

शब्दकल्पद्रुमः।

अर्थात्

एतद्देशस्यसमस्तकोषाशेषशास्त्रसङ्कलिताकारादिवर्णक्रमविन्यस्तशब्द-तल्लिङ्ग-नानार्थ-पर्य्याय-प्रमाण-प्रयोग-धातु-तदनुबन्धाभिधेय-
सहित-तत्तच्छब्दप्रसङ्गोत्थित-वेद-वेदाङ्ग-वेदान्त-न्याय-पुराणेतिहास-सङ्गीत-शिल्प-रूपकारशास्त्र-ज्योतिष-
तन्त्राख्यान-काव्यालङ्कार-च्छन्दःप्रभृति-नाम-लक्षणोदाहरण-द्रव्यगुण-रोगनिदानौषध-
स्मृत्युक्तव्यवस्थादिसंयुक्त-सर्व्वदर्शनमतानुसारि-संस्कृताभिधानग्रन्थः।

स्यार-राजा-राधाकान्तदेव-बाहादुरेण

विरचितः।


पाणिनिमतानुसारि-प्रत्येकशब्दव्युत्पत्ति-मूलग्रन्थातिरिक्तबङ्गलशब्दार्थ-प्रमाण-प्रयोग-पर्य्याय-धातुपदोदाहरणादिभिः
नूतनसङ्कलितबङ्गलशब्द-तदर्थ-तत्प्रमाण-प्रयोगादिसहित-
सप्रमुखपरिशिष्टेन च सार्द्धम्

श्रीवरदाप्रसादवसुना तदनुजेन श्रीहरिचरणवसुना च

अशेषशास्त्रविशारदकोविदवृन्दसाहाय्येन संपरिवर्द्धितः। नागराक्षरैः प्रकाशितश्च।

चतुर्थः काण्डः।

यज्ञवर्णः। य—व।



नाग पब्लिशर्स
११ ए/यू. ए. जवाहरनगर :: दिल्ली-७

This publication has been brought out with the financial assistance from the Govt. of India, Ministry of Human Resource Development

[If any defect is found in this book please return per V.P.P. for postage expences for exchange free of cost]

© NAG PUBLISHERS

(i) 11 A/U.A. (Postoffice Building) Jawahar Nagar, Delhi-110007
(ii) 8 A/U.A. 3 Jawahar Nagar, Delhi-110007
(iii) Jalalpurmafi (Chunar-Mirzapur) U.P.

I S B N 81-7081-155-4 (Set)

REPRINT
1987

5 vols Set PRICE Rs.

Printed in India

Published By Nag Sharan Singh, for Nag Publishers, 11-A/U.A. Jawahar Nagar, Delhi-7 and printed at New Gian offset Printers, 495 D. D. A Complex, Shahzada Bagh Extn, Daya Basti, Delhi

शब्दकल्पद्रुमः।

चतुर्थकाण्डम्।

य

य, अन्तःस्थयकारः। स च षड्विंशद्दलवर्णः॥ अस्योच्चारणस्थानं तालु। (यदुक्तं सिद्धान्तकौमुद्याम्। "इचुयशानां तालु॥" तथा च शिक्षायाम्। १७।
"कण्ठ्यावहाविचुयशास्तालव्या ओष्ठजावुपू॥")
तस्य स्वरूपं यथा,—
"यकारं शृणु चार्वङ्गि! चतुष्कोणमयं सदा।
ज्वालाधूमसङ्काशं स्वयं परमकुण्डली॥
पञ्चप्राणमयं वर्णं पञ्चदेवमयं सदा।
त्रिशक्तिसहितं वर्णं त्रिबिन्दुसहितं तथा।
प्रणमामि सदा वर्णं मूर्त्तिमन्मोक्षमव्ययम्॥"
इति कामधेनुतन्त्रे ५ पटलः॥
वङ्गीयवर्णमालायामस्य लेखनप्रकारो यथा,—
"ऊर्द्ध्वाधःक्रमतो रेखा चतुष्कोणमयी शुभा।
नारायणोग्रविधयस्तासु तिष्ठन्ति नित्यशः॥
मात्रा कुण्डलिनी ज्ञेया ध्यानमस्य प्रचक्षते॥"
तस्य ध्यानं यथा,—
"धूम्रवर्णां महारौद्रीं षड्भुजां रक्तलोचनाम्।
रक्ताम्बरपरीधानां नानालङ्कारभूषिताम्॥
महामोक्षप्रदां नित्यामष्टसिद्धिप्रदायिनीम्।
एवं ध्यात्वा यकारन्तु तन्मन्त्रं दशधा जपेत्॥"*॥
तत्प्राणाममन्त्रो यथा,—
"त्रिशक्तिसहितं वर्णं त्रिबिन्दुसहितं सदा।
प्रणमामि सदा वर्णं मुक्तिमामोक्षमव्ययम्॥"
इति वर्णोद्धारतन्त्रम्॥
अस्य नामानि यथा,—
"यो वाणी वसुधा वायुर्विकृतिः पुरुषोत्तमः।
युगान्तः श्वसनः प्रौष्ठो धूमार्चिः प्राणिसेवकः॥
शुक्लाभ्रमो जटी लोला वायुवेगी यशस्करी।
सङ्कर्षणः क्षपा बालो हृदयं कपिलाप्रभा॥
आग्नेयो व्यापकस्त्यागो होमो यानं प्रभा सुखम्।
षण्ढः सर्व्वेश्वरी धूमश्वासुखा सुमुखेश्वरी॥
खगात्मा मलयो माता हंसिनी भृङ्गिनायकः।
वेनमः प्रोषको मौनो धनिष्ठानङ्गवेदिनी।
मेष्ठः सोमः पक्षिनामा पापघ्ना प्राणसंज्ञकः॥"
इति नानातन्त्रशास्त्रम्॥

यकृत्

(धात्वनुबन्धविशेषः। स तु दिवादिगणस्थचकः। तथा च कविकल्पद्रुमे। "दिवाद्यो यादादिकः॥" छन्दःशास्त्रान्तर्गतगणविशेषः। तथा च छन्दोमञ्जर्य्याम्।
"भादिगुरुः पुनरादिलघुर्यः॥"
अस्य साङ्केतिकचिह्नं यथा, ।ऽ; कार्य्यादौ अस्य प्रथमप्रयोगे लक्ष्मीलाभः फलम्। यथा, वृत्तरत्नाकरटीकायाम्।
"यो लक्ष्मीं ददातु दाहं व्यसनमथ लघौ गुरुः सुखं वस्तु खेदम्॥")
यः, पुं, (याति वातीति। या गतौ + डः।) वायुः। यमुः। योगः। यानम्। याता। इति शब्दरत्नावली॥ सर्व्वनाम। यच्छब्दार्थ इति यावत्। इति विश्वः॥
यकः, त्रि, यः। ये इति भाषा। यच्छब्दस्य टेरत्वे टेः पूर्ब्बं अकागमेन निष्पन्नः॥ ("अयवसर्व्वनाम्नामकच् प्राक् टेः।" ५। ३। ७१। इति पाणिनिसूत्रम्। यथा, ऋग्वेदे। ८।२१।१८।
"चित्र इद्राजा राजका इदन्यके यके सरस्वतीमनु॥")
यकृत्, क्ली, (यज् + "ग्रकेऋतिन्।" उणा० ४। ५८। इत्यत्र "बाहुलकात् यजेः कच्च।" इत्युज्ज्वलदत्तोक्त्या ऋतिन् जस्य च कः।) कुक्षेर्दक्षिणभागस्थमांसखण्डम्। तत्पर्य्यायः। कालखण्डम् २। इत्यमरः। २। ६। ६६॥ कालखञ्जम् ३ कालेयम् ४ कालकम् ५। इति हेमचन्द्रः॥ करण्डा ६ महास्नायुः ७। इति रभसः॥*॥ (यथा, ऋग्वेदे। १०। १६३। ३।
"यक्ष्मं मतस्नाभ्यां यक्नः प्लाशिभ्यो विसृहामि ते।"
"यक्नः हृदयसमीपे वर्त्तमानः कालमांसविशेषो यकृत् तस्मात्।" इति तद्भाष्ये सायणः॥)
अथ शरीरावयवविशेषस्य यकृतः स्वरूपमाह।
"अधो दक्षिणतश्चापि हृदयाद्यकृतः स्थितिः।
तत्तु रक्तकफित्तस्य स्थानं श्लोणितजं मतम्॥"
अथ यकृद्रोगमाह।
"श्लीहामयस्य हेत्वादि समस्तं यकृदामये।

यकृद्दा

किन्तु स्थितिस्तयोर्ज्ञेया वामदक्षिणपार्श्वयोः॥"
अथ यकृद्रोगचिकित्सा।
"श्लीहोद्दिष्टाः क्रियाः सर्व्वा यकृत्यपि समाचरेत्।
कार्य्यञ्च दक्षिणे बाहौ तत्र श्लोणितमोक्षणम्॥
क्षारञ्च विड्लवणाभ्यां पूतिकस्याम्बु निस्रुतम्।
पिबेत् प्रातर्यथावह्नि यकृत्प्लीहप्रशान्तये॥"
इति भावप्रकाशः॥
(तथा च।
"वातेनोदीरितं रक्तं कफेन च घनीकृतम्।
पित्तेन पाकतां प्राप्तं विदोषसंश्रितं यकृत्॥
लक्षणं तस्य वक्ष्यामि तेन तच्चापि लक्षयेत्।
क्षीयते तेन मनुजो मृत्युराशु प्रवर्त्तते॥
वमिक्लमस्तथोद्गारो हृल्लासः श्वसनं भ्रमः।
दाहोऽरुचिस्तृषामूर्च्छा कण्ठे दाहः शिरोव्यथा॥
हृच्छूलञ्च प्रतिश्यायः ष्ठीवनं कटुकास्यता।
सशूलं हृदि शूलञ्च निद्रानाशः प्रलापतः॥
हृदये मन्यते जाड्यं उदरं गर्ज्जते भृशम्।
एतैर्लिङ्गैर्विजानीयात् यकृत् कोष्ठे च वक्षसि॥"
अथास्य चिकित्सा।
"निम्बनीपधवचेतसं निशा
काश्मरी च तुलसी च सिंहिका।
क्वाथ एव हृदयामयापहः
आशु शूलयकृतश्च नाशकृत्॥
सौराष्ट्रीकासीसमहौषधानि
दुरालभाजातिप्रवालकञ्च।
दार्व्वी यमानी ककुभः समङ्गा
क्वाथः ससर्पिर्यकृदाशु हन्ति॥"
इति हारीते चिकित्सितस्थाने चतुर्थेऽध्याये॥
"श्लीहवद्दक्षिणात् पार्श्वात् कुर्य्याद्यकृदपि च्युतम्॥"
इति वाभटे निदानस्थाने द्वादशेऽध्याये॥)
यकृदात्मिका, स्त्री, (यकृत इवात्मा स्वरूपं यस्याः। बहुव्रीहौ कः। टापि अत इत्वम्।) तैलपायिका। इति शब्दचन्द्रिका॥

यक्षधू

यक्षद्वेरी, [न्] पुं, (यक्षतो वैरी नाशकः।) रोहितकवृक्षः। यथा,—
"ग्रीहघ्नो मांसदलनो यक्षद्वेरी चलच्छदः॥"
इति शब्दचन्द्रिका॥

यक्ष, क ङ मह्रि। इति कविकल्पद्रुमः॥ (चुरा०-आत्म०-सक०-सेट्।) क ङ, यक्षयते। मह्रि पूजायाम्। इति दुर्गादासः॥

यक्षः, पुं, (यक्ष्यते पूज्यत इति। यक्ष+घञ्। यद्वा, ईं लक्ष्मीमक्ष्णोतीति। अक्ष+अण्।) गुह्यकमात्रम्। गुह्यकेश्वरः। इति मेदिनी। धे, २२॥ इन्द्रगृहम्। धनरक्षकः। इति भरतः॥ यक्षस्वरूपं यथा,—
"आजग्मुर्यक्षनिकराः कुबेरवरकिङ्कराः।
शैलजप्रस्तरकरा अञ्जनाकारमूर्त्तयः॥
विकृताकारवदनाः पिङ्गलाक्षा महोदराः।
स्फटिका रक्तवेणाश्च दीर्घस्कन्धाश्च केचन॥"
इति ब्रह्मवैवर्त्ते श्रीकृष्णजन्मखण्डे १७ अध्यायः॥
यक्षगणो यथा,—
"प्रचेतसः सुता यक्षास्तेषां नामानि मे शृणु।
केवलो हरिकेशश्च कपिलः काञ्चनस्तथा।
मेघमाली च यक्षाणां मध्य एष उदाहृतः॥"
तस्य व्युत्पत्तिर्यथा,—
"धातुर्यश्चत्यघोक्तस्त्वदत्ते क्षपणे च सः।
यदृयच्चत्युक्तवानेष तस्माद्यक्षो भवत्ययम्॥"
इति वह्निपुराणे काश्यपीयवंशः॥
(अपरा निरुक्तिर्यथा, विष्णुपुराणे।१।५।४१।
"मैवं भो रक्ष्यतामेष यैरुक्तं राक्षसास्तु ते।
ऊचुः खादाम इत्यन्ये ये ते यक्षास्तु जक्षणात्॥"
पुं, क्ली, पूजा। यथा, ऋग्वेदे। ७। ६१। ५।
"अमूरा विश्वा वृषणा विमा वां
न यासु चित्रं दद्दृशे न यक्षम्॥"
"न यक्षं न पूजा दृश्यते।" इति तद्भाष्ये सायणः॥ तथाच अथर्ब्ववेदे। १६। २। २४।
"तव यक्षं पशुपते अभूवन्तः॥")

यक्षकर्दमः, पुं, (यक्षप्रियः कर्दमः।) कर्पूरागुरुकस्तूरीकक्कोलानां मिश्रितसमभागः। इत्यमरः। २। ६। १३३॥ "कर्पूरादिभिर्गन्धद्रव्यैः समभागैः साधितोऽनुलेपनभेदो यक्षकर्दम उच्यते। यक्षप्रियः कर्दमो यक्षकर्दमः।
'कुङ्कुमागुरुकस्तूरीकर्पूरं चन्दनन्तथा।
महासुगन्धमित्युक्तं नामतो यक्षकर्दमः॥'
इति धन्वन्तरिः॥
अन्यच्चापि।
कर्पूरागुरुकस्तूरीकक्कोलघर्षणादि च।
एकीकृतमिदं सर्व्वं यक्षकर्दम इष्यते॥"
इति तट्टीकायां भरतः॥

यक्षतरुः, पुं, (यक्षप्रियो यक्षाश्रितो वा तरुः। प्राकपार्थिवादिवत् समासः।) वटवृक्षः। इति राजनिर्घण्टः॥ (विवरणमस्य वटशब्दे ज्ञातव्यम्॥)

यक्षधूपः, पुं, (यक्षप्रियो धूपः।) धूपसामान्यम्। धूनकधूपः। इति केचित्। धुना इति ख्यात इति केचित्। इति भरतः॥ तत्पर्य्यायः। सर्ज्जरसः २ अरालः ३ सर्ज्जरसः ४ बहुरूपः ५। इत्यमरः। २। ६। १२७॥ रालः ६ धूनकः ७ वह्निवल्लभः ८। इति रभसः॥ सालसारः ९ सालजः १० सालनिर्य्यासः ११ सर्ज्यः १२। इति रत्नमाला॥ (अस्य पर्य्यायान्तरं यथा,—
"रालस्तु शालनिर्य्यासस्तथा सर्ज्जरसः स्मृतः।
देवधूपो यक्षधूपस्तथा सर्ज्जरसश्च सः॥"
इति भावप्रकाशस्य पूर्ब्बखण्डे प्रथमे भागे॥
एतेन माधवपूजननिषेधो देवीपूजा चोक्ता यथा कालिकापुराणे ६८ अध्याये।
"न यक्षधूपं वितरेत् माधवाय कदाचन।"
"यक्षधूपेन वा देवीं महामायां प्रपूजयेत्॥")
सरलवृक्षरसः। टारपिन तैल इति भाषा। तत्पर्य्यायः। पायसः २ श्रीवासः ३ सरलद्रवः ४। इति हेमचन्द्रः। ३। ३११॥

यक्षरसः, पुं, (यक्षप्रियो रसः। प्राकपार्थिववत् समासः।) पुष्पमद्यम्। तत्पर्य्यायः। मध्वासवः २। इति त्रिकाण्डशेषः॥

यक्षराजः, पुं, (यक्षाणां राजा। "राजाहःसखिभ्यष्टच्।" ५। ४। ९१। इति समासान्तष्टच्।) कुबेरः। इति शब्दरत्नावली॥ (यथा, महाभारते। ५। १६४। ४६।
"इत्युक्ता भगवान्देवो यक्षराजः सुपूजितः।
प्रययौ सहितैः सर्व्वैर्निमेषान्तरचारिभिः॥")

यक्षराट्, [ज्] पुं, (यक्षेषु राजते इति। राज्+"सत्सूद्विषद्रुहेति।" ३।२।६१। इति क्विप्।) कुबेरः। (यथा, भागवते। ८। १८। १७।
"तस्मा इत्युपनीताय यक्षराट् पात्रिकामदात्॥"
यक्षराजमात्रम्। मणिभद्रः। यथा, महाभारते। ३। ६४। १२७।
"तथा नो यक्षराडद्य मणिभद्रः प्रसीदतु॥"*॥
यक्षा इव मल्ला राजन्तोऽत्र। राज्+क्विप्।) रङ्गमण्डपः। इति मेदिनी। जे, ३५॥

यक्षराट्पुरी, स्त्री, (यक्षराजः पुरी।) अलका। सा च कैलासपर्व्वतस्थितकुबेरपुरी। इति जटाधरः॥

यक्षरात्रिः, स्त्री, (यक्षप्रिया यक्षाणां वा रात्रिः।) कार्त्तिकी पूर्णिमा। तत्पर्य्यायः। दीपाली २। इति त्रिकाण्डशेषः॥

यक्षसाधनं, क्ली, (यक्षाणां साधनम्।) यक्षोपासना। यथा, वाराहीतन्त्रे।
"यक्षाणां यक्षिणीनाञ्च पैशाचीनाञ्च साधनम्।
भूतवेतालगान्धर्व्वं मारणोच्चाटनानि च।
अधोगमनमेतेषां साधने ऐहिकं हितम्॥"

यक्षामलकं, क्ली, (यक्षाणामामलकम्।) पिण्डखर्জ্জूरफलम्। इति शब्दमाला॥

यक्षावासः, पुं, (यक्षाणामावासो वासस्थानम्।) वटवृक्षः। इति राजनिर्घण्टः॥

यक्षिणी, स्त्री, (यक्षः पूजा अस्त्यस्याः। यक्ष+इनिः। ङीप्।) कुबेरपत्नी। इति शब्दरत्नावली॥ यक्षभार्य्या च॥ (यथा, कथासरित्सागरे। १०। १७८।
"सोऽपि सुक्षाशु विजने भ्रातुः पुत्रं तमभ्यधात्।
अधृतिं मा कृथाः पुत्र! मम सिद्धा हि यक्षिणी॥")

यक्षी, स्त्री, (यक्षस्य भार्य्या। यक्ष+पुंयोगादिति ङीष्।) कुबेरपत्नी। इति शब्दरत्नावली॥ (यक्षभार्य्या। यथा, महाभारते।३। ६४। ११७।
"यक्षी वा राक्षसी वापि उताहोस्वित् सुराङ्गना।
सर्व्वथा कुरु नः स्वस्ति रक्षस्वास्मान्-निन्दिते!॥")

यक्षोडुम्बरकं, क्ली, (यक्षप्रियमुडुम्बरम्। ततः स्वार्थे कन्।) अश्वत्थफलम्। इति त्रिकाण्डशेषः॥

यक्ष्मघ्नी, स्त्री, (यक्ष्माणं हन्ति। हन्+"अमनुष्यकर्त्तृके च।" ३। २। ५३। इति टक्। ततो ङीप्।) द्राक्षा। इति शब्दमाला॥

यक्ष्मा, [न्] पुं, (यक्ष+"बाहुलकात् यक्ष्मयतेरपि।" उणा० ४।१५०। इत्यत्र उज्ज्वलदत्तोक्त्या मनिन्प्रत्ययेन साधुः।) रोगविशेषः। तत्पर्य्यायः। क्षयः २ शोषः ३। इत्यमरः। २। ६। ५१॥ राजयक्ष्मा ४ रोगराट् ५॥ अथ राजयक्ष्माधिकारः। "तत्र राजयक्ष्मणो विप्रकृष्टं सन्निकृष्टञ्च निदानमाह।
'वेगरोधात् क्षयाच्चैव साहसाद्विषमाशनात्।
त्रिदोषो जायते यक्ष्मा मदो हेतुचतुष्टयात्॥'
वेगोऽत्र वातमूत्रपुरीषाणाम्।
'वातमूत्रपुरीषाणि निगृह्णाति यदा नरः॥'
इति चरकवचनात्॥
क्षयात् क्षीयतेऽनेनेति क्षयः तेनातिव्यवायानशनैर्व्यादयो धातुक्षयहेतवः क्षयशब्देनोच्यन्ते। साहसात् बलवता समं मल्लयुद्धादितः। विषमाशनात् बहु श्लोकमकाले वा भुक्तं तत् विषमाशनम्। तस्मात्। त्रिदोषः सान्निपातिकः। हेतुचतुष्टयात् अन्येऽपि हेतवः हेतुचतुष्टय एवान्तर्भवन्ति। यक्ष्मणः पर्य्यायाः राजयक्ष्मक्षयशोषाः॥*॥ यक्ष्मादीनां शब्दानां निरुक्तिमाह।
'वैद्यो व्याधिमतां यस्मात् व्याधेर्यत्नेन यक्ष्यते।
स यक्ष्मा प्रोच्यते लोके शब्दशास्त्रविशारदैः॥'
यक्ष्यते पूज्यते।
'राज्ञश्चन्द्रमसो यस्मादभूदेष किलामयः।
तस्मात्तं राजयक्ष्मेति केचिदाहुर्मनीषिणः॥
क्रियाक्षयकरत्वात्तु क्षय इत्युच्यते बुधैः।
संशोषणाद्रसादीनां शोष इत्यभिधीयते॥'*॥
संप्राप्तिमाह।
'कफप्रधानैर्दोषैस्तु रुद्धेषु रसवर्त्मसु।
अतिव्यवायिनो वापि क्षीणे रेतस्यनन्तरा।
क्षीयन्ते धातवः सर्व्वे ततः शुष्यति मानवः॥'
कफप्रधानैर्दोषैः रसवर्त्मसु रुद्धेषु अनन्तरा सर्व्वे धातवः क्षीयन्ते ततो मानवः शुष्यति।

कारणभूतस्य रसस्य क्षये कार्य्याणां रक्तादीनामनुक्रमेण क्षीयमाणत्वात् ॥ * ॥ मार्गावरोधे रसक्षयहेतुमाह चरकः ।
'रसश्रोतःसु रुद्धेषु स्वस्थानस्थो विदह्यते ।
स ऊर्द्धं कासवेगेन बहुरूपः प्रवर्त्तते ॥'
स्वस्थानस्थः हृदयस्थः । कासं विनापि रसक्षयो भवति मार्गावरोधकुपितवातेन रसस्य शोषणात् । उक्तञ्च ।
'वायोर्द्धातुक्षयात् कोपो मार्गस्यावरणेन च ।
अनुलोमक्षयं दृष्ट्वा प्रतिलोमक्षयावहः ॥'
अनुलोमक्षयं दर्शयित्वा प्रतिलोमक्षयमाह । अतिक्षयवायिनो वा रेतसि क्षीणे प्रतिलोमक्रमेणानन्तरा सर्व्वे धातवो रसपर्य्यन्ताः क्षीयन्ते । तद्यथा । शुक्रे क्षीणे मज्जा क्षीयते मज्जनि क्षीणेऽस्थि क्षीयते । एवं पूर्व्वं पूर्व्वं क्षीयते । ननु कार्य्यस्य शुक्रस्य क्षये कथं कारणभूतानां मज्जादीनां क्षयः । उच्यते । शुक्रक्षयाद्वायुः कुप्यति । यदुक्तम् ।
'वायोर्धातुक्षयात् कोपो मार्गस्यावरणेन चेति ।'
स वायुः सान्निध्यक्रमेण मज्जादीन् सर्व्वान् धातून् संशोषयति । ततस्तदनन्तरं मानवः शुष्यति ॥ * ॥ पूर्व्वरूपमाह ।
'श्वासाङ्गसादकफसंस्रवतालुशोष-
वन्ह्यग्निसादमदपीनसकासनिद्राः ।
शोषे भविष्यति भवन्ति स चापि जन्तुः
शुक्लेक्षणो भवति मांसपरो रिरंसुः ॥
स्वप्नेषु काकशुकगृध्रकिनीलकण्ठ-
गृध्रास्तथैव कपयः ककलासकाश्च ।
तं वाहयन्ति स नदीर्विजलाश्च पश्येत्
शुष्कांस्तरून् पवनधूमदवार्दितांश्च ॥'* ॥
यक्ष्मणो लक्षणमाह ।
'अंसपार्श्वाभितापश्च सन्तापः करपादयोः ।
ज्वरः सर्व्वाङ्गगश्चेति लक्षणं राजयक्ष्मणः ॥'
अंसयोः पार्श्वयोः अभितापः पीड़ा अत्र सकलधातुक्षयपूर्व्वकः सकलशरीरशोषोऽपि बोद्धव्यः । क्षीयन्ते धातवः सर्व्वे ततः शुष्यति मानव इति संप्राप्तेः । एवं षड्रूपे एकादशरूपे च बोद्धव्यम् । एतानि त्रीणि लक्षणानि प्रायोभाविनेन चरकेणोक्तानि । सुश्रुतेन यक्ष्मणि षट्लक्षणान्युक्तानि ।
'भक्तद्वेषो ज्वरः कासः श्वासः शोणितदर्शनम् ।
स्वरभेदश्च जायेत षड्रूपे राजयक्ष्मणि ॥'* ॥
उल्बणतया दोषाणां भेदादेकादश लक्षणान्याह ।
'स्वरभेदोऽनिलाच्छूलं सङ्कोचश्चांसपार्श्वयोः ।
ज्वरो दाहोऽतिसारश्च पित्तादक्तस्य चागमः ॥
शिरसः परिपूर्णत्वमभक्तच्छन्द एव च ।
कासः कण्ठस्य चोद्ध्वंसो विज्ञेयः कफकोपतः ॥'
अनिलादुल्बणात् एवं पित्तात् कफाच्च । यत आह सुश्रुतः ।
'एक एवमतः शोषः सन्निपातात्मको मतः ।
उद्रेकात्तत्र लिङ्गानि दोषाणां निपतन्ति च ॥'
असाध्ययक्ष्माणमाह ।
'एकादशभिरेभिर्व्वा षड्भिर्वापि समन्वितम् ।
त्रिभिर्व्वा पीड़ितं लिङ्गैर्ज्ज्वरकासाहगामयैः ।
जन्तोश्छोषार्दितं जन्तुमिच्छेत् सुविपुलं यशः ॥'
तत्र विशेषमाह ।
'सर्व्वैरङ्गैस्त्रिभिर्व्वापि लिङ्गैर्मांसबलक्षये ।
युक्तो वर्ज्यश्चिकित्स्यस्तु सर्व्वरूपोऽप्यतोऽन्यथा ॥'
सर्व्वैर्लिङ्गैरेकादशभिः । अङ्गैः षड्भिः त्रिभिर्ज्ज्वरकासरुधिरवमनैः । अतोऽन्यथा मांसे बले सति सर्व्वरूपोऽपि प्रत्याख्याय चिकित्स्यः ।
'महाशनं क्षीयमाणमतीसारनिपीड़ितम् ।
शूनसुष्कोदरञ्चैव यक्ष्माणं परिवर्जयेत् ॥'
महाशनं क्षीयमाणमित्येकमसाध्यलक्षणम् । अतीसारनिपीड़ितमिति द्वितीयम् । यत उक्तम् ।
'भक्षायत्तं बलं पुंसां शुक्रायत्तन्तु जीवनम् ।
तस्मादयत्नेन संरक्षेदयक्ष्मणो मलरेतसी ॥'
शूनसुष्कोदरमिति तृतीयम् ॥ * ॥ अरिष्टमाह ।
'शुक्लाक्षमन्नद्वेष्टारमूर्द्ध्वश्वासनिपीड़ितम् ।
क्षक्षेण बहु मेहन्तं यक्ष्मा हन्तीह मानवम् ॥'
मेहन्तं शुक्रं क्षरन्तम् । शुक्लाक्षत्वादीनि एकैकशोऽरिष्टलक्षणानि ॥ * ॥ अवधिमाह ।
'परं दिनसहस्रन्तु यदि जीवति मानवः ।
सुभिषग्भिरुपक्रान्तस्तरुणः शोषपीड़ितः ॥'
शोषपीड़ितो मानवश्चेत्तरुणो भवति । सुभिषग्भिरुपक्रान्तो भवति । तदा परं दिनसहस्रम् । द्वितीयदिनसहस्रं यदि जीवति तत्र जीवनविकल्प इत्यर्थः । एतेन शोषपीड़ितो मानवश्चेत्तरुणो भवति । सदैद्यैश्चिकित्स्यो भवति । तदा प्रथमदिनसहस्रं जीवेदेव इत्युक्ता चिकित्सामाह ।
'ज्वरानुबन्धरहितं बलवन्तं क्रियासहम् ।
उपक्रमैरात्मवन्तं दीप्ताग्निमक्षयं नरम् ॥'
आत्मवन्तं यत्नवन्तं धृतिमन्तं वा ॥ * ॥ अथ निदानविशेषैः शोषविशेषानाह ।
'अवायशोकवार्द्धक्यव्यायामाध्वप्रशोषितान् ।
व्रणोरःक्षतसंज्ञौ च शोषिणौ लक्षणैः शृणु ॥'
व्रणोरःक्षतसंज्ञौ शोषिणौ । व्रणशोषी उरःक्षतशोषी च ॥ * ॥ तत्र अवायशोषिणो लक्षणमाह ।
'अवायशोषी शुक्रस्य क्षयलिङ्गैरुपद्रुतः ।
पाण्डुदेहो यथापूर्व्वं क्षीयन्ते चास्य धातवः ॥'
शुक्रस्य क्षयलिङ्गैः सुश्रुतोक्तैः । तानि यथा, शुक्रक्षये मेढ्रवृषणयोर्वेदना अशक्तिर्मैथुने चिराद्वा प्रसेकः प्रसेके चास्यशुक्रदर्शनमिति । यथापूर्व्वं क्षीयन्ते चास्य धातवः प्रथमं शुक्रं क्षीयते पश्चात् शुक्रक्षयजनितवायुना मज्जादयोऽपि धातवो यथापूर्व्वं क्षीयन्ते ॥ * ॥ शोकशोषिणो लक्षणमाह ।
'प्रध्यानशीलः स्रस्ताङ्गः शोकशोष्यपि तादृशः ।
विना शुक्रक्षयजैर्विकारैरुपलक्षितः ॥'
प्रध्यानशीलः यस्याभावेन शोको जनितस्तद्ध्यानपरः । स्रस्ताङ्गः शिथिलाङ्गः । तादृशः अवायशोषिसदृशः । तेन शुक्रादिसर्व्वधातुक्षययुक्तो भवति । परं शुक्रक्षयकृतैर्विकारैर्मेढ्रवृषणवेदनादिभिर्वर्जितो भवति । व्याधिस्वभावात् ॥ * ॥ जराशोषिणो लक्षणमाह ।
'जराशोषी क्षयो मन्दवीर्य्यबुद्धिबलेन्द्रियः ।
कम्पनोरुरुचिमान् भिन्नकांस्यपात्रहतस्वरः ॥
क्षीयति श्लेष्मणा हीनं गौरवारुचिपीड़ितः ।
संप्रसुप्तास्यनासाक्षः शुष्करूक्षमलक्ष्विः ॥'
मन्दशब्दः स्वल्पार्थः । शुष्करूक्षमलक्ष्विः शुष्करूक्षे मलक्ष्वी यस्य सः ॥ * ॥ अध्वशोषिणो लक्षणमाह ।
'अध्वप्रशोषी स्रस्ताङ्गः संभृष्टपरुषच्छविः ।
प्रसुप्तगात्रावयवः शुष्कक्लोमगलाननः ॥'
संभृष्टस्येव परुषा छविर्यस्य सः । प्रसुप्तगात्रावयवः प्रसुप्तः स्वर्शाज्ञः । क्लोमं तिलकं पिपासास्थानम् ॥ * ॥ व्यायामशोषिणो लक्षणमाह ।
'व्यायामशोषी भूयिष्ठमेभिरेव समन्वितः ।
लिङ्गैरुरःक्षतस्यैः संयुक्तश्च क्षतं विना ॥'
एभिरेव स्रस्ताङ्गत्वादिभिरध्वशोषिणो लक्षणैरेव । भूयिष्ठं अत्यर्थम् ॥* ॥ सनिदानं व्रणशोषमाह ।
'रक्तक्षयादेदनाभिस्तथैवाहारयत्नजात् ।
व्रणितस्य भवेच्छोषो याप्योऽसाध्यश्च स स्मृतः ॥'
उरःक्षतस्य निदानमाह ।
'धनुर्व्यायास्यतोऽत्यर्थं भारसुद्वहतो गुरुम् ।
युध्यमानस्य बलिभिः पततो विषमोच्चतः ॥
वृषं हयं वा धावन्तं दम्यं चान्यं निगृह्णतः ।
शिलाकाष्ठाश्मनिर्घातान् क्षिपतो निघ्नतः
परान् ॥
अधीयानस्य चात्युच्चैर्दूरं वा व्रजतो द्रुतम् ।
महानदीं वा तरतो हयैर्व्वा सह धावतः ॥
सहसोत्पततो दूरं तूर्णञ्चातिप्रवृत्तयः ।
अधान्यैः कर्म्मभिः क्रूरैर्भृशमप्याहतस्य वा ॥
क्षीणे चातिप्रसक्तस्य रूक्षात्यप्रमिताग्निनः ।
विक्षते वक्षसि व्याधिर्बलवान् समुदीर्य्यते ॥'
व्यायच्छतः व्यायामं कुर्व्वतः । दम्यं वृषादिकम् । अन्यच्च गजोष्ट्रादिकम् । शिला दीर्घपाषाणः । अश्म प्रस्तरखण्डः । निर्घातोऽस्त्रविशेषः । व्याधिः उरःक्षताख्यः ॥* ॥ उरःक्षतस्य लक्षणमाह ।
'उरो विरुज्यतेऽत्यर्थं भिद्यते च विभज्यते ।
शूलं भवति तत्पार्श्वं शुष्यत्यङ्गं प्रवेपते ॥
प्रपीड्यते ततः पार्श्वं शुष्यत्यङ्गं प्रकम्यते ।
क्रमाद्वीर्य्यं बलं वर्णो रुचिरग्निश्च क्षीयते ॥
ज्वरो यथा मनोदैन्यं विड्भेदोऽग्निवधस्तथा ॥
दुष्टः स्रावः सुदुर्गन्धः पीतो विग्रथितो बहु ।
कासमानस्य चाभीक्ष्णं कफः सासृक् प्रवर्त्तते ॥
स क्षतः क्षीयतेऽत्यर्थं तथा शुक्रौजसोः क्षयात् ।
अयक्ष्मं लक्षणं तस्य पूर्व्वरूपमिति स्मृतम् ॥'
विरुज्यते पीड्यते । भिद्यते विदार्य्यत इव ।

विभज्यते द्विधा क्रियत इव । स पुरुषः । क्षतः उरःक्षतवान् । अत्यर्थं क्षीयते क्षीणो भवति । न केवलं सासकफक्षयादेव क्षीणो भवति । तथा शुक्रौजसोः क्षयात् । स्त्रीतिसेवनादिना शुक्रौजसोः क्षयादपि क्षीणो भवति ॥*॥ उरःक्षतस्य विशिष्टं लक्षणमाह ।

'उरोरुक् श्लेष्मितच्छर्दिः कासो वैश्वेष्मिकः क्षते ।
क्षीणे सरक्तमूत्रत्वं पार्श्वपृष्ठकटिग्रहः ॥'

क्षते उरःक्षतवति । उरोरुक् श्लेष्मितच्छर्दिः कासो वैश्वेष्मिकः विशेषतो भवत्येव । तस्मिन्नेवोरःक्षतवति सासकफशुक्रौजसां क्षयात् क्षीणे सरक्तमूत्रत्वं पार्श्वपृष्ठकटिग्रहश्च भवति ॥*॥ निदानविशेषेणोरःक्षतस्य लक्षणविशेषमाह ।

'व्रणारोधात् क्षयाच्चैव कोष्ठात् प्रतिमलात्तथा ।
क्षतोरस्कस्यान्नपाके निःश्वासो वाति पूतिकः ॥'

क्षयात् धातुक्षयहेतोरित्यवायादितः कोष्ठात् प्रतिमलात् कोष्ठात् प्रतिमलवातेन प्रतिलोममलात् पूतिकः पूतिगन्धः ॥ * ॥ उरःक्षतस्य साध्ययाप्यासाध्यलक्षणमाह ।

'अल्पलिङ्गस्य दीप्ताग्नेः साध्यो बलवतो नवः ।
परिसंवत्सरो याप्यः सर्वलिङ्गस्तु वर्जयेत् ॥'*॥

अथ राजयक्ष्मचिकित्सा ।

'बलिनो बहुदोषस्य पञ्च कर्माणि कारयेत् ।
यक्ष्मणः क्षीणदेहस्य तत्कृतं स्याद्विषोपमम् ॥
मलायत्तं बलं पुंसां शुक्रायत्तस्तु जीवनम् ।
तस्मादयत्नेन संरक्षेत् यक्ष्मणो मलरेतसी ॥
प्रालिश्यष्टिकगोधूमयवमुद्गादयो हिताः ।
मद्यानि जाङ्गलाः पक्षिणश्च मृद्वी विशोधिणः ॥

सपिप्पलीकं सयवं सकुलत्थं सनागरम् ।
दाडिमामलकोपेतं स्निग्धमाजं रसं पिबेत् ॥
तेन षड्विनिवर्तन्ते विकाराः पीनसादयः ॥
द्रव्यतो द्विगुणं मांसं सर्वतोऽष्टगुणं जलम् ।
पादशेषं संस्कृतमाढ्ये षड्ङ्गो यूष उच्यते ॥'

तद्यथा । यवपल १ कुलत्थपल १ छागमांसपल ४ जलपल ४८ घृतपल १२ ततः पलमिते घृते संस्करणीयम् । तत्र कर्षमितं सैन्धवं देयं सौरभार्थं हिङ्गु च देयम् । पिप्पली नागरञ्च पृथक् माषमितं कल्कीकृत्य देयम् । दाडिमामलकाभ्यामम्लत्वं साध्यम् । षड्ङ्गयूषः ॥*॥

'ककुभत्वक् नागबला वानरीबीजं विचूर्णितं
पयसा ।
पक्वं मधुघृतयुक्तं सशितं यक्ष्मादिकासहरम् ॥
छागमांसं पयश्छागं छागं सर्पिश्च नागरम् ।
छागोपसेवा शयनं छागमध्ये तु यक्ष्मनुत् ॥
मधुताप्यविड्ङ्गाम्लं जतुलोहरजताभयाः ।
घ्नन्ति यक्ष्माणमचिरं सेव्यमानाः हिताशिनः ॥'

ताप्यं सुवर्णमाक्षीकम् ।

'शर्करामधुसंयुक्तं नवनीतं लिहन् क्षयी ।
क्षीराशी लभते पुष्टिमतुल्यां चाप्यमाप्नुयात् ॥
सितोपलातुगाक्षीरीपिप्पलीबहुलाबलाः ।
अन्वाद्यूर्ध्वं द्विगुणिताचूर्णिता मधुसर्पिषा ॥

लेहयेद्राजरोगार्तं कासश्वासक्षयातुरम् ।
पार्श्वशूलिनमल्पाग्निं सुप्तजिह्वं रुचिच्युतम् ।
हृत्पादाङ्गदाहे च ज्वरे रक्ते तथोर्ध्वगे ॥'

सितोपलादिरवलेहः ॥*॥

'जातीफलं विडङ्गानि चित्रकं तगरं तिला ।
तालीशं चन्दनं शुण्ठी लवङ्गसुपकुञ्चिका ॥
कर्पूरश्चाभया धात्री मरीचं पिप्पली तुगा ।
एषामक्षसमा भागाश्चातुर्जातकसंयुताः ।
पलानि सप्त भङ्गायाः सिता सर्वसमा मता ॥
चूर्णमेतत् क्षयं कासं श्वासञ्च यक्ष्मणोद्गतम् ।
अरोचकं प्रतिश्यायं तथा चानलमन्दताम् ।
एतान् रोगान् निहन्त्येव वृत्तमिन्द्राग्निर्यथा ॥
बालरोगाधिकारोक्तं तैलं लाक्षादि योजयेत् ।
अभ्यङ्गे यक्ष्मणो नित्यं वृद्धवैद्योपदेशतः ॥'

इति जातीफलाद्यचूर्णम् ॥ * ॥

'वासकस्य रसप्रस्थं माक्षिकासितशर्करा ।
पिप्पली द्विपलं तावत् सर्पिषश्च प्रनेः पचेत् ॥
तस्मिन् लेहत्वमायाते प्रीते क्षौद्रपलाष्टकम् ।
दत्त्वावतारयेद्वैद्यो लीढ्वो लेहोऽयमुत्तमः ॥
निहन्ति राजयक्ष्माणं कासं श्वासञ्च दारुणम् ।
पार्श्वशूलञ्च हृच्छूलं रक्तपित्तं ज्वरन्तथा ॥'

इति वासावलेहः ॥ * ॥

अथ वयवायादिहेतुकक्षीणचिकित्सा । तत्र वयवायक्षीणचिकित्सा ।

'वयवायक्षीणं क्षीररसमांसाद्यभोजनैः ।
सुकूलैर्मधुरैर्हृद्यैर्जीवनीयैरुपाचरेत् ॥'

रसो मांसरसः सुकूलैर्हितैः ॥ * ॥ श्लोकक्षीणचिकित्सा ।

'हर्षणाश्वासनैः क्षीरैः स्निग्धैर्मधुरशीतलैः ।
दीपनैर्लघुभिश्चान्नैः श्लोकक्षीणमुपाचरेत् ॥'*॥

व्यायामक्षीणचिकित्सा ।

'व्यायामक्षीणं स्निग्धैः क्षतक्षयहितैर्हिमैः ।
उपाचरेज्जीवनीयैर्विधिना श्लैष्मिकेण तु ॥'*॥

अध्वक्षीणचिकित्सा ।

'वाय्वाम्बुस्त्रीदिवास्वप्नैः शीतैर्मधुरहृद्यगैः ।
अन्नमांसरसाहारैरध्वक्षीणमुपाचरेत् ॥'*॥

व्रणक्षीणचिकित्सा ।

'व्रणक्षीणं जयेत् स्निग्धैर्दीपनैः स्वादुशीतलैः ।
ईषदम्लैरनम्लैर्वा यूषमांसरसादिभिः ॥'*॥

अथोरःक्षतचिकित्सा ।

'बलाश्वगन्धा श्रीपर्णी बहुपुत्री पुनर्नवा ।
पयसा नित्यमभ्यस्ता श्रमयन्ति क्षतक्षयम् ॥'

श्रीपर्णी गम्भारी । बहुपुत्री शतावरी । इति बलादिचूर्णम् ॥*॥

'एला पत्रत्वचौ द्राक्षा पिप्पल्यर्धपलं पृथक् ।
सितामधुकखर्जूरमृद्वीकाश्च पलोन्मिताः ॥
संचूर्ण्य मधुना युक्ता वटिका संप्रकल्पयेत् ।
अक्षमात्रा ततश्चैव भक्षयेच्च दिने दिने ॥
क्षतक्षयं ज्वरं कासं श्वासं हिक्कां वमिं
भ्रमम् ।
मूर्च्छां मदं तृषां शोषं पार्श्वशूलमरोचकम् ॥

क्षीहानमामवातञ्च रक्तपित्तं स्वरक्षयम् ।
एलादिगुटिका हन्ति तृष्णा सन्तर्पणी परा ॥
द्राक्षायाः प्रस्थमेकन्तु मधूकस्य पलाष्टकम् ।
पचेत्तोयाढके शुद्धे पादशेषेण तेन तु ॥
पलिके मधुकद्राक्षे पिष्टे क्षुण्णापलद्वयम् ।
प्रदाय सर्पिषः प्रस्थं पचेत् क्षीरे चतुर्गुणे ॥
सिद्धे घृते पलान्यष्टौ शर्करायाः प्रदापयेत् ।
एतद्राक्षाघृतं सिद्धं क्षतक्षीणे सुखावहम् ॥
वातपित्तज्वरश्वासविस्फोटकहलीमकान् ।
प्रदरं रक्तपित्तञ्च हन्याच्चांसबलप्रदम् ॥'

इति द्राक्षादिघृतम् ॥*॥

'क्षीरे धात्रीविदारीक्षुवरीणाञ्च तथा रसे ।
पचेत् समे घृतप्रस्थं मधुरैः कर्षसम्मितैः ॥
द्राक्षाद्विचन्दनोशीरशर्करोत्पलपद्मकैः ।
मधूककुसुमानन्ताकाश्मरीत्वक्संयुतैः ॥
प्रस्थार्धं मधुनः प्रीते शर्करार्धतुलान्तथा ।
पलार्धकांश्च संचूर्ण्य त्वगेलापत्रकेशरान् ॥
विनीय तत्र संलिह्यान्मात्रां नित्यं सुयन्त्रितः ।
अन्तर्गतास्रमित्येतदश्निभ्यां परिकीर्तितम् ॥
क्षीरमांसाशिनां हन्ति रक्तपित्तक्षतक्षयम् ।
क्षुण्णारुचिश्वासकासच्छर्दिमूर्च्छाप्रमर्दनम् ।
मूत्रकृच्छ्रज्वरघ्नञ्च बल्यं क्षीरतिवर्धनम् ॥'

इति अन्तर्गतास्रावलेहः ॥*॥

'यदृच्छया तर्पणं प्रीतमविदाहि हितं लघु ।
अन्नपानं निषेवेत क्षतक्षीणैः सुखार्थिभिः ॥

शोकं स्त्रियः क्रोधमसूयताञ्च
त्यजेदुदारान् विषयान् भजेच्च ।
तथा द्विजातीञ्छ्रुतवृद्धान् गुरूंश्च
वाचञ्च पुण्याः श्रवणायाभिजेभ्यः ॥'*॥

अथ राजयक्ष्मणि रसाः । अम्लतेश्वरो रसो राजयक्ष्मणि रसेन्द्रचिन्तामणौ ।

'रसभस्माभ्रतासत्त्वं लौहं मधुघृतान्वितम् ।
अम्लतेश्वरनामायं षड्भुजो राजयक्ष्मजित् ॥'

इति अम्लतेश्वरो रसः ॥

रसभस्मः मारितो रसः । अभ्रतासत्त्वं गुडूचीसत्त्वम् । लौहं मारितम् ॥ * ॥

'त्रयोऽंशा मारितात् क्षतादेकोऽंशो हेमभस्मतः ।
एकोऽंशो क्षततास्रस्य शिला गन्धश्च तालकम् ।
प्रत्येकं भागयुग्मं स्यादेतत् सर्वं विचूर्णयेत् ॥
वराटीः पूरयेत्तेन छागीक्षीरेण टङ्कणम् ।
पिष्ट्वा तेन मुखं रुद्ध्वा रुद्धाण्डे ताश्च पूरयेत् ॥
ततो गजपुटे पक्त्वा चूर्णयेत् खाङ्गशीतलम् ।
रसो राजमृगाङ्कोऽयं चतुर्गुञ्जः क्षयापहः ॥
मरिचैरूनविंशत्या कणाभिर्दंशभिस्तथा ।
मधुना सर्पिषा चापि दद्यादेतं रसं भिषक् ॥
अनेन नश्यति क्षिप्रं वातश्लेष्मभवक्षयः ॥'

इति राजमृगाङ्को रसो राजयक्ष्मणि रसेन्द्रचिन्तामणौ ॥*॥

'शुद्धसूतं द्विधा गन्धं कुर्यात् खल्वेन कज्जलीम् ।
तयोः समं तीक्ष्णचूर्णं मर्दयेत् कन्यकाद्रवैः ॥
त्रियाममातपे गोलं ताम्रपात्रे विधारयेत् ।

आच्छादैरुपचेत् स्यादुष्णं यामयुगमतः ॥
धान्यराशौ न्यसेत् पश्चादहोरात्रात्तदुद्धरेत् ।
संचूर्ण्य गालयेद्वस्त्रे सत्वं वारितरं भवेत् ॥
त्रिकटुत्रिफलैलाभिर्जातीफललवङ्गकैः ।
नवभागोन्मितैरेतैः समं एष रसो भवेत् ॥
निष्कद्वयमितं नित्यं मधुना सह लेहयेत् ।
अयमग्निरसो नाम्ना कासक्षयहरः परः ॥'
इति अग्निरसः प्राङ्गधरे ॥"
इति भावप्रकाशस्य मध्यखण्डे द्वितीयभागे राजयक्ष्माधिकारः ॥ * ॥ (अथास्य पौराणिकं विवरणं यथा,—
"दिवौकसां कथयतान्यधिभिर्वै श्रुता कथा ।
कामव्यसनसंयुक्ता पौराणी प्रश्निनं प्रति ॥
रोहिण्यामतिसक्तस्य ग्रहैरं नानुरक्षतः ।
आजगामाक्ष्यतामिन्दोर्दक्षः क्षेपपरिक्षयात् ॥
दुहितृणामसम्भोगाच्छापाच्च प्रजापतेः ।
क्रोधो निश्वासरूपेण मूर्त्तिमान्निःसृतो मुखात् ॥
प्रजापतेर्हि दुहितॄरक्षार्विग्रहितमंशुमान् ।
भार्य्यार्थं प्रतिजग्राह न च सर्व्वाक्षवर्त्तत ॥
गुरुणा तमवध्यातं भार्य्याक्षसमवर्त्तिनम् ।
रजोऽयमवलं दीनं यक्ष्मा प्रश्निनमाविशत् ॥
सोऽभिभूतोऽतिगुरुणा गुरुक्रोधेन निष्प्रभः ।
देवदेवर्षिसहितो जगाम ग्रहरं गुरुम् ॥
अथ चन्द्रमसः श्रुत्वा मतिं बुद्ध्वा प्रजापतिः ।
प्रसादं ज्ञतवान् सोमस्ततोऽस्मिन्यां चिकित्-
सितः ॥
स विमुक्तग्रहश्चन्द्रो विरराज विशेषतः ।
तेजसा वर्द्धितोऽग्निभ्यां शुद्धं सत्त्वमवाप च ॥
क्रोधो यक्ष्मा ज्वरो रोग एकोऽर्थो दुःखसंज्ञितः ।
यक्ष्मात् स राज्ञः प्रागासीद्राजयक्ष्मा ततो
मतः ॥
स यक्ष्मा कुपितोऽग्निभ्यां मानुषं लोकमागतः ।
ज्ञात्वा चतुर्विधं हेतुं समाविशति मानवान् ॥
अयथाबलमारम्भं वेगसन्धारणं श्रमम् ।
यक्ष्मणः कारणं विद्यात् चतुर्थं विषमाशनम् ॥"
अस्य विशेषहेतुर्यथा,—
"गुरुद्वाध्ययनभाराध्वलङ्घनप्लवनादिभिः ।
पतनैरभिघातैर्वा साहसैर्वा तथापरैः ॥
अयथाबलमारम्भैर्जन्तोरुरसि विक्षते ।
वायुः प्रकुपितो दोषानुदीर्य्याभौ विधावति ॥"
तथास्य लक्षणादिकं यथा,—
"स शिरःस्थः शिरःशूलं करोति गलमाश्रितः ।
कण्ठोद्ध्वंसञ्च कासञ्च स्वरभेदमरोचकम् ॥
पार्श्वशूलञ्च पार्श्वस्थो वक्षोभेदं गुदे क्षितः ।
बस्तौ ज्वरञ्च सन्धिस्थ उरःस्थश्चोरसो व्रणम् ॥
व्रणजाच्चोरसो रक्तं कासमानः कफानुगम् ।
जर्ज्जरैश्चोरसा क्षुद्रैः सूरः शूली निरस्यति ॥
इति साहसिकं यक्ष्मा रूपैरेतैः प्रपद्यते ।
एकादशभिरात्मज्ञो भजेत्तत्रादितः साहसम् ॥
क्षीणस्याद्धा क्षयित्वाद्धा भयाद्धा वेगमागतम् ।
वातमूत्रपुरीषाणां निग्रहात्ति यदा नरः ॥
तदा वेगप्रतीघातात् कफपित्ते समीरयन् ।

ऊर्द्धं तिर्य्यगधः कुर्य्यादिकारान् कुपितोऽनिलः ॥
प्रतिश्यायश्च कासश्च स्वरभेदमरोचकम् ।
पार्श्वशूलं शिरःशूलं ज्वरमंसावमर्द्दनम् ॥
अङ्गिमर्द्दं सुहुश्छर्द्दिर्वक्त्रभेदं क्लिशत्तगम् ।
रूपाण्येकादशैतानि यक्ष्मा येरुपतप्यते महान् ॥"
इति चरके चिकित्सास्थाने अष्टमेऽध्याये ॥
अस्य चिकित्सा यथा,—
"काञ्चनं रससिन्दूरं मौक्तिकं लौहमभ्र-
कम् ।
विद्रुमं ऋतवेक्षान्तं तारं ताम्रञ्च वङ्गकम् ॥
कस्तूरिका लवङ्गञ्च जातिकोषैलवालुका ।
प्रत्येकं विल्वमात्रञ्च सर्व्वं मर्द्द्यं प्रयत्नतः ।
कन्यानीरेण संमर्द्द्य कैशराजरसेन च ।
अजाक्षीरेण संभाव्यं प्रत्येकं दिवसत्रयम् ॥
चतुर्ज्जाप्रमाणेन वटिकां कारयेद्भिषक् ।
अनुपानं प्रदातव्यं यथादोषानुसारतः ॥
नानारोगप्रशमनं सर्व्वोपद्रवसंयुतम् ।
क्षयं क्षिप्रं तथा कासं यक्ष्माणं श्वासमेव च ॥
प्रमेहान् विंशतिञ्चैव दोषत्रयसमुत्थितान् ।
सर्व्वान् रोगान् निहन्त्याशु भास्करस्तिमिरं
यथा ॥"
इति वृहत्काञ्चनाभ्रवटी ॥
"शिलाजतुमधुयोषिताण्डलौहरजांसि च ।
क्षीरेणालोढितस्यास्तु यक्ष्मा क्षयमवाप्नुयात् ॥"
इति शिलाजत्वादिलौहम् ॥*॥
इति वैद्यकरत्नसारसंग्रहे राजयक्ष्माधिकारे ॥ * ॥)
यक्ष्मन्, [त्] त्रि, दानकर्त्ता । उपरमकर्त्ता ।
दानधात्वोर्यमधातोश्च ग्रहणप्रत्ययेन निष्पन्नः ॥
यज, ऐ च औ देवार्च्चादानसङ्गतौ । इति कविकल्पद्रुमः ॥ (भ्वा०-उभ०-सक०-अनिट् ।)
सङ्गस्य इतिः सङ्गतिः । ऐ, इष्यात् । च, यजति यजते विष्णुं सुधीः पूजयतीत्यर्थः । पशुना रुद्रं यजते पशुं रुद्राय ददातीत्यर्थः । यजति सत्त्वं सत् सता सह सङ्गं करोतीत्यर्थः । औ, यष्टा । इति दुर्गादासः ॥
यजतः, पुं, (यजतीति । यज् + "ऋज्रेन्द्राग्रवज्र-प्रवियच्छमितमिनमिनक्षिभ्योऽतच् ।" उणा० ३।१२०। इति अतच् ।) ऋत्विक् । इति सिद्धान्तकौमुदी ॥ (ऋषिविशेषः । स तु ऋग्वेदस्य ५ म० ६७।६८। सूक्तयोः ऋषिः ॥ त्रि, यष्टव्यः । यथा, ऋग्वेदे । १ । १८१ । ३ ।
"अहंपूर्व्वो यजतो धिष्ण्या यः ॥"
"यजतो यष्टव्यः ।" इति तद्भाष्ये सायणः ॥ तथा च तत्रैव । २ । ५ । ८ ।
"यथा विदाँ अरं करद्विश्वेभ्यो यजतेभ्यः ।"
"यजतेभ्यः सर्व्वेभ्यो यजनीयेभ्यो देवेभ्यः ।" इति तद्भाष्ये सायणः ॥)
यजतिः, पुं, (यज् + बाहुलकात् अतिः ।) यागः । यथा,—
"यजतिषु ये यजामहं कुर्य्यान्नानुयाजेषु ।"
इति मन्त्रमाधतत्त्वधृता श्रुतिः ॥

यजत्रः, पुं, (यजतीति । यज् + "अमिनक्षियजि-वधिपतिभ्योऽत्रन् ।" उणा० ३ । १०५ । इति अत्रन् ।) अग्निहोत्री । इत्युणादिकोषः ॥ (यजनशीले, त्रि । यथा, ऋग्वेदे । ७।५२।१६।
"पिता च तन्नो महान् यजत्रो
विश्वेदेवाः समनसो जुषन्त ॥"
"यजत्रः यजनशीलः ।" इति तद्भाष्ये सायणः ॥)
यजन्, [तृ] पुं, यागकर्त्ता । यजधातोः शतृप्रत्ययेन निष्पन्नः ॥
यजनं, क्ली, (इज्यते इति । यज् + ल्युट् ।) यागः । (यथा, महाभारते । ७ । ५३ । ३७ ।
"यस्य सेन्द्रामरगणा ऋषयश्चर्षिपुरोगमाः ।
देवा विश्वसृजः सर्व्वे यजनान्ते समासते ॥")
तत्तु ब्राह्मणस्य षट्कर्म्मान्तर्गतकर्म्मविशेषः । यथा, मानवे १ अध्याये ।
"अध्यापनं अध्ययनं यजनं याजनं यथा ।
दानं प्रतिग्रहश्चैव ब्राह्मणानामकल्पयत् ॥"
अस्य लक्षणं यथा । पशुचीराज्यपुरोडाश-सोमौषधिचरुप्रभृतिभिश्चविर्भिः खदिरपलाशा-श्वत्थन्यग्रोधोडुम्बरप्रभृतिभिः समिद्भिः सुक्सुवो-दूखलमुषलकुठारखनित्रयूपदारुदर्भचर्म्मेध्याव-पवित्रभाजनादिभिश्च योपकरणैरग्न्याहवनीयाध्व-र्य्वादिभिर्ऋत्विग्भिः काम्यनैमित्तिकानां पश्वादिपूर्व्वकाणां यथोक्तदक्षिणानां समापनं यजनम् । इति आह्निकविवेकधृतदेवलवचनम् ॥ (इज्यतेऽनेनेति । यज् + अधिकरणे ल्युट् । यज्ञ-स्थानम् । यथा, श्रीमद्भागवते । ४ । ४ । ६ ।
"ऋद्धान्वयःकाञ्चनदर्भचर्म्मभि-
र्निरूढभाण्डं यजनं समाविशत् ॥"
"यजनं यज्ञस्थानम् ।" इति तट्टीकायां श्रीधर-स्वामी ॥)
यजमानः, पुं, यागकर्त्ता । यजधातोर्भावे शानच्प्रत्ययेन निष्पन्नः । इति सिद्धान्तकौमुदी ॥
यजमानः, पुं, (यजतीति । यज् + शानच् ।) अध्वरे आदेष्टा । तत्पर्य्यायः । व्रती २ यष्टा ३ । इत्य-मरः ।२।७।८॥ (यथा, श्रीमद्भागवते । ३।१६।८ ।
"नाहं तथाद्मि यजमानहविर्विताने
जोतद्धुतप्लुतमदन् हुतभुङ्मुखेन ॥")
"ब्रह्मादिश्चयं यजमाने। अध्वरे यागविषये मम इष्टसम्पादनाय यथार्थं कर्म्म कुरु इति ऋत्वि-जामादेशको यागस्वामी ब्रह्मादिशब्दश्चयवाच्य इत्यर्थः । व्रतमेखलाजिनादिधारणं विद्यतेऽस्य व्रती इन् । यजते इति क्तनि यष्टा । प्राप्ते यजमानः । स व्रती सोमपानवति अध्वरे यज-मानः सन् दीक्षित उच्यते अन्यत्राप्युपचारात् । दीक्षा मौञ्जीब्योपनयनव्रतादेशेषु क्तः दीक्षा-शब्दादितो वा ।" इति भरतः ॥
यजाकः, त्रि, (यजतीति । यज् दाने + आकन् ।) दानकर्त्ता । इत्युणादिकोषः ॥
यजिः, पुं, (यजतीति । यज् + "सर्व्वधातुभ्य इन् ।" उणा० ४।११७। इति इन् ।) यज्ञः । इत्युणादि-कोषः ॥

यजुः, [स्] क्ली, (इज्यतेऽनेनेति । यज् + "अर्त्तिपृवपियजीति ।" उणा० २ । ११८ । इति उसि: ।) वेदविशेषः । इत्यमरः । १ । ६ । ३ ॥ "इज्यतेऽनेनेति यजुः । यजे औ देवार्चादानसङ्गतौ । त्रासुसिस् इति उस् ।" इति भरतः ॥*॥ अपि च । यजुराह जैमिनिः । शेषे वा यजुः-शब्दः । शेषे ऋक्सामभिन्ने मन्त्रजाते ततश्च यन्मन्त्रजातं प्रक्षिप्य पठितं गानादिविच्छेद-रहितं तत् यजुरिति । इति तिथ्यादितत्त्वम् ॥ यजुर्वेदस्य षड्गीतिभेदा भवन्ति । तत्र चरका नाम द्वादश भेदा भवन्ति । चरकाः १ आह्वरका: २ कठाः ३ प्राच्यकठाः ४ कपिष्ठलकठाः५ औपमन्याः ६ आष्टाध्यकठाः ७ वारायणीयाः ८ वाराय्यणीयाः ९ वार्षान्तवेयाः १० श्वेताश्वतराः ११ मैत्रायणीयाश्चेति १२ । तत्र मैत्रायणीया नाम सप्त भेदा भवन्ति । मानवाः १ दुन्दुभाः २ चैकेयाः ३ वाराहाः ४ हारिद्रवेयाः ५ प्रयामाः ६ प्रयामायनीयाश्चेति ७ । तेषामध्ययनमष्टौ प्रतम् । यजुः-सहस्राण्यधीत्य शाखापारो भवति । तान्येव द्विगुणान्यधीत्य पदपारो भवति । तान्येव त्रिगुणान्यधीत्य क्रमपारो भवति । षड्ङ्गान्यधीत्य षड्ङ्गविद्भवति । शिक्षा कल्पो व्याकरणं निरुक्तं छन्दो ज्योतिषमित्यङ्गानि । तत्र प्राच्योदीच्या नैर्ऋत्या निर्ऋत्यः । तत्र वाजसनेया नाम सप्त-दश भेदा भवन्ति । जाबालाः १ औधेयाः २ काण्वाः ३ माध्यन्दिनाः ४ शापीयाः ५ तापायनीयाः ६ कापालाः ७ पौण्ड्रवत्साः ८ आवटिकाः ९ परावटिकाः १० पाराशर्याः ११ वैधेयाः १२ वैनेयाः १३ औधेयाः १४ गालवाः १५ वैजवाः १६ कात्यायनीयाश्चेति १७ । प्रतिपदमनुपदं छन्दो भाषा धर्म्मो मीमांसा न्यायस्तर्कं इत्युपाङ्गानि भवन्ति । उपज्योतिषम् १ षाङ्गलक्षणम् २ प्रतिज्ञा ३ अनुवाक्यम् ४ परिसंख्या ५ चरणव्यूहम् ६ श्राद्धकल्पः ७ प्रवराध्यायश्च ८ शास्त्रम् ९ क्रतुः १० संस्था ११ अनुगमः १२ यज्ञम् १३ प्रायश्चित्तम् १४ होत्रकम् १५ पशवः १५ उक्थानि १७ कूर्म्मलक्षणम् १८ । इत्यष्टादशपरिशिष्टानि ।

"द्वे सहस्रे शते न्यूने मन्त्रे वाजसनेयके ।
इत्युक्तं परिसंख्यातमेतत् सकलं सशुक्रियम् ॥
ग्रन्थांश्च परिसंख्यातं ब्राह्मणञ्च चतुर्गुणम् ।
आदावारभ्य वेदान्तं ब्रह्मणाहुतिपूर्ब्बकम् ।
वेदमध्याय एतेषां होमान्ते तु समारभेत् ॥"

तत्र तैत्तिरीयका नाम द्विभेदा भवन्ति । औख्याः खाण्डिकेयाश्चेति । तत्र खाण्डिकेया नाम पञ्च भेदा भवन्ति । आपस्तम्बी १ बौधायनी २ सत्याषाढ़ी ३ हिरण्यकेशी ४ औधेयाश्चेति ५ । तत्र कठानान्तूपगानविशेषः । चतुश्चत्वारिंशत्युपग्रन्थान् ।

"मन्त्रब्राह्मणयोर्वेदनामधेयं यत्र प्रथ्यते ।
यजुर्व्वेदः स विज्ञेयोऽन्ये शाखान्तराः स्मृताः ॥"

यजुर्व्वेदस्य धनुर्व्वेद उपवेदः । यजुर्व्वेदस्य भारद्वाजगोत्रम् । रुद्रदेवत्यम् । त्रैष्टुभं छन्दः । यजुर्व्वेदः क्षत्रः । दीर्घः । कपाली । ताम्रवर्णः । काञ्चननयनः । आदित्यवर्णः वर्णेन । पञ्चारत्नि-मात्रः । अस्य ध्यानम् ।

"वन्दे रौद्रं वेदभं ताम्रवर्णं
भारद्वाजं रुक्मनेत्रं क्षत्राङ्गम् ।
यजुर्व्वेदं दीर्घमादित्यवर्णं
कापालीनं पञ्च चारत्निमात्रम् ॥"

य इदं देवतं रूपं गोत्रं प्रमाणं छन्दो वर्णं वर्णयति स विद्यां लभते स विद्यां लभते । जन्मजन्मनि वेदपारो भवति । जन्मजन्मनि वेदधारो भवति । अव्रतो व्रती भवति । अप्रयतः प्रयतो भवति । अब्रह्मचारी ब्रह्मचारी भवति । जातिस्मरो जायते । इति चरणव्यूहम् । (ऋक्सामभिन्नो मन्त्रविशेषः । इति केचित् ॥)

यजुर्व्वेदः, पुं, (यजुरेव वेदः । यजुषां वेद इति वा ।) वेदविशेषः । तस्याधिपतिर्यथा,—

"ऋग्वेदाधिपतिर्ज्जीवः सामवेदाधिपः शुक्रः ।
यजुर्व्वेदाधिपः शुक्रः प्रथिजोऽथर्व्ववेदराट् ॥"

इति ज्योतिषम् ॥

अस्य वक्ता वैशम्पायनः । स तु आदावेक एवासीत् । यथा,—

"ऋग्वेदश्रावकं पैलं जग्राह स महामुनिः ।
यजुर्व्वेदप्रवक्तारं वैशम्पायनमेव च ॥
जैमिनं सामवेदस्य श्रावकं सोऽन्वपद्यत ।
तथैवाथर्व्ववेदस्य सुमन्तुरृषिसत्तमम् ॥
एक आसीद्यजुर्व्वेदस्तमुधा व्यकल्पयत् ।
चातुर्होत्रमभूद्यस्मिंस्तेन यज्ञमथाकरोत् ॥
अध्वर्यवं यजुर्भिः स्याद्ब्रह्मत्वं साम्नि दिजोत्तमाः ।
उद्गात्रं सामभिश्चक्रे ब्रह्मत्वमथर्व्वभिः ॥
ततः स ऋच उद्धृत्य ऋग्वेदं कृतवान् प्रभुः ।
यजूंषि च यजुर्व्वेदं सामवेदञ्च सामभिः ॥
एकविंशतिभेदेन ऋग्वेदं कृतवान् पुरा ।
शाखानान्तु शतेनाथ यजुर्व्वेदमथाकरोत् ॥
सामवेदं सहस्रेण शाखानाञ्च विभेदतः ।
अथर्व्वाणमथो वेदं विभेद नवकेन तु ॥"

इति कौर्म्मे ४६ अध्यायः ॥

यज्ञः, पुं, इज्यते हविर्दीयतेऽत्र । (इज्यन्ते देवता अत्र इति वा । यज् + "यजयाचयतविच्छप्रच्छ-रक्षो नङ् ।" ३।३।९० । इति नङ् ।) यागः । तत्पर्य्यायः । सवः २ अध्वरः ३ यागः ४ सप्ततन्तुः ५ मखः ६ क्रतुः ७ । इत्यमरः । २।७।१३॥ इष्टिः८ इष्टम् ९ वितानम्१० मन्युः ११ आहवः १२ सवनम् १३ हवः १४ अभिषवः १५ होमः १६ हवनम् १७ मखः १८ । इति शब्दरत्नावली ॥ स त्रिविधः । सात्त्विको राजसिकस्तामसिकश्च । सात्त्विकयज्ञो यथा,—

"अफलाकाङ्क्षिभिर्यज्ञो विधिदृष्टो य इज्यते ।
यष्टव्यमेवेति मनः समाधाय स सात्त्विकः ॥"

राजसिकयज्ञो यथा,—

"अभिसन्धाय तु फलं दम्भार्थमपि चैव यत् ।
इज्यते भरतश्रेष्ठ ! तं यज्ञं विद्धि राजसम् ॥"

तामसिकयज्ञो यथा,—

"विधिहीनमसृष्टान्नं मन्त्रहीनमदक्षिणम् ।
श्रद्धाविरहितं यज्ञं तामसं परिचक्षते ॥"

इति श्रीभगवद्गीतायाम् १७ अध्यायः ॥ * ॥

स च नानाविधः । यथा,—

"द्रव्ययज्ञास्तपोयज्ञा योगयज्ञास्तथापरे ।
स्वाध्यायज्ञानयज्ञाश्च यतयः संशितव्रताः ॥"

इति श्रीभगवद्गीतायाम् ४ अध्यायः ॥ * ॥

पञ्च यज्ञा यथा,—

"अध्यापनं ब्रह्मयज्ञः पितृयज्ञस्तु तर्पणम् ।
होमो देवो बलिर्भौतो नृयज्ञोऽतिथिपूजनम् ॥"

इति गारुड़े ११५ अध्यायः ॥ * ॥

(तथाच मनुः । ४ । २१—२२ ।

"ऋषियज्ञं देवयज्ञं भूतयज्ञञ्च सर्व्वदा ।
नृयज्ञं पितृयज्ञञ्च यथाशक्ति न हापयेत् ॥
एतानेके महायज्ञान् यज्ञशास्त्रविदो जनाः ।
अनीहमानाः सततमिन्द्रियेष्वेव जुह्वति ॥"

अपरपञ्चयज्ञा उक्ता यथा, अग्निपुराणे वायुसंहितायामुत्तरभागे । १८ । ८६—१०६ ।

"कर्म्मयज्ञस्तपोयज्ञो जपयज्ञस्तदुत्तरः ।
ध्यानयज्ञो ज्ञानयज्ञः पञ्च यज्ञाः प्रकीर्त्तिताः ॥
कर्म्मयज्ञरताः केचित्तपोयज्ञरताः परे ।
जपयज्ञरताश्चान्ये ध्यानयज्ञरतास्तथा ॥
ज्ञानयज्ञरताश्चान्ये विशिष्टाश्चोत्तरोत्तरम् ।
कर्म्मयज्ञो द्विधा प्रोक्तः कामाकामविभेदतः ॥
कामान् कामी ततो भुक्त्वा कामासक्तः पुनर्भवेत् ।
अकामो रुद्रभवने भोगान् भुक्त्वा ततश्च्युतः ॥
तपोयज्ञरतो भूत्वा जायते नात्र संशयः ।
तपस्वी च पुनस्तस्मिन् भोगान् भुक्त्वा ततश्च्युतः ॥
जपध्यानरतो भूत्वा जायते भुवि मानवः ।
जपध्यानरतो मर्त्यस्तदैशिष्टवमाप्नुयादिह ॥
ज्ञानं लब्ध्वा चिरादेव शिवसायुज्यमाप्नुयात् ।
तस्माच्मुक्तौ शिवाज्ञप्तः कर्म्मयज्ञोऽपि देहिनाम् ॥
अकामः कामसंयुक्तो बन्धायैव भविष्यति ।
तस्मात् पशुषु यज्ञेषु ध्यानज्ञानपरो भवेत् ॥
ध्यानं ज्ञानञ्च यस्यास्ति तीर्णस्तेन भवार्णवः ।
हिंसादिदोषनिर्म्मुक्तो विशुद्धश्चित्तसाधनः ॥
ध्यानयज्ञः परस्तस्मादपवर्गफलप्रदः ।
बहिः कर्म्मकरा यद्वन्नातीवफलभागिनः ॥
दृष्ट्वा नरेन्द्रभवने तद्दत्तापि कर्म्मिणः ।
ध्यानिनां हि वपुः सूक्ष्मं भवेत् प्रत्यक्षमैश्वरम् ॥
तथेह कर्म्मिणां स्थूलं दृष्टकाष्ठादेः प्रकल्पितम् ।
ध्यानयज्ञरतास्तस्माद्देवान् पाषाणदन्मयान् ॥
नात्यन्तं प्रतिपद्यन्ते शिवयाथात्म्यवेदनात् ।
आत्मस्थं यः शिवन्त्यक्त्वा बहिरभ्यर्च्चयेन्नरः ॥
हस्तस्थं फलमुत्सृज्य लिहेत् कूर्परमात्मनः ।
ज्ञानात् ध्यानं भवेत् ध्यानाज्ज्ञानं भूयः प्रवर्त्तते ॥
तदुभाभ्यां भवेच्छक्तिस्तस्मात् ध्यानरतो भवेत् ।
द्वादशान्ते तथा मूर्द्ध्नि ललाटे भ्रूयुगान्तरे ॥

नासाग्रे वा तथास्ये वा कन्धरे हृदये तथा ।
नाभौ वा शाश्वतस्थाने श्रद्धाविष्टेन चेतसा ॥
बहिर्य्यागोपचारेण देवं देवीञ्च पूजयेत् ।
अथवा पूजयेन्नित्यं लिङ्गे वा कृतकेपि वा ॥
वह्नौ वा स्थण्डिले वाथ भक्त्या वित्तानुसारतः ॥
अथवाम्भस्यबहिश्चैव पूजयेत् परमेश्वरम् ।
अन्तर्य्यागरतः पूजां बहिः कुर्व्वीत वा नवा ॥")
अस्योत्पत्तिर्यथा,—

ऋषय ऊचुः ।

"कथं यज्ञवराहस्य देहो यज्ञत्वमाप्तवान् ।
चेतात्वमगमत् पुत्रा वराहस्य कथं क्षयः ।
तन्नोऽद्य श्रोष्यमाणानां कथयस्व महामते ! ॥

श्रीमार्कण्डेय उवाच ।

शृणुध्वं द्विजशार्दूला यत् पृष्टोऽहं महाद्भुतम् ।
यज्ञेषु देवास्तिष्ठन्ति यज्ञे सर्व्वं प्रतिष्ठितम् ॥
यज्ञेन ध्रियते पृथ्वी यज्ञस्तारयति प्रजाः ।
अन्नेन भूता जीवन्ति पर्जन्यादन्नसम्भवः ॥
पर्जन्यो जायते यज्ञात् सर्व्वं यज्ञमयं ततः ।
स यज्ञोऽभूद्वराहस्य कायात् शम्भुविदारितात् ॥
यथाहं कथये तद्वः शृण्वन्त्ववहिता द्विजाः ।
विदारिते वराहस्य काये भर्गेण तत्क्षणात् ॥
ब्रह्मविष्णुग्निवा देवाः सर्व्वेच्च प्रमथाः सह ।
निर्य्युर्जलात् समुद्धृत्य तच्छरीरं नभः प्रति ॥
तद्विभेजुः शरीरन्ते विष्णोश्चक्रेण खण्डशः ।
तस्याङ्गसन्धयो यज्ञा जातास्ते वै पृथक् पृथक् ॥
यस्मादृक्षाच्च ये यज्ञास्तत् शृण्वन्तु महर्षयः ।
भूनासासन्धिना जातो ज्योतिष्टोमो महाध्वरः ॥
हनुश्रवणसन्ध्योस्तु वह्निष्टोमो व्यजायत ।
चक्षुर्भ्रुवोः सन्धिना तु व्राह्यष्टोमो व्यजायत ॥
राजः पौनर्भवष्टोमस्तस्य पोत्रोऽस्यसन्धिना ।
वृहष्टोमवृहष्टोमौ जिह्वामूलाद्व्यजायत ॥
अतिरात्रं सर्व्वराजमधोजिह्वान्तराद्भुत ॥
अध्यापनं ब्रह्मयज्ञः पितृयज्ञस्तु तर्पणम् ।
होमो दैवो बलिर्भौतो नृयज्ञोऽतिथिपूजनम् ॥
स्नानं तर्पणपर्य्यन्तं नित्ययज्ञाश्च सर्व्वगः ।
कण्ठसन्धेः समुत्पन्ना जिह्वातो विधयस्तथा ॥
वालिमेधो महामेधो नरमेधस्तथैव च ।
प्राणिहिंसाकरा येऽन्ये ते जाताः प्राक्सन्धितः ॥
राजसूयोऽथ कारीषो वाजपेयस्तथैव च ॥
पृष्ठसन्धौ समुत्पन्ना ग्रहयज्ञास्तथैव च ॥
प्रतिष्ठोत्सर्गयज्ञाश्च दानश्राद्धादयस्तथा ।
हृत्सन्धितः समुत्पन्नाः सावित्रीयज्ञ एव च ॥
सर्व्वेषां साधका यज्ञाः प्रायश्चित्तकराश्च ये ।
ते मेढ्रसन्धितो जाता यज्ञास्तस्य महात्मनः ॥
रथः सर्व्वं सर्पसत्रं सर्व्वञ्चैवाभिचारिकम् ।
गोमेधो वृषजापश्च खुरेभ्यो ह्यभवन्निमे ॥
मायेष्टिः परमेष्टिश्च गोष्पतिर्भोगसम्भवः ।
लाङ्गलसन्धौ संजाता अग्निष्टोमस्तथैव च ॥
नैमित्तिकाश्च ये यज्ञाः संक्रान्त्यादौ प्रकीर्त्तिताः ।
लाङ्गलमन्धौ ते जातास्तथा द्वादशवार्षिकम् ॥
तोयप्रयोगसामौजयजुःसङ्कर्षणस्तथा ।

आर्कमाथर्व्वणश्चैव नाभिसन्धेः समुद्गताः ॥
ऋचोत्कर्षः क्षेत्रयज्ञः पञ्चमार्गोऽतियोजनः ।
लिङ्गसंस्थानहेरम्बयज्ञा जातास्च जानुनि ॥
एवमष्टाधिकं जातं सहस्रं द्विजसत्तमाः ॥
यज्ञानां सततं लोका यैर्भाव्यन्तेऽधुनापि च ।
सुतस्य पोत्रात् संजाता नासिकायाः सुवोऽभवत् ॥
अन्ये सुक्सुवभेदा ये ते जाताः पोत्रनासयोः ।
ग्रीवाभागेन तस्याभूत् प्राग्वंशो मुनिसत्तमाः ॥
इष्टापूर्त्तं यजुर्धर्म्मो जातः श्रवणरन्ध्रतः ।
दंष्ट्राभ्यो ह्यभवन् यूपाः कुशा रोमाणि चाभवन् ॥
उद्गाता च तथाध्वर्य्युर्होता समिध एव च ।
अग्रदक्षिणवामाङ्गपश्चात्पादेषु सङ्गताः ॥
पुरोडाशाः सचरवो जाता मस्तिष्कसम्भवात् ।
कर्णेनेचयुगाज्जाता यज्ञकेतुस्तथा खुरात् ॥
मध्यभागोऽभवद्वेदी मेढ्रात् कुण्डमजायत ।
रेतोधारास्तथैवाज्यं खराज्जाताः समुद्गताः ॥
यज्ञालयः पृष्ठभागात् स्रुक्तुण्डात् यज्ञ एव च ।
तदात्मा यज्ञपुरुषो सृक्काः कर्णात् समुद्गताः ॥
एवं यावन्ति यज्ञानां भाण्डानि च हवींषि च ।
तानि यज्ञवराहस्य शरीरादेव चाभवन् ॥
एवं यज्ञवराहस्य शरीरं यज्ञतामगात् ।
यज्ञरूपेण सकलमाप्यायितुमिदं जगत् ॥
एवं विधाय यज्ञन्तु ब्रह्मविष्णुमहेश्वराः ।
सुदृप्तं कनकं घोरमासेदुर्यत्नतत्पराः ॥
ततस्तेषां शरीराणि पिण्डीकृत्य पृथक् पृथक् ।
त्रिदेवाग्निशरीराणि यधमन्मुखवायुभिः ॥
सुदृप्तस्य शरीरन्तु यधमन्मुखवायुना ।
स्वयमेव जगत्स्रष्टा दक्षिणाग्निस्तनोऽभवत् ॥
कनकस्य शरीरन्तु भापयामास केशवः ।
ततोऽभूद्दार्हपत्याग्निः पशवेतानभोजनः ॥
घोरस्य तु वपुः शम्भुर्भापयामास वै स्वयम् ।
तत आहवनीयोऽग्निस्तन्मुखात् समजायत ॥
एतैस्त्रिभिर्जगत् व्याप्तं त्रिमूलं सकलं जगत् ।
एतत् यत्र त्रयं नित्यं तिष्ठति द्विजसत्तमाः ।
समस्ता देवतास्तत्र वसन्तेऽनुचरैः सह ॥
एतच्छ्रद्धप्रदं नित्यमेतदेव त्रयात्मकम् ।
एतत् त्रयीविधिज्ञानमेतत् पुण्यकरं परम् ॥
यस्मिन् जनपदे चैते हूयन्ते अग्नयस्त्रयः ।
तस्मिन् जनपदे नित्यं चतुर्व्वर्गो विवर्द्धते ॥
एतद्वः कथितं सर्व्वं यत् पृष्टं द्विजसत्तमैः ।
यथा यज्ञवराहस्य देहो यज्ञत्वमाप्तवान् ।
तथा च तस्य पुत्राणां देहास्तेनात्वमागमन् ॥"

इति कालिकापुराणे ३० अध्यायः ॥*॥

ब्रह्मण आदियज्ञा यथा,—

पुलस्त्य उवाच ।

"पूर्व्वमेव मया ख्यातं यदा स्वायम्भुवो मनुः ।
जातः परमधर्म्मात्मा शतरूपापतिः स्वयम् ॥
स्रष्टा प्रजापतिः पूर्व्वं सृष्टिकर्म्मण्ययोजयत् ।
वत्स ! त्वमेव संकल्प्य स्वल्पां सृष्टिं कुरु ह्यथ ॥
स्वयं तु पुष्करं गत्वा कृत्वा यज्ञन्तु विस्तरम् ।

ब्रह्मोद्गाता होताध्वर्य्युश्चत्वारो यज्ञवाहकाः ।
एकैकस्य चयस्यान्ये परिवाराः स्वयं कृताः ॥
ऋते वै षोड़श प्रोक्ता ऋत्विजो वेदचिन्तकाः ।
शुतानि चौणि षड्भिश्च यज्ञाः सृष्टाः स्वयम्भुवा ॥

भीष्म उवाच ।

यज्ञस्य ब्रह्मणो विप्र ! समाप्तिं वद साम्प्रतम् ॥

पुलस्त्य उवाच ।

मन्वन्तरे व्यतीते तु यज्ञस्यावभृथोऽभवत् ।
दक्षिणा ब्रह्मणा दत्ता प्राची होतुस्तु दक्षिणा ॥
अध्वर्य्यवे प्रतीची तु उद्गातुश्चोत्तरा तथा ।
त्रैलोक्यं सकलं ब्रह्मा ददौ तेषान्तु दक्षिणाम् ॥
धेनूनाञ्च शतं साष्टं दातव्यं यज्ञसिद्धये ।
अध्वर्य्यूणां सहस्राणि स्वेच्छया दानमिष्यते ॥"

इति पाद्मे सृष्टिखण्डे ३१ अध्यायः ॥*॥

ब्राह्मणादीनां स्वधर्म्मयज्ञा यथा,—

"आरम्भयज्ञाः क्षत्रास्युर्हविर्यज्ञा विशः स्मृताः ।
परिचारयज्ञाः शूद्रास्तु जपयज्ञास्तु ब्राह्मणाः ॥"

इति मात्स्ये ११८ अध्यायः ॥*॥

हिंसायज्ञस्य अधर्म्मजनकत्वं यथा,—

"तया विश्वभुगिन्द्रस्तु यज्ञं प्रावर्त्तयत् प्रभुः ।
देवतैः सह संहृत्य सर्व्वसाधनसंभृतम् ॥
तस्याश्वमेधे वितते समाजग्मुर्महर्षयः ।
महर्षयश्च तान् दृष्ट्वा दीनान् पशुगणांस्तदा ॥
विश्वं भुजन्ते त्वदृष्टान् कोऽयं यज्ञविधिस्तव ।
अधर्म्मो बलवानेष हिंसाधर्म्ममया तव ॥
न नः पशुवधस्त्वेष्टस्तव यज्ञेषु सोत्तम ! ।
अधर्म्मो धर्म्मघाताय प्रारब्धः पशुभिस्त्वया ॥
नायं धर्म्मो ह्यधर्म्मोऽयं न हिंसा धर्म्म उच्यते ।
आगमेन भवान् धर्म्मं प्रकरोतु यदीच्छति ॥
विधिदृष्टेन यज्ञेन धर्म्मगात्रयसेतुना ॥
एवं विश्वभुगिन्द्रस्तु ऋषिभिस्तत्त्वदर्शिभिः ।
उक्तो न प्रतिजग्राह मानमोहसमन्वितः ॥
तेषां विवादः सुमहान् जज्ञे इन्द्रमहर्षिणाम् ।
जङ्गमैः स्थावरैः केन यष्टव्यमिति चोच्यते ॥
ते तु खिन्ना विवादेन तथ्यमुक्ता महर्षयः ।
सन्धाय वाक्यमिन्द्रेण पप्रच्छुः खचरं वसुम् ॥

ऋषय ऊचुः ।

महाप्राज्ञ कथं दृष्टस्तव यज्ञविधिर्नृप ! ।
उत्तानपादे ! ब्रूहि संशयं नो सुद प्रभो ! ॥

सूत उवाच ।

श्रुत्वा वाक्यं वसुस्तेषामविचार्य्य बलाबलम् ।
वेदशास्त्रमनुस्मृत्य यज्ञतत्त्वमुवाच ह ॥
यष्टव्यं पशुभिर्मेध्यैरथ मूलफलैरपि ।
हिंसा स्वभावो यज्ञस्य इति मे दर्शनागमः ॥
एवं श्रुतोत्तरास्ते तु युक्तात्मानं ततो धिया ।
अवध्यं भाविनं दृष्ट्वा तमधो ह्यगमंस्तदा ॥
इत्युक्तमात्रो नृपतिः प्रविवेश रसातलम् ।
धर्म्माणां संशयच्छेत्ता राजा वसुरधो गतः ॥

यज्ञट

तस्मान्न वाच्यो ह्येकेन बहुज्ञेनापि संशयः ।
तस्मान्न हिंसा यज्ञस्थ यदुक्तमृषिभिः पुरा ॥"
इति मात्स्ये ११६ अध्यायः ॥
तद्दैदिकपर्य्यायः । वेनः २ अध्वरः ३ मेधः ४ विदथः ५ नार्य्यः ६ सवनम् ७ होत्रा ८ इष्टिः ९ देवताता १० मखः ११ विष्णुः १२ इन्द्रः १३ प्रजापतिः १४ धर्म्मः १५ । इति पञ्चदश यज्ञनामानि । इति वैदनिघण्टौ । ३ । १७ ॥
(विष्णुः । यथा, महाभारते । १३।१४६।११७।
"यज्ञो यज्ञपतिर्यज्वा यज्ञाङ्गो यज्ञवाहनः ॥")
यज्ञकृत्, त्रि, (यज्ञं करोतीति । कृ + क्विप् । यागकर्त्ता । (यथा, श्रीमद्भागवते । ४।४।७ ।
"ताभागतां तत्र न कञ्चनाद्रियद्-
विमानितां यज्ञकृतो भयाज्जनः ।
ऋते स्वसॄर्वै जननीञ्च सादरा:
प्रेमाश्रुकण्ठ्यः परिषस्वजुर्मुदा ॥"
पुं, विष्णुः । यथा, महाभारते । १३ । १४६ । ११८ ।
"यज्ञभृद्यज्ञकृद्यज्ञी यज्ञभुग् यज्ञसाधनः ॥")
यज्ञपशुः, पुं, (यज्ञार्थः पशुः ।) घोटकः । इति शब्दमाला ॥ (यथा, श्रीमद्भागवते । ४ । १६ । ११ ।
"चरमेणाश्वमेधेन यजमाने यजुष्पतिम् ।
वैराजे यज्ञपशुं स्वर्द्वन्नयोवाह तिरोहितः ॥")
क्षागश्च ॥
यज्ञपुरुषः, पुं, (यज्ञरूपी पुरुषः ।) विष्णुः । इति हेमचन्द्रः । २ । २३ ॥ (यथा, श्रीमद्भागवते । २ । ७ । ११ ।
"सर्वं ममास भगवान् हृषीकेशाधोक्षजः ।
साक्षात् स यज्ञपुरुषस्तपनीयवर्णः ।
छन्दोमयो मखमयोऽखिलदेवतात्मा
वाचो बभूवुरुशतीः श्वसतोऽस्य नस्तः ॥")
यज्ञभाजनं, क्ली, (यज्ञस्य भाजनम् ।) यज्ञपात्रम् । इति जटाधरः ॥
यज्ञभूषणः, पुं. (यज्ञं भूषयतीति । भूष + णिच् + ल्युः ।) श्वेतदर्भः । इति राजनिर्घण्टः ॥ (क्रुशमात्रम् । यथा, भावप्रकाशे पूर्ब्बखण्डे प्रथमे भागे ।
"क्रुशो दर्भस्तथा बर्हिः सूच्यग्रो यज्ञभूषणः ।
ततोऽन्यो दीर्घपत्रः स्यात् क्षुरपत्रस्तथैव च ॥")
यज्ञयोग्यः, पुं, (यज्ञे योग्यः उचितः ।) उडुम्बरवृक्षः । इति राजनिर्घण्टः ॥ यागार्हे, त्रि ॥
यज्ञवल्ली, स्त्री, (यज्ञस्य वल्ली ।) सोमवल्ली । इति राजनिर्घण्टः ॥ (गुणादयोऽस्याः सोमलताशब्दे ज्ञातव्याः ॥)
यज्ञवाटः, पुं, (यज्ञस्य वाटो गृहम् ।) यज्ञस्थानम् । इति हेमचन्द्रः ॥ (यथा, श्रीमद्भागवते । १० । २३ । ३३ ।
"इत्युक्ता मुनिपत्न्यस्ता यज्ञवाटं पुनर्गताः ।
ते चानसूयवः स्वाभिः स्त्रीभिः सत्रमपारयन् ॥")
यज्ञवृक्षः, पुं, (यज्ञस्य वृक्षः) वटीवृक्षः । इति राजनिर्घण्टः ॥ (विकङ्कतः । तत्पर्य्यायो यथा,

यज्ञस्था

"विकङ्कतः स्रुवावृक्षो ग्रन्थिला स्वादुकण्टकः ।
स एव यज्ञवृक्षश्च कण्टकी व्याघ्रपादपि ॥"
इति भावप्रकाशस्य पूर्ब्बखण्डे प्रथमे भागे ॥)
यज्ञश्रेष्ठा, स्त्री, (यज्ञे श्रेष्ठा ।) सोमवल्ली । इति राजनिर्घण्टः ॥
यज्ञसाधनः, पुं, (यज्ञं साधयतीति । सिध + णिच् + ल्युः ।) विष्णुः । इति महाभारते तस्य सहस्रनामस्तोत्रम् । १३ । १४६ । ११८ ॥ (यज्ञसाधके, त्रि । यथा, ऋग्वेदे । १।१४५।३।
"पुरुप्रेषस्तुरियज्ञसाधनः ।"
"यज्ञसाधनः यज्ञसाधकः अन्याधीनत्वात् यज्ञस्य ।"
इति तद्भाष्ये सायणः ॥)
यज्ञसारः, पुं, (यज्ञे सारः उत्कृष्टः ।) यज्ञोडुम्बरवृक्षः । इति राजनिर्घण्टः ॥
यज्ञसूत्रं, क्ली, (यज्ञे धृतं सूत्रम् ।) यज्ञोपवीतम् । यथा,—
"पवित्रं यज्ञसूत्रञ्च यज्ञोपवीतमित्यपि ।
यज्ञसूत्रं तदेवोपवीतं स्यादक्षिणे भुजे ॥
उद्धृते वामबाहौ तु प्राचीनावीतमुच्यते ।
निवीतन्तु तदेव स्यादूर्द्ध्ववृत्तसि लम्बितम् ॥"
इति जटाधरः ॥
तस्य प्रमाणं यथा,—
"ऊर्द्धन्तु चिहृतं सूत्रं सधवानिर्म्मितं शुभे: ।
तत्तुत्रयमधोवृत्तं यज्ञसूत्रं विदुर्बुधाः ॥
त्रिगुणं तदृग्रन्थियुक्तं वेदप्रवरसम्मितम् ।
शिरोधरान्नाभिमध्यात् पृष्ठार्द्धपरिमाणकम् ॥
यजुर्विदां नाभिमितं सामगानामयं विधिः ।
वामस्कन्धेन विधृतं यज्ञसूत्रं बलप्रदम् ॥"
इति कल्किपुराणे ४ अध्यायः ॥
अस्य धारणे मन्त्रो यथा,—
"यज्ञोपवीतमसि यज्ञस्य त्वोपवीतेनोपनह्यामि ।"
इति संस्कारतत्त्वधृतभट्टभाष्यम् ॥
यजुषान्तु,—
"यज्ञोपवीतं परमं पवित्रं
प्रहस्पतेर्यत् सहजं पुरस्तात् ।
आयुष्यमग्र्यं प्रतिमुञ्च शुभ्रं
यज्ञोपवीतं बलमस्तु तेजः ॥"
इति पशुपतिः ॥
युगभेदे तत्सूत्रनियमो यथा,—
"सत्ये स्वर्णमयं सूत्रं त्रेतायां राजतं तथा ।
द्वापरे ताम्रजं प्रोक्तं कलौ कार्पाससम्भवम् ॥"
इति बृहन्नाजमार्त्तण्डः ॥
अन्यच्च ।
"यज्ञार्थं धार्य्यते सूत्रं यज्ञं ब्रह्मण्यमिष्यते ।
स्वर्णं रौप्यं ताम्रमूर्णं पट्टं कार्पासवार्हिषम् ॥
मृगाजिनं गुदं ग्रन्थौ यथालब्धं निधाय च ।
यज्ञसूत्रं परिचरेद्ब्रह्मलिङ्गक्रियात्मकम् ॥
न तत्र नियमो ग्राह्यः सूत्रब्रह्मण्यमङ्गया ॥"
इति बृहदादित्यसंहिता ॥
यज्ञस्थानं, क्ली, (यज्ञस्य स्थानम् ।) यज्ञवाटः । इति जटाधरः ॥

यज्ञियः

यज्ञाङ्गः, पुं, (यज्ञं अङ्गति प्राप्नोतीति । अङ्ग + अण् ।) उडुम्बरः । इत्यमरः । २ । ४ । २२ ॥ (अस्य पर्य्यायो यथा,—
"यज्ञाङ्गो ब्रह्मवृक्षश्च हेमदुग्धोऽप्युडुम्बरः ॥"
इति वैद्यकरत्नमालायाम् ॥
"उडुम्बरो जन्तुफलो यज्ञाङ्गो हेमदुग्धकः ॥"
इति भावप्रकाशस्य पूर्ब्बखण्डे प्रथमे भागे ॥)
खदिरवृक्षः । इति राजनिर्घण्टः ॥ ब्राह्मणयष्टिका । इति शब्दचन्द्रिका ॥ (यज्ञ एव अङ्गं यस्य । विष्णुः । यथा, महाभारते । १३।१४६। ११७ ।
"भूर्भुवःस्वस्तरुस्तारः सविता प्रपितामहः ।
यज्ञो यज्ञपतिर्यज्वा यज्ञाङ्गो यज्ञवाहनः ॥"* ॥
यज्ञस्याङ्गमिति ।) यागावयवे यज्ञसाधने च क्ली ॥ (यथा, कुमारसम्भवे । १ । १० ।
"यज्ञाङ्गयोनित्वमवेक्ष्य यस्य
सारं धरित्रीधरणक्षमञ्च ॥")
यज्ञाङ्गा, स्त्री, (यज्ञमङ्गति प्राप्नोति या । अङ्ग + अण् । टाप् ।) सोमवल्ली । इति राजनिर्घण्टः ॥ (विषयोऽस्याः सोमवल्लीशब्दे ज्ञातव्यः ॥)
यज्ञान्तः, पुं, (यज्ञस्य अन्तोऽवसानं यस्मिन् ।) अवभृथः । इति हेमचन्द्रः । ३ । ३६८ ॥ यागप्रोषश्च ॥ (यथा, महाभारते । १३ । १४६ । ११८ ।
"यज्ञान्तकृत् यज्ञगुह्यमन्नमन्नाद एव च ॥")
यज्ञारिः, पुं, (यज्ञस्य दक्षयज्ञस्य अरिर्नाशकः ।) शिवः । इति धनञ्जयः ॥ राक्षसश्च ॥
यज्ञिकः, पुं, पलाशवृक्षः । इति जटाधरः ॥ (अनुकम्पितो यज्ञदत्तः । "बह्वचो मनुष्यनाम्नष्ठच् वा ।" ५ । ३ । ३८ । इति ठच् । "ठाजादावूर्द्ध्वं द्वितीयादचः ।" ५।३।८३। इति प्रकृतेर्द्वितीयादच ऊर्द्ध्वस्य लोपः । यज्ञदत्तकः । इति काशिका ॥)
यज्ञियं, त्रि, (यज्ञमर्हतीति । यज्ञ + "यज्ञर्त्विग्भ्यां घखञौ ।" ५।१।७१। इति घः ।) यज्ञकर्म्मार्हम् । इत्यमरः । २।७।२७ ॥ (यथा, हरिवंशे । २६ । १६ ।
"क्रतो यज्ञविभागो हि यज्ञियेर्हि सुरैः पुरा ॥")
यज्ञाय हितम् । इति सुग्धबोधव्याकरणम् ॥ (यथा, मनुः । २ । २३ ।
"कृष्णसारस्तु चरति मृगो यत्र स्वभावतः ।
स ज्ञेयो यज्ञियो देशो म्लेच्छदेशस्ततः परः ॥")
यज्ञियः, पुं. (यज्ञाय हितः । यज्ञ + घः ।) द्वापरयुगम् । इति त्रिकाण्डशेषः ॥ (खदिरवृक्षः । तत्पर्य्यायो यथा,—
"खदिरो रक्तसारश्च गायत्री दन्तधावनः ।
कण्टकी बालपत्रश्च बहुशल्यश्च यज्ञियः ॥"
इति भावप्रकाशे पूर्ब्बखण्डे प्रथमे भागे ॥
पलाशः । तत्पर्य्यायो यथा,—
"पलाशः किंशुकः पर्णो यज्ञियो रक्तपुष्पकः ।
क्षारश्रेष्ठो वातहरो ब्रह्मवृक्षो सरिद्वरः ॥"
इति भावप्रकाशस्य पूर्ब्बखण्डे प्रथमे भागे ॥)

यज्ञियदेशः, पुं, (यज्ञियश्चासौ देशश्चेति ।) यागकरणोपयुक्तदेशः । यथा, मनुः ।२।२३ ।
"कृष्णसारस्तु चरति मृगो यत्र स्वभावतः ।
स ज्ञेयो यज्ञियो देशो म्लेच्छदेशस्ततः परः ॥"

यज्ञियप्रणाला, स्त्री, (यज्ञिया प्रणाला ।) यागमण्डपम् । इति जटाधरः ॥

यज्ञीयः, पुं, (यज्ञे भवः इति । यज्ञ + "गहादिभ्यश्च ।" ४ । २ । १३८ । इति छः ।) उडुम्बरवृक्षः । इति राजनिर्घण्टः ॥ यागसम्बन्धिनि, त्रि ॥ (यथा, महाभारते । ३ । १०४ । ६ ।
"प्रशस्तेऽहनि यज्ञीये सर्व्वकामसमृद्धिमत् ।
कारयामास प्रयतो नियोगायतनमुत्तमम् ॥")

यज्ञीयवृक्षपादपः, पुं, (यज्ञीयश्चासौ वृक्षपादपश्चेति ।) विकङ्कतवृक्षः । इति राजनिर्घण्टः ॥

यज्ञेश्वरः, पुं, (यज्ञानामीश्वरः ।) विष्णुः । यथा,
"यज्ञेश्वरो यज्ञमयस्तपोयज्ञफलप्रदः ।
भोक्तायज्ञात्मा हरिरीश्वरश्च ।
तत्सन्निधानादपयान्तु सद्यो
रक्षांस्यशेषाण्यसुराश्च सर्व्वे ॥"
इति आह्निकतत्त्वम् ॥

यज्ञेष्टं, क्ली, (यज्ञे इष्टम् ।) दीर्घरोहिषकटतृणम् । इति राजनिर्घण्टः ॥

यज्ञोडुम्बरः, पुं, (यज्ञोचितः उडुम्बरः ।) उडुम्बरवृक्षः । यज्ञडुम्बर इति भाषा ॥ तत्पर्य्यायः । हेमदुग्धी २ यज्ञफलः ३ यज्ञाङ्गः ४ हेमदुग्धकः ५ उडुम्बरः ६ जन्तुफलः ७ । इति शब्दरत्नावली ॥ अस्य गुणाः यथा, भावप्रकाशे ।
"उडुम्बरो हिमो रूक्षो गुरुः पित्तकफास्रजित् ।
मधुरस्तुवरो वर्ण्यो व्रणशोधनरोपणः ॥"

यज्ञोपवीतं, क्ली, (यज्ञस्येदं उपवीतम् ।) यज्ञसूत्रम् । पैता इति भाषा । तत्पर्य्यायः । पवित्रम् २ ब्रह्मसूत्रम् ३ द्विजायनी ४ । इति त्रिकाण्डशेषः ॥ तस्य निरूपणं यथा । उपवीतमाह गोभिलः । यज्ञोपवीतं कुरुते सूत्रं वस्त्रं वा अपि वा कुशरज्जुमेव । यज्ञोपवीतं विधिदृष्टविन्यासधारणकर्म्मतया कुरुते । किं तत् सूत्रम् । सूत्रं विप्रोक्षयति छन्दोगपरिभाषितम् ।
"ऊर्द्धन्तु त्रिवृतं कार्य्यं तन्तुत्रयमधोवृतम् ।
त्रिवृतञ्चोपवीतं स्यात्तस्यैको ग्रन्थिरिष्यते ॥"
वामावर्त्तवलितं तन्तुत्रयं त्रिगुणं कृत्वा दक्षिणावर्त्तवलितं कार्य्यं एवं त्रिवृतं त्रिसत्यं उपवीतं स्यात् । एको ग्रन्थिरिति नानात्वनिषेधार्थम् । तथा बौधायनः ।
"कौशं सौत्रं त्रिवृत्तं यज्ञोपवीतमानाभेः ॥"
कौशं क्षौमकोषोद्भवं पट्टसूत्रादिमयमित्यर्थः । सौत्रं कार्पासोद्भवम् । तथा मनुः ।
"कार्पासमुपवीतं स्यात् विप्रस्योर्द्धवृतं त्रिवृत् ।
शणसूत्रमयं राज्ञो वैश्यस्याविकसौत्रिकम् ॥"
त्रिवृत्तमित्युक्तत्वात् मनुवचनेऽपि त्रिवृच्चात्र त्रिसत्यत्वेन विधेयम् । यत्तु पैठीनसिवचनम् । कार्पासमुपवीतं षट्तन्तु त्रिवृतं ब्राह्मणस्य । शौमं राजन्यस्य । आविकं वैश्यस्य । तन्नवतन्तुसम्भवे षट्तन्तुविधायकम् । नवतन्तुत्वं यत्तमाह देवलः ।
"यज्ञोपवीतं कुर्व्वीत सूत्राणि नव तन्तवः ।
एकेन ग्रन्थिना तन्तुर्द्विगुणस्त्रिगुणोऽथवा ॥"
एकेन ग्रन्थिना युक्त इति शेषः । द्विगुणस्त्रिगुणोऽथवेति । तन्तुबलेन द्विसप्तत्रिसप्तो वा कर्त्तव्यः । द्विसप्तत्वं त्रिसप्तत्वासम्भवे । गोभिले वाशब्दो विकल्पार्थः । अपिशब्दो वस्त्रकुशरज्ज्वोः सूत्रानुकल्पत्वप्रदर्शनार्थः । एवकारस्त्रिसप्तत्वव्यवच्छेदार्थः । द्वितीयो वाशब्दः अनुक्तमौञ्जबालादिसमुच्चयार्थः । तथा निगमपरिशिष्टम् । वाससा यज्ञोपवीतानि कुरुते तदभावे त्रिवृता सूत्रेण । कुशसुञ्जबालप्रतिसररज्जुभिर्व्वा । बालोऽत्र गोबालः । यथा देवलः ।
"कार्पासत्रौमगोबालशररज्जूद्भवं त्रिवृत् ।
सदा सम्भवतो धार्य्यमुपवीतं द्विजातिभिः ॥"
तदभाव इति करणादस्त्राभावे कुशरज्जुभिरिति बोद्धव्यम् । इति आह्निकतत्त्वम् ॥ * ॥ अथोपनयनदिनम् । तत्र गर्भाष्टमेऽब्दे ब्राह्मणस्योपनयनं प्रशस्तम् । क्षत्रियस्य गर्भैकादशे । गर्भद्वादशे वैश्यस्य प्रशस्तम् । अत्रासामर्थ्ये ब्राह्मणस्य षोड़शवर्षपर्य्यन्तमेव । क्षत्रियस्य द्वाविंशतिवर्षपर्य्यन्तम् । वैश्यस्य चतुर्व्विंशतिवर्षपर्य्यन्तं तदनुष्ठानकालः । तत्र मासाः माधफाल्गुनचैत्रवैशाखज्येष्ठाषाढ़ा विहिताः । तत्र तिथयः द्वितीयैकादश्यौद्वादश्यौपञ्चमीदशमीत्रयोदश्यो विहिताः । तत्र वाराः दृक्सिद्धिप्रकरणोक्ता प्रशस्ताः । सामगानां मङ्गलवारोऽपि । तत्र नक्षत्राणि । स्वातौ ध्रुवाणि धनिष्ठा अश्विनी अनुराधा हस्ता रेवती पुष्या चित्रा श्रवणा रुद्रशिरः प्रतिभिधा पूर्व्वफल्गुनी उत्तरफल्गुनी पूर्व्वभाद्रपदा उत्तरभाद्रपदा रोहिणी पूर्व्वाषाढ़ा । तत्र लग्नानि वृषसिंहतुलाधनुर्म्मीनसंज्ञकानि । तत्र पक्षः शुक्लः । तत्रचन्द्रादिशोधने अनध्यायादीन् परित्यज्य कर्त्तव्यम् । इति ज्योतिषतत्त्वमतम् ॥ * ॥ अथोपनयनम् । तत्र गोभिलः । गर्भाष्टमेऽब्दे ब्राह्मणमुपनयेत् गर्भैकादशे क्षत्रियं गर्भद्वादशे वैश्यम् । आषोड़शात् ब्राह्मणस्यानतीतः कालो भवति आद्वाविंशात् क्षत्रियस्य आचतुर्व्विंशात् वैश्यस्य । अत ऊर्द्धं पतितसावित्रीका भवन्ति । नैतानुपनयेयुर्नाध्यापयेयुर्न एभिर्व्विवाहयेयुः ॥ आषोड़शादित्यभिधावाड़ । तथा च विष्णुधर्म्मोत्तरम् ।
"षोड़शाब्दो हि विप्रस्य राजन्यस्य द्विविंशतिः ।
विंशतिः सचतुर्थी च वैश्यस्य परिकीर्त्तिता ॥
सावित्री नातिवर्त्तेत अत ऊर्द्धं पतत्यसौ ॥"
अत्र षोड़शवर्षादासुपनयनाङ्गता प्रतीयते ।
"पतिता यस्य सावित्री दश वर्षाणि पञ्च च ।
ब्राह्मणस्य विशेषेण तथा राजन्यवैश्ययोः ॥
प्रायश्चित्तं भवेदेषां प्रोवाच वदतां वरः ॥"
इति यमवचनेन तदनङ्गता प्रतीयते अनयोर्गर्भजन्मगणनाभ्यामविरुद्धता । तथा च माधवः ।
"व्रतबन्धविवाहे च वत्सरपरिगणनमाचुराचार्य्याः ।
आधानपूर्व्वकर्म्मके प्रसूतिपूर्व्वं सदार्द्धे तु ॥"
यत्तु द्विजानामित्युपक्रम्य पैठीनसिवचनम् । द्वादशषोड़शविंशतित्रिंशदीतीता अवरस्तकालाः भवन्ति । तद्द्वादशवर्षात्युपरि ब्राह्मणादीनां महाव्याहृतिहोमप्रायश्चित्तार्द्धं षोड़शवर्षोपरि गुरुप्रायश्चित्तमिति । तथा च प्रश्नलिखितौ । ब्रात्यस्याब्दायणं चरेत् गोप्रदानञ्च कुर्य्यात । चान्द्रायणाग्नी धेन्वष्टकं तस्यां वा सार्द्धद्वाविंशतिकार्षापणाः गोमूल्यं कार्षापण एकः मिलित्वा सार्द्धत्रयोविंशतिकार्षापणाः देयाः । पितृमातृरहितस्य निःस्वस्य देशोपप्लवादिना पतितसावित्रीकस्य वा विषये तु मनुर्विशेषः ।
"ज्येष्ठा द्विजानां सावित्री नातिलिष्टेद् यथाविधि ।
तां धारयित्वा त्रीन् कृच्छ्रान् यथाविधुपनाययेत् ॥"
कृच्छ्रं प्राजापत्यम् । तदग्नौ धेनुत्रयं तन्मूल्यं वा नव कार्षापणाः । अकृतप्रायश्चित्तं प्रत्याह नैतानित्यादि । तत्र बहुवचनं तत्कर्त्तृसंसर्गिणां प्रायश्चित्तप्रदर्शनार्थम् । तथा च सूत्रान्तरम् ।
"ब्रात्याचार्य्यस्य भुक्त्वान्नं कृच्छ्रपादेन शुध्यति ।
यज्ञोपनयते ब्रात्यान् त्रिभिः कृच्छ्रैः स शुध्यति ॥"
भुक्त्वेत्यत्र भोजनप्रतिनिधिभूतस्य पाकस्य ग्रहणम् ।
"स्वातीश्रवणधनिष्ठाभिश्चरमे पौष्णेऽश्विनी-हरि-
ज्येष्ठौ सोमपतौ भगेऽदितिसुते भाद्रद्वये सागरे ।
कैलक्ष्मे भृगुजेऽङ्गिरःप्रभृसुते चक्रे च तारे शुभे
कर्त्तव्यं व्रतकर्म्म मङ्गलतिथौ वारः सितार्कैन्दवः ॥"
अदितिसुत उत्तरफल्गुनी । सागरः पूर्व्वाषाढ़ा । दीपिकायाम् ।
"जीवार्केन्दुबुधौ हरिप्रियतनद्वित्र्यंशस्करे चोत्तरस्थे
स्वाध्याये वेदवर्णाधिप इह शुभदे चौरिभे नादितौ च ।
शुक्रार्केज्यर्क्षलग्ने रविमदनतिथिं प्रोज्झ्य षष्ठाष्टमेन्द्वं
नो जीवास्तातिचारेऽर्कसितगुरुदिने कालशुद्धौ व्रतं स्यात् ॥"
रविमदनतिथिं सप्तमीं त्रयोदशीम् । षष्ठाष्टमेन्दुं लग्नापेक्षया । कृत्यचिन्तामणौ ।
"माघे रविश्च प्रौलाढ्यः फाल्गुने च हरिप्रियः ।
चैत्रे भवति मेधावी वैशाखे कोविदो भवेत् ॥
ज्यैष्ठे गर्हणनीतिज्ञ आषाढ़े क्रतुभाजनः ।
शेषेष्वन्येषु रात्रिः स्यान्निषिद्धं निशि च व्रतम् ॥"
राजमार्त्तण्डः ।
"पुनर्व्रसौ कृतो विप्रः पुनःसंस्कारमर्हति ॥"
आश्वलायनः । उदगयने आपूर्य्यमाणे पक्षे कल्याणे नक्षत्रे कृष्णोपनयनगोदानविवाहाः । विवाहः सार्व्वकालिक इत्येके । आपूर्य्यमाणे पक्षे शुक्ले पक्षे । इति गर्गः ।

"स्तूतिमुक्तानन्यायान् सप्तमीञ्च त्रयोदशीम् ।
पक्षयोर्मासमासस्य द्वितीयां परिवर्ज्जयेत् ॥"
श्रीपतिश्चवहारमनुचये ।
"कार्त्तिकस्याश्विनस्यापि फाल्गुनाषाढ़यो-
रपि ।
कृष्णपक्षे द्वितीयायामनध्यायं विदुर्बुधाः ॥"
भुजबलः ।
"चैत्रकृष्णद्वितीयायां निरुच्छ्वासाष्टकासु च ।
मार्गे च फाल्गुने चैव आषाढ़े कार्त्तिके तथा ॥
पक्षयोर्मासमासस्य द्वितीयां परिवर्ज्जयेत् ।
नाकालवृष्टौ कुर्व्वीत व्रतवत्सरभुक्तियाम् ॥"
उपनयने उत्तरायणशुक्लपक्षयोर्विधानात् कार्त्तिकादौ कृष्णपक्षे च द्वितीयानिषेधः पुनः-संस्कारमर्हति इत्युक्तप्रायश्चित्तरूपोपनयनपरः। वेद्योपनयनपरञ्च । तथा च गर्गः ।
"विप्रस्य क्षत्रियस्यापि मौञ्जी स्यादुत्तरायणे ।
दक्षिणे च विप्रा कार्य्यं नानध्याये न संक्रमे ।
अनध्यायेऽपि कुर्व्वीत यस्य नैमित्तिकं भवेत् ॥"
अपिना दक्षिणायनकृष्णपक्षयोः समुच्चयः। नैमित्तिकं प्रायश्चित्तरूपम्। चैत्रशुक्लद्वितीया आषाढ़शुक्लदशमी मन्वन्तरादित्वेन निषिद्धा। वैशाखशुक्लतृतीया युगादित्वेन निषिद्धा। षष्ठ्यामग्निरुद्रभार्य्यो रिक्तासु चतुर्दशीभाक्। सामगानां कुजवारेऽप्युपनयनम्। श्रावणाधिपत्वात्। यथा च ।
"श्रावणाधिपे बलिनि केन्द्रगतेऽथवास्मिन्
वारेऽस्य चोपनयनं कथितं द्विजानाम् ।
नीचस्थितेरिगृहगेऽथ पराजिते वा
जीवे भृगावुपनयः स्मृतिकर्म्महीनः ॥"
अस्य श्रावणाधिपस्य । कृत्यचिन्तामणौ ।
"जन्मोदये जन्मसु तारकासु
मासेऽथवा जन्मनि जन्मभे वा ।
व्रतेन विप्रो न बहुश्रुतोऽपि
विद्याविशेषैः प्रथितः पृथिव्याम् ॥
अस्तं गते दैत्यगुरौ गुरौ वा
ऋक्षेऽपि वा पापयुतेऽप्यनुक्ते ।
व्रतोपनीतो दिवसे प्रणाशं
प्रयाति देवैरपि रक्षितो यः ॥"
उदये लग्ने । व्रतेन उपनयनेन । इति संस्कारतत्त्वम् ॥

यज्यूः, स्त्री, (यजतीति । यज् + "यजिमनिशुन्धिदसिजनिभ्यो युच् ।" उणा० ३ । २० । इति युच् ।) यजुर्व्वेदवेत्ता ब्राह्मणः । इत्युणादिकोषः ॥ यजमानः । इति संक्षिप्तसारोणादिवृत्तिः ॥ (यथा, ऋग्वेदे । १ । ३१ । १३ ।
"त्वमग्ने यज्ञये पाथुरन्तरोऽनिषङ्गाय ।"
"हे अग्ने त्वं यज्ञये यज्ञोर्यजमानस्य पायुः पालकः ।" इति तद्भाष्ये सायणः ॥)

यज्वा, [न्] पुं, (यज + "सुयजोर्ङ्वनिप् ।" ३ । २ । १०३ । इति ङ्वनिप् ।) विधिना इष्टवान् । वेदविधानेन कृतयागः । इत्यमरः । २ । ७ । ८ ॥ (यथा, नैषधचरिते । ३ । २४ ।
"राजा स यज्वा विबुधव्रजत्रा
क्रतोश्चराच्योपमयैव राज्यम् ।
सुरक्षके श्रितश्रोत्रियसात्क्रतघ्नीः
पूर्व्वं त्वहो प्रेयमप्रेयमन्त्यम् ॥")

यज्वनांपतिः, पुं, चन्द्रः । इति त्रिकाण्डशेषः ॥
यत्, ईं ङ यत्ने । इति कविकल्पद्रुमः ॥ (भ्वा०-आत्म०-अक०-सेट् । अनिड्निष्ठः ।) ईं, यत्तः । ङ, यतते पठितुं स्निग्धः । इति दुर्गादासः ॥
यत्, क खेदोपस्करयोः । इति कविकल्पद्रुमः ॥ (तुदा०-पर०-सक० सेट् ।) खेदः इह ताड़नम् । क, यातयति पुत्रं पिता ताड़यति इत्यर्थः । यातयति गृहं गृहिणी उपस्करोति इत्यर्थः । निरः प्रत्यर्पणे । प्रत्यर्पणं परीवर्त्तनं । निर्यातयति धान्येन माषान् लोकः धान्यं दत्त्वा माषान् गृह्णाति इत्यर्थः । इति दुर्गादासः ॥
यत्, अ, हेतुः । यस्मात् । इत्यमरः । ३ । ४ । ३ ॥ (यथा, उत्तररामचरिते ।
"अत्र स्थिता लक्ष्मणदान् वहूंश्च यदेभ्यः
सीता ततो हरिणकेन विमुच्यते स्म ॥")

यत्, [द्] त्रि, (यजति सर्व्वैः पदार्थैः सह सङ्गतो भवतीति । यज् + "व्यजितनियजिभ्यो डित् ।" उणा० १ । १३१ । इति अदिः डित् ।) बुद्धिस्थत्वोपलक्षितधर्म्मावच्छिन्नम् । इति न्यायमतसिद्धान्तकौमुद्युणादिवृत्तिश्च ॥ ये इति भाषा ॥ (एकविंशतिविभक्तिषु पुंलिङ्गे तस्य रूपाणि यथा, यः १ यौ २ ये ३ । प्रथमा । यम् ४ यौ ५ यान् ६ । द्वितीया । येन ७ याभ्याम् ८ यैः ९ । तृतीया । यस्मै १० याभ्याम् ११ येभ्यः १२ । चतुर्थी । यस्मात् १३ याभ्याम् १४ येभ्यः १५ । पञ्चमी । यस्य १६ ययोः १७ येषाम् १८ । षष्ठी । यस्मिन् १९ ययोः २० येषु २१ । सप्तमी ॥ * ॥ स्त्रीलिङ्गे तस्य रूपाणि यथा, या १ ये २ याः ३ । प्रथमा । याम् ४ ये ५ याः ६ । द्वितीया । यया ७ याभ्याम् ८ याभिः ९ । तृतीया । यस्यै १० याभ्याम् ११ याभ्यः १२ । चतुर्थी । यस्याः १३ याभ्याम् १४ याभ्यः १५ । पञ्चमी । यस्याः १६ ययोः १७ यासाम् १८ । षष्ठी । यस्याम् १९ ययोः २० यासु २१ । सप्तमी ॥ * ॥ क्लीवलिङ्गे तस्य रूपाणि । यत् १ ये २ यानि ३ । प्रथमा । यत् ४ ये ५ यानि ६ । द्वितीया । प्रायः पुंवत् ॥)
यतः, अ, (यद् + "पञ्चम्यास्तसिल् ।" ५ । ३ । ७ । इति तसिल् । "तद्धितश्चासर्व्वविभक्तिः ।" १ । १ । ३८ । इति तसिलप्रत्ययान्तस्याव्ययत्वम् ।) हेतुः । यस्मात् । इत्यमरः । ३ । ४ । ३ ॥ (यथा, मनुः । २ । ११७ ।
"लौकिकं वैदिकं वापि तथाध्यात्मिकमेव च ।
आददीत यतो ज्ञानं तं पूर्व्वमभिवादयेत् ॥"
यद् + "इतराभ्योऽपि दृश्यन्ते ।" ५ । ३ । १४ । इति तसिलप्रत्ययेन । येन । यथा, भागवते । २ । ५ । २ ।
"यद्रूपं यदधिष्ठानं यतः सृष्टमिदं प्रभो ! ॥"

यतिः, पुं, (यतते चेष्टते मोक्षार्थमिति । यत् + "सर्व्वधातुभ्य इन् ।" उणा० ४ । ११७ । इति इन् ।) निर्व्वर्त्तेन्द्रियग्रामः । तत्पर्य्यायः । यती २ । इत्यमरः । २ । ७ । ४४ ॥ भिक्षुः ३ संन्यासिकः ४ कर्म्मन्दी ५ रक्तवसनः ६ परिव्राजकः ७ तापसः ८ पराशरी ९ परिकाङ्क्षी १० मस्करी ११ पारिव्रज्यकः १२ । इति हेमचन्द्रः ॥ निकारः । विरतिः । इति तत्रैव नानार्थे ॥ * ॥ तस्य वाराणस्यां वासो यथा,—
"अष्टौ मासान् विहारस्य यतीनां संयतात्मनाम् ।
एकत्र चतुरो मासानब्दं वा निवसेत् पुनः ॥
अविमुक्ते प्रविष्टानां विहारस्तु न विद्यते ।
यतिभिर्मोक्षकामैश्च अविमुक्तं निषेव्यते ॥"
इति मात्स्ये अविमुक्तमाहात्म्ये १५६ अध्यायः ॥
यतिधर्म्मो यथा,—
"अलाबुं दारुपात्रञ्च मृण्मयं वैदलं तथा ।
एतानि यतिपात्राणि मनुः स्वायम्भुवोऽब्रवीत् ॥
एककालं चरेद्भैक्ष्यं न प्रसज्जेत विस्तरे ।
भैक्ष्ये प्रसक्तो हि यतिर्विषयेष्वपि सज्जति ॥
विधूमे सन्नमुसले व्यङ्गारे भुक्तवज्जने ।
वृत्ते शरावसम्पाते भिक्षां नित्यं यतिश्चरेत् ॥
अलाभे न विषादी स्यात्लाभे चैव न हर्षयेत् ।
प्राणयात्रिकमात्रः स्यान्मात्रासङ्गाद्विनिर्गतः ॥
अभिपूजितलाभांस्तु जुगुप्सेतैव सर्व्वशः ।
अभिपूजितलाभैश्च यतिर्भुक्तोऽपि बध्यते ॥

अल्पान्नाभ्यवहारेण रहःस्थानासनेन च ।
ह्रियमाणानि विषयैरिन्द्रियाणि निवर्त्तयेत् ॥
इन्द्रियाणां निरोधेन रागद्वेषक्षयेण च ।
अहिंसया च भूतानामृष्टतत्वाय कल्पते ॥
अवेक्षेत गतीर्नृणां कर्म्मदोषसमुद्भवाः ।
निरये चैव पतनं यातनाश्च यमक्षये ॥
विप्रयोगं प्रियैश्चैव संयोगञ्च तथाप्रियैः ।
जरया चाभिभवनं व्याधिभिश्चोपपीडनम् ॥
देहादुत्क्रमणञ्चास्मात् पुनर्गर्भे च सम्भवम् ।
योनिकोटिसहस्रेषु सृतीश्चास्यान्तरात्मनः ॥
अधर्म्मप्रभवञ्चैव दुःखयोगं शरीरिणाम् ।
धर्म्मार्थप्रभवञ्चैव सुखसंयोगमक्षयम् ॥
सूक्ष्मतान्वावेक्षेत योगेन परमात्मनः ।
देहेषु च समुत्पत्तिमुत्तमेष्वधमेषु च ॥
दूषितोऽपि चरेद्धर्म्मं यत्र तत्राश्रमे रतः ।
समः सर्व्वेषु भूतेषु न लिङ्गं धर्म्मकारणम् ॥
फलं कतकवृक्षस्य यद्यप्यम्बुप्रसादकम् ।
न नामग्रहणादेव तस्य वारि प्रसीदति ॥
संरक्षणार्थं जन्तूनां रात्रावहनि वा सदा ।
शरीरस्यात्मनश्चैव समीक्ष्य वसुधां चरेत् ॥
अद्भिः राज्ञा च यान् जन्तून् हिनस्त्यज्ञानतो
यतिः ।
तेषां स्नात्वा विशुद्ध्यर्थं प्राणायामान् समाचरेत् ॥
प्राणायामा ब्राह्मणस्य त्रयोऽपि विधिवत् कृताः ।
व्याहृतिप्रणवैर्युक्ता विज्ञेयं परमं तपः ॥
दह्यन्ते ध्मायमानानां धातूनां हि यथा मलाः ।
तथेन्द्रियाणां दह्यन्ते दोषाः प्राणस्य निग्रहात् ॥
प्राणायामैर्दहेद्दोषान् धारणाभिश्च किल्बिषम् ।
प्रत्याहारेण संसर्गान् ध्यानेनानीश्वरान् गुणान् ।
उच्चावचेषु भूतेषु दुर्ज्ञेयामकृतात्मभिः ।
ध्यानयोगेन सम्पश्येत् गतिमस्यान्तरात्मनः ॥
सम्यग्दर्शनसम्पन्नः कर्म्मभिर्न निबध्यते ।
दर्शनेन विहीनस्तु संसारं प्रतिपद्यते ॥
अहिंसयेन्द्रियासङ्गैर्वैदिकैश्चैव कर्म्मभिः ।
तपसश्चरणैश्चोग्रैः साधयन्तीह तत् पदम् ॥
अस्थिस्थूणं स्नायुयुतं मांसशोणितलेपनम् ।
चर्म्मावनद्धं दुर्गन्धिपूर्णं मूत्रपुरीषयोः ॥
जराशोकसमाविष्टं रोगायतनमातुरम् ।
रजस्वलमनित्यञ्च भूतावासमिमं त्यजेत् ॥
नदीकूलं यथा वृक्षो वृक्षं वा शकुनिर्यथा ।
तथा त्यजन्निमं देहं कृच्छ्राद्व्याधादिवोच्यते ॥
प्रियेषु स्वेषु सुकृतमप्रियेषु च दुष्कृतम् ।
विसृज्य ध्यानयोगेन ब्रह्माभ्येति सनातनम् ॥
यदा भावेन भवति सर्व्वभावेषु निस्पृहः ।
तदा सुखमवाप्नोति प्रेत्य चेह च शाश्वतम् ॥
अनेन विधिना सर्व्वान्परित्यज्य सङ्गान् शनैः शनैः ।
सर्व्वद्वन्द्वविनिर्म्मुक्तो ब्रह्मण्येवावतिष्ठते ॥
ध्यानिकं सर्व्वमेवैतत् यदेतदभिशब्दितम् ।
न ह्यनध्यात्मविन् कश्चित् क्रियाफलमुपाश्नुते ॥
अधियज्ञं ब्रह्म जपेदाधिदैविकमेव च ।
आध्यात्मिकञ्च सततं वेदान्तेष्वभिदृष्टवान् यत् ॥
इदं शरणमज्ञानामिदमेव विजानताम् ।
इदमन्विच्छतां स्वर्गमिदमानन्त्यमिच्छताम् ॥
अनेन क्रमयोगेन परिव्रजति यो द्विजः ।
स विधूयेहपाप्मानं परं ब्रह्माधिगच्छति ॥"

इति मानवे ६ अध्यायः ॥

(ब्रह्मणः पुत्रविशेषः । यथा, श्रीमद्भागवते ।४।८।१ ।
"सनकाद्या नारदश्च ऋभुर्हंसोऽरुणिर्यतिः ।
नैते गृहान् ब्रह्मसुता ह्यावसन्नूर्द्ध्वरेतसः ॥"
नहुषपुत्रः । यथा, महाभारते ।१।७५।३०।
"यतिं ययातिं संयातिमायातिमयतिं ध्रुवम् ।
नहुषो जनयामास षट्सुतान् प्रियवाससि ॥"
विश्वामित्रपुत्रः । यथा, महाभारते ।१३।४।५७।
"आरण्यिनाचिकश्चैव चाग्नेयोऽथयनौ तथा ।
नवनस्तूर्व्वकनखः सयनो यतिरेव च ॥"
चि । कर्म्मठपरतोऽयष्टा । यथा, ऋग्वेदे ।
८ । ३ । ६ ।
"येनायतिभ्यो भृगवे धने हिते
येन प्रस्कण्वमाविथ ॥"
"येन सुवीर्य्याय यतिभ्यः कर्म्मठपरतेभ्योऽयष्टृभ्यो
जनेभ्यः सकाशात् धनमाहृत्य भृगवे महर्षये
प्रयच्छसि ।" इति तद्भाष्ये सायणः ॥)
यतिः, स्त्री, (यम्यते रमनाच्चेति । यम् + "स्त्रियां क्तिन् ।" ३ । ३ । ९४ । इति क्तिन् । "अनुदात्तोपदेशवनतितनोत्यादीनामिति ।" ६ । ४ । ३७ । इति मकारलोपः ।) पाठविच्छेदः । इति मेदिनी । ते, ४६ ॥ निर्द्देशविश्रामस्थानम् । यथा,—
"यतिर्निर्द्देशविश्रामस्थानं कविभिरुच्यते ।
सा विच्छेदविरामाद्यैः पदैर्व्याख्या निजेच्छया ॥
क्वचिच्छन्दस्यासौ यतिरभिहिता पूर्व्वकृतिभिः
पदान्ते सा शोभां व्रजति पदमध्ये त्यजति च ।
पुनस्तच्चेवासौ स्वरविहितसन्धिः श्रयति तां
यथा क्षुण्णः पुण्यात्वतुलमहिमा मां कृपयता ॥
श्रेयमाणश्रयसुरुचास्तु नक्षन्ति सुधियो यतिम् ।
इत्याह भट्टः स्वयमयं गुरुर्मे पुरुषोत्तमः ॥"

इति छन्दोमञ्जरी । १ । १६ - १८ ॥
(नियम्यते इति । यम् + क्तिन् । यतते चेष्टते व्रतादिरत्वार्थं इति वा । यत + "सर्व्वधातुभ्य इन् ।" उणा० ४।११७। इति इन् ।) विधवा । रागः । सन्धिः । इति शब्दरत्नावली ॥ वाद्याङ्गप्रबन्धविशेषः । यथा,—
"यतिरोढ्याष्टवक्त्रेदो गजरो रूपकं ध्रुवम् ।
गनपः सारिगोर्गी च नादश्च कथितं तथा ।
प्रहरणं वृन्दनञ्च प्रबन्धा द्वादश स्मृताः ॥"
यथा दं धातः । इत्येकतालो यतिः । इति सङ्गीतदामोदरः ॥ (सा त्रिविधा । यथा, मार्कण्डेयपुराणे । २३ । ५३ ।
"चतुर्विधं पदं तालं त्रिःप्रकारं लयत्रयम् ।
यतित्रयं तथा तोद्यं मया दत्तं चतुर्विधम् ॥")
यतिचान्द्रायणं, क्ली (यतिभिरनुष्ठेयं चान्द्रायणम् ।) व्रतविशेषः । यथा,—
"अथाष्टमीं समश्नीयात् पिण्डान् मध्यदिने स्थिते ।
नियतात्मा हविष्याशी यतिचान्द्रायणं चरन् ॥"

इति मानवे ११ अध्यायः ॥
यतिचान्द्रायणे प्रादौनधेनुचतुष्टयं तदग्रतो सपादैकादशग्रकार्षापणाः । इति प्रायश्चित्तविवेकः ॥
यतिनी, स्त्री, (यतं संयमोऽस्या अस्तीति । यत + इनिः । स्त्रियां ङीप् ।) विधवा । यथा,—
"विधवा जानिका रण्डा विश्वस्ता यतिनी
यतिः ॥"

इति शब्दरत्नावली ॥
यतिमैथुनं, क्ली, (यतीनां दृष्टयतीनामिव गोपनीयं मैथुनम् ।) यतिगोप्यरतिः । तत्पर्य्यायः । रक्षनरतम् २ । इति त्रिकाण्डशेषः ॥
यती, स्त्री, (यतिः । स्त्रादिकादादिति स्त्रियां ङीष् ।) विधवा । इति शब्दरत्नावली ॥
यती, [न्] पुं, (यतं संयमोऽस्यास्तीति । यत + इनिः ।) यतिः । जितेन्द्रियः । इत्यमरः । २ । ७ । ४४ ॥ (यथा, मुग्धबोधे कारकप्रकरणे ।
"दृष्ट्वा दधि शारकमेतदधीका-
नुज्ञातवन्तं यतिभिः सुदर्शनम् ॥")
यतुका, यतूका, } स्त्री, (यत् + बाहुलकात् उकन् पक्षे ऊक । स्त्रियां टाप् ।) वृश्चिकविशेषः । यथा,—
"रजनी स्यात्तु यतुका यतूका जननीति च ॥"

इति शब्दरत्नावली ॥
यत्नः, पुं, (यत + "यजयाचयतविच्छप्रच्छरक्षो नङ् ।" ३ । ३ । ९० । इति नङ् ।) रूपादिचतुर्व्विंशतिगुणान्तर्गतगुणविशेषः । स च त्रिविधः । प्रवृत्तिः १ निवृत्तिः २ जीवनयोनिः ३ । यथा,—
"प्रवृत्तिश्च निवृत्तिश्च तथा जीवनयोनयः ।
एवं प्रयत्नैर्विधं तान्त्रिकैः परिकीर्त्तितम् ॥"
तेषां कारणं यथा,—
"चिकीर्षा कृतिसाध्येऽसाधनत्वमतिक्षया ।
उपादानस्य चाध्यक्षं प्रवृत्तौ जनकं भवेत् ॥
निवृत्तिस्तु भवेद्वेषाद्विष्टसाधनताधियः ।
यत्नो जीवनयोनिस्तु सर्व्वदातीन्द्रियो भवेत् ।
शरीरे प्राणसञ्चारे कारणं तन् प्रकीर्त्तितम् ॥"

इति भाषापरिच्छेदः ॥
उद्योगः । यथा,—
"उद्योगिनं पुरुषसिंहमुपैति लक्ष्मी-
र्दैवेन देयमिति कापुरुषा वदन्ति ।
दैवं निहत्य कुरु पौरुषमात्मशक्त्या
यत्ने कृते यदि न सिध्यति कोऽत्र दोषः ॥"

इति हितोपदेशः ॥
यत्नवान्, [त्] त्रि, यत्नविशिष्टः । यत्नशब्दात् वतुप्रत्ययेन निष्पन्नः ॥ (यथा, हरिवंशे ।८६।८।
"कंसेनापि समाज्ञप्तश्चानूरः पूर्व्वमेव तु ।
योद्धव्यं सह कृष्णेन त्वया यत्नवतेति वै ॥")
यत्र, इ क संकोचने । इति कविकल्पद्रुमः ॥ (चुरा०-पर०-सक०-सेट् ।) दन्त्यवर्गाद्योपधः । इ क, यत्नयति मन्त्रेण सर्पं जाङ्गलिकः । यत्न

इत्यनेनैवेष्टसिद्धे इदनुबन्धो वेदेषूच्चारणभेदार्थः। इति दुर्गादासः॥

यत्र, व्य, यस्मिन्। येखाने इति भाषा। यच्छब्दात् सप्तम्यास्तल्प्रत्ययेन निष्पन्नम्। इति सिद्धान्तकौमुदी॥ (यथा, श्रीमद्भगवद्गीतायाम्।

"यत्र यत्र मनो देही धारयेत् सकलं धिया।
स्नेहाद्वा यदि वा लोभाद् याति तत्तत् सरूपताम्॥")

यथा, व्य, सादृश्यम्। साम्यम्। तत्पर्य्यायः। वत् २ वा ३ तथा ४ एव ५ एवम् ६। इत्यमरः। ३। ४। ६॥ (यथा, उत्तररामचरिते। २। ४।

"वितरति गुरुः प्राज्ञे विद्यां यथैव तथा जड़े
न च खलु तयोर्ज्ञाने शक्तिं करोत्यपहन्ति च।
भवति च तयोर्भूयान् भेदः फलं प्रति तद्यथा
प्रभवति शुचिर्बिम्बोद्ग्राहे मणिर्न मृदां चयः॥")

यथाकामी, [न्] त्रि, (यथा कामयते इति। कामि+णिनिः। यद्वा, काममनतिक्रम्य प्रवृत्तिरस्यास्तीति। यथाकाम+अत इनिठनाविति इनिः।) स्वेच्छाचारी॥ तत्पर्य्यायः। स्वरुचिः २ स्वच्छन्दः ३ स्वैरी ४ अपावृतः ५ स्वतन्त्रः ६ निरवग्रहः ७। इति हेमचन्द्रः। ३। १६॥ नियन्त्रणः ८। इति जटाधरः॥ (यथा, याज्ञवल्क्यसंहितायाम्। १। ८१।

"यथाकामी भवेद्वापि स्त्रीणां वरमनुस्मरन्।
स्वदारनिरतश्चैव स्त्रियो रक्ष्या यतः स्मृताः॥")

यथाक्रमं, व्य, क्ली, क्रमानुरूपम्। क्रममनतिक्रम्येति व्याकरणम्॥ (यथा, रघुवंशे। ३। १०।

"यथाक्रमं पुंसवनादिकाः क्रियाः
पृतेश्च धीरः सदृशीर्वधत्त सः॥")

अपि च।

"यथाक्रमेण पुत्रेण कार्य्या प्रेतक्रिया सदा।
पतितापतिता वापि एकोद्दिष्टविधानतः॥"

इति आह्निकतत्त्वम्॥

यथाजातः, त्रि, (यथा न जातः इति यथाजातः। जातोऽपि पुत्रादिरजात इव प्रतीयते विद्यया शौर्य्येण वा न कैरपि विदितत्वात्।) मूर्खः। इत्यमरः। ३। १। ४८॥ नीचः। इति जटाधरः॥

यथातथं, व्य, क्ली, (यथा वर्त्तते तथानतिक्रम्य इति अनतिवृत्तौ अव्ययीभावः। अव्ययीभावश्च। २। ४। १८। इति नपुंसकत्वम्। "इखो नपुंसके प्रातिपदिकस्य।" १। २। ४७। इति ह्रस्वः। "नाव्ययीभावादतोऽमृत्वपञ्चम्याः।" २। ४। ८३। इति प्रथमाविभक्तेरमादेशः।) यथार्थम्। इति हारावली॥ (यथा, श्रीमद्भागवते। ६। १। ४१।

"येन स्वधाम्नामी भावा रजःसत्त्वतमोमयाः।
गुणनामक्रियारूपैर्विभाव्यन्ते यथातथम्॥")

यथापूर्व्वं, व्य, क्ली, (पूर्व्वमनतिक्रम्य इत्यव्ययीभावः।) पूर्व्वदिग्देशकालानुरूपम्। यथा,—

"अक्षतायां प्रतिष्ठायां प्राणानां प्रतिमासु च।
यथापूर्व्वं यथा भावः स्वर्गादीनां न विप्लुता॥"

इति तिथ्यादितत्त्वधृतकालिकापुराणवचनम्॥

यथासुखीनः, त्रि, (यथासुख+"यथासुखसंमुखस्य दर्शनः खः।" ५। २। ६। इति खः।) सुखप्रतिविम्बाश्रयः। सुखस्य सदृशं यथासुखं प्रतिविम्बं निपातनात् सादृश्येऽव्ययीभावः। यथासुखं दर्शनः यथासुखीनः। इति सिद्धान्तकौमुदी॥ अपि च।

"ततश्चीयमाणोऽसौ हेमरत्नमयो मृगः।
यथासुखीनः सीतायाः पुप्लुवे बहु लोभयन्॥"

इति भट्टिः॥

सुखस्य सदृशं यथासुखं दर्पणादिस्थप्रतिविम्बमुच्यते। सादृश्यार्थेऽव्ययीभावः। इति भरतः॥ निर्म्मलत्वात् सीतायाः अयतो यथासुखीनः प्रतिविम्बाश्रय इव भूत्वा पुप्लुवे भ्रमति स्म इवशब्दलोपो द्रष्टव्यः। इति जयमङ्गलः॥

यथायथं, व्य, क्ली, ("यथाऽसादृश्ययोगयथम्।" ८। १। १४। योऽयमात्मा यच्चात्मीयं तद्यथाखम्। तस्मिन् यथाग्रब्दस्य द्वित्वं क्लीवत्वञ्च निपात्यते। यथायथं ज्ञाता यथाखभावमित्यर्थः यथात्मीयमितिवेति। इति सिद्धान्तकौमुदी।) यथाखम्। इत्यमरः। ३। ४। १५॥ (अनुरूपम्। यथा, श्रीमद्भागवते। १०। १८। १६।

"तत्रोपाहूय गोपालान् कृष्णः प्राह विहारवित्।
हे गोपा विहरिष्यामो हन्दीभूय यथायथम्॥"

"यथायथं वयोवर्णाद्यनुरूपम्।" इति तट्टीकायां श्रीधरस्वामी॥ यथा च,—

"लिङ्गमयक्तमस्पत्वात् व्याधीनां तद्यथा यथम्॥"

इति वाग्भटे निदानस्थाने प्रथमेऽध्याये॥

"यथायथं यस्य व्याधेर्यद्रूपं तदेवाव्यक्तम्।"

इति तद्व्याख्याने विजयरक्षितः॥)

यथार्थं, व्य, क्ली, यथातथम्। इत्यमरः। ३। ४। १५॥

"हे अव्यभिचारिणि। अर्थमनतिक्रान्तं यथार्थं यथास्वरूपं यथातथं उभयत्र अव्ययीभावः। यथार्थमेवेदम्। यथातथं वक्ति सभासु विद्वान्।"

इति भरतः॥ तत्पर्य्यायः।

"सत्यं सम्यक् समीचीनमृतं तथ्यं यथातथम्।
यथास्थितञ्च सद्भूतेऽलीके तु वितथानृते॥"

इति हेमचन्द्रः॥

(यथा, महाभारते। १३। ६। १८।

"कृतञ्चापकृतं किञ्चित् कृते कर्म्मणि सिध्यति।
सुकृतं दुष्कृतं कर्म्म न यथार्थं प्रपद्यते॥")

यथार्हं, व्य, क्ली, (अर्हं योग्यमनतिक्रम्य इत्यव्ययीभावः।) यथायोग्यम्। यथा,—

"कृत्वा तु तौ यथान्यायं यथार्हेणैन संविदम्।
उपविष्टौ कथाः काश्चिच्चक्रतुर्वैश्यपार्थिवौ॥"

इति देवीमाहात्म्यम्॥

यथार्हवर्णः, पुं, (यथार्हं यथायोग्यं वर्णयतीति। वर्ण+अच्।) चरः। इत्यमरः। २। ८। १३॥

यथायोग्यमचरं रूपं जातिश्च॥

यथाशक्ति, व्य, क्ली, शक्त्यनुसारेण। शक्तिमनतिक्रम्य। इति सुग्धबोधव्याकरणम्॥ (यथा, श्रीमद्भागवते। ६। १२। १६।

"पश्य मां निर्जितं शत्रुं तृक्णायुधभुजं मृधे।
घटमानं यथाशक्ति तव प्राणजिहीर्षया॥")

यथाशास्त्रं, व्य, क्ली, शास्त्रानुसारेण। शास्त्रमनतिक्रम्य। यथा, मलमासतत्त्वे।

"यथाशास्त्रञ्च निर्णीतो यथाव्याधि चिकित्सितः।
न शमं याति यो व्याधिः स ज्ञेयः कर्म्मजो बुधैः॥"

यथास्थितं, त्रि, सत्यम्। इति हेमचन्द्रः। २। १६६॥

यथास्वं, व्य, क्ली, (स्वमनतिक्रम्येत्यव्ययीभावः।) यथावाञ्छितम्। इत्यमरः॥ (यथा, सुश्रुते चिकित्सास्थाने ८ अध्याये।

"बन्धं ततोऽनुकुर्व्वीत परिषेयस्तु सर्पिषा।
तृतीये दिवसे मुक्ता यथास्वं प्रोधयेद्भिषक्॥")

यथेप्सितं, व्य, क्ली, (ईप्सितमनतिक्रम्येति।) यथावाञ्छितम्। (यथा, भट्टिकाव्ये। २। २८।

"तान् प्रत्यवादीदथ राववोऽपि
यथेप्सितं प्रस्तुतकर्म्म धर्म्यम्।
तपो मरुद्भिर्भवतां प्रशान्तिः
सन्तुष्यतां नोऽरिसमित्समेषु॥")

तत्पर्य्यायः। कामम् २ प्रकामम् ३ पर्य्याप्तम् ४ निकामम् ५ इष्टम् ६। इत्यमरः। २। ६। ५७॥ षट् इष्टानतिक्रमे स्वच्छन्दप्रवृत्तौ कामादीनि प्रायः क्रियाविशेषणानि क्रियाविशेषणत्वात् क्लीवत्वमेषाम्। ईप्सितस्यानतिक्रमो यथेप्सितमित्यव्ययीभावः। इति भरतः॥

यथेष्टं, व्य, क्ली, इष्टमनतिक्रम्य। यथेप्सितम्। यथा,—

"कुर्य्युर्यथेष्टं तत् सर्व्वमीशास्ते स्वधनस्य वै॥"

इति दायभागः॥

यथेष्टचारी, [न्] पुं, (यथेष्टं चरतीति। चर+णिनिः।) पक्षी। इति शब्दचन्द्रिका॥

यथेष्टाचरणः, त्रि, (यथेष्टं आचरणं यस्य।) यथेष्टाचारी। यथा,—

"क्रियाहीनस्य मूर्खस्य महारोगिण एव च।
यथेष्टाचरणस्याहुर्मरणान्तमशौचकम्॥"

यथेष्टाचरणस्य द्यूतवेश्याद्यासक्तस्य। इति शुद्धितत्त्वम्॥

यथेष्टाचारी, [न्] पुं, स्वेच्छाचारी। यथेष्टमाचरितुं शीलमस्य इत्यर्थे इन्प्रत्ययेन निष्पन्नः॥

यथोचितं, व्य, क्ली, (उचितमनतिक्रम्येति।) यथायोग्यम्। यथाप्राप्तम्। यथा। "अंशो भंशो यथोचितात्।" इत्यमरः। २। ८। २३॥ यथा च श्रीमद्भागवते। ४। २२। ५०।

"कर्म्माणि च यथाकालं यथादेशं यथाबलम्।
यथोचितं यथावित्तमकरोद्ब्रह्मसात्कृतम्॥"

त्रि, यथोचितमस्यास्तीति। अर्श आद्यच्। यथार्हः। यथा, मार्कण्डेये। १६। ३८।

"वयमाप्यायिता मर्त्ययज्ञभागैर्यथोचितैः।
तृष्णा तानुग्रहीमो मर्त्यान् ग्रस्यादिसिद्धये॥"

यथोदितं, व, क्ली, (उदितं कथितमनतिक्रम्य इत्यव्ययीभावः।) यथोक्तम्। यथा,—
"यथोदितन्ते पितृभिः कुरु दारपरिग्रहम्॥"
इति मार्कण्डेयपुराणे रुचिस्तोत्रम्॥

यदा, व, (यस्मिन् काले इति। यद्+"सर्व्वैकान्यकिंयत्तदः काले दा।" ५।३।१५। इति दा।) यस्मिन् काले। यथा,—
"यदा यदा सतां हानिर्व्वेदमार्गानुसारिणाम्।
तदा तदा कल्किर्वृद्धिरनुमेया विचक्षणैः॥"
इति तिथ्यादितत्त्वधृतवचनम्॥

यदि, व, पक्षान्तरम्। सम्भावना। तत्पर्य्यायः। चेत् २ यद्युवा ३। यथा,—
"यदीच्छेद्विपुलान् भोगान् चन्द्रसूर्य्यग्रहोपमान्।
प्रातःस्नायी भवेन्नित्यं द्वौ मासौ माघफाल्गुनौ॥"
इति मलमासतत्त्वम्॥
"अपि चेत् सुदुराचारो भजते मामनन्यभाक्।
साधुरेव स मन्तव्यः सम्यग्व्यवसितो हि सः॥"
इति श्रीभगवद्गीता॥
"यद्युवाल्पतरसम्भारः स्यादपि पशुनेव कुर्य्यात् इति। यद्युवेति निपातसमुदायो यद्यर्थे।" इति तिथ्यादितत्त्वम्॥

यदीय, त्रि, (यस्येदमिति। यद्+"वृद्धाच्छः।" ४।२।११४। इति छः।) यत्सम्बन्धि। यथा,
"यदीयफलतो विलोक्य विपदं
कलिन्दतनया जलोद्वतगतिः।
विलासविपिनं विवेश सहसा
करोतु कुशलं फली स जगताम्॥"
इति छन्दोमञ्जर्य्यां द्वितीयस्तवकः॥

यदुः, पुं, (यजते इति। यज्+उः। पृषोदरादित्वात् जस्थाने दकारः।) देवयान्यां जातो ययातेर्ज्येष्ठपुत्रः। तस्य वंशे पितृशापात् राजाचक्रवर्त्ती नासीत्। तदंशे द्वापरयुगस्यान्ते श्रीकृष्णोऽवतीर्णः। इति श्रीभागवतमतम्॥ तस्य मातुलकन्याविवाहकारणं यथा,—
"जरां प्राप्य ययातिस्तु स्वपुरं प्राप्य चैव ह।
पुत्रं ज्येष्ठं वरिष्ठञ्च यदुमित्यब्रवीद्वचः॥
त्वं यदो! प्रतिपद्यस्व पाप्मानं जरया सह।
यौवनेन त्वदीयेन चरेयं विषयानहम्॥
पूर्णे वर्षसहस्रे तु पुनस्ते यौवनं त्वहम्।
दत्त्वा संप्रतिपत्स्यामि पाप्मानं जरया सह॥
यदुरुवाच।
सितश्मश्रुधरो दीनो जरया शिथिलीकृतः।
बलीसन्ततगात्रश्च दुर्ब्बर्षो दुर्ब्बलः क्षुधः॥
अशक्तः कार्य्यकरणे पापभूतश्च यौवने।
सहोपजीविभिश्चैव तां जरां नैव कामये॥
सन्ति ते बहवः पुत्रा मत्तः प्रियतरा नृप!।
जरां ग्रहीतुं धर्म्मज्ञ! पुत्रमन्यं वृणीष्व वै॥
ययातिरुवाच।
यो मे त्वं हृदयाज्जातो वयः स्वं न प्रयच्छसि।
पापाच्मातुलसम्बन्धात् प्रजा वै ते भविष्यति॥"
इति मात्स्ये ३१ अध्यायः॥ * ॥
(हर्य्यश्वराजपुत्रः। यथा, हरिवंशे। ६३।४४।

"तस्यैवं सुप्रवृत्तस्य पुत्रकामस्य धीमतः।
मधुमत्यां सुतो जज्ञे यदुर्नाम महायशाः॥")
यदुनाथः, पुं, (यदूनां नाथः।) श्रीकृष्णः। इति हेमचन्द्रः। २। १३३॥
यदुपतिः, पुं, (यदूनां पतिः।) श्रीकृष्णः। यथा—
"यदुपतेः क्व गता मथुरापुरी
रघुपतेः क्व गतोत्तरकोशला।
इति विचिन्त्य कुरुष्व मनः स्थिरं
न सदिदं जगदित्यवधारय॥"
इति रूपसनातनगोस्वामिनौ॥
यदृच्छा, स्त्री, स्वातन्त्र्यम्। तत्पर्य्यायः। स्वैरिता २। इत्यमरः। ३।२।२॥ स्वरिता ३। इति तट्टीका॥ (यथा, गीतायाम्। २। ३२।
"यदृच्छया चोपपन्नं स्वर्गद्वारमपावृतम्।
सुखिनः क्षत्रियाः पार्थ! लभन्ते युद्धमीदृशम्॥")
यद्युवा, व, यदि। यथा। "यद्युवाल्पतरसम्भारः स्यादपि पशुनेव कुर्य्यात्। यद्युवेति निपातसमुदायो यद्यर्थे। अपि च। यद्युवा उभयं चिकीर्षन्हौत्रं ब्रह्मत्वञ्च इति तेनैव कल्पेन क्षत्रमुत्तरासङ्गं सोदकं कमण्डलुं दर्भवटुं वा ब्रह्मासने निधाय तेनैव प्रत्यावृत्यान्यच्चेष्टेत्।" इति तिथ्यादितत्त्वम्॥
यद्वा, स्त्री, वृद्धिः। इति संक्षिप्तसारोणादिवृत्तिः॥ पक्षान्तरञ्च॥
यन्ता, [ऋ] पुं, (यम्+तृच्।) सारथिः। (यथा, रघौ। ७। ४४।
"प्रहारमूर्च्छापगमे रथस्था
यन्तॄनुपालभ्य निवर्त्तिताश्वान्।
यैः साहिता लक्षितपूर्व्वकेतून्
तानेव सामर्षतया निजघ्नुः॥")
हस्तिपकः। इत्यमरः। ३। ३। ५६॥ (यथा, माघे। ५। ४२।
"सेयोऽपि सानुनयमाकलनाय यन्त्रा
नीतेन वन्यकरिदानलताधिवासः।
नाभाजि केवलमभाजि गजेन घ्राणौ
नाप्यस्य गन्धमपि मानभृतः सहन्ते॥")
विरतिकारके, त्रि॥
यन्त्रं, क्ली, (यच्छत्यत्रेति। यम+"गुधृवीपचिवचियमिसदित्तदिभ्यस्त्रः।" उणा० ४। १६६। इति त्रः।) देवाद्यधिष्ठानम्॥ (यथा, देवीभागवते। ३। २६। २१।
"अर्घाभावे तथा यन्त्रं नवार्णमन्त्रसंयुतम्।
स्थापयेत् पीठपूजार्थं कलसं तत्र पार्श्वतः॥")
पात्रभेदः। नियन्त्रणम्। इति हेमचन्द्रः॥ अग्नियन्त्रम्। इति महाभारतटीकायां नीलकण्ठः॥ कामान् वल्गुक इत्यादि भाषा॥ * ॥ वाद्यम्। यथा,—
"यन्त्रस्य गुणदोषौ न विचार्य्यौ मधुसूदन!।
अहं यन्त्रं भवान् यन्त्री न मे दोषा न मे गुणाः॥"
इति महाभारतम्॥
दारुयन्त्रादि। कल इति भाषा। यथा,—
"ईश्वरः सर्व्वभूतानां हृद्देशेऽर्জ্জুন! तिष्ठति।

भ्रामयन् सर्व्वभूतानि यन्त्रारूढ़ानि मायया॥"
इति श्रीभगवद्गीतायाम्। १८। ६१॥
अस्यार्थः। "सर्व्वभूतानां हृन्मध्ये ईश्वरोऽन्तर्यामी तिष्ठति। किं कुर्व्वन् सर्व्वाणि भूतानि मायया निजशक्त्या भ्रामयंस्तत्तत्कर्म्मसु प्रवर्त्तयन् यथा दारुयन्त्रमारूढ़ानि क्षुद्रिमाणि भूतानि सूत्रधारो लोके भ्रामयति तद्वदिति। यद्वा यन्त्राणि शरीराणि आरूढ़ानि भूतानि देहाभिमानिनो जीवान् भ्रामयन्नित्यर्थः।" इति श्रीधरस्वामी॥
अथ पूजाधारयन्त्रम्। तत्र नारदीये।
"आपोऽग्निर्हृदयं चक्रं विष्णोः क्षेत्रसमुद्भवम्।
यन्त्रञ्च प्रतिमास्थानमर्च्चने सर्व्वदा हरेः॥"
गौतमीये।
"शालग्रामे मणौ यन्त्रे प्रतिमामण्डलेषु च।
नित्यं पूजा हरेः कार्य्या न तु कैवलभूतले॥"
योगिनीतन्त्रे।
"लिङ्गस्थां पूजयेद्देवीं पुस्तकस्थां तथैव च।
मण्डलस्थां महामायां यन्त्रस्थां प्रतिमासु च।
जलस्थां वा शिलास्थां वा पूजयेत् परमेश्वरीम्॥"
एतत् सर्व्वं यन्त्राभावे। कौलावलीये।
"यत्रापराजितापुष्पं जवापुष्पञ्च विद्यते।
करवीरे शुक्लरक्ते द्रोणं वा यत्र तिष्ठति।
तत्र देवी वसेन्नित्यं तद्यन्त्रं चण्डिकार्चनम्॥"
एतत् सर्व्वयन्त्राभावे। तथा च।
"यन्त्रं मन्त्रमयं प्रोक्तं मन्त्रात्मा देवतैव हि।
देहात्मनोर्यथा भेदो यन्त्रदेवतयोस्तथा॥"
तथा।
"आदौ लिखेद्यन्त्रराजं देवतायाश्च विग्रहम्।
कामक्रोधादिदोषोत्थसर्व्वदुःखनियन्त्रणात्॥
यन्त्रमित्याहुरेतस्मिन् देवः प्रीणाति पूजितः।
विना यन्त्रेण पूजायां देवता न प्रसीदति॥
दुःखनिर्यन्त्रणाद्यन्त्रमित्याहुस्तन्त्रवेदिनः॥"
इति यन्त्रपूजाप्राधान्यम्॥ * ॥
अथ धारणयन्त्राणि। तत्रादौ भुवनेश्वरीयन्त्रम्। शारदायाम्।
"आलिखाष्टदिगर्गलाश्रुदरगं पाशादिकं त्र्याक्षरं
कोष्ठेष्वङ्गमनून् परेषु विलिखेदष्टार्णमन्त्रद्वयम्।
अष्टपूर्व्वापरषट्कयुग् जयवरान् योमास-नार्गले-
ष्वालिखेन्द्रजलाधिपादिगुणग्रः पंक्तिद्वयात्तत्-परम्॥
कोष्ठेष्वष्टयुगार्णमात्मसहितां युग्मस्वरान्तगतां
मायां केशरगां दलेषु विलिखेच्चक्रं त्रिपंक्ति-क्रमात्।
त्रिः पाशाङ्कुशवेष्टितञ्च लिपिभिर्व्वीतं क्रमाद्-युत्क्रमात्
पद्मस्थेन घटेन पङ्कजसुखेनावेष्टितं तद्वहिः॥"
घटार्गलमिदं यन्त्रं मन्त्रिणां श्रीप्रदं महत्।
पाशश्रीशक्तिकन्दर्पकामशक्तीन्दिराङ्कुशाः॥
प्रथमोऽष्टाक्षरो मन्त्रस्ततः कामिनि रक्षिनि।
खाहान्तोऽष्टाक्षरः सङ्गिरपरः परिकीर्त्तितः॥

यन्त्रं

ह्रीं गौरि रुद्रदयिते योगेश्वरि सर्वम्भफट् ।
दिष्टान्तः षोड़शार्णोऽयं मन्त्रः सङ्किरुदीरितः ॥"
इति घटार्गलयन्त्रम् ॥*॥

"तारे हुँ विलिखेत् सरोजकुहरे साध्याभिधानान्वितं
मन्त्रार्णान् वसुसंख्यकान् वसुदलेष्वालिख्य तद्बाह्यतः ।
प्रक्ष्मा त्रिः परिवेष्टितं घटगतं पद्मस्थमज्ञाननं
यन्त्रं वश्यकरं ग्रहादिभयहृल्लक्ष्मीप्रदं कीर्त्तिदम् ॥"
इति त्वरितायन्त्रम् ॥ * ॥

"पद्मं भानुदलान्वितं प्रविलिखेत् तत्कर्णिकायां पुनः
स्मारं प्रक्तिगबीजसाध्यसहितं तत्केसरेषु क्रमात् ।
मर्दिन्यामनुसम्भवान् युगलशो वर्णान् पुनः पत्रगान्
मन्त्रार्णान् गुणशो विधाय विलिखेदन्त्यं तदन्ते दले ॥"
मन्त्रस्तु । [स्थितम् ।
"उत्तिष्ठ पुरुषि किं स्वपिषि भयं मे समुपयदि प्रक्ष्यमप्रक्ष्यं वा तन्मे भगवति शमय स्वाहा ॥
मातृकार्णेन संवीतं भूपुरद्वयमध्यगम् ।
यन्त्रञ्च विन्ध्यवासिन्याः प्रोक्तं सर्व्वसम्पदम् ॥
रक्षाकरं विघ्नौघेण क्षुद्रभूतादिनाशनम् ।
राज्यदं भ्रष्टराज्यानां वश्यदं वश्यमिच्छताम् ॥
सुतार्थिनीनां सुतदं रोगिणां रोगशान्तिदम् ।
बहुना किमिहोक्तेन यन्त्रं यत् कामदो मणिः ॥"
इति बनदुर्गायन्त्रम् ॥*॥

अथ लक्ष्मीयन्त्रम् ।
"वेदादिस्थितसाधनामयुगशः श्रीशक्तिमारान्वितं
किञ्जल्केषु दिनेशपत्रविलसन्मन्त्राक्षरं तद्बहिः ।
पद्मं षड्जनकेसरं खरलसत्पत्राष्टयुग्मं धराबिम्बाभ्यां वषड़न्तया त्वरितया यन्त्रं लिखेद्वेष्टितम् ।
भूपुरद्वयकोणेषु हत्तौ लेखौ पुनः पुनः ।
महालक्ष्मीयन्त्रमिदं सर्व्वैश्वर्य्यफलप्रदम् ॥
सर्व्वदुःखप्रशमनं सर्व्वापद्विनिवारकम् ।
बहुना किमिहोक्तेन परमस्मान्न विद्यते ॥"*॥

अथ त्रिपुरभैरवीयन्त्रम् । [स्त्रियो
"मध्याद्यं नवयोनिषु प्रविलिखेद्बीजानि वर्णान् गायत्र्याः पुनरष्टपत्रविवरेष्वालिख्य लिप्याऽवृतम् ।
भूबिम्बद्वितयेन मन्मथयुजा कोणेषु संवेष्टितं
यन्त्रं त्रैपुरमीरितं त्रिभुवनप्रक्षोभणं श्रीप्रदम् ॥"
गायत्री तु ।
"मन्मथं त्रिपुरादेवि विद्महे क्लेसुद्धरेत् ।
उक्ता कामेश्वरिपदं प्रवदेद्यथ धीमहि ॥
अन्ते च प्रवदेद्भूयस्तन्नः क्लिन्ने प्रचोदयात् ।

यन्त्रं

गायत्र्यृषा समाख्याता त्रैपुरी सर्व्वसिद्धिदा ॥"
यन्त्रान्तरम् ।
"वह्निर्गेहयुगान्तरस्थमदने मायां लिखेद्वाग्भवं
षट्कोणेष्वथ सन्धिषु प्रविलिखेत् हुंकारमावेष्टितम् ।
स्त्रींबीजेन समीरितं त्रिभुवनप्रक्षोभणं त्रैपुरं
यन्त्रं पञ्चमनोभवात्मकमिदं सौन्दर्य्यसम्पत्करम् ॥"
इति त्रिपुरायन्त्रम् ॥*॥

अथ श्रीविद्यायन्त्रम् ।
"विघ्नेशं धारणं यन्त्रं प्रसङ्गात् कथयामि ते ॥
रेफहकारयोर्मध्ये देवीनामभिसुख्यकम् ।
साध्यनाम द्वितीयान्तं तस्योर्द्ध्वे विलिखेन्मनुम् ॥
तत्रैव मातृकां सर्व्वां विलिखेच्चक्रबाह्यतः ।
पञ्चगद्याष्टतेनैव मूलेन परिवेष्टयेत् ॥
तत्र प्राणं प्रतिष्ठाप्य विद्यामष्टोत्तरं शतम् ।
तत् स्मृत्वा प्रजपेन्मन्त्रं देवीध्यानपरायणः ॥
हेम्नो मध्यगतं कृत्वा रजतस्याथवा पुनः ।
करे धृत्वा जगद्वश्यं हृदये स्त्रीषु वल्लभम् ॥
कण्ठे धनं लभेज्ज्ञाने क्षेमं जन्मनं भवेत् ।
शिखायां मोक्षमाप्नोति तस्माद्यत्नेन धारयेत् ॥"*॥

अथ गणेशयन्त्रम् ।
"बीजं षट्कोणमध्ये स्फुरदनलपुरे तारगं दिक्षु लक्ष्मी-
मायाकन्दर्पभूमीस्तदनुरसपुटेष्वालिखेद्बीजषट्कम् ।
तत्सन्धिष्वङ्गमन्त्रान् वसुदलकमले मूलमन्त्रस्य वर्णान्
शिष्टान् पत्रेषु विद्वान् विलिखतु गुणशश्चान्त्यमन्त्यं पलाशे ॥
आवीतं लिपिभिः क्रमोत्क्रमवशात् पाशाङ्कुशाभ्यामपि
भूबिम्बद्वितयेन वेष्टितमिदं यन्त्रं गणाधीशितुः ।
लाक्षाकुङ्कुमरोचनाष्टगमदैर्भूर्जोदरे हेम्नि वा
संलिख्याभिवहन् लभेत सकलैः संप्रार्थनीयां श्रियम् ॥
उक्तं महागणपतेर्विधानं सुरपूजितम् ।
सर्व्वसिद्धिकरं पुंसां समस्तपुरुषार्थदम् ॥"*॥

अथ श्रीरामयन्त्रम् ।
"तारं मध्ये विलिखतु मनुं षट्सु कोणेषु सन्धिष्वङ्गं मायां स्मरमपि लिखेत् कोणगर्भेषु पश्चात् ।
किञ्जल्केषु स्वरगणमतो पत्रमध्येषु मालामन्त्रस्यार्णान् गुरुसुखमितानष्टमे पत्रवर्णान् ॥
दशाक्षरेण संवेष्टा कादिवर्णैश्च भूपुरे ।
दिग्विदिक्षु लिखेद्बीजे नरसिंहवराहयोः ॥
नमो भगवते ब्रूयाच्चतुर्थ्या रघुनन्दनम् ।
रक्षोघ्नविषदायान्ते मधुरादि समीरयेत् ॥
प्रसन्नवदनायेति पश्चादमिततेजसे ।
बलाय पश्चादामाय विष्णवे तदनन्तरम् ।
प्रणवादिनमोऽन्तोऽयं मालामन्त्रः प्रकीर्त्तितः ॥"

यन्त्रं

अथ नृसिंहयन्त्रम् ।
"बीजं साध्यसमन्वितं प्रविलिखेन्मध्येऽष्टपत्रेष्वथो
मन्त्रार्णान् श्रुतिशो विभज्य विलिखेल्लिप्या वह्निर्व्वेष्टयेत् ।
बाह्ये कोणगबीजवह्नवसुधागेहद्वयेनावृतं
यन्त्रं क्षुद्रविघग्रहामयरिपुप्रध्वंसनं श्रीप्रदम् ॥"*॥

अथ गोपालयन्त्रम् । [षड़र्णं
"पिण्डं मूलेन वीतं दहनपुरयुगे कोणराजत्कुर्य्यात् पद्मं दशार्णस्फुरितदशदलं कामबीजेन वीतम् ।
पद्मं किञ्जल्कसंस्थस्वरविकृतिदलप्रोल्लसत्षोड़शार्णं
किञ्जल्कयञ्जनाढ्यं विकृतियुगदलेष्वर्पितानष्टवर्णान् ॥
पाशाङ्कुशाभ्यामावीतं त्रैपुरीपुरयुगास्रिषु ।
अष्टाक्षरेण लसितं यन्त्रं गोपालदैवतम् ॥
धर्म्मार्थकामफलदं सर्व्वरक्षाकरं स्मृतम् ।
पञ्चान्तको धरासंस्थो मनुर्बिन्दुविभूषितः ॥
पिण्डबीजमिदं प्रोक्तं सर्व्वसिद्धिकरं परम् ।
स्मरः क्षणाय ठद्वन्द्वं षड़र्णो मनुरीरितः ॥
गोपीजनान्ते प्रदद्देहल्लभायाग्निवल्लभा ।
अयं दशाक्षरो मन्त्रो दृष्टादृष्टफलप्रदः ॥
प्रणवं हृदयं क्षणं ङेन्तसुक्ता ततः परम् ।
ताद्दृग् देवकीपुत्रं हुं फट्स्वाहासमन्वितम् ।
षोड़शाक्षरमन्त्रोऽयं गोविन्दस्य जगत्पतेः ॥
पिण्डं रतिपतेर्बीजं नमो भगवते ततः ।
नन्दपुत्राय बालादिवपुषे श्यामलाय च ॥
गोपीजनपदस्यान्ते वल्लभाय द्विठावधि ।
अनुष्टुप् मन्त्र आख्यातो गोपालस्य जगत्पतेः ॥
अनङ्गः क्षणगोविन्दौ ङेऽन्तावष्टाक्षरो मनुः ॥"
इति गोपालयन्त्रम् ॥ * ॥

अथ गोपालस्य यन्त्रान्तरम् ।
"प्राक् प्रत्यक् दक्षिणोदक् विधिवदभिलिखेत् सप्तरेखाश्चतुष्कं
कोणोद्यच्छूलयुक्तं वलययुगयुतं मध्यपूर्व्वं तदन्तम् ।
श्लोकस्यार्णान् पुरस्ताद्दलपदविवरेष्वष्टवर्णं लिखित्वा
तद्बाह्ये द्वादशार्णैस्तदनुपरिवृतं देवकीपुत्रयन्त्रम् ॥
तं सुकी देव देवेतं तं वेदे वरतो वतम् ।
तं वतो रूढ़तो ख्यातं तं ख्यातो देवकीसुतम् ॥
लिखितं भूर्ज्जपत्रादौ यन्त्रमेतदृषाविधि ।
विधृतं बाहुना नित्यं सर्व्वकामफलप्रदम् ॥
पलाशवृक्षफलके लिखितं साधु साधितम् ।
गोस्थाने निखनेद्यत्नं गवां वृद्धिर्भवेत्तदा ॥"*॥

अथ शिवयन्त्रम् । तत्रादौ षट्कोणमङ्कितं कृत्वा तदन्तः साध्यनामयुक्तं प्रासादबीजं विलिख्य षट्कोणेषु प्रणवसहितपञ्चाक्षरवर्णान् विलिख्य विवरेषु षड़ङ्गमन्त्रान् तद्बहिः पद्मदलानि विरचय्य तद्दलेषु ॐ ईशानाय नमः ॐ तत्पुरुषाय नमः ॐ अघोराय नमः

ॐ सद्योजाताय नमः ॐ वामदेवाय नमः। इति पञ्चमन्त्रान् प्रागादिक्रमेण लिखेत्। तद्बहिरष्टदलानि रचयित्वा तद्दलेषु मातृकावर्णान् लिखेत्। तद्बहिर्वृत्तं त्र्यस्रकेन वेष्टयेत्। एतद्यन्त्रं जपहोमादिना सम्पूज्य धारयेत्। आयुरारोग्यैश्वर्यादिसिद्धिर्भवति ॥ * ॥ अथ मृत्युञ्जयस्य यन्त्रम्।

"मध्ये साध्याक्षराढ्यं ध्रुवमभिविलिखेन्मध्यमं दिग्दलेषु
कोणेष्वन्यं मनोज्ञं क्षितिभुवनमधो दिक्षु चन्द्रं विदिक्षु।
टान्तं यन्त्रं तदुक्तं सकलभयहरं चेड़भूतापमृत्यु
व्याधिव्यामोहदुःखप्रशमनसुदितं श्रीप्रदं कीर्तिदायि॥"* ॥

अथकालीयन्त्रम्। यामले।

"आद्यं बीजं ससाध्यं प्रथमवसुगृहे तदहिः क्ष्माष्टकोणे
पूर्व्वाद्यं चाष्टबीजं तदनु वसुगृहद्वन्द्वके बीजषट्कम्।
किञ्जल्कं तत् खराढ्यं वसुदलविवरे खाद्यया बीजषट्कं
कूर्चाभ्यामेव वीतं क्षितिगृहयुगयोरन्तरे यन्त्रराजम्॥
देवीबीजत्रयं तत् प्रतिदिशमपरं शक्तिबीजद्वयं तत्
कोणे कोणे लिखेद्यस्त्रिजगति स गुरुः शङ्करस्यापि विष्णोः॥"

अथ शान्तिकादौ तारोद्धारणयन्त्रम्। तदुक्तं फेत्कारीये।

"योनियुग्मे लिखेन्मन्त्रं मन्त्री हेमशलाकया।
क्लीवर्हीनान् दीर्घवर्णान् षट्कोणे विलिखेत्ततः॥
अष्टपत्रेष्वष्टवर्णान् तद्बहिर्भूपुरद्वयम्।
अष्टवर्णं भूपुरे च विलिख्य साधकोत्तमः॥
सुवर्णपट्टे भूर्ज्जे वा रूप्ये वाप्यथ सुव्रते।
विलिखेद्वैमलेखन्या गन्धाष्टकसमन्वितम्॥
तूर्ब्बाकाण्डेन वालिख्य कुशमूलेन वा पुनः॥"

एकवीराकल्पे।

"वेष्टितं पीतवर्णेन सूत्रेण परिवेष्टयेत्॥
बध्नीयात् पट्टसूत्रेण शिशूनां कण्ठभूषणम्।
स्त्रीणां वामभुजे चैवमन्येषां दक्षिणे भुजे।
वन्ध्यापि लभते पुत्रं निर्धनो धनवान् भवेत्॥
इमां रक्षां पुरा बध्वा ज्ञानार्थं गौतमादिभिः।
प्रीत्यर्थं पार्थिवेन्द्राद्यैः संग्रामे जयकाङ्क्षिभिः॥"

अस्यार्थः। योनियुग्मे षट्कोणे। तस्य मध्ये हेमशलाकादिना भूर्ज्जपत्रादौ कुङ्कुमरोचनारक्तचन्दनजटामांसीनां समांशं विधाय षड्क्तिक्रमेण मूलमन्त्रं लिखित्वा तस्य वृत्तलेखारेफ मध्ये असुकस्य रक्षां कुरु कुरु असुकीनां शुभं पुत्रसुतादयेति वा अस्य ज्ञानं कुरु कुरु इत्यादि वा साध्यसहितं विलिख्य षट्कोणे क्लीवभिन्नान् दीर्घवर्णान् आ ईं ऊ ऐं औं अः इत्येकैकं लिखेत्। तदुक्तम्।

"स्वराणां मध्यगं यच्च तच्चतुष्कं नपुंसकमिति।"

अष्टपत्रेष्वष्टवर्णान्। ऐं ह्रीं ॐ ऐं ह्रीं फट् स्वाहेति लिखेत्। तदुक्तम्।

"वाग्भवं कुलदेवीञ्च तारकं वाग्भवं तथा।
वृत्तलेखा चाक्षमन्त्रान्ते वह्निजायावधिर्मनुः॥
अष्टाक्षरो मनुः प्रोक्तो मन्त्राणां सार ईरितः॥"

अथ यन्त्रलिखनद्वयम्।

"काश्मीररोचनालाक्षागेभमदचन्दनैः।
विलिखेद्धैमलेखन्या यन्त्रान्येतानि दीक्षिकः॥
भूमिस्पृष्टं ग्रवस्पृष्टं यन्त्रं निर्म्माल्यसङ्गतम्।
विदीर्णं लङ्घितं मन्त्री यन्त्रं नैव च धारयेत्॥
सौवर्णे राजते पात्रे भूर्जे वा सम्यगालिखेत्।
अथवा ताम्रपट्टे वा गुटिकां कृत्य धारयेत्॥
यावज्जीवं सुवर्णे स्यात् रौप्ये विंशतिवार्षिकम्।
भूर्ज्जे द्वादश वर्षाणि तद्वै ताम्रपट्टके॥"

इति तन्त्रसारः॥ * ॥

अन्यत् कालिकापुराणे ७७।७८।७९ अध्यायेषु द्रष्टव्यम्॥ * ॥ अथ यन्त्रसंस्कारः। वामकेश्वरतन्त्रे।

"स्नात्वा संकल्पयेन्मन्त्री गुरोरर्चनमाचरेत्।
पञ्चगव्यं ततः कृत्वा शिवमन्त्रेण मन्त्रितम्॥
तत्र चक्रं क्षिपेन्मन्त्री प्रणवेन समाकुलम्।
तदुद्धृत्य ततश्चक्रं स्थापयेत् स्वर्णपात्रके॥
पञ्चाम्लेन दुग्धेन घृतेन जलेन च।
चन्दनेन सुगन्धेन कस्तूरीकुङ्कुमेन च॥
पयोदधिघृतक्षौद्रशर्करादेरनुक्रमात्।
तोयपात्रान्तरैः कुर्य्यात् पञ्चाम्लविधिं बुधः॥
हाटकैः कलसैर्देवीमष्टभिर्वारिपूरितैः।
कषायजलसम्पन्नैः कारयेत् स्नानमुत्तमम्॥
स्नानं समाप्य तां देवीं स्थापयेत् स्वर्णपाठके।
यन्त्रराजाय विद्महे महायन्त्राय धीमहि तन्नो यन्त्रं प्रचोदयात्॥
स्पृष्ट्वा यन्त्रं कुशाग्रेण गायत्र्या चाभिमन्त्रयेत्।
अष्टोत्तरशतं देवि! देवताभावसिद्धये॥
आत्मशुद्धिं ततः कृत्वा षड़ङ्गैर्देवतां यजेत्।
तत्रावाह्य महादेवीं जीवन्यासञ्च कारयेत्॥
उपचारैः षोड़शभिर्मुद्रादिभिः सदा।
फलताम्बूलनैवेद्यैर्देवीं तत्र समर्चयेत्॥
पट्टसूत्रादिकं दद्यात् वस्त्रालङ्कारमेव च।
अगुरुं चामरं घण्टां यथायोग्यं महेश्वरि!।
सर्व्वमेतत् प्रयत्नेन दद्यादात्महिते रतः॥
ततो जपेत् सहस्रञ्च सकलेप्सितसिद्धये।
बलिदानं ततः कृत्वा प्रणमेच्चक्रराजकम्॥
अष्टोत्तरशतं हुत्वा सम्यताज्यं विनिःक्षिपेत्।
होमकर्म्मण्यशक्तश्चेत् द्विगुणं जपमाचरेत्॥
धेनुमेकां समानीय स्वर्णशृङ्गाद्यलङ्कृताम्।
गुरवे दक्षिणां दद्यात् ततो देया विसर्ज्जनम्॥"

अस्य प्रयोगः। कृतनित्यक्रियः स्वस्तिवाचनपूर्ब्बकं सङ्कल्पं कुर्य्यात्। आद्येत्यादि असुकगोत्रः श्रीअसुकदेवशर्म्मा असुकदेवताया: पूजार्थं असुकयन्त्रसंस्कारमहं करिष्ये। इति संकल्प्य पञ्चगव्यमानीय हौमितिमन्त्रेणाष्टोत्तर शतं अभिमन्त्र्य प्रणवेन यन्त्रं तत्र क्षिपेत्। तत उत्साल्य स्थापयेत्। ततः शीतलजलचन्दनगन्धकस्तूरीकुङ्कुमैः स्नापयित्वा पञ्चगव्यमानीय हौमिति मन्त्रेणाष्टोत्तरशतमभिमन्त्र्य प्रणवेन पूर्ब्ववत् प्रोक्षयित्वा स्नापयेत्। तत्र क्रमः। प्रथमं क्षीरेण स्नापयित्वा धूपं दद्यात्। एवं दध्ना घृतेन मधुना शर्करया च। ततोऽष्टभिः कलसैः कुङ्कुमगोरोचनाचन्दनमिश्रितैस्तोयैः स्नापयेत्। सर्व्वत्र स्नानं मूलमन्त्रेण ततो यन्त्रमुत्सृज्य कृष्णायेण तत् मृष्ट्वा यन्त्रराजाय विद्महे महायन्त्राय धीमहि तन्नो यन्त्रं प्रचोदयात्। इत्यष्टोत्तरशतमभिमन्त्र्य प्राणप्रतिष्ठां कुर्य्यात्। अस्य प्राणप्रतिष्ठामन्त्रस्य ब्रह्मविष्णुमहेश्वरा ऋषय ऋग्यजुःसामानि छन्दांसि चैतन्यं देवता प्राणप्रतिष्ठायां विनियोगः। तद्यथा। आं ह्रीं क्रों यं रं लं वं शं षं सं हौं हं सः असुकदेवतायाः प्राणा इह प्राणाः। एवं आमित्यादि असुकदेवतायाः जीव इह स्थितः। एवं आमित्यादि असुकदेवतायाः सर्व्वेन्द्रियाणि। एवं आमित्यादि असुकदेवतायाः वाङ्मनश्चक्षुःश्रोत्रघ्राणप्राणा इहागत्य सुखं चिरं तिष्ठन्तु स्वाहा। इति प्राणान् प्रतिष्ठाप्य तत्र प्रकृतदेवतामावाह्य षोड़शोपचारैः पञ्चोपचारैर्व्वा पूजयेत्। ततः पट्टसूत्रादिकं दत्त्वा अष्टोत्तरशतं जप्त्वा घृतप्लुतैः बलिं दद्यात्। ततोऽष्टोत्तरशतहोमं कृत्वा पूर्णाहुतिसम्पातं दद्यात्। होमाभावे द्विगुणजपः कार्य्यः। ततो दक्षिणां दत्त्वा अच्छिद्रावधारणं कुर्य्यात्। इति तन्त्रसारः॥ * ॥ औषधपाकार्थयन्त्राणि यथा,—

"भाण्डे वितस्तिगम्भीरे मध्ये निक्षिप्तकूपिके।
कूपिकाकण्ठपर्य्यन्तं बालुकाभिश्च पूरिते॥
मेषणं कूपिकासंस्थं वह्निना यत्र पच्यते।
बालुकायन्त्रमेतद्धि यन्त्रतन्त्रबुधैः स्मृतम्॥"

इति बालुकायन्त्रम्॥

"निबद्धमौषधं स्नुतं भूर्ज्जे तन्त्रिगुणान्तरे।
रसपोटलिकां काष्ठे दृढं बद्ध्वा गुणेन हि॥
सन्धानपूर्णे कुम्भान्तः खावलम्बनसंस्थितम्।
अधस्ताज्ज्वालयेदग्निं तत्तदुक्तक्रमेण हि।
दोलायन्त्रमिदं प्रोक्तं स्वेदनाख्यं तदेव हि॥"

सन्धानं काञ्जिकादि। इति दोलायन्त्रम्॥ * ॥

"साम्बुस्थालीमुखे बद्ध्वा वस्त्रं स्वेदं निधाय च।
पिधाय पच्यते यत्र तद्यन्त्रं स्वेदनं स्मृतम्॥"

इति स्वेदनयन्त्रम्॥

"अधःस्थाल्यां रसं क्षिप्त्वा निदध्यात्तन्मुखोपरि।
स्थालीमृद्वीमुखीं सम्यक् निरुध्य मृदुसूत्रया॥
ऊर्द्धस्थाल्यां जलं क्षिप्त्वा चुल्ल्यामारोप्य यत्नतः॥
अधस्ताज्ज्वालयेदग्निं यावत् प्रहरपञ्चकम्।
स्वाङ्गशीतं ततो यन्त्रादृग्भ्यामुद्याद्रसमुत्तमम्।
विद्याधराभिधं यन्त्रमेतत्तज्ज्ञैरुदाहृतम्॥"

इति विद्याधरयन्त्रम्॥

"बालुकासु समस्ताङ्गं गर्त्ते मूषारसान्विता।

दीप्तोपले: मंदृणुयादृयन्त्रं भूधरनामकम् ॥"
इति भूधरयन्त्रम् ॥
"यन्त्रं डमरुसंज्ञं स्यात्तत् स्याल्लोमंद्रिते सुखे॥"
इति डमरुयन्त्रम्। इति भावप्रकाश: ॥ (तथाच।
"अन्तस्सूषा तु कर्त्तव्या गोस्तनाकारसन्निभा।
सैव छिद्रान्विता मध्ये गम्भीरामारणोचिता ॥"
इति अन्तस्सूषायन्त्रम् ॥
"द्वौ भागौ तु सदुग्धस्य एकावल्लीकन्दत्तिका।
लोहकिट्टस्य भागैकं श्वेतपाषाणभागिकम् ॥
नरकेशसमं किञ्चित् क्षागीदुग्धेन पेषयेत्।
भाण्डद्वयं दृढं मर्द्य तेन सूषां सुसम्पुटाम् ॥
शोषयित्वा रसं क्षिप्त्वा तत्कल्कै: सन्धि लेपयेत्।
रौद्रसूषा समाख्याता सम्यक्पारदसाधिका॥"
इति सूषायन्त्रम् ॥ * ॥
"बालुकापूरितं भाण्डं तन्मध्ये सूतकं क्षिपेत्।
रसं सूषागतञ्चैव भाण्डं सावेण रोधयेत् ॥
लिप्त्वा श्लक्ष्णवणे: सन्धिं पाचयेच्चुल्लिकाग्निना।
बालुकायन्त्रमेतद्धि योजयेद्रसकर्म्मणि ॥"
इति बालुकायन्त्रम् ॥
"तिर्य्यक्कण्ठं काचकुप्पा गिलयेत् खल्वभाण्डके:।
तिर्य्यक्कृत्वा पचेत् भाण्डं वकयन्त्रमिति स्मृतम्॥"
इति वकयन्त्रम् ॥
"ऊर्द्धाध: संपुटाकारं तन्मध्ये रससंस्थितम्।
कवचीयन्त्रमेतद्धि रसादिद्रव्यसाधनम् ॥"
इति कवचीयन्त्रम् ॥*॥
इति वैद्यकरसेन्द्रसारसंग्रहे जारणाद्यधिकारे ॥

चिकित्सोपयोग्यपरयन्त्रविवृतिर्यथा,—
"यन्त्रमूलमेकोत्तरमत्र ह्रस्वमेव प्रधानतमं यन्त्राणामवगच्छ। किं कारणम्। यस्माद्ध्रस्वाद्धते यन्त्राणामप्रवृत्तिरेव तदधीनत्वाद्यन्त्रकर्म्मणाम्। तच्च मन:शरीरबाधकराणि शल्यानि तेषामाहरणोपायो यन्त्राणि। तानि षट्प्रकाराणि। तद्यथा। स्वस्तिकयन्त्राणि। सन्दंशयन्त्राणि। तालयन्त्राणि। नाड़ीयन्त्राणि। शलाकायन्त्राणि। उपयन्त्राणि चेति ॥
तत्र चतुर्विंशति: स्वस्तिकयन्त्राणि। द्वे सन्दंशयन्त्रे। द्वे एव तालयन्त्रे। विंशतिर्नाड्य:। अष्टाविंशति: शलाका:। पञ्चविंशतिरुपयन्त्राणि ॥
तानि प्रायशो लौहानि भवन्ति तत्प्रतिरूपकाणि वा तदलाभे। तत्र नानाप्रकाराणां बालानां मृगपक्षिणां मुखेभ्योमुखानि यन्त्राणां प्रायश: सदृशानि तस्मात् तत्सारूप्यादागमादुपदेशादन्ययन्त्रदर्शनादयुक्तितश्च कारयेत्।
समाहितानि यन्त्राणि स्वरश्लक्ष्णसुखानि च।
सुदृढानि सुरूपाणि सुग्रहाणि च कारयेत् ॥
तत्र स्वस्तिकयन्त्राण्यष्टादशाङ्गुलप्रमाणानि सिंहव्याघ्रर्क्षतरक्षुऋक्षद्वीपिमार्जारभृङ्गालमृगेन्द्रवारुककाककङ्कक्रुररासभासशृगालधातुलूकचिल्लिश्येनशरभौष्ट्रभल्लराजाञ्जलिकर्णावभञ्जननन्दिसुखसुखानि मक्षराजतिभि: कीलैरवबद्धानि मूलेऽङ्गुलवदाकृत्यवारङ्गाग्रस्थिविनष्टशल्योद्धरणार्थमुपदिश्यन्ते ॥*॥यनिग्रहो-
ऽनिग्रहश्च सन्दंशौ शोड़शाङ्गुलौ भवतस्त्वग्मांससिरास्नायुगतशल्योद्धरणार्थमुपदिश्येते।
तालयन्त्रे द्वादशाङ्गुले मत्स्यतालुवदेकतालङ्घितालके कर्णनासानाड़ीशल्यानामाहरणार्थम्।
नाड़ीयन्त्राण्यनेकप्रकाराण्यनेकप्रयोजनान्यनेकतोमुखान्युभयतोमुखानि च तानि स्रोतोगतशल्योद्धरणार्थं रोगदर्शनार्थमाचूषणार्थं क्रियासौकर्य्यार्थञ्चेति तानि स्रोतोद्वारपरिणाहानि यथायोगपरिणाहदीर्घाणि च।
भगन्दरार्शोऽर्बुदव्रणवस्त्यूत्तरबस्तिसूचद्वित्कोदरधूमनिरुद्धप्रकाशसन्निरुद्धगुदशल्याश्मलादुपद्रवयन्त्राणि चोपरिष्टाद्वक्ष्याम:।
शलाकायन्त्राण्यपि नानाप्रकाराणि नानाप्रयोजनानि यथायोगपरिणाहदीर्घाणि च तेषां गण्डूपदशूरपुङ्खसर्पफणवड़िशमुखे द्वे द्वे एषणाऽऽहरणाचालनाहरणार्थमुपदिश्येते। मसूरदलमात्रमुखे द्वे किञ्चिदानताग्रे स्रोतोगतशल्योद्धरणार्थम्। षट्कार्पासकृतोष्णीषाणि प्रमार्ज्जनक्रियासु। त्रीणि दर्भाकृतीनि स्वेदमुखानि क्षारौषधप्रणिधानार्थम्। त्रीण्यन्यानि जाम्बवदनानि त्रीण्यङ्कुशवदनानि षड्वाग्मिकर्म्मस्वभिप्रेतानि। नासार्बुदहरणार्थमेकं कोलास्थिदलमात्रमुखं खड्गतीक्ष्णोष्ठम्। अञ्जनार्थमेकं कलायपरिमण्डलमुभयतो मुकुलाग्रम्। मूत्रमार्गविशोधनार्थमेकं मालतीपुष्पवृन्ताग्रप्रमाणपरिमण्डलमिति।
उपयन्त्राण्यपि रज्जुवेणिकापट्टचर्म्मान्तवल्कलसलतावल्लास्थीलाश्म-सुद्गर-पाणिपाद-तलाङ्गुलिजिह्वा-दन्तनखमुख-बालाश्वकटकशृङ्खलास्थीवनप्रवाहणहर्षायस्कान्तमयानि क्षारामिषेषजानि चेति।
एतानि देहे सर्व्वस्मिन् देहस्यावयवे तथा।
सन्धौ कोष्ठे धमन्यां च यथायोगं प्रयोजयेत् ॥
यन्त्रकर्म्माणि तु निर्घातनपूरणवल्मनवृहणवर्त्तनचालनविवर्त्तनविवरणपीड़नमार्गविशोधनविक्षेपणाहरणाक्षनोन्नमनविनमनभञ्जनोल्लेखनाक्षणेषणदारणर्ज्जुकरणप्रक्षालनप्रधमनप्रमार्ज्जनानि चतुर्विंशति: ॥
स्वबुद्ध्या चापि विभजेद्यन्त्रकर्म्माणि बुद्धिमान्।
असंख्येयविकल्पत्वाच्छल्यानामिति निश्चय: ॥
तत्रातिस्थूलमसारमतिदीर्घमतिह्रस्वमग्राह्यं विषमग्राह्यं वक्रं शिथिलमत्युन्नतं मृदुकीलं मृदुमुखं मृदुपाश्वमिति ह्यदृश्य यन्त्रदोषा:।
एतैर्दोषैर्विनिर्म्मुक्तं यन्त्रमादृश्याङ्गुलम्।
प्रशस्तं भिषजा ज्ञेयं तद्धि कर्म्मसु योजयेत् ॥
दृश्यं सिंहमुखादीनां गूढं कङ्कमुखादिभि:।
निर्हरेत्तु शनै: शल्यं शस्त्रयुक्तिमपेक्षया ॥
विवर्द्धते साध्यवगाहते च
शल्यं निरस्योद्धरते च यस्मात्।
यन्त्रेष्वत: कङ्कमुखं प्रधानं
स्थानेषु सर्व्वेष्वविकारि चैव ॥"
इति सुश्रुते सूत्रस्थाने सप्तमेऽध्याये ॥*॥

गोलाध्यायोक्तयन्त्राणि यथा,—
"अथ यन्त्राध्यायो व्याख्यायते। तत्रादौ तदारम्भप्रयोजनमाह।
दिनगतकालावयवा ज्ञातुमशक्या यतो विना यन्त्रै:।
वक्ष्ये यन्त्राणि तत: स्फुटानि संक्षेपत: कतिचित् ॥
गोलो नाड़ीवलयं यष्टि: शङ्कुर्घटी चक्रम्।
चापं तुर्यं फलकं धीरेकं पारमार्थिकं यन्त्रम् ॥"
"अथ प्रथमं गोलयन्त्रमाह।
अपहृत्तमरविचिह्नं क्षितिजे भृत्वा कुजेन संसक्तै।
नाड़ीवृत्ते बिन्दुं कृत्वा भृत्वाथ जलजमं क्षितिजम् ॥
रविचिह्नस्य च्छाया पतति क्रमश्च यथा तथा विभृते।
उड़ुगोले कुजबिन्दोर्मध्ये नाड्यो भ्रुवाता: स्यु:॥"
"अथ नाड़ीवलयमाह।
अपहृत्ते कुजलग्ने लग्नं चाद्यो खगोलनलिकान्त:।
भूम्यं ध्रुवयष्टिस्थं चक्रं षष्ट्या निजोदयैश्चाङ्कम् ॥
यस्तैर्यष्टीभायासुदयेऽर्कं न्यस्य नाड़िका ज्ञेया:।
इष्टच्छायासङ्ख्यान्तरेऽथ लग्नं प्रभायाश्च ॥
केनचिदाधारेण ध्रुवाभिमुखकीलकेऽथ धृते।
अथवा कीलच्छायातलमध्ये स्थुर्नता नाड्य: ॥"
घटिकायन्त्रलक्षणादिकं घटीयन्त्रशब्दे द्रष्टव्यम् ॥
"अथ शङ्कुमाह। [शङ्कु:।
समतलमस्तकपरिधिर्भमसिद्धो दन्तिदन्तज:
तच्छायात: प्रोक्तं ज्ञानं दिग्देशकालानाम् ॥
इति शङ्कुयन्त्रम् ॥
अथ चक्रमाह।
चक्रं चक्रांशाङ्कं परिधौ शशिशङ्कुलादिकाधारम्।
धात्री त्रिभ आधारात् कक्ष्या भार्द्धेऽर्द्धे च खार्द्धे च ॥
तन्मध्ये शङ्कुच्छायं क्षिप्त्वार्कांभिमुखनेमिकं धार्य्यम्।
भूमेरुन्नतभागास्तच्चान्तश्छायया भुक्ता: ॥
तत्खाद्वोन्नतश्च नता उन्नतलवसंगुणीकृतं द्युदलम्।
द्युदलोन्नतांशभक्तं नाड्य: स्यूला: परै: प्रोक्ता:॥"
"अथ वेधेन ग्रहज्ञानमाह।
"पैचर्क्षपुष्यान्तिमवारुणाना-
मृक्षदयं नेमिगतं यथा स्यात्।
दूरेऽन्तरेऽक्षेषुभखेश्वरौ वा
तथात्र यन्त्रं सुधिया प्रधार्य्यम् ॥
नेमिस्थदृष्ट्यान्तगतं प्रपश्येत्
खेटञ्च धिष्ण्यस्थ च योगतारान्।
नेत्रक्रयोरक्षयुजोस्तु मध्ये
येऽंशा: स्थिता भ्रुवको युतस्ते:॥
प्रत्यक् स्थिते भेऽथ पुर:स्थिते ते-
ऽर्कोनो ध्रुव: स्यात् खचरस्य शुक्तम् ॥"
"अथ चापं तुर्यगोलं चाह।
दलीकृतं चक्रमुशन्ति चापं
कोदण्डखण्डं खलु तुर्यगोलम् ॥"

"अथ फलकयन्त्रार्थमाह ।
दृङ्मण्डलेऽत्र स्फुटकाल उक्तः
सुखेन नान्येवैतितं भयातः ।
सङ्गोलयुक्तैर्गणितस्य सारं
सृष्टं प्रवक्ष्ये फलकाख्ययन्त्रम् ॥"
"इदानीं यन्त्रलक्षणमाह ।
कर्तव्यं चतुरस्रकं सुफलकं खाङ्का-६० ङुलै-
र्विस्तृतं
विस्तारार्द्धगुणा-१८० यतं सुगणकेनायामधध्ये
तथा ।
आधारः शशधङ्कलादिघटितः कार्या च
रेखा तत-
स्त्राधारादवलम्बसूत्रसदृशी सा लम्बरेखोच्यते ॥
लम्बं नवत्य-६० ङुलकैर्विभज्य
प्रत्यङ्गुलं तिर्यगतः प्रसार्य ।
सूत्राणि तत्रायतसूत्ररेखा
जीवाभिधानाः सुधिया विधेयाः ॥
आधारतोऽधः खगुणा-३० ङुलेषु
न्यालम्बयोगे सुषिरञ्च सूक्ष्मम् ।
इष्टप्रमाणा सुषिरे शलाका
सैष्याख्यसंज्ञा खलु सा प्रकल्प्या ॥
यष्ट्याङ्गुलव्यासमतश्च रन्ध्रात्
कृत्वा सुवृत्तं परिधौ तदङ्कम् ।
यष्ट्या घटीनां भगणांश-३६० कैश्च
प्रत्यंशकं चानुपलैश्च दिग्भिः ॥
अग्रे सरन्ध्रा तनुपट्टिकैका
यष्ट्याङ्गुला दीर्घतया तथाङ्का ॥"
"इदानीं यन्त्रोपकरणमाह ।
यत् खण्डकैः शूलचरं पलाद्यं
तन्नोक्त-१६ कृत् स्याच्चरग्रन्थिनीह ॥"
"इदानीं यष्टिसाधनमाह ।
वेदाः ४ भवाः ११ शैलशुचो१७ धृतिश्च१८
विश्वे १३ च बाणाः ५ पलकर्णनिघ्नाः ।
अर्कोद्धृताः स्युः क्रमशः खदेशे
राग्यङ्गुलभ्यानि हि खण्डकानि ॥
तैः क्रान्तिपातादिरवेर्भुजज्या
यष्ट्याहृतात्राग्रवशेन युक्ता ।
दिग्घ्नी कृताग्रा भवतीह यष्टिः
सा पट्टिकायां सुषिरात् प्रदेया ॥"
"इदानीं यष्टिप्रयोजनमाह ।
धार्यं तथा फलकयन्त्रमिदं यथैव
तत्पार्श्वयोर्लगति तुल्यमिनस्य तेजः ।
छायाजजा स्पृशति तत्परिधौ यमंशं
तत्रांशके मतिमता तरणिः प्रकल्प्यः ॥
अत्रप्रोतां रविलवगतां पट्टिकां न्यस्य तस्माद्-
यष्टेरग्रादुपरि फलकेऽधश्च गोलक्रमेण ।
यन्नाड्येष्यरदलगुणस्तत्र या ज्या तयात्र
छिन्ने वृत्ते तलगघटिकाः स्युर्नता लम्बकाख्याः ॥"
"अथ यष्टियन्त्रमाह ।
चिच्याविष्कम्भार्द्धं वृत्तं कृत्वा दिगङ्कितं तत्र ।
दत्त्वाग्रां प्राक् पश्चाद्युष्यावृत्तञ्च तत्कर्णे ॥
तत्परिधौ यष्ट्यङ्कं यष्टिर्नेष्टद्युतिस्ततः केन्द्रे ।
चिच्याङ्गुला निधेया यष्ट्यग्रायाश्चरं यावत् ॥
तावत्या भौर्व्या यद्दृङ्नतीयवृत्ते धनुर्भवेत् तच्च ।
दिनगतशेषा नाड्यः प्राक् पश्चात् स्युः क्रमेणै-
वम् ॥"
"इदानीं धीयन्त्रं विष्णुराहौ तत्प्रशंसामाह ।
अथ किमु पृथुतन्त्रैर्धीमतो भूरियत्नैः
स्वकरकलितयष्टेर्दत्तमूलाग्रदृष्टेः ।
न तदविदितमानं वस्तु यद्दृश्यमानं
दिवि भुवि च जलस्थं प्रोच्यतेऽथ स्थलस्थम् ॥
अत्र प्रश्नः ।
वंशस्य मूलं प्रविलोक्य चाग्रं
तत्स्थान्तरं तस्य समुच्छ्रयञ्च ।
यो वेत्ति यष्टेरव करस्थयाशौ
धीयन्त्रवेदी वद किं न वेत्ति ॥"
"अथ यष्ट्या ध्रुववेधेन पलभामाह ।
यष्ट्याग्रमूलसंस्थं विदृश्य ध्रुवमग्रमूलयोर्लम्बौ ।
बाहुर्लम्बान्तरभूर्लम्बोच्छ्रायान्तरं कोटिः ॥
कोटिर्द्वादशगुणिता बाहुविभक्ता पलप्रभा
ज्ञेया ॥"
"इदानीं वंशादिवेधमाह ।
विदृश्यैवं वंशतलं दृष्ट्युच्छ्रायाहताक्षाहोः ।
कोट्या लब्धं ज्ञेयं स्ववंशमध्ये महीमानम् ॥
विद्वायो वंशाग्रं भूमानं कोटिसंगुणं भक्तम् ।
दोष्णा वंशोच्छ्रायो दृष्ट्युच्छ्रायेण संयुतो ज्ञेयः ॥
उदाहरणम् ।
पञ्चशलाङ्गुला १२५ यष्टिरष्टधदृष्टिर्भुच्छ्रयः ।
षट्कराक्षलवेधे दोः कोटिः सप्तदशाङ्गुला ॥
अग्रवेधे रसैघ्ना ११६ दोः कोटिस्तुरगकुञ्जरः ।
वंशस्य यस्य तज्ज्ञानं चात्मवंशान्तरं वद ॥"
"अथ कैवलाग्रवेधेनाह ।
अग्रं विश्लोर्ध्वस्थः पुनरपविष्टश्च तद्विद्ध्यात् ॥
निजभुजभक्ते कोटी तदन्तरक्षोऽङ्गौच्चविश्लेषः
भूमिर्वंशौच्चमतः पृथक् पृथक् पूर्ववज्ज्ञेयम् ॥
अत्र प्रश्नः ।
ऊर्ध्वस्थस्य ग्रहादिभिर्यवहितस्याप्यग्रमाचं सखे !
वंशस्य प्रगुणस्य यस्य सुषमे देशे समालोक्यते ।
अत्रैव त्वमवस्थितो यदि वदस्यस्यान्तरं चोच्छ्रयं
मन्ये यन्त्रविदां वरिष्ठपदवीं यातोऽसि धीयन्त्र-
वित् ॥
उदाहरणम् ।
दृष्टयष्टोर्द्वसंस्थेन वंशाग्रं विध्यता भुजः ।
दृष्टश्चतुष्करोऽधान्यष्ट्या खाङ्काङ्गुलः सखे ॥
निविष्टेन तथा कोटिरङ्गुलं वेधयोरपि ।
आत्मवंशान्तरं ब्रूहि वंशोच्छ्रायञ्च वेधवित् ॥"
"अथ जलान्तर्वेधमाह ।
एवं तोयेऽप्यौचं तत्र दृगौचयोनितं भवति ।
किंवा यष्ट्या कोटौ दृष्ट्युच्छ्रायौ जलान्तरे
बाहू ॥
अत्र प्रश्नः ।
दूरस्थस्य न दूरगस्य यदि वाऽदृष्टस्य दृष्टस्य वा
वंशस्य प्रतिबिम्बितस्य सलिले दृङ्मात्रमाचं सखे ।
अत्रैव त्वमवस्थितो यदि वदस्यस्यान्तरं चोच्छ्रयं

त्वां सर्वज्ञमतीन्द्रियज्ञमनुजव्याजेन मन्ये भुवि ॥
उदाहरणम् ।
दृष्टा चेत् यङ्गुला कोटिर्बाहुश्च चतुरङ्गुलः ।
ऊर्ध्वस्थेनोपविष्टेन बाहुरेकादशाङ्गुलः ॥
कोटिरष्टाङ्गुला तोये वंशाग्रं विध्यता सखे ! ।
चक्रहस्तौ दृगुच्छ्रायौ वंशौचां चान्तरं वद ॥"
"किंवा यष्ट्यास्योदाहरणम् ।
यड्क्रैरमरैस्तुल्यान्यङ्गुलान्यथवा क्रमात् ।
आत्मतोयान्तरं दृष्ट्वा वंशौचां चान्तरं वद ॥"
"अथ स्वयंवहमाह ।
लघुदारुजसमचक्रे समसुषिरारा: समान्तरा
नेम्याम् ।
किञ्चिद्वक्रातोय्याः सुषिरस्यार्धे पृथक् ताषाम् ॥
रसपूर्णे तच्चक्रं द्वाधाराच्छ्रियितं स्वयं भ्रमति ॥"
"अथान्यदाह ।
उत्कीर्य नेमिमथवा परितो मदनेन संलग्नम् ।
तदुपरि तालदलाद्यं कृत्वा सुषिरे रसं क्षिपेत्
तावत् ॥
यावन्नसेकपार्श्वे क्षिप्तजलं नान्यतो याति ।
पिहितच्छिद्रं तदतच्चक्रं भ्रमति स्वयं जला-
कृष्टम् ॥"
"अथान्यदाह ।
ताम्रादिमयस्याङ्गुष्ठरूपनलस्याम्बुपूर्णस्य ॥
एकं कुरुजलान्तर्दितीयमग्रं त्वधोमुखञ्च
बहिः ।
युगपच्चुतं चेत् कं नलेन कुरुताङ्गुलिः पतति ॥
नेम्यां बद्ध्वा घटिकाचक्रं जलयन्त्रवत् तथा
धार्यम् ।
नलकाग्रच्युतसलिलं पतति यथा तद्घटीमध्ये ॥
भ्रमति ततस्तत् सततं पूर्णैर्घटीभिः समाकृष्टम् ।
चक्रच्युतं तदुदकं कुण्डे याति प्रणालिकया ॥"
"इदानीमन्येषां स्वयंवहसुपहसन्नाह ।
यदधोरन्ध्रनलं तत् सापेक्षत्वात् स्वयंवहं ग्राह्यम् ।
चतुरश्रमत्कारकरी युक्तिर्यन्त्रं नहि ग्राह्या ॥
एवं बहुधा यन्त्रं स्वयंवहं कुहकविद्यया भवति ।
नेदं गोलाश्रितया पूर्वोक्तत्वाच्चयाप्युक्तम् ॥"

इति सिद्धान्तशिरोमणौ गोले यन्त्राध्यायः ॥)

यन्त्रकं, क्ली, यन्त्रकाष्ठम् । (कुन्दम् । इति हेमचन्द्रः । ३।५७३ ॥) कुँदू इति भाषा । यम्यते काष्ठमने-नेति यमधातोरुत्रप्रत्ययेन यन्त्रं ततः स्वार्थे कप्रत्य-येन निष्पन्नम् ॥ (यथा, सुश्रुते । ४ । २ ।
"कार्यो गोफणिकाबन्धः कक्षामावेष्य यन्त्रकम् ।
न कुर्यात् स्वहसेकञ्च तेन क्लिश्यति हि व्रणः ॥"
यन्त्रयति बध्नाति सेतुप्रभृतीनीति । यन्त्रि + खुल् । सेतुप्रभृतिनिर्म्मातरि, त्रि । यथा, रामा-यणे । २ । ८० । १ ।
"खकर्म्माभिरताः शूराः खनका यन्त्रकास्तथा ॥"
"यन्त्रका जलप्रवाहादियन्त्रणसमर्थाः ।" इति तट्टीका ॥)

यन्त्रयष्टिः, स्त्री, (यन्त्रस्य यष्टिः ।) लेखिशलाका । इति हेमचन्द्रः । ४ । ६३ ॥ धानिघर इति भाषा ॥

यन्त्रगोल:, पुं, कलायविशेष:। इति शब्दचन्द्रिका॥ मटर इति भाषा॥

यन्त्रणं, क्ली, (यन्त्र+ल्युट्।) रक्षणम्। बन्धनम्। (यथा, सुश्रुते उत्तरतन्त्रे ४१ अध्याये।
"रक्तक्षयाद्दहनाभिस्तप्तैर्वाहारयन्त्रणात्।
व्रणितस्य भवेच्छोष: स चासाध्यतमस्तत:॥")

यन्त्रणा, स्त्री, (यन्ति+"ण्यासश्रन्थो युच्।" ३।३।१०७। इति युच्। टाप्।) पीड़ा। यथा, मेघदूते। ४।१०।
"मदनतापभरेण विदीर्य यो
यदुदपाति हृदा दमनस्रस:।
निविड़पीनकुचद्वययन्त्रणा
तमपराधमघात् प्रतिबध्नती॥"
(पीड़ाशब्देऽस्या विशेषो विज्ञेय:॥)

यन्त्रपेषणी, स्त्री, (पिष्यतेऽनयेति। पिष्। करणे ल्युट्। ङीप्। यन्त्रमेव पेषणी।) पेषणार्थयन्त्रम्। इति जटाधर:॥ यांता इति भाषा॥

यन्त्रिका, स्त्री, (यन्त्रयति कृतकौतुका पीड़यतीति। यन्त्रि+खुल्। टापि अत इत्वम्।) भगिनी:। कनिष्ठा भगिनी। यथा, हेमचन्द्रे।
"कनिष्ठा श्यालिका हाली यन्त्रिका केलिकुक्षिका॥"

यन्त्रित:, त्रि, (यन्त्रि+क्त:।) बद्ध:। इति धरणि:॥ (यथा, देवीभागवते। ३।१७।१७।
"ते भक्ष्या भवदुर्धर्षं हठादाक्रम्य यन्त्रिताम्।
वेगमाना मुनिं प्राह सुरभि: साश्रुलोचना॥")

यन्त्री, [न्] त्रि, यन्त्रविशिष्ट:। यन्त्रशब्दादस्त्यर्थे इनिप्रत्ययेन निष्पन्न:॥ (यन्त्रयति बध्नातीति। यन्त्र बन्धने+णिनि:। बन्धनकारक:। यथा, रामायणे। १।१।७६।
"अस्त्रैर्योऽभ्युक्तमात्मानं ज्ञात्वा पैतामहाद्वरात्।
मर्षयन् राक्षसान् वीरो यन्त्रिणस्तान् यदृच्छया॥")

यभ, औ मैथुने। इति कविकल्पद्रुम:॥ (भ्वा०-पर०-अक०-अनिट्।) औ, अयाभीत्। यभति युवा। इति दुर्गादास:॥

यम, औ उ विरतौ। इति कविकल्पद्रुम:॥ (भ्वा०-पर०-अक०-अनिट्। क्वचिट्।) औ, यम्ता। उ, यमित्वा यन्त्वा। विरतिर्निवृत्ति:। यच्छति पापात् साधु:। इति दुर्गादास:॥

यम, कमि परिवेषणे। तदभावे। इति कविकल्पद्रुम:॥ (चुरा०-पर०-सक०-सेट्।) कमि, यमयति यामयति। परिवेषणं अन्नादेर्दानम्। वेष्टनमित्येके। विषत्यथाप्नावित्यस्य रूपमिति रमानाथ:। केचित्तु परिवेषण एवायं मानुबन्ध:। यमयत्यन्नं द्विजाय गृही। अन्यत्र नियामयति संयामयति इत्याहु:। अन्ये तु अपरिवेषण एवायं मानुबन्ध:। 'नियमयति

विमार्गप्रस्थितानान्तु दण्डम्।' इति प्राकुन्तले। परिवेषणे तु यामयत्यन्नं द्विजाय गृही इत्याहु:। तेन उभयस्य प्रामाणिकत्वादुभयत्र विकल्पज्ञापनार्थश्चानुबन्ध: कृत:। इति दुर्गादास:॥

यम:, पुं, (यमयति नियमयति जीवानां फलाफलमिति। यम्+अच्।) दक्षिणदिक्पाल:। तत्पर्य्याय:। धर्म्मराज:२ पितृपति:३ समवर्त्ती४ परेतराट्५ कृतान्त:६ यमुनाभ्राता७ शमन:८ यमराट्९ काल:१० दण्डधर:११ श्राद्धदेव:१२ वैवस्वत:१३ अन्तक:१४। इत्यमर:। १।१।६१॥ धर्म्म:१५ धर्म्मराट्१६ जीवितेश:१७ महिषध्वज:१८ औड़म्बर:१९ दण्डधार:२० कौणाश:२१ दभ्र:२२ महिषवाहन:२३ प्रौर्णपाद:२४ भीमशासन:२५ कङ्क:२६ हरि:२७। इति शब्दरत्नावली॥ कर्म्मकर:२८। इति जटाधर:॥ *॥ चतुर्दशयमतर्पणं यथा,—
"यां काञ्चित् सरितं प्राप्य स्नात्वा पक्षे चतुर्दशीम्।
यमुनायां विशेषेण नियतस्तर्पयेदृषिमान्॥
यमाय धर्म्मराजाय मृत्यवे चान्तकाय च।
वैवस्वताय कालाय सर्व्वभूतक्षयाय च॥
औड़म्बराय दध्नाय नीलाय परमेष्ठिने।
वृकोदराय चित्राय चित्रगुप्ताय वै नम:॥
एकैकस्य तिलैर्मिश्रांस्त्रींस्त्रीन् दद्यात् जलाञ्जलीन्।
संवत्सरकृतं पापं तत्क्षणादेव नश्यति॥"
इति तिथ्यादितत्त्वधृतभविष्यपुराणवचनम्॥
तस्योत्पत्तिर्यथा,—
"संज्ञा च रविणा दृष्टा निमीलयति लोचने।
यतस्तत: सरोषोऽर्क: संज्ञां निष्ठुरमब्रवीत्॥
मयि दृष्टे सदा यस्मात् कुरुषे नेत्रसंयमम्।
तस्मात्त्वन्निष्ठसे मूढ़े! प्रजासंयमनं यमम्॥"
मार्कण्डेय उवाच।
"ततस्तस्यास्तु संजज्ञे भर्त्तृशापेन तेन वै।
यमश्च यमुना चैव प्रख्याता सुमहानदी॥"
इति मार्कण्डेयपुराणे वैवस्वतमन्वन्तरे ७७ अ:॥
पुण्यात्मनां सम्बन्धे तस्य रूपं यथा,—
"तानागतांस्ततो दृष्ट्वा नरान् धर्म्मपरायणान्।
भास्करि: प्रीतिमाधाय स्वयं नारायणो भवेत्॥
चतुर्ब्बाहु: श्यामवर्ण: प्रफुल्लकमलेक्षण:।
शङ्खचक्रगदापद्मधारी गरुड़वाहन:॥
स्वर्णयज्ञोपवीती च रत्नैरत्युत्तरानन:।
किरीटी कुण्डली चैव वनमालाविभूषित:॥"
पापिनां सम्बन्धे तस्य रूपं यथा,—
"त्रिंशद्योजनदीर्घाङ्गो वापीसदृशलोचन:।
धूम्रवर्णो महातेजा: प्रलयाम्भोधरध्वनि:॥
तृणाधिराजलोमा च ज्वलदग्निशिखाग्रवत्।
नासारन्ध्रस्फुरच्छ्वासघनैर्व्याप्तमहानिल:॥
सुदीर्घदशनश्रेणि: सर्पोपमनखावलि:।
प्रचण्डमहिषारूढ़: संदष्टदशनच्छद:॥
दण्डहस्तश्चर्म्मवासा भ्रुकुटीकुटिलानन:॥"
इति पाद्मे क्रियायोगसारे २२ अध्याय:॥

अस्यानधिकारो यथा,—
"प्रोवाच धर्म्मं यदहं ब्रवीमि
कार्य्यं त्वया तत् खलु धर्म्मराज!॥
ब्रह्मोवाच।
ये भक्ता: पुष्करीकाक्षे कर्म्मणा मनसा गिरा।
स्वकर्म्मनिरता दान्ता न नियम्या हि ते त्वया॥
कृष्ण: संपूजितो यैस्तु ये: कृष्ण: समुपासित:।
यैश्च नित्यं स्मृत: कृष्णो न ते त्वद्विषयोपगा:॥
नम: कृष्णाच्युतानन्त वासुदेवेत्युदीरितम्।
यैर्भावभावितो धर्म्म! न ते त्वद्विषयोपगा:॥
दानं दत्तद्विजैर्यैस्तमच्युत: प्रीयतामिति।
अङ्गापुर:सरैर्धर्म्म! न ते त्वद्विषयोपगा:॥
उत्तिष्ठद्भि: स्वपद्भिश्च व्रजद्भिश्च जनार्दन:।
यै: स्मृतस्तु सदा धर्म्म! न ते त्वद्विषयोपगा:॥
सर्व्ववाधासु ये कृष्णं संस्मरन्त्युच्चरन्ति च।
तद्भावभाविनो ये च न ते त्वद्विषयोपगा:॥
स एव धाता सर्व्वस्य तन्नियोगकरा वयम्।
यमसंयमने शक्त: सोऽस्मत्संयमको हरि:॥"
इति वह्निपुराणे नरसिंहप्रादुर्भावाध्याय:॥
अपि च।
ब्राह्मण उवाच।
"यत् कृत्वा सुमहत् पुण्यं धर्म्माधर्म्मविनिर्णये।
प्रमाणं त्वं हि लोकानां फलं मे ब्रूहि तद्यम!॥"
यम उवाच।
यमो यम इति श्रुत्वा वृथा त्वं विद्यते जन:।
आत्मा च यमितो येन न तस्यैव यम: स्मृत:॥
आनृशंस्यं क्षमा सत्यमहिंसा दम आर्जवम्।
ध्यानं प्रसादो माधुर्य्यं सन्तोषश्च यमा दश॥
यमैश्च नियमैश्चैव य: करोत्यात्मसंयमम्।
स चाहत्वा तु मां याति परं ब्रह्म सनातनम्॥"
इति तत्रैव यमशम्भिसंवादाख्यानम्॥ *॥
सावित्रीकृतं यमाष्टकं स्तोत्रं यथा,—
सावित्र्युवाच।
"तपसा धर्म्ममाराध्य पुष्करे भास्कर: पुरा।
धर्म्मांशं यं सुतं प्राप धर्म्मराजं नमाम्यहम्॥१॥
समता सर्व्वभूतेषु यस्य सर्व्वस्य साक्षिण:।
अतो यन्नाम शमनमिति तं प्रणमाम्यहम्॥२॥
येनान्तश्च कृतो विश्वे सर्व्वेषां जीविनां परम्।
कर्म्मानुरूपकाले च तं कृतान्तं नमाम्यहम्॥३॥
बिभर्त्ति दण्डं दण्डाय पापिनां शुद्धिहेतवे।
नमामि तं दण्डधरं य: स्मार्त्ता सर्व्वदेहिनाम्॥४॥
विश्वे च कलयत्येव य: सर्व्वायुश्च सन्ततम्।
अतीव दुर्निवार्य्यश्च तं कालं प्रणमाम्यहम्॥५॥
तपस्वी वैष्णवो धर्म्मी संयमी विजितेन्द्रिय:।
जीविनां कर्म्मफलदस्तं यमं प्रणमाम्यहम्॥६॥
स्वात्मारामश्च सर्व्वज्ञो मित्र: पुण्यकृतां भवे।
पापिनां क्लेशद: शश्वत् पुण्यमित्रं नमाम्यहम्॥७॥
यज्जन्म ब्रह्मणो वंशे ज्वलन्तं ब्रह्मतेजसा।
यो ध्यायति परं ब्रह्म ब्रह्मवंशं नमाम्यहम्॥८॥
इत्युक्त्वा सा च सावित्री प्रणनाम यमं सुते।
यमस्तां विष्णुभजनं कर्म्मपाकमुवाच ह॥

इदं यमाष्टकं नित्यं प्रातरुत्थाय यः पठेत् ।
यमात्तस्य भयं नास्ति सर्व्वपापात् प्रमुच्यते ॥
महापापी यदि पठेत् नित्यं भक्त्या च नारद ! ।
यमः करोति तं शुद्धं कायव्यूहेन निश्चितम् ॥"
इति ब्रह्मवैवर्त्ते प्रकृतिखण्डे २६ अध्यायः ॥ ७ ॥
पारिभाषिकयमदण्डा यथा,—
"कार्षिकस्य दिनान्यष्टावष्टाग्रहायणस्य च ।
यमस्य दण्डना एते लङ्घाहारी स जीवति ॥"
इति वैद्यकम् ॥ * ॥
("पङ्कमत्स्यवसातैलघृतगन्धांश्च ये नराः ।
घृतगन्धांश्च ये वान्ति गन्तारस्ते यमालयम् ॥
यूका ललाटमायान्ति बलिं गाध्रन्ति वायसाः ।
येषां वापि इतिर्नास्ति यातारस्ते यमालयम् ॥"
इति सुश्रुते सूत्रस्थाने ३१ अध्यायः ॥
अस्य प्रायश्चित्तानि प्रायोपवेशनादीनि यमराजशब्दे द्रष्टव्यम् ॥ * ॥) शरीरसाधनापेक्षानित्यकर्म्म । इत्यमरः । २ । ७ । ४६ ॥
"उपायान्तरनिरपेक्षं शरीरमात्रसाध्यं नित्यं यावज्जीवमवश्यकार्य्यं यत्कर्म्म सत्यास्तेयादि तद्यमः । यमेरल् ।
'अहिंसा सत्यवचनं ब्रह्मचर्य्यमकल्कता ।
अस्तेयमिति पञ्चैते यमाश्चैव व्रतानि च ॥'
इति मनुः ।" इति लक्ष्मीकायां भरतः ॥
स च अष्टाङ्गयोगान्तर्गताङ्गविशेषः । स तु दशविधो यथा,—
"ब्रह्मचर्य्यं दया क्षान्तिर्ध्यानं सत्यमकल्कता ।
अहिंसास्तेयमाधुर्य्यं दमश्चेति यमाः स्मृताः ॥"
इति गारुडे १०६ अध्यायः ॥ * ॥
स च पञ्चविधो यथा,—
"अहिंसा सत्यमस्तेयं ब्रह्मचर्य्यापरिग्रहौ ।
यमाः पञ्चाथ नियमाः शौचं द्विविधमीरितम् ॥"
इति तत्रैव २३० अध्यायः ॥
"अहिंसासत्यास्तेयब्रह्मचर्य्यापरिग्रहा यमाः ।"
इति पातञ्जले साधनपादे ।३०॥ यच्छति नियच्छति इन्द्रियग्राममनेनेति । यम + घञ् ।) संयमः ॥ यथा, अमरः । ३ । २ । १८ ।
"वियामो वियमो यामो यमः संयामसंयमौ ॥"
काकः । पुंनिः । इति मेदिनी । मे, २३ ॥
(विष्णुः । यथा, महाभारते ।१३।१४६।३०।
"अतीन्द्रः संग्रहः सर्गो धृतात्मा नियमो यमः ॥"
"अन्तर्यच्छतीति यमः ।" इति तट्टीकायां भरतः ॥)

यमः, त्रि, (यच्छति एकत्र गर्भाशये नियतो भवतीति । यम + अच् ।) यमजः । इति मेदिनी । मे, २३ ॥ तयोर्ज्येष्ठत्वनिरूपणं यथा,
"बहिर्वर्णेषु चारित्राद्दृश्ययोः पूर्व्वजन्मतः ।
यस्य जातस्य यमयोः प्रथमं मुखम् ।
सन्तानः पितरश्चैव तस्मिन् ज्येष्ठं प्रतिष्ठितम् ॥
जन्मप्राधम्यात् ज्येष्ठं यमयोः न तु निषेकप्राधम्यात् जन्मप्राधम्यसन्देहे मुखदर्शनप्राधम्यात् ।" इति उद्वाहतत्त्वम् । (यथा,—
"योनेरन्तर्वायुना भिन्ने द्वौ जीवौ कुक्षिमागतौ ।

यमाविव्यभिधीयेते धर्म्मेतरपुरःसरौ ॥"
इति सुश्रुते शारीरस्थाने द्वितीयेऽध्याये ॥
अनयोरेकस्य दृष्टिरपरस्य श्रौणत्वाकथमित्यत आह ।
"कर्म्मात्मकत्वादियमांशभेदात्
शुक्रार्त्तवं दृष्टिमुपैति कुक्षौ ।
एकोऽधिको न्यूनतरो द्वितीय
एवं यमेऽप्यभ्यधिको विशेषः ॥"
इति चरके शारीरस्थाने द्वितीयेऽध्याये ॥)

यमकं, क्ली, (यमं युग्मभावं वायति प्राप्नोतीति । के + कः ।) शब्दालङ्कारः । तस्य लक्षणादि यथा, —
"सत्यर्थे पृथगर्थायाः स्वरव्यञ्जनसंहतेः ।
क्रमेण तेनैवावृत्तिर्यमकं विनिगद्यते ॥
अत्र द्वयोरपि पदयोः क्वचित् सार्थकत्वं क्वचिन्निरर्थकत्वं क्वचिदेकस्य सार्थकत्वमपरस्य निरर्थकत्वमत उक्तं सत्यर्थे इति । तेनैव क्रमेणेति दमो मोद इत्यादेर्विभक्तिविषयत्वं सूचितम् । एतच्च पदपादाद्येकावृत्तित्वेन पादाद्यावृत्तेश्चानेकविषयतया प्रभूततमभेदं दिङ्मात्रमुदाह्रियते ।
'नवपलाशपलाशवनं पुरः
स्फुटपरागपरागतपङ्कजम् ।
मृदुलतान्तलतान्तमलोकयत्
सुरभिं सुरभिं सुमनोभरैः ॥'
इति माघे । ६ । २ ॥
अत्र पदावृत्तिः पलाशपलाशेति सुरभिं सुरभिमित्यत्र च द्वयोः सार्थकत्वम् । लतान्तलतान्तेत्यत्र प्रथमस्य निरर्थकत्वं परागपरागेत्यत्र द्वितीयस्य एवमन्यत्राप्युदाहार्य्यम् । यमकादौ भवेदेवं व्यञ्जनस्वरयोरपि । इत्युक्तनयात् । भुजलतां जडतामवलाजन इत्यत्र न यमकत्वहानिः ।" इति साहित्यदर्पणे दशमः परिच्छेदः । १० ॥ (यमकालङ्कारस्तु युग्मपादयमकायुग्मपादयमकात्यन्तयमक-पादमध्ययमक-पादान्तयमक-पादादियमक-पादादिमध्ययमक-पादान्त्ययमक-मध्यान्तयमक-काञ्चीयमकगर्भयमकचक्रवालयमकपुच्छयमकमहायमकमिश्रयमकद्व्यन्तयमकविपर्ययमकसमुद्गयमकसर्व्वयमकावलीभेदात् बहुविधः । तल्लक्षणोदाहरणादिकं भट्टिकाव्ये दशमसर्गे यमकचक्रे काव्यादर्शे दशमपरिच्छेदे च द्रष्टव्यम् ॥ यष्टिविशेषः । यथा, महाभारते । ४ । ५५ । ४२ ।
"ततो विराटस्य सुतः सयमाहत्य वाजिनः ।
यमकं मण्डलं कृत्वा तान् योधान् प्रत्यवारयत् ॥"
"यमकं शत्रूणां निरोधकं मण्डलं कृत्वा ।" इति तट्टीकायां नीलकण्ठः ॥ सङ्घभ्रम । यथा, महाभारते । ३ । १६ । ८ ।
"मण्डलानि विचित्राणि यमकानीतराणि च ।
सव्यानि च विचित्राणि दक्षिणानि च सर्व्वशः ॥"
"यमकानि सङ्घभ्रमाणि ।" इति तट्टीकायां नीलकण्ठः ॥) त्रि, यमजः । इति मेदिनी । के, १३२॥

यमकः, पुं, (यम + भावे घञ् । स्वार्थे कन् ।) संयमः । इति मेदिनी । के, १४२ ॥
यमकालिन्दी, स्त्री. (यमः कालिन्दी च सुतः सुता च यस्याः ।) भंज्ञा । सा च सूर्य्यपत्नी । इति शब्दरत्नावली ॥
यमकीटः, पुं, (यमस्यूचकः कीटः ।) घुर्घुरनामा कीटः । इति त्रिकाण्डशेषः ॥
यमकोटिः, स्त्री, लङ्कायाः पूर्ब्बे पृथिव्याश्चतुर्थभागे देशविशेषः । यथा,—
"लङ्का कुमध्ये यमकोटिरस्याः
प्राक्पश्चिमे रोमकपत्तनञ्च ।
अधस्तलः सिद्धपुरं सुमेरुः
सौम्येऽथ याम्ये वडवानलञ्च ।
फुल्लत्पादाम्बरिलानि तानि
स्थानानि षड्गोलविदो वदन्ति ॥"
इति सिद्धान्तशिरोमणिः ॥
यमघण्टः, पुं, (यमं घण्टयतीति । घण्ट + अण् ।) योगविशेषः । यथा,—
"हे मघापूर्ब्बफल्गुन्यौ पुष्याश्लेषा च चन्द्रयोः ।
ज्येष्ठानुराधा भरणी चाश्विनी कृत्तिकासरे ॥
हस्तार्द्रा चन्द्रभे मूला पूर्ब्बाषाढ़ा च रेवती ।
सोमे स्युस्तरभाद्यञ्च शुक्रार्के स्वातिरोहिणी ।
शनिवारे श्रुतभिषा अथवा यमघण्टकः ॥"
इति सारसंग्रहः ॥
अपि च ।
"घण्टोक्तवर्ज्ययुक्ते स्वस्वपतिदिने सौम्यवारे-ऽर्य्यमापि ।"
अस्य वर्ज्यकालनिर्णयो यथा,—
"यमघण्टे त्यजेद्दर्शं रुद्रौ द्वादश नाड़िकाः ।
अन्येषां पापयोगानां मध्याद्धात् परतः शुभम् ॥"
अस्य दोषा यथा,—
"अभिजातो न जीवेत यदि शक्रसमो भवेत् ।
विवाहे विधवा नारी यात्रायां मरणं ध्रुवम् ॥
निष्फलं क्षत्रियाणिज्यं विद्यारम्भे च संशयता ।
गृहप्रवेशे भङ्गः स्याच्चूड़ायां मरणं ध्रुवम् ॥
अन्नदाने फलं नास्ति व्रतदाने च निष्फलं ।
शुभकर्म्माणि सर्व्वाणि नैव कुर्य्याद्विचक्षणः ॥"
इति ज्योतिस्तत्त्वम् ॥
रविवारे १० । ११ । सोमवारे ८ । ६ । मङ्गलवारे १७ । १८ । १ । २ । बुधवारे १३ । ६ । बृहस्पतिवारे १६ । २० । २६ । २७ । शुक्रवारे १५ । ४ । शनिवारे २४ । २२ । इति यमघण्टयोगः ॥

यमजः, त्रि, (यमो यमकः सन् जायते इति । जन् + डः ।) एककालीनैकगर्भजातसन्तानद्वयम् । यथा, मेदिनी । मे, २३ ।
"यमोऽग्निजिद्यमजे नाकाके शमने शनौ ॥"
(यथा च कथासरित्सागरे । २३ । ६१ ।
"प्राप्तिकरोऽपि पुरोधा आद्यसुतं प्राप्ति-
सोमनपरञ्च ।
वैश्वानरमर्पितवान् पिङ्गलिकापुत्रकौ
यमजौ ॥")

अस्य श्रेष्ठत्वं यमशब्दे द्रष्टव्यम् ॥ (अश्वविशेषे, पुं। यथा, अश्ववैद्यके। ३। १५२।
"एकेनाङ्गेन हीनेन भिन्नेन च विशेषतः।
यमजं वाजिनं विन्द्यात् वामनं वामना-
कृतिम् ॥")

यमदग्निः, पुं, (जमन् हुतभक्षणशीलः प्रज्वलितोऽग्निरिव। पृषोदरादित्वात् जस्य यः।) जमदग्निमुनिः। स तु परशुरामपिता। इति भरतद्विरूपकोषः॥ (विवृतिस्तु जमदग्निशब्दे द्रष्टव्या॥)

यमदूतः, पुं, (यमस्य दूतः।) यमस्य चरः। यथा,—
"यमदूतपिशाचाद्यैर्यत् परासुरुपास्यते।
सद्भिरौषधवीर्य्याणि तस्मात्तं परिवर्जयेत्॥"
इति वाग्भटे शरीरस्थाने षष्ठेऽध्याये॥)

धर्म्मस्य उवाच।
"के यूयं विकृताकाराः पाशमुद्गरपाणयः।
दंष्ट्राकरालवदना अङ्गारसदृग्प्रभाः॥
यूयं सर्व्वे महावीराः ज्वलत्पावकलोचनाः।
कृता तथापि युष्माकमियं केन सुदुर्गतिः॥"
यमदूता ऊचुः।
यमदूता वयं सर्व्वे यमाज्ञाकारिणः सदा।
त्वदुक्तोऽयं द्विजास्माकं सुमहान् कश्मलोदयः॥"
इति पद्मपुराणे क्रियायोगसारे ६ अध्यायः॥

यमदूतकः, पुं, (यमस्य दूत इवेति कन्।) काकः। इति शब्दरत्नावली॥ (यमदूत+स्वार्थे कन्।) यमदूतश्च॥

यमदूतिका, स्त्री, (यमस्य दूतिकेव।) तिन्तिड़ीवृक्षः। (यथा,—
"जीवनं जीवनं हन्ति प्राणान् हन्ति समीरणः।
किमाश्चर्य्यं चारभूमौ प्राणदा यमदूतिका॥"
इत्युद्भटः॥)

यमदेवता, स्त्री, (यमो देवता अधिष्ठात्री यस्याः।) भरणीनक्षत्रम्। इति हेमचन्द्रः। २। २२॥

यमद्रुमः, पुं, (यम इव भयावहो द्रुमः।) शाल्मलिवृक्षः। इति राजनिर्घण्टः॥ (विवरणमस्य शाल्मलिशब्दे ज्ञातव्यम्॥)

यमद्वितीया, स्त्री, (यमप्रिया द्वितीया इति मध्यपदलोपिकर्म्मधारयः।) कार्त्तिकशुक्लद्वितीया। भ्रातृद्वितीया इति ख्याता। तत्कृत्यं यथा। लिङ्गपुराणे।
"कार्त्तिके तु द्वितीयायां शुक्लायां भ्रातृपूजनम्।
या न कुर्य्याद्विनश्यन्ति भ्रातरः सप्तजन्मनि॥"
तस्या इति शेषः। महाभारते।
"कार्त्तिके शुक्लपक्षस्य द्वितीयायां युधिष्ठिर!।
यमो यमुनया पूर्व्वं भोजितः स्वगृहे स्वयम्।
तस्मान्निजगृहे पार्थ! न भोक्तव्यमतो बुधैः॥
यत्नेन भगिनीहस्ताद्भोक्तव्यं पुष्टिवर्द्धनम्।
दानानि च प्रदेयानि भगिनीभ्यो विशेषतः॥"
तथा।
"यमश्च चित्रगुप्तश्च यमदूतांश्च पूजयेत्।
अर्घ्यञ्चात्र प्रदातव्यो यमाय सहजद्वये॥"
सहजद्वयैर्भगिनीभ्रातृभिः। अर्घ्यमन्त्रः।
"एह्येहि भ्रातर्मद्गृहं प्रगृह्य
यमान्तकालोकधरामरेश।
भ्रातृद्वितीयाकृतदेवपूजां
गृहाण चार्घ्यं भगवन्नमस्ते॥
धर्म्मराज नमस्तुभ्यं नमस्ते यमुनाग्रज।
पाहि मां किङ्करैः सार्द्धं सूर्य्यपुत्र नमोऽस्तु ते॥"
यमुनाञ्च संपूज्य नमस्कुर्य्यात्।
"यमस्वसर्नमस्तेऽस्तु यमुने लोकपूजिते।
वरदा भव मे नित्यं सूर्य्यपुत्रि नमोऽस्तु ते॥"
अन्नं दत्त्वा पठेत्।
"भ्रातस्त्वानुजाताहं भुङ्क्ष्व भक्तमिदं शुभम्।
प्रीतये यमराजस्य यमुनाया विशेषतः॥"
ज्येष्ठा चेत् तदाग्रजाताहमिति वदेत्॥ अत्र भोक्तव्यं पुष्टिवर्द्धनं इति विधिसमभिव्याहृतफलश्रुत्या भोजननियमस्य प्राधान्यात्तस्य मुख्यकालोऽपराह्णविभक्तदिनपञ्चमांशो ग्राह्यः। यथा दक्षः।
"पञ्चमे च तथा भागे संविभागो यथार्हतः।
पितृदेवमनुष्याणां कीटानाञ्चोपदिश्यते॥
संविभागं ततः कृत्वा गृहस्थः श्रेयभाग्भवेत्।
इतिहासपुराणाद्यैः यच्च शस्यं नयेत्॥"
संविभागो विभज्यान्नस्य प्रतिपादनम्। देवोऽत्र वैश्वदेवसम्बन्धी। पञ्चमांशग्रासाभावे तु।
"न भुञ्जीतोद्धृतस्नेहं नातिसौहित्यमाचरेत्।
नातिप्रगे नातिसायं नातिसन्ध्यासमीपतः॥"
इति मनूक्तपर्य्युदस्तसूर्य्योदस्तेतरकालोऽपि ग्राह्यः। सौहित्यं लग्नः। अत्र भोजनस्य रागप्राप्तत्वेऽपि तत्कालस्य।
"मुनिभिर्हितमेतं प्रोक्तं विप्राणां मलवाहिनां नित्यम्।
अहनि च तथा तमस्विन्यां सार्द्धप्रहरयामान्तः॥"
इति कात्यायनीयेन नियमितत्वाद्भोजनकालस्य वैधत्वेन ग्राक्कीयत्वात् न सामान्यग्राक्सायंग्रासप्रतिषेधपर्य्युदासासङ्गतिः। अत्राजध्ययनं भ्रान्तानाम्। प्रेतपक्षोत्तरद्वितीयायां तन्निषेधात्। यथा च राजमार्त्तण्डे।
"प्रेतपक्षे च या द्वितीयास्ताः प्रेतपक्षे गते तु याः।
या तु कौजागरे याते चैत्र्याश्वयुजयोरपि च॥
चातुर्मास्ये मघासप्ते च द्वितीया या भवेत्तिथिः।
परास्तेताखनध्यायः पुराणैः परिकीर्त्तितः॥"
ज्योतिषे। तथा यमद्वितीयायां यात्रायां मरणं भवेत्। इति तिथ्यादितत्त्वम्॥ * ॥ अस्यां व्रतविधानं यथा,—
नारद उवाच।
"भगवन्! प्रष्टुमिच्छामि लाभहं विनयान्वितः।
तद्व्रतं ब्रूहि मे स्वामिन्! श्रुत्वा येन न पश्यति॥
अल्पदोषं महत्पुण्यं शोभनं व्रतमुत्तमम्।
प्रसादं कुरु मे स्वामिन्! यथाहं तत् करोमि भोः॥
ब्रह्मोवाच।
यदि वेच्छसि विप्रेन्द्र व्रतानां व्रतमुत्तमम्।
व्रतं यमद्वितीयाख्यं शृणु त्वं श्रुतवारज्ञम्॥
कार्त्तिके मासि शुक्लायां द्वितीयायां मुनीश्वर!।
कर्त्तव्यं तद्विधानेन मृत्युमृत्युनिवारणम्॥
ब्राह्मे मुहूर्त्ते चोत्थाय चिन्तयेदात्मनो हितम्।
प्रातः कृत्वा द्विजः स्नानं दन्तधावनपूर्व्वकम्॥
ततः शुक्लाम्बरधरः शुक्लमाल्यानुलेपनः।
कृतनित्यक्रियो हृष्टः कुण्डलाङ्गदभूषितः॥
विधिं विष्णुञ्च रुद्रञ्च संस्थाप्यौड़म्बरे शुभे।
पद्मं सप्तदलं कृत्वा पूजयेत् सुसमाहितः॥
चन्दनागुरुकर्पूरकुङ्कुमैर्द्विजसत्तम!।
पुष्पैर्धूपैश्च नैवेद्यैर्नारिकेलादिभिः फलैः॥
सरस्वतीञ्च वरदां वीणापुस्तकधारिणीम्।
ध्यायेत् शुक्लाम्बरधरां हंसवाहनसंस्थिताम्॥
ततो मृत्युविनाशार्थं सालङ्कारां पयस्विनीम्।
विप्राय वेदविदुषे गाञ्च दद्यात् सवत्सकाम्॥
अपमृत्युविनाशाय संसारार्णवतारिकाम्।
विप्र तुभ्यमिमां रौद्रीं धेनुं सम्प्रददे त्वहम्॥
इति वाक्यविचारेण धेनुं दद्याद्विजातये।
कुलीनाय सुशान्ताय रोगहीनद्विजाय वै॥
तदभावे षोडशकं सवत्सं सहिरण्यकम्।
औडुम्बरविधानेन सम्प्रदद्याद्विजातये॥
तस्याप्यलाभे विप्रेन्द्र! विप्राय सदृशाय वै।
दद्यात् कार्त्तिकशुक्लायां द्वितीयायां विशेषतः॥
भ्रातरश्रेष्ठान् तथा वृद्धान् संपूज्य चाभिवादयेत्।
नारिकेलादिदानेन तोषयेत् स्वजनानपि॥
ततः सोदरसम्पन्ना भगिनी याभवद्गृहे!।
तस्या गृहं समागत्य श्रद्धानोऽभिराजयेत्॥
भद्रे भगिनि! शुभगे त्वदङ्घ्रिसरसीरुहे।
श्रेयसेऽद्य नमस्कुर्म्मागतोऽहं तवालयम्॥
इति श्रुत्वा भगिन्यादिः सोदरं विनयान्वितम्।
दृष्ट्वाक्षेक्षतरक्षस्य पूजनं क्रियते महत्॥
अद्य भ्रातृमती भ्रातस्त्वं नो वससि बान्धवः।
भोक्तव्यं भोऽद्य मद्गेहे त्वायुषे कुलदीपक!॥
कार्त्तिके शुक्लपक्षस्य द्वितीयायां सहोदरः।
यमो यमुनया पूर्व्वं भोजितः स्वगृहेऽर्चितः।
अस्मिन् दिने यमेनापि पूजिता भगिनी शुभा॥
स्वसुर्गेहे योऽत्ति यो न भुङ्क्ते
यमद्वितीयादिनमेव लब्ध्वा।
तं पापिनं सर्व्वसुराः प्रबुध्य
संसारमार्गे रटयन्ति विप्र!॥
तस्माद्भ्राता स्वगृहे भोक्तव्यं मासि कार्त्तिके।
शुक्लायाञ्च द्वितीयायां सर्व्वैश्वर्य्याय भो द्विज!॥
वर्षे वर्षे च कर्त्तव्यं यशसे आयुषे श्रिये।
ततः सम्पूज्य सुमते भगिन्यै सुविधानतः॥
स्वर्णालङ्कारवस्त्रादिदानसत्कारमादरात्।
प्रदद्यान्मुनिशार्दूल प्रश्रयावनतः सुधीः॥
स आशीर्भिः प्रगृह्यास्या नमस्कृत्य क्षमापयेत्।
सर्व्वा भगिन्यः सन्तोष्या ज्येष्ठाशुक्लमशुक्लदा॥
वस्त्रान्नपानसत्कारैर्भोजनैः पुष्टिवर्द्धनैः।
करोत्येवं नरो विद्वान् न याति यमयातनाम्॥

अपनेतुं न चाप्नोति सत्यं सत्यं हि नान्यथा ॥
येभंगिन्यः सुवासिन्यो वस्त्रालङ्कारशोभिताः ।
न तेषां वत्सरं यावत् कलहो न रिपोर्भयम् ॥
व्रतस्यास्य प्रसादेन भूताः प्रेताश्च राक्षसाः ।
दूरादेव पलायन्ते धर्म्मराजेन ताड़िताः ॥
यो देवो महिषारूढ़ो दण्डसूद्गरधारकः ।
वेष्टितः किङ्करैर्दण्डैस्तस्मै कालात्मने नमः ॥
इत्थं त्वं द्विजशार्दूल ! कुरुष्व तदूव्रतं शुभम् ।
रम्यं यमद्वितीयाख्यमपमृत्युनिवारणम् ॥
व्रतस्यास्य प्रभावेन पुत्रपौत्रसमन्वितः ।
सत्यं वदामि ते विप्र ! गृहस्थः स्यात् सदैव हि ॥
नार्हस्योन समो धर्म्मो न भूतो न भविष्यति ।
सन्देहोऽत्र न कर्त्तव्य इह लोके परत्र च ॥
ये वै यमद्वितीयाख्यं व्रतं कुर्व्वन्ति मानवाः ।
सप्तजन्मकृतं पापं तत्क्षणादेव नश्यति ॥
अपुत्रो लभते पुत्रं धनहीनो लभेद्धनम् ।
भार्य्याहीनो लभेद्भार्य्यां सुरूपां कुलसम्भवाम् ॥
यस्यां तिथौ यमुनया यमराजदेवः
संभोजितः सकललोकनिपातदक्षः ।
तस्यां भुनक्ति सुतिथौ च गृहे भगिन्याः
प्राप्नोति वित्तमतुलं स चिरायुरेव ॥"

इति पाद्मे उत्तरखण्डे १२५ अध्यायः ॥

यमधारः, पुं, (यमा युग्मीभूता धारास्य । यद्वा, यमवत् विनाग्निका धारा यत्र ।) पार्श्वद्वय-धारायुक्तास्त्रविशेषः । किरीच कांटार इत्यादि भाषा ॥

यमनं, क्ली, (यम्+भावे ल्युट् ।) बन्धनम् । उपरतिः । इति मेदिनी । ने, १११ ॥ (संयमः । यथा, हरिवंशे भविष्यपर्व्वणि । १६ । ४८ ।
"अगुर्वामननामासि यतस्त्वं वामनाख्यया ।
मननान्मुनिरेवासि यमनाद् यतिरुच्यसे ॥")

यमनः, पुं, (यमयति नियमयतीति । यम्+ल्युः ।) यमः । इति मेदिनी । ने, १११ ॥ (यमयति वशमानयतीन्द्रियग्राममिति । संयमकर्त्तरि, त्रि । यथा, वाजसनेयसंहितायाम् । ६ । २२ ।
"यवासि यमनो ध्रुवोऽसि धरुणः ।"
"यमनः खयं संयमनकर्त्ता भवसि ।" इति तद्भाष्ये महीधरः ॥ नियमकारिणि च त्रि । यथा, तत्रैव । १४ । २२ ।
"यवी राड्यन्त्रासि यमनी ध्रुवासि धरित्री ।"
"यमनी सर्व्वेषां नियमकारित्र्यसि ।" इति तद्भाष्ये महीधरः ॥)

यमनिका, स्त्री, (यच्छति आवृणोतीति । यम्+ल्युः । कन् । टाप् ।) यवनिका । इत्यमर-टीकायां रामाश्रमः ॥ कानात् इति भाषा ॥

यमपत्नी, स्त्री, (यमस्य पत्नी ।) यमस्य भार्य्या । यमस्य द्वे भार्य्ये । धूमोर्णा १ विजया २ । इति जटाधरः ॥

यमप्रियः, पुं, (प्रीणातीति । प्री+कः । यमस्य प्रियः ।) वटवृक्षः । इति शब्दरत्नावली ॥

यमभगिनी, स्त्री, (यमस्य भगिनी स्वसा ।) यमुना । इति हेमचन्द्रः । ४ । १३६ ॥

यमराजः, पुं, (यमश्चासौ राजा चेति । "राजाहः सखिभ्यष्टच् ।" ५ । ४ । ९१ । इति टच् ।) यमः । इति हेमचन्द्रः । २ । ६६ ॥ अस्य पुर्य्यादि यथा,
"पुरी संयमनी तस्य चित्रगुप्तस्तु लेखकः ।
भृत्यौ चण्डमहाचण्डौ धूमोर्णाविजये प्रिये ।
विचारभूमिका नीचिः सहायाः कालपूरुषाः ॥"

इति जटाधरः ॥ * ॥

स च विभात्रा छायया प्रसूः । (यथा, मार्कण्डेये । ७७ । २५—२६ ।
"छायासंज्ञा त्वपत्येषु यथा स्नेहमतिवत्सला ।
तथा न संज्ञाकन्यायां पुत्रयोश्चान्ववर्त्तत ॥
नलिनाद्युपभोगेषु विशेषमनुवासरम् ।
मनुस्तत्त्वान्तवानस्या यमस्तस्या न चक्षमे ॥
ताड़नाय च वै कोपात् पादस्तेन समुद्यतः ।
तस्याः पुनः क्षान्तिमता न तु देहे निपातितः ॥
ततः शशाप तं कोपात् छायासंज्ञा यमं द्विज ।
किञ्चित् प्रस्फुरमाणोष्ठी विचलत्पाणिपल्लवा ॥
पितुः पत्नीममर्य्यादं यस्मात् तर्ज्जयसे पदा ।
भुवि तस्मादयं पादस्तवाद्यैव पतिष्यति ॥")
तच्छापान्तं यथा,—
"स्वरूपधारिणीं चैनामानिनाय निजाश्रमम् ।
संज्ञां भार्य्यां प्रीतिमतीं भास्करो वारितस्करः ॥
ततः पूर्व्वसुतो योऽस्याः सोऽभूद्वैवस्वतो मनुः ।
द्वितीयस्तु यमः शापाद्धर्म्मदृष्टिर्यतोऽभवत् ॥
क्रिमयो मांसमादाय पादतस्ते महीतलम् ।
पतिष्यन्तीति शापान्तं तस्य चक्रे पिता स्वयम् ॥
धर्म्मदृष्टिर्यतश्चासौ समो मित्रे तथाहिते ।
ततो नियोगं तं यास्ये चकार तिमिरापहः ॥
यमुना च नदी जज्ञे कलिन्दाग्नरवाहिनी ॥"

इति मार्कण्डेयपुराणे वैवस्वतमन्वन्तरे । ७८ । २५—२६ ॥

यमराट्, [ज्] पुं, (प्राणिसंयमनात् यमप्रभृतयः किङ्करास्तेषु राजते यमेन संयमेन राजते इति वा । राज्+क्विप् । इत्यमरटीकायां रघुनाथः ।) यमः । इत्यमरः । १ । १ । १६ ॥

यमलं, क्ली, (यमं जातीति । जा+कः ।) युग्मम् । इति हेमचन्द्रः । ६ । ६० ॥ (त्रि, यमजः । यथा, देवीभागवते । ३ । २८ । ५ ।
"सुमित्रानन्दनौ जातौ यमलौ द्वौ मनोहरौ ।
ते जातौ वै किशोराश्च धनुर्व्वाणधराः किल ॥")

यमलपत्रकः, पुं, (यमलं यमजं पत्रमस्य । बहुव्रीहौ कः ।) अश्वत्थवृक्षः । कोविदारवृक्षः । इति राजनिघण्टः ॥

यमलार्জ্জুनहा, [न्] पुं, (यमलार्জ্জুनौ हतवान् इति । हन्+क्विप् ।) श्रीकृष्णः । इति हेमचन्द्रः ॥

यमलार্জ্জুनौ, पुं, (यमलौ च तावर्জ্জুनौ चेति कर्म्मधारयः ।) गोकुलस्थार্জ্জুनवृक्षद्वयम् । तौ कुबेरपुत्रौ नलकूवरमणिग्रीवौ । नारदशापात् वृक्षतां गतौ श्रीकृष्णेन उद्धारितौ । यथा,—
"यदिमौ लोकपालस्य पुत्रौ भूत्वा तमःश्रुतौ ।
न विवाससमात्मानं विजानीतः सुदुर्म्मदौ ॥

अतोऽर्हतः स्थावरतां स्यातां नैवं यथा पुनः ।
स्मृतिः स्यान्मत्प्रसादेन तत्रापि मदनुग्रहात् ॥
वासुदेवस्य सान्निध्यं लब्ध्वा दिव्यशरच्छते ।
वृत्ते स्वलोकतां भूयो लब्धभक्ती भविष्यतः ॥

श्रीशुक उवाच ।

स एवमुक्त्वा देवर्षिर्गतो नारायणाश्रमम् ।
नलकूवरमणिग्रीवावासतुर्यमलार্জ্জুनौ ॥
ऋषेर्भागवतमुख्यस्य सत्यं कर्त्तुं वचो हरिः ।
जगाम शनकैस्तत्र यत्र स्तो यमलार্জ্জুनौ ॥
देवर्षिर्मे प्रियतमौ यदिमौ धनदात्मजौ ।
तत्तथा साधयिष्यामि यद्गीतं तन्महात्मना ॥
इत्यन्तरेणार্জ্জুनयोः कृष्णस्तु यमयोर्ययौ ।
आत्मनिर्व्वेशमात्रेण तीर्थयात्तमुदूखलम् ॥
बालेन निष्कर्षतान्वगुदूखलं तत्
दामोदरेण तर्षोत्कलिताङ्घ्रिबन्धौ ।
निर्य्येततुः परमविक्रमितातिवेग-
स्कन्धप्रवालविटपौ कृतचण्डशब्दौ ॥
तत्र श्रिया परमया ककुभः स्फुरन्तौ
सिद्धावुपेत्य कुजयोरिव जातवेदाः ।
कृष्णं प्रणम्य शिरसाखिललोकनाथं
बद्धाञ्जली विरजसाविदमूचतुः स्म ॥
वाणी गुणानुकथने श्रवणौ कथायां
हस्तौ च कर्म्मसु मनस्तव पादयोर्नः ।
स्मृत्यां शिरस्तव निवासजगत्प्रणामे
दृष्टिः सतां दर्शनेऽस्तु भवत्तनूनाम् ॥

श्रीभगवानुवाच ।

तद्गच्छतं मत्परमौ नलकूवरसादनम् ।
संजातो मयि भावो वामीप्सितः परमोऽभवः ॥

श्रीशुक उवाच ।

इत्युक्तौ तं परिक्रम्य प्रणम्य च पुनः पुनः ।
बद्धालूखलमामन्त्र्य जग्मतुर्दिशमुत्तराम् ॥"

इति श्रीभागवते १० स्कन्धे १० अध्यायः ॥

यमली, स्त्री, (यमल+स्त्रियां ङीष् ।) चोटिका-द्वयम् । इति मेदिनी । ने, ९२६ ॥ चोटी प्राटीपर्य्याये हेमचन्द्रेण गणिता सैव चोटिका ॥

यमवाहनः, पुं, (यमस्य वाहनः ।) महिषः । इति हेमचन्द्रः । ४ । ३४७ ॥ (तस्य पर्य्यायः ।
"महिषो घोटकारिः स्यात् कासरश्च रजस्वलः ।
पीनस्कन्धः क्षणाकायो लुलापो यमवाहनः ॥"

इति भावप्रकाशस्य पूर्व्वखण्डे द्वितीये भागे ॥)

यमव्रतं, क्ली, (यमस्य धर्म्मराजस्येव व्रतम् ।) राजधर्म्मविशेषः । स तु पक्षपातं विना पापिनां शासनरूपः । इति पुराणम् ॥

यमस्वसा, [ऋ] स्त्री, (यमस्य स्वसा भगिनी ।) यमुना । दुर्गा । इति मेदिनी । से, ६० ॥ (यदुक्तं हरिवंशे आर्य्यास्तवप्रकरणे । ५८ । ४ ।
"जया च विजया च त्वं तुष्टिः पुष्टिः क्षमा दया ।
ज्येष्ठा यमस्य भगिनी नीलकौशेयवासिनी ॥")

यमानिका, स्त्री, (यमानी+स्वार्थे कन् ।) यमानी । तत्पर्य्यायः । अजमोदा २ उग्रगन्धा ३ ब्रह्मदर्भा ४ । इत्यमरः । २ । ४ । १३५ ॥
"चत्वारि यमान्याम् । यमानी द्विविधा एका

क्षेत्रयमानी सा अजमोदा इत्येव ख्याता। अपरा यमानी इत्येव ख्याता अविशेषात् हरोरपीति सुभूतिः। केचित्तु अजमोदाहिदयं वनयमान्यां ब्रह्मदर्भाहिदयं यमान्यामित्याहुः। उग्रगन्धाजमोदाख्या स्मृता क्षेत्रयमानिका इति। 'यमानी दीपको दीप्यो भूतिकश्च यमानिका।' इति च रत्नः। यच्छति विरमति निवर्त्तते अग्निमान्द्यमनयेति यमानी। यमौ उ विरतौ नाम्नीति अनट् ङीप् यमानी स्वार्थे के यमानिका यमानी पञ्चमवर्गपञ्चममध्या। यवानीति अन्तःस्थचतुर्थमध्या इति केचित्।" इति भरतः॥ * ॥ अस्या गुणाः। कुष्ठशूलनाशित्वम्। कृमित्वम्। पित्ताग्निकारित्वम्। वायुकफक्षमिनाशित्वञ्च। इति राजवल्लभः॥

यमानी, स्त्री, (यच्छति विरमति निवर्त्तते अग्निमान्द्यमनयेति। यम+करणे ल्युट्। ङीष्। पृषोदरादित्वात् साधुः।) यमानिका। इति शब्दरत्नावली॥ (यथास्याः पर्य्यायः।

"यमानी दीपको दीप्यो भूतिकश्च यमानिका॥"

इति वैद्यकरत्नमालायाम्॥)

यमान्तकः, पुं, (यमस्यान्तकः। ल्युट्सुब्लोपत्वादेवास्य तथात्वम्।) शिवः। इति शब्दरत्नावली॥ (यमश्च अन्तकश्च तौ इति विग्रहे। वैवस्वतकालौ। यथा, महाभारते। २। १७। १५।

"तेजसा सूर्य्यसङ्काशः क्षमया पृथिवीसमः।
यमान्तकसमः क्रोधे श्रिया वैश्रवणोपमः॥"

"यमो वैवस्वतः अन्तकः कालः।" इति तट्टीकायां नीलकण्ठः॥)

यमी, स्त्री, यमुनानदी। इति त्रिकाण्डशेषः॥ (यथा, श्रीमद्भागवते। ८। १३। ६।

"तृतीयां वडवामेके तासां संज्ञासुताद्वयः।
यमौ यमी श्राद्धदेवश्छायायाश्च सुतान् शृणु॥")

यमुना, स्त्री, (यमयतीति। यमि+"अजियमिगृीड्भ्यश्च।" उणा० ३। ६१। इति उनन्। टाप्।) दुर्गा। यथा,—

"सर्व्वाणि हृदयस्थानि मङ्गलानि शुभानि च।
ददाति चेप्सितान् लोके तेन सा सर्व्वमङ्गला॥
सङ्गमाङ्गमनाङ्गङ्गा लोके देवी विभाव्यते।
यमस्य भगिनी जाता यमुना तेन सा मता॥"

इति देवीपुराणे ४५ अध्यायः॥ * ॥

(यच्छति विरमति गङ्गायामिति। नदीविशेषः। सा तु हिमालयदक्षिणदेशान्निर्गत्य प्रयागे गङ्गायां मिश्रिता। तत्पर्य्यायः। कालिन्दी २ सूर्य्यतनया ३ भ्रमनस्वसा ४। इत्यमरः।२।१०।३२॥ तपनतनूजा ५ कलिन्दकन्या ६ यमस्वसा ७ श्यामा ८ तापी ९ कलिन्दनन्दिनी १० यमनी ११ यमी १२। इति शब्दरत्नावली॥ कलिन्दशैलजा १३ सूर्य्यसुता १४। इति जटाधरः॥ (यथा,—

"गङ्गा सरस्वती शोणयमुना सरयूः सखी।
वेणा इरावती नीला उत्तरात् पूर्ब्ववाहिनी॥"

इति हारीते प्रथमे स्थाने षष्ठेऽध्याये॥)

अस्या जलगुणाः। पित्तदाहवमनश्रमापहत्वम्। स्वादुत्वम्। वातजननत्वम्। पावनत्वम्। वह्निदीपनकरत्वम्। रोचनत्वम्। बलप्रदत्वञ्च। इति राजनिर्घण्टः॥ * ॥ सा यमस्य भगिनी। यथा,—

"सावर्णिर्मेरुपृष्ठे तु तपो घोरं चकार ह।
अद्यापि भविता लोके मनुः सावर्णिकेऽन्तरे॥
भ्राता शनैश्चरश्चास्य ग्रहत्वं स तु लब्धवान्।
तथोर्य्यवीयसी या तु यमस्वसा यमुनेति सा।
अभवत् सा सरिच्छ्रेष्ठा यमुना लोकपावनी॥"

इति वह्निपुराणे सागरोपाख्यानम्॥ * ॥

सा च वृन्दावने सुषुम्नाख्या परा मूर्त्तिः। यथा,

श्रीभगवानुवाच।

"इदं वृन्दावनं रम्यं मम धामैव केवलम्।
तत्र ये पशवः साक्षाद्वृक्षाः कीटा नराधमाः।
ये वसन्ति ममाधिष्ठं मृता यान्ति ममान्तिकम्॥
तत्र या गोपकन्याश्च विवसन्ति ममालये।
योगिन्यस्तात! एवं हि मम देवाः परायणाः॥
पञ्चयोजनमेवं हि वनं मे देहरूपकम्।
कालिन्दीयं सुषुम्नाख्या परमाद्भुतवाहिनी॥"

इति पाद्मे पातालखण्डे ७ अध्यायः॥ * ॥

अस्या जलस्य कृष्णवर्णत्वकारणं यथा,—

पुलस्त्य उवाच।

"यदा दृष्टसुता ब्रह्मन्! सती याता यमक्षयम्।
विनाशञ्च दृष्टयज्ञं तं विचचार त्रिलोचनः॥
ततो वृषध्वजं दृष्ट्वा कन्दर्पः कुसुमायुधः।
अपत्नीकं तदाक्षेण औष्ण्यादेनाभ्यताड़यत्॥
ततो हरः शरेणाथ औष्ण्यादेनाभिताड़ितः।
विचचार तदोन्मत्तः काननानि सरांसि च॥
स्मरन् सतीं महादेवस्तथोष्णादेन ताड़ितः।
न शर्म्म लेभे देवर्षे वाग्विद्ध इव द्विपः॥
ततः पपात देवेशः कालिन्दीसरिते शुभे।
निमग्ने शङ्करे चापे दग्धा कृष्णत्वमागता॥
तदाप्रभृति कालिन्द्या ह्यङ्गनिभं जलम्॥"

इति वामने ६ अध्यायः॥ * ॥

ज्येष्ठशुक्लद्वादश्यादिवस्यां स्नानपिण्डदानफलं यथा,—

"यज्ञैश्चेष्ट्वा तु द्वादश्यां स्नात्वा वै यमुनाजले।
मथुरायां हरिं दृष्ट्वा प्राप्नोति परमां गतिम्॥
यमुनासलिले स्नातः पुरुषो सुनिसत्तम!।
ज्येष्ठामूलामले पक्षे द्वादश्यामुपवासकृत्॥
समभ्यर्च्याच्युतं सम्यक् मथुरायां समाहितः।
अश्वमेधस्य यज्ञस्य प्राप्नोत्यविकलं फलम्॥
ज्येष्ठामूले सिते पक्षे समभ्यर्च्य जनार्द्दनम्।
धन्यो नरः पितृनिर्व्वापं यमुनायां प्रदास्यति॥"

इति विष्णुपुराणे ६ अंशे ८ अध्यायः॥

यमुनाजनकः, पुं, (यमुनाया जनकः।) सूर्य्यः। इति हेमचन्द्रः। २। ६॥

यमुनाभित्, [द्] पुं, (यमुनां भिनत्तीति। भिद्+क्विप्।) बलदेवः। इति हेमचन्द्रः। २।१३८॥ (एतद्वृत्तान्तसूत्रं यथा, हरिवंशे। १०२। ३३—३६।

"स हलेनानताग्रेण कुले गच्छ महानदीम्।
चकर्ष यमुनां रामो युत्थितां वणितामिव॥
सा विक्लवजलस्रोता हृदप्रस्थितसञ्चया।
आवर्त्तत नदी भीता हलमार्गानुसारिणी॥
लाङ्गलादिष्टमार्गा सा वेगगा वक्रगामिनी।
सङ्कर्षणभयत्रस्ता योषेवाकुलतां गता॥")

यमुनाभ्राता, [तृ] पुं, (यमुनाया भ्राता।) यमः। इत्यमरः। १। १। ६१॥

यमेरुका, स्त्री, (यमं ईरयति प्रेरयतीति। ईरि+बाहुलकात् उकः। टाप्।) इक्षुटिका। इति त्रिकाण्डशेषः॥

ययातिः, पुं, नहुषराजपुत्रः। तत्पर्य्यायः। नाहुषिः २। इति त्रिकाण्डशेषः॥ नाहुषः ३। इति जटाधरः॥ तस्योपाख्यानं यथा,—

"नहुषस्य प्रवक्ष्यामि पुत्रान् सप्तैव धार्म्मिकान्।
यतिर्य्ययातिः संयातिरुद्भवः षष्ठमस्तथा॥
ध्रुवं यातिर्मेघयातिश्च सप्तैते वंशवर्द्धनाः।
ययातिरकरोद्राज्यं धर्म्मैकशरणस्सदा॥
शर्म्मिष्ठा तस्य भार्य्याभूत् दुहिता वृषपर्व्वणः।
भार्गवस्याङ्गजा तद्वद्देवयानी च सुव्रता॥
ययातिर्देवयान्यान्तु पुत्रावजनयन्नृपः।
यदुञ्च तुर्व्वसुञ्चैव शुक्रविष्णू इवापरौ॥
तस्मादेव तु राजर्षेः शर्म्मिष्ठा वार्षपर्व्वणी।
द्रह्युञ्चानुञ्च पूरुञ्च त्रीन् कुमारानजीजनत्॥
ततः काले च कस्मिंश्चिद्देवयानी शुचिस्मिता।
ययातिसहिता राजन् जगाम हरितं वनम्॥
ददर्श्च तदा तत्र कुमारान् देवरूपिणः।
क्रीड़मानान् सुविश्रब्धान् विस्मिता चेदमब्रवीत्॥
किन्नामधेयं गोत्रं वः पुत्रकाः! ब्राह्मणः पिता।
विब्रूत मे यथातथ्यं श्रोतुमिच्छामि तं ह्यहम्॥
तेऽदर्शयन् प्रदेशिन्या तमेव नृपसत्तमम्॥
बुद्ध्वा च तत्त्वतो देवी शर्म्मिष्ठामिदमब्रवीत्॥
ममाधीना सती कस्मादकार्षीर्विप्रियं मम॥

शर्म्मिष्ठोवाच।

यदा तया वृतो राजा वृत एव तदा मया।
त्वत्तो हि मे पूज्यतमो राजर्षिः किं न वेत्सि तत्॥

शौनक उवाच।

श्रुत्वा तस्यास्ततो वाक्यं देवयान्यब्रवीदिदम्।
राजन्नाद्येह वत्स्यामि विप्रियं मे त्वया कृतम्॥
अविब्रुवन्ती किञ्चिच्च राजानं सास्रलोचना।
अचिरादेव संप्राप्ता कायस्थोशनसोऽन्तिके॥

देवयान्युवाच।

शर्म्मिष्ठयातिवृत्तान्तं दुहित्रा वृषपर्व्वणः।
त्रयोऽस्यां जनिताः पुत्रा राज्ञानेन ययातिना।
दुर्भगायां मम द्वौ तु पुत्रौ तात! ब्रवीमि वः॥

शुक्र उवाच।

धर्म्मज्ञः सन् महाराज! योऽधर्म्ममकृथाः प्रियम्।
तस्माज्जरा त्वामचिराद्धर्षयिष्यति दुर्ज्जया॥

ययातिरुवाच।

ऋतुकामां स्त्रियं यस्तु गम्यां रहसि याचितः।
नोपैति सह धर्म्मेण भ्रूणहेत्युच्यते बुधैः॥

अधर्म्मभयसंविग्नः शर्म्मिष्ठासुप्रजग्मिवान् ॥
अहमो यौवनस्याहं देवयान्या भगूदह ! ।
प्रसादं कुरु मे ब्रह्मन् जरेयं मा विशेत मां ॥
शुक्र उवाच ।
नाहं मृषा ब्रवीम्येतत् जरां प्राप्तोऽसि भूमिप ! ।
जरां त्वेतां त्वमन्यस्मै संक्रामय यदीच्छसि ॥
वयो दास्यति पुत्रो यः स ते राजा भविष्यति ॥"
इति मात्स्ये ३२ अध्यायः ॥ * ॥
शौनक उवाच ।
"जरां प्राप्य ययातिस्तु स्वपुरं प्राप्य चैव हि ।
पुत्रं ज्येष्ठं वरिष्ठञ्च यदुमित्यब्रवीद्वचः ॥
त्वं यदो ! प्रतिपद्यस्व प्राभानं जरया सह ।
यौवनेन त्वदीयेन चरेयं विषयानहम् ॥
पूर्णे वर्षसहस्रे तु पुनस्ते यौवनं त्वहम् ।
दत्त्वा सम्प्रतिपत्स्यामि प्राभानं जरया सह ॥
यदुरुवाच ।
सन्ति ते बहवः पुत्रा मत्तः प्रियतरा नृप ! ।
जरां ग्रहीतुं धर्म्मज्ञ ! पुत्रमन्यं वृणीष्व वै ॥
ययातिरुवाच ।
यो मे त्वं हृदयाज्जातो वयः स्वं न प्रयच्छसि ।
शापाच्छातुलसम्बन्धात् दुष्प्रजा ते भविष्यति ॥
तुर्व्वसो प्रतिपद्यस्व प्राभानं जरया सह ।
यौवनेन चरेयं वै विषयांस्तव पुत्रक ! ॥
तुर्व्वसुरुवाच ।
न कामये जरां तात ! कामभोगप्रणाशिनीम् ।
बलरूपान्तकरणीं बुद्धिमानविनाशिनीम् ॥
ययातिरुवाच ।
यस्त्वं मे हृदयाज्जातो वयः स्वं न प्रयच्छसि ।
तस्मात् प्रजा समुच्छेदं तुर्व्वसो ! तव यास्यति ॥
द्रुह्यो ! त्वं प्रतिपद्यस्व वर्षरूपविनाशिनीम् ।
जरां वर्षसहस्राणि यौवनं स्वं प्रयच्छ च ॥
द्रुह्युरुवाच ।
न गजं न रथं वाश्वं जीर्णो भुङ्क्ते वरस्त्रियम् ।
नीरोगश्चास्य भवति तां जरां ते न कामये ॥
ययातिरुवाच ।
यस्त्वं मे हृदयाज्जातो वयः स्वं न प्रयच्छसि ।
तस्मात् द्रुह्यो ! प्रियः कामो न ते सम्पत्स्यते क्वचित् ॥
अनो ! त्वं प्रतिपद्यस्व प्राभानं जरया सह ।
एकं वर्षसहस्रन्तु चरेयं यौवनेन ते ॥
अनुरुवाच ।
जीर्णः शिशुरिवादत्ते कालेऽन्नमशुचिर्यथा ।
न जुहोति च कालेऽग्निं तां जरां नैव कामये ॥
ययातिरुवाच ।
यस्त्वं मे हृदयाज्जातो वयः स्वं न प्रयच्छसि ।
जरादोषस्त्वयोक्तो यस्तस्मात्तं प्रतिपत्स्यसे ॥
पूरो ! मे त्वं प्रियः पुत्रः ! त्वं वरीयान् भविष्यसि ।
कायस्योद्गमनः प्राणान्न च लप्स्येऽसि यौवने ॥
पूरो ! त्वं प्रतिपद्यस्व प्राभानं जरया सह ।
किञ्चित्कालं चरेयं वै विषयान् वयसा तव ॥
पूर्णे वर्षसहस्रे तु प्रतिदास्यामि यौवनम् ।
स्वयैव प्रतिपत्स्यामि प्राभानं जरया सह ॥

शौनक उवाच ।
एवमुक्तः प्रत्युवाच पूरुः पितरमञ्जसा ।
यथात्थ त्वं महाराज ! तत् करिष्यामि ते वचः ॥
ययातिरुवाच ।
पूरो ! प्रीतोऽस्मि ते वत्स प्रीतश्चेदं ददामि ते ।
सर्व्वकामसमृद्धा ते प्रजा राज्ये भविष्यति ॥"
इति मात्स्ये ३३ अध्यायः ॥ * ॥
शौनक उवाच ।
"पौरवेणाथ वयसा ययातिर्नहुषात्मजः ।
प्रीतियुक्तो नरश्रेष्ठश्चचार विषयान् सुखी ॥
पूर्णं मत्वा ततः कालं पूरुं पुत्रमुवाच ह ।
पूरो ! प्रीतोऽस्मि भद्रं ते गृहाणेदं स्वयौवनम् ॥
राज्यञ्चापि गृहाणेदं यत् त्वयोपकृतं पुरा ॥
शौनक उवाच ।
एवं स नाहुषो राजा ययातिः पुत्रमीप्सितम् ।
राज्येऽभिषिच्य मुदितो वानप्रस्थोऽभवन्मुनिः ॥
उषित्वा वनवासं स ब्राह्मणैः सह संश्रितः ।
फलमूलाशनो दान्तो यथा स्वर्गमितो गतः ॥"
इति मात्स्ये ३५ अध्यायः ॥ * ॥
यवीः, पुं (यायते प्राप्यते भक्तैरिति । या + "यापोः कित् ङे च" । उणा० ३ । १५६ । इति ईः द्वित्वञ्च ।) महादेवः । इत्युणादिकोषः । १ । ३५४ ॥ (याति इतं गच्छतीति । अश्वः । इत्युज्ज्वलदत्तः ॥)
यवुः, पुं, (यातीति । या + "यो डे च ।" उणा० १ । २२ । इति उः द्वित्वञ्च । यजन्त्यनेनेति । यज + उः । पृषोदरादित्वात् जस्य यत्वमित्यमरटीकायां रघुनाथः ।) अश्वमेधीयाश्वः । सामान्यघोटकः । इति मेदिनी । ये, ४७ ॥
यवः, पुं, (यूयते अम्भसा इति । यु मिश्रणे + अप् ।) स्वनामख्यातशूकधान्यम् । तत्पर्य्यायः । सितशूकः २ । इत्यमरः । २ । ९ । १५ ॥ शितशूकः ३ । इति शब्दरत्नावली ॥ मेध्यः ४ दिव्यः ५ अच्युतः ६ कषुकी ७ धान्यराजः ८ तीक्ष्णशूकः ९ तुरगप्रियः १० शुक्लः ११ महेष्टः १२ पवित्रधान्यम् १३ । तस्य गुणाः । कषायत्वम् । मधुरत्वम् । सुशीतलत्वम् । श्रमेऽपि पित्तकफापहारकत्वञ्च । अशूकसूकधान्यगुणाः । बलप्रदत्वम् । वृष्यत्वम् । नृणां बहुवीर्य्यपुष्टिदत्वञ्च । इति राजनिर्घण्टः ॥ अपि च ।
"यवः कषायमधुरो बहुवातशुक्रदृग्गुरुः ।
रूक्षः स्थैर्य्यकरः शीतो मूत्रमेदःकफापहः ॥"
इति राजवल्लभः ॥ * ॥
(अपि च ।
"यवः कषायो मधुरो हिमश्च
कटुर्विपाके कफपित्तहारी ।
व्रणेषु पथ्यस्त्रिलवञ्च नित्यं
प्रवह्लमूत्रो बहुवातवर्च्चाः ॥
स्थैर्य्याग्निमेधा स्वरवर्णशुक्र
स पिच्छिलः स्थूलविलेखनश्च ।
मेदो मरुत्तृड्हरणोऽतिरूक्षः
प्रसादनः श्लेष्मितपित्तयोश्च ॥

ऋभिर्गुणैर्हीनतरांस्तु किञ्चिद्-
विद्याद् यवेभ्योऽतियवान् विशेषैः ॥"
इति सुश्रुते सूत्रस्थाने ४६ अध्यायः ॥
"रूक्षः शीतो गुरुः स्वादुर्बहुवातशुक्रदृग्यवः ।
स्थैर्य्यकृत् सकषायस्तु बल्यः श्लेष्मविकारनुत् ॥
रूक्षः कषायानुरसो मधुरः कफपित्तहा ।
मेदःक्रिमिविषघ्नश्च बल्यो वेणुयवः स्मृतः ॥"
इति चरके सूत्रस्थाने २७ अध्याये ॥
"क्वचिद्वाक्यशेषादपि शक्तिग्रहः यथा यवपदस्य कङ्गुप्रभृतौ म्लेच्छानां दीर्घशूके च शिष्टानां व्यवहारादेकमात्रशक्तेः परिच्छेत्तुमशक्यत्वात् नानार्थत्वस्य चान्याय्यत्वात् यवमयश्चरुर्भवतीति श्रुतौ यवपदस्यार्थं सन्देहे ।
'वसन्ते सर्व्वशस्यानां जायते पत्रशातनम् ।
मोदमानास्तु तिष्ठन्ति यवाः कणिशशालिनः ॥'
इति विध्यर्थाकाङ्क्षया प्रवर्त्तमानाद्वाक्यशेषाद्दीर्घशूक एव यवपदस्य शक्तिग्रहः ।" इति शब्दशक्तिप्रकाशिकायां नैमित्तिकसंज्ञायाम् ॥ * ॥ हविष्ये यवानामेव मुख्यत्वम् । यथा,—
"हविष्येषु यवा मुख्यास्तदनु व्रीहयः स्मृताः ।
माषकोद्रवगौरादिसर्व्वान्नानामपि वर्च्चसे यत् ॥"
इति कात्यायनसंहिता । ६ । १० ॥
नवयवागमे तैरवश्यं आद्धं कार्य्यं अकरणे प्रत्यवायश्रवणात् । यथा,—
"नक्षत्रश्राद्धपीड़ासु दुःस्वप्नावलोकने ।
इच्छाश्राद्धानि कुर्व्वीत नवशस्यागमे तथा ॥
इति विष्णुपुराणात् वक्ष्यमाणबहुतरवचनेषु नवान्नश्रुतेः नवान्नागमत्वेनैव निमित्तं लाघवात् । अमावस्यास्विमोऽष्टका माघी प्रौष्ठपद्यूर्द्धं कृष्णात्रयोदशी व्रीहियवपाकौ च ।
एतांस्तु आद्धकालान् वै नित्यानाह प्रजापतिः ।
आद्धमेतेष्वकुर्व्वाणो नरकं प्रतिपद्यते ॥"
इति आद्धतत्त्वे नवान्नश्राद्धे ॥)
परिमाणविशेषः । स तु चतुर्धान्यमानरूपः । इति शुभङ्करः ॥ षट्सर्षपपरिमाणात्मकश्च । यथा, —
"आकाशरगते भानौ यच्चानु दृश्यते रजः ।
तेऽष्टभिर्भर्वेलिक्षा लिक्षाषड्भिश्च सर्षपः ।
षट्सर्षपैर्यवस्त्वेको गुञ्जैका तु यवैस्त्रिभिः ॥"
इति शब्दचन्द्रिका ॥ * ॥
अङ्गुलिस्थयवाकारेखाविशेषः । यथा,—
"तर्ज्जनीमूलसंपृक्तौ यवौ पुचार्धदौ क्रमात् ।
मध्यमायां यवश्चैवाङ्गुष्ठेऽपूर्व्वधनप्रदः ॥"
अपि च सामुद्रके ।
"मध्यमायां यदि यवो दृश्यते च सुशोभनः ।
तदान्यसञ्चितं द्रव्यं प्राप्नोत्यङ्गुष्ठके यवे ॥
यस्यापि चक्रमङ्गुष्ठे यवपूर्णश्च दृश्यते ।
तदा पितामहादीनामर्জ্জितं लभते धनम् ॥"
(पूर्ब्बप्रज्ञः । यथा, वाजसनेयसंहितायाम् । १४ । ३१ । "एकचिंशतास्तु वत प्रजा अरक्ष्यन्त यवाश्चायवाश्चाधिपतय आसन् ।" "यवाः पूर्ब्बपक्षाः अयवाः अपरपक्षाः ।" इति तट्टीकायां महीधरः ॥)

यवकः, पुं (यवप्रकारः। यव+"स्थूलादिभ्यः प्रकारवचने कन्।"५।३।७। इति कन्।) यवः। इत्यमरटीकायां रामाश्रमः॥ (यथा,—
"यवका हायनाः पांशुवाप्यनेषधकादयः।
शालीनां शालयः कुर्व्वन्त्यनुकारं गुणे गुणैः॥"
इति चरके सूत्रस्थाने २७ अध्याये॥)

यवक्यं, त्रि, (यवकानां भवनं क्षेत्रमिति। यवक+"यवयवकषष्टिकाट् यत्।" ५।२।३। इति यत्।) यवभवनोचितक्षेत्रम्। इत्यमरः। २। ९। ७॥

यवक्षारः, पुं, (यवजातः क्षारः। प्राकपार्थिववत् समासः।) क्षारविशेषः। यथा,—
"नरसारयवक्षारस्फटिकारित एव काचवकयल्लेः।
बहुशः प्रात्यं सत्त्वं तद्धि महाश्रावकन्नाम॥"
इति रत्नावली॥
तत्पर्य्यायः। यवाग्रजः २ पाक्यम् ३। इत्यमरः। २।९।१०८॥ यवलासः ४ यवशूकः ५ सारकः ६ रेचकः ७ यवनालकः ८। इति शब्दरत्नावली॥ यावशूकः ९ क्षारः १० तीक्ष्णः ११ तीक्ष्णरसः १२ यवनालजः १३ इति रत्नमाला॥ यवजः १४ यवशूकजः १५ यवाङ्कः १६ यवापत्यम् १७। अस्य गुणाः। कटुत्वम्। उष्णत्वम्। कफवातोदरार्शिनाशित्वम्। आमशूलाश्मरुक्कृत्स्नविषदोषहरत्वम्। सरत्वञ्च। इति राजनिर्घण्टः॥ अर्शःश्वासगुल्मग्रहणीपाण्डुप्लीहानाहगलामयनाशित्वञ्च। इति राजवल्लभः॥ (तथा च।
"पाक्यः क्षारो यवक्षारो यवशूको यवाग्रजः।
यवक्षारो लघुः स्निग्धः सुस्रुक्को वह्निदीपनः॥
निहन्ति शूलवातामश्लेष्मश्वासगलामयान्।
पाण्डूर्शोग्रहणीगुल्मानाहप्लीहोदरामयान्॥"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे॥)

यवक्षोदः, पुं, (यवानां क्षोदः।) यवचूर्णम्। तत्पर्य्यायः। क्षिक्कसः २। इति हेमचन्द्रः॥

यवगण्डः, पुं, (यूनो गण्डः स्फोटकः। षष्ठीतत्पुरुषादित्वात् यवादेशः।) युवगण्डः। इति शब्दरत्नावली॥ वयस्फोड़ा इति भाषा॥

यवजः, पुं, (यवाज्जायते इति। जन्+डः।) यवक्षारः। इति रत्नमाला॥ (यथास्य पर्य्यायः।
"यावशूको यवक्षारो यवशूको यवाग्रजः।
क्षारस्तीक्ष्णस्तीक्ष्णरसो यवजो यवनालजः॥"
इति वैद्यकरत्नमालायाम्॥)
यवानी। इति राजनिर्घण्टः॥

यवजोद्भवं, क्ली, (यवजादुद्भवोऽस्य।) तवक्षीरम्। इति राजनिर्घण्टः॥

यवतिक्ता, स्त्री, लताप्रभेदः। शुक्षिणीति यवेची इति च ख्याता। (यथा, सुश्रुते सूत्रस्थाने ४५ अः।
"यवतिक्तातैलं सर्व्वदोषप्रशमनमौषधसिद्धम्।
अग्निदीपनं लेखनं मेध्यं पथ्यं रसायनञ्च॥")
तत्पर्य्यायः। महातिक्ता २ दृढ़पादविसर्पिणी ३ नाकुली ४ नेत्रमीना ५ शुक्षिणी ६ पत्रतण्डुली ७ तण्डुली ८ अक्षपीड़ा ९ सूक्ष्मपुष्पी १० यशस्विनी ११ माहेश्वरी १२ तिक्तफला १३ यावी १४ तिक्ता १५। अस्या गुणाः। सतिक्तास्वत्वम्। दीपनत्वम्। रुचिकारित्वम्। कृमिकुष्ठविषवर्णास्रदोषनाशित्वम्। रेचनत्वञ्च। इति राजनिर्घण्टः॥

यवतैलं, क्ली, (यवनिर्म्मितं तैलम्।) यवचूर्णादियुक्तपक्वतैलविशेषः। तत्प्रकारं गुणञ्चाह।
"यवचूर्णार्द्धकुड़वं मञ्जिष्ठार्द्धपलेन तु।
तैलप्रस्थं घृतगुणे काञ्जिके साधितं जयेत्।
ज्वरं दाहं महावेगमङ्गानाञ्च प्रहर्षणम्॥"
इति सुश्रुतः॥

यवद्वीपः, पुं, (यवनामा द्वीपः इति मध्यपदलोपिकर्म्मधारयः।) उपद्वीपविशेषः। यावा इति भाषा। यथा,—
"यत्नवन्तो यवद्वीपं सप्तराज्योपशोभितम्।
सुवर्णरूप्यकं द्वीपं सुवर्णकरमण्डितम्॥"
इति वाल्मीकीये रामायणे किष्किन्धाकाण्डे ४० सर्गः॥*॥ "अतः परं यत्नवन्तो भूत्वा सप्तराज्योपशोभितं यवद्वीपं तथा सुवर्णद्वीपं विचेतव्यमिति शेषः। सुवर्णकरमण्डितमिति सुवर्णं कुर्व्वन्ति ये तैः शोभितम्।" इति रामायणतिलकनामतट्टीका॥

यवनः, पुं, देशविशेषः। (यथा, मात्स्ये।१२०।४३।
"तान् देशान् भावयन्ति स्म म्लेच्छप्रायांश्च सर्व्वशः।
सशैलान् कुकुरान् रौधान् वर्व्वरान् यवनान् खसान्॥")
वेगः। वेगाधिकाश्वः। इति मेदिनी॥ गोधूमः। गर्जरलशुनम्। तुरुष्कः। इति राजनिर्घण्टः॥ (यौति मिश्रीभवतीति। यु+"सुयुरुवृञो युच्।" उणा० २। ७४। इति युच्।) जातिविशेषः। इति शब्दरत्नावली॥ स तु यवनदेशोद्भवययातिराजपुत्रतुर्व्वसुवंशजः। यथा,—
"यदोस्तु जाता यदवस्तुर्व्वसोर्यवनाः सुताः।
द्रुह्योस्तु तनया भोजा अनोस्तु म्लेच्छजातयः।
पूरोस्तु पौरवो वंशो यत्र जातोऽसि पार्थिव!॥"
इति मात्स्ये ३४ अध्यायः॥*॥
सगरराजेनैषां सर्व्वक्षत्रियोसुखनं सर्व्वधर्म्मराहित्यञ्च कृतं ते चात्मधर्म्मपरित्यागात् म्लेच्छत्वं ययुरिति विष्णुपुराणोक्तत्वात् यवनः मोसलमानेङ्गरेजोभयजातिवाचकः। यवनशब्दस्यवर्गलतीयादिरिति रघुनन्दनभट्टाचार्य्येण लिखितम्॥ यवनादीनान्तु सर्व्वधर्म्मराहित्यमुक्तं हरिवंशे। यथा,—
"सगरस्तां प्रतिज्ञाञ्च गुरोर्वाक्यं निशम्य च।
धर्म्मं जघान तेषां वै वेषान्यत्वं चकार ह॥
अर्द्धं शकानां शिरसो मुण्डयित्वा व्यसर्जयत्।
यवनानां शिरः सर्व्वं काम्बोजानान्तथैव च॥
पारदा मुक्तकेशाश्च पह्लवाः श्मश्रुधारिणः।
निःस्वाध्यायवषट्काराः कृतास्तेन महात्मना॥
शका यवनकाम्बोजाः पारदाः पह्लवास्तथा।
कोलिसर्पाः समहिषा दार्व्वाश्चोलाः सकेरलाः॥
वशिष्ठवचनाद्राजन्! सगरेण महात्मना।

शकानां शकदेशोद्भवानां क्षत्रियाणां एवं यवनादीनामिति। अत्र यवनशब्दस्यदेशोद्भववाची चवर्गलतीयादिः। यवनो देशविशेषोरिति त्रिकाण्डशेषाभिधानदर्शनात्। तेषां म्लेच्छत्वमप्युक्तं विष्णुपुराणे। तथा कृतान् यवनादीनुपक्रम्य। ते चात्मधर्म्मपरित्यागात् म्लेच्छत्वं ययुरिति। बौधायनः।
"गोमांसखादको यश्च विरुद्धं बहु भाषते।
धर्म्माचारविहीनश्च म्लेच्छ इत्यभिधीयते॥"
इति प्रायश्चित्ततत्त्वम्॥*॥
यवनादीनां राज्यकालो यथा,—
"सप्त गर्द्दभिनश्चापि शकाश्चाष्टादश स्मृताः।
यवनाष्टौ भविष्यन्ति तुखारश्च भविष्यति॥
अष्टौ ते यवना राज्यं वर्षाणां परिसङ्ख्यया।
भोक्ष्यन्त्यधर्म्मतीति तदृच येऽपि गर्द्दभिनः स्मृताः॥
शतानि त्रीणि वर्षाणां दशोतीनि शतानि वै।
शकानां राज्यकालः स्याद्विष्णो निश्चयो गतः॥
शतस्यार्द्धं चतुर्थानि वर्षाणां राज्यभागिनः।
मरुत्तानां सुताः काला यस्मिन् भोक्ष्यन्ति ते महीम्॥
मरुत्ता दृषले: सार्द्धं तथान्ये म्लेच्छसम्भवाः।
भोक्ष्यन्ति राज्यं प्राच्येषु भविष्ये तद्विधारितम्॥
शतानि त्रीणि वर्षाणां पौण्ड्रा राज्यभुजः स्मृताः।
अश्मन्ति पार्व्वतेयास्तु द्वे शते परिसङ्ख्यया॥
शतार्द्धमन्यच्च तथा राज्यं भोक्ष्यन्ति ते नृपाः।
सप्तषष्टिस्तु वर्षाणि दशातीवाहृतः स्मृताः॥
तेषु च्छन्नेषु कालेषु ततः किलकिला नराः।
भविष्यन्तीह यवना धर्म्मतः कामतोऽर्थतः॥
तैर्विमिश्रा जनपदा आर्य्या म्लेच्छाश्च सर्व्वशः।
विपर्य्ययेण वर्त्तन्ते जनयिष्यन्ति वै प्रजाः॥
लब्धानिष्टवरश्चैव भवितारस्तदा नृपाः।
तेषां यतीते पर्य्याये बहुवर्षयुगांस्तदा॥
राजानः संप्रणश्यन्ति कालेन महता ततः।
कल्किना ताड़िताः सर्व्वे आर्य्या म्लेच्छाश्च सर्व्वशः॥
अधार्म्मिकाश्च ये सर्व्वे पाषण्डाश्चैव सर्व्वशः।
युष्टे नृपतिशब्दे वै सन्ध्यांशे च वै कलौ॥"
इति ब्रह्माण्डपुराणे ३६ अध्यायः॥
मुनिविशेषः। यथा,—
"जातं दिनं दूषयते वशिष्ठ-
श्चाष्टौ च गर्गो यवनो दशाहम्।
जन्माक्षमासं किल भागुरिश्च
व्रते विवाहे क्षुरकर्म्मवेधे॥"
इति तिथ्यादितत्त्वम्॥*॥
कालयवनोत्पत्तिर्यथा.—
श्रीपराशर उवाच।
"गार्ग्यं गोष्ठे द्विजं श्यालः षण्ढ इत्युक्तवान् द्विज।
यदूनां सन्निधौ सर्व्वे जहसुर्यादवास्ततः॥
ततः कोपसमाविष्टो दक्षिणापथमेत्य सः।
सुतमिच्छंस्तपस्तेपे यदुचक्रभयावहम्॥

आराधयन्महादेवं सोऽयस्चूर्णमभक्षयत् ।
ददौ वरञ्च तुष्टोऽस्मै वर्षे द्वादशमे हरः ॥
सभाजयामास च तं यवनेशो ह्यनात्मजः ।
तद्योषिन्मङ्गमाचास्य पुत्रोऽभूद्बलिसन्निभः ॥
तं कालयवनं नाम राज्ये स्वे यवनेश्वरः ।
अभिषिच्य वनं यातो वल्काग्रकठिनोरसम् ॥
स च वीर्यमदोन्मत्तः पृथिव्यां बलिनो नृपान् ।
पप्रच्छ नारदञ्चास्मै कथयामास यादवान् ॥
म्लेच्छकोटिसहस्राणां सहस्रैः सोऽभिसंवृतः ।
गजाश्वरथसम्पन्नैश्चकार परमोद्यमम् ॥
प्रययौ चाग्रवच्छिन्नं छिन्नयानो दिने दिने ।
यादवान् प्रति सामर्षो मैत्रेय मथुरां पुरीम् ॥
कृष्णोऽपि चिन्तयामास क्षयितं यादवं कुलम् ।
यवनेन रणे गम्यं मागधस्य भविष्यति ॥
मागधस्य बलं क्षीणं स कालयवनो बली ।
हन्ता तद्दिमायातं यदूनां व्यसनं द्विधा ॥
तस्माद्दुर्गं करिष्यामि यदूनामतिदुर्जयम् ।
स्त्रियोऽपि यत्र युध्येयुः किं पुनर्दृप्तिपुङ्गवाः ॥"
"इति सञ्चिन्त्य गोविन्दो योजनानि महोदधिम् ।
ययाचे द्वादशपुरीं द्वारकां तत्र निर्ममे ॥
मथुरावासिनो लोकांस्तत्रानीय जनार्द्दनः ।
आसन्ने कालयवने मथुरायाञ्च स्वयं ययौ ॥
बहिरावासिते सैन्ये मथुरायां निरायुधः ।
निर्जगाम स गोविन्दो दृष्ट्वा यवनञ्च तम् ॥
स ज्ञात्वा वासुदेवं तं बाहुप्रहरणो नृपः ।
अनुयातो महायोगिचेतोभिः प्राप्यते न यः ॥
तेनानुयातः कृष्णोऽपि प्रविवेश महागुहाम् ।
तत्र शेते महावीर्यो मुचुकुन्दो नरेश्वरः ॥
सोऽपि प्रविष्टो यवनो दृष्ट्वा शय्यागतं नरम् ।
पादेन ताड़यामास कृष्णं मत्वा सुदुर्म्मतिः ॥
दृष्टमात्रञ्च तेनासौ जज्वाल यवनोऽग्निवा ।
तत्क्रोधजेन मैत्रेय ! भस्मीभूतश्च तत्क्षणात् ॥"
इति विष्णुपुराणे ५ अंशे २३ अध्यायः ॥

यवनः, त्रि, (यौतीति । यु+"नन्दिग्रहीति ।"३।१।१३४। इति ल्युः ।) वेगी । इति मेदिनी । ने, १११ ॥ (यथा, नैषधचरिते । १ । ६५ ।
"तमश्ववारा यवनाश्वयायिनं
प्रकाशरूपा मनुजेशमन्वयुः ॥")

यवनद्विष्टः, पुं, (यवनैर्द्विष्टः । द्विष्प्रियत्वात् तथात्वम् ।) गुग्गुलुः । इति राजनिर्घण्टः ॥

यवनप्रियं, क्ली, (यवनानां प्रियम् ।) मरिचम् । इति हेमचन्द्रः । ३ । ४८ ॥ (विवरणमस्य मरिचशब्दे ज्ञातव्यम् ॥)

यवनाचार्य्यः, पुं, (यवनो नामाचार्य्यः ।) ज्योतिःशास्त्रकर्त्तृमुनिविशेषः । इति वराहमिहिरौ ॥

यवनानी, स्त्री, (यवनानां लिपिः । "यवनाल्लिप्याम् ।" ४ । १ । ४९ । इति वार्त्तिकोक्त्या ङीष् आनुगागमश्च ।) यवनस्य लिपिः । इति मुग्धबोधटीकायां दुर्गादासः ॥

यवनारिः, पुं, (यवनानामरिः । यवनः कालयवनोऽरिर्यस्येति वा ।) श्रीकृष्णः । इति त्रिकाण्डशेषः ॥

यवनालः, पुं, (यवानां नाला इव नाला यस्य ।) धान्यविशेषः । देधान् इति भाषा । तत्पर्य्यायः । योनालः २ जूर्णाङ्गयः ३ देवधान्यम् ४ जोन्नाला ५ बीजपुष्पिका ६ । इति हेमचन्द्रः । ४ । २४४ ॥ (यथा, सुश्रुते उत्तरतन्त्रे १५ अध्याये ।
"यवनालस्य चूर्णेन त्रिकटोर्लवणस्य च ।
खेदयित्वा ततः पश्चाद्भक्षयेत् कुशलो भिषक् ॥")

यवनालजः, पुं, (यवानां नालेभ्यो जायते इति । जन्+डः ।) यवक्षारः । इति हेमचन्द्रः । ४ । १० ॥ (यथा, वैद्यकरत्नमालायाम् ।
"क्षारस्तीक्ष्णस्तीक्ष्णरसो यवजो यवनालजः ॥")

यवनिका, स्त्री, (युनात्यावृणोत्यनया । यु+ल्युट् । ङीष् । स्वार्थे कन् । टाप् ।) जवनिका । इत्यमरटीका ॥ कानात् इति भाषा । (यथा, भागवते । १ । ८ । १६ ।
"मायायवनिकाच्छन्नमज्ञाधोक्षजमव्ययम् ।
न लक्ष्यसे मूढदृशा नटो नाट्यधरो यथा ॥")

यवनी, स्त्री, (यूयते पच्यते भुक्तमनया । यु+ल्युट् । ङीप् ।) यवानीनामकौषधिभेदः । इति मेदिनी । ने, ११२ ॥ (यवनस्य स्त्रीति । यवन+ङीष् ।) यवनभार्य्या ॥ (यथा, रघुः । ४ । ६१ ।
"यवनीमुखपद्मानां सेहे मधुमदं न सः ।
बालातपमिवाज्ञानामकालजलदोदयः ॥")

यवनेष्टं, क्ली, (यवनानां इष्टम् ।) सीसकम् । इति हेमचन्द्रः । ४ । १०७ ॥ मरीचम् । रञ्जनम् । इति राजनिर्घण्टः ॥

यवनेष्टः, पुं, (यवनानामिष्टः ।) लशुनः । राजपलाण्डुः । निम्बः । पलाण्डुः । इति राजनिर्घण्टः ॥ (तथास्य पर्य्यायः ।
"पलाण्डुर्यवनेष्टश्च दुर्गन्धो मुखदूषकः ॥"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥)

यवप्रख्या, स्त्री, (यव इति प्रख्या यस्याः ।) क्षुद्ररोगविशेषः । तल्लक्षणं यथा, भावप्रकाशे ।
"यवाकारा सुकठिना ग्रथिता मांसमिश्रिता ।
पीड़का श्लेष्मवाताभ्यां यवप्रख्येति सोच्यते ॥"
यवाकारा मध्ये स्थूला प्रान्ते कृशा ॥ तच्चिकित्सा यथा,—
"अन्त्रालजीं यवप्रख्यां पूर्व्वं स्वेदैरुपाचरेत् ।
मनःशिलादेवदारुकुष्ठकल्कैः प्रलेपयेत् ।
पक्वां व्रणविधानेन यथोक्तेन प्रसाधयेत् ॥"

यवफलः, पुं, (यववत् फलमस्य ।) वंशः । इत्यमरः । २ । ४ । १६१ ॥ जटामांसी । कुटजः । इति मेदिनी । ले, १६२ ॥ (अस्य पर्य्यायो यथा,
"कुटजः कूटजः कौटो वत्सको गिरिमल्लिका ।
कालिङ्गः शक्रशाखी च मल्लिकापुष्प इत्यपि ।
इन्द्रो यवफलः प्रोक्तो वृक्षकः पाण्डुरद्रुमः ॥"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमभागे ॥)
भ्रक्षवृक्षः । इति शब्दरत्नावली ॥

यवमध्यं, क्ली, (यववत् मध्यं यस्य ।) चान्द्रायणप्रभेदः । यथा,—
"शिशुचान्द्रायणं प्रोक्तं यतिचान्द्रायणन्तथा ।
यवमध्यं तथा प्रोक्तं तथा पिपीलिकाकृति ॥"
इति प्रायश्चित्ततत्त्वम् ॥
(पुं, यज्ञभेदः । यथा, शतपथब्राह्मणे । १३।६।१।६।
"यवमध्यः पञ्चरात्रो भवति ॥"
यवाकारमध्ये, त्रि । यथा, सुश्रुते चिकित्सास्थाने १ अध्याये ।
"शरावनिम्नमध्याश्च यवमध्यास्तथापरे ।
एवंप्रकाराकृतयो भवन्त्यागन्तवो व्रणाः ॥")

यवमयः, त्रि, (यवस्य विकारोऽवयवो वा । यव+"असंज्ञायां तिलयवाभ्याम् ।" ४।३।१४६। इति मयट् ।) यवनिर्म्मितः । यवशब्दात् मयट्प्रत्ययेन निष्पन्नः ॥ (यथा, शतपथब्राह्मणे ।२। २ । ३ । १३ ।
"अर्कपलाशाभ्यां यवमयमपूपं कृत्वा यवाहवनीयमाधास्य न भवति तन्निदधाति ॥")

यवलासः, पुं, (यवात् लासो यस्य ।) यवक्षारः । इति शब्दरत्नावली ॥ (विशेषोऽस्य यवक्षारशब्दे ज्ञातव्यः ॥)

यवशूकः, पुं, (यवानां शूकः कारणत्वेनास्त्यस्य । अर्शआद्यच् ।) यवक्षारः । इति त्रिकाण्डशेषः ॥ (यथास्य पर्य्यायः ।
"यावशूको यवक्षारो यवशूको यवाग्रजः ।
क्षारस्तीक्ष्णस्तीक्ष्णरसो यवजो यवनालजः ॥"
इति वैद्यकरत्नमालायाम् ॥)

यवशूकजः, पुं, (यवशूकात् जायते इति । जन्+डः ।) यवक्षारः । इति राजनिर्घण्टः ॥ (विवरणमस्य यवक्षारशब्दे ज्ञातव्यम् ॥)

यवसं, क्ली, (यौतीति । यु+"वहियुभ्यां गित् ।" उणा० ३ । ११६ । इत्यसच् । संज्ञापूर्व्वकत्वान्न वृद्धिः ।) तृणम् । घासः । इत्यमरः ।२।४।१६७॥ (यथा, मनौ । ७ । ७५ ।
"तस्यादायुधसम्पन्नं धनधान्येन वाहनैः ।
ब्राह्मणैः श्रेष्ठिभिर्यन्त्रैर्यवसेनोदकेन च ॥")

यवसुरं, क्ली, (यवनिर्म्मिता सुरा । "सुरासेनाच्छायाशालानिशा क्षियाञ्च ।" लिङ्गानुशासने नपुंसकाधिकारे १२ । इति क्लीवत्वम् ।) यवजातसुरा । इति सिद्धान्तकौमुदी ॥

यवागूः, स्त्री, (यूयते मिश्र्यते इति । यु+"स्फायुवचिभ्योऽन्युजागूजक्रुचः ।" उणा० ३।८१। इति आगूच् ।) षड्गुणजलप्रक्षघनद्रवद्रव्यविशेषः । याउ इति भाषा ॥ तत्पर्य्यायः । उष्णिका २ आगा ३ विलेपी ४ तरला ५ । इत्यमरः । २ । ९।५० ॥ "यूयते मिश्र्यते यावागूः यु ल मिश्रणे नाम्नीति आगूः गुणः । ओषति क्षिणोति ज्वरादिरोगं उष्णिका उषू ष दाहे इह पूर्व्वेण निक् । श्रायते पच्यते स्म श्राणा श्रा ल पाके क्तः सुखाद्योदिति नः । विलिम्पति विलेपी लिपौ शप श्न लेपे पचाद्यिलादन् । नदादित्वादीप् । तरति भ्रवति तरला त तरेऽभिभवे भृत्यां नाम्नीति अल: ।

यावानी

'अन्नं पञ्चगुणे साध्यं विलेपी च चतुर्गुणे।
मण्डश्चतुर्दशगुणे यवागूः षड्गुणेऽम्भसि ॥'
इति वैद्यकोक्तो भेद इह नाद्रतः ॥" इति तट्टीकायां भरतः ॥ अस्या गुणाः।
"यवागूर्ज्वरघ्नाग्नी लघ्वी वस्तिविशोधनी।
अतीसारे ज्वरे दाहे हिता वह्निप्रदीपनी ॥"
इति राजवल्लभः ॥
(अथास्या गुणा लक्षणञ्च।
"सन्दीपनी खेदकरी यवागूः
सम्याचनी दोषमलामयानाम्।
सन्तर्पणी धातु बलेन्द्रियाणां
ग्रस्ता भवेत् सा ज्वररोगिणाञ्च ॥
भागैकञ्च भवेत्तत्र द्विभागेन जलं क्षिपेत्।
चित्रकं पिप्पलीमूलं पिप्पलीचव्यनागरम् ॥
धान्यकस्य समांशानि पिष्ट्वा श्वेतांश्च तण्डुलान्।
संशुष्टा ग्रन्थिला किञ्चित् सा यवागूर्निगद्यते ॥
यवागूसुपसृष्टानो जनो नारुचिमाचरेत्।
शाकमाषफलैर्युक्ता यवागूः स्याच्च दुर्ज्जरा ॥"
इति हारीते प्रथमस्थाने १२ अध्याये ॥
"यावागूः षड्गुणजले सिद्धा स्यात् क्षुद्गरा घना।
यवागूर्ग्राहिणी बल्या तर्पणी वातनाशिनी ॥"
इति मध्यखण्डे द्वितीयेऽध्याये शार्ङ्गधरेणोक्तम् ॥)

यवागूजः, पुं, (यवागात् जायते इति। जन्+डः।) यवक्षारः। इत्यमरः। २। ६। १०८ ॥
(यथा, भावप्रकाशस्य पूर्ब्बखण्डे प्रथमे भागे।
"पाक्यः क्षारो यवक्षारो यावशूको यवागूजः ॥")
यवानी। इति राजनिर्घण्टः ॥

यवानः, त्रि, (यवेन वेगेन अनिति जीवतीति। अन्+अच्।) वेगी। इति मेदिनी। ने, १११ ॥

यवानिका, } स्त्री, (दुष्टो यवः। "यवाद्दोषे।"
यावानी, } ४। १। ४६। इत्यस्य वर्त्तिकोक्त्या ङीष् आनुगागमश्च। पक्षे स्वार्थे कन्।) ओषधिभेदः। योयानि इति भाषा। तत्पर्य्यायः। दीप्यकः २ दीप्यः ३ यवसाङ्गः ४ यवाग्रजः ५ दीपनी ६ उग्रगन्धा ७ वातारिः ८ भूकदम्बकः ९ यवजः १० दीपनीयः ११ शूलहन्त्री १२ यवानिका १३ उग्रा १४ तीव्रगन्धा १५। अस्या गुणाः। कटुत्वम्। तिक्तत्वम्। उष्णत्वम्। वातार्शःश्लेष्मशूलाध्मानक्रमिच्छर्द्दिनाशित्वम्। दीपनत्वञ्च। इति राजनिर्घण्टः ॥ अपि च। अथ यवान्या नामगुणाः।
"यवानिकोग्रगन्धा च ब्रह्मदर्भाजमोदिका।
सर्वोक्ता दीप्यका दीप्या तथा स्याद्यवसाङ्गया ॥
यवानी पाचनी रुच्या तीक्ष्णोष्णा कटुका लघुः।
दीपनी च तथा तिक्ता पित्तला शुक्रशूलहृत्।
वातश्लेष्मोदरानाहगुल्मप्लीहक्रमिप्रणुत् ॥
अथ अजमोदाया नामानि गुणाश्च।
अजमोदा खराश्वा च मायूरी दीप्यकस्तथा।
तथा ब्रह्मकुशा प्रोक्ता कारवी लोचमस्तका ॥
अजमोदा कटुस्तीक्ष्णा दीपनी कफवातनुत्।
उष्णा विदाहिनी हृद्या तृष्णा बलकरी लघुः ॥

यविष्ठः

नेत्रामयक्रमिच्छर्द्दिहिक्काबस्तिरुजो हरेत् ॥
अथ खुरासानीयवानीनामगुणाः।
पारसीकयवानी तु यवानीसदृशी गुणैः।
विशेषात् पाचनी रुच्या ग्राहिणी मादिनी गुरुः ॥"
इति भावप्रकाशस्य पूर्ब्बखण्डे प्रथमे भागे ॥

यवाग्र्यं, क्ली, (यवस्याग्र्यम्। तच्छातत्वात्तथात्वम्।) यवक्षारः। इति राजनिर्घण्टः ॥

यवाग्वजं, क्ली, (यवाग्वाभ्यां जायते इति। जन्+डः।) सौवीरम्। इति राजनिर्घण्टः ॥

यवासः, पुं, (यौतीति। यु+"ऋतन्यञ्जीति।" उणा० ४।२। इत्यादिना आसः।) दुरालभा। यथा,—
"यासो यवासो दुष्प्रर्शो धनुर्यासो दुरालभा ॥"
इति रत्नमाला ॥
खदिरभेदः। यथा,—
"करटको वासपत्रश्च यवासः खदिरस्तथा ॥"
इति शब्दमाला ॥
यवासा इति ख्याता करटकीक्षुपविशेषः। तत्पर्य्यायः। यासः २ बहुकण्टकः ३ अल्पकः ४ क्षुद्रेक्षुदी ५ रोदनिका ६ कच्छुरा ७ बालपत्रः ८ विषमः ९ करटकालुकः १० चिक्कणिका ११ गान्धारी १२ अनन्ता १३। अस्य गुणाः। मधुरतिक्तत्वम्। शीतत्वम्। पित्तार्त्तिदाहनाशित्वम्। बलदीपनकारित्वम्। व्रणाकफच्छर्द्दिविसर्पजित्त्वञ्च। इति राजनिर्घण्टः ॥

यवासकः, पुं, (यवास+स्वार्थे कन्।) दुरालभा। इति शब्दरत्नावली ॥ (यथा, सुश्रुते उत्तरतन्त्रे ३९ अध्याये।
"क्षयकासं सशोणितं पार्श्वशूलानपास्यति।
गुडूचीचिरफलावासाव्याघ्रमाणयवासकैः ॥")

यवासशर्करा, स्त्री, (यवासेन तद्रसेन कृता शर्करा। शाकपार्थिववत् समासः।) यवासरसघटितशर्करा। तत्पर्य्यायः। सुधामोदकः२ मोदकः३ तवराजः ४ खण्डसरः ५ खण्डजः ६ खण्डमोदकः ७। अस्या गुणाः। अतिमधुरत्वम्। पित्तश्रमतृषापहत्वम्। तृप्यत्वम्। विदाहमूर्च्छार्त्तिभ्रान्तिग्लानिकरत्वम्। सरत्वञ्च। इति राजनिर्घण्टः ॥ (यथा, सुश्रुते सूत्रस्थाने ४६ अध्याये।
"यवासशर्करा मधुरकषाया तिक्तानुरसा श्लेष्महरी सरा चेति ॥")

यवासा, स्त्री, (यवास+टाप्।) गुडत्वासिनीक्षुपम्। इति राजनिर्घण्टः ॥

यवाङ्कः, पुं, (यवमाङ्कयति स्वकारणत्वादिति। आ+ङ्के+कः।) यवक्षारः। इति राजनिर्घण्टः ॥ (यथा, सुश्रुते चिकित्सितस्थाने २० अध्याये।
"यवाङ्कगौरिकोद्भिद्भैः पादलेपः प्रशस्यते ॥"
गुणादिविशेषोऽस्य यवक्षारशब्दे विज्ञेयः ॥)

यविष्ठः, त्रि, (अयमेषामतिशयेन युवा इति। युवन्+इष्ठन्। "स्थूलदूरेति।" यणादिलोपगुणौ।) अतिशययुवा। (यथा, ऋग्वेदे। १।१४७।२।

यशः

"बोधा मे अस्य वचसो यविष्ठ।")
कनिष्ठभ्रातरि, पुं। इति हेमचन्द्रः। ३।११६ ॥
(त्रिष्वपि। यथा, भागवते। ३।१।५।
"भ्रातुर्य्यविष्ठस्य सुतान् विबन्धून्
प्रवेश्य लाक्षाभवने ददाह ॥")

यवीयान्, [स्] त्रि, (अयमनयोरतिशयेन युवा। युवन्+"द्विवचनविभज्योपपदे तरबीयसुनौ।" ५।३।५७। इति ईयसुन्।) कनिष्ठः। (यथा, मनौ। २।१२८।
"अवाप्यो दीक्षितो नाम्ना यवीयानपि यो भवेत् ॥"
अतिशय युवा। इति मेदिनी। से, ६१ ॥

यवोत्थं, क्ली, (यवेभ्य उत्तिष्ठतीति। उद्+स्था+कः।) सौवीरकम्। इति राजनिर्घण्टः ॥

यव्यं, त्रि, (यवानां भवनं क्षेत्रम्। यव+"यवयवकषष्टिकाट् यत्।" ५।२।३। इति यत्।) यवादिभवनोचितक्षेत्रम्। तत्पर्य्यायः। यवक्यम् २ षष्टिक्यम् ३। इत्यमरः। २। ६। ७ ॥ यवोचितम् ४ यवकोचितम् ५। इति शब्दरत्नावली ॥ (यवेभ्यो हितम्। यव+"खलयवमाषतिलवृषब्रह्मणश्च।" ५।१।७। इति यत्। यवहितः। इति व्याकरणम् ॥)

यव्यः, पुं, (यवेभ्यो हितः। यव+यत्।) मासः। यथा,—
"यव्यद्वयं श्रावणादि सर्व्वा नद्यो रजस्वलाः।
तासु स्नानं न कुर्व्वीत वर्ज्जयित्वा समुद्रगाः ॥"
इति प्रायश्चित्ततत्त्वे गङ्गामाहात्म्यम् ॥
(स्त्री, नदीभेदः। यथा, ऋग्वेदे। ८।८७।८।
"वार्णत्वा यव्याभिर्व्वर्द्धन्ति शूरब्रह्माणि।"
"यव्याभिः नदीभिः। अवनयः यवाः इति नदीनामसु पाठात्।" इति तद्भाष्ये सायणः।)

यशः, [स्] क्ली, (अश्नुते व्याप्नोतीति। अश+"अशेर्देवने युट् च।" उणा० ४। १६०। इत्यसुन् युट्च।) सुख्यातिः। तत्पर्य्यायः। कीर्त्तिः २ समज्ञा ३। इत्यमरः। १।६।११॥ समाख्या ४ कीर्त्तना ५ अभिख्यानम् ६ आज्ञा ७ समख्या ८। इति शब्दरत्नावली ॥
"दानादिप्रभवा कीर्त्तिः शौर्य्यादिप्रभवं यशः।
इति माधवी ॥
अतएव यशःकीर्त्योर्भेदस्यापि दर्शनात् यशःकीर्त्तिपरिभ्रष्टो जीवन्नपि न जीवति। इति कस्यचित् प्रयोगः। जीवतः ख्यातिर्यशो मृतस्य ख्यातिः कीर्त्तिरिति केचित्। तन्न साधु कीर्त्तिस्ते नृप दूतिकेति प्रयोगदर्शनात्।" इत्यमरटीकायां भरतः ॥ कीर्त्तिनाशे दोषो यथा,—
"हन्ति यः परकीर्त्तिञ्च स्वकीर्त्तिं मानवाधमः।
स कृतघ्न इति ख्यातस्तत्फलञ्च निगच्छति ॥
अन्धकूपे वसेत् सोऽपि यावदिन्द्राश्चतुर्दश।
कीटैर्नकुलमानैश्च भक्षितः सततं नृप! ॥
तप्तक्षारोदकं पापी नित्यं पिबति खादति।
ततः सर्पो जन्म सप्त काकः पश्च ततः शुचिः ॥"
इति ब्रह्मवैवर्त्ते प्रकृतिखण्डे ४६ अध्यायः ॥

यष्टि

(अन्नम्। यथा, ऋग्वेदे। ४। ५२। ११।
"वयं स्याम यष्टयो जनेषु।"
"यष्टयः कीर्त्तिरन्नस्य वा।" इति तद्भाष्ये सायणः॥ त्रि, यष्टयी। यथा, ऋग्वेदे। ८। ७६। ५।
"त्वमिन्द्र यष्टया अस्त्रजीषी ध्रुवसक्षते।"
"त्वं यष्टयाः यष्टिसाधनानि भवसि।" इति तद्भाष्ये सायणः॥)

यष्टःपटहः, पुं, (यष्टःस्वत्वकः पटहः। शाकपार्थिववत् समासः।) ढक्का। इत्यमरः। १। ७। ६॥

यष्टःशेषः, त्रि, (यष्ट एव शेषोऽस्य।) न्यूनः। इति हेमचन्द्रः। ३। ३८॥ (यथा, कथासरित्सागरे। ६१। ४४।
"ततः क्रमेण तेनैव सारज्वरभरोष्मणा।
प्रक्षीणदेहः प्रययौ स यष्टःशेषतां नृपः॥")
मरणे, पुं॥

यष्टदं, क्ली, धातुविशेषः। दस्ता इति भाषा। यथा,
"यष्टदं रङ्गसदृशं रीतिहेतुस्तु तन्मतम्।
यष्टदं तुवरं तिक्तं शीतलं कफपित्तहृत्।
चक्षुष्यं परमं मेहान् पाण्डुश्वासञ्च नाशयेत्॥"
इति भावप्रकाशः॥

यष्टस्करः, त्रि, कीर्त्तिकारकः। सुख्यातिजनकः। यष्टस्करोति य इत्यर्थे ("कृञो हेतुताच्छील्यानुलोम्येषु।"३।२।२०।) इति टप्रत्ययेन निष्पन्नः। यष्टस्करी विद्या इति व्याकरणम्॥ (यथा, मनौ। ८। ३८३।
"एतेषां निग्रहो राज्ञः प्रधानां विषये स्वके।
साम्राज्यकृत् सजात्येषु लोके चैव यष्टस्करः॥"
विष्णुचैत्रविशेषे, क्ली। यथा, नारसिंहे ६२ अः।
"विरजं पुष्पवत्यायां बालचामीकरे विदुः।
यष्टस्करं विपाशायां माहिष्मत्यां हुताशनम्॥"
शोभावतीपुर्य्यां जाते ब्राह्मणविशेषे, पुं। यथा, कथासरित्सागरे। १०४। १६।
"तस्यां यष्टस्करो नाम विद्वानाढ्यो बहुश्रुतः।
ब्राह्मणोऽभूदभूत्तस्य सत्पत्नी मेखलेति च॥")

यष्टयाह्वा, स्त्री, (यष्टये हिता। यष्टि+यत्।) जीवन्ती। ऋद्धिनामौषधिः। इति राजनिर्घण्टः॥

यष्टयाह्वान्, [त्] त्रि, (यष्टोऽस्त्यस्य। यष्टि+मतुप्। मस्य वः।) कीर्त्तिविशिष्टः। इति व्याकरणम्॥ (यथा, अथर्ब्ववेदे। ६। ५८। २।
"यथेन्द्रो द्यावापृथिव्योर्यष्टयाह्वान्
यथाप ओषधीषु यष्टयतीः॥")

यष्टयाह्विनी, स्त्री, (यष्टयाह्विन्+ङीष्।) वनकार्पासी। इति शब्दरत्नावली॥ यवतिक्ता। महाज्योतिष्मती। इति राजनिर्घण्टः॥ (सत्यव्रतस्य पत्नी। यथा, कथासरित्सागरे। ७३।२५७।
"अहं यष्टयाह्वती नाम राजसेवानुजीविनः।
भार्य्या सत्यव्रताख्यस्य विप्रस्येहामलान्वया॥"
गङ्गा। यथा, काशीखण्डे तत्सहस्रनामकथने। २६। १४१।
"यष्टयाह्विनी यशोदा च योग्या युक्तात्मसेविता॥")

यष्टयाह्वी, [न्] त्रि, (यष्टोऽस्त्यस्येति। यष्टि+"अस्मायेति।"५।२।१२१। इति विनिः।) यष्टोविशिष्टः। कीर्त्तिमान्। इति व्याकरणम्॥ (यथा, मनौ। ६। ३३४।
"विप्राणां वेदविदुषां गृहस्थानां यशस्विनाम्।
शुश्रूषैव तु शूद्रस्य धर्म्मो नैःश्रेयसः परः॥")

यष्टोदः, पुं, (यष्टो ददातीति। दा+कः।) पारदः। इति राजनिर्घण्टः॥ (क्लीवेऽपि दृश्यते। यथा, वाराहे।
"सुवर्णं रजतं ताम्रं रङ्गं यष्टोदमेव च।
सीसं लौहञ्च सप्तैते धातवो गिरिसम्भवाः॥")
यष्टोदातरि, त्रि॥

यष्टोदा, स्त्री, (यष्टो ददातीति। दा+कः। टाप्।) नन्दपत्नी। यथा, श्रीभागवते १०। स्कन्धे।
"नन्दः किमकरोद्ब्रह्मन् श्रेय एवं महोदयम्।
यशोदा वा महाभागा पपौ यस्याः स्तनं हरिः॥"
(दिलीपमाता। यथा, हरिवंशे। १८। ६०।
"तेषान्तु मानसी कन्या यष्टोदा नाम विश्रुता।
पत्नी सा विश्वमहतः सुधा वै दृढधर्म्मणः।
राजर्षेर्जननी चापि दिलीपस्य महात्मनः॥"
यष्टोदातरि, त्रि। यथा, तैत्तिरीयसंहितायाम्। ४। ४। ६। २।
"यष्टोदां त्वा यष्टयसि तेजोदां त्वा तेजसीति॥")

यष्टा, [ऋ] पुं, (यजते इति। यज्+ल्टच्।) यागकर्त्ता। तत्पर्य्यायः। यजमानः२। इत्यमरः। २। ७। ८॥ (यथा, मार्कण्डेये। १२०। २।
"स दानशीलो यष्टा च यज्ञानामवनीपतिः॥")

यष्टिः, पुं, (इष्यते इति। यज्+बाहुलकात् तिः। इति उणादिवृत्तौ उज्ज्वलदत्तः। ४।१७६।) ध्वजदण्डः। इति विश्वशब्दरत्नावल्यौ॥ भुजदण्डः। इति मेदिनी। टे, २६॥

यष्टिः, पुं, स्त्री, (यजते सङ्गच्छते। यज्+तिः।) तनुः। इति शब्दमाला॥ हारलता। (हारावलिः। यथा, रघौ। १३। ५४।
"क्वचित्प्रभालेपिभिरिन्द्रनीलै-
र्मुक्तामयी यष्टिरिवानुविद्धा।
अन्यत्र माला सितपङ्कजानां
इन्दीवरैरुत्खचितान्तरेव॥"
"यष्टिः हारावलिः।" इति मल्लिनाथः॥ ❋॥)
भार्गी। मधुका। वृक्षभेदः। इति मेदिनी। टे, २६॥ शेषस्य पर्य्यायः। दण्डः २। लगुडः ३ इति हेमचन्द्रः। ३। ४४६॥ तद्दानफलं यथा, वह्निपुराणे।
"यष्टिं ये तु प्रयच्छन्ति नेत्रहीने सुदुर्ब्बले।
तेषान्तु विपुलः पुंसां सन्तानो मोक्षवर्ज्जितः॥"
(स्त्री, शाखा। यथा, कुमारे। ६। २।
"चूतयष्टिरिवाभ्यासे मधौ परभृतोन्मुखी॥"
"चूतयष्टिः चूतशाखा इव।" इति तत्र मल्लिनाथः॥ यष्टिमधु। तत्पर्य्यायः। यथा,
"यष्ट्याह्वं मधुकं यष्टिः क्लीतकं मधुयष्टिका।
यष्टिमधु स्थलेजाता जलजातिरसा पुरा॥"
इति वैद्यकरत्नमालायाम्॥)

यष्टिकः, पुं, (यष्टिरिव। कन्।) जलकुक्कुटः। इति शब्दरत्नावली॥ (यष्टि+स्वार्थे कन्।) दण्डश्च॥

यष्टिका, स्त्री, (यष्टि+स्वार्थे कन्। टाप्।) हारभेदः। यथा,—
"यष्टिका दण्डिका चैव तिलकासारिकेत्यपि॥"
इति जटाधरः॥
वापी। यथा,—
"प्रस्खलं दीर्घिका वापी यष्टिका भीनगोधिका॥"
इति त्रिकाण्डशेषः॥
यष्टिमधुका। यथा,—
"अथ यष्टीमधुकं स्यान्मधुयष्टी तु यष्टिका।"
इति शब्दरत्नावली॥
लगुडः। यथा,—
"अथ शक्तिश्च शक्ती च यष्टिर्यष्टी च यष्टिका।
दण्डः काण्डोऽपि लगुडः पशुघ्नो दण्डकोऽपि च॥"
इति शब्दरत्नावली॥

यष्टिग्रहः, पुं, (यष्टिं गृह्णातीति। यष्टि+ग्रह+"शक्तिलाङ्गलाङ्कुशयष्टितोमरेति।" ३।२।६। इत्यस्य वार्त्ति० अच्।) यष्टिधारकः। लगुडग्राही। इति सुग्धबोधटीकायां दुर्गादासः॥

यष्टिमधु, क्ली, (यष्ट्याः मधु माधुर्य्यमस्य।) यष्टिमधुका। इति हलायुधः॥ (यथास्य पर्य्यायः।
"यष्ट्याह्वं मधुकं यष्टिः क्लीतकं मधुयष्टिका।
यष्टिमधु स्थलेजाता जलजातिरसा पुरा॥"
इति वैद्यकरत्नमालायाम्॥)

यष्टिमधुका, स्त्री, (यष्टिमधुवत् कायतीति। कै+कः।) यष्टिमधु। तत्पर्य्यायः। क्लीतकम् २ मधुकम् ३ मधुयष्टिका ४। इत्यमरः। २।४।१०६॥ यष्ट्याह्वम् ५ यष्टिः ६ स्थलेजातं चेत् यष्टिमधु ७ जलजा चेत् अतिरसा ८। इति रत्नमाला॥ अपि च।
"ज्येष्ठीमधु तथा यष्टीमधुकं क्लीतकं तथा।
अन्यक्लीतनकं तत्तु भवेत्तोये मधूलिका॥"
अस्या गुणाः।
"यष्टी हिमा गुरुः स्वादी चक्षुष्या बलवर्णकृत्।
सुस्निग्धा शुक्रला केश्या स्वर्य्या पित्तानिलापहा।
व्रणशोथविषच्छर्दिष्टष्णाग्लानिक्षयापहा॥"
इति भावप्रकाशः॥

यष्टी, स्त्री, (यष्टि+"क्लदिकारादक्तिनः।" इति ङीष्।) यष्टिमधु। इति भावप्रकाशः॥ (यथास्याः पर्य्यायः।
"यष्टी यष्ट्याह्वयं प्रोक्तं मधुकं मधुयष्टिका।"
इति गारुडे २०८ अध्यायः॥
तथास्या गुणाः। भावप्रकाशस्य पूर्ब्बखण्डे १।
"यष्टी हिमा गुरुः स्वादी चक्षुष्या बलवर्णकृत्।

सुस्निग्धा शुक्ला केश्या स्वर्य्या पित्तानिला-
सृजित् ।
व्रणशोथविषच्छर्दिश्लेष्मास्रानिच्छयापहा ॥"
(हारभेद:। तल्लक्षणं यथा, वृहत्संहितायाम्। ८१। ३६।
"संयोजिता या मणिना तु मध्ये
यष्टीति सा भूषणविद्भिरुक्ता ॥")
यष्टीकं, क्ली, (यष्टी+कन्।) यष्टिमधु। इति राजनिर्घण्टः॥
यष्टीपुष्पः, पुं, (यष्टीपुष्पमिव पुष्पं यस्य।) पुन्नागवृक्षः। इति भावप्रकाशः॥
यष्टीमधु, क्ली, (यष्ट्यां मधु माधुर्य्यमस्य।) मिष्ट-मूलविशेषः। जेठीमधु इति मूलहट्टी इति च हिन्दी भाषा। तत्पर्य्यायः। मधुयष्टी २ मधुवल्ली ३ मधुस्रवा ४ मधूकम् ५ मधु ६ यष्टीकम् ७ यष्ट्याह्वम् ८॥ (तथा च।
"यष्टीमधु तथा यष्टी मधुकं क्लीतकन्तथा।
अन्यत् क्लीतनकन्तत्तु भवेत्तोये मधूलिका॥"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे॥)
अस्य गुणाः। मधुरत्वम्। किञ्चित्तिक्तत्वम्। शीतलत्वम्। चक्षुष्यत्वम्। पित्तहरत्वम्। रुच्यत्वम्। शोथक्षयव्रणापहत्वञ्च। इति राजनिर्घण्टः॥ (यथा, सुश्रुते चिकित्सास्थाने २७ अध्याये। "तत्र विड्भक्तखल्लचूर्णमाहृत्य यष्टीमधुयुक्तं यथाबलं शीततोयेनोपयुञ्जीत॥")
यष्ट्याह्वं, क्ली, (यष्टीत्याह्वा यस्य।) यष्टिमधु। इति राजनिर्घण्टः॥ (यथा, सुश्रुते सूत्रस्थाने १६ अध्याये।
"यवाश्वगन्धा यष्ट्याह्वैस्तिलैश्चोद्वर्त्तनं
हितम्॥")
यस इर् य उ यतने। इति कविकल्पद्रुमः॥ (दिवा०-परo-अकo-सेट्। क्रावेट्।) इर्, अयसत् अयासीत् अयसीत्। अस्मात् पुषादित्वान्नित्यं ङ इत्यन्ये। य, प्रयस्यति। क्रम क्रम इत्यादिना केवलात् संपूर्ब्बाच्च अस्मात् श्यन् विकल्पात् यसति यस्यति संयस्यति संयसति। उ, यसित्वा यस्त्वा। यतनं यत्नः। इति दुर्गादासः॥
यक्षः, पुं, (यसति मोक्षायेति। यस्+क्विप्। संज्ञायां कन्।) मुनिविशेषः। इति मुग्धबोधव्याकरणम्॥ (यथा, आश्वलायनश्रौतसूत्रे उत्तरार्द्धे। ६।१०।१०। "यक्षवाधौलमौनमौकशाकराक्षिसार्ष्टिसावर्णिशालङ्कायनजैमिनिदेवन्यायनानां भार्गवैतहव्यसावेतसेति॥")
यज्ञः, पुं, (यजतीति। यज+"शेवायज्ञजिह्वाशीवाप्यामीवाः।" उणा० १। १५४। इति वनप्रत्ययेन निपातितः।) यजमानः। इत्युणादिकोषः॥ (त्रि, महान्। यथा, ऋग्वेदे। ३। १। १२।
"उद्यक्षिया जनिता यो जजानापां गर्भो वृतभो
यज्ञो अग्निः।"
"यज्ञो महान्।" इति तद्भाष्ये सायणः॥)

या, ल गतौ। इति कविकल्पद्रुमः॥ (अदा०-परo-सकo-अनिट्।) ल, याति। इति दुर्गादासः॥
यागः, पुं, (इज्यते इति। यज्+घञ्।) यज्ञः। इत्यमरः। २। ७। १३॥ तच्च श्रौताग्निकृत्यहविर्यज्ञाः सप्त। यथा। आग्न्याधानं तदेवाग्निहोत्रम् १ दर्शपौर्णमासौ २ पिण्डपितृयज्ञः ३ आग्रयणम् ४ चातुर्म्मास्यः ५ निरूढ़पशुबन्धः ६ सौत्रामणिः ७। स्मार्त्ताग्निकृत्यपाकयज्ञाः सप्त। यथा। औपासनम् १ वैश्वदेवः २ स्थालीपाकः ३ आग्रयणम् ४ सर्पबलिः ५ ईशानबलिः ६ अष्टकान्वष्टका ७। श्रौताग्निसप्तसंस्थाः। यथा। सोमयागः स एवाग्निष्टोमः १ अत्यग्निष्टोमः २ उक्थ्यः ३ षोड़शी ४ वाजपेयः ५ स द्विविधः संस्था कुरुश्च। अतिरात्रः ६ अप्तूर्य्यामः ७। उत्तरक्रतवो बहवः। यथा। महाव्रतम् १ सर्व्वतोमुखम् २ राजसूयः ३ पौण्डरीकम् ४ अभिजित् ५ विश्वजित् ६ अश्वमेधः ७ वृहस्पतिसवः ८ आङ्गिरसः ९ चयनान्यष्टादश २७। इत्यादि श्रौतसूत्रम्॥*॥ सर्व्वदेवानां यागकालो यथा,
शुक्र उवाच।
"स्वल्पेनैव तु द्रव्येण महापुण्यं यथा भवेत्।
तदहं श्रोतुमिच्छामि ग्रहयागं सुरेश्वर!॥
ब्रह्मोवाच।
शृणु वत्स प्रवक्ष्यामि यथा त्वं परिपृच्छसि।
अल्पकेन महापुण्यं ग्रहर्च्चतिथियौगिकम्॥
भृगुपूर्णाष्टमीयोगं शिवयागेषु चोत्तमम्।
रुद्रवर्गश्च भाग्यश्च उमाया भृगुवासरे॥
दैवयोगात् यदा षष्ठी पुष्यर्क्षरविवासरम्।
स्कन्दयागस्तदा कार्य्यः सर्व्वकामप्रसाधकः॥
वारेण वा यदा सूर्य्यः सप्तमी विजया मता।
तदा तु भवते भानोर्यागः सर्व्वगुणावहः॥
शुक्लरिक्तानुसंयोगे अर्कर्क्षे सोत्तरासु च।
नवम्यां मङ्गलायोगो भानुमूलदिनं यदा॥
अष्टम्यां वाथ चन्द्राहे श्रवणेन सुभावहम्।
अहिर्बुध्न्ये भुजाहे तु गणेशे तस्य वाहनि॥
पुनर्व्वसौ गुरोर्व्वारे द्वादश्यां श्रवणेन वा।
सोमग्रस्तं यदा योगं विष्णोः सर्व्वार्थसाधकम्॥
द्वितीयायां यदा सौम्ये कृत्तिकर्क्षे भवेत् क्वचित्।
ग्रहयागस्तदा कार्य्यः सर्व्वशान्तिप्रदायकः॥
स्वातीसौम्ये चतुर्थ्यां च उमायागे वरास्मृता॥
उत्तरासु च सर्व्वासु भानुपौर्णाष्टमीषु च।
शान्त्यभिषेकयागेषु सर्व्वकामार्थदाष्टमी॥
गुरावेकादशी पुष्ये रोहिण्यां वा यदा शनिः।
सुतसौभाग्यकामाय यागो रुद्रविनायके॥
पूर्णिमासु च सर्व्वासु अष्टमीद्वादशीषु च।
चतुर्दश्यां तृतीयासु शुक्रे शुभेषु च।
सर्व्वेषां भवते यागो भक्तिपूर्व्वो महामुने!॥
मन्त्रसाधनद्रव्यायो रुद्रयागादवाप्यते।
श्रीमेधाज्ञानवात्सल्यसुमायागान्महामुने॥
योगज्ञानयशःसिद्धिं महादेवादवाप्नुयात्।

आरोग्यं सप्रतापत्वं भास्करात् प्राप्यते ध्रुवम्॥
गतिमिष्टां यथाकामं प्रयच्छति त्रिविक्रमः।
विघ्नो न भवते तस्य यस्तु पश्येद्विनायकम्॥
विगतारिर्भवेत् षष्ठ्यां दृष्ट्वा स्कन्दं मखे क्षणात्।
माहयागान्महासिद्धिः सर्व्वेषामपि जायते॥
भवते धनवान् पुंसः प्रथमाह्ने हुताशनात्।
स्वर्गापवर्गसंसिद्धिर्दुर्गायागात् प्रजायते॥
माघादौ मङ्गलांशोत्या ज्येष्ठाद्यैर्ब्रह्म जायते।
ईशाद्यैः कालिकाद्यास्तु यष्ट्या विधिना मुने॥"
इत्याद्ये देवावतारे उदयतिथ्यृक्षयोगमाहात्म्यकीर्त्तनम्॥*॥

अथ ग्रहयागविधिः।
"प्रणम्य नव रत्नादीन् शुभाशुभफलप्रदान्।
ग्रहयागविधिं सम्यक् वक्ष्ये श्रीरघुनन्दनः॥
अथ ग्रहयागप्रयोगः।
तत्र रविसोमबुधगुरुशुक्रवारेषु चित्रानुराधाश्लेषाग्निरोरेवतीपुष्याश्विनीहस्तारोहिण्युत्तराचरेषु चन्द्रतारानुकूले शुभलग्ने यागः कार्य्यः। अत्र बालग्रहभूतग्रहप्रबलतरनराधिपग्रहदुःस्वरोगाभिभवादभूतदुःस्वप्नावलोकनग्रहदौस्थ्यादिनिमित्तकं शान्तिकं मलमासादावपि कर्त्तव्यम्। अवग्रहं विना केवलदृष्ट्यायुःपुष्टिपुत्रश्रीकामादिपौष्टिकन्तु मलमासादीतरकाल एव कार्य्यम्॥*॥ तत्र यजमानः कृतस्नानादिः गोमयोपलिप्ते देशे सदर्भासनोपविष्ट उदङ्मुखः स्वस्तिवाच्यः सूर्य्यः सोम इति पठित्वा फलपुष्यतिलदर्भचयसहितजलपूर्णताम्रपात्रं गृहीत्वा, ॐ तद्विष्णोरिति विष्णुं संस्मृत्य ॐ तत् सदित्युच्चार्य्य ॐ अद्येतादि अमुकगोत्रः श्रीअमुकदेवशर्म्मा अमुककामो ग्रहयज्ञमहं करिष्ये इति सङ्कल्प्य तज्जलमेवैशान्यां निःक्षिपेत्। अन्यार्थत्वे गोत्रनाम्नोः षष्ठ्यन्तता। करिष्ये इत्यत्र करिष्यामीति विशेषः। ततः श्वेतसर्षपानादाय।
ॐ वेतालाश्च पिशाचाश्च राक्षसाश्च सरीसृपाः।
अपसर्पन्तु ते सर्व्वे ये चान्ये विघ्नकारकाः॥
ॐ विनायका विघ्नकरा महोग्रा
यज्ञद्विषो ये पिशिताशनाश्च।
सिद्धार्थकैर्वश्यसमानकल्पै-
र्मया निरस्ता विदिशः प्रयान्तु॥
इत्येताभ्यां मन्त्राभ्यां श्वेतसर्षपप्रक्षेपैर्व्विघ्नकारकानपसारयेत्। ततः सगणाधिपषोड़शमातृकापूजा वसोर्धारा आयुष्यजपं तदङ्गानि गायत्रीजपं वृद्धिश्राद्धञ्च कृत्वा तदङ्गतो भोज्यमुक्त्वा ब्राह्मणान् परितोष्य ततः स्वयमग्रतो कर्त्ता प्राङ्मुखं गुरुम् ॐ साधु भवानास्तामिति वदेत् ॐ साध्वहमास इति प्रतिवचनम्। ततो मन्त्रपुष्पवस्त्राङ्गुरीयकादिना गुरुमलङ्कृत्य दक्षिणं जानु स्पृष्ट्वा ॐ अद्येत्यादि मत्कृतैतग्रहयागकर्म्मणि ग्रहपूजाहोमकर्म्मकरणाय अमुकगोत्रं अमुकदेव-

ग्रहमौणं गन्धादिभिरभ्यर्च्य भवन्तमहं वृणे। ॐ वृतोऽस्मीति प्रतिवचनम्। ॐ यथाविहितं पूजादिकर्म्म कुरु। ॐ यथाज्ञानं करवाणीति प्रतिवचनम्॥ * ॥ ततो मण्डपोत्तरपूर्व्वभागे वितस्तिहृदयविस्तृतायां वितस्त्युच्छ्रितायां उदक्प्लवायां वेद्यां गोमयेनोपलिप्तायां रक्तचन्दनादिना मध्ये वर्त्तुलं सूर्य्यम्। आग्नेय्यां श्वेतमर्द्धचन्द्राकारं सोमम्। दक्षिणस्यां त्रिकोणं रक्तं मङ्गलम्। ऐशान्यां पीतं धनुराकारं बुधम्। उत्तरस्यां पीतं पद्माकारं बृहस्पतिम्। प्राच्यां श्वेतं चतुष्कोणं शुक्रम्। प्रतीच्यां श्यामं सर्पाकारं शनिम्। नैर्ऋत्यां श्यामं मकराकारं राहुम्। वायव्यां धूम्रवर्णान् खड्गाकारान् केतून् विलिख्य स्वगृह्योक्तविधिना अग्निस्थापनादिब्रह्मस्थापनपर्य्यन्तं कर्म्म कृत्वा मण्डले ग्रहानावाहयेत्॥ * ॥ तत्र क्रमः। मध्ये।
ॐ क्षत्रियं काश्यपं रक्तं कालिङ्गं द्वादशाङ्गुलम्।
पद्महस्तद्वयं पूर्ब्बाननं सप्ताश्ववाहनम्।
अग्निवाधिदेवतं ध्यायेद्रविप्रत्यधिदेवतम्॥
सप्तम्यां जायमानं विशाखानक्षत्रं रक्तमाल्याम्बरधरम्। इति ध्यात्वा ॐभूर्भुवः स्वः सूर्य्यग्रह इहागच्छ इहागच्छ इह तिष्ठ इह तिष्ठ इति शुक्लतण्डुलैरावाह्य स्थापयेत्॥ १॥ आग्नेये।
ॐसासृग्वं वेश्यमाग्नेयं हस्तमात्रं सिताम्बरम्।
श्वेतं द्विबाहुं वरदं दक्षिणं सगदेतरम्॥
दशाश्वं श्वेतपद्मस्थं विचिन्त्योमाधिदेवतम्।
जलप्रत्यधिदेवञ्च सूर्य्यास्यमाकृयेत्तथा॥
चतुर्दश्यां जातं कृत्तिकानक्षत्रमिति ध्यात्वा ॐभूर्भुवः स्वः सोमग्रह इहागच्छ इहागच्छ इह तिष्ठ इह तिष्ठ इति शुक्लतण्डुलैरावाह्य स्थापयेत्॥ २॥ दक्षिणस्याम्।
ॐ आवन्त्यं क्षत्रियं रक्तं मेषस्थं चतुरङ्गुलम्।
आरक्तमाल्यवसनं भारद्वाजं चतुर्भुजम्॥
दक्षिणोर्द्ध्वक्रमात् शक्तिवराभयगदाकरम्।
आदित्याभिमुखं देवं तद्वदेव समाकृयेत्।
स्कन्दाधिदेवतं भौमं क्षितिप्रत्यधिदेवतम्॥
दशम्यां जातं पूर्व्वाषाढ़ानक्षत्रमिति ध्यात्वा ॐ भूर्भुवः स्वः मङ्गलग्रह इहागच्छ इहागच्छ इह तिष्ठ इह तिष्ठ इति शुक्लतण्डुलैरावाह्य स्थापयेत्॥ ३॥ ऐशान्याम्।
ॐ मागधं द्व्यङ्गुलाक्षेयं वैश्यं पीतं चतुर्भुजम्।
वामोर्द्ध्वक्रमतश्चक्रगदावरदखड्गिनम्॥
सूर्य्यास्यं सिंहगं सौम्यं पीतवस्त्रं तथाकृयेत्।
नारायणाधिदेवञ्च विष्णुप्रत्यधिदेवतम्॥
द्वादश्यां जातं धनिष्ठानक्षत्रमिति ध्यात्वा ॐ भूर्भुवः स्वः बुधग्रह इहागच्छ इहागच्छ इह तिष्ठ इह तिष्ठ इति शुक्लतण्डुलैरावाह्य स्थापयेत्॥ ४॥ उत्तरस्याम्।
द्विजमाङ्गिरसं पीतं सैन्धवञ्च षड़ङ्गुलम्।
ध्यात्वा पीताम्बरं जीवं सरोजस्थं चतुर्भुजम्॥
दक्षोर्द्ध्वादित्यवरदकरकादक्षमाकृयेत्।

ब्रह्माधिदेवं सूर्य्यास्यमिन्द्रप्रत्यधिदेवतम्॥
एकादश्यां जातं उत्तरफल्गुनीनक्षत्रमिति ध्यात्वा ॐ भूर्भुवः स्वः बृहस्पते इहागच्छ इहागच्छ इह तिष्ठ इह तिष्ठ इति शुक्लतण्डुलैरावाह्य स्थापयेत्॥ ५॥ ततः प्राच्याम्।
ॐ शुक्रं भोजकटं विप्रं भार्गवञ्च नवाङ्गुलम्।
पद्मस्थमाकृयेत् सूर्य्यसुखं श्वेतं चतुर्भुजम्॥
सदाक्षवरकरकादक्षहस्तं सिताम्बरम्।
शुक्राधिदेवतं ध्यायेत् प्रत्यधिदेवतम्॥
नवम्यां जातं पुष्यनक्षत्रमिति ध्यात्वा ॐ भूर्भुवः स्वः शुक्र इहागच्छ इहागच्छ इह तिष्ठ इह तिष्ठ इति शुक्लतण्डुलैरावाह्य स्थापयेत्॥ ६॥ पश्चिमायाम्।
सौराष्ट्रं काश्यपं शूद्रं सूर्य्यास्यं चतुरङ्गुलम्।
कृष्णं कृष्णाम्बरं गृध्रगतं सौरिं चतुर्भुजम्॥
तद्वद्वामवरमूलधनुर्हस्तं समाकृयेत्।
यमाधिदेवतं प्रजापतिप्रत्यधिदेवतम्॥
कृष्णचतुर्दश्यां जातं रोहिणीनक्षत्रमिति ध्यात्वा ॐ भूर्भुवः स्वः शनैश्चर इहागच्छ इहागच्छ इह तिष्ठ इह तिष्ठ इति शुक्लतण्डुलैरावाह्य स्थापयेत्॥ ७॥ नैर्ऋत्याम्।
राहुं मलयजं शूद्रं पैठीनं द्वादशाङ्गुलम्।
कृष्णं कृष्णाम्बरं सिंहासनं ध्यात्वा तथाकृयेत्॥
चतुर्बाहुं खड्गवरशूलचर्म्मकरं तथा।
कालाधिदेवं सूर्य्यास्यं सर्पप्रत्यधिदेवतम्॥
पौर्णमास्यां जातं भरणीनक्षत्रमिति ध्यात्वा ॐ भूर्भुवः स्वः भगवन् राहो इहागच्छ इहागच्छ इह तिष्ठ इह तिष्ठ इति शुक्लतण्डुलैरावाह्य स्थापयेत्॥ ८॥ वायव्याम्।
कौशद्वीपं केतुगणं जैमिनीयं षड़ङ्गुलम्।
धूम्रं गृध्रगतं शूद्रमाकृयेत् विकृताननम्॥
सूर्य्यास्यं धूम्रवसनं वरदं गदिनं तथा।
चित्रगुप्ताधिदेवञ्च ब्रह्मप्रत्यधिदेवतम्॥
अमावास्यायां जातं अश्विनीनक्षत्रमिति ध्यात्वा ॐ भूर्भुवः स्वः भगवन्तः केतव इहागच्छत इहागच्छत इह तिष्ठत इह तिष्ठत इति शुक्लतण्डुलैरावाह्य स्थापयेत्॥ ९॥ अधिदेवतप्रत्यधिदेवतपूजनञ्च अयुतहोमार्द्धं। ततस्तत्तद्वर्णवस्त्रतत्तद्वर्णगन्धतत्तद्वर्णपुष्पं दद्यात्॥
धूपे विष्णोः। रवये गुग्गुलुधूपम्। सोमाय सरलम्। मङ्गलाय देवदारुम्। बुधाय घृतमिश्रितदेवदारुम्। बृहस्पतये दशाङ्गम्। शुक्राय अगुरु। शनैश्चराय कालागुरु। राहवे गुड़त्वचम्। केतुभ्यो मधुमिश्रितगुड़त्वचम्। अभावे षोड़शाङ्गं वा॥ * ॥ गन्धे विष्णोः। सूर्य्याय रक्तचन्दनम्। सोमाय श्वेतचन्दनम्। मङ्गलाय कुङ्कुमम्। बुधाय सरलम्। गुरवे रक्तचन्दनश्वेतचन्दनकुङ्कुमसरलं मिश्रितसमभागत्वेन दद्यात्। शनैश्चराय कस्तूरीम्। राहवे पद्मकाष्ठम्। केतुभ्यश्च पद्मकाष्ठम्। अधिदेवताप्रत्यधिदेवताः पूजयेत्॥ * ॥ अधिदेवता प्रत्यधिदेवता यथा। सूर्य्यस्य शिववह्नी।

सोमस्य उमा जलम्। मङ्गलस्य स्कन्दः क्षितिः। बुधस्य नारायणविष्णू। बृहस्पतेः ब्रह्मा इन्द्रश्च। शुक्रस्य शक्रः शची। शनैश्चरस्य यमः प्रजापतिश्च। राहोः कालः सर्पश्च। केतूनां चित्रगुप्तः ब्रह्मा च। एतत्तु अयुतादिहोमे ज्ञेयम्॥ * ॥ सूर्य्याय गुड़ौदनबलिः। एवं सोमादीनामपि। सति सामर्थ्ये षोड़शोपचारादिना। बलौ तु। सूर्य्याय गुड़ौदनम्। सोमाय घृतपायसम्। मङ्गलाय पक्वयवचूर्णात्मकथावकम्। बुधाय क्षीरान्नम्। गुरवे दध्योदनम्। शुक्राय घृतौदनम्। शनैश्चराय छागरम्। राहवे छागमांसम्। केतुभ्यः अजाक्षीरसाधिताजकर्णरक्तमिश्रित-यव-तिल-तण्डुलरूपं खिचौदनम् तत्तद्द्रव्यालाभे भक्ष्यान्तरं दद्यात्॥ * ॥ ततश्चरुं अपयेत्। तत्र सामगानां क्रमः। अग्नेः पश्चिमायां दिशि प्रागग्यान् कुशानास्तीर्य्य तदुपरि प्रक्षालितवारुणसुदूखलं वैष्णवञ्च सूर्पं वारुणचमसस्थजलप्रोक्षितं संस्थाप्य व्रीहीन् यवान् वा अग्रतो प्रक्षालितण्डुलान् सूर्पे निधाय ॐ सूर्य्याय त्वा जुष्टं निर्व्वपामि इति गृहीत्वा उदूखले स्थापयेत्। एवं सोमाय। एवं मङ्गलादीनामपि निर्व्वपणं कृत्वा उदूखले स्थापयेत्। द्विस्तण्डीम्। ततो दक्षिणहस्तमुपरि कृत्वा मुषलेनावहत्य सूर्पेण प्रस्फोटयेत्। इत्यमेव वारत्रयम्। ततश्चरुस्थाल्याममन्त्रकं क्षतोत्तराग्रं पवित्रं निःक्षिप्य तत्र प्रक्षालिततण्डुलान् निधाय तदुपरि दुग्धं दत्त्वा यथा पायसचरुर्भवति तथा स्तोकं स्तोकमुदकं दत्त्वा तन्मध्ये खदिरपलाशौडुम्बराणामन्यतमस्य प्रादेशप्रमाणं उभयतो सार्द्धाङ्गुष्ठप्रमाणं चतुष्कोणपुष्कलं मेक्षणं दक्षिणावर्त्तेन भ्रामयित्वा तथा पचेत् यथा अन्तरोष्माणा सम्यक् पाको भवति मक्षणाक्षणं दाहश्च न भवति। सम्यक्पाके भूते चरुमध्ये घृतसुवं दत्त्वा प्रागादिदिक्चिह्नितं कृत्वा चरुमवतार्य्य अग्नेरुत्तरतः कुशोपरि स्थापयित्वा पुनर्मध्ये घृतसुवं दद्यात्। ततो भूमिजपादिसुवसंस्कारपर्य्यन्तं कर्म्म कृत्वा अग्नेः पश्चिमतः स्तरणकुशोपरि पूर्व्वमाज्यं पश्चाच्चरुं निधाय उदकाञ्जलिसेकं कृत्वा विरूपाक्षजपान्तां कुशण्डिकां समापयेत्॥ * ॥ यजुर्व्वेदिनान्तु आज्यस्थाल्यामाज्यनिर्व्वपणानन्तरं सूर्पं पुरतो दक्षिणभागे संस्थाप्य तत्रोदूखलं विन्यस्य व्रीह्याद्यन्यतमं तत्र निधाय ॐ सूर्य्याय त्वा जुष्टं गृह्णामि इत्येकां सृष्टिं गृहीत्वा ॐ सूर्य्याय त्वा जुष्टं निर्व्वपामीति उदूखले स्थापयित्वा ॐ सूर्य्याय त्वा जुष्टं प्रोक्षामीति प्रोक्षणीजलेन प्रोक्षयेत्। एवं सोमाय त्वा इत्यादि। ततः ॐ अग्नये स्विष्टकृते त्वा इत्यादिना गृहीतनिर्व्वपणप्रोक्षणानि कृत्वा द्विरुत्पूतीं कुर्य्यात्। ततः पूर्व्ववत् अग्रयम्। पक्वं ज्ञात्वा ज्वलदग्निं गृहीत्वा

चरुमध्ये दक्षिणावर्त्तेन भ्रामयित्वा तस्मिं तत्रैवाग्नौ क्षिपेत्। तत आधाराज्यभागान्तं कर्म्म कुर्य्यात् ॥ * ॥ ऋग्वेदिनान्तु प्रोक्षणी-पात्रस्थापनानन्तरं पवित्रान्तर्हिते ॐ सूर्य्याय त्वा जुष्टं निर्व्वपामीति प्रोक्षाद्यन्यतमसुष्टिं प्रक्षिप्य ॐ सूर्य्याय त्वा जुष्टं प्रोक्षामीति प्रणीताजलेन प्रोक्षयेत्। एवं सोमाय त्वा इत्यादि। ततः स्रिक्कद्वयंकिञ्चिदधिकं तूष्णीं नत्वा कृत्वा पवित्रान्तर्हितं कृत्वा पूर्व्ववद्गोवोर्द्ध-लोमकृष्णाजिने उदूखलं निधाय तत्र सूर्पस्थ-प्रोक्षाद्यन्यतमं प्रक्षिप्य मुषलेनावहत्य सूर्पेण वितुषीकृत्य प्रस्फोट्य त्रिः प्रक्षाल्य पवित्रं चरुस्थाल्यां प्रक्षिप्य तथैव स्थापयित्वा उदीच्यां दक्षिणभागे ॐ सोमाय स्वाहेति होमपर्य्यन्तं कुर्य्यात्। ततः प्रान्तिकर्म्मणि अर्घे त्वं वरद-नामासीति नाम कृत्वा।

ॐ पिङ्गभ्रूमश्रुकेशाश्च पीनाङ्गजठरोरुगः।
कृशस्य: साक्षसूत्रोऽग्नि: सम्पार्श्वे: प्रक्रियाकः ॥

इत्यादिपुराणीयं ध्यात्वा ॐ वरदनामन्नग्ने इहागच्छ इहागच्छ इह तिष्ठ इह तिष्ठ इत्यावाह्य पाद्यादिना पूजयेत् ॥ * ॥ पौष्टिक-कर्म्मणि तु वरदनामाग्निः। ग्रहहोमे अग्नी-नाह गोभिलः।

आदित्ये कपिलो नाम पिङ्गलः सोम उच्यते।
धूमकेतुस्तथा भौमे जठरोऽग्निर्बुधे स्मृतः ॥
बृहस्पतौ शिखी नाम शुक्रे भवति पाटकः।
शनैश्चरे महातेजा राहौ वैव हुताशनः।
केतुषु लोहितोऽग्निः स्यादिति वह्निविनिर्णयः ॥

ततः स्वगृह्योक्तविधिनानेन चरुणा सूर्य्यादि-ग्रहेभ्यः प्रत्येकाहुतिं दद्यात् ॥ * ॥ अत्र मन्त्राः। सूर्य्यस्य आकृष्णेनेतिमन्त्रस्य हिरण्यस्तूपाङ्गिरा ऋषिस्त्रिष्टुप् छन्दः सविता देवता आदित्यस्य पूजाहोमकर्म्मणि विनियोगः। ॐ आकृष्णेन रजसा वर्त्तमानो निवेशयन्नमृतं मर्त्यञ्च हिरण्ययेन सविता रथेना देवो याति भुवनानि पश्यन् स्वाहा। इदं सूर्य्याय इति देवतोद्देशः सामगेतरैः कार्य्यः ॥ १ ॥ सोमस्य इमन्देवेति-मन्त्रस्य वरुण-ऋषिरग्निर्देवता सोमस्य पूजा-होमकर्म्मणि विनियोगः। ॐ इमन्देवा असप-त्नं सुवध्वं महते क्षत्राय महते ज्यैष्ठाय। इममसुष्य पुत्रममुष्यै पुत्रमस्यै विशे स्वाहा। इदं सोमाय ॥ २ ॥ मङ्गलस्य अग्निर्मूर्द्धेति-मन्त्रस्य अपाङ्गिरा ऋषिर्गायत्री छन्दोऽग्नि-र्देवता मङ्गलस्य पूजाहोमकर्म्मणि विनि-योगः। ॐ अग्निर्मूर्द्धा दिवः ककुत्पतिः पृथिव्या अयमपां रेतांसि जिन्वति स्वाहा। इदं मङ्गलाय ॥ ३ ॥ बुधस्य उद्बुध्यस्वेतिमन्त्रस्य पर-मेष्ठिऋषिस्त्रिष्टुप् छन्दोऽग्निर्देवता बुधस्य पूजा-होमकर्म्मणि विनियोगः। ॐ उद्बुध्यस्वाग्ने प्रतिजागृहि त्वमिष्टापूर्त्ते संसृजेथामयञ्चास्मिन् सधस्थे अध्युत्तरस्मिन् विश्वेदेवा यजमानश्च सीदत स्वाहा। इदं बुधाय ॥ ४ ॥ बृहस्पतेः बृह-स्पते अतीतिमन्त्रस्य गृत्समद ऋषिस्त्रिष्टुप् छन्दो ब्रह्मा देवता जीवस्य पूजाहोमकर्म्मणि विनि-योगः। ॐ बृहस्पते अतियदर्य्योऽर्हाद्द्युमद्विभाति क्रतुमज्जनेषु। यद्दीदयच्छवस ऋतु प्रजात तद-स्मासु द्रविणं धेहि चित्रं स्वाहा। इदं बृह-स्पतये ॥ ५ ॥ शुक्रस्य अन्नात् परिस्रुत इति मन्त्रस्य प्रजापतिर्ऋषिरतिजगतीच्छन्दोऽग्निसरस्वतीन्द्रा देवताः शुक्रस्य पूजाहोमकर्म्मणि विनियोगः। ॐ अन्नात् परिस्रुतो रसं ब्रह्मणा व्यपिबत् क्षत्रं पयः सोमं प्रजापतिः। ऋतेन सत्यमिन्द्रियं विपानं शुक्रमन्धस इन्द्रस्येन्द्रियमिदं पयोऽमृतं मधु स्वाहा। इदं शुक्राय ॥ ६ ॥ शनैश्चरस्य अन्नो देवीतिमन्त्रस्य दध्यङ्ङाथर्व्वण ऋषिर्गायत्री च्छन्द आपो देवता शनैश्चरस्य पूजाहोम-कर्म्मणि विनियोगः। ॐ अन्नो देवीरभीष्टये आपो भवन्तु पीतये संयोरभिस्रवन्तु नः स्वाहा। इदं शनैश्चराय ॥ ७ ॥ राहोः काकात् काक्षा-दिति मन्त्रस्य अत्रिर्ऋषिर्गायत्री च्छन्दो दूर्व्वे-कका देवता राहोः पूजाहोमकर्म्मणि विनि-योगः। ॐ काकात् काक्षात् प्रदोहन्ती परुषः परुषः परि एवानो दूर्व्वे प्रतनु सहस्रेण शतेन च स्वाहा। इदं राहवे ॥ ८ ॥ केतूनां केतुं कृण्वन्निति मन्त्रस्य मधुच्छन्द ऋषिरनिरुद्धायत्री-च्छन्दोऽग्निर्देवता केतूनां पूजाहोमकर्म्मणि विनियोगः। ॐ केतुं कृण्वन्न केतवे पेशो मर्य्या अपेशसे। समुषद्भिरजायथा स्वाहा। इदं केतुभ्यः ॥ ९ ॥ ततो मधुघृताक्तां घृताक्तां क्षीराक्तां वा प्रादेशप्रमाणां साग्रामर्कसमिध-मादाय ॐ आकृष्णेन इत्यादिमन्त्रेण सूर्य्याया-ष्टोत्तरशतं अष्टाविंशतिमष्टौ वा आज्यक्ता। प्रक्ता ग्रहस्यातिपीड़ाकरत्वाद्वा अष्टोत्तर-सहस्रं जुहुयात् ॥ * ॥ समिधमाह याज्ञ-वल्क्यः।

अर्कः पलाशः खदिरस्त्वपामार्गोऽथ पिप्पलः।
उडुम्बरः शमी दूर्व्वा कुशाश्च समिधः क्रमात् ॥

होमो ग्रहादिपूजायां शतमष्टोत्तरं भवेत्।
अष्टाविंशतिरष्टौ वा यथाशक्ति विधीयते।
अतिपीड़ाकरो यस्तु तन्तु यत्नेन पूजयेत् ॥

ततो होमानन्तरं उदीच्यं कर्म्म कुर्य्यात्। ततो गुड़ौदनादीन् ऋत्विजे भोजयेत्। तत्तद्द्रव्या-लाभे भोज्यान्तराणि वा दद्यात्। भोजना-सामर्थ्ये तत्तद्द्रव्याणि पाणिना प्रतिग्राहयेत्। ततो मत्स्यपुराणोक्तैर्मन्त्रैर्दक्षिणां दद्यात्।

धेनुः ग्रहस्वर्णानड्वान् हेम वासो हयस्तथा।
कृष्णा गौरायसं छाग एता वै दक्षिणाः क्रमात् ॥

तत्र।

कपिले सर्व्वदेवानां पूजनीयासि रोहिणी।
तीर्थदेवमयी यस्मादतः प्रान्तिं प्रयच्छ मे ॥

इति पठित्वा ॐ अद्येत्यादि कृतैतत्सूर्य्यग्रह-यज्ञकर्म्मणः प्रतिष्ठार्थं दक्षिणां कपिलां धेनुं रुद्रदेवताकां अमुकगोत्राय अमुकदेवशर्म्मणे ब्राह्मणाय ऋत्विजे तुभ्यमहं संप्रददे। अन्यार्थं-चेत् ददानीति ब्रूयात्। कपिलाभावे गोमात्रं वा। तदभावे काञ्चनम्। तदभावे रजतादिकं वा दद्यात्। काञ्चनादिकन्तु पूर्व्वादि दक्षिणा-भावेऽपि दद्यात् ॥ १ ॥ एवम्।

पुण्यस्त्वं पूर्व्वपुण्यानां मङ्गलानाञ्च मङ्गलम्।
विष्णुना विधृतो नित्यमतः प्रान्तिं प्रयच्छ मे ॥

इत्युच्चार्य्य पूर्व्वोक्तक्रमेण सोमग्रहयज्ञे शृङ्गं दद्यात् ॥ २ ॥

ॐ धर्म्मस्त्वं वृषरूपेण जगदानन्दकारकः।
अष्टमूर्त्तेरधिष्ठानमतः प्रान्तिं प्रयच्छ मे ॥

इत्युच्चार्य्य मङ्गलयज्ञे वृषं दद्यात् ॥ ३ ॥

ॐ हिरण्यगर्भगर्भस्त्वं हेमरूपं विभावसोः।
अनन्तपुण्यफलदमतः प्रान्तिं प्रयच्छ मे ॥

इत्युच्चार्य्य बुधयज्ञे काञ्चनं दद्यात् ॥ ४ ॥

ॐ पीतवस्त्रयुगं यस्माद्दासुदेवस्य वल्लभम्।
वरप्रदानात्तद्विष्णोरतः प्रान्तिं प्रयच्छ मे ॥

इत्युच्चार्य्य गुरुयज्ञे पीतवस्त्रयुगं दद्यात् तद-भावेऽन्यवर्णवासोयुगमपि दद्यात् ॥ ५ ॥

ॐ विष्णुस्त्वमधरूपेण यस्मादर्णवसम्भवः।
चन्द्रार्कवाहनस्त्वं वै अतः प्रान्तिं प्रयच्छ मे ॥

इत्युच्चार्य्य शुक्रयज्ञे अश्वं दद्यात् ॥ ६ ॥

ॐ यस्मात्त्वं पृथिवी सर्व्वा धेनुः कैशवसम्भवा।
सर्व्वपापहरा नित्यमतः प्रान्तिं प्रयच्छ मे ॥

इत्युच्चार्य्य शनैश्चरयज्ञे कृष्णां धेनुं अन्यवर्णां वा दद्यात् ॥ ७ ॥

ॐ यस्मादायुधकर्म्माणि त्वदधीनानि सर्व्वदा।
लाङ्गलाद्यायुधादीनि ततः प्रान्तिं प्रयच्छ मे ॥

इत्युच्चार्य्य राहुयज्ञे लौहं दद्यात् ॥ ८ ॥

ॐ यस्मात्त्वं सर्व्वभूतानां मङ्गलाय व्यव-स्थितः।
यानं विभावसोर्नित्यमतः प्रान्तिं प्रयच्छ मे ॥

इत्युच्चार्य्य केतुयज्ञे छागं दद्यात् ॥ ९ ॥ दक्षिणाजलं प्रान्तिकुम्भजलेन संमिश्र्य प्रान्तिं कुर्य्यात्। ततः कृताञ्जलिः।

ॐ गच्छध्वममराः सर्व्वे गृहीत्वार्घां क्षमा-लयम्।
सन्तुष्टा वरमस्माकं दत्त्वेदानीं सुपूजिताः ॥

इति विष्णुधर्म्मोत्तरीयं पठित्वा ग्रहान् विस-र्जयेत्। दक्षिणा च प्रदातव्या ग्रहाणाञ्च विस-र्जनमिति वशिष्ठवचनात्।" इति रघुनन्दन-भट्टाचार्य्यविरचितग्रहयागप्रयोगः समाप्तः ॥

याच, टु डु ञ्च याचने। इति कविकल्पद्रुमः ॥ (भ्वा०-उभ०-द्विक०-सेट्।) याचनमात्मने दानार्थं प्रेरणम्। टु, याचयुः। डु, याचि-चिषम्। ञ्च, अययाचत्। च, याचति याचते नृपं विप्रः। ग्रहणार्थं प्रेरणेऽपि याचति वित्तं गुरवे शिष्यः। इति दुर्गादासः ॥

याचकः, त्रि, (याचत इति। याच्+ण्वुल्।) याच्ञाकर्त्ता। तत्पर्य्यायः। वनीयकः २ याचनकः ३ मार्गणः ४ अर्थी ५। इत्यमरः।

३।१।२६॥ वनीपकः ६ भिक्षुकः ७ भिक्षाकरः ८। इति शब्दरत्नावली॥ तस्य लघुत्वं यथा,—

"तृणादपि लघुस्तूलस्तूलादपि च याचकः।
वायुना किं न नीतोऽसौ किमित्यार्थनयाद्भुया॥"

इति प्राचीनाः॥

अपि च।

"कुजस्य कीटघातस्य वातान्निष्काषितस्य च।
शिखरे वसतस्तस्य वरं जन्म न याचितम्॥
जगत्यतिर्हि याचित्वा विष्णुर्वामनतां गतः।
कोऽन्योऽधिकतरस्तस्य योऽर्थी याति न लाघवम्॥"

इति गारुडे नीतिसारे ११५ अध्यायः॥

याचन, [त्] त्रि, (याचतीति। याच्+ल्युट्।) याचकः। यथा,—

"सुखभङ्गः खरो दीनो गात्रस्वेदो मुहुर्मुहुः।
मरणे यानि चिह्नानि तानि चिह्नानि याचतः॥"

इति गारुडे नीतिसारे ११५ अध्यायः॥

याचनं, क्ली, (याच्+भावे ल्युट्।) याच्ञा। (यथा, जैमिनौ। ५।११२।

"भीमनार्थयाचनवाचे
ब्रूयमेव गुरवः करणीयाः॥")

याचनकः, त्रि, (याचन+स्वार्थे कन्।) याचकः। इत्यमरः। ३।१।४६॥ (यथा, मनौ। ३।१६५।

"आचारहीनः क्लीवश्च नित्यं याचनकस्तथा॥")

याचना, स्त्री, (याच्+स्वार्थे णिच्+युच्। टाप्।) याच्ञा। इत्यमरः। २। ७। ३२॥ (यथा, रामायणे। २। २७। २३।

"नयस्व मां वाधु कुरुष्व याचनाम्॥")

याचमानः, त्रि, (याचते इति। याच्+शानच्।) याचकः। यथा,—

"अदीनदीनभावस्य याचमानस्य मानिनः।
वचोजीवितयोराशीत् पुरोनिःसरणे रथः॥"

इति वररुचिः॥

अपि च।

"द्विजेभ्यो याचमानेभ्यो यजमानः प्रयच्छति।
स याति याचयान् लोकान् येभ्यो नावर्त्तते पुनः॥
अष्टिवर्षसहस्राणां सहस्राणि वसेद्दिवि।
योऽनुमन्तापि भवति निरये प्रतिषेधकः॥"

इति वह्निपुराणे वामनप्रादुर्भावो नामाध्यायः॥

याचितं, क्ली, (याच्+क्तः।) याचनवृत्तिः। तत्पर्य्यायः। स्तृतम् २। यथा,—

"दे याचितायाचितयोर्यथासंख्यं स्तृताऽमृते॥"

इत्यमरः। २। ७। ३२॥

"दे। याचनवृत्तिर्मरणमिव दुःखजनकत्वात् स्तृतम्। अयाचितं अमृतमिव अमृतम्। याचितायाचितयोर्भावे कर्म्मणि वा क्तः।" इति भरतः॥ प्रार्थितवस्तुनि, त्रि॥ (यथा, देवीभागवते। ३। २८। ६७।

"पिता ते याचितः पूर्वं मया वै स्वतनूभवे!॥")

याचितकं, क्ली, (याचितेन निर्वृत्तम्। याचित+"अपमित्ययाचिताभ्यां कक्कनौ।"५। ४। २१। इति कन्।) याच्ञाप्राप्तम्। इत्यमरः। २।६।४॥ "याच्ञया। प्रत्यर्पणीयत्वेन याच्ञया यत् प्राप्तमलङ्कारादिवस्तु तत् याचितकम्। कार्य्यानन्तरं वस्तुस्वामी यत् पुनर्यच्छति तदित्यर्थः। याचितेन प्राप्तमिति ढ्ये कादिति कः।" इति भरतः॥

याच्ञा, स्त्री, (याचनमिति। याच्+"यजयाच्यतविच्छिप्रच्छरक्षो नङ्।" ३। ३। ९०। इति नङ्।) याचनम्। तत्पर्य्यायः। अभिप्रार्त्तिः २ याचना ३ अर्थना ४ भिक्षा ५ अर्दना ६। इत्यमरः। २। ७। ३२॥ लालसा ७। इति जटाधरः॥ (यथा, भागवते। २। ७। १७।

"श्यायान् गुणैरवरजोऽप्यदितेः सुतानां
लोकान् विचक्रम इमान् यदथाधियज्ञः।
क्ष्मां वामनेन जगृहे त्रिपदच्छलेन
याच्ञामृते पथि चरन् प्रभुभिर्न चाल्यः॥")

सदृक्षिकपर्य्यायः। दुःमर्षे १ याभि २ मञ्चके ३ दृद्धि ४ ग्रन्थि ५ पूर्त्ति ६ मिमिर्घ्टि ७ मिमीहि ८ रिरिर्घ्टि ९ रिरीहि १० पीपरत् ११ यन्तारः १२ यन्धि १३ इयुध्यति १४ मदेमहि १५ मनामहे १६ मायते १७। इति सप्तदश याच्ञाकर्म्मणाः। इति वेदनिघण्टौ ३ अः॥

याज, पुं, अन्नम्। इति हेमचन्द्रः। ३। ५६॥ (ऋषिभेदः। यथा, महाभारते। १।१६८।७।

"याजोपयाजौ ब्रह्मर्षी ग्राम्यौ परमधिष्ठितौ।
संहिताध्ययने युक्तौ गोत्रतश्चापि काश्यपौ॥")

याजकः, पुं, (यजतीति। यज्+ण्वुल्।) याज्ञिकः। राज्ञो गजः। इति मेदिनी। के, १४२॥ मत्तहस्ती। इति जटाधरः॥ ऋत्विक्। यथा,

"अग्नीध्राद्या धनैर्व्वार्य्या ऋत्विजो याजकाश्च ते॥"

इत्यमरः। २। ७। १७॥

"यजमानेन धनैर्व्वार्य्याः धनानि दत्त्वा दक्षस्यादनाय ध्रियन्ते प्रार्थ्यन्ते ये अग्नीध्रप्रभृतयस्ते ऋत्विजो याजकाश्च कथ्यन्ते। अग्निं इध्मयन्ति दीपयन्ति अग्नीध्राः इन्धी ञि ध ङ द्युतौ धिः नाञ्जेति रः मनीषादित्वान्नलोपः। आदिना ब्रह्मोन्नेतृहोत्रध्वर्य्वाद्याः संगृह्यन्ते। वार्य्या इति ह्रस्वयोरिति घ्यण् ह्रस्वस्वेत्यादौ ह ण इति आद्युदात्तनिर्द्देशात् अन्यतोधातोर्न क्यप् ऋत्वो यजन्ति ऋत्विजः क्विप्। यजन्ति याचकाः यजकः।" इति भरतः॥ * ॥ बहुयाजकग्रामयाजकयोर्निन्दा यथा,—

"अब्राह्मणास्तु षट् प्रोक्ता ऋषिभिस्तत्त्वदर्शिभिः।
आद्यो राजभृतस्तेषां द्वितीयः क्रयविक्रयी॥
तृतीयो बहुयाज्यः स्याच्चतुर्थो ग्रामयाजकः।
पञ्चमस्तु भृतस्तेषां ग्रामस्य नगरस्य च॥
अनादित्याश्च यः पूर्व्वां सादित्यामेव पश्चिमाम्।
नोपासीत द्विजः सन्ध्यां स षष्ठोऽब्राह्मणः स्मृतः॥"

इत्याह्निकतत्त्वे सन्ध्योपासनम्॥

अपि च।

"शूद्रसन्नोद्विक्तयाजी ग्रामयाजीति कीर्त्तितः।
शूद्रपाकोपजीवी यः सूपकारः प्रकीर्त्तितः॥
सन्ध्यापूजाविहीनश्च प्रमत्तः पतितः स्मृतः।
एते महापातकिनः कुम्भीपाकं व्रजन्ति ते॥"

इति ब्रह्मवैवर्त्ते प्रकृतिखण्डे २७ अध्यायः॥

याजनं, क्ली, (याज्यते इति। यज्+णिच्+ल्युट्।) यागक्रियाकारणा। याग कराण इति भाषा। तत्तु ब्राह्मणस्य षट्कर्म्मान्तर्गतकर्म्मविशेषः। यथा,—

"अध्यापनमध्ययनं यजनं याजनन्तथा।
दानं प्रतिग्रहश्चैव ब्राह्मणानामकल्पयत्॥"

इति मानवे १ अध्यायः॥

याजिः, पुं, (यज्+"वसिवपियजिराजीति।" उणा० ४। १२४। इति इञ्।) यज्ञः। इति संक्षिप्तसारोणादिवृत्तिः॥ यागकर्त्ता। इत्युणादिकोषः॥

याजुषं, त्रि, (यजुष इदमिति। यजुष्+अण्।) यजुर्व्वेदसम्बन्धि। इति सिद्धान्तकौमुदी॥

याज्ञवल्क्यः, पुं, (वल्कयतीति। वल्क+अच्। यज्ञस्य वल्को वक्ता। तस्य गोत्रापत्यम्। यज्ञवल्क+"गर्गादिभ्यो यञ्।"४। २। १०५। इति यञ्।) धर्म्मशास्त्रप्रयोजकमुनिविशेषः। तत्पर्य्यायः। ब्रह्मराशिः २ योगेशः ३। इति हेमचन्द्रः॥ योगीश्वरः ४। इति मिताक्षरा॥ (महर्षिरयं याज्ञवल्क्यः सूर्य्यात् शुक्लयजुर्व्वेदं प्राप्तवान्। तत्पूर्वौ ब्रह्मपरम्परया प्राप्तं वेदं वेदव्यासो मन्दमतीन् मनुष्यान् विचिन्त्य तेषु कृपापरः चतुर्धा यस्य ऋग्यजुःसामाथर्व्वाख्यान् चतुरो वेदान् पैलवैशम्पायनजैमिनिसुमन्तुभ्यः क्रमादुपदिदेश ते च स्वशिष्येभ्यः। तत्र व्यासशिष्यो वैशम्पायनो याज्ञवल्क्यादिभ्यः स्वशिष्येभ्यो यजुर्व्वेदमध्यापयत्। तत्र दैवात् केनापि हेतुना क्रुद्धो गुरुः शिष्यं याज्ञवल्क्यं अधीतवेदपरित्यागार्थमादिदेश। याज्ञवल्क्योऽपि योगबलेन अधीतयजुर्विद्यां मूर्त्तिमतीं विधायोदवाम। वान्तानि यजूंषि गृह्णीतेति गुरूक्ता अन्ये शिष्यास्तित्तिरयो भूत्वा यजूंष्यभक्षयन्। तान्येव यजूंषि बुद्धिमाक्षिप्यात् ज्ञातानि जातानि। ततो वेदहीनोऽतिदुःखितो याज्ञवल्क्यः सूर्य्यमाराध्य शुक्लानि यजूंषि प्राप्तवान् तानि च आबालगौधेयकाण्वमाध्यन्दिनादीन् यच्चदशशिष्यानध्यापयामास। तथाहि भागवते द्वादशस्कन्धे ६ अध्याये।

"तेनासौ चतुरो वेदांश्चतुर्भिर्वदनैर्विभुः।
व्याहरन्तिकान् सोङ्कारांश्चातुर्होत्रविवक्षया॥
पुत्रानध्यापयत् तांस्तु ब्रह्मर्षीन् ब्रह्मकोविदान्।
ते तु धर्म्मोपदेष्टारः स्वपुत्रेभ्यः समादिशन्॥
ते परम्परया प्राप्तास्तच्छिष्यैर्धृतव्रतैः।

चतुर्युगेष्वथ अस्या द्वापरादौ महर्षिभिः ॥
क्षीणायुषः क्षीणसत्त्वान्दुर्मेधान् वीक्ष्य कालतः।
वेदान् ब्रह्मर्षयो अस्मन् हृदिस्थाच्युतचोदिताः॥
अस्मिन्नप्यन्तरे ब्रह्मन् भगवान् लोकभावनः।
ब्रह्मेशादिर्लोकपालैर्याचितो धर्म्मगुप्तये ॥
पराशरात् सत्यवत्यामंशांशकलया विभुः।
अवतीर्णो महाभाग वेदं चक्रे चतुर्विधम् ॥
ऋगथर्व्वयजुःसाम्नां राशीनुद्धृत्य वर्गशः।
चतसः संहिताश्चक्रे मन्त्रैर्मणिगणा इव ॥
तासां स चतुरः शिष्यानुपाहूय महामतिः।
एकैकां संहितां ब्रह्मन्नेकैकस्मै ददौ विभुः ॥
पैलाय संहितामाद्यां बह्वृचाख्यामुवाच ह।
वैशम्पायनसंज्ञाय निगदाख्यं यजुर्गणम् ॥
साम्नां जैमिनये प्राह तथा छन्दोगसंहिताम्।
अथर्व्वाङ्गिरसीं नाम स्वशिष्याय सुमन्तवे ॥"
"वैशम्पायनशिष्या वै चरकाध्वर्य्यवोऽभवन्।
यच्चेरुर्ब्रह्महत्यांहःक्षपणं स्वगुरोर्व्रतम् ॥
याज्ञवल्क्याश्च तच्छिष्य आहाहो भगवन् कियत्।
चरितेनाल्पसाराणां चरिष्येऽहं सुदुश्चरम् ॥
इत्युक्तो गुरुरप्याह कुपितो याह्यलं त्वया।
विप्रावमन्ता शिष्येण मदधीतं त्यजाशिषि ॥
देवरातसुतः सोऽपि छर्दित्वा यजुषां गणम्।
ततो गतोऽथ मुनयो दृष्ट्वोद्गान् यजुर्गणान् ॥
यजूंषि तित्तिरा भूत्वा तल्लोलुपतयाददुः।
तैत्तिरीया इति यजुःशाखा आसन् सुपेशलाः ॥
याज्ञवल्क्यस्ततो ब्रह्मंश्छन्दांस्यधि गवेषयन्।
गुरोरविद्यमानानि स्मृतस्तेऽर्कमीश्वरम् ॥"
"एवं स्तुतः स भगवान् वाजिरूपधरो रविः।
यजूंष्ययातयामानि मुनयेऽदात् प्रसादितः ॥
यजुर्भिरकरोच्छाखा दश पञ्च शतैर्विभुः।
जगृहुर्वाजसन्यस्ता काण्वमाध्यन्दिनादयः ॥"
अयमेव महर्षिर्मिथिलास्थ एव सामश्रवःप्रभृतिभिः ऋषिभिर्वर्णाश्रमेतरधर्म्मज्ञानार्थमादिष्ट आचारव्यवहारप्रायश्चित्ताख्यकाण्डत्रयात्मकं धर्म्मशास्त्रं प्रणीय तेभ्यः आवितवान्। यदुक्तं याज्ञवल्क्यसंहितायां ग्रन्थारम्भे।
"योगीश्वरं याज्ञवल्क्यं संपूज्य मुनयोऽब्रुवन्।
वर्णाश्रमेतराणां नो ब्रूहि धर्म्मानशेषतः।
मिथिलास्थः स योगीन्द्रः श्रुतं ध्यात्वाब्रवीन्मुनीन् ॥")

क्ली. उपनिषत्विशेषः। यथा, मुक्तिकोपनिषदि।
"गोपालतापनं कृष्णं याज्ञवल्क्यं वराहकम्॥")

याज्ञसेनी, स्त्री, यज्ञसेनस्यापत्यम् ॥ (यज्ञसेन+अण्। ङीप्।) सा च द्रौपदी। इति हेमचन्द्रः। ३। ३७५ ॥ (यथा, महाभारते। ४। ४। ५६।
"याज्ञसेनीं पुरस्कृत्य षड्वेवाथ प्रवव्रजुः॥"
अस्या विवरणं द्रौपदीशब्दे द्रष्टव्यम् ॥)

याज्ञिकः, पुं, (यज्ञमर्हति यज्ञाय हितो वा। यज्ञ+ठक्।) दर्भभेदः ॥ (यज्ञं यज्ञविद्यामधीते वेद वा। यज्ञ+ठक्।) याजकः। यज्ञकर्म्मा।

इति शब्दरत्नावली ॥ (यथा, भागवते। ११। १०। २३।
"इष्ट्वेह देवता यज्ञैः स्वर्लोकं याति याज्ञिकः॥")
रक्तखदिरः। पलाशः। अश्वत्थः। इति राजनिर्घण्टः ॥

याज्ञिकं, क्ली, (याज्ञिकानां धर्म्म आम्नायो वा। याज्ञिक+"छन्दोगौक्थिकयाज्ञिकबह्वृचश्च गणात्।" ४। ३। १२८। इति ञ्यः।) यज्ञः। इति सिद्धान्तकौमुदी ॥

याज्यं, क्ली, (इज्यत इति। यज्+ण्यत्। "यजयाचरुचप्रवचर्चश्च।" ७। ३। ६६। इति कुत्वनिषेधः।) यागलब्धधनादि। इति सिद्धान्तकौमुदी ॥ यजनीये, त्रि ॥ (यथा, मनौ। ८। ३९७।
"अन्नादेर्भ्रूणहा मार्ष्टि पत्नीं भार्य्यापचारिणीं।
गुरौ शिष्यश्च याज्यश्च स्तेनो राजनि किल्बिषात्॥")

शिष्यः। ग्राससाधनः। यथा, देवीभागवते। १। १८। ६।
"याज्योऽस्ति जनकस्तत्र जीवन्मुक्तो नराधिपः।
विदेहो लोकविदितः पाति राज्यमकण्टकम्॥")

याज्या, स्त्री, (यजन्त्यनया। यज्+ण्यत्+टाप्।) ऋक्। इति मुग्धबोधव्याकरणम् ॥ (गङ्गा। यथा, काशीखण्डे सहस्रनामकीर्त्तने। २६। ४२।
"योगसिद्धिप्रदा याज्या यज्ञेशपरिपूजिता॥")

यात्, य, आख्यातप्रत्ययविशेषः। स च विधिलिङाशीर्लिङः परस्मैपदप्रथमपुरुषैकवचनम्। स तु विध्याद्यर्थक आशीर्व्वादार्थकश्च। इति व्याकरणम्॥ मुग्धबोधमते विध्यादर्थे अस्य खीसंज्ञा। आशीरर्थे ढीसंज्ञा ॥

यातं, क्ली, (या+क्तः।) निघादिनां पादकर्म्म। इति हेमचन्द्रः। ४। १६७ ॥ पुस्तकान्तरे यतमिति पाठः। यथा,—
"अपष्टस्वङ्गुष्ठाग्रं घातमङ्गुष्ठवारणम्।
निघादिनां पादकर्म्म या(यं)तं वीतन्तु तद्वयम्॥")

यातः त्रि, गतः। याधातोः क्तप्रत्ययेन निष्पन्नः ॥ (यथा, मनुः। ४। १७८।
"येनास्य पितरो याता येन याताः पितामहाः।
तेन यायात् सतां मार्गं तेन गच्छन् न रिष्यते॥")

यातना, स्त्री, (यत्+णिच्+"व्यासश्रन्थो युच्।" ३।३।१०७। इति युच्। टाप्।) गाढ़वेदना। तत्पर्य्यायः। कारणा २ तीव्रवेदना ३। इत्यमरः। २। ८। ३॥ अतिव्यथा ४। इति शब्दरत्नावली ॥ (यथा, भागवते। ७। १। ४१।
"हिरण्यकशिपुः पुत्रं प्रह्लादं केशवप्रियम्।
जिघांसुरकरोन्नानायातना मृत्युहेतवे॥")
नरकरुजा। इति केचिदिति भरतः ॥

यातयामं, त्रि, (यातो गतो यामः उपभोगकालो वीर्य्यं वा यस्य।) जीर्णम्। (यथा, भट्टिकाव्ये। ५। ३६।
"तं भीतद्वारमाक्रुश्य रावणः प्रत्यभाषत।
यातयामं विजितवान् स रामं यदि किन्नतः॥")

परिशुक्तम्। इत्यमरः। ३।३।१४५ ॥ उज्झितम्। इति मेदिनी। मे, ६२ ॥ (प्राप्तप्रौढ्यावस्थम्। यथा, गीतायाम्। १७। १०।
"यातयामं गतरसं पूतिपर्य्युषितञ्च यत्।
उच्छिष्टमपि चामेध्यं भोजनं तामसप्रियम्॥"
गतरसः। यथा, ताण्ड्यमहाब्राह्मणे। ४।३।१३।
"ब्रह्मवादिनो वदन्ति यातयामाः संवत्सरा अयातयामा इति ते नायातयामेति वक्तव्यम्।"
"यातयामः गतरसः।" इति सायणः ॥)

याता, [ऋ] स्त्री, (यतते ऽन्योन्यभेदायेति। यत्+"ऋन्।" उणा० २। ६८। इति ऋन्।) प्रतिभाल्पत्नी। इत्यमरः। १। ६। ३०॥ या इति भाषा। (यथा साहित्यदर्पणे। ३। ७८।
"स्वामी निश्वसितेऽप्यस्यति मनो जिघ्रः सपत्नीजनः
अश्रूण्युञ्छति दैवतं नयनयोरीहालिहो यातरः॥"
या+ऋत्। गमनकर्त्तरि, त्रि ॥ (यथा, हरिवंशसंहितायाम्। ३३। १३। [यातुः॥"
"उल्का शुभदा पुरतो दिवाकरविनिःसृता सारथ्यादिः। यथा, मनौ। ८। २६०।
"यानस्य चैव यातुश्च यानस्वामिन एव च।
दशातिवर्त्तनान्याहुः शेषे दण्डो विधीयते॥"
"यातुः सारथ्यादेः।" इति कुल्लूकः॥ हन्ता। यथा, ऋग्वेदे। १।३२।१४।
"अहेर्यातारं कमपश्य इन्द्र।"
"यातारं हन्तारम्।" इति तद्भाष्ये सायणः॥)

यातायातं, क्ली, गमनागमनम्। यथा,—
"पृष्ठे भाण्डमन्दमन्दुरगिरिग्रावाश्वकङ्कूयनान्
निद्रालोः कमठाकृतेर्भगवतः श्वासानिलाः
पान्तु वः।
यत्संस्कारकलानुवर्त्तनवशाद्ब्रह्मेशमुख्यास्त्रयो
यातायातमतन्द्रितं जगदिदं नाद्यापि विश्राम्यति॥"

इति श्रीभागवते १२ स्कन्धे १३ अध्यायः॥

यातिकः, पुं, (यातं गमनं प्राप्तस्त्येनास्त्यस्येति। यात+ठन्।) पान्थः। इति शब्दरत्नावली ॥

यातु, क्ली, (सर्व्वेषामन्तं यातीति। या+"कमिमनिजनीति।" उणा० १। ७३। इति तुः।) राक्षसः। इत्यमरः। १। १। ६३ ॥ (यथा,—
"यातु यातुपतीराणां प्रणम्य चरणानसौ॥"
इत्यमरटीकायां रघुनाथचक्रवर्त्ती॥
(पुंलिङ्गेऽपि दृश्यते। यथा, ऋग्वेदे। ७।२१।५।
"न यातव इन्द्र जूजुवुर्नो न।"
"यातवो राक्षसाः।" इति तद्भाष्ये सायणः॥)

यातुः, पुं, (सर्व्वान्तं याति गच्छतीति। या+"कमिमनिजनिगाभायाहिभ्यश्च।" उणा० १। ७३। इति तुः।) कालः। अध्वगः। इति सिद्धान्तकौमुद्यामुणादिवृत्तिः॥ वायुः। इति संक्षिप्तसारोणादिवृत्तिः॥ (स्त्री, यातना। यथा, ऋग्वेदे। ८। ४६। २०।
"मा नो रक्ष आवेशीदाघृणीवसो मायातुर्यातु मावताम्॥"

"यातुर्यातना पीड़ा।" इति सायणः॥ कर्म्मनाशकरी हिंसा। यथा, तत्रैव।५।१२।२।
"नाहं यातुं सहसा न द्वयेन ऋतं ग्रपाम्यरुषस्य वृष्णः।"
"यातुं कर्म्मणां नाशकरीं हिंसाम्।" इति तट्टीकायां सायणः॥)

यातु, त्रि, (यातीति। या+"कमिमनीति।" उणा० १।७३। इति तुः।) गन्ता। इत्यणादिकोषः॥ क्रियापदं चेत् गच्छतु॥

यातुघ्नः, पुं, (यातु हन्तीति। हन्+"अमनुष्यकर्त्तृके च।"३।२।५३। इति टक्।) गुग्गुलुः। इति राजनिर्घण्टः॥

यातुधानः, पुं, (यातूनि रक्षांसि दधाति पुष्णातीति। धा+बहुलमन्यत्रापीति युच्। स्वजातिपोषकत्वात्तथात्वम्।) राक्षसः। इत्यमरः। १।१।६३॥ (यथा, भट्टिकाव्ये। २। २६।
"दक्षिणयदिशं कृतमार्त्विजीनै-
रुदयातुधानैश्चिचिते प्रसर्पत्॥")

यात्रकः, पुं, (यातेवेति। यात्र+स्वार्थे कन्।) पान्थः। इति शब्दरत्नावली॥

यात्यं, त्रि, यतितव्यम्। यतनीयम्। यतधातोः कर्म्मणि ध्यण्प्रत्ययेन निष्पन्नम्॥

यात्रा, स्त्री, (या+"हुयामाश्रुभसिभ्यस्त्रन्।" उणा० ४। १६७। इति त्रन्। टाप्।) विजिगीषोः प्रयाणम्। तत्पर्य्यायः। व्रज्या २ अभिनिर्याणम् ३ प्रस्थानम् ४ गमनम् ५ गमः ६। इत्यमरः।२।८।६५॥ प्रस्थितिः७ यानम् ८ प्रायणम् ९। इति शब्दरत्नावली॥ यापनम्॥ (यथा, भागवते। १०।८६।१५।
"यात्रामात्रं त्वहरहर्दैवादुपनमत्युत॥")
उत्सवः। इति मेदिनी। रे, ७८॥ (यथा, कथासरित्सागरे। १०। ८७।
"यात्रासुपवने द्रष्टुं जगाम सखिभिः सह॥"
व्यवहारः। यथा, गीतायाम्। ३। ८।
"शरीरयात्रापि च ते न प्रसिद्ध्येदकर्म्मणः॥"
"शरीरयात्रा देहव्यवहारः।"इति तट्टीकायां नीलकण्ठः॥) उपायः। इति विश्वः॥*॥ अथ यात्रादिनम्। भाद्रपौषचैत्रेतरमासेषु दूरयात्रा कर्त्तव्या। पूर्व्वस्यां दिशि रविशुक्रवारस्य प्राशस्त्यम्। दक्षिणस्यां मङ्गलवारस्य प्राशस्त्यम्। पश्चिमायां सोमशनिवारस्य प्राशस्त्यम्। उत्तरस्यां बृहस्पतिवारस्य प्राशस्त्यम्। पूर्व्वस्यां दिशि सोमशनिवारे न गन्तव्यम्। दक्षिणस्यां बृहस्पतिवारे केषाञ्चिन्मते बुधवारे च न गन्तव्यम्। पश्चिमायां रविशुक्रवारे। एवं उत्तरस्यां बुधमङ्गलवारे न गन्तव्यम्। द्वितीया तृतीया सप्तमी पञ्चमी दशमी एकादशी त्रयोदशी च एता यात्रायां प्रशस्ताः। अत्रोत्तमनक्षत्राणि। अश्विनी अनुराधा रेवती मृगशिरा मूला पुनर्व्वसु पुष्या हस्ता श्रविष्ठा। मध्यमनक्षत्राणि। रोहिणी पूर्व्वात्रयं चित्रा स्वाती शतभिषा श्रवणा धनिष्ठा। अधमनक्षत्राणि। उत्तरात्रयं विशाखा मघा आर्द्रा भरणी कृत्तिका अश्लेषा। तच्च नक्षत्रशूलकथनम्। स्वात्यां ज्येष्ठायाञ्च पूर्व्वदिग्गमनं निषिद्धम्। एवं पूर्व्वभाद्रपदे अश्विन्याञ्च दक्षिणदिग्गमनं पुष्ये रोहिण्याञ्च पश्चिमदिग्गमनं उत्तरफल्गुन्यां हस्तायाञ्च उत्तरदिग्गमनं निषिद्धम्। तत्रानुक्तकरणानि। गरं वणिजं विष्टिः। गरमपि केचिच्छस्तं मन्यते। अत्र उत्तमलग्नानि। सिंहवृषकुम्भकन्यामिथुनानि। तत्र योगिनीनिर्णयः। प्रतिपदि नवम्याञ्च प्राच्यां योगिनी। तृतीयायां एकादश्याञ्चाग्निकोणे। पञ्चम्यां त्रयोदश्याञ्च दक्षिणे। द्वादश्यां चतुर्थ्याञ्च नैर्ऋतकोणे। षष्ठ्यां चतुर्दश्याञ्च पश्चिमे। सप्तम्यां पूर्णिमायाञ्च वायुकोणे। द्वितीयायां दशम्याञ्च उत्तरदिशि। अष्टम्याममावास्यायाञ्च ईशानकोणे। तां दक्षिणे सम्मुखे च कृत्वा न गन्तव्यम्। पापयोगग्रहसंक्रमासदग्धादिषु यात्रा न कर्त्तव्या। वारवेलाकालवेलाकुलिकवेलावृद्धिभद्रादिषु च यात्रा न कर्त्तव्या। दिग्गमनदिनं नववधूगृहे द्रष्टव्यम्॥*॥ अथ गोयात्राप्रवेशविक्रयाः। तत्र तिथयः। अमावस्याष्टमीचतुर्दशीविष्टिभिन्नाः। तत्र नक्षत्राणि। रोहिणी पूर्व्वफल्गुनी पूर्व्वाषाढ़ा पूर्व्वभाद्रपत् उत्तरफल्गुनी उत्तराषाढ़ा उत्तरभाद्रपत् अवणा भरणी चित्रा एतद्व्यतिरिक्तानि। योगाः। व्यतीपातभिन्नाः। वाराः। क्रूरभिन्नाः॥*॥ अथ नौकायात्रा। तत्र विहितनक्षत्राणि। अश्विनीहस्तापुष्यत्रयाग्नेयः पूर्व्वफल्गुनी-पूर्व्वाषाढ़ा-पूर्व्वभाद्रपदानुराधाधनिष्ठाश्रवणाः। वाराः शुभग्रहाणाम्। तत्र लग्नं शोभनम्। तत्र शोभनश्चन्द्रः। तारा च शोभना विहिता। इति ज्योतिस्तत्त्वम्॥*॥
अथ यात्रायां शुभजनकदर्शनादि यथा,—
"धेनुर्व्वत्सप्रयुक्ता वृषगजतुरगा दक्षिणावर्त्तवह्निर्दध्यक्षीपूर्णकुम्भा द्विजनृपगणिका पुष्पमाला पताका।
सद्योमांसं घृतं वा दधि मधु रजतं काञ्चनं शुक्लधान्यं
दृष्ट्वा श्रुत्वा पठित्वा फलमिह लभते मानवो भन्तुकामः॥"
इति समयप्रदीपः॥
तत्राशुभजनकदर्शनं यथा,—
"सम्मुखे रजकं पश्चात् क्षुरिणं यदि पश्यति।
न गन्तव्यं तदा तस्मात् तैलवाप्यगोऽशुभः॥
अजो लुण्ठति गौः कासी क्षुतं वा कुरुते नरः।
पश्यन् यात्रा न कर्त्तव्या क्लीवं पश्यति वामतः॥"
इति ज्योतिराकरः॥
यात्राकाले विप्रेक्षदर्शनफलं यथा,—
"मृगाहिकपिमार्জ্জারश्वानः शूकरपक्षिणः।
नकुलो मूषिकश्चैव यात्रायां दक्षिणे शुभाः॥
विप्रकन्या भ्रुवो रुद्रशङ्खभेरीवसुन्धराः।
जम्बुकोष्ट्रखराद्याश्च यात्रायां वामके शुभाः॥
वेणुस्त्रीपूर्णकुम्भानां यात्रायां दर्शनं शुभम्॥"
यात्राकाले अशुभलक्षणं यथा,—
"कार्पासौषधतैलञ्च पङ्काङ्गारभुजङ्गमाः।
सुक्तकेशो रक्तमाल्यं नग्नाद्यशुभलक्षणम्॥"*॥
यात्राकाले छिक्कायाः फलं यथा,—
"छिक्कायां लक्षणं वक्ष्ये लभेत् पूर्व्वे महाफलम्।
आग्नेये शोकसन्तापौ दक्षिणे हानिमाप्नुयात्॥
नैर्ऋते शोकसन्तापौ मिष्टान्नञ्चैव पश्चिमे।
अन्नं प्राप्नोति वायव्ये उत्तरे कलहो भवेत्।
ईशाने मरणं प्रोक्तं प्रोक्तं छिक्काफलाफलम्॥"
अथ यात्रायां दिक्शिवेषे विप्रेक्षनक्षत्राणि।
"कृत्तिकादौ तु पूर्व्वेण सप्त ऋक्षाणि वै व्रजेत्।
मघादौ दक्षिणे गच्छेदनुराधादि पश्चिमे॥
प्रशस्ता चोत्तरे यात्रा धनिष्ठादिषु सप्तसु।
अश्विनीरेवतीचित्राधनिष्ठाः सदलङ्कृताः।
मृगाश्विचित्रापुष्याश्च मूलहस्तौ शुभौ सदा॥"
यात्रादौ लग्नादिषु ग्रहस्थितिफलं यथा,—
"कन्याप्रदाने यात्रायां प्रतिष्ठादिषु कर्म्मसु।
शुक्रचन्द्रौ च जन्मस्थौ शुभदौ च द्वितीयगौ॥
शुक्रेज्यशुक्रजीवाश्च राशौ चाथ तृतीयके।
भौममन्दशशाङ्कार्का बुधः श्रेष्ठश्चतुर्थके॥
शुक्रजीवौ पञ्चमौ च श्रेष्ठौ सङ्क्षिदाद्भुतौ।
मन्दार्केन्दुकुजाः षष्ठे गुरुचन्द्रौ च सप्तमे॥
शुक्रज्ञावष्टमे श्रेष्ठौ नवमस्थौ गुरुः शुभः।
अर्काकिचन्द्रा दशमे एकादशेऽखिला ग्रहाः॥
बुधोऽथ द्वादशे चैव भार्गवः सुखदो भवेत्॥"
इति गारुड़े ६०। ६१ अध्यायौ॥*॥
अथ राजयात्रा।
"इदानीं सर्व्वधर्म्मज्ञ धर्म्मशास्त्रविशारद!।
यात्राकालविधानं मे कथयस्व महीक्षिताम्॥
यदा मन्येत नृपतिराक्रन्देन बलीयसा।
पार्ष्णिग्राहाभिभूतोऽरिस्तदा यात्रां प्रयोजयेत्॥
योधान्मत्वा प्रभूतांश्च प्रभूतञ्च बलं मम।
मूलरक्षासमर्थोऽस्मि तदा यात्रां प्रयोजयेत्॥
अशुद्धपार्ष्णिर्नृपतिर्न तु यात्रां प्रयोजयेत्।
पार्ष्णिग्राहाधिकं सैन्यं मूले निःक्षिप्य वा व्रजेत्॥
चैत्रं वा मार्गशीर्षं वा यात्रां यायान्नराधिपः।
चैत्री नश्यति नैदाघं हन्ति पुष्टिश्च शारदी॥
एतदेव विपर्य्यस्तं मार्गशीर्षं नराधिपः।
अग्रीष्मे व्यसने यायात् कालः स तु सुदुर्लभः॥
दिग्यान्तरीक्षक्षितिजैरुत्पातैः पीड़ितं परम्।
सद्यश्चपीड़ासंतप्तं पीड़ितञ्च तथा ग्रहैः॥
ज्वलन्तीव तथैवोल्का दिग्यं यस्य प्रपद्यते।
भूकम्पोल्का दिग्यं यान्ति याश्च केतुः प्रसूयते॥
निर्घातश्च पतेद्यत्र तं यायादसुधाधिपः।
सबलव्यसनोपेतं तथा दुर्भिक्षपीड़ितम्॥
सम्भृतान्तरकोपञ्च क्षिप्रं यायादरिं नृपः।
यूकमाक्षीकबहुलं बहुपङ्कं तथाविलम्॥
नास्तिकं भिन्नमर्य्यादं तथामङ्गलवादिनम्।
अपेतप्रकृतिञ्चैव निरापच्च तथा जयेत्॥
विद्विष्टनायकां सेनां तथा भिन्नां परस्परम्।
व्यसनासक्तनृपतिं बलं राजाभियोजयेत्॥

सैनिकानामशुस्त्राणि स्फूरन्त्यङ्गानि यत्र च ।
दुःस्वप्नान्यपि पश्यन्ति बलन्तदभियोजयेत् ॥
उत्साहबलसम्पन्नश्चातुरङ्गबलस्तथा ।
तुष्टपुष्टबलो राजा परानभिमुखो व्रजेत् ॥
शरीरस्फुरणे धन्ये तथा दुःस्वप्ननाशने ।
निमित्ते सङ्कुले धन्ये जाते शत्रुपुरं व्रजेत् ॥
ऋक्षेषु षट्सु शुद्धेषु ग्रहेष्वनुगुणेषु च ।
प्रश्नकाले शुभे जाते परान् यायान्नराधिपः ॥
एवन्तु दैवसम्पन्नस्तथा पौरुषसंयुतः ।
देशकालोपपन्नान्तु यात्रां यायान्नराधिपः ॥
उलूकस्य निशि ध्वाङ्क्षः स च तस्य दिवा वपुः ।
एवं देशश्च कालश्च ज्ञात्वा यात्रां प्रयोजयेत् ॥
पदातिनामबहुलां सेनां प्रावृषि योजयेत् ।
हेमन्ते शिशिरे चैव रथवाजिसमाकुलाम् ॥
खरोष्ट्रबहुलां सेनां तथा ग्रीष्मे नराधिपः ।
चतुरङ्गबलोपेतां वसन्ते वा शरत्यथ ॥
सेना पदातिबहुला यस्य स्यात् पृथिवीपतेः ।
अभियोज्यो भवेत्तेन शत्रुर्विषयमाश्रितः ॥
गन्तव्ये वृक्षवृते देशे स्थितं शत्रुं तथैव च ।
किञ्चित्पङ्के तथा यायाद्बहुनागो नराधिपः ॥
रथाश्वबहुलो यायात् शत्रुं समपथाश्रितम् ।
तदाश्रयन्तो बहुलास्तथा राजाभिपूजयेत् ॥
खरोष्ट्रबहुलो राजा शत्रुं बन्धनसंस्थितम् ।
बन्धनस्थोऽपि योद्ध्योऽरिस्तदा प्रावृषि भूभुजा ॥
हिमपातयुते देशे स्थितं ग्रीष्मेऽभियोजयेत् ।
शरदन्तौ वसन्तश्च कालौ साधारणौ स्मृतौ ॥

विज्ञाय राजा द्विजदेशकालौ
देवं त्रिकालञ्च तथैव बुद्ध्वा ।
प्रायात् परं कालविदां मतेन
सञ्चिन्त्य सार्द्धं द्विजमन्त्रविद्भिः ॥"

इति मात्स्ये २१४ अध्यायः ॥ * ॥

यात्राकाले माङ्गल्यद्रव्याणि यथा,—
"पौर्वाह्णिकं स्नातकान्तं तानुक्त्वा च शुभक्षणे ।
तैरेव सार्द्धं बलवान् बभूव गमनोन्मुखः ॥
ददर्श मङ्गलं रामः शुश्राव जयसूचकम् ।
बुबुधे मनसा सर्व्वं विजयं वैरिसंक्षयम् ॥
यात्राकाले च पुरतः शुश्राव सहसा मुनिः ।
हरिशब्दं शङ्खरवं घण्टादुन्दुभिवादनम् ॥
आकाशवाणीं सङ्गीतां जयस्ते भवितेति च ।
नरोक्तं तच्च कल्याणं मेघशब्दं जयावहम् ॥
चकार यात्रां भगवान् श्रुत्वेत्येवंविधं शुभम् ।
ददर्श पुरतो विप्रवन्दिदेवज्ञभिक्षुकान् ॥
ज्वलत्प्रदीपं बिभ्रन्तीं पतिपुत्रवतीं सतीम् ।
पुरो ददर्श सैरास्यां नानाभूषणभूषिताम् ॥
घृतं घृतां पूर्णकुम्भं चासञ्च नकुलन्तथा ।
गच्छन् ददर्श रामेशो यात्रामङ्गलसूचकम् ॥
क्षणासारं गजं सिंहं तुरगं गण्डकं द्विपम् ।
चमरीं राजहंसञ्च चक्रवाकं शुकं पिकम् ॥
मयूरं खञ्जनञ्चैव शङ्खचिल्लञ्चकोरकम् ।
पारावतं बलाकाञ्च कारण्डं चातकं चटम् ॥
सौदामिनीं शक्रचापं सूर्य्यं सूर्य्यसभां शुभाम् ।
सद्योमांसं सजीवञ्च मत्स्यं शङ्खं सुवर्णकम् ॥
माणिक्यं रजतं मुक्तां मणीन्द्रञ्च प्रवालकम् ।
दधि लाजं शुक्लधान्यं शुक्लपुष्पञ्च कुङ्कुमम् ॥
शुक्लच्छत्रं पताकाञ्च दर्पणं श्वेतचामरम् ।
धेनुं वत्सप्रयुक्ताञ्च रथस्थं भूमिपं तथा ॥
दुग्धञ्च रोचनामाज्यमक्षतं पायसं तथा ।
शालग्रामं पक्वफलं खस्तिकं शर्करां मधु ॥
मार्জ্জারञ्च वृषेन्द्रञ्च मेघपर्व्वतमूषिकम् ।
मेघाच्छन्नस्य च रवेरुदयं चन्द्रमण्डलम् ॥
कस्तूरीं कज्जलं तोयं हरिद्रां तीर्थमृत्तिकाम् ।
सिद्धार्थं सर्षपं दूर्व्वां विप्रवालञ्च बालिकाम् ॥
नगं वेश्याञ्च भ्रमरं कर्पूरं पीतवाससम् ।
गोमूत्रं गोपुरीषञ्च गोधूलिं गोपदाङ्कितम् ॥
गोष्ठं गवां वर्त्म रम्यं गोशालं गोरतिं शुभाम् ।
भूषणं देवप्रतिमां ज्वलदग्निं महोत्सवम् ॥
ताम्रं स्फटिकं रेत्यञ्च सिन्दूरं माल्यचन्दनम् ।
गन्धञ्च हीरकं रत्नं ददर्श दक्षिणे शुभम् ॥
सुगन्धि वायोराघ्राणं प्राप विप्राग्निसं शुभम् ।
इत्येवं मङ्गलं ज्ञात्वा प्रययौ स मुदान्वितः ॥"

इति ब्रह्मवैवर्त्ते गणपतिखण्डे ३३ अध्यायः ॥*॥

यात्राकाले अमङ्गलसूचकानि यथा,—
"राजा जगाम समरं हृदयेन विदूयता ।
सार्द्धं सैन्यसमूहैश्च वाद्यभाण्डैरसंख्यकैः ॥
ददर्शामङ्गलं राजा पुरो वर्त्मनि वर्त्मनि ।
ययौ तथापि समरं न जगाम गृहं पुनः ॥
मुक्तकेशीं छिन्ननासां रुदन्तीञ्च दिगम्बरीम् ।
क्षणावस्थपरीधानामपरां विधवामपि ॥
मुखदुष्टां योनिदुष्टां व्याधियुक्ताञ्च कुट्टनीम् ।
पतिपुत्रविहीनाञ्च डाकिनीं पुंश्चलीमहो ॥
कुम्भकारं तैलकारं व्याधं सर्पोपजीविनम् ।
कुचेलमपि रूक्षाङ्गं नग्नं काषायवासिनम् ॥
वत्सविक्रयिणञ्चैव कन्याविक्रयिणं तथा ।
चितां दग्धपूर्वं भस्म निर्व्वाणाङ्गारमेव च ॥
सर्पच्छत्तरं सर्पं गोधाञ्च मृगकं विषम् ।
श्राद्धपाकञ्च पिण्डञ्च मोदकञ्च तिलांस्तथा ॥
देवलं वृषवाहञ्च शूद्रश्राद्धान्नभोजिनम् ।
शूद्रान्नपाचकं शूद्रयाजकं ग्रामयाजकम् ॥
कुम्भपुत्तलिकाञ्चैव शवदाहनकारिणम् ।
शून्यकुम्भं चूर्णकुम्भं तैलं लवणमस्थि च ॥
कार्पासं कच्छपं चूर्णं कुक्कुरं शब्दकारिणम् ।
दक्षिणे च शृगालाञ्च कुर्व्वन्तं भैरवं रवम् ॥
कपर्दकञ्च चौरञ्च छिन्नकेशं नखं मलम् ।
कलहञ्च विलापञ्च विलापकारिणं जनम् ॥
अमङ्गलं वदन्तञ्च रुदन्तं शोककारिणम् ।
मिथ्यासाक्ष्यप्रदातारं चौरञ्च नरघातिनम् ॥
पुंश्चलीपतिपुत्रौ च पुंश्चल्योदनभोजिनम् ।
देवतागुरुविप्राणां वस्तुवित्तापहारिणम् ॥
दत्तापहारिणं दस्युं हिंसकं सूचकं खलम् ।
पित्तमालविरक्तञ्च द्विजाश्वत्थविघातिनम् ॥
सत्यघ्नञ्च कृतघ्नञ्च स्थाप्यापहारिणं जनम् ।
मित्रद्रुहं मित्रघ्नञ्च व्रतं विश्वासघातिनम् ॥
गुरुदेवद्विजानाञ्च निन्दकं स्वाङ्गघातकम् ।
जीवानां घातकञ्चैव स्वाङ्गहीनञ्च निर्दयम् ॥
व्रतोपवासहीनञ्च दीक्षाहीनं नपुंसकम् ।
गलितव्याधिगात्रञ्च गुरुलङ्घनमेव च ॥
पुङ्खं छिन्नसिङ्गञ्च सुरामत्तं सुरां तथा ।
क्षिप्तं वमन्तं रुधिरं महिषं गर्द्दभं तथा ॥
मूत्रं पुरीषं श्मशानं कन्यिनं नृकपालिनम् ।
भक्षयावातं रक्तदृष्टिं वाद्यञ्च नृपघातकम् ॥
वृद्धञ्च शूकरं गृध्रं श्येनं कङ्कञ्च भल्लुकम् ।
पाशञ्च शुष्ककाष्ठञ्च वायसं गन्धकं तथा ॥
अग्रदानिब्राह्मणञ्च तन्त्रमन्त्रोपजीविनम् ।
वैद्यञ्च रक्तपुष्पञ्चैवौषधन्नृपमेव च ॥
कुवार्त्तां मृतवार्त्ताञ्च विप्रग्लानिञ्च दारुणम् ।
दुर्गन्धवातं दुःशब्दं राजा संप्राप वर्त्मनि ॥
मनश्च कुत्सितं प्राणाः क्षुभिताश्च निरन्तरम् ।
वामाङ्गस्पन्दनं देहजाड्यं राज्ञो बभूव ह ॥"

इति ब्रह्मवैवर्त्ते गणपतिखण्डे ३५ अध्यायः ॥

श्रीकृष्णस्य मथुरायात्रा यथा,—
"राधिकायाञ्च सुप्तायां सुप्तासु गोपिकासु च ।
पुष्पचन्दनतल्पे च वायुना सुरभीकृते ॥
तृतीयप्रहरेऽतीते निशायाञ्च शुभक्षणे ।
शुभचन्द्रार्य्ययोगे चाप्ततयोगसमन्विते ॥
सौम्यस्वामियुते लग्ने सौम्यग्रहविलोकने ।
पापग्रहसमासक्तदृष्टिदोषादिवर्জ্জिते ॥
यशोदां बोधयामास कारयामास मङ्गलम् ।
बन्धूनाश्वासयामास समुत्थाय हरिः स्वयम् ॥
वाद्यं निषेधयामास राधिकाभयभीतवत् ।
स्वतन्त्रो विश्वकर्त्ता च माता भर्त्ता स्वतन्त्रवत् ॥
प्रक्षाल्य पादयुगलं धृत्वा धौते च वाससी ।
उवास संस्कृते स्थाने विलिप्ते चन्दनादिना ॥
फलपल्लवसंयुक्तं संस्कृतं चन्दनादिभिः ।
वामे कृत्वा पूर्णकुम्भं वह्निं विप्रं सदक्षिणे ।
पतिपुत्रवतीं दीपं दर्पणं पुरतस्तथा ॥
दूर्व्वाकाण्डञ्च सुस्निग्धं पुष्पं धान्यं सितं शुभम् ।
गुरुदत्तं गृहीत्वा च प्रददौ मस्तकोपरि ॥
घृतं ददर्श माध्वीकं रजतं काञ्चनं दधि ।
चन्दनं लेपनं कृत्वा पुष्पमालां गले ददौ ॥
गुरुवर्गं ब्राह्मणञ्च वन्दयामास भक्तितः ।
शङ्खध्वनिं वेदपाठं सङ्गीतं मङ्गलाष्टकम् ॥
विप्राशीर्व्वचनं रम्यं शुश्राव परमादरम् ।
धृत्वा मङ्गलरूपञ्च सर्व्वत्र मङ्गलप्रदम् ॥
चिक्षेप दक्षिणं पादं सुन्दरं स्वात्मविग्रहम् ।
विधृत्य नासिकावामभागं मध्यमया विभुः ॥
विलङ्घ्य वायुमिश्रञ्च नासादक्षिणरन्ध्रतः ।
ततो ययौ नन्दनन्दो नन्दस्य प्राङ्गणं वरम् ॥"

इति ब्रह्मवैवर्त्ते श्रीकृष्णजन्मखण्डे ७१ अध्यायः ॥

अथ यात्रायुक्तिः । तत्र समयः ।
"यात्रायां द्विविधः कालो वैकारः सहजस्तथा ।
प्रोक्त आत्ययिके कार्य्ये विकारो नात्र निर्णयः ।
सहजः स्वेच्छया राज्ञां तस्य निर्णय उच्यते ॥
यात्राजसिंहमथा ग्रनैश्चरबुधोशनसां गृहेषु ।

भानौ कुलीरवृषवृश्चिकगोभिरौर्घा
ग्रस्तासु देवतमतेऽध्वनि पृष्ठतोऽर्कः ॥

अश्विनी रेवती ज्येष्ठा तथा पुष्यपुनर्वसू ।

मैत्रं भगाग्निरौ मूला यात्रायामुत्तमाः स्मृताः ॥
भरणी कृत्तिकाश्लेषा विशाखा चोत्तराचयम् ।
मघा पमुपतिश्चैव यात्रायां मरणप्रदाः ॥
पूर्व्वे कुबेरे दहने निर्ऋतौ
यमे जलेशे पवने महेशे ।
त्याज्यं नरस्य प्रतिपत्क्रमेण
युग्मं तिथीनां प्रवदन्ति तज्ज्ञाः ।
स्यात् संमुखे यानमसुक्षयाय
पश्चाद्भवेत् सर्व्वशुभाय पुंसाम् ॥
सूर्य्यः शुक्रः कुजो राहुर्मन्दश्चन्द्रो गुरुर्बुधः ।
अग्रतः शोभना यात्रा पृष्ठतो मरणं ध्रुवम् ॥
पूर्व्वेशेन्द्रं दक्षिणे यानपादं
रोहिण्यै तच्चार्य्यमाख्याश्च शूलम् ।
कामं यायात् साम्परायेषु कार्य्ये-
ष्वन्यदापि प्रेक्ष्य शूलानि धीमान् ॥"
तत्र दिक्शूलम् ।
"षष्ठाष्टमी चतुर्थी च नवमी द्वादशी तथा ।
चतुर्दशी कृत्तिकाख्या यात्रायामशुभप्रदाः ॥
प्रायो जगुः सहजगश्चदशाय संस्थाः
पापाः शुभाः सविलजं परिसृत्य खस्थम् ।
सर्व्वत्रगाः शुभफलं जनयन्ति सौम्या-
स्त्यक्त्वारिसंस्थममरारिगुरुं जिगीषोः ॥
नाकालवर्षविद्युत्स्तनितेष्विष्टं कथञ्चिदपि यानम् ।
आसन्नाद्दात् दिग्वान्तरीक्षभौमैस्तथोत्पातैः ॥"
तत्र क्रमः ।
"राज्ञां यात्राविधिं वक्ष्ये जिगीषूणां परावनीम् ।
नीराजनाविधिं कृत्वा सैनिकाश्चानयेत्ततः ।
गजानश्वान् रथानन्यानिति यात्राक्रमो मतः ॥"
तत्र नीराजनाविधिः ।
"वर्षान्तेऽभ्युदिते शुक्रे चन्द्रे पूर्णे शुभक्षणे ।
अश्वनीराजनं कुर्य्यात् यथोक्तदिवसत्तमे ॥
उदीचीं प्रस्थिते भानौ संक्रान्त्यां वा शुभे दिने ।
गजनीराजनं कुर्य्यात् महीपालो जिगीर्षुवान् ॥
वृश्चिकस्थे रवौ कुर्य्यात् पत्तिनीराजनाविधिम् ।
नौकानीराजनं कुर्य्यात् दक्षिणाग्नां प्रतिष्ठति ॥
अन्येषाश्चैव यानानां विजयादशमीतिथिम् ।
ध्वजादीनाञ्च सर्व्वेषां प्रकोत्थाने नीराजनम् ॥
कृतस्य नवदग्धस्य तथा सिंहासनस्य च ।
गृहस्य नगरस्यापि महाविभवसंक्रमे ॥
आत्मनो युवराजस्य महिष्या मन्त्रिणान्तथा ।
स्वजन्मदिवसे राजा कुर्य्यान्नीराजनाविधिम् ॥
अभिषेकदिनं प्रोक्तमेषां जन्मदिनं मया ॥"
तद्यथा,—
"अश्वानां भास्करो देवो रेवन्तमिति संज्ञया ।
गजानां देवता शक्रः पत्तीनां कालिका मता ॥
नौकानां वरुणो देवो यानानान्तु जयन्तकः ।
अस्त्राणां देवता रामो यमः खड्गस्य पूज्यते ॥
ध्वजानां हनुमान् पूज्यो दृढस्तिरिति क्रमात् ।
तान् पूजयित्वा विधिवदेत्तान्नीराजयेन्नृपः ॥
द्वादशमञ्चिये: पुष्टैश्चामरच्छत्राश्वनादिभूषाढ्यैः ।
क्रोशलैर्मदिषद्विगुणैः पुरुषैस्तद्विगुणैश्चारदीपि-
काभिः ॥

भद्रं वा सहस्रांशुदिने नीराजयेद्राजा ।
द्वादशवाहै रुचिरैः साङ्गोपाङ्गैरतोर्द्धतश्चोर्द्धैः ॥
तस्यार्द्धतो याग्नेर्गजशतनीराजनं सम्भवति ।
छागलशतं वृषभशतं शतञ्च मेषाणाम् ॥
तुरगा दश हृष्टाङ्गा व्याघ्राः पञ्च द्विपञ्चैकः ।
भल्लुका हि क्रकुराश्चैकैकाः पत्तिलक्षणस्य ॥
नौकाशतकं साङ्गं नवदग्धकं काष्ठनादिभि-
र्घटितम् ।
बन्धुशतमपि जन्तूनां नौकानीराजने राज्ञाम् ॥
यदा द्विपदं यानं सर्व्वेषामिष्यते तुरगैः ।
सुदशावत्सरवसितैर्योग्याङ्गैर्योग्यवर्णैश्च ॥
अष्टाभिर्धातुभिः कुर्य्यादश्वनीराजनाविधिम् ।
गजाश्वनरनौकाभिर्द्विगुणाभिर्यथोत्तरम् ।
रत्नैर्नानाविधैरश्वैर्धातुभिर्वसनैस्तथा ॥
सिंहासनेश्च योग्येश्च कुर्य्यान्नीराजनाविधिम् ।
गृहनीराजनाप्येवं नरस्याथ निगद्यते ॥
श्वभिः खरैः शृगालैश्च व्याघ्रैरुक्तैर्यथोदितैः ।
पुरं नीराजयेद्राजा चिरसम्पत्तिहेतवे ॥
श्वा दशाश्वस्तदर्द्धेन नरश्चैव तदर्द्धतः ।
व्याघ्रादीनां तथैवैकं रत्नं नानाविधन्तथा ॥
अस्त्राणि धातवश्चैव वस्त्राणि च फलानि च ।
वनजाः स्थलजाश्चैव जलजाश्चैव जन्तवः ॥
गवयग्रहाश्च सूर्य्याद्याः शैलाः सप्त घटास्तथा ।
योग्यधातुसमुद्भूता नौकाखण्डचयस्तथा ॥
निजदेहमितं स्वर्णं रजतं ताम्रमेव वा ।
आत्मनीराजने दद्यादयदिच्छेच्चिरसंस्थितिम् ॥
अस्त्रैर्नानाविधैः कुर्य्यादयुवराजनीराजनम् ।
अलङ्कारैश्च विविधैर्देवीनीराजनं मतम् ॥
मन्त्रिनीराजनं राजा हयेनैव समाचरेत् ॥
अमात्यानां सैनिकानां विप्राणां धनिनान्तथा ।
वस्त्रैर्नीराजनं कुर्य्यादिति भोजस्य सम्मतम् ॥
नीराजनाया वस्तूनि न पश्येन्न पुनः स्पृशेत् ।
सप्रक्षत्वः परिभ्राम्य कुर्य्यान्नीराजनाविधिम् ॥
न्यसेद्वा पररार्ष्ट्रेषु गहने वा जलेऽपि वा ।
देवज्ञवेद्यदीनेभ्यः प्रयच्छेद्वा यथायथम् ॥
इति संक्षेपतः प्रोक्तो मया नीराजनाविधिः ।
अनेन विधिना राजा सुचिरं सुखमश्नुते ॥"
तथा हि गर्गः ।
"नीराजना महीन्द्राणां निघ्नन्ति विपदोऽखिलाः ।
सैव सन्नहनं राज्ञां कवचेनेव संयतः ॥
नीराजनावन्दितानां न भयं विद्यते क्वचित् ।
नीराजनाविहीनानां नश्येयुः सर्व्वसम्पदः ॥"
तथा च वात्स्यः ।
"ये भूमिपालाः प्रतिवत्सरान्तं
कुर्व्वन्ति नीराजनकर्म्म सम्यक् ।
तेषां न लक्ष्मीः क्षयतामुपेति
साम्राज्यलक्ष्मीः करगेव तेषाम् ॥
एवं नीराजनं कृत्वा राजा प्रस्थानमाचरेत् ॥"
इति नीराजनाविधिः ॥ * ॥
अथ यात्रा ।
"गुणातिशयसम्पन्नः प्रभुं यायाज्जिगीषया ।
यदि पश्चात् प्रकोपो न यदि राष्ट्रे न कण्टकाः ॥

सन्धायान्यच्च यायाद्वा पार्ष्ण्यग्राहेण प्रभुणा ॥
रात्रावुलूको विनिहन्ति काकान्
काकोऽप्युलूकान् रजनीक्षयाये ।
इति स्वकालं समुदीक्ष्य यायात्
काले फलन्तीह समीहितानि ॥
प्रबलव्यसनोपेतं दुर्भिक्षादिप्रपीड़ितम् ।
सम्भूतान्तरकोपेतं न यायात् पृथिवीपतिः ॥
निजदेवानुकूल्ये हि प्रातिकूल्ये परस्य च ।
यायाज्जयो यतो दैवं बलमेतत् परं मतम् ॥"
अन्यत्र तु ।
"निरातङ्के निरुत्पाते निरुद्विग्ने निरामये ।
विपक्षे जयमिच्छन्ति राजानो विजिगीषवः ॥"
इति युक्तिकल्पतरुः ॥
युद्धयात्रायाममङ्गलदर्शनं यथा,—
"तस्य निर्गच्छतो गेहात् श्वानोऽग्नि सुखतो-
ऽभवत् ।
ध्वजे रुरोह कापोतः शिवा शूलाग्र च
दक्षिणा ॥
पिङ्गला चक्षुगोधा च शूकरी केवली तथा ।
गजवानरसेनाजग्रिखिच्छिक्काश्च वामतः ॥
पथं विभिन्दते सर्पः कुम्भोदकं व्यशीर्य्यत ।
रराव वानरो ऋक्षो मार्जारो ह्यतिभैरवम् ॥
तैलतक्रलवणैर्घृयुक्ताभ्यक्तादिदर्शनम् ।
वान्तोन्मत्तजडक्लीबकुत्सितश्रमणक्रन्दं रवम् ॥
तुषकार्पासलवणानां निन्दितानाञ्च दर्शनम् ।
रक्ताम्बरधरो मुण्डः पङ्कामिषं तथा वसा ॥
ललाटं शुक्लजम्बाप उल्कापातध्वजारुणाः ।
दिशां दाहमहीकम्पाः सरजः कलुषं नभः ॥
निस्तेजस्तेपते भानुर्नद्यः प्रतिसुखावहाः ।
उष्णोदकं महाकूपं दरणं दीर्घिकासु च ॥
अकालविकृतिः पुष्पफलानामन्वभूत्तदा ।
प्रीत उल्काविपर्य्यासा मेघनादाश्च दारुणाः ॥
आरण्यसत्त्वा ग्रामेषु ग्रामजारण्यवासिनः ।
क्रोष्टुसर्पसमूहाश्च शुनश्वानः पिपीलिकाः ॥
ऋक्षाणां महती सेना मृगाणाश्च तथैव च ।
एते च पुरप्राकारे निपतन्त्युत्पतन्ति च ॥
दुर्गन्धः शार्करो वायुर्दीनां धीरा घृतप्रभाः ।
शुक्लाम्बूनाश्रुपातानि गजा अश्वाः प्रचक्रिरे ।
ध्वजच्छत्रपताकानां स्फुटनं दण्डभिन्दनम् ।
कलङ्कमसि चक्रे च हता दुन्दुभिरेव च ॥
व्यातलाकूटनखापि नाराचानाञ्च कुण्ठता ।
गदानां मुद्गराणाञ्च ग्लानिर्याता ह्यनुभिन्दता ॥
शुष्कप्ररोहशाखार्कसाद्रपातस्तथैव च ।
प्रतिमारुदितं खेदो मृतकानाञ्च जल्पनम् ॥
गवां रासभमारोहः स्त्रीणाञ्च वक्रपत्नता ।
स्त्रीस्रुते अविच्छागादि ह्यजावि शिशुशोभनम् ।
बालानां घातनं युद्धे निस्त्रिंशाः सकलाः प्रजाः ।
मक्षिकादंशमशकबहुगोनासदर्शनम् ॥
निस्तेजा न वहेद्वह्निः सधूमः स्फुटते मुहुः ॥
एवंविधान् तथोत्पातान् दृष्ट्वा घोरेण वासव ।
पप्रच्छ नारदं सोऽथ किमेतद्विक्रतं द्विज ! ॥"
इत्यादौ देववतारे घोरवधाध्यायः ॥

अथ द्वादश यात्रा ।
"प्रणम्य जगतां नाथं कलिकल्मषनाशनम् ।
द्वादशयात्रातत्त्वानि वक्ष्ये गौरघुनन्दनः ॥"
तत्रादौ द्वादशयात्राकालस्य मुख्योपादेयत्वात् आदौ स एव निरूप्यते । तदुक्तं स्कन्दपुराणे ।
इन्द्रद्युम्न उवाच ।
"वैशाखादिषु मासेषु यात्रापूजाविधिं मुने ! ।
श्रोतुमिच्छामि देवेशे यथावद्वक्तुमर्हसि ॥
जैमिनिरुवाच ।
वैशाखादिषु मासेषु देवदेवस्य शार्ङ्गिणः ।
या या द्वादश यात्राः स्युस्ता हि वक्ष्यामि ते शृणु ॥
वैशाखे चान्दनी यात्रा ज्येष्ठे स्नपन्युदीरिता ।
आषाढ़े रथयात्रा स्यात् श्रावणे झूलनी तथा ॥
भाद्रे दक्षिणपार्श्वीया आश्विने वामपार्श्विका ।
उत्थानी कार्त्तिके मासि द्वादनी मार्गशीर्षके ॥
पौषे पुष्याभिषेकः स्यान्माघे श्रालोदनी तथा ।
फालगुने दोलयात्रा स्याच्चैत्रे मदनभञ्जिका ॥
एकैका मुक्तिदा सर्व्वा धर्म्मकामार्थसाधनाः ॥"
अथ यात्राविधिः । स्कान्दे ।
"वैशाखस्य सिते पक्षे तृतीयात्रयसंज्ञिता ।
तत्र मां लेपयेद्गन्धलेपनैरतिशोभनैः ॥
वैशाखस्यामले पक्षे तृतीया पापनाशिनी ।
स्वयमाविष्कृता चैषा प्राजापत्यर्क्षसंयुता ॥
यः पश्यति तृतीयायां कृष्णं चन्दनभूषितम् ।
वैशाखस्य सिते पक्षे स यात्यच्युतमन्दिरम् ॥
वैष्णवा जयशब्दैश्च पूजयित्वा तदा हरिम् ।
नानास्तोत्रोपनिषदैर्विश्वेशं संस्तुवन्ति च ॥
वेणुवीणादिवाद्यैश्च तथा नानोपहारकैः ।
सन्तोषयन् जगन्नाथं तृतीयादौ विलेपयेत् ॥
वैशाखस्य तृतीयायां जलमध्ये विशेषतः ।
लेपनं मण्डपे कुर्य्यान्मण्डले वा दृढदृढे ॥
चन्दनागुरुहीवेरं कुष्ठकुङ्कुमरोचनाः ।
जटामांसी सुरा चैव विष्णोर्गन्धाष्टकं विदुः ॥
एतैर्गन्धैस्तथान्यैश्च विष्णोर्गात्राणि लेपयेत् ।
घृतञ्च तुलसीकाष्ठं कुर्य्यात्तत्रेपनकर्म्मणि ॥"१॥
अथ स्नानयात्रा । स्कन्दपुराणे ।
"ज्येष्ठामूलस्य वै जातो जन्म पूर्णं जलेऽवसम् ।
तस्माच्च स्नापणं कार्य्यं महास्नानविधानतः ।
तस्यां प्रातःस्नानकाले ब्रह्मणा सहितश्च माम् ।
रामं सुभद्रां सुस्नाप्य मम लोकमवाप्नुयात् ॥"
तथा ।
"मासि ज्येष्ठे तु संप्राप्ते नक्षत्रे शुक्रदेवते ।
पौर्णमास्यां हरेः स्नानं सर्व्वकामफलप्रदम् ॥
सर्व्वतीर्थसमः कूपस्तदाक्षे निर्म्मलः शुचिः ।
तदा भोगवती तत्र प्रत्यक्षं भवति द्विजाः ॥
तस्मात् ज्येष्ठां समुद्धृत्य होमाज्यैः कलसैर्जलैः ।
स्नापयन्ति तदा कृष्णं सततं तं हलायुधम् ॥
जन्माहनि हरेः स्नानमुत्सवं परमाद्भुतम् ।
उत्सवो वै न हीयेत तस्मात्तदुत्सवश्चरेत् ॥
जन्मनां त्रयकारित्वाज्जन्मयात्रा प्रतिष्ठिता ।
ज्येष्ठस्नानं भगवतो ये पश्यन्ति सुदान्विताः ॥
न ते भवाब्धौ मज्जन्ति यात्रायां यतमानसाः ।
ज्येष्ठे च स्नपनं कुर्य्यात् श्रीविष्णोर्जन्मवासरे ॥
दैनन्दिनन्तु दुरितं पञ्चमासर्त्तुवर्षजम् ।
ब्रह्महत्यासहस्राणि ज्ञानाज्ञानकृतानि च ॥
स्वर्णस्तेयसुरापानगुरुतल्पयुतानि च ।
कोटिकोटिसहस्राणि क्षुद्रपापानि यानि च ॥
सर्व्वाण्येव प्रणश्यन्ति पौर्णमास्यान्तु वासरे ।
पुरुषसूक्तमन्त्रेण पावमान्या तथैव च ॥
नारिकेलोदकेनाथ तथा तालफलाम्बुना ।
पञ्चाब्दते: प्रोतनोयैर्द्वीपाकर्पूरवासितैः ॥
यवोदकेन शुद्धेन तथा पुष्योदकेन च ।
स्नापयित्वा जगन्नाथं पूजयेत् परमेश्वरम् ॥
ॐ घं घण्टायै नमः इति घण्टावादं निवेदयेत् ।
य एवं कुरुते विद्वान् ब्राह्मणः क्षत्रियः शुचिः ।
सर्व्वपापैः प्रमुच्येत विष्णुलोकं स गच्छति ।
चतुर्हस्तां दृढ़ं मञ्चं कारयित्वा सुशोभनम् ॥
सुगन्धिधूपसुरभिं चन्दनाम्भःसमुक्षितम् ।
एवं मञ्चं प्रतिष्ठाप्य कलसानधिवासयेत् ॥
सुवासितं जलपूर्णं पावकं कलसं न्यसेत् ।
जयशब्दैश्च स्तुतिभिर्नीयते जगदीश्वरः ॥
जयस्व राम कृष्णेति जयभद्रेति चोदिते ।
नीयते मञ्चदेशन्तु निशीथे ब्राह्मणादिभिः ॥"
अथ रथयात्रा । स्कन्दपुराणे ।
"गुण्डिकाख्यां महायात्रां प्रकुर्व्वीथाः क्षितीश्वर ! ।
आषाढ़स्य सिते पक्षे द्वितीया पुष्यसंयुता ॥
तस्यां रथे समारोप्य रामं मां भद्रया सह ।
यात्रोत्सवं प्रवृत्ताथ प्रीणयेच्च द्विजान् बहून् ॥
ऋक्षाभावे तिथौ कार्य्या सदा सा प्रीतये मम ।
सप्ताहं सरितस्तीरे मम यात्रा भविष्यति ॥
अष्टमे दिवसे सर्व्वान् रथान् माल्यैर्विभूषयेत् ।
नवम्यामानयेद्देवांस्तेषु प्रीतः सदा द्विजान् ॥
दक्षिणाभिमुखी यात्रा विष्णोरेषा सुदुर्लभा ।
यथा पूर्व्वा तथा चेयं ते दे मुक्तिप्रदायिके ॥
अष्टाहे विहरेच्चक्रं तदर्द्धेन तु पार्व्वतीम् ॥"
इतिवत् तिथिना एकाहो बोद्धव्यः ।
"तिथिनैकेन दिवसश्चान्द्रमानेन कीर्त्तितः ॥"
इति विष्णुधर्म्मोत्तरात् ॥
यत्तु ।
"आषाढ़स्य सिते पक्षे भद्रा सा पुष्यसंयुता ।
यात्रोत्सवं प्रकुर्व्वीथास्तदभावे पुष्य एव हि ॥"
इति ईश्वरसंहितायां वचनान्तरम् ॥
तदैवकल्पिकप्रयोगान्तरविधायकम् । पाद्मे ।
"आषाढ़स्य द्वितीयायां रथं कुर्य्याद्विशेषतः ।
आषाढ़शुक्लैकादश्यां जपहोममहोत्सवम् ॥
अतः परं हि कृष्णस्य यात्रान्तरमपेक्षते ।
अत्र स्वयं त्रिलोकेशः स्यन्दनेन कृतूहलात् ॥
नाशयन् सर्व्वपापानि वर्षे वर्षे व्रजेदसौ ।
रथस्थितं व्रजन्तं तं महावेदीमहोत्सवे ॥
ये पश्यन्ति मुदा भक्त्या वासस्तेषां हरेः पदे ।
सत्यं सत्यं पुनः सत्यं प्रतिज्ञातं द्विजोत्तमाः ॥
अतः श्रेयःपदो विष्णोरुत्सवः शास्त्रसम्मतः ।
रथयात्रैव यात्राणां मुख्येत्याह प्रजापतिः ॥
महावेदीं व्रजन्तं तं रथस्थं पुरुषोत्तमम् ।
बलभद्रं सुभद्राञ्च दृष्ट्वा मुक्तिर्न चान्यथा ॥
आषाढ़स्य सिते पक्षे दिने विष्णोः शुभप्रदे ।
प्रतिष्ठाप्य सदृढ़ेन विधिना पूर्व्ववद्द्विजाः ॥
रथं नरो हरेः कुर्य्यात् स्वासनं सुपरिष्कृतम् ।
भूषयेद्विविधैर्भक्ष्यैर्वस्त्रालङ्कारमाल्यकैः ॥
दृदङ्गपणवाद्यैश्च भेरीढक्कादयस्तथा ।
नटनर्त्तकसुख्याश्च गायना बहवस्तथा ॥
वेश्या यौवनदर्पाढ्या रूपालङ्कारभूषिताः ।
ध्वजाश्च बहवस्तत्र पताकाधिष्ठितान्तराः ॥
गरुड़ञ्च ध्वजं कुर्य्यात् रक्तचन्दनमिश्रितम् ।
दीर्घनासं पीतदेहं कृष्णलाभ्यां विभूषितम् ॥
चतुर्भुजं सुनेत्रं सर्व्वालङ्कारभूषितम् ।
देव्याः पद्मध्वजं कुर्य्यात् पद्मकाष्ठविनिर्म्मितम् ॥
सप्तच्छदमयं कुर्य्याच्छ्रीरिणो लाङ्गलध्वजम् ।
सारथिं वाजिनश्चैव बलं बलसुदान्वितम् ॥
हीरकैर्मङ्गलैर्दान्तैर्बलिवर्दैः सुशोभनम् ।
इत्थं सुघटितं तन्तु रथं देवत्रयस्य च ॥
अरुणोदयवेलायां देवं तस्मात् प्रपूजयेत् ।
ब्राह्मणैर्वैष्णवैः सार्द्धं यतिभिश्च तपस्विभिः ॥
विज्ञापयेद्देवदेवं याचायै स कृताञ्जलिः ।
ततः कर्पूरपूर्णैश्च सुमनोभिरवाकिरत् ॥
पथि शोभनसूक्तानि पठन्ति द्विजातयः ।
केचिन्मङ्गलगाथाश्च केचिज्जय जयेति च ॥
जितन्तु इति मन्त्रं वै केचित् पुष्पे जपन्ति च ।
स्तुतमागधमुख्याश्च कीर्त्तिं कार्ष्णीं मुदा जगुः ॥
चर्चरीझर्झरीवेणुवीणामाधुरिकादयः ।
शब्दायन्ते सुमधुरं गोविन्दविजयान्तरे ॥
एवं प्रवृत्ते समये कृष्णं रामपुरःसरम् ।
नयन्ति विप्रा भद्राञ्च क्षत्रियाश्च विशस्तथा ॥
करे धृत्वा जगन्नाथं भ्रामयित्वा रथत्रयम् ।
रामं भद्राञ्च कृष्णञ्च रथमध्ये निवेशयेत् ॥
पूजयेदुपचारैस्तैः अङ्गभक्तिसुसंयतः ।
रथच्छायां समाक्रम्य ब्रह्महत्यां व्यपोहति ॥
तद्रेणुसंस्पृततनुस्त्यजेद्दे पापसंहतिम् ।
घनाम्बुवृष्टिसिक्तेन स्वर्गङ्गास्नानजं फलम् ॥
ये प्रणामं प्रकुर्व्वन्ति तेऽपि मोक्षमवाप्नुयुः ।
अनुगच्छन्ति ये कृष्णं ते देवतुल्यविग्रहाः ॥
वेदैः स्तुवन्ति वेदानां वक्तारो मोक्षभागिनः ।
इतिहासपुराणाद्यैः श्लोकैर्व्वापि सुसंस्कृतैः ॥
स्तुवन्ति पुण्डरीकाक्षं ये वै विगतकल्मषाः ।
ते वै जयन्ति पापानि जयशब्दैः स्तुवन्ति ये ॥
नर्त्तनं कुरुते वापि गायत्यथ नरोत्तमाः ।
वैष्णवोत्तमसंसर्गान्मुक्तिं प्राप्नोत्यसंशयम् ॥
नामानि कीर्त्तयिष्यन्ति न ते यान्ति यमालयम् ॥
जयस्व रामकृष्णेति जयभद्रेति यो वदेत् ।
न मातृगर्भे वासोऽस्य स च देवत्वमाप्नुयात् ॥
चामरैर्व्यजनैः पुष्पैः स्तवकैश्चीनचेलकैः ।
रथस्याग्रे स्थितो यो वै वीजयेत् पुरुषोत्तमम् ॥
संवीज्यमानोऽप्सरोभिर्देवगन्धर्व्वयोषितान् ।
भुङ्क्ते तु भोगानखिलान् यावदाभूतसंप्लवम् ॥

नातः परतरो लोके महावेदीमहोत्सवात् ।
सर्व्वपापहरो योगः सर्व्वतीर्थफलप्रदः ॥
क्षणमुद्दिश्य ये तत्र दानं ददति नै नराः ।
यत्किञ्चिच्चक्षयफलं मेरुदानेन संमितम् ॥
गुण्डिकामण्डपे यान्तं भद्राक्षाणं सहाग्रजम् ।
तत्रातपश्रान्तगात्रं दर्पणैर्व्वभिवेचयेत् ॥
पक्वाम्रतैः प्रीततोयैः पुष्पकर्पूरवासितैः ।
नारिकेलजलेनाथ तथा तालफलाम्बुना ॥
रत्नोदकेन शुद्धेन तथा पुण्योदकेन च ।
सर्व्वाङ्गमगुलिप्येच्च चन्दनेन्दुसदृक्षवैः ॥
सुगन्धिमाल्याभरणैश्चीनचेलैः सुशोभनैः ।
चामरैश्च जलाभैश्च प्रीतलैर्व्यजनैस्तथा ॥
वीजयेत् पुण्डरीकाक्षं सुभद्रां बलमेव च ।
सिताभिः पानकैर्हृद्यैस्तथा खण्डविकारकैः ॥
खर्ज्जूरैर्नारिकेलैश्च नानाभ्राफलादिभिः ।
तथा क्षीरविकारैश्च पनसैरिक्षुभिस्तथा ॥
वासितैः प्रीततोयैश्च गन्धताम्बूलपत्रकैः ।
सकर्पूरलवङ्गाद्यैः पूजयेत् परमेश्वरम् ॥
रथत्रयस्थितं देवत्रयं ये पुरुषर्षभाः ।
प्रदक्षिणं प्रकुर्व्वन्ति त्रिचतुःसप्त एव च ॥
ततोऽपराह्णे देवेशं दक्षिणानिलवीजितम् ।
घृतैः घृतेनैयेद्दीपं मण्डपस्य च मध्यमे ॥
एवं व्रजति देवेशे सूर्य्यश्चास्तं गतोऽभवत् ।
दीपकानां सहस्राणि ज्वालितानि नरैस्ततः ॥
मण्डपे वासयेद्देवान् गुण्डिकाख्ये मनोहरे ।
चारुचन्द्रातपे चारुमाल्यचामरभूषिते ॥
पूजयित्वा जगन्नाथं तोषयेत् गीतनृत्यकैः ।
उपहारादिभिस्तत्र सप्ताहानि जनार्द्दनम् ॥
सप्ताहं ये प्रपश्यन्ति गुण्डिकामण्डपे स्थितम् ।
माघे रामं सुभद्राञ्च विष्णुसायुज्यमाप्नुयात् ॥
दिवा तद्दर्शनं पुण्यं रात्रौ दशगुणं भवेत् ।
यत्किञ्चित् कुरुते कर्म्म कोटिकोटिगुणं भवेत् ॥
सर्व्वं मेरुसमं दानं सर्व्वे यज्ञसमा द्विजाः ।
महावेद्यां गते कृष्णे योगोऽयं खलु दुर्लभः ॥
अर्क्षोदयादयो योगाः स्कन्देन परिभाषिताः ।
महावेद्याख्ययोगस्य कलां नार्हन्ति षोडशीम् ॥
अष्टाहे च पुनः कृत्वा दक्षिणाभिमुखान् रथान् ।
दक्षिणाभिमुखी यात्रा विष्णोरेषा प्रकीर्त्तिता ॥
कार्य्या प्रयत्नतः सा हि भुक्तिमुक्तिप्रदा भवेत् ।
दक्षिणाभिमुखं यान्तं दृष्ट्वा पश्यन्ति ये नराः ॥
न तेषां पुनरावृत्तिः सत्यमेतन्न संशयः ।
पुराविदो वदन्त्येतां यात्रां नवदिनात्मिकाम् ॥
तस्याः संकीर्त्तनादेव निर्म्मलो जायते नरः ।
तावतीयं महायात्रा यो यथा कर्त्तुमिच्छति ॥
सोऽपि विष्णुप्रभावेन वैकुण्ठभवनं व्रजेत् ।
उद्धृत्य सप्तपुरुषान् पापावलिसमन्वितान् ॥"३॥
अथ शयनयात्रा । स्कन्दे ।
"आषाढ़े शुक्लदादश्यां कुर्य्यात् स्नापमहोत्सवम् ।
मण्डपे रचयेत्तत्र शयनागारमुत्तमम् ॥
देवस्य पुरतः शय्यां रत्नादिनिर्म्मितोपरि ।
आस्तीर्य्य कदुचेलादि कदुचीनोत्तरच्छदाम् ॥
कर्पूरधूलिविक्षिप्तां साधुचन्द्रातपां शुभाम् ।
पुष्पगन्धयुतां सुक्तारञ्जितां चन्दनाङ्किताम् ॥
साधुदारां शुभां स्निग्धां नानाचित्रोपशोभिताम् ।
एवं स्नापगृहं कृत्वा निशीथे स्नापयेद्विभुम् ॥
संपूज्य भावयेद्देवं तैर्या क्षणादिभिः सह ।
शेष्वेहीति च संप्रार्थ्य स्नापार्थं परमेश्वरम् ॥
नयेच्छय्यागृहद्वारं वासयेत् घटिकात्रयम् ।
पक्वाम्रतैः स्नापयेत्तान् पृथक्फलगृताधिकैः ॥
सुगन्धिचन्दनैर्लिप्तान् वस्त्रालङ्करणादिभिः ।
पूजयित्वा यथान्यायं प्राञ्जलिर्मन्त्रमुच्चरेत् ॥"
जगद्वन्द्य इत्यादि ।
"सुद्वारं कारयेद्द्वारं विष्णोः शयनवेश्मनः ।
स्नापयित्वा जगन्नाथं लभते सुखमुत्तमम् ॥"५॥
अथ पार्श्वपरिवर्त्तनयात्रा ।
"अथ ते संप्रवक्ष्यामि पार्श्वस्य परिवर्त्तनम् ।
नभस्यविमले पक्षे संप्राप्ते हरिवासरे ॥
विष्णोः स्नापगृहद्वारं शनैर्गत्वा प्रविश्य च ।
नमस्कृत्य जगन्नाथं पर्य्यङ्कशयितं सुदा ॥
अवधार्य शनैर्द्वारं पूजयेदुपचारकैः ।
प्रणम्य भक्त्या तत्पादौ स्नापयेदुत्तरासुखम् ॥"
मन्त्रश्चेमं पठेत् ।
"ॐ देवदेव ! जगन्नाथ ! कल्पार्थं परिकल्पय ।
परिवृत्तमिदं सर्व्वं यथा स्थावरजङ्गमम् ॥
यत् दृष्ट्वा चेष्टितैरेव जायन्तस्वप्नसुप्तिभिः ।
जगद्धिताय सुप्तोऽसि पार्श्वेन परिवर्त्तय ॥
परिवर्त्तनकालोऽयं जगतः पालनाय ते ।
सदृग्जनोऽयं शुक्लोऽपि ध्वजे तिष्ठेत् ससूत्रकः ।
दृष्टं त्वत्पादकमलं विमुञ्च मूर्द्धि तच्छलम् ।
महीं जलं प्लावयति प्रजापालनहेतुकम् ॥
इति संप्रार्थ्य देवेशं विनयात्तोषयेत्ततः ।
व्यजनैश्चामरैश्चैव वीजयेत् परमेश्वरम् ॥
सुगन्धिचन्दनैरस्य सर्व्वाङ्गं परिलेपयेत् ।
खाद्यानि भक्ष्यद्रव्याणि पायसादीनि दापयेत् ॥
शय्यागृहद्वारि विभोः शनैर्भक्त्या निवेदयेत् ।
देवमुद्दिश्य यत् कुर्य्यात् सर्व्वमक्षयतां व्रजेत् ॥
पार्श्वे च तस्मिन्दिवसे उपवासपरो भवेत् ।"
एवं आश्विनशुक्लैकादश्यां पूर्व्वोक्तविधानेन
श्रीलक्ष्म्यास्तु वामपार्श्वपरिवर्त्तनं कार्य्यम् ।
मतान्तरे ।
"शुभे चैवाश्विने मासि महामायां प्रपूजयेत् ।
औदयीं रात्रतीं मार्त्तां विष्णुमायां महेश्वरीम् ।
हिंसा चैव न कर्त्तव्या कदाचिद्विष्णुपूजकैः ॥"६॥
अथोत्थानयात्रा ।
"एकादश्यान्तु कार्त्तिक्यां शुक्लायां पृथिवीपते ।
क्षणमुत्थापयेद्भक्त्या पूजयित्वा जगद्गुरुम् ।
पूर्व्ववत् पूजयित्वा तु प्रातर्मन्त्रं समुच्चरेत् ॥"
मन्त्रस्तु ।
"ॐ उत्तिष्ठ देवदेवेश ! तेजोराशे जगत्पते ! ।
वीक्ष्येतत् सकलं देव ! प्रसुप्तं तव मायया ॥
प्रफुल्लपुण्डरीकाक्ष ! श्रीहरे ! शयनेन वै ।
त्वया दृष्टं जगदिदं परमं सुखमेष्यति ॥
ये ते सायौः क्रियाः सर्व्वाः प्रवर्त्तन्ते ततो ध्रुवम् ।
इत्युत्थाप्य जगन्नाथं वेणुवीणादिनिःस्वनैः ॥

जयशब्दैस्तथा देवं नयेयुर्नृत्यमण्डपम् ॥
तैलेनाभ्यङ्ग्य तोयेन स्नापयेत् पुरुषोत्तमम् ।
पक्वाम्रतैर्नारिकेलरसैः फलरसैस्तथा ॥
सुगन्धामलकैर्नाथ यवकल्केन लेपयेत् ।
घर्षयेत्तुलसीचूर्णैर्लेपयेन्मलयचन्दनैः ॥
पुण्यवासिततोयैश्च कुशरत्नोदकैस्तथा ।
स्नापयित्वा क्षयेत् पापं बहुजन्मोपपादितम् ॥
महोपचारैः संपूज्य विष्णुं नीराजयेत्ततः ।
कृताञ्जलिपुटो भूत्वा प्रार्थयेत् परया मुदा ॥"७॥
अथ प्रावरणयात्रा ।
"मार्गशीर्षे सिते पक्षे कुर्य्यात् प्रावरणोत्सवम् ।
कृत्वा दृष्ट्वा नरो भक्त्या वैष्णवं लोकमाप्नुयात् ॥
वासोऽधिवासं कुर्व्वीत पक्षस्यां निशि कर्म्म-
वित् ।
प्रभाते मण्डलं कुर्य्यात् पद्ममष्टदलान्वितम् ॥
दिक्पालान् पूजयेद्दिक्षु क्षेत्रपालं गणाधिपम् ।
षडङ्गचण्डौ च बहिश्चतुर्दिक्षु प्रपूजयेत् ॥
तन्मध्ये स्थापयेद्धर्म्मं कालयेदुष्णवारिणा ।
पूजयित्वा जगन्नाथं गन्धतैलेन दीपकम् ॥
दत्त्वा क्षणाय भक्त्या तु गीतवाद्यैर्नयेन्निशाम् ।
प्रातः प्रपूजयेद्देवं नानाद्रव्यैः सुशोभनैः ॥
सप्तभिः सप्तभिर्देवान् वासोभिः परिवेष्टयेत् ।
सुखवर्जञ्च सर्व्वाङ्गे शीतप्रावरणैर्द्विजाः ॥
दूर्व्वाक्षतैः प्रपूज्याथ कुर्य्यान्नीराजनां विभोः ।
भगवन्तं समुद्दिश्य ब्राह्मणेभ्यः प्रदापयेत् ॥
गुरुभ्यश्चान्यदेवेभ्यो दीनानाथेभ्य एव च ।
शीतप्रावरणं दद्यात् सकृत् परमया मुदा ॥
ददाति भगवान् प्रीतस्तस्मै वरमनुत्तमम् ।"८॥
अथ पुष्पस्नानयात्रा ।
"पुष्पस्नानोत्सवं वक्ष्ये यथोक्तं ब्रह्मणा पुरा ।
पुष्यर्क्षेण च संयुक्ता पौर्णमासी यदा भवेत् ।
पौषे मासि तु तत् कुर्य्यात् पुष्पस्नानोत्सवं हरेः ॥
चतुर्द्दशीनिशायान्तु कुम्भाशामधिवासनम् ।
रात्रौ जागरणं कृत्वा प्रातर्वह्निं प्रकीरयेत् ॥
ब्रह्मविष्णुशिवेभ्यश्च प्रत्येकं समिधं क्रमात् ।
जुहुयात् पूजयित्वा तु तदन्ते पुरुषोत्तमम् ॥
पूजयेदुपचारैस्तु आदर्शे प्रतिबिम्बितम् ।
ततः पुरुषसूक्तेन कुम्भांस्नानमभिमन्त्रयेत् ।
क्रमात् देवस्य शिरसि स्नापयेद्विधिवत्ततः ॥"
सूक्तमुच्चरन् ।
"ततः पक्वाम्रतैरेव वासुदेवञ्च स्नापयेत् ।
लक्ष्म्या युक्तं पुनर्विप्र उपचारैः प्रपूजयेत् ॥
दूर्व्वाङ्कुराद्यैः स्तुतिभिर्वाद्यैः संपूज्य केशवम् ।
समन्त्रादिकिरेद्देवं कर्पूराद्यैः सुतण्डुलान् ॥
नीराजयेज्जगन्नाथं कर्पूरयुतवर्त्तिभिः ।
ततः प्रदक्षिणं कृत्वा दण्डवत् प्रणमेत् क्षितौ ॥
पुष्पस्नानोत्सवं पुण्यं ये पश्यन्ति सदान्विताः ।
सर्व्वसम्पन्नकामास्ते व्रजेयुर्व्वैष्णवं पदम् ॥"९॥
अथ नवशस्ययात्रा ।
"कुर्य्यादयनसंक्रान्त्यां नवशस्यमहोत्सवम् ।
संक्रान्तेः पूर्व्वदिवसे नवं ग्राह्यं सुकृष्टिमम् ।
प्रासादपूर्व्वदेशे तु स्थापयित्वाधिवासयेत् ॥"

तथा च पाद्मे।
"संक्रान्त्यां माघमासस्य साधिवासिततण्डुलान्।
निवेद्य विष्णवे भक्त्या इमं मन्त्रमुदीरयेत्॥
त्वयि तुष्टे जगत् सर्व्वमनेन प्रभविष्यति।
दत्तं सर्व्वं जगन्नाथ! गृह्यतां पिष्टकं शुभम्॥
ब्राह्मणान् भोजयेत् पश्चात् देवदेवपुरःस्थितान्॥"
अभ्यर्च्य भगवद्भक्तानित्यादि॥
"नवेन वाससावेष्ट्य दूर्व्वासर्षपपुष्पकैः।
पूजयित्वाभिमन्त्रेण क्षमस्वामिरुदीरयेत्॥
पुनः प्रभाते देवेशं प्रलिपेन्नवचन्दनैः।
वस्त्रालङ्कारमाल्यैश्च पूजयित्वा यथाविधि॥
नीराजयित्वा देवेशं तण्डुलानधिवासितान्।
स्थालीषु पाकपात्रेषु मधुखण्डाज्यमिश्रितान्॥
षड्भिर्गुणैः स्थापयेदग्रे गन्धपुष्पाक्षतान्वितान्।
सपूपं पायसं कृत्वा दद्याद्वै चक्रपाणये।
दशवर्णकपिष्टञ्च विष्णोः प्रियतरं परम्॥
ॐ जीवनं सर्व्वभूतानां जनकस्त्वं जगद्गुरो!।
तव प्रीत्यै कृतानेतान् गृहाण परमेश्वर!॥
लोकानुग्रहणार्थाय गृहीत्वा पिष्टविग्रहम्।
तव प्रीतौ कृतानेतान् गृहाण परमेश्वर!॥
त्वयि तुष्टे जगत् सर्व्वमनेन प्रभविष्यति।
स्वाहाकारस्वधाकारवषट्कारा दिवौकसाम्॥
आप्यायना भविष्यन्ति तेनैवाप्यायितं जगत्।
दत्तं सर्व्वं जगन्नाथ! तत्सर्व्वं सचराचरम्॥
इति संप्रार्थ्य देवेशं घृतौदनान् विनिवेदयेत्॥"१०॥
अथ दोलयात्रा।
"फाल्गुने मासि कुर्व्वीत दोलारोहणमुत्तमम्।
यत्र क्रीडति गोविन्दो लोकानुग्रहणाय वै॥
अभ्यर्च्य देवदेवस्य गोविन्दाख्यान्तु कारयेत्।
कलगीतवं प्रकुर्व्वीत पञ्चाहानि चाष्टानि वा॥
फाल्गुन्याः पूर्व्वतो विप्राश्चतुर्हस्यां निशामुखे।
वह्न्यादत्सवं प्रकुर्व्वीत दोलमञ्चपपूर्व्वतः॥"
पाद्मे।
"पौर्णमास्यां समारभ्य पञ्चम्यान्च समापयेत्॥"११॥
अथ मदनभञ्जिका यात्रा।
"वासन्तिकां समाख्यास्ये यात्रां मदनभञ्जिकाम्।
यस्यां कृतायां दृष्टायां प्रीयन्ति पुरुषोत्तमः॥
चैत्रशुक्लत्रयोदश्यामाहरेत्तत् समूलकम्।
देवस्याग्रे विरचिते मण्डपे साधिवासिते॥"१२॥
इति यात्रातत्त्वम्॥
देवाः षोड़शप्रकारोत्सवः। यथा,—
"वैशाखे मधुयात्रा च चन्दनागुरुकस्तगा।
ज्येष्ठे महास्नानयात्रा अम्बुवाचीदिनत्रयम्॥
आषाढ़े रथयात्रा च हरिशयनिनी परा।
श्रावणे जलयात्रा च वस्त्रभूषणधारणैः॥
भाद्रे यात्रा धूननाख्या चक्रिकाया दिनत्रयम्।
आश्विने च महापूजा यात्रा शस्त्रबलिप्रिया॥
कार्त्तिके दीपयात्रा च नवान्नमयहायणे।
पौषे चाङ्गरागयात्रा वस्त्रालङ्कारभूषणैः॥
माघे माघि महादेवी रटन्ती च चतुर्हस्री।
दोलाकेलिः फाल्गुने च चैत्रे यात्रा चतुष्टयी।
दूतीयात्रा रासयात्रा वासन्ती नीलयात्रिका।
एवं यात्रा मया प्रोक्ता षोड़शी भवमोचनी॥"
इति वासुदेवरत्ने ५४ पटलः॥
(रोगिदर्शनार्थं भिषजां यात्राविवरणम्। यथा,
"इदानीं निर्गमे पुत्र! प्रवेशे वा गृहस्य च।
शुभाशुभानि सर्व्वाणि वक्ष्यामि शकुनानि च॥
राजा गजो द्विजमयूरकखञ्जरीटा-
श्चाषः शुकुन्तरजकः सितवस्त्रयुक्तः।
पुत्रान्विता च युवती गणिका च कन्या
श्रेयः सुखाय यदि सां प्रतिदर्शयन्ति॥
नटाश्वाश्वो भासहारीतचक्रौ
भारद्वाजोच्छिङ्गरञ्जागसंज्ञः।
एते श्रेष्ठा दक्षिणे वाथ सर्व्वे
वेद्यावेशो निर्गमे श्रेयसे च॥
सर्पोलूको वानरः शूकरश्च
गोधा ऋक्षः शकलाग्रः शृगालश्च।
एते रिष्टा निर्गमे वा प्रवेशे
कार्य्याघातो नोपकारेषु शस्ताः॥
मृगो वा पिङ्गलो वापि प्रशस्ता दक्षिणे सदा।
निर्गमे वा प्रवेशे च दक्षिणाः शुभदायकाः॥
एको वा त्रीणि वा पञ्च सप्त वा नवसंख्यया।
भाग्यकाले नराणान्तु मृगा यान्ति प्रदक्षिणाः॥
पिप्पिलिकयगजगोधाराक्षभो भृङ्गराजो
सुखरपिककपोतो पोतकी शूकरी वा।
तदनुविहगराजो मङ्गलार्घ्यसिंह-
र्वदति शकुनवेला वामतो निर्गमे वः॥
तित्तिरिः कुररः क्रौञ्चः सारसाभासशूकराः।
वामे तु शुभशंसी च निर्गमे कार्य्यसिद्धये॥
काको दक्षिणतः श्रेष्ठो निर्गमे शुभदायकः।
प्रवेशे गदितः श्रेष्ठो वामतः क्षत्रवायसः॥
जालको हि शृगालोऽपि कर्कटो-
कीर्त्तनञ्च गदितं न सुखाय।
न शुभदर्शना अमी भवेयुः
सर्पगोधाक्षकलाग्रविड़ालाः॥
दर्शनं हितकरं प्रवदन्ति
खञ्जरीटमरालक्रिकराणाम्।
वामतः शुभकराः प्रवदन्ति
दार्व्वीघाटदराटकसुकञ्च॥
इति शुभाशुभशकुनानि॥"
इति हारीते द्वितीयस्थाने सप्तमेऽध्याये॥*॥
तथा च।
"शुष्ककाष्ठपलाशानां शुष्काणां पथि सङ्गमः।
मेध्यस्थे पतितास्तस्यदीनान्यरिपक्षतथा॥
मृदुशीतोऽनुकूलश्च सुगन्धिश्चानिलः शुभः।
खरोष्णोऽनिष्टगन्धश्च प्रतिलोमश्च गर्हितः॥
गन्धर्व्वादिषु सदा क्षेदशब्दश्च पूजितः।
विप्रध्वरशृङ्गेषु भेदशब्दस्तथैव च॥
रक्तपित्तातिसारेषु रुद्धशब्दः प्रशस्यते।
एवं व्याधिविशेषेण निमित्तमुपधारयेत्॥
तथैवाकुष्टहाकष्टमाक्रन्दरुदितस्वराः।
छर्द्दी वातपुरीषाणां शब्दो वै अर्द्धभोद्दयोः॥
प्रतिषिद्धं तथा भग्नं क्षुतं स्खलितमाहतम्।
दौर्म्मनस्यञ्च वैद्यस्य यात्रायां न प्रशस्यते॥"
इति सुश्रुते सूत्रस्थाने २९ अध्यायः॥)
यादईशः, पुं, (यादसां जलानां जलजन्तूनां वा ईशः।) समुद्रः। इति हेमचन्द्रः। ४। १३९॥
यादः, [स्] क्ली, (यान्ति वेगेनेति। या+असुन्। बाहुलकात् दागमश्च।) जलजन्तुः। इत्यमरः। १।१०।२०॥ (यथा, भगवद्गीतायाम्। १०।२९।
"अनन्तश्चास्मि नागानां वरुणो यादसा-
महम्॥"
जलम्। इति निघण्टुः। १। १२॥)
यादःपतिः, पुं, (यादसां पतिः।) समुद्रः। इत्यमरः। १।१९।२०॥ वरुणः। इत्यजयपालः॥
यादवः, पुं, (यदोरपत्यम्। यदु+अण्।) श्रीकृष्णः। इति शब्दरत्नावली॥ (यथा, भगवद्गीतायाम्। ११। ४१।
"सखेति मत्वा प्रसभं यदुक्तं
हे कृष्ण! हे यादव! हे सखेति।
अजानता महिमानं तवेदं
मया प्रमादात् प्रणयेन वापि॥")
ययातेर्ज्येष्ठपुत्रो यदुस्तस्य वंशः। यथा,—
"ययातेर्ज्येष्ठपुत्रस्य यदोर्वंशं नरर्षभ!।"
इत्युपक्रम्य।
"माधवा वृष्णयो राजन् यादवाश्चेतिसंज्ञितम्॥"
इति श्रीभागवते ९ स्कन्धे २३ अध्यायः॥
(यदुसम्बन्धिनि, त्रि। यथा, भागवते। ११।१।३।
"मन्येऽवनेर्भुवि गतोऽप्यगतं हि भारं
यद्यादवं कुलमहो अविषह्यमास्ते॥")
यादवी, स्त्री, (यदोरियमिति। यदु+अण्। ङीप्।) दुर्गा। इति चिकाण्डशेषः॥ (यदुवंशीयस्त्री-सामान्ये। यथा, महाभारते। १। ९५। १३।
"प्राचीन्वान् खलयज्ञकीमुपयेमे यादवीं तस्या-
मस्य जज्ञे संयातिः॥")
यादसांनाथः, पुं, (यादसां जलजन्तूनां नाथः। षष्ठ्या अलुक्।) वरुणः। इति हलायुधः॥
यादसांपतिः, पुं, (यादसां जलजन्तूनां पतिः। षष्ठ्या अलुक्।) समुद्रः। इत्यमरः। १।१।६४॥ वरुणः। इति मेदिनी। ते, २३२॥ (यथा, देवीभागवते। ३। ६। ३५।
"अग्निर्वै तपसक्षुष्टा कुबेरो यादसांपतिः।"
क्वचित् विशेषमपि। यथा, मार्कण्डेये। २२।११।
"यावदम्भसि देयं वरुणं यादसांपतिम्।")
याद्दक्, [ग्] त्रि, (य इव दृश्यते। दृश्+"यादृशादिषु दृशोऽनालोचने कञ्च।" ३।२।६०। इति चकारात् किन्। "आ सर्व्वनाम्नः।" ६।३।९१। इत्याकारादेशः।) य इव दृश्यते सः। इति सुग्धबोधव्याकरणम्॥ येमन इति भाषा। (यथा, भागवते। ४। २९। ६४।
"नानुभूतं क्वचानेन देहेनाद्दक्मश्नुते।
कदाचिदुपलभ्येत यद्रूपं याद्दगात्मनि॥")
याद्दच्छः, त्रि, (य इव दृश्यते यमिव पश्यति वा। दृश्+"दृशेः क्वच्छ वक्तव्यः।" ३।२।६०। इति

वार्त्तिकोक्तेः क्वः। "आसर्व्वनाम्नः।"६।३।९१। इत्यत्र "ङ्ते चेति वक्तव्यम्।" इत्यात्वम्।) य इव ङ्यते सः। इति सुग्धबोधव्याकरणम्॥ येमन इति भाषा॥

याड्ग्यः, त्रि, (य इव ङ्यते। ङ्या + "त्यदादिषु ङ्याः इति।"३।२।६०। इति कञ्। "आसर्व्वनाम्नः।" ६।३।९१। इत्याकारादेशः।) य इव ङ्यते सः। इति सुग्धबोधव्याकरणम्॥ येमन इति भाषा। (यथा, मनुः। ४। २५४।

"याड्ग्योऽस्य भवेदात्मा याड्ग्यश्च चिकीर्षितम्।
यथा चोपचरेदेनं तथात्मानं निवेदयेत्॥"

स्त्रियां याड्ग्यी॥)

यादोनाथः, पुं, (यादसां नाथः।) समुद्रः। इति राजनिर्घण्टः॥ (वरुणः। इति यादसांनाथशब्ददर्शनात्॥)

यादोनिवासः, पुं, (यादसां निवासः।) जलम्। इति हेमचन्द्रः। ४। १३५॥

यानं, क्ली, (या + ल्युट्। अर्द्धर्चादित्वात् पुंलिङ्गमपि।) राज्ञां सन्ध्यादिषड्गुणान्तर्गतगुणविशेषः। तत्तु उपचितशक्तेः कृतमूलराष्ट्रस्य शत्रोरास्कन्दनाय यात्रा। इति भरतः॥ (यथा, देवीभागवते। ५। ४। ११।

"यानमप्यधुना नैव कर्त्तव्यं सहसा पुनः॥"

यान्त्यनेनेति। या + ल्युट्।) हस्त्यश्वरथदोलादि। तत्पर्य्यायः। वाहनम् २ युग्यम् ३ पत्रम् ४ घोरणम् ५। इत्यमरः। २। ८। ५८॥ विमानम् ६ चक्रुः ७ यापनम् ८ गतिमित्रकम् ९। इति शब्दरत्नावली॥*॥ (यथा, मनुः। ३। ६४ ६५।

"शिल्पेन व्यवहारेण शूद्रापत्येन केवलैः।
शोभिरश्वैश्च यानैश्च कृत्या राजोपसेवया॥
अयाज्ययाजनैश्चैव नास्तिक्येन च कर्म्मणाम्।
कुलान्याशु विनश्यन्ति यानि हीनानि मन्त्रतः॥")

अथ चतुष्पदयानोद्देशः।

"ये ब्रह्मजात्यादिविभेदतोऽमी
मया निरुक्ता इह वाजितुल्याः।
दिशानया सर्व्वचतुष्पदानां
भेदो विधेयो विदुषादरेण॥
तथा यथाश्वादिकपोषणेन
यानेन वा दोषगुणौ भवेताम्।
तथा तथैवान्यचतुष्पदानां
प्रकीर्त्तितौ दोषगुणौ बुधेन॥
वरमयानमपोषणमेव वा
वरमिवान्यशरीरमपोषणम्।
न खलु दोषवतं च चतुष्पदं
स्तृणति पश्यति शोभनचेतनः॥
सुराविन्दुर्दूषयति पयोघटशतं यथा।
तथा सर्व्वं दूषयति दोषदुष्टश्चतुष्पदः॥"

इति चतुष्पदयानोद्देशः॥*॥

अथ द्विपदयानोद्देशः।

"मानुषैः पक्षिभिर्व्वापि तथान्यैर्द्विपदैरपि।
यानं स्याद्विपदं नाम तस्य भेदो ह्यनेकधा॥
सामान्यञ्च विशेषश्च तस्य भेदो द्विधा भवेत्॥"

तत्र सामान्यं यथा,—

"यानं यद्विपदाभ्यां सत् तद्दोलादिकमुच्यते।
चतुर्भिर्युक्तिसंयुक्तैर्दण्डधातुगुणाम्बरैः।
दोलेति कथ्यते तेषां नियमोऽयं प्रदर्श्यते॥"

तत्र समयः।

"उपेन्द्रमूलाहिशिवाग्निवर्जं
शुक्रेन्दुतारातिथियोगलग्ने।
दृष्ट्वामापुत्रयमाहवर्जं
दोलाधिकारोहणमाशमिष्टम्॥

दण्डकाष्ठस्य नियमे नियमश्चन्द्रदण्डवत्।
कनकं रजतं ताम्रं लौहं धातुचतुष्टयम्॥
चतुर्विधानामुद्दिष्टं ब्रह्मादीनां यथाक्रमम्।
सुराणामसुराणाञ्च चातुर्व्वर्ण्यस्यदाहृतम्॥
चिह्नरज्जुसमितो मध्ये तदर्द्धं पार्श्वयोर्द्वयोः।
विजया नाम दोलेयं विजयाय महीक्षिताम्॥
विजया मङ्गला क्रूरा शिवा क्षेमा शुभा क्रमात्।
वितस्त्येकैकसंवृद्धा दोलाः षट् स्युः सुखप्रदाः॥
कुम्भश्च पद्मकोषश्च शुक्लः पर्व्वत एव च।
चतुर्विधानां दोलासु कल्याणाय चतुष्टयम्॥
हंसः केकी शुको भृङ्गश्चतुष्टयमिदं क्रमात्।
कुम्भाद्यग्रे निधातव्यं चतुर्विधमहीक्षिताम्॥
अत्रापि वर्त्मविन्यासो विज्ञेयो नवदण्डवत्॥"

भोजस्तु।

"गजः प्रस्थानदोलायां रणदोलासु केशरी।
मृगो भ्रमणदोलायां क्रीड़ादोलासु षट्पदः॥
भुजङ्गमः प्रचुराज्ये वृषभो दानकर्म्मणि।
दोलोपर्य्युपरि न्यस्तो बहुभिर्मुनिभासनम्॥
यद्दण्डदण्डं यानं स्यात् तत् पर्य्यङ्कमिति स्मृतम्।
चिह्नरज्जुसमितो यानस्तद्दर्द्धपरिणाहवान्।
पर्य्यङ्कः क्षेमनामायं भर्त्तुः सर्व्वार्थसाधकः॥
क्षेमो मृत्युर्जयो दुःखच्छत्वारस्ते यथाक्रमम्।
वितस्त्येकैकसंवृद्धा यथा चाशुर्न सज्जनः॥
मणिधातुगुणादीनां नियमः पूर्व्ववन्मतः।
विशेषमथ वक्ष्यामि पर्य्यङ्कस्य यथाक्रमम्॥
मुक्तिश्च गजदन्तश्च मृगशृङ्गन्तथैव च।
अनूपादिकजातानां पर्य्यङ्केषु न्यसेत् क्रमात्॥
पद्मशङ्खगजाश्वालिहंसकोकशुकान् क्रमात्।
आदित्यादिग्रहाणां मणिरूपेण विन्यसेत्॥
महीन्द्राणां विशेषेण सिंहमानेव मुख्यते।
निर्म्माणे मुक्तिदण्डाश्च राज्यभोगसुखप्रदाः॥
तदेवावक्रदण्डन्तु खट्वायानमिति स्मृतम्।
अस्यापि पूर्व्ववन्मानमणिधात्वादिनिर्णयः॥
विशेषश्चरणोच्छ्रायः परिणाहार्द्धसम्मितः।
तदेव चेन्निश्चरणं पीठयानमिति स्मृतम्॥
तस्य भेदो द्विधा दण्डवक्रावक्रप्रभेदतः।
मानादिकं पूर्व्वतुल्यं विशेषाच्चतुरस्रता॥
एवमन्यानि भिन्नानि यानानि विविधानि च।
सामान्याख्यानि जानीयात् शिल्पिभिर्निर्म्मितानि वै॥
मनोहरत्वं लघुता दृढ़तेति गुणत्रयम्।
प्रोक्तं द्विपदयानानां सहजं भोजभूभुजा॥

इति सामान्यद्विपदयानकथनम्॥"

इति युक्तिकल्पतरुः॥*॥ विशेषद्विपदयानन्तु चतुर्दलशब्दे निष्पदयानोद्देशस्तु नौकाशब्दे द्रष्टव्यम्॥ (फलप्राप्तिहेतौ, त्रि। यथा, ऋग्वेदे। १०। ११०। २।

"तनूनपात् पथ ऋतस्य यानान्
मध्वा समञ्जन् स्वदयासुजिह्व॥"

"यानान् फलप्राप्तिहेतून् पथो मार्गान्।" इति तद्भाष्ये सायणः॥ या + भावे ल्युट्। गतिः। यथा, वाभटे शारीरस्थाने षष्ठेऽध्याये।

"यानं खरोष्ट्रमार्জ্জারकपिशार्দ্দूलशूकरैः।
यस्य प्रयाति शवलैर्वा स मृत्योर्वर्त्मनि स्थितः॥")

यानपात्रं, क्ली, (यानसाधनं पात्रम्। शाकपार्थिवादित्वात् समासः।) निष्पदयानविशेषः। जाहाज इति भाषा॥ तत्पर्य्यायः। वहित्रकम् २ वोहित्थम् ३ वहनम् ४ पोतः ५। इति हेमचन्द्रः। ३। ५३६॥ समुद्रयानम् ६। इति वराहपुराणम्॥ (यथा, हरिवंशे। १४५।६३।

"समुच्छ्रितैः सितैः पोतैः यानपात्रैश्च सर्व्वशः।
नौभिश्च भिक्षिकाभिश्च शुशुभे वरुणालयः॥")

यानसुखं, क्ली, (यानस्य सुखम् पुरोभागः।) रथादेः पुरोभागः। तत्पर्य्यायः। धूः २। इत्यमरः। २। ८। ५५॥

यापनं, क्ली, (या + णिच् + ल्युट्।) वर्ज्जनम्। कालक्षेपणम्॥ (यथा, कामन्दकीये। १७।३१।

"पूर्व्वसेनापतिर्नीचः कालयापनमाश्रितः॥")

निरशनम्। इति मेदिनी। ने, ११२॥ (यापयतीति। या + णिच् + ल्युः। प्रापके, त्रि। यथा, भागवते। ३। २२। ३३।

"अयातयामाक्षस्यासन् यामाः स्वान्तरयापनाः॥")

यामा, स्त्री, जटा। इति भूरिप्रयोगः॥

याप्यः, त्रि, (यापि + यत्।) अधमः। निन्दितः। इत्यमरः। ३।१।५४॥ (यथा, वृहत्संहितायाम्। १६। २२।

"यदशुभमशुभेऽह्नि मासजं तस्य वृद्धिः
शुभफलमपि चैवं याप्यमन्योऽन्यतायाम्॥")

यापनीयः। (यथा, सुश्रुते निदानस्थाने प्रथमेऽध्याये।

"शोणितं तदसाध्यं स्यात् याप्यं संवत्सरोत्थितम्॥")

क्षेपणीयकालादिः। इति मेदिनी। ये, ४८॥

याधिविशेषः। यथा,—

"साध्या याप्या असाध्याश्च व्याधयस्त्रिविधाः स्मृताः।
सुखसाध्यः कष्टसाध्यो द्विविधः साध्य उच्यते॥

याप्यलक्षणमाह।

यापनीयस्तु तं विद्यात् क्रियां धारयते हिताम्।
क्रियायाञ्च निवृत्तायां सद्यो यश्च विनश्यति॥
प्राप्ता क्रिया धारयति सुखिनं याप्यमातुरम्।
प्रपतिष्यदिवागारं स्तम्भो यत्नेन योजितः॥
साध्या याप्यत्वमायान्ति याप्याश्चासाध्यतां तथा।
घ्नन्ति प्राणानसाध्यास्तु नराणामक्रियावताम्॥

अक्रियावतां चिकित्सारहितानाम्।" इति भावप्रकाशः॥

याप्ययानं, क्ली, (याप्यं अधमं यानम्।) शिविका। इत्यमरः। २। ८। ५३॥

यामः, पुं, (यभ्यते इति। यभ+घञ्।) मैथुनम्। यथा। वृषाश्वयोर्यामेऽर्थे सनू। इति लिधुपादे वोपदेवः। ८४६॥ (यथा, भागवते। ६। १६। ६।

"पीवानं श्मश्रुलं प्रेष्ठं मीढांसं यामकोविदम्।
स एकोऽजदृषस्तासां वक्त्रीनां रतिवर्द्धनः।
रेमे कामग्रहग्रस्त आत्मानं नावबुध्यत॥")

यामः, पुं, (याति यायते वा। या+"अर्त्तिसुहुसृधृक्षिक्षुभायावापदियक्षिनीभ्यो मन्।" उणा० १।१४०। इति मन्। यम्+घञ् वा।) दिवारात्रोश्चतुर्थभागैकभागः। तत्पर्य्यायः। प्रहरः २। इत्यमरः। १।४।६॥ (यथा, मनौ। ७। १४५।

"उत्थाय पश्चिमे यामे कृतशौचः समाहितः।
हुताग्निर्ब्राह्मणांश्चार्च्य प्रविशेत् स शुभां सभाम्॥")

संयमः। इति मेदिनी। मे, २४॥ (गमनम्। यथा, ऋग्वेदे। १। ४८। ४।

"उषो ये ते प्र यामेषु युञ्जते।"

"यामेषु गमनेषु।" इति तद्भाष्ये सायणः॥ गमनसाधनः। यथा, ऋग्वेदे। ४। ५१। ४।

"कुवित्स देवीः सनयो नवो वा
यामो बभूयादुषसो वो अद्य॥"

"यामो गमनसाधनः स रथः।" इति सायणः॥ देवगणभेदः। यथा, मार्कण्डेयपुराणे। १५। १८।

"यज्ञस्य दक्षिणायान्तु पुत्रा द्वादश जज्ञिरे।
यामा इति समाख्याता देवाः स्वायम्भुवेऽन्तरे॥")

यामघोषः, पुं, (यामे प्रतियामे घोषः रवोऽस्य। प्रतिप्रहरं रवकरणादेवास्य तथात्वम्।) कुक्कुटः। इति शब्दमाला॥

यामघोषा, स्त्री, (यामे यामे घोषोऽस्याः। यामान् प्रहरान् घोषति शब्दायत इति वा। घुष्+अच्। टाप्।) यन्त्रविशेषः। घड़ी इति भाषा। तत्पर्य्यायः। नाली २ घटी ३ यामनाली ४ यमेरुका ५ दण्डटक्का ६। इति चिकाण्डशेषः॥

यामनाली,, स्त्री, (यामस्य नालीव।) यामघोषा। इति चिकाण्डशेषः॥

यामनेमिः, पुं, इन्द्रः। इति चिकाण्डशेषः॥

यामलं, क्ली, युगलम्। इति हेमचन्द्रः। ६। ६०॥ तन्त्रशास्त्रविशेषः। तस्य लक्षणं यथा,—

"सृष्टिश्च ज्योतिषाख्यानं नित्यकृत्यप्रदीपनम्।
क्रमसूत्रं वर्णभेदो जातिभेदस्तथैव च।
युगधर्म्मश्च संख्यानो यामलस्याष्टलक्षणम्॥"

तत्तु षड्विधम्। आदियामलम् १ ब्रह्मयामलम् २ विष्णुयामलम् ३ रुद्रयामलम् ४ गणेशयामलम् ५ आदित्ययामलम् ६। इति वाराहीतन्त्रम्॥ एषां श्लोकसंख्या तन्त्रशब्दे द्रष्टव्या॥

यामवती, स्त्री, (यामः प्रहरः अस्त्यस्यामिति॥ याम+मतुप्। मस्य व ङीप्।) रात्रिः। इति राजनिर्घण्टः॥

यामातृ, [तृ] पुं, (जामातः ऋणोरादित्वात्। जस्य यः।) जामाता। दुहितुः पतिः। इत्यमरटीका शब्दरत्नावली च॥ यामातुर्विष्णुतुल्यत्वं तस्य गृहे कन्यादातुर्दौहित्रजननात् प्राक् भोजननिषेधश्च यथा, कामधेनावादित्यपुराणम्।

"विष्णुं यामातरं मन्ये तस्य मन्युं न कारयेत्।
अप्रजायान्तु कन्यायां नाश्नीयात्तस्य वै गृहे॥"

इत्युद्वाहतत्त्वम्॥

यामार्द्ध, क्ली, (यामस्यार्द्धम्।) प्रहरस्यार्द्धम्। तस्याधिपा यथा,—

"वारेशादर्द्धयामेषु राज्ञाद्यैः पञ्च षट्क्रमात्।
अधिपाः स्युर्ग्रहास्तत्र यथार्काद्ये भवन्ति हि॥
रवीज्येन्द्वसृगुज्ञाजशनिज्ञरवयो निशि।
रविशुक्रज्ञराचीशशनीज्यकुजभास्कराः॥
दिने तृज्याः परेऽह्येवं तत्राद्यत्राद्यतुर्यहाः।
पापदर्शे भवेद्दृष्टिः शुभदर्शे शुभं भवेत्॥
शुभग्रहस्य दृष्टे तु कर्म्मारम्भाच्छुभं भवेत्।
आरम्भात् पापदृष्टे तु कर्म्म निष्फलतां व्रजेत्॥
यस्यार्द्धयामभस्तस्यैव प्राग्दृष्टः समुदाहृतः।
षट् षट् परीत्य दृष्टाश्च त्रयो रात्रौ मतास्तथा॥
यामार्द्धाधिपसंख्यानो द्वितीयस्तु तदर्द्धतः।
तदर्द्धात्तु तृतीयः स्यात्तदर्द्धात्तु तुरीयकः॥
अर्द्धाभावे तु राहुः स्यात्तदर्द्धो वसुसंख्यकः।
भमार्द्धस्य परित्यागाद्दिवादृष्टाधिपा यथा॥"

इति ज्योतिषतत्त्वम्॥

यामिः, स्त्री, (याति कुलात् कुलान्तरमिति। या+बाहुलकात् मिः।) स्वसा। कुलस्त्री। इत्यमरः। २। ३। १४२॥ "स्वसा भगिनी। कुलस्त्री कुलवधूः। प्रहरे संयमे यामो यामिः स्वसृकुलस्त्रियोरित्यन्तःस्थादौ रभसः॥ जिह्मस्तु कुटिले निन्द्ये जामिः स्वसृकुलस्त्रियोरिति चवर्गतृतीयादावयः इति भरतमुकुटौ॥ यथा, जामयो यानि गेहानि शपन्त्यप्रतिपूजिताः॥ इति स्वामी॥ जै क्षये बाहुलकान्मिः। यद्वा जमु अदने बाहुलकादिण् जामिरिति। अन्तःस्थादौ या प्रापणे धातुर्बोधः।" इति रामाश्रमः॥ (यथा, मनौ। ४। १८३।

"यामयोःशरसां लोके वैश्वदेवस्य वान्ववाः॥")

यामिनी। इति शब्दरत्नावली॥ धर्म्मस्य पत्नी। तस्याः कन्या नागवीथी। यथा,—

"अरुन्धती वसुर्यामिर्लम्बा भानुर्मरुत्वती।
सङ्कल्पा च मुहूर्त्ता च साध्या विश्वा च नामतः।
धर्म्मपत्न्यो दश त्वेतास्तासुतत्यानि मे शृणु।
लम्बायाश्चैव घोषोऽसौ नागवीथी तु यामिजा॥"

इति वह्निपुराणे कश्यपीयप्रजासर्गः॥

यामिकभटः, पुं, (यामे यामे नियुक्तः। "याम+ठक्। स चासौ भटश्चेति।) प्रहरिकः। चौकीदार इति भाषा। यथा,—

"उन्नादाम्बुदवर्हितान्धतमसः प्रभ्रष्टदिङ्मण्डले
काले जाग्रदुदग्रयामिकभटप्रारब्धकोलाहले।
कर्णस्यासुहृदर्गलाम्बुवडवावह्नेर्यदन्तःपुरा-
दायातासि यदम्बुजाक्षि! क्षतकं मन्ये भयं योषिताम्॥"

इति कर्णाटः॥

यामित्रं, क्ली, लग्नात् सप्तमराशिः। यथा,—

"धीस्थानं पञ्चमं ज्ञेयं यामित्रं सप्तमं स्मृतम्।
द्यूनं द्यूनं तथास्तास्यं षट्कोणं रिपुमन्दिरम्॥"

यामित्रवेधो यथा,—

"पापात् सप्तमगः शुभी यदि भवेत् पापेन युक्तोऽथवा
यत्रैनाशु विवर्जयेन्मुनिमतो दोषोऽप्ययं कथ्यते।
यात्रायां विपदो गृहे सुतवधः क्षौरेषु रोगोद्भवो-
ऽप्युद्वाहे विधवा व्रते तु मरणं शूलश्च पुंस्कर्म्मणि॥
रविमन्दकुजाक्रान्तं नगाङ्गात् सप्तमं त्यजेत्।
विवाहयात्राचूड़ासु गृहकर्म्मप्रवेशने॥"

इति यामित्रवेधः॥ * ॥

अस्य प्रतिप्रसवो यथा।

"मूलत्रिकोणनिजमन्दिरगोऽथ पूर्णो
मित्रर्क्षसौम्यगृहगोऽथ तदीक्षितो वा।
यामित्रवेधविहितानपहृत्य दोषान्
दोषाकरः सुखमनेकविधं विधत्ते॥"

इति ज्योतिस्तत्त्वम्॥

यामिनी, स्त्री, (यामाः सन्त्यस्याम्। याम+इनिः। ङीप्।) रात्रिः॥ (यथा, महाभारते। १२। ५३। १।

"ततः शयनमाविश्य प्रसुप्तो मधुसूदनः।
याममात्रावशेषायां यामिन्यां प्रत्यबुध्यत॥")

हरिद्रा। इत्यमरः। १। ४। ४॥ (कश्यपपत्नी। यथा, भागवते। ६। ६। २१।

"तार्क्ष्यस्य विनता कद्रूः पतङ्गी यामिनीति च।
पतङ्गाच्छत पतगान् यामिनी शलभानथ॥"

प्रजापतेर्द्वितीया तनया। यथा, कथासरित्सागरे। ४६। २२।

"प्रजापतेर्यामिनीं नाम द्वितीयां तनयां ददौ॥")

यामिनीपतिः, पुं, (यामिन्याः पतिः।) चन्द्रः। इति शब्दरत्नावली॥ (यथा, भागवते। १०। ३५। २५।

"यदुपतिर्द्विजराजविहारो
यामिनीपतिरिवैष दिनान्ते।
सुहृदिच्छ उपयाति दुरन्तं
मोचयन् व्रजगवां दिनतापम्॥")

कर्पूरम्। इत्यमरः॥

यामी, स्त्री, (यमस्येयम्। यमो देवतास्याः इति वा। यम+अण्। ङीप्।) दक्षिणदिक्। इति राजनिर्घण्टः॥ (यथा, ज्योतिषे।

"————याम्यां गुरौ न व्रजेत्।"

यामि+ङीप्।) कुलस्त्री। इति शब्दरत्नावली॥ (यथा, मनौ। ४।१८०।

"मातापितृभ्यां यामीभिर्भ्रात्रा पुत्रेण भार्य्यया।
दुहित्रा दासवर्गेण विवादं न समाचरेत्॥"

धर्म्मपत्नी । यथा, विष्णुपुराणे ।१।१५।१०५।
"अरुन्धती वसुर्यामी लम्बा भानुमरुत्वती ।
सङ्कल्पा च मुहूर्त्ता च साध्या विश्वा च
ता दश ॥")

यामुनं, क्ली, (यमुनायां भवम् । यमुना + अण् । यमुनाया इदमित्यण् वा ।) ओतोऽञ्जनम् । इत्यमरः । २।६।१०० ॥ (अस्य पर्य्यायो यथा,—
"अञ्जनं यामुनञ्चापि कापोताञ्जनमित्यपि ।
तत्तु ओतोऽञ्जनं कृष्णं सौवीरं श्वेतमीरितम् ॥"
इति भावप्रकाशस्य पूर्ब्बखण्डे प्रथमे भागे ॥)

पुं, जनपदभेदः । यथा, भागवते । १।१०।३४ ।
"कुरुजाङ्गलपाञ्चालान् शूरसेनान् स यामुनान् ।
ब्रह्मावर्त्तं कुरुक्षेत्रं मत्स्यान् सारस्वतानथ ॥"

पर्ब्बतविशेषः । यथा, रामायणे । ४।४०।२१ ।
"कालिन्दीं यमुनां रम्यां यामुनञ्च महा-
गिरिम् ।"

तीर्थभेदः । यथा, महाभारते । ३ । ८४ । ४१ ।
"यमुनाप्रभवं गत्वा समुपस्पृश्य यामुनम् ।
अश्वमेधफलं लब्ध्वा स्वर्गलोके महीयते ॥")

यमुनासम्बन्धिनि, त्रि । (यथा, प्रायश्चित्ततत्त्वे ।
"त्रिभिः सारस्वतं तोयं सप्तभिस्त्वथ यामुनम् ।
नार्म्मदं दशभिर्मासैर्गाङ्गं वर्षेण शीर्य्यति ॥")

यामुनेष्टकं, क्ली, (यामुनभिवेष्टकम् ।) सीसकम् । इति जटाधरः ॥ (विशेषोऽस्य सीसकशब्दे विज्ञेयः ॥)

यामेयः, पुं, भागिनेयः । यामिः स्वस्रुकुलस्त्रियो-रित्यनुशासनात् यामेरपत्यमित्यर्थे ढ्यञ्-(ढक्) प्रत्ययनिष्पन्नः ॥ (यामी अस्य धर्म्मपत्न्या अपत्य-मिति । यामिपुत्रः । यथा, भागवते । ६।६।६ ।
"कङ्कटः सङ्कटस्यस्य कीकटस्तनयो यतः ।
भुवो दुर्गाणि यामेयः स्वर्गो नन्दिस्ततोऽभवत् ॥")

याम्यः, पुं, (यामौ निवासोऽस्य । यामी + यत् ।) अगस्त्यमुनिः । चन्दनवृक्षः । इति मेदिनी । ये, ४८ ॥ (यमस्यायमिति । यम + ण्यः । यमदूतः । यथा, मार्कण्डेये । ११ । ३० ।
"कृष्यमाणस्य याम्यैश्च नरकेषु च पात्यतः ।
पुनश्च गर्भो जन्माथ मरणं नरकस्तथा ॥")

याम्या, स्त्री. (यमस्येयं यमो देवतास्या इति वा । यम + "यमाच्चेति वक्तव्यम् ।" ४।१।८५ । इति वार्त्तिकोक्त्या ण्यः । टाप् ।) दक्षिणदिक् । (यथा, रामायणे । २ । १०३ । २६ ।
"प्रगृह्य तु महीपालो जलपूरितमञ्जलिम् ।
दिशं याम्यामभिमुखो रुदन् वचनमब्रवीत् ॥")
भरणीनक्षत्रम् । इति मेदिनी । ये, ४८ ॥ (यमसम्बन्धिनि, त्रि । यथा, महाभारते ।२।८।२।
"कथयिष्ये सभां याम्यां युधिष्ठिर ! निबोध ताम् ।
वैवस्वतस्य यां प्राप्य ! विश्वकर्म्मा चकार ह ॥")

याम्यायनं, क्ली, (याम्यायामयनं याम्यं अयन-मिति वा ।) दक्षिणायनम् । यथा, मलमासतत्त्वे ।
"याम्यायने हरौ सुप्ते सर्व्वकर्म्माणि वर्ज्जयेत् ॥"

याम्योद्भूतः, पुं, (याम्यायामुद्भूतः ।) शीतालवृक्षः । इति राजनिर्घण्टः ॥

यायजूकः, पुं, (पुनः पुनर्यजति । यज् + यङ् । "यजजपदशां यङः ।" ३ । २ । १६६ । इति ऊकः ।) पुनःपुनर्यागकर्त्ता । तत्पर्य्यायः । इज्याशीलः । इत्यमरः । २ । ७ । ८ ॥ (यथा, रामायणे । २ । ७२ । १५ ।
"या गतिः सर्व्वभूतानां तां गतिं ते पिता गतः ।
राजा महात्मा तेजस्वी यायजूकः सतां गतिः ॥")

यायावरः, पुं, (पुनःपुनरतिशयेन वा याति देशा-द्देशान्तरं गच्छतीति । या + यङ् । "यञ्च यङः ।" ३।२।१७६। इति वरच् ।) अश्वमेधीयाश्वः । इति जटाधरः ॥ जरत्कारुमुनिः । इति त्रिकाण्ड-शेषः ॥ (ऋषीणां गणविशेषः । यथा, महा-भारते । १२ । २४३ । १७ ।
"तात प्रत्यक्षधर्म्माणस्तथा यायावरा गणाः ॥"
जरत्कारुमुनिरेवेतइत्यृषीयः । यथा, महाभारते । १ । १३ । ११ ।
"जरत्कारुरिति ख्यात ऊर्द्धरेता महातपाः ।
यायावराणां प्रवरो धर्म्मज्ञः संशितव्रतः ॥")

त्रि, पुनःपुनर्गमनशीलः । यथा,—
"यायावराः पुष्पफलेन चान्ये
प्राणैर्धनैर्वा जगदर्च्चनीयम् ॥"
इति भट्टिः । २ । २० ॥

(क्ली, याच्ञा । यथा, भागवते ।७।११।१६ ।
"वार्त्ता विचित्रा शालीनयायावरशिलोञ्छनम् ।
विप्रवृत्तिश्चतुर्द्धेयं श्रेयसी चोत्तरोत्तरा ।"
"यायावरं प्रत्यहं धान्ययाच्ञा ।" इति तत्र श्रीधरस्वामी ॥)

यावः, पुं, (यौति यूयते वा । यु + अच् अप् वा । ततः प्रज्ञाद्यण् ।) अलक्तः । इत्यमरः । २ । ६ । २२५ ॥ (तथास्य पर्य्यायः ।
"लाक्षा पलङ्कषालक्तो यावो नृचामयो जतु ॥"
इति भावप्रकाशस्य पूर्ब्बखण्डे प्रथमे भागे ॥
यथा, नैषधे । २२ । ४६ ।
"ततस्तदौष्ठाधरयावयोगा-
दुदेति बिम्बारुणबिम्ब एषः ॥"
यव एव । स्वार्थेऽण् । यावः । यथा, तैत्तिरीय-संहितायाम् । ६ । ३ । ६ । २ ।
"यावानां भागोऽस्य यावानामाधिपत्यमिति ॥")

यावकः, पुं, (यव एव यावः स इवेति इवार्थे कन् । यद्वा, याव एव । याव + "यावादिभ्यः कन् ।" ५ । ४ । २६ । इति स्वार्थे कन् ।) कुल्माषः । इत्यमरः । २ । ६ । १६ ॥ "हे बोरोध्यान्ये । कुलत्थ इत्यन्ये माषाकृतिपर्व्वे काश्मीरेषु तुल-सीति ख्याते । इति सुभूतिः ॥ यव इव गुणेन इति यवकः विकारसंश्लेषे कः । यवक एव यावकः स्वार्थे णः । कुलेन मस्यति परिणमति कुल्माषः मसीर्य ईः परिणामे घञ् मनीषादित्वादलुक् । कुल्माषो दन्त्यसकारवान् मूर्द्धन्यषकारवांश्च । कुल्माषो रभसश्चेति दन्त्यान्ते रचित इति मधुः ॥ कुल्माषो यावके पुंसि काङ्क्षिके तु नपुंसकमिति मूर्द्धन्यान्ते रभसः ।" इति भरतः ॥

"यवकः स्यात्तु कुल्माषः कुल्मासो यावकोऽपि च ।
वोरवाख्ये षष्टिके वा कुल्मे काश्मीरदेशजे ।
शालिधान्येषु चत्वार इति केचित् प्रचक्षते ॥"
इति शब्दरत्नावली ॥ * ॥

यावाशम् । इति हेमचन्द्रः ॥ (यथा, मनौ ।११। १२६ ।
"सङ्करापाकरीषासु मार्गं शोधनमेव च ।
मलिनी करणीयेषु तप्तः स्याद्यावकैस्त्र्यहम् ॥")
अलक्तकः । इति शब्दरत्नावली ॥ (यथा, किराते । ५ । ३६ ।
"इह सनियमधोः सुरापगाया-
सुषसि सयावकसक्थपादलेखा ।
कथयति शिवयोः शरीरयोगं
विषमपदा पदवी विवर्त्तनेषु ॥")

यावज्जीवं, अ, क्ली, (यावत् जीवतीति । जीव + "यावति विन्दजीवोः ।" ३ । ४ । ३० । इति णमुल् ।) यावदायुः । जीवनपर्य्यन्तम् । यथा, "यावज्जीवमहं मौनी ब्रह्मचारी च मे पिता ।
माता च मम वन्ध्यासीदपुत्रश्च पिता मम ॥"
इति आर्हतशब्दटीकायां भरतः ॥

यावत्, अ, (यद् + डावतुः ।) साकल्यम् । अवधिः । मानम् । अवधारणम् । इत्यमरः । ३ । ३ । २४५ ॥ "साकल्ये निरवशेषे । यथा । यावद्दत्तं तावद्भुक्तं ॥ अवधौ मर्य्यादायाम् । मूलात् शाखां यावत् प्रकाण्डः ॥ मानं प्रमा-णम् । यावद्गृहाणि तावद्भित्तयः ॥ अवधारण-मियत्तापरिच्छेदः । इयतो भाव इयत्ता परि-माणं तस्य परिच्छेदो निश्चयः । यथा यावत् पात्रं तावद्ब्राह्मणानामन्नस्य । यावत् कार्त्स्न्ये-ऽवधारणे प्रशंसायां परिच्छेदे मानाधिकार-सम्भ्रमे पक्षान्तरे चेति मेदिनी ।" इति भरतः ॥ (यत्परिमाणमस्य इत्यर्थे । यत् + "यत्तदेतेभ्यः परिमाणे वतुप् ।" ५ । २ । ३६ । इति वतुप् । "आसर्व्वनाम्नः ।" ६ । ३ । ६१ । इत्यालम् ।) यत्परिमिते, त्रि । तत्र यावान् यावती यावत् इति रूपत्रयं भवति । यच्छब्दात् निपातनादतु-प्रत्ययनिष्पन्नः । इति तद्धितपादे वोपदेवः ॥ (यथा, भागवते । २ । ६ । ३१ ।
"यावानहं यथा भावो यद्रूपगुणकर्म्मकः ।
तथैव तत्त्वविज्ञानमस्तु ते मदनुग्रहात् ॥"
यथाच मनुः । ८ । १५५ ।
"यावती सम्भवेद्वृत्तिस्तावतीं दातुमर्हसि ॥"
तथाच याज्ञवल्क्यः । २ । २६४ ।
"यावत् ग्रस्यं विनश्येषु तावत् स्यात् चैत्रिणः
फलम् ॥")

यावतिथः, त्रि, (यावतां पूरणः । यावत् + "तस्य पूरणे डट् ।" ५।२।४८ । इति डट् । "बहोरि-थुक् ।"५।२।५३। इति इथुगागमश्च ।) यावत्परि-माणम् । इति सुग्धबोधव्याकरणम् ॥ (यथा, मनुः । १ । २० ।
"आद्याद्यस्य गुणस्यैषामवाप्नोति परः परः ।
यो यो यावतिथश्चैषां स स तावद्गुणः स्मृतः ॥")

याष्टीकः

यावनः, पुं, (यवने यवनदेशे भवः। यवन+अण्।) सिङ्घाख्यगन्धद्रव्यम्। इत्यमरः। २।४।१२८॥ (विवृतिरस्य सिङ्घकशब्दे ज्ञातव्या॥)

यावनालः, पुं, (यवनाल एवेति। यवनाल+स्वार्थे अण्।) धान्यविशेषः। जोयार इति भाषा। तत्पर्य्यायः। यवनालः २ शिखरी ३ वृत्ततण्डुलः ४ दीर्घनालः ५ दीर्घशूरः ६ चेत्रेक्षुः ७ इक्षुपत्रकः ८। तस्य गुणाः। धवलत्वम्। गौल्यत्वम्। बल्यत्वम्। त्रिदोषजित्त्वम्। वृष्यत्वम्। रुच्यत्वम्। अर्शो यक्ष्मगुल्मव्रणनाशित्वञ्च। इति राजनिर्घण्टः॥

यावनालशूरः, पुं, (यावनाल इव शूरः।) शूरभेदः। जोहुरली इति हिन्दी भाषा। तत्पर्य्यायः। नदीजः २ दृढ़त्वक् ३ वारिसम्भवः ४ यावनालनिभः ५ खरपत्रः ६। अस्य मूलगुणाः। ईषन्मधुरत्वम्। रुच्यत्वम्। शीतत्वम्। पित्तदाहनाशित्वम्। पशूनामबलप्रदत्वञ्च। इति राजनिर्घण्टः॥

यावनाली, स्त्री, (यवनालस्य विकारः। यवनाल+अण्। ततो ङीप्।) यावनालशर्करा। तत्पर्य्यायः। हिमोत्पन्ना २ हिमानी ३ हिमशर्करा ४ क्षुद्रशर्करिका ५ क्षुद्रा ६ गड़भा ७ जलविन्दुजा ८। अस्या गुणाः। गौल्यत्वम्। उष्णत्वम्। तिक्तत्वम्। अतिपिच्छिलत्वम्। वातघ्नत्वम्। सारकत्वम्। रुच्यत्वम्। दाहपित्तास्रदाथिल्यञ्च। इति राजनिर्घण्टः॥

यावशूकः, पुं, (यवशूक एव। यवशूक+स्वार्थे-अण्। यद्वा, यावस्य यवस्य शूकः कारणत्वेनास्त्यस्येति। अर्शआद्यच्।) यवक्षारः। इति रत्नमाला॥ (यथा, सुश्रुते चिकित्सास्थाने १ अध्याये।

"क्षौमं श्वेतं पिचुं फेनं यावशूकं ससत्त्वकम्। कर्कशानि च पत्राणि लेखनार्थं प्रदापयेत्॥")

यावसः, पुं, (यूयते इति। यु+"वहियुभ्यां णित्।" उणा० ३।११६। इति असच्। तस्य णित्त्वञ्च। यद्वा, यवसानां समूहः। यवस+"तस्य समूहः।" ४।२।३७। इत्यण्।) यवससमूहः। इति सिद्धान्तकौमुदी॥

यावं, त्रि, (यूयते इति। यु+"आसुयुवपिरपिलपिदपिचमश्च।" ३।१।१२६। इति ण्यत्।) मिश्रणीयम्। यूयते यत्। इति मुग्धबोधव्याकरणम्॥

याशोधरेयः, पुं, (यशोधरस्यापत्यं पुमान्। यशोधर+ढक्।) शाक्यमुनिपुत्रः। इति हेमचन्द्रः॥

याष्टीकः, पुं, (यष्टिः प्रहरणमस्य। यष्टि+"प्रहरणयष्टेरीकक्।" ४।४।५६। इति ईकक्।) यष्टिधारियोद्धा। लेठेरा इति भाषा। तत्पर्य्यायः। यष्टिहेतिकः २। इत्यमरः। २।८।७०॥ (यथा, राजतरङ्गिण्याम्। ६। २०३।

"आकलय्य हृतं दिष्ट्या सन्त्यज्य प्रार्थनादिकम्। दृष्टे प्रत्युत याष्टीकांस्तस्य हन्तुं वसर्जयत्॥")

युक्तः

यासः, पुं, (यस+घञ्।) दुरालभा। इत्यमरः। २। ४। ६१॥ (यथा,—

"यासो यवासो दुःस्पर्शो धन्वयासः कुनाशकः। दुरालभा दुरालम्भा समुद्रान्ता च रोदिनी॥ गान्धारी कच्छुरानन्ता कषाया दुरभिग्रहा। यासः स्वादुः सरस्तिक्तस्तुवरः शीतलो लघुः॥ कफमेदोमदभ्रान्तिपित्तास्रकुष्ठकासजित्। व्रणाविसर्पवातास्रवमिज्वरहरः परः॥"

इति भावप्रकाशस्य पूर्ब्बखण्डे प्रथमे भागे॥)

यासा, स्त्री, (यासः प्रयत्नोऽस्यस्या इति अर्शआद्यच्। टाप्।) मदनशलाकापत्त्री। इति शब्दमाला॥

युङ क निन्दने। इति कविकल्पद्रुमः॥ (चुरा०-आत्म०-सक०-सेट्।) ङ क, यावयते। इति दुर्गादासः॥ ("यावयते बाला वृद्धम्।" इति मनोरमा॥)

युञ् अ ग बन्धे। इति कविकल्पद्रुमः॥ (क्रया०-उभ०-सक०-सेट्।) अ ग, युनाति यो वयस्योऽपि न वेश्यावन्धकीजनैरिति हलायुधः। इति दुर्गादासः॥

युल मिश्रणे। अमिश्रणे। इति कविकल्पद्रुमः॥ (अदा०-पर०-अक०-सेट्।) ल, यौति। मिश्रणे यथा,—

"यौति काले कुलस्त्रीभिः चक्रसन्तानवृद्धये॥"

इति हलायुधः॥

अमिश्रणे समवायलक्षणे। अयुतसिद्धानामिति मिलितसिद्धानामित्यर्थः। इति दुर्गादासः॥

युक्, [ज्] त्रि, (युज्यते समाधत्ते इति। युज्यौ ङ समाधौ+क्विप्।) समाधिमान्। इति मुग्धबोधव्याकरणम्॥ (युज्यते परस्परमिति।) युग्मम्। इति शब्दरत्नावली॥ (यथा, मनुः। ३। २७७।

"युक्तु कुर्व्वन् दिनर्क्षेषु सर्व्वान् कामान् समश्नुते। अयुक्तु तु पितॄन् सर्व्वान् प्रजां प्राप्नोति पुष्कलाम्॥")

युक्, व, निन्दा। युज क ङ, निन्दे इत्यस्माद्भावे क्विप्प्रत्ययेन निष्पन्नम्॥ (एतच्चिन्त्यम्॥)

युक्तं, त्रि, (युज्यत स्म इति। युज्+क्तः।) न्याय्यम्। तत्तु न्यायागतद्रव्यादिकम्। इत्यमरः। २। ८। २४॥ (यथा, शाकुन्तले। १ अङ्के।

"जन्म यस्य पुरोर्वंशे युक्तरूपमिदं तव। पुत्रमेवं गुणोपेतं चक्रवर्त्तिनमाप्नुहि॥")

अपृथग्भूतम्। मिलितमित्यर्थः। इति मेदिनी। ते, ४७॥ (यथा, आनन्दलहर्य्याम्। १।

"शिवः शक्त्या युक्तो यदि भवति शक्तः प्रभवितुं न चेदेवं देवो न खलु कुशलः स्पन्दितुमपि। अतस्त्वामाराध्यां हरिहरविरिञ्चादिभिरपि प्रणन्तुं स्तोतुं वा कथमकृतपुण्यः प्रभवति॥")

युक्तं, क्ली, (युज्+क्तः।) हस्तचतुष्टयम्। इति मेदिनी। ते, ४७॥

युक्तः, पुं, (युज्यते स्म योगेनेति। युज्+क्तः।) अभ्यस्तयोगः। यथा,—

युक्तिः

"योगजो द्विविधः प्रोक्तो युक्तयुञ्जानभेदतः। युक्तस्य सर्व्वदा भानं चिन्तासहकृतोऽपरः॥"

इति भाषापरिच्छेदे। ६६॥

तस्य लक्षणं यथा, गीतायाम्। ६। ८।

"ज्ञानविज्ञानतृप्तात्मा कूटस्थो विजितेन्द्रियः। युक्त इत्युच्यते योगी समलोष्टाश्मकाञ्चनः॥"

"योगारूढ़स्य लक्षणं श्रेष्ठं चोक्तमुपसंहरति ज्ञानेति। ज्ञानमौपदेशिकं विज्ञानमपरोक्षानुभवः ताभ्यां तृप्तो निराकाङ्क्ष आत्मा चित्तं यस्य। अतः कूटस्थो निर्व्विकारः। अतएव विजितानि इन्द्रियाणि येन। अतएव समानि लोष्टादीनि यस्य। मृत्खण्डपाषाणसुवर्णेषु हेयोपादेयबुद्धिशून्यः स युक्तो योगारूढ़ इत्युच्यते॥" इति तट्टीकायां श्रीधरस्वामी॥

(रैवतमनोः पुत्रः। यथा, हरिवंशे। ७। २८।

"अथ पुत्रानिमांस्तस्य निबोध गदतो मम। धृतिमानव्ययो युक्तस्तत्त्वदर्शी निरुत्सुकः॥")

युक्तरसा, स्त्री, (युक्तः रसोऽस्याः।) राज्ञा। इत्यमरभरतौ। २।४।१४०॥ काँटा आमरुली इति भाषा। (तथास्याः पर्य्यायः।

"राज्ञा युक्तरसा रस्या सुवहा रसना रसा। एलापर्णी च सुरसा सुगन्धा श्रेयसी तथा॥"

इति भावप्रकाशस्य पूर्ब्बखण्डे प्रथमे भागे॥)

युक्ता, स्त्री, (युक्त+टाप्।) वृत्तविशेषः। इति रत्नमाला॥ एलाची इति भाषा॥

युक्तिः, स्त्री, (युज्यते इति। युज्+क्तिन्।) न्यायः। इति मेदिनी। ते, ४७॥ (यथा, पञ्चतन्त्रे। ३। १६३।

"तस्य तद्वचनं श्रुत्वा धर्म्मयुक्तिसमन्वितम्। उपगम्य ततोऽपृच्छत् कपोतः प्राह लुब्धकम्॥")

लोकव्यवहारः। इति व्यवहारमालिका॥

"धर्म्मशास्त्राविरोधे तु युक्तियुक्तो विधिः स्मृतः॥"

इति स्मृतिश्च॥

अनुमानम्। यथा,—

"युक्तिष्वप्यवसन्नासु सपक्षेनेनमर्हयेत्॥"

युक्तिरनुमानम्।

अनुमानेन विज्ञेयं न स्यातां पक्षसाक्षिणौ। इत्येकवाक्यत्वादिति विवरणम्॥ अथ युक्तिः। नारदः।

उल्काहस्तोऽग्निदो ज्ञेयः शस्त्रपाणिश्च घातकः। केशाकेशिगृहीतश्च युगपत् पारदारिकः॥ कुद्दालपाणिर्विज्ञेयः सेतुभेत्ता समीपगः। तथा कुठारहस्तश्च वनच्छेत्ता प्रकीर्त्तितः॥ प्रत्यक्षचिह्नैर्विज्ञेयो दण्डपारुष्यकृन्नरः। असाक्षिप्रत्यया ह्येते पारुष्ये तु परीक्षणम्॥ प्रत्यक्षचिह्नैः रुधिराक्तखड्गादिभिः। पारुष्यं वाक्पारुष्ये। शस्त्रः। लोष्टहस्तश्च चौर इति। नारदः।

अभीक्ष्णं दिश्यमानोऽपि प्रतिहन्यान्न तद्वचः। चिचतुःपञ्चकृत्वो वा परतोऽर्थं तमावहेत्॥

यदा धनिकेनाधमर्णिकश्चिचतुःपञ्चकृत्वो वा त्वं मे ऋणं धारयसीति पुनःपुनर्दिश्यमानोऽपि

न तद्वाक्यं प्रतिहन्ति तदोत्तरकालमनेनाभ्युपगतोऽयमर्थ इत्यवधार्य्य तमर्थमृणिकाय दापयेदित्यर्थः।" इति व्यवहारतत्त्वम् ॥ * ॥ नाट्यालङ्कारविशेषः। तस्य लक्षणम्। यथा।"युक्तिरर्थावधारणम्। उदाहरणं यथा,—

'यदिसमरमपास्य नास्ति मृत्यो-
र्भयमिति युक्तमितोऽन्यतः प्रयातुम्।
अथ मरणमवश्यमेव जन्तोः
किमिति सुधा मलिनं यशः कुरुध्वम् ॥'

इति वेणीसंहारः।" इति साहित्यदर्पणम् ॥ (उपायः। यथा, कथासरित्सागरे। ३६। ५६।
"तत्स्वङ्गभुजो देशान्निर्व्वास्यैतांश्चिरात् यथा।
तां पुत्र! चिन्तयेर्युक्तं त्वमन्यैर्भ्रातृभिः सह ॥"
भोगः। यथा, सूर्य्यसिद्धान्ते। ७। २४।
"त्रिचतुःकर्णयुक्त्याप्तास्ते द्विघ्नाख्यिच्यया हताः।
स्फुटाः खकर्णैस्त्रिंशाप्ता भवेयुर्मानलिप्तिकाः ॥"
प्रमाणविशेषः। तद्यथा,—
"अचासां तल्लयुक्तीनां किं प्रयोजनमित्युच्यते वाक्ययोजनमर्थयोजनञ्च।"
"असदादिप्रयुक्तानां वाक्यानां प्रतिषेधनम्।
स्ववाक्यसिद्धिरपि च क्रियते तल्लयुक्तितः ॥
यक्ता नोक्ताश्च ये ह्यर्था लीना ये चाप्यनिर्म्मलाः।
तेषोक्ता ये क्वचित्तन्त्रे तेषाञ्चापि प्रसाधनम् ॥
यथाम्बुजवनस्यार्कः प्रदीपो वेश्मनो यथा।
प्रबोधस्य प्रकाश्यार्थास्तथा तन्त्रस्य युक्तयः ॥"
इति सुश्रुते उत्तरतन्त्रे ६५ अध्यायः ॥)

युग, इ वर्ज्जने। इति कविकल्पद्रुमः ॥ (भ्वा०-पर०-सक०-सेट्।) अन्तःस्थादिः। इ, युङ्गते। इति दुर्गादासः ॥

युगं, क्ली, (युज्यत इति। युज् + घञ्। कुत्वम्। न गुणः। "युजेर्घञन्तस्य निपातनाद्गुणत्वं विशिष्टविषये च निपातनमिदमिष्यते। कालविशेषे रथाद्युपकरणे च युगशब्दस्य प्रयोगोऽन्यत्र योग एव भवति।" इति काशिका। ६। १। १६०।) युग्मम्। (यथा, शिशुपालवधे। ६। ७२।
"उपनेतुमुन्नतिमतेव दिवं
कुचयोर्युगेन तरसा कलिताम्।
रभसोत्थितासुपगतः सहसा
परिरभ्य कञ्चन बधूमरुधत् ॥")
कृतादिकालचतुष्टयम्। (यथा, गीतायाम्। ४। ८।
"परित्राणाय साधूनां विनाशाय च दुष्कृताम्।
धर्म्मसंस्थापनार्थाय सम्भवामि युगे युगे ॥")
वृद्धिनामौषधम्। हस्तचतुष्कम्। इति मेदिनी। गे, १६ ॥ (यथा, मार्कण्डेये। ४६। ३६।
"हे वितस्ती तथा हस्तो ब्राह्मतीर्थादिवेष्टयन्।
चतुर्हस्तं धनुर्दण्डो नाड़िका युगमेव च ॥")
देवानां द्वादशसहस्रवत्सरेण चतुर्युगं भवति। मनुष्यमानेन चतुर्युगपरिमाणं त्रिंशतिसहस्राधिकत्रिचत्वारिंशल्लक्षम्। तत्र सत्ययुगस्य मानम् १७२८००० वर्षाः। त्रेतायुगस्य १२९६००० वर्षाः। द्वापरयुगस्य ८६४००० वर्षाः। कलियुगस्य ४३२००० वर्षाः। इति श्रीभागवतमतम् ॥
तेषां भारतवर्षवर्त्तित्वं विवरणञ्च यथा,—
"चत्वारि भारते वर्षे युगानि ऋषयोऽब्रुवन्।
कृतं त्रेता द्वापरञ्च कलिश्चेति चतुर्युगम् ॥
पूर्व्वं कृतयुगं नाम ततस्त्रेता विधीयते।
द्वापरञ्च कलिश्चैव युगानि परिकल्पयन् ॥
चत्वार्याहुः सहस्राणि वर्षाणान्तु कृतं युगम्।
तस्य तावत् शती सन्ध्या सन्ध्यांशश्च तथाविधः ॥
इतरेषु ससन्ध्येषु ससन्ध्यांशेषु च त्रिषु।
एकापायेन वर्त्तन्ते सहस्राणि शतानि च ॥
त्रेतां त्रीणि सहस्राणि युगसंख्याविदो विदुः।
तस्यापि त्रिशती सन्ध्या सन्ध्यांशः सन्ध्यया समः ॥
द्वे सहस्रे द्वापरे तु सन्ध्यांशौ तु चतुःशते।
सहस्रमेकं वर्षाणां दिव्यं कलौ प्रकीर्त्तितम् ॥
द्वे शते च तथान्ये वै संख्यातञ्च मनीषिभिः।
एषा द्वादशसाहस्री युगसंख्या तु संज्ञिता ॥
कृतं त्रेता द्वापरञ्च कलिश्चेति चतुर्युगम्।
तत्र संवत्सराः स्पष्टा मानुषास्तान्निबोधत ॥
चत्वारिंशत्तथा त्रीणि कृतं युगमथोच्यते।
विंशतिश्च सहस्राणि कालो ह्येष चतुर्युगः ॥
पृथक्त्वेनेह वक्ष्यामि युगानि तु निबोधत।
नियुतानि दश द्वे च पञ्च चैवाब्द संख्यया ॥
अष्टाविंशसहस्राणि कृतं युगमथोच्यते।
अयुतन्तु तथा पूर्णं द्वे चान्ये नियुते पुनः ॥
षट्त्रिंशच्च सहस्राणि संख्यातानि तु संख्यया।
त्रेतायुगस्य संख्येषा मानुषेण तु कीर्त्तिता ॥
अष्टौ शतसहस्राणि वर्षाणां मानुषाणि तु।
चतुःषष्टिसहस्राणि वर्षाणां द्वापरं युगम् ॥
चत्वारि नियुतानि स्युर्वर्षाणान्तु चतुर्युगम्।
द्वात्रिंशच्च तथान्यानि सहस्राणि तु संख्यया ॥
एतत् कलियुगं प्रोक्तं मानुषेण प्रमाणतः।
एषा चतुर्युगाख्या मानुषेण प्रकीर्त्तिता ॥
चतुर्युगस्य संख्याता सन्ध्या सन्ध्यांशकेन च।।
एषा चतुर्युगाख्या तु साधिका लोकसम्मतिः।
कृतत्रेतादियुक्ता सा मनोरन्तरमुच्यते ॥"
इति मात्स्ये ११८ अध्यायः ॥ * ॥
युगधर्म्मो यथा,—
"ध्यानं परं कृतयुगे त्रेतायां ज्ञानमध्वरः।
द्वापरे यज्ञमेवाहुर्दानमेकं कलौ युगे ॥
ब्रह्मा कृतयुगे देवस्त्रेतायां भगवान् रविः।
द्वापरे दैवतं विष्णुः कलौ रुद्रो महेश्वरः ॥
ब्रह्मा विष्णुस्तथा सूर्य्यः सर्व्व एव कलिष्वपि।
पूज्यते भगवान् रुद्रश्चतुर्ष्वपि पिनाकधृक् ॥
आद्ये कृतयुगे धर्म्मश्चतुष्पादः सनातनः।
त्रेतायुगे त्रिपादः स्याद्द्विपादो द्वापरे स्थितः।
त्रिपादहीनस्त्रिष्वे तु सत्तामात्रेण तिष्ठति ॥"
इति कूर्म्मपुराणे युगधर्म्मकीर्त्तनं नाम २८ अध्यायः ॥ * ॥ युगावतारा यथा,—
"कृते युगे परं ज्ञानं कपिलादिस्वरूपभृत्।
ददाति सर्व्वभूतात्मा सर्व्वभूतहिते रतः ॥
चक्रवर्त्तिस्वरूपेण त्रेतायामपि स प्रभुः।
दुष्टानां निग्रहं कुर्व्वन् परिपाति जगत्त्रयम् ॥
वेदमेकं चतुर्भेदं कृत्वा शाखाप्रतेर्विभुः।
करोति बहुलं भूयो वेदव्यासस्वरूपधृक् ॥
वेदांस्तु द्वापरे यस्य कलेरन्ते पुनर्हरेः।
कल्किस्वरूपी दुर्वृत्तान् मार्गे स्थापयति प्रभुः ॥
एवमेष जगत् सर्व्वं परिपाति करोति च।
हन्ति चान्येष्वनन्तात्मा नास्त्यस्माद्व्यतिरेकि यत् ॥"
इति विष्णुपुराणे ३ अंशे २ अध्यायः ॥ * ॥
युगधर्म्मान्तरं यथा,—

जैमिनिरुवाच।

"कलौ युगे महाभाग! समायाते सुदारुणे।
भविष्यन्ति जनाः सर्व्वे कीदृशास्तद्वद स्व मे ॥

व्यास उवाच।

आद्यं सत्ययुगं प्राहुस्तत्त्रेताकृतं युगम्।
ततश्च द्वापरं विप्र! कलिमन्त्यं विदुर्बुधाः ॥
कृते धर्म्मश्चतुष्पादः सर्व्वधर्म्मरता जनाः।
वर्णाश्रमाचाररतास्तपोव्रतपरायणाः ॥
नारायणार्च्चनपराः शोकव्याधिविवर्जिताः।
सत्योक्तिभाषिणः सर्व्वे सदया दीर्घजीविनः ॥
धनधान्यादिसम्पन्ना हिंसादम्भविवर्जिताः।
परोपकारिणश्चैव सर्व्वशास्त्रविदस्तथा ॥
एवंविधाः सत्ययुगे सर्व्वे लोका द्विजोत्तम!।
राजधर्म्मसमाहिताश्च भूपाला जनपालिनः ॥
अहो सत्ययुगस्यास्ति कः संख्यातुं गुणान् क्षमः॥
अधर्म्माचरणं तत्र जनाः केचिन्न कुर्व्वते ॥ * ॥
त्रेतायुगे समायाते धर्म्मः पादोनतां गतः।
अल्पक्लेशान्विता लोकाः केचित् केचिद्दयाशयाः।
विष्णुध्यानरता लोका यज्ञदानपरायणाः।
वर्णाश्रमाचाररताः सुखिनः सुस्थचेतसः ॥
त्यक्ता भूमिसुरैः शूद्राः सर्व्वे ब्राह्मणसेविनः।
ब्राह्मणाश्च महात्मानो वेदवेदाङ्गपारगाः ॥
प्रतिग्रहनिवृत्ताश्च सत्यसन्धा जितेन्द्रियाः।
तपोव्रतरता नित्यं दातारो विष्णुसेविनः ॥
कालवर्षी तड़ित्वांश्च स्त्रियः सर्व्वाः पतिव्रताः।
वसुन्धरा च शस्याढ्या पुत्राश्च पितृसेविनः ॥*॥
त्रेतायुगस्यावसाने द्वापरे युग आगते।
द्विपादो भूतवान् धर्म्मः सुखदुःखान्विता नराः ॥
केचित् केचित् पापरताः केचिद्धर्म्मरतास्तथा।
केचित् केचित् गुणैर्हीनाः केचित् केचिन्महागुणाः ॥
अत्यन्तदुःखिनः केचित् केचित् चातिधनास्तथा।
प्रतिग्रहे ब्राह्मणाश्च कदाचित् कुर्व्वते स्पृहाम्।
भूभुजा धनलोभेन कदाचिद्दण्ड्यते प्रजाः।
विष्णुपूजापरा विप्राः शूद्राश्च द्विजसेविनः ॥
तदा विष्णुर्व्यासरूपी वेदभागं चकार ह ॥*॥
कलौ युगे च विप्रेन्द्र! सर्व्वपापैकमन्दिरे।
एकपादोऽभवद्धर्म्मः सर्व्वे पापरता जनाः ॥
ब्राह्मणाः क्षत्रिया वैश्याः शूद्राः पापपरायणाः।
निजाचारविहीनाश्च भविष्यन्ति कलौ युगे ॥
विप्रा वेदविहीनाश्च प्रतिग्रहपरायणाः।
अत्यन्तकामिनः क्रूरा भविष्यन्ति कलौ युगे ॥

परान्नलोलुपा नित्यं तथोव्रतपराङ्मुखाः ।
पाषण्डसङ्गलुब्धाश्च भविष्यन्ति कलौ युगे ॥
वित्तार्थं ब्राह्मणाः केचिन्कुहाकपटधर्म्मिणः ।
वल्काधरा भविष्यन्ति जटिलाः भस्मधारिणः ।
कलौ युगे भविष्यन्ति ब्राह्मणाः शूद्रधर्म्मिणः ॥
शूद्राश्च दीक्षागुरवो नित्यं ब्राह्मणधर्म्मिणः ।
कलौ यास्यन्ति निर्वृत्ता उत्तमा अपि नीचताम् ॥
नीचाश्च धनसम्पन्ना यास्यन्त्युच्चपदं प्रति ।
प्रदास्यन्त्युपकारिभ्यो दानानि सकला जनाः ॥
यत्नादपि च नेच्छन्ति कृषला विप्रवर्त्तनम् ।
मिच्छेहादद्दिष्यन्ति कुसाच्छ्राद्ध कलौ जनाः ॥
अधर्म्मबुद्धिदातारो धर्म्मबुद्धिविलोपिनः ।
परोच्चनिन्दकाः क्रूराः संमुखप्रियवादिनः ॥
परस्त्रीहिंसकाश्चैव मिथ्यावचनभाषिणः ।
भविष्यन्ति कलौ विप्राः परवित्ताभिलाषिणः ॥
गृहमायान्तमतिथिं समाराध्य विधानतः ।
धनलोभाद्वनिष्यन्ति नरा नरकभागिनः ।
ऋणोपजीविनश्चैव भविष्यन्ति कलौ युगे ॥
स्त्रीजिताः पुरुषाः सर्व्वे स्त्रियोऽप्यत्यन्तचञ्चलाः ।
दुर्नीतिर्व्वर्द्धते तासां स्वामिनश्च न संशयः ॥

जैमिनिरुवाच ।

मनःशुद्धिविहीनत्वात् सर्व्वेषां प्राणिनां मुने ! ।
अतः सर्व्वं त्वया प्रोक्तं मनो विषयदं मम ॥
कलौ सर्व्वे भविष्यन्ति मनःशुद्धिविवर्जिताः ।
तेषां यथा भवेत् कर्म्म सफलं ब्रूहि तद्गुरो ! ॥

व्यास उवाच ।

अनर्पितन्तु यत् कर्म्म तद्भवेन्निष्फलं खलु ।
एकेन मनसा विप्र ! सुदृढं कथ्यते मया ॥
विष्णुभक्तिमतां पुंसां न किञ्चिदफलं भवेत् ।
इति ते कथितं सर्व्वं यत्तं ब्राह्मणसत्तम ! ।
यत् श्रुत्वा भक्तिभावेन नरो मोक्षमवाप्नुयात् ॥"
इति प्राद्धे क्रियायोगसारे २५ अध्यायः ॥*॥

अपि च ।

"कृते धर्म्मश्चतुष्पाच्च सत्यं दानं तपो दया ।
धर्म्मपाता हरिः श्वेतः सन्तुष्टा ज्ञानिनो नराः ।
चतुर्व्वर्षसहस्राणि नरा जीवन्ति वै तदा ॥
क्षतान्ते क्षत्रियेर्विप्रा विट्शूद्राश्च जिता द्विजैः ।
शूरस्य प्रमतिः पुत्रो विष्णुः चक्रं जघान ह ॥*॥
त्रेतायुगे त्रिपाद्धर्म्मः सत्यदानदयात्मकः ।
नरा यज्ञपरास्तस्मिंस्तथा क्षत्रोद्भवं जगत् ॥
रक्तो हरिर्नरैः पूज्यो नरा दण्डव्रतायुधः ।
तत्र विष्णुर्भीमरथः क्षत्रियो राक्षसानहन् ॥*॥
द्विपाच्च द्वापरे धर्म्मः पीततायाच्युते गते ।
चतुःव्रताश्रुयो लोका द्विजक्षत्रोत्तराः प्रजाः ॥
तदा दृष्ट्वाऽथवुर्व्वीञ्च विष्णुर्व्यासस्वरूपधृक् ।
तदेकन्तु यजुर्व्वेदं चतुर्धा विभजत् पुनः ॥
ग्रिथ्यानध्यापयामास नामतस्तान्निबोध मे ।
ऋग्वेदमथ पौलस्त्यं सामवेदञ्च जैमिनिम् ॥
अथर्व्वाणं सुमन्तुन्तु यजुर्व्वेदं महामुनिम् ।
वैशम्पायनसंज्ञन्तु पुराणं सूतमेव च ॥
अष्टादश पुराणानि येषु वै हरिरेव हि ।
सर्गश्च प्रतिसर्गश्च वंशो मन्वन्तराणि च ॥
वंशानुचरितञ्चैव पुराणं पञ्चलक्षणम् ॥
ब्राह्मं पाद्मं वैष्णवञ्च शैवं भागवतन्तथा ।
भविष्यं नारदीयञ्च पुराणञ्चेति विस्तरम् ॥
मार्कण्डेयं तथाग्नेयं ब्रह्मवैवर्त्तमेव च ।
कौर्म्मं मात्स्यं गारुड़ञ्च वायवीयमनन्तरम् ॥
अष्टादशं समुदितं ब्रह्माण्डमिति संज्ञितम् ।
अन्यान्युपपुराणानि मुनिभिः कथितानि तु ॥
आद्यं सनत्कुमारोक्तं नारसिंहमथापरम् ।
तृतीयं स्कान्दमुद्दिष्टं कुमारेण तु भाषितम् ॥
चतुर्थं शिवधर्म्माख्यं साक्षान्नन्दीशभाषितम् ।
दुर्व्वाससोक्तमाश्चर्य्यं नारदोक्तमतः परम् ॥
कापिलं वामनञ्चैव तथैवोशनसेरितम् ।
ब्रह्माण्डं वारुणञ्चाथ कालिकाख्यमेव च ॥
माहेश्वरं तथा साम्बं सौरसर्व्वार्थसञ्चयम् ।
पराशरोक्तमपरं मारीचं भार्गवाख्यम् ॥
पुराणं धर्म्मशास्त्रञ्च वेदा अङ्गानि यानुमुने ! ।
न्यायः शौनक ! मीमांसा आयुर्व्वेदार्थशास्त्रकम् ।
गान्धर्व्वञ्च धनुर्व्वेदो विद्या ह्यष्टादश स्मृताः ।
द्वापरान्ते स च हरिर्भुवो भारमपाहरत् ॥*॥
एकपादस्थिते धर्म्मे क्षत्राताद्याच्युते गते ।
जनास्तदा दुराचारा भविष्यन्ति च निर्दयाः ॥
सत्त्वं रजस्तम इति दृश्यन्ते पुरुषे गुणाः ।
कालसञ्चोदितास्तेऽपि परिवर्त्तन्त आत्मनि ॥
प्रभूतञ्च यदा सत्त्वं मनोबुद्धीन्द्रियाणि च ।
तदा कृतयुगं विद्याद्दाने तपसि यद्रतिः ॥
यदा कर्म्मसु कार्य्येषु प्रवृत्तिर्यशसि देहिनाम् ।
तदा त्रेता रजोवृत्तिरिति जानीहि शौनक ! ॥
यदा लोभस्त्वसन्तोषो मानो दम्भोऽथ मत्सरः ।
कर्म्मणाञ्चापि काम्यानां द्वापरन्तद्रजस्तमः ॥
यदा सदानृतं तन्द्रीनिद्राहिंसादिसाधनम् ।
शोकमोहभयं दैन्यं स कलिस्तु तदा स्मृतः ॥
यस्मिन् जनाः कामिनोपि ग्रन्थत्कटुकभाषिणः ।
दस्युकृष्टा जनपदा वेदाः पाषण्डदूषिताः ॥
राजानश्च प्रजाभक्षाः शिश्नोदरपरा द्विजाः ।
अव्रता वटवोऽशौचा भिक्षवश्च कुटुम्बिनः ॥
तपस्विनो ग्रामवासा न्यासिनो नित्यलोलुपाः ।
ह्रस्वकाया महाहाराश्चौर्य्यमायोरुसाहसाः ॥
त्यक्ष्यन्ति भृत्याश्च पतिं भृत्यं भर्त्तार एव च ।
शूद्राः प्रतिग्रहीष्यन्ति तपोवेशोपजीविनः ॥
उद्विग्नाश्चानलङ्कारा पिप्राचसदृशाः प्रजाः ।
अस्नातभोजनेनाग्निदेवतातिथिपूजनम् ।
करिष्यन्ति कलौ प्राप्ते न च पिण्डोदकक्रियाम् ॥
स्त्रीपराश्च जनाः सर्व्वे शूद्रप्रायाश्च शौनक ! ।
बहुप्रजास्त्वभाग्याश्च भविष्यन्ति कलौ स्त्रियः ॥
शिरःकण्डूयनपरा आत्मां मेक्ष्यन्ति सत्पतेः ।
विष्णुं न पूजयिष्यन्ति पाषण्डोपहता जनाः ॥
कलेर्दोषनिधेर्विप्र अस्ति ह्येको महान् गुणः ।
कीर्त्तनादेव कृष्णस्य मुक्तबन्धः परं व्रजेत् ॥
कृते यद्ध्यायतो विष्णुं त्रेतायां यजतः क्रतुम् ।
द्वापरे परिचर्य्यायां कलौ तद्धरिकीर्त्तनात् ॥
तस्माज्ज्ञेयो हरिर्नित्यं ध्येयः पूज्यश्च शौनक ॥"
इति गारुड़े युगधर्म्माः । २२७ अध्यायः ॥

युगः, पुं, (युज्यते बलीवर्द्दौ अस्मिन्निति । युज् + घञ् । युजेर्घञन्तस्य निपातनादुगागत्वम् । इति काशिका । ६ । १ । १६० ।) रथवहनाङ्गम् । इति मेदिनी । गे, १६ ॥ जोयालि इति भाषा । (यथा,—

"नाभेव नः पारयतं युगेव
नध्येव न उपधीव प्रधीव ॥"
इति ऋग्वेदे । २ । ३६ । ४ ॥

"युगा इव यथा रथस्य युगे नध्या इव ।" इति तद्भाष्ये सायणः ॥ तथा च कथासरित्सागरे । ६० । १२ ।

"तस्येकदा वणिज्यार्थं गच्छतो मथुरां पुरीम् ।
भारवोढ़ा युगं कर्षन् भारेण युगभग्नतः ॥")

युगकीलकः, पुं, (युगस्य कीलकः ।) युगकाष्ठस्य कीलकः । जोयालेर खिल इति भाषा । तत्पर्य्यायः । शम्या २ । इत्यमरः । २ । ६ । १४ ॥

युगन्धरः, पुं, (युगं धारयतीति । धारि + "संज्ञायां भृतृवृजिधारिसहितपिदमः ।" ३ । २ । ४६ । इति खच् । "अरुर्द्विषदजन्तस्य मुम् ।" ६ । ३ । ६७ । इति मुम् ।) यत्र रथस्य युगकाष्ठमासज्यते तत्र । रथस्थाश्वा यत्र बध्यन्ते तद्युगकाष्ठं तद्युगं धरति युगन्धरः । इति भरतः ॥ तत्पर्य्यायः । कूबरः २ । इत्यमरः । २ । ८ । ५७ ॥ पर्व्वतविशेषः । यथा,—

"निषधो माल्यवान् विन्ध्यो हेमकूटो युगन्धरः ॥"
इति शब्दरत्नावली ॥

(तूणिपुत्रः । स च सात्यकेः पौत्रः । यथा, हरिवंशे । १६० । ३१ ।

"तूणेर्युगन्धरः पुत्र इति वंशः समाप्यते ॥")

युगपत्, व्य, एकदा । एककालीनम् । इत्यमरः । ३ । ४ । २२ ॥ (यथा, भागवते । ३ । ६ । २ ।

"कालसंज्ञां तदा देवीं बिभ्रच्छक्तिसुरक्रमः ।
त्रयोविंशतितत्त्वानां गणं युगपदाविशत् ॥")

युगपत्रः, पुं, (युगं पत्रमस्य ।) कोविदारवृक्षः । इति हेमचन्द्रः । ४ । ११८ ॥ युगपर्णवृक्षमात्रञ्च ॥

युगपत्रकः, पुं, (युगपत्र + स्वार्थे कन् ।) कोविदारवृक्षः । इत्यमरः । २ । ४ । २२ ॥ (यथास्य पर्य्यायः ।

"कोविदारश्चमरिकः कुद्दालो युगपत्रकः ।
कृष्णश्च ताम्रपुष्पश्च सान्तकः स्वल्पकेशरौ ॥"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥)

युगपत्रिका, स्त्री, (युगं पत्रमस्याः । कप् । टाप् । अकारस्येत्वञ्च ।) शिंशपावृक्षः । इति त्रिकाण्डशेषः ॥ (विवरणमस्याः शिंशपाशब्दे ज्ञातव्यम् ॥)

युगपार्श्वगः, पुं, (युगस्य पार्श्वं गच्छतीति । गम् + डः ।) अभ्यासार्थं लाङ्गलपार्श्वबद्धो गौः । पाँटे बाँधा गरु इति भाषा । तत्पर्य्यायः । प्रष्ठवाट् २ । इत्यमरः । २ । ६ । ६३ ॥

युगलं, क्ली, (युज्यते परस्परं संगच्छत इति । युज् + वृषादिभ्यः कलच् । व्यङ्कादित्वात् कुत्वम् ।) युग्मम् । इत्यमरः । २ । ५ । ३८ ॥ (यथा, भागवते । ४ । २६ । २० ।

"पद्मार्द्र पादयुगलमाह चोत्सङ्गलालिताम् ॥")

युगान्तः

युगलमन्त्रः, पुं, (युगलाख्यो मन्त्रः। श्राकपार्थिववत् समासः।) लक्ष्मीनारायणमन्त्रः। यथा,—
"इदं रहस्यं परमं लक्ष्मीनारायणात्मकम्।
राजंस्तवापि वक्ष्यामि प्रपत्तिं शरणागतिम्॥
द्वयात् परतरो मन्त्रो नास्ति सत्यं ब्रवीमि ते।
द्वयात् परतरो धर्म्मो नास्ति लोकेषु कञ्चन॥
सर्व्वेषां ज्ञानमन्त्राणां मध्ये युगलसंज्ञकम्।
मन्त्रं हि सर्व्वतः श्रेष्ठं ज्ञानजप्यमनुत्तमम्॥
सर्व्वतो युगलं मन्त्रं कार्य्यं परतरं नृप!।
गुह्याद्गुह्यतमं जातु ज्ञेयं तत्तदुपासकैः॥"

इति पाद्मोत्तरखण्डे २५ अध्यायः॥

युगलाख्यः, पुं, (युगलमित्याख्या यस्य।) वर्ब्बरवृक्षः। इति राजनिर्घण्टः॥ (त्रि, युग्मनामकः॥

युगांशकः, पुं, (युगस्य अंशकः खण्डांशः इति।) वत्सरः। इति हारावली।२८॥ युगविभाजकश्च॥

युगाद्या, स्त्री, (युगस्याद्यादिभूता।) युगारम्भतिथिः। यथा। "अथ युगाद्याः। तासु च।
'युगाद्या वर्षवृद्धिश्च सप्तमी पार्व्वतीप्रिया।
रवेरुदयमीक्षन्ते न तत्र तिथियुग्मता॥'

इत्यनेन व्यवस्था॥

ब्रह्मपुराणे।
'वैशाखे शुक्लपक्षे तु तृतीयायां कृतं युगम्।
कार्त्तिके शुक्लपक्षे तु त्वेतायां नवमेऽहनि॥
अथ भाद्रपदे कृष्णत्रयोदश्यान्तु द्वापरम्।
माघे च पौर्णमास्यां वै घोरं कलियुगं स्मृतम्॥
युगारम्भास्तु तिथयो युगाद्यास्तेन विश्रुताः॥'
अत्र वैशाखादयः पौर्णमास्यन्ता एव। ब्रह्मपुराणे तथैव तिथिकृत्याभिधानात्। सुरवाचित्वे कार्त्तिके नवमेऽहनीत्यनेवेरसिद्धौ शुक्लपक्ष इति अर्थः स्यात्। तेन भाद्रकृष्णत्रयोदश्यां अश्वयुक्कृष्णपक्षीयेति मैथिलोक्तं निरस्तम्॥*॥
आसां प्रशंसामाह विष्णुपुराणम्।
'वैशाखमासस्य सिता तृतीया
नवम्यसौ कार्त्तिकशुक्लपक्षे।
नभस्यमासस्य तमिस्रपक्षे
त्रयोदशी पञ्चदशी च माघे॥
एता युगाद्याः कथिताः पुराणै-
रनन्तपुण्यास्त्रिदशैश्च जुष्टाः।
उपप्लवे चन्द्रमसो रवेश्च
त्रिभ्यष्टकाखण्ययनद्वये च॥'
उपप्लवं ग्रहणे।
'पानीयमप्यत्र तिलैर्विमिश्रं
ददात् पितृभ्यः प्रयतो मनुष्यः।
आब्दं कृतं तेन समाः सहस्रं
रहस्यमेतत् पितरो वदन्ति॥'
स्नानमधिकृत्य भविष्ये।
संवत्सरफलं तत्र नवम्यां कार्त्तिके तथा।
मन्वादौ च युगादौ च माघत्रयफलं लभेत्॥"

इति तिथ्यादितत्त्वम्॥

युगान्तः, पुं, (युगानामन्तो यत्र। युगानामन्तो वा।) प्रलयः। इति हलायुधः॥ (यथा, महाभारते। ५। ४८ ६५।

युग्माद

"उद्वर्त्तयन् दस्युसंघान् समेतान्
प्रवर्त्तयन् युगमन्यद्युगान्ते।
यदा धक्ष्यन्यग्निवत् कौरवेयां-
स्तदा तप्ता धार्त्तराष्ट्रः सपुत्रः॥)

युगशेषश्च॥

युग्मं, क्ली, (युज्यते इति। युज्+"युजिरुचितिजां कुश्च।" उणा० १।१४५। इति मक्।) द्वयम्। जोड़ा इति भाषा। तत्पर्य्यायः। द्वन्द्वम् २ युगलम् ३ युगम् ४। इत्यमरः। २। ५। ३८॥ (यथा, रामायणे। २। ६१। ७६।
"पादुकोपानहाश्चैव युगान्यत्र सहस्रशः॥")

द्वितीयचतुर्थषष्ठाष्टमदशमद्वादशराशयः। यथा
"क्रूरोऽथ स्त्रीस्त्रः पुरुषोऽङ्गना च
ओजोऽथ युग्मं विषमः समश्च।
चरस्थिरद्व्यात्मकनामधेया
मेषादयोऽमी क्रमशः प्रदिष्टाः॥"

इति ज्योतिस्तत्त्वम्॥

(द्वितीया।) मेलनम्। यथा,—
"युग्माग्निकृतभूतानि षण्मन्वोर्व्वसुरन्ध्रयोः।
रुद्रेण द्वादशी युक्ता चतुर्दश्याथ पूर्णिमा॥
प्रतिपदाद्यमावास्या तिथ्योर्युग्मं महाफलम्।
एतद्व्रतं महावीरं हन्ति पुण्यं पुराकृतम्॥
द्वितीयातृतीययोश्चतुर्थीपञ्चम्योः षष्ठीसप्तम्योरष्टमीनवम्योरेकादशीद्वादश्योः चतुर्दशीपौर्णमास्योः प्रतिपदमावास्ययोर्युग्मं मेलनम्। तत्तत्तिथिमात्रनिमित्तके कर्म्मणि महाफलम्। एतत् प्रयोजनन्तु तिथिविशेषविहिते कर्म्मणि तिथिखण्डविशेषनियमनम्। स्वतिथ्या कर्म्मानिर्व्वाहे सहायभावेनान्यतिथ्यनुप्रवेशादुपवासाद्याचरणञ्च।" इति तिथ्यादितत्त्वम्॥ (द्वयविशिष्टे, त्रि। यथा, मनुः। ३। ४८।
"युग्मासु पुत्रा जायन्ते स्त्रियोऽयुग्मासु रात्रिषु।
तस्मात् युग्मासु पुत्रार्थी संविशेद्दार्त्तवे स्त्रियम्॥")

युग्मपत्रः, पुं, (युग्मं पत्रमस्य।) रक्तकाञ्चनवृक्षः। इति रत्नमाला॥ (युग्मं पत्रम्।) युगलपर्णे, क्ली॥

युग्मपत्रिका, स्त्री, (युग्मं पत्रमस्याः। "ग्रैवाद्विभाषा।"५। ४। १५४। इति कप्। टापि अत इत्वम्।) शिंशपावृक्षः। इति शब्दरत्नावली॥ (विधयोऽस्याः शिंशपाशब्दे ज्ञातव्याः॥)

युग्मपर्णः, पुं, (युग्मं पर्णमस्य।) कोविदारवृक्षः। सप्तपर्णवृक्षः। इति राजनिर्घण्टः॥

युग्मफला, स्त्री, (युग्मं फलमस्याः।) इन्द्रवल्लिभेदः। वृश्चिकाली। इति राजनिर्घण्टः॥ गन्धिका। इति रत्नमाला॥

युग्मादरः, पुं, (युग्मस्यादरः।) तिथिविशेषयोगेन तिथिखण्डविशेषस्यादरणम्। यथा। "पञ्चमी सप्तमी चैवेत्यादिना विशेषतः सायाह्नव्यापितिथेर्ग्रहणादुपवासेऽपि न रात्रियुग्मादरः।" इति तिथ्यादितत्त्वम्॥ अस्य विवरणं युग्मशब्दे द्रष्टव्यम्॥

युग्मादरणं, क्ली, (युग्मस्यादरणम्।) युग्मतिथिपूज्यता। यथा,—
"त्रिसन्ध्यव्यापिनी या तु सैव पूज्या सदा तिथिः।
न तत्र युग्मादरणमन्यत्र हरिवासरात्॥"

इति तिथ्यादितत्त्वम्॥

युग्यं, क्ली, (युगाय हितम्। युग+"उगवादिभ्यो यत्।" ५। १। २। इति यत्। युगमर्हतीति वा। दण्डादित्वात् यत्। यद्वा, युज्यत इति। युज्+"युग्यं च पत्रे।" ३। १। १२१। इति क्यबन्तो निपातितः।) वाहनम्। यानम्। इत्यमरः। २। ८। ५८॥ (यथा, महाभारते। ३। ५६। ६।
"हिरण्यस्य सुवर्णस्य यानयुग्यस्य वाससाम्।
आविद्धः कलिना द्यूते जीयते स्म नलस्तदा॥"
यथा च मनौ। ८। २६३।
"यत्रापवर्त्तते युग्यं वैगुण्यात् प्राजकस्य तु।
तत्र स्वामी भवेद्दण्ड्यो हिंसायां द्विशतं दमम्॥"
वाच्यलिङ्गेऽपि दृश्यते। यथा, "युग्यो गौः। युग्योऽश्वः। युग्यो हस्ती।" इति काश्मिका। ३। १। १२१॥)

युग्यः, पुं, (युगं वहतीति। युग+"तद्वहति रथयुगप्रासङ्गम्।" ४। ४। ७६। इति यत्प्रत्ययः।) युगवोढा। इत्यमरः। २। ८। ६४॥ ("रथं वहतीति रथ्यः युग्यः प्रासङ्गः।" इति काश्मिका॥)

युङ् [ञ्] त्रि, (युजिर् योगे+क्विन्। "युजेरसमासे।" ७। १। ७१। इति नुमागमः।) योगकर्त्ता। मेलनकर्त्ता। इति मुग्धबोधव्याकरणम्॥ (यथा, भट्टिकाव्ये। ६। ११८।
"गृह्याय निरगाद्गालो भिक्षो श्वगमिव द्रुवन्।
भ्रातरं युद्भिः संख्ये घोषेणापूरयन्दिशः॥"
युग्मम्। यथा, मनौ। ३। २७७।
"युञ्जन् कुर्व्वन् दिनर्त्तेषु सर्व्वान् कामान् समश्नुते।
अयुञ्जन् तु पितॄन् सर्व्वान् प्रजां प्राप्नोति पुष्कलाम्॥"

समः। स च छन्दसि द्वितीयचतुर्थपादरूपः। यथा, छन्दोमञ्जर्य्याम्। ३। १।
"विषमे यदि सौ सलगा दले
भौ युजि भादगुरुकावुपचित्रम्॥")

युङ्गी, [न्] पुं, वर्णसङ्करजातिविशेषः। स तु गङ्गापुत्रकन्यायां वैश्यधारिणो जातः। यथा,—
"गङ्गापुत्रस्य कन्यायां वीर्य्येण वैश्यधारिणः।
बभूव वैश्यधारी च पुत्रो युङ्गी प्रकीर्त्तितः॥"

इति ब्रह्मवैवर्त्ते ब्रह्मखण्डम्॥

युच्छ, प्रमादे। इति कविकल्पद्रुमः॥ (भ्वा०-पर०-अक०-सेट्।) अन्तःस्थादिः पञ्चमस्वरी। प्रमादोऽनवधानता। युच्छति पापे साधुः। ओष्ठ्यवर्णाद्यादिरिति रमानाथः। पचादित्वादनि पुच्छो लाङ्गूलम्। ओष्ठ्यवर्णघोषादिरिति त्रिलोचनः। मुच्छति। इति दुर्गादासः॥

युज, इर् ध च औ युतौ। इति कविकल्पद्रुमः॥ (रुधा०-उभ०-सक०-अनिट्।) इर्, अयुजत् अयौक्षीत्। ध, युनक्ति युङ्क्ते घृतेनाक्षं लोकः। औ, योक्ता। इति दुर्गादासः॥

युज, कि संयमे। युतौ। इति कविकल्पद्रुमः॥ (चुरा०-पक्षे भ्वा०-पर०-सक०-सेट्।) अन्तः-स्थादिः। कि, योजयति योजति। संयमो बन्धनम्। इति दुर्गादासः॥

युज, ड क निन्दे। इति कविकल्पद्रुमः॥ (चुरा०-आत्म०-सक०-सेट्।) ड क, योजयते। इति दुर्गादासः॥

युज, य औ ड समाधौ। इति कविकल्पद्रुमः॥ (दिवा०-आत्म०-अक०-अनिट्।) समाधि-र्योग्यभावः। य ड, स्वयमर्थे नियुज्यते। इति हलायुधः। औ, योक्ता। इति दुर्गादासः॥

युजानः, पुं, सारथिः। इति संक्षिप्तसारोणादि-वृत्तिः॥

युजौ, [ज्] पुं, (युज्+क्विप्।) अश्विनीकुमारौ। इति त्रिकाण्डशेषः॥ नित्यद्विवचनान्तोऽयम्॥

युञ्जानः, पुं, (युज्+शानच्।) सारथिः। विप्रः। इति मेदिनी। ने, ११३॥ भावनासहकारेण सर्व्वज्ञः। यथा,—

"योगजो द्विविधः प्रोक्तो युक्तयुञ्जानभेदतः।
युक्तस्य सर्व्वदा भानं चिन्तासहकृतोऽपरः॥"

इति भाषापरिच्छेदे। ६५॥

"युक्तस्यति। योगाभ्यासावगत्यावधीकृतसमाधि-समासादितो विविधसिद्धयुक्त इत्युच्यते अयमेव विशिष्टयोगवत्त्वात् युक्त इत्युच्यते। सर्व्वदेति चिन्तासहकारं विनेत्यर्थः। भानं सर्व्वविषयाणां प्रत्यक्षम्। अपरो युञ्जानः। विषयव्याकृत्या मानससमाधिस्थः। अथच युञ्जान उच्यते। चिन्ता ध्यानं तदेव कारणं तत्सहकारात् स्थूलसूक्ष्मव्यवहितविप्रकृष्टान् अर्थान् मनः प्रत्यक्षीकरोतीत्यर्थः।" इति सिद्धान्तमुक्तावली॥

युत, क्ली, निन्दा। यु ड क निन्दे इत्यस्माद्भावे क्विप्प्रत्ययेन निष्पन्नम्॥

युत, [ध] क्ली, (योधनमिति। युध्+क्विप्।) युद्धम्। इत्यमरः। ३।८।१०६॥ (चि, युद्धकर्म्मा। यथा, भागवते। ६।१२।२३।

"इति ब्रुवाणावन्योन्यं धर्म्मजिज्ञासया नृप!।
युयुधाते महावीर्य्यावेन्द्रवृत्रौ युधां पती॥")

युत, ऋ ड दीप्तौ। इति कविकल्पद्रुमः॥ (भ्वा०-आत्म०-अक०-सेट्।) ऋ, अयुयोतत्। ड, योतते। इति दुर्गादासः॥

युतं, क्ली, (यु+क्तः।) हस्तचतुष्टयम्। इति मेदिनी। ते, ४७॥

युतः, त्रि, (यु+क्तः।) युक्तः। अपृथग्-भूतः। इति मेदिनी। ते, ४७॥ (यथा, भट्टिकाव्ये। १।७।

"स्त्रीभिर्युतान्यशरसामिवौघै-
र्मेरोः शिरांसीव गृहाणि यस्याम्॥")

युतकं, क्ली, संशयः। युगम्। नारीवस्त्राञ्चलम्। युक्तम्। चलनाग्रम्। यौतुकम्। इति विश्व-मेदिन्यौ। के, १४३॥ मैत्रीकरणम्। इति शब्दरत्नावली॥ स्त्रीवस्त्रभेदः। इति हैमचन्द्रः॥ संशयः। सूपाग्रम्। इति नानार्थरत्नमाला॥

युद्, [ध] क्ली, (योधनमिति। युध्+क्विप्।) युद्धम्। इत्यमरः। २।८।१०६॥ (यथा, रामायणे। २।५१।१०।

"यो न देवासुरैः सर्व्वैः शक्यः प्रसहितुं युधि।
तं पश्य सुखसंसुप्तं तृणेषु सह सीतया॥")

युद्धं, क्ली, (युध्यते इति। युध्+भावे क्तः।) योध-नम्। लड़ाइ इति भाषा। तत्पर्य्यायः। आयो-धनम्२ जन्यम्३ प्रधनम्४ प्रविदारणम्५ स्कन्धम्६ आस्कन्दनम्७ संख्यम्८ समीकम्९ साम्य-राविकम्१० समरम्११ अनीकम्१२ रणः१३ कलहः१४ विग्रहः१५ संप्रहारः१६ अभिसम्पातः१७ कलिः१८ संस्फोटः१९ संयुगः२० अभ्यामर्दः२१ समाघातः२२ संग्रामः२३ अभ्यागमः२४ आहवः२५ समु-दायः२६ संयत्२७ समितिः२८ आजिः२९ समित्३० युत्३१। इत्यमरः।२।८।१०३-१०६॥ संरावः३२ आनाहः३३ सम्परायकः३४ विदारः३५ दारणम्३६ संवित्३७ सम्परायः ३८। इति शब्दरत्नावली॥ तीक्ष्णम्३९ अखरीधम्४० बलजम्४१ आनर्म्मः४२ अभि-मरः४३ समुदयः४४। इति जटाधरः॥ * ॥ युद्धे वर्णनीयानि यथा। चर्म्म१ वर्म्म२ बलम्३ चरः४ धूलिः५ तूर्य्यस्वनः६ सिंहनादः७ ध्रुवमण्डलम्८ रक्तनदी९ छिन्नच्छत्रम्१० रथः११ चामरः१२ हस्ती१३ अश्वः१४ केतुः१५ विदीर्णकुम्भकरिकुम्भमुक्ता१६ बृहद्रचनावस्थितसेना१७ सुरपुष्पवृष्टिः१८। इति कविकल्पलता॥ * ॥ अथ युद्धफलम्।

"अग्निष्टोमादिभिर्यज्ञैरिष्ट्वा विपुलदक्षिणैः।
न तत् फलमवाप्नोति संग्रामे यदवाप्नुयात्॥
इति यज्ञविदः प्राहुर्यज्ञकर्म्मविशारदाः।
तस्मात्तत्ते प्रवक्ष्यामि यत् फलं शस्त्रजीविनाम्॥"

युद्धे मरणफलं यथा,—

"धर्म्मलाभोऽर्थलाभश्च यशोलाभस्तथैव च।
यः शूरो वध्यते युद्धे विघ्नदन् परवाहिनीम्॥
यस्य धर्म्मार्थकामौ च यज्ञस्येव सदक्षिणः।
परं ह्यभिमुखे हत्वा तयोः पन्थाधिरोहति॥
विष्णोः स्थानमवाप्नोति एवं युधन् रणाजिरे।
अश्वमेधानवाप्नोति चतुरस्रेण कर्म्मणा॥
यस्तु शस्त्रं समुत्सृज्य वीर्य्यवान् वाहिनीमुखे।
सम्मुखो वर्त्तते शूरः स स्वर्गान्न निवर्त्तते॥
राजा वा राजपुत्रो वा सेनापतिरथापि वा।
हतः चत्रेण यः शूरस्तस्य लोकोऽक्षयो ध्रुवः॥
यावन्ति तस्य गात्राणि भिन्दन्ति शस्त्रमाहवे।
तावता लभते लोकान् सर्व्वकामदुहोऽक्षयान्॥
वीरासनं वीरशय्या वीरस्थानस्थितिः स्थिरा।
गवार्थे ब्राह्मणस्यार्थे गोब्राह्मार्थे च ये हताः।
ते गच्छन्त्यमरस्थानं ये स्युः सुकृतिनस्तथा॥
अभग्नो यः परं सैन्यं भग्नञ्च परिरक्षति।
पृष्ठस्थितः पालयति सोऽपि गच्छति तत्क्षतिम्॥
अनुत्तीर्णस्तथा सद्यः प्राणान् यस्त्यजते युधि।
हतश्च स्पृशते युद्धे स स्वर्गान्न निवर्त्तते॥

दंष्ट्रिभिः शृङ्गिभिर्व्वापि तथा म्लेच्छैश्च तस्करैः।
ब्राह्मण्यर्थे ये हता राजंस्तेषां स्वर्गो न संशयः॥
शस्त्राग्निना सुनिर्दग्धः स्वशरीरे च च्युतो यदि।
संग्रामान्म्रियते राजंस्तस्य स्वर्गो न संशयः॥
भयेन लज्जया वापि क्लैब्येन च रणाजिरे।
सम्मुखो म्रियते राजंस्तदा स्वर्गो न संशयः॥
यस्य भिन्नीकृतं गात्रं शस्त्रशक्त्यृष्टितोमरैः।
देवकन्यास्तु तं वीरं रामयन्ति रमन्ति च॥
वराप्सरःसहस्राणि शूरमायोधने हतम्।
त्वरितान्यभिधावन्ति मम भर्त्ता भवेति च॥
यत्र तत्र हतः शूरः शस्त्रभिः परिवेष्टितः।
अक्षयान् लभते लोकान् यदि क्लीवं न भाषते॥
जितेन लभ्यते लक्ष्मीर्मृतेनापि सुराङ्गनाः।
क्षणविध्वंसिनि काये का चिन्ता मरणे रणे॥
हतस्याभिमुखस्यास्य ये लोका न निवर्त्तिनः।
हते गोस्वामिविप्रार्थे नरमेधफलं हि तत्॥

स्थानाभिघाते शस्त्राणां गते च
राज्ञो विपत्तौ द्विजसार्थघाते।
स्त्रीबालवृद्धाजनगोग्रहे च
शस्त्रं सुनीनामपि धारणीयम्॥
यां यज्ञसंवेस्तपसा च विप्राः
स्वर्गेषिणो यत्र न वै प्रयान्ति।
क्षणेन तामेव गतिं प्रयान्ति
महाहवे स्वां तनुं संत्यजन्तः॥
सर्व्वाश्च वेदान् सुमहद्भिरङ्गैः
सांख्यञ्च योगञ्च वने विवासम्।
क्षते गुणा एकपदे प्रविष्टा
महाहवे स्वां तनुं संत्यजेद्यः॥
इमां गिरं वेदविदः शुभाक्षरां
सुभाषितां वृत्रभिदा दिवौकसाम्।
रणमुखे यः स्मरते दृढ़स्मृति-
र्न हन्यते हन्ति च सोऽपि वैरिणः॥

सदा पुण्यतमः स्वर्ग्यः सुयशः सर्व्वतो सुखः।
सर्व्वेषामेव वर्णानां क्षत्रियस्य विशेषतः॥
भूयश्चैव तु वक्ष्यामि रणधर्म्मं सनातनम्।
यादृशाय प्रदातव्यं यादृशं परिवर्जयेत्॥
आततायिनमायान्तमपि वेदान्तगं द्विजम्।
जिघांसन्तं जिघांसीयान्न तेन ब्रह्महा भवेत्॥
कोदण्डशस्त्रपाणिन्तु प्रहरन्तं द्विजं यदि।
हन्यात्तमासुरं भावं हत्वा न ब्रह्महा भवेत्॥
ब्रह्महा जायते येन हतेनास्त्रं प्रगृह्य मे॥
वचःसंखेऽ नृपश्रेष्ठ! कायय्त्ने सनातने।
विरथं विगतं श्रान्तं विवर्म्मं विसुखस्थितम्।
युद्धोत्साहहतं हत्वा ब्रह्महा जायते नरः॥
विशस्त्रं विधनुष्कञ्च तं भीतोऽस्मीतिवादिनम्।
वर्णशाखायुतांस्तांस्तु हत्वा च ब्रह्महा भवेत्॥
अन्याहतो न हन्तव्यो बालो वृद्धो नपुंसकः।
तवाहं प्रवदन्मन्त्रशस्त्रकृतोऽथ भीरवः॥
तस्मादेतान् परिहरेच्छूरो धर्म्मभृतां वरः।
सम्यग्यज्ञफलस्त्वेहन् हत्वासौ ब्रह्महा भवेत्॥
शस्त्रास्त्रिह सम्हृत्तैस्तु यज्ञैः क्रतुशतैर्नृपाः।
आत्मदेहपरित्यागः कर्त्तुं युद्धे सुदुष्करः॥

ब्रह्महा युध्यतेऽशुद्धो देहं त्यक्त्वा रणाजिरे।
न शुद्धी रणभग्नानां ऋते क्वचिन्महापथात्॥
संग्रामे युध्यतो लक्ष्मीः कीर्त्तिः स्यात् स्वर्गतिस्तथा।
भग्नस्य तेऽपि नश्यन्ति महासत्त्वान्महारणात्॥
तस्मात् सत्त्वेन यत्किञ्चित् क्रियते तच्छुभप्रदम्।
यज्ञं दानं व्रतं वापि संग्रामे नृपसत्तम!॥"

इत्यादौ वह्निपुराणे संग्रामप्रशंसा॥*॥

अथ युद्धनिर्णयः।

"यत्रायुद्धे ध्रुवं नाशो युद्धे जीवितसंशयः।
तं कालमेकं युद्धस्य प्रवदन्ति मनीषिणः॥
आत्मोदये विगृह्णीयात् क्षीभो नात्मबले यदि।
व्यसने च प्रहर्त्तव्यं शत्रौ न तु विपर्य्यये॥
स्वयं राज्ञा न योद्धव्यं येऽपि शस्त्रास्त्रकोविदाः।
हता युद्धेषु दृश्यन्ते शस्त्रेभ्यः शक्तिमत्तराः॥
रथयुद्धं समे देशे विषमे हस्तिसङ्गरः।
अश्वयुद्धं मरौ देशे पत्तियुद्धञ्च दुर्गमे॥
अत्यये सर्व्वयुद्धं स्यान्नौकायुद्धं जलप्लुते।
संहत्य योधयेदन्यान् कामं विस्तारयेद्बहून्॥
सूचीमुखमनीकं स्यादल्पं हि बहुभिः सह।
अपि पञ्चाशतः शूरान् निघ्नन्ति परवाहिनीम्।
येऽपि वा पञ्चषट्सप्तसहिताः कृतनिश्चयाः॥"

अथ युद्धासननिर्णयः।

"अन्यद्वारा विपक्षस्तु विगृह्यासनमुच्यते।
अरिं विगृह्य वा स्थानं विग्रहासनमुच्यते॥
अरेश्च विजिगीषोश्च विग्रहे क्षीयमाणयोः।
सन्धाय यदवस्थानं सन्धायासनमुच्यते॥
उदासीने मध्यमे वा समाने प्रतिशङ्कया।
एकीभूय व्यवस्थानं सम्भूयासनमुच्यते॥
सर्व्वेषां प्रीतिजननं निजराष्ट्रस्य लक्षणम्।
एतत् प्रीत्यासनं नाम सर्व्वासनमहत्तरम्॥"

अथ द्वन्द्वयुक्तिः।

"राज्ञो बलं नहि बलं द्वन्द्वमेव बलं बलम्।
अप्यल्पबलवान् राजा स्थिरो द्वन्द्वबलाद्भवेत्॥"

तथा च।

"एकः शतं योधयति प्राकारस्थो धनुर्द्धरः।
शतं दशसहस्राणि तस्माद्दुर्गं विशिष्यते॥
अकृत्रिमं कृत्रिमञ्च तत् पुनर्द्विविधं भवेत्॥
यद्दैवमुचितं द्वन्द्वं गिरिनद्यादिसंश्रयम्।
अकृत्रिममिदं ज्ञेयं दुर्लङ्घ्यमरिभूभुजाम्॥
प्राकारपरिखारण्यसंश्रयं यत्नवेदिह।
कृत्रिमं नाम विज्ञेयं लङ्घ्यालङ्घ्यन्तु वैरिणाम्॥"

अथाकृत्रिमद्वन्द्वयुक्तिः।

"अत्युच्चविस्तीर्णगिरा दुरारोहः सकाननः।
सजलाशयसम्भारभोज्यद्रव्यसमाश्रयः॥
सुखनिःसरणो द्वन्द्वः पर्व्वताख्यो महीभुजाम्।
नद्यो गभीरविस्तीर्णाश्चतुर्दिक्षु व्यवस्थिताः॥
तन्मध्ये भूप्रदेशो यो नदीद्वन्द्वः स उच्यते।
यत्रान्यच्चिरकालीनं दुर्लङ्घ्यविपिनादिकम्।
तन्मध्यरचिता भूमिर्द्वन्द्वलेनोपतिष्ठते।
वनद्वन्द्वमिति ख्यातं यत्नापूर्व्वं महत्तरम्॥"

कृत्रिमद्वन्द्वयुक्तिर्यथा,—

"यस्मिन्नाप्ये गिरिर्नास्ति नद्यो वा गहनोदकाः।
तस्य मध्ये महीपालः कृत्रिमं द्वन्द्वमारभेत्॥
गजैरलङ्घ्या विस्तीर्णा गम्भीराः पूर्णवारयः।
द्वन्द्वत्वेन समादिष्टाः परिखा बहुयादसः॥
विशालशालं सुघनं बहुकण्टकि सङ्कटम्।
द्वन्द्वत्वेन समादिष्टं विस्तीर्णं विषमं वनम्॥
अधोऽधो वध्यमानोऽपि कन्दरोऽल्पजलं स्रवन्।
द्वन्द्वत्वेन समुद्दिष्टः स दुर्लङ्घ्यो हि भूभुजाम्॥
सर्व्वतः परिखां कृत्वा निम्नोपरि कन्दरम्।
तच्छलभृतदेशत्वाच्छलद्वन्द्वं तदुच्यते॥
एषामभावे निम्नस्य भूप्रदेशस्य बन्धना।
वर्षासूपगते वारि जलद्वन्द्वं ततो भवेत्॥
एतयोरपि संमिश्रात् संमिश्रं द्वन्द्वमाचरेत्।
आश्रित्य कृत्रिमं द्वन्द्वं बलवद्वैरिणी दिशि॥
अन्यच्च कृत्रिमं द्वन्द्वं कृत्वा नरपतिर्विशेत्।
रथपतिर्यदा वैरी स्थलद्वन्द्वं तदाचरेत्॥
गजाश्वनाथश्चेद्वैरी जलद्वन्द्वं तदाचरेत्।
गिरिद्वन्द्वं नृपः सेवेत् यस्य स्याद्विविधो रिपुः॥
सर्व्वं हि विविधं युद्धं समासादुपादिश्यते।
प्रतिराजस्य राज्यान्ते प्रकटे गुप्त एव च॥
राज्यान्ते सैनिकान् रक्षेत् प्रकटे निवसेत् स्वयम्।
गुप्ते स्त्रीकोषसम्भारं संरक्षेदिति निश्चयः॥"

अथ सामान्यतो गुणाः। तथा हि नीतिशास्त्रम्।

"सप्रवेशापसरणं द्वन्द्वमुत्तममुच्यते।
अन्यच्च वन्दिशालेव न तादृग्बद्धमाश्रयेत्॥
धनुर्द्वन्द्वं महीद्वन्द्वं गिरिद्वन्द्वं तथैव च।
मनुष्यद्वन्द्वसंसर्गं वनद्वन्द्वञ्च तानि षट्॥"

अन्ये तु।

"न द्वन्द्वं द्वन्द्वमित्याहुर्योद्वृद्वन्द्वं प्रकीर्त्तितम्।
योद्वृशून्यं हि यद्युद्धं मृतकायसमं हि तत्॥"

अथान्यत्रापि।

"यावत्प्रमाणं नगरं हि राज्ञां
ततो भवेदुत्तममध्यमान्त्यम्।
त्रिंशल्लक्षाष्टगुणोत्तरेण
त्रिदेशजानां धरणीपतीनाम्॥"

गर्गस्तु।

"यदन्यद्विविधं द्वन्द्वं प्रोच्यते धरणीभुजाम्।
तेभ्य एवातिरिच्येत मल्लद्वन्द्वं विशेषतः॥
अन्येषु देवाङ्गिनेषु मल्लद्वन्द्वाज्जयेन्नृपः।
मल्लद्वन्द्वे हि भिन्ने हि न चान्यत् कार्य्यकारकम्॥
यदैव वैरिदुर्लङ्घ्यं विस्तीर्णं विषमञ्च तत्।
सप्रवेशापसरणं तद्युद्धमुत्तमं विदुः॥"

इति युक्तिकल्पतरुः॥

तद्वैदिकपर्य्यायः। रणः १ विवाक् २ विखादः३ नदनुः ४ भरे ५ आक्रन्दे ६ आहवे ७ आजौ ८ पृतनाज्यम् ९ अभीके १० समीके ११ समत्यम् १२ नेमधिता १३ सङ्काः १४ समितिः १५ समनम् १६ मीळ्हे १७ पृतनाः १८ स्पृधः १९ स्पधः २० पृतसु २१ समत्सु २२ समर्य्ये २३ समरणे २४ समोहे २५ समिधे २६ सङ्के २७

सङ्के २८ संयुगे २९ सङ्गथे ३० सङ्गमे ३१ तूत्रतूर्य्ये ३२ पृत्से ३३ आजौ ३४ शूरसातौ ३५ वाजसातौ ३६ समनीके ३७ खले ३८ खजे ३९ पौंस्ये ४० महाधने ४१ वाजे ४२ अज्म ४३ सद्म ४४ संयत् ४५ संवतः ४६। इति षट्चत्वारिंशत् संग्रामनामानि। इति वैद्यनिघण्टौ २। १७॥

युद्धरङ्गः, पुं, (युद्धे रङ्गो रागोऽस्य।) कार्त्तिकेयः। इति शब्दचन्द्रिका॥ (युद्धस्य रङ्गः। युद्धस्थलम्। यथा, महाभारते। ७। ६५। १८।
"अन्योऽन्यं जघ्निरे कृद्धाः युद्धरङ्गगता नराः॥")

युद्धसारः, पुं, (युद्धस्य सारः।) घोटकः। इति शब्दचन्द्रिका॥

युध, य औ ड युद्धे। इति कविकल्पद्रुमः॥ (दिवा०-आत्म०-अक०-हनने सक०-अनिट्।) य ड, युध्यते। औ, योद्धा। संसुखस्थितयोर्द्वयोः सांग्रामिकरीत्या परस्पराभिभवेच्छा युद्धम्। युध्यते योधः कदाचिदेकस्य सह भावविवक्षायां युध्यते योधः परेण। कदाचिद्धननेऽपि युध्यते चौरं राजा हन्तीत्यर्थः। यो भक्तपिण्डस्य कृते न युध्येदिति अस्माद्भावे क्विपि तमिच्छतीति क्ये तं करोतीति कण्ड्वादित्वात् क्ये वा साध्यम्। इति दुर्गादासः॥

युधानः, पुं, (युध्यतेऽसौ। युध्+"युधिबुधिदृग्भ्यः किच्च।" उणा० २। ६०। इति आनच्। स च कित्।) क्षत्रियः। इत्युज्ज्वलदत्तः॥ (रिपुः। इत्युज्ज्वलदत्तः॥)

युधिकः, त्रि, योद्धा। युधशब्दात् णिकप्रत्ययेन निष्पन्नः॥

युधिष्ठिरः, पुं, (युधि संग्रामे स्थिरः। "गतियुधिभ्यां स्थिरः।" ८। ३। ६५। इति षत्वम्। "हलदन्तात् सप्तम्याः संज्ञायाम्।" ६। ३। ९। इति सप्तम्या अलुक्।) पाण्डवराजः। स कुन्तीगर्भे धर्म्माज्जातः। तत्पर्य्यायः। अजातशत्रुः २ शत्रुजित्३ धर्म्मपुत्रः ४ अजमीढः ५। इति हेमचन्द्रः। ३। २७१॥ (मृगशृङ्गाभिशप्तः पाण्डुर्निरपत्यतया खिन्नचित्तः पुत्रार्थमेकदा धर्म्मपत्नीं कुन्तीमुवाच। शुचिस्मिते! अनपत्यो हि न शुभलोकार्हः इति विचिन्त्य त्वं मदुपकारार्थं केनापि पुत्रमुत्पादयेति। एवमुक्ता कुन्ती दृष्ट्वा च पत्युराग्रहातिशयं धार्म्मिकपुत्रलाभाय दुर्व्वासः प्रदत्तमन्त्रबलेन धर्म्ममाहूय तेन सङ्गता युधिष्ठिरं पुत्रमलभत। यदुक्तं महाभारते।१। १२३। ५—८।
"संयुक्ता सा हि धर्म्मेण योगमूर्त्तिधरेण ह।
लेभे पुत्रं वारारोहा सर्व्वप्राणभृतां हितम्॥
ऐन्द्रे चन्द्रसमायुक्ते मुहूर्त्तेऽभिजिते ऽहनि।
दिवा मध्यगते सूर्य्ये तिथौ पूर्णेऽतिपूजिते॥
सम्भवयशसं कुन्ती सुषाव प्रवरं सुतम्।
जातमात्रे सुते तस्मिन् वागुवाचाशरीरिणी॥
एष धर्म्मभृतां श्रेष्ठो भविष्यति नरोत्तमः॥
विक्रान्तः सत्यवाक्चैव राजा पृथ्व्यां भविष्यति।

युधिष्ठिर इति ख्यातः पाण्डोः प्रथमजः सुतः ॥”
अथ गच्छति काले धृतराष्ट्रेण यौवराज्ये स्थापितोऽयं दयादाक्षिण्यादिगुणपरम्परया प्रजासु लब्धकीर्त्तिरनुजैः सह सुखमुवास। अथ जतुगृहदाहानन्तरं त्यक्तराज्यो द्रुपदराज्यमभिगम्य द्रौपदीं सानुजः परिणीय पुनः स्वराज्यमागतवान्। ततः कृष्णसहायो राजसूययज्ञकरणाय दुर्जयान् जरासन्धप्रभृतिनृपतीन् हत्वा राजसूयेष्टिं समापयामास। ततोऽक्षद्यूतपरवशदुर्योधनमतानुसारिणा कैतवपटुना शकुनिना सह द्यूतं कृत्वा पराजितोऽनुजैर्भीमादिभिः पत्न्या द्रौपद्या च सहितो द्वादशवर्षं वनवासाय एकवर्षमज्ञातवासाय च प्रस्थितो द्वैतवनमध्युवास। ततो द्वादशवर्षैर्वनवासजातं महत् कष्टमनुभूय अज्ञातवासार्थं त्रयोदशवर्षे विराटनगरमधिवसन् पुनः कृष्णसहायः स्वराज्यप्राप्त्यर्थं महतीं चेष्टां कृतवान्। कृतेऽपि यत्ने यदा विगुणग्रहो दुर्योधनो राज्यादिकं न दत्तवान् तदा लब्धसैन्यबलोऽसौ कुरुक्षेत्रे महत् युद्धं कृत्वा विनाश्य च दुर्योधनादीन् हस्तिनाधिपतिः सम्राट् बभूव। अथाश्वमेधादिना सुरगणान् परितोष्य षट्त्रिंशद्वर्षं राज्यसुखमनुभूतवान्। ततः प्रभासे विप्रशापात् यदुवंशक्षयमाकर्ण्यातिनिर्विण्णः षट्त्रिंशद्वर्षवयस्कं अर्জ্জুনपौत्रं परीक्षितं स्वराज्येऽभिषिच्य उत्तरामार्गेण स्वर्गारोहणं कृतवानिति। तथाच देवीभागवते। २। ८। १५-१७।

“देहत्यागं हरेः श्रुत्वा यादवानां क्षयं तथा।
गमनाय मतिं चक्रे राजा हैमाचलं प्रति ॥
षट्त्रिंशद्वार्षिकं राज्ये स्थापयित्वोत्तरासुतम्।
निर्जगाम वनं राजा द्रौपद्या भ्रातृभिः सह ॥
षट्त्रिंशच्चैव वर्षाणि कृत्वा राज्यं गजाह्वये।
गत्वा हिमाचले षट् ते जहुः प्राणान् पृथासुताः ॥”

अस्यान्यद्विशेषविवरणन्तु महाभारतादौ विस्तरशो द्रष्टव्यम् ॥)

युधीयः, त्रि, योद्धा। युधधातोरीयप्रत्ययेन निष्पन्नः ॥

युध्मः, पुं, (युध्यते इति युध्मते येनेति वा। युध् + “इषियुधीन्धिदसिश्राधूसूभ्यो मक्।” उणा० १।१४४। इति मक्।) संग्रामः। धनुः। इति मेदिनी ॥ बाणः। इत्युणादिकोषः ॥ योद्धा। इति सिद्धान्तकौमुद्यामुणादिवृत्तिः ॥ (यथा, ऋग्वेदे। १। ५५। ५।

“स इन्महानि समिथानि मज्मना
कृणोति युध्म ओजसा जनेभ्यः ॥”

“युध्मः योद्धा।” इति तद्भाष्ये सायणः ॥) श्रेष्ठसंग्रामः। प्रखरभः। इति संक्षिप्तसारोणादिवृत्तिः ॥

युप, य इर् विमोहे। इति कविकल्पद्रुमः ॥ (दिवा०-परः०-सकः०-सेट्।) विमोह आकुलीकरणम्। य, युप्यति। इर्, अयुपत् अयोपीत्। युषादित्वात् ङ इत्यन्ये। इति दुर्गादासः ॥

युयुक्खुरः, पुं (युर्निन्दितः युक् योजनास्य। तादृशः खुरो यस्य।) क्षुद्रव्याघ्रः। इति शब्दचन्द्रिका ॥

युयुधानः, पुं, (युध्यतेऽसौ। युध + “सृत्रियुधिभ्यां कन्वच।” उणा० २। ६१। इत्यानच् कित्कार्थे कन्वत्कार्यञ्च।) सात्यकिः। यथा,—

“शैनेयस्तु शिनेर्नप्ता युयुधानश्च सात्यकिः ॥”
इति त्रिकाण्डशेषः ॥

इन्द्रः। क्षत्रियः। इति संक्षिप्तसारोणादिवृत्तिः ॥ त्रि, योद्धा च ॥

युवकः, पुं, युवा। युवन्शब्दात् कन्प्रत्ययेन निष्पन्नः ॥

युवगण्डः, पुं, (यूनां गण्ड आश्रयत्वेनास्यास्य। युवगण्ड + अर्शआद्यच्।) यूनो गण्डस्थव्रणविशेषः। वयस्फोड़ा इति भाषा। यथा,—

“युवगण्डो यवगण्डः स्यात् वयस्फोटाङ्कये द्वयम् ॥”
इति शब्दरत्नावली ॥

युवजानिः, पुं, (युवतिर्जाया यस्येति। “जायायानिङ्।” ५।४।१३४। इति निङ्।) युवतीपतिः। यथा,

“युवजानिर्धनुष्याणिर्भीमिष्ठः खविचारिणः।
रामो यन्नद्दहो हन्ति कालकल्पश्चिलीमुखः ॥”
इति भट्टिः। ५। १३ ॥

युवतिः, स्त्री, (युवन् + “यूनस्तिः।” ४। १। ७७। इति तिः।) प्राप्तयौवना ॥ (यथा, अभिज्ञानशाकुन्तले ४ अङ्के।

“शुश्रूषस्व गुरून् कुरु प्रियसखीवृत्तिं सपत्नीजने
भर्तुर्विप्रकृतापि रोषणतया मास्म प्रतीपं गमः।
भूयिष्ठं भव दक्षिणा परिजने भोगेष्वनुत्सेकिनी
यान्त्येवं गृहिणीपदं युवतयो वामाः कुलस्याधयः ॥”)

युवती, स्त्री, (युवन् + ङ्यप् + ङीप्। इति सिद्धान्तकौमुदी। ४। १। ७७। कृदिति ङीष्। इत्युज्ज्वलदत्तः। १। १५६।) प्राप्तयौवना। यथा, हरिवंशे संहितायाम्। ७५। ४।

“यो यं चिन्तयति यानि स तन्नयत्वं
यस्मादतः सुभगयेव गता युवत्यः ॥”)

तत्पर्य्यायः। युवतिः २ यूनी ३ तरुणी ४ तलुनी ५ दिक्करी ६ धनिका ७ धनीका ८ मध्यमा ९ दृष्टरजाः १० मध्यमिका ११। इति शब्दरत्नावली ॥ ईश्वरी १२ वर्या १३। इति हेमचन्द्रः। ३। ५११ ॥ वयस्या १४। इति राजनिर्घण्टः ॥ तस्या लक्षणादि यथा,—

“आषोड़शाब्दवेद्वाला तरुणी त्रिंशता मता।
पञ्चपञ्चाशतः प्रौढ़ा वृद्धा भवति तत्परम् ॥”
इति कालिदासः ॥

“बाला तु प्राणदा प्रोक्ता युवती प्राणहारिणी।
प्रौढ़ा करोति वृद्धत्वं वृद्धा मरणमादिशेत् ॥
निदाघशरदोर्बाला प्रौढ़ा वर्षावसन्तयोः।
हेमन्ते शिशिरे योग्या न वृद्धा क्वापि शस्यते ॥”
योग्या युवती। इति राजवल्लभः ॥ स्त्रीसामान्यम्। यथा। प्रमदा चेति विज्ञेया युवतिश्च तथा स्मृतेति भागुरिः। प्राग्यौवना युवतिरिति वात्स्यायनः। इत्यमरटीकायां भरतः। २। ६। ८ ॥*॥ हरिद्रा। इति शब्दचन्द्रिका ॥

युवतीष्टा, स्त्री, (युवतीनामिष्टा।) स्वर्णयूथिका। इति राजनिर्घण्टः ॥

युवनाश्वः, पुं, सूर्य्यवंशीयराजविशेषः। स च गौरीगर्भे प्रसेनजितो जातः मान्धातृपिता च। यथा,—

“तस्याः प्रसेनजिज्जज्ञे लेभे भार्य्या पतिव्रता।
गौरी नामाभिशप्ता सा नदीभूता तरङ्गिणी।
तस्यां प्रसेनजिज्जज्ञे युवनाश्वं महीपतिम् ॥
यावत् सूर्य्य उदेति स्म यावच्च प्रतितिष्ठति।
सर्व्वं तद्यौवनाश्वस्य मान्धातुः क्षेत्रमुच्यते ॥”
इति वह्निपुराणे सगरोपाख्यानाध्यायः ॥

युवनाश्वजः, पुं, (युवनाश्वात् जातः। जन् + डः।) मान्धातृराजः। इति हेमचन्द्रः। ३। ४६४।

युवराजः, पुं, भाविबुद्धविशेषः। तत्पर्य्यायः। मैत्रेयः २ अजितः ३। इति त्रिकाण्डशेषः ॥ राजपुत्रः। तत्पर्य्यायः। कुमारः २ भर्त्तृदारकः ३। इत्यमरः। १। ७। १२ ॥ युवा बालो राजा यूनां वा राजा युवराजः। सख्यहोरात्र इति षः। कुमारयति कुमारः। स्यात् कुमार कुमाल त् क केलौ अन्। भर्त्तुर्दारकः पुत्रः भर्त्ता चासौ दारकश्चेति वा भर्त्तृदारकः। दारको भेदके शिशावितिनिगमः। इति भरतः ॥ (यथा, महाभारते। १। ७३। १६।

“मयि जायेत यः पुत्रः स भवेत्त्वदनन्तरम्।
युवराजो महाराज! सत्यमेतद्ब्रवीमि ते ॥”)

युवा, [न्] त्रि, (यौतीति। यु + “कनिन् युवृषितक्षिराजिधन्विद्युप्रतिदिवः।” उणा० १। १५६। इति कनिन्।) तरुणः। (यथा, मनौ। २। १२०।

“जर्द्धं प्राणा ह्युत्क्रामन्ति यूनः स्थविर आयति।
प्रत्युत्थानाभिवादाभ्यां पुनस्तान् प्रतिपद्यते ॥”)

श्रेष्ठः। निसर्गबलशाली। इति मेदिनी। ने, ११३॥

युवा, [न्] पुं, (यौतीति। यु + कनिन्।) यौवनावस्थाविशिष्टः। षोड़शवर्षात् त्रिंशद्वर्षपर्य्यन्तवयस्कः। इति केचित् ॥ षोड़शवर्षात् सप्ततिवर्षपर्य्यन्तवयस्कः। यथा,—

“आषोड़शाब्दवेद्बालस्तरुणस्तत उच्यते।
वृद्धः स्यात् सप्ततेरूर्द्धं वर्षीयान् नवतेः परम् ॥”
इति भरतधृतस्मृतिः ॥

(“आषोड़शाब्दवेद्बालः पञ्चत्रिंशत् युवा नरः।”
इति हारीते प्रथमे स्थाने पञ्चमेऽध्याये ॥)

तत्पर्य्यायः। वयस्यः २ तरुणः ३। इत्यमरः। २। ६। ४२ ॥ वयःस्थः ४ तलुनः ५। इति शब्दरत्नावली ॥ गर्भरूपः ६ वेटकः ७। इति जटाधरः ॥

युष, भजने। इति कविकल्पद्रुमः ॥ सौत्रधातुरयम्। (परः०-सकः०-सेट्।) योषित् युष्मद्। इति दुर्गादासः ॥

युष्मद्, (योषति भजतीति। युष् + “युष्यसिभ्यां मदिक्।” उणा० १। १३८। इति मदिक्।)

सर्व्वनामयुष्मच्छब्दः। तस्य त्रिषु लिङ्गेषु समानि रूपाणि। (एकविंशतिविभक्तिषु तस्य रूपाणि।) यथा। त्वम् १ युवाम् २ यूयम् ३। त्वाम् ४ युवाम् ५ युष्मान् ६। त्वया ७ युवाभ्याम् ८ युष्माभिः ९। तुभ्यम् १० युवाभ्याम् ११ युष्मभ्यम् १२। त्वत् १३ युवाभ्याम् १४ युष्मत् १५। तव १६ युवयोः १७ युष्माकम् १८। त्वयि १९ युवयोः २० युष्मासु २१। (द्वितीयाचतुर्थीषष्ठीनामेकवचनद्विवचनबहुवचनविभक्तिषु तस्य रूपान्तराणि यथा। द्वितीयैकवचने त्वा। चतुर्थीषष्ठ्योरेकवचने ते। आसां द्विवचने वाम्। आसां बहुवचने वः। श्लोकपादे वाक्यादौ च-वा-हा-ह-एव-शब्दयोगे अदर्शनाथडश्यर्थधातुयोगे च न स्युः।) इति व्याकरणम्॥ यथा,—

"युष्मत्कृते खञ्जनगञ्जनाक्षि!
शिरो मदीयं यदि याति यातु।
नीतानि नाशं जनकात्मजार्थं
दशाननेनापि दशाननानि॥"

इति मुक्तिवादे गदाधरः॥)

यूः, स्त्री, यूषः। इति हेमचन्द्रः। ३। ६८॥

यूकः, पुं, (यौतीति। यु + "अजियुधूनीभ्यो दीर्घश्च।" उणा० ३। ४७। इति कन् दीर्घश्च।) मत्कुणः। इति जटाधरः॥ (यथा, सुश्रुते सूत्रस्थाने ३१ अध्याये।

"यूका ललाटमयान्ति बलिं नाश्नन्ति वायसाः।
येषां वापि रतिर्नास्ति यातास्ते यमालयम्॥")

यूका, स्त्री, (यूक + स्त्रियां टाप्।) मत्कुणः। यत्री इति उकुण इति च भाषा। तत्पर्य्यायः। कोशकीटः २ खेदजः ३ षट्पदः ४। इति राजनिर्घण्टः॥ पाली ५ बालकृमिः ६। इति जटाधरः॥ (यथा, मनौ। १। ४५।

"स्वेदजं दंशमशकं यूकामक्षिकमत्कुणम्।
उष्मणश्चोपजायन्ते यच्चान्यत् किञ्चिदीदृशम्॥"

क्रिमिविशेषः। तद्यथा,—

"नामतो विंशतिविधा बाह्यास्तत्र मलोद्भवाः।
तिलप्रमाणसंस्थानवर्णाः केशाम्बराश्रयाः॥
बहुपादाश्च सूक्ष्माश्च यूका लिक्षाश्च नामतः।
द्विधा ते कोठपिड़काः कण्डूगण्डान् प्रकुर्व्वते॥"

इति माधवकरसंगृहीतरुग्विनिश्चये क्रिम्यधिकारे॥

"क्रिमयो द्विविधाः प्रोक्ता बाह्याभ्यन्तरसम्भवाः।
बाह्या यूकाः प्रसिद्धाः स्युः किण्डुलूकास्तथान्तराः॥
सप्तधा हि भवेद्बाह्याः षड्धा चान्तःसमुद्भवाः।
तेषां वक्ष्यामि संभूतिं बाह्यानाभ्यन्तरे नृणाम्॥
रूक्षादति बलात् खेदाच्चिन्तया शोचनादपि।
कफधातुसमुद्भूतास्तीक्ष्णा यूका भवन्ति हि॥
यूकाः कृष्णाः पराः श्वेतास्तृतीयाश्चर्म्मसंश्रिताः।
सूक्ष्मातिविकटा रूक्षाश्चर्म्माभाश्चर्म्मयूकिकाः॥
चतुर्थी विन्दुकी नाम वर्त्तुला सूत्रसम्भवा।

यूथभ्रः, पुं, (यूथात् भ्रष्टः स्खलितः।) यूथात् पलायितहस्ती। इति शब्दमाला॥ (यूथभ्रष्टमात्रे, त्रि। यथा, श्रीमद्भागवते। ४। २८। ४६।

"यदा गोपसुतेनाङ्ग वृत्रस्यासं पतुरक्षतौ।
आसीत् संविमनस्कया यूथभ्रष्टा मृगी यथा॥")

मत्कुणाद्याश्च पञ्चन्यो बाह्योपद्रवकारिणः॥
यूका मस्तकसंस्थाने श्वेता वस्त्रनिवासिनी।
चर्म्मयूका नेत्रचर्म्मे सूक्ष्मे रोमणि यष्टिका॥"

इति हारीते चिकित्सितस्थाने पञ्चमेऽध्याये॥

यूकानाशकौषधं यथा, कामरत्ने।

"विड़ङ्गगन्धोत्पलकल्कयोगात्
गोमूत्रसिद्धं कटुतैलमेतत्।
अभ्यङ्गयोगेन शिरोरुहाणां
यूकादिलीक्षाप्रचयं निहन्ति॥

गोमूत्रेण बलामूललेपो यूकानिवारणः।
पारदं मर्दयेन्निष्कत्रयाधुस्तूरजद्रवैः॥
नागवल्लीद्रवैर्व्वाथ वस्त्रखण्डं प्रलेपयेत्।
तद्वस्त्रं वेष्टयेन्मौलौ धार्य्यं यामत्रयं तथा॥
यूका पतन्ति निःशेषास्तत्कालान्नात्र संशयः।
द्विनिशागन्धनवनीतेन लेपान्मौलौ प्रकण्डुनुत्॥
नीलोत्पलं तिलं यष्टि सर्षपं नागकेशरम्।
धात्रीफलं समं पिष्ट्वा लेपो यूकाविनाशनः॥
निशागन्धकगोमूत्रं विड़ङ्गकटुतैलकम्।
पारदेन समं मर्द्द्यं लेपो यूकानिवारणः॥"

इति केशस्य यूकादिनिवारणम्॥

परिमाणभेदः। यथा, मार्कण्डेये। ४६। ३७।

"परमाणुः परं सूक्ष्मं त्रसरेणुस्तदीरितः।
बालाग्रमेव निष्काष्ठं यूका चाथ यवोदरम्॥")

यूतिः, स्त्री, (यु + "अतियुतिक्षुतिसातिहेतिकीर्त्तयश्च।" ३।३।९७। इति क्तिन् निपातनाद्दीर्घत्वञ्च।) मिश्रणम्। इति सुग्धबोधव्याकरणम्॥ (यथा, भट्टिकाव्ये। ७। ६६।

"करोमि वो वर्हिर्यूतीन् पिबध्वं पाणिभिर्द्रुघः॥")

यूथं, क्ली, (यु मिश्रणे + "तिथपृष्ठगूथयूथप्रोथाः।" उणा० २। १२। इति थक्प्रत्ययेन निपातितम्।) सजातीयसमूहः। इत्यमरः। २।५।४१॥ (यथा, रामायणे। २। ५४। ४१।

"तत्र कुञ्जरयूथानि मृगयूथानि चैव हि।
विचरन्ति वनान्तेषु तानि द्रक्ष्यसि राघव!॥")

यूथनाथः, पुं, (यूथस्य नाथः।) वन्यकरिणां समूहस्य ईश्वरः। तत्पर्य्यायः। यूथपः २। इत्यमरः। २। ८। ३५॥

यूथपः, पुं, (यूथं पातीति। पा + कः।) अरण्यहस्तिनां प्रधानम्। इति शब्दरत्नावली॥ (यथा, श्रीमद्भागवते। ६। १५। २८।

"घोरमादाय परशुं सतूणं वर्म्मकार्मुकम्।
अन्वधावत दुर्म्मर्षो मृगेन्द्र इव यूथपम्॥"

प्रधानमात्रे च। यथा, महाभारते। १।१८।५।

"राजा पाण्डुर्महारण्ये मृगयालनिषेविते।
चरन् मैथुनधर्म्मेण ददर्श मृगयूथपम्॥")

यूथभ्रष्टः, पुं, (यूथात् भ्रष्टः स्खलितः।) यूथात् पलायितहस्ती। इति शब्दमाला॥ (यूथभ्रष्टमात्रे, त्रि। यथा, श्रीमद्भागवते। ४। २८। ४६।

"यदा गोपसुतेनाङ्ग वृत्रस्यासं पतुरक्षतौ।
आसीत् संविमनस्कया यूथभ्रष्टा मृगी यथा॥")

यूपिका, स्त्री, (यूथं पुष्पवृन्दमस्या अस्तीति। यूथ + ठन्। टाप्।) पाठा। इति राजनिर्घण्टः। अम्लानकः। इति मेदिनी। के, १४४॥ पुष्पविशेषः। युँइ फुल इति भाषा॥ (यथा, मेघदूते। १। २८।

"विश्रान्तः सन् व्रज वनमहीतीरजातानि सिञ्चन्
उद्यानानां नवजलकणैर्यूथिकाजालकानि॥")

तत्पर्य्यायः। गणिका २ अम्बष्ठा ३ मागधी ४। सा पीता चेत् हेमपुष्पिका। इत्यमरः। २। ४। ७१॥ यूथी५ प्रहसन्तीह्। इति त्रिकाण्डशेषः॥ शिखण्डिनी ७ वासन्ती ८। इति रत्नमाला॥ बालपुष्पिका ९ बहुगन्धा १० भद्रानन्दा ११। अस्या गुणाः। स्वादुत्वम्। शीतशीरत्वम्। शुक्रकरत्वं पित्तदाहश्लेष्मानाशत्वग्दोषनाशित्वञ्च। इति राजनिर्घण्टः॥ अपि च।

"यूथीयुगं हिमं तिक्तं कटुपाकं सरं लघु।
मधुरं तुवरं स्वाद्वं पित्तघ्नं कफवातलम्।
व्रणास्रसुखदन्तास्यशिरोरोगविषापहम्॥"

इति भावप्रकाशः॥

(तथा च सुश्रुते उत्तरतन्त्रे ४५ अध्यायः।

"पटोलगोलसुनिषण्णयूथिका
वटातिमुक्ताङ्कुरमिन्द्रवारजम्॥")

यूथी, स्त्री, (यूथ + अर्शआद्यच्। ततो ङीष्।) यूथिका। इति शब्दरत्नावली॥

यूथीनः, पुं, (यूथं पातीति। यूथ + खः।) यूथपः। इति शब्दचन्द्रिका॥

यूनिः, स्त्री, योगम्। मिश्रणम्। इति सिद्धान्तकौमुदी॥

यूनी, स्त्री, (युवन् + ङीष्। "श्वयुवमघोनामतद्धिते।" ६। ४। १३३। इति वस्य उत्वम्।) युवती। इति शब्दरत्नावली॥ (यथा,—

"यूनी कामभयी दुनोति हृदयं वेध्यश्यभावाद्वधूः।"

इति कलापे श्वयुवमघोनाम्नेतिसूत्रे कुलचन्द्रः॥)

यूपः, पुं क्ली, (यौति मिश्रयतीति। यूयते युज्यतेऽस्मिन्निति ऋग्भाष्ये सायणः। १। ५१। १४। यद्वा, यु + "कुयुभ्यां च। उणा० ३।२७। इति पः दीर्घत्वञ्च।) यज्ञे पशुबन्धनकाष्ठम्। इत्यमरः। २। ४। ४१॥ तस्य परिमाणादिर्यथा। सूत्रौ।

"चतुरस्रो भवेद्यूपो यज्ञदृक्षसमुद्भवः।
वर्त्तुलः शोभनः स्थूलः कर्त्तव्यो दृषमौलिकः॥"

भविष्ये।

"बिल्वस्य वकुलस्येव कर्त्तव्यो यूपः प्रशस्यते।"

इति सामवेदिदृषोत्सर्गतत्त्वम्॥

यूपः, पुं, (यु + पः। दीर्घश्च।) जयस्तम्भः। यागस्तम्भः। इत्युणादिकोषः॥ (यथा, रघुवंशे। ६। ३८।

"संग्रामनिर्व्विष्टसहस्रबाहु-
रष्टादशद्वीपनिखातयूपः।
अनन्यसाधारणराजशब्दो
बभूव योगी किल कार्त्तवीर्य्यः॥")

यूपकटकः, पुं, (यूपस्य कटक इव।) यज्ञसमाप्तिसूचकं पशुबन्धादर्थं यज्ञभूमौ यत् काष्ठमारोप्यते स यूपः तस्य शिरसि वलयाकृतिर्डमरुकाकृतिर्वा यः काष्ठविकारः सः। यूपमूले निहितलोहवलय इति केचित्। इति भरतः॥ तत्पर्य्यायः। चषालः २। इत्यमरः।२।७।१८॥

यूपकर्णः, पुं, (यूपस्य कर्ण इव।) यूपैकदेशः। तत्पर्य्यायः। घृतावनिः २। इति हेमचन्द्रः। ३। ४८६॥

यूपदारुः, पुं, (यूपाय दारुः।) खदिरवृक्षः। इति त्रिकाण्डशेषः॥

यूपद्रुमः, पुं, (यूपाय द्रुमः।) खदिरवृक्षः। इति शब्दरत्नावली॥ रक्तखदिरः। इति राजनिर्घण्टः॥

यूपलक्ष्यः पुं, (यूपो लक्ष्य उपवेशनार्थमस्य।) पक्षी। इति शब्दमाला॥

यूपाग्रं, क्ली, (यूपस्याग्रम्।) यूपस्याग्रभागः। तत्पर्य्यायः। तर्म्म २। इत्यमरः। २। ७। १६॥

यूष, वधे। इति कविकल्पद्रुमः॥ (भ्वा०-पर०-सक०-सेट्।) षष्ठस्वरी। यूषति। इति दुर्गादासः॥

यूषं, पुं, क्ली, (यूष्+कः।) सूपादिक्वाथरसः। इत्यमरः। ३। ५। ३५॥ यूषोऽन्तःस्थादिः। चवर्गादिश्चेति सुकुटः। इति भरतः॥ * ॥

अथ सूपयूषगुणाः।

"सूपयूषोऽग्निदो हृद्यः शुद्धानां व्रणिनामपि।
पथ्यो बलाग्निपित्तघ्नो ज्वरहा च कृताकृतः॥
अस्नेहलवणं सर्व्वमकृतं कटुकैर्विना।
विज्ञेयं लवणस्नेहकटुकैः संस्कृतं कृतम्॥
स तु दाड़िमभट्टीकायुक्तः स्यादागषाड़वः।
रुचिकृल्लघुपाकश्च दोषाणामविरोधकृत्॥"*॥

मसूरयूषगुणाः।

"मसूरयूषः संग्राही दृंही स्वादुः प्रमेहजित्।
पित्तश्लेष्मज्वरहरस्तथातीसारनाशनः॥"*॥

कुलत्थयूषगुणाः।

"कुलत्थयूषोऽनिलहा शर्करास्मरिनाशनः।
तूष्णीप्रतूष्णीकासाग्नीगुल्ममेदःकफापहः॥"*॥

अम्लेन सह माषयूषगुणाः।

"अम्लमाषो गुरुर्भेदी वातघ्नो दीपनो मतः॥"

अथ खड़यूषः।

"तक्रं कपित्थचाङ्गेरीमरिचाजाजिचित्रके।
सुपक्वं खड़यूषोऽयमयं काम्बलिकोऽपरः॥"*॥

खड़काम्बलिकयूषगुणाः।

"दध्नो लवणस्नेहतिलमाषविपाचितः।
खड़काम्बलिकौ यूषौ ग्राहिवातकफापहौ॥"

इति राजवल्लभः॥ * ॥

अपि च। अथ यूषस्य विधिर्गुणाश्च।

"अष्टादशगुणे नीरे शूमीधान्यशतो रसः।
विरलान्ने घनः किञ्चित् पेषातो यूष उच्यते।
उक्तः स एव निर्यूहो रुचिकृच्च विशेषतः॥"

यूषस्य प्रकारान्तरमाह।

"कल्कद्रव्यपलं शुण्ठीं पिप्पलीञ्चार्द्धकार्षिकीम्।
वारिप्रस्थेन विपचेत्तद्भवो यूष उच्यते॥"

अयमर्थः। यूषान्नं पलमितं तत् कल्कीकृतं शुण्ठी पिप्पली च समुदितार्द्धकर्षमिता कल्कीकृता उभयमपि प्रस्थमितेन वारिणा पचेत्। तद्भवो यूषः।

"यूषो वल्यो लघुः पाके रुच्यः कण्ठ्यः कफापहः॥"

अथ सूपयूषविधिः। वृन्दटीकायां तन्त्रान्तरे।

"सूपानां द्विपलं तोये घृतमर्द्धाढ़कोन्मिते।
पादस्थं मर्दितं पूतं दाड़िमस्य पलेन तत्॥
युक्तं सैन्धवविश्वाढ्यधान्यकैः पादकाग्निकैः।
कणाजीरकयोश्चूर्णाच्छागेनैवावचूर्णितम्।
संस्कृतो सूपयूषोऽयं पित्तश्लेष्महरो मतः॥"*॥

अथ सूपयूषगुणाः।

"सूपानामुत्तमो यूषो दीपनः प्रीतलो लघुः।
व्रणोर्द्धयवृरुग्दाहकफपित्तज्वरास्रहृत्॥"*॥

अथ सूपामलकयूषगुणाः।

"सूपामलकयूषस्तु भेदी पित्तानिलापहः।
दाहदाहभ्रमः प्रीतो मूर्च्छाश्रममदापहः॥"

मसूरयूषगुणाः पूर्ब्बवत्। इति भावप्रकाशः॥ (तथा च।

"कुलत्थयूषो मधुरः कषायः
कफं सपित्तं विनिहन्ति शीघ्रम्।
मेहाश्मरी पायुजमेदहन्ता
सन्दीपनो सूत्रविशोधनश्च॥
आढ्यूषं मधुरश्च प्रीतं
विशेषतो वातनिवारणश्च।
श्लेष्मापहं पित्तहरं नराणां
कृमिं निहन्यादपि दारुणश्च॥
प्रीतलं मधुरं मौद्गं यूषं पित्तविकारजित्।
वातदोषहरं प्रोक्तं ज्वराणां शमनं परम्॥
माषरो ग्राहको यूषो दृंही स्वादुः प्रमेहजित्।
पित्तश्लेष्मज्वरघ्नः स्यात्तथातीसारनाशनः॥
कषायं कटुकञ्चोष्णं वातघ्नं पुंस्त्वदोषकृत्।
रक्तपित्तं निहन्त्याशु चणानां यूषमुच्यते॥
घनं सवातं कफकृन्माषयूषं स पित्तकृत्।
अम्लं पर्य्युषितं तच्च ग्रस्यते तैलपाचने॥
अन्यानि चैव ग्रस्तानि कौलत्थान्युषितानि च।
मसूराश्चिपुटा वल्याः कलायाद्याश्च वर्ज्जिताः॥"

इति यूषविधिः॥ * ॥

इति हारिते प्रथमस्थाने नवमोऽध्याये॥

"ज्ञेयः पथ्यतमश्चापि सूपयूषः कृताकृतः।
स तु दाड़िमभट्टीकायुक्तः स्यादागषाड़वः॥"

"पटोलनिम्बयूषौ तु कफमेदोविशोषिणौ।
पित्तघ्नौ दीपनौ हृद्यौ कृमिकुष्ठज्वरापहौ॥
श्वासकासप्रतिश्याय प्रसेकारोचकज्वरान्।
हन्ति मूलकयूषस्तु कफमेदोगलामयान्॥
कुलत्थयूषोऽनिलहा श्वासपीनसनाशनः।
तूष्णी प्रतूष्णी कासाग्नीगुल्मोदावर्त्तनाशनः॥
दाड़िमामलकैर्यूषो हृद्यः संग्रमनो लघुः।
प्राणाग्निजननोमूर्च्छामेदोघ्नः पित्तवातजित्॥
सूपामलकयूषस्तु ग्राही पित्तकफे हितः।

यवकोलकुलत्थानां यूषः कण्ठ्योऽनिलापहः॥"

इति सुश्रुते सूत्रस्थाने ४५ अध्यायः॥)

यूषः, पुं, (यूषतीति। यूष्+कः।) ब्रह्मदारुवृक्षः। इति शब्दरत्नावली॥

येष, ऋ ङ यत्ने। इति कविकल्पद्रुमः॥ (भ्वा०-आत्म०-अक०-सेट्।) अन्तःस्थादिः। ऋ, अयियेषत्। ङ, येषते यियेषे। इति दुर्गादासः॥

योक्त्रा, [ऋ] त्रि, योगकर्त्ता। इति युजधातोः कर्त्तरि तृन्प्रत्ययेन निष्पन्नम्॥ (यथा, वाजसनेयसंहितायाम्। ३०। १४।

"मन्यवेऽयस्तापं क्रोधाय निसरं योगाय योक्त्रारꣳ
प्रोकायाभिसर्त्तारम्॥"

"योक्त्रारं योगकर्त्तारम्।" इति तद्भाष्यम्॥)

योक्त्रं, क्ली, (युज्यतेऽनेनेति। युज्+"हलश्चेग्रसयुयुजस्तुतुदेति।" ३। २। १८२। इति ष्ट्रन्।) युगेन सह ईषादण्ड आवध्यते अनेन तत्। योत् दड़ि इति भाषा। तत्पर्य्यायः। आवन्धः२ योत्रम् ३। इत्यमरः। २। ६। १३॥ (यथा, ऋग्वेदे। ५। ३३। २।

"स त्वं न इन्द्र धियमानो अर्कैर्हरीणां वृषन्
योक्त्रमश्रेः॥"

"योक्त्रं नियोजनरज्जुं अश्रः आश्रयसि।" इति तद्भाष्ये सायणः॥ मन्थनरज्जुः। यथा. रामायणे। १। ४५। १८।

"ततो निश्चित्य मथनं योक्त्रं कृत्वा च वासुकिम्।
मन्थानं मन्दरं कृत्वा ममन्थुरमितौजसः॥")

योगः, पुं, (युज समाधौ+भावादौ यथायथं घञ्।) सन्नहनः। उपायः। ध्यानम्। सङ्गतिः। युक्तिः। इत्यमरः। ३। ३। २२॥ (प्रेम। यथा, देवीभागवते। ३। १५। १३।

"स्त्रीयान् गुणान् प्रवितताम् प्रवदंस्तदासौ
तां प्रेमदामनुचकार च योगयुक्तः॥"

"योगयुक्तः प्रेमयुक्तः।" इति तट्टीकायां नीलकण्ठः॥ छलम्। इति मनुः। ८। ११५॥ अस्य प्रमाणं योगदानशब्दे द्रष्टव्यम्॥) अपूर्व्वार्थसम्प्राप्तिः। वपुःस्थैर्य्यम्। प्रयोगः। विष्कम्भादिः। भेषजम्। विश्वघातकः। द्रव्यम्। कार्म्मणम्। इति मेदिनी॥ नैयायिकः। घनम्। इति हेमचन्द्रः॥ चारः। सूत्रम्। इति त्रिकाण्डशेषः॥ * ॥ (येन वाक्यं युज्यते स योगः। यथा,—

"तैलं पिबेच्चाष्टतवल्लिनिम्ब-
हिंस्राभयाकृत्तकपिप्पलीभिः।
सिद्धं बलाभ्याञ्च सदेवदारु
हिताय नित्यं गलगण्डरोगी॥

सिद्धं पिबेदिति प्रथमं वक्तव्ये तृतीयपादे सिद्धं प्रयुक्तमेवं दूरस्थानामपि पदानामेकीकरणं योगः।" इत्युत्तरतन्त्रे पञ्चषष्टितमोऽध्याये सुश्रुतेनोक्तम्॥) अथ सप्तविंशतियोगानां नामानि। यथा,—

"विष्कम्भः प्रीतिरायुष्मान् सौभाग्यः शोभन-
स्तथा।
अतिगण्डः सुकर्म्मा च धृतिः शूलस्तथैव च ॥
गण्डो वृद्धिर्ध्रुवश्चैव व्याघातो हर्षणस्तथा।
वज्रश्चाथ सिद्धिः व्यतीपातो वरीयान् परिघः शिवः।
सिद्धः साध्यः शुभः शुक्लो ब्रह्मेन्द्रो वैधृतिस्तथा॥"
तेषां वर्ज्जनीयभागा यथा,—
"परिघस्य त्यजेदर्द्धं शुभकर्म्म ततः परम्।
त्यजादौ पञ्च विष्कम्भे सप्त शूले च नाड़िकाः॥
गण्डव्याघातयोः षट् च नव हर्षणवज्रयोः।
वैधृतिव्यतिपातौ च समस्तौ परिवर्जयेत्॥
शेषा यथार्थनामानो योगाः कार्य्येषु शोभनाः॥"
अथ विष्कम्भादियोगानयनक्रमः।
"रवीन्दुयोगलिप्ताभ्यो योगा भभोगभाजिताः।
गतगम्याश्च षष्टिघ्ना नाड्यो भुक्त्यन्तरोद्धृताः॥"
इति सूर्य्यसिद्धान्तः॥
विष्कम्भादिसप्तविंशतिसङ्ख्यकःकालविशेषः। तत्-
साधनमाह।
"ग्रहकलाः सरवीन्दुकलाहृताः
खखगजैश्च भयोगमिती क्रमात्।
अथ हृता खगतैष्यविलिप्तिका
निजदिनेन गतागत नाड़िकाः॥"
इति भास्करीयसिद्धान्तशिरोमणौगणिता-
ध्यायः॥*॥ यस्य ग्रहस्य नक्षत्रं ज्ञातु-
मिष्यते तस्य कलाः कार्य्याः। तथा चन्द्रार्कयो-
र्योगस्य कलाः कार्य्याः। उभयत्र मृताष्टकेन
हृते प्रथमस्थाने गतभानि। द्वितीयस्थाने गत-
योगाः। अथ यान्यवशिष्टानि गतानि खख-
हारच्युतानि गम्यानि स्युः तेषां गतानां सम्ब-
न्धिन्यो विकलाः खखगतिभिर्भाज्याः। यल्लभ्यते
सा गतनाड़िका भवन्ति। यद्भोग्याणां विकला
भक्तास्तद्देश्या घटिका भवन्ति। इति मिता-
क्षरानाम्नी तन्त्रटीका॥ आनन्दयोगो
यथा। भीमपराक्रमे।
"अश्विनी सह सूर्य्येण सोमे मृगशिरस्तथा।
आर्द्रेषा भौमवारेण बुधे हस्तः प्रकीर्त्तितः॥
अनुराधा गुरोर्वारे विश्वदेवस्तु भार्गवे।
वारुणं शनिसंयुक्तमानन्दोऽयं प्रकीर्त्तितः॥"
योगवरा यथा। दीपिकायाम्।
"भूमिपुत्रार्कयोरर्क्षे नन्दा भद-
द्वारुणाद्रान्त्यचित्राहिमूलाग्निभिः।
भार्गवेज्ययोरर्क्षे भद्रा
भवेत् फल्गुयुग्मोडुसंयुता॥
सोमपुत्रस्य वारे जया स्यान्मृगो-
पेन्द्रगुर्व्विन्द्रयाम्याभिजिद्वह्निभिः।
शेष्यतेरर्क्षे रिक्ता च युक्ता यदा
विश्वभूक्रामियुक्पित्रादित्यर्क्षभिः॥
सूर्य्यसुतस्य दिने यदि पूर्णा
ब्रह्मदिनाधिपतिद्रविणैः स्यात्।
योगवरास्त्रिभिरेव समेताः
सर्व्वसमीहितसिद्धिनियुक्ताः॥"
अयमेव चानन्दयोगः॥*॥ अथानन्दयोगः।
"ध्रुवगुरुकरमूलापौष्णभान्यर्कवारे
हरियुगविधियुग्मे फल्गुनौ भाद्रयुग्मे।
दिवसकरतुरङ्गौ सर्व्वरीनाथवारे
गुरुयुगनलवातोपान्त्यपौष्णानि कौजे
दहनविधिशताख्यामैत्रभं सौम्यवारे
मरुददितिभपुष्यामैत्रभं जीववारे।
भगयुगजयुगम्बो विष्णुमैत्रे सिताह्वे
श्वसनकमलयोनी सौरिवारेऽमृतानि॥
यदि विष्टियतीपातौ दिनं वाप्यशुभं भवेत्।
हन्यतेऽमृतयोगेन भास्करेण तमो यथा॥
सर्व्वदेशाविरोधेन फलं स्याच्छुभयोगजम्॥
अमृतं सिद्धियोगश्च यद्येकस्मिन् दिने भवेत्।
तद्दिनन्तु भवेद्दुष्टं मधुसर्पिर्यथा विषम्॥"*॥
अथ सिद्धिदग्धपापपथमघटयोगाः। यथा,—
"नन्दाद्याः सिद्धियोगा भृगुजबुधकुजार्कौण्य-
वारैः प्रशस्ताः।
सूर्य्येशाग्न्यग्निषड्द्वयृतुमितितिथयोऽर्कादि-
वारैः प्रदग्धाः॥"
राजमार्त्तण्डे।
"मासा रुद्रादिशो रामा षट्पक्षसुनयस्तथा।
दह्यन्ते तिथयः सप्त रव्यादिसप्तभिर्यदैः॥"
अपि च।
"द्वादश्यर्कयुता भवेदशुभदा सोमेन चैकादशी
भौमे चापि युता तथैव दशमी नेष्टा तृतीया
बुधे।
षष्ठी नेष्टफलप्रदा सुरगुरौ शुक्रे द्वितीया तथा।
सर्व्वारम्भविनाशविघ्नजननी सूर्य्यात्मजे सप्तमी॥
पापोऽर्काहे विषाखाचययमसुडुपस्याद्रि
चित्राचतुष्कं
तोयं विश्वाभिजिद्धं त्वष्ट्र कुजदिवसे स्वत्रयं
विश्वरुद्रौ।
ब्राह्मे मूला विशाखा यमधनतुरगान्यानि जैवे-
ऽद्रि पित्र्यं
रौद्रिण्यार्द्रा यमेन्द्राग्नतभमथ भृगोरद्रि पुष्या-
त्रयेन्द्रौ॥
सौराहे हस्तयुग्मार्थ्यमयमजलयुक्पौष्णपुष्या-
धनानि
षष्ठोऽखण्डर्त्तुयुक्ते खरुद्रपतिदिने सौम्यवारे
ऽर्य्यमापि॥"*॥
अथोत्पाटादियोगाः।
"रव्यादिदिवसैर्युक्ता विशाखादिचतुश्चतुः।
उत्पाटा मृत्यवः काणा अमृतानि यथा-
क्रमम्॥"
अथ करकचायोगः।
"वाजिचित्रोत्तराषाढ़ा मूलपाशैष्यभान्तकाः।
सूर्य्यादिवारसंयुक्ता योगाः करकचाः स्मृताः॥"
अथ मृत्युयोगः।
"आदित्यभौमयोर्नन्दा भद्रा शुक्रशशाङ्कयोः।
बुधे जया गुरौ रिक्ता शनौ पूर्णा च मृत्युदा॥"
अथ यमघण्टादीनां वर्ज्यकालनिर्णयः।
"यमघण्टे त्यजेद्दृष्टौ मृत्यौ द्वादश नाड़िकाः।
अन्येषां पापयोगानां मध्याद्भात् परतः शुभम्॥"
अथ शुभचन्द्रेण करकचादिशान्तिः।
"अयोगेषु च सर्व्वेषु पूर्व्वयामं परित्यजेत्।
अयोगाश्च विनश्यन्ति चन्द्रशुद्धिहता इमे॥
करकचा मृत्युयोगाश्च दिनं दग्धं तथा परे।
शुभे चन्द्रे प्रणश्यन्ति तृणा वज्रहता इव॥"*॥
विरुद्धयोगानां देशविशेषे प्रतिप्रसवो यथा।
श्रीपतिः।
"विरुद्धसंज्ञास्त्रिधिवारयोगा
नक्षत्रवारप्रभवाश्च ये वै।
हूनाङ्गवङ्गेषु खशेषु वर्ज्याः
शेषेषु देशेषु न ते विरुद्धाः॥"
इति ज्योतिस्तत्त्वम्॥*॥
अथ क्रियायोगः। सुनय ऊचुः।
"दुःखाम्बुमग्नाः पुरुषाः प्राप्य ब्रह्म महालयम्।
उत्तरेयुर्भवाम्भोधिं तथा त्वमनुचिन्तय॥
इत्युक्तः स तदा प्राह क्रियायोगं महात्मनाम्।
नराणामुपकाराय दुःखविच्छित्तिकारकम्॥
वह्निरुवाच।
आराधयध्वं विश्वेशं जगतां कारणं परम्।
केशवन्तन्निरापेक्षा एवमुक्तं प्रवास्यथ॥
दृष्ट्वा पूजानमस्कारैः शुश्रूषाभिरहर्निशम्।
व्रतोपवासैर्विविधैर्ब्राह्मणानाञ्च तर्पणैः॥
तेषेषेष्वात्महितैः कामैर्यैः स्वचेतसि तुष्टिदाः।
भवेयुरपरिच्छेदादाराधयत केशवम्॥
तन्निष्ठास्तद्गतधियस्तत्कर्म्मागस्तदाश्रयाः।
तद्दृष्यस्तन्मनसः सर्व्वस्मिन् स इति स्थितः॥
समस्तान्यथ कर्म्माणि तत्र सर्व्वात्मनात्मनि।
संन्यस्यध्वं स वः कर्त्ता समस्तावरणच्युतः॥
परः परार्णां परमः स एको
नरोत्तमो यस्य पदन्न भिन्नम्।
चराचरं विश्वमिदं समन्ता-
दचिन्त्यरूपन्त्वपरिग्रहं यत्॥
तमाराध्य जगन्नाथं क्रियायोगेन वाड़वाः।
यान्ति मोक्षं परं जन्मुस्तस्मात्तन्मोक्षकारणम्॥
संसारार्णवमग्नानां विषयाक्रान्तचेतसाम्।
विष्णुपोतं विना नान्यत् किञ्चिदस्ति परायणम्॥
उत्तिष्ठञ्चिन्तय हरिं व्रजञ्चिन्तय केशवम्।
सुञ्जंश्चिन्तय गोविन्दं स्वपंश्चिन्तय माधवम्॥
यूयमेकाग्रचित्ता हि संश्रिता मधुसूदनम्।
जन्ममृत्युजराग्राहं संसारं सन्तरिष्यथ॥
क्रियायोगपरामेतां मुक्तिकार्य्याण्यनेकशः।
समाराध्य जगन्नाथं राजानो मोक्षमाप्नुयुः॥"
इति वह्निपुराणम्॥*॥
अथ योगसाधनम्। केशिध्वज उवाच।
"योगस्वरूपं ब्राह्मण्य! श्रूयतां गदतो मम।
यत्र स्थितो न चवते प्राप्य ब्रह्मलयं मुनिः॥
मन एव मनुष्याणां कारणं बन्धमोक्षयोः।
बन्धस्य विषयासङ्गि मुक्तेर्निर्विषयं तथा॥
विषयेभ्यः समाहृत्य विज्ञानात्मा मनो मुने।
चिन्तयेच्छुक्तये तेन ब्रह्मभूयं परेश्वरम्॥
आत्मभावं नयत्येवं तद्ब्रह्माध्यायिनं मुने।
विकार्य्यञ्चात्मनः शक्त्या लोहमाकर्षको यथा॥

आत्मप्रयत्नसापेक्षा विशिष्टा या मनोगतिः ।
तस्या ब्रह्मणि संयोगो योग इत्यभिधीयते ॥
एवमत्यन्तविशिष्टायुक्तधर्मोपलक्षणः ।
यस्य योगः स वै योगी समुच्चुरभिधीयते ॥
योगयुक् प्रथमं योगी युञ्जानः सोऽभिधीयते ।
विनिष्पन्नसमाधिस्तु परब्रह्मोपलब्धिवान् ॥
यद्यन्तरायदोषेण दुष्यते चास्य मानसम् ।
जन्मान्तरेऽभ्यसतो मुक्तिः पूर्वस्य जायते ॥
विनिष्पन्नसमाधिस्तु मुक्तिं तत्रैव जन्मनि ।
प्राप्नोति योगी योगाग्निदग्धकर्म्मा च योऽचिरात् ॥
ब्रह्मचर्य्यमहिंसां च सत्यास्तेयापरिग्रहान् ।
सेवेत योगी निष्कामो योग्यतां स्वं मनो नयन् ॥
स्वाध्यायशौचसन्तोषतपांसि नियतात्मवान् ।
कुर्वीत ब्रह्मणि तथा परस्मिन् प्रवणं मनः ॥
एते यमाः सनियमाः पञ्च पञ्च प्रकीर्त्तिताः ।
विशिष्टफलदाः काम्या निष्कामानां विमुक्तिदाः ॥
एकं भद्रासनादीनां समास्थाय गुणैर्युतः ॥
यमास्त्वेनियमांस्त्वेव युञ्जीत नियतो यतिः ॥
प्राणाख्यमनिलं वक्त्रमभ्यासात् कुरुते तु यत् ।
प्राणायामः स विज्ञेयः सबीजोऽबीज एव च ॥
परस्परेणाभिभवं प्राणापानौ यदानिलौ ।
कुरुतः सद्विधानेन तृतीयः संयमात्तयोः ॥
तस्य चालम्बनवतः स्थूलरूपं द्विजोत्तम ! ।
आलम्बनमनन्तस्य योगिनोऽभ्यसतः स्मृतम् ॥
पृथ्व्यादिष्वनुरक्तानि निगृह्याक्षाणि योगवित् ।
कुर्य्याच्चित्तानुकारीणि प्रत्याहारपरायणः ॥
वश्यता परमा तेन जायतेऽतिचलात्मनाम् ।
इन्द्रियाणामवश्यैस्तैर्न योगी योगसाधकः ॥
प्राणायामेन पवनैः प्रत्याहारेण चेन्द्रियैः ।
वशीकृतैस्ततः कुर्य्यात् स्थितं चेतः शुभाश्रये ॥

श्रीखाण्डिक्य उवाच ।

कथ्यतां मे महाभाग ! चेतसो यः शुभाश्रयः ।
यदाधारमशेषं तद्धन्ति दोषफलोद्भवम् ॥

श्रीकेशिध्वज उवाच ।

आश्रयस्चेतसो ब्रह्म द्विधा तच्च स्वभावतः ।
भूप ! मूर्त्तममूर्त्तञ्च परञ्चापरमेव च ॥
त्रिविधा भावना विप्र विश्वमेतन्निबोध मे ।
ब्रह्माख्या कर्म्मसंज्ञा च यथा चैवोभयात्मिका ॥
ब्रह्मभावात्मिका ह्येका कर्म्मभावात्मिका परा ।
उभयात्मिका तथैवान्या त्रिविधा भावभावना ॥
सनन्दनादयो ब्रह्मभावभावनया युताः ।
कर्म्मभावनया चान्ये देवाद्याः स्थावरान्ताः ॥
हिरण्यगर्भादिषु च ब्रह्मकर्म्मात्मिका द्विधा ।
बोधाधिकारयुक्तेषु विद्यते भावभावना ॥
अन्येषु सकलेषु विशेषज्ञानकर्म्मसु ।
विश्वमेतत् परं चान्यद्भेदभिन्नदृशां नृप ! ॥
प्रत्यक्षमितभेदं यत् सत्तामात्रमगोचरम् ।
वचसामात्मसंवेद्यं तज्ज्ञानं ब्रह्मसंज्ञितम् ॥
तच्च विष्णोः परं रूपमरूपस्याजमक्षरम् ।
विश्वस्वरूपवैरूप्यलक्षणं परमात्मनः ॥
न तद्योगयुजा शक्यं नृप ! चिन्तयितुं यतः ।
ततः स्थूलं हरेरूपं चिन्त्यं यद्वश्यगोचरम् ॥
हिरण्यगर्भो भगवान् वासवोऽथ प्रजापतिः ।
मरुतो वसवो रुद्रा भास्करास्तारका ग्रहाः ॥
गन्धर्व्वयक्षदैत्याद्याः सकला देवयोनयः ।
मनुष्याः पशवः शैलाः समुद्राः सरितो द्रुमाः ॥
भूप भूतान्यशेषाणि भूतानां ये च हेतवः ।
प्रधानादि विशेषान्तं चेतनाचेतनात्मकम् ॥
एकपादं द्विपादञ्च बहुपादमपादकम् ।
मूर्त्तमेतद्धरेरूपं भावनात्रितयात्मकम् ॥
एतत् सर्व्वमिदं विश्वं जगदेतच्चराचरम् ।
परं ब्रह्मस्वरूपस्य विष्णोः शक्तिसमन्वितम् ॥
विष्णुशक्तिः परा प्रोक्ता क्षेत्रज्ञाख्या तथापरा ।
अविद्या कर्म्मसंज्ञान्या तृतीया शक्तिरिष्यते ॥
यया क्षेत्रज्ञशक्तिः सा वेष्टिता नृप ! सर्व्वगा ।
संसारतापानखिलानवाप्नोत्यनुसन्ततान् ॥
तया तिरोहितत्वाच्च शक्तिः क्षेत्रज्ञसंज्ञिता ।
सर्व्वभूतेषु भूपाल ! तारतम्येन लक्ष्यते ॥
अप्राणवत्सु स्वल्पाल्पा स्थावरेषु ततोऽधिका ।
सरीसृपेऽपि तेभ्योऽपि अतिशक्तिः पतत्रिषु ॥
पतत्रिभ्यो मृगास्तेभ्यः स्वशक्त्या पशवोऽधिकाः ।
पशुभ्यो मनुजाश्चातिशक्त्या पुंसः प्रभाविताः ॥
एभ्योऽपि नागगन्धर्व्वा यक्षाद्या देवता नृप ! ।
शक्रः समस्तदेवेभ्यस्तस्चापि प्रजापतिः ॥
हिरण्यगर्भोऽति ततः पुंसः शक्त्युपलक्षितः ।
एतान्यशेषरूपस्य तस्य रूपाणि पार्थिव ! ॥
यतस्तच्छक्तियोगेन युक्तानि नभसा यथा ।
द्वितीयं विष्णुसंज्ञस्य योगिध्येयं महामते ॥
अमूर्त्तं ब्रह्मणो रूपं यत् सदित्युच्यते बुधैः ।
समस्ताः शक्तयश्चैता नृप यत्र प्रतिष्ठिताः ॥
तद्विश्वरूपरूपं वै रूपमन्यद्धरेर्महत् ।
समस्तशक्तिरूपाणि तत् करोति जनेश्वर ! ॥
देवतिर्य्यङ्मनुष्यादिचेष्टावन्ति स्वलीलया ।
जगतामुपकाराय न सा कर्म्म निमित्तजा ।
चेष्टा तस्याप्रमेयस्य व्यापिन्यव्याहतात्मिका ॥
तद्रूपं विश्वरूपस्य तस्य योगयुजो नृप ! ।
चिन्त्यमात्मविशुद्ध्यर्थं सर्व्वकिल्बिषनाशनम् ॥
यथाग्निरुद्धतशिखः कक्षं दहति सानिलः ।
तथा चित्ते स्थितो विष्णुर्योगिनां सर्व्वकिल्बिषम् ।
तस्मात् समस्तशक्तीनामाधारे तत्र चेतसः ।
कुर्व्वीत संस्थितिं सा तु विज्ञेया शुद्धधारणा ॥
शुभाश्रयः सचित्तस्य सर्व्वगस्य तथात्मनः ।
त्रिभावभावनातीतो मुक्तये योगिनां नृप ॥
अन्ये च पुरुषव्याघ्र ! चेतसो ये यथाश्रयाः ।
अशुद्धास्ते समस्तास्तु देवाद्याः कर्म्मयोनयः ॥
मूर्त्तं भगवतो रूपं सर्व्वाधाश्रयनिस्पृहम् ।
एषा वै धारणा ज्ञेया यच्चित्तं तत्र धार्य्यते ॥
तच्च मूर्त्तं हरेरूपं यादृक्चिन्त्यं नराधिप ! ।
तच्छ्रूयतामनाधारा धारणा नोपपद्यते ॥
प्रसन्नचारुवदनं पद्मपत्रायतेक्षणम् ।
सुकपोलं सुविस्तीर्णललाटफलकोज्ज्वलम् ॥
समकर्णान्तविन्यस्तचारुकर्णविभूषणम् ।
कम्बुग्रीवं सुविस्तीर्णश्रीवत्साङ्कितवक्षसम् ॥
बलीचिभङ्गिना मग्ननाभिना चोदरेण वै ।
प्रलम्बाष्टभुजं विष्णुमथवापि चतुर्भुजम् ॥
समस्थितोरुजङ्घञ्च सुस्थिराङ्घ्रिकराम्बुजम् ।
चिन्तयेद्ब्रह्मभूतं तं पीतनिर्म्मलवाससम् ॥
किरीटचारुकेयूरकटकादिविभूषितम् ।
शार्ङ्गशङ्खगदाखड्गचक्राद्यवलयान्वितम् ॥
चिन्तयेत्तन्मयो योगी समाधायात्ममानसम् ॥
तावद्यावद्दृढीभूता तत्रैव नृप धारणा ॥
व्रजतस्तिष्ठतोऽन्यदा स्वेच्छया कर्म्म कुर्व्वतः ।
नापयाति तदा चित्तात् सिद्धां मन्येत तां तदा ॥
ततः शङ्खगदाचक्रशार्ङ्गादिरहितं बुधः ।
चिन्तयेद्वपुषः पश्चात् साक्षसूत्रकम् ॥
सा यदा धारणा तद्वदवस्थानवती ततः ।
किरीटकेयूरसुखैर्भूषणैः रहितं स्मरेत् ॥
तदेकावयवं देवं चेतसापि पुनर्बुधः ।
कुर्य्यात्ततोऽवयविनि प्रणिधानपरो भवेत् ॥
तद्रूपप्रत्ययैकैकसन्ततिश्चान्यनिस्पृहा ।
तद्ध्यानं प्रथमैरङ्गैः षड्भिर्निष्पाद्यते नृप ॥
तस्यैव कल्पनाहीनं स्वरूपग्रहणं हि यत् ।
मनसा ध्याननिष्पाद्यं समाधिः सोऽभिधीयते ॥
विज्ञानं प्रापकं प्राप्य परे ब्रह्मणि पार्थिव ! ।
प्रापणीयस्तथैवात्मा प्रक्षीणाशेषभावनः ॥
क्षेत्रज्ञः करणो ज्ञानं करणं तेन तस्य तत् ।
निष्पाद्य मुक्तिकार्य्यं वै कृतकृत्यं निवर्त्तते ॥
तद्भावभावमापन्नस्ततोऽसौ परमात्मना ।
भवत्यभेदो भेदश्च तस्याज्ञानकृतो भवेत् ॥
विभेदजनकेऽज्ञाने नाशमात्यन्तिकं गते ।
आत्मनो ब्रह्मणो भेदमसन्तं कः करिष्यति ॥
इत्युक्तस्ते मया योगः खाण्डिक्य ! परिपृच्छते ॥"
इति विष्णुपुराणे ६ अंशे ७ अध्यायः ॥ * ॥

ब्रह्मकृतयोगो यथा ।

"सुखं योगासनं कृत्वा बभूव संपुटाञ्जलिः ।
पुलकाङ्कितसर्व्वाङ्गः साश्रुनेत्रोऽतिदीनवत् ॥
दृढां सुषुम्नां मेधाञ्च पिङ्गलां नलिनीं धुराम् ।
नाड़ीषट्कञ्च योगेन निरुध्य च प्रयत्नतः ॥
मूलाधारं स्वाधिष्ठानं मणिपूरमनाहतम् ।
विशुद्धं परमाज्ञाख्यं षट्चक्रञ्च निरुध्य च ॥
लङ्घनं कारयित्वा च तं षट्चक्रं क्रमाद्विधिः ।
ब्रह्मरन्ध्रं समानीय वायुवह्निं चकार ह ॥
निरुध्य वायुं मेधान्तामानीय हृदयाम्बुजम् ।
तं वायुं भ्रामयित्वा च योजयामास मेधया ॥
एवं कृत्वा तु निष्पन्नो यो दत्तो हरिणा पुरा ।
जजाप परमं मन्त्रं तं तस्यैकादशाक्षरम् ॥
मुहूर्त्तञ्च जपं कृत्वा ध्यायं ध्यायं पदाम्बुजम् ।
ददर्श हृदयाम्भोजे सर्व्वं तेजोमयं मुने ॥
तत्तेजसोऽन्तरे रूपमतीवसुमनोहरम् ।
द्विभुजं सुरलीहस्तं भूषितं पीतवाससा ॥
श्रुतिमूलमूलन्यस्तज्वलन्मकरकुण्डलम् ।
ईषद्धासं प्रसन्नास्यं भक्तानुग्रहकातरम् ॥
नवीनजलदाकारश्यामसुन्दरविग्रहम् ।
स्थितं जगत्सु सर्व्वेषु निर्लिप्तं सात्त्विरूपिणम् ॥

स्वात्मारामं पूर्णकामं जगद्व्यापि जगत्परम् ।
सर्व्वस्वरूपं सर्व्वेषां बीजरूपं सनातनम् ॥
सर्व्वाधारं सर्व्ववरं सर्व्वशक्तिसमन्वितम् ।
सर्व्वाराध्यं सर्व्वगुरुं सर्व्वमङ्गलकारणम् ॥
सर्व्वमन्त्रस्वरूपञ्च सर्व्वसम्पत्करं वरम् ।
यद्दृष्टं ब्रह्मरन्ध्रे च हृदि तद्बहिरेव च ।
दृष्ट्वा च परमाश्चर्य्यं तुष्टाव परमेश्वरम् ॥"
इति ब्रह्मवैवर्त्ते श्रीकृष्णखण्डे २० अध्यायः ॥*॥
अथ ध्यानयोगः । हरिरुवाच ।
"अथ योगं प्रवक्ष्यामि मुक्तिमुक्तिकरं परम् ।
ध्यायिभिः प्रीयते ध्येयो ध्यानेन हरिरीश्वरः ॥
तत् शृणुष्व महेशान ! सर्व्वपापविनाशनम् ।
विष्णुः सर्व्वेश्वरोऽनन्तो यद्भूमिपरिवर्ज्जितः ॥
वासुदेवो जगन्नाथो ब्रह्मात्मा अहमेव तु ।
देहिदेहस्थितो नित्यः सर्व्वदेहविवर्ज्जितः ॥
देहधर्म्मविहीनश्च चराचरविवर्ज्जितः ।
षड्विधेषु स्थितो द्रष्टा श्रोता घ्राता ऋतीन्द्रियः ॥
तद्धर्म्मरहितः स्रष्टा नामगोत्रविवर्ज्जितः ।
मन्ता मनःस्थितो देवो मनसा परिवर्ज्जितः ॥
मनोधर्म्मविहीनश्च विज्ञानाद्यय एव च ।
बोद्धा बुद्धिस्थितः साक्षी सर्व्वबोधविवर्ज्जितः ॥
बुद्धिधर्म्मविहीनश्च सर्व्वः सर्व्वगतोऽमलः ।
सर्व्वप्राणविनिर्मुक्तः प्राणधर्म्मविवर्ज्जितः ॥
प्राणिप्राणो महाप्राणान्तो भयेन परिवर्ज्जितः ।
अहङ्कारादिहीनश्च तद्धर्म्मपरिवर्ज्जितः ॥
तत्साक्षी तन्नियन्ता च परमानन्दरूपकः ।
जाग्रत्स्वप्नसुषुप्तिस्थस्तत्साक्षी तद्विवर्ज्जितः ॥
तुरीयः परमो धाता द्रष्टारो गुणवर्ज्जितः ।
सक्तो बुद्धो जनव्यापी सत्य आत्मास्म्यहं शिवः ॥
एवं ये मानवा विज्ञा ध्यायन्तीशपरं पदम् ।
प्राप्नुयुस्ते च तद्रूपं नात्र कार्य्या विचारणा ॥
इति ध्यानं मया ख्यातं तव शङ्कर ! सुव्रत ! ।
पठेद्य एतत् सततं विष्णुलोकं स गच्छति ॥"
इति गारुड़े १४ अध्यायः ॥
अथाष्टाङ्गयोगः ।
"मुक्तिरष्टाङ्गविज्ञानात् संप्राप्तव्यदे शृणु ।
यमाः पञ्च तद्विंसाद्या अहिंसा प्राण्यहिंसनम् ॥
सत्यं भूतहितं वाक्यमस्तेयं स्वाग्रहं परम् ।
अमैथुनं ब्रह्मचर्य्यं सर्व्वत्यागोऽपरिग्रहः ॥
नियमाः पञ्च सत्याद्या बाह्यमाभ्यन्तरं द्विधा ।
शौचं तुष्टिश्च सन्तोषस्तपश्चेन्द्रियनिग्रहः ॥
स्वाध्यायः स्वात्मजापः प्रणिधानं हरेर्यजिः ।
आसनं पद्मकाद्युक्तं प्राणायामो मरुज्जयः ॥
मन्त्रध्यानयुतो गर्भो विपरीतो ह्यगर्भकः ।
अगर्भात् सगर्भस्थः प्राणायामस्ततोऽधिकः ॥
एवं द्विधा त्रिधाप्युक्तः पूरणात् पूरकः स च ।
कुम्भको निश्चलत्वात् स रेचकाद्रेचकस्त्रिधा ॥
लघुर्द्वादशमात्रः स्याच्चतुर्विंशतिकः परः ।
षट्त्रिंशन्मात्रिकः श्रेष्ठः प्रत्याहारश्च रोधनम् ।
ब्रह्मात्मचिन्ता ध्यानं स्याद्धारणा मनसो धृतिः ।
अहं ब्रह्मेत्यवस्थानं समाधिर्ब्रह्मणः स्थितिः ॥

अहमात्मा परं ब्रह्म सत्यं ज्ञानमनन्तकम् ।
विज्ञानमानन्दो ब्रह्म सत्तत्त्वमसि केवलम् ॥
अहं ब्रह्मास्म्यहं ब्रह्म अशरीरमनिन्द्रियम् ।
अहं मनो बुद्धिमरुदहङ्कारादिवर्ज्जितम् ॥
जाग्रत्स्वप्नसुषुप्त्यादिमुक्तं ज्योतिस्तदीयकम् ।
नित्यं शुद्धं बुद्धियुक्तं सत्यमानन्दमद्वयम् ॥
योऽसावादित्यपुरुषः सोऽसावहमखण्ड ॐ ।
इति ध्यायन् विमुच्येत ब्राह्मणो भवबन्धनात् ॥"
इति गारुड़े ४६ अध्यायः ॥ * ॥
अपि च ।
"एतत्ते कथितं ज्ञानं योगक्षेमं निबोध मे ।
यं प्राप्य ब्रह्मणो योगी प्राप्नुतानन्यतां व्रजेत् ॥
प्राणात्मैवात्मना जेयो योगिनां स हि दुर्ज्जयः ।
कुर्व्वीत तज्जये यत्नं तस्योपायं शृणुष्व मे ॥
प्राणायामैर्दहेद्दोषान् धारणाभिश्च किल्बिषम् ।
प्रत्याहारेण संसर्गान् ध्यानेनानीश्वरान् गुणान् ॥
यथा पर्व्वतधातूनां ध्मातानां दह्यते मलम् ।
तथेन्द्रियकृता दोषा दह्यन्ते प्राणनिग्रहात् ॥
प्रथमं साधनं कुर्य्यात् प्राणायामस्य योगवित् ।
प्राणापाननिरोधस्तु प्राणायाम उदाहृतः ॥
लघुर्मध्योत्तरीयाख्यः प्राणायामस्त्रिधोदितः ।
तस्य प्रमाणं वक्ष्यामि तदलर्कं ! शृणुष्व मे ॥
लघुर्द्वादशमात्रस्तु द्विगुणः स तु मध्यमः ।
त्रिगुणाभिश्च मात्राभिरुत्तरीय उदाहृतः ॥
निमेषोन्मेषणे मात्रा तालो लघ्वक्षरो मतः ।
प्राणायामस्य संख्यार्थं स्मृतो द्वादशमात्रकः ॥
प्रथमेन जयेत् स्वेदं मध्यमेन तु वेपथुम् ।
विषादं हि तृतीयेन जयेद्दोषानुक्रमात् ॥
मृदुत्वं सेव्यमानास्तु सिंहव्याघ्रगजङ्गराः ।
यथा यान्ति तथा प्राणो वश्यो भवति योगिनः ॥
वश्यं मत्तं यथेच्छासौ नागं नयति हस्तिपः ।
तथैव योगी च्छन्देन प्राणं नयति साधितम् ॥
यथा हि साधितः सिंहो मृगान् हन्ति न मानुषान् ।
तद्वन्निषिद्धः पवनः किल्बिषं न नृणां तनुम् ॥
तस्मादयुक्तः सदा योगी प्राणायामपरो भवेत् ।
श्रूयतां मुक्तिफलदं तस्यावस्थाचतुष्टयम् ॥
ध्वस्तिः प्राप्तिस्तथा संवित् प्रसादश्च महीपते ।
स्वरूपं शृणु वै तेषां कथ्यमानमनुक्रमात् ॥
कर्म्मणाभिष्टुतानां जायते फलसंचयः ।
चेतसो विकषायत्वं यत्र सा ध्वस्तिरुच्यते ॥
ऐहिकामुष्मिकान् कामान् लोभमोहात्मकांश्च यान् ।
निरुध्यास्ते सदा योगी प्राप्तिः सा सार्व्वकालिकी ॥
अतीतानागतानर्थान् विप्रकृष्टतिरोहितान् ।
विजानातीन्द्रियैर्य्यत्र तद्ग्रहणां ज्ञानसम्पदा ॥
तुल्यप्रभावस्तु यदा योगी प्राप्नोति संविदम् ।
तदा संविदिति ख्याता प्राणायामस्य सा स्थितिः ॥
याति प्रसादं येनास्य मनः पञ्च च वायवः ।

इन्द्रियाणीन्द्रियार्थाश्च स प्रसाद इति स्मृतः ।
शृणुष्व च महीपाल ! प्राणायामस्य लक्षणम् ।
युञ्जतश्च यथायोगं यादृग्विहितमासनम् ॥
पद्मभद्रासनं वापि तथा स्वस्तिकमासनम् ।
आस्थाय योगी युञ्जीत कृत्वा च प्रणवं हृदि ॥
समः समासनो भूत्वा संछृत्य चरणावुभौ ।
संवृतास्यस्तथा चोरू सम्यग्विष्टभ्य वाग्यतः ॥
पार्ष्णिभ्यां लिङ्गवृषणावस्पृशन् प्रयतः स्थितः ।
किञ्चिदुन्नामितशिरा दन्तैर्दन्तान्न संस्पृशेत् ।
संपश्यन्नासिकाग्रं स्वं दिशश्चानवलोकयन् ॥
रजसा तमसो वृत्तिं सत्वेन रजस्तथा ।
संस्थाप्य निर्म्मले सत्वे स्थितो युञ्जीत योगवित् ॥
इन्द्रियाणीन्द्रियार्थेभ्यः प्राणादीन् मन एव च ।
नियम्य समवायेन प्रत्याहारमुपक्रमेत् ॥
यस्तु प्रत्याहरेत् कामान् कूर्म्मोऽङ्गानीव सर्व्वशः ।
स त्वात्मरतिरेकस्थः पश्यन्नात्मानमात्मनि ॥
सबाह्याभ्यन्तरं शौचं निष्पाद्याकल्पनाभितः ।
पूरयित्वा बुधो देहं प्रत्याहारमुपक्रमेत् ॥
प्राणायामा दश द्वौ च धारणा साभिधीयते ।
द्विधारणा स्मृतो योगो योगिभिस्तत्त्वदृष्टिभिः ॥
तथा वै योगयुक्तस्य योगिनो नियतात्मनः ।
सर्व्वे दोषाः प्रणश्यन्ति सत्त्वश्चैवोपजायते ॥
वीक्षते च परं ब्रह्म प्राकृतांश्च गुणान् पृथक् ।
व्योमादिपरमाणूंश्च तथात्मानमकल्मषम् ॥
इत्थं योगी जिताहारः प्राणायामपरायणः ।
जितं जितं शनैर्भूमिमारोहेत यथा गृहम् ॥
दोषान् व्याधिं तथा मोहमाक्रान्ता भूरनिर्जिता ।
विवर्द्धयति नारोहेत्तस्माद्भूमिमनिर्ज्जिताम् ॥
प्राणानामुपसंरोधात् प्राणायाम इति स्मृतः ।
धारणेत्युच्यते चेयं धार्य्यते यन्मनोऽनया ॥
शब्दादिभ्यः प्रवृत्तानि यदाक्षाणि जितात्मभिः ।
प्रत्याह्रियन्ते योगेन प्रत्याहारस्ततः स्मृतः ॥
उपायश्चात्र कथितो योगिभिः परमर्षिभिः ।
येन व्याधादयो दोषा न जायन्ते हि योगिनः ॥
यथा तोयार्थिनस्तोयं यन्त्रनालादिभिः शनैः ।
आपिबेयुस्तथा वायुं पिबेद्योगी जितश्रमः ॥
प्राग्भ्यां हृदये वाथ हृतीये च तथोरसि ।
कण्ठे मुखे नासिकाग्रे नेत्रभ्रूमध्यमूर्द्धसु ॥
किञ्चित्तस्मात् परस्मिंश्च धारणा परमा स्मृता ।
दशैता धारणाः प्राप्य प्राप्नोत्यक्षरसाम्यताम् ॥
नाभ्राजः क्षुधितः श्रान्तो न च व्याकुललोचनः ।
युञ्जीत योगं राजेन्द्र ! योगी सिद्ध्यर्थमात्मनः ॥
नातिशीते न चैवोष्णे द्वन्द्वे नाम्बुनिलात्मके ।
कालेष्वेतेषु युञ्जीत न योगं ध्यानतत्परः ॥
सशब्देऽग्निजलाभ्यासे जीर्णे गोष्ठे चतुष्पथे ।
शुष्कपर्णचये नद्यां श्मशाने सचरीस्थले ॥
सभये कूपतीरे वा चैत्यवल्मीकसञ्चये ।
देशेष्वेतेषु तत्त्वज्ञो योगाभ्यासं विवर्ज्जयेत् ॥
सत्त्वस्यानुपपत्तौ च देशकालविवर्ज्जिते ।
नासतो दर्शनं योगे तस्मात्तं परिवर्ज्जयेत् ॥
दोषानेतानवाहत्य स्मृत्वाद्यो युनक्ति वै ।

विघ्नाय तस्य ये दोषा जायन्ते तान्निबोध मे ॥
वाधिर्य्यं जड़तालोपः स्मृतेर्मूकत्वमन्धता ।
ज्वरश्च जायते सद्यस्तद्वज्ज्ञानयोगिनः ॥
प्रमादाद्योगिनो दोषा यद्येते स्युश्चिकित्सितम् ।
तेषां नाशाय कर्त्तव्यं योगिनां तं निबोध मे ॥
स्निग्धां यवागूमश्नीयां भुक्त्वा तत्रैव धारयेत् ।
वातगुल्मप्रशान्त्यर्थं गुदावर्त्ते ततो दधि ॥
यवागूर्व्वापि पवने वायुग्रस्तीन् परिक्षिपेत् ।
तद्वत् कर्म्मे महाशैलं स्थिरं मनसि धारयेत् ॥
विघाते वचसो वापि वाधिर्य्ये श्रवणेन्द्रिये ।
तथैवास्वफलं ध्यायेत्तृष्णार्त्तो रसनेन्द्रिये ॥
यस्मिन् यस्मिन् रुजा देहे तस्मिंस्तदुपकारिणीम् ।
धारयेद्धारणामुग्रां प्रीतां प्रीते विसर्जयेत् ॥
कीलं शिरसि संस्थाप्य काष्ठं काष्ठेन ताड़येत् ।
लुप्तस्मृतेः स्मृतिः सद्यो योगिनस्तेन जायते ॥
द्यावापृथिव्यौ वायुश्च यद्यपि नावधारयेत् ।
अमानुषात् सत्त्वजातादाधास्यतिचिकित्सितम् ॥
अमानुषं सत्त्वमन्तर्योगिनं प्रविशेत् यदि ।
वायुग्निधारणा चैवं देहसंस्थं विनिर्दहेत् ॥
एवं सर्व्वात्मना कार्य्या रक्षा योगविदा नृप ! ।
धर्म्मार्थकाममोक्षाणां शरीरं साधनं यतः ॥
प्रवृत्तिलक्षणा ख्याता योगिनो विघ्नयात्तथा ।
विघ्नानं विलयं याति तस्मादुद्योग्याः प्रवृत्तयः ॥
अलौल्यमारोग्यमनिष्ठुरत्वं
गन्धः शुभो मूत्रपुरीषमल्पम् ।
कान्तिः प्रसादः स्वरसौम्यता च
योगप्रवृत्तेः प्रथमं हि चिह्नम् ॥
अनुरागं जनो याति परोक्षे गुणकीर्त्तनम् ।
न विभ्यति च सत्त्वानि सिद्धिर्लक्षणमुत्तमम् ॥
शीतोष्णादिभिरत्युग्रैर्यस्य बाधा न जायते ।
न भीतिमेति चान्येभ्यस्तस्य सिद्धिरुपस्थिता ॥"
इति मार्कण्डेयपुराणे योगिचिकित्सानाम ३६ अध्यायः ॥ (तथा च ।
ईश्वर उवाच ।
"मय्येकचित्तता योग इति पूर्व्वं निरूपितम् ।
साधनान्यष्टधा तस्य प्रवक्ष्याम्यधुना शृणु ॥
यमाश्च नियमास्तावदासनान्यपि षण्मुख ! ।
प्राणायामस्ततः प्रोक्तः प्रत्याहारश्च धारणा ॥
ध्यानं तथा समाधिश्च योगाङ्गानि प्रचक्षते ।
अहिंसा सत्यमस्तेयं ब्रह्मचर्य्यापरिग्रहौ ॥
यमाः संक्षेपतः प्रोक्ता नियमाः शृणु पुत्रक ! ।
तपः स्वाध्यायसन्तोषः शौचमीश्वरपूजनम् ॥
नियमाः कथिता तत्त्व ! योगसिद्धिप्रदायिनः ।
सर्व्वेषामेव भूतानामक्लेशजननं हि यत् ॥
अहिंसा कथिता सद्भिर्योगसिद्धिप्रदायिनी ।
यथार्थकथनं सत्यमस्तेयमधुना शृणु ॥
चौर्य्येण वा बलेनापि परस्वहरणं च यत् ।
स्तेयमित्युच्यते सद्भिरस्तेयं तस्य वर्ज्जनम् ॥
सर्व्वत्र मैथुनत्यागो ब्रह्मचर्य्यमिहोच्यते ।
द्रव्याणामप्यनादानमापद्यपि यथेच्छया ॥
अपरिग्रह इत्युक्तो योगसिद्धेस्तु साधनम् ।
चान्द्रायणादिना यत्तु शरीरस्य च शोषणम् ॥
तत्तपः कथितं पुत्र ! साध्यायमधुना शृणु ।
प्रणवः शतरुद्रीयं तथाथर्व्वशिरःशिखा ॥
एतेषां यो जपः पुत्र ! स्वाध्याय इति कीर्त्तितः ।
यदृच्छालाभसन्तुष्टः सन्तोष इति पठ्यते ॥
बाह्ये चाभ्यन्तरे चापि शुद्धिः शौचं विधीयते ।
स्तुतिस्मरणपूजाभिर्वाङ्मनः कायकर्म्मभिः ॥
मयि भक्तिर्दृढ़ा पुत्र एतदीश्वरपूजनम् ।
यमाश्च नियमाः प्रोक्ताः संक्षेपान्न तु विस्तरात् ॥
यमैश्च नियमैर्युक्तो योगी मोक्षाय संस्तुतः ।
स्थिरबुद्धिरसंमूढ़ः पूर्व्वमासनमभ्यसेत् ॥
पद्मकं स्वस्तिकं पीठं सैंहं कौक्कुटकौञ्चरम् ।
कौर्म्मं वज्रासनं चैव वैयाघ्रं चार्द्धचन्द्रकम् ॥
दण्डं तार्क्ष्यासनं शूलं खड्गं मुद्गरमेव च ।
मकरं त्रिपथं काष्ठं स्थाणुर्वा हस्तिकर्णिकम् ।
भीमं वीरासनं चापि वाराहं मृगवैणिकम् ॥
क्रौञ्चं पानालिकं चापि सर्व्वतोभद्रमेव च ।
इत्येतान्यासनान्यत्र सप्तविंशतिसंख्यया ॥
योगसंसिद्धिहेतोस्तु कथितानि तवानघ ! ॥
एषामेकतरं बद्ध्वा गुरुभक्तिपरायणः ।
द्वन्द्वातीतो जयेत्प्राणानभ्यासक्रमयोगतः ॥
अन्तश्चराणां वायूनां बाह्याभ्यरोधनम् ।
प्राणायाम इति प्रोक्तो द्विविधः स च कथ्यते ॥
अगर्भश्च सगर्भश्च तयोराद्योऽजयः स्मृतः ।
द्वितीयः सजयः प्रोक्तो ध्रुवं याकृतिमाद्यभिः ॥
रेचकः शून्यकश्चैव पूरकः कुम्भकस्तथा ।
एवं चतुर्व्विधो भेदः प्राणायामेऽत्र हरिभिः ॥
अस्तनां नाड़यः प्रोक्ता गमागमलयाश्रयाः ।
रेचनाद्रेचकः प्रोक्तः शून्यकस्तु यथास्थितः ॥
पूरकः पूरणाद्वायोस्तन्निरोधाच्च कुम्भकः ।
देहिनो दक्षिणे भागे पिङ्गला नाड़िका स्मृता ॥
पितृयोनिरिति ख्याता भानुस्तत्राधिदैवतम् ।
दक्षिणेतरगा या च इड़ा सा नाड़िका स्मृता ।
देवयोनिरिति ख्याता चन्द्रस्तत्राधिदैवतम् ॥
एतयोरुभयोर्म्मध्ये सुषुम्ना नाम विश्रुता ॥
पद्मसूत्रनिभा नाड़ी कार्य्याख्या ब्रह्मदैवतम् ।
ततः शून्यं निरालम्बं मध्ये खात्मनि योजयेत् ॥
बाह्यस्यारोधनाद्वायोः शून्यकत्वं विनिर्दिशेत् ।
चन्द्रदैवतया भूयः पिबेदमृतमुत्तमम् ॥
आप्यायनं भवेत्तेन भावनं कल्मषस्य तु ।
आपूर्य्योदरसंस्थं तु उच्चैर्वायुं निरोधयेत् ॥
कुम्भकः कुम्भवत्स्थानं रेचको वर्णितस्य च ।
उत्क्षिप्य प्रयतो वायुमजदैवत्यमानयेत् ॥
अङ्गुष्ठाद्यान्तमारभ्य ब्रह्मरन्ध्रेण मोचयेत् ।
सङ्कोच्य कूर्चिकाचक्रमूर्द्धं नीत्वा रसाचयम् ॥
संशोष्य शक्तिनीं सम्यक्ततो ब्रह्मगृहां नयेत् ।
अनेन शोधयेन्नाड़ीमैश्वरं विमलं मुनिः ॥
क्रमेणाभ्यासयोगेन योगसंसिद्धिभाग्भवेत् ।
सुसूक्ष्मणां सदा वत्स ! योगाङ्गं योगसिद्धये ॥
विहाय वह्निमार्गं तु अङ्गुल्यास्तु शनैः शनैः ।
सौम्येनाकर्षयेद्वायुं नाभावाकाशय धारयेत् ॥
धारयन्नियतप्राणो योगैश्वर्य्यसमन्वितः ।
जायते वत्सरादूर्द्ध्वं जरामरणवर्ज्जितः ॥
वायुमाकर्षयेद्वाह्यं वामया चोदरं भवेत् ।
नाभिनासान्तराध्यायं स्त्रिः प्राणांश्च जयेद्ध्रुवम् ॥
मनःस्थैर्य्यं भवेदत्र ! त्रिषु स्थानेषु धारणात् ।
अङ्गुष्ठनाभिनासाग्रे वायुं योगी जितासनः ॥
अपानं कटिदेशे तु पृष्ठतो वै विनिर्दिशेत् ।
सदा तत्रैव सन्त्येष वायुजयक्रमः ॥
रेचकः पूरकश्चैव कुम्भकश्च न विद्यते ।
निरालम्बे मनः कृत्वा क्षणात्प्राणजितो भवेत् ॥
इन्द्रियाणां विचरतां विषयेषु स्वभावतः ।
निग्रहः प्रोच्यते यस्तु प्रत्याहारः स उच्यते ॥
यद्यत् पश्यति तत्सर्व्वं पश्येदात्मवदात्मनि ।
प्रत्याहारः स वै प्रोक्तो योगसाधनमुत्तमम् ॥
कर्म्मेन्द्रियाणां पञ्चानां पञ्चमाद्येतरे जने ।
यदि तत्र स्थिरो लोको मनो याति तदालयम् ॥
उद्धातान् दश पञ्चैव कारयेद्धारणां बुधः ।
प्राणवायुं निवार्य्यैव मनः स्थैर्य्यान्तरे क्षिपेत् ॥
देवांश्च सिद्धान् गन्धर्व्वांश्चारणान् खेचरान् गणान् ।
षण्मासाभ्यासयोगेन सूक्ष्मज्योतिः प्रपश्यति ॥
दृष्टे न स्याज्जरा मृत्युः सर्व्वज्ञश्च प्रजायते ।
स्फोटाख्या नाड़िका प्रोक्ता कूर्म्मलोकस्तदान्तरे ॥
उच्चार्य्य बिन्दुतत्त्वं तु तस्यान्ते गुणवत् स्मरेत् ।
भूतं भव्यं भविष्यच्च वर्त्तमानञ्च दूरतः ॥
ज्ञानं यत्तद्भवेन्नूनं स्फोटाख्ये ज्ञानमभ्यसेत् ।
ललाटे मूर्द्धिहृदये सदाग्निवमनुस्मरेत् ॥
शुद्धस्फटिकसङ्काशं जटाजूटेन्दुशेखरम् ।
पञ्चवक्त्रं दशभुजं सर्पयज्ञोपवीतिनम् ॥
ध्यात्वैवमात्मनि विभुं ध्यानं तत् स्मरयो विदुः ।
ततोऽमनस्कं भवति न शृणोति न पश्यति ॥
न जिघ्रति न स्पृशति न किञ्चिदपि वीक्षते ।
गुह्योरुहृदयास्येषु वायुं नासां विचिन्तयेत् ॥
ईशोऽहमिति योगीन्द्रः परानन्दैकविग्रहः ।
जरामरणनिर्म्मुक्तः शिव एव भवेन्मुनिः ॥
गमनागमनाभ्यां यो हीनो वै विषयोज्झितः ।
एकान्तरोन्मनीभावः समाधिरभिधीयते ॥
न दृष्टद्वयमुन्मन्ता न सूक्ष्मस्यापि चिन्तनम् ।
न बहिर्नान्तरं पुत्र ! ब्रह्मग्रन्थिविभेदनम् ॥
न शून्यं न कृष्णं वापि न दृश्यं नापि लोहितम् ।
न शुक्लं नापि वा पीतं न क्षय्यं नापि कर्व्वुरम् ॥
क्षत्वा हृत्पद्मनिलये विश्वाख्यं विश्वसम्भवम् ।
आत्मानं सर्व्वभूतानां परस्तात्तमसं स्थितम् ॥
सर्व्वस्याधारमयक्तमानन्दं ज्योतिरव्ययम् ।
प्रधानपुरुषातीतमाकाशं दहरं शिवम् ॥
तदन्तः सर्व्वभूतानामीश्वरं ब्रह्मरूपिणम् ।
ध्यायेदनादिमध्यान्तमानन्दादिगुणालयम् ॥
महान्तं पुरुषं ब्रह्म ब्रह्माणं ब्रह्म चाव्ययम् ।

ओङ्कारादौ तथात्मानं संस्थाप्य परमात्मनि ॥
आकाशे देवमीशानं ध्यायीताकाशमध्यगम् ।
कारणं सर्वभावानामानन्दैकरसाश्रयम् ॥
पुराणं पुरुषं प्रभुं ध्यायेन्मुच्येत बन्धनात् ।
शिवभक्तिं विना यस्तु संसारं तर्तुमिच्छति ॥
मूढो यथा श्वलाङ्गूलैः समुद्रं तर्तुमिच्छति ।
तथा विना प्रभुसेवां संसारतरणं न हि ॥
सर्वसौख्यप्रदः प्रभुर्नान्या काचन देवता ।
तस्मात् सर्वप्रयत्नेन महादेवं प्रपूजयेत् ॥
यदा गुहायां प्रकृतं जगत्संमोहनालये ।
चिन्तयेत् परमं व्योम सर्वभूतैककारणम् ॥
जीवनं सर्वभूतानां यत्र लोकः प्रलीयते ।
आनन्दं ब्रह्मणः सूक्ष्मं यत्पश्यन्ति समुच्चयः ॥
तन्मध्ये निहितं ब्रह्म केवलं ज्ञानलक्षणम् ।
पातुं तिष्ठेन्महेशेन सोऽमृते योगमैश्वरम् ॥
नैकलक्षं द्विलक्षं वा त्रिलक्षं न नवात्मकम् ।
सर्वोपाधिविनिर्मुक्तं समाधिरभिधीयते ॥
बाह्ये चाभ्यन्तरे पुत्र ! यत्र यत्र मनः क्षिपेत् ।
तत्र तत्रात्मनो रूपमानन्दमनुभूयते ॥
संस्थाप्य मयि चात्मानं परं ज्योतिषि निर्गुणे ।
मुहूर्तं तिष्ठतः साक्षात्तस्य चानुभवो भवेत् ॥
सर्वज्ञः परिपूर्णश्च जरामरणवर्जितः ।
मत्प्रसादाद्भवेद्योगी नान्यथा क्रौञ्चसूदन ! ॥
तस्मात् सर्वं परित्यज्य कर्मजातं सुदुष्करम् ।
मामेकं शरणं गच्छेदज्ञानं नाशयाम्यहम् ॥
ब्राह्मणाः क्षत्रिया वैश्याः शूद्राश्चान्ये च सङ्करा: ।
मद्भक्तिभावना पूता यान्ति मत्परमं पदम् ॥
जगतः प्रलये प्राप्ते नष्टे च कमलोद्भवे ।
मद्भक्ता नैव नश्यन्ति स्वेच्छाविग्रहधारिणः ॥
योगिनां कर्मिणां चैव तापसानां यतात्मनाम् ।
अहमेव गतिस्तेषां नान्यदस्तीति निश्चयः ॥"
इति ब्रह्मपुराणोपपुराणे श्रीसौरे शिवस्कन्द-संवादे यमनियमप्राणायामादिकथनं १२ अः ॥
अथ योगान्तरायाः यथा,—
"योगान्तरायास्तस्याथ जायन्ते युञ्जतः पुनः ।
नश्यन्तेऽभ्यासतस्तेऽपि प्रणिधानेन वै गुरोः ॥"
सूत उवाच ।
"आलस्यं प्रथमं पश्चाद्व्याधिपीड़ा प्रजायते ।
प्रमादः संशयस्थाने चित्तस्थैर्यानवस्थितिः ॥
अश्रद्धादर्शनं भ्रान्तिदुःखञ्च त्रिविधं ततः ।
दौर्मनस्यमयोग्येषु विषयेषु च योग्यता ॥
दशधाभिप्रजायन्ते मुनेर्योगान्तरायकाः ।
आलस्यञ्च प्रवृत्तिश्च गुरुत्वात् कायचित्तयोः ॥
व्याधयो धातुवैषम्यात् कर्मजा दोषजास्तथा ।
प्रमादस्तु समाधेस्तु साधनानामभावनम् ॥
इदं वैद्युभयसृक्तं विज्ञानं स्थानसंशयः ।
अनवस्थितचित्तत्वमप्रतिष्ठा हि योगिनः ॥
लब्धायामपि भूमौ च चित्तस्य भवबन्धनात् ।
अश्रद्धाभावरहिता वृत्तिर्वै साधनेषु च ॥
साध्ये चित्तस्य हि गुरौ ज्ञानाचारप्रियादिषु ।
विपर्ययज्ञानमिति भ्रान्तिदर्शनमुच्यते ॥
अनात्मन्यात्मविज्ञानमज्ञानात् तस्य सन्निधौ ।
दुःखमाध्यात्मिकं प्रोक्तं तथा चैवाधिभौतिकम् ॥
आधिदैविकमित्युक्तं त्रिविधं सहजं पुनः ।
इच्छाविघातात् सङ्क्षोभश्चेतसस्तदुदाहृतम् ॥
दौर्मनस्यं निरोद्धव्यं वैराग्येण परेण तु ।
तमसा रजसा चैव संसृष्टं दुर्मनः स्मृतम् ॥
तदा मनसि सञ्जातं दौर्मनस्यमिति स्मृतम् ।
हटात् स्वीकरणं कृत्वा योग्यायोग्यविवेकतः ॥
विषयेषु विचित्रेषु जन्तोर्विषयलोलता ।
अन्तराया इति ख्याता योगस्यैते हि योगिनाम् ॥
अत्यन्तोत्साहयुक्तस्य नश्यन्ति न च संशयः ।
प्रनष्टेष्वन्तरायेषु द्विजा पश्चाद्धि योगिनः ॥
उपसर्गाः प्रवर्तन्ते सर्वे ते सिद्धिसूचकाः ।
प्रतिभा प्रथमा सिद्धिर्द्वितीया श्रवणा स्मृता ॥
वार्त्ता तृतीया विप्रेन्द्रास्तुरीया चेह दर्शना ।
आस्वादा पञ्चमी प्रोक्ता वेदना षष्ठिका स्मृता ।
सप्तधा सिद्धिसन्त्यागात् सिद्धिदाः सिद्धयो मुनेः ।
प्रतिभा प्रतिभावृत्तिः प्रतिभाव इति स्थितिः ॥
बुद्धिर्विवेचना वेद्यं बुध्यते बुद्धिरुच्यते ।
सूक्ष्मे व्यवहितेऽतीते विप्रकृष्टे त्वनागते ॥
सर्वत्र सर्वदा ज्ञानं प्रतिभामुक्रमेण तु ।
श्रवणात् सर्वशब्दानामप्रयत्नेन योगिनः ॥
ह्रस्वदीर्घप्लुतादीनां गुह्यानां श्रवणादपि ।
सर्वस्याधिगमो यस्तु वेदना तूपपादिता ॥
दर्शना दिव्यरूपाणां दर्शनाप्रयत्नतः ।
संविद्धियरसे तस्मिन्नास्वादो ह्यप्रयत्नतः ॥
वार्त्ता च दिव्यगन्धानां तच्चात्रा बुद्धिसंविदा ।
विन्दन्ते योगिनस्तस्मादाब्रह्मभुवनं द्विजाः ॥
जगत्यस्मिन् हि देहस्थं चतुःषष्टिगुणं समम् ।
औपसर्गिकमेतेषु गुणेषु गणितं द्विजाः ॥
सन्त्याज्यं सर्वथा सर्वमौपसर्गिकमात्मनः ।
प्रेक्षाचे पार्थिवचाप्यं राक्षसानां पुरे द्विजाः ॥
याम्ये तु तैजसं प्रोक्तं गान्धर्वं श्वसनात्मकम् ।
ऐन्द्रे सोमात्मकं सर्वं सौम्ये चैव तु मानसम् ॥
प्राजापत्ये त्वहङ्कारं ब्राह्मे बोधमनुत्तमम् ।
आद्ये चाष्टौ द्वितीये च तथा षोड़शरूपकम् ॥
चतुर्विंशत् तृतीये तु द्वात्रिंशच्च चतुर्थके ।
चत्वारिंशत् पञ्चमे तु भूतमात्रात्मकं स्मृतम् ॥
गन्धो रसस्तथा रूपं स्पर्शः शब्दस्तथैव च ।
प्रत्येकमष्टधा सिद्धं पञ्चमे तच्छतक्रतोः ॥
तथाष्टचत्वारिंशच्च षट्पञ्चाशत् तथैव च ।
चतुःषष्टिगुणं ब्राह्मं लभते द्विजसत्तमाः ॥
औपसर्गिकमाब्रह्म भुवनेषु परित्यजेत् ।
लोकेष्वालोक्ययोगेन योगवित् परमं सुखम् ॥
स्थूलता ह्रस्वता वाल्यं वार्द्धक्यं यौवनं तथा ।
नानाजातिस्वरूपञ्च चतुर्भिर्देहधारणम् ॥
पार्थिवांशं विना नित्यं सुरभिर्गन्धसंयुतः ।
एतदष्टगुणं प्रोक्तमैश्वर्यं पार्थिवं महत् ॥
जले निवसनं यद्वज्जूषामिव विनिर्गमः ।
इच्छेच्छक्तः स्वयं पातुं समुद्रमपि मातुरः ॥
यत्रेच्छति जगत्यस्मिन् तत्रास्य जलदर्शनम् ।
यद्यदस्तु समादाय भोक्तुमिच्छति कामतः ॥
तत्तद्रसान्वितं तस्य क्षयाणां देहधारणम् ।
भाण्डं विनाथ हस्तेन जलपिण्डस्य धारणम् ॥
अव्रणत्वं शरीरस्य पार्थिवेन समन्वितम् ।
एतत् षोड़शकं प्रोक्तमाप्यमैश्वर्यमुत्तमम् ॥
देहादग्निविनिर्माणं तत्तापभयवर्जितम् ।
लोकं दग्धमपीहान्यददग्धं स्वविधानतः ॥
जलमध्ये हुतवहस्याधाय परिरक्षणम् ।
अग्निनिग्रहणं हस्ते स्मृतिमात्रेण चागमः ॥
भस्मीभूतविनिर्माणं यथापूर्वं स्वकामतः ।
द्वाभ्यां रूपविनिष्पत्तिर्विना तैस्त्रिभिरात्मनः ॥
चतुर्विंशात्मकं ह्येतत् तैजसं मुनिपुङ्गवाः ।
मनोगतित्वं भूतानामन्तर्निवसनं तथा ॥
पर्वतादिमहाभारस्कन्धेनोद्वहनं पुनः ।
लघुत्वञ्च गुरुत्वञ्च पाणिभ्यां वायुधारणम् ॥
अङ्गुल्यग्रनिपातेन भूमेः सर्वत्र कम्पनम् ।
एकेन देहनिष्पत्तिर्वायैश्वर्यं स्मृतं बुधैः ॥
छायाविहीननिष्पत्तिरिन्द्रियाणाञ्च दर्शनम् ।
आकाशगमनं नित्यमिन्द्रियार्थैः समन्वितम् ॥
दूरे च शब्दग्रहणं सर्वशब्दावगाहनम् ।
तन्मात्रलिङ्गग्रहणं सर्वप्राणिनिदर्शनम् ॥
ऐन्द्रमैश्वर्यमित्युक्तमेतैरुक्तः पुरातनः ।
यथाकामोपलब्धिश्च यथाकामविनिर्गमः ॥
सर्वत्राभिभवश्चैव सर्वगुह्यनिदर्शनम् ।
कामानुरूपनिर्माणं वह्नित्वं प्रियदर्शनम् ॥
संसारदर्शनञ्चैव मानसं गुणलक्षणम् ।
छेदनं ताड़नं बन्धं संसारपरिवर्तनम् ॥
सर्वभूतप्रसादश्च मृत्युकालजयस्तथा ।
प्राजापत्यमिदं प्रोक्तमाहङ्कारिकमुत्तमम् ॥
अकारणजगत्सृष्टिस्तथानुग्रह एव च ।
प्रलयश्चाधिकारश्च लोकवृत्तप्रवर्तनम् ॥
असाद्गुण्यमिदं यक्षं निर्माणञ्च पृथक् पृथक् ।
संसारस्य च कर्तृत्वं ब्राह्ममेतदनुत्तमम् ॥
एतावत् तत्त्वमित्युक्तं प्राधान्यं वैष्णवं पदम् ।
ब्रह्मणा तद्गुणं प्रोक्तं वेत्तुमन्येन शक्यते ॥
विद्यते तत् परं शैवं विष्णुना नावगम्यते ।
असंख्येयगुणं शुद्धं को जानीयाच्छिवात्मकम् ॥
तुत्याने सिद्धयश्चेता ह्युपसर्गाश्च कीर्तिताः ।
निरोद्धव्याः प्रयत्नेन वैराग्येण परेण तु ॥
नाशातिशयतां ज्ञात्वा विषयेषु भयेषु च ।
अश्रद्धया त्यजेत् सर्वं विरक्त इति कीर्तितः ॥
वैष्णवो पुरुषे ख्यातं गुणवैलक्षण्यमुच्यते ।
वैराग्येणैव सन्त्याज्याः सिद्धयश्चौपसर्गिकाः ॥
औपसर्गिकमाब्रह्म भुवनेषु परित्यजेत् ।
निरुद्धैव त्यजेत् सर्वं प्रसीदति महेश्वरः ॥
प्रसन्ने विमला मुक्तिर्वैराग्येण परेण वै ।
अथवानुग्रहार्थञ्च लीलार्थं वा तदा मुनिः ॥
अनिरुद्ध विचेष्टेद्यः सोऽप्येवं हि सुखी भवेत् ।
क्वचिद्भूमिं परित्यज्य आकाशे क्रीड़ते श्रिया ॥
उन्निरेच क्वचिद्देवान् सूक्ष्मानर्थान् समासतः ।
क्वचिच्छृणे तदर्थेन श्रोकवन्धं करोति सः ॥

क्वचिद्दृष्टकवत्स्वन्तु कुर्य्याद्वन्द्यं सहस्रशः ।
स्वगपत्तिसमूहस्य रत्नानश्च विन्दति ॥
ब्रह्मादिं स्थावरान्तश्च हस्तामलकवद्भवेत् ।
बहुनात्र किमुक्तेन विज्ञानानि सहस्रशः ॥
उत्पद्यन्ते मुनिश्रेष्ठ मुनेस्तस्य महात्मनः ।
अभ्यासेनैव विज्ञानं विष्णुश्च स्थिरं भवेत् ॥
तेजोरूपाणि सर्व्वाणि सर्व्वं पश्यति योगवित् ।
देवविम्बान्यनेकानि विमानानि सहस्रशः ॥
पश्यति ब्रह्मविष्णुन्द्रयमाग्निवरुणादिकान् ।
ग्रहनक्षत्रताराश्च भुवनानि सहस्रशः ॥
पातालतलसंस्थाश्च समाधिस्थः स पश्यति ।
आत्मविद्याप्रदीपेन स्वस्थेनाचलनेन तु ॥
प्रसादाष्टपूर्णेन सत्त्वपात्रस्थितेन तु ।
तमो निहत्य पुरुषः पश्यति ह्यात्मनीश्वरम् ॥
तस्य प्रसादाद्धर्म्मश्च ऐश्वर्य्यं ज्ञानमेव च ।
वैराग्यमपवर्गश्च नात्र कार्य्या विचारणा ॥
न शक्यो विस्तराद्वक्तुं वर्षाणामयुतैरपि ।
योगे पाशुपते निष्ठा स्थातव्यश्च मुनीश्वराः ! ॥"
इति लिङ्गपुराणे ६ अध्यायः ॥)

अथ त्रिविधयोगः ।

श्रीभगवानुवाच ।

"योगास्त्रयो मया प्रोक्ता नृणां श्रेयोविधित्सया ।
ज्ञानं कर्म्म च भक्तिश्च नोपायोऽन्योऽस्ति कुत्रचित् ॥
निर्व्विण्णानां ज्ञानयोगो न्यासिनामिह कर्म्मसु ।
तेष्वनिर्व्विण्णचित्तानां कर्म्मयोगस्तु कामिनाम् ॥
यदृच्छया मत्कथादौ जातश्रद्धस्तु यः पुमान् ।
न निर्व्विण्णो नातिसक्तो भक्तियोगोऽस्य सिद्धिदः ॥
तावत् कर्म्माणि कुर्व्वीत न निर्व्विद्येत यावता ।
मत्कथाश्रवणादौ वा श्रद्धा यावन्न जायते ॥
स्वधर्म्मस्थो यजन् यज्ञैरनाशीः काम उद्धव ! ।
न याति स्वर्गनरकौ यद्यन्यन्न समाचरेत् ॥
अस्मिँल्लोके वर्त्तमानः स्वधर्म्मस्थोऽनघः शुचिः ।
ज्ञानं विशुद्धमाप्नोति मद्भक्तिं वा यदृच्छया ॥"
इति श्रीभागवते । ११ । २० । ६—११ ॥ * ॥
सांख्ययोगः २ कर्म्मयोगः ३ ज्ञानकर्म्मन्यासयोगः ४ सन्न्यासयोगः ५ ज्ञानयोगः ६ विज्ञानयोगः ७ ब्रह्मयोगः ८ राजगुह्ययोगः ९ विभूतियोगः १० भक्तियोगः ११ प्रकृतिपुरुषविवेकयोगः १२ गुणत्रययोगः १३ पुरुषोत्तमयोगः १४ आचारविवेकयोगः १५ मोक्षयोगः १६ इते योगा इतेष्वध्यायेषु भगवद्गीतायां द्रष्टव्याः ॥*॥
(कलौ योगसिद्धिर्नास्ति। यदुक्तं काशीखण्डे । ३२ अध्याये ।

"न सिध्यति कलौ योगो न सिध्यति कलौ तपः ॥

तथा च तत्रैव ४२ अध्याये ।

"चञ्चलेन्द्रियवृत्तिः स्यात् कलिकल्मषजृम्भणात् ।
अल्पायुः स्यात्तथा नृणां क्वेह योगमहोदयः ॥")

योगक्षेमं, क्ली, (योगश्च क्षेमश्च तयोः समाहारः।) अनागतानयनागतरक्षणे । यथा मनुः ।

"दिवा वक्तव्यता प्राप्ते रात्रौ स्वामिनि तद्गृहे ।
योगक्षेमेऽन्यथा चेत्तु पालो वक्तव्यतामियात् ॥"
इहदङ्गिराः ।

"अनागतस्य दानेता आगतस्य च रक्षकः ।
रात्रावपि यदान्योऽस्ति तदा स्वामी न दोषभाक् ॥"
इति प्रायश्चित्ततत्त्वम् ॥

(तथा च गीतायाम् । ६ । २२ ।

"अनन्याश्चिन्तयन्तो मां ये जनाः पर्य्युपासते ।
तेषां नित्याभियुक्तानां योगक्षेमं वहाम्यहम् ॥"
"योगोऽप्राप्तस्य प्रापणं क्षेमस्तद्रक्षणं तदुभयं वहामि।" इति शङ्कराचार्य्यः ॥ "योगं धनादिलाभं क्षेमञ्च तत्पालनं मोक्षं वा तैरप्रार्थितमपि अहमेव वहामि प्रापयामि।" इति श्रीधरस्वामी ॥ योगश्च क्षेमश्च इतीतरेतरद्वन्द्वे पुंलिङ्गद्विवचनप्रयोगो भवति।) यथा,—

"योगक्षेमकरं कृत्वा सीताया लक्ष्मणं ततः ।
स्वगस्यानुपदी रामो जगाम गजविक्रमः ॥"
इति भट्टिकाव्ये । ५ । ५० ॥

"फलपुष्पादेरलब्धस्य साधनं योगः शरीरादेर्लब्धस्य पालनं क्षेमः ।" इति तट्टीकायां भरतः ॥ "योगक्षेमौ शरीरस्थितिपालने ।" इति तत्रैव जयमङ्गलः ॥

योगचरः, पुं, (योगेषु चरतीति । चर + "चरेष्टः ।" ३ । २ । १६ । इति टः ।) हनूमान् । इति शब्दरत्नावली ॥

योगज, क्ली, (योगात् जायते इति । जन् + डः ।) अगुरु । इति भावप्रकाशः ॥ योगजाते, त्रि ॥

योगजः, पुं, (योगेभ्यो जायते इति । जन् + डः ।) अलौकिकसन्निकर्षविशेषः । स च युक्तयुञ्जानभेदतो द्विविधः । यथा,—

"अलौकिकः सन्निकर्षस्त्रिविधः परिकीर्त्तितः ।
सामान्यलक्षणो ज्ञानलक्षणो योगजस्तथा ॥
आसत्तेराश्रयाणान्तु सामान्यज्ञानमिष्यते ।
तदिन्द्रियजतद्धर्म्मबोधसामग्र्यपेक्षते ॥
विषयी यस्य तस्यैव व्यापारो ज्ञानलक्षणः ।
योगजो द्विविधः प्रोक्तो युक्तयुञ्जानभेदतः ॥
युक्तस्य सर्व्वदा भानं चिन्तासहकृतोऽपरः ॥"
इति भाषापरिच्छेदे । ६३—६६ ॥*॥

"योगज इति । योगाभ्यासजनितधर्म्मविशेषः । श्रुतिपुराणादिप्रमाणक इत्यर्थः । युक्तेति । युक्तयुञ्जानरूपयोगिभेदेन द्विधात् धर्म्मस्य द्वैविध्यमिति भावः । युक्तस्येति । योगाभ्यासावगतावशीकृत-समाधि-समासादित-विविधसिद्धियुक्त इत्युच्यते । अयमेव विशिष्टयोगवत्त्वात् युक्त इत्युच्यते । सर्व्वदेति । चिन्तासहकारं विनेत्यर्थः । भानं सर्व्वविषयाणां प्रत्यक्षम् । अपरो युञ्जानः । विषयव्यावृत्ता मानससमाधिस्थः अयञ्च युञ्जान उच्यते । चिन्ता ध्यानं तदेव कारणं तत्सहकारात् स्थूलसूक्ष्मव्यवहितविप्रकृष्टानर्थान् मनः प्रत्यक्षीकरोतीत्यर्थः ।" इति सिद्धान्तमुक्तावली ॥

योगदानं, क्ली, (योगेन दानम् ।) छलेन दानम् । यथा,—

"योगाधमनविक्रीतं योगदानप्रतिग्रहम् ।
यच्च वाप्युपधिं पश्येत्तत् सर्व्वं विनिवर्त्तयेत् ॥"
इति मानवे ८ अध्यायः ॥

"योगाधमनेति । योगशब्दश्छलवाची छलेन ये बन्धकविक्रयदानप्रतिग्रहाः क्रियन्ते न तत्त्वतोऽन्यत्रापि निःक्षेपादौ यत्र छद्म जानीयात् वस्तुतो निक्षेपादि न कृतं तत् सर्व्वं निवर्त्तयेत् ।" इति तट्टीकायां कुल्लूकभट्टः ॥

योगनाविकः, पुं, मत्स्यविशेषः । तत्पर्य्यायः । गर्गाटः २ । इति हारावली ॥

योगनिद्रा, स्त्री, (योगश्चित्तवृत्तिनिरोधस्तच्चासौ समाधिस्तद्रूपा निद्रा ।) दुर्गा । यथा,—

"या निस्त्रान्तःस्थलाधस्था जगदण्डकपालतः ।
विभज्य पुरुषं याति योगनिद्रेति सोच्यते ॥"
इति कालिकापुराणे ६ अध्यायः ॥
(अपि च मार्कण्डेये देवीमाहात्म्ये । ८१ । ४६ ।

"योगनिद्रां यदा विष्णुर्जगत्येकार्णवीकृते ।
आस्तीर्य्य शेषमभजत् कल्पान्ते भगवान् प्रभुः ॥"
योगेन सन्न्यसनोपायादिना साध्या निद्रा । वीराणां निद्रा । यथा, कामन्दकीयनीतिसारे । १५ । ४४ ।

"मार्गे च दुर्गे विनिविष्टसैन्यो
विधाय रक्षां विधिवद्विधिज्ञः ।
सन्नद्धपार्श्वस्थितिवीरयोधः
सेवेत साध्वीं सुखयोगनिद्राम् ॥")

योगपट्टं, क्ली, (योगस्य पट्टं वसनविशेषः । योगार्थं पट्टमिति वा।) यद्वस्त्रेण पृष्ठजानुबन्धनं भवति तत् । यथा,—

"पाण्डुके योगपट्टस्य तर्ज्जन्यां रौप्यधारणम् ।
न जीवत्पितृकः कुर्य्यात् ज्येष्ठे भ्रातरि जीवति ॥"

तल्लक्षणं यथा,—

"पृष्ठजान्वोः समायोगे वस्त्रं वलयवद्दृढम् ।
परिवेष्ट्य यदूर्द्धञ्च स्थितं तद्योगपट्टकम् ॥"
इति पाद्मे कार्त्तिकमाहात्म्ये २ अध्यायः ॥
(योगपट्टकम् । उत्तरीयविशेषः । यथा, याज्ञवल्क्यः ।

"अभावे धौतवस्त्राणां शाणक्षौमाविकानि च ।
कृतपो योगपट्टं वा दिर्व्वासा येन वा भवेत् ॥")
इत्याह्निकतत्त्वम् ॥)

योगपट्टकं, क्ली, (योगस्य पट्टकम् ।) पूजादौ धार्य्योत्तरीयविशेषः । योगपाटा इति भाषा ॥ यथा,—

"त्रिविधं योगपट्टकमाद्यं व्याघ्राजिनोद्भवम् ।
द्वितीयं शणचर्म्मोत्थं तृतीयं तन्तुनिर्म्मितम् ।
चतुर्म्मात्रप्रविस्तारं दैर्घ्येण यत्नलक्षवत् ॥
चतुर्म्मात्रं चतुरङ्गुलमात्रेम् ॥" इति वीरमित्रोदयधृतविद्वान्तप्रेखरः ॥

योगपीठं, क्ली, (योगस्य योगार्थं वा पीठमासनम् ।) देवानां योगासनम् । यथा,—

"मण्डलं योगपीठस्तु पद्मं पद्मे विचिन्तयेत् ।
घ्राणादीन्यासनानीह चत्वार्यपि विचिन्तयेत् ॥
योगपीठं पृथग्ध्यात्वा मण्डलेन सहैकताम् ।
पुनर्ध्यात्वा ततः पश्चात् पूजयेदासनं ततः ॥
ध्यानेन योगपीठस्य ध्यात्वा यद्दीयते जलम् ।
नैवेद्यपुष्पधूपादि तत् स्वयञ्चोपतिष्ठते ॥
सर्व्वे देवाः सगन्धर्व्वाः सचराचरगुह्यकाः ।
चिन्तिताः पूजिताश्च स्युर्य्योगपीठस्य पूजने ॥"
इति कालिकापुराणे ५६ अध्यायः ॥

योगमाया, स्त्री, (योग एव माया ।) भगवती ।
सा च विष्णुमाया । यथा, —
"ततश्च शौरिर्भगवत्प्रचोदितः
सुतं समादाय स सूतिकागृहात् ।
यदा बहिर्गन्तुमियेष तर्ह्यजा
या योगमायाजनिनन्दजाश्रया ॥"
इति श्रीभागवते १० स्कन्धे ३ अध्यायः ॥

योगरङ्गः, पुं, (योगेन रङ्गो रागो यस्य ।) नारङ्गः ।
इति राजनिर्घण्टः ॥ (नारङ्गशब्देऽस्य विशेषो ज्ञेयः ॥)

योगराजगुग्गुलुः, पुं, (योगराजाख्यो गुग्गुलुः ।)
वातरोगादीनामौषधविशेषः । यथा, —
"नागरं पिप्पलीमूलं चव्यं सृष्यगचित्रकम् ।
शुण्ठी हिङ्गुजमोदा च सर्षपो जीरकद्वयम् ॥
रेणुकेन्द्रयवौ पाठा विड्ङ्गं गजपिप्पली ।
कटुकातिविषा भार्गी वचा मूर्व्वा च पञ्चकम् ॥
देवदारु कणा कुष्ठं रास्ना मुस्ता च सैन्धवम् ।
एला चित्रकटङ्कः पथ्या धान्यकञ्च विभीतकम् ॥
धात्री च त्वगुशीरञ्च यवक्षारोऽखिलान्यपि ।
एतानि समभागानि सूक्ष्मचूर्णानि कारयेत् ॥
यावन्त्येतानि चूर्णानि तावदेवाञ्च गुग्गुलुः ।
संमर्द्द्य सर्पिषा पश्चात् सर्व्वं संमिश्रयेच्च तत् ॥
एकं पिण्डं ततः कुर्य्यात् धारयेत् घृतभाजने ।
गुटिकाष्टकमात्रास्तु खादेत्ताञ्च यथोचितम् ॥
यथोचितमिति दोषकालानलाद्यपेक्षया ॥
परिभाषा च ।
आदौ घ्राणोन्मितं खादेत् ततः कर्षार्द्ध-
मात्रकम् ।
ततः कर्षमितं खादेत् गुग्गुलुं क्रमतो नरः ॥
दिनानां सप्तके पूर्व्वे गुग्गुलोः घ्राणमाहरेत् ।
द्वितीये कर्षमर्द्धन्तु पूर्णं कर्षं ततः परम् ॥
गुग्गुलुर्योगराजोऽयं महाश्चर्य्यो रसायनः ।
मैथुनाहारपानानां नियमो नात्र विद्यते ॥
सर्व्वान् वातामयान् हन्यात् आमवातमप-
स्मृतिम् ।
वातरक्तं तथा कुष्ठं तथा दुष्टव्रणानपि ॥
अर्शांसि ग्रहणीरोगं प्लीहगुल्मोदराण्यपि ।
श्वासार्द्दितं मन्दमग्निञ्च श्वासं कासमरोचकम् ॥
प्रमेहं नाभिशूलञ्च क्रिमिं क्षयमुरोग्रहम् ।
शुक्रदोषं रजोदोषमुदावर्त्तं भगन्दरम् ॥ * ॥
रास्नादिक्वाथसंयुक्तः सर्व्ववातामयान् हरेत् ।
काकोल्यादिश्रितान् पित्तं कफमारग्वधादिना ॥
दार्व्यादिश्रितेन मोहांश्च गोमूत्रेण च पाण्डुताम् ।
मधुना मेदसो वृद्धिं कुष्ठं निम्बगुडेन च ॥
क्षिप्ताक्षाक्षेण वातासृं शीफं मूलकजात्
घृतात् ।
पाटलाक्वाथसहितो विषं मूषकसम्भवम् ॥
त्रिफलाक्वाथसंयुक्तो दारुणां नेत्रवेदनाम् ।
पुनर्नवादेः क्वाथेन हन्ति सर्व्वोदरानपि ॥ * ॥
अत्र रास्नादिक्वाथो यथा, —
रास्ना पुनर्नवा शुण्ठी गुडूचीरण्डजं घृतम् ।
सप्तधातुगते वाते सामे सर्व्वाङ्गगे पिबेत् ॥
इति योगराजो गुग्गुलुः ॥"इति भावप्रकाशः ॥

योगरूढ़ः, पुं, (योगार्थप्रतिपादको रूढ़ः ।)
योगार्थसहभावेन रूढ़ार्थबोधकशब्दः । यथा,
"योगरूढ़ाश्च रूढ़ाश्च यौगिकाश्चेति ते त्रिधा ॥"
"ते शब्दाः पुनस्त्रिधा भवन्ति । योगरूढ़ाः पङ्कजादयः । पङ्कजनिडप्रत्ययैः पङ्कजनिकर्चभिधायकेन योगेनापि पदार्थ एव प्रतिपाद्यते न कुमुमाद्यर्थ इति । योगार्थपुरस्कारेणापि रूढ्यर्थ एवेति योगरूढ़ः । एवं ईश्वरसङ्केतमहिम्ना झटिति पद्मस्यैव स्मृतेः ।" इत्यलङ्कारकौस्तुभे २ किरणः ॥ ("योगरूढ़ं नाम लक्षयति ।
'स्वान्तर्निविष्टशब्दार्थस्वार्थयोर्बोधकत्वकथ्यः ।
योगरूढ़ं न यत्रैकं विनान्यस्यास्ति शाब्दधीः ॥'
यन्नाम स्वावयववृत्तिलभ्यार्थेन समं स्वार्थस्यान्वयबोधकृत् तन्नाम योगरूढ़ं यथा पङ्कजकृष्णसर्पाधर्म्मादि तद्धि शान्तर्निविष्टानां पङ्कादिशब्दानां वृत्तिलभ्येन पङ्कजनिकर्चादिना समं स्वप्रत्ययस्य पद्मादेरन्वयानुभावकं पङ्कजमित्यादितः पङ्कजनिकर्त्तृ पद्ममित्यनुभवस्य सर्व्वसिद्धत्वात् । स्यांस्तु विशेषो यद्रूढ़मपि मण्डपरथकारादिपदं योगार्थविनाकृतस्य रूढ्यर्थस्यैव रूढ्यर्थविनाकृतस्यापि योगार्थस्य बोधकं मण्डपे शेते इत्यादौ योगार्थस्य मण्डपानकर्त्रादेरिव मण्डपं भोजयेदित्यादौ समुदितार्थस्य गृहादेरयोग्यत्वेनान्वयाबोधात् । योगरूढ़न्तु पङ्कजादिपदमवयववृत्त्या रूढ्यर्थमेव समुदायशक्त्या चावयवलभ्यार्थमेवानुभावयति तत्वन्त्र युत्पत्तिवैचित्र्यात्तथैव साकाङ्क्षत्वात् । अतएव पङ्कजं कुमुदमित्यत्र पङ्कजनिकर्त्तृत्वेन भूमौ पङ्कजसत्पन्नमित्यादौ च पद्मत्वेन पङ्कजपदस्य लक्षणयैव कुमुदस्थलपद्मयोर्बोध इति वार्त्तिकम् । ननु पुष्पं पङ्कजेत्यादौ पङ्कजादेरन्वयस्यावोधात् बोधाच्च पङ्कजपुष्पमित्यादौ निर्विभक्तिकेन पङ्कजादिपदेनोपस्थाप्यार्थस्यान्वयधीसामान्यं प्रत्येव तादृशपङ्कजादिपदोत्तरशब्दोपस्थाप्यत्वं तन्त्रम् एवं पुष्पं पङ्कजमित्यादौ अन्वयबोधदर्शनात्तदनुरोधेन सविभक्तिकपङ्कजादिपदोपस्थाप्यार्थान्वयबोधं प्रति स्वसमानविभक्तिकपदोपस्थाप्यत्वञ्च अतस्तदुपस्थापितस्य पङ्कजातादेः कथं पदान्तरानुपस्थापितं पद्मादावन्वय इति चेदपङ्कजवृत्तिः सत्तेत्यादौ च व्यभिचारादुक्तयुत्पत्तेः
'स्वजदच्छरसंग्रीभि तरुण्यासुखपङ्कजम् ।'
इत्यादौ सङ्कोचेनेति गृहाण । नच धेनुपदस्य

धानकर्म्मत्वविशिष्टायां गवीवपङ्कजादिपदस्यापि पङ्कजातत्वादिविशिष्टपद्मादौ 'रूढ़िरेवास्तु नतु योगरूढ़िरिति साम्प्रतं अन्यत्र क्लृप्तशक्तिभ्यः पङ्कजन्यादिपदेभ्य एवाकाङ्क्षादिसाचिव्येन पङ्कजनिकर्त्तृत्वादेर्लाभसम्भवे तद्विशिष्टस्य पद्मस्य गुरोः समुदायाशक्त्यवादनन्यलभ्यस्यैव शब्दार्थत्वात् । यद्यपि कर्त्तर्यचकडप्रत्यये एव पद्मत्वविशिष्टस्य लक्षणया लाभसम्भवान्न पङ्कजभागस्य तत्र शक्तिरुचिता प्रकारान्तरालभ्यस्यैव शब्दशक्यत्वमित्युक्तत्वात् कृतिवर्त्तमानत्वयोरिवैकपदार्थयोरपि कर्तृपद्मयोर्भिन्नोऽन्वयस्तं सम्भवित्वात् तथाप्यवयवानां शक्तेरग्रहे ग्रहेऽपि वा पद्मादौ तदर्थस्यान्वयधीविरोधिधीदशायां पङ्कजमस्तीत्यादितः पद्ममस्तीत्याद्यनुभवार्थमवश्यं पद्मत्वादिविशिष्टे पङ्कजादिभागस्य रूढ़िरूपेया इतरथा प्रकृत्यर्थावच्छिन्नस्यैव प्रत्ययार्थस्य पदार्थान्तरेणान्वयस्य युत्पन्नतया ङप्रत्ययोपस्थापितस्यापि पद्मस्याक्तित्वादिना सहान्वयानुपपत्तेः । अतएव पङ्कजादिपदाग्रहीतशक्तिकस्य पुंसः पङ्कजमस्तीत्यादितो ज्ञात्वापि कर्त्तास्तीत्याकारको नान्वयबोधः प्रत्ययमात्रोपस्थाप्यस्य कर्त्तुरन्यत्रान्वये निराकाङ्क्षत्वादिति वक्ष्यते । किञ्चैवमेकाक्षरकोषावधृतशक्तिकानां कखादिप्रत्येकवर्णानामेव निरूढ़लक्षणया तत्तदर्थानुभावकत्वसम्भवाद्बकनखादिसमुदायस्यापि तत्तदर्थे शक्तिर्व्विलीयेत कादिप्रत्येकवर्णस्य शक्तिग्रहं विनापि वकादिशब्दाद्बकादेरनुभवार्थं तत्र समुदाये शक्तिरिति तु प्रकृतेऽपि समानं कादिप्रत्ययमात्रस्य पद्मादौ वृत्तिमत्त्वाग्रहेऽपि पङ्कजादिसमुदायात् पद्मादेरनुभवस्य सर्व्वसिद्धत्वात् । नचैवं चित्रगुरित्यादावपि चित्रगोस्वाम्यादौ समुदायस्य शक्तिप्रसङ्गः समासत्वस्याविशिष्टत्वादिति वाच्यम् अगृहीतावयववृत्तिकस्य पुंसस्ततोऽर्थानधिगमेनावयवानां शक्तेरवश्यापेक्षायां तेषामेव तथाविधार्थबोधकत्वौचित्यस्य वक्ष्यमाणत्वादिति ।

पङ्कजादिपदेभ्यः केवलस्यैव योगार्थस्य रूढ्यर्थस्य वा बोधयुदासार्थत्वाद्व्युत्पत्त्यर्थयोर्मिथः साकाङ्क्षत्वनियमो न कल्प्यते परन्तु रूढ्यर्थभिन्ने योगार्थस्य बोधं प्रति रूढ़िधियः प्रतिबन्धकत्वं तेन रूढ़िरप्रतिसन्धानदशायामवयवशक्तेरेव पङ्कजं कुमुदमित्यादौ पङ्कजनिकर्त्तृत्वादिना केरवादेरवगमस्तथावयवशक्तिरनुपस्थितौ समुदायशक्तेरेव भूमौ पङ्कजमुत्पन्नमित्यादौ पङ्कजत्वप्रकारेण स्थलपद्मादेरतएव च तैलपदं योगेन तिलप्रभवं रूढ्या विलक्षणद्रव्यपर्य्यवसितं स्नेहं बोधयेद्योगरूढ़मपि तैलं पत्रमित्यादौ सर्षपस्य तैलमित्यादौ च शक्तेरेव प्रत्येकस्य बोधकमिति मीमांसकानामतमुपन्यस्यति ।
'रूढ्यर्थभिन्ने योगार्थबुद्धौ रूढेर्विरोधिताम् ।
वदन्ति केचिदेकैकबुद्धिस्तैः क्वचिदिष्यते ॥'
क्वचित्समुदायावयवयोरेकमात्रस्य शक्तिप्रति-

सत्त्वानस्थले यद्यपि पद्मान्यधर्म्मिकपङ्कजातत्वान्वयधीसामान्यं प्रति पङ्कजपदं पद्मप्रत्युक्तमित्येवं रूढ्यज्ञानत्वेन न विरोधित्वं तादृग्धीसत्त्वेऽपि कर्दमजादिशब्देभ्यस्तादृशेन कैरवादेरवगमात् नापि पङ्कजपदजन्यतादृग्बोधं प्रत्येव तथा विरोधित्वं रूढ्यज्ञानदशायामपि समुदायस्य लक्षणया शक्तिभ्रमेण वा पङ्कजपदात् पङ्कजातत्वेन कुमुदबोधस्य सर्व्वेरुपगमात् तथाप्यवयवशक्त्या पङ्कजपदजन्यपद्मान्यधर्म्मिकपङ्कजातत्वान्वयबोधं प्रत्येव रूढ्यज्ञानत्वेन प्रतिबन्धकत्वम्। नच कुमुदत्व एव पद्मत्वेन रूढ्यभ्रमदशायां तादृशेण कुमुदस्य बोधो न स्यादिरोधित्वा रूढ्यधीः सत्त्वादिति वाच्यं पद्मान्यधर्म्मिकेत्यनेन पद्मत्वानवच्छिन्नविशेष्यताकत्वस्योक्तत्वात्। पद्मत्व एव कुमुदस्यापि समुदायशक्त्यधीदशायामवयवशक्त्या पङ्कजातं कुमुदमित्याकारकधीस्वीकारे तु कुमुदादिशक्तत्व ज्ञानाजन्यत्वेनापि प्रतिबध्यं विशेषणीयम्। नच यत्र तात्पर्य्यादिधीविलम्बादयोग्यताभ्रमादिनाप्रतिबन्धाद्वा रूढ्युपस्थिते पद्मे योगार्थस्य पङ्कजनिकर्त्तृत्वनान्वयस्तत्रावयवशक्त्या पङ्कजातत्वेन कुमुदादिबोधो न स्यात् विरोधिनो रूढ्यज्ञानस्य सत्त्वादिति वाच्यं मीमांसकानामिष्टत्वात्। ते हि मण्डपं भोजयेत्यादावपि गृहादौ रूढ्यधीसत्त्वे मण्डपादिपदानामवयवशक्त्या मण्डपानकर्त्तृत्वेन मन्यन्ते बोधं भ्रमत्वा ग्रहानास्कन्दितस्येव रूढ्यर्थगोचरतत्तदयोग्यताज्ञानाद्यभावविशिष्टस्यैव रूढ्यज्ञानस्य विरोधितायाः सुवचत्वाच्च। यदि च समुदाय एव पद्मत्वेन पङ्कजनिकर्त्तृत्वेन च शक्तिः प्रमाभ्रमाभ्यां पङ्कजातं पद्ममित्याकारको बोधः प्रामाणिक स्तदानीं च पङ्कजनिकर्त्तृत्वेन कुमुदस्य नान्वयधीः तदावयवशक्तीत्यपहाय पङ्कजपदघटकशब्दशक्तेति प्रतिबध्यकुक्षौ निक्षेपणीयं तद्घटकत्वञ्चेह तद्विषयिताश्रयकविषयिताकत्वमात्रं तदवयव एव तत्राप्यविशिष्टम्। यत्तु खावयवशक्त्या पङ्कजपदजन्यं पङ्कजकर्त्तृत्वेनान्वयबोधं प्रति पद्मत्वं हेतुस्तत्र कार्य्यस्य विशेष्यत्वं तदवच्छेदकत्वं वा कारणस्य तु समवायस्तादात्म्यं वा प्रत्यासत्तिरित्येतावतैव योगार्थमर्य्यादया कुमुदादेर्बोधयुदाससम्भवात् उक्तक्रमेण प्रतिबन्धकतायां मानाभावः पद्मत्वं पङ्कजप्रयोगोपाधिरिति प्राचीनप्रवादस्याप्युक्तार्थ एव पर्य्यवसानादिति तत्तुच्छं पद्मशब्दशक्तिकस्यापि पुंसः पङ्कजनिकर्त्तृत्वेनावयवशक्त्या कुमुदस्य बोधानुदयप्रसङ्गात् नचेष्टापत्तिरनुभवविरोधात् नच रूढ्यज्ञानकालीनमेव योगार्थस्य बोधं प्रत्युक्तरीत्या पद्मत्वस्य हेतुत्वं तथा सति रूढ्यधीदशायामपि तदसमानकालीनस्य पङ्कजातत्वेन कुमुदबोधस्य सामान्यसामग्रीमहिम्ना दुर्व्वारतापत्तेः रूढ्यज्ञानासमानकालीनतादृग्बोधं प्रति विशेषतो हेतुत्वस्यालाघवात् तत्कल्पने चातिगौरवात्। यद्यपि पङ्कजननकर्त्तृषु पङ्कादिपदानां शक्तिसत्त्वेऽपि पङ्कजपदान्न तादृग्बोधः परन्तु पद्मत्वमाश्रित्य योगार्थमर्य्यादया पङ्कजातत्वप्रकारकबोधसामान्यं प्रत्येव पद्मत्वविशिष्टे रूढ्यज्ञानस्य लाघवेन विरोधित्वात् पद्मान्यधर्म्मिकत्वादेर्गौरवेण प्रतिबध्यकोट्यप्रविष्टत्वादतो योगरूढं नामैव नास्ति युधिष्ठिरादिशब्दादपि रणस्थिरत्वादिकं योगार्थं परित्यज्यैव वैजात्यादिप्रकारेण कुन्तीपुत्रादवगमात्। यदुक्तमभियुक्तैः।

या वृत्तिरजहत्स्वार्था सेयमत्रोपपादिता।
जहत्स्वार्था तु तत्रैव यत्र रूढिर्विरोधिनी।
पङ्कजं मनसादेवी पद्मनाभो युधिष्ठिरः॥

इति। तदेतद्वैयाकरणमतं पङ्कजमरुणीत्यादितः पङ्कजातं पद्ममरुणीत्यादानुभवस्य न्यायमीमांसादिसकलतन्त्रसिद्धत्वेन गौरवस्य प्रामाणिकत्वादनादेयमन्यथा अवयवशक्तेरपि प्रतिबध्यतायामप्रवेशापत्तेर्लाघवे पङ्कजातत्वप्रकारकशाब्दसामान्यं प्रत्येव रूढिधीः प्रतिबन्धकत्वस्य सुवचत्वात्। नन्वेवं द्रव्ये सरसिजमस्तीत्यादितो द्रव्यनिष्ठं सरोजमिव द्रव्याभिन्ने सरसि जातं पद्ममपि प्रतीयेत नामार्थयोरभेदान्वये तन्त्रस्य नात्रोः समानविभक्तिकत्वस्यानयादिति चेत् सत्यं सविभक्तिकनामार्थस्य नामान्तरार्थान्वये वृत्तिशब्देकदेशान्वयेनैव समानविभक्तिकनामान्तरेण स्मारितत्वस्य तन्त्रतायाः स्वीकार्य्यत्वादिति।

यद्यदाकाङ्क्षितं योग्यं सन्निधानं प्रपद्यते।
तेन तेनान्वितः स्वार्थः पदैः समधिगम्यते॥

इति रूढ्यर्थयोगार्थयोर्युगपदुपस्थितौ तयोराकाङ्क्षादिसाचिव्यादाद्यान्वयबुद्धिस्थल एव योगार्थस्य रूढ्यर्थस्य वा नान्यत्रान्वयो नतु तयोरेव मिथः साकाङ्क्षत्वं अन्यत्र योगार्थस्य बोधने रूढिधीः प्रतिबन्धकत्वं वा प्रमाणाभावात् एवञ्च यत्र योगरूढिलभ्यार्थयोस्तात्पर्य्याद्यग्रहाद्विरोधिसमवधानाद्वा न प्रथममन्वयधीस्तत्र योगार्थमर्य्यादया पङ्कजातत्वेन कुमुदादेः समुदायशक्त्या च पद्मत्वेन शालूकमलस्य बोधो भवत्येवेति मणिकृन्मतं दर्शयति।

'रूढ्यर्थेऽन्यत्र या यत्र यदाकाङ्क्षादिनिश्चयः।
तदेव तत्र योगार्थस्यान्वयो मणिकृन्मतः॥'

समुदायशक्त्युपस्थापिते पदान्तरवृत्त्युपस्थापिते वा यत्र धर्म्मिण्यवान्तरवृत्तिलभ्यार्थस्य यदाकाङ्क्षानिश्चयादिस्तदैव तत्र तथान्वयबोध उत्पद्यते सम्भृतसामग्रीकत्वात् रूढ्यर्थभिन्ने योगार्थस्यान्वयबोधयुदासाय तु रूढेर्योगापहारिताप्रवादो रूढ्यर्थमात्रे योगार्थस्यान्वयबोधसामग्रीस्थलाभिप्रायक इति चिन्तामणिकृतामाशयः।

योगरूढं विभजते।

'सामासिकं तद्धितोक्तमिति तत् द्विविधं भवेत्।
योगरूढं कृदन्तस्य समासत्वव्यवस्थितेः॥'

तत् योगरूढं सामासिकं समासात्मकं कृष्णसर्पादि तद्धितोक्तं वासुदेवादि। कृदन्तस्य

पङ्कजादियोगरूढस्य सामासिक एवान्तर्भाव इति नाधिक्यम्॥ * ॥)

योगवाहः, पुं, (योगस्य वाहः। योगं वाहयतीति। वह + णिच् + अण् वा।) अनुस्वारः। विसर्गः। जिह्वामूलीयः। उपाध्मानीयः। इति व्याकरणम्॥

योगवाही, स्त्री. (योगं वाहयतीति। वह + णिच् + अण्। ततो ङीष्।) क्षारविशेषः। यथा,—

"खर्ज्जिस्तु खर्ज्जिकासुन्नी योगवाही सुवर्चिका।"

इति हेमचन्द्रः॥

पारदश्च॥ (पुं, रोगविशेषे मिलितानामौषधानां प्रयोगः। यथा,—

"योगवाहिरसाः सर्व्वे सर्व्वरोगगलग्रहे॥"

इति वैद्यकरत्नसारसंग्रहे रक्तपित्ताधिकारे॥)

योगसारः, पुं, (योगस्यौषधप्रयोगस्य सारः।) सर्व्वरोगहरणोपायः। यथा,—

धन्वन्तरिरुवाच।

"सर्व्वरोगहरं सिद्धं योगसारं वदाम्यहम्।
शृणु सुश्रुत! संक्षेपात् प्राणिनां जीवहेतवे॥
निमेषादिर्हविःकालश्चिन्ताभिः षड्विधो भवेत्॥
कषायकटुतिक्ताम्लरूक्षाहारादभोजनात्।
चिन्ताध्ववायव्यायामभयशोकप्रजागरात्॥
उच्चैर्भाष्यतिभावाच्च कर्म्मयोगातिकर्षणात्।
वायुः कुप्यति पर्य्यन्ते जीर्णान्ने दिनसंचये॥
उष्णाम्ललवणक्षारकटुकाजीर्णभोजनात्।
तीक्ष्णातपाग्निसन्तापमद्यक्रोधनिषेवणात्॥
विदाहकाले भुक्तस्य मध्याह्ने जलदागमे।
ग्रीष्मकालेऽर्द्धरात्रेऽपि पित्तं कुप्यति देहिनः॥
स्वादम्ललवणस्निग्धगुरुशीतातिभोजनात्।
नवान्नपिच्छलानूपमाषाभिष्यन्दिसेवनात्॥
अव्यवायो दिवास्वप्नश्चासनसुखादिभिः।
कफः प्रदोषे सुप्ते च वसन्ते च प्रकुप्यति॥
पारुष्यमूलसङ्कोचतोदविष्टम्भभोजनात्।
खरता सुप्तता हर्षरौक्ष्यस्तम्भनशोषणम्॥
म्लावत्वमङ्गविश्लेषवलनाग्रामवर्त्तनम्।
वायोर्लिङ्गानि तैर्युक्तं रोगं वातात्मकं वदेत्॥
दाहोष्मपाकसक्लेदकोपरागपरिस्रवाः।
कण्डूमण्डलवैगन्ध्यस्वेदमूर्च्छातिसृष्टभ्रमाः॥
हारिद्रं हरितत्वञ्च पित्तलिङ्गानि तैर्लयः।
स्नेहोपदेहमाधुर्य्यचिरकारित्ववन्धनम्॥
श्लेष्मित्यदृष्टिसंघातशोथशीतत्वगौरवम्।
कण्डूनिद्राभियोगश्च लक्षणं कफसम्भवम्॥
हेतुलक्षणसंसर्गाद्विद्याद्व्याधिं द्विदोषजम्।
सर्व्वहेतुसमुत्पन्नं त्रिलिङ्गं सान्निपातिकम्॥
दोषधातुमलाधारो देहिनां देह उच्यते।
तेषां समत्वमारोग्यं क्षयवृद्धी विपर्य्ययः॥
रसासृङ्मांसमेदोऽस्थिमज्जशुक्राणि धातवः।
वातपित्तकफा दोषा विण्मूत्राद्या मलाः स्मृताः।
वायुः प्रीतो लघुः सूक्ष्मः खरो रूक्षोऽस्थिरो वली।
पित्तमम्लकटूष्णञ्च पक्वोजोरोगकारणम्॥
मधुरो लवणः स्निग्धो गुरुः श्लेष्मातिपिच्छिलः।

गुदश्रोण्याश्रयो वायुः पित्तं पक्वाशयस्थितम् ॥
कफस्यामाशयं स्थानं कण्ठोरुन्मूर्द्धसन्धयः ।
कटुतिक्तकषायाश्च कफपित्तादिसंश्रयः ।
कट्वम्ललवणाः पित्तं स्वादुम्ललवणाः कफम् ॥
एत एव विपर्य्यस्ताः समायेषां प्रयोजिताः ।
भवन्ति रोगिणां प्रान्त्ये सुस्थानां सुखहेतवः ॥"
इत्यादि गारुडे १७२ अध्यायः ॥
(योगस्य सारः । शिवस्तवात्मको ग्रन्थविशेषः ॥)

योगाधमनं, क्ली, (योगेनाधमनम् ।) कूलेन बन्धकम् । यथा,—
"योगाधमनविक्रीतं योगदानप्रतिग्रहम् ।
यत्र वाप्युपधिं पश्येत् तत् सर्व्वं विनिवर्त्तयेत् ॥"
इति मनुः ॥
अस्य विवरणं योगदानशब्दे द्रष्टव्यम् ॥

योगारङ्गः, पुं, (योगेन ऋतुयोगेन आरङ्गः । नारङ्गः । इति राजनिर्घण्टः ॥

योगारूढः, त्रि, (योगं विषयनिवृत्तिं यमादिकं वा आरूढः ।) इन्द्रियभोग्येषु शब्दादिषु तत्साधनकर्म्मसु चानासक्तः । तस्य लक्षणं यथा,—
"यदा हि नेन्द्रियार्थेषु न कर्म्मस्वनुषज्जते ।
सर्व्वसङ्कल्पसंन्यासी योगारूढ़स्तदोच्यते ॥"
इति श्रीभगवद्गीतायाम् । ६ । ४ ॥ *॥
"कीदृशोऽयं योगारूढ़ो यस्य शमः कारणमुच्यते इत्यत्राह यदेति । इन्द्रियार्थेषु इन्द्रियभोग्येषु शब्दादिषु तत्साधनेषु च कर्म्मसु यदा नानुषज्जते आसक्तिं न करोति । तत्र हेतुः आसक्तिमूलभूतान् सर्व्वान् भोगविषयान् कर्म्मविषयांश्च सङ्कल्पान् संन्यसितुं त्यक्तुं शीलं यस्य सः । तदा योगारूढ़ उच्यते ।" इति तट्टीकायां श्रीधरस्वामी ॥

योगासनं, क्ली, (योगस्यासनं योगसाधनमासनमिति वा ।) ब्रह्मासनम् । ध्यानासनम् । इति हेमचन्द्रः । ३ । ५०३ ॥ (तत्तु पद्मासनादि । यथा, भट्टिकाव्ये । ७ । ७७ ।
"इत्युक्त्वा सर्व्व एवास्थुर्ब्रह्मा योगासनानि ते ॥"
"योगासनानि पद्मासनानि ।" इति तट्टीकायां जयमङ्गलभरतमल्लिकौ ॥)

योगिदृक्, पुं, (योगिनां दृक्योऽवलम्बनयष्टिः ।) वेत्रः । इति राजनिर्घण्टः ॥

योगिनी, स्त्री, (योगोऽस्यस्या इति । योग + इनिः । ङीप् ।) योगयुक्ता नारी । (यथा, मार्कण्डेये । ५२ । ३१ ।
"ते उभे ब्रह्मवादिन्यौ योगिन्यौ चाप्युभे द्विज ॥")
भगवत्याः सखीरूपा आवरणदेवता । सा कोटिविधा । तासां मध्ये चतुःषष्टिः प्रधानाः । यथा । नारायणी १ गौरी २ प्राकम्भरी ३ भीमा ४ रक्तदन्तिका ५ भ्रामरी ६ पार्व्वती ७ दुर्गा ८ कात्यायनी ९ महादेवी १० चण्डघण्टा ११ महाविद्या १२ महातपा १३ सावित्री १४ ब्रह्मवादिनी १५ भद्रकाली १६ विशालाक्षी १७ रुद्राणी १८ कृष्णपिङ्गला १९ अग्निज्वाला २० रौद्रमुखी २१ कालरात्रिः २२ तपस्विनी २३ मेघस्वना २४ सहस्राक्षी २५ विष्णुमाया २६ जलोदरी २७ महोदरी २८ मुक्तकेशी २९ घोररूपा ३० महाबला ३१ श्रुतिः ३२ स्मृतिः ३३ धृतिः ३४ तुष्टिः ३५ पुष्टिः ३६ मेधा ३७ विद्या ३८ लक्ष्मीः ३९ सरस्वती ४० अपर्णा ४१ अम्बिका ४२ योगिनी ४३ डाकिनी ४४ शाकिनी ४५ हारिणी ४६ हाकिनी ४७ राकिनी ४८ चिदग्नेश्वरी ४९ महाषष्ठी ५० सर्व्वमङ्गला ५१ लज्जा ५२ कौशिकी ५३ ब्रह्माणी ५४ माहेश्वरी ५५ कौमारी ५६ वैष्णवी ५७ ऐन्द्री ५८ नारसिंही ५९ वाराही ६० चामुण्डा ६१ शिवदूती ६२ विष्णुमाया ६३ मालिका ६४ । इति बृहन्नन्दिकेश्वरपुराणोक्तदुर्गापूजापद्धतिः ॥ अपि च ।
"ब्रह्माणी चण्डिका रौद्री गौरीन्द्राणी तथैव च ।
कौमारी वैष्णवी दुर्गा नारसिंही च कालिका ॥
चामुण्डा शिवदूती च वाराही कौशिकी तथा ।
माहेश्वरी शाङ्करी च जयन्ती सर्व्वमङ्गला ॥
काली कपालिनी मेधा शिवा शाकम्भरी तथा ।
भीमा शान्ता भ्रामरी च रुद्राणी चाम्बिका तथा ॥
क्षमा धात्री तथा स्वाहा स्वधापर्णा महोदरी ।
घोररूपा महाकाली भद्रकाली भयङ्करी ॥
क्षेमङ्करी चोग्रचण्डा चण्डोग्रा चण्डनायिका ।
चण्डा चण्डवती चण्डी महामोहा प्रियङ्करी ॥
बलविकरिणी देवी बलप्रमथिनी तथा ।
मनोन्मथिनी देवी च सर्व्वभूतस्य दामिनी ॥
उमा तारा महानिद्रा विजया च जया तथा ।
पूर्व्वोक्ताः शैलपुत्र्याद्या योगिन्यष्टौ च याः क्रमात् ॥
ताभिराभिश्च सहिताश्चतुःषष्टीश्च योगिनीः ।
पूजयेत्कमलस्थाश्च सर्व्वकामार्थसिद्धये ॥"
इति कालिकापुराणे ६२ अध्यायः ॥ *॥
अथ योगिन्यो यथा,—
"ततोऽष्टपत्रेष्वस्य पूजयेदष्टयोगिनीः ॥
शैलपुत्रीं चण्डघण्टां स्कन्दमातरमेव च ।
कालरात्रिञ्च पूर्व्वादिचतुर्दिक्षु प्रपूजयेत् ॥
चण्डिकामथ कूष्माण्डीं तथा कात्यायनीं शुभाम् ।
महागौरीं चाग्निकोणे नैर्ऋत्यादिषु पूजयेत् ॥"
इति तत्रैव ५३ अध्यायः ॥ *॥
तिथिविशेषे दिग्विशेषावस्थितयोगिन्यो यथा,—
"ब्रह्माणी संस्थिता पूर्व्वे प्रतिपन्नवमीतिथौ ।
माहेश्वरी चोत्तरे च द्वितीयादशमीतिथौ ॥
स्थिताग्नेये च कौमारी तृतीयैकादशीतिथौ ।
नारायणी च नैर्ऋत्ये चतुर्थीद्वादशीतिथौ ॥
पञ्चम्याञ्च त्रयोदश्यां वाराही दक्षिणे तथा ।
षष्ठ्याञ्चैव चतुर्दश्यामिन्द्राणी पश्चिमे स्थिता ॥
सप्तम्यां पौर्णमास्याञ्च चामुण्डा वायुगोचरे ।
अष्टम्यमावास्ययोश्च महालक्ष्मीश्च गोचरे ॥
योगिनीसंसुखे नैव गमनादि प्रकारयेत् ॥"
इति गारुडे ५६ अध्यायः ॥ *॥

अपि च ।
"प्रतिपन्नवमी पूर्व्वे रामा रुद्राश्च पावके ।
शरत्रयोदशी याम्ये वेदा मासाश्च नैर्ऋते ॥
षष्ठी चतुर्दशी पश्चात् वायव्यां मुनिपूर्णिमा ।
द्वितीया दशमी यत्ने ऐशान्यां चाष्टमी कुहूः ॥
वामे शुभकरी देवी सप्तमी दक्षिणे स्थिता ।
वधबन्धकरी चाग्रे पृष्ठे सर्व्वार्थसाधनी ॥"
इति ज्योतिस्तत्त्वम् ॥ *॥
तत्कालयोगिनी यथा, —
"यस्यां दिश्युदयं याति ततो यामार्द्धभुक्तिका ।
भ्रमन्ती तेन मार्गेण भवेत्तत्कालयोगिनी ॥
प्राची धनेश्वरहुताशनकौणपेय-
वायव्यवारुणयमाधिपशाङ्करेषु ।
एषु क्रमाच्चिवसति प्रतिपन्नबन्धोः
पृष्ठे स्थिता शुभकरी गिरिराजपुत्री ॥"
इति समयाश्चतम् ॥ *॥
अथ योगिनीसाधनम् । भूतडामरे ।
"अथातः संप्रवक्ष्यामि योगिनीसाधनोत्तमम् ।
सर्व्वार्थसाधनं नाम देहिनां सर्व्वसिद्धिदम् ॥
अतिगुह्या महाविद्या देवानामपि दुर्लभा ।
यासामभ्यर्चनं कृत्वा यक्षेशोऽभूद्धनाधिपः ॥
तासामाद्यां प्रवक्ष्यामि सुराणां सुन्दरीं प्रिये ।
अस्या अभ्यर्चनेनैव राजत्वं लभते नरः ॥
अथ प्रातः समुत्थाय कृत्वा स्नानादिकं शुभम् ।
प्रासादञ्च समासाद्य कुर्य्यादाचमनं ततः ॥
प्रणवान्ते महामारे हूँ फट् दिग्बन्धनं चरेत् ॥
प्राणायामं ततः कुर्य्यात् मूलमन्त्रेण मन्त्रवित् ।
षड़ङ्गं मायया कुर्य्यात् पद्मपत्रदलं लिखेत् ॥
तस्मिन् पद्मे महामन्त्रं जीवन्यासं समाचरेत् ।
पीठे देवीं समावाह्य ध्यायेद्देवीं जगत्प्रियाम् ॥
पूर्णचन्द्रनिभां गौरीं विचित्राम्बरधारिणीम् ।
पीनोत्तुङ्गकुचां रामां सर्व्वेषामभयप्रदाम् ॥
इति ध्यात्वा च मूलेन दद्यात् पाद्यादिकं शुभम् ।
पुनर्धूपं निवेद्यैव नैवेद्यं मूलमन्त्रतः ।
गन्धचन्दनताम्बूलं सकर्पूरं सुशोभनम् ॥
प्रणवान्ते भुवनेशी आगच्छ सुरसुन्दरि ! ।
वह्निभार्य्या जपेन्मन्त्रं त्रिसन्ध्यञ्च दिने दिने ॥
सहस्रैकप्रमाणेन ध्यात्वा देवीं सदा बुधः ।
मासान्ते चाप्य दिवसं बलिपूजां सुशोभनाम् ॥
कृत्वा च प्रजपेन्मन्त्रं निशीथे याति सुन्दरी ।
सुदृढ़ं साधकं मत्वा याति सा साधकालये ॥
सुप्रसन्ना साधकाग्रे सदा क्षेरसुखी ततः ।
दृष्ट्वा देवीं साधकेन्द्रो दद्यात् पाद्यादिकं शुभम् ॥
सुचन्दनं सुमनसो ज्ञात्वाभिलषितं वदेत् ।
मातरं भगिनीं वापि भार्य्यां वा भक्तिभावतः ॥
यदि माता तदा वित्तं द्रव्यञ्च सुमनोहरम् ।
भूपतित्वं प्रार्थितं यत्तद्ददाति दिने दिने ।
पुत्रवत् पाति तं लोके सत्यं सत्यं सुनिश्चितम् ॥
स्वसा ददाति द्रव्यञ्च दिव्यवस्त्रं तथैव च ।
दिव्यां कन्यां समानीय नागकन्यां दिने दिने ॥
यदृच्छवति भूतञ्च भविष्यतीति यत् पुनः ।
तत् सर्व्वं साधकेन्द्राय निवेदयति निश्चितम् ॥

यत् यत् प्रार्थयते सर्व्वं ददाति सा दिने दिने ।
भ्रातृवत् पाति तं लोके कामनाभिर्मनोगतैः ॥
भार्य्या स्याद्यदि सा देवी साधकस्य मनोहरा ।
राजेन्द्रः सर्व्वराजानां संसारे साधकोत्तमः ॥
स्वर्गे मर्त्ये च पाताले गतिः सर्व्वत्र निश्चितम् ।
यद्यदृद्दाति सा देवी कथितुं नैव शक्यते ॥
तथा सार्द्धं च संभोगं करोति साधकोत्तमः ।
अन्यस्त्रीगमनं त्यक्त्वा अन्यथा नश्यति ध्रुवम् ॥१॥
ततोऽन्यत् साधनं वक्ष्ये निर्म्मितं ब्रह्मणा पुरा ।
नदीतीरं समासाद्य कुर्य्यात् स्नानादिकं ततः ॥
पूर्व्ववत् सकलं कार्य्यं चन्दनेर्मण्डलं लिखेत् ।
खमन्त्रं तत्र संलिख्यावाह्य ध्यायेन्मनोहराम् ॥

कुरङ्गनेत्रां शरदिन्दुवक्त्रां
बिम्बाधरां चन्दनगन्धलिप्ताम् ।
चीनांशुकां पीनकुचां मनोज्ञां
श्यामां सदा कामदुघां विचित्राम् ॥

एवं ध्यात्वा जपेद्देवीमगुरुधूपदीपकैः ।
गन्धं पुष्परसञ्चैव ताम्बूलादींश्च मूलतः ॥
तारं माया गच्छ मनोहरे पावकवल्लभा ।
कृत्वायुतं प्रतिदिनं जपेन्मन्त्रं प्रसन्नधीः ॥
मासान्ते प्राप्य दिवसं कुर्य्याच्च जपमुत्तमम् ।
आनिग्नीथं जपेन्मन्त्रं ज्ञात्वा च साधकं दृढम् ॥
गत्वा च साधकाभ्यासे सुप्रसन्ना मनोहरा ।
मनोऽचिंता प्रसन्ना सा पुष्णाति प्रार्थितं यत् ॥
स्वर्णप्रदं साधकाय ददाति सा दिने दिने ।
भावग्रहं यदि कुर्य्यात् स्थिते तत्तु न दास्यति ॥
अन्यस्त्रीगमनं तस्य न भवेत् सत्यमीरितम् ।
अथाहतगतिस्तस्य भवतीति न संशयः ॥
इयं ते कथिता विद्या सुगोप्या या सुरासुरैः ।
तव स्नेहेन भक्त्या च वक्ष्येऽहं परमेश्वरि ! ॥२॥
ततोऽन्यत् साधनं वक्ष्ये शृणुष्वैकमनाः प्रिये ।
गत्वा वटतलं देवीं पूजयेत् साधकोत्तमः ॥
प्राणायामं षड़ङ्गञ्च मायया च समाचरेत् ।
सद्यो मांसं बलिं दत्त्वा पूजयेत्तां समाहितः ॥
अर्द्धमुच्छिष्टरक्तेन दद्यात्तस्यै दिने दिने ।
प्रचण्डवदनां गौरीं पक्वबिम्बाधरां प्रिये ॥
रक्ताम्बरधरां बालां सर्व्वकामप्रदां शुभाम् ।
एवं ध्यात्वा जपेन्मन्त्रमयुतं साधकोत्तमः ॥
सप्तदिनं समभ्यर्च्च चाष्टमे विधिवच्चरेत् ।
कायेन मनसा वाचा पूजयेच्च दिने दिने ॥
तारं माया तथा कूर्चं रक्त कर्म्मणि तद्वहिः ।
आगच्छ कनकान्ते तु वतिः स्वाहा महामनुः ।
आनिग्नीथं जपेन्मन्त्रं बलिं दत्त्वा मनोहरम् ॥
साधकेन्द्रं दृढं मत्वा आयाति साधकालये ।
साधकेन्द्रोऽपि तां दृष्ट्वा दद्यादर्घ्यादिकं ततः ॥
ततः सपरिवारेण भार्य्या स्यात् कामभोजनैः ।
वस्त्रभूषादिकं त्यक्त्वा याति सा निजमन्दिरम् ॥
एवंभार्य्या भवेन्नित्यं साधकाज्ञानुरूपतः ।
आत्मभार्य्यां परित्यज्य भजेत्तान्च विचक्षणः ॥३॥
ततः कामेश्वरीं वक्ष्ये सर्व्वकामफलप्रदाम् ।
प्रणवं भुवनेशानी चागच्छ कामेश्वरि ततः ॥
वह्निभार्य्या महामन्त्रं साधकानां सुखावहम् ।
पूर्व्ववत् सकलं कृत्वा भूर्जपत्रे सुशोभने ॥
गोरोचनाभिः प्रतिमां विनिर्म्माय खलङ्कृताम् ।
शय्यामारुह्य प्रजपेन्मन्त्रमेकमनास्ततः ॥
सहस्रैकप्रमाणेन मासमेकं जपेद्बुधः ।
घृतेन मधुना दीपं दद्याच्च सुसमाहितः ॥
कामेश्वरीं शृणुष्वास्यां चलत्खञ्जनलोचनाम् ।
सदा लोलगतिं कान्तां कुसुमास्त्रग्विलीमुखीम् ॥
एवं ध्यात्वा जपेन्मन्त्रं निशीथे याति सा तदा ।
दृष्ट्वा तु साधकः श्रेष्ठामाज्ञां देहीति तां वदेत् ॥
स्त्रीभावेन सुदा तस्मै दद्यात् पाद्यादिकं ततः ।
सुप्रसन्ना तदा देवी साधकं तोषयेत् सदा ॥
अन्नाद्यैरतिभोगेन पतिवत् पालयेत् सदा ।
नीत्वा रात्रौ सुखैश्वर्य्यैर्दत्त्वा च विपुलं धनम् ॥
वस्त्रालङ्कारद्रव्यादीन् प्रभाते याति निश्चितम् ।
एवं प्रतिदिनं तस्य सिद्धिः स्यात् कामरूपतः ॥४॥
ततः पटे विनिर्म्माय पुत्तलिं ध्यानरूपतः ।
सुवर्णवर्णां गौराङ्गीं सर्व्वालङ्कारभूषिताम् ॥
नूपुराङ्गदहाराढ्यां रम्याञ्च पुष्करेक्षणाम् ।
एवं ध्यात्वा जपेन्मन्त्रं दत्त्वा च पाद्यमुत्तमम् ॥
सचन्दनेन पुष्पेण जातीपुष्पेण यत्नतः ।
गुग्गुलुं धूपदीपौ च दद्यान्मूलेन साधकः ॥
मन्त्रस्तु ।
तारं मायां तथागच्छ रतिसुन्दरिपदं ततः ।
वह्निजाया चाष्टसहस्रं जपेन्मन्त्रं दिने दिने ॥
मासान्ते दिवसं प्राप्य कुर्य्यात् पूजादिकं शुभम् ।
घृतदीपं तथा गन्धं पुष्पं ताम्बूलमेव च ॥
तावन्मन्त्रं जपेद्विद्वान् यावदायाति सुन्दरी ।
ज्ञात्वा दृढं साधकेन्द्रं निशीथे याति निश्चितम् ॥
ततस्तामर्च्चयेद्भक्त्या जातीकुसुममालया ।
सुसन्तुष्टा साधकेन्द्रं तोषयेदतिभोजनैः ॥
भूत्वा भार्य्या च सा तस्मै ददाति वाञ्छितं वरम् ।
भूषादिकं परित्यज्य प्रभाते याति सा ध्रुवम् ॥
साधकाज्ञानुरूपेण प्रयाति सा दिने दिने ।
निर्ज्जने प्रान्तरे देवि! सिद्धिः स्यान्नात्र संशयः ॥
त्यक्त्वा भार्य्यां भजेत्तान्च अन्यथा नश्यति ध्रुवम् ॥५॥
ततोऽन्यत् साधनं वक्ष्ये खगृहे शिवसन्निधौ ।
वेदाद्यं भुवनेशीञ्चागच्छ पद्मिनि वल्लभा ॥
पावकस्य महामन्त्रं पूर्व्ववत् सकलं ततः ।
मण्डलं चन्दनैः कृत्वा मूलमन्त्रं लिखेत्ततः ॥
पद्मानना श्यामवर्णां पीनोत्तुङ्गपयोधराम् ।
कोमलाङ्गीं स्मेरमुखीं रक्तोत्पलदलेक्षणाम् ॥
एवं ध्यात्वा जपेन्मन्त्रं सहस्रञ्च दिने दिने ।
मासान्ते पूर्णिमां प्राप्य विधिवत् पूजयेत् सदा ॥
आनिग्नीथं जपेन्मन्त्रं दृढाभ्यासेन साधकः ।
सर्व्वत्र कुशलं ज्ञात्वा सा याति साधकालयम् ॥
भूत्वा भार्य्या साधकं हि साधयेद्विविधैरपि ।
भोगैर्दिव्यैर्भूषणाद्यैः पद्मिनी सा दिने दिने ॥
पतिवत् पाति तं लोके नित्यं स्वर्गे च सर्व्वदा ।
त्यक्त्वा भार्य्यां भजेत् ताञ्च साधकेन्द्रः सदा प्रिये ॥६॥
ततो वक्ष्ये महाविद्यां विश्वामित्रेण धीमता ।
ज्ञात्वा यां साधिता विद्या बला चातिबला प्रिये ॥
मन्त्रस्तु ।
प्रणवान्ते महामाया नटिनि पावकप्रिया ।
महाविद्येह कथिता गोपनीया प्रयत्नतः ॥
अशोकस्य तलं गत्वा स्नानं पूर्व्ववदाचरेत् ।
मूलमन्त्रेण सकलं कुर्य्याच्च सुसमाहितः ॥
त्रैलोक्यमोहिनीं गौरीं विचित्राम्बरधारिणीम् ।
विचित्रालङ्कृतां रम्यां नर्त्तकीवेशधारिणीम् ॥
एवं ध्यात्वा जपेन्मन्त्रं सहस्रञ्च दिने दिने ।
मांसोपहारैः संपूज्य धूपं दीपं निवेदयेत् ॥
गन्धचन्दनताम्बूलं दद्यात्तस्यै सुदा बुधः ।
मासमेकञ्च तां भक्त्या पूजयेत् साधकोत्तमः ॥
मासान्ते दिवसं प्राप्य कुर्य्याच्च पूजनं महत् ।
अर्द्धरात्रौ भयं दत्त्वा किञ्चित् साधकसत्तमे ।
सुदृढं साधकं मत्वा याति सा साधकालयम् ॥
विद्याभिः सकलाभिश्च किञ्चित्तस्यैरसुखी ततः ।
वरं वरय शीघ्रं त्वं यत्ते मनसि वर्त्तते ॥
तत् श्रुत्वा साधकश्रेष्ठो भावयेन्मनसा धिया ।
मातरं भगिनीं वापि भार्य्यां वा प्रीतिभावतः ।
कृत्वा सन्तोषयेद्भक्त्या नटिनी तत् करोत्यलम् ॥
माता स्याद्यदि सा देवी पुत्रवत् पाति तं सुदा ।
स्वर्णप्रदं सिद्धिदञ्च ददाति सा दिने दिने ॥
भगिनी यदि सा कन्यां देवस्य नागकन्यकाम् ।
राजकन्यां समानीय ददाति सा दिने दिने ।
अतीतानागतां वार्त्तां सर्व्वां जानाति साधकः ॥
भार्य्या स्यात् यदि सा देवी ददाति विपुलं धनम् ।
अन्नाद्यैरुपचारैश्च ददाति कामभोजनम् ॥
स्वर्णप्रदं सदा तस्मै ददाति सा ध्रुवं प्रिये ।
यत् यत् वाञ्छति तत् सर्व्वं ददाति नात्र संशयः ॥७॥
महाविद्यां प्रवक्ष्यामि सावधानावधारय ।
कुङ्कुमेन समालिख्य भूर्जपत्रे स्त्रियं सुदा ॥
ततोऽष्टदलमालिख्य कुर्य्यान्न्यासादिकं प्रिये ।
जीवन्यासादिकं कृत्वा ध्यायेत् तत्र प्रसन्नधीः ॥
शुद्धस्फटिकसङ्काशां नानारत्नविभूषिताम् ।
मञ्जीरहारकेयूररत्नकुण्डलमण्डिताम् ।
एवं ध्यात्वा जपेन्मन्त्रं सहस्रन्तु दिने दिने ॥
प्रतिपद्दिनमारभ्य पूजयेत् कुसुमादिभिः ।
धूपदीपविधानेन त्रिसन्ध्यं पूजयेन्मुदा ॥
पूर्णिमां प्राप्य गन्धाद्यैः पूजयेत् साधकोत्तमः ।
घृतदीपं तथा धूपं नैवेद्यञ्च मनोरमम् ॥
रात्रौ च दिवसे जप्यं कुर्य्याच्च सुसमाहितः ।
प्रभातसमये याति साधकस्यान्तिकं ध्रुवम् ॥
प्रसन्नवदना भूत्वा तोषयेदतिभोजनैः ।
देवदानवगन्धर्व्वविद्याधरयक्षराक्षसाम् ॥
कन्याभी रत्नभूषाभिः साधकेन्द्रं सुदुर्मुदुः ।
वस्त्रं चोप्यादिकं द्रव्यं दिवं ददाति सा ध्रुवम् ॥
स्वर्गे मर्त्ये च पाताले यद्वस्तु विद्यते प्रिये ।
आनीय दीयते सद्यं साधकाज्ञानुरूपतः ॥
स्वर्णप्रदं सदा तस्मै ददाति सा दिने दिने ।
साधकाय वरं दत्त्वा याति सा निजमन्दिरम् ॥
तस्या वरप्रसादेन चिरजीवी निरामयः ।
सर्व्वज्ञः सुन्दरः श्रीमान् सर्व्वगो भवति ध्रुवम् ।
रेमे सार्द्धं तया देवि साधकेन्द्रो दिने दिने ॥
मन्त्रस्तु ।

तारं मायां तथागच्छानुरागिणि मैथुनप्रिये।
वह्निभार्य्या मनुः प्रोक्तः सर्व्वसिद्धिप्रदायकः॥
एषा मधुमती तु स्यात् सर्व्वसिद्धिप्रदा प्रिये।
गुह्यात् गुह्यतरा विद्या तव स्नेहात् प्रकी-
र्त्तिता॥ ८॥

देव्युवाच।

श्रुतञ्च साधनं पुण्यं यक्षिणीनां सुखप्रदम्।
यस्मिन् काले प्रकर्त्तव्यं विधिना केन वा प्रभो।
अत्राधिकारिणः के वा समासेन वदस्व मे॥

ईश्वर उवाच।

वसन्ते साधयेद्धीमान् हविष्याशी जितेन्द्रियः।
सदा ध्यानपरो भूत्वा तद्दर्शनमहोत्सुकः॥
उच्चटे प्रान्तरे वापि कामरूपे विशेषतः।
श्मशानेष्वेकतमं प्राप्य साधयेत् सुसमाहितः।
अनेन विधिना साक्षात् भविष्यति न संशयः॥
देवाश्च सेवकाः सर्व्वे परं चात्राधिकारिणः।
तारकब्रह्मणो भक्त्या विनाप्यत्राधिकारिणः॥"
इति तन्त्रसारे योगिनीसाधनप्रकरणं समाप्तम्॥
इयुविधदशान्तर्गतदशाविशेषः। यथा,—
"खनत्रं ध्रुवं कृत्वा पश्च तत्र विमिश्रयेत्।
मङ्गलेन हृतः शेषो मङ्गलादिविनिश्चयः॥
मङ्गला पिङ्गला धन्या भ्रामरी भद्रिका तथा।
उल्का सिद्धा सङ्कटा च योगिन्यश्चौ प्रकीर्त्तिताः॥
अब्देकं मङ्गला धत्ते शेषाश्चैकैकवर्द्धिकाः।
पुनस्त्वाद्यान्निवर्त्तन्ते चक्रवत् परिवर्त्तनात्॥"
अपि च।
"रोहिण्यादौ चिरादृत्या मङ्गलादौ यथाक्रमम्।
उल्का सिद्धा सङ्कटा च अश्विन्यादित्रये पुनः॥"
एतासामन्तर्दशा।
"दशावर्षन्तु षट्त्रिंशद्भागं कृत्वा विनिर्दिशेत्।
यत्तु यस्या हि यद्वर्षं तत्तद्भागं प्रकीर्त्तितम्॥"
फलं यथा,—
"मङ्गला मङ्गलं धत्ते ऽतुलभोगं सुखं तथा।
गोगजाश्वसहस्राणि गृहे तस्य दिने दिने॥
पिङ्गला विविधं दुःखमन्नचिन्तादिसम्भवम्।
ददाति नाशं शत्रुभ्यो धनधान्यगवादिकम्॥
धन्या च सततं दत्ते सर्व्वत्र विजयादिकम्।
शत्रुभ्यो रक्षते नित्यं मातृवत् परिपालयेत्॥
भ्रामरी विविधं दुःखमन्तःसम्भ्रमसम्भवम्।
अकस्मात्तस्य दुर्दैवं विधिना प्रेरितं भवेत्॥
भद्रिका विविधान् धत्ते सम्मानादिमनोरथान्।
तुष्टा चैव भद्रिका नित्यं दुर्ग्रहः सुग्रहायते॥
उल्का व्याधिकरी प्रोक्ता नित्यं नानाभयप्रदा।
उल्का यदि समायाति सुग्रहो दुर्ग्रहायते॥
सिद्धा च साधयेत् सर्व्वं मन्त्रारम्भधनादिकम्।
यस्य तुष्टा भवेत् सिद्धा लक्ष्मीस्तस्य करे स्थिता॥
सङ्कटा सङ्कटं दत्ते भुङ्क्ते धान्यधनादिकम्।
सैव माता सदा नित्यं गृही क्षमा फणी यथा॥"
इत्युदयादित्यचन्द्रिका॥

योगी, [न्] पुं, (योगः अस्त्यस्येति। योग+इनिः। यद्वा, युज समाधौ। युजिर् योगे वा+"संपृचानुरुधेति।"३। २।१४२। इति घिनुण्।) योगयुक्तः। तस्य लक्षणादि यथा,—

"स्वर्णे लोष्टे गृहेऽरण्ये सुस्निग्धे चन्दने तथा।
समता भावना यस्य स योगी परिकीर्त्तितः॥"
इति ब्रह्मवैवर्त्ते गणपतिखण्डे ३५ अध्यायः॥
अपि च।
"आत्मौपम्येन सर्व्वत्र समं पश्यति योऽर्জ্জुन!।
सुखं वा यदि वा दुःखं स योगी परमो मतः॥"
इति श्रीभगवद्गीतायाम् ७ अध्यायः॥
अन्यच्च।

ऋषय ऊचुः।

"भगवन्! देवतारिघ्न! हिरण्यादिनिसूदन!।
चत्वारो ह्याश्रमाः प्रोक्ता योगी नाम क
उच्यते॥
सर्व्वकर्म्माणि संन्यस्य समाधिमचलं श्रितः।
य आस्ते निश्चलो योगी स सन्यासी न पश्चमः॥
सर्व्वेषामाश्रमाणान्तु द्वैविध्यं श्रुतिदर्शितम्।
ब्रह्मचार्य्यूर्द्धपकुर्व्वाणो नैष्ठिको ब्रह्मतत्परः॥
योऽधीत्य विधिवद्वेदान् गृहस्थाश्रममाव्रजेत्।
उपकुर्व्वाणको ज्ञेयो नैष्ठिको मरणान्तिकः॥
उदासीनसाधकश्च गृहस्थो द्विविधो भवेत्।
ऋणानि त्रीण्युपाहृत्य त्यक्त्वा भार्य्याधनादिकम्॥
एकाकी यस्तु विचरेदुदासीनः स मोक्षिकः।
कुटुम्बभरणायत्तः साधकोऽसौ गृही भवेत्॥
तपस्तप्यति योऽन्येन यजेद्देवान् जुहोति च।
स्वाध्याये चैव निरतो वनस्थस्तापसो मतः॥
तपसा कर्षितोऽत्यर्थं यस्तु ध्यानपरो भवेत्।
सन्यासिकः स विज्ञेयो वानप्रस्थाश्रमे स्थितः॥
योगाभ्यासरतो नित्यमारुरुक्षुर्व्विजेन्द्रियः।
ज्ञानाय कर्म्मते भिक्षुः प्रोच्यते परमेष्ठिकः॥
यस्त्वात्मरतिरेव स्यान्नित्यतृप्तो महामुनिः।
सम्यग्दर्शनसम्पन्नः स योगी भिक्षुरुच्यते॥
ज्ञानसन्यासिनः केचिद्वेदसन्यासिनः परे।
कर्म्मसन्यासिनः केचिद्विविधाः परमेष्ठिकाः॥
योगी च त्रिविधो ज्ञेयो भौतिकः सांख्य एव च।
तृतीयोऽन्याश्रमी प्रोक्तो योगसूत्तममाश्रितः॥"
इति कौर्म्मे २ अध्यायः॥
(तेषां स्त्रीसङ्गनिषेधो यथा,—
"यदि सङ्गं करोत्येव बिन्दुस्तस्य विनश्यति।
आयुःक्षयो बिन्दुहीनादसामर्थ्यञ्च जायते॥
तस्मात् स्त्रीणां सङ्गवर्ज्यं कुर्य्यादभ्यासमादरात्।
योगिनोऽङ्गस्य सिद्धिः स्यात् सततं बिन्दुधारणात्॥"
इति दत्तात्रेयसंहिता॥
तेषां पथ्यं यथा, हठयोगप्रदीपिकायाम्।
"गोधूमयवशालिषष्टिकशोभनान्नं
क्षीराज्यखण्डनवनीतसितामधूनि।
शृङ्गीकपोलकफलादिकपञ्चशाकं
सुन्नादिदिव्यसुदकञ्च यमीन्द्रपथ्यम्॥"
तेषामपथ्यं यथा, तत्रैव।
"कट्वम्लतिक्तलवणोष्णहरीतशाक-
सौवीरतैलतिलसर्षपमत्स्यमद्यम्।
आजादिमांसदधितक्रकुलत्थकोल-
पिण्याकहिङ्गुलसुनाद्यमपथ्यमाहुः॥")
योगीश्वरः, पुं, (योगिनामीश्वरः।) याज्ञवल्क्यमुनिः। (इति हेमचन्द्रे योगेशशब्ददर्शनात्। ३। ८५१॥) यथा,—
"योगीश्वरं याज्ञवल्क्यं सम्पूज्य मुनयोऽब्रुवन्।
वर्णाश्रमेतराणां नो ब्रूहि धर्म्मानशेषतः॥"
"योगिनां सनकादीनां ईश्वरः श्रेष्ठत्वं याज्ञवल्क्यं संपूज्य।" इति मिताक्षरा॥ च, यतिनां श्रेष्ठः। (यथा, मार्कण्डेये। ६६। २८।
"यजन्ति यानस्तमलैर्मनोभि-
र्योगीश्वराः क्लेशविमुक्तिहेतून्॥")
योगीश्वरी, स्त्री, (योगिनामीश्वरी।) दुर्गा। यथा,—
"योगिशक्रादयो देवाः सनकान्तास्तपोधनाः।
तेषां स्वामी तथा योगी ईश्वरी प्रभुपालना॥
आत्मेन्द्रियमनादीनां संयोगो योग उच्यते।
तेषां वा योजनाद्योगी योगैश्वर्य्यविबोधना॥"
इति देवीपुराणे ४५ अध्यायः॥
योगेशः, पुं, (योगस्य ईशः ईश्वरः।) याज्ञवल्क्यः। इति हेमचन्द्रः। ३। ८५१॥ (योगेश्वरे, त्रि। यथा, भागवते। ४। १६। ६।
"कपिलो नारदो दत्तो योगेशाः सनकादयः।
तमन्वीयुर्भागवता ये च तत्सेवनोत्सुकाः॥")
योगेश्वरः, पुं, (योगानां ईश्वरः।) श्रीकृष्णः। यथा,—
"ब्रूहि योगेश्वरे कृष्णे ब्रह्मण्ये धर्म्मवर्म्मणि।
स्वां काष्ठामधुनोपेते धर्म्मः कं शरणं गतः॥"
इति श्रीभागवते १ स्कन्धे १ अध्यायः॥
(शिवः। यथा, महाभारते। १३। १४। ३२३।
"नमस्ते भगवन् देव! नमस्ते भक्तवत्सल!।
योगेश्वर! नमस्तेऽस्तु नमस्ते विश्वसम्भव!॥"
देवहोत्रतनयः। यथा, भागवते। ८। १३। ३२।
"देवहोत्रस्य तनय उपहर्त्ता दिवस्पतेः।
योगेश्वरो हरेरंशो हृदय्यां सम्भविष्यति॥"
योगेश्वरी, स्त्री, वन्ध्याकर्कोटकी। इति भावप्रकाशः॥ (योगानामीश्वरी। दुर्गा। यथा,—
"त्वं योगेश्वरी तथा—।" इति चण्डीकवचम्॥ योगयुक्ते, त्रि। यथा, मार्कण्डेये। ६७। ८।
"प्रजापतेः कश्यपाय सोमाय वरुणाय च।
योगेश्वरेभ्यश्च सदा नमस्यामि कृताञ्जलिः॥")
योगेष्टं, क्ली, (योगे सन्धिच्छिद्रादिपूरणे इष्टम्।) सीसकम्। इत्यमरः। २। ६। १०५॥ (तथास्य पर्य्यायः।
"नागं महावलं चीनं पिष्टं योगेष्टसीसकम्॥"
इति वैद्यकरत्नमालायाम्॥)
योग्यं, क्ली, (योज्यत इति। युज्+णिच्+ण्यत्।) वृद्धिनामौषधम्। वृद्धिनामौषधम्। इत्यमरः। २। ४। ११२॥
योग्यः, त्रि, (योगाय प्रभवति। योग्+"योगाद्यच्च।" ५। १। १०२। इति यत्।) प्रवीणः। योगार्हः। (यथा, रघुः। ६। २६।

"कान्त्या गिरा सूनृतया च योग्या
त्वमेव कल्याणि ! तयोस्तृतीया ॥")
उपायी । शक्तः । इति मेदिनी हेमचन्द्रश्च ॥ (यथा, मार्कण्डेये । ७१ । १० ।
"अपत्नीको नरो भूप न योग्यो निजकर्म्मणाम् ॥"
योजनसाधनभूतः । यथा, ऋग्वेदे । ३ । ६ । ६ ।
"ऋतस्य वा केशिना योग्याभिः ।"
"योग्याभिर्योजनसाधनभूताभी रज्जुभिः ।" इति सायणः ॥ शकटादियोजनीयः । यथा, शतपथब्राह्मणे । १ । ३ । १ । १३ ।
"योक्त्रेण हि योग्यं युञ्जन्त्यस्ति वै पत्नया अमेध्यं यदवाचीनम् ।"
"योग्यं योजनीयमनड्वदश्वादिकम् ।" इति तट्टीकायाम् ॥) पुण्यवृक्षे, पुं । इति मेदिनी । ये, ४६ ॥

योग्यता, स्त्री, (योग्यस्य भावः । योग्य + तल् । टाप् ।) क्षमता । इति लोकप्रसिद्धिः ॥ (यथा, मार्कण्डेये । ११३ । ६ ।
"तथान्यानप्ययोग्यानि योग्यतां यान्ति कालतः ।
योग्यान्ययोग्यतां यान्ति कालवश्या हि योग्यता ॥")
शाब्दबोधकारणविशेषः । स तु पादार्थानां परस्परसम्बन्धे बाधाभावः । इति साहित्यदर्पणम् ॥ न्यायमते तत्पदार्थे तत्पदार्थवत्ता । यथा,—
"पदार्थे तत्र तद्वत्ता योग्यता परिकीर्त्तिता ।"
इति भाषापरिच्छेदः ॥
"योग्यतां निरूपयति पदार्थे इत्यादिना । एकपदार्थेऽपरपदार्थसम्बन्धो योग्यता इत्यर्थः । तज्ज्ञानाभावाच्च वह्निना सिञ्चतीत्यादौ न शाब्दबोधः । नन्वेतस्या योग्यतायाः ज्ञानं शाब्दबोधात् प्राक् सर्व्वत्र न सम्भवति वाक्यार्थस्यापूर्व्वत्वादिति चेन्न तत्तत्पदार्थस्मरणे सति क्वचित् संशयरूपस्य क्वचिन्निश्चयरूपस्यापि योग्यतायाः ज्ञानस्य सम्भवात् । नन्यास्तु योग्यताज्ञानं न शाब्दज्ञाने कारणं वह्निना सिञ्चति इत्यादौ सेके वह्निकरणकत्वाभावरूपायोग्यतायाः निश्चयेन प्रतिबन्धान्न शाब्दबोधः । तदभावनिश्चयस्य लौकिकसन्निकर्षाजन्यदोषविशेषाजन्यज्ञानमात्रे प्रतिबन्धकत्वात् शाब्दे प्रतिबन्धकत्वं सिद्धं योग्यताज्ञानविलम्बाच्च शाब्दविलम्बोऽसिद्ध इति वदन्ति ।" इति सिद्धान्तमुक्तावली ॥

योग्या, स्त्री, (योग्य + टाप् ।) अभ्यासः । (यथा, रघुः । ८ । १६ ।
"अपरः प्रणिधानयोग्यया
मरुतः पञ्च प्ररीरगोचरान् ॥"
"अपरो रघुः प्रणिधानयोग्यया समाध्यभ्यासेन ।" इति मल्लिनाथः ॥) अर्कवृक्षः । इति मेदिनी । ये, ४६ ॥ शस्त्राभ्यासः । तत्पर्य्यायः । खुरली २ श्रमः ३ अभ्यासः ४ । तङ्गूः खलूरिका । इति हेमचन्द्रः । ३ । ४५२ ॥ (यथा, सुश्रुते सूत्रस्थाने ६ अध्याये ।
"अथातो योग्यास्त्रीयमध्यायं व्याख्यास्यामः । अधिगतसर्व्वशास्त्रार्थमपि शिष्यं योग्याङ्कारयेत् । छेद्यादिषु स्नेहादिषु च कर्म्मसूपदिशेत् । सुबहुश्रुतोऽप्यकृतयोग्यः कर्म्मसु योग्यो भवति । तत्र पुष्पफलालाबूकालिन्दकचर्पटेर्व्वारुककर्कारुकप्रभृतिषु छेद्यविशेषान् दर्शयेदुत्कर्त्तनपरिकर्त्तनानि चोपदिशेत् । इतिवस्तिप्रसेकप्रभृतिमूदकपङ्कपूर्णेषु भेद्ययोग्याम् । सरोन्नि चर्म्मण्यातते लेख्यस्य । मृतपशुसिरास्त्पलनालेषु च वेध्यस्य । घुणोपहतकाष्ठवेणुनलनालीशुष्कालाबुमुखेर्व्व्येष्यस्य । पनसविल्वीविल्वफलमज्जमृतपशुदन्तेष्वाहार्य्यस्य । मधुच्छिष्टोपलिप्ते शालालीफलके विसाद्यस्य । सूच्यघनवस्त्रान्तयोर्मृदुचर्म्मान्तयोश्च सीव्यस्य । पुस्तमयपुरुषाङ्गप्रत्यङ्गविशेषेषु बन्धयोग्याम् । मृदुमांसपेश्यीघृतपलनालेषु च कर्णसन्धिबन्धयोग्याम् । मृदुषु मांसखण्डेष्वग्निचारयोग्याम् । उदकपूर्णघटपार्श्वस्रोतस्यलाबूमुखादिषु च नेत्रप्रणिधानवस्तिव्रणवस्तिपीड़नयोग्यामिति । भवतश्चात्र ।
एवमादिषु मेधावी योग्यार्हेषु यथाविधि ।
द्रव्येषु योग्यां कुर्व्वाणो न प्रमुह्यति कर्म्मसु ॥
तस्मात् कौशलमन्विच्छन् शस्त्रक्षाराग्निकर्म्मसु ।
यस्य यत्रेह साधर्म्म्यं तत्र योग्यां समाचरेत् ॥"
(युवती । यथा,—
"निदाघशरदोर्बाला प्रौढ़ा वर्षावसन्तयोः ।
हेमन्ते शिशिरे योग्या न वृद्धा क्वापि शस्यते ॥"
योग्या युवती । इति राजवल्लभः ॥)

योजनं, क्ली, (युज्यते मनो यस्मिन्निति । युज् + ल्युट् ।) परमात्मा । चतुःक्रोशी । योगः । इति मेदिनी । ने, ११३ ॥ * ॥ (यथा, हरिवंशे । १४६ । १३ ।
"गान्धारकन्या वहने नृपाणां
रथे तथा योजनमूर्ज्जितानाम् ॥")
चतुःक्रोशार्थे यथा,—
"द्वादशाङ्गुलिकः शङ्कुस्तद्द्वयन्तु शयः स्मृतः ।
तच्चतुष्कं धनुः प्रोक्तं क्रोशो धनुःसहस्रिकः ॥
तच्चतुष्कं योजनं स्यादित्यादि मानशास्त्रम् ॥
एतन्मते षोड़शसहस्रसहस्रैर्योजनं भवति ।
द्वात्रिंशत्सहस्रसहस्रैरपि योजनम् । यथा,—
यवोदरैरङ्गुलमष्टसंख्यै-
र्हस्तोऽङ्गुलैः षड्गुणितैश्चतुर्भिः ।
हस्तैश्चतुर्भिर्भवतीह दण्डः
क्रोशः सहस्रद्वितयेन तेषाम् ।
स्याद्योजनं क्रोशचतुष्टयेन
तथा कराणां दशकेन वंशः ॥"
इति लीलावती ॥

योजनगन्धा, स्त्री, (योजनं गन्धोऽस्याः । योजनात् गन्धोऽस्या इति वा ।) कस्तूरी । सीता । सत्यवती । इति मेदिनी । धे, ४८ ॥ (यथा, देवीभागवते । २ । २ । १८ ।
"इत्युक्तन तु सा कन्या क्षणमात्रेण भाविनी ।
जाता योजनगन्धा तु सुरूपा च वरानना ॥")
योजनगन्धिका, स्त्री, सत्यवती । इति जटाधरः ॥ कस्तूरी । इत्यजयपालः ॥ सीता । योजनगन्धाशब्दात् स्वार्थे कप्रत्ययेन जातत्वात् ॥

योजनपर्णी, स्त्री, (योजनाय सन्धिस्थानादेर्म्मेलनार्थं पर्णं यस्याः ।) मञ्जिष्ठा । इति रत्नमाला ॥

योजनवल्लिका, स्त्री (योजनवल्ली + स्वार्थे कन् । टाप् ।) मञ्जिष्ठा । इति राजनिर्घण्टः ॥

योजना, स्त्री, योगकारणा । इति श्यान्तयुजधातोरनप्रत्ययेन सिद्धम् ॥

योजनवल्ली, स्त्री, (योजनगामिनी अतिदीर्घा वल्ली यस्याः सा ।) मञ्जिष्ठा । इत्यमरः । २ । ४ । ६१ ॥ (तथास्याः पर्य्यायः ।
"मञ्जिष्ठा विकसा जिङ्गी समङ्गा कालमेषिका ।
मण्डूकपर्णी भण्डीरी भण्डी योजनवल्लयपि ॥
रसायन्यरुणा काला रक्ताङ्गी रक्तयष्टिका ।
भण्डीतक्री च गण्डीरी मञ्जुषा वल्लरञ्जिनी ॥"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥)

योजितं, त्रि, कारितयोजनम् । श्यान्तयुजधातोः कर्म्मणि क्तप्रत्ययेन निष्पन्नम् ॥ (यथा, भागवते । ४ । २१ । २२ ।
"अहं दण्डधरो राजा प्रजानामिह योजितः ॥")

योटकः, पुं, योटनम् । मेलनमिति यावत् । विवाहे राश्योटक-गृहयोटक-नक्षत्रयोटक-गणयोटक-वर्गयोटक-योनियोटक-वर्गयोटकभेदेन सप्तविधो योटकः । तत्र राश्योटके षड़ष्टकनवपञ्चमद्विद्वादशविषमसप्तकयोगा निषिद्धाः । तदाह श्रीपतिसंहितायाम् ।
"षड़ष्टकं त्रिकोणञ्च द्विद्वादशकमेव च ।
परस्परं जन्मराश्योस्त्यक्त्वा कन्याकुमारयोः ॥
षड़ष्टके भवेद्दोषो वैधव्यं मृत्युरेव वा ।
त्रिकोणे पुत्रहानिः स्यात् धनहानिर्धनक्षये ॥
पुरुषस्याष्टमे कन्या कन्यायाः षष्ठके पुमान् ।
शुभं षड़ष्टकं ज्ञेयं नोद्वाहे दूषणं भवेत् ॥
नवपञ्चमे ।
पुंसो गृहात् सुतगृहे सुतहा च कन्या
धर्म्मे स्थिता सुतवती पतिवल्लभा च ।
द्विद्वादशे धनगृहे धनहा च कन्या
रिपुफे स्थिता धनवती पतिवल्लभा च ॥
योटके सप्तके मेषतुलौ युग्महयौ तथा ।
सिंहघटौ सदा वर्ज्यौ स्मृतिस्तत्राब्रवीच्छिवः ॥
राजयोटकमाह दीपिकायाम् ।
एकराश्यौ च दम्पत्योः शुभं स्यात् समसप्तके ।
चतुर्थदशके चैव तृतीयैकादशे तथा ॥"
इति राश्योटकविचारः ॥ * ॥
गृहयोटके गृहशत्रुयोगो निषिद्धः । कन्यावरराश्यधिपगृहयोः शत्रुत्वे गृहशत्रुयोगः । तत्र विवाहे रोगादिः फलम् । तदाह गर्गः । मरणं

भावविरोधे ग्रहरिपुभावे चाचिरेण रोगादिः। इति ग्रहयोटकविचारः॥ * ॥ अन्ये योटकाः प्रपञ्चभयान्न लिखिताः। इति ज्योतिषम्॥ ग्रन्थान्तरे जोटकशब्दश्चवर्गतृतीयादिश्च॥

योतुः, पुं, (यूयते ज्ञायते अनेनेति। यु+बाहुलकात् तुः।) परिमाणम्। इत्युणादिकोषः॥

योत्रं, क्ली, (यूयते अनेनेति। यु+"दात्रीघ्रस युजस्तुतुदसिसिचमिहपतदंशनहः करणे।" ३।२।१८२। इति ष्ट्रन्।) योक्त्रम्। इत्यमरः। २।९।१३॥ (यथा, गो० रामायणे। २। ४५। २९।

"भरतायाभिरूढाः स्म योत्राय पशवो यथा॥")

योद्धा, [द्धृ] पुं, (युध्यतीति। युध्+तृच्।) युद्धकर्त्ता। तत्पर्य्यायः। भटः २ योधः ३। इत्यमरः। २।८।६१॥ (यथा, हरिवंशे भविष्यपर्व्वणि। २।१८।

"वाधिष्यते पुरीं योद्धा छिद्रं यदि लभेत सः॥")

योधः, पुं, (युध्यतीति। युध्+अच्।) योद्धा। इत्यमरः। २।८।६१॥ (यथा, कथासरित्सागरे। १२।२२।

"सङ्केतमिलितेश्चान्यैर्योधाख्यैः सैनिकैः सह।
निर्य्युवौ तत्सैन्यं चण्डमहासेनान्तिकञ्च ततः॥")

योधनं, क्ली, युद्धम्। (यथा, मार्कण्डेये।१३५।१७।

"योधनेषु स्वरूपेण दमो यस्य दुरात्मनः।
स दमो वारयत्येष हन्ति तस्य रिपोर्गुरुम्॥")

अस्त्रम्॥ युधधातोर्भावे करणे चानट् (ल्युट्) प्रत्ययेन निष्पन्नम्।

योधसंरावः, पुं, (योधानां संरावः।) अन्योन्यं योधानां युद्धायाह्वानम्। तत्पर्य्यायः। क्रन्दनम् २। इत्यमरभरतौ॥

योधेयः, पुं, (युध्+भावे घञ्। योधं युद्धं करोतीति। योध+खः।) योद्धा। योधशब्दात् स्वार्थे प्रत्ययेन निष्पन्नः॥

योनलः, पुं, (यवस्य नल इव नलः काण्डोऽस्य। पृषोदरादिः।) शस्यविशेषः। तत्पर्य्यायः। यवनालः २ जूर्णाह्वयः ३ दैवधान्यम् ४ जोन्नाला ५ बीजपुष्पिका ६। इति हेमचन्द्रः। ४।२४४॥

योनिः, पुं, स्त्री, (यौति संयोजयतीति। यु+"वह्निश्रिस्रुद्रुस्रुभ्यो नित्।" उणा० ४।५२। इति निः। नित्त्वादाद्युदात्तः।) आकरः। इति मेदिनी। ने, १६॥ कारणम्। (यथा, उत्तररामचरिते। ६।

"ऋषयो राक्षसीमाहुर्वाचमुन्मत्तदप्रयोः।
सा योनिः सर्व्ववैराणां सा हि लोकस्य
निर्ऋतिः॥")

जलम्। इति हेमचन्द्रः। ३।२४६॥ (कुशद्वीपस्य नदीविशेषः। यथा, मार्कण्डेये।१२१।७१।

"धूतपापा नदी नाम योनिश्चैव पुनः स्मृता।
सीता द्वितीया विज्ञेया सा चैव हि निष्पाप-
स्मृता॥"

तन्त्रशास्त्रविशेषः। यथा, महासिद्धिसारस्वते।

"सनत्कुमारकं तन्त्रं योनितन्त्रं प्रकीर्त्तितम्।
तन्त्रान्तरञ्च देवेशि! नवरत्नेश्वरं तथा॥")

प्राणिनामुत्पत्तिस्थानम्। इति त्रिकाण्डशेषः॥ तत्तु चतुरशीतिलक्षप्रकारम्। यथा,—

"चतुरशीतिलक्षाणि चतुर्भेदाश्च जन्तवः।
अण्डजाः स्वेदजाश्चैव उद्भिज्जाश्च जरायुजाः॥
एकविंशतिलक्षाणि ह्यण्डजाः परिकीर्त्तिताः।
स्वेदजाश्च तथैवोक्ता उद्भिज्जास्तत्प्रमाणतः॥
जरायुजाश्च तावन्तो मनुष्याद्याश्च जन्तवः।
सर्व्वेषामेव जन्तूनां मानुषत्वं सुदुर्लभम्॥"

इति श्रीगरुड़पुराणे प्रेतकल्पे धर्म्मप्रकटनो नाम २ अध्यायः॥ * ॥ अन्यच।

"जलजा नव लक्षाणि स्थावरा लक्षविंशतिः।
कृमयो रुद्रसङ्ख्याकाः पक्षिणां दशलक्षकम्॥
त्रिंशल्लक्षाणि पशवश्चतुर्लक्षाणि मानुषाः।
सर्व्वयोनिं परित्यज्य ब्रह्मयोनिं ततोऽभ्यगात्॥"

इति श्रीविष्णुपुराणम्॥ * ॥

अपि च।

"स्थावराख्यंशतलक्षञ्च जलजो नवलक्षकः।
कृमिजा दशलक्षञ्च रुद्रलक्षञ्च पक्षिणः॥
पशवो विंशतिलक्षञ्च चतुर्लक्षञ्च मानवाः।
एतेषु भ्रमणं कृत्वा द्विजत्वमुपजायते॥"

इति कर्म्मविपाकः॥

("भूतानाञ्चतुर्व्विधा योनिर्भवति जरायुजाण्डस्वेदोद्भिदः। तासां खलु चतसृणामपि योनीनामेकैका योनिरपरिसङ्ख्येयभेदा भवति भूतानामाकृतिविशेषापरिसङ्ख्येयत्वात्। तत्र जरायुजानामण्डजानां प्राणिनामेते गर्भकरा भावा यां यां योनिमापद्यन्ते तस्यां तस्यां योनौ तथा तथा रूपा भवन्ति। तद्यथा कनकरजततास्रत्रपुसीसा आसिच्यमानास्वेषु तेषु 'मधुच्छिष्टबिम्बेषु। ते यदा मनुष्यबिम्बमापद्यन्ते तदा मनुष्यविग्रहेण जायन्ते। तस्मात् समुदायात्मकः सन् गर्भो मनुष्यविग्रहेण जायते मनुष्यो मनुष्यप्रभव इत्युच्यते तद्योनित्वात्।" इति चरके शारीरस्थाने अष्टमेऽध्याये॥ * ॥) भगम्। इत्यमरः।२।६।७६॥ तत्पर्य्यायः। वराङ्गम् २ उपस्थः ३ स्मरमन्दिरम् ४। इति राजनिर्घण्टः॥ रतिगृहम् ५ जन्मवर्त्म ६ अधरम् ७ अवाक्पथः ८ प्रकृतिः ९ अपथम् १० स्मरकूपकः ११ अपद्वारः १२ प्रकृतिः १३ पुण्ड्री १४ संसारमार्गकः १५ संसारमार्गः १६ गुह्यम् १७ स्मरागारम् १८ स्मरध्वजम् १९ रत्यङ्गम् २० रतिकुहरम् २१ कलत्रम् २२ अधः २३। इति शब्दरत्नावली॥ रतिमन्दिरम् २४ स्मरगृहम् २५ कन्दर्पकूपः २६ कन्दर्पसम्बाधः २७ कन्दर्पसन्धिः २८ स्त्रीचिह्नम् २९। इति जटाधरः॥ स तु गर्भस्थायाः सप्तभिर्मासैर्भवति। इति सुखबोधः॥ * ॥ तस्य लक्षणं यथा,—

"शुभः कमठपृष्ठाभो गजस्कन्धोपमो भगः।
वामोन्नतश्चेत् कन्याजः पुत्रजो दक्षिणोन्नतः॥
आखुरोमा गूढ़भगः सुश्लिष्टः संहतः पृथुः।
तुङ्गः कमलवर्णाभः शुभोऽश्वत्यदलाकृतिः॥
कुरङ्गखुरवृत्तो यश्चुल्लिकोदरसन्निभः।
रोमशो विवृतास्यश्च दृश्यनासोऽतिदुर्भगः॥
ग्रन्थावर्त्तो भगो यस्याः सा गर्भमिह नेच्छति।
पिपिटः कर्पराकारः किङ्करीपदृशो भगः॥
वंशपत्रसपत्राभो गजरोमोच्चनासिकः।
विकटः कुटिलाकारो लम्बगल्लस्तथाशुभः॥"

इति काशीखण्डे ३७ अध्यायः॥ * ॥

अपि च।

"ग्रन्थनाभ्याकृतिर्योनिरुक्तावर्त्ता सा च
कीर्त्तिता।
तस्यास्तृतीये त्वावर्त्ते गर्भशय्या प्रतिष्ठिता॥"* ॥

अथ योनिरोगाधिकारः।

"तत्र योनिरोगाणां निदानान्याह।

'मिथ्याहारविहाराभ्यां दुष्टैर्दोषैः प्रदूषितात्।
आर्त्तवाद्दीर्य्यतश्चापि दैवाद्वा सुभगे गदाः॥'

रोगिणीनां योनीनां सामान्याह।

'उदावर्त्ता तथा बन्ध्या विप्लुता च परिप्लुता।
वातला योनयो रुग्णा वातदोषेण पञ्चधा॥
पञ्चधा पित्तदोषेण तत्रादौ लोहितक्षरा।
प्रसंसिनी वामिनी च पुत्रघ्नी पित्तला तथा॥
अत्यानन्दा कर्णिनी च चरणानन्दपूर्व्विका।
अतिपूर्व्वापि सा ज्ञेया श्लैष्मला च कफादिमाः॥
खण्डाखिनी च महती सूचीवक्त्रा त्रिदोषिणी।
षड्वेता योनयः प्रोक्ताः सर्व्वदोषप्रकोपतः॥'

अथ तासां लक्षणान्याह।

'सा फेणिलसुदावर्त्ता रजःश्लेष्मेण सुच्यति।
बन्ध्या नष्टार्त्तवा ज्ञेया विप्लुता नित्यवेदना॥
परिप्लुता या भवति ग्राम्यधर्म्मे रुजा भृशम्।
वातला कर्कशा स्तब्धा शूलनिस्तोदपीड़िता॥
चतसृष्वपि चाद्यासु भवन्त्यनिलवेदनाः॥'

अनिलवेदनास्तोदादयः॥ वातलायां त्वतिप्रथिता वातवेदना बोद्धव्या। वातला इत्यन्वयात्॥ * ॥

'सदाहं चरते रक्तं यस्याः सा लोहितक्षरा।
प्रसंसिनी संसते च क्षोभिता दुःप्रजायिनी॥'

क्षोभिता विमर्द्दिता संसते स्खलनात् भवते दुःप्रजायिनी दुष्टप्रजननशीला।

'सवातमुन्निरेद्वीर्य्यं वामिनी रजसा युतम्।
स्थितं स्थितं हन्ति गर्भं पुत्रघ्नी रक्तसंस्रवात्॥'

पुत्रशब्दोऽत्रापत्योपलक्षकः।

'अत्यर्थं पित्तला योनिर्दाहपाकज्वरान्विता।
चतसृष्वपि चाद्यासु पित्तलिङ्गक्षयो भवेत्॥'

अत्यानन्दानसन्तोषं ग्राम्यधर्म्मेण विन्दति।

कर्णिन्यां कर्णिका योनौ श्लैष्मलाङ्गभृतां प्रजायते॥'

कर्णिका मांसस्य कर्णाकारो ग्रन्थिः॥

'मैथुने चरणापूर्व्वं पुरुषादतिरिच्यते।'

अतिरिच्यते रजो सुच्यति इत्यर्थः।

'बहुशश्चातिचरणा तयोर्बीजं न तिष्ठति॥'

बहुशः वारं वारं अतिरिच्यते तयोः चरणातिचरणयोः।

'श्लैष्मला पिच्छिला योनिः कण्डूयुक्तातिशीतला।

चतस्रष्वपि चाद्यासु श्लेष्मलिङ्गाक्षयो भवेत् ॥
अनार्तवास्तनी खण्डी खरस्पर्शा च मैथुने ॥'
अस्तनी ईषत् स्तनौ यस्यां सा अच लक्ष्या खण्डी। अखिनीमाह।
'महामेढ्रगृहीताया बालाया अखिनी भवेत् ॥'
महामेढ्रः पुरुषः तेन गृहीताया बालायाः सूक्ष्मयोनिच्छिद्राया अखिनी अखवल्लम्बमाना योनिर्भवति।
'विवृतातिमहायोनिः सूचीवक्त्रातिसंवृता।
सर्व्वलिङ्गसमुत्थानात् सर्व्वदोषप्रकोपजा।
चतस्रष्वपि चाद्यासु सर्व्वलिङ्गनिदर्शनम् ॥'
असाध्या योनीराह।
'पञ्चासाध्या भवन्तीह योनयः सर्व्वदोषजाः ॥'
पञ्च खण्डीप्रभृतयः ॥ * ॥
अथ योनिकन्दस्य निदानमाह।
'दिवास्वप्नादतिक्रोधाद्व्यायामादतिमैथुनात्।
क्षताच्च नखदन्ताद्यैर्व्वातादाः कुपिता यथा ॥'
वातादाः कुपिता यथा यथा निदानकुपिता वातादाः ॥ * ॥ रूपमाह।
"पूयशोणितसङ्काशं लकुचाकृतिसन्निभम्।
जनयन्ति यदा योनौ नाम्ना कन्दः स योनिजः॥"
लकुचाकृतिसन्निभं लकुचाकाराकारम्। गुड़कमच विशेष्यं बोद्धव्यम् ॥ * ॥ वातजादिभेदेन रूपभेदमाह।
"रूक्षं विवर्णं स्फुटितं वातिकं तं विनिर्दिशेत्।
दाहरागज्वरयुतं विद्यात् पित्तात्मकं तु तम् ॥
तिलपुष्पप्रतीकाशं कण्डूमन्तं कफात्मकम्।
सर्व्वलिङ्गसमायुक्तं सन्निपातात्मकं भवेत् ॥"* ॥
अथ योनिरोगाणां चिकित्सा। तत्र वन्ध्याचिकित्सा। तस्या लक्षणमाह। वन्ध्या नष्टार्त्तवा क्षेयेति। ततः प्रथमतो नष्टार्त्तवाचिकित्सा।
'आर्त्तवादर्शने नारी मत्स्यान् सेवेत नित्यशः।
काञ्जिकञ्च तिलान् माषानुदश्चित्तथा दधि ॥
इक्ष्वाकुबीजदन्तीचपलागुड़दमनकिण्वयवशूकैः।
सक्षुक्षीरैर्व्वर्त्तियोनिगता कुसुमसञ्जननी ॥'
इक्ष्वाकुः कटुतुम्बी। चपला पिप्पली। दमनो मदनफलम्। किण्वं सुराबीजम्।
'पीतं ज्योतिष्मतीपत्रं राजिकोग्रासनं त्राहम्।
घृतेन पयसा पिष्टं कुसुमं जनयेद्ध्रुवम् ॥'
ज्योतिष्मती कटभीवृक्षविशेषः करञ्ही इति लोके। पयसा दुग्धेन ॥ * ॥ अथ वन्ध्याचिकित्सा।

'बला सिता सातिबला मधूकं
वटस्य शुङ्गं गजकेशरञ्च।
एतन्मधुक्षीरघृतैर्निपीय
वन्ध्या सुपुत्रं नियतं प्रसूते ॥

अश्वगन्धाकषायेण सिद्धं दुग्धं घृतान्वितम्।
ऋतुस्नाताङ्गना प्रातः पीत्वा गर्भं दधाति हि ॥
पुष्पोद्भूतं लक्ष्मणाया मूलं दुग्धेन कन्यया।
पिष्ट्वा पीत्वा ऋतुस्नाता गर्भं धत्ते न संशयः ॥
कुरण्टमूलं धातक्या कुसुमानि वटाङ्कुराः।
नीलोत्पलं पयोयुक्तमेतद्गर्भप्रदं ध्रुवम् ॥

यावला पिबति प्रातश्चपिप्पलं
जीरकेण सहितं घृताप्लुता।
श्वेतया विशिखपुष्पया युतं
सा सुतं जनयतीह नान्यथा ॥"
श्वेतकुसुमया शरपुंखया सह।
"पञ्चमेकं पलाशस्य पिष्ट्वा दुग्धेन गर्भिणी।
पीत्वा पुत्रमवाप्नोति वीर्य्यवन्तं न संशयः ॥
शूकरशिम्बीमूलं मध्वा दधि फलस्य सपयस्कम्
पीत्वाथोभयलिङ्गीबीजं कन्यां न सूते स्त्री ॥
पुत्रमजारीमूलं विष्णुक्रान्तैप्सालिङ्गिनीसहिता।
एतत् गर्भेऽहदिनं पीत्वा कन्यां न सर्व्वथा सूते ॥
पुत्रमजारी पतजिया तस्या मूलम्। इप्सालिङ्गिनी पचगुरिया ॥ * ॥ गर्भप्रदरभेषजकथनावसरे गर्भाजनकमपि भेषजमाह।
'पिप्पलीविड़ङ्गटङ्कणसमचूर्णं या पिबेत् पयसा।
ऋतुसमये नहि तस्या गर्भः संजायते क्वापि ॥

आरनालपरिपेषितं चाहं
यां जयाकुसुममत्ति पुष्पिणी।
सत्पुराणगुड़सृष्टिसेविनी
सा दधाति नहि गर्भमङ्गना ॥ * ॥

तासु योनिषु चाद्यासु स्नेहादिक्रम इष्यते।
वस्त्यभ्यङ्गपरीषेकप्रलेपपिचुधारणम् ॥'
वस्तिरुत्तरवस्तिः। क्रमश्चिकित्सा।
'नतवार्त्ताकिनीकुष्ठसैन्धवामरदारुभिः।
तिलतैलं पचेन्नारी पिचुं तस्य विधारयेत् ॥
विप्लुतायां सदा योनौ यथा तेन प्रशाम्यति ॥'
नतं तगरम्।
'वातलां कर्कशां स्तब्धामल्पस्पर्शां तथैव च।
कुम्भीस्वेदैरुपचरेदन्तर्व्वेश्मनि संवृते ॥
धारयेद्वा पिचुं योनौ तिलतैलस्य सा सदा।
पित्तलानाञ्च योनीनां सेकाभ्यङ्गपिचुक्रियाः ॥
घृताः पित्तहराः कार्य्याः स्नेहनार्थं घृतानि च।
प्रसंसिनीं घृताभ्यक्तां क्षीरस्निग्धां प्रवेशयेत् ॥
पिधाय वेश्मद्वारेण ततो वन्ध्यं समाचरेत्।
शुण्ठीमरिचकृष्णाभिर्धान्यकाजाजिदाड़िमैः ॥
पिप्पलीमूलसंयुक्तैर्व्वेश्मद्वारः स्रुतो बुधैः ॥
धात्रीरसं सितायुक्तं योनिदाहे पिबेत् सदा।
सूर्य्यक्रान्ताभवं मूलं पिबेद्वा तण्डुलाम्बुना ॥
योन्यास्तु पूयस्राविण्याः शोधनद्रव्यनिर्म्मितैः।
सगोमूत्रैः सलवणैः पिण्डैः संपूरणं हितम् ॥'
शोधनद्रव्याणि निम्बपत्रादीनि।
'दुर्गन्धां पिच्छिलां वापि चूर्णैः पञ्चकषायजैः।
पूरयेद्वारयेद्राजवृक्षादिक्षथिताम्बुना ॥"
पञ्च कषायाः। वचावासापटोलप्रियङ्गुनिम्बाः।
राजवृक्षादि धनवहेरा।
"पिप्पल्यामरिचैर्माषैः घृताक्ताकुष्ठसैन्धवैः।
वर्त्तिस्तुल्या प्रदेशिन्या योनौ श्लेष्मविशोधिनी ॥
तुल्या प्रदेशिन्या दैर्घ्येण परिणाहेन च।
कर्णिन्यां वर्त्तयो देयाः शोधनद्रव्यनिर्म्मिताः ॥
गुड़ूचीचिफलादन्तीक्षथितोदकधारया।
योनिं प्रक्षालयेत्तेन तत्र कण्डूः प्रशाम्यति ॥
सुप्तपुष्पं सखदिरं पथ्या जातीफलं तथा।

बिल्वं पूगञ्च संचूर्ण्य वस्त्रपूतं क्षिपेद्भगे।
योनिर्भवति संकीर्णा न स्रवेच्च जलं ततः ॥
कपिकच्छुभवं मूलं क्वाथयेद्विधिना भिषक्।
योनिः सङ्कीर्णतां याति क्वाथेनानेन धावनात् ॥
जीरकक्षितयं क्षौद्रा सुखवी सुरभिर्व्वचा।
वासकः सैन्धवश्चापि यवक्षारो यवानिका ॥
एषां चूर्णं घृते किञ्चित् भृष्ट्वा खण्डेन मोदकम्।
कृत्वा खादेद्यथावह्नि योनिरोगाद्विमुच्यते ॥
मञ्जिष्ठा मधुकं कुष्ठं क्षिफला शर्करा बला।
मेदे पयस्या काकोली मूलञ्चैवाश्वगन्धजम् ॥
अजमोदा हरिद्रे द्वे प्रियङ्गुकटुरोहिणी।
उत्पलं कुमुदं द्राक्षा काकोल्यौ चन्दनद्वयम्
एतेषां कार्षिकैर्भागैर्घृतप्रस्थं विपाचयेत् ॥
घृतावरीरसं क्षीरं घृताज्ज्ञेयं चतुर्गुणम्।
सर्पिरेतन्नरः पीत्वा स्त्रीषु नित्यं वृषायते।
पुत्रान् जनयते वीरान् मेधाढ्यान् प्रियदर्शनान् ॥
या चैवास्थिरगर्भा स्यात् पुत्रं वा जनयेन्मृतम्।
अल्पायुषं वा जनयेत् या च कन्यां प्रसूयते ॥
योनिरोगे रजोदोषे परिस्रावे च शस्यते।
प्रजावर्द्धनमायुष्यं सर्व्वग्रहनिवारणम्।
नाम्ना फलघृतं ह्येतदश्विभ्यां परिवर्त्तितम् ॥
अनुक्तं लक्ष्मणामूलं क्षिपन्त्यत्र चिकित्सकाः।
जीवदृत्सैकवर्णाया घृतस्याच्च प्रयुज्यते।
अरण्यगोमयेनेह वह्निज्वाला च दीयते ॥'
मेदे मेदा महामेदा तयोरभावे घृतावरी द्विगुणा देया। पयस्याश्च क्षीरकाकोली काकोलीयुगलाभावे अश्वगन्धा द्विगुणा देया। प्रियङ्गुस्थाने केचिद्विङ्गु पठन्ति। पयस्या काकोलीत्युक्ता पुनः काकोल्याविति काकोलीक्षीरकाकोल्यौ द्वैगुण्यार्थं घृतस्य फलघृतस्य पाठो नानातन्त्रेषु नानाविधः। तत्र द्विङ्गुवचातगरजीवकर्षभका एवाधिकाः। तत्र जीवकर्षभयोरभावे विदारीकन्दो द्विगुणो देयः। फलघृतं सकलयोनिरोगेषु ॥ * ॥

अथ योनिकन्दस्य चिकित्सा।
'गैरिकाम्बाश्मजन्तुघ्नरजन्यञ्जवकट्फलम्।
पूरयेद्योनिमेतैर्यां चूर्णैः क्षौद्रसमन्वितैः ॥
क्षिफलायाः कषायेण सक्षौद्रेण च सेचयेत्।
प्रमदा योनिकन्देन व्याधिना परिमुच्यते ॥'
अथ प्रसङ्गात् गुर्व्विण्या रोगाणां चिकित्सा।
'क्षीवेरातिविषामुस्तमोचशुक्लैः शृतं जलम्।
दद्याद्गर्भे प्रचलिते प्रदरे कुक्षिरुग्यदि ॥'
कुक्षिरुक् उदरव्यथा। चलितगर्भस्थापने क्षीवेरादिक्वाथः ॥ * ॥

अथ गर्भस्रावपातयोर्निदानम्।
'व्याध्यधर्म्माध्वगमनयानासनप्रपीड़नैः।
ज्वरोपवासोत्पतनप्रहाराजीर्णधावनैः ॥
वमनाच्च विरेकाच्च कुत्सनाद्भर्त्सनात्तथा।
तीक्ष्णधारोष्णकटुकतिक्तरूक्षनिषेवणात् ॥
वेगाभिघातादधमादासनाच्छयनाद्व्यायात्।
गर्भे पतति रक्तस्य सशूलं दर्शनं भवेत् ॥'

गर्भपातनात् नियमे गर्भे पातनप्रौलं ब्रवीतस्मात्। गर्भस्य स्रावपातयोः पूर्व्वरूपमाह। गर्भे पततीत्यादि। पतति स्रावेण पातेन वा पतिष्यति स्रावपातयोरवधिमाह।

'आचतुर्थात्ततो मासात् प्रस्रवेद्गर्भविद्रवः।
ततः स्थिरशरीरस्य पातः पञ्चमषष्ठयोः॥'

आचतुर्थात् मासात् चतुर्थमासपर्य्यन्तम्। गर्भस्य विद्रवः। श्रोणितरूपगर्भः। स्रवति श्रोणितमिति भोजवचनात्। स्थिरशरीरस्य कठिनशरीरस्य गर्भस्य। गर्भपातस्य दृष्टान्तं दर्शयति।

'गर्भोऽभिघातविषमासनपीड़नाद्यैः
पक्वं इमादिव फलं पतति स्वयेन॥'

यथा वृन्तलग्नं पक्वं फलमभिघातेनाकाल एव पतति तथा गर्भोऽप्यभिघातादिना अकालेऽपि पतति॥ * ॥ अथ गर्भस्रावस्य चिकित्सा।

'गुर्व्विण्या गर्भतो रक्तं स्रवेद्यदि सुदुर्म्मुहुः।
तन्निरोधाय सुस्निग्धसुशीतादिहितं पिबेत्॥'

उत्पलादिगणमाह।

'उत्पलं नीलमारक्तं कह्लारं कुमुदं तथा।
श्वेताम्भोजञ्च मधुकमुत्पलादिरयं गणः॥
संशोधितो हरत्येव दाहं तृष्णां च्छर्दामयम्।
रक्तपित्तञ्च मूर्च्छाञ्च तथा छर्द्दिमरोचकम्॥'

अथ गर्भपातस्य उपद्रवानाह।

'प्रसंश्यमाने गर्भे स्याद्वाहः शूलञ्च पार्श्वयोः।
हृद्ग्रहः प्रदराघातौ मूत्रसङ्गश्च जायते॥'

प्रसंश्यमाने पतति॥ * ॥ अथ गर्भस्य स्थानान्तरगमने चोपद्रवानाह।

'स्थानात् स्थानान्तरं तस्मिन् प्रयात्यपि च जायते।
आमपक्वाशयादौ तु क्षोभः पूर्व्वोऽपद्रवाः॥'
पूर्व्वोऽपद्रवाः पार्श्वशूलादयः॥ * ॥

तच्चिकित्सामाह।

'स्विन्नशीताः क्रियास्तेषु दाहादिषु समाचरेत्।
कुशकाशोरुवूकाभ्यां मूलैर्गोक्षुरकस्य च॥
हृतं दुग्धं सितायुक्तं गर्भिण्याः शूलजित् परम्।
स्वदंष्ट्रामधुकक्षुद्राग्नेः सिद्धं पयः पिबेत्।
शर्करामधुसंयुक्तं गुर्व्विणीवेदनापहम्॥'

अश्वानः पुष्पजातिः। अयं वाणपुष्प इति गौड़ादौ प्रसिद्धः।

'स्रुत्कोष्ठागारिका गेहसम्भवाच्च मृत्तिका।
समङ्गा धातकीपुष्पं गैरिकञ्च रसाञ्जनम्॥
तथा सर्व्वरसक्षौद्रान् यथालाभं विचूर्णयेत्।
तच्चूर्णं मधुना लिह्यान्नारी प्रदरशान्तये॥'

स्रुत्कोष्ठागारिकासम्भवा स्रुत्कोष्ठागारिका वरटी तन्निर्म्मितगृहभवा मृत्तिका। समङ्गा लज्जालुः।

'कसेरुत्वक्शृङ्गाटकल्कं वा पयसा पिबेत्।
पक्वं वचारुक्षोनाभ्यां क्षौद्रशौवर्च्चलान्वितम्।
आमाहे तु पिबेद्दुग्धं गुर्व्विणी सुखिनी भवेत्॥'

शौवर्च्चलं चौक्षार इति लोके।

'शृणपञ्चकमूलानां कल्केन विपचेत् पयः।
तत् पयो गुर्व्विणी पीत्वा मूत्रसङ्गाद्विमुच्यते॥
प्रालीक्षुकुशकाशैः स्यात् शरेण शृणपञ्चकम्।
एषां मूलं शृतादाहपित्तास्रघ्नं मूत्रसङ्गहृत्॥'*॥

अथ प्रसूताया योनेः क्षतादेश्चिकित्सा।

'तुम्बीपत्रं तथा लोध्रं समभागं सुपेषयेत्।
तेन लेपो भगे कार्य्यः शीघ्रं स्याद्योनिरक्षता॥
पलाशोडुम्बरफलं तिलतैलसमन्वितम्।
योनौ विलिप्तं विधिना गाढ़ीकरणमुत्तमम्॥"

इति भावप्रकाशः॥ * ॥

अथ कुयोनिप्राप्तिकारणानि।

"हरिर्व्वृक्षेति नामौ ये गोविन्दं नार्च्चयन्ति ये।
लभन्ते नात्मविद्याञ्च सुतीर्थविसुखाश्च ये॥
सुवर्णं वस्त्रताम्बूलं रत्नमन्नं फलं जलम्।
आर्त्तेभ्यो न प्रयच्छन्ति सर्व्वं सुकृतदारकाः॥
ब्रह्मस्वं स्त्रीधनानि लोभादेव हरन्ति ये।
बलेन छद्मना वापि धूर्त्ताश्च परवञ्चकाः॥
नास्तिकाः कुहकाश्चौरा ये चान्ये वकवृत्तयः।
बालवृद्धातुरस्त्रीषु निर्दयाः सत्यवर्ज्जिताः॥
अग्निदा गरदा ये च ये चान्ये कूटसाक्षिणः।
अगम्यागामिनः सर्व्वे ये चान्ये ग्रामयाजिनः॥
याधाचरणसम्पन्ना वर्णादिधर्म्मवर्जिताः।
देवोपदेवदनुजरक्षोयक्षादिसेविनः॥
सर्व्वदा मादकद्रव्यपानमत्ता हरिद्विषः।
देवतोच्छिष्टपतितनृपान्नान्नभोजिनः॥
असत्कर्म्मरता नित्यं सर्व्वपातकपापिनः।
पाषण्डधर्म्माचरणाः पुरोधोवृत्तिजीविनः॥
पितृमातृस्वसापत्यस्वदारत्यागिनश्च ये।
ये कदर्य्याश्च लुब्धाश्च नास्तिका धर्म्मदूषकाः॥
त्यजन्ति स्वामिनं युद्धे त्यजन्ति शरणागतम्।
गवां भूमेश्च हर्त्तारो ये चान्ये रत्नदूषकाः॥
महाक्षेत्रेषु सर्व्वेषु प्रतिग्रहरताश्च ये।
परद्रोहरता ये च तथा ये प्राणिहिंसकाः॥
परापवादिनः पापा देवतागुरुनिन्दकाः॥
कुप्रतिग्राहिणः सर्व्वे सम्भवन्ति पुनः पुनः॥
प्रेतराक्षसपैशाच्यतिर्य्यग्वृक्षकुयोनिषु।
न तेषां सुखलेशोऽस्ति इह लोके परत्र च॥
तस्मात् त्यक्त्वा निजिहार्थं विहितं कर्म्म कारयेत्।
यत्तं दानं तपस्तीर्थं मन्त्रं देवं गुरुं भरेत्॥
नाचरेत् कुत्सितं कर्म्म मनसा च कदाचन।
विपाकं कर्म्मणां दृष्ट्वा योनिकोटिषु दुःसहम्॥
चतुर्भिरपि वर्णैस्तु सेव्यो धर्म्मो निरन्तरम्॥"

इति पाद्मोत्तरखण्डे १८ अध्यायः॥ * ॥

योनिदुष्टाया असाध्यत्वं यथा,—

"साध्वी स्त्री मातृतुल्या च सर्व्वथा हितकारिणी।
असाध्वी वैरतुल्या च ग्रथ्नत्सन्तापदायिका।
सुखदुष्टा योनिदुष्टा चेत्यसाध्वीति विश्रुता॥"

इति ब्रह्मवैवर्त्ते गणपतिखण्डे २ अध्यायः॥*॥

पापपुण्यफलं अधमोत्तमयोनिप्राप्तिर्यथा,—

"पापपुण्यफलं लोके प्रत्यक्षं खलु दृश्यते।
देवदानवमानुष्यतिर्य्यक्त्वं क्रमियोनिता॥
नानायोनिषु जन्मानि नानाव्याधिप्रपीड़िताः।
मरणं बालवृद्धानामन्यत्वं कुजता तथा॥
ऐश्वर्य्यं सुदरिद्रत्वं पाण्डित्यं मूर्खता तथा।
एतच्चराचरे लोके भवन्ति कथमन्यथा॥"

इति पाद्मोत्तरखण्डे २१ अध्यायः॥ * ॥

पक्षियोनिप्राप्तिकारणं यथा,—

"इति श्रुतकथो विप्र! सारसं प्राह वानरः।
सम्यग्वेत्ति भवान् नूनं त्वं कथं पक्षितां गतः।
वृत्तान्तमेतं कथय श्रोतुमिच्छामि सारस!॥

सारस उवाच।

कथयिष्यामि तत् कर्म्म येनाहं दुर्गतिं गतः।
पक्षियोनिं गतो येन तत् सर्व्वं श्रोतुमर्हसि॥
धान्यखारीशतं साग्रमुत्सृष्टं हि त्वया पुरा।
वटुभ्यो ब्राह्मणेभ्यश्च नर्म्मदायाः परिग्रहे॥
पौरोहित्यमदाल्लोभाद्वञ्चयित्वा द्विजांस्तथा।
किञ्चिदृत्त्वा तु तेभ्यश्च गृहीतमखिलं मया॥
विप्रसाधारणद्रव्यग्रहणोत्पन्नपातकात्।
पतितः कालसूत्रेऽहं नरके रक्तकर्द्दमे॥
वक्तुमत्र न शक्नोमि दुःखं वानर! नारकम्।
दैवात् कथमपि प्राप्य उत्तारो नरकाम्बुधेः॥
मया यदि तथापीह शकुनत्वमुपस्थितम्।
अपचित्य पुरा कांस्यभाजनं भगिनीगृहात्।
नृतकर्त्रे मया दत्तं तेन मे सारसी गतिः॥
दृश्यश्च ब्राह्मणी पूर्व्वं कांस्यचौरी सुदारुणा।
तेनेह सारसी जाता मद्भार्य्या सहधर्म्मिणी॥"

इति तत्रैव १९। २० अध्यायौ॥ * ॥

पापिनां नरकभोगानन्तरं स्थावरादियोनिप्राप्तिर्यथा,—

"स्थावराः क्रमयोऽब्जाश्च पक्षिणः पशवो नराः।
धार्म्मिकाश्चिदग्राम्यदग्धोच्छिन्नश्च यथाक्रमम्॥
सहस्रभागप्रथमा द्वितीयानुक्रमास्तथा।
सर्व्वे ह्येते सहाभाग यावन्मुक्तिसमाश्रयाः॥"

इति विष्णुपुराणे २ अंशे ५ अध्यायः॥

"पापिनां नरकभोगानन्तरं स्थावराद्याश्चतुरोत्तरसप्तलक्षासु नवधा भिन्नासु योनिषु जन्मक्रममाह। स्थावरा इति। अब्जा मत्स्याद्याः। धार्म्मिका नरेष्वेव पुण्यविशेषेण केचिन्मोच्छिन्नाश्च सुसुश्चवश्च यथाक्रमं भवन्तीति शेषः। तेषाञ्च पूर्व्ववाक्योक्तसप्तोत्तरशतलक्षाह सहस्रेति। द्वितीयानुक्रमाः द्वितीयोऽनुक्रम उद्देशो येषां द्वितीयस्थानेऽनुक्रान्ता ये क्रमयस्ते सहस्रभागप्रथमाः सहस्रभागाः सहस्रगुणाः प्रथमाः प्रथमनिर्द्दिष्टाः स्थावरा येषां ते। क्रमिभ्यः सहस्रगुणमधिकाः स्थावराः। तत्सहस्रतमभागाः क्रमयः इत्यर्थः। पञ्चम्यन्तपाठेऽपि द्वितीयस्थानेऽनुक्रान्तात् क्रमिवर्गात् सहस्रगुणाः स्थावरा इत्येवार्थः। तथा सर्व्वे ह्येत इति। यथा स्थावराः स्थानान्तरनिर्द्दिष्टेभ्यः क्रमिभ्यः सहस्रगुणमधिकाः। तथा क्रमयः स्थानान्तरनिर्द्दिष्टेभ्योऽब्जेभ्यः सहस्रगुणमधिकाः। एवं पक्ष्यादिष्वपि द्रष्टव्यम्। मोक्षं सम्यगाश्रयन्ति इति मोक्षसमाश्रया सुसुश्चवो ज्ञाननिष्ठास्तत्पर्य्यन्तमेवं पूर्व्वपूर्व्वादुत्तरोत्तरबहुत्वेन जन्म-

क्रमः । ततः परं मुक्तिः । एतच्च संसारिजीव-बाहुल्यकथनं मोक्षस्य दुर्लभतासूचनार्थम् । अयञ्च नवधा निर्द्दिष्टो जन्मक्रमः प्रायिक एव । तदुक्तमादित्यपुराणे ।

"युतक्रमेणापि मानुष्यं प्राप्यन्ते पुण्यगौरवात् । विचित्रा गतयः पुंसां कर्म्मणां गुरुलाघवैः ॥"

इति तट्टीका ॥

कुयोनिमोचनं यथा,—

वाराह उवाच ।

"येन गर्भं न गच्छेत तन्मे शृणु हि माधवि ! । कथयिष्यामि ते ह्येवं सर्व्वधर्म्मविनिश्चयम् ॥ कृत्वापि विपुलं कर्म्म आत्मानं न प्रशंसति । कुर्व्वते बहुकर्म्माणि शुद्धेनैवान्तरात्मना ॥ कृत्वापि मम कर्म्माणि मत्प्रियाणि वसुन्धरे ! । नैव कुर्व्वन्त्यहङ्कारं क्रोधश्चैव न गच्छति ॥ समं पश्यति चित्तेन लाभालाभविवर्जितः । यश्चानाभिन्द्रियाणाञ्च समर्थो निग्रहे रतः ॥ कार्य्याकार्य्यं विजानाति सर्व्वधर्म्मेषु निष्ठितः । शीतोष्णवातवर्षादिक्षुत्पिपासासहश्च यः ॥ यो दरिद्रो निरालस्यः सत्यवागनसूयकः । स्वदारनिरतो नित्यं परदारविवर्जितः ॥ सत्यवादी विशुद्धात्मा नित्यं भागवतप्रियः । संविभागी विशेषज्ञो नित्यं ब्राह्मणवत्सलः ॥ प्रियवादी द्विजानाञ्च मम कर्म्मपरायणः । कुयोनिन्तु न गच्छेत मम लोकाय गच्छति ॥"

वियोनिमोचनं यथा,—

"अन्यच्च ते प्रवक्ष्यामि तच्छृणुष्व वसुन्धरे ! । यो वियोनिं न गच्छेत मम कर्म्मपरायणः ॥ जीवहिंसानिवृत्तस्तु सर्व्वभूतहितः शुचिः । सर्व्वत्र समतायुक्तः समलोष्टाश्मकाञ्चनः ॥ बाल्ये स्थितोऽपि वयसि क्षान्तो दान्तः शुभे रतः । कृत्यं नैव विजानाति परेणापकृतं क्वचित् ॥ कृत्यञ्च संस्मरेत् क्षिप्रमसत्यञ्च न जल्पति । बलीकेषु निवृत्तो यः पर्य्येति कृतनिश्चयः ॥ नित्यञ्च धृतिमान् किञ्चित् परोक्षेऽपि न च क्षिपेत् ।
ऋतुकालेऽभिगच्छेत अपत्यार्थं स्वकां स्त्रियम् ॥ ईदृशास्तु नरा भद्रे ! मम कर्म्मपरायणाः । ते वियोनिं न गच्छन्ति मम गच्छन्ति सुन्दरि ॥"

तिर्य्यग्योनिमोचनं यथा,—

वाराह उवाच ।

"गुह्यानां परमं गुह्यं तच्छृणुष्व वसुन्धरे ! । तिर्य्यग्योनिगताश्चापि यो न गच्छन्ति किल्बिषम् ॥ अष्टम्याञ्च चतुर्द्दश्यां मैथुनं यो न गच्छति । सुक्ता परस्य चान्नानि यश्चैव न विकुत्सति ॥ बाल्ये वयस्यपि च यो मम नित्यमनुव्रतः । येन केनापि सन्तुष्टः पितृमातृप्रपूजकः ॥ प्राप्तेन जीवति च यः प्रविभागी गुणान्वितः । अलुब्धः सर्व्वकार्य्येषु स्वतन्त्रो नित्यसंयतः ॥ विकर्म्म नाभिकुर्व्वीत कौमारव्रतसंस्थितः । सर्व्वभूतदयायुक्तः सत्त्वेन च समन्वितः ॥ मतिमान्नैव तप्येत परार्थेषु कदाचन । ईदृशीं बुद्धिमास्थाय मम कर्म्माणि कुर्व्वते । तिर्य्यग्योनिं न गच्छेत मम लोकाय गच्छति ॥"

इति वराहपुराणे योनिगर्भमोचननामाध्यायः ॥

योनिकन्दः, पुं, (योनौ कन्द इव ।) योनिरोग-विशेषः । तस्य निदानं यथा,—

"दिवास्वप्नादतिक्रोधाद्व्यायामादतिमैथुनात् । क्षताच्च नखदन्ताद्यैर्व्वातास्त्रयः कुपिता यथा ॥ वातास्त्रयः कुपिता यथा । यथा निदानकुपिता वातास्त्रयः । रूपमाह ।

'पूयशोणितसङ्काशं लकुचाकृतिसन्निभम् । जनयन्ति यदा योनौ नाम्ना कन्दः स योनिजः ॥' लकुचाकृतिसन्निभं लकुचाकाराकारम् । गुडकमत्र विशेष्यं बोद्धव्यम् ॥ * ॥ वातजादि-भेदेन रूपभेदमाह ।

'रूक्षं विवर्णं स्फुटितं वातिकं तं विनिर्द्दिशेत् । दाहरागज्वरयुतं विद्यात् पित्तात्मकन्तु तत् ॥ तिलपुष्पप्रतीकाशं कण्डूयन्तं कफात्मकम् । सर्व्वलिङ्गसमायुक्तं सान्निपातात्मकं भवेत् ॥' अस्य चिकित्सा । योनिशब्दे द्रष्टव्या ।" इति भावप्रकाशः ॥

योनिज, त्रि, (योनेर्ज्जायते इति । जन् + डः ।) योनिनिःसृतशरीरादिकम् । यथा,—

"सा च त्रिधा भवेद्देहे इन्द्रियं विषयस्तथा । योनिजादिर्भवेद्देहे इन्द्रियं घ्राणलक्षणम् ॥"

इति भाषापरिच्छेदः ॥

"योनिजादीति । योनिजमयोनिजञ्चेत्यर्थः । योनिजमपि जरायुजमण्डजञ्च । जरायुजं मानुषादीनां अण्डजं सर्पादीनाम् । अयोनिजं स्वेदजोद्भिदादिकम् । स्वेदजाः कृमिदंशाद्याः । उद्भिदस्तरुगुल्माद्याः । नारकिणां शरीरमध्य-योनिजम् ।" इति सिद्धान्तमुक्तावली ॥

योनिदेवता, स्त्री, (योनेर्देवता ।) पूर्व्वफल्गुणी-नक्षत्रम् । इति हेमचन्द्रः ॥

योनिमुद्रा, स्त्री, (योन्याकृतिर्मुद्रा हस्तभङ्गी ।) भगवत्याः पूजायां प्रदर्शनीयाङ्गुलीरचितयोन्या-कारमुद्राविशेषः । यथा,—

"पञ्च प्रणामान् कृत्वाथ ॐ ह्रीँ श्रीमितिमन्त्रकैः । अन्येषां पुरतश्चैव अधिकाल्पा यथेच्छया । योनिमुद्रां ततः पश्चात् दर्शयित्वा विसर्ज्जयेत् ॥ दौ पाणी प्रसृतीकृत्य कृत्वा तूत्तानमञ्जलिम् । अङ्गुष्ठाग्रद्वयं न्यस्य कनिष्ठाग्रद्वयोस्ततः ॥ अनामिकायां वामस्य तत्कनिष्ठां पुरो न्यसेत् । दक्षिणस्यानामिकायां कनिष्ठां दक्षिणस्य च ॥ अनामिकायाः पृष्ठे तु मध्यमे विनियोजयेत् । इ तज्जन्यौ कनिष्ठाग्रे तदग्रेणैव योजयेत् ॥ योनिमुद्रा समाख्याता देव्याः प्रीतिकरी मता ॥ चिवारं दर्शयेदग्रे मूलमन्त्रेण साधकः । तां मुद्रां शिरसि न्यस्य मण्डलं विन्यसेत्ततः ॥"

इति कालिकापुराणे ५३ अध्यायः ॥ * ॥

पारिभाषिकयोनिमुद्रा यथा । मन्त्रमुक्ता-वल्याम् ।

"उपविश्यासने मन्त्री प्राङ्मुखो वाप्युदङ्मुखः । षट्चक्रं चिन्तयेद्देवि ! प्राणायामपुरःसरम् ॥ चतुर्द्दलं स्याद्धाधारं स्वाधिष्ठानन्तु षड्दलम् । नाभौ दशदलं पद्मं सूर्य्यसंख्यदलं हृदि ॥ कण्ठे स्यात् षोड़शदलं भ्रूमध्ये द्विदलन्तथा । सहस्रदलमाख्यातं ब्रह्मरन्ध्रे महापथे ॥ आधारे कन्दमध्यस्थं त्रिकोणमतिसुन्दरम् । त्रिकोणमध्ये देवेशि ! कामबीजं सुलक्षणम् ॥ कामबीजोद्भवं तत्र स्वयम्भुलिङ्गमुत्तमम् । तस्योपरि पुनर्ध्यायेत् चित्कलां हंसमाश्रिताम् ॥ ध्यायेत् कुण्डलिनीं देवीं स्वयम्भुलिङ्गवेष्टिताम् । चित्कलया कुण्डलिनीं तेजोरूपां जगन्मयीम् ॥ आधारादीनि पद्मानि भित्त्वा तेजःस्वरू-पिणीम् । हंसेन मनुना देवीं ब्रह्मरन्ध्रं नयेत् सुधीः ॥ सदाशिवेन देवेशि ! क्षणमात्रं रमेत् प्रिये ! । अमृतं जायते देवि ! तत्क्षणात् परमेश्वरि ! ॥ तदुद्भवामृतं देवि ! लाजाररससमोपमम् । तेनामृतेन देवेशि ! तर्पयेत् परदेवताम् ॥ षट्चक्रदेवतास्तत्र सन्तर्प्यामृतधारया । आनयेत्तेन मार्गेण मूलाधारं पुनः सुधीः ॥ ततस्तु परमेशानि ! अक्षमालां विचिन्तयेत् । चिच्चित्रणी विद्युतरूपाभा ब्रह्मनाड़ीगतान्तरा ॥ तया संग्रथिता ध्येया साक्षाज्ज्ञानमयस्वरूपिणी । अनुलोमविलोमेन मन्त्रवर्णविभेदतः ॥ मन्त्रवर्णान्तरितान् वर्णान् वर्णान्तरितं मनुम् । कुर्य्यादर्णमयीं मालां सर्व्वमन्त्रप्रकाशिनीम् ॥ चरमार्णं मेरुरूपं लङ्घनं नैव कारयेत् । सबिन्दुं वर्णमुच्चार्य्य पश्चान्मन्त्रं जपेत् सुधीः ॥ अष्टोत्तरशतं मूलमन्त्रं ज्ञानेन संजपेत् । वर्गाणामष्टवर्गेण अष्टवारं जपेत् सुधीः ॥ अ क च ट त प य शा इत्येवञ्चाष्टवर्गकाः । योनिमुद्रा महेशानि ! तव स्नेहात् प्रकाशिता ॥ मन्त्रार्थं मन्त्रचैतन्यं योनिमुद्रां न वेत्ति यः । शतकोटिजपेनापि तस्य सिद्धिर्न जायते ॥"

इति शाक्तानन्दतरङ्गिणी ॥

योनिरोगः, पुं, (योनेः रोगः ।) भगगदः ॥ (यथा, सुश्रुते । १ । ४५ ।

"शूलोदावर्त्तातिसारप्रवाहिकायोनिरोगगर्भ-स्रावरक्तपित्तश्रमक्लमहरम् ॥" * ॥) अस्य निदानादिर्योनिशब्दे द्रष्टव्यः ॥

योन्यर्शः, [स्] क्ली, (योनिजातमर्शः ।) योनि-जातरोगविशेषः । तत्पर्य्यायः । कन्दसंज्ञम् २ । इति त्रिकाण्डशेषः ॥ (यथा,—

"केचित्तु भूयांसमेव देशमुपदिशन्त्यर्शसां शिश्न-मपथ्यपथं गलसुखनासिकाकर्णाक्षिवर्त्मानि वक्ष्य ।" इति चरके चिकित्सास्थाने अष्टमे अध्याये ॥)

योषा, स्त्री, (यौति मिश्रीभवतीति । यु मिश्रणे + बाहुलकात् सः । इत्युज्ज्वलदत्तः । ३ । ६२ । स्त्रियां टाप् ।) नारी । इत्यमरः । २ । ६ । २ ॥ (यथा, देवीभागवते । ३ । २५ । ६ ।

"यथा दारुमयी योषा नटादीनां प्रचेष्टते ।
तथा स्वकर्म्मवशगो देही सर्व्वत्र वर्त्तते ॥")

योषित्, स्त्री, (योषति पुमांसं शुष्यते पुंभिरिति वा । युष् + "कृञ्हृरुहियुषिभ्य इतिः ।" उणा० १ । ६६ । इति इतिः ।) नारी । इत्यमरः । १ । ६ । २ ॥ (यथा, मेघदूते । १ । ३६ ।
"गच्छन्तीनां रमणवसतिं योषितां तत्र नक्तं
रुद्धालोके नरपतिपथे सूचिभेद्यैस्तमोभिः ॥")
तस्या अवध्यत्वं यथा, वह्निपुराणे ।
"तं प्रेक्ष्य भरतं श्रेष्ठं शत्रुघ्नो वाक्यमब्रवीत् ।
अवध्याः सर्व्वभूतानां योषितः क्षम्यतामिति ॥"

योषित्प्रिया, स्त्री, (योषितां प्रिया ।) हरिद्रा । इति भावप्रकाशः ॥

योषिता, स्त्री, (योषित् + टाप् ।) नारी । यथा,
"स्त्री वधूरबला नारी प्रिया रामा जनिर्ज्जनी ।
योषा योषिद्योषिता च जोषिज्जोषा च
जोषिता ॥"
इति शब्दरत्नावली ॥
(यथा, सुश्रुतोपनिषदि । २ । १ । ५ ।
"तस्मादग्निः समिधो यस्य सूर्य्यः
सोमात् पर्जन्य ओषधयः पृथिव्याम् ।
पुमान् रेतः सिञ्चति योषितायां
बह्वीः प्रजाः पुरुषात् सम्प्रसूताः ॥")

यौक्तिकः, पुं, (युक्तिं करोतीति । युक्ति + ठण् ।) नर्म्मसचिवः । इति शब्दरत्नावली ॥ युक्तियोग्ये, त्रि ॥

यौगकः, त्रि, (योगस्यायमिति । योग + अण् + स्वार्थे कन् ।) योगसम्बन्धी । इति सिद्धान्तकौमुदी ॥

यौगिकः, त्रि, (योगाय प्रभवतीति । योग + "योगाद्यच्च ।" ५ । १ । १२६ । इति ठञ् ।) प्रकृतिप्रत्यययोगलभ्यार्थवाचकः । यथा । योगाय प्रभवति । इति योग्यः यौगिकः । इति सिद्धान्तकौमुदी ॥ "योगरूढ़ाच्च रूढ़ाच्च यौगिकाच्चेति ते त्रिधा । आर्हतेयादिशब्दा यौगिकाः अर्हतिरपत्यानीति ठक्प्रत्ययेन केवलं योगार्थ एव ।" इत्यलङ्कारकौस्तुभे २ किरणः ॥ * ॥
("यौगिकं नाम लक्षयति विभजते च ।
'योगलभ्यार्थमात्रस्य बोधकं नाम यौगिकम् ।
समासस्तद्धिताक्तञ्च कृदन्तश्चेति तत्त्रिधा ॥'
यन्नाम स्वान्तर्निविशमानशब्दानां योगलभ्यस्यैव याद्दशार्थस्यान्वयबोधं प्रतिहेतुस्तन्नाम ताद्दशार्थे यौगिकम् । योगरूढ़न्तु लक्षणसर्पादिपदं योगेनावच्छिन्नस्य रूढ्यर्थस्य बोधकं न तु तन्मात्रस्य । तच्च यौगिकं त्रिविधं समासस्तद्धितान्तं कृदन्तश्चेति । द्वन्द्वोऽपि समासः खघटकशब्दानामाकाङ्क्षया लभ्यस्य धवखदिरादार्थस्यान्वयबोधकतया यौगिक एव । सर्व्वत्रेदं रूढ़ान्यत्वेन विशेषणीयं नातः लक्षणसर्पादौ वासुदेवादौ पङ्कजादौ च योगरूढ़्यतिप्रसङ्गः । माञ्जरी श्मश्रूः श्मश्रूत्यादौ ङीबादेः स्त्रीत्वाश्रिते याद्दशं नाम यौगिकमेव अन्यथा तु स्त्रीत्वादिमति तत्तदर्थे रूढ़मेव नातो विभागस्य व्याघातः ॥ यौगिकेषु समासं लक्षयति ।
'याद्दशस्य महावाक्यस्यान्तरवयवादिभिर्जायमानस्यार्थके ।
याद्दशार्थस्य धीहेतुः स समासस्तदर्थकः ॥'
याद्दशमहावाक्योत्तरखण्डतलादिः स्वार्थस्य याद्दशार्थावच्छिन्नविषयतायाश्चालिबोधे हेतुस्तादृशं तदाख्यं तथाविधार्थे समासः । पाचकादिकन्तु पाककर्त्तृत्वार्थकं वाक्यमपि खघटकानेकनामलभ्यताद्दशार्थकत्वविरहान्न महावाक्यम् । प्रकृत्यर्थमात्रावच्छिन्नप्रत्ययार्थस्यान्वयबोधं प्रत्ययोग्यत्वं वा प्रकृते वाक्यस्य महत्त्वं वाच्यम् । तेन उपकुम्भादौ नाद्यापिन्नैवा नीलघटत्वत्वमित्यादौ नीलघटत्वादिभागेऽतिप्रसङ्गः । क्षीरपायीत्यादिकन्तु प्रकृत्यर्थावच्छिन्नप्रकृदर्थस्यान्वयबोधे समर्थोऽपि न प्रकृत्यर्थमात्रावच्छिन्नस्य ततः पान ।स्त्रीलसामान्यस्याप्र ।राज्ञः पुरुषत्वमित्यादितो राजन्येव पुरुषभावः प्रतीयते न तु राजपुरुषस्य भावः तद्धितानां प्रकृत्यर्थमात्रान्वित स्वार्थबोधकत्वादतो राज्ञः पुरुषेत्यादिभागे न प्रसङ्गः । पायंपायमित्यादिगमन्तभागस्तु स्वार्थावच्छिन्नस्य धात्वन्तरार्थस्यैवान्वयबोधको न तु त्वादिप्रत्ययार्थस्य प्रस्थायेत्यादौ समासस्यपदेशोल्यवादिशब्दसंस्कारप्रयोजनको गौणः ॥"

* * * * * *

"यौगिकेषु क्रमप्राप्तं तद्धितान्तं नाम लक्षयति ।
'यन्नाम तद्धितं यच्च यत्क्रमं सद्यदर्थकम् ।
यद्दृश्यं यमक्रमं तच्च तद्धितान्तं निगद्यते ॥'
यद्यपि नामोत्तरतद्धितत्वं तद्धितोत्तरनामत्वं वा प्रत्येकं बहुगुड़ो ब्राह्मेत्यादौ दाक्षिरित्यादौ चाव्याप्तमेव तद्धितान्तं नाम्नि तथापि याद्दशं नाम यच्च तद्धितं याद्दशानुपूर्व्यवच्छिन्नं स्वाद्दशार्थस्यान्वयबोधे समर्थं ताद्दशानुपूर्व्यवच्छिन्नं तद्दृश्यमपि ताद्दशार्थे तद्धितान्तं नामेत्यर्थः पचतितरामित्यादिकन्तु नामैव न प्रागेव तु तद्धितान्तं तस्यापि लक्ष्यत्वे यः शब्दस्तद्धितं यच्चेति पटनीयं टाबादेरपि तद्धितत्वोपगमादजाद्राह्मणीत्यादेर्नासंग्रह इति वदन्ति ।
कृदन्तं नाम लक्षयति ।
'यद्वाक्यार्थान्वितस्वार्थधीकृत् कृद्याद्दशं भवेत् ।
तद्धातूत्तरगं तत् कृत् कृदन्तं नाम ताद्दशम् ॥'
यद्वाक्यार्थान्वितस्वार्थान्वयबोधं प्रति याद्दशानुपूर्व्यवच्छिन्नस्य यत्कृतो निश्चयः कारणं तद्धातूत्तरगं तत् कृदेव ताद्दशानुपूर्व्यवच्छिन्नं सत् कृदन्तं नाम । यथा पाठकपाठ्यमानादि तद्धि धात्वर्थेनान्वितस्य स्वार्थकर्त्तादेः कर्म्मत्वादावन्वयबोधं प्रति द्वितीयादौ ताद्दशानुपूर्व्यिकत्वेन निश्चीयमानं हेतुः चैत्रेण ग्रामस्य गन्तव्यमित्यादौ धात्वर्थे स्वार्थमिष्टसाधनत्वादिकं बोधयदपि तथादिकं धात्वर्थनिरूपितस्वार्थविषयतानिरूपितस्वार्थविषयताकबोधजनकत्वेन धात्वर्थान्वितस्वार्थकमेव भावकृतामपि स्वरूपार्थकत्वं श्रुत्पादितमेव ॥" इति शब्दशक्तिप्रकाशिका ॥

अशुरुः । तत्पर्य्यायो यथा,—
"अयोगुरुः ससुद्दिष्टो यौगिको लोहनामभिः ॥"
इति गारुड़े २०५ अध्यायः ॥)

यौजनशतिकः, त्रि, (योजनशतं गच्छतीति । योजनशत + "क्रोशशतयोजनशतयोरुपसंख्यानम् ।" ५ । १ । ७४ । इत्यस्य वार्त्ति० इति । ठञ् ।) योजनशतगमनकर्त्ता । इति सिद्धान्तकौमुदी ॥ (योजनशतादभिगमनमर्हतीति वाक्ये योजनशताभिगमनकर्त्ता । इति काशिका ॥)

यौजनिकः, त्रि, (योजनं गच्छतीति । योजन + "योजनं गच्छति ।" ५ । १ । ७४ । इति ठञ् ।) एकयोजनगमनकर्त्ता । इति सिद्धान्तकौमुदी ॥

यौट, ऋ सम्बन्धे । इति कविकल्पद्रुमः ॥ (भ्वा० पर०-सक०-सेट् ।) चतुर्द्दशस्वरी । ऋ, अयुयौटत् । यौटति काष्ठं तक्षा । इति दुर्गादासः ॥

यौड, ऋ सम्बन्धे । इति कविकल्पद्रुमः । (भ्वा० पर०-सक०-सेट् ।) चतुर्द्दशस्वरी । ऋ, अयुयौड़त् । यौड़ति काष्ठं तक्षा । इति दुर्गादासः ॥

यौतकं, क्ली, (युतकयोर्बधूवरयोरिदम् । युतक + अण् । युतकमेवेति । स्वार्थे अण् वा ।) यौतुकम् । इति हलायुधरायमुकुटौ । २ । ८ । २८ ॥
(यथा, मनुः । ६ । १३१ ।
"मातुस्तु यौतकं यत् स्यात् कुमारीभाग एव
सः ॥"
अस्य विशेषविवरणन्तु यौतुकशब्दे द्रष्टव्यम् ॥)

यौतवं, क्ली, परिमाणम् । इत्यमरः । २ । ६ । ८५ ॥

यौतुकं, क्ली, यौतकम् । विवाहकाले दम्पत्योर्लब्धं धनम् । उपचारात् अन्नप्राशनादिसंस्कारकाललब्धमपि । युतकं योनिसम्बन्धः तत्र भवमिति ष्ठञि यौतकम् । युतयोर्बधूवरयोरिदमिति वा ष्ठञि यौतकम् ॥ यौतकसुकारमध्यमपि । यौतकं यौतुकञ्च तत् । इति वाचस्पतिः ॥ यौतकादि तु यद्दृश्यं स दायो हरणञ्च तदित्यमरटीकायां भरतः ॥*॥ स्त्रिया यौतकधनस्याधिकारक्रमो यथा,—
"यस्य दुहितृमात्राधिकारार्थं गोतमवचनम् ।
'स्त्रीधनं दुहितृणामप्रजानामप्रतिष्ठितानाञ्च ।'
यच्च नारदस्य ।
'मातुर्दुहितरोऽभावे दुहितॄणां तदन्वयः ॥'
यच्च कात्यायनस्यापि ।
'दुहितॄणामभावे तु रिक्थं पुत्रेषु तद्भवेत् ॥'
यच्च याज्ञवल्क्यस्य ।
'मातुर्दुहितरः प्रेषन्दत्तात्तास्य ऋतेऽन्वयः ॥'
तानि पूर्व्वोक्तदेवलवचनविरोधेन यौतकधनमात्रविषयाणि । अतएव मनुः । ६ । १३१ ॥
'मातुश्च यौतकं यत् स्यात् कुमारीभाग एव सः ॥'
यौतकं परिणयनलभ्यम् । यु मिश्रण इति धातोर्युंत इति पदम् । मिश्रता च स्त्रीपुंसयोरेकशरीरता तच्च विवाहाद्भवति । अस्थिभिरस्थीनि मांसैर्म्मांसानि त्वचा त्वचमिति श्रुतेः । अतो विवाहकाललभ्यं यौतकम् । ततश्च परिणयनलभ्यं स्त्रीधनं दुहितुरेव न पुत्राणाम् । तत्रैव

क्रमार्थं गोतमवचनम्। स्त्रीधनं दुहितॄणाम-प्रत्तानामप्रतिष्ठितानाञ्च। प्रथममप्रत्तानां तद-भावे प्रत्तानां तदभावे समूढानाम्। स्त्रीधनं दुहितॄणामितिसामान्यत: प्राप्तत्वात्। अप्रत्ता-नामित्यादेस्तु क्रमार्थत्वात्। तथा, याज्ञ-वल्क्य:।

'अप्रज:स्त्रीधनं भर्त्तुर्ब्राह्म्यादिषु चतुर्ष्वपि।
दुहितॄणां प्रसूता चेच्छेषेषु पितृगामि तत्॥'

तत्र ब्राह्म्यादिषु विवाहेषु यल्लभ्यमप्यग्निधनं स्त्रिया तत् तस्यां मृतायां प्रथमं दुहितृणामेव तत्रापि प्रथमं कन्यायास्तदभावे प्रत्तायास्तद-भावे परिणीतायाः सर्व्वदुहितृभावे च पुत्र-स्याधिकार: अप्रज:स्त्रीधने भर्त्तुरधिकारात्। दृढस्मृतिना अप्रत्तापदेन अप्रत्ताद्यभावे समू-ढ़ाया अप्यधिकार: सूचित:।

'ब्राह्म्यादेवार्षगान्धर्व्वप्राजापत्येषु यद्धनम्।
अप्रजायामतीतायां भर्त्तुरेव तदिष्यते॥
यत्तस्या: स्याद्धनं दत्तं विवाहेष्वासुरादिषु।
अतीतायामप्रजायां मातापित्रोस्तदिष्यते॥'

अस्या: स्याद्दत्तमिति परार्द्धेन पूर्ब्बार्द्धानुषज्यते। तेन विवाहेषु यद्धनं दत्तमिति सम्बन्धात् दैवाहिकधनमात्रप्रतीतेर्न यावद्धनविषयत्वम्, तथा यम:।

'आसुरादिषु यद्दत्तं विवाहेषु प्रदीयते॥'

विवाहक्रियायां पूर्ब्बापरीभूतायां यद्दत्तं प्रदी-यते इति यौतकधनमात्रगोचरत्वमेव प्रतीयते।" इति दायभाग:॥*॥ "ऊढ़ाया यौतकधने प्रथमं कुमारी तदभावे वाग्दत्ता अधिकारिणी। एतयोरभावे ऊढ़्यो: पुत्रवतीसम्भावितपुत्रयो-र्द्वयगर्भाधिकार:। एकाभावे चापराया:। एतयो-रभावे वन्ध्याविधवयोस्तुल्याधिकार:। एकाभावे चापराया:। तत: पुत्रदौहित्रपौत्रप्रपौत्रस-पत्नीपुत्रपौत्रप्रपौत्राणां क्रमेणाधिकार:। अन्य-त्रुक्तमते सपत्नीपुत्रानन्तरं दौहित्रस्याधिकार इति विष्णु:। ततो ब्राह्म्यादिविवाहषष्ठक-समयलभ्ययौतकधने भर्त्ता भ्राता माता पिता चेति क्रम:। आसुरादिविवाहत्रयसमयलभ्य-यौतकधने माता पिता भ्राता भर्त्ता चेति क्रम:। ततो देवर: ततो देवरपुत्रभर्त्तृश्वशुरपुत्रौ भगिनीपुत्र: ततो भर्त्तृभागिनेय: ततो भ्रातृपुत्र: ततो जामाता तत: श्वशुर: ततो भ्रातृश्वशुर: तत आनन्तर्य्यक्रमेण सपिण्डा: तत: सकुल्या: तत: समानोदका:।" इति तट्टीकायां श्रीकृष्ण-तर्कालङ्कार:॥

यौधिष्ठिरं, त्रि, (युधिष्ठिरस्य इदमिति। युधिष्ठिर + अण्।) युधिष्ठिरसम्बन्धि। यथा,—

"सा च यौधिष्ठिरी सेना गार्ङ्गेयशरताड़िता।
प्रतिपत्पाठशीलानां विद्येव तनुतां गता॥"

इति महाभारतम्॥

(युधिष्ठिरस्यापत्ये, पुं। यथा, महाभारते। ६। ५०। ५६।

"यौधिष्ठिर: सुसंक्रुद्ध: सौबलं निशितै: शरै:।

व्यदारयत संग्रामे मघवा इव दानवम्॥"

वासुदेवस्य पत्नीविशेषे, स्त्री। यथा, हरिवंशे। १६०। २०—२१।

"कौशिक्यां सुतसोमायां यौधिष्ठिर्य्यां युधिष्ठिर:।
कापाली गरुड़श्चैव जज्ञाते चित्रयोधिनौ॥
एवमादीनि पुत्राणां सहस्राणि निबोध मे।
दशायुतं समाख्याता वासुदेवस्य ते सुता:॥")

यौधेय:, पुं, (योधमर्हतीति। योध + ढञ्। यद्वा, "पार्श्वादियौधेयादिभ्यामणौ।" ५। ३। ११७। इति स्वार्थे अण्।) योद्धा। इति सिद्धान्तकौमुदी॥ (युधिष्ठिरपुत्र:। स च शैब्य-राजदौहित्र:। यथा, महाभारते। १।६५।७६।

"युधिष्ठिरस्तु गोवासनस्य शैब्यस्य देविकां नाम कन्यां स्वयम्वरां लेभे। तस्यां पुत्रं जनयामास यौधेयं नाम॥" नृगराजपुत्रा: यौधेया इति ख्याता: [illegible]या, हरिवंशे। ३१।२५।

"दृषद्वत्यास्तु संजज्ञे शिविरौशीनरो नृप:।
शिवेषु शिवयस्तात! यौधेयास्तु नृगस्य ह॥")

यौनं, क्ली, (योनेरिदमिति। योनि + अण्।) योनिसम्बन्धाधीनपापम्। यथा। बौधायन:।

"संवत्सरेण पतति पतितेन सहाचरन्।
याजनाध्यापनाद्यौनात् सद्यो हि प्रयना-
श्नात्॥"

सुमन्तु:। यच्चेतेर्यौनमौखश्मौवादीनां सम्बन्धा-नामन्यतमेन सह सम्पर्कमियात् तस्याप्येतदेव प्रायश्चित्तं विदध्यादिति। इयात् कुर्य्यात्। एतदेवेति द्वादशवार्षिकमित्यर्थ:। अत्र याज-नादीनामन्यतमेन संवत्सरेण पततीत्यवगम्यते। इति प्रायश्चित्तविवेक:॥ (उत्पत्तिकारणम्। यथा, महाभारते। १३। १०२। २५।

"यत्राग्नियौनाश्च वसन्ति लोका
अब्योनय: पर्व्वतयोनयश्च॥"

उत्तरापथजातजातिविशेषे, पुं। यथा, महा-भारते। १२। २०७। ४३।

"उत्तरापथजन्मान: कीर्त्तयिष्यामि तानपि।
यौनकाम्भोजगान्धरा: किराता बर्ब्बरै: सह॥")

यौवतं, क्ली, (युवतीनां समूह:। युवति + "भिक्षादिभ्योऽण्।" ४। २। ३८। इति अण्। पुंवद्भावाभावश्च।) युवतिसमूह:। इत्यमर:। २। ६। २२॥ (यथा, गीतगोविन्दे। १०। १५।

"रतिस्तव कलावती रुचिरचित्रलेखे भुवा-
वहो विबुधयौवतं वहसि तन्वि! पृथ्वीगता॥"

युवतिभि: कृतमिति। नृत्यविशेष:। यथा, सङ्गीतदामोदरे।

"मधुरं बहुलीलाभिर्नटीभिर्यत्र नृत्यते।
वशीकरणविद्याभं तल्लास्यं यौवतं मतम्॥")

परिमाणम्। इति अमरटीकायां भरत:॥

यौवनं, क्ली, (युवन् + "हायनान्तयुवादिभ्योऽण्।" ५। १। १३०। इति अण्।) युनो भाव:। तत्पर्य्याय:। तारुण्यम् २। इत्यमर:॥ वय: ३ इति जटाधर:॥ तत्तु षोड़शवर्षमारभ्य सप्तति-वर्षपर्य्यन्तम्। यथा,—

"आषोड़शाद्भवेद्बालस्तरुणस्तत उच्यते।
वृद्ध: स्यात् सप्ततेरूर्द्ध्वं वर्षीयान् नवते: परम्॥"

इति स्मृति:॥

नवयौवनलक्षणं यथा,—

"दरोद्भिन्नस्तनं किञ्चित् चलाक्षं मेदुरस्मितम्।
मनागभिस्फूरद्भावं नवं यौवनमुच्यते॥"

इत्युज्ज्वलनीलमणि:॥

("गर्भेश्वरत्वम् अभिनवयौवनत्वमप्रतिरूपत्वम-मानुषशक्तित्वञ्चेति महतीयं खल्वनर्थपरम्परा। सर्व्वाविनयानामेकैकमप्येषामायतनम्। किमुत समवाय:। यौवनारम्भे च प्राय: प्राक्तजल-प्रक्षालननिर्म्मलापि कालुष्यमुपयाति बुद्धि:। अनुज्झितधवलतापि सरागेव भवति यूनां दृष्टि:। अपहरति च वाल्येव शुष्कपत्रं समु-च्छ्वसन्नरजोभ्रान्तिरदूरमात्मेच्छया यौवनसमये पुरुषं प्रकृति:। इन्द्रियहरिणहारिणी च सततमतिदुरन्तेयमुपभोगगृद्धगर्द्धिका। नव-यौवनकषायितात्मनश्च सलिलानीव तान्येव विषयस्वरूपाण्यास्वाद्यमानानि मधुरतरागण्या-पतन्ति मनस:। नाघ्रायति च दिङ्मोह इवो-न्मार्गप्रवर्त्तक: पुरुषमत्यासङ्गो विषयेषु।" इति कादम्बर्य्यां चन्द्रापीड़ं प्रतिशुकनाशोपदेश:॥)

नवयौवनकारकमौषधं यथा,—

"अश्वगन्धानागबलागुड़मांसनिषेविणाम्।
रूपं भवेद्यथा तद्वत् नवयौवनचारिणाम्॥"

इति गारुड़े १८६ अध्याय:॥

यौवनकण्टकं, पुं, क्ली, (यौवने कण्टकमिव दु:खदत्वात्।) युवगण्ड:। इति शब्दमाला॥ वयस्फोड़ा इति भाषा॥

यौवनपिड़का, स्त्री, (यौवने पिड़का।) युवकाले मुखे जात: क्षुद्रस्फोटक:। वयस्फोड़ा इति भाषा॥ (यथा, सुश्रुते निदानस्थाने। १३।

"यौवनपिड़का पद्मिनी कण्टका जतुमणिरि-त्यादि॥") तल्लक्षणं यथा,—

"श्लाक्ष्णालीकण्टकप्रख्या: कफमारुतशोणिते:।
जायन्ते पिड़का युनां वक्त्रे या मुखदूषिका:॥"

इति सुश्रुते। १। १४ अध्याय:॥

अस्याश्चिकित्सा मुखदूषिकाशब्दे द्रष्टव्या॥

यौवनलक्षणं, क्ली (यौवनस्य लक्षणं चिह्नम्।) लावण्यम्। स्तन:। इति मेदिनी। ने, ११७॥ तारुण्यचिह्नम्॥

यौवनाश्व:, पुं, (युवनाश्वस्यापत्यमिति। युवनाश्व + अण्।) मान्धातृराज:। इति त्रिकाण्डशेष:॥ अपि च।

"यौवनाश्वोऽथ मान्धाता चक्रवर्त्ती बभूव ह।
सप्तद्वीपवतीमेक: शशासाच्युततेजसा॥
ईजे च यज्ञं क्रतुभिरात्मविद्भूरिदक्षिणै:॥
सर्व्वदेवमयं देवं सर्व्वात्मकमतीन्द्रियम्॥
द्रव्यं मन्त्रो विधिर्यज्ञो यजमानस्तथर्त्विज:।
धर्म्मो देशश्च कालश्च सर्व्वमेतदृयदात्मकम्॥
यावत् सूर्य्य उदेति स्म यावच्च प्रतितिष्ठति।
तत् सर्व्वं यौवनाश्वस्य मान्धातु: क्षेत्रमुच्यते॥

ग्रग्रविन्दोर्दुहितरि बिन्दुमत्यामधान्नृपः ।
पुरुकुत्समम्बरीषं मुचुकुन्दञ्च योगिनम् ॥
तेषां खसारः पञ्चाशत् सौभरिं वव्रिरे पतिम् ॥"

इति श्रीभागवते ९ स्कन्धे ६ अध्यायः ॥

यौवनाश्वकः, पुं, (यौवनाश्व + स्वार्थे कन् ।) मान्धातराजः । इति जटाधरः ॥

यौष्माकं, त्रि, (युष्मद् + अण् । "तस्मिन्नणि च युष्माकास्माकौ ।" ४ । ३ । २ । इति प्रकृतेर्युष्माकादेशः ।) युष्मत्सम्बन्धि । युष्माकमिदं इत्यर्थे ष्यञ्प्रत्ययेन निष्पन्नम् । इति मुग्धबोधव्याकरणम् ॥ (यथा, कथासरित्सागरे । ११२ । २०५ ।

"इत्यात्मजासु जल्पत्सु मिलितेष्वत्र तत्क्षणम् ।
विद्याधरो धूमशिखो यौष्माको ऽवातरद्दिवः ॥")

यौष्माकीनं, त्रि, (युष्मद् + "युष्मदस्मदोरन्यतरस्यां खञ्च ।" ४ । ३ । १ । इति खञ् । "तस्मिन्नणि चेति ।" ४ । ३ । २ । इति युष्माकादेशः ।) युष्मत्सम्बन्धि, युष्माकमिदं इत्यर्थे खीन् प्रत्ययेन निष्पन्नम् । इति मुग्धबोधव्याकरणम् ॥ युष्मच्छब्दे अलिखितत्वादवसरसङ्गत्या गौणयुष्मदस्मच्छब्दप्रयोगोऽत्र लिख्यते । युष्मदस्मदोर्मुख्यत्वे गौणत्वे च सिजसुडेङसां स्वरूपग्रहणात् तेषु परेषु त्वाहृययवयतुभ्यमह्यतवममाः स्युरेव । सिजसादेरन्यत्र युष्मदस्मदोर्मुख्यत्वे एकवचने परे त्वन्मदौ द्विवचने परे युवावौ बहुवचने परे खरूपेणावस्थानम्, गौणत्वे तु परविभक्तिमनादृत्य युष्मदस्मदोरेकत्वे त्वन्मदौ द्वित्वे युवावौ बहुत्वे खरूपेणावस्थानमिति ॥ ❋ ॥ यथा त्वामतिक्रान्तः अतित्वं अतित्वां अतियूयम् । अतित्वां अतित्वां अतित्वान् । अतित्वया अतित्वाभ्यां अतित्वाभिः । अतितुभ्यं अतित्वाभ्यां अतित्वभ्यम् । अतित्वत् अतित्वाभ्यां अतित्वत् । अतितव अतित्वयोः अतित्वयाम् । अतित्वयि अतित्वयोः अतित्वासु ॥ ❋ ॥ युवामतिक्रान्तः अतित्वं अतियुवां अतियूयम् । अतियुवां अतियुवां अतियुवान् । अतियुवया अतियुवाभ्यां अतियुवाभिः । अतितुभ्यं अतियुवाभ्यां अतियुवभ्यम् । अतियुवत् अतियुवाभ्यां अतियुवत् । अतितव अतियुवयोः अतियुवयाम् । अतियुवयि अतियुवयोः अतियुवासु ॥ ❋ ॥ युष्मानतिक्रान्तः अतित्वं अतियुष्मां अतियूयम् । अतियुष्मां अतियुष्मां अतियुष्मान् । अतियुष्मया अतियुष्माभ्यां अतियुष्माभिः । अतितुभ्यं अतियुष्माभ्यां अतियुष्मभ्यम् । अतियुष्मत् अतियुष्माभ्यां अतियुष्मत् । अतितव अतियुष्मयोः अतियुष्मयाम् । अतियुष्मयि अतियुष्मयोः अतियुष्मासु ॥ ❋ ॥ मामतिक्रान्तः अत्यहं अतिमां अतिवयम् । अतिमां अतिमां अतिमान् । अतिमया अतिमाभ्यां अतिमाभिः । अतिमह्यं अतिमाभ्यां अतिमभ्यम् । अतिमत् अतिमाभ्यां अतिमत् । अतिमम अतिमयोः अतिमयाम् । अतिमयि अतिमयोः अतिमासु ॥ ❋ ॥ आवामतिक्रान्तः अत्यहं अत्यावां अतिवयम् । अत्यावां अत्यावां अत्यावान् । अत्यावया अत्यावाभ्यां अत्यावाभिः । अतिमह्यं अत्यावाभ्यां अत्यावभ्यम् । अत्यावत् अत्यावाभ्यां अत्यावत् । अतिमम अत्यावयोः अत्यावयाम् । अत्यावयि अत्यावयोः अत्यावासु ॥ ❋ ॥ अस्मानतिक्रान्तः अत्यहं अत्यस्मां अतिवयम् । अत्यस्मां अत्यस्मां अत्यस्मान् । अत्यस्मया अत्यस्माभ्यां अत्यस्माभिः । अतिमह्यं अत्यस्माभ्यां अत्यस्मभ्यम् । अत्यस्मत् अत्यस्माभ्यां अत्यस्मत् । अतिमम अत्यस्मयोः अत्यस्मयाम् । अत्यस्मयि अत्यस्मयोः अत्यस्मासु । इति दुर्गादासः ॥

र

र, रेफः । यथा । वर्णात् कारतकारौ रादेफः । इति कलापसंक्षिप्तसारव्याकरणे ॥ रेफात् कारश्च । रकारः । इति प्रक्रियाकौमुदी ॥ स तु सप्तविंशद्गुहलवर्णः । तस्योच्चारणस्थानं मूर्द्धा । इति मुग्धबोधव्याकरणम् ॥ ❋ ॥ (तथा च शिक्षायाम् । १७ ।

"सूर्मूर्द्धन्या ऋटुरसा दन्त्या ऌतुलसाः
स्मृताः ॥")

तस्य स्वरूपं यथा,—

"रेफञ्च चञ्चलापाङ्गि ! कुण्डलीद्वयसंयुतम् ।
रक्तविद्युल्लताकारं पञ्चदेवात्मकं सदा ।
पञ्चप्राणमयं वर्णं त्रिबिन्दुसहितं सदा ॥"

इति कामधेनुतन्त्रे ६ पटलः ॥ ❋ ॥

तस्य लेखनप्रकारो यथा,—

"दक्षतः कुण्डली रेखा वामाद्दक्षगताग्रधः ।
पुनर्दक्षगता द्वेधा ततोऽधोगत्य चोर्द्धतः ॥
भवानी शङ्करो वह्निस्तासु तिष्ठन्ति नित्यशः ।
अर्द्धमात्रा ब्रह्मरूपा महाशक्तिः प्रकीर्त्तिता ॥"

अपि च ।

"ऊर्द्धाधःक्रमतो रेखा त्रिकोणाधोगता हि सा ।
विधिरीशः कैशवश्च तासु तिष्ठन्ति नित्यशः ॥
ऊर्द्धस्थिता तु या मात्रा सा शक्तिः परिकीर्त्तिता ।
तस्य मध्यगता रेखा वह्निरूपा हि सा स्मृता ।
निर्गुणोऽसौ सदा वर्णो न कदाचित् गुणीभवेत् ॥"

अस्य ध्यानं यथा,—

"ललज्जिह्वां महारौद्रीं रक्तास्यां रक्तलोचनाम् ।
रक्तवर्णामष्टभुजां रक्तपुष्पोपशोभिताम् ॥
रक्तमाल्याम्बरधरां रक्तालङ्कारभूषिताम् ।
महामोक्षप्रदां नित्यामष्टसिद्धिप्रदायिकाम् ॥
एवं ध्यात्वा ब्रह्मरूपां तन्मन्त्रं दशधा जपेत् ॥"

तत्प्रणाममन्त्रो यथा,—

"शिशक्तिसहितं देवि ! आत्मादितत्त्वसंयुतम् ।
सर्व्वतेजोमयं वर्णं सततं प्रणमाम्यहम् ॥"

इति वर्णोद्धारतन्त्रम् ॥ ❋ ॥

तस्य नामानि यथा,—

"रो रक्तः क्रोधिनी रेफः पावकस्त्रोजसो मतः ।
प्रकाशादर्शनो दीपो रतक्षमापरं बली ॥
भुजङ्गेशो मतिः सूर्य्यो धातुरक्तः प्रकाशकः ।
व्यापको रेवतीदासं कुक्षिंशो वह्निमण्डलम् ॥
उग्ररेखा स्थूलदण्डो वेदकण्ठपला पुरा ।
प्रकृतिः सुगलो ब्रह्मशब्दश्च गायको धनम् ॥
श्रीकण्ठ उमा हृदयं सुखी त्रिपुरसुन्दरी ।
सबिन्दुर्योनिजो ज्वाला श्रीशैलो विश्वतोमुखी ॥"

इति नानातन्त्रशास्त्राणि ॥

(छन्दःशास्त्रोक्तगणविशेषः । यथा, छन्दोमञ्जर्य्याम् । १ । ८ । "र-लमध्यः ।" लघुवर्णमध्यो रः भवति । तस्येदं सांकेतिकं चिह्नम् ।। पद्यादौ अस्याक्षरस्य प्रयोगे दाहो भवति । यदुक्तं वृत्तरत्नाकरटीकायाम् ।

"यो लक्ष्मीं रसु दाहं व्यसनमथ लवौ भ्रः सुखं
यस्तु खेदम् ॥"

धात्वनुबन्धविशेषः । यथा, कविकल्पद्रुमे ।

"————चो नचादि र वैदिकः ।"

"वैदिको वेदेष्वेव प्रयुक्तो न तु भाषायामित्यर्थः । यथा, गार्ग्ये स्तुतौ जगाति ॥")

रः, पुं, (राति ऊर्द्धं गतच्छीति । रा + डः ।) पावकः । तीक्ष्णः । इति मेदिनी । रे, १ ॥ कामवह्निः । इति शब्दरत्नावली ॥

रंहः, [स्] क्ली, (रमते येन इति । रम् + "रमेश्च ।" उणा० ४ । २१३ । इति असुन् । हुगागमश्च धातोः । "अहिरहिभ्यामसुन् इति अंहो रहः । इति धातुप्रदीपः ।" इत्युज्ज्वलदत्तः ।) वेगः । इत्यमरः । १ । १ । ६७ ॥ (यथा, रघुवंशे । २ । ३४ ।

"असं महीपाल ! तव श्रमेण
प्रयुक्तमप्यस्त्रमितो यथा स्यात् ।
न पादपोन्मूलनशक्तिरंहः
शिलोच्चये मूर्च्छति मारुतस्य ॥"

महादेवः । यथा, महाभारते । १४ । ८ । १५ ।

"हरिनेत्राय मुण्डाय क्षमायोत्तरणाय च ।
भास्कराय सुतीर्थाय देवदेवाय रंहसे ॥"

विष्णुः । यथा, महाभारते हरिवंशपर्व्वणि २५२ । १८ ।

"नमस्कृत्य सुरेशाय तस्मै देवाय रंहसे ।
प्रयाताः प्राग्दिशं पुण्यां विपुलं कश्यपाश्रमम् ॥")

रक, क खादे । आपने । इति कविकल्पद्रुमः ॥ खादो रसोपादनम् । क, राकयति मोदकं बालकः । इति दुर्गादासः ॥

रक्तं, क्ली, (रज्यत अङ्गमनेनेति । रञ्ज् + क्तः ।) कुङ्कुमम् । ताम्रम् । (अस्य पर्य्यायो यथा,—

"रक्तं वरिष्ठं स्त्रैक्ष्ण्यं ताम्रं शुक्लमुडुम्बरम् ॥"

इति वैद्यकरत्नमालायाम् ॥)

प्राचीनामलकम् । इति मेदिनी । ते, ४८ ॥ पद्मकम् । (अस्य पर्य्यायो यथा,—

"रक्तं कोकनदं पद्ममब्जमन्यदलोहितम् ॥"
इति रत्नमाला ॥)
सिन्दूरम्। हिङ्गुलम्। इति राजनिर्घण्टः ॥
(अस्य पर्य्यायो यथा,—
"रक्तं मर्कटशीर्षञ्च हिङ्गुलं दरदो रसः ॥"
इति रत्नमाला ॥)
(रक्तचन्दनभेदः। तत्पर्य्यायो यथा,—
"पतङ्गं रञ्जनं रक्तं पत्राङ्गञ्च कुचन्दनम् ॥"
इति रत्नमाला ॥)
शरीरस्थसप्तधात्वन्तर्गतधातुविशेषः। तत्पर्य्यायः। रुधिरम् २ असृक् ३ लोहितम् ४ असम् ५ क्षतजम् ६ शोणितम् ७। इत्यमरः। २। ६। ६४॥ पलङ्कारम् ८ रोहितम् ९ रङ्गकम् १०। इति शब्दरत्नावली ॥ कौषालम् ११ अङ्गजम् १२ रोधिरम् १३ खजम् १४। इति जटाधरः ॥ त्वग्जम् १५ शोणम् १६ लोहम् १७ चर्म्मजम् १८। इति राजनिर्घण्टः ॥ * ॥ अथ रक्तस्य स्वरूपमाह।
"यदा रसो यकृद्याति तत्र रञ्जकपित्ततः।
रागं पाकञ्च संप्राप्य स भवेद्रक्तसंज्ञकः ॥
रक्तं सर्व्वशरीरस्थं जीवस्याधार उत्तमः।
स्निग्धं गुरु चलं स्वादु विदग्धं पित्तवद्भवेत् ॥
जीवस्याधार उत्तम इति। यत आह।
जीवो वसति सर्व्वस्मिन् देहे तच्च विशेषतः।
वीर्य्ये रक्ते मले यस्मिन् क्षीणे याति क्षयं क्षणादिति ॥
वीर्य्ये रक्ते मले च शरीरारम्भके। वाग्भटोक्तपरिमाणमिते शुद्धे जीवो वसति न तु दुष्टे प्रदुष्टे रक्तस्रावणोपदेशस्य वैयर्थ्यप्रसङ्गात्। पित्तवद्भवेत्। अम्लं भवेदित्यर्थः ॥ * ॥ अथ रक्तस्य स्थानमाह।
यकृत् प्लीहा च रक्तस्य सुखं स्थानं तयोः स्थितम्।
अन्यत्रापि स्थितवतां रक्तानां पोषकं भवेत् ॥"
इति भावप्रकाशः ॥
रक्तदोषनाशकौषधं यथा,—
"ब्रह्मयष्टिफलं पिष्टं वारिणा तनु लेपतः।
तेन दुष्टं रक्तदोषः प्रणश्यति न संशयः ॥"
इति गारुडे १६२ अध्यायः ॥
("स खल्वाप्यो रसो यकृत्प्लीहानौ प्राप्य रागमुपैति ॥ भवतश्चात्र।
रञ्जितास्तेजसा त्वापः शरीरस्थेन देहिनाम्।
अवापन्नाः प्रसन्नेन रक्तमित्यभिधीयते ॥
रसादेव स्त्रिया रक्तं रजःसंज्ञं प्रवर्त्तते।
तद्द्वादशादूर्द्धं याति पक्षाच्छतः क्षयम् ॥"
"रसाद्रक्तं ततो मांसम् ॥"
"तत्र फेनिलमरुणं क्षारं परुषं तनु शीघ्रमस्कन्दि च वातेन दुष्टम्। नीलं पीतं हरितं श्यावं विस्रमनिष्टं पिपीलिकामक्षिकाणामस्कन्दि च पित्तदुष्टम्। गैरिकोदकप्रतीकाशं स्निग्धं शीतलं बहलं पिच्छिलं चिरस्रावि मांसपेशीप्रभं श्लेष्मदुष्टञ्च। सर्व्वलक्षणसंयुक्तं काङ्क्षिकाभं विशेषतो दुर्गन्धि च सन्निपातदुष्टम्। पित्तवद्रक्तेनातिक्षाराच्च। द्विदोषलिङ्गं संसृष्टम् ॥"
"इन्द्रगोपप्रतीकाशमसंहतमविवर्णञ्च प्रकृतिस्थं जानीयात् ॥"
"त्वग्दोषा गण्डयः शोफाः रोगाः शोणितजाश्च ये।
रक्तमोक्षणशीलानां न भवन्ति कदाचन ॥"
"देहस्य रुधिरं मूलं रुधिरेणैव धार्य्यते।
तस्मादयत्नेन संरक्ष्यं रक्तं जीव इति स्थितिः ॥
इति सुश्रुते सूत्रस्थाने चतुर्दशोऽध्याये ॥ * ॥
"शीतोष्णस्निग्धरूक्षाद्यैरुपक्रान्ताश्च ये गदाः।
सम्यक्साध्या न सिद्ध्यन्ति रक्तजांस्तान् विभावयेत् ॥"
अरुणाभं भवेद्वातात् फेनिलं विषदं तनु।
पित्तात्पीतासितं रक्तं सौम्यात्स्यायति वै चिरात् ॥
ईषत् पाण्डुकफादुष्टं पिच्छिलं तन्तुमज्जनम्।
द्विदोषलिङ्गं संसर्गात्त्रिलिङ्गं सान्निपातिकम् ॥"
"नात्युष्णशीतं लघुदीपनीयं
रक्तेऽपनीते हितमन्नपानम्।
तदा शरीरं ह्यनवस्थितास्रं-
गग्निर्विशेषेण च रक्षितव्यः ॥
प्रसन्नवर्णेन्द्रियमिन्द्रियार्था
निक्लेशमस्याहतपक्तिवेगम्।
सुखान्वितं पुष्टिबलोपपन्नं
विशुद्धरक्तं पुरुषं वदन्ति ॥"
इति चरके सूत्रस्थाने २४ अध्यायः ॥)
रक्तः, पुं, लोहितवर्णः। इत्यमरः। १। ५। १५ ॥
कुसुम्भः। हिङ्गुलः। इति राजनिर्घण्टः ॥
(बन्धूकः ॥ तत्पर्य्यायो यथा,—
"बन्धूको बन्धुजीवश्च रक्तो माध्याह्निकोऽपि च ॥"
इति भावप्रकाशस्य पूर्ब्बखण्डे प्रथमे भागे ॥)
रक्तः, त्रि, अनुरक्तः। नीलादिरञ्जितः। लोहितः।
इति मेदिनी। ते, ४८ ॥ क्रीड़ारतः। इति धरणिः ॥ * ॥ रक्तवर्णवस्तुनि यथा,—
"शोणानि भौमतीक्ष्णांशुताम्रकुङ्कुमतक्षकाः।
शुक्रेन्द्रगोपखद्योतविद्युत्कुङ्कुरबिन्दवः ॥
द्रुमन्ताधरजिह्वाहृद्ध्वांससिन्दूरधातवः।
हिङ्गुलं कुक्कुटशिखा तेजः सारसमस्रकम् ॥
माणिक्यं हंसचञ्चुङ्घ्री शुकमर्कटयोर्मुखम्।
चकोरकोकिलपारावतनेत्रनखाग्नयः ॥
कुसुम्भकिंशुकाशोकजवाबन्धूकपाटलाः।
कमलं दाड़िमीपुष्पं बिम्बकिम्पाकपल्लवौ ॥
ताम्बूलरागो मञ्जिष्ठालक्तकं रक्तचन्दनम्।
चेता नखक्षतश्चेन्द्रधनुरौद्ररसादयः ॥" * ॥
रक्तनीलवाचकानि यथा,—
"लोहितनीलौ पुष्करहरिविद्रुमकमलक्षणारक्तानि।
सिन्दूरभूषणोत्पलधनञ्जयाम्भोजिनीदलानि ॥"
यथा। पुष्करं पद्माकाशयोः। हरिः सूर्य्यक्षयोः। विद्रुमः प्रवालविशिष्टवृक्षयोः। कमलं पद्मपाण्डीयामलयोः क्षाराम्लं कौसुम्भेन्द्रनीलयोः। सिन्दूरभूषणं सिन्दूरालङ्कारगजयोः। उत्पलमुत्क्षुरमांसेन्दीवरयोः। धनञ्जयोऽग्निपार्थयोः। अम्भोजिनीदलं पद्मपत्रपुटञ्जिन्योः।
"कमलाधिपपद्मेशौ नागजित्कान्तसूर्य्यभूः।
रत्नाकरवरश्रीकः सदाधिकमलक्षतिः ॥"
कमलाधिपपद्मेशौ सूर्य्यक्षणौ। नागजित् गरुड़ो नागसङ्घौ च। कान्तः कमनीयः कं जलं तस्यान्तश्च। सूर्य्यभूः सूर्य्योद्भवो यमश्च।
"सदा सिन्दूरसुच्छेता कलयन् कमलश्रियम्।
स्फुटशोभनताम्रश्रीर्व्वराहस्वामिदीधितिः ॥
एवं सुसम्यग्नखप्रभः विद्रूरमणिदीधितिः।
प्रवालप्रबलच्छायः कलभानुमितच्छविः ॥"* ॥
रक्तश्वेतवाचकानि यथा,—
"रक्तश्वेतौ हरिसुचिपुष्करघृतपत्रसूर्य्यकान्ताक्षः।
नवहंसमहापद्मार्कसोदराः कमलकीलाले ॥"
हरिश्चन्द्रसूर्य्ययोः। शुचिः श्वेतवैश्वानरयोः। पुष्करं जलपद्मयोः। घृतपत्रं हंसपद्मयोः। सूर्य्यकान्तः स्फटिके सूर्य्यवत्कान्ते च। अक्षः शुक्लाम्बुजयोः। नवहंसः नवहंसे प्रत्यग्रसूर्य्ये च। महापद्मः श्वेतनागे पद्मे च। अर्कः स्फटिकसूर्य्ययोः। कमलं जलाम्बुजयोः। कीलालं जलरक्तयोः।
"सुहृद्भद्रादिभिर्भानो रक्तैर्नागे रदांशुकैः।
जलेभ्यो जन्मशोभाभिः सरोजकुसुदादिभिः ॥"
भानोः परस्मात् सुहृद्भद्रादिभिः ॥ * ॥
सितरक्तौ यथा। रविमित्रं चन्द्रः रवितुल्यश्च। भानुरत्नं सूर्य्यकान्तः रविपद्मरागौ च। अग्निरत्नं सूर्य्यकान्तोऽग्निपद्मरागौ च। रदांशुकं दन्तवस्त्रे अधरश्च। जलजशोभा जलजा चासौ शोभा चेति पक्षे पद्मकान्तिः। एवं सरोजादिशोभा सरोजसङ्घिशोभा पक्षे सरोजादिश्चन्द्रः। कुसुदादिशोभा कुसुदसङ्घिशोभा पक्षे कुसुदादिरादित्यः। इति कविकल्पलतायाम् २ श्लेषस्तवके उद्दिष्टवर्णनं नाम १ कुसुमम् ॥
रक्तकः, पुं, (रक्तं रक्तवर्णं कायति प्राप्नोतीति, कै + कः।) अम्लानवृक्षः। बन्धूकवृक्षः। रक्तवस्त्रम्। अनुरागी। इति मेदिनी। के, १४५॥ विनोदी। इति शब्दरत्नावली ॥ रक्तशिग्रुः। रक्तेरण्डः। इति राजनिर्घण्टः ॥ (अश्वविशेषः। यथा, अश्ववैद्यके। ३। १००।
"पीतको हरितः प्रोक्तः कषायो रक्तकः स्मृतः।
पक्वतालनिभो वाजी कथ्यते परिकीर्त्तितः ॥"
रक्त एव स्वार्थे कन्। लोहितवर्णे, त्रि। यथा, बृहत्संहितायाम्। ८। ४६।
"अलसस्तु जनः प्रमादिसंज्ञे
डमरं रक्तकपुष्पबीजनाम्नः ॥")
रक्तकन्दः, पुं, (रक्तः रक्तवर्णः कन्दोऽस्य।) विद्रुमः। इति हेमचन्द्रः। ४। १३२ ॥ राजपलाण्डुः। रक्तालुः। इति राजनिर्घण्टः ॥

रक्तकु

रक्तकन्दलः, पुं, (रक्तं रक्तवर्णं कन्दलं नवाङ्कुरो यस्य।) प्रवालम्। इति त्रिकाण्डशेषः॥ (गुणादयोऽस्य प्रवालशब्दे विज्ञेयाः॥)

रक्तकमलं, क्ली, (रक्तं रक्तवर्णं कमलम्।) रक्तवर्णोत्पलम्। तत्पर्य्यायः। कोकनदम्२ रक्ताम्भोजम्३ अरुणकमलम्४ शोणपद्मम्५ रक्तोत्पलम्६ अरविन्दम्७ रविप्रियम्८ रक्तवारिजम्९। (रक्तकम्बलम्१०। इति पाद्मोत्तरखण्डे १३ अध्यायः॥) अस्य गुणाः। कटुत्वम्। तिक्तत्वम्। मधुरत्वम्। शिशिरत्वम्। रक्तदोषहरत्वम्। पित्तकफवातशमनत्वम्। सन्तर्पणकारणत्वम्। दृष्यत्वञ्च। इति राजनिर्घण्टः॥ तत्पर्य्यायगुणाः।

"विशेषतः सितं पद्मं पुण्डरीकमिति स्मृतम्।
रक्तं कोकनदं ज्ञेयं नीलमिन्दीवरं स्मृतम्॥
धवलं कमलं शीतं मधुरं कफपित्तजित्।
तस्मादल्पगुणं किञ्चिदन्यद्रक्तोत्पलादिकम्॥"

इति भावप्रकाशः॥

रक्तकम्बलं, क्ली, (कम्बलं जलमाश्रयत्वेनास्त्यस्येति। अर्शं आद्यच्। रक्तं रक्तवर्णं कम्बलमुत्पलमिति।) रक्तोत्पलम्। यथा,—

"चन्दनागुरुकर्पूरकुङ्कुमैश्च सुगन्धिभिः।
कमलैः कुमुदैः पुष्पैः कह्लारै रक्तकम्बलैः॥
फलैर्धूपैरपूपैश्च शोभनैर्गुडसंयुतैः।
अर्चयेद्बलिराजानं मन्त्रेण द्विजसत्तमः॥"

इति पाद्मोत्तरखण्डे १३ अध्यायः॥

रक्तकरवीरकः, पुं, (करवीर+स्वार्थे कन्। ततो रक्तः रक्तवर्णः करवीरकः।) लोहितवर्णकरवीरपुष्पवृक्षः। लाल् कनेल् इति हिन्दी भाषा। तत्पर्य्यायः। रक्तप्रसवः२ गणेशकुसुमः३ चण्डीकुसुमः४ क्रूरः५ भूतद्रावी६ रविप्रियः७। अस्य गुणाः। कटुत्वम्। तीक्ष्णत्वम्। विशोधनत्वम्। व्रणोपद्रवकण्डूतिकुष्ठविषहरत्वञ्च। इति राजनिर्घण्टः॥ तत्पर्य्यायगुणाः।

"करवीरः श्वेतपुष्पः शुक्लकुम्भोऽश्वमारकः।
द्वितीयो रक्तपुष्पश्च चण्डालो लगुडस्तथा॥
करवीरद्वयं तिक्तं कषायं कटुकञ्च तत्।
व्रणलाघवकृन्नेत्रकोपकुष्ठव्रणापहम्।
वीर्य्योष्णं कृमिकण्डूघ्नं भक्षितं विषवन्मतम्॥"

इति भावप्रकाशः॥

रक्तकाञ्चनः, पुं, (रक्तः रक्तवर्णः काञ्चनः।) स्वनामख्यातपुष्पवृक्षविशेषः। तत्पर्य्यायः। विदलः२ चमरिकः३। इति शब्दरत्नावली॥ काञ्चनालः४ ताम्रपुष्पः५ कुदारः६। इति जटाधरः॥

रक्तकाण्डा, स्त्री, (रक्तः रक्तवर्णः काण्डः दण्डोऽस्याः।) रक्तपुनर्नवा। इति राजनिर्घण्टः॥ (विवरणमस्या रक्तपुनर्नवाशब्दे विज्ञेयम्॥)

रक्तकाष्ठं, क्ली, (रक्तं काष्ठं यस्य।) पत्तङ्गम्। इति राजनिर्घण्टः॥ लोहितवर्णदारु च॥

रक्तकुसुदं क्ली, (रक्तं रक्तवर्णं कुसुदम्।) रक्तकैरवम्। इति जटाधरः॥

रक्तगु

रक्तकुसुमः, पुं, (रक्तानि रक्तवर्णानि कुसुमान्यस्य।) पारिभद्रः। धन्वनवृक्षः। इति राजनिर्घण्टः॥

रक्तकेशरः, पुं, (रक्ताः केशराः किञ्जल्काः अस्य।) पारिभद्रः। इति रत्नमाला॥

रक्तकैरवं, क्ली, (रक्तं रक्तवर्णं कैरवम्।) रक्तकुमुदम्। इति जटाधरः॥ (यथास्य पर्य्यायः।

"तदल्पगन्धं सोमाख्यं हल्लकं रक्तकैरवम्॥"

इति वैद्यकरत्नमाला॥)

रक्तकोकनदं, क्ली, (रक्तं रक्तवर्णं कोकनदम्।) रक्तोत्पलम्। इति जटाधरः॥ (विशेषोऽस्य रक्तोत्पलशब्दे ज्ञातव्यः॥)

रक्तखदिरः, पुं, (रक्तः रक्तवर्णः खदिरः।) रक्तवर्णखदिरवृक्षः। तत्पर्य्यायः। रक्तसारः२ सुसारः३ ताम्रसारकः४ बहुशल्यः५ याज्ञिकः६ कुष्ठनोदनः७ यूपदृमः८ असखदिरः९ अरुः१०। अस्य गुणाः। कटुत्वम्। उष्णत्वम्। कषायत्वम्। गुरुत्वम्। तिक्तत्वम्। आमवातास्रवातव्रणभूतज्वरनाशित्वञ्च। इति राजनिर्घण्टः॥ तत्पर्य्यायगुणाश्च।

"खदिरो रक्तसारश्च गायत्री दन्तधावनः।
कण्टकी बालपत्रश्च बहुशल्यश्च यज्ञियः॥
खदिरः शीतलो दन्त्यः कण्डूकासारुचिप्रणुत्।
तिक्तः कषायो मेदोघ्नः कृमिमेहज्वरव्रणान्।
श्वित्रशोथामपित्तास्रपाण्डुकुष्ठकफान् हरेत्॥"

इति भावप्रकाशः॥

रक्तगन्धकं, क्ली, (रक्तं रक्तवर्णं गन्धकम्।) गोलम्। इति राजनिर्घण्टः॥

रक्तगुल्मः, पुं, (रक्तजो गुल्मः इति मध्यपदलोपी कर्म्मधारयः।) स्त्रीणां रक्तजगुल्मरोगः। तस्यौषधं यथा,—

"द्विनयष्टीचिकटुकं चूर्णं पीतं हरेच्छिवे!।
तिलक्वाथेन संयुक्तं रक्तगुल्मं स्त्रिया हरे!॥"

इति गारुडे १९६ अध्यायः॥

(तथास्य निदानादिकं यथा,—

"शोणितगुल्मस्तु खलु स्त्रिया एव भवति न पुरुषस्य गर्भकोष्ठार्त्तवागमनवैशेष्यात्। पारतन्त्र्यादवैशारद्यात् सततमपचारानुरोधादेकानुदीर्णानुपरून्धन्त्या आमगर्भे वाप्यचिरात् पतिते तथाप्यचिरप्रजातायाः ऋतौ वा वातप्रकोपनान्यासेवमानायाः वातः प्रकोपमापद्यते। स प्रकुपितो योन्या मुखमनुप्रविश्यार्त्तवमुपरुणद्धि मासि मासि तदार्त्तवमुपरुध्यमानं कुक्षिं वर्द्धयति। तस्याः मूलकासातीसारच्छर्द्यरोचकाविपाकाङ्गमर्दनिद्रालस्यकफप्रसेकाः समुपजायन्ते स्तनयोश्च स्तन्यमोष्ठयोः स्तनमण्डलयोश्च कार्ष्ण्यं ग्लानिः चक्षुषोर्मूर्च्छा हृल्लासो दौहृदः श्वयथुः पादयोरौषधोन्नमो रोमराज्याः योन्याश्चाजालत्वमपिच योन्याः दौर्गन्ध्यमास्रावश्चोपजायते। केवलञ्चास्याः गुल्मः स्यन्दते तामगर्भाङ्गिनीमित्याहुर्मूढाः।" इति चरके निदानस्थाने तृतीयेऽध्याये॥ यथा च।

रक्तच

"न स्यन्दते नोदरमेति वृद्धिं
भवन्ति लिङ्गानि च गर्भिणीनाम्।
तं गर्भकालातिगमे चिकित्स्य-
मसृग्भवं गुल्ममुशन्ति तज्ज्ञाः॥"

इति सुश्रुते उत्तरतन्त्रे ४२ अध्यायः॥

तथा च। रक्तगुल्मस्तु स्त्रिया एव प्रजायते। यथा,—

"ऋतौ वा नवसूता वा यदि वा योनिरोगिणी।
सेवते वातलान्नित्यं क्रुद्धस्तस्याः समीरणः॥
निरुणद्ध्यार्त्तवं योन्यां प्रतिमासमवस्थितम्।
कुक्षिं करोति तद्गर्भलिङ्गमाविष्करोति च॥
हृल्लासदौर्हृदस्तन्यदर्शनं श्यामतादिकम्।
क्रमेण वायुसंसर्गात् पित्तयोनितया च तत्॥
शोणितं क्षरते तस्या वातपित्तोत्थगुल्मजान्।
रूक्षस्तम्भहातीसारहृड्ज्वरादीनुपद्रवान्॥
गर्भाशये च सुतरां शूलं दुष्टास्रगाश्रये।
योन्याश्च स्रावदौर्गन्ध्यतोदस्यन्दनवेदनाः॥
न चाङ्गैर्गर्भवद्गुल्मः स्फुरत्यपि तु शूलवान्।
पिण्डीभूतः स एवास्याः कदाचित् स्यन्दते चिरात्॥
न चास्या वर्द्धते कुक्षिर्गुल्म एव तु वर्द्धते।
खदोषसंश्रयो गुल्मः सर्व्वो भवति तेन सः॥'
पाकं चिरेण भजते नैव वा———॥"

इति वाभटे निदानस्थाने एकादशेऽध्याये॥*॥

तथास्य चिकित्सा।

"सरक्तगुल्मे न च पाचनन्तु
न छिद्रपानं कटिचालनञ्च।
न चैव संस्वेदनमर्द्दनञ्च
न वा क्रमेणोत्क्लथनं हितञ्च॥
रोध्राञ्जनं खदिरमागधिका समङ्गा
क्वाथोऽम्बुवेतससमं घृतसंप्रयुक्तम्।
गुल्मं सरक्तमपि चाथ निहन्ति शीघ्रं
घृतक्षौद्रञ्च विनिहन्ति च क्रुद्धरक्तम्॥
क्षीरपानं प्रदातव्यं घृतसौवर्चलान्वितम्।
रक्तगुल्मविनाशाय यक्ष्मिणश्चेतजेऽपि वा॥
न छिद्रसंयुतं पथ्यं न क्षोणं न विदाहि च।
रक्तजे चेतजे गुल्मे मांसानि जाङ्गलानि च॥"

इति हारीते चिकित्सितस्थाने चतुर्थेऽध्याये॥)

अन्यत् गुल्मशब्दे द्रष्टव्यम्॥*॥

रक्तघ्नः, पुं, (रक्तं हन्तीति। हन्+"अमनुष्यकर्त्तृके च।" ३। २। ५३। इति टक्।) रोहितकवृक्षः। इति जटाधरः॥ (रोहितकशब्दस्यास्य विशेषो ज्ञेयः॥)

रक्तघ्नी, स्त्री, (रक्तं हन्तीति। हन्+टक्। ङीष्।) दूर्व्वाविशेषः। गाँठिया दूर्वा इति भाषा॥ यथा,

"महौषधिश्च गोलोम्नां रक्तघ्नी रक्तपित्तहा॥"

इति शब्दचन्द्रिका॥

रक्तचन्दनं, क्ली, (रक्तं रक्तवर्णं चन्दनम्।) रक्तवर्णचन्दनकाष्ठम्। (यथा, रामायणे। २। ३३। ६।

"प्रस्रवागोचितां सीतां रक्तचन्दनसेविनीम्।
वर्षसुष्णञ्च शीतञ्च नेष्यत्यायुर्विवर्णताम्॥")

तत्पर्य्यायः। तिलपर्णी२ पत्राङ्गम्३ रक्त-

नम् ४ कुचन्दनम् ५। इत्यमरः। १। ६। १३२॥ ताम्रसारम् ६ ताम्रवृक्षः ७ चन्दनम् ८। इति रत्नमाला॥ लोहितम् ९ प्रोक्षितचन्दनम् १० रक्तसारम् ११ ताम्रसारकम् १२ क्षुद्रचन्दनम् १३ अर्कचन्दनम् १४। इति राजनिर्घण्टः॥ रक्ताङ्गम् १५ प्रवालफलम् १६। इति भावप्रकाशः॥ पत्तङ्गम् १७ पत्तगम् १८ रक्तबीजम् १९। इति शब्दरत्नावली॥ अस्य गुणाः। अतिशीतलत्वम्। तिक्तत्वम्। ईक्षणगतास्रदोषभूतपित्तकफकासज्वरभ्रान्तिजन्तुवमथुतृषानाशित्वञ्च। इति राजनिर्घण्टः॥ अपि च।

"रक्तं शीतं गुरु स्वादु च्छर्दितृष्णास्रपित्तहृत्।
तिक्तनेत्रहितं तृष्यं ज्वरव्रणविषापहम्॥"

इति भावप्रकाशः॥

अन्यच्च।

"रक्तपित्तहरं बल्यं चक्षुष्यं रक्तचन्दनम्॥"

इति राजवल्लभः॥

रक्तचित्रकः, पुं, (रक्तो रक्तवर्णश्चित्रकः।) क्षुपविशेषः। राङ्गचिता इति भाषा॥ तत्पर्य्यायः। कालः २ व्यालः ३ कालमूलः ४ अतिदीप्यः ५ माञ्जरिः ६ अग्निः ७ दाहकः ८ पावकः ९ चित्राङ्गः १० महाङ्गः ११। अस्य गुणाः। व्रत्रकायकरत्वम्। रुच्यत्वम्। कुष्ठघ्नत्वम्। लोहवेधकत्वम्। रसनियामकत्वम्। रसायनत्वञ्च। इति राजनिर्घण्टः॥

रक्तचूर्ण, क्ली, (रक्तं रक्तवर्णं चूर्णम्।) सिन्दूरम्। इति हारावली। ४४॥ रक्तवर्णचूर्णमात्रञ्च॥

रक्तजन्तुकः, पुं, (रक्तः रक्तवर्णो जन्तुः। ततः स्वार्थे कन्। अथवा रक्ता आसक्ता जन्तवोऽस्मिन्।) भूनागः। इति राजनिर्घण्टः॥ रक्तवर्णजन्तुमात्रञ्च॥

रक्तजिह्वः, पुं, (रक्ता रक्तवर्णा प्रोक्षितपानादौ आसक्ता वा जिह्वा यस्य।) सिंहः। इति शब्दमाला॥ रक्तवर्णजिह्वायुक्ते, त्रि॥

रक्तझिण्टी, स्त्री, (रक्ता रक्तवर्णा झिण्टी।) रक्तवर्णझिण्टीपुष्पवृक्षः। तत्पर्य्यायः। कुरुवकः २। इत्यमरः॥ (विशेषोऽस्याः कुरुवक शब्द ज्ञातव्यः॥)

रक्ततुण्डः, पुं, (रक्तौ तुण्डौ यस्य।) शुकपक्षी। इति राजनिर्घण्टः॥ लोहितमुखयुक्ते, त्रि॥

रक्ततुण्डकः, पुं, (रक्ततुण्डो यस्य। कन्। भूनागः।) इति राजनिर्घण्टः॥

रक्तत्रणा, स्त्री, (रक्तानि व्रणान्यस्याम्।) गोमूचिका। इति राजनिर्घण्टः॥

रक्तत्रिवृत्, स्त्री, (रक्ता त्रिवृत्।) रक्तवर्णत्रिवृता। लाल तेउड़ी। इति भाषा॥ तत्पर्य्यायः। कालिन्दी २ त्रिपुटा ३ ताम्रपुष्पिका ४ कुलवर्णा ५ मधुरी ६ अम्बष्ठा ७ काकनासिका ८। अस्या गुणाः। तिक्तत्वम्। कटुत्वम्। उष्णत्वम्। रेचनत्वम्। ग्रहणीमलविष्टम्भहारित्वम्। हितकारित्वञ्च। इति राजनिर्घण्टः॥ (अस्या विशेषो यथा,—

"तयोर्मध्यतरं विद्धि मूलं यद्रक्तप्रभम्।
सुकुमारे स्निग्धौ वृत्ते मृदुकोष्ठे च तत् शुभम्॥"

इति चरके कल्पस्थाने सप्तमेऽध्याये॥

"अरुणाभं वृत्तमूलं श्रेष्ठं मूलविरेचने॥"

इति सुश्रुते सूत्रस्थाने ४४ अध्यायः॥)

रक्तदन्तिका, स्त्री, (रक्ता दन्ताः अस्याः) रक्तदन्ता+स्वार्थे कन्। टापि अत इत्वम्।) चण्डिका। यथा,—

"भक्षयन्त्याश्च तानुग्रान् वैप्रचित्तान् महासुरान्।
रक्ता दन्ता भविष्यन्ति दाड़िमीकुसुमोपमाः॥
ततो मां देवताः स्वर्गे मर्त्यलोके च मानवाः।
स्तुवन्तो व्याहरिष्यन्ति सततं रक्तदन्तिकाम्॥"

इति मार्कण्डेयपुराणे देवीमाहात्म्ये। ६१। ४०॥

रक्तदला, स्त्री, (रक्तानि दलान्यस्याः।) नलिका। चिविल्लिका। इति राजनिर्घण्टः॥

रक्तदृक्, [ग्] पुं स्त्री, (रक्ता दृक् दृष्टिर्यस्य।) कपोतः। इति केचित्॥ रक्तवर्णचक्षुर्विशिष्टे, त्रि॥

रक्तधातुः, पुं, (रक्तो रक्तवर्णो धातुः।) गैरिकम्। इति त्रिकाण्डशेषः॥ (अस्य पर्य्यायो यथा,—

"गैरिकं रक्तधातुश्च गैरेयं गिरिजन्तथा।
सुवर्णगैरिकन्त्वन्यत्ततो रक्ततरं हि तत्॥"

इति भावप्रकाशस्य पूर्ब्बखण्डे प्रथमे भागे॥) ताम्रम्। इति राजनिर्घण्टः॥ रक्तवर्णधातुमात्रञ्च॥

रक्तनालः, पुं, (रक्तो नालोऽस्य।) जीवशाकः इति राजनिर्घण्टः॥ (विवरणमस्य जीवशाकशब्दे विज्ञेयम्॥)

रक्तनासिकः, पुं, (रक्ता नासिकास्य।) पेचकः। इति शब्दरत्नावली॥ लोहितनासायुक्ते, त्रि॥

रक्तपः, पुं, (रक्तं पिबतीति। पा+कः।) राक्षसः। इति मेदिनी। पे, २१॥ रक्तपानकर्त्तरि, त्रि॥

रक्तपच्चः, पुं, (रक्तौ पच्चौ अस्य।) गरुड़ः। इति केचित्॥

रक्तपक्षिका, स्त्री, (रक्तानि पक्षाण्यस्याः। स्वार्थे कन्। टापि अत इत्वञ्च।) नाकुली। रक्तपुनर्नवा। इति राजनिर्घण्टः॥ लोहितपक्षञ्च।

रक्तपदी, स्त्री, क्षुद्रवृक्षविशेषः। यथा,—

"भ्रमीपत्रा रक्तपदी समङ्गाञ्जलिकारिका॥"

इति जटाधरः॥

रक्तपद्मः, पुं क्ली, (रक्तो रक्तवर्णो पद्मः।) रक्तवर्णकमलम्। तत्पर्य्यायः। रक्तसरोरुहम् २ रक्तोत्पलम् ३ कोकनदम् ४। इत्यमरः। १। १०। ४२॥ अस्य प्रमाणं यथा,—

"येषा ललितकान्ताख्या देवी मङ्गलचण्डिका।
वरदाभयहस्ता च द्विभुजा गौरदेहिका॥
रक्तपद्मासनस्था च जटामुकुटमण्डिता॥
रक्तकौशेयवस्त्रा च स्मितवक्त्रा शुभानना।
नवयौवनसम्पन्ना चार्व्वङ्गी ललितप्रभा॥"

इति तिथ्यादितत्त्वम्॥

रक्तपल्लवः, पुं, (रक्ताः पल्लवा अस्य।) अशोकवृक्षः। इति राजनिर्घण्टः॥ लोहितपत्रञ्च॥

रक्तपा, स्त्री, (रक्तं पिबतीति। पा+कः+स्त्रियां टाप्।) जलौका। डाकिनी। इति मेदिनी। गे, २१॥ प्रोक्षितपानकर्त्तरि, त्रि॥

रक्तपाकी, स्त्री, (पच्यते इति। पच्+घञ्। रक्तः रक्तवर्णः पाके यस्याः।) वृहती। इति राजनिर्घण्टः॥

रक्तपाता, स्त्री, (रक्तं पातयतीति। पत+णिच्+अच्। स्त्रियां टाप्।) जलौका। इति शब्दरत्नावली॥

रक्तपादः, पुं, (रक्तौ पादावस्य।) शुकपक्षी। इदि हैमचन्द्रः॥ (यथा, रामायणे। ७।६।५७।

"रक्षोगणस्योपरिष्टात् परिभ्रमति कालवत्।
कपोता रक्तपादाश्च सारिका विहृता ययुः॥"

तथा च याज्ञवल्क्यः। १। १७५।

"चाषांश्च रक्तपादांश्च सौनं वल्लूरमेव च।
मत्स्यांश्च कामतो जग्ध्वा सोपवासस्त्र्यहं चरेत्॥")

लोहितचरणयुक्ते, त्रि॥

रक्तपादी, स्त्री, (रक्ताः पादा अस्याः।) लज्जालुः। (अस्याः पर्य्यायो यथा,—

"लज्जालुः स्यात् भ्रमीपत्रा समङ्गा जलकारिका।
रक्तपादी नमस्कारी नाम्ना खदिरकेत्यपि॥"

इति भावप्रकाशस्य पूर्ब्बखण्डे प्रथमे भागे॥) हंसपदी। इति राजनिर्घण्टः॥

रक्तपायिनी, स्त्री, (रक्तं पातुं शीलमस्याः। पा+णिनि। स्त्रियां ङीष्।) जलौका। इति राजनिर्घण्टः॥

रक्तपायी, [न्] त्रि, (रक्तं पातुं शीलमस्य। पा+णिनिः।) रक्तपानशीलः। इति व्याकरणम्॥

रक्तपारदं, क्ली, (रक्तं रक्तवर्णं पारदम्।) हिङ्गुलम्। इति हारावली। १५५॥ जटाधरे, पुं॥

रक्तपिण्डं, क्ली, (रक्तं रक्तवर्णं पिण्डमिव।) जवापुष्पम्। इति शब्दरत्नावली॥

रक्तपिण्डकः, पुं, (रक्तपिण्डमिवेति। रक्तपिण्ड+इवार्थे कन्।) रक्तालुः। इति राजनिर्घण्टः॥

रक्तपित्तं, क्ली, (रक्तदूषकं पित्तमिति। मध्यपदलोपी कर्म्मधारयः। "रक्तञ्च पित्तञ्च रक्तपित्तमिति द्वन्द्व इति सुश्रुतः। रक्तञ्च तत् पित्तञ्चेति रक्तपित्तं रागप्राप्तं पित्तमिति कर्म्मधारय इति चरकः।") रोगविशेषः। तस्य निदानं यथा, धन्वन्तरिरुवाच।

"अथातो रक्तपित्तस्य निदानं प्रवदाम्यहम्।
भृशोष्णातिकटुम्ललवणादिविदाहिभिः॥
कोद्रवोद्दालकैश्चान्यैस्तदुक्तैरतिसेवितैः।
कुपितं पित्तलैः पित्तं द्रवं रक्तञ्च मूर्च्छयेत्॥

ते मिथस्तुल्यरूपत्वमागम्य याप्यवंस्तनुम् ।
पित्तरक्तस्य विज्ञते: संसर्गादूषणादपि ॥
गन्धवर्णानुवृत्तेषु रक्ते न व्यपदिश्यते ।
प्रभवत्यङ्गजत्वात् ह्रीहतो यक्तच्च तत् ॥
शिरोगुरुत्वमरुचि: प्रीतेच्छा मधुकोल्कष: ।
कृद्दिलटकृद्दिवैभत्स्यं काश्य: श्वासो भ्रम: क्लम: ॥
लोहितोऽलोहितो मत्स्यामगन्ध्यास्यत्व विज्वर: ।
रक्तहारिद्रहरितवर्णता नयनादिषु ॥
नीललोहितपीतानां वर्णानामविचेतनम् ।
स्वप्ने तदर्थधर्मित्वं भवत्यस्मिन् भविष्यति ॥
ऊर्द्धं नासाक्षिकर्णास्यैर्मेढ्योनिगुदैरध: ।
कुपितं रोमकूपेभ्य समस्तैस्तत् प्रवर्त्तते ॥
ऊर्द्धं साध्यं कफाद्दयस्मात् तद्विरेचनसाधितम् ।
वह्नौषधञ्च पित्तस्य विरेको हि वरौषधम् ॥
अनुबन्धी कफो यञ्च तत्र तस्यापि शुद्धिकृत् ।
कषाया: स्वादवो यस्य विशुद्धे श्लेष्मलोहिता: ॥
कटुतिक्तकषाया वा ये निसर्गात् कफावहा: ।
अधो याप्यञ्च नासृग्घ्नात् तत् प्रवर्द्धनसाधनम् ॥
अल्पौषधञ्च पित्तस्य वमनं ननु चौषधम् ।
अनुबन्धि च लोपस्य घ्नान्तपित्तनरस्य तत् ॥
कषायाञ्च हितास्तस्य मधुरा एव केवलम् ।
कफमारुतसंसृष्टमसाध्यमुपनायनम् ॥
असह्यप्रतिलोमत्वादसाध्यादौषधस्य च ।
नहि संशोधनं किञ्चिदस्य च प्रतिलोमनम् ॥
शोधनं प्रतिलोमञ्च रक्तपित्ते विनिर्द्दितम् ।
एवमेवोपशमनं सर्व्वशोधनमिष्यते ॥
संसृष्टेष्वाह दोषेषु सर्व्वथा कृद्दनं हितम् ।
तत्र दोषोऽत्र गमनं शिरावास्त्र इव लक्ष्यते ।
उपद्रवाश्च विकृतं फलतस्तेषु चाधिकम् ॥"

इति गारुड़े १५३ अध्याय: ॥ * ॥

तस्यौषधं यथा,—

"चित्रता त्रिफला श्यामा पिप्पली शर्करा मधु ।
मोदक: सन्निपातान्तो रक्तपित्तज्वरापह: ॥
वाश्यायां विद्यमानायामाश्यायां जीवितस्य च ।
रक्तपित्ती व्यथी कासी किमर्थमवसीदति ॥
अटरूषकमृद्वीकापथ्याक्वाथ: सशर्कर: ।
क्षौद्राढ्य: कासजन्यासरक्तपित्तनिबर्हण: ॥"

इति गारुड़े १७४ अध्याय: ॥*॥

अपि च। "तत्र रक्तपित्तस्य निदानपूर्व्विकां संप्राप्तिमाह ।

'धर्म्मेर्ष्यायामशोकाध्वव्यवायैरतिसेवितै: ।
तीक्ष्णोष्णक्षारलवणैरम्लै: कटुभिरेव च ।
पित्तं विदग्धं स्वगुणैर्विदहत्याशु शोणितम् ॥'

तीक्ष्णं मरिचादि। उष्णोऽग्नितापादि:। क्षारो यवक्षारादि:। विदग्धं दूषितम्। स्वगुणै: स्वकारणेगुणैस्तीक्ष्णादिभि:। गुणैरिति बहुत्वेन तीक्ष्णाम्लवणकटूष्णधर्म्मादयो गृह्यन्ते। विदहति दूषयति ॥ * ॥ रक्तपित्तस्य सामान्यलक्षणमाह ।

'तत: प्रवर्त्तते रक्तमूर्द्धं वाधो द्विधापि वा ।'

रक्तमित्युपलक्षणम्। तत्संसर्गि पित्तञ्च। अत एव रक्तञ्च पित्तञ्च रक्तपित्तमिति द्वन्द्व इति सुश्रुत: ॥ रक्तञ्च तत् पित्तञ्चेति रक्तपित्तं रागप्राप्तं पित्तमिति कर्म्मधारय इति चरक: ॥ मार्गानाह ।

'ऊर्द्धं नासाक्षिकर्णास्यैर्मेढ्योनिगुदैरध: ।
कुपितं रोमकूपेभ्य समस्तैस्तत् प्रवर्त्तते ॥'

कुपितमतिकुपितम् ॥*॥ पूर्व्वरूपमाह ।

'सदनं प्रीतकामित्वं कण्ठधूमायनं वमि: ।
लोहगन्धित्व निश्वासो भवत्यस्मिन् भविष्यति ॥'

विशिष्टं रूपमाह ।

'सान्द्रं सपाण्डु सस्नेहं पिच्छिलञ्च कफान्वितम् ।
श्यावारुणं सफेणञ्च तनुरूक्षञ्च वातिकम् ॥
रक्तपित्तं कषायाभं क्षणं गोमूत्रसन्निभम् ।
मेचकागारधूमाभमञ्जनाभञ्च पैत्तिकम् ।
संसृष्टलिङ्गं संसर्गात्त्रिलिङ्गं सान्निपातिकम् ॥'

सपाण्डु ईषत्पाण्डु। पिच्छिलं मयूरपिच्छच्छवियुक्तम्। क्षणं कच्चलाभम्। मेचकं चिक्कणकृष्णवर्णम्। अञ्जनं श्रोतोऽञ्जनं तदाभम् ॥*॥ संसर्गाविशेषेण मार्गभेदमाह ।

'ऊर्द्धगं कफसंसृष्टमधोगं मारुतानुगम् ।
द्विमार्गं कफवाताभ्यां उभाभ्यां तत्प्रवर्त्तते ॥'*॥

उपद्रवानाह ।

'दौर्ब्बल्यश्वासकासज्वरमधुमदा: पाण्डुना दाहमूर्च्छा
मुक्ते घोरो विदाहस्त्वधृतिरपि सदा तृष्णया तुल्या च पीड़ा ।
तृष्णा कोष्ठस्य भेद: शिरसि च तपनं पूतिनिष्ठीवनञ्च
द्वेषो भुक्तेऽविपाको विकृतिरपि भवेद्रक्तपित्तोपसर्गा: ॥'

उपसर्गा उपद्रवा:। विकृतिर्मांसप्रक्षालनाभत्वादि: ॥ * ॥ साध्यत्वादिकमाह ।

'एकदोषानुगं साध्यं द्विदोषं याप्यमुच्यते ।
यत्रिदोषमसाध्यं स्यान्नन्दाग्निरतिवेगवत् ॥
ऊर्द्धं साध्यमधो याप्यमसाध्यं युगपद्गतम् ।
व्याधिभि: क्षीणदेहस्य वृद्धस्यानशनञ्च यत् ॥'

साध्यमाह ।

'एकमार्गं बलवतो नातिवेगं न चोत्थितम् ।
रक्तपित्तं सुखे काले साध्यं स्यान्निरुपद्रवम् ॥'

सुखे काले हिमग्रिग्रियो: ॥*॥ असाध्यमाह ।

'मांसप्रक्षालनाभं क्वथितमिव च यत् कर्दमाम्भोनिभं वा
मेद: पूयासृक्लं यकृदिव यदि वा पङ्कजं वा कफाभम् ।
यत् कृष्णं यच्च नीलं भृशमपि कुणपं यच्च चोक्ता विकारास्तद्वर्ज्यं रक्तपित्तं सुरपतिधनुषा यच्च तुल्यं विभाति ॥'

उक्ता विकारा दौर्ब्बल्यादय:। सुरपतिधनुषा तुल्यं नानावर्णम्।

'येन चोपहतो रक्तं रक्तपित्तेन मानव: ।
पश्येद्दृश्यं वियच्चापि तच्चासाध्यमसंशयम् ॥'

येन रक्तपित्तेन उपहतो मनुष्य: दृश्यं घटपटादिकं वियच्च रक्तं पश्यति स नश्यति वियच्चापि अदृश्यमपीत्यर्थ: ॥ * ॥ अरिष्टमाह ।

'लोहितं हृदयेदृश्यं बहुशो लोहितेक्षण: ।
लोहितोद्गारदर्शी च म्रियते रक्तपित्तक: ॥'

लोहितोद्गारदर्शी व्याधिमल्लोद्गारमपि लोहितं पश्यति इत्यर्थ: ॥*॥ अथ रक्तपित्तस्य चिकित्सा ।

'पित्तासृक् स्तम्भयेन्नादौ प्रवृत्तं बलिनोऽन्यत: ।
क्षुत्पाण्डुग्रहणीरोगप्लीहगुल्मज्वरादिकृत् ॥
प्रालिघटिकनीवारकोरदूषप्रसाधिका:
श्यामाकाश्च प्रियङ्गुश्च भोजनं रक्तपित्तिनाम् ॥'

प्रियङ्गु: कङ्गु:।

'मसूरमुद्गचणका: समकुष्ठाढ़कीफला:।
प्रशस्ता: सूपयूषार्थे कल्पिता रक्तपित्तिनाम् ।
दाड़िमामलकं विल्वान्वार्थे चापि दापयेत् ।
पटोलनिम्बवेत्राग्रशुक्लवेतसपल्लवा: ॥
शाकार्थे शाकसात्म्यानां तण्डुलीयादयो हिता:।
पारावतान् कपोतांश्च लावानुत्काश्चवर्त्तकान् ॥
शशान् कपिञ्जलानेणान् हरिणान् कालपुच्छकान् ।
रक्तपित्तहरान् विद्याद्रसांस्तेषां प्रयोजयेत् ॥
ईषदम्लाननम्लांश्च घृतभृष्टान् ससैन्धवान् ।
कफानुगे यूषशाके दद्याद्वातानुगे रसम् ॥
पथ्यं सतिलयूषेण ससिताल्लाजशक्तुभि: ।
धान्याकधात्रीवासानां द्राक्षापर्पटयोर्हिम: ।
रक्तपित्तं ज्वरं दाहं तृष्णां शोषञ्च नाशयेत् ॥
धान्याकादेर्हिम: ॥ * ॥

'ह्रीवेरमुत्पलं धान्यं चन्दनं यष्टिकाञ्जना ।
उशीरञ्च तृषश्चैषां क्वाथं समधुशर्करम् ॥
पाययेत्तेन सद्यो हि रक्तपित्तं प्रशाम्यति ।
रक्तपित्तं जयत्युग्रं तृष्णां दाहं ज्वरं तथा ॥*॥
पुराणं पीनमानीय कुष्माण्डस्य फलं दृढ़म् ।
तद्बीजाधारबीजत्वक्शिराश्रुग्रं समाचरेत् ॥
ततस्तस्य तुलां नीत्वा पचेच्छलतुलार्द्धके ।
तस्मिन्नीरेऽर्द्धशिष्टे तु यत्नत: शीतलीकृते ॥
तानि कुष्माण्डखण्डानि पीड़येद्दृढ़वाससा ।
यत्नतस्तज्जलं नीत्वा पुन: पाकाय धारयेत् ॥
कुष्माण्डं शोधयेद्धर्म्मे ताम्रपात्रे ततः क्षिपेत् ।
क्षिप्त्वा तत्र घृतप्रस्थं कुष्माण्डं तेन भर्ज्जयेत् ॥
मधुवर्णं तदालोक्य तज्जलं तत्र निःक्षिपेत् ।
सिताया च तुलां तत्र क्षिप्त्वा तल्लेहवत् पचेत् ॥
सुपक्वे पिप्पलीशुण्ठीजीराणां द्वे पले पृथक् ।
पृथक् पलार्द्धं धान्याकपत्रैलामरिचं त्वचम् ॥
चूर्णमेषां क्षिपेत्तत्र घृतार्द्धं क्षौद्रमावपेत् ।
एतत् पलमितं खादेदथवाग्निबलं यथा ॥
खण्डकुष्माण्डलेहोऽयं रक्तपित्तं विनाशयेत् ।
पित्तज्वरं क्षयं दाहं प्रदरं क्षतजं वमिम् ॥
स्वरभेदं सद्यदोषं कासं श्वासं क्षतं क्षयम् ।
नाशयत्येव दृष्टोऽयं हृद्यो बलवर्द्धन: ॥'

इति खण्डकुष्माण्डावलेह: ॥ * ॥

'घृतावरीमूलकल्कं कल्कात् क्षीरं चतुर्गुणम् ।
क्षीरतुल्यं घृतं गव्यं सितया कल्कतुल्यया ॥

घृतप्रेषं पचेत्तत्तु पलार्द्धं लेहयेत् सदा।
रक्तपित्तं क्षणात्पित्तं क्षयं श्वासञ्च नाशयेत्॥'
शृतावरीपाकः। इति रक्तपित्ताधिकारः॥"
इति भावप्रकाशः॥

(तथास्य सनिदानपूर्व्वरूपलक्षणं सम्प्राप्तिञ्च।
"पित्तं यथा भूतं लोहितपित्तसंज्ञां लभते तत्तथानुव्याख्यास्यामः। यदा यस्तु जन्तुर्यवकोद्दालककोरदूषकप्रायाण्यन्नानि नित्यं भुङ्क्ते भृशोष्णतीक्ष्णमपि चान्यदन्नजातं निष्पावमाषकुलत्थचारस्नेहोपहितं दधिमण्डोदश्वित् कट्वम्लकाञ्जिकोपहितं वाराहमाहिषाविकमत्स्यगव्यपिशितं पिण्याकं पिण्डालकशाकोपहितं मूलक-सर्षपलशुनकरञ्जशिग्रुकखरयूषभूस्तृणकसुमुखसुरसकुठेरकखडीरकालक-पर्णासक्षवक-फणिज्झकोपदंशं सुरासौवीरतुषोदकमैरेयमेदकमधूलककुवरवदराम्लप्रायानुपानं पिष्टान्नोत्तरभूयिष्ठसुराभिषन्नो चातिमात्रमतिवेलं वा पयसा समश्नाति रौहिणीकलङ्कापोतं वा सर्षपतैलक्षारसिद्धं कुलत्थमाषपिण्याकजाम्बवलकुचपक्वैः; प्रौक्तिकैर्वा सह क्षीरमाममतिमात्र मथवा पित्तलुण्णाभितप्तस्त्वेवमाचरतः पित्तं प्रकोपमापद्यते। लोहितञ्च स्वप्रमाणमतिवर्त्तते। तस्मिन् प्रमाणातिप्रवृत्ते पित्तं प्रकुपितं शरीरमनुसर्पदूर्द्ध्वमेव यकृत्प्लीहप्रभवानां लोहितवहानां स्रोतसां लोहितामिष्यन्दगुरूणि सुखान्यासाद्य प्रतिपद्यते तदेव लोहितं दूषयति। संसर्गान्तर्लोहितप्रदूषणाल्लोहितगन्धवर्णानुविधानाच्च पित्तं लोहितमित्याचक्षते। तस्येमानि पूर्व्वरूपाणि। तद्यथा। अन्नाभिलाषो भुक्तस्य विदाहः शुक्ताम्लरसगन्ध उद्गरश्छर्द्दिषोऽभीक्ष्णागमनं हृद्दि तस्य वीभत्सता स्वरभेदो गात्राणां सदनं परिदाहश्च सुखाद्भूमागम इव लोहलोहितमत्स्यामगन्धित्वमपि चास्यस्य रक्तहरितहारिद्रवक्त्वमङ्गावयवशुक्लभ्रू च-क्षेदलालाग्निहानकास्यकर्णमलपिड़कोलिकापिड़कारामसंवेदनालोहितनीलपीतशयावानामर्च्चिष्मतश्च रूपाणां स्वप्रदर्शनमभीक्ष्णमिति लोहितपित्तपूर्व्वरूपाणि। उपद्रवास्तु खलु दौर्ब्बल्यारोचकाविपाकश्वासकासज्वरातीसारशीफशोषपाण्डुरोगस्वरभेदाः। मार्गौ पुनरस्य द्वौ ऊर्द्ध्वाधश्च तद्बहुश्लेष्मणि शरीरे श्लेष्मसंसर्गादूर्द्ध्वं प्रपद्यमानं कर्णनासिकानेत्रास्येभ्यः प्रच्यवते। बहुवाते तु शरीरे वातसंसर्गादधः प्रपद्यमानं मूत्रपुरीषमार्गाभ्यां प्रच्यवते। बहुवातश्लेष्मणि तु शरीरे श्लेष्मवातसंसर्गाद्द्वावपि मार्गौ प्रपद्यते। तौ मार्गौ प्रपद्यमानं सर्व्वेभ्य एव यथोक्तेभ्यः खेभ्यः प्रच्यवते शरीरस्य। तच्च यदूर्द्ध्वभागं तत्साध्यं विरेचनोपक्रमणीयत्वात् वङ्क्षौषधत्वाच्च। यदधोभागं तदप्याप्यं वमनोपक्रमणीयत्वात् अल्पौषधत्वाच्च। यदुभयभागं तदसाध्यं वमनविरेचनायोगित्वादनौषधत्वाच्च। रक्तपित्तप्रकोपस्तु खलु पुरा दक्षयज्ञोद्वंसे रुद्रकोपाभमूर्ज्जाग्निना प्राणिनां परिगतशरीरप्राणानामनुज्वरमभवत्। तस्याशुकारिणो दावाग्नेरिवापतितस्यात्ययिकस्याशु प्रशान्तौ यतितव्यं मात्रां देशं कालञ्चाभिसमीक्ष्य सन्तर्पणेनापतर्पणेन वा मृदुमधुरस्निग्धैरतिक्तकषायैरभ्यवहार्य्य प्रदेहपरिषेकावगाहसंस्पर्शनैर्वमनाद्यैर्वा तत्रावहितेनेति॥"
संक्षेपतोऽस्योपशमनोपायो यथा,—
"साध्यं लोहितपित्तं तदयदूर्द्ध्वं प्रतिपद्यते।
विरेचनस्य योगित्वाद्बहुत्वाच्छ्लेष्मणस्य च॥
वमनं नहि पित्तस्य हरणं श्रेष्ठमुच्यते।
यच्च तत्रानुगो वायुस्तच्छान्त्यै चावरं मतम्॥
स्याच्च योगावहन्तत्र कषायं तिक्तकानि च।
तस्माद्याप्यं समाख्यातं यदूर्द्ध्वमनुलोमगम्॥
रक्तपित्तन्तु यन्मार्गौ द्वावपि प्रतिपद्यते।
असाध्यमपि तज्ज्ञेयं पूर्व्वोक्तादपि कारणात्॥
नहि संशोधनं किञ्चिदस्यस्य प्रतिमार्गगम्।
प्रतिमार्गञ्च हरणं रक्तपित्ते विधीयते॥
एवमेवोपशमनं सर्व्वशो नास्य विद्यते।
संसृष्टेषु च दोषेषु सर्व्वमिच्छमनं मतम्॥
इत्युक्तं त्रिविधोदर्कं रक्तं मार्गविशेषता।
एभ्यस्तु खलु हेतुभ्यः किञ्चित् साध्यं न सिध्यति।
प्रेक्ष्योपक्रमणाभावात् दौरात्म्याद्वेद्यदोषतः॥
अकस्मैतच्च साध्यत्वं कस्मिंश्चिद्रोगोऽतिवर्त्तते।
तत्र साध्यत्वमेकं स्यात् साध्यायाप्यपरिक्रमात्॥
रक्तपित्तस्य विज्ञानमिदं तस्योपदेक्ष्यते।
यत् कृष्णमथवा नीलं यद्वा शुक्लधनुष्प्रभम्॥
रक्तपित्तमसाध्यन्तद्वासश्चो रञ्जनञ्च यत्।
भृशं पूयतिमात्रञ्च सर्व्वोपद्रवञ्च यत्॥
बलमांसक्षये यच्च तच्च रक्तमसिद्धिमत्॥
येन चोपहतो रक्तं रक्तपित्तेन मानवः।
पश्येदृष्टभ्रं वियच्चैव तच्चासाध्यमसंशयम्॥
तच्चासाध्यं परित्यज्यं याप्यं यत्नेन यापयेत्।
साध्यञ्चावहितः सिद्धैर्भेषजैः साधयेद्भिषक्॥
कारणं नाम निर्वृत्तिं पूर्व्वरूपाण्युपद्रवान्।
मार्गौ दोषानुबन्धञ्च साध्यत्वं न च हेतुमत्॥
निदाने रक्तपित्तस्य आजहार पुनर्व्वसुः।
वीतमोहरजोदोषलोभमानमदस्पृहः॥"
इति चरके निदानस्थाने द्वितीयेऽध्याये॥ * ॥
अथास्य चिकित्सायां रसाः।
"घृतं गन्धं माक्षिकञ्चैव लौहं
सर्व्वं घृष्टं चैफलेनोदकेन।
लोहे पात्रे गोमयैः पाचयित्वा
रात्रौ दद्यात् रक्तपित्तप्रशान्त्यै॥
इति सुधानिधीरसः॥
घृताभ्रमुण्डतीक्ष्णञ्च माक्षिकं रसतालकम्।
गन्धकञ्च भवेत्तुल्यं यष्टिद्राक्षाश्वत्तादवैः॥
दिनैकं मर्द्दयेत् खल्वे सिताक्षौद्रयुतावटी।
माषामात्रा निहन्त्याशु रक्तपित्तं सुदारुणम्।
ज्वरं दाहं तृषां वान्तिं श्लेष्मपित्तान्तको रसः॥
इति रक्तपित्तान्तको रसः॥

शृङ्गैरातिलसंयुक्तं चिरुचयशुतत्त्वयः।
रक्तपित्तं निहन्त्याशु अम्लपित्तहरं परम्॥
इति शृङ्गैरादां लौहम्॥"
इति वैद्यकरसेन्द्रसारसंग्रहे रक्तपित्ताधिकारे॥
अथास्य पथ्यापथ्यविधिः।
"अधोगते छर्दनमूर्द्धनिर्गमे
विरेचनं स्यादुभयत्र लङ्घनम्।
पुरातनाः षष्टिकशालिकोद्रव-
प्रियङ्गुनीवारयवप्रसातिकाः॥
मुद्गा मसूराश्चणकास्तु वर्य्यो-
सुकुष्टकाश्चिङ्गटवर्म्ममत्स्याः।
शशः कपोतो हरिणेनलाव-
शरालिपारावतवर्त्तकाश्च॥
वका उरभ्राश्च सकालपुच्छाः
कपिञ्जलाश्चापि कषायवर्गः।
गवामजायाश्च पयो घृतञ्च
घृतं महिष्याः पनसं पियालम्॥
रम्भाफलं कक्षटतण्डुलीय-
पटोलवेत्राग्रमहार्द्रकाणि।
पुराणकुष्माण्डफलञ्च पक्व-
फलानि तद्वीजजलानि वासा॥
खादूनि बिम्बानि च दाड़िमानि
खर्ज्जूरधात्रीमिधिनारिकेलम्।
कपीरुपट्टाटमरुष्करागि
कपित्थशालूकपरूषकाणि॥
भूनिम्बशाकं पिचुमर्द्दपत्रं
तुम्बीकलिङ्गानि च लाजसक्तुः।
द्राक्षा सिता माक्षिकमैक्षवञ्च
शीतोदकञ्चौद्भिदवारि चापि॥
सेकोऽवगाहः घृतधौतसर्पिरभ्यङ्गयोगः शिशिरप्रदेहः।
हिमानिलस्पर्शनमिन्दुपादाः
कथा विचित्राश्च मनोऽनुकूलाः॥
धाराग्रहं भूमिगृहं सुशीतं
वैदूर्य्यमुक्तामणिधारणञ्च।
रम्भोत्पलाम्भोरुहपत्रशय्या
चौमाम्बरञ्चोपवनं सुशीतम्॥
प्रियङ्गुकाचन्दनरूषितानामालिङ्गनञ्चापि वराङ्गनानाम्।
पद्माकराणां सरितां ह्रदानां
चन्द्रोदयाग्रं हिमवद्गिरीणाम्॥
सुशीतलानां गिरिनिर्झराणां
स्तुतिः प्रशस्तानि च कीर्त्तितानि।
प्रणीरनीरं हिमवालुका च
मित्रं नृणां शोणितपित्तरोगे॥"
अथापथ्यानि।
"आयासाध्वनिषेवणं रविकरस्नीक्ष्णानि
कर्म्माणि च।
क्षोभो वेगविधारणञ्चपलता हस्त्यश्वयानानि च॥
स्वेदाम्लसुतिधूमपानसुरतक्रोधाः कुलत्थो गुड़ो
वार्त्ताकं तिलमाषसर्षपदधिक्षारांशि कौपं पयः॥"
इति वैद्यकपथ्यापथ्यविधौ रक्तपित्ताधिकारः॥)

रक्तपु

रक्तपित्तहा, स्त्री, (रक्तपित्तं हन्तीति। हन्+ड:। स्त्रियां टाप्।) रक्तघ्नी। इति शब्दचन्द्रिका॥ गाँठिया दूर्व्वा इति भाषा॥ (विवृतिरस्या: रक्तघ्नीशब्दे ज्ञातव्या॥)

रक्तपुनर्नवा, स्त्री, (रक्ता रक्तवर्णा पुनर्नवा।) रक्तवर्णपुनर्नवाप्रभेदा:। तत्पर्य्यायः। क्रूरा २ मण्डलपत्रिका ३ रक्तकाण्डा ४ वर्षकेतुः ५ लोहिता ६ रक्तपत्रिका ७ वैशाखी ८ रक्तवर्षाभूः ९ श्वेतपुनर्नवा १० पुष्पिका ११ विकसरा १२ विषघ्नी १३ प्रावृषेण्या १४ सारिणी १५ वर्षाभवः १६ शोफघ्नः १७ भौमः १८ पुनर्भवः १९ नवः २० नवः २१। अस्य गुणाः। तिक्तत्वम्। सारकत्वम्। शोफरक्तप्रदरदोषपाण्डुपित्तनाशित्वञ्च। इति राजनिर्घण्टः॥

रक्तपुष्पः, पुं, (रक्तं पुष्पमस्य।) करवीरः। इति जटाधरः॥ (अस्य पर्य्यायो यथा,—
"करवीरः श्वेतपुष्पः श्वेतकुसुमोऽश्वमारकः।
द्वितीयो रक्तपुष्पश्च चण्डातो लगुडस्तथा॥"
इति भावप्रकाशस्य पूर्ब्बखण्डे प्रथमे भागे॥) रोहितवृक्षः। इति शब्दमाला॥ रक्तकाञ्चनवृक्षः। दाड़िमवृक्षः। वकवृक्षः। इति रत्नमाला॥ बन्धूकवृक्षः। पुन्नागवृक्षः। इति राजनिर्घण्टः॥ (रक्तवर्णपुष्पविशिष्टे, त्रि।) यथा, बृहत्संहितायाम्। १५। १४।
"इन्द्राग्निदेवते रक्तपुष्पफलशाखिनः सतिलसुहाः।
कार्पासमाषचणका: पुरन्दरहुताशभक्ताश्च॥")

रक्तपुष्पकः, पुं, (रक्तं पुष्पमस्य। कन्।) पलाशवृक्षः। (अस्य पर्य्यायो यथा,—
"पलाशः किंशुकः पर्णो यज्ञियो रक्तपुष्पकः।
त्रयश्रेष्ठो वातहरो ब्रह्मवृक्षः समिद्वरः॥"
इति भावप्रकाशस्य पूर्ब्बखण्डे प्रथमे भागे॥) रोहितकवृक्षः। इति जटाधरः॥ पर्पटः। शाल्मलिवृक्षः। इति राजनिर्घण्टः॥

रक्तपुष्पा, स्त्री, (रक्तं पुष्पं अस्याः।) शाल्मलिवृक्षः। इति जटाधरः॥ (अस्याः पर्य्यायो यथा,—
"शाल्मलिस्तु भवेन्मोचा पिच्छिला पूरणीति च।
रक्तपुष्पा स्थिरायुश्च कण्टकाढ्या च तूलिनी॥"
इति भावप्रकाशस्य पूर्ब्बखण्डे प्रथमे भागे॥) पुनर्नवा। तत्पर्य्यायो यथा,—
"पुनर्नवा पररक्ता रक्तपुष्पा शिलाटिका॥"
सिन्दूरी। तत्पर्य्यायो यथा,—
"सिन्दूरी रक्तबीजा च रक्तपुष्पा सुकोमला॥"
इति भावप्रकाशः॥)

रक्तपुष्पिका, स्त्री, (रक्तपुष्पा+कन्। टापि अत इत्वम्।) लज्जालुः। इति शब्दचन्द्रिका॥ रक्तपुनर्नवा। भूपाटलिः। इति राजनिर्घण्टः॥

रक्तपुष्पी, स्त्री, (रक्तं पुष्पं अस्याः। ङीष्।) पाटलीवृक्षः। इति जटाधरः॥ जवा। आवर्त्तकीलता। नागदमनी। करञ्जीवृक्षः। उष्ट्रकाण्डी। इति राजनिर्घण्टः॥ (धातकी। तत्पर्य्यायो यथा,—
"धातकी रक्तपुष्पी स्यात् कुञ्जरा मध्यवासिनी॥"
इति वैद्यकरत्नमालायाम्॥)

रक्तपूरकं, क्ली, (रक्तं पूरयतीति। पूर्+ण्वुल्।) वृक्षाम्लम्। इति राजनिर्घण्टः॥ (विवरणमस्य वृक्षाम्लशब्दे ज्ञातव्यम्॥)

रक्तप्रसवः, पुं, (रक्तः रक्तवर्णः प्रसवः पुष्पमस्य।) रक्तकरवीरः। रक्ताम्लानः। इति राजनिर्घण्टः॥

रक्तफलः, पुं, (रक्तं लोहितवर्णं फलमस्य।) वटवृक्षः। इति जटाधरः॥ (अस्य पर्य्यायो यथा,—
"वटो रक्तफलः शृङ्गी न्यग्रोधः स्कन्दजो ध्रुवः।
क्षीरी वैश्रवणो वासो बहुपादो वनस्पतिः॥"
इति भावप्रकाशस्य पूर्ब्बखण्डे प्रथमे भागे॥)

रक्तफला, स्त्री, (रक्तं पक्वदशायां लोहितवर्णं फलमस्याः।) बिम्बिका। इत्यमरः। २। ४। १३६॥ (अस्याः पर्य्यायो यथा,—
"तुण्डी रक्तफला बिम्बी तुण्डिकेरी च बिम्बिका॥"
इति वैद्यकरत्नमालायाम्॥) स्वर्णवल्ली। इति राजनिर्घण्टः॥ (अस्याः पर्य्यायो यथा,—
"स्वर्णवल्ली रक्तफला काकायुः काकवल्लरी॥"
इति भावप्रकाशस्य पूर्ब्बखण्डे प्रथमे भागे॥)

रक्तफेनजः, पुं, (रक्तफेनात् जायते इति। जन्+डः।) वामपार्श्वस्थशूकम्। तत्पर्य्यायः। पुस्त्वयः २। इति हेमचन्द्रः। ३। २६६॥

रक्तबिन्दुः, पुं, (रक्तानां बिन्दुः।) रक्तकणा। यथा,—
"रक्तबिन्दुर्यदा भूमौ पतत्यस्य शरीरतः।
समुत्पतति मेदिन्यास्तत्प्रमाणस्तदासुरः॥"
इति मार्कण्डेये देवीमाहात्म्यम्॥)

रक्तबीजः, पुं, (रक्तवर्णो बीजमस्य।) दाड़िमः। इति राजनिर्घण्टः॥ (अरिष्टकफलः। रीठा इति ख्यातेः। तत्पर्य्यायो यथा,—
"अरिष्टकस्तु माङ्गल्यः क्षणवर्णोऽर्धसाधनः।
रक्तबीजः पीतफेनः फेनिलो गर्भपातनः॥"
इति भावप्रकाशस्य पूर्ब्बखण्डे प्रथमे भागे॥ रक्तं शोणितं बीजं कारणमस्य।) असुरविशेषः। स च शुम्भनिशुम्भसेनापतिः देव्या हतश्च। यथा,—
"पलायनपरान् दृष्ट्वा दैत्यान् मातृगणादितान्।
योद्धुमभ्याययौ क्रुद्धो रक्तबीजो महासुरः॥
रक्तबिन्दुर्यदा भूमौ पतत्यस्य शरीरतः।
समुत्पतति मेदिन्यास्तत्प्रमाणस्तदासुरः॥
युयुधे स गदापाणिरिन्द्रशक्त्या महासुरः।
ततश्चैन्द्री स्ववज्रेण रक्तबीजमताड़यत्॥
कुलिशेनाहतस्याशु तस्य सुस्राव शोणितम्।
समुत्तस्थुस्ततो योधास्तद्रूपास्तत्पराक्रमाः॥
यावन्तः पतितास्तस्य शरीराद्रक्तबिन्दवः।
तावन्तः पुरुषा जातास्तद्वीर्य्यबलविक्रमाः॥
तस्याहतस्य बहुधा शक्तिशूलादिभिर्भुवि।
पपात यो वै रक्तौघस्तेनासञ्छतशोऽसुराः॥
तैश्चासुरासृक्सम्भूतैरसुरैः सकलं जगत्।
व्याप्तमासीत्ततो देवा भयमाजग्मुरुत्तमम्॥
तान् विषण्णान् सुरान् दृष्ट्वा चण्डिका प्राह सत्वरा।
उवाच कालीं चामुण्डे! विस्तरं वदनं कुरु॥
मच्छस्त्रपातसम्भूतान् रक्तबिन्दून् महासुरान्।
रक्तबिन्दोः प्रतीच्छ त्वं वक्त्रेणानेन वेगिता॥
भक्षयन्ती चर रणे तदुत्पन्नान् महासुरान्।
एवमेष क्षयं दैत्यः क्षीणरक्तो गमिष्यति॥
भक्ष्यमाणास्त्वया चोग्रा न चोत्पत्स्यन्ति चापरे।
इत्युक्त्वा तां ततो देवी शूलेनाभिजघान तम्॥
मुखेन कालो जग्राह रक्तबीजस्य शोणितम्।
तस्याहतस्य देहात्तु बहु सुस्राव शोणितम्॥
यतस्ततस्तद्वक्त्रेण चामुण्डा संप्रतीच्छति।
मुखे समुद्गता येऽस्या रक्तपातान्महासुराः।
तांश्चखादाथ चामुण्डा पपौ तस्य च शोणितम्॥
देवी शूलेन वज्रेण बाणैरसिभिरृष्टिभिः।
जघान रक्तबीजं तं चामुण्डापीतशोणितम्॥
स पपात महीपृष्ठे शस्त्रसंघसमाहतः।
नीरक्तश्च महीपाल! रक्तबीजो महासुरः॥
ततस्ते हर्षमतुलमवापुस्त्रिदशा नृप!।
तेषां मातृगणो जातो ननर्त्तासृङ्मदोद्धतः॥"
इति मार्कण्डेये देवीमाहात्म्यम्॥
(महिषासुरपिता दानवी रम्भ एव जन्मान्तरे रक्तबीजो जातः। यथा, देवीभागवते। ५। २। ४४—४६।
"हतं रम्भं समानीय यत्तास्ते परमं प्रियम्।
चितायां रोपयामासुस्तस्य देहस्य शुद्धये॥
महिषी सा पतिं दृष्ट्वा चितायां रोपितं तदा।
प्रवेष्टुं सा मतिं चक्रे पतिना सह पावकम्॥
वार्य्यमाणापि यत्नैः सा प्रविवेश हुताशनम्।
ज्वालामालाकुलं साध्वी पतिमादाय वल्लभम्॥
महिषस्तु चितामध्यात् समुत्तस्थौ महाबलः।
रम्भोऽप्यन्यवपुः कृत्वा निःसृतः पुत्रवत्सलः॥
रक्तबीजोऽप्यसौ जातो महिषोऽपि महाबलः।
अभिषिक्तस्तु राज्येऽसौ हयारिसुरोत्तमैः॥
एवं स महिषो जातो रक्तबीजश्च वीर्य्यवान्।
अवध्यस्तु सुरैर्दैत्येर्मानवैश्च नृपोत्तम!॥")

रक्तबीजका, स्त्री, (रक्तो रक्तवर्णो बीजोऽस्याः। कन्+टाप्।) तरङ्गवृक्षः। इति राजनिर्घण्टः॥

रक्तमञ्जरः, पुं, (रक्ता रक्तवर्णा मञ्जरी। सा विद्यतेऽस्येति। "अर्शआदिभ्यः अच्।" ५।२।१२७। इत्यच्।) निचुलवृक्षः। इति चिकित्साडम्बरः॥ (गुणादयोऽस्य निचुलशब्दे ज्ञातव्याः॥)

रक्तमत्स्यः, पुं, (रक्तो रक्तवर्णो मत्स्यः।) रक्तवर्णो मत्स्यविशेषः। यथा,—
"यो रक्ताङ्गो नातिदीर्घो न चाल्पो
नातिस्थूलो रक्तमत्स्यः स तूक्तः।
प्रीतो रुच्यः पुष्टिकृद्दीपनोऽसौ
नाग्निं धत्ते क्षिप्रं दोषत्रयस्य॥"
इति राजनिर्घण्टः॥

रक्तमूलकः, पुं, (रक्तं रक्तवर्णं मूलमस्य । कन् ।) देवसर्षपवृक्षः । इति राजनिर्घण्टः ॥

रक्तमूला, स्त्री, (रक्तं मूलं अस्याः । टाप् ।) लघ्वालुवृक्षः । इति राजनिर्घण्टः ॥

रक्तमेहः, पुं, (मेहनं मेहः रक्तस्य मेहः ।) प्रमेहरोगविशेषः । तस्य लक्षणं यथा,—

"विस्रमुष्णं सलवणं रक्ताभं रक्तमेहनः ॥"

मूत्रं मूत्रयेदिति योजनीयम् । अस्यौषधम् । यथा,—

"चन्द्रप्रभावचामुस्ताभूनिम्बसुरदारवः ।
हरिद्रातिविषादार्व्यौ पिप्पलीमूलचित्रकम् ॥
धान्यकं त्रिफला चव्यं विड्ङ्गं गजपिप्पली ।
सुवर्णमाक्षिकं शोषं द्वौ क्षारौ लवणत्रयम् ॥
एतानि टङ्कमात्राणि संगृह्णीयात् पृथक् पृथक् ।
द्विकर्षहतलोहं स्याच्चतुष्कर्षा सिता भवेत् ॥
शिलाजत्वष्टकर्षं स्यादष्टौ कर्षाश्च गुग्गुलोः ।
विधिना योजितैरेतैः कर्त्तव्या गुटिका शुभा ॥
चन्द्रप्रभेति विख्याता सर्व्वरोगप्रणाशिनी ।
निहन्ति विंशतिं मेहान् कृच्छ्रमष्टविधं तथा ॥
चतस्रश्चाश्मरीस्तद्वत् मूत्राघातांस्त्रयोदश ।
अण्डवृद्धिं पाण्डुरोगं कामलाञ्च क्लीमकम् ॥
कासं श्वासं तथा कुष्ठमग्निमान्द्यमरोचकम् ।
वातपित्तकफव्याधीन् बल्या वृष्या रसायनी ॥
समाराध्य शिवं तस्मात् प्रयत्नात् गुटिकामिमाम् ।
प्राप्नवांश्चन्द्रमा यस्मात् तस्माच्चन्द्रप्रभा स्मृता ॥"

इति भावप्रकाशः ॥

(तथास्य लक्षणम् । यथा,—

"विस्रं लवणसृष्णञ्च रक्तं मेहति यो नरः ।
पित्तस्य परिकोपेन तं विद्याद्रक्तमेहिनम् ॥"

इति चरके निदानस्थाने चतुर्थेऽध्याये ॥)

रक्तमोक्षणं, क्ली, (रक्तस्य मोक्षणम् ।) शोणितस्रावः । यथा,—

"वेदनोपशमार्थाय तथा पाकशमाय च ।
अचिरोत्पतिते शोथे शोणितस्रावणञ्चरेत् ॥
चरेत् कुर्य्यात् ।
एकतस्तु क्रियाः सर्व्वा रक्तमोक्षणमेकतः ।
रक्तं हि वेदनामूलं तच्चैवास्ति न चापि रुक् ॥
विवर्णे कठिने स्रावे व्रणे चात्यन्तवेदने ।
सविशेषे विशेषेण जलौकोभिः पदैरपि ॥
शोणितस्रावणञ्चरेदित्यनेनान्वयः ।" इति भावप्रकाशः ॥ (तथा च ।

"रक्तावसेचनं चतुर्भिः प्रकारैर्भवति ।
शिराविस्रावणेनापि अलाबूभिस्तथैव च ॥
शृङ्गशृङ्गैर्जलौकाभी रक्तञ्च स्रावयेद्बुधः ।
पूर्व्वाह्णे चापराह्णे च नातुष्णे नातिशीतले ॥
यवागूपरिपीतस्य शोणितं मोक्षयेद्भिषक् ।
शिरोरोगेषु सर्व्वेषु नासामधपुटे तथा ।
अहजं रेचयेदूर्द्ध्वं सर्व्वदा भिषगुत्तमः ॥"

इति हारीते शारीरस्थाने पञ्चमेऽध्याये ॥)

रक्तयष्टिः, स्त्री, (रक्ता यष्टिरिव । यद्वा रक्ता रक्तवर्णा यष्टिः शाखास्याः ।) मञ्जिष्ठा । इति जटाधरः ॥

रक्तयष्टिका, स्त्री, (रक्तयष्टि + कन् । टाप् ।) मञ्जिष्ठा । इति राजनिर्घण्टः ॥ (अस्याः पर्य्यायो यथा,—

"मञ्जिष्ठा विकसा जिङ्गी कालायोजनपर्य्यपि ।
ताम्रवल्ली चित्रपर्णी काण्डारी रक्तयष्टिका ॥"

इति वैद्यकरत्नमालायाम् ॥

"मञ्जिष्ठा विकसा जिङ्गी समङ्गा काल-
मेषिका ।
मण्डूकपर्णी भण्डीरी भण्डी योजनवल्ल्यपि ॥
रसायन्यरुणा काला रक्ताङ्गी रक्तयष्टिका ।
भण्डीतकी च गण्डीरी मञ्जिषा वस्त्ररञ्जिनी ॥"

इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥)

रक्तयावनालः, पुं, (रक्तवर्णः यावनालः ।) तुवरयावनालः । इति राजनिर्घण्टः ॥

रक्तरेणुः, पुं, (रक्ताः रेणवोऽस्मिन्निति ।) सिन्दूरम् । (अस्य पर्य्यायो यथा.—

"सिन्दूरं रक्तरेणुश्च नागगर्भश्च सीसजम् ॥"

इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥) पलाशकलिका । इति मेदिनी । ने, १०५ ॥ पुन्नागः । इति राजनिर्घण्टः ॥

रक्तरेणुका, स्त्री, (रक्ताः रेणवः परागा अस्याम् । कन् । टाप् च ।) पलाशकलिका । तत्पर्य्यायः । अङ्गारिका २ । इति शब्दमाला ॥

रक्तरैवतकं, क्ली, (रक्तवर्णं रैवतकम् ।) महारैवतम् । इति राजनिर्घण्टः ॥

रक्तलशुनः, पुं, (रक्तवर्णो लशुनः ।) रक्तवर्णमूलविशेषः । तत्पर्य्यायः । महाकन्दः २ गृञ्जनः ३ दीर्घपत्रकः ४ पृथुपत्रः ५ स्थूलकन्दः ६ यवनेष्टः ७ । अस्य गुणाः ।

"गृञ्जनस्य मधुरं कटु कन्दं
नालमप्युपदिशन्ति कषायम् ।
पत्रसञ्चयमुशन्ति सतिक्तं
सूरयो लवणमिश्रि वदन्ति ॥"

इति राजनिर्घण्टः ॥

रक्तला, स्त्री, (रक्तं लाति गृह्णातीति । ला + कः । टाप् ।) काकतुण्डी । इति राजनिर्घण्टः ॥ (विशेषोऽस्याः काकतुण्डीशब्दे ज्ञातव्यः ॥)

रक्तलोचनः, पुं, (रक्ते लोहिते लोचने अस्य ।) कपोतः । इति हेमचन्द्रः । ४ । ४०५ ॥ लोहितलोचनयुक्ते, त्रि ॥

रक्तवटी, स्त्री, (रक्ता वटी वटिकेव ।) मसूरिका । इति त्रिकाण्डशेषः ॥

रक्तवरटी, स्त्री (रक्ता वरटीव ।) मसूरिका । इति जटाधरः ॥ (मसूरिकाशब्देऽस्या गुणादयो ज्ञेयाः ॥)

रक्तवर्गः पुं, (रक्तानां लोहितवर्णानां वर्गः समूहोऽत्र ।) दाड़िमः । किंशुकम् । लाक्षा । वन्धूकम् । निशाद्वयम् । कुसुम्भपुष्पम् । मञ्जिष्ठा, इति राजनिर्घण्टः ॥

रक्तवर्णः, पुं, (रक्तः लोहितः वर्णोऽस्य ।) इन्द्रगोपः । इति राजनिर्घण्टः ॥ (रक्तवर्णविशिष्टे, त्रि । यथा, सुश्रुते सूत्रस्थाने । ४६ अध्याये ।

"सितासिताः पीतकरक्तवर्णा
भवन्ति येऽनेकविधास्तु शिम्बाः ॥")

रक्तवर्द्धनः, पुं, (रक्तं शोणितं वर्द्धयतीति । वृध् + णिच् + ल्युः ।) वार्त्ताकुः । इति शब्दचन्द्रिका ॥ (पारावतः । तत्पर्य्यायो यथा,—

"पारावतः कलरवः कपोतो रक्तवर्द्धनः ॥"

इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥)

रक्तवर्षाभूः, स्त्री, (रक्तवर्णा वर्षाभूः ।) रक्तपुनर्नवा । इति राजनिर्घण्टः ॥

रक्तवसनः, पुं, (रक्तं वसनमस्य ।) सन्न्यासी । इति हेमचन्द्रः । ३ । ४७३ ॥

रक्तवातः, पुं, (रक्तप्रधानो वातः ।) रोगविशेषः । अस्यौषधम् । यथा, गारुड़े १६३ अध्याये ।

"नारिकेलस्य वै मूलं छागक्षीरेण संयुतम् ।
पिबेच्च त्रिविधस्तस्य रक्तवातो विनश्यति ॥"

रक्तवालुकं, क्ली, (रक्ता वालुका चूर्णमत्र ।) सिन्दूरम् । इति हारावली ॥

रक्तवालुका, स्त्री, (रक्ता वालुकेव ।) सिन्दूरम् । इति शब्दरत्नावली ॥

रक्तवृन्ता, स्त्री, (रक्तवर्णं वृन्तं प्रसववन्धनमस्याः ।) शेफालिका । इति शब्दचन्द्रिका ॥ (शेफालिकाशब्देऽस्या गुणादयो विज्ञेयाः ॥)

रक्तवृष्टिः, स्त्री, (रक्तानां वृष्टिः ।) रुधिरवर्षणम् । तत्तु उत्पातविशेषः । तत्फलं शुक्रोद्योगः । यथा । कृत्यचिन्तामणौ ।

"रक्ते शुक्रोद्योगो मांसास्थिवसादिभिर्भूरुकः ।
धान्यहिरण्यत्वक्फलकुसुमाद्यं वर्षते भयं
विद्यात् ॥"

इति ज्योतिस्तत्त्वम् ॥

रक्तशालिः, पुं, (रक्तवर्णः शालिः ।) रक्तवर्णधान्यविशेषः । (यथा, सुश्रुते सूत्रस्थाने । २० अध्याये । "रक्तशालिषष्टिकगवेधुकमुकुन्दकपाण्डुकपीतकप्रमोदककालकेत्यादि ॥") तत्पर्य्यायः । ताम्रशालिः २ शोणशालिः ३ लोहितः ४ । अस्य गुणाः । मधुरत्वम् । लघुत्वम् । स्निग्धत्वम् । बलावहत्वम् । रुचिकारित्वम् । दीपनत्वम् । पथ्यत्वम् । पित्तदाहानिलासनाशित्वञ्च । इति राजनिर्घण्टः ॥ (तथा च ।

"रक्तशालिर्वरस्तेषु बल्यो वर्ण्यश्च दोषजित् ।
चक्षुष्यो मूत्रलः स्वर्य्यः शुक्रश्लेष्मलघूष्णहृत् ।
विषव्रणश्वासकासदाहतृड्दृष्टिपुष्टिदः ॥"

इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥)

रक्तशासनं, क्ली, (रक्तं रक्तवर्णं शास्ति वशीकरोतीति । शास् + ल्युः ।) सिन्दूरम् । इति हारावली ॥

रक्तशिग्रुः, पुं, (रक्तवर्णः शिग्रुः ।) रक्तशोभाञ्जनवृक्षः । तत्पर्य्यायः । रक्तकः २ मधुरः ३ बहुलच्छदः ४ सुगन्धः ५ केशरी ६ सिंहः ७ मृगारिः ८ । अस्य गुणाः । महावीर्य्यत्वम् । मधुरत्वम् । रसायनत्वम् । शोफाध्मानसमोरार्शिपित्तश्लेष्मनाशित्वम् । सारकत्वञ्च । इति राजनिर्घण्टः ॥

रक्तशीर्षकः, पुं, (रक्तं रक्तवर्णं शीर्षं अग्रमस्य । कन् ।) सरलद्रवः । इति रत्नमाला ॥

रक्तशृङ्गिकं, क्ली, विषम् । इति राजनिर्घण्टः ॥

रक्तसंज्ञं, क्ली, (रक्तमिति संज्ञास्य ।) कुङ्कुमम् । इति चिकाण्डशेषः ॥ (गुणादयोऽस्य कुङ्कुमशब्दे विज्ञेयाः ॥)

रक्तसन्दीपिका, स्त्री, (रक्ताय रक्तपानाय सम्यक् दीपयतीति । इनुप्र + खुल् । टापि अत इत्वञ्च ।) जलौका । इति राजनिर्घण्टः ॥

रक्तसन्ध्यकं, क्ली, ("रक्तं सन्धेवेति रघुनाथः । रक्तान् सन्धीन् अकति गच्छति आप्नोतीति । कः । इति रायमुकुटभरतमल्लिकौ ।") रक्तकल्हारम् । तत्पर्य्यायः । हल्लकम् २ । इत्यमरः । १ । १० । ३६ ॥

रक्तसरोरुहं, क्ली, (रक्तं सरोरुहम् ।) रक्तपद्मम् । इत्यमरः । १ । १० । ४१ ॥

रक्तसर्षपः, पुं, (रक्तवर्णः सर्षपः ।) राजिका । इति राजनिर्घण्टः ॥

रक्तसहा, स्त्री, (रक्तं सहते इति । सह + अच् + टाप् ।) रक्तान्धानः । इति राजनिर्घण्टः ॥

रक्तसारं, क्ली, (रक्तवर्णः सारोऽस्य ।) रक्तचन्दनम् । (यथास्य पर्य्यायः ।

"रक्तचन्दनमाख्यातं रक्ताङ्गं क्षुद्रचन्दनम् ।
तिलपर्णं रक्तसारं तत्प्रवालफलं स्मृतम् ॥"

इति भावप्रकाशस्य पूर्ब्बखण्डे प्रथमे भागे ॥)

पत्तङ्गम् । इति राजनिर्घण्टः ॥ (अस्य पर्य्यायो यथा,—

"पत्तङ्गं रक्तसारञ्च सुरङ्गं रङ्गनन्तथा ।
पट्टरञ्जकमाख्यातं पत्तूरञ्च कुचन्दनम् ॥")

इति भावप्रकाशस्य पूर्ब्बखण्डे प्रथमे भागे ॥)

रक्तसारः, पुं, (रक्तः सारो यस्य ।) अम्लवेतसः । रक्तखदिरः । इति राजनिर्घण्टः ॥ (अस्य पर्य्यायो यथा,—

"खदिरो रक्तसारश्च गायत्री दन्तधावनः ।
कण्टकी बालपत्रश्च बहुशल्यश्च यज्ञियः ॥"

इति भावप्रकाशस्य पूर्ब्बखण्डे प्रथमे भागे ॥

रक्ते सारो यस्येति । शोणितसारयुक्ते, त्रि । यथा, बृहत्संहितायाम् । ६८ । ६७ ।

"ताम्रोष्ठदन्तपाल्योर्जिह्वानेत्रान्तपायुकरचरणैः ।
रक्तैस्तु रक्तसारा बहुसुखवनितार्थपुत्रयुताः ॥")

रक्तसौगन्धिकं, क्ली, (रक्तवर्णं सौगन्धिकम् ।) रक्तकल्हारम् । इति जटाधरः ॥

रक्तस्रावः, पुं, (रक्तं स्रावयतीति । स्रु + णिच् + अच् ।) वेतसाम्लः । इति जटाधरः ॥ (रक्तस्य स्रावः ।) रक्तपतनम् । (यथा, बृहत्संहितायाम् । ८७ । ३५ ।

"कलहो नैर्ऋतभागे रक्तस्रावोऽथ गन्धकोपश्च ।
अपराह्णे चर्मकृतं विनश्यते चर्मकारभयम् ॥")

रक्तहंसा, स्त्री, (रक्ताः वर्णीभूताः हंसा अत्र ।) रागिणीविशेषः । इति हलायुधः ॥

रक्तातिसार

रक्ता, स्त्री, (रक्त + टाप् ।) गुञ्जा । (अस्याः पर्य्यायो यथा,—

"रक्ता सा काकचिञ्ची स्यात् काकानन्दी च रक्तिका ।
काकादनी काकपीलुः सा स्मृता काकवल्लरी ॥"

इति भावप्रकाशस्य पूर्ब्बखण्डे प्रथमे भागे ॥) लाक्षा । मञ्जिष्ठा । उष्ट्रकाण्डी । इति राजनिर्घण्टः ॥

रक्ताकारः, पुं, (रक्तवर्णं आकारः अवयवोऽस्य ।) प्रवालः । इति राजनिर्घण्टः ॥ (विशेषोऽस्य प्रवालशब्दे विज्ञेयः ॥)

रक्ताक्तं, क्ली, (रक्तेन रक्तवर्णेन अक्तं म्रक्षितम् ।) रक्तचन्दनम् । इति जटाधरः ॥ शोणितमिश्रिते, त्रि ॥

रक्ताक्षः, पुं, (रक्ते लोहिते अक्षिणी अस्य । "अक्ष्णोऽदर्शनात् ।" ५ । ४ । ७६ । इति अच् ।) महिषः । पारावतः । चकोरः । क्रूरः । इति मेदिनी । षे, ४४ ॥ सारसः । इति राजनिर्घण्टः ॥ (अन्यविशेषः । यथा, बृहत्संहितायाम् । ८ । ५१ ।

"रक्ताक्षमब्दं कथितं तृतीयं
यस्मिन् भयं दंष्ट्रिकृतं गदाश्च ॥")

रक्तवर्णचक्षुर्युक्ते, त्रि । (यथा,रामायणे । २ । ८८ । १६ ।

"कथमिन्दीवरश्यामो रक्ताक्षः प्रियदर्शनः ।
सुखभागी न दुःखार्हो ग्रथितो भुवि राघवः ॥"

अयन्तु सदा लक्ष्मीयुक्तो भवेत् । यथा, ज्योतिःसागरे ।

"न श्रीरत्यजति रक्ताक्षं नार्थः कनकपिङ्गलम् ।
न दीर्घबाहुमैश्वर्य्यं न सौख्यं प्रहसन्मुखम् ॥")

रक्ताङ्गं, क्ली, (रक्तवर्णमङ्गमस्य ।) विद्रुमः । कुङ्कुमम् । इति मेदिनी । गे, ४८ ॥ (रक्तचन्दनम् । यथा, भावप्रकाशे पूर्ब्बखण्डे प्रथमे भागे ।

"रक्तचन्दनमाख्यातं रक्ताङ्गं क्षुद्रचन्दनम् ।
तिलपर्णं रक्तसारं तत्प्रवालफलं स्मृतम् ॥")

रक्ताङ्गः, पुं, (रक्तमङ्गं यस्य ।) मङ्गलग्रहः । कम्पिल्लः । इति मेदिनी । गे, ४७ ॥ (अस्य पर्य्यायो यथा, वैद्यकरत्नमालायाम् ।

"कम्पिल्लकस्तु रक्ताङ्गो गुण्डारोचनिकेति सा ॥"

"कम्पिल्लः कर्कशश्चन्द्रो रक्ताङ्गो रोचनोऽपि च ॥"

इति भावप्रकाशस्य पूर्ब्बखण्डे प्रथमभागे ॥) प्रवालः । मल्लुगः । इति राजनिर्घण्टः ॥ मण्डलम् । इति शब्दरत्नावली ॥ (नागविशेषः । यथा, महाभारते । १ । ५७ । १७ ।

"ऋषभो वेगवान्नागः पिण्डारकमहाहनू ।
रक्ताङ्गः सर्व्वसारङ्गः सन्हृदः पटवासकौ ॥")

रक्ताङ्गी, स्त्री, (रक्ताङ्ग + ङीष् ।) जीवन्ती । इति मेदिनी । गे, ४६ ॥ मञ्जिष्ठा । इति भावप्रकाशः ॥

रक्तातिसारः, पुं, (रक्तं अत्यन्तं सरत्यस्मात् । सृ + घञ् ।) रोगविशेषः । "तस्य संप्राप्तिमाह । 'पित्तकृत्तु यदात्यर्थं द्रव्यमश्नाति पैत्तिके ।

रक्ताम्ब

तद्दोषाज्जायते शीघ्रं रक्तातीसार उल्बणः ॥'

तस्य चिकित्सा ।

'वत्सकतरुत्वगार्द्रा दाडिमफलसम्भवा त्वक् ।
त्वग्युगलं पलमानं विपचेदष्टाङ्गसम्मिते तोये ॥
अष्टमभागं पेयं क्वाथं मधुना पिबेत् पुरुषः ।
रक्तातिसारमुल्बणमतिशयितं नाशयेन्नियतम् ॥

इति कुटजदाडिमक्वाथः ॥ * ॥

'गोदुग्धनवनीतन्तु मधुना सितया सह ।
लीढ्वं रक्तातिसारे तु आढकं परमं महत् ॥'

इति नवनीतावलेहः ॥ * ॥

'पीतं मधुसितायुक्तं चन्दनं तण्डुलाम्बुना ।
रक्तातिसारजिद्रक्तपित्तदाहतृड्दाहमेहहृत् ॥'

चन्दनञ्च श्वेतम् । इति चन्दनकल्पः ॥" इति भावप्रकाशः ॥ (तथा च ।

"यस्तु रक्तशुद्धविरेचने शीघ्रदाहमतिरिच्यते ।
रक्तातिसार इति विज्ञेयो वैद्यैर्महामतिभिः ॥
धन्वयावरमुस्ता च बालकं बालविल्वकम् ।
बलायावला चेति क्वाथो रक्तातिसारिणाम् ॥
दाडिमञ्च कपित्थञ्च पथ्याजम्ब्वाम्रपल्लवान् ।
पिष्ट्वा देया मस्तुयुक्ता रक्तातिसारवारणाः ॥
गुडेन पक्वं दातव्यं बिल्वं रक्तातिसारिणे ।
मनुजे मधुयुक्ता वा दध्ना रक्तातिसारहाः ॥
वत्सकातिविषनागराभया
पेयितञ्च मधुमस्तुसंयुतम् ।
लेह एव मधुना च मानुषे
रक्तवाहमति वारयत्यपि ॥
कुटजत्वक् च पाठा च बिल्वं बिल्वञ्च धातकी ।
मधुना सहितं चूर्णं देयं रक्तातिसारहृत् ॥
इति रक्तातिसारः ।" इति हारीते चिकित्सितस्थाने तृतीयेऽध्याये ॥)

रक्ताधारः, पुं, (रक्तस्याधारः ।) चर्म्म । इति राजनिर्घण्टः ॥

रक्तापहं, क्ली, (रक्तमपहन्तीति । हन् + डः ।) बोलम् । इति राजनिर्घण्टः ॥

रक्तापामार्गः, पुं, (रक्तवर्णः अपामार्गः ।) रक्तवर्णापामार्गक्षुपः । राङ्गा आपाङ् इति बङ्गभाषा । लाल चिरचिरी इति हिन्दी भाषा । तत्पर्य्यायः । क्षुद्रापामार्गः २ आघट्टकः ३ दुग्धिनिका ४ रक्तविट् ५ कक्षपत्रिका ६ । अस्य गुणाः । शीतत्वम् । कटुत्वम् । कफवातव्रणकण्डूविषनाशित्वम् । संग्राहित्वम् । वान्तिकारित्वञ्च । इति राजनिर्घण्टः ॥ तत्पर्य्यायगुणाः । अथ आरक्तचिरचिरा ।

"रक्तोऽन्यो वप्पिरो वृत्तफलो धामार्गवोऽपि च ।
प्रत्यक्पर्णी केशपर्णी कथिता कपिपिप्पली ॥
अपामार्गोऽरुणो वातविष्टम्भी कफकृद्भिषक् ।
रूक्षः पूर्ब्वगुणैर्न्यूनः कथितो गुणवेदिभिः ॥
अपामार्गफलं स्वादु रसे पाके च दुर्ज्जरम् ।
विष्टम्भि वातलं रूक्षं वातपित्तप्रसादनम् ॥"

इति भावप्रकाशः ॥

रक्ताम्बरं, क्ली, (रक्तं रञ्जितमम्बरम् ।) काषायवस्त्रम् । यथा,—

"ग्रवोपरिसमासीनां रक्ताम्बरपरिच्छदाम् ।
रक्तालङ्कारसंयुक्तां गुञ्जाहारविभूषिताम् ॥"
इति तन्त्रसारधृतमुच्छिष्टचाण्डालिनीध्यानम् ॥
तद्युक्ते, त्रि ॥

रक्ताम्रः, पुं, (रक्तवर्णः ग्राम्रः ।) कोशाम्रः । इति राजनिर्घण्टः ॥ (विवरणमस्य कोशाम्र-शब्दे ज्ञातव्यम् ॥)

रक्ताम्लानः, पुं, (रक्तेन रक्तवर्णेन ग्रा सम्यक् म्लायते इति । म्ला + क्तः । समधिकरक्तवर्णत्वात्तथात्वम् ।) रक्तवर्णपुष्पविशेषः । तत्पर्य्यायः । रक्तसहा २ ग्रपरिम्लानः ३ रक्ताम्लानकः ४ रागप्रसवः ५ रक्तप्रसवः ६ कुरुवकः ७ रामालिङ्गनकामः ८ बधूत्मवप्रसवः ९ सुभगः १० भ्रमरानन्दः ११ । ग्रस्य गुणाः । कटुत्वम् । उष्णत्वम् । वातामयश्लेष्मज्वरार्शोनाशूलकाश्वासार्त्तिश्रम-मनत्वम् । वर्ण्यत्वञ्च । इति राजनिर्घण्टः ॥

रक्तार्म्म, [न्] क्ली, (रक्तं ऋच्छतीति । ऋ + मन् ।) नेत्ररोगभेदः । तस्य लक्षणं यथा,—
"पद्माभं मृदु रक्तार्म्म यन्मासं चीयते सिते ॥"
इति माधवकरः ॥

रक्तार्व्बुदः, पुं, क्ली, (रक्तानामर्व्बुदमत्र ।) रोगविशेषः । यथा, प्रातातपीयकर्म्मविपाके ।
"जलोदरयकृत्प्लीहशूलरोगव्रणानि च ।
श्वासाजीर्णज्वरच्छर्द्यभममोहगलग्रहाः ।
रक्तार्व्बुदविसर्पाद्या उपपापोद्भवा गदाः ॥"
इति मलमासतत्त्वम् ॥ * ॥

"रक्तार्व्बुदमाह ।
'दोषप्रदुष्टा रुधिरं शिराश्च
सङ्कोच्य संपीड्य ततस्त्वपाकम् ।
सस्रावसुन्नह्यति मांसपिण्डं
मांसाङ्कुरैराचितमाशु वृद्धिम् ॥
स्रवत्यजस्रं रुधिरं प्रदुष्ट-
मसाध्यमेतद्रुधिरार्बुदन्तु ।
रक्तक्षयोपद्रवपीड़ितत्वात्
पाण्डुर्भवेदर्व्बुदपीड़ितश्च ॥'
दोषोऽत्र पित्तं रुधिरं शिराश्च सङ्कोच्य संपीड्य संदूषीकृत्य मांसाङ्कुरैः सर्व्वेष्वर्व्बुदेषु दूष्यत्वं रक्तजे तु विशेषतो रक्तदुष्टिः एवं मांसार्व्बुदे विशेषतो मांसदुष्टिर्बोद्धव्या । ततो मांसपिण्डमुन्नह्यति उन्नतं करोति । अपाकं ईषत्पाकं यथा स्यादेवमिति क्रियाविशेषणम् । ईषत्पाकश्चैकदेशपाकेन । रक्तक्षयोपद्रवपीड़ितत्वात् रक्तक्षयोपद्रवाः सुश्रुतेनोक्ताः । तैः पीड़ितत्वात् ग्रर्व्बुदपीड़ितः ॥ * ॥ ग्रथार्व्बुदस्य चिकित्सा ।
'ग्रन्यार्व्बुदानां न यतो विशेषः
प्रदेशहेत्वाकृतिदोषदूष्यैः ।
ग्रतश्चिकित्सेच्छिरगार्व्बुदानि
विधानविद्ग्रन्थिचिकित्सितेन ॥
हरिद्रालोध्रपद्मङ्गमधूमम्बःशिलाः ।
मधुप्रगाढो लेपोऽयं मेदोऽर्व्बुदहरः परः ॥
मूलकस्य कृतः क्षारो हरिद्रायास्तथैव च ।
शृङ्गवेरेण संयुक्तो लेपः सिद्धोऽर्व्बुदापहः ॥
वटदुग्धकुष्ठरोमकलिप्तं बद्धं वटस्य पत्रेण ।
ग्रध्यस्थि सप्तरात्रान्मेदर्व्बुदमुद्धरेत् ॥
शिग्रुमूलकयोर्ब्बीजं रक्तोष्णं सुरसा यवम् ।
तक्रेणाश्वरिपुं पिष्ट्वा लिम्पेदर्व्बुदशान्तये ॥'
रक्तोष्णं सर्षपम् । सुरसा तुलसी । यवं इन्द्रयवम् । ग्रश्वरिपुं करवीरम् ।" इति भावप्रकाशः ॥

रक्तार्शः, [स्] क्ली, (रक्तजनितमर्शः ।) ग्रर्शोरोगविशेषः । तस्य लक्षणमाह ।
"रक्तोल्वणा गुदे कीलाः पित्ताकृतिसमन्विताः ।
वटप्ररोहसदृशा गुञ्जाविद्रुमसन्निभाः ॥
तेऽत्यर्थं दुष्टसुघ्राघ्य गाढ़विड्भिः प्रपीड़िताः ।
स्रवन्ति सहसा रक्तं तस्य चातिप्रवृत्तितः ॥
भेकाभः पीड्यते दुःखैः शोणितक्षयसम्भवैः ।
हीनवर्णबलोत्साहो हतौजाः कलुषेन्द्रियः ॥
विट्शावं कठिनं रूक्षमधो वायुर्न वर्त्तते ।
तनु चारुणवर्णञ्च फेणिलञ्चास्यगर्शसाम् ॥
कव्यूरगुदशूलञ्च दौर्ब्बल्यं यदि वाधिकम् ।
तत्रानुबन्धो वातस्य हेतुर्यदि च रूक्षणम् ॥
स्निग्धिलं श्वेतपीतञ्च विट्स्निग्धं गुरु शीतलम् ।
यद्यर्शसां घनश्चास्रक् तत्तु सत्याशु पिच्छिलम् ॥
गुदं सपिच्छं स्रिमितं गुरु स्निग्धञ्च कारणम् ।
श्लेष्मानुबन्धो विज्ञेयस्तत्र रक्तार्शसां बुधैः ॥
गुदे कीला ग्रर्शांसि । पित्ताकृतिसमन्विताः पित्तार्शोलक्षणयुक्ताः । ग्राकारेण च वटप्ररोहादिसदृशाः । दुःखैः रोगैः । त्वक्पारुष्याम्लशीतप्रार्थनादिभिः कलुषेन्द्रियः ग्राकुलसर्व्वेन्द्रियः । रक्तजस्यापि वातोल्वणस्य लक्षणमाह । तत्र रक्तार्शसि अनुबन्धः उल्वणत्वम् । रूक्षणं रूक्षयतीति रूक्षणं रूक्षं द्रव्यम् । पित्तोल्वणस्य लक्षणं रक्तोल्वणा गुदे कीला पित्ताकृतिसमन्विता इत्यादिनैवोक्तम् । रक्तपित्तयोः समानलिङ्गत्वात् ॥ * ॥ कफोल्वणस्य लक्षणमाह । सपिच्छं पिच्छिलार्द्रस्रिमितमार्द्रचर्म्मावगुण्ठितमिव । तस्य चिकित्सा ।
रक्तार्शसामुपेक्षेत रक्तमादौ स्रवद्भिषक् ।
दुष्टाश्रेणिगृहीते स्तु शूलानाहाङ्गमार्दवैः ॥
चन्दनकिराततिक्तकधन्वयवासाः सनागराः कथिताः ।
रक्तार्शसां प्रशमना दार्व्वीत्वगुशीरनिम्बा वा ॥
चन्दनमत्र रक्तचन्दनम् । इति चन्दनादिक्वाथः ॥
नवनीततिलाभ्यासात्
केशरनवनीतशर्करााभ्यासात् ।
दधिसरमथिताभ्यासात्
गुदजाः शाम्यन्ति रक्तवहाः ॥
दध्नस्तूपरि यो भागो घनः स्नेहयुतः सरः ।
मथितं सररहितम् । निर्ज्जलं वस्त्रपूतं दधि ।
सपद्मकेशरं क्षौद्रं नवनीतं नवं लिहन् ।
सिताकेशरसंयुक्तं रक्तार्शःसु सुखी भवेत् ॥
पयसा घृतेन यूषैः सतीनसुद्गाढ़कौमसूराणाम् ।
ओदनमद्याद्रसैर्मधुरैरीषत्सुगन्धैश्च ॥

समङ्गोत्पलमोचाक्षतिरीटतिलचन्दनैः ।
सिद्धं छागीपयो दद्यादृगुदजे शोणितात्मके ॥
समङ्गा लज्जालुः । मोचाक्षो मोचरसः । तिरीटो लोध्रः । चन्दनमत्र रक्तचन्दनम् । समङ्गादिदुग्धम् ।
भावितं रजनीचूर्णं स्नुहीक्षीरैः पुनः पुनः ।
बध्नतां सुदृढ़ं सूत्रं छिनत्त्यर्शो भगन्दरम् ॥
क्षारसूत्रम् ॥
नाड्यानाभिसमुत्थेषु तथा मेढ्रादिजेष्वपि ।
क्रियामर्शःसु कुर्व्वीत तत्र तत्र यथोदिताम् ॥
चर्म्मकीलन्तु संछिद्य दहेत् क्षारेण चाग्निना ।
वेगावरोधन्तीक्ष्णयानान्युत्कटकासनम् ।
यथास्वं दोषलक्षान्नमर्शसः परिवर्ज्जयेत् ॥"
इति भावप्रकाशः ॥
(यथा चास्य लक्षणानि ।
"रक्तजानि न्यग्रोधप्ररोहविद्रुमकाकणन्तिकाफलसदृशानि पित्तलक्षणानि च यदावगाढ़पुरीषप्रपीड़ितानि भवन्ति तदात्यर्थं दुष्टमनल्पमल्पक् सहसा विसृजन्ति तस्यैवातिप्रवृत्तौ शोणितातियोगोपद्रवा भवन्ति ।" इति सुश्रुते निदानस्थाने द्वितीयेऽध्याये ॥ ग्रथास्य चिकित्सा ।
"रक्तार्शसामुपचारं वक्ष्यामि शृणु पुत्रक ! ।
प्रातस्त्रिलान् भक्षयेच्च नवनीतविमिश्रितान् ॥
सितानागरसंयुक्तं नवनीतं सशर्करम् ।
केशरं मातुलुङ्गस्य विड़ङ्गशर्करायुतम् ॥
भक्षेत् कुष्माण्डावलेहं नवनीतेन शर्करान् ।
एतेन रक्तगुदजान् शमयन्ति विचक्षणाः ॥
समङ्गा शाल्मलीपुष्पं चन्दनं ककुभत्वचम् ।
नीलोत्पलमजाक्षीरं पिष्ट्वा पानमसृग्दरात् ॥
कुटजमूलसकेशरमुत्पलं
खदिरधातकिमूलशृतं पयः ।
पिबति नक्तमयोगमसृग्भवं
गुदजवैकृतसङ्घविनाशनम् ॥"
इति रक्तार्शश्चिकित्सा ॥
इति हारीते चिकित्सितस्थाने १२ अध्यायः ॥)

रक्तालुः, पुं, (रक्तः रक्तवर्णः ग्रालुः ।) रक्तवर्णालुविशेषः । शर्करकन्द ग्रालु इति भाषा ॥ तत्पर्य्यायः । रक्तपिण्डालुः २ रक्तपिण्डकः ३ लोहितः ४ रक्तकन्दः ५ लोहितालुः ६ । ग्रस्य गुणाः । शीतत्वम् । मधुरास्लत्वम् । भ्रमपित्तदाहापहत्वम् । वृष्यत्वम् । बलपुष्टिकारित्वम् । गुरुत्वञ्च । इति राजनिर्घण्टः ॥

रक्तिका, स्त्री, (रक्तो रक्तवर्णोऽस्यस्याः । रक्त + "ग्रत इनिठनौ ।" ५।२।११५ । इति ठन् ।) गुञ्जा । (ग्रस्याः पर्य्यायो यथा,—
"साङ्कुष्ठा क्षणला गुञ्जा रक्तिका काकणन्तिका ।
काकादनी काकतिक्ता काकचञ्चा शिखण्डनी ॥"
इति वैद्यकरत्नमालायाम् ॥
"रक्ता सा काकचिञ्ची स्यात् काकणन्ती च रक्तिका ।
काकादनी काकपीलुः सा स्मृता काकवल्लरी ॥"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥)

राजिका। इति राजनिर्घण्टः॥ रक्तिकापरिमाणञ्च॥

रक्तेक्षुः, पुं, (रक्तो रक्तवर्ण इक्षुः।) रक्तवर्णेक्षुः। लाल आक् इति भाषा॥ तत्पर्य्यायः। सूक्ष्मपत्रः २ शोणः ३ लोहितः ४ उत्कटः ५ मधुरः ६ दृढमूलः ७ लोहितेक्षुः ८। अस्य गुणाः। मधुरत्वम्। पाके शीतलत्वम्। स्वादुत्वम्। पित्तदाहहरत्वम्। वृष्यत्वम्। तेजोबलविवर्द्धनत्वञ्च। इति राजनिर्घण्टः॥

रक्तेरण्डः, पुं, (रक्तवर्णः एरण्डः।) वृक्षविशेषः। लाल भेरण्डा इति भाषा॥ तत्पर्य्यायः। व्याघ्रः २ हस्तिकर्णः ३ रुचुः ४ उरुवूकः ५ नागवर्णः ६ चक्षुः ७ उत्तानपत्रकः ८ करपर्णः ९ पाचनः १० स्निग्धः ११ व्याघ्रतलः १२ रक्तकः १३ चित्रवीर्य्यः १४ हस्तेरण्डः १५। अस्य गुणाः श्वयथुपवनश्रान्तिरक्तार्शिपाण्डुभ्रान्तिश्वासज्वरारोचकनाशित्वम्। लघुत्वञ्च। इति राजनिर्घण्टः॥ तत्पर्य्यायगुणाः।

"शुक्ल एरण्ड आमण्डश्चित्रो गन्धर्वहस्तकः।
पञ्चाङ्गुलो वर्द्धमानो दीर्घदण्डो वड़म्बकः॥
रक्तोऽपरोरुवूकः स्यादूरुवूको रुचुस्तथा।
व्याघ्रपुच्छश्च वातारिश्चुरुत्तानपत्रकः॥
एरण्डयुग्मं मधुरसृष्णं गुरु विनाशयेत्।
शूलशोथकटीवस्तिशिरःपीड़ोदरज्वरान्॥
श्वासश्वासकफानाहकासकुष्ठाममारुतान्।
एरण्डपत्रं वातघ्नं कफक्रिमिविनाशनम्।
मूत्रकृच्छ्रहरश्चापि पित्तरक्तप्रकोपणम्॥
वातार्य्यगदलं गुल्मवस्तिशूलहरं परम्।
कफवातकृमीन् हन्ति वृद्धिं सन्निधामपि॥
एरण्डफलमत्युष्णं गुल्मशूलानिलापहम्।
यकृत्प्लीहोदरार्शोघ्नं कटुकं दीपनं परम्।
तद्बन्धघ्नं च विड्भेदी वातश्लेष्मोदयापहः॥"

इति भावप्रकाशः॥

रक्तेर्व्वारुः, पुं, (रक्तः रक्तवर्णः एर्व्वारुः।) इन्द्रवारुणी। इति राजनिर्घण्टः॥ (विशेषोऽस्येन्द्रवारुणीशब्दे विज्ञेयः॥)

रक्तोत्पलं, क्ली, (रक्तं रक्तवर्णमुत्पलम्।) रक्तपद्मम्। तत्पर्य्यायः। रक्तसरोरुहम् २ कोकनदम् ३। इत्यमरः। १। १०। ४२॥ (यथा, हृहत्संहितायाम्। २६। ६।

"विन्धाच्च सिन्दुवारेण मौक्तिकं कुङ्कुमं कुसुम्भेन। रक्तोत्पलेन राजा मन्त्री नीलोत्पलेनोक्तः॥"

तथास्य गुणाः।

"धवलं कमलं शीतं मधुरं कफपित्तजित्। तस्मादल्पगुणं किञ्चिदन्यत् रक्तोत्पलादिकम्॥"

इति भावप्रकाशस्य पूर्ब्बखण्डे प्रथमे भागे॥)

रक्तोत्पलः, पुं, (रक्तोत्पलमिव पुष्पमस्यस्य। अर्शआद्यच्।) श्वेतमल्लिकावृक्षः। इति राजनिर्घण्टः॥

रक्तोत्पलाभः, पुं, (रक्तोत्पलस्य आभेव आभास्य।) शोणवर्णः। इति जटाधरः। तद्युक्ते, त्रि॥

रक्तोपलं, क्ली, (रक्तमुपलम्।) गैरिकम्। इति हारावली। ११५॥ (गुणादयोऽस्य गैरिकशब्दे ज्ञेयाः॥)

रक्ष, णि पालने। इति कविकल्पद्रुमः॥ (भ्वा०-पर०-सक०-सेट्।) णि, रक्षितोऽस्ति। इति दुर्गादासः॥

रक्षः, [स्] क्ली, (रक्षत्यस्मादिति। रक्ष+"सर्व्वधातुभ्योऽसुन्।" उणा० ४। १८८। इति असुन्।) राक्षसः। इत्यमरः। १। १। ६२॥ तद्विशेषो यथा,—

"दृष्ट्वा तु विकलान् अङ्गाननाथान् रोगिणस्तथा दया न जायते यस्य स रक्ष इति मे मतिः॥"

इत्याग्नेये यमशर्म्मिलोपाख्याननामाध्यायः॥

रक्षोघ्नौषधं यथा,—

मनुरुवाच।

"रक्षोघ्नानि विषघ्नानि यानि धार्य्याणि भूभुजा। अगदानि समाचक्ष्व तानि धर्म्मभृतांवर॥"

मत्स्य उवाच।

पचिका रोहिणी चैव रक्तमाला महौषधी। तथामलकवन्दारं या च चित्रपटोलिका॥ काकोली क्षीरकाकोली पीलुपर्णी तथैव च। कैष्णिनी वृश्चिकाली च महानागा धृतावरी॥ तथा गरुड़वेगा च स्थले कुसुदिनी तथा। स्थले चोत्पलिनी या च महाभूमिलता च या। उन्मादिनी सोमराजी सर्व्वरत्नानि पार्थिव। विशेषाम्बरकतान्यच्च कीटपक्ष्यविशेषतः॥ जीवजाताश्च मण्यः सर्व्वे धार्य्या विशेषतः। रक्षोघ्नाश्च यशस्याश्च कृत्या वेतालनाशनाः॥"

इति मात्स्ये १९२ अध्यायः॥

रक्षःसभं, क्ली, (रक्षसां राक्षसानां सभा। क्लीवत्वमभिधानात्।) रक्षःसमूहः। इत्यमरः। ३। ५। २३॥

रक्षकः, त्रि, (रक्षतीति। रक्ष+ण्वुल्।) रक्षाकर्त्ता। यथा,—

"गोरक्षः सहदेवश्च नकुलो हयरक्षकः। वैराटे कुरुदायादो नराणां मातुलक्रमः॥"

इति पुराणम्॥

रक्षणं, क्ली, (रक्ष+भावे ल्युट्।) रक्षा। यथा,

"इति प्रणयबद्धाभिर्गोपीभिः कृतरक्षणम्। पाययित्वा स्तनं माता संन्यवेशयदात्मजम्॥"

इति श्रीभागवते १० स्कन्धे ६ अध्यायः॥

रक्षणारकः, पुं, सूचक्रकृच्छ्ररोगः। इति शब्दरत्नावली॥ क्वचित् पुस्तके रक्षणीरकोऽपि पाठः॥

रक्षणिः, स्त्री, त्रायमाणा लता। इति राजनिर्घण्टः॥

रक्षा, स्त्री, (रक्षणमिति। रक्ष+"गुरोश्च हलः।" ३। ३। १०३। इति अः। स्त्रियां टाप्।) रक्षणम्। (यथा, कुमारे। २। २८।

"मयि सृष्टिर्हि लोकानां रक्षा युष्माखवस्थिता॥") जतु। इति मेदिनी। षे, २३॥ भस्म। इति शब्दरत्नावली॥ यज्ञोदाहृता रक्षा यथा,—

"रक्षां विदधिरे सम्यक् गोपुच्छभ्रमणादिभिः।
गोभूत्रेण स्नापयित्वा पुनर्गोरजसार्भकम्॥
रक्षां च चक्रुः पवित्रता द्वादशाङ्गेषु नामभिः।
गोप्यः संस्पृष्टसलिला अङ्गेषु करयोः पृथक्॥
न्यस्तात्मन्यथ बालस्य बीजन्यासमकुर्व्वत॥
अव्याद्जोऽङ्घ्रिमणिमांस्तव जानुयोरू
यज्ञोऽच्युतः कटितटं जठरं हयास्यः।
हृत् केशवस्त्वदुर ईश इनस्तु कण्ठं
विष्णुर्भुजं मुखमुरुक्रम ईश्वरः कम्॥
चक्रीगदी सहगदो हरिरस्तु पश्चात्
त्वत्पार्श्वयोर्धनुरसी मधुहा जनञ्च।
कोणेषु शङ्ख उरुगाय उपर्य्युपेन्द्रस्तार्क्ष्यः क्षितौ हलधरः पुरुषः समन्तात्॥
इन्द्रियाणि हृषीकेशः प्राणान् नारायणोऽवतु।
श्वेतद्वीपपतिश्चित्तं मनो योगेश्वरोऽवतु॥
पृश्निगर्भस्तु ते बुद्धिमात्मानं भगवान् परः।
क्रीड़न्तं पातु गोविन्दः शयानं पातु माधवः॥
व्रजन्तमव्यादेकुण्ठ आसीनं त्वां श्रियः पतिः।
भुञ्जानं यज्ञभुक् पातु सर्व्वग्रहभयङ्करः॥
डाकिन्यो यातुधान्यश्च कुष्माण्डा येऽर्भकग्रहाः।
भूतमातृपिशाचाश्च यक्षरक्षोविनायकाः॥
कोटरा रेवती ज्येष्ठा पूतना मातृकादयः।
उन्मादा ये ह्यपस्मारा देहप्राणेन्द्रियद्रुहः॥
स्वप्नदृष्टमहोत्पाता वृद्धबालग्रहाश्च ये।
सर्व्वे नश्यन्तु ते विष्णोर्नामग्रहणभीरवः॥"

इति श्रीभागवते १० स्कन्धे ६ अध्यायः॥ * ॥

अथ पौर्णमास्यां रक्षाबन्धनम्। राखीबाँधा इति भाषा। यथा,—

"पौर्णमास्यां हरे रक्षाबन्धनं विधिपूर्व्वकम्। व्रजराजकुमारत्वात् केचिदिच्छन्ति साधवः॥"

तत्र भद्रादिसद्भावे तामतिक्रम्यैव कुर्य्यात्। तथा च स्मृत्यन्तरे।

"भद्रायां द्वे न कर्त्तव्ये श्रावणी फाल्गुनी तथा। श्रावणी नृपतिं हन्ति ग्रामान् दहति फाल्गुनी॥"

विधिश्च भविष्योत्तरे।

"उपाकर्म्मदिने प्रोक्तौषधीनाञ्चैव तर्पणम्। ततोऽपराह्णसमये रक्षापोटलिकां शुभाम्॥ कारयेद्धतैः शुक्लैः सिद्धार्थैर्हेमभूषिताम्। वस्त्रैर्विचित्रैः कार्पासैः क्षौमैर्वा मलवर्ज्जितैः। विचित्रं ग्रथितं सूत्रं स्थापयेद्राजनोपरि॥ उपलिप्तगृहमध्ये दत्तचतुष्के न्यसेच्छुभं पीठम्। तत्रोपविश्य राजा सामात्यः सपुरोहितः ससुहृत्॥ तदनु पुरोधा नृपते रक्षां बध्नीत मन्त्रेण। येन बद्धो बली राजा दानवेन्द्रो महाबलः। तेन त्वां प्रतिबध्नामि रक्षे मा चल मा चल॥"

वैदिकञ्च। यदा वन्न दाक्षायणा हिरण्यः शतानीका मनस्य माना तन्मया बध्नामि शतं शारदाया युष्मान् जरदष्टिर्यथा सम्।

"ब्राह्मणैः क्षत्रियैर्वैश्यैः शूद्रैश्चान्यैश्च मानवैः। कर्त्तव्यो रक्षणाचारो विप्रान् संपूज्य शक्तितः॥ अनेन विधिना यस्तु रक्षिकाबन्धमाचरेत्।

रक्षा

स सर्व्वदोषरहितः सुखं संवत्सरं वसेदिति॥" अथ तद्दिननिर्णयार्थं उपाकर्म्मदिननिर्णयः क्रियते। यदाह स्मृत्यन्तरे।

"उपाकर्म्म तु कुर्व्वन्ति ते सामगऋग्यजुर्व्विदः। ग्रहसंक्रान्तियुक्तेषु हस्तश्रवणपर्व्वसु॥"

तथा च। सामवेदिनां भाद्रस्य हस्तानक्षत्रं ऋग्वेदिनां श्रावणस्य श्रवणनक्षत्रं यजुर्व्वेदिनां श्रावणी पूर्णिमोपाकर्म्मकालः। उपक्रमकण्डिका-कौथुमरूपं कर्म्म उपाकर्म्म। अत्र कारणाभावे भाद्रे श्रावणोऽपि विधेयम्।

"अदृष्ट्वौषधयस्तस्मिन् मासे न हि भवन्ति तेत्। तदा भाद्रपदे मासि श्रावणोऽपि तदिष्यते॥"

इति बह्वृच्परिशिष्टवचनात्॥

श्रावणपक्षमनुकल्पः। तदाह गर्गः।

"यदि स्यात् श्रावणं पर्व्व ग्रहसंक्रान्तिदूषितम्। स्यादुपाकरणं शुक्लपक्षस्यां श्रावणस्य च॥" इति॥

अत्र भूतविद्धा पूर्णिमा च निषिद्धा। तथा च कालिकापुराणे।

"चतुर्दश्यां समुत्पन्नावसुरौ मधुकैटभौ। वेदान् स्वीकुर्व्वतः पद्मयोनेस्तौ जघ्नतुः श्रुतीः॥ हत्वा तावसुरौ देवः पातालतलवासिनौ। आहृता ताः श्रुतीस्तस्मै ददौ लोकगुरुः स्वयम्॥ संप्राप्नवान् श्रुतीर्ब्रह्मा पर्व्वण्योदधिके पुनः। अतो भूतयुते तस्मिन्नोपाकरणमिष्यते। आसुरं वर्ज्जयेत् कालं वेदाहरणशङ्कयेति॥"

व्यासोऽपि।

"श्रवणेन तु यत् कर्म्म उत्तराषाढसंयुतम्। संवत्सरकृतोऽध्यायस्तत्क्षणादेव नश्यति॥ अनिष्टासंयतं कुर्य्याच्छ्रावणं कर्म्म यद्भवेत्। तत् कर्म्म सफलं विद्यादुपाकरणसंज्ञकमिति॥"

इति श्रीहरिभक्तिविलासे ५१ विलासः॥

(रक्षाकर्म्म यथा। उदकुम्भाचापो गृहीत्वा प्रोक्षयन् रक्षाकर्म्म कुर्य्यात् तद्यथाः।

"कृत्यानां प्रतिघातार्थं तथा रक्षोभयस्य च। रक्षाकर्म्म करिष्यामि ब्रह्मा तदनुमन्यताम्॥ नागाः पिशाचा गन्धर्व्वाः पितरो यक्षराक्षसाः। अभिद्रवन्ति ये ये त्वां ब्रह्माद्या घ्नन्तु तान् सदा॥ पृथिव्यामन्तरीक्षे च ये चरन्ति निशाचराः। दिक्षु वास्तुनिवासाश्च पान्तु त्वान्ते नमस्कृताः॥ पान्तु त्वां मुनयो ब्राह्म्या दिव्या राजर्षयस्तथा। पर्व्वताश्चैव नद्यश्च सर्व्वाः सर्व्वेऽपि सागराः॥ अग्नी रक्षतु ते जिह्वां प्राणान् वायुस्तथैव च। सोमो व्यानमपानन्ते पर्जन्यः परिरक्षतु॥ उदानं विद्युतः पान्तु समानं स्तनयित्नवः। बलमिन्द्रो बलपतिर्मनुर्मन्यं मतिन्तथा॥ कामांस्ते पान्तु गन्धर्व्वाः सत्त्वमिन्द्रोऽभिरक्षतु। प्रज्ञान्ते वरुणो राजा समुद्रो नाभिमण्डलम्॥ चक्षुः सूर्य्यो दिशः श्रोत्रे चन्द्रभाः पातु ते मनः। नक्षत्राणि सदा रूपं छायां पान्तु निशास्तव॥ रेतस्त्वाप्याययन्त्वापो रोमाण्योषधयस्तथा। आकाशं खानि ते पातु देहन्तव वसुन्धरा॥ वैश्वानरः शिरः पातु विष्णुस्तव पराक्रमम्।

रक्षोघ्नः

पौरुषं पुरुषश्रेष्ठो ब्रह्मात्मानं भुवौ भुवौ॥ एता देहे विशेषेण तव नित्या हि देवताः। एतासां सततं पान्तु दीर्घमायुरवाप्नुहि॥ स्वस्ति ते भगवान् ब्रह्म स्वस्ति देवाश्च कुर्व्वताम्। स्वस्ति ते चन्द्रसूर्य्यौ च स्वस्ति नारदपर्व्वतौ॥ स्वस्त्यग्निश्चैव वायुश्च स्वस्ति देवाः सहेन्द्रगाः। पितामहकृता रक्षा स्वस्त्यायुर्वर्द्धतां तव॥ ईतयस्ते प्रशाम्यन्तु सदा भव गतव्यथः॥"

इति स्वाहा॥

एतैर्वेदात्मकैर्मन्त्रैः कृत्या व्याधिविनाशनैः। मयैवं कृतरक्षस्त्वं दीर्घमायुरवाप्नुहि॥"

इति सुश्रुते सूत्रस्थाने पञ्चमेऽध्याये॥)

रक्षापत्रः, पुं, (रक्षार्थं पत्रमस्य।) भूर्जवृक्षः। इति राजनिर्घण्टः॥ भूर्जत्वचि, क्ली॥

रक्षिका, स्त्री, (रक्षैव। रक्षा+स्वार्थे कन्। टापि अत इत्वम्।) रक्षा। यथा,—

"अनेन विधना यस्तु रक्षिकाबन्धमाचरेत्। स सर्व्वदोषरहितः सुखं संवत्सरं वसेत्॥"

इति हरिभक्तिविलासे ५१ विलासः॥

रक्षितं, त्रि, (रक्ष+क्तः।) कृतरक्षम्। तत्-पर्य्यायः। त्रातम् २ त्राणम् ३ अवितम् ४ गोपायितम् ५ गुप्तम् ६। इत्यमरः।३।१।१०६॥ (यथा, मनुः।११।२३।

"कल्पयित्वास्य वृत्तिञ्च रक्षेदेनं समन्ततः। राजा हि धर्म्मषड्भागं तस्मात् प्राप्नोति रक्षितात्॥"

क्ली, भावे क्तः। रक्षा॥ * ॥ स्त्रियां टाप्। अक्षरोविशेषः। यथा, महाभारते।१।६५।५०।

"अलम्बुषा मिश्रकेशी विद्युत्पर्णा तिलोत्तमा। अरुणा रक्षिता चैव रम्भा तद्वन्मनोरमा॥")

रक्षिता, [क्तृ] पुं, (रक्षतीति। रक्ष+तृच्।) रक्षाकर्त्ता। यथा,—

"आयव्ययज्ञो लोकज्ञो देशोत्पत्तिविशारदः। कृताकृतज्ञो भृत्यानां ज्ञेयः स्यादेष रक्षिता॥"

इति मात्स्ये १८६ अध्यायः॥

रक्षिवर्गः, पुं, (रक्षिणां वर्गः समूहः।) राजाज्ञ-रक्षकगणः। तत्पर्य्यायः। अनीकस्थः २। इत्य-मरः।२।८।६॥

रक्षोघ्नं, क्ली, (रक्षो राक्षसं हन्तीति। हन्+टक्।) काञ्जिकम्। इति हेमचन्द्रः॥ हिङ्गु। इति राजनिर्घण्टः॥

रक्षोघ्नः, पुं, (रक्षो हन्तीति। हन्+टक्।) भल्लातकवृक्षः। इति चिकित्साशेषः॥ श्वेत-सर्षपः। इति रत्नमाला॥ रक्षोघ्नमन्त्रो यथा,—

"स्थाने हृषीकेश तव प्रकीर्त्त्या जगत् प्रहृष्यत्यनुरज्यते च। रक्षांसि भीतानि दिशो द्रवन्ति सर्व्वे नमस्यन्ति च सिद्धसंघाः॥"

इति भगवद्गीतायाम्। ११। ३६॥

"स्थाने इत्यव्ययं युक्तमित्यर्थे। हे हृषीकेश सर्व्वेन्द्रियप्रवर्त्तक यतस्त्वमेवात्यन्ताद्भुतप्रभावो भक्तवत्सलश्च ततस्तव प्रकीर्त्त्या प्रहृष्यत्या

रघुः

कीर्त्त्या निरतिशयप्राशस्त्यस्य कीर्त्तनेन अव-शेन च न केवलमहमेव प्रहृष्यामि किन्तु सर्व्व-मेव जगच्चेतनमात्रं रक्षोविरोधि प्रहृष्यति प्रकृष्टं हर्षमाप्नोति इति यत् तत् स्थाने युक्त-मित्यर्थः। तथा सर्व्वं जगत् अनुरज्यते च त्वद्वि-षयमनुरागमुपैति इति च यत्तदपि युक्तमेव। यथा रक्षांसि भीतानि सन्ति दिशो द्रवन्ति सर्व्वासु दिक्षु पलायन्त इति यत्तदपि युक्तमेव। यथा सर्व्वेषां सिद्धानां कपिलादीनां संघा नमस्यन्ति चेति यत्तदपि युक्तमेव। सर्व्वत्र तव प्रकीर्त्त्या इत्यस्यान्वयः स्थाने इत्यस्य च। अयं श्लोको रक्षोघ्नमन्त्रः प्राच्यप्रसिद्धः।" इति षष्ठीकायां मधुसूदनसरस्वती॥ (रक्षोविनाशके, त्रि। यथा सुश्रुते।१।५। "वेदनारक्षोघ्नैर्धूपै-र्धूपयेद्रक्षोघ्नैश्च मन्त्रै रक्षां कुर्व्वीत॥")

रक्षोघ्नी, स्त्री, (रक्षो हन्तीति। हन+टक्। ङीप्।) वचा। इति रत्नमाला॥

रक्षोजननी, स्त्री, (रक्षसां जननीव।) रात्रिः। इति त्रिकाण्डशेषः॥ राक्षसमाता च॥

रक्षोहा, [न्] पुं, (रक्षो हन्तीति। हन्+क्विप्।) गुग्गुलुः। इति राजनिर्घण्टः॥ (ऋषिविशेषः। स तु ऋग्वेदस्य १० मण्डलस्य १६२ सूक्तस्य ऋषिः॥ राक्षसहन्तरि, त्रि। यथा, ऋग्वेदे। १०।६७।६।

"विप्रः स उच्यते भिषग्रक्षोहा मीवचातनः॥"

"रक्षोहा रक्षोहन्ता।" तद्भाष्ये सायणः॥)

रक्ष्णः, पुं, (रक्ष+"यजयाचयतविच्छप्रच्छरक्षो नङ्।" ३।३।९०। इति नङ्।) बाणम्। इत्यमरः।३।२।८॥

रख, सर्पणे। इति कविकल्पद्रुमः॥ (भ्वा०-पर०-सक०-सेट्।) रखति। इति दुर्गादासः॥

रख, इ सर्पणे। इति कविकल्पद्रुमः॥ (भ्वा०-पर०-सक०-सेट्।) इ, रङ्खते। इति दुर्गादासः॥

रग, इ गतौ। इति कविकल्पद्रुमः॥ (भ्वा०-पर०-सक०-सेट्।) इ, रङ्गते। इति दुर्गादासः॥

रग, क स्वादे आपने। इति कविकल्पद्रुमः॥ (चुरा०-पर०-सक०-अक०च-सेट्।) क, रागयति। इति दुर्गादासः॥

रग, म ए गङ्गे। इति कविकल्पद्रुमः॥ (भ्वा० पर०-अक०-सेट्।) म, रगयति। ए, अरगीत्। गङ्गः गङ्गा। रगति रोगी कुपथ्येभ्यः। इति दुर्गादासः॥

रघ, इ क भासि। इति कविकल्पद्रुमः॥ (चुरा०-पर०-अक०-सेट्।) इ क, रङ्घयति। भासि दीप्तौ। इति दुर्गादासः॥

रघ, इ ङ गमने। इति कविकल्पद्रुमः॥ (भ्वा०-आत्म०-सक० सेट्।) इ, रङ्घते। ङ, रङ्घते। इति दुर्गादासः॥

रघुः, पुं, (लङ्घति ज्ञानसीमां प्राप्नोतीति। लङ्घि+"लङ्घिबन्धोर्नलोपश्च।" उणा० १।३०। इति कुः नलोपश्च। "बालमूललघ्वसुराल-मङ्गुलीनां वा लो रत्वमापद्यते इति वक्तव्यम्।"

८। २। १८। इति काशिकोक्त्या तस्य रत्वम्। इत्युज्ज्वलदत्तः।) सूर्य्यवंशीयदिलीपराजपुत्रः। स तु अयोध्याधिपतिः। श्रीरामचन्द्रस्य प्रपितामहः। यथा, रघुः। ३। १८।

"स जातकर्म्मण्यखिले तपस्विना
तपोवनादेत्य पुरोधसा कृते।
दिलीपसूनुर्म्मणिराकरोद्भवः
प्रयुक्तसंस्कार इवाधिकं बभौ॥"

तन्नामश्रुत्पत्तिर्यथा,—

"श्रुतस्य यायादयमन्तमर्भक-
स्तथा परेषां युधि चेति पार्थिवः।
अवेक्ष्य धातोर्गमनार्थमर्थ-वि-
चकार नाम्ना रघुमात्मसम्भवम्॥"

इति रघुवंशे महाकाव्ये। ३। २१॥

(अस्य पिता दिलीपः माता सुदक्षिणा। अयं हि अश्वमेधयज्ञदीक्षितस्य पितुर्यज्ञीयाश्वरक्षणे नियुक्तस्तदश्वहारिणं देवराजं जितवान्। अथ बहुकालं राज्यसुखमनुभूय विश्वजिन्नामाध्वरे सर्व्वं वित्तं ब्राह्मणसात् कृतवानपि गुरुदक्षिणार्थिना वरतन्तुशिष्येण कौत्सेनाभ्यर्थितः कुबेरं विजित्य धनान्यादाय तस्मै प्रदत्तवान्। अथ स्वपुत्रमजं यौवराज्येऽभिषिच्य विगतविषयाभिलाषो योगसमाधिना भगवत्-सायुज्यमाप्तवान्। तथा च रघुवंशे। ८ सर्गे।

"अथ वीक्ष्य रघुः प्रतिष्ठितं
प्रकृतिष्वात्मजमात्मवत्तया।
विषयेषु विनाशधर्म्मसु
त्रिदिवस्थेष्वपि निःस्पृहोऽभवत्॥"
"अथ काश्चिदजय्यपेक्षया
गमयित्वा समदर्शनः समाः।
तमसः परमापदव्ययं
पुरुषं योगसमाधिना रघुः॥" * ॥

भौमादिवदेकदेशग्रन्थे रघुवंशकाव्यम्। यथा,

"रघुरपि काव्यं तदपि च पाठ्यम्
तस्य च टीका सापि च पाठ्या॥"

एवं "रघोः काव्यं पठे पठे॥" एतावुञ्छटौ॥ अपि च।

"रञ्जयतीति। राजा प्रभुः। तेन 'राजा प्रकृतिरञ्जनात्।' इति रघुः।" इति उणादिवृत्तौ उज्ज्वलदत्तः। १। १५६॥ * ॥ रघुवंशीयमात्रम्। तच्च बहुवचनान्तः। यथा, रघुवंशे। १। ६।

"रघूणामन्वयं वक्ष्ये तनुवाग्विभवोऽपि सन्॥"

लङ्घति द्रुतं गच्छतीति। शीघ्रगामिनि, त्रि। यथा, ऋग्वेदे। ५। ३०। १४।

"अत्यो न वाजी रघुरद्यमानः॥"
"रघुः शीघ्रगामी।" इति तद्भाष्ये सायणः॥")

रघुकारः, पुं. (रघुं तदाख्यं काव्यं करोतीति। कृ+"कर्म्मण्यण्।" ३। २। १। इति अण्।) कालिदासः। इति चिकाण्डशेषः॥ (यथा, आर्य्यासप्तशत्याम्। ६६७।

"पूर्ब्बैर्विभिन्नदत्तां गुणाढ्यभवभूतिबाणरघुकारैः॥
वाग्देवीं भजतो मम सन्तः पश्यन्तु को दोषः॥"

यथा च।

"सौमन्तिनी च नलिनी च कुमुद्वती च
चन्द्रप्रभा च रघुकारसरस्वती च।
कान्तोज्झिता हिमहता रविरश्मितप्ता
मेघावृता जड़धियाभिहता न भाति॥"

इत्युद्भटः॥)

रघुनन्दनः, पुं, (रघून् रघुवंशसम्भूतान् नन्दयतीति। नन्दि+ल्युः।) श्रीरामः। इति शब्दरत्नावली॥ (यथा, रामायणे। १। ५२। १२।

"ततो वशिष्ठो भगवान् कथान्ते रघुनन्दन!।
विश्वामित्रमिदं वाक्यमुवाच प्रहसन्निव॥"

वङ्गदेशीयनवद्वीपनिवासी स्मार्त्तः पण्डितविशेषः। स च प्राचीनस्मृतिसंग्रहकर्त्ता। मलमासतत्त्वाद्यष्टाविंशतितत्त्वप्रणेता वन्द्यघटीयश्रीहरिहरभट्टाचार्य्यात्मजः। यथा,—

"प्रणम्य सच्चिदानन्दं परमात्मानमीश्वरम्।
मुनीन्द्राणां स्मृतेस्तत्त्वं वक्ति श्रीरघुनन्दनः।
मलिम्लुचे दायभागे संस्कारे शुद्धिनिर्णये।
प्रायश्चित्ते विवाहे च तिथौ जन्माष्टमीव्रते॥
दुर्गोत्सवे श्रवणद्वादश्यादिनिर्णये।
तड़ागभवनोत्सर्गे द्वयोत्सर्गत्रये व्रते॥
प्रतिष्ठायां परीक्षायां ज्योतिषे वास्तुयज्ञके।
दीक्षायामाह्निके कृत्ये चैत्ये श्रीपुरुषोत्तमे॥
सामश्राद्धे यजुःश्राद्धे शूद्रकृत्यविचारणे।
इत्यष्टाविंशतिस्थाने तत्त्वं वक्ष्यामि यत्नतः॥"

इति मलमासतत्त्वम्॥

अपरः पण्डितविशेषः। स च वर्द्धमानप्रदेशान्तर्गतमाड़ग्रामनिवासिचरः। राढ़ीयश्रेणीभुक्तः किशोरीमोहनगोस्वामिसुतः श्रीमन्नित्यानन्दवंशीयगोस्वामी। भागवतसिद्धान्तव्रजरसापरिणयकुन्दोमञ्जरीटीकाव्याख्यानकौमुदीरामरसायणप्रभृतयो बहवो ग्रन्थास्तत्प्रणीताः सन्ति॥)

रघुनाथः, पुं, (रघूणां नाथः। चतुर्भादित्वात् णत्वाभावः।) श्रीरामः। इति शब्दरत्नावली॥ (यथा, रघुः। १५। ५४।

"रघुनाथोऽप्यगस्त्येन मार्गसन्दर्शितात्मना।
महौजसा संयुयुजे शरत्काल इवेन्दुना॥")

रघुपतिः, पुं, (रघूणां पतिः।) श्रीरामः। यथा,

"यदुपतेः क्व गता मथुरा पुरी
रघुपतेः क्व गतोत्तरकोशला।
इति विचिन्त्य कुरुष्व मनः स्थिरं
न सदिदं जगदित्यवधारय॥"

इति रूपगोस्वामी॥

(केषाञ्चित् पण्डितानां नाम। यथा, रघुनाथशिरोमणिः अयन्तु नैयायिकः गाङ्गेयोपाध्यायकृतचिन्तामणिपञ्चकादेर्टीकाकारः। रघुनाथ चक्रवर्त्ती अयममरकोषस्य टीकाकारः। रघुनाथ तर्कवागीशः। रघुनाथ सरस्वती। रघुनाथ दासगोस्वामी। अयं हि श्रीचैतन्यदेवस्य प्रियभक्तः आसीत्। स्तवावल्यादिभक्तिग्रन्थप्रणेता। अयं खलु अशेषवैराग्यसम्पन्नः यशो-

हरनिवासिचरः कायस्थकुलभूषणं मथुरान्तर्व्वर्त्तिगोवर्द्धनगिरितटे राधाकुण्डे मर्त्यदेहं विहाय स्वधामागमत्। तत्समाधिरधुनापि तत्रैवास्ते सेव्यतेऽद्यापि बहुभिर्वैष्णवैः॥)

रघुवंशः, पुं, क्ली, (रघोर्वंशः सन्ततिर्वर्णनीयो यस्मिन्। यद्वा रघूणां वंशमधिकृत्य कृतमिति अण् लुक् च।) कालिदासकृतरघुराजान्वयवर्णनमहाकाव्यग्रन्थविशेषः। यथा,—

"रघूणामन्वयं वक्ष्ये तनुवाग्विभवोऽपि सन्।
तद्गुणैः कर्णमागत्य चापलाय प्रचोदितः॥"

इति रघुवंशे महाकाव्ये। १। ६॥

(अयं हि जगद्विंशसर्गात्मको ग्रन्थः। अत्र दिलीपादारभ्य अग्निवर्णपर्य्यन्तं वस्तु वर्णितम्॥ पुं, रघोर्वंशः। यथा,—

"जयति रघुवंशतिलकः कौशल्यानन्दिवर्द्धनो
रामः॥"

इति रामायणम्॥)

रघुवंशतिलकः, पुं, (रघुवंशे तिलक इव शोभाजनकत्वात्।) श्रीरामः। यथा,—

"जयति रघुवंशतिलकः कौशल्यानन्दिवर्द्धनो
रामः।
दशवदननिधनकारी दाशरथिः पुण्डरीकाक्षः॥"

इति रामायणम्॥

रघुवरः, त्रि, (रघुषु वरः श्रेष्ठः।) रघुवंशीयश्रेष्ठः। यथा, रामायणे।

"रामं लक्ष्मणपूर्व्वजं रघुवरं सीतापतिं सुन्दरं
काकुत्स्थं करुणामयं गुणनिधिं विप्रप्रियं
धार्म्मिकम्॥"

रघूद्वहः, पुं, (उद्वहतीति। उत्+वह्+अच्। रघूणां उद्वहः रक्षाभारधारकः।) श्रीरामः। इति शब्दरत्नावली॥

रङ्कः, पुं, (रमते तुष्यतीति। रम्+"बाहुलकात् कमेरपि कः।" इति कः। इत्युज्ज्वलदत्तः। ३। ४०।) कृपणः। मन्दः। इति मेदिनी। के, ३१॥

रङ्कुः, पुं, (रमते इति। रम्+बाहुलकात् कुः।) मृगविशेषः। इत्यमरः। २। ५। १०॥ स तु ध्रुवलग्नस्थहरिणः। इति राजनिर्घण्टः॥

रङ्गं, क्ली पुं, (रङ्गतीति। रङ्ग+अच्। रज्यते अस्मिन्। रञ्ज्+अधिकरणे घञ् वा।) धातुविशेषः। राङ्ग इति भाषा॥ तत्पर्य्यायः। चपुः २ चपुषम् ३ आपूषम् ४ वङ्गम् ५ मधुरम् ६ हिमम् ७ कुरूप्यम् ८ पिच्चटम् ९ पूतिगन्धम् १०। अस्य गुणाः। कटुत्वम्। तिक्तत्वम्। हिमत्वम्। कषायत्वम्। लवणरसत्वम्। मेहघ्नत्वम्। कृमिपाण्डुदाहघ्नमनत्वम्। कान्तिकरत्वम्। रसायनत्वञ्च। तद्विशेषो यथा,—

"श्वेतं मृदु लघु स्वच्छं स्निग्धमृणासहं हिमम्।
क्षत्रपत्रकरं कान्तं चपुश्रेष्ठमुदाहृतम्॥
क्षुरकं मिश्रकञ्चापि द्विविधं वङ्गमुच्यते।
उत्तमं क्षुरकं तत्र मिश्रकं त्वहितं मतम्॥"

इति राजनिर्घण्टः॥

तस्यामुद्वस्य दोषमाह ।
"वङ्गो विधत्ते खलु मुष्टिहीन-
स्तथा ह्यपक्वश्च किलासगुल्मौ ।
कुष्ठानि शूलं किल वातशोथं
पाण्डुं प्रमेहञ्च भगन्दरञ्च ॥
विषोपमं रक्तविकारदुष्टं
क्षयञ्च कृच्छ्राणि कफज्वरञ्च ।
मेहाश्मरीविद्रधिमुखरोगान्
नागोऽपि कुर्य्यात् कथितान् विकारान् ॥"
तस्य शोधनमभिधीयते ।
"वङ्गनागौ प्रतप्तौ च गलितौ तौ निषेचयेत् ।
त्रिधा त्रिधा विशुद्धिः स्यान्नविदुग्धेऽपि च
त्रिधा ॥
तैलतक्रकाञ्जिकगोमूत्रकुलत्थकाथेषु प्रत्येकं त्रिधा
त्रिधा । ततोऽर्कदुग्धे त्रिधा ॥ * ॥
अथ वङ्गस्य मारणविधिः ।
"दृतिपाचे द्राविते वङ्गे क्षिप्त्वाम्लत्यक्तो रजः ।
क्षिप्त्वा वङ्गचतुर्थांशमयोदर्व्या प्रचालयेत् ॥"
क्षिप्त्वा अमिलो । रजश्चूर्णम् । अयोदर्व्वी कर-
छुली ।
"ततो द्वियाममात्रेण वङ्गं भस्म प्रजायते ।
अथ भस्मसमं तालं क्षिप्त्वाम्लेन विवर्द्धयेत् ॥
ततो गजपुटे पक्त्वा पुनरम्लेन मर्द्दयेत् ।
तालेन दशमांशेन यामभेकं ततः पुटेत् ।
एवं दशपुटैः पक्वं वङ्गं भवति मारितम् ॥"
एवं मारितस्य वङ्गस्य गुणाः ।
"वङ्गं लघु सरं रूक्षं कुष्ठमेहकफक्षमीन् ।
निहन्ति पाण्डुं सश्वासं नेत्रामीषत्तु पित्तलम् ॥
सिंहो गजौघन्तु यथा निहन्ति
तथैव रङ्गोऽखिलहेमवर्गम् ।
देहस्य सौख्यं प्रबलेन्द्रियत्वं
नरस्य पुष्टिं विदधाति नूनम् ॥"
इति भावप्रकाशः ॥
(यथाच ।
"वङ्गं तिक्ताम्लकं रूक्षं किञ्चिद्वातप्रकोपणम् ।
मेदः श्लेष्मामयघ्नञ्च क्रिमिघ्नं मेहनाशनम् ॥"
इति वैद्यकरसेन्द्रसारसंग्रहे
जारणमारणाधिकारे ॥)

रङ्गः, पुं, (रञ्ज् + घञ् ।) रागः । (यथा, महा-
भारते । ५ । ३६ । १० ।
"वासो यथा रङ्गवशं प्रयाति
तथा स तेषां वशमभ्युपेति ॥")
नृत्यम् । (यथा विष्णुपुराणे । २ । ६ । २० ।
"रङ्गोपजीवी केवर्त्तः कुण्डाशी गरदस्तथा ।
सूचीमाहिषिकश्चैव पर्व्वकारी च यो द्विजः ॥"
रजति आसज्यति मल्लोऽत्र । रञ्ज् + अधि-
करणे घञ् ।) रणभूमिः । इति मेदिनी । गे,
२१ ॥ (यथा, श्रीमद्भागवते । १० । ४३ । १७ ।
"दृष्णीनां परदेवतेति विदितो रङ्गं गतः
साग्रजः ॥")
नाट्यस्थानम् । इति हेमचन्द्रः ॥ (यथा,
मृच्छकटिकप्रकरणे । १ ।
"इयं रङ्गप्रवेशेन कलानाञ्चोपशिक्षया ।
वचनापण्डितत्वेन स्वरनैपुण्यमाश्रिता ॥"
लक्षणया नाट्यस्थानस्थितो जनः । यथा, अभि-
ज्ञानशकुन्तले १ प्रस्तावनायाम् ।
"सूत्रधारः । आर्य्ये ! साधु गीतम् । अहो
रागापहृतचित्तवृत्तिरालिखित इव विभाति
सर्व्वतो रङ्गः । तदिदानीं कतमं प्रयोगमाश्रित्ये-
नमाराधयामः ॥" राजमार्गः । यथा, देवी-
भागवते । ७ । २२ । ३ ।
"अवतार्य तदा रङ्गे तां भार्य्यां नृपसत्तमः ॥")
टङ्कणः । खादिरसारः । इति राजनिर्घण्टः ॥
रङ्गकाष्ठं, क्ली, (रङ्गं रञ्जितं काष्ठमस्य ।) पत्त-
ङ्गम् । इति राजनिर्घण्टः ॥
रङ्गजं, क्ली, (रङ्गात् जायते इति । जन् + डः ।)
सिन्दूरम् । इति रत्नमाला ॥
रङ्गजीवकः, पुं, (रङ्गेण रङ्गनकार्य्येण जीवतीति ।
जीव् + ण्वुल् ।) चित्रकारः । इति शब्द-
रत्नावली ॥ नाट्यकारश्च ॥
रङ्गदः, पुं, (रङ्गं ददाति छिनत्तीति । दो + कः ।)
टङ्कणः । खादिरसारः । इति राजनिर्घण्टः ॥
रङ्गदा, स्त्री, (रङ्गद + टाप् ।) स्फटी । इति
राजनिर्घण्टः ॥ (तथास्याः पर्य्यायः ।
"स्फटी च स्फटिका प्रोक्ता श्वेता शुभ्रा च रङ्गदा ।
रङ्गदृढ़ा रङ्गदा च दृढ़ा रङ्गापि कथ्यते ॥"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥)
रङ्गदायकं, क्ली, (रङ्गस्य दायकम् ।) कङ्कुष्ठम् ।
इति राजनिर्घण्टः ॥
रङ्गदृढ़ा, स्त्री, (रङ्गवत् दृढ़ा ।) स्फटी । इति
राजनिर्घण्टः ॥
रङ्गपत्री, स्त्री, (रङ्गं रङ्गार्थं पत्रमस्याः । ङीष् ।)
नीलीवृक्षः । इति राजनिर्घण्टः ॥
रङ्गपुष्पी, स्त्री, (रङ्गं रञ्जितं पुष्पमस्याः ।)
नीलीवृक्षः । इति राजनिर्घण्टः ॥
रङ्गबीजं, क्ली, (रङ्गं बीजं उत्पत्तिकारणमस्य ।)
रूप्यम् । इति शब्दरत्नावली ॥
रङ्गभूतिः, स्त्री, (रङ्गस्य रागस्य गौरिव भूतिः
प्रोभाव ।) कोजागरपूर्णिमा । इति शब्द-
रत्नावली ॥
रङ्गभूमिः, स्त्री, (रङ्गस्य भूमिः ।) मल्लभूमिः । इति
शब्दरत्नावली ॥ (यथा, महाभारते । १ । १३५ । ६ ।
"अवघुष्टे समाजे च तदर्थं वदतां वरः ।
रङ्गभूमौ सुविपुलं प्राक्षटृष्टं यथाविधि ॥"
रङ्गभूमिविवरणं यथा, अश्ववैद्यके । ७ । ११-१२ ।
"सान्द्रां सुकठिनाञ्चैव पाषाणोदकसंयुताम् ।
तृणकाष्ठसमायुक्तां रङ्गभूमिन्तु वर्ज्जयेत् ॥
समाञ्च विपुलाञ्चैव किञ्चित् पांशुसमन्विताम् ।
एकान्ते विजने रम्ये रङ्गभूमिन्तु कारयेत् ॥")
नाट्यभूमिश्च ॥
रङ्गमल्ली, स्त्री, (रङ्गाय रागाय मल्ली ।) वीणा ।
इति शब्दरत्नावली ॥
रङ्गमाणिक्यं, क्ली, (रङ्गं रञ्जितं माणिक्यम् ।)
माणिक्यरत्नम् । इति राजनिर्घण्टः ॥
रङ्गमाता, [त्र] स्त्री, (रङ्गस्य माता जनिका ।)
कुट्टनी । लाक्षा । इति मेदिनी । ते, २१५ ॥
रङ्गमातृका, स्त्री, (रङ्गमातृ + स्वार्थे कन् । टाप् ।)
लाक्षा । इति चिकाण्डशेषः ॥
रङ्गलासिनी, स्त्री, (रङ्गेण रागेण लसितुं शील-
मस्याः इति । लस + णिनिः ।) शैफालिका ।
इति शब्दचन्द्रिका ॥
रङ्गशाला, स्त्री, (रङ्गस्य शाला ।) नाट्यगृहम् ।
इति शब्दरत्नावली ॥ नाचघर इति भाषा ॥
रङ्गाङ्गा, स्त्री, (रङ्गं रङ्गार्हमङ्गमस्याः ।) स्फटी ।
इति राजनिर्घण्टः ॥
रङ्गाजीवः, पुं, (रङ्गो हरितालादिरसेनाजीव-
तीति । जीव् + अण् । यद्वा, रङ्ग आजी-
वोऽस्य ।) चित्रकरः । इत्यमरः । २ । १० । ७ ॥
नटः । इति हेमचन्द्रः । ३ । ५८५ ॥
रङ्गावतारकः, पुं, (रङ्गे सङ्गीतभवने अवतर-
तीति । तॄ + ण्वुल् । यद्वा रङ्गं नृत्यादिकमव-
तारयतीति । तॄ + णिच् + ण्वुल् ।) रङ्गाव-
तारी । तत्पर्य्यायः । शैलूषः २ भरतः ३ सर्व्व-
वेद्यी ४ भरतपुत्रकः ५ धात्रीपुत्रः ६ रङ्ग-
जीवः ७ जायाजीवः ८ नटः ९ क्षुद्राश्वी १०
शैलाली ११ । इति हेमचन्द्रः ॥ नृत्यगीतस्थाने
गीतवाद्यादिना तदनुगुणतया प्रसङ्गो । इति
प्रायश्चित्तविवेकः ॥ नटगायनव्यतिरिक्तरङ्गाव-
तरणजीवी । इति कुल्लूकभट्टः ॥ तस्यान्नभक्षण-
प्रायश्चित्तं यथा,—
"मत्तक्रुद्धातुराणाञ्च न भुञ्जीत कदाचन ।
केशकीटावपन्नञ्च पदा स्पृष्टञ्च कामतः ॥"
इत्युपक्रम्य,—
"कर्म्मारस्य निषादस्य रङ्गावतारकस्य च ।
सुवर्णकर्त्तुर्व्रणस्य शूल्यविक्रयिणस्तथा ॥"
इत्याद्युक्त्वा,—
"य एतेऽन्ये त्वभोज्यान्नाः क्रमशः परिकीर्त्तिताः ॥
तेषामन्नमशिरोमात्रि वदन्त्यन्नं मनीषिणः ॥
भुक्त्वातोऽन्यतमस्यान्नममत्या श्रपणं त्र्यहम् ।
मत्या भुक्त्वा चरेत् कृच्छ्रं रेतोविण्मूत्रमेव च ॥"
इति मानवे ४ अध्यायः ॥
रङ्गावतारी, [न्] पुं, (रङ्गमवतरतीति । तॄ +
णिनिः ।) नटः । इति जटाधरः ॥ (यथा,
याज्ञवल्क्यसंहितायाम् । २ । ७२ ।
"स्त्रीदृङ्नवालक्तितवमत्तोन्मत्ताभिसन्धकः ।
रङ्गावतारिपाषण्डिकूटकृद्विकलेन्द्रियाः ॥")
रङ्गारिः, पुं, (रङ्गस्य तदाख्यधातोररिरिव ।)
करवीरः । इति रत्नमाला ॥
रङ्गिणी, स्त्री, (रङ्गोऽस्त्यस्या इति । रङ्ग +
इनिः । स्त्रियां ङीष् ।) शुक्लमूली । इति
जटाधरः ॥ केवर्त्तिका । इति राजनिर्घण्टः ॥
रङ्गविग्रिष्टे, त्रि ॥
रङ्गः, [स्] क्ली, (रंघ्यते प्राप्यते इति । रघि
+ "अधिरघिभ्यामसुन् ।" इति असुन् । इषु-
क्लृलदत्तः । ४ । २१३ ।) रंहः । वेगः । इति
भरतद्विरूपकोषः ॥ (यथा, सूर्य्यशतके । ७१ ।

"रंघः संघो सुराणां जगदुपक्षतये नित्यमुक्तस्य यस्य ॥")

रच, तृ क क्षत्याम्। इति कविकल्पद्रुमः॥ (अदन्त चुरा०-पर०-सक०-सेट्।) रचयति। इति दुर्गादासः॥

रचनं, क्ली, (रचि+भावे ल्युट्।) निर्म्माणम्। ग्रन्थनम्। यथा, जयदेवः। १। ४।

"वाचः पल्लवयत्युमापतिधरः सन्दर्भशुद्धिं गिरां जानीते जयदेव एव शरणः श्लाघ्यो दुरूहद्रुतेः। शृङ्गारोत्तरसत्प्रमेयरचनैराचार्य्यगोवर्द्धनः स्पर्द्धी कोऽपि न विश्रुतः श्रुतिधरो धोयी कविः क्ष्मापतिः॥"

रचना, स्त्री, (रच्यते इति। रच+णिच्+"ण्यासश्रन्थो युच्।" ३। ३। १०७। इति युच्।) कुसुमप्रकारादेः पत्रावल्यादेश्च रचनम्। तत्पर्य्यायः। परिस्पन्दः २। इत्यमरः। २। ६। १३७॥ परिस्पन्दः ३। इति भरतः॥ (यथा, साहित्यदर्पणे। ३। १४६।

"भूषणानामङ्गरचना वृथा विश्वगवेक्षणम्। रहस्याख्यानमीषच्च विक्षेपो ललितान्तिके॥")

यथाक्रमेण स्थापनम्। तत्पर्य्यायः। निवेशः २ स्थितिः ३। इति हेमचन्द्रः। ३। ४११॥ (यथा, महाभारते। ८। ४६। १०।

"शृणु यूहस्य रचनामर्জ্জुनस्य यथागतः॥")

निर्म्मितिः। कृतिः। यथा,—

"असाधारणचमत्कारकारिणी रचना हि निर्म्मितिः॥" इत्यलङ्कारकौस्तुभे १ किरणः॥

तत्पर्य्यायः। सन्दर्भः २ गुम्फः ३ ग्रन्थनम् ४। ग्रन्थनम् ५। इति हेमचन्द्रः। ३। ३१७॥ (उद्यमः। यथा, श्रीमद्भागवते। ३। ६। १०।

"देवाहृतार्थरचना ऋषयोऽपि देव युष्मत्प्रसङ्गविमुखा इह संसरन्ति॥"

"दैवेनाहृताः सर्व्वतः प्रतिहताः अर्थानां रचनाः अर्थार्थोद्यमाः येषाम्।" इति तट्टीकायां श्रीधरस्वामी॥ रचयतीति। रचि+ल्युः। टाप्। विश्वकर्म्मणो भार्य्या। यथा, श्रीमद्भागवते। ६। ६। ४४।

"त्वष्टुर्दैत्यात्मजा भार्य्या रचना नाम कन्यका। सन्निवेशस्तयोर्জ্জज्ञे विश्वरूपश्च वीर्य्यवान्॥")

रचितः, त्रि, कृतः। रचधातोः कर्म्मणि क्तप्रत्ययेन निष्पन्नः। यथा,—

"शिरः पद्मश्रेणीरचितचरणाभ्योरुहबलेः स्थिरायास्वङ्गुलेस्त्रिपुरहर विस्फूर्জ্जितमिदम्॥"

इति पुष्पदन्तकृतस्तुतिः॥

रजं, क्ली, (रञ्जयतीति। रञ्ज+अच्। निपातनात् सिद्धम्।) स्त्रीकुसुमम्। इति शब्दरत्नावली॥

रजः, पुं, (रञ्जयतीति। रनुज्+अच्। निपातनान्नलोपः।) परागः। (यथा, गो० रामायणे। ३। ७६। २६।

"पद्मपुष्परजोमिश्रो वृक्षान्तरविनिःसृतः। निश्वास इव सीतायाः वायुर्वाति मनोरमः॥")

रेणुः। ("अर्थोः पादरजोपमाः॥" इति उज्ज्वलदत्तः। ४। २१६॥) गुणभेदः। आर्त्तवम्। इति जान्तवर्गे शब्दरत्नावली॥ (स्कन्दस्य सेनाविशेषः। यथा, महाभारते। ६। ४५। ७१।

"दण्डबाहुः सुबाहुश्च रजः कोकिलकस्तथा॥"

विरजपुत्रः। यथा, विष्णुपुराणे। २। १। ४०।

"त्वष्टा त्वष्टुश्च विरजो रजस्याप्यभूतसुतः॥"

वशिष्ठपुत्रः ऋषिभेदः। यथा, विष्णुपुराणे। ९। १०। १३।

"ऊर्জ্জायान्तु वशिष्ठस्य सप्ताजायन्त वै सुताः। रजो गात्रोर्द्ध्ववाहुश्च सवनश्चानघस्तथा॥")

रजः [स्] क्ली, (रज्यते रजतीति। रनुज्+"भूरञ्जिभ्यां कित्।" उणा०४। २१६। इत्यसुन्।) स्त्रीणां मासि मासि योनिनिःसृतरक्तम्। तत्पर्य्यायः। पुष्पम् २ आर्त्तवम् ३। इत्यमरः। २। ६। २१॥ ऋतुः ४ कुसुमम् ५ रजम् ६। इति शब्दरत्नावली॥ (यथा, मनौ। ५। १०८।

"रजसा स्त्री मनोदुष्टा सन्ध्यासेन द्विजोत्तमः॥"

अस्य लक्षणं यथा,—

"रञ्जितास्तेजसा त्वाप्यः शरीरस्थेन देहिनाम्। अव्यापन्नाः प्रसन्नेन रक्तमित्यभिधीयते॥ रसादेव स्त्रिया रक्तं रजःसंज्ञं प्रवर्त्तते। तद्द्वर्षाद्द्वादशाद्ऊर्द्ध्वं याति पञ्चाशतः क्षयम्॥"

"नारीणां रजसि चोपचीयमाने शनैः शनैः स्तनगर्भाशययोन्यभिवृद्धिर्भवति।" इति सुश्रुते शरीरस्थाने १४ अध्यायः॥

"मासि मासि रजःस्त्रीणां रसजं स्रवति ह्यहम्। वत्सराद्द्वादशाद्ऊर्द्ध्वं याति पञ्चाशतः क्षयम्॥"

इति वाभटे शारीरस्थाने प्रथमेऽध्याये॥) प्रकृतेर्गुणविशेषः। तत्तु रागद्वेषात्मकं दुःखहेतुः। रजोऽन्तः पुंलिङ्गोऽपि। यथा,—

"रजोऽयं रजसा सार्द्धं स्त्रीपुष्पगुणधूलिषु।"

इत्यमरदत्तः। इति भरतः॥

महाभारतमते दुःखजनकगुणः। तस्य धर्म्मः काम क्रोधः लोभः मानः दर्पश्च। इति मोक्षधर्म्मः॥

"तृष्णा क्रोधोऽभिसंरम्भो राजसास्ते गुणाः स्मृताः॥"

अभिसंरम्भो द्वेषाभिनिवेशः। इत्याश्वमेधिकपर्व्व॥ अपि च।

"काम एष क्रोध एष रजोगुणसमुद्भवः। महाशनो महापाप्मा विद्ध्येनमिह वैरिणम्॥"

इति श्रीभगवद्गीतायाम्। २ अध्यायः॥

अपि च।

"सत्त्वं रजस्तम इति गुणाः प्रकृतिसम्भवाः। निबध्नन्ति महाबाहो देहे देहिनमव्ययम्॥"

"रजो रागात्मकं विद्धि तृष्णासङ्गसमुद्भवम्। तन्निबध्नाति कौन्तेय! कर्म्मसङ्गेन देहिनम्॥"

"सत्त्वं सुखे सञ्जयति रजः कर्म्मणि भारत। ज्ञानमावृत्य तु तमः प्रमादे सञ्जयत्युत॥ रजस्तमश्चाभिभूय सत्त्वं भवति भारत।

रजः सत्त्वं तमश्चैव तमः सत्त्वं रजस्तथा॥"

"लोभः प्रवृत्तिरारम्भः कर्म्मणामशमः स्पृहा। रजस्येतानि जायन्ते विवृद्धे भरतर्षभ!॥"

"कर्म्मणः सुकृतस्याहुः सात्त्विकं निर्म्मलं फलम्। रजसस्तु फलं दुःखमज्ञानं तमसः फलम्॥ सत्त्वात् सञ्जायते ज्ञानं रजसो लोभ एव च। प्रमादमोहौ तमसो भवतोऽज्ञानमेव च॥ ऊर्द्ध्वं गच्छन्ति सत्त्वस्था मध्ये तिष्ठन्ति राजसाः। जघन्यगुणवृत्तिस्था अधो गच्छन्ति तामसाः॥"

इति श्रीभगवद्गीतायाम्। १४ अध्यायः॥

"सत्त्वं रजस्तम इति दृश्यन्ते पुरुषे गुणाः। कालसञ्चोदितास्तेऽपि परिवर्त्तन्त आत्मनि॥ प्रभूतत्वं यदा सत्त्वं मनोबुद्धीन्द्रियाणि च। तदा कृतयुगं विद्यादाने तपसि यत्नतः॥ यदा कर्म्मसु कार्य्येषु प्रवृत्तिर्बहुलं देहिनाम्। तदा त्रेता रजोवृद्धिरिति जानीहि शौनक॥ यदा लोभस्त्वसन्तोषो मानो दम्भोऽथ मत्सरः। कर्म्मणाञ्चापि काम्यानां द्वापरं तद्रजस्तमः॥ यदा मृषातृतं तन्द्री निद्रा हिंसादिसाधनम्। शोकमोहभयं दैन्यं स कलिस्तु तदा स्मृतः॥"

इति गारुड़े २२७ अध्यायः॥

परागः। इति मेदिनी। से, ३२॥ (यथा, भागवते। ४। २४। २२।

"पद्मकोशरजो दिक्षु विक्षिपत्यवनोन्मुखम्॥")

रेणुः। अस्य पर्य्यायः धूलिशब्दे द्रष्टव्यः॥ (यथा, माघे। २। ४६।

"पादाहतं यदुत्थाय मूर्द्धानमधिरोहति। स्वस्थादेवापमानेऽपि देहिनस्तद्वरं रजः॥")

निषिद्धानिषिद्धरजो यथा,—

"आयुष्कामो न सेवेत तथा सम्मार्জ্জनीरजः। तथाश्वरथधान्यानां गवाञ्चैव रजः शुभम्॥ अशुभञ्च विजानीयात् खरोष्ट्राजाविकेषु च। गवां रजो धान्यरजः पुत्रस्याङ्गभवं रजः॥ एतद्रजो महाशस्तं महापातकनाशनम्। अजारजः खररजो यत्तु सम्मार्জ্जनीरजः॥ एतद्रजो महापापं महाकिल्बिषकारणम्॥"

इति गारुड़े ११४ अध्यायः॥

(रात्रिः। इति निघण्टुः। १। ७॥ उदकम्। यथा, ऋग्वेदे। १। ५६। ५।

"वियत्तिरोधरणमच्युतं रजोतिष्ठिपो दिव आतासु बर्हणा।"

'रज उदकम्।' इति तद्भाष्ये सायणः॥ भुवनम्। यथा, तत्रैव। १०। ८२। ३।

"अस्कर्त्ते स्कर्त्ते रजसि निषत्ते ये भूतानि समकृखन्निमानि।"

"रजसि लोके।" इति तद्भाष्ये सायणः॥ ज्योतिः। यथा, तत्रैव। १०। ३२। २।

"वीन्द्र यासि दिव्यानि रोचना विपार्थिवानि रजसा पुरुष्टुत।"

"रजसा आत्मीयेन ज्योतिषा। विद्युल्लक्षणेन यदा रजःशब्दाच्चक्षस आकारः प्रार्थिवान् लोकान्।" इति तद्भाष्ये सायणः॥)

रजःशुभ्रः, पुं, (रजसि शेते। शी+"अधिकरणे शेतेः।" ३।२।१५। इति अच्।) कुक्कुरः। इति शब्दमाला॥ (धूलिशायिनि, त्रि। रजतमयी। यथा, वाजसनेयसंहितायाम्। ५।८।

"या ते॑ऽग्ने रजःशुभा तनूर्वर्षिष्ठा॥"

"रजःशुभा रजतमयीति।" तद्भाष्ये महीधरः॥)

रजःसारथिः, पुं, (रजसां सारथिरिव।) वायुः। इति शब्दरत्नावली॥

रजकः, पुं, (रजति निर्णेजनेन श्वेतिमानमापादयति वस्त्रादीनामिति। रनृज+"नृतिखनिरञ्जिभ्यः संज्ञायां कन्।" ३।१।१४५। इति ण्वुन्।) वर्णसङ्करजातिविशेषः। धोबा इति भाषा॥ (यथा, भागवते। १०।४१।३२।

"रजकं कञ्चिदायान्तं रङ्गकारं गदाग्रजः।
दृष्ट्वायाचत वासांसि विधौतान्युत्तमानि च॥")

स च तीवरपत्न्यां धीवराज्जातः। इति ब्रह्मवैवर्त्तपुराणम्॥ तत्पर्य्यायः। निर्णेजकः २। इत्यमरः। २।१०।१०॥ शौचेयः ३ कर्म्मकीलकः ४। इति शब्दरत्नावली॥ धावकः ५। इति हेमचन्द्रः। ३।५।७८॥ रजकस्य वस्त्रनिर्णेजनप्रकारो यथा,—

"वासांसि फलकैः शुद्धैर्निर्णिज्याद्रजकः शुनैः।
अतोऽन्यथा हि कुर्व्वीत दण्डः स्याद्रजकस्य तु॥"

इति मात्स्ये २०१ अध्यायः॥

(रजकान्नभक्षणप्रायश्चित्तं यथाह आपस्तम्बः।

"रजके चैव शैलूषे वेणुचर्म्मोपजीविनि।
एतेषां यस्तु भुञ्जीत द्विजश्चान्द्रायणञ्चरेत्॥"

इति प्रायश्चित्तविवेकः॥ विशेषस्तत्रैव द्रष्टव्यः॥)

अंशुकः। इति विश्वः॥

रजकी, स्त्री, रजकपत्नी। रनृजघातोः घकप्रत्ययान्तादीपि ङते सिद्धा। इति मुग्धबोधव्याकरणम्॥ (यथा, आर्य्यासप्तशत्याम्। ४०२।

"परपट इव रजकीभिर्मलिनो मुक्तापि निर्दयं ताभिः।
अर्थग्रहणेन विना जघन्य! मुक्तोऽसि कुलटाभिः॥")

रजतं, क्ली, (रजति प्रियं भवति रज्यत इति वा। रनृज+"नृषिरञ्जिभ्यां कित्।" उणा०। ३।११९। इति अतच् कित्कार्य्यञ्च।) रूप्यम्। इत्यमरः। २।९।९९॥ हस्तिदन्तः। धवलः। शोणितम्। हारः। ह्रदः। शैलः। (स तु शाकद्वीपस्थ एव। यथा, मात्स्ये १२१। १४।

"रत्नमालान्तरमयः शाल्मलश्चान्तरालकृत्।
तस्यापरेण रजतो महानस्तो गिरिः स्मृतः॥")

स्वर्णम्। इति हेमचन्द्रः। ४।१०९॥ शुक्लवर्णविशिष्टे, त्रि। इत्यमरटीकायां भरतः॥ पित्र्यकार्य्ये रजतपात्रादीनां प्राशस्त्यादि यथा,

"सौवर्णे राजतं ताम्रं पितॄणां पात्रमुच्यते।
रजतस्य कथा वापि दर्शनं दानमेव वा॥
राजतैर्भाजनैरेषामथवा रजतान्वितैः।
वार्य्यपि श्रद्धया दत्तमक्षयायोपकल्पते॥
यथार्घ्यपिण्डभोज्यादौ पितॄणां राजतं मतम्।
शिवनेत्रोद्भवं तस्माद्दत्तं तत् पितृवल्लभम्।
अमङ्गलं तदृक्षेषु दैवकार्य्येषु वर्ज्जितम्॥"

इति मात्स्ये १७ अध्यायः॥

रजतद्युतिः, पुं, (रजतस्येव द्युतिरस्य।) हनूमान्। इति शब्दरत्नावली॥

रजतप्रस्थः, पुं, (रजतस्तब्धः तद्वत् शुभ्रो वा प्रस्थः सानुरस्य।) कैलासपर्व्वतः। इति त्रिकाण्डशेषः॥

रजताचलः, पुं, (रजतप्रधानोऽचल इव। शाकपार्थिववत् समासः।) रौप्यपर्व्वतः। तस्य परिमाणं दानविधिश्च यथा,—

"राजतो नवमस्तद्वद्गुणः शुक्लाचलः।
वक्ष्ये विधानमेतेषां यथावदनुपूर्व्वशः॥
अतः परं प्रवक्ष्यामि रौप्याचलमनुत्तमम्।
यत्प्रसादान्नरो याति सोमलोकं द्विजोत्तम॥
दशभिः पलसाहस्रैरुत्तमो रजताचलः।
पञ्चभिर्म्मध्यमः प्रोक्तस्तदर्द्धेनावरः स्मृतः॥
अग्रतो विंशतेरूर्द्धं कारयेत् शक्तितः सदा।
विष्कम्भपर्व्वतांस्तद्वत् तुरीयांशेन कल्पयेत्॥
पूर्व्ववद्राजतान् कुर्य्याच्चन्द्रादीन् विधानतः॥"

पूर्व्ववत् रत्नाचलवत्।

"कलधौतमथांस्तत्र लोकेशान् रचयेद्बुधः॥
ब्रह्मविष्णुर्कवत् कार्य्यो नितम्बोऽत्र हिरण्मयः।
राजतं स्याद्यदन्येषां समन्तादिह काञ्चनम्॥
शेषञ्च पूर्व्ववत् कुर्य्यात् होमजागरणादिकम्।
प्रदद्यात्तु प्रभाते तु गुरवे रौप्यपर्व्वतम्॥
विष्कम्भशैलान्नृत्विग्भ्यः पूज्य वस्त्रविभूषणैः।
इमं मन्त्रं पठन् दद्याद्भर्पाणिर्विमत्सरः॥
पितॄणां वल्लभं यस्मात् विष्णोर्ब्रह्मणस्य च।
रजतं पाहि तस्मान्नः शोकसंसारसागरात्॥
इत्यं निवेद्य वो दद्यात् रजताचलमुत्तमम्।
गवामयुतदानस्य फलं प्राप्नोति मानवः॥
सोमलोके सगन्धर्व्वैः किन्नराप्सरसाङ्गणैः।
पूज्यमानो वसेद्दिव्यान् यावदाभूतसंप्लवम्॥"

इति मात्स्ये ७ अध्यायः॥

(कैलासपर्व्वतः। यथा, महानिर्व्वाणतन्त्रे।

"रजताचलमध्ये तु कुबेरेश्वर ईरितः॥")

रजताद्रिः, पुं, (रजतमयस्तद्वत् शुभ्रो वा अद्रिः। शाकपार्थिववत् समासः।) कैलासपर्व्वतः। इति हेमचन्द्रः। ४।९४॥

रजनं, क्ली, (रज्यत इति। रनृज्+"रञ्जेः क्युन्।" उणा० २।७९। इति क्युन्। "रजकरजनरजःस्वरूपसंख्यानम्।" ६।४।२४। इति वार्त्तिकोक्तेर्नलोपश्च।) रागः। इति सिद्धान्तकौमुद्यामुणादिवृत्तिः॥ (यथा, महाभारते। ८।५२।६।

"यथा वा वाससी शुक्ले महारजनरञ्जिते।
विभ्यादुभयतः श्यामा तद्वदासीद्वसुन्धरा॥")

ऋषिविशेषे, पुं। यथा, तैत्तिरीयसंहितायाम्। २।३।८।१।

"रजनो वै कौशेयः क्रतुजितं जानकिं चक्षुर्व्वन् यमयात्॥")

रजनिः, स्त्री, (रजन्ति लोका यत्र। रनृज्+बाहुलकादनिः। इत्युज्ज्वलदत्तः। २।१०३।) रात्रिः। इत्यमरटीका॥ (यथा, कथासरित्सागरे। १८।१४५।।

"इत्येवं स्वाप्य समयं प्राप्तायां रजनौ च तान्।
आमन्त्र्य विप्रान् प्रययौ श्मशानं स विदूषकः॥")

रजनी, स्त्री, (रजनि+ङादिकारादिति ङीष्।) रात्रिः। (यथा, महाभारते। ३।६६।२८।

"सा बुद्ध्वा रजनीन्तञ्च पितुर्वेश्मनि भाविनी।
विश्रान्ता मातरं राजन्! इदं वचनमब्रवीत्॥")

हरिद्रा॥ (अस्याः पर्य्यायो यथा,—

"हरिद्रा पीतिका गौरी काञ्चनी रजनी निशा।
मेहघ्नी रञ्जनी पीता वर्णिनी रात्रिभामिका॥"

इति वैद्यकरत्नमालायाम्॥

यथा, नघधे। २२। ४६।

"अस्याः सुराधीशदिशः पुरासीत्
यदम्बरं पीतमिदं रजन्या।
चन्द्रांशुचूर्णैरतिचुम्बितेन
तेनाधुना नूनमलोहितायि॥")

जतुका। इत्यमरः। २।४।१५३॥ (यथा, इष्टसंहितायाम्। ४४।६।

"दन्त्यदन्ताञ्जनरजनीस्नुवर्णपूज्याग्निमन्त्याश्च॥")

नीलिनी। इति मेदिनी। ने, ११६॥ (शाल्मलीद्वीपस्थनदीभेदः। यथा, भागवते। ५।२०।१०।

"अनुमती सिनीवाली सरस्वती कुहू रजनी नन्दा राकेति॥")

रजनीकरः, पुं, (रजनीं करोतीति। कृ+टः।) चन्द्रः। इति शब्दरत्नावली॥ (यथा, भागवते। ४।२८।३४।

"हित्वा गृहान् सुतान् भोगान् वेदैर्भी मन्दिरेक्षणा।
अन्वधावत पाञ्चाल्यं ज्योत्स्नेव रजनीकरम्॥")

रजनीगन्धा, स्त्री, (रजन्यां गन्धोऽस्याः। रात्रौ विकाशात् तथात्वम्।) खनामख्यातश्वेतवर्णपुष्पविशेषः। इति लोकप्रसिद्धिः॥

रजनीचरः, पुं, (रजन्यां चरतीति। चर+"चरेष्टः।" ३।२।१६। इति टः।) राक्षसः। इति शब्दरत्नावली॥ (यथा, रामायणे। ७।५।४।

"स तया सह संयुक्तो वराज रजनीचरः॥"

तथा च।

"ओजोऽग्रजानां रजनीचराणां
आहारहेतोर्न शरीरमिष्टम्।
गर्भं हरेयुर्यदि तेन मातुर्-
लब्धावकाशं न हरेयुरोजः॥"

इति चरके शारीरस्थाने द्वितीयेऽध्याये॥)

चौरः॥ यामिकभटः॥ (रात्रिविहारके, त्रि। यथा, हरिवंशे। २०२।१८।

"ब्राह्मणानाञ्च राजानं शाश्वतं रजनीचरम्॥")

रजनीजलं, क्ली, (रजन्या जलम्।) नीहारः। इति हारावली। ६७॥

रजनीपुष्पः, पुं, (रजन्या हरिद्रायाः पुष्पमिव पुष्पमस्य।) पूतिकरञ्जः। इति राजनिर्घण्टः॥ (पूतिकरञ्जशब्देऽस्य विवरणं ज्ञातव्यम्॥)

रजनीमुखं, क्ली, (रजन्या मुखम्।) प्रदोषः। इत्यमरः। १। ४। ६॥ (यथा, राजतरङ्गिण्याम्। ४। ४३३।
"ततः प्रयाङ्कधवले सञ्जाते रजनीमुखे।
पाणिनालभ्य भूपालं प्रत्याबोधञ्च विदधे सा॥")

रजनीहासा, स्त्री, (रजन्यां हासो विकाशो यस्याः।) शेफालिकापुष्पम्। इति शब्दरत्नावली॥

रजसानुः, पुं, (रज्यतेऽस्मिन्निति। रञ्ज्+"असानुः सक्थिमन्दिभ्यां वृधिरञ्जिभ्यां तु किदर्त्तेर्णश्च।" इत्युणादिकोषटीकाधृतसूत्रोक्तेः असानुप्रत्ययः।) मेघः। चित्तम्। इत्युणादिकोषः। १। १७४॥

रजस्वलः, पुं, (रजोऽस्यास्तीति। रजस्+"रजःकृष्यासुतिपरिषदो वलच्।" ५। २। ११२। इति वलच्।) महिषः। इति मेदिनी। ले, १६३॥ (अस्य पर्य्यायो यथा,—
"महिषो घोटकारिः स्यात् कासरश्च रजस्वलः।
पीनस्कः क्षणकायोऽथ लुलापो यमवाहनः॥"
इति भावप्रकाशस्य पूर्व्वखण्डे द्वितीये भागे॥
त्रि, रजोयुक्तः। यथा, भागवते। ७। १३।१२।
"तं प्रयान्तं धरोपस्थे कावेर्य्यां सह्यसानुनि।
रजस्वलैस्तनदेशैर्निगूढामलतेजसम्॥"
रजोगुणयुक्तः। सृष्टयालुः। यथा, मनुः। ६। ७७।
"जराशोकसमाविष्टं रोगार्त्तयतनमातुरम्।
रजस्वलमनित्यञ्च भूतावासमिमं त्यजेत्॥")

रजस्वला, स्त्री, (रजोऽस्यास्याः। "रजःकृष्यासुतीति।"५।२।११२। इति वलच्। टाप्।) रजोयुक्ता। तत्पर्य्यायः। स्त्रीधर्म्मिणी २ अवी ३ आर्त्तवी ४ मलिनी ५ पुष्पवती ६ ऋतुमती ७ उदक्या ८। इत्यमरः।२।६।२०॥ दुरिः ९ पुष्पहासा १०। इति शब्दरत्नावली॥ पुष्पिता ११ अवीरा १२ विफली १३ निष्फली १४। इति जटाधरः॥ स्नाना १५ पांशुला १६। इति राजनिर्घण्टः॥ ✱॥ अथ रजस्वलाशब्दे प्रायश्चित्तम्। "काश्यपः।
'रजस्वला तु संस्पृष्टा ब्राह्मण्या ब्राह्मणी यदि।
एकरात्रं निराहारा पञ्चगव्येन शुध्यति॥
रजस्वला तु संस्पृष्टा राजन्या ब्राह्मणी तु या।
त्रिरात्रेण विशुद्धिः स्यात् व्याघ्रस्य वचनं यथा॥
रजस्वला तु संस्पृष्टा वैश्यया ब्राह्मणी च या।
पञ्चरात्रं निराहारा पञ्चगव्येन शुध्यति॥
रजस्वला तु संस्पृष्टा शूद्रया ब्राह्मणी यदि।
षड्रात्रेण विशुध्येत्तु ब्राह्मणी कामचारतः॥
अकामतस्त्वरेदृङ्गं ब्राह्मणी सर्व्वजातिषु॥'
एतेन रजस्वलाया ब्राह्मण्याः सवर्णरजस्वलास्पर्शे एकरात्रोपवासः पञ्चगव्यपानं कामतः। अकामतस्तदर्द्धम्। गव्यव्रतम्। असवर्णरजस्वलास्पर्शे त्रिरात्रपञ्चरात्रषड्रात्रोपवासाः। अकामतस्तदर्द्धम्। एतत् चतुर्थाहानन्तरं कर्त्तव्यम्।
'चण्डालेन श्वपाकेन संस्पृष्टा चेद्रजस्वला।
अतिक्रम्य तान्यहानि प्रायश्चित्तं समाचरेत्॥
चिरात्रमुपवासः स्यात् पञ्चगव्येन शुध्यति।
तां निष्पाद्य अतिक्रम्य स्नपयित्वोक्तु कारयेत्॥'
इति वचनान्तरदर्शनात् .एतत् कामतः॥
अत्र दिनभेदोऽपि नास्ति। अज्ञाने वृहस्पतिः।
'पतितान्त्यश्वपाकैश्च संस्पृष्टा स्त्री रजस्वला।
तान्यहानि अतिक्रम्य प्रायश्चित्तं समाचरेत्॥
प्रथमेऽह्नि चिराचं तु द्वितीये द्व्याहमाचरेत्।
अहोरात्रं तृतीयेऽह्नि चतुर्थे नक्तमाचरेत्॥'
चतुर्थेऽहीति शुद्धिस्नानात् पूर्व्वम्। व्याघ्रः।
'रजस्वला यदा स्पृष्टा श्वजम्बूकखरैः क्वचित्।
निराहारा भवेत्तावत् यावत् स्नानेन शुध्यति॥'
अत्रापि वृहस्पत्युक्तदिनभेदव्यवस्था। वृद्धप्रातातपः।
'रजस्वले तु ये नार्य्यावन्योन्यं स्पृशतो यदि।
सवर्णे पञ्चगव्यन्तु ब्रह्मकूर्चमतः परम्॥'
पञ्चगव्यपानं व्रतरूपम्। तेनोपवासः। ब्रह्मकूर्चमाह जाबालः।
'अहोरात्रोषितो भूत्वा पौर्णमास्यां विशेषतः।
पञ्चगव्यं पिबेत् प्रातर्ब्रह्मकूर्चविधिः स्मृतः॥'
तदशक्तौ पुराणोक्तं दातव्यम्।" इति प्रायश्चित्ततत्त्वम्॥ ✱॥ अन्यच्च।
'शुद्धा भर्त्तुश्चतुर्थेऽह्नि अशुद्धा देवपैत्रयोः।
देवे कर्म्मणि पैत्रे च पञ्चमेऽहनि शुध्यति॥'
इति शुद्धितत्त्वम्॥
तस्यां गमने पापं यथा,—
"प्रथमे दिवसे कान्तां यो हि गच्छेद्रजस्वलाम्।
ब्रह्महत्याचतुर्थांशं लभते नात्र संशयः॥
स पुमान्न हि कर्म्मार्हो देवे पैत्रे च कर्म्मणि।
अधमः स च सर्व्वेषां निन्दितश्चायशस्करः॥
द्वितीयदिवसे नारीं यो व्रजेच्च रजस्वलाम्।
कामतः परिपूर्णाञ्च ब्रह्महत्यां लभेद्ध्रुवम्॥
आजीवनं नाधिकारी पितृविप्रसुरार्च्चने॥
अमनुष्योऽयशस्यः स्यादित्याङ्गिरसभाषितम्॥
तृतीयदिवसे भार्यां यो हि गच्छेद्रजस्वलाम्।
स मूढो ब्रह्महत्याञ्च लभते नात्र संशयः॥
पूर्व्ववत् पतितः सोऽपि न चार्हः सर्व्वकर्म्मसु।
असत्पुत्रा चतुर्थेऽह्नि न गच्छेत्तां विचक्षणः॥"
इति ब्रह्मवैवर्त्ते श्रीकृष्णजन्मखण्डे ५६ अध्यायः॥
अपि च।
"अपूर्णे ऋतुकाले तु योऽभिगच्छेद्रजस्वलाम्।
रेतपाः पितरस्तस्य एवमेतन्न संशयः॥
एकस्तु पुरुषो याति द्वितीयां काममोहितः।
तृतीयां वा चतुर्थीञ्च तदा स पुरुषाधमः॥
ऋतुकाले तु सर्व्वासां पित्र्यर्थं भोग इष्यते।
ऋतुकालाभिगामी यो ब्रह्मचार्य्येव सम्मतः॥
न गच्छति च यः क्रोधात् मोहाद्वा पुरुषाधमः।
ऋतौ ऋतौ भ्रूणहत्यां प्राप्नोति पुरुषश्वरन्॥"
इति वाराहे गुह्यकर्म्मवर्णनं नामाध्यायः॥
(अपि च।
"रजस्वलास्त्रीगमनमेतन्नरककारणम्।
रजस्वलावीरान्नञ्च पुंश्चल्यन्नञ्च भक्षयम्।
अभक्ष्यान्नञ्च विप्रर्षे यदन्नं वृषलीपतेः॥"
तथा च।
"रजस्वलामकामाञ्च मलिनामप्रियान्तथा।
वर्णवृद्धां वयोवृद्धां तथा व्याधिप्रपीड़िताम्॥
हीनाङ्गीं गर्भिणीं दैव्यां योनिदोषसमन्विताम्।
सगोत्रां गुरुपुत्रीञ्च तथा प्रव्रजितामपि॥
सन्ध्यापूर्व्वखगम्याञ्च नोपेयात् प्रमदां नरः॥
रजस्वलां प्राप्नुवतो नरस्यानियतात्मनः।
वृद्ध्यायुस्तेजसां हानि-रधर्म्मश्च ततो भवेत्॥"
इति सुश्रुते चिकित्सितस्थाने २४ अध्यायः॥)

रजिः, पुं, चन्द्रवंशीयराजविशेषः। यथा। "पुरूरवसो ज्येष्ठपुत्रश्चायुर्नामा। स राहोर्दुहितरमुपयेमे। तस्यां पञ्च पुत्रानुत्पादयामास। नहुषक्षत्रवृद्धरम्भरजिसंज्ञाः। रजेः पञ्च पुत्रशतान्यतुलवीर्य्यसाराण्यासन्।" इति विष्णुपुराणे ४ अंशे। ८। ६। अध्यायौ॥ (राज्यम्। कन्याविशेषे, स्त्री। यथा, ऋग्वेदे। ६।२६। ६।
"त्वं रजिं पिठीनसे दशस्यन् षष्टिं सहस्रा
अश्व्या ददाहन्।"
"रजिं एतदाख्यां कन्यां वा राज्यं वा।" इति तद्भाष्ये सायणः॥ रज्जुः। यथा, ऋग्वेदे।१०। १००। १२। "रजिष्ठया रज्ज्या पश्व आ गोस्तूर्षति पर्यग्रं दुवस्युः॥"
"रजिष्ठया ऋजुतमया रज्ज्या रज्ज्वा।" इति तद्भाष्ये सायणः॥)

रजोबलं, क्ली, (रज इव बलति संवृणोतीति। बल्+अच्।) अन्धकारः। इति त्रिकाण्डशेषः॥

रजोरसं, क्ली, अन्धकारः। इति शब्दरत्नावली॥

रजोहरः, पुं, (रजो हरतीति। हृ+"हरतेरुद्यमनेऽच्।" ३।२।६। इति अच्।) रजकः। इति शब्दमाला॥

रज्जुः, स्त्री, (रज्यते रच्यते इति। रञ्ज्+"रञ्जेरसुच्च।" उणा० १। १६। इति उः। असुगागमश्च। धातुसकारलोपश्च। आगमसकारस्य जश्त्वम्। दकारः। तस्यापि चुत्वम्। जकारः। इत्युज्ज्वलः। अप्राणिजातेश्चारज्ज्वादीनामिति कथनात् न ऊङ्।) बन्धनसाधनवस्तु। दड़ी इति भाषा॥ तत्पर्य्यायः। शुल्बम् २ वराटकः ३ वटी ४ गुणः ५ इत्यमरः। २। १०। २७॥ शुल्बा ६। इति भरतधृतरत्नकोषः॥ शुल्बम् ७ शुल्वः ८ शुल्बी १० सुक्षम् ११ वराटः १२ वटाकरः १३ वटीगुणः १४। इति टीकान्तरम्॥ (तस्या अपहरणे दोषो यथा, मनौ। ११। १६६।
"कार्पासकीटजीर्णानां द्विशफैकशफस्य च।
पक्षिगन्धौषधीनाञ्च रज्ज्वाश्चैव चाहरं पयः॥")
वेणी। इति मेदिनी। ले, १४॥ (प्रत्यङ्गविशेषः। यथा, सुश्रुते शारीरस्थाने ५ अध्याये।
"रज्जवः सेवन्यः सङ्घाताः॥")

रटन्ती

रञ्जकं, क्ली, (रञ्जयतीति। रञ्ज्+णिच्+ण्वुल्।) हिङ्गुलम्। इति राजनिर्घण्टः॥ (गुणादयोऽस्य हिङ्गुलशब्दे विज्ञेयाः॥)

रञ्जकः, पुं, (रञ्जयतीति। रञ्ज्+णिच्+ण्वुल्।) कम्पिल्लकः। इति राजनिर्घण्टः॥ प्रीतिजनकः। वस्त्रादिरागकर्त्ता च॥ (अस्य गृहे भोजनं निषिद्धं यथा, मनौ। ४। २१६।

"श्ववतां पौष्किकानाञ्च चेलनिर्णेजकस्य च।
रञ्जकस्य कृतघ्नस्य यस्य चोपपतिर्गृहे॥"

नाद्यादिति मेधः॥ पित्तान्तर्गतोऽग्निविशेषः। यथा,—

"यत्तु यकृत्प्लीह्नोः पित्तं तस्मिन् रञ्जको ऽग्निरिति संज्ञा सरसस्य रागकृदुक्तः।" इति सुश्रुते सूत्रस्थाने २१ अध्यायः॥)

रञ्जनं, क्ली, (रज्यतेऽनेनेति। रञ्ज्+करणे ल्युट्।) रक्तचन्दनम्। इति मेदिनी। ने, ११५॥ (अस्य पर्य्यायो यथा,—

"पत्तङ्गं रक्तसारञ्च सुरङ्गं रञ्जनन्तथा।
मट्टरञ्जनमाख्यातं पत्तूरञ्च कुचन्दनम्॥"

इति भावप्रकाशस्य पूर्ब्बखण्डे प्रथमे भागे॥) हिङ्गुलम्। इति राजनिर्घण्टः॥ (रञ्ज्+णिच्। भावे ल्युट्। प्रीतिजननम्। यथा, रघौ। ४। १२।

"तथैव सोऽभूदन्वर्थो राजा प्रकृतिरञ्जनात्॥")

रञ्जनः, पुं, (रञ्जयतीति। रञ्ज्+णिच्+ल्युः।) रागजनकः। इति मेदिनी। ने, ११५॥ सुञ्जलवणम्। इति राजनिर्घण्टः॥

रञ्जनकः, पुं, (रञ्जन+कन्।) कट्फलः। इति राजनिर्घण्टः॥ (गुणादिविशेषोऽस्य कट्फलशब्दे विज्ञेयः॥)

रञ्जनद्रुः, पुं, (रञ्जयतीति। रञ्ज्+णिच्+ल्युः। रञ्जनश्चासौ द्रुश्चेति।) अच्छुकवृक्षः। आच्गाछ इति भाषा॥

रञ्जनी, स्त्री, (रञ्जन+ङीष्।) गुण्डारोचनिका। नीली। (अस्याः पर्य्यायो यथा,—

"नीली तु नीलिनी तूली कालदोला च नीलिका।
रञ्जनी श्रीफली तुङ्गा ग्रामीणा मधुपर्णिका॥
क्रौतिका कालकेशी च नीलपुष्पा च सा स्मृता॥"

इति भावप्रकाशस्य पूर्ब्बखण्डे प्रथमे भागे॥) मञ्जिष्ठा। इति मेदिनी। ने, ११५॥ प्रेंखालिका। इति शब्दचन्द्रिका॥ हरिद्रा। (अस्याः पर्य्यायो यथा,—

"हरिद्रा पीतिका गौरी काञ्चनी रजनी निशा।
मेहघ्नी रञ्जनी पीता वर्षिणी राजिनामिका॥"

इति वैद्यकरत्नमालायाम्॥) पर्ण्यटी। इति राजनिर्घण्टः॥

रट, वाचि। इति कविकल्पद्रुमः॥ (भ्वा०-पर०-सक०-सेट्।) रटति। इति दुर्गादासः॥

रटन्ती, स्त्री, (रट्यते पुण्यजनकत्वेन कथ्यते इति। रट्+बहुलकात् झच्। ङीप्।) गौणचान्द्रमाघीयकृष्णचतुर्द्दशी। तत्र अरुणोदयकाले स्नानं कर्त्तव्यम्। यथा। यमः।

रणं

"माघे मासि सिते पक्षे रटन्त्याख्या चतुर्द्दशी।
तस्यामुदयवेलायां स्नाता नावेक्षते यमम्॥"

उदयवेलायामरुणोदयवेलायाम्।

"अनर्कोभ्युदिते काले माघे कृष्णचतुर्द्दशी।
सतारत्योमकाले तु तत्र स्नानं महाफलम्।
स्नात्वा सन्तर्प्य तु यमान् सर्व्वपापैः प्रमुच्यते॥"

अत्र तिथिकृत्यत्वात् गौणचान्द्रादरः। अत्रारुणोदयकाल एव स्नानं पूर्ब्बोक्तचतुर्द्दशीयमतर्पणञ्च। यत्तु उदयवेलायां सूर्य्योदयवेलायां अनर्कोभ्युदित इति ईषदर्थे नञिति व्याख्यानं तत् समुद्रकरभाष्यधृतसतारत्योम इति इत्युत्तरार्द्धानवलोकनेनेति। इति तिथ्यादितत्त्वम्॥ किञ्च।

"अनर्कोभ्युदिते काले स्नानं कुर्य्यात् सरिज्जले।
शतजन्मकृतं पापं तत्क्षणादेव नश्यति॥
रटन्ती नाम विख्याता सर्व्वपापहरा शिवा॥"

इति मत्स्यसूक्ते ५५ पटलः॥

क्वचित् पुस्तके "सतारत्योमकाले इत्यत्र वह्निर्ज्वले इति पाठः॥ * ॥ तत्र श्यामापूजाविधिर्यथा,—

"माघे मासि सिते पक्षे रटन्त्याख्या चतुर्द्दशी।
तस्यां संपूजयेत्तारां महाविभवविस्तरैः।
चक्रवर्त्ती महाराजो भवत्येव न संशयः॥"

इति दक्षिणीलतन्त्रे ७ पटलः॥

अपि च।

"माघे मासि सिते पक्षे रटन्त्याख्या चतुर्द्दशी।
तत्राचौ कालिकापूजा सर्व्वविघ्नोपशान्तये॥"

इति कालिकापुराणम्॥ * ॥

अपरञ्च।

"माघे मासि सिते पक्षे रटन्त्याख्या चतुर्द्दशी।
तस्यां प्रदोषसमये पूजयेन्मुण्डमालिनीम्॥"

इत्याचार्य्यचूड़ामणिकृतकृत्यतत्त्वार्णवधृतवचनम्॥ अन्यत् श्यामाशब्दे द्रष्टव्यम्॥

रटितं, क्ली, कथितम्। रटधातोः कर्म्मणि क्तप्रत्ययेन निष्पन्नम्। (भावे क्तः।) कथनमात्रे, क्ली॥ (यथा, राजतरङ्गिण्याम्। २। १७४।

"वनहरिरसितैः पदे पदे
स प्रतिभटतां पटहध्वनेर्दधानैः।
अमनुत रटितैश्च कर्करेटोः
परिगलितां गमनोन्मुखस्त्रियामाम्॥")

रट, भाषणे। इति कविकल्पद्रुमः॥ (भ्वा०-पर०-सक०-सेट्।) भाषणं कथनम्। रटति। इति दुर्गादासः॥

रण, रुति। इति कविकल्पद्रुमः॥ (भ्वा०-पर०-अक०-सेट्।) रणति। रुतिः शब्दे। इति दुर्गादासः॥

रण, म गतौ। इति कविकल्पद्रुमः॥ (भ्वा०-पर०-सक०-सेट्।) म, रणयति। इति दुर्गादासः॥

रणं, क्ली पुं, (रणन्ति शब्दायन्तेऽत्रेति। रण्+"अधिकरणे।"३। ३। ५८। इत्यत्र। "वह्निरण्योरुपसंख्यानम्।" इति काशिकोक्त्या अप्।) युद्धम्। इत्यमरः। २। ८। १०४॥ (यथा,

रणाल

मनौ। ७। ९०।

"न कूटैरायुधैर्हन्याद्युध्यमानो रणे रिपून्।
न कर्णिभिर्नापि दिग्धैर्नाग्निज्वलिततेजनैः॥"

रमणम्। यथा, ऋग्वेदे। ८। १७। १२।

"ग्नाचिगो ग्नाचि पूजनायं रणाय ते सुतः॥"

"रणाय रमणाय।" इति तद्भाष्ये सायणः॥ रमणीये, त्रि। यथा, तत्रैव। १। ११६। २१।

"एकस्यावन्त्यो रावतं रणाय वग्रमश्विनासनये सहस्रा।"

"रणाय रमणीयाय।" इति तद्भाष्ये सायणः॥)

रणः, पुं, (रण्+अप्।) शब्दः। कणः। इति मेदिनी॥ गतिः। इति शब्दरत्नावली॥

रणतूर्य्यं, क्ली, (रणस्य तूर्य्यम्।) युद्धवाद्यम्। तत्पर्य्यायः। संग्रामपटहः२ अभयङ्डिण्डिमः३। इति त्रिकाण्डशेषः॥

रणप्रियं, क्ली, (रणे प्रियम्।) उशीरम्। इति राजनिर्घण्टः॥

रणप्रियः, पुं, (रणः प्रियोऽस्य। तत्र मांसभक्षणात्तथात्वम्।) श्येनकपक्षी। इति राजनिर्घण्टः॥ (विष्णुः। यथा, महाभारते। १३। १४६। ८६।

"स्तवः स्तवप्रियः स्तोत्रं स्तुतिः स्तोता रणप्रियः॥"

युद्धप्रियमात्रे, त्रि। यथा, कामन्दकीये। १७।३३।

"रणप्रियः साहसिक आत्मसम्भावितस्तथा।
विच्छिन्नधर्म्मकामार्थः क्रुद्धो मानी विमानितः॥")

रणमत्तः, पुं, (रणे रणं प्राप्य वा मत्तः।) हस्ती। इति शब्दमाला॥

रणमुष्टिः, पुं, विषमुष्टिक्षुपः। इति राजनिर्घण्टः॥

रणरङ्गः, पुं, (रणेषु रङ्गो मन्दः।) रणकातरहस्ती। तत्पर्य्यायः। प्रतिमः२। इति हारावली। २०४॥

रणरणं, क्ली, उद्दाहनम्। इति त्रिकाण्डशेषः॥

रणरणः, पुं, (रणरण इति शब्दोऽस्यास्तीति। अर्श आदित्वादच्।) मशकः। इति त्रिकाण्डशेषः॥ (रणे रणः शब्दो यस्य। रणगर्ज्जनशीले, त्रि। यथा,—

"अयाद्यः करणो रणो रणरणो राणो रणो रावणो
भूत्वा येन रमा रमा रमरमा रामा रमा सा रमा।
सश्रीमानदयो दयो दयदयो दायो दयो वेदयो
विष्णुर्ज्विष्णुरभीरभीरभरभीराभीरभीसौरभिः॥"

इत्युद्भटः॥)

रणरणकः, पुं, उत्कण्ठा। इति हेमचन्द्रः। २। २२६॥ (यथा, उत्तररामचरिते प्रथमाङ्के।

"अये सैवेयं रणरणकदायिनी चित्रदर्शनादिरहभावना देव्याः स्वप्नोद्वेगं करोति॥")

रणसङ्कुलं, क्ली, (रणस्य सङ्कुलम्।) तुमुलम्। इत्यमरः। २। ८। १०६॥

रणालङ्करणः, पुं, (रणस्य अलङ्करणः।) कङ्कपक्षी। इति राजनिर्घण्टः॥

रतः, त्रि, (रम्+"अमन्ताड्डः।" उणा० १।११३। इति डः।) अर्द्धचर्म्मावच्छिन्नावयवः। धूर्त्तः। इति संक्षिप्तसारोणादिवृत्तिः॥

रतकः, पुं, (रत इवेति। रत+कन्।) अपलवृक्षः। इति शब्दचन्द्रिका॥

रतङ्गा, स्त्री, (रमन्तेऽत्रेति। रम्+"अमन्ताड्डः।" उणा० १।११३। इति डः। टाप्।) मूषिकपर्णी। इत्यमरः। २।४।८८॥ (यथा, "हिङ्गुलात् सम्भवं सूतं पालिधारसमर्द्दितम्। रङ्गाग्रोधितगन्धञ्च तेनैव कज्जलीकृतम्॥" इति वैद्यकरसेन्द्रसारसंग्रहे ज्वरलोमनाधरसे॥) विधवा। राँड़ इति भाषा॥ यथा। तिष्ठते रङ्गा विक्रमैस्तेभ्यः स्वहृदयं यत्नतोत्यर्थः। इति संक्षिप्तसारे तिङन्तपादः॥

रतङ्गाश्रमी [न्] पुं, (रङ्गो विफल आश्रमः सोऽस्यास्य। रङ्गाश्रम+इनिः।) अष्टचत्वारिंशद्वत्सरोपरिभार्य्याविहीनः। यथा, भविष्यपुराणम्।

"चत्वारिंशद्वत्सराणां साष्टानाञ्च परे यदि। स्त्रिया वियुज्यते कश्चित् स तु रङ्गाश्रमी मतः॥" इत्युद्वाहतत्त्वम्॥

रतं, क्ली, (रमणमिति। रम्+भावे क्तः।) मैथुनम्। इत्यमरः। २।७।५७॥ (यथा, आर्य्यासप्तशत्याम्। ५४६।

"विपरीतमपि रतं ते स्रोतो नद्या इवानुकूलमिदम्। तटतरुमिव मम हृदयं समूलमपि वेगतो हरति॥"

तत्तु द्विविधम्। यथा, कामशास्त्रम्।

"बाह्यमाभ्यन्तरञ्चेति द्विविधं रतमुच्यते। तत्राद्यं चुम्बनाश्लेषनखदन्तव्रतादिकम्॥ द्वितीयं सुरतं साक्षान्नानाकारेण कल्पितम्॥") गुह्यम्। इति मेदिनी। ते, ४६॥ अनुरक्ते, त्रि॥ (यथा, राजतरङ्गिण्याम्। ३।५०५।

"तुल्यगुणनिर्विशेषा तद्विषयसुतौ रता॥" नियुक्तः। यथा, मनुः। २।२३५।

"यावन्नयत्ते जीवेयुस्तावन्नान्यं समाचरेत्। तेष्वेव नित्यं शुश्रूषां कुर्य्यात् प्रियहिते रतः॥")

रतकीलः, पुं, (रते मैथुने कीलतीव परस्परं संबध्नातीति। कील+कः।) कुक्कुरः। इति हेमचन्द्रः। ४।३४६॥ (रतस्य कीलः।) सुरतकण्टकश्च॥

रतकूजितं, क्ली, (रतस्य कूजितम्।) मैथुनकालीनवाक्। तत्पर्य्यायः। मञ्जितम् २। इति हेमचन्द्रः॥

रतगुरुः, पुं, (रतस्य रते वा गुरुः।) पतिः। इति त्रिकाण्डशेषः। ६।४४॥

रतज्वरः, पुं, (रतेन ज्वरोऽस्य।) काकः। इति त्रिकाण्डशेषः॥

रततालौ, [न्] पुं, (रते तलति प्रतिष्ठां लभते इति। तल+णिनिः।) षिड्गः। इति शब्दमाला॥

रततालौ, स्त्री, (रते तालः प्रतिष्ठास्याः। ङीष्।) कुट्टनी। इति त्रिकाण्डशेषः॥

रतनारीचः, पुं, (रते नार्य्यां चिनोतीति। चि+डः।) नारीणां प्रीत्कारः। कुक्कुरः। खरः। इति मेदिनी। चे, २१॥ षिड्गः। इति शब्दमाला॥

रतनिधिः पुं, (रतमेव निधिवत् गोप्यं यस्य।) खञ्जनः। इति शब्दरत्नावली॥

रतर्द्धिकं, क्ली, (रतस्य ऋद्धिरत्र। शेषाद्विभाषेति कप्।) दिवसः। सुखस्थानम्। अष्टमङ्गलम्। इति मेदिनी। के, २१०॥

रतव्रणः, पुं, (रतेन व्रणोऽस्य। रतं व्रण इव कष्टदायकं यस्येति वा।) कुक्कुरः। इति हेमचन्द्रः। ४।३४६॥

रतशायी, [न्] पुं (रतेन शेते तनूकरोत्यात्मानमिति। शी+णिनिः।) कुक्कुरः। इति हेमचन्द्रः। ४।३५६॥

रतशिखण्डकः, पुं, (रते रतार्थं वा शिखण्डते इति। शिखण्ड+खुल्।) स्त्रीचौरः। इति त्रिकाण्डशेषः॥ लम्पटः। लोचा इति भाषा। तत्पर्य्यायः। षिड्गः २ वलीकः ३ पल्लवः ४ द्रावकः ५ सुनङ्गः ६ चुम्बकः ७ खङ्गः ८ भृङ्गः ९ नारीतरङ्गकः १० खस्तिकः ११ रतनारीचः १२ वन्धकः १३ रततालौ १४ कटारः १५ कामी १६ खेटौ १७ नागरः १८ दासीप्रियः १९ कुण्डकीटः २०। इति शब्दमाला॥

रतान्धकः, पुं; (रतार्थमन्धक इव।) कुक्कुरः। इति हेमचन्द्रः। ४।३४६॥

रतान्धी, स्त्री, (रते अन्धीव।) कुलभटिः। इति त्रिकाण्डशेषः॥

रतामर्दः, पुं, (रते रतकाले आमर्दोऽस्य।) कुक्कुरः। इति शब्दमाला॥

रतायनी, स्त्री, (रतमेवायनं जीवनगतिर्यस्याः।) वेश्या। इति शब्दमाला॥

रतार्थिनी, स्त्री, (रतमर्थयत इति। अर्थ+णिनिः। ङीप्।) मैथुनाभिलाषिणी। इति हलायुधः॥

रतिः, स्त्री, (रम्यतेऽनया इति। रम्+क्तिन्।) कामदेवपत्नी॥ (अस्याः नामनिरुक्तिर्यथा, ब्रह्मवैवर्त्ते प्रकृतिखण्डे। ४।६।

"मनो मथ्नाति सर्व्वेषां पञ्चबाणेन कामिनीम्। तन्नाम मन्मथस्तेन प्रवदन्ति मनीषिणः॥ तस्य पुंसो वामपार्श्वात् कामस्य कामिनी वरा। बभूवातीव ललिता सर्व्वेषां मोहकारिणी॥ रतिर्बभूव सर्व्वेषां तां दृष्ट्वा सस्मितां सतीम्। रतीति तेन तन्नाम प्रवदन्ति मनीषिणः॥")

तस्य उत्पत्तिः नामकारणं कामपत्नीत्वञ्च यथा, दक्ष उवाच।

"मद्देहजेयं कन्दर्प मद्रूपगुणशालिनी। एनां गृहीत्व भार्य्यार्थे भवतः सदृशी गुणैः॥ एषा तव महातेजाः सर्व्वदा सहचारिणी। भविष्यति यथाकामं धर्म्मतो वशवर्त्तिनी॥

मार्कण्डेय उवाच।

इत्युक्त्वा प्रददौ दक्षो देहस्वेदजलोद्भवाम्। कन्दर्पायाग्रतः कृत्वा नाम कृत्वा रतीति ताम्॥

तां वीक्ष्य मदनो रामां रत्याख्यां सुमनोहराम्। आत्मानुगेन विद्धोऽसौ सुमोह रतिरञ्जितः॥"

इति कालिकापुराणे ३ अध्यायः॥

अनुरागः। (यथा, भागवते। १।२।८।

"नोत्पादयेद् यदि रतिं श्रम एव हि केवलम्॥") रतम्। (यथा, हरिवंशे। ७४।१८।

"कामिनीं प्रथमयौवनान्वितां मद्गजेन्द्रगतिदुर्ल्लितस्तनाम्। उत्सस्नौ समवलम्ब्य या रतिः सा न धातृभवनेऽस्ति मे मतिः॥") गुह्यम्। इति मेदिनी। ते। ४६॥ (अप्सरोविशेषः। यथा, महाभारते। १३।१६। ४५।

"विद्युता प्रथमा दान्ता विद्योता रतिरेव च। एताश्चान्याश्च वै कन्याः प्रवृत्ताश्चरसः शुभाः॥" प्रीतिः। यथा, रामायणे। १।१८।२४।

"तेषां केतुरिव ज्येष्ठो रामो रतिकरः पितुः॥" 'रतिः प्रीतिः।' इति तट्टीकायां रामानुजः॥) रतिबन्धा यथा,—

"न भवन्ति यदा नार्य्यस्तुष्टा वाद्यरते मताः। नानाविधैस्तथा बन्धे रन्तव्याः कामिभिः स्त्रियः॥ पद्मासनो नागपाशो लतावेष्टोऽर्द्धसंपुटम्। कुलिशं सुन्दरश्चैव तथा केशर एव च॥ हिल्लोलो नरसिंहोऽपि विपरीतस्तथापरः। शुद्धो वै धेनुकश्चैवसृत्कण्ठस्तु ततः परम्। सिंहासनो रतिनागो विद्याधरस्तु षोड़शः॥"

इति रतिमञ्जरी॥

एतेषां लक्षणानि तत्तच्छब्दे द्रष्टव्यानि॥

रतिकुहरं, क्ली, (रत्याः कुहरम्।) योनिः। इति त्रिकाण्डशेषः॥

रतिक्रिया, स्त्री, (रत्याः क्रिया।) मैथुनम्। तत्पर्य्यायः। संवेशनम् २। इति त्रिकाण्डशेषः॥ (यथा, कामन्दकीये नीतिसारे। २।२५।

"अग्निहोत्रोपचर्य्यं जीवनञ्च स्वकर्म्मभिः। धर्म्मोऽयं गृहिणां काले पर्व्ववर्ज्यं रतिक्रिया॥")

रतिगृहं, क्ली, (रत्याः गृहम्।) योनिः। इति त्रिकाण्डशेषः॥ रमणमन्दिरञ्च॥ (यथा, हरिवंशसंहितायाम्। ५३।१६।

"पश्चाश्रमिगामभितं धान्यायुधवद्विरतिगृहाख्याच्च।

नेच्छन्ति ग्राम्यकारा हस्तग्रतादुच्छ्रितंपरतः॥")

रतिनागः, पुं, षोड़शरतिबन्धान्तर्गतपञ्चदशबन्धः। तस्य लक्षणं यथा,—

"पीड़येदूरुयुग्मेन कामुकं कामिनी यदि। रतिनागः समाख्यातः कामिनीनां मनोरमः॥"

इति रतिमञ्जरी॥

रतिपतिः, पुं, (रत्याः पतिः।) कामदेवः। इत्यमरः॥ (यथा, महाभागवतपतिस्तोत्रे। १०।

"पश्चात्तिष्ठलमाश्रितो रतिपतिर्देवस्य रत्नोत्पले ।
विभ्रत्या समभेद्यवं धनुरिषून् पौष्पान् वहन् पञ्च च ॥")
देशविशेषस्थस्त्रीणां स्थानविशेषे तस्याविर्भावो यथा,—
"वाचि श्रीमाथुरीणां जनकजनपदस्थायिनीनां कटाक्षे
दन्ते गौड़ाङ्गनानां सुखखितजघने चोत्कलप्रेयसीनाम् ।
तैलङ्गीनां नितम्बे सजलघनरुचौ केरलीकेशपाशे
कार्णाटीनां कटौ च स्फुरति रतिपतिर्गुर्जरीणां स्तनेषु ॥"
इति साहित्यदर्पणम् ॥
रतिपाशकः, पुं, (रतेः पाश इव । ततः स्वार्थे कन् ।)
रतिबन्धविशेषः । यथा,—
"पीड़येदूरुयुग्मेन कामुको यदि सुन्दरीम् ।
रतिपाशस्तथाख्यातः कामिनीनां सुखावहः ॥"
इति स्मरदीपिका ॥
रतिप्रियः, पुं, (रतेः प्रियः ।) कामदेवः । इति शब्दरत्नावली ॥ सुरतप्रियश्च ॥ (स्त्री, भक्तिविशेषः । यथा, देवीभागवते । ७ । ३० । ६८ ।
"गोदावर्य्यां चिसन्ध्या तु गङ्गाद्वारे रतिप्रिया ॥")
रतिमदा, स्त्री, (रतेर्मदोऽस्याः ।) अप्सरसः । यथा,—
"सर्ग्गानन्दा रतिमदाप्सरसः सुमदात्मजा ॥"
इति चिकाण्डशेषः ॥
रतिमन्दिरं, क्ली, (रतेर्मन्दिरमिव ।) योनिः । इति जटाधरः ॥ मैथुनगृहम् । यथा,—
"सत्कारो रतिमन्दिरावधि सखीकर्णावधि स्वागतं
चेतः कान्तसमीहितावधि पदन्यासावधि प्रेक्षितम् ।
हास्यं चाधरपल्लवावधि महामानोऽपि मौनावधिः
सर्व्वं सावधि नावधिः कुलभुवां प्रेम्णः परं केवलम् ॥"
इति रसमञ्जरी ॥
रतिमित्रः, पुं, (रतौ मित्रः सूर्य्य इव ।) रतिबन्धविशेषः । तस्य लक्षणं यथा,—
"पातयेदूरुयुग्मे च कामुकं यदि कामुकी ।
रतिमित्रस्तदाख्यातः कामिनीनां सुखावहः ॥"
इति रतिमञ्जरी ॥
रतिरमणः, पुं, (रत्या रमणः ।) कामदेवः । इति चिकाण्डशेषः ॥
रतिलक्षं, क्ली, (रतिं लक्षयतीति । लक्षि + अच् ।) त्रिभुवनम् । इति हारावली । ५० ॥
रतिसत्वरा, स्त्री, (रतौ सत्वरा ।) चिरञ्जीवा । इति शब्दचन्द्रिका ॥ पिड़िङ्ग प्राक इति भाषा ॥

रतिसुन्दरः, पुं, (रता सुन्दरः सुखावहः ।)
रतिबन्धविशेषः । तस्य लक्षणं यथा,—
"नारीपदद्वयं क्रामी धारयेद्धृदये यदि ।
धृतकण्ठो रमेत् कामी बन्धः स्याद्रतिसुन्दरः ॥"
इति रतिमञ्जरी स्मरदीपिका च ॥
रतूः, स्त्री, (ऋतीयते इति । ऋगत्यर्थकऋतसौत्रधातुः + "ऋतेरम् च ।" उणा० १ । ६४ । इति कूः । अम् च ।) देवनदी । सत्यवाक् । इति सिद्धान्तकौमुद्यामुणादिवृत्तिः ॥
रतोद्वहः, पुं, (रतं उद्वहति प्रापयतीति । उत् + वह् + अच् ।) कोकिलः । इति शब्दमाला ॥
रत्नं, क्ली, (रमयति हर्षयतीति । रम् + णिच् + "रमेस्त च ।" उणा० ३ । १४ । इति नः तकारश्चान्तादेशः ।) अश्मजातिः । मुक्तादि । तत्पर्य्यायः । मणिः २ । इत्यमरः ॥ (यथा, कुमारे । ५ । ४५ ।
"न रत्नमन्विष्यति मृग्यते हि तत् ॥")
खजातिश्रेष्ठः । इति मेदिनी ॥ (यथा, मार्कण्डेये । ८५ । ४५ ।
"क्षीररत्नमतिचार्व्वङ्गी द्योतयन्ती दिशःक्षिपा ॥")
माणिक्यम् । वज्रम् । इति राजनिर्घण्टः ॥*॥
अथ रत्नोत्पत्तिकारणम् । यथा,—
सूत उवाच ।
"वक्ष्मि परीक्षां रत्नानां बलो नामासुरोऽभवत् ।
इन्द्राद्या निर्ज्जितास्तेन निर्जेतुं तैर्न शक्यते ॥
वरयाजेन पशूनां याचितः स सुरैर्मखे ।
बलो ददौ खपशुतामतिसत्त्वो मखे हतः ॥
पशुवत्स विशेत् स्तम्भे खवाक्यास्त्रनियन्त्रितः ।
बलो लोकोपकाराय देवानां हितकाम्यया ॥
तस्य सत्त्वविशुद्धस्य सुविशुद्धेन कर्म्मणा ।
कायस्यावयवाः सर्व्वे रत्नबीजत्वमाययुः ॥
देवानामथ यज्ञानां सिद्धानां पवनाग्निनाम् ।
रत्नबीजमयं प्राहुः सुमहानभवन्नदा ॥"*॥
अथ तस्याकरस्थानानि यथा,—
"तेषान्तु पततां वेगाद्विमानेन विहायसा ।
यद्यत् पपात रत्नानां बीजं क्वचन किञ्चन ॥
महोदधौ सरिति वा पर्व्वते काननेऽपि वा ।
तत्तदाकरतां यातं स्थानमाधेयगौरवात् ॥
तेषु रत्नोद्विषद्यालव्याधिघ्नान्यघहानि च ।
प्रादुर्भवन्ति रत्नानि तथैव विगुणानि च ॥
वज्रमुक्ताश्मसभ्यः सपद्मरागाः समरकताः प्रोक्ताः ।
अपि चेन्द्रनीलमणिवरवैदूर्य्याश्च पुष्यरागाश्च ।
कर्केतनं सपुलकं रुधिराक्षसमन्वितं तथा स्फटिकम् ।
विद्रुममणिश्च यत्नादुद्दिष्टं संग्रहे तज्ज्ञैः ॥*॥
आकारवर्णौ प्रथमं गुणदोषौ ततः फलं परीक्षा च ।
मूल्यञ्च रत्नकुशलैर्विज्ञेयं सर्व्वशास्त्राणाम् ॥
कुलभेषूपजायन्ते यानि चोपहतेऽहनि ।
दोषैस्तानुपयुञ्जते हीयन्ते गुणसम्पदा ॥
परीक्षापरिशुद्धानां रत्नानां पृथिवीभुजा ।

धारयं संग्रहो वापि कार्य्यः श्रियमभीप्सता ॥
प्राक्षज्ञाः कुशलाश्चापि रत्नभाजः परीक्षकाः ।
त एव मूल्यमाचार्या वेत्तारः परिकीर्त्तिताः ॥"
इति गारुड़े ६८ अध्यायः ॥
विशेषरत्नपरीक्षा तत्तच्छब्दे द्रष्टव्या ॥*॥ चतुर्दश महारत्नानि यथा । रुग्वेदोक्तिश्चरथः तत्तनयः शुक्रबिन्दुश्चतुर्दशमहारत्नश्चक्रवर्त्तिभवत् । चतुर्दश महान्ति रत्नानि यस्य सः । रत्नानि तु स्वजातिश्रेष्ठानि धर्म्मसंहितोक्तानि ।
"चक्रं रथो मणिः खड्गश्चर्म्म रत्नञ्च पञ्चमम् ।
केतुर्निधिश्च सप्तैवमप्राणानि प्रचक्षते ॥
भार्य्या पुरोहितश्चैव सेनानी रथकृच्च यः ।
पत्त्यश्वौ कलभश्चेति प्राणिनः सप्त कीर्त्तिताः ॥
चतुर्दशैतानि रत्नानि सर्व्वेषां चक्रवर्त्तिनामिति । इति विष्णुपुराणे ४ अंशे १२ अध्यायः तट्टीका च ॥ (अथ रत्नस्य निरुक्तिः ।
"धनार्थिनो जनाः सर्व्वे रमन्तेऽस्मिन्नतीव यत् ।
ततो रत्नमिति प्रोक्तं शब्दशास्त्रविशारदैः ॥"
अथ रत्नस्य नामानि स्वरूपनिरूपणञ्च । यथा,—
"रत्नं क्लीवे मणिः पुंसि स्त्रियामपि निगद्यते ।
तत्तु पाषाणभेदोऽस्ति मुक्तादि च तदुच्यते ॥"
अथ रत्नानां निरूपणम् ।
"रत्नं गारुत्मतं पुष्यरागो माणिक्यमेव च ।
इन्द्रनीलञ्च गोमेदस्तथा वैदूर्य्यमित्यपि ॥
मौक्तिक विद्रुमश्चेति रत्नान्युक्तानि वै नव ।
रत्नं हीरा । गारुत्मतं पान्ना । माणिक्यं पद्मरागः । इन्द्रनीलः लीला ।
विष्णुधर्म्मोत्तरेऽपि नवरत्ननिरूपणम् ।
मुक्ताफलं हीरकञ्च वैदूर्य्यं पद्मरागकम् ।
पुष्यरागञ्च गोमेदं नीलं गारुत्मतन्तथा ।
प्रवालयुक्तान्येतानि महारत्नानि वै नव ॥"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥)
रत्नकन्दलः, पुं, (रत्नानां कन्दलो नवाङ्कुर इव ।) प्रवालम् । इति शब्दरत्नावली ॥
रत्नकूटः, पुं. (रत्नमयः कूटो यद्वत्तस्य ।) पर्व्वतविशेषः । इति शब्दरत्नावली ॥ (क्ली, द्वीपविशेषः । यथा, कथासरित्सागरे । २६ । ३ ।
"अस्ति द्वीपवरं मध्ये रत्नकूटाख्यमम्बुधेः ।
कृतप्रतिष्ठरत्नार्हे भगवान् हरिरर्च्चितः ॥")
रत्नगर्भः, पुं, (रत्नानि गर्भे यस्य यथा अधिकारेऽस्य ।) कुबेरः । इति चिकाण्डशेषः ॥ (रत्नानिगर्भेऽस्य ।) समुद्रः । इति राजनिर्घण्टः ॥
रत्नगर्भा, स्त्री, (रत्नानि गर्भे मध्येऽस्याः ।) पृथिवी । इति हेमचन्द्रः । ४ । ३ ॥ उपचारात् गुणवत्पुत्रवती च ॥
रत्नद्वीपं, क्ली, (रत्ननिर्म्मितं द्वीपम् । प्राक्पार्थिववत् समासः ।) रत्ननिर्म्मितस्थानम् । यथा,—
"सिंहस्कन्धाधिसंरूढां नानालङ्कारभूषिताम् ।
चतुर्भुजां महादेवीं नागयज्ञोपवीतिनीम् ॥
शङ्खचक्रधनुर्ब्बाणलोचनत्रितयान्विताम् ।
रक्तवस्त्रपरीधानां बालार्कसदृशद्युतिनूम् ॥

नारदाद्यैर्मुनिगणैः सेवितां भवसुन्दरीम् ।
त्रिवलीवलयोपेतनाभिनालसृणालिनीम् ॥
रत्नद्वीपे महाद्वीपे सिंहासनसमन्विते ।
प्रफुल्लकमलारूढां ध्यायेत्तां भवगेहिनीम् ॥"
इति तन्त्रसारे जगद्धात्रीध्यानम् ॥

रत्नधेनुः, स्त्री, (रत्ननिर्म्मिता धेनुः ।) महादानविशेषः । यथा,—
मत्स्य उवाच ।
"अथातः संप्रवक्ष्यामि महादानमनुत्तमम् ।
रत्नधेनुरिति ख्यातं गोलोकफलदं नृणाम् ॥
पुण्यन्दिनमथासाद्य तुलापुरुषदानवत् ।
लोकेशावाहनं कृत्वा ततो धेनुं प्रकल्पयेत् ॥
भूमौ कृष्णाजिनं कृत्वा लवणद्रोणसंयुतम् ।
धेनुं रत्नमयीं कुर्य्यात् सङ्कल्प्य विधिपूर्ब्बकम् ॥
स्थापयेत् पद्मरागाणामेकाशीतिं मुखे बुधः ।
पुष्यरागशतं तद्वदूधोधायां परिकल्पयेत् ॥
ललाटे हेमतिलकं मुक्ताफलशतं दृशोः ।
भ्रुयुगे विद्रुमशतं शुक्तौ कर्णद्वये स्मृते ॥
काञ्चनानि तु शृङ्गाणि शिरो वज्रशतात्मकम् ।
ग्रीवायां नेत्रपटलं गोमेदकसमन्वितम् ॥
इन्द्रनीलशतं पृष्ठे वैदूर्य्यशतपार्श्वकौ ।
स्फाटिकैरुदरं कार्य्यं सौगन्धिकशतानि हृदि ॥
खुरा हेममयाः कार्य्याः पुच्छं मुक्तावलीमयम् ।
सूर्य्यकान्तेन्दुकान्तौ च घ्राणं कर्पूरचन्दनैः ॥
कुङ्कुमानि च रोमाणि रौप्यं नाभिञ्च कारयेत् ।
गारुत्मतशतं तद्वदस्थीनि परिकल्पयेत् ॥
तथान्यानि च रत्नानि स्थापयेत् सर्व्वसन्धिषु ।
कुर्य्याच्छर्करया जिह्वां गोमयञ्च गुडात्मकम् ॥
गोमूत्रमाज्यञ्च तथा दधि दुग्धं स्वरूपतः ।
पुच्छाग्रे चामरं दद्यात् समीपे ताम्रदोहनम् ॥
कुरुलानि च हेमानि भूषणानि च भक्तितः ।
कारयेदेवमेवन्तु चतुर्थांशेन वत्सकम् ॥
तथान्यानि च सर्व्वाणि पादांश्चेक्षुमयांस्तथा ।
नानाफलानि सर्व्वाणि पल्लवर्णवितानकम् ॥
एवं विरचनं कृत्वा तद्गोमाधिवासनम् ।
ऋत्विग्भ्यो दक्षिणां दत्त्वा धेनुमामन्त्रयेत्ततः ।
गुडधेनुवदाचार्य्य इदमुच्चारयेत्ततः ॥
त्वं सर्व्वदेवगणधाम यतः पठन्ति
रुद्रेन्द्रविष्णुकमलासनवामदेवाः ।
तस्मात् समस्तभुवनत्रयहेतुभूता
मां पाहि देवि भवसागरपीड्यमानम् ॥
आमन्त्र्य धेनुमभितः परिवर्त्य भक्त्या
दद्याद्द्विजाय गुरवे जलपूर्ब्बकं ताम् ।
यः पुण्यमाप्य दिनमत्र कृतोपवासः
पापैर्विमुक्ततनुरेति पदं मुरारेः ॥
इति सकलविधिज्ञो रत्नधेनुप्रदानं
वितरति च विमानं प्राप्य देदीप्यमानम् ।
कलिकलुषविमुक्तो बन्धुभिः पुत्रपौत्रैः
स हि मदनसुरूपः स्थानमभ्येति शम्भोः ॥"
इति मत्स्यपुराणे महादानानुकीर्त्तने रत्नधेनुप्रदानिको नाम २९२ अध्यायः ॥

रत्ननिधिः, पुं, खञ्जनपक्षी । इति त्रिकाण्डशेषः ॥

रत्नपारायणं, क्ली, (परायणमेव । अण् । रत्नस्य पारायणम् ।) सर्व्वरत्नस्थानम् । यथा,—
"समुद्रोपत्यका हैमी पर्व्वताधित्यका पुरी ।
रत्नपारायणं नाम्ना सङ्केति मम मैथिलि ! ॥"
इति भट्टिः ॥

रत्नप्रभा, स्त्री, (रत्नानां प्रभाच ।) जिनानां नरकविशेषः । यथा,—
"रत्नशर्क्करावालुकापङ्कधूमतमप्रभाः ।
महातमप्रभा चेत्यधोऽधो नरकभूमयः ॥"
इति हेमचन्द्रः ॥

रत्नमुख्यं, क्ली, (रत्नेषु मुख्यम् ।) हीरकम् । इति हेमचन्द्रः ॥

रत्नराट्, [ज्] क्ली, (रत्नेषु राजते इति । राज् + क्विप् ।) माणिक्यम् । इति राजनिर्घण्टः । रत्नश्रेष्ठञ्च ॥

रत्नवती, स्त्री, (रत्नानि सन्त्यस्यामिति । रत्न + मतुप् । मस्य वः । उगित्वात् ङीप् ।) पृथिवी । इति शब्दमाला ॥ (राज्ञो वीरकेतोः कन्या । यथा, कथासरित्सागरे । ८८ । ६ ।
"नन्दयन्त्यभिधानायां पत्न्यां तस्योदपद्यत ।
सुता रत्नवती नाम देवताराधनार्ज्जिता ॥")
रत्नयुक्ते, त्रि ॥ (यथा, रघुः । ६ । ४ ।
"पराङ्मुखैर्वर्षशतैरगोपपन्न-
मासेदिवान् रत्नवदासनं सः ॥"
फलप्रदे च त्रि । यथा, ऋग्वेदे । ३ । २८ । ५ ।
"धारत्नवन्तमग्नतेषु जागृविम् ॥"
"रत्नवन्तं रत्नशब्देन स्वर्गादिलक्षणमुत्तमं फलमभिधीयते तद्वन्तं फलप्रदम् ।" इति तद्भाष्ये सायणः ॥)

रत्नवर्षुकं, क्ली, (रत्नानि वर्षितुं शीलमस्य । वृष् + "सञ्जपतपदस्थेति ।" ३ । २ । १५४ । इति उकञ् ।) पुष्यकरञ्जः । इति शब्दरत्नावली ॥
रत्नवर्षणशीले, त्रि ॥

रत्नसानुः, पुं, (रत्नानि सानौ प्रस्थे यस्य ।) सुमेरुपर्व्वतः । इत्यमरः । १ । १ । ५२ ॥

रत्नसूः, स्त्री, (रत्नानि सूते इति । षू प्रसवे + क्विप् ।) पृथिवी । इति हेमचन्द्रः । ३ । ३ ॥ (यथा, राजतरङ्गिण्याम् । १ । ४२ ।
"त्रिलोक्यां रत्नसूः श्राद्धा तस्यां धनपतेर्हरित् ।
तत्र गौरीगुरुः शैलो यत्तस्मिन्नपि मङ्गलम् ॥"
रत्नप्रसवकारिणि, त्रि । यथा, रघुः । १ । ६५ ।
"न मामवति सद्वीपा रत्नसूरपि मेदिनी ॥")

रत्नाकरः, पुं, (रत्नानामाकरः उत्पत्तिस्थानम् ।) समुद्रः । इत्यमरः । १ । १० । २ ॥ (यथा, महाभारते । ३ । १०१ । २३ ।
"दुर्गं समाश्रित्य महोर्म्मिमन्तं
रत्नाकरं वरुणस्यालयं वा ॥")
रत्नोत्पत्तिस्थानञ्च ॥ (स्वनामख्यातकविविशेषः । यथा, राजशेखरकृतश्लोकः ।
"मा वा सन्तु हि चत्वारः प्रायो रत्नाकरा इमे ।
इतीव स कृतो धात्रा कविरत्नाकरोऽपरः ॥"
स तु ध्वनिगाथापञ्चिका-वक्रोक्तिपञ्चाशिका-हरविजयादिग्रन्थप्रणेता । अन्तभागे स्तनुर्विद्याधिपत्यपरनामायं कविः काश्मीरदेशेऽवन्तिवर्म्मणो राज्यकाले समुत्पन्नः । तथा च राजतरङ्गिण्याम् । ५ । ३६ ।
"सुक्ताकणः शिवस्वामी कविरानन्दवर्द्धनः ।
प्रथां रत्नाकरश्चागात् साम्राज्येऽवन्ति-
वर्म्मणः ॥"
अवन्तिवर्म्मराज्यकालस्तु ७७७ शकाब्दादारभ्य ८०६ शकाब्दपर्य्यन्तमासीदतस्तत्कालीन एवायं कविरिति ज्ञायते । रत्नाकरप्रणीतं हरविजयाभिधं पञ्चाशत्सर्गात्मकं महाकाव्यं काश्मीरेषु प्रसिद्धमस्ति ॥)

रत्नाङ्कः, पुं, (रत्नानामङ्कश्चिह्नं यस्मिन् ।) विष्णुरथः । इति शब्दरत्नावली ॥ (रत्नानामङ्कः ।) रत्नचिह्नञ्च ॥

रत्नाचलः, पुं, (रत्ननिर्म्मितः अचलः । शाकपार्थिववत् समासः ।) दानार्थमणिमयपर्व्वतः । यथा,—
"अतः परं प्रवक्ष्यामि रत्नाचलमनुत्तमम् ।
सुक्ताफलसहस्रेण पर्व्वतः स्यादनुत्तमः ॥
मध्यमः पञ्चशतिकस्त्रिशतेनाधमः स्मृतः ।
चतुर्थांशेन विष्कम्भाः पर्व्वताः स्युः समन्ततः ॥
पूर्ब्बेण वज्रगोमेदैर्दक्षिणेनेन्द्रनीलकैः ।
पुष्यरागयुतैः कार्य्यो विद्रुमैर्गन्धमादनः ॥
वैदूर्य्यविद्रुमैः पश्चात् संमिश्रो विमलाचलः ।
पद्मरागसमो वर्णैरुत्तरेण तु विन्यसेत् ॥
धान्यपर्व्वतवत् सर्व्वमत्रापि परिकल्पयेत् ।
तदद्रावाहनं कृत्वा दृष्ट्वा देवांश्च काञ्चनान् ॥
पूजयेत् पुष्पपानौघैः प्रभाते चाथ पूर्ब्बवत् ।
पूर्ब्बवद्गुरुऋत्विग्भ्यः फलमन्त्रानुदीरयेत् ॥
यथा देवगणाः सर्व्वे सर्व्वरत्नेष्ववस्थिताः ।
त्वञ्च रत्नमयो नित्यमतः पाहि महाचल ! ॥
यस्माद्रत्नप्रदानेन तुष्टिं प्रकुरुते हरिः ।
सदा रत्नप्रदानेन तस्मान्नः पाहि पर्व्वत ॥
अनेन विधिना यस्तु दद्याद्रत्नं महागिरिम् ।
स याति वैष्णवं लोकममरेश्वरपूजितः ॥
यावत् कल्पशतं साग्रं वसेच्चेह नराधिप ।
रूपारोग्यगुणोपेतः सप्तद्वीपाधिपो भवेत् ॥
ब्रह्महत्यादिकं किञ्चिद्यदन्यासुञ्च वा कृतम् ।
तत् सर्व्वं नाशमायाति गिरिर्व्वज्रहतो यथा ॥"
इति मात्स्ये ९० अध्यायः ॥

रत्नाभरणं, क्ली, (रत्नविशिष्टमाभरणम् ।) मणिमयालङ्करणम् । जड़ाओ गहना इति भाषा ॥ तस्य धारणगुणाः ।
"धन्यं यशस्यमायुष्यं श्रीमद्व्यसनसूदनम् ।
हर्षणं काम्यभोज्यं रत्नाभरणधारणम् ॥"
इति राजवल्लभः ॥

रत्निः, पुं, (ऋच्छति प्राप्नोत्यनेनेति । ऋ + "ऋतन्यञ्जीति ।" उणा० ४ । २ । इति कनिच् ।) बद्धमुष्टिहस्तः । इत्यमरः । २ । ६ । ८६ ॥ सटुम् हात इति भाषा ॥ स्त्रीपुंसयो

रत्नारत्नौ रत्नये। इति भरतः॥ (यथा, महाभारते। ८। ७२। २७।
"अश्वरश्मिर्महावाहुर्धूरोरस्कः सुदुर्जयः॥")
रत्नाङ्गं, क्ली, (रतेरङ्गम्।) योनिः। इति शब्दरत्नावली॥
रथः, पुं, (रम्यतेऽनेनास्मिन् वा। रम्+"हनि कुषिनीरमिकाशिभ्यः क्थन्।" उणा० २।२। इति क्थन्। अनुनासिकलोपश्च।) कायः। (यथा, गीतायाम्।
"आत्मानं रथिनं विद्धि शरीरं रथमेव च॥")
चरणः। वेतसवृक्षः। इति विश्वः॥ (अस्य पर्य्यायो यथा,—
"वेतसो नक्रकः प्रोक्तो वाणीरो वञ्जुलस्तथा।
अम्बुपुष्पश्च विदुलो रथः प्रोक्तश्च कीर्त्तितः॥"
इति भावप्रकाशस्य पूर्ब्बखण्डे प्रथमे भागे॥)
तिनिशवृक्षः। इति राजनिर्घण्टः॥ चक्रविशिष्टयुद्धार्थयानम्। तत्पर्य्यायः। प्रताङ्गः २ स्यन्दनः ३। इत्यमरः। २। ८। ५१॥ स्यन्दनमात्रम्। इत्यजयः॥ (यथा, मनुः। ८।२६५।
"स चेत् तु पथि संरुद्धः पशुभिर्वा रथेन वा।
प्रमापयेत् प्राणभृतस्तत्र दण्डोऽविचारितः॥")
तद्द्वारा भ्रमणगुणाः।
"हस्त्यश्वरथदोलाद्यैर्भ्रमणं वातकोपनम्।
स्थिरीकरणमङ्गानां बल्यं वह्निविवर्द्धनम्॥"
इति राजवल्लभः॥ *॥
रथविशेषाणां नामानि यथा,—
"युद्धार्थं चक्रवद्याने प्रताङ्गः स्यन्दनो रथः।
संक्रीड़ार्थः पुष्यरथो देवार्थस्तु मरुद्रथः॥
योग्यो रथो वैनायिकोऽध्वरथः परिघातिकः।
कर्णीरथः प्रवहणं डयनं रथगर्भकः॥
अनस्तु शकटोऽथ स्यान्नली कम्बलिवाह्यकम्।
अथ कम्बलवस्त्राद्यास्तैस्तैः परिवृते रथे॥
सपाण्डुकम्बली यः स्यात् संवीतः पाण्डुकम्बलैः।
स तु वैपो वैयाघ्रश्च यो वृतो द्वीपिचर्म्मणा॥"
इति हेमचन्द्रः॥
गोलोकस्य रथो यथा,—
"प्रदत्तं विप्रपत्नीभिस्तिलमन्नं सुधोपमम्।
बालकान् भोजयित्वा तु स्वयञ्च बुभुजे विभुः॥
एतस्मिन्नन्तरे तत्र प्रातकुम्भरथं वरम्।
ददृशुर्विप्रपत्न्यश्च पतन्तं गगनादधो॥
रत्नदर्पणसंयुक्तं रत्नसारपरिच्छदम्।
रत्नस्तम्भैर्निबद्धञ्च सद्रत्नकलसोज्ज्वलम्॥
श्वेतचामरसंयुक्तं वह्निशुद्धांशुकान्वितम्।
पारिजातप्रसूनानां मालाजालविराजितम्॥
शतचक्रसमायुक्तं मनोयायि मनोहरम्।
वेष्टितं पार्षदैर्दिव्यैर्वनमालाविभूषितैः॥
पीतवस्त्रपरीधानै रत्नालङ्कारभूषितैः।
नवयौवनसम्पन्नैः श्यामलैः सुमनोहरैः॥
द्विभुजैर्मुरलीहस्तैर्गोपवेशधरैर्वरैः।
शिखिपुच्छगुञ्जमालावद्धचिमचूड़कैः॥
अवरुह्य रथात्तूर्णं ते प्रणम्य हरेः पदम्।
रथमारोहणं कर्त्तुमुद्यता ब्राह्मणकामिनीः॥
विप्रभार्य्या हरिं नत्वा जग्मुर्गोलोकमीप्सितम्।
बभूवुर्गोपिकाः सद्यस्तद्वत्ता मानुषस्त्रियः॥"
इति ब्रह्मवैवर्त्ते श्रीकृष्णजन्मखण्डे १८ अध्यायः॥
देवा रथयात्रा यथा,—
ब्रह्मोवाच।
"भूयस्ते संप्रवक्ष्यामि देवाराधनमुत्तमम्।
यत् कृत्वा सर्व्वकामानां भाजनं पुरुषो भवेत्॥
दन्तिदन्तमयैर्दण्डैर्हेमवद्भैः सुशोभनैः।
विचित्रपद्मरागाद्यैर्मणिभिरुपशोभितैः॥
रथन्तैः कारयेद्देवा सप्तभौमं मनोरमम्।
दुकूलवस्त्रसंछन्नमर्द्धचन्द्रोपशोभितम्॥
घण्टाकिङ्किणिसङ्घाढ्यं चामरैः कटकान्वितम्।
पताकाध्वजशोभाढ्यं दर्पणैरुपशोभितम्॥
तं रथं पूजयेच्छक्र जातीकुसुममल्लिकैः।
पारिजातकपुष्पैश्च यत्नकर्दमचन्दनैः॥
सुगन्धधूपितैः कृत्वा देवीं तत्र निवेशयेत्।
प्रतिमां शोभनां वत्स! महासुरक्षयङ्करीम्॥
पूजयेद्रथविन्यस्तां सर्व्वमङ्गलमङ्गलाम्।
दुर्गां कात्यायनीं देवीं वरदां विन्ध्यवासिनीं॥
निशुम्भशुम्भमथनीं महिषासुरघातिनीं।
प्रसीदतु सदा मेऽस्तु यच्च नो वाञ्छितं हृदि॥
अनेन वलिपूर्ब्बेण नमस्कारयुतेन च।
पूजयित्वा ततो नेया समस्तास्वरगीतकैः॥
पञ्चमी सप्तमी पूर्णा नवम्येकादशीषु च।
तृतीयाग्निवविघ्नेग्रहदिवसेषूत्सवेषु च॥
महानदीनदसंङ्गमपर्व्वतस्तवनेषु च।
तत्र मण्डपविन्यासं महदाधिष्ठनिर्म्मितम्॥
शैलं वा दारुमयं वापि कृत्वा वास्तुविचारितम्।
सर्व्वलक्षणसंपूर्णं सर्व्वशोभासमन्वितम्॥
पूर्ब्बं च कारयेच्छक्र पश्चाद्यात्रां प्रचक्रिरे।
महाजनपदोपेतां महाद्यौभिः ससङ्कुलाम्॥
सर्व्वान्नपाननैवेद्यैः समस्तैरपि पूजयेत्।
दद्याद्वलिं शक्र सर्व्वं सर्व्वदिक्षु समन्ततः॥
भूयो वेतालसंघस्य मन्त्रेणानेन सुव्रत!।
रक्ष मां निजभूतेभ्यो वलिं गृह्ण सदा प्रियम्॥
मातर्मातर्वरे देवि! सर्व्वकामार्थसाधिनि।
अनेन वलिदानेन सर्व्वकामान् प्रयच्छ मे॥
एवं दत्त्वा वलिं शक्र तथा देव्यावतारयेत्।
विन्यसेद्भद्रपीठे तु मण्डलैरुपशोभिताम्॥
तत्रस्थां पूजयेद्देवीं हेमरूपेण तान्त्रजैः।
कलसैस्तु सहस्रेण गन्धोदकसुपूरितैः॥
समस्तफलसम्पूर्णैर्यज्ञियैरथ पल्लवैः।
स्नापयेदेकमेकेन रत्नगर्भेर्नवैर्दृढैः॥
वेदमङ्गलशब्देन शङ्खवाद्यनिस्वनैः।
वेणुवीणाशब्दशब्दैश्च घण्टाकिङ्किणिरावितैः॥
स्नापयित्वा ततो देवीं निर्मञ्छ्येच्छनकैः शुभैः।
गोमयादिकृतैः पञ्चदीपवर्त्तिप्रशोधितैः॥
खस्तिकैर्नन्दिकावर्त्तैः शङ्खैर्नीलोत्पलोत्पलैः।
यवशालिकुरोद्भिन्नैर्यवाचारैर्निमज्जयेत्॥
प्रत्येकञ्च दद्देद्रूपं प्रत्येकं कलसैः क्षपेत्।
तथा कर्पूरचोदेन चन्दनैः कुङ्कुमेन च॥
गोरोचनासमेतेन देवीमालिप्य पूजयेत्॥
हेमजैर्जातिजैर्माल्यै रत्नमाल्यैरनेकधा।
वासोभिः सुमनोभिश्चैः पुनर्धूपं ससृत्विपेत्॥
भक्ष्येत तथा कन्या द्विजातीनथ दुःखितान्।
भक्ष्यभोज्यान्नपानेन तच्च सर्व्वांश्च प्रीणयेत्॥
भोजयित्वा क्षमायेत देवि मे प्रीयतामिति।
रथे कृत्वा तथा देवीं पुनरेव गृहं नयेत्॥
महता जनसंघेन समस्तविभवान्वितैः।
शान्तरेणुपथं सर्व्वं पुष्पदूर्व्वाक्षतैर्जलैः॥
प्रक्षिप्यमाणैः कन्याभिः स्त्रीभिर्मङ्गलवादिभिः।
सलिलेन यथा पांशुं कृत्वा पङ्कं प्रचक्रिरे॥
पुरशोभां पथे शोभां द्वारशोभां गृहे गृहे।
कारयीत तथा शक्र सर्व्वबाधां निवारयेत्॥
अच्छेद्यास्त्रवस्त्रस्त्रिन् प्राणिहिंसां विवर्ज्जयेत्।
बन्धनस्था विमोक्तव्या वध्याः क्रोधादिशत्रवः॥
अकालकौसुदीं शक्र रथयात्रान्तु कारयेत्।
सर्व्वदा सर्व्वदेवेषु शक्रराद्यैः प्रतिष्ठिता॥
रथयात्रा तदा शक्र सुरैः स्वर्गे सदा कृता।
तथा किन्नरगन्धर्व्वैर्भूपातालनिवासिभिः॥
रथयात्राप्रभावेण मोदन्ते दिवि देवताः।
आदित्यो रथयात्राक्षद्रथेन नभसः क्रमेत्॥
देवो दिव्यविमानस्था रथयात्राप्रभावतः।
क्रीड़न्ते विविधैर्भोगैः सर्व्वातङ्कविवर्जिताः॥
तथा त्वमपि देवेन्द्र! रथयात्राकरो भव।
शिवायाः शिवदायास्तु परमेण समाधिना॥
अगस्त्य उवाच।
रथयात्राकृतं पुण्यं ब्रह्मणो वासवस्य तु।
पूर्ब्बं यत् कथितं तात तत्ते सर्व्वं मयाखिलम्॥
स्थापितं नाच सन्देहो देवीमाहात्म्यमुत्तमम्।
यः पठेत् शृणुयाद्वापि भक्तिमान् नृपसत्तम॥
स सुखं यशः सौभाग्यं पुत्रप्राप्तिमथेप्सिताम्।
लभते नाच सन्देह इत्येवं ब्रह्मणोऽब्रवीत्॥
खवलेन कृते राज्ये पुरा शक्रस्य कीर्त्तिता।
धनदस्य पुरीप्राप्तिर्व्वरुणस्य च वायुना॥
कृते स्थाने कृता तेन तथा श्रुत्वा च निर्ऋतेः।
भुञ्जते परया दृष्ट्या पुरीभोगवतीः शुभाः॥"
इति देवीपुराणे रथयात्राविधिमाहात्म्यम्
३६ अध्यायः॥*॥ नवग्रहाणां रथा यथा,—
"योजनानां सहस्राणि भास्करस्य रथो नव।
ईषादण्डस्तथैवास्मादर्द्धिगुणो द्विजसत्तमाः॥
सार्द्धकोटिस्तथा सप्त नियुतान्यधिकानि तु।
योजनानान्तु तस्यास्तं तत्र चक्रं प्रतिष्ठितम्॥
त्रिनाभिमतिपञ्चारे षण्णेमिन्यक्षयात्मके।
संवत्सरन्तु यत् प्रोक्तं कालचक्रं प्रतिष्ठितम्॥
चत्वारिंसत्सहस्राणि द्वितीयोऽक्षो विवस्वतः।
पञ्चान्यानि तु सार्द्धानि स्यन्दनस्य द्विजोत्तमाः॥
अक्षप्रमाणसमयोः प्रमाणं तत्परार्द्धयोः।
भूयोऽक्षस्तद्युगार्द्धे च ध्रुवाधारं रथस्य वै॥
द्वितीयेऽक्षे तु तच्चक्रं संस्थितं मानसाचले।
हयाश्च सप्त छन्दांसि तन्नामानि निबोधत॥
गायत्री च वृहत्युष्णिक् जगती पंक्तिरेव च।
अनुष्टुप् त्रिष्टुबित्युक्ताश्छन्दांसि हरयो रवेः॥"१॥
इति कौर्म्मे ३८ अध्यायः॥

"रथश्चित्रः सोमस्य कुन्दाभास्तस्य वाजिनः।
वामदक्षिणतो युक्ता दश तेन निशाकरः।
वीथ्याश्रयाणि चरति नक्षत्राणि रवियथा ॥२॥
सोमपुत्रस्य चाष्टाभिर्वाणिभिर्वायुवेगिभिः।
वारिजैः स्यन्दनो युक्तस्तेनासौ याति सर्व्वतः ॥३॥
शुक्रस्य भूमिजेरश्वैः स्यन्दनो दशभिर्वृतः ॥ ४ ॥
अष्टाभिश्चाथ भौमस्य रथो हैमः सुशोभनः।५।
बृहस्पतेरथाष्टाश्वः स्यन्दनो हैमनिर्म्मितः ॥६॥
रथस्तमोमयो ह्यश्वो मन्दस्यायसनिर्म्मितः। ७।
खर्भानोर्भास्करारेश्च तथा षड्भिर्हयैर्वृतः॥८॥६॥
एते महाग्रहाणां वै समाख्याता रथा नव।
सर्व्वे ध्रुवे महाभागा निबद्धा वातरश्मिभिः ॥
ग्रहर्क्षतारादिष्टानि ध्रुवे बद्धान्यशेषतः।
भ्रमन्ति भ्रामयन्त्येनं सर्व्वाण्यनिलरश्मिभिः ॥"
इति कौर्म्मे ४० अध्यायः ॥ * ॥

श्रीजगन्नाथदेवस्य रथः यात्राशब्दे द्रष्टव्यः ॥*॥
(त्रिपुरदहनार्थं महेश्वरादिष्टा देवा येन प्रकारेण तद्रथं निर्म्मितवन्तस्तदाह। मात्स्ये। १३३। १३—७१।
"त्रिनेत्र एवमुक्तस्तु देवैः शक्रपुरोगमैः।
उवाच देवान् देवेशो वरदो वृषवाहनः ॥
अपगच्छतु वो देवा महदानवजं भयम्।
तदहं त्रिपुरं धक्ष्ये क्रियतां यद्ब्रवीमि तत् ॥
यदीच्छथ मया दग्धुं तत् पुरं सहदानवम्।
रथमोषधिकं मह्यं सज्जयध्वं किलास्य ते ॥
दिग्वाससा तथोक्तास्ते सर्षितामहकाः सुराः।
तथेत्युक्ता महादेवं चक्रुस्ते रथसत्तमम् ॥
धरां कूबरकौ द्यौ तु रुद्रपार्श्वचरावुभौ।
अधिष्ठानं गिरो मेरोश्चो मन्दर एव च ॥
चक्रुश्चन्द्रञ्च सूर्य्यञ्च चक्रे काञ्चन-राजते।
कृष्णपक्षं शुक्लपक्षं पक्षद्वयमथेश्वराः ॥
रथनेमिदयं चक्रुर्देवा ब्रह्मपुरःसराः।
आदित्यद्वयं पक्षयन्तं यन्नमेताश्च देवताः ॥
कम्बलाश्वतराभ्याञ्च नागाभ्यां समवेष्टितम्।
भार्गवञ्चाङ्गिराश्चैव बुधोऽङ्गारक एव च ॥
ग्रहेश्वरस्तथा चात्र सर्व्वे ते देवसत्तमाः।
वरूथं गगनं चक्रुश्चारूपं रथस्य ते ॥
क्षतं दिजिह्मनयनं त्रिवेणुं प्रातकौम्भिकम्।
मणिमुक्तेन्द्रनीलैश्च वृतं हृष्टमुखैः सुरैः ॥
गङ्गा सिन्धुः शुतद्रुश्च चन्द्रभागा इरावती।
वितस्ता च विपाशा च यमुना गण्डकी तथा ॥
सरस्वती देविका च तथा च शरयूरपि।
एताः सरिद्वराः सर्व्वा वेणुसंज्ञाः कृता रथे ॥
धृतराष्ट्राश्च ये नागास्ते च वेण्यात्मकाः कृताः।
वासुकेः कुलजा ये च ये च रैवतवंशजाः ॥
ते सर्पा दर्पसम्पूर्णाश्चापतूणीष्वनूनगाः।
अवतस्थुः शरा भूत्वा नानाजातिशुभाननाः ॥
सुरसा सरमा कद्रूर्विनता शुचिरेव च।
क्षुधा तृषा सर्व्वोग्रा श्वसुः सर्व्वशमस्तथा ॥
ब्रह्मवध्या च गोवध्या बालवध्या प्रजाभयाः।
गदा भूत्वा शक्तयश्च तदा देवरथेऽभ्ययुः ॥
युगं कृतयुगश्चाथ चातुर्होत्रप्रयोजकाः।
चतुर्व्वर्णाः सलीलाश्च बभूवुः स्वर्णकुण्डलाः ॥
तद्युगं युगसङ्काशं रथशीर्षे प्रतिष्ठितम्।
धृतराष्ट्रेण नागेन बद्धं बलवता महत् ॥
ऋग्वेदः सामवेदश्च यजुर्व्वेदस्तथापरः।
वेदाश्चत्वार एवैते चत्वारस्तुरगा भवन् ॥
अन्नदानपुरोगाणि यानि दानानि कानिचित्।
तान्यासन् वाजिनां तेषां भूषणानि सहस्रशः ॥
पद्मद्वयं तक्षकश्च कर्कोटक-धनञ्जयौ।
नागा बभूवुरेवैते हयानां बालबन्धनाः ॥
ओङ्कारप्रभवास्तां वा मन्त्रयज्ञक्रतुक्रियाः।
उपद्रवाः प्रतीकाराः पशुबन्धेष्टयस्तथा ॥
यज्ञोपवाहान्येतानि तस्मिन् लोकरथे शुभे।
मणि-मुक्ता-प्रवालैस्तु भूषितानि सहस्रशः ॥
प्रतोदोङ्कार एवासीत् तदग्रञ्च वषट्कृतम्।
सिनीवाली कुहूः राका तथा चानुमती शुभा ॥
योक्त्राण्यासंस्तुरङ्गाणामपसर्पणविग्रहाः ॥
क्षणान्यथ च पीतानि श्वेतमाञ्जिष्ठकानि च।
अवदाताः पताकास्तु बभूवुः पवनेरिताः ॥
ऋतुभिश्च कृतः षड्भिर्धनुः संवत्सरोऽभवत्।
अजरा व्याभवच्चापि साम्बिका धनुषो दृढा ॥
कालो हि भगवान् रुद्रस्तच्च संवत्सरं विदुः।
तस्मादुमा कालरात्रिर्धनुषो व्याऽजराभवत् ॥
सगर्भं त्रिपुरं येन दग्धवान् स त्रिलोचनः।
स इषुर्विष्णुसोमाग्नि-त्रिदेवतमयोऽभवत् ॥
आननं ह्यग्निरभवच्छल्यं सोमस्तमोनुदः।
तेजसः समवायोऽथ पैशोक्तेजो रथाङ्गधृक् ॥
तस्मिंश्च वीर्य्यवृद्ध्यर्थं वासुकिर्नागपार्थिवः।
तेजः संवसनार्थं वै समोचातिविषो विषम् ॥
कृत्वा देवा रथञ्चापि दिव्यं दिव्यप्रभावतः।
लोकाधिपतिमभ्येत्य इदं वचनमब्रुवन् ॥
संस्कृतोऽयं रथोऽस्माभिस्तव दानवशत्रुजित्।
इदमास्पदमित्याहुं देवान् सेन्द्रपुरोगमान् ॥
तं मेरुशिखराकारं त्रैलोक्यरथसत्तमम्।
प्रशस्य देवान् साध्विति रथं पश्यति शङ्करः ॥
सुदुर्दृशं रथं साधु साध्वित्युक्ता सुदुर्म्मुदुः।
उवाच सेन्द्रानमरानमराधिपतिः स्वयम् ॥
यादृशोऽयं रथः कृत्नो युष्माभिर्मम सत्तमाः।
ईदृशो रथसम्पत्ता यत्ना शीघ्रं विधीयताम् ॥
इत्युक्ता देवदेवेन देवा विद्वा इवेशुभिः।
अवापुर्महतीं चिन्तां कथं कार्य्यमिति ब्रुवन् ॥
महादेवस्य देवोऽन्यः को नाम सदृशो भवेत्।
सुक्ता चक्रायुधं देवं सोपास्य इषुमाश्रितः ॥
धुरि युक्ता इवोचाणो घटन्त इव पर्व्वतैः।
निश्वसन्तः सुराः सर्व्वे कथमेतदिति ब्रुवन् ॥
अहं सारथिरित्युक्ता जग्राहाश्वांस्ततोऽग्रजः ॥
ततो देवैः सगन्धर्व्वैः सिंहनादो महान् कृतः।
प्रतोदहस्तं सम्प्रेक्ष्य ब्रह्माणं स्तुततां गतम् ॥
भगवानपि विश्वेशो रथस्थे वै पितामहे।
सदृशः स्तुत इत्युक्ता चारुरोह रथं हरः ॥
आरोहति रथं देवे ह्यश्वा हरभरासुराः।
जानुभिः पतिता भूमौ रजोग्रासञ्च ग्रासितः ॥
देवो दृष्ट्वाथ वेदांस्तानभीरुग्रहयान् भयात्।
उज्जहार पितृनार्त्तान् सुपुत्र इव दुःखितान् ॥
ततः सिंहरवो भूयो बभूव रथभैरवः।
जयशब्दश्च देवानां सम्बभूवार्णवोपमः ॥
तदोङ्कारमयं कृत्वा प्रतोदं वरदः प्रभुः।
स्वयम्भुः प्रययौ वाहानुमन्त्र्य यथाक्रमम् ॥
ग्रसमाना इवाकाशं सृजन्त इव मेदिनीम्।
मुखेभ्यः सस्रुजुः श्वासानुच्छ्वसन्त इवोरगाः ॥
स्वयम्भुवा चोह्यमानाश्चोदितेन कपर्द्दिना।
व्रजन्ति तेऽश्वा जवनाः क्षयकाल इवानिलाः ॥
ध्वजोच्छ्रयविनिर्म्माणो ध्वजयष्टिमनुत्तमाम्।
आक्रम्य नन्दी वृषभं तस्थौ तस्मिन्किवेच्छया ॥
भार्गवाङ्गिरसौ देवौ दण्डहस्तौ रविप्रभौ।
रथचक्रे तु रक्षेते रुद्रस्य प्रियकाङ्क्षिणौ ॥
शेषश्च भगवान् नागः अनन्तोऽन्तकरोऽरि-
णाम्।
शूरहस्तो रथं याति शूयनं ब्रह्मणस्तदा ॥
यमस्तूर्णं ससास्त्राय महिषस्थातिदारुणम्।
द्रविणाधिपतिर्यातं सुराणामधिपो दिपम् ॥
मयूरं शूतचक्रञ्च कूजन्तं किन्नरं यथा।
गुह आस्थाय वरदो युगोपमरथं पितुः ॥
नदीश्वरश्च भगवान् शूलमादाय दीप्तिमत्।
पृष्ठतश्चापि पार्श्वाभ्यां लोकस्य क्षयकृद्यथा ॥
प्रमथाश्चाग्निवर्णाभाः साग्निज्वाला इवाचलाः।
अनुजग्मू रथं शार्व्वं नक्षा इव महार्णवम् ॥
भृगुभरद्वाज-वसिष्ठ-गौतमाः
क्रतुः पुलस्त्यः पुलहस्तपोधनाः।
मरीचिरत्रिर्भगवानथाङ्गिराः
पराशरागस्त्यसुखा महर्षयः ॥
हरमर्चितमर्चं प्रतुष्टुवु-
र्वैचनविधैर्विचित्रभूषणैः।
रथस्थितपुरे सकाञ्चनाचलौ
व्रजति सपक्ष इवाद्रिरम्बरे ॥
करिगिरिरविमेघसन्निभाः
सजलपयोदनिनादनादिनः।
प्रमथगणाः परिवार्य्य देवगुप्तं
रथमभितः प्रययुः खदर्पयुक्ताः ॥
मकर-तिमि-तिमिङ्गिलाकृतः
प्रलय इवातिसमुद्धतोऽर्णवः।
व्रजति रथवरोऽति भास्करो
ह्यगनिनिपातपयोदनिस्वनः ॥"*॥)

अथ ज्योतिर्व्विदाभरणे रथकर्म्माह।
"लोलमेत्रलघुजिष्णुकभेद्य
स्यन्दनाखिलविधानमथाहुः।
सैनसत्युवगवाम्बुतपस्वेः
साधुराग्निवति साधुभिरङ्ग ॥"

अथ रथचक्रमाह।
"उष्णांशुशीकरकीर्णपुरन्ध्रा-
द्वेयद्वत्त्वलयं वलयस्य।
सप्तभागनिचितभ्रममग्रा-
दाविमध्यमनसो नवभागम् ॥
अग्रमे भवति संकलिरन्ध्रः-
कूबरोद्गनि जयोऽथ रथाङ्गे।

सन्धिमेऽर्थंधृतिरन्तरसन्धौ
भीतिरिष्टमनसो ननु गर्भे ॥"

अथ मुहूर्त्तगणपतौ रथचक्रम्।

"पुष्ये पुनर्व्वसुज्येष्ठानुराधा रेवती द्वयोः।
अवणादित्रिभे हस्तचित्रये रोहिणीत्रिगे।
सार्के सौम्यदिने सौम्यविलग्ने रथकर्म्म सत् ॥"

अथ ज्योतिःसागरे रथचक्रम्।

"रथाकारं लिखेच्चक्रं भानुभादौ विलोकयेत्।
रथाग्रे त्रीणि रक्षाणि रश्मिमार्गे प्रदापयेत् ॥
मङ्गे मृत्युर्ज्जयं चक्रे सन्धिदण्डे महद्भयम्।
रथाग्रे च महोत्पातं मध्ये चैव सुखप्रदम् ॥"

इत्यार्य्येषु ज्योतिर्व्विदलङ्करामेण कृताः शुभाशुभदिग्नः ॥ * ॥ अस्यार्थः। अथानन्तरं धीराः स्यन्दनानां रथानां अखिलं सम्पूर्णं विधानं कार्य्यमाहुः कथयन्ति। केषु लोलसंज्ञानि स्वाति पुनर्व्वसुः अवणा धनिष्ठा शतभिषा एतानि। मेत्रसंज्ञानि मृगशिरा रेवती चित्रा अनुराधा एतानि। लघुसंज्ञानि हस्ता अश्विनी पुष्या अभिजित् एतानि। जिष्णुरिन्द्रस्तद्भं ज्येष्ठा को ब्रह्मा तद्भं रोहिणी एतेषु नक्षत्रेषु। पुनः केषु सेनसद्युषु इनः सूर्य्यः तेन सह वर्त्तमानेषु। सतां शुभग्रहाणां द्युषु वारेषु। पुनः कस्मिन् साधुराशिस्थिते शुभग्रहराशियुक्ते अङ्गे लग्ने सति। पुनः कैः वक्ष्या स्त्री सप्तमं स्थानं अम्बु चतुर्थं तपः नवमं एतद्भवनस्थैः साधुभिः शुभग्रहैरिति। अथ रथचक्रे नक्षत्रस्थापनम्। उष्णेति। उष्णदीधितिः सूर्य्यस्तस्य करैः किरणैः कीर्णं व्याप्तं पुरं कक्षामण्डलीयस्वभागप्रदेशं यस्य तच्च तद्दक्षेति तस्मात् अर्थात् सूर्य्याक्रान्तनक्षत्रात् अनसः शकटस्य वलयचक्रं तस्याग्रात् अग्रभागमारभ्य आविमध्यं मध्यभागपर्य्यन्तं सुधिया ऋक्षवलयं भचक्रं देयं न्यासीकर्त्तव्यं किम्भूतं ऋक्षवलयं नवभागं नवभिर्भागैः स्थितमिति यावत्। पुनः किंभूतं सप्तभागनिश्चितभ्रमं वामभागेन व्याप्तभ्रमणमिति। अथास्य फलम्। अनसः शकटस्य अग्रमे अग्रगतवर्त्तमाने चन्द्रनक्षत्रे सङ्कलिः युद्धं भवति। कूवरोडुनि युगन्धरगते वर्त्तमाननक्षत्रे अन्तो मृतिः मरणं भवति॥ रथाङ्गे चक्रयुग्मे जयो भवति। सन्धिमे सन्धिगतनक्षत्रे अर्थधृतिः द्रव्यहरणं भवति। अन्तरसन्धौ मध्यसन्धानगतनक्षत्रे भीतिर्भयो भवति। गर्भे मध्यभागगतनक्षत्रे इष्टं शुभं भवति। ननु निश्चितमिति। अन्यत् सुगमम्॥

रथकः, पुं, (रथ इव प्रतिकृतिः। कन्।) मन्दिरावयवविशेषः। यथा,—

"अष्टकांशेन गर्भस्य रथकानान्तु निर्गमः।
परिधेर्गुणभागेन रथकांश्चैव कल्पयेत्॥
तत्तृतीयेन वा कुर्य्यात् रथकानान्तु निर्गमम्।
दामत्रयं स्थापनीयं रथकत्रितये सदा॥"

इति श्रीहरिभक्तिविलासे २० विलासः॥

रथकक्ष्या, स्त्री, (रथानां समूह इति। "जनखलादिगोरथेति।" इति सुग्धबोधसूत्रेण कक्ष्यः। टाप्।) रथसमूहः। तत्पर्य्यायः। रथव्रजः २। इत्यमरः। २। ८। ५५॥ (रथकक्ष्या। इति पाणिनिः। ४। २। ५१॥)

रथकरः, पुं, (करोतीति। कृ+अच्। रथानां करः।) रथकारः। इति शब्दरत्नावली॥

रथकारः, पुं, (रथं करोतीति। कृ+अण्।) रथनिर्म्माणकर्त्ता। छुतार इति भाषा। स तु करणीगर्भे माहिष्याज्जातः। (यथा, वाजसनेयसंहितायाम्। ३०। ६।

"स्त्रीषखं प्रमदे कुमारीपुत्रं
मेधायै रथकारं धैर्य्याय तक्षाणम्।"

"रथकारं माहिष्येण करिण्यां जातम्।" इति तद्भाष्ये महीधरः॥) तत्पर्य्यायः। तक्षा २ वर्द्धकिः ३ त्वष्टा ४ काष्ठतट् ५। इत्यमरः॥ सूत्रधारः ६ वर्द्धका ७ रथकरः ८ काष्ठतक्षकः ९। इति शब्दरत्नावली॥

रथकुटुम्बी, [न्] पुं, (रथं कुटुम्बयितुं धारयितुं शीलमस्य। णिनिः। यद्वा, रथ एव कुटुम्बम्। तदस्यास्तीति। इनिः।) सारथिः। इत्यमरः। २। ८। ६०॥

रथक्रान्तः, पुं, (रथवत् क्रान्तं क्रमणमस्य।) तालविशेषः। यथा,—

"अश्वक्रान्तो रथक्रान्तो विष्णुक्रान्तस्ततः परः।
सूर्य्यक्रान्तो विधुक्रान्तो बलभिन्नागपञ्चकः॥
इति पञ्चमहीनानां संज्ञाः सप्त क्रमाच्छताः॥"

इति सङ्गीतरत्नाकरः॥

रथगर्भकः, पुं, (रथो गर्भोऽस्य।) स्कन्धवाह्ययानम्। नररथः। तत्पर्य्यायः। कर्णीरथः २ प्रवहणम् ३ डयनम् ४। इति हेमचन्द्रः॥

रथगुप्तिः, स्त्री, परप्रहरणाभिघातरक्षार्थं रथस्य सन्नाहवदावरणकादिद्रव्यम्। रथस्य गुप्तिः काष्ठादिभ्यो रक्षार्थमावरणम्। तत्पर्य्यायः। वरूथः २। इत्यमरः भरतश्च॥

रथगोपनं, क्ली, (रथस्य गोपनं प्रक्षादिभ्यो रक्षार्थमावरणम्।) रथगुप्तिः। इति हलायुधः॥

रथचरणः, पुं, (रथचरणं चक्रं तदेव नामास्य।) चक्रवाकपक्षी। इति शब्दरत्नावली॥ (पुं, क्ली, रथस्य चरणः।) रथचक्रम्। यथा,—

"रथः स्त्रीणां यन्त्रा धृतधृतिरगेन्द्रो धनुरथो
रथाङ्गे चन्द्रार्कौ रथचरणपाणिः शर इति।"

इति महिम्नः स्तोत्रम्॥

रथद्रुः, पुं, (रथनामा द्रुः। यद्वा, रथस्य द्रुर्द्रुमः। तत्रोपयोगित्वात्।) तिनिशवृक्षः। इत्यमरः। २। ४। २६॥ (तथास्य पर्य्यायः।

"तिनिशः स्यन्दनो नेमी रथद्रुर्व्वञ्जुलस्तथा।"

इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे॥)

रथन्तरः, त्रि, रथेन तरति यः। इति सुग्धबोधव्याकरणम्॥ (कल्पविशेषे, पुं। यथा, मत्स्यपुराणे। ५३। ३३—३४।

"रथन्तरस्य कल्पस्य वृत्तान्तमधिकृत्य यत्।
सावर्णिना नारदाय कृष्णमाहात्म्यसंयुतम्॥
यत्र ब्रह्मवराहस्य चरितं वर्ण्यते मुहुः।
तदष्टादशसाहस्रं ब्राह्मवैवर्त्तमुच्यते॥"

रथेन तरतीति। तॄ+"संज्ञायां भृतॄजिधारिसहितपिदमः।" ३। २। ४६। इति खच्। मुमच्च। अत्र व्युत्पत्तिमात्रम्। नलवयवार्थानुगमः। सामभेदे, क्ली। यथा, ऋग्वेदे। १। १६४। २५।

"जगता सिन्धुं दिव्यस्तभायद्रथन्तरे सूर्य्यं पर्य्यपश्यत्॥"

"रथन्तरे एतन्नामके साम्नि।" इति तद्भाष्ये सायणः। स्त्रियां ङीप्। रथन्तरी। पौरवस्य ईलिनस्य भार्य्या। यथा, महाभारते। १। ६४। १७।

"रथन्तर्य्यां सुतान् पञ्च पञ्चभूतोपमांस्ततः।
ईलिनो जनयामास दुष्मन्तप्रभृतीन् नृपान्॥")

रथपर्य्यायः, पुं, (रथः पर्य्यायो यस्य।) वेतसवृक्षः। इति शब्दचन्द्रिका॥ (विवरणमस्य वेतसशब्दे विज्ञेयम्॥)

रथपादः, पुं, (रथस्य पादः।) चक्रम्। इति हेमचन्द्रः॥

रथपथा, स्त्री, नदीविशेषः। इति शब्दरत्नावली॥

रथयात्रा, स्त्री, (रथेन भगवतो यात्रा।) आषाढ़शुक्लद्वितीयायां श्रीजगन्नाथस्य रथारोपणरूपोत्सवः। यथा, स्कन्दपुराणे।

"आषाढ़स्य सिते पक्षे द्वितीया पुण्यसंयुता।
तस्यां रथे समारोप्य रामं मां भद्रया सह॥
यात्रोत्सवं प्रकृत्याथ प्रीणयेच्च द्विजान् बहून्॥
तथा।
ऋक्षाभावे तिथौ कार्य्या सदा सा प्रीतये मम॥
मां जगन्नाथम्। सा यात्रा।" इति तिथ्यादितत्त्वम्॥*॥

"नातः श्रेयःपदो विष्णोरुत्सवः प्राक्सम्मतः।
रथयात्रैव यात्राणां सुखेत्याह प्रजापतिः॥"

इति यात्रातत्त्वम्॥*॥

अन्यत् यात्राशब्दे द्रष्टव्यम्॥

रथाङ्गं, क्ली, (रथस्याङ्गम्।) चक्रम्। इत्यमरः॥ (यथा, रघुः। ७। ४१।

"रथो रथाङ्गध्वनिना विजज्ञे
विलोलघण्टाक्वणितेन नागः॥"

रथावयवमात्रम्। यथा, महाभारते। १४। ८२। १३।

"ध्वजे पताकादण्डेषु रथयन्त्रहयेषु च।
अन्येषु च रथाङ्गेषु न शरीरे न सारथौ॥"

सुदर्शनचक्रम्। यथा, माघे। १। २१।

"रथाङ्गपाणेः पटलेन रोचिषा-
मृषित्विषः संवलिता विरेजिरे॥")

रथाङ्गः, पुं, चक्रवाकपक्षी। इत्यमरः॥ (यथा, नैषधे। १६। ३५।

"विरहतरलिकां बकाङ्कयन्त्यतिविकलामिह सहचरीं नामयाहं रथाङ्गविहङ्गमाः॥")

रथाङ्गपाणिः, पुं, (रथाङ्गं सुदर्शनचक्रं पाणौ यस्य।) विष्णुः। इति हलायुधः॥ (यथा, भागवते। १। ३। ३८।
"सवेद धातुः पदवीं परस्य
दुरन्तवीर्यस्य रथाङ्गपाणेः॥")

रथाङ्गी, स्त्री, (रथस्याङ्गमिवाकृतिर्यस्याः। रथाङ्ग+ङीष्।) ऋद्धिः। इति राजनिर्घण्टः॥

रथान्तरः, पुं, कल्पभेदः। इत्यग्निपुराणम्। (रथन्तर इत्यपि पाठः॥)

रथाभ्रः, पुं, वेतसवृक्षः। इति शब्दरत्नावली॥

रथाभ्रपुष्पः, पुं, (रथाभ्रस्य पुष्पमिव पुष्पमस्य।) वेतसः। इत्यमरटीकायां भरतः॥

रथावरोही, [न्] पुं, (रथे अवरोहतीति। अव्+रुह+णिनिः।) रथस्थयुद्धकर्त्ता। इति हेमचन्द्रः॥

रथिकः, पुं, (रथोऽस्त्यस्येति। रथ्+ठन्।) रथी। इत्यमरः। २। ८। ७६॥ (यथा, बृहत्संहितायाम्। १५। ११।
"हस्ते तस्करकुञ्जर-
रथिकमहामात्रग्रिव्यिपरुषाणि॥")
तिनिशवृक्षः। इति राजनिर्घण्टः॥ (रथेन चरतीति। रथ्+"पर्णादिभ्यः ष्ठन्।" ४। ४। १०। इति ष्ठन्। रथचारिणि, त्रि। इति सिद्धान्तकौमुदी॥)

रथिनः, पुं, (रथस्य इनः प्रभुः। मूकन्धादित्वादकारलोपः।) रथी। इत्यमरः। २। ८। ७६॥

रथिरः, पुं, (रथोऽस्त्यस्येति। रथ्+"मेधारथाभ्यामिरन्निरचौ वक्तव्यौ।" ५। २। १०६। इत्यस्य वार्त्तिकोक्त्या इरच्।) रथी। इति शब्दरत्नावली॥ (यथा, ऋग्वेदे। ३। १। १७।
"अनुदेवान्रथिरो यासि साधन्॥"
"रथिरः रथी।" इति तद्भाष्ये सायणः॥)

रथी, [न्] पुं, (रथोऽस्त्यस्तीति। रथ्+इनिः।) रथस्वामी राजादिः। तत्पर्य्यायः। रथिकः २ रथिनः ३। इत्यमरः। १। ८। ७६॥ रथारोही ४ रथी ५ रथिरः ६। इति हेमचन्द्रः॥ रथस्वामी ७ सारात्रः ८। इति शब्दरत्नावली॥ स्यन्दनारोहः ९। इति जटाधरः॥ (यथा, रघुः। ७। ३७।
"पत्तिः पदातिं रथिनं रथेशः-
स्तुरङ्गसादी तुरगाधिरूढम्॥")

रथ्यः, पुं, (रथं वहतीति। रथ्+"तदर्हति-रथयुगप्रासङ्गम्।" ४। ४। ७६। इति यत्।) रथस्य घोड़ा घोटकः। इत्यमरः। २। ८। ४६॥ रथांसः। इति हेमचन्द्रः॥ (रथस्य नेता। यथा, ऋग्वेदे। ६। २१। ६।
"ऋभुर्नं रथ्यं नवं दधाता केतमादिशे।"
"रथ्यं रथस्य नेतारम्।" इति तद्भाष्ये सायणः॥ रथसम्बन्धिनि, त्रि। यथा, ऋग्वेदे। २। ३१। ७।
"सम्भर्नं रथ्यो अहधीतिमख्याः।"
"रथ्यो रथसम्बन्धी सम्भर्नं सर्पणशीलोऽश्व इव।" इति तद्भाष्ये सायणः॥ रथस्येदमिति। "रथात् यत्।" ४। ३। १२१। इति यत्।) क्लीबे चक्रम्॥ (युगम्। इति कात्यिका॥

रथ्या, स्त्री, (रथानां समूहः। रथ्+"खलगोरथात्।" ४। २। ५०। इति यत्।) रथसमूहः। तत्पर्य्यायः। रथकट्या (त्या) २ रथव्रजः ३। अभ्यन्तरमार्गः। नाक्ष इति भाषा॥ तत्पर्य्यायः। प्रतोली २ विप्रिखा ३। इत्यमरः॥ आवर्त्तनी। इति मेदिनी॥ (रथाय हिता। रथ्+"रथादृयत्।" ४। ३। १२१। इति यत्। यद्वा, रथं वहतीति। "तद्वहतीति।" ४। ४। ७६। इति यत्।) पन्थाः। (यथा, महाभारते। १। १४१। ६०।
"पानागारेषु रथ्यासु सर्व्वतीर्थेषु चाप्यथ।
चत्वरेषु च कूपेषु पर्व्वतेषु वनेषु च॥")
चत्वरम्। इति हेमचन्द्रः॥

रद, उत्खाते। इति कविकल्पद्रुमः॥ (भ्वा०-पर०-सक०-सेट्।) रेफादिः। उत्खातसुतखननमिति गोविन्दभट्टः। रदति भूमिं शूकरः। इति दुर्गादासः॥

रदः, पुं, (रदतीति। रद विलेखने+पचाद्यच्।) दन्तः। (यथा, आर्य्यासप्तशत्याम्। ४०६।
"भ्रमसि प्रकटयसि रदं
करं प्रसारयसि लवणमपि अयसि।
धिङ्मानं तव कुञ्जर
जीवं न जुहोषि जठराग्नौ॥")
विलेखनम्। इति मेदिनी। दे, १४॥ पुरुषदन्तलक्षणं यथा,—
"विवर्णैर्धनहीनाश्च दन्ताः स्निग्धा घनाः शुभाः।
तीक्ष्णा दंष्ट्राः समाः श्रेष्ठा जिह्वा रक्ता समा शुभा॥"
स्त्रीदन्तलक्षणं यथा,—
"कुन्दपुष्पसमा दन्ता भाषितं कोकिलासमम्।
दाक्षिण्ययुक्तमशठं हंसशब्दसुखावहम्॥
नासा समा समपुटा स्त्रीणान्तु रुचिरा शुभा।
करालविषमा दन्ताः क्लेशाय च भयाय च।
चौर्य्याय क्षुद्रमांसाश्च दीर्घा भक्तुञ्च रत्नवे॥"
इति गारुड़े ६६ अध्यायः॥*॥
दन्तलक्षस्य शुचित्वं यथा,—
"दन्तवद्दन्तलग्नेषु जिह्वास्पर्शेऽशुचिर्भवेत्॥"
इति कौर्म्मे उपविभागे १२ अध्यायः॥*॥
"दन्तलग्नमसंहार्य्यं लेपं मन्येत दन्तवत्।
न तत्र बहुशः कुर्य्यादुत्तमस्तद्धरणे पुनः।
भवेदशौचमत्यर्थं व्रणवेधाद्व्रणे कृते॥"
इति प्रायश्चित्ततत्त्वधृतवचनम्॥

रदच्छदः, पुं, (रदानां छद आच्छादकः।) ओष्ठः। इति हेमचन्द्रः॥

रदनः, पुं, (रद्यतेऽनेनेति। रद+करणे ल्युट्। रनतीति। रद्+ल्युर्वा।) दन्तः। इत्यमरः। २। ६। ६२॥ (यथा, हरिवंशे। १३०। ८७।
"रदने: पन्नगरिपुं करेण शिरसा तदा।
ऐरावतो गजपतिराजधान नदंस्तथा॥"
रद्+भावे ल्युट्।) उत्खनने, क्लीबे॥

रदनच्छदः, पुं, (रदनानां छद आच्छादकः।) ओष्ठः। अधरः। इत्यमरः। २। ६। ६०॥ तस्य शुभाशुभलक्षणं यथा,—
"मांसलैश्च घनोपेता अवक्रैरधरैर्नृपाः।
बिम्बोपमैश्च स्फुटितैरोष्ठै रक्तैश्च खण्डितैः।
विवर्णैर्धनहीनाश्च दन्ता स्निग्धा घनाः शुभाः॥"
इति गारुड़े ६६ अध्यायः॥

रदनी, [न्] पुं, (रदनौ प्रशस्तदन्तावस्य सन्ति। रदन+इनिः।) हस्ती। इति राजनिर्घण्टः॥

रदी, [न्] पुं, (रदौ प्रशस्तदन्तावस्य सन्ति। रद+इनिः।) हस्ती। इति हलायुधः॥

रध, य ऊ ल्ल हिंसने। पाके। इति कविकल्पद्रुमः॥ (दिवा०-पर०-सक०-वेट्।) य, रध्यति। ऊ, रधिष्यति रत्स्यति। ल्ल, अरन्धत्। इति दुर्गादासः॥

रनृज, म औ ण } रागे। इति कविकल्पद्रुमः॥
रनृज, य म औ ण } (भ्वा०-दिवा० च-उभ०-वर्णान्तरोत्पादने सक०-आसक्तौ अक०-अनिट्।) य ञ, रञ्यति रज्यते। म, रजयति रागान् रागरमणादन्यच्च रञ्जयति पुत्रं पिता। औ, रङ्क्ता। ण, रजति रजते। रागो वर्णान्तरोत्पादनमासक्तिश्च। इति दुर्गादासः॥

रन्तिदेवः, पुं, (रमते इति। रम+संज्ञायां तिक्। रन्तिश्चासौ देवश्चेति।) विष्णुः। चन्द्रवंशीयनृपतिभेदः। स तु साङ्कृतिपुत्रः। इति मेदिनी। वे, ६२॥ (यथा, भागवते। ६।२१।२।
"गुरुश्च रन्तिदेवश्च संकृतेः पाण्डुनन्दन!।
रन्तिदेवस्य महिमा इहामुत्र च गीयते॥"
अयं हि याज्ञिको दातागणगण्य इति पुराणेषु श्रूयते। एतद्यज्ञहतगोचर्म्मरसेनैव चर्म्मण्वती नदी जाता। यथा, महाभारते। ३। २०७। ८—६।
"राज्ञो महानसे पूर्व्वं रन्तिदेवस्य वै द्विज।
द्वे सहस्रे तु वध्येते पशूनामन्वहं तदा॥
अहन्यहनि वध्येते द्वे सहस्रे गवां तथा।
समांसं ददतो ह्यन्नं रन्तिदेवस्य नित्यशः॥
अतुला कीर्त्तिरभवत् नृपस्य द्विजसत्तम!॥"
तथाच तत्रैव। १२। २६। १२२—१२८।
"उपातिष्ठंश्च पशवः स्वयं तं संस्कृतव्रतम्।
आरण्याश्च महात्मानं रन्तिदेवं यशस्विनम्॥
महानदी चर्म्मराशेरुत्क्लेदात् सुस्रुवे यतः।
ततश्चर्म्मण्वतीत्येवं विख्याता सा महानदी॥
ब्राह्मणेभ्यो ददौ निष्कान् सदसि प्रतते नृपः।
तुभ्यं निष्कं तुभ्यं निष्कमिति क्रोशन्ति वै द्विजाः॥
सहस्रं तुभ्यमित्युक्त्वा ब्राह्मणान् संप्रपद्यते।
अन्नाहार्य्योपकरणं द्रव्योपकरणञ्च यत्॥
घटाः पात्राः कटाहानि स्थाल्यश्च पिटराणि च।
नासीत् किञ्चिदसौवर्णं रन्तिदेवस्य धीमतः॥"

सांक्षते रन्तिदेवस्य यां रात्रिमवसन् गृहे ।
आलभ्यन्त गृतं गावः सहस्राणि च विंशतिः ॥
तत्र स्म सूदाः क्रोशन्ति सुस्थमग्निकुण्डलाः ।
सूपभूयिष्ठमश्नीध्वं नाद्यमांसं यथा पुरा ॥")
कुक्कुरः । इति शब्दरत्नावली ॥

रन्धुः, स्त्री, (रमते अत्रेति । रम् + तुन् ।) वर्त्म । नदी । इति मेदिनी । ते, ४६ ॥

रन्धनं, क्ली, पाकः । रधधातोर्भावेऽनट्प्रत्ययेन निष्पन्नम् । यथा रन्धनाय स्थाली । इति संक्षिप्तसारव्याकरणम् ॥ (रध् + ल्युः । नाशके, त्रि । यथा, भागवते । ४ । १० । २८ ।
"यदनुस्मर्यते काले खबुद्ध्याभद्ररन्धन ! ॥"
"हे अभद्ररन्धन ! अमङ्गलनाशन !।" इति तट्टीकायां श्रीधरः ॥)

रन्धितं, क्ली, (रध् + क्त ।) क्षतरन्धनद्रव्यम् । तस्य पाचान्तरे स्थापनविधिर्यथा,—
"सङ्कीर्णे पात्रसम्भारे मार्गे वा ग्रामवर्त्मनि ।
स्थापयेद्गुणवान् सूदः सिद्धान्नं पात्रकान्तरे ॥
भक्तं स्वपाकके स्थाप्यं न स्थाप्यं पात्रकान्तरे ॥
घृतं काष्ठायसे स्थाप्यं मांसं मांसभवं रसम् ।
स्थापयेद्राजते हेमे पात्रे लौहेऽथ काञ्चने ।
पञ्चादिषड्विधं शाकं स्थाप्यं काष्ठायसलौहजे ।
पक्वान्नं पिष्टकं भक्ष्यं स्थाप्यं कांस्येऽथ दारुजे ॥
धारयेत् सुस्थितं क्षीरं पार्थिवे वाथ काष्ठजे ।
पानीयं पायसं तक्रं मृण्मयेष्वेव धारयेत् ॥
काचजे स्फाटिके वाथ वैदूर्य्यादिविचित्रिते ।
धारयेत् सर्व्वदा पात्रे रागषाड्वगुडकान् ॥
उक्तपात्रान्तरे स्थाप्यं तद्द्रव्यं तद्दृशापहम् ।
सर्व्वदा सुखदं हृद्यमन्यथा दोषकारकम् ॥"
इति रूपकारग्रन्थे पाकराजेश्वरः ॥

रन्ध्रं, क्ली, (रन्ध्रयति छिनत्त्यनेनेति । रध् + बाहुलकात् रक् ।) दूषणम् । (यथा, रघुः । १२ । ११ ।
"रन्ध्रान्वेषणदक्षाणां द्विषामाभिषतां ययौ ॥")
छिद्रम् । इति मेदिनी ॥ (यथा, रघौ । १५ । ८२ ।
"एवमुक्ते तया साध्व्या रन्ध्रात् सद्योभवद्भुवः ।
प्रातर्हृदमिव व्योतिः प्रभामण्डलमुद्ययौ ॥"
मनुष्यशरीरस्थरन्ध्राणि यथा,—
"नासानयनकर्णानां द्वे द्वे रन्ध्रे प्रकीर्त्तिते ।
मेहनापानवक्त्राणामेकैकं रन्ध्रमुच्यते ।
दशमं मस्तके प्रोक्तं रन्ध्राणीति नृणां विदुः ॥
स्त्रीणान्तौरूधिकानि स्युः स्तनयोर्गर्भवर्त्मनः ।
सूक्ष्मच्छिद्राणि चान्यानि मतानि त्वचि जन्मिनाम् ॥"
इति श्राद्धधरे पूर्व्वखण्डे पञ्चमेऽध्याये ॥
योनिः । यथा, महाभारते । १२ । २८२ । ५३ ।
"रन्ध्रागतमथाश्वानां शिखोद्भेदश्च बर्हिणाम् ।
नेत्ररोगः कोकिलस्य ज्वरः प्रोक्तो महात्मना ॥")

रन्ध्रकण्टः, पुं, (रन्ध्रे कण्टः कण्टको यस्य ।) जालवल्वृक्षः । इति राजनिर्घण्टः ॥

रन्ध्रबभुः, पुं, (रन्ध्रे गर्त्ते बभुर्नकुल इव ।) उन्दुरः । इति त्रिकाण्डशेषः ॥

रन्ध्रविग्रहः, पुं, (रन्ध्रविशिष्टो वंशः ।) छिद्रयुक्तवंशः । फाँफाबाँश इति भाषा । तत्पर्य्यायः । त्वक्सारः २ कीचकाङ्कयः ३ मस्करः ४ वादनीयः ५ शुषिरास्यः ६ । अस्य गुणाः ।
"वंशौ लघ्वौ कषायौ च किञ्चित्तिक्तौ च शीतलौ ।
मूत्रकृच्छ्रप्रमेहार्शःपित्तदाहास्रनाशनौ ॥
विशेषो रन्ध्रवंशस्तु दीपनोऽजीर्णनाशकः ।
रुचिकृत् पाचनो हृद्यः शूलघ्नो गुल्मनाशनः ॥"
इति राजनिर्घण्टः ॥

रप, वदे । इति कविकल्पद्रुमः ॥ (भ्वा०-पर०-सक०-सेट् ।) रपति । वदः कथनम् । इति दुर्गादासः ॥

रफ, गत्याम् । वधे । इति कविकल्पद्रुमः ॥ (भ्वा०-पर०-सक०-सेट् ।) रफति । इति दुर्गादासः ॥

रब, इ गत्याम् । इति कविकल्पद्रुमः ॥ (भ्वा०-पर०-सक०-सेट् ।) इ, रम्बति । इति दुर्गादासः ॥

रब, इ ङ शब्दे । इति कविकल्पद्रुमः ॥ (भ्वा०-पर०-अक०-सेट् ॥)

रबः, पुं, शब्दः । रबधातोर्भावेऽल्प्रत्ययेन निष्पन्नः ॥ (यथा, राजतरङ्गिण्याम् । ५ । ४०८ ।
"सुप्तस्तटाद्ध्वदे भ्रष्ट इव निद्रालसेक्षणः ।
प्रबुद्धः शब्दपातैः स वसुचद्भैरवान् रवान् ॥")

रभ, इ ङ शब्दे । इति कविकल्पद्रुमः ॥ (भ्वा०-आत्म०-अक०-सेट् ।) इ, रम्भते । ङ, रम्भते । इति दुर्गादासः ॥

रभ, औ ङ राभस्ये । इति कविकल्पद्रुमः ॥ (भ्वा०-आत्म०-अक०-अनिट् । राभस्यमुत्सुकीभावः । निर्व्विचारा प्रवृत्तिरिति गोविन्दभट्टः । औ, रब्धा । ङ, रभते साधुः पुरुषे । आङ्पूर्व्वोऽयमारम्भे । आरब्धं पठितुमारभते शिष्यः । इति दुर्गादासः ॥

रभसः, पुं, (रभणमिति । रभ + "अत्यविधनिमितमिनमिरभिलभीति ।" उणा० ३ । ११७ । इति असच् ।) वेगः । (यथा, माघे । ६ । ७२ ।
"रभसोत्थितासुपगतः सहसा
परिरभ्यकञ्चन वधूमरुधत् ॥")
हर्षः । इति मेदिनी । से, ३१ ॥ (प्रेमोत्साहः । यथा, गीतगोविन्दे । ५ । ६ ।
"मनसि रभसविभवे हरिरुदयतु सुकृतेन ॥"
"रभसस्य प्रेमोत्साहस्य ।" इति तट्टीकायां बोधिनी ॥) संभ्रमः । यथा, माघे । ११ । १६ ।
"प्रमदमदनमाद्यद्यौवनोद्दामरामा
रमणरभसखेदच्छेदविच्छेददक्षः ॥"
संभ्रमः । यथा, भागवते । ११ । १६ ।
"वक्षदंष्ट्राः श्वानः सम्प्रसभानि
विंशतिश्च सृगमसं खादन्ति ॥")
यौवनपर्य्यविचारः । इत्यरण्यः । औत्सुक्यमिति कलिङ्गः । स्त्रियामा रभसा च दृश्यते । इति क्षीरः । (यथा, किरातार्জ্জुनीये । ५ । १ ।
"अथ जयाय तु मेरुमहीभृतो
रभसया तु दिगन्तदिदृक्षया ।
अभिययौ स हिमालयमुक्षितं
वसुदितं तु विलङ्घयितुं नभः ॥")
(यथा, महाभारते । ५ । ५१ । १० ।
"सर्व्वेषां मम पुत्राणां स एकः क्रूरविक्रमः ।
वज्राग्नी विप्रतीपञ्च बाल्येऽपि रभसः सदा ॥"
महान् । इति निघण्टुः । ३ । ३ ॥)
यदा तु रभसगुणयोगात्अर्शं आदित्वात् अप्रत्यये तद्वति वर्त्तते तदा वाच्यलिङ्गता स्यात् । इति लिङ्गादिसंग्रहे भरतः ॥
खनामख्यातः अभिधानविशेषश्च ॥

रम, उ ङ ञ औ क्रीड़े । इति कविकल्पद्रुमः ॥ (भ्वा०-आत्म०-अक०-अनिट्। क्त्वावेट् ।) रेफादिः । उ, रमित्वा । रन्त्वा । ङ, रमते । ञ, रामः रम्यः । औ, रन्ता । इति दुर्गादासः ॥

रमः, पुं, (रमते इति । रम् + पचाद्यच् ।) कामः । (यथा, किरातार्জ্জुनीये । ५ । २० ।
"निधिगुह्यकाधिपरमैः परमैः ॥")
रक्ताशोकवृक्षः । कामदेवः । इति मेदिनी । मे, २५ ॥ रमणञ्च । रमधातोर्भावेऽल्प्रत्ययनिष्पन्नम् ॥

रमकः, पुं, (रमते इति । रम् + "रमेरच्च लो वा ।" उणा० ३ । १३ । इति वुन् ।) कान्तः । इत्युणादिकोषः ॥

रमठं, क्ली, (रम + अठन् ।) हिङ्गु । इत्युणादिकोषः ॥ (जनपदविशेषे, पुं । तद्देशवासिनि, त्रि । यथा, महाभारते । ३ । ५१ । २४ ।
"जागुडान् रमठान् सुण्डान् क्षीराद्यानथ तङ्गणान् ॥")

रमठध्वनिः, पुं, (रमठ इति शब्देन ध्वन्यते कथ्यते इति । ध्वन् + इन् ।) हिङ्गु । इति शब्दचन्द्रिका ॥

रमणं, क्ली, (रमयतीति । रम् + णिच् + ल्युः ।) पटोलमूलम् । इति मेदिनी ॥ जघनम् । इति हेमचन्द्रः ॥ (रम् + भावे ल्युट् ।) जघनम् । तत्पर्य्यायः । अवक्षत्तर्य्यकम् २ ग्राम्यधर्म्मः ३ सुरतम् ४ रतम् ५ संप्रयोगः ६ निधुवनम् ७ मैथुनम् ८ रतिः ९ उपहरम् १० घर्षितम् ११ क्रीड़ारतम् १२ महासुखम् १३ त्रिभद्रम् १४ योगमिथुनम् १५ अभिमानितम् १६ । इति शब्दरत्नावली ॥ (यथा, माघे । ११ । १६ ।
विकच कमलगन्धैरन्वयुः भृङ्गमालाः
सुरभितमकरन्दं मन्दमावाति वातः ।
प्रमदमदनमाद्यद्यौवनोद्दामरामा-
रमणरभसखेदस्वेदविच्छेददक्षः ॥")
क्रीड़नम् । इति रमधात्वर्थदर्शनात् ॥ (रत्युत्पादनम् । यथा, भागवते । १० । २ । १३ ।
"रामेति लोकरमणाद्बलं बलवदुच्छ्रयात् ॥"
"लोकस्य रमणात् रत्युत्पादनात् ।" इति तत्र

स्वामी ॥ वनविशेषः । यथा, हरिवंशे ।१५५।२१।
"भाति चैत्रवनञ्चैव नन्दनञ्च वनं महत् ।
रमणं भावनं चैव वेणुमद्दे समन्ततः ॥")
रमणः, पुं, (रमते रमयतीति वा । रम्+णिच् वा+ल्युः ।) पतिः । (यथा, कुमारे । ४ । २१ ।
"वचनीयमिदं वयस्थितं
रमण ! त्वामनुयामि यद्यपि ॥"
रमयति स्त्रीपुरुषाणां अन्तःकरणमिति । रम्+णिच्+ल्युः ।) कामदेवः । इति मेदिनी । णे, ७२ ॥ गर्भः । इति हेमचन्द्रः ।३ । १८१ ॥ वृषणः । इति शब्दचन्द्रिका ॥ महादिष्टः । इति राजनिर्घण्टः ॥ (धरवसुपुत्राणामन्यतमः । यथा, मात्स्ये । ५ । २४ ।
"कल्याणिन्यां ततः प्राणो रमणः शिशिरोऽपि च
मनोहरा धरात् पुत्रानवापाथ हरेः सुता ॥"
रमणीये, त्रि । यथा, भागवते । ४ । ६ । १० ।
"रमणं विहरन्तीनां रमणैः सिद्धयोषिताम् ॥")
रमणकं, क्ली, (रमन्ते लोका अत्र । रम्+ल्युट् । संज्ञायां कन् ।) जम्बुद्वीपान्तर्गतवर्षविशेषः । स तु रम्यकवर्षः । यथा,—
"एवमेवोत्तरे त्रीणि वर्षाणि च तपोधन ।
कुरुवर्षं सिन्धुकूलात् प्रह्लवानवधिः स्मृतः ॥
हिरण्मयं ततो वर्षं श्वेतावधि निगद्यते ।
रम्यकञ्च ततो वर्षं नीलस्त्वावधिः स्मृतः ॥"
अपि च ।
शेष उवाच ।
"दक्षिणेन तु श्वेतस्य निषधस्योत्तरेण तु ।
वर्षं रमणकं नाम जायन्ते तत्र मानवाः ॥
शुक्लाभिजनसम्पन्नाः सर्व्वे सुप्रियदर्शनाः ।
दशवर्षसहस्राणि प्रजानि दश पञ्च च ।
जीवन्ति ते महाभाग नित्यं मुदितमानसाः ॥"
इति पाद्मे भूखण्डे १२८ । २२६ अध्यायौ ॥
(अन्यत् रम्यकशब्दे द्रष्टव्यम् ॥ वीतिहोत्रस्य पुत्रभेदः । यथा, भागवते । ५ । २० । ३१ ।
"तद्वीपस्याधिपतिः प्रियव्रतो प्रीतिहोत्रो नाम तस्यात्मजौ रमणकधातकनामानौ वर्षपती नियुज्य स्वयं पूर्व्वजवद्भगवत्कर्म्मशील एवास्ते ॥")
रमणा, स्त्री, रमणी । इत्यमरटीका ॥ (पीठस्य शक्तिविशेषः । यथा, देवीभागवते । ७।३०।६७ ।
"रमणा रामतीर्थे तु यमुनायां मृगावती ॥")
रमणी, स्त्री, (रमतेऽस्यामिति । रम्+ल्युट् । ङीष् ।) नारी । इति मेदिनी । णे, ७२ ॥ उत्तमस्त्रीविशेषः । या वपुर्गुणोपचारेण सौभाग्येन कान्तं रमयति सा । इत्यमरभरतौ ॥ (यथा, कथासरित्सागरे । ५२ । २१४ ॥
"रथेन रमणीयुक्तः प्रजानां दत्तकौतुकः ॥")
बालास्त्रीवृत्तः । यथा,—
"बाला च रमणी रामा वन्द्या कामकलापि च ॥"
इति शब्दचन्द्रिका ॥
रमणीयं त्रि, (रम्+अनीयर् ।) सुन्दरम् । इत्यमरटीका ॥ (यथा, गीतगोविन्दे । १ । ११ ।
"वितरसि दिक्षु रणे दिक्पतिकमनीयम्
दशमुखमौलिबलिं रमणीयम् ॥")
रमण्यं, त्रि, (रम्+"ग्रहरम्योच्च ।" उणा० ३ । १०१ । इति अन्यप्रत्ययः । रंमणीयम् । इति सिद्धान्तकौमुद्यामुणादिवृत्तिः ॥)
रमतिः, पुं, (रमतेऽस्मिन् इति । रम्+"रमेर्म्नित् ।" उणा० ४ । ६३ । इति अतिप्रत्ययः । नित्त्वं ।) नायकः । स्वर्गः । इति मेदिनी । ते, १४३ ॥ काकः । इति शब्दरत्नावली ॥ कामः । कामदेवः । इति सिद्धान्तकौमुद्यामुणादिवृत्तिः ॥
रमा, स्त्री, (रमयतीति । रम्+णिच्+अच् । टाप् च ।) लक्ष्मीः । इति मेदिनी । मे, २५ ॥ (यथा, भागवते । ३ । ६ । २३ ।
"एष प्रसन्नवरदो रमयात्मशक्त्या
यदूयत् करिष्यति गृहीतगुणावतारः ॥"
यथा च ।
"रमा यत्र भवाक् तत्र यत्र वाक् तत्र नो रमा ।
ते यत्र विनयो नास्ति सा च सा च स च त्वयि ॥"
इत्युद्भटः ॥)
शशिध्वजराजकन्या । सा कल्किदेवेन विवाहिता । यथा,—
"ततः शशिध्वजो राजा युद्धादाहूय पुत्रकान् ।
सुशान्तायां मतिं कृत्वा रमां प्रादात् स कल्कये ॥"
इति कल्किपुराणे २५ अध्यायः ॥
शोभा । इति राजनिर्घण्टः ॥ (गङ्गा । यथा, काशीखण्डे । २६ । १४५ ।
"रेवती रतिरम्भा रत्नगर्भा रमा रतिः ॥"
रमाधवः, पुं, (रमाया लक्ष्म्या धवः पतिरिति ।) श्रीकृष्णः । यथा । रमाधवः पूज्यो माधवत्वात् । इत्यवयवशक्त्ये जगदीशः ॥
रमानाथः, पुं, श्रीकृष्णः । रमा लक्ष्मीस्तस्या नाथः स्वामी । इति षष्ठीतत्पुरुषसमासनिष्पन्नः ॥
रमापतिः, पुं, (रमायाः पतिः ।) श्रीकृष्णः । यथा, मुग्धबोधव्याकरणे ।
"सकुन्दस्यासितमिदमिदं यातं रमापतेः ।
मुक्तमेतदनन्तस्येत्यूचुर्गोप्यो दिदृक्षवः ॥"
(यथा च देवीभागवते । १ । ५ । ८ ।
"दत्त्वा भारं धनुष्कोट्यां निद्रामाप रमापतिः ॥")
रमाप्रियं, क्ली, (रमायाः प्रियम् ।) पद्मम् । इति शब्दचन्द्रिका ॥
रमावेष्टः, पुं, (रमया वेष्टतेऽसौ । वेष्ट+घञ् ।) श्रीवासः । इति राजनिर्घण्टः ॥
रमिता, त्रि, (रम्+णिच्+क्त । टाप् ।) रतिप्रापिता । यथा,—
"त्वरितगतिर्व्रजयुवतिस्तरणिसुताविपिनगता ।
सुररिपुणा रतिगुरुणा परिरमिता श्रमदमिता ॥"
इति छन्दोमञ्जरी ॥
"व्रजयुवतिगोपवधूः सुररिपुणा श्रीकृष्णेन परिरमिता सती श्रमदं हर्षं इता गता । किम्भूता । त्वरितगतिः त्वरिता शीघ्रा गतिर्यस्याः सा तथा । पुनः किम्भूता तरणिसुताविपिनगता यमुनासम्बन्धिवनसुपागता । किम्भूतेन रतिगुरुणा रतौ शृङ्गारे गुरुणा उपाध्यायेन । अयमभिप्रायः । स्वयं रतिकुशलो नायिकाश्च रतिमध्यापयति ।" इति सटीका ॥
रमेश्वरः, पुं, (रमाया लक्ष्म्या ईश्वरः पतिर्नियन्ता वा ।) विष्णुः । यथा,—
"श्रीराम राघव रमेश्वर रावणारे
भूतेश भस्मथरिपो प्रमथाधिनाथ ।
त्राणं रमर्हेन कुरीकपतेऽसुरारे
त्याख्या भटा य इति सन्ततमामनन्ति ॥"
इति काशीखण्डे हरिहरस्तोत्रम् ॥
रम्भः, पुं, (रम्भते रागमूर्च्छनादिकमभिनेति । रभि+कर्म्मणि घञ् ।) वेणुः । (रम्भते उद्यमशीलो भवति निरन्तरसुदरभरणायेति भावः । रभि+अच् ।) वानरविशेषः । इति मेदिनी । मे, ७ ॥ महिषासुरपिता । यथा,—
श्रीऔर्व्व उवाच ।
"आराधितो महादेवो रम्भेण सुरवैरिणा ।
चिरेण स च सुप्रीतस्तपसा तस्य शङ्करः ॥
अथ तुष्टो महादेवः प्रत्यक्षं रम्भमुक्तवान् ।
प्रीतोऽस्मि ते वरं रम्भ वरयस्व यथेप्सितम् ॥
एवमुक्तः प्रत्युवाच रम्भस्तं चन्द्रशेखरम् ।
अपुत्रोऽहं महादेव यदि ते मय्यनुग्रहः ॥
मम जन्मत्रये पुत्रो भवान् भवतु शङ्कर ।
एवमुक्तस्तु देवेन प्रत्युवाच वृषध्वजः ॥
भवत्येतद्दाक्ष्यितं ते भविष्यामि सुतस्तव ।
इत्युक्त्वा स महादेवस्तत्रैवान्तरधीयत ॥
रम्भोऽपि यातः स्वस्थानं हर्षोत्फुल्लविलोचनः ।
पथि गच्छन् स रम्भोऽथ ददर्श महिषीं शुभाम् ॥
चित्रायणीं चित्रवर्णां सुन्दरीं ऋतुशालिनीम् ।
स तां दृष्ट्वाथ महिषीं रम्भः कामेन मोहितः ॥
दोर्भ्यां गृहीत्वा च तदा चकार सुरतोत्सवम् ।
तयोः प्रवृत्ते सुरते सा तदा तस्य तेजसा ॥
दधार महिषी गर्भं तदाभून्महिषासुरः ॥"
इति कालिकापुराणे ५६ अध्यायः ॥
(असौ एव जन्मान्तरे रक्तबीजो जातः । एतद्विवरणं यथा, देवीभागवते । ५।२।१७-४६।
व्यास उवाच ।
"दनोः पुत्रौ महाराज ! विख्यातौ क्षितिमण्डले ।
रम्भश्चैव करम्भश्च ह्यावास्तां दानवोत्तमौ ॥
तावपुत्रौ महाराज ! पुत्रार्थे तेपतुस्तपः ।
बहून् वर्षगणान् कामं पुण्ये पञ्चनदे जले ॥
करम्भस्तु जले मग्नश्चकार परमं तपः ।
वृक्षं रसालवटं प्राप्य स रम्भोऽग्निमसेवत ॥
पञ्चाग्निसाधनासक्तः स रम्भस्तु यदाभवत् ।
ज्ञात्वा शचीपतिर्दुःखमुदयौ दानवौ प्रति ॥

गत्वा पञ्चनदे तत्र ग्राहरूपं चकार ह ।
वासवस्तु करभन्तं तदा जग्राह पादयोः ॥
निजघान च तं दुष्टं करभं वृत्रसूदनः ।
भ्रातरं निहतं श्रुत्वा रम्भः कोपं परङ्गतः ॥
स्वग्रीवं पावके होतुमैच्छच्छित्वा करेण ह ।
केशपाशे गृहीत्वाशु वामेन क्रोधसंयुतः ॥
दक्षिणेन करेणोग्रं गृहीत्वा खड्गमुत्तमम् ।
छिनत्ति ग्रीवं तत्तावद्वह्निना प्रतिबोधितः ॥
उक्तश्च दैत्य मूर्खोऽसि स्वग्रीवं छेत्तुमिच्छसि ।
आत्महत्यातिदुःसाध्या कथं त्वं कर्त्तुमुद्यतः ॥
वरं वरय भद्रं ते यस्ते मनसि वर्त्तते ।
मा म्रियस्व मृतेनाद्य किन्ते कार्यं भविष्यति ॥

व्यास उवाच ।

तच्छ्रुत्वा वचनं रम्भः पावकस्य सुभाषितम् ।
ततोऽब्रवीद्वह्निं रम्भस्त्यक्त्वा केशप्रकलापकम् ॥
यदि तुष्टोऽसि देवेश ! देहि मे वाञ्छितं वरम् ।
त्रैलोक्यविजयी पुत्रः स्यान्न परबलार्दनः ॥
अजेयः सर्व्वथा स स्याद्देवदानवमानवैः ।
कामरूपी महावीर्य्यः सर्व्वलोकाभिवन्दितः ॥
पावकस्तं तथेत्याह भविष्यति तवेप्सितम् ।
पुत्रस्तव महाभाग ! मरणाद्विरमाधुना ॥
यस्यां चित्तं तु रम्भ ! त्वं प्रमदायां करिष्यसि ।

व्यास उवाच ।

तस्यां पुत्रो महाभाग ! भविष्यति बलाधिकः ॥
इत्युक्तो वह्निना रम्भो वचनं चित्तरञ्जनम् ।
श्रुत्वा प्रणम्य प्रययौ वह्निं तं दानवोत्तमः ॥
यत्रैः परिवृतं स्थानं रमनीयं श्रियान्वितम् ।
दृष्ट्वा चक्रे तदा भावं महिष्यां दानवोत्तमः ॥
मत्तायां रूपपूर्णायां चिह्नायन्यां च योषितम् ।
सा समागाच्च तरसा कामयन्ती सुदान्विता ॥
रम्भोऽपि गमनं चक्रे भवितव्यप्रणोदितः ।
सा तु गर्भवती जाता महिषी तस्य वीर्य्यतः ॥
तां गृहीत्वाथ पातालं प्रविवेश मनोहरम् ।
महिषेभ्यश्च तां रक्षन् प्रियामनुमतीं किल ॥
कदाचित् महिषश्चान्यः कामार्त्तस्तासुपाद्रवत् ।
स्वयमागत्य तं हन्तुं दानवः ससुपाद्रवत् ॥
स्वरक्षार्थं समागम्य महिषं समताड़यत् ।
सोऽपि तं निजघानाशु शृङ्गाभ्यां काममोहितः ॥
ताड़ितस्तेन तीक्ष्णाभ्यां शृङ्गाभ्यां हृदये भृशम् ।
भूमौ प्रपात तरसा ममार च विमूर्च्छितः ॥
मृते भर्त्तरि सा दीना भयार्त्ता विद्रुता भृशम् ।
सा वेगात्तं वटं प्राप्य यत्राणां शरणं गता ॥
पृष्ठतस्तु गतस्तत्र महिषः कामपीड़ितः ।
कामयानस्तु तां कामी बलवीर्य्यमदोद्धतः ॥
रुदती सा भृशं दीना दृष्ट्वा यत्रैर्मयातुरा ।
धावमानञ्च तं वीक्ष्य यत्राख्यातुं समाययुः ॥
युद्धं समभवद्घोरं यत्राणां च हयारिणा ।
शरेण ताड़ितस्तूर्णं प्रपात धरणीतले ॥
मृतं रम्भं समानीय यत्रास्ते परमं प्रियम् ।
चितायां रोपयामासुस्तस्य देहस्य शुद्धये ॥
महिषी सा पतिं दृष्ट्वा चितायां रोपितं तदा ।
प्रवेष्टुं सा मतिं चक्रे पतिना सह पावकम् ॥
वार्य्यमाणापि यत्नैः सा प्रविवेश हुताशनम् ।
ज्वालामालाकुलं साध्वीपतिमादाय वल्लभम् ॥
महिषस्तु चितामध्यात् समुत्तस्थौ महाबलः ।
रम्भोऽप्यन्यद्वपुः कृत्वा निःसृतः पुत्रवत्सलः ॥
रक्तबीजोऽप्यसौ जातो महिषोऽपि महाबलः ।
अभिषिक्तस्तु राज्येऽसौ हयारिरसुरोत्तमैः ॥
एवं स महिषो जातो रक्तबीजश्च वीर्य्यवान् ।
अवध्यस्तु सुरैर्दैत्यैर्मानवैश्च नृपोत्तम ! ॥")

रम्भा, स्त्री, (रभि + अच् । टाप् ।) कदली । (यथा, नैषधे । २ । ३७ ।

"तरुस्तरुभ्युगेन सुन्दरी
किमु रम्भां परिणाहिना परम् ॥")

अप्सरोविशेषः । इति मेदिनी । मे, ७ ॥ (यथा, महाभारते । १ । ६५ । ५० ।

"अरुणा रचिता चैव रम्भा तद्वन्मनोरमा ॥")

गौरी । इति शब्दरत्नावली ॥ (सा तु पीठस्थशक्तीनामन्यतमा । यथा, देवीभागवते । ७ । ३० । ५८ ।

"गौरी प्रोक्ता कान्यकुब्जे रम्भा कु मलयाचले ॥")

गोधनिः । इति हेमचन्द्रः । ६ । ४२ ॥ वेश्या । इति धरणिः ॥

रम्भाष्टतीया, स्त्री, (रम्भाख्या तृतीया ।) व्रतविशेषकालः । यथा,—

ब्रह्मोवाच ।

"रम्भातृतीयां वक्ष्ये च सौभाग्यश्रीसुतादिदाम् ।
मार्गशीर्षे सिते पक्षे तृतीयायामुपोषितः ॥
गौरीं यजेद्दिक्षपत्रैः कुशोदादः करम्भदः ।
कदम्बादो गिरिसुतां पौषे मरुवकैर्यजेत् ॥
कर्पूरादः शरदो मल्लिकादन्तकाष्ठदृत् ।
माघे सुभद्रां कङ्कारेर्घृताशो मण्डकप्रदः ॥
गौतीमयं दन्तकाष्ठं फाल्गुने गोमतीं यजेत् ।
कुन्दैः कृत्वा दन्तकाष्ठं जीवाग्रः सक्तुलीप्रदः ॥
विशालाक्षीं दमनकैश्चैत्रे काशारसंप्रदः ।
दधिप्राशो दन्तकाष्ठं तगरं श्रीसुखीं यजेत् ॥
वैशाखे कर्णिकारैश्च अशोकाशो वटप्रदः ।
ज्येष्ठे नारायणीमर्च्चेत्कृतपत्रैश्च खड्गदः ॥
नवशाकाशश्च तच्छाद आषाढ़े माधवीं यजेत् ।
तिलाशो विल्वपत्रैश्च क्षीरान्नवटकप्रदः ॥
औडुम्बरं दन्तकाष्ठं तर्पयेत्तः श्रावणे श्रियम् ।
दन्तकाष्ठं स्वर्णकाशः क्षीरदो द्युतमां यजेत् ॥
पद्मैर्यजेत् भाद्रपदे शृङ्गोदाशो गुणादिदः ।
राजपुत्रीश्वाश्वयुजे जवापुष्पैश्च जीवकम् ॥
प्राशयेन्निशि नैवेद्यैः कृशरैः कार्त्तिके यजेत् ।
जातिपुष्पैः पद्मजाक्षं पञ्चगव्याशनो यजेत् ॥
घृतोदनश्च वर्षान्ते सपत्नीकान् द्विजान् यजेत् ।
उमामहेश्वरं स्वर्गे लक्ष्मीं तु गृहे स्थितम् ॥
वस्त्रच्छत्रसुवर्णाद्यैः रात्रौ च कृतजागरः ।
गीतवाद्यैर्ददेत् प्रातर्गवाद्यं सर्व्वमाप्नुयात् ॥"

इति गारुड़े १२० अध्यायः ॥ * ॥

अपि च । "अथ तृतीया । सा चतुर्थीयुता रम्माव्रतेतरदेवकर्म्मसु ग्राह्या ।

'रम्माख्यां वर्ज्जयित्वा तु तृतीयां मुनिसत्तम ।
अन्येषु सर्व्वकार्य्येषु गणयुक्ता प्रशस्यते ॥'

इति ब्रह्मवैवर्त्तात् ॥

ततश्च युग्मवाक्यं रम्माव्रतपरम् । भविष्योत्तरे ।

'कुरुष्व भद्रे यत्नेन रम्माख्यं व्रतमुत्तमम् ।
ज्येष्ठे शुक्लतृतीयायां स्नातनियमतत्परा ॥'

रम्माख्यमिति रम्भया कृतमिति रम्माव्रतम् ।" इति तिथ्यादितत्त्वम् ॥

रम्भोरूः, स्त्री, रम्भे इव ऊरू यस्याः सा । इति व्याकरणम् ॥ (यथा, रघौ । ६ । ३५ ।

"अनेन यूना सह पार्थिवेन
रम्भोरु ! कच्चिन्मनसो रुचिस्ते ॥")

रम्यं, क्ली, (रम + "शेरडुपधात् यत् ।" ३ । १ । ६८ । इति यत् ।) पटोलमूलम् । इति मेदिनी ॥ प्रधानधातु । इति जटाधरः ॥

रम्यः, पुं, (रम्यते अनेनेति । रम + यत् ।) चम्पकवृक्षः । इति मेदिनी ॥ वकवृक्षः । इति शब्दचन्द्रिका ॥

रम्यः, त्रि, (रम + यत् ।) मनोज्ञः । इति मेदिनी ॥ (यथा, मनौ । ७ । ६६ ।

"रम्यमानतसामन्तं खाजीयं देशमावसेत् ॥")

बलकरः । इति जटाधरः ॥

रम्यकं, क्ली, (रम्यते जनोऽत्रेति । रम् + यत् । ततः कप् संज्ञायां कन् वा ।) वर्षविशेषः । इति जटाधरः ॥ एतस्य विवरणं यथा,—

"दक्षिणेन तु मेरोस्तु श्वेतस्य चोत्तरेण च ।
वायव्यं रम्यकं नाम जायन्ते तत्र मानवाः ॥
मतिप्रधाना विमला जरादुर्गविवर्जिताः ।
तत्रापि सुमहान् वृक्षो न्यग्रोधो रोहितः स्मृतः ।
तत्फलप्राश्यनादेव जीवन्ति बहुवासरम् ॥"

इति वराहपुराणे रुद्रगीतानामाध्यायः ॥

(तथाच देवीभागवते । ८ । ६ । १८—२३ ।

"रम्यके नाम वर्षे च मूर्त्तिं भगवतः पराम् ।
मात्स्यां देवासुरैर्वन्द्यां मनुः स्तौति निरन्तरम् ॥

मनुरुवाच ।

ॐ नमो मुख्यतमाय नमः सत्त्वाय
प्राणायौजसे बलाय महामत्स्याय नमः ।
अन्तर्बहिश्चाखिललोकपालके-
रदृष्टरूपो विचरस्युरुस्वनः ।
स ईश्वरस्त्वं स इदं वपुः नय-
न्नाम्ना यथा दारुमयौ नरः स्त्रियम् ॥
यं लोकपालाः किल मत्सरज्वरा
हित्वा यतन्तोऽपि पृथक् समेत्य च ।
पातुं न शेकुर्द्विपदश्चतुष्पदः
सरीसृपं स्थाणु यदत्र दृश्यते ॥
भवान् युगान्तार्णव ऊर्म्मिमालिनि
चौर्णीमिमामोषधिवीरुधां निधिम् ।
मया सहोरुक्रमतेऽज ओजसा
तस्मै जगत्प्राणगणात्मने नमः ॥
एवं स्तौति च देवेशं मनुः पार्थिवसत्तम ।
मत्स्यावतारं देवेशं संप्रयच्छेदकारणम् ॥

ध्यानयोगेन देवस्य निर्धूताशेषकल्मषः।
आस्ते परिचरन् भक्त्या महाभागवतोत्तमः॥"
तथाच मात्स्ये। ११२। ३०॥ वैष्णवे। २।२।१३॥
ब्रह्माण्डे च। ६। १। ७॥ द्रष्टव्यम्॥) पटोल-
मूलम्। इति त्रिकाण्डशेषः॥ (यथा, सुश्रुते।
१। २६ अध्याये।
"कम्पिल्लकरञ्जकपाटलापूगहरीतकीत्वादयः॥"
पुं, आग्नीध्रपुत्रभेदः। एतन्नामानुसारेणैव रम्यक-
वर्षोऽभवत्। यथा, भागवते। ५। २। १६।
"तस्यासुंह वा आत्मजान् स राजवर्य आग्नीध्रो
नाभिकिंपुरुषहरिवर्षेलावृतरम्यकाहिरण्मय-
कुरुभद्राश्वकेतुमालसंज्ञान् नवपुत्रानजनयत्॥")
रम्यपुष्पः, पुं, (रम्यं दर्शनीयं पुष्पमस्य।)
प्राल्मलिवृक्षः। इति राजनिर्घण्टः॥ (प्राल्मलि-
शब्दोऽस्य गुणादयो ज्ञेयाः॥)
रम्यफलः, पुं, (रम्यं फलमस्य।) कारस्करवृक्षः।
इति राजनिर्घण्टः॥
रम्या, स्त्री, (रमतेऽस्यामिति। रम+"गोर-
डुपधात् यत्।" ३। १। ६८। इति यत्।
टाप् च।) रात्रिः। इति मेदिनी॥ स्थल-
पद्मिनी। इति राजनिर्घण्टः॥ (गङ्गा।
यथा, काशीखण्डे तत्सहस्रनामकीर्त्तने। २६।
१४५।
"रेवती रतिश्चन्द्रम्या रत्नगर्भा रमा रतिः॥")
रम्भः, पुं, (रम्+शकादित्वात् रः।) अरुणवर्णः।
प्रोभा। इत्युणादिकोषः। २। २३८॥
रय, ङ गतौ। इति कविकल्पद्रुमः॥ (भ्वा०-आत्म०-
सक०-सेट्।) ङ, रयते। इति दुर्गादासः॥
रयः, पुं, (रयते अनेनेति। रय+"पुंसि संज्ञायां
घः प्रायेण।" ३। ३। ११८। इति घः। रौणा-
त्यनेनेति वा। रौ गतौ+घप्रत्ययेन साधुरिति।)
वेगः। इत्यमरः। १।१।६७॥ प्रवाहः। यथा,—
"प्रवाहः पुनरोघः स्यादेणी धारा रयश्च सः॥"
इति हेमचन्द्रः॥
(यथा, महाभारते। २। १७। ६।
"कथमम्भो न गच्छेम वृक्षस्येव नदीरयाः॥"
पुरूरवसः पुत्रभेदः। यथा, भागवते। ६।१५।१।
"ऐलस्य चोर्व्वश्यौगर्भात् षड़ासन्नात्मजा नृप।
आयुः श्रुतायुः सत्यायू रयोऽथ विजयो जयः॥")
ररटी, स्त्री, (ललाट+रलयोरैक्यात् ललस्य रलम्।
ततो ङीप्।) ललाटः। इति पुराणम्॥ (यथा,
भागवते। २। १। २८।
"तपो ररटीं विदुरादिपुंसः
सत्यन्तु श्रीर्यामि सहस्रश्रीर्णाः॥")
रलकः, पुं, ("रमणं रत् क्विप्यनुनासिकलोपे
रत् इच्छा तां राति कः रलस्ततः स्वार्थे
कन्।" इत्यमरटीकायां रघुनाथचक्रवर्त्ती।)
कमलः। इत्यमरः॥ पद्मा। इति मुग्धबोधः॥
नागविशेषः। इति मुकुटः॥
रव, इ शब्दे। इति कविकल्पद्रुमः॥ (भ्वा०-पर०-
सक०-सेट्।) इ, रवति। इति दुर्गा-
दासः॥

रवः, पुं, (रूयते इति। रु ध्वनौ+भावे अप्।)
शब्दः। इत्यमरः॥ (यथा, रघुः। ६। ५४।
धनुरधिज्यमनाधिरुपाददे
नरवरो रवरोधितकेशरी॥")
रवर्णं, क्ली, (रौतीति। रु+युच्।) कांस्यम्।
इति हेमचन्द्रः॥ (रु+भावे ल्युट्।) रवश्च॥
रवणः, पुं, (रौतीति। रु+"सुयुरुवृञो युच्।"
उणा० २। ७४। इति युच्।) उष्ट्रः। इति
हेमचन्द्रः॥ (यथा, माघे। १२। ६।
"उत्पातुमिच्छून् विधृतः पुरोबला-
न्निधीयमाने भरभाजि यन्तरि।
अर्द्धोज्झितोद्गारविभर्त्सरस्वरः
स्वनाम निन्ये रवणः स्फुटार्थताम्॥")
कोकिलः। इति सिद्धान्तकौमुद्यामुणादिवृत्तिः॥
रवणः, त्रि, (रु+युच्।) शब्दनः। तीक्ष्णः।
भक्षकः। चञ्चलः। इति शब्दरत्नावली॥
रवथः, पुं, (रु+"शीङ्शपिरुगमिवधिजीवि-
प्राणिभ्योऽथः।" उणा० ३। ११३। इति
अथप्रत्ययः।) कोकिलः। इत्युणादिकोषः॥
रविः, पुं, (रूयते स्तूयते इति। रु+"अच इः।"
उणा० ४। १३८। इति इः।) सूर्य्यः। अर्क-
वृक्षः। इत्यमरः॥ सूर्य्यस्य भोग्यं दिनं वार-
रूपम्॥ यथा,—
"रवौ वर्ज्यं चतुः पञ्च सोमे सप्त द्वयं तथा॥"
इत्यादिवारवेलाकथने समयप्रदीपः॥
तत्र निषिद्धानि यथा,—
"माषमामिषमांसञ्च मसूरं निम्बपत्रकम्।
भक्षयेद्यो रवेर्व्वारे सप्तजन्मन्यपुत्रकः॥
आर्द्रकं मधु मत्स्यञ्च भक्षयेद्यो रवेर्दिने।
सप्तजन्म भवेद्रोगी जन्म जन्म दरिद्रता॥
निम्बं मांसं मसूरञ्च विल्वकाञ्जिकमार्द्रकम्।
भक्षयेद्यो रवेर्व्वारे सप्तजन्मन्यपुत्रकः॥"
इति कर्म्मलोचनम्॥ * ॥
रविग्रहस्य रक्तश्याममिश्रितवर्णः। अयं
पूर्ब्बदिक्पुरुषक्षत्रियजातिसत्त्वगुणकटुरसपित्त-
राशिहस्तानक्षत्रसप्तमीतिथिताम्रकलिङ्गदेशा-
नामधिपतिः। काश्यपगोत्रः। द्वादशाङ्गुल-
शरीरः। पद्महस्तहृदयः। पूर्ब्बाननः। सप्ताश्व-
वाहनः। शिवाधिदेवतः। रट्टिप्रत्यधिदेवतश्च।
इति ग्रहयज्ञतत्त्वादयः॥*॥ अस्य द्युतपत्तिर्यथा,
"अवतीर्य्यो लोकांस्तस्मात् सूर्य्यः परि-
भ्रमात्।
अचिरात्तु प्रकाशेत अवनात् स रविः स्मृतः॥"
इति मात्स्ये १०१ अध्यायः॥ * ॥
अस्य भार्य्यापत्यानि यथा,—
"मरीचेः काश्यपो जज्ञे तस्माच्चाग्निर्विभावसुः।
तस्य भार्य्याभवत् संज्ञा पुत्री त्वष्टुः प्रजापतेः॥
द्वौ अपत्यानि राजेन्द्र! संज्ञायां महतां
निधिः।
आदित्यो जनयामास कन्याञ्चैकां सुलोचनाम्।
वैवस्वतं मनुश्रेष्ठं यमञ्च यमुनां ततः॥
नातितेजोमयं रूपं सोढुं सा न विवस्वतः।

मायामयीं ततश्छायां सवर्णां निर्ममे स्वतः॥
संज्ञोवाच ततश्छायां सवर्णे शृणु मे वचः।
अहं यास्यामि सदनं पितुस्ते पुनरत्र मे।
भवने वस कल्याणि! निर्व्विशङ्कं ममाज्ञया॥
मनुरेष यमावेतौ यमुनायमसंज्ञकौ।
स्वापत्यदृष्ट्या द्रष्टव्यमेतद्बालत्रयं त्वया॥
न वक्तव्यमिदं वृत्तं त्वया पत्यौ कदाचन।
इत्याकर्ण्याथ सा त्वाष्ट्री देवी छाया जगाद
ताम्॥
आकर्षणाद्गमिष्यामि शापाद्वा कदाचन।
आख्यास्यामि चरित्रं ते याहि देवि! यथासुखम्॥
इति च्छायां गृहे स्थाप्य संज्ञागात् पितुरालयम्।
उवाच पितरं देवी जामातुस्तव न क्षमा॥
तेजः सोढुमहं तात! काश्यपस्य महात्मनः।
तन्निगृह्य शुकोपासौ भर्त्तुं सयामास कन्यकाम्॥
मह्यं श्रेयः कथं वा स्यादिति सा परिचिन्त्य च।
अगच्छद्वडवा भूत्वा चरन्ती घोरान् कुरून्॥
तपस्तेपे च सा तीव्रं प्रतिमाधाय चेतसि।
मन्यमानोऽथ तां संज्ञां सवर्णायां तथा रविः॥
सावर्णिं जनयामास मनुश्रेष्ठं महीपते।
शनैश्चरं द्वितीयञ्च सुतां भद्रां त्रयीविकाम्॥
सवर्णा स्वेष्वपत्येषु सापत्न्यात् स्त्रीस्वभावतः।
चकाराप्यधिकं स्नेहं न तथा पूर्व्वजेष्वहो॥
चिरमालोक्य तां भार्य्यां उवाच सविता वचः।
त्वयि भाविनि बालेषु समेष्वपि कृतस्त्वया॥
विधीयतेऽधिकः स्नेहः सावर्ण्यादिसुतान् प्रति।
नाचचक्षे तदा साथ भास्करे परिपृच्छते॥
ततः समुद्यते शप्तुं छाया सर्व्वं शशंस च।
यथा दत्तं तथा तथ्यं तुतोष भगवान् रविः॥
निरागसं न शशाप जगाम स्वगुरन्तिकम्।
स्वष्टापि च यथान्यायं सान्त्वयित्वाथ काश्यपम्।
निर्दग्धुकामं कोपेन प्राणार्थञ्च सुदा तदा॥
स्वष्टोवाच।
तवातितेजसो भीता प्राप्योत्तरकुरून् वने।
वड़वारूपमास्थाय संज्ञा चरति भास्करे।
द्रष्टा हि तां भवानद्य स्वभार्य्यां तात मा रुष॥
लब्धानुज्ञोऽथ सविता गत्वोत्तरकुरूनथ।
स हरिद्धैरिरूपेण सुखेन समताड़यत्॥
स्मरमाणा च सवितुः परपूरुषशङ्कया।
सा तन्निरवमत् शुक्रं नासिकाभ्यां विवस्वतः।
देवौ तस्मादजायेतामश्विनौ भिषजां वरौ॥"
इति पाद्मे स्वर्गखण्डे ११ अध्यायः॥
(अन्यत् सूर्य्यशब्दे द्रष्टव्यम्॥)
रविकान्तः, पुं, (रविणा रविकरसंयोगेन कान्तः
कमनीयः।) सूर्य्यकान्तमणिः। इति राज-
निर्घण्टः॥
रविचक्रं, क्ली, (रवेश्चक्रम्।) नराकारसूर्य्यचक्र-
विशेषः। यथा,—
"लिखेते रविचक्रन्तु भास्करो नरसन्निभः॥
यस्मिन्नृक्षे भवेत् सूर्य्यस्तस्मादौ त्रीणि भक्षके।
त्यजं वक्त्रे प्रदातव्यमेकैकं स्कन्धयोर्न्यसेत्॥
एकैकं बाहुयुग्मे तु एकैकं हृक्षयोर्द्वयोः।

हृदये पञ्च मृत्पिण्डान् एकं नाभौ प्रदापयेत् ॥
मृत्पिण्डमेकं दद्याद्वै गुह्ये एकैकं जानुके न्यसेत् ।
नक्षत्राणि च ग्रीवायां रविपादे नियोजयेत् ॥
चरणस्थेन मृत्पिण्डेन अल्पायुर्जायते नरः ।
विदेशगमनं जानौ गुह्यस्थे परदारवान् ॥
नाभिस्थेनाल्पसन्तुष्टो हृत्स्थेन स्यान्महेश्वरः ।
पार्श्वस्थेन भवेच्चौरः स्थानभ्रष्टो भवेद्भुजे ॥
स्कन्धस्थिते धनपतिर्मुखे मिष्टान्नमाप्नुयात् ।
मस्तके पङ्क्तिवस्तु नक्षत्रं स्याद्यदि स्थितम् ॥"
इति गारुडे ६० अध्यायः ॥

रविजः, पुं, (रवेर्जात इति । जन्+डः ।) शनैश्चरः । यथा, ज्योतिषतत्त्वे ।
"उरगप्रतिभिषार्द्राखातिमूलाग्निपूर्ब्बा
रविरविजकुजाहे भूतषष्ठीनवन्याम् ॥"
(जह्नुवचने तु केतवः । यथा, बृहत्संहितायाम् । ११ । १० ।
"प्रागपरदिग्गोऽर्च्या
नृपतिविरोधावहा रविजाः ॥")

रवितनयः, पुं, (रवेः तनयः पुत्रः ।) सावर्णिकमनुः । यथा,—
"स बभूव महाभागः सावर्णिस्तनयो रवेः ॥"
इति देवीमाहात्म्यम् ॥
वैवस्वतमनुः । शनिः । (यथा, बृहत्संहितायाम् । ३४ । १२ ।
"परिवेषमण्डलगतो
रवितनयो क्षुद्भयान्यनाग्नकरः ।")
यमः । (सुग्रीवः । कर्णः ॥ द्विवचने अश्विनीकुमारौ ॥)

रविनन्दनः, पुं, (रवेर्नन्दनः । यद्वा, रविं नन्दयतीति । नन्दि+ल्युः ।) सुग्रीवः । इति त्रिकाण्डशेषः ॥ सावर्णिमनुः । वैवस्वतमनुः । (यथा, भागवते । ६ । १ । १६ ।
"होतुर्व्यतिक्रमं ज्ञात्वा बभाषे रविनन्दनम् ॥")
शनिः । यमश्च ॥ (द्विवचने अश्विनीकुमारौ ॥)

रविनाथं, क्ली, (रविरेव नाथोऽस्य ।) पद्मम् । वल्मूके, पुं । इति शब्दचन्द्रिका ॥

रविपत्रः, पुं, (रविवत् दीप्तिमत्पत्रं यस्य ।) आदित्यपत्रक्षुपः । इति राजनिर्घण्टः ॥

रविप्रियं, क्ली, (रविरेव प्रियमस्य ।) रक्तकमलम् । ताम्रम् । इति राजनिर्घण्टः ॥ (अस्य पर्य्यायो यथा,—
"ताम्रमौडुम्बरं शुल्वमुडुम्बरमपि स्मृतम् ।
रविप्रियं म्लेच्छमुखं सूर्य्यपर्य्यायनामकम् ॥"
इति भावप्रकाशस्य पूर्ब्बखण्डे प्रथमे भागे ॥)

रविप्रियः, पुं, (रवेः प्रियः ।) आदित्यपत्रः । रक्तकरवीरः । इति राजनिर्घण्टः ॥ लकुचः । इति शब्दमाला ॥

रविरत्नकं, क्ली, (रवे रत्नम् । ततः कन् ।) माणिक्यम् । इति राजनिर्घण्टः ॥

रविलोहं, क्ली, (रविप्रियं लोहम् ।) ताम्रम् । इति राजनिर्घण्टः ॥ (गुणादयोऽस्य ताम्रशब्दे विज्ञेयाः ॥)

रविलोचनः, पुं, (रविर्लोचनमस्य ।) विष्णुः । यथा,—
"रविर्विरोचनः सूर्य्यः सविता रविलोचनः ॥"
इति तस्य सहस्रनामस्तोत्रम् ॥

रविसंज्ञकं, क्ली, (रविः संज्ञा यस्य इति । कप् ।) ताम्रम् । इति शब्दचन्द्रिका ॥

रविसुतः, पुं, (रवेः सुतः ।) सूर्य्यपुत्रः । स च शनैश्चरादिः । यथा,—
"नीलाञ्जनचयप्रख्यं रविसुतं महाग्रहम् ।
छायाया गर्भसंभूतं वन्दे भक्त्या शनैश्चरम् ॥"
इति नवग्रहस्तोत्रम् ॥

रवीन्द्रं, क्ली, (रविणा सूर्य्यकरसर्पेण इन्द्यते प्रकाश्यते इति । इन्द्+अच् ।) पद्मम् । इति धरणिः ॥

रश्, खने । इति कविकल्पद्रुमः ॥ (भ्वा०-पर०-अक०- सेट् ।) रेफादिस्तालव्यान्तः । रश्यना । इति दुर्गादासः ॥ सौत्रधातुरयम् ॥

रश्मना, स्त्री, (अश्नुते व्याप्नोतीति । अशूं व्याप्तौ+"अशेर्नुट् च ।" उणा० २ । ७५ । इति मुच् धातोर्नुट्मादेशश्च ।) काञ्ची । इत्यमरादिकोषः ॥ (यथा, रघौ । ८ । ५८ ।
"इयमप्रतिबोधशायिनीं
रश्मना त्वां प्रथमा दृष्टसखी ॥")
जिह्वा । इति शब्दरत्नावली ॥ ("जिह्वावाची तु रसनाशब्दो दन्त्यसकारवानेव । रसयति स्वादयतीति । नन्द्यादित्वात् ल्युः । इति कलिङ्गः । रसना काञ्चिजिह्वयोरिति तु धरणिः ।" इत्युज्ज्वलः । २ । ७५ ॥ रज्जुः । यथा, वाजसनेयसंहितायाम् । २१ । ४६ ।
"होता यक्षदनस्पतिमभि हि प्रियमया रभिष्टया रश्मनयाधित ।" "रश्मनया रज्ज्वा कृत्वा अधित धृतवान् पशून् इति भोगः ।" इति तद्भाष्ये महीधरः ॥ अङ्गुलयः । इति निघण्टुः ।२।५॥ अत्र सदा बहुवचनप्रयोगो भवति । इति देवराजयज्वा ॥)

रश्मिः, पुं, (अश्नुते व्याप्नोतीति । अशूं व्याप्तौ+"अशेरौणादिको मिः ।" उणा० ४ । ४६ । इति मिः धातोर्नुट्मादेशश्च ।) किरणः । (यथा, मनौ । ५ । १३३ ।
"मक्षिका विप्रुषश्छाया गौरश्वः सूर्य्यरश्मयः ।
रजो भूर्वायुरग्निश्च सूर्शे मेध्यानि निर्दिशेत् ॥")
पद्मम् । अश्वरज्जुः । इति मेदिनी ॥ * ॥ (यथा, ऋग्वेदे । १ । २८ । ४ ।
"यच्च मन्यां विवभ्रते रश्मीन् यमित वा इव ॥"
"रश्मीन् अश्ववन्धनार्थान् प्रग्रहान् ।" इति तद्भाष्ये सायणः ॥) सूर्य्यस्य रश्मिना जलादानदाने यथा,—
"तेजोभिः सर्व्वलोकेभ्यो ह्यादत्ते रश्मिभिर्जलम् ।
संसृज्याङ्गायुसंयोगाद्धन्त्यापो गभस्तयः ॥
ततस्तु पयसां काले परिवर्त्तन्दिवाकरः ।
नियच्छत्यपो मेघेभ्यः शुक्लाशुक्लेषु रश्मिभिः ॥"
इति मात्स्ये १०२ अध्यायः ॥ * ॥

अपि च ।
"एवमेष महादेवो देवदेवः पितामहः ।
करोति नियतं कालं कालात्मा ह्यीश्वरी तनुः ॥
तस्य ये रश्मयो विप्राः सर्व्वलोकप्रदीपकाः ।
तेषां श्रेष्ठा पुनः सप्त रश्मयो यहयोनयः ॥
सुसुम्नो हरिकेशश्च विश्वकर्म्मा तथैव च ।
विश्वश्रवाः पुनश्चान्यः सम्यद्वसुरतः परः ॥
अर्व्वाग्वसुरिति ख्यातः खराड्न्यः प्रकीर्त्तितः ॥
सुसुम्नः सूर्य्यरश्मिस्तु पुष्णाति शिशिरद्युतिम् ।
तिर्य्यगूर्द्ध्वप्रचारोऽसौ सुसुम्नः परिगीयते ॥
हरिकेशस्तु यः प्रोक्तो रश्मिर्नक्षत्रपोषकः ।
विश्वकर्म्मा तथा रश्मिर्बुधं पुष्णाति सर्व्वदा ॥
विश्वश्रवास्तु यो रश्मिः शुक्रं पुष्णाति नित्यदा ।
सम्यद्वसुरिति ख्यातः स पुष्णाति च लोहितम् ॥
बृहस्पतिं प्रपुष्णाति रश्मिरर्व्वाग्वसुः प्रभोः ।
शनैश्चरं प्रपुष्णाति सप्तमश्च खराट् तथा ॥
एवं सूर्य्यप्रभावेन सर्व्वा नक्षत्रतारकाः ।
वर्द्धन्ते वर्द्धिता नित्यं नित्यमाप्याययन्ति च ॥
दिव्यानां पार्थिवानाञ्च नैशानाञ्चैव सर्व्वशः ।
आदानान्नित्यमादित्यस्तेजसा तमसां प्रभुः ।
आदत्ते स तु नाड़ीनां सहस्रेण समन्ततः ॥
नादेयांश्चैव सामुद्रान् कूपांश्चैव सहस्रकम् ।
स्थावरान् जङ्गमांश्चैव यच्च कुल्यादिकं पयः ॥
तस्य रश्मिसहस्रन्तु प्रीतवर्षोष्णनिस्रवम् ।
तासां चतुःशतं नाड्यो वर्षन्ते चित्रमूर्त्तयः ॥
कुन्दनाक्षेत यान्याश्च कोतगा भकणास्तथा ।
अष्टता नामतः सर्व्वा रश्मयो वृष्टिसर्ज्जनाः ॥
हिमोद्दाश्च तामस्यो रश्मयश्चिशतं पुनः ।
वश्यो मेघाश्च पेष्यश्च हृादिन्यो हिमसर्ज्जनाः ।
चन्द्राख्या नामतः सर्व्वाः पीताभाः स्युर्गभस्तयः ।
शुक्राश्च ककुभश्चैव गावो विश्वभृतस्तथा ।
शुक्राख्या नामतः सर्व्वास्त्रिविधा घर्म्मसर्ज्जनाः ॥
समं विभर्त्ति ताभिः स मनुष्यपितृदेवताः ।
मनुष्यानौषधेनेह स्वधया च पितॄनपि ॥
अष्टतेन सुरान् सर्व्वान्तिसृभिस्तर्पयत्यसौ ।
वसन्ते ग्रीष्मके चैव घृतेः सन्तर्पति त्रिभिः ॥
शरद्यपि च वर्षासु चतुर्भिः संप्रवर्षति ।
हेमन्ते शिशिरे चैव हिमसृत्सृजति त्रिभिः ॥
वरुणो माघमासे तु सूर्य्यः पूषा तु फाल्गुने ।
चैत्रे मासि भवेदीशो धाता वैशाखतापनः ॥
ज्येष्ठमूले भवेदिन्द्र आषाढ़े सविता रविः ।
विवस्वान् श्रावणे मासि प्रौष्ठपद्यां भगः स्मृतः ॥
पर्य्यण्योऽश्वयुजि त्वष्टा कार्त्तिके मासि भास्करः ।
मार्गशीर्षे भवेन्मित्रः पौषे विष्णुः सनातनः ॥
पञ्च रश्मिसहस्राणि वरुणस्यार्कमण्डले ।
षड्भिः सहस्रैः पूषा तु देवेशः सप्तभिस्तथा ॥
धाताष्टभिः सहस्रैस्तु नवभिस्तु मृतक्रतुः ।
विवस्वान् दशभिः पाति पात्येकादशभिर्भगः ॥
सप्तभिस्तपते मित्रस्त्वष्टा चैवाष्टभिस्तपेत् ।
अर्य्यमा दशभिः पाति पर्य्यण्यो नवभिस्तपेत् ॥
षड्भी रश्मिसहस्रैस्तु विष्णुस्तपति विश्वकृक् ।
वसन्ते कपिलः सूर्य्यो ग्रीष्मे काञ्चनसप्रभः ॥

श्वेतो वर्षासु वर्णेन पाण्डरः शरदि प्रभुः।
हेमन्ते ताम्रवर्णः स्यात् शिशिरे लोहितो रविः॥
औषधीषु बलं धत्ते स्वधामपि पितृष्वथ।
सूर्योऽमरत्वमन्वतत्त्वयं त्रिषु नियच्छति॥
अन्ये चाष्टौ ग्रहाः ज्ञेयाः सूर्ये चाधिष्ठिता द्विजाः।
चन्द्रमाः सोमपुत्रश्च शुक्रश्चैव बृहस्पतिः॥
भौमो भानुस्तथा राहुः केतुमानपि चाष्टमः।
सर्व्वे ध्रुवे निरुद्धा ये ग्रहास्ते वातरश्मिभिः।
भ्राम्यमाणा यथायोगं भ्रमन्त्यनुदिवाकरम्॥"
इति कौर्म्मे ४० अध्यायः॥
तद्वैदिकपर्य्यायः। खेदयाः १ किरणाः २ गावः ३ रश्मयः ४ अभीशवः ५ दीधितयः ६ गभस्तयः ७ वनम् ८ उशाः ९ वसवः १० मरीचिपाः ११ मयूखाः १२ सप्तऋषयः १३ साध्याः १४ सुपर्णाः १५। इति पञ्चदश रश्मिनामानि। इति वैद्यनिघण्टौ। १५॥

रश्मिपतिः, पुं, (रश्मेः पतिः षोषको यस्य।) आदित्यपत्नीसुपः। इति राजनिर्घण्टः॥

रस, शब्दे। इति कविकल्पद्रुमः॥ (भ्वा०-पर०-अक०-सेट्।) रसति। इति दुर्गादासः॥

रस, तृ क आस्वादे। स्नेहे। इति कविकल्पद्रुमः॥ (अदन्तपुरा०-पर०-सक०-सेट्।) दन्त्योपधः। रसयति मधु द्विरेफः। इति दुर्गादासः॥

रसं, क्ली, बोलम्। इति राजनिर्घण्टः॥

रसः, पुं, (रसतीति। रस + पचाद्यच्। यद्वा, रस्यते इति। रस आस्वादने + "पुंसि संज्ञायां घः प्रायेण।" ३।३।११९। इति घः।) रसनेन्द्रियग्राह्यवस्तु। स च कालसहायभूमिवियदनिलानलसंसर्गेण परिणामान्तरं गतः षट्प्रकारो भवति। तत्र पृथिव्यम्बुगुणबाहुल्यान्मधुरः १ तोयाग्निगुणबाहुल्यादम्लः २ पृथिव्यग्निगुण-बाहुल्याल्लवणः ३ वायुग्निगुणबाहुल्यात् कटुकः ४ वायुकाश्गुणबाहुल्यात् तिक्तः ५ पृथिव्यनिलगुणबाहुल्यात् कषायः ६। आपो रसानामाधारकारणं अत आप्यो नाम। अपां पृथिव्यामनुप्रवेशात् पृथिव्याप्याधारकारणमेव। तेन जलक्षितौ अपि तदाधारतया रसानामभिव्यक्तौ कारणे। अभिव्यक्तेश्च मधुरादिरूपमन्तरेणासम्भवान्मधुरादिविशेषेऽपि जलक्षितौ कारणे। अम्लादयस्तु त्रयः नीरसतया मधुरादिविशेषे प्राधान्येन निमित्तकारणम्। तदतिरेकेणाम्लादिरसाभावात्। रसाभिव्यक्तेश्च अम्लादिभूतत्रयसन्निधानं विनानुपलब्धेरभिव्यक्तावपि अम्लादीनां कारणत्वम्। तदुक्तं चरके।

"रसनार्थो रसस्तस्य द्रव्यमापः क्षितिस्तथा।
निर्व्वृत्तौ च विशेषे च प्रत्ययाः खादयस्त्रयः॥"
एते च रसाः परस्परसंयोगात् सप्तपञ्चाशद्भवन्ति। इति चक्रपाणिदत्तकृतद्रव्यगुणोपरि ऋग्वेदसौयटीका॥ * ॥ (तथाच।

"भेदस्त्वेषां त्रिषष्टिविधिविकल्पो द्रव्यदेशकाल-प्रभावात्तदुपदेक्ष्यामः।
स्वादुरम्लादिभिर्योगं ग्रैष्मैरम्लाद्यः पृथक्।
यानि पञ्चदशैतानि द्रव्याणि द्विरसानि तु॥
पृथगम्लादियुक्तस्य योगः शैषैः पृथग्भवेत्।
मधुरस्य तथाम्लस्य लवणस्य कटोस्तथा॥
त्रिरसानि यथासङ्ख्यं द्रव्याण्युक्तानि विंशतिः।
वक्ष्यन्ते तु चतुष्केण द्रव्याणि दश पञ्च च॥
स्वाद्वम्लौ सहितौ योगं लवणाद्यैः पृथग् गतौ योगैः शैषं पृथग्यातस्तुल्यं रससङ्ख्यया॥
सहितौ स्वादुलवणौ तद्वत् कट्वादिभिः पृथक्।
युक्तौ शैषैः पृथग् योगं यातः स्वादूषणौ तथा॥
कट्वाद्यैरम्ललवणौ संयुक्तौ सहितौ पृथक्।
यातः शैषैः पृथग्योगं शैषैरम्लकटू तथा॥
युज्यते तु कषायेण सतिक्तौ लवणोषणौ।
षट् तु पञ्च रसान्याहुरेकैकस्यापवर्ज्जनात्॥
षट् चैवैकरसानि स्युरेकं षड्रसमेव तु।
इति त्रिषष्टिर्द्रव्याणां निर्दिष्टा रससङ्ख्यया॥
त्रिषष्टिः स्यात्तसङ्ख्या रसानुरसकल्पनात्।
रसास्तरतमाभ्यस्ताः सङ्ग्रामतिपतन्ति हि॥
संयोगाः सप्तपञ्चाशत् कल्पना तु त्रिषष्टिधा।
रसानां तत्र योग्यत्वात् कल्पिता रसचिन्तकैः॥
क्वचिदेको रसः कल्प्यः संयुक्ताश्च रसाः क्वचित्।
दोषौषधादीन् सञ्चिन्त्य भिषजा सिद्धिमिच्छता॥"
परस्परात्: प्रवक्ष्यन्ते रसानां षड्विभक्तयः।
षट्पञ्चभूतप्रभवाःसङ्ग्रातास्च यथा रसाः॥"
"सौम्याः खल्वापोऽन्तरिक्षप्रभवाः प्रकृति शीता लघ्वश्च अव्यक्तरसाश्च ताश्चन्तरिक्षाद्भ्रश्यमानाभ्रष्टाश्च पञ्च महाभूतगुणसमन्विता जङ्गमस्थावराणां भूतानां मूर्त्तीरभिप्रीणयन्ति यासु मूर्त्तिषु षड्भिर्मूर्च्छन्ति रसाः।

तेषां षण्णां रसानां सोमगुणातिरेकान्मधुरो रसः पृथिव्यग्निभूयिष्ठत्वादम्लः सलिलाग्निभूयिष्ठत्वाल्लवणो वायुग्निभूयिष्ठत्वात् कटुको वायुकाशातिरेकात्तिक्तः पवनपृथिव्यतिरेकात् कषायः। एवमेषां रसानां षट्त्वमुत्पन्नम्॥"
इति च चरके सूत्रस्थाने २६ अध्यायः॥
तथाच।
"दोषाणां पञ्चदशधा प्रसरोऽभिहितस्तु यः।
त्रिषष्ट्या रसभेदानां तत्प्रयोजनमुच्यते॥
अविद्वधा विदग्धाश्च भिद्यन्ते ते त्रिषष्टिधा।
रसभेदत्रिषष्टिस्तु वीक्ष्य वीक्ष्यावचारयेत्॥
एकैकेनानुगमनं भागशो यदुदीरितम्।
दोषाणां तत्र मतिमान् त्रिषष्टिन्तु प्रयोजयेत्॥
यथाक्रमं प्रवृत्तानां द्विकेषु मधुरो रसः।
पञ्चानुक्रमते योगानम्लश्चतुर एव च॥
त्रींश्चानुगच्छति रसो लवणः कटुको द्वयम्।
तिक्तः कषायमन्वेति ते द्विका दश पञ्च च॥
तद्यथा। मधुराम्लः। मधुरलवणः। मधुरतिक्तः। मधुरकटुकः। मधुरकषायः। एते पञ्चानुक्रान्ता मधुरेण॥ अम्ललवणः। अम्लकटुकः। अम्लतिक्तः। अम्लकषायः। एते चत्वारोऽनुक्रान्ता अम्लेन॥ लवणकटुकः। लवणतिक्तः। लवणकषायः। एते त्रयोऽनुक्रान्ता लवणेन॥ कटुतिक्तः। कटुकषायः। द्वावेतावनुक्रान्तौ कटुकेन॥ तिक्तकषाय एक एवानुक्रान्तस्तिक्तेन। एते पञ्चदशद्विकसंयोगा व्याख्यातास्त्रिकं वक्ष्यामः॥
आदौ प्रयुज्यमानस्तु मधुरो दश गच्छति।
षड्रसो लवणस्त्रसादर्द्धम्लैकं रसः कटुः॥
मधुराम्ललवणः। मधुराम्लकटुकः। मधुराम्लतिक्तः। मधुराम्लकषायः। मधुरलवणकटुकः। मधुरलवणतिक्तः। मधुरलवणकषायः। मधुरकटुकतिक्तः। मधुरकटुकषायः। मधुरतिक्तकषायः। एवमेषां त्रिकसंयोगानां दशानामादौ मधुरः प्रयुज्यते। अम्ललवणकटुकः। अम्ललवणतिक्तः। अम्ललवणकषायः। अम्लकटुकषायः। अम्लकटुकतिक्तः। अम्लतिक्तकषायः। एवमेषां षण्णामादावम्लः प्रयुज्यते। लवणकटुतिक्तः। लवणकटुकषायः। लवणतिक्तकषायः। एवमेषां चयाणामादौ लवणः प्रयुज्यते॥ कटुतिक्तकषायः। एवमेकस्यादौ कटुकः प्रयुज्यते॥ एवमेति त्रिकसंयोगविंशतिर्व्याख्याताः॥ चतुष्कान् वक्ष्यामः।
चतुष्करससंयोगाश्चधुरो दश गच्छति।
चतुरोऽम्लस्तु गच्छेच्च लवणश्चैकमेव तु॥
मधुराम्ललवणकटुकः। मधुराम्ललवणतिक्तः। मधुराम्ललवणकषायः। मधुराम्लकटुकतिक्तः। मधुराम्लकटुककषायः। मधुरलवणतिक्तकटुकः। मधुराम्लतिक्तकषायः। मधुरलवणकटुतिक्तः। मधुरलवणकटुकषायः। मधुरलवणतिक्तकषायः। एवमेषां दशानामादौ मधुरः प्रयुज्यते॥
अम्ललवणकटुकतिक्तः। अम्ललवणकटुकषायः। अम्ललवणतिक्तकषायः। अम्लकटुतिक्तकषायः। एवमेषां चतुर्णामम्लः॥ लवणकटुतिक्तकषायः। एवमेकस्यादौ लवणः। एवमेते चतुष्करससंयोगाः पञ्चदशकीर्त्तिताः॥ पञ्चकान् वक्ष्यामः। पञ्चकान् पञ्चमधुर एकमम्लस्तु गच्छति। मधुराम्ललवणकटुतिक्तः। मधुराम्ललवणकटुकषायः। मधुराम्ललवणतिक्तकषायः। मधुराम्लकटुतिक्तकषायः। मधुरलवणकटुतिक्तकषायः। एवमेषां पञ्चानां पञ्चकरससंयोगानामादौ मधुरः प्रयुज्यते॥ अम्ललवणकटुतिक्तकषायः। एवमेकस्यादावम्लः प्रयुज्यते। एवमेते षट्पञ्चकसंयोगा आख्याताः॥ षट्कमेकं वक्ष्यामः। एकस्तुषट्कसंयोगः मधुराम्ललवणकटुकतिक्तकषायः। एवमयमेकषट्संयोगः॥ एकैकश्च षड्धा भवन्ति। मधुरोऽम्लो लवणः कटुकस्तिक्तः कषाय इति। भवति चात्र।
एषा त्रिषष्टिर्व्याख्याता रसानां रसचिन्तकैः।
दोषभेदे त्रिषष्टिस्तु प्रयोक्तव्या विचक्षणैः॥"
इत्युत्तरतन्त्रे सुश्रुतेन त्रिषष्टितमोऽध्याय उक्तः॥
"रसास्तु प्रधानं कस्मादागमादागमो हि प्राप्त-

सुश्रुते शास्त्रे हि रसा अधिकृता यथा रसायत्त आहार इति तस्मिंश्च प्राणाः। उपदेशाच्चोपदिश्यन्ते हि रसाः। यथा मधुराम्ललवणा वातं शमयन्ति। अनुमानाच्च रसेन ह्यनुमीयते द्रव्यं यथा मधुरमिति। ऋषिवचनाच्च ऋषिवचनं वेदो यथा किञ्चिदिष्यार्थं मधुरमाहरेदिति। तस्माद्रसाः प्रधानं रसेषु गुणसंज्ञा।" इति च सुश्रुते सूत्रस्थाने ४० अध्याये॥ यथा च, वाग्भटे १० अध्याये।

"व्योम्नोऽग्निः व्योम्नुतेजः खवायुभ्यानिलः गोऽनिलेः।
द्वयोल्वणैः क्रमाज्ज्ञेयैर्मधुरादिरसोद्भवः॥
तेषां विद्याद्रसं स्वादुं यो वक्त्रमुपलिम्पति।
आस्वाद्य मानो देहस्य ह्लादनोऽक्षप्रसादनः॥
प्रियः पिपीलिकादीनां अम्लः चालयते सुखम्।
हर्षणो रोमदन्तानामक्ष्णिभ्रुवनिकोचनः॥
लवणः स्यन्दयत्यास्यं कपोलगलदाहकृत्।
तिक्तो विष्यदयत्यास्यं रसनं प्रतिहन्ति च।
उद्वेजयति जिह्वाग्रं कुर्वन्नक्ष्णिभ्रुविप्लवम् कटुः॥
स्रावयत्यक्षिनासास्यं कपोलौ दहतीव च।
कषायो जड़येज्जिह्वां कण्ठस्रोतो विमन्थकृत्॥
रसानामिति रूपाणि कर्म्माणि मधुरो रसः।
आजन्मसात्म्यात् कुरुते धातूनां प्रबलं बलम्॥
बालवृद्धक्षतक्षीणवर्णकेशेन्द्रियौजसम्।
प्रशस्तो दृंहणः कण्ठ्यः स्तन्यसन्धानकृद्गुरुः॥
आयुष्यो जीवनः स्निग्धः पित्तानिलविषापहः।
कुरुतेऽल्पप्रयोगेण सम्भेदः कफजान् गदान्॥
शैत्यात्यग्निसादसात्म्यमेहगण्डार्व्बुदादिकान्॥
अम्लोऽग्निदीप्तिकृत्स्निग्धो द्रव्यः पाचनरोचनः।
उष्णवीर्य्यो हिमस्पर्शः प्रीणनः क्लेदनो लघुः॥
करोति कफपित्तास्रं मृद्ववातानुलोमनम्।
सोऽत्यभ्यस्तः स्तनोः कृम्याक्षेथिल्यं तिमिरं भ्रमम्॥
कण्डूपाण्डुत्वसर्पपीटकविस्फोटलड्व्वरान्॥
लवणः स्तम्भसंघातबन्धविध्मापनोऽग्निकृत्।
स्नेहनः स्वेदनस्तीक्ष्णो रोचनश्छेदभेदकृत्॥
सोऽतियुक्तोऽस्रपवनं खलतिं पलितं वलिम्।
त्वट्कुष्ठविषवीसर्पान् जनयेत् क्षयमेदसम्॥
तिक्तः स्वयमरोचिष्णुररुचिं कृमित्वट्विषम्।
मूर्च्छाज्वरोत्क्लेदग्लपदाहपित्तकफान् जयेत्॥
क्लेदमेदो वसामज्जशुक्रस्तन्यौजपूषणः।
लघुर्मेध्यो हिमो रूक्षः स्तन्यकण्ठविशोधनः॥
धातुक्षयानिलव्याधीनतियोगात् करोति सः।
कटुर्गलामयोदर्दकुष्ठालसकपीनसित्।
व्रणावसादनस्नेह मेदः क्लेदोपशोषणः॥
छिनत्ति बन्धान् स्रोतांसि विवृणोति कफापहः।
कुरुते सोऽतियोगेन ग्लानिं शुक्रबलक्षयम्॥
मूर्च्छामाक्षेपणं कम्पं कटिपृष्ठादिषु व्यथाम्।
कषायः पित्तकफहा गुरूरूक्षविशोधनः।
पीड़नो रोपणः प्रीतः क्लेदमेदोविशोषणः॥
आमसंस्तम्भनो ग्राही रूक्षोऽतिवृक्प्रसादनः।
करोति प्रीलितः सोऽतिविष्टम्भाध्मानहृद्रुजः॥
त्वट्कार्श्यपौरुषभ्रंशस्रोतोरोधमलग्रहान्॥

घृतहेमगुड़ाक्षौद्रमोचचोचरूषकम्।
अभीरुवीरापनसराजादनबलाद्वयम्॥
मेदे द्वयस्य पर्णिन्यौ जीवन्ती जीवकर्षभौ।
मधूकं मधुकं बिम्बी विदारी श्रावणीयुगम्॥
क्षीरशुक्ला तुगाक्षीरी क्षीरिण्यौ काश्मरी सहे।
क्षीरेक्षुगोक्षुरश्वौद्रदार्वादिर्मधुरो गणः॥
अम्लो धात्रीफलाम्लीकामातुलुङ्गाम्लवेतसम्।
दाड़िमं रजतं तक्रं चुक्रं पालेवतं दधि।
आम्रमाम्रातकं भव्यं कपित्थं करमर्द्दकम्॥
वरं सौवर्चलं क्षारां विड़ं सामुद्रमौद्भिदम्॥
रौमकं पांसुजं शीर्षं क्षारश्च लवणो गणः।
तिक्तः पटोली त्रायन्ती वालकोशीरचन्दनम्।
भूनिम्बनिम्बकटुकातगरागुरुवत्सकम्॥
नक्तमालदिरञ्जनीमुस्तमूर्वाटरूषकम्।
पाठापामार्गकांस्यायोगुडूचीधन्वयासकम्।
पञ्चमूलं महद्व्याघ्र्यौ विशालातिविषा वचा॥
कटुको हिङ्गुमरिचकृमिजित्पञ्चकोलकम्।
कुठेराद्या हरितकाः पित्तं मूत्रमरुष्करम्॥
वर्गः कषायः पथ्याद्यं शिरीषः खदिरो मधु।
कदम्बोडुम्बरं सुक्षाप्रवालाञ्जनगैरिकम्।
बालं कपित्थं खर्जूरं विसपद्मोत्पलादि च॥
मधुरं श्लेष्मलं प्रायो जीर्णाच्छालियवाद्यते।
सुस्नादुगोधूमतः क्षौद्रास्तिताया जाङ्गलामिषात्॥
प्रायोऽम्लं पित्तजननं दाड़िमामलकादृते।
अपथ्यं लवणं प्रायश्चक्षुषोऽन्यत्र सैन्धवात्॥
तिक्तं कटु च भूयिष्ठमद्यं वातकोपनम्।
ऋतेऽष्टतापटोलीभ्यां शुण्ठीक्षाराम्लसोनतः॥
कषायं प्रायशः प्रीतं स्तम्भनं चाभयाद्यते॥
रसा कटूम्ललवणा वीर्य्येणोष्णा यथोत्तरम्।
तिक्तः कषायो मधुरस्तद्वदेव च प्रीतलः॥
तिक्तः कटुः कषायश्च रूक्षा बह्वमलास्तथा॥
षड्रसमधुराः स्निग्धाः हृष्टविण्मूत्रमारुता॥
पटोः कषायस्तस्माच्च मधुरः परमं गुरुः॥
लघुरम्लः कटुस्तस्मात्तस्मादपि च तिक्तकः।
संयोगाः सप्तपञ्चाशत्कल्पना तु त्रिषष्टिधा।
रसानां यौगिकत्वेन यथास्थूलं विभज्यते॥
एकैकहीनांस्तान् पञ्च पञ्च याप्ति रसा द्विके।
त्रिके स्वादुर्दशाम्लः षट् त्रीन् पटुस्तिक्त एकम्॥
चतुष्केषु दश स्वादुश्चतुरोऽम्लः षटुः सप्तकृत्।
पञ्चकेष्वेकमेवाम्लो मधुरः पञ्च सेवते।
द्रव्यमेकं षड़ास्वादसंयुक्ताश्च षड्रसाः॥
षट्पञ्चकाः षट् च पृथग्रसाः स्युः
शतुर्दिकौ पञ्चदशप्रकारौ।
भेदास्त्रिकाविंशतिरेकमेकं
द्रव्यं षड़ास्वादमिति त्रिषष्टिः॥
ते रसानुरसतो रसभेदा-
स्तारतम्यपरिकल्पनया च।
सम्भवन्ति गणनां समतीता
दोषभेषजवशादुपयोज्याः॥"

अथ षड्रसगुणाः।
"मधुरः प्रीणनो बल्यो बृंहणोऽनिलपित्तहा।
रसायनो गुरुः स्निग्धश्चक्षुष्यः प्रीतलश्च सः॥
आयुःक्षुद्वयश्छर्दिहृद्यः कण्ठ्योदावर्त्तनाशकः।
अम्लो रुचिकरो हृद्यः प्रीणनो वह्निवर्द्धनः॥
वातहा रसनोद्वेगी स्निग्धोष्णो रक्तमांसदः।
क्लेदनस्तर्पणः पक्ता लघुश्चापी कटुश्च यः॥
लवणः क्लेदनस्तीक्ष्णः पाचनोद्दीपनो रसः।
स्निग्धो रुचिकरः स्यन्दी दृष्टिशुक्रकरोऽगुरुः॥
कटुर्जिह्वास्यनासाक्षिरोचनो रुचिराङ्गकृत्।
उष्णस्तीक्ष्णो लघुः कण्डूकृमिश्लेष्मकफापहः॥
लघुः शोषो पक्तिकरः श्लेष्माकर्षणकः पटुः।
तिक्तः पित्तकफक्लेदी विषकुष्ठज्वरापहः॥
दीपनः पाचनो रूक्षः कण्डूकृमिहरो लघुः।
कषायः शोषकः स्तम्भी व्रणग्लानिक्षतिनाशनः॥
कफमेदोऽसृतपित्तघ्नो रूक्षः शीतो लघुस्तथा।
शीतलः पित्तहा बल्यः कफवातहरो गुरुः॥
उष्णं पित्तकरो वीर्य्यो वातश्लेष्महरो लघुः।
शीतं वीर्य्येण यद्द्रव्यं मधुरं रसपाकयोः॥
तयोरल्पं कटुद्यञ्च यच्चोष्णं कटुकं तयोः।
कटुतिक्तकषायाणां विपाकः प्रायशः कटुः॥
अम्लोष्णं पच्यते स्वादु मधुरं लवणं तथा।
कटुर्विपाके शुक्रघ्नो बह्वविड्वातलो लघुः॥
स्वादुर्गुरुः सृष्टमलो विपाके कफशुक्रलः।
पाकेऽम्लः सृष्टविण्मूत्रपित्तश्लेष्मश्लथो लघुः॥"
गारुड़े॥
"कटुतिक्तकषायाश्च कोपयन्ति समीरणम्।
कटूम्ललवणाः पित्तं स्वाद्वम्ललवणाः कफम्॥
अतएव विपर्य्यस्ताः समायैषां प्रयोजिताः।
चक्षुष्यो मधुरो ज्ञेयो रसो धातुविवर्द्धनः॥
स्थौल्यालस्यविषघ्नश्च कटुर्दीपन पाचनः॥"
इत्याह्निकतत्त्वम्॥)

न्यायमते तु।
"रसस्तु रसनाग्राह्यो मधुरादिरनेकधा।
सहकारी रसज्ञाया नित्यत्वादि च पूर्ब्ववत्॥"
इति भाषापरिच्छेदः॥
"रसश्चेति। सहकारीति रसनज्ञाने रसकारणमित्यर्थः। पूर्ब्ववदिति जलपरमाणौ रसो नित्यः अन्यः सर्ब्वोऽपि रसोऽनित्य इत्यर्थः।"
इति सिद्धान्तमुक्तावली॥*॥ शरीरस्थधातुविशेषः। तत्पर्य्यायः। रसिका २ खेदमाता ३ वपुःस्रवः ४ चर्म्माभः ५ चर्म्मसारः ६ रक्तसारः ७ असृग्मालका ८। इति राजनिर्घण्टः॥ आहारसम्भवः ९ तेजःसम्भवः १० अग्निसम्भवः ११ षड़्रसासवः १२ आचेयः १३ अष्टकरः १४ धातुघनः १५ मूलमहापरः १६। इति हेमचन्द्रः॥ तस्य निरुक्तिर्यथा,—
"यत् पार्थो रसधातुर्यस्ततोऽभवदयं रसः।
सदैव सकलं देहं रसतीति रसः स्मृतः॥"
तस्य स्वरूपमाह।
"सम्यक्पक्वस्य भुक्तस्य सारो निर्दोष उत्तमः।
स तु द्रवः सितः प्रीतः स्वादुः स्निग्धश्चलो भवेत्॥

सारः। यथा, गुड़मधूकपुष्पवकुलत्वक्खदरी-मूलादिभवः सारो मदिरा। तस्य स्थानमाह।
"सर्व्वदेहचरस्यापि रसस्य हृदयं स्थलम्।
समानमरुता पूर्व्वं यदयं हृदये धृतः॥"
तस्य कर्म्माण्याह।
"आरुह्य धमनीर्गत्वा धातून् सर्व्वानयं रसः।
पुष्णाति तदनु स्वीयैर्व्याप्नोति च तनुं गुणैः॥"
गुणैः प्रीतस्निग्धपोषकत्वैः।
"मन्दवह्निविदग्धस्तु कटुर्व्वाय्वो भवेद्रसः।
स कुर्य्याद्बहुलान् रोगान् विषत्वं करोत्यपि॥"
इति भावप्रकाशः॥
(तथा च। "तत्र पाञ्चभौतिकस्य चतुर्व्विधस्य षड्रसस्य द्विविधवीर्य्यस्याष्टविधवीर्य्यस्य वानेकगुणस्योपयुक्तस्याहारस्य सम्यक् परिणतस्य यस्तेजोभूतः सारः परमसूक्ष्मः स रस इत्युच्यते। तस्य च हृदयं स्थानं स हृदयाच्चतुर्व्विंशतिं धमनीरनुप्रविश्योर्द्ध्वगा दश दश चाधोगामिनीश्चतस्रस्तिर्य्यग्गाः कृत्स्नं शरीरमहरहस्तर्पयति वर्द्धयति धारयति यापयति जीवयति चाऽदृष्टहेतुकेन कर्म्मणा। तस्य शरीरमनुधावतोऽनुमानाद् गतिरूपलक्षयितव्या चयदृद्धिवैकृतैः। तस्मिन् सर्व्वशरीरावयवदोषधातुमलाशयानुसारिणि रसे जिज्ञासा किमयं सौम्यस्तेजस इति। अत्रोच्यते स खलु द्रवानुसारी स्नेहनजीवनतर्पणधारणादिभिर्विशेषैः सौम्य इत्यवगम्यते।" इति च सुश्रुते सूत्रस्थाने चतुर्दशेऽध्याये॥ * ॥)

शृङ्गारादिदशविधस्थायी भावः। शृङ्गारादयोऽष्टौ रसशब्दवाच्याः। रस्यन्ते आस्वाद्यन्ते रसाः रसत् क्त्वास्वादे घञ्। तथा हि। विभावैरनुभावैश्च व्यक्तो वा व्यभिचारिभिः। आस्वाद्यत्वात् प्रधानत्वात् स्थायी भावो रसो भवेदिति॥

रत्युत्साहशोक-विस्मयहासभयजुगुप्साक्रोधाः क्रमादेते स्युः स्थायिनः। यदुक्तम्।
"रतिर्हासश्च शोकश्च क्रोधोत्साहौ भयं तथा।
जुगुप्सा विस्मयश्चेति स्थायिभावाः क्रमादमी॥
समये यः समुद्भूतः स्वान्ते यश्चावतिष्ठते।
भावः स्थायी स विज्ञेयो व्यभिचारी ततोऽन्यथा।
निर्व्वेदग्लानिशङ्काद्या व्यभिचारिण ईरिताः॥"
स्थायिनः कारणं विभावः स चावलम्बनोद्दीपनत्वेन द्विविधः। यथा रतेरवलम्बनकारणं पुंसो युवती युवत्याश्च पुमान्। उद्दीपनकारणं सक्चन्दनादि। एवं सर्व्वत्रोन्नेयम्। रतिप्रमोदात्मको भावः स च युवभिरुत्पादितः शृङ्गारः। यदाह।
"पुंसः स्त्रियां स्त्रियाः पुंसि संयोगं प्रति या स्पृहा।
स शृङ्गार इति ख्यातो रतिक्रीड़ादिकारणम्॥
दानधर्म्मयुद्धेषु जीवानपेक्षोत्साहकारी रसो वीरः। शोकस्थायिभावः करुणः। असम्भावितमर्त्यान्तरीक्षगमनादिजोऽद्भुतः। कौतुकोद्भवो हासः। क्रुध्यद्गात्रसादिभयजन्यो भयानकः। दृग्गात्रकरपूयरसादिजो बीभत्सः। सर्व्वाभिभाविता रौद्रः। यथा, रावणचरितादि। शान्तोऽपि रसोऽस्ति।
"शृङ्गारवीरबीभत्सरौद्रहास्यभयानकाः।
करुणाद्भुतशान्ताश्च नव नाट्या रसाः स्मृताः॥"
इति रत्नकोषः॥
एवं वत्सलोऽपि रसोऽस्ति।
"शृङ्गारवीरकरुणाद्भुतहास्यभयानकाः।
बीभत्सरौद्रौ वात्सल्यं शान्तश्चेति रसा दश॥"
इति नामनिधानम्॥
वत्सलः पुत्रादिस्नेहात् स्वारतिभेद एव। शान्तस्त्वलौकिकत्वान्नोक्तः। इति मुकुटः॥ चशब्दात् शान्तवत्सलावपि संगृहीताविति केचित्। इत्यमरटीकायां भरतः॥ * ॥ अपि च। तत्र शृङ्गारादिसर्व्वरसकदम्बमूर्त्तिर्भगवान् तत्तदभिप्रायानुसारेण क्वचौ न साकल्येन सर्व्वेषामित्याह। मल्लानामिति। मल्लादीनां दृश्यानां द्रष्टॄणां अश्मन्यादिरूपेण दृश्यधा विदितः सन् साग्रजो रङ्गं गतः इत्यन्वयः। मल्लादिषु अभिषक्ता रसाः क्रमेण श्लोकेन निबध्यन्ते।
"रौद्रोऽद्भुतश्च शृङ्गारो हास्यवीरौ दया तथा।
भयानकश्च बीभत्सः शान्तः सप्रेमभक्तिकः॥"
अविदुषां विराट्विकलः अपर्य्याप्तो जड़ इति यावत्। अनेन बीभत्स उक्तः। विकलत्वञ्च कवज्रसारसर्व्वाङ्गावित्यादिना वक्ष्यति। इति श्रीमद्भागवते १० स्कन्धे ४३ अध्याये १५ श्लोकटीकायां श्रीधरस्वामी॥ * ॥ (तथा च।
"रसे सारश्चमत्कारः सर्व्वत्राप्यनुभूयते॥
तच्चमत्कारसारत्वे सर्व्वत्राप्यद्भुतो रसः।
तस्मादद्भुतमेवाह कृती नारायणो रसम्॥"
इति साहित्यदर्पणे धर्म्मदत्तः॥
रसः कथ्यते।
"विभावेनानुभावेन व्यक्तः सञ्चारिणा तथा।
रसतामेति रत्यादिः स्थायी भावः सचेतसाम्॥"
अस्य स्वरूपकथनगर्भं आस्वादप्रकारः कथ्यते।
"सत्त्वोद्रेकादखण्डस्वप्रकाशानन्दचिन्मयः।
वेद्यान्तरस्पर्शशून्यो ब्रह्मास्वादसहोदरः॥
लोकोत्तरचमत्कारप्राणः कैश्चित् प्रमातृभिः।
स्वाकारवदभिन्नत्वे नायमास्वाद्यते रसः।
रजस्तमोभ्यामस्पृष्टं मनः सत्त्वमिहोच्यते॥"
इति साहित्यदर्पणे विश्वनाथः॥ ३॥
"शृङ्गारहास्यकरुणरौद्रवीरभयानकाः।
बीभत्साद्भुतसंज्ञौ चेत्यष्टौ नाट्ये रसाः स्मृताः॥"
शृङ्गारस्य यथा,—
"शृङ्गं हि मन्मथोद्भेदस्तदागमनहेतुकः।
उत्तमप्रकृतिप्रायो रसः शृङ्गार इष्यते॥
परोढ़ा वर्ज्जयित्वा तु वेश्यात्वाननुरागिणीम्।
आलम्बनं नायिका स्युर्दक्षिणाद्याश्च नायकाः॥
चन्द्रचन्दनरोलम्बरुतादुद्दीपनं मतम्।
भ्रूविक्षेपकटाक्षादिरनुभावः प्रकीर्त्तितः॥
व्यभिचारिणः।
स्थायी भावो रतिः श्यामवर्णोऽयं विष्णुदेवतः॥"
यथा,—
"शून्यं वासगृहं विलोक्य शयनादुत्थाय किञ्चिच्चकैः
निद्रायाजसुपागतस्य सुचिरं निर्व्वर्ण्य पत्युर्मुखम्।
विस्रब्धं परिचुम्ब्य जातपुलकामालोक्य गण्डस्थलीं
लज्जानम्रमुखी प्रियेण हसता बाला चिरं चुम्बिता॥"
हास्यस्य।
"विकृताकारवाग्वेषचेष्टादेः कुहकाद्भवेत्।
हासो हास्यस्थायिभावः श्वेतः प्रमथदैवतः॥
विकृताकारवाक्चेष्टं यदालोक्य हसेन्नरः।
तदालम्बनं प्राहुस्तच्चेष्टोद्दीपनं मतम्॥
अनुभावोऽक्षिसङ्कोचवचनस्मेरतादयः।
निद्रालस्यावहित्थाद्या अत्र सुस्थैभिचारिणः॥
श्रेष्ठानां स्मितहसिते मध्यानां विहसितावहसिते च।
नीचानामपहसितं तथातिहसितञ्च षड्भेदाः॥
ईषद्विकाशिनयनं स्मितं स्यात् स्पन्दिताधरम्।
किञ्चिल्लक्ष्यदिजं तच्च हसितं कथितं बुधैः॥
मधुरस्वरं विहसितं सांसशिरःकम्पनमवहसितम्।
अपहसितं सास्राक्षं विच्छिन्नाङ्गं भवत्यतिहसितम्॥"
यथा,—
"आकुञ्च्य पाणिमशुचिं मम मूर्द्धि वेश्या
मन्त्राम्भसां प्रतिपदं पृषतैः पवित्रे।
तारस्वरं प्रथितयूत्कमदात् प्रहारं
हा हा हतोऽहमिति रोदिति विष्णुशर्म्मा॥"
करुणस्य।
"इष्टनाशादनिष्टाप्तेः करुणाख्यो रसो भवेत्।
धीरैः कपोतवर्णोऽयं कथितो यमदैवतः॥
शोकोऽत्र स्थायिभावः स्याच्छोच्यमालम्बनं मतम्।
तस्य दाहादिकावस्था भवेदुद्दीपनं पुनः।
अनुभावा दैवनिन्दा भूपातक्रन्दनादयः॥
वैवर्णोच्छ्वासनिश्वासस्तम्भप्रलपनानि च।
निर्व्वेदमोहापस्मारव्याधिग्लानिस्मृतिश्रमाः॥
विषादजड़तोन्मादचिन्ताद्या व्यभिचारिणः॥"
यथा,—
"विपिने क्व जटानिबन्धनं
तव चेदं क्व मनोहरं वपुः।
अनयोर्घटनाविधेः स्फुटं
ननु खड्गेन शिरीषकर्त्तनम्॥"
रौद्रस्य।
"रौद्रः क्रोधः स्थायिभावो रक्तो रुद्राधिदैवतः।
आलम्बनमरिस्तच्च तच्चेष्टोद्दीपनं मतम्॥
मुष्टिप्रहारपतनविक्षतच्छेदावदारणैश्चैव।
संग्रामसंभ्रमाद्यैरस्योद्दीप्तिर्भवेत् प्रौढ़ा॥

भ्रूविभङ्गोष्ठनिर्देशबाहुस्फोटनतर्ज्जनम् ।
आत्मावदानकथनमायुधोत्क्षेपणादि च ॥
अनुभावास्तथोत्क्षेपक्रूरसन्दर्शनादयः ।
उग्रतावेगरोमाञ्च स्वेदवेपथवो मदः ॥
मोहामर्षादयश्चात्र भावाः स्युर्व्यभिचारिणः ॥"
यथा,—

"क्षतमनुमतं दृष्टं वा येरिदं गुरु पातकं
मनुजपशुभिर्निर्मर्य्यादैर्भवद्भिरुदायुधैः ।
नरकरिपुना सार्द्धं तेषां सभीमकिरीटिना-
मयमहमहङ्मेदोमांसैः करोमि दिशां बलिम् ॥"

वीरस्य ।

"उत्तमप्रकृतिर्वीर उत्साहस्थायिभावकः
महेन्द्रदेवतो हेमवर्णोऽयं समुदाहृतः ॥
आलम्बनविभावाश्च विजेतव्यादयो मताः ।
विजेतव्यादिचेष्टाद्यास्तद्दीपनरूपिणः ॥
अनुभावास्तु तत्र स्युः सहायान्वेषणादयः ।
सञ्चारिणस्तु धृतिमतिगर्व्वस्मृतितर्कौग्र्यमाद्याः ॥
स च दानधर्म्मयुद्धैर्दयया च समन्वितश्चतुर्द्धा
स्यात् ॥"

यथा,—

"क्षुद्राः सन्त्रासमेते विजहति हरयः ! क्षुब्ध-
भ्रूक्षेपैरेभिरुग्रां दधति परममी सायका निष्य-
तन्तः ।
सौमित्रे ! तिष्ठ पात्रं त्वमसि नहि रणे नन्वहं
मेघनादः
क्वाद्य भ्रूभङ्गलीलानियमितजलधिं राम-
मन्वेषयामि ॥"

।नकस्य ।

"भयानको भयस्थायिभावः कालाधिदेवतः ।
स्त्रीनीचप्रकृतिः कृष्णो मतस्तत्त्वविशारदैः ॥
यस्मादुत्पद्यते भीतिस्तदत्रालम्बनं मतम् ।
चेष्टा घोरतरा तस्य तदुद्दीपनं पुनः ॥
अनुभावोऽत्र वैवर्ण्यगद्गदस्वरभाषणम् ।
पुलकस्वेदरोमाञ्चकम्पदिक्प्रेक्षणादयः ॥
जुगुप्सावेगसम्मोहसन्त्रासग्लानिदीनताः ।
शङ्कापस्मारसम्भ्रान्तिश्चलाद्या व्यभि-
चारिणः ॥"

यथा,—

"ग्रीवाभङ्गाभिरामं मुहुरनुपतति स्यन्दने
दत्तदृष्टिः
पश्चार्द्धेन प्रविष्टः शरपतनभयाद्भूयसा पूर्व्व-
कायम् ।
शष्पैरर्द्धावलीढैः श्रमविवृतमुखभ्रंशिभिः
कीर्णवर्त्मा
पश्योदग्रप्लुतत्वाद्व्रजति बहुतरं स्तोकमुर्व्यां
प्रयाति ॥"

वीभत्सस्य ।

"जुगुप्सा स्थायिभावस्तु वीभत्सः कथ्यते रसः ।
नीलवर्णो महाकालदेवतोऽयमुदाहृतः ॥
दुर्गन्धमांसपिशितमेदांस्यालम्बनं मतम् ।

तत्रैव कृमिपातादिरुद्दीपनमुदाहृतम् ॥
निष्ठीवनास्यवलननेत्रसङ्कोचनादयः ।
अनुभावास्तत्र मतास्तत्र स्युर्व्यभिचारिणः ॥
मोहोऽपस्मार आवेगो व्याधिश्च मरणादयः ॥"
यथा,—

"उत्कृत्योत्कृत्य कृत्तिं प्रथममथ पृथूत्सेध-
भूयांसि मांसा-
न्यंसस्थिक् पृष्ठपिण्डाद्यवयवसुलभान्युग्रपूतीनि
जघ्नुः ।
अन्नः पर्य्यस्तनेत्रः प्रकटितदशनः प्रेतरङ्गः
करङ्का-
दङ्कस्थादक्षिसंस्थं स्फुटगतमपि क्रव्यमत्य-
ग्रमत्ति ॥"

अद्भुतस्य ।

"अद्भुतो विस्मयस्थायिभावो गन्धर्व्वदेवतः ।
पीतवर्णो वस्तु लोकातिगमालम्बनं मतम् ॥
गुणानां तस्य महिमा भवेदुद्दीपनं पुनः ।
स्तम्भः स्वेदोऽथ रोमाञ्चगद्गदस्वरसंभ्रमाः ॥
तथा नेत्रविकासाद्या अनुभावाः प्रकीर्त्तिताः ।
वितर्कावेगसम्भ्रान्तिहर्षाद्या व्यभिचारिणः ॥"
यथा,

"चित्रं महानेष वतावतारः
क्व कातिरेषाभिनवैव भङ्गिः ।
लोकोत्तरं धैर्य्यमहो प्रभावः
काप्याकृतिर्नूतन एष सर्गः ॥"

शान्तस्य ।

"निर्व्वेदस्थायिभावोऽस्ति शान्तोऽपि नवमो
रसः ॥"

तथा च ।

"शान्तः शमस्थायिभाव उत्तमप्रकृतिर्मतः ।
कुन्देन्दुसुन्दरच्छायः श्रीनारायणदेवतः ॥
अनित्यत्वादिनाशेषवस्तुनिःसारता तु या ।
परमात्मस्वरूपं वा तस्यालम्बनमिष्यते ॥
पुण्याश्रमहरिक्षेत्रतीर्थरम्यवनादयः ।
महापुरुषसङ्गाद्यास्तस्योद्दीपनरूपिणः ॥
रोमाञ्चाद्याश्चानुभावास्तथास्युर्व्यभिचारिणः ।
निर्व्वेदहर्षस्मरणमतिभूतदयादयः ॥"
यथा,—

"अहौ वा हारे वा कुसुमशयने वा दृषदि वा
मणौ वा लोष्टे वा बलवति रिपौ वा सुहृदि वा ।
तृणे वा स्त्रैणे वा मम समदृशो यान्ति दिवसाः
क्वचित् पुण्येऽरण्ये शिवशिवशिवेति प्रलपतः ॥"

इति काव्यप्रकाशसाहित्यदर्पणे ॥ विशेषविस्तृ-
तिस्तु साहित्यदर्पणे तृतीयपरिच्छेदे द्रष्टव्या ॥
तन्त्रशास्त्रेऽपि साधकानामुपासनासौकर्य्यार्थं
रसास्वादः रसप्रकारश्च कथ्यते । यथा,—

भैरव उवाच ।

"क्रियाकाण्डप्रकथने तन्त्रं बहुतरं भवेत् ।
किञ्चिल्लक्षणमेतेषां संक्षेपात् कथयामि ते ॥
काव्यशास्त्रेण नव रसा योगे चाष्टौ रसाः स्मृताः ॥
अष्टादशप्रकारा हि विद्यायाः परिकीर्त्तिताः ।
भक्तियोगे नव रसा ऋतवो विषये स्मृताः ॥

रक्षमाद्या रसा देवि ! पञ्चपञ्चाशतः स्मृताः ।
भेदं रसानां वक्ष्यामि शृणुष्वावहिता प्रिये ॥
शृङ्गारवीरकरुणाद्भुतभयानकाः ।
बीभत्सः शान्तको रौद्रो नवधा काव्यशास्त्रके ॥
यमश्च नियमश्चैव आसनं प्राणसंयमः ।
प्रत्याहारो धारणा च ध्यानं समाधिरष्टधा ॥
योगशास्त्रे महादेवि कथिता विस्तरात् प्रिये ॥
छन्दः पादौ च वेदस्य मुखं व्याकरणं स्मृतम् ।
घ्रित्वा घ्राणं महेशानि ! हस्तौ कल्पोऽथ कथ्यते ॥
ज्योतिषं देवि तन्नेत्रं निरुक्तं श्रोत्रमुच्यते ।
अङ्गानि वेदाश्चत्वारो मीमांसान्यायविस्तरैः ॥
धर्म्मशास्त्रं पुराणञ्च विद्या ह्येताश्चतुर्दश ।
आयुर्व्वेदो धनुर्व्वेदो गान्धर्व्वश्चेति ते त्रयः ॥
अर्थशास्त्रसमायुक्ता विद्याष्टादशधा रसाः ।
मननं कीर्त्तनं ध्यानं स्मरणं पादसेवनम् ॥
अर्चनं वन्दनं दास्यं सख्यमात्मसमर्पणम् ।
इत्थं देवि नव रसा भक्तियोगे प्रकीर्त्तिताः ॥
सुगन्धवनितामाल्याम्बरालङ्करणानि च ।
कथिताः परमेशानि विषये ऋतवो रसाः ॥
खाद्याः पञ्चरसा गौड़ी माध्वीचुक्षफलशस्यकाः ।
एतेषु रसभावज्ञा ये ते वै रसिकाः स्मृताः ॥
कृत्यविधिर्ज्जपविधिर्द्रव्यशोधनिको विधिः ।
बाह्यमानसिकी पूजा विधिश्च परमेश्वरि ! ॥
पुरश्चर्य्याविधिर्देवि ! कर्म्मकाण्डानि पञ्चधा ।
त्रिधा कृत्य विधिर्देवि ! प्रातः सायं दिनन्तथा ॥
अनुभूय रसान् सर्व्वान् क्रियाकाण्डं विधाय च ।
साधकः स्थिरचित्तेन कुर्य्यात् पूर्णाभिषेचनम् ॥"
इति वामकेश्वरतन्त्रे त्रयःपञ्चाशत् पटलः ॥

देव्युवाच ।

"मन्त्रप्रकथनं नाथ ! देव प्रकथनं कथम् ।
तत्तद्रसानां वचनैश्चित्तं मोहयसीव मे ॥
साम्प्रतं संशयच्छेदकारणं ब्रूहि मे प्रभो ! ॥
आश्चर्य्याख्यानमेवं हि श्रवणात् कौतुकं महत् ॥

भैरव उवाच ।

तन्त्रोक्तं वेदवाक्यञ्च सर्व्वज्ञानस्य कारणम् ।
भेदं रसानां वक्ष्यामि शृणुष्वावहिता सती ॥
शृङ्गारो वीरतो ज्ञेयस्तस्मिंस्ते करुणादयः ।
शृङ्गारादिशृणादिश्च अपि शृङ्गारतो भवेत् ॥
शृङ्गारस्तु यदा देवी परमार्थकसूचकः ।
तदेव परमा शान्ती रूपत्वं संप्रपद्यते ॥
तेषां प्रकरणार्थन्तु शृणु प्राणाधिके ! मयि ।
पादं विना शरीरस्य न गतिर्व्विद्यते प्रिये ! ॥
छन्दसा वेदमार्गे तु प्रविशेन्न कदाचन ॥
अलङ्कारं विनाच्छन्दो न शोभेत प्रियंवदे ॥
चक्षुः परोक्षभेदः स्यात् ज्योतिःशास्त्रं तथैवच ।
चन्द्रसूर्य्यस्य ग्रहणात् ज्योतिः प्रत्यक्षतामियात् ॥
वेदशाखा निरुक्तं स्यात् शाखाभिर्ब्रह्म जायते ।
गानकार्य्ये श्रूयमाणे भक्तिर्भवति ब्रह्मणि ॥
तदेव गानकृत्यञ्च सुखनाशिकयोर्भवेत् ।
गानं विना न नृत्यं स्यात् नृत्यं गानेन जायते ॥
घ्रित्वा घ्राणं नाटकादि शब्दस्याकरणं स्मृतम् ।
अविनाभावसम्बन्धात्द्वयोरेव शुचिस्मिते ॥

वेदाः षड़ङ्गसहिताः ब्रह्मयाख्यानतत्पराः। न्यायेन सार्द्धं मीमांसा ब्रह्म निर्णीयते ध्रुवम्॥ ब्रह्मज्ञाने तु जीवस्य परमात्मविचारणम्। धर्म्मशास्त्रानुसारेण व्यवस्थादिर्निरूपितः॥ पुराणाख्यानि तेनैव जायते सततं प्रिये!। ब्रह्मानन्दपरो जीव आत्मसंरक्षणोत्सुकः॥ आयुर्व्वेदं धनुर्व्वेदं गान्धर्व्वञ्च समभ्यसेत्। अनुसन्धानतो देवि पूर्णज्ञानी च साधकः॥ मधुनेक्षुरसेनैव दुग्धादिफलशस्यकैः। गन्धमाल्यादिना देवि! वस्त्रालङ्करणादिना॥ ग्रथ्यायां वनितारूपं पूजयेज्जगदम्बिकाम्। वनितापूजने देवि! महङ्गारो रससाधनम्॥ पूजनं कर्म्मकाण्डञ्च प्रथमा तत्प्रकीर्त्तितम्। तत्सर्व्वं साधयेद्वीरो देवी सम्प्राप्तिहेतवे॥ पूजने नवधा भक्तौ रसोल्लासञ्च जायते। तदा योगं समभ्यस्य समाधिस्थो भवेद्यतिः॥ अतएव महेशानि! पुरैव कथितं मया। अनुभूय रसान् सर्व्वान् पञ्चपञ्चाशतः प्रिये!॥ विषये कर्म्मकाण्डेषु निष्कामी भवति प्रिये!। निष्कामे फलमाश्चर्य्यं तेन लभ्यति देवता॥ देही देहं समाश्रित्य न च कर्म्म परित्यजेत्। दिव्यां क्रियां समाप्येवं देवीयात्रादिकर्म्मणा॥ पूर्णज्ञानरसानन्दात् जीवन्मुक्तो भवेद्ध्रुवम्॥"

इति वामकेश्वरतन्त्रे चतुःपञ्चाशत् पटलः॥

रसस्य परब्रह्मस्वरूपत्वमप्युक्तम्। यथा,—
"रसो वै सः।" इति श्रुतिः॥ सन्ध्यामन्त्रोऽपि।
"आपो ज्योती रसोऽमृतं ब्रह्म।" अत्र ब्राह्मण-सर्व्वस्वे हलायुधः॥ "स एव ब्रह्मरूपो भर्गो रसः लवणवृक्षौषध्यादिषु स्थावरेषु च स एव रसरूपेण वसतीत्यर्थः। तथा च योगियाज्ञवल्क्याः।
"वृक्षौषधिलवणानाञ्च रसरूपेण तिष्ठति॥"
श्रीमद्भगवद्गीतायामपि।
"रसोऽहमप्सु कौन्तेय इति॥")
विषम्। (यथा, सुश्रुतसंहितायां २ अङ्के।
"ये मन्त्रेषु रसेषु च प्रणिहितास्तैरेव ते घातिताः॥")
वीर्य्यम्। गुणः। रागः। (यथा,—
"कविता कोमलवनिता
रसयति रसिकं रसेन मिलिता।
सा यदि दुर्ज्जनहस्ते
पतिता प्रतिपदभग्ना संशयमग्ना॥"
इत्युद्भटः॥)
द्रवः। इत्यमरः। ३। ३। २२६॥ गन्धरसः। (तत्पर्य्यायो यथा,—
"विद्वान् गोलः पिण्डकश्च पिण्डो वोलो रसो रसः॥")
जलम्। (यथा, रघौ। १। १८।
"प्रजानामेव भूत्यर्थं स ताभ्यो बलिमग्रहीत्।
सहस्रगुणमुत्स्रष्टुमादत्ते हि रसं रविः॥")
पारदः। इति मेदिनी। ("तत्र रसप्राधान्यमाह।

अल्पमात्रोपयोगित्वादरुचेरप्रसङ्गतः।
क्षिप्रमारोग्यदायित्वादौषधेभ्योऽधिको रसः॥
साध्येषु भेषजं सर्व्वमीरितं तत्त्ववेदिना।
असाध्येष्वपि दातव्यो रसोऽतः श्रेष्ठ उच्यते॥
हतो हन्ति जराव्याधिं मूर्च्छितो व्याधिघातकः।
वङ्गः खेचरतां धत्ते कोऽन्यः सूतात् कृपाकरः॥"
अथ रसपर्य्यायमाह।
"रसेन्द्रः पारदः सूतः सूतराजश्च सूतकः।
शिवतेजो रसः सप्त नामान्येवं रसस्य तु॥"
मतान्तरम्।
"शिववीजं रसः सूतः पारदश्च रसेन्द्रकः।
एतानि रसनामानि तथान्यानि यथा शिवे॥"
यथा शिवे इत्यनेन शिवपर्य्यायाणामपि रसवाचकत्वम्॥ * ॥ अथ रसलक्षणम्।

"अन्तः सुनीलो बहिरुज्ज्वलो यो
मध्याह्नसूर्य्यप्रतिमप्रकाशः।
गुरुश्चथ धूम्रः परिपाण्डुरश्च
चित्रो न योज्यो रसकर्म्मसिद्धौ॥

नागो वङ्गो मलो वह्निश्चाञ्चल्यञ्च विषं गिरिः।
असह्याग्निर्महादोषा निसर्गाः पारदे स्थिताः॥
व्रणं कुष्ठं तथा जाड्यं दाहं वीर्य्यस्य नाशनम्।
मरणं जड़तां स्फोटं कुर्व्वन्त्येते क्रमान्नृणाम्॥
तस्मात्तस्य संशुद्धिं विदध्याद्भिषजां वरः।
शुद्धोऽयमुक्तं सात्त्वादोषयुक्तो रसो विषम्॥"
"घृतं पञ्चाशतं वापि पञ्चविंशद्गुणैव च।
पञ्चैकं वा पलञ्चैव पलार्द्धं कर्षमेव च॥
कर्षान्न्यूनो न कर्त्तव्यो रससंस्कार उत्तमः।
प्रयोगेषु च सर्व्वेषु यथालाभं प्रकल्पयेत्॥

शुभेऽह्नि विष्णुं परिचिन्त्य कुर्य्यात्
सम्यक्कुमारीवटुकार्च्चनञ्च।
सुलोहपाषाणसमुद्भवेऽस्मिन्
दृढ़े च वेदाङ्गुलिगर्भमात्रे॥
सुतप्तखल्वे निजमन्त्रयुक्तां
विधाय रक्षां स्थिरसारबुद्धिः।
अनन्यचित्तः शिवभक्तियुक्तः
समाचरेत् कर्म्मरसस्य तज्ज्ञः॥"
"अघोरेभ्योऽथ घोरेभ्यो घोरघोरतरेभ्यश्च।
सर्व्वतः सर्व्वसर्व्वेभ्यो नमस्ते रुद्ररूपिभ्यः॥"
इति रुद्रयामलः॥

इति वैद्यकरसेन्द्रसारसंग्रहे भारणमारणाधिकारे॥ विस्तृतविवृतिरस्य पारदशब्देऽभिहिता॥
शिरालसः। तत्पर्य्यायो यथा,—
"कपिनामा कपिर्तेलं क्षत्रिमं कपिलच्छलः।
तुरुष्को मुक्तिमुक्तश्च पिण्डातेः सिक्थको रसः॥"
हिङ्गुलम्॥ तत्पर्य्यायो यथा,—
"रक्तं मर्कटशीर्षञ्च हिङ्गुलं दरदो रसः॥"
इति वैद्यकरत्नमालायाम्॥)

रसकः, पुं, (रस+संज्ञायां कन्।) निष्क्वाथमांसः। इति हेमचन्द्रः। ३। ७७॥
रसकर्पूरं, क्ली, कर्पूररसः। रसकापूर इति भाषा। यथा, "तत्र पारदस्य संक्षिप्तं शोधनं कर्त्तव्यम्।

शुद्धसूतसमं कुर्य्यात् प्रत्येकं गैरिकं सुधीः।
इष्टिकां खटिकां तद्वत् स्फुटिकां सिन्धुजन्म च॥
वल्मीकक्षारलवणं भाण्डरञ्जकमृत्तिकाम्।
सर्व्वाण्यतानि संचूर्ण्य वाससा चापि शोधयेत्॥
खटिका खड़ी। स्फुटिका फिट्करी। सिन्धुजन्म सैन्धवम्। वल्मीकं तच्चा मृत्। वल्मीक वरउर। क्षारलवणं खारीलवण। भाण्डरञ्जकमृत्तिका काविसमाटी।
एभिश्चूर्णैर्युतं सूतं यावद्यामं विमर्द्दितम्।
तच्चूर्णसहितं सूतं स्थालीमध्ये परिक्षिपेत्॥
तस्याः स्थाल्या मुखे स्थालीमपरां धारयेत् समाम्।
सवस्त्रकृत्तिमृद्दा सुद्रयेदुभयोर्म्मुखम्॥
संशोष्य सुद्रयेद्भूयो भूयः संशोष्य सुद्रयेत्।
सम्यक्विशोष्य सुद्रां तां स्थालीं चुल्ल्यां विधारयेत्॥
अग्निं निरन्तरं दद्यादृयावद्दिनचतुष्टयम्।
अङ्गारोपरि तद्यन्त्रं रचेद्यत्नादहर्निशम्॥
प्रनेरुद्धारयेद्यन्त्रभूर्द्ध्वस्थालीगतं रसम्।
कर्पूरवत् सुविमलं गृह्णीयादृगुणवत्तरम्॥
तं देवकुसुमचन्दनकस्तूरीकुङ्कुमैर्युक्तम्।
खादन् हरति शिरङ्गं व्याधिं सोपद्रवं सपदि॥
विन्दति वह्निर्दीप्तिं पुष्टिं वीर्य्यं बलं विपुलम्।
रमयति रमणीशतकं रसकर्पूरस्य सेवकः सततम्॥"

इति भावप्रकाशः॥ * ॥

अपि च।
"गैरिकतुरवीखटिकासैन्धवगड़जं रजं कुड़वम्।
प्रत्येकं दृढ़हण्डामाधायास्योपरि घृतं स्थाप्यः॥
कुड़वमितोऽथ तदूर्द्धं देया हण्डीतदास्य पातसुखी।
अथ तत्सन्धेर्म्मुद्रां कृता तदधो हुताशनो ज्वाल्यः॥
अग्निगणषट्कप्रमितैर्दारुभिरनुनातिदुर्ब्बलस्थूलैः।
अग्निं क्रमेण दद्यादृगुरुदग्निवर्त्मना द्विनिशम्॥
तदनु ततो यन्त्रवराद्युक्त्या कर्पूरसन्निभं सूतम्।
आदाय काचकुम्भे निधाय नवसादरं दद्यात्॥
संमर्द्द्य चाथ काष्ठैरर्द्धाग्निसंमितैः पचेत् घनम्।
घुस्रीडमरुकमध्यं वितस्तिचतुराङ्गुलावकाशन्तु॥
कर्त्तव्यं क्रमदहनं तदधः प्रक्षालयेन्मध्यम्।
गृध्रिधवलमुपरिलगं युक्त्या संगृह्य रचयेदृयत्नात्॥
वल्लं वल्लार्द्धं वा गुड़ेन जीर्णेन रोगिणे दद्यात्।
दुग्धोदनन्तु पथ्यं देयं तस्मै च ताम्बूलम्॥
हरति समस्तं रोगं कर्पूराख्यो रसो नृणाम्॥
फिरङ्गकरिकेशरी सकलकुष्ठदावानलोऽखिलव्रणविनाशकृत् व्रणजगर्त्तपूर्त्तिप्रदः।
सुवर्णसमवर्णकृत् बलहुताशतेजस्करः
समस्तगदतस्करो रसपतिः स कर्पूरकः॥"
ग्रन्थान्तरम्।
"टङ्कणं मधु लाक्षाघृ ऊर्णा गुञ्जायुतो रसः।
मर्द्दयेत् भृङ्गजद्रावैर्द्दिनैकं भावयेत् पुनः।
भावतो भस्मतामेति शुद्धकर्पूरसन्निभः॥

नवसादरं पारदाच्चतुर्थांशमिति सङ्केतः। गड़जं साम्भरिलोण इति भाषा। ग्रेषं स्पष्टम्।
इत्यायुर्व्वेदप्रकाशः॥ (तथा च।
"पिष्टं पांशुपटुं प्रगाढममलं वज्रम्बुना नैकशः
स्तं धातुगतं खटीकवलितं ततसंपुटे रोधयेत्॥
अन्तस्तल्लवणस्य तस्य च तले प्रज्वाल्य वह्निं दृढात्
घर्मं ग्राह्य मथेन्दुकुन्दधवलं भस्मोपरिस्थं ग्रनैः॥
तद्रस्वद्वितयं लवङ्गसहितं प्रातः प्रयुक्तं भजेत्।
ऊर्द्धं रेचयति द्वियाममसक्तत् पेयं जलं ग्रीतलम्॥
एतद्वन्हि च वत्सरावधि विषं वाक्तासिकं मासिकम्।
ग्रैलोत्थं गरलं भुगेन्द्रकुटिलोऽङ्गुलस्च तात्कालिकम्॥"
इति सुधानिधिरसः॥ * ॥ रकर्पूरमिति रसमञ्जरी कारः। श्वेतभस्म इति चन्द्रिका॥ इति वैद्यकरसेन्द्रसारसंग्रहे जारणमाराणाधिकारे॥)

रसकर्पूरं, क्ली, कर्पूरम्। इति हारावली॥ (कर्पूरशब्दस्यास्य विवरणं ज्ञातव्यम्॥)

रसगन्धं, क्ली, बोलम्। इति राजनिर्घण्टः॥

रसगन्धः, पुं, गन्धरसः। यथा,—
"रसगन्धो गन्धरसो गान्धारं मसिवर्द्धनम्॥"
इति चिकाण्डग्रेषः॥

रसगन्धकः, पुं, (रसगन्ध+स्वार्थे कन्।) गन्धरसः। इति ग्रब्दचन्द्रिका॥ गन्धकः। इति राजनिर्घण्टः॥

रसगर्भं, क्ली, रसाञ्जनम्। इत्यमरः॥ (तत्पर्य्यायो यथा, भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे।
"रसाञ्जनन्तार्क्ष्यग्रैलं रसगर्भञ्च तार्क्ष्यजम्॥")
हिङ्गुलम्। इति राजनिर्घण्टः॥

रसघ्नः, पुं, (रसं रसस्य दोषावहग्रक्तिं हन्तीति। हन+टक्।) टङ्कणः। इति राजनिर्घण्टः॥

रसज, क्ली, (रसाज्जायते इति। जन्+डः।) रक्तम्। इति ग्रब्दचन्द्रिका॥

रसजः, पुं, (रसाज्जातः। जन्+डः।) गुड़ः। इति राजनिर्घण्टः॥ (यथा, मनुः।११।१४४।
"अन्नाद्यजानां सत्त्वानां रसजानाञ्च सर्व्वशः॥")
मद्यकीटः। इति हेमचन्द्रः॥ (रसजाते, त्रि। यथा,—
"रसजं पुरुषं विद्याद्रसं रक्षेत् प्रयत्नतः।
अन्नात् पानाच्च मतिमानाचाराच्चाप्यतन्द्रितः॥"
इति सुश्रुते सूत्रस्थाने चतुर्दग्रोऽध्याये॥)

रसज्ञा, स्त्री, (रसं जानातीति। ज्ञा+कः। टाप्।) जिह्वा। इत्यमरः॥ (गङ्गा। इति काग्रीखण्डे। २६।१४६॥) रसवेत्तरि, त्रि॥ (यथा, रघौ। २।३६।
"यो हेमकुम्भस्तननिःसृतानां
स्कन्दस्य मातुः पयसां रसज्ञः॥")

रसज्येष्ठः, पुं, (रसेषु ज्येष्ठः।) मधुररसः। इति हेमचन्द्रः॥ ग्रृङ्गाररसञ्च॥

रसतेजः, [स्] क्ली, (रसात् रसजन्यं वा तेजो यस्य।) रक्तम्। इति हेमचन्द्रः॥

रसदालिका, स्त्री, (रसं दालयति इति। दल+णिच्+खुल्। टाप्। अत इत्वम्।) पुण्ड्रेक्षुः। इति राजनिर्घण्टः॥

रसद्रावी, [न्] पुं, (रसं द्रावयतीति। द्रु+णिच्+णिनि।) मधुरजम्बीरः। इति राजनिर्घण्टः॥

रसधातुः, पुं, (रसात्मको धातुः।) पारदः। इति राजनिर्घण्टः॥ (अस्य पर्य्यायादिर्यथा,—
"रसायनार्थिभिर्लोकैः पारदो रस्यते यतः।
ततो रस इति प्रोक्तः स च धातुरपि स्मृतः॥
पारदो रसधातुश्च रसेन्द्रश्च महारसः।
चपलः ग्रिववीर्य्यश्च रसः स्मृतः ग्रिवाक्षयः॥"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे॥)

रसधेनुः, स्त्री, (रसकल्पिता धेनुः।) दानार्थेक्षुरसनिर्म्मितधेनुः। यथा,—
होतोवाच।
"रसधेनुं महाराज कथयामि समासतः।
अनुलिप्ते महीपृष्ठे कृष्णाजिनकुशास्तरे॥
रसस्य तु घटं राजन् संपूर्णमेक्षवस्य च।
तद्वत् संकल्पयेत् प्राज्ञश्चतुर्थांग्रेन वत्सकम्॥
इक्षुदण्डमयाः पादा रजतक्षुरसंयुताः।
सुवर्णग्रृङ्गाभरणां वस्त्रपुच्छां घृतस्तनीम्॥
पुष्पकम्बलसंयुक्तां शर्करासुखजिह्विकाम्।
दन्ताः फलमयास्तस्याः पृष्टताम्रमयीं शुभाम्॥
पुष्परोमाणि राजेन्द्र मुक्ताफलकृतेक्षणाम्।
सप्तधान्यसमायुक्तां चतुर्द्दिक्षु च दीपिकाम्॥
सर्व्वौषधरसंयुक्तां सर्व्वगन्धादिवासिताम्।
चत्वारि तिलपात्राणि चतुर्द्दिक्षु निवेदयेत्॥
ब्रह्मणे वेदविदुषे ग्रोत्रियायाहिताग्नये।
पुराणज्ञे विग्रेषेण साधुवृत्ताय धीमते॥
ताडग्राय प्रदातव्या रसधेनुः कटम्बिने।
सर्व्वलक्षणयुक्ताय ग्रोत्रियाय कुटुम्बिने॥
रसधेनुः प्रदातव्या सर्व्वकामेण नित्यदा।
दाता स्वर्गमवाप्नोति सर्व्वपातकवर्ज्जितः॥
दाता च ग्राहको वाथ एककालमभोजनः।
सोमपानफलं तस्य सर्व्वक्रतुफलं लभेत्॥
दीयमानान्तु पश्यन्ति ते यान्ति परमां गतिम्।
धेनुञ्च पूजयित्वाथ गन्धधूपसगादिभिः॥
पूर्व्वोक्तैरेव मन्त्रैस्तु ततस्तां प्रार्थयेत् सुधीः।
प्रार्थनापूर्व्वकं भक्त्या द्विजाग्र्याय निवेदयेत्॥
दग्ध पूर्व्वान् परांश्चैव आत्मानञ्चैकविंग्रकम्।
प्रापयेत् परमं स्थानं स्वर्गान्नावर्त्तते पुनः॥
एषा ते कथिता राजन् रसधेनुरनुत्तमा।
दत्त्व च महाराज परं स्थानमवाप्नुहि॥
य इदं पठते नित्यं ग्रृणुयादथ भक्तितः।
सर्व्वपापविनिर्मुक्तो विष्णुलोके महीयते॥"
इत्यादि वाराहपुराणे श्वेतोपाख्याने रसधेनुमाहात्म्यं समाप्तम्॥

रसनं, क्ली, (रस्+भावे ल्युट्।) स्वादनम्। ध्वनिः। इति मेदिनी॥ (यथा, हृहत्संहितायाम्। ४६। ८८।
"कम्योङ्गनवेलत्वं रसनं दरणं चिते;॥")

रसनं, क्ली क्ली, (रस्यते रसयत्यनेन वा। रस+करणे ल्युट्।) जिह्वा। इति मेदिनी॥ सा च जलेन्द्रियम्। यथा,—
"नित्यतादि प्रथमवत् किन्तु देहमयोनिजम्।
इन्द्रियं रसनं सिन्धुर्हिमादिर्व्विषयो मतः॥"
इति भाषापरिच्छेदः॥
"प्रथमवदिति पृथिव्या इवेत्यर्थः। तथा हि जलं द्विविधं नित्यमनित्यञ्च। परमाणुरूपं नित्यं द्व्यणुकादिकं सर्व्वमनित्यम्। अवयवसमवेतञ्चानित्यजलमपि त्रिविधम्। ग्ररीरेन्द्रियविषयभेदात्। किन्तु पृथिवीतोययोर्यो विग्रेषस्तमाह किन्त्विति। अयोनिजमेवेत्यर्थः। जलीयं ग्ररीरं अयोनिजं वरुणलोके प्रसिद्धमिति। इन्द्रियं रसनं जलीयम्। तथा हि रसनं जलीयं गन्धाद्यव्यञ्जकत्वे सति रसव्यञ्जकत्वात्। ग्रुक्लुरसाभिव्यञ्जकोदकवत्। रसनासन्निकर्षे व्यभिचारवारणाय द्रव्यत्वं हेतौ देयम्। विषयं दर्ग्रयति सिन्धुर्हिमादिरिति। सिन्धुः समुद्रः हिमं तुषारः। आदिना सरित्कासारकरकादिः सर्व्वो ग्राह्यः।" इति सिद्धान्तमुक्तावली॥

रसना, स्त्री, (रस+युच्। टाप् च।) जिह्वा। इत्यमरः॥ (यथा, भागवते। ६। ४। १६।
"घ्राणञ्च तत्पादसरोजसौरभे
ग्रीमत्तुलस्या रसनां तदर्पिते॥")
तस्याः शुभलक्षणं यथा,—
"तीक्ष्णा दंष्ट्राः समाः ग्रेष्ठा जिह्वा रक्ता समा शुभा।
ग्लक्ष्णा दीर्घा च विज्ञेया तालुः ग्वेतो घनश्चये॥"
इति गारुड़े ६६ अध्यायः॥
न्यायमते रसनेन्द्रियग्राह्यो रसो रसत्वादिसहितः। यथा,—
"रसस्तु रसनाग्राह्यो मधुरादिरनेकधा।
सहकारी रसज्ञाया नित्यतादि च पूर्व्ववत्॥
घ्राणस्य गोचरो गन्धो गन्धत्वादिरपि स्मृतः।
तथा रसो रसज्ञायास्तथा ग्रब्दोऽपि च श्रुतेः॥"
इति भाषापरिच्छेदः॥
"तथारस इति रसत्वादिसहित इत्यर्थः।" इति सिद्धान्तमुक्तावली॥*॥ राज्ञा। इति मेदिनी॥ (अस्याः पर्य्यायो यथा,—
"राज्ञा युक्तरसा रस्या सुवक्त्रा रसना रसा।
रलापर्णी च सुरसा सुगन्धा ग्रेयसी तथा॥"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे॥)
गन्धभद्रा। इति ग्रब्दचन्द्रिका॥ काञ्ची। इति हेमचन्द्रः॥ (यथा, रघौ। ७। १०।
"कस्याञ्चिदासौद्रसना तदानीं
ग्रुक्लोष्ठमूलार्पितसूत्रग्रेषा॥")
रज्जुः। इति संक्षिप्तसारोणादिवृत्तिः॥

रसनाथः, पुं, (रसानां नाथः ग्रेष्ठ इत्यर्थः।) पारदः। इति राजनिर्घण्टः॥

रसनायकः, पुं, (रसानां नायकः नेता रसायनविद्याविष्कारकत्वादस्य तथात्वम्।) ग्रिवः। इति ग्रब्दरत्नावली॥

रसनालिट्, [ह्] पुं, (रसनया लेढ़ीति । लिह्+क्विप् ।) कुक्कुरः । इति हेमचन्द्रः ॥ रसनया लेहनकर्त्तरि, त्रि ॥

रसनेत्रिका, स्त्री, (रसो नेत्रमिव तदस्त्यस्या इति । रसनेत्र+ठन् ।) मनःशिला । इति हेमचन्द्रः ॥ (मनःशिलाशब्देऽस्या गुणादयो ज्ञेयाः ॥)

रसपाकजः, पुं, (रसपाकात् जायते इति । जन्+डः ।) गुड़ः । इति राजनिर्घण्टः ॥

रसफलः, पुं, (रसो जलं फले यस्य रसयुक्तं फलमस्येति वा । प्राकपार्थिववत् मध्यपदलोपी समासः ।) नारिकेलवृक्षः । इति शब्दरत्नावली ॥ (नारिकेलशब्देऽस्य विशेषो विज्ञेयः ॥)

रसभवं, क्ली, (रसात् रसे वा भवतीति ।) भू+अच् ।) रक्तम् । इति राजनिर्घण्टः ॥

रसमञ्जरी, स्त्री, (रसानां मञ्जरीव ।) नायकनायिकाभेदकग्रन्थविशेषः । यथा,—

"विबुध्जनमनोभृङ्गरसयासङ्गहेतवे ।
एषा प्रकाश्यते श्रीमद्भानुना रसमञ्जरी ॥"

इति तस्य द्वितीयः श्लोकः ॥

रसमयः, त्रि, रसस्वरूपः । रसात्मकः रसशब्दात् मयट्प्रत्ययेन निष्पन्नः ॥ (यथा, भागवते । ३ । ५ । ३४ ।

"आधत्ताम्भो रसमयं कालमायांशयोगतः ॥")

रसमर्द्दनं, क्ली, (रसस्य पारदधातोर्मर्द्दनम् ।) पारदपेषणम् । यथा,—

"इष्टिकाचूर्णचूर्णाभ्यामादौ मर्द्यो रसस्ततः ।
रम्भा गुड़ेन सिन्धूत्थराजिकाग्रहधूमकैः ॥"

अन्यच्च ।

"कुमारिकाचित्रकरक्तसर्षपैः
कृतैः कषायैर्हृतीविमिश्रितैः ।
फलत्रिकेणापि विमर्द्दितो रसो
दिनत्रयं सर्व्वमलैर्विमुच्यते ॥"

इति भावप्रकाशः ॥

रसमारणं, क्ली, (रसस्य पारदस्य मारणम् ।) पारदस्य मारणम् । यथा,—

"धूमसारं रसं तोरि गन्धकं नवसादरम् ।
यामैकं मर्द्ययेदम्बुभांगं कृत्वा समं समम् ॥
काचकूप्यां विनिःक्षिप्य तास्य मृद्वस्त्रमुद्रया ।
विलिप्य परितो वक्त्रे सुद्रां दत्त्वा विशोषयेत् ॥
अधःसच्छिद्रपिठरीमध्ये कूपीं निवेशयेत् ।
पिठरीवालुकापूरैर्भृत्वा वा कूपिकागलम् ॥
निवेश्य चुल्ल्यां तदधो वह्निं कुर्य्याच्छनैः शनैः ।
तस्मादप्यधिकं किञ्चित् पावकं ज्वालयेत्क्रमात् ॥
एवं द्वादशभिर्यामैर्म्रियते रस उत्तमः ।
स्फोटयेत् खाङ्गशीतं तन्मर्द्दनं गन्धकं त्यजेत् ॥
अधस्थञ्च मृतं सूतं गृह्णीयात् तन्तु मात्रया ।
यथोचितानुपानेन सर्व्वकर्म्मसु योजयेत् ॥"

इति भावप्रकाशः ॥

रसमूर्च्छनं, क्ली, (रसस्य पारदस्य मूर्च्छनम् ।) पारदस्य मूर्च्छाकरणम् । यथा,—

"चूताश्वत्थं त्रिफलावन्ध्याकन्दैः क्षुद्रद्वयान्वितैः ।
चित्रकोन्मत्तनिर्गुण्डीरक्तार्काकनकद्रवैः ॥
सूतं कृतेन यूषेण वारान् सप्ताभिमूर्च्छयेत् ।
इत्थं संमूर्च्छितः सूतस्त्यजेत् सप्तापि कञ्चुकान् ॥"

इति भावप्रकाशः ॥

(तथास्य विवृतिः ।

"गन्धकेन रसं प्राज्ञः सुदृढं मर्द्दयेद्भिषक् ।
कज्जलाभो यदा सूतो विहाय घनचापलम् ॥
दृश्यतेऽसौ तदा ज्ञेयो मूर्च्छितो रसकोविदैः ।
असौ रोगत्रयं हन्यादनुपानस्य योगतः ॥"

इति मूर्च्छनम् ॥ * ॥

इति वैद्यकरसेन्द्रसारसंग्रहे जारणमारणाधिकारे ॥)

रसराजः, पुं, (रसानां धातूनां राजा इति । "राजाहःसखिभ्यष्टच् ।"५।४।९१। इति टच् ।) पारदः । रसाञ्जनम् । इति राजनिर्घण्टः ॥

रसलेहः, पुं, (रसान् अपरान् धातून् लेढ़ीति । लिह्+पचाद्यच् ।) पारदः । इति राजनिर्घण्टः ॥

रसवती, स्त्री, (रसो विविधखाद्यरसो विद्यतेऽस्यामिति । रस+"रसादिभ्यश्च ।" ५ । २ । ९५ । इति मतुप् । मस्य वत्वम् ।) महानसम् । इत्यमरः ॥ (यथा, सांख्यतत्त्वकौमुद्याम् । ५ । "यथा धूमादग्नित्वसामान्यविशेषः पर्व्वते ऽनुमीयते तस्य च वह्नित्वसामान्यविशेषस्य स्वलक्षणो वह्निविशेषो दृष्टो रसवत्याम् ॥*॥")

रसविशिष्टे, त्रि ॥ (यथा, आर्य्यासप्तशती ।७९८।

"रोषोऽपि रसवतीनां न कर्कशो वा चिरानुबन्धी वा ॥")

रसशोधनं, क्ली, (रसः शोध्यतेऽनेनेति । शुध्+णिच्+ल्युट् । रसं पारदं शोधयत्यनेनेति वा ।) टङ्कणः । इति हेमचन्द्रः ॥ (रसस्य शोधनम् ।) पारदशुद्धिः । यथा,—

"कुमारिकाचित्रकरक्तसर्षपैः
कृतैः कषायैर्हृतीविमिश्रितैः ।
फलत्रिकेणापि विमर्द्दितो रसो
दिनत्रयं सर्व्वमलैर्विमुच्यते ॥
एवं कदर्थितः सूतः षण्ढो भवति निश्चितम् ।
वङ्गौषधीकषायेण खेदितः स बली भवेत् ॥
सर्पाक्षीचित्रिकाबन्ध्याभृङ्गारैः खेदितो बली ।
ततः सपावकन्नावैः खिन्नः स्यादतिदीप्तिमान् ॥"

इति भावप्रकाशः ॥

(मतान्तरम् ।

"जयन्त्या वर्द्धमानस्य चार्द्रकस्य रसेन च ।
वायस्याश्चानुपूर्व्येण मर्द्दनं रसशोधनम् ॥
एषां प्रत्येकमस्तावन्मर्द्दयेत् खरसेन च ।
यावच्च शुष्कतां याति सप्तवारं विचक्षणः ॥
उद्वृत्तोष्णारनालेन मृद्भाण्डे क्षालयेत् सुधीः ।
सर्व्वदोषविनिर्म्मुक्तः सप्तकञ्चुकवर्ज्जितः ॥
जायते शुद्धसूतोऽयं युज्यते सर्व्वकर्म्मसु ॥"

इति वैद्यकरसेन्द्रसारसंग्रहे जारणमारणाधिकारे ॥)

रससिन्दूरं, क्ली, (रसजातं सिन्दूरमिति ।) औषधविशेषः । तस्य नामान्तरं सिन्दूररसः ।

यथा,—

"शुद्धसूतस्य गृह्णीयाद्भिषग्भागचतुष्टयम् ।
शुद्धगन्धस्य भागैकं तावत् क्षत्रिमगन्धकम् ॥
अथवा पारदस्यार्द्धं शुद्धगन्धकमेव हि ।
तयोः कज्जलिकां कुर्य्यादृगमेकं विवर्ज्जयेत् ॥
श्लक्ष्णिकां वाससा सार्द्धं कुट्टयेदतियत्नतः ।
तया वारत्रयं सम्यक् काचकूपीं प्रलेपयेत् ॥
श्लक्ष्णिकां प्रोषयित्वा तु कूप्यां कज्जलिकां
क्षिपेत् ।
तां कूपीं वालुकायन्त्रे स्थापयित्वा रसं पचेत् ॥
अग्निं निरन्तरं दद्यादृयावद्दिनचतुष्टयम् ।
गृह्णीयादूर्द्धसंलग्नं सिन्दूरसदृशं रसम् ॥"

इति भावप्रकाशः ॥

(मतान्तरम् ।

"पृथक् समं समं कृत्वा पारदं गन्धकन्तथा ।
नवसारं धूमसारं स्फटिकं यामभाजकम् ॥
निम्बूरसेन संमर्द्द्य काचकूप्यां निवेशयेत् ।
मुखे पाषाणखटिकां दत्त्वा मुद्रां प्रलेपयेत् ॥
सप्तभिर्श्लेष्मिकावस्त्रैः पृथक्संशोध्य वेष्टयेत् ।
सच्छिद्रायां भूदस्थाल्यां कूपिकां तां निवेशयेत् ।
पूरयेत् सिकतापूरैरागलं मतिमान् भिषक् ।
निवेश्य चुल्ल्यां दहनं मन्दं मध्यं खरं क्रमात् ॥
प्रज्वाल्य द्वादशं यामं खाङ्गशीतं समुद्धरेत् ।
स्फोटयित्वा तु मुक्ताभमूर्द्धलग्नं वलिं त्यजेत् ।
अधःस्थं रससिन्दूरं सर्व्वरोगेषु योजयेत् ॥"

इति रससिन्दूरम् ॥

इति वैद्यकरसेन्द्रसारसंग्रहे जारणमारणाधिकारे ॥)

रसस्थानं, क्ली, (रसः स्थानमाधार उत्पत्तिस्थानं यस्य । रसस्य पारदस्य स्थानमित्यके ।) हिङ्गुलम् । इति शब्दचन्द्रिका ॥ शरीरस्थ रसस्थलञ्च । तस्य प्रमाणं रसशब्दे द्रष्टव्यम् ॥

रसा, स्त्री, (माधुर्य्यादिरूपो विविधो रसोऽस्यस्यामिति । "अर्शआदिभ्योऽच् ।"५ । २ । १२७ । इति अच् । रसति शब्दायते इति वा । रस+अच् । टाप् च ।) पृथिवी । इत्यमरः ॥ रसना । (तत्पर्य्यायो यथा, भावप्रकाशे ।१।१।

"राखा युक्तरसा रस्या सुवक्षा रसना रसा ।
रसज्ञापर्णी च सुरसा सुगन्धा श्रेयसी तथा ॥")

पाठा । (अस्याः पर्य्यायो यथा, भावप्रकाशे ।१।१।

"पाठाम्बष्ठाम्बष्ठकी च प्राचीना पारपेलिका ।
एकाष्ठीला रसा प्रोक्ता पाठिका वरतिक्तिका ॥"

शल्लकी । (अस्याः पर्य्यायो यथा,—

"शल्लकी गजभक्ष्या च सुवक्षा सुरभी रसा ।
मदेरुणा कुन्दुरुकी वल्लकी च बहुत्वचा ॥"

इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥)

कङ्कुः । इति मेदिनी ॥ लाक्षा । काकोली । इति शब्दरत्नावली ॥ (रसातलम् । यथा, भागवते । १० । ६ । १२ ।

"रसा दृग्भ्य प्रतिनेदिरे जनाः
पेतुः क्षितौ वज्रनिपातशङ्कया ॥"

यथा च तत्रैव । ३ । १३ । १६ ।

"हनतो मे चितिर्वाभिः ध्रायमाना रसां
गता ॥"
"रसां रसातलं गता।" इति तट्टीकायां स्वामिपादाः॥ नदी। यथा, ऋग्वेदे। १।११२।१२।
"याभी रसां चोदसोदः पिपिन्वथुः॥"
"रसां नदीम्।" इति तद्भाष्ये सायणः॥)
रसाखनः, पुं, (खनतीति। खन् विदारे + अच्। रसाया भूमेः खनः।) शुकुटः। इति शब्दचन्द्रिका॥
रसाग्रजं, क्ली, (रसानां अग्रजं रसस्य अग्रे जायते इति वा। जन् + डः।) रसाञ्जनम्। इति राजनिर्घण्टः॥
रसाञ्जनं, क्ली, (रसजातमञ्जनं इति मध्यपदलोपी कर्म्मधारयः।) रसजाताञ्जनविशेषः। रसवत् इति भाषा॥ तत्पर्य्यायः। रसगर्भम् २ तार्क्ष्यशैलम् ३। इत्यमरः॥ रसोद्भूतम् ४ रसाग्रजम् ५ क्षतकम् ६ बालभैषज्यम् ७ दार्व्यीक्वाथोद्भवम् ८ रसराजः ९ वर्य्याञ्जनम् १० रसनागर्भम् ११ अग्निसारम् १२। अस्य गुणाः। स्निग्धत्वम्। तिक्तत्वम्। चक्षुष्यत्वम्। मधुरत्वम्। कटुत्वम्। रक्तपित्तविषच्छर्द्दिहिक्कापस्मारनाशित्वञ्च।
"रौप्यात्तु ध्रायमानायां तत्किट्टन्तु रसाञ्जनम्। तदभावे तु कर्त्तव्यं दार्व्यीक्वाथसमुद्भवम्॥"
इति राजनिर्घण्टः॥
अपि च।
"दार्व्यीक्वाथसमं क्षीरं पादं पक्त्वा यथाघनम्। तदा रसाञ्जनाख्यं तन्नेत्रयोः परमं हितम्॥
रसाञ्जनं तार्क्ष्यशैलं रसगर्भञ्च तार्क्ष्यजम्। रसाञ्जनं कटु श्लेष्मविषनेत्रविकारनुत्।
उक्तं रसायवं तिक्तं छेदनं व्रणदोषहृत्॥"
इति भावप्रकाशः॥
रसाढ्यः, पुं, (रसेनाढ्यः युक्तः।) आम्रातकः। इति राजनिर्घण्टः॥ (आम्रातकशब्दस्य विवरणं ज्ञातव्यम्॥)
रसातलं, क्ली, (रसायाः तलं निम्नभागस्थलोकविशेषः।) पातालम्। इत्यमरः॥ (यथा, महाभारते। १२। ३४७। ५६।
"अगाहं वेदानखिलान् रसातलगतो हरिः॥")
पातालभेदः। यथा,—
"अतलं वितलञ्चैव नितलञ्च तलातलम्॥
महातलञ्च सुतलं सप्तमञ्च रसातलम्॥
पातालभेदाः सप्तैव नामतः कीर्त्तिता अमी। तत्र पातालमेकैकं दशसाहस्रयोजनम्॥"
इति शब्दमाला॥
(इदमेव निवातकवचानां निवासस्थानम्। यथा च देवीभागवते। ८। २०। ८—१२।
ततोऽधस्ताच्च विवरे रसातलसमाह्वये।
तेषां निवसतामेव पञ्चयो दानवाश्च ये॥
नाम हिरण्यपुरवासिनः।
च प्रोक्ताः प्रत्यनीका हविर्-
भुजाम्॥

महौजसश्चोत्पत्त्यैव महासाहसिनस्तथा। सकलेशस्य च हरेस्तेजसा हतविक्रमाः॥
विलेशया इव सदा विवरे निवसन्ति हि। ये वै वाग्भिः सरमया भ्रक्रदूत्या निरन्तरम्॥
मन्त्रवर्णाभिरसुरास्ताड़िता विभ्यति स्म ह॥")
रसादानं, क्ली, (रसानां आदानं ग्रहणम्।) शोषणम्। इति हेमचन्द्रः॥ (रसाया दानम्।) भूमिदानञ्च॥
रसाधारः, पुं, (रसानां जलानां आधारः। रसां पृथिवीं धरति स्वाकर्षणेनेति वा। धृ + अण्।) सूर्य्यः। इति शब्दरत्नावली॥ रसस्याधारश्च॥
रसाधिकः, पुं, (रसाय स्वर्णादीनां द्रवीकरणाय अधिकः प्रबलः।) टङ्कणः। इति राजनिर्घण्टः॥ अधिकरसश्च॥
रसाधिका, स्त्री, (रसेन अधिका।) काकोलीद्राक्षा। इति राजनिर्घण्टः॥
रसाभासः, पुं, (रस इव आभासते इति। आ + भास् + अच्।) अनौचित्यविशिष्टरसः। तस्य लक्षणं यथा,—
"अनौचित्यप्रवृत्तत्वे आभासौ रसभावयोः।"
अनौचित्यञ्चात्र रसानां भरतादिप्रणीतलक्षणानां सामग्रीरहितत्वे सत्येकदेशयोगित्वोपलक्षणपरं बोध्यम्। तच्च बालव्युत्पत्तये एकदेशतो दर्श्यते। उपनायकसंस्थायां मुनिगुरुपत्नीगतायाञ्च। बहुनायकविषयायां रतौ तथानुभयनिष्ठायां प्रतिनायकनिष्ठत्वे तद्वदधमपात्रतिर्य्यगादिगते भृङ्गारे अनौचित्यम्। रौद्रे गुर्व्वादिगतकोपे। भ्रान्ते च हीननिष्ठे। गुर्व्वाद्यालम्बने हास्ये। ब्रह्मवधादुत्साहे। अधमपात्रगते तथा वीरे। उत्तमपात्रगतत्वे भयानके श्रेयमेवमन्यत्र। तत्र रतेरुपनायकनिष्ठत्वे यथा मम।
"स्वामी सुग्धतरो वनं घनमिदं बालाहमेकाकिनी चौर्णीमाडयते तमालमलिनच्छायातमः-
सन्ततिः।
तन्मे सुन्दर! सुष्ठ कृष्ण! सहसा वर्त्मेति
गोप्या गिरः
श्रुत्वा तां परिरभ्य मध्यकलासक्तो हरिः
पातु वः॥"
बहुनायकनिष्ठत्वे यथा,—
"कान्तास्त्व एव भुवनत्रितयेऽपि मन्ये
येषां कृते सुतनु! पाण्डुरयं कपोलः।"
अनुभयनिष्ठत्वे यथा,—
मालतीमाधवे नन्दनस्य मालत्याम्। पश्चादुभयनिष्ठत्वेऽपि प्रथममेकनिष्ठत्वे रतेराभासत्वमिति श्रीमल्लोचनकाराः। तच्चोदाहरणं यथा रत्नावल्याम्। सागरिकाया अन्योऽन्यदर्शनात् प्राक् वत्सराजे रतिः। प्रतिनायकनिष्ठत्वे यथा हयग्रीववधे। हयग्रीवस्य जलक्रीड़ावर्णने। अधमपात्रगतत्वे यथा,—
"जघनस्थलनद्धपत्रवल्ली-
गिरिसल्लीकुसुमानि कापि भिल्ली।

अवचित्य गिरौ पुरो निषण्णा
स्वकचानुत्कचयाञ्चकार भर्त्रा॥"
तिर्य्यग्गतत्वे यथा,—
"मल्लीमतल्लीषु वनान्तरेषु
वल्लान्तरे वल्लभमाङ्कयन्ती।
पक्षद्विपक्षी कलनादभङ्गी
सङ्गीतभङ्गीकुरुते स्म भृङ्गी॥"
आदिशब्दात्तापसादयः। रौद्राभासो यथा,—
"रक्तोत्फुल्लविशालशोलनयनः कम्पोत्तराङ्गो मुहु-
र्मुक्ताकर्णमपेतभीर्धृतधनुर्व्याग्रो हरेः पश्यतः।
आघ्रातः कटुकोक्तिभिः खमसकृद्दोर्विक्रमं कीर्त्तयन्
अंसास्फोटपटुर्युधिष्ठिरमसौ हन्तुं प्रविष्टोऽर्জ্জুनः॥"
भयानकाभासो यथा,—
"अग्रक्रुवन् सोढुमधीरलोचनः
सहस्ररश्मेरिव यस्य दर्शनम्।
प्रविश्य हैमाद्रिगुहागृहान्तरं
निनाय विभ्यद्दिवसानि कौशिकः॥"
स्त्रीनीचविषयमेव हि भयं रसप्रकृतिः। एवमन्यत्र। इति साहित्यदर्पणे ३ परिच्छेदः॥
रसाम्लं, क्ली, (रसात्मकोऽम्लो यत्र।) दृक्चाम्लम्। इति राजनिर्घण्टः॥ चुक्रम्। इति भावप्रकाशः॥
रसाम्लः, पुं, (रसेन सह अम्लो यत्र।) अम्लवेतसः। इति राजनिर्घण्टः॥
रसायकः, पुं, (रसं रसत्वमयति प्राप्नोति इति। अय + ण्वुल्।) लक्षणविशेषः। इति शब्दचन्द्रिका॥
रसायनं, क्ली, कटिः। इति राजनिर्घण्टः॥ (रसो दुग्धं अयनं मूलं यस्येति।) तक्रम्। इति हेमचन्द्रः॥ विषम्। (रसा रसरक्तादय दूयन्ते प्राप्यन्ते अनेनेति। इ + ल्युट्।) ज्वराद्याधिनाशकौषधम्। इति मेदिनी॥ (यथा, माघे। २। ६३।
"षाड्गुण्यसुपयुञ्जीत प्रक्षपेक्षं रसायनम्।
भवन्त्यस्येवमङ्गानि स्थास्नूनि बलवन्ति च॥")
"न सूतेन विना कान्तं न कान्तेन विना रसः।
सूतकान्तसमायोगात् रसायनमुदीरितम्॥"
इति राजनिर्घण्टः॥ *॥
अथ रसायनाधिकारः। तत्र रसायनस्य लक्षणमाह।
"यज्जराव्याधिविध्वंसि वयस्तम्भकृन्नृणाम्।
चक्षुष्यं दृंहणं वृष्यं भेषजं तद्रसायनम्॥"
रसायनस्य फलमाह।
"दीर्घमायुः स्मृतीर्मेधामारोग्यं तरुणं वयः।
देहेन्द्रियबलं कान्तिं नरो विन्देदसायनात्॥"
तद्विधिमाह।
"पूर्व्वे वयसि मध्ये वा मनुष्यस्य रसायनम्।
प्रयुञ्जीत भिषक् प्राज्ञः स्निग्धशुद्धतनोः सदा॥
नाविशुद्धशरीरस्य युक्तो रसायनो विधिः।
न भाति वाससि श्लिष्टे रङ्गयोग इवाहितः॥"

अथ तदुदाहरणानि ।
"गृहीतोदकं पयः क्षौद्रं घृतमेकैकशो दिशः ।
त्रिशः समस्तमथवा प्राक् पीतं स्यापयेद्भयः ॥
भृङ्गकपर्ण्याः स्वरसः प्रभाते
प्रयोज्य यष्टीमधुकस्य चूर्णम् ।
रसो गुडुच्यास्तु समूलपुष्पः
कल्काः प्रयोज्याः खलु शङ्खपुष्प्याः ॥
आयुःप्रदान्यामयनाशनानि
बलाग्निवर्णस्वरवर्द्धनानि ।
मेध्यानि चैतानि रसायनानि
मेध्या विशेषेण च शङ्खपुष्पी ॥"
भृङ्गकपर्णी ब्राह्मी। वरभी इति लोके। तद्लाभे मञ्जिष्ठापि ग्राह्या। तस्या अपि रसायनत्वात् ।
"माक्षिकेण तुगाक्षीर्या पिप्पल्या लवणेन च ।
त्रिफला सितया वापि युक्ता सिद्धं रसायनम् ॥
सिन्धूत्थशर्करासृष्टीकणामधुगुडैः क्रमात् ।
वर्षादिष्वभया प्राप्ता रसायनगुणैषिणा ॥
पुनर्नवस्यार्द्धपलं नवस्य
पिष्टं पिबेदूर्ध्वः पयसार्द्धमासम् ।
मासत्रयं तत्त्रिगुणं समां वा
जीर्णोऽपि भूयः स पुनर्नवः स्यात् ॥
ये मासमेकं स्वरसं पिबन्ति
दिने दिने भृङ्गरजःसमुत्थम् ।
क्षीराशिनस्ते बलवीर्य्ययुक्ताः
समाशतं जीवनमाप्नुवन्ति ॥
घृतावरी सिद्धतिका गुडूची
सहस्रिकर्णा सहतालमूली ।
एतानि कृत्वा समभागयुक्ता-
न्याज्येन किंवा मधुनावलिह्यात् ॥
जरारुजान्तत्वविमुक्तदेहो
भवेन्नरो वीर्य्यबलादियुक्तः ।
विभाति देवप्रतिमः स नित्यं
प्रभामयो भूरिविशुद्धबुद्धिः ॥
पीताश्वगन्धा पयसार्द्धमासं
घृतेन तैलेन सुखाम्बुना वा ।
वीर्य्यस्य पुष्टिं वपुषो विधत्ते
बालस्य शुष्कस्य यथाम्बुवृष्टिः ॥
अयःपलं गुग्गुलुरत्र योज्यः
पलत्रयं घोषफलानि पञ्च ।
पलानि चाष्टौ त्रिफलारजश्च
कर्षं लिहन् याम्यमरत्वमेव ॥"
गोहगुग्गुलुः ।
"न केवलं दीर्घमिहायुरश्नुते
रसायनं यो विधिवत् निषेवते ।
गतिं स देवर्षिनिषेवितां शुभां
प्रपद्यते ब्रह्म तथैव चाक्षयम् ॥"
इति रसायनाधिकारे भावप्रकाशः ॥
(तथा च ।
"लाभोपायोद्भिशस्तानां रसादीनां रसायनम् ।
पूर्वे वयसि मध्ये वा तत् प्रयोज्यं जितात्मनः ।
स्निग्धस्य मृतरक्तस्य विशुद्धस्य च सर्व्वथा ॥
नाविशुद्धे शरीरे हि युक्तो रसायनो विधिः ।
वाजीकरो वा मलिने वस्त्रे रङ्ग इवाफलः ॥"
"रसायनानां द्विविधं प्रयोगमृषयो विदुः ।
कुटीप्रावेशिकं मुख्यं वातातपिकमन्यथा ॥
निर्व्वाते निर्भये हर्म्ये प्राग्योपकरणे पुरे ।
दिशुदीच्यां शुभे देशे त्रिगर्भां सूक्ष्मलोचनाम् ॥
धूमातपरजोव्यालस्त्रीमूर्खांद्यविलङ्घिताम् ।
सच्चवेद्योपकरणां सुगुप्तां कारयेत् कुटीम् ॥
अथ पुण्येऽह्नि संपूज्य पूर्व्वास्तां प्रविशेच्छुचिः ।
तत्र संशोधनैः शुद्धः सुखी जातबलः पुनः ॥
ब्रह्मचारी धृतियुतः श्रद्दधानो जितेन्द्रियः ।
दानशीलदयासत्यव्रतधर्म्मपरायणः ॥
देवताद्युक्तितो युक्तो युक्तस्वप्नप्रजागरः ।
प्रियौषधः पेशलवाक् प्रारभेत रसायनम् ॥
हरीतकीमामलकं सैन्धवं नागरं वचाम् ।
हरिद्रां पिप्पलीं वेल्लं गुडूचीस्वरसेन पिबेत् ॥
स्निग्धः स्निग्धो नरः पूर्व्वं तेन साधु विरिच्यते ।
ततः शुद्धशरीराय कृतसंसर्ज्जनाय च ॥
चिराय पञ्चरात्रं वा सप्ताहं वा घृतान्वितम् ।
दद्यादृषभकमाशुद्धेः पुराणगुडतोऽथ वा ॥
इत्थं संस्कृतकोष्ठस्य रसायनमुपाहरेत् ।
यस्य यद्यौगिकं पश्येत् सर्व्वमालोच्य सात्मा-
वित् ॥"
"कुटीप्रवेशः क्षणिनां परिच्छदवतां हितः ।
अतोऽन्यथा तु ये तेषां सूर्य्यमारुतिकोविधिः ॥
वातातपसहायोगा वक्ष्यन्तेऽतो विशेषतः ।
सुखोपचारा भंगेऽपि ये न देहस्यबाधकाः ॥"
इत्युत्तरस्थानीयवाग्भटे ३९ अध्याये ॥
विशेषस्तु तस्मिन्नध्याये ज्ञातव्यः ॥ * ॥ रसः पारदः लक्षणया तज्जातीय-हरितालादिकञ्च अयनं आश्रय उपायो वा यस्य तत् । स्वर्णादिकरणम् ।

अथरसायने ईश्वर उवाच ।
"गोमूत्रं हरितालञ्च गन्धकञ्च मनःशिलाम् ।
समं समं गृहीत्वा तु यावत् शुष्यति पेषयेत् ॥
एकादशदिनं यावत् यत्नेन रक्षयेत् शुचिः ।
मर्दनेन धूपदीपादिनैवेद्यैर्दुग्धमिश्रितैः ॥
मन्त्रस्तु ॐ हरिहराय रसायनं सिद्धिं कुरुकुरु स्वाहा । अयुतजपेन सिद्धिः ।
तद्वटीं गोलकं कृत्वा वस्त्रेणावेष्टयेत् पुनः ।
मृत्तिकां लेपयेत्तस्य च्छायाशुष्कन्तु कारयेत् ॥
गर्त्ते कुड्ये विनिक्षिप्ते पलाशांगारवह्निना ।
ज्वालयेदृष्टयामन्तु नान्यथा शङ्करोदितम् ॥
तद्वज्र जायते सिद्धिर्व्विद्धि सिद्धिसमाकुलम् ।
ताम्रपात्रे अग्निमध्ये बिन्दुमात्रं नियच्छति ॥
तत्क्षणाज्जायते स्वर्णं नान्यथा शङ्करोदितम् ।
दातव्यं गुरुभक्ताय न दद्याद्दुष्टमानसे ।
सिद्धपीठे भवेत्सिद्धिर्गायत्रीलक्षजापनैः ॥
यस्मै कस्मै न दातव्यं दातव्यं शिवभक्तके ।
अग्निमुखं द्विजातीनां पाचकानां विशेषतः ॥
गोप्यं गोप्यं महागोप्यं देवानामपि दुर्लभम् ॥"

प्रकारान्तरम् ।
"आनीय बहुयत्नेन सत्त्वं लोलकद्वयम् ।
वसुरादौ शिवक्षाद्यं मायाबिन्दुसमन्वितम् ॥
बीजत्रयक्षाष्टशतं प्रजपेत् सत्त्वलोपरि ।
अग्नौतितोलकमानं क्षणाधेनुसमुद्भवम् ॥
दुग्धमानीय यत्नेन चाष्टोत्तरशतं जपेत् ।
वस्त्रयुक्तेन सूत्रेण दुग्धमध्ये विनिक्षिपेत् ॥
उत्तापं ज्वालयेद्धीमान् मन्दमन्देन वह्निना ।
रिपुर्वेदार्द्धपर्य्यन्तमर्द्धशोषं भवेद्यदि ॥
तदैवोत्तोल्य तद्द्रव्यं दुग्धं तोये विनिक्षिपेत् ॥"
ततः परीक्षा कर्त्तव्या ।
"निर्धूमं पावके द्रव्यं दृष्ट्वा उत्थाप्य यत्नतः ।
तत्रैव प्रजपेन्मन्त्रं सर्व्वबन्धनमात्मकम् ॥
सार्द्धेन तोलकं ताम्रं दृष्ट्वा उत्थाप्य यत्नतः ।
गुञ्जाप्रमाणं तद्द्रव्यं सत्यं सत्यं हि शङ्करि ! ।
रौप्यं भवति तद्द्रव्यं नान्यथा शङ्करोदितम् ॥"

प्रकारान्तरम् ।
"क्षणसर्पमेकं गृहीत्वा तस्य मुखे शिववीर्य्यं पूरयित्वा सर्पस्य मुखं गुदञ्च बद्ध्वा नूतनमृण्मय-स्थालीमध्ये संस्थाप्य स्थालीमुखं मृदादिना संलिप्य निर्ज्जनस्थाने प्रातरारभ्य पुनःप्रातर्यावत् वह्निना ज्वालं दद्यात् । ततः शुभक्षणे स्थालीमुखमुद्घृत्य सर्पभस्म विहाय शिववीर्य्यं गृह्णीयात् । ततस्तोलकमितं ताम्रं गालयित्वा तस्मिन् गालिततास्रे रक्तिकमात्रं सत् शिववीर्य्यं दद्यात् तेन तत्क्षणादेव तत्ताम्रं सुवर्णीभूतम् । आदौ शिवाक्षेन क्षत्वा पश्चात् प्रयोग एष कर्त्तव्यः ॥" इति दत्तात्रेयतन्त्रे ईश्वरदत्तात्रेय-संवादे रसायनं नाम त्रयोदशः पटलः ॥)

रसायनः, पुं, गरुडः । विष्णुः । इति मेदिनी ॥

रसायनफला, स्त्री, (रसायनेन फलति या । फल् + अच् । टाप् ।) हरीतकी । इति त्रिकाण्डशेषः ॥

रसायनश्रेष्ठः, पुं, (रसायनेषु श्रेष्ठः ।) पारदः । इति राजनिर्घण्टः ॥

रसायनी, स्त्री, (रसान् तैलादीन् अयते प्राप्नोतीति । अय् + ल्युः । ङीष् ।) गुडूची । काकमाची । महाकरञ्जः । गोरक्षदुग्धा । मांसरोहिणी । इति राजनिर्घण्टः ॥ (मञ्जिष्ठा । अस्याः पर्य्यायो यथा,—
"मञ्जिष्ठा विकसा जिङ्गी समङ्गा कालमेषिका ।
भृङ्गकपर्णी भण्डीरी भण्डी योजनवल्लयपि ॥
रसायन्यरुणा काला रक्ताङ्गी रक्तयष्टिका ।
भण्डीतकी च गण्डीरी भङ्गुषा वक्त्ररञ्जिनी ॥"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥)

रसालं, क्ली, (रसं आलातीति । आ + ला + कः ।) सिक्थकम् । मोमम् । इति मेदिनी ॥

रसालः, पुं, (रसं आलाति गृह्णाति । आ + ला + कः ।) इक्षुः । आम्रः । इत्यमरः ॥ (यथा, साहित्यदर्पणे १० परिच्छेदे अतिशयोक्त्यलङ्कारे ।
"प्रागेव हरिणाक्षीणां चित्तमुत्कलिकाकुलम् ।
पाश्चादुद्भिन्नवकुलरसालसुकुलश्रियः ॥")

रसः । इति शब्दरत्नावली ॥ कुन्दरत्नम् ॥ गोधूमः । पुण्ड्रकनामेक्षुः । इति राजनिर्घण्टः ।

रसालसा, स्त्री, (रसेन अलसा ।) नाड़ी । इति शब्दचन्द्रिका ॥

रसाला, स्त्री, (रसान् आलातीति । आ+ला +कः । टाप् ।) रसना । दूर्व्वा । विहारी । इति मेदिनी ॥ द्राक्षा । इति शब्दरत्नावली ॥ शिखरिणी । तत्पर्य्यायः । माञ्जिता २ । इत्यमरः ॥ तस्याः करणप्रकारो यथा,—

"आदौ माहिषमम्लमम्बुरहितं दध्याढकं प्रकरां
शुभ्रां प्रस्थयुगोन्मितां शुचिपटे किञ्चिच्च
कञ्चित् क्षिपेत् ।
दुग्धेनाढ्यघनेन मन्थनवस्त्राल्पां दृढं स्रावये-
देलाबीजलवङ्गचन्द्रमरिचैर्योग्यैश्च तद्योजयेत् ॥
भीमेन प्रियभोजनेन रचिता नाम्ना रसाला
स्वयं
श्रीकृष्णेन पुरा पुनःपुनरियं प्रीत्या समा-
स्वादिता ।
एषा येन वसन्तवर्জ্জितदिने सेव्या परं नित्यश-
स्तस्य स्यादतिवीर्य्यवृद्धिरनिशं सर्व्वेन्द्रियाणां
बलम् ॥
ग्रीष्मे तथा शरदि ये रविशोषिताङ्गा
ये च प्रमत्तवनितासुरतातिखिन्नाः ।
ये चापि मार्गपरिसर्पणशीर्णगात्रा-
स्तेषामियं वपुषि पोषणमाशु कुर्य्यात् ॥
रसाला शुक्रला बल्या रोचनी वातपित्तजित् ।
दीपनी हृंहणी स्निग्धा मधुरा गुरुगुरा सरा ।
रक्तपित्तं क्षयं दाहं प्रतिश्यायं विनाशयेत् ॥"
इति राजनिर्घण्टः ॥

अपि च ।

द्रोणार्द्धकमीषदम्लमधुरं खण्डस्य चन्द्रद्युतेः
पं क्षौद्रपलञ्च पञ्च हविषः शुण्ठ्याश्चतुर्म्मोष-
कान् ।
एलामाषचतुष्टयं मरिचतः कर्षं लवङ्गं तथा
भृत्वा शुक्लपटे घृनेः करतलेनोन्मथ्य विस्रा-
वयेत् ॥
नङ्गाब्धे रगनाभिचन्द्रनरसक्षेऽगुरुक्षूपिते
कर्पूरेण सुगन्धितं तदखिलं संलोड्य संस्थाप-
येत् ।
स्वार्थं मथुरेश्वरेण रचिता क्षौद्रा रसाला
स्वयं
भोक्तुम्मन्मथदीपनी सुखकरी कान्तेव नित्यं
प्रिया ॥"
इति भावप्रकाशः ॥

रसालिङ्गा, स्त्री, शीर्णनाला । इति शब्दचन्द्रिका ॥ चाकुलिया इति भाषा ॥

रसाली, स्त्री, (रसान् आलाति या । आ+ला+कः । ङीप् ।) पुरुकेचुः । इति राजनिर्घण्टः ॥

रसाश्वासा, स्त्री, मलाशौलता । इति राजनिर्घण्टः ॥

रसास्वादः, पुं, (रसस्य आस्वादः ।) अखण्डवस्त्वनवलम्बनेनापि चित्तवृत्तेः सविकल्पानन्दास्वादनम् । समाध्यारम्भसमये सविकल्पानन्दास्वादनं वा । इति वेदान्तसारः ॥*॥ "चतुर्थं विघ्नमाह अखण्डेति । उक्तसविकल्पकसमाध्योर्म्मध्ये द्वितीयः शब्दाननुविद्धस्फिुटीविशिष्टस्तस्मिन् य आनन्दो बाह्यशब्दादिविषयप्रपञ्चभारत्यागप्रयुक्तो नतु चैतन्यप्रयुक्तः । यथा निधिग्रहणाय प्रवृत्तस्य निधिपरिपालकभूतप्रेताद्यावृतस्य निधिप्राप्तेः अभावेऽपि भूताद्यनिष्टनिवृत्तिमात्रेण कोऽपि महानानन्दो भवति तथा सविकल्पकसमाधावखण्डवस्त्वनवलम्बनेन नित्यानन्दरसास्वादनाभावेऽपि अनिष्टबाह्यप्रपञ्चनिवृत्तिजन्यानन्दं सविकल्पकरूपं ब्रह्मानन्दभ्रमेण स्वादयति तद्रसास्वादनमित्यर्थः । लक्षणान्तरमाह समाधौत्यादि । निर्व्विकल्पकसमाध्यारम्भकाले अनुभूय मानसविकल्पकानन्दत्यागासहिष्णुतया पुनस्तस्यैवास्वादनं रसास्वाद इत्यर्थः ।" इति सुबोधव्याख्या तट्टीका ॥

रसास्वादी, [न्] पुं, (रसं मधु आस्वादयितुं शीलमस्य । आ+स्वद्+णिनिः ।) भ्रमरः । इति शब्दमाला ॥ रसास्वादविशिष्टे, त्रि ॥

रसाङ्कः, पुं, (रसः आङ्का आख्या यस्य ।) सरलद्रवः । इति रत्नमाला ॥

रसिकः, पुं, (रसोऽस्यास्तीति वा । रस्+ठन् ।) सारसपक्षी । इति राजनिर्घण्टः ॥ तुरङ्गः । हस्ती । इति सारस्वतः ॥ सरसे, त्रि । इति मेदिनी ॥ (यथा, भागवते । १ । १ । ३ ।

"पिबत भागवतं रसमालयं
महुरहो रसिका भुवि भावुकाः ॥")

रसिका, स्त्री, (रसिक+टाप् ।) रसाला । इक्षुरसः । इति मेदिनी ॥ काञ्ची । रसना । इति विश्वः ॥

रसिकेश्वरः, पुं, (रसिकानां रसज्ञानामीश्वरः ।) श्रीकृष्णः । यथा,—

"वृन्दावनान्तरे रम्ये रासोत्सवसमुत्सुकम् ।
रासमण्डलमध्यस्थं नमामि रसिकेश्वरम् ॥"
इति ब्रह्मवैवर्त्ते गणपतिखण्डे ३२ अध्यायः ॥
(रसिकश्रेष्ठश्च ॥)

रसितं, क्ली, (रस शब्दे+भावे क्तः ।) मेघनिर्घोषः । इत्यमरः ॥ रुतम् । स्वर्णादिखचिते, त्रि । इति मेदिनी ॥

रसुनः, पुं, (रस+उनन् ।) लशुनः । इति शब्दचन्द्रिका ॥ (विवरणमस्य रसोनशब्दे ज्ञातव्यम्॥)

रसेन्द्रः,, पुं, (रसानां धातुरसानामिन्द्रः श्रेष्ठः ।) पारदः । इति राजनिर्घण्टः ॥ (यथा, भावप्रकाशे । १ । १ ।

"असाध्यो यो भवेद्रोगो यस्य नास्ति चिकित्सितम् ।
रसेन्द्रो हन्ति तं रोगं नरकुञ्जरवाजिनाम् ॥"
अस्य पर्य्यायादिकं रसशब्दे द्रष्टव्यम् ॥)

रसोत्तमः, पुं, (रसेषु उत्तमः । यद्वा, रसः उत्तमोऽस्य ।) सूपः । इति राजनिर्घण्टः ॥ श्रेष्ठरसश्च ॥

रसोद्भवं, क्ली, (रसात् प्रारब्धातोरुद्भवतीति । उत्+भू+अच् ।) हिङ्गुलम् । इति राजनिर्घण्टः ॥ रसजाते, त्रि ॥

रसोनः, पुं, (रसेनैकेनोनः ।) रसुनः । इति राजनिर्घण्टः ॥ (तस्योत्पत्तिर्यथा,—

"राहोरुद्गतचौर्य्येण लूनात् ये पतिता गलात् ।
अमृतस्य कणा भूमौ ते रसोनत्वमागताः ॥
द्विजा नाश्नन्ति तमतो दैत्यदेहसमुद्भवम् ।
साक्षादमृतसम्भूतेर्गामणीः सरसायनम् ॥"
इति वाभटे उत्तरस्थाने ३९ अध्यायः ॥

"अथ वीर्य्यञ्च वक्ष्यामि रसोनस्य महामते ।
रसेश्च पञ्चभिर्युक्तो रसोनस्तेन वर्জ্জितः ॥
"दृष्ट्वा वातादिशमनो रसोनो विहितो बुधैः ।
जाङ्गलानि रसान्येव भोजनार्थे प्रदापयेत् ॥"
इति हारीते कल्पस्थाने तृतीयेऽध्याये ॥
अथास्यगुणाः ।
"रसोनो हृंहणो वृष्यः स्निग्धोष्णः पाचनः सरः ।
रसे पाके च कटुकस्तीक्ष्णो मधुरको मतः ॥
भग्नसन्धानकृत्कण्ठ्यो गुरुः पित्तासृदृद्धिदः ।
बलवर्णकरो मेधाहितो नेत्र्यो रसायनः ॥"
इति च भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥
अन्यद्विवरणमस्य रसोनकशब्दे लशुनशब्दे च द्रष्टव्यम् ॥)

रसोनकः, पुं, (रसोन+स्वार्थे कन् ।) रसुनः । तत्पर्य्यायः ।

"लशुनस्तु रसोनः स्यादुग्रगन्धो महौषधम् ।
अरिष्टो म्लेच्छकन्दश्च यवनेष्टो रसोनकः ॥"
तस्योत्पत्तिर्यथा,—

"यदाऽमृतं वैनतेयो जहार सुरसत्तमात् ।
तदा ततोऽपतद्बिन्दुः सुरसोनोऽभवद्भुवि ॥
पञ्चभिश्च रसैर्युक्तो रसेनाम्लेन वर्জ্जितः ।
तस्माद्रसोन इत्युक्तो द्रव्याणां गुणवेदिभिः ॥"
अस्यावयवगुणाः ।
"कटुकश्चापि मूलेषु तिक्तः पत्रेषु संस्थितः ।
नाले कषाय उद्दिष्टो नालाग्रे लवणः स्मृतः ।
बीजे तु मधुरः प्रोक्तो रसस्तद्गुणवेदिभिः ॥"
अस्य भक्षणगुणाः ।
"रसोनो हृंहणो वृष्यो स्निग्धोष्णः पाचनः सरः ।
रसे पाके च कटुकस्तीक्ष्णो मधुरको मतः ॥
भग्नसन्धानकृत् कण्ठ्यो गुरुः पित्तासृदृद्धिदः ।
बलवर्णकरो मेधाहितो नेत्र्यो रसायनः ॥
कृच्छ्रोगजीर्णज्वरकुष्ठिशूल-
विबन्धगुल्मारुचिकासगोपान् ।
दुर्नामकुष्ठानलसादजन्तु-
समीरणश्वासकफांश्च हन्ति ॥
मद्यं मांसं तथान्नञ्च हितं लशुनसेविनाम् ॥
व्यायाममातपं रोषमतिनीरपयो गुडम् ।
रसोनमग्नं पुरुषस्त्यजेदेतन्निरन्तरम् ॥"
इति भावप्रकाशः ॥
(तथास्याश्चा विवृतिर्यथा,—
"अमृतमथने जातः सुरासुरयज्ञो महान् ।

जहार वैनतेयश्च चक्षुना चिदिवं गतः ॥
संग्रामश्रमसम्प्राप्ते श्रमवेगप्रधाविते ।
आरूढे वैक्लवं प्राप्ते च्युता ह्यस्रबिन्दवः ॥
सकृत् सन्दूषिते देहे पतितास्तत्र संस्थिताः ।
तस्मात् कालवशाज्जातं दुर्भिक्षं द्वादशाब्दि-
कम् ॥
विशुष्काः कानने सर्व्वा वृक्षकाष्ठप्रतानिकाः ।
तस्माच्च कानने सर्व्वे प्रकृष्टं गहनं गताः ॥
तेषां मध्ये जराग्रस्तो गतिहीनोऽतिजर्जरः ।
सयष्टिः सरणिच्युतः क्षीणदन्तावलीमुखः ॥
सक्षुत्क्षामैः क्षुधापन्नैः ऋषिभिस्तत्र विस्मृतः ।
सोऽपि क्षुधातुरः सर्व्वां पर्य्यटन्नुर्व्वरां महीम् ॥
कुत्रचित् पुण्ययोगेन दृष्टवान् विटपान् शुभान् ।
नीलग्रैवालसङ्काशान् प्राङ्गलान् बहुलान्
भुवि ।
क्षुधासंपीड़नेनापि भक्षवान् साङ्गलानपि ॥
षण्मासानन्तरे शुष्कान् विटपान् तदनन्तरम् ।
भक्षवान् कन्दकान् सोऽपि मासमेकं तथा
ऋषिः ॥
पश्चात् सुभिक्षे सञ्जाते सर्व्वे चैकत्र संस्थिताः ।
सोऽपि दृष्टो युवा भूत्वा गतस्तत्र च यत्र ते ॥
तं दृष्ट्वा विस्मयापन्नाः पप्रच्छुः किं कृतं त्वया ।
ऊचिवान् सोऽपि किञ्चित्र ऋषा तैः प्रापित-
स्ततः ॥
यत्त्वया खादितं द्रव्यं तदभक्ष्यं द्विजातिभिः ।
दुर्गन्धमपि चित्रञ्च तस्माज्जातं रसोनकम् ॥"
"तेन रसोनकं नाम विख्यातं भुवनत्रये ।
कुक्कुटाण्डनिभं ग्रीष्मे प्रौर्णपर्णं समुद्धरेत् ॥
बद्ध्वा पुटे सुनिर्गन्धं धारयेत्तन्महामते ।
दोषाग्निदर्शनात्तेन म्रियते दीर्य्यते भुवि ॥
वर्षासु शिशिरे चैव कारयेन्मात्रया युतम् ।
रामठं जीरके द्वे च अजमोदाकटुत्रयम् ॥
घृतसौवर्चलोपेतं वातरोगे विशेषतः ।
मातुलुङ्गरसेनापि शूलानाहे प्रकीर्त्तितः ॥"
इति हारीते कल्पस्थाने तृतीयोऽध्याये ॥
अस्यान्यत् द्विजाभक्ष्यत्वकारणादिकं रसोनशब्दे
द्रष्टव्यम् ॥)

रसोपलं, क्ली, (रसवत् पारद इव उपलम् ।) मौक्तिकम् । इति त्रिकाण्डशेषः ॥

रस्यं, क्ली, (रस+"तृषिमृषिकृसिभ्यः कित् ।" उणा० ३ । १२ । इति नप्रत्ययः । कित्वात् टेर्लोपः ।) द्रव्यम् । इति सिद्धान्तकौमुद्यामुणादिवृत्तिः ॥

रस्यं, क्ली, (रसात् भुक्तान्नादिपरिपाकात् आगतमिति । रस+यत् ।) रक्तम् । इति शब्दचन्द्रिका ॥ (यथा, महाभारते । १४ । ५० । ३२ ।
"यत्नेव गन्धिनो रस्यं नरूपं स्पर्शशब्दवत् ॥"
रसयुक्ते, त्रि । यथा, भगवद्गीतायाम् । १७ । ८ ।
"रस्याः स्निग्धाः स्थिरा हृद्या आहाराः
सात्त्विकप्रियाः ॥")

रस्या, स्त्री, (रसाय हिता । रस्+यत् । टाप् ।) राम्ना । (अस्याः पर्य्यायो यथा,—
"राम्ना युक्तरसा रस्या सुवहा रसना रसा ।
एलापर्णी च सुरसा सुगन्धा श्रेयसी तथा ॥"
इति भावप्रकाशस्य पूर्ब्बखण्डे प्रथमे भागे ॥)
पाठा । इति राजनिर्घण्टः ॥

रंह, तृ क गतौ । इति कविकल्पद्रुमः ॥ (अदन्त चुरा०-परः-सक०-सेट् ।) रंहयति रंहापयति । इति दुर्गादासः ॥

रंहः, [स्] क्ली, (रंह+"रमेश्च ।" उणा० ४ । २१३ । इति असुन् हुगागमश्च । "अहि रहिभ्यामसुन् इत्यहो रंह इति धातुप्रदीपः ।" इत्युज्ज्वलः ।) वेगः । तत्पर्य्यायः । तरः २ रयः ३ स्वदः ४ यवः ५ । इत्यमरः ॥ रंघः ६ यवनः ७ । इति तट्टीका ॥ (यथा, रघुः । २ । ३४ ।
"न पादपोन्मूलनशक्ति रंहः
शिलोच्चये मूर्च्छति मारुतस्य ॥")

रह, त्यजि । इति कविकल्पद्रुमः ॥ (भ्वा०-परः-सक०-सेट् ।) रहति सुखं दीनः । इति दुर्गादासः ॥

रह, इ ड गत्याम् । इति कविकल्पद्रुमः ॥ (भ्वा०-आत्म०-सक०-सेट् ।) इ, रंह्यते । इति दुर्गादासः ॥

रह, तृ क त्यागे । इति कविकल्पद्रुमः ॥ (अदन्त चुरा०-परः-सक०-सेट् ।) रहयति श्लोकं धीरः । इति दुर्गादासः ॥

रहः, [स्] क्ली, (रमन्तेऽस्मिन् । रह+"देशे ह च ।" उणा० ४ । २१४ । इति असुन्प्रत्ययः । हकारस्यान्तादेशः । "रह त्यागे अस्मादसुनि रह इति धातुप्रदीपः ।" इत्युज्ज्वलः ।) निर्ज्जनम् । तत्पर्य्यायः । विविक्तः २ विजनः ३ छन्नः ४ निःशलाकः ५ रहः ६ उपांशुः ७ इत्यमरः ॥ (यथा, रघौ । ३ । ३ ।
"तदाननं स्तब्धमुरभि क्षितीश्वरः
रहस्युपाघ्राय न तृप्तिमाययौ ॥")
तत्त्वम् । रतिः । गुह्यम् । इति मेदिनी ॥

रहः, [स्] अ, विजनम् । इत्यमरः ॥
"रहो निधुवनेऽपि स्याद्रहो गुह्ये नपुंसकम् ॥"
इति रभसश्च ॥
"देशादन्यत्र रहोऽयं शब्दान्तरं वास्ति सुरतवाचकम् ।" इत्युज्ज्वलः । ४ । २१४ ॥)

रहस्यं, त्रि, (रहसि भवम् । रहस्+दिगादित्वात् यत् । इत्युज्ज्वलः । ४ । २१४ ।) गोपनीयम् । रहसि भवम् । इति मेदिनी अमरश्च ॥
रहस्यरोमस्पर्शनिषेधो यथा,—
"न सर्पशल्लेः क्रीड़ेत स्वानि स्वानि न संस्पृशेत् ।
रोमाणि च रहस्यानि नाग्निदष्टेन सदा व्रजेत् ॥"
इति कौर्म्मे १५ अध्यायः ॥

रहस्या, स्त्री, (रहस्य+टाप् ।) नदीभेदः । इति मेदिनी ॥ (यथा, महाभारते । ६ । ६ । १८ ।
"रहस्यां घृतकुम्भां च सरयूं च नरेश्वर ! ॥")
राम्ना । पाठा । इति राजनिर्घण्टः ॥

रहितं, त्रि, (रह+क्तः ।) वर्ज्जितम् । यथा,—
"जातस्तकमादौ च अन्ते च मृतसूतकम् ।
गुरोस्तद्रहितं कृत्वा जपकर्म्म समाचरेत् ॥"
इति तन्त्रसारः ॥
अपि च ।
"दिग्भ्रोऽब्दाब्धिरहितो जन्मर्क्षाद्यो भगैर्युतः ।
भं भवेदब्दवेदैश्च योगेऽप्येवं विचिन्तयेत् ॥"
इति जातकपद्धतिः ॥

रा, ल दाने । ग्रहणे । इति कविकल्पद्रुमः ॥ (अदा०-परः-सक०-अनिट् ।) ला, राति । इति दुर्गादासः ॥

राः, स्त्री, (रा+सम्पदादित्वात् क्विप् ।) विभ्रमः । दानम् । इत्येकाक्षरकोषः ॥ काञ्चनम् । इति शब्दरत्नावली ॥

राः, [रै] पुं, (रा दाने+"राते डैः ।" उणा० २ । ६६ । इति डैः ।) धनम् । (यथा, भागवते । ३ । २५ । ३८ ।
"आत्मानमत्र ये चेह ये रायः पशवो
गृहाः ॥")
स्वर्णम् । इत्यमरः ॥ शब्दः । इति शब्दरत्नावली ॥ (स्त्री, श्रीः । यथा, ऋग्वेदे । १० । १११ । ७ ।
"स चन्तयद्दुषसः सूर्य्येण चित्रामस्य केतवो
रामविन्दन् ॥"
"चित्रां नानावर्णां रां रायं श्रियमविन्दन् अलभन्त ।" इति तद्भाष्ये सायणः ॥)

राका, स्त्री, (रा दाने+"क्रदाधारार्चिकलिभ्यः कः ।" उणा० ३ । ४० । इति कः । बहुलवचनादेव न ङीषः ।) नदीविशेषः । (सा च प्राक्शाल्मलीद्वीपस्थानां नदीनामन्यतमा । यथा, भागवते । ५ । २० । १० ।
"तेषु वर्षाद्रयो नद्यश्च सप्तैवाभिज्ञाताः । सुरसः घृतपृष्ठो वामदेवः कुन्दः कुसुदः पुष्पावर्षः सहस्रश्रुतिरिति । अनुमती सिनीवाली सरस्वती कुहू रजनी नन्दा राकेति ॥")
कण्डूरोगः । नवजातरजःस्त्री । (रायते दीयते देवेभ्य हविर्यस्याम् । इति निघण्टुटीकायां देवराजयज्वा । ५ । ५ । २१ ।) सम्पूर्णेन्दुतिथिः । इति मेदिनी ॥ (यथा, ऋग्वेदे । २ । ३२ । ४ ।
"राकामहं सुहवां सुष्टुतीहुवे
शृणोतु नः सुभगा बोधतुत्मना ॥"
"संपूर्णचन्द्रा पौर्णमासी राका ।" इति सायणः ॥
राक्षसीविशेषः । सा च खरस्य शूर्पणखायाश्च जननी । यथा, महाभारते । ३ । २७४ । १-८ ।
मार्कण्डेय उवाच ।
"पुलस्त्यस्य तु यः क्रोधाद्देहोऽभवन्मुनेः ।
विश्रवा नाम सक्रोधः स वैश्रवणमैक्षत ॥
बुबुधे तन्तु सक्रोधं पितरं राक्षसेश्वरः ।
कुबेरस्तत्प्रसादार्थं यतते स्म सदा नृप ! ॥
स राजराजो लङ्कायां निवसन्नरवाहनः ।
राक्षसीः प्रददौ तिस्रः पितुर्वै परिचारिकाः ॥
ताः सदा तं महात्मानं सन्तोषयितुमुद्यताः ।
ऋषिं भरतशार्दूल ! नृत्यगीतविशारदाः ॥

पुष्पोत्कटा च राका च मालिनी च विभ्रां पते।
अन्योऽन्यसङ्ख्या राजन्! श्रेयस्कामाः सुमध्यमाः॥
स तासां भगवांस्तुष्टो महात्मा प्रददौ वरान्।
लोकपालोपमान् पुत्रानेकैकस्या यथेप्सितान्॥
पुष्पोत्कटायां जज्ञाते द्वौ पुत्रौ राक्षसेश्वरौ।
कुम्भकर्णदशग्रीवौ बलेनाप्रतिमौ भुवि॥
मालिनी जनयामास पुत्रमेकं विभीषणम्।
राकायां मिथुनं जज्ञे खरः शूर्पणखा तथा॥")

राक्षसः, पुं, रक्षन्त्यस्मात् रक्षः रक्ष एव राक्षसः। तत्पर्य्यायः। कौणपः २ क्रव्यात् ३ क्रव्यादः ४ असपः ५ आशुरः ६ रात्रिञ्चरः ७ रात्रिञ्चरः ८ कर्व्वुरः ९ निकषात्मजः १० यातुधानः ११ पुण्यजनः १२ नैर्ऋतः १३ यातु १४ रक्षः १५। इत्यमरः॥ सत्त्वाबलः १६ क्षपाटः १७ रजनीचरः १८ कीलापाः १९ नृचक्षाः २० नक्तञ्चरः २१ पलाशी २२ पलाशुः २३ भूतः २४। इति शब्दरत्नावली॥ नीलाम्बरः २५ कल्माषः २६ कटपूः २७ अगिरः २८ कीलालपाः २९ नरधिषणः ३०। इति जटाधरः॥
तस्योत्पत्तिर्यथा,—
"रजोभाचात्मिकामेव ततोऽन्यां जग्रहे तनुम्।
ततः क्षुद्ब्रह्मणो जाता जज्ञे कोपाश्रयात्ततः॥
क्षुत्क्षामानन्याकारांश्च सोऽहजद्भगवांस्ततः।
विरूपाः श्मश्रुला जातास्तेऽभ्यधावन्त तं प्रभुम्॥
नैवं भो रक्ष्यतामेष तैरुक्तं राक्षासास्तु ते॥"
इति वह्निपुराणम्॥ * ॥
अपि च।
"रक्षोगणं क्रोधवशात् खनाभानमजीजनत्।
दंष्ट्रिणां निर्ऋतं तेषां भीमसेनान्नतं क्षयम्॥"
इति मात्स्ये आदिसर्गे कश्यपान्वयनाम ६ अध्यायः॥ * ॥ राक्षसभोज्यान्नानि यथा,—
"क्षुत्कीटाद्युपपन्नञ्च यच्चोच्छिष्टान्वितं भवेत्।
केशावपन्नमाधूतं मारुतश्वासवच्चवेत्॥
एभिः संसृष्टमन्नञ्च भागो वै रक्षसो भवेत्।
तस्माज्ज्ञात्वा सदा विद्वानन्नान्येतानि वर्জ्जयेत्॥
राक्षसा नाम ये प्रोक्तास्ते भुञ्जन्त्यन्नमीदृशम्॥"
इति वामनपुराणे ३६ अध्यायः॥ * ॥
तेषां विहारः सूर्य्यलोकादधः। यथा,—
"अन्तरीक्षचरा ये च भूतप्रेतपिशाचकाः।
वर्জ्जयित्वा रुद्रगणांस्ते तत्रैव चरन्ति हि॥
नोर्द्धं विक्रमणे शक्तिस्तेषां सम्भूतपाप्मनाम्।
अत ऊर्द्धं हि विप्रेन्द्र राक्षसा ये क्षतैनसः।
ते तु सूर्य्यादधः सर्व्वे विहरन्त्यूर्द्धवर्জ्जिताः॥"
इति पाद्मे स्वर्गखण्डे १५ अध्यायः॥ * ॥
(अनेनाधिष्ठितस्य रोगिनो लक्षणं यथा,—
"वक्रोधदृष्टिं भ्रुकुटीमुद्वहन्तं ससंभ्रमम्।
प्रहरन्तं प्रधावन्तं शब्दन्तं भैरवाननम्॥
अन्नादिनापि बलिनं नष्टनिद्रं निशाचरम्।
निर्लज्जमशुचिं शूरं क्रूरं परुषभाषिणम्॥
रौद्रं रक्तमाल्यस्त्रीरक्तमद्यामिषप्रियम्।
दृष्ट्वा च रक्तं मांसं वा लिहानं दशनच्छदौ।
हसन्तमन्नकाले च राक्षसाधिष्ठितं वदेत्॥"
इति वाग्भटे उत्तरस्थाने चतुर्थेऽध्याये॥)
अष्टप्रकारविवाहान्तर्गतविवाहविशेषः। यथा,
"आसुरो द्रविणादानाद्गान्धर्व्वः समयान्मिथः।
राक्षसो युद्धहरणात् पैशाचः कन्यकाच्छलात्॥"
इत्युद्वाहतत्त्वम्॥
(एतल्लक्षणान्तरञ्च यथा, मनुः। ३। ३३।
"हत्वा छित्त्वा च भित्त्वा च क्रोशन्तीं रुदतीं गृहात्।
प्रसह्य कन्याहरणं राक्षसो विधिरुच्यते॥"
राक्षसविवाहस्तु क्षत्रियस्यैव प्रशस्तः। यथा, तत्रैव। ३। २४।
"चतुरो ब्राह्मणस्याद्यान् प्रशस्तान् कवयो विदुः।
राक्षसं क्षत्रियस्यैकं आसुरं वैश्यशूद्रयोः॥"
नित्यप्रजोत्पत्तिजनकतया तु ब्राह्माद्यपेक्षया राक्षसादिविवाहस्य गर्हितत्वमाह तत्रैव। ३। ४१—४२।
"इतरेषु च शिष्टेषु नृशंसानृतवादिनः।
जायन्ते दुर्विवाहेषु ब्रह्मधर्म्मद्विषः सुताः॥
अनिन्दितैः स्त्रीविवाहैरनिन्द्या भवति प्रजा।
निन्दितैर्निन्दिता नृणां तस्मान्निन्द्यान् विवर्জ्जयेत्॥"* ॥
अब्दविशेषे, पुं, क्ली। यथा, बृहत्संहितायाम्। ८। ४५।
"इन्द्राग्निदैवं दशमं युगं यत्
तत्राद्यमब्दं परिधाविसंज्ञम्।
प्रमाद्यानन्दमतःपरं यत्
स्याद्राक्षसं चानलसंज्ञितञ्च॥")
रक्षःसम्बन्धिनि, त्रि॥
राक्षसी, स्त्री, (राक्षस+ङीप्।) कौणपी। राक्षसपत्नी। यथा, रघुः। १२। ६१।
"दृष्ट्वा विचिन्वता तेन लङ्कायां राक्षसीवृता।
जानकी विषवल्लीभिः परीतेव महौषधिः॥")
दंष्ट्रा। दशनच्छदौ यावत्। इति हेमचन्द्रः॥
चण्डा घोरनामगन्धद्रव्यमिति यावत्। इति मेदिनी॥ सायाह्नवेला। यथा,—
"प्रातःकालो मुहूर्त्तांस्त्रीन् सङ्गवस्तावदेव तु।
मध्याह्नस्त्रिमुहूर्त्तः स्यादपराह्णस्ततः परम्॥
सायाह्नस्त्रिमुहूर्त्तः स्यात् आद्यं तत्र न कारयेत्।
राक्षसी नाम सा वेला गर्हिता सर्व्वकर्म्मसु॥"
इति तिथ्यादितत्त्वम्॥
राक्षसेन्द्रः, पुं, (राक्षसानामिन्द्रः।) रावणः। इति त्रिकाण्डशेषः॥ (राक्षसपतिमात्रे च। यथा, महाभारते। १। १५४। १८।
"धिक्! त्वामसति पुंश्चल्यामे मम विप्रियकारिणि।
पूर्व्वेषां राक्षसेन्द्राणां सर्व्वेषामयशस्करि॥")
राक्षा, स्त्री, (लाक्षा। रलयोरैक्यात् तस्य रत्वम्।) लाक्षा। इत्यमरः॥

राख, क्ष प्रीषालमर्थ्ययोः। इति कविकल्पद्रुमः॥ (भ्वा०-पर०-अक०-सक० च-सेट्।) प्रीषः स्नेहरहितीभावः। अलमर्थो भूषणं सामर्थ्यं निवारणञ्च। क्ष, अरराखत्। इति दुर्गादासः॥
रागः, पुं, (रञ्जनमिति रज्यतेऽनेनेति वा। रञ्ज+भावे करणे वा घञ्। "घञि च भावकरणयोः।" ६। ४। २७। इति नलोपः।) माल्यार्य्यम्। लोहितादिः। (यथा, कुमारे। ३। ३०।
"रागेण बालारुणकोमलेन
चूतप्रवालोष्ठमलञ्चकार॥")
स्नेहादिः। अनुरागः। (यथा, आर्य्यासप्तशत्याम्। २७०।
"तानवमेत्य क्षिप्रः परोपहितरागमदनसङ्कटितः।
कर्ण इव कामिनीनां न शीभते निर्भरः प्रेमा॥")
गान्धारादिः। नृपः। इति मेदिनी॥ चन्द्रः॥ सूर्य्यः। इति शब्दरत्नावली॥ लाक्षादिः। (यथा, कुमारे। ४। १६।
"तमिमं कुरु दक्षिणेतरं
चरणं निर्म्मितरागमेहि मे॥")
रक्तिमत्वित्। रञ्जनम्। इति नानार्थरत्नमाला॥ प्रीतिः। यथा,—
"वीतरागभयक्रोधस्थितधीर्मुनिरुच्यते॥"
इति भगवद्गीतायामेकटीकायां श्रीधरस्वामी॥
तस्य लक्षणं यथा,—
"सुखमप्यधिकं चित्ते सुखत्वेनैव रज्यते।
यतस्तु प्रणयोत्कर्षात् स राग इति कीर्त्यते॥"
इत्युज्ज्वलनीलमणिः॥ * ॥
(अभिमतविषयाभिलाषः। स तु पञ्चक्लेशान्तर्गतः। यथा,—
"अविद्यास्मितारागद्वेषाभिनिवेशाः पञ्चक्लेशाः। रागोऽभिमतविषयाभिलाषः।" इति विष्णुपालवधटीकायां मल्लिनाथः। ४। ५६॥
"सुखानुशयी रागः।" इति पतञ्जलिः। गानशास्त्रीयरागा यथा। भरतमते हनूमन्मते च रागः षड्विधः। तेषां नामानि यथा। भैरवः १ कौशिकः २ हिन्दोलः ३ दीपकः ४ श्रीरागः ५ मेघः ६। हनूमद्भरतयोर्म्मते प्रत्येकमेषां पञ्च रागिण्यः। सोमेश्वरकल्लिनाथयोर्म्मते प्रत्येकमेतेषां षट् रागिण्यः। एतेषां प्रत्येकमष्टौ पुत्राः एकैकपुत्रभार्य्या च। कल्लिनाथसोमेश्वरमते षड्रागा यथा। श्रीरागः १ वसन्तः २ पञ्चमः ३ भैरवः ४ मेघः ५ नटनारायणः ६। इति नानासंगीतशास्त्रम्॥ *॥
अथ रागस्य व्युत्पत्तिसंख्यास्थानानि।
"यैस्तु चेतांसि रज्यन्ते जगत्त्रितयवर्त्तिनाम्।
ते रागा इति कथ्यन्ते मुनिभिर्भरतादिभिः॥
गोपीभिर्गीतमारब्धमेकैकं कृष्णसन्निधौ।
तेन जातानि रागाणां सहस्राणि तु षोड़श॥
रागेषु तेषु षट्त्रिंशद्रागा जगति विश्रुताः।

कालक्रमेण तत्रापि ह्रास एव तु दृश्यते ।
केचिदद्यन्ति ते रागाः सर्व्वे सन्तीति निश्चितम् ॥
मेरोरुत्तरतः पूर्व्वे पश्चिमे दक्षिणे तथा ।
समुद्रकण्ठे ये देशास्तत्रामीषां प्रचारणा ॥"
तथा च । अङ्गवङ्गकलिङ्गतैलङ्गभूलिङ्गहावङ्ग-
सुरङ्गयूपलङ्गखेलाङ्गसौवीरकीरकाश्मीरनाभी-
रनाहीरसिन्धुजालन्धरमगमगधनिषधमलयहो-
हयगजाङ्गयमालवजालवमरुमूरुचोलोल्कलकु-
न्तलसिंहलहरिकेलकेरल-कोङ्कणमल्लिवालमल्ल-
भल्लसौविदल्लवातकिल्लातगुर्जरातगुर्जरकालञ्जर-
गौड़द्रविड़ौड्रान्ध्रवैदिकाष्ठीपाष्ठालसौराष्ट्रप्र-
वरलौहावरखण्डकौकणवरूपकामरूपहरिगर्भ-
विदर्भदुर्मटवाटकौकटदेवेङ्गटङ्कननाटभोटक-
वाटकरहाटकर्णाटकुन्तिकावन्तिककनकाल-
काम्यकुलभोजकाम्बोजलोजतुखारविहारवली-
हारवाणगेहविदेहवाह्लीकचञ्चरीकचित्रगर्त्ता-
र्त्तादिदेशेषु रागाः प्रचरन्तीति ।
"यस्य श्रवणमात्रेण रञ्जन्ते सकलाः प्रजाः ।
सर्व्वाधरञ्जनाह्वेतोस्तेन राग इति स्मृतः ॥"*॥
अथ रागाः ।
"आदौ मालवरागेन्द्रस्ततो भल्लारसंज्ञितः ।
श्रीरागश्च ततः पश्चाद्वसन्तस्तदनन्तरम् ॥
हिन्दोलश्चाथ कर्णाट एते रागाः षडेव तु ।६।
षट्त्रिंशद्रागिणी तत्र क्रमशः कथिता मया ॥
धानसी मालसी चैव रामकिरी च सिन्धुड़ा ।
आशावरी भैरवी च मालवस्य प्रिया इमाः ॥६
वेलावली च पुरवी कानड़ा माधवी तथा ।
कोड़ा केदारिका चापि भल्लारदयिता इमाः॥६
गान्धारी शुभगा चैव गौरी कौमारिका तथा ।
वेलोयारी च वैरागी श्रीरागस्य प्रिया इमाः॥६
तुड़ी च पञ्चमी चैव ललिता पठमञ्जरी ।
गुज्जरी च विभाषा च वसन्तस्य प्रिया इमाः॥६
मायूरी दीपिका चैव देशकारी च पाहिड़ा ।
वराड़ी मोरहाटी च हिन्दोलस्य प्रिया
इमाः ॥६॥
नाटिका चाथ भूपाली रामकेली गड़ा तथा ।
कामोदा चापि कल्याणी कर्णाटस्य प्रिया
इमाः ॥६॥३६॥*॥
अथ कालनियमः ।
"विभाषा ललिता चैव कामोदा पठमञ्जरी ।
रामकीरी रामकेली वेलोयारी च गुज्जरी ॥
देशकारी च शुभगा पञ्चमी च गड़ा तुड़ी ।
भैरवी चाथ कौमारी रागिण्यो दश पञ्च च ।
एताः पूर्व्वाह्णकाले तु गीयन्ते गायनोत्तमैः ॥
वराड़ी मायूरी कोड़ा वैरागी चाथ धानसी ।
वेलावली मोरहाटी सम्मेता रागयोषितः ।
गेया मध्याह्नकाले तु यथा भारतभाषितम् ॥
गान्धारी दीपिका चैव कल्याणी पुरवी तथा ।
कानड़ा गौरवी चैव गौरी केदारपाहिड़ा ॥
मायूरी मालसी नाटी भूपाली सिन्धुड़ा तथा ।
सायाह्णे ताश्च रागिण्यः प्रगायन्ति चतुर्दश ॥
पुरुषा वसुभूषाढ्या रागास्ते मालवादयः ।

प्रदोषे चापरार्द्धे च रजन्यां गानगोचराः ॥
दण्डद्वयात् परं रात्रौ सर्व्वेषां गानमीरितम् ।
मेघमल्लाररागस्य गानं वर्षासु सर्व्वदा ॥
श्रीपञ्चम्यां समारभ्य यावत् जन्मोत्सवं हरेः ।
तावद्वसन्तरागस्य गानमुक्तं मनीषिभिः ॥
ग्रक्रोत्थानं समारभ्य यावद्दुर्गामहोत्सवम् ।
गीयते तद्बुधैर्नित्यं मालसी सा मनोहरा ॥
सर्व्वेषामिह रागाणां रागिणीनाञ्च सर्व्वथा ।
रङ्गभूमौ नृपाज्ञायां कालदोषो न विद्यते ॥
रागच्छालापयेदादौ तत्पश्चाद्वस्तदनन्तरम् ।
नान्यथा गीतया नृपाज्ञायां न दूषणम् ॥
रागाः षड़थ रागिण्यः षट्त्रिंशद्वारु-
विग्रहाः ।
आगता ब्रह्मसदनात् ब्रह्माणं समुपासते ॥"*॥
अथ ध्यानम् ।
"नितम्बिनीचुम्बितवक्त्रपद्मः
शुकद्युतिः कुण्डलवान् प्रमत्तः ।
सङ्गीतग्रामं प्रविशन् प्रदोषे
मालाधरो मालवरागराजः ॥ १ ॥
नीलोत्पलं कर्णयुगे वहन्ती
श्यामा सुकेशी च सुमध्यभागा ।
ईषत्सहासामुखरम्यवक्त्रा
सा धानसी पद्मसुचारुनेत्रा ॥ २ ॥
करे युता चाम्बुजयुग्मरम्या
इतस्ततश्चारु विलोकयन्ती ।
कण्ठस्फरन्मौक्तिकरत्नहारा
सा मालसी संकथिता विचित्रा ॥ ३ ॥
प्रतप्तचामीकरचारुवक्त्रा
कर्णावतंसं कमलं वहन्ती ।
पुष्पं धनुः पुष्पशरैर्दधाना
चन्द्राननना रामकिरी प्रदिष्टा ॥४॥
महेन्द्रनीलद्युतिरम्बुजाक्षी
प्रवाद्यन्ती कपिलाग्रयन्त्रम् ।
विचित्ररत्नाभरणा सुकेशी
सा सिन्धुड़ा कान्तसमीपसंस्था ॥५॥
जवाप्रसूनद्युतिबिम्बवक्त्रा
सकञ्जपद्मं करयोर्दधाना ।
क्षौमांशुकाच्छादितगात्रयष्टि-
राशावरी रङ्गकिला विदग्धा ॥६॥
सरोवरस्था स्फटिकस्य मन्दिरे
सरोरुहैः शृङ्गरमर्च्चयन्ती ।
तालप्रयोगप्रतिरङ्गगीते-
र्गौरीतनुर्भैरविका सतीयम् ॥"६॥*॥
अथ मल्लारः ।
"विहारशीलोऽतिसुकान्तदेहः
कान्तप्रियो धार्म्मिकशीलयुक्तः ।
कामातुरः पिङ्गलनेत्रयुग्मो
मल्लारराग: प्रियकृत् सुवेशः ॥१॥
सङ्केतितोत्पुल्लतानिकुञ्जे
कृतस्थितिः कान्तसमागमाय ।
वेलावली चम्पकमौलिनी सा
बाला विचित्राभरणा निरुक्ता ॥२॥

रहःसु कान्तप्रियमाणपत्रं
रम्यं वहन्ती कुचकुम्भयुग्मे ।
दूर्व्वादलश्यामतनुः सकामा
पुरातनेः सा पुरवी निरुक्ता ॥३॥
अशोकवृक्षस्य तले निषण्णा
वियोगिनी वासकसज्जिताङ्गी ।
विभूषिताङ्गी जटिलेव बाला
सा कानड़ा हेमलतेव तन्वी ॥४॥
संग्रथ्य संग्रथ्य गले दधाना
प्रस्रुनमाला दयितेन बाला ।
गौरी स्वकान्ताननचुम्बितास्या
सा सुन्दरी माधविका निकुञ्जे ॥५॥
सुकच्छपीं वादयति स्वभर्त्तु-
र्गानार्थमभ्यस्यति सम्मुखेन ।
सदैव साला विहिता च माला
कोड़ा कला तानवती मता सा ॥६॥
स्नात्वा समुत्तीर्णवती सुदेहा
केशप्रसिच्यन्दितवारिबिन्दुः ।
निष्पीड़यन्ती तिमिरांशुकान्तं
केदारिका रक्तपरोधरश्रीः ॥"६॥*॥
अथ श्रीरागः ।
"लीलावतारेण वनान्तराणि
चिन्वन् प्रसूनानि वधूसहायः ।
विलासवेशो द्युतिदिव्यमूर्त्तिः
श्रीराग एष प्रथितः पृथिव्याम् ॥१॥
सन्ध्यासुकाले गृहमध्यदेशे
प्रवाद्यन्ती ह पिनाकयन्त्रम् ।
धाराधराधातुविचित्रिताङ्गी
गान्धारिका गन्धसुखं निधत्ते ॥ २ ॥
रसनया सुविचारकौतुकं
विदधती कविकोविदकौतुकम् ।
सुकवितास्तुतभावनतत्परा
भगवती सुभगा समुदाहृता ॥३॥
पुष्पोद्याने सार्द्धमालीकलापैः
क्रीड़न्त्येवं कोकिलाकाकलीभ्रु ।
रामा श्यामा सद्गुणानाञ्च सीमा
गौरी गौरी गौरवालोकदिष्टा ॥४॥
अट्टालिकायां स्फुटकौमुदीभिः
प्रकाशितायां रजनीविहारम् ।
अवाय कान्तेन समं वसन्ती
कौमारिका कामकला वहन्ती ॥५॥
गौरीपदाम्भोजमभ्यर्च्चयन्ती
गन्धोद्भूतं गन्धमाल्यं दधाना ।
नानारत्नोपायनैर्भक्तिभावै-
र्वेलोयारी कथ्यते बालिकेयम् ॥६॥
उल्लासयन्ती धम्मिल्ले रहःस्थान् प्राणबन्धुना ।
मालतीकुसुमस्रग्भिर्वैरागी रागिनी स्मृता॥"६
अथ वसन्तः ।
"चूताङ्कुरेणैव कृतावतंसो
विघूर्णमानारुणनेत्रपद्मः ।
पीताम्बरः काञ्चनचारुदेहो
वसन्तरागो युवतिप्रियश्च ॥१॥

सुवृत्तमात्रातिसुश्लीलयुक्ता
मुक्तालताकल्पितहारयष्टिः ।
चूताङ्कुरं पाणियुगे वहन्ती
जवारणाङ्गी तुडिकेरितेयम् ॥१॥
संगीतगोष्ठीषु गरिष्ठभावं
समाश्रिता गायनसम्प्रदायैः ।
खर्वाङ्गिनी नूपुरपादपद्मा
सा पञ्चमी पञ्चमवेदवेत्री ॥२॥
उरसि केशग्रथस्य सुभारं
विदधती श्लथनोत्थितचारुवेशम् ।
विलुलितालकवल्लिकशाङ्गी
भासुरा ललिता कथिता बुधैः ॥३॥
सखीकलापैः परिहास्यमाना
वियोगिनी कान्तवियोगदेहा ।
पीनस्तनी चैव धराप्रसुप्ता
श्यामा सुकेशी पठमञ्जरीयम् ॥४॥
कर्णोत्पलालम्बिमधुव्रतालीं
द्रष्टुमिति सा मञ्जुलकूजितानि ।
कान्तान्तिकं गन्तुमना: प्रदोषे
सा गुर्ज्जरी वेशकलोचिताङ्गी ॥५॥
अध्यापयन्ती निजशिष्यवृन्दं
सङ्गीतशास्त्राणि विवेचनाभिः ।
मनोहरा हारलताभिरामा
समस्तभाषाकुशला विशेषा ॥"६॥*॥

अथ हिन्दोलः ।

"हासाभिलाषेण यतन् पृथिव्यां
उत्थापितस्तत्क्षणमालिवृन्दैः ।
उल्लोलसङ्गीतरसैर्विदग्धो
हिन्दोलरागः कथितो रसज्ञैः ॥१॥
मयूरकेकाश्रवणोल्लसन्ती
मयूरिकातूलततं क्षिरन्ती ।
मयूरकान्तीव सितिं दधाना
मायूरिका संकथिता गुणज्ञैः ॥२॥
प्रदोषकाले गृहसंप्रविष्टा
प्रदीप्तहस्तारुणगात्रवस्त्रा ।
सीमन्तसिन्दूरविराजमाना
सुरक्तमाल्या किल दीपिकेयम् ॥३॥
सार्द्धं सखीभिर्विजने वसन्ती
विचित्रवस्त्रोज्जवितस्वसङ्गा ।
निरीक्ष्यमाणाननदर्पणा या
सा देशकारी कथिता गुणज्ञैः ॥४॥
भर्त्तुर्दधाना चरणारविन्दं
निषेधयन्ती परदेशयानम् ।
प्रकामदाम्यत्यसुखे निमग्ना
सा पाहिड़ा संकथिता कवीन्द्रैः ॥५॥
कर्णे दधाना सुरपुष्पयुग्मं
स्फुरत्सुवक्षोजमनोहराङ्गी ।
केरानना चारुविलोलनेत्रा
वराङ्गनेयं कथिता वड़ारी ॥६॥
उत्पन्नमात्रे प्रथमापराधे
मानं पुनः कर्त्तुमनास्वीरेण ।
ऋजुस्वभावान्नियतं वदन्ती
सा मोरहाटी हृतकेलिरम्या ॥"६॥*॥

अथ कर्णाटः ।

"क्षपाणपाणिस्तुरगाधिरूढो
मयूरकण्ठातिसुकण्ठकान्तिः ।
स्फुरल्लिसस्निग्धरसः प्रशान्तः
कर्णाटरागो हरितालवर्णः ॥१॥
चिरं नटन्ती शुभरङ्गमध्ये
संप्रार्थयन्ती नटिनं वसन्तम् ।
सुगीततालेषु कृतावधाना
नटी सुघाटीपरिधानदेहा ॥१॥
खनायकं पुष्पलताधिरूढ़ा
हसन्मुखी सर्व्वसुदं वहन्ती ।
खनानि ग्रन्थद्वितनोति सुग्धा
भूपालिका सा खलदुत्तरीया ॥२॥
अध्यापयन्ती शुकसारसारीः
श्रीराम रामेति सुवेशलक्ष्मीः ।
वामस्तनार्द्धस्खलितांशुकश्रीः
श्रीरामकेली कथिता कवीन्द्रैः ॥३॥
विशेषवैदग्ध्यवती समस्तान्
कलाविलासेन विमोहयन्ती ।
दृढ़न्नितम्बा परिपुष्टदेहा
वड़ा प्रलम्बस्तनभारभग्ना ॥४॥
भर्त्तुः समं पार्थसि सञ्चरन्ती
पयोविहारेण सरोरुहाणि ।
विचिन्वती सौरभमोदमाना
कामोदरागिण्युदिता गुणज्ञैः ॥५॥
व्याधूता नटवृत्यपरिश्रमेण
बाला लीलाभिः सुदती कृतादरा ।
नटीनां कल्याणी कलयति मत्तहस्ती
रणप्रस्थानं सुखरिता किङ्किणीकलापम् ॥"६॥

अथ रागरागिणीनां भावनिरूपणम् ।

"मालवः श्रीश्च हिन्दोलो मल्लारस्तदनन्तरम् ।
गायन्ति गायका धीर सानन्देन चतुष्टयम् ॥
वसन्तो रागः कर्णाटो द्वौ वीरौ भवतः क्रमात् ॥
धानसी मालसी चैव भैरवी माधवी तथा ।
सुभगा पञ्चमी नाटी वेलोयारी च गुर्ज्जरी ॥
कामोदा चापि कल्याणी कोड़ा केदारिका
तुड़ी ।
कौमारी मायूरी चैव देशकारी च सिन्धुड़ा ॥
रामकेली च भूपाली रागिण्यश्चेति विंशतिः ।
आनन्दांज्ञा इति प्रोक्ता गीयन्ते गानकोविदैः ॥
पुरवी कानड़ा गौरी रामकिरी च दीपिका ।
आशावरी विभाषा च वड़ारी च गड़ा तथा ।
एताश्च नव रागिण्यो वीरांशे गानसुत्तमम् ॥
वेलावली च गान्धारी ललिता पठमञ्जरी ।
वैरागी रागिणी चापि मोरहाटी च पाहिड़ा ।
करुणांज्ञा विजानीयात् सप्तैता रागयोषितः ॥
रागेण रसभागेन षट्त्रिंशद्रागिणीषु च ।
करुणानन्दवीरेषु ज्ञापनार्थं मतत्रयम् ॥"
इति संगीतदामोदरे शिवनारदसंवादे १ । २ अध्यायौ ॥ (तथा च संगीतदर्पणे ।

अथ रागाणामुद्भवं दर्शयति ।
"शिवशक्तिसमायोगाद्रागाणां समभवो भवेत् ।
पञ्चास्यात् पञ्च रागाः स्युः षष्ठस्तु गिरिजा-
मुखात् ॥
सद्योवक्त्रात्तु श्रीरागो वामदेवाद् वसन्तकः ।
अघोराद् भैरवोऽभूत् तत्पुरुषात् पञ्चमो-
ऽभवत् ॥
ईशानाख्यान्मेघरागो नाट्यारम्भे शिवादभूत् ।
गिरिजाया मुखाल्लास्ये नटनारायणोऽभवत् ॥"

अथ रागवेला ।

"मधुमाधवी च देशाख्या भूपाली भैरवी
तथा ।
वेलावली च मल्लारी वल्लारी सोमगुर्ज्जरी ॥
धनाश्रीर्मालवश्रीश्च मेघरागश्च पञ्चमः ।
देशकारी भैरवश्च ललिता च वसन्तकः ॥
एते रागाः प्रगीयन्ते प्रातरारभ्य नित्यशः ।
गुर्ज्जरी कौशिकश्चैव सावेरी पठमञ्जरी ॥
रेवा गुणकिरी चैव भैरवी रामकिर्य्यपि ।
सौराटी च तथा गेया प्रथमप्रहरोत्तरम् ॥
वैराटी तोड़िका चैव कामोदी च कुड़ायिका ।
गान्धारी नागध्वन्दी च तथा देशी विशेषतः ।
शुद्धरागभरणो गेयो द्वितीयप्रहरात् परम् ॥
श्रीरागो मालवाख्यश्च गौरी शिवसंज्ञिका ।
नटकल्याणसंज्ञश्च सारङ्गनटकौ तथा ॥
सर्व्वे नाटाश्च केदारी कर्णाट्याभीरिका तथा ।
वड़हंसी पहाड़ी च तृतीयप्रहरात् परम् ।
अर्द्धरात्रावधि ज्ञेया एते रागाः सुखप्रदाः ॥
यथोक्तकाल एवैते गेयाः पूर्व्वविधानतः ।
रागाज्ञया सदा गेया न तु कालं विचारयेत् ॥"

इति रागवेला ।

अथ ऋतवः ।

"श्रीरागो रागिणीयुक्तः शिशिरे गीयते
बुधैः ।
वसन्तः ससहायस्तु वसन्तर्त्तौ प्रगीयते ।
भैरवः ससहायस्तु ऋतौ ग्रीष्मे प्रगीयते ।
पञ्चमस्तु तथा गेयो रागिण्या सह शारदे ॥
मेघरागो रागिणीभिर्युक्तो वर्षासु गीयते ।
नटनारायणो रागो रागिण्या सह हेमके ॥
यथेच्छया वा गातव्याः सर्व्वर्त्तुषु सुखप्रदाः ॥"

इति रागाणां ऋतुनिर्णयः । इति सोमेश्वर-
मतम् ॥ * ॥)

रागचूर्णः, पुं, कामदेवः । खदिरवृक्षः । इति मेदिनी । ने, १०६ ॥ फलगुचूर्णम् । इति शब्द-रत्नावली ॥ लाक्षारसः । इति राजनिर्घण्टः ॥

रागच्छन्नः, पुं, (रागेण च्छन्नः ।) कामदेवः । इति शब्दरत्नावली ॥ रागेणाच्छन्ने, त्रि ॥

रागदः, पुं, (रागं ददातीति । दा + कः ।) तैरणीक्षुपः । इति राजनिर्घण्टः ॥ रागदातरि, त्रि ॥

रागदालिः, पुं, (रागदा रागप्रदा आलिः पङ्क्तिर्यत्र ।) मन्दरः । इति राजनिर्घण्टः ॥ (विवरण-मस्य मन्दरशब्दे विज्ञेयम् ॥)

रागपुष्पः, पुं, (रागविशिष्टं रक्तवर्णं पुष्पं यस्य ।) बन्धूकः । रक्तास्थानः । इति राजनिर्घण्टः ॥

रागपुष्पी, स्त्री, (रागयुक्तं पुष्पं यस्याः । ङीप् ।) जवा । इति राजनिर्घण्टः ॥ (गुणादयोऽस्य जवाशब्दे ज्ञातव्याः ॥)

रागप्रसवः, पुं, (रागयुक्तो रक्तवर्णः प्रसवः पुष्पं यस्य ।) बन्धूकः । रक्तास्थानः । इति राजनिर्घण्टः ॥

रागयुक्, [ज्] पुं, (रागेण युज्यते इति । युज् + क्विप् ।) माणिक्यम् । इति राजनिर्घण्टः । कस्मिंश्चित् पुस्तके रागढक् इति पाठोऽपि विद्यते ॥

रागरज्जुः, पुं, (रागो रज्जुरिव यस्य । नायकयोः परस्परानुरागबद्धत्वात्तथात्वम् ।) कामदेवः । इति शब्दरत्नावली ॥

रागलता, स्त्री, (रागस्य जनिका लतेव ।) कामदेवपत्नी । इति जटाधरः ॥

रागवृन्तः, पुं, (रागस्य वृन्त इव ।) कामदेवः । इति शब्दमाला ॥

रागषाड़वः, पुं, दाड़िमद्राक्षायुक्तमुद्गयूषः । अस्य गुणाः । रुचिकारित्वम् । लघुपाकित्वम् । वातपित्तकफाविरोधित्वञ्च । इति राजवल्लभः ॥ (यथा, सुश्रुते । १ । ४६ अध्याये क्षतान्नवर्गे । "श्रेयः पथ्यतमञ्चापि मुद्गयूषः क्षताक्षतः । स तु दाड़िमसंदीप्तकायुक्तः स्याद्रागषाड़वः । रुचिष्यो लघुपाकश्च दोषाणामविरोधनात् ॥" तथास्य गुणाः । "लघवो दृंहणा दृष्याः क्षुदा रोचनदीपनाः । दृष्यामूर्च्छाभ्रमच्छर्द्यमप्ना रागषाड़वाः ॥" इति च सुश्रुते सूत्रस्थाने ४६ अध्यायः ॥)

रागसूत्रं, क्ली, (रागयुक्तं रक्तवर्णं सूत्रम् ।) तुलासूत्रम् । पट्टसूत्रम् । इति मेदिनी । रे, २६४ ॥

रागाङ्गी, स्त्री, (रागविशिष्टमङ्गं यस्याः । ङीप् ।) मञ्जिष्ठा । इति राजनिर्घण्टः ॥

रागाढ्या, स्त्री, (रागेण आढ्या ।) मञ्जिष्ठा । इति राजनिर्घण्टः ॥

रागाढ्यः, त्रि, आर्द्रां दत्त्वा दानविमुखः । यथा, "आर्द्रां बलवतीं दत्त्वा यो हन्ति पिशुनो जनः । स जीवन्नपि रामाद्यैर्मृतो दानस्तु दातरि ॥" इति शब्दमाला ॥

रागाग्निः, पुं, (रागेषु विषयवासनासु अग्निरिव ।) वृहः । इति त्रिकाण्डशेषः ॥

रागिणी, स्त्री, (रागोऽस्यस्या इति । राग + इनिः । ङीप् ।) विदग्धा नारी । इति जटाधरः ॥ मेनकाया ज्येष्ठकन्या । यथा,— "रागिणी नाम संजाता ज्येष्ठा मेनासुता सुते । शुभाङ्गी पद्मपत्राक्षी गौराङ्गी चितमर्दना ॥" इति वामनपुराणे ४८ अध्यायः ॥ जयश्रीनाम्नी लक्ष्मीः । इति पुराणम् ॥ षड्रागाणां पत्नी । इति हलायुधः ॥ सा तु हनूमन्मते भरतमते च चिंशत्प्रकारा । सोमेश्वरमते कल्लिनाथमते च षट्त्रिंशत्प्रकारा ॥ आसां विवरणं रागशब्दे द्रष्टव्यम् ॥

रागी, [न्] त्रि, (रञ्ज + "संपृचानुरुधेति ।" ३ । २ । १४२ । इति तच्छीलादिषु घिण्णुच् । यद्वा, रागोऽस्यास्तीति । राग + इनिः ।) अनुरक्तः । (यथा, मार्कण्डेये । २१ । ४१ । "लक्ष्यस्या हृदयं रागि भर्त्ता चान्यो भविष्यति । यावज्जीवमतो दुःखं सुरभ्या नान्यथा वचः ॥") कामुकः । इति विश्वः ॥ रङ्गी । इति मेदिनी ॥ (विषयानुरागयुक्तः । स च द्विविधः । यथा, देवीभागवते । १ । १७ । ३७—३८ । ४१ । "द्वैविध्यं सर्व्वलोकेषु सर्व्वत्र द्विविधो जनः । रागी चैव विरागी च तयोश्चित्तं द्विधा पुनः ॥ विरागी त्रिविधः कामं ज्ञातोऽज्ञातश्च मध्यमः । रागी च द्विविधः प्रोक्तो मूर्खश्च चतुरस्तथा ॥" "रागो यस्यास्ति संसारे स रागीत्युच्यते ध्रुवम् । दुःखं बहुविधं तस्य सुखञ्च विविधं पुनः ॥" रक्तवर्णविशिष्टः । यथा, कथासरित्सागरे । २१ । ६ । "ईर्ष्यारुषामभावेऽपि भ्रूरभूमि रागिणि । न मुखे तत्तयो राज्ञोरुत्कदृष्टिस्तृप्तिमाययौ ॥") पुं, लवणधान्यविशेषः । तत्पर्य्यायः । लाक्षुनः २ बहुतरकणिशः ३ गुच्छकणिशः ४ । अस्य गुणाः । तिक्तत्वम् । मधुरत्वम् । कषायत्वम् । शीतत्वम् । पित्तास्रनाशित्वम् । बल्यत्वञ्च । इति राजनिर्घण्टः ॥

राघ, ऋ ङ गत्तौ । इति कविकल्पद्रुमः ॥ (भ्वा०-आत्म०-अक०-सेट् ।) ऋ, अरराघत् । ङ, राघते । शक्तिः सामर्थ्यम् । इति दुर्गादासः ॥

राघवः, पुं, (रघोरपत्यमिति । रघु + अण् ।) रामचन्द्रः । (यथा, रघुः । १२ । ३२ । "रावणावरजा तत्र राघवं मदनातुरा । अभिपेदे निदाघार्त्ता जालीव मलयद्रुमम् ॥" अजः । यथा, रघुः । ८ । १६ । "यतिपार्थिवलिङ्गधारिणौ दददाते रघुराघवौ जनैः ॥" दशरथः । यथा, रामायणे । २ । ६४ । १ । "वधमप्रतिरूपं तु मद्वधेनास्य राघवः । विलपन्नेव धर्म्मात्मा कौशल्यामिदमब्रवीत् ॥" रघुवंशीयमात्रम् । यथा, तत्रैव । २ । ६४ । २५ । "अपि ह्यद्य कुलं न स्याद्राघवाणां कुतो भवान् ॥") समुद्र-मत्स्यविशेषः । इति मेदिनी ॥ वे, ४८ ॥ (यथा, जटाधरौ प्रथमपादे दुर्गसिंहः । "अस्ति मत्स्यस्तिमिर्नाम शतयोजनविस्तृतः । तिमिङ्गिलगिलोऽप्यस्ति तद्गिलोऽप्यस्ति राघवः ॥")

राघवायनं, क्ली, (राघवस्य रामस्य चरितान्वितं अयनं ज्ञानम् ।) रामायणम् । यथा,— "सेतिहासपुराणानि राघवायनभारतम् । समाप्तिरहितान्येव सन्ति तानि श्रुतानि ते ॥" इत्यग्निपुराणे वामनप्रादुर्भावनामाध्यायः ॥

राङ्कवः, पुं, वृक्षकण्टकः । इति हारावली ॥ ६१ ॥

राङ्कवं, क्ली, (रङ्कौ भवम् । रङ्कु + "रङ्कोरमनुष्येऽण् च ।" ४ । २ । १०० । इति अण् ।) मृगलोमजातवस्त्रादि । तत्पर्य्यायः । मृगरोमजम् २ । इत्यमरः । २ । ६ । ११९ ॥ रङ्कुर्मृगभेदः ततो जातार्थे यः पशवोऽपि मृगा इति रूढ्या मेषादिलोमजमपि कम्बलादि राङ्कवम् । इति तट्टीकायां भरतः ॥ (यथा, महाभारते । २ । ५० । २३ । "और्णञ्च राङ्कवञ्चैव पट्टजं कीटजन्तथा ॥" पुं, गौः । इति काम्बिका ॥ राङ्कवाजतौ, त्रि । यथा, महाभारते । ६ । ४४ । २६ । "क्रौञ्चयारावतनिर्भेदैराङ्कवैरपि ॥")

राङ्गं, क्ली, मुख्यविशेषः । रङ्गन् इति भाषा । अस्य गुणः । रक्तपित्तनाशित्वम् । इति द्रव्यगुणः ॥

राज, ऋ भ ण दीप्तौ । इति कविकल्पद्रुमः ॥ (भ्वा०-उभ०-अक०-सेट् ।) ऋ, अरराजत् । भ, राजति राजते । ण, रेजतुः । इति दुर्गादासः ॥

राजकं, क्ली, (राज्ञां समूहः । राजन् + "गोत्रोक्षोष्ट्रोरभ्राजेति ।" ४ । २ । ३९ । इति वुञ् ।) नृपसमूहः । इत्यमरः । २ । ८ । ३ ॥ यथा, मार्कण्डेये । १०६ । ६ ।
"वृष्टपुष्टमतीवासीत् तस्मिन् राजन्यशीयतः ।
राजकं सकलं चोर्व्व्यां पौरजानपदो जनः ॥"
राजन् + स्वार्थे कन् ।) राजनि, पुं । (यथा हरिवंशे भविष्यपर्व्वणि । २४ । ६ ।
"तवाङ्गं तिलशः कृत्वा श्वभ्यो दास्यामि राजक ।
राज् + खुल् ।) दीप्तिकारके, त्रि ॥

राजकदम्बः, पुं, (कदम्बानां राजा । राजदन्ता त्वात् परनिपातः ।) कदम्बविशेषः । यथा,— "कादम्बर्यः प्रावृषेण्यो गौपो धूलीकदम्बकः ।
कदम्बप्रियको राजकदम्बोऽरुष्करोऽधिकः ॥"
इति जटाधरः ॥

राजकन्या, स्त्री, (राज्ञः कन्येव ।) केविकापुष्पम् । इति राजनिर्घण्टः ॥ नृपसुता च ॥ (यथा, भारते । ६ । ६ । ४३ ।
"वृतः स राजकन्याभिरेकः पञ्चाशता वरः ॥

राजकर्कटी, स्त्री, चीनाककर्कटी । इति राजनिर्घण्टः ॥

राजकशेरुः, पुं, (कशेरुरिव राजा । राजदन्तादित्वात् परनिपातः ।) भद्रमुस्ता । इति राजनिर्घण्टः ॥

राजकीयः, त्रि, (राज्ञ इदम् । राजन् + "राज्ञश्च ।" ४ । २ । १४० । इति छः ककारस्यान्त्यदेशस्य ।) राजसम्बन्धी । राजकस्यायं इत्यर्थीयप्रत्ययेन सिद्धः ॥ (यथा, कथासरित्सागरे । ६२ । २२८ ।
"ततस्तदर्थं राज्ञा स राजकीयं वरो ययौ ॥"

राजकुमारः, पुं, (राज्ञः कुमारः ।) राजपुत्रः । तच्च वर्णनीयानि यथा,— "कुमारे शूरशूरात्मशौर्यकान्तिगुणोच्छ्रयाः ।

वाद्याकी खुरली राजभक्तिः शुभगतादयः ॥"
इति कविकल्पलतायाम् १ स्तवकः ॥

राजकुम्भाण्डः, पुं, वार्त्ताकौ । इति जटाधरः ॥

राजकोषातकी, स्त्री, (राजप्रिया कोषातकी ।) झिङ्गाकविशेषः । घिया तोरइ इति हिन्दीभाषा ॥ तत्पर्य्यायः । हस्तिपर्णिका २ पीतपुष्पिका ३ धामार्गवः ४ केशफला ५ महाजाली ६ सपीतकः ७ । अस्या गुणाः । शीतत्वम् । ज्वरघ्नत्वम् । कफवातलत्वञ्च । इति मदनविनोदः ॥

राजखर्ज्जूरी, स्त्री, (राजप्रिया खर्ज्जूरी ।) श्रेष्ठखर्ज्जूरी । पिण्डखर्ज्जूरिका । तत्पर्य्यायः । राजपिण्डा २ नृपपिण्डा ३ । अस्या गुणाः । गौरुत्वम् । स्वादे स्निग्धत्वम् । गुरुत्वम् । पित्तदाहार्त्तिश्वासभ्रमनाशित्वम् । वीर्य्यवृद्धिदत्वञ्च । इति राजनिर्घण्टः ॥

राजगामि, [न्] त्रि, (राजानं गच्छतीति । गम् + णिनिः ।) राजसम्बन्धि । यथा,—
"अनृतञ्च समुत्कर्षे राजगामि च पैशुनम् ।
गुरोश्चालीकनिर्ब्बन्धः समानि ब्रह्महत्यया ॥"
इति मानवे ११ अध्यायः ॥
"राजनि वा स्त्रीनादीनां परेषां मरणफलदोषाभिधानम् ।" इति कुल्लूकभट्टः ॥ अपि च ।
"अपुत्रस्य धनं पत्न्यभिगामि तदभावे मातृगामि तदभावे भ्रातृगामि तदभावे भ्रातृपुत्रगामि तदभावे सकुल्यगामि तदभावे बन्धुगामि तदभावे शिष्यगामि तदभावे सब्रह्मचारिगामि तदभावे ब्राह्मणधनवर्জ्জं राजगामि ।" इति दायभागग्रन्थधृतविष्णुवचनम् ॥

राजगिरिः, पुं, ग्राकभेदः । तत्पर्य्यायः । राजाद्रिः २ राजग्राकिनी ३ राजग्राकनिका ४ । अस्य गुणाः । रूक्षत्वम् । पित्तनाशित्वम् । शीतलत्वम् । स्थूलस्य तु अतिशीतलत्वम् । अतिरूक्षत्वञ्च । इति राजनिर्घण्टः ॥ (मगधदेशस्थः पर्व्वतविशेषश्च ॥)

राजग्रीवः, पुं, (राजते इति । राज् + अच् । राजा दीप्तिशालिनी ग्रीवा यस्य ।) मत्स्यविशेषः । फलुइ इति भाषा । यथा,—
"फलकी स्याच्चित्रफली राजग्रीवो महार्मदः ॥"
इति चिकित्साखण्डेषः ॥

राजघः, त्रि, तीक्ष्णः । इति चिकित्साखण्डेषः ॥ (राजानं हन्तीति । हन् + "राजघ उपसंख्यानम् ।" ३ । २ । ५५ । इत्यस्य वार्त्तिकोक्त्या क प्रत्ययेन साधु ।) राजहन्ता । यथा,—
"अनल्पदर्पारिपुरानलोज्ज्वलै-
र्निजप्रतापैर्ज्वलयं ज्वलद्भुवः ।
प्रदक्षिणीकृत्य जयाय हृष्टया
रराज नीराजनया स राजघः ॥"
इति नैषधे । १ । १० ॥

राजचिह्नकं, क्ली, उपस्थः । इति शब्दचन्द्रिका । चिह्नानां स्त्रीपुंविभागकानां राजा इति व्युत्पत्त्या चिह्नम् ॥

राजजम्बूः, स्त्री, (जम्बूनां राजा । राजदन्तादित्वात् परनिपातः ।) पिण्डखर्ज्जूरम् । इति मेदिनी ॥ महाजम्बूः । इति राजनिर्घण्टः ॥

राजजक्ष्मा [न्] पुं, क्षयरोगः । "यक्ष्यते पूज्यते रोगराजत्वात् यक्ष्मा यक्ष क ङ मह्नि अन्तःस्थादिः आसुसिसिति मनू चवर्गलतीयादिरित्येके तदा जक्ष भक्षहसनयोरित्यस्य रूपं राजयक्ष्मशब्दोऽप्यत्र ।" इत्यमरटीकायां भरतः ॥ (अस्य विवरणन्तु राजयक्ष्मशब्दे द्रष्टव्यम् ॥)

राजतं, त्रि, (रजतस्य विकारः । रजत + "प्राण्यिरजतादिभ्योऽञ् ।" ४ । ३ । १५४ । इति अञ् ।) रजतनिर्म्मितम् । यथा,—
"सौवर्णं राजतं ताम्रं पित्र्यां पात्रमुच्यते ।
रजतस्य कथा वापि दर्शनं दानमेव वा ॥"
इति मात्स्ये १७ अध्यायः ॥
रजते, क्ली ॥ (यथा, गो० रामायणे ।३।४८।१।
"तं तु सीता मृगं दृष्ट्वा वने काञ्चनसप्रभम् ।
हेमराजतचित्राभ्यां पार्श्वाभ्यां समलङ्कृतम् ॥")

राजतरुः, पुं, (तरूणां राजा । राजदन्तादित्वात् परनिपातः ।) कर्णिकारवृक्षः । आरग्वधः । इति राजनिर्घण्टः ॥ (यथा, सुश्रुते ।६ । ५७ ।
"सुस्नादिराजतरुवर्गदशाङ्गसिद्धैः
क्वाथैर्जयेन्मधुयुतैर्विविधैश्च लेहैः ॥")

राजतरुणी, स्त्री, (राज्ञस्तरुणीव । सौन्दर्य्यातिप्रशस्यत्वात् ।) पुष्पविशेषः । तत्पर्य्यायः । महासहा २ वर्णपुष्पः ३ अम्लानः ४ अम्लातकः ५ सुपुष्पः ६ सुवर्णपुष्पः ७ । अस्या गुणाः । कषायत्वम् । कफकारित्वम् । चक्षुष्यत्वम् । हर्षदत्वम् । हृद्यत्वम् । सुरभित्वम् । सुखवल्लभत्वञ्च । इति राजनिर्घण्टः ॥

राजता, स्त्री, राजत्वम् । राज्ञो भाव इत्यर्थे राजन् शब्दात् तल्प्रत्ययेन सिद्धा ॥ (यथा, कथासरित्सागरे । ३६ । ६८ ।
"तेन मत्तामसुप्तस्तामपि सुप्ता स तां ययौ ।
रत्नकूटं स्वकार्य्यार्थं नित्यस्निग्धा हि राजता ॥")

राजताल, पुं, (राज्ञस्ताल इव ।) गुवाकवृक्षः । इति शब्दरत्नावली ॥

राजतिमिङ्गः, पुं, सुखाप्यः । इति हारावली ।१८१॥

राजत्वं, क्ली, राजता । राज्ञो भाव इत्यर्थे राजन् शब्दात् त्वप्रत्ययेन निष्पन्नम् ॥ (यथा, कथासरित्सागरे । २० । १६१ ।
"क्व च राजत्वमित्युक्त्वा स राजा निषिषेध तत् ॥")

राजदण्डः, पुं, (राज्ञो दण्डः ।) राजशासनम् । यथा,—
"ऊनैकादशवर्षस्य पञ्चवर्षाधिकस्य च ।
चरेद्गुरुः सुहृद्वापि प्रायश्चित्तं विशुद्धये ॥
ततो न्यूनतरस्यास्य नापराधो न पातकम् ।
न चास्य राजदण्डोऽपि प्रायश्चित्तं न विद्यते ॥"
इति प्रायश्चित्ततत्त्वधृताङ्गिरोवचनम् ॥

राजदन्तः, पुं, दन्तानां राजा । ("राजदन्तादिषु परम् ।" २ । २ । ३१ । इति परनिपातः ।) उपरिश्रेणीस्थमध्यवर्त्तिदन्तद्वयम् । यथा,—
"राजदन्तौ तु मध्यस्थावुपरिश्रेणिकौ क्वचित् ॥"
इति हेमचन्द्रः ॥

राजदेशीयः, पुं, (ईषदूनो राजा । राजन् + "ईषदसमाप्तौ कल्पब्देश्यदेशीयरः ।"५।३।६७। इति देशीयर् ।) राजदेश्यः । राजकल्पः । इति व्याकरणम् ॥

राजधत्तूरकः, पुं, (धत्तूरकाणां राजा । राजदन्तादित्वात् परनिपातः ।) दृढधुस्तूरः । इति कश्चित् राजनिर्घण्टः ॥ तस्य पर्य्यायः राजधुस्तूरशब्दे द्रष्टव्यः ॥

राजधर्म्मः, पुं, (राज्ञो धर्म्मः ।) राज्ञः कर्त्तव्यं कर्म्म । यथा,—
"राजधर्म्मान् प्रवक्ष्यामि यथावृत्तो भवेन्नृपः ।
सम्भवश्च यथा तस्य सिद्धिश्च परमा यथा ॥
ब्राह्मं प्राप्तेन संस्कारं क्षत्रियेण यथाविधि ।
सर्व्वस्यास्य यथान्यायं कर्त्तव्यं परिरक्षणम् ॥
अराजके हि लोकेऽस्मिन् सर्व्वतो विद्रुते भयात् ।
रक्षार्थमस्य सर्व्वस्य राजानमसृजत् प्रभुः ॥
इन्द्रानिलयमार्क्काणामग्नेश्च वरुणस्य च ।
चन्द्रवित्तेशयोश्चैव मात्रा निर्हृत्य शाश्वतीः ॥
यस्मादेषां सुरेन्द्राणां मात्राभ्यो निर्म्मितो नृपः ।
तस्मादभिभवत्येष सर्व्वभूतानि तेजसा ॥
तपत्यादित्यवच्चैष चक्षूंषि च मनांसि च ।
न चैनं भुवि शक्नोति कश्चिदप्यभिवीक्षितुम् ॥
सोऽग्निर्भवति वायुश्च सोऽर्कः सोमः स धर्म्मराट् ।
स कुबेरः स वरुणः स महेन्द्रः प्रभावतः ॥
बालोऽपि नावमन्तव्यो मनुष्य इति भूमिपः ।
महती देवता ह्येषा नररूपेण तिष्ठति ॥
एकमेव दहत्यग्निर्नरं दुरुपसर्पिणम् ।
कुलं दहति राजाग्निः सपशुद्रव्यसञ्चयम् ॥
कार्य्यं सोऽवेक्ष्य शक्तिञ्च देशकालौ च तत्त्वतः ।
कुरुते धर्म्मसिद्ध्यर्थं विश्वरूपं पुनःपुनः ॥
यस्य प्रसादे पद्मा श्रीर्विजयश्च पराक्रमे ।
मृत्युश्च वसति क्रोधे सर्व्वतेजोमयो हि सः ॥
तं यस्तु हेडि संमोहात् स विनश्यत्यसंशयम् ।
तस्य ह्याशु विनाशाय राजा प्रकुरुते मनः ॥
तस्माद्धर्म्मं यमिष्टेषु स व्यवस्येन्नराधिपः ।
अनिष्टाप्यनिषेधेषु तं धर्म्मं न विचालयेत् ॥
तस्यार्थे सर्व्वभूतानां गोप्तारं धर्म्ममात्मजम् ।
ब्रह्मतेजोमयं दण्डमसृजत् पूर्व्वमीश्वरः ॥
तस्य सर्व्वाणि भूतानि स्थावराणि चराणि च ।
भयाद्भोगाय कल्पन्ते स्वधर्म्मान्न चलन्ति च ॥
तं देशकालौ शक्तिञ्च विद्याश्चावेक्ष्य तत्त्वतः ।
यथार्हतः संप्रणयेन्नरेष्वन्यायवर्त्तिषु ॥
स राजा पुरुषो दण्डः स नेता शासिता च सः ।
चतुर्णामाश्रमाणाञ्च धर्म्मस्य प्रतिभूः स्मृतः ॥
दण्डः शास्ति प्रजाः सर्व्वा दण्ड एवाभिरक्षति ।
दण्डः सुप्तेषु जागर्त्ति दण्डं धर्म्मं विदुर्बुधाः ॥
समीक्ष्य स धृतः सम्यक् सर्व्वा रञ्जयति प्रजाः ।
असमीक्ष्य प्रणीतस्तु विनाशयति सर्व्वतः ॥
यदि न प्रणयेद्राजा दण्डं दण्ड्येष्वतन्द्रितः ।
शूले मत्स्यानिवापक्ष्यन् दुर्ब्बलान् बलवत्तराः ॥

अद्यात् काकः पुरोडाशं श्वावलिह्याद्विचक्षणा।
स्वाम्यञ्च न स्यात् कस्मिंश्चित् प्रवर्त्तेताधरोत्तरम्॥
सर्व्वो दण्डजितो लोको दुर्लभो हि शुचिर्नरः।
दण्डस्य हि भयात् सर्व्वं जगद्भोगाय कल्पते॥
देवदानवगन्धर्व्वा रक्षांसि पतगोरगाः।
तेऽपि भोगाय कल्पन्ते दण्डेनैव निपीड़िताः॥
दुष्येयुः सर्व्ववर्णाश्च भिद्येरन् सर्व्वसेतवः।
सर्व्वलोकप्रकोपश्च भवेद्दण्डस्य विभ्रमात्॥
यत्र श्यामो लोहिताक्षो दण्डश्चरति पापहा।
प्रजास्तत्र न मुह्यन्ति नेता चेत् साधु पश्यति॥
तस्माद्दुः संप्रणेतारं राजानं सत्यवादिनम्।
समीक्ष्य कारियं प्राज्ञं धर्म्मकामार्थकोविदम्॥
तं राजा प्रणयन् सम्यक् त्रिवर्गेणाभिवर्द्धते।
कामात्मा विषमः क्षुद्रो दण्डेनैव निहन्यते॥
दण्डो हि सुमहत्तेजो दुर्द्धरश्चाकृतात्मभिः।
धर्म्माद्विचलितं हन्ति नृपमेव सबान्धवम्॥
ततो दुर्गञ्च राष्ट्रञ्च लोकञ्च सचराचरम्।
अन्तरीक्षगतांश्चैव सुरान् देवांश्च पीड़येत्॥
सोऽसहायेन मूढ़ेन लुब्धेनाकृतबुद्धिना।
न शक्यो न्यायतो नेतुं सक्तेन विषयेषु च॥
शुचिना सत्यसन्धेन यथाशास्त्रानुसारिणा।
प्रणेतुं शक्यते दण्डः सुसहायेन धीमता॥
खराश्च न्यायवृत्तः स्याद्भृशदण्डश्च शत्रुषु।
सुहृत्स्वजिह्मः स्निग्धेषु ब्राह्मणेषु क्षमान्वितः॥
एवंवृत्तस्य नृपतेः श्लोकोऽल्पेनापि जीवतः।
विस्तीर्य्यते यशो लोके तैलबिन्दुरिवाम्भसि॥
अतस्तु विपरीतस्य नृपतेरजितात्मनः।
संक्षिप्यते यशो लोके घृतबिन्दुरिवाम्भसि॥
स्वे स्वे धर्म्मे निविष्टानां सर्व्वेषामनुपूर्व्वशः।
वर्णानामाश्रमाणाञ्च राजा सृष्टोऽभिरक्षिता॥
तेन यद्यत् सभृत्येन कर्त्तव्यं रक्षता प्रजाः।
तत्तथोऽहं प्रवक्ष्यामि यथावदनुपूर्व्वशः॥
ब्राह्मणान् पर्य्युपासीत प्रातरुत्थाय पार्थिवः।
त्रैविद्यवृद्धान् विदुषस्तिष्ठेत्तेषाञ्च शासने॥
वृद्धांश्च नित्यं सेवेत विप्रान् वेदविदः शुचीन्।
वृद्धसेवी हि सततं रक्षोभिरपि पूज्यते॥
तेभ्योऽधिगच्छेद्विनयं विनीतात्मापि नित्यशः।
विनीतात्मा हि नृपतिर्न विनश्यति कर्हिचित्॥
बहवोऽविनयान्नष्टा राजानः सपरिच्छदाः।
वनस्था अपि राज्यानि विनयात् प्रतिपेदिरे॥
वेनो विनष्टोऽविनयान्नहुषश्चैव पार्थिवः।
सुदासो यवनश्चैव सुमुखो निमिरेव च॥
पृथुस्तु विनयाद्राज्यं प्राप्तवान् मनुरेव च।
कुबेरश्च धनैश्वर्य्यं ब्राह्मण्यश्चैव गाधिजः॥
त्रैविद्येभ्यस्त्रयीं विद्यां दण्डनीतिञ्च शाश्वतीम्।
आन्वीक्षिकीञ्चात्मविद्यां वार्त्तारम्भांश्च लोकतः॥
इन्द्रियाणां जये योगं समातिष्ठेद्दिवानिशम्।
जितेन्द्रियो हि शक्नोति वशे स्थापयितुं प्रजाः॥
दश कामसमुत्थानि तथाष्टौ क्रोधजानि च।
व्यसनानि दुरन्तानि प्रयत्नेन विवर्ज्जयेत्॥
कामजेषु प्रसक्तो हि व्यसनेषु महीपतिः।
वियुज्यतेऽर्थधर्म्माभ्यां क्रोधजेष्वात्मनैव तु॥
मृगयाक्षो दिवास्वप्नः परीवादः स्त्रियो मदः।
तौर्य्यत्रिकं वृथाट्या च कामजो दशको गणः॥
पैशुन्यं साहसं द्रोह ईर्ष्यासूयार्थदूषणम्।
वाग्दण्डजञ्च पारुष्यं क्रोधजोऽपि गणोऽष्टकः॥
द्वयोरप्येतयोर्म्मूलं यं सर्व्वे कवयो विदुः।
तं यत्नेन जयेल्लोभं तज्जावेतावुभौ गणौ॥
पानमक्षास्त्रियश्चैव मृगया च यथाक्रमम्।
एतत् कष्टतमं विद्यात्चतुष्कं कामजे गणे॥
दण्डस्य पातनञ्चैव वाक्पारुष्यार्थदूषणे।
क्रोधजेऽपि गणे विद्यात् कष्टमेतत्त्रिकं सदा॥
सप्तकस्यास्य वर्गस्य सर्व्वत्रैवानुषङ्गिणः।
पूर्व्वं पूर्व्वं गुरुतरं विद्याद्व्यसनमात्मवान्॥
व्यसनस्य च मृत्योश्च व्यसनं कष्टमुच्यते।
व्यसन्यधोऽधो व्रजति स्वर्य्यात्यव्यसनी मृतः॥
मौलान् शास्त्रविदः शूरान् लब्धलक्षान् कुलोद्गतान्।
सचिवान् सप्त चाष्टौ वा प्रकुर्व्वीत परीक्षितान्॥
अपि यत् सुकरं कर्म्म तदप्येकेन दुष्करम्।
विशेषतोऽसहायेन किन्तु राज्यं महोदयम्॥
तैः सार्द्धं चिन्तयेन्नित्यं सामान्यं सन्धिविग्रहम्।
स्थानं समुदयं गुप्तिं लब्धप्रशमनानि च॥
तेषां स्वं स्वमभिप्रायमुपलभ्य पृथक् पृथक्।
समस्तानाञ्च कार्य्येषु विदध्याद्धितमात्मनः॥
सर्व्वेषान्तु विशिष्टेन ब्राह्मणेन विपश्चिता।
मन्त्रयेत् परमं मन्त्रं राजा षाड्गुण्यसंयुतम्॥
नित्यं तस्मिन् समाश्वस्तः सर्व्वकार्य्याणि निःक्षिपेत्।
तेन सार्द्धं विनिश्चित्य ततः कर्म्म समारभेत्॥
अन्यानपि प्रकुर्व्वीत शुचीन् प्राज्ञानवस्थितान्।
सम्यगर्थसमाहर्त्तॄनमात्यान् सुपरीक्षितान्॥
निर्व्वर्त्तेतास्य यावद्भिरितिकर्त्तव्यता नृभिः।
तावतोऽतन्द्रितान् दक्षान् प्रकुर्व्वीत विचक्षणान्॥
तेषामर्थे नियुञ्जीत शूरान् दक्षान् कुलोद्गतान्।
शुचीनाकरकर्म्मान्ते भीरूनन्तर्निवेशने॥
दूतञ्चैव प्रकुर्व्वीत सर्व्वशास्त्रविशारदम्।
इङ्गिताकारचेष्टज्ञं शुचिं दक्षं कुलोद्गतम्॥
अनुरक्तः शुचिर्दक्षः स्मृतिमान् देशकालवित्।
वपुष्मान् वीतभीर्व्वाग्मी दूतो राज्ञः प्रशस्यते॥
आमात्ये दण्ड आयत्तो दण्डे वैनयिकी क्रिया।
नृपतौ कोषराष्ट्रे च दूते सन्धिविपर्य्ययौ॥
दूत एव हि सन्धत्ते भिनत्त्येव च संहतान्।
दूतस्तत् कुरुते कर्म्म भिद्यन्ते येन वा न वा॥
स विद्यादस्य कृत्येषु निगूढ़ेङ्गितचेष्टितैः।
आकारमिङ्गितं चेष्टा भृत्येषु च चिकीर्षितम्॥
बुद्ध्वा च सर्व्वं तत्त्वेन परराजचिकीर्षितम्।
तथा प्रयत्नमातिष्ठेद्यथात्मानं न पीड़येत्॥
जाङ्गलं गुह्यसम्पन्नमार्य्यप्रायमनाविलम्।
रम्यमानतसामन्तं स्वाजीव्यं देशमावसेत्॥
धन्वदुर्गं महीदुर्गमब्दुर्गं वार्क्षमेव वा।
नृदुर्गं गिरिदुर्गं वा समाश्रित्य वसेत् पुरम्॥
सर्व्वेण तु प्रयत्नेन गिरिदुर्गं समाश्रयेत्।
एषां हि बहुगुण्येन गिरिदुर्गं विशिष्यते॥
त्रीण्याद्यान्याश्रितास्तेषां मृगगर्त्ताश्रयाश्चराः।
त्रीण्युत्तराणि क्रमशः प्लवङ्गमनरामराः॥
यथा दुर्गाश्रितानेतान्नोपहिंसन्ति शत्रवः।
तथारयो न हिंसन्ति नृपं दुर्गसमाश्रितम्॥
एकः शतं योधयति प्राकारस्थो धनुर्द्धरः।
शतं दशसहस्राणि तस्माद्दुर्गं विधीयते॥
तत् स्यादायुधसम्पन्नं धनधान्येन वाहनैः।
ब्राह्मणैः शिल्पिभिर्यन्त्रैर्यवसेनोदकेन च॥
तस्य मध्ये सुपर्य्याप्तं कारयेद्गृहमात्मनः।
गुप्तं सर्व्वर्तुकं शुभ्रं जलवृक्षसमन्वितम्॥ *॥
तदध्यास्योद्वहेद्भार्य्यां सवर्णां लक्षणान्विताम्।
कुले महति सम्भूतां हृद्यां रूपगुणान्विताम्॥
पुरोहितञ्च कुर्व्वीत दृष्ट्यादेव चर्त्विजम्।
तैरस्य यज्ञाश्च कर्म्माणि कुर्य्युर्वैतानिकानि च॥
यजेत राजा क्रतुभिर्विविधैराप्तदक्षिणैः।
धर्म्मार्थञ्चैव विप्रेभ्यो दद्याद्भोगान् धनानि च॥
सांवत्सरिकमाप्तैश्च राष्ट्रादाहारयेद्बलिम्।
स्याच्चास्यायपरो लोके वर्त्तेत पितृवत् नृषु॥
अध्यक्षान् विविधान् कुर्य्यात् तत्र तत्र विपश्चितः।
तेऽस्य सर्व्वाण्यवेक्षेरन् नृणां कार्य्याणि कुर्व्वताम्॥
आकृष्टानां गुरुकुलादिप्राणां पूजको भवेत्।
नृपाणामक्षयो ह्येष निधिर्ब्राह्मोऽभिधीयते॥
न तं स्तेना न चामित्रा हरन्ति न च नश्यति।
तस्माद्ब्राह्मे निधातव्यो ब्राह्मणेष्वक्षयो निधिः॥
न स्कन्दते न व्यथते न विनश्यति कर्हिचित्।
वरिष्ठमस्मिंल्लोकेभ्यो ब्राह्मणस्य सुखे हितम्॥
सममब्राह्मणे दानं द्विगुणं ब्राह्मणब्रुवे।
प्राधीते शतसाहस्रमनन्तं वेदपारगे॥
पात्रस्य हि विशेषेण श्रद्धाभृतयेव च।
अल्पं वा बहु वा प्रेत्य दानस्यावाप्यते फलम्॥
समोत्तमाधमे राजा स्वाकृतः पालयन् प्रजाः।
न निवर्त्तेत संग्रामात् क्षात्रं धर्म्ममनुस्मरन्॥
संग्रामेष्वनिवर्त्तित्वं प्रजानाञ्चैव पालनम्।
शुश्रूषा ब्राह्मणानाञ्च राज्ञां श्रेयस्करं परम्॥
आहवेषु मिथोऽन्योन्यं जिघांसन्तो महीक्षितः।
युध्यमानाः परं शक्त्या स्वर्गं यान्त्यपराङ्मुखाः॥
न कूटैरायुधैर्हन्यात् युध्यमानो रणे रिपून्।
न कर्णिभिर्नापि दिग्धैर्नाग्निज्वलिततेजनैः॥
न च हन्यात् स्थलारूढं न क्लीवं न कृताञ्जलिम्।
न मुक्तकेशं नासीनं न तवास्मीति वादिनम्॥
न सुप्तं न विसन्नाहं न नग्नं न निरायुधम्।
नायुध्यमानं पश्यन्तं न परेण समागतम्॥
नायुधव्यसनप्राप्तं नार्त्तं नातिपरीक्षतम्।
न भीतं न परावृत्तं सतां धर्म्ममनुस्मरन्॥
यस्तु भीतः परावृत्तः संग्रामे हन्यते परैः।
भर्त्तुर्यद्दुष्कृतं किञ्चित्तत् सर्व्वं प्रतिपद्यते॥
यच्चास्य सुकृतं किञ्चिदमुत्रार्थमुपार्ज्जितम्।
भर्त्ता तत् सर्व्वमादत्ते परावृत्तहतस्य तु॥ *॥

रथाश्वं हस्तिनं छत्रं धनं धान्यं पशून् स्त्रियः ।
सर्व्वद्रव्याणि कुप्यञ्च यो यज्जयति तस्य तत् ॥
राज्ञश्च दद्युरुद्धारमित्येषा वैदिकी श्रुतिः ।
राज्ञा च सर्व्वयोधेभ्यो दातव्यमपृथग्जितम् ॥
एषोऽनुपस्कृतः प्रोक्तो योधधर्म्मः सनातनः ।
अस्माद्धर्म्मान्न चवेत क्षत्रियो घ्नन् रणे रिपून् ॥
अलब्धञ्चैव लिप्सेत लब्धं रक्षेत् प्रयत्नतः ।
रक्षितं वर्द्धयेच्चैव वृद्धं पात्रेषु निःक्षिपेत् ॥
एतच्चतुर्व्विधं विद्यात् पुरुषार्थप्रयोजनम् ।
अस्य नित्यमनुष्ठानं सम्यक् कुर्य्यादतन्द्रितः ॥
अलब्धमिच्छेद्दण्डेन लब्धं रक्षेदवेक्षया ।
रक्षितं वर्द्धयेद्वृद्ध्या वृद्धं दानेन निःक्षिपेत् ॥*
नित्यमुद्यतदण्डः स्यान्नित्यं विवृतपौरुषः ।
नित्यं संवृतसंवार्य्यो नित्यं छिद्रानुसार्य्यरेः ॥
नित्यमुद्यतदण्डस्य कृतज्ञस्य विजानतः जगत् ।
तस्मात् सर्व्वाणि भूतानि दण्डेनैव प्रसाधयेत् ॥
अमाययैव वर्त्तेत न कथञ्चन मायया ।
बुद्ध्येतारिप्रयुक्तञ्च मायां नित्यं स्वसंवृतः ॥
नास्य च्छिद्रं परो विद्याद्विद्याच्छिद्रं परस्य तु ।
गूहेत् कूर्म्म इवाङ्गानि रक्षेद्विवरमात्मनः ॥
बकवच्चिन्तयेदर्थान् सिंहवच्च पराक्रमेत् ।
वृकवच्चावलुम्पेत शशवच्च विनिष्पतेत् ॥
एवं विजयमानस्य येऽस्य स्युः परिपन्थिनः ।
तानानयेद्वशं सर्व्वान् सामादिभिरुपक्रमैः ॥
यदि ते तु न तिष्ठेयुरुपायैः प्रथमैस्त्रिभिः ।
दण्डेनैव प्रसह्यैतान्वशमानयेत् ॥
सामादीनामुपायानां चतुर्णामपि पण्डिताः ।
सामदण्डौ प्रशंसन्ति नित्यं राष्ट्राभिवृद्धये ॥
यथोद्वरति निर्द्दाता कक्षं धान्यञ्च रक्षति ।
तथा रक्षेन्नृपो राष्ट्रं हन्याच्च परिपन्थिनः ॥
मोहाद्राजा स्वराष्ट्रं यः कर्षयत्यनवेक्षया ।
सोऽचिराद्भ्रश्यते राज्याज्जीविताच्च सबान्धवः ॥
शरीरकर्षणात् प्राणाः क्षीयन्ते प्राणिनां यथा ।
तथा राज्ञामपि प्राणाः क्षीयन्ते राष्ट्रकर्षणात् ॥
राष्ट्रस्य संग्रहे नित्यं विधानमिदमाचरेत् ।
सुसंगृहीतराष्ट्रो हि पार्थिवः सुखमेधते ॥
दयोस्त्रयाणां पक्षानां मध्ये गुल्ममधिष्ठितम् ।
तथा ग्रामशतानाञ्च कुर्य्याद्व्यूहं संग्रहम् ॥
ग्रामस्याधिपतिं कुर्य्याद्दशग्रामपतिं तथा ।
विंशतीशं शतेशञ्च सहस्रपतिमेव च ॥
ग्रामे दोषान् समुत्पन्नान् ग्रामिकः शनकैः स्वयम् ।
शंसेद्ग्रामदशेशाय दशेशो विंशतीशिनम् ॥
विंशतीशस्तु तत्सर्व्वं शतेशाय निवेदयेत् ।
शंसेद्ग्रामशतेशस्तु सहस्रपतये स्वयम् ॥
यानि राजप्रदेयानि प्रत्यहं ग्रामवासिभिः ।
अन्नपानेन्धनादीनि ग्रामिकस्तान्यवाप्नुयात् ॥
दशी कुलन्तु भुञ्जीत विंशी पञ्च कुलानि च ।
ग्रामं ग्रामशताध्यक्षः सहस्राधिपतिः पुरम् ॥
तेषां ग्राम्याणि कार्य्याणि पृथक् कार्य्याणि चैव हि ।
राज्ञोऽन्यैः सचिवैः स्निग्धैस्तानि पश्येदतन्द्रितः ॥

नगरे नगरे चैकं कुर्य्यात् सर्व्वार्थचिन्तकम् ।
उच्चैः स्थानं घोररूपं नक्षत्राणामिव ग्रहम् ।
सतानमुपरिक्रामेत् सर्व्वानेव सदा स्वयम् ।
तेषां वृत्तं परिणयेत् सम्यग्राष्ट्रेषु तच्चरैः ॥
राज्ञो हि रक्षाधिकृताः परस्वादायिनः शठाः ।
भृत्या भवन्ति प्रायेण तेभ्यो रक्षेदिमाः प्रजाः ॥
ये कार्य्यिकेभ्योऽर्थमेव गृह्णीयुः पापचेतसः ।
तेषां सर्व्वस्वमादाय राजा कुर्य्यात् प्रवासनम् ॥
राजकर्म्मसु युक्तानां स्त्रीणां प्रेष्यजनस्य च ।
प्रत्यहं कल्पयेद्वृत्तिं स्थानकर्म्मानुरूपतः ॥
पणो देयोऽक्षरस्य षड्वृक्षस्य वेतनम् ।
धारणासिक्तस्तथाच्छादो धान्यद्रोणस्तु मासिकः ॥ * ॥
क्रयविक्रयमध्वानं भक्तञ्च सपरिव्ययम् ।
योगक्षेमञ्च संप्रेक्ष्य वणिजो दापयेत् करान् ॥
यथा फलेन युज्येत राजा कर्त्ता च कर्म्मणाम् ।
तथावेक्ष्य नृपो राष्ट्रे कल्पयेत् सततं करान् ॥
यथाल्पाल्पमदन्त्याद्यं वार्य्योको वत्स षट्पदाः ।
तथाल्पाल्पो ग्रहीतव्यो राष्ट्राद्राज्ञाब्दिकः करः ॥
पञ्चाशद्भाग आदेयो राज्ञा पशुहिरण्ययोः ।
धान्यानामष्टमो भागः षष्ठो द्वादश एव वा ॥
आददीताथ षड्भागं द्रुमांसमधुसर्पिषाम् ।
गन्धौषधिरसानाञ्च मूलपुष्पफलस्य च ॥
पञ्चाशत्कल्पनानाञ्च वेदलस्य च चर्म्मणाम् ।
तृणसूपानाञ्च भाण्डानां सर्व्वस्याश्ममयस्य च ॥
क्षियमाणोऽप्यादद्यान्न राजा श्रोत्रियात्करम् ।
न च क्षुधास्य संसीदेत् श्रोत्रियो विषये वसन् ॥
यस्य राज्ञस्तु विषये श्रोत्रियः सीदति क्षुधा ।
तस्यापि तत्क्षुधा राष्ट्रमचिरेणैव सीदति ॥
श्रुतवित्ते विदित्वास्य वृत्तिं धर्म्म्यां प्रकल्पयेत् ।
संरक्षेत् सर्व्वतश्चैनं पिता पुत्रमिवौरसम् ॥
संरक्ष्यमाणो राज्ञा यं कुरुते धर्म्ममन्वहम् ।
तेनायुर्व्वर्द्धते राज्ञो द्रविणं राष्ट्रमेव च ॥
यत्किञ्चिदपि वर्षस्य दापयेत् करसंज्ञितम् ।
व्यवहारेण जीवन्तं राजा राष्ट्रे पृथग्जनम् ॥
कारुकान् शिल्पिनश्चैव शूद्रांश्चात्मोपजीविनः ।
एकैकं कारयेत् कर्म्म मासि मासि महीपतिः ॥
नोच्छिन्द्यादात्मनो मूलं परेषाञ्चातितृष्णया ।
उच्छिन्दन् ह्यात्मनो मूलमात्मानं तांश्च पीड़येत् ॥
तीक्ष्णश्चैव मृदुश्च स्यात् कार्य्यं वीक्ष्य महीपतिः ।
तीक्ष्णश्चैव मृदुश्चैव राजा भवति सम्मतः ॥
अमात्यमुखं धर्म्मज्ञं प्राज्ञं दान्तं कुलोद्गतम् ।
स्थापयेदासने तस्मिन् क्षिप्रं कार्य्येक्षणे नृणाम् ॥
एवं सर्व्वं विधायेदमिति कर्त्तव्यमात्मनः ।
युक्तश्चैवाप्रमत्तश्च परिरक्षेदिमाः प्रजाः ॥
विक्रोशन्त्यो यस्य राष्ट्राद्ध्रियन्ते दस्युभिः प्रजाः ।
संपश्यतः सभृत्यस्य मृताः स न तु जीवति ॥
क्षत्रियस्य परो धर्म्मः प्रजानामेव पालनम् ।
निर्द्दिष्टफलभोक्ता हि राजा धर्म्मेण युज्यते ॥

उत्थाय पश्चिमे यामे कृतशौचः समाहितः ।
हुताग्निर्ब्राह्मणांश्चार्च्य प्रविशेत् स शुभां सभाम् ॥
तत्र स्थितः प्रजाः सर्व्वाः प्रतिनन्द्य विसर्ज्जयेत् ।
विसृज्य च प्रजाः सर्व्वा मन्त्रयेत् सह मन्त्रिभिः ॥
गिरिपृष्ठं समारुह्य प्रासादं वा रहोगतः ।
अरण्ये निःशलाके वा मन्त्रयेदविभावितः ॥
यस्य मन्त्रं न जानन्ति समागम्य पृथग्जनाः ।
सम्पूर्णामपि पृथिवीं भुङ्क्ते कोशहीनोऽपि पार्थिवः ॥
जड़मूकान्धबधिरांस्तिर्य्यग्योनान् वयोगतान् ।
स्त्रीम्लेच्छव्याधितव्यङ्गान् मन्त्रकाले ऽपसारयेत् ॥
भिन्दन्त्यवमता मन्त्रं तैर्य्यग्योनास्तथैव च ।
स्त्रियश्चैव विशेषेण तस्मात्तत्राऽऽदृतो भवेत् ॥
मध्यन्दिनेऽर्द्धरात्रे वा विश्रान्तो विगतक्लमः ।
चिन्तयेद्धर्म्मकामार्थान् सार्द्धं तैरेक एव वा ॥
परस्परविरुद्धानां तेषाञ्च समुपार्জ्जनम् ।
कन्यानां सम्प्रदानञ्च कुमाराणाञ्च रक्षणम् ॥
दूतसंप्रेषणञ्चैव कार्य्यशेषं तथैव च ।
अन्तःपुरप्रचारञ्च प्रणिधीनाञ्च चेष्टितम् ॥
कृत्स्नं चाष्टविधं कर्म्म पञ्चवर्गञ्च तत्त्वतः ।
अनुरागापरागौ च प्रचारं मण्डलस्य च ॥
मध्यमस्य प्रचारञ्च विजिगीषोश्च चेष्टितम् ।
उदासीनप्रचारञ्च गूढ़ञ्चैव प्रयत्नतः ॥ * ॥
एताः प्रकृतयो मूलं मण्डलस्य समासतः ।
अष्टौ चान्याः समाख्याता द्वादशैव तु ताः स्मृताः ॥
अमात्यराष्ट्रदुर्गार्थदण्डाख्याः पञ्च चापराः ।
प्रत्येकं कथिता ह्येताः संक्षेपेण द्विसप्ततिः ॥
अनन्तरमरिं विद्यादरिसेविनमेव च ।
अरेरनन्तरं मित्रमुदासीनं तयोः परम् ॥
तान् सर्व्वानभिसन्धत्ते सामादिभिरुपक्रमैः ।
यत्नेनैव समस्तेन पौरुषेण नयेन च ॥
सन्धिञ्च विग्रहञ्चैव यानमासनमेव च ।
द्वैधीभावं संश्रयञ्च षड्गुणांश्चिन्तयेत् सदा ॥
आसनञ्चैव यानञ्च सन्धिं विग्रहमेव च ।
कार्य्यं वीक्ष्य प्रयुञ्जीत द्वैधं संश्रयमेव च ॥
सन्धिन्तु द्विविधं विद्याद्राजा विग्रहमेव च ।
उभे यानासने चैव द्विविधः संश्रयः स्मृतः ॥
समानयानकर्म्मा च विपरीतस्तथैव च ।
तदात्वायतिसंयुक्तः सन्धिर्ज्ञेयो द्विलक्षणः ॥
स्वयंकृतञ्च कार्य्यार्थमकाले काल एव वा ।
मित्रस्य चैवापकृते द्विविधो विग्रहः स्मृतः ॥
एकाकिनश्चात्यधिके कार्य्ये प्राप्ते यदृच्छया ।
संहतस्य च मित्रेण द्विविधं यानमुच्यते ॥
क्षीणस्य चैव क्रमशो दैवात् पूर्व्वकृतेन वा ।
मित्रस्य चानुरोधेन द्विविधं स्मृतमासनम् ॥
बलस्य स्वामिनश्चैव स्थितिः कार्य्यार्थसिद्धये ।
द्विविधं कीर्त्यते द्वैधं षाड्गुण्यगुणवेदिभिः ॥
अर्थसम्पादनार्थञ्च पीड्यमानस्य शत्रुभिः ।
साधुषु व्यपदेशार्थं द्विविधः संश्रयः स्मृतः ॥ * ॥
यदावगच्छेदायत्यामाधिक्यं ध्रुवमात्मनः ।
तदात्वे चाल्पिकां पीड़ां तदा सन्धिं समाश्रयेत् ॥”

तदाले तत्काले ।
"यदा प्रहृष्टा मन्येत सर्व्वास्तु प्रकृतीर्भृशम् ।
अभुक्षितं तथात्मानं तदा कुर्व्वीत विग्रहम् ॥
यदा मन्येत भावेन हृष्टं पुष्टं बलं स्वकम् ।
परस्य विपरीतञ्च तदा यायादरिं प्रति ॥
यदा तु स्यात् परिक्षीणो वाहनेन बलेन च ।
तदासीत प्रयत्नेन शनकैः सान्त्वयन्नरीन् ॥
मन्येतारिं यदा राजा सर्व्वथा बलवत्तरम् ।
तदा द्विधा बलं कृत्वा साधयेत् कार्य्यमात्मनः ॥
यदा परबलानान्तु गमनीयतमो भवेत् ।
तदा तु संश्रयेत् क्षिप्रं धार्म्मिकं बलिनं नृपम् ॥
नियहं प्रकृतीनाञ्च कुर्य्यादुद्योगिबलस्य च ।
उपसेवेत तं नित्यं सर्व्वयत्नैर्गुरुं यथा ॥
यदि तत्रापि संपश्येत् दोषं संश्रयकारितम् ।
सुयुद्धमेव तत्रापि निर्विशङ्कः समाचरेत् ॥
सर्व्वोपायैस्तथा कुर्य्यान्नीतिज्ञः पृथिवीपतिः ।
यथास्याभ्यधिका न स्युर्मित्रोदासीनशत्रवः ॥
आयतिं सर्व्वकार्य्याणां तदात्वञ्च विचारयेत् ।
अतीतानाञ्च सर्व्वेषां गुणदोषौ च तत्त्वतः ॥
आयत्यां गुणदोषज्ञस्तदात्वे क्षिप्रनिश्चयः ।
अतीते कार्य्यशेषज्ञः शत्रुभिर्नाभिभूयते ॥
यत्नेन नाभिसन्दध्यान्मित्रोदासीनशत्रवः ।
तथा सर्व्वं संविदध्यादेष सामासिको नयः ॥
यदा तु यानमातिष्ठेदरिराष्ट्रं प्रति प्रभुः ।
तदानेन विधानेन यायादरिपुरं शनैः ॥
मार्गशीर्षे शुभे मासि यायादर्य्यां महीपतिः ।
फाल्गुनं वाथ चैत्रं वा मासौ प्रति यथाबलम् ॥
अन्येष्वपि तु कालेषु यदा पश्येदुपक्षयम् ।
तदा यायादिगृह्यैव व्यसने चोत्थिते रिपोः ॥
कृत्वा विधानं स्थले तु यात्रिकञ्च यथाविधि ।
उपगृह्यासदञ्चैव चारान् सम्यग्विधाय च ॥
संगृह्य त्रिविधं मार्गं षड्विधञ्च बलं स्वकम् ।
साम्परायिककल्पेन यायादरिपुरं शनैः ॥
शत्रुसेविनि मित्रे च गूढे युक्ततरो भवेत् ।
मतप्रत्यागते चैव स हि कष्टतरो रिपुः ॥
दण्डव्यूहेन तन्मार्गं यायात्तु शकटेन वा ।
वराहमकराभ्यां वा सूच्या वा गरुडेन वा ॥
यतञ्च भयमाशङ्केत्ततो विस्तारयेद्बलम् ।
पद्मेन चैव व्यूहेन निविशेत सदा स्वयम् ॥
सेनापतिबलाध्यक्षौ सर्व्वदिक्षु निवेशयेत् ।
यतञ्च भयमाशङ्केत् प्राचीं तां कल्पयेद्दिशम् ॥
गुल्मांश्च स्थापयेदात्मान् कृतसंज्ञान् समन्ततः ।
स्थाने युद्धे च कुशलानभीरूनविकारिणः ॥
संहतान् योधयेदल्पान् कामं विस्तारयेद्बहून् ।
सूच्या वज्रेण चैवैतान् व्यूहेन व्यूह्य योधयेत् ॥
स्यन्दनाश्वैः समे युध्येदनूपे नौद्विपैस्तथा ।
दृढमुल्लातते चापैरसिचर्म्मायुधैः स्थले ॥
कुरुचेदीन्श्च मत्स्यांश्च पञ्चालान् शूरसेनजान् ।
दीर्घान् लघूंश्चैव नरानग्रानीकेषु योधयेत् ॥
प्रहर्षयेद्बलं व्यूह्य तांश्च सम्यक् परीक्षयेत् ।
चेष्टाश्चैव विजानीयादरीन् योधयतामपि ॥
उपरुध्यारिमासीत राष्ट्रं चास्योपपीडयेत् ।
दूषयेच्चास्य सततं यवसान्नोदकेन्धनम् ॥
भिन्द्याच्चैव तडागानि प्राकारपरिखास्तथा ।
समवस्कन्दयेच्चैनं रात्रौ वित्रासयेत्तथा ॥
उपजप्यानुपजपेदुपेक्षेतैव च तत्प्लुतम् ।
युक्ते च दैवे युध्येत जयप्रेप्सुरपेतभीः ॥
साम्ना दानेन भेदेन समस्तैरथवा पृथक् ।
विजेतुं प्रयतेतारीन्न युद्धेन कदाचन ॥
अनित्यो विजयो यस्मादृश्यते युध्यमानयोः ।
पराजयश्च संग्रामे तस्माद्युद्धं विवर्ज्जयेत् ॥
त्रयाणामप्युपायानां पूर्व्वोक्तानामसम्भवे ।
तथा युध्येत संयत्तो विजयेत रिपून् यथा ॥*॥
जित्वा सम्पूजयेद्देवान् ब्राह्मणांश्चैव धार्म्मिकान् ।
प्रदद्यात् परिहारांश्च स्थापयेदभयानि च ॥
सर्व्वेषान्तु विदित्वैषां समासेन चिकीर्षितम् ।
स्थापयेत्तत्र तद्वृत्तं कुर्य्याच्च समयक्रियाम् ॥
प्रमाणानि च कुर्व्वीत तेषां धर्म्म्यान् यथोदितान् ।
रत्नैश्च पूजयेदेनं प्रधानपुरुषैः सह ॥
आदानमप्रियकरं दानञ्च प्रियकारकम् ।
अभीप्सितानामर्थानां काले युक्तं प्रशस्यते ॥
सर्व्वं कर्म्मेदमायत्तं विधाने दैवमानुषे ।
तयोर्दैवमचिन्त्यन्तु मानुषे विद्यते क्रिया ॥
सह वापि व्रजेद्युक्तः सन्धिं कृत्वा प्रयत्नतः ।
मित्रं हिरण्यं भूमिं वा सम्पश्यंस्त्रिविधं फलम् ॥
पार्ष्णिग्राहञ्च संप्रेक्ष्य तथाक्रन्दञ्च मण्डले ।
मित्रादथाप्यमित्राद्वा यात्राफलमवाप्नुयात् ॥"
आक्रन्दः पार्ष्णिग्राहस्य नियामको राजा ।
"हिरण्यभूमिसम्पन्ना पार्थिवो न तथैधते ।
यथा मित्रं ध्रुवं लब्ध्वा कृशमप्यायतिक्षमम् ॥*॥
धर्म्मज्ञञ्च कृतज्ञञ्च तुष्टप्रकृतिमेव च ।
अनुरक्तं स्थिरारम्भं लघु मित्रं प्रशस्यते ॥
प्राज्ञं कुलीनं शूरञ्च दक्षं दातारमेव च ।
कृतज्ञं धृतिमन्तञ्च कष्टमाहुररिं बुधाः ॥
आर्य्यता पुरुषज्ञानं शौर्य्यं करुणवेदिता ।
स्थौललक्ष्यञ्च सततमुदासीनगुणोदयः ॥"
स्थौललक्ष्यं बहुप्रदत्वम् ।
"क्षेम्यां शस्यप्रदां नित्यं पशुहस्तिकरीमपि ।
परित्यजेन्नृपो भूमिमात्मार्थमविचारयन् ॥
आपदर्थं धनं रक्षेद्दारान्रक्षेद्धनैरपि ।
आत्मानं सततं रक्षेद्दारैरपि धनैरपि ॥
सह सर्व्वाः समुत्पन्नाः प्रसमीक्ष्यापदो भृशम् ।
संयुक्तांश्च वियुक्तांश्च सर्व्वोपायान् प्रयोजयेत् ॥
उपेतारमुपेयञ्च सर्व्वोपायांश्च तत्त्वज्ञः ।
एतत् त्रयं समाश्रित्य प्रयतेतार्थसिद्धये ॥"
उपेतारं आत्मानम् । उपेयं प्राप्तव्यम् ॥*॥
"एवं सर्व्वमिदं राजा सह सम्मन्त्र्य मन्त्रिभिः ।
यायादाक्रन्द्य मध्याह्ने भोक्तुमन्तःपुरं विशेत् ॥
तत्रात्मभूतैः कालज्ञैरहार्य्यैः परिचारकैः ।
सुपरीक्षितमन्नाद्यमद्याच्चैर्व्विषापहैः ॥
विषघ्नैरगदैश्चास्य सर्व्वद्रव्याणि योजयेत् ।
विषघ्नानि च रत्नानि नियतो धारयेत् सदा ॥
परीक्षिताः स्त्रियश्चैनं व्यजनोदकधूपनैः ।
वेषाभरणसंगुप्ताः शयनेषु सुसमाहिताः ॥
एवं प्रयत्नं कुर्व्वीत यानशय्यासनाशने ।
स्नाने प्रसाधने चैव सर्व्वालङ्कारकेषु च ॥
भुक्तवांस्तु विहरेच्चैव स्त्रीभिरन्तःपुरे सह ।
विहृत्य तु यथाकालं पुनः कार्य्याणि चिन्तयेत् ॥
अलङ्कृतश्च संपश्येदायुधीयं पुनर्ज्जनम् ।
वाहनानि च सर्व्वाणि शस्त्राण्याभरणानि च ॥
सन्ध्यांचोपास्य शृणुयादन्तर्व्वेश्मनि शस्त्रभृत् ।
रहस्याख्यायिनाञ्चैव प्रणिधीनाञ्च चेष्टितम् ॥
गत्वा कक्षान्तरं त्वन्यत् समनुज्ञाप्य तं जनम् ।
प्रविशेद्भोजनार्थञ्च स्त्रीवृतोऽन्तःपुरं पुनः ॥
तत्र भुक्त्वा पुनः किञ्चित्तूर्य्यघोषैः प्रहर्षितः ।
संविशेत्तु यथाकालमुत्तिष्ठेच्च गतक्लमः ॥
एतद्विधानमातिष्ठेदरोगः पृथिवीपतिः ।
अस्वस्थः सर्व्वमेतत्तु भृत्येषु विनियोजयेत् ॥"

इति मानवे ७ अध्यायः ॥*॥

काशीकापुराणोक्तराजधर्म्मः ८५ । ८६ अध्याययोः द्रष्टव्यः । महाभारतोक्तराजधर्म्मः शान्तिपर्व्वणि द्रष्टव्यः । पद्मपुराणोक्तराजधर्म्मः स्वर्गखण्डे १३८ अध्याये द्रष्टव्यः ॥

राजधानकं, क्ली, (धीयतेऽत्रेति । धा + ल्युट् । ततः कन् । राज्ञां धानकं नगरम् ।) राजपुरम् । इति शब्दरत्नावली ॥

राजधानी, स्त्री, (धीयतेऽस्यामिति । धा + अधिकरणे ल्युट् । ङीप् । राज्ञां धानी नगरी ।) राजधानिका । तत्पर्य्यायः । कोट्टः २ राजधानकम् ३ । इति शब्दरत्नावली ॥ स्कन्धावारः ४ । इति हेमचन्द्रः ॥ (यथा, रघुः । २ । ७० ।
"तौ दम्पती स्वां प्रति राजधानीं
प्रस्थापयामास वशी वशिष्ठः ॥")

राजधान्यं, क्ली, (राजप्रियं धान्यम् ।) श्यामाकः । इति राजनिर्घण्टः ॥ (यथा, हरिवंशसंहितायाम् । १५ । १२ ।
"त्वाष्ट्रे भूषणमणिरागवेशवृगान्धर्व्वगन्धयुक्तिज्ञाः ।
गणिकपटुतन्तुवायाः शालाक्या राजधान्यानि ॥")

राजधुस्तूरकः, पुं, (धुस्तूरकाणां राजा । राजदन्तादित्वात् परनिपातः ।) हरहुस्तूरः । तत्पर्य्यायः । राजधूर्त्तः २ महाशठः ३ निर्लेजपुष्पकः ४ भ्रान्तः ५ राजखर्जः ६ । इति राजनिर्घण्टः ॥ अस्य गुणाः धुस्तूरशब्दे द्रष्टव्याः ॥

राजनामा, [न्] पुं, (राज्ञो नाम नाम यस्य ।) पटोलः । इति राजनिर्घण्टः ॥

राजनीतिः, स्त्री, (राज्ञां नीतिः ।) राज्ञां नयः । यथा, चाणक्यपण्डितकृतप्रथमः श्लोकः ।
"नानाशास्त्रोद्धृतं वक्ष्ये राजनीतिसमुच्चयम् ।
सर्व्वबीजमिदं शास्त्रं चाणक्यं सारसंग्रहम् ॥"
सा यथा,—
"गदितं बलिशुक्राभ्यां श्रुत्वा भागवतोऽसुरः ।
प्राह धर्म्मार्थसंयुक्तं प्रह्लादो वाक्यमुत्तमम् ॥
यदायत्यां क्षमं राजन् ! यद्धितं भुवनस्य च ।
अविरोधेन धर्म्मस्य अर्थस्योपार्ज्जनञ्च यत् ॥
सर्व्वसत्त्वानुगमनं कामवर्गफलञ्च यत् ।

परत्रेह च यच्छ्रेयः पुत्र तत् कर्म्म आचर ॥
यथा श्लाघां प्रयास्यद्य यथा कीर्त्तिर्भवेत्तव ।
यथा नापयशोयोगस्तथा कुरु महामते ॥
एतदर्थं श्रियं दीप्तां काङ्क्षन्ते पुरुषोत्तमाः ।
येनेति हि गृहेऽस्माकं निवसन्ति सुनिर्वृताः ।
वृद्धो ज्ञातिर्गुणा विप्रः कीर्त्तिश्च यशसा सह ॥
तस्मादृथा ते निवसन्ति पुत्र-
राज्यस्थितस्येह कुलोत्तमाद्याः ।
तथा यतस्वामलसत्त्वचेष्टया
यथा यशस्वी भवितासि लोके ॥
भूम्यां सदा ब्राह्मणभूषितायां
क्षेत्रान्वितायां दृढवापितायाम् ।
शुश्रूषणासक्तससुद्भवायां
वृद्धिं प्रयास्यीह नराधिपेन्द्राः ॥
तस्माद्द्विजाग्र्याः श्रुतिशास्त्रयुक्ता
नराधिपांस्ते प्रतियाजयन्ते ।
दिव्यैर्यजन्तु क्रतुभिर्दिवेन्द्रा
यज्ञाग्निधूमो न नृपस्य ग्लानिः ॥
तपोऽध्ययनसम्पन्ना याजनाध्यापने रताः ।
सन्तु विप्रा बले पुण्याल्लोऽनुज्ञामवाप्य हि ॥
स्वाध्याययज्ञनिरता दातारः शस्त्रजीविनः ।
क्षत्रियाः सन्तु देवेन्द्र प्रजापालनधर्म्मिणः ॥
यज्ञाध्ययनसम्पन्ना दातारः कृषिकारिणः ।
पाशुपाल्यं प्रकुर्वन्तु वैश्या विपणजीविनः ॥
ब्राह्मणक्षत्रियविशां सदा शुश्रूषणे रताः ।
शूद्राः सन्त्वसुरश्रेष्ठ तवाज्ञाकारिणः सदा ॥
यदा वर्णाः स्वधर्म्मस्था भवन्ति दितिजेश्वर ! ।
धर्म्मवृद्धिस्तदा स्याद्वै धर्म्मवृद्धौ नृपोदयः ॥
तस्माद्वर्णा सधर्म्मस्थास्त्वया कार्य्याः सदा बले ! ।
तद्वृद्धौ भवतो वृद्धिस्तद्धानौ हानिरुच्यते ॥
इत्यं वचः प्राप्य महासुरेन्द्रो
बलिं महात्मा स बभूव तूष्णीम् ।
ततो यदाज्ञापयसे करिष्ये
इत्यं बलिः प्राह वचो महर्षे ॥"
इति वामने ७१ अध्यायः ॥ * ॥

अपि च ।
"एवं दत्त्वा ततो राज्यं मूर्द्ध्नि चाघ्राय धर्म्मवित् ।
उवाच मधुरं वाक्यं पुत्रं पुत्रवतां वरः ॥
राज्यस्थेनापि ते पुत्र कर्त्तव्यं शृणु तन्मम ।
यदीच्छेत् परमं धर्म्मं पितॄणां तारणं तथा ॥
दातव्योऽग्निर्न कर्त्तव्या हन्तव्या परदारिकाः ।
बालघातास्च हन्तव्या हन्तव्या स्त्रीविघातकाः ॥
मा लोभं परद्रव्येषु अन्यायोपार्ज्जितेषु च ।
न चिरं तिष्ठते क्वापि सर्व्वे मान्याः कदाचन ॥
रक्षणीयस्च ते देशः कुलन्यायवशार्ज्जितः ।
नित्योद्युक्तेन स्थातव्यममात्यवचनं कुरु ॥
अमात्यो यद्वचो ब्रूयात् पुत्र कार्य्यविमर्शनम् ।
अवश्यमेव कर्त्तव्यं शरीरपरिरक्षणम् ॥
प्रजा येन प्रमोदन्ति येन तुष्यन्ति ब्राह्मणाः ।
एवं ते पुत्र कर्त्तव्यं मम प्रियहितैषिणा ॥
सप्त व्यसनं वर्ज्जयेत् दोषो राज्ञस्तु तन्महत् ।
येषु राजा विनश्येत सम्यग्गोऽपि महाद्युतिः ॥
वर्ज्जयेत सुरापानं मृगया वर्ज्जयेत् सदा ।
वाक्यं रूक्षं न वक्तव्यं वृथा यावत् कदाचन ॥
राजगुह्यं न वक्तव्यं दूतभेदं विवर्ज्जयेत् ।
वर्ज्जयेदतिपारुष्यं असङ्गिश्च समागमम् ॥
अर्थदूषणकश्चैव न कर्त्तव्यं कदाचन ।
अमात्यं नाप्रियं ब्रूयादृयदीच्छेद्राजकर्म्मणि ॥
नाहं निवारणीयस्ते गमनाय पथे स्थितः ।
एतन्मे क्रियतां शीघ्रं यदीच्छसि मम प्रियम् ॥
ततः पितुर्व्वचः श्रुत्वा राजपुत्रो यशस्विनः ।
उभौ तु पादौ संगृह्य कारुण्यं प्रत्युवाच तम् ॥"
इत्यादि श्रीवराहपुराणे भगवच्छास्त्रे शौकरवे तीर्थमाहात्म्ये आदित्यवरप्रदानन्नयनभ्रमुकोपाख्यानं नामाध्यायः ॥ * ॥

अन्यच्च ।
मनुरुवाच ।
"राज्ञोऽभिषिक्तमात्रस्य किंनु कृत्यतमं भवेत् ।
एतत् सर्व्वं समाचक्ष्व सम्यग्वेत्सि यतो भवान् ॥
मत्स्य उवाच ।
अभिषेकार्द्रशिरसा राज्ञा राजीवलोचन ।
गृहायावरणं कार्य्यं तच्च राज्यं प्रतिष्ठितम् ॥
यदस्यात्यतरं कर्म्म तदप्येकेन दुष्करम् ।
पुरुषैस्सहायेन किंनु राज्यं महत् पदम् ॥
तस्मात् सहायान् वरयेत् कुलीनान् नृपतिः स्वयम् ।
शूरान् कुलीनान् ज्ञातीयान् बलयुक्तान् श्रियान्वितान् ॥
रूपसत्त्वगुणोपेतान् सम्मतान् क्षमया युतान् ।
क्लेशक्षमान् महोत्साहान् धर्म्मज्ञांश्च प्रियंवदान् ॥
हितोपदेशकालज्ञान् स्वामिभक्तान् यशोऽर्थिनः ।
एवंविधान् सहायांश्च शुभकर्म्मसु योजयेत् ॥
गुणहीनानपि सदा विज्ञाय नृपतिः स्वयम् ॥
कर्म्मस्वेव नियुञ्जीत यथायोग्येषु भारत ! ।
कुलीनः शीलसम्पन्नो धनुर्व्वेदविशारदः ।
हस्तिशिक्षाश्वशिक्षासु कुशलः शस्त्रभाषणः ॥
निमित्तशकुनज्ञाने वेत्ता चैव चिकित्सिते ।
कृतज्ञः कर्म्मणा शूरस्तथा क्लेशसहो ऋजुः ॥
यूहतत्त्वविधानज्ञः फल्गुसारविशेषवित् ।
राज्ञा सेनापतिः कार्य्यो ब्राह्मणः क्षत्रियो यथा ॥
प्रांशुः सुरूपो दक्षश्च प्रियवादी न चोद्धतः ।
चित्तग्राहश्च सर्व्वेषां प्रतीहारो विधीयते ॥
यथोक्तवादी दूतः स्यादेशभाषाविशारदः ।
प्रगल्भः क्लेशसहो वाग्मी देशकालविभाषितः ॥
विज्ञातदेशकालश्च दूतः स्यात् स महीक्षितः ।
वक्ता नयस्य यः काले स दूतो भूपतेर्भवेत् ॥
प्रांशवो आयताः शूराः दृढभक्ता निराकुलाः ।
राज्ञा तु रक्षिणः कार्य्याः सदा क्लेशसहा हिताः ॥
अनाहार्य्योऽनृशंसश्च दृढभक्तिश्च पार्थिवे ।
ताम्बूलधारी भवति नारी वायथ तद्गुणा ॥
षाड्गुण्यविधितत्त्वज्ञो देशभाषाविशारदः ।
सन्धिविग्रहिकः कार्य्यो राज्ञा नयविशारदः ॥
आयव्ययज्ञो लोकज्ञो देशोत्पत्तिविशारदः ।
कृताकृतज्ञो भृत्यानां ज्ञेयः स्यादेष रक्षिता ॥
सुरूपस्तरुणः प्रांशुर्दृढभक्तिः कुलोचितः ।
शूरः क्लेशसहश्चैव खड्गधारी प्रकीर्त्तितः ॥
शूरश्च बलयुक्तश्च गजाश्वरथकोविदः ।
धनुर्धारी भवेद्राज्ञः सर्व्वक्लेशसहः शुचिः ॥
निमित्तशकुनज्ञानहयशिक्षाविशारदः ।
हयायुर्व्वेदतत्त्वज्ञो भूविभागविशेषवित् ॥
स्वामिभक्तो महोत्साहः सर्व्वेषाञ्च प्रियंवदः ।
बलाबलज्ञो रथिकः स्थिरदृष्टिः प्रियंवदः ॥
शूरश्च कृतविद्यश्च सारथिः परिकीर्त्तितः ।
अनाहार्य्यः शुचिर्दक्षश्चिकित्सितविदांवरः ॥
हृदयास्त्रविशेषज्ञः हृदाध्वगः प्रशस्यते ।
हृदयास्त्रविधानज्ञाः परामेद्याः कुलोद्गताः ।
सर्व्वे महानसे धार्य्या सुपकेशनखा जनाः ॥
समः शत्रौ च मित्रे च धर्म्मशास्त्रविशारदः ।
विप्रमुख्यः कुलीनश्च धर्म्माधिकरणो भवेत् ॥
कार्य्यास्तथाविधास्तत्र द्विजमुख्याः सभासदः ।
सर्व्वदेशाद्यराभिज्ञः सर्व्वशास्त्रविशारदः ॥
लेखकः कथितो राज्ञः सर्व्वाधिकरणेषु वै ।
शीघ्रोपेतान् सुसम्पूर्णान् समश्रेणिगतान् समान् ।
अक्षरान् वै लिखेत् यस्तु लेखकः स वरः स्मृतः ।
उपायवाक्यकुशलः सर्व्वशास्त्रविशारदः ।
वक्रार्थवक्ता वाक्येन लेखकः स्यादभृगूत्तम ॥
वाक्याभिप्रायतत्त्वज्ञो देशकालविभागवित् ।
अनाहार्य्यो नृपे भक्तो लेखकः स्यादभृगूत्तम ।
पुरुषान्तरतत्त्वज्ञाः प्रांशवश्चाप्यलोलुपाः ।
धर्म्माधिकरणे कार्य्या जनाः कानकरा नराः ।
एवंविधास्तथा कार्य्या राज्ञा दौवारिका जनाः ।
लोहवस्त्राजिनादीनां रत्नानाञ्च विधानवित् ॥
विज्ञाता फल्गुसाराणामनाहार्य्यः शुचिः सदा ।
निपुणश्चाप्रमत्तश्च धनाध्यक्षः प्रकीर्त्तितः ॥
आयद्वारेषु सर्व्वेषु धनान्यक्षसमा नराः ।
व्ययद्वारेषु च तथा कर्त्तव्या पृथिवीक्षिता ॥
परम्परागतो यः स्यादष्टाङ्गे तु चिकित्सिते ।
अनाहार्य्यः स वैद्यः स्याद्धर्म्मात्मा च कुलोद्गतः ॥
प्राणाचार्य्यः स विज्ञेयो वचनं तस्य भूभुजः ।
राजन् राज्ञा सदा कार्य्यं यथाकार्य्यं पृथग्जनैः ॥
हस्तिशिक्षाविधानज्ञो वनजातिविशारदः ।
क्लेशक्षमस्तथा राज्ञो गजाध्यक्षः प्रशस्यते ॥
एतैरेव गुणैर्युक्तः खासनश्च विशेषतः ।
गजारोहो नरेन्द्रस्य सर्व्वकर्म्मसु प्रस्थते ॥
हयशिक्षाविधानज्ञस्तच्चिकित्सितपारगः ।
अश्वाध्यक्षो महीभर्तुः खासनश्च प्रशस्यते ॥
अनाहार्य्यश्च शूरश्च तथा प्राज्ञः कुलोद्गतः ।
दुर्गाध्यक्षः स्मृतो राज्ञ उद्युक्तः सर्व्वकर्म्मसु ॥
वास्तुविद्याविधानज्ञो लघुहस्तो जितश्रमः ।
दीर्घदर्शी च शूरश्च स्थपतिः परिकीर्त्तितः ॥

यन्त्रमुक्ते पाणिमुक्ते असक्ते सक्तधारिते ।
अस्त्राचार्य्यो निरुद्वेगः कुलग्रश्च विशिष्यते ॥
वृद्धः कुलोद्गतः शूरः पितृपैतामहः शुचिः ।
राज्ञामन्तःपुराध्यक्षो विनीतश्च तथेष्यते ॥
एवं सप्ताधिकारेषु पुरुषाः सप्त तेऽपरे ।
पञ्च ग्रब्दाधिकरणाः पुरुषाः सप्त तेऽपरम् ॥
अन्तःपुरचराः कार्य्या राज्ञा सर्व्वेषु कर्म्मसु ।
स्थापनाजातितत्त्वज्ञाः सततं प्रतिजाग्रता ॥
राज्ञः स्यादायुधागारे दक्षः कर्म्मसु चोद्यतः ।
कर्म्माण्यपरिमेयानि राज्ञां भृगुकुलोद्वह ॥
उत्तमाधममध्यानि बुद्ध्वा कर्म्माणि पार्थिवः ।
उत्तमाधममध्येषु पुरुषेषु नियोजयेत् ॥
नरकर्म्मविपर्य्यासाद्राजा नाग्रमवाग्नुयात् ।
नियोगं पौरुषं भक्तिं श्रुतं ग्रौर्य्यं कुलं नयम् ॥
ज्ञात्वा वृत्तिर्विधातव्या पुरुषाणां महीक्षिता ।
पुरुषान्तरविज्ञाने तत्त्वसारनिबन्धनात् ॥
बहुभिर्म्मन्त्रयेत् कामं राजा मन्त्रं पृथक् पृथक् ।
मन्त्रिणामपि नो कुर्य्यान्मन्त्रिमन्त्रप्रकाग्रनम् ॥
क्वचित् कस्यचिद्विश्वासो भवतीह सदा नृणाम् ।
निश्चयश्च सदा मन्त्रे कार्य एकेन ग्रूरिणा ॥
भवेद्धा निश्चयावाप्तिः परबुद्ध्यनुजीवनात् ।
एकस्यैव महीभर्त्तुर्भूयः कार्य्यो विनिश्चयः ॥
ब्राह्मणान् पर्य्युपासीत चर्य्यां नाम सुनिश्चिताम् ।
नासच्छास्त्रवतो मूढांस्ते हि लोकस्य कण्टकाः ॥
वृद्धांश्च नित्यं सेवेत विप्रान् वेदविदः शुचीन् ।
तेभ्यो हि ग्रिक्षेद्विनयं विनीतात्मा हि नित्यग्रः ।
समग्रां वग्रगां कुर्य्यात् पृथिवीं नात्र संग्रयः ॥
बहवोऽविनयाद्भ्रष्टा राजानः सपरिच्छदाः ।
वनस्थाश्चैव राज्यानि विनयात् प्रतिपेदिरे ॥
त्रैविद्येभ्यस्त्रयीविद्यां दण्डनीतिञ्च ग्राश्वतीम् ।
आन्वीक्षिकीञ्चात्मविद्यां वार्त्तारम्भांश्च लोकतः ॥
इन्द्रियाणां जये योगं समातिष्ठेद्दिवानिग्रम् ।
जितेन्द्रियो हि ग्रक्नोति वग्रे स्थापयितुं प्रजाः ।
यजेत राजा क्रतुभिर्ब्बहुभिराप्तदक्षिणैः ।
धर्म्मार्थञ्चैव विप्रेभ्यो दद्याद्भोगान् धनानि च ॥
सांवत्सरिकमाप्तैश्च राष्ट्रादाहारयेद्बलिम् ।
स्यात् स्वाध्यायपरो लोके वर्त्तेत पितृवन्नृषु ॥
आवृत्तानां गुरुकुलात् द्विजानां पूजको भवेत् ।
नृपाणामक्षयो ह्येष विधिर्ब्राह्मो विधीयते ॥
ततः स्तेनानवामित्रा हरन्ति न च नश्यति ।
तस्माद्राज्ञा विधातव्यो ब्राह्मणेष्वक्षयो निधिः ॥
समोत्तमाधमे राजा ह्याहूय पालयेत् प्रजाः ।
न निवर्त्तेत संग्रामात् क्षत्रव्रतमनुस्मरन् ॥
संग्रामेष्वनिवर्त्तित्वं प्रजानां परिपालनम् ।
शुग्रूषा ब्राह्मणानाञ्च राजा निग्रेयसं परम् ॥
क्षपणानाञ्च वृद्धानामातुराणाञ्च रोगिणाम् ।
योगक्षेमञ्च वृत्तिञ्च तथैव परिकल्पयेत् ॥
वर्णाग्रमव्यवस्थानं तथा कार्य्यं विग्रेषतः ।
स्वधर्म्मप्रच्युतान् राजा स्वधर्म्मे स्थापयेत्तथा ॥
आग्रमे च यथाकार्य्यं तैलभाजनभोजनम् ।
स्वयमेवानयेद्राजा सत्कृतान्नावमानयेत् ॥
तापसे सर्व्वकार्य्याणि राज्यमात्मानमेव च ।
निवेदयेत् प्रयत्नेन देववच्चिरमर्च्चयेत् ॥
द्वे प्रज्ञे वेदितव्ये च ऋज्वी वक्रा च मानवैः ।
वक्रां ज्ञात्वा न सेवेत प्रतिबाधेत चागताम् ॥
नास्य च्छिद्रं परो विद्यात् विद्याच्छिद्रं परस्य तु ।
गूहेत् कूर्म्म इवाङ्गानि रक्षेद्विवरमात्मनः ॥
न विश्वसेदविश्वस्ते विश्वस्ते नातिविश्वसेत् ।
विश्वासाद्भयमुत्पन्नं मूलान्यपि निकृन्तति ॥
विश्वासयेच्चाप्यपरं तत्त्वभूतेन हेतुना ।
बकवच्चिन्तयेदर्थान् सिंहवच्च पराक्रमेत् ॥
वृकवच्चावलुम्पेत ग्रग्रवच्च विनिष्पतेत् ।
दृढ़प्रहारी च भवेत् तथा ग्रूकरवन्नृपः ॥
चित्राकारश्च ग्रिखिवद्दृढ़भक्तस्तथाग्रववत् ।
भवेच्च मधुराभाषी तथा कोकिलवन्नृपः ॥
काकग्रङ्की भवेन्नित्यं नाज्ञातवसतिं वसेत् ।
नापरीक्षितपूर्व्वञ्च भोजनं ग्रयनं व्रजेत् ॥
वस्त्रं पूयमलङ्कारं यच्चान्यन्नानुजोत्तम ।
न गाहेच्छलसम्बाधं न चाज्ञातजलाग्रयम् ॥
अपरीक्षितपूर्व्वन्तु पुरुषैराप्तकारिभिः ।
नारोहेत् कुञ्जरं बालं न चातु तुरगं तथा ॥
नाविज्ञातक्रियं गच्छेत् नैव देवोत्सवे वसेत् ।
नरेन्द्रलक्ष्मणा धर्म्मज्ञ ज्ञाता यत्तो भवेन्नृपः ।
सदृग्वृत्ताञ्च तथा पुष्टा सततं प्रतिमानिता ।
राज्ञा सहायाः कर्त्तव्याः पृथिवीं जेतुमिच्छता ।
यथार्हञ्चाथ सुभृतान् राजा कर्म्मसु योजयेत् ।
धर्म्मिष्ठान् धर्म्मकार्य्येषु ग्रूरान् संग्रामकर्म्मसु ॥
निपुणानर्थशास्त्रेषु सर्व्वत्र च तथा ग्रुचीन् ।
क्लीवु यज्ञान् नियुञ्जीत तीक्ष्णान् दारुणकर्म्मसु ।
धर्म्मे चार्थे च कामे च भये च रविनन्दन ।
राजा यथार्हञ्च कुर्य्यादुपधाभिः परीक्षणम् ॥
समतौतोपधान् भृत्यान् कुर्य्याद्वस्तिवनेचरान् ।
तत्पादान्वेषणे यत्नांस्तदध्यक्षांश्च कारयेत् ॥
एवमादीनि कर्म्माणि नृपैः कर्य्याणि भार्गव ।
सर्व्वथा नेष्यते राज्ञस्तीक्ष्णोपक्रमणक्रियः ॥
पापसाध्यानि कर्म्माणि यानि राज्ञां नृपोत्तम ।
सन्तस्तानि न कुर्व्वन्ति तस्मात्तान् विभृयान्नृपः ।
नेष्यते पृथिवीग्रानां तीक्ष्णोपक्रमणक्रिया ।
यस्मिन् कर्म्मणि यस्य स्यात् विग्रेषेण च कौग्रलम् ।
तस्मिन् कर्म्मणि तं राजा परीक्ष्य विनियोजयेत् ॥
पितृपैतामहान् भृत्यान् सर्व्वकर्म्मसु योजयेत् ।
विना दायादकृत्येषु परीक्ष्य स्वकृतान्नरान् ।
विनियुञ्जीत महाभाग तस्य ते हितकारिणः ॥
परराजग्रहात् प्राज्ञ जनसंग्रहकाम्यया ।
दुष्टान् वाप्यथवादुष्टानाग्रयेत प्रयत्नतः ॥
दुष्टं विज्ञाय विश्वासं न कुर्य्यात्तत्र भूमिपः ।
वृत्तिं तस्यापि वर्त्तेत जनसंग्रहकाम्यया ॥
राजा देग्रान्तरं प्राप्तं पुरुषं पूजयेद्ग्रमम् ।
ममायं देग्रसंप्राप्तो बहुमानेन चिन्तितः ॥
तेषाचारेण चारित्रं राजा विज्ञाय नित्यग्रः ।
गुणिनां पूजनं कुर्य्यात् निर्गुणानाञ्च ग्रासनम् ॥
कथिताः सततं राजन् राजानश्चारचक्षुषः ।
स्वके देग्रे परे देग्रे ज्ञातग्रौलान् विचक्षणान् ॥
अनाहार्य्यान् क्लेग्रसहान् नियुञ्जीत सदा चरान् ।
जनस्याविदितान् सौम्यांस्तथाज्ञातान् परस्परम् ॥
वणिजो मन्त्रकुग्रलान् सांवत्सरचिकित्सकान् ।
तथा प्रव्रजिताकारान् चारान् राजा नियोजयेत् ॥
नैकस्य राजा ग्रद्धात् चारस्यापि च भाषितं ।
द्वयोः सम्बन्धमाज्ञाय ग्रद्धानृपतिस्ततः ॥
परस्परस्याविदितौ यदि स्यातां चरावुभौ ।
तस्माद्राजा प्रयत्नेन गूढ़ांश्चारान्नियोजयेत् ॥
राज्यस्य मूलमेतावत् या राज्ञश्चारदृष्टिता ।
चाराणामपि यत्नेन राज्ञा कार्य्यं परीक्षणम् ॥
विरज्यते तथा केन विज्ञेयं तन्महीक्षिता ।
अनुरागात् कथं लोके कर्म्म कार्य्यं महीक्षिता ॥
लोकरागापरागौ च भृत्यानाञ्च गुणागुणान् ।
सर्व्वं राज्ञां चरायत्तं तेषु यत्नपरो भवेत् ॥
कर्म्मणा केन मे लोके जनः सर्व्वोऽनुरज्यते ।
विरज्यते केन तथा विज्ञेयं तन्महीक्षिता ।
विरोधजनकं लोके वर्ज्जनीयं विग्रेषतः ॥

जनानुरागप्रभवा हि लक्ष्मी
राज्ञां मता भार्गववंग्रचन्द्र ।
तस्मात् प्रयत्नेन नरेन्द्रसूनुः
कार्य्योऽनुरागो भुवि मानवेषु ॥"

इति मात्स्ये २१५ अध्यायः ॥ * ॥

अपरञ्च ।

राजोवाच ।

"बहवो भूपतेर्धर्म्मास्तान् वक्तुं नहि ग्रक्यते ।
तस्मात् समासतो ब्रूहि महाभाग निग्रामय ॥
पृथिवी वैष्णवी पुण्या सदा प्रियतमा हरेः ।
नारायणाद्ऋते नान्यो वसुमत्याः पतिर्भवेत् ॥
नारायणांग्रजो राजा मनुष्यो न कदाचन ।
अतस्तु दुर्नयं त्यक्त्वा सर्व्वां नीतिं समाचरेत् ॥
नीतिग्राही नृपो यस्तु विपत्तिर्नास्ति तस्य वै ।
चिरं भुनक्ति पृथिवीं कण्टकैः परिवर्ज्जितः ॥
यस्मै न रोचते नीतिर्भूपालाय दुरात्मने ।
अष्टग्रीरचिरेणैव स भवेन्नात्र संग्रयः ॥
आयुर्ब्बलं यग्रो वित्तं विजयं सुखमिच्छता ।
मन्त्रिणे पण्डितो राज्ञा नियोज्यः सर्व्वदैव हि ॥
अवज्ञया महीभर्त्तुर्य्यजन्ति सदसीं बुधाः ।
सभायां बुधहीनायां नीतिर्ब्बलवती न हि ॥
ततो नीतौ विपन्नायां सहसा धरणीपतेः ।
राजग्रियो विनग्यन्ति सकोषबलवाहनाः ॥
ब्राह्मणान् गणकांश्चैव वैद्यांश्च बान्धवांस्तथा ।
नृपाः कल्याणमिच्छन्तो न द्विषन्ति कदाचन ॥
गतग्रीर्गणकद्वेष्टा वैद्यद्वेष्यायुर्व्वर्ज्जितः ।
ज्ञातिद्वेष्टा निष्कुलः स्यात् द्विजद्वेष्टाखिलार्त्ति-
भाक् ॥
राजानः पितरः प्रोक्ताः पुत्रा जनपदास्तथा ।
अतो भूपाः पालयन्ति प्रजाः पुत्रानिवौरसान् ॥
पौरलोकवधूं राजा पग्येत् पुत्रवधूमिव ।
पौरलोके तथा कुर्य्यात् यथा स्नेहो निजात्मजे ॥
प्रजापीड़ाकरा ये च भूपाला अतिमानिनः ।
ग्रिरस्या विपरस्तेषां विज्ञेया दीर्घदर्ग्भिः ॥

विवेकिनो महीपालाः पालयन्ति यथा प्रजाः ।
तथा तानपि देवेशः पालयत्यनिशं हरिः ॥
प्रजानां पालनं दानं देवपि राज्ञां शुभावहे ।
द्वाभ्यां ये वर्जिता भूपास्ते विज्ञेया नृपाधमाः ॥
दुष्टानां शासनञ्चैव शिष्टानां प्रतिपालनम् ।
प्रकुर्व्वन्तो महीपालाश्चिरं नन्दन्ति भूतले ॥
न्यायेनोपार्ज्जितं वित्तं यत्नाद्रक्षेन्महीपतिः ।
निर्व्वित्तो हि महीपालो विपत्तां न हि निस्तरेत् ॥
नृपाः कल्याणमिच्छन्तो निजराज्यशुभाशुभम् ।
पश्यन्ति नित्यं विप्रेन्द्र ! सत्यराचारचक्षुषः ॥
परचक्रभयं यावत् नायाति चिन्तयेद्भयम् ।
आयाते तु भये भूप आत्मरक्षेन्निर्भयो यथा ॥
भ्रातौ वापि च मित्रे वा पुत्रे वापि च मन्त्रिणि ।
कुर्य्यान्मुखेन गाम्भीर्य्यं मनसा प्रेम केवलम् ॥
मन्त्रिणो ज्ञातयः पुत्राः प्रजाश्च भ्रातरस्तथा ।
गाम्भीर्य्यहीनं भूपालं मन्यन्ते न हि भूपवत् ॥
तिष्ठन्ति प्रथमं दूरे वसन्ति पुरतस्तदा ।
लोकाः श्रियं यदिच्छन्ति त्यक्तगाम्भीर्य्यभूपतेः ।
एकस्य मन्त्रिणो राज्ञा चिरं राजत्वमिच्छता ।
कर्त्तव्याः सकले राज्ये वृद्धयो नैव भूसुर ॥
अत्यन्तलब्धवृद्धीनां भृत्यानां सम्पदं हरेत् ।
तस्यां सम्पदि भूपालो भृत्यमन्यं नियोजयेत् ॥
मूर्खः स्त्रीविजितो राजा गीतवाद्यरतः सदा ।
चतुरङ्गबलैर्हीनः सहसा विपदं व्रजेत् ॥
स्वाचारग्रहणं सत्त्वं स्ववाक्यप्रतिपालनम् ।
गाम्भीर्य्यमिति भूपानां लक्षणानि द्विजोत्तम ! ॥
स कथं नृपतिर्यस्तु प्रतापेन विवर्ज्जितः ।
स कथं नृपतिर्येन न जिता परमेदिनी ॥
जितायां परमेदिन्यां यावत् पादं व्रजेन्नृपः ।
प्रतिपादेऽश्वमेधस्य फलं प्राप्नोति चाक्षयम् ॥
परभूमिजयाकाङ्क्षी हतो वा नृपतिर्युधि ।
तदा गच्छेत् परं धाम विमुक्तः सर्व्वपातकैः ॥
युधि प्राप्तजयो राजा प्राप्नोति परमं पदम् ।
स साहसप्राप्तमतुद्दिवीन्द्रसम्पदं लभेत् ॥
त्यक्तसत्त्वं त्यक्तशस्त्रं पलायनपरायणम् ।
भीद्वारं युधि यो हन्यात् स भूपो यात्यधोगतिम् ॥
पलायनपरो युद्धे तद्धन्ता च द्विजोत्तम ! ।
तावुभावपि तिष्ठेतां नरकेऽत्यन्तदुःसहे ॥
युधि साहसवान् योद्धा तद्धन्ता च महीसुर ।
तिष्ठेतां दावपि स्वर्गे यावच्चन्द्रदिवाकरौ ॥
बहुनात्र किमुक्तेन संक्षेपादुच्यते मया ।
प्रजापालनकद्राजा कदाचिन्नावसीदति ॥"

इति पाद्मे क्रियायोगसारे २० अध्यायः ॥

राजनीलं, क्ली, मरकतमणिः । इति शब्दरत्नावली ॥

राजन्यः, पुं, (राज्ञोऽपत्यमिति । राजन् + "राजश्वशुरात् यत् ।" ४ । १ । १३७ । इति यत् ।) क्षत्रियः । इत्यमरः ॥ (यथा, ऋग्वेदे । १० । ९० । १२ ।
"ब्राह्मणोऽस्य मुखमासीत् बाहू राजन्यः कृतः ।
ऊरू तदस्य यद्वैश्यः पद्भ्यां शूद्रो अजायत ॥")
राजपुत्रः । (राजति दीप्यते इति । राज् + "राजेरन्यः ।" उणा० ३ । १०० । इति अन्यः ।) अग्निः । इलुणादिकोषः ॥ चौरिकाकृत्यः । इति जटाधरः ॥

राजन्यकं, क्ली, (राजन्यानां क्षत्रियाणां समूहः । राजन्य + "गोत्रोक्षोष्ट्रोरभ्रराजराजन्येति ।" ४ । २ । ३९ । इति वुञ् ।) क्षत्रियसमूहः । इत्यमरः ॥ (यथा, रघुः । ७ । ५६ ।
"रथी निषङ्गी कवची धनुष्मान्
इन्द्रः स राजन्यकमेकवीरः ।
निवारयामास महावराहः
कल्पक्षयोद्वृत्तमिवार्णवाम्भः ॥"*॥

राजन्यानां विषये देशे च पुं । इति काशिका ॥ अत्र "राजन्यादिभ्यो वुञ् ।" ४ । २ । ५३ । इति वुञ्प्रत्ययः ॥)

राजन्वान्, त्रि, (राजाऽस्त्यस्मिन्निति वा । राजन् + प्रशंसायां मतुप् । "राजन्वान् सौराज्ये ।" ८ । २ । १४ । इति निपातनात् नलोपाभावः ।) सुराराजयुक्तदेशः । इत्यमरः ॥ "प्रजापालनादि-स्वधर्म्मपरायणराजयुक्ते देशे राजन्वात् राजा विद्यतेऽस्येति मोऽभ्रादिपाठात् प्रशंसायां वतुः । यदुक्तं तत्रान्तरे ।
'भूम्नि निन्दाप्रशंसासु नित्ययोगेऽतिशायने ।
संसर्गेऽस्ति विवक्षायां भवन्ति मतुबादयः ॥' इति स्वमते अस्त्यर्थे भूमादयोऽमी अर्था अर्थात्तु लभ्यन्त एव । निपातनान्नलोपाभावः । न सौराज्ये राज्ञो नस्य लुप्तताविति परे । सुराज्ञि स्वधर्म्मपरत्वात् प्रशोभना राजानोऽत्रेति नार्थायां खतेरिति अनिषेधः । देशो लोकोपलक्षणं सुराज्ञि लोके इत्यर्थः ।" इति तट्टीकायां भरतः ॥ (यथा, रघुः । ६ । २२ ।
"कामं नृपाः सन्तु सहस्रशोऽन्ये
राजन्वतीमाहुरनेन भूमिम् ।
नक्षत्रतारागहसङ्कुलापि
ज्योतिष्मती चन्द्रमसैव रात्रिः ॥")

राजपटोलः, पुं, (पटोलानां राजा । परनिपातः ।) मधुरपटोलः । इति रत्नमाला ॥

राजपटोली, स्त्री, (राजप्रिया पटोली ।) मधुरपटोली । इति राजनिर्घण्टः ॥

राजपट्टः, पुं, (राजप्रियः पट्ट इव ।) मन्त्रिविशेषः । तत्पर्य्यायः । विराटजः २ । इति त्रिकाण्डशेषः ॥

राजपट्टिका, स्त्री, चातकपक्षी । इति हारावली ॥

राजपथः, पुं, (राज्ञां पन्थाः । "ऋक्पूरब्धुःपथामानक्षे ।" ५ । ४ । ७४ । इत्यः ।) राजमार्गः । तस्य लक्षणं यथा,—
"धनूंषि दश विस्तीर्णः श्रीमान् राजपथः स्मृतः ।
नृवाजिरथनागानामसम्बाधः सुसञ्चरः ॥"

इति देवीपुराणम् ॥

(यथा, कुमारसम्भवे । ७ । ६३ ।
"तावत्पताकाकुलमिन्द्रमौलि-
रुत्तोरणं राजपथं प्रपेदे ॥")

राजपर्णी, स्त्री, प्रसारिणी लता । इति राजनिर्घण्टः ॥

राजपलाङ्कुः, पुं, (पलाङ्कूनां राजा । राजदन्तादित्वात् परनिपातः ।) रक्तवर्णपलाङ्कुः । लाल प्याँज इति भाषा ॥ तत्पर्य्यायः । जवनेष्टः २ नृपाङ्गयः ३ राजप्रियः ४ महामूलः ५ दीर्घपत्रः ६ रोकः ७ नृपेष्टः ८ नृपकन्दः ९ महाकन्दः १० नृपप्रियः ११ रक्तकन्दः १२ राजेष्टः १३ । अस्य गुणाः । स्निग्धत्वम् । पित्तकफनाशित्वम् । दीपनत्वम् । बहुनिद्राकरत्वञ्च । इति राजनिर्घण्टः ॥

राजपीलुः, पुं, (राजप्रियः पीलुः ।) महापीलुवृक्षः । इति राजनिर्घण्टः ॥

राजपुत्रः, पुं, (राज्ञश्चन्द्रस्य पुत्रः ।) बुधग्रहः । इति शब्दरत्नावली ॥ महाराजसुतः । इति राजनिर्घण्टः ॥ वर्णसङ्करजातिविशेषः । रजपुत इति भाषा ॥ यथा,—
"वैश्यादम्बष्ठकन्यायां राजपुत्रस्य सम्भवः ॥"

इति पराशरपद्धतिः ॥

करणकन्यायां क्षत्रियाज्जातश्च । इति पुराणम् ॥ राजनन्दनः । तत्पर्य्यायः । युवराजः २ कुमारः ३ भर्तृदारकः ४ । इत्यमरः ॥ (यथा,—
"राजपुत्र ! चिरं जीव माजीव सुनिपुत्रक ! ।
जीव वा मर वा साधो बाध माजीव मा मर ॥"

इत्युद्भटः ॥)

तस्य रक्षणं यथा,—
"राजपुत्रस्य रक्षा च कर्त्तव्या पृथिवीक्षिता ।
आचार्य्यैश्चास्य कर्त्तव्यं नित्यमुक्तैश्च रक्षणम् ॥
धर्म्मैकार्थैर्ग्राह्यशास्त्रैः धनुर्व्वेदश्च शिक्षयेत् ।
रथे च कुञ्जरे चैनं वाजिमे कारयेत् सदा ॥
शिक्षयानि शिक्षयेच्चैव नाग्नेर्मिथ्याप्रियं वदेत् ॥
गुणाधानमशक्यन्तु यस्य कर्त्तुं स्वभावतः ।
बन्धनं तस्य कर्त्तव्यं गुप्ते देशे सुखान्वितम् ॥
अविनीतकुमारं हि कुलमाशु विनश्यति ।
अधिकारेषु सर्व्वेषु विनीतं हि नियोजयेत् ॥
आदौ स्वल्पेषु तत्पश्चात् क्रमेणाथ महत्स्वपि ॥
द्यूतमद्यापानमद्यांश्च वर्ज्जयेत् पृथिवीपतिः ।
एतान्यासेवमानास्तु विनश्यन्ति पृथिवीक्षितः ॥
बहवो नृपपुत्रादूंला येषां संख्या न विद्यते ॥
वृथाटनदिवास्वप्नं विशेषेण विवर्ज्जयेत् ।
वाक्पारुष्यं न कर्त्तव्यं दण्डपारुष्यमेव च ॥
परोक्षनिन्दा च तथा वर्ज्जनीया महीक्षिता ।
अर्थस्य दूषणं राजा द्विःप्रकारं विवर्ज्जयेत् ॥
अर्थानां दूषणञ्चैव तथा चार्थेषु दूषणम् ।
अकारणात् समुच्छेदं दुर्गादीनामसत्क्रिया ॥
अर्थानां दूषणं प्रोक्तं विप्रकीर्णत्वमेव च ।
अदेशकाले यद्दानमपात्रे दानमेव च ॥
अर्थस्य दूषणं प्रोक्तमसत्कर्म्मप्रवर्त्तनम् ।
कामं क्रोधं मदं मानं लोभं हर्षञ्चैव च ।
जेतव्यमरिषड्वर्गं सादरं पृथिवीक्षिता ॥

एतेषां विजयं कृत्वा कार्य्यं भृत्यजयं ततः।
कृत्वा भृत्यजयं सर्व्वं राजा जनपदं जयेत्॥
कृत्वा तु विजयं तेषां शत्रून् बाह्यांस्ततो जयेत्।
बाह्याश्च त्रिविधा ज्ञेयास्तुल्याभ्यन्तरक्षत्रिमाः॥
गुरवस्ते यथापूर्व्वं तेषु यत्नपरो भवेत्।
पितृपैतामहं मित्रमभित्रञ्च तथा रिपोः॥
क्षत्रिमञ्च महाभाग मित्रं त्रिविधमुच्यते।
तथापि च गुरुः पूर्व्वं भवेत्तत्रापि चाहतः॥
स्वाम्यमात्यो जनपदो दुर्गं सैन्यन्तथैव च।
कोषो मित्रञ्च धर्म्मज्ञ सप्ताङ्गं राज्यमुच्यते॥
सप्ताङ्गस्यापि राज्यस्य मूलं स्वामी प्रकीर्त्तितः।
तन्मूलत्वात्तथाङ्गानां राजा रक्ष्यः प्रयत्नतः।
षड्वर्गरक्षा कर्त्तव्या तथा तेन प्रयत्नतः॥
अङ्गेभ्यो यस्तथैकस्य द्रोहमाचरतेऽल्पधीः।
वधस्तस्य तु कर्त्तव्यः क्षीप्रमेव महीक्षिता॥
न राज्ञा मृदुना भाव्यं मृदुर्हि परिभूयते।
न भाव्यं दारुणेनापि तीक्ष्णादुद्विजते जनः॥
काले मृदुर्यो भवति काले भवति दारुणः।
राजा लोकद्वयापेक्षी तस्य लोकद्वयं भवेत्॥
भृत्यैः सह महीपालः परिहासं विवर्ज्जयेत्।
भृत्याः परिभवन्तीह नृपं हर्षवशं गतम्॥
व्यसनानि च सर्व्वाणि भूपतिः परिवर्ज्जयेत्।
लोकसंग्रहणार्थाय कृतकव्यसनो भवेत्॥
प्रौढीरस्य नरेन्द्रस्य नित्यमुद्रिक्तचेतसः।
जना विरागमायान्ति सदा दुःसेव्यभावतः॥
स्मितपूर्व्वाभिभाषी स्यात् सर्व्वस्यैव महीपतिः।
वधेष्वपि महाभाग भ्रुकुटीं न समाचरेत्॥
भाव्यं धर्म्मभृतां श्रेष्ठ शूललक्ष्येण भूभुजा।
शूललक्ष्यस्य वशगा सर्व्वा भवति मेदिनी॥
अदीर्घसूत्रश्च भवेत् सर्व्वकर्म्मसु पार्थिवः।
दीर्घसूत्रस्य नृपतेः कर्म्महानिर्ध्रुवं भवेत्॥
रागे द्वेषे च कामे च द्रोहे पापे च कर्म्मणि।
अप्रिये चैव कर्त्तव्ये दीर्घसूत्रः प्रशस्यते॥
राज्ञा संवृतमन्त्रेण सदा भाव्यं द्विजोत्तम।
तस्यासंवृतमन्त्रस्य ज्ञेयाः सर्व्वापदो ध्रुवाः॥
कृतान्येव तु कर्म्माणि जायन्ते यस्य भूपतेः।
गारब्धानि महाभाग तस्य ह्यङ्गसुधा वपुः॥
मन्त्रमूलं सदा राज्यं तस्मान्मन्त्रं सुरक्षितम्।
कर्त्तव्यं पृथिवीपालैर्मन्त्रभेदभयात् सदा॥
मन्त्रवित् साधितो मन्त्रः संयतानां सुखावहः।
मन्त्रच्छलेन बहवो विनष्टाः पृथिवीक्षितः॥
आकारैरिङ्गितैर्गत्या चेष्टया भाषितेन च।
नेत्रवक्त्रविकारैश्च गृह्यतेऽन्तर्गतं मनः॥
नयस्य कृत्स्नलक्ष्यस्य वशे सर्व्वा वसुन्धरा।
भवतीह महीभर्त्तुः सदा पार्थिवनन्दन॥
नैकस्तु मन्त्रयेन्मन्त्रं न राजा बहुभिः सह।
नारोहेद्विषमां नावं नापरीक्षितनाविकाम्॥
ये चास्य भूमिं जयतो भवेयुः परिपन्थिनः।
तानानयेदशे सर्व्वान् सामादिभिरुपक्रमैः॥
यथा न स्यात् क्षयोभावः प्रजानामनपेक्षया।
तथा राज्ञा प्रकर्त्तव्यं स्वराष्ट्रपरिरक्षता॥
मोहाद्राजा स्वराष्ट्रं यः कर्षयत्यनपेक्षया।

सोऽचिराद्भ्रश्यते राज्यात् जीविताच्च सबान्धवः॥
भृतो वह्निर्यातवलः कर्म्मयोग्यो यथा भवेत्।
तथा राष्ट्रं महाभाग भृतं कर्म्मसहं भवेत्॥
यो राष्ट्रमनुगृह्णाति राज्यं स्वं परिरक्षति।
संघातमुपयाचेत्तु विन्दते स महत् फलम्॥
राष्ट्राद्धिरण्यं धान्यञ्च महीं राजा सुरक्षिताम्।
महता तु प्रयत्नेन स्वराष्ट्रस्य च रक्षिता॥
नित्यं स्वेभ्यः परेभ्यश्च यथा माता यथा पिता।
गोपितानि सदा कुर्य्यात् स विभागी प्रियाणि च॥
अजस्रमुपयोक्तव्यं फलं तेभ्यस्तथैव च।
धर्म्मकर्म्मेदमायत्तं विधाने दैवमानुषे।
तयोर्दैवमचिन्त्यं हि पौरुषे विद्यते क्रिया॥
एवं महीं पालयतोऽस्य भर्त्तुः
लोकानुरागः परमो भवेच्च।
लोकानुरागप्रभवा च लक्ष्मी-
र्लक्ष्मीवतश्चैव परा च कीर्त्तिः॥"
इति मात्स्ये २०० अध्यायः॥

राजपुत्रिका, स्त्री, (राजपुत्री+संज्ञायां कन्।) शरारिपक्षी। शराली इति भाषा॥ यथा,—
"शरारिराटिराड़िञ्च ह्रापुत्री राजपुत्रिका॥"
इति जटाधरः॥
राजकन्या च॥ (यथा, हरिवंशे। २५। ४६।
"उत्पादयामास ततः पुत्रं वै राजपुत्रिका॥")

राजपुत्री, स्त्री, (राज्ञः पुत्रीव।) कटुतुम्बी। रेणुका। जाती। राजरीतिः। छुछुन्दरी। इति राजनिर्घण्टः॥ मालती। यथा,—
"अतिमुक्तञ्चाथ जातिर्मालती सुमना अपि॥"
राजपुत्री मनोज्ञा——॥" इति जटाधरः॥
राजकन्या च॥ (यथा, महाभारते। १।७३।१।
"सुयक्तं राजपुत्री त्वं यथा कल्याणि! भाषसे।
भार्य्या मे भव शुभ्रोणि! ब्रूहि किं करवाणि ते॥")

राजपुष्पः, पुं, (पुष्पाणां राजा। राजदन्तादित्वात् परनिपातः।) नागकेशरपुष्पवृक्षः। यथा,—
"चाम्पेयः केशरो नागकेशरः कनकाह्वयः।
महौषधं राजपुष्पः फलकः खरचामरः॥"
इति शब्दचन्द्रिका॥

राजपुष्पी, स्त्री, (राजप्रियं पुष्पमस्याः। ङीप्।) करञ्जवृक्षः। इति राजनिर्घण्टः॥

राजप्रिया, स्त्री, (राज्ञः प्रिया।) करञ्जवृक्षः। इति राजनिर्घण्टः॥

राजफणिज्झकः, पुं, (राजते इति। राज्+अच्। राजो दीप्तिर्यस्यासौ फणिज्झकः।) नागरङ्गवृक्षः। इति शब्दमाला॥

राजफलं, क्ली, (राजाभिधेयं फलम्।) पटोलम्। इति चिकित्साशेषः॥

राजफला, स्त्री, (राजप्रियं फलमस्याः।) जम्बूः। इति राजनिर्घण्टः॥

राजबदरं, क्ली, (राज्ञो बदरमिव प्रियत्वात्।) रक्तामलकम्। लवणम्। इति मेदिनी॥

राजबदरः, पुं, (बदराणां राजा। राजदन्तादित्वात् परनिपातः।) उत्तमकोलिः। तत्पर्य्यायः। नृपश्रेष्ठः २ नृपबदरः ३ राजवल्लभः ४ पृथुकोलः ५ तनुबीजः ६ मधुरफलः ७ राजकोलः ८। अस्य गुणाः। सुमधुरत्वम्। स्निग्धिरत्वम्। दाहार्त्तिपित्तवातहरत्वम्। वृष्यत्वम्। वीर्य्यवृद्धिकरत्वम्। श्लेष्मश्रमनाशित्वञ्च। इति राजनिर्घण्टः॥

राजबीजी, [न्] त्रि, (राजा बीजी कारणं यस्य।) राजवंश्यः। इत्यमरः। २। ७। २॥

राजभट्टिका, स्त्री, ह्रापुत्रीपक्षी। यथा,—
"गोभण्डीरः पङ्कटीरो ह्रापुत्री राजभट्टिका॥"
इति जटाधरः॥

राजभद्रकः, पुं, कुष्ठम्। निम्बः। इति राजनिर्घण्टः॥ पारिभद्रकः। इति साधुपाठः॥

राजभूयं, क्ली, (राज्ञो भावः। राजन्+भू+क्यप्।) राजत्वम्। यथा,—
"स्यादुब्रह्मभूयं ब्रह्मत्वं ब्रह्मसायुज्यमित्यपि।
देवभूयादिकं तद्वत्।" इत्यमरकोषदर्शनात्॥

राजभोग्यं, क्ली, (राज्ञा भोक्तुं योग्यम्। भुज्+ण्यत्। कुत्वञ्च।) जातीकोषम्। प्रियाशब्दे, पुं। इति शब्दचन्द्रिका॥

राजमण्डूकः, पुं, (भण्डूकानां राजा। राजदन्तादित्वात् परनिपातः।) दर्दुरैकः। बड़ बेङ् इति भाषा। तत्पर्य्यायः। महामण्डूकः २ पीताङ्गः ३ पीतमण्डूकः ४ वर्षाघोषः ५ महारवः ६। इति राजनिर्घण्टः॥

राजमल्लः, पुं, राज्ञां मल्लः। राजार माल् इति भाषा। तत्पर्य्यायः। उत्प्लुतः २ उद्गतः ३। इति चिकित्साशेषः॥

राजमार्गः, पुं, (राज्ञो मार्गः।) राजपथः। तद्विवरणं यथा,—
"राजमार्गं सौधयुक्तं यः करोति पतिव्रते।
वर्षाणामयुतं सोऽपि मूलकोके महीयते॥"
इति ब्रह्मवैवर्त्ते प्रकृतिखण्डे २४ अध्यायः॥
अपि च।
"त्रिंशद्धनूंषि विस्तीर्णो देवमार्गस्तु तैः कृतः।
विंशं धनुर्याममार्गः सीमामार्गो दशैव तु॥
धनूंषि दश विस्तीर्णः श्रीमान्राजपथः स्मृतः।
वृषाश्वरथनागानामसम्बाधः सुसञ्चरः॥
धनूंषि चैव चत्वारि प्राखारस्थास्तु निर्म्मिताः।
चिकरः स्रोपरस्थास्तु दिकराप्युपरस्थकाः॥
जङ्घापथश्चतुष्पादस्त्रिपादश्च गृहान्तरम्।
तृतीयपादस्त्वर्द्धपादः प्राग्वंशः पादकः स्मृतः।
अवकरः परिवारः पादमात्रः समन्ततः॥"
इति देवीपुराणे गोपुरद्वारलक्षणं नामाध्यायः॥
(अश्वमेधोत्सर्गे दक्षविधानं कर्त्तव्यम्। यथा, मनुः। ९। २८२।
"यस्तु त्रूयेत् राजमार्गे यज्ञमेध्यमनापदि।
स द्वौ कार्षापणौ दद्यादमेध्याक्षासु शोधयेत्॥"
नीतिः। यथा, हरिवंशे भविष्यपर्व्वणि। ५४। २।

"ज्ञानविज्ञानसम्पन्नौ राजमार्गविशारदौ।
युयुधाते महाराज राक्षसेन दुरात्मना॥")

राजमाषः, पुं, (माषाणां राजा श्रेष्ठत्वात्। राजदन्तादित्वात् परनिपातः।) वर्ब्बटः। वरवटी कड़ाइ इति भाषा। तत्पर्य्यायः। नीलमाषः २ नृपमाषः ३ नृपोचितः ४। अस्य गुणाः। कफपित्तहरत्वम्। रूक्षत्वम्। वातकारित्वम्। बलदायकत्वञ्च। इति राजनिर्घण्टः॥ सारकत्वम्। शुक्रान्मपित्तहरत्वम्। सुखादुत्वम्। रूक्षत्वम्। कषायत्वम्। विषदत्वम्। लघुत्वञ्च। इति राजवल्लभः॥ अन्यच्च।

"राजमाषो महामाषश्चपलश्च बलः स्मृतः।
राजमाषो गुरुः स्वादुस्तुवरस्तर्पणो रसः।
रूक्षो वातकरो रूक्ष्यः स्तन्यो भूरिमलप्रदः॥"
इति भावप्रकाशः॥ *॥

कालविशेषे अस्याभक्षणं यथा। नारदीये।

"निष्पावान् राजमाषांश्च सुप्ते देवे जनार्द्दने।
यो भक्षयति राजेन्द्र चाण्डालादधिको हि सः॥
कार्त्तिके तु विशेषेण राजमाषांश्च वर्ज्जयेत्।
निष्पावान् मुनिशार्दूल यावदाहूतनारकी॥"
इति तिथ्यादितत्त्वम्॥

राजसुङ्गः, पुं, (सुङ्गानां राजा। राजदन्तादित्वात् परनिपातः।) सुङ्गवंशकः। इति हेमचन्द्रः। ४। २४०॥

राजयक्ष्मा, [न्] पुं, (राज्ञश्चन्द्रस्य क्षयकारको यक्ष्मा। राजा चासौ यक्ष्मा चेति वा।) क्षयरोगः। इति हेमचन्द्रः॥ अस्य पर्य्यायनिदानौषधादयो यक्ष्मशब्दे द्रष्टव्याः॥*॥

(असौ हि सर्व्वरोगाणामाकरः। यथा, माधवे। २। ६६।

"मावेदि यदसावेको जेतव्यश्चेदिराड़िति।
राजयक्ष्मैव रोगाणां समूहः स महीभृताम्॥"

"तथाह वाग्भटः।

अनेकरोगानुगतो बहुरोगपुरःसरः।
राजयक्ष्मा क्षयः शोषो रोगराड़िति च स्मृतः॥
नक्षत्राणां द्विजानाञ्च राज्ञोऽभूत् यदयं पुरा।
यच्च राजा च यक्ष्मा च राजयक्ष्मा ततो मतः॥"
इति तट्टीकायां मल्लिनाथः॥)

महापातकजन्यचिह्नमप्यस्य। यथा, विष्णुः।

अथ नरकानुभूतदुःखानां तिर्य्यक्त्वमनुष्यत्वानां मानुष्ये लक्षणानि भवन्ति। कुष्ठ्यतिपातकी ब्रह्महा यक्ष्मी सुरापः श्यावदन्तकः सुवर्णहारी कुनखी गुरुतल्पगो दुष्कर्म्मा। इत्यादि कूर्म्मपुराणम्॥

"क्रियाहीनस्य मूर्खस्य महारोगिण एव च।
यथेष्टाचरणस्याहुर्मरणान्तमशौचकम्॥"

महारोगिणः पापरोगाश्चकान्यतमरोगवतः। ते च उन्मादस्वग्दोषौ राजयक्ष्मा श्वासो मधुमेहो भगन्दरः उदरोऽश्मरी इत्यष्टौ पापरोगा नारदोक्ताः। इति शुद्धितत्त्वम्॥*॥

तस्योत्पत्तिरुपस्यानादि यथा,—

"अथ कोपवतस्तस्य दक्षस्य सुमहात्मनः।
निश्चक्राम तदा यक्ष्मा नासिकाग्रादिभीषणः॥
दंष्ट्राकरालवदनः क्षयाङ्गारसमप्रभः।
अतिदीर्घः खल्वकेशः क्षयो धमनिसन्ततः॥
अधोमुखो दग्धहस्तः कासं विस्रम्य सन्ततम्।
कुर्व्वाणो निम्ननेत्रश्च योषासम्भोगलोलुपः॥
स चोवाच तदा दक्षं कुत्र स्थास्याम्यहं मुने!।
किंवा चाहं करिष्यामि तन्मे वद महामते॥
ततो दक्षस्तु तं प्राह सोमं यातु द्रुतं भवान्।
सोममत्तु भवान्नित्यं सोमे त्वं तिष्ठ स्वेच्छया॥
मार्कण्डेय उवाच।
इति तस्य वचः श्रुत्वा दक्षस्याथ महात्मनः।
अग्नेः अग्नेस्ततः सोममाससाद स च द्रुतम्॥
असाद्य स तदा सोमं वल्मीकं पन्नगो यथा।
प्रविवेशोन्मुखहृदये छिद्रं प्राप्य महागदः॥
तस्मिन् प्रविष्टे हृदये दारुणे राजयक्ष्मणि।
शुशोष चन्द्रस्तन्वीश्च विषमां प्राप्नवांस्ततः॥
उत्पत्य प्रथमं यस्माल्लीनो राजन्यसौ गदः।
राजयक्ष्मेति लोकेऽस्मिंस्तस्य ख्यातिरभूत् द्विजाः॥
ततस्तेनाभिभूतश्च यक्ष्मणा रोहिणीपतिः।
क्षयं जगामानुदिनं ग्रीष्मे शुष्का नदी यथा॥
तथा चन्द्रे क्षीयमाणे सर्व्वौषध्यः क्षयं गताः।
क्षयं जातास्वोषधीषु न यज्ञः संप्रवर्त्तते॥
यज्ञाभावात्तु देवानामन्नं सर्व्वं क्षयं गतम्।
पर्य्यशश्च ततो नष्टास्ततो वृष्टिर्न चाभवत्॥
वृष्ट्यभावे तु लोकानामाहारो क्षीणतां गतः॥
दुर्भिक्षव्यसनोपेते सर्व्वलोके द्विजोत्तमाः।
दानधर्म्मादिकं किञ्चिन्न लोकेषु प्रवर्त्तते॥
सत्त्वहीनाः प्रजाः सर्व्वा लोभेनोपहतेन्द्रियाः।
पापमेव तदा चक्रुर्न धर्म्मरुचयस्तथा॥
एतद्दृष्ट्वा तदा भावं दिक्पालाः सपुरन्दराः।
जग्मुः क्षोभं परं देवाः सागराश्च यथास्तथा॥
ततो दृष्ट्वा जगत् सर्व्वं व्याकुलं दस्युपीड़ितम्।
ब्रह्माणमगमन्देवाः सर्व्वे शक्रपुरोगमाः॥
उपसङ्गम्य लोकेशं स्रष्टारं जगतां पतिम्।
प्रणम्याथ यथायोग्यमुपविष्टास्ततः सुराः॥
तान् म्लानवदनान् वीक्ष्य ब्रह्मा लोकपितामहः।
अभिभूतान् परेणैव द्यूतसक्तविषयानिव।
पप्रच्छ सुसुखीकृत्य गुरुमिन्द्रं हुताशनम्॥
ब्रह्मोवाच।
स्वागतं भोः सुरगणाः किमर्थं यूयमागताः।
दुःखोपहतदेहांश्च युष्मान् म्लानांश्च लक्षये॥
निराधारान् निरातङ्कान् सुरान् सर्व्वासु कामगान्।
कृत्वा स्वविषये न्यस्तान् कथं पश्यामि दुःखितान्॥
यद्वभूवे दुःखबीजं युष्मान् वा यस्तु बाधते।
तत् कथ्यतामशेषेण सिद्धिं चाप्यवधार्य्यताम्॥
मार्कण्डेय उवाच।
ततो बृहस्पतिर्जीवः कृष्णवर्त्मा च लोककृत्।
उवाचात्मभुवे तस्मै सुराणां दुःखकारणम्॥
श्रुत्वा सर्व्वं जगत्कर्त्रे येन वयमागताः।
यदस्माकं दुःखबीजं यतो म्लानश्रियो वयम्।
न क्वचित् संप्रवर्त्तन्ते यज्ञा लोकपितामह॥
देवा ऊचुः।
निराधारा निरातङ्काः प्रजाः सर्व्वाः क्षयं गताः।
न च दानादिधर्म्माश्च न तपांसि क्षितौ क्वचित्॥
नैव वर्षति पर्य्यन्यः क्षीणतोयाभवत् क्षितिः।
क्षीणाः सर्व्वास्तथौषध्यः शुष्का लोकाः समाकुलाः॥
दस्युभिः पीड़िता विप्रा वेदवादान्न कुर्व्वते।
अन्नवैकल्यमासाद्य म्रियन्ते बहवः प्रजाः॥
क्षीणेषु यज्ञभागेषु भोगहीनास्तथा वयम्।
दुर्ब्बलाश्च श्रिया हीना नैव शान्तिं लभामहे॥
रोहिण्या मन्दिरे चन्द्रो वक्रगत्या चिरं स्थितः।
वृषराशौ स च क्षीणो ज्योत्स्नाहीनश्च वर्त्तते॥
यदैवान्विष्यते देवैश्चन्द्रो नैषां पुरःसरः।
कदाचिदपि देवानां समाजे वा भवद्विधे॥
कदाचिद्रोहिणीं त्यक्त्वा नैव क्व च न गच्छति।
यदन्यः कोऽपि न भवेत्तदा चन्द्रो बहिर्भवेत्।
दृश्यते स कलाहीनः कलामात्रावशेषितः॥
इति सर्व्वत्र लोकेषु दृष्टः कर्म्मविपर्य्ययः।
तं दृष्ट्वा कान्दिशीकास्तु वयं त्वां शरणं गताः॥
पातालादुद्यावदुत्थाय कालकञ्जादयोऽसुराः।
नाशान् लोकेषु बाधन्ते तावन्नः पाहि साध्वसात्॥
स्वयं प्रवर्त्तते कस्माच्छगतां वा व्यतिक्रमः।
न जानीमस्तु तत् सर्व्वं विप्लवे चापि कारणम्॥
मार्कण्डेय उवाच।
एतत् सुराणां वचनं दिव्यदृष्टिः पितामहः।
श्रुत्वा क्षणमभिध्याय निजगाद सुरोत्तमान्॥
ब्रह्मोवाच।
शृण्वन्तु देवताः सर्व्वा यदर्थं लोकविप्लवः।
प्रवर्त्ततेऽधुना येन शान्तिस्तस्य भविष्यति॥
सोमो दाक्षायणीः कन्याः सप्तविंशतिसंख्यया।
अश्विन्याद्या वरवधूर्भार्य्यार्थे परिणीतवान्॥
परिणीय स ताः सर्व्वा रोहिण्यां सततं विधुः।
प्रवर्त्ततानुरागेण न सर्व्वासु प्रवर्त्तते॥
अश्विन्याद्यास्ततः सर्व्वा सौभाग्यज्वरपीड़िताः।
षड्विंशतिवरारोहाः पितरं प्रस्थिताः स्वकम्॥
प्रवर्त्तते निशानाथो रोहिण्यां रागतो यथा।
तथा न तासु भजते तद्दक्षाय न्यवेदयन्॥
अतो दक्षो महाबुद्धिः सान्त्वा संस्तूय विट्पतिम्।
बहुसृतमाभाष्य पुत्रार्थेऽनुररोध तम्॥
अनुरुद्धो यथाकामं दक्षेण सुमहात्मना।
समं प्रवर्त्तितं तासु समयं कृतवान् विधुः॥
सममङ्गीकृते भावं तासु कर्त्तुं द्विमांशुना।
खं जगाम ततः स्थानं दक्षोऽपि मुनिसत्तमः॥
गते दक्षे मुनिश्रेष्ठे वैषम्यं तासु चक्रमाः।
जह्नौ न भावं ताः शश्वत् कुपिताः पितरं गताः॥
ततो दक्षः पुनश्चन्द्रमनुरुध्य सुतान्तरे।

समदृष्टिं प्रतिश्राव्य वचनञ्चेदमब्रवीत् ॥
न समं वर्त्तते चन्द्र सर्व्वांसासु भवान् यदि ।
तदा शप्स्ये त्वहं तुभ्यं तस्माद् कुरु समञ्च-
समम् ॥
ततो गते पुनर्दृष्टे न समं वर्त्तते यदा ।
तासु चन्द्रस्तदा दक्षं पुनर्गत्वाब्रुवन् रुषा ॥
न ते वचः स कुरुते नैवासासु प्रवर्त्तते ।
वयं तपः करिष्यामः स्थास्यामश्च त्वदन्तिके ॥
तासामिति वचः श्रुत्वा कुपितस्य तदा मुनेः ।
क्षयाय चन्द्रस्य मनः शापायोत्सुकतां गतम् ॥
शापायोद्युक्तमनसः कुपितस्य महात्मनः ।
क्षयो नाम महारोगो नासिकाग्राद्विनिर्गतः ॥
प्रेषितः स च चन्द्राय दक्षेण मुनिना ततः ।
प्रविष्टवांस्तस्य देहे क्षपितस्तेन चन्द्रमाः ॥
क्षीणे चन्द्रे क्षयं याता ज्योत्स्ना तस्य महा-
त्मनः ।
क्षीणासु सर्व्वज्योत्स्नासु सर्व्वौषध्यः क्षयं गताः ॥
ओषध्यभावाल्लोकेऽस्मिन्न यज्ञः संप्रवर्त्तते ।
यज्ञाभावादनावृष्टिस्ततः सर्व्वप्रजाक्षयः ॥
यज्ञभागोपभोगेन हीनानां भवतां तथा ।
दुर्ब्बलत्वं समुत्पन्नं विकारश्च खगोचरे ॥
इति वः कथितं सर्व्वं यथाभूल्लोकविप्लवः ।
येनोपायेन तच्छान्तिस्तत्गृह्णध्वं सुरोत्तमाः ॥"
इति कालिकापुराणे २० अध्यायः ॥ * ॥
ब्रह्मोवाच ।
"गच्छन्तु भोः सुरगणा दक्षस्य सदनं प्रति ।
तं प्रसाद्य चन्द्रार्थे स च पूर्णो भवेद्यथा ॥
पूर्णे चन्द्रे जगत् सर्व्वं प्रकृतिस्थं भविष्यति ।
युष्माकञ्च भवेत् प्राप्तिरोषधीनाञ्च सम्भवः ॥
मार्कण्डेय उवाच ।
इति ब्रह्मवचः श्रुत्वा देवाः शक्रपुरोगमाः ।
प्रययुर्हृष्टमनसस्तदा दक्षनिवेशनम् ॥
यथान्यायमुपस्थाय सर्व्वे मुनिवरं सुराः ।
प्रोचुः प्रजापतिं दक्षं प्रणम्य श्लक्ष्णया गिरा ॥
देवा ऊचुः ।
प्रसीद सीदतां ब्रह्मन्नस्माकं बहुदुःखिनाम् ।
उद्धरस्व महाबुद्धे त्राहि नः शोकसागरात् ॥
यद्रूपं ब्रह्मसंज्ञन्तु सृष्टिस्थित्यन्तकारणात् ।
तदंशरूपं परं ज्योतिर्विश्वरूपं नतोऽस्मि ते ॥
दक्षणात् सर्व्वजगतां प्रजापालनकारणात् ।
दक्षप्रजापतिश्चेति योगेशस्त्वन्नुमो वयम् ॥
दक्षाय सर्व्वजगतां दक्षाय कुशलात्मनाम् ।
दक्षायात्महितायाशु नमस्तुभ्यं महात्मने ॥
सततं चिन्त्यमानस्य योगिभिर्नियतात्मभिः ।
सारस्य सारभूतस्त्वं दक्षाय परमात्मने ॥
योगविद्भिरनाद्यन्तः पारगाणां परायणः ।
आद्यन्तमुक्तः सहसा तस्मै नित्यं नमो नमः ॥
इति तेषां वचः श्रुत्वा दक्षो यज्ञभुजां तदा ।
प्राह प्रसन्नवदनः शक्रमाभाष्य सुखतः ॥
दक्ष उवाच ।
कुतः शक्र महाभाग भवतां दुःखमागतम् ।
दुःखहेतुं वद विभो श्रोतुमिच्छाम्यहन्तु तम् ॥
ममास्ति यदि कर्त्तव्यं भवतां दुःखहानये ।
तदहं यदि शक्नोमि करिष्यामि हितं सम्म् ॥
मार्कण्डेय उवाच ।
तत् श्रुत्वा वचनं तस्य ब्रह्मस्नूनोर्महर्षिणः ।
जगाद गीष्पतिः शक्रो वीतिहोत्रोऽथ तं
मुनिम् ॥
क्षयं यातो निशानाथस्तस्मिन् क्षीणे क्षयं गताः ।
सर्व्वौषध्यो द्विजश्रेष्ठ तद्धानिर्यज्ञहानिकृत् ॥
यज्ञे विनष्टे सकलाः प्रजाः क्षुद्भयकातराः ।
वृष्टयभावान्महद्दुःखं प्राप्य नष्टाश्च काश्चन ॥
क्षयोऽयं राजिनाथस्य यस्ते कोपात् प्रवर्त्तते ।
स सर्व्वजगतो ब्रह्मन्नभवार्थमुपस्थितः ॥
नाधुना तत्त्रिभुवने यन्न क्षुब्धन्तु किञ्चन ।
विप्लवं यान्ति विप्रेन्द्र सागराः स्थावराश्चराः ॥
न यज्ञाः संप्रवर्त्तन्ते न तपस्यन्ति तापसाः ।
आहारदुःखान्निर्न्नीकाः प्रजाः क्षीणा भया-
तुराः ॥
एवं प्रवृत्ते विप्रेन्द्र विप्लवेऽस्मान् रसातलात् ।
दैत्या न यावदुत्थाय बाधन्ते तावदुद्धर ॥
प्रसीद दक्ष सततं तं पूरय तपोबलात् ।
पूर्णे चन्द्रे जगत् सर्व्वं प्रकृतिस्थं भविष्यति ॥
मार्कण्डेय उवाच ।
इति तेषां वचः श्रुत्वा प्रजापतिसुतस्तदा ।
उवाच तान् सुरगणान् हृदयाच्छल्यमुद्धरन् ॥
दक्ष उवाच ।
यन्मे वचो निशानाथे प्रवृत्तं शापकारणम् ।
न केनापि निदानेन मिथ्या कर्त्तुं तदुत्सहे ॥
किन्तु मद्वचनं यस्मान्नैकान्तेन वृथा भवेत् ।
चन्द्रोऽपि वर्द्धते यस्मात् तस्मात्तस्योपायमपेक्षते ॥
तत्राप्युपायोऽस्ति मासार्द्धं यातु चन्द्रमाः ।
क्षयं वृद्धिञ्च मासार्द्धं स्वयं भार्य्यासु वर्द्धताम् ॥
तस्य तद्वचनं श्रुत्वा तं प्रसाद्य प्रजापतिम् ।
सर्व्वे सुरगणास्तत्र गता यत्रास्ति चन्द्रमाः ॥
एवमुक्ते तु वचने दक्षेण मुनिना द्विजाः ।
अथ चन्द्रं समादाय भार्य्याभिः सहितं तदा ।
अभ्युक्ते ब्रह्मसदनं मुदिताः सुरसत्तमाः ॥
तत्र गत्वा महाभागा यथा दक्षेण भाषितम् ।
तत्सर्व्वं कथयामासुर्ब्रह्मणे परमात्मने ।
ब्रह्मा दक्षवचः श्रुत्वा देवानां सदनं तदा ।
चन्द्रभागं महापुण्यं जगाम सहितः सुरैः ॥
तत्र गत्वा सुरश्रेष्ठः प्रजानां हितकाम्यया ।
क्षापयामास शुभ्रांशुं वृद्धक्षोहितपुष्करे ॥
भूतभव्यभवज्ज्ञानः पूर्व्वमेव पितामहः ।
एतदर्थं चकाराब्ज सरः पूर्णं जगत्प्रभुः ॥
तत्र स्नातस्य लोकस्य नीरोगत्वं प्रजायते ।
चिरायुस्त्वञ्च सततं वृद्धक्षोहितसंज्ञके ॥
तत्र स्नातस्य चन्द्रस्य शरीरात् ततश्च्युतं गदः ।
राजयक्ष्मा निःससार पूर्व्वरूपो यथोदितः ॥
निःसृत्य राजयक्ष्मा तु ब्रह्माणञ्च जगत्पतिम् ।
प्रणम्याहं किं करिष्ये क्व गच्छामीत्युवाच ह ॥
स्थानं पत्नीश्च लोकेश ! देहि मम सदातनम् ।
निदेशयानुरूपं मे सृष्टा त्वं जगतां यतः ॥
मार्कण्डेय उवाच ।
ततो ब्रह्मापि तं पुष्टं निरीक्ष्येन्दुशरीरगैः ।
अष्टतेस्तेजातिभुक्तैः क्षीणश्चापि निशापतिम् ॥
दोर्भिः स्वयं तं गृहीत्वा गिरौ निक्षिप्य वै
सुहृः ।
अष्टतं गालयामास शरीरान्नाजयक्ष्मणः ॥
अष्टतानि च गात्रेभ्यः तदपूतं तदा जले ।
क्षीरोदस्य च चिक्षेप मध्ये रहसि लोकभृत् ॥
तस्मादप्यष्टतादिन्दोः कलाः क्षीणाः पुराभ
वाः ।
तासां जग्राह लवशश्चूर्णान् क्षीरोदसागरात् ॥
कलामात्रावशेषस्य संसर्गान्नाजयक्ष्मणः ।
क्षीणाः कलाः प्रपद्यन्त याः पूर्व्वमष्टतात्मिकाः ।
ता रागयक्ष्मगर्भस्थाश्चूर्णीभूतास्तु पीड़या ॥
तेजोज्योत्स्नाकलाभिस्तु निबद्धं यत् कला-
पतेः ।
शरीरं तत्त्रिधाभूतं गर्भस्थं राजयक्ष्मणः ॥
ज्योतिश्चूर्णमभूत् ज्योत्स्ना क्षीणा राजादि-
यक्ष्माणि ।
द्रवीभूताः सुधाः सर्व्वा गर्भे रोगस्य च स्थिताः ॥
यदा निर्गालयामास सुधां ब्रह्मा गदान्तरात् ।
तदा ज्योत्स्ना सुधा ज्योतिः सर्व्वं तस्माद्-
बहिर्गतम् ॥
क्षीरोदसागरे क्षिप्तं तत्सर्व्वं विधिना तदा ।
देवान् गिरौ परित्यज्य स्वयं गत्वा हृतं ततः ॥
ततोऽष्टतानि प्रक्षाल्य कलाचूर्णानि वारिधेः ।
ज्योत्स्नाक्षाप्याजगामाशु गृहीत्वा तत्त्रयं
गिरिम् ॥
क्षीरोदाद्गिरिमागम्य चन्द्रभागं तदा विधिः ।
देवमध्ये कलाचूर्णं सुधां ज्योत्स्नां न्यवीविशत् ॥
संस्थाप्य तत्त्रयं ब्रह्मा देवानां मध्यतस्ततः ।
जगाद राजयक्ष्माणं तत्स्थानादि निदेशयन् ॥
ब्रह्मोवाच ।
सर्व्वदा यो दिवा रात्रौ सन्ध्यायां वनितारतः ।
सेवते सुरतं तस्मिन् राजयक्ष्मन् वसिष्यसि ॥
प्रतिश्यायश्वासकासयुक्तो यो मैथुनं चरेत् ।
स ते प्रवेशः सततं श्लेष्मणश्च तथाविधः ॥
क्षमाख्या स्त्रीपुत्री या भवतः सदृशी गुणैः ।
सा तेऽस्तु भार्य्या सततं भवन्तमनुयास्यति ॥
क्षीणत्वं भवतः क्षय्यं ततस्त्वं विषये कुरु ।
हृतं गच्छ यथाकामं चन्द्रे त्वं विसुखो भव ॥
मार्कण्डेय उवाच ।
एवं विसृष्टो विधिना राजयक्ष्मा महागदः ।
पश्यतां सर्व्वदेवानामन्तर्द्धानं जगाम ह ॥
अन्तर्हिते महारोगे ब्रह्मा लोकपितामहः ।
चन्द्रं समग्रयामास कलाप्रपदशोधितम् ॥
तेन क्षीरोदधौतेन सुधापूरेण वात्मभूः ।
सन्ध्योत्स्नेस्तु कलाचूर्णैः पूर्व्ववच्चाकरोद्विधुम् ॥
स षोड़शकलापूर्णः पूर्व्ववद्विबभौ यदा ।
चन्द्रस्तदा सर्व्वदेवा सुमुदुस्तस्य दर्शनात् ॥
अथ चन्द्रस्तदा पूर्णः प्रणिपत्य पितामहम् ।
उवाचेदं सुरसदो मध्यगो नातिहर्षितः ॥

सोम उवाच ।
न स्थानं पूर्ववद्ब्रह्मन् ग्रहरीरे मम वर्त्तते ।
न वीर्य्यं वा तथोत्साहो विसीदन्त्यङ्गसन्धयः ॥
नोत्सहे पूर्ववच्चेष्टां विधातुं सुतरामहम् ।
चेष्टाहीनस्त्वनुदिनं वर्त्तेयं केन लोकभृत् ॥
ब्रह्मोवाच ।
ग्रस्तस्य यक्ष्मणा सोम यदभूदङ्गसन्धयः ।
पूर्व्वं विशीर्णा भवतस्तत्पूर्णमभवन्न हि ॥
अधुना भवतो देहचूर्णं निःसारितं मया ।
ग्रहरीरात् साम्प्रतञ्योत्स्ना अङ्गसा राज-
यक्ष्मणः ॥
तेषां प्रक्षालनविधौ लवणो यत् स्थितं जले ।
ज्योत्स्नायाश्च सुधायाश्च तेन हीनो भवान्
यतः ।
ततोऽङ्गसन्धयो राजंस्तव सीदन्ति साम्प्रतम् ॥
अत्रोपायं विधास्यामि यथा नार्त्तिं लभेद्भवान् ।
प्राजापत्यः पुरोडाशो हवनीयः पुरोऽध्वरे ॥
ऐन्द्रस्ततोऽनु चाग्नेयः प्रदेयः सर्व्वतः क्रतौ ।
ततोऽनु भवतो भागः पुरोडाशो मया कृतः ॥
तेन भागेन भुक्तेन नित्यं यज्ञहुतेन हि ।
पूर्ब्ववत्ते ससुत्साहः स्थानं वीर्य्यं भविष्यति ॥
यच्चाम्बतकणास्तोये क्षीरोदस्य स्थितास्तव ।
ग्रहरीरचूर्णं यावत्ते ज्योत्स्नायाश्चापि ये कणाः ।
वृद्धिं यास्यन्ति सततं क्षीरसागरमध्यगाः ॥
खारोचिषोऽन्तरे प्राप्ते द्वितीये ग्रङ्करांग्रजः ।
दुर्व्वासा भविता विप्रः प्रचण्डश्चण्डभास्करः ॥
स महेन्द्रस्याविनयात् ग्रापं दत्त्वा सुदारुणम् ।
करिष्यति त्रिभुवनं निःग्रीकं ससुरासुरम् ॥
ग्रिया हीने ततो लोके भविता लोकविप्लवः ।
यथा तव क्षयात् सोम प्रवृत्तो लोकविप्लवः ॥
तन्मानुषप्रमाणेन त्रेतायै तु कृते युगे ।
भविष्यति स्थास्यति च यावद्युगचतुष्टयम् ॥
ततश्चतुर्थे सम्प्राप्ते सह देवैः कृते युगे ।
क्षीरोदं निर्म्मथिष्यामः ग्रम्भुर्विष्णुरहं तथा ॥
मन्थानं मन्दरं कृत्वा सर्पराजं तथांशुकम् ॥
यज्ञभागेषु हीनेषु देवान्नार्थं वयं ततः ।
मथिष्यामः समं देवैः क्षीरोदं सह दानवैः ।
त्वच्छरीरान्तमिदं यत् स्थितं क्षीरसागरे ॥
तन्मथ्य ग्रहीष्यामो ग्राग्रीभूतं तथाक्षयम् ।
सर्व्वौषध्यन्तरे कृत्वा त्वच्छरीरं तदा वयम् ।
क्षेप्स्यामः सागरजले ग्रहरीरार्थं विधो तव ॥
निर्म्मथ्य सागरं पश्चात् ससुद्रार्य्य यदाप्तम् ।
तदा तव वपुस्तस्मिन्नपूर्व्वं सम्भविष्यति ॥
ओजो वीर्य्यांशुकं कान्तमक्षयञ्च सुधात्मकम् ।
दृढाङ्गसन्धिकं चारु भविष्यति वपुस्तव ॥
मार्कण्डेय उवाच ।
सुधांशुमेवमाभाष्य ब्रह्मा लोकपितामहः ।
विधोः क्षयाय मासार्द्धं वृद्धये यत्नवानभूत् ॥
यथा दक्षेण गदितं मासार्द्धं याति चन्द्रमाः ।
क्षयं वृद्धिञ्च मासार्द्धं यत्नं तत्राकरोद्विधिः ॥
यतः षोड़ग्रधा चन्द्रं सुरज्येष्ठो विभक्तवान् ।
विभज्य च सुरान् सर्व्वान् ससुवाचेदमद्भुतम् ॥
कलाः षोड़ग्र चन्द्रस्य तत्रैका ग्रम्भुमूर्द्धनि ।
तिष्ठत्वद्यावधि परा क्षयं यान्तु क्षयं विना ॥
क्षयेण यदि रोगेण मासार्द्धं दक्षवाक्यतः ।
क्षयाय पीड्यते चन्द्रो नोपग्राह्याः सदा भवेत् ॥
किन्त्वस्य या कला ग्रम्भौ ज्योत्स्ना गच्छन्तु तां
प्रति ।
चतुर्द्दग्रकलासंस्थाः प्रतिमासं सुरोत्तमाः ॥
चतुर्द्दग्रकलासंस्थान्यन्दतानि पिबन्तु वै ।
प्रतिपत्तिथिमारभ्य भवन्तस्त्वाचतुर्द्दग्रीम् ॥
तेजोभागाः सूर्य्यबिम्बं चतुर्द्दग्रतिथौ क्रमात् ।
प्रविग्रन्तु क्षयं त्वेवं कृष्णपक्षे विधोर्भवेत् ॥
यातु ग्रेषा कलादर्ग्रे हरितपक्षे पलायिता ।
तिष्ठतु प्रथमे भागे तिथौ तस्यां निग्रापतेः ॥
द्वितीये दर्ग्रभागे तु रोहिण्या यातु मन्दिरम् ।
तृतीये तु सरस्वत्यां स्नात्वा सन्तुष्टितो विधुः ॥
चतुर्थे बलसंपूर्णस्तिथिभागे विभावसोः ।
मण्डलं यातु चन्द्रोऽयं सबिम्बरघघोटकः ॥
यावत्कालेन हि कला प्रथमा क्षयमाप्नुयात् ।
एवमेवं कृष्णपक्षे तावत्स्था प्रतिपत् भवेत् ॥
द्वितीयादौ कृष्णपक्षे वृद्धिर्द्वासस्तथाविधः ।
तिथीनां वृद्धिहेतुश्च ग्रुक्ले कृष्णे तथा भवेत् ॥
ततः पुनः ग्रुक्लपक्षे यावत् पूर्ब्बा कलोदिता ।
वृद्धिमेति भवेत्तावत् प्रतिपत्तिथिरादितः ॥
ततो द्वितीयभागस्य या ज्योत्स्ना चरमूर्द्धनि ।
स्थितायां वै कलायान्तु गता सा पुनरेष्यति ॥
युष्माभिस्तु भवेत् पेयमन्दतं यद्दिने दिने ।
तद्द्वितीयादितिथिभिः पूर्णान्नाभिः सदैव हि ॥
स्वयमुत्पत्स्यते चन्द्रो ज्योत्स्नायोगात् सुरो-
त्तमाः ।
यथा दिने दिने भागाः क्षयं यान्ति तथा
विधोः ॥
वृद्धिं गच्छन्त्यनुदिनं ग्रुक्लपक्षेऽन्वहं सुराः ।
तेजोभागः सूर्य्यबिम्बात् पुनरेव समेष्यति ॥
प्रयास्यति कृष्णपक्षे यथाभागक्रमन्तथा ।
ज्योत्स्नाहरग्निरश्चन्द्रात् प्रत्यहं पुनरेष्यति ॥
तेजोभागः सूर्य्यबिम्बादन्दतं वत्स्यते स्वयम् ।
एवं वृद्धिः ग्रुक्लपक्षे सुधांग्शोः संभविष्यति ॥
पक्षयोः ग्रुक्लकृष्णत्वं चन्द्रवृद्धिक्षयाङ्गवेत् ।
यावत्कालेन यो भागं क्षयं वृद्धिञ्च यास्यति ॥
तावत्कालमभिव्याप्य तिथिः स्थास्यति सा पुनः ॥
चिरेण वृद्धिर्यदि वा क्षयो वा
हतेन वृद्धिर्यदि वा क्षयो वा ।
हतात्तिथीनां तु सदा क्षयः स्या-
च्चिरात्तु वृद्धिस्तिथिषु प्रवेग्रे ॥
क्षयं कर्त्तुञ्च चन्द्रेण विना न संभविष्यति ।
तस्मात् तयोः प्रवृद्ध्यर्थं चन्द्रं रक्षन्तु देवताः ॥
आस्वादनीयः सुधांशुः कलाग्रेषोऽनुमासतः ।
अमावास्यापराह्णे तु पितृभी रोहिणीग्रृङ्गे ॥
तस्यैवास्वादनात् क्षयं वृद्धिं यास्यति चान्वहम् ।
तेन क्षयेण पितरस्तृप्तिं यास्यन्ति वै पराम् ॥
ग्रीमार्कण्डेय उवाच ।
ततः सुरगणाः सर्व्वे यथोक्तं विधिना तथा ।
चक्रुर्लोकहितार्थाय चन्द्रस्य क्षयवृद्धये ॥
महादेवोऽपि चन्द्रार्द्धं स्वरूपं परमात्मनः ।
जग्राह देवैर्विधिना ग्रिरसाभ्युदितो भृग्नम् ॥
यत्तेजः परमं नित्यमजमव्ययमक्षयम् ।
तत्स्वरूपाश्चन्द्रकलाः ग्रापतस्तु क्षयं गताः ॥
प्रविग्रन्ति यदा ज्योतिरानन्दमजरं परम् ।
योगिनान्तु तदा तेषां चित्तं तल्लीनमेष्यति ॥
महादेवग्रिरःसंस्थे लीने चित्ते सुधानिधौ ।
चन्द्रद्वारा भवेन्मुक्तिरित्येवं वैदिकी श्रुतिः ॥
एतज्ज्ञात्वा महादेवः क्षयवृद्धया विना कृतम्
हिताय सर्व्वलोकानां जग्राह ग्रिरसा विधुम् ॥
चन्द्रज्योत्स्नासमायोगादोषध्यो यान्ति वृद्धये ।
सर्व्वौषधीषु वृद्धासु प्रवर्त्तन्ते ततोऽध्वराः ॥
अध्वरेषु प्रवृत्तेषु स्वान् स्वान् भागांस्तु देवताः ।
परिग्रह्णन्ति पितरस्तथा कव्यानि भूरि च ॥
अन्दतं ब्रह्मणा सृष्टं यदेवेभ्यः पुरातनम् ।
तेन तृप्यन्ति हीना ये क्षयभागेन देवताः ॥
यज्ञेनाप्यायिते तस्य ज्योत्स्नाभिर्वृद्धिमेति वै ।
यज्ञज्योत्स्ना विना भूतं तस्य स्यात् क्षीण-
मन्यथा ॥
अतोऽन्दतस्य यज्ञस्य चन्द्रमाः कारणं स्वयम् ।
अतोऽस्य दक्षग्रापात्तु रक्षाये तच्चिकीर्षितम् ॥
अद्यापि कृष्णपक्षेऽपि सुधा संपीयते सुरैः ।
तेजः सूर्य्यं याति ग्रम्भोश्चन्द्रार्द्धं ज्योत्स्निका तथा
पुनश्च ग्रुक्लपक्षे तु ग्रेषोदेति कला ततः ।
ज्योत्स्नाद्वितीयो भागस्तु तेजोभागो द्वितीयकः ॥
अन्वेत्युग्रिरश्चन्द्रात् सूर्य्यबिम्बादयाक्रमम् ।
कलाः षोड़ग्र चन्द्रस्य तत्रैका ग्रम्भुग्रेखरे ॥
सितासितावुभौ पक्षौ ग्रेषाणासुदयक्षयौ ।
इति वः सर्व्वमाख्यातं विभक्तश्चन्द्रमा यथा ॥
ब्रह्मणा पर्व्वतश्रेष्ठे तथा तच्चन्द्रभागतः ।
यज्ञभागे स्थिते यस्माद्देवार्थमकरोद्विधुम् ।
कर्म्मे स्थितेऽपि पित्र्यर्थे तिथिवृद्धिक्षयौ यथा ॥
इदं पुण्यतमाख्यानं यः ग्रृणोति सदानरः ।
राजयक्ष्मा तस्य कुले न कदाचिद्भविष्यति ॥
यक्ष्मणा परिभूतो यः ग्रृणोति वचनं विधेः ।
अचिरात् यक्ष्मणा मुक्तः स भवेन्नरसत्तमः ॥
इदं स्वस्त्ययनं पुण्यं गुह्यात् गुह्यतरं परम् ।
यः ग्रृणोत्येकचित्तः सन् स महापुण्यभाग्-
भवेत् ॥"
इति कालिकापुराणे २१ अध्यायः ॥

राजयोग्यः, त्रि, (राज्ञो योग्यः ।) राजार्हः । नृपोचितः । यथा,—
"त्रिकोणकण्टके सौम्ये पापे चोपचयस्थिते ।
राजयोग्या भवेन्नारी सुन्दरी कुलवर्द्धिनी ॥"
इति जातकाभरणम् ॥

राजरङ्गं, क्ली, (राजयोग्यं रङ्गम् ।) रजतम् ।
इति शब्दरत्नावली ॥

राजराजः, पुं, (राज्ञामपि राजा धनाधिपत्वात् ।
"राजाहःसखिभ्यष्टच् ।" ५ । ४ । ९१ । इति टच् ।) कुबेरः । इत्यमरः । १ । १ । ६३ ॥
(यथा, किरातार्জ্জुनीये । ५ । ५१ ।

"इत्युक्ता सपदि हितं प्रियं प्रियार्हे
धाम स्वं गतवति राजराजभृत्ये ।
सोत्कण्ठं किमपि पृथासुतः प्रबन्धौ
सन्यस्ते भृशमरतिं हि सद्वियोगः ॥")
सार्व्वभौमः । (यथा, रामायणे ।२।६२।१४।
"प्रयागमिति च श्रुत्वा राजराजस्य योषितः ।
हित्वा यानानि यानार्हा ब्राह्मणं पर्य्यवारयन् ॥")
सुधाकरः । इति मेदिनी । जे, ३६ ॥

राजरीतिः, स्त्री, पित्तलविशेषः । तत्पर्य्यायः । पाकतुण्डी २ राजपुत्री ३ महेश्वरी ४ ब्रह्माणी ५ ब्रह्मारीतिः ६ कपिला ७ पिङ्गला ८ । अस्य गुणाः । तिक्तत्वम् । शीतलत्वम् । लवणत्वम् । शोधनत्वम् । पाण्डुवातकृमिप्लीहपित्तनाशित्वञ्च । इति राजनिर्घण्टः ॥

राजर्षिः, पुं, (राजा ऋषिरिव श्रेष्ठत्वात् ।) ऋतपर्णादिराजः । इति त्रिकाण्डशेषः ॥ तस्य स्मरणं कलिनाशनम् । यथा,—
"कर्कोटकस्य नागस्य दमयन्त्या नलस्य च ।
ऋतपर्णस्य राजर्षेः कीर्त्तनं कलिनाशनम् ॥"
इति महाभारतम् ॥

राजलक्ष्मा, [न्] पुं, (राज्ञो लक्ष्म चिह्नं यत्र ।) युधिष्ठिरः । इति धनञ्जयकोषः ॥ (राजचिह्नयुक्ते, त्रि ॥)

राजलक्ष्मीः, स्त्री, (राज्ञो लक्ष्मीः ।) राजश्रीः । यथा, ज्योतिषतत्त्वे ।
"मन्त्रप्रभावनिपुणः प्रमदाविलासः
श्वेतातपत्रनृपपूजितदेशलाभः ।
हस्त्यश्वलाभधनपूर्णमनोरथः स्यात्
शौक्री दशा भवति निश्चलराजलक्ष्मीः ॥"

राजवंश्यः, त्रि, (राजवंशे भवः । राजवंश+यत् ।) राजवंशोद्भवः । तत्पर्य्यायः । राजबीजी २ । इत्यमरः । २ । ७ । २ ॥

राजवर्त्म, [न्] क्ली, (राज्ञो वर्त्म पन्थाः ।) राजपथः । तत्पर्य्यायः । घण्टापथः २ संसरणम् ३ श्रीपथः ४ उपनिष्क्रमणम् ५ उपनिष्क्रमः ६ महापथः ७ । इति हेमचन्द्रः । ४ । ५३ ॥

राजवला, स्त्री, (राजते शोभते इति । राज्+अच् । राजा वला इति कर्म्मधारयः ।) भद्रवला । इत्यमरः । २ । ४ । १५३ ॥ गन्धभादालिया इति भाषा ॥

राजवल्लभः, पुं, (राज्ञां वल्लभः ।) राजादनी । राजान्नः । राजबदरः । इति राजनिर्घण्टः ॥ नारायणदासकविराजकृतद्रव्यगुणग्रन्थविशेषः । यथा,—
"श्रीनारायणदासेन कविराजेन धीमता ।
प्रतिसंस्क्रियते द्रव्यगुणोऽयं राजवल्लभः ॥"
इति तस्य द्वितीयश्लोकः ॥
नृपप्रिये, त्रि ॥ (यथा, मार्कण्डेये । ४६ । ४६ ।
"दुष्टप्रायो विना चेदैः परभूमिश्चरो बली ।
ग्राम एवाक्रमीसंज्ञो राजवल्लभसंश्रयः ॥")

राजवल्ली, स्त्री, (राजप्रिया वल्ली ।) तोयवल्ली । इति रत्नमाला ॥ उल्या इति भाषा ॥

राजवान्, [त्] त्रि, (राजाऽस्यास्तेति । राजन्+मतुप् । मस्य वः ।) राजमात्रयुक्तदेशः । यथा,—
"सुराष्ट्रे देशे राजन्वान् स्यात्ततोऽन्यत्र राजवान् ॥"
इत्यमरः । २ । १ । १३ ॥
(नृपविशिष्टः । यथा, महाभारते ।५।१।७।
"रराज सा राजवती सम्पदा
यक्षेरिव द्यौर्विमलेरुपेता ॥")

राजवाहः, पुं, (राजानं वहतीति । वह्+अण् ।) घोटकः । इति शब्दचन्द्रिका ॥

राजवाह्यः, पुं, (राज्ञां वाह्यः ।) राजवाहकवृक्षौ । तत्पर्य्यायः । उपवाह्यः २ । इति हेमचन्द्रः ॥ विजयकुञ्जरः ३ । इति त्रिकाण्डशेषः ॥ राजवहनीये, त्रि ॥

राजवृक्षः, पुं, (वृक्षाणां राजा । राजदन्तादित्वात् परनिपातः ।) आरग्वधवृक्षः । इत्यमरः ॥ प्रियालवृक्षः । इति मेदिनी ॥ लङ्कास्थायी वृक्षः । इति शब्दचन्द्रिका ॥ लङ्कासिज् इति भाषा ॥

राजशूरः, पुं, (राजः शोभमानः शूरः ।) भटः । इति शब्दमाला ॥ भाट् इति भाषा ॥

राजसर्षपः, पुं, इक्षिशूरमत्स्यः । इति हारावली ॥

राजश्यामा, स्त्री, (राज्ञः श्यामा ।) राज्ञः श्यामनीयम् । तत्पर्य्यायः । महाश्यामा २ । इति हेमचन्द्रः ॥

राजशाकः, पुं, (राजप्रियः शाकः । शाकानां राजा इति वा ।) वास्तूकम् । इति राजनिर्घण्टः ॥

राजशुकः, पुं, (शुकानां राजा । राजदन्तादित्वात् परनिपातः ।) पक्षिविशेषः । राजा शूगा इति हिन्दी भाषा । तत्पर्य्यायः । प्राज्ञः २ शतपत्रः ३ नृपप्रियः ४ । इति राजनिर्घण्टः ॥

राजश्छत्रं, क्ली, राजच्छत्रम् । तत्पर्य्यायः । कनकदण्डकम् २ । इति त्रिकाण्डशेषः ॥

राजश्वशुरः, पुं, मद्गुरमत्स्यः । इति हेमचन्द्रः ॥

राजसः, त्रि, (रजसो भवः । रजस्+अण् ।) रजोगुणोद्भवः । लक्षणञ्च यथा,—
"आरम्भरुचिताधैर्य्यमसत्कार्य्यपरिग्रहः ।
विषयोपसेवा चाजस्रं राजसं गुणलक्षणम् ॥"
आरम्भरुचिता फलार्थं कर्म्मानुष्ठानशीलता ॥*॥
संक्षेपतस्तल्लक्षणं यथा,—
"येनास्मिन् कर्म्मणा लोके ख्यातिमिच्छति पुष्कलाम् ।
न च शोचत्यसम्पत्तौ तद्विज्ञेयन्तु राजसम् ॥"
तस्याश्च गतिर्यथा,—
"देवत्वं सात्त्विका यान्ति मनुष्यत्वञ्च राजसाः ।
तिर्य्यक्त्वं तामसा नित्यमित्येषा त्रिविधा गतिः ॥"
तद्गतिप्रकारा यथा,—
"भक्षा भक्षा नटाश्चैव पुरुषाः शस्त्रवृत्तयः ।
द्यूतपानप्रसक्ताश्च जघन्या राजसी गतिः ॥
राजानः क्षत्रियाश्चैव राज्ञश्चैव पुरोहिताः ।
वादयुद्धप्रधानाश्च मध्यमा राजसी गतिः ॥
गन्धर्व्वा गुह्यका यक्षा विबुधानुचराश्च ये ।
तथैवाप्सरसः सर्व्वा राजसीषूत्तमा गतिः ॥"
इति वामने १२ अध्यायः ॥
राजसाहारा यथा,—
"कट्वम्ललवणात्युष्णातीक्ष्णरूक्षविदाहिनः ।
आहारा राजसस्येष्टा दुःखशोकामयप्रदाः ॥"
राजसयज्ञो यथा,—
"अभिसन्धाय तु फलं दम्भार्थमपि चैव यत् ।
इज्यते भरतश्रेष्ठ तं यज्ञं विद्धि राजसम् ॥"
राजसतपो यथा,—
"सत्कारमानपूजार्थं तपो दम्भेन चैव यत् ।
क्रियते तदिह प्रोक्तं राजसं चलमध्रुवम् ॥"*॥
राजसदानं यथा,—
"यत्तु प्रत्युपकारार्थं फलमुद्दिश्य वा पुनः ।
दीयते च परिक्लिष्टं तद्दानं राजसं स्मृतम् ॥"
इति श्रीभगवद्गीतायाम् १७ अध्यायः ॥
राजसत्यागो यथा,—
"दुःखमित्येव यत् कर्म्म कायक्लेशभयात् त्यजेत् ।
स कृत्वा राजसत्यागं नैव त्यागफलं लभेत् ॥"
राजसज्ञानं यथा,—
"पृथक्त्वेन तु यज्ज्ञानं नानाभावान् पृथग्विधान् ।
वेत्ति सर्व्वेषु भूतेषु तज्ज्ञानं विद्धि राजसम् ॥"
राजसकर्म्म यथा,—
"यत्तु कामेप्सुना कर्म्म साहङ्कारेण वा पुनः ।
क्रियते बहुलायासं तद्राजसमुदाहृतम् ॥"*॥
राजसकर्त्ता यथा,—
"रागी कर्म्मफलप्रेप्सुर्लुब्धो हिंसात्मकोऽशुचिः ।
हर्षशोकान्वितः कर्त्ता राजसः परिकीर्त्तितः ॥"
राजसी बुद्धिर्यथा,—
"यया धर्म्ममधर्म्मञ्च कार्य्यञ्चाकार्य्यमेव च ।
अयथावत् प्रजानाति बुद्धिः सा पार्थ राजसी ॥"
राजसी धृतिर्यथा,—
"यया तु धर्म्मकामार्थान् धृत्या धारयतेऽर्জ্জুন ।
प्रसङ्गेन फलाकाङ्क्षी धृतिः सा पार्थ राजसी ॥"
राजससुखं यथा,—
"विषयेन्द्रियसंयोगात् यत्तदग्रेऽमृतोपमम् ।
परिणामे विषमिव तत् सुखं राजसं स्मृतम् ॥"
इति श्रीभगवद्गीतायाम् १८ अध्यायः ॥ * ॥
राजसपुराणानि यथा,—
"ब्रह्माण्डं ब्रह्मवैवर्त्तं मार्कण्डेयं तथैव च ।
भविष्यं वामनं ब्राह्मं राजसानि निबोधत ॥" ॥
राजसस्मृतयो यथा,—
"आवनं याज्ञवल्क्यञ्च आत्रेयं दाक्षमेव च ।
कात्यायनं वैष्णवञ्च राजसाः स्वर्गदा मताः ॥"
इति पाद्मोत्तरखण्डे ४३ अध्यायः ॥

राजसदनं, क्ली, (राज्ञः सदनम् ।) राजगृहम् । तत्पर्य्यायः । सौधः २ । इत्यमरः । २ । २ । १० ॥ भूपालभवनम् ३ सुधामयम् ४ । इति शब्दरत्नावली ॥ तद्भेदा यथा,—
"सौधोऽस्त्री राजसदनसुपकार्य्योपकारिका ।

खस्तिकः सर्व्वतोभद्रो नन्द्यावर्त्तादयोऽपि च ।
विच्छन्दकः प्रभेदा हि भवन्तीश्वरसङ्गनाम् ॥"
इत्यमरः । २ । २ । १० ॥

राजसभा, स्त्री, राज्ञः सभा । ("सभा राजामनुष्यपूर्व्वा ।" २ । ४ । २३ । इत्यत्र राजपर्य्यायस्यैव ग्रहणात् न क्लीवत्वम् ।) नृपतिसमाजः । इत्यमरः । ३ । ५ । ६ ॥ (वाचस्पत्ये नपुंसकलिङ्गतोक्तिस्तु प्रामादिकी ॥)

राजसर्षपः, पुं, (सर्षपाणां राजा । राजदन्तादित्वात् परनिपातः ।) सर्षपविशेषः । तत्पर्य्यायः । भुजङ्गभोजी २ । इति हेमचन्द्रः । ४ । ३७० ॥

राजसर्षपः, पुं, (सर्षपाणां राजा श्रेष्ठत्वात् । परनिपातः ।) सर्षपविशेषः । राजसर्षा इति भाषा ॥ राइ इति कैश्चित् ॥ तत्पर्य्यायः । क्षुद्रिका २ राजिका ३ सूरी ४ मुष्टकः ५ । मुष्टक इत्यत्र यष्टक इति वा पाठः । इति रत्नमाला ॥ क्षवः ६ क्षुताभिजननः ७ । क्षुताभिजनन इत्यत्र क्षुधाभिजनन इति वा पाठः । इति हेमचन्द्रः ॥ कृष्णा ८ तीक्ष्णफला ९ राजी १० कृष्णसर्षपाख्या ११ । अस्य गुणाः । तिक्तत्वम् । कटुत्वम् । उष्णत्वम् । वातशूलगुल्मकण्डूकुष्ठव्रणनाशित्वम् । पित्तदाहप्रदत्वञ्च । इति राजनिर्घण्टः ॥ (चतुर्व्विंशतिचसरेणुपरिमित-परिमाणविशेषः । यथा, मनुः । ८ । १३३ ।

"चसरेणवोऽष्टौ विज्ञेया लिक्षैका परिमाणतः ।
ता राजसर्षपस्तिस्रस्ते त्रयो गौरसर्षपः ॥"

"चसेत्यादि । अष्टौ चसरेणवो लिक्षैका परिमाणेन ज्ञेया तास्तिस्रो लिक्षा राजसर्षपो ज्ञेयः । ते राजसर्षपास्त्रयो गौरसर्षपो ज्ञेयः ॥" इति तट्टीकायां कुल्लूकः ॥)

राजसायुज्यं, क्ली, (राज्ञः सायुज्यम् ।) राजत्वम् ।

"स्याद्ब्रह्मभूयं ब्रह्मत्वं ब्रह्मसायुज्यमित्यपि ।
देवभूयादिकं तद्वत्————— ॥"
इत्यमरदर्शनात् ॥

राजसारसः, पुं, (राज्ञः सारस इव । राजः श्वेभाग्नाली सारस इव इति वा ।) मयूरः । इति शब्दमाला ॥

राजसी, स्त्री, (रजस इयमिति । रजस्+अण् । ङीप् ।) दुर्गा । इति शब्दरत्नावली ॥ रजोगुणसम्बन्धिनी च ॥ (यथा, गीतायाम् ।

"यया धर्म्ममधर्म्मञ्च कार्य्यञ्चाकार्य्यमेव च ।
अयथावत् प्रजानाति बुद्धिः सा पार्थ राजसी ॥")

राजसूयः, पुं, ("राज्ञा क्रतात्मकः सोमः सूयते ऽत्र ।" इत्यमरटीका ॥ सु+अधिकरणे क्यप् । "राज्ञा सोतव्यः राज्ञा वा इह सूयते ।" इति काशिका । "राजसूयसूर्य्येति ।" ३ । १ । ११४ । इति निपातनात् दीर्घः ।) राजकर्त्तव्ययज्ञविशेषः । तत्पर्य्यायः । नृपाध्वरः २ क्रतुराजः ३ क्रतूत्तमः ४ । इति शब्दरत्नावली ॥ (अमरमते क्लीवलिङ्गोऽयम् । ३ । ५ । ३२ ॥ यथा, महाभारते । १ । १५७ । १६ ।

"यक्ष्यन्ति चनरव्याघ्रा निर्ज्जित्य पृथिवीमिमाम्
राजसूयाश्वमेधाद्यैः क्रतुभिर्भूरिदक्षिणैः ॥"

राजसूयमन्त्रादिकं वाजसनेयसंहितायाम् ९ अध्यायस्य ३५ कण्डिकामारभ्य १० अध्यायस्य ३० कण्डिकापर्य्यन्तं द्रष्टव्यम् ॥ युधिष्ठिरस्य राजसूययज्ञविवरणन्तु महाभारते सभापर्व्वणि विशेषतो द्रष्टव्यम् ॥)

राजस्कन्धः, पुं, (राजः श्वेभाग्नाली स्कन्धो यस्य ।) घोटकः । इति त्रिकाण्डशेषः ॥

राजस्वं, पुं क्ली, (राज्ञे देयं स्वं धनम् ।) राजधनम् । राजकरः । इति लोकप्रसिद्धम् ॥

राजस्वर्णः, पुं, (स्वर्णानां धुस्तूराणां राजा । राजदन्तादित्वात् परनिपातः ।) राजधुस्तूरकः । इति राजनिर्घण्टः ॥

राजहंसः, पुं, (हंसानां राजा श्रेष्ठत्वात् । राजदन्तादित्वात् परनिपातः ।) चञ्चुचरणलोहितश्वेतवर्णहंसः । इत्यमरः । २ । ५ । २४ ॥ (यथा, कुमारे । १ । ३४ ।

"सा राजहंसैरिव सन्नताङ्गी
गतेषु लीलाञ्चितविक्रमेषु ।
यनीयतप्रत्युपदेशसुज्ञै-
रादित्सुभिर्नूपुरशिञ्जितानि ॥")

कदम्बः । कलहंसः । नृपोत्तमः । इति मेदिनी ॥

राजहर्षणं, क्ली, (राजानमपि हर्षयतीति । हृष्+णिच्+ल्युः ।) तगरपुष्पम् । इति राजनिर्घण्टः ॥

राजहस्ती, [न्] पुं, (राज्ञो हस्ती ।) राजगजः । तत्पर्य्यायः । मारीचः २ याजकगजः ३ मदोत्कटः ४ । इति हारावली । ४६ ॥

राजहासकः, पुं, (राजानमपि हासयतीति । हस्+णिच्+ण्वुल् ।) मत्स्यविशेषः । तत्पर्य्यायः । कातरः २ कातलः ३ राजीवः ४ । इति शब्दरत्नावली ॥

राजक्षवकः, पुं, सर्षपः । इति राजनिर्घण्टः ॥ (अस्य शाकगुणाः ।

"संग्राहि शीतलञ्चापि लघुदोषाविरोधि च ।
राजक्षवकशाकन्तु सटीशाकन्तु तद्विधम् ॥"
इति सुश्रुते सूत्रस्थाने ४६ अध्यायः ॥)

राजा, [न्] पुं, (राजते श्वेभते इति । राज्+"कनिन् युवृषितक्षिराजीति ।" उणा० १ । १५६ । इति कनिन् ।) प्रभुः । नृपतिः । (यथा-रघुः । ४ । ११ ।

"यथा प्रह्लादनात् चन्द्रः प्रतापात् तपनो यथा ।
तथैव सोऽभूदन्वर्थो राजा प्रकृतिरञ्जनात् ॥")

क्षत्रियः । (यथा, मनुः । २ । ३२ ।

"शूद्रवद्ब्राह्मणस्य स्यात् राज्ञो रक्षासमन्वितम् ।
वैश्यस्य पुष्टिसंयुक्तं शूद्रस्य प्रेष्यसंयुतम् ॥")

चन्द्रः । यक्षः । इन्द्रः । इति मेदिनी ॥ उत्तरपदे चेत् श्रेष्ठार्थवाचकः ॥ अथ नृपतेः पर्य्यायः । राट् २ पार्थिवः ३ क्ष्माभृत् ४ नृपः ५

भूपः ६ महीक्षित् ७ । इत्यमरः ॥ नरपतिः ८ पार्थः ९ नृपतिः १० भूपालः ११ भूभृत् १२ महीपतिः १३ नाभिः १४ नाराट् १५ भूमीन्द्रः १६ नरेन्द्रः १७ नायकाधिपः १८ । इति शब्दरत्नावली ॥ प्रजेश्वरः १९ भूमिपः २० इनः २१ दण्डधरः २२ अवनीपतिः २३ स्कन्दः २४ स्कन्धः २५ भूभुक् २६ अर्थपतिः २७ । इति जटाधरः ॥ * ॥ अस्य व्युत्पत्तिर्यथा,—

"महता राजराज्येन पृथुर्वैण्यः प्रतापवान् ।
सोऽभिषिक्तो महातेजा विधिवद्धर्म्मकोविदैः ॥
पित्रापरञ्जितास्तस्य प्रजास्तेनानुरञ्जिताः ।
अनुरागात्ततस्तस्य नाम राजेत्यभाषत ॥"

इति विष्णुपुराणे १ अंशे १३ अध्यायः ॥

अपि च ।

"रागी राजसिकं स्वर्गं कुरुते कर्म्म रागतः ।
रागान्धाश्च राजसिकास्तेन राजा प्रकीर्त्तितः ॥"
इति ब्रह्मवैवर्त्ते गणपतिखण्डे ३५ अध्यायः ॥*॥

तस्य सर्व्वपितृत्वं यथा,—

ध्रुव उवाच ।

"ब्रूहि वत्स ! महाराज हे तात ! भयभञ्जन ।
भयत्राता च राजा च सर्व्वेषां पालकः पिता ॥
भक्तश्रीश्च महेन्द्रोऽद्य त्वञ्च स्वर्गे नृपोऽधुना ।
यो राजा स पिता पाता प्रजानामेव निश्चयः ॥"
इति ब्रह्मवैवर्त्ते श्रीकृष्णजन्मखण्डे ५६ अध्यायः ॥

पृथोरेवादौ राजा इति संज्ञा आसीत् । यथा,

"देवैर्विप्रैस्तथा सर्व्वैरभिषिक्तो महामनाः ।
राजाचैवाधिकारे वै पृथुर्वैण्यः प्रतापवान् ॥
तदा पित्रा प्रजाः सर्व्वाः कदा नैवानुरञ्जिताः ।
तेनानुरञ्जिताः सर्व्वाः सुखेमुंसुदिरे तदा ।
अनुरागात्तस्य वीरस्य नाम राजेत्यभाषत ॥"

इति पाद्मे भूमिखण्डे २६ अध्यायः ॥ * ॥

अथ राजलक्षणम् ।

"सोऽपि क्षणपटे बालं दृष्ट्वाश्वीविषपीडितम् ।
नरेन्द्रलक्षणोपेतं चिन्तामाप नरेश्वरः ॥
तस्यास्यं चन्द्रविम्बाभं सुभ्रु रम्यं ससुन्नसम् ।
नीलाः केशाः कुञ्चिताश्च समा दीर्घास्तरङ्गिताः ॥
राजीवनेत्रयुगलो विम्बोष्ठपुटसंवृतः ।
चतुर्हस्तचतुष्किष्कुदीर्घांसो दीर्घबाहुकः ॥
चतुर्लेखाकरो मांस्यवद्वङ्कपर्व्वकः ।
गिरालपादो गम्भीरः सूक्ष्मत्वक् त्रिवलीधरः ॥"
इति मार्कण्डेयपुराणे हरिश्चन्द्रोपाख्यानाध्यायः ॥ * ॥ अन्यच ।

"अखेदिनौ मृदुतरौ कमलोदरसन्निभौ ।
श्लिष्टाङ्गुली ताम्रनखौ पादावुष्णौ गिरोज्झितौ ।
कूर्म्मोन्नतौ गूढ़गुल्फौ सुपार्ष्णी नृपतेः स्मृतौ ।
मृदुलोमा समा जङ्घा तथा करिकरप्रभा ।
उरवो जानवस्तुल्या नृपस्योपचिताः स्मृताः ॥
कोषगूढ़े नृपो दीर्घैर्भुंमेश्च 'धनवर्ज्जितः ।
समाभ्यां क्षितिपः प्रोक्तः प्रलम्बेन प्रतान्ववान् ॥
सप्तभिर्नृपः शब्दज्ञाः स्युर्हरिद्राश्च मार्दवाः ।

एकद्वित्रिचतुःपञ्चषड्धारादिभिरेव च ॥
दक्षिणावर्त्तचलितशुभ्राभिश्च नृपाः स्मृताः ।
नृपाः पुष्यगन्धिशुक्ला मधुगन्धे धनं वहु ॥
मांसलस्फिक् सुखी स्याच्च सिंहस्फिक् भूपतिः स्मृतः ।
भवेत् सिंहकटी राजा निखः कपिकटिर्नरः ॥
नृपाश्चोन्नतकक्षाः स्युर्व्विक्षा विषमकक्षकाः ।
वलिमध्यगता नाभिः शूलधारां करोति हि ॥
अधो गवाढ्यां कुर्य्याच्च नृपत्वं पद्मकर्णिका ।
अनुद्वतैश्चुकैश्च भवन्ति सुभगा नराः ।
निर्व्रणा विषमैर्दोषैः पीतोपचितकैर्नृपाः ॥
समोन्नतश्च हृदयमकम्प्यं मांसलं पृथु ।
नृपाणामध्वमानाच्च खरलोम शिरालकम् ॥
कम्बुग्रीवश्च नृपतिर्लम्बकर्णोऽतिभक्षणः ।
आजानुलम्बिनौ बाहू वृत्तौ पीनौ नृपेश्वरे ॥
मणिबन्धैर्निगूढैश्च सुश्लिष्टशुभसन्धिभिः ।
नृपा हीनैः करच्छेदमणिबन्धैर्धनवर्ज्जिताः ॥
निस्वाश्चक्रनखैस्तद्वदर्णैश्च परतर्ककाः ।
ताम्रैर्भूपा धनाढ्याश्च अङ्गुष्ठैः सयवैस्तथा ॥
धनाङ्गुलिश्च सधनस्त्रिलो रेखाश्च यस्य वै ।
नृपतेः करतलगा मणिबन्धे समुत्थिताः ॥
शुक्लातपत्रशिविका गजपद्मोपमा नृपे ।
कुम्भाङ्कुशपताकाभा व्यजालाभा निरीश्वरे ॥
दामाभाश्च गवाढ्यानां खस्तिकाभा नृपेश्वरे ।
चक्रासितोमरधनुःकुन्ताभा नृपतेः करे ॥
मांसलेश्च धनोपेता अवक्रैरधरैर्नृपाः ।
विम्बोपमेश्च स्फुटितैरोष्ठे रक्तैश्च खण्डितैः ॥
विवर्णैर्धनहीनाश्च दग्धाः स्निग्धा घनाः शुभाः ।
तीक्ष्णा दंष्ट्राः समाः श्रेष्ठा जिह्वा रक्ता समा शुभा ॥
श्लक्ष्णा दीर्घा च विज्ञेया तालु श्वेतं धनेश्वरे ।
क्षमा च परुषा वक्त्रं समं सौम्यञ्च संवृतम् ॥
भूपानाममलं श्लक्ष्णं विपरीतञ्च दुःखिनाम् ।
शुक्लकर्णाश्च राजानो रोमकर्णाः शतायुषः ॥
कराः स्निग्धावनद्धैश्च बालत्वैर्म्मांसलैर्नृपाः ।
श्लीष्टलम्बिपिटनासा ऋज्वी भाग्यवतां भवेत् ॥
अल्पच्छिद्रा सुपुटा च अवक्रा च नृपेश्वरे ।
संवृतैश्च ललाटैश्च कृपणा उन्ननैर्नृपाः ॥
ललाटोपस्थताश्चिस्रो रेखाः स्युः शतवर्षिणाम् ।
नृपत्वं स्याच्चतसृभिरायुः पञ्चनवत्यथ ॥
कूचाकारैः शिरोभिस्तु नृपा निम्नशिरा धनी ।
षड्भिस्तच्चतुर्भिर्खो रक्तः सप्तभिर्नृपः ॥"
इति गारुड़े नरलक्षणं नाम ६६ अध्यायः ॥

अपि च ।

"पार्थिवस्य तु वक्ष्यामि भृत्यानाञ्चैव लक्षणम् ।
सर्व्वाणि यो महीपालः सम्यङ्नित्यं परीक्षयेत् ॥
राज्यं पालयते नित्यं सत्यधर्म्मपरायणः ।
निर्ज्जित्य परसैन्यानि क्षितिं धर्म्मेण पालयेत् ॥
पुष्यं पुष्यं विनिन्दीयान्मूलच्छेदं न कारयेत् ।
मालाकार इवारण्ये न यथाङ्गारकारकः ॥
दुग्धी क्षीरन्तु भुञ्जीत विक्रेतारो न भुञ्जते ।
परराष्ट्रं महीपालो कालयालांश्च दूषयेत् ॥
नीधश्छिन्द्यात्तु यो धेन्वाः क्षीरार्थी लभते पयः ।
एवं राष्ट्रमयोगेन पीड्यमानं न वर्द्धते ॥
तस्मात् सर्व्वप्रयत्नेन पृथिवीमनुपालयेत् ।
पालकस्य भवेद्भूमिः कीर्त्तिरायुर्यशो बलम् ॥
अभ्यर्च्य विष्णुं धर्म्मात्मा गोब्राह्मणहिते रतः ।
प्रजाः पालयितुं शक्तः पार्थिवो यो जितेन्द्रियः ॥
ऐश्वर्य्यमध्रुवं प्राप्य राजा धर्म्मे मतिञ्चरेत् ॥"
इति गारुड़े १११ अध्यायः ॥ * ॥

ब्रह्माभिषिक्तराजानो यथा,—

श्रीपराशर उवाच ।

"यदाभिषिक्तः स पृथुः पूर्व्वं राज्ये महर्षिभिः ।
ततः क्रमेण राज्यानि ददौ लोकपितामहः ॥
नक्षत्रग्रहविप्राणां वीरुधां वाप्यशेषतः ।
सोमं राज्ये दधाद्ब्रह्मा यज्ञानां तपसामपि ॥
राज्ञां वैश्रवणं राज्ये जलानां वरुणं तथा ।
आदित्यानां पतिं विष्णुं वसूनामथ पावकम् ॥
प्रजापतीनां दक्षन्तु वासवं मरुतामपि ।
दैत्यानां दानवानाञ्च प्रह्लादमधिपं ददौ ॥
पितॄणां धर्म्मराजानं यमं राज्येऽभ्यषेचयत् ।
ऐरावतं गजेन्द्राणामशेषाणां पतिं ददौ ॥
पतत्रीणाञ्च गरुड़ं देवानामपि वासवम् ।
उच्चैःश्रवसमश्वानां वृषभन्तु गवामपि ॥
शेषन्तु नागराजानं मृगाणां सिंहमीश्वरम् ।
वनस्पतीनां राजानं प्लक्षमेवाभ्यषेचयत् ॥
एवं विभज्य राज्यानि दिशां पालानगन्तरम् ।
प्रजापतिपतिर्ब्रह्मा स्थापयामास सर्व्वतः ॥
पूर्व्वस्यां दिशि राजानं वैराजस्य प्रजापतेः ।
दिशः पालं सुधन्वानं पुत्रं वै सोऽभ्यषेचयत् ॥
दक्षिणस्यां दिशि तथा कर्दमस्य प्रजापतेः ।
पुत्रं शङ्खपदं नाम राजानं सोऽभ्यषेचयत् ॥
पश्चिमायां दिशि तथा रजसः पुत्रमच्युतम् ।
केतुमन्तं महात्मानं राजानमभिषिक्तवान् ॥
तथा हिरण्यरोमाणं पर्ज्जन्यस्य प्रजापतेः ।
उदीच्यां दिशि दुर्द्धर्षं राजानमभिषिक्तवान् ॥
तैरियं पृथिवी सर्व्वा सप्तद्वीपा सपत्तना ।
यथाप्रदेशमद्यापि धर्म्मतः प्रतिपाल्यते ॥
एते सर्व्वे प्रकृतस्य स्थितौ विष्णोर्म्महात्मनः ।
विभूतिभूता राजानो ये चान्ये मुनिसत्तम ॥
ये भविष्यन्ति येऽतीता वर्त्तमानाश्च सर्व्वशः ।
ते सर्व्वे सर्व्वभूतस्य विष्णोरंशा द्विजोत्तम ॥"
इति श्रीविष्णुपुराणे प्रथमेंऽशे २२ अध्यायः ॥ *

सूत उवाच ।

"एवं सृष्टासु सर्व्वासु स्थावरासु चरासु च ।
ब्रह्मा क्रमेण राज्यानि यादेषूपचक्रमे ॥
द्विजानां वीरुधाञ्चैव नक्षत्राणां ग्रहैः सह ।
यज्ञानां तपसाञ्चैव सोमं राज्येऽभ्यषेचयत् ॥
वृहस्पतिञ्च सर्व्वेषां ददावङ्गिरसामपि ।
भूगूणामाधिपत्ये च कावं राज्येऽभ्यषेचयत् ॥
आदित्यानां पुनर्व्विष्णुं वसूनामथ पावकम् ।
प्रजापतीनां दक्षञ्च मरुतामथ वासवम् ॥
दैत्यानामथ राजानं प्रह्लादं दितिनन्दनम् ।
नारायणन्तु साध्यानां रुद्राणां वृषभध्वजम् ॥
मृगाणामथ प्रादूर्भूतं गरुड़ं पततां वरम् ।
गन्धर्व्वाणां चित्ररथं नागानामथ वासुकिम् ॥
गन्धानां मरुतञ्चैव भूतानाञ्च शरीरिणाम् ।
सर्व्वेषां दंष्ट्रिणां शेषं सर्पाणाञ्चैव तक्षकम् ॥
सागराणां नदीनाञ्च मेघानां वर्षितञ्च च ।
आदित्यानामन्यतमं पर्ज्जन्यमभिषिक्तवान् ।
सर्व्वौषधरोगणानाञ्च कामदेवं तथा प्रभुम् ॥
ऋतूनामधिमासानां दिवसानां तथैव च ।
पक्षाणाञ्च क्षपाणाञ्च मुहूर्त्तैतिथिपर्व्वणाम् ॥
कलाकाष्ठाप्रमाणानां गतिरयनयोस्तथा ।
गणितस्याथ योगस्य चक्रे संवत्सरं प्रभुम् ॥
प्रजापतेर्व्विरजसः पूर्व्वस्यामभिषेचयन् ।
पुत्रं नाम्ना सुधामानं राजानञ्चाभ्यषेचयत् ॥
यथाप्रदेशं राजानं दक्षिणस्यां प्रजापतेः ।
कर्दमस्य शङ्खपदं पुत्रं राज्येऽभिषिक्तवान् ॥
पश्चिमस्यां दिशि तथा रजसः पुत्रमुत्तमम् ।
केतुमन्तं महात्मानं राजानं ह्यभ्यषेचयत् ॥
तथा हिरण्यरोमाणं पर्ज्जन्यस्य प्रजापतेः ।
दिगुत्तरायां पुत्रन्तु राजानमभ्यषेचयत् ॥
मानुषाणामधिपतिं चक्रे वैवस्वतं मनुम् ।
तैरेव पृथिवी सर्व्वा सप्तद्वीपा सपत्तना ।
यथाप्रदेशमद्यापि धर्म्मेण परिरक्ष्यते ॥
स्वायम्भुवेऽन्तरे पूर्व्वं ब्रह्मणा तेऽभिषेचिताः ।
इन्द्रादिलोकपालास्तु पुनर्व्वैवस्वतेऽन्तरे ॥
राजसूयेऽभिषिक्तस्तु पृथुः पूर्व्वं महर्षिभिः ।
मनुभिर्व्विधिना तद्वत् सोऽधिराजः प्रतापवान् ॥"
इत्यादे वह्निपुराणे वराहप्रादुर्भावनामाध्यायः ॥

राजकर्त्तव्यकर्म्माणि यथा,—

मदालसोवाच ।

"वत्स ! राज्ञाभिषिक्तेन प्रजारञ्जनमादितः ।
कर्त्तव्यमविरोधेन स्वधर्म्मस्य महीभृता ॥"
अविरोधेन धर्म्मस्याप्याविरोधेन ।
"व्यसनानि परित्यज्य सप्तमूलहराणि वै ।
आत्मा रिपुभ्यः संरक्ष्यो वह्निर्मन्त्रविनिर्गमात् ॥
अन्यथा नाशमाप्नोति स्वचक्रस्यन्दनाद्यथा ।
तथा राजाप्यसन्दिग्धं वह्निर्मन्त्रं विनिर्गमात् ॥
दुष्टादुष्टांश्च जानीयादमात्यानरिदोषतः ।
चरैश्चराश्चथा शत्रोरन्वेष्टव्याः प्रयत्नतः ॥
विश्वासो न तु कर्त्तव्यो राज्ञा मित्रात्मबन्धुषु ।
कार्य्ययोगादमित्रेषु विश्वसेत नराधिपः ॥
स्थानवृद्धिक्षयज्ञेन षाड्गुण्यविदितात्मना ।
भवितव्यं नरेन्द्रेण न कामवशवर्त्तिना ॥
प्रागात्मा मन्त्रिणश्चैव ततो भृत्यो महीभृता ।
ज्ञेयाश्चानन्तरं पौरा विरुध्येत ततोऽरिभिः ॥
यस्येतानविलिखैव वैरिणो विनिगीर्यते ।
सोऽजितात्मा जितामात्यः शत्रुवर्गेण बाध्यते ॥
तस्मात् कामादयः पूर्व्वं जेयाः पुत्र महीभृता ।
तज्जये हि जयो राज्ञो राजा नश्यति तैर्जितः ॥
कामः क्रोधश्च लोभश्च मदो मानस्तथैव च ।
हर्षश्च शत्रवो ह्येते नाशाय कुमहीभृताम् ॥
कामप्रसक्तमात्मानं ज्ञात्वा दग्धं निपातितम् ।

निवर्त्तयेत्तथा क्रोधादनुद्वादं हतात्मजम् ॥
हृतमेलं तथा लोभाच्चादद्येगं द्विजेर्हृतम् ।
मानादनायुषः पुत्रं हृतं हर्षात् पुरक्रयम् ॥
यभिर्जितैर्जितं सर्व्वं मरुत्तेन महात्मना ।
स्मृत्वा विवर्ज्जयेदेतान् षड्दोषांश्च महीपतिः ॥
काककोकिलभृङ्गानां वकव्यालशिखण्डिनाम् ।
हंसानां लोहकुट्टानां शिक्षेत चरितं नृपः ॥"
काकात् सर्व्वशङ्कितता । कोकिलात् माधुर्य्यम् । भृङ्गात् प्रगीड्या अर्थादानम् । वकात् शत्रुग्रहणे एकाग्रताम् । व्यालात् दुरुपसर्पित्वम् । शिखण्डिनश्चित्रतां सर्पग्रहणाय सूक्ष्मतां राजावात्मगोपनञ्च । हंसस्य सारग्राहित्वम् । लोहकुट्टात् सन्धानम् ॥
"कौशिकस्य क्रियां कुर्य्यादिपक्षे मनुजेश्वरः ।
चेष्टां पिपीलिकानाञ्च काले भूपः प्रदर्शयेत् ॥"
कौशिकस्य उलूकस्य रात्रौ काकावस्कन्दनम् । पिपीलिकानां सेनावहुत्वं सर्पभक्षणञ्च ।
"ज्ञेयाग्निविस्फुलिङ्गानां बीजचेष्टाञ्च शाल्मलेः ।
चन्द्रसूर्य्यस्वरूपञ्च नीत्यर्थं पृथिवीक्षिता ॥"
अग्निविस्फुलिङ्गात् दूरात् दाहः । बीजाच्चाङ्कुरोत्पत्तिज्ञानम् । उषाकाले चन्द्रः सुखदायी शीतकाले न । एवं सूर्य्यः शीते सुखदायी उषाकाले न । एवं कालानुसारेण सुखदुःखदातृत्वम् ॥
"वधकात् पक्षग्रहभूलिम्पा गुर्व्विणीस्नानात् ।
प्रजा नृपेण चाहेया तथा चण्डालयोषितः ॥"
वधकात् निर्घृणत्वम् । पक्षात् कण्टकगोपनं स्मितमुखता च । ग्रहभात् हत्वापि शत्रुन् नोद्वेकः । यथा ग्रहभोऽल्पदः परोन्नतिं न सहते । भूलिम्पा आत्मिज्ञापनम् । गुर्व्विण्या स्नानात् कालेऽर्थादानम् । चण्डालयोषित् पौनश्चक्यं क्षणशिरो दर्शयित्वा अन्यद्विक्रीणाति ।
"शक्यार्थमसमानं तद्वद्यायोर्महीपतिः ।
रूपाणि पञ्च कुर्व्वीत महीपालनकर्म्मणि ॥
यथेन्द्रश्चतुरो मासान् वार्य्यर्थैरेव भूतलम् ।
आप्याययेत्तथा लोकान् परिचारैर्महीपतिः ॥"
परिचारैरर्थदानादिभिः ।
"मासानर्थो यथा सूर्य्यस्तोयं हरति रश्मिभिः ।
सूर्य्यरूपेवाभ्युपायेन तथा शुल्कादिना नृपः ॥
यथा यमः प्रियद्वेष्यौ प्राप्ते काले नियच्छति ।
तथा प्रियाप्रियौ राजा दुष्टादुष्टे समो भवेत् ॥
पूर्णेन्दुमालोक्य यथा प्रीतिमान् जायते नरः ।
एवं यत्र प्रजाः सर्व्वा निर्व्वृत्तास्तच्छशिव्रतम् ॥
मारुतः सर्व्वभूतेषु निगूढश्चरते यथा ।
एवं चरेन्नृपश्चारैः पौरामात्यारिवन्धुषु ॥
न लोभार्थेन कामार्थेनार्थार्थैर्यस्य मानसम् ।
ददार्थैः क्षम्यते धर्म्मान् स राजा स्वर्गमृच्छति ॥"
लोभादिप्रयोजनैः ।
"उत्पथग्राहिणो मूढान् स्वधर्म्माच्चलितान्नरान् ।
यः करोति निजे धर्म्मे स राजा स्वर्गमृच्छति ॥"
उत्पथग्राहिणः पापिनः ।
"वर्णधर्म्मा न सीदन्ति यस्य राष्ट्रे तथाश्रमाः ।
राज्ञस्तस्य सुखं तात परत्रेह च शाश्वतम् ॥
एतद्राज्ञः परं कृत्यं तद्येतदुपेक्षिकारणम् ।
स्वधर्म्मे स्थापनं नृणां चाह्यते न कुबुद्धिभिः ॥
पालनेनैव भृत्यानां कृतकृत्यो महीपतिः ।
सम्यक् पालयिता भागं धर्म्मस्याप्नोति वै यतः ॥
एवमाचरते राजा चातुर्व्वर्ण्यस्य रक्षणे ।
स सुखी विहरत्येष शक्रस्येति सलोकताम् ॥"
इति मार्कण्डेयपुराणे मदालसोपाख्यानाध्यायः तट्टीका च ॥ * ॥ राजाभिषेकस्य विहितनक्षत्राणि यथा,—
"पुष्यानुराधा ज्येष्ठा च रोहिणी चोत्तराश्रयम् ।
हस्ताश्विनी रेवती च नृपाभिषेचनोत्तमाः ॥"
इति ज्योतिःसारसंग्रहः ॥
अस्य विवरणं अभिषेकशब्दे द्रष्टव्यम् ॥ * ॥
राज्ञि वर्ज्जनीयानि यथा,—
"नृपे कीर्त्तिप्रतापाढ्यादुदग्राख्यिविवेकिताः ।
धर्म्मप्रयागसंग्रामशूरास्त्राद्याः सनयक्षमाः ॥
प्रजारागोऽरिशैलादिवासोऽरिपुरशून्यता ।
औदार्य्यधैर्य्यगाम्भीर्य्यशौर्य्यैश्वर्य्योत्तमादयः ॥"
इति कविकल्पलतायाम् १स्तवके ३कुसुमम् ॥*॥
राजान्नभक्षणे दोषो यथा,—
वाराह उवाच ।
"भुक्ता भागवता भूत्वा मम कर्म्मपरायणाः ।
ये तु भुञ्जन्ति राजान्नं लोभेन च भयेन च ॥
आपन्नता हि भुञ्जीत राजान्नन्तु वसुन्धरे ।
दशवर्षसहस्राणि पच्यन्ते नरके नराः ॥
भगवद्वचनं श्रुत्वा सा मही शंसितव्रता ।
उवाच मधुरं वाक्यं सर्व्वलोकसुखावहम् ॥
धरण्युवाच ।
शृणु तत्त्वेन मे देव हृदये हि व्यवस्थितम् ।
को नु दोषो हि राज्ञान्नु तन्मे त्वं वक्तुमर्हसि ॥
ततो भूम्या वचः श्रुत्वा सर्व्वधर्म्मविदां वरः ।
प्राह नारायणो वाक्यं धर्म्मकामां वसुन्धराम् ॥
वाराह उवाच ।
शृणु सुन्दरि ! तत्त्वेन गुह्यमेतदनिन्दिते ।
राजान्नन्तु न भोक्तव्यं शुभैर्भागवतैः सदा ॥
यद्यप्येष समत्वेन राजा लोके प्रवर्त्तते ।
राजसस्तामसो वापि कुर्व्वन् कर्म्म सुदारुणम् ॥
अपि वा गर्हितं तेन राजान्नन्तु वसुन्धरे ।
धर्म्मसन्धारणार्थाय न तु मे रोचते भुवि ॥
ततोऽन्यं संप्रवक्ष्यामि तच्छृणुष्व वसुन्धरे ।
यथा राज्ञान्तु भोक्तव्यं वै शुद्धैर्भागवतैः शुभैः ॥
स्थापयित्वा तु मां देवि विधिदृष्टेन कर्म्मणा ।
धनधान्यप्रदानानि दत्त्वा भागवतेरपि ॥
सिद्धं भागवतैश्चान्नं मम प्रापणशेषकम् ।
भुञ्जानस्तु वरारोहे न स पापेन लिप्यते ॥
एवं विष्णुवचः श्रुत्वा धरणी शंसितव्रता ।
वाराहरूपिणं देवं प्रत्युवाच वरानना ॥"*॥
तदन्नभोजनप्रायश्चित्तानि यथा,—
धरण्युवाच ।
"राजान्नन्तु ततो भुक्ता शुद्धो भागवतः शुचिः ।
कर्म्मणा केन शुद्धेत तन्मे ब्रूहि जनार्द्दन ॥
वाराह उवाच ।
शृणु तत्त्वेन मे देवि यन्मां त्वं भीरु भाषसे ।
तरन्ति मनुजा येन राजान्नस्योपभुञ्जकाः ॥
एकं चान्द्रायणं कृत्वा तप्तकृच्छ्रञ्च पुष्कलम् ।
कुर्य्यात् सान्तपनञ्चैकं शीघ्रं सुष्यति किल्बिषात् ॥
भुक्ता वै राज्ञोऽन्नानि इदं कर्म्म समारभेत् ।
न तस्यैवापराधोऽस्ति वसुधे वै वचो मम ॥
एवमेव न भोक्तव्यं राजान्नन्तु कदाचन ।
ममाच्च प्रियकामाय यदीच्छेत् परमां गतिम् ॥"
इत्यादि वाराहे राजान्नभक्षणप्रायश्चित्तं नामाध्यायः ॥ * ॥ अपि च ।
"राजान्नं तेज आदत्त शूद्रान्नं ब्रह्मवर्च्चसम् ।
इत्याद्यभिधाय,—
भुक्ता चान्यतमस्यान्नममत्या क्षपयेत्त्र्यहम् ।
मत्या भुक्ता चरेत् कृच्छ्रं रेतो विण्मूत्रमेव च ॥"
इति प्रायश्चित्ततत्त्वम् ॥
(राजनम् । यथा, ऋग्वेदे । १० । ४६ । ४ ।
"अहं भुवं यजमानस्य राजनि ।"
"अहं यजमानस्य राजनि राजनार्थे भुवं अभवं समर्थ इति प्रेषः ।" इति तद्भाष्ये सायणः ॥)
राजातनः, पुं, (राजानं अततीति । अत सातत्यगमने + "बहुलमन्यत्रापि ।" उणा० २ । ७८ । इति युच् ।) पियालवृक्षः । इति शब्दमाला ॥
राजादनं, क्ली, (राजभिरद्यते इति । अद भक्षणे + कर्म्मणि ल्युट् ।) चौरिका । पियालः । किंशुकः । इति मेदिनी । ने, २०५ ॥ (यथा, सुश्रुते । १ । ४६ । लवणवर्गे ।
"दाड़िमामलकं द्राक्षा खर्ज्जूरं सपरूषकम् ।
राजादनं मातुलुङ्गं फलवर्गं प्रशस्यते ॥"
पुंलिङ्गात्मोऽपि दृश्यते । इत्यमरः । २ । ४ । ४५ ॥ हैमचन्द्रश्च । ४ । २०८ ॥ चौरिकार्थे पर्य्यायो यथा,—
"राजादनः चीरवृक्षः पालाशी वानरप्रियः ॥"
इति वैद्यकरत्नमालायाम् ॥
किंशुकार्थे पर्य्यायो यथा,—
"वातपोथः पलाशः स्याद्वानप्रस्थश्च किंशुकः ।
राजादनो ब्रह्मवृक्षो हस्तिकर्णो दलोऽपरः ॥")
राजानुजीवी, [न्] त्रि, (राज्ञः अनुजीवी ।) राजोपजीवी । तस्य कर्म्माणि यथा,—
मत्स्य उवाच ।
"यथानुवर्त्तितव्यं स्यान्मनो राजोपजीविना ।
तथा ते कथयिष्यामि निबोध गदतो मम ॥
आत्मा सर्व्वात्मना कार्य्यो स्वधर्म्मे रविनन्दन ।
आत्मिप्य वचनन्तस्य न वक्तव्यं तथा वचः ॥
अनुकूलं प्रियन्तस्य वक्तव्यं ज्ञानसंसदि ।
रहोगतस्य वक्तव्यमप्रियं यद्धितं भवेत् ॥
परार्थमस्य वक्तव्यं स्वस्थे चेतसि भार्गव ।
स्वार्थः सुहृद्भिर्व्वक्तव्यो न स्वयन्तु कदाचन ॥
कार्य्याभिघातः सर्व्वेषु रक्षितव्यः प्रयत्नतः ।
न च हिंस्यं धनं किञ्चिन्नियुक्तेन च कर्म्मणि ॥
नोपेक्ष्यं भाष्यमाणस्य तथा राज्ञः प्रियो भवेत् ।

राज्ञश्च न तथा कार्य्यं वैद्यभाषितचेष्टितम् ॥
राजलीला न कर्त्तव्या तद्विद्विष्टं विवर्ज्जयेत् ।
राज्ञः समोऽधिको वा न कार्य्यो वैद्यो विजानता ॥
द्यूतादिषु तथैवास्य कौशलञ्च प्रदर्शयेत् ।
प्रदर्श्य कौशलञ्चास्य राजानञ्च विशेषयेत् ॥
अन्तःपुरधनाध्यक्षैश्चरदूतैः समागतैः ।
संसर्गं न व्रजेद्राजन् ! विना पार्थिवशासनम् ॥
निःस्नेहताञ्चावमानं प्रयत्नेन च गोपयेत् ।
यच्च गुह्यं भवेद्राज्ञो न तल्लोके प्रकाशयेत् ॥
नृपेण स्मारितं यत् स्याद्वाच्यावाच्यं नृपोत्तम ! ।
न तत् संस्मारयेल्लोके तदा राज्ञः प्रियो भवेत् ॥
आह्वाय्यमाने चान्यस्मिन् समुत्थाय त्वरान्वितः ।
अहं किं करवाणीति वाच्यो राजा विजानता ॥
कार्य्यावस्थाञ्च विज्ञाय कार्य्यमेव तथा भवेत् ।
सततं क्रियमाणोऽस्मिन् लाघवन्तु व्रजेत् ध्रुवम् ॥
राज्ञः प्रियाणि वाक्यानि न चात्यर्थं पुनःपुनः ।
न हास्यशीलश्च भवेन्न चापि भ्रुकुटीमुखः ॥
नातिवक्ता न निर्व्वक्ता न च मत्सरिकस्तथा ।
आत्मसम्भावितश्चैव न भवेत् कथञ्चन ॥
दुष्कृतानि नरेन्द्रस्य न तु संकीर्त्तयेत् क्वचित् ।
वस्त्रं सूक्ष्ममलङ्कारं राज्ञा दत्तञ्च धारयेत् ॥
औदार्य्येण न तद्देयमन्यस्मै भूतिमिच्छता ।
राज्ञैवोपासनं कार्य्यं दिवाखप्नं न कारयेत् ॥
नानिर्द्दिष्टे तथा द्वारे प्रविशेत् कदाचन ।
न च पश्येत्तु राजानमयोग्यासु च भूमिषु ।
राज्ञस्तु दक्षिणे पार्श्वे वामे चोपविशेत्तथा ।
पुरस्तात्तु तथा पश्चादासनन्तु विगर्हितम् ॥
जृम्भा निष्ठीवनं कासं कोपं पर्य्यस्तिकाश्रयम् ।
भ्रुकुटीं वान्तसुद्गारं तत्समीपे विवर्जयेत् ॥
स्वयं तत्र न कुर्व्वीत स्वगुणाख्यापनन्तथा ।
स्वगुणाख्यापने चैव परमेव प्रयोजयेत् ॥
हृदयं निर्म्मलं कृत्वा परां भक्तिमुपाश्रितैः ।
अनुजीविगणैर्भाव्यं नित्यं राज्ञामतन्द्रितैः ॥
ग्राम्यं लौल्यञ्च पैशुन्यं वाक्पित्यं क्षुद्रतान्तथा ।
चापल्यञ्च परित्याज्यं नित्यं राजानुजीविना ॥
श्रुतेन विद्याशिल्पैश्च संयोज्यात्मानमात्मना ।
राजसेवां ततः कुर्य्याद्भूतये भूतिवर्द्धिनीम् ॥
नमस्कार्य्याः सदा चास्य पुत्रवल्लभमन्त्रिणः ।
सचिवेष्वास्य विश्वासो न तु कार्य्यः कथञ्चन ॥
अपृष्टश्चास्य न ब्रूयात् कामं ब्रूयात्तथापदि ।
हितं पथ्यञ्च वचनं हितैः सह सुनिश्चितम् ॥
चित्तञ्चैवास्य विज्ञेयं नित्यमेवोपजीविना ।
भर्त्तुराराधनं कुर्य्यात् चित्तज्ञो मानवः सुखम् ॥
रागापरागौ चैवास्य विज्ञेयौ भूतिमिच्छता ।
व्रजेद्वृत्तिं विरक्तस्तु रक्तो वृत्तिन्तु कारयेत् ॥
विरक्तः कारयेन्नाशं विपक्षाभ्युदयन्तथा ।
आत्मावर्জ্জनकं कृत्वा फलनाशं करोति च ॥
अकोपोऽपि सकोपात्तः प्रसन्नोऽपि च निष्फलः ।
वाक्यं स मन्दं वदति वृत्तिच्छेदं करोति च ॥
प्रहेयवाक्यानुदितो न सम्भावयतेऽन्यथा ।

आराधनासु सर्व्वासु-सुप्रयत्नञ्च विचेष्टते ॥
कथासु दोषं क्षिपति वाक्यभङ्गं करोति च ।
लक्ष्यते विमुखैश्चैव गुणसंकीर्त्तने कृते ॥
दृष्टिं क्षिपत्यथान्यत्र क्रियमाणे च कर्म्मणि ।
विरक्तलक्षणं ह्येतत् शृणु रक्तस्य लक्षणम् ॥
दृष्ट्वा प्रसन्नो भवति वाक्यं गृह्णाति चादरात् ।
कुशलादिपरिप्रश्नं संप्रयच्छति चासनम् ॥
विरक्तदर्शने चास्य रहस्ये च न शङ्कते ।
जायते हृष्टवदनः श्रुत्वा तस्य तु तत्कथाम् ॥
अप्रियाण्यपि वाक्यानि तदुक्तान्यभिनन्दति ।
उपायनञ्च गृह्णाति श्लोकमप्यादरात्तथा ॥
कथान्तरेषु स्मरति प्रहृष्टवदनस्तथा ।
इति रक्तस्य कर्त्तव्या सेवा रविकुलोद्वह ॥
आपत्सु न त्यजेत् पूर्ब्बं विरक्तमपि सेवितम् ॥
मित्रं न चापत्सु तथा च भृत्यं
त्यजन्ति ये निर्गुणमप्रमेयम् ।
प्रभुं विशेषेण च ते व्रजन्ति
सुरेन्द्रधामामरवृन्दजुष्टम् ॥"
इति मत्स्यपुराणे राजधर्म्मे अनुजीविवृत्तिनाम २१६ अध्यायः ॥

राजादनी, स्त्री, (राजभिरद्यते या । अद् + कर्म्मणि ल्युट् । ङीप् ।) वृक्षविशेषः । चौरिगी इति भाषा । तत्पर्य्यायः । राजफलः २ चीरवृक्षः ३ नृपद्रुमः ४ निम्बबीजः ५ मधुफलः ६ कपीष्टः ७ माधवोद्भवः ८ चीरी ९ गुच्छफलः १० भूपेष्टः ११ राजवल्लभः १२ श्रीफलः १३ दृढस्कन्धः १४ चीरशुक्लः १५ । अस्या गुणाः । मधुरत्वम् । पित्तनाशित्वम् । गुरुत्वम् । तर्पणत्वम् । वृष्यत्वम् । स्तौल्यकरत्वम् । हृद्यत्वम् । स्निग्धत्वम् । मेहनाशित्वञ्च । इति राजनिर्घण्टः ॥ अपि च ।
"क्षीरिकायाः फलं वृष्यं बल्यं स्निग्धं हिमं गुरु ।
तृष्णामूर्च्छामदभ्रान्तिक्षयदोषत्रयापहम् ॥"
इति भावप्रकाशः ॥

राजान्नं, क्ली, (राजयोग्यमन्नम् । अन्नानां राजा इति वा ।) अन्नदेशोद्भवधान्यविशेषः । तत्पर्य्यायः । नृपान्नम् २ राजार्हम् ३ दीर्घशूककम् ४ धान्यश्रेष्ठम् ५ राजधान्यम् ६ राजेष्टम् ७ दीर्घकूरकम् ८ । अस्य गुणाः । त्रिदोषघ्नत्वम् । स्निग्धत्वम् । मधुरत्वम् । लघुत्वम् । दीपनत्वम् । बलकारित्वम् । पथ्यत्वम् । कान्तिमेधावृद्धिदत्वञ्च । इति राजनिर्घण्टः ॥ (राज्ञः अन्नम् ।) राजस्वामिकभक्तम् । तद्भोजननिषेधप्रायश्चित्ते राजशब्दे दृश्ये ॥ (राजान्नभक्षणेन हि तेजोहानिर्भवति । यथा, मनुः । ४ । २१८ ।
"राजान्नं तेज आदत्ते शूद्रान्नं ब्रह्मवर्चसम् ।
आयुः सुवर्णकारान्नं यशश्चर्म्मावकर्त्तिनः ॥")

राजाम्रः, पुं, (आम्राणां राजा श्रेष्ठत्वात् । राजदन्तादित्वात् परनिपातः ।) आम्रविशेषः । तत्पर्य्यायः । राजफलः २ आम्रराजः ३ कोकिलोत्सवः ४ मधुरः ५ कोकिलानन्दः ६ कामेष्टः ७ नृपवल्लभः ८ । अस्य फलगुणाः । कौमलत्वम् । कटुस्वलम् । पित्तदाहदत्वञ्च ॥ सुपक्वस्य तस्य गुणाः । स्वादुत्वम् । मधुरत्वम् । पुष्टिवीर्य्यबलप्रदत्वञ्च । इति राजनिर्घण्टः ॥ अपि च ।
"राजाम्रष्टङ्क आम्रातः कामाक्षो राजपुत्रकः ।
राजाम्रं तुवरं स्वादु विषदं शीतलं गुरु ।
याहि रूक्षं विबन्धाध्मवातकृत् कफपित्तजुत् ॥"
इति भावप्रकाशः ॥

राजाम्बः, पुं, (अम्बानां राजा श्रेष्ठत्वात् । राजदन्तादित्वात् परनिपातः ।) अम्बवेतसः । इति राजनिर्घण्टः ॥

राजार्कः, पुं, (अर्काणां राजा श्रेष्ठत्वात् ।) श्वेतार्कवृक्षः । सादा आकन्द इति भाषा । तत्पर्य्यायः । वसुकः २ अर्कः ३ मन्दारः ४ गणरूपकः ५ काण्डीलः ६ सदापुष्पः ७ । इति राजनिर्घण्टः ॥ अलर्कः ८ प्रतापसः ९ । इति शब्दरत्नावली ॥

राजार्हं, क्ली, (राजानमर्हतीति । अर्ह + अण् ।) अगुरु । (अस्य पर्य्यायो यथा,—
"अगुरु प्रवरं लोहं राजार्हं योगजन्तथा ।
वंशिकं क्रमिजं वापि क्रमिजग्धमगार्य्यकम् ॥"
इति भावप्रकाशस्य पूर्ब्बखण्डे प्रथमे भागे ॥)
राजयोग्ये, त्रि । इति मेदिनी । हे, २६ ॥ (यथा, गो० रामायणे । ३ । ४६ । ४२ ।
"तथेदमुपपन्नं मे वृत्तरूपस्य धर्षणम् ।
राजार्हाणि च रत्नानि रक्षोभाजो वयं ध्रुवम् ॥")

राजार्हा, स्त्री, (राज्ञोऽर्हा ।) जम्बूः । इति राजनिर्घण्टः ॥

राजालाबूः, स्त्री, (अलाबूनां राजा । राजदन्तादित्वात् परनिपातः ।) स्वादुतुम्बी । मिठा लाउ इति भाषा । तत्पर्य्यायः । मधुतुम्बी २ मधुरालाबुनी ३ ग्रामालाबूः ४ तुम्बकः ५ भक्ष्यालाबूः ६ अलाबुनी ७ मिष्टतुम्बी ८ । अस्याः फलगुणाः । वृष्यत्वम् । कफपित्तहरत्वम् । गुरुत्वञ्च । इति मदनविनोदः ॥

राजालुकः, पुं, (आलूनां राजा । ततः स्वार्थे कन् ।) महाकन्दः । इति शब्दरावली । १०१ ॥

राजावर्त्तः, पुं, (राजानं आवर्त्तयति आगच्छयतीति । आ + वृत् + णिच् + अच् । यद्वा, राज्ञः शोभमान आवर्त्तो यत्र ।) उपरत्नभेदः । रेउटी इति हिन्दी भाषा । तत्पर्य्यायः । नृपावर्त्तः २ राजात्यावर्त्तकः ३ आवर्त्तमणिः ४ आवर्त्तः ५ । अस्य गुणाः । लघुत्वम् । स्निग्धत्वम् । अग्निप्रियत्वम् । पित्तनाशनत्वम् । भूषणे प्रयोजितश्चेत् नृणां बहुभाग्यकरत्वञ्च । इति राजनिर्घण्टः ॥ विराटदेशजहीरकः । तत्पर्य्यायः । विराटजः २ राजपट्टः ३ । इति हेमचन्द्रः । ४ । १३२ ॥ (यथा, कथासरित्सागरे । ७३ । ३३६ ।
"राजावर्त्तोपलग्रामतले सहासवेश्मनि ॥"
तथास्य गुणाः ।
"राजावर्त्तः कटुस्निग्धः अग्निग्रहः पित्तवाग्रहः ।

राजावर्त्तः प्रमेहघ्नः कृच्छ्रिच्छिकानिवारणः ॥"
इति भावप्रकाशस्य पूर्ब्बखण्डे प्रथमे भागे ॥)

राजाहिः, पुं, (अहीनां राजा। राजदन्तादित्वात् परनिपातः।) द्विमुखसर्पः। तत्पर्य्यायः। द्विमुखाहिः २ विलावासी ३ विषायुधः ४। इति शब्दरत्नावली॥ अहीरणिः ५। इति चिकाण्डशेषः॥

राजिः, स्त्री, (राजते इति। राज+"वसिवपियजिराजीति।" उणा० ४।१२४। इति इन्।) श्रेणी। (यथा, अर्य्यासप्तशत्याम्। ६६३।
"उल्लसति रोमराजिः स्तनशम्भोर्गरललेखेव॥")
रेखा। इति मेदिनी। जे, १४॥ (यथा, महाभारते। ७। २२। ६२।
"कषायपुष्पवर्णांस्तु श्वेतलोहितराजयः।
रथसेनं हयश्रेष्ठाः समूहुर्युद्धदुर्म्मदम्॥"
पुं, आयुधपुत्रविशेषः। स तु रैवतपौत्रः। यथा, महाभारते। १। ७५। २५।
"नहुषं वृद्धशर्म्माणं राजिं गयमनेनसम्।
खर्भानवी सुतानेतानाहुः पुत्रान् प्रचक्षते॥")

राजिका, स्त्री, (राजते या। राज+खुल्। टापि अत इत्वम्।) केदारः। राजसर्षपः। रेखा। इति मेदिनी। के, १४५॥ षड्क्तिः। इति हेमचन्द्रः॥ क्षणसर्षपः। तत्पर्य्यायः। क्षवः २ क्षुधाभिजननः ३ कृष्णिका ३ आसुरी ५। इत्यमरः। २।६।१६॥ क्षुताभिजननः ६ असुरी ७। इति तट्टीका॥ रक्तवर्णसर्षपः। राइ इति भाषा। तत्पर्य्यायः। राजी २ आसुरी ३ रक्तिका ४ रक्तसर्षपः ५ तीक्ष्णगन्धा ६ मधूलिका ७ क्षवकः ८ क्षुतकः ९ क्षवः १०। अस्या गुणाः। कटुत्वम्। तिक्तत्वम्। उष्णत्वम्। वातश्लीहार्शःशूलकफगुल्मक्रमिव्रणनाशित्वम्। दाहपित्तप्रदत्वञ्च॥ तत्तैलगुणाः। तीक्ष्णत्वम्। वातादिदोषनाशित्वम्। अग्निरत्वम्। यूककण्डूघ्नत्वम्। केश्यत्वम्। त्वग्दोषनाशित्वञ्च॥ तत्पत्रगुणाः। कटुत्वम्। उष्णत्वम्। क्रमिवातकफकण्डूकामयहरत्वम्। स्वादुत्वम्। वह्निदीपनकारित्वञ्च। इति राजनिर्घण्टः॥ अपि च।
"राजी तु राजिका तीक्ष्णगन्धा क्षुच्चनिकासुरी।
क्षवः क्षुताभिजनकः क्रमिकः कृष्णसर्षपः॥
राजिका कफपित्तघ्नी तीक्ष्णोष्णा रक्तपित्तकृत्।
किञ्चिद्वातामिदा कण्डूकुष्ठकोठक्रमीन् हरेत्।
अतितीक्ष्णा विशेषेण तद्वत् कृष्णापि राजिका॥"
इति भावप्रकाशः॥

राजिकाफलः, पुं, (राजिकायाः फलमिव फलमस्य।) गौरसर्षपः। इति राजनिर्घण्टः॥

राजिफला, स्त्री, (राजीभूतानि श्रेणिवद्धानि फलानि यस्याः।) चीनाकर्कटी। इति राजनिर्घण्टः॥

राजिलः, पुं, (राजी रेखास्त्यस्येति। राजि+सिध्मादित्वात् लच्। यद्वा, राजिं लातीति। ला+कः।) डुण्डुभसर्पः। इत्यमरः। १।८।५॥ (यथा, रघुः। १९। २७।
"किं मद्दोरगविसर्पिविक्रमो
राजिलेषु गरुडः प्रवर्त्तते॥")

राजी, स्त्री, (राजि+कृदिकारादिति ङीष्।) निच्छिद्रपङ्क्तिः। इति शब्दरत्नावली॥ (श्रेणिः। यथा, माघे। ४। ६।
"राजीवराजीवशृङ्खलोलभृङ्ग-
सङ्गान्तसङ्गान्ततिभिस्तरूणाम्॥")
राजिका। (अस्या गुणा यथा,—
"राजी तु राजिका तीक्ष्णगन्धा क्षुच्चनिकासुरी।
क्षवः क्षुताभिजनकः क्रमिकः कृष्णसर्षपः॥"
इति भावप्रकाशस्य पूर्ब्बखण्डे प्रथमभागे॥)
रक्तवर्णसर्षपः। इति राजनिर्घण्टः॥

राजीफलः, पुं, (राजीभूतानि श्रेणिवद्धानि फलानि यस्य।) पटोलः। इति राजनिर्घण्टः॥ (तथास्य पर्य्यायः।
"पटोलः कुलकस्तिक्तः पाण्डुकः कर्कशच्छदः।
राजीफलः पाण्डुफलो राजेयश्चान्ततिफलः।
बीजगर्भः प्रतीकश्च कुष्ठहा कासभञ्जनः॥"
इति भावप्रकाशस्य पूर्ब्बखण्डे प्रथमभागे॥)

राजीवं, क्ली, (राजी दलश्रेणिरस्यास्तीति। राजी+"अन्येभ्योऽपि दृश्यते।"५। २। १०९। इत्यस्य वार्त्तिकोक्त्या वः।) पद्मम्। इत्यमरः। १। १०। ४१॥ (यथा, कुमारे। ३। ४५।
"उत्तानपाणिद्वयसन्निवेशात्
प्रफुल्लराजीवमिवाङ्कमध्ये॥")

राजीवः, पुं, (राजी अस्त्यस्येति। राजी+वः।) हरिणभेदः। (अस्य लक्षणं यथा,—
"राजीवस्तु दृगो ज्ञेयो राजीभिः परितो वृतः॥"
इति भावप्रकाशस्य पूर्ब्बखण्डे द्वितीये भागे॥)
दृषत्कीनभेदः। इति मेदिनी। वे, ४८॥ (यथा, मनुः। ५। १६।
"पाठीनरोहितावाद्यौ नियुक्तौ हव्यकव्ययोः।
राजीवान् सिंहतुण्डांश्च सशल्कांश्चैव सर्व्वशः॥")
हस्ती। इति। त्रिकाण्डशेषः॥ सारसपक्षी। इत्यमरः॥ राजोपजीविनि, त्रि। इत्यजयः॥

राजेन्द्रः, पुं, (राजसु इन्द्र इव श्रेष्ठत्वात्।) मण्डलेश्वरात् दशगुणो राजा। यथा,—
"चतुर्योजनपर्य्यन्तमधिकारं नृपस्य च।
यो राजा तच्छतगुणः स एव मण्डलेश्वरः।
तस्माद्दशगुणो राजा राजेन्द्रः परिकीर्त्तितः॥"
इति ब्रह्मवैवर्त्ते श्रीकृष्णजन्मखण्डे ८६ अध्यायः॥
(राजश्रेष्ठः। यथा, महाभारते। २।४५।४१।
"कर्म्मणैतेन राजेन्द्र! धर्म्मश्च सुमहान् कृतः॥")

राजोदिजनसंज्ञकः, पुं, (राजोदिजन इति संज्ञा यस्य। ततः कन्।) भूताङ्कुशवृक्षः। इति राजनिर्घण्टः॥

राज्ञी, स्त्री, (राज्ञः पत्नी। राजन्+ङीप्। यद्वा, राजते इति। राज+कनिन्। ततः स्त्रियां ङीप्।) राजपत्नी। राणी इति भाषा॥ (यथा, रघुः। १। ५७।
"तयोर्जगृहतुः पादान् राजा राज्ञी च मागधी।
तौ गुरुर्गुरुपत्नी च प्रीत्या प्रतिननन्दतुः॥")

स्त्र्यंपत्नी। इति मेदिनी। ज्ञे, २॥ राजपत्न्यां वर्णनीयानि यथा,—
"देव्यां सौभाग्यलावण्यशीलशृङ्गारमञ्जयाः।
चपाचातुर्य्यदाक्षिण्यप्रेममानव्रतादयः॥
वेणीधम्मिल्लसीमन्तभालश्रवणनासिकम्।
कपोलाधरनेत्रभ्रूकटाक्षरदकन्धराः॥
गण्डबाहुकरोरोजनाभीमध्यवलित्रयम्।
लोमालिश्रोणिजङ्घोरुपादद्युग्मनखं क्रमात्॥"
इति कविकल्पलतायाम् १ स्तवके ३ कुसुमम्॥
स्त्र्यंपत्न्याः प्रमाणान्तरं यथा,—
सूत उवाच।
"विवस्वान् कश्यपात् पूर्ब्बमदित्यामभवत् पुरा।
तस्य पत्नीत्रयं तद्वत् संज्ञा राज्ञी प्रभा तथा॥
रेवतस्य सुता राज्ञी रेवन्तं सुषुवे सुतम्।
प्रभा प्रभावं सुषुवे त्वाष्ट्री संज्ञा तथा मनुम्॥
यमञ्च यमुना चैव यमलौ तु बभूवतुः॥"
इति मात्स्ये ११ अध्यायः॥
कांस्यः। इति। हेमचन्द्रः॥ नीली इति राजनिर्घण्टः॥ * ॥ (प्रतीची दिक्। यथा, छान्दोग्योपनिषदि। ३।१५।२। "तस्य प्राची दिक् जुहूर्नाम सहमाना नाम दक्षिणा राज्ञी नाम प्रतीची सुभूता नामोदीचीति॥"
'तथा राज्ञी नाम प्रतीची पश्चिमा दिक् राज्ञी राज्ञा वरुणेनाधिष्ठिता सन्ध्यारागयोगाद्वा।'
इति शाङ्करभाष्यम्॥)

राज्यं, क्ली, (राज्ञो भावः कर्म्म वा। राजन्+"पत्यन्तपुरोहितादिभ्यो यक्।"५। १। १२८। इति यक्।) राज्ञ इदम्। तत्पर्य्यायः। नीवृत् २ मण्डलम् ३ जनपदः ४ देशः ५ प्रदेशः ६ विषयः ७ राष्ट्रम् ८ उपवर्त्तनम् ९। इति शब्दरत्नावली॥ अमरमते नीवृज्जनपदौ अङ्गवङ्गकलिङ्गपञ्चालमगधकोशलादौ मण्डलत्वेन ख्याते ग्रामसमूहे। देशविषयोपवर्त्तनानि च जनपदे जनपदसमुदाये। जनपदैकदेशे सजलनिर्जलस्थानमात्रे च। उपाधिभेदेन देशादित्रिकं भिन्नार्थम्। सामान्येन प्रयोगदर्शनात्। नीवृदादयः पञ्चैवैकार्थाः। इत्यपरे। एतच्चायुक्तम्। इति भरतः॥ * ॥ तस्य लक्षणं अङ्गानि च यथा,—
"परस्वैवोपकारीदं सप्ताङ्गं राज्यमुच्यते॥
अमात्यराष्ट्रदुर्गाणि कोषो दण्डश्च पञ्चमः।
एताः प्रकृतयस्तद्वद्विजिगीषोरुदाहृताः॥
एताः पञ्च तथा मित्रं सप्तमं पृथिवीपतिः।
सप्तप्रकृतिकं राज्यमित्युवाच बृहस्पतिः॥
पौरश्रेणी तदङ्गञ्च ब्रुवते शब्दवेदिनः॥
खाम्यमात्यः सुहृत् कोषो राष्ट्रं दुर्गं बलं तथा।
पौरश्रेणी च राज्याङ्गं प्रकृतिश्च भवेत् क्रमम्॥"
इति शब्दरत्नावली॥
अपि च।
"लक्षाधिपत्यं राज्यं स्यात् साम्राज्यं दशलक्षके।
शतलक्षे महेशानि महासाम्राज्यमुच्यते॥"
इति वरदातन्त्रम्॥

राज्यक्ता, स्त्री,(राज्या सर्षपेण अक्ता व्यञ्जिता।) पिष्टराजिकादधिलवणमिश्रितलङ्घालावूखण्डादि। रायता इति भाषा॥ यथा,—
"संचूर्ण्य निक्षिपेत्तत्रे भृष्टं जीरकहिङ्गु च।
लवणान्तत्र वटकान् सकलानपि मज्जयेत्॥
शुक्लरक्तत्र वटको बलकृद्रोचनो गुरुः।
विबन्धकृद्विदाही च श्लेष्मलः पवनापहः।
राज्यक्तयातिरोचिन्या पाचन्या तांस्तु भक्षयेत्॥"
इति भावप्रकाशे कृतान्नवर्गः॥

राज्याङ्ग, क्ली, (राज्यस्य अङ्गम्।) राज्यस्योपायः। तत्पर्य्यायः। प्रकृतिः २। तत्तु अष्टविधं यथा। स्वामी १ अमात्यः २ सुहृत् ३ कोषः ४ राष्ट्रम् ५ दुर्गम् ६ बलम् ७ पौराणां श्रेणयश्च ८। इत्यमरः। २। ८। १८॥ "स्वाम्यादयः सप्त पुरस्थलोकश्रेण्यश्च राज्याङ्गपदप्रकृतिपदवाच्याः। राज्यं सप्ताङ्गम्। कस्यचिन्मते अष्टाङ्गत्वेनुभयमेव दर्शितम्। यदुक्तं कामन्दकीये।
'स्वाम्यमात्यश्च राष्ट्रञ्च दुर्गं कोषो बलं सुहृत्।
परस्परोपकारीदं सप्ताङ्गं राज्यमुच्यते॥'
पौरश्रेण्या सहाष्टाङ्गमपि राज्यं प्रकीर्त्तितमिति। स्वाम्यादयः सप्त परस्परोपकारित्वात् राज्यस्य अङ्गानि उपायाः साधनानि राज्याङ्गानि प्रकृष्टं कुर्व्वन्ति राज्यम्। प्रकृतयः कृञ्जोः कभाव इत्युक्तेः क्तिः प्रकृतिः स्त्रियाम्। स्वामी राजा। अमात्यो मन्त्री। सुहृन्मित्रम्। खर्णादिभाण्डागारं कोषः। राष्ट्रं जनपदवती भूमिः। पर्व्वतादिदुर्गमं पुरं दुर्गम्। बलं सैन्यम्। पौरश्रेणीग्रहणे सिद्धे पुनर्व्वचनं प्राधान्यख्यापनार्थम्।" इति भरतः॥ * ॥ अपि च।
"स्वाम्यमात्यो जनपदो दुर्गं दण्डस्तथैव च।
कोषो मित्रञ्च धर्म्मज्ञ सप्ताङ्गं राज्यमुच्यते॥
सप्ताङ्गस्यापि राज्यस्य मूलं स्वामी प्रकीर्त्तितः।
तन्मूलत्वात्तथाङ्गानां राजा रक्ष्यः प्रयत्नतः॥
षड्वर्गरक्षा कर्त्तव्या तथा तेन प्रयत्नतः।
षड्वर्गो यस्तथैकस्य द्रोहमाचरतेऽधमः।
वधस्तस्य तु कर्त्तव्यः क्षीप्रमेव महीक्षिता॥"
इति मात्स्ये १६४ अध्यायः॥

राटिः, स्त्री, (राटयति परस्परमाकाययत्यनेनेति। रट+क्विप्+इन्।) युद्धम्। इति हेमचन्द्रः। ३।४६२॥ (राटयतीति। रट भाषणे+स्वार्थे क्विप्+इन्।) शरारिपक्षी। इत्यमरः। २। ५। २५॥

राड़िः, स्त्री, शरारिपक्षी। इत्यमरः। २।५।२५॥

राढ़कः, पुं, स्वनामख्यातदेशः। यथा,—
"प्राच्यां मागधशोणौ च वारेन्द्रीगौड़राढ़काः॥"
इति ज्योतिषतत्त्वम्॥

राढ़ा, स्त्री, रूक्षा। शोभा। इति मेदिनी। ढे, १॥ पुरीविशेषः। यथा।
"गौड़ं राढ़मनुत्तमं निरुपमा तत्रापि राढ़ा पुरी
भूरिश्रेष्ठिकनामधाम परमं तत्रोत्तमो नः पिता॥"
इत्यादि प्रबोधचन्द्रोदये दम्भवाक्यम्॥

राढ़ीयः, त्रि, (राढ़ो निवासोऽस्य। राढ़+"वृद्धाच्छः।" ४।२।११४। इति छः।) राढ़देशोद्भवः। यथा,—
"अयनांशाल्लग्नमानं दुरूहमिति नोच्यते।
राढ़ीयश्रीनिवासोक्तं तस्मानं स्थूलतोऽत्र तु॥"
इति मलमासतत्त्वम्॥

राज्ञं, क्ली, ज्ञानम्। यथा,—
"राज्ञञ्च ज्ञानवचनं ज्ञानं पञ्चविधं स्मृतम्।
तेनेदं पञ्चराज्ञञ्च प्रवदन्ति मनीषिणः॥"
इति नारदपञ्चरात्रे प्रथमरात्रे १ अध्यायः॥
(राज्ञिः। यथा, महाभारते। १३।१३६।११।
"क्षेत्रप्रतिग्रहे चैव ग्रहस्तुतकयोस्तथा।
त्रीणि रात्राण्युपोषित्वा तेन पापाद्विमुच्यते॥")

राज्ञकं, क्ली, (राज्ञं ज्ञानं तेन कायतीति। के+कः।) पञ्चरात्रम्। इति मेदिनी। के, १४६॥

राज्ञकः, पुं, एकवर्षं वेश्याग्रहवासी। इति मेदिनी। के, १४६॥

राज्ञिः, स्त्री, राति ददाति कर्म्मभ्योऽवसरं निद्रादिसुखं वा। रादाने+"राशृदिभ्यां क्निप्।" उणा० ४। ६७। इति क्निप्।) हरिद्रा। (यथा, सुश्रुते चिकित्सितस्थाने ६ अध्याये।
"लाक्षा कुष्ठं सर्षपाः श्रीनिकेतं
राज्ञियोषं चक्रमर्दस्य बीजम्।
क्षत्वेकस्यं तत्र पिष्टः प्रलेपो
दद्रूयुक्तो मूलकाद्वीजयुक्तः॥")
एतद्द्वीपावच्छिन्न-सूर्य्यकिरणावच्छिन्नकालः। राति इति भाषा। तत्पर्य्यायः। शर्व्वरी २ निशा ३ निशीथिनी ४ त्रियामा ५ क्षणदा ६ क्षपा ७ विभावरी ८ तमस्विनी ९ रजनी १० यामिनी ११ तमी १२। इत्यमरः।१।४।४॥ श्यामा १३ घोरा १४ याम्या १५ तुङ्गी १६ नक्तम् १७ दोषा १८ वास्तेयी १९ तमा २० क्षमा २१ घृणाची २२ क्षणिनी २३ निशिथा २४ चक्रभेदिनी २५ शार्व्वरी २६ शून्या २७ वासुरा २८ निशङ्करी २९। इति शब्दरत्नावली॥ वसतिः ३० वायुरोषा ३१ निशीथः ३२ निट् ३३। इति जटाधरः॥ यामवती ३४ तारा ३५ भूषा ३६ ज्योतिष्मती ३७ तारकिणी ३८ काली ३९ कलाविनी ४०। इति राजनिर्घण्टः॥ * ॥ तस्याः कारणं यथा,—
"यदा दिक्षु च अष्टासु मेरोर्भूगोलकोद्भवा।
छाया भवेत्तदा रात्रिः स्याच्च तद्विरहादिनम्॥"
इति वह्निपुराणे गणभेदो नामाध्यायः॥*॥
पितृदेवानां रात्रिर्यथा,—
"मासेन च नराणाञ्च पितॄणां तदहर्निशम्।
कृष्णपक्षे दिनं प्रोक्तं शुक्ले रात्रिः प्रकीर्त्तिता॥
वत्सरेण नराणाञ्च देवानाञ्च दिवानिशम्।
उत्तरायणे दिनं प्रोक्तं रात्रिश्च दक्षिणायने॥"
इति ब्रह्मवैवर्ते प्रकृतिखण्डे ५१ अध्यायः॥

अथ रात्रिकृत्यम्। स्मृतिः।
"पूर्व्वाह्णविहितं कर्म्म न कृतं तत् प्रमादतः।
रात्रेस्तु प्रहरं यावत् तत् कर्त्तव्यं यथोक्तवत्॥
दिवोदितानि कर्म्माणि प्रमादात् पतितानि च।
पूर्व्वयोः प्रथमे यामे तानि कुर्य्यादतन्द्रितः॥"
इति रत्नाकरः॥
याज्ञवल्क्याङ्गिरसौ।
"उपास्य पश्चिमां सन्ध्यां हुत्वाग्नींस्तानुपास्य च।
भृत्यैः परिवृतो भुक्त्वा नातिलम्बोऽथ संविशेत्॥
अग्निहोमोपासने साग्निपरे। उपास्य चेति चकारो वैश्वदेवादिकं समुच्चिनोति। संविशेत् स्वपेत्। तथा च विष्णुपुराणम्।
"पुनः पाकसुपादाय सायमप्यवनीपते।
वैश्वदेवनिमित्तं वै पक्त्वा सार्द्धं बलिं हरेत्॥
अतिथिञ्चागतं तत्र स्वशक्त्या पूजयेद्बुधः।
दिवातिथौ तु विमुखे गते यत् पातकं भवेत्।
तदेवाष्टगुणं पुंसां सूर्य्योढ़े विमुखे गते॥"
सूर्य्योढ़े अस्तं गते सूर्य्ये। तथा,—
"कृतपादादिशौचस्तु भुक्त्वा सायं ततो गृही।
गच्छेदस्फुटितां ग्रस्यामति दारमर्थी नृप॥"
भोजने सायमिति सार्द्धप्रहरपरं प्रागुक्तात्॥
अथ रात्रौ शयनविधिः। सति सूर्य्ये शय्या च न पातनीया सा च सूर्य्योदयात् पूर्व्वमुत्थापनीया। तथा च स्मृतिः।
"भास्कराद्दृष्टशय्यानि नित्याग्निसलिलानि च।
सूर्य्यावलोकिदीपानि लक्ष्म्या वेश्मानि भोजनम्॥"
व्यासः।
"शुचौ देशे विविक्ते च गोमयेनोपलेपिते।
प्रागुदक्प्रवणे चैव संविशेत्तु सदा बुधः॥
मङ्गल्यं पूर्णकुम्भञ्च शिरःस्थाने विधाय च।
वेदिकेर्गारुड़ैर्मन्त्रै रक्षां कृत्वा स्वपेत्ततः॥"
गर्गः।
"स्वगृहे प्राक्शिराः शेते श्वायुषे दक्षिणाशिराः।
प्रत्यक्शिराः प्रवासे तु न कदाचिदुदक्शिराः॥"
मार्कण्डेयपुराणे।
"प्राक्शिरः शयने विद्यात् धनमायुश्च दक्षिणे।
पश्चिमे प्रबलां चिन्तां हानिं मृत्युं तथोत्तरे॥"
तथा।
"नमस्कृत्याव्ययं विष्णुं समाधिस्थं स्वपेन्निशि॥"
मार्कण्डेयः।
"शून्यालये श्मशाने च एकवृक्षे चतुष्पथे।
महादेवगृहे चापि शर्करालोष्टपांशुषु॥
धान्यगोविप्रदेवानां गुरूणाञ्च तथोपरि।
न चापि भग्नशयने नाशुचौ नाशुचिः स्वयम्॥
नार्द्रवासा न नग्नश्च नोत्तरापरमस्तकः।
नाकाशे सर्व्वशून्ये च न च चैत्यद्रुमे तथा॥"
स्वपेदिति शेषः॥ * ॥ अथ रात्रौ दारोपगमनविधिः। याज्ञवल्क्यः।
"षोड़शर्त्तुर्निशाः स्त्रीणां तासु युग्मासु संविशेत्।
ब्रह्मचर्य्येव पर्व्वण्याद्याश्चतस्रस्तु वर्জ्जयेत्॥"
स्त्रीणां षोड़शनिशा ऋतुर्गर्भाधानयोग्यकालः।

तत्रोक्तविधिना गच्छेत्। तत्र युग्मासु रात्रिष्वपि पर्व्वणि ब्रह्मचार्येव भवति। तत्र व्रतादौ गच्छतो ब्रह्मचर्य्यस्खलनदोषो नास्ति इति मिताक्षरा॥ विष्णुपुराणम्।

"षष्ठ्यष्टमीममावास्यामुभे पक्षे चतुर्दशीम्।
मैथुनं नोपसेवेत द्वादशीञ्च मम प्रियाम्॥"

हारीतः। "चतुर्थेऽहनि स्नातायां युग्मासु च गर्भाधानवदुपेत ब्रह्मगर्भं सन्दधातीति।" अत्र चतुर्थ्यां रात्रौ यद्गर्भाधानमुक्तं तदजोनिवृत्तौ बोध्यम्। रजस्युपरते साध्वी स्नानेन स्त्री रजस्वला। इति मनुवचनैकवाक्यत्वात्। साध्वी गर्भाधानादिविहितकर्म्मयोग्येत्यर्थः। आद्यास्तस्रस्तु वर्ज्जयेत्। इति तु रजोनिवृत्तीतरपरम्। अनृतावपि कामुकीगमनमाह। विष्णुपुराणम्।

"मृतो नरकमभ्येति हीयेदप्यपि चायुषः।
परदाररतिः पुंसामुभयत्रापि भीतिदा॥
इति मत्वा स्वदारेषु ऋतुमत्सु बुधो व्रजेत्।
यथोक्तदोषहीनेषु सकामेष्वनृतावपि॥"

पैठीनसिः। "त्वाष्ट्रं विश्वरूपं जघान वज्रेणेन्द्रस्तं प्रति देवा ब्रह्महन्निति अवदन् स स्त्रिय उपागच्छत् वरं दास्यामि ततोऽस्यास्तृतीयं ब्रह्महत्यायाः प्रपद्यन्ता स्त्रियः एकं भूमिर्व्वनस्पतयश्चैकम्। आसां मघवा तुष्टो वरं प्रायच्छत भूमेः स्थिरत्वं वृक्षाणां छिन्नप्ररोहणं स्त्रीणां सर्व्वकालेषु सम्भवः।" सम्भवो मेलनं सम्भोग इति यावत्। सर्व्वकाले ऋतावनृतौ च। न तु प्रतिषिद्धपर्व्वादौ। तथाच गौतमः। ऋतावुपेयात् सर्व्वत्र वा प्रतिषिद्धवर्ज्जमिति॥ दुष्टकालमाह ज्योतिषे।

"ज्येष्ठा मूला मघाश्लेषा रेवती कृत्तिका-
श्विनी।
उत्तरात्रितयं चैव पर्व्ववर्ज्यं व्रजेद्बुधः॥"

एवञ्च।

"ऋतौ नोपैति यो भार्य्यामनृतौ यश्च गच्छति।
तुल्यमाहुस्तयोर्दोषमयोनौ यश्च सिञ्चति॥"

बौधायनीयमनृतौ गमनदोषाभिधानमकामाविषयम्। विष्णुः। पर्व्वाणारोग्यवर्ज्यन्तावगच्छन् पत्नीं त्रिरात्रमुपवसेदिति। वृद्धप्रातापः।

"स्त्रीणां संप्रेक्षणात् स्पर्शात् ताभिः संकथनादपि।
ब्रह्मचर्य्यं विपद्येत न दारेष्वनुषङ्गतः॥"

संप्रेक्षणात् संकथनादित्यत्र सरागत्वं संपृच्यर्थः। आह्निकानन्तरन्तु निषेधमाहतुः शङ्खलिखितौ। ऋतुस्नातां सदहोरात्रं परिहरेत् नार्त्तवे दिवामैथुनं व्रजेत् स्त्रीवाप्यवीर्य्याश्च दिवा प्रस्रवन्तोऽल्पायुष्य तस्मादेतद्विवर्ज्जयेत्। प्रजाकामश्च पितृणां नोपहरेत तन्तुं विच्छिन्द्यात् प्रयतेताच्छेदाय येनाप्रतिष्ठो भवति तस्मात् प्रतिष्ठाकामः प्रजया प्रतिष्ठेतेति। नोपहरेत् निषेधे। तन्तुं सन्तानं अच्छेदाय अविच्छेदाय सन्तानस्य। येन यस्मात् अप्रतिष्ठः प्रजोत्पत्त्या अप्राप्तप्रतिष्ठः सन् पतति तस्मात् तदुत्पत्त्यर्थं यतितव्यमिति कल्पतरुः॥ एवञ्च आह्निके यदभिगमनं प्रागुक्तयाज्ञवल्क्यवचनात् उक्तं मिताक्षरायां तद्वेयम्। वशिष्ठः।

"शूद्रान्नेन तु सुक्तेन मैथुनं योऽधिगच्छति।
यस्यान्नं तस्य ते पुत्रा अखर्य्याः शूद्रवत्
द्विजाः॥"

पराशरः।

"ऋतुस्नाताच्च यो भार्य्यां सन्निधौ नोपगच्छति।
स गच्छेन्नरकं घोरं ब्रह्महेति तथोच्यते॥"

सन्निधावित्यभिधानात् असन्निहितस्य गमनाभावे न दोषः। पुत्रोत्पत्तिपर्य्यन्तमृतावभिगमननियममाह। कूर्म्मपुराणम्।

"ऋतुकालाभिगामी स्यात् यावत् पुत्रो न
जायते।
ऋणापकर्षणार्थं हि पुत्रस्योत्पादनं प्रति॥"

यतितव्यमिति शेषः। आपस्तम्बः।

"ऋतौ तु गर्भग्रङ्क्षित्वात् स्नानं मैथुनिनः
स्मृतम्।
अनृतौ तु सदा कार्य्यं शौचं मूत्रपुरीषवदिति॥
द्वावेतावशुची स्यातां दम्पती शयनं गतौ।
शयनादुत्थिता नारी शुचिः स्यादशुचिः
पुमान्॥
मैथुनशुद्धः प्राक् मलमूत्रोत्सर्गं न कुर्य्यात्।
तैलाभ्यक्ते तथा वान्ते श्मश्रुकर्म्मणि मैथुने।
मूत्रोच्चारं यदा कुर्य्यादहोरात्रेण शुद्धति॥"

इति वचनात्।

पुत्रानुत्पत्तौ पारस्करः। सा यदि गर्भं नाद्धीत निदिध्यिकायाः श्वेतपुष्पाया उपोष्य पुष्यनक्षत्रे मूलमुत्थाप्य चतुर्थेऽहनि स्नातायां निशायामुदकेन पिष्ट्वा दक्षिणस्यां नासिकायामासिञ्चतीति। इयमोषधीत्यायमाणा सहमाना सरस्वती। अस्या अहं दृष्ट्याः पुत्रः पितुरिव नाम जनयत्यभित इति। सा परिणीता ऋतुकालेऽपि स्नाताभिगमना यदि गर्भं न दधाति सदा उपोष्य पुष्ये नक्षत्रे श्वेतकण्टकारिकामूलमुत्थाप्य चतुर्थेऽहनि ऋतुस्नातायां सत्यां रात्रावुदकेन पिष्ट्वा दक्षिणनासापुटे पतिः इयमोषधीरिति मन्त्रेण नस्यं ददाति दक्षिणङ्कुशानामिकाङ्गुष्ठाभ्यां गृहीत्वा प्राक्शिरः संविष्टाया इति गोभिलस्मरणात्। आयुर्व्वेदीये।

"पिप्पलीं शृङ्गवेरञ्च मरीचं नागकेशरम्।
आज्येन सह भुञ्जीत अपि वन्ध्या प्रसूयते॥"

याज्ञवल्क्यः।

"एवं गच्छन् स्त्रियं श्यामां मघां मूलाञ्च वर्ज्जयेत्।
युग्म इन्दौ सुतं पुत्रं लक्षण्यं जनयेत्
पुमान्॥"

श्यामामाहारलाघवादिना। सप्तदशवारम्। अत्र सन्ध्यागमनहेतुतया उत्तानकरचरणामेव कुर्व्वीत न तिर्य्यगाद्यितकरचरणां स्त्रियञ्च ऋत्वभिगमनानन्तरं दक्षिणपार्श्वे न स्वापयेत्। पुरुषायिते तु गर्भोत्पत्तिरिति विशेषः। दक्षः।

"प्रदोषपश्चिमौ यामौ वेदाभ्यासेन तौ नयेत्।
यामद्वयं शयानस्तु ब्रह्मभूयाय कल्पते॥"

इत्याह्निकतत्त्वम्॥ * ॥

अथ रात्रिजागरणदोषगुणौ।

"रात्रौ जागरणं रूक्षं स्निग्धं प्रस्वपनं दिवा।
अरूक्षमनभिष्यन्दि त्वासीनप्रचलायितम्॥
कफमेदोविघातार्त्तानां रात्रौ जागरणं हितम्।
दिवा वा यदि वा रात्रौ निद्रा स्वाभीक्षता
तु यैः।
न तेषां स्वपतां दोषो जाग्रतां वा विधीयते॥"

इति राजवल्लभः॥ * ॥

रात्रौ कुलपूजा यथा। "यतु।

रात्रावेव महापूजा कर्त्तव्या वीरवन्दिते।
न दिने सर्व्वथा कार्य्या शासनाज्ञम सुव्रते॥
तत् पुनः कुलपूजाविषयम्।
अर्द्धरात्रात् परं यच्च सुदूर्त्तत्रयमेव च।
सा महारात्रिरुद्दिष्टा तद्धर्म्मज्ञधनु वै॥"

इति तन्त्रसारः॥*॥

अथ रात्रौ विहितनिषिद्धे। छन्दोगपरिशिष्टम्।

"मुनिभिर्दिवसं प्रोक्तं विप्राणां मर्त्यवासिनां
नित्यम्।
अहनि च तथा तमस्विन्यां सार्द्धप्रहर-
यामान्तः॥"

जाबालः।

"अहःसु तिथयः पुण्याः कर्म्मानुष्ठानतो दिवा।
नक्षत्रादित्रितयोगे तु रात्रियोगो विशिष्यते॥"

देवलः।

"राहुदर्शनसंक्रान्तिविवाहात्ययवृद्धिषु।
स्नानदानादिकं कुर्य्युर्निशि काम्यव्रतेषु च॥"

ब्रह्माण्डपुराणम्।

"न रात्रौ पारणं कुर्य्यात् ऋते वै रोहिणीव्रतात्।
तत्र निशापि वै कुर्य्याद्भक्त्वैथित्वा मनुष्यान्॥"

इति तिथ्यादितत्त्वम्॥*॥

"एकभक्तेन नक्तेन तथैवायाचितेन च।
उपवासेन दानेन नैवाहादशिको भवेत्॥"

स्कन्दपुराणम्।

"प्रदोषव्यापिनी ग्राह्या तिथिर्नक्तव्रते सदा।"

देवीपुराणम्।

"हविष्यभोजनं सत्यं स्नानमाहारलाघवम्।
अग्निकार्य्यमधःशय्या नक्तभोजी षडाचरेत्॥"

इत्येकादशीतत्त्वम्॥ * ॥

देवलः।

"रात्रौ श्राद्धं न कुर्व्वीत रात्रयो कीर्त्तिता हि
सा।
सन्ध्ययोरुभयोश्चैव सूर्य्ये चैवाभिरोदिते॥"

इति श्राद्धतत्त्वम्॥ * ॥

विष्णुपुराणम्।

"प्रातर्निशि तथा सन्ध्यामध्याह्नादिषु संस्मरन्।
नारायणमवाप्नोति सद्यः पापक्षयं नरः॥"

रात्रावपि गङ्गायां स्नानादौ प्रतिप्रसवमाह।

ब्रह्मपुराणम् ।
"दिवारात्रौ च सन्ध्यायां गङ्गाद्वाञ्च प्रसङ्गतः ।
स्नात्वाश्वमेधजं पुण्यं गृहेऽप्युद्धृततज्जलैः ॥"
रात्रिश्चराधिकारमुपक्रम्य आदित्यपुराणे ।
"अतो रात्रौ प्राप्नुवतो जलं ब्रह्मविदो जनाः ।
गर्हयन्ति जनान् सर्व्वान् वनस्थान् नृपतीनपि ॥"
तच्चाज्ञानस्य प्रतिवचनम् ।
"समुद्रे हिमवत्पार्श्वे नद्यामस्याञ्च दुर्म्मते ।
रात्रावहनि सन्ध्यायां कस्य गुप्तः परिग्रहः ॥"
देवलः ।
"मध्यानिशा तु विज्ञेया मध्यमं प्रहरद्वयम् ।
तस्यां स्नानं न कुर्व्वीत काञ्चनेमित्तिकादृते ॥"
अतएव कल्पतरुः । न नक्तं स्नायादिति बौधायनवचनं रागप्राप्तस्नानविषयम् । एवञ्च गङ्गास्नानस्य दिवारात्रिकर्त्तव्यत्वाविशेषात् तत्तन्निमित्ततिथिविशेषस्यापि दिवारात्रिसम्बन्धित्वेनाविशेषः । इति प्रायश्चित्ततत्त्वम् ॥
(रात्र्युक्तनियमाः यथा,—
"रात्रौ च भोजनं कुर्य्यात् प्रथमप्रहरागमे ।
किञ्चिदूनं समश्नीयात् दुर्ज्जरन्तत्र वर्ज्जयेत् ॥
शरीरे जायते नित्यं देहिनः सुरतस्पृहा ।
अथवायान्मेहमेदोवृद्धिः श्लथिलता तनोः ॥
बालेति गीयते नारी यावदर्षाणि षोड़श ।
ततस्तु तरुणी ज्ञेया द्वात्रिंशत् वत्सरावधि ॥
तदूर्द्धमधिरूढ़ा स्यात् पञ्चाशद्वत्सरावधि ।
वृद्धा तत्परतो ज्ञेया सुरतोत्सववर्ज्जिता ॥"
अधिरूढ़ा प्रौढ़ा ।
"निदाघशरदोर्बाला हिता विषयिणी मता ।
तरुणी शीतसमये प्रौढ़ा वर्षावसन्तयोः ॥
नित्यं बाला सेव्यमाना नित्यं वर्द्धयते बलम् ।
तरुणी ह्रासयेच्छक्तिं प्रौढ़ोह्रासयते जराम् ॥
मद्यो मांसान्नवस्त्रान्नं बाला स्त्री क्षीरभोजनम् ।
घृतसुखोदके स्नानं सद्यः प्राणकराणि षट् ॥
पूतिमांसं स्त्रियो वृद्धा बालार्कश्चरुणं दधि ।
प्रभाते मैथुनं निद्रा सद्यः प्राणहराणि षट् ॥"
प्राणशब्दोऽत्र बलवाचकः । बालार्कः कन्यार्कः ।
"वृद्धोऽपि तरुणीं गत्वा तरुणत्वमवाप्नुयात् ।
वयोऽधिकां स्त्रियं गत्वा तरुणः स्थविरायते ॥
आयुष्मन्तो मन्दजरा वपुर्वर्णबलान्विताः ।
स्त्रीरोपचितमांसाश्च भवन्ति स्त्रीषु संयताः ॥
सेवेत कामतः कामं बलाद्राजीकृतो हि मे ।
प्रकामन्तु निषेवेत मैथुनं शीतरागमे ॥
ग्रीष्मादसन्तशरदोः पश्चाद्वृष्टिनिदाघयोः ॥"
सुश्रुतस्तु ।
"त्रिभिस्त्रिभिरहोभिर्हि समेयात् प्रमदानरः ।
सर्व्वेष्वृतुषु धर्म्मेषु पञ्चात् पञ्चाद्व्रजेद्बुधः ॥"
समेयात् सङ्गच्छेत् धर्म्मे ग्रीष्मे ।
"शीते रात्रौ दिवा ग्रीष्मे वसन्ते तु दिवा-निशि ।
वर्षासु वारिदध्वाने शरत्सु सरसः करः ॥
उपेयात् पुरुषो नारीं सन्ध्ययोर्न च पर्व्वसु ।
गोसर्गे चार्द्धरात्रे च तथा मध्यदिनेऽपि च ॥
विहारं भार्य्यया कुर्य्याद्दीप्तेऽतिशयसंवृते ।
रम्ये अवाङ्मुखागारे सुगन्धे सुखमारुते ॥
देशे गुरुजनासन्ने विदूरेऽतिखराकरे ।
अश्रूयमाणे यथाहेतुवचने न रमेत ना ॥
स्नातस्सुन्दनलिप्ताङ्गः सुगन्धः सुमनोऽन्वितः ॥
सुस्नातृष्टः सुवसनः सुवेशः समलङ्कृतः ।
ताम्बूलवदनः पत्न्यामनुरक्तोऽधिकः स्मरः ॥
पुत्रार्थी पुरुषो नारीमुपेयाच्छयने शुभे ।
अत्याग्निरोऽधृतिः क्षुद्वान् सत्यधाङ्गः पिपासितः ॥
बालो वृद्धोऽन्यवेगार्त्तस्त्यजेद्रोगी च मैथुनम् ॥"
रोगी मैथुनसंवर्द्धनीयरोगयुक्तः ।
"भार्य्यां रूपगुणोपेतां तुल्यशीलां कुलोद्भवाम् ।
अतिकामोऽभिकामान्तु हृष्टो हृष्टामलङ्कृताम् ॥
सेवेत प्रमदां युक्त्या वाजीकरणसंहितः ।
रजखलामकामाञ्च मलिनामप्रियान्तथा ॥
वर्णवृद्धां वयोवृद्धां तथा व्याधिप्रपीड़िताम् ।
हीनाङ्गीं गर्भिणीं दृश्यां योनिरोगसमन्विताम् ॥
सगोत्राङ्गुरुपत्नीञ्च तथा प्रव्रजितामपि ॥
नाभिगच्छेत् पुमान्नारीं भूरिवैगुण्यशङ्कया ॥"
"स्नानं सशर्करं क्षीरं भक्ष्यमैक्षवसंस्कृतम् ।
वातो मांसरसः स्वप्नः सुरतान्ते हिता अमी ॥
शूलकासज्वरश्वासकार्श्यपाण्डुगदक्षयाः ।
अतिश्रवायाञ्जायन्ते रोगाश्चाक्षेपकादयः ॥
रात्रौ जागरणं रूक्षं कफदोषविषापहम् ।
निद्रा तु सेविता काले धातुसाम्यमतन्द्रितम् ॥
पुष्टिवर्णबलोत्साहं वह्निदीप्तिं करोति च ॥"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥)
तद्वैदिकपर्य्यायः । श्यामा १ क्षपा २ शर्व्वरी ३ क्षत्तुः ४ ऊर्म्या ५ रात्र्या ६ यन्त्र्या ७ नक्ष्या ८ दोषा ९ नक्ता १० तमः ११ रजः १२ अक्षिकी १३ यक्षती १४ तमस्वती १५ घृताची १६ शिरिणा १७ मौकी १८ शौकी १९ ऊधः २० पयः २१ हिमा २२ वस्वी २३ । इति त्रयोविंशतौ रात्रिनामानि । इति वैद्यनिघण्टौ । १ । ७ ॥ (क्रौञ्चद्वीपस्थनदीविशेषः । यथा, मात्स्ये । १२२ । ८७ ।
"श्रुताक्षत्रेव नद्यस्तु प्रतिवर्षं गताः शुभाः ।
गौरी कुमुदती चैव सन्ध्या रात्रिर्मनोजवा ॥")
रात्रिकरः, पुं, (रात्रिं करोतीति । कृ + टः ।) चन्द्रः । इति हेमचन्द्रे निघण्टुशब्दार्णवात् ॥ (कर्पूरः । इत्यमरः । २ । ६ । १३० ॥)
रात्रिचरः, पुं, (रात्रौ चरतीति । "चरेष्टः ।" ३।२।१६। इति टः । "रात्रेः कृति विभाषा ।" ६ । ३ । ७२ । इति पक्षे मुमभावः ।) राक्षसः । इत्यमरः । १।१।६३ ॥ रात्रौ गमनकर्त्तरि, त्रि ॥
रात्रिचरी, स्त्री, (रात्रिचर + टित्वात् ङीप् ।) राक्षसी । यथा, भट्टिः । २ । २३ ।
"तं विप्रदर्शं क्षतघातयत्नां
यान्तं वने रात्रिचरी कुढौके ।
जिघांसुवेदं धृतभासुराक्ष-
स्तं वाड़काख्यां निजघान रामः ॥"
रात्रिजलं, क्ली, (रात्रेर्जलम् ।) कुज्झटिका । इति शब्दमाला ॥
रात्रिजागरः, पुं, (रात्रौ जागर्त्तीति । जागृ + अच् ।) कुक्कुरः । इति हेमचन्द्रः ॥ रात्रौ जागरणकर्त्तरि, त्रि ॥
रात्रिजागरदः, पुं, (रात्रौ जागरं जागरणं ददातीति । दा + कः ।) मशकः । इति राजनिर्घण्टः ॥
रात्रिञ्चरः, पुं, (रात्रौ चरतीति । चर् + टः । "रात्रेः कृति विभाषा ।" ६।३।७२। इति सुम् ।) राक्षसः । इत्यमरः । १।१।६३ ॥ (स्त्रियां ङीप् । रात्रिञ्चरी ॥) रात्रौ गमनकर्त्तरि, त्रि ॥
रात्रिपुष्पं, क्ली, (रात्रौ पुष्पमिति विकाशोऽस्येति । पुष्प् + अच् ।) उत्पलम् । इति राजनिर्घण्टः ॥
रात्रिभटः, पुं, (रात्रौ भटतीति । भट् + अच् । "रात्रेः कृति विभाषा ।" ६ । ३ । ७२ । इति सुम् ।) राक्षसः । इति त्रिकाण्डशेषः ॥ रात्रौ गमनकर्त्तरि, त्रि ॥
रात्रिमणिः, पुं, (रात्रेर्मणिरिव ।) चन्द्रः । इति हारावली । १३ ॥
रात्रिवासः, [स्] क्ली, (रात्रेर्वासो यद्वदिव ।) अन्धकारः । इति शब्दमाला ॥ रात्रौ शयनकालीनपरिधेयवस्त्रम् । यथा । ब्राह्मो मुहूर्त्ते उत्थाय कृत्वास्यः रात्रिवासस्त्यक्त्वा शिरसि सहस्रदलकमलावस्थितं श्वेतवर्णं द्विभुजं वराभयकरं श्वेतमाल्यानुलेपनं स्वप्रकाशरूपं स्ववामस्थितरक्तशक्त्या सुप्रकाशरूपया सहितं गुरुं विभाव्य मानसोपचारैराराध्य नमस्कुर्य्यात् । इति तन्त्रसारः ॥ अपि च ।
"शयनञ्चान्धकारे च रात्रिवासो दिने तथा ।
स्नानाम्बरं कुवेशञ्च वर्ज्जयेत् शुष्कभोजनम् ॥"
इति लक्ष्मीचरित्रम् ॥
रात्रिविगमः, पुं, (रात्रेर्विगमो यत्र ।) प्रभातम् । इति शब्दमाला ॥
रात्रिविश्लेषगामी, [न्] पुं, (रात्रौ विश्लेषं विच्छेदं गच्छतीति । गम् + णिनिः ।) चक्रवाकः । इति राजनिर्घण्टः ॥
रात्रिवेदः, पुं, (रात्रिं रात्रिशेषं वेदयति रवेरिति । विद् + णिच् + अण् ।) कुक्कुटः । इति शब्दरत्नावली ॥
रात्रिवेदी, [न्] पुं, (रात्रिं रात्रिशेषं वेदयति स्वरेणेति । रात्रि + विद् + णिच् + णिनिः ।) कुक्कुटः । इति त्रिकाण्डशेषः ॥
रात्रिहासः, पुं, (रात्रेर्हास इव शुभ्रत्वात् । रात्रौ हासो विकाशो यस्य इति वा ।) श्वेतोत्पलम् । इति शब्दरत्नावली ॥
रात्रिहिण्डकः, पुं, (रात्रौ हिण्डति अन्तःपुरमध्ये भ्रमतीति । हिण्ड गतौ + ण्वुल् ।) अन्तःपुररक्षकः । इति शब्दरत्नावली ॥
रात्री, स्त्री, (रात्रि + ऋदिकारादिति ङीप् ।) निशा । इत्यमरटीकायां भरतः ॥ (यथा, ऋग्वेदे । १० । १२७ । १ ।

"राज्ञी अश्नुत आयती पुरुत्रा देवत्तभिः ॥" हरिद्रा। निशापर्य्यायत्वात् ॥)

राज्ञाटः, पुं, (राज्ञौ अटतीति। अट्+अच्।) राक्षसः। इति केचित् ॥ राज्ञौ गमनकर्त्तरि, त्रि ॥

राज्ञान्धः, त्रि, (राज्ञौ अन्धः।) राज्ञौ दृष्टिहीनो नरः। रातिकाणा इति भाषा ॥ राज्ञौ स्वाभाविकदृष्टिहीनपक्षी। स तु काकादिः। यथा, मार्कण्डेयपुराणे देवीमाहात्म्यम्।

"दिवान्धाः प्राणिनः केचिद्रात्रावन्धास्तथापरे। केचिद्दिवा तथा रात्रौ प्राणिनस्तुल्यदृष्टयः ॥"

तन्नाम्नौषधं यथा,—

"देवदारोश्च वै चूर्णं अजामूत्रेण भावयेत्। एकविंशति वै वारमत्रिणी तेन चाञ्जयेत्। राज्ञान्धता पटलता नश्येदिति विनिश्चयः ॥"

इति गारुड़े १८६ अध्यायः ॥

राद्धं, त्रि, (राध सिद्धौ+क्तः।) पक्वम्। सिद्धम्। इति हेमचन्द्रः। ३। ७६ ॥ चिकाङ्क्षितञ्च ॥ (यथा, भागवते। ३। ६। ४०।

"पूर्त्तेन तपसा यज्ञैर्दानैर्योगैः समाधिना। राद्धं निःश्रेयसं पुंसां मत्प्रीतिस्तत्त्वविग्रतम् ॥")

राद्धान्तः, पुं, (राद्धः सिद्धः अन्तो विर्णयो यस्मात्।) सिद्धान्तः। इत्यमरः। १। ५। ४ ॥ (यथा, भागवते। १२। ११। १।

"अथेदमर्थं पृच्छामो भवन्तं बहुवित्तमम्। सर्वतन्त्रराद्धान्तं भवान् भागवततत्त्ववित् ॥")

राध, न औ य सिद्धौ। इति कविकल्पद्रुमः ॥ (स्वा०-दिवा०-च-पर०-स्वादिपक्षे सक०-दिवादिपक्षे अक०-अनिट्।) रेफादिः। ग, राध्नोति। य, राध्यति। औ, अराधीत्। सिद्धिरिह स्वादिपक्षे निष्पादना। दिवादिपक्षे निष्पत्तिः। अन्ने राध्नोति विप्राणां य इति हलायुधः। निष्पादयतीत्यर्थः। सततं राध्यति श्रिये इति हलायुधः। निष्पन्नो स्वादित्यर्थः। सिद्धिरन्तर्भूतण्यर्थत्वादुभयत्रैव निष्पादनेति गोविन्दभट्टः। इति दुर्गादासः ॥ (शुभाशुभपर्य्यालोचने च। यथा, सुग्धबोधे। "गर्गो राध्यति रामाय।" रामस्य शुभाशुभं पर्य्यालोचयतीत्यर्थः ॥)

राधः, पुं, (राधा विशाखा तद्वती पौर्णमासी राधी। सास्मिन्नस्तीति। राधी+"सास्मिन् पौर्णमासीति।" ४। २। २१। इति अण्।) वैशाखमासः। इत्यमरः। १। ४। १६॥ (यथा, राजतरङ्गिण्याम्। ८। २४८२।

"राधमासावधि दयुस्ततः प्रभृति वारिदाः ॥"

धनम्। यथा, ऋग्वेदे। १। ३०। ५।

"स्तोतं राधानां पते गीर्वाहो वीर यस्य ते ॥"

"हे इन्द्र राधानां पते धनानां पालक।" इति तद्भाष्ये सायणः ॥)

राधनं, क्ली, (राध्+ल्युट्।) साधनम्। प्राप्तिः। इति मेदिनी। ने, ११४ ॥ तोषः। इति हेमचन्द्रः ॥

राधना, स्त्री, (राध्+णिच्+युच्। टाप्।) भाषणम्। इति मेदिनी। ने, ११४ ॥

राधा, स्त्री, (राध्नोति साधयति कार्य्याणीति। राध+अच्। टाप्।) धन्यिनां चित्रभेदः। (यथा, बालभारते १ अङ्के। "इह हि महाराजसमाजे न जाने कमवलम्बिष्यते राधावेधकीर्त्तिर्व्वैजयन्ती ॥") गोपीविशेषः। विशाखानक्षत्रम्। आमलकी। विष्णुक्रान्ता। विद्युत्। इति मेदिनी। धे, १३ ॥ (धृतराष्ट्रस्याधिरथस्य पत्नी। असौ एव कुन्तीगर्भजस्य शिशोः कर्णस्य पालयित्री अतएव कर्णो राधासुत इति ख्यात आसीत्। यथा, महाभारते। १। ६७। १३८—१३६।

"निगूहमाना जातं वै बन्धुपक्षभयात्तदा। उत्ससर्ज्ज जले कुन्ती तं कुमारं यशस्विनम् ॥ तसुतृहृष्टं जले गर्भं राधाभर्त्ता महायशाः। राधायाः कक्षयामास पुत्रं सोऽधिरथस्तदा ॥"

तथा च देवीभागवते। २। ६। ३८।

"राधा धृतस्य भार्य्या वै तयासौ प्रार्थितः सुतः। कर्णोऽभूद्बलवान् वीरः पालितः धृतसत्तमैः ॥")

श्रीराधिका। सा च श्रीकृष्णवामभागांशा प्रकृतिः। यथा,—

"स कृष्णः सर्व्वदृग्रादौ सिसृक्षुरेक एव च। दृष्ट्वाभ्रुखस्तदंशेन कालेन प्रेरितः प्रभुः ॥ स्वेच्छामयः स्वेच्छया च द्विधारूपो बभूव ह। स्त्रीरूपा वामभागांशा दक्षिणांशः पुमान् स्मृतः ॥

तां ददर्श महाकामी कामाधारः सनातनः। अतीवकमनीयाञ्च शारचम्पकसन्निभाम् ॥"

इत्यादि ॥*॥

तस्या अनपत्यताकारणादिर्यथा,—

"दृष्टिमात्रं तया सार्द्धं रासेशो रासमण्डले। रासोल्लासे सुरहसि रासक्रीड़ामकार ह ॥ नानाप्रकारशृङ्गारं शृङ्गारो मूर्त्तिमानिव। चकार सुखसम्भोगं यावद्वै ब्रह्मणो दिनम् ॥ ततः स चापरिश्रान्तस्तस्या योनौ जगत्पिता। चकार वीर्य्याधानञ्च नित्यानन्दः शुभे क्षणे ॥ गात्रतो योषितस्तस्याः सुरतान्ते च सुव्रत। निःससार श्रमजलं श्रान्तायास्तेजसा हरेः ॥ महाक्रमणक्लिष्टाया निःश्वासश्च बभूव ह। तदा वव्रे श्रमजलं तत्सर्व्वं विश्वगोलकम् ॥ स तु निश्वासवायुश्च सर्व्वाधारो बभूव ह। निःश्वासवायुः सर्व्वेषां जीविनाञ्च भवेषु च ॥ बभूव मूर्त्तिमदायोर्वांशात्प्राणवल्लभा। तत्पत्नी सा च तत्पुत्राः प्राणाश्च पञ्च जीविनाम् ॥ प्राणोऽपानः समानश्चोदानो व्यान एव च। बभूवुरेव तत्पुत्रा अधःप्राणाश्च पञ्च च ॥ धर्म्मतोयाधिदेवश्च बभूव वरुणो महान्। तदाज्ञातु तत्पत्नी वरुणानी बभूव ह ॥ अथ सा कृष्णशक्तिश्च कृष्णगर्भं दधार च। शतमन्वन्तरं यावत् ज्वलन्ती ब्रह्मतेजसा ॥

कृष्णप्राणाधिदेवी सा कृष्णप्राणाधिकप्रिया। कृष्णस्य सङ्गिनी शश्वत् कृष्णवक्षःस्थलस्थिता शतमन्वन्तरातीतकालेऽतीतेऽपि सुन्दरी। सुषाव डिम्बं स्वर्णाभं विश्वाधारालयं परम् ॥ दृष्ट्वा डिम्बञ्च सा देवी हृदयेन विदूयता। उत्ससर्ज्ज च कोपेन ब्रह्माण्डं गोलके जले ॥ दृष्ट्वा कृष्णश्च तत्त्यागं हाहाकारं चकार ह। शशाप देवीं देवेशस्तत्त्यागञ्च यथोचितम् ॥ यतोऽपत्यं त्वया त्यक्तं कोपशीले सुनिष्ठुरे। भव त्वमनपत्यापि चाद्यप्रभृति निश्चितम् ॥ या यास्तदंशरूपाश्च भविष्यन्ति सुरस्त्रियः। अनपत्याश्च ताः सर्व्वास्तत्समा नित्ययौवना ॥ एतस्मिन्नन्तरे देवीजिह्वाग्रात् सहसा ततः। आविर्ब्बभूव कन्यैका शुक्लवर्णा मनोहरा ॥ पीतवस्त्रपरीधाना वीणापुस्तकधारिणी रत्नभूषणभूषाढ्या सर्व्वशास्त्राधिदेवता ॥ अथ कालान्तरे सा च द्विधारूपा बभूव ह। वामार्द्धाङ्गा च कमला दक्षिणार्द्धा सरस्वती ॥ एतस्मिन्नन्तरे कृष्णो द्विधारूपो बभूव सः। दक्षिणार्द्धश्च द्विभुजो वामार्द्धश्च चतुर्भुजः ॥ उवाच वाणीं श्रीकृष्णस्तस्य कामिनी भव। अत्रैव मानिनी राधा नैव भद्रं भविष्यति ॥ एवं लक्ष्मीञ्च प्रददौ तुष्टो नारायणाय च। स जगाम च वैकुण्ठं ताभ्यां सार्द्धं जगत्पतिः ॥ अनपत्ये च ते दे च यतो राधाङ्गसम्भवा ॥"

इति ब्रह्मवैवर्त्ते प्रकृतिखण्डे २ अध्यायः ॥

राधाया उत्पत्तिर्यथा,—

"पुरा वृन्दावने रम्ये गोलोके रासमण्डले। शतशृङ्गैकदेशे च मल्लिकामाधवीवने ॥ रत्नसिंहासने रम्ये तस्थौ तत्र जगत्पतिः। स्वेच्छामयश्च भगवान् बभूव रमणोत्सुकः ॥ रमणं कर्त्तुमिच्छुश्च तद्बभूव सुरेश्वरी। इच्छया च भवेत् सर्व्वं तस्य स्वेच्छामयस्य च ॥ एतस्मिन्नन्तरे दुर्गे द्विधारूपो बभूव सः। दक्षिणाङ्गश्च श्रीकृष्णो वामार्द्धाङ्गा च राधिका ॥ बभूव रमणी रम्या रासेशी रमणोत्सुका। अमूल्यरत्नाभरणा रत्नसिंहासनस्थिता ॥ वह्निशुद्धांशुकाधाना कोटिपूर्णशशिप्रभा। तप्तकाञ्चनवर्णाभा राजिता च स्वतेजसा ॥ सस्मिता सुदती शुद्धा शरत्पद्मनिभानना। बिभ्रती कबरीं रम्यां मालतीमाल्यमण्डिताम् ॥ रत्नमालाञ्च दधती श्रीमत्सूर्य्यसमप्रभाम्। मुक्ताहारेण शुभ्रेण गङ्गाधारानिभेन च ॥ संयुक्तं वर्त्तुलोत्तुङ्गं सुमेरुगिरिसन्निभम्। कठिनं सुन्दरं दृश्यं कस्तूरीपत्रचर्चितम् ॥ माङ्गल्यं मङ्गलार्हञ्च स्तनयुग्मञ्च बिभ्रतीम्। नितम्बश्रोणिभारार्त्तां नवयौवनसंयुताम् ॥ कामातुरां सस्मिताञ्च ददर्श रसिकेश्वरः। दृष्ट्वा कान्तां जगत्कान्तो बभूव रमणोत्सुकः ॥ दृष्ट्वा रिरंसुं कान्तञ्च सा दधार हरेः पुरः। रासेशीं भूय गोलोके सा दधार हरेः पुरः ॥ तेन राधा समाख्याता पुराविद्भिर्महेश्वरि।

राधा जयति श्रीकृष्णं स च ताश्च परस्परम् ॥
उभयोः सर्व्वसाम्यञ्च सदा सर्व्वे वदन्ति च ।
भवनं धावनं रासे स्मरत्यालिङ्गनं जपेत् ॥
तेन जल्पति सङ्केताद्रस्या राधा यदीश्वरः ।
राशब्दोच्चारणाद्भक्तो राति मुक्तिं सुदुर्लभाम् ॥
धाशब्दोच्चारणाद्गर्भे धावत्येव हरेः पदम् ।
कृष्णवामांशसम्भूता राधा रासेश्वरी पुरा ॥
तस्याश्चांशांशकलया बभूवुर्देवयोषितः ।
रा इत्यादानवचनो धा च निर्व्वाणवाचकः ॥
यतोऽवाप्नोति सुक्तिञ्च सा च राधा प्रकीर्त्तिता ।
बभूव गोपीसंघश्च राधाया लोमकूपतः ॥
श्रीकृष्णलोमकूपेभ्यश्च बभूवुः सर्व्ववल्लवाः ।
राधा वामांशभागेन महालक्ष्मीर्बभूव सा ॥
चतुर्भुजस्य सा पत्नी देवी वैकुण्ठवासिनी ।
तदंशा राजलक्ष्मीश्च राजसम्पत्प्रदायिनी ॥
तदंशा मर्त्यलक्ष्मीश्च गृहिणाञ्च गृहे गृहे ।
प्रस्याधिष्ठातृदेवी च सा एव गृहदेवता ॥
स्वयं राधा कृष्णपत्नी कृष्णवक्षःस्थलस्थिता ।
प्राणाधिष्ठातृदेवी च तस्यैव परमात्मनः ॥
ब्रह्मादिस्तम्बपर्य्यन्तं सर्व्वं मिथ्येव पार्व्वति ।
भज सत्यं परं ब्रह्म राधेशं त्रिगुणात् परम् ॥
परं प्रधानं प्रकृतिं परमात्मानमीश्वरम् ।
सर्व्वाद्यं सर्व्वपूज्यञ्च निरीहं प्रकृतेः परम् ॥
स्वेच्छामयं नित्यरूपं भक्तानुग्रहविग्रहम् ।
तच्छक्तयश्च देवानां प्राकृतं रूपमेव च ॥
तस्य प्राणाधिका राधा बहुसौभाग्यसंयुता ।
महिष्योः प्रभुः सा च मूलप्रकृतिरीश्वरी ॥
मानिनीं राधिकां सन्तः सदा सेवन्ति नित्यशः ।
सुलभं यत्पदाम्भोजं ब्रह्मादीनां सुदुर्लभम् ॥
स्वप्ने राधापदाम्भोजं न हि पश्यन्ति वल्लवाः ।
स्वयं देवी हरेः क्रोड़े छाया रायाणकामिनी ॥
स च द्वादशगोपानां रायाणः परमः प्रिये ।
श्रीकृष्णांशश्च भगवान् विष्णुतुल्यपराक्रमः ॥
श्रीदामशापात् सा देवी गोलोकादागता महीम् ॥"

इति ब्रह्मवैवर्त्ते प्रकृतिखण्डे राधोपाख्यानं ४५ अध्यायः ॥ * ॥ अपि च ।

गर्ग उवाच ।

"शृणु नन्द प्रवक्ष्येऽहमितिहासं पुरातनम् ।
पुरा गोलोकवृत्तान्तं श्रुतं शङ्करवक्त्रतः ॥
श्रीदाम्नो राधया सार्द्धं बभूव कलहो महान् ।
श्रीदामा शापाद्दैत्यश्च गोपी राधा च गोकुले ॥
वृषभानुसुता सा च माता यस्याः कलावती ।
कृष्णस्यार्द्धाङ्गसम्भूता नाथस्य सदृशी सती ॥
गोलोकवासिनी सेयमत्र कृष्णाज्ञयाधुना ।
अयोनिसम्भवा देवी मूलप्रकृतिरीश्वरी ॥
मातुर्गर्भं वायुपूर्णं कृत्वा च मायया सती ।
वायुनिःसारणे काले धृत्वा च शिशुविग्रहम् ॥
आविर्बभूव सा सद्यः पृथ्व्यां कृष्णोपदेशतः ।
वर्द्धते सा व्रजे राधा शुक्ले चन्द्रकला यथा ॥
श्रीकृष्णतेजसोऽर्द्धेन सा च मूर्त्तिमती सती ।
एका मूर्त्तिर्द्विधा भूता भेदो वेदे निरूपितः ॥
इयं स्त्री न पुमान् किंवा सा वा कान्ता पुमानयम् ।
द्वे रूपे तेजसा तुल्ये रूपेण च गुणेन च ॥
पराक्रमेण बुद्ध्या वा ज्ञानेन सम्पदेन च ।
पुरतो गमनेनैव किन्तु सा वयसाधिका ॥
ध्यायते तामयं शश्वदिमं सा स्मरति प्रियम् ।
रचिता सास्य प्राणैश्च तत्प्राणैर्मूर्त्तिमानयम् ॥
अस्य राधानुसारेण गोकुलागमनं परम् ।
स्वीकारं सार्थकं कर्त्तुं गोलोके यत् कृतं पुरा ॥
कंसभीतिच्छलेनैव गोकुलागमनं हरेः ।
प्रतिज्ञापालनार्थञ्च भयेशस्य भयं कृतः ॥"*॥

राधाशब्दस्य व्युत्पत्तिर्यथा—

"राधाशब्दस्य व्युत्पत्तिः सामवेदे निरूपिता ।
नारायणस्तामुवाच ब्रह्माणं नाभिपङ्कजे ॥
ब्रह्मा तां कथयामास ब्रह्मलोके च शङ्करम् ।
पुरा कैलासशिखरे मामुवाच महेश्वरः ॥
देवानां दुर्लभं नन्द निगूढमथ वदामि ते ।
सुरासुरमुनीन्द्राणां वाञ्छितां मुक्तिदां पराम् ॥
रेफो हि कोटिजन्माघं कर्म्मभोगं शुभाशुभम् ।
आकारो गर्भवासञ्च मृत्युञ्च रोगमुद्धरेत् ॥
धकारमायुषो हानिमाकारो भवबन्धनम् ।
श्रवणस्मरणोक्तिभ्यः प्रणश्यति न संशयः ॥
रेफो हि निश्चलां भक्तिं दास्यं कृष्णपदाम्बुजे ।
सर्व्वेप्सितं सदानन्दं सर्व्वसिद्धौघमीश्वरम् ॥
धकारः सहवासञ्च तत्तुल्यकालमेव च ।
ददाति सार्ष्टिं सारूप्यं तत्त्वज्ञानं हरेः स्वयम् ॥
आकारस्तेजसो राशिं दानशक्तिं हरौ यथा ।
योगशक्तिं योगमतिं सर्व्वकालहरिस्मृतिम् ॥
मृत्युक्लिस्मरणादूर्द्ध्वं योगान्मोहजालञ्च किल्बिषम् ।
रोगशोकमृत्युभया वेपन्ते नात्र संशयः ॥"

इति ब्रह्मवैवर्त्ते श्रीकृष्णजन्मखण्डे १३ अध्यायः ॥

तस्याः षोड़शनामानि तेषां व्युत्पत्तिश्च यथा,

नारद उवाच ।

"कानि षोड़श नामानि राधिकाया जगद्गुरोः ।
तानि मे वद शिष्याय श्रोतुं कौतूहलं मम ॥
श्रुतं नाम्नां सहस्रञ्च सामवेदनिरूपितम् ।
तथापि श्रोतुमिच्छामि तत्तो नामानि षोड़श ॥
अभ्यन्तराणि तेषां वा तदन्यान्येव वा विभो ।
अहो पुण्यस्वरूपाणि भक्तानां वाञ्छितानि च ॥
नामानि तेषां व्युत्पत्तिं सर्व्वेषां दुर्लभानि च ।
पावनानि जगन्मातुर्जगतां गूढरूपिणी ॥

नारायण उवाच ।

राधा रासेश्वरी रासवासिनी रसिकेश्वरी ।
कृष्णप्राणाधिका कृष्णप्रिया कृष्णस्वरूपिणी ॥
कृष्णदामांशसम्भूता परमानन्दरूपिणी ।
कृष्णा वृन्दावनी वृन्दा वृन्दावनविनोदिनी ॥
चन्द्रावती चन्द्रकान्ता शतचन्द्रनिभानना ।
नामान्येतानि सारानि तेषामभ्यन्तराणि च ॥
राधेत्येवञ्च संसिद्धौ राकारो दातृवाचकः ।
स्वयं निर्व्वाणधात्री या सा राधा परिकीर्त्तिता ॥
रा च रासे च भवनाद्धा एव धारणादहो ।
हरेरालिङ्गनाधारात्तेन राधा प्रकीर्त्तिता ॥
रासेश्वरस्य पत्नीयं तेन रासेश्वरी स्मृता ।
रासे च वासो यस्याश्च तेन रासनिवासिनी ॥
सर्व्वाभ्यो रसिकानाञ्च देवीनामीश्वरी परा ।
प्रवदन्ति पुरा सन्तस्तेन तां रसिकेश्वरीम् ॥
प्राणाधिका प्रेयसी सा कृष्णस्य परमात्मनः ।
कृष्णप्राणाधिका सा च कृष्णेन परिकीर्त्तिता ॥
कृष्णस्यासि प्रिया शान्ता कृष्णो वास्याः प्रियः सदा ।
सर्व्वदेवगणैरुक्ता तेन कृष्णप्रिया स्मृता ॥
कृष्णरूपं संविधातुं या शक्ता चावलीलया ।
सर्व्वांशैः कृष्णसदृशी तेन कृष्णस्वरूपिणी ॥
वामार्द्धाङ्गेन कृष्णस्य या सम्भूता परा सती ।
कृष्णवामांशसम्भूता तेन कृष्णेति कीर्त्तिता ॥
परमानन्दराशिश्च स्वयं मूर्त्तिमती सती ।
श्रुतिभिः कीर्त्तिता तेन परमानन्दरूपिणी ॥
कृषिर्मोक्षार्थवचनो ण एवोत्कृष्टवाचकः ।
आकारो दातृवचनस्तेन कृष्णा प्रकीर्त्तिता ॥
अस्ति वृन्दावनं यस्यास्तेन वृन्दावनी स्मृता ।
वृन्दावनस्याधिदेवी तेन राधा प्रकीर्त्तिता ॥
वृन्दः संघवचः सखुराकारोऽप्यस्तिवाचकः ।
सखिवृन्दास्ति यस्याश्च सा वृन्दा परिकीर्त्तिता ॥
मुक्ताचको विनोदश्च सा यस्या अस्ति तत्र च ।
वेदा वदन्ति तां तेन वृन्दावनविनोदिनीम् ॥
नखचन्द्रावलीवक्त्रचन्द्रोऽस्ति यत्र सन्ततम् ।
तेन चन्द्रावली सा च कृष्णेन कीर्त्तिता पुरा ॥
कान्तिरस्ति चन्द्रतुल्या यदा यस्या दिवा-निशम् ।
सा चन्द्रकान्ता हर्षेण हरिणा परिकीर्त्तिता ॥
शरच्चन्द्रप्रभा यस्याश्चाननेऽस्ति दिवानिशम् ।
मुनिना कीर्त्तिता तेन शरच्चन्द्रप्रभानना ॥

इदं षोड़शनामोक्तमर्थाख्यानसंयुतम् ।
नारायणेन यदुक्तं ब्रह्मणे नाभिपङ्कजे ॥
ब्रह्मणा च पुरा दत्तं धर्म्माय जनकाय मे ।
धर्म्मेण कृपया दत्तं मह्यमादित्यपर्व्वणि ॥
पुष्करे च महातीर्थे पुण्याहे देवसंसदि ।
राधाप्रभावप्रस्तावे सुप्रसन्नेन चेतसा ॥
इदं स्तोत्रं महापुण्यं तुभ्यं दत्तं महामुने ।
निन्दकायावैष्णवाय न दास्यसि महामुने ॥
यावज्जीवमिदं स्तोत्रं चिरन्त्यं यः पठेन्नरः ।
राधामाधवयोः पादपद्मे भक्तिर्भवेदिह ॥
अन्ते लभेत्तयोर्दास्यं शश्वत् सहचरो भवेत् ।
अणिमादिकसिद्धिञ्च संप्राप्य नित्यविग्रहम् ॥
व्रतदानोपवासैश्च सर्व्वनियमपूर्व्वकम् ।
चतुर्णामेव वेदानां पाठैः सर्व्वार्थसंयुतैः ॥
सर्व्वेषां यत्ततीर्थानां करणैर्विधिबोधितैः ।
प्रादक्षिण्येन भूमेश्च कृत्स्नायाः एव सप्तधा ॥
शरणागतरक्षायामज्ञानज्ञानदानतः ।
देवानां ब्राह्मणानाञ्च दर्शनेनापि यत् फलम् ॥
तदेव स्तोत्रपाठस्य कलां नार्हन्ति षोड़शीम् ।
स्तोत्रस्यास्य प्रभावेण जीवन्मुक्तो भवेन्नरः ॥"

इति ब्रह्मवैवर्त्ते श्रीकृष्णजन्मखण्डे १० अध्यायः ॥

राधानामोच्चारणानन्तरं कृष्णनामोच्चारण-विधिर्यथा,—

नारद उवाच।

"आदौ राधां समुच्चार्य पश्चात् कृष्णं विदुर्बुधाः।
निमित्तमस्य मां प्रोक्तं वद भक्तजनप्रिय॥

श्रीनारायण उवाच।

निमित्तमस्य त्रिविधं कथयामि निशामय।
जगन्माता च प्रकृतिः पुरुषश्च जगत्पिता॥
गरीयसीति जगतां माता प्रोक्तगुणैः पितुः।
राधाकृष्णेति गौरीशेत्येवं शब्दः श्रुतौ श्रुतः॥
कृष्णराधेशगौरीति लोके न च कदा श्रुतः।
प्रसीद रोहिणीचन्द्र गृहाणार्घ्यमिदं मम॥
गृहाणार्घ्यं मया दत्तं संध्यया सह भास्कर।
प्रसीद कमलाकान्त गृहाण मम पूजनम्॥
इति दृष्टं सामवेदे कौथुमे मुनिसत्तम॥
राशब्दोच्चारणादेव स्फीतो भवति माधवः।
धाशब्दोच्चारतः पश्चाद्धावत्येव ससम्भ्रमः॥
आदौ पुरुषमुच्चार्य पश्चात् प्रकृतिमुच्चरेत्।
स भवेन्मातृगामी च वेदातिक्रमणे मुने॥"
इति ब्रह्मवैवर्ते श्रीकृष्णजन्मखण्डे ५२ अध्यायः॥

तस्या निन्दायां दोषो यथा,—

"ये वा द्विषन्ति निन्दन्ति पापिनश्च हसन्ति च।
कृष्णप्राणाधिकां देव देवीञ्च राधिकां पराम्॥
ब्रह्महत्याशतं ते च लभन्ते गात्र संशयः।
तत्पापेन च पच्यन्ते कुम्भीपाके च रौरवे॥
तप्ततैले महाघोरे ध्वान्ते कीटे च यत्नके।
चतुर्दशेन्द्रावच्छिन्नं पितृभिः सप्तभिः सह॥
ततः परमजायन्त जन्मैकं कोलयोनितः।
दिव्यं वर्षसहस्रञ्च विष्ठाकीटाश्च पापतः॥
पुंश्चलीनां योनिकीटास्तद्रक्तमलभक्षणाः।
मलकीटाश्च तन्मानवर्षञ्च पूयभक्षकाः।
वेदे च काण्वशाखायामित्याह कमलोद्भवः॥"
इति ब्रह्मवैवर्ते श्रीकृष्णजन्मखण्डे ६७ अध्यायः॥

राधास्वरूपं यथा,—

यशोदोवाच।

"हरौ च निश्चला भक्तिस्तद्दास्यं वाञ्छितं मम।
तव नाम्नश्च युत्पत्तिं का वा त्वं वक्तुमर्हसि॥

राधिकोवाच।

भवेद्भक्तिर्निश्चला ते हरेर्दास्यञ्च दुर्लभम्।
लभस्व महरेणापि कथयामि खनिर्णयम्॥
पुरा नन्देन दृष्टाहं भाण्डीरे वटमूलके।
मया च कथितो नन्दो निषिद्धश्च व्रजेश्वरः॥
अहमेव स्वयं राधा कृष्णा रासाब्जकामिनी।
रासेशः श्रीहरेरंशः पार्षदप्रवरो महान्॥
राशब्दश्च महद्विष्णोर्विश्वानि यस्य लोमसु।
विश्वप्राणिषु विश्वेषु धा धात्रीमातृवाचकः॥
धात्री माताहमेतेषां मूलप्रकृतिरीश्वरी।
तेन राधा समाख्याता हरिणा च पुरा बुधैः॥
अहं श्रीदामशापेन वृषभानुसुताधुना।
प्रसूतवर्षञ्च विच्छेदो हरिणा सह साम्प्रतम्॥
वृषभानुश्च कृष्णस्य पार्षदप्रवरो महान्।
पितॄणां मानसी कन्या मम माता कलावती॥
अयोनिसम्भवाहञ्च मम माता च भारते।
पुनः साङ्गञ्च युष्माभिर्यास्यामि श्रीहरेः पदम्॥
इति ते कथितं सर्व्वं व्रजं व्रज व्रजेश्वरि।
व्रजेश्वरेण सहिता स्वामिना ज्ञानिना सति!॥"
इति ब्रह्मवैवर्ते श्रीकृष्णजन्मखण्डे ११० अध्यायः॥

राधापार्व्वत्योरभेदो यथा,—

पार्व्वत्युवाच।

"किं वा प्रश्नं करिष्यामि त्वां राधां मङ्गलालयाम्।
गता ते विरहज्वाला श्रीदाम्नः शापमोक्षणे॥
सततं तन्मनःप्राणा त्वय्येव मयि ते तथा।
न ह्येवमावयोर्भेदः शक्तिपूरुषयोर्यथा॥
ये त्वां निन्दन्ति मद्भक्तास्त्वद्भक्ताश्चापि मामपि।
कुम्भीपाके च पच्यन्ते यावच्चन्द्रदिवाकरौ॥
राधामाधवयोर्भेदं ये कुर्व्वन्ति नराधमाः।
वंशहानिर्भवेत्तस्य पच्यन्ते नरकं चिरम्॥
यान्ति शूकरयोनिञ्च पितृभिः प्रपितामहैः सह।
यष्टिं वर्षसहस्राणि विष्ठायां कृमयस्तथा॥"
इति ब्रह्मवैवर्ते श्रीकृष्णजन्मखण्डे १२३ अध्यायः॥

गोलोके तस्या आश्रमो यथा,—

"एतान् मनोरमान् दृष्ट्वा ते देवा गमनोन्मुखाः।
जग्मुः शीघ्रं कियद्दूरं ददृशुः सुन्दरं ततः॥
आश्रमं राधिकायाश्च रासेश्वर्य्याश्च नारद।
देवाधिदेवा गोपीनां वरायाश्चारु निर्म्मितम्॥
प्राणाधिकायाः कृष्णस्य रम्याद्रम्यं मनोहरम्।
सर्व्वानिर्व्वचनीयञ्च पण्डितैर्न निरूपितम्॥
सुचारु वर्त्तुलाकारं षड्गव्यूतिप्रमाणकम्।
प्रतप्तमन्दिरसंयुक्तं ज्वलितं रत्नतेजसा॥
अमूल्यरत्नसाराणां वरैर्विरचितं वरम्।
दुर्लङ्घ्याभिर्गभीराभिः परिखाभिः सुशोभितम्॥
कल्पवृक्षैः परिवृतं पुष्पोद्यानशतान्तरम्।
सुमूल्यरत्नरचितं प्राकारैः परिवेष्टितम्॥
सप्तप्रवेदिकायुक्तं युक्तैर्द्वारैश्च सप्तभिः।
संयुक्तरत्नचित्रैश्च विचित्रैर्वस्तुभिर्मुने॥
प्रधानद्वारसप्तभ्यः क्रमशः क्रमशो मुने।
सर्व्वतोऽपि ततस्तत्र षोड़शद्वारसंयुतम्॥
देवा दृष्ट्वा च प्राकारं सहस्रधनुरुच्छ्रितम्।
सप्तप्रकलससमूहैः सुमनोहरम्॥
सुदीप्तं तेजसा रम्यं परमं विस्मयं ययुः।
ततः प्रदक्षिणीकृत्य कियद्दूरं ययुर्मुदा॥"
इति ब्रह्मवैवर्ते श्रीकृष्णजन्मखण्डे ४ अध्यायः॥

तस्या जन्मतिथिर्यथा,—

"भाद्रस्य कृष्णपक्षे तु हरिजन्माष्टमी यदा।
तस्याः परे तु या शुक्ला तस्यां जाता हरिप्रिया॥
वृषभानुपुरी नाम्ना सर्व्वरत्नमयी शुभा।
सुवर्णमणिमाणिक्यविचित्रभवनाङ्गना॥
अणिमादिसुखैश्वर्य्यपरिपूर्णमनोहरा।
चित्रध्वजपताकादिविचित्रा चित्रनिर्म्मिता॥
चिदानन्दस्वरूपा सा चिदानन्दप्रदायिनी।
आनन्दकलिला नार्य्यो यत्र तिष्ठन्ति सर्व्वदा॥
विचित्रवेशालङ्कारा विचित्रवसनाम्बरा।
नानावेशविचित्राङ्गा प्रमदामोददायिनी॥
सर्व्वलक्षणसम्पन्ना राधा नाम्ना विनोदिनी।
जगतां मोहिनी देवी गुह्यगुह्यातिसुन्दरी।
मूढ़ानामसतान्चैव न कथ्यं मुनिसत्तम॥

नारद उवाच।

प्रणिपत्य महाभाग पृच्छामि तव किङ्करः।
सा लक्ष्मीः किं सुरवधूर्महालक्ष्मीः सरस्वती॥
विद्या किमन्तरङ्गाथ वैष्णवी प्रकृतिः किमु।
वेदकन्या देवकन्या मुनिकन्याथवा वद॥

सदाशिव उवाच।

कोटिकोटिमहालक्ष्मीर्लक्ष्मीः का वा परावरा।
निन्दिता यत्प्रदाम्नोजे कथिता मुनिसत्तम॥
अपरं किं निगदेऽहमेकवक्त्रेण नारद।
श्रीराधारूपलावण्यगुणादीन् वक्तुमक्षमः॥
तत्तद्रूपादिमाहात्म्यं लज्जेऽहमपि नारद।
त्रैलोक्ये तु समर्थो हि न मातुं वक्तुमर्हति॥
तद्देहरूपमाधुर्य्यं जगन्मोहनमोहनम्।
यद्यनन्तमुखोऽपि स्यां तद्वक्तुं नास्ति मे गतिः॥
लक्ष्मीः कमला दास्यो यस्याः सा लाक्ष्मकी मता॥
एवं शतसहस्राणामीश्वरी राधिका परा॥

नारद उवाच।

प्रभो श्रीराधिकाजन्ममाहात्म्यं सर्व्वतः परम्।
तदहं श्रोतुमिच्छामि समस्तं भक्तवत्सल॥
कथ्यतां मे महाभाग व्रतानाञ्च व्रतोत्तमम्।
ध्यानं वा कीदृशी पूजा स्तुतिर्वापि वदस्व मे॥
तत्सर्व्वं श्रोतुमिच्छामि कथ्यतां मे सदाशिव।
चर्य्यां पूजाविधानञ्च विशेषमत्रैव भव॥
यत्रं मन्त्रं स्तुतिर्ध्यानं पूजनं यत्र निर्म्मितम्।
पूजने किं विधानञ्च तत्तत्सर्व्वाद्यैव विधौ॥

शिव उवाच।

वृषभानुपुरीराजा वृषभानुर्महाशयः।
महाकुलप्रसूतोऽसौ सर्व्वशास्त्रविशारदः॥
महाशयो धनी श्रीमानग्निमाद्यष्टवैभवः।
वैश्यः सदन्तःकरणः कुलीनः कृष्णदेवतः॥
तस्य भार्य्या महाभागा श्रीमत्श्रीकीर्त्तिदाह्वया।
रूपयौवनसम्पन्ना महाराजकुलोद्भवा॥
महालक्ष्मीस्वरूपा सा भर्त्या परमसुन्दरी।
महापतिव्रता कान्ता सर्व्वविद्यागुणान्विता॥
तस्यां श्रीराधिका जाता श्रीमद्वृन्दावनेश्वरी।
भाद्रे मासि सिताष्टम्यां मध्याह्ने शुभदायिनी॥
वेदागमपुराणादिगीता या कृष्णवल्लभा।
सदा कृष्णप्रिया साध्वी श्रीकृष्णानन्ददायिनी॥
शृणु मत्तो महाभाग पूजनं भजनं तथा।
कर्त्तव्यं यदनुष्ठानं राधाजन्ममहोत्सवः॥
समर्च्चय सदा राधां जन्मव्रतपरायणैः।
तत् समग्रं प्रवक्ष्यामि ध्यानादिकमनुक्रमात्॥
सर्व्वदा पश्चिमद्वारे श्रीराधाकृष्णमन्दिरे।
ध्वजस्रग्वस्त्रकलसपताकातोरणादिभिः॥
नानासुमङ्गलद्रव्यैर्यथाविधि प्रवर्त्तते।
सुवासितगन्धपुष्पैर्धूपैश्च धूपितैर्गृहम्॥
मध्ये पद्मवर्णचूर्णैर्मण्डलं सरसोरुहम्।
सुषोड़शदलाकारं तत्र निर्म्माय यत्नतः॥
दिव्यासने पद्ममध्ये पश्चिमाभिमुखीं स्थिताम्।

श्रीयुग्ममूर्त्तिं सम्पास्य ध्यानपाद्यादिभिः क्रमात् ॥
भक्तैः सह सजातीयैः प्रत्यानुसारवस्तुभिः ।
तद्भक्तः पूजयेद्भक्त्या तां सदा संयतेन्द्रियः ॥"

अथ ध्यानम् ।

"हेमेन्दीवरकान्तिमञ्जुलतरं श्रीमच्जगन्मोहनं
नित्याभिर्ललितादिभिः परिवृतं सन्नीलपीताम्बरम् ।
नानाभूषणभूषणाङ्गमधुरं कैशोररूपं युगं
गान्धर्व्वाजनमत्र्ययं सुललितं नित्यं शरण्यं भजे ॥
युग्ममूर्त्तिमिति ध्यात्वा शालग्रामेऽथवा पुनः ।
साक्षात् शैलादिमूर्त्तौ वा मनोमय्यां समर्च्चयेत् ॥
ततो मण्डलपूजाञ्च तयोः सम्मुखतः क्रमात् ।
कुर्य्याद्भक्तः प्रयत्नेन ध्यानपाद्यादिभिः सदा ॥
ललिता पश्चिमे पूज्या पीतवर्णदले ऽपरा ।
चन्द्रावती शुक्लदले तद्वामे पूजयेत् सुधीः ॥
वायव्ये श्यामलां देवीं कृष्णवर्णदले ऽर्चयेत् ।
तद्वामे चित्ररेखाख्यां शुक्लवर्णदले ततः ॥
उत्तरे श्रीमती त्वर्च्या रक्तवर्णदले तथा ।
तद्वामपार्श्वे चन्द्राख्यां नीलवर्णदले ऽर्चयेत् ॥
रक्तवर्णदले ऽप्यर्च्या ईशाने श्रीहरिप्रिया ।
तस्या वामे शुक्लदले पूज्या मदनसुन्दरी ॥
पीतवर्णदले पूर्व्वे विशाखामर्चयेत्ततः ।
प्रियां तस्या वामपार्श्वे शुक्लवर्णदले ऽर्चयेत् ॥
अग्निकोणे श्यामवर्णां दले सख्यां समर्चयेत् ।
तद्वामे श्रीमधुमतीं शुक्लवर्णदले ऽर्चयेत् ॥
पूजयेद्दक्षिणे पद्मां रक्तवर्णदले तथा ।
शशिरेखाञ्च तद्वामे नीलवर्णदले ऽर्चयेत् ॥
पूजयेन्नैर्ऋते भद्रां रक्तवर्णदले ततः ।
रसप्रियाञ्च तद्वामे शुक्लवर्णदले ऽर्चयेत् ॥ * ॥
श्रीराधाप्रियसङ्गिनीं विधुमुखीं कृष्णप्रियां प्रेयसीं
हेमाभां परिधानिनीं सुमधुरध्यानां सुवेशाम्बराम् ।
सद्रत्नाभरणैर्मनोज्ञसुतनुं नित्यां जगन्मोहिनीं
वन्दे श्रीललितां कुरङ्गनयनीं पीताम्बरेणावृताम् ॥ १ ॥
श्यामां श्यामपरायणां वरतनुं चामीकराङ्गच्छटां
मञ्जीरैर्मधुरध्वनिंपरिलसच्चन्द्राननां सुस्वराम् ।
सद्रत्नाभरणां सरोजनयनीं शुक्लांशुकेनावृतां
ध्यायेत् श्रीललितासखीं सुचिबुकां चन्द्रावतीमुत्तमाम् ॥ २ ॥
कान्त्या काञ्चनसन्निभां सुललितां कृष्णाम्बरं बिभ्रतीं
नानाभूषणमञ्जुलाञ्च सुदतीं माहेङ्गिकीं सुन्दरीम् ।
श्रीवृन्दाविपिनेश्वरीं प्रियसखीं भव्यां शुभ्राङ्काननां
वेणीचारुसुमल्लिकासजमम्रूं नित्यं भजे श्यामलाम् ॥ ३ ॥
श्रीकृष्णप्रियवल्लभां शशिमुखीं सच्छब्दडम्फान्वितां

शुद्धस्वर्णशरीरकान्तिमतुलां शुक्लाम्बरेणावृताम्।
स्वर्णाद्याभरणां सदा पुलकिनीं श्रीकृष्णभावेन वै
गायन्तीं मधुरस्वरैरविरतं श्रीचित्रलेखां
भजे ॥४॥
कनकनिभशरीरां बिभ्रतीं रक्तवस्त्रं
ललितनलिननेत्रां चारुभूषाङ्गशोभाम् ।
सुमधुरपिकवाक्यां चन्द्रवक्त्रां सुवेशां
मधुरिपुनिजदास्यां श्रीमतीं तां हि वन्दे ॥५॥
वृन्दावनेशनिजसेवनसौख्यदात्रीं
रम्यां सुनीलवसनां सुरवावयन्त्राम् ।
नानाविभूषिततनुं स्फुरदम्बुजाक्षीं
चन्द्रां भजे सकलरागमनोज्ञगानाम् ॥६॥
सुवर्णवर्णां शुकधारिणीं ता-
सुपाङ्गयन्त्रां मणिभूषणाङ्गीम् ।
हरिप्रियां मञ्जुलपत्ननेत्रां
भजेऽहमीड्यां कनकाङ्गशोभाम् ॥ ७ ॥
रवावकलवादिनीं सकलरागसंगायिनीं
सुचारुमणिकुण्डलां शरदपूर्णचन्द्राननाम् ।
सुरत्नवरभूषणां रुचिरशुभ्रपट्टाम्बरां
भजे मदनसुन्दरीं कनकवर्णदेहां शुभाम् ॥८॥
सुतानज्ञां गीते भ्रमरकलकण्ठीं सुचतुरां
जगद्वन्द्यां वेल्लन्नलिननयनामिन्दुवदनाम् ।
विशाखां गौराङ्गीं ललितसुरसीं पीतवसनां
भजे श्यामां सेव्यां सकलगुणपूर्णां सुखमयीम् ॥९
सुचामीकराभूषणाढ्यां सुवेशां
सुसङ्गीतविद्यासुधीरां वरेण्याम् ।
सुवंशीसुगानां सुहेमाङ्गशोभां
भजे श्रीप्रियां शुक्लवस्त्रां मनोज्ञाम् ॥१०॥
गान्धर्व्वानिजदासिकां सुगदवाग्यन्त्रं सदा बिभ्रतीं
मञ्जुस्वर्णविभूषितां वरतनुं पाथोजनेत्रां वराम् ।
ध्यायेत् कृष्णपदारविन्दमधुपीं कृष्णाम्बरेणावृतां
संगीते मधुरंवरामविरतं सेव्यां मनोहारिणीम् ॥११॥
रुचिरमधुमतीं तां तप्तचामीकराभां
पिककलरवकण्ठीं शुक्लवस्त्रं दधानाम् ।
तिलकुसुमसुनासां चारुहेमाङ्गभूषां
युगलचरणसेवातत्परामाभजेऽहम् ॥१२॥
रत्नालङ्कारदेहां जितकुसुमरुचीमङ्गलावण्यरूपे-
र्भव्यां सङ्गीतविद्यासुनिपुणरसिकां तानमानातिविज्ञाम् ।
शारङ्गीयन्त्रगानां कनकनिभतनुं सर्व्वदा कृष्णसेवीं
वन्दे पद्मां सुवेशां शशधरवदनां बिभ्रतीं रङ्गवस्त्रम् ॥ १३ ॥
शशिरेखां मृदङ्गञ्च वादयन्तीं सहर्षतुः ।
रसालापस्वरूपाञ्च रसप्रेमैकसंयुताम् ॥१४॥
भव्यां श्रीशशिरेखिकां सुखमकां यन्त्रादिगानावरां

वन्दे ऽहं मधुरस्वरां परमिकां लावण्यसारान्विताम् ।
नानायन्त्रविशारदां वरतनुं पट्टाम्बरेणावृतां
फुल्लेन्दीवरलोचनामविरतं ध्याये जगन्मोहिनीम् ॥१५॥
श्रीयन्त्रं स्वरमण्डलं कलरवं गाने सदा बिभ्रतीं
श्रीभद्रां मधुरस्वरां सुललितां सद्रत्नवस्त्रावृताम्।
राजत्स्वर्णरुचिं विभूषणवरैरङ्गैः सदा शोभितां
ध्याये श्रीयुगसेविकां परमिकां कृष्णैकमग्नां
सदा ॥१६॥
राधाकृष्णपदारविन्दमधुपीं सद्भक्तुल्यार्थिनीं
नानाभूषणभूषिताङ्गरुचिरां सद्रत्नवस्त्रां
शुभाम् ।
ध्याये सन्ततकृष्णभावललितां केयूरहेमाङ्गदां
स्वर्णाङ्गीञ्च रसप्रियां सुखमयीं सर्व्वाङ्गशोभान्विताम् ॥१७॥
मधुस्वरां कोकिलभृङ्गगानां
सतुम्बरीयन्त्रविधारिणीञ्च ।
वनप्रियां शुक्लसुचीनवस्त्रां
भजे हरिद्राङ्गसमङ्गशोभाम् ॥१८॥
एवं ध्यात्वा पूजयित्वा ललिताद्या यथाक्रमात् ।
पाद्यादिभिः सोपचारैर्विधिवद्भक्तितत्परः ॥
सङ्गिन्यो ललितादीनां दत्वात्यन्तिमतों सुने ! ।
प्रणवादिनमोऽन्तेन संप्रदानपदेन वै ।
तत्तन्नाम्ना तु मनुना पुष्पगन्धादिभिर्मुने ! ॥"

इति पाद्मे उत्तरखण्डे श्रीराधाजन्माष्टमीव्रतकथनमाहात्म्यं नाम १६२ अध्यायः ॥

श्रीसदाशिव उवाच ।

"प्रत्येकेऽष्टौ पूजयेद्वै क्रमतस्तु दले दले ।
प्रणवं नाम्ना कथते तासामष्टाविंशाधिकं शतम् ।
इन्दुसुखी रसज्ञा च शुभदा सुमुखी तथा ।
वल्लवी चन्द्रिका चारुचतुरा च सुचञ्चला ॥
मधुरा हस्तकमला तथा मधुरभाविनी ।
विलासिनी रसवती तथा खञ्जनलोचना ॥
सुखदा चम्पकलिका रसदा रसमञ्जरी ।
सदा सुमञ्जरी शीला चन्द्रा चन्द्रप्रभावती ॥
वासन्ती मालती जाती चन्द्रकान्ती सुकुन्तला ।
रम्भा भ्रमरगम्भीरा सुशीला च सुवेशिनी ॥
आमलकी सुधाकण्ठी श्रिता च श्रीरतिप्रिया ।
शुकप्रिया मधुकरी सुवेशा चाम्रतोऽम्बवा ॥
सुरलीवल्लभा वृन्दा पारिजातप्रिया शुभा ।
पद्मखरा रत्नमाला मदिरा रासवल्लवी ॥
मातङ्गगमनी तारावती कुण्डलधारिणी ।
केशरी मित्रवृन्दा च लक्ष्मणाच्युतमालिका ॥
मायावती कौशिकी च कोमलाङ्गी सुचन्दनी ।
पीयूषभाषिणी सत्यवती च कुञ्जवासिनी ॥
कपोतमालिका लोपामुद्रा च किंशुकप्रिया ।
दलावती कुङ्कुमा च कमला च मदालसा ॥
तिलोत्तमा च सावित्री बहुला प्रियवादिनी ।
मुक्तावली चित्ररेखा सुमित्रा लोलकुण्डला ॥
अरुन्धती चित्रवती श्रीरक्ता पद्मगन्धिनी ।
मेनका कलिका रङ्गकेतकी कामसञ्जीवनी ॥

कुमुदप्रिया च तानज्ञा तथा वृत्यविलासिनी।
हिरावती हारकण्ठी सिंहमध्या सुलोचना॥
नन्दया नन्दकलिका सुनन्दा नन्ददायिनी।
कुरङ्गाक्षी च सुश्रोणी केलिलोला प्रियंवदा॥
श्यामाराध्या श्यामसेव्या कस्तूरी मानभञ्जिनी।
विचित्रवसना रत्नमञ्जीरा मञ्जुकिङ्किणी॥
पिकस्वरा भृङ्गगाना तथा रासविहारिणी।
श्रीकृष्णदक्षिणे पूज्या यत्नात् चन्द्रावली ततः।
ध्यानपाद्यादिभिः सम्यक्प्रकारैश्च पूजके॥
हेमाभां मधुरस्वरां विधुमुखीं गान्धर्व्वविद्या-
रतां
नानाभूषणभूषिताङ्गमधुरां जातीसुमालीसजम्।
वीणायन्त्रसुवादिनीं वरतनुं चित्राम्बरं बिभ्रतीं
ध्याये कृष्णपरायणां सुचिबुकां चन्द्रावलीं
मङ्गलाम्॥
एवं राधाजन्मतिथौ कुर्य्याच्चक्रमण्डलपूजनम्।
कार्ष्णादीन् वैष्णवान् सर्व्वान् यत्नतः परि-
पूजयेत्॥
एवं राधाकृष्णपूजां तयोर्मण्डलपूजनम्।
प्रत्यब्दे यत्नतः कुर्य्यात् कार्ष्णो रासमहोत्सवे॥
न्यूनातिरिक्तं देवर्षे! न कर्त्तव्यं कदाचन।
श्रीमत्कृष्णोक्तानेनावश्यं तेनैव सर्व्वदा॥
नाकूयेत् ग्रैवग्राक्तादीन् राधाजन्ममहोत्सवे।
पाषण्डान् पतितान् कोलानन्त्यजान्न निमन्त्रयेत्॥
विना भागवताँल्लोकान्न च तत्र प्रवेशयेत्।
गन्धपुष्पादिभिर्माल्येश्चन्दनैरुक्तिवेदितैः॥
नानापराधभीतस्तु भक्तांस्तांश्च चार्चयेत्।
तत्तन्महाप्रसादैश्च भक्ष्यपेयादिभिस्तथा॥
तत्तन्मण्डलपूजायाः कार्ष्णो नान्यांश्च भोजयेत्।
वह्निर्मुखान् श्रीकृष्णस्य गान्धर्व्वाभक्तितत्परः॥
कार्ष्णादीन् वैष्णवान् भक्त्या भोजयेत् पूजयेत्तथा।
तन्नैवेद्यैर्गन्धपुष्पैर्माल्यैर्मैलयजादिभिः॥
सजातीयैर्भक्तवृन्दैः समं तत्र महोत्सवम्।
दिवा कुर्य्यात् प्रयत्नेन राधाभक्तिपरायणः॥
महाप्रसादं भुञ्जीत दिनान्ते चरणोदकम्।
पूजां कृत्वा पिबेत् कार्ष्णः साहंमानन्दितेक्षतः॥
रात्रौ जागरणं कुर्य्याद्राधाकृष्णेति वा स्मरन्।
पूजयेन्मूर्त्तिमारोप्य रूप्यस्वर्णादिसंस्कृताम्॥
अक्षतान्यकथालापं पुराणाद्यश्रुकीर्त्तनम्।
श्रवणीयं प्रयत्नेन नारीभिर्व्वान्धवैः सह॥
यः करोति नरो भक्त्या राधाजन्माष्टमीं शुभाम्।
वदन्ति विबुधाः सर्व्वे राधाभक्तोऽस्ति भूतले॥
प्रहरे प्रहरे राधां गोष्ठाङ्गण्यां दिवानिशि।
पूजयित्वा विधानेन श्रीकृष्णसहितां तथा॥
तन्नसिकैः सहालापैः राधाकृष्णस्तुतिं मुहुः।
तत्तन्महोत्सवं कृत्वा परमानन्दितो भवन्॥
दण्डवत् प्रणतिं कुर्य्यादष्टाङ्गविधिबोधिताम्।
प्रत्यब्दमेव कुरुते राधाजन्ममहोत्सवम्॥
यः पुमानथवा नारी राधाभक्तिपरायणा।
भूत्वा वृन्दावने वासः श्रीराधाकृष्णसङ्गिनी॥
व्रजवासी भवेत् सोऽपि राधाभक्तिपरायणः।
तस्यालापप्रयोगाच्च मुक्तवन्तो नरो भवेत्॥

राधाराधेति यो ब्रूयात् स्मरणं कुरुते नरः।
सर्व्वतीर्थेषु संस्कारात् सर्व्वविद्याप्रयत्नवान्॥
राधाराधेति कुर्य्यात्तु राधाराधेति पूजयेत्।
राधाराधेति यन्निष्ठा राधाराधेति जल्पति॥
वृन्दारण्ये महाभागा राधासहचरी भवेत्।
जगतां पृथिवी धन्या तत्र वृन्दावनं पुरी।
तत्र धन्या सती राधा ध्येया या मुनिसत्तमैः॥
ब्रह्मादीनां महाराध्यां दूरतः सेवते सुरः।
तां राधिकां यो भजते देवर्षे तं भजेमहि॥
तदालापं कुरुष्वेव जपस्व मन्त्रसुत्तमम्।
अहर्निशं महाभाग कुरु राधेति कीर्त्तनम्॥
राधेति कीर्त्तनं कुर्य्यात् कृष्णेन सह यो जनः।
तस्माद्दासं न शक्नोऽहं वक्तुं शेषोऽपि नैव च॥
न गङ्गा न गया नित्यं न हिता च सरस्वती।
कदाचिन्नैव विमुखा सर्व्वतीर्थफलप्रदा॥
सर्व्वतीर्थमयी राधा सर्व्वैश्वर्य्यमयी पुनः।
कदाचिदिमुखा लक्ष्मीर्न भवेत्तु तदालये॥
तस्यालये वसेत् कृष्णो राधया सह नारद॥
राधाकृष्णेति यस्येष्टं तदेतद्व्रतसुत्तमम्।
तद्गेहे देहमनसोः कदाचिन्न चलेद्धरिः॥
एतदेव वचः श्रुत्वा नारदो मुनिसत्तमः।
प्रणतः पूजयामास गोष्ठाङ्गण्यां यथोदितम्॥
जन्माष्टमीव्रतकथां यः शृणोतीह मानवः।
श्रीराधायाः सुखी मानी धनी सर्व्वगुणान्वितः॥
जपेद्धे भक्तिसंयुक्तः पठेन्नाम्ना स्मरेन्नरः।
धर्म्मार्थी लभते धर्म्ममर्थार्थी लभते धनम्॥
कामार्थी लभते कामं मोक्षार्थी मोक्षमाप्नु-
यात्॥
सर्व्वदानव्रतफलैः कार्ष्णादिवैष्णवः सुखी।
विवेकी च तथा निष्कामी यदा भक्तिमाप्नु-
यात्॥"
इति पाद्मे उत्तरखण्डे श्रीसदाशिवनारदसंवादे
श्रीराधाजन्माष्टमीकथनमाहात्म्ये १६३अध्यायः॥
(तन्त्रमतेऽस्या उत्पत्त्यादिविवरणानि यथा,—
कात्यायन्युवाच।
"वासुदेव महाबाहो मा भयं कुरु पुत्रक।
मथुरां गच्छ तातेति तव सिद्धिर्भविष्यति॥
गच्छ गच्छ महाबाहो पद्मिनीसङ्गमाचर।
पद्मिनी मम देवेशि व्रजे राधा भविष्यति॥
अन्याश्च मालकादेव्यः सदा तस्यानुचारिकाः॥
वासुदेव उवाच।
शृणु मातर्म्महामाये चतुवर्गप्रदायिनि।
त्वां विना परमेशानि! विद्यासिद्धिर्न जायते॥
पद्मिनीं परमेशानि! शीघ्रं दर्शय सुन्दरि!।
प्रत्ययं मम देवेशि! तदा भवति मानसम्॥
इति श्रुत्वा वचस्तस्य वासुदेवस्य तत्क्षणात्।
आविरासीत्तदा देवी पद्मिनी परसंस्थिता॥
रक्तविद्युल्लताकारा पद्मगन्धसमन्विता।
रूपेण मोहयन्ती सा सखीगणसमन्विता॥
सहस्रदलपद्मान्तर्म्मध्यस्थानस्थिता सदा।
सखीगणयुता देवी जपन्ती परमाक्षरम्॥
एकाक्षरी महेशानि! सा एव परमाक्षरा।
कालिका या महाविद्या पद्मिन्या इष्टदेवता।
वासुदेवो महाबाहुर्दृष्ट्वा विस्मयमागतः॥
पद्मिन्युवाच।
व्रजं गच्छ महाबाहो शीघ्रं हि भगवन्! प्रभो!।
त्वया सह महाबाहो कुलाचारं करोम्यहम्॥
वासुदेव उवाच।
शृणु पद्मिनि मे वाक्यं कदा ते दर्शनं भवेत्।
कृपया वद देवेशि! जपं किंवा करोम्यहम्॥
पद्मिन्युवाच।
तवाग्रे देवदेवेश मम जन्म भविष्यति।
गोकुले माथुरे पीठे वृकभानुगृहे ध्रुवम्॥
दुःखं नास्ति महाबाहो मम संसर्गहेतुना।
कुलाचारोपयुक्ता या सामग्री पञ्चलक्षणा॥
मालायां तव देवेश सदा स्थास्यति नान्यथा।
इत्युक्ता पद्मिनी सा तु सुन्दर्य्या दूतिका तदा॥
अन्तर्धानं ततो गत्वा मालायां सहसा क्षणात्।
वासुदेवोऽपि तां दृष्ट्वा क्षीराब्धिं प्रययौ ध्रुवम्॥
त्यक्त्वा काशीपुरं रम्यं महापीठं दुरासदम्।
प्रययौ माथुरं पीठं पद्मिनी परमेश्वरी॥
यत्र कात्यायनी दुर्गा महामायास्वरूपिणी।
नारदाद्यैर्मुनिश्रेष्ठैः पूजिता संस्तुता सदा॥
कात्यायनी महामाया यमुनाजलसंस्थिता।
यमुनाया जलं तत्र साक्षात् कालीस्वरूपिणी॥
बहुपद्मयुतं रम्यं शुक्लपीतं महाप्रभम्।
रक्तं कृष्णं तथा चित्रं हरितं सर्व्वमोहनम्॥
कालिन्द्याख्या महेशानि यत्र कात्यायनी परा॥
कालिन्दी कालिका माता जगतां हित-
कारिणी।
साराध्यास्ते महेशानि! देवर्षिसंस्तुता परा।
सहस्रदलपद्मान्तर्म्मध्ये माथुरमण्डलम्॥
केशवस्य महेशानि! यत् पद्मं सततं स्थितम्।
पद्ममध्ये महेशानि! केशवपीठं मनोहरम्॥
केशवस्य महेशानि! व्रजं माथुरमण्डलम्।
यत्र कात्यायनी माया महामाया जगन्मयी॥
व्रजं वृन्दावनं देवि! नानाशक्तिसमन्वितम्।
शक्तिस्तु परमेशानि! कलारूपेण साक्षिणी।
शक्तिं विना परं ब्रह्म न भाति ध्रुवरूपवत्॥"
इति वासुदेवरहस्ये राधातन्त्रे षष्ठः पटलः॥
देव्युवाच।
"व्रजं गत्वा महादेवाकरोत् किं पद्मिनी तदा।
कस्य वा भवने सा तु जाता सा पद्मिनी परा॥
तत् सर्व्वं परमेशान विस्तारादद शङ्कर।
यदि नो कथ्यते देव विमुह्यामि तदा तनुम्॥
ईश्वर उवाच।
पद्मिनी पद्मगन्धा सा वृकभानुगृहे प्रिये!।
आविरासीत्तदा देवी कृष्णस्य प्रथमं प्रिया।
चैत्रे मासि सिते पक्षे नवम्यां पुष्यसंयुते॥
कालिन्दीजलकल्लोले नानापद्मगणावृते।
आविरासीत्तदा पद्मा मायाडिम्बमुपाश्रिता॥
डिम्बीभूत्वा तदा पद्मा स्थिता कनकमध्यतः।
कोटिचन्द्रप्रतीकाशं डिम्बं मायासमन्वितम्॥
पुष्ययुक्तनवम्यां वै निर्गच्छेत् पद्ममध्यतः।

आविरासीत्तदा पद्मा रङ्गिणी कुसुमप्रभा ॥
तरुणादित्यसङ्काशे पद्मे परमकामिनी ।
वृकभानुपुरं देवि ! कालिन्दीपारमेव च ।
नाम्ना पद्मपुरं रम्यं चतुर्व्वर्गसमन्वितम् ॥
डिम्बज्योतिर्म्महेशानि ! सहस्रादित्यसन्निभम् ।
तत्क्षणात् परमेशानि गाढ़ध्वान्तविनाशकृत् ॥
वृकभानुर्म्महात्मा स कालिन्दीतटमास्थितः ।
महाविद्यां महाकालीं सततं प्रजपेत्सुधीः ॥
आविरासीन्महामाया तदा कात्यायनी परा ।
शृणु पुत्र महाबाहो वृकभानो महीधर ।
सिद्धोऽसि पुरुषश्रेष्ठ वरं वरय साम्प्रतम् ॥

वृकभानुरुवाच ।

सिद्धोऽहं सततं देवि ! त्वत्प्रसादात् सुरेश्वरि ! ।
त्वत्प्रसादान्महामाये यथा मुक्तो भवाम्यहम् ॥
त्वत्प्रसादान्महामाये असाध्यं नास्ति भूतले ।
आत्मनः सदृशाकारां कन्यामेकां प्रयच्छ मे ॥
तच्छ्रुत्वा परमेशानि ! तदा कात्यायनी परा ।
मेघगम्भीरया वाचा यदाह वृकभानवे ॥
तच्छृणुष्व महेशानि ! पीयूषसदृशं वचः ।
भक्त्या त्वदीयपत्न्यास्तु तुष्टाहं त्वयि सुन्दरि ! ॥
एतद्धि वचनं वत्स ! तव पत्न्या सुयुज्यते ।
इत्युक्त्वा सहसा तत्र महामाया जगन्मयी ॥
प्रददौ परमेशानि ! तस्मै डिम्बं मनोहरम् ।
वृकभानुर्म्महात्मा स ततःक्षणादृगृहमाययौ ॥
भार्य्या तस्य विशालाक्षी विशालकटिमोहिनी ।
रत्नप्रदीपमाभाष्य रत्नपर्य्यङ्कमाश्रिता ॥
तस्या हस्ते तदा भानुः प्रददौ डिम्बमोहनम् ।
तं दृष्ट्वा परमेशानि ! विस्मयं परमं गता ॥
हस्ते कृत्वा तु डिम्बं वै निरीक्ष्य च पुनः पुनः ।
नानागन्धयुतं डिम्बं सर्व्वशक्तिसमन्वितम् ॥
नानाज्योतिर्म्मयं डिम्बं ततःक्षणाच्चे द्विधाभवत् ।
तत्रापश्यन्महाकन्यां पद्मिनीं कृष्णमोहिनीम् ॥
रक्तविद्युल्लताकारां सर्व्वसौभाग्यवर्द्धिनीम् ।
तां दृष्ट्वा परमेशानि सहसा विस्मयं गता ॥

कीर्त्तिदोवाच ।

हे मातः पद्मिनीरूपे रूपं संहर संहर ।
ततस्तु परमेशानि ! तद्रूपं ततःक्षणात् प्रिये ! ॥
संहृत्य सहसा देवी सामान्यं रूपमास्थिता ।
ततस्तु कीर्त्तिदा देवी रूपन्तस्या अलोकयत् ॥
रङ्गिणी कुसुमाकारा रक्तविद्युत्समप्रभा ॥

कन्योवाच ।

हे मातः कीर्त्तिदे भद्रे क्षीरं पाययसुन्दरि ! ।
स्तनं देहि स्तनं देहि तव कन्या भवाम्यहम् ॥
तच्छ्रुत्वा वचनं तस्याः पद्मिन्याः कमलेक्षणे ।
अपाययत् स्तनं तस्यै पद्मिन्यै नगनन्दिनि ॥
चकार नाम तस्यास्तु भानुः कीर्त्तिदयान्वितः ।
रक्तविद्युत्प्रभां देवीं धत्ते यस्मात् शुचिस्मिते ।
तस्मात्तु राधिका नाम सर्व्वलोकेषु गीयते ॥

ईश्वर उवाच ।

दिने दिने वर्द्धमाना वृकभानुगृहे प्रिये ! ।
एवं माथुरपीठे च चकार व्रजवासिनी ॥
तस्माद्भाद्रपदे मासि कृष्णोऽभूत् कमलेक्षणः ॥

महादेव उवाच ।

श्रूयतां पद्मपत्राक्षि रहस्यं पद्मिनीमतम् ।
सम्प्राप्ते परमेशानि ! द्वितीये वत्सरे तदा ॥
कुर्य्यादयत्नेन देवेशि ! शिवलिङ्गप्रपूजनम् ।
प्रजपेत् परमां विद्यां कालीं ब्रह्माण्डरूपिणीम् ॥
पूजयेद्विविधैः पुष्पैर्गन्धैश्च सुमनोहरैः ।
फलैर्बहुविधैर्भद्रे पूजयेत् परमेश्वरीम् ॥

पद्मिन्युवाच ।

कात्यायनि महामाये महायोगिन्यधीश्वरि ! ।
देहि देहि महामाये विद्यासिद्धिमनुत्तमाम् ॥
सिद्धिश्च वासुदेवस्य देहि मातर्नमोऽस्तु ते ।
त्वां विना ब्रह्म निःशब्दं निश्चलं सततं सदा ॥
शरीरस्थं हि कृष्णस्य कृष्णो ज्योतिर्म्मयं सदा ।
विना देहं परं ब्रह्म शून्यरूपवदीरितम् ॥
अतएव महामाये ब्रह्मणः कारणं परा ।
एवं प्रार्थ्य महेशानि ! सततं परमेश्वरीम् ॥
संपूज्य परया भक्त्या लब्ध्वा आज्ञां तु मानसम् ।
वरं प्राप्य महेशानि कात्यायन्याः समीपतः ॥

कात्यायन्युवाच ।

पद्मिनि शृणु मद्वाक्यं शीघ्रं प्राप्स्यसि कैशवम् ।
इत्युक्त्वा परमेशानि ! तत्रैवान्तरधीयत ॥
कात्यायनी महामाया सदा वृन्दावनेश्वरी ।
वृकभानुसुता राधा सखीगणवृता सदा ॥
वर्द्धमाना सदा राधा यथा चन्द्रकला प्रिये ! ।
सर्व्वशृङ्गारवेशाढ्या स्फुरच्चकितलोचना ॥
सर्व्वालङ्कारसंयुक्ता साक्षात् श्रीरिव पार्व्वति ।
चचार गहने घोरे पद्मिनी परसुन्दरी ॥
या राधा परमेशानि ! पद्मिनी परमेश्वरी ।
पद्मस्य वनमाश्रित्य सदा तिष्ठति कामिनी ॥
अन्यमूर्त्तिं महेशानि ! दृष्ट्वा चैवात्मसन्निभाम् ।
आत्मनः सदृशाकारां राधामन्यां ससर्ज्ज सा ॥
या सा तु कृत्रिमा राधा वृकभानुगृहे सदा ।
अयोनिसम्भवा यातु पद्मिनी सा परात्परा ॥
कृत्रिमा या महेशानि ! तस्यास्तु चरितं शृणु ।
वृकभानुर्म्महात्मा स तस्या वैवाहिकीं क्रियाम् ॥
कारयामास यत्नेन पञ्चवर्षे तु सुन्दरि ! ।
तस्यास्तु चोभयं वंशं सावधानावधारय ॥
श्वशुरस्य वृकस्यापि वंशं परमसुन्दरम् ।
श्वश्रूस्तु जटिला ख्याता पतिर्म्मान्योऽतिमन्युकः ॥
ननान्दा कुटिलानाम्नी देवरो दुर्म्मदाभिधः ।
तिलकं स्मरमादाख्यं हरोहरिमनोहरः ॥
रोचनो रत्नताटङ्को घृणियुक्तप्रभाकरी ।
छत्रं दृष्ट्वा प्रतिच्छायं पद्मश्च मदनाभिधम् ॥
श्यमन्तकान्यपर्य्यायः शृङ्गचूड़शिरोमणिः ।
पुष्पवन्तोच्चिपलकः सौभाग्यमणिरुच्यते ॥
काञ्ची काञ्चनचित्राङ्गि नूपुरे चित्रगोपुरे ।
मधुसूदनभावज्ञा ययोः सिञ्चितमाधुरी ॥
वासो मेघाम्बरं नाम कुरुविन्दनिभं सदा ।
आद्यं सुप्रियमभ्राभं रक्तमन्यं हरेः प्रियम् ॥
सुधांशो र्दर्पहरणो दर्पणो मणिबान्धवः ।
शृङ्गारा नर्म्मदा हेमी खड्गिका नाम कञ्चुलिः ॥

कन्दर्पकुञ्जरी नाम कटिका पुष्पभूषिता ।
स्वर्णसुखीतड़िद्वली कुक्षा ख्याता खनामतः ॥
नीपा नदीतटे यस्य रहस्यकथनस्थली ।
मन्दारश्च धनुः स्त्रीश्च रागोच्छ्रयमन्दगौ ॥
क्षानिक्यं दयिता नित्यं वल्लभा रुद्रधन्वकी ।
सख्यः ख्याताः सदा भद्राचारुचन्द्रावलीसुखाः ॥
गन्धर्व्वास्तु कलाकण्ठी सुकण्ठी पिककण्ठिका ।
कलावती रसोल्लासा गुणवत्यादयः स्मृताः ॥
या विशाखाक्षतागीतिर्गायन्त्यः सुखदा हरेः ॥
वादयन्त्यश्च शुषिरं तालल्लयघनन्त्वपि ॥
माणिक्या नर्म्मदा प्रेमवती कुसुमपेषलाः ।
दिवाकीर्त्तेस्तभृजे तु सुगन्धानलिनीत्वभे ॥
मञ्जिष्ठा रङ्गवत्याख्ये रजकस्य किणीरिके ।
पालिन्धिसमसैरिन्ध्री वृन्दाकन्दलतादयः ॥
धनिष्ठा गुणवत्याद्या धन्ववेश्वरगेहगाः ।
कामधा नामधा प्रेयी सखीभावविशेषभाक् ॥
लवङ्गमञ्जरी रागमञ्जरी गुणमञ्जरी ।
सुभाशलत्यनुपमा सुप्रिया रतिमञ्जरी ॥
रागलेखा कलाकेली भूविदाद्याश्च नायिकाः ।
नान्दीमुखी बिन्दुमुखी आद्याः सन्धिविधायिकाः ॥
सुकृत्यद्मतया ख्याताः श्यामला मङ्गलादयः ।
प्रतिपत्तया श्रेष्ठा राधाचन्द्रावलीत्वभे ॥
समूहास्तु ययोः सन्ति कोटिसंख्याश्चगोढ़याम् ।
तयोरप्युभयोर्म्मध्ये सर्व्वमाधुर्य्यतोऽधिका ॥
श्रीराधा त्रिपुराद्यूती पुराणपुरुषप्रिया ।
असमानगुणोदर्य्या धूर्य्यो गोपेन्द्रनन्दनः ॥
यस्याः प्राणपरार्द्धानां परार्द्धादतिवल्लभः ।
श्रेष्ठा सा मालकादिभ्यस्तत्र गोपेन्द्रगेहिनी ।
वृषभानुः पिता यस्या वृषभानुविधो महान् ।
रत्नगर्भा क्षितौ ख्याता जननी कीर्त्तिदा तया ॥
उपास्यो जगतां चक्षुर्भगवान् पद्मबान्धवः ।
जन्यः स्वाभीष्टसंसर्गे कात्यायन्या महामनुः ॥
पौर्णमासी भगवती सर्व्वसौभाग्यवर्द्धिनी ।
पितामही महीभानुर्विन्ध्यर्म्मातामही मतः ॥
मातामहीपितामह्यौ सुखदामोदयदाभिधे ।
रत्नभानुः स्वभानुश्च भानुश्च भ्रातरः पितुः ॥
भद्रकीर्त्तिर्म्महाकीर्त्तिः कीर्त्तिचन्द्रश्च मातुलः ।
स्वसा कीर्त्तिमती मातुर्भानुमुद्रा पितृष्वसा ॥
पितृष्वश्रूपतिः काश्यो मातृष्वश्रूपतिः कृष्णः ।
मातुली मेनकामेना षष्ठी धात्री तु धातकी ॥
श्रीदामा पूर्व्वजो भ्राता कनिष्ठानङ्गमञ्जरी ।
परमप्रेष्ठसख्यस्तु ललिता च विशाखिका ॥
विचित्रा चम्पकलता रङ्गदेवी सुदेविका ।
तुङ्गविद्यङ्गलेखा च इत्यष्टौ च गणा मताः ॥
प्रियसख्यः कुरङ्गाक्षी मण्डली मानकुण्डला ।
मालती चन्द्रलतिका माधवामदनालसा ॥
मञ्जुमेधा शशिकला सुमध्या मधुमेक्षणा ।
कमला कामलतिका कान्तचूड़ा वराङ्गना ॥
मधूरी चन्द्रिका प्रेममञ्जरी तनुमध्यमा ।
कन्दर्पसुन्दरी मञ्जुवेणी चाद्यास्तु कोटिशः ॥
रक्ताजीवितयाख्याता कलिका केलिसुन्दरी ।

कादम्बरी शशिमुखी चन्द्ररेखा प्रियंवदा ॥
मदोन्मादा मधुमती वासन्ती कलभाषिणी ।
रत्नवेणी मालवती कर्पूरतिलकादयः ॥
एता वृन्दावनेश्वर्यः प्रायः सारूप्यमागताः ।
नित्यसख्यस्तु कस्तूरी मनोज्ञा मणिमञ्जरी ॥
सिन्दूरा चन्दनवती कौमुदी सुदितादयः ।
काननादिगतास्तस्या विहारार्थं कला इव ॥
अथ तस्याः प्रकीर्त्यन्ते प्रेयस्यः परमाद्भुताः ।
वनादित्योपुरुप्रेमसौन्दर्य्यभरभूषिताः ॥
चन्द्रावली च पद्मा च श्यामा सैका च भद्रिका ।
तारा चित्रा च गन्धर्व्वी पालिका चन्द्रमालिका ॥
मङ्गला विमला नीला भवनाक्षी मनोरमा ।
कल्पलता तथा मञ्जुभाषिणी मञ्जुमेखला ॥
कुमुदा कैरवी पारी शारदाक्षी विशारदा ।
शुक्लरी कुसुमा कृष्णा सारङ्गी प्रविलाशिनी ॥
तारावती गुणवती सुमुखी केलिमञ्जरी ।
हारावली चकोराक्षी भारती कामिनीति च ॥
आसां यूथानि शतशः ख्यातान्यन्यानि सुभ्रुवाम् ।
लक्षसंख्यास्तु कथिता यूथे यूथे वराङ्गनाः ॥
मुख्यास्तु तेषु यूथेषु कान्ताः सर्व्वगुणोत्तमाः ।
राधा चन्द्रावली भद्रा श्यामला पालिकादयः ॥
जन्मनाम्नाथ सा ख्याता मधुमासे विशेषतः ।
पुष्यर्क्षे च नवम्यां वै शुक्लपक्षे शुचिस्मिते ॥
जाता राधा महेशानी स्वयं प्रकृतिपद्मिनी ।
तासु रेमे महेशानि स्वयं कृष्णः शुचिस्मिते ।
रमणं वासुदेवस्य मल्लसिद्धेषु कारणम् ॥

देव्युवाच ।

भो देव तापसां श्रेष्ठ विस्तारादद ईश्वर ।
कथं सा पद्मिनी राधा सदा पद्मवने स्थिता ॥
पितरं मातरं त्यक्त्वा आत्मतुल्यां ससर्ज्ज सा ।
पद्ममाश्रित्य देवेशि वृन्दावनविलासिनी ।
सदाध्यास्ते महेशानि एतद्गुह्यं वद प्रभो ! ॥"

इति वासुदेवरहस्ये राधातन्त्रे सप्तमः पटलः ॥

ईश्वर उवाच ।

"श्रा राधा शृणुष्वाद्रि ! पद्मिनी विष्णुवल्लभा ।
महामाया जगद्धात्री त्रिपुरा परमेश्वरी ॥
तस्या दूती महेशानि पद्मिनी पद्मगन्धिनी ।
कृष्णस्य दृढ़भक्ता तु पद्मिनी तस्य वल्लभा ॥
एकभानोर्म्महेशानि दृढ़भक्तिः शुचिस्मिते ।
दुष्टित्वं गता देवी पद्मिनी गन्धमालिनी ॥
कृत्वा तु स्तनपानं हि राधामन्यां ससर्ज्ज सा ।
पद्मषण्डं समाश्रित्य यमुनाजलमध्यतः ॥
महाकाल्या महामन्त्रं प्रजपेन्निर्ज्जने वने ।
अन्या चन्द्रावली राधा एकभानुगृहे स्थिता ॥
पूर्व्वोक्तं यद्गुणं देवि पद्मिनी कमलेक्षणी ।
तत् सर्व्वं पद्मिनीस्थं नान्यथा परमेश्वरि ॥
राधिका त्रिविधा प्रोक्ता चन्द्रा तु पद्मिनी तथा ।
न पश्येत् परमेशानि चन्द्रसूर्य्यं शुचिस्मिते ॥
मानवानां महेशानि वराकाणां हि का कथा ।
आत्मनोऽपह्नवं कृत्वा पद्मिनी पद्ममाश्रिता ।
त्रिपुराया महेशानि पद्मिनी अनुचारिणी ॥"

इति वासुदेवरहस्ये राधातन्त्रे अष्टमः पटलः ॥

अस्याः सहस्रनामानि यथा,—

पार्व्वत्युवाच ।

"देवदेव जगन्नाथ भक्तानुग्रहकारक ।
यद्यस्ति मयि कारुण्यं यद्यस्ति मयि ते दया ॥
यदुक्तं त्वया प्रगदितं तत् सर्व्वं मे श्रुतं प्रभो ।
गुह्यात् गुह्यतरं यत्तु यत्ते मनसि काङ्क्षते ॥
त्वया न गदितं यत्तु यस्मै कस्मै कदाचन ।
तन्मां कथय देवेश सहस्रं नाम चोत्तमम् ॥
श्रीराधाया महादेव्या गोप्या भक्तिप्रसाधनम् ।
ब्रह्माण्डकर्त्री हर्त्री सा कथं गोपीत्वमागता ॥

महादेवउवाच ।

शृणु देवि ! विचित्रार्थां कथां पापहरां शुभाम् ।
सन्ति जन्मानि कर्म्माणि तस्या नूनं महेश्वरि ! ॥
यदा हरिश्चरित्राणि कुरुते कार्य्यगौरवात् ।
तदा विधत्ते रूपाणि हरिसान्निध्यसाधिनी ॥
तस्या गोपीत्वभावस्य कारणं गदितं पुरा ।
इदानीं शृणु देवेशि ! नाम्नां चैव सहस्रकम् ॥
यन्मया कथितं नैव तन्त्रेष्वपि कदाचन ।
तव स्नेहात् प्रवक्ष्यामि भक्त्या धार्य्यं सुसूक्ष्मभिः ॥
मम प्राणसमा विद्या भाव्यते मे त्वहर्निशम् ।
शृणुष्व गिरिजे नित्यं पठस्व च यथामति ॥
यस्याः प्रसादात् कृष्णस्तु गोलोकेशः परः
प्रभुः । * ।
अस्या नामसहस्रस्य ऋषिर्नारद एव च ॥
देवी राधा परा प्रोक्ता चतुर्व्वर्गप्रसाधिनी ।
श्रीराधा राधिका कृष्णवल्लभा कृष्णसंयुता ॥
वृन्दावनेश्वरी कृष्णप्रिया मदनमोहिनी ।
श्रीमती कृष्णकान्ता च कृष्णानन्दप्रदायिनी ॥
यशस्विनी यशोगम्या यशोदानन्दवल्लभा ।
दामोदरप्रिया गोपी गोपानन्दकरी तथा ॥
कृष्णाङ्गवासिनी हृद्या हरिकान्ता हरिप्रिया ।
प्रधाना गोपिका गोपकन्या त्रैलोक्यसुन्दरी ॥
वृन्दावनविहारी च विस्फूर्ज्जितसुखाम्बुजा ।
गोपकुलानन्दकर्त्री गोकुलानन्ददायिनी ॥
गतिप्रदा गीतगम्या आगमागमनप्रिया ।
विष्णुप्रिया विष्णुकान्ता विष्णोरङ्गनिवासिनी ॥
यशोदानन्दपत्नी च यशोदानन्दगेहिनी ।
कामारिकान्ता कामेशी कामलालसविग्रहा ॥
जयप्रदा जया जीवा जीवानन्दप्रदायिनी ।
यशोदानन्दपत्नी च वृषभानुसुता शिवा ॥
गणाध्यक्षा गवाध्यक्षा गवां मतिरनुत्तमा ।
काञ्चनाभा हेमगात्री काञ्चनाङ्गदधारिणी ॥
अशोका शोकरहिता विशोका शोकनाशिनी ।
गायत्री वेदमाता च वेदातीता विदुत्तमा ॥
नीतिशास्त्रप्रिया नीतिर्गतिर्म्मतिरभीष्टदा ।
वेदप्रिया वेदगर्भा वेदमार्गप्रवर्द्धिनी ॥
वेदगम्या वेदपरा विचित्रकनकोज्ज्वला ।
तथोज्ज्वलप्रदा नित्या तथैवोज्ज्वलगात्रिका ॥
नन्दप्रिया नन्दसुता राधानन्दप्रदा शुभा ।
शुभाङ्गी विमलाङ्गी च विलासित्यपराजिता ॥
जननी जन्मशून्या च जन्मदुश्चरापहा ।

गतिर्गतिमतां धात्री धात्रानन्दप्रदायिनी ॥
जगन्नाथप्रिया शैलवासिनी हेमसुन्दरी ।
विचित्रवासिनी चित्रवासिनी चित्ररूपिणी ॥
निर्गुणा सुकुलीना च निष्कुलीना निराकुला ।
गोकुलान्तरगेहा च योगानन्दकरी तथा ॥
वेणुवाद्या वेणुरतिर्वेणुवाद्यपरायणा ।
गोपालस्य प्रिया सौम्या रम्या सौम्यकुलोद्भवा ॥
अतिसौम्यातिमोहा च गतिरिष्टा गतिप्रदा ।
गीर्व्वाणवन्द्या गीर्व्वाणा गीर्व्वाणगणसेविता ॥
ललिता च विशोका च विशाखा चित्र-
मालिनी ।
जितेन्द्रिया शुद्धसत्त्वा कुलीना कुलदीपिका ॥
दीपप्रिया दीपदात्री विमला विमलोदका ।
कान्तारवासिनी कृष्णा कृष्णचन्द्रप्रिया मतिः ॥
अनुत्तरा दुःखहन्त्री दुःखकर्त्री कुलोद्भवा ।
मतिर्लक्ष्मीर्धृतिर्लज्जा कान्तिः पुष्टिः स्तुतिः
क्षमा ॥
क्षीरोदशायिनी देवी देवारिकुलमर्द्दिनी ।
वैष्णवी च महालक्ष्मीः कुलपूज्या कुलप्रिया ॥
संहर्त्री सर्व्वदेत्यानां सावित्री वेदगामिनी ।
वेदातीता निरालम्बा निरालम्बगणप्रिया ॥
निरालम्बजनैः पूज्या निरालोका निराश्रया ।
एकाङ्गी सर्व्वगा सेव्या विष्णोः पत्नी सरस्वती ॥
रासप्रिया रासगम्या रासाधिष्ठातृदेवता ।
रसिका रसिकानन्दा स्वयं रासेश्वरी परा ॥
रासमण्डलमध्यस्था रासमण्डलशोभिता ।
रासमण्डलसेव्या च रासक्रीड़ामनोहरा ॥
पुण्डरीकाक्षनिलया पुण्डरीकाक्षगेहिनी ।
पुण्डरीकाक्षसेव्या च पुण्डरीकाक्षवल्लभा ॥
सर्व्वजीवेश्वरी सर्व्वजीववन्द्या परात्परा ।
प्रकृतिः शम्भुकान्ता च सदाशिवमनोहरा ॥
क्षुत् पिपासा दया निद्रा भ्रान्तिः आन्तिः क्षमा
कुला ।
विधुरूपा गोपपत्नी भारती सिद्धयोगिनी ॥
शुचिरूपा मित्ररूपा नित्याङ्गी नित्यगेहिनी ।
स्थानदात्री तथा धात्री महालक्ष्मीः स्वयंप्रभा ॥
सिन्धुकन्या स्थानदात्री द्वारकावासिनी तथा ।
बुद्धिः स्थितिः स्थानरूपा सर्व्वकारणकारणम् ॥
भक्तप्रिया भक्तगम्या भक्तानन्दप्रदायिनी ।
भक्तकल्पद्रुमातीता तथातीतगुणा तथा ॥
मनोऽधिष्ठातृदेवी च कृष्णप्रेमपरायणा ।
निरामया सौम्यदात्री तथा मदनमोहिनी ॥
एकानंशा शिवा क्षेमा दुर्गा दुर्गतिनाशिनी ।
ईश्वरी सर्व्ववन्द्या च गोपनीया शुभङ्करी ॥
पालिनी सर्व्वभूतानां तथा कामाङ्गहारिणी ।
सद्योमुक्तिप्रदा देवी वेदसारा परात्परा ॥
हिमालयसुता सर्व्वा पार्व्वती गिरिजा सती ।
दक्षकन्या देवमाता मन्दलज्जा हरेस्तथुः ॥
वृन्दारण्यप्रिया वृन्दा वृन्दावनविलासिनी ।
विलासिनी वैष्णवी च ब्रह्मलोकप्रतिष्ठिता ॥
रुक्मिणी रेवती सत्यभामा जाम्बवती तथा ।
सुलक्षणा मित्रविन्दा कालिन्दी भद्रकन्यका ॥

परिपूर्णा पूर्णतरा तथा हैमवती गतिः।
अपूर्व्वा ब्रह्मरूपा च ब्रह्माण्डपरिपालिनी ॥
ब्रह्माण्डभाण्डमध्यस्था ब्रह्माण्डभाण्डरूपिणी।
अण्डरूपाण्डमध्यस्था तथाण्डपरिपालिनी ॥
अण्डबाह्याण्डसंहन्त्री ब्रह्मशिवहरिप्रिया।
महाविष्णुप्रिया कल्पवृक्षरूपा निरन्तरा ॥
सारभूता स्थिरा गौरी गौराङ्गी शशिशेखरा।
श्वेतचम्पकवर्णाभा शशिकोटिसमप्रभा ॥
मालतीमाल्यभूषाढ्या मालतीमाल्यधारिणी।
कृष्णसुता कृष्णकान्ता वृन्दावनविलासिनी ॥
तुलस्यधिष्ठातृदेवी संसारार्णवपारदा।
सारदा हारदा गोपनन्दिनी सर्व्वसिद्धिदा ॥
अतीतगमना गौरी परानुग्रहकारिणी।
करुणार्णवसंपूर्णा करुणार्णवधारिणी ॥
माधवी माधवमनोहारिणी श्यामवल्लभा।
अन्धकारभयध्वस्ता मङ्गला मङ्गलप्रदा ॥
श्रीप्रभा श्रीप्रदा श्रीज्ञा श्रीनिवासाच्युतप्रिया।
श्रीरूपा श्रीहरा श्रीदा श्रीकामा श्रीस्वरूपिणी ॥
श्रीदामानन्ददाची च श्रीदामेश्वरवल्लभा।
श्रीनिवासा श्रीगोप्ता श्रीस्वरूपाश्रिता श्रुतिः ॥
श्रीक्रियारूपिणी श्रीला श्रीकृष्णभजनाश्रिता।
श्रीराधा श्रीमतिः श्रेष्ठा श्रेष्ठरूपा श्रुतिप्रिया ॥
योगेज्ञा योगमाता च योगातीता युगप्रिया।
योगप्रिया योगगम्या योगिनीगणवन्दिता ॥
जवाकुसुमसङ्काशा दाड़िमीकुसुमोपमा।
नीलाम्बरधरा धारी धैर्य्यरूपा धरा धृतिः ॥
रत्नसिंहासनस्था च रत्नकुण्डलभूषिता।
रत्नालङ्कारसंयुक्ता रत्नमाल्यधरा परा ॥
रत्नेन्द्रसारहाराढ्या रत्नमालाविभूषिता।
इन्द्रनीलमणिन्यस्तपादपद्मा शुभा शुचिः ॥
कार्त्तिकी पौर्णमासी च अमावस्या भयापहा।
गोविन्दराजगृहिणी गोविन्दराजपूजिता ॥
गोविन्दार्पितचित्ता च गोपीजनगणान्विता।
वैकुण्ठनाथगृहिणी गोविन्दपरमानसा ॥
गोविन्ददेवदेवाढ्या तथा वैकुण्ठसुन्दरी।
मानदा सा वेदवती सीता साध्वी पतिव्रता ॥
अन्नपूर्णा सदानन्दरूपा कैवल्यसुन्दरी।
कैवल्यदायिनी श्रेष्ठा गोपीनाथमनोहरा ॥
गोपीनाथेश्वरी चण्डी नायिका नयनान्विता।
नायका नायकप्रीता नायकानन्दरूपिणी ॥
शेषा शेषवती शेषरूपा चैव जगन्मयी।
गोपालपालिका माया नन्दजाया तथा परा ॥
कुमारी यौवनानन्दी युवती गोपसुन्दरी।
गोपमाता जानकी च जनकानन्दकारिणी ॥
कैलासवासिनी रम्भा हरतोषणतत्परा।
हरेश्वरी रामरता रामरामेश्वरी रमा ॥
श्यामला चित्रलेखा च तथा भुवनमोहिनी।
सुगोप्या गोपवनिता गोपराज्यप्रदा शुभा ॥
आनन्दपूर्णा माहेशी मत्स्यराजसुता सती।
कौमारी नारसिंही च वाराही नवदुर्गिका ॥
चञ्चलाचञ्चला मोदा नारी भुवनसुन्दरी।
दक्षयज्ञहरा दाक्षी दक्षकन्या सुलोचना ॥

रतिरूपा रतिप्रीता रतिश्रेष्ठा रतिप्रदा।
रतिलक्षणगेहस्था विरजा भुवनेश्वरी ॥
शृङ्गारदा हरेर्जाया जामात्रकुलवन्दिता।
वकुला वकुलामोदधारिणी यमुना जया ॥
विजया जयपत्नी च यमलार्জ্জुनभञ्जिनी।
वक्रेश्वरी वक्ररूपा वक्रवीक्षणदीक्षिता ॥
अपराजिता जगन्नाथा जगन्नाथेश्वरी मतिः।
खेचरी खेचरसुता खेचरत्वप्रदायिनी ॥
विष्णुवक्षःस्थलस्था च विष्णुभावनतत्परा।
चन्द्रकोटिसुगात्रा च चन्द्राननमनोहरा ॥
सर्व्वसेव्या शिवा क्षेमा तथा क्षेमङ्करी वधूः।
यादवेन्द्रवधूः श्रेया शिवभक्ता शिवान्विता ॥
केवला निष्कला सूक्ष्मा महाभीमा भयप्रदा।
भीमरूपा भैमती जिता मित्रप्रमोदिनी ॥
गोपालवनितानङ्गा कुलजेन्द्रनिवासिनी।
जयन्ती यमुनाङ्गी च यमुनातोषकारिणी ॥
कलिकल्मषभङ्गा च कलिकल्मषनाशिनी।
कलिकल्मषरूपा च नित्यानन्दकरी कृपा ॥
कृपावती कुलवती कैलासाचलवासिनी।
वामदेवी वामभागा गोविन्दप्रियकारिणी ॥
नगेन्द्रकन्या योगेशी योगिनी योगरूपिणी।
योगसिद्धा सिद्धरूपा सिद्धक्षेत्रनिवासिनी ॥
क्षेत्राधिष्ठातृरूपा च क्षेत्रातीता कुलप्रदा।
कैशवानन्ददात्री च कैशवानन्ददायिनी ॥
कैशवा कैशवप्रीता कैशोरी कैशवप्रिया।
रासक्रीड़ाकरी रासवासिनी राससुन्दरी ॥
गोकुलान्वितदेहा च गोकुलत्वप्रदायिनी।
लवङ्गनाम्नी नारङ्गी नारङ्गकुलमण्डला ॥
एलालवङ्गकर्पूरसुखवाससुखान्विता।
सुखा सुखप्रदा सुखरूपा सुखप्रदायिनी ॥
नारायणी कृपा राधा करुणा करुणामयी।
कारुण्या करुणाकर्णी गोकर्णा नागकर्णिका ॥
सर्पिणी कौलिनी क्षेत्रवासिनी च जगन्मयी।
जटिला कुटिला नीला नीलाम्बरधरा शुभा ॥
नितम्बिनी रूपवती युवती कृष्णपीवरी।
विभावरी वेत्रवती संकटा कुटिलालका ॥
नारायणप्रिया श्रेला हृत्कर्णीपरिमोहिता।
हृत्पातमोहिता प्रातराश्रितनवनीतिका ॥
नवीना नवनारी च नारङ्गफलशोभिता।
हेमी हेमसुखी चन्द्रसुखी शशिसुशोभना ॥
अर्द्धचन्द्राधरा चन्द्रवल्लभा रोहिणी तिमिः।
तिमिङ्गिलकुलामोदमत्स्यरूपाङ्गहारिणी ॥
कारणी सर्व्वभूतानां कार्य्यातीता किशोरिणी।
किशोरवल्लभा कैशकारिका कामकारिका ॥
कामेश्वरी कामकला कालिन्दीकुलदीपिका।
कलिन्दतनयातीरवासिनी तीरगेहिनी ॥
कादम्बरीपानपरा कुसुमामोदधारिणी।
कुसुदा कुसुदानन्दा कृष्णेशी कामवल्लभा ॥
तर्कारी वैजयन्ती च निम्बदाड़िम्बरूपिणी।
विल्ववृक्षप्रिया कृष्णाम्बरा विल्वोपमस्तनी ॥
विल्वात्मिका विल्ववपुर्विल्ववृक्षनिवासिनी।
तुलसी तोषिका चैव तैतिलानन्दकारिणी ॥

गजेन्द्रगामिनी श्यामलतानङ्गलता तथा।
योषिच्छक्तिस्वरूपा च योषिदानन्दकारिणी ॥
प्रेमप्रिया प्रेमरूपा प्रेमानन्दतरङ्गिणी।
प्रेमहरा प्रेमदात्री प्रेमशक्तिमयी तथा ॥
कृष्णप्रेमवती धन्या कृष्णप्रेमतरङ्गिणी।
प्रेमार्थदायिनी सर्व्वश्रेता नित्यतरङ्गिणी ॥
हावभावान्विता रौद्रा रुद्रानन्दप्रकाशिनी।
कपिला पिङ्गला केशपाशसम्वर्द्धिनी धटी ॥
कुटीरवासिनी धूम्रा धूम्रकेशा जनोदरी।
ब्रह्माण्डगोचरा ब्रह्मरूपिणी भवभाविनी ॥
संसारनाशिनी शैवा शैवानन्दप्रदायिनी।
शिशिरा हैमरागाढ्या मेघरूपातिसुन्दरी ॥
मनोरमा वेगवती वेगाढ्या वेदवादिनी।
दयान्विता दयाधारा दयारूपा सुसेविनी ॥
किशोरसङ्गसंसर्गा गौरचन्द्रानना कला।
कलाधिनाथवदना कलानाथाधिरोहिणी ॥
विरागकुण्डला हैमशिङ्गला हैममण्डला।
भाण्डीरतालवनगा कैवर्त्ती पौवरी शुकी ॥
शुकदेवगुणातीता शुकदेवप्रियासखी।
विकलोत्कर्षिणी कौषा कौषेयाम्बरधारिणी ॥
कोषावरी कोषरूपा जगदुत्पत्तिकारिका।
सृष्टिस्थितिकरी संहारिणी संहारकारिणी ॥
केशशैवालधात्री च चन्द्रगात्रा सुकोमला।
पद्माङ्गरागसंरागा विन्ध्याद्रिपरिवासिनी ॥
विन्ध्यालया श्यामसखी सखी संसाररागिणी।
भूता भविष्या भव्या च भव्यगात्रा भवातिगा ॥
भवनाशान्तकारिण्याकाशरूपा सुवेशिनी।
रतिरङ्गपरित्यागा रतिवेश्या रतिप्रिया ॥
तेजस्विनी तेजरूपा कैवल्यपथदा शुभा।
मुक्तिहेतुर्मुक्तिहेतुलङ्घिनी लक्ष्मणा क्षमा ॥
विशालनेत्रा वैशाली विशालकुलसम्भवा।
विशालगृहवासा च विशालवदरीरतिः ॥
भक्त्यतीता भक्तिगतिर्भक्तिबाधा भवाकृतिः।
वामाङ्गहारिणी विष्णोः शिवभक्तिसुखा-
न्विता ॥
विजिताविजिता मोदमग्ना च गणतोषिता।
हयास्या हेरम्बसुता गणमाता सुरेश्वरी ॥
दुःखहन्त्री दुःखहरा सेवितेप्सितसर्व्वदा।
सर्व्वाङ्गासुविधात्री च कुलक्षेत्रविनाशिनी ॥
लवङ्गा पाण्डवसखी सखीमध्यविलासिनी।
गान्धर्वगीता गया गम्या गमनातीतनिर्भरा ॥
सर्व्वाङ्गसुन्दरी गङ्गा गङ्गाजलमयी तथा।
गङ्गेरिता पूतमात्रा पवित्रकुलदीपिका ॥
पवित्रगुणशीलाढ्या पवित्रानन्ददायिनी।
पवित्रगुणसीमाढ्या पवित्रकुलपावितका ॥
गतिज्ञा गीतकुशला दनुजेन्द्रनिवारिणी।
निर्व्वाणदात्री नैर्वाणी हेतुयुक्तागमोत्तरा ॥
पर्व्वताधिनिवासा च निवासकुशला तथा।
सन्यासधर्म्मकुशला सन्यासे फलदा शुभा ॥
शरच्चन्द्रमुखी श्यामहारा क्षेत्रनिवासिनी।
वसन्तरागा मुञ्जोशी वसन्तवसनाकृतिः ॥
चतुर्भुजा षड्भुजा च द्विभुजा गौरविग्रहा।

सहस्राख्या विद्याख्या च सुद्राख्या सुद्रदायिनी ॥
प्राणप्रिया प्राणरूपा प्राणरूपिण्यपावृता ।
कृष्णप्रीता कृष्णरता कृष्णतोषणतत्परा ॥
कृष्णप्रेमवती कृष्णभक्ता भक्तफलप्रदा ।
कृष्णप्रेमप्रेमभक्ता हरिभक्तिप्रदायिनी ॥
चैतन्यरूपा चैतन्यप्रिया चैतन्यरूपिणी ।
उग्ररूपा शिवक्रोड़ा कृष्णक्रोड़ा जलोदरी ॥
महोदरी महादुर्गकान्तारस्थलवासिनी ।
चन्द्रावली चन्द्रकेशी चन्द्रप्रेमतरङ्गिणी ॥
समुद्रान्तरूपा च समुद्रजलवासिका ।
केशपाशरता निद्रा क्षुधा प्रेमरताम्बिका ॥
दूर्व्वादलश्यामतनुर्दूर्व्वादलतनुच्छविः ।
नागरा नागरीवासा नगरानन्दकारिणी ॥
नागरालिङ्गनपरा नगराङ्गनमङ्गला ।
उच्चनीचा हैमवती प्रियाकृष्णतरङ्गिणी ॥
प्रेमालिङ्गनसिद्धाङ्गी सिद्धसाध्यविलासिका ।
मङ्गला मोदजननी मेखला मोदधारिणी ॥
रत्नमञ्जीरभूषाङ्गी रत्नभूषणभूषणा ॥
जम्बालमालिका कृष्णप्राणा प्राणविमोचना ॥
सत्यप्रदा सत्यवती सेवकानन्ददायिका ।
जगद्योनिर्ज्जगद्वीप्ता विचित्रमणिभूषणा ॥
राधारमणकान्ता च राध्याराधनरूपिणी ।
कैलासवासिनी कृष्णप्राणसर्व्वस्वदायिनी ॥
कृष्णावतारनिरता कृष्णभक्तफलार्थिनी ।
याचका याचकानन्दकारिणी याचकोज्ज्वला ॥
हरिभूषणभूषाढ्या नन्द्युक्ता कृपापगा ।
हैहैतालधरा धैर्य्यशब्दशक्तिप्रकाशिनी ॥
हैहैशब्दस्वरूपा च हीहीवाक्यविशारदा ॥
जगदानन्दकर्त्री च शास्त्रानन्दविशारदा ॥
पण्डिता पण्डितगुणा पण्डितानन्दकारिणी ।
परिपालनकर्त्री च तथा स्थितिविनोदिनी ॥
तथा संहारशब्दाढ्या विद्वज्जनमनोहरा ।
विदुषां प्रीतिजननी विद्वत्प्रेमविवर्द्धिनी ॥
नादेयी नादरूपा च नादबिन्दुविधारिणी ।
शून्यस्थानस्थिता शून्यरूपा शून्यनिवासिनी ॥
कार्त्तिकव्रतकर्त्री च रसनाहारिणी खरा ।
ज्वलना चातलतली शिखातलनिवासिनी ॥
क्षुद्रकीटाङ्गसंसर्गसङ्गदोषविनाशिनी ।
कोटिकन्दर्पलावण्या कन्दर्पकोटिसुन्दरी ॥
कन्दर्पकोटिजननी कामबीजप्रदायिनी ।
कामशास्त्रविनोदा च कामशास्त्रप्रकाशिनी ॥
कामप्रकाशिका कामिन्यणिमाद्यष्टसिद्धिदा ।
यामिनी यामिनीनाथवदना यामिनीश्वरी ॥
योगेश्वरी हरयोगमुक्तिदात्री हिरण्यदा ।
कपालमालिनी देवी सौभाग्यसुखरूपदा ॥
कृपान्वितगुणा गौण्या गुणातीता फलप्रदा ।
कुमाण्डभूतवेतालनाशिनी शास्त्रदान्विता ॥
सितासिता च सरला लीलालावण्यमङ्गला ।
विद्यार्थिविद्या माया च विद्याविद्यास्वरूपिणी ॥
आन्वीक्षिकीशास्त्रस्वरूपा शास्त्रसिद्धान्त-
कारिणी ।
नागेन्द्राणी नागमाता क्रीड़ाकौतुकरूपिणी ॥

हरिभावनशीला च हरिसेवनतत्परा ।
हरिप्राणा हरप्राणा शिवप्राणा शिवान्विता ॥
नरकार्णवसंहन्त्री नरकार्णवनाशिनी ।
नरेश्वरी नरातीता नरसेव्या वराङ्गना ॥
यशोदानन्दिनीक्रीड़ा यशोदाक्रोड़वासिनी ।
यशोदानन्दनप्राणा यशोदानन्दनार्थदा ॥
वत्सला कोमला काला करुणार्णवरूपिणी ।
स्वर्गलक्ष्मीर्भूमिलक्ष्मीर्द्रौपदी पाण्डवप्रिया ॥
तथाञ्जनसखी भौमी भीमा भैमी भयानका ।
चिज्जगन्मोहिनी क्षीणा प्राणासक्ततरा तथा ॥
पानार्थिनी पानपात्रा पानपानन्ददायिनी ।
दुग्धमन्थनकर्म्माढ्या दधिमन्थनतत्परा ॥
दधिभाण्डार्थिनी कृष्णक्रोधिनी नन्दनाङ्गना ।
घृतलिप्ता तक्रयुक्ता यमुनापारकौतुका ॥
विचित्रकर्म्मैका कृष्णहास्यभाषणतत्परा ।
गोपाङ्गनावेष्टिता च कृष्णसङ्गार्थिनी तथा ॥
रासासक्ता रासरतिरासवासक्तवासना ।
हरिद्रा हरितारूपा हरार्पितचेतसा ॥
निश्चैतन्या च निश्चेता तथा दारुहरिद्रिका ।
सुबलस्य सखा चैव कृष्णभाषातिवेगिनी ॥
श्रीदामस्य सखी दामदामिनी दामधारिणी ।
मल्लिकोल्लासिनी केशी हरिदम्बरधारिणी ॥
हरिसान्निध्यदात्री च हरिकौतुकमङ्गला ।
हरिप्रदा हरिप्राणा यमुनाजलवासिनी ॥
तपःप्रदा जितार्था च चतुरा चातुरीतमी ।
तमिस्रा तमरूपा च रौद्ररूपा यशोऽर्थिनी ॥
कृष्णकामा कृष्णभक्ता कृष्णानन्दप्रदायिनी ।
कृष्णार्थवासना कृष्णरागिणी भाविनी तथा ॥
कृष्णार्थरहिता भक्ता भक्ताभक्तसुभक्तिदा ।
श्रीकृष्णरहिता दीना विरहिणी हरेः प्रिया ॥
मथुरा मधुराराजगेहभावनभाजना ।
श्रीकृष्णभावनामोदा तस्योन्मादविधायिनी ॥
कृष्णार्थकुशला कृष्णसारचर्म्मधरा शुभा ।
अलकेश्वरपूज्या च कुबेरेश्वरवल्लभा ॥
धनधान्यविधात्री च जया काया हया हयी ।
प्रणवा प्रणवेशी च प्रणवार्थस्वरूपिणी ॥
ब्रह्मविष्णुशिवार्द्धाङ्गहारिणी प्रेतशिंशपा ।
राक्षसीनाशिनी भूतप्रेतप्राणविनाशिनी ॥
सकलेप्सितदात्री च सती साध्वी अरुन्धती ।
पतिव्रता पतिप्राणा पतिवाक्यविनोदिनी ॥
अशेषसाधिनी कल्पवासिनी कल्परूपिणी ॥
इत्येतत् कथितं देवि! राधानामसहस्रकम् ।
यः पठेत् पाठयेद्वापि तस्य तुष्यति माधवः ॥
किं तस्य यमुनाभिर्व्वा नदीभिः सर्व्वतः प्रिये ।
कुरुक्षेत्रादितीर्थेन यस्य तुष्टो जनार्दनः ॥
स्तोत्रस्यास्य प्रसादेन किं न सिध्यति भूतले ॥
ब्राह्मणो ब्रह्मवर्चस्वी क्षत्रियो जगतीपतिः ।
वैश्यो निधिपतिर्भूयात् शूद्रो मुच्येत जन्मतः ॥
ब्रह्महत्या सुरापानमित्यादीन्यतिपापतः ।
सद्यो मुच्येत देवेशि! सत्यं सत्यं न संशयः ॥
राधानामसहस्रस्य समानं नास्ति भूतले ।
स्वर्गे वाप्यथ पाताले गिरौ वा जलतोऽपि वा ॥

नातः परं शुभं स्तोत्रं तीर्थं नातः परं परम् ।
एकादश्यां शुचिर्भूत्वा यः पठेत् सुसमाहितः ॥
तस्य सर्व्वार्थसिद्धिः स्यात् शृणुयाद्वा सुशोभने ।
द्वादश्यां पौर्णमास्यां वा तुलसीसन्निधौ शिवे! ॥
यः पठेत् शृणुयाद्वापि तस्य तत्तत् फलं शृणु ।
अश्वमेधं राजसूयं वाजपेयं तथाविधम् ॥
अतिरात्रं वाजपेयं अग्निष्टोमं तथा शुभम् ।
कृत्वा यत्फलमाप्नोति श्रुत्वा तत्फलमाप्नुयात् ॥
कार्त्तिके चाष्टमीं प्राप्य पठेद्वा शृणुयादपि ।
सहस्रयुगकल्पान्तं वैकुण्ठवसतिं लभेत् ॥
ततश्च ब्रह्मभवने शिवस्य भवने पुनः ।
सुराधिनाथभवने पुनर्याति सलोकताम् ॥
गङ्गातीरं समासाद्य यः पठेत् शृणुयादपि ।
विष्णोः स्वरूपतां याति सत्यं सत्यं सुरेश्वरि! ॥
मम वक्त्रगिरेर्जाता पार्व्वतीसागराश्रिता ।
राधानामसहस्राख्या नदी त्रैलोक्यपावनी ॥
पश्यतेहि मयानित्यं भक्त्याग्रक्त्या यथोचितम् ।
मम प्राणसमं स्तोत्रं तव भक्त्या प्रकाशितम् ॥
नाभक्ताय प्रदातव्यं पाषण्डाय कदाचन ।
नास्तिकाय विरागाय रागयुक्ताय सुन्दरि! ॥
तथा देयं महास्तोत्रं हरिभक्ताय शङ्करि! ।
वैष्णवेषु यथाशक्तिदात्रे पुण्यार्थशीलिने ॥
राधानामसुधावारि मम वक्त्रं महाखनिः ।
उद्धृतं हि त्वया यत्नात् पाता सद्वैष्णवा-
यतीः ॥
विशुद्धसत्त्वाय यथार्थवादिने
द्विजस्य सेवानिरताय मन्त्रिणे ।
दात्रे यथाशक्ति सुभक्तिमानसे
राधापदध्यानपराय शोभने ॥
हरिपादाब्जमधुपमनोभूताय मानसे ।
राधापादसुधास्वादशालिने वैष्णवाय च ॥
दद्यात् स्तोत्रं महापुण्यं हरिभक्तिप्रसाधनम् ।
जन्मान्तरं न तस्यास्ति राधाकृष्णपदार्थिनः ॥
मम प्राणा वैष्णवा हि तेषां रक्षार्थमेव हि ।
शूलं मया धार्य्यते हि नान्यथा मैत्रकारणम् ॥
हरिभक्तिविघातार्थे शूलं संधार्य्यते मया ।
शृणु देवि यथार्थं मे गदितं त्वयि सुव्रते! ॥
भक्तासि मे प्रियासि त्वमतः स्नेहात् प्रका-
शितम् ।
कदापि नोच्यते देवि मया नामसहस्रकम् ॥
किं परं त्वां प्रवक्ष्यामि प्राणतुल्यं मम प्रिये ।
स्तोत्रं मन्त्रं राधिकाया यन्त्रं कवचमेव हि ॥"
इति नारदपञ्चरात्रे राधिकासहस्रनामसमा-
प्तोऽध्यायः ॥*॥ (राधातन्त्रोक्तसहस्रनामस्तोत्रं
यथा,—

ईश्वर उवाच ।
"इति ते कथितं देवि किमन्यत् कथयामि ते ।
श्रोता त्वं परमेशानि अहं वक्ता च शाश्वतः ॥
देव्युवाच ।
कियदन्यन्महादेव पृच्छामि यदि रोचते ।
हृदये तव देवेश नानातन्त्राणि सन्ति वै ॥
नानातन्त्राणि मन्त्राणि रहस्यानि पृथक् पृथक् ।

राधा

बहूनि तव देवेश हृदये देव सुव्रत।
कृपया परमेशान कथयस्व दयानिधे॥

ईश्वर उवाच।

पद्मिन्याः परमेशानि रहस्यं नास्ति सुन्दरी।
त्वयि सर्व्वं महेशानि कथितं परमेश्वरि॥
किञ्चिदन्यन्महेशानि नास्ति मे गोचरे प्रिये।
यद्यदस्ति महेशानि रहस्यं कथितं मया॥

देव्युवाच।

पद्मिन्याः परमेशान रहस्यं कथय प्रभो।
यदि गो कथ्यते देव त्यजामि विग्रहं तदा॥

ईश्वर उवाच।

शृणु प्रिये कुरङ्गाक्षि एतत् प्रौढ़ं कथं तव।
प्रौढ़त्वं यदि चार्व्वङ्गि रहस्यं कथयामि ते॥
रहस्यं शृणु चार्व्वङ्गि स्तोत्रं परमदुर्लभम्।
स्तोत्रं सहस्रनामाख्यं उपविद्यासु सम्मतम्॥
उपविद्यासु देवेशि अतिगुप्तं मनोहरम्।
एतत् स्तोत्रं महेशानि पद्मिनीसम्मतं सदा॥
एतत्तु पद्मिनीस्तोत्रमाश्चर्य्यं परमाद्भुतम्।
यन्नोक्तं सर्व्वतन्त्रेषु तव भक्त्या प्रकाशितम्॥
अस्य श्रीपद्मिनीसहस्रनामस्तोत्रस्य श्रीकृष्ण-ऋषिर्गायत्रीछन्दो महाविद्यासिद्ध्यर्थे विनियोगः। ॐ ह्रीं ऐं पद्मिन्ये राधिकायै। राधा रमणीरूपा निरुपमरूपवती रूपधन्या वश्या वामा रजोगुणा।
रक्ताङ्गी रक्तपुष्पाभा राधा रासपरायणा।
रम्भावती रूपशीला रदनी रञ्जिनी रतिः॥
रतिप्रिया रमणीया रसपुष्टा रसायना।
रासमध्ये रासरूपा रसवेशा रसोत्सुका॥
रसवती रसोल्लासा रसिका रसभूषणा।
रसमालाधरी रङ्गी रसपट्टपरिच्छदा॥
कमला कल्पलतिका कुलव्रतपरायणा।
कामिनी कमला कुन्ती कलिकल्मषनाशिनी।
कुलिना कुलवती कामी कामसन्दीपनी तथा॥
कौमारी कृष्णवनिता कामार्त्ता कामरूपिणी।
कामुकी कलुषघ्नी च कुलज्ञा कुलपण्डिता॥
कृष्णवर्णा कृष्णाङ्गी च कृष्णवस्त्रपरिच्छदा।
कान्ता कामस्वरूपा च कामरूपा कृपावती॥
क्षेमा क्षमावती चैव खेलत्खञ्जनगामिनी।
खस्था खगा खगस्थाची खगगस्थ विहारिणी॥
गरिष्ठा गरिमा गङ्गा गया गोदावरी गतिः।
गान्धारी गुणिनी गौरी गङ्गा गोकुलवासिनी॥
गान्धर्व्वी गानकुशला गुणा गुप्तविलासिनी।
घर्घरा घर्म्मदा घर्म्मा घनस्था घनवासिनी॥
घृणा घृणावती घोरा घोरकर्म्मविवर्जिता।
चन्द्रा चन्द्रप्रभा चैव चन्द्रमूर्त्तिपरिच्छदा॥
चन्द्ररूपा च चन्द्राख्या चपला चारुभूषणा।
चतुरा चारुशीला च चम्पा चम्पावती तथा॥
चन्द्ररेखा चन्द्रकला चारुवेशा विनोदिनी।
चन्द्रचन्दनभूषाङ्गी चार्व्वङ्गी चन्द्रभूषणा॥
चिच्चिणी चिच्चरूपा च चिच्चमूर्त्तिधरा सदा।
छद्मरूपा छद्मवेशी श्वेतच्छत्रविधारिणी॥

राधा

छत्रातपा च छत्राङ्गी छत्रस्था छत्रपालिनी।
छुरिताम्बुतधारौघा छद्मवेशनिवासिनी॥
छटीकृतमरालौघा छटीकृतनिजाम्बुता।
जयन्ती च जगन्माता जननी जन्मदायिनी॥
जया जेत्री च जरती जीवनी जगदम्बिका।
जीवा जीवस्वरूपा च जाड्यविध्वंसकारिणी॥
जगज्जनिर्जनश्रेष्ठा जगद्धेतुर्ज्जगन्मयी।
जगदानन्दजननी जनयित्री जनाश्रया॥
झङ्कारवाहिनी झङ्गा झङ्कारनिर्झरावती।
टङ्कारटङ्किनी टङ्का टङ्किता टङ्करूपिणी॥
डम्बरा डम्भरा डम्बा डम्डम्बा च डम्बुरा।
ढोकिताशेषनिर्घोषा ढलढोलितलोचना॥
तापिनी त्रिपथा तीर्थवासिनी त्रिदशेश्वरी।
त्रिलोकत्रयी त्रैलोक्यतरणी तरणी तरुः॥
तापहन्त्री तपा तापा तपनीया तपावती।
तापिनी त्रिपुरादेवी त्रिपुराज्ञाकरी सदा॥
त्रिलक्षा तारिणी तारा तारामायतमोहिनी।
त्रैलोक्यगमना तीर्णा तुष्टिता त्वरिता त्वरा॥
त्वष्टा तरङ्गिणी तीर्था त्रिविक्रमविधारिणी।
तमोमयी तामसी च तपस्या तपसः फला॥
त्रैलोक्यव्यापिनी तुष्टा तृप्तिस्तुत्या तुला तथा।
त्रैलोक्यमोहिनी तूर्णा त्रैलोक्यविभवप्रदा॥
त्रिपदी च तथा तथ्या तिमिरध्वंसचन्द्रिका।
तेजोरूपा तपःपारा त्रिपुरा त्रिपदस्थिता॥
त्रयी तन्वी तापहरा तपनाङ्गजवाहिनी।
तरिस्तरणितारुण्या तपिता तरणीप्रिया॥
तीव्रपापहरातुल्यातुलपापतनूनपात्।
दारिद्र्यनाशिनी दात्री दक्षा देया दयावती॥
दिव्या दिव्यस्वरूपा च दीक्षादक्षा दया द्रवा।
दिव्यरूपा दिव्यमूर्त्तिर्देवेन्द्रप्राणनाशिनी॥
हुता च हुतरूपा च दन्दशूकविनाशिनी।
दुर्व्वारादमनीया च देवकार्य्यकरी सदा॥
देवप्रिया देवयाज्या देवा देवधिया सदा।
दिक्पालपददात्री च दीर्घाद्या दीर्घलोचना॥
दुष्टद्वेषकामदुघा दोग्ध्री दूषणवर्ज्जिता।
दुग्धा द्युसद्गणाभाषा दिव्या दिव्यगतिप्रिया॥
द्युनदी दीनशरण्या दिव्या देहविहारिणी।
दुर्गमा दरिमा दामा दूरस्था दूरवासिनी॥
दुर्व्विगाह्या दयाधारा दूरसन्तापनाशिनी।
दुराशया दुराधारा द्राविणी द्रुहिणसुता॥
दैत्यशुद्धिकरी देवी सदादानवसिद्धिदा।
दुर्बुद्धिनाशिनी देवी सततं दानदायिनी॥
दानदात्री च देवेशी द्यावाभूमिविगाहिनी।
दृष्टिदा दृष्टिफलदा देवतागृहसंस्थिता॥
दीर्घव्रतकरी दीर्घा दीर्घधर्म्मा दयावती।
दक्षिनी दक्षनीतिश्च दीप्तदण्डधरार्च्चिता॥
दानार्च्चिता द्रवद्रव्या द्रव्यैकनियमा परा।
दुष्टसन्तापशान्त्या च दात्री दवथुरोधिनी॥
देवी दिव्या बलवती दान्ता दान्तजनप्रिया।
दारिद्र्यादितटा दुर्गा दुर्गादन्यप्रचारिणी॥
धर्म्मरूपा धर्म्मधुरा धेनुरूपा धृतिर्ध्रुवा।
धेनुदाना ध्रुवस्थाणुर्धर्म्मकामार्थमोक्षदा॥

राधा

धर्म्मिणी धर्म्ममाता च धर्म्मदात्री धनुर्द्धरा।
धात्री धेया धरा धर्म्मधारिणी धृतकल्मषी॥
धनदा धर्म्मदा धन्या धन्यदा धान्यदा धना।
धन्या धनाधिरूपा च धरित्री धनपूरिता॥
धारणा धनरूपा च धर्म्मा धर्म्मप्रचारिणी।
धर्म्मिणी धर्म्मतन्त्राख्या धर्म्मिष्ठामलकेशिनी॥
धर्म्मप्रचारनिरता धर्म्मरूपा धुरन्धरी।
धनुर्व्विद्याधरी धात्री धनुर्व्विद्याविशारदा॥
निरानन्दा निरीहा च निर्व्वाणद्वारसंस्थिता।
निर्व्वाणपदवी दात्री नन्दिनी नाकनायिका॥
नारायणी निषिद्धघ्नी निजरूपप्रकाशिनी।
नम्रस्था निर्दया नन्दनता नूतनरूपिणी॥
निर्म्मला निर्म्मलाभासा निरस्था निरुपद्रवा।
नित्यानन्दमयी नित्यानित्या नतनविग्रहा॥
निषिद्धा नीतिधैर्य्या च निर्व्वाणपददीपिका।
निःशङ्का च निरातङ्का निर्नाशितमहाभया॥
निर्म्मला नन्दजननी निर्म्मलश्यामवेशिनी।
निरवद्याकुलस्थस्थी नित्यानन्दस्वरूपिणी॥
निर्णया निर्णयज्ञाता निषिद्धकर्म्मवर्ज्जिता।
नित्योत्सवा नित्यतृप्ता नमस्कार्य्या निरञ्जना॥
निष्ठावती निरातङ्का निर्लेपा निश्चलात्मिका।
निरवद्या निरीहा च निरञ्जनपुरस्थिता॥
पुण्यप्रदा पुण्यकरी पुण्यगर्भा पुरातनी।
पुण्यरूपा पुण्यदेहा पुण्यगीता च पावनी॥
पूजा पवित्रा परमा परा पुण्यविभूषणा।
पुण्यदात्री पुण्यधरा पुण्या पुण्यप्रवाहिनी॥
पुण्यदेहा पुण्यवती पूर्णिमा पूर्णचन्द्रमा।
पौर्णमासी परा पद्मा पद्मजा पद्मगन्धिनी॥
पद्मिनी पद्मवस्त्रा च पद्ममालाधरा सदा।
पद्मोद्भवा परस्था च परमानन्दरूपिणी॥
प्रकाश्या परमाश्चर्य्या पद्मगर्भनिवासिनी।
पावनी च तथा पूता पवित्रा परमाकला॥
पद्मार्च्चिता पद्मसंस्था पद्ममाता पुरातनी।
पद्मासनगता नित्या पद्मासनपरिच्छदा॥
शुक्लपद्मासनगता रक्तपद्मासना तथा।
पीतपद्मासनगता कृष्णपद्मस्थिता तथा॥
पदार्थदायिनी पद्मवनवासपरायणा।
प्रकाशिनी प्रगम्या च पुण्यश्लोका च पावनी॥
फलहन्त्री फलहरा फलिनी फलरूपिणी।
फुल्लेन्दीवलोचना फुल्ला फुल्लकोरकगन्धिनी॥
फलिनी फालिनी फेला फुल्लच्छाटितपातका।
विश्वमाता च विश्वेशी विश्वा विश्ववरप्रिया॥
ब्रह्मण्या ब्राह्मणी ब्राह्मी ब्रह्मज्ञा विमलामला।
बहुला बाहुला बह्वी बङ्करी वनदायिनी॥
विक्रान्ता विक्रमाक्रान्ता बहुभाग्यविलोचना।
विश्वामित्रा विष्णुसखी वैष्णवी विष्णुवल्लभा॥
विरूपाक्षप्रिया देवी विभूतिर्विश्वतोमुखी।
वेदवेदरता वाणी वेदाक्षरसमन्विता॥
विद्या विद्यावती वन्द्या वृहती ब्रह्मवादिनी।
वरदा विप्रवृष्टा च वरिष्ठा च विशोधिनी॥
विद्याधरी वसुमती विप्रवृद्धा विशोधिता।
व्योमस्थानावती वामा विधात्री विबुधप्रिया॥

बुद्धिर्ब्रह्मनाग्निनी चित्ता ब्रह्मरूपा वरानना ।
वासिनी ब्रह्मजननी ब्रह्महत्यापहारिणी ॥
ब्रह्मविष्णुस्वरूपा च सदा विभववर्द्धिनी ।
विभाषिणी व्यापिनी च व्यापिका परिचारिका ॥
विपन्नार्त्तिहरा देवी विनयव्रतचारिणी ।
विपन्नशोकसंहर्त्री विपञ्चीवाद्यतत्परा ॥
वेणुवाद्यपरा देवी वेणुश्रुतिपरायणा ।
वर्च्चस्विनी बलकरी बलमूला विवस्वती ॥
विप्राभा विप्रशिखा चैव विकल्पपरिवर्ज्जिता ।
बुद्विदा बृहती देवी विधिविच्छिन्नसंशया ॥
विचित्राङ्गी विचित्राभा विच्छा विभववर्द्धिनी ।
विजया विनया वन्द्या वामदेवी वरप्रदा ॥
विषघ्नी च विशालाक्षी विज्ञानवित्तमानिनी ।
भद्रा भोगवती भव्या भवानी भयवासिनी ॥
भूतधात्री भयहरी भक्तवश्या भयापहा ।
भक्तिदा भयहा भैरीभक्तदुर्गप्रहारिणी ॥
भागीरथी भानुमती भाग्यदा भगनिर्हिता ।
भवप्रिया भूततुष्टिर्भूतिदा भूतभूषणा ॥
भोगवती भूतिमती भयरूपा भमिर्भमा ।
भूरिदा भक्तिसुलभा भाग्यवृद्धिकरी सदा ॥
भिक्षुमाता भिक्षुनिभा भव्या भवस्वरूपिणी ।
महामाया मालप्रिया महानन्दा महोदरी ॥
मतिर्मुक्तिर्मनोज्ञा च महामङ्गलदायिनी ।
महापुण्या महादात्री मैथुनप्रियलालसा ॥
मनोज्ञा मालिनी मान्या मणिमाणिक्यधारिणी ।
मुनिस्तुता मोहकरी मोहहन्त्री मदोत्कटा ॥
मधुपानरता मद्या मदाघूर्णितलोचना ।
मधुपानप्रमत्ता च मधुलुब्धा मधुव्रता ॥
माधवी मालिनी मान्या मनोरथपथातिगा ।
मोक्षैश्वर्यप्रदामर्त्या महापद्मवनाश्रिता ॥
महाप्रभावा महती म्रगाक्षी मीनलोचना ।
महाकाठिन्यसम्पूर्णा महाक्षी महती कला ॥
मुक्तिरूपा महासुक्ता मणिमाणिक्यभूषणा ।
मुक्ताफलविचित्राङ्गी मुक्ताकञ्चितनासिका ॥
महापातकराग्निघ्नी मनोनयननन्दिनी ।
महामाणिक्यरचिता महाभूषणभूषिता ॥
मायावती मोहहन्त्री महाविद्याविधारिणी ।
महामेधा महाभूतिर्म्महामाया प्रिया सखी ॥
मनोधरी महोपाया महामणिविभूषिता ।
महामोहप्रशमिनी महामङ्गलदायिनी ॥
यशस्विनी यशोदा च यमुनावारिहारिणी ।
योगसिद्धिकरी यज्ञा यज्ञेशवन्दितप्रिया ॥
यज्ञेशी यज्ञफलदा यजनीया यशस्करी ।
योगयोनिर्योगसिद्धा योगिनी योगबुद्धिदा ॥
योगयुक्ता यमाद्यष्टसिद्धिर्यज्ञैकधारिणी ।
यमुनाजलसेव्या च यमुनाजलहारिणी ॥
यामिनी यमुना याम्या यमलोकनिवासिनी ।
लोकालोकविलासा च लोलत्कल्लोलमालिका ॥
लोलाक्षी लोकमाता च लोकानन्दप्रदायिनी ।
लोकबन्धुर्लोकधात्री लोकालोकनिवासिनी ॥
लोकत्रयनिवासा च लक्षलक्षणलक्षिता ।
लीलालोका च लावण्या लघिमा लसदीक्षणा ॥

वासुदेवप्रिया वामा वसन्तसमयप्रिया ।
वासन्ती वसुदा वन्द्या वेणुवादपरायणा ॥
वीणावाद्यप्रमत्ता च वीणानादविभूषणा ।
वेणुवाद्यरता चैव वंशीनादविभूषणा ॥
शुभा शुभरतिः शान्तिः श्रीश्रद्धा शान्तिविग्रहा ।
शीतला शोषिता शोभा शुभदा शुभदायिनी ॥
शिवप्रिया शिवानन्दा शिवपूजासु तत्परा ।
शिवस्तुत्या शिवसत्या शिवनित्यपरायणा ॥
श्रीमती श्रीनिवासा च श्रुतिरूपा शुभव्रता ।
शुद्धविद्याजपकरी शुभकर्त्री शुभाशया ॥
श्रुतानन्दा श्रुतिः श्रोत्री शिवप्रेमपरायणा ।
शोषणी शुभवार्त्ता च शालिनी शिवनर्त्तकी ॥
षड्गुणाद्युपदाक्रान्ता षड्ङ्गश्रुतिरूपिणी ।
सरसा सुप्रभा सिद्धा सिद्धसिद्धिप्रदायिनी ॥
सेव्यासङ्गा सती सूक्ता सूक्तिरूपा सदाप्रिया ।
सम्पत्प्रदा स्तुतिः स्तुत्या स्तवनीया स्तवप्रिया ॥
स्थैर्य्यदा स्थैर्य्यगा सौख्या क्षेमसौभाग्यदायिनी ।
सूक्ष्मरूपा स्वधा स्वाहा स्वधालेपप्रमोदिनी ॥
स्वर्गप्रिया समुद्राभा सर्व्वपातकनाशिनी ।
संसारवारिणी राधा सौभाग्यवर्द्धिनी सदा ॥
हरप्रिया हिरण्याभा हरिणाक्षी हिरण्मयी ।
हंसरूपा हरिद्राभा हरिदर्णा शुचिस्मिते ॥
क्षेमदा क्षालिता क्षेमा क्षुद्रघण्टाविधारिणी ।
अपरैकं शृणु प्रौढ़े स्वराक्षरसमन्वितम् ॥
स्तोत्रं सहस्रनामाख्यं स्वरव्यञ्जनसंयुतम् ।
अजपा अतुलानन्ता अनन्ताद्यतदायिनी ॥
अन्नदाना अशोका च अलका अद्भुतप्रवा ।
अनाथवत्सलानन्ता अयोनिसम्भवा प्रिये ॥
अयत्नलक्षणाक्षुण्णा विच्छिन्नापापराजिता ।
अनाथानामभीष्टार्थसिद्धिदानन्दवर्द्धिनी ॥
अणिमादिगुणाधारा अगण्यालिकहारिणी ।
अचिन्त्यशक्तिवलयाद्भुतरूपा च हारिणी ॥
अद्रिराजसुता दूती अश्वयोगसमन्विता ।
अच्युता अनवच्छिन्ना अक्षुण्णशक्तिधारिणी ॥
अनन्ततीर्थरूपा च अनन्ताद्भुतरूपिणी ।
अनन्तमहिमा पारा अनन्तसुखदायिनी ॥
अर्थदा अन्नदा अर्था सदा अद्भुतवर्षिणी ।
अविद्याजालशमनी अप्रतर्क्यगतिप्रदा ॥
अशेषविघ्नसंहन्त्री अशेषगुणगुम्फिता ।
अज्ञाननाशिनी देवी अनन्तसिद्धिदायिनी ॥
अशेषपापसंहन्त्री अशेषदेवतामयी ।
अघोरा अद्भुता देवी अज्ञानतिमिरप्रदा ॥
अशुभहरपरा देवी अभिरामविनोदिनी ।
अनवद्यपरिच्छिन्ना अत्यनन्तकलङ्किणी ॥
आरोग्यदात्री आनन्दा आपन्नार्त्तिविनाशिनी ।
आश्चर्य्यरूपा आत्मस्था आत्मविद्या सदा प्रिया ॥
आप्यायिनी च आलस्या आपदाद्भुतप्रदा ।
इष्टारतिरिष्टदात्री इष्टपूर्त्तफलप्रदा ॥
इतिहासस्तुतिः श्वेता इहामुत्रफलप्रदा ।
इष्टा च इष्टरूपा च इत्यादिपरिवन्दिता ॥
इन्दिरा इतरात्रीच इलङ्कार धारिणी ।
इन्द्राणीसेवितपदा इन्द्रियप्रीतिदायिनी ॥

ईश्वरी ईशजननी ईशस्त्रैश्वर्य्यदायिनी ॥
उतङ्कशक्तिसंयुक्ता उपमानविवर्ज्जिता ।
उत्तमश्लोकसंसेव्या उत्तमोत्तमरूपिणी ॥
ऊहा ऊषा ऊधाराधा ऊर्म्मिला च शुचिस्मिते ।
ऊहा ऊहवितर्का च ऊर्द्धधारा च ऊर्द्धगा ॥
ऊर्द्धधारा ऊर्द्धयोनी ऊपपापविनाशिनी ।
ऋषिवृन्दस्तुता ऋद्धिकरणव्रतनाशिनी ॥
ऋतम्भरा ऋद्विदात्री ऋकथा ऋकथस्वरूपिणी
ऋतुप्रिया ऋक्षमाता ऋक्षार्च्चिर्ऋक्षमार्गगा ॥
ऋतुलक्षणरूपा च ऋतुमार्गप्रदर्शिनी ।
एषिताखिलसर्व्वस्वा एकैकाद्भुतदायिनी ॥
ऐश्वर्य्यतर्प्यरूपा च ऐतिरैन्द्रशिरोमणिः ।
ओजस्विनी ओषधी च ओजोनादौजदायिनी ॥
ओङ्कारजननी देवि ओङ्कारप्रतिपादिता ।
औदार्य्यप्रकरा भद्रे औपेन्द्रौषधिविग्रहा ॥
अंशवश्या च अम्बष्ठा अम्बा अम्बालिका तथा ।
अम्बुजाक्षी च अम्बाना अम्बुस्निग्धाम्बुजानना ॥
अंशुमाली अंशुमती अंशूत्यंशांशसम्भवा ।
अन्धतामिस्रहा भद्रे अत्यन्तशोभनस्वरा ॥
अर्थघ्ना अर्थदात्री च अर्थरूपा अनाहता ।
अकारं नामान्तरं भद्रे ककारादि वरानने ! ॥
अत्यन्तसुन्दरं शुद्धं निर्म्मलोत्पलगन्धिनी ।
कुटन्ता करुणा कान्ता कर्म्मजालविनाशिनी ॥
कमला कल्पलतिका कलिकल्मषनाशिनी ।
कमनीयकला कर्णा कपर्द्दिपूजनप्रिया ॥
कदम्बकुसुमाभाषा सदा कोकनदेक्षणा ।
कालिन्दीकेलिकलिता कथा कादम्बमालिका ॥
कान्तालोकचया कन्या कन्यरूपा मनोहरा ।
खड्गिनी खड्गधाराभा खगा खगेन्द्रधारिणी ॥
खेखेलगामिनी खड्गा खड्गेन्दुतलकास्थिता ।
खेचरी खेचरी विद्या खगतिः ख्यातिदायिनी ॥
खखिपापेषपापौघा खलवृद्धिविनाशिनी ।
खातेन कन्दसन्दोहा खड्गखट्वाङ्गधारिणी ॥
खरसन्तापशमनी खरदुःखनिकृन्तनी ।
गुह्यगन्धगतिर्गौरी गन्धर्व्वनगरप्रिया ॥
गूढ़रूपा गुणवती गुर्व्वी गौरवरङ्गिणी ।
गदपीड़ाहरा गुप्ता गदस्निग्धमना प्रिया ॥
चाम्पेयलोचना चारु चार्व्वङ्गी चारुरूपिणी ।
चन्द्रचन्दनसिक्ताङ्गी चर्व्वनीया चिरस्थिता ॥
चारुचम्पकमालाढ्या चलिताग्रेषदुष्कृता ।
चारिताग्रेषदुरिता चारुताग्रेषमस्तुता ॥
रक्तचन्दनसिक्ताङ्गी रक्ताङ्गी रक्तमालिका ।
शुक्लचन्दनसिक्ताङ्गी शुक्लाङ्गी शुक्लमालिका ॥
पीतचन्दनसिक्ताङ्गी पीताङ्गी पीतमालिका ।
कृष्णचन्दनसिक्ताङ्गी कृष्णाङ्गी कृष्णमालिका ॥
शुक्लवस्त्रपरीधाना शुक्लवस्त्रोत्तरीयिका ।
रक्तवस्त्रपरीधाना रक्तवस्त्रोत्तरीयिका ।
पीतवस्त्रपरीधाना पीतवस्त्रोत्तरीयिका ।
कृष्णपट्टपरीधाना कृष्णपट्टोत्तरीयिका ॥
वृन्दावनेश्वरी राधा कृष्णकार्य्यप्रकाशिनी ।
पद्मिनी नागिनी गोपीकालिन्दी अवगाहिनी ॥
गोपीश्वरप्रिया भूत्वा सदा नगरसोहिनी ।

त्रिपुरा त्रिपुरादेवी त्रिपुराह्नाकरी सदा ॥
त्रिपुरासन्निकर्षस्था त्रिपुरापरिचारिका ।
त्रिपुरापुरसंस्था तु या राधा पद्मिनी परा ॥
नानासौभाग्यसम्पन्ना नानाभरणभूषिता ।
स्तोत्रं सहस्रनामाख्यं कथितं तव भक्तितः ॥
एतत् स्तोत्रञ्च मन्त्रञ्च कवचञ्च वरानने ।
कल्पे कल्पे च देवेशि प्रपठेद्यदि मानवः ॥
उपास्य राधिकां विद्यां केवलं कमलेक्षणे ।
बहुकालेन देवेशि उपविद्यापि सिध्यति ॥
पद्मिनी राधिका विद्या उपविद्यासु निश्चिता ।
महाविद्यां महेशानि उपास्य यत्नतः स्वयम् ॥
प्रकटं परमेशानि राधामन्त्रेण सुन्दरि ! ।
शृणु नाम सहस्राणि प्रकटे यत्तु शस्यते ॥
क्षणात्तु कालिका साक्षात् राधाप्रकृतिपद्मिनी ।
हे क्षणा राधे गोविन्द इदमुच्चार्य यत्नतः ॥
सदासौ वैष्णवो देवि सर्व्वत्रैव प्रकाशते ।
गोविन्दो यस्तु देवेशि स्वयं त्रिपुरसुन्दरी ॥
विना मन्त्रं विना होमं विना पूजां विना बलिम् ।
विना गन्धं विना पुष्पं विना नित्योदितां क्रियाम् ॥
प्राणायामं विना ध्यानं विना भूतविशोधनम् ।
विना जपं विना दानं येन राधा प्रसीदति ॥
राधासहस्रनामाख्यस्तोत्रमार्गेण पार्व्वति ।
यो जपेद्वैष्णवं मन्त्रं राधिकामन्त्रमेव च ॥
स पतेन्नरके घोरे यावदिन्द्राश्चतुर्दश ।
श्रुत्वा गुरुमुखान्मन्त्रं वैष्णवो भक्तितत्परः ॥
ततः पुरश्चरीं कुर्य्यादेकविंशतिसंख्यकम् ।
पूर्णाभिषेकसिक्तस्य ततो गुरुपदार्चनम् ॥
विना पूर्णाभिषेकञ्च भवाब्धौ पारमिच्छति ।
अन्नस्य तस्य दुर्ब्बुद्धेर्निरये पतनं भवेत् ॥
सत्यं सत्यं महेशानि सत्यं सत्यं वदाम्यहम् ।
भवाब्धितरणं नास्ति विना पूर्णाभिषेचनम् ॥
नानागमपुराणानि वेदवेदाङ्गशास्त्रतः ।
मयोद्धृतं महेशानि सारं पूर्णाभिषेचनम् ॥
तस्मात् सर्व्वप्रयत्नेन कुर्य्यात् पूर्णाभिषेचनम् ।
कृत्वा पूर्णाभिषेकञ्च पठेत् राधास्तवं प्रिये ॥
स्तवपाठाच्चमहेशानि स भवेद्भुवनन्दनः ।
स्तोत्रं सहस्रनामाख्यं न यस्य जपतो मनुम् ॥
राधाक्षणस्य देवेशि तस्य पापफलं शृणु ।
कुम्भीपाके स पच्येत यावदै ब्रह्मणः शतम् ॥
निम्नगानां यथा श्रेष्ठा भवेद्भागीरथी प्रिये ।
वैष्णवानां यथा शम्भुः प्रकृतीनां यथा सती ॥
पुरुषाणां यथा विष्णुर्नक्षत्राणां यथा शशी ।
स्तवानाञ्च तथा श्रेष्ठं राधास्तोत्रमिदं प्रिये ॥
जपपूजादिकं यद्यद्बलिहोमादिकन्तथा ।
श्रीराधास्तोत्रपाठस्य कलां नार्हति षोड़शीम् ॥"
इति वासुदेवरहस्ये राधातन्त्रे द्वात्रिंशत् पटले सहस्रनामस्तोत्रम् ॥*॥) अथ राधाकवचम् ।

श्रीपार्व्वत्युवाच ।

"कैलासवासिन् भगवन् भक्तानुग्रहकारक ।
राधिकाकवचं पुण्यं कथयस्व मम प्रभो ॥
यद्यस्ति करुणा नाथ त्राहि मां दुःखतो भयात् ।
त्वमेव गुरवं नाथ मूलपाणे पिनाकधृक् ॥

श्रीमहादेव उवाच ।

शृणुष्व गिरिजे तुभ्यं कवचं पूर्व्वसूचितम् ।
सर्व्वरक्षाकरं पुण्यं सर्व्वदुःखहरं परम् ॥
हरिभक्तिप्रदं साक्षात् मुक्तिसुक्तिप्रसाधनम् ।
त्रैलोक्याकर्षणं देवि हरिसान्निध्यकारणम् ॥
सर्व्वत्र जयदं देवि सर्व्वशत्रुभयापहम् ।
सर्व्वेषाञ्चैव भूतानां मनोवृत्तिकरं परम् ॥
चतुर्व्वर्गसुक्तिजनकं सदानन्दकरं परम् ।
राजसूयाश्वमेधानां यज्ञानां फलदायकम् ॥
इदं कवचमज्ञात्वा राधामन्त्रञ्च यो जपेत् ।
स नाप्नोति फलं तस्य विघ्नस्तस्य पदे पदे ॥
ऋषिरस्य महादेवोऽनुष्टुप्छन्दः प्रकीर्त्तितम् ।
राधाख्य देवता प्रोक्ता रां बीजं परिकीर्त्तितम् ॥
धर्म्मार्थकाममोक्षेषु विनियोगः प्रकीर्त्तितः ।
श्रीराधा मे शिरः पातु ललाटं राधिका तथा ॥
वृषभानुसुता दन्तान् चिबुकं गोपनन्दिनी ।
चन्द्रावली पातु गण्डं जिह्वां कृष्णप्रिया तथा ॥
कण्ठं पातु हरिप्राणा हृदयं विजया तथा ।
बाहू द्वौ चन्द्रवदना उदरं सुललसना ॥
कटिं योगान्विता पातु पादौ सौभद्रिका तथा ।
नखान् चन्द्रसखी पातु गुल्फौ गोपालवल्लभा ॥
सुखं विधुसुखी पातु गोपी पदतलं तथा ॥
शुभप्रदा पातु पृष्ठं कुक्षौ श्रीकान्तवल्लभा ।
गुह्यदेशं जरा पातु हरिणी पातु सर्व्वतः ॥
वाक्यं वाणी सदा पातु धनागारं धनेश्वरी ।
पूर्व्वां दिशं क्षणारता कृष्णप्राणा च पश्चिमाम् ॥
उत्तरां हरिता पातु दक्षिणां वृषभानुजा ।
चन्द्रावली नैऋमेव दिवा खेड़ितमेखला ॥
सौभाग्यदा मध्यदिने सायाह्ने कामरूपिणी ।
रौद्री प्रातः पातु मां हि गोपिनी रजनीक्षये ॥
हेतुदा सङ्गवे पातु कोमला च दिवार्द्धके ।
प्रेषापराह्णसमये शमिता सर्व्वसन्धिषु ॥
योगिनी भोगसमये रतौ रतिप्रदा सदा ।
कामेशी कौतुके नित्यं योगे रत्नावली मम ॥
सर्व्वदा सर्व्वकार्य्येषु राधिका कृष्णमानसा ।
इत्येतत् कथितं देवि कवचं परमाद्भुतम् ॥
सर्व्वरक्षाकरं नाम महारक्षाकरं परम् ।
सर्व्वार्थसिद्धिस्तस्य स्यात् यदृच्छमनसि वर्त्तते ॥
राजद्वारे सभायाञ्च संग्रामे शत्रुसङ्कटे ।
प्राणार्थनाशसमये यः पठेत् प्रयतो नरः ।
तस्य सिद्धिर्भवेद्देवि न भयं विद्यते क्वचित् ॥
आराधिता राधिका च तेन सत्यं न संशयः ।
गङ्गास्नानात् हरेर्नामग्रहणात् यत् फलं लभेत् ॥
तत् फलं तस्य भवति यः पठेत् प्रयतः शुचिः ।
हरिद्रारोचना चन्द्रमण्डितं हरिचन्दनम् ॥
कृत्वा लिखित्वा भूर्ज्जे च धारयेत् मस्तके भुजे ।
कण्ठे वा देवदेवेशि स हरिर्नात्र संशयः ॥
कवचस्य प्रसादेन ब्रह्मा सृष्टिं स्थितिं हरिः ।
संहारञ्चाहं नियतं करोमि कुरुते तथा ॥
वैष्णवाय च शुद्धाय विरागगुरुभक्तिने ।
दद्यात् कवचमव्ययमन्यथा नाशमाप्नुयात् ॥"
इति श्रीनारदपञ्चरात्रे ज्ञानामृतसारे पञ्चरात्रे

सर्व्वरक्षाकवचं समाप्तम् ॥ * ॥ (राधातन्त्रोक्त-राधिकाकवचं यथा,—

देव्युवाच ।

"देवदेव महादेव सृष्टिस्थित्यन्तकारक ।
राधिकाकवचं देव कथयस्व दयानिधे ॥

ईश्वर उवाच ।

शृणु देवि वरारोहे कवचं जनमोहनम् ।
गोपितं सर्व्वतन्त्रेषु इदानीं प्रकटीकृतम् ॥
या राधा त्रिपुरा दूती उपविद्या सदा तु सा ।
उपविद्याक्रमादेवि कवचं शृणु पार्व्वति ॥
जपपूजाविधानस्य फलं सर्व्वसिद्धिदम् ।
यत्र तत्र न वक्तव्यं कवचं गोपितं महत् ।
भक्तिहीनाय देवेशि द्विजनिन्दापराय च ।
न शूद्रयाजिविप्राय वक्तव्यं परमेश्वरि ॥
शिष्याय भक्तियुक्ताय शक्तिदीक्षारताय च ।
वैष्णवाय विशेषेण गुरुभक्तिपराय च ॥
वक्तव्यं परमेशानि मम वाक्यं न चान्यथा ॥
अस्य श्रीराधात्रैलोक्यमङ्गलकवचस्य गोपिका ऋषिरनुष्टुप्छन्दः श्रीराधिका देवता महा-विद्यासाधनगोप्यर्थे विनियोगः ॥
ॐ पूर्व्वे च पातु सा देवी रुक्मिणी शुभदायिनी ।
क्रीं पश्चिमे पातु सत्या सर्व्वकामप्रपूरणी ।
याम्यां क्रीं जाम्बवती पातु सर्व्वकामफलप्रदा ।
उत्तरे पातु भद्रा क्रीं भद्रशक्तिसमन्विता ॥
ऊर्द्धं पातु महादेवी क्रीं कृष्णप्रिया यशस्विनी ।
अधश्च पातु मां देवी ऐं पातालतलवासिनी ॥
अधरे राधिका पातु ऐं पातु हृदयं मम ।
नमः पातु च सर्व्वाङ्गं डेयुता च पुनः पुनः ।
सर्व्वत्र पातु मे देवी ईश्वरी भुवनेश्वरी ॥
ऐं क्रीं राधिकाये क्रीं ऐं शिरः पातु मां क्रीं क्रीं राधिकाये क्रीं क्रीं दक्षबाहुं रक्षतु मम ।
क्रीं क्रीं राधिकाये क्रीं क्रीं वामाङ्गं रक्षतु पद्मिनी पद्मगन्धिनी । ऐं क्रीं राधिकाये ऐं ऐं दक्षपादं रक्षतु मम । क्लीं क्लीं ऐं ऐं राधिकाये क्रीं क्रीं ऐं ऐं क्लीं क्लीं ॐ सर्व्वाङ्गं मम रक्षतु । क्लीं राधिकाये क्लीं वामपादं रक्षतु सदा पद्मिनी । क्रीं राधिकाये क्रीं अक्षियुग्मं रक्षतु मम । ऐं राधिकाये ऐं कर्णयुग्मं सदा रक्षतु मम । क्रीं राधिकाये क्रीं नासायुग्मं सदा रक्षतु मम । ॐ क्रीं राधिकाये ॐ क्रीं दन्तपंक्तिं सदा पातु सरस्वती । क्रीं भुवनेश्वरी ललाटं पातु क्रीं काली मे मुखमण्डलं सदा पातु । क्रीं क्रीं क्रीं महिषमर्द्दिन्ये क्रीं क्रीं महिषमर्द्दिनी द्वारकावासिनी सहस्रारं रक्षतु सदा मम । ऐं क्रीं ऐं मातङ्गी हृदयं सदा मम रक्षतु । क्रीं ऐं क्रीं उग्रतारा नाभिपद्मं सदा रक्षतु मम । क्लीं ऐं क्लीं सुन्दरी क्लीं ऐं क्लीं स्वाधिष्ठानं लिङ्गमूलं रक्षतु मम । लं ऐं लं पृथिवी गुदमण्डलं रक्षतु मम । ऐं ऐं ऐं बगला ऐं ऐं ऐं स्तनद्वयं रक्षतु मम । ह्सौं भैरवी ह्सौः स्कन्धद्वयं रक्षतु मम । क्रीं

अन्नपूर्णा ङीं घाटां रक्षतु मम। ऐं ङीं ऐं बीजत्रयं सदा पातु पृष्ठदेशं मम। ॐ महादेव: पातु सर्व्वाङ्गं मे ॐ नारायण: पातु सर्व्वाङ्गं सदा मम।
ॐ ॐ कृष्ण: पातु सदा गोत्रं रुक्मिणीनाथ:।
रुक्मिणी सत्यभामा च सैव्या जाम्बवती तथा॥
लक्ष्मणा मित्रविन्दा च भद्रा नग्नजिता तथा।
एता: सर्व्वा युवतय: शोभनाख्या: सुलोचना:॥
रक्षेयुर्मां सन्तु दिक्षु सततं शुभदर्शना:।
ॐ नारायणश्च गोविन्द: शिर: पद्मदलेक्षण:॥
सर्व्वाङ्गं मे सदा रक्षेत् केशव: केशिहा हरि:।
इतीदं कवचं भद्रे त्रैलोक्यमङ्गलं शुभम्॥
यस्मिन्या: परमेशानि उपविद्यासु सङ्गतम्।
य: पठेत् पाठयेद्वापि सततं भक्तितत्पर:॥
निराहारो जलत्यागी अयुतं वत्सरे सदा।
तदेव परमेशानि पद्मिनी वशतामियात्॥
एतत्ते कथितं देवि कवचं भुवि दुर्लभम्।
फलमूलजलं त्यक्त्वा पठेत् संवत्सरं यदि॥
पद्मिनी वशमायाति तदेव नगनन्दिनि।
अनेनैव विधानेन य: पठेत् कवचं परम्॥
विष्णुलोकमवाप्नोति नात्यथा वचनं मम।
संगोप्य पूजयेद्विद्यां महाविद्यां वरानने॥
प्रकटार्थमिदं देवि कवचं प्रपठेत् सदा।
महाविद्यां विना भद्रे य: पठेत् कवचं प्रिये।
तदेव सहसा भद्रे कुम्भीपाकं व्रजेत् प्रिये॥"
इति वासुदेवरहस्ये राधातन्त्रे एकत्रिंशत्पटल:॥) अथ राधास्तोत्रम्।
"स्तोत्रञ्च सामवेदोक्तं प्रपठेत् भक्तिपूर्व्वकम्।
राधा रासेश्वरी रम्या परमा च परात्मन:॥
रासोद्भवा कृष्णकान्ता कृष्णवक्ष:स्थलस्थिता।
कृष्णप्राणाधिदेवी च महाविष्णुप्रसूरपि॥
सर्व्वथा विष्णुमाया च सत्यासत्या सनातनी।
ब्रह्मरूपा परमा निर्लिप्ता निर्गुणा परा॥
वृन्दावनेशा विजया यमुनातटवासिनी।
गोलोकवासिनी गोपी गोपीशा गोपमालिका।
सानन्दा परमानन्दा नन्दनन्दनकामिनी।
वृषभानुसुता शान्ता कान्ता पूर्णतमस्य च॥
कान्या कलावतीकन्या तीर्थपूता सतीनिभा।
सप्तत्रिंशच्च नामानि वेदोक्तानि शुभानि च॥
सारभूतानि पुण्यानि सर्व्वनामसु नारद:।
य: पठेत् संयत: शुद्धो विष्णुभक्तो जितेन्द्रिय:॥
इह वै निश्चलां लक्ष्मीं लब्ध्वा याति हरे: पदम्॥
हरिभक्तिं हरेर्दास्यं लभते नात्र संशय:॥
भक्तो लक्षजपेनैव स्तोत्रसिद्धिर्भवेत् ध्रुवम्।
स्तोत्रस्मरणमात्रेण जीवन्मुक्तो भवेन्नर:॥
पदे पदेऽश्वमेधस्य लभते निश्चितं फलम्।
कोटिजन्मार्ज्जितात् पापात् ब्रह्महत्यायुतादपि।
स्तोत्रस्मरणमात्रेण मुच्यते नात्र संशय:॥
मृतवत्सा काकवन्ध्या महाबन्ध्या प्रसूयते।
शृणोति वर्षमेकं या शुद्धा स्त्रिग्धान्नभोजनी॥
शृणोति मासमेकं य: सर्व्वाभीष्टं लभेन्नर:।
सामवेदे कुमारं तमित्याह कमलोद्भव:॥"

इति नारदपञ्चरात्रे ज्ञानाम्बुतसारे द्वितीयरात्रौ शिवनारदसंवादे भक्तिज्ञानकथने श्रीराधिकास्तोत्रं समाप्तम्॥

राधाकान्त:, पुं, (राधाया: कान्त:।) श्रीकृष्ण:। यथा,—
"गोलोके द्विभुज: कृष्णो राधाकान्त:सनातन:।
गोपाङ्गनादिभिर्युक्तो द्विभुजैर्गोपपार्षदै:॥"
इति ब्रह्मवैवर्त्ते ब्रह्मखण्डे १७ अध्याय:॥

राधातनय:, पुं, (राधाया: सुतपत्न्यास्तनय:। तया पालितत्वात् तथात्वम्।) कर्ण:। इति हेमचन्द्रे कर्णपर्य्याये राधासुतशब्ददर्शनात्॥

राधाभेदी, [न्] पुं, (राधां धन्विचित्रभेदं भिनत्तीति। भिद्+णिनि:।) अर्জ্জुन:। इति भूरिप्रयोग:॥

राधावेधी, [न्] पुं, (राधां धन्विचित्रविशेषं विध्यतीति। विध्+णिनि:।) अर्জ্জुन:। यथा,
"राधावेधी किरीट्येन्द्रिर्ज्जिष्णु: श्वेतहयो नर:।
कृष्णसखो गुडाकेश: सुभद्रेश: कपिध्वज:।
बीभत्सु: कर्णजित्तस्य गाण्डीवं गाण्डिवं धनु:॥"
इति हेमचन्द्र:। ३। १०३॥

राधासुत:, पुं, (राधाया: सुतपत्न्या: सुत:।) कर्ण:। यथा,—
"वेदिला याज्ञसेनी च कर्णञ्चाधिरथोऽङ्गराट्।
राधासुतोऽर्कतनय: कालपृष्ठस्तु तद्गुरु:॥"
इति हेमचन्द्र:। ३। १०५॥
(यथा, महाभारते। ८। ८६। ३।
"पश्य चैनं समायुक्तं रथं कर्णस्य पार्थिव।
श्वेतवाजिसमायुक्तं युक्तं राधासुतेन च॥")

राधेय:, पुं, (राधाया अपत्यमिति। राधा+"स्त्रीभ्यो ढक्।" ४। १। १२०। इति ढक्।) कर्ण:। इति त्रिकाण्डशेष:॥ (यथा, महाभारते। १। १३४। ११।
"सुतपुत्रस्तु राधेयो गुरुं द्रोणमियात्तदा॥")

राध्य:, त्रि, (रध्यते इति। रध्+"आसुयुवपिरपीति।" ३। १। १२६। इति ण्यत्।) कथनीय:। रधधातो: कर्म्मणि घञ्प्रत्ययेन निष्पन्न:॥

रामं, क्ली, (रम्यतेऽनेनेति। रम्+घञ्।) वास्तूकम्। कुष्ठम्। इति मेदिनी। मे, २६॥ तमालपत्रम्। इति राजनिर्घण्टः॥ (नेयं तम:। यथा, ऋग्वेदे। १०। ३। ३।
"सुप्रकेतैर्द्युभिरभिर्वितिष्ठन्
रुशद्भिर्वर्णैरभिरामम स्वात्॥"
"रामं कृष्णवर्णं शार्व्वरं तम: अभ्यस्यात्मायं होमकाले अभिभूय तिष्ठति।" इति तद्भाष्ये सायण:॥)

राम:, त्रि, (रमते इति। रम्+ण:। रम्यतेऽनेनेति। रम्+घञ् वा।) मनोज्ञ:। (यथा, हरिवंशे। १६। ५।
"गाव: प्रभूतपयसो नयनाभिरामा
रामा रतेरविरतं रमयन्ति रामान्॥")
सित:। असित:। इति मेदिनी। मे, २७॥

राम:, पुं, (रमते इति। रम क्रीड़ायाम्+"अजिसितिकसन्तेभ्यो रच:।" ३। १। १४०। इति रच:।) परशुराम:। स तु विष्णोरंश: जमदग्निसुने: पुत्रत्वेन त्रेतायुगादाववतीर्ण: एकविंशतिवारान् पृथिवीं नि:क्षत्रियामकरोत्। (असौ एव समन्तपञ्चके पञ्च क्षत्रियशोणितह्रदान् विधाय पितॄन् सन्तर्पयामास। यदुक्तं महाभारते। १। २। २—११।
सौतिरुवाच।
"शृणुध्वं मम भो विप्रा ब्रुवतश्च कथा: शुभा:।
समन्तपञ्चकाख्यञ्च श्रोतुमर्हथ सत्तमा:॥
त्रेताद्वापरयो: सन्धौ राम: शस्त्रभृतांवर:।
असकृत् पार्थिवं क्षत्रं जघानामर्षचोदित:॥
स सर्व्वं क्षत्रमुत्साद्य स्ववीर्य्येणानलद्युति:।
समन्तपञ्चके पञ्च चकार रुधिरान् ह्रदान्॥
स तेषु रुधिराम्भ:सु ह्रदेषु क्रोधमूर्च्छित:।
पितॄन् सन्तर्पयामास रुधिरेणेति न: श्रुतम्॥
अथर्चीकादयोऽभ्येत्य पितरो राममब्रुवन्।
राम राम महाभाग प्रीता: स्मस्तव भार्गव॥
अनया पितृभक्त्या च विक्रमेण तव प्रभो।
वरं वृणीष्व भद्रन्ते यमिच्छसि महाद्युते॥
राम उवाच।
यदि मे पितर: प्रीता यद्यनुग्राह्यता मयि।
यच्च रोषाभिभूतेन क्षत्रमुत्सादितं मया॥
अतश्च पापान्मुच्येऽहमेष मे प्रार्थितो वर:।
ह्रदाश्च तीर्थभूता मे भवेयुर्भुवि विश्रुता:॥
एवं भविष्यतीत्येवं पितरस्तमथाब्रुवन्।
तं क्षमस्वेति निर्विण्णस्तत: स विरराम ह॥
तेषां समीपे यो देशो ह्रदानां रुधिराम्भसाम्।
समन्तपञ्चकमिति पुण्यं तत् परिकीर्त्तितम्॥"
अस्यान्यद्विवरणं परशुरामशब्दे द्रष्टव्यम्॥*)
राघव:। श्रीरामचन्द्र: स च पूर्णब्रह्मस्वरूप: अयोध्याधिपतिदशरथराजतनयत्वेन त्रेतायुगशेषे रावणादिवधार्थमवतीर्ण:। बलदेव:। स तु अनन्तदेवो विष्णोरंश: यदुवंशीयवसुदेवपुत्रत्वेन द्वापरयुगान्ते कंसादिवधार्थमवतीर्ण:। (यथा, भागवते। १। ११। १७।
"निशम्य प्रेष्ठमायान्तं वासुदेवो महामना:।
अक्रूरञ्चोग्रसेनञ्च रामञ्चाद्भुतविक्रम:॥")
त्रयो रामा यथा,—
"अघोरश्चाथ बाणश्च महाकालौ प्रकीर्त्तितौ।
भार्गवो राघवो गोपस्त्रयो रामा: प्रकीर्त्तिता:॥"
इति वह्निपुराणम्॥*॥
वरण:। घोटक:। प्रभुभेद:। इति मेदिनी। मे, २६॥ (रम्+भावे घञ्। रति:। यथा, भागवते। ७। ६। १४।
"सर्व्वत्र तापत्रयदु:खितात्मा
निर्व्विद्यते न स्वकुटुम्बरामः॥"
"स्वकुटुम्बे रामो रतिर्यस्य।" इति तत्र श्रीधरस्वामी॥) रामशब्दस्य व्युत्पत्तिर्यथा,—
"राशब्दो विश्ववचनो मश्चापीश्वरवाचक:।
विश्वानामीश्वरो यो हि तेन राम: प्रकीर्त्तित:॥

रमते रमया सार्द्धं तेन रामं विदुर्बुधाः ।
रमायां रमणस्थानं रामं रामविदो विदुः ॥
रा चेति लक्ष्मीवचनो मश्चापीश्वरवाचकः ।
लक्ष्मीपतिं गतिं रामं प्रवदन्ति मनीषिणः ॥
नाश्वां सहस्रं दित्यानां सरये यत् फलं लभेत् ।
तत् फलं लभते नूनं रामोच्चारणमात्रतः ॥"
इति ब्रह्मवैवर्ते श्रीकृष्णजन्मखण्डे ११० अध्यायः ॥
(तथा च अध्यात्मरामायणे । १ । ३ । ४४ ।
"यस्मिन् रमन्ते मुनयो विद्यया ज्ञानविप्लवे ।
तं गुरुः प्राह रामेति रमणाद्राम इत्यपि ॥"
एतत्कृतराक्षसवधवृत्तान्तं विचार्य्य यदुक्तं रामानुजेन तदाह । "अत्र युद्धदिवसगणनायां कृतकृत्तीर्थौ । पूर्वं सुवेलारोहणदिने ।
'ततोऽस्तमगमत् सूर्यः सन्ध्यया प्रतिरञ्जितः ।
पूर्णचन्द्रप्रदीप्ता च क्षपा समतिवर्त्तते ॥'
इत्युक्तेस्तद्दिनं चतुर्दश्यूपूर्णिमान्यतरदिति स्थितम् । ततः कृष्णप्रतिपदि युद्धारम्भस्तस्यामेव रात्रौ नागपाशबन्धनद्विमोक्षौ । द्वितीयायां धूम्राक्षवधः । तृतीयायां वज्रदंष्ट्रस्य । चतुर्थ्यामकम्पनस्य । पञ्चम्यां प्रहस्तस्य । षष्ठ्यां रावणभङ्गः । सप्तम्यां कुम्भकर्णवधः । अष्टम्यामतिकायादेः । नवम्यामिन्द्रजितो ब्रह्मास्त्रप्रयोगः । दशम्यां दिवा निकुम्भवधः । तद्रात्रौ मकराक्षवधः । एकादश्यादित्रयोदश्यन्तदिनत्रयेण इन्द्रजिद्वधः । चतुर्दश्यां मूलबलवधः । अमायां रावणयुद्धारम्भतद्वधाविति पञ्चदशदिनानि सर्वं युद्धमिति । अत्रेदं वक्तव्यम् । कोयं कृष्णप्रतिपत् माघकृष्णस्य वा चैत्रकृष्णस्य वा । नाद्यः चैत्रे पुष्यानक्षत्रेऽयोध्यातो वनं प्रति रामस्य प्रस्थानमिति सप्तमयोध्याकाण्डे । चैत्रे पुष्यस्य शुक्लपक्ष एव तत्रापि नवम्यादिदिनत्रये एवेति सप्तमेव ज्योतिषादौ । तत्र नवमीरिक्तात्वादभिषेकायोग्या दशम्येव तु पूर्णत्वादयोग्या । एवञ्च चैत्रशुक्लदशम्यां प्रस्थानम् । तत्र माघकृष्णायां युद्धसमाप्तौ तदुत्तरपञ्चम्यां भरद्वाजाश्रमगमनम् ।
'पूर्णे चतुर्दशे वर्षे पञ्चम्यां लक्ष्मणाग्रजः ।
भरद्वाजाश्रमं प्राप्य ववन्दे नियतो मुनिम् ॥'
इति वक्ष्यमाणत्वात् । तत्र न च चतुर्दशवर्षसमाप्तिरिति भगवतः प्रतिज्ञाहानिः । पूर्णे चतुर्दशे वर्षे इत्युक्तेरसङ्गतिश्च । युद्धोत्तरं तावत्कालं लङ्कायामवस्थानस्यालाभाच्च । चैत्रशुक्लपञ्चम्यां तत्रागमनेऽपि पञ्चदिनन्यूनतैवेति तद्वानिस्तदवस्थैव । तदुत्तरद्वितीयदिने एवायोध्याप्रवेशस्य लाभात् । अमान्तमानेन चैत्रकृष्णोत्तरपञ्चम्यां तदाश्रमगतावपि चतुर्दशवर्षतो बहुदिनाधिक्येन चतुर्दशवर्षसमाप्तिदिनेऽयोध्यागमे "मया प्राणा हेया" इति भरतप्रतिज्ञाहानिः । सा च प्रतिज्ञा चित्रकूटे रामसन्निधाविति अयोध्याकाण्डान्ते स्थितम् । एतेन चैत्रकृष्णप्रतिपदि युद्धारम्भस्तच्छुक्लप्रतिपदि रावणसंहार इति तीर्थोक्तश्चैत्रकृष्णस्येत्यन्योऽपि परास्तः । पूर्णिमान्तमानेन तिथिबहुत्वादशमासैर्वर्षगणने पञ्चदिनानां न्यूनत्वात् । अमान्तमानेन चैत्रकृष्णग्रहणे बहुदिनाधिक्यम् । सावनमानेन षष्ट्युत्तरत्रिशतादिनैर्वर्षगणने तु तिथिबहुत्ववर्षात् तत्र षड्दिनाधिक्येन चतुर्दशवर्षाणाञ्चतुरशीत्यहोरात्रबहुत्वा बहुदिनन्यूनतैव । किञ्च महाभारते युधिष्ठिरवनवासे त्रयोदशवर्षमिते किञ्चित्कालादर्वागेव तेषां प्राकट्ये दुर्योधनेन तदसमाप्तौ एषां प्राकट्येन पुनस्तावत्पर्य्यन्तं पुनरेतैर्वनवासः कर्त्तव्यो भविष्यतीति भीष्मं प्रत्युक्ते भीष्मवाक्यं विराटपर्व्वणि ।
'पञ्चमे पञ्चमे वर्षे द्वौ मासावुपजायतः ।
एषामप्यधिका मासाः पञ्च च द्वादशक्षपाः ॥
त्रयोदशानां वर्षाणामिति मे धीयते मतिः ।
सर्वे यथावच्चरितं यद्वैभिः प्रतिश्रुतम् ॥
एवमेतदुभुवं ज्ञात्वा ततो धीमत्सुरागतः ।
सर्वे चैव महात्मानः सर्वे धर्मार्थकोविदाः ॥
येषां युधिष्ठिरो राजा कस्माद्धर्म्मेपराभुवः ॥'
इति । एवञ्चेदृशग्रन्थवचनविरुद्धद्वादशमासैरेव वर्षगणना । अधिकमासगणना चोचितैव । एवञ्चाधिकमासगणनायां धर्म्महानौ न्याय्यत्वे च स्थिते कस्माद्रामस्तानुपेक्षेत । भरतो वा तान्न गणयेत् । एवञ्चामान्तमानेन चतुर्दशीयाश्विनकृष्णे । पूर्णिमान्तमानेन कार्त्तिककृष्णे षष्ठ्यां तत्समाप्तिरित्यायाति । अन्यथा चैत्रशुक्लदशम्यामारब्धस्य वनवासस्य षष्ठ्यां चतुर्दशवर्षसमाप्तिर्न कथमप्युपपद्यते । तद्गणने तु एकादशदिनन्यूनषष्ट्यां मासानां चतुर्दशवर्षेषु तृतीयायुपपद्यत एव सा । तस्मात् द्वादशसमाप्युत्तरं त्रयोदशे किञ्चिदतीते अरण्यकाण्डोक्तासन्नीत्या फाल्गुनाष्टम्यां रावणहृतसीतापहारः । ततश्चतुर्दशे किञ्चिदतीते रामस्य लङ्कासमीपगमनम् । वर्त्तते दशमो मासो द्वौ तु शेषौ प्लवङ्गमेति सीतोक्तिः सावनमानेन खहरणदिनतः कालगणनया । तत्र पूर्णचन्द्रप्रदीप्ता चेति रामोक्त्या पौषशुक्लचतुर्दश्यां पूर्णिमायां वा त्रिकूटाग्निखरप्राप्तौ रामस्य । किञ्च हनूमतो लङ्काप्रवेशोत्तरं सीतादर्शनकाले हिमत्यपायेन च प्रीतरश्मिरभ्युत्थितो नैकसहस्ररश्मिरिति वाक्येन द्वौ मासौ रक्षितव्यौ मे योऽवधिस्ते मया कृत इति रावणवाक्येन मार्गशुक्लदशम्युत्तरं हनूमतो लङ्काप्रवेशो दिनद्वयान्तरे लभ्यते इति निरूपितं सुन्दरकाण्डे । ततो मार्गकृष्णाष्टम्यां राघवप्रस्थानस्यान्यत्रोक्तत्वेन पौषपूर्णिमात्वमेवोचितं तत्राग्निदिनस्य । ततो दशपञ्चदिनानि सेनानिवेशदूतप्रेषणादिना गतानि । ततो युद्धारम्भश्च तदारभ्य भाद्रश्रावणोभयामान्तं लङ्कापुराद् बहिः सेनयोः सङ्कुलं युद्धम् । ततो बहुराक्षससंक्षयेण भीता राक्षसा लङ्कां प्रविष्टा इति तद्दिनेऽवहारः । तदुत्तरप्रतिपदि रात्राविन्द्रजित्कृतशरबन्ध इत्यादि । अतएव शरबन्धबहुराघवदर्शनकाले सीतावाक्यम् । तीर्त्वा सागरमक्षोभ्यं भ्रातरौ गोष्पदे हताविति । अनेन बहुदिनयुद्धे बहुषु राक्षसेषु क्षयितेषु यूथपकतिपयरूपेऽवशिष्टे सैन्ये तयोः शरबन्ध इति लभ्यते । तथा अयं ते समयप्राप्तः कालः प्रयातस्य महाबलेति कुम्भकर्णस्मृति रावणोक्त्या साम्प्रततन्निद्रायाः षण्मासाधिकत्वप्रतीतेरप्येवमेवोचितम् । निरूपितञ्चैतत् प्राक् । सेतुबन्धादिदृष्टान्तं त्वं न जानीषे इति कुम्भकर्णस्मृति रावणोक्त्या पूर्वमन्तकरणोत्तरं मध्ये जागरणाभावस्य प्रतीतेः । किञ्च । शरबन्धनदिनं न कृष्णप्रतिपत् । तस्याः पूर्णिमोत्तरत्वेन सम्पूर्णरात्रौ चन्द्रसत्तया तस्मिंस्तमसि दारुणे इत्यादुक्तेरसङ्गत्यापत्तेरतः सा शुक्लप्रतिपदाह्या । एवञ्चामान्तपञ्चमाद्यं युद्धमित्यस्यात्यन्तमसङ्गत्यापत्तिः । यत्तु अमायामेव रावणवध इति तत्तु न युक्तम् । इन्द्रजिद्वधोत्तरम् ।
'अभ्युत्थानं त्वमद्यैव कृष्णपक्षचतुर्दशीम् ।
कृत्वा निर्य्याह्यमावास्यां विजयाय बलैर्वृतः ॥'
इति रावणस्मृति सुपार्श्वोक्त्या । चतुर्दश्यां रावणप्रेषितबलवधोत्तरममायां निर्गतरावणेन रामलक्ष्मणयोर्युद्धे रात्रौ लक्ष्मणस्य शक्तिघातोत्तरं रावणलङ्काप्रवेशश्रुत्युक्तया ततो लक्ष्मणचिकित्सोत्तरं पुना रामरावणयुद्धस्य वाल्मीकिनैव सप्तमुक्तया तदसम्भवात् । किञ्च । आदित्यहृदयस्यादित्यं प्रेक्ष्य जप्तेदं परं हर्षमवाप्स्यसीत्यनेन सूर्य्यदर्शनोत्तरं जपश्रुत्युक्तया रावणमरणोत्तरं स्थिरप्रभाभ्यभवद्दिवाकर इत्युक्त्या दिवा तद्वधप्रतीत्या च चिरकालयुद्धोत्तरं लक्ष्मणे शक्तिघातस्य तदथौषधीपर्व्वतानयनस्य चोक्तत्वेनामारात्रौ शक्तिघातप्रतीत्या रणाद्रावणापगमस्य प्रतीत्या च तद्विरोधात् । तथा पाद्मे ।
'ततो जग्मे महायुद्धं सङ्कुलं कपिरक्षसाम् ।
मध्याह्ने प्रथमं युद्धं प्रारब्धं प्रतिपद्यभूत् ॥'
प्रतिपदि शुक्लप्रतिपदीत्यर्थः । उक्तयुक्तेः ।
'ततो निशि समागम्य मायावी शुक्रनिद्बली ।
बबन्ध नागपाशैस्तौ राघवौ च हरिव्रजान् ॥'
ततः चिरकालसङ्कुलयुद्धोत्तरम् । अन्यथा तस्यां निशीत्येव वदेत् । अग्रे द्वितीयेऽह्नि षष्ठ्यामिति चोक्त्या दारुणे तमसीति रामायणोक्त्या च भाद्रश्रावणोभयमामोत्तरप्रतिपद्येतदिति बोध्यम् ।
'वैनतेयस्तदाभ्येत्य तानि चास्त्राण्यमोचयत् ।
द्वितीयेऽह्नि धूम्राक्षं हनूमान्निजघान वै ॥
तृतीयेऽह्नि वज्रदंष्ट्रं खड्गाभिच्छेद चाङ्गदः ।
जघान हनूमान् भूयश्चतुर्थेऽह्न्यकम्पनम् ॥
प्रहस्तं पञ्चमीतिथ्यां नीलश्चिच्छेदमर्द्दनि ।
रावणः परिभूतोऽभूत् षष्ठ्यां रामेण धन्विना ॥
अथ लङ्केश्वरः खिन्नः कुम्भकर्णं सहोदरम् ।
शैलसुन्दरघातान्धबोधयत् ।
जघान तं कुम्भकर्णं रामः सप्तमवासरे ॥'

इदं बोधनं दिनद्वयेन । तं बोधितं कुम्भकर्णम् । सप्तमवासरे बोधनोत्तरं सप्तमवासरे इत्यर्थः । यत् तु बोधनं षष्ठ्यां रात्रौ सप्तम्यामेतदध इति तन्न । तदुत्थापने उक्तस्यातिप्रयासस्य रात्रिमात्रेणासम्भवात् । रावणमन्दिरगमनकाले सूर्यप्रभया रावणमन्दिरस्यातिभास्वरत्ववर्णनेन मन्त्रादिना सप्तम्यां युद्धासम्भवात् । इन्द्रजितो दिनत्रयेण वधोऽस्य यामषट्केनेत्यस्यासङ्गतत्वाच्च । एवञ्च भाद्रपूर्णिमायामेतदधः ।

'जघान लक्ष्मणोऽन्येद्युरतिकायं दशास्यजम् ।
ववन्दात्येद्युरिन्द्रारिर्नक्तञ्चेण नृपौ कपीन् ॥
हनूमता समानीतो महौषधमहीधरः ।
तस्यानिलस्पर्शवशात् सर्वे ते समुत्थिताः ॥
अन्येद्युः कपिराट्कुम्भं निकुम्भं वायुजोऽवधीत् ।
तस्यां निशि रघुश्रेष्ठो जघान मकरेक्षणम् ॥
मायासीतावधञ्चक्रे शुक्रजिद्दशमूर्द्धनि ।
तेन खिन्नोऽभवद्राम आश्वस्तो लक्ष्मणेन सः ।
त्रयोदश्यहे सौमित्रिस्त्रिदिनं योधयन् बली ॥
जघान शुक्रजेतारं रामध्यानेन हेतुना ॥'

अन्येद्युः अन्येषु दिवसेषु । अत्रातिकायग्रहणं त्रिशिरोदेवान्तकनरान्तकमहोदरमहापार्श्वोपलक्षणम् । लक्ष्मणग्रहणमङ्गदहनूमतोरुपलक्षणम् । एवं षड्भिर्दिनैः षष्ठ्यां वधः । पूर्वं क्रमेणैव तद्वधोक्तेः । अन्येद्युः सप्तम्याम् । पर्व्वतानयनमष्टम्याम् । अन्येद्युर्नवम्याम् । तस्यां निशि नवमीरात्रौ तदन्ते मायासीतावधः । ततो दशमीचतुर्थयाममारभ्य त्रयोदशीचतुर्थयामपर्यन्तमिन्द्रजिद्वधः ।

'ततोऽवधीन्मूलबलञ्चतुर्दश्यां रघूद्वहः ।
दर्शेऽथ निर्ययौ राजा योद्धुं रामेण संयुगे ॥
चतुरङ्गबलैः सार्द्धं मन्त्रिभिर्दशकन्धरः ।
कृतचामरसंयुक्तः सर्व्वाभरणभूषितः ॥
महारथगतो द्वाराद्दुत्तरान्निर्ययौ बहिः ।
आगतो रक्षसां राजा ब्रह्मघ्नो देवकण्टकः ॥
योद्धुं रघुवरेणेति शुश्रुवे कलहध्वनिः ।
तत्र युद्धं समभवद्वानराणाञ्च रक्षसाम् ॥
रामरावणयोश्चैव तथा सौमित्रिणा सह ॥
शूलमिन्द्रजिते प्राप संक्रुद्धः सोऽनुजं प्रति रावणः ।
वक्षसा धारयामास सौमित्रिस्तां वियद्गताम् ॥
तया स बाध्यमानः सन् पपात धरणीतले ॥
हनूमता जीवितोऽभूदोषधानयनात् पुनः ।
ततः क्रुद्धो महातेजा राघवो राक्षसान्तकः ॥
जघान राक्षसान् सर्व्वान् शरैः कालान्तकोपमैः ।
भयात् प्रदुद्राव रणे लङ्कां प्रति निशाचरः ॥
जगद्रामममयं पश्यन्निर्व्वेदात् स्वगृहं विशत् ।
निकुम्भिलां ततः प्राप्य होमञ्चक्रे जिगीषया ॥
ध्वंसितं वानरेन्द्रैस्तदभिचारात्मकं रिपोः ।
पुनरुत्थाय पौलस्त्यो रामेण सह योधितुम् ॥
दिव्यं स्यन्दनमारुह्य राक्षसैर्निर्ययौ बहिः ॥'

इदं निर्गमनमाश्विनशुक्लप्रतिपदि ।

'ततः शतमखो दिव्यं रथं हर्य्यश्वसंयुतम् ।
राघवाय स्वसूतेन प्रेषयामास भक्तिमान् ॥
तन्तु मातलिनानीतमारुह्य रथसत्तमम् ।
स्तूयमानः सुरगणैर्युयुधे तेन रक्षसा ॥
ततो युद्धमभूद्घोरं रामराघवयोर्महत् ।
सप्ताह्निकमहोरात्रं शस्त्रास्त्रैरतिभीषणैरिति ॥'

ततो मातलिरथागमनदिनोत्तरम् । एवञ्च नवम्यां तद्वधः । तदुक्तं कालिकापुराणे ।

'रामस्यानुग्रहार्थं वै रावणस्य वधाय च ।
रात्रावेव महादेवी ब्रह्मणा बोधिता पुरा ॥
ततस्तु त्यक्तनिद्रा सा नन्दायामाश्विनेऽसिते ।
जगाम नगरीं लङ्कां यत्रासीद्राघवः पुरा ॥'

आगत इति शेषः । इदञ्चागमनं रात्र्यन्ते तदेव मातलिरथागमनम् ।

'तत्र गत्वा महादेवी तदा तौ रामलक्ष्मणौ ।
युद्धेन योजयामास स्वयमन्तर्हिताम्बिका ॥
राक्षसानां वानराणां जग्ध्वा सा मांसशोणितम् ।
रामरावणयोर्युद्धं सप्ताहं सा न्ययोजयत् ॥
व्यतीते सप्तमे रात्रे नवम्यां रावणं ततः ।
रामेण घातयामास महामाया जगन्मयी ॥
यावत्तयोः स्वयं देवो युद्धकेलिमुदैक्षत ।
तावत्तु अष्टरात्राणि सर्व्वैर्देवैः सुपूजिता ॥
निहते रावणे वीरे नवम्यां सकलैः सुरैः ।
विष्णोरपूजां दुर्गायाश्चक्रे लोकपितामहः ॥'

सकलैः सुरैरित्यस्य सङ्गतिः शेषः ।

'रामरावणबाणैस्तु युद्धञ्चावेक्ष्य भीतिदम् ।
तृतीयायान्तु लङ्कायाः पूर्व्वोत्तरदिशि स्थितम् ॥
स्वातिनक्षत्रयुक्तायां भीतं सुरबलं महत् ।
भ्रान्त्यर्थं वारयामास देवेन्द्रो वचनाद्धरेः ॥'

भ्रान्त्यर्थं भयभ्रान्त्यर्थम् ।

'ततस्तु श्रवणे नाथ दशम्यां चण्डिका शुभाम् ।
विहस्य चक्रे भ्रान्त्यर्थं बलनीराजनं हरिः ॥'

रिपुजनितभयभ्रान्त्यर्थमित्यर्थः ।

'नीराजितबलः शक्रस्तञ्च रामं सलक्ष्मणम् ।
सम्भाष्य प्रययौ स्वर्गं सह देवैः शचीपतिः ॥
इति वृत्तं पुरा कल्पे मनोः स्वायम्भुवेऽन्तरे ।
पुरा कल्पे यथा वृत्तं प्रतिकल्पं तथैव तु ॥
प्रवर्त्तते स्वयं देवी दैत्यानां नाशनाय वै ।'

स्वायम्भुवमन्वन्तररूपे पुरा कल्पे इत्यर्थः । प्रतिकल्पं प्रतिमन्वन्तरमित्यर्थः । जलप्लवसामान्येन तत्रापि कल्पव्यवहारात् ।

'प्रतिकल्पं भवेद्रामो रावणश्चापि राक्षसः ।
तथैव जायते युद्धं तथैव चिदशागमः ॥
एवं रामसहस्राणि रावणानां तथैव च ।
भवितव्यानि भूतानि तेषु देवी प्रवर्त्तते ॥
तां पूजन्ति सुराः सर्व्वे बलं नीराजयन्ति च ।
तथैव च नराः सर्व्वे कुर्य्युः पूजां यथाविधि ॥
बलनीराजनं राजा कुर्य्याद् बलविवृद्धये ॥'

इति । इयञ्च ब्रह्मबोधिता महादेवी अम्बौ प्रविष्टा सीतैव भगवच्छक्तिरूपेति प्रतिभाति । अतएव ब्रह्मवैवर्त्ते प्रथमेऽंशविभागे । प्रतिकल्पं विष्णोश्चरितं कीदृशमिति नारदप्रश्ने ब्रह्मवाक्यम् ।

'स एव भगवान्मूलं प्रतिमन्वन्तरं मुने ! ।
वधाय दुष्टदैत्यानां भूमिभारहृतां भुवि ॥
कलिद्वापरयोः सन्धौ भविष्यति न संशयः ।
प्रतिकल्पं त्वेवमेव भविष्यति न संशयः ॥" इति ।

सहस्रशत्वो रामोऽपि भविता ब्रह्मणो दिने इति ब्रह्मवैवर्त्ते प्रथमविभागस्थे राधां प्रति कृष्णवाक्ये । दिने इति जातावेकवचनम् । दिनेष्वित्यर्थः । पूर्वं प्रतिमन्वन्तरमित्युक्तेः । प्रतिचतुर्युगं रामावतार इति तु न युक्तम् । चतुर्विंशतितमचतुर्युगे रामावतारस्याष्टाविंशतितमचतुर्युगे कृष्णावतारस्य हरिवंशे पुराणान्तरे च प्रसिद्धत्वादिति दिक् । अग्निवेश्यरामायणमिति प्रसिद्धग्रन्थेषु ।

'रामः पञ्चदशे वर्षे षड्वर्षामपि मैथिलीम् ।
उपयेमे त्वयोध्यायां द्वादशाब्दानुवास सः ॥
सप्तविंशतिमे वर्षे वनवासमकल्पयत् ।
अष्टादश तु वर्षाणि सीतायास्तु तदाभवन् ॥
चिरात्रसुदकाहारश्चतुर्थेऽह्नि फलाशनः ।
पञ्चमे चित्रकूटे तु रामो वासमकारयत् ॥
अथ त्रयोदशे वर्षे पञ्चवट्यां महामनाः ।
रामो विरूपयामास घोरां शूर्पणखां वने ॥
ततो माघे सिताष्टम्यां सुहूर्त्ते वृन्दसंज्ञके ।
राघवाभ्यां विना सीतां जहार दशकन्धरः ॥'

माघे शुक्लचतुर्दश्यामिति पाठान्तरम् ।

'मार्गशुक्लदशम्यान्तु वसन्तौ रावणालये ।
सम्पातिर्दशमे मासे आचख्यौ वानरेषु ताम् ॥
एकादश्यां महेन्द्राग्रात् प्लुतवे शतयोजनम् ।
तत्रात्रिशिष्ये सीताया दर्शनं हि हनूमतः ॥
द्वादश्यां शिंशपावृक्षे हनूमान् पर्य्यवस्थितः ।
तस्यां निशायां सीतायां विश्वासालापसत्कथाः ॥
अक्षादिभिस्त्रयोदश्यां ततो युद्धमवर्त्तत ।
वधो ह्यक्षकुमारस्य वनविध्वंसनं तथा ॥
ब्रह्मास्त्रेण चतुर्दश्यां बद्धः शक्रजिता कपिः ।
वह्निना पुच्छयुक्तेन लङ्कायाः दहनं तथा ॥
पौर्णमासीं महेन्द्राद्रौ पुनरागमनं कपेः ।
मार्गासितप्रतिपदः पञ्चभिः पथि वासरैः ॥
पुनरागम्य षष्ठेऽह्नि ध्वस्तं मधुवनञ्च तैः ।
सप्तम्यां प्रत्यभिज्ञानदानं शुद्धिनिवेदनम् ॥
अष्टम्युत्तरफल्गुन्यां मुहूर्त्ते विजयाभिधे ।
मध्यं प्राप्ते सहस्रांशौ प्रस्थानं राघवस्य तु ।
वासरे सप्तमेऽम्भोधौ स्कन्धावारनिवेशनम् ॥
पौषशुक्लप्रतिपदस्तृतीया यावदम्बुधेः ।
उपस्थानं ससैन्यस्य राघवस्य बभूव ह ॥
विभीषणश्चतुर्थ्यां वै रामेण सह सङ्गतः ।
समुद्रतरणार्थाय पञ्चम्यां मन्त्र उद्यमः ॥
प्रायोपवेशनञ्चक्रे रामो दिनचतुष्टयम् ।
समुद्रवरलाभश्च सेतूपायप्रकीर्त्तनम् ॥
सेतोर्दशम्यामारम्भस्त्रयोदश्यां समापनम् ।
चतुर्दश्यां सुवेलाग्रे रामः सैन्यं न्यवेशयत् ॥
पौर्णमास्यां द्वितीयान्तं चिदिनैः सैन्यतारणम् ।
तृतीयाया दशम्यन्तं मन्त्रो गुल्मनिवेशने ॥

रामः

शुक्लसारणयोः सैन्यप्राग्निरेकादशे दिने।
माघे सितायां द्वादश्यां सैन्यसंख्या कृता तु वै॥
सारणेन कपीनान्तु सारासारोपवर्णनम्।
त्रयोदश्याद्यमां यावल्लङ्कायां दिवसैस्त्रिभिः॥
रावणः सैन्यसंख्यानं रणायोत्साहनं तथा।
ययावथाङ्गदो दौत्यं माघशुक्लादिवासरे॥
माघशुक्लद्वितीयादिदिनैः सप्तभिरेव तु।
रक्षसां वानराणाञ्च युद्धमासीत् सुदारुणम्॥
माघशुक्लनवम्यान्तु राघविन्द्रजिता रणे।
रामलक्ष्मणयोर्नागपाशैर्बन्धो बभूव ह॥
नागपाशविमोक्षार्थं दशम्यां गरुडोऽभ्यगात्।
अत्रावहारः कथितो दशम्यादिदिनद्वयम्॥
द्वादश्यामाञ्जनेयेन धूम्राक्षस्य वधः कृतः।
त्रयोदश्यान्तु तेनैव निहतोऽकम्पनो रणे॥
माघशुक्लचतुर्दश्यां यावत् कृष्णादिवासरम्।
त्रिदिनेन प्रहस्तस्य नीलेन विहितोऽवधः॥
माघासितद्वितीयायाश्चतुर्थ्यन्तदिनैस्त्रिभिः।
रामेण तुमुले युद्धे रावणो द्रावितो रणात्॥
पञ्चम्याख्यष्टमी यावद्रावणेन प्रबोधितः।
कुम्भकर्णः समुत्तस्थौ तावद्युद्धञ्चतुर्दिनम्॥
कुम्भकर्णो दिनैः षड्भिर्न्यस्यास्तु चतुर्दशीम्।
रामेण निहतो युद्धे बहुवानरभक्षकः॥
अमावास्यादिने शोकादवहारो बभूव ह।
फाल्गुनादिप्रतिपदश्चतुर्थ्यन्तदिनैस्ततः॥
नरान्तकप्रभृतयो निहताः पञ्च राक्षसाः।
पञ्चम्याः सप्तमी यावदतिकायवधस्ताहात्॥
अष्टम्या द्वादशी यावन्निहतौ दिनपञ्चकात्।
निकुम्भकुम्भावुर्व्वन्तु मकराक्षश्चतुर्दिनैः॥
फाल्गुनस्य द्वितीयायां कृष्णे शुक्रजिता
जितम्।
तृतीयायास्तु सप्तम्यां हरयः पञ्चवासरात्॥
औषध्यानयने व्यग्रास्तदासीदवहारकः।
तत्र त्रयोदशीं यावद्दिनैः षड्भिस्तु शुक्रजित्॥
लक्ष्मणेन हतो युद्धे विघ्नितोऽभिचरन् क्रमात्।
चतुर्दश्यां दशग्रीवरणदीक्षाविधिः क्रमात्॥
अमावास्यां ययौ वीरो युद्धाय दशकन्धरः।
चैत्रशुक्लप्रतिपदः पञ्चमी दिनपञ्चकैः॥
रावणस्य प्रधानानां युध्यतामभवत् क्षयः।
चैत्रषष्ठ्यष्टमी यावन्महापार्श्वादिमारणम्॥
चैत्रशुक्लनवम्यान्तु सौमित्रेः शक्तिभेदनम्।
द्रोणाद्रिराजनयेन लक्ष्मणार्थेसुपाहृतः॥
दशम्यामवहारोऽभून्नाद्यौ युद्धं तूरक्षसोः।
एकादश्यान्तु रामाय रथो मातलिसारथिः॥
अष्टादशदिने रामो दैरथे रावणं वधीत्।
द्वादश्याः शुक्लपक्षस्य यावत् कृष्णचतुर्दशीम्॥
माघशुक्लद्वितीयायाश्चैत्रकृष्णचतुर्दशीम्।
अष्टाशीतिदिनं युद्धं मध्ये पञ्चदशाहकम्॥
युद्धावहारः संग्रामक्षिप्तप्रतिदिनान्यभूत्।
संस्कारो रावणादीनाममावास्यादिनेऽभवत्॥
वैशाखादितिथौ रामः सुवेलं पुनरागतः।
अभिषिक्तो द्वितीयायां लङ्काराज्ये विभीषणः॥
सीतामुद्धिस्तृतीयायां देवेभ्यो वरलम्भनम्।

रामः

वैशाखस्य चतुर्थ्यान्तु रामः पुष्यकमास्थितः॥
पूर्णे चतुर्दशे वर्षे पञ्चम्यां माधवस्य तु।
भरद्वाजाश्रमं रामः ससीतः पुनरागमत्॥
नन्दिग्रामे तु षष्ठ्यां वै भरतेन समागमः।
सप्तम्यामभिषिक्तोऽसावयोध्यायां रघूत्तमः॥
जानकी रामसहिता रावणस्य निवेशने।
मनुमासान् स्थिता पञ्चदशवासरसंयुतेति॥'
यत्तु सर्व्वांशे अनिश्चितप्रामाण्यम्। कालिकापुराणादिविरोधात्। इदं कल्पान्तरविषयमिति न युक्तम्। तद्विरोधादेव। तस्मात् क्रियाविरोधे पुराणेषु उपसंहार एव न्यायः। शाखान्तरोक्ताङ्गोपसंहारवत्। यथा कुम्भकर्णवधोऽत्र रामेणोक्तो भारते लक्ष्मणेन तादृशे विषये न तु कल्पभेदेन व्यवस्था। अन्यविषये एव तु हरिवंशोक्ता सेति बोध्यम्।"इति श्रीरामायणतीलके लङ्काकाण्डे ११० सर्गः॥) तस्य परिपूर्णतमत्वं यथा,—

"सर्व्वे चांशकलाः पुंसः कृष्णस्तु भगवान्
स्वयम्।
परिपूर्णतमो रामो ब्रह्मशापात् स्वविस्मृतः॥"
इति ब्रह्मवैवर्त्ते श्रीकृष्णजन्मखण्डे ११६ अध्यायः॥
अथ श्रीराममन्त्राः।
"अनन्तोऽग्निासनः सेन्दुर्ब्बीजं रामाय हृन्मनुः।
षड़क्षरोऽयमादिष्टो भजतां कामदो मनुः॥"*
तस्य तारकब्रह्ममन्त्रो यथा,—
"सर्व्वेषां राममन्त्राणां मन्त्रराजः षड़क्षरः।
तारकब्रह्म चेत्युक्तं तेन पूजा प्रशस्यते॥"
तन्मन्त्रस्य रां रामाय स्वाहा। इति रामार्चनचन्द्रिकायाम् ४ पटलः॥ अस्य पूजाप्रयोगः। प्रातःकृत्यादि वेद्योक्तपीठन्यासान्तं कर्म्म विधाय ऋष्यादिन्यासं कुर्य्यात्। शिरसि ॐ ब्रह्मणे ऋषये नमः। मुखे गायत्रीच्छन्दसे नमः। हृदि श्रीरामाय देवतायै नमः। ततः कराङ्गन्यासौ। रां अङ्गुष्ठाभ्यां नमः। रीं तर्ज्जनीभ्यां स्वाहा। रूं मध्यमाभ्यां वषट्। रैं अनामिकाभ्यां हुम्। रौं कनिष्ठाभ्यां वौषट्। रः करतलपृष्ठाभ्यां फट्। एवं हृदयादिषु। ततो मन्त्रन्यासः। ब्रह्मरन्ध्रे रां नमः। भ्रूमध्ये रा नमः। हृदि मा नमः॥ नाभौ य नमः। लिङ्गे न नमः॥ पादयोर्म नमः। ततो मूर्त्तिपञ्जरादिविधिं विधाय देवं ध्यायेत्।

"कालाम्भोधरकान्तिकान्तमनिशं वीरासनाध्यासिनं
मुद्रां ज्ञानमयीं दधानमपरं हस्ताम्बुजं जानुनि।
सीतां पार्श्वगतां सरोरुहकरां विद्युन्निभां राघवं
पश्यन्तं सुकुटाङ्गदादिविविधाकल्पोज्ज्वलाङ्गं
भजे॥"

एवं ध्यात्वा मानसैः संपूज्य ब्रह्मस्थापनं कुर्य्यात्। ततः पीठपूजां विधाय वेद्योक्तपीठशक्तीः पीठमनुञ्च संपूज्य पुनर्ध्यात्वा वाहनादिपञ्चपुष्पाञ्जलिदानपर्य्यन्तं विधायावरणपूजामारभेत्। यथा देववामपार्श्वे श्रीं

रामः

सीतायै नमः। अग्रे ॐ शार्ङ्गाय नमः। दक्षिणवामपार्श्वयोः ॐ शरेभ्यो नमः। ॐ चापाय नमः तद्बहिः केशरेषु अस्त्रादिकोणेषु मध्ये दिक्षु च रां हृदयाय नमः। इत्यादिना षड़ङ्गानि पूजयेत्। ततो दलेषु पूर्ब्बादिदिक्षु ॐ हनुमते नमः। ॐ सुग्रीवाय नमः। ॐ भरताय नमः। ॐ विभीषणाय नमः। ॐ लक्ष्मणाय नमः। ॐ अङ्गदाय नमः। ॐ शत्रुघ्नाय नमः। ॐ जाम्बवते नमः। दलाग्रेषु ॐ हृदाय नमः। ॐ जयन्ताय नमः। ॐ विजयाय नमः। ॐ सुराष्ट्राय नमः। ॐ राष्ट्रवर्द्धनाय नमः। ॐ अकोपाय नमः। ॐ धर्म्मपालाय नमः। ॐ सुमन्त्राय नमः। तद्बहिरिन्द्रादीन् वज्रादींश्च पूजयेत्। ततो धूपादिविसर्ज्जनान्तं कर्म्म समापयेत्॥ * ॥ अस्य पुरश्चर्य्या षड़्लक्षजपः। तथा च।

"ऋतुलक्षं जपेन्मन्त्रं दशांशं कमलैः शुभैः।
जुहुयादर्चिते वह्नौ ब्राह्मणान् भोजयेत्ततः॥"
अयं मन्त्रः षड़्विधः। तथा च।
"स्वकामशक्तिवाक्लक्ष्मीतारादाः पञ्चवर्णकः।
षड़क्षरः षड़्विधः स्यात् चतुर्व्वर्गफलप्रदः॥
ब्रह्मा सम्मोहनः शक्तिर्दक्षिणामूर्त्तिरुच्यते।
अगस्त्यः श्रीशिवः प्रोक्तो मुनयोऽत्र क्रमादिमे॥
अथवा कामबीजादेर्विश्वामित्रो मुनिर्मतः।
छन्दो गायत्रीसंज्ञञ्च श्रीरामश्चैव देवता॥
ध्यानपूजादिकं सर्व्वं पूर्ब्ववच्च समाचरेत्॥"
तथा।
"जानकीवल्लभं डेऽन्तं वह्निजाया हृदादिकम्।
दशाक्षरोऽयं मन्त्रः स्याद्वशिष्ठस्तु ऋषिर्विराट्॥
छन्दस्तु देवता रामः सीतापाणिपरिग्रहः।
आद्यं बीजं द्वितः शक्तिः कामेनाङ्गक्रिया मता॥
शिरोललाटभ्रूमध्यतालुकण्ठेषु हृद्यपि।
नाभ्यूरुजानुपादेषु दशवर्णान् न्यसेन्मनोः॥"*॥
ततो ध्यानम्।

"अयोध्यानगरे चित्ररत्नसौवर्णमण्डपे।
मन्दारपुष्पैराबद्धविताने तोरणान्विते॥
सिंहासनसमारूढं पुष्पकोपरि राघवम्।
रक्षोभिर्हरिभिर्देवैर्दिव्ययानगतैः शुभैः॥
संस्तूयमानं मुनिभिर्गन्धर्व्वैः परिशोभितम्।
सीतालङ्कृतवामाङ्गं लक्ष्मणेनोपशोभितम्॥
श्यामं प्रसन्नवदनं सर्व्वाभरणभूषितम्।
ध्यायन्नेवं जपेन्मन्त्रं वर्णलक्षमनन्यधीः॥"
अन्यत् सर्व्वं पूर्ब्ववत्॥ * ॥
"वह्निर्नारायणेनाढ्यो जठरः केवल एव च।
द्व्यक्षरो मन्त्रराजोऽयं सर्व्वाभीष्टफलप्रदः॥
श्रीमाया मध्यगैकैकबीजाद्यन्तगतो मनुः।
चतुर्व्वर्णः स एव स्यात् षड़्वर्णो वाञ्छितप्रदः॥
स्वाहान्तो हुं फड़न्तो वा नमोऽन्तो वा
भवेन्मनुः॥"
तथा।
"तारमायारमाशङ्खवाक्खबीजैस्तु षड़्विधः।
त्र्यक्षरो मन्त्रराजः स्यात् सर्व्वाभीष्टफलप्रदः॥

द्व्याक्षरश्चन्द्रभद्रान्तो चन्द्रोऽयं चतुरक्षरः ।
रामाय हृन्मनुः प्रोक्तो मन्त्रः पञ्चाक्षरः परः ॥
पञ्चाग्न्यात्मकावर्णः प्रत्येकपूर्व्वको मनुः ।
लक्ष्मीवाक्मन्मथादिश्च तारान्तः स्यादनेकधा ॥
तेन यं राम । त्रां राम । इत्यादि त्र्यक्षरः ।
तथा लक्ष्मीवाक्मन्मथादीनामन्यतमदानेऽपि त्र्यक्षरः । तेन श्रीं राम । ह्रें राम । क्लीं राम इति ।
"वह्निस्थं शयनं विष्णोरर्द्धचन्द्रविभूषितम् ।
एकाक्षरो मनुः प्रोक्तो मन्त्रराजः सुरद्रुमः ॥
ब्रह्मा मुनिः स्याद्गायत्री च्छन्दो रामस्तु देवता ॥"*॥
एकाक्षरे तु द्वादशलक्षजपः पुरश्चरणम् । तथा च । भानुलक्षं जपेन्मन्त्रं इति वचनात् अन्येषां षड्लक्षजप इति विशेषः । ध्यानपूजादिकं षड्क्षरवत् ॥ * ॥ अथ श्रीरामचन्द्रप्रयोगः ।
"जातीप्रसूनैर्जुहुयादिन्दिरावाप्तये नरः ।
जातीप्रसूनैर्जुहुयाच्चन्द्रनाभःसमृद्धिदः ॥
राजवश्याय कमलैर्धनधान्यादिसम्पदः ।
नीलोत्पलानां होमेन वशयेदखिलं जगत् ॥
बिल्वप्रसूनैर्जुहूयादिन्दिरावाप्तये नरः ।
दूर्व्वाहोमेन दीर्घायुर्भवेन्मर्त्यो निरामयः ॥
रक्तोत्पलहुतान्मर्त्यो धनमाप्नोति वाञ्छितम् ।
मेधाकामेन होतव्यं पलाशकुसुमैर्नरैः ॥
तच्छ्रममम्भः प्रविवेश कविर्भवति वत्सरात् ।
तन्मिश्रितान्नं भुञ्जीत महदारोग्यवर्द्धनम् ॥"*॥
अथ श्रीरामचन्द्रस्तोत्रम् ।
श्रीहनूमानुवाच ।
"तिरश्चामपि राजेति समवायं समीयुषाम् ।
यथा सुग्रीवमुख्यानां यस्तमुग्रं नमाम्यहम् ॥
सकृदेव प्रपन्नाय विभिष्टायैव यत् प्रियम् ।
विभीषणायाब्धितटे यस्तं वीरं नमाम्यहम् ॥
यो महान् पूजितो याति महाब्धेः करुणाकृतम् ।
स्तुतं जटायुना येन महाविष्णुं नमाम्यहम् ॥
तेजसाप्यायिता यस्य ज्वलन्ति ज्वलनादयः ।
प्रकाशते स्वतन्त्रो यस्तं ज्वलन्तं नमाम्यहम् ॥
सर्व्वतोमुखता येन लीलया दर्शिता रणे ।
राक्षसेश्वरयोधानां तं वन्दे सर्व्वतोमुखम् ॥
नृभावन्तु प्रपन्नानां छिनत्ति च यथा नृषु ।
सिंहः सत्त्वेष्विवोत्कृष्टस्तं नृसिंहं नमाम्यहम् ॥
यस्माद्बिभ्यति वातार्कज्वलनेन्द्राः सदृत्यवः ।
भियं धिनोति पापानां भीषणं तं नमाम्यहम् ॥
परस्य योग्यताप्रेक्षारहितो नित्यमङ्गलम् ।
ददात्येव निजौदार्य्यात्तं भद्रं नमाम्यहम् ॥
यो भृत्यु निजदासानां मारयत्यखिलेश्वरः ।
तत्रोदाहृतयो वक्त्रो भृत्युघ्नं नमाम्यहम् ॥
यत्पादपद्मप्रणतो भवेदुत्तमपूरुषः ।
तमीशं सर्व्वदेवानां नमनीयं नमाम्यहम् ॥
आत्मभावं ससुतवित्त्य दाक्षिण्येनैव रघूत्तमम् ।
भजेऽहं प्रत्यहं रामं ससीतं सहलक्ष्मणम् ॥

तित्यं श्रीरामभक्तस्य किङ्करा यमकिङ्कराः ।
शिवमय्यो दिशस्तस्य सिद्धयस्तस्य दासिकाः ॥
इदं हनूमता प्रोक्तं मन्त्रराजात्मकं स्तवम् ।
पठेदनुदिनं यस्तु स रामे भक्तिमान् भवेत् ॥"
इति हनूमत्कल्पे मन्त्रराजात्मकं श्रीरामचन्द्रस्तोत्रं समाप्तम् ॥ * ॥ अथ श्रीरामचन्द्राष्टोत्तरशतकं नाम ।
वेदव्यास उवाच ।
"शृणु गाङ्गेय वक्ष्यामि रामस्याद्भुतकर्म्मणः ।
नामाष्टशतकं पुण्यं त्रिषु लोकेषु विश्रुतम् ॥
नातः परतरं गुह्यं त्रिषु लोकेषु विद्यते ॥
कैलासशिखरे रम्ये नानारत्नविचित्रिते ।
एकाग्रमनसो भूत्वा विष्णुमाराध्य भक्तितः ॥
उपविष्टस्ततो भोक्तुं पार्व्वतीं शङ्करोऽब्रवीत् ।
पार्व्वत्येहि मया सार्द्धं भोक्तुं भुवनवन्दिते ॥
तमाह पार्व्वती देवी जप्या नाम सहस्रकम् ।
ततो भोक्ष्याम्यहं देव भुज्यतां भवता प्रभो ॥
ततस्तां पार्व्वतीं प्राह प्रहसन् परमेश्वरः ॥
धन्यासि कृतपुण्यासि विष्णुभक्तासि पार्व्वती ।
दुर्लभा वैष्णवी भक्तिर्भागधेयं विनेश्वरि ॥
रकारादीनि नामानि शृण्वतो मम पार्व्वति ।
मनः प्रसन्नतामेति रामनामाभिशङ्कया ॥
रमन्ते योगिनोऽनन्ते नित्यानन्दे चिदात्मनि ।
इति रामपदेनासौ परं ब्रह्माभिधीयते ॥
राम रामेति रामेति रमे रामे मनोरमे ।
सहस्रनामभिस्तुल्यं रामनाम वरानने ॥
रामेत्युक्त्वा महादेवि भुङ्क्ष्व सार्द्धं मयाधुना ।
ततो रामेति नामोक्त्वा सह भुक्त्वा च पार्व्वती ॥
ततो भुक्त्वा महादेवी पतिना सह संस्थिता ।
पप्रच्छ श्रीमहादेवं प्रीतिप्रवणमानसा ॥
सहस्रनामभिस्तुल्यं रामनाम त्वयोदितम् ।
तस्मान्नाम्नापि नामानि सन्ति चेद्रावणद्विषः ।
कथ्यतां मम देवेश तच्च मे प्रीतिरुत्तमा ॥
श्रीशङ्कर उवाच ।
शृणु नामानि वक्ष्यामि रामचन्द्रस्य पार्व्वती ।
लौकिका वैदिकाः शब्दा ये केचित् सन्ति पार्व्वति ॥
नामानि रामचन्द्रस्य सहस्रं तेषु चाधिकम् ।
तेषु चात्यन्तसुखं हि नाम्नामष्टोत्तरं शतम् ॥
विष्णोरेकैकनामानि सर्व्ववेदाधिकं फलम् ।
तादृङ्नामसहस्रेषु रामनाम परं मतम् ॥
जपतः सर्व्ववेदांश्च सर्व्वमन्त्रांश्च पार्व्वति ।
तस्मात् कोटिगुणं पुण्यं रामनाम्नैव लभ्यते ॥
अस्य श्रीरामनामाष्टोत्तरशतनामस्तोत्रस्य ईश्वर ऋषिरनुष्टुप् छन्दः श्रीरामचन्द्रो देवता श्रीरामचन्द्रप्रीत्यर्थं जपे विनियोगः ।
श्रीरामो रामचन्द्रश्च रामभद्रश्च शाश्वतः ।
राजीवलोचनः श्रीमान् राजेन्द्रो रघुपुङ्गवः ॥
जानकीवल्लभो जैत्रो जितामित्रो जनार्द्दनः ।
विश्वामित्रप्रियो दान्तः शरण्यत्राणतत्परः ॥
वालिप्रमथनो वाग्मी सत्यवाक् सत्यविक्रमः ।
सत्यव्रतो व्रतफलः सदा हनुमदाश्रयः ॥

कौशलेयः खरध्वंसी विराधवधपण्डितः ।
विभीषणपरित्राता दशग्रीवशिरोहरः ॥
सप्ततालप्रभेत्ता च हरकोदण्डखण्डनः ।
जामदग्न्यमहादर्पदमनस्ताड़कान्तकः ॥
वेदान्तसारोऽमेयात्मा भववैद्यश्च भेषजः ।
दूषणत्रिशिरोहन्ता त्रिमूर्त्तिस्त्रिगुणस्त्रयी ॥
त्रिविक्रमस्त्रिलोकात्मा पुण्यचारित्रकीर्त्तनः ।
त्रिलोकरक्षको धन्वी दण्डकारण्यपुण्यकृत् ॥
अहल्यापावनश्चैव पितृभक्तो वरप्रदः ।
जितेन्द्रियो जितक्रोधो जितलोभो जगद्गुरुः ॥
ऋक्षवानरसंघाती चित्रकूटसमाश्रयः ।
जयन्तत्राणवरदः सुमित्रापुत्रसेवितः ॥
सर्व्वदेवाधिदेवश्च मृतवानरजीवनः ।
मायामारीचहन्ता च महाभागो महाभुजः ॥
सर्व्वदेवस्तुतः सौम्यो ब्रह्मण्यो मुनिसंस्तुतः ।
महायोगी महोदारः सुग्रीवेप्सितराज्यदः ॥
सर्व्वपुण्याधिकफलस्तीर्थः सर्व्वाघनाशनः ।
आदिपुरुषो महापुरुषः परमः पुरुषस्तथा ॥
पुण्योदयो दयासारः पुराणः पुरुषोत्तमः ।
स्मितवक्त्रो मितभाषी पूर्वभाषी च राघवः ॥
अनन्तगुणगम्भीरो धीरोदात्तगुणोत्तरः ।
मायामानुषचारित्रो महादेवाभिपूजितः ॥
सेतुकृत् जितवारीशः सर्व्वतीर्थमयो हरिः ।
श्यामाङ्गः सुन्दरः शूरः पीतवासा धनुर्द्धरः ॥
सर्व्वयज्ञाधिपो यज्वा जरामरणवर्ज्जितः ।
शिवलिङ्गप्रतिष्ठाता सर्व्वाघगणवर्ज्जितः ॥
परमात्मा परं ब्रह्म सच्चिदानन्दविग्रहः ।
परं ज्योतिः परं धाम पराकाशः परात्परः ।
परेशः पारगः पारः सर्व्ववेदात्मकः शिवः ॥
इत्येतद्रामभद्रस्य नाम्नामष्टोत्तरं शतम् ।
गुह्याद्गुह्यतरं देवि तव प्रीत्या प्रकीर्त्तितम् ॥
यः पठेत् शृणुयादापि भक्तियुक्तेन चेतसा ।
स सर्व्वैर्मुच्यते पापैः कल्पकोटिसमुद्भवैः ॥
जलानि स्थलतां यान्ति शत्रवो यान्ति मित्रताम् ।
राजानो दासतां यान्ति वह्नयो यान्ति शैत्यताम् ॥
आनुकूल्यञ्च भूतानि स्थैर्य्यं यान्ति चलाः स्त्रियः ।
अनुग्रहं यदा यान्ति शान्तिमायान्त्युपद्रवाः ॥
पठतो भक्तिभावेन जनस्य गिरिसम्भवे ।
यः पठेत् परया भक्त्या तस्य वश्यं जगत्त्रयम् ॥
यद्यत् कामयते चित्ते तत्तदाप्नोति कीर्त्तनात् ।
यः पठेद्रामचन्द्रस्य नाम्नामष्टोत्तरं शतम् ॥
अज्ञानेनापि कुर्व्वाणो न स पापैर्विलिप्यते ।
पुण्यकालेषु सर्व्वेषु पठनानन्त्यमाप्नुयात् ॥
सर्व्ववेदेषु तीर्थेषु दानेषु च तपःसु च ।
तत्फलं कोटिगुणितं स्तवेनानेन लभ्यते ॥
पुण्यकालेषु सर्व्वेषु पठन्नामशतादृकम् ।
कल्पकोटिसहस्राणि कल्पकोटिशतानि च ॥
वैकुण्ठे वासमाप्नोति दशपूर्व्वैर्दशापरैः ।
रामं दूर्व्वादलश्यामं पद्माक्षं पीतवाससम् ॥
स्तुवन्ति नामभिर्दिव्यैर्न ते संसारिणो नराः ।

रामाय रामभद्राय रामचन्द्राय वेधसे ।
रघुनाथाय नाथाय सीतायाः पतये नमः ॥
इमं मन्त्रं महेशानि ! जपन्नेव दिवानिशम् ।
सर्व्वपापविनिर्म्मुक्तो विष्णुसायुज्यमाप्नुयात् ॥
इत्येतद्रामभद्रस्य माहात्म्यं वेदसम्मतम् ।
कथितं तव गाङ्गेय यत्तत्त्वं वैष्णवोत्तमः ॥
वन्दामहे महेशानं हरकोदण्डखण्डनम् ।
जानकीहृदयानन्दचन्दनं रघुनन्दनम् ॥"
इति पद्मपुराणे उमामहेश्वरसंवादे श्रीरामचन्द्राष्टोत्तरशतनामस्तोत्रं समाप्तम् ॥ * ॥
(अस्य विराड्मूर्त्तिकथनं यथा, अध्यात्मरामायणे । ३ । ६ । ३०—५४ ।

गन्धर्व्व उवाच ।

"स्तोतुमुत्सहते मेऽद्य मनो रामातिसम्भ्रमात् ।
त्वामनन्तमनाद्यन्तं मनोवाचामगोचरम् ॥
सूक्ष्मं ते रूपमयत्तं देहद्वयविलक्षणम् ।
दृश्यरूपमितरं सर्व्वं दृश्यं जड़मनात्मकम् ॥
तत्कथं त्वां विजानीयादृश्यतिरिक्तं मनः प्रभो ।
बुद्ध्यात्माभासयोरैक्यं जीव इत्यभिधीयते ॥
बुद्ध्यादिसाक्षी ब्रह्मैवतस्मिन् निर्व्विषयेऽखिलम् ।
आरोप्यतेऽज्ञानवशान्निर्व्विकारेऽखिलात्मनि ॥
हिरण्यगर्भस्ते सूक्ष्मं देहं स्थूलं विराट् स्मृतम् ।
भावनाविषयो राम सूक्ष्मं ते ध्यानमङ्गलम् ॥
भूतं भव्यं भविष्यच्च यच्चेदं दृश्यते जगत् ।
स्थूलेऽङ्गकोषे देहे ते महदादिभिरावृते ॥
सप्तभिरुत्तरगुणैर्विराजो धारणाश्रयः ।
त्वमेव सर्व्वकैवल्यं लोकास्तेऽवयवाः स्मृताः ॥
पातालं ते पादमूलं पार्ष्णिस्त्वं महातलम् ।
रसातलं ते गुल्फौ तु तलातलमितीर्य्यते ॥
जानुनी सुतलं राम ! ऊरू ते वितलं तथा ।
अतलञ्च मही राम ! जघनं नाभिर्गं नभः ॥
उरःस्थलं ते ज्योतींषि ग्रीवा ते महः उच्यते ॥
वदनं जनलोकस्ते तपस्ते शुद्धदेशगम् ।
सत्यलोको रघुश्रेष्ठ ! शीर्षण्यस्ते सदा प्रभो ॥
इन्द्रादयो लोकपाला बाहवस्ते दिशः श्रुतौ ।
अश्विनौ नासिके राम वक्त्रं तेऽग्निरुदाहृतः ॥
चक्षुस्ते सविता राम मनश्चन्द्र उदाहृतः ।
भ्रूभङ्ग एव कालस्ते बुद्धिस्ते वाक्पतिर्भवेत् ॥
रुद्रोऽहङ्काररूपस्ते वाचश्छन्दांसि तेऽयत ।
यमस्ते दंष्ट्रदेशस्थो नक्षत्राणि द्विजालयः ॥
हासो मोहकरी माया दृष्टिस्तेऽपाङ्गमोक्षणम् ।
धर्म्मः पुरस्तेऽधर्म्मश्च पृष्ठभाग उदीरितः ॥
निमिषोन्मेषणे रात्रिर्दिवा चैव रघूत्तम ! ।
समुद्राः सप्त ते कुक्षिर्नाड्यो नद्यस्तव प्रभो ॥
रोमाणि वृक्षौषधयो रेतो वृष्टिस्तव प्रभो ।
महिमा ज्ञानशक्तिस्ते एवं स्थूलं वपुस्तव ।
यस्मिन् स्थूलरूपे ते मनः सन्धार्य्यते नरैः ।
अनायासेन मुक्तिः स्यादतोऽन्यन्नहि किञ्चन ॥
अतोऽहं रामरूपं ते स्थूलमेवानुभावये ।
यस्मिन् ध्याते प्रेमरसः सरोमपुलको भवेत् ॥
तदेव मुक्तिः स्याद्राम यदा ते स्थूलभावकः ।
तदप्यास्तां तवैवाहमेतद्रूपं विचिन्तये ॥

धनुर्बाणधरं श्यामं जटावल्कलभूषितम् ।
अपीच्यवयसं सीतां विचिन्वन्तं सलक्ष्मणम् ॥
इदमेव सदा मे स्यान्मानसे रघुनन्दन ।
सर्व्वज्ञः शङ्करः साक्षात् पार्व्वत्या सहितः सदा ॥
तद्रूपमेवं सततं ध्यायन्नास्ते रघूत्तम ।
सुमूर्ष्णां सदा काश्यां तारकं ब्रह्मवाचकम् ॥
राम रामेत्युपदिशन् सदा सन्तुष्टमानसः ।
अतस्त्वं जानकीनाथ परमात्मा सुनिश्चितः ॥
सर्व्वे ते मायया मूढास्त्वां न जानन्ति तत्त्वतः ।
नमस्ते रामभद्राय वेधसे परमात्मने ॥
अयोध्याधिपते तुभ्यं नमः सौमित्रसेवित ।
त्राहि त्राहि जगन्नाथ मां माया नाशयेतु ते ॥"* ॥)

अथ श्रीरामकवचम् ।

"ध्यात्वा नीलोत्पलश्यामं रामं राजीवलोचनम् ।
जानकीलक्ष्मणोपेतं जटामुकुटमण्डितम् ॥
सासितूणधनुर्ब्बाणपाणिं नक्तञ्चरान्तकम् ।
स्वलीलया जगत्त्रातुमाविर्भूतमजं विभुम् ॥
रामरक्षां पठेत् प्राज्ञः पापघ्नीं सर्व्वकामदाम् ॥"

अस्य श्रीरामचन्द्रकवचस्य बुधकौशिकऋषिर्गायत्री च्छन्दः श्रीरामचन्द्रो देवता श्रीरामचन्द्रप्रीत्यर्थं जपे विनियोगः ।

ॐ शिरो मे राघवः पातु भालं दशरथात्मजः ।
कौशल्येयो दृशौ पातु विश्वामित्रप्रियः श्रुती ॥
घ्राणं पातु मखत्राता मुखं सौमित्रवत्सलः ।
जिह्वां विद्यानिधिः पातु कण्ठौ भरतवन्दितः ॥
स्कन्धौ दिव्यायुधः पातु भुजौ भग्नेशकार्म्मुकः ।
करौ सीतापतिः पातु हृदयं जामदग्न्यजित् ॥
मध्यं पातु खरध्वंसी नाभिं जाम्बवदाश्रयः ।
सुग्रीवेशः कटिं पातु सक्थिनी हनुमत्प्रभुः ।
ऊरू रघूत्तमः पातु रक्षःकुलविनाशकृत् ॥
जानुनी सेतुकृत् पातु जङ्घे दशमुखान्तकः ।
पादौ विभीषणश्रीदः पातु रामोऽखिलं वपुः ॥
एतां रामबलोपेतां रक्षां यः सुकृती पठेत् ।
स चिरायुः सुखी पुत्री विजयी विनयी भवेत् ।
पातालभूतलव्योमचारिणश्छद्मचारिणः ।
न द्रष्टुमपि शक्तास्ते रक्षितं रामनामभिः ॥
रामेति रामभद्रेति रामचन्द्रेति वा स्मरन् ।
नरो न लिप्यते पापैर्भुक्तिं मुक्तिञ्च विन्दति ॥
जगज्जैत्रैकमन्त्रेण रामनाम्नाभिरक्षितम् ।
यः करे धारयेत्तस्य करस्थाः सर्व्वसिद्धयः ॥
भूर्ज्जपत्रे त्विमां विद्यां गन्धचन्दनचर्चिताम् ।
कृत्वा वै धारयेद्यस्तु सोऽभीष्टं फलमाप्नुयात् ॥
रणे राजकुले द्यूते नित्यं तस्य जयो भवेत् ।
काकवन्ध्या च या नारी मृतापत्या च या भवेत् ।

वन्ध्यापत्या जीववत्सा सा भवेन्नात्र संशयः ॥
वज्रपञ्जरनामेदं यो रामकवचं पठेत् ।
अव्याहताज्ञः सर्व्वत्र लभते जयमङ्गलम् ॥
आदिष्टवान् यथा स्वप्ने रामरक्षामिमां हरिः ।
तथा लिखितवान् प्रातः प्रबुद्धो बुधकौशिकः ॥
धन्विनौ बद्धनिस्त्रिंशौ काकपक्षधरौ शुभौ ।
वीरौ मां पथि रक्षेतां तावुभौ रामलक्ष्मणौ ॥
तरुणौ रूपसम्पन्नौ सुकुमारौ महाबलौ ।
पुण्डरीकविशालाक्षौ चीरकृष्णाजिनाम्बरौ ॥
फलमूलाशिनौ दान्तौ तापसौ ब्रह्मचारिणौ ।
पुत्रौ दशरथस्यैतौ भ्रातरौ रामलक्ष्मणौ ॥
शरण्यौ सर्व्वसत्त्वानां श्रेष्ठौ सर्व्वधनुष्मताम् ।
रक्षःकुलनिहन्तारौ त्रायेतां नो रघूत्तमौ ॥
आत्तसज्यधनुषाविषुस्पृशा-
वक्षयाशुगनिषङ्गसङ्गिनौ ।
रक्षणाय मम रामलक्ष्मणा-
वग्रतः पथि सदैव गच्छताम् ॥
सन्नद्धः कवची खड्गी चापबाणधरो युवा ।
गच्छन्मनोरथश्चास्माकं रामः पातु सलक्ष्मणः ॥
अग्रतस्तु नृसिंहो मे पृष्ठतो गरुड़ध्वजः ।
पार्श्वयोस्तु धनुष्मन्तौ सशरौ रामलक्ष्मणौ ॥
रामो दाशरथिः शूरो लक्ष्मणानुचरो बली ।
काकुत्स्थः पुरुषः पूर्णः कौशल्येयो रघूत्तमः ॥
वेदान्तवेद्यो यज्ञेशः पुराणः पुरुषोत्तमः ।
जानकीवल्लभः श्रीमानप्रमेयपराक्रमः ॥
आपदामपहर्त्तारं दातारं सर्व्वसम्पदाम् ।
गुणाभिरामं श्रीरामं भूयो भूयो नमाम्यहम् ॥
दक्षिणे लक्ष्मणो धन्वी वामतो जानकी शुभा ।
पुरतो मारुतिर्यस्य तं नमामि रघूत्तमम् ॥
एतानि मम नामानि मद्भक्तो यः सदा स्मरेत् ।
अश्वमेधायुतं पुण्यं स प्राप्नोति न संशयः ॥"
इति पद्मपुराणे वज्रपञ्जरनामाख्यं श्रीरामकवचम् । इति तन्त्रसारः ॥
रामकरी, स्त्री, रामकली रागिणी । इति हलायुधः ॥ (क्वचित् रामकिरीत्यपि पाठः । यथा, सङ्गीतदर्पणे रागाध्याये ।

अथ रामकिरी ।

"षड्जग्रहांशकन्यासा पूर्णा रामकिरी मता ।
मूर्च्छना प्रथमा ज्ञेया करुणे सा प्रयुज्यते ॥
रिधत्यक्ताथवा प्रोक्ता केचित् पञ्चमवर्জিতা ।
त्रिविधा सा समुद्दिष्टा सम्पूर्णा षाड़वौड़वा ॥"
अस्या ध्यानम् ।
"हेमप्रभा भासुरभूषणा च
नीलं निचोलं वपुषा वहन्ती ।
कान्ते समीपे कमनीयकण्ठा
मानोन्नता रामकिरी मतेयम् ॥"
उदाहरणम् ।
स रि ग म प ध नि स । सम्पूर्णा ॥
अथवा
स ग म प नि स । औड़वा ॥

अथवा
स रि ग म ध नि स। षाड़वा॥
इति रामकिरी॥)
अस्य अन्यत् विवरणं रागशब्दे द्रष्टव्यम्॥

रामकर्पूरकः, पुं, (रामो रमणीयः कर्पूरः। ततः स्वार्थे संज्ञायां वा कन्।) स्वामख्यातलशुनम्। यथा,—
"सौगन्धिकञ्च सौगन्धं रामकर्पूरके लशौ।"
इति शब्दरत्नावली॥

रामगिरिः, पुं, (रामाश्रितो गिरिः। रामो रमणीयो गिरिर्वा।) पर्व्वतविशेषः। चित्रकूटपर्व्वतः। इति कश्चित्॥ यथा,—
"कश्चित् कान्ताविरहगुरुणा स्वाधिकारप्रमत्तः
शापेनास्तं गमितमहिमा वर्षभोग्येन भर्त्तुः।
यक्षश्चक्रे जनकतनयास्नानपुण्योदकेषु
स्निग्धच्छायातरुषु वसतिं रामगिर्याश्रमेषु॥"
इति मेघदूतः॥१॥

रामचन्द्रः, पुं, (रामश्चन्द्र इवाह्लादकत्वात्।) श्रीरामः। इति शब्दरत्नावली॥ (लक्ष्मणभट्टसुतः स्वनामख्यातः कविविशेषः। स तु अयोध्यानगरे वैराग्यशृङ्गारार्थद्वयोपेतं सटीकं रसिकरञ्जनं नाम काव्यं प्रणीतवान्। तस्यादिमश्लोको यथा,—
"शृङ्गारवैराग्यशृतं सपद्य-
विशृत्ययोध्यानगरे वधत्त।
अब्दे वियद्वारणबाणचन्द्रे
श्रीरामचन्द्रोऽनु च तस्य टीकाम्॥
श्रीरामचन्द्रकविना काव्यमिदं व्यरचि विरतिबीजतया।
रसिकानामपि रतये शृङ्गारार्थोऽपि संगृहीतोऽत्र॥"
एतत्कविप्रणीतानि रोमावलीशृतकप्रभृतीन्यन्यान्यपि काव्यानि द्रश्यन्ते॥)

रामच्छर्दनकः, पुं, (रामं मनोज्ञत्वं छर्दयति। छर्दि+ल्युः। स्वार्थे कन्।) मदनवृक्षः। इति भावप्रकाशः॥ क्वचित् पुस्तके रामाच्छर्दनकः इति च पाठः॥ (गुणादयोऽस्य मदनशब्दे विज्ञेयाः॥)

रामजननी, स्त्री, (रामस्य जननी।) बलदेवमाता। यथा,—
"रोहिणी रामजननी रोहिणिश्च बलप्रसूः॥"
इति शब्दरत्नावली॥
कौशल्या। रेणुका च॥

रामठं, क्ली, (रम्यतेऽनेनेति। रम+"रमेर्ठच्च।" उणा० १।१०३। इति अठः ठच्च धातोः।) हिङ्गु। इत्यमरः। १।१०३॥ (यथा, सुश्रुते। ५।१।
"तत्र नस्याञ्जने कुष्ठं रामठं नलदं मधु।
कुर्य्यात् शिरीषरजनीचन्दनैश्च प्रलेपनम्॥")

रामठः, पुं, ('रम्+अठः। ठच्च।) अङ्कोठवृक्षः। इति रत्नमाला॥ (जनपदविशेषः। यथा, बृहत्संहितायाम्। १०।५।
"रौद्रस्थे पारतरामठतैलिकरजकचौराश्च॥"
तद्देशवासिनश्च। यथा, महाभारते।२।३२।१२।
"रामठान् हारहूणांश्च प्रतीच्यांश्चैव ये नृपाः।
तान् सर्व्वान् स वशे चक्रे शासनादेव पाण्डवः॥")

रामठी, स्त्री, (रामठ+स्त्रियां ङीष्।) नाड़ीहिङ्गु। इति राजनिर्घण्टः॥

रामणः, पुं, गिरिनिम्बः। तिन्दुकः। इति राजनिर्घण्टः॥

रामणीयकं, त्रि, रमणीयम्। इत्यमरटीका॥ (यथा, महाभारते।१।२६।८।
"रामणीयकमागच्छन्माचा सह भुजङ्गमाः॥"
रामणीयकं रमणीयं द्वीपमिति श्लेषः॥
स्त्री, रमणीयस्य भावः कर्म्म वा। रमणीय+
"योपधाद्गुरूपोत्तमाद्वुञ्।" ५।१।१३२।
इति वुञ्। रमणीयत्वम्॥ यथा, किराते।
१।३६।
"पुरोपनीतं नृप! रामणीयकं
द्विजातिशेषेण यदेतदन्धसा।
तदद्य ते वन्यफलाशिनः परं
परैति कार्श्यं यशसा समं वपुः॥")

रामतरुणी, स्त्री, (रामा मनोहरा तरुणीव।) तरुणीपुष्पम्। इति राजनिर्घण्टः॥ सेउती इति भाषा॥

रामदूतः, पुं, (रामस्य दूतः।) हनूमान्। इति शब्दरत्नावली॥

रामदूती, स्त्री, (रामस्य दूतीव। विष्णुप्रियत्वात्।) तुलसीविशेषः। तत्पर्य्यायः। पर्व्वपुष्पी २ विशृङ्खा ३ नागदन्तिका ४ काण्डली ५ क्षुद्रपर्णी ६ भरण्याङ्गा ७ फणिज्झका ८। इति शब्दचन्द्रिका॥

रामनवमी, स्त्री, (रामस्य जन्मतिथिरूपा नवमी। मध्यपदलोपिकर्म्मधारयः।) चैत्रशुक्लनवमी। सा च श्रीरामचन्द्रस्य जन्मतिथिः। यथा,—
"अगस्त्यसंहितायाम्।
'चैत्रे मासि नवम्यान्तु जातो रामः स्वयं हरिः।
पुनर्व्वसूदयसंयुक्ता सा तिथिः सर्व्वकामदा॥
पुनर्व्वसूदयसंयोगः स्वल्पोऽपि यदि लभ्यते।
चैत्रशुक्लनवम्यान्तु सा तिथिः सर्व्वकामदा॥
श्रीरामनवमी प्रोक्ता कोटिसूर्य्यग्रहाधिका।
तस्मिन् दिने महापुण्ये रामसुद्दिश्य भक्तितः।
यत्किञ्चित् क्रियते कर्म्म तद्भवत्ययकारकम्॥
उपोषणं जागरणं पितॄनुद्दिश्य तर्पणम्।
तस्मिन् दिने तु कर्त्तव्यं ब्रह्मप्राप्तिमभीप्सुभिः॥'
चैत्रपदं चान्द्रपरम्।
'मेषं पूषणि संप्राप्ते लग्ने च कर्कटाङ्किते।
आविरासीत् सकलया कौशल्यायां परःपुमान्॥'

अत्र मेषस्थसूर्य्ये चान्द्रचैत्रस्यैव सम्भवात् तिथिह्रासत्वाच्च। तथा।
'तस्मिन् दिने महापुण्ये रामसुद्दिश्य भक्तितः।
जपेदेकान्त आसीनो यावत् स्याद्दशमीदिनम्॥
तेनैव स्यात् पुरश्चर्य्या दशम्यां भोजयेद्द्विजान्।
भक्ष्यभोज्यैर्ब्बहुविधैर्भक्त्या श्रद्धाच दक्षिणाम्।
श्रुतक्रतो भवेत्तेन सद्यो रामः प्रसीदति॥'
तथा।
'चैत्रशुक्ला तु नवमी पुनर्व्वसुयुता यदि।
सैव मध्याह्नयोगेन महापुण्यतमा भवेत्॥
नवमी चाष्टमीविद्धा त्याज्या विष्णुपरायणैः।
उपोषणं नवम्यान्तु दशम्यामेव पारणम्॥'
एतद्वचनद्वयं कालमाधवीयेऽपि। किन्तु महापुण्या इत्यत्र महाफलेति पाठः। शुद्धेतिश्रवणात् सर्व्वत्र शुद्धायामष्टम्यादरो न विद्धायामिति। अतएवाष्टमीविद्धा नवमी सनक्षत्रापि नोपोष्या। इति माधवाचार्य्यः॥ सैव तादृश्येव नतु विद्धा। यदा तु परदिने एकादश्यां दशमी पारणयोग्या तदा दशमीयुक्ता नवम्युपोष्या। वैष्णवैर्विष्णुपरायणैरितिश्रवणात्। अवैष्णवैस्तु अष्टमीविद्धैव त्याज्या। यदा तु पूर्व्वदिने अष्टमीविद्धा नवमी परत्र दशमीयुता नवमी एकादशीदिने च न पारणयोग्या दशमी तदा नक्षत्रयोगायोगेऽप्यष्टमीविद्धैव त्याज्या। परदिने दशम्यामेव पारणमिति नियमात्। तथा च रामार्चनचन्द्रिकायाम्।
'दशम्यादिषु वृद्धिश्चेत् त्याज्या विद्धैव वैष्णवैः।
तदन्येषान्तु सर्व्वेषां व्रतं तत्रैव निश्चितम्॥
दशम्यामेवशब्देन दशमीं नैव लङ्घयेत्।
निश्चित्यैवं विचारेण नवमीव्रतमाचरेत्॥'
इति कारिकाभ्यामगस्त्यसंहिताव्याख्यानम्॥
वस्तुतस्तु दशमीपारणसत्त्वे सर्व्वैरेवाष्टमीविद्धा नोपोष्या। विष्णुपरायणैरिति तु विष्णुपरायणत्वेन भवितव्यमित्युपदेशपरं न तु कर्त्तृविशेषणम्। अगस्त्येनावैष्णवस्य विद्धोपवासानुपदेशात्। कर्त्तृभेदे विधिद्वयकल्पनाप्रसक्तेश्च। अतएव माधवाचार्य्येण सामान्यत एव विद्धा निषिद्धा। अगस्त्यसंहितायामस्य नित्यत्वमाह।
'प्राप्ते श्रीरामनवमीदिने मर्त्यो विमूढधीः।
उपोषणं न कुरुते कुम्भीपाकेषु पच्यते॥
यस्तु रामनवम्यान्तु भुङ्क्ते मोहादिमूढधीः।
कुम्भीपाकेषु घोरेषु पच्यते नात्र संशयः॥'
अत्र मर्त्य इत्युपादानात् नरमात्रस्याधिकारः।
एवञ्च।
'कुर्य्याद्रामनवम्यां य उपोषणमतन्द्रितः।
मातुर्गर्भमवाप्नोति नैव रामो भवेत् स्वयम्॥
तस्मात् सर्व्वात्मना सर्व्वैः कर्त्तव्यं नवमीव्रतम्।
सुयन्ते पातकैः सर्व्वैर्यान्ति ब्रह्म सनातनम्॥'
इति फलकीर्त्तनं प्रागुक्तसंयोगपृथक्त्वन्यायात् सिद्धम्। अगस्त्यसंहितायाम्।
'ग्रामग्रामप्रियायाश्च तुलसीदलकल्पिता।
पूजा श्रीरामचन्द्रस्य कोटिकोटिगुणाधिका॥'

तत्रानुष्ठानं अगस्त्यसंहितातः संक्षिप्य लिख्यते। स्नातप्रातःस्नानादिः।
'उपोष्य नवमीन्यद्य यामेष्वष्टसु राघव।
तेन प्रीतो भव त्वंभो संसाराच्चाहि मां हरे॥'
इति निवेद्य॥
'कोमलाङ्गं विशालाक्षमिन्द्रनीलसमप्रभम्।
दक्षिणांघ्रिं दशरथं पुत्रावेक्षणतत्परम्॥
पृष्ठतो लक्ष्मणं देवं सच्छत्रं कनकप्रभम्।
पार्श्वे भरतशत्रुघ्नौ तालवृन्तकरावुभौ।
अग्रे यज्ञं हनूमन्तं रामानुग्रहकाङ्क्षिणम्॥'
एवं ध्यात्वा श्रीरामं पूजयेत्। स्नानमन्त्रस्तु।
'इन्द्रोऽग्निश्च यमश्चैव नैर्ऋतो वरुणोऽनिलः।
कुबेर ईशो ब्रह्माहिर्दिक्पालाः स्नापयन्तु ते॥'
अहिरनन्तः। कौशल्यां पूजयेत्। मन्त्रस्तु।
'रामस्य जननी चासि राममयमिदं जगत्।
अतस्त्वां पूजयिष्यामि लोकमातर्नमोऽस्तु ते॥'
तथा।
'नमो दशरथायेति पूजयेत् पितरं ततः।
ततोऽनुज्ञाप्य देवेशं परिवारान् समर्चयेत्।
पूर्व्वषट्कोणकोणेषु हृदयादीनि च क्रमात्॥'
हृदयादीनि यथा। रां हृदयाय नमः। रीं शिरसे स्वाहा। रूं शिखायै वषट्। रैं कवचाय हुम्। रौं नेत्राभ्यां वौषट्। रः अस्त्राय फट्। तथा,—
'हनूमन्तं ससुग्रीवं भरतं सविभीषणम्।
लक्ष्मणाङ्गदशत्रुघ्नं जाम्बवन्तं दलादिषु॥
धूम्रं जयन्तं विजयं सुराष्ट्रं राष्ट्रवर्द्धनम्।
अकोपं धूम्रपालाख्यं सुमन्त्रं दलमध्यतः।
दलाग्रे लोकपालांश्च तदस्त्राणि तदग्रतः॥'
लोकपाला इन्द्रादयो दश। तदस्त्राणि वज्रशक्तिदण्डखड्गपाशाङ्कुशगदाशूलपद्मचक्राणि। मध्यादूर्द्धे जन्म भावयेत्।
'उच्चस्थे ग्रहपञ्चके सुरगुरौ सेन्दौ नवम्यां तिथौ
लग्ने कर्कटके पुनर्व्वसुदिने मेषं गते भूषणि।
निर्दग्धुं निखिलाः पलाशसमिधो मध्यादयोध्यारणेराविर्भूतमभूदपूर्व्वविभवं यत्किञ्चिदेकं महः॥'
पलाशा राक्षसाः।
'मन्त्रेवं वादयेद्वाद्यानर्घ्यं दद्याज्जगत्पतेः।
फलपुष्पाम्बुसंपूर्णं गृहीत्वा शुद्धसुत्तमम्।
अशोकरक्तकुसुमैर्युक्तञ्च तुलसीदलैः॥'
मन्त्रस्तु।
'दशाननवधार्थाय धर्म्मसंस्थापनाय च।
ज्ञानवानां विनाशाय दैत्यानां निधनाय च॥
परित्राणाय साधूनां रामो जातः स्वयं हरिः।
गृहाणार्घ्यं मया दत्तं भावभिः सहितो मम॥
पुष्पाञ्जलिं पुनर्दत्त्वा यामे यामेष्वतन्द्रितः।
पूजयेद्विधिवद्भक्त्या दिवारात्रं नयेद्बुधः॥'
तदयं संक्षेपः। शुद्धायां नक्षत्रयुक्तायां विवाहाभावः। शुद्धायान्तु एकादश्यादिने दशमी पारणयोग्या न चेत् तदा नक्षत्रयोगायोगेऽपि अष्टमीविद्धायाम्। पारणयोग्या चेत् तदा अष्टमीविद्धां त्यक्त्वा परेऽहनि उपवासः।" इति तिथ्यादितत्त्वम्॥

रामपूगः, पुं. (रामो रमणीयः पूगः।) गुवाकविशेषः। तत्पर्य्यायः। कामीनः २ मुनिपूगः ३ सुरेवटः ४। इति चिकाण्डशेषः॥

रामबाणः, पुं. (रामस्य बाणं इव सफलत्वात्।) औषधविशेषः। यथा। रसेन्द्रचिन्तामणौ।
"पारदाष्टतलवङ्गजन्यकं
भागयुग्ममरिचेन मिश्रितम्।
तच्च जातिफलमर्द्धभागिकं
तिन्तिलीफलरसेन मर्द्दितम्॥
वह्निमान्द्यदशवक्त्रनाशनो
रामबाण इति विश्रुतो रसः।
संग्रहग्रहणीकुम्भकर्णक-
मामवातखरदूषणं जयेत्॥
दीयते तु क्षणकानुमानतः
सद्य एव जठराग्निदीपनः।
रोचकः कफकुलान्तकारकः
श्वासकासवमिजन्तुनाशनः॥"
पारभागः १ विषभागः १ लवङ्गभागः १ गन्धकभागः १ मरिचभागः८ जायफलभागः२। रामबाणो रसोऽजीर्णे। इति भावप्रकाशः॥ (शरवृक्षभेदः। इति राजनिर्घण्टः॥ रामशरश्च॥)

रामभद्रः, पुं, (राम एव भद्रो मङ्गलजनकत्वात्।) श्रीरामः। इति शब्दरत्नावली॥ (यथा, कथासरित्सागरे। ३४। २३६।
"लोकश्च सर्व्वदा रक्षस्तत्प्रवादेन किं पुरा।
रामभद्रेण शुद्धापि त्यक्ता देवी न जानकी॥")

रामलवणं, क्ली, (रामं रमणीयं लवणम्।) शाम्भरिलवणम्। तत्पर्य्यायः। रोमकम् २ पाक्षात्याकरसम्भवम् ३। इति रत्नमाला॥

रामवल्लभं, क्ली, (रामं रमणीयं वल्लभञ्च।) त्वक्। इति राजनिर्घण्टः॥ (रामस्य वल्लभम्।) रामप्रिये, त्रि॥

रामवीणा, स्त्री, (रामा रमणीया वीणा।) वीणाविशेषः। यथा, शब्दरत्नावली॥
"कुब्जी च कच्छपीवीणा वीणा तुम्बुरुनारदी।
सारस्वती केलिकला रामवीणा वलाक्षिता॥"

रामशरः, पुं, (रामस्य शर इव।) शरवृक्षभेदः। तत्पर्य्यायः। रामकाण्डः २ रामबाणः ३ रामेषुः ४ अपर्व्वदण्डः ५ दीर्घः ६ नृपप्रियः ७। तस्य मूलगुणाः। ईषदुष्णत्वम्। रुचिप्रदत्वम्। रसे अम्लत्वम्। कषायत्वम्। पित्तकारित्वम्। कफवातनाशित्वञ्च। इति राजनिर्घण्टः॥ (रामचन्द्रस्य बाणोऽपि॥)

रामशीतला, स्त्री, आरामशीतला। इति राजनिर्घण्टः॥

रामसखः, पुं, (रामस्य सखा। "राजाहःसखिभ्यष्टच्।" ५। ४। ९१। इति टच्।) सुग्रीवः। इति शब्दरत्नावली॥

रामसेनकः, पुं, भूनिम्बः। (अस्य पर्य्यायो यथा,—
"किराततिक्तः कैरातः कटुतिक्तः किरातकः।
काण्डतिक्तो नार्य्यतिक्तो भूनिम्बो रामसेनकः॥"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे॥)
कट्फलः। इति राजनिर्घण्टः॥

रामा, स्त्री, (रमते रमयतीति वा। रम+ज्वलादित्वात् णः। टाप्। रमतेऽनयेति। करणे घञ् वा।) उत्तमस्त्रीविशेषः। इत्यमरः। २। ६। ४॥ गीतकलाभी रमते रामा। इति भरतः॥ (यथा, भागवते। ३। २३। ४३।
"विभज्य नवधात्मानं मानवीं सुरतोत्सुकाम्।
रामां निरमयन् रेमे वर्षपूगान् सुहूर्त्तवत्॥")
योषा। (यथा, रघुः। ५। ४६।
"स क्षिप्तवज्रप्रहृतयुग्यपूर्ण्यं
भयात्पर्य्यन्तरथं क्षणेन।
रामापरित्राणविहस्तयोधं
सेनानिवेशं तुमुलं चकार॥")
छिङ्गः। नदी। इति मेदिनी॥ छिङ्गलम्। इति शब्दरत्नावली॥ श्वेतकण्टकारी। गृहकन्या। आरामशीतला। अशोकः। गोरोचना। इति राजनिर्घण्टः॥ बाला। गैरिकम्। इति शब्दचन्द्रिका॥

रामायणं, क्ली, (रामस्य चरितान्वितं अयनं ज्ञानम्।) रामेण रावणवधकाव्यम्। इति चिकाण्डशेषः॥ तच्च शतकोटिसंख्यकम्। यथा, स्कान्दे पातालखण्डे अयोध्यामाहात्म्ये तत्रत्यतीर्थाश्रमवर्णनप्रस्तावे।
"शापोक्त्या हृदि सन्तप्तं प्राचेतसमकल्मषम्।
श्रीवाच वचनं ब्रह्मा तत्रागत्य सुसंस्कृतः॥
न निषादः स वै रामो मृगयाश्चर्त्तुमागतः।
तस्य संवर्णनेनैव सुशोक्यस्त्वं भविष्यसि॥
इत्युक्त्वा तं जगामाशु ब्रह्मलोकं सनातनः।
ततः संवर्णयामास राघवं शतकोटिभिः॥"
कोटिभिः शतकोटिभिः। चरितं रघुनाथस्य शतकोटिप्रविस्तरमित्यन्यत्रोक्तेः। तच्च संपूर्णं ब्रह्मलोके इत्येतित्त्यम्॥ इह तु कुशलवोपदिष्टा चतुर्विंशतिसाहस्रीत्यलम्। इति रामायणटीकायां नागोजीभट्टः॥ * ॥ तथा हि।
"प्राप्तराज्यस्य रामस्य वाल्मीकिर्भगवान् ऋषिः।
चकार चरितं कृत्स्नं विचित्रपदमर्थवत्॥
चतुर्विंशत्सहस्राणि श्लोकानामुक्तवान् ऋषिः।
तथा सर्गशतान् पञ्च षट् काण्डानि तथोत्तरम्॥
इति रामायणे वाल्मीकीये बालकाण्डे ३ सर्गः॥
संक्षिप्तरामचरितं यथा,—
"रामायणमथो वक्ष्ये श्रुतं पापविनाशनम्।
विष्णुनाभ्यब्जजो ब्रह्मा मरीचिस्तत्सुतः स्मृतः॥
मरीचेः कश्यपस्तस्मात् परस्तस्मात् मनुः सुतः।
मनोरिक्ष्वाकुवंश्योऽभूदंशे राजा रघुः स्मृतः॥
रघोरजस्ततो जातो राजा दशरथो बली।
तस्य पुत्रास्तु चत्वारो महाबलपराक्रमाः॥
कौशल्यायामभूद्रामो भरतः कैकयीसुतः।
सुतौ लक्ष्मणशत्रुघ्नौ सुमित्रायां बभूवतुः॥

रामो भक्तः पितुर्मातुर्विश्वामित्रादवाप्तवान् ।
अस्त्रग्रामं यतो यत्तौ ताड़कां प्रजघान ह ॥
विश्वामित्रस्य यज्ञे तु सुबाहुं व्यवधीद्बली ।
जनकस्य क्रतुं गत्वा उपयेमेऽथ जानकीम् ॥
उर्मिलां लक्ष्मणो वीरो भरतो माण्डवीं सुताम् ।
श्रुतकीर्तिं वै कीर्तिमतीं कुशध्वजसुते च वै ॥
पित्रादिभिरयोध्यायां गत्वा रामादयः स्थिताः ।
युधाजितं मातुलञ्च भ्रातृभरतौ गतौ ॥
गतयोर्नृपवर्य्येण राज्यं दातुं समुद्यतम् ।
रामाय ज्येष्ठपुत्राय कैकेय्या प्रार्थितं तदा ।
चतुर्दशसमा वासो वने रामस्य वाञ्छितः ॥
रामः पितृहितार्थन्तु लक्ष्मणेन च सीतया ।
राज्यञ्च तृणवत्त्यक्त्वा भ्रातृवैरपुरं गतः ।
रथं त्यक्त्वा प्रयागञ्च चित्रकूटं गिरिं गतः ॥
रामस्य तु वियोगेन राजा स्वर्गं समाश्रितः ।
संस्कृत्य भरतश्चागात् रामं मातृबलान्वितः ॥
अयोध्यान्तु समागत्य राज्यं कुरु महामते ।
स नेच्छत् पादुके दत्त्वा राज्याय भरताय तु ॥
विसर्ज्जितोऽथ भरतो रामराज्यमपालयत् ।
नन्दिग्रामे स्थितो भक्त्या ह्ययोध्यां नाविशद्व्रती ॥
रामोऽपि चित्रकूटाच्च अत्रेराश्रममाययौ ।
नत्वा अभीक्ष्णं चागस्त्यं दण्डकारण्यमागतः ॥
तत्र शूर्पनखा नाम राक्षसीवाड्मागता ।
निकृत्य कर्णौ नासे च रामेणाथ पराहिता ॥
ततःप्रेरितः खरश्चागाद्दूषणस्त्रिशिरास्तथा ।
चतुर्दशसहस्रेण रक्षसान्तु बलेन च ॥
रामोऽपि प्रेषयामास वाणैर्यमपुरञ्च तान् ।
राक्षस्या प्रेरितोऽभ्यागात् रावणो हरणाय हि ॥
मृगरूपं स मारीचं कृत्वागेऽथ चिरन्दधृक् ।
सीतया प्रेरितो रामो मारीचं प्रजघान ह ॥
म्रियमाणः स च प्राह हा सीते लक्ष्मणेति च ।
सीतोक्तो लक्ष्मणोऽधागात्तामश्रौषु ददर्श तम् ॥
उवाच राक्षसी माया नूनं सीता हृतेति सा ।
रावणोऽन्तरमासाद्य अङ्केनादाय जानकीम् ॥
जटायुषं विनिर्ज्जित्य ययौ लङ्कां ततो बली ।
अशोकवृक्षच्छायायां रक्षितां तामधारयत् ॥
आगत्य रामः शून्यञ्च पर्णशालां ददर्श ह ।
शोकं कृत्वाथ जानक्या मार्गणं कृतवान् प्रभुः ॥
जटायुषञ्च संस्कृत्य तदुक्तो दक्षिणां दिशम् ।
गत्वा सख्यं ततश्चक्रे सुग्रीवेण च राघवः ॥
सप्ततालान् विनिर्भिद्य शरेणानतपर्व्वणा ।
वालिनञ्च विनिर्भिद्य किष्किन्धायां हरीश्वरम् ॥
सुग्रीवं कृतवान् रामो ऋष्यमूके स्थितः ।
सुग्रीवः प्रेषयामास वानरान् पर्व्वतोपमान् ॥
सीताया मार्गणं कर्त्तुं पूर्व्वाद्यैः सुमहाबलान् ।
प्रतीचीमुत्तरां प्राचीं दिशं गत्वा समागताः ॥
दक्षिणान्तु दिशं ये च मार्गयन्तोऽथ जानकीम् ।
वनानि पर्व्वतान् द्वीपान् नदीनां पुलिनानि च ॥
जानकीं ते ह्यपश्यन्तो मरणे कृतनिश्चयाः ।
सम्पातिवचनात् ज्ञात्वा हनूमान् कपिकुञ्जरः ॥
शतयोजनविस्तीर्णं पुप्लुवे मकरालयम् ।
अपश्यज्जानकीं तत्र अशोकवनिकास्थिताम् ॥
भर्त्सितां राक्षसीभिश्च रावणेन च रक्षसा ।
भव भार्य्येति वदता चिन्तयन्तीञ्च राघवम् ॥
अङ्गुलीयं कपिर्दत्त्वा सीतां कौशल्यमब्रवीत् ।
रामस्य तस्य दूतोऽहं शोकं मा कुरु मैथिलि ॥
अभिज्ञानञ्च मे देहि येन रामः स्मरिष्यति ।
तत् श्रुत्वा प्रददौ सीता वेणौ रत्नं हनूमते ॥
यथा रामो नयेत् शीघ्रं तथा वाच्यं त्वया गते ।
तथेत्युक्त्वा तु हनुमान् वनं दिव्यं बभञ्ज तत् ॥
हत्वाक्षं राक्षसांश्चान्यान् बन्धनं स्वयमागतः ।
सर्व्वैरिन्द्रजितो बाणैर्दृष्ट्वा रावणमब्रवीत् ॥
रामदूतोऽस्मि हनुमान् देहि रामाय मैथिलीम् ।
एतत् श्रुत्वा प्रकुपितो दीपयामास पुच्छकम् ॥
कपिर्ज्ज्वलितलाङ्गूलो लङ्कागेहे महाबलः ।
दग्ध्वा लङ्कां समायातो रामपार्श्वं स वानरः ॥
जग्ध्वा फलं मधुवने दृष्ट्वा सीतेत्यवेदयत् ।
मणिरत्नञ्च रामाय रामो लङ्कां ययौ पुरीम् ॥
ससुग्रीवः सहनुमानङ्गदाद्यः सलक्ष्मणः ।
विभीषणोऽपि संप्राप्तः शरणं राघवं प्रति ॥
लङ्केश्वर्य्येऽभ्यषिञ्चद्रामस्तं रावणानुजम् ।
रामो नलेन सेतुञ्च कृत्वाब्धौ चोच्छ्रितायतम् ॥
सुवेलावस्थितश्चैव पुरीं लङ्कां ददर्श ह ।
अथ ये वानरा वीरा नीलाङ्गदनलादयः ॥
धूम्रधूम्रान्तधूम्रेन्द्रा जाम्बवत्सुखास्तदा ।
मैन्दद्विविदमुख्यास्ते पुरीं लङ्कां बभञ्जिरे ॥
राक्षसांश्च महाकायान् कालाञ्जनचयोपमान् ।
रामः सलक्ष्मणो हत्वा सकपिः सर्व्वराक्षसान् ॥
विद्युज्जिह्वञ्च धूम्राक्षं वेदान्तकनरान्तकौ ।
महोदरमहापार्श्वावतिकायं महाबलम् ॥
कुम्भं निकुम्भं मत्तञ्च मकराक्षं त्रिकम्पनम् ।
प्रहस्तं वीरमुन्मत्तं कुम्भकर्णं महाबलम् ॥
रावणिं लक्ष्मणश्छित्त्वा ह्यस्त्राद्यै राघवो बली ।
निकृत्य बाहू वक्त्राणि रावणन्तु अपातयत् ॥
सीतां शुद्धां गृहीत्वाथ विमाने पुष्पके स्थितः ।
सवानरः समायातो ह्ययोध्याप्रवरं पुरम् ॥
तत्र राज्यं चकाराथ पुत्रवत् पालयन् प्रजाः ।
दशाश्वमेधानाहृत्य गयाशिरसि पातनम् ॥
पिण्डानां विधिवत् कृत्वा दत्त्वा दानानि राघवः ।
पुत्रौ कुशलवौ दृष्ट्वा तौ च राज्येऽभ्यषेचयत् ॥
एकादशसहस्राणि रामो राज्यमकारयत् ।
भ्रातुश्चो लवणं हत्वा शैलूषं भरतः स्थितः ॥
अगस्त्यादीन् मुनीन् श्रुत्वा श्रुत्वोत्पत्तिञ्च रक्षसाम् ।
स्वर्गं गतो जनैः सार्द्धमयोध्यां वैकुण्ठान्तकः ॥"

इति गारुड़े १४८ अध्यायः ॥ * ॥

एतदतिरिक्तं वाल्मीकिप्रणीतं सप्तविंशतिसर्गयुक्तं सहस्रश्लोकात्मकं सीताकर्तृकसहस्रकन्धरावणवधकाथरूपादद्भुतोत्तरकाण्डमस्ति। तस्य प्रथमसर्गीयश्लोका यथा,—

"तमसातीरनिलयं सर्व्वेषां तपसां गुरुम् ।
वचसां प्रथमं स्थानं वाल्मीकिं मुनिपुङ्गवम् ॥
विनयावनतो भूत्वा भारद्वाजो महामुनिः ।
प्रप्रच्छ सम्मतः शिष्यः कृताञ्जलिपुटो वशी ॥
रामायणमितिख्यातं शतकोटि प्रविस्तरम् ।
प्रणीतं भवता यच्च ब्रह्मलोके प्रतिष्ठितम् ॥
श्रूयते ब्रह्मणा नित्यमृषिभिः पितृभिः सुरैः ।
षड्विंशतिसाहस्रं रामायणमिदं भुवि ।
तदाकर्णितमस्माभिः सावशेषं महामुने ॥
शतकोटिप्रविस्तारे रामायणमहार्णवे ।
किं गीतमिह यन्नास्ति तन्मे कथय सुव्रत ॥
आकर्ण्यादरिणः पृष्टं भरद्वाजस्य वै मुनिः ।
हस्तामलकवत् सर्व्वं संस्मार शतकोटिकम् ॥
ओमित्युक्त्वा मुनिः शिष्यं प्रोवाच वदतां वरः ।
भारद्वाज चिरं जीव साधु स्मारितमद्य नः ॥
शतकोटिप्रविस्तारे रामायणमहार्णवे ।
रामस्य चरितं सर्व्वमाश्चर्य्यं सम्यगीरितम् ॥
षड्विंशतिसाहस्रं भूलोके यत् प्रतिष्ठितम् ।
नृणां हि सदृशं रामचरितं वर्णितं मया ।
सीतामाहात्म्यसारं यत् विशेषादत्र नोक्तवान् ।
शृणुष्वावहितो ब्रह्मन् काकुत्स्थचरितं महत् ।
सीताया मूलभूतायाः प्रकृतेश्चरितञ्च यत् ॥"

इत्याद्यार्षे रामायणे वाल्मीकीये अद्भुतोत्तरकाण्डे आदिकाव्ये प्रथमः सर्गः ॥ * ॥ अन्यत् ब्रह्माण्डपुराणीयोत्तरखण्डान्तर्गतैकषष्टितमाध्यायादिकहरपार्व्वती-संवादरूपाध्यात्म-रामायणमस्ति । तत्र अध्यात्मबालकाण्डे सर्गाः सप्तैव शम्भुनोद्दिष्टाः षष्ट्युत्तरत्रिशतश्लोकाः मोक्षप्रदा नृणाम् १ । अध्यात्मरामचरिते अयोध्याकाण्डे नवानां सर्गाणां सप्तशतानि श्लोकाः पुण्यमोक्षप्रदाः २ । काण्डेऽरण्येऽध्यात्माख्ये सर्गा द्विपञ्च परिच्छिन्नाः पञ्चशतानि श्लोकाः पापहराः पार्व्वतीप्रोक्ताः ३ । श्रीमदध्यात्मरामायणे उमामहेश्वरसंवादे किष्किन्धाकाण्डे नवमः सर्गः पञ्चशतानि श्लोकाः दुरितहरा पञ्चपञ्चाशत् ४। सुन्दरकाण्डे सर्गाः पञ्चैवाध्यात्मिकग्रन्थिते प्रोक्ताश्लोकाश्चिसुवनपापहराः ५ । काण्डे युद्धात्मके सर्गा नवसप्त नीलकण्ठोक्ताः सार्द्धैकादशशतश्लोका मनुसंख्यायुताः पुण्याः ६ । अध्यात्मोत्तरकाण्डे सर्गाः यदृसंख्यया प्रच्छिन्ना ऋतुशतसंख्यश्लोकाः ७ । पुराणसंख्याश्च पुरा हरेणोक्ताः ।

"पार्व्वत्यै परमेश्वरेण गदिते ह्यध्यात्मरामायणे
काण्डैः सप्तभिरन्वितेऽतिशुभदे सर्गाश्चतुःषष्टिकाः ।
श्लोकानान्तु शतद्वयेन सहिता युक्तानि चत्वारि ङा-
हस्राण्येव समासतः श्रुतिशते सूक्तानि तत्संख्यतः ॥"

इत्यध्यात्मरामायणम् ॥ * ॥

अपरं रामवशिष्ठसंवादरूपमोक्षोपायकदेवदूतोक्तवाशिष्ठनामकमहारामायणमस्ति । तत्र प्रथमार्द्धे अष्टाविंशत्युत्तरशततसर्गाः । तस्य आद्यन्तश्लोकौ यथा,—

रालः

श्रीवाल्मीकिरुवाच ।
"उपशमप्रकरणादनन्तरमिदं शृणु ।
तन्निर्व्वाणप्रकरणं ज्ञातं निर्व्वाणदायि यत् ॥१॥
य इमं शृणुयान्नित्यं विधिं रामवशिष्ठयोः ।
सर्व्वावस्थोऽपि अवणान्मुच्यते ब्रह्म ऋच्छति ॥२॥
उत्तरार्द्धे षोड़शोत्तरद्विशततमसर्गाः । तस्या-
द्यन्तश्लोकौ यथा,—
श्रीराम उवाच ।
"नैष्कर्म्म्यात् कल्पनात्यागात् तनुः पतति
रोहितः ।
कथमेतदतो ब्रह्मन् सम्भवत्यापु जीवतः ॥ १ ॥
यत् तर्व्वं खल्विदं ब्रह्म तच्चलानिति च स्फुटम् ।
श्रुत्वा त्वदीर्य्यते साद्धि तस्मै ब्रह्मात्मने नमः ॥"२॥
अत्रादौ वैराग्यप्रकरणग्रन्थः । द्वितीयो मुमुक्षु-
ग्रन्थः । तृतीय उत्पत्तिग्रन्थः । चतुर्थः स्थिति-
ग्रन्थः । पञ्चमः सकलोपशमग्रन्थः । षष्ठप्रक-
रणे निर्व्वाणग्रन्थः । पूर्व्वार्द्धे सटीकग्रन्थ-
संख्या १३६०० । उत्तरार्द्धे सटीकग्रन्थसंख्या
२३६०० । इति श्रीमहारामायणे निर्व्वाणप्रक-
रणे बालकाण्डे मोक्षोपाये देवकृतोक्ते ह्याचिं-
शत्सहस्रां संहितायां वाशिष्ठे ब्रह्मदर्शने
उत्तरार्द्धे षोड़शोत्तरद्विशततमः सर्गः ॥

रामालिङ्गनकामः, पुं, (रामाणामालिङ्गनस्य
कामोऽभिलाषो यस्मात् ।) रक्ताम्बानः । इति
राजनिर्घण्टः ॥

रामावक्त्रोजोपमः, पुं, (रामावक्त्रोजयोः स्त्रीमुखयो-
रुपमा यत्र ।) चक्रवाकः । इति राजनिर्घण्टः ।

रामिलः, पुं, रमणम् । कामः । इति मेदिनी ॥
जे, १२७ ॥

रम्भः, पुं, (रम्भस्य विकारः । रम्भ + "पला-
शादिभ्यो वा ।" ४ । ३ । १४१ । इत्यण् ।)
व्रते वेणुकृतो दण्डः । रम्भो वेणुः तस्य
विकारः । इत्यमरभरतौ । २ । ७ । ४५ ॥

रायणं, क्ली, पीड़ा । इति कांचित् ग्रन्थरत्ना-
वली ॥

रायभाटी, स्त्री, नदीस्रोतोविशेषः । आओड़
इति भाषा । यथा,—
"पूरोढ़ि पाचसङ्कारो रायभाटी समाकरे ।"
इति शब्दरत्नावली ॥

रालः, पुं, सालवृक्षनिर्य्यासः । धुना इति भाषा ।
तत्पर्य्यायः । सर्व्वरसः २ सालः ३ कनक-
लोद्भवः ४ ललनः ५ सालनिर्य्यासः ६ देवेष्टः ७
शीतलः ८ बहुरूपः ९ सालरसः १० सर्व्व-
निर्य्यासकः ११ सुरभिः १२ सुरधूपः १३ यक्ष-
धूपः १४ अग्निवल्लभः १५ कलः १६ कल-
लजः १७ । अस्य गुणाः । अग्निग्रित्वम् ।
स्निग्धत्वम् । कषायत्वम् । तिक्तत्वम् । संग्रह-
त्वम् । वातपित्तस्फोटकव्रणनाशित्वञ्च । अस्य
धानलेपगुणौ । अग्निग्रित्वम् । प्रदरामयशान्ति-
कारित्वञ्च । इति राजनिर्घण्टः ॥ अपि च ।
"रालस्तु सालनिर्य्यासस्तथा सर्व्वरसः स्मृतः ।
देवधूपो यक्षधूपस्तथा सर्व्वरसश्च सः ॥

रावणः

रालो हिमो गुरुस्निग्धः कषायो व्याहको हरेत् ।
दोषास्रखेदवीसर्पज्वरव्रणविषादिकाः ।
ग्रहभग्नाग्निदग्धांश्चमूलातीसारनाशनः ॥"
इति भावप्रकाशः ॥

रालकार्य्यः, पुं, (रालस्य सालरसस्य कार्य्यं यत्र ।)
सालवृक्षः । इति राजनिर्घण्टः ॥

रावः, पुं, (रवणमिति । रु ल ध्वनौ + भावे
घञ् ।) शब्दः । इति शब्दरत्नावली ॥ (यथा,
महाभारते । १ । २१ । १८ ।
"गम्भीरं तिमिमकरोग्रसंकुलं तं
गर्জ্জन्तं जलचररावरौद्रनादैः ।
विस्तीर्णं ददृशतुरम्बरप्रकाशं
तेऽगाधं निधिसुरमम्भसामनन्तम् ॥")

रावणः, पुं, (रवणस्यापत्यमिति । रवण +
"शिवादिभ्योऽण् ।" ४ । १ । ११२ । इति
अण् । यद्वा, रावयति भीषयति सर्व्वानिति ।
रु + णिच् + ल्युः ।) लङ्काधिपतिः । तत्पर्य्यायः ।
पौलस्त्यः २ रक्षः ३ लङ्केशः ४ दशकन्धरः ५ ।
इति हेमचन्द्रः ॥ दशकण्ठः ६ निकषात्मजः ७
राक्षसेन्द्रः ८ लङ्केशः ९ षड़्क्तिग्रीवः १० दशा-
ननः ११ । इति शब्दरत्नावली ॥ लङ्काधिपतिः १२
दशास्यः १३ । इति जटाधरः ॥ (अस्य
निरुक्तिर्यथा, रामायणे ।
"यस्माल्लोकत्रयं चैतद्रावितं भयमागतम् ।
तस्मात्त्वं रावणो नाम नाम्ना वीरो भवि-
ष्यसि ॥")

तस्योत्पत्तिर्नाम्नी यथा,—
सूत उवाच ।
"मानवस्य नरेष्यन्त आसीत् पुत्रो दमः किल ।
नवमस्तस्य दायादस्तृणबिन्दुरिति स्मृतः ॥
तस्य कन्या इड़विड़ा रूपेणाप्रतिमा भुवि ।
पुलस्त्याय स राजर्षिस्तां कन्यां प्रत्यपादयत् ॥
ऋषिरैड़विड़ो यस्यां विश्रवाः समपद्यत ।
तस्य पत्न्यश्चतस्रश्च पूर्व्वा वै देववर्णिनी ॥
ज्येष्ठं वैश्रवणं यत्रे कुरूपं देववर्णिनी ।
त्रिपादं सुमहाकायं स्थूलग्रीवं महाहनुम् ॥
अरुदंष्ट्रं हरिश्मश्रुं शृङ्गकर्णविलोहितम् ।
पिङ्गलं नाम संदृश्य पिता तस्यान्ववीत्ततः ॥
कुत्सायान्तु कुशब्दोऽयं शरीरस्यैदमुच्यते ।
कुशरीरत्वाच्च नाम्ना तेन वै स कुवेरकः ॥
ऋध्यां कुवेरो जनयद्विश्रुतं नलकूबरम् ॥
रावणं कुम्भकर्णञ्च कन्यां शूर्पणखां तथा ।
विभीषणं चतुर्थन्तु नैकष्यजनयत् सुतम् ॥
शृङ्गकर्णो दशग्रीवः पिङ्गलो रक्तमूर्द्धजः ।
चतुष्पादिंशतिभुजो महाकायो महाबलः ॥
जात्यञ्जननिभो मर्द्दलोहितश्मीव एव च ।
निसर्गादारुणः क्रूरः स रावण इति स्मृतः ॥
हिरण्यकशिपुश्चासीत् स राजा पूर्व्वजन्मनि ॥
चतुर्युगानां राजा तु त्रयोदश स राक्षसः ॥
ता पञ्चकोट्यो वर्षाणां संख्याताः संख्यया
द्विजैः ।
नियुतानामेकषष्टिः संख्याविद्भिरुदाहृताः ॥

राक्षिः

षष्टिश्चैव सहस्राणि वर्षाणां हि स रावणः ।
देवतानां पितॄणाञ्च घोरं त्रासा प्रजागरम् ॥
त्रेतायुगे चतुर्थांशे रावणस्तपसः क्षयात् ।
रामं दाशरथिं प्राप्य समरे क्षयमीयिवान् ॥"
इति वह्निपुराणे वाराहप्रादुर्भावनामाध्यायः ॥

रावणगङ्गा, स्त्री, (रावणेन स्रुता गङ्गा ।) सिंहल-
देशस्थनदीविशेषः । यथा,—
सूत उवाच ।
"दिवाकरस्रुस्य महामहिम्नो
महासुरस्योत्तमरत्नबीजम् ।
अङ्गप्रहीला चरितं प्रतस्थे
निश्चिंशपानीतेन नभस्तलेन ॥
त्रेता सुराणां समरेष्वजस्रं
वीर्य्यावलेपोद्धतमानसेन ।
लङ्काधिपेनार्द्धपथं समेत्य
स्वर्भानुनेव प्रसभं निरुद्धम् ॥
तत् सिंहलीचारुनितम्बबिम्ब-
विच्छोभितागाधमहाह्रदायाम् ।
पूगद्रुमाबद्धतटद्वयायां
सुमोच सूर्य्यः सरिदुत्तमायाम् ॥
ततः प्रभृति सा गङ्गा तुल्यपुण्यफलोदया ।
नाम्ना रावणगङ्गेति प्रथिमानमुपागता ॥
ये तु रावणगङ्गायां जायन्ते कुरुविन्दकाः ।
पद्मरागा घनं रागं बिभ्राणाः स्वस्फटार्चिषः ॥"
इति गारुड़े ७० अध्यायः ॥

रावणारिः, पुं, (रावणस्य अरिः शत्रुः ।)
श्रीरामः । इति जटाधरः ॥ (यथा,—
"वन्दे लोकाभिरामं रघुकुलतिलकं राघवं
रावणारिम् ॥"
इति महानाटकम् ॥)

रावणिः, पुं, (रावणस्यापत्यमिति । रावण +
"अत इञ् ।" ४ । १ । ९५ । इति इञ् ।)
रावणज्येष्ठपुत्रः । स च इन्द्रजित् । यथा,—
"रावणिः शत्रुजिन्मेघनादो मन्दोदरीसुतः ॥"
इति हेमचन्द्रः । ३ । ३७० ॥
(यथा, महाभारते । ३ । २८७ । १२ ।
"रावणिस्तु यदा नैनं विशेषयति सायकैः ।
ततो गुरुतरं यत्नमातिष्ठद्बलिनां वरः ॥"
रावणपुत्रमात्रे । यथा, भट्टिः । १४ । ७६ ।
"तस्याहारिषत प्राणा सुहृदा वालिसूनुना ।
प्रादुद्रुवंस्ततः क्रुद्धाः सर्व्वे रावणयोऽङ्गदम् ॥")

राध्, ऋ ङ शब्दे । इति कविकल्पद्रुमः ॥ (भ्वा०-
आत्म०-अक०-सेट् ।) दन्त्यान्तोऽयमिति गद-
सिंहः । रासभः खरः । दुर्गसिंहस्तु इमं
तालव्यान्तं मत्वा उणादौ इक्षं कृत्वा रक्षि-
शब्दं व्युत्पादितवान् । ऋ, अरराधत् । ङ,
राध्यते । इति दुर्गादासः ॥

राधिः, पुं, (राध्यते इति । राध् शब्दे + इण् ।
यद्वा, अश्नुते व्याप्नोतीति । अशू व्याप्तौ + "अधि-
पशाभ्यो रुड़ायलुकौ च ।" उणा० ४ । १३२ ।
इति इण् रुड़ागमश्च ।) धान्यादिसमूहः ।
तत्पर्य्यायः । पुञ्जः २ उत्करः ३ कूटम्

इत्यमरः । २ । ५ । ४२ ॥ समुच्चयः ५ समाहारः ६ । इति जटाधरः ॥ अश्नुते व्याप्नोति इति राशिः। अशू ञ व्याप्तिसंहत्योरित्यस्मात् नान्नीति इञ् निपातनाद्वेणागमः । इति भरतः ॥ * ॥ (यथा, शकुन्तलायाम् १ अङ्के ।
"न खलु न खलु बाणः सन्निपात्योऽयमस्मिन्
मृदुनि मृगशरीरे तुलराशाविवाग्निः ॥")
ज्योतिश्चक्रस्य द्वादशांशः । तस्योत्पत्तिर्यथा,—
अथ सृष्टां मनश्चक्रे ब्रह्माहङ्कारमूर्त्तिभृत् ।
मनसश्चन्द्रमा जज्ञे सूर्य्योऽक्ष्णोस्तेजसां निधिः ॥
मनसः खं ततो वायुरग्निरापो धरा क्रमात् ।
गुणैकवृद्ध्या पञ्चैव महाभूतानि जज्ञिरे ॥
अग्नीषोमौ भास्करेन्दू ततस्त्वङ्कारकादयः ।
तेजोभूखाम्बुवातेभ्यः क्रमशः पञ्च जज्ञिरे ॥
पुनर्द्वादशधात्मानं विभज्येद्राग्निसंज्ञकम् ।
नक्षत्ररूपिणं भूयः सप्तविंशात्मकं वशी ॥"
इति सूर्य्यसिद्धान्ते गोलाध्यायः ॥ * ॥
तस्य संस्थानं यथा,—
"विषुवत्क्रान्तिवृत्तैक्यात् पूर्ब्वभागस्थिताः स्थिराः ।
मेषाद्या राशयः क्रान्तिवृत्तयः पूर्ब्वदिक्क्रमात् ॥"
इति मुनीश्वरकृतसार्ब्वभौमसिद्धान्तः ॥ * ॥
अथ राश्यादिनिर्णयः ।
"मेषवृषमिथुनकर्कटसिंहाः कन्या तुलाथ वृश्चिकभम् ।
धनुरथ मकरः कुम्भो मीन इति च राशयः कथिताः ॥"
इति राशिकथनम् ॥ * ॥
"अश्विन्या सह भरणी कृत्तिकापादश्च कीर्त्तितो मेषः । १ ।
वृषभः कृत्तिकाशेषं रोहिण्यर्द्धञ्च मृगशिरसः ॥ २ ॥
मृगशिरसोऽर्द्धं चार्द्रा पुनर्ब्वसोस्त्रिपादो मिथुनम् । ३ ।
पादः पुनर्ब्वसोरन्त्यः पुष्योऽश्लेषा च कर्कटः ॥४॥
सिंहोऽथ मघा पूर्ब्वफल्गुनी पाद उत्तरायाः ।५।
तच्छेषं हस्ता चित्रार्द्धञ्च कन्यकाख्यः ॥ ६ ॥
तौलिनि चित्रार्द्धं स्वाती विशाखायाः पादत्रयम् । ७ ।
व्रश्चिनि विशाखा पादस्तथानुराधान्विता ज्येष्ठा ॥ ८ ॥
मूलं पूर्ब्वाषाढ़ा प्रथमस्त्वाप्युत्तरांशको धन्वी ।९।
मकरस्तत्परिशेषं श्रवणा चार्द्धं धनिष्ठायाः ॥१०॥
धनिष्ठार्द्धं शतभिषा पूर्ब्वभाद्रपदपादत्रयं कुम्भः । ११ ।
पूर्ब्वभाद्रपदाशेषस्तथोत्तरा रेवती मीनः ॥"११॥
इति राशिनक्षत्रभेदकथनम् ॥ * ॥
"राशिनामानि च ज्ञेयं भस्थं गृहनाम च ।
मेषादीनाञ्च पर्य्यायं लोकादेव विचिन्तयेत् ॥"
इति राशिपर्य्यायकथनम् ॥ * ॥
"क्रियतावुरिजितुमकुलीरलेयपाथेययूकवृश्चिकौ-
र्याख्याः ।
तौक्षिक आकोकेरो वृद्धोगश्चान्त्यभं चैत्यम् ॥"
इति मेषादीनां विशेषनामकथनम् ॥ * ॥
"अरुणसितहरितपाटलपाण्डुविचित्राः सितेतरपिङ्गौ ।
पिङ्गलकर्व्बुरवभ्रुमलिना रुचयो यथासंख्यम् ॥"
इति मेषादीनां वर्णभेदकथनम् ॥ * ॥
"मत्स्यौ घटी नृमिथुनं मृगदं सवीणं
चापी नरोऽश्वजघनो मकरो मृगास्यः ।
तौली सशस्यदहना झषगा च कन्या
शेषाः स्वनामसदृशाः खचराश्च सर्व्वे ॥"
अश्वजघनोऽश्वाकारजघनो नतु अश्वारूढ़ इति जघनः । उत्तरत्र चतुश्चरणत्वकथनात् ।
राश्यधिष्ठातृदेवताकथनम् ॥ * ॥
"क्रूरोऽथ सौम्यः पुरुषोऽङ्गना च
ओजोऽथ युग्मं विषमः समश्च ।
चरस्थिरद्व्यात्मकनामधेया
मेषादयोऽमी क्रमशः प्रदिष्टाः ॥"
इति राशीनां क्रूरसौम्यादिविवेकः ॥ * ॥
देवन्नमनोहरे ।
"पुण्यश्च पुष्करश्चैव आधानाख्यस्तथैव च ।
श्रुत्वा वृत्ता भवन्त्येते नित्यं द्वादश राशयः ॥"
इति पुण्यादिविवेकः ॥ * ॥
"मिथुनतुलाघटकन्या द्विपदाख्याश्चापपूर्ब्वभागश्च ।
मृगधनुराद्यन्तार्द्धं वृषाजसिंहाश्चरणाः ॥"
इति द्विपदचतुष्पदराशिकथनम् ॥ * ॥
"कर्कटवृश्चिकमीना मकरान्त्यार्द्धञ्च कीटसंज्ञाः स्युः ।
वृश्चिकराशिर्मुनिभिः सरीसृपत्वेन निर्दिष्टः ॥"
इति कीटसरीसृपराशिकथनम् ॥ * ॥
"द्विपदवयुगाः सर्व्वे सिंहं विहाय चतुष्पदाः ।
सलिलनिलया भक्ष्या वश्याः सरीसृपजातयः ॥
मृगपतिवर्ज्जे तिष्ठन्त्येते विहाय सरीसृपान् ।
व्यक्थितमृद्देषूक्तं वश्यं जनव्यवहारतः ॥"
सरीसृपजातय इति बहुवचनात् कीटस्यापि परिग्रहः । राशीनां वश्यावश्यकथनम् ॥ * ॥
"ग्राम्या मिथुनतुलाखीचापालिघटाः निशासु वृषमेषौ ।
मकरादिमार्द्धसिंहौ वन्यौ दिवसेऽजवृषभौ च ॥
जलजौ कर्कटमीनौ मकरान्त्यार्द्धञ्च शिवमते कुम्भः ॥
इति ग्राम्यारण्यजलजराशिकथनम् ॥ * ॥
"दृक्खाखिमिगोऽविघटा मिथुनधनुःकर्किन्द्रगसुखाश्च समाः ।
वृश्चिककन्याम्बुगपतिवह्निजो दीर्घाः समाख्याताः ॥"
इति राशीनां दृक्खदीर्घकथनम् ॥ * ॥
"प्रागादिककुभां नाथा यथासंख्यं प्रदक्षिणम् ।
मेषाद्या राशयो ज्ञेयाश्चिराद्वृत्तिपरिभ्रमात् ॥"
इति दिगधिपत्वकथनम् ॥ * ॥
"क्षुजणुक्रबुधेन्द्वर्कसौम्यशुक्रावनीसुवाम् ।
जीवार्किभानुजेज्यानां क्षेत्राणि स्युरजादयः ॥"
इति ग्रहाणां क्षेत्रकथनम् ॥ * ॥
"अजो गोपतियुग्मञ्च कर्किधन्विन्दुगास्त्रया ।
निशासंज्ञाः स्मृताश्चैते शेषाश्चाह्ने दिनात्मकाः ॥
निशासंज्ञा विमिथुना स्मृताः पृष्ठोदयास्त्रया ।
शेषाः शीर्षोदया ह्येते मीनश्चोभयसंज्ञकः ॥"
इति निशादिसंज्ञाकथनम् ॥ * ॥
"रविर्मासं निशानाथः सपाददिवसद्वयम् ।
पक्षत्रयं भूमिपुत्रो बुधोऽष्टादशवासरान् ॥
वर्षमेकं सुराचार्य्यश्चाष्टाविंशदिनं भृगुः ।
शनिः सार्द्धद्वयं वर्षं स्वर्भानुः सार्द्धवत्सरम् ॥
एवं प्रमाणात् सकलाः खराशिं भुञ्जते ग्रहाः ॥"
इति राशिभोगकथनम् ॥
इति ज्योतिस्तत्त्वम् ॥ * ॥ द्वादशराश्यात्मकाग्निरूपं यथा,—
पुलस्त्य उवाच ।
'स्वरूपं त्रिपुरघ्नस्य वदिष्ये कालरूपिणः ।
अश्विनी भरणी चैव कृत्तिकाप्रथमांशकम् ॥
मेषकं हि विजानीयात् कुजक्षेत्रमुदाहृतम् ।
आग्नेयांशास्त्रयो ब्रह्मन् प्राजापत्यं कवेर्गृहम् ॥
सौम्यार्द्धं वृषनामेदं वदनं परिकीर्त्तितम् ।
मृगार्द्धमार्द्रादित्यां शास्त्रयः सौम्यगृहं त्विदम् ॥
मिथुनं भुजयोस्तस्य गगनस्थस्य शूलिनः ।
आदित्यांशश्च पुष्यश्च श्लेषा शनिगृहं त्विदम् ॥
राशिः कर्कटको नाम पार्श्वे सखविनाशिनः ।
पित्र्यार्द्धं भगदैवत्यं उत्तरांशश्च कीर्त्तरी ॥
सूर्य्यक्षेत्रं विभोर्ब्रह्मन् हृदयं परिकीर्त्तितम् ।
उत्तरांशास्त्रयः पाणिश्चित्रार्द्धं कन्यका त्वियम् ।
सोमपुत्रस्य सद्मैतद्द्वितीयं जठरं विभोः ॥
चित्रांशद्वितयं स्वाती विशाखायांशकत्रयम् ।
द्वितीयं शुक्रसदनं तुला नाभिरुदाहृता ॥
विशाखांशमनुराधा ज्येष्ठा भौमगृहं त्विदम् ।
द्वितीयं वृश्चिको राशिर्मेढ्रं कालस्वरूपिणः ॥
मूलं पूर्ब्वोत्तरांशश्च देवाचार्य्यगृहं धनुः ।
ऊरुयुगलमीशस्य अमरैर्ब्बै प्रगीयते ॥
उत्तरांशास्त्रयो ऋक्षं श्रवणं मकरो भुजे ।
धनिष्ठार्द्धं शनिक्षेत्रं जानुनी परिकीर्त्तिते ॥
धनिष्ठार्द्धं शतभिषा प्रोष्ठपदांशकत्रयम् ।
सौरं पद्मापरमिदं कुम्भो जङ्घे च विश्रुते ॥
प्रोष्ठपदांशमेकन्तु उत्तरा रेवती तथा ।
द्वितीयं जीवसदनं मीनस्तु चरणावुभौ ॥"* ॥
राशीनां लक्षणस्वरूपादि यथा,—
नारद उवाच ।
"राशयः कथिता ब्रह्मन् ! त्वया द्वादश वै मम ।
तेषां विशेषतो ब्रूहि लक्षणानि स्वरूपतः ॥
पुलस्त्य उवाच ।
स्वरूपं तत्र वक्ष्यामि राशीनां शृणु नारद ।
यादृशा यत्र सञ्चारा यस्मिन् स्थाने वसन्ति हि ॥
सञ्चारस्थानमेकस्य धान्यरत्नाकरादिषु ।
नवसाङ्गलसंच्छन्नो वसुधायाश्च सर्व्वशः ॥
नित्यं चरति पुष्पेषु सरसां पुलिनेषु च ।
मेषः समानमूर्त्तिश्च अजाविकघनादिषु ॥

वृषः सद्गुरूपेषु चरते गोकुलादिषु ।
तस्याधिवासभूमिस्तु क्षपीवलधराश्रया ॥
स्त्रीपुंसयोः समं भद्रगृह्यासनपरिग्रहैः ।
बीणावाद्यदृङ्मिथुनं गीतनर्त्तकशिल्पिषु ॥
स्थितं क्रीड़ा रतिर्नित्यं विहारोऽवनिरस्य तु ।
मिथुनं नाम विख्यातं राशिर्देधात्मकः स्मृतः ॥
कर्किः कुलीरेण समः सलिलस्थः प्रकीर्त्तितः ।
केदारवापीपुलिनविविक्तावनिरेव च ॥
सिंहस्तु पर्व्वतारण्यदुर्गकन्दरभूमिषु ।
वसते व्याधपल्लीषु गह्वरेषु गुहासु च ॥
या हि प्रदीपकरा नावारूढ़ा च कन्यका ।
चरते स्त्रीरतिस्थाने वसते तद्गनेषु च ॥
तुलापाणिश्च पुरुषो वीथ्यापणविचारकः ।
नगराध्वनि शालासु वसते तच्च नारद ॥
स्वभ्रवल्मीकसञ्चारी वृश्चिको वृश्चिकाकृतिः ।
वृषगोमयकीटोऽल्पपाषाणादिषु संस्थितः ॥
धनुस्तुरङ्गजघनो दीप्यमानो धनुर्द्धरः ।
वाजिशूरोऽस्त्रविद्वीरः स्थायी युद्धबलादिषु ॥
मृगास्यो मकरो ब्रह्मन् ! वृषस्कन्धः फणाङ्गदः ।
मकरोऽसौ नदीचारी वसते च महोदधौ ॥
रिक्तकुम्भश्च पुरुषः स्कन्धधारी जलाप्लुतः ।
दूतशालाचरः कुम्भस्थायी शौण्डिकसद्मसु ॥
मीनरूपत्वमासक्तो मीनस्तीर्थाम्बुसञ्चरः ।
वसते पुण्यदेशेषु देवब्राह्मणपूजकः ॥
लक्षणं गदितं तुभ्यं मेषादीनां महामुने ।
न कस्यचित्त्वयाख्येयं गुह्यमेतत् पुरातनम् ॥
एतन्मया ते कथितं सुरर्षे
यथा त्रिनेत्रः प्रममाथ यज्ञं ।
पुण्यं पुराणं परमं पवित्रं
संग्रहणतां पापहरं शिवञ्च ॥"

इति श्रीवामनपुराणे पुलस्त्यनारदसंवादे हरलिलतः पञ्चमोऽध्यायः ॥

राशिचक्रं, क्ली, (राशीनां चक्रम् ।) मेषादिद्वादशराश्यादियुक्तवृत्तम् । तस्य नामान्तरं भचक्रं ज्योतिषचक्रञ्च । यथा,—
"सप्तविंशतिभेर्ज्योतिश्चक्रं क्षिमितवायुगम् ।
तदर्कांशो भवेद्राशिर्नवर्क्षचरणाङ्कितः ॥"

इति दीपिका ॥ * ॥

तद्विवरणं यथा,—
"भचक्रं ध्रुवयोर्ब्रह्ममात्रिप्रं प्रवहानिलैः ।
पर्य्येत्यजस्रं तन्नद्धा ग्रहकक्षा यथाक्रमम् ॥
उपरिस्थस्य महतीकक्षात्याधःस्थितस्य च ।
महत्या कक्षया भागा महान्तोऽल्पास्तथाल्पया ॥
कालेनाल्पेन भगणं भुङ्क्तेऽल्पभ्रमणाश्रितः ।
ग्रहः कालेन महता मण्डले महति भ्रमन् ॥
स्वल्पया तु बहून् भुङ्क्ते भगणान् शीतदीधितिः ।
महत्या कक्षयागच्छन् ततः स्वल्पः शनैश्चरः ॥
मन्दादधःक्रमेण स्युश्चतुर्था दिवसाधिपाः ।
वर्षाधिपतयस्तद्वत् तृतीयाः परिकीर्त्तिताः ॥
ऊर्द्धक्रमेण शशिनो मासानामधिपाः स्मृताः ।
होरेशाः सूर्य्यतनयादधोधः क्रमशस्तथा ।
भवेद्भकक्षा तीक्ष्णांशोर्भ्रमणं यष्टिताड़ितम् ।
सर्व्वोपरिष्टात् भ्रमति योजनैस्त्रैभमण्डलम् ॥"
तच्च कक्षाक्रममाह ।
"ब्रह्माण्डमध्ये परिधिर्योमकक्षाभिधीयते ।
तन्मध्ये भ्रमणं भानामधोऽधः क्रमशस्तथा ॥
मन्दामरेज्यभूपुत्रसूर्य्यशुक्रेन्दुजेन्दवः ।
परिभ्रमन्त्यधोऽधःस्थाः सिद्धविद्याधरा घनाः ॥"

इति सूर्य्यसिद्धान्तः ॥ * ॥

ग्रहत्रयचन्द्रसंयोगे फलविशेषजनकं राशिचक्रं यथा,—
"राशिचक्रं प्रवक्ष्यामि नृपाणां हितकाम्यया ॥
रविर्जीवस्तथा सौम्यस्तैश्च चन्द्रे समागते ।
जलपातो भवेत् सत्यमित्युक्तं विष्णुयामले ॥
रविर्जीवस्तथा शुक्रस्तैश्च चन्द्रे समागते ।
वायुपातो भवेत् सत्यमित्युक्तं विष्णुयामले ॥
रविर्ज्जीवस्तथा भौमस्तैश्च चन्द्रे समागते ।
अग्निपातो भवेत् सत्यमित्युक्तं ब्रह्मयामले ॥
रविर्भौमस्तथा राहुस्तैश्च चन्द्रे समागते ।
लोहपातो भवेत् सत्यमित्युक्तं रुद्रयामले ॥
रवौ राहुस्तथा केतुस्तैश्च चन्द्रे समागते ।
पाषाणपातोऽपि भवेदित्युक्तं भानुयामले ॥"
इति नरपतिजयचर्य्यायां तुम्बुरुचक्रे राशिचक्रम् ॥ * ॥ जातकराशिचक्रम् । यथा,—
"तन्वादिद्वयपर्य्यन्तं राशिचक्रे व्यवस्थितम् ।
तन्न बुद्ध्वाल्पमतयो जल्पयन्ति वृथा वृथा ॥"

इति पञ्चस्वरा ॥ * ॥

मन्त्रग्रहणोक्तराशिचक्रम् यथा । आगमकल्पद्रुमे ।
"रेखाद्वयं पूर्ब्बपरागतं स्यात्
तन्मध्यतो याम्यकुबेरभेदात् ।
एकैकभीशाननिशाचरे तु
हुताशवायोर्विलिखेत्ततोऽर्णान् ॥
वेदाग्निवह्न्यृगलश्रवणाक्षिसंख्यान्
पक्षेषुबाणशरपक्षचतुष्टयार्णान् ।
मेषादितः प्रविलिखेत् सकलांस्तु वर्णान्
कन्यागतान् प्रविलिखेदथ शादिवर्णान् ॥"

तथा,—
"बालं गौरं खुरं शीर्षं शमी शीभेति राशिषु ।
क्रमेण भेदिता वर्णाः कन्यायां शादयः स्मृताः ॥"
तेन अ आ इ ई मेषः । उ ऊ ऋ वृषः । ऋ ऌ ॡ मिथुनम् । ए ऐ कर्कटः । ओ औ सिंहः । अं अः श ष स ल क्षाः कन्याः । कवर्गस्तुला । चवर्गो वृश्चिकः । टवर्गो धनुः । तवर्गो मकरः । पवर्गः कुम्भः । यवर्गो मीनः । स्वराशीनामनुकूलं मन्त्रं भजेत् । तथा च ।
"स्वतारराशिकोष्ठानामनुकूलान् भजेन्मनून् ॥"

इति वचनात् ॥
"राशीनां शुद्धता ज्ञेया त्यजेच्छुद्धिं स्मृतिं यथम् ।
स्वराशेर्मन्त्रराश्यन्तं गणनीयं विचक्षणैः ॥"
यदा तु स्वराशेरज्ञानं तदा साधकनामाद्यक्षरसम्बन्धिनं राशिं गृहीत्वा गणयेत् ।
"साध्याद्यक्षरराश्यन्तं गणयेत् साधकाक्षरम् ।"
इति रामार्चनचन्द्रिकाधृतवचनात् । तथा,
"अज्ञाते राशिनक्षत्रे नामाद्यक्षरराशितः ॥"

इति तन्त्रराजे ॥
"तेन मन्त्राद्यवर्णेन नाम्नश्चाद्यक्षरेण च ।
गणयेद्यदि षष्ठं वाप्यष्टमं द्वादशन्तु वा ।
रिपुमैत्राद्यवर्णः स्यात् तेन तस्याहितं भवेत् ॥
एक पञ्च नव बान्धवाः स्मृताः
द्वौ च षट् च दशमाश्च सेवकाः ।
वह्निरुद्रसुनयस्तु घोषकाः
द्वादशाष्टचतुरस्तु घातकाः ॥"

इति विष्णुविषयम् ॥
रामार्चनचन्द्रिकाधृतत्वात् । मृत्यादौ तु षष्ठं वर्জ্জनीयम् । तथा च ।
"षष्ठाष्टमद्वादशानि वर्জ্জनीयानि यत्नतः ॥"


इति वचनात् ॥
तन्त्रान्तरे ।
"लग्नं धनं भ्रातृबन्धुपुत्रशत्रुकलत्रकाः ।
मरणं धर्म्मकर्म्मायव्यया द्वादश राशयः ॥
नामानुरूपमेतेषां शुभाशुभफलं लभेत् ।
लग्ने सिद्धिस्तथा नित्यं धने धनसमृद्धिदः ।
भ्रातरि भ्रातृवृद्धिश्च शत्रौ शत्रुविवर्द्धनः ॥
पुत्रे पुत्रविवृद्धिः स्यात् बन्धौ बान्धववत् प्रियः ।
कलत्रे मध्यमा प्रोक्ता मरणे मरणं भवेत् ॥
धर्म्मे धर्म्मविवृद्धिः स्यात् सिद्धिः कर्म्मसंस्थितः ।
आये च धनसम्पत्तिर्व्यये च सञ्चितक्षयः ॥"

वैद्यावतन्त्रे तु शत्रुस्थाने बन्धुरिति पाठः । इति तन्त्रसारः ॥

राशिव्यवहारः, पुं, (राशेर्व्यवहारः ।) शस्यराशिपरिमाणज्ञापकाङ्कः । तद्विवरणं यथा,—
अथ राशिव्यवहारे करणसूत्रं वृत्तम् ।
"अनणुषु दशमांशोऽणुष्वथैकादशांशः
परिधिनवमभागः शूकधान्येषु वेधः ।
भवति परिधिषष्ठे वर्गिते वेधनिघ्ने
घनगणितकराः स्युर्भागधास्त्राश्च खार्थाः ॥"

उदाहरणम् ।
"समभुवि किल राशिर्यः स्थितः स्थूलधान्यः
परिधिपरिमितिः स्याद्वस्तषष्ठिर्यदीया ।
प्रवद गणक खार्थाः किंमिताः सन्ति तस्मिन्नथ पृथगणुधान्येः शूकधान्यैश्च शीघ्रम् ॥"

अथ स्थूलधान्यराशिमानावबोधनाय



परिधिः ६० । वेधः ६ । परिधेः षष्ठांशः १० । वर्गितः १०० । वेध ६ निघ्नः । लब्धाः खार्थाः ६०० ।

राशिव्य

अथाशुधान्यराशिमानानयनाय

न्यासः



परिधिः ६० । वेधः $\frac{६०}{११}$ । जातं फलम् ५४५ $\frac{५}{११}$ ।

अथ शूकधान्यराशिमानानयनाय

न्यासः



परिधिः ६० । वेधः $\frac{२०}{३}$ । खार्यः ६६६ $\frac{२}{३}$ ।

अथ भित्त्यन्तर्वाह्यकोणसंलग्नराशिप्रमाणानयने करणसूत्रं वृत्तम् ।

"द्विवेदसञ्चिभागैकनिघ्नात्तु परिधेः फलम् ।
भित्त्यन्तर्वाह्यकोणस्थराशेः खगुणभाजितम् ॥"


उदाहरणम् ।

"परिधिर्भित्तिलग्नस्य राशेस्त्रिंशत्करः किल ।
अन्तःकोणस्थितस्यापि तिथितुल्यः करः सखे ॥
बहिः कोणस्थितस्यापि पञ्चनवसम्मितः ।
तेषामानयतु क्षिप्रं घनहस्तान् पृथक् पृथक् ॥"

अत्रापि स्थूलादिधान्यानां राशिमानावबोधनाय सप्तक्षेत्रचयम् ।

तत्रादावनशुधान्यराशिमानबोधकं क्षेत्रम् ।

न्यासः




अत्राद्यस्य परिधिः ३० । द्वितीयः ६० । अन्यः १५ । चतुर्थः ६० । अपरः ४५ । सन्धिभागैक $\frac{४}{३}$ निघ्नः ६० । एषां वेधः ६ । एषां फलं तुल्यमेतावन्त्य एव खार्यः ६०० । एतत्खखगुणेन भक्तं जातं पृथक् पृथक् फलम् ३०० । १५० । ४५० ॥

राष्ट्रिका

अथाशुधान्यराशिमानानयनाय


न्यासः



पूर्ब्ववत्क्षेत्रचयाणां खगुणगुणितपरिधिः ६० । वेधः $\frac{६०}{११}$ । फलानि २७२ $\frac{८}{११}$ । १३६ $\frac{४}{११}$ । ४०६ $\frac{१}{११}$ ।

अथ शूकधान्यराशिमानानयनाय

न्यासः



अत्रापि पूर्ब्ववत् क्षेत्रचयाणां खगुणगुणितः परिधिः ६० । वेधः $\frac{२०}{३}$ । फलानि ३३३ $\frac{१}{३}$ । १६६ $\frac{२}{३}$ । ५०० ।

इति लीलावत्यां राशिव्यवहारः समाप्तः ॥

राष्ट्रं, पुं, क्ली, (राजते इति । राज्+"सर्व्वधातुभ्यः ष्ट्रन् ।" उणा० ४ । १५८ । इति ष्ट्रन् । ब्रवेति षः ।) विषयः । (यथा, मनुः । ६ । २५४ ।

"अप्राप्तसंस्कारान् यस्तु बलिं गृह्णाति पार्थिवः ।
तस्य प्रच्युभ्यते राष्ट्रं खर्गाच्चैव परिहीयते ॥") उपद्रवः । इत्यमरः । ३ । ३ । १८३ ॥ विषयो जनपदः । उपद्रवो मरकादिः । इति भरतः ॥ (राष्ट्रपालननियमादिकं महाभारते १२ । ८७ अध्याये द्रष्टव्यम् ॥ * ॥ पुं, पुरूरवोवंशजातस्य काशेः पुत्रः । यथा, भागवते । ६ । १७ । ४ ।

"काशस्य काशिस्तत्पुत्रो राष्ट्रो दीर्घतमः पिता ॥")

राष्ट्रनिवासी, [न्] पुं, (राष्ट्रे निवसतीति ॥ नि+वस्+णिनिः ।) जानपदः । देशवासी । इति त्रिकाण्डशेषः ॥

राष्ट्रिका, स्त्री, (राष्ट्रं उत्पत्तिस्थानत्वेनास्त्यस्या इति । राष्ट्र+ठन् । टाप् ।) कण्टकारिका । इत्यमरः । २ । ४ । ६३ ॥ (पुं, राष्ट्रवासी । जानपदः । यथा, मनुः । १० । ६१ ।

"यत्र त्वेते परिध्वंसा जायन्ते वर्णदूषकाः ।
राष्ट्रिकैः सह तद्राष्ट्रं क्षिप्रमेव विनश्यति ॥"

राष्ट्रपतिः । यथा, हरिवंशे । १८३ । २७—२८ ।

"कुम्भाण्ड ! मन्त्रिणां श्रेष्ठ ! प्रीतोऽस्मि तव सुव्रत ।
सुकृतन्ते विजानामि राष्ट्रिकोऽस्तु भवानिह ॥
सज्ञातिपक्षः सुसुखी निर्व्वृतोऽस्तु भवानिह ।
राज्यञ्च ते मया दत्तं चिरं जीव ममाज्ञया ॥")

राष्ट्रियः, पुं, (राष्ट्रेऽधिकृतः । राष्ट्र+"राष्ट्रावारपाराद् घखौ ।" ४ । २ । ६३ । इति घः । यद्वा, राष्ट्रे जातः । "तत्र जातः ।" ४ । ३ । २५ । इति घः ।) नाय्योक्तौ राजश्यालः । इत्यमरः । १ । ७ । १४ ॥ (राष्ट्राधिपः । यथा, महाभारते । १२ । ८५ । १२ ।

"ततः संप्रेषयेद्राष्ट्रे राष्ट्रियाय च दर्शयेत् ॥")

राष्ट्रीयः, पुं, (राष्ट्रे भव इति । राष्ट्र+छः ।) नाय्योक्तौ राजश्यालः । इति हेमचन्द्रः । २ । २४ ॥ राष्ट्रसम्बन्धिनि, त्रि ॥ (यथा, महाभारते । १२ । ८७ । ६ ।

"धान्यं हिरण्यं भोगेन भोक्तुं राष्ट्रीयसङ्गतः ॥")

रास, ङ क्ष शब्दे । इति कविकल्पद्रुमः ॥ (भ्वा० आत्म० अक० सेट् ।) दन्त्यान्तोऽयमिति गर्सिंहः । रासभः खरः । दुर्गसिंहस्त्विमं तालव्यान्तं मत्वा उणादौ क्षत्वं कृत्वा रभिशब्दं व्युत्पादितवान् । क्ष, अरारासत् । ङ, रासते । इति दुर्गादासः ॥

रासः, पुं, (रासनमिति रासतेऽनेनेति वा । रास शब्दे+भावे अधिकरणे वा घञ् ।) कोलाहलः । ध्वानः । भाषाग्रहकलकः । गोपानां क्रीड़ाभेदः । इति मेदिनी । से, ११ ॥ तस्य विधिर्यथा,—

"कार्त्तिकीपूर्णिमायाञ्च कृत्वा तु रासमण्डलम् ।
गोपानां प्रतिकं कृत्वा गोपीनां प्रतिकन्तथा ॥
शिलायां प्रतिमायां वा श्रीकृष्णं राधया सह ।
भारते पूजयेत् कृत्वा चोपहाराणि षोड़श ॥
गोलोके च वसेत् सोऽपि यावद्वै ब्रह्मणो वयः ।
भारतं पुनरागत्य हरिभक्तिं लभेद्ध्रुवम् ॥
क्रमेण सुदृढ़ां भक्तिं लब्ध्वा मन्त्रं हरेरपि ।
देहं त्यक्त्वा च गोलोकं पुनरेव प्रयाति च ॥
तत्र कृष्णस्य सारूप्यं संप्राप्य पार्षदो भवेत् ।
पुनस्तत्पतनं नास्ति जराम्त्युहरो महान् ॥"

इति ब्रह्मवैवर्त्ते प्रकृतिखण्डे २५ अध्यायः ॥

विस्तारस्तु श्रीकृष्णजन्मखण्डे २८ अध्याये श्रीमद्भागवतीयरासपञ्चाध्यायेषु च द्रष्टव्यः ॥*॥

कस्यचिन्मते कल्यतरुयाचेयम् । अस्य विधिर्यथा,—

"कार्त्तिके पौर्णमास्यान्तु रासयात्रा महानिशि ।
नन्दस्नोः प्रकर्त्तव्या महाविभवविस्तरैः ॥
इह लोके सुखं प्राप्य अन्ते विष्णुपुरं व्रजेत् ॥
पूजा कार्य्याद्वैराजे तु नयेत् प्रेयं महोत्सवैः ।
गीतैर्नानाविधैर्वाद्यैर्वेणुवीणाम्दङ्गकैः ॥
वृत्तैर्वैराङ्गनागीतैरङ्गनानाञ्च कीर्त्तनैः ।

चन्दनागुरुकस्तूरीपङ्कलेपैर्विराजितैः ॥
विहरद्भिर्विष्णुभक्तैः कार्य्य एष महोत्सवः ।
ध्यायेद्वृन्दावने रम्ये यमुनापुलिने वने ॥
निकुञ्जसदने कृष्णं गोपीमण्डलमण्डितम् ।
रासमण्डलयन्तस्य गोविन्दं कर्णिकागतम् ॥
द्वयोर्द्वयोर्गोपिकयोर्मध्ये सान्तमनेकधा ।
अपरं नटवेषेण मध्ये तं सुरलीधरम् ॥
गोपीगणसुखाम्भोजमधुपानमधुव्रतम् ।
कुलालचक्रप्रतिमं मण्डलं पङ्कजाङ्कितम् ॥
दलाष्टशोभितं कार्य्यं महिष्योऽष्टौ च सन्यसु ।
मध्ये मध्ये च गोविन्दं पार्श्वयोरष्टरूपकम् ॥
सुकुन्दं माधवं कृष्णं नटनागरमेव च ।
हरिं दामोदरं विष्णुं पूजयेत् कामरूपिणम् ॥
तदाग्ने भूपुरे गोप्यः शतशोऽथ सहस्रशः ।
पूजनीयाः प्रयत्नेन नृत्यगीतपरायणाः ॥
असंख्या गोपिकास्तत्र मण्डलेऽष्टौ वराङ्गनाः ।
महिष्यस्ताः समाख्याताः सदासङ्गसुनिव्रताः ॥
भक्तोत्सवाभिलाषेण कमला बहुरूपिणी ।
राधा विशाखा विमला सुमित्रा ललिता तथा ।
सुन्दरी कमला रम्भा महिष्योऽष्टौ प्रकीर्त्तिताः ॥
तारा राधा निरावाधा कृष्णा भेदसुपागताः ।
तासां ध्यानैर्वक्ष्यमाणैः पूजा कार्य्या विशेषतः ॥
उत्तीर्णे सायं समये गोप्यो वृन्दावनं ययुः ।
रासक्रीड़ां ततस्ताभिश्चक्रे च जगदीश्वरः ॥
गोप्यो रासक्रीड़ां चक्रुः पौर्णमास्यां महा-
निशि ।
न तत्र पक्षिनिनदो न झिल्लीनिनदस्तथा ॥
महानिशा द्वे घटिके रात्रेर्मध्यमयामयोः ।
तदप्राप्तौ च कर्त्तव्यं पौर्णमास्यां निशासुखे ॥
एवं रासक्रीड़ां यस्तु कारयेद्भुवि मानवः ।
स सर्व्वदुष्कृतं त्यक्त्वा निर्व्वाणमुक्तिमाप्नुयात् ॥"
इत्युत्कलकलिका ॥

(विलासः । यथा, भागवते । ५ । २ । १२ ।
"अस्मद्विधस्य मन उन्नयनौ बिभर्त्ति
वक्त्रद्युतं सरसरासमुधादिवक्त्रे ॥"
"वक्त्रे च वक्त्रद्युतं बिभर्त्ति किं तदाह । रसो मधुरालापः रासो विलासस्ताभ्यां सहिता सुधा अधरास्तम् । आदिशब्दात् स्मितनर्म्मादि ।" इति तत्र श्रीधरस्वामी ॥ क्रिया । यथा, भागवते । ५ । १३ । १७ ।
"तैर्वञ्चितो हंसकुलं समाविशत्
नरोचयन् श्लीलमुपैति वानरान् ।
तज्जातिरासेन सुनिर्वृतेन्द्रियः
परस्परोद्वीक्षणविस्मृतावधिः ॥"
"तैर्वञ्चितस्तत्र फलाभावं ज्ञात्वा हंसानां ब्राह्मणानां कुलं पुनः प्रविशन् तेषां श्लीलं प्रायश्चित्तपूर्ब्बकं पुनरुपनयनाद्याचारमरोचयन् अप्रियं पश्यन् वानरतुल्यान् अशाचारान् शूद्रप्रायानुपैति । तज्जातिरासेन वानरजातिक्रियया स्त्रियां मिथुनीभूय परस्परसुखोद्वीक्षणेन विस्मृतो जीवितावधिर्मरणकालो येन ।" इति तट्टीकायां श्रीधरस्वामी ॥ * ॥)

रासभः, पुं, (रासते शब्दायते इति । रास + "रासिवल्लिभ्याञ्च ।" उणा० ३ । १२५ । इति अभच् ।) गर्द्दभः । इत्यमरः । २ । ६ । ७८ ॥ (अयं हि ब्रह्मणः पद्भ्यां जातः । यथा, मार्कण्डेये । ४८ । २६ ।
"पद्भ्याश्चाश्वान् समातङ्गान् रासभान् शरभान् मृगान् ।
उष्ट्रानश्वतरांश्चैव नानारूपाश्च जातयः ॥"
अश्वतरः । खच्चर इति भाषा । यथा, महाभारते । १ । १४५ । ७ ।
"स त्वं रासभयुक्तेन स्यन्दनेनाशुगामिना ।
वारणावतमद्यैव यथा यासि तथा कुरु ॥")

रासभवन्दिनी, स्त्री, मल्लिका । इति शब्दचन्द्रिका ॥

रासभी, स्त्री, (रासभ + ङीप् ।) गर्द्दभी । इति शब्दरत्नावली ॥ (यथा, महाभारते । १३ । २७ । १४ ।
"एतत् श्रुत्वा मतङ्गस्तु दारुणं रासभीवचः ।
अवतीर्य्य रथात्तूर्णं रासभीं प्रत्यभाषत ॥")

रासमण्डलं, क्ली, (रासस्य मण्डलम् ।) श्रीकृष्णस्य रासक्रीड़ास्थलम् । तद्विवरणम् । यथा,—
"तस्मादुपरि गोलोकः पञ्चाशत्कोटियोजने ।
वायुना धार्य्यमाणश्च विचित्रपरमाश्रयः ॥
अतीवरम्यनिर्म्माणो नित्यरूपो मदीच्छया ।
शतशृङ्गेण शैलेन पुण्यवृन्दावनेन च ॥
सुरासमण्डलेनापि नद्या विरजयावृतः ।
कोटियोजनविस्तीर्णा प्रस्थेन विरजा व्रज ॥
दैर्घ्ये तस्य शतगुणा परितः परमा शुभा ।
अमूल्यरत्ननिकरा हीरामाणिक्ययोस्तथा ॥
मणीनां कौस्तुभादीनामसंख्यानां मनोहरा ।
अमूल्यरत्ननिर्म्माणं तत्रापि प्रतिमन्दिरम् ॥
मनोहरञ्च प्राकारमष्टदिक्षु विचक्रर्म्मणा ।
गोपीभिर्गोपिनिकरैर्वेष्टितं कामधेनुभिः ॥
कल्पवृक्षैः पारिजातैरसंख्यैश्च सरोवरैः ।
पुष्पोद्यानैः सुकोटिभिः संवृतं रासमण्डलम् ॥
वेष्टितं चेष्टितैर्गोपैर्मन्दिरैः शतकोटिभिः ।
रत्नप्रदीपयुक्तैश्च पुष्पतल्पसमन्वितैः ॥
सुगन्धिचन्दनामोदैः कस्तूरीकुङ्कुमान्वितैः ।
क्रीड़ोपयुक्तैर्भोगैश्च ताम्बूलैर्वासितैर्जलैः ॥
धूपैः सुरभिरम्यैश्च माल्यैश्च रत्नदर्पणैः ।
रत्नकैः रचितैः प्रत्यग्रराधादासीकोटिभिः ॥
अमूल्यरत्नाभरणैर्ब्बह्निशुद्धांशुकैरपि ।
लक्षमत्तगजेन्द्राणां वेष्टितैश्च बलैः क्रमात् ॥
नवयौवनसम्पन्नै रूपेणैरुपमैरपि ।
रम्यश्च वर्त्तुलाकारं चन्द्रबिम्बं यथा व्रज ॥
अमूल्यरत्नरचितं दशयोजनविस्तृतम् ।
कस्तूरीकुङ्कुमै रम्यैः सुगन्धिचन्दनार्चितैः ॥
आवृतं मङ्गलघटैः फलपल्लवसंयुतैः ।
दधिलाजैश्च पूर्णैश्च स्निग्धदूर्व्वाङ्कुरैः फलैः ॥
श्रीरामकदलीस्तम्भैरसंख्यैश्च मनोहरैः ।
पट्टसूत्रनिबद्धैश्च स्निग्धैश्चन्दनपल्लवैः ॥
चन्दनासक्तमाल्यैश्च भूषणैश्च विभूषितम् ।
अमूल्यरत्नरचितं शतशृङ्गं मनोहरम् ॥
कोटियोजनमूर्द्धञ्च दैर्घ्यं दशगुणोत्तरम् ।
शैलप्रस्थं परिमितं पञ्चाशत्कोटियोजनम् ॥
अतीवकमनीयञ्च वेदैरनिर्व्वचनीयकम् ।
प्राकारमिव तस्यापि गोलोकस्य मनोहरम् ॥
परितो वेष्टितं रम्यं हीराहारसमन्वितम् ।
तत्र वृन्दावनं रम्यं युक्तं चन्दनपादपैः ॥
कल्पवृक्षैश्च रम्यैश्च मन्दारैः कामधेनुभिः ।
शोभितं शोभनाढ्यैश्च पुष्पोद्यानैर्मनोहरैः ॥
क्रीड़ासरोवरै रम्यैः सुरम्यै रतिमन्दिरैः ।
अतीवरम्यं रहसि रासयोग्यस्थलान्वितम् ॥
रचितं रत्नकै रम्यैरसंख्यैर्गोपिकागणैः ।
परितो वर्त्तुलाकारं त्रिलक्षयोजनं वनम् ॥
षट्पदध्वनिसंयुक्तं पुंस्कोकिलरुतान्वितम् ।
तत्राक्षयवटो रम्यो रहस्येव हि विस्तृतः ॥
सहस्रयोजनोर्द्धञ्च परितश्च चतुर्गुणः ।
गोपीनां कल्पवृक्षश्च सर्व्ववाञ्छाफलप्रदः ॥
क्रीड़ान्वितैरावृतश्च राधादासीशतैरकैः ।
विरजातीरनारीणां यमुनाशीतलेन च ॥
पुण्यान्वितेन मान्येन पवित्रेण सुगन्धिना ।
दासीगणैरसंख्यैश्च वृन्दावनविनोदिनी ॥
तत्र क्रीड़ति सा राधा मम प्राणाधिदेवता ॥
सेयं श्रीदामशापेन वृषभानुसुताधुना ।
ब्रह्मादिदेवैः सिद्धेन्द्रैर्मुनीन्द्रैः पूजिता व्रज ॥"
इति ब्रह्मवैवर्त्ते भगवन्नन्दसंवादे श्रीकृष्णजन्मखण्डे ८४ अध्यायः ॥

रासयात्रा, स्त्री, (रासस्य यात्रा उत्सवः ।) कार्त्तिकीपौर्णमासीकर्त्तव्यश्रीकृष्णरासोत्सवविशेषः । तद्विवरणं यात्राशब्दे द्रष्टव्यम् ॥ * ॥ भक्तिविषयकरासयात्रा यथा,—
"पौर्णमास्यां रासयात्रां देवाः कुर्य्युर्निशामुखे ।
पूर्ब्ववन्मण्डपाद्यापि देवीं देवासनं यजेत् ॥"
पौर्णमास्यां चैत्रपौर्णमास्याम् ।
"संमुखे राससंस्थानं भैरवीभैरवान्वितम् ।
कृत्वा तान् पूजयित्वा च भ्रामयेत् कुम्भचक्रवत् ॥
कोलाहलं मृदङ्गादिवाद्यैर्नृत्यैः सुगीतकैः ।
कुर्य्यादानन्दहृदयः साधकः स्थिरमानसः ॥
वित्तप्राप्यं न कुर्व्वीत देवीयात्रा सुखप्रदा ॥"
इति वामकेश्वरतन्त्रे ५४ पटलः ॥

रासेरसः, पुं, (रासे क्रीड़ाविशेषे यो रसः । अलुक्समासः ।) गोष्ठी । रासः । शृङ्गारः । रससिद्धिः । रसावासः । षष्ठीजागरकः । इति मेदिनी । से, ६० ॥ उत्सवः । इति शब्दरत्नावली ॥ परिहासः । इति जटाधरः ॥

रासेश्वरी, स्त्री, (रासस्य ईश्वरी ।) राधा । यथा,—
"राधा रासेश्वरी रासवासिनी रसिकेश्वरी ॥"
इति ब्रह्मवैवर्त्ते श्रीकृष्णजन्मखण्डे १७ अध्यायः ॥

रास्ना, स्त्री, (रस्यते इति । रस आस्वादने + "रास्नासास्नास्यूणावीणाः ।" उणा० ३ । १५ । इति नप्रत्ययेन साधुः ।) स्वनामख्यातलता-

विशेषः। रासन इति हिन्दी भाषा। तत्पर्य्यायः। नाकुली २ सुरसा ३ सुगन्धा ४ गन्धनाकुली ५ नकुलेष्टा ६ भुजङ्गाक्षी ७ क्षुत्राकी८ सुवहा ९। इत्यमरः॥ नाकुल्यादिपञ्चकं राज्ञायाम्। नकुलेष्टादिचतुष्कं सर्पाक्ष्यामित्याहुः। इति तट्टीकायां भरतः॥ रस्ना १० श्रेयसी ११ रसना १२ रसा१३ सुगन्धिमूला १४ रसाढ्या १५ अतिरसा १६ द्रोणगान्धिका १७ सर्पगन्धा १८ पलङ्कषा १९। इति जटाधरः॥ अस्या गुणाः। गुरुत्वम्। तिक्तत्वम्। उष्णत्वम्। विषवातासकासश्लीपकम्योदरश्लेष्मनाशित्वम्। पाचनत्वञ्च।

"राज्ञा तु त्रिविधा प्रोक्ता मूलं पत्रं लतास्तथा।
ज्ञेयौ मूलदलौ श्रिष्टौ लता राज्ञा तु मध्यमा॥"
इति राजनिर्घण्टः॥

अपिच।

"नाकुली सुरसा राज्ञा सुगन्धा गन्धनाकुली।
नकुलेष्टा भुजङ्गाक्षी सर्पाक्षी विषनाशिनी॥
नाकुली तुवरा तिक्ता कटुकोष्णा विनाशयेत्।
भोगिलूताविषश्वित्रकुष्ठविषज्वरकृमिव्रणान्॥"
इति भावप्रकाशः॥

राज्ञा श्लेष्मामवातघ्नी। इति राजवल्लभः॥ औषधिविशेषः। काँटा आमरुली इति भाषा। तत्पर्य्यायः। एलापर्णी २ सुवहा ३ युक्तरसा ४। इत्यमरः॥ अपि च।

"राज्ञा युक्तरसा रस्ना सुवहा रसना रसा।
एलापर्णी च सुरसा सुस्निग्धा श्रेयसी तथा॥
राज्ञामपाचनी तिक्ता गुरूष्णा कफवातजित्।
श्लेष्मश्वाससमीरास्रवातशूलोदरापहा।
कासज्वरविषाशौतिवातिकामयदोषहृत्॥"
इति भावप्रकाशः॥

(रज्ञना। यथा, वाजसनेयसंहितायाम्। १।३०।

"आदित्ये राज्ञासि।"

"हे योक्त्र आदित्ये अदित्या भूम्याख्यं राज्ञासि रज्ञना असि॥" इति तद्भाष्ये महीधरः॥ रुद्रपत्नीनामन्यतमा। यथा, ब्रह्मवैवर्त्ते। १। ९। १३—१४।

"नामानि रुद्रपत्नीनां सावधानं निबोध मे।
कला कलावती काष्ठा कालिका कलहप्रिया॥
कन्दली भीषणा राज्ञा प्रज्ञोचा भूषणा शुकी।
एतासां बहवः पुत्रा बभूवुः शिवपार्षदाः॥")

राहुः, पुं, (रह त्यागे + बहुलवचनात् उण्।) त्यागः। इति संक्षिप्तसारोणादिवृत्तिः॥ (रहति गृहीत्वा त्यजति चन्द्रमिति। रह त्यागे + बहुलवचनात् उण्। इत्युज्ज्वलः। १। १।) ग्रहविशेषः। तत्पर्य्यायः। तमः २ स्वर्भानुः ३ सैंहिकेयः ४ विधुन्तुदः ५। इत्यमरः॥ असृपिग्वाः ६ ग्रहकल्लोलः ७ सैंहिकः ८ उपप्लवः ९ ग्रीष्मकः १० उपरागः ११ सिंहिकासूनुः १२। इति शब्दरत्नावली॥ कृष्णवर्णः १३ कबन्धः १४। इति जटाधरः॥ अगुः १५

असुरः १६। इति ज्योतिस्तत्त्वम्॥ तस्योत्पत्त्यादिर्यथा,—

"सिंहिकायामथोत्पन्ना विप्रचित्तेश्चतुर्दश।
शूरः शूरबलश्चैव शतः शतबलस्तथैव च॥
दक्षलो नभसश्चैव वातापी हरपो जिकः।
हरकल्पकलिनाभौ भौमश्च नरकस्तथा॥
राहुर्ज्येष्ठश्च तेषां वै चन्द्रसूर्य्यप्रमर्दनः।
इत्येते सिंहिकापुत्रा देवैरपि दुरासदाः॥
दारुणाभिजनाः क्रूराः सर्व्वे ब्रह्मद्विषस्तु ते।
दशान्यानि सहस्राणि सैंहिकेयो गणः स्मृतः॥
निहतो यामदग्न्येन भार्गवेण बलीयसा।
स्वर्भानोस्तु प्रभा कन्या पुलोमस्तु शची सुता॥"
इति वह्निपुराणे प्रजापतिसर्गनामाध्यायः॥*॥

तस्य शिरश्छेदकारणं यथा,—

"देवलिङ्गप्रतिच्छन्नः स्वर्भानुर्देवसंसदि।
प्रविष्टः सोममपिबत् चन्द्रार्काभ्याञ्च सूचितः॥
चक्रेण क्षुरधारेण जहार पिबतः शिरः।
हरिस्तस्य कबन्धस्तु सुधयाप्लावितोऽपतत्॥
शिरस्त्वमरतां नीतमजो ग्रहमचीकल्पत्।
यस्तु पर्व्वणि चन्द्रार्कावभिधावति वैरधीः॥"
इति श्रीभागवते ८ स्कन्धे ९ अध्यायः॥

स च मलयपर्व्वतजातः। शूद्रवर्णः। द्वादशाङ्गुलपरिमाणः। कृष्णवर्णः। कृष्णवस्त्रः। सिंहवाहनः। चतुर्भुजः। खड्गवरशूलचर्म्मधारी। सूर्य्यास्यः। अस्य अधिदेवता कालः। प्रत्यधिदेवता सर्पः। इति ग्रहयज्ञतत्त्वम्॥ अस्य स्वरूपं ग्रहवत्। स च चण्डालजातिः। सर्पाकृतिः। अश्विस्वामी नैर्ऋतदिक्स्वामी च। इति बृहज्जातकादयः॥ (राहुचारस्य फलाफलं बृहत्संहितायाः ५ अध्यायतो द्रष्टव्यम्॥)

राहुग्राहः, पुं, (राहोर्ग्राहो ग्रहणं यत्र।) चन्द्रसूर्य्ययोर्ग्रहणम्। यथा,—

"राहुग्राहोऽर्केन्दोर्ग्रह उपराग उपप्लवः॥"
इति हेमचन्द्रः। २। ३६॥

(अत्र राहुग्राह इत्यपि पाठो दृश्यते॥)

राहुचक्रं, क्ली, (राहोश्चक्रम्।) रथादिसप्तवारेषु अश्वगत्या वामावर्त्तेन यामार्द्धं प्राप्य सप्तदिक्षु राहोर्गमनम्। यथा,—

"पश्चादर्के विधौ वह्नौ सौम्ये शे वायवे कुजे।
रथोदिग्भि भगौ याम्यां गुरावीशे ग्नौ दिने।
राहुर्भ्रमति यामार्द्धादश्वगत्या च वामतः॥
द्यूते युद्धे विवादे च यात्रायां सम्मुखं स्थितम्।
राहुं विवर्ज्जयेद्यत्नाद्यदीच्छेत् कर्म्मणः फलम्॥"
इति सत्तत्त्वमुक्तावली॥*॥

राहुकालानलचक्रं यथा,—

"तस्य चक्रं प्रवक्ष्यामि राहुकालानलाख्यकम्।
मूलाकाशसमं चक्रं ईशादौ क्षत्तिकादिकाः॥
यत्र ऋक्षे स्थितो राहुर्वदनं तद्विनिर्द्दिशेत्॥
मुखात् पञ्चदशे ऋक्षे तस्य पुच्छं व्यवस्थितम्।
अष्टोत्तरशतं ज्ञाता जायन्ते यत्र केतवः॥
याम्ये तस्मुर्च्छगतं सर्वं सहस्रार्कसमत्विषः।

राहुश्रुक्तानि ऋक्षाणि जीवपक्षे त्रयोदश॥
त्रयोदशैव भोग्यानि मृतपक्षे प्रकीर्त्तयेत्।
मृतपक्षे सुखं तस्य मृदं जीवाङ्गमध्यगम्॥
एवमङ्गद्वयो राहुर्ज्ञातव्यः खरपारगैः।
जीवपक्षे त्वपानार्थे मृतपक्षे रवौ स्थिते।
तस्मिन् काले शुभा यात्रा विपरीते तु
हानिदा॥"
इति खरोदयः॥

राहुच्छदः, क्ली, आर्द्रकम्। इति राजनिर्घण्टः॥

राहुदर्शनं, क्ली, (राहोर्दर्शनं यत्र।) राहोश्चाक्षुषज्ञानम्। ग्रहणमिति यावत्। यथा,—

"चक्षुषा दर्शनं राहोर्यत्तद्ग्रहणमुच्यते।
तत्र कर्म्माणि कुर्व्वीत गणनामाचतो नतु॥
राहुदर्शनसंक्रान्तिविवाहात्ययदृष्टिषु।
स्नानमात्रन्तु कर्त्तव्यं दानश्राद्धविवर्ज्जितम्॥"
इति तिथ्यादितत्त्वम्॥

राहुभेदी, [न्] पुं, (राहुं भिनत्तीति। भिद् + णिनिः।) विष्णुः। इति जटाधरः॥

राहुमर्द्दभित्, पुं, (राहोर्मर्द्दनं भिनत्ति क्विनस्तीति। भिद् + क्विप्।) विष्णुः। इति त्रिकाण्डशेषः॥

राहुरत्नं, क्ली, (राहुप्रियं रत्नम्। राहो रत्नमिति वा।) गोमेदकः। इति राजनिर्घण्टः॥

राहुलब्धः, पुं, बुधः। इति हेमचन्द्रः। २। १५१॥

राहुबृहस्पतियोगः, पुं, (राहुणा बृहस्पतेर्योगो मेलनम्।) एकराशिस्थितगुरुराहुः। गुरुचाण्डालियोग इति ख्यातः। तस्य कालाशुद्धिजनकत्वं यथा, भोजदेवव्यवहारसमुच्चये।

"सर्व्वं कार्य्यं न कर्त्तव्यं गुरौ सिंहेऽस्तगेऽपि च।
व्रतदीक्षे न कुर्व्वीत तमोयुक्ते बृहस्पतौ॥"

तमोयुक्ते राहुयुक्ते। व्रतदीक्षे इति नित्येतरवैदिककर्म्मोपलक्षणम्। तथा च स्मृतिसारे ज्योतिषम्।

"एकराशौ स्थितौ स्यातां यदि राहुबृहस्पती।
विवाहव्रतयज्ञादि सर्व्वं तत्र परित्यजेत्॥"

मलमासाद्युपक्रम्य भविष्ये।

"ऋक्षभेदेऽप्येकराशौ सम्पर्कौ यदि वानयोः।
गुरौ राहोरपि तथा त्यजेदिद्वान्न संशयः॥"

अत्र गुरोर्लक्षितत्वं हेतुः।

"यत्र यत्र स्थितो जीवस्तमोयोगेन लक्ष्यते।
उपहासाय किं न स्यादसत्यङ्गो मनीषिणाम्॥"
इति मलमासतत्त्वम्॥*॥

अस्य प्रतिप्रसवो यथा,—

"कर्णाटनाटाङ्गकलिङ्गदेशे
बृहस्पतौ राहुयुतो विरुद्धः।
शेषेषु देशेषु न चास्ति दोषः
सर्व्वत्र कार्य्यं मुनयो वदन्ति॥"

इति बृहद्राजमार्त्तण्डधृतवचनमिति केचिद्वदन्ति॥

राहुस्पर्शः, पुं, (राहोः स्पर्शो यत्र।) उपरागः। इति हलायुधः॥

राहुहा, [न्] पुं, (राहुं हन्तीति। हन्+क्विप्।) विष्णुः। इति हेमचन्द्रः॥
राहूच्छिष्टः, पुं, (राहोरुच्छिष्टः।) लशुनः। इति चिकाण्डशेषः॥ (अस्य विवरणन्तु रसोनशब्दे द्रष्टव्यम्॥)
राहूत्सृष्टः, पुं, (राहुणा उत्सृष्टः परित्यक्तः।) लशुनः। इति हारावली। २२३॥ (अस्य विवरणं रसोनशब्दे द्रष्टव्यम्॥)
रि, शृ गतौ। इति कविकल्पद्रुमः॥ (तुदा०-पर०-सक०-सेट्।) रेफादिः। शृ, रियति। इति दुर्गादासः॥
रिक्तं, क्ली, (रिच्+क्तः।) शून्यम्। वनम्। इति मेदिनी। ते, ५०॥
रिक्तं, त्रि, (रिच्+क्तः।) निर्धनम्। इति शब्दरत्नावली॥ (शून्यम्। यथा, मनुः।८।४०५।
"भाण्डपूर्णानि यानानि तार्य्यं दाप्यानि सारतः।
रिक्तभाण्डानि यत्किञ्चित् पुमांसश्चापरिच्छदाः॥")
रिक्तकं, त्रि, (रिक्त+कन्।) शून्यम्। इत्यमरः। ३। १। ५६॥ (यथा, मनुः। ८। ४०४।
"पञ्चं यानं तरे दाप्यं पौरुषेऽर्द्धपणं तरे।
पादं पशुषु योषित्सु पादार्द्धं रिक्तकः पुमान्॥")
रिक्ता, स्त्री, (रिच्+क्तः। टाप्।) तिथिभेदः। सा तु चतुर्थी नवमी चतुर्दशी च। यथा,—
"नन्दा भद्रा जया रिक्ता पूर्णा च तिथयः क्रमात्॥"
इति तिथ्यादितत्त्वम्॥
कर्म्मसु तस्या निषेधविधौ यथा,—
"नन्दा भद्रा जया रिक्ता पूर्णा नामसदृक्फलाः।"
न रिक्ता सर्व्वकर्म्मसु। इति ज्योतिःसारः॥
"चन्द्रे चार्ककुजार्किशुक्रवियुते मध्येऽथवा पापयोः
त्यक्त्वा च व्यतिपातवैधृतिदिनं विष्टिञ्च रिक्तां तिथिम्।
क्रूराह्वायनचेत्रपौषरहिते लग्नांशके मानुषे॥
रिक्तासु विधवा कन्या दर्शेऽपि स्यादिवाहिता।
शनैश्चरदिने चैव यदि रिक्ता तिथिर्भवेत्।
तस्मिन् विवाहिता कन्या पतिसन्तानवह्निनी॥"
इति दीपिका॥
"षष्ठे मासि निशाकरे शुभकरे रिक्तेतरे वा तिथौ
सौम्यादित्यसितेन्दुजीववदिवसे पक्षे च शुक्लेतरे॥"
इति शुक्लबलभीमः॥
"द्वादश्यौ सप्तमी नन्दा रिक्तासु पर्व्वसु।
बलमायुर्यशो हन्यात् स्त्रिशूनामन्नभक्षणम्॥"
इति कृत्यचिन्तामणिः॥
"पूर्व्वेद्युरह्नकसर्षमूलरहितेष्वृक्षेष्वरिक्ते तिथौ
षष्ठे मासि सितेन्दुजीवदिवसे गोऋक्षे मीनोदये।
संप्राप्ते पञ्चमे वर्षे अप्रसूते जनार्द्दने।
षष्ठीं प्रतिपदञ्चैव वर्जयित्वा तथाष्टमीम्॥
रिक्तां पञ्चदशीञ्चैव सौरिभौमदिनं तथा।
एवं सुनिश्चिते काले विद्यारम्भन्तु कारयेत्॥"
इति विष्णुधर्म्मोत्तरः॥

"पूर्व्वाह्णेऽथाभ्यपक्षिणिचित्रश्विवान्त्यभेषु
रिक्ताष्टमीं विगतचन्द्रतिथिं विहाय।
द्वाङ्गालिगोसमुदये विकुलार्किवारे
शूस्तेन्दुयोगकरणेषु हलप्रवाहः॥"
इति दीपिका॥
"चन्द्रार्कयोर्भवेत् पूर्णा कुजे भद्रा जया गुरौ।
बुधमन्दौ च नन्दायां शुक्रे रिक्ताष्टता तिथिः॥"
इति भीमपराक्रमः॥
"सर्व्वत्र कार्य्ये बुधजीवशुक्राः
केन्द्रत्रिकोणोपगताः प्रशस्ताः।
तृतीयलाभारिगताश्च पापा-
स्तिथिर्विरिक्ता शुभदस्य चाहः॥"
इति दीपिका॥
"चतुर्थी नवमी चैव रिक्ता चैव चतुर्दशी।
शुक्रे नन्दा बुधे भद्रा शनौ रिक्ता कुजे जया।
गुरौ पूर्णा च संयुक्ता सिद्धियोगाः प्रकीर्त्तिताः॥
बुधमन्दगता नन्दा कुजे भद्रा जया गुरौ।
भृगुरिक्ताष्टतं प्रोक्तं पूर्णा च रविचन्द्रयोः॥"
इति ज्योतिःसागरसारः॥
"षष्ठाष्टमीद्वादशीषु न गच्छेत्त्रिदिनस्पृशि।
पूर्णिमाप्रतिपद्दर्शरिक्तावमदिनेषु च।
तथा यमद्वितीयायां यात्रायां मरणं भवेत्॥"
इति सत्कृत्यसुक्तावली॥
रिक्थं, क्ली, (रिङ्क्ते वहिर्गच्छति नश्यतीति। रिच्+"पातृतुदिवचिरिचिसिचिभ्यस्थक्।" उणा०२।७। इति थक्।) धनम्। इत्यमरः। २। ६। ६०॥ (यथा, मनुः। ८। २७।
"बालदायादिकं रिक्थं तावत् राजानुपालयेत्।
यावत् स स्यात् समाप्तो यावच्चातीतशैशवः॥")
रिक्थहारी, [न्] त्रि, (रिक्थं हरतीति। हृ+णिनिः।) दायादः। धनहारी। यथा।
"यदासौ नियुक्तो देवरादिः स्वयमप्यपुत्रोऽपुत्रस्य क्षेत्रे स्वपरपुत्रार्थं प्रवृत्तोऽयं जनयति स द्विपिण्डको द्वयोरपि रिक्थहारी पिण्डदाता च।" इति मिताक्षरायां दायभागः॥
रिक्थी, [न्] त्रि, (रिक्थमस्यास्तीति। रिक्थ+इनिः।) धनहारी। धनी। (यथा, याज्ञवल्क्यः। २। २६।
"योऽभियुक्तः परेतः स्यात् तस्य रिक्थी तमुद्धरेत्॥")
रिक्षा, स्त्री, लिक्षा। यूका। इति हेमचन्द्रः। ४। २७४॥
रिख, इ सर्पणे। इति कविकल्पद्रुमः॥ (भ्वा०-पर०-सक०-सेट्।) इ, रिक्षति। इति दुर्गादासः॥
रिग, इ गतौ। इति कविकल्पद्रुमः॥ (भ्वा०-पर०-सक०-सेट्।) इ, रिङ्गति। इति दुर्गादासः॥
रिङ्खं, क्ली, (रिङ्ख+ल्युट्।) स्खलनम्। इति हेमचन्द्रः। ६। १५६॥ (यथा,—
"सुक्राथ रिङ्खविधिं पादचंक्रमणक्षमः।
कुमारः पञ्चवर्षीयः कलाभ्यासं विधास्यति॥")
रिङ्गणं, क्ली, (रिङ्ग+ल्युट्।) स्खलनम्। इत्यमरः॥ "दे धर्म्मोद्युपचितादप्रतिष्ठायां स्वकीयविधानादन्यथाभावे इत्यर्थः। औचित्यात् पिच्छिलादेश्च स्खलने। इति रमानाथः॥ धर्म्मविलङ्घनं रिङ्गणमिति स्वामी॥ बालानां हस्तपादाभ्यां चलनं रिङ्गणम्। पिच्छिलादौ पतनं स्खलनमित्यन्ये। एतन्मते भेदेऽप्यभेदोपचारेण समे इत्युक्तम्। 'रग रिग लिगि गतौ' अनट्। रिङ्गणमिति पाठे रखि रख रिखि सर्पणे इत्यस्य रूपम्।" इति भरतः॥
रिच, किं सम्पर्कवियोगयोः। इति कविकल्पद्रुमः॥ (चुरा०-पक्षे भ्वा०-पर०-अक०-सेट्।) किरेचयति रेचति। रिङ्क्ते रिपुर्यदाक्रान्तो धनैर्मन्त्रेश्च रेचति। रेचयन्ति च तन्नार्य्य इति हलायुधः। इति दुर्गादासः॥
रिच, इर् ध च औ विरेके। इति कविकल्पद्रुमः॥ (रुधा०-उभ०-अक०-अनिट्।) विरेकः पौनःपुन्येन पुरीषोत्सर्गः। इति चतुर्भुजः। इर्, अरिचत् अरेचीत्। ध च, रिणक्ति रिङ्क्ते अतिसारकी। औ, रेक्ता। इति दुर्गादासः॥
रिज, ङ ऋज्यर्थे। इति कविकल्पद्रुमः॥ (भ्वा०-आत्म०-सक०-सेट्।) ऋज्यर्थे भर्जने। ङ, रेजते। इति दुर्गादासः॥
रिधमः, पुं, कामः। वसन्तः। इति विश्वः॥
रिपुः, पुं, (अनिष्टं रपतीति। रप वाचि+"रपेरिच्चोपधायाः।" उणा० १। २७। इति कुः इकारश्चोपधायाः। "रिफ कत्थनयुद्धनिन्दाहिंसादानेषु। 'रेफेः किच्च।' उणा० १। १४। इति बाहुलकादुप्रत्ययः। रिपति केचित् पठन्ति। तत्र बाहुलकादेव ककारस्य पकारः। रिफति मोघमार्थं युध्यते हिनस्ति वा निन्द्यते च सत्पुरुषैः।" इति निघण्टुटीकायां देवराजयज्वा। ३। २४। ४।) शत्रुः। इत्यमरः। २। ८। १०॥ (यथा, हितोपदेशे।
"नकश्चित् कस्यचिन्मित्रं न कश्चित् कस्यचिद्रिपुः।
कारणादेव जायन्ते मित्राणि रिपवस्तथा॥")
शरीरस्थषड्रिपवो यथा। कामः क्रोधः लोभः मोहः मदः मात्सर्य्यञ्च। तथा हि।
"आस्थाय योगमवलिप्य च वैरिषट्कमावध्य चेन्द्रियगणं मनसि प्रसह्य॥"
इत्यादि तन्त्रसारे भुवनेश्वरीस्तोत्रम्॥ * ॥
चोरकनामगन्धद्रव्यम्। इति राजनिर्घण्टः॥ लग्नापेक्षया षष्ठलग्नम्। तत्पर्य्यायः। षट्कोणम् २ रिपुमन्दिरम् ३। यथा,—
"धीस्थानं पञ्चमं ज्ञेयं यामित्रं सप्तमं स्मृतम्।
द्यूनं द्यूनं तथास्त्राख्यं षट्कोणं रिपुमन्दिरम्॥"
अपि च।
"सुनीचगेऽस्तगेऽपि वा रिपोर्यदे स्थिता ग्रहाः।
वृथा फलं प्रकीर्त्तितं समस्तमेव सूरिभिः॥"
अन्यच्च।
"अरातित्रयगोः षष्ठे चाष्टमे मृत्युरन्ध्रयोः।
व्ययस्थे द्वादशस्थाने वैपरीत्येन चिन्तनम्॥"
इति ज्योतिस्तत्त्वम्॥

(ध्रुवपुत्रस्य शिष्टेः पुत्रः। यथा, हरिवंशे। २। १४-१५।
"तस्मात्शिष्टिश्च भव्यश्च ध्रुवात् शम्भुर्व्यजायत।
शिष्टेराधत्त सुच्छाया पञ्चपुत्रानकल्मषान्॥
रिपुं रिपुञ्जयं पुण्यं वृकलं वृकतेजसम्॥"
यदोः पुत्रः। यथा, भागवते। ९। २३। २०।
"यदोः सहस्रजित् क्रोष्टानलोरिपुरितिश्रुताः॥")

रिपुघातिनी, स्त्री, (रिपुं हन्तीति। हन+णिनिः।) लताविशेषः। कुचुइ इति भाषा। यथा,
"कुचिका बहुविस्तीर्णा कुचिका रिपुघातिनी॥"
इति शब्दचन्द्रिका॥

रिनृफ, प अ वधे। इति कविकल्पद्रुमः॥ (तुदा०-पर०-सक०-सेट्।) नोपधः। प अ, रिम्फति रिरिम्फ। सप्तमस्वरादिरयमित्यन्ये। इति दुर्गादासः॥

रिपृफं, क्ली, लग्नापेक्षया द्वादशराशिः। यथा,—
"कर्म्मस्थानञ्च दशमं खं मेशूरणमास्यदम्।
छिद्राख्यमष्टमं स्थानं रिपृफाख्यं द्वादशं स्मृतम्॥"
तत्र चिन्तनीयं यथा,—
"प्राप्तायावथ चिन्तयेद्भवगृहे रिपृफेऽथ मन्त्रिव्ययौ
सौम्यस्वामियुतीक्षितैरुपचितस्थैर्यां क्षतिस्त्वन्यथा॥"
इति ज्योतिस्तत्त्वम्॥

रिप्रः, त्रि, (रीङ् स्रवणे+"लीड्रीङो ड्रुक्च पुट्च तरौ श्लेषणकुत्सितयोः।" उणा०५। ५५। इति रप्रत्ययः। धातोर्द्वित्वः। प्रत्ययस्य पुट्च।) अधमः। इति सिद्धान्तकौमुद्यामुणादिवृत्तिः॥ (यथा, ऋग्वेदे। ६। ७८। १।
"गृभ्णाति रिप्रमविरस्य तान्वा।'
"रिप्रं अनुपादेयत्वेन पापरूपम्॥" इति तद्भाष्ये सायणः॥ क्ली, पापम्। यथा, ऋग्वेदे। १०। १७। १०।
"विश्वं हि रिप्रं प्रवहन्ति देवीः॥"
"देवीर्देव्यः देवनशीला आपः विश्वं सर्व्वं विप्रं पापं प्रवहन्ति पुरुषसकाशात् प्रगमयन्ति अपनयन्तीति यावत्।" इति तद्भाष्ये सायणः॥)

रिप्रवाहः, त्रि, पापवाहकः। यथा,—
"क्रव्यादमग्निं प्रहिणोमि दूरम्।
यमराज्यं गच्छतु रिप्रवाहः॥"
इति भवदेवभट्टोक्तकुशण्डिकापद्धतिः॥
"रिप्रं पापं वहतीति रिप्रवाहः।" इति तट्टीकायां गुणविष्णुः॥ "स प्रहितः क्रव्यादग्निः यमराज्यं गच्छतु यमस्य राज्यं प्रति व्रजतु। किम्भूतः रिप्रवाहः रिप्रमिति पापनाम। रिप्रं पापं वहति नाशयति रिप्रवाहः।" इति वाजसनेयसंहिताभाष्ये महीधरः। ३५। १९॥
"रिप्रवाहः रिप्रं पापं तस्य वोढा सोऽग्निः यमराज्ञः यमो राजा येषां तान् यमराजकान् अन्यप्रदेशान् गच्छतु प्राप्नोतु।" इति ऋक्भाष्ये सायणः। १०। १६। ६॥)

रिफ, कुत्सने। इति कविकल्पद्रुमः॥ (भ्वा०-पर०-सक०-सेट्।) सौत्रधातुरयम्। रिप्फः रेफः। इति दुर्गादासः॥

रिफ, अ अर्फे। इति कविकल्पद्रुमः॥ (तुदा०-पर०-सक०-सेट्।) अ, रिफति। अर्फो दानश्लाघाहिंसानिन्दायुद्धानि। इति दुर्गादासः॥

रिब, इ गत्याम्। इति कविकल्पद्रुमः॥ (भ्वा०-पर०-सक०-सेट्।) इ, रिम्बते। इति दुर्गादासः॥

रिभ, रवे। इति कविकल्पद्रुमः॥ (भ्वा०-पर०-अक०-सेट्।) विरिभ्वः। इति दुर्गादासः॥

रिमेदः, पुं, अरिमेदः। इति राजनिर्घण्टः॥

रिरी, स्त्री, पित्तलः। इति हेमचन्द्रः। ४। ११४॥

रिव, इ व्रणे। इति कविकल्पद्रुमः॥ (भ्वा०-पर०-सक०-सेट्।) इ, रिखति। व्रणो गतिः। इति दुर्गादासः॥

रिश, औ अ हिंसे। इति कविकल्पद्रुमः॥ (तुदा०-पर०-सक०-अनिट्।) औ, अरिक्षत्। अ, रिशति। रेक्ष्यति। इति दुर्गादासः॥

रिश्यः, पुं, (रिश्यते हिंस्यते इति। रिश्+क्यप्।) मृगः। इति त्रिकाण्डशेषः॥

रिष, वधे। इति कविकल्पद्रुमः॥ (भ्वा०-पर०-सक०-सेट्।) रेषति। इति दुर्गादासः॥

रिषिः, पुं, ऋषिः। ऋषन्ति ज्ञानसंसारयोः पारं गच्छन्ति ऋषयः। ऋषी अ गतौ नाम्नीति किः। रिषिर्हंसादिश्च। विद्याविदग्धमतयो रिषयः प्रसिद्धाः। इति प्रयोगात्। स्त्रियां ऋषी च। इत्यमरटीकायां भरतः॥

रिष्टं, क्ली, (रिष्+क्तः।) क्षेमम्। कल्याणम्। अशुभम्। अमङ्गलम्। (यथा, मार्कण्डेये। ५०। ८६।
"स्थालीपिधाने यत्नाग्निर्दत्तो दर्व्याफलेन वा।
गृहे तत्र हि रिष्टानामशेषाणां समाश्रयः॥")
अभावः। नाशः। इत्यमरभरतौ॥ अशुभस्याभावः। इति केचित्। इति भरतः॥ पापम्। इत्यजयः॥ तद्वति, त्रि॥

रिष्टः, पुं, (रिष्+क्तः।) खड्गः। फेणिलः। स तु रक्तशिग्रुः। इति मेदिनी। टे, २७॥

रिष्टकः, पुं, (रिष्ट एव। स्वार्थे कन्।) रक्तशिग्रुः। इति शब्दरत्नावली॥

रिष्टिः, पुं, (रेषति हिनस्तीति। रिष्+क्तिच्।) खड्गः। इति मेदिनी। टे, २७॥

रिष्टिः, स्त्री, (रिष्+क्तिन्।) अशुभम्। इति मेदिनी। टे, २७॥ शब्दभेदः। इति शब्दरत्नावली॥

रिष्यः, पुं, (रिष्यते इति। रिष्+क्यप्।) मृगविशेषः। यथा,—
"ऋष्य ऋश्यो रिश्यो रिष्य एणः स्यादेणकोऽपि च।"
इति शब्दरत्नावली॥

रिष्वः, त्रि, (रिष वधे+"सर्व्वनिघृष्वरिष्वेति।" उणा० १। १५३। इति वनुप्रत्ययेन साधुः।) वधकः। इति सिद्धान्तकौमुद्यामुणादिवृत्तिः॥

रिह, वधे। इति कविकल्पद्रुमः॥ (भ्वा०-पर०-सक०-सेट्।) रेहति। इति दुर्गादासः॥

री, श्रो ड य क्षरणे। इति कविकल्पद्रुमः॥ (दिवा०-आत्म०-अक०-अनिट्।) श्रो, रीयः। ड य, रीयते पयः। इति दुर्गादासः॥

री, गि रवे। वधे। गतौ। इति कविकल्पद्रुमः॥ (क्र्या०पु०-पर०-अक०-सक० च-अनिट्।) गि, रिणाति रीणः रिणिः। रव; शब्दः। तथा च कातन्त्रादौ री गतिरेषणयोः। रेषणं वृक-ध्वनिरिति रमानाथः। रिणाति रेषते वृकः। इति शब्दार्थे भट्टमल्लः। इति दुर्गादासः॥

री, स्त्री, (री+क्विप्।) गतिः। इति शब्दरत्नावली॥ रवः। वधः। इति रीधात्वर्थदर्शनात्॥

रीच्या, स्त्री, घृणा। यथा। मोहो रीच्या जुगुप्सा च घृणीया घृणिया घृणेति वाचस्पतिः। अयन्तु लज्जायां प्रसिद्धेः प्रमादात् घृणायां प्रयुक्त इति कलिङ्गः। इत्यमरटीकायां भरतः॥

रीठा, स्त्री, रीठाकरञ्जः। इति राजनिर्घण्टः॥

रीठाकरञ्जः, पुं, स्वनामख्यातवृक्षः। तत्पर्य्यायः। गुच्छकः २ गुच्छपुष्पकः ३ रीठा ४ गुच्छफलः५ अरिष्टः ६ मङ्गल्यः ७ कुम्भबीजकः८ प्रकीर्य्यः९ सोमवल्कः १० फेणिलः ११। अस्य फलगुणाः। तिक्तत्वम्। उष्णत्वम्। कटुत्वम्। स्निग्धत्वम्। वातकफकुष्ठकण्डूतिविषविष्फोटनाग्नित्वञ्च। इति राजनिर्घण्टः॥

रीढ़कः, पुं, पृष्ठवंशः। इति हेमचन्द्रः। ३। २६५॥

रीढ़ा, स्त्री, (रिह वर्ज्जे+औणादिकः क्तः।) अवज्ञा। इत्यमरः। १। ७। २३॥

रीर्णं, त्रि, (री+क्तः। ओदितश्चेति नः।) सृतजलादि। चरितम्। इत्यमरः। ३। १। ६२॥

रीतिः, स्त्री, (री+क्तिच् क्तिन् वा।) आरकूटः। (तत्पर्य्यायगुणा यथा,—
"पित्तलन्त्वारकूटं स्यादरो रीतिश्च कथ्यते।
राजरीतिर्व्रणारीतिः कपिला पिङ्गलापि च॥
रीतिरप्युपधातुः स्यात्ताम्रस्य यशदस्य च।
पित्तलस्य गुणा ज्ञेयाः स्वयोनिसदृशा जनैः॥
संयोगजप्रभावेण तस्याप्यन्ये गुणाः स्मृताः॥"
इति भावप्रकाशस्य पूर्ब्बखण्डे प्रथमे भागे॥)
प्रचारः। स्यन्दः। इत्यमरः। २। ६। ६९॥ ३।३।६८॥ लोहकिट्टम्। इति मेदिनी। ते, ५०॥ दग्धखर्ज्जादिमलम्। इति धरणिः॥ सीमा। स्रवणम्। गतिः। स्वभावः। शैघस्य पर्य्यायः। रूपम् २ लक्षणम् ३ भावः ४ आत्मा ५ प्रकृतिः ६ सहजः ७ रूपतत्त्वम् ८ धर्म्मः ९ सर्गः १० निसर्गः ११ शीलम् १२ सतत्त्वम् १३ संसिद्धिः १४। इति हेमचन्द्रः॥ (यथा, कथासरित्सागरे। १४। ६२।
"निम्नान्तस्निग्धचक्राक्षरीतिच्छद्मो रथक्रमः॥"

स्तुतिः । यथा, ऋग्वेदे । २ । २४ । १४ ।
"महीव रीतिः प्रवसासरत् पृथक् ॥"
"महीव रीतिः महती स्तुतिरिव ।" इति तद्भाष्ये सायणः ॥) काव्यस्यात्मा । इति वामनस्तच्चम् ॥ गुणभेदेन तद्विभागमाह ।
"ओजःप्रसादमाधुर्य्यगुणत्रितयभेदतः ।
गौड़वैदर्भ्यपाञ्चालरीतयः परिकीर्त्तिताः ॥"
प्रत्येकेनेषां लक्षणानि यथा,—
"ओजः समासभूयस्त्वं मांसलं पदडम्बरम् ।
अयुक्तार्थपदमग्राम्यं प्रसादः परिकीर्त्तितः ॥
ग्रन्दार्थयोस्तु रसवन्मधुरं परिकीर्त्तितम् ।
सर्व्वलोकावगम्यं यद्ग्राम्यं तदभिधीयते ।
सुश्राव्यमपि गम्भीरं प्रसन्नमुपनागरम् ॥"
ग्राम्यं यथा,—
"कन्ये मन्येऽसौ धन्यो यस्यामद्य विवाहयेत् ।
नाल्पेन तपसा लभ्यः सुन्दरस्त्रीसमागमः ॥"
उपनागरं यथा—
"तन्वि त्वदधरं खादु नाविदन्नविदो जनाः ।
वसुधायां सुधाभावान्मृषा स्वर्गं ययासवः ॥
ग्रन्दालङ्करणं तत् स्यादृयदनुप्रासभास्वरम् ।
वर्णावृत्तिरनुप्रासः पदे पादे विधीयते ।
पदावृत्तिस्तु यमकमादिमध्यान्तसर्व्वगम् ॥" *॥
क्रमेण रीतित्रयाणामुदाहरणानि ।
"गङ्गोत्तुङ्गतरङ्गसङ्गतजटाजूटाग्रजाग्रत्फणि-
स्फूर्ज्जत्फुत्कृतिभीतिसम्भृतिचमत्कारस्फुरत्-
रुक्मभा ।
आनन्दाप्लुतवापिकां विदधती चित्ते गिरीशप्रभो-
स्त्वां पायान्नवसङ्गमे भगवती लज्जावती
पार्व्वती ॥
भवतो विरहव्याधिमधिगम्य ससम्भ्रमा ।
कामिनी यामिनीकान्तं कृतान्तमिव पश्यति ॥
हन्ताङ्गि सन्तापनिवृत्तयेऽस्याः
किं तालवृन्तं तरलीकरोषि ।
उत्तापं एवोऽन्तरतापहेतु-
र्नतभ्रुवो नर्त्तयतापनेयः ॥"
इति काव्यचन्द्रिका ॥
(अस्या अन्यद्विवरणं साहित्यदर्पणे ६ परिच्छेदे द्रष्टव्यम् ॥)
रीतिकं, क्ली, पुष्पाञ्जनम् । इति राजनिर्घण्टः ॥
रीतिका, स्त्री, कुसुमाञ्जनम् । इति ग्रन्दचन्द्रिका पित्तलञ्च ॥ (यथा, वृहत्संहितायाम् । ५७।८।
"अष्टौ सीसकभागाः कांस्यस्य द्वौ तु रीतिकाभागः ।
मयकथितो योगोऽयं विज्ञेयो वज्रसंघातः ॥")
रीतिपुष्पं, क्ली, (रीतेः पित्तलस्य पुष्पमिव । तदाकृतित्वात् ।) कुसुमाञ्जनम् । इत्यमरः । २ । ६ । १०३ ॥
रीव, ऋ ञ चौवे । इति कविकल्पद्रुमः ॥ (भ्वा०-उभ०-सक०-सेट् ।) ऋ, अरिरीवत् । ञ, रीवति रीवते । चौवो ग्रहणसंवरणयोः । इति दुर्गादासः ॥

रु, ड वधे । गत्याम् । इति कविकल्पद्रुमः ॥ (भ्वा०-आत्म०-सक०-सेट् ।) ड, रवते । इति दुर्गादासः ॥
रु, ल ध्वनौ । इति कविकल्पद्रुमः ॥ (अदा०-पर०-अक०-सेट् ।) ल, रौति रवीति पक्षी । इति दुर्गादासः ॥
रुः, पुं, ग्रब्दः । इत्येकाक्षरकोषः ॥
रुक्, त्रि, बहुप्रदः । इति ग्रब्दमाला ॥
रुक्, [च्] स्त्री, (रुच् + भावे क्विप् ।) ग्रोभा । (यथा, माघे । ४ । ६६ ।
"दधद्भिरभितस्तटौ विकचवारिजाम्बूनदै-
र्विनोदितदिनक्लमाः स्तुतरुचश्च जाम्बूनदैः ॥")
द्युतिः । (यथा, किरातें । ५ । ४५ ।
"क्षिपति योऽनुवनं वितनां दृहद्-
दृहतिकामिव रौचनिकीं रुचम् ॥")
इच्छा । इति मेदिनी ॥ (यथा, महाभारते । १३ । १२४ । २८ ।
"नानाबुद्धिरुचो लोके मनुष्यान्नूनमिच्छसि ।
ग्रहीतुं स्वगुणैः सर्व्वांस्तेनासि हरिणः स्तुतः ॥"
तेजः । यथा, रघुः । ६ । ६ ।
"अनुययौ यमपुण्यजनेश्वरौ
सवरुणावरुणाग्रसरं रुचा ॥")
ग्रारिकाशुकवाक् । इति ग्रब्दरत्नावली ॥
रुक्, [ज्] स्त्री, (रुज् + क्विप् ।) रोगः । इत्यमरः । २ । ६ । ५१ ॥ (यथा, भागवते । ६ । १ । ८ ।
"दोषस्य दृष्ट्वा गुरु लाघवं यथा
भिषक् चिकित्सेत रुजां निदानवित् ॥"
रुजति पीड़यतीति । पीड़ादायके, त्रि । यथा, महाभारते । ५ । ८४ । १ ।
"प्रयान्तं देवकीपुत्रं परवीररुजो दृग्र ।
महारथा महाबाहुमन्वयुः ग्रस्त्रपाणयः ॥"
अथवा परस्य वीराणां रुक् यैरिति ॥)
रुक्प्रतिक्रिया, स्त्री, (रुजः प्रतिक्रिया निरसनम् ।) चिकित्सा । इत्यमरः । २ । ६ । ५० ॥
रुक्मं, क्ली, (रोचते ग्रोभते इति । रुच् + "ग्रुजिरुचितिजां कुश्च । उणा० १ । १४५ । इति मक् कवर्गश्चान्तादेग्रः ।) काञ्चनम् । (यथा, रामायणे । २ । ७० । २१ ।
"रुक्मनिष्कसहस्रे द्वे षोड़ग्राश्वशतानि च ।
सतूणञ्च कैकयीपुत्रं कैकेयो धनमादिग्रत् ॥")
धुस्तूरम् । इत्यमरः । लोहम् । इति मेदिनी । मे, २८ ॥ (अस्य पर्य्यायो यथा,—
"कृष्णायसं काललोहं रुक्मं तप्तीक्ष्णमग्नथ ॥"
इति वैद्यकरत्नमालायाम् ॥)
नागकेग्ररम् । इति राजनिर्घण्टः ॥ (वर्णे, पुं । इति उज्ज्वलदत्तः । १ । १४५ ॥ दीप्तिग्रीले, त्रि । यथा, ऋग्वेदे । ५ । ६१ । १२ ।
"दिवि रुक्म इवोपरि ॥"
"दिवि द्युलोके रुक्मो रोचमान आदित्य इव ।"
इति तद्भाष्ये सायणः ॥)
रुक्मकारकः, पुं, (रुक्मं स्वर्णालङ्कारं करोतीति । रुक्म + "कर्म्मण्यण् ।" ३ । २ । १ । इत्यण् । ततः स्वार्थे कन् ।) स्वर्णकारः । इत्यमरः । २ । १० । ८ ॥
रुक्माङ्गदः, पुं, राजविग्रेषः । यथा । अस्ति कलिङ्गविषये रुक्माङ्गदो नाम नरपतिर्दिग्विजययात्रापराक्रमेणागत्य चन्द्रभागानदीतीरे समावेग्रितकटको वर्त्तते । इत्यादि हितोपदेग्रे १ परिच्छेदः ॥
रुक्मिणी, स्त्री, (रुक्मो वर्णोऽस्यस्या इति । रुक्म + इनिः । ङीप् ।) लक्ष्मीमहिषीविग्रेषः । तत्पर्य्यायः । ईः २ रमा ३ सिन्धुजा ४ साम्रा ५ चला ६ हीरा ७ चञ्चला ८ वृषाकपायी ९ चपला १० इन्दिरा ११ लक्ष्मीः १२ पद्मालया १३ पद्मा १४ कमला १५ श्रीः १६ हरिप्रिया १७ । इति जटाधरः ॥ अस्या विवरणं यथा,
"विदर्भराजो धर्म्मात्मा भीष्मको नाम धार्म्मिकः ।
बभूवुस्तस्य पुत्रास्तु नाम्ना रुक्मादयः शुभाः ॥
तेषामवरजा कन्या रुक्मिणी रुक्मवर्णिनी ।
कमलांग्रेन सम्भूता सर्व्वलक्षणग्रोभिता ॥
राघवत्वेऽभवत् सीता रुक्मिणी कृष्णजन्मनि ।
साक्षाल्लक्ष्मीस्तु विज्ञेया प्राकट्येनैव पार्व्वति ॥"
इति पाद्मोत्तरखण्डे ६७ अध्यायः ॥*॥
(रुक्मिण्या सह ग्रिग्रुपालस्य विवाहघोषणा श्रीकृष्णस्य रुक्मिणीहरणं कृतायाञ्च तस्यां यादवैः सह राज्ञां तुमुलयुद्धादिकं हरिवंग्रे । ११६ अध्याये द्रष्टव्यम् ॥*॥ नारदस्य रुक्मिण्यै पारिजातपुष्पप्रदानवृत्तान्तं तत्रैव च १२२ अध्याये द्रष्टव्यम् ॥*॥ अस्याः सन्ततिनामानि यथा तत्रैव । १६० । ४—६ ।
"————————रुक्मिणीतनयान् ग्रृणु ।
प्रद्युम्नः प्रथमं यज्ञे ग्रम्बरान्तकरः सुतः ॥
द्वितीयश्चारुदेष्णश्च वृष्णिसिंहो महारथः ।
चारुभद्रश्चारुगर्भः सुदंष्ट्रो हृस्व एव च ॥
सुषेणश्चारुगुप्तश्च चारुविन्दश्च वीर्य्यवान् ।
चारुबाहुः कनीयांश्च कन्या चारुमती तथा ॥")
स्वर्णक्षीरी । इति राजनिर्घण्टः ॥
रुक्मिणीव्रतं, क्ली, (रुक्मिण्या व्रतम् ।) व्रतविग्रेषः । यथा,—
सूत उवाच ।
"नामदमाः समाकर्ण्य रमां तां पुत्रगर्ह्विणीम् ।
कल्कैरभिमतं बुद्ध्वा कारयद्रुक्मिणीव्रतम् ॥
व्रतेन तेन च रमा पुत्राढ्या सुभगा सती ।
सर्व्वभोगेन संयुक्ता बभूव स्थिरयौवना ॥
ग्रौनक उवाच ।
विधानं ब्रूहि मे सूत व्रतस्यास्य च यत् फलम् ।
पुरा केन कृतं धर्म्मं रुक्मिणीव्रतमुत्तमम् ॥
सूत उवाच ।
ग्रृणु ब्रह्मन् ! राजपुत्री ग्रर्म्मिष्ठा वार्षपर्व्वणी ।
अवगाह्य सरोनीरं सोमं हरमपग्रयत ॥
सा सखीभिः परिवृता देवयान्या च संगता ।
ग्रम्भुभीत्या ससत्याय पर्य्यधुर्व्वसनं हुतम् ॥
तत्र शुक्रस्य कन्या या वज्रायत्यात्मजात्मनः ।
संवस्त्र कुपिता प्राह वसनं त्वज मिच्छकि ! ॥

इति दानवकन्या सा दासीभिः परिवारिता ।
तां तस्या वाससा बद्ध्वा कूपे क्षिप्त्वा गता गृहम् ॥
तां कूपमग्नां रुदतीं जलार्थी नहुषात्मजः ।
करे सृष्ट्वा समुद्धृत्य प्राह का त्वं वरानने ॥
सा शुक्रपुत्री वसनं परिधाय ह्रिया भिया ।
शर्म्मिष्ठया कृतं सर्व्वं प्राह राजानमीक्षती ॥
ययातिस्तदभिप्रायं ज्ञात्वानुव्रज्य शोभनाम् ।
आश्वास्य तां ययौ गेहं तस्याः परिणयादृतः ॥
सा गत्वा भवनं शुक्रं प्राह शर्म्मिष्ठया कृतम् ।
तच्छ्रुत्वा कुपितं विप्रं वृषपर्व्वाह सान्त्वयन् ॥
दण्ड्यं मां दण्डय विभो रोषो यद्यस्ति ते मयि ।
शर्म्मिष्ठां वाप्यपक्वतां कुरु यज्ञानसेधितम् ॥
राजानं प्रणतं पादे पितुर्दृष्ट्वा रुषाब्रवीत् ।
देवयानी त्वियं कन्या मम दासी भवत्विति ॥
समानीय तदा राजा दास्ये तां विनियुज्य सः ।
ययौ निजगृहं ज्ञानी देवं परमकं स्मरन् ॥
ततः शुक्रस्तमानीय ययातिं प्रतिलोमकम् ।
तस्मै ददौ तां विधिवत् देवयानीं तया सह ॥
दत्त्वा प्राह नृपं विप्रोऽप्येनां राजसुतां यदि ।
शयने नयसे सद्यो जरा त्वामुपभोक्ष्यति ॥
शुक्रस्येतदचः श्रुत्वा राजा तां वरवर्णिनीम् ।
अदृश्यां स्थापयामास देवयान्यनुगां भिया ॥
सा शर्म्मिष्ठा राजपुत्री दुःखशोकभयाकुला ।
नित्यं दासीव्रताकीर्णा देवयानीन्तु सेवते ॥
एकदा सा वनगता रुदती जाह्नवीतटे ।
विश्वामित्रं मुनिं सा तं दृष्ट्वा स्त्रीभिरावृतम् ॥
व्रजिनं पुण्यगन्धाभिः सुरूपाभिः सुवासितम् ।
कारयन्तं व्रतं माल्यधूपदीपोपहारकैः ॥
निर्म्मायाष्टदलं पद्मं वेदिकायां सुचिह्नितम् ।
तन्मध्येतेऽष्टभिस्तु चतुष्कोणं विराजितम् ॥
दासीभा निर्म्मितगृहे स्वर्णपट्टैर्विचित्रिते ।
निर्म्मितश्रीवासुदेवं नानारत्नविघट्टितम् ॥
पौरुषेण च सूक्तेन नानागन्धोदकैः शुभैः ।
पञ्चाप्तैः पञ्चगव्यैर्यथामन्त्रैर्द्विजैरितैः ॥
स्नापयित्वा भद्रपीठे कर्णिकायां प्रपूजयन् ।
पञ्चभिर्दृग्भिर्व्वापि षोड़शैरुपचारकैः ॥
पाद्यमर्घ्यमहरं शीतलं सुमनोहरम् ।
परमानन्दजनकं गृहाण परमेश्वर ॥
दूर्व्वाचन्दनगन्धाढ्यमर्घ्ययुक्तं प्रयत्नतः ।
गृहाण रुक्मिणीकान्त प्रपन्नस्य मम प्रभो ॥
नानातीर्थाद्भवं वारि सुगन्धि सुमनोहरम् ।
गृहाणाचमनीयं त्वं श्रीनिवास श्रिया सह ॥
नानाकुसुमगन्धाढ्यं सूक्ष्मग्रथितसुत्तमम् ।
वक्षःशोभाकरं चारु माल्यं नय सुरेश्वर ॥
तन्तुसन्तानसन्धानरचितं वन्दनं हरे ।
गृहाणावरणं शुद्धं निरावरण सप्रिय ॥
यज्ञसूत्रमिदं देव प्रजापतिविनिर्म्मितम् ।
गृहाण वासुदेव त्वं रुक्मिण्या रमया सह ॥
नानारत्नसमायुक्तं स्वर्णसूक्तादिघट्टितम् ।
प्रियया सह देवेश गृहाणाभरणं मम ॥
दधिक्षीरगुड़ान्नादिपूपशष्कुलिखण्डकान् ।
गृहाण रुक्मिणीनाथ सनाथं कुरु मां प्रभो ॥
कर्पूरागुरुगन्धाढ्यं परमानन्ददायकम् ।
धूपं गृहाण वरद वैदर्भ्या प्रियया सह ॥
भक्तानां गेहसक्तानां संसारध्वान्तनाशनम् ।
दीपमालोकय विभो जगदालोकनादर ॥
श्यामसुन्दर पद्माक्ष पीताम्बर चतुर्भुज ।
प्रपन्नं पाहि देवेश रुक्मिण्या सहिताच्युत ॥
इति तासां व्रतं दृष्ट्वा मुनिं नत्वा सुदुःखिता ।
शर्म्मिष्ठा मिष्टवचना कृताञ्जलिरुवाच ताः ॥

शर्म्मिष्ठोवाच ।

राजपुत्रीं दुर्भगां मां स्वामिना परिवर्ज्जिताम् ।
त्रातुमर्हथ हे देव्यो व्रतेनानेन कर्म्मणा ॥
श्रुत्वा तु ता वचस्तस्याः कारुण्याच्च कियत् कियत् ।
पूजोपकरणं दत्त्वा कारयामासुरादरात् ॥
व्रतं कृत्वा तु शर्म्मिष्ठा लब्ध्वा स्वामिनमीश्वरम् ।
स्नात्वा पुत्रान् सुसन्तुष्टा समभूत् स्थिरयौवना ॥
सीता चाशोकवनिकामध्ये सरमया सह ।
व्रतं कृत्वा पतिं लेभे रामं राक्षसनाशनम् ॥
इहदश्वप्रसादेन कृत्वेदं द्रौपदी व्रतम् ।
पतियुक्ता दुःखमुक्ता बभूव स्थिरयौवना ॥
तथा रमा सिते पक्षे वैशाखे द्वादशीदिने ।
जामदग्न्याद्व्रतं चक्रे पूर्णे वर्षचतुष्टयम् ॥
पट्टसूत्रं करे बद्ध्वा भोजयित्वा द्विजान् बहून् ।
भुक्त्वा हविष्यं क्षीरान्नं सुमिष्टं स्वामिना सह ॥
बुभुजे पृथिवीं सर्व्वामपूर्व्वां स्वजनैर्वृता ।
सा पुत्रौ सुषुवे साध्वी मेघमालबलाहकौ ॥
देवानामुपकर्त्तारौ यज्ञदानतपोव्रतौ ।
महोत्साहौ महावीर्य्यौ सुभगौ कल्किसम्मतौ ॥
व्रतवरमिति कृत्वा सर्व्वसम्पत्समृद्धा
भवति विदिततत्त्वा पूजिता पूर्णकामा ।
हरिचरणसरोजद्वन्द्वभक्तैकताना
व्रजति गतिमपूर्व्वां ब्रह्मविद्भिरगम्याम् ॥"
इति कल्किपुराणे रुक्मिणीव्रतम् ३१ अध्यायः ॥

रुक्मिदर्पः, पुं, (रुक्मिणि भीष्मकपुत्रे दर्पो यस्य सः । तस्य रुक्मिनाशकत्वात् ।) बलदेवः । इति हलायुधः ॥

रुक्मिदारी, [न्] पुं, (रुक्मिणं दारयतीति । दृ + णिच् + णिनिः ।) बलदेवः । इति त्रिकाण्डशेषः ॥

रुक्मिभित्, [द्] पुं, (रुक्मिणं भिनत्तीति । भिद् + क्विप् ।) बलदेवः । इति हेमचन्द्रः । २ । १३८॥

रुक्मी, [न्] पुं, (रुक्मो वर्णविशेषोऽस्यास्तीति । रुक्म + इनिः ।) भीष्मकराजज्येष्ठपुत्रः । यथा,
"राजासीद्भीष्मको नाम विदर्भाधिपतिर्महान् ।
तस्य पञ्चाभवन् पुत्राः कन्यैका रुचिराननाः ॥
रुक्म्यग्रजो रुक्मरथो रुक्मबाहुरनन्तरः ।
रुक्मकेशो रुक्ममाली रुक्मिण्येषां स्वसा सती ॥"
इति श्रीभागवते १० स्कन्धे ५२ अध्यायः ॥
(रुक्मिणीहरणानन्तरं कृष्णेन सहास्य युद्धादिविवरणं हरिवंशे ११७ अध्याये तथा प्रद्युम्नेन सहास्य कन्यापरिणयवृत्तान्तः अनिरुद्धेन सहास्य पौत्र्याः परिणयवृत्तान्तश्च ११८ अध्याये विस्तरशो द्रष्टव्यम् ॥)

रुक्षाङ्ग, [न्] क्ली, मलम् । इति केचित् ॥

रुक्षः, त्रि, अप्रेम । अचिक्कणः । रुक्षधातोरौणादिकसप्रत्ययेन निष्पन्नः । इत्युणादिकोषः ॥ (नीरसः । तद्यथा, वायुस्वरूपवर्णने ।
"दोषधातुमलादीनां नेता शीघ्रः समीरणः ।
रजोगुणमयः सूक्ष्मो रूक्षः शीतो लघुश्चलः ॥"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥)

रुग्णः, त्रि, (रुज् + क्तः । ओदितश्चेति नः ।) रोगादिना कुटिलीकृतः । तत्पर्य्यायः । शुभ्रः २ । इत्यमरः ॥ (यथा, रामायणे । २ । १०२ । ६ ।
"त्वया विहीनस्तव शोकरुग्ण-
स्त्वां संस्मरन्नेव गतः पिता ते ॥")
रोगी । इति राजनिर्घण्टः ॥

रुच, ङ ल प्रीतिप्रकाशयोः । इति कविकल्पद्रुमः ॥ (भ्वा०-आत्म०-अक०-सेट् ।) प्रीतिरिह अनुरागविशेषः । तत्र यस्यानुरागस्तस्य सम्प्रदानत्वम् । ङ, रोचते अन्नं बुभुक्षवे । ल, अरुचत् । इति दुर्गादासः ॥

रुचकं, क्ली, (रोचतेऽनेनेति । रुच् + "बहुलमन्यत्रापि ।" उणा० २ । ३७ । इति कुन् ।) सज्जिकाक्षारम् । अश्वाभरणम् । माल्यम् । सौवर्चलम् । (यथा,—
"सौवर्चलं स्याद्रुचकमन्यपाकञ्च तन्मतम् ॥"
तथास्य गुणाः ।
"रुचकं रोचनम्भेदि दीपनम्याचनम्परम् ।
सुखेदं वातगुल्मातिपित्तलं विशदं लघु ।
उद्गारशुद्धिदं रूक्षं विबन्धानाहशूलजित् ॥"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमभागे ॥)
माङ्गल्यद्रव्यम् । (यथा, भागवते । ३ । २३ । ३१ ।
"हारेण च महार्हेण रुचकेन च भूषितम् ॥"
"रुचकेन मङ्गलद्रव्येण ।" इति श्रीधरः ॥) उत्कटः ॥ इति मेदिनी । के, १४६ ॥ स्वाद्वम्लः । इति शब्दरत्नावली ॥ रोचना । विड्लवणम् । इति हेमचन्द्रः ॥ लवणम् । इति हारावली ॥ (दक्षिणदिक् । यथा, बृहत्संहितायाम् । ५३ । ३५ ।
"प्राक्पश्चिमावलिन्दावन्तगतौ तदवधिस्थितौ
शौरी ।
रुचके द्वारं न शुभदसुतरतोऽन्यानि शुक्लानि ॥"
"रुचकं मातुलुङ्गकम् ।" इत्युणादिकोषः । २ । ३७ ॥)

रुचकः, पुं, (रोचते इति । रुच् + कुन् ।) वीजपूरः । निम्बः । दन्तः । कपोतः । इति मेदिनी ॥ (यथा, बृहत्संहितायाम् । ६६ । २ ।
"जीवेन भवति हंसः
सौरेण शशः कुजेन रुचकश्च ॥"
पर्व्वतविशेषः । यथा, विष्णुपुराणे । २ । २ । २६ ।
"त्रिकूटः शिशिरश्चैव पतङ्गो रुचकस्तथा ॥"
स्तम्भः । यथा, बृहत्संहितायाम् । ५३ । २८ ।

"समचतुरस्रो रुचको
वज्रोऽश्वाश्विर्द्विवज्रको द्विगुणः ॥")

रुचा, स्त्री, (रुच्+क्विप्। पचे टाप्।) दीप्तिः। शोभा। इच्छा। (यथा, महाभारते।३।५।१३।

"तद्वै तस्मै न रुचामभ्युपैति
ततश्चाहं शमनन्यत्र मन्ये ॥")

शारिकाशुकवाक्। इति शब्दरत्नावली ॥

रुचिः, स्त्री, (रुच्यते इति। रुच्+"इगुपधात् कित्।" उणा० ४।११६। इति इन्। सच कित्।) अभिव्यङ्ग्यः। अनुरागः। आसक्तिर्वा। स्पृहा। (यथा, किराते। १०। ६२।

"रुचिकरमपि नार्थवद्बभूव
स्तिमितसमाधिगुचौ पृथातनूजे ॥"

"अम्लो रुचिकरो हृद्यः प्रीणनो वह्निदीपनः॥"
इति वैद्यकराजवल्लभे द्रव्यगुणव्याख्यायाम् ॥)

अभिलाषः। गभस्तिः। किरणः। इत्यमरभरतौ ॥ शोभा। इति मेदिनी ॥ (यथा, रघुः। ५। ६७।

"लक्ष्मीर्विनोदयति येन दिगन्तलम्बी
सोऽपि त्वदाननरुचिं विजहाति चन्द्रः ॥")

बुभुक्षा। इति हेमचन्द्रः ॥ गोरोचना। इति राजनिर्घण्टः ॥ आलिङ्गनविशेषः। तल्लक्षणं यथा। नायिकाया नायकस्य संमुखे जान्वोरुपर्य्युपविश्य वक्षसि वक्षो दत्त्वा मदवस्थानम्। इति कामशास्त्रम् ॥

रुचिः, पुं, (रोचते शोभते इति। रुच्+इन्। सच कित्।) प्रजापतिविशेषः। स च रौच्यमनुपिता। यथा,—

मार्कण्डेय उवाच।

"रुचिः प्रजापतिः पूर्व्वं निर्ममो निरहङ्कृतिः।
यत्रास्तमितगामी च चचार पृथिवीमिमाम् ॥
अनग्निमनिकेतन्तमेकाहावसथाश्रयम्।
विमुक्तसङ्गं तं दृष्ट्वा प्रोचुः स्वपितरो मुनिम् ॥

पितर ऊचुः।

वत्स कस्मात् त्वया पुण्यो न कृतो दारसंग्रहः।
स्वर्गापवर्गहेतुत्वाद्गन्धस्रेनानिशं विना ॥
गृही समस्तदेवानां पितृणाञ्च तथार्हणाम्।
ऋषीणामतिथीनाञ्च कुर्व्वन् लोकानुपाश्नुते ॥
स्वाहोच्चारणतो देवान् स्वधोच्चारणतः पितॄन्।
बिभजन्नन्नदानेन भूताद्यानतिथीनपि ॥
स त्वं देवाद्दणाद्बन्धं बन्धमस्राद्दणादपि।
आवाप्नोषि मनुष्यर्षिभूतेभ्यश्च दिने दिने ॥
अनुत्पाद्य सुतान् देवानसन्तर्प्य पितॄंस्तथा।
भूतादींश्च कथं मौढ्यात् सुगतिं गन्तुमिच्छसि ॥

रुचिरुवाच।

परिग्रहोऽतिदुःखाय पापायाधोगतेस्तथा।
भवत्यतो मया पूर्व्वं न कृतो दारसंग्रहः ॥
प्रक्षाल्यतेऽनुदिवसं यदात्मा निष्परिग्रहैः।
ममत्वपङ्कदिग्धोऽपि चिन्ताम्भोभिर्व्वरं हि तत् ॥"
इत्यादि ॥

पितर ऊचुः।

"युक्तं प्रक्षालनं कर्त्तुमात्मनो नियतेन्द्रियैः।
किन्तु लेपाय मार्गोऽयं यत्र त्वं पुत्र वर्त्तसे ॥"
इत्यादि ॥ * ॥

मार्कण्डेय उवाच।

"स तेन पितृवाक्येन भृशमुद्विग्नमानसः।
कन्याभिलाषी विप्रर्षिः परिबभ्राम मेदिनीम् ॥
कन्यामलभमानोऽसौ पितृवाक्याग्निदीपितः।
चिन्तामवाप महतीमतीवोद्विग्नमानसः ॥
किं करोमि क्व गच्छामि कथं मे दारसंग्रहः।
क्षिप्रं भवेत् पितॄणां यो ममाभ्युदयकारकः ॥
इति चिन्तयतस्तस्य मतिर्जाता महात्मनः।
तपसाराधयाम्येनं ब्रह्माणं कमलोद्भवम् ॥
ततो वर्षशतं दिव्यं तपस्तेपे स वैधसम्।
दिदृक्षुः सुचिरं कालं रुचिर्नियममास्थितः ॥
ततः सन्दर्शयामास ब्रह्मा लोकपितामहः।
उवाच च प्रसन्नोऽस्मीत्युच्यतामभिवाञ्छितम् ॥
ततोऽसौ प्रणिपत्याह ब्रह्माणं जगतः पतिम्।
पितॄणां वचनात्तेन यत् कर्त्तुमभिवाञ्छितम् ॥
ब्रह्मा चाह रुचिं विप्रं श्रुत्वा तस्याभिवाञ्छितम्।

प्रजापतिस्त्वं भविता सृष्ट्या भवता प्रजाः ॥
सृष्ट्वा प्रजाः सुतान् विप्र समुत्पाद्य क्रियास्तथा।
लब्ध्वा दृताधिकारस्त्वं ततः सिद्धिमवाप्स्यसि ॥
स त्वं यथोक्तं पितृभिः कुरु दारपरिग्रहम्।
कामश्चेममभिध्याय क्रियतां पितृपूजनम् ॥
त एव तुष्टाः पितरः प्रदास्यन्ति तवेप्सितम्।
पत्नीं सुतांश्च सन्तुष्टाः किं न दद्युः पितामहाः ॥

मार्कण्डेय उवाच।

इत्यृषिर्व्वचनं श्रुत्वा ब्रह्मणोऽव्यक्तजन्मनः।
ययौ विविक्ते पुलिने चकार पितृतर्पणम् ॥
तुष्टाव च पितॄन् विप्रः स्तवैरेभिरथादृतः।
एकाग्रः प्रयतो भूत्वा भक्तिनम्रात्मको रुचिः ॥"
रुचिकृतपितृस्तोत्रं यथा,—

रुचिरुवाच।

"नमस्येऽहं पितॄन् भक्त्या ये वसन्त्यधिदेवतम्।
देवैरपि हि तर्प्यन्ते ये श्राद्धेषु स्वधोत्तरैः ॥
नमस्येऽहं पितॄन् स्वर्गे ये तर्पयन्ति महर्षिभिः।
श्राद्धैर्नानोमयैर्भक्त्या मुक्तिमुक्तिमभीप्सुभिः ॥
नमस्येऽहं पितॄन् स्वर्गे सिद्धाः सन्तर्पयन्ति यान्।
श्राद्धेषु दिव्यैः सकलैरुपहारैरनुत्तमैः ॥
नमस्येऽहं पितॄन् भक्त्या येऽर्च्यन्ते गुह्यकैर्दिवि।
तन्मयत्वेन वाञ्छद्भिर्ऋद्धिमात्यन्तिकीं पराम् ॥
नमस्येऽहं पितॄन् मर्त्यैरर्च्यन्ते भुवि ये सदा।
श्राद्धेषु श्रद्धयाभीष्टलोकपुष्टिप्रदायिनः ॥
नमस्येऽहं पितॄन् विप्रैरर्च्यन्ते भुवि ये सदा।
वाञ्छिताभीष्टलाभाय प्राजापत्यप्रदायिनः ॥
नमस्येऽहं पितॄन् विप्रैरर्च्यन्तेऽरण्यवासिभिः।
वन्यैः श्राद्धेयताहारैस्तपोनिर्द्धूतकल्मषैः ॥
नमस्येऽहं पितॄन् विप्रैर्नैष्ठिकव्रतधारिभिः।
ये संयतात्मभिर्नित्यं सन्तर्प्यन्ते समाधिभिः।
नमस्येऽहं पितॄन् श्राद्धे राजन्यास्तर्पयन्ति यान्।
कव्यैरुपैर्विधिवल्लोकदयफलप्रदान् ॥
नमस्येऽहं पितॄन् वैश्यैरर्च्यन्ते भुवि ये सदा।
स्वकर्म्माभिरतैर्नित्यं पुष्पधूपान्नवारिभिः ॥
नमस्येऽहं पितॄन् श्राद्धे ये शूद्रैरपि भक्तितः।
सन्तर्प्यन्ते जगत्यस्मिन् नाना ख्याताः सुकालिनः ॥
नमस्येऽहं पितॄन् श्राद्धे पातालेषु ये महासुरैः।
सन्तर्प्यन्ते स्वधाहारास्त्यक्तदम्भमदैः सदा ॥
नमस्येऽहं पितॄन् श्राद्धैरर्च्यन्ते ये रसातले।
भोगैरप्सरसां विविधैर्नागैः कामानभीप्सुभिः ॥
नमस्येऽहं पितॄन् श्राद्धे सर्पैः सन्तर्पितान् सदा।
तत्रैव विविधैर्भक्ष्यैर्भोगसम्पत्समन्वितैः ॥

पितॄन्नमस्ये निवसन्ति साक्षाद्
ये देवलोकेऽथ महीतले वा।
तथान्तरीक्षे च सुरादिपूज्या-
स्ते संप्रतीच्छन्तु मयोपनीतम् ॥
पितॄन्नमस्ये परमाणुभूता
ये वै विमाने निवसन्त्यमूर्त्ताः।
यजन्ति यानस्तमला मनोभि-
र्योगीश्वराः क्लेशविमुक्तिहेतून् ॥
पितॄन्नमस्ये दिवि ये च मूर्त्ताः
स्वधासुजः काम्यफलाभिसन्धौ।
प्रदानशक्ताः सकलेप्सितानां
विमुक्तिदा येऽनभिसंहितेषु ॥
लभ्यन्तु तेऽस्मिन् पितरः समस्ता
इच्छावतां ये प्रदिशन्ति कामान्।
सुरत्वमिन्द्रत्वमतोऽधिकं वा
वस्वात्मजान् श्यामवलां गृहाणि ॥
सूर्य्यस्य ये रश्मिषु चन्द्रबिम्बे
शुक्ले विमाने च सदा वसन्ति।
लभ्यन्तु तेऽस्मिन् पितरोऽम्बुतोये-
र्गन्धादिना पुष्टिमतो व्रजन्तु ॥
येषां हुतेऽग्नौ हविषा च लिप्सु-
र्यैः भुज्यते विप्र शरीरसंस्थाः।
ये पिण्डदानेन सुखं प्रयान्ति
लभ्यन्तु तेऽस्मिन् पितरोऽम्बुतोयैः ॥
ये खड्गमांसेन सुरैरभीष्टैः
क्षौद्रेण लोकैर्दैत्यमहोरगैश्च।
कालेन प्राकेन महर्षिवर्य्यैः
संप्रीणितास्ते मुदमत्र यान्तु ॥
कव्यान्यशेषाणि च यान्यभीष्टा-
न्यतीव येषाममरार्चितानाम्।
तेषान्तु सान्निध्यमिहास्तु पुष्प-
गन्धादिभोज्येषु मयाहृतेषु ॥
दिने दिने ये प्रतिगृह्णतेऽर्चां
मासान्तपूज्या भुवि येऽष्टकासु।
ये वत्सरान्तेऽभ्युदये च पूज्याः
प्रयान्तु ते मे पितरोऽत्र तुष्टिम् ॥
पूज्या द्विजानां कुमुदेन्दुभासो
ये क्षत्रियाणाञ्च नवार्कवर्णाः।
तथा विशां ये कनकावदाता
नीलोनिभाः शूद्रजनस्य ये च ॥
तेऽस्मिन् समस्ता मम पुष्पगन्ध-
धूपान्नतोयादिनिवेदनेन।

तथाग्निहोमेन च यान्तु तृप्तिं
सदा पितृभ्यः प्रणतोऽस्मि तेभ्यः ॥
ये देवपूर्व्वाण्यतितृप्तिहेतो-
रश्नन्ति कव्यानि शुभाहृतानि ।
तृप्ताश्च ये भूतिकरा भवन्ति
तृप्यन्तु तेऽस्मिन् प्रणतोऽस्मि तेभ्यः ॥
रक्षांसि भूतान्यसुरांस्तथोग्रान्
विनाशयन्तस्तृप्तिवं प्रजानाम् ।
आद्याः सुराणामपरेश्वपूज्या-
स्तृप्यन्तु तेऽस्मिन् प्रणतोऽस्मि तेभ्यः ॥
अग्निष्वात्ता बर्हिषद आज्यपाः सोमपास्तथा ।
व्रजन्तु तृप्तिं आद्धेऽस्मिन् पितरस्तर्पिता मया ॥
अग्निष्वात्ताः पितृगणाः प्राचीं रक्षन्तु मे
दिशम् ।
तथा बर्हिषदः पान्तु याम्यां ये पितरःस्थिताः ॥
प्रतीचीमाज्यपास्तद्वदुदीचीमपि सोमपाः ।
ऊष्मैतस्यर्थमा रक्षेत् कव्यवालोऽनलोऽप्यधः ॥
रक्षोभूतपिशाचेभ्यस्तथैवासुरदोषतः ।
सर्व्वतश्चाधिपस्तेषां यमो रक्षां करोतु मे ॥
विश्वो विश्वभुगाराध्यो धन्यो धर्म्मः सनातनः ।
भूतिदो भूतिकृद्भूतिः पितॄणां ये गणा नव ॥
कल्याणः कल्यदः कर्त्ता कलः कल्यतराश्रयः ।
कल्याताहेतुरनघः षड्विंशते गणाः स्मृताः ॥
वरो वरेण्यो वरदस्सुहृदः पुहिदस्तथा ।
विश्वपाता तथा धाता सप्त चैते गणाः स्मृताः॥
महान्महात्मा महितो महिमावान्महाबलः ।
गणाः पञ्च तथैवैते पितॄणां पापनाशनाः ॥
सुखदो धनदश्चान्यो धर्म्मदोऽन्यो विभूतिदः ।
पितॄणां कथ्यते चैतत्तथा गणचतुष्टयम् ॥
एकविंशत् पितृगणा यैर्व्याप्तमखिलं जगत् ।
ते मेऽत्र तृप्तास्तुष्यन्तु यच्छन्तु च समीहितम् ॥"
इति मार्कण्डेयपुराणे रौच्ये मन्वन्तरे पितरस्तवः ॥

मार्कण्डेय उवाच ।

"एवन्तु स्तुवतस्तस्य तेजसो राशिरुच्छ्रितः ।
प्रादुर्बभूव सहसा गगनव्याप्तिकारकः ॥
तदृष्ट्वा सुमहत्तेजः समाच्छाद्य स्थितं जगत् ।
जानुभ्यामवनिं गत्वा रुचिः स्तोत्रमिदं जगौ ॥
अमूर्त्तानाञ्च मूर्त्तानां पितॄणां दीप्ततेजसाम् ।
नमस्यामि सदा तेषां ध्यानिनां दिव्यचक्षुषाम् ॥
इन्द्रादीनाञ्च नेतारो दक्षमारीचयोस्तथा ।
सप्तर्षीणान्तथान्येषां तान् नमस्यामि कामदान् ॥
मन्वादीनाञ्च नेतारः सूर्य्याचन्द्रमसोस्तथा ।
तान्नमस्याम्यहं सर्व्वान् पितॄनप्स्वर्णवेषु च ॥
नक्षत्राणां ग्रहाणाञ्च वाय्वग्निनभसां तथा ।
द्यावापृथिव्योश्च तथा नमस्यामि कृताञ्जलिः ॥
प्रजापतेः कश्यपाय सोमाय वरुणाय च ।
योगेश्वरेभ्यश्च तथा नमस्यामि कृताञ्जलिः ॥
नमो गणेभ्यः सप्तभ्यस्तथा लोकेषु सप्तसु ।
स्वयम्भुवे नमस्यामि ब्रह्मणे योगचक्षुषे ॥
सोमाधाराः पितृगणा योगमूर्त्तिधरा हि ते ।
नमस्यामि ततः सोमं पितरं जगतामहम् ॥

अग्निरूपांस्तथैवान्यान्नमस्यामि पितॄनहम् ।
अग्नीषोममयं विश्वं यत एतदशेषतः ॥
ये तु तेजसि ये वायौ सोमसूर्य्याग्निमूर्त्तयः ।
जगत्स्वरूपिणश्चैव तथा ब्रह्मस्वरूपिणः ॥
तेभ्योऽखिलेभ्यो योगिभ्यः पितृभ्यो यतमानसः ।
नमो नमो नमस्ते मे प्रसीदन्तु स्वधाभुजः ॥

श्रीमार्कण्डेय उवाच ।

एवं स्तुतास्ततस्तेन तेजसो मुनिसत्तमाः ।
निश्चक्रमुस्ते पितरो भासयन्तो दिशो दश ॥
निवेदितन्तु यत्तेन पुष्पगन्धानुलेपनम् ।
तद्दूषितानथ स तान् ददृशे पुरतः स्थितान् ॥
प्रणिपत्य रुचिर्भक्त्या पुनरेव कृताञ्जलिः ।
नमस्तुभ्यं नमस्तुभ्यमित्याह पृथगादृतः ॥
ततः प्रसन्नाः पितरस्तमूचुर्मुनिसत्तमम् ।
वरं वृणीष्वेति स तानुवाचानतकन्धरः ॥
साम्प्रतं सर्गकर्त्तृत्वमादिष्टं ब्रह्मणा मम ।
सोऽहं पत्नीमभीप्सामि धन्यां दिव्यां प्रजावतीम् ॥

पितर ऊचुः ।

अद्यैव सद्यः पत्नी ते भविष्यति मनोरमा ।
तस्याञ्च पुत्रो भविता भवतो मुनिसत्तम ! ॥
मन्वन्तराधिपो धीमान् त्वन्नाम्नैवोपलक्षितः ।
रुचे रौच्य इति ख्यातिं प्रयास्यति जगत्त्रये ॥
तस्यापि बहवः पुत्रा महाबलपराक्रमाः ।
भविष्यन्ति महात्मानः पृथिवीपरिपालकाः ॥
त्वञ्च प्रजापतिर्भूत्वा प्रजाः सृष्ट्वा चतुर्विधाः ।
स्त्रीणामधिकारो धर्म्मशास्त्रतः सिद्धिमवाप्स्यसि ॥
स्तोत्रेणानेन च नरो योऽस्मांस्तोष्यति भक्तितः ।
तस्य तुष्टा वयं भोगान् दास्यामो ज्ञानमुत्तमम् ॥
शरीरारोग्यमैश्वर्य्यं पुत्रपौत्रादिसन्ततिम् ।
प्रदास्यामो न सन्देहो यच्चान्यदभिवाञ्छितम् ॥
तस्मात् पुण्यफलं लोके वाञ्छद्भिः सततं नरैः ।
पितॄणाञ्चाक्षयां तृप्तिं स्तुत्या स्तोत्रेण मानवैः ॥
श्राद्धे च य इमं भक्त्या अस्मत्प्रीतिकरं स्तवम् ।
पठिष्यन्ति द्विजाग्र्याणां शृण्वतां पुरतः स्थिताः ॥
स्तोत्रश्रवणसंप्रीत्या सन्निधाने परे कृते ।
अस्माभिरक्षयं श्राद्धं तद्भविष्यत्यसंशयम् ॥
यद्यप्यश्रोत्रियं श्राद्धं यद्यप्युपहतं भवेत् ।
अन्यायोपात्तवित्तेन यदि वा कृतमन्यथा ॥
अश्राद्धार्हैरुपहृतैरुपहारैस्तथा कृतम् ।
अकालेऽप्यथवा देये विधिहीनमथापि वा ॥
अश्रद्धया वा पुरुषैर्दम्भमाश्रित्य वा कृतम् ।
अस्माकं प्रीतये श्राद्धं तथाप्येतदुदीरणात् ॥
यच्चैतत् पठ्यते श्राद्धे स्तोत्रमस्मत्सुखावहम् ।
अस्माकं जायते तृप्तिस्तच्च द्वादशवार्षिकी ॥
हैमन्ते द्वादशाब्दानि तृप्तिमेतत् प्रयच्छति ।
शिशिरे द्विगुणाब्दानि तृप्तिं स्तोत्रमिदं श्रुतम् ॥
वसन्ते षोडशसमास्तृप्तये श्राद्धकर्म्मणि ।
ग्रीष्मे च षोडशैवैतत् पठितं तृप्तिकारकम् ॥
विकाले च कृते श्राद्धे स्तोत्रेणानेन साधिते ।
वर्षासु तृप्तिरस्माकमक्षया जायते रुचे ॥
शरत्काले पठितं श्राद्धकाले प्रयच्छति ।

अस्माकमेतत् पुरुषैस्तृप्तिं पञ्चदशाब्दिकीम् ॥
यस्मिन् गृहेऽपि लिखितमेतत्तिष्ठति नित्यदा ।
सन्निधानं कृते श्राद्धे तत्रास्माकं भविष्यति ॥
तस्मादेतत्त्वया श्राद्धे विप्राणां भुञ्जतां पुरः ।
श्रावणीयं महाभाग अस्माकं तुष्टिकारकम् ॥"
इति मार्कण्डेयपुराणे रौच्ये मन्वन्तरे पितृस्तवे ॥*

मार्कण्डेय उवाच ।

"ततस्तस्मान्नदीमध्यात् समुत्तस्थौ मनोरमा ।
प्रम्लोचा नाम तन्वङ्गी तत्समीपे वराप्सराः ॥
सा चोवाच महात्मानं रुचिं सुमधुराक्षरम् ॥
प्रश्रयावनता सुभ्रूः प्रम्लोचा वै वराप्सराः ॥
अतीव रूपिणी कन्या मत्सुता तपतांवर ।
जाता वरुणपुत्रेण पुष्करेण महात्मना ॥
तां गृहाण मया दत्तां भार्य्यार्थे वरवर्णिनीम् ।
मनुर्भद्रामतिस्तस्यां समुत्पत्स्यति ते सुतः ॥

मार्कण्डेय उवाच ।

तथेति तेन चाप्युक्ता तस्मात्तोयादपुप्लुतीम् ।
उज्जहार ततः कन्यां मालिनीं नाम नामतः ॥
नद्याश्च पुलिने तस्मिन् स मुनिर्मुनिसत्तम ! ॥
जग्राह पाणिं विधिवत् समानाय्य महामुनीन् ॥
तस्यां तस्य सुतो जज्ञे महावीर्य्यो महामतिः ।
रौच्योऽभवत् पितुर्नाम्ना ख्यातोऽत्र वसुधातले ॥
तस्य मन्वन्तरे देवास्तथा सप्तर्षयश्च ये ।
तनयाश्च नृपाश्चैव ते सम्यक् कथितास्तव ॥
धर्म्मवृद्धिस्तथारोग्यं धनधान्यसुतोद्भवः ।
नृणां भवत्यसन्दिग्धमस्मिन् मन्वन्तरे श्रुते ॥
पितृस्तवं तथा श्रुत्वा पितॄणाञ्च तथा गणान् ।
सर्व्वान् कामानवाप्नोति तत्प्रसादान्नरो सुने ॥"
इति मार्कण्डेयपुराणे रौच्यमन्वन्तरं समाप्तम् ॥
गारुडे ८६ । ६० अध्यायेऽप्येवमस्ति ॥

रुचितं, त्रि, (रोचते इति । रुच्+"रुचिवचिकुचिकुटिभ्यः कितच् ।" उणा० ४ । २८५ । इति कितच् ।) मिष्टवस्तु । इत्युणादिकोषः ॥ (रुच्+क्तः । अभिलषितः । यथा, महाभारते । ५ । १०० । १६ ।
"मातले कञ्चिदप्यत्र रुचितस्ते वरो भवेत् ॥" क्ली, रुच्+भावे क्तः । इच्छा । अभिलाषः । यथा, महाभारते । ३ । २६६ । ७६ ।
"वसावेह त्वयाप्येकां रुचितं यदि तेऽनघ ॥")

रुचिफलं, क्ली, (रुचिजनकं फलम् ।) आम्रताकम् । इति राजनिर्घण्टः ॥

रुचिरं, क्ली, (रोचते इति । रुच्+"इषिमदिसदीति ।" उणा० १ । ५२ । इति किरच् ।) मूलकम् । कुङ्कुमम् । लवङ्गम् । इति राजनिर्घण्टः ॥ (पुं, सेनजितपुत्रः । यथा, हरिवंशे । २० । २१ ।
"पुत्राः सेनजितश्चासंश्चत्वारो लोकसत्तमाः ।
रुचिरः श्वेतकेतुश्च महिम्नारस्तथैव च ॥")

रुचिरं, त्रि, (रुच्+किरच् ।) सुन्दरम् । इत्यमरः ॥ (यथा, आर्य्यासप्तशत्याम् । ११७ ।
"उल्लसितभ्रूधनुषा तव पृथुना लोचनेन रुचिराङ्गि ।

अचला अपि न महान्तः के चञ्चलभाव-
मानीताः ॥”)
मिष्टम्। इत्युणादिकोषः ॥
रुचिरा, स्त्री, (रोचते इति। रुच्+किरच्। ततष्टाप्।) गोरोचना। इति राजनिर्घण्टः ॥ (त्रयोदशाक्षरवृत्तिविशेषः। अस्य लक्षणोदाहरणादिकं छन्दःशब्दे द्रष्टव्यम् ॥)
रुचिराङ्गनः, पुं, (रुचिरः सुन्दरोऽङ्गनः।) शोभाञ्जनः। इति राजनिर्घण्टः ॥
रुचिराश्वः, पुं, (रुचिरः सुन्दरोऽश्वो यस्य।) राजविशेषः। स तु देवापेः श्वशुरः। यथा,—
“मरौ भूपाललोकानां खस्तये कुरु मे वचः।
रुचिराश्वसुतां प्राप्तां देवापे त्वं ससुहृद ॥”
इति कल्किपुराणे १८ अध्यायः ॥
सुन्दरघोटकश्च ॥
रुचिर्य्य, त्रि, (रुच्यते इति। रुच्+“रुचि-भुजिभ्यां किच्यन्।” उणा० ४। १७८। इति किच्यन्।) मिष्टवस्तु। इत्युणादिकोषः ॥ (यथा, सुश्रुते। १। ४६। पुष्यवर्गे।
“सिञ्चाकी वातला स्वाद्वी रुचिर्य्यानल-
दीपनी ॥”)
अभिप्रेतम्। इति संक्षिप्तसारोणादिवृत्तिः ॥ (यथा, हरिवंशे। २५४। ६०।
“न एष्यीं कामये क्षत्तर्न सन्नुरोऽस्मि पदे-
ष्वितिभिः ॥
एष एव रुचिर्य्यो मे वरो दानवसत्तम! ॥”)
रुची, स्त्री, (रुचि+ऋदिकारादिति ङीष्।) रुचिः। यथा। रुक् रुची रुचयः समाः। इत्येकार्थसंग्रहः ॥
रुच्य, क्ली, (रोचते इति। रुच्+“राजसूयसूर्य्य-मृषोद्येति।” ३। १। ११४। इति क्यप्प्रत्ययेन निपातितम्।) सौवर्चलम्। इति राजनिर्घण्टः ॥
रुच्यः, पुं, (रुच्+क्यप्।) कृतकटङ्कः। प्राति-धान्यम्। इति राजनिघण्टः ॥ पतिः। इति हेमचन्द्रः। ३।१६१ ॥ सुन्दरे, त्रि। इत्यमरः ॥ (रुचिकरः। यथा,—
“पक्वं वर्णकरं रुच्यं मांसशुक्रबलप्रदम्।
पित्तावरोधि वातघ्नं हृद्यं गुर्व्वनुलोमनम् ॥”
इति वैद्यकराजवल्लभे द्रव्यगुणाख्यायाम् ॥)
रुच्यकन्दः, पुं, (रुच्यः कन्दो यस्य।) शूरणः। इति राजनिर्घण्टः ॥
रुज, ओ भ्रू औ भङ्गे। इति कविकल्पद्रुमः ॥ (तुदा०-परः-सकः-अनिट्।) ओ, रुजः। भ्रू, रुजति रोगो हस्तम्। औ, रोक्ता। इति दुर्गादासः ॥
रुज, क, हिंसे। इति कविकल्पद्रुमः ॥ (चुरा०-परः-सकः-सेट्।) क, रोजयति। इति दुर्गा-दासः ॥
रुजा, स्त्री, (रुज्+क्विप्। पक्षे टाप्।) रोगः। भङ्गः। इति मेदिनी। जे, १४ ॥ (पीड़ा। यथा, महाभारते। ८। ३४। १४६।
“निपातात् तव शस्त्राणां शरीरे यामवहृजा।
तया ते मानुषं कर्म्म व्यपोढ़ं भृगुनन्दन!॥”)
मेघी। इति हेमचन्द्रः। ४। ३४३ ॥ कुष्ठम्। इति राजनिर्घण्टः ॥
रुजाकरं, क्ली, (रुजां रोगं करोतीति। कृ+टः।) कर्म्मरङ्गफलम्। इति शब्दचन्द्रिका ॥
रुजाकरः, पुं, (रुजां करोतीति। कृ+टः।) व्याधिः। यथा। व्याधिस्त्वाधी रुजाकरः। इति हेमचन्द्रः। २। २२६ ॥ (व्याधिकारके, त्रि ॥)
रुजासहः, पुं, (रुजां सहते इति। सह+अच्।) धन्वनवृक्षः। इति राजनिर्घण्टः ॥
रुट, इ क्लेशे। इति कविकल्पद्रुमः ॥ (भ्वा०-परः-सकः-सेट्।) पञ्चमस्वरी। इ, रुण्टते धनं चौरेण। इति दुर्गादासः ॥
रुट, ल ड दीप्तिप्रतिघातयोः। इति कविकल्पद्रुमः ॥ (भ्वा०-आत्म०-सकः-अकः च-सेट्।) ल, अरुटत्। ड, रोटते। प्रतिघातिः शोकादिना पातनं पुनर्हननं वा। इति दुर्गादासः ॥
रुट, क रुषि। स्तुतौ। इति कविकल्पद्रुमः ॥ (चुरा०-परः-अकः-सेट्।) क, रोटयति ॥ इति दुर्गादासः ॥
रुट्[ष्] स्त्री, (रुष्+क्विप्।) क्रोधः। इत्य-मरः ।१।७।२६ ॥ (यथा, भागवते। १।१८।३०।
“स तु ब्रह्म ऋषेरंशे गतासुसुरगं रुषा।
विनिर्गच्छन् धनुष्कोट्या निधाय पुरमागतः ॥”)
रुठ, उपघाते। इति कविकल्पद्रुमः ॥ (भ्वा०-परः-सकः-सेट्।) रोठति लोकं शोकः। इति दुर्गादासः ॥
रुठ, इ गत्यालस्यक्लेयखोटे। इति कविकल्पद्रुमः ॥ (भ्वा०-परः-सकः-अकः च-सेट्।) पञ्चमस्वरी। इ, रुण्ठते। आलस्यं मन्दीभावः। क्लेयं दौर्ब्बल्यम्। खोटः खोड़नम्। इति दुर्गादासः ॥
रुठ, ल ड प्रतीघाते। इति कविकल्पद्रुमः ॥ (भ्वा०-आत्म०-सकः-सेट्।) ल, अरुठत्। ड, रोठते। प्रतीघातः शोकादिना पतनं पुनर्हननं वा। इति दुर्गादासः ॥
रुड्, [ष्] स्त्री, (रुष क्रुधि+क्विप्।) रुट्। इति व्याकरणम् ॥
रुणरुणा, स्त्री, सुखसन्दोह्या गौः। इति शब्द-चन्द्रिका ॥
रुण्डः, पुं, कबन्धः। इति जटाधरः ॥ (छिन्नपाद-हस्तः। यथा, कथासरित्सागरे। ६५। ११।
“तेनारोप्य स्थलं पृष्ठः स रुण्डः पुरुषोऽभ्यधात्।
निक्षत्तहस्तचरणो नष्टां चिन्तोऽस्मि शत्रुभिः॥”)
रुण्डिका, स्त्री, (रुण्डः कबन्धोऽस्त्यस्यामिति। रुण्ड+ठन्।) युद्धभूमिः। दारपिण्डिका। विभूतिः। इति शब्दरत्नावली ॥
रुतं, क्ली, (रु+क्तः।) पशुपक्ष्यादीनां शब्दः। तत्पर्य्यायः। वाश्रितम् २। इत्यमरः ॥ वाशि-तम् ३। इति शब्दरत्नावली ॥ (यथा, शिशु-पालवधे। १६। २५।
“अशुद्धं कुरुते धनध्वनिं
न तु गोमायुरुतानि केशरी ॥”)
रुद, ल ध इर् रोदे। इति कविकल्पद्रुमः ॥ (अदा०-पर०-अक०-सेट्।) रोदोऽश्रुविमो-चनम्। ल घ, रोदिति लोकः शोकात्। इर्, अरुदत् अरोदीत्। रोदिष्यमाणमात्मानमिति भट्टौ। आक्रानविशिष्टरोदनक्रियाव्याप्यत्वात् सकर्म्मकत्वमिति जयमङ्गला। इति दुर्गादासः ॥
रुदथः, पुं, (रोदितीति। रुद् रोदने+“रुदि-विदिभ्यां डित्।” उणा० ३। ११६। इति अथः। सच डित्।) कुक्कुरः। इत्युणादिकोषः ॥ अग्निः। इति सिद्धान्तकौमुद्यामुणादिवृत्तिः ॥
रुदन्तिका, रुदन्ती } स्त्री, (रोदनं रुत्। अति अदि वन्यने+अच्+ङीप्। स्वार्थे कन् च।) क्षुद्रक्षुपविशेषः। तत्पर्य्यायः। सवल्लोया २ सञ्जीवनी ३ अन्तस्रवा ४ रोमाञ्चिका ५ महामांसी ६ चणपत्री ७ सुधास्रवी ८। अस्या गुणाः। कटुत्वम्। तिक्तत्वम्। उष्णत्वम्। कषा-यत्वम्। क्षामरक्तपित्तकफश्वासमेहनाशित्वम्। रसायनत्वञ्च। अस्य स्वरूपं यथा,—
“चणपत्रसमं पत्रं क्षुपस्यैव तथाकृतिः।
शैशिरे जलबिन्दूनां स्रवन्तीति रुदन्तिका ॥”
इति राजनिर्घण्टः ॥
अस्य गुणाः।
“रुदन्ती वह्निकृद्वृष्या पित्तघ्नी च रसायनी ॥”
इति राजवल्लभः ॥
(रोदनशीले, त्रि। यथा,—
“धरित्रि पुष्पाञ्जलिरेष तुभ्यं
सुता मदीयास्तव पालनीयाः।
इतीव रम्भा नमिताग्रमौलिना
भृशं रुदन्ती मकरन्दबिन्दुना ॥”
इति प्रसिद्धम् ॥)
रुदितं, क्ली, (रुद्+क्तः।) क्रन्दनम्। इत्यमरः ॥ तद्वति, त्रि ॥ (यथा, महाभारते। १३।२३।६।
“केशकीटावपतितं क्षुतं श्वभिरवेक्षितम्।
रुदितञ्चावधूतञ्च तं भागं रक्षसां विदुः ॥”)
रुद्ध, त्रि, (रुध्+क्तः।) नदीप्राकारादिना कृतवेष्टनम्। तत्पर्य्यायः। वेष्टितम् २ वल-यितम् ३ संवीतम् ४ आवृतम् ५। इत्यमरः ॥ (यथा, मेघदूते। ३६।
“रुद्धालोके नरपतिपथे सूचिभेद्यैस्तमोभिः ॥”)
रुद्रः, पुं, (रोदयतीति। रुद्+णिच्+“रोदेर्णिलुक् च।” उणा० २। २२। इति रक्। णौ च लुक्।) आदित्यपञ्चकम्। इति राजनिर्घण्टः ॥ शिवः। (यथा, महाभारते। १३। १७।४६।
“त्रिजटश्चीरवासाश्च रुद्रः सेनापतिर्व्विभुः॥”)
गणदेवताविशेषः। इत्यमरः ॥ अयं अग्नि-मूर्त्तिः। यथा रुद्राय अग्निमूर्त्तये नमः। इति तिथ्यादितत्त्वे शिवपूजापद्धतिः ॥ स च ब्रह्मणः क्रोधरूपः सृष्टिकाले भ्रूमध्याज्जातः। तत्-सृष्टः भूतप्रेतपिशाचादिः। अयमेवान्ते संहार-कर्त्ता। इति भागवतम् ॥ * ॥ अथैकादश-रुद्रनामानि यथा। अजः १ एकपात् २ अहि-र्ब्रध्नः ३ पिनाकी ४ अपराजितः ५ त्र्यम्बकः ६

महेश्वरः ७ वृषाकपिः ८ शम्भुः ९ हरणः १० ईश्वरः ११ । इति महाभारते दानधर्म्मः ॥ * ॥ अपि च ।

"अजैकपादहिर्ब्रध्नो विरूपाक्षः सुरेश्वरः ।
जयन्तो बहुरूपश्च त्र्यम्बकोऽपराजितः ।
वैवस्वतश्च सावित्रो हरो रुद्रा इमे स्मृताः ॥"

इति जटाधरः ॥ * ॥

अन्यच्च ।

"अजैकपादहिर्ब्रध्नस्त्वष्टा रुद्रश्च वीर्य्यवान् ।
त्वष्टुश्चाप्यात्मजः पुत्रो विश्वरूपो महातपाः ॥
हरश्च बहुरूपश्च त्र्यम्बकश्चापराजितः ।
वृषाकपिश्च शम्भुश्च कपर्द्दी रैवतस्तथा ॥
एकादशैते कथिता रुद्रास्त्रिभुवनेश्वराः ॥"

इति गारुड़े ६ अध्यायः ॥

अग्निपुराणे त्वष्टृस्थाने कृत्तिवासाः ॥ * ॥ अपरञ्च ।

"अजैकपादहिर्ब्रध्नो विरूपाक्षोऽथ रैवतः ।
हरश्च बहुरूपश्च त्र्यम्बकश्च सुरेश्वरः ॥
सावित्र्याश्च जयन्तश्च पिणाकी चापराजितः ।
एते रुद्राः समाख्याता एकादश गणेश्वराः ॥
एतेषां मानसानान्तु त्रिशूलवरधारिणाम् ।
कोटयश्चतुरशीतिरस्तु पुत्राश्चात्तमा मताः ॥
दित्तु सर्व्वासु ये रुद्रां प्रकुर्व्वन्ति गणेश्वराः ।
पुत्रपौत्रसुताख्याते सुरभीगर्भसम्भवाः ॥"

इति मात्स्ये ५ अध्यायः ॥ * ॥

तस्य उत्पत्तिर्यथा,—

"प्रजाः सृष्टुमनास्तेपे तपः परमदुश्चरम् ।
तस्यैवं तप्यमानस्य न किञ्चित् समवर्त्तत ॥
ततो दीर्घेण कालेन दुःखात् क्रोधो व्यजायत ।
क्रोधाविष्टस्य नेत्राभ्यां प्रापतन्नश्रुबिन्दवः ॥
ततस्तेभ्योऽश्रुबिन्दुभ्यो भूताः प्रेताश्चदाभवन् ।
सर्व्वांस्तानग्रजान् दृष्ट्वा ब्रह्मात्मानमविन्दत ॥
तदा प्राणमयो रुद्रः प्रादुरासीत् प्रभोर्मुखात् ।
सहस्रादित्यसङ्काशो युगान्तदहनोपमः ॥
रुरोद सस्वरं घोरं देवदेवः स्वयं शिवः ।
रोदमानं तदा ब्रह्मा मारोदीरित्यभाषत ।
रोदनाद्रुद्र इत्येवं लोके ख्यातिं गमिष्यसि ॥
अन्यानि सप्तनामानि पत्नीः पुत्रांश्च शाश्वतान् ।
स्थानानि चैषामष्टानां ददौ लोकपितामहः ॥
भवः प्रथमस्तेषां प्रभूनाम्पतिरेव च ।
भीमश्चोग्रो महादेवस्तानि नामानि सप्त वै ॥
सूर्य्यो जलं मही वह्निर्व्वायुराकाशमेव च ।
दीक्षितो ब्राह्मणश्चन्द्र इत्येता अष्टमूर्त्तयः ॥
स्थानेषु तेषु ये रुद्रं ध्यायन्ति मनुजाधिप ।
तेषामष्टतनुर्देवो ददाति परमं पदम् ॥
सुवर्चला तथैवोमा विकेशा च शिवा तथा ।
स्वाहा दिशा च दीक्षा च रोहिणीति च पत्नयः ॥
शनैश्चरस्तथा शुक्रो लोहिताङ्गो मनोजवः ।
स्कन्दः सर्गोऽथ सन्तानो बुधश्चैषां सुताः स्मृताः ॥"

इति कौर्म्मे १० अध्यायः ॥ * ॥

विष्णुरुद्रयोरभेदो यथा,—

"सदैव देवो भगवान् महादेवो न संशयः ।
मन्यन्ते ये जगद्योनिं विभिन्नं विष्णुमीश्वरात् ।
मोहादवैदनिष्ठाद्वा ते यान्ति नरकं नराः ॥
वेदानुवर्त्तिनं रुद्रं देवं नारायणन्तथा ।
एकीभावेन पश्यन्ति मुक्तिभाजो भवन्ति ते ॥"

इति च तत्रैव १३ अध्यायः ॥ * ॥

कल्पभेदे तस्योत्पत्तिनामस्थानभार्य्यादीनि यथा,

"चुकोप च ततो ब्रह्मा ज्वलन्निव हुताशनः ।
ततः कोपं सुपुत्रेभ्यः क्षतमन्याय्यमित्यपि ॥
विचार्य्य परिवर्त्तन्तं नियन्तुमुपचक्रमे ।
यत्नान्नियम्यमानोऽपि स कोपः परमेष्ठिनः ॥
भ्रुवोर्म्मध्यादथोद्भूतः कुमारो नीललोहितः ।
जातमात्रः कुमारोऽसौ रुरोद भगवान् भवः ॥
ब्रह्मोवाच कथं पुत्ररोदिषि त्वं महाबल ।
तन्मे कथय कामन्ते सद्यः सम्पादयाम्यहम् ॥

रुद्र उवाच ।

नामानि कुरु मे ब्रह्मन् ! स्थानानि च जगद्गुरो ।
पत्नीश्च देहि भगवन् ततः शान्तिर्भविष्यति ॥

ब्रह्मोवाच ।

जानामि त्वां देवदेवं पूर्व्वं दत्तं वरं मम ।
सत्यं कर्त्तुं भवान् जातस्तं हि सर्व्वेश्वरेश्वरः ॥
जातमात्रो रोदिषि त्वं ततो रुद्र इति स्मृतः ।
नामान्यन्यानि ते देव विधास्ये शृणु पुत्रक ॥
ऋतध्वजो मनुर्मन्युरुग्ररेता महान् शिवः ।
भवः कालो महिनसो वामदेवो धृतव्रतः ॥
एतानि तव नामानि ये स्मरन्ति नरा भुवि ।
तेषां सदैव कल्याणं करिष्यसि महामते ॥
स्थानानि च प्रवक्ष्यामि तेषु वासो विधीयताम् ॥
इन्द्रियाण्यसृजद्व्योम वायुरग्निर्जलं मही ।
तपश्चन्द्रश्च सूर्य्यश्च स्थानान्येतानि ते भव ॥
धृतिर्धीरसिलोमा च नियुत् सर्पिर्विलम्बिका ।
इरावती स्वधा दीक्षा योषितस्तव सुन्दरी ॥
प्रजाः सृज महाभाग जगदेतत् प्रपूरय ॥
इत्यादिष्टः स भगवान् ब्रह्मणा नीललोहितः ।
सृष्टवान् स प्रजा ब्रह्मौर्भूतप्रेतपिशाचकान् ।
कुष्माण्डान् विकृताकारान् भैरवान् भीमनादिनः ॥
तान् दृष्ट्वा तु तदा ब्रह्मा जगद्विद्रावकान् बहून् ।
वारयामास पुत्र त्वं मा स्राक्षीरीदृशीः प्रजाः ॥
तपसा विष्णुमाराध्य विहरस्व यथासुखम् ।
इति ते कथितो राजन् ! रुद्रसर्गः प्रजापतेः ॥
यं श्रुत्वापि नरः सद्यो जह्याद्भूतकृतं भयम् ॥"

इति पाद्मे स्वर्गखण्डे रुद्रसर्गः ८ अध्यायः ॥ * ॥

प्रकारान्तरं यथा,—

"कथितस्तमसः सर्गो ब्रह्मंस्तेऽयं महामुने ।
रुद्रसर्गं प्रवक्ष्यामि तन्मे निगदतः शृणु ॥
कल्पादावात्मनस्तुल्यं सुतं प्रध्यायतस्ततः ।
प्रादुरासीत् प्रभोरङ्के कुमारो नीललोहितः ॥
रुदन् वै सस्वरं सोऽथ द्रवंश्च द्विजसत्तम ! ।
किं करोषीति तं ब्रह्मा रुदन्तं प्रत्युवाच वै ॥
नाम धेहीति तं सोऽथ प्रत्युवाच प्रजापतिम् ।
रुद्राख्यं देव नामासि मारोदीर्धैर्य्यमाप्नुहि ॥
एवमुक्तः पुनः सोऽथ सप्तकृत्वो रुरोद वै ।
ततोऽन्यानि ददौ तस्मै सप्त नामानि स प्रभुः ॥
स्थानानि चैषामष्टानां पत्नीः पुत्रांश्च वै प्रभुः ॥
भवं प्रथमयेशानं तथा पशुपतिं द्विज ।
भीमसुग्रं महादेवमुवाच स पितामहः ॥
चक्रे नामान्यथैतानि स्थानान्येषां चकार सः ॥
सूर्य्यो जलं मही वह्निर्व्वायुराकाशमेव च ।
दीक्षितो ब्राह्मणः सोम इत्येतास्तनवः क्रमात् ॥
सुवर्चला तथैवोषा सुकेशी चापरा शिवा ।
स्वाहा दिशस्तथा दीक्षा रोहिणी च यथाक्रमम् ॥
सूर्य्यादीनां नरश्रेष्ठ रुद्राद्यैर्नामभिः सह ।
पत्नयः सुता महाभाग तदपत्यानि मे शृणु ॥
येषां सुतिप्रसूतेश्च इदमापूरितं जगत् ।
शनैश्चरस्तथा शुक्रो लोहिताङ्गो मनोजवः ॥
स्कन्दः सर्गोऽथ सन्तानो बुधश्चानुक्रमात् सुताः ।
एवंप्रकाररुद्रोऽसौ सतीं भार्य्यामविन्दत ॥
दक्षकोपाच्च तत्याज सा सती स्वं कलेवरम् ।
हिमवदुहिता साभून्मेनायां द्विजसत्तम ! ॥
उपयेमे पुनस्तोमामनन्यां भगवान् भवः ॥
देवौ धाता विधातारौ भृगोः ख्यातिरसूयत ।
श्रियञ्च देवदेवस्य पत्नी नारायणस्य या ॥"

इति विष्णुपुराणे १ अंशे ८ अध्यायः ॥ * ॥

("द्वितीये हि युगे सर्व्वमक्रोधव्रतमास्थितम् ।
दिवं सहस्रवर्षाणामसुरा अभिदुद्रुवुः ॥
तपोविघ्नं शमीकृत्तुं तपोविघ्नं महात्मनाम् ।
पश्यन् समर्थश्चोपेक्षामकरोद्दक्षः प्रजापतिः ॥
पुनर्माहेश्वरं भागं ध्रुवं दक्षः प्रजापतिः ।
प्रायो न कल्पयामास प्रोच्यमानः सुरैरपि ॥
पाशुपत्यं ऋचो याश्च प्रैयश्चाहुतयश्च याः ।
यज्ञसिद्धिकृतस्ताभिर्हीनश्चैव स दृष्टवान् ॥
अथोत्तीर्णव्रतो देवो बुद्ध्वा दक्षमतिक्रमम् ।
रुद्रो रौद्रं पुरस्कृत्य भावमात्मविदात्मनः ॥
सृष्ट्वा ललाटे चक्षुर्वै दग्ध्वा तानसुरान् प्रभुः ।
बाणं क्रोधाग्निसन्तप्तमसृजत् प्रक्षुनाशनम् ॥
ततो यज्ञः स विध्वस्तो यथितास्च दिवौकसः ।
दाह्यथा परीताश्च भ्रान्ता भूतगणा दिशः ॥"

इति चरके चिकित्सास्थाने तृतीयेऽध्याये ॥)

रुद्रगीता वराहपुराणे द्रष्टव्या ॥ * ॥ (विश्वकर्म्मपुत्रविशेषः । यथा, विष्णुपुराणे । १ । १५ । १२२ ।

"तस्य पुत्रास्तु चत्वारस्तेषां नामानि मे शृणु ।
अजैकपादहिर्ब्रध्नस्त्वष्टा रुद्रश्च बुद्धिमान् ॥")

स्वनामख्यातः कविविशेषः । स च विद्याविलासपुत्रः भावविलासप्रणेता । कविरयं मानसिंहपुत्रस्य भावसिंहमहीपतेः समये बभूव । स च भावसिंहमहीपतिर्व्वर्त्तमानजयपुरमहाराजस्य षोड़शः पूर्व्वपुरुषः । तथा च भावविलासे । १३४—१३६ ।

"अन्यापदेशविनिवेशविदग्धबुद्धि-
श्रीभावसिंहनरसिंहनियोगयोगात्।
सम्पादितो विविधभावविकासभाजां
प्रीत्यै भूयं भवतु भावविलास एषः॥
सद्गुणानां समुद्रेण रुद्रेण ग्रथिता गुणैः।
कण्ठस्था श्लोकमालेयं केषां न कुरुते श्रियम्॥
विद्याविलासपुत्रस्य न्यायवाचस्पतेरियम्।
काशालापविदग्धानां सुदं निर्मातु निर्मितिः॥")

रुद्रकवचं, क्ली, (रुद्रस्य कवचम्।) शिवनाम-समूहेन सर्व्वाङ्गरक्षकम्। यथा,—

"वक्ष्यामि रुद्रकवचमाद्यं प्राणस्य रक्षणम्।
अहोरात्रं महादेव रक्षार्थं देवनिर्म्मितम्॥
ॐ रुद्रो मामग्रतः पातु पृष्ठतः पातु शङ्करः।
कपर्द्दी दक्षिणे पातु वामपार्श्वे तथा हरः॥
शिवः शिरो मे च पातु ललाटे नीललोहितः।
नेत्रयोस्त्र्यम्बकः पातु मुखे पातु महेश्वरः॥
कर्णयोर्नासिकायाञ्च जिह्वायां शुभ्रुरव्ययः।
श्रीकण्ठस्तु गले पातु बाह्वोः पिणाकधृक्॥
हृदयं मे महादेव ईश्वरस्तु तथोदरम्।
नाभौ कुक्षौ कटिस्थाने पातु सर्व्वं प्रजापतिः॥
ऊरू जानू महादेवः पादौ पातु महेश्वरः।
सर्व्वं रक्षतु भूतेशः सर्व्वगात्राणि यत्नतः॥
परशुं शूलखट्वाङ्गं दिव्यास्त्रं रौद्रमेव च।
नमस्काराय देवेशं रक्ष मां जगदीश्वरः॥
रक्षोभ्यो ग्रहपीड़ाभ्यो रोगशोकार्त्तिवेषु च।
पापेभ्यो नरकेभ्यश्च त्राहि मां भक्तवत्सल॥
जन्म मृत्युर्ज्जरा व्याधिः कामः क्रोधः श्रमो दमः।
लोभमोहमदाश्चापि त्वन्तु भुवनेश्वर॥
त्वं गतिस्त्वं मतिश्चैव त्वं बुद्धिस्त्वं परायणः।
कायेन मनसा वाचा त्वयि भक्तिर्द्दृढास्तु मे॥
इत्येतद्रुद्रकवचं पठतः पापनाशनम्।
महादेवप्रसादेन दुर्व्वासःपरिकीर्त्तितम्॥
न तस्य पापरोगोऽस्ति भयं तस्य न विद्यते।
प्राप्नोति सुखमारोग्यं पुण्यमात्मप्रवन्धनम्॥
पुत्रार्थी लभते पुत्रं धनार्थी लभते धनम्।
विद्यार्थी लभते विद्यां मोक्षार्थी मोक्षमाप्नुयात्॥
देहे चेदं हृदि न्यस्य शिवकल्पो भवेन्नरः।
मुच्यते सर्व्वपापेभ्यो रुद्रलोकं स गच्छति॥"

इति स्कन्दपुराणे रुद्रकवचं समाप्तम्। इति तन्त्रसारः॥

रुद्रगणः, पुं, (रुद्रस्य गणः।) शिवपार्षदसमूहः। यथा,—

"अपरे रुद्रनामानो जटाचन्द्रार्द्धमण्डिताः।
देवेन्द्रस्य नियोगेन वर्त्तन्ते त्रिदिवे सदा॥
तेषां संख्या चैककोटिस्ते सर्व्वे बलवत्तराः।
कुर्व्वन्ति हि सदा सेवां हरस्य सततं गणाः॥
विलसन्ति च पापिष्ठान् धर्म्मिष्ठान् पालयन्ति च।
अनुग्रह्णन्ति सततं धृतपाशुपतव्रतान्॥
विघ्नांश्च सततं घ्नन्ति योगिनां प्रयतात्मनाम्।
षट्त्रिंशत्कोटयश्चैव हरस्य सकला गणाः॥
वराहगणनाग्रार्थं हिताय जगतां तथा।
शङ्करस्याथ सेवायै समुत्पन्ना इमे गणाः॥"

इति कालिकापुराणे २६ अध्यायः॥

रुद्रचण्डी, स्त्री, (रुद्रा चण्डी।) रुद्रयामलोक्त-देवीमाहात्म्यम्। यथा। "अस्य चण्डिका-महामन्त्रस्य महारुद्र ऋषिरनुष्टुप् छन्दश्चण्डिका देवता रुद्रचण्डीजपे विनियोगः। ॐ नमश्चण्डिकायै।

श्रीशङ्कर उवाच।

चण्डिकां हृदये न्यस्य स्मरणं यः करोत्यपि।
अनन्तफलमाप्नोति देवि चण्डीप्रसादतः॥
रविवारे यदा चण्डीं पठेदागमसम्मताम्।
नवावृत्तिफलं तस्य जायते नात्र संशयः॥
सोमवारे यदा चण्डीं पठेद्यस्तु समाहितः।
सहस्रावृत्तिपाठस्य फलं जानीहि सुव्रते॥
कुजवारे जगद्धात्रि पठेद्यामलसम्मताम्।
शतावृत्तिफलं तस्य बुधे लक्षफलं भवेत्॥
गुरौ यदि महामाये लक्षयुग्मफलं ध्रुवम्।
शुक्रे देवि जगद्धात्रि चण्डीपाठेन शङ्करि॥
त्रैयं तुल्यफलं दुर्गे यदि चण्डीं समाहितः।
शनिवारे जगद्धात्रि कोट्यावृत्तिफलं ध्रुवम्॥
अतएव जगद्धात्रीं यश्च चण्डीं समभ्यसेत्।
स धन्यश्च कृतार्थश्च राजराजाधिपो भवेत्॥
आरोग्यं विजयं सौख्यं वस्त्ररत्नप्रवालकम्।
पठनाच्छ्रवणाच्चैव जायते नात्र संशयः॥
धनं धान्यं प्रवालञ्च वस्त्ररत्नविभूषितम्।
चण्डीसरणमात्रेण कुर्य्यात् सर्व्वं महेश्वरि॥
ॐ घोरचण्डी महाचण्डी चण्डमुण्डविखण्डिनी।
चण्डवक्त्रा महामाया महादेवविभूषिता॥
चतुर्वक्त्रा इत्यपि पाठः।
रक्तदन्ता वरारोहा महासुरविमर्द्दिनी।
तारिणी जननी दुर्गा चण्डिका चण्डविक्रमा॥
गुह्यकाली जगद्धात्री चण्डी च यामलोद्भवा।
श्मशानवासिनी देवी घोरचण्डी भयानका॥
शिवा घोरा रुद्रचण्डी महेशगणभूषिता।
जाह्नवी परमा क्षमा महाचित्पुरसुन्दरी॥
विद्या श्रीपरमा विद्या चण्डी च वैरमर्द्दिनी।
दुर्गे दुर्गा शिवा घोरा चण्डहन्त्री प्रचण्डिका॥
महेशी वगला देवी भैरवी चण्डविक्रमा।
प्रमथैर्भूषिता क्षमा चासृक्पा सुखमर्द्दिनी॥
रणघण्टा चण्डघण्टा रणरामवरप्रदा।
तारिणी भद्रकाली च शिवा घोरा भयानका॥
विष्णुप्रिया महामाया नन्दगोपगृहोद्भवा।
मङ्गला जननी चण्डी महाक्रुद्धा भयङ्करी॥
विमला भैरवी निद्रा जातिरूपा मनोहरा।
क्षमा निद्रा क्षुधा माया भक्तिरूपा मनोहरा॥
तस्यै देव्यै नमस्तस्यै सर्व्वरूपेण संस्थिता।
प्राणप्रिया जातिमाया निद्रारूपा महेश्वरी॥
या देवी सर्व्वभूतेषु सर्व्वरूपेण संस्थिता।
नमस्तस्यै नमस्तस्यै नमस्तस्यै नमो नमः॥
एतां चण्डीं जगद्धात्रीं ब्राह्मणस्तु सदा पठेत्।
नान्यस्तु पाठको देवी पठने ब्रह्महा भवेत्॥
नारदः पाठकश्चैव कैलासे रत्नभूषिते।
वैकुण्ठे ब्रह्मलोके च देवराजपुरे शिवे॥
यः शृणोति धरायाञ्च मुच्यते सर्व्वपातकैः।
ब्रह्महत्या च भोहत्या स्त्रीवधोद्भवपातकम्॥
तत् सर्व्वं पातकं दुर्गे मातुर्गमनपातकम्।
श्वश्रूगमनपापञ्च यत् कन्यागमपातकम्॥
सुतस्त्रीगमनञ्चैव यत् यत् पापं प्रजायते।
परदारकृतं पापं तत्क्षणादेव नश्यति॥
जन्मजन्मान्तरात् पापात् गुरुहत्यादिपातकात्।
मुच्यते मुच्यते देवि गुरुपत्नीषु सङ्गमात्॥
मनसा वचसा पापं यत् पापं ब्रह्महिंसने।
मिथ्यायाश्चैव यत् पापं तत् पापं नश्यति क्षणात्॥
श्रवणं पठनञ्चैव यः करोति धरातले।
स धन्यश्च कृतार्थश्च राजराजाधिपो भवेत्॥
यः करिष्यत्यवज्ञां वै रुद्रयामलचण्डिकाम्।
पापैरेतैः समायुक्तो रौरवं नरकं व्रजेत्॥
अश्रद्धां ये प्रकुर्व्वन्ति ते च पातकिनो नराः।
रौरवं रक्तकुण्डञ्च कृमिकुण्डं मलस्य वै॥
शुक्रस्य कुण्डं स्त्रीरक्तं यान्ति तेऽप्यचिरेण वै।
ततः पितृगणैः सार्द्धं विष्ठायां जायते कृमिः॥
शृणु देवि महामाये पठेत् चण्डीं शृणोत्यपि।
गयायाञ्चैव यत् पुण्यं काश्यां विश्वेश्वराग्रतः॥
प्रयागे सङ्गमञ्चैव हरिद्वारे हरेर्गृहे।
तुल्यं पुण्यं भवेद्देवि सत्यं दुर्गे शिवे रमे॥
त्रिगयायां त्रिकाश्यां वै यच्च पुण्यं शृणु प्रिये।
तच्च पुण्यं तच्च पुण्यं तच्च पुण्यं न संशयः॥
भवानी च भवानी च भवानीत्युच्यते बुधैः।
भकारस्तु भकारस्तु भकारः केवलः शिवः॥
वाणी चैव जगद्धात्री वरारोहे भकारकः।
प्रेतवद्देवि विश्वेशि भकारः प्रेतवत् सदा॥
आरोग्यञ्च जयं दुःखनाशनं सुखवर्द्धनम्।
धनं पुत्रं जयारोग्यं कुष्ठं गलितनाशकम्॥
अङ्गैकरोगान्मुच्येत दद्रुरोगाद्धि पार्व्वति।
सत्यं सत्यं जगद्धात्रि महामाये शिवे रमे॥
चण्डे चण्डे महाघोरे चण्डिके व्याधिनाशिनि।
मन्दे दिने महेशानि विशेषफलदायिनी॥
सर्व्वदुःखात् प्रमुच्येत भक्त्या चण्डीं शृणोति यः।
ब्राह्मणो हितकारी च पठेन्नियतमानसः॥
मङ्गलं मङ्गलं श्रेयं मङ्गलं जयमङ्गलम्।
भवेद्धि पुत्रपौत्रादिकन्यादासादिभिर्युतः॥
तत्त्वज्ञानञ्च निधने काले निर्व्वाणमाप्नुयात्।
महादानोद्भवं पुण्यं तुलाहिरण्यके यथा॥
चण्डीश्रवणमात्रेण पठनाद्ब्राह्मणोऽपि सः।
निर्व्वाणमेति देवेशि महास्तव्ययनं हि तत्॥
सर्व्वत्र विजयं याति श्रवणाद्ग्रहदोषतः।
मुच्यते सर्व्वपापेभ्यो राजराजाधिपो भवेत्॥
महाचण्डी शिवा घोरा भयानकवरप्रदा।
काली च कमला विद्या महोरगविमर्द्दिनी॥
गुह्यचण्डी घोरचण्डी चण्डी त्रैलोक्यदुर्लभा।
देवानां दुर्लभा चण्डी रुद्रयामलसम्भवा॥
अप्रकाश्या महादेवप्रिया रावणमर्द्दिनी।

मत्स्यप्रिया मांसरता मत्स्यमांसबलिप्रिया ॥
मद्यभक्ता सदा नित्या भूतप्रमथसङ्गता ।
मध्यभागा महारामा धान्यदा धनरत्नदा ॥
वस्त्रदा मणिदा राज्यप्रदा विषयवर्द्धिका ।
मुक्तिदा सर्व्वदा चण्डी महाविपदनाशिनी ॥
इमाञ्च चण्डीं पठते मनुष्यः
शृणोति भक्त्या परमां शिवस्य ।
चण्डीं धरण्यामतिपुण्ययुक्तः
पठेच्च गच्छेद्धरमन्दिरं शुभम् ॥
यद्यन्मनोरथान् दुर्गे करोति धरणीतले ।
रुद्रचण्डीप्रसादेन किं न सिध्यति भूतले ॥
रुद्रध्येया रुद्ररूपा रुद्राणी रुद्रवल्लभा ।
रुद्रभक्ता रुद्ररूपा रुद्रभूषासमन्विता ॥
शिवचण्डी महारक्ता शिवप्रीतिगणान्विता ।
भैरवी परमा विद्या महाविद्या च घोड़शी ॥
सुन्दरी परमा विद्या महात्रिपुरसुन्दरी ।
गुह्यकाली भद्रकाली महाकालविमर्द्दिनी ॥
कृष्णा कृष्णस्वरूपा सा जननी मोहकारिणी ।
अतितन्द्रा महालज्जा सर्व्वमङ्गलदायिनी ॥
घोरचण्डी भीमरूपा भीमा देवी मनोहरा ।
वगला वगला सिद्धिदायिका सर्व्वदा शिवा ॥
स्मृतिरूपा कीर्त्तिरूपा बुद्धिरूपा मनोहरा ।
विष्णुप्रिया शक्रपूज्या योगेन्द्रैरपि सेविता ॥
भयानका महाकृष्णा देवी भयविनाशिनी ।
चण्डिका मुक्तिहस्ता च कौमारी सर्व्वकामदा ॥
वाराही च वराहस्य इन्द्राणी शक्रपूजिता ।
माहेश्वरी महेशस्य महेशगणभूषिता ॥
चामुण्डा नारसिंही च नृसिंहशत्रुनाशिनी ।
सर्व्वशत्रुप्रशमनी सर्व्वारोग्यप्रदायिनी ॥
नैव दुःखं भयं किञ्चित् पठनात् श्रवणाज्जनः ।
इति सत्यं महेशानि सत्यं सत्यं वदाम्यहम् ॥
नैव शोकं नैव रोगं नैव दुःखं भयन्तथा ।
आरोग्यं मङ्गलं नित्यं करोति शुभमङ्गलम् ॥
महेशानि वरारोहे ब्रवीमि सत्यमुत्तमम् ।
अभक्ताय न दातव्यं मम प्राणाधिकं शुभम् ॥
मम भक्ताय शान्ताय शिवविष्णुप्रियाय च ।
दद्यात् कदाचिद्देवेशि सत्यं सत्यं न संशयः ॥
अनन्तफलमाप्नोति शिवचण्डीप्रसादतः ।
अश्वमेधवाजपेयराजसूयशतेन वै ।
तृप्ताः स्युः पितरो देवास्तथा च सर्व्वदेवताः ॥
दुर्गे त्वां स्तवयीत्यागं रुद्रयामलपुस्तकम् ।
मन्त्रमक्षरसंज्ञानं यः करोति नराधमः ॥
अतएव महेशानि किं वक्ष्ये तव सन्निधौ ॥
लक्षोद्धराधिकचण्डीपठनाच्छ्रवणात् जनः ।
तत्त्वमसीति वाक्येन मुक्तिमाप्नोति दुर्लभाम् ॥"
इति श्रीरुद्रयामले हरगौरीसंवादे रुद्रयामल-
चण्डी समाप्ता ॥

रुद्रजः, पुं, (रुद्रात् जात इति। जन्+डः।) पारदः। इति राजनिर्घण्टः॥ (गुणादयोऽस्य पारदशब्दे विज्ञेयाः॥)

रुद्रजटा, स्त्री, (रुद्रस्य जटेव।) लताविशेषः॥ तत्पर्य्यायः। रौद्री २ जटा ३ रुद्रा ४ सौम्या ५ सुगन्धा ६ सुवहा ७ घनां ८ ईश्वरी ९ रुद्रलता १० सुपत्रा ११ सुगन्धपत्रा १२ सुरभिः १३ शिवाङ्गा १४ पत्रवल्ली १५ जटावल्ली १६ रुद्राणी १७ नेत्रपुष्करा १८ महाजटा १९ जटारुद्रा २०। अस्या गुणाः। कटुरसत्वम्। श्वासकासक्षयरोगभूतरक्षोनाशित्वञ्च। इति राजनिर्घण्टः॥

रुद्रपत्नी, स्त्री, (रुद्रस्य पत्नी।) दुर्गा। इत्युणादिकोषः॥ (यथा, महाभारते। ३। ८३। १५८। "सान्निध्यं तत्र राजेन्द्र रुद्रपत्न्या कुरूद्वह।
अभिगम्य च तां देवीं न दुर्गतिमवाप्नुयात्॥") अतसी। इति रत्नमाला॥

रुद्रप्रिया, स्त्री, (रुद्रस्य प्रिया।) हरीतकी। इति शब्दरत्नावली॥ पार्व्वती च॥

रुद्रभूः, स्त्री, (रुद्रस्य भूः स्थानम्।) श्मशानम्। इति केचित्॥

रुद्रविप्रुतिः, स्त्री, (रुद्रदेवताका विप्रुतिः।) प्रभवादिषष्टिवर्षान्तर्गतशेषविप्रुतिवर्षाणि। तेषां नामानि फलानि च यथा,—
"आद्या तु विप्रुतिर्ज्ञेया द्वितीया वैष्णवी स्मृता।
तृतीया रुद्रदैवत्या श्रेष्ठा मध्याधमा भवेत्॥
तृणधान्यानि पीड्यन्ते शीघ्रं वर्षति वासवः।
ज्ञवङ्गे पीड़िताः सर्व्वाः प्रजाश्च सुरवन्दिते॥१॥
जायन्ते सर्व्वशस्यानि सुभिक्षं निरुपद्रवम्।
सौम्यदृष्टिर्भवेद्राजा कालिके च शुभं वदेत्॥२॥
सुभिक्षं क्षेममारोग्यं सुखञ्च निरुपद्रवम्।
सौम्यदृष्टिर्भवेद्राजा सौम्ये सौख्यं प्रकीर्त्तितम्॥३॥
तोयपूर्णा भवेन्मेघो वर्षते च दिने दिने।
निरुपद्रवाश्च राजानः सर्व्वसाधारणे प्रिये॥४॥
वासवो वर्षते देवि देशे चाखण्डमण्डले।
अहिच्छत्रे कान्यकुब्जे विरोधी क्षयिनाशकृत्॥५॥
अभिभूतं जगत् सर्व्वं क्लेशैर्व्वहुविधैः प्रिये।
मारुतैः फलदाहेच्छ परिवारिणि शोभने॥६॥
निष्पत्तिः सर्व्वशस्यानां सुभिक्षं भवति प्रिये।
प्रमाधिनि जलोद्गारी जलदो मोदते प्रजा॥७॥
निष्पत्तिः सर्व्वशस्यानां सर्व्वशस्यमहार्घता।
घृतं तैलसमं याति आनन्दे नन्दिनी प्रजा॥८॥
कोद्रवाः शालिसङ्काश्च पीड्यन्ते वरवर्णिनि।
सर्व्वौषधानि धान्यानि राक्षसे निष्ठुरा प्रजा॥९॥
दुर्भिक्षं जायते घोरं धान्यौषधिप्रपीड़नम्।
अनले च समाख्यातं नात्र कार्य्या विचारणा॥१०॥
देशभङ्गोऽथ दुर्भिक्षं समासात् कथयाम्यहम्।
पिङ्गले चारुपद्माक्षि दुर्भिक्षं नर्म्मदातटे॥११॥
गोमहिष्यो विनश्यन्ति ये चान्ये नटनर्त्तकाः।
वासवो वर्षते देवि शस्यञ्च नहि जायते॥
तिलसर्षपमाषादिकार्पासानां महार्घता।
गोमहिष्यः सुवर्णानि कांस्यताम्राद्यशेषतः॥
तत् सर्व्वं देवि विक्रीय कर्त्तव्यो धान्यसञ्चयः।
तेन धान्येन लोकोऽयं निस्तरिष्यति दुर्दिनम्।
पार्थिवा मोषका दीनाः कामयुक्ते प्रपीड़िताः॥१२॥

तोयपूर्णाः स्रुता मेघा बहुशस्या च मेदिनी।
निष्ठुराः पार्थिवा देवि सिद्धार्थे च वरानने॥१३॥
अल्पतोया घनाश्चैव कोटकाः प्रबलाः स्रुताः।
विरुद्धाः पार्थिवा देवि रौद्रे वर्षे वरानने॥१४॥
दुर्भिक्षं मध्यमं प्रोक्तं व्यवहारो न वर्त्तते।
भवेद्वै मध्यमा वृद्धिर्दुर्म्मतौ सम्प्रपद्यते॥१५॥
सुभिक्षं जायते लोकः सर्व्वोपद्रववर्जितः।
प्राणिनां जायते हर्षो दुन्दुभौ वरवर्णिनि॥१६॥
महिषीगोहिरण्यादितान्त्रकांस्याद्यशेषतः।
तत् सर्व्वं देवि विक्रीय कर्त्तव्यो धान्यसञ्चयः॥
रक्ते संवत्सरे देवि क्रूरबुद्धिर्नराधिपः।
मानवाः क्रूरचेष्टाश्च संग्रामे न जयो भवेत्॥१७॥
दुर्भिक्षं मरणं रोगो धान्यौषधिनिपीड़नम्।
पापरोगो भवेद्देवि रक्ताख्येऽमरवन्दिते॥१८॥
रोगो मरणदुर्भिक्षं विविधोपद्रवाकुलम्।
क्रोधे तु विषमं सर्व्वं समाख्यातं हरप्रिये॥१९॥
मेदिनी चलते देवि सर्व्वभूतं चराचरम्।
देशभङ्गश्च दुर्भिक्षं क्षये संक्षीयते प्रजा॥
सौराष्ट्रे मालवे देशे दक्षिणे कोङ्कणे तथा।
दुर्भिक्षं जायते घोरं क्षये संवत्सरे प्रिये॥
कौसुदीचर्म्मनद्योश्च यमुनानर्म्मदातटे।
विन्ध्यायां सैन्धवे चैव विनश्यति न संशयः॥
सिंहलो मरुदेशश्च कालञ्जरं तथैव च।
क्षये क्षयन्ति सर्व्वाणि नान्यथा वरवर्णिनि॥"२०
इति ज्योतिस्तत्त्वम्॥

रुद्रवीणा, स्त्री, (रुद्रस्य वीणा।) वीणाभेदः। यथा,—
"दण्डः स्याद्रुद्रवीणाया सुश्लक्ष्णदारुसम्भितः।
भमरङ्कुष्ठाग्रमितं शुषिरं तस्य कीर्त्तितम्॥
दण्डस्योभयतो ज्ञेयं कांस्यसंवरणद्वयम्।
पश्चात् संवरकश्चात्र कृत्रीकृतशिरो भवेत्॥
दण्डस्य वेष्टनं सार्द्धं पश्चाङ्गुलमिवोदितम्।
तन्मिता लक्षरी तस्याः कर्त्तव्या सुन्दराकृतिः॥
कक्षुभो रुद्रवीणायाश्चिह्नराः परिकीर्त्तितः।
ऊर्द्धं शिरसि दातव्या लोहपत्री समन्विता॥
मूलतन्त्री तदुपरि तस्या सौही ततः परम्।
दक्षिणे शिरसि न्यस्येत् श्रुतितन्त्रीद्वयं क्रमात्॥
एवन्तु कक्षुभं तत्र वीणादण्डे निवेशयेत्।
द्व्यङ्गुलोच्चमूर्द्धशिरोऽङ्गुष्ठमात्रन्तु पार्श्वकम्॥
सप्ताङ्गुलान्तरं तस्मात्तन्मूलञ्च निवेशयेत्।
अन्यं ततश्चतुरङ्गुलान्तरमाक्षिपेत्॥
अष्टादशाङ्गुलसुखं चक्रं वै चारुगर्भकम्।
दण्डं सप्तमतं कान्तं वर्त्तुलं तुम्बयुग्मकम्॥
औन्नत्ये किञ्चिदाधिक्यमलयञ्च प्रशस्यते।
अर्द्धाङ्गुलान्तरं पश्चात्तुम्बरं स्थापयेद्बुधः॥
दण्डपृष्ठे रन्ध्रमेकं स्थापयेच्च समन्ततः।
लौहाङ्कुशन्तु कर्त्तव्यं वर्त्तुलं पङ्कजाकृति॥
तद्बन्धनं गुणं तस्मिन् वेष्टवन्धे निवेशयेत्।
एतत्परायां मोटिन्यां वेष्टरन्ध्राङ्कुशं क्षिपेत्॥
तन्मोटनीवृत्तरन्ध्रसटशं दण्डरन्ध्रकम्।
सुयन्त्रिते तु तत्रैव बध्नीयात्सुखतन्त्रिकाम्॥
तावच्च भ्रामयेत् पूर्व्वां मोटनीञ्च शनैः शनैः।

न यावदेति खस्थानं तन्त्री यत्नविशारदः ॥
अस्याश्चतुर्दश प्रोक्ताः शारिकाः पूर्व्वसूरिभिः।
तासां दक्षत्तरा अष्टौ दश क्षुद्राः प्रकीर्त्तिताः ॥
एतासु तारवादित्यस्तिष्ठन्ति पदिकोपरि।
वितस्तिमात्रपदिकाङ्गुष्ठोचाप्यस्य गर्भकः ॥
तावत् शून्यस्तु कर्त्तव्यो यथा दक्षे स्थिरो भवेत्।
मदनस्य च सिक्थस्य योगेन सुदृढ़ीकृता ॥
दक्षतीनाच्च शारीणां खननोऽयं तलक्रमात्।
एतासु सर्व्वावयवैः कथितास्त्वङ्गुला बुधैः ॥
स्थाप्य दक्षस्य ताः पृष्ठे यथारागस्वरं पुनः।
मदनस्य च सिक्थस्य योगेन सुदृढ़ीकृताः ॥
सर्व्वासां खोदकलिका मस्तके स्युः सुयन्त्रिताः।
एकाङ्गुलोच्चाः क्षुद्राः स्युरिति शारीविनिर्णयः ॥
एवं विनिर्म्मिता रुद्रवीणा जनमनोहरा।
अस्यां शिक्षा तु कर्त्तव्या दाक्षिणात्योप्रदेशतः ॥"

इति सङ्गीतनारायणः ॥

रुद्रसर्गः, पुं, (रुद्रकृतः सर्गः।) रुद्रकर्त्तृकसृष्टिः। यथा,—

"इदानीं रुद्रसर्गं त्वं शृणु पार्थिवसत्तम!।
दशवर्षसहस्राणि तपश्चीर्त्वा महाजले ॥
प्रतिबुद्धो यदा रुद्रस्तदा घोरीं सकाननाम्।
दृष्ट्वा शून्यवतीं रम्यां मनुष्यपशुसङ्कुलाम् ॥
शुश्राव च तदा शब्दान्तृलिजां दक्षसञ्ज्ञनि।
आश्रमे यज्विनाघोरैर्योगस्थैरिति कीर्त्तितान् ॥
ततः श्रुत्वा महातेजाः सर्व्वज्ञः परमेश्वरः।
चुकोप सुभृशं देवो वाक्यञ्चेदमुवाच ह ॥
अहं पूर्व्वन्तु कविना सृष्टः सर्व्वात्मना विभुः।
प्रजाः सृजस्वेति तदा वाक्यमेतत्तथोक्तवान् ॥
इदानीं केन तत् कर्म्म कृतं सृष्ट्यादिवर्णनम्।
एवमुक्त्वा भृशं कोपात्ननाद परमेश्वरः ॥
तस्य तां नदतो ज्वालाः श्रोत्रेभ्यो निर्य्ययुस्तदा।
तत्र भूतानि वेतालाः उत्कुट्वाः प्रेतपूतनाः ॥
कुष्माण्डा यातुधानाश्च सर्व्वे प्रव्रजितानना।
उत्तस्थुः कोटिशस्तत्र नागाप्रहरणाहताः ॥"

इति वराहपुराणम् ॥

रुद्रसावर्णिः, पुं, द्वादशो मनुः। अस्मिन् मन्वन्तरे सुधामाख्योऽवतारः। ऋतधामा इन्द्रः। हरितादयो देवाः। तपोमूर्त्यादयः सप्तर्षयः। देववदुपदेवादयो मनुपुत्रा भविष्यन्ति। इति श्रीभागवतमतम् ॥ अपि च।

"द्वादशे रु[illegible]स्य प्राप्ते मन्वन्तरे मनोः।
सावर्ण्यास्य[illegible]ये देवा सृणुष्व तान् ॥
सुकर्म्माणः सुमनसो हरितो रोहितस्तथा।
सुरापाश्च सुरास्तत्र पञ्चैते दशका गणाः ॥
त्रिःप्रकारा भविष्यन्ति एकैकस्मिंश्चको गणः।
तेषामिन्द्रो हि विज्ञेयो ऋतधामा महाबलः ॥
सर्व्वैरिन्द्रगुणैर्युक्तः सप्तर्षीनपि मे शृणु।
द्युतिमत्पञ्चो सुतपास्तपोमूर्त्तिस्तपोनिधिः ॥
तपोरतिस्तथैवान्यः सप्तमस्तु तपोधृतिः।
देववान् वामदेवश्च देवश्रेष्ठो विदूरथः।
मित्रवान्मित्रभूतश्च भाविनस्तत्सुता मनोः ॥"

इति मार्कण्डेयपुराणम् ॥

रुद्राक्षः, स्त्री, (रुद्रं तत्परिमितपुत्रं क्षते इति। क्षत+क्विप्।) एकादशपुत्रजननी। यथा,—

"विश्वद्रुर्दशपुत्रा स्यादेकाधिका तु रुद्रक्षः॥"

इति शब्दरत्नावली ॥

रुद्राक्रीड़ः, पुं, (रुद्रस्य आक्रीड़ा देवनं यत्र।) श्मशानम्। इति त्रिकाण्डशेषः ॥

रुद्राक्षं, क्ली, (रुद्रस्य अक्षि कारणत्वेनाख्यस्येति। अर्शआदित्वादच्।) खनामख्यातवृक्षबीजम्। तस्य स्थूलत्वं प्रशस्तत्वञ्च यथा,—

"रुद्राक्षं शिवलिङ्गञ्च स्थूलं स्थूलं विशिष्यते।
शालग्रामो नर्म्मदश्च सूक्ष्मः सूक्ष्मो विशिष्यते॥"

इति मेरुतन्त्रे ६ प्रकाशः ॥

रुद्राक्षः, पुं, खनामख्यातवृक्षः। तत्पर्य्यायः। त्रिनयनः २ अमरः ३ पुण्यचामरः ४। इति शब्दरत्नावली ॥ तस्य फलपर्य्यायः। शिवाक्षम् १ सर्पाक्षम् २ भूतनाशनम् ३ पावनम् ४ नीलकण्ठाक्षम् ५ हराक्षम् ६ शिवप्रियम् ७। अस्य गुणाः। अम्लत्वम्। उष्णत्वम्। वातक्लमिशिरोऽस्थिभूतग्रहविषनाशित्वम्। रुच्यत्वञ्च। इति राजनिर्घण्टः ॥ शिवपूजायां अस्य माल्याधारणमावश्यकम्। यथा, लिङ्गपुराणे।

"विना भस्मत्रिपुण्ड्रेण विना रुद्राक्षमालया।
पूजितोऽपि महादेवो न स्यात्तस्य फलप्रदः ॥"

तस्योत्पत्तिर्यथा। संवत्सरप्रदीपे।

"त्रिपुरस्य वधे काले रुद्रस्याक्ष्णोऽपतंस्तु ये।
अश्रुणो बिन्दवस्ते तु रुद्राक्षा अभवन् भुवि ॥"

यद्यप्येकादित्रिचतुर्दशमुखरुद्राक्षेषु मन्त्रफलविशेषाः सन्ति तथापि सुलभत्वात् पञ्चवक्त्रस्य फलमन्त्रावभिधीयेते। यथा, स्कान्दे।

"पञ्चवक्त्रः स्वयं रुद्रः कालाग्निर्नाम नामतः।
अगम्यागमनाच्चैव अभक्ष्यस्य च भक्षणात्।
मुच्यते सर्व्वपापेभ्यः पञ्चवक्त्रस्य धारणात् ॥
हूं नमः इति प्रत्येकमष्टोत्तरशतं जपा शिवाग्निना प्रक्षाल्य धारणीयम्।
"विधा मन्त्रेण यो धत्ते रुद्राक्षं भुवि मानवः।
स याति नरकं घोरं यावदिन्द्राश्चतुर्दश ॥"

इति तिथ्यादितत्त्वम् ॥ * ॥

तस्य धारणे आवश्यकत्वं यथा, संवत्सरप्रदीपे।

"अरुद्राक्षधरो भूत्वा यदृयत् कर्म्म च वैदिकम्।
करोति जपहोमादि तत् सर्व्वं निष्फलं भवेत् ॥"

स्कान्दे।

"ध्यानधारणहीनोऽपि रुद्राक्षं धारयेद्बुधः।
सर्व्वपापविनिर्म्मुक्तः स याति परमां गतिम् ॥"

इत्येकादशीतत्त्वम् ॥

अथ रुद्राक्षमाहात्म्यम्।

श्रीमहादेव उवाच।

"इदानीं देवदेवेशि! मालानां धारणं शुभम्।
रुद्राक्षस्य च माहात्म्यं वद मे परमेश्वरि! ॥"

श्रीदेव्युवाच।

"शिखायां दक्षिणे बाहौ कण्ठे कर्णयोस्तथापि यो नरः।
रुद्राक्षं धारयेद्भक्त्या शिवलोकमवाप्नुयात् ॥
नववक्त्रन्तु रुद्राक्षं धारयेद्दामबाहुना।
दक्षबाहौ तथा वत्स! धारयेद्दृढ़मानसः ॥
शिखायां दशनं धार्य्यं कण्ठे च पञ्चविंशतिम्।
कर्णयोः पञ्च संस्थाप्य हृदि चाष्टोत्तरं शतम् ॥
नाभौ सप्त च रुद्राक्षं धारणाच्छिवभाग्भवेत्।
रुद्राक्षधारणादेव नरो देवत्वमाप्नुयात् ॥"
शिखायां दशनं हार्व्विशत्यरिमितम् ॥ तथा।
"रुद्राक्षं धारयेन्नित्यं भद्राक्षञ्च सुरेश्वर!।
रुद्राक्षस्य महाबाहो माहात्म्यं शृणु यत्नतः ॥
एकवक्त्रः शिवः साक्षात् ब्रह्महत्यां व्यपोहति।
अवध्यत्वं प्रतिश्रोतो वह्निस्तम्भं करोति च ॥
द्विवक्त्रे हरगौरी स्यात् गोवधाद्यघनाशकृत्।
त्रिवक्त्रोऽग्निस्त्रिजन्मोत्थपापराशिं प्रणाशयेत् ॥
तुलाराशिं यथा वह्निर्भस्मसात् कुरुते हर!।
त्रिवक्त्रोऽपि च रुद्राक्षस्तथा दहति किल्बिषम् ॥
चतुर्व्वक्त्रस्तु धाता स्यात् नरहत्यां व्यपोहति।
पञ्चवक्त्रस्तु कालाग्निरगम्याभक्ष्यपापनुत् ॥
षड्वक्त्रो यो गुहः साक्षात् गर्भहत्यां शमेदयम्।
सप्तवक्त्रो ह्यनन्तश्च स्वर्णस्तेयाघनुत् सदा ॥
विनायकोऽष्टवक्त्रः स्यात् सर्व्वारृतविनाशकृत्।
भैरवो नववक्त्रः स्यात् शिवसायुज्यदायकः ॥
दशवक्त्रः स्वयं विष्णुर्भूतप्रेतपिशाचहा।
एकादशमुखो रुद्रो नानायज्ञफलप्रदः ॥
द्वादशाक्षो भवेदर्कः सर्व्वतीर्थफलप्रदः।
त्रयोदशमुखः कामः सर्व्वकामफलप्रदः ॥
चतुर्दशाक्षः श्रीकण्ठो वंशोद्धारकरः स्मृतः।
यथोक्तस्योऽपि रुद्राक्षे तथैन्द्राक्षे प्रकीर्त्तितम् ॥
भद्राक्षेऽपि सुरश्रेष्ठ तद्गुणं परिकीर्त्तितम् ॥"

इति योगसारे २ परिच्छेदः ॥

अपि च।

"निश्छिद्राश्च सुपक्वाश्च रुद्राक्षा धारणे स्मृताः।
पञ्चास्तं पञ्चगव्यं स्नानकाले प्रयोजयेत् ॥
रुद्राक्षस्य प्रतिष्ठायां मन्त्रं पञ्चाक्षरं तथा।
त्र्यम्बकादिकमन्त्रञ्च तथा तत्र प्रयोजयेत् ॥
ॐ त्र्यम्बकं यजामहे सुगन्धिं पुष्टिवर्द्धनम्।
उर्व्वारुकमिव बन्धनान्मृत्योर्मुक्षीयमाऽमृतात् ॥
तथा ॐ ह्रीं अघोरे ह्रीं घोरे हूं घोरघोरतरे ॐ ह्रैं ह्रौं श्रीं रें सर्व्वतः सर्व्वसर्व्वेभ्यो नमस्तेऽस्तु रुद्ररूपिणे हूं हूं।
अनेनापि च मन्त्रेण रुद्राक्षस्य द्विजोत्तमः।
प्रतिष्ठां विधिवत् कुर्य्यात् ततोऽधिकफलं लभेत् ॥
ततो यथा स्वमन्त्रेण धारयेद्भक्तिसंयुतः ॥
एकादित्रिचतुर्दशवक्त्राणां संस्कारे प्रत्येकं क्रमेण मन्त्रा यथा। ॐ ॐ शृं नमः। १। ॐ ॐ नमः। २। ॐ ॐ नमः।३। ॐ ॐ ह्रीं नमः। ४। ॐ हूं नमः। ५। ॐ हूं नमः। ६। ॐ ॐ हूं हूं नमः। ७। ॐ नमः।८। हूं नमः। ९। ॐ हूं नमः। १०। ॐ ह्रीं नमः।११। ॐ ह्रीं नमः। १२। ॐ त्रां त्रौं नमः। १३। ॐ नमो नमः। १४।
"रुद्राक्षे देहसंस्थे तु कुक्कुरो म्रियते यदि।

सोऽपि रुद्रपदं याति किं पुनर्मानवा गृह ॥
सप्तविंशतिरुद्राक्षमालया देहसंख्यया ।
यः करोति नरः पुण्यं सर्व्वं कोटिगुणं भवेत् ॥
यो ददाति द्विजातिभ्यो रुद्राक्षं भुवि षण्मुख ।
तस्य प्रीतो भवेद्रुद्रः स्वयदक्ष प्रयच्छति ॥
विना मन्त्रेण यो धत्ते रुद्राक्षं भुवि मानवः ।
स याति नरकान् घोरान् यावदिन्द्राश्चतुर्दश ॥"
इति पद्मपुराणे रुद्राक्षमाहात्म्यम्। इति तन्त्रसारः ॥

रुद्राणी, स्त्री, (रुद्रस्य पत्नी। "इन्द्रवरुणभव-शर्व्वरुद्रेति।" ४ । १ । ४९ । इति ङीष् ।) दुर्गा। इत्यमरः ॥ तस्या व्युत्पत्तिर्यथा,—
"रुद्रस्येयन्तु रुद्राणी रौद्रं हन्ति करोति या ॥"
इति देवीपुराणे ३५ अध्यायः ॥
रुद्रजटा। इति राजनिर्घण्टः ॥

रुद्रावासः, पुं, (रुद्रस्य आवासः।) काशी। इति केचित् ॥

रुद्रारिः, पुं, (रुद्रः अरिर्यस्य।) कामदेवः। इति केचित् ॥

रुद्री, स्त्री, वीणाभेदः। इति शब्दरत्नावली ॥ अस्या विवरणं रुद्रवीणाशब्दे द्रष्टव्यम् ॥

रुध, इर् ध ञ औ ञि आवृतौ। इति कविकल्पद्रुमः ॥ (रुधा०-उभ०-सक०-अनिट् ।) इर्, अरुधत् अरौत्सीत्। ध ञ, रुणद्धि रुन्धे। औ, रोद्धा। ञि, रुद्धोऽस्ति। इति दुर्गादासः ॥

रुध, य ङ औ कामे। अनुपूर्ब्बोऽयम्। इति कविकल्पद्रुमः ॥ (दिवा०-आत्म०-सक०-अनिट् ।) य ङ, अनुरुध्यते धनं लोकः। औ, अनुरोद्धा। इति दुर्गादासः ॥

रुधिरं, क्ली, (रुणद्धि रुध्यते इति वा। रुध + "इषिमदिमुदीति।" उणा० १ । ५२ । इति किरच् ।) शरीरस्थरसभवधातुः। तत्पर्य्यायः। रक्तम् २ असृक् ३ लगृजम् ४ कीलालम् ५ क्षतजम् ६ प्रोथितम् ७ लोहितम् ८ असृक् ९ प्रोथम् १० लोहम् ११ चर्म्मजम् १२। इति राजनिर्घण्टः ॥ (यथा,—
"तद्विशुद्धं हि रुधिरं बलवर्णसुखायुषा।
युनक्ति प्राणिनं प्रायः प्रोथितं त्वशुचर्म्मते ॥"
"बलदोषप्रमाणाद्वा विशुद्धा रुधिरस्य वा।
रुधिरं स्रावयेत्तस्योरायुषं प्रसमीक्ष्य वा ॥"
इति चरके सूत्रस्थाने चतुर्व्विंशेऽध्याये ॥
"चतुर्व्विधं यदेतद्धि रुधिरस्य निवारणम्।
सन्धानं स्कन्दनञ्चैव पाचनं दहनन्तथा ॥
व्रणं कषायः सन्धत्ते रक्तं स्कन्दयते हिमम्।
तथा सन्धारयेद्वस्त्र दाहः सङ्कोचयेत् शिराः ॥
अस्कन्दमाने रुधिरे सन्धानानि प्रयोजयेत्।
सन्धाने सस्थमाने तु पाचनैः समुपाचरेत् ॥
क्रमैरेतैरभिद्येत प्रयतेत यथाविधि।
असिद्धिमत्सु चैतेषु दाहः परम इष्यते ॥
सप्तोपदोषे रुधिरे न व्याधिरतिवर्त्तते।
सावशेषे ततः स्थेयं न तु कुर्य्यादतिक्रमम् ॥
देहस्थं रुधिरं मूलं रुधिरेणैव धार्य्यते।
तस्मादयत्नेन संरक्ष्यं रक्तं जीव इति स्थितिः ॥"
इति सुश्रुते सूत्रस्थाने चतुर्दशोऽध्याये ॥
रुधिरस्रावेऽनध्ययनमुक्तं यथा, मनौ । ४।१२२।
"रुधिरे च स्रुते गात्राच्छस्त्रेण च परिक्षते।
सामध्वनावृग्यजुषी नाधीयीत कदाचन ॥")
कुङ्कुमम्। इत्यमरः ॥ (यथा, रघुः । ११।२०।
"राममन्मथशरेण ताडिता
दुःसहेन हृदये निशाचरी।
गन्धवद्रुधिरचन्दनोक्षिता
जीवितेशवसतिं जगाम सा ॥")

रुधिरः, पुं, (रुध + किरच् ।) मङ्गलग्रहः। इति मेदिनी ॥

रुधिराक्षं, क्ली, (रुधिरमिति आख्या यस्य ।) मणिभेदः। यथा,—
"हुतभुग्रूपमादाय दानवस्य यथेप्सितम्।
नर्म्मदायां निचिक्षेप किञ्चिद्वीनादि भूतले ॥
तत्रेन्द्रगोपकलितं शुकवक्त्रवर्णं
संस्थानतः प्रकटपीलुसमानमात्रम्।
नानाप्रकारविहितं रुधिराक्षरत्न-
मुद्भूय तस्य खलु सर्व्वं समानमेव ॥
मध्येन्द्रपाण्डरमतीवविशुद्धवर्णं
तच्चेन्द्रनीलसदृशं पटलं तुले स्यात्।
सैश्वर्य्यभृत्यजननं कथितं तदेव
पक्वञ्च तत् किल भवेत् शुरवच्चवर्णम् ॥"
इति गारुडे ७८ अध्यायः ॥

रुष, य इर् विमोहे। इति कविकल्पद्रुमः ॥ (दिवा०-पर०-सक०-सेट् ।) विमोह आकुलीकरणम्। य, रुष्यति लोकं लोकः। इर्, अरुषत् अरोषीत्। अस्मात् पुषादित्वान्नित्यं ङ इत्यन्ये। इति दुर्गादासः ॥

रुषा, स्त्री, सुग्रीवभार्य्या। विश्वप्रकाशकोषः। इति मेदिनी। षे, २७ ॥

रुष्णः, पुं, (रुष् + "चक्रिरुग्योरुच्चोपधायाः।" उणा० २।१४। इति रक् उपधायाश्च उत्वम्।) अरुणः। इति सिद्धान्तकौमुद्यामुणादिवृत्तिः ॥

रुरुः, पुं, (रौतीति। रु + "रुशातिभ्यां कुन्।" उणा० ४ । १०३ । इति कुन् ।) मृगविशेषः। इत्यमरः ॥ (यथा, महाभारते । ३ । ५० । ७ ।
"रुरून् शल्यान् गवांश्चैव मेध्यांश्चान्यान् वनेचरान्।
वाराहमथ विविधं नानामेध्यो न्यवेदयत् ॥")
अस्य मांसगुणाः। स्निग्धत्वम्। गुरुत्वम्। मन्दाग्निबलप्रदत्वञ्च। इति राजनिर्घण्टः ॥ दैत्यभेदः। इति मेदिनी। रे, ७६ ॥ (यथा, कथासरित्सागरे । ५३ । १७१ ।
"एकानंशे शिवे दुर्गे नारायणि सरस्वति।
भद्रकालि महालक्ष्मि सिद्धिरूपविदारिणि ॥"
क्रूरसत्त्वविशेषः। तस्य भारद्वाज इति नाम। इति भागवतटीकायां श्रीधरः। ५ । २६ । ११ ॥ यथा च देवीभागवते । ८ । २२ । १०—११ ।
"इह लोकेऽसुरा ये तु हिंसिता जन्तवः पुरा।
त एव रुरवो भूत्वा परत्र पीडयन्ति तम् ॥
तस्मादौरवमित्याहुः पुराणज्ञा मनीषिणः।

रुरुः सर्पादतिक्रूरो जन्तुरुक्तः पुरातनैः ॥"
खनामख्यातमुनिविशेषः। स तु श्वयनस्य पौत्रः। अयमेव निजायुषोऽर्द्धं दत्त्वा प्रियां जीवयामास। अस्य विवरणं देवीभागवते २ स्कन्धे ८ अध्याय-मारभ्य तथा महाभारते १ पर्व्वणि ५ अध्याय-मारभ्य द्रष्टव्यम् ॥)

रुरुः, पुं, (रु + कुः ।) एरण्डवृक्षः। इति रत्नमाला ॥ रक्तैरण्डः। इति राजनिर्घण्टः ॥ (एरण्डशब्दोऽस्य विषयो ज्ञातव्यः ॥)

रुरुकः, पुं, (रुरुरेव। रुरु + स्वार्थे कन्।) एरण्डवृक्षः। इति रत्नमाला ॥ रक्तैरण्डः। इति राजनिर्घण्टः ॥

रुरूकः, पुं, एरण्डवृक्षः। इति रत्नमाला ॥

रुरूकः, पुं, एरण्डवृक्षः। इत्यमरः ॥ (तस्य पर्य्यायः।
"शुक्लएरण्ड आमण्डश्चित्रो गन्धर्व्वहस्तकः।
पत्राङ्गुलो वर्द्धमानो दीर्घदण्डोऽण्डदण्डकः ॥
वातारिरत्नरण्डापि रुरूकश्च निगद्यते।
रक्तोऽपरो रुरूकः स्यादुरुरूको रुरूत्तधा ॥
व्याघ्रपुच्छश्च वातारिश्चुरुत्तानपादकः ॥"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥)

रुष्प, औ प्र हिंसे। इति कविकल्पद्रुमः ॥ (तुदा०-पर०-सक०-अनिट् ।) औ, अरुष्पत्। प्र, रुष्पति रोष्यति। इति दुर्गादासः ॥

रुष, क क्रुधि। इति कविकल्पद्रुमः ॥ (चुरा०-पर०-अक०-सेट् ।) क, रोषयति। इति दुर्गादासः ॥

रुष, ञि वधे। इति कविकल्पद्रुमः ॥ (भ्वा०-पर०-सक०-सेट् ।) ञि, रुष्टः रुषितोऽस्ति। अरोषीत्। इति दुर्गादासः ॥

रुष, य इर् ञि क्रुधि। इति कविकल्पद्रुमः ॥ (दिवा०-पर०-अक०-सेट् ।) य, रुष्यति भृत्याय भूपालः। इर्, अरुषत् अरोषीत्। अस्मात् पुषादित्वान्नित्यं ङ इत्यन्ये। ञि, रुष्टः रुषितोऽस्ति। इति दुर्गादासः ॥

रुषा, स्त्री, (रुष् + क्विप्। भागुरिमते टाप्।) अमर्षः। तत्पर्य्यायः। क्रोधः २ मन्युः ३ क्रुधा ४ क्रुत् ५ कोपः ६ प्रतिघः ७ रोषः ८ रुट् ९। इति हेमचन्द्रः। २। २१२ ॥

रुषितः, त्रि, (रुष्यति स्मेति। रुष + क्तः। "रुष्य-मत्वरसंघुषास्वनाम्।" ७। २। २८। इति पक्षे इट्।) क्रोधयुक्तः। यथा,—
"तं नागपाशैर्बलिनन्दनो बली
बद्धं स्वसैन्यं रुषितो ववन्ध ह ॥"
इति श्रीभागवते वाणयुद्धे ६२ अध्यायः ॥

रुष्टः, त्रि, (रुष्यते स्मेति। रुष + क्तः। "रुष्यमत्वर-संघुषास्वनाम्।" ७।२।२८। इति इड्भावः।) क्रोधयुक्तः। यथा,—
"शिवे रुष्टे गुरुस्त्राता गुरौ रुष्टे न कश्चन ॥"
इति तन्त्रसारः ॥

रुह, ञि ज औ जन्याम्। इति कविकल्पद्रुमः ॥ (भ्वा०-पर०-अक०-अनिट् ।) ञि, रूढोऽस्ति।

ज रोहः रुहः। औ, अरुक्षत्। जनिर्जन्म। रोहति जन्तुर्जायते इत्यर्थः। रुह जन्मनि प्रादुर्भावे इति प्राचः। जन्मप्रादुर्भावयोरेकोऽर्थः। इति गोविन्दभट्टचतुर्भुजमिश्रौ। रमानाथस्तु प्रादुर्भावः स्फूर्त्तिरिति भेदमाह। इति दुर्गादासः॥

रुहः, त्रि, (रोहतीति। रुह+"इगुपधज्ञेति। ३।१।१३५। इति कः।) जातः। आरूढः। (यथा, मनुः। १। ४८।

"बीजकाण्डरुहाणेव प्रताना वल्ल्य एवच॥")

रुहकं, क्ली, छिन्नम्। इति शब्दचन्द्रिका॥

रुहा, स्त्री, (रोहति छिन्नापि पुनरुत्पद्यते इति। रुह+कः। टाप्।) दूर्व्वा। इत्यमरः॥ (अस्याः पर्य्यायो यथा,—

"सहस्रवीर्य्या दूर्व्वा तु मङ्गल्या भार्गवी रुहा॥"

इति वैद्यकरत्नमालायाम्॥

"नीलदूर्व्वा रुहानन्ता भार्गवी शतपर्व्विका।
शत्यं सहस्रवीर्य्या च शतवल्ली च कीर्त्तिता॥"

इति भावप्रकाशस्य पूर्ब्बखण्डे प्रथमे भागे॥)
महासमङ्गा। इति राजनिर्घण्टः॥

रुहिरुहिका, स्त्री, (रुह+इन्। रुहिरुतुप्तिः। रुहिरुहिणा पुनः पुनरुक्तत्वेन कायतीति। के+कः। टाप्।) उत्कण्ठा। इति पुराणम्॥

रुक्षा, [न्] पुं, (रोहतीति। रुह+"ग्रीडक्रुशिरुहीति।" उणा० ४। ११३। इति क्सनिप्।) वृक्षः। इति सिद्धान्तकौमुद्यामुणादिवृत्तिः॥

रूक्ष, त् क पारुष्ये। इति कविकल्पद्रुमः॥ (अदन्त चुरा०-पर०-अक०-सेट्।) "दीर्घौ। तथा च।
'स पुनातु व्रजे यस्य गोरजःपातरूक्षितौ।
शिशुरुक्षित्य यमजौ निष्पिपेष तरू क्षितौ॥'

इति कौक्षकयमकम्॥

पारुष्यमस्निग्धीभावः। रूक्षयति रूक्षापयति केशः तैलाभावादिति श्लेषः।"इति दुर्गादासः॥

रूक्षं, त्रि, (रूक्षयतीति। रूक्ष पारुष्ये+पचाद्यच्।) अस्नेम। अचिक्कणम्। इत्यमरः। ३। ३। २२४॥ (यथा, महाभारते। १।१५३।६।

"ऊर्द्धाङ्गुलिः स कण्डूयन् धुन्वन् रूक्षान् शिरोरुहान्॥")

रूक्षः, पुं, वृक्षः। इति हेमचन्द्रः॥ वरकलक्षणम्॥ इति राजनिर्घण्टः॥

रूक्षगन्धकः, पुं, (रूक्षो गन्धो यस्य। कन्।) गुग्गुलुः। इति राजनिर्घण्टः॥

रूक्षणात्मिका, स्त्री, (रूक्षण आत्मा यस्याः। कन्। टापि अत इत्वम्।) लङ्काधान्यम्। इति राजनिर्घण्टः॥

रूक्षदर्भः, पुं, (रूक्षः कर्कशो दर्भः।) हरिदर्भः। इति राजनिर्घण्टः॥

रूक्षपत्रः, पुं, (रूक्षाणि पत्राणि यस्य।) शाखोटवृक्षः। इति राजनिर्घण्टः॥

रूक्षप्रियः, पुं, (रूक्षस्य प्रियः।) ऋषभौषधम्। इति राजनिर्घण्टः॥

रूक्षस्वादुफलः, पुं, (रूक्षं स्वादु च फलं यस्य।) धन्वनवृक्षः। इति राजनिर्घण्टः॥

रूक्षा, स्त्री, (रूक्षयतीति। रूक्ष+अच्+टाप्।) दन्तीवृक्षः। इति राजनिर्घण्टः॥

रूढ़, त्रि, (रुह+क्तः।) जातम्। (यथा, रघुः। ६। ४१।

"येन स्त्रियः संश्रयदोषरूढ़ं
स्वभावलोलेत्ययशः प्रमृष्टम्॥")

प्रसिद्धम्। इति मेदिनीः ढ़े, ३॥ (यथा, रघुः। २। ५३।

"क्षतात् किल त्रायत इत्युदग्रः
क्षत्रस्य शब्दो भुवनेषु रूढ़ः॥")

रूढ़ः, पुं, (रुह+क्तः।) प्रकृतिप्रत्ययार्थमनपेक्ष्य शब्दबोधजनकः शब्दः। यथा,—

"मुख्यो लाक्षणिको गौणः शब्दः स्यादौपचारिकः।
यौगिको योगरूढ़ो वा रूढ़ो वा मुख्य एव सः॥"

इति शाब्दिकाः॥ * ॥

अपि च। रूढ़ं नाम लक्षयति विभजते च।

"रूढ़ं सङ्केतवन्नाम सैव संज्ञेति कीर्त्यते।
नैमित्तिकी पारिभाषिक्यौपाधिकयपि तद्विदा॥"

यन्नाम यादृशार्थे सङ्केतितमेव न तु यौगिकमपि तद्रूढ़म्। योगरूढ़न्तु पङ्कजादिकं न तथा रूढ़ानामेव च संज्ञापदेनाभिलप्यते। न तु रूढ़ादिवत् संज्ञापि नान्योऽवान्तरभेदः। येन विभागव्याघातः स्यात्। संज्ञायाश्च त्रयो भेदाः नैमित्तिकी पारिभाषिकी औपाधिकी चेति। पाचकपाठकादयस्तु न संज्ञाः सङ्केतशून्यत्वादिति वक्ष्यते॥ ये तु रूढ़स्य नान्यच्चतुर्विधत्वमाहुस्तन्मतमुपन्यस्यति।

"जातिद्रव्यगुणस्यन्दैर्धर्म्मैः सङ्केतवत्तया।
जातिशब्दादिभेदेन चातुर्विध्यं परे जगुः॥"

गोगव्यादीनां गोत्वादिजात्या। पश्वाद्यादीनां लाङ्गुलधनादिद्रव्येण। धन्यपिशुनादीनां पुण्यहेयादिगुणेन। खलचपलादीनाञ्च शब्दानां कर्म्मणाव्यक्तिमत्त्वाच्चातुर्विध्यमेव रूढ़ानामिति। यदुक्तं दण्ड्याचार्य्यैः।

"शब्दैरेभिः प्रतीयन्ते जातिद्रव्यगुणक्रियाः।
चातुर्विध्यादमीषान्तु शब्द उक्तश्चतुर्विधः॥"इति तदेतज्जड़-मूक-मूर्खादीनामन्धमूषादीनाञ्च शब्दानामपरिग्रहापत्त्या परित्यक्तमस्माभिः॥ * ॥

नैमित्तिकसंज्ञां लक्षयति।

"जात्यवच्छिन्नसङ्केतवती नैमित्तिकी मता।
जातिमात्रे हि सङ्केतादाक्लेर्भार्यां सुदुष्करम्॥"

यन्नामजात्यवच्छिन्नसङ्केतवत् सा नैमित्तिकी संज्ञा यथा गोचैचादिः। सा हि गोत्वचैचत्वादिजात्यवच्छिन्नमेव गवादिकमभिधत्ते न तु गोत्वादिजातिमात्रम्। गोपदं गोत्वे सङ्केतितमित्याकारकयष्ट्राद्यानयनेत्यादौ गोत्वादिना गवादेरन्वयानुपपत्तेश्च एकशक्तत्वग्रहस्यान्याननुभावकत्वेऽतिप्रसङ्गात्॥ * ॥ पारिभाषिकीमौपाधिकीञ्च संज्ञां क्रमेण लक्षयति।

"उभयावृत्तिधर्म्मेण संज्ञा स्यात् पारिभाषिकी।
औपाधिकी त्वनुगतोपाधिना या प्रवर्त्तते॥"

उभयावृत्तिधर्म्मावच्छिन्नसङ्केतवती संज्ञा पारिभाषिकी। यथाकाश्यप्डित्यादिः। या चानुगतोपाध्यवच्छिन्नसङ्केतवती संज्ञा सा त्वौपाधिकी। यथा भूतदूतादिः। सा हि सचेतनवृत्तिविशेषगुणवत्त्ववार्त्ताहारकत्वाद्यनुगतोपाधिपुरस्कारेणैव प्रवर्त्तते। इति शब्दशक्तिप्रकाशिका॥

रूढ़िः, स्त्री, (रुह+क्तिन्।) जन्म। प्रादुर्भावः। (प्रसिद्धिः। यथा, राजतरङ्गिण्याम्। ४।२७१।

"रूढ़िः परम्परायाता सेयमस्मद्गृहे स्थिता॥"

आरोहणम्। यथा, तत्रैव। १। २८५।

"यात्याश्रितः किल समाश्रयणीयलभ्यां
निन्द्यां गतिं जगति सर्व्वजनार्च्चितां वा।
गच्छत्यधस्तृणगुणः श्रितकूपयन्त्रः
पुण्याश्रया सुरशिरोभुवि रूढ़िमेति॥")

रूढ़शब्दनिष्पत्तिः। यथा,—

"सञ्ज्ञात्मिका सती रूढ़िर्भवेद्योगापहारिणी।
कल्पनीया तु लभते नात्मानं योगवाधतः॥"

इति कुमारभट्टकारिका॥

रूप, तृ क तत्कृतौ। इति कविकल्पद्रुमः॥ (अदन्त चुरा०-पर०-सक०-सेट्।) तत्कृतौ रूपकरणम्। अरूरूपत् प्रतिमां शिल्पी। प्रतिमाया रूपं करोतीत्यर्थः। निपूर्व्वः स्वरूपकथने। अनुमानं निरूप्यत इत्यनुमानखण्डम्। इति दुर्गादासः॥

रूपं, क्ली, (रूप्यते कीर्त्यते रौतीति वा। रु+"खष्यञ्जिल्यञ्ज्यर्त्तिभ्यः।" उणा० ३। २८। इति पः दीर्घश्च। रूपयतीति। रूप्+अच् वा।) स्वभावः। सौन्दर्य्यम्। नामकम्। पशुः। शब्दः। अन्यार्थवृत्तिः। नाटकादिः। आकारः। (यथा, मनुः। ७। ७७।

"तदध्यास्योद्वहेद्भार्य्यां सवर्णां लक्षणान्विताम्।
कुले महति सम्भूतां हृद्यां रूपगुणान्विताम्॥")

श्लोकः। इति मेदिनीशब्दरत्नावलीभूरिप्रयोगाः॥ (स्वरूपम्। यथा, मनुः। ८। ४५।

"देशं रूपञ्च कालञ्च व्यवहारविधौ स्थितः॥")

शुक्लादिः। नामकस्थाने नाशकम्। इति नानार्थरत्नमालाविश्वहेमचन्द्राः॥ * ॥ रूपन्तु षोड़शविधम्। यथा। ह्रस्वम् १ दीर्घम् २ स्थूलम् ३ चतुरस्रम् ४ वृत्तम् ५ शुक्लम् ६ कृष्णम् ७ नीलारुणम् ८ रक्तम् ९ पीतम् १० कठिनम् ११ चिक्कणम् १२ श्लक्ष्णम् १३ पिच्छिलम् १४ मृदु १५ दारुणम् १६। इति महाभारते मोक्षधर्म्मः॥ * ॥ तस्य लक्षणं यथा,—

"अङ्गान्यभूषितान्येव केनचिद्भूषणादिना।
येन भूषितवद्भान्ति तद्रूपमिति कथ्यते॥"

इत्युज्ज्वलनीलमणिः॥

न्यायमते तत् चक्षुरिन्द्रियग्राह्यम्। द्रव्यादिप्रत्यक्षकारणम्। चक्षुः सहकारि। शुक्लादि-नेकप्रकारम्। जलादिपरमाणुरूपं नित्यम्। अन्यत्र अनित्यम्। यथा,—

"चक्षुर्ग्राह्यं भवेद्रूपं द्रव्यादेरुपलभ्यकम्।
चक्षुषः सहकारि स्याच्छुक्लादिकमनेकधा।
जलादिपरमाणौ तन्नित्यमन्यत् सहेतुकम्॥"
इति भाषापरिच्छेदः॥

उत्तरपदस्थरूपादिशब्दस्य उपमानवाचकत्वम्। यथा,—

"स्युरुत्तरपदे प्रख्यः प्रकारः प्रतिमो निभः।
भूतरूपोपमाः काण्डः सन्निभः प्रथितः परः॥"
इति हेमचन्द्रः॥

अतिशयरूपस्य दोषो यथा,—
उमोवाच।

"रूपातिशयसम्पन्ना नानागुणसमन्विताः।
किमर्थं दुःखिता जाताः कान्तसौख्यविवर्जिताः॥
ईश्वर उवाच।
दमयन्ती तथा सीता रूपातिशयपारगा।
दुःखिता तेन संजाता कान्तसौख्यविवर्जिता॥
अहल्या वन्यकी जाता कपिलस्य तु योषिता।
रूपस्य तु प्रभावेण दासी जाता तिलोत्तमा॥
तस्माद्रूपञ्च नेच्छन्ति लक्षणज्ञास्तपोधनाः।
अतिरूपेण खल्वायुः पुरुषो योषितोऽपि वा।
अथवा सौख्यहीनस्तु जायते तु महातपे॥"
इति देवीपुराणे नन्दाकुरुप्रवेशाध्यायः॥

तद्वैदिकपर्य्यायः। निर्णिक् १ वज्रिः २ वर्पः ३ वपुः ४ अमतिः ५ अघः ६ भुः ७ अग्रः ८ पिष्टम् ९ पेशः १० क्षत्रम् ११ घरः १२ अर्जुनम् १३ ताम्रम् १४ अरुषम् १५ शिल्पम् १६। इति षोड़शरूपनामानि। इति वेदनिघण्टौ ३ अध्यायः॥

रूपकं, क्ली, (रूपयतीति। रूपि+खुल्।) नाटकम्। ("तस्य रूपकसंज्ञाहेतुमाह। रूपारोपात्तु रूपकम्। रूपकस्य भेदानाह।

नाटकमथ प्रकरणं
भाणव्यायोगसमवकारडिमाः।
ईहामृगाङ्कवीथ्यः
प्रहसनमिति रूपकाणि दश॥

किञ्च।

नाटिका त्रोटकं गोष्ठी सट्टकं नाट्यरासकम्।
प्रस्थानोल्लाप्यकाव्यानि प्रेङ्खणं रासकं तथा॥
संलापकं श्रीगदितं शिल्पकञ्च विलासिका।
दुर्मल्लिका प्रकरणी हल्लीशो भाणिकेति च॥
अष्टादश प्राहुरुपरूपकाणि मनीषिणः।
विना विशेष सर्व्वेषां लक्ष्म नाटकवल्लक्षम्॥"
इति साहित्यदर्पणे ६ परिच्छेदः॥)

मूर्त्तम्। (यथा, कथासरित्सागरे। ५५। ४३।

"आदिश्यताञ्च चित्रे किमालिखामीह रूपकम्॥")

काव्यालङ्करणम्। इति मेदिनी। के, १४८॥

श्लेषस्य लक्षणं यथा,—

"रूपकं रूपितारोपात् विषये निरपह्नवे।
तत् परम्परितं साङ्गं निरङ्गमिति च त्रिधा॥
यत्र कस्यचिदारोपः परारोपणकारणम्।
तत् परम्परितं श्लिष्टाश्लिष्टशब्दनिबन्धनम्॥

प्रत्येकं केवलं मालारूपश्चेति चतुर्विधम्।
अङ्गिनो यदि साङ्गस्य रूपणं साङ्गमेव तत्॥
समस्तवस्तुविषयमेकदेशविवर्त्ति च।
आरोप्याणामभेदानां गौणत्वे प्रथमं मतम्॥
यत्र कस्यचिदार्थत्वमेकदेशविवर्त्ति तत्।
निरङ्गं केवलस्यैव रूपणं तदपि द्विधा॥
माला केवलरूपत्वात् तेनाष्टौ रूपके भिदाः॥"
इति साहित्यदर्पणे १० परिच्छेदः॥

अपि च।

"अभेदो भासते यस्मिन्नुपमानोपमेययोः।
रूपकं कथ्यते सद्भिरलङ्कारोत्तमं यथा॥
तन्वि युग्मखाम्भोजं लोलालकमधुव्रतम्।
न कस्य हरते चेतो लसद्भ्रूनकेशरम्॥
अस्यानेकप्रकारत्वं रूपकोपमयोरपि।
संक्षेपेणोक्तमस्यन्तु सुधीभिरवधीयताम्॥"
इति काव्यचन्द्रिका॥

संख्याविशेषः। यथा,—

"सङ्खाली प्रोच्यते गुञ्जा सा तिस्रो रूपकं भवेत्।
रूपकैर्दशभिः प्रोक्तः कलञ्जो नाम मानतः॥"
इति युक्तिकल्पतरुः॥

(उपमानम्। यथा, साहित्यदर्पणे १० परिच्छेदे समासोक्त्यलङ्कारे।

"यत्र तु रूप्यरूपकयोः सादृश्यमस्फुटमिति॥"
पुं, सुद्रा। यथा, कथासरित्सागरे। ७८।१३।

"अस्मै परिकरेऽप्येभिरियद्भिः स्वर्णरूपकैः।
किमेष यजसं पुण्यात्यथ कश्चन सद्व्ययम्॥"
तथाच हृहत्संहितायाम्। ८२। १२।

"गुञ्जात्रयस्य मूल्यं पञ्चाग्रद्रूपका गुणयुतस्य॥")

रूपत्वं, क्ली, (रूपस्य तत्त्वम्।) श्लीलम्। यथा,—

"स्याद्रूपं लक्षणं भावस्वात्मप्रकृतिरीतयः।
सहजो रूपतत्त्वञ्च धर्म्मस्वर्गो निसर्गवत्॥"
इति हेमचन्द्रः। ६। १२॥

रूपधारी, [न्] (रूपं धरतीति। धृ+णिनिः।) सौन्दर्य्यविशिष्टः। यथा,—

"ततो विकटरूपोऽसौ सर्व्वशास्त्रार्थपारगः।
विवाहयद्द्विजसुतां रूपेणानुपमां द्विजः॥
सावमेने च भर्त्तारं सुशीलमपि भाविनी।
विरूपमिति मत्वाना ततः सोऽभूत् सुदुःखितः॥
ततो निर्व्वेदसंयुक्तो गत्वाश्रमपदं महत्।
हरावत्यास्तटे श्रीमान् रूपधारिणमासदत्॥
तमाराध्य जगन्नाथं यज्ञचक्रपुरुषेण हि।
सुरूपतामवाप्याग्र्यां तस्मिन्नेव च जन्मनि॥"
इति वामनपुराणे ७६ अध्यायः॥

रूपनाशनः, पुं, (रूपस्य नाशनं अदर्शनं यत्र।) पेचकः। इति शब्दरत्नावली॥

रूपवान्, [त्] त्रि, (रूपमस्यास्तीति। रूप+"रसादिभ्यश्च।" ५। २। ९५। इति मतुप्। मस्य वः।) आकारविशिष्टः। (यथा, भागवते। २। ५। २७।

"वायोरपि विकुर्व्वाणात् कालकर्म्मस्वभावतः।
उदपद्यत वै तेजो रूपवत् स्पर्शशब्दवत्॥")

सौन्दर्य्ययुक्तः। (यथा, महाभारते। ३। ४५। १२।

"सत्यवाक् पूजितो वक्ता रूपवाननहङ्कृतः॥")

रूपाजीवा, स्त्री, (रूपेण सौन्दर्य्येण आजीवतीति। आ+जीव्+अच्। टाप्।) वेश्या। इत्यमरः। २। ६। १६॥ (यथा, रामायणे। २। ३६। ३।

"रूपाजीवाश्च वादिन्यो वणिजश्च महाधनाः।
शोभयन्तु कुमारस्य वाहिनीः सुप्रसारिताः॥")

रूपाक्षः, पुं, (रूपमेव अक्षं यस्य।) कामदेवः। इति त्रिकाण्डशेषः॥

रूपिका, स्त्री, (रूपमस्या अस्तीति। रूप+ठन्।) श्वेतार्कवृक्षः। इति रत्नमाला॥ (यथा, सुश्रुते। ५। ६।

"पललं तिलतैलञ्च रूपिकायाः पयो गुडः॥")

रूपेश्वरी, स्त्री, (रूपाणामीश्वरी।) देवीविशेषः। सा तु प्रभवादिषष्टिवर्षान्तर्गतैकविंशवर्षे पूज्या। यथा,—

"रूपेश्वरी प्रकर्त्तव्या वृषयुग्मव्यवस्थिता।
जटामुकुटभारेन्दुचिञ्चूलोरगभूषणा॥
मणिमौक्तिकशोभाढ्या सितचन्दनचर्चिता।
पूजिता कुसुमैर्हृद्यैः सर्व्वकामफलप्रदा॥"
इति देवीपुराणे संवत्सरदेवतार्विंशतिविधिः प्रथमः॥

रूप्यं, क्ली, (आहतं रूपं अस्यास्तीति। रूप+"रूपादाहतप्रशंसयोर्यप्।" ५।२।१२०। इति यप्।) आहतस्वर्णरजतम्। इत्यमरः। २। ९। ९१॥ हेम रूप्यञ्च आहतं अश्ववराहपुरुषादिरूपमुत्पाद्यितुं निर्घातिकया ताड़ितं रूप्यमुच्यते रूपाय आहतं रूप्यं ठ्ये कादिति ण्यः। इति भरतः॥ * ॥ धातुविशेषः। रूपा इति भाषा॥ (यथा, महाभारते। ५। ३६। ७६।

"सुवर्णस्य मलं रूप्यं रूप्यस्यापि मलं त्रपु।
त्रैयं त्रपु मलं सीसं सीसस्यापि मलं मलम्॥")

तत्पर्य्यायः। शुभ्रम् २ वसुश्रेष्ठम् ३ रुधिरम् ४ चन्द्रलोहकम् ५ श्वेतकम् ६ महाशुभ्रम् ७ रजतम् ८ वप्ररूपकम् ९ चन्द्रभूति १० सितम् ११ तारम् १२ कलधौतम् १३ इन्द्रलोहकम् १४ शौल्यम् १५ धौतम् १६ सौधम् १७ चन्द्रहासम् १८। इति राजनिर्घण्टः॥ खर्ज्जूरम् १९ दुर्व्वर्णम् २० श्वेतम् २१ रङ्गबीजम् २२ राजरङ्गम् २३ सौदराजकम् २४। इति शब्दरत्नावली॥ कलधौतम् २५। इति जटाधरः॥ अस्य गुणाः। स्निग्धत्वम्। कषायत्वम्। अम्लत्वम्। विपाके मधुरत्वम्। सरत्वम्। वातपित्तहरत्वम्। रूक्षत्वम्। वलीपलितनाशित्वञ्च। इति राजनिर्घण्टः॥ * ॥ अथ रूप्यस्योत्पत्तिनामलक्षणगुणाः।

"त्रिपुरस्य वधार्थाय निर्निमेषैर्त्रिलोकनैः।
निरीक्षयामास शिवः क्रोधेन परिपूरितः॥
ततस्तूष्णा समपतत्तस्यैकस्यादिलोकनात।

अतो रुद्रः समभवद्वह्नेश्चानर इव ज्वलन् ॥
द्वितीयादपतन्नेत्राद्भ्रुविन्दुस्तु वामकात् ।
तस्माद्रजतसुत्पन्नमुक्तकर्म्मसु योजयेत् ॥
कृत्रिमञ्च भवेत्तद्धि रङ्गादिरसयोगतः ।
रूप्यन्तु रजतं तारं चन्द्रकान्ति सितं शुभम् ॥
गुरु स्निग्धं मृदु श्वेतं दाहच्छेदघनक्षयम् ।
स्वर्णाद्यं चन्द्रवत् स्वच्छं रूप्यं नवगुणं शुभम् ॥
कठिनं कृत्रिमं रूक्षं रक्तं पीतं दलं लघु ।
दाहच्छेदघनैर्नष्टं रूप्यं दुष्टं प्रकीर्त्तितम् ॥
रूप्यं शीतं कषायाम्लं स्वादुपाकरसं सरम् ।
वयसः स्थापनं स्निग्धं लेखनं वातपित्तजित् ॥
प्रमेहादिकरोगांश्च नाशयत्यचिरात् ध्रुवम् ।
तारं शरीरस्य करोति तापं
विध्वंसनं यच्छति शुक्रनाशम् ।
वीर्य्यं बलं हन्ति तनोश्च पुष्टिं
महागदान् पोषयति ह्यशुद्धम् ॥"

अथ मारणाय योग्यं रूप्यमाह ।

"गुरु स्निग्धं मृदु श्वेतं दाहच्छेदघनक्षयम् ।
वर्णाढ्यं चन्द्रवत् स्वच्छं तारे नवगुणं स्मृतम् ॥"

अथायोग्यम् ।

"कठिनं कृत्रिमं रूक्षं रक्तं पीतं दलं लघु ।
दाहच्छेदघनैर्नष्टं रूप्यं दुष्टं प्रकीर्त्तितम् ॥"

अथ शोधनविधिः ।

"पत्तलीकृतपत्राणि तारस्याग्नौ प्रतापयेत् ।
निषिञ्चेत् तप्ततप्तानि तैले तक्रे च काञ्जिके ॥
गोमूत्रे च कुलत्थानां कषाये च त्रिधा त्रिधा ।
एवं रजतपत्राणां विशुद्धिः संप्रजायते ॥"

अथाशुद्धस्य रूप्यस्य दोषमाह ।

"रूप्यं ह्यशुद्धन्तु करोति तापं
विध्वंसनं वीर्य्यबलक्षयञ्च ।
देहस्य पुष्टिं हरते तनोति
रोगांस्ततः शोधनमस्य कुर्य्यात् ॥"

अथ रूप्यस्य मारणविधिः ।

"भागैकं तालकं मर्द्यं याममम्लेन केनचित् ।
तेन भागत्रयं तारपत्राणि परिलेपयेत् ॥
धृत्वा मृषापुटे रुद्ध्वा पुटेत् चिंशद्गवोपलैः ।
सप्तवृत्त्या पुनस्तालं दत्त्वा रुद्ध्वा पुनः पचेत् ।
एवं चतुर्दशपुटैस्तारं भस्म प्रजायते ॥"

अन्यप्रकारः ।

"स्नुहीक्षीरेण संपिष्टं माक्षिकं तेन लेपयेत् ।
तालकस्य प्रकारेण तारपत्राणि बुद्धिमान् ।
पुटे चतुर्दशपुटैस्तारं भस्म प्रजायते ॥"

एवं मारितस्य रूप्यस्य गुणाः ।

"रूप्यं शीतं कषायाम्लं स्वादुपाकरसं सरम् ।
वयसः स्थापनं स्निग्धं लेखनं वातपित्तजित् ॥
प्रमेहादिकरोगांश्च नाशयत्यचिरात् ध्रुवम् ॥"

इति भावप्रकाशः ॥

अथ रूप्यकरणम् ।

"मध्वाज्यं गुडताम्रञ्च करेणा माक्षिकं रसम् ।
धमनाच्च भवेद्रौप्यं सुवर्णकरणं ह्यणु ॥"

इति गारुड़े १८८ अध्यायः ॥

रूप्यं, त्रि, (प्रशस्तं रूपं अस्यास्तीति । रूप+"रूपादाहृतप्रशंसयोर्यप् ।" ५ । २ । १२० । इति यप् ।) सुन्दरम् । इति मेदिनी । ये, ५० ॥ (क्ली, उपमेयम् । यथा, साहित्यदर्पणे १० परिच्छेदे समासोक्त्यलङ्कारे ।
"तच्च हि तिमिरांशुकयोरूप्यरूपकभावी द्वयोरावरकत्वेन स्फुटमिति ॥"* ॥ पुं, प्रत्ययविशेषः । स च तत आगत इत्यस्मिन्विषये "हेतुमनुष्येभ्योऽन्यतरस्यां रूप्यः ।" ४ । ३ । ८१ । इति सूत्रेण हेतुभ्यो मनुष्येभ्यश्चान्यतरस्यां भवति ॥ यथा समादागतं समरूप्यम् । देवदत्तरूप्यम् ॥)

रूप्याध्यक्षः, पुं, (रूप्यस्य रूप्ये वा अध्यक्षः ।) नैष्किकः । इत्यमरः ॥ रूप्यं रजतं तदेव निष्कं पूर्ब्ववत् स्वार्थिकः रजताध्यक्षो नैष्किकः । टक्कपतिर्नैष्किक इत्यन्ये । पुरुषाश्वादिरूपं गठितं रजतं रूप्यं तस्याध्यक्षो नैष्किक इति केचित् । इति भरतः ॥

रूषकः, पुं, (रूषयतीति । रूष+ण्वुल् ।) वासकः । इति जटाधरः ॥

रूषितं, त्रि, (रूष+क्तः ।) गुण्ठितम् । इत्यमरः ॥ हे धूलिगुण्ठकेनेव म्लानिते । गुढ़ि क वेष्टे रूष तु क स्याद्विस्फुरणे क्तः । इति भरतः ॥ (यथा, रामायणे । २ । ४२ । १५ ।
"यः सुखेनोपधानेषु शेते चन्दनरूषितः ।
वीज्यमानो महार्हाभिः स्त्रीभिर्मम सुतोत्तमः ॥")

रे, व्य, सम्बोधनविशेषः । यथा,—
"सम्बोधनेऽङ्ग भोः पाट् प्याट् हे हे हं हो रेरे रेऽपि च ।"
इति हेमचन्द्रः । ६ । १७३ ॥
(यथा, कथासरित्सागरे । ३२ । १५५ ।
"तच्च मन्दमिवालोक्य साभिप्रायः समं नृपः ।
पप्रच्छ रे किमीदृक् त्वं सङ्गातः कथयेति ;")

रेक, ऋ ङ शङ्कायाम् । इति कविकल्पद्रुमः । (भ्वा०-आत्म०-सक०-सेट् ।) शङ्का संशयारोपः । ऋ, अरिरेकत् । ङ, रेकते पुरुषत्वं स्थाणौ । स्थाणुर्वा पुरुषो वेति संशयमारोपयतीत्यर्थः । रिरेके । इति दुर्गादासः ॥

रेकः, पुं, (रेक शङ्कायाम् अथवा रिच्+घञ् ।) शङ्का । नीचः । विरेचनम् । इति मेदिनी । के, ३१ ॥ (यथा,—
"वस्तिर्वातविकारान् पैत्तान् रेकः कफोद्भवान् वमनम् ।
श्रौद्रं जयति बलासं सर्पिः पित्तं समीरणं तैलम् ॥"
इति वाभटे उत्तरस्थाने ४० अध्याये ॥)
भेकः । इति त्रिकाण्डशेषः ॥

रेकणः, [स्] क्ली, (रिणक्तीति । रिच्+"रिचेर्धने धित् किच्च ।" उणा० ४ । १६८ । इति असुन् । धात् प्रत्ययस्य नुट् । धित्वात् कुत्वम् ।) स्वर्णम् । इति सिद्धान्तकौमुद्यामुणादिवृत्तिः ॥

रेका, स्त्री, (रेक शङ्कायाम्+अच् । स्त्रियां टाप् ।) सन्देहः । इति हेमचन्द्रः ॥

रेखा, स्त्री, (लिख्यते इति । लिख विलेखने+"घिद्भिदादिभ्योऽङ् ।" ३ । ३ । १०४ । इति भिदादित्वात् अङ् । टाप् । रलयोरैक्यात् तस्य रत्वम् ।) अणकम् । छद्म । आभोगः । उल्लेखः । इति विश्वः ॥ उल्लेखस्तु दण्डाकारलिपिविशेषः । दाँड़ी इति कची इति च भाषा । यथा,—
"यावती यावती रेखा गृहाणामष्टवर्गके ।
तावतीं द्विगुणीकृत्य अष्टाभिः परिशोधयेत् ॥
अष्टोपरि भवेद्रेखा अष्टाभ्यन्तरबिन्दवः ।
यत्र रेखा न बिन्दुश्च तत् समं परिकीर्त्तितम् ॥"
इति ज्योतिस्तत्त्वम् ॥ * ॥

शरीरस्थरेखया शुभाशुभलक्षणं यथा,—
"ललाटे यस्य दृश्यन्ते तिस्रो रेखाः समा हिताः ।
सुखी पुत्रसमायुक्तः स षष्टिं जीवते नरः ॥
चत्वारिंशच्च वर्षाणि द्विरेखादर्शनान्नरः ।
विंशत्यब्दमेकरेख आकर्णान्ताः शतायुषः ॥
आकर्णान्तरिता रेखास्तिस्रश्च स्युः शतायुषः ।
समत्वा मूर्द्धि रेखा तु षष्ट्यायुस्तिसृभिर्भवेत् ॥
यत्तायत्ताभी रेखाभिर्विंशत्यब्दायुरेव हि ।
चत्वारिंशच्च वर्षाणि हीनरेखस्तु जीवति ॥
भिन्नाभिश्चैव रेखाभिरपमृत्युर्नरस्य हि ॥
त्रिशूलं पट्टिशं वापि ललाटे यस्य दृश्यते ।
धनपुत्रसमायुक्तः स जीवेत् शरदः शतम् ॥
तर्जन्या मध्यमाङ्गुल्या आयूरेखा तु मध्यतः ।
सम्प्राप्ता या भवेद्यत्र स जीवेत् शरदः शतम् ॥
कुलरेखा तु प्रथमा अङ्गुष्ठादनुवर्त्तते ।
मध्यमायाः करे रेखा आयूरेखा अतः परम् ॥
कनिष्ठिकां समाश्रित्य आयूरेखां समादिशेत् ।
अच्छिन्ना वाविभक्ता वा स जीवेच्छरदः शतम् ॥
यस्य पाणितले रेखा आयुक्तस्य प्रकाशयेत् ।
शतं वर्षाणि जीवेच्च भोगी राज्ञ ! न संशयः ॥
कनिष्ठिकां समाश्रित्य मध्यमायासुपागता ।
षष्टिं वर्षायुषं कुर्य्यात् आयूरेखा तु मानवम् ॥"
इति गारुड़े ६३ अध्यायः ॥ * ॥

अपिच ।
"धनाङ्गुलिश्च सधनस्तिस्रो रेखाश्च यस्य वै ।
नृपतेः करतलगा मणिबन्धे समुत्थिता ॥
युगमीनाङ्कितकरो भवेत् सत्यप्रदो नरः ।
वज्राकारश्च धनिनां मत्स्यपुच्छनिभो बुधे ॥

रेखाभू

प्रच्छातपत्रशिविकागजपद्मोपमा नृपे ।
कुम्भाङ्कुशध्वजपताकाभा भृङ्गालाभा निरीश्वरे ॥
दामाभाश्च गजाष्टानां स्वस्तिकाभा नृपेश्वरे ।
चक्राभितोमरधनुःकुन्ताभा नृपतेः करे ॥
उदूखलाभा यज्ञाष्टे वेदीभाश्चाग्निहोत्रिणि ।
वापीदेवकुलाभाश्च त्रिकोणाभाश्च धार्म्मिके ॥
अङ्गुष्ठमूलगा रेखाः पुत्राः सूच्याश्च कारिकाः ।
प्रदेशिनीगता रेखा कनिष्ठान्तलगामिनी ॥
प्रतायुषश्च कुरुते छिन्नया तरुणो भयम् ।
निःस्वाश्च बहुरेखाः स्युर्निर्द्रव्याश्चिबुके क्षते ॥"
इति गारुडे ६६ अध्यायः ॥

रेखागणितः, पुं, (रेखाया गणितं प्रमाणस्वरूपादि यत्र ।) श्रीजयसिंहमहाराजपण्डितद्विजसम्राड्जगन्नाथकृतगणितग्रन्थविशेषः । तस्य संक्षिप्तविवरणम् । यथा,—
"येनेष्टं वाजपेयाद्यैर्म्महादानानि षोड्श ।
दत्तानि द्विजवर्य्येभ्यो गोग्रामगजवाजिनः ॥
तस्य श्रीजयसिंहस्य तुष्टैः रचयति स्फुटम् ।
द्विजः सम्राड् जगन्नाथो रेखागणितसुत्तमम् ॥
अपूर्व्वं विहितं ग्राह्यं यत्र कोणावबोधनात् ।
क्षेत्रेषु जायते सम्यक् व्युत्पत्तिर्गणिते तथा ॥
ग्रिक्पद्धत्याक्षमिदं प्रोक्तं ब्रह्मणा विश्वकर्म्मणे ।
पारम्पर्य्यवशादेतदागतं धरणीतले ॥
तदुच्छिन्नं महाराजजयसिंहाज्ञया पुनः ।
प्रकाशितं मया सम्यक् गणकानन्दहेतवे ॥"*॥
अथ रेखागणिता । अत्र ग्रन्थे पञ्चदशाध्यायाः सन्ति । अष्टसप्तोत्तरचतुःशतम् शकलानि सन्ति । तत्र प्रथमाध्याये अष्टचत्वारिंशच्छकलानि । तत्रादौ परिभाषा । यः पदार्थः दर्शनयोग्यः विभागार्हः स बिन्दुर्वाच्यः । यः पदार्थः दीर्घः विस्काररहितः विभागार्हः स रेखाशब्दवाच्यः । विस्तारदैर्घ्ययोर्यद्विद्यते तद्धरातलं तदेव क्षेत्रम् । तद्विविधं एकं जलवत् समं द्वितीयं विषमम् । अथ रेखापि द्विविधा । एका वक्रा अन्या सरला । अथ सरलरेखालक्षणम् । यस्यां व्यक्ता बिन्दवः अवलोकिताः सन्ति एकबिन्दुनाच्छाद्यन्ते सा सरला अन्यथा कुटिला । धरातलमपि समं विषमञ्च ज्ञेयम् । समं य आदर्शोति । यत् रेखाद्वयं समं समानान्तरं न भवति तस्य यस्मिन् प्रदेशे बहिरन्तरं भवति तद्विशिष्टवर्द्धितयो रेखयोरन्तरमुत्तरोत्तरं अधिकमेव भवति यत्राल्पमन्तरं भवति तद्विशिष्टवर्द्धितयो रेखयोरन्तरमुत्तरोत्तरमल्पमेव भवति यावद्रेखासंयोगं तदनन्तरमन्तरं वर्द्धिष्णु भवति । यत्र कोणशब्दः तत्र सरलरेखाकृत एव कोणो ज्ञेयः । यत्र रेखाशब्दः तत्र सरलैव रेखा ज्ञेया । यत्र भूमितलशब्दः तत्र जलसमीकृतमेव भूतलं ज्ञेयम् । इति रेखागणितस्य परिभाषा ॥

रेखाभूमिः, स्त्री, (रेखास्थिता भूमिः ।) लङ्कासुमेरुपर्व्वतयोर्म्मध्यसूत्रगतदेशः । यथा,—

रेचकः

"यल्लङ्कोज्जयिनीपुरोपरिकुरुक्षेत्रादिदेशान् स्पृशन्
सूत्रं मेरुगतं बुधैर्निगदिता सा मध्यरेखा भुवः ।
आदौ प्रागुदयोऽपरत्र विषये पश्चाद्धि रेखोदयात्
स्यात्तस्मात् क्रियते तदन्तरभुवं खेटैर्घृणं खं फलम् ॥"
इति सिद्धान्तशिरोमणिः ॥ * ॥

अन्यच्च । रेखोक्ता सूर्य्यसिद्धान्ते । यथा रेखामधिकृत्य ।
"राक्षसालयदेवौकः शैलयोर्म्मध्यसूत्रगाः ।
रौहितकमवन्ती च तथा सन्निहितं सरः ॥"
अस्यार्थः । लङ्कासुमेरुपर्व्वतयोर्म्मध्यसूत्रगा देशा रेखासंज्ञिताः । तान् देशानाह । रौहितकदेशोऽवन्तीदेशः सन्निहितं सरः कुरुक्षेत्रस्थितम् । रेखायाः पूर्व्वदेशे परदेशे च यथासंख्यं सूर्य्योदयकालात् परकालं पूर्व्वकालञ्च वारप्रवृत्तिः स्यादित्यर्थः । एतेनेतदुक्तं भवति रेखासंज्ञकदेशस्थलोका यदा सूर्य्यं पश्यन्ति तदैव पूर्व्वदेशे वारप्रवृत्तिरित्यर्थः । तत्र रेखा पूर्व्वस्याः सन्निहितत्वादादौ सूर्य्यं पश्यन्ति तदनन्तरञ्च रेखास्याः । अतो रेखापूर्व्वे सूर्य्योदयात् परं वारः । तथा रेखास्थैः सूर्य्ये दृष्टे सति पश्चात् रेखापरस्थाः पश्यन्ति अतो रेखापरदेशे सूर्य्योदयात् पूर्व्वं वार इत्यर्थः । तत्र कालपरिमाणमाह । रेखातो यावन्ति देशान्तरयोजनानि ततसम्मिताभिर्विघटीभिः पलैः पादहीनाभिः चतुर्थभागहीनाभिर्व्वारप्रवृत्तिः स्यादित्यर्थः । देशान्तरसाधनप्रकारस्तु सूर्य्यसिद्धान्ते उक्तः । अत्र तु संक्षेपेण किञ्चित् कथ्यते । गौड़े पञ्चदशाधिकशततयोजनानि ११५ । दक्षिणराढ़े गङ्गातीरे दशाधिकशतम् ११० । भैरवीतीरे विंशत्यधिकशतम् १२० । वङ्गे सुवर्णग्रामादौ चत्वारिंशदधिकशतम् १४० । वाराणस्यामशीत्युत्तरशतम् १०८ देशान्तरम् । एवमन्यत्राप्यूह्यम् । तच्चतत्तु लोकसंग्रहीतमिति किन्तु सूर्य्यसिद्धान्ते अर्द्धरात्रादेव वारप्रवृत्तिरुक्ता । यथा,—
"वारप्रवृत्तिः प्राग्देशे चपार्द्धेत्यधिके भवेत् ।
तद्देशान्तरनाड़ीभिः पश्चादूने विनिर्दिशेत् ॥"
इति दीपिकाटीकायामर्थकौमुद्यां गोविन्दानन्दः ॥

रेचकं, क्ली, (रेचयतीति । रिच् + णिच् + ण्वुल् ।) कङ्कुष्टन्तिका । इति राजनिर्घण्टः ॥ (भेदके, त्रि ॥)

रेचकः, पुं, (रेचयतीति । रिच् + णिच् + ण्वुल् ।) यवक्षारः । इति त्रिकाण्डशेषः ॥ जयपालवृक्षः । इति राजनिर्घण्टः ॥ क्रीड़ार्थजलनिःक्षेपयन्त्रम् । पिचकारी इति भाषा । यथा,
"सिच्यमानोऽच्युतस्तासां भिन्नहृद्भिः स रेचकैः ।

रेणुः

प्रतिषिञ्चन् विचिक्रीड़े यक्षीभिर्यक्षराड़िव ॥"
इति श्रीभागवते । १० । ६०। ६ ॥
(ध्मातनासिकया प्राणायामाङ्गसुच्यमानवायुः । यथा, भागवते । ३ । २८ । ६ ।
"प्राणस्य शोधयेन्मार्गं पूरकुम्भकरेचकैः ॥"
अस्यान्यद्विवरणं प्राणायामशब्दे द्रष्टव्यम् ॥)

रेच्यः, पुं, ध्मातनासिकया प्राणायामाङ्गसुच्यमानवायुः । यथा,—
"पूरकः कुम्भको रेच्यः प्राणायामस्त्रिलक्षणः ।
नासिकाकृष्ट उच्छ्वासो धातुः पूरक उच्यते ।
कुम्भको निश्चलश्वासो सुच्यमानस्तु रेचकः ॥"
इत्याह्निकाचारतत्त्वम् ॥
भेदके, त्रि ॥

रेचनं, (रिच् + ल्युट् ।) मलभेदनम् । तत्पर्य्यायः । प्रस्कन्दनम् २ विरेकः ३ विरेचनम् ४ । इति रत्नमाला ॥ रेकः ५ रेचना ६ । इति शब्दरत्नावली ॥ (यथा, सुश्रुते । १ । ३ ।
"रसज्ञानं वमनार्थमध्यायो रेचनाय च ॥"
रेचनद्रव्याणि तु सुश्रुते । १ । ४४ । अध्यायतो ज्ञेयानि ॥)

रेचनकः, पुं, (रेचयतीति । रिच् + णिच् + ल्युः । ततः स्वार्थे कन् ।) कम्पिल्लकः । इति राजनिर्घण्टः ॥

रेचना, स्त्री, (रिच् + णिच् + युच् । टाप् ।) कम्पिल्लः । इति शब्दरत्नावली ॥

रेचनी, स्त्री, (रिच्यतेऽनयेति । रिच् + ल्युट् + ङीप्) कम्पिल्लः । इति शब्दरत्नावली ॥ कालाञ्जनी । दन्तीवृक्षः । इति राजनिर्घण्टः ॥ श्वेतचिरटता । इति मेदिनी ॥ (अस्याः पर्य्यायो यथा,—
"श्वेता चिरटिका भद्री स्यात् चिरटता चिरुटापि च ।
सर्व्वानुभूतिः सरला निर्ग्रोचा रेचनीति च ॥"
इति भावप्रकाशे पूर्व्वखण्डे प्रथमे भागे ॥
वटपत्री । तत्पर्य्यायो यथा,—
"वटपत्री तु कथिता मोहिनी रेचनी बुधैः ॥"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥)

रेची, स्त्री, (रेचयतीति । रिच् + णिच् + अच् । गौरादित्वात् ङीष् ।) कम्पिल्लकः । अङ्कोटः । इति राजनिर्घण्टः ॥

रेज, ऋ ङ दीप्तौ । इति कविकल्पद्रुमः ॥ (भ्वा०-आत्म०-अक०-सेट् ।) ऋ, अरिरेजत् । ङ, रेजते रिरेजे । इति दुर्गादासः ॥

रेट, ऋ ञ याचे । वाचि । इति कविकल्पद्रुमः ॥ (भ्वा०-उभ०-द्विक०-सेट् ।) ऋ, अरिरेटत् । ञ, रेटति रेटते । याचो याचनम् । इति दुर्गादासः ॥

रेणुः, पुं स्त्री, (रिणातीति । री गतिरेषणयोः + "अजिवृरीभ्यो निच ।" उणा० ३ । ३८ । इति णुः ।) धूलिः । इत्यमरः ॥ (यथाह कश्चित् ।
"मानुषीकरणरेणुरक्षि ते
प्रादयोरिति कथा प्रथीयसी ।

त्राणधामि तव पादपङ्कजं
नाथ ! दारुदृषदोस्तु का भिदा ॥")

रेणुः, पुं, (री + णुः ।) पर्पटः । रेणुका । पांशुः । इति राजनिर्घण्टः ॥ (यथा, रघुः । ६ । २३ ।
"दिनकराभिमुखा रणरेणवो
रुरुधिरे रुधिरेण सुरद्विषाम् ॥"
विड्जः । तत्पर्य्यायो यथा,—
"जन्तुघ्नं भस्मकं रेणुः क्रिमिघ्नं चित्रतण्डुलम् ।
क्रिमिघ्नुः विड्जश्च गर्दभं लघ्वं केवलम् ॥"
इति वैद्यकरत्नमालायाम् ॥)

रेणुका, स्त्री, (रेणुना कायतीति । कै + कः । टाप् ।) मरिचाकृतिसुगन्धिद्रव्यविशेषः । तत्पर्य्यायः । द्विजा २ हरेणुः ३ कौन्ती ४ कपिला ५ भस्मगन्धिनी ६ । इत्यमरः ॥ कान्ता ७ नन्दिनी ८ महिला ९ राजपुत्री १० हिमा ११ रेणुः १२ पाण्डुपुत्री १३ हरेणुका १४ सुपर्णी १५ घ्रिण्टिका १६ घ्राणा १७ दृप्ता १८ क्वचित् पुस्तके दृप्ता इति च पाठः । धर्म्मिणी १९ कपिलोमा २० हैमवती २१ पाण्डुपत्नी २२ । अस्या गुणाः । कटुत्वम् । प्रीतत्वम् । खर्ज्जूकण्डूति-व्रण-दाह-विषनाशित्वम् । सुखवैभस्यकारित्वञ्च । इति राजनिर्घण्टः ॥ अपि च ।
अथ रेणुका मरीचसदृशी ।
"रेणुका राजपुत्री च नन्दिनी कपिला द्विजा ।
भस्मगन्धा पाण्डुपुत्री स्मृता कौन्ती हरेणुका ॥
रेणुका कटुका पाके तिक्तानुष्णा कटुर्लघुः ।
पित्तला दीपनी मेध्या पाचनी गर्भपातिनी ।
वसास-वात-वैकार्य-लट्-कण्डू-विष-दाह-नुत् ॥"
इति भावप्रकाशः ॥

अन्यच्च ।
"रेणुका कफवातघ्नी दीपनी पित्तला लघुः ।"
इति राजवल्लभः ॥ * ॥
("हरेणू रेणुका कौन्ती ब्राह्मणी हैमगन्धिनी ॥"
इति वैद्यकरत्नमालाम् ॥)

परशुरामभाता । तद्विवरणं यथा,—
मार्कण्डेय उवाच ।
"अथ काले व्यतीते तु जमदग्निर्महातपाः ।
विदर्भराजस्य सुतां प्रयत्नेन जितां स्वयम् ॥
भार्य्यार्थे प्रतिजग्राह रेणुकां लक्षणान्विताम् ।
सा तस्मात् सुषुवे पुत्रान् चतुरो वेदसम्मतान् ॥
रुक्मवन्तं सुषेणञ्च वसुं विश्वावसुं तथा ।
पश्चात्तस्यां स्वयं जज्ञे भगवान् मधुसूदनः ॥
कार्त्तवीर्य्यवधार्थाय ब्रह्माद्यैः सकलैः सुरैः ।
याचितः प्रथमः सोऽभूत्तेषां रामाह्वयस्तु यः ॥
भारावतारणार्थाय जातः परशुना सह ।
सहजः परशुस्तस्य तं जहाति कदापि न ॥
अयं निजपितामह्याश्चरुभुक्तिविपर्य्ययात् ।
ब्राह्मणः क्षत्रियाचारो रामोऽभूत् क्रूरकर्म्मकृत् ॥
स वेदानखिलान् ज्ञात्वा धनुर्व्वेदांश्च सर्व्वतः ।
स्वतातात् कृतकृत्योऽभूदेदविद्याविशारदः ॥
एकदा तस्य जननी स्नानार्थं रेणुका गता ।
गङ्गातोये तथापश्यन्नाम्ना चित्ररथं नृपम् ॥
भार्य्याभिः सहितं जलक्रीड़ारतं शुभम् ।
सुमालिनं सुकान्तञ्च तरुणं चन्द्रसन्निभम् ॥
तथाविधं नृपं दृष्ट्वा संजातमदना भृशम् ।
रेणुका स्पृहयाभास तस्मै राज्ञे च मैथुनम् ॥
स्पृहायुतायास्तस्यास्तु संक्लेदः समजायत ।
विचेतना तथा क्लिन्ना चस्रां सा स्वाश्रमं ययौ ॥
अबोधि जमदग्निस्तां रेणुकां विकृतां तथा ।
धिक् धिक् पापरतेत्येवं निनिन्द च समन्ततः ॥
ततः स्वतनयान् प्राह चतुरः प्रथमं मुनिः ।
रुक्मवत्प्रमुखान् सर्व्वान् एकैकं क्रमतो रुषा ॥
छिन्ध्वेनां पापनिरतां रेणुकां व्यभिचारिणीम् ।
ते तद्वचो नैव चक्रुर्मूढास्तस्थुः जड़ा इव ॥
कुपितो जमदग्निस्तान् शशापेति विचेतनान् ।
भवध्वं यूयं नचिरात् जड़ा गोवद्विगर्हिताः ॥
अथाजगाम चरमो जामदग्न्योऽतिवीर्य्यवान् ।
तञ्च रामं पिता प्राह पापिष्ठां छिन्धि मातरम् ॥
स भ्रातॄंश्च तथाभूतान् दृष्ट्वा ज्ञानविवर्ज्जितान् ।
पित्रा शप्तान् महातेजाः परशुं परशुना-
च्छिनत् ॥
रामेण रेणुकां छिन्नां दृष्ट्वा चाक्रोधनोऽभवत् ।
जमदग्निः प्रसन्नः सन्निति रामञ्जवाच ह ॥
प्रीतोऽस्मि पुत्र भद्रं ते यत्त्वया मदचः कृतम् ।
तस्मादिष्टवरान् कामान् त्वं वै वरय साम्प्रतम् ॥
स तु रामो वरान् वव्रे मातुरुत्थानमादितः ।
वधस्यास्मरणं तस्या भ्रातॄणां शापमोचनम् ॥
मातृहत्यापनयं युद्धे सर्व्वत्र वै जयम् ।
आयुः कल्पान्तपर्य्यन्तं क्रमादेह नृपसत्तम ! ॥
सर्व्वान् वरान् स प्रददौ जमदग्निर्महातपाः ।
सुप्तोत्थितेव जननी रेणुकाप्यभवत्तदा ॥
वधं न चापि सस्मार सहजप्रकृतिं तथा ।
युद्धे जयं चिरायुष्ट्वं लेभे रामस्तदैव हि ॥
मातृहत्यापनोदाय पिता तं वाक्यमब्रवीत् ।
न पुत्र-वरदानेन मातृहत्यापगच्छति ॥
तस्मात्तं ब्रह्मकुण्डाय गच्छ स्नातुञ्च तज्जले ।
तत्र स्नात्वा मुक्तपापो नचिरात् पुनरेष्यसि ।
जगद्धिताय पुत्र त्वं ब्रह्मकुण्डं व्रज द्रुतम् ॥
स तस्य वचनं श्रुत्वा रामः परशुधृक् तदा ।
उपदेशात् पितुर्यातो ब्रह्मकुण्डं दृषोदकम् ॥
तत्र स्नानं स विधिवत्कृत्वा धौतपरश्वधः ।
शरीरान्निःसृतां सम्यक् मातृहत्यां व्यलोकयत् ॥
जातसंप्रत्ययः सोऽथ तीर्थमासाद्य तं वरम् ।
वीथिं परशुना कृत्वा ब्रह्मपुत्रमवाहयत् ॥
ब्रह्मकुण्डात् सुतः सोऽथ कासारे लोहिताक्षये ।
कैलासोपत्यकायास्तु व्यपतद्ब्रह्मणः सुतः ॥
तस्मादपि सरस्तीरं समुत्थाय महाबलः ।
कुठारेण दिशं पूर्व्वामनयद्ब्रह्मणः सुतम् ॥
ततोऽपरत्रापि गिरिं हैमशृङ्गं विभिद्य च ।
कामरूपान्तरं पीठमवाहयदसुं हरिः ॥
तस्य नाम विधिश्चक्रे स्वयं लोहितगङ्गकम् ।
लौहित्यात् सरसो जातो लौहित्याख्यस्ततो-
ऽभवत् ॥
स कामरूपमखिलं पीठमाप्लाव्य वारिणा ।
गोपयन् सर्व्वतीर्थानि दक्षिणं याति सागरम् ॥
प्रागेव दिव्ययमुनां संत्यक्ता ब्रह्मणः सुतः ।
पुनः पतति लौहित्ये गत्वा द्वादशयोजनम् ॥
चैत्रे मासि सिताष्टम्यां यो नरो नियतेन्द्रियः ।
स्नाति लौहित्यतोयेषु स याति ब्रह्मणः पदम् ॥
चैत्रन्तु सकलं मासं शुचिः प्रयतमानसः ।
लौहित्यतोये यः स्नाति स कैवल्यमवाप्नुयात् ॥
इति ते कथितं राजन् यदर्थं मातरं पुरा ।
हन्ति धीरो जामदग्न्यो यस्माद्वा क्रूरकर्म्मकृत् ॥
इदन्तु महदाख्यानं यः पठेति दिने दिने ।
स दीर्घायुः प्रसूदिसो धनवानभिजायते ॥"
इति कालिकापुराणे ८५ अध्यायः ॥

रेणुकासुतः, पुं, (रेणुकायाः सुतः ।) परशुरामः । इति हेमचन्द्रः । ३ । ५१२ ॥ (यथा, महाभारते । ३ । ६६ । ४३ ।
"आर्चीकनन्दनो रामो भार्गवो रेणुकासुतः ॥")

रेणुरुषितः, पुं, (रेणुना रुषितः ।) गर्दभः । इति त्रिकाण्डशेषः ॥ धूलिव्याप्तिते, त्रि ॥

रेणुवासः, पुं, (रेणौ परागे वासो यस्य ।) भ्रमरः । इति त्रिकाण्डशेषः ॥

रेणुसारः, पुं, (रेणुरेव सारो यस्य ।) कर्पूरः । इति त्रिकाण्डशेषः ॥ (गुणादयोऽस्य कर्पूरशब्दे-विज्ञेयाः ॥)

रेणुसारकः, पुं, (रेणुसार एव । स्वार्थे कन् ।) कर्पूरः । इति शब्दरत्नावली ॥

रेतः, [स्] क्ली, (रीयते क्षरतीति । री यत असुन् रुगागमश्च + "सुरीभ्यां तुट् च ।" उणा० ४ । २०१ । इति असुन् तस्य तुट् च ।) शुक्रम् । (यथा,—
"स्त्रीणां रजोमयं रेतो बीजाढ्यमिन्द्रियं नरे ।
तस्मात् संयोगतः पुत्रो जायते गर्भसम्भवः ।
प्रथमेऽहनि रेतश्च संयोगात् कलनञ्च यत् ॥"
इति हारीते शारीरस्थाने प्रथमेऽध्याये ॥
"मातापित्रोर्बीजदोषादशुभैस्त्वाहृतात्मनः ।
गर्भस्यस्य यदा दोषाः प्राप्य रेतोवहाः शिराः ॥
प्रक्षोभयन्त्यशु तन्नाशायैतच्चाप्युपद्रवति ।
तत्र सम्पूर्णसर्व्वाङ्गः स भवत्यपुमान् पुमान् ।
इति त्वसाध्या व्याख्याताः सन्निपातसमुच्छ्रयात् ॥"
इति चरके चिकित्सास्थाने त्रिंशेऽध्याये ॥)

अप्सु रेतःपातनिषेधो यथा,—
"न वामहस्तेनोद्धृत्य पिबेद्वक्त्रेण वा जलम् ।
नोत्तरेदुपस्पृश्य नाप्सु रेतः समुत्सृजेत् ॥"
इति कौर्म्मे उपविभागे १५ अध्यायः ॥

पारदम् । इति मेदिनी । से, ३३ ॥
(जलम् । इति निघण्टुः । १ । १२ ॥ "वृष्टि-लक्षणानां अपां देवानां रेतस्त्वादेव उच्यते । तथाचोपनिषत् । देवानां रेतो वर्षमिति ।" इति तट्टीकायां देवराजयज्वा ॥ यथा, ऋग्वेदे ६ । ७० । २ ।
"अग्ने रेतः शिशतं यन्नृभिर्जनम् ॥")

रेतजा, स्त्री, (रेतसिव जायते इति। जन्+ड:। टाप्। सर्व्वे सान्ता अदन्ताश्च इति न्यायात् अत्राकारान्तरेतशब्दः।) बालुका। इति भावप्रकाशः॥

रेतनं, क्ली, शुक्रम्। इति शब्दचन्द्रिका॥

रेत्यं, क्ली, पित्तलम्। इत्यमरटिकायां नीलकण्ठः॥

रेत्रं, क्ली, (रीयते क्षरतीति। री+बाहुलकात् त्रः।) रेतः। पीयूषम्। पटवासः। स्रुतकम्। इति मेदिनी॥

रेप, ङ ऋ शब्दे। गमने। इति कविकल्पद्रुमः॥ (भ्वा०-आत्म०-शब्दे अक०-गमने सक०-सेट्।) ङ, रेपते रिरेपे। ऋ, अरिरेपत्। इति दुर्गादासः॥

रेपः, त्रि, (रेप्यते निन्द्यते इति। रेप+घञ्।) निन्दितः। क्रूरः। क्षपणः। इति मेदिनी। पे, १०॥

रेफः, पुं, (रिफ्यते इति। रिफ+घञ्। यद्वा, "रादिफन्।" इत्यनेन वर्णस्वरूपार्थे रशब्दादिफन्प्रत्ययः। तथाच "रेफ इत्यौणादिकः।" इति क्रतुसु ५ पादे दुर्गः।) रवर्णः। (यथा,—

"परैर्गतो यः शिरसापि धार्य्यते
समागते सद्मनि याति नम्रताम्।
गुणैः परेषां द्विगुणत्वमीहते।
रेफेण तुल्या प्रकृतिर्महात्मनाम्॥"

इत्युद्भटः॥)

रागः। इति शब्दरत्नावली॥ (शब्दः। यथा, भागवते। ८। २०। २५।

"श्रियश्च वक्षस्यरविन्दहस्तां
कण्ठे च सामानि समस्तरेफान्॥")

रेफः, त्रि, (रिफ+"अवद्यावमाधमार्वरेफाः कुत्सिते।" उणा० ५। ५४। इति अप्रत्ययेन निपातितः।) कुत्सितः। इत्यमरः॥

रेफाः, [स्] त्रि, (रिफतीति। रिफ्+असुन्।) क्रूरः। अधमः। दुष्टः। क्षपणः। इति शब्दरत्नावली॥

रेभ, ङ ऋ शब्दे। इति कविकल्पद्रुमः॥ (भ्वा०-आत्म०-अक०-सेट्।) ङ, रेभते रिरेभे। ऋ, अरिरेभत्। इति दुर्गादासः॥

रेभणं, क्ली, (रेभ शब्दे+भावे ल्युट्।) गर्व्वा ध्वनिः। इति त्रिकाण्डशेषः॥

रेरिहाणः, पुं, शिवः। असुरः। इति मेदिनी। णे, १०६॥ चौरः। इति शब्दरत्नावली॥

रेव, ऋ ङ प्लुतौ गतौ। इति कविकल्पद्रुमः॥ (भ्वा०-आत्म०-अक०-सेट्।) प्लुतिः प्लवेन गमनम्। ऋ, अरिरेवत्। ङ, रेवते कपिः उत्प्लुत्य गच्छतीत्यर्थः। इति दुर्गादासः॥

रेवटं, क्ली, दन्तिगावर्त्तशब्दम्। इत्यजयपालः॥

रेवटः, पुं, (रवते इति। रेव+बाहुलकात् अटच्।) शूकरः। वेणुः। वातुलः। विषवैद्यः। इत्यजयपालः॥

रेवतः, पुं, जम्बीरः। इति जटाधरः॥ (यथा, सुश्रुते। ४। ५।

"पित्तप्रबले द्राक्षारेवतकट्फलपयस्यामधुक-चन्दनकाश्मर्य्यकषायं शर्करामधुमधुरं पाययेत्॥") आरग्वधवृक्षः। इति शब्दरत्नावली॥ राजविशेषः। स तु रेवतीपिता। बलरामश्वशुरश्च। इति महाभारतम्॥ (अयं हि आनर्त्तपुत्रः शर्य्यातिपौत्रः। स खलु स्वपुत्र्या रेवत्या वरं प्रष्टुकामस्तया सह ब्रह्मलोकं गतवान् आत्मनश्च ब्रह्मणा बलदेवाय कन्यां दत्तवान्। एतद्विवरणं देवीभागवते ७ स्कन्धे ७। ८ अध्यायतो द्रष्टव्यम्॥)

रेवतकं, क्ली, (रेवत इव कायतीति। के+कः।) पारेवतम्। इति राजनिर्घण्टः॥

रेवतिः, स्त्री, कामदेवपत्नी। इति त्रिकाण्डशेषः॥

रेवती, स्त्री, (रेवतस्यापत्यं स्त्री। रेवत+अण्। न वृद्धिः। ङीष्।) बलदेवपत्नी। नक्षत्रभेदः। मालतीभेदः। इति मेदिनी॥ स्त्रीगवी। इत्यजयपालः॥ दुर्गा। यथा,—

"रेवा तु नर्म्मदा देवी नदी वा रेवती मता।
अतिखण्डनवन्ध्या वा लोके देवी प्रकीर्त्तिता॥"

इति देवीपुराणे ४५ अध्यायः॥ *॥

रेवतीनक्षत्रन्तु अश्विन्यादिसप्तविंशतिनक्षत्रान्तर्गतशेषनक्षत्रम्। तस्य रूपं मत्स्याकृति द्वात्रिंशत्तारात्मकम्। तस्याधिष्ठातृदेवता पूषाख्यः सूर्य्यः। यथा,—

"दन्तसंख्यभवने भसाकृता-
वन्तभे लसदनन्तमध्यगे।
कोमलाङ्गि मिथुनोदयात् प्रिये
कालखानलकलाः प्रियेऽचलन्॥"

इति कालिदासकृतराशिलग्ननिरूपणम्॥*॥

तच्च जातफलं यथा,—

"चारुशीलविभवो जितेन्द्रियः
सत्कुलः स्वभवनैकमानसः।
मानवो ननु भवेन्महीपतौ
रेवती भवति यस्य जन्मभम्॥"

इति कोष्ठीप्रदीपः॥ *॥

बालग्रहविशेषः। तच्चिकित्सा यथा,—

"अश्वगन्धालशृङ्गी च शारिवाथ पुनर्नवा।
सहा विदारी श्वेतासां क्वाथेन परिषेचनम्॥"

अजशृङ्गी मेढ़ाशृङ्गी। सहा सेवतीपुष्पजाति:।

"तैलमभ्यङ्गने कार्य्यं कुष्ठे सर्जरसे तथा।
पलङ्कषायां नलदे तथा गौरकदम्बके॥"

सर्जरसः राल:। पलङ्कषा गुग्गुलुः। नलदं लामज्जकमुशीरवत् पीतच्छवि। गौरकदम्बको हारिद्रकः। हरिद्रया कदम्ब इति लोके।

"ध्वाङ्क्षकर्णककुभशृङ्गकीर्तिकेषु च।
काकोलादौ गणे चापि सिद्धं सर्पिः पिबेच्छिशुः॥"

ध्वाङ्क्षकर्णः सोंदु इति लोके।

"कुलत्थाः शृङ्गवेरञ्च प्रदेहः साधुगन्धिकः।
गृध्रोलूककपोतारिण यवान् यवफलो घृतम्।
सन्ध्ययोरुभयोः कार्य्यमेतदुद्भूपनं शिशोः॥"

यवफलो वंशाङ्कुरः।

"युक्ताः सुमनसो लाजाः पयः शाल्योदनं दधि।
बलिर्निवेद्यो गोतीर्थे रेवत्यै प्रयतात्मना॥"

गोतीर्थं गोष्ठे।

"स्नानं धात्रीकुमाराभ्यां सङ्गमे कारयेद्भिषक्॥
नानाशस्त्रधरा देवी चित्रमाल्यानुलेपना।
चलत्कुण्डलिनी श्यामा रेवती ते प्रसीदतु॥
उपासते यां सततं देवो विविधभूषणाः।
लम्बा कराला विनता तथैव बहुपुत्रिका।
रेवती शुष्कनासा च तुभ्यं देवी प्रसीदतु॥"

इति भावप्रकाशः॥ *॥

बलदेवपत्न्या विवरणं यथा,—

"रेवस्य रेवतः पुत्रः ककुद्मान्नाम धार्म्मिकः।
श्रेष्ठः पुत्रशतस्यासीत्तस्यां पुर्य्यां नृपोऽभवत्॥
स कन्यासहितः प्रायाद्रैवतो ब्रह्मणोऽन्तिकम्॥
न जरा क्षुत् पिपासा वा न मृत्युस्तत्र कर्हिचित्।
क्षणचक्रञ्च भवति ब्रह्मलोके द्विजोत्तमाः॥
रैवतस्य गतस्याथ सा पुरी राक्षसैर्हृता।
तस्य पुत्रशतं यच्च त्यक्ता तामगमद्दिशः॥
तस्य वंशे तु ये तत्र स्थिताता इति विश्रुताः।
क्षत्रिया ह्यभवन् विप्रा दिक्षु सर्व्वासु धार्म्मिकाः॥
गते बहुयुगे काले आजगामाथ रैवतः।
सङ्कर्षणमेकं मत्वासौ ददर्श यादवेश्वरम्॥
कृतां द्वारवतीं नाम बहुद्वारां मनोरमाम्।
भोजवृष्ण्यन्धकैर्गुप्तां वासुदेवपुरोगमैः॥
गत्वा तु रैवतः सम्यग्बलभद्राय रेवतीम्।
प्रादाद्गुरुतरां तान्तु बलदेवो हलेन वै।
समानां लघुतां नीत्वा उवाह स प्रहर्षतः॥
दत्त्वा जगाम शिखरं मेरोस्तपसि रैवतः।
रेमे रामोऽपि धर्म्मात्मा रेवत्या सहितः सुखी॥"

इति वह्निपुराणम्॥*॥

(ब्रह्मणो वाक्येनैव इयं रेवतेन बलदेवाय प्रदत्ता। एतद्विवरणन्तु देवीभागवते ७ स्कन्धे ८ अध्याये द्रष्टव्यम्॥) रैवतमनुभ्राता। तद्विवरणं यथा,—

मार्कण्डेय उवाच।

"पञ्चमोऽपि मनुर्ज्ञेयो रैवतो नाम विश्रुतः।
तस्योत्पत्तिं विस्तरञ्च शृणुष्व कथयामि ते॥
ऋषिराजीवसुतो भागवश्चवनोऽभिधः विश्रुतः।
तस्यापुत्रस्य पुत्रोऽभूत् रैवतश्चेति महात्मनः॥
स तस्य विधिवच्चक्रे जातकर्म्मादिकाः क्रियाः।
तथोपनयनादींश्च स चाग्नीनोऽभवन्मुने॥
यतः प्रभृति जातोऽसौ ततः प्रभृति सोऽभवत्।
दीर्घरोगपरामर्शमवाप मुनिपुङ्गवः॥
माता चास्य परामार्त्तिं कुष्ठरोगादिपीड़िता।
जगाम स पिता चास्य चिन्तयामास दुःखितः॥
किमेतदिति सोऽप्यस्य पुत्रोऽत्यन्तसुदुर्म्मतिः।
जग्राह भार्य्यामन्यस्य मुनिपुत्रस्य मन्दधीः॥
ततो विषण्णो मनसा ऋतवागिदमुक्तवान्।
अपुत्रता मनुष्याणां श्रेयसे न कुपुत्रता॥

कुपुत्रो हृदयायासं सर्व्वदा कुरुते पितुः ।
मातुश्च खर्गसंस्थांश्च खपितॄन् पातयत्यधः ॥
सुहृदां नोपकाराय पितॄणां नापि तृप्तये ।
पित्रोर्दुःखाय धिक् जन्म तस्य दुष्कृतकर्म्मणः ॥
धन्यास्ते तनया येषां सर्व्वलोकाभिसम्मताः ।
परोपकारिणः प्राज्ञाः साधुकर्म्मण्यनुव्रताः ॥
अनिर्वृत्तं तथा मूर्खं परलोकपराङ्मुखम् ।
नरकाय न सङ्गृह्णे कुपुत्रालम्बि यज्जनः ॥
करोति सुहृदां दैन्यमहितानां तथा सदम् ।
अकाले च जरां पित्रोः कुपुत्रः कुरुते हि वै ॥

मार्कण्डेय उवाच ।

एवं सोऽत्यन्तदुष्टस्य पुत्रस्य चरितैर्मुनिः ।
दह्यमानमनोवृत्तिर्गर्गमप्रच्छत ॥

ऋषिरुवाच ।

सुव्रतेन पुरा वेदा गृहीता विधिवन्मया ।
समाप्य वेदान् विधिवत् कृतो दारपरिग्रहः ॥
सदारेण यथा कार्य्याः श्रौताः स्मार्त्ताश्च तथा क्रियाः ।
नानून्नाः कृताः काश्चिद्यावदद्य महामुने ॥
गर्भाधानविधानेन न काममनुरुध्यता ।
पुत्रार्थं जनितश्चायं पुत्राग्नौ विधृता सुने ॥
सोऽयं किमात्मदोषेण मम दोषेण वा सुने ।
अस्मादृदुःखवहो जातो दौःशील्याद्दुरनुशोकदः ॥

गर्ग उवाच ।

रेवत्यन्ते मुनिश्रेष्ठ जातोऽयं तनयस्तव ।
तेन दुःखाय ते काले दुष्टे यस्मादजायत ॥
न तेऽपचारो नैवास्य मातुर्नापि कुलस्य ते ।
तस्य दौःशील्यहेतुत्वं रेवत्यन्तमुपागतम् ॥

ऋतवागुवाच ।

यस्माच्चमेकपुत्रस्य रेवत्यन्तमसङ्गवम् ।
दौःशील्यमेतत् सा तस्मात् पतताभाशु रेवती ॥

मार्कण्डेय उवाच ।

तेनैव चाङ्कते प्राप्ते रेवत्यन्तं पपात ह ।
पश्यतः सर्व्वलोकस्य विस्मयाविष्टचेतसः ॥
रेवत्यन्तच्च पतितं कुसुदाद्रौ समन्ततः ।
भासयामास सहसा वनकन्दरनिर्झरान् ॥
कुसुदाद्रिश्च तत्पातात् ख्यातो रेवतकोऽभवत् ।
अतीवरम्यः सर्व्वस्यां पृथिव्यां पृथिवीधरः ॥
तस्यर्क्षस्य तु या कान्तिर्जाता पङ्कजिनीश्वरः ।
ततो जज्ञे तदा कन्या रूपेणातीव शोभना ॥
रेवतीकान्तिसंभूतां तां दृष्ट्वा प्रसुचो मुनिः ।
तस्या नाम चकारेत्थं रेवतीति हि भागुरे ॥
पोषयामास चैवैनां स्वाश्रमाभ्याससम्भवाम् ।
प्रसुचः स महाभागस्तस्मिन्नेव महाचले ॥
तान्तु यौवनिनीं दृष्ट्वा कन्यकां रूपशालिनीम् ।
स मुनिश्चिन्तयामास कोऽस्या भर्त्ता भवेदिति ॥
एवं चिन्तयतः कालो जगाम सुमहात्मनः ।
न चाससाद सदृशं वरं तस्या महामुनिः ॥
ततस्तस्या वरं प्रष्टुमग्निं स प्रसुचो मुनिः ।
विवेश वह्निशालां वै पृष्टस्तं प्राह हव्यभुक् ॥
महाबलो महावीर्यः प्रियवाक् धर्म्मवत्सलः ।
दुर्दमो नाम भविता भर्त्ता तस्या महीपतिः ॥

मार्कण्डेय उवाच ।

अनन्तरञ्च मृगयाप्रसङ्गेनागतो सुने ।
तस्याश्रमपदं धीमान् दुर्दमः स नराधिपः ॥
प्रियव्रतान्वयभवो महाबलपराक्रमः ।
पुत्रो विक्रमशीलस्य कान्दिनीजठरोद्भवः ॥
स प्रविश्याश्रमपदं तां तन्वीं जगतीपतिः ।
अपश्यमानस्तन्दृष्टिं प्रियेत्यामन्त्र्य पृष्टवान् ॥

राजोवाच ।

क्व गतो भगवानस्मादाश्रमाच्चुनिपुङ्गवः ।
तं प्रणन्तुमिहेच्छामि तत्त्वं ब्रूहि शोभने ॥

मार्कण्डेय उवाच ।

अग्निशालां गतो विप्रस्तच्छ्रुत्वा तस्य भाषितम् ।
प्रियेत्यामन्त्रणञ्चैव निश्चक्राम त्वरान्वितः ॥
स ददर्श महात्मानं राजानं दुर्दमं मुनिः ।
नरेन्द्रचिह्नसहितं प्रश्रयावनतं पुरः ॥
तस्मिन् दृष्टे ततः प्रिष्यमुवाच स तु गोतमम् ।
गोतमानीयतां शीघ्रमर्घोऽस्य जगतां पतेः ॥
एष तावदयं भूपश्चिरकालादुपागतः ।
जामाता च विशेषेण योग्योऽर्घोऽस्य मतं मम ॥

मार्कण्डेय उवाच ।

ततः स चिन्तयामास राजा जामात्कारणम् ।
विवेद न च तन्मौनी जग्रहेऽर्घञ्च तं नृपः ॥
तमासनगतं विप्रं गृहीतार्घं महामुनिः ।
प्रहृतं प्राह राजेन्द्रमपि ते कुशलं पुरे ॥
कोषे बले ऽथ मित्रेषु भृत्यामात्येषु चेश्वर ।
तथात्मनि महाबाहो यच्च सर्व्वं प्रतिष्ठितम् ॥
पत्नी च ते कुशलिनी यत एवाच्च तिष्ठति ।
पृच्छाम्यस्यास्ततो नाहं कुशलिन्योऽपरास्तव ॥

राजोवाच ।

त्वत्प्रसादादकुशलं न क्वचिन्मुनिसत्तम ।
जातकौतूहलश्चास्मि मम भार्य्याच का सुने ॥

ऋषिरुवाच ।

रेवती तु महाभागा त्रैलोक्ये सापि सुन्दरी ।
तव भार्य्या वरारोहा मानवेन्द्र न वेत्सि किम् ॥

राजोवाच ।

सुभद्रां शान्ततनयां कावेरीतनयां विभो ।
शूरात्मजां सुजाताच्च कस्माच्च वरूथजाम् ॥
विपाठां नन्दिनीञ्चैव वेद्मि भार्य्या गृहे हि याः ।
तिष्ठन्ति मे न भगवन् रेवतीं वेद्मि का त्वियम् ॥

ऋषिरुवाच ।

प्रियेति साम्प्रतं येयं त्वयोक्ता वरवर्णिनी ।
किं विस्मृतं ते भूपाल श्राध्येयं गृहिणी तव ॥

राजोवाच ।

सत्यमुक्तं मया किन्तु भावो दुष्टो न मे मने ।
नाच कोपं भवान् कर्त्तुमर्हत्यस्मास्व याचतः ॥

ऋषिरुवाच ।

सत्यं ब्रवीषि भूपाल न भावस्तव दूषितः ।
आजहार भवानेवं वह्निना नृप नोदितः ॥
मया पृष्टो हुतवहः कोऽस्या भर्त्तेति पार्थिव ।
भविता तेन चाप्युक्तो भवानेवाद्य चागतः ॥
तदृष्टत्वात् मया दत्ता कन्या तुभ्यं नराधिप ।
प्रियेत्यामन्त्रिता चेयं विचारं कुरुषे कथम् ॥

श्रीमार्कण्डेय उवाच ।

ततश्च सोऽभवन्मौनी तेनोक्तः पृथिवीपतिः ।
ऋषिस्तथोद्यतः कर्त्तुं तस्या वैवाहिकं विधिम् ॥
समुद्यतञ्च पितरं विवाहाय महामुने ।
उवाच कन्या सा किञ्चित् प्रश्रयावनताननाः ॥
यदि मे प्रीतिमांस्तात प्रसादं कर्त्तुमिच्छसि ।
रेवतृक्षे विवाहं मे तत् करोतु प्रसादितः ॥

ऋषिरुवाच ।

रेवतृक्षं न वै भद्रे चन्द्रयोगे दिवि स्थितम् ।
अन्यानि सन्ति ऋक्षाणि सुभु वैवाहिकानि ते ॥

कन्योवाच ।

तात तेन विना कालो विफलः प्रतिभाति मे ।
विवाहो विफले काले महिधायाः कथं भवेत् ॥

ऋषिरुवाच ।

ऋतवागिति विख्यातस्तपस्वी रेवतीं प्रति ।
चकार कोपं क्रोधेन तेनर्क्षं तन्निपातितम् ॥
मया चास्मै प्रतिज्ञाता भार्य्येति मदिरेक्षणे ।
न चेच्छसि विवाहं त्वं संकटं नः समागतम् ॥

कन्योवाच ।

ऋतवाक् स मुनिस्तात किं मे कस्तम्भवांस्तपः ।
न त्वया समता तेन ब्रह्मबन्धोः सुतास्मि किम् ॥

ऋषिरुवाच ।

ब्रह्मबन्धोः सुता न त्वं बाले नैवातपस्विनः ।
सुता त्वं मम यो देवान् कर्त्तुमन्यान् ससृत्सहे ॥

कन्योवाच ।

तपस्वी यदि मे तातस्तत् किन्त्वमिदं दिवि ।
समारोप्य विवाहो मे नाचर्यं क्रियते पितः ॥

ऋषिरुवाच ।

एवं भवतु भद्रं ते भद्रे प्रीतिमती भव ।
आरोपयामीन्दुमार्गे रेवतृक्षं तवाधुना ॥

श्रीमार्कण्डेय उवाच ।

ततस्तपःप्रभावेन रेवतृक्षं महामुनिः ।
यथापूर्व्वं तथा चक्रे सोमयोगे द्विजोत्तम ॥
विवाहश्चैव दुहितुर्विधिवन्मन्त्रयोगजम् ।
निष्पाद्य प्रीतिमान् भूयो जामातरमथाब्रवीत् ॥

ऋषिरुवाच ।

औद्वाहिकं ते भूपाल कथयतां किं ददाम्यहम् ।
दुर्लभ्यमपि दास्यामि ममाप्रतिहतं तपः ॥

राजोवाच ।

मनोः स्वायम्भुवस्याहमुत्पन्नः सन्ततौ सुने ।
मन्वन्तराधिपं पुत्रं त्वत्प्रसादादृतोऽन्यहम् ॥

मुनिरुवाच ।

भविष्यत्येष ते कामो मनुस्तनयो महान् ।
सकलां भोक्ष्यते भूमिं धर्म्मेणैव भविष्यति ॥

श्रीमार्कण्डेय उवाच ।

तामादाय ततो भूपस्तदैव नगरं ययौ ।
तस्यां जज्ञाथ सुतो रेवत्यां रैवतो मनुः ॥
समेतः सकलैर्धर्म्मैर्मानवैरपराजितः ।
विज्ञाताखिलशास्त्रार्थो वेदविद्यार्थशास्त्रवित् ॥"
इति मार्कण्डेयपुराणे रैवतमन्वन्तरं समाप्तम् ॥

रैवन्तः

(गौः । इति निघण्टुटीकायां देवराजयज्वा । १ । १० । १६ ॥)

रैवतीभवः, पुं, (रेवत्यां भव उत्पत्तिर्यस्य ।) शनैश्चरः । इति हेमचन्द्रः । २ । ३४ ॥ (रैवतमनुः । इति मार्कण्डेयपुराणम् ॥)

रैवतीरमणः, पुं, (रेवत्या रमणः पतिः ।) बलदेवः । इत्यमरः । १ । १ । २४ ॥

रैवतीशः, पुं, (रेवत्या ईशः ।) बलरामः । इति हेमचन्द्रः । २ । १३८ ॥

रैवन्तः, पुं, सूर्य्यपुत्रविशेषः । स च गुह्यकाधिपतिः । तस्योत्पत्तिर्यथा,—

"ततोऽसौ योगमास्थाय स्वां भार्य्यां वड़वां रविः । ददर्श नियमस्थान्तामश्वरूपमधाकरोत् ॥
मैथुनायोपचक्राम सूर्य्योऽसौ च त्वरान्वितः । नेच्छन्ती तेन संयोगं परपुंसोऽभिशङ्कया ॥
संग्रहात् संमुखी तेजो मुखनासिकया रवेः । देवौ यतः प्रजायेतामश्विनौ भिषजां वरौ ।
नासत्यौ द्वौ स्तुतौयश्च रैवन्तोऽश्वप्रवाहकः ॥"

इति वह्निपुराणम् ॥

अपि च ।

"ततोऽश्वरूपधृक् भानुरुत्तरानगमत् कुरून् । ददर्शे तत्र संज्ञान्तु वड़वारूपधारिणीम् ॥
सा च दृष्ट्वा तमायान्तं परपुंसोऽभिशङ्कया । जगाम संमुखं तस्य पृष्ठरक्षणतत्परा ॥
ततश्च नासिकायोगे तयोस्तत्र समेतयोः । नासत्यदस्रौ तनयावश्ववक्त्राद्विनिर्गतौ ॥
रेतसोऽन्ते च रैवन्तः खड्गी धन्वी तनुत्रधृक् । अश्वारूढः समुत्पन्नो बाणतूणसमन्वितः ॥
ततः स्वं रूपममलं दर्शयामास भानुमान् । तस्मै सा च समालोक्य स्वरूपं मुदमाददे ॥
स्वरूपधारिणीत्वेमामानिनाय निजाश्रमम् । संज्ञां भार्य्यां प्रीतिमतीं भास्करो वारितस्करः ॥
ततः पूर्ब्बसुतो योऽस्याः सोऽभूदैवस्वतो मनुः । द्वितीयश्च यमः प्रापाङ्गमेदस्थिरभूत् सुतः ॥
कृमयो मांसमादाय पादतस्ते महीतलम् । प्रतिपद्यन्तीति प्रापान्तं तस्य चक्रे पिता स्वयम् ॥
धर्म्मेष्टश्चियंतश्चासौ समो मित्रे तथाहिते । ततो नियोगं तं याम्ये चकार तिमिरापहः ॥
यमुना च नदी जज्ञे कलिन्दान्तरवाहिनी । अश्विनौ देवभिषजौ कृतौ पित्रा महात्मना ।
गुह्यकाधिपतित्वे च रैवन्तो विनियोजितः ॥"

इति मार्कण्डेयपुराणे वैवस्वतमन्वन्तरे ॥ * ॥

सप्तदिनकर्त्तव्यनीराजनविधौ रैवन्तस्य राजकर्त्तृकपूजाविधिर्यथा,—

"सप्तमे हि तु रैवन्तं पूजयेत्तोरणान्तरे । सूर्य्यपुत्रं महाबाहुं द्विभुजं कवचोज्ज्वलम् ॥
ज्वलन्तं शुक्लवस्त्रेण केशान् वितत्य वाससा । कक्षां वामकरे बिभ्रद्दक्षिणे तु करे पुनः ।
खड्गं न्यस्य महातीक्ष्णं सितसैन्यवसंस्थितम् ॥ एवंविधन्तु रैवन्तं प्रतिमायां घटेऽपि वा ।
सूर्य्यपूजाविधानेन पूजयेत्तोरणान्तरे ॥"

इति कालिकापुराणे नीराजनविधिः ८६ अध्यायः ॥ * ॥ कोजागरपूर्णिमारात्रौ द्वारोपान्ते तस्य पूजाविधिर्यथा,—

"द्वारोपान्ते सुदीप्तस्तु संपूज्यो हव्यवाहनः । यवाचततृतोपेतैस्तण्डुलैश्च सुतर्पितः ॥
संपूजितश्च पूर्णेन्दुः पयसा पायसेन च । स्कन्दः सभार्य्यो रुद्रश्च तथा नन्दीश्वरो मुनिः ॥
गोमद्भिः सुरभिः पूज्या छागवद्भिर्हुताशनः । उरभ्रवद्भिर्वरुणो गजवद्भिर्विनायकः ।
पूज्यः साश्वैश्च रैवन्तो यथाविभवविस्तरैः ॥"

इति तिथ्यादितत्त्वम् ॥

(रैवन्तदर्शनेन लक्ष्मीं प्रति नारायणस्य प्रापवृत्तान्तं देवीभागवते ६ स्कन्धे १७ अध्याये द्रष्टव्यम् ॥)

रैवन्तमनुः, स्त्री, (रैवन्तं मनुञ्च सूते इति । सू + क्विप् ।) संज्ञा । इति चिकाण्डशेषः ॥

रेवा, स्त्री, (रेवते उत्प्लुत्य गच्छतीति । रेव + अच् । टाप् ।) नर्म्मदा नदी । इत्यमरः । १ । १० । ३२ ॥ (यथा, मेघदूते । २० ।

"रेवां द्रक्ष्यस्युपलविषमे विन्ध्यपादे विशीर्णाम् ॥")

अस्याः शिवलिङ्गोत्पत्तिर्यथा,—

"रेवया च कृतं पूर्ब्बं तपः शिवसुतुष्टिदम् । मम त्वत्सदृशः पुत्रो भूयादिति विधो तथा ॥
अहं कस्यापि न सुतः किं करिष्यामि चिन्तयन् ।
रेवायास्तु वरो देयस्त्वयं मृगलाञ्छन ॥
निश्चित्यैवं तदा प्रोक्तं प्रसन्नेनान्तरात्मना । लिङ्गरूपेण ते देवि ! गजाननपुरस्कृतः ।
गर्भे तव वसिष्यामि पुत्रो भूत्वा शिवप्रिये ! ॥ मम त्वमपरा मूर्त्तिः ख्याता जलमयी शिवा ।
शिवशक्तिविभेदेन चावामेकत्र संस्थितौ ॥ एवं दत्तवरा रेवा मत्सान्निध्यमिहागता ।
रेवाखण्डमिति ख्यातं ततः प्रभृति गोपते ॥"

इति वाराहे सोमेश्वरादिलिङ्गमहिमाध्यायः ॥

रतिः । सा च कामपत्नी । नीलीवृक्षः । इति मेदिनी । वे, २१ ॥ दुर्गा । यथा,—

"रेवा तु नर्म्मदा देवी नदी वा रेवती मता । अतिखण्डनवत्सा वा लोके देवी प्रकीर्त्तिता ॥"

इति देवीपुराणे ४५ अध्यायः ॥

रेष, ऋ ङ हिंसायाम् । इति कविकल्पद्रुमः ॥ (भ्वा०-आत्म०-अक०-सेट् ।) हिंसा घोटककर्त्तृकशब्दः । ऋ, अरिरेषत् । ङ, रेषते रिरेषेऽश्वः । इति दुर्गादासः ॥

रे, शब्दे । इति कविकल्पद्रुमः ॥ (भ्वा०-पर०-अक०-अनिट् ।) रेफादिः । रायति । इति दुर्गादासः ॥

रैवतः, पुं, स्वर्णालुवृक्षः । (यथा, गारुड़े २०८अः ।

"चतुरङ्गुलसम्याको व्याधिघातामिसंज्ञकः । विद्याद्दारुवधं राजवृक्षं रैवतसंज्ञकम् ॥")

शैलभेदः । (अत्रैवार्জ্জুनः सुभद्रां हृतवान् । यथा, महाभारते । २२१ । ६—८ ।

"सुभद्रा त्वथ शैलेन्द्रमभ्यर्च्यैव हि रैवतम् । देवतानि च सर्व्वाणि ब्राह्मणान् स्वस्ति वाच्य च ॥

रैवतः

प्रदक्षिणं गिरेः कृत्वा प्रययौ द्वारकां प्रति ॥ तामभिद्रुत्य कौन्तेयः प्रसह्यारोपयद्रथम् ।
सुभद्रां चारुसर्व्वाङ्गीं कामबाणप्रपीड़ितः ॥ ततः स पुरुषव्याघ्रस्तामादाय शुचिस्मिताम् ।
रथेन काञ्चनाङ्गेन प्रययौ स्वपुरं प्रति ॥")

शङ्करः । इति मेदिनी । ते, ४५ ॥ देवविशेषः । इति धरणिः ॥ (स तु बालग्रहाणामन्यतमः । यथा, महाभारते । ३ । २२६ । २६ ।

"अदितिं रेवतीं प्राहुर्यं हस्तस्थासु रैवतः । सोऽपि बालान् महाघोरो बाधते वै महाग्रहः ॥"

रेवत्यां भवः । रेवती + अण् ।) वर्त्तमानकल्पीयः पञ्चमो मनुः । स तु रेवतीगर्भे दुर्दमराजपुत्रः । अस्मिन् मन्वन्तरे विकुण्ठोऽवतारः । विभुरिन्द्रः । भूतरयादयो देवाः । हिरण्यरोमादयः सप्तर्षयः । बलिविन्ध्यादयस्तन्मनुसुताः । इति श्रीभागवतम् ॥ तद्विवरणं यथा,—

"पञ्चमस्य मनोस्तद्वत् रैवतस्यान्तरं शृणु । देववाहुः सुबाहुश्च पर्ज्जन्यः सोमपो मुनिः ॥
हिरण्यरोमा सप्तार्श्वः सप्तैते ऋषयः स्मृताः । देवाश्चाभूतरजसस्तथा प्रकृतयः स्मृताः ॥
अरुणस्तत्त्वदर्शी च वित्तवान् हव्यपः कविः । सुत्तो निरुत्सुकः सत्वो निर्म्मोहोऽथ प्रकाशकः ।
धर्म्मवीर्य्यबलोपेता दृश्यते रैवतात्मजाः ॥ भृगुः सुधामा विरजः सहिष्णुर्नाद एव च ।
विवस्वानतिनामा च षष्टिसप्तर्षयोऽपरे ॥"

इति मात्स्ये ६ अध्यायः ॥ * ॥ मार्कण्डेयपुराणोक्तरैवतमनुविवरणन्तु रेवतीशब्दे द्रष्टव्यम् ॥ (रुद्राणामन्यतमः । यथा, मात्स्ये । ५ । २६ ।

"अजैकपादहिर्ब्रध्नो विरूपाक्षोऽथ रैवतः ॥"

मेघः । इति निघण्टुः । १ । १० ॥ *

"रैवत्यो गावः 'पशवो वै रेवतीः ।' इति श्रुतेः 'तस्येदम् ।' ४ । ३ । १२० । इत्यण् । मेघो हि सर्व्वत्र वर्षति यवसं पानीयं च जनयित्वा तदौयो भवति पर्ब्बतस्तद्वत्तया । यद्वा, रयिरस्यास्तीति मतुपि 'रयेर्म्मतौ बहुलम् ।' ६ । १ । ३४ । इति सम्प्रसारणम् । 'संज्ञायाम् ।' ८ । २ । ११ । इति वत्वम् । सर्व्वस्य धनस्येश्वरत्वात् रेवान् इन्द्रः मघवेति हि तस्य नाम तदौयो रैवतः पूर्ब्ववत् तदीयत्वं द्रष्टव्यम् ।" इति तत्र देवराजयज्वा ॥ * ॥ सोमलताविशेषः । यथा, सुश्रुते । ४ । २६ ।

"अभिषोमो रैवतश्च यथोक्त इति संज्ञितः ॥"

ऋषिविशेषः । यथा, महाभारते । २ । ५ । ११ ।

"नारदः सुमहातेजा ऋषिभिः सहितस्तदा । पारिजातेन राजेन्द्र रैवतेन च धीमता ॥"

धनवति, त्रि । यथा, ऋग्वेदे । ५ । ६० । ४ ।

"वरा इवेद्रैवतासो हिरण्यै-
रभिस्वधाभिस्तन्वः पिपिश्रे ।"

"रैवतासो धनवन्तः ।" इति तद्भाष्ये सायणः ॥)

रैवतकं, क्ली, (रैवतकमेव। स्वार्थे अण्।) पारेवतवृक्षः। इति राजनिर्घण्टः॥ (पारेवतशब्देऽस्य गुणादिकं ज्ञेयम्॥)
रैवतकः, पुं, (रैवत एव। स्वार्थे कन्।) रैवतपर्व्वतः। तत्पर्य्यायः। उज्जयन्तः २। इति हेमचन्द्रः॥ (यथा, महाभारते।१।२२०।१।
"ततः कतिपयाहस्य तस्मिन् रैवतके गिरौ।
तृष्णान्धकानामभवदुत्सवो नृपसत्तम!॥")
तस्य नामकारणं रैवतीशब्दे द्रष्टव्यम्॥
रैवतिकः, त्रि, (रेवती+"रेवत्यादिभ्यष्ठक्।" ४।१।१४६। इति ठक्।) रेवत्या अपत्यम्। इति मुग्धबोधव्याकरणम्॥
रोकं, क्ली, (रोचतेऽत्रेति। रुच्+घञ्। न्यङ्क्वादित्वात् कुत्वम्।) छिद्रम्। इत्यमरः।१।८।२॥ नौका। चलम्। इति मेदिनी॥ के, ३२॥
रोकः, पुं, (रुच्+घञ्।) क्रयभेदः। दीप्तिः। इति मेदिनी। के, ३१॥ (यथा, ऋग्वेदे। ३। ६। ७।
"दिवक्षिदाते रुचयन्त रोकाः।"
"ते रोकास्त्वदीया दीप्तयः।" इति तद्भाष्ये सायणः॥")
रोगः, पुं, (रुज्यतेऽनेनेति। रोजनमिति वा। रुज+घञ्। यद्वा, रुजतीति। रुज्+"पदरुजविशस्पृशो घञ्।" ३।३।१६। इति कर्त्तरि घञ्।) कुष्ठौषधम्। इति मेदिनी। गे, २३॥ देहभङ्गकारकः। तत्पर्य्यायः। रुक् २ रुजा ३ उपतापः ४ व्याधिः ५ गदः ६ आमयः ७। इत्यमरः। २। ६। ५१॥ अपाटवः ८ आमः९ आतङ्कः १० भयः ११ उपघातः १२ भङ्गः १३ अर्त्तिः १४ तमोविकारः १५ व्यथिः १६ क्षयः १७ अगार्ज्जवः १८ मृत्युभृत्यः १९। इति राजनिर्घण्टः॥ अमः २०। इति जटाधरः॥ माद्यम् २१ आकल्यम् २२। इति हेमचन्द्रः॥ *॥
अस्य निदानादिर्यथा,—
धन्वन्तरिरुवाच।
"सर्व्वरोगनिदानञ्च वक्ष्ये सुश्रुत तत्त्वतः।
आत्रेयाद्यैर्मुनिवरैर्यथापूर्व्वमुदीरितम्॥
रोगः पाप्मा ज्वरो व्याधिर्विकारो दुःखमामयः।
यक्ष्मातङ्कगदाबाधाः शब्दाः पर्य्यायवाचिनः॥
निदानं पूर्व्वरूपाणि रूपाण्युपशयस्तथा।
संप्राप्तिश्चेति विज्ञानं रोगाणां पञ्चधा स्मृतम्॥
निमित्तहेत्वायतनप्रत्ययोत्थानकारणैः।
निदानमाहुः पर्य्यायैः प्राग्रूपं येन लक्ष्यते।
उत्पित्सुरामयो दोषविशेषैरनधिष्ठितः॥
लिङ्गमव्यक्तमल्पत्वात् व्याधीनां तदयथातथम्।
तदेव व्यक्ततां यातं रूपमित्यभिधीयते॥
संस्थानं व्यञ्जनं लिङ्गं लक्षणं चिह्नमाकृतिः।
हेतुव्याधिविपर्य्यस्तं विपर्य्यस्तार्थकारिणाम्॥
औषधान्नविहाराणां उपयोगं सुखावहम्।
विद्यादुपशयं व्याधेः स हि सात्म्यमिति स्मृतः॥
विपरीतोऽनुपशयो व्याधिसात्म्याभिसंज्ञितः।
यथा दुष्टेन दोषेण तथा सात्म्यविपर्य्यता॥

निवृत्तिरामयस्यासौ संप्राप्तिर्जातिरागतिः।
संख्याविकल्पप्राधान्यबलकालविशेषतः॥
स भिद्यते यथाचैव संख्यातोऽष्टौ ज्वरा इति।
दोषाणां समवेतानां विकल्पांशांशकल्पना॥
स्वातन्त्र्यपारतन्त्र्याभ्यां व्याधेः प्राधान्यमादिशेत्।
हेत्वादिकार्त्तृस्वाभावयवैर्बलाबलविशेषणम्॥
नक्तं दिनर्त्तुभुक्तांशैर्व्याधिकालो यथा मलम्।
इति प्रोक्तो निदानार्थः स व्यासेनोपदेक्ष्यते।
सर्व्वेषामेव रोगाणां निदानं कुपिता मलाः॥
तत्प्रकोपस्य तु प्रोक्तं विविधाहितसेवनम्।
अहितस्यविधौ योगस्त्याज्यानां प्रागुदाहृतः॥
तिक्तौषधकषायान्नरूक्षाप्रमितभोजनैः।
धावनोद्वेगनिष्प्राणागरात्युच्चभाषणैः॥
क्रियाभियोगभीशोकचिन्तायायाममैथुनैः।
ग्रीष्माहोरात्रभुक्तान्ते प्रकुप्यति समीरणः॥
पित्तं कटम्लतीक्ष्णोष्णकटुक्रोधविदाहिभिः।
प्रारब्धमध्याह्नरात्रार्द्धविदाहसमयेषु च॥
स्वादुस्निग्धगुर्व्वभिष्यन्दिशीतलैः।
आस्यास्वप्नसुखाजीर्णदिवास्वप्नादिदूषणैः॥
प्रच्छर्दनाद्ययोगेन भुक्तमात्रवसन्तयोः।
पूर्व्वाह्णे पूर्व्वरात्रे च श्लेष्मा वक्ष्यामि शङ्करान्॥
मिश्रीभावात् समस्तानां सन्निपातस्तथा पुनः।
सङ्कीर्णाजीर्णविषमविरूक्षाध्यशनादिभिः॥
व्यापन्नमद्यपानीयशुष्कशाकामशूलकैः।
पिण्याकतिलवसराप्तिशुष्कक्षवामिषैः॥
दोषत्रयकरैस्तैस्तैस्तथान्नपरिवर्त्तनतः।
ऋतोर्दुष्टात् पुरोवातात् विग्रहादेशविभ्रमात्॥
दुष्टामाम्बरतिस्निग्धगुरुशीतातिवर्षणात्।
मिथ्यायोगाच्च विविधात् पापानाञ्च निषेवणात्॥
स्त्रीणां प्रसवदौर्ब्बल्यात्तथा मिथ्योपचारतः।
प्रतिरोगमिति कृत्वा रोगविध्यनुगामिनः।
रसायनीं प्रपद्यान्ते दोषा देहे विकुर्व्वते॥"
इति गारुडे सर्व्वरोगनिदानं १५१ अध्यायः॥
रोगविशेषाणां औषधानि गारुडे १८९।१९०। १९१। १९२। १९३। १९४। १९५। १९६। १९७। १९८। १९९ अध्यायेषु द्रष्टव्यानि॥
सर्व्वरोगहरविष्णुवर्म्मकवचञ्च तत्रैव २०० अध्याये द्रष्टव्यम्॥ *॥ अपि च।
"जनकः सर्व्वरोगाणां दुर्व्वारो दारुणो ज्वरः।
शिवभक्तश्च योगी च स एव विज्ञतामियात्॥
भीमस्त्रिपादस्त्रिशिराः षड्भुजो नवलोचनः।
भस्मप्रहरणो रौद्रः कालान्तकयमोपमः॥
मन्दाग्निस्तस्य जनको मन्दाग्नेर्जनकास्त्रयः।
पित्तश्लेष्मसमीराश्च प्राणिनां दुःखदायकाः॥
वायुजः पित्तजश्चैव श्लेष्मजश्च तथैव च।
ज्वरभेदाश्च त्रिविधाश्चतुर्थश्च त्रिदोषजः॥
पाण्डुकः कामलः कुष्ठः प्लीहः शीघ्रा च शूलकः।
ज्वरातिसारग्रहणीकाग्निव्रणगुदार्शमकाः॥
मूत्रकृच्छ्रश्च गुल्मश्च रक्तदोषविकारकः।
आरिघ्नो मेहनः कृत्नो गोदश्च गलगण्डकः॥
भ्रमरी सन्निपातश्च विसूची दारुणो मतः।

एषां भेदप्रभेदेन चतुःषष्टिरुजः स्मृताः॥
मृत्युकन्यासुतास्वेते जरा तस्याश्च कन्यकाः।
जरा च भ्रातृभिः सार्द्धं ग्रसद्भ्रमति भूतलम्॥
एते चोपायवेत्तारं न गच्छन्ति च संयुतम्।
पलायन्ते च तं दृष्ट्वा वैनतेयमिवोरगाः॥*॥
चक्षुर्जलञ्च यामः पादाधस्तैलसेवनम्।
कर्णतैलं मूर्द्धितैलं जराव्याधिविनाशकम्॥
वसन्ते भ्रमणं वह्निसेवास्वप्नं करोति यः।
बालाञ्च सेवते काले जरा तं नोपगच्छति॥
स्नातप्रीतोदकस्नायी सेवते चन्दनद्रवम्।
नोपयाति जरा तञ्च निदाघेऽनिलसेविनम्॥
प्रावृड्युष्णोदकस्नायी घनतोयं न सेवते।
समये च समाहारी जरा तं नोपगच्छति॥
प्रारब्धौद्रं न गृह्णाति भ्रमणं तञ्च वर्जयेत्।
स्नातस्नायी समाहारी जरा तं नोपतिष्ठति॥
स्नातस्नायी च हेमन्ते काले वह्निं निषेवते।
भुङ्क्ते नवान्नमुष्णञ्च जरा तं नोपगच्छति॥
शिशिरेऽगुरुवह्निञ्च नवोष्णान्नञ्च सेवते।
य एवोष्णोदकस्नायी जरा तं नोपगच्छति॥
सद्योमांसं नवान्नञ्च बाला स्त्री क्षीरभोजनम्।
घृतञ्च सेवते यो हि जरा तं नोपगच्छति॥
भुङ्क्ते सदन्नं क्षुत्काले तृष्णायां पीयते जलम्।
नित्यं भुङ्क्ते च ताम्बूलं जरा तं नोपगच्छति॥
दधि हैयङ्गवीनञ्च नवनीतं तथा शुभम्।
नित्यं भुङ्क्ते संयमी यो जरा तं नैव गच्छति॥
शुष्कमांसं स्त्रियो दृष्ट्वा बालार्कं तरुणं दधि।
संसेवन्तं जरा याति प्रहृष्टा भ्रातृभिः सह॥
रात्रौ ये दधि सेवन्ते पुंश्चलीञ्च रजस्वलाम्।
तमुपैति जरा क्षिप्रा भ्रातृभिः सह सुन्दरि!॥
रजस्वला च कुलटा चावीरा जारदूतिका।
शूद्रयाजकपत्नी या ऋतुहीना च या सति!॥
यो हि तासामन्नभोजी ब्रह्महत्यां लभेत सः।
तेन पापेन सार्द्धं सा जरा तमुपगच्छति॥
पापानां व्याधिभिः सार्द्धं मित्रता सन्ततं ध्रुवम्।
पापं व्याधिजराबीजं विघ्नबीजञ्च निश्चितम्॥
पापेन जायते व्याधिः पापेन जायते जरा।
पापेन जायते दैन्यं दुःखं शोकं भयं कलिः॥
तस्मात् पापं महावैरं दोषबीजममङ्गलम्।
भारते सन्ततं सन्तो नाचरन्ति भयातुराः॥
स्वधर्म्माचारयुक्तञ्च दीक्षितं हरिसेवकम्।
गुरुदेवातिथीनाञ्च भक्तं सक्तं तपःसु च॥
व्रतोपवासयुक्तञ्च सदा तीर्थनिषेविणम्।
पापा द्रवन्ति तं दृष्ट्वा वैनतेयमिवोरगाः॥
एतान् जरा न सेवेत व्याधिसङ्घश्च दुर्ज्जयः।
सर्व्वं बोध्यमसमये काले सर्व्वं ग्रहीष्यति॥ *॥
ज्वरश्च सर्व्वरोगाणां जनकः कथितः सति।
पित्तश्लेष्मसमीराश्च ज्वरस्य जनकास्त्रयः॥
एते यथा सञ्चरन्ति स्वयं यान्ति च देहिषु।
तमेव विधिमुपायं साध्वि मत्तो निशामय॥
क्षुधि जाज्वल्यमानायामाहाराभाव एव च।
प्राणिनां जायते पित्तं चक्रे च मणिपूरके॥
नालं विस्वपनं शुक्ला जलपानञ्च तत्क्षणम्

तदेव तु भवेत् पित्तं सद्यःप्राणहरं परम् ॥
तप्तोदकञ्च ग्रसति भाद्रे तिक्तं विशेषतः ।
दैवयत्तञ्च यो भुङ्क्ते पित्तं तस्य प्रजायते ॥
सशर्करञ्च धान्याकं पिष्टं शीतोदकान्वितम् ।
चणकं सर्व्वगव्यञ्च दधितक्रविवर्ज्जितम् ॥
विल्वतालफलं पक्वं सर्व्वमत्यारमेव च ॥
आर्द्रकं सूपयूषञ्च तिलपिष्टं सशर्करम् ॥"
अत्यारस्थाने ऐत्वमिति च पाठः ।
"पित्तक्षयकरं सद्यो बलपुष्टिप्रदं परम् ।
पित्तनाशञ्च तद्बीजमुक्तमन्यं निबोध मे ॥
भोजनानन्तरं स्नानं जलपानं विना तृषा ।
तिलतैलं स्निग्धतैलं स्निग्धमामलकीद्रवम् ॥
पर्य्युषितान्नं तक्रञ्च पक्वरम्भाफलं दधि ।
क्षीराम्बुशर्करातोयं सुस्निग्धस्थलसेवनम् ॥
नारिकेलोदकं रूक्षस्नानं पर्य्युषितं जलम् ।
तरुसञ्जपक्वफलं सुपक्वकर्कटीफलम् ॥
खातस्नानञ्च वर्षासु मूलकं श्लेष्मकारणम् ।
ब्रह्मरन्ध्रे च तच्चन्म महद्वीर्य्यविनाशनम् ॥
वह्निस्वेदं भृष्टिभक्षं पक्वतैलं विशोषकम् ।
भ्रमणं शुष्कभक्षञ्च शुष्कपक्वहरीतकी ॥
पिण्डारकमपक्वञ्च रम्भाफलमपक्वकम् ।
वेगधारणसन्धारणाहारमपानकम् ॥
सघृतं रोचनाचूर्णं सघृतं शुष्कशर्करम् ।
मरीचं पिप्पलीशुष्कमार्द्रकं जीरकं मधु ॥
द्रव्याण्येतानि गन्धर्व्वि सद्यः श्लेष्महराणि च ।
बलपुष्टिकराण्येव वायुबीजं निशामय ॥
भोजनानन्तरं सद्यो गमनं धावनं तथा ।
क्षेदनं वह्नितापञ्च गृध्नुभ्रमणमैथुनम् ॥
दृङ्स्त्रीगमनञ्चैव मनःसन्ताप एव च ।
अतिरूक्षमनाहारं युद्धं कलहमेव च ॥
कटुवाक्यं भयं शोकः केवलं वायुकारणम् ।
आम्राम्रपक्वे तच्चन्म निशामय तदौषधम् ॥
पक्वरम्भाफलञ्चैव सबीजं सर्करोदकम् ।
नारिकेलोदकञ्चैव सद्यस्कं सुमिष्टकम् ॥
माहिषं दधि मिष्टञ्च केवलं वा सशर्करम् ।
सद्यःपर्य्युषितान्नञ्च सौवीरं शीतलोदकम् ॥
पक्वतैलविशेषञ्च तिलतैलञ्च केवलम् ।
आङ्गलीतालखर्ज्जूररसुस्तमामलकीद्रवम् ॥
शीतलोष्णोदकस्नानं सुस्निग्धचन्दनद्रवम् ।
स्निग्धपद्मपत्रतल्पं सुस्निग्धव्यजनानिलः ॥
एतत्ते कथितं वत्से ! सद्यो वातप्रणाशनम् ।*।
वायवस्त्रिविधाः पुंसां क्षीणसन्तापकामजाः ॥
व्याधिसंघञ्च कथितस्तन्नाम्नि विविधानि च ।
तानि व्याधिप्रणाशाय कृतानि सद्भिरेव च ॥
तस्मात्येतानि सर्व्वाणि व्याधित्रयकराणि च ।
रसायनादयो येषु चोपायश्च सुदुर्ल्लभः ॥
न शक्तः कथितुं साध्वि यावार्थं वत्सरेण च ।
तेषाञ्च सर्व्वतन्त्राणां कृतार्थानां विचक्षणैः ॥"

इति ब्रह्मवैवर्त्ते ब्रह्मखण्डे १६ अध्यायः ॥

अथ व्याधिलक्षणम् । तच्च वाग्भटः ।
"रोगस्तु दोषवैषम्यं दोषसाम्यमरोगता ।
रोगा दुःखस्य दातारो ज्वरप्रभृतयो हि ते ॥
ते च स्वाभाविकाः केचित् केचिदागन्तवः स्मृताः ।
मानसाः केचिदाख्याताः कथिताः केऽपि कायिकाः ॥"
तत्र स्वाभाविकाः शरीरस्वभावादेव जाताः ।
क्षुत्पिपासासुषुप्त्याजागरमृत्युप्रभृतयः ॥ अथवा स्वस्य भावादुत्पत्तेर्जाताः स्वाभाविकाः सहजा इति यावत् । ते च जन्मान्तादयः । आगन्तवोऽभिघातादिजनिताः । अथवा जन्मोत्तरभाविनः । मानसाः कामक्रोधलोभमोहभयाभिमानदैन्यपैशुन्यविषादेर्षासूयामात्सर्य्यप्रभृतयः । अथवा उन्मादापस्मारमूर्च्छाभ्रमतमःसन्न्यासप्रभृतयः । कायिकाः पाण्डुरोगप्रभृतयः ॥
"कर्म्मजाः कथिताः केचिद्दोषजाः सन्ति चापरे ।
कर्म्मदोषोद्भवाश्चान्ये व्याधयस्त्रिविधाः स्मृताः ॥"
तत्र कर्म्मजा व्याधयः । यत् प्राक्तनं दुष्कर्म्मप्रबलं व्याधिरूपं केवलं भोगनाश्यं प्रायश्चित्तनाश्यं वा ततो जाताः न तु दुष्टवातादिदोषैश्च जनिताः । तथा ।
"यथाप्राप्तान्तु निर्गीता यथाव्याधि चिकित्सिताः ।
न शमं यान्ति ये रोगास्ते ज्ञेयाः कर्म्मजा बुधैः ॥"
दोषजाः मिथ्याहारविहारप्रकुपितवातपित्तकफजाः ॥ * ॥ ननु मिथ्याहारविहारिणामपि प्राक्तनसुकृतेन नैरुज्यं दृश्यत एव ततो दोषेष्वपि प्राक्तनकर्म्मैव कारणं तत् कथं दोषजा इति । उच्यते । दोषजेष्वपि वस्तुतः आदिकारणं दुष्कर्म्म वर्त्तत एव किन्तु तत्र मिथ्याहारविहारभूषिता दोषा हेतवो दृश्यत इति दोषजा इत्युच्यत इति समाधिः ॥ * ॥ कर्म्मदोषोद्भवाः ।
"स्वल्पदोषा गरीयांसस्ते ज्ञेयाः कर्म्मदोषजाः ।"
अत्र कारणं दुष्कर्म्मप्रबलं यतो दोषाल्पत्वेऽपि व्याधेर्गरीयस्त्वं तत्कर्म्मक्षयादेव क्षीणं भवति । दोषास्तु स्वल्पा अपि निदानत्वेनोक्ता दृश्यन्त एवेति । दोषाणां कारणन्तु मन्यत इति कर्म्मदोषोद्भवाः ।
"कर्म्मक्षयात् कर्म्मकृता दोषजाः स्वस्वभेषजैः ।
कर्म्मदोषोद्भवा यान्ति कर्म्मदोषक्षयात् क्षयम् ॥"
दोषजाः स्वस्वभेषजैरिति दोषजेष्वादिकारणं दुष्कर्म्म तद्भेषजार्थव्रतक्षयादिजनितदुःखभोगेन कटुतिक्तकषायाद्यरुक्षभक्षणादिजनितदुःखभोगेन च क्षयं याति । श्लेष्मादृष्टहेतवो दोषास्ते स्वस्वभेषजैः क्षयं यान्तीत्यर्थः ।
"साध्या याप्या असाध्याश्च व्याधयस्त्रिविधाः स्मृताः ।
सुखसाध्यः कृच्छ्रसाध्यो द्विविधः साध्य उच्यते ॥"
याप्यलक्षणमाह ।
"यापनीयन्तु तं विद्यात् क्रियां धारयते हि तम् ।
क्रियायान्तु निवृत्तायां सद्यो यच्च विनश्यति ॥
प्राप्ता क्रिया धारयति सुखिनं प्राप्यमातुरम् ।
प्रप्रतिष्ठदिवागारं स्तम्भो यत्नेन योजितः ॥
साध्या याप्यत्वमायान्ति याप्याश्चासाध्यतां तथा ।
घ्नन्ति प्राणानसाध्यास्तु नराणामक्रियावताम् ॥"
अक्रियावतां चिकित्सारहितानाम् ॥ * ॥
अथोपद्रवलक्षणम् ।
"रोगारम्भकदोषस्य प्रकोपादुपजायते ।
योऽन्यो विकारः स बुधैरुपद्रव इहोदितः ॥"
अथारिष्टस्य लक्षणमाह ।
"रोगिणो मरणं यस्मादवश्यम्भावि लक्ष्यते ।
तल्लक्षणमरिष्टं स्यादरिष्टञ्चापि तदुच्यते ॥"
अथ रोगस्य चिकित्सालक्षणमाह ।
"या क्रिया व्याधिहरणी सा चिकित्सा निगद्यते ।
दोषधातुमलानां या साम्यकृत् सैव रोगहृत् ॥"
क्रियाच कर्म्म । व्याधिर्हियतेऽनयेति व्याधिहरणी । करणाधिकरणयोश्चेति सूत्रेण करणार्थे ल्युट् । तथा च ।
"याभिः क्रियाभिर्जायन्ते शरीरे धातवः समाः ।
सा चिकित्सा विकाराणां कर्म्म तद्भिषजां मतम् ॥"
या हृद्यैर्द्रव्यैः शमयति नाशं व्याधिं करोति च ।
सा क्रिया न तु या व्याधिं हरत्यन्यमुदीरयेत् ॥"
क्रियाच चिकित्सा । तथा चामरसिंहः ।
"आरम्भो निष्कृतिः शिल्पं पूजनं संप्रधारणम् ।
उपायः कर्म्म चेष्टा च चिकित्सा च नव क्रियाः ॥"
इति ॥*॥

अथ चिकित्साविधुपदेशः ।
"जातमात्रचिकित्सः स्यान्नोपेक्ष्योऽल्पतया गदः ।
वह्निश्चविषेस्तुल्यः स्वल्पोऽपि विकरोत्यसौ ॥
रोगमादौ परीक्षेत ततोऽनन्तरमौषधम् ।
ततः कर्म्म भिषक् पश्चात् ज्ञानपूर्व्वं समाचरेत् ॥"
अयमर्थः । भिषक् आदौ रोगं परीक्षेत विचारयेत् । ततोऽनन्तरं औषधं विचारयेत् । ततः पश्चात् रोगौषधविचारानन्तरं ज्ञानपूर्व्वं सावधानो न तु अवश्यथा कर्म्म चिकित्सामौषधदानादिरूपं समाचरेदित्यर्थः ॥ * ॥ रोगाज्ञाने चिकित्साकरणे दोषमाह ।
"यस्तु रोगमविज्ञाय कर्म्माण्यारभते भिषक् ।
अपौषधविधानज्ञस्तस्य सिद्धिर्यदृच्छया ॥"
यदृच्छया स्वैरितया सिद्धिर्भवति वापि भवतीत्यर्थः । अन्यच्च ।
"औषधं केवलं कर्त्तुं यो जानाति न चामयम् ।
वैद्यकर्म्म स चेत् कुर्य्यादधमर्हति राजतः ॥"*॥
रोगज्ञाने भेषजाज्ञाने दोषमाह ।
"यस्तु केवलरोगज्ञो भेषजेष्वविचक्षणः ।
तं वैद्यं प्राप्य रोगी स्यादृग्यथा नौर्नाविकं विना ॥"
नाविकं कर्णधारं विना यथा नौः सङ्कटे पतति तथा रोगीत्यर्थः । अन्यच्च ।
"यस्तु केवलशास्त्रज्ञः क्रियाकुशलो भिषक् ।
स मुह्यत्यातुरं प्राप्य भीरुः शस्त्रीव चाहवम् ॥"
रोगौषधयोर्ज्ञाने गुणमाह ।
"यस्तु रोगविशेषज्ञः सर्व्वभेषज्यकोविदः ।
देशकालविभागज्ञस्तस्य सिद्धिर्न संशयः ॥

आद्यावस्थे वर्णा ज्ञाने प्रयतेत चिकित्सकः ।
भेषजानां विधाने॓थ ततः कुर्य्याच्चिकित्सितम् ॥"
चिकित्सितमित्यत्र भावे क्तः । इति भावप्रकाशे पूर्व्वखण्डः ॥ * ॥ अथ येन रोगाणां ज्ञानं स्यात्तदाह ।
"हेतुस्तदेषु संप्राप्तिः पूर्व्वरूपञ्च लक्षणम् ।
तथैवोपशयः पञ्च रोगविज्ञानहेतवः ॥"
तत्र हेतोर्लक्षणमाह ।
"यस्तु न स्याद्विना येन तस्य तद्धेतुरुच्यते ।
ग्राह्ये संव्यवहाराय तत्पर्य्यायान् प्रवक्ष्यते ॥
निदानं कारणं हेतुर्निमित्तञ्च निबन्धनम् ।
मूलमायतनं तन्तु प्रत्ययो॓पि निगद्यते ॥"
तत्र हेतुर्व्याधीनां ज्ञानाय हेतुर्यथा । वर्षाऋत्वभ्रमहिमानग्न्यतिमैथुनशोकचिन्ताभयादयो वातप्रकोपहेतवो वातजान् व्याधीन् बोधयन्ति । ग्रैरत्कट्यम्लोष्णतीक्ष्णक्रोधलघ्वशनाद्यभिघातादयः पित्तप्रकोपहेतवः पित्तजान् व्याधीन् बोधयन्ति । वसन्तमधुरस्निग्धशीतादयः कफप्रकोपहेतवः कफजान् व्याधीन् बोधयन्ति ॥*॥ अथ संप्राप्तेर्लक्षणमाह ।
"यथा दुष्टेन दोषेण यथा चानुविसर्पता ।
उत्पत्तिर्व्याधयस्यासौ संप्राप्तिर्ज्ञातिरागतिः ॥"
यथा दुष्टेन दोषेण यथा कारणभेदेन दुष्टेन दोषेण । यथा चानुविसर्पता अनेकधा दोषाणां विसर्पणमूर्द्धाधस्तिर्य्यगादिगतिभेदेन । तथा च विसर्पता व्याप्नुवता या उत्पत्तिः असौ संप्राप्तिः । ग्राह्ये व्यवहाराय संप्राप्तेः पर्य्यायानाह जातिरागतिरिति । संप्राप्तेरौपाधिकभेदानाह ।
"संख्याविकल्पप्राधान्यबलकालविशेषतः ।
सा भिद्यते यथात्रैव वक्ष्यन्तेऽसौ ज्वरा इति ॥"
संख्यादिरूपा ये विशेषास्तेभ्यः सा संप्राप्तिर्भिद्यते भेदवती क्रियते इत्यर्थः । तत्र संख्यां विवृणोति । यथा ज्वरोऽष्टधा अतीसारः षड्विध इत्यादि । विकल्पं विवृणोति । दोषाणां समवेतानां विकल्पोऽंशांशकल्पना । समवेतानां असुदितानां दोषाणां अंशांशकल्पना हीनमध्याधिकभेदैर्भागकल्पना विकल्पः ॥ * ॥ प्राधान्यं विवृणोति ।
"खातस्यापारतस्याभ्यां व्याधेः प्राधान्यमादिशेत् ।
व्याधेः खातस्येव प्राधान्यं पारतस्येवाप्राधान्यञ्च वदेदित्यर्थः । यथा खातस्य ज्वरस्य प्राधान्यं ज्वराधीनानां श्वासादीनामप्राधान्यम् ॥ * ॥ बलं विवृणोति ।
"हेत्वादिकार्त्स्न्यावयवैर्व्याधेर्बलाबलावधृतम् ।"
अत्रापि व्याधेरित्यनुवर्त्तते । हेत्वादेः हेतुपूर्व्वरूपाणां कार्त्स्न्येन साकल्येन । अवयवैः एकदेशेन । व्याधेर्व्यलाबलयोर्विशेषणं विशेषबोधः ॥ * ॥ कालं विवृणोति ।
"नक्तं दिनर्तुसुक्तांशैर्व्याधिकालो यथाबलम् ।"
नक्तमत्राद्यं रात्रिवाचकम् । एतेनेतदुक्तं यस्मिन्नक्तादेरंशे यस्य दोषस्य प्रकोप उक्तो॓स्ति सो॓ंशस्तद्दोषजस्य व्याधेः काल इत्यर्थः । नक्तादेरंशेषु वातादिप्रकोप उक्तो वाग्भटेन ।
"ते व्याधिगो॓पि हृन्नाभ्योरधोमध्योर्द्ध्वसंश्रयाः ।
वयो॓होरात्रिभुक्तानामन्तमध्यादिगाः क्रमात् ॥"
इति ॥
ते वातपित्तकफाः । ऋतुषु वातादिकोपो यथा,
"वर्षासु श्लिष्यिरे वायुः पित्तं शरदि उष्मके ।
वसन्ते तु कफः कुप्येदेवा प्रकृतिरार्त्तवी ॥"*॥
संप्राप्तिर्व्याधीनां ज्ञानाय हेतुर्यथा । मिथ्याहारविहारकुपितवातादयो मांसशोणितमलदूषणक्लोष्मान्निव्यहिर्निरसनरूपं ज्वरोत्पत्तिप्रकारं बोधयति तथा व्याधीनां संख्यादोषांशांशकल्पनाप्राधान्यबलकालांश्च बोधयति । तेषु ज्ञानेषु चिकित्साविशेषः स्यात् ॥ * ॥ अथ पूर्व्वरूपस्य लक्षणमाह ।
"पूर्व्वरूपन्तु तद्येन विद्याद्भावि नमामयम् ।
सामान्यञ्च विशिष्टञ्च द्विविधं तदुदाहृतम् ॥
सामान्यं तत्र दोषाणां विशेषैरनधिष्ठितम् ।
विशिष्टमीषद्व्यक्तं स्यात् विशेषैश्च समन्वितम् ॥"
दोषाणां विशेषाः वृद्ध्यादिग्रथनेत्यादाह्यभिमान्द्यादयः । तत्र पूर्व्वरूपं व्याधीनां ज्ञानाय हेतुर्यथा । अग्निमान्द्यादयो भाविनं ज्वरं बोधयन्ति । अथ च त एव अग्निमान्द्यादयो॓ग्निग्रथितवृद्ध्यायुक्ता भाविनं वातज्वरं नेत्रदाहयुक्ता भाविनं पित्तज्वरं वह्निमान्द्ययुक्ता भाविनं श्लेष्मज्वरं बोधयन्ति ॥ * ॥ अथ लक्षणस्य लक्षणमाह ।
"पूर्व्वरूपं विशिष्टं यदुक्तं तल्लक्षणं स्मृतम् ।
संस्थानं लिङ्गचिह्नं च व्यञ्जनं रूपमाकृतिः ॥"
विशिष्टं पूर्व्वरूपं ईषदुक्तं रूपं तदेव सम्यगुक्तं लक्षणं स्मृतम् । तत्र ग्राह्ये व्यवहाराय पर्य्यायानाह संस्थानमित्यादि । लक्षणं व्याधेर्ज्ञानाय हेतुर्यथा । स्वेदावरोधः सन्तापः सर्व्वाङ्गग्रहणञ्च युगपदेतल्लक्षणं ज्वरं बोधयति ॥ * ॥ अथोपशयस्य लक्षणमाह ।
"औषधान्नविहाराद्यासुपथोगं सुखावहम् ।
तृष्णासुपशयं विद्यात् स हि साम्यमिति स्मृतः ॥"
तत्र वातस्योपशयमाह ।
"मधुरलवणस्निग्धस्निग्धाम्लोष्णविदाहिगुरूष्णकरवस्तिस्वेदसंमर्द्दनानि ।
दहनजलदग्धाभ्यङ्गसन्तर्पणानि
प्रकुपितपवनानं शान्तमेतानि कुर्य्युः ॥"
अथ पित्तस्योपशयमाह ।
"तिक्तस्वादुकषायशीतपवनच्छायानिशावीजनज्योत्स्नाभूयहयन्त्रवारिजलदक्षीरात्रसंस्पर्शनम् ।
सर्पिः क्षीरविरेकसेकरुधिरस्रावप्रदेहादिकं
पानाहारविहारभेषजमिदं पित्तं प्रशान्तिं नयेत् ॥"
अथ कफस्योपशयमाह ।
"रूक्षोष्णकटुकषायतिक्तकटुकषायामनिष्ठीवनं
धूमात्युष्णविरोविरेकवमनं स्वेदोपवासादिकम् ।
लङ्घनाद्यनियुद्धजागरजलक्रीड़ाङ्गनासेवनं
पानाहारविहारभेषजमिदं श्लेष्माणमुग्रं हरेत् ॥"
जलक्रीड़ा कथं कफं हरति तदाह । जलक्रीड़ाजनितग्लेत्यमावरुद्धदेहोष्मा यङ्कलिप्रपाकाग्निरिवोष्मो भूत्वा कफं शोषयति इति समाधिः ॥*॥ उपशयो व्याधेर्ज्ञानाय हेतुर्यदुक्तं चरकेण । गूढलिङ्गं सङ्कीर्णलक्षणञ्च व्याधिमुपशयानुपशयाभ्यां परीक्षेतेति । तथा च सुश्रुते ।
"अभ्यङ्गस्वेदनस्नेहैर्विकारो वातिको न यः ।
ग्राम्येत्तत्र तु विज्ञेयं रक्तमाश्रित्य दूषितम् ॥
सर्व्वेषामेव रोगानां निदानं कुपिता मलाः ।
तत्प्रकोपस्य तु प्रोक्तं विविधाहितसेवनम् ॥"
सर्व्वेषां रोगानां निदानं सन्निरुक्तं कारणम् । कुपिताः स्वहेतुदुष्टाः । मला वातपित्तकफा एवेत्यन्वयः । तथा च वाग्भटः । दोषा एव हि सर्व्वेषां रोगाणामेककारणमिति । नत्वागन्वादिषु व्यभिचारः स्यात् । तत्र तत्रापि उत्पत्तानन्तरं दोषप्रकोपस्यावश्यं भावित्वात् । उत्पन्नत्वेषु गुणयोगस्येव । इति भावप्रकाशः ॥ * ॥ पापजरोगा यथा । भ्रातातपीयकर्म्मविपाके ।
"कुष्ठञ्च राजयक्ष्मा च प्रमेहो ग्रहणी तथा ।
मूत्रकृच्छ्राश्मरीकाशा अतिसारभगन्दरौ ॥
दुष्टव्रणं गण्डमाला पक्षाघातो॓क्षिनाशनम् ।
इत्येवमादयो रोगा महापापो॓द्भवा स्मृताः ।
जलोदरयकृत्प्लीहशूलरोगव्रणानि च ।
श्वासार्शोजीर्णज्वरच्छर्द्दिभ्रममोहगलग्रहाः ।
रक्तार्व्बुदविसर्पाद्या उपपापो॓द्भवा गदाः ॥
दण्डावतानकश्चित्रवपुःकम्पविचर्च्चिकाः ।
वल्मीकपुष्करीकाद्या रोगाः प्रापथसङ्भवाः ॥"
तथा ।
"अर्शआद्या दृशां रोगा अतिपापाद्भवन्ति हि ।
अन्ये च बहुधा रोगा जायन्ते रोगसङ्करात् ।
उच्यन्ते हि निदानानि प्रायश्चित्तानि च
क्रमात् ॥"
सर्व्वरोगनाशकदानं यथा । हेमाद्रिधृतदानखण्डे भगवद्वाक्यम् ।
"सुवर्णदानं सर्व्वेषां रोगाणां नाशकारणम् ।
तस्मात् सर्व्वप्रयत्नेन कर्त्तव्यं कमलोद्भव ॥"
इति मलमासतत्त्वम् ॥ * ॥
अथारोग्यस्नानदिनम् । तत्र तिथयो रिक्ताः प्रशस्ताः । दर्शमीप्रतिपद्द्वितीयाचतुर्दशीपञ्चमीभिन्ना मध्यमाः । तत्र नक्षत्राणि । स्वातीश्रवणाधनिष्ठाशतभिषाज्येष्ठाहस्तापुष्यपूर्व्वाषाढापूर्व्वफल्गुनीपूर्व्वभाद्रपदमघाभरणीरुद्रार्द्राश्लेषाणि । तत्र वाराः क्रूराः । तत्र योगो व्यतीपातः । अशोभनस्वप्नः । तमापेक्षया केचिदेषु पापग्रहः । इति ज्योतिस्तत्त्वम् ॥ अपि च ।
"चन्द्राशुद्धौ व्यतीपाते भौमार्कग्रहिवासरे ।
व्रणसुप्तो व्याधिसुप्तः क्षयः स्नानं समाचरेत् ॥
पूर्व्वाचयमघाश्लेषा भरणी क्षत्तिका तथा ।
आर्द्रायाञ्च तिथौ रिक्ते चारोग्यस्नानमाचरेत् ॥"
इति ज्योतिःसारसंग्रहः ॥

रोगघ्न, क्ली, (रोगं हन्तीति । हन+टक् ।) औषधम् । इति वैद्यकम् ॥ रोगनाशके, त्रि ॥ (स्त्रियां ङीप् । यथा, सुश्रुते । १ । ४४ । "त्रिफला सर्व्वरोगघ्नी त्रिभागघृतमूर्च्छिता ॥")

रोगभू: क्ली, (रोगाणां भू: स्थानं व्याधिमन्दिरत्वात् ।) शरीरम् । इति शब्दचन्द्रिका ॥

रोगराज:, पुं, (रोगाणां राजा । टच् ।) राजयक्ष्मा । इति राजनिर्घण्टः ॥ (यथा,— "इति व्याधिसमूहस्य रोगराजस्य हेतुजम् । रूपमेकादशविधं हेतुस्त्रोक्तश्चतुर्विध: ॥" इति चरके चिकित्सास्थाने ८ अध्याय: ॥)

रोगलक्षणं, क्ली, (रोगाणां लक्षणम् ।) निदानम् । इति राजनिर्घण्टः ॥

रोगघ्नान्तक:, पुं, (रोगान् घ्नान्तयतीति । घ्नान्ति+खुल् ।) वैद्य: । इति शब्दचन्द्रिका ॥

रोगघ्निला, स्त्री, (रोगाय रोगनिवृत्तये घ्निला ।) मन:शिला । इति राजनिर्घण्टः ॥ (विवरणमस्या मन:शिलाशब्दे विज्ञेयम् ॥)

रोगघ्निल्वी, [न्] पुं, (रोगे घ्निल्वीव ।) वृक्षविशेष: । इति जटाधर: ॥ घ्नराजु इति भाषा ॥

रोगश्रेष्ठ:, पुं, (रोगेषु श्रेष्ठ: ।) ज्वर: । इति राजनिर्घण्टः ॥

रोगहं, क्ली, (रोगान् हन्तीति । हन्+ड: ।) औषधम् । इति शब्दचन्द्रिका ॥

रोगहरद्रव्यं, क्ली, (रोगहरं रोगनाशकं द्रव्यम् ।) रोगनाशकवस्तु । यथा,—

धन्वन्तरिरुवाच ।

"द्रव्याणि मधुरादीनि वक्ष्ये रोगहराण्यहम् ।
घ्नालिषष्टिकगोधूमशीरश्वेव तथा मधु ॥
मज्जाश्वङ्गाटकयवकपोर्व्वारुकगोक्षुरम् ।
गम्भारी पौष्करं बीजं द्राक्षा खर्ज्जूरकं वला ॥
नारिकेलेक्षुतालगुप्ता विदारी च पियालकम् ।
मधुकं तालकुष्माण्डं सुखोष्णं मधुरो गण: ॥
मूर्च्छादाहप्रशमन: षड्इन्द्रियप्रसादन: ।
क्षमिक्षत् कफक्षत् तृष्ण एकोऽत्यर्थं निषेवित: ॥
श्वासकाशास्यमाधुर्य्यस्वरघातार्व्बुदानि च ।
गलगण्डश्लीपदानि गुड़क्षेपाद्धि कारयेत् ॥ ❋ ॥
दाड़िमामलकाम्लञ्च कपित्थकरमर्द्दकौ ।
मातुलुङ्गाम्लातकञ्च वदरं तित्तिरीफलम् ॥
दधितक्रं काञ्जिकञ्च लकुचं चाम्लवेतसम् ।
अम्लो दन्तग्रहायुक्तो लावण: पाचनो रस: ॥
क्लेदनो वातक्षत् तृष्णो विदाही चानुलोमन: ।
अम्लोऽत्यर्थं सेव्यमान: क्षुर्य्याद्दे दन्तहर्षकम् ॥
घ्नरीरस्य च शैथिल्यस्वरकुण्ठनक्षत्रवेत् ।
छिन्नभिन्नव्रणादीनि पाचयत्यग्निभावत: ॥ ❋ ॥
लवणादियवक्षार: सर्व्वकादिश्च लावण: ।
शोधन: पाचन: क्लेदी विश्लेषसरणादिकृत् ॥
मार्गरोधी मार्दवक्षत् स एक: परिषेवित: ।
गात्रकण्डूकोठशोफवैवर्ण्यं जनयेद्रस: ।
रक्तवातं रक्तपित्तं पुंस्त्वेन्द्रियरुजादिकम् ॥ ❋ ॥
शोधघ्निशुं मूलकञ्च देवदारु च कुष्ठकम् ॥
लवणं जम्बुजफलं सुस्रा गुग्गुलुलाङ्गली ।
कटुको दीपन: शोधी कुष्ठकण्डूकफान्तक्षत् ॥
स्थौल्यालस्यक्लमहर: शुक्रमेदोविरोधन: ।
एकोऽत्यर्थं सेव्यमानो भ्रमदाहादिकृद्भवेत् ॥❋॥
क्षतमाल: करीराणि हरिद्रेन्द्रयवास्तथा ।
स्वादुकण्टकवेत्राणि दृहतीद्वयघृष्टिनी ॥
गुड़ूची च द्रवन्ती च त्रिवृत्कण्डूकपर्ण्यपि ।
कारवेल्लकवार्त्ताकुकरवीरकवासका: ॥
रोहिणी घ्नक्षपुष्पी च कर्कोटो वैजयन्तिका ।
जाती वरुणकं निम्बो ज्योतिष्मती पुनर्नवा ॥
तिक्तो रसश्छेदन: स्याद्रोचनो दीपनस्तथा ।
शोधनो जरदष्णाघ्नो मूर्च्छाकण्डूतिकादिजित् ॥
विण्मूत्रक्लेदसंशोषि अत्यर्थं स च सेवित: ।
मन्यास्तम्भक्षेपकार्त्तिशिर:शूलव्रणादिकृत् ॥❋॥
त्रिफलाघृक्तकौलम्बु आम्रास्रातवटादिकम् ।
तिन्दुकं बकुलं घ्राकं निम्बं सुश्रुचिल्लिका ॥"
निम्बस्थाने पालङ्क्या इति क्वचित् पाठ:।
"कषायो ग्राहको रोपी स्तम्भन: क्लेदशोषण: ।
एकोऽत्यर्थं सेव्यमानो हृद्दयादथ पीड़कृत् ॥
सुखशोषज्वराध्मानमन्यास्तम्भादिकारक: ।❋।
हरिद्रा कुष्ठलवणमेषशृङ्गीवलाह्वयम् ॥
कच्छपी घ्नक्षकी पद्मो पुनर्नवा घृतावरी ।
अग्निमन्थो ब्रह्मदण्डी खदंष्ट्रैरण्डके तथा ॥
यवकोलकुलत्थादि कर्षासीदसस्नुकम् ।
पृथक् समस्तो वातान्तो बहुपित्तहरस्तथा ॥
घृतावरी विदारी च वालकोशीरचन्दनम् ।
दूर्व्वा वट: पिप्पली च वदरी घ्नक्षकी तथा ॥
कदली चोत्पलं पद्मसृङ्बरपटोलकम् । ❋ ।
अथ श्लेष्महरो वर्गो हरिद्रा गुड़कुष्ठकम् ॥
घृतपुष्पी च जाती च शोधारग्वधनाकुली ।❋।
सर्पिस्तैलवसामज्जा स्नेहेषु प्रवरं घृतम् ॥
तथाधीस्मृतिमेधाग्निकाङ्क्षिणां घ्नस्यते घृतम् ।
केवलं पैत्तिके सर्पिर्व्वातिके लवणान्वितम् ॥
देयं बहुकफे वापि शोधक्षारसमन्वितम् ।
ग्रन्थीनाड़ीक्रिमिश्लेष्ममेदोमारुतरोगिषु ॥ ❋ ॥
तैलं लाघवदार्ढ्याय क्रूरकोष्ठेषु देहिषु ।
वातातपाक्षभावातिव्यायामक्षीणधातुषु ॥
रूक्षे क्लेघ्नक्षयात्यग्निवातार्त्तपथेषु च ।
तथा दग्धा हतभ्रष्टा योनिकर्म्मा शिरोरुजि ॥
उत्तमस्य पलं मात्रा त्रिभिश्चाचैश्च मध्यमे ।
जघन्यस्य पलार्द्धेन स्नेहकाथौषधेषु च ॥ ❋ ॥
जलमुष्णं घृते देयं पृथक् तैले न घ्नस्यते ।
स्नेहे पीते तु तृष्णायां पिबेदुष्णोदकं नर: ॥
वातानुलोमदीप्ताग्निवर्च्चोस्निग्धसमं मतम् ।
रूक्षस्य स्नेहनं कार्य्यमतिस्निग्धस्य रूक्षणम् ॥
श्यामाकको रदूषान्नतक्रपिण्याकयष्टिभि: ।
वातश्लेष्मणि वाते वा कफे वा स्वेद इष्यते ॥
न स्वेदयेदतिस्थूलरूक्षदुर्ब्बलमूर्च्छितान् ॥"

इति गारुड़े योगसारे १७७ अध्याय: ॥❋॥

धन्वन्तरिरुवाच ।

"घृततैलादि वक्ष्यामि घ्नणु सुश्रुत रोगघ्नुत् ।
घ्नक्षपुष्पी वचा सोमा ब्राह्मी ब्रह्मसुवर्चला ॥
अभया गुड़ूची चैव अङ्कोलकवाकुची ।
एतैरष्टसमैर्भागैर्घृतप्रस्थं विपाचयेत् ॥
कण्टकार्य्या रसप्रस्थ: क्षीरप्रस्थसमन्वित: ।
एतद्ब्राह्मीघृतं नाम श्रुतिमेधाकरं परम् ॥❋॥
त्रिफलात्रिकवलानिर्गुण्डीनिम्बवासका: ।
पुनर्नवा गुड़ूची च दृहती च घृतावरी ॥
एतैर्घृतं यथालाभं सर्व्वरोगविमर्द्दनम् । ❋ ।
वलाघृतकषाये तु तैलस्यार्द्धाढ़कं पचेत् ॥
कल्कैर्मधुकमञ्जिष्ठाचन्दनोत्पलपद्मकै: ।
कृष्णैलापिप्पलीकुष्ठवंशलागुरुकेशरै: ॥
गन्धाश्वजीवनीयैश्च जीराढ़कसमाश्रितम् ।
एतन्मृद्वग्निना पक्वं स्थापयेद्रजते शुभे ॥
सर्व्ववातविकारांस्तु सर्व्वधात्वन्तराश्रयान् ।
तैलमेतत् प्रशमयेद्बलाख्यं राजवल्लभम् ॥ ❋ ॥
घृतावरीरसप्रस्थं क्षीरप्रस्थं तथैव च ।
घृतपुष्पा देवदारु मांसी श्वेतेक्षकं वला ॥
चन्दनं तगरं कुष्ठं माला चांशुमती तथा ।
एतै: कर्षसमै: कल्कैस्तैलप्रस्थं विपाचयेत् ॥
कुब्जवामनपङ्गूनां वधिरव्यङ्गकुण्ठिनाम् ।
वायुना भग्नगात्राणां ये च सीदन्ति मैथुने ॥
जराजर्जरगात्राणां चाध्मानसुखशोषिणाम् ।
त्वग्गतास्थापि ये वाता: शिरास्नायुगताश्च ये ॥
स वस्तिनाभ्यत्यास्यु तैस्तैव स्याद्घ्राङ्गक: ।
नारायणमिदं तैलं विष्णुनोक्तं रुगर्द्दनम् ॥❋॥
पृथक् तैलं घृतं कुर्य्यात् समस्तैरौषधै: पृथक् ।
घृतावर्य्या गुड़ूच्या वा चित्रके रोचनायुत: ॥
निर्गुण्ड्या वा प्रसारण्या कण्टकार्य्या रसादिभि: ।
वर्षाभानलया वापि वासकेन फलत्रिके: ॥
ब्राह्म्या चैरण्डकेनापि भृङ्गराजेन मुण्डिना ।
मूषल्या दग्धमूलेन खदिरेण वटादिभि: ॥
वटिका मोदको वापि चूर्णं स्यात् सर्व्वरोगघ्नुत् ।
घृतेन मधुना वापि युक्तं खण्डगुड़ादिभि: ।
लवणै: कटुकैर्युक्तं यथाभागञ्च रोगघ्नुत् ॥
चित्रकर्कारुचित्रतामलघ्नहयमारकम् ।
स्वधा च वाला गणिका सघ्नपर्णसुवर्चिकाम् ।
ज्योतिष्मतीञ्च संभृत्य तैलं धीरो विपाचयेत् ।
एतन्निष्यन्दनं तैलं घृघ्नं दद्यात् भगन्दरे ॥
शोधनं रोचनञ्चैव सर्व्ववर्णकरं परम् ।
चित्रकाद्यं महातैलं सर्व्वरोगप्रभञ्जनम् ॥
अजमोद: ससिन्दूरो हरितालनिशोद्वयम् ।
चारद्वयं फेनयुतमार्द्रकं सरलोद्भवम् ॥
इन्द्रवारुण्यपामार्गकदले: कन्दले: समै: ।"
कन्दले: स्थाने स्नन्दने: इति च पाठ: ।
"एभि: सर्षपजं तैलमजाम्लेन च योजितम् ।
गृहधूमेन पचेदेतत् अर्कक्षीरेण संयुतम् ॥
अजमोदादिकं तैलं गण्डमालां व्यपोहति ।
विदग्धस्तु पचेत् पक्वं पक्वञ्चैव विशोधयेत् ॥
रोपणं मृदुभावञ्च तैलेनानेन कारयेत् ।
अजमोदादिकं तैलं महावीर्य्यञ्च रोगघ्नुत् ॥"

इति गारुड़े १७८ अध्याय: ॥

रोगहारी, [न्] पुं, (रोगं हरति तच्छीलः । हृ + णिनिः ।) वैद्यः । इत्यमरः । २ । ६ । ५७॥ रोगनाशके, त्रि ॥

रोगितरुः, पुं, (रोगिणां शोकनाशकस्तरुः ।) अशोकवृक्षः । इति राजनिर्घण्टः ॥

रोगिवल्लभं, क्ली, (रोगिणां वल्लभं प्रियम् ।) औषधम् । इति शब्दचन्द्रिका ॥ रोगिप्रिये, त्रि ॥

रोगी, [न्] त्रि, (रोगोऽस्यास्तीति । रोग + इनिः ।) रोगयुक्तः । तत्पर्य्यायः । आधितः २ विकृतः ३ ग्लानः ४ म्लानः ५ मन्दः ६ आतुरः ७ अभ्यान्तः ८ अभ्यमितः ९ रुग्नः १० सामयः ११ अपटुः १२ । इति राजनिर्घण्टः ॥ आमयावी १३ ग्लांस्नुः १४ । इत्यमरः ॥ * ॥ अथ चिकित्सार्थं रोगिणः परीक्षा । तत्र वाग्भटः ।

"दर्शनस्पर्शनप्रश्नैः परीक्षेदथ रोगिणम् ।
आयुरादि दृशा स्पर्शाच्छीतादेः प्रश्नतोऽपरम् ॥"

आयुरादि । आदिशब्दात् साध्यत्वासाध्यत्वादि । दृशा दर्शनेन । अत्र सम्पदादिभ्यश्चेति भावे क्विप् । स्पर्शात् शीतादेः । शीतोष्णस्नदुकठिनत्वादिना परीक्षणञ्च । प्रश्नतः । उदरलाघवगौरवदृषाद्युभुक्तावलाबलादिना ॥

"मिथ्या दृष्टा विकारा हि दुराख्यातास्तथैव च ।
तथा दुष्परिदृष्टाश्च मोहयेयुश्चिकित्सकान् ॥"

तत्र दर्शनं नेत्रजिह्वामूत्रादेः कर्त्तव्यम् ॥ * ॥ तत्र नेत्रपरीक्षा यथा,—

"नेत्रं स्यात् पवनाद्रूक्षं धूम्रवर्णं तथारुणम् ।
कोटरान्तःप्रविष्टञ्च तथास्रञ्च विलोकनम् ॥
हरिद्राखण्डवर्णञ्च रक्तं वा हरितं तथा ।
दीपदीप्ति सदाहञ्च नेत्रं स्यात् पित्तकोपतः ॥
श्लक्ष्णश्लेष्माग्रवाहुल्यात् स्निग्धं स्यात् सलिलप्लुतम् ।
तथा धवलवर्णञ्च ज्योतिर्हीनं बलान्वितम् ॥
नेत्रं द्विदोषबाहुल्यात् स्याद्दोषद्वयलक्षणम् ।
त्रिदोषलिङ्गं सेवेत तन्मारयति रोगिणम् ॥
त्रिदोषदूषितं नेत्रमन्तर्म्लानं भृशं भवेत् ।
त्रिलिङ्गं सलिलस्रावि प्राज्ञेनोन्मीलयत्यपि ॥"*

अथ जिह्वापरीक्षा ।

"शाकपत्रप्रभा रूक्षा स्फुटिता रसनानिलात् ।
रक्ता श्यामा भवेत् पित्तात्लिग्धार्द्रा धवला कफात् ।
परिदग्धा खरस्पर्शा कृष्णा दोषत्रयेऽधिके ।
सैव दोषद्वयाधिक्ये दोषद्वितयलक्षणा ॥"

अथ मूत्रपरीक्षा ।

"वातेन पाण्डुरं मूत्रं रक्तं नीलञ्च पित्ततः ।
रक्तमेव भवेद्रक्ताद्धवलं फेनिलं कफात् ॥"

अथ शरीरस्य उष्णत्वादिज्ञानार्थं स्पर्शनं कार्य्यम् । तत्र नाड़ीपरीक्षामाह ।

"पुंसो दक्षिणहस्तस्य स्त्रियो वामकरस्य तु ।
अङ्गुष्ठमूलगा नाड़ी परीक्ष्येत भिषग्वरैः ॥
अङ्गुलीभिस्तु तिसृभिर्नाड़ीमवहितः स्पृशेत् ।
तत्रेच्छया सुखं दुःखं जानीयात् कुशलोऽखिलम् ॥
सद्यःस्नातस्य सुस्नस्य क्षुत्तृष्णातपशीलिनः ।
व्यायामश्रान्तदेहस्य सम्यक् नाड़ी न बुध्यते ॥
वातेऽधिके भवेन्नाड़ी प्रत्यक्षा तर्ज्जनीतले ।
पित्ते यक्षा मध्यमायां तृतीयाङ्गुलिगा कफे ॥
तर्ज्जनीमध्यमामध्ये वातपित्तेऽधिके स्फुटा ।
अनामिकायां तर्ज्जन्यां यक्षा वातकफे भवेत् ॥
मध्यमानामिकामध्ये स्फुटा पित्तकफेऽधिके ।
अङ्गुलित्रितयेऽपि स्यात् प्रत्यक्षा सन्निपातिनः ॥
वाताद्वक्रगतिर्नाड़ी पित्तादुत्प्लुत्य गामिनी ।
कफान्मन्दगतिर्ज्ञेया सन्निपातात्तिदुष्टा ॥
वक्रमुत्प्लुत्य चलति धमनी वातपित्ततः ।
वक्रेद्वक्रञ्च मन्दञ्च वातश्लेष्माधिके ततः ॥
उत्प्लुत्य मन्दं चलति नाड़ी पित्तकफेऽधिके ।
कामात् क्रोधात् वेगवहा क्षीणा चिन्ताभयाप्लुता ॥
स्थित्वा स्थित्वा चलेद्दृया सा हन्ति स्थानच्युता तथा ।
अतिक्षीणा च स्फीता च प्राणान् हन्ति न संशयः ॥
ज्वरकोपेन धमनी सोष्णा वेगवती भवेत् ।
मन्दाग्नेः क्षीणधातोश्च सैव मन्दतरा मता ॥
चपला क्षुधितस्य स्यात् तृप्तस्य भवति स्थिरा ।
सुखिनोऽपि स्थिरा ज्ञेया तथा बलवती मता ॥"

इति भावप्रकाशः ॥

(लक्षणान्तरादिकमाह ।

"रोगी यस्यास्ति रोगी स स चिकित्स्यस्तु यादृशः ।
यादृशश्चाचिकित्स्योऽपि वक्ष्यमाणो निशम्यताम् ॥"

तत्र चिकित्स्यः ।

"निजप्रकृतिवर्णाभ्यां युक्तः सत्त्वेन चक्षुषा ।
चिकित्स्यो भिषजां रोगी वैद्यभक्तो जितेन्द्रियः ॥"

सत्त्वं व्यसनाभ्युदयक्रियादिष्वविक्लवताकरं तेन युक्तः । चक्षुषा चक्षुरुपलक्षितेन । ततोऽन्येनापीन्द्रियेण चिकित्स्यः रोगान् मोचयितव्यः । अन्यच्च ।

"आयुष्मान् सत्त्ववान् साध्यो द्रव्यवान् मित्रवानपि ।
चिकित्स्यो भिषजा रोगी वैद्यवाक्यक्रियास्तिकः ॥"

आयुर्वेदोऽस्तीति मतिर्यस्य स आस्तिकः ॥

अथाचिकित्स्यः ।

"चण्डः साहसिको भीरुः कृतघ्नो व्यग्र एव च ।
शोकाकुलो सुमूर्षुश्च विहीनः करणैश्च यः ॥
वैरी वैद्यविद्वेषी श्रद्धाहीनश्च पृच्छकः ।
भिषजामविधेयाः स्युर्नोपक्रम्या भिषग्विधाः ॥
एतानुपाचरन् वैद्यो बहून् दोषानवाप्नुयात् ॥"

चण्डोऽत्यन्तक्रोधशीलः । साहसिकः अविचार्य्यकारी । भीरुर्भयशीलः । कृतघ्नो वैद्यकृतोपकारलोपकः । व्यग्रो व्याकुलः । विहीनः करणैश्च यः निजेन्द्रियशक्तिरहितः । वैरी न चिकित्स्यः कदाचिद्रोगोद्रेके अपवादभयात् । वैद्यविद्वेषी वैद्यधूर्त्तः । तथा च सुश्रुतः ।

"स न सिध्यति वैद्यस्तु गृहे यस्य न पूज्यते ।"

शङ्कितो वैद्यविश्वासरहितः । भिषजामविधेयाः ॥ वैद्यवचनाविधायिनः । भिषग्विधा वैद्यतुल्याः । एते नोपक्रम्याः न चिकित्स्याः । अथ दूतस्य लक्षणम् ।

"यश्चिकित्सकमानेतुं याति दूतः स कथ्यते ।
स च यादृक् समुचितस्तादृगत्र निगद्यते ॥
दूताः सुजातयोऽव्यङ्गाः पटवो निर्म्मलाम्बराः ।
सुखिनोऽश्वरथारूढाः शुभ्रपुष्पफलेर्युताः ॥
सजातयः सुचेष्टाश्च सजीवदृग्निसङ्गताः ।
भिषजं समये प्राप्ता रोगिणः सुखहेतवे ॥"

संजातयः रोगिसमानजातयः ।

"यस्यां प्राणमरुद्वाति सा नाड़ी जीवसंज्ञिता ॥"

अथ दूतस्य यात्रायां शकुनविचारः ।

"वैद्याह्वानाय दूतस्य गच्छतो रोगिणः क्षते ।
न शुभं सौम्य शकुनं प्रदीप्तन्तु सुखावहम् ॥"

प्रदीप्तमग्निं दूतो रोगी रिक्तहस्तो वैद्यं न पश्येत् । तथा च ।

"रिक्तहस्तो न पश्येत्तु राजानं भिषजंगुरुम् ॥"

इति भावप्रकाशस्य पूर्ब्बखण्डे प्रथमे भागे ॥)

रोग्यं, त्रि, (रोगाय हितमिति । रोग + यत् ।) अपथ्यम् । अहितम् । इति शब्दचन्द्रिका ॥ रोगसम्बन्धिनि च ॥

रोचकः, पुं, (रोचयतीति । रुच् + णिच् + ण्वुल् ।) क्षुधा । तत्पर्य्यायः । बुभुक्षा २ अशना ३ जिघत्सा ४ रुचिः ५ । इति हेमचन्द्रः । ३ । ५७ ॥ कदली । इति शब्दरत्नावली ॥ राजपलाण्डुः । अवदंशः । इति राजनिर्घण्टः ॥ अग्निपर्णभेदः । भण्डिउर इति नेपालदेशे ख्यातः । तत्पर्य्यायः । निशाचरः २ धनहरः ३ कितवः ४ गणहासकः ५ । अस्य गुणाः । मधुरत्वम् । तिक्तत्वम् । कटुत्वम् । पाके कटुत्वम् । लघुत्वम् । तीक्ष्णत्वम् । हृद्यत्वम् । हिमत्वम् । कुष्ठकण्डूकफानिलरक्तोऽग्नी खेदमेदोऽस्रज्वरगन्धविषव्रणनाशित्वञ्च । इति भावप्रकाशः ॥ (काचकूप्यादिकारकः । यथा, रामायणे । २ । ८३ । १३ ।

"माथूरकाः क्राकचिका वेधका रोचकास्तथा ॥"

"रोचकाः काचकूप्यादिकर्त्तारः इति कतकः ।" इति तट्टीका ॥) रुचिकारके, त्रि ॥ (यथा, सुश्रुते । १ । ४६ । मांसवर्गे ।

"संग्राही रोचको बल्यस्तेषामेषो ज्वरापहः ॥")

रोचनः, पुं, (रोचयतीति । रोचि + नन्दादित्वात् ल्युः ।) कूटशाल्मलिः । इत्यमरः ॥ (तस्य पर्य्यायो यथा,—

रोचनि

"कुत्सितः ग्राम्यालिः प्रोक्तो रोचनः कूट-
ग्राम्यालिः ॥"
इति भावप्रकाशे । १ । १ ॥
काम्पिल्लः । तत्पर्य्यायो यथा,—
"काम्पिल्लः कर्कशग्रन्थो रक्ताङ्गो रोचनोऽपि
च ॥"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥)
श्वेतशिग्रुः । पलाण्डुः । आरग्वधः । करञ्जः । अङ्कोटः । दाड़िमः । इति राजनिर्घण्टः ॥ (देवयोनिविशेषः । यथा, हरिवंशे ।१६६।७५।
"कुम्भाण्डः कुम्भमूर्द्धा च रोचनो वैकृतोग्रहः ॥"
दक्षिणापुत्राणामन्यतमः । स च स्वायम्भुवमन्वन्तरे देवविशेषः । इति भागवतम् । ४ । १ । ७ ॥ स्वारोचिषमन्वन्तरे इन्द्रः । इति च तत्रैव ।८।१।२० ॥ भारतवर्षान्तर्गतपर्व्वतविशेषः । यथा, मार्कण्डेये । ५७ । १३ ।
"तुङ्गप्रस्थो नागगिरी रोचनः पाण्डुराचलः ॥")
त्रि, रोचकः । इति मेदिनी । ने, ११६ ॥ (यथा, सुश्रुते । १ । ४६ । ग्राकवर्गे ।
"तृष्णोष्णं रोचनं हृद्यं सक्षेद्रं लघु दीपनम् ॥"
दीप्तिग्राही । यथा, हरिवंशे । १२६ । ३५ ।
"अक्षरं रोचनं चारुग्राखं
महाबलं धर्म्मनेतारमीड्यम् ।
सहस्रनेत्रं शतवर्म्माणमुग्रं
महादेवं विश्वरूपं नमस्ये ॥"
शोभमानः । यथा, भट्टिः । ६ । ७३ ।
"भृङ्गालिकोकिलकुडभिर्वाग्नेः पश्य लक्ष्मण ।
रोचनैर्भूषितां पम्पामसाकं हृदयाविधम् ॥"
अनुरागकरः । यथा, भागवते । १ । १० ।११ ।
"सत्सङ्गानुसक्तदुःसङ्गो हातुं नोत्सहते बुधः ।
कीर्त्यमानं यशो यस्य सकृदाकर्ण्य रोचनम् ॥")
रोचनकः, पुं, (रोचयतीति । रोचि + ल्युः । ततः कन्) जम्बीरः । इति राजनिर्घण्टः ॥ (गुणादयोऽस्य जम्बीरशब्दे ज्ञातव्याः ॥)
रोचनफलः, पुं, (रोचनं रुचिकरं फलमस्य ।) बीजपूरकः । । इति राजनिर्घण्टः ॥
रोचनफला, स्त्री, (रोचनं रोचकं फलमस्याः ।) चिर्भिटा । इति राजनिर्घण्टः ॥
रोचना, स्त्री, (रोचते या । रुच् + "बहुलमन्यापि।" उणा० २ । ७८ । इति युच् । टाप् ।) रक्तकङ्कारम् । गोपित्तम् । गोरोचना इति ख्यातम् । (यथा, मनुः । ८ । २३४ ।
"कर्णौ चर्म्म च बालांश्च वस्तिं स्नायुञ्च रोचनाम् ।
पशुषु स्वामिना दत्तान् स्तेयञ्चाङ्गानि दर्शयेत् ॥")
वरयोषित् । इति मेदिनी । ने, ११८ ॥ (वसुदेवभार्य्या । यथा, भागवते । ६ । २४ । ४५ ।
"पौरवी रोहिणी भद्रा मदिरा रोचना इला ।
देवकी प्रमुखाश्चासन् पत्न्य आनकदुन्दुभेः ॥")
रोचनिका, स्त्री, (रोचनैव । स्वार्थे कन् । टाप् अत इत्वम् ।) वंशरोचना । इति राजनिर्घण्टः ॥ शुक्लारोचनी । इति रत्नमाला ॥

रोटिका

रोचनी, स्त्री, (रोचते इति । रुच् + ल्युट्यल्युटौ बहुलमिति ल्युट् । ततो ङीष् ।) आमलकी । गोरोचना । इति राजनिर्घण्टः ॥ मनःशिला । इति हेमचन्द्रः ॥ श्वेतचित्रता । गुँड़ारोचनीतिख्यातवणिग्द्रव्यम् । तत्पर्य्यायः । काम्पिल्लः २ कर्कशः ३ चन्द्रः ४ रक्ताङ्गः ५ । इत्यमरः ॥ कम्पिल्लः ६ कम्पीलः ७ कम्पिलः ८ काम्पिल्यः ९ रेचनी १० । इति भरतः ॥ पर्य्यायान्तरं गुणाश्च कम्पिल्लकशब्दे द्रष्टव्याः ॥
रोचमानः, पुं, (रोचते इति । रुच् + शानच् ।) अश्वग्रीवाख्यरोमावर्त्तः । यथा,—
"ग्रीवृत्तो हृदयावर्त्तो रोचमानो गलोद्भवः ॥"
इति चिकाख्यशेषः ॥
(यथा, माघे । ५ । ४ ।
"अश्वाः प्रधुर्वसुमतीमतिरोचमाना-
स्तूर्णं पयोधय इवोर्म्मिभिरापतन्तः ॥"
नृपविशेषः । यथा, महाभारते । १ । ६७।१८।
"अश्वग्रीव इति ख्यातः सत्त्ववान् यो महासुरः ।
रोचमान इति ख्यातः पृथिव्यां सोऽभवन्नृपः ॥"
दीप्यमाने, त्रि । यथा, कथासरित्सागरे । ७४ । ७८ ।
"रोचमानैः समायुक्तचूड़ामण्यङ्गदादिभिः ।
गन्धर्व्वकुलसम्भूतिसंसिद्धैरिव भूषितम् ॥")
रोचिः, [स्] क्ली, (रोचतेऽनेनेति । रुच् + बाहुलकात् इसिन् । इत्युज्ज्वलः । २ ।११२ ।) प्रभा । इत्यमरः ॥ (यथा, माघे । १ । २१ ।
"रथाङ्गपाणेः पटलेन रोचिषा-
मधित्विषः संवलिता विरेजिरे ॥")
रोचिष्णुः, त्रि, (रोचते तच्छीलः । रुच् + "अलं कञ् निराकाङ्क्षिणि।" ३ । २ । १३६ । इति इष्णुच् ।) अलङ्कारादिना दीप्तिशीलः । तत्पर्य्यायः । विभ्राट् २ भ्राजिष्णुः ३ । इत्यमरः ॥ (यथा, कथासरित्सागरे । ६४ । ६ ।
"तत्र शूकरवृन्दानि भिन्दन् बाणैर्निरन्तरम् ।
श्यामलाम्बररोचिष्णुस्तमांसीव रविः करैः ॥"
रोचकः । यथा, सुश्रुते । १ । ४५ । मद्यवर्गे ।
"सुगन्धि दीपनं हृद्यं रोचिष्णु क्षमिनाशनम् ॥")
रोची, स्त्री, (रोचते इति । रुच् + इन् । वा ङीष् ।) छिलमोचिका । इति शब्दरत्नावली ॥
रोची, [न्] त्रि, (रोचते इति । रुच् + णिनिः ।) रोचिष्णुः । इति हेमचन्द्रः ॥
रोच्यं, त्रि, (रुच् + ण्यः । "यजयाचरुचप्रवचर्चश्च ।" ७ । ३ । ६६ । इति कवर्गादेशो न ।) प्रकाश्यम् । प्रीतिविषयः । रुचधातोः कर्म्मणि यप्रत्ययेन निष्पन्नोऽयम् ॥
रोट्, [ष्] त्रि, (रुष् + "अन्येभ्योऽपि दृश्यन्ते ।" ३ । २ । ७५ । इति विच् ।) हिंस्रः । वधकः । रोषतीति विचि गुणः । इति सुग्धबोधटीकायां दुर्गादासः ॥
रोटिका, स्त्री, पिष्टकविशेषः । रोटी इति रुटी इति च भाषा । तत्करणप्रकारमाह ।

रोदनं

"शुष्कगोधूमचूर्णेन किञ्चित् पुष्टाञ्च पोलिकाम् ।
तप्तके स्वेदयेत् कृत्वा भूयोऽङ्गारेऽपि तां पचेत् ॥
सिद्धेषा रोटिका प्रोक्ता गुणानस्याः प्रचक्ष्महे ।
रोटिका बलकृद्वृष्या हृद्या धातुवर्द्धनी ॥
वातघ्नी कफकृद्गुर्व्वी दीप्ताग्नीनां प्रपूजिता ॥"
अथ लेटी ।
"सूक्ष्मगोधूमचूर्णन्तु साम्बुगाढ़ं विमर्द्दयेत् ।
विधाय वटकाकारं निर्धूमेऽग्नौ घृते पचेत् ॥
अङ्गारकर्कटी ह्येषा हृद्या वृष्या सुकृता लघुः ।
दीपनी कफहृद्वल्या पीनसश्वासकासजित् ॥"
अथ यवरोटिका ।
"यवजा रोटिका रूक्षा मधुरा विषदा लघुः ।
मलशुक्रानिलकरी बल्या हन्ति कफामयान् ।
पीनसश्वासकासांश्च मेदोमेहगलामयान् ॥"
अथ माषरोटिका ।
"पूर्णं यच्चुष्कमाषाणां चमसी साभिधीयते ।
चमसीरचिता रोटी कथ्यते बलभद्रिका ॥
रूक्षोष्णा वातला बल्या दीप्ताग्नीनां प्रपूजिता ।
माषाणां दलयस्तोये स्थापिताश्चक्तकञ्चुकाः ॥
आतपे शोषिता यन्त्रे पिष्टास्ता धूमसी स्मृता ।
धूमसीरचिता सैव प्रोक्ता भर्भरिका बुधैः ॥"
भर्भरिकास्थाने सुभुंरिका इति गुगुंरिका इति वा पाठः ।
"भर्भरी कफपित्तघ्नी किञ्चिद्वातकरी स्मृता ॥"
अथ चणकरोटिका ।
"चाणक्या रोटिका रूक्षा श्लेष्मपित्तास्रनुद्गुरुः ।
विष्टम्भिनी न चक्षुष्या तद्गुणा तिलपिण्याकुली ॥"
इति भावप्रकाशः ॥
रोड, ऋ अनादरे । इति कविकल्पद्रुमः ॥ (भ्वा० पर० सक० सेट् ।) ऋ, अररोड़त् । इति दुर्गादासः ॥
रोदः, [स्] क्ली (रुद् + असुन् ।) स्वर्गः । भूमिः । इति मेदिनी । से, ३३ ॥ (यथा, ऋग्वेदे । ६ । २२ । ५ ।
"एते पृष्ठानि रोदसोर्विप्रयन्तो व्यानशुः ॥")
रोदनं, क्ली, (रुद् + ल्युट् ।) क्रन्दनम् । (यथा, चाणक्यशतके । ६२ ।
"दुर्ब्बलस्य बलं राजा बालानां रोदनं बलम् ।
बलं मूर्खस्य मौनित्वं चौराणामनृतं बलम् ॥")
असु । इति मेदिनी । ने, ११६ ॥ तस्य शुभाशुभं यथा,—
"अनश्रु स्निग्धरुदितमदीनं सुभदं नृणाम् ।
प्रचुराश्रु दीनं रूक्षञ्च रुदितं न सुखावहम् ॥"
इति गारुड़े ६६ अध्यायः ॥
कपिलाधेनूनां नेत्राम्बुना रत्नसम्भवो जातः । यथा,—
"युद्धे मुनिं मृतं दृष्ट्वा रुरोद कपिला मुहुः ॥"
इत्युपक्रम्य ।
"तदश्रुबिन्दुना मर्त्ये रत्नसंघो बभूव ह ॥"
रोदनाश्रुपतनेन मृतानां नरकं स्यात् । यथा,—
"ज्ञानिनो मा रुदन्त्येव मा रोदीः पुत्र साम्प्रतम् ।

रोदनाश्रुप्रपतवान्मृतानां नरकं ध्रुवम् ॥"
इति ब्रह्मवैवर्त्ते गणपतिखण्डे २७ अध्यायः ॥
मृतमुद्दिश्य रोदननिषेधो यथा,—
"श्लेष्माश्रु बान्धवैर्मुक्तं प्रेतो भुङ्क्ते यतोऽवशः।
अतो न रोदितव्यं हि क्रिया: कार्य्या विधानतः॥"
इति शुद्धितत्त्वम् ॥
रोदनिका, स्त्री, (रोदनं अश्रु पातयत्वेनास्त्यस्येति। रोदन+ठन्।) यवासः। इति राजनिर्घण्टः ॥ (विषयोऽस्य यवासशब्दे ज्ञातव्यः ॥)
रोदनी, स्त्री, (रुद्यतेऽनयेति। रुद्+करणे ल्युट्। ङीप्।) दुरालभा। इत्यमरः। २। ४। ६२ ॥
रोदसी, स्त्री, (रोदस्+गौरादित्वात् ङीष्।) स्वर्गः। भूमिः। इत्यमरः। १। ३। २२८ ॥
रोदसी, द्य, स्वर्गः। भूमिः। यथा,—
"द्यावापृथिव्यौ रोदस्यौ रोदसी रोदसीति च॥"
इति भरतधृतकोषः ॥
रौदस्यौ, स्त्री, भूमिस्वर्गौ। यथा,—
"प्रस्फुरन्त्यापि भूद्यावौ रोदस्यौ रोदसी च ते ॥"
इत्यमरः। १। ३। २२८ ॥
"भूभूमिः द्यौराकाशं एते सहिते विशेषिते च रोदसीरोदःशब्दयोर्वाच्ये इति भूद्यावौ परामृश्येते एतेन द्वैवन्तसान्तशब्दद्वयेन एकवचनान्तेनापि भूद्यावौ समुदिते उच्येते।
'रोदश्च रोदसी चापि दिवि भूमौ पृथक् पृथक्।
सह प्रयोगेऽप्यनयो रोदः स्यादपि रोदसी ॥'
इति विश्वः ॥
'रोदसी रोदसा सार्द्धं पृथ्वीस्वर्गौ दिवि स्थितौ ॥'
इत्यजयः ॥
रोदसीत्ययमप्यस्ति। यथा। द्यावापृथिव्यौ रोदस्यौ रोदसी रोदसीति चेति।" इति तट्टीकायां भरतः ॥
रोधः, पुं, (रुणद्धि जलमिति। रुध्+घञ्।) नदीतीरम्। इत्यमरटीकायां भरतः। १।१०।७॥ (रुध्+घञ्। रोधनम्। यथा, मार्कण्डेये। १३। १।
"अहं वैश्यकुले जातो जन्मन्यस्मात्तु सप्तमे।
समतीते गवां रोधं निपाने कृतवान् पुरा ॥")
रोधः, [स्] क्ली, (रुणद्धि वार्य्यादिकमिति। रुध+"सर्व्वधातुभ्योऽसुन्।" उणा० ४। १ ८८। इति असुन्।) नदीतीरम्। इत्यमरः। १। १०। ७ ॥ (यथा, रघुः। ५। ४२।
"स वर्म्मदारोधसि बीरकाणां
मदद्विरानर्च्छितनक्तमाशे।
निवेशयामास विभङ्गिताध्वा
श्रान्तं रजोधूसरकेतु सैन्यम् ॥")
रोधनः, त्रि, (रुणद्धीति। रुध+ल्युः।) रोधकर्त्ता। (रुध्+भावे ल्युट्।) रोधे, क्ली। इति व्याकरणम् ॥ (यथा, भागवते। ३। ३०। २७।
"प्रातनं गिरिदुर्गेभ्यो रोधनं चामुगर्त्तयोः ॥")
रोधवक्रा, स्त्री, (रोधेव वक्रा।) नदी। यथा। निम्नगा रोधवक्रा च सवन्ती सिन्धुरापगेति नदीपर्य्याये भागुरिः। इति भरतः ॥
रोधोवक्रा, स्त्री, (रोधसा वक्रा।) नदी। इति त्रिकाण्डशेषः ॥
रोधोवती, स्त्री, (रोधोऽस्त्यस्या इति। रोधस्+मतुप्। ङीप्।) नदी। इति राजनिर्घण्टः ॥
रोध्रं, क्ली, (रुध्यतेऽनेन। रुध+बाहुलकात् रन्।) अपराधः। पापम्। इति मेदिनी। रे, ८१ ॥
रोध्रः, पुं, क्ली, (रोध्र+अण्।) रोध्रवृक्षः। इति मेदिनी राजनिर्घण्टश्च ॥ (यथा, सुश्रुते। १। १२।
"मधूच्छिष्टं समधुकं रोध्रं सर्ज्जरसं तथा।
मञ्जिष्ठां चन्दनं मूर्व्वां पिष्ट्वा सर्पिर्विपाचयेत्॥")
रोध्रपुष्पः, पुं, (रोध्रस्येव पुष्पमस्य।) मधूकवृक्षः। इति राजनिर्घण्टः ॥ (मण्डलिसर्पजातिविशेषः। तद्यथा।"आदर्शमण्डलः श्वेतमण्डलो रक्तमण्डलश्चित्रमण्डलः पृथलो रोध्रपुष्पो मिलिन्दको गोनसः इत्यादिषु।" इति सुश्रुते कल्पस्थाने चतुर्थेऽध्याये ॥)
रोध्रपुष्पिणी, स्त्री, (रोध्र इव पुष्पात्तीति। पुष्प+णिनि। ङीप्।) धातकीवृक्षः। इति राजनिर्घण्टः ॥
रोपः, पुं, (रुप्यतेऽनेनेति। रुप विमोहे+घञ्।) बाणः। इत्यमरः ॥ (रुह+णिच्+घञ्।) रोपणम्। इति मेदिनी। पे, २ ॥ (यथा, महाभारते। १३। ५८। २४।
"एता जात्यस्तु वृक्षाणां तेषां रोपे गुणाञ्छिमे॥")
छिद्रे, क्ली। इति हेमचन्द्रः ॥
रोपणं, क्ली, विमोहनम्। रुपधातोर्भावेऽनट्प्रत्ययेन निष्पन्नम्॥ जननम्। प्रादुर्भावः। आन्तरुहधातोः पञ्चादेशे अनट्प्रत्ययेन निष्पन्नम्। इति व्याकरणम्॥ (यथा, सुश्रुते। १। १५।
"सन्धिसंश्लेषणक्षेत्ररोपणापूरणबलस्थैर्य्यकृत्स्नेहा पञ्चधा प्रविभक्ता उदकर्म्मातुग्रहं करोति॥")
अञ्जनविशेषः। यथा,—
"रोपणं रसकं पिष्ट्वा सम्यक् संभाव्य वारिणा।
गृह्णीयात्तज्जलं सर्व्वं त्रपेचूर्णमधोगतम्॥
शुष्कञ्च तज्जलं सर्व्वं पर्पटीसन्निभं भवेत्।
विचूर्ण्य भावयेत् सम्यक् त्रिफलारसैः॥
कर्पूरस्य रसस्तत्र दशमांशेन निक्षिपेत्।
अञ्जयेन्नयनं तेन सर्व्वदोषोपशान्तये॥
समस्तनेत्ररोगघ्नं चूर्णमेतन्न संशयः॥"
रोपणीवर्त्तिः, स्त्री, नेत्राञ्जनभेदः। यथा। अथ रोपणीवर्त्तिः।
"अग्नीतिनिम्बपुष्पाणि यष्टिः पिप्पलितण्डुलाः।
जातीपुष्पाणि पद्माग्र्यमरिचानि च षोड़श॥
सूक्ष्मं पिष्ट्वाम्बुना वर्त्तिः कृता कुसुमिकाभिधा।
तिमिरार्ज्जुनशुक्राणां नाशिनी मांसदृद्धिनुत्।
एतस्या अञ्जने प्रोक्ता मात्रा सार्द्धहरेणुका॥"
कुसुमिकांवटी रोपणी। इति भावप्रकाशः॥
रोप्यातिरोप्यः, पुं, धान्यविशेषः। अस्य गुणाः।
"रोप्यातिरोप्या लघवः ग्रीष्मपाका गुणोत्तराः।
अदाहिनो दोषहरा बल्या मूत्रविवर्द्धनाः॥"
इति राजवल्लभः॥
रोमं, क्ली, जलम्। इति शब्दचन्द्रिका॥ (लोम। यथा, महाभारते। ३। ११२। ६।
"द्वौ चास्य पिण्डावधरेण कण्ठा-
दजातरोमौ सुमनोहरौ च॥"
जनपदविशेषः। इति केचित्॥)
रोम, [न्] क्ली, (रौतीति। रु+"नामन्सीमन्व्योमन्रोमन्निति।" उणा० ४। १५०। इति मनिन्प्रत्ययेन साधुः।) शरीरजाताङ्कुरः। रोंआ इति भाषा। तत्पर्य्यायः। लोम २ अङ्गजम् ३ त्वग्जम् ४ चर्म्मजम् ५ तनूरुहम् ६। इति राजनिर्घण्टः॥ स्थानविशेषे तस्य शुभाशुभसूचकत्वं यथा,—
"अल्परोमयुता श्रेष्ठा जङ्घा हस्तिकरोपमा।
रोमैकैकं कूपके स्यान्नृपाणामतु महात्मनाम्॥
द्वे द्वे रोमे पण्डितानां श्रोत्रियाणां त्रयं त्रयं च।
रोमत्रयं दरिद्राणां रोगी निर्म्मांसजानुकः॥"
इति गारुड़े ६३ अध्यायः॥
रूक्षस्थरोम्णोऽसाध्यत्वं यथा,—
"न सर्पग्राम्यैः क्रीड़ेत स्वानि स्वानि न संवृणुयात्।
रोमाणि च रूक्षस्थानि नाग्निरूपेण सदा व्रजेत्॥"
इति कौर्म्मे उपविभागे १५ अध्यायः॥
(जनपदविशेषः। तद्देशवासिनि। पुं भूम्नि। यथा, महाभारते। ६। ६। ५५।
"बाभ्रवयो दीर्घाः पार्श्वा रोमाणः कृष्णबिन्दवः॥")
रोमकं, क्ली, (रोमे कायतीति। के+कः।) पांशुलवणम्। (यथा, सुश्रुते। १। ४२।
"सैन्धवसौवर्च्चलविड़पाक्यरोमकसामुद्रकपक्रिमयवक्षारोषत्सुतसुवर्च्चिकाप्रभृतीनि समासेन लवणो वर्गः॥") अयस्कान्तभेदः। इति राजनिर्घण्टः॥ (रोमैव। जनपदविशेषः। तद्देशवासिनि, पुं भूम्नि। यथा, महाभारते। २।५०।१५।
"औद्रीकागस्तवार्षांश्च रोमकान् पुरुषादकान्॥")

रोमकन्दः, पुं, (रोमयुक्तः कन्दो मूलमस्य ।) पिण्डालुः । इति राजनिर्घण्टः ॥

रोमकपत्तनं, क्ली, (रोमकं पत्तनमिति कर्म्मधारयः ।) देशविशेषः । रूम् इति पारस्यभाषा । यथा,—

"लङ्काकुमध्ये यमकोटिरस्याः
प्राक् पश्चिमे रोमकपत्तनञ्च ।
अधस्तात् सिद्धपुरं सुमेरुः
सौम्येऽथ याम्ये वड़वानलञ्च ।
कुवृत्तपादान्तरितानि तानि
स्थानानि षड़् गोलविदो वदन्ति ॥"
इति सिद्धान्तशिरोमणौ गोलाध्यायः ॥

रोमकूपः, पुं, (रोम्णां कूपः ।) लोमविवरम् । यथा,—

"प्रजापतिश्चात्तमालां ददौ ब्रह्मा कमण्डलुम् ।
समस्तरोमकूपेषु निजरश्मीन्दिवाकरः ॥"
इति मार्कण्डेयपुराणे देवीमाहात्म्यम् ॥
(तथा च ।
"ऊर्द्ध नासाक्षिकर्णास्यैर्मेढ्योनिगुदैरधः ।
कुपितं रोमकूपैश्च समस्तैस्तत्प्रवर्त्तते ॥"
इति वाभटे निदानस्थाने तृतीयेऽध्याये ॥)

रोमकेशरं, क्ली, (रोम्णां केशरमिव ।) चामरम् । इति त्रिकाण्डशेषः ॥

रोमगुच्छः, पुं, (रोम्णां गुच्छस्तवकः ।) चामरम् । इति हेमचन्द्रः । २।३८१॥ हारावली च । १७३॥

रोमगुच्छकः, पुं, (रोमगुच्छ एव । स्वार्थे कन् ।) चामरम् । इति जटाधरः ॥

रोमन्थः, पुं, उद्गीर्य चर्व्वणम् । इत्यमरः ॥ जाओरकाटा इति भाषा ॥ (यथा, रघुः । १ । ५२ ।
"ऋष्टैर्वर्त्तितरोमन्थमुटजाङ्गनभूमिषु ॥")

रोमभूमिः, स्त्री, (रोम्णां भूमिरिव ।) चर्म्म । इति राजनिर्घण्टः ॥

रोमलता, स्त्री, (रोम्णां लतेव ।) लोमावलिः । इति हेमचन्द्रः । ३ । २७० ॥

रोमवान्, [त्] त्रि, लोमविशिष्टः । रोमशब्दादस्त्यर्थे मतुप्प्रत्ययेन निष्पन्नः ॥

रोमविकारः, पुं, (रोम्णां विकारः ।) रोमाञ्चः । इति हलायुधः ॥

रोमशः, पुं, (रोमाणि सन्त्यस्येति । रोमन् + "लोमादिपामादिपिच्छादिभ्यः शनेलचः ।" ५ । २ । १००। इति शः ।) मेषः । इति हेमचन्द्रः ॥ पिण्डालुः । कुम्भी । शूकरः । इति राजनिर्घण्टः ॥ (ऋषिविशेषः । यथा, भागवते । ६ । १५ । १४ ।
"रोमशस्यावनो दत्त आसुरिः सपतञ्जलिः ॥"
अस्य ऋषेरेकलोमपतने एकेन्द्रपातो भवेत् एवं सर्व्वलोमपतनकालस्तस्य परमायुः । एतावद्योऽप्यसौ जीवामि वा कियन्ति दिनानीति चिन्तयन् निवस्तुं गृहं न निर्म्ममे केवलं वर्षासु धारापातनिवृत्तये मस्तकविन्यस्तकटस्तपश्चरति । विशेषविवरणमस्य ब्रह्मवैवर्त्ते श्रीकृष्णजन्मखण्डे

द्रष्टव्यम् ॥ क्ली, उपस्थम् । यथा, ऋग्वेदे । १० । ८६ । १६ ।
"सेदीशे यस्य रोमशं निषेदुषो
विजृम्भते विश्वमादिन्न शुत्तरः ॥"
"निषेदुषः शयानस्य रोमशमुपस्थं विजृम्भते विवृतं भवति ।" इति तद्भाष्ये सायणः ॥) अतिशयलोमविशिष्टे, त्रि ॥ (यथा, मनुः । ३ । ७ ।
"हीनक्रियं निष्पुरुषं निश्छन्दो रोमशार्शसम् ॥")

रोमशफलः, पुं, (रोमशं फलमस्य । टिण्डिशवृक्षः । इति राजनिर्घण्टः ॥

रोमशा, स्त्री, (रोमाणि सन्त्यस्या इति । रोमन् + शः । टाप् ।) दग्धावृक्षः । इति राजनिर्घण्टः ॥ लोमशा च ॥ (दृहस्पतिकन्या । यथा, ऋग्वेदे । १ । १२७ । ७ ।
"सर्व्वाहमस्मि रोमशा गन्धारीणामिवाविका ॥")

रोमश्मूकं, क्ली, (रोमयुक्तं श्मूकं यस्य ।) स्त्रीशेयकम् । इति भावप्रकाशः ॥

रोमहर्षः, पुं, (रोम्णां हर्षः ।) रोमाञ्चः । इति हलायुधः ॥ (यथा, गीतायाम् । १ । २६ ।
"वेपथुश्च शरीरे मे रोमहर्षश्च जायते ॥")

रोमहर्षणं, क्ली, (रोम्णां हर्षणम् ।) रोमाञ्चः । इत्यमरः ॥ (रोम्णां हर्षणं यस्मात् । रोमाञ्चकरे, त्रि । यथा, गीतायाम् । १८ । ७४ ।
"संवादमिदमश्रौषमद्भुतं लोमहर्षणम् ॥")

रोमहर्षणः, पुं, सूतः । अस्य व्युत्पत्तिर्यथा,—

"अस्य ते सर्व्वरोमाणि वचसा हृषितानि यत् ।
द्वैपायनस्य भगवंस्ततो वै रोमहर्षणः ।
भवन्तमेव भगवान् याजहार स्वयं प्रभुः ॥"
इति कौर्म्मे १ अध्यायः ॥
(स तु व्यासशिष्यः । यथा, भागवते । १० । ७८ । २२ ।
"सोऽर्चितः सपरीवारः कृतासनपरिग्रहः ।
रोमहर्षणमासीनं महर्षेः शिष्यमैक्षत ॥"
अस्यान्यद्विवरणं लोमहर्षणशब्दे द्रष्टव्यम् ॥)

विभीतकवृक्षः ॥ इति मेदिनी । ने, ११६ ॥

रोमाञ्चः, पुं, (रोम्णां अञ्चः उद्गमः ।) रोमहर्षणम् । इत्यमरः ॥ पुलककण्टकरोमविक्रिया रोमोद्गमरोमहर्षश्चात्र । इति भरतः ॥ (स तु सात्त्विकभावानामन्यतमः । यथा, साहित्यदर्पणे । ३ । १६६ ।
"स्तम्भः स्वेदोऽथ रोमाञ्चः स्वरभङ्गोऽथ वेपथुः ।
वैवर्ण्यमश्रुप्रलय इत्यष्टौ सात्त्विकाः स्मृताः ॥"
"हर्षाद्भुतभयादिभ्यो रोमाञ्चो रोमविक्रिया ॥")

रोमाञ्चिका, स्त्री, (रोमाञ्च उत्पाद्यत्वेनास्त्यस्या इति । रोमाञ्च + ठन् ।) वृश्चीवृक्षः । इति राजनिर्घण्टः ॥

रोमाञ्चितः, त्रि, (रोमाञ्चः सञ्जातोऽस्येति । रोमाञ्च + "तदस्य सञ्जातं तारकादिभ्य इतच् ।" ५ । २ । ३६ । इति इतच् ।) जातपुलकः । रोमाञ्चविशिष्टः । तत्पर्य्यायः । हृष्टरोमा २ । इति त्रिकाण्डशेषः ॥ (यथा, मार्कण्डेये । १०० । २० ।
"स च शान्तिर्गते वह्नौ परितुष्टेन चेतसा ।
हर्षरोमाञ्चिततनुः प्रविवेशाश्रमं गुरोः ॥")

रोमाली, स्त्री, (रोम्णां आली श्रेणिर्यत्र ।) वयःसन्धिः । इति शब्दमाला ॥ (रोम्णां आली ।) रोमावली । (यथा, आर्य्यासप्तशत्याम् । ३३८ ।
"निधिनिःक्षेपस्थानस्योपरि चिह्नार्थमिव
लता निहिता ।
लोभयति तव तनूदरि जघनतटादुपरि
रोमाली ॥")

रोमालुः, पुं, (रोमविशिष्ट आलुः ।) पिण्डालुः । इति राजनिर्घण्टः ॥

रोमालुविटपी, [न्] पुं, (रोमालुरिव विटपी वृक्षः ।) कुम्भीवृक्षः । इति राजनिर्घण्टः ॥

रोमावली, स्त्री, (रोम्णामावली ।) नाभेरूर्द्धलोमश्रेणी । तत्पर्य्यायः । रोमलता २ । इति हेमचन्द्रः । ३ । २७० ॥ रोमाली ३ । इति शब्दमाला ॥ लोमराजी ४ । यथा,—

"तस्याः प्रविष्टा नतनाभिरन्ध्रं
रराज तन्वी नवलोमराजी ।
नीवीमतिक्रम्य सितेतरस्य
तन्मेखलामध्यमणेरिवार्चिः ॥"
इति कुमारसम्भवम् ॥
सा च यौवनारम्भे भवति । अज्ञातयौवना यथा,—

"नीरात्तीरसुपागता श्रवणयोः सीत्नि स्फुरन्नेत्रयोः
श्रोत्रे लग्नमिदं किमुत्पलमिति ज्ञातुं करं
न्यस्यति ।
सैवालाङ्कुरशङ्कया शफरिसुखी रोमावलीं
प्रोक्षति
आन्तास्मीति सखीमविदितश्रोणीभरा
पृच्छति ॥"
इति रसमञ्जरी ॥

रोमाश्रयफला, स्त्री, (रोमाश्रयं फलमस्याः ।) भिक्षिरिष्टाक्षुपः । इति राजनिर्घण्टः ॥

रोमोद्गमः, पुं, (रोम्णामुद्गमः ।) रोमाञ्चः । इति हलायुधः ॥ (यथा, कुमारे । ७ । ७७ ।
"रोमोद्गमः प्रादुरभूदुमायाः
खिन्नाङ्गुलिः पुङ्गवकेतुरासीत् ।
वृत्तिस्तयोः पाणिसमागमेन
समं विभक्तेव मनोभवस्य ॥")

रोमोद्भेदः, पुं, (रोम्णामुद्भेदः ।) रोमाञ्चः । इति त्रिकाण्डशेषः ॥ (यथा, प्रबोधचन्द्रोदये । १ अङ्के ।
"स्फुरद्रोमोद्भेदस्खलतरतराकुलदृशो
भयोत्कम्पोत्तुङ्गस्तनयुगभरासङ्गसुभगः ॥")

रोलः, पुं. पानीयामलकम् । इति शब्दचन्द्रिका ॥ (पानीयामलकशब्देऽस्य गुणादयोऽभिहिताः ॥)

रोलम्बः, पुं, (रौतीति । रु + विच् । रौः कुजन् सन् लम्बति स्थानात् स्थानान्तरं गच्छतीति । लम्ब + अच् ।) भ्रमरः । इति त्रिकाण्डशेषः ॥

(यथा, वक्रोक्तिपञ्चाशिकायाम् । ४० ।
"गण्डे दानवनाशिनो गणपतेः कुर्व्वन्ति कोलाहलं
रोलम्बा दनुसूनुनाशनविधौ सक्ताः स्मरेते कथम् ॥")

रोषः, पुं, (रुष्+घञ् ।) क्रोधः । इत्यमरः ॥ (यथा, आर्य्यासप्तशत्याम् । ४४६ ।
"सुच्यसि किं मानवतीं यवसाद्दृढगुणमनुवेगेति ।
स्नेहभवः पयसामिः सान्त्वेन च रोष उन्मिषति ॥")

रोषणः, पुं, (रोषति तच्छीलः । रुष्+"क्रुधमण्डार्थेभ्यश्च ।" ३ । २ । १५१ । इति युच् ।) पारदः । हेमघर्षणोपलः । इति मेदिनी । ने, ७३ ॥ ऊषरभूमिः । क्रोधने, त्रि । इति हेमचन्द्रः ॥ (यथा, मार्कण्डेये । ११२ । १५ ।
"न धर्म्मः क्रोधशीलस्य नार्थश्चाप्नोति रोषणः ।
नालं सुखाय कामाग्निः कोपेनाविश्चेतसाम् ॥")

रोहः, पुं, (रोहतीति । रुह्+अच् ।) अङ्कुरः । इति हेमचन्द्रः ॥ (यथा, महाभारते । १२ । १२० । ३८ ।
"अग्निः श्लोको वर्द्धतेऽप्याज्यसिक्तो
बीजञ्चैकं रोहसाहस्रमेति ।
आयव्ययौ विपुलौ सन्निशाम्य
तस्मादल्पं नावमन्येत वित्तम् ॥")

रोहणीये, त्रि । यथा, वाजसनेयसंहितायाम् । १३ । ५१ ।
"तेन रोहमायन्नुप मेध्यासः ।"
"रोहं रोहणीय स्वर्गम् ।" इति तद्भाष्ये महीधरः ॥)

रोहकः, पुं, (रुह्+ण्वुल् ।) प्रेतभेदः । वोढ़रि, त्रि । इति मेदिनी । के, १४६ ॥ (यथा, महाभारते । ८ । ३४ । ३२ ।
"सिनीवालीमनुमतिं कुहूं राकाञ्च सुव्रताम् ।
योक्ष्यामि चक्रुर्वाहानां रोहकांस्तत्र कण्टकान् ॥")

रोहणं, क्ली, (रोहत्यनेनेति । रुह्+करणे ल्युट् ।) शुक्रम् । इति राजनिर्घण्टः ॥ जन्म । प्रादुर्भावः । इति रुहधातोर्भावेऽनट्प्रत्ययेन निष्पन्नम् ॥

रोहणः, पुं, (रोहत्यस्मिन्निति । रुह्+अधिकरणे ल्युट् ।) पर्व्वतविशेषः । तत्पर्य्यायः । विदूरान्द्रिः २ । इति जटाधरः ॥ (यथा, राजेन्द्रकर्णपूरे । ५२ ।
"अपारपुलिनस्थलीभुवि हिमालये मालये
निकामविकटोन्नते दुरधिरोहणे रोहणे ।
महत्यमरभूधरे गहनकन्दरे मन्दरे
भ्रमन्ति न पतन्त्यहो परिगता भवत्कीर्त्तयः ॥")

रोहन्तः, पुं, (रुह्यादिति । रुह्+"रुहिनन्दिजीविप्राणिभ्यः षिदाग्निधि ।" उणा० ३ । १२७ । इति झच् ।) वृक्षभेदः । इत्युणादिकोषः ॥ वृक्षमात्रम् । इति संक्षिप्तसारोणादिवृत्तिः ॥

रोहन्ती, पुं, (रुह्+झच् । ङित्वात् ङीष् ।) लताभेदः । इत्युणादिकोषः ॥ लतामात्रम् । इति संक्षिप्तसारोणादिवृत्तिः ॥

रोहिः, पुं, (रोहतीति । रुह्+"हृषिधिरुहीति ।" उणा० ४ । ११८ । इति इन् ।) बीजम् । वृक्षः । इत्युणादिकोषः ॥ धार्म्मिकः । इति सिद्धान्तकौमुद्यामुणादिवृत्तिः ॥

रोहिणं, क्ली, (रुह्+"रुहेश्च ।" उणा० २ । ५५ । इति इनन् ।) कालभेदः । इत्युणादिकोषः ॥ स तु दिवसीयनवमसुहूर्त्तः । पूर्व्वाह्णआह्नस्य गौणकालत्वेनोत्तरावधिः । अपराह्णआह्नस्य पूर्व्वावधिः । एकोद्दिष्टश्राद्धस्य समापनकालः । रौहिणञ्चास्य नामान्तरम् । यथा । अत्र पूर्व्वाह्णे श्राद्धमभिधाय रौहिणन्तु न लङ्घयेदित्यभिधानेन पूर्व्वाह्णश्राद्धस्य सङ्गवात् परो रौहिणपर्य्यन्तगौणपूर्व्वाह्णकालः प्रतीयते तेन रौहिणं पूर्व्वाह्णश्राद्धस्य गौणकालत्वेनोत्तरावधिः अपराह्णश्राद्धस्य पूर्व्वावधिरित्यवगम्यते । रौहिणन्तु दिवसस्य नवमसुहूर्त्तः । तस्य ज्योतिषोक्तरोहिणीदेवतत्वात् रौहिणत्वमिति । व्यासः ।
"आरभ्य कुतपे श्राद्धं कुर्य्यादारौहिणं बुधः ।
विधिज्ञो विधिमास्थाय रौहिणन्तु न लङ्घयेत् ॥"
इति श्राद्धतत्त्वम् ॥

रोहिणः, पुं, (रोहतीति । रुह्+"रुहेश्च ।"उणा० २ । ५५ । इति इनन् ।) भूतृणः । वटवृक्षः । रोहितकवृक्षः । इति राजनिर्घण्टः ॥ (ग्राह्मलद्वीपस्थपर्व्वतविशेषः । यथा, मात्स्ये । १२१ । ६६ ।
"रोहितो यस्तृतीयस्तु रोहिणो नाम विश्रुतः ॥")

रोहिणिः, स्त्री, रोहिणीनक्षत्रम् । इति शब्दरत्नावली ॥ (यथा, बृहत्संहितायाम् । १०७ । ४ ।
"धारणवर्षणरोहिणि-
वायव्याषाढ़भाद्रपदयोगाः ।
क्षणदृष्टिः कुसुमलताः
सन्ध्याचिह्नं दिशां दाहः ॥")

रोहिणिका, स्त्री, (रोहिण्येव स्वार्थे कन् । टाप् ह्रस्वश्च ।) कोपादिना रक्तवर्णा स्त्री । इति जटाधरः ॥

रोहिणी, स्त्री, (रुह्+इनन् । गौरादित्वात् ङीष् ।) स्त्रीगवी । इत्यमरः ॥ (यथा, माघे । १२ । ४० ।
"प्रीत्या नियुक्तालिहतीः स्तनन्धया-
न्निगृह्य पार्श्वमुभयेन जानुनोः ।
वर्द्धिष्णुधाराध्वनि रोहिणीः पय-
श्चिरं निदध्यौ दुहतः स गोदुहः ॥")

तड़ित् । कटुम्भरा । (यथास्याः पर्य्यायः ।
"कट्फली तु कटुका तिक्ता क्षणभेदा कटुम्भरा ।
अशोका मन्थपृकला चक्राङ्गी शकुलादनी ॥"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥)
सोमवल्कः । (यथास्याः पर्य्यायो रत्नमालायाम् ।
"कट्फलः सोमवल्काख्यः सोमवृक्षश्च रोहिणी ॥"
महाश्वेता । तत्पर्य्यायो यथा,—
"कटभी किणिही श्वेता महाश्वेता च रोहिणी ॥"
इति वैद्यकरत्नमालायाम् ॥)
लोहिता । इति मेदिनी । णे, ३७ ॥ जिनानां विद्यादेवीविशेषः । इति हेमचन्द्रः ॥ काश्मरी । हरीतकी । मञ्जिष्ठा । इति राजनिर्घण्टः ॥ कपिलवर्णा वर्त्तुलाकारा विरेचने प्रशस्ता हरीतकी । इति राजवल्लभः ॥ ❋ ॥ बलदेवमाता । सा वसुदेवभार्य्या कश्यपपत्नीसुरभ्यंशजाता । यथा,—
"देवकी रोहिणी चेमे वसुदेवस्य धीमतः ।
रोहिणी सुरभिर्देवी अदितिर्देवकी त्वभूत् ॥"
इति महाभारते हरिवंशः ॥ ❋ ॥
सुरभिकन्या । यथा,—
श्रीमार्कण्डेय उवाच ।
"दक्षस्य तनया याभूत् सुरभिर्नाम नामतः ।
गवां माता महाभागागा सर्व्वलोकोपकारिणी ॥
तस्यास्तु तनया जज्ञे कश्यपात्तु प्रजापतेः ।
नाम्ना सा रोहिणी शुभा सर्व्वकामदुघा नृणाम् ॥
तस्यां यज्ञे शूरसेनाद्वसोरिति तपोज्वलात् ।
कामधेनुरिति ख्याता सर्व्वलक्षणसंयुता ॥"
इति कालिकापुराणे त्रेषाध्यायः ॥ ❋ ॥
नववर्षीया कन्या । यथा,—
"अष्टवर्षा भवेद्गौरी नववर्षा तु रोहिणी ।
दशमे कन्यका प्रोक्ता अत ऊर्द्धं रजस्वला ॥"
इत्युद्वाहतत्त्वम् ॥ ❋ ॥
(पञ्चवर्षा कुमारी । यथा, देवीभागवते । ३ । २६ । ४२ ।
"रोहिणी पञ्चवर्षा च षड्वर्षा कालिका स्मृता ॥")
रोगनाशायैवास्याः पूजा कर्त्तव्या । यथा, तत्रैव । ३ । २६ । ४८ ।
"रोहिणीं रोगनाशाय पूजयेद्विधिवन्नरः ॥"
अस्याः पूजामन्त्रो यथा, तत्रैव । ३ । २६ । ५६ ।
"रोहयन्ती च बीजानि प्राग्जन्मसञ्चितानि वै ।
या देवी सर्व्वभूतानां रोहिणीं पूजयाम्यहम् ॥"
हिरण्यकशिपुकन्या । यथा, महाभारते । ३ । २२० । १८ ।
"कन्या सा रोहिणी नाम हिरण्यकशिपोः सुता ॥" ❋ ॥
रोहिणि + पचे ङीष् ।) अश्विन्यादिसप्तविंशतिनक्षत्रान्तर्गतचतुर्थनक्षत्रम् । तत्पर्य्यायः । रोहिणिः २ । इति शब्दरत्नावली ॥ ब्राह्मी ३ । इति हेमचन्द्रः ॥ (यथा, महाभारते । १ । १४६ । ३३ ।
"अष्टमेऽहनि रौहिण्यां प्रयाताः फाल्गुणस्य ते ।
वारणावतमासाद्य दहुर्नागरं जनम् ॥")
तत्र शकुलाकृति पञ्चतारात्मकम् । तस्याधि-

ष्ठांत्री देवता ब्रह्मा। गगनमध्ये उदिते सति सिंहलग्नस्य अष्टत्रिंशद्घट्यधिकदण्डत्रितयं गतं भवति। यथा,—

"कम्बुकण्ठि! शुकुलाक्षतौ नभो-
मध्यमागतवति प्रजापतौ।
पञ्चमे गजकुपञ्चलिप्रिका
निःसृताः सुमुखि! सिंहलग्नतः॥"

इति कालिदासोक्ततरात्रिलग्ननिरूपणम्॥ * ॥

तत्र जातफलं यथा,—

"स्याद्धर्म्मकार्य्ये कुशलः कुलीनः
सुचारुदेहो विलसत्कलेवरः।
स्मराग्निनाकुलिताखिलाशयो
यो रोहिणीजः स धनी स मानी॥"

इति कोष्ठीप्रदीपः॥ * ॥

गलरोगविशेषः। यथा। रोहिणीनामकगल-रोगाणां नामानि संख्यामाह।

"रोहिणी पञ्चधा प्रोक्ता कण्ठशालूक एव च।
अधिजिह्वश्च वलयोऽलासनामैरुदन्दकः॥
ततो वृन्दः शुतघ्नी च गिलायुः कण्ठविद्रधिः।
गलौघः प्रस्वरघ्नश्च मांसतालस्तथैव च।
विद्राधी कण्ठदेशे तु रोगा अष्टादश स्मृताः॥"

तत्र पञ्चानामपि रोहिणीनां सामान्यसंप्राप्तिमाह।

"गलेऽनिलः पित्तकफौ च मूर्च्छितौ
प्रदूष्य मांसञ्च तथैव शोणितम्।
गलोपसंरोधकरैस्तथाङ्कुरै-
र्निहन्त्यसून् याधिरियं हि रोहिणी॥"

अनिलः मूर्च्छितः प्रदुष्टः कफपित्तौ च मूर्च्छितौ पित्तं वा मूर्च्छितं कफो वा मूर्च्छितः। तनु त्रयोऽपि मूर्च्छिताः पृथग्दोषजाया अविवक्षितत्वात्॥ तस्या वातजाया लक्षणमाह।

"जिह्वासमन्तादभिघातवेदनास्तु
मांसाङ्कुराः कण्ठविरोधनाः स्युः।
सा रोहिणी वातकृता प्रदिष्टा
वातात्मकोपद्रवगाढ़जुष्टा॥"

जिह्वासमन्तात् जिह्वायाः सर्व्वतः। वातात्मकोपद्रवगाढ़जुष्टा स्तम्भादिभिरतिशूलेन युक्ता॥"

पित्तजामाह।

"क्षिप्रोद्गमा क्षिप्रविदाहपाका
तीव्रज्वरा पित्तनिमित्तजाता॥"

श्लेष्मजामाह।

"स्रोतोनिरोधिन्यपि मन्दपाका
गुर्व्वी स्थिरा सा कफसम्भवा तु॥"

स्रोतोऽत्र कण्ठस्रोतः॥ * ॥ सन्निपातजामाह।

"गम्भीरपाकिन्यनिवार्य्यवीर्य्या
त्रिदोषलिङ्गा त्रिभवा भवेत् सा॥"

रक्तजामाह।

"स्फोटैश्चिता पित्तसमानलिङ्गा
साध्या प्रदिष्टा रुधिरात्मिका तु॥"

रक्तजेतरासंहारकत्वावधिमाह।

"सद्यस्त्रिदोषजा हन्ति चाहात् कफसमुद्भवा।
पञ्चाहात् पित्तसम्भूता सप्ताहात् पवनोत्थिता॥"

कण्ठशालूकमाह।

"कोलास्थिमात्रः कफसम्भवो यो
ग्रन्थिर्गले कण्टकशूकभूतः।
खरः स्थिरः शुष्कनिपातसाध्य-
स्तं कण्ठशालूकमिति ब्रुवन्ति॥"

कण्टकशूकभूतः कण्टकवच्छूकवदेदनाजनकः॥

अधिजिह्वमाह।

"जिह्वाग्ररूपः श्वयथुः कफात्तु
जिह्वोपरिष्टादधिजेव मिश्रात्।
श्लेष्मोऽधिजिह्वः खलु रोग एष
विवर्ज्जयेदागतपाकमेनम्॥"

अधिजा मिश्रादेवेत्यन्वयः॥ * ॥ वलयमाह।

"वलाग्र एवायतसुन्नतश्च
श्लेष्मं करोत्यन्नगतिं निवार्य्य।
तं सर्व्वथैवाप्रतिवार्य्यवीर्य्यं
विवर्ज्जनीयं वलयं वदन्ति॥"

अलासमाह।

"गले तु श्लेष्मं कुरुतः प्रदुष्टौ
श्लेष्मानिलौ श्वासरुजोपपन्नम्।
मर्म्मच्छिदं दुस्तरमेनमाहु-
रलाससंज्ञं भिषजो विकारम्॥"

मर्म्मच्छिदं हृदयमर्म्मणि छेदेनेव वेदनाजनकम्॥

एकवृन्दमाह।

"वृत्तोन्नतोऽन्तः श्वयथुः सदाहः
सकण्डुरोऽपाक्यथदुर्गरुश्च।
नाम्नैकवृन्दः परिकीर्त्तितोऽसौ
व्याधिर्ज्वलाग्रः क्षतजप्रसूतः॥"

अन्तः गलमध्ये। अपाकी ईषत् पाकी। अरुट्टुः ईषन्नरुट्टुः॥ * ॥ वृन्दमाह।

"समुन्नतं वृत्तममन्ददाहं
तीव्रज्वरं वृन्दमुदाहरन्ति।
तत्रापि पित्तक्षतजप्रकोपा-
द्विद्यात् सतोदं पवनात्मकन्तु॥" * ॥

शुतघ्नीमाह।

"वर्त्मिघ्नी कण्ठनिरोधिनी तु
चिताप्तिमात्रं पिशितप्ररोहैः।
अनेकरुक् प्राणहरी त्रिदोषा
ज्ञेया शुतघ्नीसदृशी शुतघ्नी॥"

घना कठिना। अनेकरुक् वातपित्तकफजतोददाहकण्डादियुक्ता। शुतघ्नीसदृशी लोहकण्टकसंकुला शुतघ्नी महती गिला। तत्तुल्या यतः प्राणहरी॥ * ॥ गिलायुमाह।

"ग्रन्थिर्गले वामलकास्थिमात्रः
स्थिरोऽल्परुक् स्यात् कफरक्तमूर्च्छितः।
संलक्ष्यते शुक्तमिवासितश्च
स शुक्लसाध्यस्तु गिलायुसंज्ञः॥"

गलविद्रधिमाह।

"सर्व्वं गलं व्याप्य समुत्थितो यः
शोफो रुजः सन्ति च यत्र सर्व्वाः।
स सर्व्वदोषैर्गलविद्रधिस्तु
तस्यैव तुल्यः खलु सर्व्वजस्य॥" * ॥

गलौघमाह।

"शोथो महान् यस्तु गलावरोधी
तीव्रज्वरो वायुगतेर्निहन्ता।
कफेन जातो रुधिरान्वितेन
गले गलौघः परिकीर्त्तितोऽसौ॥"

वायुगतेर्निहन्ता उदानवायुगतिरोधकः॥ * ॥

स्वरघ्नमाह।

"यस्ताम्यमानः श्वसिति प्रसक्तं
भिन्नस्वरः शुष्कविमुक्तकण्ठः।
कफोपदुष्टेष्वनिलायनेषु
ज्ञेयः स रोगः श्वसनात् स्वरघ्नः॥"

ताम्यमानः तमः पश्यन्। शुष्कविमुक्तकण्ठः शुष्को विमुक्तोऽन्नाधीनः कण्ठो यस्य सः। अन्नाधीनता सुक्तं गिलितुं अशक्यत्वात्। अनिलायनेषु वायुवर्त्मसु। श्वसनाद्धेतोः॥ * ॥

मांसतानमाह।

"प्रतानवान् यः श्वयथुः सुकष्टो
गलोपरोधं कुरुते क्रमेण।
स मांसतानः कथितोऽवलम्बी
प्राणप्रणुत् सर्व्वगतो विकारः॥"

प्रतानवान् विस्तारवान्। सुकष्टः अतिशयितं कष्टं यत्र सः॥ * ॥ विदारीमाह।

"सदाहतोदं श्वयथुं सुताम्र-
मन्तर्गले पूतिविशीर्णमांसम्।
पित्तेन विद्याद्रुदने विदारीं
पार्श्वे विशेषात् स तु येन शेते॥"

पार्श्वे विशेषात् स तु येन शेते स पुरुषो येन पार्श्वेन विशेषाद्व्याकुलेन शेते तस्मिन् पार्श्वे सा विदारी भवति इत्यर्थः॥ * ॥ अथ गलरोगाणां चिकित्सा।

"रोहिणीनान्तु साध्यानां हितं शोधितमोक्षणम्।
वमनं धूमपानञ्च गण्डूषो नस्यकर्म्म च॥
वातजानान्तु हृते रक्ते लवणैः प्रतिसारयेत्।
सुखोष्णान् स्नेहगण्डूषान् धारयेच्चाप्यभीक्ष्णशः॥
विस्राव्य पित्तसंभूतां सिताक्षौद्रप्रियङ्गुभिः।
घर्षयेत् कवलो द्राक्षामरुषैः कथितो हितः॥
आगारधूमकटुकैः कफजां प्रतिसारयेत्।
आगारधूमः झूल इति लोके। कटुकानि शुण्ठीपिप्पलीमरिचानि।
"श्वेताविड़ङ्गदन्तीषु तैलं सिद्धं ससैन्धवम्।
नस्यकर्म्मणि दातव्यं कवलश्च कफोच्छ्राये॥"

श्वेता अपराजिता।

"पित्तवत् साधयेद्वैद्यो रोहिणीं रक्तसम्भवाम्।
विस्राव्य कण्ठशालूकं साधयेत्तुण्डिकेरिवत्॥
एककालं यवान्नञ्च भुञ्जीत स्निग्धमल्पशः।
उपजिह्वकवच्चापि साधयेदधिजिह्वकम्॥
एकवृन्दन्तु विस्राव्य विधिं शोधनमाचरेत्।
एकवृन्दमिव प्रायो वृन्दञ्च समुपाचरेत्॥
गिलायुञ्चापि यो व्याधिस्तञ्च शुक्तेन साधयेत्।
अमर्म्मस्थं सुसंपक्वं छेदयेद्गलविद्रधिम्॥"

इति भावप्रकाशः॥

(स्त्री, त्रि। यथा, महाभारते। २।६१।३३।

"नैव दृश्या न महती न कृष्णा नापि रोहिणी।
नीलकुञ्चितकेशी च तया दीव्याम्यहं त्वया ॥")

रोहिणीपतिः, पुं, (रोहिण्याः पतिः।) चन्द्रः। इति हेमचन्द्रः। २। १८॥ (यथा, देवीभागवते। १। ११। १८।
"इत्येवं भाषमाणं तमुवाच रोहिणीपतिः।
गुरुं क्रोधसमायुक्तं कान्ताविरहदुःखितम् ॥"
वसुदेवः। वृषभश्च॥)

रोहिणीरमणः, पुं, (रोहिण्या रमणः।) वृषभः। इति राजनिर्घण्टः॥ वसुदेवश्च॥ (चन्द्रः। यथा, गीतगोविन्दे। ३। १०।
"वर्णितं जयदेवकेन हरेरिदं प्रवणेन।
कैन्दुबिल्वसमुद्रसम्भवरोहिणीरमणेन ॥")

रोहिणीवल्लभः, पुं, (रोहिण्या वल्लभः।) चन्द्रः। इति हलायुधः॥ वसुदेवश्च॥

रोहिणीशः, पुं, (रोहिण्या ईशः।) चन्द्रः। इति हेमचन्द्रः॥ (यथा, माघे। ३। ६०।
"यां रेवतीजानिरियेष हातुं
न रौहिणेयो न च रोहिणीशः॥")
वसुदेवश्च॥

रोहिण्यष्टमी, स्त्री, (रोहिणीयुक्ता अष्टमी।) रोहिणीनक्षत्रयुक्तभाद्रकृष्णाष्टमी। यथा,—
"कृष्णाष्टम्याञ्च रोहिण्यामङ्गराचेऽर्चनं हरेः।
कार्य्या विद्धापि सप्तम्या हन्ति पापं त्रिजन्मजम्॥
उपोषितोऽर्चयेन्मन्त्रैस्तिथिभान्ते च पारणम्॥
योगाय योगपतये योगेश्वराय योगसम्भवाय गोविन्दाय नमो नमः॥ स्नानमन्त्रः। यज्ञाय यज्ञेश्वराय यज्ञपतये यज्ञसम्भवाय गोविन्दाय नमो नमः॥ अर्चनस्य। विश्वाय विश्वेश्वराय विश्वपतये विश्वसम्भवाय गोविन्दाय नमो नमः॥ प्रणतस्य। सर्व्वाय सर्व्वेश्वराय सर्व्वपतये सर्व्वसम्भवाय गोविन्दाय नमो नमः॥ पारणस्य।
स्नपिते पूजयेद्देवं सचन्द्रां रोहिणीन्तथा।
पूर्णे तोयं समादाय सपुष्पफलचन्दनम्।
जानुभ्यामवनीं गत्वा चन्द्रायार्घ्यं निवेदयेत्॥
क्षीरोदार्णवसम्भूत अत्रिनेत्रसमुद्भव।
गृहाणार्घ्यं मयाद्दत्तं रोहिण्या सहितो मम॥
श्रियै वसुदेवाय बलदेवाय नन्दाय यशोदायै।
अनघं वामनं शौरिं वैकुण्ठं पुरुषोत्तमम्।
वासुदेवं हृषीकेशं नृसिंहं दैत्यसूदनम्॥
वाराहं पुण्डरीकाक्षं श्रीकान्तमजमव्ययम्।
दामोदरं पद्मनाभं केशवं गरुड़ध्वजम्॥
गोविन्दमच्युतं देवमनन्तमपराजितम्।
अधोक्षजं जगद्बीजं सर्गस्थित्यन्तकारकम्॥
अनादिनिधनं विष्णुं त्रिलोकेशं त्रिविक्रमम्।
नारायणञ्चतुर्बाहुं पद्मचक्रगदाधरम्॥
पीताम्बरधरं दिव्यं वनमालाविभूषितम्।
श्रीवत्साङ्कं जगद्धाम श्रीपतिं श्रीधरं हरिम्॥
यं देवं देवकी देवी वसुदेवादजीजनत्।
भौमस्य ब्रह्मणो गुप्त्रै तस्मै ब्रह्मात्मने नमः।
नामान्येतानि संकीर्त्य गत्यर्थं प्रार्थयेत् पुनः॥
त्राहि मां सर्व्वपापघ्न दुःखशोकार्णवात् प्रभो।
देवकीनन्दन श्रीश हरे संसारसागरात्॥
दुर्वृत्तांस्त्रायसे विष्णो ये स्मरन्ति सकृत् सकृत्।
सोऽहं देवातिदुर्वृत्तस्त्राहि मां शोकसागरात्॥
पुष्कराच्च निमग्नोऽहं महत्यज्ञानसागरे।
त्राहि मां देवदेवेश त्वामृतेऽन्यो न रक्षिता॥
स्वजन्म वासुदेवाय गोब्राह्मणहिताय च।
जगद्धिताय कृष्णाय गोविन्दाय नमो नमः॥
शान्तिरस्तु शिवञ्चास्तु धनर्द्धिख्यातिराज्यभाक्॥"

इति गारुड़े १३२ अध्यायः॥

रोहित्, पुं, (रोहतीति। रुह+"हृहरुहियुषिभ्य इतिः।" उणा० १। ६६। इति इतिः।) सूर्य्यः। इति मेदिनी। टे, १४७॥ वर्णभेदः। मत्स्यभेदः। इति संक्षिप्तसारोणादिवृत्तिः॥ (ऋष्यृगः। यथा, वाजसनेयसंहितायाम्। "२४। ३०॥ "मनुष्यराजाय मर्कटः श्राद्धलाय रोहित्।" "एको रोहित् ऋष्यः श्राद्धलाय।" इति तद्भाष्ये महीधरः॥ रोहितवर्णविशिष्टे, त्रि। (यथा, ऋग्वेदे। १। १००। १६।
"रोहित् श्यावा सुमदंशुर्ललामीः।"
"रोहित् रोहितवर्णा श्यावा श्यामवर्णा।"
इति तद्भाष्ये सायणः॥)

रोहित्, स्त्री, (रुह+"हृहरुहियुषिभ्य इतिः।" उणा० १। ६६। इति इतिः।) मृगी। ("ऋष्यस्य मृगस्य मृगी रोहिदुच्यते। तथाच महिम्नः स्तवे। गतं रोहिद्भूतां रिरमयिषुमृष्यस्य वपुषा।" इत्युज्ज्वलः। १। ६६॥) लतामेदः। इति मेदिनी। टे, १४७॥ (वड़वा। यथा, ऋग्वेदे। १। १४। १२।
"युञ्जन्त्यरुषी रथे हरितो देवा रोहितः॥"
"हे देवाग्ने रोहितः रोहिच्छब्दाभिधेयाश्वदीया वड़वाः रथे युञ्जन्त्यु युज योजय।" इति तद्भाष्ये सायणः॥*॥ रोहन्त्याभिर्बीजानि तच्छीलेन हि बीजानि प्ररोहन्तीति तथात्वम्। नदी। इति निघण्टुः। १। १३। १८॥ निगमेषु बहुवचनान्तत्वेन प्रायशः श्रवणात् बहुवचनान्तत्वम्॥)

रोहितं, क्ली, (रुह+"रुहे रश्च लो वा।" उणा० ३। ६४। इति इतन्।) कुङ्कुमम्। रक्तम्। ऋजुग्रक्तग्रहासनम्। इति मेदिनी। ते, १४५॥ (यथा, मनुः। १। ३८।
"विद्युतोऽग्निमेघांश्च रोहितेन्द्रधनूंषि च।
उल्कानिर्घातकेतूंश्च ज्योतींष्युत्पातिकानि च॥")

रोहितः, पुं, (रोहतीति। रुह+"रुहे रश्च लो वा।" उणा० ३। ६४। इति इतन्।) मीनविशेषः। (यथाह कश्चित्।
"ईलीशो जितपीयूषो वाचा वाचामगोचरः।
रोहितो नो हितः प्रोक्तो मङ्गुरो मङ्गुरोः प्रियः॥")

रोहितमत्स्यस्य लक्षणं गुणाश्च यथा,—
"कृष्णः शल्की श्वेतकुक्षिस्तु मत्स्यो
यः श्रेष्ठोऽसौ लोहितो वृत्तवक्त्रः।
कोष्णं बल्यं रोहितस्यापि मांसं
वातं हन्ति स्निग्धमश्नाति वीर्य्यम्॥"

इति राजनिर्घण्टः॥

अपि च।
"रक्तोदरो रक्तमुखो रक्ताक्षो रक्तपुच्छतिः।
कृष्णपक्षो झषश्रेष्ठो रोहितः कथितो बुधैः॥
रोहितः सर्व्वमत्स्यानां वरो वृष्योऽर्दितार्त्तिजित्।
कषायानुरसः स्वादुर्व्वातघ्नो नातिपित्तकृत्॥
ऊर्द्ध्वजत्रुगतान् रोगान् हन्याद्रोहितमुष्कम्॥"

इति भावप्रकाशः॥

(तथाच।
"वातघ्नो नहि पित्तकृत्कफकरः स्याद्रोहितः सर्व्वदा॥"

इति हारीते प्रथमस्थाने एकादशेऽध्याये॥
"शैवलाहारभोजित्वात् स्वप्नस्य च विवर्ज्जनात्।
रोहितो दीपनीयश्च लघुपाको महाबलः॥"

इति चरके सूत्रस्थाने सप्तविंशेऽध्याये॥
"कषायानुरसस्नेहा गुरुश्लक्ष्णो वालभोजनः।
रोहितो मारुतहरो नात्यर्थं पित्तकोपणः॥"

इति सुश्रुते सूत्रस्थाने ४६ अध्याये॥
स्वनामख्यातो हरिश्चन्द्रश्च नृपतेः पुत्रः। यथा देवीभागवते। ७। १५। १५॥
"राजा पुत्रसुखं दृष्ट्वा सुखमाप महत्तरम्।
नामास्य रोहितश्चेति चकार विधिपूर्ब्बकम्॥"
अस्य विवरणन्तु तत्रैव द्रष्टव्यम्॥) मृगभेदः। रोहितकवृक्षः। इति मेदिनी। ते, १४६॥ (रोहीतोऽपि पाठः। रोहीतकशब्ददर्शनात्॥ यथा, सुश्रुते। ६। १७।
"पलाशरोहीतमधूकजा रसाः
क्षौद्रेण युक्ता मदिराम्लमिश्रिताः॥"
अग्निवोटकः। इति निघण्टुः। १। १५॥
"रोहन्ति आरोहन्ति रथं वहन्त्यादिभिति रोहितः।" इति तच्च देवराजयज्वा॥ यथा, ऋग्वेदे। १। ६४। १०।
"यदयुक्था अरुषा रोहिता रथे॥"
"रोहिता लोहितवर्णौ रोहित इत्यग्नेरश्वस्याख्या रोहितोऽग्नेरितिदर्शनात् रोहितेनत्वाग्निर्देवतां गमयत्वितिमन्त्रवर्णाच्च।" इति तद्भाष्ये सायणः॥) रक्तवर्णः। रक्तवर्णविशिष्टे, त्रि। इत्यमरः॥ (यथा, वाजसनेयसंहितायाम्। १६। १६।
"नमो रोहिताय स्थपतये वृक्षाणां पतये नमो नमः॥")

रोहितकः, पुं, (रोहित एव। स्वार्थे कन्।) वृक्षविशेषः। रोहड़ा इति भाषा। तत्पर्य्यायः। रोही २ ह्रीबेरशत्रुः ३ दाड़िमपुष्पकः ४। इत्यमरः॥ रोहीतकः ५ रोहितः ६ रोहिणः ७ कुष्ठाल्मलिः ८ दाड़िमपुष्पः ९ सदाप्रसूनः १० कूटशाल्मलिः ११ विरोचनः १२ शाल्मलिकः १३। अस्य गुणाः। कटुत्वम्। स्निग्धत्वम्। कषायत्वम्। सुग्रीतलत्वम्। कृमिदोष-

व्रणग्लौहरक्तनेत्रामयाप्रहत्वच्च। इति राजनिर्घण्टः॥ अपि च।
"रोहितो लोहितो रोही लोही दाड़िम-पुष्पकः।
रोहीतकः श्लीहघाती ग्रन्थौ रक्तप्रसादनः॥"
इति भावप्रकाशः॥
अन्यच्च।
"रोहीतको यकृत्प्लीहगुल्मोदरहरः स्मृतः॥"
इति राजवल्लभः॥
(गणविशेषः। यथा, महाभारते।३।२५३।१६।
"भद्रान् रोहितकांश्चैव आग्नेयान्मालवानपि।
गणान् सर्व्वान् विनिर्जित्य नीतिज्ञस्तु प्रहसन्निव।
शूद्रकान् यवनांश्चैव विजिग्ये सूतनन्दनः॥")
रोहिता, स्त्री, (रोहित+टाप्। "वर्णादनुदात्तात्तोपधातो नः।" ४।१।३९। इति प्राप्तिको ङीष् तकारस्य नकारादेशश्च न।) रागादिना रक्तवर्णा। यथा,—
"रोहिणी रोहिता रक्ता लोहिनी लोहिता च सा।"
इति जटाधरः॥
रोहिताश्वः, पुं, (रोहितः अश्वो यस्य।) अग्निः। इत्यमरः॥ हरिश्चन्द्रराजपुत्रः। इति मेदिनी। ते, ६३॥
रोहितिका, स्त्री, (रोहितो वर्णोऽस्यस्या इति। रोहित+ठन्।) रागादिना रक्तवर्णा। इति जटाधरः॥
रोहितेयः, पुं, (रोहित एव। स्वार्थे ढक्।) रोहितवृक्षः। यथा,—
"श्लीहारी रोहितेयः स्यात् रक्तपुष्पश्च रोहितः॥"
इति भरतधृतरत्नकोषः॥
(विवरणमस्य रोहितकशब्दे ज्ञातव्यम्॥)
रोही, [न्] पुं, (अवश्यं रोहतीति। रुह्+आवश्यके णिनिः।) रोहितकवृक्षः। (अस्य पर्य्यायो यथा,—
"रोही रोहितकः श्लीहाग्नृदाड़िमपुष्पकः॥"
इति वैद्यकरत्नमालायाम्॥
"रोहीतको रोहितको रोही दाड़िमपुष्पकः॥"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे॥)
अश्वत्थवृक्षः। वटवृक्षः। इति मेदिनी। ने, १२०॥
रोहीतकः, पुं, (रोहीत एव। स्वार्थे कन्।) रोहितकवृक्षः। इति राजनिर्घण्टः॥ (यथा, बृहत्संहितायाम्। ५४। ६८।
"रोहितकस्य पश्चादहिवासश्चैत्रिभिः करैर्याम्ये॥"
तथास्य पर्य्यायः।
"रोहीतको रोहितको रोही दाड़िमपुष्पकः।"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे॥)
रौच्यं, क्ली, (रूक्षस्य भावः। रूक्ष+ष्यञ्।) रूक्षता। रूक्षस्य भाव इत्यर्थे ष्यञ्प्रत्ययेन निष्पन्नम्। तथा हि।
"तैलं यद्रौच्यदोषघ्नं तैलं यच्चार्द्रकं स्मृतम्।
तेन त्वां स्नापयाम्यद्य जगन्मातरम्बिकाम्॥"
इति दुर्गापूजायां महाष्टमीमहानवम्योर्महास्नानप्रकरणे देवीपुराणम्॥ (तथा च।
"ये रसा वातशमना भवन्ति यदि तेषु वै।
रौच्यलाघवशैत्यानि न ते घ्नन्तु: समीरणम्॥"
इति सुश्रुते सूत्रस्थाने ४० अध्यायः॥)
रौच्यः, पुं, (रुचेरपत्यमिति। रुचि+ष्यञ्।) मनुविशेषः। यथा,—
"रौच्यादयस्तथान्येऽपि मनवः संप्रकीर्त्तिताः।
रुचेः प्रजापतेः पुत्रो रौच्यो नाम भविष्यति॥"
इति मात्स्ये ९ अध्यायः॥
तन्मन्वन्तरे देवादयो यथा,—
"त्रयोदशस्य पर्य्याये ये रौच्यस्य मनोः सुराः।
सप्तर्षींश्च नृपांश्चैव वदतो मे निशामय॥
सुपर्व्वाणः सुरास्तत्र सुकर्म्माणस्तथापरे।
सुशर्म्माणस्तथा ह्येते समस्ता सुनिसत्तम॥
महाबलो महावीर्य्यस्तेषामिन्द्रो दिवस्पतिः।
भविष्यत्यथ सप्तर्षीन् गदतो मे निशामय॥
धृतिमानव्ययश्चैव तत्त्वदर्शी निरुत्सुकः।
निर्म्मोहः सुतपाश्चान्यो निष्प्रकम्पश्च सप्तमः॥
चित्रसेनो विचित्रश्च नयश्चन्नियमो दृढ़ः।
सुनेत्रः चित्रवृद्धिश्च सुरतश्चैव तत्सुताः॥"
इति मार्कण्डेयपुराणम्॥
अन्यद्विवरणं रुचिशब्दे द्रष्टव्यम्॥ * ॥ विल्वकाष्ठदण्डः। तत्पर्य्यायः। वैल्वः २। इति हेमचन्द्रः॥ (क्ली, रौच्यस्येदमिति। अण्। मन्वन्तरविशेषः। यथा, मार्कण्डेये। १००। ३९।
"ज्ञातिश्रेष्ठो गुणैर्युक्तो दक्षसावर्णिके श्रुते।
निशामयत्यतरिदं रौच्यं श्रुत्वा नरोत्तमः॥")
रौट, ऋ नादरे। इति कविकल्पद्रुमः॥ (भ्वा०-पर०-सक०-सेट्।) चतुर्दन्तलघुः। ऋ, अरौटत्। नादरोऽनादरः। रौटति खलं लोकः। इति दुर्गादासः॥
रौड, ऋ अनादरे। इति कविकल्पद्रुमः॥ (भ्वा०-पर०-सक०-सेट्।) ऋ, अरराड़त्। इति दुर्गादासः॥
रौद्रं, क्ली, (रुद्रस्येदम्। रुद्र+अण्।) भृङ्गराद्यष्टरसान्तर्गतग्लेषरसः। तत्पर्य्यायः। उग्रम् २। इत्यमरः॥ हे क्रोधस्याश्रये। रुद्रो देवता यस्य रौद्रम्। यदाह भरतः।
"भृङ्गारो विष्णुदेवः स्याद्धास्यः प्रमथदेवतः।
करुणो यमदेवः स्याद्रौद्रो रुद्राधिदेवतः॥" इति हे क्रोधस्याश्रये। उद्यति क्रुधा समवेति उग्रः। उद्यिर्य समवायने नान्नीति रक् निपातनाच्चस्य गः। सर्व्वाभिभाविता रौद्रः। यथा, रावणचरितादि। एषु वीभत्सरौद्रे क्लीबे रूपभेदात् अन्ये पुंसि वीभत्सरौद्रौ चेति पुंलिङ्गपाठ इह युक्तः। इति भरतः॥ * ॥ अपि च।
अथ रौद्रः।
"रौद्रः क्रोधस्थायिभावो रक्तो रुद्राधिदेवतः।
आलम्बनं रिपुस्तत्र तच्चेष्टोद्दीपनं मतम्॥
मुष्टिप्रहारपातनविक्षतच्छेदावदारणैश्चैव।
संग्रामसंभ्रमाद्यैरस्योद्दीपनं भवेत् प्रौढ़ा॥
भ्रूविभङ्गौष्ठनिर्देशबाहुस्फोटनतर्जनाः।
आत्मावदानकथनमायुधोत्क्षेपणानि च।
अनुभावास्तथा क्ष्वेडक्रूरसन्दर्शनादयः॥
उग्रतावेगरोमाञ्चस्वेदवेपथवो मदः।
मोहहर्षादयश्चात्र भावाः स्युर्व्यभिचारिणः॥"
यथा,—
"हतमनुमतं दृष्टं वा यैरिदं गुरु पातकं
मनुजपशुभिर्निर्मर्य्यादैर्भवद्भिरुदायुधैः।
नरकरिपुणा सार्द्धं तेषां सभीमकिरीटिना-
मयमहमहङ्मेदोमांसैः करोमि दिशां बलिम्॥"
अस्य युद्धवीराङ्गेदमाह।
"रक्ताक्षनेत्रता चात्र भेदिनी युद्धवीरतः॥"
इति साहित्यदर्पणे ३ परिच्छेदः॥
रौद्रः, पुं, (रुद्रस्यायमिति। रुद्र+अण्।) सूर्य्यतेजः। तत्पर्य्यायः। घर्म्मः २। इति मेदिनी। रे, ८०॥ प्रकाशः ३ द्योतः ४ आतपः ५। इत्यमरः॥ तस्य गुणाः।
"आतपः कटुको रूक्षः स्वेदमूर्च्छाभ्रमावहः।
दाहवैवर्ण्यजननो नेत्ररोगप्रकोपणः॥"
इति राजवल्लभः॥ * ॥
सप्तरौद्रा यथा,—
"जठरः पिङ्गलो रौद्रो घोराक्षः कालसंज्ञितः।
अग्निनामा हतो रौद्रः सप्त रौद्राः प्रकीर्त्तिताः॥"
ग्रन्थान्तरे सप्तमो रौद्रः प्राणदाहः॥ तेषां फलानि यथा,—
"पिङ्गलो रौद्रनामा च कालरूपः प्रजाक्षयम्।
स्वर्गेऽपि बहुरोगः स्यात् सर्व्वजीवसमुद्भवः॥
जठरो रौद्रनामा च घोरधूम्रश्च कारयेत्।
व्रणादिपित्तरोगञ्च नानाक्लेशकरो नृणाम्॥
अग्निर्नाम्ना यदा वर्षे रौद्रो भवति नान्यथा।
उत्तापेन क्षितिं शुष्येत् नराणां रोगदो भवेत्।
रौद्रनामा महारौद्रो यत्राब्दे च भवेद्ध्रुवम्।
क्षितोदेगं व्रणं कुर्य्यान्नानारोगसमन्वितम्॥
घोरनामा महारौद्रो घोरधूम्रश्च कारयेत्।
उत्तापेन सदा दग्धं नानारोगसमन्वितम्॥
कालनामा महारौद्र उत्तापे पीड़नं सदा।
नानारोगसमायुक्तं व्रणादिकबुकं भवेत्॥"
इति ज्योतिषम्॥
रसविशेषः। इति मेदिनी। रे, ८०॥ तद्विवरणं क्लीवलिङ्गरौद्रशब्दे द्रष्टव्यम्। हेमन्त ऋतुः। इति हेमचन्द्रः॥ यमः। इति धरणिः॥ (कार्त्तिकेयः। यथा, महाभारते। १। १३८। १३।
"आग्नेयः कृत्तिकापुत्रो रौद्रो गाङ्गेय इत्यपि।
अयते भगवान् देवः सर्व्वदेवमयो गुहः॥")
रौद्रः, त्रि, (रुद्र+अण्।) तीव्रः। (यथा, रुक्मिनिश्चयव्याख्याने विजयरक्षितेन हरिवंशोक्तज्वरवर्णनवचनमुक्तम्।
"ज्वरश्छिन्नपादश्छिन्नशिराः षड्भुजो नवलोचनः।
भस्मप्रहरणो रौद्रः कालान्तकयमोपमः॥")

भीषणः। इति मेदिनी। रे, ८०॥ (यथा, महाभारते। २। ६४। ५०।
"तस्य ते तदचः श्रुत्वा रौद्रं लोमप्रहर्षणम्।
प्रचक्रुर्बहुलां पूजां कृतसन्तो धृतराष्ट्रजम्॥")
रुद्रसम्बन्धिनि च॥
रौद्री, स्त्री, (रौद्र+ङीप्।) चण्डी। इति मेदिनी। रे, ८०॥ रुद्रजटा। इति राजनिर्घण्टः॥ रुरुदैत्यकृतमहारौद्री माया महारौद्रीनाम्नी चासुरी च। यथा,—
"एक एव महादैत्यो रुरुस्तस्यौ महाबले।
स च मायां महारौद्रीं रौरवीं विससर्ज्ज ह॥
सा माया वह्नये भीमा सर्व्वदेवप्रमोहिनी।
तया तु मोहिता देवाः सद्यो निद्रां तु मेनिरे॥
देवी च त्रिशिखेनाशौ तं दैत्यं समताड़यत्।
तया तु ताड़ितं तस्य दैत्यस्य शुभलोचने।
चर्म्मसुखे उभे सम्यक् पृथग्भूते बभूवतुः॥
रुरोस्तु दानवेन्द्रस्य चर्म्मसुखे यशादृयतः।
अपकृत्य हरेर्देवी चासुरी तेन साभवत्॥
सर्व्वभूतमहारौद्री या देवी परमेश्वरी।
संहारिणी तु या चैव कालरात्रिः प्रकीर्त्तिता॥"
इति वाराहे त्रिशक्तिमाहात्म्यम्॥
रौप्यं, क्ली, (रूप्यमेव। अण्।) रूप्यम्। इति राजनिर्घण्टः॥ (यथा, माघे। ४। ६७।
"दर्पणनिर्म्मलासु पतिते घनतिमिरसुषि
ज्योतिषि रौप्यभित्तिषु पुरः प्रतिफलति
सङ्घः॥")
तत्करणं यथा,—
"मध्वाज्यं गुड़ताम्रञ्च करेणा माक्षिकं रसम्।
धमनाच्च भवेद्रौप्यं सुवर्णकरणं परम्॥"
इति गारुड़े १८८ अध्यायः॥
(औषधादिषु अस्यालाभे यद्दातव्यं तदुक्तं यथा,—
"सुवर्णमथवा रौप्यं न्यूनं यत्र न लभ्यते।
तत्र कार्य्येन कर्म्माणि भिषक् कुर्य्यादिचक्षणः॥"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे॥
तद्विशिष्टे, त्रि। यथा, भागवते। ४।२५।१४।
"स्वर्णरौप्यायसैः पद्मैः सङ्कुलां सर्व्वतो गृहैः॥")
रौमं, क्ली, (रुमायां लवणाकरे भवम्। रुमा+अण्।) ग्राम्यलवणम्। इत्यमरटीकायां रामाश्रमः॥
रौमकं, क्ली, ग्राम्यलवणम्। तत्पर्य्यायः। वसुकम् २। इत्यमरः॥ "रुमा नाम नदी लवणाकरः तत्र भवं रौमकम्। ढ्ये कादितिष्यः रौमं ततः स्वार्थे कः रौमकम्।" इति तट्टीकायां भरतः॥ (पर्य्यायोऽस्य यथा,—
"ग्राकम्भरीयं कथितं गुड़ाख्यं रौमकन्तथा॥"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे॥)
रौमलवणं, क्ली, (रौमं लवणमिति।) ग्राम्यलवणम्। इति रत्नमाला॥
रौरवः, पुं, (रुरुर्ज्जन्तुविशेषस्तस्यायमिति। रुरु+अण्।) नरकविशेषः। घोरः। इति मेदिनी। वे, ४६॥ आद्यस्य विवरणं यथा,—
"रौरवे कूटसाक्षी तु याति यश्चानृतो नरः।
तस्य स्वरूपं वदतो रौरवस्य निशामय॥
योजनानां सहस्रे द्वे रौरवो हि प्रमाणतः।
जानुमात्रप्रमाणस्तु तत्र श्वभ्रः सुदुस्तरः॥
तत्राङ्गारचयो येन कृतं तद्वरणीसमम्।
आज्वल्यतातितीव्रेण तापिताम्बरभूमिना॥
तस्मध्ये पापकर्म्माणं विसृजन्ति यमानुगाः।
स दह्यमानस्तीव्रेण वह्निना तेन धावति॥
पदे पदे च पादोऽस्य शीर्य्यते जायते पुनः।
अहोरात्रेणोद्धरणं पादन्यासं स गच्छति।
एवं सहस्रं विस्तीर्णे योजनानां विसृत्यते॥"
इति मार्कण्डेयपुराणे पितापुत्रसंवादनामाध्यायः॥ (तथाच देवीभागवते। ८।२२।८-११।
"एतन्ममाहमिति यो भूतद्रोहेण केवलम्।
पुष्णाति प्रत्यहं स्वीयकुटुम्बं कार्य्यलम्पटः॥
एतद्विहाय चाम्त्रैव स्वाशुभेन पतेदिह।
रौरवे नाम नरके सर्व्वसत्त्वभयावहे॥
इह लोकेऽसुना ये तु हिंसिता जन्तवः पुरा।
त एव रुरवो भूत्वा परत्र पीड़यन्ति तम्॥
तस्माद्रौरवमित्याहुः पुराणज्ञा मनिषिणः।
रुरुः सर्पादपि क्रूरो जन्तुरुक्तः पुरातनैः॥")
रौरवः, त्रि, चञ्चलः। धूर्त्तः। घोरः। इति शब्दरत्नावली॥ (रुरोर्मृगस्येदमिति। अण्। मृगसम्बन्धिनि च। यथा, मनुः। २। ४१।
"कार्ष्णरौरववास्तानि चर्म्माणि ब्रह्मचारिणः।
वसीरन्नानुपूर्व्वेण शाणक्षौमाविकानि च॥")
रौहिट, [ष्] पुं, रोहिषमृगः। यथा। "स एष रौहिषां मध्ये चरतीति भवभूतिः।" इत्यमरटीकायां भरतः॥
रौहिणं, क्ली, (रोहिणमेव। स्वार्थे अण्।) दिनस्य नवमसुहूर्त्तः। यथा। अत्र पूर्व्वाह्णे आह्नमभिधाय रौहिणन्तु न लङ्घयेदित्यभिधानेन पूर्व्वाह्णआह्नस्य सङ्गवात् परो रौहिणपर्य्यन्तगौणपूर्व्वाह्णकालः प्रतीयते। तेन रौहिणं पूर्व्वाह्णआह्नस्य गौणकालत्वेनोत्तरावधिः अपराह्णआह्नस्य पूर्व्वावधिरित्यवगम्यते ततश्च पूर्व्वदिने सङ्गवात् परं रौहिणपर्य्यन्तं तिथेर्लाभे परदिने सुहूर्त्तत्रयमात्रे तत्तिथिलाभे पूर्व्वदिने आह्नम्। रौहिणान्तरूपगौणपूर्व्वाह्णलाभात् न परदिने तथात्वाभावात्। उभयदिने सङ्गवलाभे परदिने शुक्लपक्षे तिथिर्ग्राह्या इति वचनात्। रौहिणन्तु दिवसस्य नवमसुहूर्त्तस्य ज्योतिषोक्तरोहिणीदेवतत्वात् रौहिणत्वमिति। इति आह्निकतत्त्वम्॥
रौहिष, पुं, (रुह्+इनन्। स्वार्थे अण्।) चन्दनवृक्षः। इति त्रिकाण्डशेषः॥
रौहिषेयं, क्ली, मरकतमणिः। इति राजनिर्घण्टः॥
रौहिणेयः, पुं, (रोहिण्या अपत्यमिति। रोहिणी+"शुभ्रादिभ्यश्च।" ४।१।१२३। इति ढक्।) बलदेवः। (यथा, महाभारते। १।१६२।१६।
"तत्रोपविष्टं पृथुदीर्घबाहुं
ददर्श कृष्णः सह रौहिणेयः॥")
बुधग्रहः। इत्यमरः॥ (पुरुषोत्तमक्षेत्रतीर्थपञ्चकान्यतमः। यथा, तीर्थतत्त्वे।
"मार्कण्डेये वटे कृष्णे रौहिणेये महोदधौ।
इन्द्रद्युम्नसरः स्नात्वा पुनर्जन्म न विद्यते॥")
रौहिणेयः, त्रि, (रोहिण्या अपत्यमिति। रोहिणी+ढक्।) गोवत्सः। इति मेदिनी। ये, १२७॥
रौहिषं, क्ली, (रोहतीति। रुह्+"रुहेर्हिश्च।" उणा० १।४८। इति टिषच्। हृद्भिन्न धातोः।) कर्त्तृणम्। इत्यमरः॥ रोहिषलक्षणम्। इति राजनिर्घण्टः॥ तन्नामगुणाः।
"कर्त्तृणं रौहिषं देवनखं सौगन्धिकं तथा।
भूतीकं ध्यामं पौरञ्च श्यामकं धूपगन्धिकम्॥
रौहिषं तुवरं तिक्तं कटुपाकं त्रयोहति।
कृमिकण्डूत्यधिपित्तास्रशूलकासकफज्वरान्॥"
इति भावप्रकाशः॥ *॥
अन्यत् कर्त्तृणशब्दे द्रष्टव्यम्॥
रौहिषः, पुं, (रुह्+टिषच्। हृद्भिन्न धातोः।) मृगविशेषः। इत्यमरः॥ रोहितमत्स्यः। इत्यजयपालः॥
रौहिषी, स्त्री, (रौहिष+ङीप्।) मृगी। दूर्व्वा। इति संक्षिप्तसारोणादिवृत्तिः॥

ल

ल, लकारः। स तु यवर्गस्य तृतीयो वर्णो यत्नस्याष्टाविंशवर्णश्च। अस्योच्चारणस्थानं दन्ताः। इति व्याकरणम्॥ (तथाच सिद्धान्तकौमुद्याम्।
"लृतुलसानां दन्ताः॥") तस्य स्वरूपं यथा,—
"लकारं चञ्चलापाङ्गि! कुण्डलीत्रयसंयुतम्।
पीतविद्युल्लताकारं सर्व्वरत्नप्रदायकम्॥
पञ्चदेवमयं वर्णं पञ्चप्राणमयं सदा।
त्रिशक्तिसहितं वर्णं त्रिबिन्दुसहितं सदा।
आत्मादितत्त्वसहितं हृदि भावय पार्व्वति!॥"
इति कामधेनुतन्त्रम्॥ *॥
(वङ्गीयवर्णमालायाम्। अस्य लेखनप्रकारो यथा,—
"कुण्डलीत्रयसंयुक्ता वामाङ्गगता लघुः।
पुनरूर्द्धगता रेखा तासु नारायणः शिवः।
ब्रह्मग्रन्थिश्च सन्तिष्ठेद्ध्यानमस्य प्रचक्षते॥"
ध्यानं यथा,—
"चतुर्भुजां पीतवस्त्रां रक्तपङ्कजलोचनाम्।
सर्व्वदा वरदां भीमां सर्व्वालङ्कारभूषिताम्॥
योगीन्द्रसेवितां नित्यां योगिनीं योगरूपिणीम्।
चतुर्वर्गप्रदां देवीं नागहारोपशोभिताम्॥
एवं ध्यात्वा लकारन्तु तन्मन्त्रं दशधा जपेत्॥"
इति वर्णोद्धारतन्त्रम्॥
तस्य नामानि यथा,—
"लक्ष्मीन्द्रः पूतना पृथ्वी माधवः शुक्रवाचकः।
बलानुजः पिनाकीशो व्यापको मांससंज्ञकः॥

खड्गी नादोऽन्तं देवी लवणं वारुणीपतिः। ग्रिखा वाणी क्रिया माता भामिनी कामिनी प्रिया॥
ज्वालिनी वेगिनी नादः प्रद्युम्नः ग्रोषणो हरिः। विश्वात्ममन्त्रौ बली चेतो मेरुर्गिरिः कला रसः॥"
इति नानातन्त्रग्राह्यम्॥
(अनुबन्धविग्रेषः। यथा, कविकल्पद्रुमे। "दिवाद्यो यादादिकः।" इतेन अद् लौ भक्षणे लुगदृभ्योऽपः। अत्ति इति॥ छन्दः-ग्राह्योक्तो लघुसंज्ञको गणविग्रेषः। इति छन्दोमञ्जरी॥)

लं, क्ली, (लीयतेऽनेति। ली+अभिधानान्निरुपपदेऽपि डः।) पृथ्वीबीजम्। इति तन्त्रम्॥

लः, पुं, (लातीति। ला+अच्।) इन्द्रः। इति मेदिनी। ले, १॥

लक, क स्वाद आपने। इति कविकल्पद्रुमः॥ (चुरा०-पर०-सक०-सेट्।) स्वादो रसोपादानम्। क, लाकयति मोदकं बालकः। इति दुर्गादासः॥

लकचः, पुं, लकुचवृक्षः। इति ग्रब्दरत्नावली॥

लकुचः, पुं, (लक्यते इति। लक स्वादे+बाहुलकादुचः।) वृक्षविग्रेषः। डेहुया इति मादार इति च भाषा। तत्पर्य्यायः। लिकुचः२ ग्रालः३ कषायी४ दृढ़वल्कलः५ डहुः६ काण्डेः७ ग्रूरः८ स्थूलस्कन्धः९। अस्य गुणाः। तिक्तरसत्वम्। कषायत्वम्। उष्णत्वम्। लघुत्वम्। कण्ठदोषहरत्वम्। दाहित्वम्। मलसंग्रहदायकत्वञ्च। इति राजनिर्घण्टः॥ * ॥ अपि च।
"लकुचः क्षुद्रपनसो लिकुचो डहुरित्यपि।
आमं लकुचमुष्णञ्च गुरु विष्टम्भलक्षणम्॥
मधुरञ्च तथाम्लञ्च दोषत्रितयरक्तकृत्।
शुक्राग्निनाशनञ्चापि नेत्रयोरहितं स्मृतम्॥
सुपक्वं तत्तु मधुरमम्लं वातानिलपित्तहृत्।
कफवह्निकरं रुच्यं वृष्यं विष्टम्भकञ्च तत्॥"
इति भावप्रकाशः॥*॥
अन्यच।
"लकुचं गुरु विष्टम्भि स्वादम्लं रक्तपित्तकम्।
श्लेष्मकारि समीरघ्नमुष्णं शुक्राग्निनाशनम्॥"
इति वैद्यकम्॥

लक्तकः, पुं, (रक्तेन रक्तवर्णेन कायतीति। के+कः। रस्य लत्वम्।) अलक्तकः। इति ग्रब्दरत्नावली॥ (यथा, गो० रामायणे। २।६०।१६।
"प्रक्षाल्य लक्तकरसप्रख्यौ तद्रसवर्ज्जितौ।
तथैव रेजतुस्तस्याश्चरणौ पद्मवर्चसौ॥")
जीर्णवस्त्रखण्डम्। नेकड़ा इति भाषा। तत्पर्य्यायः। कर्पटः२। इत्यमरः॥ नक्तकः३। इति भरतः॥ दे मलिनत्वादिदुष्टजीर्णवस्त्रखण्डे नेकड़ा इति ख्याते। लक्तकाद्यष्टकं वस्त्रमात्रे इति केचित्॥ पटोऽस्त्री कर्पटः ग्राटः सिचयः प्रोतलक्तकाः। इति रभसः॥ लक्ष्यते हीनैरास्वाद्यते अनुभूयते लक्तः रक लक क स्वाद आपने चुर्भ्वो भिर्व्वेति विभाषितत्वात् न भिः कर्म्मणि क्तः ततः स्वार्थे कः लक्तको ऽन्तःस्थादिः। अज्यते स्म अक्तं वक्तं अन्जोः क्तः न अक्तं कं सुखं यस्मादिति विग्रहवचुव्रीहौ मनीषादित्वात् अक्तस्य पूर्व्वलोपे नक्तकस्त्वर्गपञ्चमादिरपि। इति तट्टीकायां भरतः॥

लक्तकर्म्मा, [न्] पुं, (लक्तं रक्तवर्णं करोतीति। कृ+मनिन्।) रक्तवर्णलोधः। इति ग्रब्दचन्द्रिका॥

लक्ष, क च दर्ग्रने। अङ्के। इति कविकल्पद्रुमः॥ (चुरा०-उभ०-सक०-सेट्।) क च, लक्षयति लक्षयते घटं लोकः। पग्रयति चिह्नयुक्तं करोतीत्यर्थो वा। इति दुर्गादासः॥

लक्षं, क्ली, (लक्षयतीति। लक्ष+अच्।) व्याजः। ग्रस्त्रम्। इति मेदिनी। षे, २३॥ (यथा, मनुः। ७। ५४।
"मौलान् ग्रास्त्रविदः ग्रूरान् लब्धलक्षान् कुलोद्गतान्।
सचिवान् सप्त चाष्टौ वा प्रकुर्व्वीत परीक्षितान्॥")

लक्षं, क्ली, स्त्री, (लक्षयतीति। लक्ष+अच्।) दग्रायुतसंख्या। इति मेदिनी। षे, २३॥ लाख इति भाषा। (यथा, कथासरित्सागरे। ४३।१०६।
"तस्यैकादग्रभिर्मित्रैः सहायातैर्युतस्य हि।
लक्षमभ्यधिकं देव वर्त्तते वरवाजिनाम्॥")

लक्ष्मकं, क्ली, (लक्षयतीति। लक्ष+खुल्।) लक्षयति यत्। यथा। लक्ष्मकं नाम लक्षयति।
"याटग्रार्थस्य सम्बन्धवति ग्रक्तन्तु यज्ञवेत्।
तत्र तल्लक्ष्मकं नाम तच्छक्तिविधुरं यदि॥"
याटग्रार्थसम्बन्धवति यन्नाम सङ्केतितं तदेव ताटग्रार्थे लक्ष्मकं यदि ताटग्रार्थे ग्रक्तिग्रून्यं भवेत्। सैन्धवादयस्तु ग्रब्दाः तुरगादिसम्बन्धिनि लवणादाविव तुरगादावपि ग्रक्ता एव। गङ्गादयस्तु तीरादावसङ्केतिताः तत्सम्बन्धितीरादिग्रक्तत्वेन ग्रहीता एव तीरादन्वयं बोधयन्ति तत्र लक्षका एव। अपि च। तदेवं विधलक्षणावत्त्वाल्लक्ष्मकं नामापि जहत्स्वार्थादिभेदादनेकविधमित्यर्थः स्यादेतद्यदि तीरादिलक्ष्मकतया गङ्गादिपदस्य ज्ञानं तीरादनुभवे भवेद्धेतुत्वदीक्तक्रमेण लक्षकाणां विभागो न त्वेतदस्ति। तीरादन्वयबोधं प्रति तीरादिग्रक्तत्वेनैव पदज्ञानस्य लाघवेन हेतुतया लक्षकाणामननुभावकत्वात् गुरूणामग्नौ प्रेत्यं स्पृष्टेदित्यादौ ग्रक्येन दहनादिनेव गङ्गायां घोष इत्यादौ लक्षितेन तीरादिना साङ्गेमग्रहीतासंसर्गकस्येव सप्तम्यर्थाधेयत्वान्वयबोधप्रविष्टत्वादिति चेन्न। प्रकृत्यर्थावच्छिन्नस्येव प्रत्ययार्थस्य धर्म्मान्तरेऽन्वयबुद्धेर्व्युत्पन्नतया तीरादिविग्रेषितस्य सुवर्थाधेयत्वादेर्घोषादावन्वयबोधायोगात्। न च ग्रक्तस्येव पदस्य स्वसाकाङ्क्षपदान्तरोपस्थाप्यार्थान्वितस्वार्थधर्म्मिकान्वयबोधं प्रति हेतुत्वादन्वयबुद्धौ लक्ष्यार्थस्य प्रवेग्रः।

कुन्ताः प्रविग्रन्तीत्यादौ लक्ष्यस्य कुन्तधरादेरन्वयविग्रेष्यत्वानुपपत्तेः। कुमतिः पग्रुरित्यादौ लक्ष्यार्थयोर्भिन्नयोऽन्वयबोधस्याप्यनुभविकत्वाच्च। तस्मात् ग्रक्तिरिव भक्तिरपि ज्ञानमनुभावकं भवत्येव कार्य्यतावच्छेदकस्य सङ्कोचाच्च न व्यभिचारः। इति ग्रब्दग्रक्तिप्रकाग्रिका॥

लक्षणं, क्ली, (लक्ष्यतेऽनेनेति। लक्ष+ल्युट्। यद्वा, "लक्षेरट् च।" उणा० ३। ७। इति नग्प्रत्ययस्यास्याड़ागमश्च।) चिह्नम्। (यथा, रघुः। १०। ६।
"अथाचीपो भविष्यन्त्याः कार्य्यसिद्धेर्हि लक्षणम्॥")
नाम। इति मेदिनी। णे, ७५॥ लक्ष्यते ज्ञायतेऽनेनेति लक्षणम्। तद्विविधम्। इतरभेदानुमापकम्। व्यवहारप्रयोजकञ्च। इति न्यायमतम्॥ वैयाकरणमते तु।
"कृत्तद्धितसमासानामभिधानं नियामकम्।
लक्षणस्त्वनभिज्ञानां तदभिज्ञानलक्षकम्॥"
इति वोपदेवः॥
(लक्षणलक्षणन्तु। "समानासमानजातीयो व्यवच्छेदो लक्षणार्थः।" इति सांख्यतत्त्वकौमुद्याम्। ५॥ सुखदुःखलक्षणं यथा, मनौ। ४।१६०।
"सर्व्वं परवग्रं दुःखं सर्व्वमात्मवग्रं सुखम्।
एतद्विद्यात् समासेन लक्षणं सुखदुःखयोः॥")
दर्ग्रनम्। इति लक्षधात्वर्थदर्ग्रनात्॥

लक्षणः, पुं, (लक्ष+"लक्षेरट् च।" उणा० ३।७। इति नक्तस्याड़ागमश्च। लक्षणमस्यस्तीति अच् वा।) सौमित्रिः। यथा, हरिवंग्रे। ४१।१२६।
"लक्षणानुगतो यच्च सर्व्वभूतहिते रतः।
अतुर्दग्रं वने तप्ता तपो वर्षाणि राघवः॥")
सारसपक्षी। इति ग्रब्दरत्नावली॥

लक्षणा, स्त्री, (लक्षण+टाप्।) सारसी। इति मेदिनी। णे, ७५॥ हंसी। इति सिद्धान्तकौमुद्यामुणादिवृत्तिः॥ (अक्षरोविग्रेषः। यथा, महाभारते। १। १२३। ५६।
"अम्बिका लक्षणा चेमा देवी रम्भा मनोरमा॥")
ग्रक्यसम्बन्धः। यथा,—
"लक्षणा ग्रक्यसम्बन्धस्तात्पर्य्यानुपपत्तितः॥"
इति भाषापरिच्छेदः॥
गङ्गायां घोष इत्यादौ गङ्गापदस्य ग्रक्यार्थे प्रवाहरूपे घोषस्यान्वयानुपपत्तिस्तात्पर्य्यानुपपत्तिर्वा यत्र प्रतिसन्धीयते तत्र लक्षणया तीरस्य बोधः। सा च ग्रक्यसम्बन्धरूपा। तथा हि प्रवाहरूपंग्रक्यार्थसम्बन्धस्य तीरे ग्रहीतत्वात्तीरस्य स्मरणं ततः ग्राब्दबोधः। इति सिद्धान्तमुक्तावली॥ * ॥ अपि च।
"जहत्स्वार्थाजहत्स्वार्थानिरूढ़ाधुविकादिकाः।
लक्षणा विविधास्त्राभिर्लक्ष्मकं स्यादनेकधा॥"
काचिल्लक्षणा ग्रक्यावृत्तिरूपेण बोधकतया जहत्स्वार्थेत्युच्यते। यथा तीरत्वादिना गङ्गादिपदस्य। काचिच्छक्यलक्षोभयवृत्तिना ग्रक्य-

वृत्तिनैव वा रूपेणानुभावकत्वादनहत्स्वार्था। यथा द्रव्यत्वादिना नीलघटत्वादिना च घटादिपदस्य। काचिल्लक्षतावच्छेदकीभूततत्तद्रूपेण पूर्वपूर्वं प्रत्यायकत्वान्निरूढा। यथा, आरण्यादिप्रकारेण तदाश्रयद्रव्यानुभावकत्वादरण्यादिपदस्य। काचिच्च पूर्वपूर्वं तादृरूपेणाप्रत्यायकत्वादाधुनिकी। यथा घटत्वादिना पटादिपदस्य। आदिना ग्रक्यसहग्रत्वप्रकारेण बोधकतया गौणीत्युपगम्यते। यथा अग्निर्माणवक इत्यादावग्निसहग्रत्वादिना अग्न्यादिपदस्य। इति ग्रब्दशक्तिप्रकाशिका॥ * ॥ अन्यच्च।

"मुख्यार्थबाधे तद्युक्तो ययान्योऽर्थः प्रतीयते। रूढेः प्रयोजनाद्वासौ लक्षणाग्रक्तिरर्पिता॥"१॥

कलिङ्गः साहसिक इत्यादौ कलिङ्गादिग्रब्दो देग्रविग्रेषादिरूपे स्वार्थे असम्भवन् यया ग्रब्दस्य ग्रक्त्या स्वसंयुक्तान् पुरुषादीन् प्रत्याययति। यथा च गङ्गायां घोष इत्यादौ गङ्गादिग्रब्दो जलमयाद्यर्थवाचकत्वात् प्रकृतेऽसम्भवन् स्वस्य सामीप्यादिसम्बन्धिसम्बन्धिनं तटादिं बोधयति। सा ग्रब्दस्यार्पिता स्वाभाविकेतरा ईश्वरानुद्भाविता वा ग्रक्तिर्लक्षणा नाम। पूर्वत्र हेतू रूढिः प्रसिद्धिरेव। उत्तरत्र गङ्गातटे घोष इति प्रतिपादनादलभ्यस्य ग्रीतत्वपावनत्वातिग्रयस्य बोधनरूपं प्रयोजनम्। हेतुं विनापि यस्य कस्यचित् सम्बन्धिनो लक्षणेऽतिप्रसङ्गः स्यादत उक्तं रूढेः प्रयोजनाद्वेति॥ * ॥

तद्भेदानाह।

"मुख्यार्थस्येतराक्षेपो वाक्यार्थेऽन्वयसिद्धये। स्यादात्मनोऽप्युपादानादेघोपादानलक्षणा॥"२॥

रूढ्युपादानलक्षणा यथा। श्वेतो धावति। प्रयोजने यथा। कुन्ताः प्रविग्रन्ति। अनयोर्हि श्वेतादिभिः कुन्तादिभिश्च अचेतनतया केवलैर्धावनप्रवेग्रनक्रिययोः कर्तृतयान्वयमलभमानैरेतत्सिद्धये आत्मसम्बन्धिनोऽश्वादयः पुरुषादयश्च आक्षिप्यन्ते। पूर्वत्र प्रयोजनाभावाद्रूढिः। उत्तरत्र कुन्तादीनामतिग्रहणत्वं प्रयोजनम्। अत्र च मुख्यार्थस्यात्मनोऽप्युपादानम्। लक्षणलक्षणायान्तु परस्यैवोपलक्षणमित्यनयोर्भेदः। इयमेवाजहत्स्वार्थेत्युच्यते॥ * ॥

"अर्पणं स्वस्य वाक्यार्थे परस्यान्वयसिद्धये। उपलक्षणहेतुत्वादेषा लक्षणलक्षणा॥" ३॥

रूढिप्रयोजनयोर्लक्षणलक्षणा यथा। कलिङ्गः साहसिकः गङ्गायां घोष इति च। अनयोर्हि पुरुषतटयोर्वाक्यार्थेऽन्वयसिद्धये कलिङ्गगङ्गाग्रब्दावात्मानमर्पयतः। यथा वा।

"उपकृतं बहु तत्र किमुच्यते
सुजनता प्रथिता भवता परम्।
विदधदीदृग्रमेव सदा सखे
सुखितमास्व ततः ग्ररदां ग्रतम्॥"

अत्रानुपकारादीनां वाक्यार्थेऽन्वयसिद्धये उपलक्षणाद्यः ग्रब्दाः आत्मानमर्पयन्ति। अत्रापकारिणं प्रति उपकारादिप्रतिपादनान्मुख्यार्थबाधः वैपरीत्यलक्षणः सम्बन्धः फलमपकारातिग्रयः। इयमेव जहत्स्वार्थेत्युच्यते॥ * ॥

"आरोपाध्यवसानाभ्यां प्रत्येकं ता अपि द्विधा।"

ताः पूर्वोक्ताश्चतुर्भेदा लक्षणाः।

"विषयस्यानिगीर्णस्यान्यतादात्म्यप्रतीतिकृत्। सारोपा स्यान्निगीर्णस्य मता साध्यवसानिका॥ ४॥

रूढ्युपादानलक्षणा सारोपा यथा। अश्वः श्वेतो धावति अत्र हि श्वेतगुणवान् अश्वोऽनिगीर्णस्वरूपः स्वसमवेतश्वेतगुणतादात्म्येन प्रतीयते। प्रयोजने यथा एते कुन्ताः प्रविग्रन्ति अत्र सर्वगात्रा कुन्तधारिपुरुषनिर्देग्रात् सारोपात्वम्। रूढौ लक्षणलक्षणा यथा। कलिङ्गः पुरुषो युध्यति। अत्र पुरुषकलिङ्गयोराधार्याधारतासम्बन्धः। प्रयोजने यथा आयुर्घृतम्। अत्रायुष्कारणमपि घृतं कार्यकारणभावसम्बन्धसम्बन्ध्यायुक्तादात्म्येन प्रतीयते अन्यवैलक्षण्येनानभिचारेणायुष्करणं प्रयोजनम्। यथा च राजकीये पुरुषे गच्छति राजासौ गच्छति इत्यत्र स्वस्वामिभावलक्षणः सम्बन्धः। यथा वा अग्निर्माणवकोऽयमे हस्तोऽयम्। अत्रावयवावयविभावलक्षणः सम्बन्धः। ब्राह्मणोऽपि तत्रासौ अत्र तात्कर्म्यलक्षणः सम्बन्धः। इन्द्रार्थाः स्थूणाः अमी इन्द्राः अत्र तादर्थ्यरूपः। एवमन्यत्रापि। निगीर्णस्य पुनर्विषयस्यान्यतादात्म्यप्रतीतिकृत् साध्यवसाना। अस्याश्चतुर्भेदेषु पूर्वोदाहरणान्येव॥ * ॥

"साङ्गस्येतरसम्बन्धाः शुद्धाश्चाः सकृता अपि। साङ्गात्तु मता गौण्यस्तेन षोढ़ाग्र भेदिताः॥"५॥

ताः पूर्वोक्ता अष्टभेदा लक्षणाः साङ्गस्येतरसम्बन्धाः कार्यकारणभावादयः। अत्र शुद्धानां पूर्वोदाहरणान्येव। रूढ्युपादानलक्षणा सारोपा गौणी यथा। एतानि तैलानि हैमन्ते सुखानि अत्र तैलग्रब्दस्तिलभवस्नेहरूपं सुखार्थमुपादायैव सार्वधादिस्नेहेषु वर्तते। प्रयोजने यथा राजकुमारेषु ततसङ्गेषु च गच्छत्सु एते राजकुमारा गच्छन्ति। रूढ्युपादानलक्षणा साध्यवसाना गौणी यथा तैलानि हैमन्ते सुखानि। प्रयोजने यथा राजकुमारा गच्छन्ति। रूढौ लक्षणलक्षणा सारोपा गौणी यथा राजा गौड़ेन्द्रः कण्टकं ग्रोधयति। प्रयोजने गौर्वाहिकः। रूढौ लक्षणलक्षणा साध्यवसाना गौणी यथा कण्टकं ग्रोधयति। प्रयोजने यथा गौर्ज्वलति॥ * ॥

"अङ्गस्य गूढागूढत्वाद्द्विधा स्युः फललक्षणाः॥" ६॥

प्रयोजने या अष्टभेदा लक्षणा दर्ग्रितास्ताः प्रयोजनरूपयङ्गस्य गूढागूढतया प्रत्येकं द्विधा भूत्वा षोढ़ाग्रभेदाः। तत्र गूढः वाक्यार्थभावनापरिपक्वबुद्धिविभवमात्रवेद्यः। यथा उपकृतं बहु तत्रेत्यादि। अगूढोऽतिस्पष्टतया सर्वजनवेद्यः। यथा उपदिग्रति कामिनीनां यौवनमद एव ललितानि। अत्रोपदिग्रतीत्यनेन आविष्करोतीति लक्ष्यते आविष्कारातिग्रयस्याभिधेयवत् स्फुटं प्रतीयते॥ * ॥

"धर्मिधर्मगतत्वेन फलस्यैता अपि द्विधा॥"७॥

एता अनन्तरोक्ताः षोढ़ाग्रभेदा लक्षणाः फलस्य धर्मिगतत्वेन धर्मिगतत्वेन च प्रत्येकं द्विधा भूत्वा द्वादग्रभेदाः। क्रमेणोदाहरति।

"स्निग्धग्यामलकान्तिलिग्नवियतो वेल्लद्बलाकाघनाः
वाताः ग्रीकरिणः पयोदसुहृदामानन्दकेकाः कलाः।
कामं सन्तु दृढं कठोरहृदयो रामोऽस्मि सर्वं सहे
वैदेही तु कथं भविष्यति हहा हा देवि! धीरा भव॥"

अत्रात्यन्तदुःखसहिष्णुरूपे रामे धर्मिणि लक्ष्ये तस्यैवातिग्रयः फलम्। गङ्गायां घोष इत्यत्र तटादिषु लक्ष्येषु ग्रीतत्वपावनत्वादिरूपधर्मस्यातिग्रयः फलम्॥ * ॥

"तदेवं लक्षणाभेदाश्चत्वारिंग्रदग्रता बुधैः॥"

रूढ़ावष्टौ फले द्वात्रिंग्रदिति चत्वारिंग्रल्लक्षणाभेदाः॥ * ॥ किञ्च।

"पदवाक्यगतत्वेन प्रत्येकं ता अपि द्विधा।"८।

ता अनन्तरोक्ताः। अत्र पदगतत्वेन यथा गङ्गायां घोषः। वाक्यगतत्वेन यथा उपकृतं बहु तत्रेति। एवमग्रीतिप्रकारा लक्षणा। इति साहित्यदर्पणम्॥

लक्षा, स्त्री, (लक्ष्यतीति। लक्ष्+अच्। टाप्।) लक्षम्। दग्रायुतसंख्या। इति मेदिनी। षे, २३॥

लक्षितः, त्रि, (लक्ष्+क्तः।) आलोचितः। दृष्टः। (यथा, रघुः। ७। ४४।

"यैः सादिता लक्षितपूर्वकेतून्
तानेव सामर्यतया निजघ्नुः॥")

अङ्कितः। इति लक्षधातोः कर्म्मणि क्तप्रत्ययेन निष्पन्नम्॥ लक्षणाग्रयश्च॥

लक्षितलक्षणा, स्त्री, लक्षिते लक्षणा। यथा द्विरेफपदेन बहुव्रीहिलक्षणयोपस्थापितद्विरेफद्वययुक्तभ्रमरपदादभिधयैव भृङ्गोपस्थितिः। अत्र रूढिरस्ति। प्रकृते तु रूढिप्रयोजनाभावाज्ज्ञेयार्थत्वं इयमेव लक्षितलक्षणेत्युच्यते। न च लक्षणाद्वयाभावात् कथमियं लक्षितलक्षणेति वाच्यम्। यत्र लक्षिताच्छब्दादर्थाभिधानं तत्रैव लक्षितलक्षणायाः परिभाषितत्वात्। इति साहित्यदर्पणटीकाकृत् श्रीरामचरणतर्कवागीग्रः॥

लक्षिता, स्त्री, (लक्ष्+क्तः। स्त्रियां टाप्।) परकीयान्तर्गतनायिकाभेदः। अस्या लक्षणम्।

पुंस्त्वलीभावनिपुणा। उदाहरणं यथा,—
"यङ्कृतं तङ्कृतं यङ्कृत्यात्तदपि वा भूयात्।
यङ्क्वतु तङ्क्वतु वा विफलस्तव गोपनोपायः॥"
इति रसमञ्जरी॥

लक्ष्म, [न्] क्ली, (लक्ष्यतेऽनेन लक्ष्यते इति वा। लक्ष+मनिन्।) चिह्नम्। (यथा, प्राकुन्तले १ अङ्के।
"सरसिजमनुविद्धं शैवलेनापि रम्यं
मलिनमपि हिमांशोर्लक्ष्म लक्ष्मीं तनोति।
इयमधिकमनोज्ञा वल्कलेनापि तन्वी
किमिव हि मधुराणां मण्डनं नाकृतीनाम्॥")
प्रधानम्। इत्यमरः। ३। ३। १२४॥

लक्ष्मणं, क्ली, चिह्नम्। इति शब्दरत्नावली॥ (यथा, माघे। ६। ३१।
"अथ लक्ष्मणानुगतकान्तवपु-
र्जलधिं विलङ्घ्य गणिदाग्रथिः।
परिवारितः परित ऋक्षगणै-
स्त्रिमिरौघराक्षसकुलं विभिदे॥")
नाम। इत्यमरटीकायां भरतः॥ (लक्ष्मीरस्यस्येति। लक्ष्मी+मादित्वात्। लक्ष्म्या अक्षेति गणसूत्रेणात्वं बोध्यम्।) श्रीविष्णुः, त्रि। इति मेदिनी। णे, ७५॥

लक्ष्मणः, पुं, (लक्ष्मणमस्त्यस्येति। अर्शआदित्वादच्।) सारसः। इति हेमचन्द्रः॥ श्रीरामभ्राता। इति मेदिनी। णे, ७६॥ (यथा, अध्यात्मरामायणे। १। ३। ७५।
'भरणाङ्गरतो नाम लक्ष्मणं लक्ष्मणान्वितम्।
शत्रुघ्नं शत्रुहन्तारमेवं गुरुरभाषत॥")
स च त्रेतायुगे अयोध्यायां सुमित्रागर्भे दशरथात्जातः। इन्द्रजिद्वधार्थं तस्य चतुर्दशवर्षपर्य्यन्तं आहारनिद्रादिरहितत्वं यथा,—
"एकदा रघुनाथश्च सीतया लक्ष्मणेन च।
स्नातः सरसि तत्रस्थो रम्ये पञ्चवटीतटे॥
उवाच सीतां हेमन्ते जलं सुखादु निर्म्मलम्।
तथान्नव्यञ्जनं रम्यं सर्व्वं वस्तु सुशीतलम्॥
फलञ्च चयनं चक्रे सीतायै प्रददौ पुरः।
ततो ददौ लक्ष्मणाय पश्चाद्भुङ्क्ते स्वयं प्रभुः॥
लक्ष्मणस्तु गृहीत्वा च नैव भुङ्क्ते फलं जलम्।
मेघनादवधार्थञ्च सीतोद्धारणकारणात्॥
निद्रां न याति नो भुङ्क्ते वर्षाणाञ्च चतुर्दश।
य एव पुरुषो योगी तदधो रावणात्मजः॥"
इति ब्रह्मवैवर्त्ते श्रीकृष्णजन्मखण्डे ११५ अध्यायः॥

लक्ष्मणप्रसूः, स्त्री, (लक्ष्मणस्य प्रसूर्जननी।) सुमित्रा। इति शब्दरत्नावली॥

लक्ष्मणा, स्त्री, (लक्ष्मणमस्त्यस्या इति। अर्शआदित्वात् अच्। टाप्।) श्वेतकण्टकारी। इति राजनिर्घण्टः॥ सारसी। ओषधिभेदः। इति मेदिनी। णे, ७६॥ प्रेयस्तु लक्ष्मणाकन्द इति नाम्ना ख्यातः। तस्याः पर्य्यायः। पुत्रकन्दा २ पुत्रदा ३ नागिनी ४ नागाक्षा ५ नागपत्री ६ तुलिनी ७ मज्जिका ८ असबिन्दुच्छदा ९ पुच्छदा १०। अस्या गुणाः। मधुरत्वम्। शीतत्वम्। स्त्रीवन्ध्यत्वनाशित्वम्। रसायनकरत्वम्। वल्यत्वम्। चिरदोषश्रमनत्वञ्च। इति राजनिर्घण्टः॥ अपि च।
"पुत्रकाकाररक्ताख्यबिन्दुभिर्लाञ्छिता सदा।
लक्ष्मणा पुत्रजननी वस्तगन्धाकृतिर्भवेत्॥"
इति भावप्रकाशः॥*॥
(मद्राधिपतिकन्या। यथा, भागवते। १०। ५८। ५७।
"सुताञ्च मद्राधिपतेर्लक्ष्मणां लक्ष्मणैर्युताम्।
स्वयंवरे जहारैकः स सुपर्णः सुधामिव॥")
दुर्य्योधनकन्या। सा तु श्रीकृष्णपुत्रेण साम्बेन विवाहिता। इति महाभारतम्॥ (यथा, भागवते। १०। ६८। १।
"दुर्य्योधनसुतां राजन् लक्ष्मणां समितिञ्जयः।
स्वयंवरस्थामहरत् साम्बो जाम्बवतीसुतः॥")

लक्ष्मीः, स्त्री, (लक्ष्यति पश्यति उद्योगिनमिति। लक्ष+"लक्षेर्मुट् च।" उणा० ३।१६०। इति ईप्रत्ययो मुडागमश्च।) विष्णुपत्नी। तत्पर्य्यायः। पद्मालया २ पद्मा ३ कमला ४ श्रीः ५ हरिप्रिया ६ इन्दिरा ७ लोकमाता ८ मा ९ क्षीराब्धितनया १० रमा ११। इत्यमरः॥ जलधिजा १२ भार्गवी १३। इति शब्दरत्नावली॥ हरिवल्लभा १४ दुग्धाब्धितनया १५ क्षीरसागरसुता १६। इति कविकल्पलता॥*॥

अथ लक्ष्मीमन्त्राः।
"वाग्भं वह्निसमारूढं वामनेत्रेन्दुसंयुतम्।
बीजमेतत् श्रियः प्रोक्तं सर्व्वकामफलप्रदम्॥"*॥
अस्य पूजाप्रयोगः। प्रातःकृत्यादिपीठन्यासान्तं कर्म्म विधाय हृत्पद्मस्य पूर्व्वादिकेशरेषु मध्ये च पीठशक्तीः पीठमनुञ्च न्यसेत्। ॐ विभूत्यै नमः। एवं उन्नत्यै कान्त्यै स्वृद्ध्यै कीर्त्यै सन्नत्यै पुष्ट्यै उत्कृष्ट्यै ऋद्ध्यै। ततः श्रीकमलासनाय नमः। इत्यासनं विन्यस्य ऋष्यादिन्यासं कुर्य्यात्। शिरसि भृगुऋषये नमः मुखे निवृच्छन्दसे नमः। हृदि श्रियै देवतायै नमः। ततः कराङ्गन्यासौ कुर्य्यात्। श्रां अङ्गुष्ठाभ्यां नमः। श्रीं तर्जनीभ्यां स्वाहा। श्रूं मध्यमाभ्यां वषट्। इत्यादि। एवं श्रां हृदयाय नमः इत्यादिना च न्यसेत्। तथा च निबन्धे।
"अङ्गानि दीर्घयुक्तेन रमाबीजेन कल्पयेत्।"
ततो ध्यानम्।
"कान्त्या काञ्चनसन्निभां हिमगिरिप्रख्यै-
श्चतुर्भिर्गजै
र्हस्तोत्क्षिप्तहिरण्मयामृततटैरासिच्यमानां
श्रियम्।
बिभ्राणां वरमब्जयुग्ममभयं हस्तैः किरीटोज्ज्वलां
क्षौमाबद्धनितम्बबिम्बललितां वन्देऽरविन्दस्थिताम्॥"
एवं ध्यात्वा मानसैः संपूज्य शङ्खस्थापनं कुर्य्यात्। ततः पीठपूजां विधाय केशरेषु मध्ये च विभूत्यादिपीठमन्त्रपूजां विधाय पुनर्ध्यात्वा आवाहनादिपञ्चपुष्पाञ्जलिदानपर्य्यन्तं विधाय आवरणपूजामारभेत्। अग्न्यादिकेशरेषु मध्ये दिक्षु च श्रां हृदयाय नमः। इत्यादिना संपूज्य दिग्दलेषु पूर्व्वादिषु ॐ वासुदेवाय नमः। एवं सङ्कर्षणाय प्रद्युम्नाय अनिरुद्धाय। विदिग्दलेषु ॐ दमकाय ॐ सलिलाय ॐ गुग्गुलवे ॐ कुरुण्टकाय। ततो देव्या दक्षिणे ॐ शङ्खनिधये नमः। एवं वसुधारायै। वामे ॐ पद्मनिधये वसुमत्यै। पत्रायेषु पूर्व्वादिषु ॐ वलाक्यै नमः। एवं विमलायै कमलायै वनमालिकायै विभीषिकायै प्राक्पूर्य्यै वसुमालिकायै। तद्बहिरिन्द्रादीन् वज्रादींश्च पूजयेत्। ततो धूपादिविसर्जनान्तं कर्म्म समापयेत्। अस्य पुरश्चरणं द्वादशलक्षजपः। तथा च।
"भानुलक्षं जपेन्मन्त्रं दीक्षितो विजितेन्द्रियः।
तत्सहस्रञ्च जुहुयात् कमलैर्मधुराप्लुतैः।
जपान्ते जुहुयान्मन्त्री तिलैर्वा मधुराप्लुतैः।
बिल्वैः फलैर्वा जुहुयान्निभिर्वा साधकोत्तमः॥
वाग्भवं वनिता विष्णोर्माया मकरकेतनः।
चतुर्व्वर्णात्मको मन्त्रश्चतुर्व्वर्गफलप्रदः॥"
वाग्भवं ऐं। विष्णुवनिता श्रीं। माया ह्रीं। मकरकेतनः क्लीं। अस्य पूजादिकं पूर्व्ववद्बोध्यम्। तथा च।
"रमायाः कल्पिते पीठे तद्विधानेन पूजयेत्।
कुर्य्यात् प्रयोगान् तत्रस्थानेन साधकोत्तमः॥
विधिभिः सेवते नित्यं ऋषिमङ्गिरसं श्रिते॥"
ध्याने तु विशेषः।
"माणिक्यप्रतिभप्रभां हिमगिरेस्तुङ्गैश्चतुर्भिर्गजै-
र्हस्ताद्यर्पितरत्नकुम्भसलिलैरासिच्यमानां सदा।
हस्ताब्जैर्वरदानमम्बुजयुगाभीतीर्दधानां हरेः
कान्तां काञ्चितपारिजातलतिकां वन्दे सरोजासनाम्॥"
अस्य पुरश्चरणं द्वादशलक्षजपः। तथा च।
"भानुलक्षं हविष्याशी जपेदन्ते सरोरुहैः।
जुहुयादशतैः पुण्यैस्तत्सहस्रं जितेन्द्रियः॥"
मन्त्रान्तरम्। नमः कमलाग्ने वासिन्यै उद्वयमिति प्रोक्तो दशाक्षरः। तथा च निबन्धे।
"दीर्घा यादिर्विसर्गान्तो ब्रह्मा भानुर्व्वसुन्धरा।
वाग्देवसिन्धे प्रिया वह्निप्रियेति प्रोक्तो दशाक्षरः॥"
"दीर्घा नकारः। यादिर्मः। ब्रह्मा कः। भानुर्मः। वसुन्धरा लः। वाग्देवसिन्धे वासिन्यै। वह्निप्रिया स्वाहा। अस्य पूजाप्रयोगः। पूर्व्ववत् पीठमन्त्रान्तं विन्यस्य ऋष्यादिन्यासं कुर्य्यात्। शिरसि दत्तऋषये नमः। मुखे विराट्छन्दसे नमः। हृदि श्रियै देवतायै नमः। तथा च शारदायाम्।
"ऋषिर्दत्तो विराट्छन्दो देवता श्रीः प्रकीर्त्तिता॥"
ततः कराङ्गन्यासौ। ॐ देव्यै नमोऽङ्गुष्ठाभ्यां नमः। ॐ पद्मिन्यै नमस्तर्जनीभ्यां स्वाहा। ॐ विष्णुपत्न्यै नमो मध्यमाभ्यां वषट्। ॐ वरदायै नमोऽनामिकाभ्यां हुं।

ॐ कमलरूपाये नमः कनिष्ठाभ्यां फट्। एवं हृदयादिषु। ॐ देव्यै नमो हृदयाय नम इत्यादि। तथा च निबन्धे।
"देव्यै हृदयमाख्यातं पद्मिन्ये शिर ईरितम्।
विष्णुपत्न्यै शिखा प्रोक्ता वरदायै तनुच्छदम्।
अस्त्रं कमलरूपाये नमोऽन्ताः प्रणवादिकाः॥"
ततो ध्यानम्।
"आसीना सरसीरुहे स्मितमुखी हस्ताम्बुजै-
र्बिभ्रती
दानं पद्मयुगाभये च वपुषा सौदामिनी-
सन्निभा।
मुक्ताहारविराजमानपृथुलोत्तुङ्गस्तनोद्भासिनी
पायाद्वः कमला कटाक्षविभवैरानन्दयन्ती
हरिम्॥"
एवं ध्यात्वा मानसैः संपूज्य शङ्खस्थापनं कृत्वा पूर्व्वोक्तपीठशक्तिसहितपीठमन्त्रान्तां पूजां विधाय पुनर्ध्यात्वावाहनादिपञ्चपुष्पाञ्जलिदानपर्य्यन्तं विधायावरणपूजामारभेत्। अग्न्यादिचतुष्कं दिक्षु च ॐ देव्यै नमो हृदयाय नमः। ॐ पद्मिन्ये नमः शिरसे स्वाहा। ॐ विष्णुपत्न्यै नमः शिखायै वषट्। ॐ वरदायै नमः कवचाय हुम्। ॐ कमलरूपाये नमोऽस्त्राय फट्। ततः पूर्व्वादिदलेषु पूर्व्ववत् बलाक्यादि पूजयेत्। तद्बहिरिन्द्रादीन् वज्रादींश्च पूजयेत्। ततो धूपादिविसर्जनान्तं कर्म समापयेत्। अस्य पुरश्चरणं दशलक्षजपः। तथा च।
"दशलक्षं जपेन्मन्त्रं मन्त्रविद्विजितेन्द्रियः।
दशांशं जुहुयान्मन्त्री मधुराक्तैः सरोरुहैः॥"*॥
अथ लक्ष्मीस्तोत्रम्।
ईश्वर उवाच।
"त्रैलोक्यपूजिते देवि! कमले विष्णुवल्लभे।
यथा त्वं सुस्थिरा कृष्णे तथा भव मयि स्थिरा॥
ईश्वरी कमला लक्ष्मीश्चला भूतिर्हरिप्रिया।
पद्मा पद्मालया सम्पत्कृद्धिः श्रीः पद्मधारिणी॥
द्वादशैतानि नामानि लक्ष्मीं संपूज्य यः पठेत्।
स्थिरा लक्ष्मीर्भवेत् तस्य पुत्रदारादिभिः सह॥"
इति तन्त्रसारः॥
विष्णुपुराणोक्तलक्ष्मीस्तोत्रं तत्रैव १ अंशे ९ अध्याये द्रष्टव्यम्॥*॥ अथ लक्ष्मीपूजानिरूपणम्। यथा, स्कन्दपुराणे।
"पौषे चैत्रे तथा भाद्रे पूजयेयुः स्त्रियः श्रियम्।
सिंहे धनुषि मीने च स्थिते सप्ततुरङ्गमे॥
प्रत्यब्दं पूजयेल्लक्ष्मीं शुक्लपक्षे गुरोर्दिने।
नापराह्णे न रात्रौ च नासिते न चाहस्यपि॥
द्वादश्यामेव नन्दायां रिक्तायाञ्च निरंशके।
त्रयोदश्यां तथाऽमायां कमलां नैव पूजयेत्॥
न पूजयेत् शनौ भौमे न बुधे नैव भार्गवे।
पूजयेत्तु गुरोर्वारे चाप्राप्ते रविसोमयोः॥
गुरुवारे हि पूर्णा च यत्नेन यदि लभ्यते।
तत्र पूज्या तु कमला धनपुत्रविवर्द्धिनी॥
न कुर्य्यात् प्रथमे मासि नैव कुर्य्याद्विसर्जनम्।
न घण्टां वादयेत्तत्र नैव भिण्टौ प्रदापयेत्॥
पौषे च दशमी ग्राह्या चैत्रके पञ्चमी तथा।
नभस्ये पूर्णिमा ज्ञेया गुरुवारे विशेषतः॥
आढकं धान्यसम्पूर्णं नानाभरणभूषितम्।
सुगन्धिशुक्लपुष्पेण शुक्लपक्षे प्रपूजयेत्॥
पौषे तु पिष्टकं दद्यात् परमान्नञ्च चैत्रके।
पिष्टकं परमान्नञ्च नभस्ये तु विशेषतः॥
गुरुवारसमायुक्ता नभस्ये पूर्णिमा शुभा।
कमलां पूजयेत्तत्र पुनर्जन्म न विद्यते॥
एकेन कमलेनैव कमलां पूजयेद् यदि।
इह लोके सुखं प्राप्य परत्र केशवं व्रजेत्॥
प्राङ्मुखी पूजयेल्लक्ष्मीं पश्चिमाननसंस्थिताम्।
गन्धपुष्पधूपदीपनैवेद्याद्युपचारकैः॥
गन्धद्वारेतिमन्त्रेण गन्धेनावाहयेदसौ।
श्रिये जात इति द्वाभ्यां पुष्पैरावाहयेत्ततः॥"
ततो ध्यानम्।
"हिरण्यवर्णां हरिणीं सुवर्णरजतस्रजम्।
चन्द्रां हिरण्मयीं लक्ष्मीं जातवेदसमावहाम्॥
गौरवर्णान्तु द्विभुजां सितपद्मोपरिस्थिताम्।
विष्णोर्वक्षःस्थलस्थाञ्च जगच्छोभाप्रकाशिनीम्॥
ध्यायेदाद्यां सदा देवीं पूजाकाले विशेषतः।
ततः पूजादिकं कुर्य्यात् श्रीं लक्ष्मीं नम इत्यृचा॥
लक्ष्मीः पद्मालया पद्मा कमला श्रीर्धृतिः क्षमा।
तुष्टिः पुष्टिस्तथा कान्तिर्मेधा विद्या रमा श्रुतिः॥
हरिप्रिया तथा विष्णोः प्रिया नारायणस्य च।
एताभिः सप्तदशभिर्लक्ष्मीबीजादिनार्चयेत्॥
लक्ष्मीनारायणाभ्याञ्च नमोऽन्तेन प्रपूजयेत्।
धिषणाञ्च कुबेरञ्च पूजयेत्तदनन्तरम्॥"
लक्ष्मीचरित्रे।
"न क्षयापत्रे रिक्तायां दशमीदादशीषु च।
श्रवणादिचतुर्ऋक्षे लक्ष्मीपूजां न कारयेत्॥"
इति कालचन्द्रिका॥
दीपान्वितामावस्यायां लक्ष्मीपूजाविधिर्यथा,—
"तुलाराशिगते भानौ अमावास्यां नराधिपः।
स्नात्वा देवान् पितॄन् भक्त्या संपूज्याथ प्रणम्य च॥
स्नात्वा तु पार्व्वणश्राद्धं दधिक्षीरगुडादिभिः।
ततोऽपराह्णसमये घोषयेन्नगरे नृपः।
लक्ष्मीः संपूज्यतां लोका उल्काभिश्चाभिवेष्टाताम्॥
अमावास्या यदा रात्रौ दिवाभागे चतुर्दशी।
पूजनीया तदा लक्ष्मीर्विज्ञेया सुखरात्रिका॥
अमावास्यां यदा देवाः कार्त्तिके मासि केशवात्।
अभयं प्राप्य सुप्ताश्च क्षीरोदार्णवसानुषु॥
लक्ष्मीर्दैत्यभयाद्भक्ता सुखं सुप्ताम्बुजोदरे।
चतुर्युगसहस्रान्ते ब्रह्मा स्वपिति पङ्कजे॥
अतोऽत्र विधिवत् कार्य्या मनुष्यैः सुखसुप्तिका।
दिवा तत्र न भोक्तव्यमृते बालातुराज्जनात्॥
प्रदोषसमये लक्ष्मीं पूजयित्वा यथाक्रमम्।
दीपवृक्षास्तथा कार्य्या भक्त्या देवगृहेष्वपि॥
चतुष्पथेषु सर्व्वेषु नदीपर्व्वतसानुषु।
वृक्षमूलेषु गोष्ठेषु चत्वरेषु गृहेषु च॥
वस्त्रैः पुष्पैः प्रशोभितयाः क्रयविक्रयभूमयः।
दीपमालापरिक्षिप्ता प्रदोषे तदनन्तरम्॥
ब्राह्मणान् भोजयित्वादौ विभव्य च बुभुक्षितान्।
अलङ्कृतेन भोक्तव्यं नववस्त्रोपशोभिना।
स्निग्धैर्मुग्धैर्विदग्धैश्च बान्धवैर्वेष्टितैः सह॥"
अत्र लक्ष्मीपूजायां पुण्यदानकाले।
"नमस्ते सर्व्वदेवानां वरदासि हरिप्रिये!।
या गतिस्त्वत्प्रपन्नानां सा मे भूयात्त्वदर्च्चनात्॥"
लक्ष्मै नम इत्यनेन वारत्रयं पूजयेत्।
"सुखरात्र्यां प्रदीपे तु कुबेरं पूजयन्ति ये॥"
इति रुद्रधरधृतात् कुबेरमपि पूजयन्ति।
"धनदाय नमस्तुभ्यं निधिपद्माधिपाय च।
भवन्तु त्वत्प्रसादान्मे धनधान्यादिसम्पदः॥"
इति पठित्वा कुबेराय नम इति त्रिः पूजयेत्। ततो देवगृहादिषु दीपान् दद्यात्। तत्र मन्त्रः।
"अग्निज्योतीरविज्योतिश्चन्द्रज्योतिस्तथैव च।
उत्तमः सर्व्वज्योतीनां दीपोऽयं प्रतिगृह्यताम्॥"
ततो ब्राह्मणान् बन्धूंश्च भोजयित्वा स्वयं भुक्त्वा सुखं सुप्त्वा प्रत्यूषे भविष्योक्तं कर्म कुर्य्यात्। तथा,—
"सुखरात्रेरथःकाले प्रदीपोज्ज्वलितालये।
बन्धूंश्चान्यूनबन्धूंश्च वाचा कुशलयार्चयेत्॥
प्रदीपवन्दनं कार्य्यं लक्ष्मीमङ्गलहेतवे।
गोरोचनाक्षतैश्चैव दद्याद्देवेषु सर्व्वतः॥"
लक्ष्मीपूजामन्त्रः।
"विश्वरूपस्य भार्य्यासि पद्मे पद्मालये शुभे।
महालक्ष्मि नमस्तुभ्यं सुखरात्रिं कुरुष्व मे॥
वर्षाकाले महाघोरे यन्मया दुष्कृतं कृतम्।
सुखरात्रिप्रभातेऽद्य तन्मे लक्ष्मीर्व्यपोहतु॥
या रात्रिः सर्व्वभूतानां या च देवेष्ववस्थिता।
संवत्सरप्रिया या च सा ममास्तु सुमङ्गला॥
माता त्वं सर्व्वभूतानां देवानां कृष्टिसम्भवा।
आख्याता भूतले देवि! सुखरात्रि नमोऽस्तु ते॥"
लक्ष्मै नम इति त्रिः पूजयेत्। इति तिथ्यादितत्त्वम्॥*॥ तस्या उपाख्यानं यथा,—
नारद उवाच।
"श्रीकृष्णस्यात्मनश्चैव निर्गुणस्य निरात्मनेः।
सावित्र्यमसंवादे श्रुतं मुनिभिरुत्तमैः॥
तद्गुणोत्कीर्त्तनं सत्यं मङ्गलानाञ्च मङ्गलम्।
अधुना श्रोतुमिच्छामि लक्ष्म्युपाख्यानमेव च॥
कैर्वादौ पूजिता सापि किम्भूता केन वा पुरा।
तद्गुणोत्कीर्त्तनं सत्यं वद वेदविदांवर॥
श्रीनारायण उवाच।
सृष्टेरादौ पुरा ब्रह्मन् कृष्णस्य परमात्मनः।
देवी वामांशसम्भूता बभूव रासमण्डले॥
अतीवसुन्दरी रामा न्यग्रोधपरिमण्डला।
यथा द्वादशवर्षीया ग्रस्थत् सुस्थिरयौवना॥
श्वेतचम्पकवर्णाभा सुखदृश्या मनोहरा।
प्ररत्नपार्व्वणकोटीन्दुप्रभाप्रच्छादिताननाः॥
प्ररम्यश्रोणिपद्मानां प्रशोभामोचनलोचना।

सा च देवी द्विधा भूता सहसैवेश्वरेच्छया ॥
समा रूपेण वर्णेन तेजसा वयसा विभा ।
यशसा वाससा सूक्ष्मा भूषणेन गुणेन च ॥
स्मितेन वीक्षितेनैव वचसा गमनेन च ।
मधुरेण स्वरेणैव नयेनानुनयेन च ॥
तद्वामांशो महालक्ष्मीर्दक्षिणांशश्च राधिका ।
राधादौ वरयामास द्विभुजश्च परात्परम् ॥
महालक्ष्मीश्च तत्पश्चाच्चकमे कमनीयकम् ।
कृष्णश्चतुर्भुजश्चैव द्विधारूपो बभूव ह ॥
दक्षिणांशश्च द्विभुजो वामांशश्च चतुर्भुजः ।
चतुर्भुजाय द्विभुजो महालक्ष्मीं ददौ पुरा ॥
लक्ष्यते दृश्यते विश्वं स्निग्धदृष्ट्या ययानिशम् ।
देवीषु या च महती महालक्ष्मीश्च सा स्मृता ॥
द्विभुजो राधिकाकान्तो लक्ष्मीकान्तश्चतुर्भुजः ।
शुद्धसत्त्वस्वरूपेश्च गोपैर्गोपीभिरावृतः ॥
चतुर्भुजश्च वैकुण्ठं प्रययौ पद्मया सह ।
सर्वांशेन समौ द्वौ तौ कृष्णनारायणौ परौ ॥
महालक्ष्मीश्च योगेन नानारूपा बभूव सा ।
वैकुण्ठे च महालक्ष्मीः परिपूर्णतमा रमा ॥
शुद्धसत्त्वस्वरूपा च सर्वसौभाग्यसंयुता ।
प्रेमूणा सा च प्रधाना च सर्वासु रमणीषु च ॥
स्वर्गे च स्वर्गलक्ष्मीश्च शक्रसम्पत्स्वरूपिणी ।
पातालेषु च मर्त्येषु राजलक्ष्मीश्च राजसु ॥
गृहलक्ष्मीर्गृहेष्वेव गृहिणी च कलांशया ।
सम्पत्स्वरूपा गृहिणां सर्वमङ्गलमङ्गला ॥
गवां प्रसूः सा सुरभी दक्षिणा यज्ञकामिनी ।
क्षीरोदसिन्धुकन्या सा श्रीरूपा पद्मिनीषु च ॥
शोभास्वरूपा चन्द्रे च सूर्यमण्डलमण्डिता ।
विभूषणेषु रत्नेषु फलेषु च जलेषु च ॥
नृपेषु नृपपत्नीषु दिव्यस्त्रीषु गृहेषु च ।
सर्वशस्येषु वस्त्रेषु स्थानेषु संस्कृतेषु च ॥
प्रतिमासु च देवानां मङ्गलेषु घटेषु च ।
माणिक्येषु च मुक्तासु माल्येषु च मनोहरा ॥
मणीन्द्रेषु च हीरेषु क्षीरेषु चन्दनेषु च ।
वृक्षशाखासु रम्यासु नवपल्लवेषु वस्त्रेषु ॥
वैकुण्ठे पूजिता सादौ देवी नारायणेन च ।
द्वितीये ब्रह्मणा भक्त्या तृतीये शक्रशेण च ॥
विष्णुना पूजिता सा च क्षीरोदे भारते मुने ! ।
स्वायम्भुवेन मनुना मानवेन्द्रेण सर्वतः ॥
ऋषीन्द्रैश्च मुनीन्द्रैश्च सद्भिश्च गृहिभिर्भवे ।
गन्धर्वाद्यैश्च नागाद्यैः पातालेषु च पूजिता ॥
शुक्लाष्टम्यां भाद्रपदे कृता पूजा च ब्रह्मणा ।
भक्त्या च पक्षपर्यन्तं त्रिषु लोकेषु नारद ! ॥
चैत्रे पौषे च भाद्रे च पुण्ये मङ्गलवासरे ।
विष्णुना निर्मिता पूजा त्रिषु लोकेषु भक्तितः ॥
वर्षान्ते पौषसंक्रान्त्यां मेध्यामावाद्य प्राङ्गणे ।
मनुना पूजयामास सा भूता भुवनत्रये ॥
राजेन्द्रेण पूजिता सा मङ्गलेनैव मङ्गला ।
केदारेणैव नीलेन नलेन सुवलेन च ॥
ध्रुवेणोत्तानपादेन शक्रेण बलिना तथा ।
कश्यपेन च दक्षेण कर्दमेन विवस्वता ॥
प्रियव्रतेन चन्द्रेण कुबेरेणैव वायुना ।
यमेन वह्निना चैव वरुणेनैव पूजिता ॥
एवं सर्वत्र सर्वैश्च वन्दिता पूजिता सदा ।
सर्वैश्वर्याधिदेवी सा सर्वसम्पत्स्वरूपिणी ॥"
अपि च ।

नारद उवाच ।

"नारायणप्रिया सा च वरा वैकुण्ठवासिनी ।
वैकुण्ठाधिष्ठातृदेवी महालक्ष्मीः सनातनी ॥
कथं बभूव सा देवी पृथिव्यां सिन्धुकन्यका ।
किं तद्ध्यानञ्च स्तवनं सर्वैः पूजाविधिक्रमः ।
पुरा केन स्तुतादौ सा तन्मां व्याख्यातुमर्हसि ॥

श्रीनारायण उवाच ।

पुरा दुर्वाससः शापात् भ्रष्टश्रीश्च पुरन्दरः ।
बभूव देवसंघश्च मर्त्यलोकश्च नारद ! ॥
लक्ष्मीः स्वर्गादिकं त्यक्त्वा रुष्टा परमदुःखिता ।
गत्वा लीना च वैकुण्ठे महालक्ष्म्याश्च नारद ॥
तदा शोकादयुर्देवा दुःखिता ब्रह्मणः सभाम् ।
ब्रह्माणञ्च पुरस्कृत्य ययुर्वैकुण्ठमेव च ॥
वैकुण्ठे शरणापन्ना देवा नारायणं परे ।
अतीवदैन्ययुक्ताश्च शुष्ककण्ठौष्ठतालुकाः ॥
तदा लक्ष्मीश्च कलया पुरा नारायणाज्ञया ।
बभूव सिन्धुकन्या सा शक्रसम्पत्स्वरूपिणी ॥
तथा मथित्वा क्षीरोदं देवा दैत्यगणैः सह ।
संप्राप्य वरं लक्ष्म्या दृष्ट्युत्थाश्च तत्र हि ॥
सुरादिभ्यो वरं दत्त्वा वरमालाञ्च विष्णवे ।
ददौ प्रसन्नवदना तुष्टा क्षीरोदशायिने ॥
देवाश्चाप्यसुरयुक्तं राज्यं प्राप्य तदरात् ।
तां सम्पूज्य च सम्भूय सर्वत्र च निरापदः ॥"
इति ब्रह्मवैवर्ते प्रकृतिखण्डे ३५ ।३६ अध्यायौ ।
लक्ष्म्या अगम्यगृहाणि यथा,—
"यं यं रुष्टो गुरुर्देवो माता तातश्च बान्धवः ।
अतिथिः पितृलोकाश्च न यामि तस्य मन्दिरम् ॥
मिथ्यावादी च यः प्रश्नान्नास्तीति वाचकः सदा ।
सत्यहीनश्च दुःशीलो न गेहं तस्य याम्यहम् ॥
सत्यहीनः स्वाध्यहारी मिथ्यासाक्ष्यप्रदायकः ।
विश्वासघ्नः कृतघ्नो यो न यामि तस्य मन्दिरम् ॥
चिन्तायस्तो भयग्रस्तः शत्रुग्रस्तोऽतिपातकी ।
ऋणग्रस्तोऽतिकृपणो न गेहं यामि पापिनाम् ॥
दीक्षाहीनश्च शोकार्त्तो मन्दधीः स्त्रीजितः सदा ।
पुंश्चलीपतिपुत्रौ यौ तद्गेहं नैव याम्यहम् ॥
पुंश्चलान्नञ्चावीरान्नं यो भुङ्क्ते कामतः सदा ।
शूद्रान्नभोजी तद्याजी तद्गेहं नैव याम्यहम् ॥
यो दुर्वाक् कलहाविष्टः कलिः प्रश्नदघालये ।
स्त्री प्रधाना गृहे यस्य न यामि तस्य मन्दिरम् ॥
यत्र नास्ति हरेः पूजा तदीयगुणकीर्त्तनम् ।
नोत्सुकश्च प्रशंसायां न यामि तस्य मन्दिरम् ॥
कन्यान्नवेदविक्रेता नरघाती च हिंसकः ।
नरकागारसदृशं न यामि तस्य मन्दिरम् ॥
स्वदत्तां परदत्तां वा ब्रह्मवृत्तिं सुरस्य च ।
यो हरेद्दानहीनश्च न यामि तस्य मन्दिरम् ॥
यत् कर्म्म दक्षिणाहीनं मूढधीः कुरुते शठः ।
स पापी पुण्यहीनश्च न यामि तस्य मन्दिरम् ॥
मातरं पितरं भार्य्यां गुरुपत्नीं गुरुञ्च तम् ।
अनाथां भगिनीं कन्यामनन्याश्रयबान्धवान् ॥
कार्पण्यादुपेक्षते न पुष्णाति सक्षयं करोति सदा ।
तद्गृहान्नरकाकारान्न यामि तान्मुनीश्वराः ॥
मूत्रं पुरीषसृष्ट्यर्थं यस्तत् पश्यति मन्दधीः ।
यः शेते स्निग्धपादेन न यामि तस्य मन्दिरम् ॥
अधौतपादशायी यो नग्नः शेतेऽतिनिद्रितः ।
सन्ध्याशायी दिवाशायी न यामि तस्य मन्दिरम् ॥
मूर्द्धि तैलं पुरो दत्त्वा योऽन्यदङ्गमुपस्पृशेत् ।
ददाति पश्चाद्गात्रे वा न यामि तस्य मन्दिरम् ॥
दत्त्वा तैलं मूर्द्धि गात्रे विण्मूत्रं यः समुत्सृजेत् ।
प्रणमेदाहरेत् पुष्पं न यामि तस्य मन्दिरम् ॥
व्रणं क्षिनत्ति नखरैर्नखरैर्विलिखेन्महीम् ।
गात्रे पादे मलं यस्य न यामि तस्य मन्दिरम् ॥
दग्नं वसनं यस्य समलं रूक्षमस्तकम् ।
विकृतौ ग्रासहासौ च न यामि तस्य मन्दिरम् ॥
मन्त्रविद्योपजीवी च ग्रामयाजी चिकित्सकः ।
शूपकृद्देवलश्चैव न यामि तस्य मन्दिरम् ॥
विवाहं धर्म्मकार्य्यं वा यो निहन्ति च कोपतः ।
दिवामैथुनकारी यो न यामि तस्य मन्दिरम् ॥"
इत्यादि ब्रह्मवैवर्ते गणेशखण्डे लक्ष्मीचरितनाम २३ अध्यायः ॥ * ॥ अपि च ।

"कुचेलिनं दन्तमलोपधारिणं
बह्वाशिनं निष्ठुरवाक्यभाषिणम् ।
सूर्य्योदये चास्तमये च शायिनं
विमुञ्चति श्रीरपि चक्रपाणिनम् ॥
नित्यं क्षेदस्तृणानां धरणिविलिखनं पादयोरल्पमार्द्धिं
दन्तानामल्पशौचं वसनमलिनता रूक्षता मूर्द्धजानाम् ।
क्षे सत्ये चापि निद्रा विवसनशयनं ग्रासहानिरेक-
स्त्राङ्गे पीढ़े च वाद्यं निधनमुपनयेत् केशवस्यापि लक्ष्मीम् ॥
शिरः सुधौतं चरणौ सुमार्জ্জितौ
वराङ्गनासेवनमल्पभोजनम् ।
अनग्नशायित्वमपर्व्वमैथुनं
चिरप्रनष्टां श्रियमानयन्ति षट् ॥
यस्य कस्य तु पुण्यस्य पाण्डरस्य विशेषतः ।
शिरसा धार्य्यमाणस्य अलक्ष्मीः प्रतिहन्यते ॥
दीपस्य पश्चिमा च्छाया छाया शय्यासनस्य च ।
रजकस्य तु यत्तीर्थमलक्ष्मीस्तत्र तिष्ठति ॥"
इत्यादि गारुड़े ११४ अध्यायः ॥ * ॥
अङ्गविशेषे तस्याः स्थितिफलं यथा,—

देवा ऊचुः ।

"कथयस्व जगन्नाथ ! केषु स्थानेष्ववस्थिता ।
पुरुषाणां फलं किं वा प्रयच्छत्यथ नश्यति ॥

दत्तात्रेय उवाच ।
नृणां पादस्थिता लक्ष्मीर्निलयं संप्रयच्छति ।
सक्थिनि संस्थिता वस्त्रं रत्नं कांस्यादिधं वसु ॥
कलत्रदा गुह्यसंस्था क्रोडस्थापत्यदायिनी ।
मनोरथान् पूरयति पुरुषाणां हृदि स्थिता ॥
लक्ष्मीर्लक्ष्मीवतां श्रेष्ठं कण्ठस्था कण्ठभूषणम् ।
अभीष्टबन्धुदारेषु तथाश्लेषं प्रयच्छति ॥
मिष्टान्नं वाक्यलावण्यमाज्ञामवितथान्तथा ।
सुखसंस्था कवित्वञ्च यच्छत्युदधिसम्भवा ॥
शिरोगता संत्यजति ततोऽन्यं याति संश्रयम् ।
सेयं शिरोगता दैत्यान् परित्यजति साम्प्रतम् ॥"
इति मार्कण्डेयपुराणे दत्तात्रेयचरिताध्यायः ॥*॥
अथ लक्ष्मीचरित्रम् ।
श्रीरुवाच ।
"मेरुपृष्ठे सुखासीनां लक्ष्मीं पृच्छति केशवः ।
केनोपायेन देवि त्वं नृणां भवसि निश्चला ॥
श्रीरुवाच ।
शुक्लाः पारावता यत्र गृहिणी यत्र चोज्ज्वला ।
अकलहा वसतिर्यत्र तत्र क्षमा वसाम्यहम् ॥
धान्यं सुवर्णसदृशं तण्डुला रजतोपमाः ।
अन्नश्चैवातुषं यत्र तत्र क्षमा वसाम्यहम् ॥
यः संविभागी प्रियवाक्यभाषी
वृद्धोपसेवी प्रियदर्शनश्च ।
अल्पप्रलापी न च दीर्घसूत्री
तस्मिन् सदाहं पुरुषे वसामि ॥
यो धर्मशीलो विजितेन्द्रियश्च
विद्याविनीतो न परोपतापी ।
अगर्वितो यश्च जनानुरागी
तस्मिन् सदाहं पुरुषे वसामि ॥
चिरं स्नाति द्रुतं भुङ्क्ते पुष्पं प्राप्य न जिघ्रति ।
यो न पश्येत् स्त्रियं नग्नां नियतं स च मे प्रियः ॥
त्यागः सत्यञ्च शौचञ्च यत्र एते महागुणाः ।
यः प्राप्नोति गुणानेतान् अद्भावान् स च मे प्रियः ॥
सर्वत्र तत्रमध्ये तु त्याग एव विशिष्यते ।
काले देये च पात्रे च स च त्यागः प्रशस्यते ॥
नित्यमामलके लक्ष्मीर्नित्यं वसति गोमये ।
नित्यं गृहे च पद्मे च नित्यं श्रीः सुखवासयि ॥
वसामि पद्मोत्पलगन्धमध्ये
वसामि चन्द्रे च महेश्वरे च ।
नारायणे चैव वसुन्धरायां
वसामि नित्योत्सवमन्दिरेषु ॥"
वसुन्धरायामित्यत्र वसौ धरायामिति वा पाठः ॥
"यथोपदिष्टा गुरुभक्तियुक्ता
पत्युर्वचो नाक्रमते च नित्यम् ।
नित्यञ्च शुङ्क्ते पतिभुक्तशेषं
तस्याः शरीरे नियतं वसामि ॥
तुष्टा च धीरा प्रियवादिनी च
सौभाग्ययुक्ता च सुशोभना च ।
लावण्ययुक्ता प्रियदर्शना या
पतिव्रता या च वसामि तासु ॥
श्यामा नगाक्षी क्षमध्यभागा
सुभ्रूः सुकेशी सुगतिः सुशीला ।

गभीरनाभिः समदन्तपङ्क्ति-
स्तस्याः शरीरे नियतं वसामि ॥
या पापरक्ता पिशुनस्वभावा
स्वाधीनकान्तः परिभूयते च ।
अमर्षकामा कुचरित्रशीला
तामङ्गनां प्रेतसुखीं त्यजामि ॥
पुष्पं पर्य्युषितं पूतिं शयनं बहुभिः सह ।
भस्मासनं कुनारीञ्च दूरतः परिवर्जयेत् ॥
चिताङ्गारकमस्थीनि वह्निं भस्म द्विजञ्च गाम् ।
न पादेन स्पृशेत् पादं कार्पासञ्चि तुषं गुरुम् ॥
नखकेशोदकञ्चैव मैथुनं पर्व्वसन्धयोः ।
वर्जयेन्नग्नशायित्वमेकाकी मिष्टभोजनम् ॥
शिरः सपुष्पं चरणौ सुपूजितौ
निशाङ्गनासेवनमल्पभोजनम् ।
अनग्नशायित्वमपर्व्वमैथुनं
चिरप्रनष्टां श्रियमानयन्ति षट् ॥
सम्मार्जनीरजोवातं निर्गुण्डीं लकुचन्तथा ।
रात्रौ विल्वपलाशञ्च कपित्थं वर्जयेद्बुधः ॥
खगाचासनयोर्वाद्यं अपूजा मूर्द्धपादयोः ।
उच्छिष्टस्पर्शनं मूर्द्धि स्नानाभ्यङ्गञ्च वर्जयेत् ॥
शयनञ्चान्धकारे च रात्रिवासो दिने तथा ।
स्नानाम्बरं कुवेशञ्च वर्जयेत् शुष्कभोजनम् ॥
परेषोद्वर्त्तितं वस्त्रं स्वयं माल्यापकर्षणम् ।
आलस्यमवसादञ्च न कुर्य्यात्क्षौरमर्दनम् ॥
शुक्रवारे च यत्नेन शिलापिष्टञ्च दर्पणे ।
स्वयं वामेन मूर्द्धानं पाणिना नैव संस्पृशेत् ॥
तारकाः पुष्पवन्तौ च न पश्येदशुचिः पुमान् ।
नेक्षेद्दृग्भ्यां परस्त्रीणां नास्तं यान्तं दिवाकरम् ॥
कुर्य्यान्नान्यधनाकाङ्क्षां परस्त्रीणां तथैव च ।
परेषां प्रतिकूलञ्च उदितार्के प्रबोधनम् ॥
नखकण्टकरक्तैश्च मृत्तिकाङ्गारवारिभिः ।
वृथा विलेखनं भूमौ न कुर्य्याच्चम काङ्क्षया ॥
स्वयं दोहं स्वयं माल्यं स्वयं घृष्टञ्च चन्दनम् ।
नापितस्य गृहे क्षौरं शुक्रादपि हरेत् श्रियम् ॥"
स्वयं दोहमित्यत्र ग्रथितश्चेति वा पाठः ।
"न निन्द्यं गणके विप्रे पादयोर्नैवनम्रता ।
प्रतिकूलं हरेत् स्त्रीणां शुक्रं च दन्तधावनम् ॥
अघृतं मांसशूकञ्च नग्नाश्चैव स्त्रियस्तथा ।
भद्रणाद्यनाश्चैव शुक्रादपि हरेत् श्रियम् ॥
मन्त्रैरयुक्तः परदारसेवी
आचारहीनः परसेवकश्च ।
सङ्कीर्णचारी परिवादशीलः
तं निष्ठुरं दम्भमयं त्यजामि ॥
शयनञ्चार्द्रपादेन रात्रिवासो दिने तथा ।
नोत्तरीयमधः कुर्य्यात् शुष्कपादेन भोजनम् ॥
अशुचिं स्नानवस्त्रञ्च दुर्गन्धामसुखावहाम् ।
अभूषणामपुष्पाञ्च न कुर्य्यादात्मनस्तनुम् ॥
कर्णे च वदने घ्राणे तथा करतलेऽपि च ।
पादे पृष्ठे तथा नेत्रे न कुर्य्यादनुलेपनम् ॥
चतुर्जन्मे हृतं श्रेयो सुखजन्मे धनक्षयः ।
दरिद्रः कर्णजन्मे च पादपृष्ठे तथायुषः ॥
गर्भं पुष्पं यथा सोयं रत्नञ्चैव महोदधिम् ।

गृहीतं प्रथमं वस्त्रं वर्जयेन्न कदाचन ॥
अजरजः खररजस्तथा सम्मार्जनीरजः ।
स्त्रीणां पादरजो राजन् शुक्रादपि हरेत् श्रियम् ॥
कुचैलिनं दन्तमलप्रधारिणं
महाशनं निष्ठुरवाक्यभाषिणम् ।
सूर्य्योदये चास्तमिते तु शायिनं
विमुञ्चति श्रीरपि चक्रपाणिनम् ॥"
महाशनमित्यत्र बह्वाशिनमिति वा पाठः ।
"नित्यं छेदस्तृणानां क्षितिनखलिखनं पादयो-
रभ्यशौचं
एकाङ्गे तैलहीनं वसनमलिनतावत्वनं मूर्द्ध-
जानाम् ।
द्वे सन्ध्ये चापि निद्रा विवसनशयनं यासहासा-
तिरेकः
खाङ्गे पीठे च वाद्यं हरति धनपतेः केशव-
स्यापि लक्ष्मीम् ॥"
अवत्वनमित्यत्र रूक्षता इति वा पाठः ।
"एवं यः कुरुते नित्यं मयोक्तानि च केशव ! ।
तुष्टा भवामि तस्याहं त्वथेषा निश्चला यथा ॥
श्रीभाषितमिदं स्तोत्रं प्रातरुत्थाय यः पठेत् ।
तद्गृहं विपुलं रम्यं नित्यं भवति नान्यथा ॥
व्याधितो मुच्यते रोगी बद्धो मुच्येत बन्धनात् ।
आपदस्तस्य नश्यन्ति तमः सूर्य्योदये यथा ॥"
इति स्कन्दपुराणे लक्ष्मीकेशवसंवादे लक्ष्मी-
चरित्रं समाप्तम् ॥ * ॥ दुर्गा । यथा,—
"स्तुतिः सिद्धिरिति ख्याता श्रिया संश्रयणाच्च वा ।
लक्ष्मीर्वा लक्षणा वापि क्षमात् सा कान्ति-
रुच्यते ॥
इति देवीपुराणे ५५ अध्यायः ॥
सम्पत्तिः । शोभा । अङ्गौषधम् । हरिद्रानामौ-
षधम् । फलिनीवृक्षः । इति मेदिनी । मे, २८ ॥
सीता । वीरयोषित् । इति शब्दरत्नावली ॥
स्थलपद्मिनी । हरिद्रा । भूमी । द्रव्यम् । मुक्ता ।
इति राजनिर्घण्टः ॥ मोक्षप्राप्तिः । इति
षड्दीटीकायां नागभट्टः ॥ (शोभा । यथा,
कुमारे । ३ । ४६ ।
"कपालनेत्रान्तरलब्धमार्गै-
र्व्याप्तिःप्रतीहेरुदितैः शिरस्तः ।
मृणालसूत्राधिकसौकुमार्य्यां
बालस्य लक्ष्मीं स्नपयन्तमिन्दोः ॥")
लक्ष्मीकान्तः, पुं, (लक्ष्म्याः कान्तः ।) नारायणः ।
यथा,—
"नमः कमलनेत्राय हरये परमात्मने ।
जगतः पालयित्रे च लक्ष्मीकान्त नमोऽस्तु ते ॥"
इति जन्माष्टमीव्रतकथा ॥
लक्ष्मीगृहं, क्ली, (लक्ष्म्याः गृहमावासस्थानम् ।)
रक्तोत्पलम् । इति त्रिकाण्डशेषः ॥ लक्ष्मी-
वेश्म च ॥
लक्ष्मीजनार्द्दनः, पुं, (लक्ष्म्याः सहितो जनार्द्दनः ।)
शालग्रामविशेषः । तस्य लक्षणं यथा,—
"एकद्वारे चतुश्चक्रं नवीननीरदोपमम् ।

लक्ष्मीजगाद्गंगो ग्रेयो रक्षितो वनमालया ॥"
इति ब्रह्मवैवर्ते प्रकृतिखण्डम् ॥
(तथा, देवीभागवते । ६ । २४ । ५६ ॥)

लक्ष्मीतालः, पुं, (लक्ष्म्यायुक्तस्तालः ।) श्रीतालवृक्षः । इति राजनिर्घण्टः ॥ तौर्य्यत्रिकस्य परिच्छेदविशेषः । तस्य द्रुतलघ्वनुविरामक्रमो यथा,—
"द्वौ लो गू द्वौ विरामान्तौ द्रुतौ गू द्वविरामकः ।
विरामान्तौ द्रुतौ लघ्वौ द्रुतौ लघुविरामकः ॥"
इति सङ्गीतरत्नाकरे लक्ष्मीतालः ॥

लक्ष्मीनारायणः, पुं, (लक्ष्म्यान्वितो नारायणः ।) ग्रामग्रामविशेषः । तस्य लक्षणं यथा,—
"एकद्वारे चतुश्चक्रं वनमालाविभूषितम् ।
नवीननीरदाकारं लक्ष्मीनारायणाभिधम् ॥"
इति ब्रह्मवैवर्तपुराणम् ॥

लक्ष्मीनृसिंहः, पुं, (लक्ष्मीयुतो नृसिंहः ।) ग्रामग्रामविशेषः । तस्य लक्षणं यथा,—
"द्विचक्रं विस्तृतास्यञ्च वनमालासमन्वितम् ।
लक्ष्मीनृसिंहं विज्ञेयं गृहिणाञ्च सुखप्रदम् ॥"
इति ब्रह्मवैवर्तपुराणम् ॥

लक्ष्मीपतिः, पुं, (लक्ष्म्याः पतिः ।) वासुदेवः । नरपतिः । इति मेदिनी । ते, २१५ ॥ (यथा, किरातं । १ । ४४ ।
"अथ क्षमामेव निरस्तविक्रम-
श्चिराय पर्य्येषि सुखस्य साधनम् ।
विहाय लक्ष्मीपतिलक्ष्म कार्म्मुकं
जटाधरः सन् जुहुधीह पावकम् ॥")
लवङ्गवृक्षः । पूगः । इति विश्वः ॥

लक्ष्मीपुत्रः, पुं, (लक्ष्म्याः पुत्रः ।) कामदेवः । घोटकः । इति मेदिनी । रे, २६३ ॥ कुम्भः । लवः । इति शब्दरत्नावली ॥

लक्ष्मीपुष्पः, पुं, (लक्ष्मीयुक्तं सौन्दर्य्यविशिष्टं पुष्पमिवास्य ।) पद्मरागमणिः । इति हेमचन्द्रः ॥

लक्ष्मीफलः, पुं, (लक्ष्म्याः फलमिव फलं यत्र ।) बिल्ववृक्षः । इति राजनिर्घण्टः ॥

लक्ष्मीवान्, [त्] पुं, (लक्ष्मीः शोभास्त्यस्येति । मतुप् । मस्य वः ।) पनसवृक्षः । इति शब्दमाला ॥ श्वेतरोहितवृक्षः । इति राजनिर्घण्टः ॥ (विष्णुः । यथा, महाभारते । १३ । १४६ । ५२ ।
"सर्व्वलक्षणसम्पन्नो लक्ष्मीवान् समितिञ्जयः ॥")

लक्ष्मीवान्, [त्] त्रि, (लक्ष्मीरस्त्यर्थेति ।) श्रीयुक्तः । धनवान् । तत्पर्य्यायः । लक्ष्मणः २ श्रीलः ३ श्रीमान् ४ । इत्यमरः ॥ (यथाह कश्चित् ।
"शेषे धराभराक्रान्ते शेषे विश्वम्भरः श्रिया ।
लक्ष्मीवन्तो न पश्यन्ति दुःसहां परवेदनाम् ॥")

लक्ष्मीवेष्टः, पुं, (लक्ष्म्यायुक्तो वेष्टः ।) श्रीवेष्टः । इति राजनिर्घण्टः ॥

लक्ष्मीशः, पुं, (लक्ष्म्याः ईशः ।) विष्णुः । इति मुग्धबोधव्याकरणम् ॥

लक्ष्मीसमाकृया, स्त्री, (लक्ष्म्याः सम आकृतिर्यस्याः ।) सीता । इति शब्दरत्नावली ॥

लक्ष्मीसहजः, पुं, (लक्ष्म्या सह जातः इति । जन् + डः । क्षीराब्धिजातत्वादस्य तथात्वम् ।) चन्द्रः । इति शब्दरत्नावली ॥

लक्ष्म्यारामः, पुं, (लक्ष्म्या आरामः ।) वनभेदः । इति शब्दमाला ॥

लक्ष्यं, क्ली, (लक्ष्यते यदिति । लक्ष् + ण्यत् ।) शरवेधस्थानम् । तत्पर्य्यायः । लक्षम् २ शरव्यम् ३ । इत्यमरः । २ । ८ । ८६ ॥ प्रतिकायः ४ वेध्यम् ५ । इति जटाधरः ॥ वेधम् ६ । इति शब्दरत्नावली ॥ (यथा, कुमारे । ३ । ६४ ।
"कामस्तु बाणावसरं प्रतीक्ष्य
पतङ्गवद्वह्निसुखं विवित्षुः ।
उमामुखे बिम्बफलाधरोष्ठे
व्यापारयामास सुरार्त्तमर्त्रः ॥")

लक्ष्यः, त्रि, लक्षणया बोधः । इति साहित्यदर्पणम् ॥ (लक्ष्यते इति । लक्ष् + ण्यत् ।) दर्शनीयः । इति लक्षधात्वर्थदर्शनात् ॥ (यथा, । इत्यमरः ॥ यथा, रघुः । ६ । ८१ ।
"रोमाञ्चलक्ष्येण स गात्रयष्टिं
भित्वा निराक्रामदरालकेश्याः ॥"
अनुमेयः । इति मल्लिनाथः ॥ यथा, कुमारे । ५ । ७४ ।
"इति द्विजातौ प्रतिकूलवादिनि
प्रवेपमानाधरलक्ष्यकोपया ॥"
तथा च रघुः । ४ । ५ ।
"क्षायामखण्डलालक्ष्येण तमदृश्या किल स्वयम् ।
पद्मा पद्मातपत्रेण भेजे सान्द्राम्बुदौचितम् ॥")

लख, रूपि । इति कविकल्पद्रुमः ॥ (भ्वा०-पर०-सक०-सेट् ।) लखति । रूपि गतौ । इति दुर्गादासः ॥

लख, इ रूपि । इति कविकल्पद्रुमः ॥ (भ्वा०-पर०-सक०-सेट् ।) इ, लक्षते । रूपि गतौ । इति दुर्गादासः ॥

लग, इ खञ्जे । गतौ । इति कविकल्पद्रुमः ॥ (भ्वा०-पर०-खञ्जे अक०-गतौ सक०-सेट् ।) इ, लङ्गते । खञ्जो गतिवैकल्यम् । इति दुर्गादासः ॥

लग, क रके । इति कविकल्पद्रुमः ॥ (चुरा०-पर०-सक०-सेट् ।) क, लागयति । रके खादाम्रोः । रके इति रक क खाद आपने । इत्यस्य भेरनित्यत्वे भावे अलि रूपम् । इति दुर्गादासः ॥

लग, म ए सङ्गे । इति कविकल्पद्रुमः ॥ (भ्वा०-पर०-अक०-सेट् ।) म, लगयति । ए, अलगीत् । गलति अधर ओष्ठे । इति दुर्गादासः ॥

लगड़, त्रि, चारु । इति त्रिकाण्डशेषः ॥

लगितं, त्रि, सङ्गयुक्तम् । लागा इति भाषा । इति लगधातोः कर्म्मणि क्तप्रत्ययेन निष्पन्नम् ॥

लगुड़ः, पुं, दण्डः । लाठी इति भाषा । इत्यमरः ॥ लगुड़ो वंशादिमयो दण्डः । लोहमयोऽस्त्रभेदः । इति सुभूतिः । लगुड़ो लोहमयी यष्टिरन्यत्रोपचारादित्यन्ये । इति तट्टीकायां भरतः ॥

लग्नं (अस्याकृतिपरिमाणादि यथा, शुक्रनीतौ ।
"लगुड़ः लक्ष्मपादः स्यात् पृथ्वंशः स्थूलग्रीवकः ।
लौहवह्नाग्रभागश्च दृढदेहः सुपीवरः ॥
दण्डाकारो दृढाङ्गश्च तथा चक्रद्वयोन्नतः ।
उत्थानं पातनञ्चैव पेषणं पोथनं तथा ॥
चतस्रो गतयस्तस्य पञ्चमी नेह विद्यते ।
दृढ़कायः पत्तिवर्गो तेन युध्येत शत्रुभिः ॥")

लग्नं, क्ली, (लगति फले इति । लग सङ्गे + "क्तुब्खान्तध्वान्तलग्नेति ।" ७ । २ । १८ । इति निपातनात् साधु ।) राशीनामुदयः । इत्यमरः ॥ राति फलं राशिस्तालग्यग्रकारः । अहोरात्रमध्ये द्वादशराश्यय उदयन्ति । उदयः पूर्व्वाचलसंयोगः । तेषां क्रमेण उदयाचलसंयोगो लग्नं ओ लस्जी व्रीड़े ओदित्वान्नः निपातनाच्चस्य गः । इति तट्टीकायां भरतः ॥ तेषां शून्यायनांशपरिमाणं यथा,—
"रामोऽगवेदै-३ । ४७ जलधिस्तु मैत्रे-४ ।१७
व्योमो रसैः ५ । ६ पक्ष खसागरैश्च ५ । ४० ।
बाणः कुवेदै-५।४१ विषयोऽकयुग्मैः ५। २६
क्रमोत्क्रमाच्छेषतुलादिमानम् ॥"
तथा हि ।

मेषस्य	३ । ३७ ॥	तुलायाः	५ । २६ ॥
वृषस्य	४ । १७ ॥	वृश्चिकस्य	५ । ४१ ॥
मिथुनस्य	५ । ६ ॥	धनुषः	५ । ४० ॥
कर्कटस्य	५ । ४० ॥	मकरस्य	५ । ६ ॥
सिंहस्य	५ । ४१ ॥	कुम्भस्य	४ । १७ ॥
कन्यायाः	५ । २६ ॥	मीनस्य	३ । ४७ ॥

इति दीपिका ॥ * ॥ दृग्यत्रकुलाधिकपञ्चाङ्कुलप्रभे कलिकातास्थदेशे वर्त्तमानोनविंशायनांशे प्रामाणिककारिका यथा,—
"वेदोऽङ्गैः ४ । ६ सोऽन्तवेदै ४ । ४८ रिपुरगनयनैः ५।२७ सोऽन्तरीक्षाम्बुनाथैः ५ । ४० ।
पारावाराश्रयासै-५।३४ गंगनगनयनैः ५ । २६
षट्त्रिभि-५।३६ ऋग्वेदैः ५ । ४१ ।
अङ्काभ्राभिः ५ । १६ वसुद्रोऽसुमुनिभि-४ ।३५
रनलोऽष्टेषुभिः ३।५८ सोऽगवेदै-३ । ४७ ।
मैषादेकोनविंशे गणितपरिगतं मानमभ्रायनांशे ॥" * ॥
उदयलग्नास्तलग्नयोर्दिनं प्रति रविभोग्यं यथा,
"लग्नदग्धफलं हित्वा ततसंख्यं क्रमतः फलम् ।
विपलाश्च रवेर्भोग्यमेवं कल्पनमस्तभे ॥"
इति ज्योतिषम् ॥

एतयोर्विवरणं यथा,—
तत्र प्राचीनलग्यमानम् ।

लग्नाः	दिनभुक्तम् ।	मासभुक्तम् ।
यथा	फलम् । विपलम् ।	दण्डः । पलम् ।
१ मेषः ।	७ । ३४ ॥	३ । ४७ ॥
२ वृषः ।	८ । ३४ ॥	४ । १७ ॥
३ मिथुनम् ।	१० । १२ ॥	५ । ६ ॥
४ कर्कटः ।	११ । २० ॥	५ । ४० ॥
५ सिंहः ।	११ । २२ ॥	५ । ४१ ॥
६ कन्या ।	१० । ५८ ॥	५ । २६ ॥

लग्नं

लग्नाः	दिनशुद्धम्।		मासशुद्धम्।	
यथा	पलम्।	विपलम्।	दण्डः।	पलम्।
७ तुला।	१०	५८	५	२६
८ वृश्चिकः।	११	२२	५	४१
९ धनुः।	११	२०	५	४०
१० मकरः।	१०	१२	५	६
११ कुम्भः।	८	३४	४	१७
१२ मीनः।	७	३४	३	४७

तत्र खदेशाधुनिकलग्नमानम्।

लग्नाः	दिनशुद्धम्।		मासशुद्धम्।	
यथा	पलम्।	विपलम्।	दण्डः।	पलम्।
१ मेषः।	८	१२	४	६।
२ वृषः।	९	३६	४	४८
३ मिथुनम्।	१०	५४	५	२७
४ कर्कटः।	११	२०	५	४०
५ सिंहः।	११	८	५	३४
६ कन्या।	१०	५८	५	२६
७ तुला।	११	१२	५	३६
८ वृश्चिकः।	११	२२	५	४१
९ धनुः।	१०	३८	५	१६
१० मकरः।	९	१०	४	३५
११ कुम्भः।	७	५६	३	५८
१२ मीनः।	७	३४	३	४७

अथ जन्मकालीनलग्नस्यग्रहस्फुटसिद्धलम्।

"लग्ने सूर्येऽक्षिरोगी ग्रन्थिनि बलयुतो
रूपवान् वित्तयुक्तो
भौमे वङ्गः सुवाग्मी ग्रन्थधरतनये सर्व-
ग्राह्यार्थवेत्ता।
जीवे दाता पवित्रः सुकविरथ गते भार्गवे
मद्यलेखः
सौरौ कण्डूतिगात्रस्तमसि च नियतं वञ्चितो
धर्महीनः॥"

इति ज्योतिस्तत्त्वम्॥ * ॥

अपि च।

"हरिरुवाच।
उदयर्क्षं समारभ्य राशौ भानुः स्थितो हर।
खराश्यादौ व्रजेदङ्के षड्भिः षड्भिस्तथा
निशाम्॥
मीने मेषे च पञ्च स्युस्तस्रो वृषकुम्भयोः।
मकरे मिथुने तिस्रः पञ्च चापे च कर्कटे॥
सिंहे च वृश्चिके षट् च सप्त कन्या तुले तथा।
एता लग्नप्रमाणेन घटिकाः परिकीर्त्तिताः॥
ग्रहपूर्व्वावग्रानेषुरसाब्धीष्वधिसागराः।
लङ्कोदया हि ह्रे वस्तुं लग्ना मेषादयोऽथवा॥
मेषलग्ने भवेदन्धा वृषे भवति कामिनी।
मिथुने सुभगा कन्या वेश्या भवति कर्कटे॥
सिंहे चैवाल्पपुत्रा च कन्यायां रूपसंयुता।
तुलायां रूपमैश्वर्यं वृश्चिके कर्कशा भवेत्॥
सौभाग्यं धनुषि स्याच्च मकरे नीचगामिनी।
कुम्भे चैवाल्पपुत्रा स्याज्जीने वैराग्यसंयुता॥
तुला कर्कटको मेषो मकरश्चैव राशयः।
चरकार्य्याणि कुर्य्याच्च स्थिरकार्य्याणि चैव हि॥

लघिमा

पञ्चाननो वृषः कुम्भो वृश्चिकः स्युः स्थिराणि हि।
कन्या धनुश्च मीनश्च मिथुनं द्विस्वभावतः॥
द्विस्वभावानि कर्म्माणि कुर्य्यादेषु विचक्षणः।
यात्रा चरेण कर्त्तव्या प्रवेष्टव्यं स्थिरेण तु।
देवस्थापनवेवाह्यं द्विस्वभावेन कारयेत्॥"

इति गारुड़े ६२ अध्यायः॥

लग्नः, पुं, (लग्+क्तः। निपातनात् साधुः। यद्वा, लस्ज+क्तः। "ओ लस्जी। लग्नः लग्नवान्। लस्जेरोदनुबन्धबलाद्दिड्भावे नत्वं स्यात्।" इति क्रमदीश्वरे दुर्गासिंहः।) सूतिपाठकः॥ तत्पर्य्यायः। प्रातर्गेयः २ सूतिव्रतः ३। इति त्रिकाण्डशेषः॥ स्कतः ४। इति जटाधरः॥

लग्नः, त्रि, (लस्ज+क्तप्रत्ययेन साधुः।) सक्तः। लज्जितः। इति मेदिनी॥

लग्नकः, पुं, (लग्न एव। स्वार्थे कन्।) प्रतिभूः। इत्यमरः॥ ह्रे लागा इति जामिन इति च ख्याते। तत्कार्य्ये लग्नकः। ओ लस्जी व्रीड़े क्तः। स्वार्थे कन्। प्रतिनिधिर्भवति प्रतिभूः क्विप्। इति तट्टीकायां भरतः॥

लग्निका, स्त्री, नग्निका। इत्यमरटीका॥

लघ, इ श्लोषे। इति कविकल्पद्रुमः॥ (भ्वा०-पर०-सक०-सेट्।) इ, लङ्घते। श्लोष इह अल्पीकरणम्।

'यं आधिरतिदीर्घाङ्गं कदाचित्तु न लङ्घति॥'

इति हलायुधः॥

गतावप्यन्ये। अन्ये चालङ्घिषुः श्लेलान्। इति दुर्गादासः॥

लघ, इ क लिघि। इति कविकल्पद्रुमः॥ (चुरा०-पर०-अक०-सेट्।) इ क, लङ्घयति। लिघि दीप्तौ। इति दुर्गादासः॥

लघ, इ ङ अशुग्गत्योः। इति कविकल्पद्रुमः॥ (भ्वा०-आत्म०-अक०-सक०च-सेट्।) इ, लङ्घते। ङ, लङ्घते। अशुक् भोजनाभावः। तथा च।

'ये गुणा लङ्घने प्रोक्तास्ते गुणा लघुभोजने॥'

इति वैद्यकम्॥

लङ्घने उपवासे इत्यर्थः। इति दुर्गादासः॥

लघट्, पुं, (लङ्घते मध्यस्थानमस्यृष्ट्वोत्तरस्थाने पतति भ्रुतं इतस्ततो गच्छतीति वा। लङ्घ+"लङ्घेर्नलोपश्च।" उणा०१।१३४। इति अटिः। नलोपश्च धातोः।) वायुः। इत्युणादिकोषः॥

लघटिः, पुं, (लघ गतौ+अटिः। इदभावः।) वायुः। इत्युणादिकोषः॥

लघिमा, [न्] पुं, (लघोर्भावः। लघु+"पृथ्वादिभ्य इमनिज्वा।" ५।१।१२२। इति इमनिच्।) लघुत्वम्। (यथा, रघुः। १३। ३७।

"आत्मा हविर्गन्धि रजोविमुक्तः
समश्नुते मे लघिमानमात्मा॥")

तत्तु श्लिष्टस्याष्टैश्वर्य्यान्तर्गत ऐश्वर्य्यविशेषः। यथा,

"लघिमा वपुषितेश्लिष्टं प्राकाम्यं महिमादिमाः।
यत्र कामावसायित्वं प्राप्तिरैश्वर्य्यमष्टधा॥"

इति हेमचन्द्रः॥

लघुः

(अवक्षुमतलम्। दुःखलम्। यथा, आर्य्यासप्तशत्याम्। ६०।

"अग्रे लघिमा पश्चात् महतापि विधीयते नहि महिम्ना।
वामन इति त्रिविक्रममभिदधति दशावतार-विदः॥")

लघिष्ठः, त्रि, अयमनयोरेषां वा अतिशयेन लघुः इत्यर्थे इष्ठप्रत्ययेन निष्पन्नः। अतिशयलघुत्वयुक्तः। इति आकरग्रन्थम्॥ (यथा, विदग्धमुखमण्डने।

"भविची रम्भोरु भिदशवदनज्ञानिरधुना
स रामोऽपि स्थाता न युधि पुरतो लक्ष्मणयुतः।
गमिष्यत्येवोच्चैर्विपदमधुना वानरचमू-
र्लघिष्ठेदं षष्ठाक्षरपरविलोपात् पठ पुनः॥"

सीतारावणयोरुक्तिप्रत्युक्तिरियम्। सप्तमाक्षरलोपे त्वेवं वाक्यम्। यथा। "दशवदनज्ञानिः।" "स्थाता युधि।" "उच्चैः पदम्॥")

लघीयान् [स्] त्रि, अयमनयोरेषां वा अतिशयेन लघुः इत्यर्थे ईयसुप्रत्ययेन निष्पन्नः। अतिशयलघुत्वयुक्तः। इति आकरग्रन्थम्॥ (यथा, महाभारते। २। ६३। १४।

"न वै सन्धिं पालयते लघीयान्
यस्त्वां समानेष्यति राजपुत्रि!॥")

लघु, क्ली, (लङ्घते अनेनेति। लङ्घ+"लङ्घिबन्धोर्नलोपश्च।" उणा० १। ३०। इति कुः। धातोर्नलोपश्च।) शीघ्रम्। इत्यमरः॥ (यथा, रामायणे। २। ४६। २१।

"यावदेव तु संसृप्तास्तावदेव वयं लघु।
रथमारुह्य गच्छामः पन्थानमकुतोभयम्॥")

क्षत्रियगुरु। इति मेदिनी। घे, ५॥ लामञ्जकम्। इति राजनिर्घण्टः॥ (अस्य पर्य्यायो यथा,—

"लामञ्जकं सुनालं स्यादम्लानं लघु लघुः।
इष्टकापथकं सेव्यं नलदस्यावदातकम्॥"

इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे॥ हस्ताश्विनीपुष्यनक्षत्राणि। यथा, बृहत्संहितायाम्। ९८। ६।

"लघु हस्ताश्विनपुष्याः
पञ्चदशरात्रिज्ञानभूषणकलासु।
शिल्पौषधयानादिषु
सिद्धिकराणि प्रदिष्टानि॥"

कालपरिमाणविशेषः। यथा, भागवते। ३। ११। ७।

"त्रयान् पञ्च विदुः काष्ठां लघुता दश पञ्च च।
लघूनि वै समाम्नाता दश पञ्च च नाडिकाः॥"

पुं, प्राणायामविशेषः। यथा, मार्कण्डेये। ३६। १३—१४।

"लघुमध्योत्तरीयाख्यः प्राणायामस्त्रिधोदितः।
तस्य प्रमाणं वक्ष्यामि तदलक्ष्यञ्च मे शृणु॥
लघुर्द्वादशमात्रस्तु द्विगुणः स तु मध्यमः।
त्रिगुणाभिस्तु मात्राभिरुत्तमः परिकीर्त्तितः॥")

लघुः, स्त्री, वृक्षा गाम ओषधिः। इति मेदिनी। घे, ५॥ (तथास्याः पर्य्यायः।

"मृक्काक्षगन्धाक्षयौ देवी मदयन्तिका लता लघुः।
सनुद्रान्ता वधूः कोटिवर्षालङ्कोपिकेत्यपि ॥"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥)

लघुः, त्रि, (लङ्घ + कुः। नलोपश्च।) अगुरुः। (यथा,—
"लवणादपि लघुलूलवूलादपि च भिक्षुकः।
न नीतो वायुना कस्मादर्थप्रार्थनभङ्गया ॥"
इत्युद्भटः ॥)
मनोज्ञः। (इष्टः। इत्यमरः ॥ यथा, रघुः। ११। १२।
"नाम्भसां कमलगन्धिभिर्नयौ
ग्राहिणाञ्च न परिश्रमच्छिदाम्।
दर्शनेन लघुना यथा तयोः
प्रीतिमापुरुभयोस्तपस्विनः ॥")
निःसारः। इति मेदिनी। धे, ५ ॥ (यथा, रघुः। १२। ६६।
"श्रुत्वा रामः प्रियोदन्तं मेने तत्सङ्गमोत्सुकः।
महार्णवपरिक्षेपं लङ्कायाः परिखालघुम् ॥")
हस्वः। इति हेमचन्द्रः ॥ * ॥ व्याकरणोक्तलघुसंज्ञा यथा। ह्रस्वो लघुः दीर्घो गुरुरित्युच्चारणवशाद्भवते। तथा संयोगे सति ह्रस्वोऽपि गुरुर्गुरुमतोऽनृच्छ इति वर्জ্জनाच्च। इति दुर्गासिंहकृतकलापवृत्तिः ॥ * ॥ छन्दःशास्त्रोक्तं लघुलक्षणं यथा,—
"मध्यगुरुश्चिलघुश्च नकारो
भादिगुरुः पुनरादिलघुर्यः।
जो गुरुमध्यगतो रलमध्यः
सोऽन्तगुरुः कथितोऽन्तलघुस्तः ॥
गुरुरेको गकारस्तु लकारो लघुरेकक ॥"
इति छन्दोमञ्जरी ॥
लघुकायः, पुं, (लघुः कायो यस्य।) छागः। इति त्रिकाण्डशेषः ॥ क्षुद्रशरीरश्च ॥
लघुकाश्मर्य्यः, पुं, (लघुः काश्मर्य्यः।) कट्फलवृक्षः। इति राजनिर्घण्टः ॥
लघुखट्टिका, स्त्री, (लघुः खट्टिका।) क्षुद्रखट्टा। तत्पर्य्यायः। आसन्दी २। इति हारावली। २०६ ॥
लघुगणः, पुं, (लघुर्गणः।) अश्विनीपुष्यहस्तमघाश्च। यथा,—
"उग्रः पूर्व्वमघान्तका ध्रुवगणश्चित्रोत्तराणि स्वभू-
र्व्वातादित्यहरित्रयं चरगणः पुष्याश्विहस्ता लघुः ॥"
इति दीपिका ॥
लघुगर्भः, पुं, (लघुर्गर्भ इव।) चिकटकमत्स्यः। इति हारावली। १६० ॥
लघुचिर्भिटा, स्त्री, (लघुश्चिर्भिटा।) लघुचिर्भिटा। इति राजनिर्घण्टः ॥
लघुजङ्घलः, पुं, लावकपक्षी। इति त्रिकाण्डशेषः ॥
लघुदन्ती, स्त्री, (लघुः क्षुद्रा दन्ती।) क्षुद्रदन्तीवृक्षः। यथा,—

"लघ्वी दन्ती विशल्या च स्वादुकण्टकपर्ण्यपि।
तथैरण्डफला ग्रीष्मा ग्रसनघण्टा घृणप्रिया।
वराहाङ्घ्री च कथिता निकुम्भश्च मकूलकः ॥"
अस्या गुणाः।
"दन्तीद्वयं सरं पाके रसे च कटु दीपनम्।
गुदाङ्कुराश्मशूलास्रकण्डूकुष्ठविदाहजित् ॥
तीक्ष्णोष्णं हन्ति पित्तास्रकफग्रोथोदरक्रिमीन्॥"
इति भावप्रकाशः ॥
तत्फलगुणाः।
"क्षुद्रदन्तीफलन्तु स्याच्चाम्लमधुरं रसपाकयोः।
शीतलं हृद्यविष्टम्भं गलग्रोथकफापहम् ॥"
इति भावप्रकाशः ॥
लघुदुन्दुभिः, पुं, (लघुर्दुन्दुभिः।) मृगडवाद्यम्। इति शब्दरत्नावली ॥
लघुद्राक्षा, स्त्री, (लघुः क्षुद्रा द्राक्षा।) काकलीद्राक्षा। इति राजनिर्घण्टः ॥
लघुनाम, [न्] क्ली, (लघु लघुवर्णयुक्तं नाम यस्य।) अगुरु। इति शब्दचन्द्रिका ॥
लघुपञ्चमूलं, क्ली, (लघु क्षुद्रं पञ्चमूलम्।) क्षुद्रपञ्चमूलपाचनम्। तत्तु शालपर्णीपृश्निपर्णीदृढतीकण्टकारीगोक्षुरसंयुक्तम्। यथा,—
"शालपर्णी पृश्निपर्णी वार्ताकी कण्टकारिका।
गोक्षुरः पञ्चभिश्चैतैः कनिष्ठं पञ्चमूलकम् ॥"
अस्य गुणाः।
"पञ्चमूलं लघु स्वादु बल्यं पित्तानिलापहम्।
वातुणां दृढ़तां याहि ज्वरश्वासाग्निसादजित् ॥"
इति भावप्रकाशः ॥
लघुपत्रकः, पुं, (लघूनि पत्राणि यस्य। कप्।) रोचनी। शुक्लारोचनी इति ख्यातः। इति शब्दचन्द्रिका ॥
लघुपत्री, स्त्री, (लघूनि पत्राणि यस्याः। ङीष्।) अश्वत्थोदुम्बरः। इति राजनिर्घण्टः ॥
लघुपिच्छिलः, पुं, (लघुः पिच्छिलः।) भूकदम्बकः। इति राजनिर्घण्टः ॥
लघुपुष्पः, पुं, (लघूनि क्षुद्राणि पुष्पाणि यस्य।) भूमिकदम्बः। इति राजनिर्घण्टः ॥ (भूमिकदम्बशब्दोऽस्य विशेषो ज्ञेयः ॥)
लघुबदरः, पुं, (लघुः क्षुद्रो बदरः।) क्षुद्रकोलिः। तत्पर्य्यायः। कृष्णफलः २ बहुकरः ३ कृष्णफलः ४ दुष्पार्श्वः ५ मधुरः ६ दरहारः ७ गृध्रिप्रियः ८। इति राजनिर्घण्टः ॥ अस्य फलगुणाः।
"कर्कन्धुः क्षुद्रबदरं कथितं पूर्व्वसूरिभिः।
अम्लं स्यात् क्षुद्रबदरं कषायं कथितं मनाक् ॥
स्निग्धं गुरु च तिक्तञ्च वातपित्तापहं स्मृतम्।
शुष्कं भेदि मिश्रितं सर्व्वं लघु दृष्टाङ्कमाक्षजित् ॥"
इति भावप्रकाशः ॥
अस्य पक्वफलगुणाः। मधुराम्लत्वम्। कफवातनाशित्वम्। कषत्वम्। स्निग्धत्वम्। जन्तुकारकत्वम्। ईषत्पित्तासृदाहश्रमनाशत्वञ्च। इति राजनिर्घण्टः ॥

लघुबदरी, स्त्री, (लघुः क्षुद्रा बदरी।) भूबदरी। इति राजनिर्घण्टः ॥
लघुभ्राष्ट्री, स्त्री, (लघुः क्षुद्रा भ्राष्ट्री।) क्षुद्रभ्राष्ट्री। तत्पर्य्यायः। जलोद्भवा २ कच्छपत्रा ३। इति राजनिर्घण्टः ॥
लघुमत्स्यः, पुं, (लघुः क्षुद्रो मत्स्यः) क्षुद्रमत्स्यः। इति राजनिर्घण्टः ॥
लघुमांसः, पुं, (लघु स्वल्पं मांसं यस्य।) तित्तिरिपक्षी। इति त्रिकाण्डशेषः ॥
लघुमांसी, स्त्री, गव्यमांसी। इति राजनिर्घण्टः ॥
लघुलयं, क्ली, (लघु श्लीयते इति। ली + अच्।) वीरणमूलम्। इत्यमरः ॥
लघुसदाफला, स्त्री, (सदा फलं यस्याः सा। लघुः सदाफला।) लघूदुम्बरिका। इति राजनिर्घण्टः ॥
लघुहस्तः, पुं, (लघुः क्षिप्रकारी हस्तो यस्य।) शीघ्रवेधी। इति हेमचन्द्रः। ३। ४३१ ॥ (वाच्यलिङ्गोऽपि। यथा, कथासरित्सागरे। ४२। १३३।
"स राजपुत्रश्चित्रेव रङ्गसस्तस्य तच्छरः।
भूयः खड्गप्रहारेण लघुहस्तो विधाकरोत् ॥"
यथा च।
"तस्याधिगतशास्त्रार्थो दृष्टकर्म्मा स्वयं कृती।
लघुहस्तः शुचिः शूरः सज्जोपस्करभेषजः ॥
प्रत्युत्पन्नमतिर्धीमान् व्यवसायी विशारदः।
सत्यधर्म्मपरो यश्च स भिषक् पाद उच्यते ॥"
इति सुश्रुते सूत्रस्थाने ३४ अध्यायः ॥)
लघुहैमदुग्धा, स्त्री, (लघुर्हैमदुग्धा।) लघूदुम्बरिका। इति राजनिर्घण्टः ॥
लघूदुम्बरिका, स्त्री, (लघुः क्षुद्रा उदुम्बरिका।) क्षुद्रोडुम्बरिका। छोट डुमुर इति भाषा। तत्पर्य्यायः। लघुपत्रफला २ लघुहैमदुग्धा ३ लघुसदाफला ४ लघ्वात्युडुम्बरा ५। रसवीर्य्यविपाकेषु उडुम्बरात् किञ्चिन्न्यूनगुणोयम्। इति राजनिर्घण्टः ॥
लघ्वी, स्त्री, (लघु + ङीष्।) लाघवयुक्ता। (यथा,—
"गुर्व्वी पिङ्गी खरात्यर्थं लघ्वी सैव विपर्य्ययात्।
प्रकृतीनामाशु जीर्य्येत कदुलाद्यवेहिका ॥"
इति वैद्यकचक्रपाणिसंग्रहेऽतीसाराधिकारे ॥)
स्यन्दनप्रभेदः। इति मेदिनी। धे, ५ ॥ एक्का। इति राजनिर्घण्टः ॥
लङ्का, स्त्री, (रमन्तेऽस्यामिति। रम् + बाहुलकात् कः। रस्य लत्वम्। इत्युज्ज्वलः। ३। ४०।) रत्नःपुरी। (यथा, नैषधे। ३। ६७।
"चेतो न लङ्कामयते मदीयं
नान्यत्र कुत्रापि च साभिजाषम् ॥")
ज्योतिःशास्त्रमते सा च पृथिव्या मध्यभागे तिष्ठति। लङ्कोदयात् चरखण्डेभ्यः खदेशे लग्नप्रमाणं भवति। यथा,—
"लङ्का कुमध्ये यमकोटिरस्याः
प्राक् पश्चिमे रोमकपत्तनञ्च।

अधस्तात् सिद्धपुरं सुमेरोः
सौम्येऽथ याम्ये वटवानलश्च ।
कुबेरपादान्तरितानि तानि
स्थानानि यक्षगोलविदो वदन्ति ॥"

अपि च ।

"यल्लङ्कोज्जयिनीपुरीपरिकुरुक्षेत्रादिदेशान् स्पृशन्
सूत्रं मेरुगतं बुधैर्निगदिता सा मध्यरेखा भुवः ।
आदौ प्रागुदयोऽपरत्र विषये पश्चाद्धि रेखोदयात्
स्यात्तस्मात् क्रियते तदन्तरभुवं खेटेष्वृणं खं फलम् ॥"

इति सिद्धान्तशिरोमणिः ॥ * ॥

अथ लङ्कापुरीवर्णनम् ।

त्वष्टोवाच ।

"त्रिंशद्योजनविस्तीर्णा स्वर्णप्राकारतोरणाम् ।
दक्षिणस्योदधेस्तीरे त्रिकूटो नाम पर्वतः ।
शिखरे तस्य शैलस्य मध्यमम्बुधिसन्निधौ ॥
पतत्रिभिश्च दुष्प्रापां टङ्कच्छिन्नां चतुर्हृदम् ।
शक्रार्थं मत्प्रजता पूर्वं प्रयत्नात् बहुवत्सरैः ॥
वसन्तु तत्र दुर्द्धर्षाः सुखं राक्षसपुङ्गवाः ।
अमरावतीं समासाद्य सेन्द्रा इव दिवौकसः ॥
लङ्कादुर्गं समासाद्य शत्रूणां शस्त्रछेदनाः ।
दुराधर्षा भविष्यन्ति राक्षसैर्बहुभिर्वृताः ॥"

इति वह्निपुराणे कपिलदर्शनगमाध्यायः ॥ * ॥

शाखा । शाकिनी । कुलटा । इति मेदिनी । के, ३३ ॥ धान्यविशेषः । तत्पर्य्यायः । कराजचिपुटा २ काण्डिका ३ रूक्षशाकिका ४ । अस्या गुणाः । रूक्षत्वम् । हिमत्वम् । शीतलत्वम् । पित्तनाशित्वम् । वातकारित्वम् । गुरुत्वञ्च । इति राजनिर्घण्टः ॥

लङ्घादाढ्यी, [न्] पुं, (लङ्घां दृढति तच्छीलः । दृढ + णिनिः ।) हनूमान् । इति शब्दरत्नावली ॥

लङ्घाधिपतिः, पुं, (लङ्घाया अधिपतिः ।) रावणः । इति जटाधरभूरिप्रयोगौ ॥ (यथा, रघुः । ६ । ६२ ।

"पुरा जनस्थानविमर्द्दशङ्की
सन्धाय लङ्घाधिपतिः प्रतस्थे ॥")

लङ्घापतिः, पुं, (लङ्घायाः पतिः ।) रावणः । इति भूरिप्रयोगः ॥

लङ्घापिका
लङ्घायिका
लङ्घारिका
} स्त्री, पृक्का । इति शब्दरत्नावली ॥ पिङ्गिंशाक इति भाषा ॥

लङ्घास्थायी, [न्] पुं, (लङ्घावत् तिष्ठतीति । स्था + णिनिः ।) वृक्षविशेषः । लङ्घासिज इति भाषा । यथा,—

"लङ्घास्थायी राजवृक्षो भद्रचूडो विशायकः ।"

इति शब्दचन्द्रिका ॥

(लङ्घायां तिष्ठतीति ।) लङ्घावासिनि, त्रि ॥

लङ्केशः, पुं, (लङ्घायाः ईशः पतिः ।) रावणः । इति त्रिकाण्डशेषः ॥

लङ्घोपिका, स्त्री, पृक्का । इति शब्दरत्नावली ॥

लङ्घोयिका, स्त्री, पृक्का । इति शब्दरत्नावली ॥

लङ्घः, पुं, (लङ्घतीति । लङ्घ गतौ + अच् ।) खड्गः । विहगः । इति मेदिनी । गे, २३ ॥ नां इति भाषा ॥

लङ्घूलं, क्ली, लाङ्गूलम् । इत्युणादिकोषः ॥

लङ्घनं, क्ली, (लङ्घ + ल्युट् ।) उपवासः । (यथा, सुश्रुते । १ । ४६ ।

"तत्रामे लङ्घनं कार्य्यं विदग्धे वमनं हितम् ।
विष्टब्धे स्वेदनं पथ्यं रसशेषे प्रयोजयेत् च ॥"

यथा च ।

"लङ्घनं दृंहणं काले रूक्षणं स्नेहनन्तथा ।
स्वेदनं स्तम्भनञ्चैव जानीते यः स वै भिषक् ॥"

"तदग्निवेशस्य वचो निशम्य गुरुरब्रवीत् ।
यत्किञ्चिल्लाघवकरं देहे तल्लङ्घनं स्मृतम् ॥"

"लघ्वशीतोष्णविषदं रूक्षं सूक्ष्मं खरं सरम् ।
कठिनञ्चैव यद्द्रव्यं प्रायस्तल्लङ्घनं स्मृतम् ॥"

"————————पिपासा मारुतातपौ ।
पाचनान्युपवासश्च व्यायामश्चेति लङ्घनम् ॥"

"प्रभूतश्लेष्मपित्तास्रमलाः सन्दूषितारुताः ।
दृढच्छरीरा बलिनो लङ्घनीया विभुद्धिभिः ॥"

"स्वस्थदोषाणां प्रमीढ़ानां स्निग्धाभिष्यन्दिदृंहिणाम् ।
शिशिरे लङ्घनं प्रस्तमपि वातविकारिणाम् ॥"

इति चरके सूत्रस्थाने द्वाविंशेऽध्याये ॥

"ज्वरे लङ्घनमेवादावुपदिष्टन्ते ज्वरात् ।
क्षयानिलभयक्रोधकामशोकश्रमोद्भवात् ॥
आमाशयस्थो हत्वाग्निं सामो मार्गान् पिधापयन् ।
विदधाति ज्वरं दोषस्तदा लङ्घनमाचरेत् ॥
अनवस्थितदोषाग्नेर्लङ्घनं दोषपाचनम् ।
ज्वरघ्नं दीपनं कार्श्यरुचिलाघवकारकम् ॥
प्राक्तविरोधिना चैनं लङ्घनेनोपपादयेत् ।
बलाधिष्ठानभारौम्यं यदर्थोऽयं क्रियाक्रमः ॥
तत्तु मारुतसृष्ट्यासुखशोषभ्रमान्विते ।
कार्य्यं न बाले वृद्धे वा न गर्भिण्यां न दुर्ब्बले ॥
वातमूत्रपुरीषाणां विसर्गे गात्रलाघवे ।
हृदयोद्गारकण्ठास्यशुद्धौ तन्द्रा क्लमे गते ॥
खेदे जाते रुचौ चापि क्षुत्पिपासासहोदये ॥
ज्ञातं लङ्घनमादेयं निर्यत्ने चान्नरागिनि ॥
पर्व्वभेदोऽङ्गमर्द्दश्च कासः श्लेष्मा सुखस्य च ।
क्षुत्प्रणाशोऽरुचिस्तृष्णा दौर्ब्बल्यं श्रोत्रनेत्रयोः ॥
मनसः सम्भ्रमोऽभीक्ष्णमुद्गारास्यसमो हृदि ।
देहाग्निबलहानिश्च लङ्घनेऽतिकृते भवेत् ॥"

इति वैद्यकचक्रपाणिसंग्रहे ज्वराधिकारे ॥)

क्रमशम् । (यथा, कुमारे । ५ । ६४ ।

"यथा श्रुतं वेदविदांवर त्वया
जनोऽयमुच्चैः पदलङ्घनोत्सुकः ।
तपः किलेदं तदवाप्तिसाधनं
मनोरथानामगतिर्न विद्यते ॥")

प्लवनम् । इति मेदिनी । ने, १२० ॥ अभिलङ्घनविधौ यथा,—

"न चाग्निं लङ्घयेद्धीमान्नोपदध्याद्धः क्वचित् ।
न चैनं पादतः कुर्य्यात् सुखेन न घमेद्बुधः ॥"

इति कौर्म्मे उपविभागे १५ अध्यायः ॥

(अतिक्रमः । यथा, महाभारते । १ । १५६ । १६ ।

"न चाप्यधर्म्मैः कल्याण बहुपक्षीकृता नृणाम् ।
स्त्रीणामधर्म्मैः सुमहान् भर्तुः पूर्व्वस्य लङ्घने ॥")

अभ्यतीयगतिः । यथा,—

"श्रुतन्तु लङ्घनं पश्चिन्दगगत्यनुहारकम् ।"

इति हेमचन्द्रः ॥ * ॥

(स्त्री, अवमानना । यथा, मार्कण्डेये । १३५ । ३३ ।

"अन्यस्यापि स्वपुत्रस्य लङ्घना क्रियते हि या ।
तां नालं क्षत्रियः सोढुं किं पुनः पितृमारणम् ॥")

लङ्घ, लङ्घने । इति कविकल्पद्रुमः ॥ (भ्वा०-पर०-सक०-सेट् ।) लङ्घति दधं चक्रेण गोपः । इति दुर्गादासः ॥

लञ्ज, भर्त्सने । इति कविकल्पद्रुमः ॥ (भ्वा०-पर०-सक०-सेट् ।) लञ्जति । इति दुर्गादासः ॥

लञ्ज, इ भर्त्सने । इति कविकल्पद्रुमः ॥ (भ्वा०-पर०-सक०-सेट् ।) इ, लञ्जाते । इति दुर्गादासः ॥

लञ्ज, इ क भाषवृत्तौ । इति कविकल्पद्रुमः ॥ (चुरा०-पर०-अक०-सक०-च-सेट् ।) इ क, लञ्जयति । भा दीप्तिः बकार्थो निकेतनहिंसाबलदानानि । इति दुर्गादासः ॥

लञ्ज, क अन्तर्द्धौ । इति कविकल्पद्रुमः ॥ (चुरा०-पर०-सक०-सेट् ।) अन्तर्द्धिराच्छादनम् । क, लाञ्जयति चन्द्रं मेघः । इति दुर्गादासः ॥

लञ्ज, ड व्रीड़े । इति कविकल्पद्रुमः ॥ (भ्वा०-आत्म०-अक०-सेट् ।) ड, लञ्जते । निष्ठायां लग्न इत्यर्थे । इति दुर्गादासः ॥

लञ्ज, त् क भाषने । इति कविकल्पद्रुमः ॥ (अदन्त चुरा०-पर०-अक०-सेट् ।) क, लञ्जयति । भाषनं दीप्तिः । इति दुर्गादासः ॥

लञ्जकारिका, स्त्री, (लञ्जं लज्जां करोतीव । लञ्ज + ण्वुल् । टापि अत इत्वम् ।) लज्जालुलता । इति शब्दमाला ॥

लज्जा, स्त्री, (लज्जनमिति । लस्जृ व्रीड़ने + "गुरोश्च हलः ।" ३ । ३ । १०३ । इति अः । टाप् ।) अन्तःकरणवृत्तिविशेषः । इति नागोजीभट्टः ॥ अकर्त्तव्ये कर्म्मणि परज्ञानभयम् । लाज इति भाषा । तत्पर्य्यायः । मन्द्राक्षम् २ ह्रीः ३ त्रपा ४ व्रीड़ा ५ । सा अन्यतस्त्वेतु अपत्रपा ६ । इत्यमरः ॥ मन्द्राक्ष्यम् ७ लज्या ८ व्रीड़ः ९ व्रीड़नम् १० । इति शब्दरत्नावली ॥ (यथा, कुमारे । १ । ४८ ।

"लज्जा तिरश्चां यदि चेतसि स्या-
दसंशयं पर्व्वतराजपुत्र्याः ।
तं केशपाशं प्रसमीक्ष्य कुर्यु-
र्बालप्रियत्वं ग्रथिलं चमर्य्यः ॥")

लज्जालुः । इति राजनिर्घण्टः ॥

लज्जालुः, पुं,स्त्री,(लज्जेवास्या अस्तीत्यर्थे आलुः।) क्षुपविशेषः। तत्पर्य्यायः। रक्तपादी २ ग्रमीपत्रा ३ स्पृक्का ४ खदिरपत्रिका ५ सङ्कोचिनी ६ समङ्गी ७ नमस्कारी ८ प्रसारिणी ९ सप्तपर्णी १० खदिरी ११ गण्डमालिका १२ लज्जा १३ लज्जिरी १४ सपर्णलज्जा १५ अस्ररोधिनी १६ रक्तमूला १७ ताम्रमूला १८ खगुप्ता १९ अङ्गविकारिका २०। इति राजनिर्घण्टः॥ महाभीता २१ वह्निनी २२ महौषधिः २३। इति शब्दचन्द्रिका॥ अस्या गुणाः। कटुत्वम्। शीतत्वम्। पित्तातिसार-श्लीपदाहश्रमश्वासव्रणकुष्ठ-कफार्शिनाशित्वञ्च॥ तद्भेदो यथा,—

"लज्जालुर्विपरीतान्या अल्पक्षुपदृढदला।
वेपरीत्या च लज्जालुर्ह्याभिधाने प्रयोजयेत्॥
लज्जालुर्वेपरीत्याहुः कटुरुष्णः कफापहुत्।
रसे नियामकश्चैव नानाविज्ञानकारकः॥"

इति राजनिर्घण्टः॥

अन्या हंसपादीशब्दे द्रष्टव्या॥*॥ अपि च।

"लज्जालुः स्यात् शमीपत्रा समङ्गाञ्जलि-
कारिका।
रक्तपादी नमस्कारी नाम्ना खदिरकेत्यपि॥
लज्जालुः शीलता तिक्ता कषाया कफपित्त-
जित्।
रक्तपित्तमतीसारं योनिरोगान् विनाशयेत्॥"

अत लज्जालुभेदः।

"अलम्बुषा खरस्वक् च तथा मेदोगला स्मृता।
अलम्बुषा लघुः स्वादुः कृमिपित्तकफापहा॥"

इति भावप्रकाशः॥

अन्या दुग्धिकाशब्दे द्रष्टव्या॥

लज्जाशीलः, त्रि, (लज्जा शीलं स्वभावो यस्य।) लज्जाविशिष्टः। तत्पर्य्यायः। अपत्रपिष्णुः २। इत्यमरः॥ लज्जितः ३। इति शब्दरत्नावली॥

लज्जितः, त्रि, (लज्जा सञ्जातास्य। लज्जा+तारकादित्वात् इतच्।) लज्जायुक्तः। तत्पर्य्यायः। व्रीणः २ व्रीतः ३। इत्यमरः॥ (यथा, रघुः। १२। ७५।

"कामं जीवति मे नाथः इति सा विजहौ शुचम्।
प्राक् मत्वा सत्यमस्यात्मं जीवितास्मीति लज्जिता॥")

लज्जिरी, स्त्री, लज्जालुः। इति राजनिर्घण्टः॥

लज्या, स्त्री, लज्जा। इति शब्दरत्नावली॥

लञ्ज, तृ क भासने। इति कविकल्पद्रुमः॥ (अदन्त-चुरा०-पर०-अक०-सेट्।) क, लञ्जयति। भासनं दीप्तिः। इति दुर्गादासः॥

लञ्जः, पुं, (लञ्जयति शोभते इति। लञ्ज+अच्।) पदः। कच्छः। इति हेमचन्द्रः॥ पुच्छः। इति जटाधरः॥

लञ्जिका, स्त्री, (लञ्जयति शोभते इति। लञ्ज+ण्वुल्। टापि अत इत्वम्।) वेश्या। इति हेमचन्द्रः॥

लट, वाल्योक्त्योः। इति कविकल्पद्रुमः॥ (भ्वा०-पर०-अक०-सक० च-सेट्।) बालोऽङ्गः तस्य भावो बाल्यं यामोह इति यावत्। लटति लोकः श्लिष्यः स्यात्। किञ्चिद्वदति वेत्यर्थः। इति दुर्गादासः॥

लटः, पुं, (लटति यथेच्छया वदतीति। लट+अच्।) प्रमादवचनम्। दोषः। इति विश्वः॥

लटकः, पुं, (लटतीति। लट+"कुन् श्लिल्यिसंज्ञयोरपूर्व्वस्यापि।" उणा० २। ३२। इति कुन्।) दुर्जनः। इत्युणादिकोषः॥

लटपर्णं, क्ली, (लटमुग्रं पर्णमस्य।) त्वचम्। इति राजनिर्घण्टः॥

लट्टः, पुं, दुर्जनः। इति शब्दरत्नावली॥

लट्टः, पुं, (लटतीति। लट+"अशूप्रुषिलटीति।" उणा० १। १५१। इति क्तन्।) जातिविशेषः। नेटुया इति भाषा॥ रागभेदः। तुरङ्गमः। इत्युणादिकोषः॥

लट्वा, स्त्री, (लट्+क्तन्। टाप्।) करङ्गभेदः। नाटाकरञ्जा इति भाषा। वाद्यभेदः। पक्षिविशेषः। श्यामचटक इति ख्यातः। इति मेदिनी। वे, २२॥ कुसुम्भम्। इति हेमचन्द्रः॥ भ्रमरकः। भोडरी इति ख्यातः। इत्यमरभरतौ॥ (श्लिलौ। इति हारावली। २५६॥ तूलिका। द्यूतम्। यथा,—

"लट्वा तु तूलिका ख्याता लट्वा द्यूतेऽपि दृश्यते॥"

इति याज्ञिरभसौ।" इति उणादिवृत्तौ उज्ज्वलः। १।१५१॥)

लड, विलासे। इति कविकल्पद्रुमः॥ (भ्वा०-पर०-अक०-सेट्।) लड़ति बाला। इति दुर्गादासः॥

लड, इ कि भाषणे। इति कविकल्पद्रुमः॥ (चुरा०-पक्षे भ्वा०-पर०-सक०-सेट्।) इ, लण्डयते। कि, लण्डयति लण्डति। भाषणं कथनम्। अयं केचिन्न मन्यते। इति दुर्गादासः॥

लड, ओ इ कि उत्क्षेपणे। इति कविकल्पद्रुमः॥ (चुरा०-पक्षे भ्वा०-पर०-सक०-सेट्।) ओ, लण्डितः। अनुबन्धबलादिमूयवधानेऽपि निष्ठातस्य नत्वम्। अस्मात् निष्ठायामिम् न स्यादित्येके। लड इति। इ, लण्डयते। कि, लण्डयति लण्डति तण्डुलं लोकः। इति दुर्गादासः॥

लड, क उपसेवे। इति कविकल्पद्रुमः॥ (चुरा०-पर०-सक०-सेट्।) उपसेव इह अत्यन्तपालनम्। क, लालयेत् पञ्चवर्षाणि पुत्रमिति अत्र डलयोरेकत्वाल्लत्वम्। कल्यनायामस्य प्रयोगः। इति रमानाथः। लाडयति लतां वायुः। इति दुर्गादासः॥

लड, क ड वीर्य्ये। इति कविकल्पद्रुमः॥ (चुरा०-आत्म०-सक०-सेट्।) क ड, लाड़यते। लाभ एव इत्यन्ये। विशेषेण आप्तुमिच्छा वीप्सा। इति दुर्गादासः॥

लड, त क त्रैपे। इति कविकल्पद्रुमः॥ (अदन्त-चुरा०-पर०-सक०-सेट्।) लड़यति। अललाड़त्। इति दुर्गादासः॥

लड, म उन्मत्थनजिक्रयोः। इति कविकल्पद्रुमः॥ (भ्वा०-पर०-अक०-क्वचित् पीड़नादौ सक०-सेट्।) उन्मत्थनं पीड़ितौभावः उत्क्षिप्तीभावश्च। लड़ति लता वायुना पीड़िता उत्क्षिप्ता वा स्यादित्यर्थः। जिक्रा तद्विषयक्रिया। लड़ति जिक्रा स्पन्दनवती स्यादित्यर्थः। म, लड़यति। लड़यति त्वचमुल्लालयत्यूनिति श्रीहर्षः। पीड़यतीत्यर्थः। कवाटघ्नीभिन्दुः किरणलहरीमुल्लालयतीति मुरारिः। उत्क्षिपतीत्यर्थः। उभयत्र डलयोरेकत्वाल्लत्वम्। केचित्तु जिक्रोन्मत्थने इति पठित्वा जिक्राया उन्मत्थनं उत्क्षेपणमिति व्याख्याय लड़ति जिक्रां सर्पं इत्येवोदाहरन्ति। इति दुर्गादासः॥

लड़हः, त्रि, मनोज्ञः। इति त्रिकाण्डशेषः॥

लडुः, त्रि, दुर्ज्जनः। इति शब्दरत्नावली॥

लड्डुकः, पुं, पिष्टकविशेषः। लाडु इति भाषा॥ यथा। लड्डुको दुर्ज्जरो गुरुः। इति राजवल्लभः॥ अपि च।

"तैलेन हविषा पक्वं भवेत् चूर्णञ्च लड्डुकः॥"

इति शब्दचन्द्रिका॥

लण्डं, क्ली, (लण्ड्यते उत्क्षिप्यते इति। लण्ड+घञ्।) पुरीषम्। लाण्ड् इति भाषा। यथा,—

"समेधमानेन स लण्डवाहुना
निरुद्धवायुश्वसनांश्च निक्षिपन्।
प्रस्विन्नगात्रः परिवृत्तलोचनः
पपात लण्डं विसृजन् क्षितौ वसुः॥"

इति श्रीभागवते १० स्कन्धे ३७ अध्याये ८ श्लोकः॥ लण्डं पुरीषमुत्सृजन्। इति तट्टीकायां श्रीधरस्वामी॥

लण्डजः, त्रि, (लण्डे तदाख्यदेशे जायते इति। जन्+डः।) लण्डदेशजातः। यथा,—

"पूर्व्वाम्नाये नवघ्नं षड्घ्नीतिः प्रकीर्त्तिता।
किरङ्गभाषया तन्त्रास्त्रेषां संसाधनात् भुवि॥
अधिपा मण्डलानाञ्च संग्रामेष्वपराजिताः।
इरेजा नव षट् पञ्च लण्डजाश्चापि भाविनः॥"

इति मेरुतन्त्रे २३ प्रकाशः॥*॥

लण्डस्तु अधुना लण्डन् इति ख्यातः। इरेजानां राजधानी च॥

लत, प्राते। सौत्रधातुरयम्। इति कविकल्पद्रुमः॥ (भ्वा०-पर०-सक०-सेट्।) लता। इति दुर्गादासः॥

लता, स्त्री, (लतति वेष्टयते वान्यमिति। लत+पचाद्यच्। टाप्।) शाखादिरहिता गुडूच्यादिः। तत्पर्य्यायः। वल्ली २ प्रतति: ३। इत्यमरः॥ वल्लिः ४ वेल्लिः ५ प्रततिः ६। सा शाखापत्रसमायुक्ता चेत्प्रतानिनी। इति शब्दरत्नावली॥ तत्पर्य्यायः। वीरुत् २ गुल्मिनी ३ उलपः ४। इत्यमरः॥*॥ अमायां वीरुधां छेदकर्त्तुर्निन्दा

यथा,—
"अप्सु तस्मिन्नहोरात्रे पूर्व्वं विश्रुति चन्द्रमाः
ततो वीरुत्सु वसति प्रथाग्यर्कं ततः क्रमात् ॥
छिनत्ति वीरुधो यस्तु वीरुत्संस्थे निशाकरे।
पत्रं वा पातयत्येकं ब्रह्महत्यां स विन्दति ॥"
इति श्रीविष्णुपुराणे २ अंशे १२ अध्यायः ॥*॥
आश्रमे रोपणीया शुभदा लतादिर्यथा,—
"अलाबुश्चापि कुष्माण्डं मायाम्बुश्च सुकासुकः।
खर्ज्जुरी कर्कटी चापि शिविरे मङ्गलप्रदा ॥
वास्तूकः कारवेल्लश्च वार्त्ताकुश्च शुभप्रदा।
लताफलञ्च शुभदं सर्व्वं सर्व्वत्र निश्चितम् ॥"
इति ब्रह्मवैवर्त्ते श्रीकृष्णजन्मखण्डे १०२ अध्यायः॥
शाखा। प्रियङ्गुः। (अस्याः पर्य्यायो यथा,—
"प्रियङ्गुः फलिनी कान्ता लता च महिलाक्षया।
गुन्द्रा गुन्द्रफला श्यामा विश्वक्सेनाङ्गना-
प्रिया ॥"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥)
पृक्का। (यथास्याः पर्य्यायः।
"तस्करोच्चारकश्चण्डो देवी पृक्का लता लघुः ॥"
इति वैद्यकरत्नमालायाम् ॥)
अग्निपर्णी। इत्यमरः॥ ज्योतिष्मती। (अस्याः पर्य्यायो यथा,—
"ज्योतिष्मती स्यात् कटभी ज्योतिष्का कङ्गीनी-
ति च।
पारावतपदी पण्या लता प्रोक्ता ककुन्दनी ॥"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे॥)
लताकस्तूरिका। माधवी। दूर्व्वा। इति मेदिनी। ते, ५१-५२॥ कैवर्त्तिका। सारिवा। इति राजनिर्घण्टः॥ (वृहती। तत्पर्य्यायो यथा,—
"भण्डाकी वृहती सिंही वार्त्ताकी राष्ट्रिका-
कुली।
प्रसह्या रक्तपाका च लता वृहतिका परा॥")
नारी। यथा,—
"नम्रां परलतां पश्यन् जपेत् सं यस्तु साधकः।
प्रजपेत् स भवेत् शीघ्रं विद्यायां वल्लभः स्वयम्॥"
इति तन्त्रसारे श्यामासाधनम्॥
(तथा च नैषधे। १। ८५।
"नवा लता ग्रन्थवहेन चुम्बिता
करम्बिताङ्गी मकरन्दशीकरैः।
दृशा नृपेण स्मितशोभिकुड्मला
दरादराभ्यां दरकम्पिनी पपे॥"
"नवा नवीना लता माधवीलता पक्षे नवा रम्या लता स्त्री।" इति तट्टीका॥*॥ अप्सरोविशेषः। यथा, महाभारते। १। २१७। २०।
"अहश्च सौरभेयी च समीची बुद्बुदा लता।
यौगपद्येन तं विप्रमभ्यगच्छाम भारत!॥")
लताकरञ्जः, पुं, (लतारूपः करञ्जः।) करञ्जविशेषः। कराटकरेञ इति हिन्दी भाषा। तत्पर्य्यायः। दुग्धपूः २ वीराख्यः ३ वक्रयोजकः ४ धनदाढ्यो ५ कराटफलः ६ कुबेराढ्यो ७। अस्य पञ्चगुणाः। कटुत्वम्। उष्णत्वम्। कफवातनाशित्वञ्च। तद्बीजगुणाः। दीपनत्वम्। पथ्यत्वम्। मूलगुल्मविषापहत्वञ्च। इति राजनिर्घण्टः॥
लताकस्तूरिका, स्त्री, (लतारूपा कस्तूरी तद्वद्गन्धत्वात्। ततः स्वार्थे कन्।) लताकस्तूरी। तत्पर्य्यायः। कटुः २ दक्षिणदेशजा ३। अस्या गुणाः। तिक्तत्वम्। स्वादुत्वम्। वृष्यत्वम्। हिमत्वम्। लघुत्वम्। चक्षुष्यत्वम्। क्षैण्यत्वम्। श्लेष्मलत्वावस्थास्यरोगनाशित्वञ्च। इति पथ्यापथ्यविवेकः॥ अपि च।
"लताकस्तूरिका तिक्ता हृद्या ग्रीतास्र-
रोगनुत्॥"
इति राजवल्लभः॥
लताजिह्वः, पुं, (लतेव जिह्वा यस्य।) सर्पः। इति शब्दमाला॥
लतातरुः, पुं, (लतेव दीर्घस्तरुः।) नारङ्गवृक्षः। तालवृक्षः। इति शब्दमाला॥ शालवृक्षः। इति चिकाण्डशेषः॥
लतादुमः, (लतेव द्रुमः दीर्घत्वात्।) लताशालः। तत्पर्य्यायः। तार्क्ष्यः २ अश्वकर्णः ३ कुम्भिकः ४ वन्यः ५ दीर्घः ६। इति रत्नमाला॥
लतापनसः, पुं, (लतायां पनसमिव फलमस्य।) फललताविशेषः। तरसुज् इति ख्यातः। तत्पर्य्यायः। चेलालः २ चिचफलः ३ सुखाप्रः ४ राजतेमिषः ५ गाटान्त्रः ६ सेटुः ७। इति चिकाण्डशेषः॥
लताप्रक्का, स्त्री, (लताप्रधाना प्रक्का।) सप्तद्राक्षा। इति शब्दरत्नावली॥ पिड़िंयाक इति भाषा॥
लताप्रतानिनी, स्त्री, (लताप्रतानोऽस्त्यस्येति। इनिः।) शाखाप्रचयवती लता। तत्पर्य्यायः। वीरुत् २ गुल्मिनी ३ उलपः ४। इत्यमरभरतौ॥ वीरुधा ५ वरुत् ६। इति शब्दरत्नावली॥ प्रतानी ७ कक्षः ८। इति जटाधरः॥
लताफलं, क्ली, (लतायां फलमस्य।) पटोलः। यथा,—
"वास्तूकः कारवेल्लश्च वार्त्ताकुश्च शुभप्रदा।
लताफलञ्च शुभदं सर्व्वं सर्व्वत्र निश्चितम्॥"
इति ब्रह्मवैवर्त्ते श्रीकृष्णजन्मखण्डे १०२ अध्यायः॥
लताभद्रा, स्त्री, (लतया भद्रा यस्याः।) भद्रालीवृक्षः। इति शब्दमाला॥
लतामणिः, पुं, (लतासदृशो मणिः।) प्रवालः। इति चिकाण्डशेषः राजनिर्घण्टश्च॥ (प्रवालशब्देऽस्य विवरणं ज्ञातव्यम्॥)
लतामरुत्, स्त्री, (लतायां मरुत् यस्याः।) प्रक्का। इति शब्दरत्नावली॥
लतामाधवी, स्त्री, (लताप्रधाना माधवी।) माधवीलता। इति शब्दरत्नावली॥
लतायष्टिः, स्त्री, (लता यष्टिरिव।) मञ्जिष्ठा। इति शब्दमाला॥
लतायावकं, क्ली, (लतायां याव इव यस्य। कन्।) प्रवालम्। इति हारावली। ६१॥ (गुणादयोऽस्य प्रवालशब्दे ज्ञेयाः॥)
लतारसनः, पुं, (लतेव रसना यस्य।) सर्पः। इति हारावली। १५॥
लतार्कः, पुं, (लता अर्क इव तीव्रा यस्य।) हरितपलाण्डुः। तत्पर्य्यायः। दुद्रुमः २। इत्यमरः॥
लतालकः, पुं, हस्ती। इति चिकाण्डशेषः॥
लतावेष्टः, पुं, (लतयेव आवेष्टो वेष्टनं यत्र।) घोड़ग्ररतिबन्धान्तर्गतलतीयबन्धः। यथा,—
"बाहुभ्यां पादयुग्माभ्यां वेष्टयित्वा स्त्रियं रमेत्।
लघुलिङ्गताड़नं योनौ लतावेष्टोऽयमुच्यते॥"
इति रतिमञ्जरी॥*॥
पर्व्वतविशेषः। यथा,—
"अन्वेषणे निरुद्दिष्टस्य चरान् आदिष्टवान् तदा।
अभ्यन्तरञ्च मार्गध्वं बाह्यतश्च समन्ततः॥
वेणुमन्तं लतावेष्टं तथा रैवतकं गिरिम्।
ऋष्यवन्तं गिरिञ्चैव मार्गध्वं त्वरिता हयैः॥"
इति हरिवंशे वाणयुद्धम्॥
(पर्व्वतोऽयं द्वारकाया दक्षिणस्यां दिशि स्थितः। यथा, तत्रैव। १५५। १६।
"दक्षिणस्यां लतावेष्टः पश्चिमस्यां तथा क्षुपः॥")
लतावेष्टितकं, क्ली, (लतयेव वेष्टितं वेष्टनं, यच्। कन्।) आलिङ्गनभेदः। यथा, शब्दमालायाम्।
"उद्वृत्तकं पीड़ितकं लतावेष्टितकं तथा॥"
लताशृङ्गः, पुं, शालवृक्षः। इति शब्दरत्नावली॥
लतासाधनं, क्ली, (लतया स्त्रिया साधनम्।) योषिदधिकरणकेष्टदेवताराधनम्। तद्यथा,—
"लतायाः साधनं वक्ष्ये शृणुष्व हरवल्लभे।
घृतं केशे घृतं भाले घृतं सिन्दूरमण्डले॥
स्तनद्वन्द्वे घृतद्वन्द्वं घृतं नाभौ महेश्वरि।
घृतं योनौ महेशानि उत्थाय च घृतत्रयम्॥
एवं दृष्ट्वा घृतं जप्त्वा सुवेषिस्त्रीश्वरो भवेत्।
अथान्यत् संप्रवक्ष्यामि साधनं भुवि दुर्लभम्॥
रजोऽवस्थां समानीय तद्योनौ स्वेष्टदेवताम्।
पूजयित्वा महारात्रौ त्रिदिनं पूजयेन्मनुम्॥
घृतत्रयञ्च षट्त्रिंशदधिकं प्रत्यहं जपन्।
अष्टोत्तरशतं पूर्व्वं चक्रवर्त्ती जपेद्बुधः॥
ततस्तां ववभिः पुष्पैर्यजेदष्टोत्तरं शतम्।
ततः पूर्णाहुतिं दत्त्वा जपेदष्टोत्तरं शतम्॥
धनवान् बलवान् वाग्मी सर्व्वयोषित्प्रियङ्करः।
षोड़शाहेन च भवेत् सत्यं सत्यं न संशयः॥"
इति मायातन्त्रे १२ पटलः॥
अन्यत् अन्नदाकल्पे १६ पटले गुप्तसाधनतन्त्रे ४ पटले च द्रष्टव्यम्॥
लतिका, स्त्री, लता। इति लताशब्दात् स्वार्थे कन्प्रत्ययेन ङीकप्रत्ययेन वा निष्पन्नम्॥ (यथा,—
"इयं सन्ध्या दूरादहसुपगतो हन्त मलयात्
तदेकां तद्गेहे विनयवति! नेष्यामि रजनीम्।
समीरेणोक्तेवं नवकुसुमिता चूतलतिका
धुनाना मूर्द्धानं नहि नहि नहीत्येव कुरुते॥"
इत्युद्भटः॥)

लतिका, स्त्री, (लत घाते + "लतिभिदिलतिभ्यः कित्।" उणा० ३। १४७। इति तिकन्।) गोधा। इति सिद्धान्तकौमुद्यामुणादिवृत्तिः॥

लप, ऋ भाषे। इति कविकल्पद्रुमः॥ (भ्वा०-पर०-सक०-सेट्।) ऋ, अलीलपत् अलालपत्। भाषः कथनम्। इति दुर्गादासः॥

लपनं, क्ली, (लप्यतेऽनेनेति। लप्+करणे ल्युट्।) मुखम्। इत्यमरः॥ (भावे ल्युट्।) भाषणम्। इति लपधात्वर्थदर्शनात्॥ (यथा, आर्य्यासप्तशत्याम्। ६८१।

"प्रकटयति रागमधिकं लपनमिदं वक्त्रमाग-
मावहति।
प्रीणयति च प्रतिपदं दूति शुकस्येव दयि-
तस्य॥"

"शुकस्येव दयितस्य लपनं सम्भाषणम्। मत्ते वदनम्।" इति तट्टीका॥)

लपितं, क्ली, (लप्+क्तः भावे।) वचनम्। कथिते, त्रि। इत्यमरः॥ (लपितमस्यास्तीति। अच्। वचनयुक्ते च त्रि। यथा, अथर्ववेदे। ४।३६।६।

"ये मा क्रोधयन्ति लपिता हसन्तं मृगका इव।
तानहं मन्ये दुर्हितॄन् जने अल्पशूनिव॥")

लघिका, स्त्री, खाद्यविशेषः। लप्सी। इति ख्याता। यथा,—

"समितां सर्पिषा भृष्टां शर्करां पयसि क्षिपेत्।
तस्मिन् घनीकृते श्लक्ष्णे लवङ्गमरिचादिकम्।
सिद्धैषा लघिका ख्याता गुणानस्या वदा-
म्यहम्॥
लघिका दृंहणी तृष्णा वल्या पित्तानिलापहा।
स्निग्धा श्लेष्मकरी गुर्व्वी रोचनी तर्पणी
परम्॥"

इति भावप्रकाशः॥

लब, इ ड संसने। ग्रन्थे। इति कविकल्पद्रुमः॥ (भ्वा०-आत्म०-अवलम्बने सक०-ग्रन्थे अक०-सेट्।) इ, लम्बते। ड, लम्बते। संसनमिहावलम्बनमिति गोविन्दभट्टः। ननाद चरणायुधस्तदपि मौनमालम्बसे। इति दुर्गादासः॥

लब्धः, त्रि, (लभ्+क्तः।) प्राप्तः। इत्यमरः॥ (यथा, हितोपदेशे।

"अलब्धश्चैव लिप्सेत लब्धं रक्षेदवेक्षया।
रक्षितं वर्द्धयेत् सम्यक् वृद्धं तीर्थेषु निक्षिपेत्॥")

लब्धवर्णः, पुं, (लब्धावर्णा यशांसि येन।) पण्डितः। इत्यमरः॥ (यथा, रघुः। १५। २।

"लक्ष्मलब्धमपि लब्धवर्णभाक्
तं दिदेश सुनये वलक्षणम्॥")

लब्धा, स्त्री, (लभ्+क्तः। टाप्।) नायिकाभेदः। यथा,—

"खण्डितोत्कण्ठिता लब्धा तथा प्रोषितभर्तृका।
कलहान्तरिता वाससज्जा स्वाधीनभर्तृका॥"

इति जटाधरः॥

लभ, इ ड ग्रन्थे। इति कविकल्पद्रुमः॥ (भ्वा०-आत्म०-अक०-सेट्।) इ, लभ्यते। ड, लभते। इति दुर्गादासः॥

लभ, डु औ ड ष प्राप्तौ। इति कविकल्पद्रुमः॥ (भ्वा०-आत्म०-सक०-अनिट्।) डु, लब्धिमम्। औ, लब्धा। ड, लभते। ष, लभा। लभन्ति पुनरत्यानमिति गणकृतानित्यत्वादिति रमानाथः। वस्तुतस्तु लभते लभः पचाद्यजन्ततो लभ इवाचरतीति क्वौ साध्यम्। इति दुर्गादासः॥

लभस, पुं, (लभ्+"अत्यविधमीति।" उणा० ३। ११७। इति असच्।) वाञ्छितबन्धनरज्जुः। इत्युणादिकोषः॥ धनम्। याचकः। इति सिद्धान्तकौमुद्यामुणादिवृत्तिः॥

लभ्य, त्रि, (लभ्यते इति। लभ्+पोरदुपधात्।" ३। १। ९८। इति यत्।) न्याय्यम्। इत्यमरः॥ लब्धव्यम्। इति मेदिनी। ये, ४३॥ (यथा, सुश्रुते कोपनिषदि। ३। २। ३।

"नायमात्मा प्रवचनेन लभ्यो
न मेधया न बहुधा श्रुतेन।
यमेवैष वृणुते तेन लभ्य-
स्तस्यैष आत्मा विवृणुते तनूं स्वाम्॥")

लम्बकः, पुं, (रम्यते इति। रम्+"रमेरम्बच् लो वा।" उणा० २। ३३। इति कुन् रस्य लत्वञ्च।) पिङ्गः। इति सिद्धान्तकौमुद्यामुणादिवृत्तिः॥ (तीर्थप्रोधकः। इत्युज्ज्वलः॥ विलासिनि, त्रि। इति केचित्॥)

लम्पटः, पुं, पिङ्गः। इति लम्पाकशब्दार्थे मेदिनी। के, १४६॥ (यथा, कथासरित्सागरे। ४७। १०१।

"अथेतराज्ञीष्वेवं यद्यपि स्त्रीषु लम्पटः।
तथापि न स दुःखेऽस्मिन्नौदग्र्यः स्यात्तथा-
विधः॥")

आसक्तः। यथा,—

"यद्यैहिकामुष्मिककामलम्पटः
सुतेषु दारेषु धनेषु चिन्तयन्।
प्रक्षेत विद्वान् कुकलेवराद्यया-
यस्तस्य यत्नः श्रम एव केवलम्॥"

इति श्रीभागवते ५ स्कन्धे १९ अध्यायः॥

लम्पाकः, पुं, लम्पटः। देशभेदः। इति मेदिनी। के, १४६॥ (यथा, मार्कण्डेये। ५७। ४०।

"लम्पाकाः मूलकाराश्च चुलिका जागुडैः सह।
औपधाश्चाभिभद्राश्च किरातानाञ्च जातयः॥")

लम्पाटकः, पुं, पटहवाद्यम्। इति हारावली॥

लम्फः, पुं, द्रुतगतिः। लाफ इति भाषा। इति प्रसिद्धः॥ उल्लम्फनं प्रलम्फनञ्चात्र॥

लम्बः, पुं, (लम्बते इति। लबि अवस्रंसने+अच्।) नर्त्तकः। अङ्गम्। कान्तः। इति संक्षिप्तसारोणादिवृत्तिः॥ उत्कोचः। यथा,

"प्राभृतं चौकनं लम्बोत्कोचः कोग्रलिकामिषे।
उपाचारः प्रदानन्दा हारो ग्राह्यायने अपि॥"

इति हेमचन्द्रः॥

अन्यभेदः। यथा,—

"वरलम्बगमा भेदाः पाटकोऽन्यादिचालने॥"

इति शब्दमाला॥

क्षेत्रादौ लम्बमानरेखा सूत्रं वा। यथा,—

"त्रिभुजे भुजयोर्योगस्तदन्तरगुणो भुवाच्छतो लम्बः।
द्विघ्ना भूरूनयुता दलितावाधे तयोः
स्यातां॥
स्वावाधाभुजलम्बोरन्तरमूलं प्रजायते लम्बः।
लम्बगुणं भूम्यर्द्धं स्यात् त्रिभुजे फलं भवति॥"

उदाहरणम्।

"क्षेत्रे मही मनुमिता त्रिभुजे भुजौ तु
यत्र त्रयोदशतिथिप्रमितौ हि यस्य।
तत्रावलम्बकमधो कथयावबाधे
क्षिप्रं तथा च समकोष्ठमितिं फलाख्याम्॥"

न्यासः। भूः १४ भुजौ १३। १५ लम्बे आवाधे ५। ९। लम्बौ लम्बश्च १२ क्षेत्रफलञ्च ८४। इति लीलावती॥ (दैत्यविशेषः। यथा, हरिवंशे। ४३। २२।

"लम्बस्तु लम्बमेघाभः प्रलम्बाम्बरभूषणः।
दैत्यव्यूहगतो भाति सनीहार इवांशुमान्॥")

त्रि, दीर्घः। लम्बा इति भाषा। यथा,—

"दूरतः शोभते मूर्खो लम्बशाटपटावृतः।
तावच्च शोभते मूर्खो यावत् किञ्चिन्न भाषते॥"

इति चाणक्यशतकम्॥

(लम्बमानः। यथा, रघुः। ६। ६०।

"पाण्ड्योऽयमंसार्पितलम्बहारः
कुलप्ताङ्गरागो हरिचन्दनेन।
आभाति बालातपरक्तसानुः
सनिर्झरोद्गार इवाद्रिराजः॥")

लम्बकर्णः, पुं, (लम्बौ कर्णौ यस्य।) छागः। अङ्कोटवृक्षः। इति मेदिनी। णे, १०७॥ राक्षसः। हस्ती। इति शब्दरत्नावली॥ श्येनपक्षी। इति राजनिर्घण्टः॥ (ग्रन्थः। तद्यथा, अथ विलेग्रयेषु तत्र ग्रन्थः स्यात्।

"लम्बकर्णः ग्रन्थः स्यूली लोमकर्णो विले-
शयः॥"

इति वैद्यकम्॥

लम्बःकर्णः इति कर्म्मधारये।) दीर्घश्रोत्रम्॥ तद्युक्ते, त्रि। (यथा, महाभारते। ६। ४६। ३४।

"लम्बोदर्य्यो लम्बकर्णास्तथा लम्बपयोधराः॥")

लम्बकेशः, पुं, (लम्बः केश इवाग्रभागो यस्य।) विष्टरः। स तु विवाहकाले वरोपवेशनार्थं सार्द्धत्रितयवामावर्त्तवलिताधोमुखा असंख्यातदर्भाः। यथा,—

"ऊर्द्धकेशो भवेद् ब्रह्मा लम्बकेशस्तु विष्टरः।
दक्षिणावर्त्तको ब्रह्मा वामार्त्तस्तु विष्टरः॥"

इति संस्कारतत्त्वम्॥

केशोऽत्राग्रम्। इति प्रायश्चित्ततत्त्वे गङ्गाभट्टोक्तप्रतिनिधितदभंवटुस्नानप्रकरणे लिखितम्॥ * ॥ दीर्घकेशयुक्ते, त्रि॥

लम्बदन्ता, स्त्री, (लम्बा दन्ता इव फलानि यस्याः।) सैंहलीपिप्पली। इति राजनिर्घण्टः। दन्तदग्नविशिष्टे, त्रि॥

लम्बोष्ठः

लम्बनं, क्ली, (लम्बते इति। लम्ब+ल्युः।) नाभिलम्बितकच्छिकादिः। तत्पर्य्यायः। लम्बिका २। इत्यमरः॥ लम्बते लम्बनं गन्धादित्वादनः। इति तट्टीकायां भरतः॥ (लम्ब+भावे ल्युट्।) लम्बग्रन्थार्थाच्च॥

लम्बनः, पुं, (लम्बते इति। लम्ब+ल्युः।) कपः। इति शब्दचन्द्रिका॥

लम्बबीजा, स्त्री, (लम्बानि बीजानि यस्याः।) सैंहलोप्रिय्यसी। इति राजनिर्घण्टः॥

लम्बमानं, त्रि, लम्बायमानवत्। लम्बधातोः कर्त्तरि शानच्प्रत्ययेन निष्पन्नम्॥

लम्बा, स्त्री, लक्ष्मीः। गौरी। तिक्ततुम्बी। इति मेदिनी। बे, ६॥ दक्षकन्याविशेषः। यथा,—

"अरुन्धतीं वसुं यामीं लम्बां भानुं मरुत्वतीम्।
सङ्कल्पाञ्च मुहूर्त्ताञ्च साध्यां विश्वाञ्च भारत।
मनवे दत्तपुत्राय दत्त एता ददौ प्रभुः॥"

इति हरिवंशे अधिपतिस्थापनम्॥

हिमालयकन्याविशेषः। यथा,—

"ततश्चाश्ववचः श्रुत्वा देवीलम्बामथाब्रवीत्।
गच्छस्व लम्बे शीघ्रं त्वं वाक्यसंरक्षणं कुरु॥
ततो योगं समाधाय अदृश्या हिमवत्सुता।
लम्बास्येकस्य तद्रूपं दर्शयत् पार्श्वमागता॥
सान्तर्द्धानमुपागम्य तत्रा सा वासवी पुनः।
परित्राणाय वाक्यस्य विजयाधिष्ठिता ततः॥
प्रमुखे वासुदेवस्य दिग्वासाः कोट्टवी स्थिता।"

इति महाभारते हरिवंशे बाणयुद्धम्॥

लम्बिका, स्त्री, (लम्बते या। लम्ब+ण्वुल्। टापि अत इत्वम्।) तालूर्द्धलम्बनिका। तत्पर्य्यायः। घण्टिका २। इति राजनिर्घण्टः॥ सुधास्रवा ३ गलमुष्किका ४। इति हेमचन्द्रः॥ अलिजिका ५ अलिजिह्विका ६। इति शब्दरत्नावली॥

लम्बितः, त्रि, (लम्ब+क्तः।) लंबितः। (यथा, गीतगोविन्दे। १२। १८।

"त्वदधरचुम्बनलम्बितकज्जलसुज्ज्वलय प्रिय लोचने॥")

ग्रन्थितः। इति लबधातोः कर्म्मणि क्तप्रत्ययेन निष्पन्नम्। लम्बमानमाख्यादिवत्॥ (यथा, महाभारते। १। १५७। ४२।

"वह्निरोऽयं त्वया यस्तः कालसूत्रेण लम्बितः॥")

लम्बोदरः, पुं, (लम्बमुदरं यस्य।) गणेशः। इत्यमरः॥ (यथा, आर्य्यासप्तशत्याम्। १६८।

"गतिगञ्जितवरयुवतिः करी कपोलौ करोतु मदमलिनौ।
मुखवन्यमात्रसिन्धुर लम्बोदर किं मदं वहसि॥"

नृपविशेषः। इति भागवतम्। १२। १। २२॥) औदरिके, त्रि। इति हेमचन्द्रः॥ (यथा, कथासरित्सागरे। ७०। १०२।

"ततो लम्बोदरेणैव पुंसारोपितबाहुकः।
सम्पादितः स यातस्तद्गं केशरिणोज्झते॥")

लम्बोष्ठः पुं, (लम्बं ओष्ठो यस्य। ओष्ठोष्ठयोः समासे वा। इति साधुः।) उष्ट्रः। इति राजनिर्घण्टः॥ लम्बमानौष्ठयुक्ते, त्रि। (क्षेत्रपालदेवताविशेषः। यथा, प्रयोगसारे क्षेत्रपालप्रकरणे।

"युगान्तो वाह्यकश्चाथ लम्बोष्ठो वसवस्तथा॥")

लम्भः, पुं, (लभ ओष्ठो यस्य।) उष्ट्रः। इति त्रिकाण्डशेषः॥ दीर्घोष्ठविशिष्टे, त्रि॥

लम्भनं, क्ली, प्रतिलम्भः। इति हेमचन्द्रः॥ ध्वनिः। लभि ड शब्दे इत्यस्मात् भावेऽनट् (ल्युट्) प्रत्ययेन निष्पन्नमिति॥

लम्भा, स्त्री, (लभते इति। लभ इ ड शब्दे+अच्। टाप्।) वाटशब्दला। इति शब्दरत्नावली॥

लय, ड गत्याम्। इति कविकल्पद्रुमः॥ (भ्वा०-आत्म०-सक०-सेट्।) ड, लयते। इति दुर्गादासः॥

लयः, पुं, (ली+अच्।) विनाशः। संश्लेषः। तौर्य्यत्रिकस्य साम्यम्। इति मेदिनी। ये, ५२॥ प्रलयः। इति शब्दरत्नावली॥ * ॥ अखण्डचक्रवलम्बनेन चित्तवृत्तेर्निरोधः। इति श्रीपरमहंससदानन्दयोगीन्द्रकृतवेदान्तसारः॥ तच्चाद्यं विघ्नं लक्षयति लयस्तावदिति। लयो द्विविधः। चिरकालसुखाद्यासहितनिर्विकल्पकसमाध्यभ्यासपाटवेनातितप्तलोहतलस्थितजलबिन्दुवत् तैलरहितदीपकलिकावच्च प्रत्यगभिन्ने परमानन्दे चित्तवृत्तेर्लयः प्रथमः। द्वितीयस्तु मूर्च्छावस्थावत् आलस्येन चित्तवृत्तेर्बाह्यशब्दादिविषयग्रहणागादरे सतिप्रत्यगात्मस्वरूपानवभासनात् वृत्तेस्तन्मीभावलक्षणनिद्रारूपः। इति श्रीसिंहसरस्वतीकृतसुबोधिन्याख्या तट्टीका॥ गीतवाद्यपादन्यासानां क्रियाकालयोः परस्परं समता लयः। लीयन्ते श्लिष्यन्तेऽनेनेति लयन्ति व्रजन्ति साम्यं गीतादयोऽत्रेति वा लयः। लीङ श्लिषि लय गत्यां वा अल्। इत्यमरटीकायां भरतः॥ * ॥ लयस्थानविवर्ज्यं गायकस्य चतुर्दशदोषान्-गीतदोषविशेषो यथा,—

"लज्जितं भीतमुक्तेषु अव्यक्तमनुनासिकम्।
काकस्वरः शिरःकम्पो लयस्थानविवर्ज्जितम्॥
विस्वरं विरसञ्चैव विच्छिन्नं विषमाहतम्।
आकुलं तालहीनञ्च गातुर्दोषाश्चतुर्दश॥"*॥

अथ लयाः। द्रुति स्थितिः कलास्थितिः कलाप-स्थितिरिति लयत्रयम्। अपरे तु।

"द्विपदी स्यादद्रुतिका झल्लिका छिन्नखल्लिका।
वामभ्रुवस्तत्छिन्ना खल्लधावा षड्डुकः॥
जम्भट्टिका कलतिकः खल्लकः खुरिकस्तथा।
कथितश्चतुरस्रोऽर्द्धचतुरस्रोऽथ गर्त्तकः॥
त्रास्रः षट्त्रान्दालनावल्लरा गन्दघटौत्यपि।
कादम्बर्य्वरी घट्टा मिश्रोऽर्द्धवनिता ततः॥
अतिचित्रः समयश्च वलितोऽर्द्धदलस्तथा।
आविद्धस्तु टङ्कवकस्तत्त्रिचित्रविचित्रकौ॥
आन्त्री विलम्बितधावा च सङ्कुलोऽथ विलोलकः।
रमणीयस्तत्त्रैव करकण्टकसंज्ञकः॥
चत्वारिंशदिमे प्रोक्ता लया लयविशारदैः।
लयेन यज्ञो भगवान् लये लीनो जनार्द्दनः॥"

इति संगीतदामोदरः॥

लयः

(त्रि, आवरणात्मकम्। इति श्रीधरस्वामी॥ यथा, भागवते। ११। २५। १५।

"यदा जयेदजः सत्त्वं तमो मूढं लयं जडम्।
युञ्जीत शोकमोहाभ्यां निद्रया हिंसया शुचा॥"

क्ली, लामञ्जकम्। यथा,—

"लामञ्जकं सुनालं स्यादम्लगालं लयं लघुः।
इष्टकापथकं सेयं नलदश्चावदातकम्॥"

इति भावप्रकाशस्य पूर्ब्बखण्डे प्रथमे भागे॥)

लयपुत्री, स्त्री, (लयस्य पुत्रीव।) नर्त्तकी। इति शब्दरत्नावली॥

लयारम्भः, पुं, (लयस्यारम्भो यस्मात्।) नटः। इति त्रिकाण्डशेषः॥

लयालम्बः, पुं, (लयमालम्बते इति। लम्ब+अण्।) नटः। इति शब्दरत्नावली॥

लर्ब्ब, गतौ। (भ्वा०-पर०-सक०-सेट्।) लर्ब्बति। इति सिद्धान्तकौमुदी॥

लल, ड क ईप्सायाम्। इति कविकल्पद्रुमः॥ (चुरा०-आत्म०-सक०-सेट्।) क ड, लालयते। ईप्सा आप्तुमिच्छा। इति दुर्गादासः॥

लल, तृ क ईप्से। इति कविकल्पद्रुमः॥ (अदन्त चुरा०-पर०-सक०-सेट्।) ईप्सा इति आपधातोः सनन्तस्य रूपम्। प्रुंख्याद इत्यकारेण सरूपोऽपि अल् कथं न बाध्यते इति चेन्न स्त्रीविहितप्रत्ययैः क्वचित् सरूपोऽपि न बाध्यते इत्यस्य वाच्यत्वात् अन्यथा कारयाकारयमित्यादयोऽपि न स्युः। एवं वक्ष्यमाणेषु त्रीढ़ लज्जे इत्यादिष्वपि बोध्यम्। ललयति धनं लोकः। इति दुर्गादासः॥

ललञ्जिकः, पुं, (ललन्ती जिह्वा यस्य।) उष्ट्रः। कुक्कुरः। हिंसे, त्रि। इति मेदिनी। बे, २६॥ (चलद्रसनायुक्ते च त्रि। यथा, कथासरित्सागरे। १०६। १२७।

"तावच्च प्रकटीभूय भगवान् भैरवाकृतिः।
उद्धृतासिर्ललञ्जिकः कृत्वा हुंकारमभ्यधात्॥")

ललत्, त्रि, विलासयुक्तः। उच्चत्वनविशिष्टः। जिह्वाक्रियाविशिष्टः। क्षेपविशिष्टः। वीक्षाविशिष्टः। उपसेवाविशिष्टः। भाषणविशिष्टः। कृत्क्षेपविशिष्टः। इति लडधातोः कर्त्तरि शतृप्रत्ययेन डस्य लकारादेशेन च निष्पन्नम्॥

ललद्भुः, पुं, (ललत् चलद्भु यस्य।) लिम्पाकः। इति जटाधरः॥ (विषयोऽस्य लिम्पाकशब्देज्ञेयः॥)

ललनं, क्ली, (लस+ल्युट्।) केलिः। इति हेमचन्द्रः॥ चालनम्। इति नागोजीभट्टः॥ यथा,—

"काली करालवदना विनिष्क्रान्तासिपाशिनी।
विचित्रखट्वाङ्गधरा नरमालाविभूषणा॥
द्वीपिचर्म्मपरीधाना शुष्कमांसातिभैरवा।
अतिविस्तारवदना जिह्वाललनभीषणा॥"

इति देवीमाहात्म्यम्॥

ललनः, पुं, (लल्यते ईप्स्यते इति। लस+कर्म्मणि ल्युट्।) बालः। सालः। प्रियालः। इति राजनिर्घण्टः॥

ललना, स्त्री, (लसयति ईषति कामानिति। लस+ल्युः। टाप्।) कामिनी। (यथा, कलाविलासे। १। ५।
"रतिलुलित ललित ललनालक्षमजल लववाहिन सुहुर्यच।
अथ केशकुसुम परिमल वासितदेहा वहन्त्यनिलाः॥")
नारीभेदः। जिह्मा। इति मेदिनी। ने, १२१॥
ललनाप्रियं, क्ली, (ललनानां प्रियम्।) क्रीवेरम्। इति राजनिर्घण्टः॥
ललनाप्रियः, पुं, (ललनानां प्रियः।) कदम्बः। इति राजनिर्घण्टः॥ कामिनीवल्लभश्च॥
ललन्तिका, स्त्री, (ललन्त्येव। स्वार्थे कन्।) नाभिललकण्ठिकादिः। तत्पर्य्यायः। लम्बनम् २। इत्यमरः॥ गोधा। इति शब्दमाला॥
ललाकः, पुं, मेहनम्। इति शब्दचन्द्रिका।
ललाटं, क्ली, (ललं ईषामटति° ज्ञापयतीति। अट्+अण्।) अवयवविशेषः। कपाल इति ख्यातम्। तत्पर्य्यायः। अलिकम् २ गोधिः ३। इत्यमरः॥ मस्तकम् ४ शुक्रः ५ भालः ६ कपालकः ७ अलीकम् ८। इति शब्दरत्नावली॥ ललाटकम् ९। इति धनञ्जयः॥ तस्य शुभाशुभलक्षणम्। यथा,—
"उन्नतैर्विपुलैः शुक्लैर्ललाटैर्विषमैस्तथा।
निर्धना धनवन्तश्च अर्द्धेन्दुसदृशैर्नराः॥
आचार्य्याः शुक्तिविशालैः शिरालैः पापकारिणः।
उन्नताभिः शिराभिस्तु खस्तिकाभिर्धनेश्वराः॥
निम्नैर्ललाटैर्वधार्हाः क्रूरकर्म्मरतास्तथा।
संवृतैश्च ललाटैश्च कृपणा उन्नतैर्नृपाः॥
ललाटोपरितास्तिस्रो रेखाः स्युः शतवर्षिणाम्।
नृपत्वं स्याच्चतसृभिरायुः पञ्चनवत्यथ॥
अरेखेणायुर्नवतिर्विच्छिन्नाभिश्च पुंश्चलाः।
केशान्तोपगताभिश्च अशीत्यायुर्नरो भवेत्॥
पञ्चभिः सप्तभिः षड्भिः पञ्चाशद्वत्सरैस्तथा।
चत्वारिंशच्च वक्राभिश्छिन्नभूलम्बगामिभिः॥
विंशतिर्व्रामवक्राभिरायुः क्षुद्राभिरल्पकम्।
न पृथु बालेन्दुनिभे भ्रुवौ चाथ ललाटकम्॥
शुभमर्द्धेन्दुसंस्थानमतुङ्गं स्यादलोमशम्॥"
इति गारुडे ६५ अध्यायः॥
("अतःपरं प्रत्यङ्गानि वक्ष्यन्ते। मस्तकोदरपृष्ठनाभिललाटनासाचिबुकवस्तिग्रीवा इत्येता एकैकाः।" इति सुश्रुते शारीरस्थाने पञ्चमेऽध्याये॥)
ललाटकं, क्ली, (ललाटमेव। कन्।) प्रशस्तललाटम्। इति शब्दरत्नावली॥ ललाटमात्रम्। इति धनञ्जयः॥
ललाटन्तपः, त्रि, (ललाटं तपतीति। ललाट+तप+"अस्तूर्य्यललाटयोर्दृशितपोः।" ३। २। ३६। इति खश्। मुम्।) ललाटतापकः। "ललाटन्तपः सूर्य्यः।" इति सिद्धान्तकौमुदी॥ (यथा, रघुः। १३। ४१।
"हविर्भुजामेधवतां चतुर्णां
मध्ये ललाटन्तपसप्तसप्तिः।
असौ तपस्यत्यपरस्तपस्वी
नाम्ना सुतीक्ष्णश्चरितेन दान्तः॥"
यथा च, नैषधे। १। १३८।
"कथं विधातर्मयि पाणिपङ्कजात्
तव प्रिया प्रेत्यदुरुत्तरिष्यतः।
वियोक्ष्यसे वल्लभयेति निर्गता
लिपिर्ललाटन्तपनिष्ठुराक्षरा॥")
ललाटिका, स्त्री, (ललाटे भवोऽलङ्कारः। "कर्णललाटात् कनलङ्कारे।" ४। ३। ६५। इति कन्।) स्वर्णादिरचितललाटाभरणम्। टिकेति ख्याता। तत्पर्य्यायः। पट्टपाट्या २। इत्यमरः॥ लालटश्चन्दनम्। तत्पर्य्यायः। गुह्यचर्चा २। इति शब्दरत्नावली॥ (तिलकः। इति मल्लिनाथः॥ यथा, कुमारे। ५। ५५।
"तदा प्रभृत्युन्मदना पितुर्गृहे
ललाटिकाचन्दनधूसरालका।
न जातु बाला लभते स्म निर्वृतिं
तुषारसङ्घातशिलातलेष्वपि॥")
ललाम, [न्] क्ली, ललाममम्। यथाह रुद्रः।
"प्रधानध्वजपट्टेषु पुच्छबालधिलच्मसु।
भूषावाजिप्रभावेषु ललामं स्यात् ललाम च॥"
(प्रधाने। यथा, रघुः। ५। ६४।
"तत्र स्वयंवरसमाहृतराजलोकं
कन्याललाम कमनीयमजस्य लिप्सोः॥"
पुरुषः। इति रघुटीकायां मल्लिनाथधृतयादवः। ५। ६४॥)
ललामं, क्ली, (लड विलासे+क्विप्। तं अमति प्राप्नोतीति। अम गतौ+घञ्। डस्य लत्वम्।) चिह्नम्। ध्वजः। पट्टम्। प्रधानम्। भूषा। (यथा, भागवते। ३। १४। ४८।
"पौत्रस्तव श्रीललनाललामं
द्रष्टासुरत् कुन्तलमण्डिताननम्॥")
बालधिः। पुच्छम्। तुरङ्गः। प्रभावः। इति मेदिनी। मे, ५१॥ अश्वललाटे अन्यवर्णचिह्नम्। गवादीनां ललाटचिह्नम्। अश्वस्य भूषा। इत्यमरटीकायां भरतः॥ (पुंनपुंसकलिङ्गमपि। यथा,—
"ललामोऽस्त्री ललामापि प्रभावे पुरुषे ध्वजे।
श्रेष्ठभूषापुच्छपट्टचिह्नाश्वलिङ्गिषु॥"
इति रघुटीकायां मल्लिनाथधृतयादवः॥ रम्ये श्रेष्ठे च त्रि। यथा, महाभारते। ७। २२। १३।
"ललामैरिव भिर्युक्तः सर्व्वशस्त्रैर्युधि।
राज्ञां मध्ये महेष्वासः शान्तभीरभ्यवर्त्तत॥")
ललामकं, क्ली, पुरोन्यस्तमाल्यम्। इत्यमरः॥ तदेव माल्यं पुरः संमुखभागे न्यस्तं ललाटपर्य्यन्तमागतं ललामकं ललामं तिलकमिव इति इवार्थे कः। इति भरतः॥
ललामी, स्त्री कर्णभूषणविशेषः। तत्पर्य्यायः। उत्क्षिप्तिका २। इति शब्दमाला॥
ललितं, क्ली, (लस+क्तः।) शृङ्गारभावव्यञ्जकक्रियाविशेषः। इत्यमरः॥ सुकुमारविधानेन भूनेत्रादिक्रियासन्निवेशकरचरणाङ्गविन्यासो ललितम्। तथा च।
"सुकुमाराङ्गविन्यासे मह्या ललितं भवेत्॥"
तथा,—
"सभ्रूभङ्गं करकिसलयावर्त्तनैरापतन्ती
सा लिम्पन्ती ललितललिता लोचनस्याञ्जनेन।
विन्यस्यन्ती चरणकमले लीलया खेदयाते
निःशङ्का च प्रथमवयसा नर्त्तिता पङ्कजाक्षी॥
भ्रूनेत्रादिक्रियाग्राह्यिसुकुमारविधानतः।
हस्तपादाङ्गविन्यासस्तरुण्या ललितं विदुः॥"
इत्यन्येऽपि॥
"अनाचार्य्योपदिष्टं स्याल्ललितं रतिचेष्टितम्।"
इत्यन्ये।
ललत् केशे भावे क्तः। लड विलासे इत्यस्य मनीषादित्वात् डस्य लत्वं वा। इति भरतः॥ अपि च।
"विन्यासभङ्गिरङ्गानां भूविलासमनोहरा।
सुकुमारा भवेद्यत्र ललितं तदुदीरितम्॥"
इत्युज्ज्वलनीलमणिः॥
ललितः, पुं, (लस्यते ईषदिति। लस+कर्म्मणि क्तः।) रागविशेषः। तस्य स्वरूपं यथा,—
"प्रफुल्लसप्तच्छदमाल्यधारी
युवातिगौरोऽलसलोचनश्रीः।
विनिःसरन् वासगृहात् प्रभाते
विलासिवेषो ललितः प्रदिष्टः॥"
तस्य गानसमयो यथा,—
"प्रातर्गेयास्तु देशागो ललितः षटमञ्जरी।
विभाषा भैरवी चैव कामोदो गोण्डकीर्य्यपि॥"
इति सङ्गीतदामोदरः॥
ललितः, त्रि, (लस+क्तः।) सुन्दरः। (यथा, रघुः। ८। १।
"अथ तस्य विवाहकौतुकं
ललितं बिभ्रत एव पार्थिवः॥")
हर्षितः। इति मेदिनी। ते, १४७॥ चलितः। इति विश्वशब्दरत्नावल्यौ॥
ललितकान्ता, स्त्री, (ललिता कान्ता च।) मङ्गलचण्डिका। तस्या ध्यानं यथा,—
"येषा ललितकान्ताख्या देवी मङ्गलचण्डिका।
वरदाभयहस्ता च द्विभुजा गौरदेहिका॥
रक्तकौशेयवस्त्रा च स्मितवक्त्रा शुभानना।
नवयौवनसम्पन्ना सर्व्वाङ्गी ललितप्रभा॥"
इति तिथ्यादितत्त्वम्॥
ललिता, स्त्री, (ललित+टाप्।) कस्तूरी। दारी। इति राजनिर्घण्टः॥ नदीविशेषः। यथा,—
"निमिनाम्नस्तु राजर्षेः शापादृक्षसुतः पुरा।
वशिष्ठो ह्यशरीरोऽभूत् शापाच्च निमिनस्तथा॥
ततो ब्रह्मोपदेशेन निर्जने कामरूपके।
सन्ध्याचले तपस्तेपे तस्य विघ्नोऽभूत्तदा॥
प्रत्यक्षस्तस्य देवस्य वरदानामहासुनिः।
अन्दतान्यवतार्य्याशु कुक्षं कृत्वा गिरेस्तटे।
तच्च खात्वा च पीत्वा च पूरीदं प्राप पूरितम्॥
तस्मादन्दतकुक्षात्तु सन्ध्या नाम नदी वरा।

निःस्रता तत्र चाश्रुत्य चिराद्गरुडो भवेत् ॥
तस्मात् पूर्व्वन्तु कुर्व्वीत ललिताख्यां सरिद्वरां।
सागरादुत्तिणात् पूर्व्वं महादेवावतारिता ॥
वैशाखशुक्लपक्षस्य तृतीयायां नरस्तु यः।
कुर्य्याद्वै ललितास्नानं स प्रभुसदनं व्रजेत् ॥
ललितायाः पूर्व्वतीरे भगवान्नाम पर्व्वतः।
स्वयं विष्णुर्लिङ्गरूपी तत्रास्ते भगवान् हरिः ॥
ललितायां नरः स्नात्वा द्वादश्यां शुक्लपक्षके।
भगवन्तं समाराध्य यो यजेत् परमेश्वरम्।
स याति विष्णुभवनं शरीरेण विराजता ॥"

इति कालिकापुराणे ८१ अध्यायः ॥ * ॥

गोपीविशेषः। यथा,—

"अखिलरसामृतमूर्त्तिः
प्रसृमररुचिरुद्धतारका पालिः।
कलितश्यामा ललितो
राधाप्रेयान् विधुर्जयति ॥

इति भक्तिरसामृतसिन्धुः ॥

ललिता श्यामला प्रेया पद्मा भद्राच्च शैव्यते ॥
इति तट्टीकायां जीवगोस्वामी ॥ तस्याः स्वरूपं यथा,—

"या दुर्गा सैव ललिता ललिता सैव राधिका।
एतासामन्तरं नास्ति सत्यं सत्यं हि नारद! ॥"

इति पाद्मे पातालखण्डे रासलीलायां नारदं प्रति श्रीकृष्णवाक्यम् ॥ रागिणीविशेषः। सा च मेघरागस्य पत्नी। यथा, सङ्गीतदर्पणे।

"ललिता मालसी गौड़ी नाटी देवकिरी तथा।
मेघरागस्य रागिण्यो भवन्तीमाः सुमध्यमाः ॥"

(सा तु हनूमन्मते हिन्दोलरागस्य पत्नी। सोमेश्वरमते वसन्तस्य पत्नी। यथा, संगीतदर्पणे।

"वेलावली रामकिरी देशाख्या पटमञ्जरी।
ललिता सहिता एता हिन्दोलस्य वराङ्गनाः ॥"

"देशी देवकिरी चैव वराटी तोड़िका तथा।
ललिता चाथ हिन्दोली वसन्तस्य वराङ्गनाः ॥"

अस्या ध्यानादिकमाह तत्रैव। अथ ललिता।

रि-पै-वर्ज्या च ललिता औड़वा सञ्चया मता।
मूर्च्छना मुद्गमध्या स्यात् सम्पूर्णा केचिदूचिरे।
धैवतत्रयसंयुक्ता द्वितीया ललिता मता ॥"

ध्यानम्। यथा,—

"प्रफुल्लसप्तच्छदमाल्यकक्षा
सुगौरकान्तिर्युवती सुदृष्टिः।
विबिभ्रती सङ्कसा प्रभाते
विलासवेश्मा ललिता प्रदिष्टा ॥"

उदाहरणम्। स ग म ध नि स।
अथवा,—
स रि ग म प ध नि स। इति प्रथमा ॥
ध नि स ग म ध। इति द्वितीया ॥
इति ललिता ॥)

ललितासप्तमी, स्त्री, (ललिताख्या सप्तमी।) भाद्रशुक्लसप्तमी। तत्र कुक्कुटीव्रतं कार्य्यम्। यथा भविष्ये।

"भाद्रे मासि सिते पक्षे सप्तम्यां नियमेव या।
स्नात्वा शिवं लेखयित्वा मण्डले च सहाम्बिकम्।
पूजयेच्च तदा तस्यां दुष्प्राप्यं नैव विद्यते ॥"

इति कुक्कुटीव्रतत्वेन ख्यातम्। इति तिथ्यादितत्त्वम् ॥ * ॥

तद्विधिर्यथा। तत्रादौ स्वस्तिवाचनपूर्व्वकं सङ्कल्पं कुर्य्यात्। ॐ अद्येत्यादि भाद्रे मासि शुक्ले पक्षे सप्तम्यान्तिथौ यावज्जीवनपर्य्यन्तं अमुकगोत्रा श्रीमदमुकी शिवदुर्गाप्रीतिकामा प्रतिवर्षीयभाद्रशुक्लसप्तम्यां गणेशादिदेवतापूजापूर्व्वकशिवपार्व्वतीपूजायावज्जीवनडोरकधारणभविष्यपुराणोक्तव्रतकथाश्रवणरूपललितासप्तमीव्रतमहं करिष्ये। ततः सङ्कल्पवाक्यं पठित्वा सामान्यार्घ्यं विधाय गणेशादीन् संपूज्य भूतशुद्ध्यादिकं विधाय मण्डलादिषु पूजामारभेत। ततो ध्यात्वा खड्गिरसि पुष्पं दत्त्वा मानसोपचारैः संपूज्य अर्घ्यं संस्थाप्य पुनर्ध्यात्वा आवाहयेत्। शिवपूजाविधिना शिवं दुर्गापूजाविधिना दुर्गाञ्च यथाप्राप्तोपचारैः संपूज्य आवरणदेवान् पूजयेत्। ततो ऽष्टग्रन्थियुक्तडोरकं दुर्वेण सिक्तं शिवदुर्गाभ्यां अर्पयित्वा तत् डोरकं वामकरे बद्ध्वा भोज्यमुत्सृज्य कथां शृणुयात्। अष्टफलानि दद्यात्। ततो दक्षिणां दद्यात् ॥ * ॥ अथ कथा।

श्रीकृष्ण उवाच।

"लोमशो नाम देवर्षिर्मथुरामागतः पुरा।
सोऽर्चितो वसुदेवेन देवक्या च युधिष्ठिर! ॥
उपविष्टः कथाः पुण्याः कथयामास वै तदा।
ततः कथयितुं भूयः कथामेतां प्रचक्रमे ॥
कंसेन निहताः पुत्रा जाता जाताः पुनः पुनः।
मृतवत्सा देवकि! त्वं पुत्रदुःखेन दुःखिता ॥
यथा चन्द्रसुखी दीना बभूव नहुषप्रिया।
तथा त्वं देवकी भद्रे पुत्रदुःखेन दुःखिता ॥
यस्माच्चीर्णव्रता सा तु बभूवाक्षयपुत्रिका।
त्वमेव देवकी देवि! भविष्यसि न संशयः ॥

देवक्युवाच।

का सा चन्द्रसुखी दीना बभूव नहुषप्रिया।
कथं चीर्णव्रतं सम्यक् तस्याः सन्ततिकारणम् ॥

लोमश उवाच।

अयोध्यायां पुरा राजा नहुषो नाम विश्रुतः।
तस्य राज्ञो महादेवी नाम्ना चन्द्रसुखी प्रिया ॥
पुरोहितस्य तस्यैव पत्नी माला च नामिका।
तयोरासीद्दृढप्रीतिः सुहृज्जीया परस्परम् ॥
अथ तेऽपि च मित्रिण्यौ स्नानार्थं सरयूजले।
प्राप्ते प्राप्तासु तत्रैव बहुशो नगराङ्गनाः ॥
स्नातास्ता मण्डलं चक्रुस्तन्मध्ये यक्तरूपिणम्।
लेखयित्वा शिवं शान्तिसुमया सह शङ्करम् ॥
गन्धपुष्पाक्षतैर्भक्त्या पूजयित्वा यथाविधि।
प्रणम्य शिरसा भक्त्या दृष्टास्ताभ्यां वरस्त्रियः ॥
किमिदं क्रियते साध्वाः कथ्यतां यदि रोचते।
कदा वा क्रियते किं वा फलं सम्यक् तदुच्यताम् ॥

स्त्रिय ऊचुः।

पूजितोऽस्माभिरेतस्मिन् पार्व्वत्या सह शङ्करः।
बद्ध्वा करेऽमिदं शुभ्रं शिवस्यात्मा निवेदितः ॥
धारणीयमिदं तावद्यावत् प्राणस्य धारणम्।
तासान्तु तद्वचः श्रुत्वा ते ऊचुः मानसं तथा ॥
कृत्वा च सम्मतिं तत्र बद्ध्वा दोर्भ्यां सुडोरकम्।
ततस्ताः स्वगृहं जग्मुः सखीभिः परिवारिताः ॥
कालेन महता तत्र विस्मृतं तद्व्रतं नृप!।
प्रमत्तया चन्द्रसुखा विस्मृतञ्च सुडोरकम् ॥
मृता कैश्चिदहोरात्रैः सा बभूव प्लवङ्गमी।
माला च कुक्कुटी जाता व्रतसम्यग्व्रतपालनात् ॥
तथैव ते च मित्रिण्यौ जाते जातिस्मरे कुले।
सम्भूय भूयस्तत्रैव प्राप्तश्च समयः पुनः ॥
तद्दिने तद्दिने प्राप्ते पुनः काले च ते मृते।
अदेवमातृके देशे जाते गोकुलसङ्कुले ॥
राज्ञो जाया बभूवाथ पृथ्वीनाथस्य सा पुनः।
ईश्वरी नाम विख्याता सा तु राज्ञोऽतिवल्लभा ॥
अग्निमीलद्द्विजस्याथोद्भार्य्या भूषणनामिका।
पुरोहितस्य कालेन कुक्कुटी बहुपुत्रिणी ॥
जातिस्मरा चाष्टपुत्रा तथैव चान्ततप्रजा।
पुनर्निःस्मरा प्रीतिर्बभूवाथ तयोर्द्वयोः ॥
तत्रेश्वरी पुत्रमेकं प्रसूता तच्च रोगिणम्।
नववर्षे तु पञ्चत्वमगात्तच्च युधिष्ठिर! ॥
तत्र तां भूषणा द्रष्टुमाजगामातिदुःखिता।
सखीभावादतिस्नेहादष्टपुत्रसमन्विता ॥
अयुक्ताभरणा नित्यं स्वभावेनैव भूषिता।
तां दृष्ट्वा पुत्रिणीं भार्य्यां प्रजज्वालेश्वरी रुषा ॥
ततो गृहं प्रेषयित्वा तां सखीं तीव्रमत्सरा।
चिन्तयामास सा राज्ञी तस्याः पुत्रवधं प्रति ॥
मृता मृताश्च ये पुत्राः पुनर्जीवन्त्यनामयाः।
बहुपुत्रा जीववत्सा प्रयुक्ताभरणा कथम्।
शोभसे त्यधिकं भद्रे तड़ित् सौदामिनी यथा ॥

भूषणोवाच।

भाद्रे मासि सिते पक्षे सप्तम्यां ललिताश्रये।
स्नात्वा शिवं लेखयित्वा मण्डले च सहाम्बिकम् ॥
संपूज्य विधिवत् प्राप्तं त्रैलोक्ये यच्च विद्यते।
तदेव हि व्रतं पूर्व्वं त्वयी सह मया कृतम् ॥
सम्यगाचरितं भक्त्या तेनाहं सुस्थिरा सखि।
त्वया नाचरितं सम्यक् दर्पेणातिशरीरया ॥
तेन ते सन्ततिश्छिन्ना राज्ञ्यपि सति दुःखिता।
प्रभाव एष कथितो व्रतस्यास्य मया सखि! ॥
अद्यैं तुभ्यं प्रदास्यामि तस्य धर्म्मस्य सुव्रते।
सखीभावात् प्रतीच्छ त्वं नात्र कार्य्या विचारणा ॥
संपूज्य शङ्करं भक्त्या करे बद्ध्वा सुडोरकम्।
यावज्जीवं मया तावत् शिवस्यात्मा निवेदितः ॥
इत्येवं समयं कृत्वा ततः प्रभृति डोरकम्।
स्वर्णरूप्यमयं वापि करशाखासु धारणम् ॥
शङ्करस्योमया सार्द्धं सौवर्णं राजतन्तथा।
ताम्रपात्रे प्रतिष्ठाप्य ब्राह्मणायोपपादयेत् ॥
पायसं पिष्टकञ्चैव भक्ष्यं भोज्यं प्रयत्नतः।
सगोत्रान् भोजयित्वा तु स्वयं भुञ्जीत सत्वरम् ॥
मण्डलं सोमसङ्घं शिवस्यात्मानिवेदितम्।
इत्येवं प्रतिजग्राह व्रतदानफलं ततः ॥

बभूव सुप्रजा साध्वी ईश्वरी भुवनेश्वरी।
व्रतस्यास्य प्रभावेण सुपुत्रा त्वञ्च देवकि! ॥
भविष्यसि त्रिलोकेशं पुत्रञ्च जनयिष्यसि।
इत्येवं श्रावयित्वा च विरराम मुनिस्तदा ॥
जगाम स्वपुरं पार्थ मयाप्येवं तवोदितम्।
याः स्त्रियः स्वाचरिष्यन्ति व्रतमेतदनुत्तमम् ॥
कुक्कुटाख्यं प्लवङ्गाख्यं देवक्याचरितं शुभम्।
तासां सन्ततिविच्छेदो न कदाचिद्भविष्यति ॥
स्त्रियश्चैवाचरिष्यन्ति व्रतमेतत् सुखप्रदम्।
अस्मिन् लोके सुखं भुक्त्वा यास्यन्ति शिवमन्दिरम् ॥

या कुक्कुटीव्रतमिदं प्लवगीसमेतं
देवं विभाव्य हृदये च गुरुं निधाय।
भक्त्या करोति कलुषौघविघातदक्षं
साध्वी सदा भवति शोभनजीववत्सा ॥"

इति भविष्यपुराणे कुक्कुटीव्रतकथा समाप्ता ॥

लवं, क्ली, (लू+अप्।) जातीफलम्। इति शब्दचन्द्रिका ॥ लवङ्गम्। लामज्जकम्। ईषत्। इति राजनिर्घण्टः ॥

लवः, पुं, (लवणमिति। लू+अप्।) छेदः। (यथा, रघुः। १६। ६६।

"वक्त्रेतराग्रैरलकेषु लग्न-
चूर्णारुणान् वारिलवान् वमन्ति ॥")

विनाशः। छेदनम्। रामपुत्रः। इति मेदिनी। वे, २२॥ अत्र विनाशस्थाने विलासः। इति विश्वः हेमचन्द्रश्च॥ (रामपुत्रस्य जन्मविवरणादिकं रामायणे उत्तरकाण्डतो द्रष्टव्यम्॥) कालभेदः। यथा,—

"अष्टादशनिमेषास्तु काष्ठा काष्ठादशं लवः॥"

इति हेमचन्द्रः॥

(यथा, भागवते। १। १८। १३।

"तुलयाम लवेनापि न स्वर्गं नापुनर्भवम्।
भगवत्सङ्गिसङ्गस्य मर्त्यानां किमुताशिषः॥")

लावानामा पक्षी। इति राजनिर्घण्टः॥ (किञ्जल्कः। पक्षः। गोपुच्छलोम। इति रघुटीकायां मल्लिनाथधृतवैजयन्ती॥ यथा, रघुः। १५। ३२।

"स तौ कुशलवोत्पत्तिगर्भक्लेशौ तदाख्यया।
कविः कुशलवावेव चकार किल नामतः॥")

लवङ्गं, क्ली, (लुनाति शैत्यादिकमिति। लू+"तरत्यादिभ्यश्च।" उणा० १। ११६। इति अङ्गच्।) खनामख्यातवणिग्द्रव्यभेदः। तत्पर्य्यायः। देवकुसुमम् २ श्रीसंज्ञम् ३। इत्यमरः॥ श्रीप्रसूनम् ४। इति भावप्रकाशः॥ लवङ्गकम् ५। इति शब्दरत्नावली॥ लवङ्गकलिका ६ दिव्यम् ७ शेखरम् ८ लवम् ९ श्रीपुष्पम् १० रुचिरम् ११ वारिसम्भवम् १२ भृङ्गारम् १३ गौर्व्वाणकुसुमम् १४ चन्दनपुष्पम् १५। अस्य गुणाः। शीतलत्वम्। तिक्तत्वम्। चक्षुष्यत्वम्। भुक्तरोचनत्वम्। वातपित्तकफनाशित्वम्। तीक्ष्णत्वम्। मूर्च्छरुजापहत्वञ्च। इति राजनिर्घण्टः॥ आध्मानानाहशूलघ्नत्वम्। दीपनत्वम्। लघुत्वञ्च। इति राजवल्लभः॥ अपि च।

"लवङ्गं कटुकं तिक्तं लघु नेत्रहितं हिमम्।
दीपनं पाचनं रुच्यं कफपित्तास्रनाशनम्॥
छर्द्दिं छर्द्दिं तथाध्मानं शूलमाशु विनाशयेत्।
कासं श्वासञ्च हिक्काञ्च क्षयं शमयति ध्रुवम्॥"

इति भावप्रकाशः॥

(यथा,—

"विरहानलसन्तप्ता तापिनी कापि कामिनी।
लवङ्गानि ससृष्टञ्च ग्रहणे राहवे ददौ॥"

इत्युद्भटः॥)

लवङ्गकं, क्ली, (लवङ्ग+स्वार्थे कन्।) लवङ्गम्। इति शब्दरत्नावली॥ (लवङ्गशब्दोऽस्य विवरणं विज्ञेयम्॥)

लवङ्गकलिका, स्त्री, लवङ्गम्। इति राजनिर्घण्टः॥

लवङ्गलता, स्त्री, (लवङ्गस्य लता।) पुष्पलताविशेषः। यथा, जयदेवः।

"ललितलवङ्गलतापरिशीलनकोमलमलयसमीरे।
मधुकरनिकरकरम्बितकोकिलकूजितकुञ्जकुटीरे॥
विहरति हरिरिह सरसवसन्ते।
नृत्यति युवतिजनेन समं सखि विरहिजनस्य दुरन्ते॥"

(यथा च।

"अयि! प्लवङ्ग! लवङ्गलतालये
पिब मधूनि विधूय मधुव्रतान्।
इह वने हि वनेचरसङ्कुले
नहि सतामसताञ्च विवेचना॥")

राधायाः सखीविशेषश्च॥

लवणं, क्ली, (लुनाति जाड्यमिति। लू+नन्द्यादित्वात् ल्युः। पृषोदरादित्वात् णत्वम्।) चाररसयुक्तद्रव्यम्। तच्च पञ्चविधं यथा। सौवर्चलम् १ सैन्धवम् २ विटम् ३ औद्भिदम् ४ सामुद्रम् ५। तथा हि।

"सामुद्रं यत्तु लवणमम्लपाकं वलिरुक् ततः।
सैन्धवोऽल्पौ प्रीतस्निग्धौ माहिमन्यच्च सिन्धुजे॥
रौमकं बहुकं पाक्यं विड्रुक् क्षतकृमे हयम्॥"
सौवर्चलेऽतिरुचके। इत्यमरः॥ (अस्य विवरणं यथा। "सैन्धवसामुद्रविड्सौवर्चलरोमकौद्भिदप्रभृतीनि लवणानि यथोत्तरमुष्णानि वातहराणि कफपित्तकराणि यथापूर्व्वं स्निग्धानि स्वादूनि वृष्यमूत्रपुरीषाणि चेति॥

"चक्षुष्यं सैन्धवं रुच्यं रुच्यमग्निदीपनम्।
स्निग्धं समधुरं तृष्यं प्रीतं दोषघ्नमुत्तमम्॥
सामुद्रं मधुरं पाके नात्युष्णमविदाहि च।
भेदनं स्निग्धमीषच्च शूलघ्नं नातिपित्तलम्॥
सक्षारं दीपनं रूक्षं शूलकृद्रोगनाशनम्।
रोचनं तीक्ष्णमुष्णञ्च विड्वातानुलोमनम्॥
लघुसौवर्चलं पाके वीर्य्योष्णं विशदं कटु।
गुल्मशूलविबन्धघ्नं रुच्यं सुरभि रोचनम्॥

रोमकं तीक्ष्णमत्युष्णं व्यवायि कटुपाकि च।
वातघ्नं लघु विस्यन्दि रुच्यं विड्भेदि शूलनुत्॥
लघु तीक्ष्णोष्णमुद्भेदि रुच्यं वातानुलोमनम्।
सलिलं कटु सक्षारं विद्याल्लवणमौद्भिदम्॥
कफवातक्रिमिहरं लेखनं पित्तकोपनम्।
दीपनं पाचनं भेदि लवणं गुटिकाह्वयम्॥
लवणन्तु बालुकेलं शैलमूलाकरोद्भवम्।
लवणं कटुकं छेदि विद्धि तत् कटु चोच्यते॥"

इति सुश्रुते सूत्रस्थाने ४६ अध्यायः॥*॥

लू+भावे ल्युट्।) छेदनम्। यथा। लवोऽभिलाषो लवणे। इति भरतः (खड्गयुद्धप्रकारविशेषः। यथा, हरिवंशे भविष्यपर्व्वणि। ५३। १७।

"आच्छिन्नं चिच्छकं चिन्नं कुद्रवं लवणं धृतम्॥")

लवणः, पुं, (लुनातीति। लू+ल्युः।) सिन्धुभेदः। (यथा, महाभारते। ६। ५। १५।

"लवणेन समुद्रेण समन्तात् परिवारितः॥")

राक्षसविशेषः। रसविशेषः। इति मेदिनी। णे, ७४॥ (यथा, भागवते। ३। ३१। ७।

"कटुतीक्ष्णोष्णलवणक्षाराम्लादिभिरुल्बणैः।
मात्रयोक्तैरुपक्रुष्टः सर्व्वाङ्गोत्थितवेदनः॥")

पृथिव्यभिगुणदोक्त्याख्यवणः। इति चक्रपाणिदत्तशतपथगुणोपरि शिवदासीयटीका॥ तत्पर्य्यायः। षटुः २। तस्य गुणाः।

"लवणो रुचिकृन्नसोऽग्निदायी
पवनः स्वादुकरश्च सारकश्च।
रवितो गितरां जराश्च पित्रं
श्लिष्मलश्च ददाति कुष्ठकारी॥"

इति राजनिर्घण्टः॥

अपि च।

"लवणः क्लेदनस्तीक्ष्णः पाचनो दीपनः सरः।
स्निग्धो रुचिकरः स्वन्दी छर्द्दिमुक्तहरो लघुः॥"

अन्यच्च।

"लवणः श्लेष्मघनो रुच्यः पाचनः कफपित्तदः।
पुंस्त्ववातहरः कायग्रन्थिस्यन्दुतारकः॥
सोऽतियुक्तोऽधिपाकास्रपित्तकुष्ठक्षयापहृत्॥"

इति राजवल्लभः॥*॥

("लवणः स्यन्दयत्यास्यं कपोलगलदाहहृत्।"

"लवणः स्रम्भसङ्घातबन्धविध्मापनोऽधिकृत्॥
स्नेहनः स्वेदनस्तीक्ष्णो रोचनश्छेदभेदनकृत्।
सोऽतियुक्तोऽस्रवपनं स्खलितं पलितं वलिम्॥
वट्कुष्ठविषवीसर्पान् जनयेत् क्षपयेद्बलम्॥"

इति वाग्भटे सूत्रस्थाने दशमेऽध्याये॥

"लवणो रसः पाचनः क्लेदनः दीपनः क्षावनः छेदनः भेदनस्तीक्ष्णः सरो विकास्यधःसंस्रवकारकरो वातहरः स्रम्भवस्रसङ्घातविधमनः सर्व्वरसप्रत्यनीकभूत आस्यं विस्रावयति कफं विस्यन्दयति मार्गान् शोधयति सर्व्वशरीरावयवान् स्नेहूकरोति रोचयत्याहारमाहारयोगी नात्यर्थगुरुः स्निग्ध उष्णश्च।

स एवं गुणोऽपि एवात्यर्थसमुच्यमानः पित्तं कोपयति रक्तं वर्द्धयति तर्पयति स्रच्छे-

यति तापयति दाहयति कुष्णाति मांसानि प्रगालयति कुष्ठानि विषं वर्द्धयति ग्रीष्मान् स्फोटयति दन्तान् ध्लावयति पुंस्त्वमुपहन्ति इन्द्रियाण्युपरुणद्धि वलीपलितखालित्यमापादयति च लोहितपित्तास्रपित्तवीसर्पवातरक्तविचर्चिकेन्द्रलुप्तप्रभृतीन् विकारानुपजनयति।"

"प्रलीयन् क्लेद्यविष्यन्दलाघवं कुरुते सुखे।
यः स्नीह्नं लवणो ज्ञेयः सविदाहश्लथस्य च॥"

इति चरके सूत्रस्थाने २६ अध्यायः॥

"लवणः संशोधनः पाचनो विस्रेषणः क्लेदनः ग्रैथिल्यद्रुत्वः सर्व्वरसप्रत्यनीको मार्गविशोधनः सर्व्वशरीरावयवमार्द्दवकरश्चेति स एवंगुणोऽप्येकत्र वात्यर्थमासेव्यमानो गात्रकण्डूकोठश्वेतवैवर्ण्यपुंस्त्वोपघातेन्द्रियोपतापान् तथासृग्दोषविपाकं रक्तपित्तवातश्लेष्मिलान्त्रीकाप्रभृतीनापादयति॥"

"यो भक्तरुचिमुत्पादयति कफप्रसेकं जनयति मार्द्दवञ्चापादयति स लवणः।" इति सुश्रुते सूत्रस्थाने ४२ अध्यायः॥ * ॥)

लवणासुरस्य विवरणं यथा,—

"पूर्व्वं कृतयुगे राजन्! दैतेयः समहामतिः।
लोलापुत्रोऽभवल्लोष्ठो मधुर्नाम महासुरः॥
स मधुर्वीर्य्यसम्पन्नो धर्म्मे च सुसमाहितः।
बहुमानाच्च रुद्रेण दत्तस्तस्याद्भुतो वरः॥
शूलं शूलादिनिष्कृष्य महावीर्य्यं महाप्रभम्।
ददौ महात्मा सुप्रीतो वाक्यं चेतदुवाच ह॥
यावत् सुरेषु विप्रेषु न विद्यैर्म्महासुर!।
तावच्छूलं तवेदं स्यादन्यथा नाग्निमेष्यति॥
यच्च त्वामभियुञ्जीत युद्धाय विगतज्वरः।
तं शूलो भस्मसात् कृत्वा पुनरेष्यति ते करम्॥
एवं रुद्रादरं लब्ध्वा भूय एव महासुरः।
प्रणिपत्य महादेवं वाक्यमेतदुवाच ह॥
भगवन्नम वंशस्य शूलमेतदनुत्तमम्।
भवेत्तु सततं देव सुराणामीश्वरो ह्यहि॥
तं ब्रुवाणं मधुं देवः सर्व्वभूतपतिः शिवः।
प्रत्युवाच महादेवो नैतदेवं भविष्यति॥
माभूत्ते विफला वाणी मत्प्रसादकृता शुभा।
भवतः पुत्रमेकन्तु शूलमेतद्विष्यति॥
यावत् करस्थः शूलोऽयं भविष्यति सुतस्य ते।
अवध्यः सर्व्वभूतानां शूलहस्तो भविष्यति॥
एवं मधुर्व्वरं लब्ध्वा देवात् सुमहदद्भुतम्।
भवनं सोऽसुरश्रेष्ठः कारयामास सुप्रभम्॥
तस्य पत्नी महाभागा प्रिया कुम्भीनसीति या।
विन्ध्यावसोरपत्यं सा व्यजनलतां महाप्रभा॥
तस्याः पुत्रो महावीर्य्यो लवणो नाम दानवः।
बाल्यात् प्रभृति दुष्टात्मा पापान्येव समाचरत्॥
तं पुत्रं दुर्व्विनीतन्तु दृष्ट्वा क्रोधसमन्वितः।
मधुः स शोकमापेदे न चैनं किञ्चिदब्रवीत्॥
स विहाय इमं लोकं प्रविष्टो वरुणालयम्।
शूलं निवेश्य लवणे वरं तस्मै न्यवेदयत्॥
स प्रभावेण शूलस्य दौरात्म्येनातिगर्व्वितः।
सन्तापयति लोकांस्त्रीन् विप्रेषेण च तापसान्॥

आहारः सर्व्वसत्त्वानि विप्रेषेण च तापसाः।
आचारो रौद्रता नित्यं वासो मधुवने तथा॥
हत्वा बहुसहस्राणि सिंहव्याघ्रगणाञ्जनान्।
मांसानीव करुते नित्यमाहारमाह्निकम्॥
तच्छ्रुत्वा राघवो वाक्यमुवाच स महासुनीन्।
घातयिष्यामि तद्रक्षो भयमुत्सृजतु वो भयम्॥
प्रतिज्ञाय तदा तेषां मुनीनामुग्रतेजसाम्।
स भ्रातॄन् सहितान् सर्व्वानुवाच रघुनन्दनः॥
को हत्वा लवणं वीरः कस्यांशुः स विधीयताम्।
भरतस्य महाबाहो शत्रुघ्नस्य च धीमतः॥
राघवेणैवमुक्तस्तु भरतो वाक्यमब्रवीत्।
अहमेनं वधिष्यामि ममांशुः स विधीयताम्॥
भरतस्य वचः श्रुत्वा धैर्य्यवीर्य्यसमन्वितम्।
लक्ष्मणावरजस्तस्थौ हित्वा सौवर्णमासनम्॥
शत्रुघ्नमब्रवीद्वाक्यं प्रणिपत्य नराधिपम्।
कृतकर्म्मा महाबाहुर्मध्यमो रघुनन्दन!॥
आर्य्येण हि पुरा शून्या त्वयोध्या परिपालिता।
सन्तापं हृदये कृत्वा आर्य्यस्यागमनं प्रति।
प्रेम्णे मयि स्थिते राजन्न भूयः क्लेशमाप्नुयात्॥
तथा ब्रुवति शत्रुघ्ने राघवः पुनरब्रवीत्।
एवं भवतु काकुत्स्थ क्रियतां मम शासनम्॥
स त्वं हत्वा मधुसुतं लवणं पापनिश्चयम्।
राज्यं प्रशाधि धर्म्मेण वाक्यं मे यदि वेत्तसे॥
यदा तु युद्धमाकाङ्क्षन् यदि कश्चित् समाह्वयेत्।
तदा शूलं गृहीत्वा तु भस्म रक्षः करोति हि॥
स त्वं पुरुषशार्दूल! समायुधविनाशनम्।
अप्रविष्टं पुरं पूर्व्वं द्वारि तिष्ठ धृतायुधः॥
अन्यथा क्रियमाणे तु अवध्यः स भविष्यति॥
ततः प्रभाते विमले तस्मिन् काले स राक्षसः।
निर्गतस्तु पुराद्वीरो भक्ष्याहारप्रचोदितः॥
एतस्मिन्नन्तरे वीर उत्तीर्य्य यमुनां नदीम्।
सौम्यां मधुपुरद्वारि धनुष्याशिरतिष्ठत॥
ततोऽर्द्धदिवसे प्राप्ते क्रूरधर्म्मा स राक्षसः।
आगच्छद्बहुसाहस्रं प्राणिनां भारसहनम्॥
ततो ददर्श शत्रुघ्नं स्थितं द्वारि धृतायुधम्।
तमुवाच ततो रक्षः किमनेन करिष्यसि॥
तस्यैवं भाषमाणस्य हसतश्च मुहुर्मुहुः।
शत्रुघ्नो वीर्य्यसम्पन्नो रोषादभूण्यवाक्षणत्॥
उवाच च सुसंक्रुद्धः शत्रुघ्नः स निशाचरम्।
योद्धुमिच्छामि दुर्म्बुद्धे दन्दयुद्धं त्वया सह॥
तच्छ्रुत्वा भाषितं तस्य शत्रुघ्नस्य महात्मनः।
क्रोधमाहारयन्तीव्रं तिष्ठ तिष्ठेति चाब्रवीत्॥
आद्रुतस्तु पुरस्तेन शत्रुघ्नेन महात्मना।
लवणः क्रोधसंयुक्तो युद्धाय समुपस्थितः॥
आकर्णात् स विकृष्याथ तद्धनुर्धन्विनां वरः।
स समोच महाबाणं लवणस्य महोरसि॥
उरस्तस्य विदार्य्याशु प्रविवेश रसातलम्।
पुनरेवागमत्तूर्णमिच्छन्कुलनन्दनम्॥
शत्रुघ्नशरनिर्भिन्नो लवणः स निशाचरः।
पपात सहसा भूमौ वज्राहत इवाचलः॥
तच्च शूलं महद्दिव्यं हते लवणराक्षसे।

पश्यतां सर्व्वदेवानां रुद्रस्य वशमन्वगात्॥
हते तु लवणे देवाः सेन्द्राः साग्निपुरोगमाः।
ऊचुः सुमधुरां वाचीं शत्रुघ्नं शत्रुतापनम्॥
वरदास्तु महाबाहो सर्व्व एव समागताः।
विजयाकाङ्क्षिणस्तुभ्यमभीष्टं दर्शनं हि नः॥
देवानां भाषितं श्रुत्वा शूरो बद्धाञ्जलिः।
प्रत्युवाच महाबाहुः शत्रुघ्नः प्रयतात्मवान्॥
इयं मधुपुरी रम्या मधुरा देवनिर्म्मिता।
निवेशं प्राप्नुयाच्छीघ्रमेव मेऽस्तु वरः परः॥
तं देवाः प्रीतमनसो बाढमित्येव राघवम्।
भविष्यति पुरी रम्या शूरसेना न संशयः॥
ते तथोक्ता महात्मानो दिवमारुरुहुस्तदा।
शत्रुघ्नोऽपि महातेजास्तां सेनां समुपानयेत्॥
सा सेना शीघ्रमागच्छत् श्रुत्वा शत्रुघ्नशासनम्।
निवेशनञ्च शत्रुघ्नः आवसेन समारभत्॥
तां पुरीं दिव्यसङ्काशां नानापण्योपशोभिताम्।
निरीक्ष्य परमप्रीतः परं हर्षमुपागमत्॥
तस्य बुद्धिः समुत्पन्ना निवेश्य मधुरां पुरीम्।
रामपादौ निरीक्षेऽहं वर्षे द्वादश आगते।"

इति श्रीरामायणे उत्तरकाण्डे एकषष्ट्यधिकशततमाध्यायेभ्यः सङ्कलितम्॥ * ॥ लवणासुरस्योत्पत्तिर्यथा,—

"विरजा सा रजोयुक्ता श्रुत्वा वीर्य्यमयोधकम्।
सद्यो बभूव तत्रैव धन्या गर्भवती सती।
तस्यौ तत्र सुखासीना सार्द्धं पुत्रैश्च सप्तभिः॥
एकदा हरिणा सार्द्धं वृन्दारण्ये सुनिर्जने।
विजहार पुनः साध्वी शृङ्गारासक्तमानसा॥
एतस्मिन्नन्तरे तत्र मातुः क्रोडं जगाम ह।
कनिष्ठपुत्रस्तस्याश्च भ्रातृभिः पौढ़िसो भिया॥
भीतं सुतनयं दृष्ट्वा तत्याज तां कृपानिधिः।
क्रोडे चकार बालं सा साध्वी राधायजं ययौ॥
प्रबोध्य बालं सा साध्वी न ददर्शान्तिके प्रियम्।
विललाप भृशं तत्र शृङ्गारालङ्कृतमानसा॥
शशाप सुतं क्रोपात् लवणोदो भविष्यति॥
कदापि ते जलं केचित् न खादिष्यन्ति जीविनः॥
शशाप सर्व्वान् बालांश्च यान् मुक्त्वा मही-
तलम्।
गच्छध्वं च महीं मुक्त्वा जम्बुद्वीपं मनोहरम्॥
क्षितिर्नैकत्र युष्माकं भविष्यति पृथक् पृथक्।
द्वीपे द्वीपे क्षितिं लब्ध्वा तिष्ठन्तु सुखिनः सुताः॥
द्वीपस्याभिर्नदीभिश्च सह क्रीड़न्तु निर्जने।
कनिष्ठो माद्रशापाच्च लवणोदो बभूव ह॥
कनिष्ठः कथयामास माद्रशापञ्च बालकान्।
आजग्मुर्दुःखिताः सर्व्वे माद्रस्यागच्च बालकाः॥
श्रुत्वा विवरणं सर्व्वे प्रणम्युर्धरणीतलम्।
प्रणम्य मातुश्चरणं भक्तिनम्रात्मकन्धराः॥
सप्तद्वीपे समुद्राश्च सप्त तस्युर्विभागशः।
कनिष्ठादृद्धपर्य्यन्तं द्विगुणं द्विगुणं सुने॥
लवणेक्षुसुरासर्पिर्दधिदुग्धजलाख्यवाः।
एतेषाञ्च जलं पृथ्यां भक्ष्यार्थञ्च भविष्यति।
आप्नाः समुद्राः सप्तैव सप्तद्वीपां वसुन्धराम्॥"

इति ब्रह्मवैवर्त्ते श्रीकृष्णजन्मखण्डे ३ अध्यायः॥

लवण

लवणः, त्रि, (लवणेन संसृष्टः । लवण + ठक् । "लवणात् लुक् ।" ४ । ४ । २४ । इति ठको लुक् । यद्वा, लवणो रसोऽस्यस्मिन्निति । अर्श आद्यच् ।) लवणरसयुक्तः । इति मेदिनी । णे, ७५ ॥ (यथा, सुश्रुते । १ । २१ । "मधुरस्त्वविदग्धः स्यादविदग्धो लवणः स्मृतः ॥") लावण्ययुक्तश्च ॥

लवणकिंशुका, स्त्री, महाज्योतिष्मती । इति राजनिर्घण्टः ॥

लवणक्षारः पुं, (लवणस्य क्षारः ।) लोणाखार । इति राजनिर्घण्टः ॥

लवणखानिः, स्त्री, (लवणस्य खानिः खनिः ।) ग्राम्भरिलवणोत्पत्तिस्थानम् । तत्पर्य्यायः । रमा २ । इति हेमचन्द्रः । ४ । ७ ॥ लवणाकरमात्रश्च ॥

लवणत्रयं, क्ली, (लवणत्रयविशिष्टं त्रयम् ।) त्रयविशेषः । तत्पर्य्यायः । सोमत्रयम् २ त्रयान्हम् ३ पटुत्रयकम् ४ अम्लकाण्डम् ५ । अस्य गुणाः । सप्तधीरत्वम् । अम्लत्वम् । कषायत्वम् । अस्रघ्नत्वम् । अश्वत्थिकरत्वञ्च । इति राजनिर्घण्टः ॥

लवणत्रयं, क्ली, (लवणानां त्रयम् ।) सैन्धवं विड्ं रुचकञ्च । इति राजनिर्घण्टः ॥

लवणधेनुः, स्त्री, (लवणनिर्म्मिता धेनुः ।) दानार्थ-लवणादिनिर्म्मितधेनुः । तद्विवरणं यथा,—

होतोवाच ।

"लवणधेनुं वक्ष्यामि तां निबोध महीपते ।
अनुलिप्ते महीपृष्ठे कृष्णाजिनकुशोत्तरे ॥
धेनुं लवणमयीं कृत्वा षोड़शप्रस्थसंयुताम् ।
वत्सं चतुर्भी राजेन्द्र इक्षुपादांश्च कारयेत् ॥
सौवर्णसुखदृङ्गाणि खुरा रौप्यमयास्तथा ।
सुखं गुड़मयं तस्या दन्ताः फलमया नृप ! ॥
जिह्वां शर्करया राजन् घ्राणं गन्धमयन्तथा ।
नेत्रे रत्नमये कुर्य्यात् कर्णौ पत्रमयौ तथा ॥
श्रीखण्डं पङ्गकोटौ च नवनीतमयाः स्तनाः ।
सूत्रपुच्छां ताम्रशृङ्गां दर्भरोमशुभां पयस्विनीम् ॥
कांस्योपदोहां राजेन्द्र घण्टाभरणभूषिताम् ।
सुगन्धपुष्पधूपैश्च पूजयित्वा विधानतः ।
आच्छाद्य वस्त्रयुग्मेन ब्राह्मणाय निवेदयेत् ॥
ग्रहणे वाथ संक्रान्तौ यतीपाते तथायने ।
नक्षत्रग्रहपीड़ासु सर्व्वकालं प्रदापयेत् ॥
द्विजाय साधुवृत्ताय कुलीनाय च धीमते ।
वेदवेदाङ्गविदुषे श्रोत्रियायाहिताग्नये ॥
ईदृशाय प्रदातव्या तथाभरिणी नृप ! ।
अन्नमयेव मन्तव्या पुच्छदेशोपरिस्थितः ॥
कृच्छ्रकोपागतौ देयौ मुद्रिकापर्व्वपञ्चके ।
आच्छाद्य वस्त्रयुग्मेन दक्षिणां कनकं ददेत् ॥
पूर्व्वोक्तेन विधानेन सुवर्णेन कनकेन तु ।
इमां गृहाण भो विप्र रुद्ररूपे नमोऽस्तु ते ॥
रसज्ञा सर्व्वभूतानां सर्व्वदेवनमस्कृता ।
कामं कामदुघे कामा धारयेनो नमोऽस्तु ते ॥
दत्त्वा धेनुं लवणेन एकाहश्चैव तिष्ठति ।
सर्व्वं चिराच्चं विप्रेभ्य स्तथैव लवणाग्निना ॥

लवली

सहस्रेण गृहीतेनाथ सुवर्णेन कनकेन तु ।
दत्त्वेमां स्वर्गमाप्नोति यत्र देवो वृषध्वजः ॥
य इदं शृणुयाद्भक्त्या आवयेदापि मानवः ।
मुच्यते सर्व्वपापेभ्यो रुद्रलोकञ्च गच्छति ॥"
इत्यादि वाराहपुराणे श्वेतोपाख्याने लवणधेनु-माहात्म्यम् ॥

लवणमदः, पुं, (लवणस्य मदः ।) लोणाखारः । इति राजनिर्घण्टः ॥

लवणा, स्त्री, (लुनाति या । लू + ल्युः । टाप् ।) नदीभेदः । दीप्तिः । इति मेदिनीशब्दरत्नावल्यौ ॥ महाज्योतिष्मती । इति राजनिर्घण्टः ॥

लवणाचलः, पुं, (लवणनिर्म्मितः अचलः ।) दानार्थ-लवणादिनिर्म्मितपर्व्वतः । यथा,—

"अथातः संप्रवक्ष्यामि लवणाचलमुत्तमम् ।
यत्प्रदाता नरो लोकं प्राप्नोति शिवसंयुतम् ॥
उत्तमः षोड़शद्रोणः कर्त्तव्यो लवणाचलः ।
मध्यमः स्यात्तदर्द्धेन चतुर्भिरधमः स्मृतः ॥
वित्तहीनो यथाशक्त्या द्रोणादूर्द्धन्तु कारयेत् ।
चतुर्थांशेन विष्कम्भान् पर्व्वतान् कारयेत् पृथक् ॥
विधानं पूर्व्ववत् कुर्य्यात् ब्रह्मादीनाञ्च सर्व्वदा ।
तद्वद्धेमतनून् सर्व्वान् लोकपालान्निवेशयेत् ॥
सरांसि कामदेवादींस्तद्वच्चात्र निवेशयेत् ।
कुर्य्याच्छागरमत्रापि दानमत्र निबोधत ॥
सौभाग्यरससम्भूतो यतोऽयं लवणो रसः ।
तदात्मकत्वेन च मां पाहि पापान्नगोत्तम ॥
यस्मादन्नरसाः सर्व्वे नोत्कटा लवणं विना ।
प्रियश्च शिवयोर्नित्यं तस्मात् शान्तिप्रदो भव ॥
विष्णुदेहसमुद्भूतं यस्मादारोग्यवर्द्धनम् ।
तस्मात् पर्व्वतरूपेण पाहि संसारसागरात् ॥
अनेन विधिना यस्तु दद्यात्लवणपर्व्वतम् ।
उमालोके वसेत् कल्पं ततो याति परां गतिम् ॥"
इति मात्स्ये ७७ अध्यायः ॥

लवणाब्धिज, क्ली, (लवणाब्धौ लवणसमुद्रे जायते इति । जन् + डः ।) सामुद्रलवणम् । इति राजनिर्घण्टः ॥

लवणारज, क्ली, लोणाखारः । इति राजनिर्घण्टः ॥

लवणोत्तम, क्ली, (लवणेषु उत्तमम् ।) सैन्धवम् । इति रत्नमाला ॥

लवणोत्थ, क्ली, (लवणादुत्तिष्ठतीति । उत् + स्था + कः ।) लोणाखारः । इति राजनिर्घण्टः ॥

लवणोदः, पुं, (लवणं उदकं यस्य । उत्तरपदस्य चेत्युदकस्योदादेशः ।) लवणसमुद्रः । इत्यमरः ॥

लवनं, क्ली, (लू + भावे ल्युट् ।) छेदनम् । इत्यमरः ॥

लवनी, स्त्री, फलवृक्षविशेषः । लोमा इति भाषा ॥ तत्पर्य्यायः । रोमशा २ अश्मिमा ३ । इति शब्दचन्द्रिका ॥

लवली, स्त्री, (लवं छेद्यं लातीति । ला + कः । गौरादित्वात् ङीष् ।) फलवृक्षविशेषः । लोमाड़ि इति भाषा । तत्पर्य्यायः । सुगन्ध-

लशुनं

मूला २ गृञ्जः ३ कोमलवल्कला ४ । इति राजनिर्घण्टः ॥ तस्य फलगुणाः । हृद्यत्वम् । सुगन्धित्वम् । कफवातनाशित्वञ्च । इति राजवल्लभः ॥

"लवलीफलमम्लाग्नीवातपित्तहरं लघु ॥"
इति कैश्चित् ॥

(यथा, राजेन्द्रकर्णपूरे । ४७ ।

"कृत्वा वेलापुलिनलवलीपल्लवग्रासगोष्ठीं
दिङ्मातङ्गाः समममथ सरिन्नाथपाथः
पिबन्ति ॥")

लवाकः, पुं, (लवार्थं छेदनार्थं अकतीति । अक + अच् ।) छेदनद्रव्यम् । इत्युणादिकोषः ॥

लवाणकः, पुं, (लूयतेऽनेनेति । लू + "आणको लूधूग्निन्धिधान्भ्यः ।" उणा० ३ । ८३ । इति आणकः ।) दात्रादिः । इत्युणादिकोषः ॥

लविः, त्रि, (लूयतेऽनेनेति । लू + "अच इः ।" उणा० ४ । १३८ । इति इः ।) छिदुरः । इत्युणादिकोषः ॥

लविचं, क्ली, (लूयतेऽनेनेति । लू + "आर्त्तिलूधूसूखनसहचर इत्रः ।" ३ । २ । १८४ । इति इत्रः ।) दात्रम् । इत्यमरः ॥

लशृ, क श्लिष्यर्थयोगे । इति कविकल्पद्रुमः ॥ (चुरा० पर० अक० सेट् ।) क, लाशयति कुशलो गृत्वे शिल्पं युनक्तीत्यर्थः । इति दुर्गादासः ॥

लशुनं, क्ली, (अश्यते भुज्यते इति । अश् + "अशेर्लशुश्च ।" उणा० ३ । ५७ इति उनन् । लशादेशश्च धातोः ।) रसुनः । तत्पर्य्यायः । महौषधम् २ गृञ्जनः ३ अरिष्टः ४ महाकन्दः ५ रसोनकः ६ । इत्यमरः ॥ रसोनः ७ म्लेच्छकन्दः ८ भूतघ्नः ९ उग्रगन्धः १० । अस्य गुणाः । अक्षरसेन ऊनत्वम् । गुरुत्वम् । उष्णत्वम् । कफवातनाशित्वम् । अशुचित्वम् । क्रिमिरुग्रोगगोपघ्नत्वम् । रसायनत्वञ्च । इति राजनिर्घण्टः ॥ * ॥ अपि च ।

"लशुनस्तु रसोनः स्यादुग्रगन्धो महौषधम् ।
अरिष्टो म्लेच्छकन्दश्च यवनेष्टो रसोनकः ॥
यदाहृतं वैनतेयो जहार सुरसत्तमात् ।
तदा ततोऽपतद्बिन्दुः सुरसोनोऽपतद्भुवि ॥
पञ्चभिश्च रसैर्युक्तो रसेनाम्लेन वर्ज्जितः ।
तस्मादसोन इत्युक्तो ब्रह्मणा गुरुवेदिभिः ॥
कटुकश्चापि मूलेषु तिक्तः पत्रेषु संस्थितः ।
नाले कषाय उद्दिष्टो नालाग्रे लवणः स्मृतः ॥
बीजे तु मधुरः प्रोक्तो रसज्ञैर्गुरुवेदिभिः ।
रसोनो दीपनो वृष्यो स्निग्धोष्णः पाचनः
सरः ॥
रसे पाके च कटुकस्तीक्ष्णो मधुरको मतः ।
भग्नसन्धानकृत् कण्ठ्यो गुरुः पित्तासृग्विदः ।
बलवर्णकरो मेध्यहितो नेत्र्यो रसायनः ॥
कुष्ठोगजीर्णज्वरकुक्षिशूलं
विबन्धगुल्मारुचिकासप्लीहान् ।
कृमामकुष्ठानलसादजन्तु-
धमीरवश्वासकफांश्च हन्ति ॥

मद्यं मांसं तथाम्लञ्च हितं लशुनसेविनाम् ॥
व्यायाममातपं रोषमतिनीरं पयो गुड़म् ।
रसोनमश्नन् पुरुषस्त्यजेदेतन्निरन्तरम् ॥"

इति भावप्रकाशः ॥ * ॥

अन्यच्च ।

"लशुनः क्षारमधुरः कषायो वृष्यो गुरुः सरः ।
भग्नसन्धानकृद्बल्यो रक्तपित्तप्रदूषणः ॥"

इति राजवल्लभः ॥

(तथाचास्य गुणादिविषयो यथा,—

"कटूष्णवीर्य्यो लशुनो हितश्च
स्निग्धो गुरुः स्वादुरसोऽथ वल्यः ।
वृद्धस्य मेधास्वरवर्णचक्षु-
र्भग्नास्थिसन्धानकरः सुतीक्ष्णः ॥
हृद्रोगजीर्णज्वरकुक्षिशूल-
प्रमेहहिक्कारुचिगुल्मशोफान् ।
दुर्नामकुष्ठानलमान्द्यजन्तु-
समीरणं श्वासकफान्निहन्ति ॥"

इति हारीते कल्पस्थाने तृतीयाध्याये ॥

"शीतवातहिमदग्धतनूनां
स्तब्धसुप्तकुटिलग्रथिताङ्गाम् ।
भेषजस्य पवनोपहतानां
वक्ष्यते विधिरतो लशुनस्य ॥"

"शीलयेल्लशुनं शीते वसन्तेऽपि कफोल्वणः ।
घनोदयेऽपि वातार्त्तः सदा वा शीतलीलया ॥"

इति वाग्भटे उत्तरस्थाने ३६ अध्यायः ॥

"क्रिमिकुष्ठक्लिासघ्नो वातघ्नो गुल्मनाशनः ।
स्निग्धोष्णश्च वृष्यश्च लशुनः कटुको गुरुः ॥"

इति चरके सूत्रस्थाने २७ अध्यायः ॥)

लशूनः, पुं. (रसेन ऊनः रस्य लत्वम् । पृषोदरादित्वात् सस्य शः अकारलोपश्च ।) लशुनः । इति शब्दरत्नावली ॥

लष, क प्रीत्ययोगे । इति कविकल्पद्रुमः ॥ (चुरा०-पर०-अक०-सेट् ।) क, लाषयति कुशलो नृत्ये प्रीत्यं युनक्तीत्यर्थः । इति दुर्गादासः ॥

लष, ञ स्पृहि । इति कविकल्पद्रुमः ॥ (भ्वा०-उभ०-सक०-सेट् ।) ञ, लषति लषते । इति दुर्गादासः ॥

लष, य ञ स्पृहि । इति कविकल्पद्रुमः ॥ (दिवा०-उभ०-सक०-सेट् ।) य ञ, लष्यति लष्यते । इति दुर्गादासः ॥

लष्वः, पुं, (लाषयति नृत्ये प्रीत्यं युनक्तीति । लष् + "सर्व्वनिघृष्वरिष्वेति ।" उणा० १।१५३। इति वनप्रत्ययेन साधुः ।) नर्त्तकः । इत्युणादिकोषः ॥

लस, श्लिषि । क्रीड़े । इति कविकल्पद्रुमः ॥ (भ्वा०-पर०-अक०-सेट् ।) लसति । इति दुर्गादासः ॥

लस, क प्रीत्ययोगे । इति कविकल्पद्रुमः ॥ (चुरा०-पर०-अक०-सेट् ।) क, लासयति कुशलो नृत्ये प्रीत्यं युनक्तीत्यर्थः । इति दुर्गादासः ॥

लसा, स्त्री, (लसतीति । लस् + अच् ।) हरिद्रा । इति हारावली । ६३ ॥

लसिका, स्त्री, (लसतीति । लस् + अच् । ततः कन् ततष्टापि अत इत्वम् ।) लाला । यथा,—

"लालायां पिच्छिला खेला लसिका लासिका तथा ॥"

इति शब्दचन्द्रिका ॥

लसीका, स्त्री, इक्षुरसः । खड्मांसमध्यगरसः । इति केचित् ॥ (यथा । "लसीका उदकविशेषः । यथाह चरकः । यत्तु मांसत्वगन्तरे उदकं तल्लसीकाशब्दं लभते ।" इति विजयरक्षितकृतप्रमेहरोगव्याख्याने ॥

"यत्तु त्वगन्तरे व्रणगतं लसीकाशब्दं लभते ।"

इति चरके शारीरस्थाने सप्तमेऽध्याये ॥)

लस्ज, ईं ओ ङ व्रीड़े । इति कविकल्पद्रुमः ॥ (भ्वा०-आत्म०-अक०-सेट् । निष्ठायामनिट् ।) क्विपि संयोगादिलोपे लक् । ईं ओ, लग्नः । ङ, लज्जते । इति दुर्गादासः ॥

लस्तः, त्रि, श्लिष्टः । क्रीड़ितः । श्लिष्टयुक्तः । लसधातोः क्तप्रत्ययेन निष्पन्नः । इति लस्तकशब्दव्युत्पत्तौ भरतश्च ॥

लस्तकः, पुं, धनुषो मध्यभागः । इत्यमरः ॥

लस्तकी, [न्] पुं, (लस्तकोऽस्यास्तीति । लस्तक + इनिः ।) धनुः । इति शब्दमाला ॥

लहरिः, } स्त्री, महातरङ्गः । तत्पर्य्यायः ।
लहरी, } उल्लोलः २ कल्लोलः ३ । इति हेमचन्द्रः शब्दरत्नावली च ॥ (यथा, आर्य्यासप्तशत्याम् । ६१४ ।

"सरित इव यस्य गेहे शुष्यन्ति विप्रलाभगोचरजा नार्य्यः ।
वाराम्बुधेव स तृप्यति जलनिधिलहरिषु जलद इव ॥")

ला, ला ग्रहे । इति कविकल्पद्रुमः ॥ (अदा०-पर०-सक०-अनिट् ।) ला, लाति । ग्रहो ग्रहणम् । इति दुर्गादासः ॥

ला, स्त्री, ग्रहणम् । दानम् । इति मेदिनी । ले, १ ॥

लाक्षकी, स्त्री, सीता । यथा,—

"राघव ते इयं सीता द्वारकेशस्य रुक्मिणी ।
विष्णोरवतारमात्रस्य लक्ष्मीर्य्या कमलालया ॥
वाराणस्यां विशालाक्षी विमला पुरुषोत्तमे ।
वैकुण्ठे तु महालक्ष्मी राधा वृन्दावने वने ॥
लक्षयः कमला दास्यो यस्याः सा लाक्षकी मता ।
एवं शतसहस्राणामीश्वरी राधिकाधिका ॥"

इति पाद्मोत्तरखण्डे ५५ अध्यायः ॥

लाक्षणिकः, पुं, लक्षणया प्रतिपादकः । इति साहित्यदर्पणम् ॥ लक्षणात्मकवृत्तिमत्पदत्वं लाक्षणिकत्वम् । इति सारमञ्जरी ॥ (यथा, विभक्तितत्त्वार्थवादे ।

"मुख्यो लाक्षणिको रूढ़ो योगरूढ़श्च यौगिकः ।
क्वचित् यौगिकरूढ़श्च शब्दः षोढ़ा निगद्यते ॥"

(लक्षणमधीते वेद वा । लक्षण + "कतूक्थादिसूत्रान्तात् ठक् ।" ४ । २ । ६० । इति ठक् । लक्षणाभिज्ञे, त्रि ॥)

लाक्षा, स्त्री, (लक्ष्यतेऽनयेति । लक्ष् + "गुरोश्च हलः ।" ३।३।१०३ । इति अः । टाप् । यद्वा, "बाहुलकात् राजतेरपि सः । कपिलिकादित्वात् वा लत्वम् ।" इत्युज्ज्वलः । ३ । ६२ ।) रक्तवर्णवृक्षनिर्य्यासविशेषः । लाहा इति भाषा ॥ तत्पर्य्यायः । राक्षा २ जतु ३ यावः ४ अलक्तः ५ द्रुमामयः ६ । इत्यमरः ॥ खदिरिका ७ रक्षा ८ रङ्गमाता ९ पलङ्कषा १० क्रिमिहा ११ द्रुमव्याधिः १२ अलक्तकः १३ पलाशी १४ सुव्रिणी १५ दीप्तिः १६ जन्तुका १७ गन्धमादिनी १८ नीला १९ द्रवरसा २० पित्तारिः २१ । अस्या गुणाः । कटुत्वम् । तिक्तत्वम् । कषायत्वम् । श्लेष्मपित्तार्शिःशोफविषरक्तविषमज्वरनाशित्वञ्च । इति राजनिर्घण्टः ॥ भग्नविसर्पत्वग्दोषनाशित्वम् । बल्यत्वञ्च । इति राजवल्लभः ॥ अपि च ।

"लाक्षा वर्ण्या हिमा बल्या स्निग्धा च तुवरा लघुः ।
अनुष्णा कफपित्तास्रहिक्काकासज्वरप्रणुत् ॥
व्रणोरःक्षतवीसर्पकृमिकुष्ठगदापहा ।
अलक्तको गुणैस्तद्वदिशेषाद्व्रणनाशनः ॥"

इति भावप्रकाशः ॥

(घृतपत्री । सेवती । गुलाव इति च । तत्पर्य्यायो यथा,—

"घृतपत्री तरुण्युक्ता कर्णिका चारुकेशरा ।
महाकुमारी गन्धाढ्या लाक्षा क्षणाति-मञ्जुला ॥"

इति भावप्रकाशस्य पूर्ब्बखण्डे प्रथमे भागे ॥)

लाक्षातरुः, पुं, (लाक्षोत्पादकस्तरुः ।) पलाशवृक्षः । इति शब्दमाला ॥ (पलाशशब्देऽस्य विशेषः ज्ञेयः ॥)

लाक्षातैलं, क्ली, (लाक्षादिभिः पक्वं तैलम् ।) पक्वतैलविशेषः । लाक्षादितैलमिति ख्यातम् । तद्विविधं खल्वं वृहच्च । यथाक्रमं तत्प्रकारं तद्गुणञ्चाह ।

"लाक्षाहरिद्रामञ्जिष्ठाकल्कैस्तैलं विपाचितम् ।
सद्गुणैर्नारनालेन दाहघ्नीतज्वरापहम् ॥"

इति खल्वलाक्षातैलम् ॥

वृहद्यथा,—

"लाक्षारसाढ़के प्रस्थं तैलस्य विपचेद्भिषक् ।
मञ्जिष्ठाढ़कसमायुक्तं पिष्ट्वा चाच्च समावपेत् ॥
घृतपुष्पां हरिद्राञ्च मूर्व्वां कुष्ठं हरेणुकाम् ।
कटुकां मधुकां रास्नामश्वगन्धाञ्च दारु च ॥
सुक्तकं चन्दनञ्चैव पृथगर्द्धसमानकैः ।
द्रव्यैरेतैश्च तत् सिद्धं अभ्यङ्गान्मारुतापहम् ॥
विषमाख्यान् ज्वरान् सर्व्वानार्श्वैव प्रथमं नयेत् ।
कासं श्वासं प्रतिश्यायं कण्डूं दौर्गन्ध्यगौरवम् ॥
त्रिकपृष्ठग्रहं शूलं गात्राणां स्फुटनन्तथा ।
पापालक्ष्मीप्रशमनं सर्व्वग्रहनिवारणम् ।
अश्विभ्यां निर्म्मितं सम्यक् तैलं लाक्षादिकं महत् ॥"

इति वृहल्लाक्षातैलम् । इति सुखबोधः ॥

लाङ्गल

लाङ्गलप्रसादः, पुं, (लाङ्गलाया: प्रसादो यस्मात् ।) पट्टिकालोध्रः । इति राजनिर्घण्टः ॥

लाङ्गलप्रसादनः, पुं, (लाङ्गलां प्रसादयतीति । प्र+सद्+णिच्+ल्युः ।) रक्तलोध्रः । तत्पर्य्यायः । क्रमुकः २ पट्टिका ३ पट्टी ४ । इत्यमरः ॥ (तथास्य पर्य्यायः ।

"द्वितीयः पट्टिकालोध्रः क्रमुकः स्थूलवल्कलः । गौर्यप्रियो दृढत्वक्: पट्टी लाङ्गलप्रसादनः ॥"

इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥)

लाङ्गलवृक्षः, पुं, (लङ्गलोत्पादको वृक्षः ।) कोशाम्रः । इति राजनिर्घण्टः ॥ पलाशवृक्षः । इति हारावली ॥

लाङ्ग, भ्वा० पर०-अक०-सेट् ।) भ, अलङ्गाङ्गत् । इति दुर्गादासः ॥

लाङ्घ, भ्वा० उ० अक० । इति कविकल्पद्रुमः ॥ (भ्वा०-आत्म०-अक०-सेट् ।) भ, अलङ्गाङ्घत् । ङ, लाङ्घते । अशक्तिः सामर्थ्यम् । इति दुर्गादासः ॥

लाघवं, क्ली, (लघोर्भावः कर्म्म वा । लघु+"इगन्ताच्च लघुपूर्व्वात् ।" ५ । १ । १३१ । इति अण् ।) आरोग्यम् । इति राजनिर्घण्टः ॥ लघुत्वम् । लघोर्भाव इत्यर्थे अणप्रत्ययेन निष्पन्नम् ॥ (प्रीतिजन्यम् । यथा, महाभारते । ५ । १८३ । ७ ।

"लाघवं कर्षं भारत मोक्षं ब्रूयां तेजस्विनात् लाघवाच्चैव वक्तुम् ।"

अल्पत्वम् । यथा, मार्कण्डेये । ४१ । १७ ।

"अक्रोधो गुरुशुश्रूषा शौचमाहारलाघवम् । निस्पृहाभाव इत्येते नियमाः पञ्च कीर्त्तिताः ॥"

क्षैप्यम् । यथा, कुमारे । २ । २३ ।

"यमोऽपि विलिखन् भूमिं दण्डेनाक्रमितक्रिया । कुर्व्वतेऽस्मिन्मनोधैर्य्यमपि निर्म्मानालातलाघवम् ॥")

लाङ्गल, क्ली, (लङ्गतीति । लगि गतौ + बाहुलकात् कलच् । ङीष्च धातोः । इति उणादिवृत्तौ उज्ज्वलदत्तः । १ । १०८ ।) स्वनामख्यात भूमिकर्षणयन्त्रम् । तत्पर्य्यायः । हलम् २ गोदारुम् ३ सीरः ४ । इत्यमरः ॥ हलः ५ हालम् ६ शालः ७ शीरः ८ । इति भरतः ॥ (यथा, वाजसनेयसंहितायाम् । १२ । ७१ ।

"लाङ्गलं पवीरवत्सुशेवꣳसोमपितूयव ॥")

लिङ्गः । इति त्रिकाण्डशेषः ॥ पुष्पविशेषः । तालवृक्षः । मूषदारु । इति मेदिनी । ले, १२८ ॥


लाङ्गलग्रहः, पुं, लावकः । लाङ्गलं गृह्णाति य इत्यर्थे अणप्रत्ययेन निष्पन्नः ॥ ("गृत्तिलाङ्गलाकुम्भयष्टितोमरघटघटीधनुःषु ग्रहेरपसंख्यानम् ।" ३ । २ । १६ । इत्यस्य वार्त्तिकोक्त्या अच् ॥)

लाङ्गलचक्रं, क्ली, (लाङ्गलाकारं चक्रम् ।) क्षेत्रकर्म्मणि शुभाशुभगणन हलाकारचक्रविशेषः । यथा । अथ लाङ्गलचक्रं खरोदये ।

"लाङ्गलं दक्षिकायूपयोक्त्रहृदयसमन्वितम् । दक्षिकादि लिखेत् भानि दिनैर्ग्राक्रान्तभाहितः ॥ दक्षिकाहलयूपानां द्विद्विस्थाने त्रिकं त्रिकम् । योक्त्रयोश्च त्रिकस्यैव मध्ये पञ्चात्मके द्विकम् ॥

दक्षस्थे च गवां हानिर्यमस्थे स्वामिनो भयम् । लक्ष्मीर्लाङ्गलयोक्त्रे स्यात् सेचारम्भदिनर्क्षके ॥"

इति ज्योतिस्तत्त्वम् ॥



लाङ्गलदण्डः, पुं, (लाङ्गलस्य दण्डः ।) लाङ्गलमध्यस्थकाष्ठम् । लाङ्गलेर ईंड्ग इति भाषा । तत्पर्य्यायः । ईंषा २ । इत्यमरः ॥ ईंषा ३ । इति शब्दरत्नावली ॥

लाङ्गलपद्धतिः, स्त्री, (लाङ्गलस्य पद्धतिः ।) लाङ्गलरेखा । सिराल इति भाषा । तत्पर्य्यायः । सीता २ । इत्यमरः ॥ सीता ३ । इति शब्दरत्नावली ॥

लाङ्गलिकः, पुं, (लाङ्गलवत् आकृतिरस्यस्येति । लाङ्गल+ठन् ।) स्थावरविषभेदः । इति हेमचन्द्रः ॥

लाङ्गलिका, स्त्री,(लाङ्गलमिवाकारोऽस्यस्या इति । लाङ्गल+ठन् । टाप् ।) लाङ्गलीवृक्षः । इति शब्दरत्नावली ॥ (यथा, गारुडे १६२ अध्याये ।

"वृत्तलाङ्गलिकामूलं छिन्नस्य तथैव च । तेन मद्यसमं लिप्तं शस्त्रो निःसरति क्षणात् ॥")

लाङ्गलिकी, स्त्री, (लाङ्गल+ठन् । ङीष् ।) वृक्षविशेषः । लाङ्गलिया इति विषलाङ्गलिया इति च भाषा । तत्पर्य्यायः । अग्निशिखा २ । इत्यमरः ॥ अग्निज्वाला ३ लाङ्गलिका ४ लाङ्गली ५ । इति शब्दरत्नावली ॥ गौरी ६ दीप्ता ७ ज्वलिनी ८ गर्भघातिनी ९ अग्निजिह्वा १० रक्तपुष्पा ११ अग्निमुखी १२ वह्निशिखा १३ । इति रत्नमाला ॥ अस्या गुणः । कुष्ठदुष्टव्रणनाशित्वम् । इति राजवल्लभः ॥ राजनिर्घण्टोक्तगुणपर्य्यायाः कलिकारीशब्दे द्रष्टव्याः ॥

लाङ्गली, [न्] पुं, (लाङ्गलमस्यस्येति । लाङ्गल+इनिः ।) बलरामः । इति शब्दरत्नावली ॥ (यथा, हरिवंशे । ३८ । ३८ ।

"स्थापयित्वा बलहरिं यदून् लाङ्गलिना सह । प्रार्द्दयन्वा बलस्यन्तु जाम्बवन्तं ददर्श ह ॥")

नारिकेलः । इत्यमरः ॥ (यथा,—

"नारिकेलो डिण्डफलो लाङ्गली कूर्च्चशीर्षकः । तुङ्गस्कन्धफलश्चैव द्रुमराजः सदाफलः ॥"

इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥) सर्पः । इति शब्दचन्द्रिका ॥ (लाङ्गलविशिष्टे, त्रि । यथा, रामायणे । २ । ३२ । ३० ।

लाङ्गली

"तत्रासीत् पिङ्गलो गार्ग्यस्त्रिजटो नाम वै द्विजः । वृतदृत्तिर्वने नित्यं फालकुद्दाललाङ्गली ॥"

तथा, महाभारते । १ । २२२ । ५३ ।

"रामः पाणिग्रहणिकं ददौ पार्थाय लाङ्गली ॥"

स्त्रियां ङीष् । नदीविशेषः । यथा, मार्कण्डेये । ५७ । २६ ।

"लाङ्गलिनी वंशकरा महेन्द्रप्रभवा: स्मृताः ॥")

लाङ्गली, स्त्री, (लाङ्गलाकारोऽस्यस्या इति । लाङ्गल+अच् । ङीष् ।) लाङ्गलाकारपुष्पजलजघ्राणविशेषः । काँचड़ा इति भाषा । तत्पर्य्यायः । घ्राणदी २ तोयपिप्पली ३ घ्राणजादनी ४ । इत्यमरः ॥ जलाची ५ जलपिप्पलिः ६ । इति शब्दरत्नावली ॥ पिप्पला ७ घ्राणादिनी ८ मत्स्यगन्धा ९ । इति जटाधरः ॥ कलिकारी १० । इति राजनिर्घण्टः ॥ (घ्राणपर्व्वी । तत्पर्य्यायो यथा,—

"स्थिरा विदारिगन्धा च घ्राणपर्य्यस्तमत्यपि । लाङ्गली कलसी चैवक्रोष्टुपुच्छा गुडा मता ॥"

इति गारुडे २०८ अध्यायः ॥)

लाङ्गूलं, क्ली, पुच्छम् । इत्यमरटीकासारसुन्दरी ॥

लाङ्गूलं, क्ली, (लङ्ग+"खर्जिपिञ्जादिभ्य ऊरोलचौ ।" उणा० ४ । ६० । इति कलच् । वाहुलकात् दृद्धिश्च ।) पशुपक्षादिनिलम्बमानलोमाद्यावयवविशेषः । ल्याज इति भाषा । तत्पर्य्यायः । पुच्छम् २ लूम ३ वालहस्तः ४ वालधिः ५ । इत्यमरः ॥ लङ्गूलम् ६ लाङ्गूलम् ७ लुलामः ८ अवालः ९ । इति शब्दरत्नावली ॥ लङ्गः १० पिच्छः ११ वालः १२ । इति जटाधरः ॥ (यथा, कुमारे । १ । १३ ।

"लाङ्गूलविक्षेपविसर्पिशोभै-रितस्ततश्चक्रमरीचिगौरैः ।
यस्यार्द्धयुक्तं गिरिराजशब्दं कुर्व्वन्ति बालव्यजनैश्चमर्य्यः ॥")

गोलाङ्गूलजलमाहात्म्यं यथा,—

"लाङ्गूलेनोद्धृतं तोयं महीं यद्याति यो नरः । सर्व्वतीर्थफलं प्राप्य सर्व्वपापैः प्रमुच्यते ॥"

इति वाराहपुराणम् ॥

शैलः । इति मेदिनी । ले, १२७ ॥ कुमूलः । इति सिद्धान्तकौमुद्यामुणादिवृत्तिः ॥

लाङ्गूलिका, स्त्री, (लाङ्गूलाकृतिरस्यस्या इति । लाङ्गूल+इनिः ।) पृश्निपर्णी । इति राजनिर्घण्टः ॥

लाङ्गूली, [न्] पुं, (प्रशस्तं लाङ्गूलमस्यस्येति । लाङ्गूल+इनिः ।) वानरः । इति शब्दचन्द्रिका ॥ ऋषभनामौषधम् । इति राजनिर्घण्टः ॥

लाङ्घ, इ लङ्घने । इति कविकल्पद्रुमः ॥ (भ्वा०-पर०-सक०-सेट् ।) इ, लाङ्घति । लाङ्घितुं । इति दुर्गादासः ॥

लाज, भर्त्सने । भर्ग्गे । इति कविकल्पद्रुमः ॥ (भ्वा०-पर०-सक०-सेट् ।) लाजति ॥

लाज, इ भर्त्सने । भर्ग्गे । इति कविकल्पद्रुमः ॥ (भ्वा०-पर०-सक०-सेट् ।) द्वौ द्वितीय-

खरिणौ। लाजति। इ, लाज्यते। भर्त्सन एव केचित् पठ्यते। भर्गो भर्त्सनम्। इति दुर्गादासः॥

लाजं, क्ली, (लाज्+अच्।) उशीरम्। इति मेदिनी। जे, १५॥ (भृष्टधान्यम्। खइ इति भाषा॥

"येषां स्युस्तण्डुलास्तानि धान्यानि सतु-
षाणि च।
भृष्टानि स्फुटिताग्राणि कुर्ज्जानीति मनीषिणः॥
लाजाः स्युर्मन्थुराः प्रोक्ता लघवो दीपनाश्च ते॥
खल्पमूत्रमला रूक्षा बल्याः पित्तकफच्छिदः।
छर्द्यतीसारदाहास्रमेहमेदस्तृषापहाः॥"

इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे॥)

लाजः, पुं, (लाज्+अच्।) आर्द्रतण्डुलः। इति मेदिनी। जे, १५॥

लाजा, स्त्री, अक्षतम्। इति मेदिनी। जे, १५॥ (यथा, सुश्रुते। ४। २६।

"पैत्तिकं शर्करालाजामधुकैः सारिवा-
युतैः॥")

लाजाः, पुं भूम्नि, (लाज्यन्ते ये ते। लाज्+घञ्।) भृष्टधान्यम्। लाजोया इति खइ इति च भाषा। (यथा, रामायणे। २। ४३। १३।

"कदा प्राप्निसहस्राणि राजमार्गे समात्मजौ।
लाजैरवकरिष्यन्ति प्रविशन्तावरिन्दमौ॥")

तत्पर्य्यायः। अक्षतम् २। इत्यमरः। २।६।४७॥ लाजा इ अक्षताः ४। इति भरतः॥ अस्य गुणाः। दृष्ट्याच्छर्द्यतीसारप्रमेहमेदःकफनाशित्वम्। कायपित्तोपशमनत्वम्। अग्निकारित्वम्। लघुत्वम्। प्रीतनत्वञ्च। अस्य मण्डगुणाः। अग्निकारित्वम्। दाहदृष्ट्याच्छर्द्यतीसारनाशित्वम्। अग्नेषदोषामपाचनत्वञ्च॥ तस्य पेयागुणाः। श्रमकक्लमस्य शमनत्वम्। क्षुधादृष्ट्याग्लानिदौर्ब्बल्यकृच्छ्ररोगनाशित्वञ्च। इति राजवल्लभः॥ * ॥ अपि च।

"एते च त्रीहयो भृष्टास्ते लाजा इति
संज्ञिताः।
यवादयश्च ये भृष्टास्ते धानाः परिकीर्त्तिताः॥
लाजाश्च यवधानाश्च तर्पणाः पित्तनाशनाः।
गोधूमयावनालोत्थाः किञ्चिदुष्णाश्च दीपनाः॥
दृष्ट्यातीसारशमनो धातुशान्त्यकरः परः।
मन्दाग्निविषमाग्नीनां बालस्थविरयोषिताम्।
देयश्च सुकुमाराणां लाजमण्डः सुसंस्कृतः॥"

इति राजनिर्घण्टः॥ * ॥

तस्य चूर्णगुणाः।

"द्राक्षादाड़िमखर्ज्जूरमृदितामलसंयुतम्।
लाजचूर्णं समध्याज्यं सत्तर्पणमुदाहृतम्॥"

लाजचूर्णं द्राक्षादिफलशर्करामध्याज्यसहितं तर्पणसुक्तमित्यर्थः। लाजशुक्तगुणाश्च गुणशब्दे।

"लाजानां शुक्तवः क्षौद्रसितायुक्ता विशेषतः।
छर्द्यतीसारदाहविषमूर्च्छाज्वरापहाः॥"

चरकश्च।

"तत्र तर्पणमेवादौ प्रदेयं लाजशुक्तुभिः।

ज्वरापहैः फलरसैर्युक्तं समधुशर्करम्॥"

इति भावप्रकाशः॥

लाञ्छनं क्ली, (लाञ्छ्+ल्युट्।) नाम। चिह्नम्। इति मेदिनी। ने, १२१॥ (यथा, कुमारे। ७। ३५।

"दिवापि निष्पातमरीचिभासा
बालादनाविष्कृतलाञ्छनेन।
चन्द्रेण नित्यं प्रतिभिन्नमौलेः
चूड़ामणेः किं ग्रहणं हरस्य॥")

लाञ्छनः, पुं, (लाञ्छतीति। लाञ्छ्+ल्युः।) रागीधान्यम्। इति राजनिर्घण्टः॥ क्वचित् पुस्तके लाञ्छनीति च पाठः॥

लाटः, पुं, देशान्तरम्। (यथा, कथासरित्सागरे। ७८। ११६।

"ददौ तस्मै सपुत्राय प्रीत्या वीरवराय च।
लाटदेशे ततो राज्यं स कर्णाटयुते नृपः॥")

वस्त्रम्। इति मेदिनी। टे, २७॥ जीर्णभूषणादि। इति शब्दरत्नावली॥

लाड, तृ क क्षेपे। इति कविकल्पद्रुमः॥ (अदन्तचुरा० पर०-सक०-सेट्।) लाड़यति अलालाड़त्। इति दुर्गादासः॥

लाप्यः, पुं, कथनम्। लपधातोर्भावे घञ्प्रत्ययेन निष्पन्नम्॥

लाप्यं, त्रि, (लप्यते इति। लप्+ण्यत्।) कथनीयम्। लपधातोः कर्म्मणि घञ्प्रत्ययेन निष्पन्नम्। इति सुग्धबोधव्याकरणम्॥

लाभः, पुं, (लभ+घञ् करणे।) मूलधनादधिकं वाणिज्योपार्ज्जितं धनम्। तत्पर्य्यायः। फलम् २। इत्यमरभरतौ॥ लभ्यम् ३ वृद्धिः ४। इति शब्दरत्नावली॥ (यथा, रामायणे। २। २२। २२।

"सुखदुःखे भयक्रोधौ लाभालाभौ भवाभवौ।
यच्च किञ्चित्तथाभूतं नतु दैवस्य कर्म्म तत्॥")

प्राप्तिः। इति लभधात्वर्थदर्शनात्॥ (सप्तधर्म्मवित्तागमेषु अन्यतमः। यथा, मनुः। १०। ११५।

"सप्त वित्तागमा धर्म्म्या दायो लाभः क्रयो जयः।
प्रयोगः कर्म्मयोगश्च सत्प्रतिग्रह एव च॥")

लाभ्यं, क्ली, (लभ्+ण्यत्।) लाभः। इति शब्दरत्नावली॥

लामज्जकं, क्ली, वीरणमूलम्। इत्यमरः॥ अस्य पर्य्यायगुणावुशीरशब्दे द्रष्टव्यौ। उशीरवत्पीतच्छर्द्यतिविशेषः। तत्पर्य्यायः। सुगन्धम् २ अम्लगन्धम् ३ लवम् ४ लघु ५ दृष्टिकापथिकम् ६ शीघ्रम् ७ दीर्घमूलम् ८ जलाश्रयम् ९। अस्य गुणाः। हिमत्वम्। तिक्तत्वम्। वातपित्तदाहश्रममूर्च्छाक्षिरक्तज्वरापहत्वञ्च। इति राजनिर्घण्टः॥

लालनं, क्ली, (लल्+णिच्+ल्युट्।) अत्यन्तस्नेहकरणम्। प्रेमपूर्ब्बकबालकादरणम्। सोहाग इति भाषा। लड कोपसेवे उपसेव इह अत्यन्तपालनम्। क, लालयेत् पञ्च वर्षाणि

पुत्रमिति अत्र उभयोरेकलाङ्गलम्। इति कविकल्पद्रुमटीकायां दुर्गादासः॥ तथा हि।

"लालने बहवो दोषास्ताड़ने बहवो गुणाः।
तस्मात् पुत्रञ्च शिष्यञ्च ताड़येन्न तु लालयेत्॥"

अपि च।

"लालयेत् पञ्च वर्षाणि दशवर्षाणि ताड़येत्।
प्राप्ते तु षोड़शे वर्षे पुत्रं मित्रवदाचरेत्॥"

इति चाणक्यशतकम्॥

लालसा, पुं स्त्री, (लस्+यङ्। ततः "अ प्रत्ययात्।" ३।३।१०२। इति अः। टाप्।) महाभिलाषः। इत्यमरः॥ औत्सुक्यम्। याच्ञा इति मेदिनी। से, ३४॥ दोहदम्। यथा,—

"दोहदं दौहृदं श्रद्धा लालसा कृतिमार्षि तु।"

इति हेमचन्द्रः॥

लोलः। इति नानार्थे स एव॥ (लोलुपे, त्रि। इति यादवः॥ यथा, माघे। ४। ६।

"छायां निजस्त्री चटुलालसानां
मदेन किञ्चित् चटुलालसानाम्।
कुर्व्वाणमुत्पिञ्जरणातपत्रै-
र्विहङ्गमानां जलजातपत्रैः॥"

तथा च कुमारे। ७। ५६।

"तस्मिन् सुहूर्त्ते पुरसुन्दरीणा-
मीक्षानसन्दर्शनलालसानाम्॥")

लालसीकं, क्ली, पिच्छलम्। इति शब्दरत्नावली॥

लालां, क्ली, (लल्+णिच्+अच्। टाप्।) सुखभवजलम्। लाल इति भाषा। तत्पर्य्यायः। वृक्षिका २ स्यन्दिनी ३। इत्यमरः॥ द्राविका ४ वृणीका ५। इति शब्दरत्नावली॥ सुखस्रावः। इति राजनिर्घण्टः॥ (यथा, सुश्रुते। ४। २२।

"हीनच्छेदात् भवेच्छोफो लालानिद्राभ-
क्षमः॥")

लालाटिकः, त्रि, (ललाटं पश्यतीति। ललाट+"संज्ञायां ललाटकुक्कुटौ पश्यति।" ४।४।४६। इति ठक्। दूरेस्थित्वा प्रभोर्ललाटं पश्यति न तु कार्य्येषूपतिष्ठते इत्यर्थः।) प्रभोर्भावदर्शी। कार्य्याक्षमः। इत्यमरः॥ यः सेवकः क्रोधप्रसादचिह्नज्ञानाय प्रभोर्ललाटमेव पश्यति। यच्च प्रभोः कार्य्येऽक्षमोऽशक्तश्च लालाटिकौ पूर्ब्बवत् स्थितः। केचित्तु कार्य्याक्षम इति भावदर्शिन एव विशेषणमुक्त्वा एकमेव लालाटिकमाहुर्न तु द्वाविति। भावदर्शीति च पाठः लालाटिकः सदालस्ये प्रभुभावनिदर्शिनि। इत्यजयः॥ इति तट्टीकायां भरतः॥ आक्षेपणविशेषे, पुं। इति मेदिनी। के, २२१॥ ललाटसम्बन्धिनि, त्रि। यथा। प्राप्निस्तु लालाटिकीत्यादि॥

लालामेहः, पुं, (लालावत् मेहतीति। मिह+अच्।) प्रमेहविशेषः। यथा,—

"लालातन्तुयुतं मूत्रं लालामेहेन पिच्छिलम्।"

प्रमेहतीति प्रमेहः। अस्यौषधम्।

"गुडूच्याः स्वरसः पेयो मधुना सर्व्वमेहजित्।

हरिद्राचूर्णयुक्तो वा रसो धात्र्याः समाधिकः ॥"

अपि च ।

"चन्द्रप्रभा वचा मुस्ता भूनिम्बं सुरदारु च ।
हरिद्रातिविषा दार्व्वी पिप्पलीमूलचित्रकम् ॥
कट्वङ्गीपचकञ्च त्रिफला चव्यं विड्ङ्गं गजपिप्पली ।
सुवर्णमाक्षिकं घोषं द्वौ क्षारौ लवणत्रयम् ॥
एतानि टङ्कमात्राणि संगृह्णीयात् पृथक् पृथक् ।
द्विकर्षहतलोहं स्याच्चतुःकर्षा सिता भवेत् ॥
घृतात्रयञ्चकर्षं स्यादष्टौ कर्षाश्च गुग्गुलोः ।
विधिना योजितैरेतैः कर्त्तव्या गुटिका शुभा ॥
चन्द्रप्रभातिविख्याता सर्व्वरोगप्रणाशिनी ।
निहन्ति विंशतिं मेहान् क्षुद्रमष्टविधं तथा ॥"

इत्यादि भावप्रकाशः ॥

(तथास्य लक्षणान्तरम् ।

"तन्तुबद्धमिवालालं पिच्छिलं यः प्रमेहति ।
आलालमेहिनं विद्यात्तं नरं श्लेष्मकोपतः ॥"

इति चरके निदानस्थाने चतुर्थेऽध्याये ॥)

लालायितः, त्रि, लालाविशिष्टः । कातर इति यावत् । लालाशब्दात् नमस्तपोवरिवः कण्ड्वादिभ्यः क्यः क्तौ इति सुग्धबोधव्याकरणसूत्रेण क्यप्रत्यये क्ते क्तप्रत्ययान्निष्पन्नः । यथा । अत्र लालायितः फणी । इति अनन्तदेवोक्तगणेशलिखितपाणिनिव्याकरणीयमहाभाष्यम् ॥

अपि च ।

"परिखावलयच्छलेन या
न परेषां ग्रहणस्य गोचरः ।
फणिभाषितभाष्यफक्किका
विषमा कुण्डलनामवापिता ॥"

इति पूर्ब्बमेघे २ सर्गः ॥

परिखेति । शत्रूणां ग्रहणगोचरो नेयमिति ज्ञात्वा परिखावलयव्याजेन या पुरी कुण्डलनां प्रापिता विधात्रेति शेषः । फणिना भाषिता या महाभाष्यफक्किका तद्वद्विषमा सापि परेषां ज्ञानगोचरो नेयमिति ज्ञात्वा अत्र लालायितः फणीत्येवं कुण्डलनां प्रापिता पण्डितैरिति शेषः । इति भवदत्तज्ञाततट्टीका ॥

लालाविषः, पुं, (लालायां विषं यस्य ।) लूतादिः । इति हेमचन्द्रः । ४ । ३७६ ॥

लालास्रावः, पुं, (लालां स्रावयतीति । स्रु + णिच् + अण् ।) जर्णनाभः । इति हेमचन्द्रः ॥ (लालाक्षारके, त्रि । यथा, सुश्रुते । २ । १६ ।

"ललास्रावी स विज्ञेयः कण्डूमान् श्लैष्मिरोगदः ॥")

लालिकः, पुं, महिषः । इति हेमचन्द्रः । ४ । ३४६ ॥

लालित्यं, क्ली, (ललित + ष्यञ् ।) ललितस्य भावः । यथा,—

"प्रीतिं भक्तजनस्य यो जनयते विघ्नं विनिघ्नन् स्मृतः
स्तं वृन्दारकवृन्दवन्दितपदं नत्वा मतङ्गाननम् ।
पाटीं सङ्गणितस्य वच्मि चतुरप्रीतिप्रदां प्रस्फुटां
संक्षिप्ताक्षरकोमलामलपदैर्लालित्यलीलावतीम् ॥"

इति लीलावती ॥

लाव(ब)वः, पुं स्त्री, पक्षिविशेषः । लाओया इति भाषा । इत्यमरभरतौ ॥ (यथा, सुश्रुते । ४ । ८ ।

"ग्राम्यानुपोदकैर्मांसैः लावादीर्व्वापि विष्किरैः ॥")

अस्य मांसगुणाः । लघुत्वम् । कटुत्वम् । मलबद्धकारित्वम् । स्वादुत्वम् । शीतत्वम् । त्रिदोषनाशित्वञ्च । इति राजवल्लभः ॥ (तथा च ।

"संग्राही दीपनश्चैव कषायो मधुरो लघुः ।
लावः कटुविपाकश्च सन्निपाते च पूजितः ॥"

इति सुश्रुते सूत्रस्थाने ४६ अध्यायः ॥)

(यथास्य गुणपर्य्यायौ ।

"लावा विष्किरवर्गेषु ते चतुर्धा मता बुधैः ।
पांशुलो गौरकोऽन्यस्तु पौण्ड्रकोदर्भरस्तथा ॥
लावा वह्निकराः स्निग्धा गरघ्ना वाहिका हिताः ॥
पांशुलः श्लेष्मलस्तेषु वीर्य्योष्णोऽनिलनाशनः ।
गौरो लघुतरो रूक्षो वह्निकारी त्रिदोषजित् ॥
पौण्ड्रकः पित्तलस्तत्र किञ्चिल्लघुवातकफापहः ।
दर्भरोरक्तपित्तघ्नो हृद्यमेषद्धरो हिमः ॥"

इति भावप्रकाशस्य पूर्ब्बखण्डे द्वितीये भागे ॥)

लाव(ब)कः, पुं, (लाव एव । स्वार्थे कन् ।) लावपक्षी । तत्पर्य्यायः । लघुजङ्घलः २ । इति त्रिकाण्डशेषः ॥ (तथास्य मांसगुणाः ।

"पक्षिणाञ्च महाश्रेष्ठो लावको जाङ्गलात्मकः ।
संग्राही दीपनः प्रोक्तः कषायो मधुरो लघुः ।
तथा विपाके मधुरः सन्निपातेऽतिपूजितः ॥"

इति हारीते प्रथमे स्थाने एकादशेऽध्याये ॥

यथा, सुश्रुते । ४ । ३६ ।

"विरिक्तवान्तैर्हरिणैर्लावकाः
प्रग्राह्य सेयः समयूरतित्तिरिः ॥"

लुनातीति । लू + ण्वुल् । छेदकः । यथा, मार्कण्डेये । ४६ । १६ ।

"यथा प्रागव्यापकः क्षेत्री पालको लावकस्तथा ॥")

लावणं, त्रि, (लवण + अण् ।) लवणेन संस्कृतम् । यथा,—

"सार्पिष्कं दाधिकं सर्पिर्दधिभ्यां संस्कृतं क्रमात् ।
लवणोदकाभ्यामुदकं लावणिकमुदश्चिति ।
औदश्वितमौदश्वित्कं लवणे स्यात्तु लावणम् ॥"

इति हेमचन्द्रः ॥

लवणसम्बन्धि च । (यथा, हरिवंशे । ५३ । २० ।

"स मां परिभवन्नेव खां वेलां समुपाक्रमत् ।
क्षोदयामास चपलैर्लावणैरम्बुविस्रवैः ॥")

नस्ये, क्ली । इति रत्नमाला ॥

लावणिकं, त्रि, (लवण + ठञ् ।) लवणेन संस्कृतम् । इति हेमचन्द्रः ॥ लवणसम्बन्धि च । लवणविक्रेतरि, पुं । (यथा, माघे । १० । ३८ ।

"लीलयैव सुतनोस्तुलयित्वा
गौरवाढ्यमपि लावणिकेन ॥")

लवणपात्रे, क्ली । इति केचित् ॥

लावण्यं, क्ली, (लवण + ष्यञ् ।) लवणत्वम् । लवणस्य भाव इत्यर्थे ष्यञ्प्रत्ययेन निष्पन्नम् । (लवणा त्विट् विद्यते यस्येति लवणः । अर्शआदिभ्योऽच् । तस्य भावः । दृढादित्वात् ष्यञ् । यद्वा, लवणा त्विट् सैव । चतुर्वर्णादित्वात् स्वार्थे ष्यञ् ।) सौन्दर्य्यविशेषः । तस्य लक्षणं यथा,—

"मुक्ताफलेषु च्छायायास्तरलत्वमिवान्तरा ।
प्रतिभाति यदङ्गेषु तल्लावण्यमिहोच्यते ॥"

इत्युज्ज्वलनीलमणिः ॥

तथा हि ।

"नीतिभूमिभुजां नतिर्गुणवतां क्षीरङ्गनानां धृतिः
दैन्यत्यौ स्निग्धो गृहस्य कविता बुद्धेः प्रसादो गिराम् ।
लावण्यं वपुषः स्मृतिस्तु मनसा ग्लानिर्द्विजस्य क्षमा
मुक्तस्य द्रविणं गृहाश्रमवतां स्वाध्यं सतां मज्जनम् ॥"

इति नवरत्नान्तर्गतामरसिंहः ॥

(शीलनैपुण्यादि । अस्य प्रमाणं लावण्यार्जितशब्दे द्रष्टव्यम् ॥)

लावण्यार्जितं, क्ली, (लावण्येन अर्जितम् ।) विवाहकालीनं श्वशुराभ्यां दत्तं धनम् । यथा,—

"प्रीत्या दत्तञ्च यत्किञ्चित् श्वश्वा वा श्वशुरेण वा ।
पादवन्दनिकं यत्तल्लावण्यार्जितमुच्यते ॥"

इति विवादचिन्तामणिधृतकात्यायनवचनम् ॥ लावण्यं शीलनैपुण्यादि । तथा च पादप्रणतायै शीलादिमत्यै वा स्त्रियै श्वशुरादिना दत्तं तृतीयं स्त्रीधनमित्यर्थः । इति तद्व्याख्यानम् ॥

लावा, स्त्री, (लाव + टाप् ।) पक्षिविशेषः । तत्पर्य्यायः । लावकः २ लावः ३ लवः ४ । अस्या मांसगुणाः । पथ्यत्वम् । बाह्यत्वम् । लघुत्वञ्च । इति राजनिर्घण्टः ॥

लावुः, लावूः, } स्त्री, अलाबुः । इति शब्दरत्नावली ॥

लासः, पुं, (लस् + घञ् ।) नृत्यमात्रम् । स्त्रीणां नृत्यम् । इति शब्दरत्नावली ॥ (यथा, ऋतुसंहारे । ६ । ३१ ।

"मदनजनितलासैर्दृष्टिपातैर्मुनीन्द्रान्
स्तनभरनतनार्यः कामयन्ति प्रयान्तान् ॥")

यूषः । इति शब्दचन्द्रिका ॥

लासकं, क्ली, (लसतीति । लस + ण्वुल् ।) मद्दकम् । इति हारावली ॥ मटका इति भाषा ॥

लासकः, पुं, (लसतीति । लस + ण्वुल् ।) लास्यकारी । मयूरः । लसकः । इति मेदिनी । के, ॥ वेष्टः । इति धरणिः ॥ (दौग्धिकारकः । यथा, ऋतुसंहारे । २ । २६ ।

"नवजलकणसेकाच्छीततामादधानः
कुसुमभरनतानां लासकः प्रादपानाम् ॥")
लासकी, स्त्री, नर्त्तकी। इत्यमरः॥
लासिका, स्त्री, (लासोऽस्त्यस्या इति। लास+ठन्।) नर्त्तकी। इत्यमरः॥
लास्फोटनी, स्त्री, आस्फोटनी। वेधनिका। इत्यमरटीकायां रायमुकुटः॥
लास्यं, क्ली, (लस्+"ऋहलोर्ण्यत्।" ३।१।१२४। इति ण्यत्।) नृत्यम्। इत्यमरः॥ तौर्य्यत्रिकम्। इति मेदिनी॥ भावाश्रयं नृत्यम्। ताललयाश्रयं नृत्यम्। इति भरतः॥
"पुंनृत्यं ताण्डवं प्राहुः स्त्रीनृत्यं लास्यमुच्यते।"
इति सङ्गीतनारायणे नारदसंहिता॥
(यथा, महाभारते। १। ६८। १०।
"सम्भोगक्लेदचातुर्य्यैर्हावलास्यमनोहरैः।
राजानं रमयामास तथा रेमे तथैव सः॥")
लास्यः, पुं, (लास्यमस्त्यस्येति। लास्य+अच्।) नर्त्तकः। इति शब्दरत्नावली॥
लास्यकं, क्ली, (लास्यमेव। स्वार्थे कन्।) नृत्यम्। इति शब्दरत्नावली॥
लास्या, स्त्री, (लास्यमस्त्यस्या इति। लास्य+अच्। टाप्।) नर्त्तकी। इति शब्दरत्नावली॥
लिकुचं, क्ली, (लक्यते आस्वाद्यते इति। लक्+बाहुलकात् उचः। पृषोदरादित्वात् इत्वम्।) चुक्रम्। इति राजनिर्घण्टः॥ (डहुः। अस्य गुणा यथा,—
"पित्तश्लेष्मप्रकोपीणि कर्कन्धुलिकुचान्यपि॥"
इति चरके सूत्रस्थाने २७ अध्याये॥)
लिकुचः, पुं, लकुचः। इत्यमरः॥
लिक्का, स्त्री, लिक्षा। इति शब्दरत्नावली॥
लिक्षा, स्त्री, (लिक्ष् गतौ+बाहुलकात् सः। सच कित्। इत्युणादिवृत्तौ उज्ज्वलः। ३। ६६।) यूकाण्डम्। इत्यमरः॥ लिक्षि इति भाषा। इत्यमरभरतौ॥ तत्पर्य्यायः। लिक्षा २ लीक्षा ३ लीक्षा ४ लिक्षिका ५। इति शब्दरत्नावली॥ (यथा,—
"बहुपादाश्च सूक्ष्माश्च यूका लिक्षाश्च नामतः॥"
इति वाभटे निदानस्थाने चतुर्दशोऽध्याये॥)
परिमाणविशेषः। यथा,—
"त्रसरेणवस्तु अष्टौ स्युर्लिक्षैका परिकीर्त्तिता।
ते त्रयश्च भवेल्लिक्षा लिक्षाषड्भिश्च सर्षपः॥"
इति शब्दचन्द्रिका॥
सयकारककवर्गद्वितीयवतीत्यपि पाठः॥
लिख, ङ क्षपि। इति कविकल्पद्रुमः॥ (भ्वा०-पर०-सक०-सेट्।) ङ, लिक्षति। क्षपि गतौ। इति दुर्गादासः॥
लिख, प्र लेखने। इति कविकल्पद्रुमः॥ (तुदा०-पर०-सक०-सेट्।) प्र, लिखति पुस्तकं लेखकः। अयं विभाषया कुटादिरिति केचित्। तेन लिखितं विस्मरणोऽपि प्रवृत्तिहानिरिति। लिखितव्यं लेखितव्यं लिखनं इत्यादि सिद्धम्। इति दुर्गादासः॥

लिखः, त्रि, (लिखतीति। लेख+"इगुपधज्ञेति।" ३।१।१३५। इति कः।) लेखकः। इति लिखधातोः कप्रत्ययेन निष्पन्नम्॥
लिखनं, क्ली, लेखनम्। लिपिः। इत्यमरटीकायां भारतसुन्दरी॥ (यथा, मार्कण्डेये। ५१। २२।
"प्रसिद्धमन्त्रलिखनात् प्रश्नमाख्यादिधारणात्।
विशुद्धगेहावसथादनायासाच्च वै द्विज!॥")
विधिलिपिरखण्डनीया यथा,—
"यस्य यल्लिखनं पूर्वं यत्र काले निरूपितम्।
तदेव खण्डितुं राधे चन्द्रे नाहञ्च को विधिः॥
विधातुश्च विधाताहं येषां यल्लिखनं कृतम्।
ब्रह्मादीनाञ्च चुद्राणां न तत् खण्डं कदाचन॥"
इति ब्रह्मवैवर्त्ते श्रीकृष्णजन्मखण्डे १५ अध्यायः॥
लिखितं, क्ली, (लिख+भावे क्तः।) लिपिः। इत्यमरः॥ लेखनम्। इति भरतः॥ (लिख+कर्म्मणि क्तः।) लिखितपत्रादौ, त्रि। यथा,—
"प्रमाणं लिखितं भुक्तिः साक्षिणश्चेति
कीर्त्तितम्॥"
इति मिताक्षरायां याज्ञवल्क्यः॥
मुनिविशेषे, पुं। यथा, आह्निकतत्त्वे याज्ञवल्क्यः॥
"पराशरव्यासशङ्खलिखिता दक्षगौतमौ।
शातातपो वशिष्ठश्च धर्म्मशास्त्रप्रयोजकाः॥"
लिखा, स्त्री, परिमाणविशेषः। यथा,—
"जालान्तरगते भानौ यच्चाणुर्दृश्यते रजः।
तेश्चतुर्भिर्भवेल्लिक्षा लिक्षाषड्भिश्च सर्षपः॥"
इति शब्दचन्द्रिका॥
लिग, इ गतौ। इति कविकल्पद्रुमः॥ (भ्वा०-पर०-सक०-सेट्।) इ, लिङ्गते। इति दुर्गादासः॥
लिग, इ क चित्रे। इति कविकल्पद्रुमः॥ (चुरा०-पर०-सक०-सेट्।) इ क, लिङ्गयति शब्दं स्त्रीनपुंसकैः प्राब्दिकः चित्रं करोतीत्यर्थः। इति दुर्गादासः॥
लिङ्गु, क्ली, (लिङ्गति विषयात् विषयान्तरं गच्छतीति। लिग+"खरुग्लुकुपीङ्गुनीलङ्गुलिङ्गु।" उणा० १। ३७। इति कुप्रत्ययेन साधु।) मनः। इति सिद्धान्तकौमुद्यामुणादिवृत्तिः॥
लिङ्गुः, पुं, (लिग+कुः।) स्वर्गः। इति सिद्धान्तकौमुद्यामुणादिवृत्तिः॥ भूप्रदेशः। स्वगः। इति नानार्थरत्नमाला॥
लिङ्गं, क्ली, (लिङ्गते अनेन इति। लिङ्ग+घञ्। अभिधानात् क्लीवलिङ्गत्वम्।) चिह्नम्। (यथा, महाभारते। १। २। १२।
"येन लिङ्गेन यो देशो युक्तः समुपलक्ष्यते।
तेनैव नाम्ना तं देशं वाच्यमाहुर्मनीषिणः॥")
शेफः। इत्यमरः॥ अनुमानम्। साङ्ख्योक्त-प्रकृतिः। (यथा, सांख्यकारिकायाम्। ५५।
"तत्र जरामरणकृतं दुःखं प्राप्नोति चेतनः
पुरुषः।
लिङ्गस्याविनिवृत्तेस्तस्माद्दुःखं स्वभावेन॥"
प्रकृतिकार्य्यं विकृतिश्च। यथा, तत्रैव। १०।
"हेतुमदनित्यमव्यापि सक्रियमनेकमाश्रितं
लिङ्गम्।
सावयवं परतन्त्रं व्यक्तं विपरीतमव्यक्तम्॥"
विशेषस्तु तत्र द्रष्टव्यः।) शिवमूर्त्तिविशेषः। इति मेदिनी। गे, २३॥ व्याप्यम्। व्यक्तम्। पुंस्त्वादिः। इति त्रिकाण्डशेषः॥ (यथा, मनुः। ५। १३६।
"एका लिङ्गे गुदे तिस्रस्तथैकत्र करे दश।
उभयोः सप्त दातव्या मृदः शुद्धिमभीप्सता॥")
सामर्थ्यम्। यथा,—
"यावतामेव धातूनां लिङ्गं रूढ़िगतं भवेत्।
अर्थस्यैवाभिधेयस्तु तावल्लिङ्गविग्रहः॥"
इति तिथ्यादितत्त्वे एतत्कारिकाव्याख्यायां रघुनन्दनः॥ * ॥ अथ शेफार्थस्य लिङ्गस्य पर्य्यायः। शिश्नः२ खरस्तम्भः ३ उपस्थः ४ मदनाङ्कुशः ५ कन्दर्पसुषलः ६ शेफः ७ मेहनम् ८ शेफः [सृ]६ मेढ्रः १० लांगुः ११ ध्वजः ११ रागलता १३ यज्ञः १४। इति शब्दरत्नावली॥ लाङ्गूलम् १५ साधनम् १६ शेफः १७ कामाङ्कुशः १८। इति जटाधरः॥ * ॥ लिङ्गमूले वादिलान्तवर्णयुक्त-स्वाधिष्ठाननामकषड्दलपद्ममस्ति। यथा,—
"मूलाधारे त्रिकोणाख्ये इच्छाज्ञानक्रियात्मके।
मध्ये स्वयम्भूलिङ्गन्तु कोटिसूर्य्यसमप्रभम्॥
तदाह्ये हेमवर्णाभं व स वर्णचतुर्दलम्।
तदूर्द्धे शिखिसमप्रख्यं षड्दलं हीरकप्रभम्॥
वादिलान्तषड्वर्णैर्न युक्तञ्चाधिष्ठानसंज्ञकम्।
स्वशब्देन परं लिङ्गं स्वाधिष्ठानं ततो विदुः॥"
इति तन्त्रम्॥*॥
अस्याधिष्ठातृदेवतादिर्यथा।
"प्रजनः सर्व्वभूतानामुपस्थोऽध्यात्ममुच्यते।
अधिभूतं तथा शुक्रं दैवतञ्च प्रजापतिः॥"
इति महाभारते आश्वमेधिकपर्व्व॥ * ॥
अस्य शुभाशुभलक्षणं यथा,—
"स्वल्पे लिङ्गे च धनवान् स्याच्च पुत्रादि-
वर्জ্জितः।
स्थूललिङ्गो दरिद्रः स्याद्दुःखैकदृषणो भवेत्॥"
इति गारुड़े ६३ अध्यायः॥ * ॥
अपि च।
"मज्जशिरायुराख्यातं स्वल्पलिङ्गो धनी नरः।
अपत्यरहितश्चैव स्थूललिङ्गो धनोज्झितः॥"
मज्जशिरायुभिरिति शेषः।
"मेढ्रे वामनते चैव सुतान्नरहितो भवेत्।
वक्रेऽन्यथा पुत्रवान् स्यात् दारिद्र्यं विनते
त्वधः॥
अल्पे तु तनयो लिङ्गे शिराले२ऽथ सुखी नरः।
स्थूलग्रन्थियुते लिङ्गे भवेत् पुत्रादिसंयुतः॥"
इति गारुड़े ६६ अध्यायः॥
अन्यच्च।
"दीर्घलिङ्गेन दारिद्र्यं स्थूललिङ्गेन निर्द्धनः।
शुक्ललिङ्गेन सौभाग्यं कृष्णलिङ्गेन भूपतिः॥
कर्कशैः कठिनैर्लिङ्गैः परदाररतः सदा।
रमते च सदा दारौ निर्द्धनो भवति ध्रुवम्॥
शुक्ललिङ्गेन सूक्ष्मेण रक्तलिङ्गेन भूपतिः।
परस्त्रीं रमते नित्यं नारीणां वल्लभो भवेत्॥
शुक्ललिङ्गेन रक्तेन लभते चोत्तमाङ्गनाम्।

राज्यं सुखञ्च दिव्याङ्गाः कन्यकायाः पति-
र्भवेत् ॥'
इति वासुदेवकम् ॥
ग्रिवस्य लिङ्गरूपस्य तन्निर्माल्याग्राह्यत्वस्य च कारणं यथा,—
दिलीप उवाच ।
"देवि स्नातं द्विजश्रेष्ठ ! रुद्रस्त्रिपुरहन्तकः ।
कस्माद्विगर्हितं रूपं प्राप्तवान् सह भार्यया ॥
योनिलिङ्गस्वरूपञ्च कथं स्यात् सुमहात्मनः ।
पञ्चवक्त्रश्चतुर्बाहुः शूलपाणिस्त्रिलोचनः ॥
कथं विगर्हितं रूपं प्राप्तवान् द्विजपुङ्गव ! ।
एवं सर्व्वं समाचक्ष्व मित्रावरुणनन्दन ॥
श्रीवशिष्ठ उवाच ।
शृणु राजन् प्रवक्ष्यामि यन्मां पृच्छसि गौरवात् ।
स्वायम्भुवो मनुः पूर्व्वं मन्दरे पर्व्वतोत्तमे ॥
दयाज मुनिभिः सार्द्धं दीर्घसत्रमनुत्तमम् ।
तस्मिन् समागताः सर्व्वे मुनयः शंसितव्रताः ॥
अन्वेष्टुं देवतातत्त्वं मिथः प्रोचुस्तपोधनाः ।
विप्राणां वेदविदुषां कः पूज्यो देवतावरः ॥
इति तस्य वचः श्रुत्वा सर्व्व एव महर्षयः ।
भृगुं तपोनिधिं विप्रं प्रोचुः प्राञ्जलयस्तदा ॥
ऋषय ऊचुः ।
अस्माकं संशयं छेत्तुं समर्थोऽसि शुभव्रत ।
ब्रह्मविष्णुमहेशानामधिकं व्रज सुव्रत ॥
गत्वा तेषां समीपन्तु तथा दृष्ट्वा च विग्रहान् ।
शुद्धसत्त्वगुणस्तेषां यस्मिन् संविद्यते मुने ! ॥
स एव पूज्यो विप्राणां नेतरस्तु कदाचन ।
तस्मात् त्वं हि मुनिश्रेष्ठ विबुधानां निरासनम् ॥
क्षिप्रं कुरु मुनिश्रेष्ठ सर्व्वलोकहितं प्रभो ॥
एवमुक्तस्ततस्तूर्णं कैलासं मुनिसत्तमः ।
जगाम वामदेवेन यत्रास्ते वृषभध्वजः ॥
गृहद्वारमुपागम्य शङ्करस्य महात्मनः ।
शूलहस्तं महारौद्रं नन्दिं दृष्ट्वाब्रवीद्भृगुः ॥
संप्राप्तो हि भृगुर्विप्रो हरं द्रष्टुं सुरोत्तमम् ।
निवेदयस्व मां शीघ्रं शङ्कराय महात्मने ॥
तस्य तद्वचनं श्रुत्वा नन्दी सर्व्वगणेश्वरः ।
उवाच परमं वाक्यं महर्षिममितौजसम् ॥
असान्निध्यः प्रभोस्तस्य देव्या क्रीडति शङ्करः ।
निवर्त्तस्व निवर्त्तस्व यदि जीवितुमिच्छसि ॥
एवं निराकृतस्तेन तत्रातिष्ठन्महातपाः ।
बहूनि दिवसान्यस्मिन् गृहद्वारे मुनीश्वरः ॥
ततः क्रोधसमाविष्टो भृगुः प्रोवाच शङ्करम् ।
विगर्हितमसारूढो मां न जानाति शङ्करः ॥
नारीसङ्गममत्तोऽसौ यस्माच्चामवमन्यते ।
योनिलिङ्गस्वरूपं वै रूपं तस्माद्भविष्यति ॥
ब्राह्मणं मां न जानाति तमसा चाप्युपागतः ।
अब्रह्मण्यत्वमापन्नो न पूज्योऽसौ द्विजन्मनाम् ॥
तस्मान्न जलमन्तु तस्मै दत्तं हविस्तथा ।
ग्रिवस्यान्नं जलञ्चैव पत्रं पुष्पं फलादिकम् ॥
निर्म्माल्यमस्य चाग्राह्यं भविष्यति न संशयः ॥
एवं शप्त्वा महातेजाः शङ्करं लोकपूजितम् ।
उवाच गणमत्युग्रं नन्दिं शूलधरं नृप ! ॥

रुद्रभक्ताश्च ये लोके भस्मलिङ्गास्थिधारिणः ।
ते पाषण्डत्वमापन्ना वेदबाह्या भवन्ति वै ॥
एवं शप्त्वा मुनिस्तत्र रुद्रं त्रिपुरहन्तकम् ।
जगाम ब्रह्मलोकं वै सर्व्वलोकनमस्कृतम् ॥"
इति पाद्मोत्तरखण्डीयाष्टसप्ततितमाध्यायात् सङ्कलितम् ॥* ग्रिवलिङ्गस्य पूजाधारत्वं यथा,
"पूजास्थानानि वक्ष्यामि यस्मिन् सान्निध्यतां व्रजेत् ।
लिङ्गस्थां पूजयेद्देवीं स्थण्डिलस्थां तथैव च ।
पुस्तकस्थां महादेवीं पादुके प्रतिमासु च ॥
तल्लिङ्गमाश्रयेन्नित्यं शुक्राद्यैर्यत् प्रतिष्ठितम् ।
कचाद्यैर्यत् कृतं लिङ्गं वर्ज्जनीयन्तु साधकैः ॥
अल्पसौख्यप्रदं प्रोक्तं वेदमन्त्रैः प्रतिष्ठितम् ।
सावित्रकारन्तु सल्लिङ्गं भुक्तभोगं तथैव च ।
ज्ञातव्यं साधकेन्द्रेण सिद्धिदञ्चाप्यसिद्धिदम् ॥
देव्युवाच ।
सावित्रकारन्तु यल्लिङ्गं मन्त्रहीनं प्रतिष्ठितम् ।
निर्वर्त्तितविकारञ्च स्वयम्भु स्वयम्भवम् ॥
कुर्व्वन्ति भक्तिवात्सल्यं लोकानां वासनात्मकम् ।
दुर्विज्ञेयमिदं ज्ञानं योगिनामप्यगोचरम् ॥
मर्त्यैर्जडधियैर्नाथ कथं विज्ञायते विभो ॥
ईश्वर उवाच ।
साधु साधु महादेवि ! रहस्यमिदमुत्तमम् ।
यत्त्वया चोदितं भद्रे ! तत्तथैव न चान्यथा ॥
दुर्विज्ञेयं सुरैश्चापि किं पुनर्मनुजन्तुभिः ।
आधिष्ठ्य साधकः चैनं हृदयानन्दकारकम् ॥
इन्द्रियाणाञ्च औत्सुक्यं ददामि लिङ्गदर्शने ।
सेव्यमानं ततो लिङ्गं नित्यमानन्ददायकम् ॥
सुखप्राप्तं पश्यते नित्यं विमानस्थां वराङ्गनाम् ।
भैरवं पश्यते नित्यं क्रीड़न्तं माल्यमण्डले ॥
उमामहेश्वरञ्चापि स्वप्ने पश्यति साधकः ।
अनिवर्त्तिताधिकारं लिङ्गं त्रिभुवनेश्वरि ! ।
आक्रमन्ति महाविघ्नाः सदैत्या राक्षसादयः ॥
शून्यागारं यथा देवि ! आक्रमन्ति नराः प्रिये ।
अनर्चितन्तु भुञ्जन्ति तथा लिङ्गन्तु कल्पगा ॥
प्रेतं यथा सुराधत्ते आक्रमन्ति पिशाचकाः ।
शून्यञ्च यल्लिङ्गन्तु आश्रयन्ति तथा प्रिये ॥"
इत्यादौ देवीपुराणे नन्दाकुण्डप्रवेशाध्यायः ॥*॥
अथ लिङ्गलक्षणम् ।
तत्र बाणलिङ्गस्य लक्षणं यथा,—
"बाणलिङ्गं तथा ज्ञेयं भुक्तिमुक्तिप्रदायकम् ।
उत्पत्तिं बाणलिङ्गस्य लक्षणं शेषतः शृणु ॥
नर्म्मदादेविकायाञ्च गङ्गायमुनयोस्तथा ।
सन्ति पुण्यनदीनाञ्च बाणलिङ्गानि यत्मुखे ॥
इन्द्रादिपूजितान्यत्र तच्चिह्नैर्विहितानि च ।
सदा सन्निहितस्तत्र ग्रिवः सर्व्वार्थदायकः ॥
इन्द्रलिङ्गानि तान्याहुः साक्षाच्चार्थप्रदानि च ॥"
अथार्षलिङ्गलक्षणम् ।
"आरुणं हित्वकीलालसुधाखण्डं करोत्यलम् ।
आर्षेयं तत् शुक्तिनिभमथवा शुक्तिलाञ्छितम् ॥
इदं लिङ्गवरं ख्यात्य तेजसाधिपतिर्भवेत् ॥" * ॥

अथ याम्यलिङ्गलक्षणम् ।
"दक्षाकारं भवेद्याम्यमथवा रसनाकृति ।
यद्यदुक्तं सह तैर्न निर्मितं ज्ञायते तदा ।
निर्मितं निधनं तेन क्रियते स्थापितेन तु ॥"*॥
अथ नैर्ऋतलिङ्गलक्षणम् ।
"राक्षसं खड्गसदृशं ज्ञानयोगफलप्रदम् ।
कर्कशादिप्रलिप्तन्तु कुण्डकुक्षियुतं तथा ।
राक्षसं निष्कृते लिङ्गं गार्हस्थे न सुखप्रदम् ॥"
अथ वारुणलिङ्गलक्षणम् ।
"वारुणं वर्त्तुलाकारं पाशाङ्कं चालिवर्च्चसम् ।
दृद्धिर्मुखादेः दुःखत्वं संभोगाग्नन्तु मध्यगे ॥"
अथ वायुलिङ्गलक्षणम् ।
"क्षणं धूम्रं न वारुव्यं ध्वजाभं ध्वजसन्निभम् ।
मस्तके स्थापितं तस्य न्यूनन्यूनमितस्ततः ॥"*॥
अथ कुबेरलिङ्गलक्षणम् ।
"तूणपाशगदाकारं गुह्यकेशस्य मध्यगम् ।"
अथ रौद्रलिङ्गलक्षणम् ।
"दिनं वाप्यथवा रात्रिं सप्तोर्णं रविवर्च्चसम् ।
अस्थिशूलाङ्कितं रौद्रं हेमकुण्डलवर्च्चसम् ॥"
अथ वैष्णवलिङ्गलक्षणम् ।
"चतुर्व्वर्णमयं वापि वैष्णवं ज्ञायतेऽथतः ।
वैष्णवं शङ्खचक्राङ्कगदाब्जादिविभूषितम् ॥
श्रीवत्सं कौस्तुभाङ्कञ्च सर्व्वसिंहासनाङ्कितम् ।
वैनतेयसमाङ्कं वा तथा विष्णुपदाङ्कितम् ॥
वैष्णवं नाम तत् प्रोक्तं सर्व्वैश्वर्य्यफलप्रदम् ।
ग्रासत्रयादिसंस्थन्तु शङ्खाङ्कं श्रीविवर्द्धनम् ॥
पद्माङ्कं स्वस्तिकाङ्कं वा श्रीवत्साङ्कं विभूतये ॥"
इति वीरमित्रोदयधृतकालोत्तरः ॥ * ॥
नारद उवाच ।
"अथ वक्ष्यामि ते विप्र चिह्नमेकादशं परम् ।
श्रवणादस्य पापानि नाशमायान्ति तत्क्षणात् ॥
मधुपिङ्गलवर्णाभं कृष्णकुञ्चितिकायुतम् ।
स्वयम्भुलिङ्गमाख्यातं सर्व्वसिद्धैर्निषेवितम् ॥
नानावर्णसमाकीर्णं जटाशूलसमन्वितम् ।
मृत्युञ्जयाख्यं लिङ्गं सुरासुरनमस्कृतम् ॥
दीर्घाकारं शुभ्रवर्णं कृष्णबिन्दुसमन्वितम् ।
नीलकण्ठं समाख्यातं लिङ्गं पूज्यं सुरासुरैः ॥
शुक्लाभं शुक्लकेशञ्च नेत्रत्रयसमन्वितम् ।
त्रिलोचनं महादेवं सर्व्वपापप्रमोदनम् ॥
ज्वललिङ्गं जटाजूटं कृष्णाभं स्थूलविग्रहम् ।
कालाग्निरुद्रमाख्यातं सर्व्वसत्त्वैर्निषेवितम् ॥
मधुपिङ्गलवर्णाभं श्वेतयज्ञोपवीतिनम् ।
श्वेतपद्मसमासीनं चन्द्ररेखाविभूषितम् ॥
प्रलयाख्यसमायुक्तं त्रिपुरारिसमाश्रयम् ।
शुभ्राभं पिङ्गलजटं मुक्ताभाधरं परम् ॥
त्रिशैलधरमीशानं लिङ्गं सर्व्वार्थसाधनम् ।
त्रिशूलडमरुधरं शुक्लरक्तार्द्धभागतः ॥
अर्द्धनारीश्वराङ्गानं सर्व्वदेवैरभिष्टुतम् ।
ईषद्रक्तमयं कान्तं स्थूलं लिङ्गं वसुच्छदम् ॥
महाकालं समाख्यातं धर्म्मकामार्थमोक्षदम् ।
एतत्तु कथितं तुभ्यं लिङ्गचिह्नं महेश्वरतः ।

एकेनैव कृतार्थः स्यात् बहुभिः किमु सुव्रत ॥"
इति हेमाद्रिधृतलक्षणकाण्डम् ॥ * ॥
"उत्तराङ्गं श्रेयसे योन्यं श्रीषमन्नं विवर्ज्जयेत् ।
यमवर्णन्तु यल्लिङ्गं यमाङ्कं वा कमण्डलुम् ॥
दण्डाङ्कं खड्गचिह्नं वा ब्रह्मज्ञानान्वितं मतम् ।
अग्निवर्णं महाकालं नन्दीशं पद्मरागवत् ॥
पद्मरागनिभं सर्व्वं महाभं सिद्धपूजितम् ।
मौक्तिकाभं नीलनिभं रुद्रादित्यैः प्रपूजितम् ॥
वसुदैः सेन्द्रयक्षैश्च गुह्यकैर्यातुधानकैः ।
नानावर्णमयं नीलं शुभ्राङ्कमण्डलप्रभम् ॥"
इति वीरमित्रोदयधृतकालोत्तरः ॥
इति बाणलिङ्गलक्षणम् ॥ * ॥
अथ तस्य परीक्षा ।
"इत्येतल्लक्षणं प्रोक्तं परीक्षा तत्त्वकोविदैः ।
त्रिः सप्त पञ्च वारं वा तुलासाम्यं न जायते ।
तदा बाणं समाख्यातं श्रेष्ठं पाषाणसम्भवम् ॥"
इति वीरमित्रोदयधृतम् ॥
तुलाकरणन्तु तण्डुलेन । अपरतुलादिषु तण्डुला यद्यधिकाः स्युस्तदा तल्लिङ्गं गृहिणां पूज्यमवधार्य्यं लिङ्गच्छेदधिकं तदोदासीनपूज्यमदिति किं वदन्तीति हेमाद्रिधृतलक्षणकाण्डम् ॥
"सप्तकृत्वस्तुलारूढं वृद्धिमेति न हीयते ।
बाणलिङ्गमिति ख्यातं श्रेष्ठं नार्म्मदसुच्यते ॥
त्रिपञ्चवारं यस्यैव तुलासाम्यं न जायते ।
तदा बाणं समाख्यातं श्रेष्ठं पाषाणसम्भवम् ॥"
इति स्कन्दसंहिता ॥
"नद्यां वा प्रक्षिपेद्भूयादयदा तदुपलभ्यते ।
बाणलिङ्गं तदा विद्धि न्यूनं सुखविवर्द्धनम् ॥"
इति वीरमित्रोदयः ॥ * ॥
बाणशब्दव्युत्पत्तिरपि तत्रैव ।
"अथ बाणं समाख्यातं यथा वक्ष्ये तथादितः ।
बाणः सदाशिवो देवो बाणो बाणान्तरोऽपि च ॥
तेन यस्मै कृतं तस्मात् बाणलिङ्गमुदाहृतम् ।
सदा सन्निहितस्तत्र शिवः सर्व्वार्थदायकः ॥
स्कन्दप्रतिष्ठं तल्लिङ्गं बाणाख्येन शिवेन च ।
पङ्कजस्य फलाकारं कुण्डलस्य समाकृति ॥
मुक्तिमुक्तिप्रदत्वेव बाणलिङ्गमुदाहृतम् ॥"
पङ्कजफलं पद्मबीजम् ।
"पङ्कजम्बुफलाकारं कुक्कुटाण्डसमाकृति ।"
इति हेमाद्रिधृतलक्षणकाण्डे पाठः ॥ * ॥
देवीं प्रति शिववाक्यम् ।
"प्रशस्तं बार्म्मदं लिङ्गं पङ्कजम्बुफलाकृति ।
मधुवर्णं तथा शुक्लं नीलं मरकतप्रभम् ॥
हंसडिम्बाकृति पुनः स्थापनार्थं प्रशस्यते ।
स्वयं संभवते लिङ्गं गिरितो नर्म्मदाजले ॥
पुरा बाणासुरेणाहं प्रार्थितो नर्म्मदातटे ।
आविरासं गिरौ तत्र लिङ्गरूपी महेश्वरः ।
बाणलिङ्गमपि ख्यातमतोऽर्थाच्छगतीतले ॥
अन्येषां कोटिलिङ्गानां पूजने यत् फलं लभेत् ।
तत् फलं लभते मर्त्यो बाणलिङ्गैकपूजनात् ॥"

तथा,—
"ताम्री वा स्फाटिकी स्वार्णी पाषाणी राजती तथा ।
वैदिका च प्रकर्त्तव्या तत्र संस्थाप्य पूजयेत् ॥"*॥
प्रत्यहं योऽर्चयेल्लिङ्गं नार्म्मदं भक्तिभावतः ।
ऐहिकं किं फलं तस्य मुक्तिस्तस्य करे स्थिता॥"
इति प्रत्यहबाणलिङ्गपूजायाः फलम् । इति याज्ञवल्क्यसंहिता ॥ * ॥
"संस्थाप्य श्रीबाणलिङ्गं रत्नकोटिगुणं भवेत् ।
रसलिङ्गे ततो बाणात् फलं कोटिगुणं स्मृतम् ॥
गुणांस्तु रसलिङ्गस्य वक्तुं शक्नोति शङ्करी ।
सिद्धयो रसलिङ्गे स्युरणिमाद्याः सुसंस्थिताः ॥"
इति स्मृतसंहिता ॥ * ॥
"रत्नधातुमयान्येव लिङ्गानि कथितान्यपि ।
पवित्राण्येव पूज्यानि सर्व्वकामप्रदानि च ॥
एतेषामपि सर्व्वेषां काश्मीरं हि विशिष्यते ।
काश्मीरादपि लिङ्गाच्च बाणलिङ्गं विशिष्यते ॥
बाणलिङ्गात् परं नान्यत् पवित्रमिह दृश्यते ।
ऐहिकामुष्मिकं सर्व्वं पूजाकर्त्तुः प्रयच्छति ॥"
इति बाणलिङ्गप्रशंसा । इति केदारखण्डम् ॥*॥
निन्द्यलिङ्गमाह तत्रैव ।
"कर्कशे बाणलिङ्गे तु पुत्रदारक्षयो भवेत् ।
चिपिटे पूजिते तस्मिन् गृहभङ्गो भवेद्ध्रुवम् ॥
एकपार्श्वस्थिते धेनुपुत्रदारधनक्षयः ।
शिरसि स्फुटिते बाणे व्याधिभिर्मरणमेव च ॥
छिन्नलिङ्गेऽर्चिते बाणे विदेशगमनं भवेत् ।
लिङ्गे च कर्णिकां दृष्ट्वा व्याधिमान् जायते पुमान् ।
अत्युन्नतिं विलाग्रे तु गोधनानां क्षयो भवेत् ॥*
तीक्ष्णाग्रं वक्रशीर्षञ्च त्यजेल्लिङ्गं विवर्जयेत् ।
अतिस्थूलघातिलक्ष्मं खड्गं वा भूषणान्वितम् ।
गृही विवर्ज्जयेत्ताद्दक् तद्धि मोक्षार्थिनो हितम् ॥"
इति दुष्टबाणलिङ्गलक्षणम् । इति हेमाद्रिः ॥*॥
शुभलिङ्गमाह ।
"अर्थदं कपिलं लिङ्गं घनाभं मोक्षकाङ्क्षिणः ।
लघु वा कपिलं स्थूलं गृही नैवार्चयेत् क्वचित् ॥
पूजितव्यं गृहस्थेन वर्णेन भ्रमरोपमम् ।
तत् सपीठमपीठं वा मलसंस्कारवर्जितम् ।
सिद्धिमुक्तिप्रदं लिङ्गं सर्व्वप्रासादपीठगम् ॥"
इति शुभबाणलिङ्गलक्षणम् । इति वीरमित्रोदयः ॥ * ॥ बाणलिङ्गेष्वावाहनादि न कर्त्तव्यं यथा,—
"बाणलिङ्गानि राजेन्द्र ! स्थितानि भुवनत्रये ।
न प्रतिष्ठा न संस्कारस्तेषामावाहनं न च ॥"
इति भविष्यपुराणम् ॥
"ब्राह्मे मुहूर्त्ते चोत्थाय यः स्मरेद्बाणलिङ्गकम् ।
सर्व्वत्र जयमाप्नोति सत्यं सत्यं महेश्वर ! ॥"
इति योगसारे ५ परिच्छेदः ॥ * ॥
अथ बाणलिङ्गध्यानम् ।
"ॐ प्रसन्नं मुक्तिसंयुक्तं बाणाख्यञ्च महाप्रभम् ।

कामबाणान्वितं देवं संसारदहनक्षमम् ॥
हृङ्कारादिरसोल्लासं बाणाख्यं परमेश्वरम् ।
एवं ध्यात्वा बाणलिङ्गं यजेत्तं परमं शिवम् ॥
मनसा गन्धपुष्पाद्यैः संपूज्यास्य मनुं स्मरेत् ।
प्राणायामं ततः कृत्वा बाणलिङ्गन्तु तोषयेत् ॥
तदिष्टदेवयोरैक्यं विभाव्य वाग्भवं जपेत् ।
ततो जपं समाप्याथ स्तवेनानेन तोषयेत् ॥"*॥
अथ स्तवः ।
"बाणलिङ्ग महाभाग संसाराब्धेर्हि मां प्रभो
नमस्ते चोग्ररूपाय नमस्तेऽव्यक्तयोनये ॥
संसारकारिणे तुभ्यं नमस्ते स्थूलरूपधृक् ।
प्रमत्ताय महेन्द्राय कालरूपाय वै नमः ॥
दहनाय नमस्तुभ्यं नमस्ते योगकारिणे ।
भोगिनां भोगकर्त्रे च मोक्षदात्रे नमो नमः ॥
नमः कामाङ्गनाशाय नमः कल्मषहारिणे ।
नमो विश्वप्रदात्रे च नमो विश्वस्वरूपिणे ॥
वाणस्य वरदात्रे च रावणस्य क्षयाय च ।
रामस्यानुग्रहार्थाय राज्याय भरतस्य च ॥
मुनीनां योगदात्रे च राक्षसानां क्षयाय च ।
नमस्तुभ्यं नमस्तुभ्यं नमस्तुभ्यं नमो नमः ॥
ह्रीं दाहिकाशक्तियुक्ताय महामायाप्रियाय च ।
भगप्रियाय सर्व्वाय वैरिणां निग्रहाय च ॥
परित्राणाय योगिनां कौलिकानां प्रियाय च ।
कुलाङ्गनानां भक्ताय कुलाचाररताय च ॥
कुलभक्ताय योगाय नमो नारायणाय च ।
मधुपानप्रमत्ताय योगेशाय नमो नमः ॥
कुलनिन्दाप्रणाशाय कौलिकानां सुखाय च ।
कुलयोगाय निष्ठाय शुद्धाय परमात्मने ॥
परमात्मस्वरूपाय लिङ्गमूलात्मकाय च ।
सर्व्वेश्वराय सर्व्वाय शिवायं निर्गुणाय च ॥ * ॥
इत्येतत् परमं गुह्यं बाणलिङ्गस्य शङ्कर ।
यः पठेत् साधकश्रेष्ठो गाणपत्यं लभेत सः ॥
स्तवस्यास्य प्रसादेन योगी योगित्वमाप्नुयात् ।
राज्यार्थिनां भवेद्राज्यं भोगिनां भोग एव च ॥
साधूनां साधनं देव कौलिकानां कुलं भवेत् ।
यं यं कामयते मन्त्री तं तमाप्नोति कौलया ॥
बाणलिङ्गप्रसादेन सर्व्वमाप्नोति सत्वरम् ।
किमन्यत् कथयामीह सर्व्वं वेत्सि कुबेरज ! ॥
महाभये समुत्पन्ने राजद्वारे कुबेरज ! ।
देशान्तरभये प्राप्ते दस्युचौरादिसङ्कुले ।
पठनात् स्तवराजस्य न भयं लभते क्वचित् ॥
बाणलिङ्गस्य माहात्म्यं संक्षेपात् कथितं मया ।
तस्य श्रवणमात्रेण नरो मोक्षमवाप्नुयात् ॥
बाणलिङ्गं सदाराध्यं योगिनां योगसाधने ।
कौलिकानां कुलाचारे पशूनां ग्रहणिग्रहे ॥
वेदज्ञानां वेदपाठे रोगिणां रोगनाशने ।
यो यो नाराधयेदेनं सर्व्वं तन्निष्फलं भवेत् ॥"
इति श्रीयोगसारे सर्व्वागमोत्तमे पार्व्वतीशिवसंवादे बाणलिङ्गस्तोत्रं समाप्तम् ॥ * ॥
अथ रौद्रलिङ्गलक्षणम् ।
"नदीसङ्गमे रौद्रमन्योन्यस्य विघर्षणात् ।

नदीवेगात् समं स्निग्धं संजातं रौद्रमुच्यते ॥"
इति वीरमित्रोदयः ॥
"सरित्प्रवाहसंस्थानं वाणलिङ्गसमाकृति ।
तदन्यदपि बोद्धव्यं रौद्रलिङ्गं सुखावहम् ॥
नदीसारनर्म्मदाया वाणलिङ्गसमाकृति ।
तदन्यदपि बोद्धव्यं लिङ्गं रौद्रं भविष्यति ॥
रौद्रलिङ्गं तथाख्यातं वाणलिङ्गसमाकृति ।
श्वेतं रक्तं तथा पीतं कृष्णं विप्रादिपूजितम् ॥
स्वभावात् कृष्णवर्णं वा सर्व्वजातिषु सिद्धिदम् ।
नर्म्मदासम्भवं रौद्रं वाणलिङ्गवदीरितम् ॥"
इति रौद्रलिङ्गलक्षणम् । इति लक्षणसमुच्चयोऽपि॥
अथ शिवनाभिलिङ्गलक्षणम् ।
"उत्तमं मध्यमधमं त्रिविधं लिङ्गमीरितम् ।
चतुरङ्गुलमुत्सेधे रम्यवेदिकमुत्तमम् ॥
उत्तमं लिङ्गमाख्यातं मुनिभिः शास्त्रकोविदैः ।
तदर्द्धं मध्यमं प्रोक्तं तदर्द्धमधमं स्मृतम् ॥"
तस्य महिमा ।
"शिवनाभिमयं लिङ्गं प्रतिपूज्य महर्षिभिः ।
श्रेष्ठञ्च सर्व्वलिङ्गभ्यस्तस्मात् पूज्यं विशेषतः ॥"
इति शिवनाभिलिङ्गलक्षणम् । इति वीरमित्रो-
दयधृतशिवनारदसंवादः ॥ * ॥
अथ देवलिङ्गलक्षणम् । सिद्धान्तशेखरे ।
"करसंपुटसंस्पर्शं शूलटङ्केन्दुभूषितम् ।
रेखाकोटरसंयुक्तं निम्नोन्नतसमन्वितम् ॥
दीर्घाकारञ्च यल्लिङ्गं ब्रह्मभागादिवर्जितम् ।
लिङ्गं गोलमिति प्रोक्तं गोलकं प्रोच्यतेऽधुना ॥
कृष्माण्डस्य फलाकारं नागरङ्गफलोपमम् ।
काकडिम्बफलाकारं गोललिङ्गमितीरितम् ॥"
इति गोललिङ्गलक्षणम् ॥
अथार्षलिङ्गलक्षणं तत्रैव ।
"नानाकौलफलाकारं ब्रह्मसूत्रविवर्जितम् ।
मूले स्थूलञ्च यल्लिङ्गं कपित्थफलसन्निभम् ॥
नालस्य वा फलाकारं मध्ये स्थूलञ्च यद्भवेत् ।
मध्ये स्थूलं वरं लिङ्गमृषिवाणमुदाहृतम् ॥"
इत्यार्षलिङ्गलक्षणम् ॥*॥
अथ लिङ्गलक्षणम् ।
"लिङ्गं हि द्विविधं प्रोक्तं कृत्रिमाकृत्रिमभेदतः ।
तल्लिङ्गं द्विविधं ज्ञेयमचलञ्च चलन्तथा ।
प्रत्येकं त्रिविधं ज्ञेयं लिङ्गं तदुभयात्मकम् ॥
प्रासादे स्थापितं लिङ्गमचलं तल्लिलादिजम् ।
स्थापितं सचलं गेहे स्थिरं लिङ्गमयोजिते ॥
पञ्चधा तत् स्थितं लिङ्गं स्वयम्भु दैवपालकम् ।
आर्षञ्च मानसं लिङ्गं तेषां लक्षणमुच्यते ॥"
इति सिद्धान्तशेखरः ॥
"आचार्य्यसंज्ञये स्नेहं स्वयम्भूतो महेश्वरः ।
यत्र चैव स्वयं शक्तं लिङ्गमस्तु स्वयम्भु तत् ॥
यमनी यस्य संस्पर्शात् दहति त्रिप्रमेव तु ॥"
इति षट्कर्म्मदीपिका ॥ * ॥
"नानाच्छिद्रसुसंयुक्तं नानावर्णसमन्वितम् ।
अदृष्टमूलं यल्लिङ्गं कर्कशं भुवि दृश्यते ॥
तल्लिङ्गन्तु स्वयम्भूतमपरं लक्षणच्युतम् ।
स्वयम्भु लिङ्गमित्युक्तं तच्च नानाविधं मतम् ॥
शङ्खाभमस्तकं लिङ्गं वैश्यावं तदुदाहृतम् ।
पद्माभमस्तकं ब्राह्मं कृष्णाभं शाक्रमुच्यते ॥
शिरोयुग्मं तदाग्नेयं त्रिपदं याम्यमीरितम् ।
खड्गाभं नैर्ऋतं लिङ्गं वारुणं कलसाकृति ॥
वायव्यं ध्वजवल्लिङ्गं कौवेरन्तु गदान्वितम् ।
ईशानस्य त्रिशूलाभं लोकपालादिनिःसृतम् ।
सर्यम्भु लिङ्गमाख्यातं सर्व्वशास्त्रविशारदैः ॥"
इति स्वयम्भुलिङ्गलक्षणम् ॥
इति सिद्धान्तशेखरः ॥ * ॥
"दृष्ट्वा लिङ्गं महेशस्य स्वयम्भूतस्य पार्व्वति ! ।
सर्व्वपापविनिर्म्मुक्तः परे ब्रह्मणि लीयते ॥"
एतेषां पूजाफलं तत्रैव ।
"विप्रोक्षाच्छैलजं सुक्ष्मे भुक्तये चानुषङ्गतः ।
पार्थिवं मुक्तये प्रस्तं मुक्तये चानुषङ्गतः ॥
एवं वै दारुजं ज्ञेयं चित्रलिङ्गं तथा पुनः ।
स्थिरलक्ष्मीप्रदं ज्ञेयं हेमं राज्यप्रदञ्च तत् ॥
पुत्रवृद्धिकरं ताम्रं राङ्गमायुःप्रवर्द्धनम् ॥"
इति मत्स्यसूक्तमहातन्त्रम् ॥ * ॥
"पारदञ्च महाभूत्यै सौभाग्याय च मौक्तिकम् ।
चन्द्रकान्तं मृत्युजित् स्याद्वाटकं सर्व्वकामदम् ॥"
इति पद्मपुराणम् ॥ * ॥
"सर्व्वफलप्रदा भूमिर्मणयस्तद्वदेव हि ।
अनन्ताद्याः स्मृता ह्यष्टौ मणयो विद्युदुज्ज्वलाः ॥
राजौ प्रकाशकाः सर्व्वविषाद्याघातकारिणः ।
नागावर्णास्तु विज्ञेया रसैर्गन्धेश्च रूपतः ॥
वज्राद्याः स्फाटिकाद्याश्च गुड़ान्नादिविनि-
र्म्मितम् ।
सर्व्वकामप्रदं पुंसां लिङ्गं तात्कालिकं मतम् ॥"
इति वीरमित्रोदयधृतकालोत्तरः ॥ * ॥
"गान्धं सौभाग्यदं लिङ्गं पौष्पं मुक्तिप्रदायकम् ।
नानाशूनोद्भवं लिङ्गं नानाकामप्रदायकम् ॥
सैकतं गुणदं लिङ्गं सौभाग्याय च लावणम् ।
उचाटने तु पाषाणं मौलं शत्रुक्षयावहम् ।
तात्कालिकं दरिद्रश्च कृत्वा भक्त्या समर्च्चयेत् ॥"
इति लक्षणसमुच्चयः ॥
अथ गन्धलिङ्गम् । गरुड़पुराणे ।
"कस्तूरिकाया द्वौ भागौ चत्वारश्चन्दनस्य च ।
कुङ्कुमस्य त्रयश्चैव अग्निना च चतुःसमम् ॥
एतद्धि गन्धलिङ्गन्तु कृत्वा संपूज्य भक्तितः ।
शिवसायुज्यमाप्नोति बन्धुभिः सहितो नरः ॥"
पुष्पमयलिङ्गं यथा,—
"कार्य्यं पुष्पमयं लिङ्गं हयगन्धसमन्वितम् ।
नवखण्डां धरां भुक्त्वा गणेशोऽधिपतिर्भवेत् ॥"
अथ रत्नमयलिङ्गम् ।
"रत्नैरभिर्निर्म्मितं लिङ्गं यः पूजयति भक्तितः ।
विद्याधरपदं प्राप्य पश्चाच्छिवसमो भवेत् ॥"
अथ गोशृङ्गलिङ्गम् ।
"श्रीकामो गोशृङ्गलिङ्गं कृत्वा भक्त्या प्रपू-
जयेत् ।
स्वच्छेन कापिलेनैव गोमयेन प्रकल्पयेत् ॥"
स्वच्छेन भूमिपतनरहितेन । भूम्योद्धृतेनेति
यावत् ॥*॥
अथ यवगोधूमशालिजलिङ्गम् ।
"कार्य्यं यष्टिक्रमं लिङ्गं यवगोधूमशालिजम् ।
श्रीकामः पुष्टिकामश्च पुत्रकामस्तदर्चयेत् ॥"
अथ सिताखण्डमयलिङ्गम् ।
"सिताखण्डमयं लिङ्गं कार्य्यमारोग्यवर्द्धनम् ।
वश्ये लवणजं लिङ्गं तालचिकटुकान्वितम् ॥"
तालं हरितालम् । चिकटुकं शुण्ठीपिप्पली-
मरीचं इति प्रसिद्धम् ।
"गव्यघृतमयं लिङ्गं संपूज्य बुद्धिवर्द्धनम् ।"
तथा ।
"लवणेन च सौभाग्यं पार्थिवं सर्व्वकामदम् ।
कामदं तिलपिष्टोत्थं तुष्टोत्थं मारणे स्मृतम् ॥
भस्मोत्थं सर्व्वफलदं गुड़ोत्थं प्रीतिवर्द्धनम् ।
गन्धोत्थं गुणदं भूरि शर्करोत्थं सुखप्रदम् ॥
वंशाङ्कुरोत्थं वंशकरं गोमयं सर्व्वरोगदम् ।
कैशास्थिसम्भवं लिङ्गं सर्व्वशत्रुविनाशनम् ॥
क्षोभणे मारणे पिष्टसम्भवं लिङ्गमुत्तमम् ।
दारिद्र्यदं दुग्धोद्भूतं पिष्टं सारस्वतप्रदम् ॥
दधिदुग्धोद्भवं लिङ्गं कीर्त्तिलक्ष्मीसुखप्रदम् ।
धान्यदं धान्यजं लिङ्गं फलोत्थं फलदं भवेत् ॥
पुष्पोत्थं दिव्यभोगायुर्मृण्मये धान्यफलोद्भवम् ।
नवनीतोद्भवं लिङ्गं कीर्त्तिसौभाग्यवर्द्धनम् ॥
दूर्व्वाकाण्डसमुद्भूतमपमृत्युनिवारणम् ।
कर्पूरसम्भवं लिङ्गं चलं वै मुक्तिमुक्तिदम् ॥
अयस्कान्तं चतुर्धा तु ज्ञेयं सामान्यसिद्धिषु ॥
सर्व्वं नवभवं श्रेष्ठं तत्र वज्रमरिच्छिदि ।
यमलिङ्गं महाभूत्यै सौभाग्याय च मौक्तिकम् ।
पुष्टिमूलं महानीलं ज्योतिश्चीरसमुद्भवम् ॥
स्वर्णकं कुलसन्नत्यै तैजसं सूर्य्यकान्तजम् ।
चन्द्रापीड़ं मृत्युजितं स्फाटिकं सर्व्वकामदम् ॥
चन्द्रापीड़ं चन्द्रकान्तमित्यर्थः ।
"शूलाश्मशिखिं शत्रुक्षयार्थं मौक्तिकं तथा ।"
यत्सन्निधानात् शूलरोगनाशः स शूलमणिः ॥
"आपुत्रं हीरकं ज्ञेयं रोगघ्नमौक्तिकोद्भवम् ।
शुभक्षत् पुष्कलं तीर्थे वैदूर्य्यं शत्रुदर्पघ्नत् ।
नीलं लक्ष्मीप्रदं ज्ञेयं स्फाटिकं सर्व्वकामदम् ॥"
इति सारसंग्रहे ॥
"महाभुक्तिप्रदं हेमं राजतं भूतिवर्द्धनम् ।
आरकूटं तथा कांस्यं प्रशस्तं सामान्यमुक्तिदम् ॥"
आरकूटं पित्तलम् ।
"त्रपु सौसायसं लिङ्गं शत्रूणां नाशने हितम् ।
कौशिदं कांस्यजं लिङ्गं राजतं पुष्टिवर्द्धनम् ।
प्रेत्तलं भुक्तिमुक्त्यर्थं मिश्रजं सर्व्वसिद्धिदम् ॥"
मिश्रजमष्टधातुनिर्म्मितम् ॥ इति कालोत्तरः ॥
"पितृणां मुक्तये लिङ्गं पूज्यं रजतसम्भवम् ।
हैमजं सत्यलोकस्य प्राप्तये पूजयेत् पुमान् ॥
पूजयेत्ताम्रजं लिङ्गं पुष्टिकामो हि मानवः ॥"
इति शिवनारदसंवादः ॥
ताम्रादिलिङ्गपूजनन्तु कलौतरत्परम् ।
"ताम्रलिङ्गं कलौ नार्च्चेत् रैत्यस्य सीसकस्य च ।
रक्तचन्दनलिङ्गञ्च शङ्खकांस्यायसं तथा ॥
तुष्टिकामस्तु सततं लिङ्गं पित्तलसम्भवम् ।

कीर्त्तिकामो यजेन्नित्यं लिङ्गं कांस्यसमुद्भवम् ॥
शत्रुमारणकामस्तु लिङ्गं लौहमयं सदा ।
सदा सीसमयं लिङ्गमायुष्कामोऽर्चयेत् नरः ॥"
इति मत्स्यसूक्तमहातन्त्रम् ॥
"स्थिरलक्ष्मीप्रदं हैमं राजतं चैव राज्यदम् ।
प्रजावृद्धिकरं राङ्गं ताम्रमायुःप्रवर्द्धनम् ॥
विद्वेषकारणं कांस्यं रीतिजं शत्रुनाशनम् ।
रोगघ्नं सैसकं लिङ्गमायसं शत्रुनाशनम् ॥
अष्टलौहमयं लिङ्गं कुष्ठरोगक्षयावहम् ।
त्रिलौहसम्भवं लिङ्गं विज्ञानं प्रति सिद्धिदम् ॥"
इति लक्षणसमुच्चयः ॥
"श्रीप्रदं वज्रजं लिङ्गं शिलाजं सर्व्वसिद्धिदम् ।
धातुजं धनदं साक्षाद्दारुजं भोगसिद्धिदम् ॥"
इति लिङ्गपुराणम् ॥
"गन्धपुष्पमयं लिङ्गं तथान्नादिविनिर्म्मितम् ।
कस्तूरीसम्भवं लिङ्गं धनाकाङ्क्षी प्रपूजयेत् ॥
लिङ्गं गोरोचनोत्थञ्च रूपकामस्तु पूजयेत् ।
कान्तिकामस्तु सततं लिङ्गं कुङ्कुमसम्भवम् ॥
श्वेतागुरुसमुद्भूतं महाबुद्धिविवर्द्धनम् ।
धारणाशक्तिदं लिङ्गं क्षणागुरुसमुद्भवम् ॥
यज्ञकर्दमसम्भूतम् ।" इति कालोत्तरः ॥
"पार्थिवे शिवपूजायां सर्व्वसिद्धियुतो भवेत् ।
पाषाणे शिवपूजायां द्विगुणं फलमीरितम् ॥
स्वर्णलिङ्गे च पूजायां शतानां नाशनं मतम् ।
सर्व्वसिद्धीश्वरो रौप्ये फलं तस्माच्चतुर्गुणम् ॥
ताम्रे पुष्टिं विजानीयात् कांस्ये च धनसंचयः ।
गङ्गायाञ्च लक्षगुणं साक्षायां रोगवान् भवेत् ॥
स्फाटिके सर्व्वसिद्धिः स्यात्तथा मरकते प्रिये ।
लौहलिङ्गे रिपोर्नाशः कामदं भस्मलिङ्गकम् ।
वालुकायां काम्यसिद्धिर्गोमये रिपुहिंसनम् ।
सर्व्वलिङ्गस्य माहात्म्यं धर्म्मकामार्थमोक्षदम् ॥"
इति माहकामेश्वरतन्त्रे १२ पटलः ॥
"ब्रह्मा संपूजयेन्नित्यं लिङ्गं शैलमयं शुभम् ।
तस्य संपूजनात्तेन प्राप्तं ब्रह्मत्वमुत्तमम् ॥
इन्द्रनीलमयं लिङ्गं विष्णुः समर्चयेत् सदा ।
विष्णुत्वं प्राप्तवान् तेन सोऽभूद्भूतैकपालकः ॥
स्फाटिकं निर्म्मलं लिङ्गं वरुणोऽभ्यर्चयेत् सदा ।
तेन तद्वरुणत्वं हि प्राप्तं तेजोबलान्वितम् ॥"
इति षट्कर्म्मदीपिकाधृतशिवधर्म्मः ॥
"पूजयेत् पार्थिवे लिङ्गे पाषाणलिङ्गकेऽथवा ।
स्वर्णलिङ्गेऽथवा देवि रौप्ये ताम्रे च कांस्यके ॥
पारदे वाथ गङ्गायां स्फाटिके मरकतेऽपि वा ।
कार्य्यभेदे लौहलिङ्गे भस्मनिर्म्मितलिङ्गके ॥
वालुकानिर्म्मिते लिङ्गे गोमये वाथ पूजयेत् ।
संस्कारेण विना देवि पाषाणादौ न पूजयेत् ॥"
इति माहकामेश्वरतन्त्रे ७ पटलः ॥
इति शिवलिङ्गनिर्म्माणप्रकाराणि ॥ * ॥ अथ शिवलिङ्गसंस्कारः ।
"संस्कारञ्च प्रवक्ष्यामि विशेष इह यज्ञवेत् ॥
रौप्यञ्च स्वर्णलिङ्गञ्च स्वर्णपात्रे निधाय च ।
तस्मादुत्तोल्य तल्लिङ्गं दुग्धमर्थे दिनत्रयम् ।
आम्रकेण क्षापयित्वा कालरुद्रं प्रपूजयेत् ॥
घोड़शैनोपचारेण वेद्यान्तु पार्व्वतीं यजेत् ।
तस्मादुत्तोल्य तल्लिङ्गं गङ्गातोये दिनत्रयम् ।
ततो वेदोक्तविधिना संस्कारमाचरेत् सुधीः ॥"
पूर्व्वोक्तवचनैः फलविशेषकामनया नानाविधलिङ्गपूजोक्ता सा च पूजा ।
"लिङ्गं सुलक्षणं कुर्य्यात्तत्तज्जेक्षिलिङ्गमलक्षणम् ।
दैर्घ्यहीने भवेद्व्याधिरधिके शत्रुवर्द्धनम् ॥
मानहीने विनाशः स्यादधिके च शिशुक्षयः ।
विस्तारे चाधिके हीने राष्ट्रनाशो भवेद्ध्रुवम् ॥
पीठहीने तु दारिद्र्यं शिरोहीने कुलक्षयः ।
ब्रह्मसूत्रविहीने च राज्ञां राष्ट्रञ्च नश्यति ।
तस्मात् सर्व्वप्रयत्नेन लिङ्गं कुर्य्यात् सुलक्षणम् ॥"
इत्यादिना सुलक्षणलिङ्गस्यैव फलदात्रत्वमुक्तम् ।
इति माहकामेश्वरतन्त्रे ७ पटलः ॥

देव्युवाच ।

"इन्द्रिये रहितो देवः शून्यरूपः सदाशिवः ।
आकारो नास्ति देवस्य किं तस्य पूजने फलम् ॥

शिव उवाच ।

शृणु पूजा महेशानि कदाचिन्नास्ति पार्व्वती ।
रुद्रस्य परमेशानि रौद्री शक्तिरितीरिता ॥
रौद्री तु परमेशानि आद्या कुण्डलिनी भवेत् ।
वर्त्तते परमेशानि ब्रह्मविष्णुशिवात्मिका ॥
सार्द्धत्रिवलयाकारैः शिवं वेष्ट्य सदा स्थिता ।
शक्तिं विना महेशानि प्रेतत्वं तस्य निश्चितम् ॥
शक्तिसंयोगमात्रेण कर्म्मकर्त्ता सदाशिवः ।
अतएव महेशानि पूजयेच्छिवलिङ्गकम् ॥"
इति सशक्तिकशिवलिङ्गपूजनफलम् ॥
इति लिङ्गार्चनतन्त्रे २ पटलः ॥ * ॥

देव्युवाच ।

"लिङ्गप्रमाणं देवेश कथयस्व मयि प्रभो ।
पार्थिवे च शिलादौ च विशेषो यत्र यो भवेत् ॥

श्रीशिव उवाच ।

शृणु तोलकं ग्राह्यमथवा तोलकद्वयम् ।
एतदन्यन्न कुर्व्वीत कदाचिदपि पार्व्वति ॥"
इति माहकामेश्वरतन्त्रे ७ पटलः ॥
अपि च ।
"शक्तिकातोलकं ग्राह्यमथवा तोलकद्वयम् ।
त्रिसूत्रस्य प्रमाणेन घटनं कारयेद्बुधः ॥
स्वाङ्गुष्ठपर्व्वमानन्तु कृत्वा लिङ्गं प्रपूजयेत् ।
स्वादिलिङ्गघटने प्रमाणं परिकीर्त्तितम् ।
फलमुक्तमवाप्नोति अन्यथा चेत्तदन्यथा ॥"
इति षट्कर्म्मदीपिकाधृतविश्वसारतन्त्रम् ॥
"लिङ्गे वेद्यां तथा पीठे समसूत्रनिपातनात् ।
समत्वेन विजानीयात्त्रिसूत्रीकरणन्त्विदम् ॥"
इति कालोत्तरः ॥
शक्तिकाभेदेन ब्राह्मणादीनां पूजाफलस्य प्रशस्तत्वं यथा,—
"चतुर्धा पार्थिवं लिङ्गं शक्तिभेदेन पार्व्वति ।
शुक्लं रक्तं तथा पीतं कृष्णञ्च परमेश्वरि ॥
शुक्लन्तु ब्राह्मणे प्रोक्तं क्षत्रिये रक्तमिष्यते ।
पीतन्तु वैश्यजातौ स्यात् कृष्णं शूद्रे प्रकीर्त्तितम् ॥"

तथा ।
"शुक्लं हि पार्थिवं लिङ्गं निर्म्माय यस्तु पूजयेत् ।
स एव परमेशानि त्रिवर्गफलभाग्भवेत् ॥
क्षत्रियस्तु वरारोहे रक्तं निर्म्माय पार्थिवम् ।
पूजयेत् सततं यस्तु त्रिवर्गफलमाप्नुयात् ॥
हरितं पार्थिवं देवि ! निर्म्माय यस्तु पूजयेत् ।
स च वैश्यो महेशानि ! त्रिवर्गफलभाग्भवेत् ॥
कृष्णं हि पार्थिवं लिङ्गं निर्म्माय यस्तु पूजयेत् ।
स शूद्रः परमेशानि ! त्रिवर्गफलभाग्भवेत् ॥"
इति लिङ्गार्चनतन्त्रे ३ पटलः ॥ * ॥
"शिलादौ च महेशानि ! स्थूलञ्च फलदायकम् ।
अङ्गुष्ठमानं देवेशि ! यद्वा हेमाद्रिमानकम् ॥
क्रमेण देवदेवेशि ! फलं बहुविधं लभेत् ।
स्थूलात् स्थूलतरं लिङ्गं रुद्राक्षं परमेश्वरि ! ॥
पूजनाद्धारणाद्देवि ! फलं बहुविधं स्मृतम् ॥"
स्थूलात् स्थूलमिति पार्थिवलिङ्गेतरपरम् । मृत्तिकातोलकमिति विशेषवचनात् । शिलास्फाटिकमरकतादीनां पक्षसूचीकरणसूक्तं यथा,—
"शिवलिङ्गस्य यन्मानं तन्मानं दक्षसव्ययोः ।
योन्यग्रमपि यन्मानं तदधोऽपि तथा भवेत् ॥"
इति लिङ्गपुराणम् ॥
"लिङ्गस्य यादृविस्तारः परिणाहोऽपि तादृशः ।
लिङ्गस्य द्विगुणा देवी योनिस्तद्दर्शसम्मिता ॥
कुर्व्वीताङ्गुष्ठतो ह्रस्वं न कदाचिदपि क्वचित् ।
रत्नादिशिवनिर्म्माणे मानमिच्छावशाद्भवे ॥"
इति तन्त्रान्तरम् ॥
लिङ्गव्युत्पत्तिर्यथा,—
"आकाशं लिङ्गमित्याहुः पृथिवी तस्य पीठिका ।
आलयः सर्व्वदेवानां लयनाल्लिङ्गमुच्यते ॥"
इति स्कन्दपुराणम् ॥
लिङ्गमहिमा यथा,—

शिव उवाच ।

"न तुष्याम्यर्चितोऽर्चायां पुष्पधूपनिवेदनैः ।
लिङ्गेऽर्चिते तथात्यर्थं परं तुष्यामि पार्व्वति ! ॥
एष देवि ! पुरा कल्पे जीनोऽहं सर्व्वदेवतैः ।
लिङ्गत्वाल्लिङ्गमित्युक्तं सदेवासुरकिन्नरैः ॥
प्रयच्छामि दिवं देवि ! यो मल्लिङ्गार्चने रतः ।
त्यक्त्वा सर्व्वाणि पापानि निर्गतो दग्धकल्मषः ॥
मन्मना मन्नमस्कारो मामेव प्रतिपद्यते ॥"
इति वीरमित्रोदयधृतस्कन्दपुराणम् ॥
द्रव्यविशेषेण पूजादिफलं यथा,—
"वज्रपूतजलैर्लिङ्गं स्नपित्वा मम मानवाः ।
लक्षाणाञ्चाश्वमेधानां फलमाप्नोति सत्तमः ॥
सुगन्धिचन्दनरसैर्लिङ्गमालिप्य भक्तितः ।
आलिप्यते सुरस्त्रीभिः सुगन्धैर्यत्नकर्दमैः ॥"
इति तत्रैव ॥*॥
लिङ्गपूजाया अकरणे दोषः तत्पूजाफलञ्च यथा,
"विना लिङ्गार्चनं यस्य कालो गच्छति नित्यशः ।
महाहानिर्भवेत्तस्य दुर्गतस्य दुरात्मनः ।
एकतः सर्व्वदानानि व्रतानि विविधानि च ।
तीर्थानि नियमा यज्ञा लिङ्गाराधनमेकतः ॥

न लिङ्गाराधनादन्यत् पुरा वेदे चतुर्ष्वपि ।
विद्यते सर्व्वशास्त्राणामेष एव सुनिश्चितः ॥
मुक्तिसुक्तिप्रदं लिङ्गं विविधापन्निवारणम् ।
पूजयित्वा नरो नित्यं शिवसायुज्यमाप्नुयात् ॥
सर्व्वमन्यत् परित्यज्य क्रियाजालमशेषतः ।
भक्त्या परमया विद्वान् लिङ्गमेकं प्रपूजयेत् ॥"

इति स्कन्दपुराणम् ॥*॥

"अश्वमेधसहस्राणि वाजपेयशतानि च ।
महेशार्चनपुण्यस्य कलां नार्हन्ति षोड़शीम् ॥"

इति मत्स्यसूक्त १६ पटलः ॥

"बहुनात्र किमुक्तेन चराचरमिदं जगत् ।
शिवलिङ्गं समभ्यर्च्च्य स्थितमत्र न संशयः ॥"

इति लिङ्गपुराणम् ॥*॥

"शिवस्य पूजनाद्देवि चतुर्व्वर्गाधिपो भवेत् ।
अष्टैश्वर्य्ययुतो मर्त्यः शम्भुनाथस्य पूजनात् ।
स्वयं नारायणेनोक्तं यदि शम्भुं प्रपूजयेत् ॥
स्वर्गे मर्त्ये च पाताले ये देवाः संस्थिताः सदा ।
तेषां पूजा भवेद्देवि शम्भुनाथस्य पूजनात् ॥"

इति लिङ्गपुराणम् ॥*॥

"असारे खलु संसारे सारमेतच्चतुष्टयम् ।
काश्यां वासः सतां सङ्गो गङ्गाम्भः शम्भु-
पूजनम् ॥"

इति षट्कर्म्मदीपिकाधृतकालोत्तरे नारद-वाक्यम् ॥ * ॥

"अग्निहोत्राध्वरवेदाश्च यज्ञाश्च बहुदक्षिणाः ।
शिवलिङ्गार्चनस्यैते कोटिंशेनापि ते समाः ॥
क्षित्वा भित्वा च भूतानि हित्वा सर्व्वमिदं
जगत् ।
यजेद्देवं विरूपाक्षं न स पापेन लिप्यते ॥
अनेकजन्मसाहस्रं भ्राम्यमाणश्च योनिषु ।
कः समाप्नोति वै मुक्तिं विना लिङ्गार्चनं नरः ॥"

इति स्कन्दपुराणम् ॥*॥

"ब्राह्मणः क्षत्रियो वैश्यः शूद्रो वाप्यनुलोमजः ।
पूजयेत् सततं लिङ्गं तत्तन्मन्त्रेण सादरम् ॥"

तत्तन्मन्त्रेणेति यथायोग्यं वैदिकतान्त्रिकनाम-मन्त्रेणेत्यर्थः । इति वीरमित्रोदयधृतस्कन्द-पुराणम् ॥ * ॥

"मूले ब्रह्मा तथा मध्ये विष्णुस्त्रिभुवनेश्वरः ।
रुद्रोपरि महादेवः प्रणवाख्यः सदाशिवः ॥
लिङ्गवेदी महादेवी लिङ्गं साक्षान्महेश्वरः ॥
तयोः प्रपूजनान्नित्यं देवी देवश्च पूजितौ ॥"

इति लिङ्गपुराणम् ॥*॥

अथ पारदशिवलिङ्गमाहात्म्यम् ।

"ज्योतिर्म्मयं महालिङ्गं कैलासनगरे प्रिये ।
तस्यैव षोड़शांशैकः काश्यां विश्वेश्वरः स्थितः ॥
पूर्णलिङ्गं महेशानि शिवबीजं न चान्यथा ।
शिलामध्ये यथा चक्रं लक्ष्मीनारायणः परम् ।
पारदस्य प्रतांशैको लक्ष्मीनारायणौ न हि ॥
प्रकारं विष्णुरूपञ्च आकारं कालिका स्वयम् ।
रेफं शिवं दकारञ्च ब्रह्मरूपं न चान्यथा ॥
पारदं परमेशानि ब्रह्मविष्णुशिवात्मकम् ।
यो यजेत् पारदं लिङ्गं स एव शम्भुरव्ययः ॥
आजन्ममध्ये यो देवि एकदा यदि पूजयेत् ।
स एव धन्यो देवेशि स ज्ञानी स च तत्त्ववित् ॥
स ब्रह्मवेत्ता स धनी स राजा भुवि पूज्यते ।
अणिमादिविभूतीनामीश्वरः साधकोत्तमः ॥"*॥

अथ पारदशिवलिङ्गनिर्म्माणविधिः ।

"पारदे शिवनिर्म्माणे नानाविघ्नं यतः प्रिये ।
अतएव महेशानि शान्तिस्वस्त्ययनं चरेत् ॥
पारदं शिवबीजं हि ताड़नं हि न कारयेत् ।
ताड़नाद्वित्तनाशः स्यात्ताड़नाद्बित्तहीनता ।
ताड़नाद्रोगयुक्तत्वं ताड़नान्मरणं भवेत् ॥"

इति मालतीमाधवतन्त्रे ८ पटलः ॥*॥

अथ शिवलिङ्गोत्पत्तिः ।

ब्रह्मोवाच ।

"पुरा त्वां चञ्चलं ज्ञात्वा त्वदग्रे न प्रकाशितम् ।
इदानीं योगिनं ज्ञात्वा कथयामि न संशयः ॥
अतिगुह्यमतिगुह्यमतिगुह्यं न संशयः ।
गोपितव्यं गोपितव्यं गोपितव्यं त्वयापि च ॥
शम्भुना गोपितं तन्त्रे तन्त्रान्तरे प्रकाशितम् ।
अद्य तत् कथयाम्यद्य सावधानोऽवधारय ॥
सर्गादौ विविधाः सर्गा मया सृष्टा हि नारद ।
देवदानवदैत्याश्च गन्धर्व्वयक्षराक्षसाः ॥
सर्व्वे स्त्रीवशगाः श्रेष्ठा मैथुनाज्जायते प्रजा ।
केवलं हि शिवः शम्भुर्दारग्रहणकर्म्मणि ॥
कदापि न मनश्चक्रे दृष्ट्वा चिन्तापराः सुराः ।
मामेव शरणं जग्मुः सेन्द्रा देवासुरादयः ॥
प्रणिपत्य स्तुतिं कृत्वा उपतस्थुः समाहिताः ।
प्रोचुः प्राञ्जलयः सर्व्वे भयाद्गद्गदमानसाः ॥

देवाद्या ऊचुः ।

उद्वाहिता वयं सर्व्वे भवानपि जगद्गुरुः ।
केवलं हि महादेवो देवदेवो जगत्पतिः ॥
विवाहे न मनश्चक्रे कया वा मोह्यते शिवः ।
उपायं चिन्तय विभो सदारः कथमीश्वरः ।
येन स्याज्जगतां नाथस्तत् कुरुष्व दयानिधे ॥
इति श्रुत्वा वचस्तेषां ततो ब्रह्मा प्रजापतिः ।
सह तैर्गरुड़ारूढ़ं जगाम कमलासनः ।
उवाच तं जगन्नाथं विष्णुं कमललोचनम् ॥

ब्रह्मोवाच ।

दृष्टा मया सुरश्रेष्ठ मानुषा मैथुनोद्भवाः ।
सर्व्वे स्त्रैणा विना शम्भुं यत् कर्त्तव्यं वदस्व मे ॥

श्रीभगवानुवाच ।

एभिः सह महाबाहो गच्छामस्वमहं शिवम् ।
कर्त्तव्यं स्थापितं तेन अनुज्ञातैर्यथाविधि ।
किन्तु तद्योग्यनारीस्तु विवाहार्थं प्रकल्पय ॥

ब्रह्मोवाच ।

दक्षं गच्छामहे सर्व्वे अनुज्ञापय तं हरे ।
आद्याशक्तिं महामायां प्रसादयतु वै लघु ॥
कन्या भूत्वा महाशम्भुं मोहयिष्यति शङ्करम् ।
एवमुक्त्वा तु तैः सार्द्धं जग्मतुर्विधिकेशवौ ।
यत्र दक्षो महातेजाः प्रोचतुः कार्य्यमात्मनः ॥
उवाच दक्षं तद्युक्तं तपस्तप्तुं प्रजापतिः ।
ब्रह्मा विष्णुश्च सर्व्वे ते तपसा तोषयेच्छिवाम् ॥
आविर्ब्बभूव सा देवी कालिका जगदीश्वरी ।
प्राह मां वः किमर्थन्तु संस्तुताः सुरासुराः ॥

देव्युवाच ।

शीघ्रं रूपं यथाकामं भवतां प्रार्थने फलम् ।
अचिरात् तत्प्रदास्यामि सत्यं सत्यं न संशयः ॥

देवाद्या ऊचुः ।

भूत्वा तु दक्षकन्या त्वं शङ्करं परिमोहय ।
अस्माकं वाञ्छितञ्चैतत् कुरु सिद्धिं सदा शिवे ॥
एतत् श्रुत्वा वचस्तेषां निरीक्ष्य कमलासनम् ।
उवाच विस्मयाविष्टा कालिका जगदीश्वरी ॥

देव्युवाच ।

शम्भुरद्यतनो बालः किं मां सम्मोहयिष्यति ।
मम योग्यं पुमांसन्तु अन्यं वै परिकल्पय ॥

ब्रह्मोवाच ।

शम्भुः सर्व्वगुरुर्देवो ह्यस्माकं परमेश्वरः ।
महासत्त्वो महातेजाः स ते तोषं करिष्यति ॥
शम्भुतुल्यः पुमान्नास्ति कदाचिदपि कुत्रचित् ।
इत्युक्ता ब्रह्मणा देवी वाढ़मित्याह चेश्वरी ।
दक्षाय दर्शनं दत्त्वा उवाच उच्यतां वरः ॥
दक्षोऽपि दृष्ट्वा तां देवीं खड्गकर्त्तृधरां पराम् ।
खर्व्वां लम्बोदरीं व्याघ्रचर्म्मावृतकटिस्थलीम् ॥
नीलोत्पलकपालाढ्यकरयुग्मां वरप्रदाम् ।
कृतकृत्यमिवात्मानं मेने दक्षः प्रजापतिः ॥

दक्ष उवाच ।

यदि मे वरदासि त्वं देवानामपि वाञ्छितम् ।
मदीयतनया भूत्वा शङ्करं किल मोहय ॥
तथेत्युक्त्वा जगद्धात्री अन्तर्द्धानं गता तदा ।
देवताश्च ततो नत्वा यत्र तेपे तपो हरः ॥
सस्त्रीकाः परमात्मानमुपतस्थुर्जगत्पतिम् ।
प्रणेमुस्तुष्टुवुर्भक्त्या प्राहुर्गद्गदभाषिणः ॥

देवाद्या ऊचुः ।

भगवन् देवदेवेश लोकनाथ महाप्रभो ।
वयं सर्व्वे तु सस्त्रीकाः स्वार्थं परमेश्वर ।
अतस्त्वं कुरु चोद्वाहं सृष्टिरक्षा यथा भवेत् ॥
दक्षगेहे महाकाली मायेति परिकीर्त्तिता ।
जाता ते प्रीतये शम्भो सा ते योग्या न
संशयः ॥

ईश्वर उवाच ।

भवतां प्रीतये सम्यक् करिष्ये नात्र संशयः ।
उद्योगः क्रियतां क्षिप्रं विवाहाय ममैव हि ॥
इत्युक्तास्तु सुराः सर्व्वे ईश्वरेण महात्मना ।
कृतकृत्या गताः सर्व्वे भवनं सर्व्वसुन्दरम् ॥
दक्षाय कथयामासुः शङ्करेणोदितं वचः ।
ततो विवाहं निर्व्वर्त्य कृतकृत्या यथा गताः ॥
गताः सर्व्वे महेशोऽपि सत्या सह तदा गृहम् ।
जगाम रेमे सत्या च चिरं निर्भरमानसः ॥
अथ काले कदाचित्तु सत्या सह महेश्वरः ।
रेमे न प्रेक्ते तं सोढुं सती आन्ताभवत्तदा ॥
उवाच दीनया वाचा देवदेवं जगद्गुरुम् ।
भगवन्नहि शक्नोमि तव भारं सुदुःसहम् ।
क्षमस्व मां महादेव कृपां कुरु जगत्पते ॥
निशम्य वचनं तस्या भगवान् वृषभध्वजः ।
निर्भरं रमणं चक्रे गाढ़ं निर्द्दयमानसः ॥

कृत्वा सम्पूर्णरमणं सती च व्यक्तमैथुना।
उत्थानाय मनश्चक्रे उभयोस्तेज उत्तमम्।
प्रपात धरणीपृष्ठे तेषांप्रमथितं जगत्॥
पाताले भूतले स्वर्गे शिवलिङ्गास्तदाभवन्।
तेन भूता भविष्याश्च शिवलिङ्गाः सयोनयः॥
यत्र लिङ्गं तत्र योनिर्यत्र योनिस्ततः शिवः।
उभयोश्चैव तेजोभिः शिवलिङ्गं व्यजायत॥"
इति शिवलिङ्गोत्पत्तिकथनमिति नारदप्रश्नाच्चान्तर्गतत्तृतीयरात्रे प्रथमाध्याये नारदब्रह्मसंवादः॥ * ॥ शिवलिङ्गपूजायां सर्व्वेषामधिकारो यथा,—
"ब्राह्मो वा वैष्णवो वापि सौरो वा गाणपोऽथवा।
शिवार्चनविहीनस्य कुतः सिद्धिर्भवेत् प्रिये॥
अनाराध्य च मां देवि योऽन्यैर्देवैरान्तरम्।
न गच्छति महादेवि शापं दत्त्वा व्रजेत् पुरम्॥
पर्व्वताग्रसमं देवि मिष्टान्नादि क्रमेण हि।
फलानि बहुधान्येव पुष्पाण्येव यथाविधि॥
सुमेरुसदृशं चान्नं नानाविधं महेश्वरि।
सूपादिकं महेशानि यदि स्यात् सागरोपमम्॥
यद्दत्तं पुष्पनैवेद्यं सर्व्वं विष्ठासमं भवेत्।
शिवार्चनविहीनो यः पूजयेद्देवतान्तरम्।
विशेषतः कलियुगे स नरः पापभाग्भवेत्॥"
इति उत्पत्तितन्त्रे ६४ पटलः॥ * ॥
"सर्व्वपूजासु देवेशि! लिङ्गपूजापरं पदम्।
लिङ्गपूजां विना देवि अन्यपूजां करोति यः॥
विफला तस्य पूजा स्यादन्ते नरकमाप्नुयात्।
तस्माल्लिङ्गं महेशानि प्रथमं परिपूजयेत्॥
ब्राह्म्यं लिङ्गपूजायां रक्षितं सततं प्रिये।
तद्राज्यं पतितं मन्ये विष्ठाभूमिसमं स्मृतम्॥
ब्रह्म विट् क्षत्रियो देवि यदि लिङ्गं न पूजयेत्।
तत्क्षणात् परमेशानि त्रयश्चण्डालतामियुः।
शूद्रश्च परमेशानि सदा शूकरवद्भवेत्॥
शिवार्चनन्तु देवेशि यस्मिन् गेहे विवर्ज्जितम्।
विष्ठागर्त्तसमं देवि तद्गृहं विद्धि पार्व्वति।
अन्नं विष्ठा पयो मूत्रं तस्मिन् वेश्मनि पार्व्वति॥
ब्राह्मो वा वैष्णवो वापि शैवो वा परमेश्वरि!।
आदौ लिङ्गं प्रपूज्याथ विल्वपत्रैर्वरानने!॥
पश्चादन्यं महेशानि! लिङ्गं प्रार्थ्य प्रपूजयेत्।
अन्यथा मूत्रवत् सर्व्वं शिवपूजां विना प्रिये!॥"
इति लिङ्गार्चनतन्त्रे १ पटलः॥
उपक्रमोपसंहारादि। यथा। लिङ्गानि तु उपक्रमोपसंहारावभ्यासापूर्व्वताफलार्थवादोपपत्याख्यानि। तदुक्तम्।
"उपक्रमोपसंहारावभ्यासोऽपूर्व्वताफलम्।
अर्थवादोपपत्ती च लिङ्गं तात्पर्यनिर्णये॥"
तत्र प्रकरणप्रतिपाद्यस्यार्थस्य तदाद्यन्तयोरुपादानं उपक्रमोपसंहारौ। यथा छान्दोग्ये षष्ठे प्रपाठके। प्रकरणप्रतिपाद्यस्याद्वितीयवस्तुन एकमेवाद्वितीयमित्यादौ ऐतदात्म्यमिदं सर्व्वमित्यन्तेन च प्रतिपादनम्॥ १॥ प्रकरणप्रतिपाद्यस्य वस्तुनः तन्मध्ये पौनःपुन्येन प्रतिपादनं अभ्यासः। यथा तत्रैवाद्वितीयवस्तुनो मध्ये तत्त्वमसीति नवकृत्वः प्रतिपादनम्॥ २॥ प्रकरणप्रतिपाद्यस्य वस्तुनः प्रमाणान्तरेणाविषयीकरणं अपूर्व्वत्वम्। यथा। तत्रैवाद्वितीयवस्तुनो मानान्तराविषयीकरणम्॥३॥ फलन्तु। प्रकरणप्रतिपाद्यस्यात्मज्ञानस्य तदनुष्ठानस्य वा तत्र तत्र श्रूयमाणं प्रयोजनम्। यथा। तत्रैव आचार्य्यवान् पुरुषो वेद तस्य तावदेव चिरं यावन्न विमोक्षे अथ सम्पत्स्ये इत्यद्वितीयवस्तुज्ञानस्य तत्प्राप्तिप्रयोजनं श्रूयते॥ ४॥ प्रकरणप्रतिपाद्यस्य तत्र तत्र प्रशंसनं अर्थवादः। यथा तत्रैव उत तमादेशमप्राक्षो येनाश्रुतं श्रुतं भवत्यमतं मतमविज्ञातं विज्ञातमित्यद्वितीयवस्तुप्रशंसनम्॥ ५॥ प्रकरणप्रतिपाद्यार्थसाधने तत्र तत्र श्रूयमाणा युक्तिः उपपत्तिः। यथा तत्र यथा सौम्यैकेन मृत्पिण्डेन सर्व्वं मृण्मयं विज्ञातं स्यात् वाचारम्भणं विकारो नामधेयं मृत्तिकेत्येव सत्यम्। इत्यादावद्वितीयवस्तुसाधने विकारस्य वाचारम्भणमात्रत्वे युक्तिः श्रूयते॥६॥
इति श्रीपरमहंससदानन्दयोगीन्द्रविरचितवेदान्तसारः॥ (पुराणविशेषः। यथा, देवीभागवते। १। ३। १०।
"एकादशसहस्राणि लिङ्गाख्यं चातिविस्तृतम्॥"
अस्यान्यद्विवरणं पुराणशब्दे द्रष्टव्यम्॥ हेतुः। यथा, तर्ककौमुद्याम्। "लिङ्गज्ञानजन्यं लिङ्गज्ञानमनुमितिः॥ "ज्ञायमानं लिङ्गन्तु करणं न हि।" इति भाषापरिच्छेदः॥ सूक्ष्मशरीरम्। यथा, पञ्चदश्याम्। १। २३।
"बुद्धिकर्म्मेन्द्रियप्राणपञ्चकैर्मनसा धिया।
शरीरं सप्तदशभिः सूक्ष्मं तल्लिङ्गमुच्यते॥")
लिङ्गकः, पुं, (लिङ्गेन कायतीति। कै+कः।) कपित्थवृक्षः। इति शब्दचन्द्रिका॥ (गुणादयोऽस्य कपित्थशब्दे विज्ञेयाः॥)
लिङ्गवर्द्धः, पुं, (लिङ्गं वर्द्धयतीति। वृध्+णिच्+अच्।) कपित्थवृक्षः। इति शब्दचन्द्रिका॥ शिश्नवृद्धिकरणम्। तस्यौषधं यथा,—
"कटुतैलं भल्लातकं वृहतीफलदाड़िमम्।
वल्कलैः साधितं लिप्तं लिङ्गं तेन विवर्द्धते॥"
अपि च।
"कुष्ठमाषमरीचानि तगरं मधुपिप्पली।
अपामार्गाश्वगन्धा च वृहती सितसर्षपाः॥
यवाश्चिलं सैन्धवञ्च पाणिकोद्वर्त्तनं शुभम्।
लिङ्गबाहुल्यनाशञ्च कर्त्तयोर्द्धिलिङ्गवेत्॥"
इति गारुड़े १८० अध्यायः॥
लिङ्गवर्द्धिनी, स्त्री, (लिङ्गं वर्द्धयति या। वृध्+णिच्+इनि। ङीप्।) अपामार्गः। इति शब्दचन्द्रिका॥
लिङ्गवृत्तिः, पुं, (लिङ्गमेव वृत्तिर्जीवनोपायो यस्य।) जीविकार्थजटादिचिह्नधारी। तत्पर्य्यायः। धर्म्मध्वजी २। इत्यमरः। २।७।५४॥
"जीविकादिनिमित्तन्तु यो बिभर्त्ति जटादिकम्।
धर्म्मध्वजी लिङ्गवृत्तिरयं तत्र निगद्यते॥"
इति शब्दरत्नावली॥
लिङ्गालिका, स्त्री, क्षुद्रमधिकः। तत्पर्य्यायः। दीना २। इति हारावली। २१७॥
लिङ्गिनी, स्त्री, (लिङ्गमस्त्यस्या इति। लिङ्ग+इनिः।) लताविशेषः। पश्चगुरिया इति हिन्दी भाषा। तत्पर्य्यायः। बहुपत्री २ ईश्वरी ३ शिववल्लिका ४ स्वयम्भूः ५ लिङ्गसम्भूता ६ लेङ्गी ७ चित्रफला ८ चाण्डाली ९ लिङ्गजा १० देवी ११ चण्डा १२ आपस्तम्भिनी १३ शिवजा १४ शिववल्ली १५। अस्या गुणाः। कटुत्वम्। उष्णत्वम्। दुर्गन्धत्वम्। रसायनत्वम्। सर्व्वसिद्धिकरत्वम्। दिव्यत्वम्। वश्यत्वम्। रसनियामनत्वञ्च। इति राजनिर्घण्टः॥ (सन्न्यासादिलिङ्गधारिणी। यथा, सुश्रुते। ४। २४।
"लिङ्गिनीं गुरुपत्नीञ्च सगोत्रामथ पर्व्वसु।
वृद्धाञ्च सन्ध्ययोश्चापि गच्छतो जीवितक्षयः॥")
लिङ्गी [न्], पुं, (लिङ्गमस्त्यस्येति। इनिः।) हस्ती। इति जटाधरः॥ त्रि, धर्म्मध्वजी। यथा,—
"अलिङ्गी लिङ्गवेषेण यो लिङ्गमुपजीवति।
स लिङ्गिनां हरेदेनस्तिर्य्यग्योनौ च गच्छति॥"
इति कौर्म्मे उपविभागे १५ अध्यायः॥
(वासनाश्रयः। इति औधरस्वामी॥ यथा, भागवते। ४। २९। ६५।
"तेनास्य तादृशं राजन् लिङ्गिनो देहसम्भवम्।
अद्भुतस्थानुभूतोऽर्थो न मनः सृष्टुमिच्छति॥")
लिप, णि औ ग्रं प च लेपे। इति कविकल्पद्रुमः॥ (तुदा०-उभ०-सक०-अनिट्।) णि, लिप्रोऽस्ति। औ, लेप्ता। ग्रं प च, लिम्पति लिम्पते चन्दनेन गात्रं सुखी। इति दुर्गादासः॥
लिपः, पुं, (लिम्पतीति। लिप+कः।) लेपनकर्त्ता। इति लिपधातोः कर्त्तरि कप्रत्ययेन निष्पन्नम्॥
लिपिः, स्त्री, (लिप+"इगुपधात् कित्।" उणा० ४। ११९। इति इन्। सच्च कित्।) लिखितवर्णम्। तत्पर्य्यायः। लिखितम् २ अक्षरसंस्थानम् ३ लिबिः ४। इत्यमरः॥ लिखनम् ५ लेखनम् ६ अक्षरविन्यासः ७ लिपी ८ लिबी ९। इति तट्टीका॥ अक्षररचना १०। इति जटाधरः॥ लिपिका ११। इति शब्दरत्नावली॥ (यथा, नैषधे। १। १५।
"अयं दरिद्रो भवितेति वैधसीं
लिपिं ललाटेऽर्थिजनस्य जाग्रतीम्।
मृषा न चक्रेऽस्खलितक्रियापदः
प्रणीय दारिद्र्यदरिद्रतां नृपः॥"
अस्याः पञ्चविधत्वं यथा, वाराहीतन्त्रे।
"मुद्रालिपिः शिल्पलिपिर्लिपिर्लेखनिसम्भवा।
गुच्छिकाघुणसम्भूता लिपयः पञ्चधा स्मृताः॥")
लिखितपुस्तकादि। इति केचिदिति भरतः॥
लिपिकरः, पुं, (लिपिं करोतीति। लिपि+क्र+"दिवाविभानिशेति।" ३। २। २१। इति टः।) लेखकः। इत्यमरटीका॥

लिपिका, स्त्री, (लिपिरेव । लिपि + स्वार्थे कन् । टाप् ।) लिपिः । इति शब्दरत्नावली ॥

लिपिकारः, पुं, (लिपिं करोतीति । कृ + अण् ।) लेखकः । इत्यमरः । २ । ८ । १६ ॥

लिपी, स्त्री, (लिपिः । कृदिकारादिति ङीष् ।) लिपिः । इति शब्दरत्नावली ॥

लिप्तं, त्रि, (लिप + क्तः ।) भक्षितम् । कृत-लेपनम् । तत्पर्य्यायः । दिग्धम् २ । इत्यमरः ॥ विलिम्पितम् ३ । इति शब्दरत्नावली ॥ चर्चितम् ४ । इति जटाधरः ॥ (यथा, कथासरित्सागरे । ४ । ४८ ।

"तस्मिन्नाश्वेलखण्डाश्च चत्वारो विहितास्तया ॥") मिलितम् । इति सिद्धान्तकौमुद्यामुणादिवृत्तिः ॥ विग्रदिग्धम् । इति मेदिनी । ते, ५२ ॥

लिप्तकः, पुं, (लिप्त एव । स्वार्थे कन् ।) विषाक्त-बाणः । इत्यमरः । २ । ८ । ८८ ॥

लिप्तिका, स्त्री, (लिप्तेव । स्वार्थे कन् ।) दण्डः । यथा । वैश्यस्य चतुर्थोंऽशः अवणादौ लिप्तिका-चतुष्कं अभिजित् । इति सत्कृत्यसुक्तावली ॥

लिप्सा, स्त्री, (लब्धुमिच्छा । लभ + सन् + अः । टाप् ।) इच्छा । इत्यमरः ॥ (यथा, हरि-वंशे । ३८ । २६ ।

"लिप्सां चक्रे प्रसेनात्तु मणिरत्ने स्यमन्तके । गोविन्दो न च तं लेभे शक्तोऽपि न जहार ह ॥")

लिप्सुः, त्रि, (लभ + सन् + उः ।) लब्धुमिच्छुः । तत्पर्य्यायः । गृप्सुः २ गर्द्धनः ३ लुब्धकः ४ लुब्धः ५ अभिलाषुकः ६ लोलुपः ७ लोलुभः ८ । इति हेमचन्द्रः ॥ (यथा, कथासरित्सागरे । २४ । १६ ।

"सोऽप्युपायनलोभात्तत् अद्धे कल्पितायतिः । उपप्रदानं लिप्सूनामेकं ह्याकर्षणौषधम् ॥")

लि(वि)बिः, स्त्री, (लिप् + इन् । बाहुलकात् पस्य बत्वम् ।) लिपिः । इत्यमरः ॥

लिबि(वि)करः, पुं, (लिबिं करोतीति । कृ + "दिवाविभानिशीति ।" ३ । २ । २१ । इति टः ।) लिपिकरः । लिपिं करोति इत्यर्थे कृकुष इत्यनेन कर्त्तरि टप्रत्ययेन निष्पन्नः ॥

लिबि(वि)क्करः, पुं, (लिपिं करोतीति । कृ + टः । पृषोदरादित्वात् द्वितीयाया अलुक् ।) लिपि-कारः । इत्यमरटीकायां भानुदीक्षितः ॥

लिबी, स्त्री, (लिबि + ऋदिकारादिति ङीष् ।) लिपिः । इति शब्दरत्नावली ॥

लिम्पः, पुं, (लिम्पतीति । लिम्प + "अनुपसर्गात् लिम्पविन्देति ।" ३ । १ । १३८ । इति ग्रः ।) लेपनकर्त्ता । इति लिम्पधातोः कर्त्तरि ग्रप्रत्यय-निष्पन्नम् । इति सुग्धबोधव्याकरणम् ॥

लिम्पटः, पुं, षिड्गः । इति हारावली । १६२ ॥

लिम्पाकं, क्ली, निम्बूकविशेषः । पातिलेबु इति भाषा । तस्य गुणाः । सुरभित्वम् । खादुत्वम् । नात्यम्लत्वम् । भक्तरोचनत्वम् । वातश्लेष्महर-त्वम् । हृद्यत्वम् । छर्दिघ्नत्वम् । नातिपित्तकृत्त्वञ्च । इति राजवल्लभः ॥ (तथा च ।

"कर्षे शुद्धं मृतं ताम्रं लिम्पाकाङ्गित्वचां पलम् ॥"

इति रसेन्द्रसारसंग्रहे क्षीद्धि यकृद्दरिलौहे ॥)

लिम्पाकः, पुं, जम्बीरः । खरः । इति शब्दरत्ना-वली ॥

लिप्र, ङ य औ तौच्छ्ये । इति कविकल्पद्रुमः ॥ (दिवा०-आत्म०-अक०-अनिट् ।) तौच्छ्या-मल्पीभावः । ङ य, लिप्र्यते धर्म्मः कलौ । औ, लेष्टा । इति दुर्गादासः ॥

लिप्र, प्र औ गत्याम् । इति कविकल्पद्रुमः ॥ (तुदा०-पर०-सक०-अनिट् ।) लिप्रति । औ, अलिप्त्त् लेष्टा । इति दुर्गादासः ॥

लिप्सः, पुं, नर्त्तकः । लभधातोः कर्त्तरि वनुप्रत्य-येन निपातनात् सिद्धः । उपधाया इत्वमपि । इति सिद्धान्तकौमुद्यामुणादिवृत्तिः । १।१५३॥ (लप्स इति पाठः साधुः ॥)

लिह, ल ष औ स्वादे । इति कविकल्पद्रुमः ॥ (अदा०-उभ०-सक०-अनिट् ।) ल ष, लेढि पुष्पाणि षट्पदः । लीढ्वा । औ, अलिक्षत् । इति दुर्गादासः ॥

ली, कि द्रावणे । इति कविकल्पद्रुमः ॥ (चुरा०-पक्षे भ्वा०-पर०-सक०-अनिट् ।) द्रावणं द्रवी-करणम् । कि, लाययति लयति । मिथ्यो-र्यत्वणाविति लापयति लोहमग्नौ कर्म्मकारः । स्नेहद्रवे तु लाल्योर्लत्वनाविति जनो घृतमग्नौ लीनयत्यपि । इति दुर्गादासः ॥

ली, गि श्लिषि । इति कविकल्पद्रुमः ॥ (क्रया०-पर०-अक०-अनिट् ।) गि, लिनाति बाला लावण्यं प्राप्नोतीत्यर्थः । कर्म्मविवक्षायान्तु लिनाति जलधौ नदी । लीनः लीनिः । अयं अन्तःस्थतीयादिः । इति दुर्गादासः ॥

ली, ड य ओ श्लिषि । इति कविकल्पद्रुमः ॥ (दिवा०-आत्म०-अक०-अनिट् ।) ड य, लीयते चन्द्रः सूर्य्ये । ओ, लीनः । इति दुर्गा-दासः ॥

लीक्षा, स्त्री, लिक्षा । इति शब्दरत्नावली ॥

लीक्षा, स्त्री, लिक्षा । इति शब्दरत्नावली ॥

लीढः, त्रि, आस्वादितः । इति लिहधातोः कर्म्मणि क्तप्रत्ययेन निष्पन्नः ॥ (यथा, श्रीकण्ठ-चरिते । १ । ५३ ।

"सा शुद्धये ऽस्तु शिवपादनखावनिर्यो भक्ता यदीयरुचिलीढ़ललाटपट्टाः ॥")

लीनः, त्रि, (ली + क्तः । "ओदितश्च ।" ८ । २ । ४५ । इति निष्ठातस्य नः ।) लयप्राप्तः । श्लिष्टः । इति व्याकरणम् ॥ अपि च ।

"दिवाकराद्रक्षति यो गुहासु लीनं दिवाभीतमिवान्धकारम् । क्षुद्रेऽपि नूनं शरणं प्रपन्ने ममत्वमुच्चैः शिरसामतीव ॥"

इति कुमारसम्भवे । १ । १२ ॥

लीला, स्त्री, (लयनमिति । ली + सम्पदादित्वात् क्विप् । लियं लातीति । ला + कः ।) केलिः । विलासः । भ्रूभङ्गारभावचेष्टा । इति मेदिनी । ले, ४७ ॥ खेला । इति विश्वः ॥ (यथा, भाग-वते । १ । १ । १८ ।

"अथाख्याहि हरेर्धीमन्नवतारकथाः शुभाः । लीलाविदधतः स्वैरमीश्वरस्यात्ममायया ॥")

अलब्धप्रियसमागमया खचित्तविनोदनार्थं प्रियस्य या चेष्टगतिदृष्टिहसितभणितैरनुकृतिः क्रियते सा लीला । तथा च ।

"अप्राप्तवल्लभसमागमनायिकायाः सख्याः पुरोऽथ निजचित्तविनोदबुद्ध्या । आलापचेष्टगतिहास्यविलोकनाद्यैः प्राणेश्वरानुकृतिमाकथयन्ति लीलाम् ॥" इति ।

प्रियानुकरणं लोला । यथा वेनोदितं वदति याति तथा तथासाविति त्यादीत्यन्योऽपि । ली ड य ओ श्लिषि नाम्नीति लक् लीला । इत्यमर-टीकायां भरतः ॥ * ॥ सा प्रकटाप्रकटभेदेन द्विविधा यथा,—

"प्रकटाप्रकटा चेति लीला सेयं द्विधोच्यते ।"

इति पद्मपुराणम् ॥

तथा हि ।

"सदानन्दैः प्रकाशैः स्वैर्लीलाभिश्च स दीव्यति । तत्रैकेन प्रकाशेन कदाचिज्जगदन्तरे ॥ सहैव स्वपरीवारैर्जन्मादि कुरुते हरिः । क्षणाभावानुसारेण लीलाख्या शक्तिरेव सा ॥ तेषां परिकराणाञ्च तं तं भावं विभावयेत् । प्रपञ्चगोचरत्वेन सा लीला प्रकटा स्मृता ॥ अन्यास्वप्रकटा भान्ति तादृश्यस्तदगोचराः । तत्र प्रकटलीलायामेव स्यातां गमागमौ ॥ गोकुले मथुरायाञ्च द्वारकायाञ्च शार्ङ्गिणः । यास्तत्र तत्राप्रकटास्तत्र तत्रैव सन्ति ताः ॥"

इति श्रीभागवताष्टमम् ॥

लीलावती, स्त्री, (लीलाऽस्त्यस्या इति । लीला + मतुप् । मस्य वः ।) केलियुक्ता । विलासवती । भ्रूभङ्गारभावचेष्टान्विता । खेलाविशिष्टा । इति लीलाशब्दार्थदर्शनात् ॥ * ॥ भास्कराचार्य्यस्य पत्नी । तत्कृतगणितग्रन्थः । यथा । गोदावरीतीर-निवासिनो महाराष्ट्रदेशोद्भवस्य श्रीभास्करा-चार्य्यस्य ग्रन्थकर्त्तुः सुप्रिया लीलावती विरह-विच्छिन्नहृदयस्य तां पदैर्लीलावत्या लीला-वतीमिव । इति लीलावतीग्रन्थस्य मङ्गला-चरणश्लोकस्य टीकायां भवेशः ॥ * ॥ (अवि-चितनृपतेः स्त्रीविशेषः । यथा, मार्कण्डेये । १२३ । १७ ।

"लीलावती वीरसुता वीरभद्रसुतानिभा ॥")

वेश्याविशेषः । । यथा,—

"अभिरूपेण सम्पन्नान् घटयित्वा विना भृतिम् । धर्म्मकार्य्यमिति ज्ञात्वा न गृह्णाति कथञ्चन ॥ योऽसौ सुवर्णकारश्च दरिद्रोऽप्यथ सत्त्ववान् । न मूल्यमादादेषोऽयात् सभार्य्य ऋद्धिसंयुतः । सप्तद्वीपपतिर्जातः सूर्य्यायुतसमप्रभः ॥"

इति मत्स्यपुराणे लीलावतीवेश्यायाः लवणाचल-दाने हेमतरुघटकस्य तथाविधफलदर्शनात् ।

इति तिथ्यादितत्त्वम् ॥ * ॥ न्यायग्रन्थविशेषः । तस्य द्वितीयश्लोको यथा,—

"द्रव्यं नाकुलसुज्ज्वलो गुणगणः कर्म्माधिकं श्लाघ्यते
जातिर्विश्रुतिमागता न च पुनः श्लाघ्या विशेषस्थितिः ।
सम्बन्धः सहजो गुणादिभिरयं यत्रास्तु सत्प्रीतये
सान्वीक्षा नयवेश्मकर्म्मकुशला श्रीन्यायलीलावती ॥"

इति मण्डनमिश्रः ॥

लीलोद्यानं, क्ली, (लीलार्थमुद्यानम् ।) देववनम् । इति त्रिकाण्डशेषः ॥ (यथा, कथासरित्सागरे । १०६ । ४१ ।

"अथ मानससुस्नात्रा देवर्षिव्रातसेवितम् ।
अतीत्य गण्डशैलञ्च लीलोद्यानं द्युयोषिताम् ॥")

लुक्, [च्] पुं, लोपः । यथा । स्यमोर्लुक् क्लीवात् परयोः स्यमोर्लुक् स्यात् । इति मुग्धबोधव्याकरणम् ॥

लुक्कायितः, त्रि, (लुक् कायस्य यस्य ताटग्र इवाचरतीति । लुक्काय + क्विप् । ततः क्तः ।) अन्तर्हितः । यथा । अन्तर्धानं लुक्कायनमिति यावत् । यथा गुरोरन्तर्हृत्ते ग्रिग्रुः निलीयते पलायते लुक्कायते लुक्कायतीति लुच्चापनयनेऽपि लुक् । लुक् कायः शरीरं यस्य स लुक्कायः ततः स इव आचरतीति क्विप् साध्यम् । इति कारकटीकायां दुर्गादासः ॥ कर्म्मणि क्तप्रत्ययेन निष्पन्नोऽयम् ॥

लुङ्गुषः, पुं, क्रोलङ्गः । इति रत्नमाला ॥

लुज, ई क भाषट्टार्थे । इति कविकल्पद्रुमः ॥ (चुरा०-पर०-अक०-सक०-च-सेट् ।) ई क, लुञ्जयति । भा दीप्तिः । षट्टार्थौ निकेतनहिंसावलदानानि । इति दुर्गादासः ॥

लुञ्च, अपनयने । इति कविकल्पद्रुमः ॥ (भ्वा०-पर०-सक०-सेट् ।) सोऽलुञ्चीत् कर्णनासिकम् । इति दुर्गादासः ॥

लुट, विलोटविलोड़नयोः । इति कविकल्पद्रुमः ॥ (भ्वा०-पर०-विलोटे अक०-विलोड़ने सक०-सेट् ।) लोटति । इति दुर्गादासः ॥

लुट, ई च्युतौ । इति कविकल्पद्रुमः ॥ (भ्वा०-पर०-सक०-सेट् ।) ई, लुण्टयते । च्युतिश्चौर्य्यम् । इति दुर्गादासः ॥

लुट, ल ऋ य विलोटविलोड़नयोः । इति कविकल्पद्रुमः ॥ (दिवा०-पर०-विलोटे अक०-विलोड़ने सक०-सेट् ।) ल, अलुटत् । ऋ, अलूलुटत् अलुलोटत् । य, लुट्यति । विलोटः सम्बन्धीभावः । तच्च लुट्यन् सप्तोको भुवि हीरुदावान् । इति भट्टिः ॥ विलोड़ने लुट्यत्पट्टाम्बरान् दुर्गान् कवाटानि च लोटति । इति हलायुधः । इति दुर्गादासः ॥

लुट, ल ड दीप्तिप्रतिघातयोः । इति कविकल्पद्रुमः ॥ (भ्वा०-आत्म०-अक०-पुनर्हनने सक०-सेट् ।) ल, अलुटत् । ड, लोटते । प्रतिघातिः शोकादिना पतनं पुनर्हवनं वा । इति दुर्गादासः ॥

लुट, क भासे । इति कविकल्पद्रुमः ॥ (चुरा०-पर०-अक०-सेट् ।) क, लोटयति । भासो दीप्तिः । इति दुर्गादासः ॥

लुठ, उपघाते । इति कविकल्पद्रुमः ॥ (भ्वा०-पर०-सक० सेट् ।) लोठति । इति दुर्गादासः ॥

लुठ, इ गत्यालस्यस्तेयखोटे । इति कविकल्पद्रुमः ॥ (भ्वा०-पर०-सक०-अक० च-सेट् ।) इ, लुण्ठति । आलस्यं मन्दीभावः । स्तेयं चौर्य्यम् । खोटः खोड़नम् । इति दुर्गादासः ॥

लुठ, ल ड प्रतीघाते । इति कविकल्पद्रुमः ॥ (भ्वा०-आत्म०-सक०-सेट् ।) ल, अलुठत् । ड, लोठते । इति दुर्गादासः ॥

लुठ, क चौर्य्ये । इति कविकल्पद्रुमः ॥ (चुरा०-पर०-सक०-सेट् ।) क, लोठयति । इति दुर्गादासः ॥

लुठ, ग्रि लोटे । इति कविकल्पद्रुमः ॥ (तुदा०-पर०-अक०-सेट् ।) ग्रि, लुठति अलुठीत् लुलोठ । लोटः सम्बन्धीभावः । हारोऽयं हरिणाक्षीणां लुठति स्तनमण्डले । इति दुर्गादासः ॥

लुठनं, क्ली, (लुठ लोटे + ल्युट् ।) अधस्य भूमौ पुनः पुनः भ्रमोपहननम् । लोटा इति गड़ागड़ि इति च भाषा । तत्पर्य्यायः । वेल्लनम् २ । इति त्रिकाण्डशेषः ॥

लुठितः त्रि, (लुठ + क्तः ।) सहसैव पराहृत्तः । भ्रमप्राप्त्यर्थं पुनःपुनर्भूमौ लुठितोऽश्वः । तत्पर्य्यायः । उपावृत्तः २ । इत्यमरभरतौ ॥ वेल्लितः ३ । इति शब्दरत्नावली ॥ अपावृत्तः ४ परावृत्तः ५ । इति हेमचन्द्रः ॥ (यथा, कथासरित्सागरे । १०२ । ७७ ।

"ग्रिलाकलापो लुठितः किमञ्जनगिरेरयम् ।
किमुताकालकल्पान्तमेघौघः पतितो भुवि ॥")

लुड, मन्थे । इति कविकल्पद्रुमः ॥ (भ्वा०-पर०-सक०-सेट् ।) लोड़ति । मन्थो विलोड़नम् । इति दुर्गादासः ॥

लुड, ग्रि संवृतौ । क्षेपे । इति कविकल्पद्रुमः ॥ (तुदा०-पर०-सक०-सेट् ।) ग्रि, लुड़ति अलुड़ीत् लुलोड़ । इति दुर्गादासः ॥

लुण्ट, कि अवज्ञाचौर्य्ये । इति कविकल्पद्रुमः ॥ (चुरा०-पक्षे भ्वा०-पर०-सक०-सेट् ।) इत्यनकारप्रकृतिः टयोगान्मूर्द्धन्यः । तेन भ्वादिपक्षे यगादौ तल्लोपे लुण्ट्यत इत्यादि । कि, लुण्टयति लुण्टति । इति दुर्गादासः ॥

लुण्टकः, पुं, (लुण्टतीति । लुण्ट + ण्वुल् ।) ग्राकविशेषः । नट्या इति भाषा । तत्पर्य्यायः । मासवः २ । इति शब्दचन्द्रिका ॥

लुण्टा, स्त्री, (लुण्ट + अङ् । टाप् ।) लुठनम् । इति काचित् शब्दरत्नावली ॥

लुण्टाकः, पुं, (लुण्टतीति । लुण्ट + "अल्पमिच्छकुटृलुण्टृडः षाकन् ।" ३ । २ । १५५ । इति षाकन् ।) चौरः । लुटधातोः षाकप्रत्ययेन निष्पन्नः ॥

लुण्टाकी, स्त्री, (लुण्टाक + स्त्रियां ङीप् ।) चौरा स्त्री । इति मुग्धबोधव्याकरणम् ॥

लुण्ठकः, त्रि, (लुण्ठतीति । लुण्ठ + ण्वुल् ।) स्तेयकारकः । लुटेरा इति भाषा । यथा,—

"ये चौरा वह्निना दुष्टा गरदा ग्रामलुण्ठकाः ।
सारमेयादने ते वै पात्यन्ते पातकान्विताः ॥"

इति पाद्मे पातालखण्डम् ॥

लुण्ठनं, क्ली, (लुण्ठ + ल्युट् ।) लुठनम् । इति काचित् शब्दरत्नावली ॥ (यथा, देवीभागवते । ५ । २ । १८ ।

"हरणं लुण्ठनं तद्वत् तत्पत्नीनां नराधिप ! ॥")

लुण्ठा, स्त्री, (लुण्ठ + अङ् । स्त्रियां टाप् ।) लुठनम् । इति काचित् शब्दरत्नावली ॥

लुण्ठाकः, पुं, (लुण्ठ + घाकन् ।) काकः । इति त्रिकाण्डशेषः ॥ (चौरः । यथा, कलाविलासे । १ । ३ ।

"विघ्नोऽभिसारिकाणां भवनगणस्फाटिकप्रभानिकरः ।
यत्र विराजति रजनीतिमिरपटप्रकटलुण्ठाकः ॥")

लुण्ठी, स्त्री, लुठनम् । इति काचित् शब्दरत्नावली ॥

लुण्ड, क चौर्य्ये । इति कविकल्पद्रुमः ॥ (चुरा०-पर०-सक०-सेट् ।) क, लुण्डयति । इति दुर्गादासः ॥

लुण्डिका, स्त्री, (लुण्डी । स्वार्थे कन् । ततष्टाप् ।) न्यायसारिणी । इति हारावली ॥ एकत्र वेष्टितमेषलोमादिः । लुड़ि इति लुटि इति च भाषा ॥ यथा,—

"सैन्धवञ्च घृताभ्यक्तं ताम्रभाजनमातपे ।
प्रतप्तमर्कयोगा घृष्टं तन्मलञ्च समाहरेत् ॥"

ताम्रभाजने घृतं सैन्धवं दत्त्वा रौद्रे तप्तं कृत्वा मेषलोमलुण्डिकया घृष्ट्वा मलमग्रं कृत्वा तेन स्वस्थयेत् । इति भैषज्यरत्नावली ॥

लुण्डी, स्त्री, न्यायसारिणी । इति त्रिकाण्डशेषः ॥

लुथ, ई क्लन्थे । इति कविकल्पद्रुमः ॥ (भ्वा०-पर० सक०-सेट् ।) ई, लुत्थयते । क्लन्थो वधक्लेशौ । इति दुर्गादासः ॥

लुप, ऋ ग्र प ल ष औ छेदे । इति कविकल्पद्रुमः ॥ (तुदा०-उभ०-सक०-अनिट् ।) ऋ, अलूलुपत् अलुलोपत् । ग्र प ष, लुप्यति लुप्यते । ल, अलुपत् । औ, लोप्रा । इति दुर्गादासः ॥

लुप्, ऐर् य युपि । इति कविकल्पद्रुमः ॥ (दिवा०-पर०-अक०-सेट् ।) ऐर्, अलुपत् अलोपीत् । अस्मात् पुषादित्वान्नित्यं ङ इत्यन्ये । य, लुप्यति । युपि आकुलीभावे । पातुं लुप्यति लावण्यं नेत्राञ्जलिपुटैर्नरः । इति हलायुधः । इति दुर्गादासः ॥

लुप्, पुं, (लुप् च्छेदे + क्विप् ।) लोपः । यथा । अभोभगोऽघोभ्योऽवे लुप् । इति मुग्धबोधव्याकरणम् ॥

लुप्तं, क्ली, (लुप्+क्तः।) चौर्य्यधनम्। लोत इति ख्यातम्। इति शब्दरत्नावली॥ लोपयति, चि। यथा,—

"चक्षुष्मानिति लुप्ताक्षं चाण्डालं ब्राह्मणेति च।
प्रशंसा निन्दनं द्वेषात् परुषान्न विशिष्यते॥"

इति तिथ्यादितत्त्वम्॥

(यथा च, आर्य्यासप्तशत्याम्। ३६३।

"परिवृत्तनाभि लुप्तत्रिवलि श्यामस्तनाग्र-
मलसाक्षि।
बहुधवलजघनरेखं वपुर्न पुरुषायितं सहते॥")

लुभ. कि इ अर्द्दने। इति कविकल्पद्रुमः॥ (चुरा०-पक्षे भ्वा०-पर०-सक०-सेट्।) कि, लुम्बयति लुम्भति। इ, लुभ्यते। अर्द्दनं वधः। इति दुर्गादासः॥

लुब्धः, पुं, (लुभ+गत्यर्थेति क्तः।) व्याधः। (यथा, महाभारते। १६। ४। २१।

"स संनिरुद्धेन्द्रियवाङ्मनास्तु
शिष्ये महायोगमुपेत्य कृष्णः।
जराथ तं देशमुपाजगाम
लुब्धस्तदानीं मृगसंलिप्तमुखः॥")

लम्पटः। इति शब्दरत्नावली॥

लुब्धः, त्रि, (लुभ+क्तः।) आकाङ्क्षी। इति मेदिनी। धे, १४॥ तत्पर्य्यायः। गृध्नुः २। गर्द्धनः ३ अभिलाषुकः ४ लषाक् ५। इत्यमरः॥ (यथा, कथासरित्सागरे। ५५। ३०।

"लुब्धो यशसि नत्वर्थे भीतः पापान्न शङ्कितः।
मूर्खः परापवादेषु नच शास्त्रेषु योऽभवत्॥")

लुब्धकः, पुं. (लुब्ध एव। स्वार्थे कन्।) व्याधः। इत्यमरः॥ (यथा, कथासरित्सागरे। ८। २४।

"आस्तामकामीदृशं मांसं ददते लुब्धका इति॥")

लम्पटः। इति लुब्धशब्दार्थदर्पणात्॥ (पायुः। यथा, भागवते। ४। २५। ५३।

"निर्ऋतिर्नाम पश्चाद्द्वारत्वया याति पुरञ्जनः।
वैशसं नाम विषयं लुब्धकेन समन्वितः॥")

लुभ, य इर् गार्द्धे। इति कविकल्पद्रुमः॥ (दिवा०-पर०-सक०-सेट्।) गार्द्धमाकाङ्क्षा। य, लुभ्यति धनं लुब्धः। इर्, अलुभत् अलोभीत्। अस्मात् पुषादित्वात् नित्यं ङ इत्यन्ये। इति दुर्गादासः॥

लुभ, शृ विमोहने। इति कविकल्पद्रुमः॥ (तुदा०-पर०-अक०-सेट्।) शृ, लुभत्यात्मनि कामे च। इति हलायुधः॥ लोभिता लोब्धा। इति दुर्गादासः॥ [क्तप्रत्ययेन निष्पन्नः॥

लुभितः, त्रि, विमोहितः। विमोहनार्थलुभधातोः क्तप्रत्ययेन निष्पन्नः॥

लुल, विमर्द्दने। इति कविकल्पद्रुमः॥ (भ्वा०-पर०-सक०-सेट्।) सौत्रधातुरयम्। लुलापः। इति दुर्गादासः॥

लुलापः, पुं, (लुल्यते इति। लुल विमर्द्दने+भिदादित्वात् अङ्। लुलां आप्नोतीति। आप्+आण्।) महिषः। इत्यमरः॥ (यथा, दुर्गाभक्तितरङ्गिण्याम्।

"लुलापं खड्गेन छिन्धि छिन्धि॥")

(तथास्य पर्य्यायः।

"महिषो घोटकारिः स्यात्कासरश्च रजस्वलः।
पीनस्कन्धः कृष्णकायो लुलापो यमवाहनः॥"

इति भावप्रकाशस्य पूर्ब्बखण्डे द्वितीये भागे॥)

लुलापकन्दः, पुं, (लुलापप्रियः कन्दः।) महिषकन्दः। इति राजनिर्घण्टः॥

लुलापकान्ता, स्त्री, (लुलापस्य कान्ता।) महिषी। इति राजनिर्घण्टः॥

लुलितः, त्रि, (लुल+क्तः।) आन्दोलितः। यथा,

"प्रेङ्खोलितस्तरलितो लुलितान्दोलितावपि॥"

इति भूरिप्रयोगः॥

(यथा, कथासरित्सागरे। ३७। ७०।

"हत्वा रथाश्वांश्चिच्छेद शिरो लुलितकुण्डलम्॥"

विकीर्णः। इति श्रीधरः॥ यथा, भागवते। १। ६। ३४।

"युधि तुरगरजो विधूम्रविष्वक्
कचलुलितश्रमवार्य्यलङ्कृतास्ये॥"

व्याप्तः। यथा, रामायणे। २। ६५। १६।

"न सम विभ्राजते देवी शोकाश्रुलुलिताननाः॥"

म्लानः। यथा, आर्य्यासप्तशत्याम्।

"प्रातर्निद्राति यथा यथात्मजा लुलितनिःसहैरङ्गैः।
जामातरि सुदितमनास्तथा तथा सादरा श्वश्रूः॥"

उन्मूलितः। यथा, भागवते। ३। १६। २४।

"विघूर्णबाहूच्छ्वसिशिरोरुहोऽपतत्
यथा नगेन्द्रो लुलितो नभस्वता॥"

खण्डितः। यथा, तत्रैव। ४। ६। १०।

"किञ्चन्नकासिलुलितात् पततां विमानात्॥"

विध्वस्तः। यथा, तत्रैव। ७। ६। २३।

"येऽस्मत्पितुः कुपितहासविजृम्भितभ्रु-
विस्फूर्ज्जितेन लुलिताः स तु ते निरस्तः॥")

लुष, स्तेये। इति कविकल्पद्रुमः॥ (भ्वा०-पर०-सक०-सेट्।) लोषति। इति दुर्गादासः॥

लुष, हिंसने। इति कविकल्पद्रुमः॥ (भ्वा०-पर०-सक०-सेट्।) सौत्रधातुरयम्। लुषाः। इति दुर्गादासः॥

लुषभः, पुं, (रोषतीति। रुष हिंसायाम्+"रुषेर्निसुच् च।" उणा० ३। १२४। इति अभच्। लुषादेशश्च धातोः।) मत्तहस्ती। इत्युणादिकोषः॥

लुह, औ गार्द्धे। इति कविकल्पद्रुमः॥ (भ्वा०-पर०-सक०-अनिट्।) औ, अलुक्षत्। गार्द्धं लब्धुमिच्छा। लोहति धनं लोकः। इति दुर्गादासः॥

लू, श गि छिदि। इति कविकल्पद्रुमः॥ (क्रया०-उभ०-सक०-अनिट्।) श गि, लूनाति लूनीते। लूनः लूनिः। इति दुर्गादासः॥

लूता, स्त्री, (लूनातीति। लू+बाहुलकात् तन्। गुणाभावश्च।) कीटविशेषः। माकड़सा इति भाषा। तत्पर्य्यायः। तन्तुवायः २ ऊर्णनाभः ३ मर्कटकः ४। इत्यमरः॥ मर्कटः ५ लूतिका ६ ऊर्णनाभिः ७ प्रनकः ८ तन्तवायः ९। इति शब्दरत्नावली॥ (यथा, आर्य्यासप्तशत्याम्। ५०४।

"लूतातन्तुनिरुद्धद्वारः शून्यालयः पतत्पतगः।
पथिके तस्मिन्नश्रुसपिहितसुखो रोदितीव
सखि!॥")

पिपीलिका। रोगविशेषः। इति मेदिनी। ते, ५२॥ श्लेष्मस्य पर्य्यायः। मर्म्मत्रग्रः २ श्लेष्मा ३। इति राजनिर्घण्टः॥ तद्रोगस्य निदानादि लूतानां जन्तुविशेषाणामुत्पत्तिं संख्यामाह।

"यस्माल्लूनत्वणं प्राप्ता सुनेः प्रस्वेदबिन्दवः।
तेभ्यो जातास्ततो लूता इति ख्यातास्तु
षोड़श॥"

अत्र सुश्रुतः।

"विश्वामित्रो नृपवरः कदाचिदृषिसत्तमम्।
वशिष्ठं कोपयामास गत्वाश्रमपदं किल॥
कुपितस्य मुनेस्तस्य ललाटे स्वेदबिन्दवः।
अपतन् दर्शनादेव ह्यधस्तात्तीव्रवर्चसः॥
लूते व्रणे महर्षेस्तु धैर्य्ये संभृतेऽपि च।
ततो जातास्त्रिमा घोरा नानारूपा महा-
विषाः।
तासामष्टौ कष्टसाध्या वर्ज्यास्तावत्य एव हि॥"

तत्र व्रणमण्डलाप्रभृतयोऽष्ट कष्टसाध्याः। सौवर्णिकाप्रभृतयोऽष्टावसाध्याः। तासां सामान्यतो दंशलक्षणमाह।

"ताभिर्दष्टे दंशकोऽप्यप्रवृत्तिः क्षतजस्य च।
ज्वरो दाहोऽतिसारश्च गदाः क्षुच्च त्रिदोष-
जाः॥
पिड़िका विविधाकारा मण्डलानि महान्ति च।
श्वोथा महान्तो रुदवो रक्ताः श्यावाश्चला-
स्तथा।
सामान्यं सर्व्वलूतानामेतद्दंशस्य लक्षणम्॥"

दंशकोऽप्यदंशमध्ये पूतिभावः।

"दंशमध्ये तु यत् कृष्णं श्यावं वा जालकावृ-
तम्।
दग्धाकृति भृशं पाकं क्लेदशोथज्वरान्वितम्।
दूषीविषाभिर्लूताभिस्तद्दष्टमिति निर्द्दिशेत्॥"

सौवर्णिकादयोऽष्टावसाध्यप्राणहरास्तासां लक्षणमाह।

"श्वोथः श्वेतासिता रक्ता पीता च पिड़िका
ज्वरः।
प्राणान्तिको भवेद्दाहः श्वासो हिक्का शिरो-
ग्रहः॥ *॥

तस्यौषधं यथा,—

"रजनीयुग्मयष्टङ्गमञ्जिष्ठानागकेशरैः।
घृताम्बुपिष्टैरालेपः सद्यो लूतां विनाशयेत्॥"

अपि च।

"अभयां रोचनां कुष्ठमर्कपुष्पं तथोत्पलम्।
नलवेतसमूलानि गरलं सुरसां तथा॥
सकलिङ्गं समञ्जिष्ठामनन्ताञ्च घृतावरीम्।

लूता

मुद्गाटकं समङ्गाञ्च पद्मकेशरमित्यपि ॥
कल्कीकृत्य पचेत् सर्पिः पयो दद्याच्चतुर्गुणम् ।
सम्यक् पक्वेऽवतीर्णे च शीते तस्मिन् विनिः ।
क्षिपेत् ॥
सर्पिस्तुल्यं भिषक् क्षौद्रं क्षतरक्षं निधापयेत् ।
विषाणि हन्ति दुर्गाणि गरदोषकृतानि च ॥
सप्तरात्रेण विषं सर्व्वं गरेरुपहतं त्वचाम् ।
योगजन्तमकं कण्डुं मांससादं विसञ्ज्ञताम् ॥
नाशयत्यञ्जनाभ्यङ्ग पानवस्तिषु योजितम् ।
सर्पकीटाखुलूतादिदष्टानां विषच्छत् परम् ॥"
मृत्युपाशच्छेदि घृतम् । इति भावप्रकाशः ॥
(तथा च ।
"कोटिभ्यो दारुणतरा लूताः षोड़श ता जगुः ।
अष्टाविंशतिरित्येके ततोऽप्यन्ये तु भूयसीः ॥
सहस्ररश्मयश्चरा वदन्त्यन्ये सहस्रशः ।
बक्रूपत्रवरूपा तु लूतैकैव विषात्मिका ॥
रूपाणि नामतस्तस्या दुर्ज्ञेयान्यतिसङ्करात् ।
नास्ति स्थानव्यवस्था च दोषतोऽतः प्रवक्ष्यते ॥
कृच्छ्रसाध्या पृथग्दोषैरसाध्या निचयेन सा ।
तद्दंशः पैत्तिको दाहस्फोटज्वरदाहवान् ॥
श्यावोष्मा रक्तपीताभः क्लेदी द्राक्षाफलोपमः ।
श्लैष्मिकः कठिनः पाण्डुः परूषकफलाकृतिः ॥
निद्रां प्रीतज्वरं कासं कण्डूञ्च कुरुते श्यावम् ।
वातिकः परुषः श्यावः पर्व्वभेदज्वरप्रदः ॥
तद्विभागं यथास्वञ्च दोषलिङ्गैर्विभावयेत् ।
असाध्यायान्तु कृष्णोष्णश्वासहिक्काग्निरोगरुजाः ॥
श्वेताः पीताः सिता रक्ताः पिटिकाः श्यथुदूषवाः ॥
वेपथुर्व्वमथुर्दाहस्तृड्दान्ध्यं वक्त्रनासता ।
श्यावोष्ठवक्त्रदन्तत्वं पृष्ठग्रीवावभञ्जनम् ॥
पक्वजम्बूसवर्णञ्च दंशात् स्रवति शोणितम् ।
सर्व्वापि सर्व्वजा प्रायो विषदंशेषु भूयसा ॥
तीक्ष्णमध्यावरत्वेन सा त्रिधा हन्त्युपेक्षिता ।
सप्ताहेन दशाहेन पक्षेण च परं क्रमात् ॥
लूतादंशेषु सर्व्वोऽपि दद्रुमण्डलसन्निभः ।
सितोऽसितोऽरुणः पीतः श्यावो वा स्पर्शतः ॥
मध्ये क्षतोऽथवा श्यावः पर्य्यन्ते जालकाकृतः ।
विसर्पवान् शोफयुतस्ताम्यते बहुवेदनः ॥
ज्वरशूलपाकविक्लेदकोठावदरणान्वितः ।
क्लेदेन यत् स्रवेच्छ्यावं तत्रापि कुरुते व्रणम् ॥
श्वासदंष्ट्राशूककूजचक्षुःक्लमालानखार्त्तवैः ।
अष्टाभिरुदमत्येषा विषं वक्त्रैर्विशेषतः ॥
लूता नामेदृशैर्व्यूहैर्मूर्द्धं वाधश्च कीटकाः ।
तद्दूषितञ्च वस्त्रादिदेहे पूर्व्वं विकारकृत् ॥
दिवार्द्धं लक्ष्यते नैव दंशो लूताविषोद्भवः ।
स्फोटोपमवदाभाति ततोऽसौ प्रथमेऽहनि ॥
अथ स्फोटवर्त्मः प्रबलः किञ्चित् कण्डूरुजान्वितः ।
द्वितीयेऽभ्युन्नतोऽन्तेषु पिटकैरिव वाचितः ॥
श्याववर्णो ततो मध्ये कण्डूमान् मन्थिसन्निभः ।

लेखः

तृतीये सञ्चरो रोमहर्षकृन्नक्तमण्डलः ॥
शूरावरूपस्तोदाढ्यो रोमकूपेषु सम्भवः ।
महांश्चतुर्थे श्वयथुस्तापश्वासभ्रमप्रदः ॥
विकारान् कुरुते तांस्तान् पञ्चमे विषकोपजान् ।
षष्ठे व्याप्नोति मर्म्माणि सप्तमे हन्ति जीवितम् ॥
इति तीक्ष्णं विषं मध्यं हीनेषु विभजेदतः ।
एकविंशतिरात्रेण विषं याम्यति सर्व्वथा ॥
अथाशु लूतादष्टस्य शस्त्रेणादंशमुद्धरेत् ।
दष्टेच्च जाम्बवौष्ठाद्यैर्न तु पित्तोत्तरं दहेत् ॥
कर्कशं भिन्नरोमाग्रं मर्म्मसन्ध्यादिसंश्रितम् ।
प्रस्तृतं सर्व्वतो दंशं नच्छिन्दीत दहेन्न च ॥
लेपयेद्दग्धमगदैर्मधुसैन्धवसंयुतैः ।
सुशीतः सेचयेच्चानुकषायैः क्षीरिवृक्षजैः ॥
सर्व्वतोऽपहरेद्रक्तं शस्त्राद्यैः सिरयापिवा ।
सेका लेपास्ततः शीता बोधिश्लेष्मान्तकादिभिः ॥
फलिनीद्विनिशाक्षौद्रसर्पिर्भिः पद्मकाद्भयः ।
अगोधालूताकीटानामगदः सर्व्वकार्म्मिकः ॥"
"रोधं सेव्यं पद्मकं पद्मरेणुः
कालीयाख्यं चन्दनं यच्च रक्तम् ।
कान्ता पुष्पं दुग्धिनीकाथ शस्तं
लूताः सर्व्वा घ्नन्ति सर्व्वक्रियाभिः ॥"
इति वाग्भटे उत्तरस्थाने ३७ अध्यायः ॥)
लूतारिः, पुं, (लूताया अरिः ।) दुग्धफेनीवृक्षः ।
इति राजनिर्घण्टः ॥
लूतिका, स्त्री, (लूतैव । स्वार्थे कन् । टापि अत इत्वम् ।) मर्कटकः । इति शब्दरत्नावली ॥
लूनः, त्रि, (लूयते स्मेति । लू + क्तः । "स्वादिभ्यः ।" ८ । २ । ४४ । इति निष्ठातस्य नः ।) छिन्नः । इत्यमरः ॥ (यथा, कथासरित्सागरे । २७ । १४३ ।
"देवेन वैरिणा संख्ये लूनबाहुवनः कृतः ॥"
उपचितः । यथा, कुमारे । ३ । ६१ ।
"तस्याः सखीभ्यां प्रणिपातपूर्व्वं
स्वहस्तलूनः शिशिरात्ययस्य ।
अकीर्य्यत च्छिन्नकपादमूले
पुष्पोच्चयः पल्लवभङ्गभिन्नः ॥")
लूनकः, पुं, (लून एव । स्वार्थे कन् ।) मेदितः । पशुः । इति मेदिनी । के, १५६ ॥
लूनिः, स्त्री, (लू + क्तिन् । "ऋकारखादिभ्यः क्तिन्निष्ठावङ्गवतीति वक्तव्यम् ।" ८ । २ । ४४ । इत्यस्य वार्त्तिकोक्त्या तस्य नः ।) छेदः । इति सुग्धबोधव्याकरणम् ॥ (व्रीहिः । इत्युज्ज्वलदत्तः । ४ । १०५ ॥)
लूमं, क्ली, (लूयते इति । लू + बाहुलकात् मक् ।) लाङ्गूलम् । इत्यमरः ॥
लूमविषः, पुं, (लूमे लाङ्गूले विषमस्य ।) वृश्चिकादिः । इति हेमचन्द्रः ॥
लूष, क वधे । स्तेये । इति कविकल्पद्रुमः ॥ (चुरा०-पर०-सक०-सेट् ।) क, लूषयति । इति दुर्गादासः ॥
लेखः, पुं, (लिख्यते इति । लिख् + घञ् ।) देवः । इत्यमरः ॥ लेख्यः । इति मेदिनी । खे, ४ ॥ (यथा, कुमारे । १ । ७ ।

लेखनं

"व्रजन्ति विद्याधरसुन्दरीणा-
मनङ्गलेखक्रिययोपयोगम् ॥")
लेखकः, पुं, (लिखतीति । लिख् + ण्वुल् ।) लेखनकर्त्ता । तत्पर्य्यायः । लिपिकरः २ अक्षरचनः ३ अक्षरचुषुः ४ । इत्यमरः । २ । ८ । १५ ॥ वोलकः ५ करकः ६ मसीपत्रयः ७ करप्रथी ८ । इति शब्दरत्नावली ॥ वर्णी ६ । इति जटाधरः ॥ * ॥ तस्य लक्षणानि यथा,—
"सर्व्वदेशाक्षराभिज्ञः सर्व्वशास्त्रविशारदः ।
लेखकः कथितो राज्ञः सर्व्वाधिकरणेषु वै ॥
श्रीघ्रपितान् सुसंपूर्णान् समश्रेणिगतान् समान् ।
अक्षरान् वै लिखेद्यस्तु लेखकः स वरः स्मृतः ॥
उपायवाक्यकुशलः सर्व्वशास्त्रविशारदः ।
वक्तर्थवक्ता चास्पिन लेखकः स्यादभ्यगूत्तम ॥
वाक्याभिप्रायतत्त्वज्ञो देशकालविभागवित् ।
अनाहार्य्यो नृपे भक्तो लेखकः स्यादभ्यगूत्तम ॥"
इति मात्स्ये १८६ अध्यायः ॥ * ॥
अपि च ।
"सकृदुक्तग्रहीतार्थो लघुहस्तो जिताक्षरः ।
सर्व्वशास्त्रसमालोकी प्रकृष्टो नाम लेखकः ॥"
इति चाणक्यसंग्रहः ॥ * ॥
राजलेखकलक्षणं यथा,—
"ब्राह्मणो मन्त्रणाभिज्ञो राजनीतिविशारदः ।
नानालिपिज्ञो मेधावी नानाभाषासमन्वितः ॥
मन्त्रणाचतुरो धीमान् नीतिशास्त्रार्थकोविदः ।
सन्धिविग्रहभेदज्ञो राजकार्य्ये विचक्षणः ॥
सदा राजहितान्वेषी राजसन्निधिसंस्थितः ।
कार्य्याकार्य्यविचारज्ञः सत्यवादी जितेन्द्रियः ॥
स्वरूपवादी शुद्धात्मा धर्म्मज्ञो राजधर्म्मवित् ।
एवमादिगुणैर्युक्तः स एव राजलेखकः ॥
नृपानुवर्त्ती सततं नृपविश्वासरक्षकः ।
नृपतेर्हितकार्य्येषी स एव राजलेखकः ॥"
इति पत्रकौमुदी ॥ * ॥
लेखककर्म्म कायस्थेन कर्त्तव्यम् । यथा,—
"लेखकानपि कायस्थान् लेखकर्म्मणि विचक्षणान् ॥"
कुर्य्यादितिशेषः । इति पराशरसंहितायाम् १० अध्यायः ॥ (गणेशस्तु महाभारतस्य लेखकः । यथा, महाभारते । १ । १ ७८—७९ ।
"श्रुत्वैतत् प्राह विघ्नेशो यदि मे लेखनी क्षणम् ।
लिखनी नावतिष्ठेत तदा स्यां लेखको ह्यहम् ॥
व्यासोऽप्युवाच तं देवमबुद्ध्वा मा लिख क्वचित् ।
ॐमित्युक्त्वा गणेशोऽपि बभूव किल लेखकः ॥")
लेखनं, क्ली, (लिख + ल्युट् ।) कुर्द्दनम् । भुर्ज्जत्वक् । अक्षरविन्यासः । इति मेदिनी । ने, १२२ ॥ * ॥
भूमौ लेखननिषेधो यथा,—
"न भूमौ विलिखेद्वर्णं मन्त्रं न पुस्तकं लिखेत् ॥"
इति योगिनीतन्त्रे तृतीयभागे ७ पटलः ॥
लेखनाञ्जनम् । यथा,—
"दक्षाङ्गुलकृशिलाकाक्षग्रहचन्दनसैन्धवैः ।
चूर्णितैरञ्जनं प्रोक्तं पुष्यार्कादिनिरूपणम् ॥"

दत्तः कुक्कुटः तस्याङ्गस्य त्वक्। शिला मनःशिला। इति भावप्रकाशः॥

लेखनः, पुं, (लिख+ल्युः।) काशः। इति राजनिर्घण्टः॥

लेखनिकः पुं, (लेखनं शिल्पमस्य। लेखन+ठन्।) लेखहारकः। परहस्तेन लेखकः। स्वहस्तेन लेखकः। इति मेदिनी। के, २११॥

लेखनी, स्त्री, लिख्यतेऽनया। (लिख+ल्युट्। ङीष्।) लेखनसाधनवस्तु। तत्पर्य्यायः। वर्णतूलिका २। इति हारावली॥ वर्णतूली ३ कलमः ४ अक्षरतूलिका ५। इति जटाधरः॥ करास्यः ६ चित्रकः ७। इति शब्दरत्नावली॥ ✻॥ (यथा, महाभारते १।१।७८।

"श्रुत्वैतत् प्राह विघ्नेशो यदि मे लेखनी क्षणम्। लिखतो नावतिष्ठेत तदास्यां लेखको ह्यहम्॥")

लेखनीकरणशुभाशुभं यथा,—

"वंशशुच्या लिखेद्वर्णं तस्य हानिर्भवेद्ध्रुवम्। ताम्रशुच्या तु विभवो भवेन्न तत्क्षयो भवेत्॥ महालक्ष्मीर्भवेन्नित्यं सुवर्णस्य शलाकया। दृढनलस्य शुच्या वै मतिवृद्धिः प्रजायते॥ तथा अभिमयैर्दैवि पुत्रपौत्रधनागमः।"

अभिमयेक्षिचकाष्ठमये:।

"रेखेन विपुला लक्ष्मीः कांस्येन मरणं भवेत्॥ अष्टाङ्गुलप्रमाणेन दशाङ्गुलेन वाथवा। चतुरङ्गुलशुच्या वा यो लिखेत् पुस्तकं शुभे। तत्तदक्षरसंख्यं तु स्वस्यायुर्याति वै दिने॥"

यथा रेखेनेत्यादिवचने एकत्रैव विधिनिषेधौ तथात्राप्यष्टाङ्गुलदशाङ्गुलयोर्विधिः निषेधश्चतुरङ्गुले। इति योगिनीतन्त्रे तृतीयभागे ७ पटलः॥ (खटिका। तत्पर्य्यायो यथा,—

"खटिका कठिनी चापि लेखनी च निगद्यते॥"

इति भावप्रकाशस्य पूर्ब्बखण्डे प्रथमे भागे॥)

लेखनीयः, त्रि, लेख्यम्। लेखितव्यम्। इति लिखधातोः कर्म्मण्यनीयप्रत्ययेन निष्पन्नम्॥ (यथा, सुश्रुते। ६। १८।

"स्नेहनो लेखनीयश्च रोपणीयश्च स त्रिधा॥")

लेखर्षभः, पुं, (लेखेषु देवेषु ऋषभः श्रेष्ठः। लेख ऋषभ इवेति वा।) इन्द्रः। इत्यमरः॥

लेखहारः, पुं, लेखं हरति इत्यर्थे अण्प्रत्ययेन निष्पन्नः। पत्रवाहकः। इति विद्वान्तकौमुदी॥ (यथा, कथासरित्सागरे। ५। ६५।

"निगूढं स नृपस्तत्र लेखहारं यसर्ज्जयत्॥")

लेखहारकः, पुं, (लेखहार एव। स्वार्थे कन्।) पत्रवाहकः। (यथा, कथासरित्सागरे। १६। १६०।

"आक्रान्ताय खनगरे स्थितेनोच्छ्वलस्थिते:। भ्रातुर्भूमिखसेह प्रहितो लेखहारकः॥")

लेखा, स्त्री, (लिख्यते इति। लिख+बाहुलकात् अप्। टाप्।) लिपिः। पङ्क्तिः। इति मेदिनी। खे, ४॥

लेखार्हः, पुं, (लेखे अर्हः।) श्रीतालवृक्षः। इति राजनिर्घण्टः॥ लेखनयोग्ये, त्रि॥

लेखितं, त्रि, लेख्यते यत्। कारितलिखितम्। इति आप्तलिखधातोः क्तप्रत्ययेन निष्पन्नम्॥

लेख्य, त्रि, (लिख+ण्यत्।) लेखितव्यम् लेखनीयम्। इति लिखधातोः कर्म्मणि यप्रत्ययेन निष्पन्नम्॥ ✻॥ व्यवहाराङ्गक्रियापादाङ्गम्। यथा,—

"धारणासिकेऽपि समये भ्रान्तिः संजायते यतः। धात्राक्षराणि दृष्टानि पत्रारूढान्यतः पुरा॥ लेख्यन्तु द्विविधं प्रोक्तं स्वहस्तान्यकृतन्तथा। असाक्षिकं साक्षिमच्च सिद्धिर्दृष्टेष्टयोस्त्रयोः॥ मृतास्तु साक्षिणो यत्र धनिकर्णिकलेखकाः। तदप्यार्धं करणस्थते त्वाधेः शिराश्रयात्॥ दर्शितं प्रतिकालच्च पठितं श्रावितच्च यत्। लेख्यं सिध्यति सर्व्वत्र मृतेष्वपि च साक्षिषु॥"

इति व्यवहारतत्त्वे बृहस्पतिः॥

अपि च। साम्प्रतं लेख्यं निरूप्यते। तच्च लेख्यं द्विविधम्। शासनं जानपदञ्चेति। शासनं निरूपितम्। जानपदमभिधीयते। तच्च द्विविधम्। स्वहस्तकृतमन्यकृतञ्चेति। तत्र स्वहस्तकृतमसाक्षिकम्। अन्यकृतं ससाक्षिकम्। अनयोश्च देशाचारानुसारेण प्रामाण्यम्। यदाह नारदः।

"लेख्यन्तु द्विविधं ज्ञेयं स्वहस्तान्यकृतन्तथा। असाक्षिमत् साक्षिमच्च सिद्धिदृष्टेष्टयोस्त्रयोः॥"

इति॥

तत्रान्यकृतमाह।

"यः कश्चिदर्थो निष्पातः स्वरुच्या तु परस्परम्। लेख्यन्तु साक्षिमत् कार्य्यन्तस्मिन् धनिकपूर्ब्बकम्॥"

धनिकाधमर्णयोर्योऽर्थो स्थिरण्यादिः परस्परं स्वरुच्या इयता कालेनेतावद्देयमितीयती च प्रतिमासं वृद्धिरिति निष्पातो व्यवस्थितस्तस्मिन्नर्थे कालान्तरे विप्रतिपत्तौ वस्तुतत्त्वनिर्णयार्थं लेख्यम्। साक्षिमद्दक्षलक्षणं साक्षियुक्तम्। धनिकः पूर्व्वो यस्मिन् तद्धनिकपूर्ब्बकम्। धनिकनामलेखनपूर्ब्बकमिति यावत् कार्य्यं कर्त्तव्यम्। उक्तलक्षणाः साक्षिणो वा कर्त्तव्याः।

"कर्त्रा तु यत् कृतं कार्य्यं सिद्ध्यर्थन्तस्य साक्षिणः।
प्रवर्त्तन्ते विवादेषु स्वकृतं वाप्यलेखकम्॥"

इति स्मरणात्॥

अपि च।

"समामासतदर्द्धाहर्नामजातिस्वगोत्रकैः। सव्रह्मचारिकात्मीयपित्रनामादिचिह्नितम्॥"

समा संवत्सरः। मासश्चैत्रादिस्तदर्द्धः पक्षः शुक्लः कृष्णो वा। अहस्तिथिः प्रतिपदादिः। नाम धनिकाधमर्णयोः। जातिर्ब्राह्मणादिः। स्वगोत्रं वाग्निष्ठादिगोत्रमेतैः समादिभिश्चिह्नितम्। तथा सव्रह्मचारिकं बह्वृचादिशाखाप्रयुक्तं गुणनामवक्तृच इति। आत्मीयपित्रनाम धनिकर्णिकपित्रनाम। आदि ग्रहणाद्वयजातिसंख्याचारादेर्ग्रहणम्। एतैश्चिह्नितं लेख्यं कार्य्यमिति गतेन सम्बन्धः। किञ्च।

"समाप्तेऽर्थे ऋणी नाम स्वहस्तेन निवेशयेत्। मतं मेऽमुकपुत्रस्य यदत्रोपरि लेखितम्॥"

धनिकाधमर्णयोर्योऽर्थः स्वरुच्या व्यवस्थितस्तस्मिन्नर्थे समाप्ते लिखिते ऋणी अधमर्णो नामात्मीयं स्वहस्तेनास्मिन्लेख्ये यदुपरि लेखितं तन्ममामुकपुत्रस्य मतमभिप्रेतमिति निवेशयेत् पत्रे लिखेत्। तथा,—

"साक्षिणश्च स्वहस्तेन पित्रनामकपूर्ब्बकम्। अत्राहमसुकः साक्षी लिखेयुरिति ते समाः॥"

तस्मिन् लेख्ये ये साक्षिणो लिखितास्तेऽप्यात्मीयपित्रनामलेखनपूर्ब्बकमस्मिन्नर्थे अहमसुको देवदत्तः साक्षीति स्वहस्तेनैकैकशो लिखेयुस्ते च समाः संख्यातो गुणतश्च कर्त्तव्याः। यदाधमर्णः साक्षी वा लिपिज्ञो न भवति तदाधमर्णोऽन्यन साक्षी च साक्ष्यन्तरेण सर्व्वसाक्षिसन्निधौ स्वमतं लेखयेत्। यथाह नारदः।

"अलिपिज्ञ ऋणी यः स्यात् स्वमतन्तु स लेखयेत्।
साक्षी वा साक्षिणान्येन सर्व्वसाक्षी समीपतः॥"

इति।

अपि च।

"उभयाभ्यर्थ्यते नैतन्मया ह्यमुकसूनुना। लिखितं ह्यमुकेनेति लेखकोऽन्ते ततो लिखेत्॥ ततो लेखको धनिकाधमर्णिकाभ्यां उभाभ्यां प्रार्थितेन मयामुकेन देवदत्तेन विष्णुमित्रसूनुना एतल्लेख्यं लिखितमित्यन्ते लिखेत्॥ ✻॥ साम्प्रतं स्वकृतलेख्यमाह।

"विनापि साक्षिभिर्लेख्यं स्वहस्तलिखितन्तु यत्। तत् प्रमाणं स्मृतं लेख्यं बलोपधिकृताऽऽदृते॥"

यल्लेख्यं स्वहस्तेन लिखितं अधमर्णेन तत् साक्षिभिर्विनापि प्रमाणं स्मृतं मन्वादिभिः। बलोपधिकृताऽऽदृते। बलेन बलात्कारेण। उपधिना कूटलोभक्रोधभयमदादिलक्षणेन यत् कृतं तस्मादिना। नारदोऽप्याह।

"मत्ताभियुक्तस्त्रीबालबलात्कारकृतञ्च यत्। तदप्रमाणं लिखितं भयोपधिकृतन्त्वयेति॥"

तच्चैतत् स्वहस्तकृतं परहस्तकृतञ्च यल्लेख्यं देशाचारानुसारेण सर्व्वत्रैकव्यवहारे बन्धकव्यवहारयुक्तमर्थक्रमापरिलोपेन लिप्यक्षरापरिलोपेन च लेख्यमित्येतावन्न पुनः साधुशब्दैरेव प्रातिस्विकदेशभाषयापि लेखनीयम्। यथाह नारदः।

"देशाचाराविरुद्धं यदाकाधिविधिलक्षणम्।
तत् प्रमाणं स्मृतं लेख्यमविलुप्तक्रमाक्षरम्॥"

इति॥

विधानं विधिराधिर्विधिराधीकरणस्य लक्षणम्। गोप्याधिर्भोग्याधिकालकृतमित्यादि तदुक्तं विस्पष्टं यस्मिंस्तदुक्ताधिविधिलक्षणम्। अविलुप्तक्रमाक्षरं अर्थानाक्रमः क्रमश्चाक्षराणि च क्रमाक्षराणि अविलुप्तानि क्रमाक्षराणि यस्मिंस्तदविलुप्तक्रमाक्षरम्। तदेवं भूतं लिखितं प्रमाणम्। राजशासनवन्न साधुशब्दनियमोऽत्रेत्यभिप्रायः। लेख्यप्रसङ्गेन लेखारूढमप्राणं त्रिभिरेव

देयमित्याह । ऋणं लेख्यकृतन्देयं पुरुषैस्त्रिभिरेव तु । यथा साक्ष्यादिकृतमृणन्त्रिभिरेव देयं तथा लेख्यकृतमप्याहर्नृपुत्रततृपुत्रैस्त्रिभिरेव देयम् । न चतुर्थादिभिरिति नियम्यते । ननु पुत्रपौत्रैर्ऋणन्देयमित्यविशेषेणर्णमात्रन्त्रिभिरेव देयमिति नियतमेव । वाढ़मस्यैवोत्सर्गस्य पत्रारूढ़र्ण-विषये स्मृत्यन्तरप्रभवामपवादशङ्कामपनेतुमिदं वचनमारब्धम् । तथा हि । पत्रलक्षणमभिधाय कात्यायनेनाभिहितम् । एवं कालमतिक्रान्तं पितृणान्दाप्यते ऋणमिति । इत्थं पत्रारूढ़-मतिक्रान्तकालमपि पितृणामपि पितृणां सम्बन्धि दाप्यते । अत्र पितृणामिति बहुवचननिर्देशात् कालमतिक्रान्तमिति वचनाच्चतुर्थादिर्दाप्यत इति प्रतीयते । तथा हारीतेनापि । लेख्यं यस्य भवेद्धस्ते लाभस्तस्य विनिर्द्दिशेदिति । अत्रापि यस्य हस्ते पत्रमस्ति तस्यर्णलाभ इति सामान्येन चतु-र्थादिभ्योऽप्यणलाभोऽस्तीति प्रतीयते । अतश्चै-तदाशङ्कानिवृत्त्यर्थं एतद्वचनमिति युक्तम् । वचन-द्वयन्तु योगीश्वरवचनानुसारेण योजनीयम् ॥*॥ अस्यापवादमाह । आधिस्तु भुज्यते तावद्-यावत्तन्न प्रदीयते । सवन्धकेऽपि पत्रारूढ़े ऋणे त्रिभिरेव देयमिति नियमाद्दर्शापकरणानधि-कारेणाध्याहरणेऽप्यनधिकारप्राप्ताविदमुच्यते । यावच्चतुर्थेन पञ्चमेन वा ऋणं न दीयते तावद्-देवाधिभुंज्यत इति वदता सवन्धकर्णापाकरणे चतुर्थादेरप्यधिकारो दर्शितः । नन्वेतदप्ययुक्त-मेव फलभोग्यो न नश्यतीति सत्यम् । तदप्ये-तस्मिन्न सत्यपवादवचने पुरुषत्रयविषयमेव स्यादिति सर्व्वमनवद्यम् ॥*॥ प्रासङ्गिकं परि-समाप्य प्रकृतमेवानुसरति ।

"देशान्तरस्थे दुर्लेखे नष्टोन्मृष्टे हृते तथा ।
भिन्ने दग्धेऽथवा छिन्ने लेख्यमन्यत्तु कारयेत् ॥"

व्यवहाराच्चमे पत्रे पत्रान्तरं कुर्य्यादिति विधी-यते । व्यवहाराच्चमत्वाच्चात्यन्तव्यवहितदेशान्त-रस्थे पत्रे दुर्लेखे दुष्टानि सन्दिह्यमानानि अवाचकानि वा लेखानि लिप्यक्षराणि पदानि वा यस्मिंस्तद्दुर्लेखं तस्मिन्दुर्लेखे नष्टे कालवशेन उन्मृष्टे मसीदौर्ब्बल्यादिना मृदिते लिप्यक्षरे हृते तस्करादिभिर्भिन्ने विदलिते दग्धे अग्निना छिन्ने द्विधा भूते सति दिर्भवति । एतच्चार्थि-प्रत्यर्थिनोः परस्परानुमतौ सत्यां विमत्यान्तु व्यवहाराप्राप्तौ देशान्तरस्थपत्रानयनाधानापे-क्षया कालो दातव्यः दुर्दैग्रावस्थिते नष्टे वा पत्रे साक्षिभिरेव व्यवहारनिर्णयः कार्य्यः । यथाह नारदः ।

"लेखेऽ देशान्तरन्यस्ते प्रौर्णे दुर्लिखिते हृते ।
सतस्तत्कालकरणमसतो दृष्टदर्शनम् ॥" इति ॥

सतो विद्यमानपत्रस्य देशान्तरस्थानयनाय कालकरणं कालावधिदातव्यः । असतः पुनर-विद्यमानस्य पत्रस्य पूर्व्वं ये द्रष्टारः साक्षिणस्तै-र्दर्शनं व्यवहारपरिसमापनं कार्य्यम् । यदा तु साक्षिणो न सन्ति तदा दिव्येन निर्णयः कार्य्यः

अलेख्यसाक्षिके देवीं व्यवहारे विनिर्द्दिशेदिति स्मरणात् । एतच्च जानपदं व्यवस्थापत्रम् । राजकीयमपि व्यवस्थापत्रमीदृशमेव भवति । इयांस्तु विशेषः ।

"राज्ञः स्वहस्तसंयुक्तं स्वमुद्राचिह्नितन्तथा ।
राजकीयं स्मृतं लेख्यं सर्व्वेष्वर्थेषु साक्षिमत् ॥"
इति ॥*॥

तथान्यदपि राजकीयं जयपत्रं बृहन्नारदेनोक्तम् ।

यथोपन्यस्तसाध्यार्थसंयुक्तं सोत्तरक्रियम् ।
सावधारणकञ्चैव जयपत्रकमिष्यते ॥
प्राड्विवाकादिहस्ताङ्कं मुद्रितं राजमुद्रया ।
सिद्धेऽर्थे वादिने दद्याज्जयिने जयपत्रकमिति ॥

तथा । सभासदोऽपि मतं मेऽमुकपुत्रस्येति स्वहस्तं दद्युः ।

"सभासदश्च ये तत्र स्मृतिशास्त्रविदः स्थिताः ।
यथा लेख्यविधौ तद्वत् स्वहस्तं दद्युरेव ते ॥"
इति मनुस्मरणात् ॥

सभासदाञ्च परस्परानुमतिव्यतिरेकेण व्यवहारो निःशल्यो भवति । यथाह नारदः ।

"यत्र सभ्यो जनः सर्व्वः साध्ये तदिति मन्यते ।
स निःशल्यो विवादः स्यात् सशल्यस्त्वन्यथा भवेत् ॥" इति ।

एतच्चतुष्पाद्व्यवहार एव ।

"साधयेत् साध्यमर्थं यच्चतुष्पादान्वितञ्च यत् ।
राजमुद्राङ्कितञ्चैव जयपत्रकमिष्यते ॥"
इति स्मरणात् ॥

यत्र तु हीनता यथा ।

"अन्यवादी क्रियाद्वेषी नोपस्थाता निरुत्तरः ।
आहूतप्रपलायी च हीनः पञ्चविधः स्मृतः ॥"
इति ॥

तत्र न जयपत्रमस्ति अपि तु हीनपत्रमेव तत्र कालान्तरे दण्डप्राप्त्यर्थं जयपत्रं तु प्राड्व्याय-विधिसिद्ध्यर्थमिति विशेषः । लेख्यसन्देहे निर्णयनिमित्तान्याह ।

"सन्दिग्धलेख्यशुद्धिः स्यात् स्वहस्तलिखितादि-
भिः ।
युक्तिप्राप्तिक्रियाचिह्नसम्बन्धागमहेतुभिः ॥"

शुद्धमशुद्धञ्चेति सन्दिग्धस्य लेख्यस्य शुद्धिः स्वहस्तलिखितादिभिः स्यात् । स्वहस्तेन लिखितं यल्लेख्यान्तरन्तेन शुद्धिः । यदि सदृशान्यक्ष-राणि भवन्ति तदा शुद्धिः स्यादित्यर्थः । आदि-शब्दात् साक्षिलेखकस्वहस्तलिखितान्तरसम्बा-दाच्छुद्धिरिति । युक्त्या प्राप्तिर्युक्तिप्राप्तिः । देश-कालपुरुषाणां द्रव्येण सह सम्बन्धः प्राप्तिः । अस्मिन्देशे अस्मिन् काले अस्य पुरुषस्येदं द्रव्यं घटत इति युक्तिः । प्राप्तिः क्रिया तत्साध्युप-न्यासः । चिह्नमसाधारणं श्रीकारादि । सम्बन्धः अर्थिप्रत्यर्थिनोः पूर्व्वमपि परस्परविश्वासेन दान-ग्रहणादिसम्बन्धः । आगमोऽस्येतावतोऽर्थस्य सम्भावितः प्रामुपायः । एत एव हेतवः । एभिर्हेतुभिः सन्दिग्धलेख्यशुद्धिः स्यादित्यन्वयः । यदा तु लेख्ये सन्देहनिर्णयो न जायते तदा

साक्षिभिर्निर्णयः कार्य्यः । यथाह कात्यायनः ।

"दूषिते पत्रके वादी तदारूढ़ांस्तु निर्द्दिशेत् ॥"
इति ।

साक्षिसम्भवविषयमिदं वचनम् । साक्ष्यसम्भव-विषयन्तु हारीतवचनम् ।

"न मयैतत् कृतं पत्रं कूटमेतेन कारितम् ।
अधरीकृत्य तत् पत्रमथ दिव्येन निर्णयः ॥"
इति ॥*॥

एवं प्रोधिते पत्रे ऋणे च दातव्ये प्राप्ते यदा कृतघ्नमेवर्णन्दातुमसमर्थस्तदा किं कर्त्तव्यमित्यत आह ।

"लेख्यस्य पृष्ठेऽभिलिखेद्दत्त्वा दत्तर्णिको धनम् ।
धनी चोपगतं दद्यात् स्वहस्तपरिचिह्नितम् ॥"

यदाधमर्णिकः सकलन्ऋणं दातुमसमर्थस्तदा शक्त्यनुसारेण दत्त्वा दत्त्वा पूर्व्वकृतस्य लेख्यस्य पृष्ठेऽभिलिखेदेतावन्मया दत्तमिति । उत्तमर्णो वा उपगतं प्राप्तं धनन्तस्यैव लेख्यस्य पृष्ठे दद्या-दभिलिखेदेतावन्मया लब्धमिति । कथं स्वहस्त-परिचिह्नितम् । स्वहस्तलिखिताक्षरचिह्नितम् । यद्वोपगतं प्रवेशप्रपं स्वहस्तलिखितचिह्नित-मधमर्णायोत्तमर्णो दद्यात् ॥*॥ ऋणे तु कृतघ्ने दत्ते लेख्यं किं कर्त्तव्यमित्यत आह ।

"दत्तर्णं पाटयेल्लेख्यं शुद्धौ चान्यत्तु कारयेत् ॥"

क्रमेण सकृदेव वा कृतघ्नऋणन्दत्त्वा पूर्व्वकृतं लेख्यम्पाटयेत् । यदा तु दुर्गदेशावस्थितं लेख्यं नष्टं वा तदा शुद्धौ अधमर्णत्वनिवृत्त्यर्थमन्यलेखं कारयेदुत्तमर्णमधमर्णः पूर्व्वोक्तक्रमेणोत्तमर्णो विशुद्धिपत्रं अधमर्णाय दद्यादित्यर्थः ॥*॥ ससाक्षिके ऋणे कृतघ्ने दातव्ये किं कर्त्तव्य-मित्यत आह ।

"साक्षिमच्च भवेत् यद्वा तद्दातव्यं ससाक्षिकम् ।"

यत्तु ससाक्षिकमृणन्तत् पूर्व्वसाक्षिसमक्षमेव दद्यात् । इति लेख्यप्रकरणम् । इति मिता-क्षरायां व्यवहाराध्यायः ॥

लेख्यचूर्णिका, स्त्री, (लेख्यस्य चूर्णिका ।) तूलिका इति शब्दरत्नावली ॥

लेख्यपत्रः, पुं, (लेख्यं लेखार्हं पत्रं अस्य ।) ताल-तरुः । इति भावप्रकाशः ॥ लेखनीय-पत्रे, क्ली ॥

लेख्यस्थानं, क्ली, (लेख्यस्य स्थानम् ।) लिख्यते यत्र । आफिस इति दप्तरखाना इति च म्लेच्छभाषा । तत्पर्य्यायः । ग्रन्थकुटी २ । इति शब्दरत्नावली ॥

लेखं, क्ली, गूथम् । ल्याड़ इति भाषा । यथा,—

"उत्ससर्ज्ज बृहल्लेखं सूत्रञ्च भयमाप ह ॥"

इति ब्रह्मवैवर्त्ते श्रीकृष्णजन्मखण्डे धेनुकासुरवधे २२ अध्यायः ॥

लेप, ऋ ङ गमने । इति कविकल्पद्रुमः ॥ (भ्वा०-आत्म०-सक०-सेट् ।) ऋ, अलिलेपत् । ङ, लेपते लिलेपे । इति दुर्गादासः ॥

लेपः, पुं, (लिप + घञ् ।) लेपनम् । (यथा, मार्क-ण्डेये । ३५ । १५ ।

"भूमिर्विशुध्यते कालात् दाहमार्ज्जनगोक्रमैः।
लेपादुल्लेखनात् सेकादेभ्रसंमार्ज्जनार्चनात्॥")
भोजनम्। इति मेदिनी। पे, १०॥ (लिप्यतेऽनेनेति।) सुधा। इति विश्वः॥ चुन इति भाषा॥
लेपकः, पुं, (लिम्पतीति। लिप्+ण्वुल्।) जातिविशेषः। राज इति थेकर इति च भाषा। तत्पर्य्यायः। पक्षगण्डः २। इत्यमरः॥ लेपी ३। इति शब्दरत्नावली॥ लेप्यकृत् ४। इति हेमचन्द्रः॥ (लेपनकर्त्तरि, त्रि॥)
लेपनं, क्ली, (लिप्+ल्युट्।) लेपः। लेपा इति भाषा। यथा,—
"वैशाखस्य सिते पक्षे तृतीयात्रयसंज्ञिता।
तत्र मां लेपयेन्नत्वलेपनैरतिशोभितम्॥"
इति तिथ्यादितत्त्वम्॥
विष्णुगृहलेपनफलं यथा,—
वराह उवाच।
"शृणु तत्त्वेन मे देवि! लिप्यमानस्य यत् फलम्।
सर्व्वं ते कथयिष्यामि यथा प्राप्नोति मानवः॥
गोमयं गृह्य वै भूमे मम वेश्मोपलेपयेत्।
न्यस्तानि तत्र यावन्ति पदानि च विलिम्पतः॥
तावद्वर्षसहस्राणि दिव्यानि दिवि मोदते।
यदि द्वादश वर्षाणि लिप्यते मम कर्म्मसु॥
जायते विपुले शुद्धे धनधान्यसमाकुले॥
द्विजेनैमस्कृतो देवि! कुशद्वीपाय गच्छति।
कुशद्वीपमनुप्राप्य सहस्रं जीवते दश।
मद्भक्तश्चैव जायेत महिमागुणवान् शुचिः॥
कुशद्वीपात् परिभ्रष्टो मम कर्म्मपरायणः।
राजा वै जायते सुभ्रु सर्व्वधर्म्मेषु निष्ठितः॥
लेपनस्य प्रभावेण मम कर्म्मपरायणः।
भक्त्या यवस्थितश्चापि सर्व्वयज्ञाणि गच्छते॥
देवि! कारयते सर्व्वं मम चायतनानि च॥
कारयित्वा यथान्यायं मम लोकाय गच्छति॥
गोमयस्य तु वक्ष्यामि तच्छृणुष्व वसुन्धरे।
गोमयन्तु समासाद्य यावल्लोकोऽनुगच्छति॥
समीपे यदि वा दूरे गत्वानयति गोमयम्।
यावन्ति तत्पदान्यस्य तावद्वर्षसहस्रकम्।
गोमयानयिता चैव स्वर्गलोके महीयते॥
एकादशसहस्राणि एकादशशतानि च।
ततः स याज्ञले द्वीपे रमते च सुदा युतः॥
याज्ञलात्तु परिभ्रष्टो राजा भवति धार्म्मिकः।
मद्भक्तश्चैव जायेत सर्व्वधर्म्मविदांवरः॥
अथ द्वादशवर्षाणि मच्चित्तः सुदृढव्रतः।
वहते गोमयं सुभ्रु मम लोकाय गच्छति॥"
इति वराहपुराणम्॥
देवीगृहलेपनफलं यथा,—
"देव्या गृहन्तु यः शुक्र गोमयेनानुलेपयेत्।
स्त्रियो वा यदि वा पुंसः प्रसादयतु निरन्तरम्।
स लभेदीप्सितान् कामान् देव्या लोकञ्च गच्छति॥"
इति देवीपुराणे ४२ अध्यायः॥
(रात्रौ लेपननिषेधो यथा,—
"न रात्रौ लेपनं कुर्य्यात् शुष्कमाणं न धारयेत्।
शुष्कमाणमुपेक्षेत प्रदेहे पीड़नं प्रति॥"
इति मध्यखण्डे त्रयोविंशेऽध्याये शार्ङ्गधरेणोक्तम्॥)
लेपनः, पुं, (लिम्पत्यनेनेति। लिप्+करणे ल्युट्।) तुरुष्कनामगन्धद्रव्यम्। इति राजनिर्घण्टः॥
लेपी [न्] पुं, (लिम्पतीति। लिप्+णिनिः।) लेपकः। थेकर इति भाषा। इति शब्दरत्नावली॥ लेपकर्त्तरि लेपविशिष्टे च त्रि॥
लेप्यं, त्रि, (लिप्+ण्यत्।) लेपनीयम्। लेपनयम्। लिपधातोः कर्म्मणि यप्रत्ययेन निष्पन्नम्॥ (यथा, भागवते। ११। २७। १२।
"शैली दारुमयी लौही लेप्या लेख्या च सैकती।
मनोमयी मणिमयी प्रतिमाष्टविधा स्मृता॥")
लेप्यकृत्, पुं, (लेप्यं करोतीति। कृ+क्विप्।) लेपकः। इति हेमचन्द्रः। ३। ५८६॥
लेप्यमयी, स्त्री, (लेप्य+मयट्। ङीप्।) काष्ठादिघटितपुत्तलिका। तत्पर्य्यायः। अञ्जलिकारिका २। इति हेमचन्द्रः॥
लेप्यस्त्री, स्त्री, (लेप्या स्त्री।) सुगन्धद्रव्यलिप्ता स्त्री। इति शब्दरत्नावली॥
लेयः, पुं, सिंहराशिः। इति ज्योतिस्तत्त्वम्॥
लेलिहानः, पुं, (पुनःपुनरतिशयेन वा लेढ़ीति। लिह्+यङ्+शानच्।) शिवः। इति शब्दरत्नावली॥ सर्पः। इति हेमचन्द्रः॥ पुनःपुनर्लेहनकर्त्तरि, त्रि॥ (यथा, महाभारते। १। २३३। ५।
"सप्तजिह्वानन: क्रूरो लेलिहानो विसर्पति॥")
लेलिहाना, स्त्री, (लेलिहान+स्त्रियां टाप्।) सुरादिविशेषः। यथा,—
"वक्त्रं विस्तारितं कृत्वाप्यधो जिह्वाञ्च चालयेत्।
पार्श्वस्थं सुरियुगलं लेलिहानेति कीर्त्तिता॥"
एषा ताराराधने। अन्या लेलिहाना वक्ष्यते।
"धोनिर्म्मायाधरः सेन्दुर्बधूः कूर्चं क्रमादिदुः॥
बीजानि चोच्चरन् मन्त्री सुरादानमाचरेत्।
तर्ज्जनीमध्यमानामाः समं कुर्य्यादधोमुखम्॥
अनामायां स्थिपेद्दृष्ट्वा ऋर्च्यौ कृत्वा कनिष्ठिकाम्।
लेलिहानाख्यमुद्रेयं जीवन्मासे प्रकीर्त्तिता॥"
इति तन्त्रसारः॥
लेप्यः, पुं, (लिप्+घञ्।) कथा। इत्यमरः॥ (यथा, महाभारते। १२। ५८। २४।
"एष ते राजधर्म्माणां लेप्यः समनुवर्णितः॥")
लेष्टुः, पुं, (लिश्यते इति। लिश्+बाहुलकात् तुन्।) लोष्टम्। इत्यमरः॥ (यथा, महाभारते। १३। ३४। २६।
"अथ यो ब्राह्मणान् क्रुष्टः पराभवति सोऽचिरात्।
यथा मृद्भवे क्षिप्त आमलेष्टुर्विनश्यति")
लेष्टुघ्नः, पुं, (लेष्टुं हन्तीति। हन्+टक्। लेष्टुभेदनः। इति शब्दरत्नावली॥
लेष्टुभेदनः, पुं, (लेष्टुं भिनत्तीति। भिद्+ल्युट्।) लोष्टभङ्गसाधनमुद्गरः। मट इति ख्यातः। इति केचित्। इति भरतः॥ तत्पर्य्यायः। कोटिघ्नः २। इत्यमरः॥ कोटीघ्नः ३। इति रत्नकोषः॥ लेष्टुघ्नः ४ लेष्टुभेदी ५ चूर्णदण्डः ६। इति शब्दरत्नावली॥
लेसिकः, पुं, हस्त्यारोहकः। तत्पर्य्यायः। कटिरोहकः २। इति शब्दमाला॥
लेहः, पुं, (लेहनमिति। लिह्+घञ्।) आहारः। भक्ष्यम्। इति हेमचन्द्रः॥ तत्पर्य्यायः। खादनम् २ रसनम् ३ खदनम् ४ खदिः ५। इति राजनिर्घण्टः॥ (यथा, सुश्रुतसंहितायाम्। ५। ४३।
"सर्पापसव्यलेहग्रसननिरोधावमर्द्दनारोहाः।
आघ्रातं मधुतमस्तमोऽन्य इति ते दश श्वासाः॥"
कर्म्मणि घञ्। रसः। यथा, सुश्रुते। १। १४४।
"पचेल्लेहं सिता चौद्रं पलार्द्धकुड़वान्वितम्॥"
लेढ़ीति। लिह्+पचाद्यच्। लेहनकर्त्तरि, त्रि। यथा, भट्टिः। ६। ८२।
"इक्ष्वोऽहं मधुनो लेहैर्द्विरुग्रैर्यथा गिरिः॥"
अवलेहः। तत्पर्य्यायो यथा,—
"क्वाथस्य स्यात् पुनः पाकात् घनत्वं सारसक्रिया।
सोऽवलेहश्च लेहः स्यात्तन्मात्रा स्यात् पलोन्मिता॥
सिता चतुर्गुणा कार्य्या चूर्णाश्च द्विगुणो गुड़ः।
द्रवं चतुर्गुणं दद्यादिति सर्व्वत्र निश्चयः॥"
इति मध्यखण्डेऽष्टमेऽध्याये शार्ङ्गधरेणोक्तम्॥")
लेहनं, क्ली (लिह्+ल्युट्।) जिह्वया रसग्रहणम्। चाटन इति भाषा। तत्पर्य्यायः। जिह्वाखादः २। इति हेमचन्द्रः॥
लेहिनः, पुं, (लिह्+बाहुलकात् इनन्।) टङ्गम्। इति हेमचन्द्रः॥
लेह्यं, क्ली, (लिह्+ण्यत्।) अम्लतम्। इति शब्दमाला॥ लेहनीये, त्रि॥ (यथा, कथासरित्सागरे। ४५। २३०।
"तत्तन्नानाविधं भक्ष्यभोज्यलेह्यादि षड्रसम्।
दिव्यमन्नं बुभुजिरे पपुः पानमथोत्तमम्॥"
आहारविशेषो यथा,—
"आहारं षड्विधञ्चूष्यं पेयं लेह्यन्तथैव च।
भोज्यं भक्ष्यन्तथा चर्व्व्यं गुरु विद्यादयथोत्तरम्॥"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे॥)
लैङ्गं, क्ली, (लिङ्गमधिकृत्य कृतो ग्रन्थ इति। लिङ्गस्येदमिति वा। लिङ्ग+अण्।) लिङ्गपुराणम्। यथा,—
"मात्स्यं कौर्म्मं तथा लैङ्गं शैवं स्कान्दन्तथैव च॥"
इत्यादि पाद्मोत्तरखण्डे ३४ अध्यायः॥
(अस्य विवरणादिकं पुराणशब्दे द्रष्टव्यम्॥)

लैङ्गी, स्त्री, लिङ्गिनी। इति राजनिर्घण्टः॥ लिङ्ग सम्बन्धिनि, त्रि॥

लोक, ऋ क दीप्तौ। इति कविकल्पद्रुमः॥ (चुरा०-पर०-अक०-सेट्।) ऋ, अलुलोकत्। क, लोकयति। इति दुर्गादासः॥

लोक, ऋ ड ईक्षे। इति कविकल्पद्रुमः॥ (भ्वा०-आत्म०-सक०-सेट्।) ऋ, अलुलोकत्। ड, लोकते। विलोकयन्त्यो वपुरापुरच्छलं प्रकाम-विस्तारफलं हरिण्यः। इत्यादौ विलोकनं विलोकः पश्चात् तं करोतीति णौ साध्यम्। इति दुर्गादासः॥

लोकः, पुं, (लोक्यते इति। लोक्+घञ्।) भुवनम्। जनः। इत्यमरः॥ सप्तलोकनामानि यथा,—

"भूर्भुवः स्वर्महश्चैव जनश्च तप एव च।
सत्यलोकश्च सप्तैते लोकास्तु परिकीर्त्तिताः॥"
इत्यग्निपुराणम्॥

अपि च।

"भूर्लोको भुवः स्वर्लोकस्त्रैलोक्यमिदमुच्यते।
महर्ज्जनस्तपः सत्यः सप्त लोकाः प्रकीर्त्तिताः॥
भूर्लोकः पार्थिवो लोकः अन्तरीक्षं भुवः स्मृतः।
भावो लोको दिवि ज्ञेयस्तदूर्द्ध्वं यथाक्रमम्॥
भूतस्याधिपतिर्ह्यग्निस्ततो भूतपतिस्तु सः।
वायुर्नभसोऽधिपतिस्तेन वायुर्नभस्वतिः।
भायस्य सूर्य्याधिपतिस्तेन सूर्य्यो दिवस्पतिः॥
गन्धर्व्वाप्सरसश्चैव गुह्यकाः सह राक्षसैः।
भूर्लोकवासिनः सर्व्वे अन्तरीक्षचरान् शृणु॥
मरुतः सप्तभिः स्कन्धै रुद्रास्तथैव चाश्विनौ।
आदित्या वसवः सर्व्वे तथैव च गवाङ्गनाः॥
चतुर्थ तु महर्लोके तिष्ठन्ते कल्पवासिनः।
प्रजानां पतिभिः सर्व्वैः सेव्यते पञ्चमो महान्॥
मनुः सनत्कुमाराद्या वैराजश्च सुताश्रयः।
षष्ठे तु संस्थिता ह्येते देवा देवविरोधकाः॥
सत्यस्तु सप्तमो लोको ह्यपुनर्भववासिनाम्।
ब्रह्मलोकः समाख्यातो ह्यप्रतीघातलक्षणः॥
महीतलात् सहस्रांशुस्तत ऊर्द्धं दिवाकरः।
दश तानि ध्रुवे यावद्द्विगुणे द्विगुणान्तरे॥
दशयोजनकोट्यास्तु मेरुरूर्द्धं ध्रुवः स्मृतः।
त्रयोविंशतिलक्षाणि त्रैलोक्येऽयैक उच्यते॥
द्विगुणेषु सहस्रेषु योजनानां शतेषु च।
लोकान्तरमथैवैकं ध्रुवादूर्द्धं विधीयते॥
देवदानवगन्धर्व्वयक्षराक्षसपन्नगाः।
भूतविद्याधराश्चैव अष्टौ ते देवयोनयः॥
ते ब्रह्माण्डस्य मध्यस्थाः परतस्तमसावृतम्।
ततोऽग्निवायुराकाशं ततो भूतादिरुच्यते॥
ततो महान् प्रधानश्च प्रकृतिः पुरुषस्ततः।
पुरुषादीश्वरो ज्ञेयो यस्य सृष्ट्याहृतं जगत्।
शिवोमाभानुदेवानां परापरतरा मताः॥"
इति देवीपुराणे त्रैलोक्याभ्युदये ग्रहगति-र्नामाध्यायः॥ *॥ दिक्पालानां लोका यथा,

"प्रजापतिस्तु भगवान् गुह्यतः प्रेक्ष्य देवताम्।
आधिपत्येषु शुक्रेषु न्ययोजयत योगवित्॥
चयाणामपि लोकानां देवतानां द्विजोत्तमाः।
चकार शुक्रं राजानं दैत्यानां दितिपूर्व्वजम्॥
पूर्व्वस्यां कौशिको राजा दक्षिणस्यां यमो दिशि।
वरुणः पश्चिमायान्तु उत्तरस्यां सदा धनी॥"*॥
पुण्यवतां लोका यथा,—

"एवं विभज्य राज्यानि पुरा प्रोक्तानि यानि च।
लोकांश्च विदधे दिव्यान् ददावथ पृथक् पृथक्॥
कस्यचित् सूर्य्यसङ्काशान् कस्यचिद्वह्निनिर्म्मलान्।
कस्यचिद्विष्णुविद्योतान् कस्यचिच्चन्द्रनिर्म्मलान्॥
नानावर्णान् काममयाननेकशतयोजनान्।
स तान् सुकृतिनां लोकान् पावनाय च संस्थितान्॥
भानूर्द्धे ये तपस्यन्ति सौम्याश्चारागणाः सदा।
एते सुकृतिनां लोका ये शान्ताः पुण्यकर्म्मभिः।
ये यजन्ति मखैः पुर्य्यैः समाप्तवरदक्षिणैः।
स्वदारनिरता दान्ता ऋजवः सत्यवादिनः॥
दीनानुग्रहकर्त्तारो ब्रह्मण्या लोकपूजिताः।
योगयुक्ता महात्मानो यान्ति तत्र तपोज्वलाः॥
सर्व्वे सद्दाः क्षमायुक्ता कोपिता ये तमोजिताः।
एवं नियोज्य तनयान् स्वयं लोकपितामहः।
पौष्करं ब्रह्मसदनमारुरोह प्रजापतिः॥
सर्व्वे स्वयम्भुदत्तेषु पावनेषु दिवौकसः।
रेमिरे खेषु लोकेषु महेन्द्रेणाभिपालिताः॥"
इति वह्निपुराणे वाराहप्रादुर्भावनामाध्यायः॥
(जनार्थे विषयोऽस्य यथा,—

"यथा लोकस्य स्वार्गादिस्तथा पुरुषस्य गर्भाधानं यथा कृतयुगमेवं बाल्यम्। यथा त्रेता तथा यौवनं यथा द्वापरस्तथा स्थाविर्य्यं यथा कलिरेवमातुर्य्यं यथा युगान्तस्तथा मरणमित्येवमनुमानेनानुक्तानामपि लोकपुरुषयोरवयवविशेषाणामभिवेशसामान्यं विद्यात्।"

"तत्र संयोगापेक्षो लोकशब्दः षड्धातुसमुदायो हि सामान्यतः सर्व्वलोकः। तस्य हेतुरुत्पत्तिर्वृद्धिरुपप्लवो वियोगश्च तत्र हेतुरुत्पत्तिकारणं उत्पत्तिर्जन्म वृद्धिराप्यायनं उपप्लवो दुःखागमः षड्धातु विभागो वियोगः स जीवापगमः स प्राणनिरोधः स भङ्गः स लोकस्वभावः।" इति चरके शारीरस्थाने पञ्चमेऽध्याये॥

"तस्मिन् क्रिया सोऽधिष्ठानं कस्मात् लोकस्य देविध्यात्। लोकोहि द्विविधः स्थावरो जङ्गमश्च। द्विविधात्मक एवाग्नेयः सौम्यश्च तद्भूयस्त्वात्। पञ्चात्मको वा।" इति सुश्रुते सूत्रस्थाने प्रथमेऽध्याये॥ *॥)

लोककान्ता, स्त्री, (लोकानां कान्ता प्रिया।) ऋद्धिनामौषधम्। इति राजनिर्घण्टः॥ (लोकप्रिये, त्रि। यथा, गो० रामायणे। २। ३८। ६।

"लोककान्तं प्रियं पुत्रं कुशचीराम्बरं वनम्।
प्रस्थितं पश्यतो मेऽद्य हृदयं किं न दीर्य्यते॥")

लोकचक्षुः, [स्] क्ली, (लोकानां चक्षुरिव।) सूर्य्यः। इति शब्दमाला॥ जनस्य लोचनञ्च॥

लोकजित्, पुं, (लोकं जितवानिति। जि+क्विप्।) बुद्धः। इत्यमरः॥ (लोकजेतरि, त्रि। यथा, शतपथब्राह्मणे। १४। ४। १। ३३।

"यं कामं कामयते तमागायति तद्वै तल्लोकजिदेव॥")

लोकतुषारः, पुं, (लोके तुषार इव।) कर्पूरः। इति राजनिर्घण्टः॥ (कर्पूरशब्दे ऽस्य गुणादिकं ज्ञातव्यम्॥)

लोकनाथः, पुं, (लोकानां नाथः।) बुद्धः। इति चिकाण्डशेषः॥ (यथा, राजतरङ्गिण्याम्। १। १५८।

"लोके भगवतो लोकनाथादारभ्य केचन
ये जन्तवो गतक्लेशान् बोधिसत्त्वानवेहि तान्॥")

ब्रह्मा। इति शब्दरत्नावली॥ विष्णुः। इति तस्य सहस्रनामस्तोत्रम्॥ शिवः। यथा,—

"अकिञ्चनः सनू प्रभवः स सम्पदां
स लोकनाथः पितृसद्मगोचरः।
स भीमरूपः शिव इत्युदीर्य्यते
न सन्ति यार्थार्थविदः पिशाकिनः॥"
इति कुमारसम्भवम्॥

(तथा च महालिङ्गार्चनतन्त्रे शिवशतनाम-स्तोत्रे।

"त्रैलोक्ये लोकनाथश्च रुद्रलोके महेश्वरः॥"

वटिकौषधविशेषः। तद्यथा,—

"पारदं गन्धकञ्चैव समभागं विचूर्णयेत्।
मृताभ्रं रसतुल्यञ्च पुनस्तेनैव मर्द्दयेत्॥
रसाद्द्विगुणलौहञ्च लौहतुल्यञ्च ताम्रकम्।
भस्मवाराटिकायाश्च ताम्रतल्लिगुणं क्षिपेत्॥
नागवङ्गौदलेनैव मर्द्दयेद्दयत्नतो भिषक्।
पत्रैरलपुटेनैव खाङ्गशीतं समुद्धरेत्॥
यत्तत्क्षीरोदरहरः गुल्मश्वयथुनाशनः।
पिप्पलीमधुसंयुक्तां सगुड़ां वा हरीतकीम्॥
गोमूत्रञ्च पिबेच्चानु गुड़ं वा क्षीरकान्वितम्॥"

इति लोकनाथो रसः॥ इति वैद्यकरसेन्द्रसार-संग्रहे यत्तत्क्षीरोदाधिकारे॥ *॥ लोकप्रभौ, त्रि। यथा, गो० रामायणे। २। ३३। १६।

"लोकनाथस्य रामस्य पीड़या पीड़ितं जगत्।
अपर्व्वणीव सोमस्य राहुग्रहणपीड़या॥")

लोकपालः, पुं, (लोकान् पालयतीति। पाल+णिच्+अण्।) राजा। इति हलायुधः॥ (यथा, राजतरङ्गिण्याम्। १। ३४६।

"उत्तमो लोकपालोऽयमिति लक्ष्म प्रयुञ्जिषु।
यः प्राप्तवान् विना यत्नं चक्षमे न पशुक्षयम्॥")

दिक्पालः। यथा,—

"इन्द्रो वह्निः पितृपतिर्निर्ऋतिर्वरुणोऽनिलः।
धनदः शङ्करश्चैव लोकपालाः पुरातनाः॥"
इति वह्निपुराणम्॥

(यथा च, मनुः । ५ । ६६ ।
"सोमाग्न्यर्कानिलेन्द्राणां वित्ताग्न्योर्यमस्य च ।
अष्टानां लोकपालानां वपुर्धारयते नृपः ॥")
लोकबान्धवः, पुं, (लोकानां बान्धवः ।) सूर्य्यः । इति जटाधरः ॥
लोकबाह्यः, पुं, (लोकात् लोकसमाजात् बाह्यः ।) सर्व्वाचारवर्ज्जितः । यथा,—
"लोकबाह्यस्तु यो वाजिगवाश्याचारवर्ज्जितः ॥"
इति जटाधरः ॥
लोकमाता, स्त्री, (लोकानां मातेव ।) लक्ष्मीः । इत्यमरः ॥ (लक्षणया लोकजननीसमापि च । यथा, भागवते । २ । ३ । ५ ।
"प्रतिष्ठाकामः पुरुषो रोदसी लोकमातरौ ॥")
लोकलोचनं, क्ली, (लोकानां लोचनमिव ।) सूर्य्यः । इति शब्दरत्नावली ॥ (जनस्य लोचनञ्च । कथा, कथासरित्सागरे । १८ । ६२ ।
"सोऽश्वस्तत्पार्ष्णिघातेन यन्त्रेणेवेरितः शरः ।
जगाम काप्यतिजवादलक्ष्यो लोकलोचनैः ॥")
लोकविनायकः, पुं, (लोके विनायक इव ।) ग्रहविशेषः । यथा,—
"स्कन्दग्रहादयो ये च आर्य्यकचासकादयः ।
कौमारास्ते भुवि ज्ञेया ये च लोकविनायकाः ।
सप्तसप्ततसंख्याता मर्त्यलोकविचारिणः ॥"
इति वह्निपुराणम् ॥
लोकविश्रुतिः, स्त्री, (लोके विश्रुतिः ।) जनश्रुतिः । किंवदन्ती । इति केचित् ॥
लोकायतं, क्ली, (लोकेषु आयतं विस्तीर्णमिव ।) तर्कभेदः । चार्व्वाकशास्त्रम् । इत्यमरभरतौ ॥
लोकायतिकः, पुं, (लोकायतं शास्त्रमस्यस्येति । लोकायत + ठन् ।) चार्व्वाकः । इति हेमचन्द्रः ॥ (तार्किकः । यथा, हरिवंशे ।२४६।३०।
"ऐक्यनानात्मसंयोगसमवायविशारदैः ।
लोकायतिकमुख्यैश्च शुश्रुवुः स्वनमीरितम् ॥")
लोकालोकः, पुं, (लोक्यतेऽसौ इति लोकः । न लोक्यतेऽसौ इति अलोकः । ततः कर्म्मधारयः ।) स्वनामख्यातपर्व्वतः । तत्पर्य्यायः । चक्रवाड़ः २ । इत्यमरः ॥ ये सप्तद्वीपां महीमावेष्ट्य प्राकारवत् स्थिते गिरौ लोकालोक इति स्वनामख्याते । अन्तर्लोक्यते सूर्य्यरश्मिभिः सूक्ष्मभावत्वात् इति लोकः । तथा बहिः सूर्य्यकिरणास्पर्शात् न लोक्यते इति अलोकः । लोक्र शोके कर्म्मणि घञ् लोकश्चासौ अलोकश्चेति लोकालोकः । चक्रं महीचक्रं वष्टते वेष्टयति चक्रवाड़ः । वड़ि ड वेष्टे च षण् । ज्ञापकसिद्धस्यानित्यत्वात् न गुण् । इति भरतः ॥ (यथा, रघुः । १ । ६८ ।
"सोऽहमित्याविशुद्धात्मा प्रजालोपनिमीलितः ।
प्रकाशश्चाप्रकाशश्च लोकालोक इवाचलः ॥"
अस्य विवरणं यथा देवीभागवते ।८।१४।१-१५।
श्रीनारायण उवाच ।
"ततः परस्तादचलो लोकालोकेति नामकः ।
अन्तराले च लोकालोकयोर्यः परिकल्पितः ॥
यावदस्ति च देवर्षे ह्यन्तरं मानसोत्तरात् ।
सुमेरोस्तावती शुद्धा काञ्चनी भूमिरस्ति हि ॥
दर्पणोदरतुल्या सा सर्व्वप्राणिविवर्ज्जिता ।
यस्यां पदार्थः प्रक्षिप्तो न किञ्चित् प्रत्युदीयते ॥
अतः सर्व्वप्राणिसङ्गरहिता सा च नारद ! ।
लोकालोक इति व्याख्या यदत्र परिकल्पिता ॥
लोकालोकान्तरे चास्य वर्त्तते सर्व्वदा स्थितिः ।
ईश्वरेण सलोकानां त्रयाणामन्तगः कृतः ॥
सूर्य्यादीनां ध्रुवान्तानां रश्मयो यदगादिह ।
अर्व्वाचीनाश्च ये लोकानातन्वानाः कदापि हि ॥
पराचीनत्वभाजो हि न भवन्ति च नारद ! ।
तावदुच्चत्वनायामः पर्व्वतेन्द्रो महोदयः ॥
एतावॉल्लोकविन्यासोऽयं संख्यामानलक्षणैः ।
कविभिः स तु पञ्चाशत्कोटिभिर्गणितस्य च ॥
भूगोलस्य चतुर्थांशो लोकालोकाचलो मुने ! ।
तस्योपरि चतुर्दिक्षु ब्रह्मणा चात्मयोनिना ॥
निवेशिता दिग्गजा ये तन्नामानि निबोधत ।
ऋषभः पुष्पचूड़ोऽथ वामनोऽथापराजितः ॥
एते समस्तलोकस्य स्थितिहेतव ईरिताः ।
तेषाञ्च स्वविभूतीनां बहुवीर्य्यापबृंहणम् ॥
विष्णुश्चक्रञ्चैश्वर्य्यं वर्द्धयन् भगवान् हरिः ।
आस्ते सिद्धाष्टकोपेतो विष्वक्सेनादिसंवृतः ॥
निजायुधैः परिवृतो भुजदण्डैः समं ततः ।
आस्ते सकललोकस्य स्वस्तये परमेश्वरः ॥
आकल्पमेवं वेषं स गतो विष्णुः सनातनः ।
स्वमायारचितस्यास्य गोपीयायात्मसाधनः ॥
योऽन्तर्विस्तार एतेन ह्यलोकपरिमाणकम् ।
व्याख्यातं यद्धि लोकालोकाचल इतीरणात् ॥" * ॥
लोकश्च अलोकश्च तौ । सूर्य्याद्यालोकविशिष्टतद्रहितदेशौ । अत्र द्विवचनप्रयोगः स्यात् । यथा, भागवते । ५ । २० । ३४ ।
"ततः परस्तात् लोकालोकनामाचलो लोकालोकयोरन्तराले परित उपक्लृप्तः ॥")
लोकेशः, पुं, (लोकानामीशः ।) ब्रह्मा । इत्यमरः ॥ बुद्धभेदः । इति त्रिकाण्डशेषः ॥ नारदः । इति राजनिर्घण्टः ॥ (इन्द्रः । यथा, रघुः । ३ । ६६ ।
"यथा च दृष्टान्तमिमं सदोगत-
श्चित्रोपनेकाग्रतया दुरासदः ।
तवैव सन्देशहरादिशांपतिः
प्रबोधितो लोकेश ! तथा विधीयताम् ॥"
लोकपालः । यथा, मनुः । ५ । ६७ ।
"लोकेशाधिष्ठितो राजा नास्याशौचं विधीयते ।
शौचाशौचं हि मर्त्यानां लोकेशप्रभवाप्ययम् ॥"
लोकाधिपतौ, त्रि । यथा, भागवते । ३ । ६ । १६ ।
"पादावस्य विनिर्भिन्नौ लोकेशो विष्णुरावृत् ॥")
लोकेश्वरः, पुं, (लोकानामीश्वरः ।) बुद्धभेदः । इति त्रिकाण्डशेषः ॥ भुवनानां जनानां प्रभुश्च ॥ (यथा, महाभारते ।३।११४ । १६ ।
"अवसीदच्च कौन्तेय दत्तमात्रा मही तदा ।
उवाच चापि कुपिता लोकेश्वरमिदं प्रभुम् ॥")
लोकपालः । यथा, महाभारते । ८ । ३४।२६ ।
"ग्रहनक्षत्रताराभिश्चर्म्म चित्रं नभस्तलम् ।
सुरासुरेप्सितवित्तानां पतीन् लोकेश्वरान् हयान् ॥")
लोकेश्वरात्मजा, स्त्री, (लोकेश्वरस्य बुद्धस्य आत्मजैव ।) बुद्धशक्तिभेदः । तत्पर्य्यायः । तारा २ महाश्रीः ३ ओङ्कारा ४ स्वाहा ५ श्रीः ६ मनोरमा ७ तारिणी ८ जया ९ अनन्ता १० शिवा ११ खदूरवासिनी १२ भद्रा १३ वैश्या १४ नीलसरस्वती १५ ग्रहिणी १६ महातारा १७ वसुधारा १८ धनन्ददा १९ त्रिलोचना २० लोचना २१ । इति हेमचन्द्रः ॥
लोच, ऋ क भासि । इति कविकल्पद्रुमः ॥ (चुरा०-परं०-अकं०-सेट् ।) ऋ, अलुलोचत् । भासि दीप्तौ । किन्तु पुरुषोत्तमशरणदेवौ भाष इति मूर्द्धन्यषकारं मत्वा वचनार्थमाहतुः । इति दुर्गादासः ॥
लोच, ऋ ङ ईक्षे । इति दुर्गादासः ॥ (भ्वा०-आत्म०-सकं०-सेट् ।) ईक्षः पर्य्यालोचनं प्रणिधानमिति यावत् । ऋ, अलुलोचत् । ङ, लोचते कार्य्यं सुधीः । इति दुर्गादासः ॥
लोचं, क्ली, (लोचते पर्य्यालोचयति सुखदुःखादिकमिति । लोच + अच् ।) अश्रु । इति जटाधरः ॥
लोचकः, पुं, (लोचते इति । लोच + ण्वुल् ।) मांसपिण्डम् । अक्षितारका । कज्जलम् । स्त्रीणां ललाटाभरणम् । कदली । नीलवस्त्रम् । निर्ल्लुञ्चिः । कर्णपूरः । भ्रूर्व्वी । भ्रूशब्दचर्म्म । इति मेदिनी । के, ५० ॥ निर्म्लोकः । इति शब्दरत्नावली ॥
लोचनं, क्ली, (लोचतेऽनेनेति । लोच + ल्युट् ।) चक्षुः । इत्यमरः ॥ तस्य शुभाशुभलक्षणं यथा,—
"वक्राग्रैः पद्मपत्राभैर्लोचनैः सुखभागिनः ।
मार्জারलोचनैः पापो महात्मा मधुपिङ्गलैः ॥
क्रूराः कैकरनेत्राश्च हरिणाक्षाः सकल्मषाः ।
जिह्मैश्च लोचनैः क्रूराः सेनान्यो गजलोचनाः ॥
गम्भीराक्षा ईश्वराः स्युर्मन्त्रिणः स्थूलचक्षुषः ।
नीलोत्पलाक्षा विद्वांसः सौभाग्यं श्यावचक्षुषाम् ॥
स्यात् क्षणतारकाक्षाणामक्ष्णासुत्पाटनं किल ।
मण्डलाक्षाश्च पापाः स्युर्निःस्वाः स्युर्दीर्घलोचनाः ॥
दृक् स्निग्धा विपुला भोगे अल्पायुर्नाभिरुन्नता ।
विषमभ्रुवः ॥"
इति गारुड़े ६५ अध्यायः ॥
लोचनहिता, स्त्री, (लोचनाभ्यां हिता ।) तुत्थाञ्जनम् । इति राजनिर्घण्टः ॥

लोचना, स्त्री, (लोचते पर्य्यालोचयतीति। लोच + ल्युः। टाप्।) बुद्धग्रक्तिभेदः। अस्याः प्रमाणं पर्य्यायाश्च लोकेश्वरात्मजाशब्दे द्रष्टव्याः॥

लोचनामयः, पुं, (लोचनयोरामयः।) चक्षूरोगविशेषः। तत्पर्य्यायः। अभिमन्थः २। इति चिकित्साखण्डेषः॥

लोचनी, स्त्री, (लोच्यतेऽसौ। लोच्+ल्युट्। ङीप्।) महाश्रावणिका। इति राजनिर्घण्टः॥

लोचमर्कटः, पुं, लोचमस्तकः। इत्यमरटीकायां स्वामी॥

लोचमस्तकः, पुं, (लोचं दृश्यं मस्तकं मयूरशिखेव यस्य।) मयूरशिखौषधम्। रुद्रजटा इति ख्यातः। चेत्रयमानिकेति केचित्। तत्पर्य्यायः। खराश्वा २ कारवी ३ दीप्यः ४ मयूरः ५। इत्यमरः॥ लोचमर्कटः ६। इति भरतः॥

लोचिका, स्त्री, दधिघृतमर्दितोष्णोदकसहितदलितमण्डलाकारनिर्म्मितघृतभृष्टसमिता। लुचि इति भाषा। इति पाकराजेश्वरः॥

लोट, ऋ उन्मादे। इति कविकल्पद्रुमः॥ (भ्वा०-पर०-अक०-सेट्।) ऋ, अलुलोटत्। लोटति लोकः उन्मादतीत्यर्थः। इति दुर्गादासः॥

लोटुलः, पुं, (लोटतीति। लोट्+बाहुलकात् उलच्।) अभिलोटकः। इति संक्षिप्तसारोणादिवृत्तिः॥

लोड, ऋ उन्मादे। इति कविकल्पद्रुमः॥ (भ्वा०-पर०-अक०-सेट्।) ऋ, अलुलोड़त्। इति दुर्गादासः॥

लोणलवणं, क्ली, (लोणं लवणरसयुक्तं लवणम्।) लवणलवणम्। इति राजनिर्घण्टः॥

लोणा, स्त्री, (लवणमस्त्यस्या इति। अच्। टाप्। पृषोदरादित्वात् साधुः।) क्षुद्राम्बिका। इति राजनिर्घण्टः॥ (तथास्याः पर्य्यायः।

"लोणा लोणी च कथिता दृहल्लोणी तु घोटिका।"

इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे॥)

लोणारं, क्ली, (लवणं ऋच्छतीति। लवण+ऋ+अण्। पृषोदरादित्वात् साधुः।) क्षारविशेषः। तत्पर्य्यायः। लवणोत्थम् २ लवणाकरजम् ३ लवणमद्यः ४ जलजम् ५ लवणक्षारः ६ लवणः ७। अस्य गुणाः। अत्युष्णत्वम्। तीक्ष्णत्वम्। पित्तदृद्धिकारित्वम्। क्षारत्वम्। दुर्जरत्वम्। वातगुल्मादिमूलरोगाग्नित्वञ्च। इति राजनिर्घण्टः॥

लोणाम्बा, स्त्री, क्षुद्राम्बिका। इति राजनिर्घण्टः॥

लोतं, क्ली, (लुनातीति। लू+"इषिमदिमिथीति।" उणा० ३। ८६। इति तन्।) स्नेयद्रव्यम्। तत्पर्य्यायः। लोम्रम् २। इति जटाधरः॥ लोम्री ३ लोत्रम् ४ लुम्यम् ५। इति शब्दरत्नावली॥

लोतः, पुं, क्ली, (लुनातीति। लू+"इषिमदिमिथीति।" उणा० ३।८६। इति तन्।) नेत्राम्बु। इति चिकित्साखण्डेषः॥ क्षिप्तम्। इति सिद्धान्तकौमुद्यामरादिवृत्तिः॥ लवणम्। अश्रुपातः। इति संक्षिप्तसारोणादिवृत्तिः॥

लोत्रं, क्ली, (लुनातीति। लू+"सर्व्वधातुभ्यष्ट्रन्।" उणा० ४। १५८। इति ष्ट्रन्। यद्वा, लू+"अग्रिचादिभ्य इत्रोत्रौ।" उणा० ४। १७२। इति उत्रः। इत्वुज्ज्वलः।) लोतम्। इति शब्दरत्नावली॥ नेत्रजलम्। इति संक्षिप्तसारोणादिवृत्तिः॥

लोध्रः, पुं, (रुणद्धीति। रुध+रक्। रस्य लः।) स्वनामख्यातवृक्षः। रक्तवर्णस्य तस्य पर्य्यायः। तिरीटः २ मार्ज्जनः ३ रक्तः ४ लोध्रः ५ तिल्वकः ६। श्वेतस्य तस्य पर्य्यायः। शुक्लः २ शावरलोध्रः ३ महालोध्रः ४ शाबरः ५। इति रत्नमाला॥ अस्य गुणाः। असृक्पवातनाशित्वम्। चक्षुष्यत्वम्। शोथजित्त्वम्। सरत्वञ्च। इति राजवल्लभः॥

लोध्रः, पुं, (रुणद्धीति। रुध+बाहुलकात् रन्। रस्य लः।) लोधवृक्षः। (यथा, शिशुपालवधे। ६। ४६।

"अधरेष्वलक्तकरसः सुदृशां
विशदं कपोलभुवि लोध्ररजः।
नवमञ्जनं नयनपङ्कजयो-
र्विभिदे न शृङ्गनिहितात् पयसः॥")

तत्पर्य्यायः। गालवः २ शाबरः ३ तिरीटः ४ तिल्यः ५ मार्जनः ६। इत्यमरः॥ षट् लोध्रमात्रे लोध्र इति ख्यातिः। षट् श्वेतलोध्रे इति सुभूतिः॥ आद्यपादः श्वेतलोध्रे शेषौ रक्तलोध्रे इति स्वामी॥ तस्य पर्य्यायान्तरं यथा। लोध्रः७ भिल्लतरुः ८ तिल्वकः ९ काण्डकीलकः १० लोध्रकवृक्षः ११ ग्रम्बरः १२ हस्तिलोध्रकः १३ तिलकः १४ काण्डनीलकः १५ हेमपुष्पकः १६ भिल्ली १७ शाबरकः १८। अस्य गुणाः। कषायत्वम्। शीतत्वम्। वातकफास्रनाशित्वम्। चक्षुष्यत्वम्। विषघ्नत्वम्। तच्च विशिष्टो वल्कलोध्रकः। इति राजनिर्घण्टः॥ अपि च।

"लोध्रस्तिल्वस्तिरीटश्च शाबरो गालवस्तथा।
द्वितीयः पट्टिकालोध्रः क्रमुकः स्थूलवल्कलः॥
जीर्णपत्रो दृढत्वक्षः पट्टीलाद्यापसादनः।
लोध्रो ग्राही लघुः शीतश्चक्षुष्यः कफपित्तहृत्।
कषायो रक्तपित्तास्रग्वातातीसारशोथहृत्॥"

इति भावप्रकाशः॥

(तथा च।

"तिल्वकस्तु मतो लोध्रो दृढत्वक्तिरीटकः।
तस्य मूलत्वचं शुष्कामन्तर्वल्कलवर्ज्जिताम्॥
चूर्णयेत्तु त्रिधा कृत्वा द्वौ भागौ श्लोतयेत्ततः।
लोध्रस्यैव कषायेण तृतीयं तेन भावयेत्॥
भागं तं दन्तमूलस्य पुनः क्वाथेन भावयेत्।
शुष्कं चूर्णं पुनः कृत्वा तत ऊर्द्धं प्रयोजयेत्॥
दधितक्रसुरामण्डसूनैर्वदरशीधुना।
रसेनामलकानां वा ततः पाणितलं पिबेत्॥"
"सुरां लोध्रकषायेण जातां पक्वस्थितां पिबेत्॥"

इति चरके कल्पस्थाने नवमेऽध्याये॥)

लोध्रकवृक्षः, पुं, (लोध्र एव लोध्रकः। स एव वृक्षः।) लोधः। इति राजनिर्घण्टः॥

लोपः, पुं, क्षेपः। आकुलीभावः। लुपधातोर्भावे घञ्प्रत्ययेन निष्पन्नोऽयम्। (अभावः। यथा, रघुः। १। ६८।

"सोऽहमिज्याविशुद्धात्मा प्रजालोपनिमीलितः।
प्रकाशश्चाप्रकाशश्च लोकालोक इवाचलः॥")

वैयाकरणमते वर्णनाशः। तथा हि। नाशविधिर्यथा। लोपोऽस्योमाङोरित्यादि॥ अपि च।

"सकलेभ्यो विधिभ्यः स्याद्बली लोपविधिस्तथा।
लोपखरादेशयोस्तु खरादेशो विधिर्बली॥"

इति दुर्गादासः॥

लोपा, स्त्री, अगस्त्यमुनिपत्नी। इति जटाधरः॥

लोपाकः, पुं, (लोपं शीघ्रमदर्शनं अकति प्राप्नोतीति। अक्+अण्।) शृगालः। इति चिकित्साखण्डेषः॥ (यथा, सुश्रुते। १। ४६।

"श्वाविच्छल्यकगोधाशृगालवृषदंशलोपाकलोमशकर्णकदलीमृगप्रियकाजगरसर्पमूषिकनकुलमहावभ्रुप्रभृतयो विलेशयाः॥")

लोपापकः, पुं, (लोपं द्रुतमदर्शनं आप्नोतीति। आप्+ण्वुल्।) शृगालः। इति शब्दमाला॥

लोपापिका, स्त्री, (लोपापक+स्त्रियां टाप्। अत इत्वम्।) शृगाली। इति शब्दमाला॥

लोपामुद्रा, स्त्री, अगस्त्यमुनिभार्य्या। इत्यमरः॥ लोपयति योषितां रूपाभिधानमिति लोपा पचाद्यच् आमुद्रयति मुष्णाति रूपमिति आमुद्रा अन् ततः कर्म्मधारयः। किंवा न मुद्रं राति आमुद्रा पतिशुश्रूषाया लोपे अमुद्रा लोपामुद्रा। लोपा च।

"लोपामुद्रा तु वैदर्भी लोपा स्त्री कुम्भजन्मनः॥"

इति कण्ठभूषणम्। इति भरतः॥*॥

अस्या अर्घ्यदानप्रसङ्गेन अगस्त्यार्घ्यदानं लिख्यते। अगस्त्यार्घ्यदानन्तु सौरेण सिंहराशौ विधानात्। यथा, ब्रह्मवैवर्त्ते।

"अप्राप्ते भास्करे कन्यां शैघभूतेस्त्रिभिर्दिनैः।
अर्घ्यं दद्युरगस्त्याय गौड़देशनिवासिनः॥"

नारसिंहे।

"पूर्व्वे तोयं विनिक्षिप्य सितपुष्पाक्षतैर्युतम्।
मन्त्रेणानेन वै दद्यादृक्षिणाशासुखस्थितः॥
काशपुष्पप्रतीकाश अग्निमारुतसम्भव।
मित्रावरुणयोः पुत्र कुम्भयोने नमोऽस्तु ते॥"

प्रार्थनन्तु।

"आतापिर्भक्षितो येन वातापिश्च महासुरः।
समुद्रः शोषितो येन स मेऽगस्त्यः प्रसीदतु॥"

गन्धादिकन्तु अगस्त्याय नम इत्यनेन देयं विशेषानुद्देशो सामान्यतः प्राप्तत्वात्।

दृक्षिणाशासुखस्थित इति गन्धादावपि प्रयोगाङ्गकर्त्तृधर्म्मत्वादिति रत्नाकरः॥*॥

तत्पत्न्यर्घ्यदानमन्त्रस्तु।

"लोपामुद्रे महाभागे राजपुत्रि पतिव्रते।
गृहाणार्घ्यं मया दत्तं मैत्रावरुणिवल्लभे॥"

इति मलमासतत्त्वम्॥

(अस्या जन्मादिविवरणन्तु महाभारते वनपर्व्वणि ६६ अध्यायमारभ्य द्रष्टव्यम् ॥)

लोपामुद्रापतिः, पुं, (लोपामुद्रायाः पतिः।) अगस्त्यमुनिः। इति पुराणम् ॥

लोपाशकः, पुं, (लोपं आकुलीभावं चकितमश्नाति। अश् + ण्वुल्।) शृगालः। इति हारावली ॥

लोपाशिका, स्त्री, (लोपाशक + स्त्रियां टाप्। अत इत्वम्।) शृगाली। इति हारावली। १७२ ॥

लोभ्रं, क्ली, (लुप् + रक्।) स्तेयधनम्। लोतम्। इत्यमरः ॥ (यथा, महाभारते। १।१०७।५।
"ते तस्यावसथे लोभ्रं दस्यवः कुरुसत्तम!।
निधाय च भयाल्लीनास्तत्रैवानागते बले ॥")

लोभ्री, स्त्री, (लोभ्र + स्त्रियां ङीष्।) लोभ्रम्। इति शब्दरत्नावली ॥

लोभः, पुं, (लुभ् + घञ्।) आकाङ्क्षा। परद्रव्याभिलाषः। तत्पर्य्यायः। तृष्णा २ लिप्सा ३ वप्रः ४ स्पृहा ५ काङ्क्षा ६ ग्रंसा ७ गर्द्धः ८ वाञ्छा ९ इच्छा १० लट् ११ मनोरथः १२ कामः १३ अभिलाषः १४। इति हेमचन्द्रः ॥*॥ तस्य लक्षणं यथा,—
"परवित्तादिकं दृष्ट्वा नेतुं यो हृदि जायते।
अभिलाषो द्विजश्रेष्ठ स लोभः परिकीर्त्तितः ॥"
इति पाद्मे क्रियायोगसारे १६ अध्यायः ॥*॥
स च ब्रह्मणोऽधराज्जातः। यथा,—
"भ्रूमध्यादभवत् क्रोधो लोभश्चाधरसम्भवः।"
इति मात्स्ये सुखोत्पत्तिर्नाम ३ अध्यायः ॥*॥
स तु नाशकारणं यथा,—
"लोभप्रमादविश्वासैः पुरुषो नश्यते भृशम्।
तस्माल्लोभो न कर्त्तव्यः प्रमादो न न विश्वसेत् ॥"
इति गारुड़े नीतिसारे ११५ अध्यायः ॥
अपि च।
"त्रिविधं नरकस्येदं द्वारं नाशनमात्मनः।
कामः क्रोधस्तथा लोभस्तस्मादेतत्त्रयं त्यजेत् ॥"
इति श्रीभगवद्गीतायाम् १६ अध्यायः ॥
(लोभनिन्दाविषयकश्लोकानि यथा,—
"लोभः प्रतिष्ठा पापस्य प्रकृतिर्लोभ एव च।
दैवक्रोधादिजनको लोभः पापस्य कारणम् ॥
लोभात् क्रोधः प्रभवति लोभात्कामः प्रजायते।
लोभान्मोहश्च नाशश्च लोभः पापस्य कारणम् ॥
लोभात् क्रोधः प्रभवति क्रोधाद्द्वेषः प्रवर्त्तते।
द्वेषेण नरकं याति ब्राह्मणोऽपि विचक्षणः ॥
मातरं पितरं पुत्रं भ्रातरं वा सुहृत्तमम्।
लोभाविष्टो नरो हन्ति स्वामिनं वा सहोदरम् ॥
लोभेन बुद्धिश्चलति लोभो नयति क्षयम्।
क्षयान्तं दुःखमाप्नोति परत्रेह च मानवः ॥
लोभाविष्टो नरो वित्तं वीक्षते न स चापदम्।
दुग्धं पश्यति मार्জ্জारो यथा न लगुड़ाहतिम् ॥
प्रायेण धनिनामेव धनलोभो निरङ्कुशः।
पश्य कोटिद्वयोपेतं लक्षाय प्रणतं धनुः ॥
नात्यर्थमर्थार्थितया लुब्धमुद्वेजयेज्जनम्।
अब्धिर्दत्त्वाप्यरत्नं स्त्रीर्मथ्यमानोऽहजद्विषम् ॥
लोभः सदा विचिन्त्यो लुब्धेभ्यः सर्व्वतो भयं दृष्टम्।
कार्य्याकार्य्यविचारो लोभविमूढस्य नास्त्येव ॥
सत्यप्रशमतपोभिः शास्त्रधनैः शास्त्रवेदिभिर्विजितः।
लोभो वत प्रविष्टः कुटिलं हृदयं किरातीनाम् ॥
स्नेहोपपन्न इति पूर्णदशाविशेष-
श्लाघी स्वमात्मनि वसुप्रकरं निधाय।
लब्धोदये तमध गच्छति पद्मबन्धौ
दीपा भवन्ति कलुषा बलवान् हि लोभः ॥
यद्दुर्गाभटवीभटल्लि विकटं क्रामन्ति देशान्तरं
गाहन्ते गहनं समुद्रमथनक्लेशं क्षयिं कुर्व्वते।
सेवन्ते नृपणं पतिं गजघटासङ्घट्टदुःसञ्चरं
सर्व्वन्ति प्रधनं धनान्वितधियस्तल्लोभविस्फूर्ज्जितम् ॥" *॥)

लोभी, [न्] त्रि, (लोभोऽस्यास्तीति। लोभ + इनिः।) लोभयुक्तः। तत्पर्य्यायः। गृधुः २ गर्द्धनः ३ लुब्धः ४ अभिलाषुकः ५ तृष्णकः ६ लोलुपः ७ लोलुभः ८। इति जटाधरः ॥ लिप्सुः ९। इति हेमचन्द्रः ॥

लोभ्यः, पुं, (लुभ्यते इति। लुभ + यत्।) सुङ्गः। इति हेमचन्द्रः ॥ लोभनीये, त्रि ॥

लोम, [न्] क्ली, (लूयते छिद्यते इति। ल + "नामन्सीमन्व्योमन्रोमन्लोमन्पाप्मन्ध्मन्।" उणा० ४। १५०। इति मनिन्प्रत्ययेन साधुः।) शरीरस्थकेशः। तत्पर्य्यायः। तनूरुहम् २ रोम ३। इत्यमरः ॥ तनुरुहम् ४ तनुरुट् ५। इति शब्दरत्नावली ॥ (यथा, सुश्रुते शारीरस्थाने। १। १। ७।
"यथोर्णनाभिः सृजते गृह्णते च
यथा पृथिव्यामोषधयः सम्भवन्ति।
यथा सतः पुरुषात् केशलोमानि
तथाक्षरात् सम्भवतीह विश्वम् ॥")

तत्तु गर्भस्थस्य षष्ठे मासि भवति। इति सुश्रुतः ॥ अपि च।
"षष्ठे मासि च नारीणां वैदिके नाधिकारिता।
उदरस्थस्य बालस्य नखलोमप्रवर्त्तनात् ॥"
इति स्मृतिः ॥
(तथास्य विवृतिः।
"अस्थि मलानि लोमानि असङ्ख्यानि भवन्ति हि।
सन्ति यावन्ति लोमानि तावन्तो लोमकूपकाः ॥
अङ्गप्रत्यङ्गनिर्वृत्तिः स्वभावादेव जायते।
सन्निवेशश्च गात्राणां नात्राऽन्ये कारणान्तरम् ॥"
निर्वृत्तिः सिद्धिः स्वभावात् ईश्वरात्। सन्निवेशो रचनाविशेषः। इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥)

लोमं, क्ली, लाङ्गूलम्। इति जटाधरः ॥ (रोम। यथा, तैत्तिरीयसंहितायाम्। ५। २। ६। २।
"अधो ग्रन्थायाजलोमैः संहजलेषा वा अग्नेः प्रिया तनूर्यदजेति ॥")

लोमकरणी, स्त्री, मांसच्छदा। इति राजनिर्घण्टः ॥

लोमकर्णः, पुं, (लोमयुक्तौ कर्णौ यस्य।) शृगालः। इति हेमचन्द्रः ॥ (अस्य पर्य्यायो यथा,—
"लम्बकर्णः शृगः शूली लोमकर्णो विलेशयः ॥"
इति भावप्रकाशस्य पूर्व्वखण्डे द्वितीये भागे ॥)
लोमयुक्तकर्णविशिष्टे, त्रि ॥

लोमघ्नं, क्ली, (लोमानि हन्तीति। हन + टक्।) इन्द्रलुप्तकम्। इति भूरिप्रयोगः ॥ टाक इति भाषा ॥ लोमघातके, त्रि ॥

लोमपादः, पुं, (लोमानि पादयोर्यस्य।) अङ्गदेशीयराजविशेषः। स तु ऋष्यशृङ्गमुनिश्वशुरः। इति रामायणम् ॥ (अयं हि सूर्य्यवंशावतंसस्य दशरथस्य सखा। विप्रावमानजात एवास्य राष्ट्रे बहुकालं अवग्रहः सम्बभूव तत एवासौ काश्यपं ऋष्यशृङ्गं स्वराष्ट्रे आनीय शान्तां नाम दशरथकन्यामस्मै दत्तवान्। एतद्वृत्तान्तन्तु महाभारते वनपर्व्वणि ११० अध्यायतो विशेषतो द्रष्टव्यम्॥)

लोमपादपूः, स्त्री, (लोमपादस्य पूः।) पुरीविशेषः। अधुना भागलपुर इति ख्याता। तत्पर्य्यायः। चम्पा २ मालिनी ३ कर्णपूः ४। इति हेमचन्द्रः ॥

लोमफलं, क्ली, (लोमयुक्तं फलम्।) भयम्। इति राजनिर्घण्टः ॥

लोमविषः, पुं, (लोम्नि विषं यस्य।) व्याघ्रादिः। इति हेमचन्द्रः ॥

लोमशः, पुं, (लोमानि सन्त्यस्येति। लोमन् + "लोमादिभ्यः शः।" इति शः।) मुनिविशेषः। (मुनिवरोऽयं तीर्थगमनाभिलाषिणः सानुजस्य युधिष्ठिरस्यानुगामी सर्व्वतीर्थवृत्तान्तमस्मै विज्ञापयामासेति महाभारते वनपर्व्वणि द्रष्टव्यम्॥*॥)
मेषः। अतिलोमान्विते, त्रि। इति मेदिनी। शे, २७ ॥ यथा,—
"कदाचिद्गुरुरे सूक्ष्मः कदाचिल्लोमशः सुखी ॥"
इति-सारसङ्ग्रहकम् ॥
(धान्यापहरणरूपकर्म्मविपाकात् लोमशो भवति। यथा, महाभारते। १३। १११।११८।
"ध्यात्वं हत्वा तु पुरुषो लोमशः संप्रजायते ॥")

लोमशकाक्षा, स्त्री, (लोमशः काक्षो यस्याः।) कर्कटी। इति राजनिर्घण्टः ॥ (कर्कटीशब्दे ऽस्या गुणादयो ज्ञातव्याः ॥)

लोमशपर्णिनी, स्त्री, (लोमशं पर्णमस्यास्या इति। इनि। ङीप्।) माषपर्णी। इति शब्दचन्द्रिका ॥

लोमशपुष्पकः, पुं, (लोमशानि पुष्पाणि यस्य। कप्।) शिरीषवृक्षः। इति राजनिर्घण्टः ॥

लोमशमार्জ্জारः, पुं, (लोमशो लोमबहुलो मार्জ্জारः।) मार्জ্জारविशेषः। गन्धगकुला।

इति भाषा। तत्पर्य्यायः। पूतिकः २ मारजातकः ३ सुगन्धी ४ सूत्रपातनः ५ गन्धमार्ज्जारकः ६। इति राजनिर्घण्टः॥ अस्य गुणाः।
"गन्धमार्ज्जारवीर्य्यन्तु वीर्य्यकृत् कफवातकृत्।
कण्डुकोष्ठहरं नेत्र्यं सुगन्धं खेदगन्धहृत्॥"
इति भावप्रकाशः॥

लोमशा, स्त्री, (लोमानि सन्त्यस्या इति। लोमन्+श। टाप्।) काकजङ्घा। मांसी। (अस्याः पर्य्यायो यथा,—
"नलदं नन्दिनी पेषी मांसी क्रव्यजटा जटी।
किरातिनी च जटिला लोमशा तु तपस्विनी॥"
इति वैद्यकरत्नमालायाम्॥)
वचा। (अस्याः पर्य्यायो यथा,—
"वचोग्रगन्धा षड्ग्रन्था गोलोमी शतपर्व्विका।
क्षुद्रपत्री च मङ्गल्या जटिलोग्रा च लोमशा॥"
इति भावप्रकाशस्य पूर्ब्बखण्डे प्रथमे भागे॥)
शूकशिम्बिः। महामेदा। काकिनीभेदः। इति मेदिनी। शे, २०॥ अम्बिलता। इति विश्वः॥ शूकपुष्पी। एरण्डः। गन्धमांसी। इति राजनिर्घण्टः॥

लोमशातनं, क्ली, (लोम्नां शातनम्।) लोमशातनम्। तस्यौषधानि यथा,—
"हरितालं शुक्लचूर्णं कदलीदलभक्षणात्।
एतद्भक्षेण चोद्धर्त्तुं लोमशातनमुत्तमम्॥
लवणं हरितालञ्च तण्डुलाश्च फलानि च।
लाक्षारसयुतं लोमशातनमुत्तमम्॥
सुधा च हरितालञ्च शुक्लश्चैव मनःशिला।
सैन्धवेन सहैकत्र क्षारमूत्रेण पेषयेत्।
तत्क्षणोद्धर्त्तनादेव लोमशातनमुत्तमम्॥"
इति गारुडे १८५ अध्यायः॥
(तथाच।
"भल्लातकं विड्ङ्गञ्च यवक्षारश्च सैन्धवम्।
मनःशिला शुक्लचूर्णं तैलपक्वं तथैव च।
लोमानि शातयत्येव नात्र कार्य्या विचारणा॥"
इति वैद्यके भैषज्यधन्वन्तरौ वशीकरणाद्यधिकारे॥ * ॥)

लोमहर्षणं, क्ली, (लोम्नां हर्षणमिव।) रोमाञ्चः। इत्यमरः॥ (लोम्नां हर्षणमस्मादिति। रोमाञ्चकारके, त्रि। यथा, महाभारते। ६।६७।१३।
"तस्मिन् महाभये घोरे तुमुले लोमहर्षणे।
ववर्षुः शरजालानि क्षत्रिया युद्धदुर्म्मदाः॥")

लोमहर्षणः, पुं, (विचित्रपुराणकथाश्रवणात् लोम्नां हर्षणं उद्गमो यस्मात्।) सूतः। यथा,
"पुराणसंहितां चक्रे पुराणार्थविशारदः।
प्रख्यातो व्यासशिष्योऽभूत् सूतो वै लोमहर्षणः॥
पुराणसंहितां तस्मै ददौ व्यासो महामुनिः॥"
इति विष्णुपुराणे ३ अंशे ७ अध्यायः॥ * ॥
स च बलरामेण हतः। यथा,—
"तथा चैत्रे सूतपुत्रो निहतो लोमहर्षणः।
बलरामास्त्रयुक्तात्मा नैमिषेऽभूत् स्वयाच्ञया॥"
इति कल्किपुराणे २७ अध्यायः॥

लोमहृत्, पुं, (लोमानि हरति नाशयतीति। हृ+क्विप्।) हरितालम्। इति हेमचन्द्रः॥
लोमालिका, स्त्री, (लोमाल्या लोमश्रेण्या कायतीति। के+कः। टाप्।) शूगालिका। यथा,—
"लोमालिका दीप्तजिह्वा किखिरुल्कामुखी च सा॥"
इति त्रिकाण्डशेषः॥

लोलः, त्रि, (लोड़तीति। लुड़ विलोड़ने+अच्।) चञ्चलः। (यथा, साहित्यदर्पणे ३ परिच्छेदे। १४१।
"पल्लवोपमितिसाम्यसपक्षं
दष्टवत्यधरबिम्बमभीष्टे।
पर्य्यकूजि सरलेव तरुण्या-
स्तारलोलवलयेन करेण॥")
आकाङ्क्षः। इत्यमरः॥ (यथा, रघुः। ७।२३।
"क्रीयन्तामामनन्ति स्म मनोज्ञा-
मन्योन्यलोलानि विलोचनानि॥"
पुं, तामसमनुः। इति मार्कण्डेयपुराणम्। ७४। ४१॥)

लोला, स्त्री, (लोल+टाप्।) जिह्वा। लक्ष्मीः। इति मेदिनी। ले, ४७॥ चञ्चला स्त्री च। (यथा, आर्य्यासप्तशत्याम्। ६०८।
"सर्व्वाङ्गमर्पयन्ती लोला सुखं अमेव शय्यायाम्।
अलसमपि भाग्यवन्तं भजते पुरुषायितेव श्रीः॥"
चतुर्दशाक्षरवृत्तविशेषः। इति छन्दोमञ्जरी॥ अस्य लक्षणादिकं छन्दःशब्दे द्रष्टव्यम्॥)

लोलार्कः, पुं, (लोलनामा अर्कः।) सूर्य्यः। यथा, पुलस्त्य उवाच।
"ततः सुकेशिवचनात् सर्व्व एव निशाचराः।
तेनोदितन्तु ते धर्म्मं चक्रुर्मुदितमानसाः॥
ततः प्रवृद्धिं सुतरामगच्छन्त निशाचराः।
पुत्रपौत्रार्थसंयुक्ताः सदाचारसमन्विताः॥
तच्छ्रोतिस्तेजसा तेषां राक्षसानां महात्मनाम्।
भन्तुं नाशक्नुवन् सूर्य्यो नक्षत्राणि च चन्द्रमाः॥
ततस्त्रिभुवनं ब्रह्मन् निशाचरपुरोऽभवत्।
दिवा सूर्य्यस्य सद्दग्रः क्षयदायाश्च चक्रवत्॥
ततः क्रोधाभिभूतेन भानुना विप्रभेदिभिः।
भानुभी राक्षसपुरं तद्दृष्टञ्च यथेच्छया॥
तद्भानुना तदा दृष्टं क्रोधाभातेन चक्षुषा।
निपपाताम्बरादृष्टः क्षीणपुण्य इव ग्रहः॥
पतमानं समालोक्य पुरं ग्रालकटङ्कटः।
नमो भवाय सर्व्वाय इदमुच्चैरघोषयत्॥
तेषां क्रन्दितमाकर्ण्य चारणा गगनेचराः।
हाहेत्युचुक्रुशुः सर्व्वे हरभक्ताः पतत्यसौ॥
तच्चारणवचः श्रुत्वा सुतवान् सर्व्वतोऽव्ययः।
श्रुत्वा च चिन्तयामास केनायौ पात्यते भुवि॥
ज्ञातवान् देवपतिना सहस्रकिरणेन तत्।
पातितं राक्षसपुरं ततः क्रुद्धस्त्रिलोचनः॥
क्रुद्धस्तु भगवान् दृग्भिर्भासमन्तमपश्यत।
दृष्टमात्रस्त्रिनेत्रेण निपपात ततोऽम्बरात्॥
ततो ब्रह्मा सुरपतिः सुरैः सार्द्धं समभ्ययात्।

रम्यं महेश्वरावासं मन्दरं रविकारणात्॥
गत्वा दृष्ट्वा च देवेशं शूकरं शूलपाणिनम्।
प्रसाद्य भास्करार्थाय वाराणस्यासुपानयत्॥
ततो दिवाकरं भूयः पाणिनादाय शूकरः।
ज्ञात्वा नामास्य लोलेति रथमारोपयत् पुनः॥
आरोपिते दिवाकरे ब्रह्माभ्येत्य सुकेशिनम्।
सबान्धवं सनगरं पुनरारोपयद्दिवि॥"
इति श्रीवामनपुराणे सुकेशिचरिते लोलार्कजननं नाम १५ अध्यायः॥

लोलिका, स्त्री, (लोलतीति। लुल+ण्वुल्। टापि अत इत्वम्।) चाङ्गेरी। यथा,—
"क्षुद्रा दन्तशठाम्लेष्टा चाङ्गेरी लोलिका च सा॥"
इति जटाधरः॥

लोलितः, त्रि, स्त्रियः। झोला इति भाषा। लुल विमर्द्दे अस्माद्भावे क्तिच लोलः। लोलस्य भावः इत्यर्थे इतप्रत्ययेन निष्पन्नः॥

लोलुपः, त्रि, (गर्द्धितं लुभ्यतीति। लुप+यङ्+अच्।) अतिलुब्धः। इत्यमरः॥ (यथा, माघे। १। ४०।
"तथापि वाचालतया युनक्ति मां
मिथस्त्वदाभाषणलोलुपं मनः॥")

लोलुभः, त्रि, (भृशं लुभ्यतीति। लुभ+यङ्+अच्।) लोलुपः। इत्यमरः॥ (यथा, कथासरित्सागरे। ११७। ४६।
"स्त्रियोऽपीच्छन्ति पुंभावं यं दृष्ट्वा रूपलोलुभाः।
तस्यास्ते को भवेन्नार्थी तुल्यरूपः स किं पुनः॥")

लोष्ट, ङ संहतौ। इति कविकल्पद्रुमः॥ (भ्वा०-आत्म०-सक०-सेट्।) ङ, लोष्टते धान्यं लोकः। इति दुर्गादासः॥

लोष्टं, क्ली, (लोष्टते इति। लोष्ट+अच्।) लौहमलम्। इति राजनिर्घण्टः॥ लेष्टुः। इत्यमरः॥

लोष्टः, पुं क्ली, (लोष्टाते इति। लोष्ट+घञ्। यद्वा, लूयते इति। लू+"लोष्टपलितौ।" उणा० ३। ६२। इति क्तप्रत्ययेन निपातितः।) मृत्तिकाखण्डम्। ढेला इति भाषा। तत्पर्य्यायः। लोष्टुः २। इति शब्दरत्नावली अमरश्च॥ लोष्टुः ३ इष्टिः ४। इति हेमचन्द्रः॥ (यथा, वेतालपञ्चविंशत्याम्। १।
"अहौ वा हारे वा बलवति रिपौ वा सुहृदि वा
मणौ वा लोष्टे वा कुसुमशयने वा दृषदि वा।
तृणे वा स्त्रैणे वा मम समदृशो यान्तु दिवसाः
क्वचित्पुण्येऽरण्ये शिव शिव शिवेति प्रलपतः॥")

लोष्टभः, पुं, (लोष्टं भक्षतीति। भक्ष+टक्।) लेष्टुभेदनः। इत्यमरटीकायां भरतः॥

लोष्टभेदनः, पुं, (भिनत्तीति। भिद्+ल्युः। लोष्टस्य भेदनः।) लोष्टभङ्गसाधनमुद्गरः। मट इति ख्याते इति केचित्। तत्पर्य्यायः। लेष्टुभेदनः २ लोष्टभः ३ लेष्टुघ्नः ४ कोटिघ्नः ५ कोटीघ्नः ६। इत्यमरटीका॥

लोष्टुः, पुं, लोष्टः। इति हेमचन्द्रः॥

लोहं, क्ली, अगुरु। इत्यमरः॥ (अथास्य पर्य्यायः।
"अगुरुप्रवरं लोहं राजार्हं योगजन्तथा।
वंशिकं क्रिमिजं वापि क्रिमिजग्धमनार्यकम्॥"
इति भावप्रकाशस्य पूर्ब्बखण्डे प्रथमे भागे॥)

लोहः, पुं क्ली, (लूयतेऽनेनेति। लू+बाहुलकात् हः।) लौहम्। ओङ्गकम्। सर्व्वतेजसम्। इति मेदिनी। हे, ८॥ रुधिरम्। इति राजनिर्घण्टः॥
अथ सुखलोहस्य पर्य्यायः। सुखम् २ सुखायसम् ३ दृषत्सारम् ४ शिलात्मजम् ५ अश्मजम् ६ क्षत्रिलोहम् ७ आरम् ८ क्षत्रायसम् ९॥
अथ तीक्ष्णलोहस्य पर्य्यायः। तीक्ष्णम् २ शस्त्रायसम् ३ शस्त्रम् ४ पिण्डम् ५ पिण्डायसम् ६ शूठम् ७ आयसम् ८ निशितम् ९ तीव्रम् १० खड्गम् ११ सुखजम् १२ अयः १३ चित्रायसम् १४ चीनजम् १५। अस्य गुणाः। रूक्षत्वम्। उष्णत्वम्। तिक्तत्वम्। वातपित्तकफप्रमेहपाण्डुशूलनाशित्वम्। तीक्ष्णत्वम्। सुखाधिकगुणत्वञ्च। इति राजनिर्घण्टः॥ * ॥
अथ लोहस्योत्पत्तिनामलक्षणगुणाः।
"पुरा लोमिलदैत्यानां निहतानां सुरैर्युधि।
उत्पन्नानि शरीरेभ्यो लोहानि विविधानि च॥
लोहोऽस्त्री शस्त्रकं तीक्ष्णं पिण्डं कालायसायसी।
गुरुना दृढतोत्क्लेदकफदाहस्य कारिता।
अश्मदोषः सुदुर्गन्धो दोषाः सप्तायसस्य तु॥
लोहं तिक्तरसं शीतं मधुरं तुवरं गुरु।
रूक्षं वयस्यं चक्षुष्यं लेखनं वातलं जयेत्॥
कफं पित्तं गरं शूलं शोथार्शःप्लीहपाण्डुताः।
मेदोमेहकृमीन् कुष्ठं तत्किट्टं तद्वदेव हि॥
षण्ढत्वकुष्ठामयहृद्भवेत्
हृद्रोगशूलौ कुरुतेऽश्मरीञ्च।
नानारुजाञ्चापि तथा प्रकोपं
करोति हृल्लासमशुद्धलोहम्॥
जीवहारि मदकारि चायसं
चेदशुद्धिमदसंस्कृतं ध्रुवम्।
पाटवं न तनुते शरीरके
दारुणं हृदि रुजाञ्च यच्छति॥"*॥
तत्र सारलोहस्य लक्षणं गुणाञ्च।
"चमाभच्छिखराकाराण्यङ्गान्यस्त्रेण लेखिते।
लोहे स्युर्यत्र रूक्षाणि तत्सारमभिधीयते॥
लोहं सारार्कयं हन्याद्व्रणशोमतिसारकम्।
अर्शसश्चाङ्गजं वातं शूलञ्च परिणामजम्।
कृच्छ्रेण पीनसं पित्तं श्वासमाशु व्यपोहति॥"
अथ कान्तलोहस्य लक्षणं गुणाञ्च।
"यत्पात्रे न प्रसरति जले तैलबिन्दुः प्रतप्ते
हिङ्गुर्गन्धं त्यजति च निजं तिक्ततां निम्बकन्दः।
तप्तं दुग्धं भवति शिखराकारकं नेति भूमिं
क्षणाङ्गः स्यात् सजलचणकः कान्तलोहं
तदुक्तम्॥
गुल्मोदरार्शःशूलाममामवातं भगन्दरम्।
कामलाप्लीहकुष्ठानि चयं कान्तमयो जयेत्॥
क्लीहानमग्निपित्तञ्च यकृच्चापि शिरोरुजम्।
सर्व्वानोगान् विजयते कान्तलोहं न संशयः।
बलं वीर्य्यं वपुःपुष्टिं कुरुतेऽग्निं विवर्द्धयेत्॥"
अथ किट्टी।
"भ्रायमानस्य लोहस्य मलं मण्डूरमुच्यते।
लोहसंहानिका किट्टी संहानञ्च निगद्यते॥
यल्लोहं यद्गुणं प्रोक्तं तत्किट्टमपि तद्गुणम्॥"
अथ लोहस्याशुद्धस्य दोषमाह।
"षण्ढत्वकुष्ठामयहृत्प्रकारि
हृद्रोगशूलौ कुरुतेऽश्मरीञ्च।
नानारुजानाञ्च तथा प्रकोपं
कुर्य्याच्च हृल्लासमशुद्धलोहम्॥"
अथ लोहस्य दोषशान्तये शोधनमभिधीयते।
"पत्तलीकृतपत्राणि लोहस्यामौ प्रतापयेत्।
निषिञ्चेत्तप्ततप्तानि तैले तक्रे च काञ्जिके॥
गोमूत्रे च कुलत्थानां कषाये च त्रिधा त्रिधा।
एवं लोहस्य पत्राणां विशुद्धिः संप्रजायते॥"
अथ लोहस्य मारणविधिः।
"शुद्धलोहभवं चूर्णं पातालगरुड़ीरसैः।
मर्द्दयित्वा पुटेद्दग्धौ दद्यादेवं पुटद्वयम्॥
पुटत्रयं कुमार्य्याश्च कुठारच्छिल्लिकारसैः।
पुटषट्कं ततो दद्यादेवं तीक्ष्णन्तिभवेत्॥"
अन्यच्च।
"क्षिपेद्दादशमांशेन दरदं तीक्ष्णचूर्णतः।
मर्द्दयेत् कन्यकाद्रावैर्यामयुग्मं ततः पुटेत्।
एवं सप्तपुटैर्मृत्युं लोहचूर्णमवाप्नुयात्॥
सत्वोऽनुभूतो योगीन्द्रैः क्रमोऽन्यो लोहमारणे।
कथ्यते रामराजेन कौतूहलधियाधुना॥
घृतकाद्विगुणं गन्धं दत्त्वा कुर्य्याच्च कज्जलीम्।
द्वयोः समं लौहचूर्णं मर्द्दयेत् कन्यकाद्रवैः॥
यामयुग्मं ततः पिण्डं कृत्वा ताम्रस्य पात्रके।
धर्म्मे धृत्वा रूवुकस्य पत्रैराच्छादयेद्बुधः॥
यामद्वयाज्ज्वेदुद्धृत्य धान्यराशौ न्यसेत्ततः।
दत्त्वोपरि शरावञ्च चिदिनान्ते समुद्धरेत्॥
पिष्ट्वा च गालयेद्वस्त्रादेवं वारितरं भवेत्।
दाड़िमस्य दलं पिष्ट्वा तच्चतुर्गुणवारिणा॥
तद्रसेनायसच्चूर्णं सप्तधीयात् भावयेदपि।
आतपे शोषयेत्तच्च पुटेदेव पुनः पुनः।
एकविंशतिवारैस्तत्म्रियते नात्र संशयः।
एवं सर्व्वाणि लोहानि स्वर्णादीन्यपि मारयेत्॥"
एवं मारितलोहस्य गुणाः।
"लोहं तिक्तं सरं शीतं कषायं मधुरं गुरु।
रूक्षं वयस्यं चक्षुष्यं लेखनं वातलं जयेत्॥
कफं पित्तं गरं शूलं शोफार्शःप्लीहपाण्डुताः।
मेदोमेहकृमीन् कुष्ठं तत्किट्टं तद्वदेव हि॥
गुञ्जामेकां समारभ्य यावत् स्यूनवरक्तिकाः।
तावल्लोहं समश्नीयाद्यथादोषानलं नरः॥
कुष्माण्डं तिलतैलञ्च माषान्नं राजिकान्तथा।
मद्यमम्बरसञ्चैव वर्जयेल्लोहसेवकः॥"
इति भावप्रकाशः॥
लोहपात्रे भक्षणनिषेधो यथा,—
"यदा तु आयसे पात्रे पक्वमश्नाति वै द्विजः।
स पापिष्ठोऽपि शुद्धोऽन्नं रौरवे परिपच्यते॥"
इति मत्स्यसूक्ततन्त्रम्॥
अपि च।
"अयःपात्रे पयःपानं गव्यं सिद्धान्नमेव च।
भृष्टादिकं मधु गुड़ं नारिकेलोदकन्तथा॥
फलं मूलञ्च यत्किञ्चिदभक्ष्यं मुनिरब्रवीत्॥"
इति ब्रह्मवैवर्त्ते श्रीकृष्णजन्मखण्डम्॥
(अश्मन एवास्य उत्पत्तिः श्रूयते। यथा, मनुः। ६। ३२१।
"अद्भ्योऽग्निर्ब्रह्मतः क्षत्रमश्मनो लोहमुत्थितम्।
तेषां सर्व्वत्रगं तेजः स्वासु योनिषु शाम्यति॥"
पुं, क्षत्रः। स तु लक्षणान्वितः क्षत्रवर्णो रक्तवर्णो वा। यथा, मनुः। ३। २७२।
"कालशाकं महाशल्काः खड्गलोहामिषं मधु।
आनन्त्यायैव कल्पन्ते मुन्यन्नानि च सर्व्वशः॥"
पार्व्वतजातिविशेषः। यथा, महाभारते। २। २७। २५।
"लोहान् परमकाम्बोजान्ऋषिकानुत्तरानपि।
सहितांस्तान् महाराज वशयत् पाकशासनिः॥"
रक्तवर्णे, त्रि। यथा, महाभारते। ५। १३६। २३।
"भ्रमतश्च वराहस्य लोहस्य प्रमुखे समम्।
पञ्चबाणान् सुसंयुक्तान् स सुमोचैकबाणवत्॥")

लोहकण्टकः, पुं, (लोहवत् कण्टकं यत्र।) मदनवृक्षः। इति शब्दचन्द्रिका॥ लौहमयकण्टकश्च॥ (यथा, आर्य्यासप्तशत्याम्। ४७६।
"सखि लोहकण्टकनिभस्तथा तथा मदनविशिखोऽपि॥")

लोहकान्तं, क्ली, (लोहः कान्तोऽस्येति।) अयस्कान्तम्। इति राजनिर्घण्टः॥

लोहकारः, पुं, (लोहं लोहमयं शस्त्रादि करोतीति। कृ+अण्।) लौहकारकः। इति हलायुधः॥ (यथा, गो० रामायणे। २। ६०। २३।
"प्रख्याताश्चर्म्मकाराश्च लोहकारास्तथैव च॥")

लोहकारकः, पुं, (लोहं तन्मयशस्त्रादि करोतीति। कृ+ण्वुल्।) वर्णसङ्करजातिविशेषः। कामार इति भाषा। तत्पर्य्यायः। ओकारः २ इत्यमरः॥ लौहकारः ३ अयस्कारः ४ कर्म्मकारः ५ कर्म्मारः ६। इति भरतरभसौ॥
तस्योत्पत्तिर्यथा।
"गोपाजात्तत्तनयायां वै कर्म्मकारोऽप्यभूत् सुतः॥"
इति पराशरपद्धतिः॥

लोहकिट्टं, क्ली, (लोहस्य किट्टम्।) लोहमलम्। तत्पर्य्यायः। किट्टम् २ लोहचूर्णम् ३ अयोमलम् ४ लोहजम् ५ क्षत्रचूर्णम् ६ लोहम् ७ लोहमलम् ८। (यथा, सुश्रुते। ६। ४४।
"मूत्रस्थितं सैन्धवसंप्रयुक्तं
मांसं पिबेदापि हि लोहकिट्टम्॥")
अस्य गुणाः। मधुरत्वम्। कटुत्वम्। उष्णत्वम्। कृमिवातपित्तशूलमेहशूलगुल्मशोफजाग्निमान्द्यत्वञ्च। इति राजनिर्घण्टः॥ अपि च।

"ध्मायमानस्य लोहस्य मलं मण्डूरमुच्यते ।
लोहसिंहानिका किट्टौ सिंहाङ्गश्च निगद्यते ॥
यल्लोहं यद्गुणं प्रोक्तं तत्किट्टमपि तद्गुणम् ॥"
इति भावप्रकाशः ॥
(तथास्योद्धरणादिविधिः ।
"प्रतोऽर्द्धमुत्तमं किट्टं मध्यमाग्नीतिवार्षिकम् ।
अधमं षष्टिवर्षोर्ध्वं ततो हीनं विषोपमम् ॥"
इति वैद्यकरसेन्द्रसारसंग्रहे जारणमारणाद्यधिकारे ॥
"कुरबं पथ्याचूर्णं द्विपलगन्धाश्मलोहकिट्टञ्च ।
शुद्धरसस्यार्द्धपलं भृङ्गस्य रसं कैराजस्य ॥"
इति वैद्यकचक्रपाणिसंग्रहे परिणामशूलाधिकारे ॥)

लोहचूर्णं, क्ली, (लोहस्य चूर्णम् ।) लोहकिट्टम् । इति राजनिर्घण्टः ॥ (यथा, बृहत्संहितायाम् । ७६ । ३ ।
"माक्षीकधातुमधुपारदलोहचूर्ण-
पथ्याग्निलाजतुविडङ्गकृतानि योऽद्यात् ।
सैकानि विंशतिरहानि जरान्वितोऽपि
सोऽग्नीतिकोऽपि रमयत्यबलां युवेव ॥")

लोहजं, क्ली, (लोहात् जायते इति । जन् + डः ।) लोहकिट्टम् । इति राजनिर्घण्टः ॥ (पर्य्यायोऽस्य यथा, "मण्डूरं लोहजं किट्टम् ।" इति वैद्यकरत्नमालायाम् ॥) कांस्यम् । इति हेमचन्द्रः ॥

लोहद्रावी [न्] पुं, (लोहानि द्रावयतीति । द्रु + णिच् + णिनिः ।) टङ्कणः । इति राजनिर्घण्टः ॥ (टङ्कणशब्दोऽस्य विषयो विज्ञेयः ॥)

लोहनालः, पुं, (लोहस्य नालं दण्डो यत्र ।) नाराचः । इति त्रिकाण्डशेषः ॥

लोहपृष्ठः, पुं, (लोहस्येव कठिनं श्यामलं वा पृष्ठं यस्य ।) कङ्कपक्षी । इत्यमरः ॥ लौहमयपृष्ठयुक्ते, त्रि ॥

लोहप्रतिमा, स्त्री, (लोहस्य प्रतिमा ।) लौहमयी प्रतिमा । तत्पर्य्यायः । खर्म्भी २ शूणा ३ । इत्यमरः ॥ शूर्म्भी ४ शूर्म्मिः ५ शूर्म्मः ६ । इति भरतः ॥ शूर्म्मिका ७ । इति शब्दरत्नावली ॥

लोहमयं, त्रि, लोहात्मकम् । लोहनिर्म्मितम् । लोहशब्दात् तद्रूपार्थे मयट्प्रत्ययेन निष्पन्नम् ॥ (यथा, छान्दोग्योपनिषदि । ६ । १ । ५ ।
"यथा सौम्यैकेन लोहमणिना सर्वं लोहमयं विज्ञातं स्याद्वाचारम्भणं विकारो नामधेयं लोहमित्येव सत्यम् ॥")

लोहमारकः, पुं, (लोहं मारयति जारयतीति । मृ + णिच् + ण्वुल् ।) म्लेच्छभाकः । इति त्रिकाण्डशेषराजनिर्घण्टौ ॥

लोहलः, पुं, (लोहं लातीति । ला + कः ।) शब्दलाचार्य्यः । इति मेदिनौ । ले, १२६ ॥

लोहलः, त्रि, (लोहमिव लातीति । ला + कः ।) अयस्कवाक् । इत्यमरः ॥ लोहप्राहकश्च ॥

लोहवरं, क्ली, (लोहेषु सर्व्वतेजसेषु वरम् ।) स्वर्णम् । इति त्रिकाण्डशेषः ॥

लोहश्लेषणः, पुं, (लोहानि सर्व्वतेजसानि श्लेषयति योजयतीति । श्लेषि + ल्युः ।) टङ्कणः । इति हेमचन्द्रः ॥

लोहसङ्करं, क्ली, (लोहानां सङ्करो यत्र ।) वर्त्तलोहम् । इति राजनिर्घण्टः ॥ मिश्रिततेजसञ्च ॥

लोहाख्यं, क्ली, (लोहमेव आख्या यस्य ।) अगुरु । इति रत्नमाला ॥

लोहाभिसारः, पुं, (लोहानां शस्त्रादीनां अभिसारो यत्र ।) लोहाभिहारः । इत्यमरटीकायां भरतः ॥

लोहाभिहारः, पुं, (लोहानामभिहारो यत्र ।) शस्त्रभृतां राज्ञां नीराजनाविधिः । इत्यमरः ॥ महानवमीदीक्षायां अश्वादीनां नीराजने सति पश्चात् शस्त्रधारिणां राज्ञां यः शास्त्रोक्तो निर्म्मञ्छनप्रधानो विधिः प्रस्थानात् प्राक् स लोहाभिहारः । लोहस्य शस्त्रस्य अभिहारः सर्व्वतो हरणमत्रेति बहुव्रीहिः । लोहाभिहार इत्युक्तो विधिर्नीराजनोत्तर इत्यमरमाला ॥ लोहोऽस्त्री शस्त्रके लौहे इति मेदिनी ॥ लोहाभिसार इति पठन्त्यन्ये तत्र लोहं शस्त्रं अभिसार्य्यते प्रस्थाप्यतेऽत्रेति घञ् वाहनायुधादेर्निःशेषेण राजनं यत्र सा नीराजना नीरस्य शान्त्युदकस्य अञ्जनं क्षेपो यत्र सा नीराजना वा । इति भरतः ॥

लोहार्गलं, क्ली, (लोहस्य अर्गलमिव ।) तीर्थविशेषः । यथा,—
वराह उवाच ।
"शृणु देवि च तत्त्वेन यस्मां त्वं परिपृच्छसि ।
गुह्यमन्यच्च वक्ष्यामि महतः कर्म्मणो गतिः ॥
ततः सिद्धवटे गत्वा त्रिंशद्योजनदूरतः ।
म्लेच्छमध्ये वरारोहे हिमवन्तं समाश्रितम् ॥
तत्र लोहार्गलं नाम निवासो मे विधीयते ।
गुह्याः पञ्चदशा यत्र समन्तात् पञ्चयोजनम् ॥
सुलभं पुण्ययुक्तानां मम कर्म्मानुसारिणाम् ।
तत्र तिष्ठाम्यहं भद्रे ! उदीचीं दिशमाश्रितः ॥
तत्र ब्रह्मा च रुद्रश्च स्कन्देन्द्रश्च मरुद्गणाः ।
आदित्या वसवो रुद्रा अश्विनौ च महौजसः ॥
सोमो बृहस्पतिश्चैव ये चान्ये च दिवौकसः ।
तेषाञ्चैवार्गलं दत्त्वा चक्रं गृह्य महौजसम् ॥
ततो मे दानवाः सर्व्वे क्रमन्तो लोकमुत्तमम् ।
मया चैवान्तरं कृत्वा कृत्वा मायाञ्च वैष्णवीम् ॥
शतकोटिसहस्राणि शीघ्रमेव निपातितम् ।
एवं लोहार्गलेत्यासीन्नाम मे तत्र कारितम् ॥
एकधारा पतत्यत्र इन्द्रगोपकसन्निभा ।
यस्तत्र कुरुते स्नानं सप्तरात्रोषितो नरः ॥
ब्रह्मलोकं समासाद्य ब्रह्मणा सह मोदते ।
अथात्र मुञ्चते प्राणानहङ्कारविवर्ज्जितः ॥
ब्रह्मलोकं परित्यज्य मम लोकं प्रपद्यते ।
गुह्याख्याने महाभागे क्षेत्रे लोहार्गले मम ॥
सिद्धिकामेन मर्त्येन गन्तव्यं नात्र संशयः ॥
एतत्ते कथितं भद्रे लोहार्गलनिवासिनः ।
माहात्म्यं पद्मपत्राक्षि गुह्यं पद्ममहौजसम् ।
मङ्गल्यञ्च पवित्रञ्च मम भक्तसुखावहम् ॥"
इत्यादि वराहपुराणे लोहार्गलमाहात्म्यवर्णनं नामाध्यायः ॥ * ॥ लौहकीलके क्ली स्त्री च ॥

लोहि, क्ली, श्वेतटङ्कणम् । इति कश्चिद्राजनिर्घण्टः ॥

लोहिका, स्त्री, (लोहमस्त्यत्रेति । लोह + ठन् ।) लौहपात्रम् । तत्पर्य्यायः । खरसोन्दः २ खरपात्रम् ३ । इति त्रिकाण्डशेषः ॥

लोहितं, क्ली, (रुह्यते इति । रुह + "रुहेश्च लो वा ।" उणा० ३ । ६४ । इति इतन् रस्य लत्वञ्च ।) रक्तगोपीधर्षम् । कुङ्कुमम् । रक्तचन्दनम् । इति मेदिनी । ते, १४७ ॥ पत्तङ्गम् । हरिचन्दनम् । क्लणकुङ्कुमम् । रुधिरम् । इति राजनिर्घण्टः ॥ (यथा, मनुः । ४ । ५६ ।
"नाप्सु मूत्रं पुरीषं वा ष्ठीवनं वा समुत्सृजेत् ।
अमेध्यलिप्तमन्यद्वा लोहितं वा विषाणि वा ॥")
युद्धम् । इति हेमचन्द्रः ॥ (सरोवरविशेषः । इति मात्स्ये । १२० । १२ ॥ माणिक्यम् । तत्पर्य्यायो यथा,—
"माणिक्यं पद्मरागः स्याच्छोणरत्नञ्च लोहितम् ॥"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥)

लोहितः, पुं, (रुह + इतन् । रस्य लः ।) नदविशेषः । (सागरविशेषश्च । यथा, रामायणे । ४ । ४० । ३६ ।
"ततो रक्तजलं भीमं लोहितं नाम सागरम् ।
गत्वा प्रेक्षत ताश्चैव बृहतीं कूटशाल्मलीम् ॥")
भौमः । (यथा, बृहत्संहितायाम् । ६ । ८ ॥
"मध्येन यदि मघानां गतागतं लोहितः करोति ततः ।
प्राच्यो नृपो विनश्यति शस्त्रोद्योगाद्भयमतिवृष्टिः ॥")
रक्तवर्णः । इति मेदिनी । ते, १४८ ॥ रोहितमत्स्यः । नगविशेषः । इति शब्दरत्नावली ॥ सर्पः । (यथा, महाभारते । २ । ६ । ८ ।
"वासुकिस्तक्षकश्चैव नागश्चैरावणस्तथा ।
कक्षश्च लोहितश्चैव पद्मश्चित्रश्च वीर्य्यवान् ॥")
सुरान्तरः । इति धरणिः ॥ मसूरः । इति शब्दचन्द्रिका ॥ रक्तालुः । रक्तशालिः । इति राजनिर्घण्टः ॥ (यथा, सुश्रुते । १ । ४६ ।
"यष्टिका यवगोधूमा लोहिता ये च शालयः ।
सुनाड़की मसूराश्च धान्येषु प्रवराः स्मृताः ॥")
बलभेदः । इति हेमचन्द्रः ॥ (पर्व्वतविशेषः । इति मात्स्ये । १२० । ११ ॥ कुशद्वीपस्थवर्षविशेषः । इति तत्रैव । १२१ । ६५ ॥)

लोहितः, त्रि, रक्तवर्णयुक्तः । इत्यमरः ॥ (यथा, मनुः । ५ । ६ ।
"लोहितान् वृक्षनिर्य्यासान् ब्रह्मनप्रभवांस्तथा ।
भक्षणं गव्यञ्च पेयूषं प्रयत्नेन विवर्जयेत् ॥")

लोहितकं, क्ली, (लोहितमिव। इवार्थे कन्।) रीतिः। इति राजनिर्घण्टः॥

लोहितकः, पुं, (लोहित एव। स्वार्थे कन्।) मङ्गलग्रहः। इति शब्दमाला॥ पद्मरागमणिः। इति हेमचन्द्रः॥ (यथा, माघे। १३। ५२।

"लयनेषु लोहितकनिर्म्मिता भुवः
श्रितिरत्नरश्मिहरिसौकृताम्बराः॥"

रक्तवर्णयुक्ते, त्रि। यथा, महाभारते। २।६।३।

"नीलपीतासितश्यामैः क्षितेर्लोहितकैरपि।
अवतार्य्येत्थमा शुल्मैर्मञ्जरीजालधारिभिः॥")

लोहितचन्दनं, क्ली, (लोहितं चन्दनमिव।) कुङ्कुमम। इत्यमरः॥ रक्तचन्दनम्॥ (यथा, किरातार्জ্জुनीये। २। ३७।

"परिश्रमन् लोहितचन्दनोचितः
पदातिरन्तर्गिरिरेणुरुक्षितः॥")

लोहितपुष्पकः, पुं, (लोहितं पुष्पमस्य। कप्।) दाड़िमवृक्षः। इति भावप्रकाशः॥

लोहितमृत्तिका, स्त्री, (लोहिता चासौ मृत्तिका।) गैरिकम्। इति रत्नमाला॥ रक्तवर्णमृत्तिका च॥

लोहिता, स्त्री, (लोहित+स्त्रियां टाप्।) रागादिना रक्तवर्णा। इति जटाधरः॥ वराहक्रान्ता। इति शब्दचन्द्रिका॥ रक्तपुनर्नवा। इति राजनिर्घण्टः॥

लोहिताक्षः, पुं, (लोहिते अक्षिणी यस्य। सक्थ्यक्ष्णोः स्वाङ्गात् षच्।) विष्णुः। इति शब्दमाला॥ कोकिलः। इति शब्दचन्द्रिका॥ रक्तवर्णाक्षियुक्ते, त्रि। (यथा, महाभारते। २। ५६। ६।

"यथा स्तुतो लोहिताक्षो महात्मा
पौराणिको वेदितवान् पुरस्तात्॥")

लोहिताङ्गः, पुं, (लोहितमङ्गं यस्य।) मङ्गलग्रहः। इत्यमरः॥ (यथा, हरिवंशे। २२८।१२।

"वामे च दक्षिणे चैव स्थितौ शुक्रबृहस्पती।
शनैश्चरो लोहिताङ्गो लोहितार्कसमद्युतिः॥")

कम्पिल्लकः। इति राजनिर्घण्टः॥

लोहितानना, पुं, (लोहितमाननं मुखं यस्य।) नकुलः। इति राजनिर्घण्टः॥ रक्तवर्णमुखे, त्रि॥

लोहितायः, [स्] क्ली, (लोहितमयः।) ताम्रम्। इति त्रिकाण्डशेषः॥ (विशेषोऽस्य ताम्रशब्दे विज्ञेयः॥)

लोहितायसं, क्ली, (लोहितमायसम्।) रक्तवर्णलोहजातिः। इति मुग्धबोधव्याकरणम्॥

लोहिनी, स्त्री, (लोहिता+"वर्णादनुदात्तात्तोपधात्तः।" ४। १। ३९। इति ङीप्। तकारस्य नकारादेशश्च।) रक्तवर्णा स्त्री। यथा,—

"रोहिणी रोहिता रक्ता लोहिनी लोहिता च सा॥"

इति जटाधरः॥

लोहोत्तमं, क्ली, (लोहेषु सर्व्वतेजसेषु उत्तमम्।) स्वर्णम्। इति हेमचन्द्रः॥

लौकायतिकः, पुं, (लोकायतमधीते वेद वा। लोकायत+"क्रतूक्थादि सूत्रान्तात् ठक्।" ४। २। ६०। इति ठक्।) तार्किकभेदः। (यथा, गो० रामायणे। २। १०६। २६।

"कच्चिन्न लौकायतिकान् ब्राह्मणानुपसेवसे।
अनर्थकुशला ह्येते बालाः पण्डितमानिनः॥")

चार्व्वाकशास्त्रवेत्ता। लोकायतं वेत्ति इत्यर्थे ष्ठिकप्रत्ययेन निष्पन्नोऽर्थः॥

लौकिकः, त्रि, (लोके विदितः प्रसिद्धो हितो लोकं वेत्ति वा। लोक+ठञ्।) लोकव्यवहारसिद्धः। यथा,—

"वैदिका लौकिकाश्चैव ये यथोक्तास्तथैव ते।
निर्णीतार्थास्तु विज्ञेया लोकात्तेषामसंग्रहः॥"

इति कलापव्याकरणे सन्धिवृत्तौ प्रथमप्रकरणम्॥ लोकाय हित इत्यर्थे च ष्ठिकप्रत्ययनिष्पन्नः। इति मुग्धबोधव्याकरणम्॥

लौकिकता, स्त्री, (लौकिकस्य भावः। लौकिक+तल्।) लोकव्यवहारसिद्धत्वम्। श्लिष्टाचारोऽस्य भूरिप्रयोगः॥

लौकिकाग्निः, पुं, (लौकिकोऽग्निः।) असंस्कृताग्निः। यथा, आह्निकतत्त्वे।

"न पैत्र्ययज्ञियो होमो लौकिकाग्नौ विधीयते॥"

लौड, ऋ उत्क्षादे। इति कविकल्पद्रुमः॥ (भ्वा०-पर०-अक०-सेट्।) चतुर्दृग्लघरी। ऋ, अलुलौड़त्। इति दुर्गादासः॥

लौहः, पुं, (लोह एव। प्रज्ञादित्वात्।) लोहः। इत्यमरटीकायां भरतः॥ स च पञ्चविधः। यथा। काचिः १ पाण्डिः २ कान्तः ३ कालिङ्गः ४ वज्रकः ५। अस्य चयोदशविधसंस्काराः। यथा। घृतालिघर्षणम् १ उद्वर्त्तनम् २ अम्लभावनम् ३ आतपशोषः ४ निषेकः ५ मारणम् ६ दलनम् ७ चालनम् ८ सूर्य्यपाकः ९ स्थालीपाकः १० चूर्णनम् ११ पुटपाकः १२ पाकनिष्पन्नः १३। अस्य गुणाः। आयुर्ब्बलवीर्य्यकामदात्वम्। रोगनाशित्वम्। श्रेष्ठतमरसायनत्वञ्च। कृष्णवर्णस्य तस्य गुणाः। शोथशूलार्शःकुष्ठपाण्डुप्रमेहमेदोवायुनाशित्वम्। वयःस्थैर्य्यचक्षुस्तेजःकारित्वम्। सारकत्वम्। गुरुत्वञ्च। शोधितस्यास्य गुणौ। सर्व्वरोगनाशित्वम्। मरणनाशित्वञ्च। अशुद्धस्य तस्य गुणाः। जारणायोग्यत्वम्। आयुर्नाशकत्वञ्च। इति रत्नावल्यादयः॥*॥ (अथास्य शोधनादिनियमः।

"त्रिफलाष्टगुणे तोये त्रिफलाषोड़शं पलम्।
ततः क्वाथे पादशेषे लौहस्य पलपञ्चकम्॥
क्षिप्त्वा तप्ताणि पत्राणि सप्तवारं निषेचयेत्।
ध्रुवं प्रलीयते दोषो गिरिजे लौहसम्भवः॥"

इति लौहशोधनम्॥ *॥

"भानुपाकात्तथा स्थालीपाकाच्च पुटपाकतः।
निरुत्थो जायते लौहो यथोत्तफलदो भवेत्॥"

इति संक्षिप्तलौहमारणम्॥ *॥

"दादशांशेन दरदं तीक्ष्णचूर्णस्य मेलयेत्।
कन्यानीरेन संमर्द्द्य यामयुग्मञ्च संपुटे।
पुटेदेवं लौहचूर्णं सप्तधा मारणं व्रजेत्॥"

इति वैद्यकरसेन्द्रसारसंग्रहे जारणमारणाधिकारे॥") अन्यत् लोहशब्दे द्रष्टव्यम्॥ (छागविशेषः। यथा, महाभारते। १३। ८८। १३।

"अजेन वापि लौहेन मघास्वेव यतव्रतः।
हस्तिच्छायासु विधिवत् कर्म्म व्रजनवीक्षितम्॥"

लोहशब्दार्थोऽप्यत्र॥)

लौहचारकः, पुं, (लौहेन लौहनिगड़ेन चारः प्रचारो यत्र।) नरकभेदः॥ यत्र निगड़ैर्बध्यन्ते। इति पुराणम्॥

लौहजं, क्ली, (लौहात् जायते इति। जन्+डः।) मक्षिकम्। इति रत्नमाला॥

लौहभाण्डः, पुं, (लौहस्य भाण्डमिवाकृतिर्यत्र।) अयस्तालम्। इति शब्दचन्द्रिका॥ हामनदिस्ता इति भाषा। लौहनिर्म्मितभाण्डे, क्ली॥

लौहभूः, स्त्री, (लौहस्य भूरिव।) कठिनी। सा तु लौहपात्रविशेषः। यथा,—

"लौहात्मा चायुगा लौहा लौहभूः कठिनी-ल्यपि॥"

इति शब्दचन्द्रिका॥

लौहमलं, क्ली, (लौहस्य मलम्।) लोहमलम्। इति राजनिर्घण्टः॥ (तथास्य विषयः।

"सद्यो लौहमलाभ्यक्तसिताभागाः समा मानतः
पात्रे ताम्रमये दिनाम्लमथितं संस्थापयेदातपे
पश्चात्तद्घनतां प्रयीय रजनीमेकां बहिः स्थापयेत्।
पात्रे ताम्रमये विधेयमथवा पात्रे हविर्भाविते॥
पश्चाच्चाषचतुष्टयं प्रतिदिनं जग्ध्वा जलं प्रीतलम्।
पेयं भोजनपूर्ब्बमध्यविरतोऽस्वच्छन्दभोज्यैर्नरैः॥
जेतुं शूलहुताशमान्द्यकसनश्वासाम्लपित्तज्वरो-न्मादापस्मृतिमेहसर्व्वजठराजीर्णादि सर्व्वा रुजः॥"

इति भैषज्यधन्वन्तरौ शूले चतुःसममक्षूरम्॥)

लौहशङ्कुः, पुं, (लौहस्य शङ्कुर्यत्र।) नरकविशेषः। यत्र लकुचैर्भिद्यते। इति पुराणम्॥ लौहनिर्म्मितकीलकश्च॥

लौहा, स्त्री, लौहभूः। इति शब्दचन्द्रिका॥

लौहात्मा, स्त्री, (लौह आत्मा यस्याः।) लौहभूः। इति शब्दचन्द्रिका॥

लौहित्यः, पुं, लोहितः। इति लोहितशब्दात् स्वार्थे ष्या-(अण्) प्रत्ययेन निष्पन्नः॥ लोहितसम्बन्धिनि, त्रि॥

लौहितीकः, त्रि, (लोहित इव। लोहित+"कर्कलोहितादीकक्।" ५। ३। ११०। इति ईकक्।) लोहितवर्णतुल्यः। इति सिद्धान्तकौमुदी॥

लौहित्यं, क्ली, (लोहितस्य भावः। लोहित+ष्यञ्।) लोहितत्वम्। इति मेदिनी। ये, १०२॥

लौहित्यः पुं, (लोहित एव। स्वार्थे ष्यञ्।) नदभेदः। स च ब्रह्मपुत्रः। इति मेदिनी। ये, १०२॥ सागरः। इति शब्दमाला॥ तस्य नदविशेषस्य उत्पत्तिर्यथा,—

सगर उवाच।

"अमोघायां कथं जज्ञे लौहित्यो ब्रह्मणः सुतः।
कथं शान्तनुभार्य्यायां रतः स कमलासनः॥
पारस्त्रैणेयपुत्रो वा कथं जज्ञे पितामहात्।
तत् सर्व्वं श्रोतुमिच्छामि कथयस्व द्विजोत्तम॥

और्व्व उवाच।

शृणु त्वं नृपशार्दूल कथयामि महत्तरम्।
आख्यानं ब्रह्मपुत्रस्य लौहित्यस्य महात्मनः॥
हरिवर्षे महावर्षे शान्तनुर्नाम नामतः।
मुनिरासीन्महाभागो ज्ञानवान् सुतपोधनः॥
तस्य भार्य्या महाभागा अमोघाख्या महासती।
हिरण्यगर्भस्य सुतेस्तृणबृन्दाश्रमोद्भवा॥
तया सार्द्धं स कैलासमर्य्यादापर्व्वतेऽवसत्।
लौहित्याख्यस्य सरसस्तीरे वै गन्धमादने॥
एकदा स तपोनिष्ठो निजपुष्पादिगोचरे।
जगाम वनमध्यन्तु चिन्वन् बहुफलानि च॥
तस्मिन्नवसरे ब्रह्मा सर्व्वलोकपितामहः।
तत्राजगाम यत्रास्ति अमोघा शान्तनोः प्रिया॥
तां दृष्ट्वा हेमगर्भाभां युवतीमतिसुन्दरीम्।
मोहितो मदनेनाशु तथाभूद्दूषितेन्द्रियः॥
उदीरितेन्द्रियो भूत्वा जिघृक्षुस्तां महासतीम्।
अथाधावत्तदा ब्रह्मा संमुखो मदनार्दितः॥
धावमानं विधातारं दृष्ट्वामोघा महासती।
मैवं मैवमिति प्रोक्ता पर्णशालां बलीयत॥
दृष्ट्वोवाच धातारममोघा कुपिता तदा।
पर्णशालान्तरगता द्वारमावृत्य तत्क्षणात्॥
अकार्य्यं न मया कार्य्यं मुनिपत्न्या विगर्हितम्।
बलात् प्रमथ्य चाहं तत्त्वया त्वाच्च शपाम्यहम्॥
अमोघया चैवमुक्ते विधातुश्च तदा नृप।
रेतश्चस्कन्द च तदैवाश्रमे शान्तनोर्मुनेः॥
च्युते रेतसि धातापि हंसयानं समाश्रितः।
लज्जयातिपरीतात्मा द्रुतं वै स्वाश्रमं ययौ॥
गते वेधसि शान्तनुर्निजमाश्रममागतः।
आगत्य दृष्ट्वा हंसानां पदचोभं तथा भुवि॥
तेजश्च पतितं भूमौ विधातुर्ज्ज्वलनोपमम्।
अमोघां परिपप्रच्छ पर्णशालान्तरस्थिताम्॥
किमेतदत्र शुभगे प्रवृत्तं दृश्यते तु यत्।
पक्षिणाञ्च पदचोभं तेजश्चैदञ्च कीदृशम्॥
सा तस्य वचनं श्रुत्वा शान्तनुं मुनिसत्तमम्।
अमर्षितेव न्यगददाकुला विकलानना॥
हंसयुक्तस्यन्दनेन कोऽप्यागत्य चतुर्मुखः।
कमण्डलुकरो भीरू रतिं मां समयाचत॥
ततो मया मर्त्सितश्च उटजान्तरलीनया।
प्रधाय तेजः संयातो मम शापभयार्दितः॥
कुरु तत्र प्रतीकारं यदि शक्तोषि शान्तनो।
न हि मां धर्षणां सोढुं कश्चित् शक्नोति जीवभृत्॥

स तस्या वचनं श्रुत्वा स्वयं ब्रह्मा समागतः।
इति निश्चित्य मनसा तत्र ध्यानपरोऽभवत्॥
दिव्यध्यानेन तज्ज्ञात्वा देवकार्य्यमुपस्थितम्।
तीर्थावतारणञ्चापि हिताय जगतां मुनिः॥
ध्यात्वोदकं चिन्तयित्वा स्वभार्य्यामिदमब्रवीत्।
इदं तेजो ब्रह्मणस्त्वं पिबामोघे ममाज्ञया॥
हिताय सर्व्वजगतां देवकार्य्यार्थसिद्धये।
भवत्या निकटं ब्रह्मा स्वयमेव समागतः॥
त्वामप्राप्य महाकृत्यमावयोः स न समर्थ्य च।
गतो निजाश्रमं तत्त्वं कर्त्तुमर्हसि तद्वचः॥
तत् श्रुत्वा शान्तनोर्व्वाक्यममोघातीव लज्जिता।
सान्त्वयन्तीव तं प्राह पतिं गत्वा महासती॥
नान्यस्य तेजो धास्यामि न चेत्ते विमनस्कता।
अवश्यं यदि कर्त्तव्यं पीत्वा त्वं मयि चोत्सृज॥
ततस्तस्या वचः श्रुत्वा युक्तं तथ्यञ्च शान्तनुः।
स्वयं पीत्वा च तत्तेजस्तस्या गर्भे न्यसेचयत्॥
संक्रामितेः शान्तनुना तेजोभिर्ब्रह्मणः सती।
गर्भं दधानामोघाख्या हिताय जगतां ततः॥
तस्यां काले तु संप्राप्ते संजातो जलसञ्चयः।
तन्मध्ये तनयश्चापि नीलवासाः किरीटधृक्॥
रत्नमालासमायुक्तो रक्तगौरश्च ब्रह्मवत्।
चतुर्भुजः पद्मविद्याधरयज्ञोपवीतधरस्तथा॥
शिशुभारशिरःस्थश्च तुल्यकायो जलोत्करैः।
तं जातञ्च तथा भूतं शान्तनुर्लोकशान्तनुः।
चतुर्णां पर्व्वतानाञ्च मध्यदेशे न्यवेशयत्॥
कैलासश्चोत्तरे पार्श्वे दक्षिणे गन्धमादनः।
जारुधिः पश्चिमे शैलः पूर्व्वे सर्व्वैकाक्षयः॥
तेषां मध्ये स्वयं कुण्डं पर्व्वतानां विधेः सुतः।
कृत्वातिवृद्धे नित्यं शरदीव निशाकरः॥
तं तोयमध्यगं पुत्रमासाद्य दुहिणः स्वयम्।
क्रमतस्तस्य संस्कारानकरोद्दृढशुद्धये॥
अथ काले बहुतिथे यतीते ब्रह्मणः सुतः।
तोयराशिस्वरूपेण ववृधे पञ्चयोजनान्॥
तस्मिन् देवाः पपुः सस्नुर्द्वितीय इव सागरे।
शीतामलजले हृद्ये देवश्चाम्बरसां गणैः॥
तस्मिन्नवसरे रामो जामदग्न्यः प्रतापवान्।
चक्रे मातृवधं घोरमत्युग्रं पितुराज्ञया॥
तस्य पापस्य मोक्षाय स्वपितुश्चोपदेशतः।
स जगाम महाकुण्डं ब्रह्माख्यं स्नातुमिच्छया॥
तत्र स्नात्वा च पीत्वा च मातृहत्यां व्यपानयत्।
वीर्य्यो परशुना कृत्वा तच्च न्यामवतारयत्॥"

इति कालिकापुराणे जामदग्न्योपाख्याने ८४ अध्यायः॥ * ॥ अपि च।

"जातसंप्रत्ययः सोऽथ तीर्थमासाद्य तं वरम्।
वीर्य्यो परशुना कृत्वा ब्रह्मपुत्रमवाहयत्॥
ब्रह्मकुण्डात् सुतः सोऽथ कासारे लोहिताक्षये।
कैलासोपत्यकायान्तु न्यपतद्ब्रह्मणः सुतः॥
तस्यापि सरसस्तीरं समुत्थाय महाबलः।
कुठारेण दिशं पूर्व्वामनयद्ब्रह्मणः सुतम्॥
ततोऽपरत्रापि गिरिं हेमशृङ्गं विभिद्य च।
कामरूपान्तरं पीठमवाहयदमुं हरिः॥
तस्य नाम विधिश्चक्रे स्वयं लौहितगङ्गकम्।

लौहित्यात् सरसो जातो लौहित्याख्यस्ततोऽभवत्॥
स कामरूपमखिलं पीठमाप्लाव्य वारिणा।
गोपयन् सर्व्वतीर्थानि दक्षिणं याति सागरम्॥
प्रागेव दिग्व्यसुनां संत्यक्ता ब्रह्मणः सुतः।
पुनः पतति लौहित्ये गत्वा द्वादशयोजनम्॥
चैत्रे मासि सिताष्टम्यां यो नरो नियतेन्द्रियः।
स्नाति लौहित्यतोयेषु स याति ब्रह्मणः पदम्॥
स्नेत्रन्तु सकलं मासं शुचिः प्रयतमानसः।
लौहित्यतोये यः स्नाति स कैवल्यमवाप्नुयात्॥"

इति कालिकापुराणे ८५ अध्यायः॥

ल्यी, गि श्रिणि। इति कविकल्पद्रुमः॥ (क्रया०-पर०-सक०-अनिट्।) ओष्ठ्यवर्णाद्योपधः। ल्यिनाति ल्यीनः ल्यीनिः। अन्तःस्याद्योपध इति रमानाथः। ल्यिनाति। इति दुर्गादासः॥

ल्वी, गि ग गत्याम्। इति कविकल्पद्रुमः॥ (क्रया०-पर०-सक०-अनिट्।) वकारोपधः। ग, ल्वीनाति ल्वीतः ल्वीतिः। गि, ल्विनाति ल्वीनाति ल्वीनः ल्वीनिः। गिनेव क्रयादित्वसिद्धौ गकरणं पादित्वविकल्पार्थम्। इति दुर्गादासः॥

व

व, वकारः। स च यत्नस्य जनचिंग्रवर्णः। यवर्गस्य चतुर्थवर्णश्च। अस्योच्चारणस्थानं दन्तः ओष्ठश्च। इति व्याकरणम्॥ (यथा, ग्रिच्चायाम्। १८।

"जिह्वामूले तु कुः प्रोक्तो दन्तौष्ठौ वः स्मृतौ बुधैः॥")

दन्त्यवकारः। स च अन्तःस्थवर्णः। यथा। अन्तःस्था यरलवाः। इति कलापव्याकरणम्॥ अपि च।

"ततोऽक्षरसमाम्नायमसृजद्भगवानजः।
अन्तःस्थोष्मस्वरस्पर्शह्रस्वदीर्घादिलक्षणम्॥"

इति श्रीभागवते १२ स्कन्धे ६ अध्यायः॥

"ततस्तेभ्योऽक्षराणां समाम्नायं समाहारं तमेवाह। अन्तःस्था यरलवाः। उष्माणः शषसहाः। स्वरा अकारादयः। स्पर्शाः कादयो मावसानाः। ह्रस्वा दीर्घाश्च। आदिशब्दात् जिह्वामूलीयादयः। त एव लक्षणं स्वरूपं यस्य तम्।" इति तट्टीकायां श्रीधरस्वामी॥*॥ "यवरलीयवकारस्य प फ ब भ म वा इत्येकपदोक्त्या उत्पत्तिस्थानमोष्ठसृक्का दन्त्यकार्य्यार्थं दन्त्यमध्येऽपि त थ द ध न ल स व इति भिन्नपदे पठितवान्। यथा संवृवर्त्तति इत्यादौ वकारस्य ओष्ठ्यत्वात् उर् दन्त्यत्वात् अनुस्वारस्य मकारो न स्यात्। वैदिकास्तु अस्योत्पत्तिस्थानं दन्त एवेत्याहुः। अतएव तद्विष्णोः परमं पदं इत्यादौ तथैवोच्चारयन्ति।" इति मुग्धबोधटीकायां दुर्गादासः॥ * ॥

तस्य पर्य्यायः ।
"वो वाणो वारुणी रुच्या वरुणो देव-
संज्ञकः ।
तोयं लान्तश्च वामांशः ॥" इति बीजवर्णाभि-
धानम् ॥ * ॥ अपि च ।
"वकारो वरुणो बाणः खेदः खड्गीश्वरो जवः ॥"
इति रुद्रयामले मन्त्रकोषः ॥ * ॥
अपि च ।
"वो वाणो वारुणी रुच्या वरुणो देवसंज्ञकः ।
खड्गीशो ज्वालिनी वक्त्रः कलसध्वनिवाचकः ॥
उत्कारीशस्तु नावीतो वज्रा स्त्रिक् सागरः
शुचिः ।
त्रिधातुः शङ्करः श्रेष्ठो विशेषो यमसादनम् ॥"
इति नागातन्त्रशास्त्रम् ॥
तस्य स्वरूपं यथा,—
"वकारं चन्द्रलापाङ्गि कुण्डली मोक्षमव्ययम् ।
पञ्चप्राणमयं वर्णं त्रिशक्तिसहितं सदा ॥
त्रिबिन्दुसहितं वर्णमात्मादित्वसंयुतम् ।
पञ्चदेवमयं वर्णं पीतविद्युल्लतामयम् ॥
चतुर्व्वर्गप्रदं वर्णं सर्व्वसिद्धिप्रदायकम् ।
त्रिशक्तिसहितं देवि ! त्रिबिन्दुसहितं सदा ॥"
इति कामधेनुतन्त्रम् ॥ * ॥
वङ्गीयवर्णमालायामस्य लेखनप्रकारो यथा,—
"कोणत्रययुता रेखा ब्रह्मविष्णुग्निधात्मिका ।
माया शक्तिः परा नित्या ध्यानमस्य प्रचक्षते ॥"
इति वर्णोद्धारतन्त्रम् ॥ * ॥
अस्य ध्यानम् ।
"कुन्दपुष्पप्रभां देवीं द्विभुजां पङ्कजेक्षणाम् ।
शुक्लमाल्याम्बरधरां रत्नहारोज्ज्वलां पराम् ॥
साधकाभीष्टदां सिद्धां सिद्धिदां सिद्धसेविताम् ।
एवं ध्यात्वा वकारन्तु तन्मन्त्रं दशधा जपेत् ॥"
इति वर्णोद्धारतन्त्रम् ॥

व, य, इवार्थः । इति मेदिनी । वे, १ ॥ (यथा, रघुः । ४ । ४२ ।
"ताम्बूलीनां दलैस्तत्र रचितापानभूमयः ।
नारिकेलासवं योधाः पाययं व यशः पपुः ॥")

वं, क्ली, (वा ल गमनहिंसयोः + कः ।) प्रचेताः । इति मेदिनी । वे, १ ॥ वरुणबीजम् । इति तन्त्रम् ॥

वः, पुं, (वानमिति । वा + भावे चः ।) सान्त्वनम् । (वाति गच्छतीति । वाल गमने + कः ।) वायुः । वरुणः । इति मेदिनी । वे, १ ॥ बाहुः । मन्त्रणम् । कल्याणम् । बलवान् । वसतिः । वरुणालयः । इति शब्दरत्नावली ॥ शार्दूलः । वस्त्रम् । शालूकः । वन्दनम् । इति नानेकाक्षरकोषः ॥

वः, [स्] त्रि, युष्मान् । युष्मभ्यम् । युष्माकम् । युष्मच्छब्दस्य द्वितीयाचतुर्थीषष्ठीबहुवचनान्त-रूपोऽयम् । इति आकरग्रन्थम् ॥ (यथा, मुग्धबोधे ।
"पुष्णा तु वो नोऽपि हरिर्धनं वो
ददातु नो हन्त्वशुभानि वो नः ॥"
पादवाक्यादौ तु अस्य प्रयोगो न भवति । इति वैयाकरणिकाः ॥)

वंशः, पुं, (वमति उद्गिरति पुरुषान् वध्नते इति वा । टु वम उद्गिरणे इति धातोर्यद्वा वन शब्दे इति धातोर्वा कुलकात् शः । यद्वा, वंशि उच्यते इति वा । वंश कान्तौ + अच् घञ् वा । ततो नुम् ।) पुत्रपौत्रादिः । तत्पर्य्यायः । सन्ततिः २ गोत्रम् ३ जननम् ४ कुलम् ५ अभिजनः ६ अन्वयः ७ अन्ववायः ८ सन्तानः ९ । इत्यमरः । २ । ७ । १ ॥ निघनम् १० जातिः ११ । इति जटाधरः ॥ कुलञ्च विद्यया जन्मना वा प्राणिनामेकलक्षणः सन्तानो वंश इति जयादित्यः । धनेन विद्यया वा ख्यातस्यापत्यधारा वंश इति सुभूतिः । वमति उद्गिरति पूर्व्वपुरुषान् वंशः नाम्नीति शः । इत्यमरटीकायां भरतः ॥ * ॥ (यथा, रघुः । १ । २ ।
"क्व सूर्य्यप्रभवो वंशः क्व चाल्पविषया मतिः ।
तितीर्षुर्दुस्तरं मोहादुडुपेनास्मि सागरम् ॥"
पुत्रः । यथा, भागवते । ९ । २ । १७ ।
"नृपस्य वंशः सुमतिर्भूतज्योतिस्ततो वसुः ॥")
लशजातिविशेषः । वाँश इति भाषा । तत्पर्य्यायः । लक्सारः २ कर्म्मारः ३ लक्षिसारः ४ लशध्वजः ५ घृतपर्व्वा ६ यवफलः ७ वेणुः ८ मस्करः ९ तेजनः १० । इत्यमरः । २ । ४ । ६० ॥ किष्कुपर्व्वा ११ । इति जटाधरः ॥ वंशः १२ । इति शब्दरत्नावली ॥ लशकेतुकः १३ कण्टालुः १४ कण्टकी १५ महाबलः १६ दृढ़ग्रन्थिः १७ दृढ़पत्रः १८ धनुर्द्रुमः १९ धानुषः २० दृढ़काण्डः २१ ॥ (यथा, ऋतुसंहारे । १ । २५ ।
"ध्वनति पवनविद्धः पर्व्वतानां दरीषु
स्फुटति पटुनिनादः शुष्कवंशस्थलीषु ।
प्रसरति लशमध्ये लब्धवृद्धिः क्षणेन
क्षपयति वनराजीं प्राप्तसङ्गो दवाग्निः ॥")
अस्य गुणाः । अम्लत्वम् । कषायत्वम् । किञ्चित्तिक्तत्वम् । शीतलत्वम् । मूत्रकृच्छ्रप्रमेहार्शःपित्तदाहासनाशित्वञ्च । इति राजनिर्घण्टः ॥ * ॥ अपि च ।
"वंशः सरो हिमः स्वादुः कषायो वस्तिशोधनः ।
छेदनः कफपित्तघ्नः कुष्ठासृग्व्रणशोथजित् ॥ * ॥
तत्करीरः कटुः पाके रसे रूक्षो गुरुः सरः ।
कषायः कफजित् स्वादुर्व्विदाही वातपित्तलः ॥
तदृग्वास्तु सरा रूक्षाः कषायाः कटुपाकिनः ।
वातपित्तकरा ऊष्णा बह्वसृक्षाः कफापहाः ॥"
इति भावप्रकाशः ॥ * ॥
(गृहोर्द्धकाष्ठम् । यथा,—
"वंशः पृष्ठास्थि गेहोर्द्धकाष्ठे वेणौ गणे कुले ॥"
इति रघुटीकायां मल्लिनाथधृतकेशवः । ७ । ३६ ॥)
पृष्ठावयवः । पिठेर दाँड़ा इति भाषा ॥ (यथा, भागवते । ११ । ८ । ३३ ।
"यदस्थिभिर्निर्म्मितवंशवंश्य-
स्त्वचा रोमनखैः पिनद्धम् ॥")
वर्गः । इति मेदिनी । शे, १३ ॥ (यथा, रघुः । ७ । ३६ ।
"उत्थापितः संयति रेणुरश्वैः
सान्द्रीकृतः स्यन्दनवंशचक्रैः ॥")
वाद्यभाण्डविशेषः । इति धरणिः ॥ वाँशी इति भाषा ॥ (यथा, रघुः । २ । १२ ।
"स कीचकैर्मारुतपूर्णरन्ध्रैः
कूजद्भिरापादितवंशकृत्यम् ।
शुश्राव कुञ्जेषु यशः खमुच्चै-
रुद्गीयमानं वनदेवताभिः ॥"
विवृतिरस्य वंशीशब्दे द्रष्टव्या ॥) इक्षुः । सालवृक्षः । इति राजनिर्घण्टः ॥ (प्राधागर्भसम्भूताश्वरोविशेषे, स्त्री । यथा, महाभारते । १ । ६५ । ४६ ।
"अनवद्यां मनुं वंशामसुरां मार्गणप्रियाम् ।
अनूपां सुभगां भासीमिति प्राधा व्यजायत ॥")

वंशकं, क्ली, (वंश इव कायतीति । कै + कः ।) अगुरु । इति हारावली । १०४ ॥

वंशकः, क्ली, (वंश इव प्रतिक्षतिः । "इवे प्रतिकृतौ ।" ५ । ३ । ९६ । इति कन् ।) मत्स्यविशेषः । इति शब्दमाला ॥ वाँशपाताभाछ इतिभाषा ॥ इक्षुविशेषः । इति रत्नमाला ॥ वाँशाइ इति सामशाड़ा इति च भाषा ॥ अस्य गुणाः ।
"वंशकस्त्वनभिष्यन्दी लघुर्दोषत्रयापहः ॥"
इति राजवल्लभः ॥
(यथा, सुश्रुते । १ । ४५ ।
"पौण्ड्रको भीरुकश्चैव वंशकः घृतपोरकः ॥"
"अविदाही गुरुर्ज्ञेयः पौण्ड्रको भीरुकस्तथा ।
आभ्यां तुल्यगुणः किञ्चित् सक्षारो वंशको मतः ॥")
(वृक्षो वंशः । "संज्ञायां कन् ।" ५ । ३ । ८७ । इति कन् । क्षुद्रवंशः । इति सिद्धान्तकौमुदी ॥)

वंशकर्पूरं, क्ली, आकाशोद्भूयमानसत्त्वम् । यथा,—
"वृद्धसूचकमित्याहुरिन्द्रतूलं मनीषिणः ।
ग्रीष्महासं वंशकर्पूरं वाततूलं मरुद्भवम् ॥"
इति हारावली । २३ ॥

वंशकर्पूररोचना, स्त्री, (कर्पूर इव रोचते शोभते इति । रुच् + ल्युः । ततः षष्ठीतत्पुरुषः ।) वंशरोचना । इति राजनिर्घण्टः ॥

वंशक्षीरी, स्त्री, (वंशस्य क्षीरमिवास्या अस्तीति । अच् । गौरादित्वात् ङीष् ।) वंशरोचना । इति राजनिर्घण्टः ॥

वंशजः, पुं, (वंशाज्जायते इति । जन् + डः ।) वेणुयवः । इति राजनिर्घण्टः ॥

वंशजः, त्रि, (वंशात् सदृवंशाज्जायते इति । जन् + डः ।) सदृवंशजातः । तत्पर्य्यायः । दैव्यः २ वंश्यः ३ । इति हेमचन्द्रः । ३ । ३७७ ॥ (वेणूत्पन्नोऽपि । यथा, आर्य्यासप्तशत्याम् । ४७६ ।
"यन्नियतनिर्गुणं यन्न वंशजं यच्च नित्यनिर्व्वाणम् ।
किं कर्म्मस्वन्निहितं धनुः पदे देवराजेन ॥")

वंशजा, स्त्री, (वंशे जायते इति । जन् + डः + टाप् ।) वंशरोचना । इति शब्दरत्नावली ॥ (अस्या गुणाः यथा,—
"वंशजा दृंहणी तृष्या बल्या स्वादी च शीतला ।
तृष्णाकाश्यज्वरश्वासक्षयपित्तास्रकामलाः ।
हरेत् कुष्ठं व्रणं पाण्डुं कषाया वातरक्तकृत् ॥"
इति भावप्रकाशस्य पूर्ब्बखण्डे प्रथमे भागे ॥)

वंशतण्डुलः, पुं, (वंशजातस्तण्डुलः ।) वेणुयवः । इति राजनिर्घण्टः ॥

वंशधान्यं, क्ली, (वंशस्य धान्यम् ।) वेणुयवः । इति राजनिर्घण्टः ॥

वंशनालिका, स्त्री, (वंशनाल्योऽस्त्यस्या इति । वंशनाल + ठन् । टीप् ।) वंशी । इति शब्दरत्नावली ॥

वंशनेत्रं, क्ली, (वंशस्येव नेत्राणयस्य ।) इक्षुमूलम् । इति राजनिर्घण्टः ॥

वंशपत्रः, पुं, (वंशस्य पत्राणीव पत्राणयस्य ।) नलः । इति राजनिर्घण्टः ॥ (वंशस्य पत्रम् ।) वंशस्य दले, क्ली ॥ (हरितालम् । यथा,—
"तालकं वंशपत्राख्यं कुमाण्डसलिले क्षिपेत् ।
सप्तधा वा त्रिधा वापि दग्धस्तेन च वा पुनः ॥
शोधयित्वा पुनः शुष्कं चूर्णयेत्तण्डुलाम्बुभिः ।
ततः शरावके पात्रे स्थापयेत् कुशलो भिषक् ॥
वदरीपत्रकल्केन सन्निलेपस्य कारयेत् ।
अरुणाभमधःपात्रं तावज्ज्वाला प्रदीयते ॥
खाङ्गशीतं समुद्धृत्य मालिक्याभो भवेद्रसः ॥"
इति वैद्यकरसेन्द्रसारसंग्रहे कुष्ठाधिकारे ॥)

वंशपत्रकं, क्ली, (वंशपत्रमेव । स्वार्थे कन् ।) हरितालम् । इति हेमचन्द्रः । ४ । १२४ ॥

वंशपत्रकः, पुं, (वंशस्य पत्रमिवाकृतिरस्यति । इवार्थे कन् ।) क्षुद्रमत्स्यविशेषः । इति शब्दमाला ॥ वाँशपाता माछ इति भाषा ॥ नलः । श्वेतेक्षुः । इति राजनिर्घण्टः ॥

वंशपत्रपतितं, क्ली, सप्तदशाक्षरपादच्छन्दोविशेषः । यथा,—
"हिड्सुनिवंशपत्रपतितं भ र न भ न ल गे: ॥"
उदाहरणम् ।
"नूतनवंशपत्रपतितं रजनिजलस्रवं
पश्य मुकुन्द ! मौक्तिकमिवोत्तममरकतगम् ।
एष च तं चकोरनिकरः प्रपिबति मुदितो
वान्तमवेत्य चन्द्रकिरणैरुत्तकणमिव ॥"
वंशपत्रचरितेति केचित् । वंशदलमिति शम्भौ ।
इति छन्दोमञ्जरी ॥

वंशपत्री, स्त्री, (वंशपत्र + गौरादित्वात् ङीष् ।) नाड़ीहिङ्गुः । व्रणविशेषः । तत्पर्य्यायः । वंशदला २ जीरिका ३ जीर्णपत्रिका ४ । अस्या गुणाः । सुमधुरत्वम् । स्निग्धिरत्वम् । पित्तरक्तदोषनाशित्वम् । रूक्षत्वम् । पशूनां दुग्धदायित्वञ्च । इति राजनिर्घण्टः ॥ तत्पर्य्यायगुणाः ।
"वंशपत्री वेणुपत्री पिङ्गा हिङ्गु शिवाटिका ।
हिङ्गुपत्रीगुणा विज्ञैर्वंशपत्री च कीर्त्तिता ॥"
इति भावप्रकाशः ॥

वंशपीतः, पुं, (वंशः वंशपत्रमिव पीतः ।) कणगुग्गुलुः । इति राजनिर्घण्टः ॥

वंशपुष्पा, स्त्री, (वंशस्य पुष्पाणीव पुष्पाण्यस्याः ।) सहदेवीलता । इति राजनिर्घण्टः ॥

वंशपूरकं, क्ली, (वंशस्येव पूरकमस्य ।) इक्षुमूलम् । इति राजनिर्घण्टः ॥

वंशरोचना, स्त्री, (रोचते इति । रुच + नन्दादित्वात् ल्युः । टाप् । वंशस्य रोचना ।) स्वनामख्यातवंशपर्व्वस्थितश्वेतवर्णौषधविशेषः । वंशलोचन इति भाषा । तत्पर्य्यायः । त्वक्क्षीरा २ । इत्यमरः । २ । ६ । १०६ ॥ वंशलोचना ३ । इति भरतः ॥ तुगाक्षीरी ४ शुभा ५ वांशी ६ वंशजा ७ । इति रत्नमाला ॥ क्षीरिका ८ । इति शब्दरत्नावली ॥ तुगा ९ त्वक्क्षीरी १० शुभ्रा ११ वंशक्षीरी १२ वैणवी १३ त्वक्सारा १४ कर्म्मरी १५ श्वेता १६ वंशकर्पूररोचना १७ तुङ्गा १८ रोचनिका १९ पिङ्गा २० वंशशर्करा २१ । अस्या गुणाः । रूक्षत्वम् । कषायत्वम् । मधुरत्वम् । हिमत्वम् । रक्तशुद्धिकारित्वम् । तापपित्तोद्रेकहरत्वञ्च । इति राजनिर्घण्टः ॥ अपि च ।
"वंशजा दृंहणी तृष्या बल्या स्वादी च शीतला ।
तृष्णाकाश्यज्वरश्वासक्षयपित्तास्रकामलाः ।
हरेत् कुष्ठं व्रणं पाण्डुं कषाया वातरक्तकृत् ॥"
इति भावप्रकाशः ॥

वंशलोचना, स्त्री, (वंशरोचना । रस्य लः ।) वंशरोचना । इति हेमचन्द्रः ॥ अस्या गुणाः ।
"कषायमधुरा रूक्षा वातघ्नी वंशलोचना ।
तुगाक्षीरी क्षयश्वासकासघ्नी मधुरा हिमा ॥"
इति राजवल्लभः ॥

वंशशर्करा, स्त्री, (वंशस्य शर्करेव ।) वंशलोचना । इति राजनिर्घण्टः ॥

वंशशलाका, स्त्री, (वंशस्य शलाकेव दार्ढ्यात् ।) वीणामूलम् । इति हेमचन्द्रः । २ । २०० ॥ (वंशनिर्म्मिता शलाकेति मध्यलोपी समासः ।) वंशनिर्म्मितशलाका च ॥

वंशस्तनितं, क्ली, वंशस्थविलं, क्ली, द्वादशाक्षरपादच्छन्दोविशेषः । यथा,—
"वहन्ति वंशस्थविलं जतौ जरौ ॥"
उदाहरणम् ।
"विलासवंशस्थविलं मुखानिलैः
प्रपूर्य्य यः पञ्चमरागमुद्धिरन् ।
व्रजाङ्गनानामपि गानशालिनां
जहार मानं स हरिः पुनातु वः ॥"
वंशस्तनितमपि क्वापि । इति छन्दोमञ्जरी ॥

वंशाग्र्यं, क्ली, (वंशस्य अग्रम् । प्रथमजातत्वात् ।) वंशाङ्कुरः । इति राजनिर्घण्टः ॥

वंशानुचरितं, क्ली, (वंशस्य अनुचरितम् ।) वंशचरित्रवर्णनम् । तत्तु पुराणस्य पञ्चलक्षणान्तर्गतलक्षणविशेषः । यथा, शब्दरत्नावल्याम् ।
"सर्गश्च प्रतिसर्गश्च वंशो मन्वन्तराणि च ।
वंशानुचरितञ्चेति पुराणं पञ्चलक्षणम् ॥"
(यथा, भागवते । ६ । १ । ४ ।
"तेषां वंशं पृथग्ब्रह्मन् ! वंशानुचरितानि च ।
कीर्त्तयस्व महाभाग ! नित्यं शुश्रूषतां हि नः ॥")

वंशाङ्कुरः, पुं, वंशस्याङ्कुरः । वाँशेर कोँड़ा इति भाषा । तत्पर्य्यायः । करीरम् २ वंशाग्रम् ३ यवफलाङ्कुरः । अस्य गुणाः । कटुत्वम् । तिक्तत्वम् । अम्लत्वम् । कषायत्वम् । लघुत्वम् । शीतलत्वम् । पित्तास्रदाहक्लेदनाशित्वम् । रुचिकारित्वम् । तत्पर्व्वणो निर्गुणत्वञ्च । इति राजनिर्घण्टः ॥

वंशिकं, क्ली, (वंशोऽस्त्यस्येति । ठन् ।) अगुरु । इत्यमरः । २ । ६ । १२६ ॥

वंशिका, स्त्री, (वंशिक + टाप् ।) अगुरु । इत्यमरटीकायां भरतः ॥ वंशी । इति शब्दरत्नावली ॥

वंशी, स्त्री, (वंशः कारणत्वेनास्त्यस्याः । अच् । गौरादित्वात् ङीष् ।) सुरली । इति शब्दरत्नावली ॥ वाँशी इति भाषा ॥ (यथा, कायस्थचन्द्रिकायाम् ।
"निर्म्मिता कापि गोपीनां कुलशीलविनाशिनी ।
विधिना पामरेणेयं न वंशी सुरवैरिणः ॥")
कर्षचतुष्टयम् । इति राजनिर्घण्टः ॥ वंशीवाद्यस्य विवरणम् । यथा,—
"तालेन राजते गीतं तालो वादित्रसम्भवः ।
गरीयस्त्वेन वादित्रं तच्चतुर्व्विधमुच्यते ॥
ततं शुषिरमानद्धं घनमित्यं चतुर्व्विधम् ।
ततं तन्त्रीगतं वाद्यं वंशाद्यं शुषिरं तथा ।
चर्म्मावनद्धमानद्धं घनं तालादिकं मतम् ॥"
शुषिरं यथा,—
"वंशोऽथ पारीमधुरीतित्तिरीशुष्ककाहलाः ।
तोड़हीसुरलीवृक्काश्चङ्किकास्वरनाभयः ॥
शृङ्गं कापालिकं वंशश्चमे वंशस्तथा परः ।
एते शुषिरभेदास्तु कथिताः पूर्ब्बसूरिभिः ॥
वर्त्तुलः सरलश्चैव पर्ब्बदोषविवर्ज्जितः ।
वेणवः खादिरो वापि रक्तचन्दनजोऽथवा ॥
श्रीखण्डजोऽथ सौवर्णो दन्तिदन्तमयोऽपि वा ।
राजतस्ताम्रजो वापि लौहजः स्फाटिकोऽथवा ॥
कनिष्ठाङ्गुलितुल्येन गर्भरन्ध्रेण शोभितः ।
शिक्षाविद्याप्रवीणेन वंशः कार्य्यो मनोहरः ॥
वंशेनैव मतोऽपीति मतङ्गमुनिनोदितम् ।
ततोऽन्येऽपि तदाकारा वंशा एव प्रकीर्त्तिताः ॥
तत्र त्यक्त्वा शिरोदेशादधो द्विमितमङ्गुलम् ।
पुत्कारतारन्ध्रं कुर्व्वीत मितमङ्गुलिपर्व्वणा ॥
पञ्चाङ्गुलानि संत्यज्य तारन्ध्राणि कारयेत् ।
कुर्य्यात्तथाग्रतन्ध्राणि सप्तसंख्यानि कौशलात् ॥
वदरीबीजतुल्यानि संत्यज्यार्द्धाङ्गुलमङ्गुलम् ।
प्राग्लयोर्ब्बन्धनं कार्य्यं खराद्यैर्नादहेतवे ॥
सिक्थकेन कला देया तेन सुस्वरता भवेत् ।
पञ्चाङ्गुलोऽयं वंशः स्यादेकाङ्गुलविवर्द्धितः ॥
षडङ्गुलानि नाभ्या स्यात् यावदष्टादशाङ्गुलम् ।
पुत्कारतारन्ध्रस्य यावदङ्गुलिमन्तरम् ।
तदेव नाम वंशस्य वांशिकैः परिकीर्त्यते ॥

एकाङ्गुलो द्व्यङ्गुलश्च त्र्यङ्गुलश्चतुरङ्गुलः ।
अतितारतरत्वेन वांशिकैः समुपेक्षितः ॥
त्रयोदशाङ्गुलो वंशोऽपरः पञ्चदशाङ्गुलः ।
निन्दितो वंशतत्त्वज्ञैस्तथासप्तदशाङ्गुलः ॥
महानन्दस्तथा नन्दो विजयोऽथ जयस्तथा ।
चत्वार उत्तमा वंशा मतङ्गमुनिसम्मताः ॥
दशाङ्गुलो महानन्दो नन्द एकादशाङ्गुलः ।
द्वादशाङ्गुलमानस्तु विजयः परिकीर्त्तितः ॥
चतुर्दशाङ्गुलमितो जय इत्यभिधीयते ।
ब्रह्मा रुद्रो रविर्विष्णुः क्रमादत्र व्यवस्थिताः ॥
नैर्विड्यं प्रौढ़ता चापि सुस्वरत्वञ्च शीघ्रता ।
माधुर्य्यमिति पञ्चामी फुत्कृतेषु गुणाः स्मृताः ॥
प्रीत्कारबहुलः स्रस्तो विस्वरः स्फुटितो लघुः ।
अमधुरश्च विज्ञेयाः षड्दोषाः फुत्कृते क्रमात् ॥
वृथाप्रयोगबाहुल्यमज्ञता गीतवादने ।
एभिर्दोषैर्युतोऽतीव निन्दितो वांशिको मतः ॥
स्थानकादिनयाभिज्ञो गमकाढ्यः स्फुटाक्षरः ।
शीघ्रहस्तः कलाभिज्ञो वांशिको रक्त उच्यते ॥
प्रमुक्तिर्ब्रह्ममुक्तिश्च युक्तिश्चेत्यङ्गुलैर्गुणाः ॥
सुस्थानत्वं सुस्वरत्वं अङ्गुलीसारणक्रिया ।
समस्तगमकज्ञानं रागरागाङ्गवेदिता ॥
क्रियाभाषाविभाषासु दक्षता गीतवादने ।
स्वस्थाने चापि दुःस्थाने नादनिर्म्माणकौशलम् ॥
गातॄणां स्थानदाढ्यत्वं तद्दोषाच्छादनं तथा ।
वांशिकस्य गुणा एते मया संक्षिप्य दर्शिताः ॥"
इति संगीतदामोदरः ॥

वंश्यः, त्रि, (वंशे भवः । वंश + "दिगादिभ्यो यत् ।" ४ । ३ । ५४ । इति यत् ।) सदंशजातः । तत्पर्य्यायः । अल्यः २ बीज्यः ३ । इति त्रिकाण्डशेषः ॥ (यथा, मनुः । १ । ६१ ।
"स्वायम्भुवस्यास्य मनोः षड्वंश्या मनवोऽपरे ॥"
वंशोत्पन्नमात्रे च । यथा, रघुः । १८ । ४६ ।
"वंश्या गुणाः खल्वपि लोककान्ताः
प्रारभ्यसृष्ट्याः प्रथिमानमापुः ॥"
गृहोर्द्धकाष्ठविशेषः । पृष्ठावयवविशेषश्च । इति वंशशब्ददर्शनात् ॥ यथा, भागवते । ११ । ८ । ३३ ।
"यदस्थिभिर्निर्म्मितवंशवंश्य-
स्तूर्णं त्वचा रोमनखैः पिनद्धम् ॥")

वक, इ ड कौटिल्ये । गतौ । इति कविकल्पद्रुमः ॥ (भ्वा०-आत्म०-अक०-सक० च-सेट् ।) कौटिल्यमिह कुटिलीभावः कुटिलीकरणञ्च । इ, वङ्कते । ड, वङ्कते काष्ठं कुटिलं स्यादित्यर्थः । वङ्कते काष्ठं कुटिलं करोतीत्यर्थः । इति दुर्गादासः ॥

वक्क, ड गतौ । इति कविकल्पद्रुमः ॥ (भ्वा०-आत्म०-सक०-सेट् ।) ड, वक्कते । इति दुर्गादासः ॥

वक्तव्यः, त्रि, (ब्रू वच् वा + तव्यः ।) कुत्सितः । हीनः । (यथा, मनुः । ८ । ६६ ।
"नाधर्म्मदण्ड्यो न वक्तव्यो न दस्युर्न विकर्म्मकृत् ॥")
वचनार्हः । इति मेदिनी । ये, १०३ ॥ (यथा, महाभारते । १४ । ७६ । २२ ।
"वक्तव्याश्चापि राजानः सर्व्वे सह सुहृज्जनैः ।
युधिष्ठिरस्याश्वमेधो भवद्भिरनुभूयताम् ॥"
वच् + भावे तव्य ।) वचने, क्ली ॥

वक्ता, [तृ] त्रि, (वच् + तृच् ।) योवक्तुं जानाति सः । इति भरतः ॥ औचित्यात् बहु विशिष्टं वदति । इति सुकुटः ॥ (यथा, हितोपदेशे ।
"भद्रं कृतं कृतं मौनं कोकिलैर्व्वर्ल्लदागमे ।
दर्दुरा यत्र वक्तारस्तत्र मौनं हि शोभनम् ॥")
तत्पर्य्यायः । वदः २ वदावदः ३ । इत्यमरः । ३ । १ । २५ ॥ वदान्यः ४ वग्मी ५ । इति जटाधरः ॥ सुष्ठुवक्ता । इति भरतः ॥ बहुभाषी । इत्यैके । तत्पर्य्यायः । वाचोयुक्तिपटुः २ वाग्मी ३ वावदूकः ४ । इत्यमरः ॥ प्रवक्तृः ५ सुवचाः ६ प्रवाक् ७ । इति जटाधरः ॥ पण्डितः । इति मेदिनी । ते, ५३ ॥

वक्त्रं, क्ली, (वक्ति अनेनेति । वच् + "गुधृवीपचिवचियमिसदिचदिभ्यस्त्रः ।" उणा० ४ । १६६ । इति त्रः ।) मुखम् । इत्यमरः । २ । ६ । ८६ ॥ (यथा, मनौ । ८ । २७२ ।
"धर्म्मोपदेशं दर्पेण विप्राणामस्य कुर्व्वतः ।
तप्तमासेचयेत्तैलं वक्त्रे श्रोत्रे च पार्थिवः ॥")
तगरमूलम् । इति शब्दमाला ॥ वस्त्रभेदः । इति मेदिनी । रे, ८४ ॥ छन्दोविशेषः । इति हेमचन्द्रः ॥ तस्य लक्षणादि यथा,—
"भवत्यर्द्धसमं वक्त्रं विषमञ्च कदाचन ।
तयोर्द्वयोरुपान्त्येऽच्च छन्दस्तदधुनोच्यते ॥
वक्त्रं युग्म्यां मगौ स्यातामब्धियोऽनुष्टुभः
ख्यातम् ॥"
अत्र द्विरावर्त्त्य श्लोकः पूरयितव्यः ।
"वक्त्राम्भोजं सदा स्तेरं चक्षुर्नीलोत्पलं पुष्कलम् ।
वल्गवीनां सुरारातेश्चेतो भृङ्गं जहारोच्चैः ॥"
इति छन्दोमञ्जरी ॥

वक्त्रखुरः, पुं, (वक्त्रस्य क्षुर इव पृषोदरादित्वात् खः ।) दन्तः । इति त्रिकाण्डशेषः ॥

वक्त्रजः, पुं, (ब्रह्मणो वक्त्राद् जायते इति । ब्राह्मणोऽस्य मुखमासीत् इति श्रुतेः । जन् + डः ।) ब्राह्मणः । इति त्रिकाण्डशेषः ॥ मुखजाते, त्रि ॥

वक्त्रताल, क्ली, (वक्त्रस्य तालम् ।) मुखवाद्यम् । इति कैश्चित् ॥ त्रिकाण्डशेषे मुखवाद्यं वक्त्रनालमिति लिखितम् ॥

वक्त्रपट्टः, पुं, (वक्त्रस्य पट्ट इव ।) अश्वान्नभोजनपात्रम् । तोबड़ा इति भाषा । तत्पर्य्यायः । तलिका २ तलसारकम् ३ । इति हेमचन्द्रः । ४ । ३१७ ॥

वक्त्रभेदी, [न्] पुं, (वक्त्रं भिनत्तीति । भिद् + णिनिः ।) तिक्तरसः । इति हेमचन्द्रः । ६ । २५ ॥ मुखभेदके, त्रि ॥

वक्त्रवासः, पुं, (वक्त्रं वासयति सुरभीकरोतीति । वास + "कर्म्मण्यण् ।" ३ । २ । १ । इत्यण् ।) नारङ्गः । इति राजनिर्घण्टः ॥ (विवरणमस्य नारङ्गशब्दे ज्ञातव्यम् ॥ वक्त्रस्य वासः ।) सुखगन्धश्च ॥

वक्त्रशोधनं, क्ली, (वक्त्रस्य शोधनमिव ।) भव्यम् । इति राजनिर्घण्टः ॥ (वक्त्रस्य शोधनम् ।) मुखशुद्धिकरणञ्च ॥

वक्त्रशोधी, [न्] पुं. (वक्त्रं शोधयतीति । शुध् + णिच् + णिनिः ।) जम्बीरः । इति जटाधरः ॥ मुखशोधके, त्रि ॥

वक्त्रासवः, पुं, (वक्त्रस्य आसवः ।) अधरमधु । इति त्रिकाण्डशेषः ॥

वक्रं, क्ली, (वङ्कते इति । वकि कौटिल्ये + रन् । पृषोदरादित्वात् न लोपः । यद्वा, वञ्चतीति । वञ्चु गतौ + "स्फायितञ्चिवञ्चीति ।" उणा० २ । १३ । इति रक् । न्यङ्कादित्वात् कुत्वम् ।) नदीवङ्कः । तत्पर्य्यायः । पुटभेदः २ । इत्यमरः ॥ वङ्कः ३ । इति भरतः ॥ (तगरपादिकम् । तत्पर्य्यायो यथा,—
"कालानुसार्य्यारिवा वक्रं तगरं कुटिलं पृथक् ।
महोरगं नतं जिह्मं दीनं तगरपादिकम् ॥"
इति वैद्यकरत्नमालायाम् ॥
तथास्य विधयः ।
"घृताक्तैरण्डमूलोत्था वक्त्राद्याश्च फलैः पृथक् ।
तैलं नस्यं मरुत्श्लेष्मतिमिरोर्द्ध्वगदापहम् ॥"
इति घृताक्ताद्यं तैलम् ।
इति चक्रपाणिसंग्रहे शिरोरोगाधिकारे ॥)

वक्रः, पुं, (वञ्चतीति । वञ्च गतौ + "स्फायितञ्चिवञ्चीति ।" उणा० २ । १३ । इति रक् । न्यङ्कादित्वात् कुत्वम् ।) शनैश्चरः । इति मेदिनी । रे, ६५ ॥ मङ्गलग्रहः । इति हेमचन्द्रः । २ । ३० ॥ रुद्रः । त्रिपुरासुरः । इति धरणिः ॥ पर्पटः । इति राजनिर्घण्टः ॥ वक्रगतिविशिष्टग्रहः । स तु यस्य ग्रहस्याश्रितात् रथधिष्ठितराशीयत्रिंशांशान्तर्गतादंशात् पञ्चमषष्ठांशे रविस्तिष्ठति । यथा,—
"वक्राः स्युः पञ्चषष्ठेऽर्के त्वतिवक्रा नगाष्टगे ।
नवमे दशमे भानौ जायते सहजा गतिः ॥
द्वादशैकादशे सूर्य्ये लभन्ते शीघ्रतां पुनः ।
रविस्थित्यंशकस्थित्यंशावधेः संख्याच कल्प्यते ॥
न तु राश्यन्तरस्थार्कात् द्वितीयादिनिरूपणम् ।
राहुकेतू सदा वक्रौ शीघ्रगौ चन्द्रभास्करौ ॥"
इति ज्योतिस्तत्त्वम् ॥
(करूषदेशीयनृपतिभेदः । यथा, महाभारते । २ । १४ । ११ ।
"तमेव च महाराज ! शिष्यवत् समुपस्थितः ।
वक्रः करूषाधिपतिर्म्मायायोधी महाबलः ॥")

वक्रः त्रि, (वङ्कते इति । वकि कौटिल्ये + रन् । पृषोदरादित्वात् न लोपः । यद्वा, वञ्चि + रक् ।) अनृजुः । बाँका इति भाषा । तत्पर्य्यायः । अरालम् २ वृजिनम् ३ जिह्मम् ४ ऊर्म्मिमत् ५ कुञ्चितम् ६ ननम् ७ आविद्धम् ८ कुटिलम् ९ भुग्नम् १० वेल्लितम् ११ । इत्यमरः । ३ । १ । ७१ ॥ वङ्कुरम् १२ वेङ्कु १३ विनतम् १४ उन्नूरम् १५ । इति शब्दरत्नावली ॥ अवनतः १६ आनतः १७ भङ्गुरः १८ । इति जटाधरः ॥*॥

(यथा, महाभारते । ३ । १३२ । १२ ।
"स वै तथा वक्र एवाभ्यजाय-
दष्टावक्रः प्रथितो वै महर्षिः ॥")
वक्राणि यथा । अलकः १ भालः २ भ्रूः ३ नखचित्रम् ४ अङ्गुष्ठः ५ कुक्षिका ६ भगकङ्गणम् ७ बालेन्दुः ८ दात्रम् ९ कुद्दालः १० चन्द्रकः ११ शुक्राश्रम् १२ पलाशपुष्पम् १३ विद्युत् १४ कटाक्षः १५ शक्रधनुः १६ फणा १७ प्रबोधः १८ करः १९ हस्तिदन्तः २० शूकरदन्तः २१ सिंहनखादिः २२ । इति कविकल्पलता ॥ क्रूरः । इति मेदिनी । रे, ६५ ॥

वक्रकण्टः, पुं, (वक्राः कण्टाः कण्टका यस्य ।) वदरवृक्षः । इति राजनिर्घण्टः ॥ (वक्रः कण्टः ।) कुटिलकण्टकश्च ॥

वक्रकण्टकः, पुं, (वक्राः कण्टका अस्य ।) खदिरवृक्षः । इति राजनिर्घण्टः ॥ (विषयोऽस्य खदिरशब्दे विज्ञेयः ॥)

वक्रखड्गः, पुं, (वक्रः खड्गः ।) करवालः । इति राजनिर्घण्टः ॥

वक्रग्रीवः, पुं, (वक्रा ग्रीवास्य ।) उष्ट्रः । इति चिकाण्डशेषः ॥

वक्रचञ्चुः, पुं, (वक्रा चञ्चुर्यस्य ।) शुकपक्षी । इति शब्दरत्नावली ॥

वक्रताल, क्ली, (वक्रं तालं यत्र ।) वाद्यविशेषः । तत्पर्य्यायः । सुखवाद्यम् २ । वक्रनालमिति वा पाठः । इति चिकाण्डशेषः ॥

वक्रतालो, स्त्री, (वक्रताल + गौरादित्वात् ङीष् ।) सुखवाद्यम् । इति शब्दरत्नावली ॥

वक्रतुण्डः, पुं, (वक्रन्तुण्डं यस्य ।) शुकपक्षी । इति शब्दरत्नावली ॥ (वक्रोऽस्ति, त्रि । यथा, भागवते । ६ । १ । २८ ।
"स पाशहस्तांश्चीन् दृष्ट्वा पुरुषानतिदारुणान् ।
वक्रतुण्डानूर्ध्वरोम्न आत्मानं नेतुमागतान् ॥")

वक्रदंष्ट्रः, पुं, (वक्रा दंष्ट्रा यस्य ।) शूकरः । इति केचित् ॥

वक्रनक्रः, पुं, (वक्रः कुटिलः नक्र इव हिंस्रश्च ।) पिशुनः । शुकपक्षी । इति मेदिनी । रे, २८५ ॥

वक्रनालं, क्ली, सुखवाद्यम् । इति सुधाङ्कितचिकाण्डशेषः ॥

वक्रनासिकः, पुं, (वक्रा नासिका यस्य ।) पेचकः । इति चिकाण्डशेषः ॥ कुटिलनासायुक्ते, त्रि ॥

वक्रपुच्छः, पुं, स्त्री, (वक्रं पुच्छं यस्य ।) कुक्कुरः । इति चिकाण्डशेषः ॥ सलोमकुटिललाङ्गूलश्च ॥

वक्रपुष्पः, पुं, (वक्राणि पुष्पाण्यस्य ।) वकवृक्षः । इति शब्दरत्नावली ॥ पलाशवृक्षः । इति राजनिर्घण्टः ॥

वक्रबालधिः, पुं, (वक्रो बालधिः केशयुक्तलाङ्गूलं यस्य ।) कुक्कुरः । इति हेमचन्द्रः । ४ । ३४४ ॥ कुटिलपुच्छश्च ॥

वक्रभणितं, क्ली, (वक्रं कुटिलं भणितम् ।) कुटिलवाक्यम् । तत्पर्य्यायः । छेकोक्तिः २ । इति चिकाण्डशेषः ॥

वक्रम, पुं, (अवक्रमणमिति । अव + क्रम + भावे घञ् । अल्लोपः ।) पलायनम् । इति शब्दरत्नावली ॥

वक्रलाङ्गूलः, पुं, (वक्रं लाङ्गूलं यस्य ।) कुक्कुरः । इति राजनिर्घण्टः ॥ कुटिलपुच्छे, क्ली ॥

वक्रवक्त्रः, पुं, (वक्रं वक्त्रं मुखमस्य ।) शूकरः । इति शब्दरत्नावली ॥ कुटिलमुखविशिष्टे, त्रि ॥

वक्रशल्या, स्त्री, (वक्रं शल्यमिव पत्त्रादिकं यस्याः ।) कुटुम्बिनीचुपः । इति राजनिर्घण्टः ॥

वक्राग्रं, क्ली, (वक्रमग्रं यस्य ।) कवाटवक्रवृक्षः । इति रत्नमाला ॥ ॥ कुटिलाग्रभागश्च ॥

वक्राङ्गः, पुं, (वक्रमङ्गं यस्य ।) हंसः । इति हेमचन्द्रः ॥ कुटिलावयवे, क्ली ॥ (कुटिलावयवविशिष्टे, त्रि । यथा, हरिवंशे । १०२ । ३८ ।
"तरङ्गविषमापीड़ा चक्रवाकोन्मुखस्तनी ।
वेगगम्भीरवक्राङ्गी चस्रमीनविभूषणा ॥")

वक्रिः, त्रि, मिथ्यावादी । वकधातोः क्रिन्प्रत्ययेन निष्पन्नः ॥

वक्री, [न्] पुं, (वक्रो वक्रतास्यास्तीति । इनिः । वैदिकधर्म्मविरुद्धवादित्वादस्य तथात्वम् ।) बुद्धः । इति शब्दरत्नावली ॥ वक्रतायिविशिष्टे, त्रि । यथा,
"लग्नेशो यदि वक्री स्यात् पुंसः कार्य्येषु वक्रता ।
लग्नेशेऽस्तं गते मर्त्यो दुःखादिव्याधिसंयुतः ॥"
इति ज्योतिस्तत्त्वम् ॥

वक्रोक्तिः, स्त्री, (वक्रा कुटिला उक्तिः ।) काकूक्तिः । यथा, कामधेनुकल्पतरुधृतब्रह्मपुराणम् ।
"अथ तुष्टे वृषोत्सर्गे दाता वक्रोक्तिभिः पदैः ।
ब्राह्मणानाह यत् किञ्चित् मयोत्सृष्टन्तु निर्ज्जने ॥
तत् कश्चिदन्यो न नयेन्न विभाज्यं यथाक्रमम् ।
न वाह्यं न च तत् क्षीरं पातव्यं केनचित् क्वचित् ॥"
इत्यप्रदीपेऽप्येवम् । वक्रोक्तिभिः काकूक्तिभिः । इति शुद्धितत्त्वम् ॥ * ॥ कुटिलोक्तिः । यथा,
"वादी व्याकरणं विनैव विदुषां दृष्टः प्रविष्टः सभां
जल्पन्नल्पमतिः स्वयात् पटुवटुर्भ्रूभङ्गवक्रोक्तिभिः ।
हीतः सन्नुपहासमेति गणको गोलानभिज्ञस्तथा
ज्योतिर्विन्मदसि प्रगल्भगणकः प्रश्नप्रपञ्चोक्तिभिः ॥"
इति सिद्धान्तशिरोमणौ गोलाध्यायः ॥
(वक्रा अर्थान्तरग्रहणेन कुटिला उक्तिः । शब्दालङ्कारप्रभेदः । तल्लक्षणादिकं यथा, साहित्यदर्पणे दशमपरिच्छेदे ।
"अन्यस्यान्यार्थकं वाक्यमन्यथा योजयेद् यदि ।
अन्यः श्लेषेण काक्वा वा सा वक्रोक्तिस्ततो द्विधा ॥
द्विधेति श्लेषवक्रोक्तिः काकुवक्रोक्तिश्च । क्रमेणोदाहरणं यथा,—

"के यूयं स्थल एव सम्प्रति वयं प्रश्नो विशेषाश्रयः
किं ब्रूते विहगः स वा फणिपतिर्यत्रास्ति सुप्तो हरिः ।
वामा यूयमहो विडम्बरसिकः कीदृक् स्मरो वर्त्तते
येनास्मासु विवेकशून्यमनसः पुंस्त्वेव योषिद्भ्रमः ॥"
अत्र विशेषपदस्य विः पक्षी शेषो नाग इति अर्थद्वययोगात् सभङ्गः श्लेषः । अन्यत्र तु अभङ्गः ।
"काले कोकिलवाचाले सहकारमनोहरे ।
कृतागसः परित्यागात् तस्याश्चेतो न दूयते ॥"
अत्र कयाचित् सख्या निषेधार्थे नियुक्तो नञ् अन्यया काक्वा दूयत एवेति विध्यर्थे घटितः ॥")

वक्रोष्ठिका, स्त्री, (वक्रोष्ठोऽस्यस्या इति । टन् । ईषद्धसनेन हि ओष्ठस्य वक्रता जायते अतोऽस्यास्तथात्वम् । यद्वा, वक्र ओष्ठो यस्याः । ततः स्वार्थे कन् । टापि अत इत्वम् ।) अट्टहासः । ईषद्धास्यम् । तत्पर्य्यायः । स्मितम् २ । इति हेमचन्द्रः ॥

वच्च, रोषसंहत्योः । इति कविकल्पद्रुमः ॥ (भ्वा०-पर०-रोषे अक०-संहतौ सक०-सेट् ।) वच्चति । इति दुर्गादासः ॥

वच्चः, [स्] क्ली, (उच्यतेऽनेनेति । वच्च + "पचिवचिभ्यां सुट् च ।" उणा० ४ । २१६ । इति असुन् सुट् । वच्चतेरसुन् इति रमानाथः । धातुप्रदीपश्च ।) अङ्गविशेषः । स तु हृदयोपरिकण्ठादधोभागः । वुक् इति भाषा । तत्पर्य्यायः । क्रोडम् २ भुजान्तरम् ३ उरः ४ वतसम् ५ । इत्यमरः ॥ अङ्कः ६ उत्सङ्गः ७ । इति जटाधरः ॥ वच्चणम् ८ गणपीठकम् ९ । इति शब्दचन्द्रिका ॥ अपि च ।
"अथ वच्चश्च वतसं स्याद्धरो वच्चस्थले चयम् ।"
इति शब्दरत्नावली ॥
तस्य शुभाशुभलच्चणं यथा,—
"अन्नवान् समवच्चाः स्यात् पीनैर्व्वच्चोभिरूर्ज्जितः ।
वच्चोभिर्व्विषमैर्निस्वः शुष्केण निधनस्तथा ॥"
इति गारुड़े ६६ अध्यायः ॥
(पुं, वहतीति । वह + "वहिहाधाभ्यश्छन्दसि ।" उणा० ४ । २२० । इति असुन् । सुट् च । अनड्वान् । इत्युज्ज्वलदत्तः ॥")

वच्चस्यं, क्ली, (वच्चस्यनेनेति । वच्चस्रोषसंहत्योः + ल्युट् ।) वच्चः । इति शब्दचन्द्रिका ॥ (वाहके, त्रि । यथा, ऋग्वेदे । ६ । २३ । ६ ।
"क्रियासु वच्चस्यानि यज्ञैः ।"
"वच्चस्यानि वाहकानि स्तोत्राणि क्रियासु करवाम ।" इति तद्भाष्ये सायणः ॥)

वच्चोजं, क्ली, (वच्चसि जायते इति । जन् + डः ।) स्तनः । इति शब्दरत्नावली ॥ (यथा, साहित्यदर्पणे ३ परिच्छेदे ।
"मध्यस्य प्रथिमानमेति जघनं वच्चोजयोर्मन्दतां
दूरं यात्युदरच्च लोमलतिका नेत्रार्जवं धावति ।

कन्दर्पं परिवीक्ष्य नूतनमनोराज्याभिषिक्तं चणात्
अङ्गानीव परस्परं विदधते निर्लुण्ठनं सुभ्रुवः॥")
वक्षोरुहः पुं, (वक्षसि रोहतीति। रुह+कः।) स्तनः। इति चिकाण्डशेषः॥ (यथा, आर्य्यासप्तशत्याम्। ४४६।
"मा ग्रहरतरुणि पीवरवक्षोरुहयोर्भरेण भज गर्व्वम्।
निर्म्मोकैरपि शोभा यथोर्भुजङ्गीभिरुच्चकुचैः॥")
वक्ष्यमाण, त्रि, भविष्यत्कथनीयविषयः। वच्+ण्यतोः स्यमानप्रत्ययेन निष्पन्नः। यथा। अत्र वक्ष्यमाणवचनात् मध्यरात्रप्राप्तावेव जयन्तीत्वम्। इति तिथ्यादितत्त्वम्॥ अपि च।
"तत्रैव द्वादशीमध्ये पारणं अवणोऽधिके।
वक्ष्यमाणश्च घटतेऽन्यथा प्राग्वद्विधा व्रतम्॥"
इति श्रीहरिभक्तिविलासे १५ विलासः॥
वख, क्षपि। इति कविकल्पद्रुमः॥ (भ्वा०-पर०-सक०-सेट्।) वखति। क्षपि गतौ। इति दुर्गादासः॥
वख, इ क्षपि। इति कविकल्पद्रुमः॥ (भ्वा०-पर०-सक०-सेट्। इदित्।) इ, वङ्खते। क्षपि गतौ। इति दुर्गादासः॥
वग, इ खञ्जे। इति कविकल्पद्रुमः॥ (भ्वा० पर०-अक०-सेट्।) इ, वङ्गते। इति दुर्गादासः॥
वगला } स्त्री, दशमहाविद्यान्तर्गतदेवी-
बगलामुखी } विशेषः। तदुक्तं तन्त्रान्तरे।
"ब्रह्मास्त्रं संप्रवक्ष्यामि सद्यःप्रत्ययकारकम्।
साधकानां हितार्थाय स्तम्भनाय च वैरिणाम्॥
यस्याः स्मरणमात्रेण पवनोऽपि स्थिरायते।
प्रणवं स्थिरमायाञ्च ततश्च वगलामुखि॥
तदन्ते सर्व्वदुष्टानां ततो वाचं मुखं पदम्॥
स्तम्भयेति ततो जिह्वां कीलयेति पदद्वयम्॥
बुद्धिं नाशय पश्चात्तु स्थिरमायां समालिखेत्।
लिखेच्च पुनरोङ्कारं स्वाहेति पदमन्ततः॥
षट्त्रिंशदक्षरी विद्या सर्व्वसम्पत्करी मता॥"
स्थिरमायां क्लीँ। तथा च।
"वह्निहीनेन्द्रमायायुक् स्थिरमाया प्रकीर्त्तिता॥
ॐ क्लीँ वगलामुखी सर्व्वदुष्टानां वाचं मुखं स्तम्भय जिह्वां कीलय कीलय बुद्धिं नाशय क्लीँ ॐ स्वाहा॥ *॥ तन्त्रान्तरे।
"वह्निहीनेन्द्रमायायुक् वगलामुखि सर्व्वयुक्।
दुष्टानां वाचमित्युक्त्वा मुखं स्तम्भय कीलयेत्॥
जिह्वां कीलय बुद्धिं तत् विनाशय पदं वदेत्।
पुनर्ब्बीजं ततस्तारं वह्निजायावधिर्भवेत्।
तारादिका चतुस्त्रिंशदुक्ता वगलामुखी॥"
ॐ क्लीँ वगलामुखि सर्व्वदुष्टानां वाचं मुखं स्तम्भय जिह्वां कीलय बुद्धिं विनाशय क्लीँ ॐ स्वाहा। इत्यपि मन्त्रोद्धारः॥ *॥ अनयोः पूजा। प्रातःस्नानादिप्राणायामान्तं विधाय ऋष्यादिन्यासं कुर्य्यात्। यथा, शिरसि नारदऋषये नमः। मुखे बृहत्युष्णिक्छन्दसे नमः। हृदि वगलामुखी देवतायै नमः। गुह्ये क्लीँ बीजाय नमः। पादयोः स्वाहाशक्तये नमः।
"नारदोऽस्य ऋषिः मूर्द्ध्नि बृहत्यु छन्दश्च तन्मुखे।
श्रीवगलामुखीं देवीं हृदये विन्यसेत्ततः।
क्लीँ बीजं गुह्यदेशे तु स्वाहाशक्तिस्तु पादयोः॥"
ततः कराङ्गन्यासौ। ॐ क्लीँ अङ्गुष्ठाभ्यां नमः। वगलामुखि तर्जनीभ्यां स्वाहा। सर्व्वदुष्टानां मध्यमाभ्यां वषट्। वाचं मुखं स्तम्भय अनामिकाभ्यां हूँ। जिह्वां कीलय कीलय कनिष्ठाभ्यां वौषट्। बुद्धिं नाशय क्लीँ ॐ स्वाहा करतलपृष्ठाभ्यां फट्। एवं हृदयादिषु। तथा च दिग्बन्धे।
"युग्मबाणेषुसप्ताद्रिशैलाग्नींश्च मनुद्भवैः।
करशाखासु तलयोः कराङ्गन्यासमाचरेत्॥"
ततो मूलान्ते आत्मतत्त्वव्यापिनीवगलामुखीश्रीपादुकां पूजयामि इति मूलाधारे। मूलान्ते विद्यातत्त्वव्यापिनीवगलामुखीश्रीपादुकां पूजयामि शिरसि। मूलान्ते शिवतत्त्वव्यापिनीवगलामुखीश्रीपादुकां पूजयामि सर्व्वाङ्गे। ततश्च।
"भ्रूर्द्ध्नि भाले दृशोः श्रोत्रे गण्डयोर्नासयोः पुनः।
ओष्ठयोर्मुखवृत्ते च दक्षिणांसे च कूर्परे॥
मणिबन्धेऽङ्गुलेर्म्मूले गले च कुचयोर्हृदि।
नाभौ कट्यां गुह्यदेशे वामांसे कूर्परे तथा॥
मणिबन्धेऽङ्गुलेर्म्मूले ततश्च विन्यसेत् पुनः।
दक्षवामे चोरुजान्वोर्गुल्फयोरङ्गुलिष्वलयोः।
क्रमेण मन्त्रवर्णांस्तु न्यस्य ध्यायेत् यथाविधि॥"*॥
ततो ध्यानम्।
"मध्ये सुराब्धिमणिमण्डपरत्नवेदी-
सिंहासनोपरिगतां परिपीतवर्णाम्।
पीताम्बराभरणमाल्यविभूषिताङ्गीं
देवीं स्मरामि धृतमुद्गरवैरिजिह्वाम्॥
जिह्वाग्रमादाय करेण देवीं
वामेन शत्रुं परिपीड़यन्तीम्।
गदाभिघातेन च दक्षिणेन
पीताम्बराढ्यां द्विभुजां नमामि॥"
एवं ध्यात्वा मानसैः सम्पूज्य बहिःपूजामारभेत्॥ *॥ तत्र प्रथमतोऽर्घ्यस्थापनम्। यथा। अष्टदलं चतुरस्रं विधाय ईशानादिकोणेषु पूर्व्वादिदिक्षु च कुसुमाक्षतरक्तचन्दनैर्लौं गणपतये नमः इत्यनेन गजदानेन संपूज्य तेन मधुना वा अर्घ्यपात्रमापूरयेत्। ततो वारत्रयं विद्यया संपूज्य अङ्गानि विन्यसेत्। ततो धेनुयोनिमुद्रे प्रदर्श्य तेनोदकेन आत्मानं पूजोपकरणञ्चाभ्युक्षयेत्॥ *॥ अस्या यन्त्रम्। चारुं षड़स्रं वृत्तमष्टदलं भूपुरान्वितम्। ततो मूलमुच्चार्य्य ॐ आधारशक्तिकमलासनाय नमः। एवं शक्तिपद्मासनाय नमः। पूर्व्ववत् ध्यात्वा पीठे आवाह्य षड़ङ्गानि न्यसेत्। ततो मुद्रां प्रदर्श्य पुरतः षड़ङ्गेन मण्डलं यजेत्। ततो मूलेन मन्त्रयित्वा धेनुयोनिमुद्रे प्रदर्श्य आत्मविद्याशिवैस्तत्त्वैर्विन्दुत्रयं मुखे क्षिप्त्वा तर्जन्यङ्गुष्ठयोगेन साङ्गावरणां वगलामुखीं तर्पयेत्। ततो यथासम्भवमुपचारैः संपूज्य आवरणपूजामारभेत्। षट्कोणेषु पूर्व्वे ॐ सुभगायै नमः। एवमग्निकोणे भगसर्पिण्यै। ईशाने भगावहायै। पश्चिमे भगसिद्धायै। नैर्ऋते भगपातिन्यै। वायौ भगमालिन्यै। ततोऽष्टदलपत्रेषु ब्राह्म्याद्याः पूज्याः। पत्राग्रेषु ॐ जयायै नमः। एवं विजयायै। अजितायै। अपराजितायै। स्तम्भिन्यै। जम्भिन्यै। मोहिन्यै। आकर्षिण्यै। ततो द्वारेषु ॐ भैरवाय नमः। तद्बाह्ये इन्द्रादीन् वज्रादीन् पूजयेत्। ततो मूलेन धूपादिकं दत्त्वा यथाशक्ति जपं विधाय त्रिशूलमुद्रां प्रदर्श्य पुष्पाञ्जलित्रयं दत्त्वा देवीयोनिमुद्रां प्रदर्शयेत्। ततो भैरवाय बलिं दद्यात्। ततो विसर्जनान्तं कर्म्म समापयेत्॥
अस्य पुरश्चरणं लक्षजपः। तथा च।
"पीताम्बरधरो भूत्वा पूर्व्वाशाभिमुखस्थितः।
लक्षमेकं जपेन्मन्त्रं हरिद्रामन्थिमालया॥
ब्रह्मचर्य्यरतो नित्यं प्रयतो ध्यानतत्परः।
प्रियङ्गुकुसुमेनापि पीतपुष्पैश्च होमयेत्॥"*॥
द्वितीयमन्त्रस्य तु न्यासादिकं सर्व्वं पूर्व्ववत्। ध्यानन्तु।
"गम्भीराञ्च मदोन्मत्तां स्वर्णकान्तिसमप्रभाम्।
चतुर्भुजां त्रिनयनां कामलालसमानसाम्॥
सुन्दरं दक्षिणे पार्श्वे वामे जिह्वाञ्च वज्रकम्।
पीताम्बरधरां देवीं दृढ़पीनपयोधराम्।
हेमकुण्डलभूषाञ्च स्वर्णसिंहासनस्थिताम्॥"*॥
अथ प्रयोगः।
"कुरुते वाग्गतिस्तम्भं दुष्टानां बुद्धिनाशनम्।
जपहोमप्रयोगे च मन्त्रं चाप्ययुतं जपेत्॥
हरिद्राहरितालाभ्यां लवणं जुहुयान्निशि।
स्तम्भयेत् परसैन्यानि नात्र कार्य्या विचारणा॥
अथवा पीतपुष्पैश्च त्रिमध्वक्तैश्च होमयेत्।
स्तम्भनेषु च सर्व्वेषु प्रयोगः प्रत्ययावहः॥"*॥
यन्त्रन्तु।
"ॐकारयोः संमुखयोरूर्द्धाधःशिरसोर्लिखेत्।
मध्यगं नाम साध्यस्य तद्बाह्ये चाक्षरद्वयम्॥
बीजं हितीयवर्गस्य तृतीयं विन्दुभूषितम्।
चतुर्द्वारस्वरोपेतं संलिखेत् पृथिवीगतम्॥
ठकारेण समावेष्ट्य चतुष्कोणपुटं बहिः।
तत्कोणरेखासंसक्तैः मूलैर्व्वाष्टकं लिखेत्॥
त्रिशूलमध्यरेखायाः पृथ्वी बीजानि पार्श्वयोः।
अष्टस्वपि च कोणेषु तद्बहिर्व्वगलां लिखेत्॥
पृथिव्यन्तरितं बाह्ये माहेन्द्रापरिमण्डलम्।
आवेष्ट्य चाष्टधा पश्चात्तद्बाह्ये स्थिरमायया॥
निरुध्याङ्कुशबीजेन नादसंमिलिताङ्घ्रिया।
लिखेत् पूर्व्ववदावेष्ट्य पश्चाच्च वगलामुखीम्॥
पट्टे पाषाणपट्टे वा हरिद्रोल्लसताखकैः।
दिग्यन्त्रमेतं सुखस्तम्भे लिखित्वा गाढ़माक्रमेत्॥
विवादे यन्त्रमालिख्य भूर्ज्जे तेरेव वस्तुभिः।
कुम्भकारस्य चक्रस्य भ्रमतो विपरीततः॥

मृत्तिकां समुपादाय वृषभं कारयेत्ततः ।
यन्त्रं तस्योपरि न्यस्य तालकेन विलिप्य च ॥
तन्नासायां विनिःक्षिप्य पीतरज्जुं निजे गृहे ।
अर्चयेत्तं चतुष्कालं नित्यं पीतोपचारतः ।
दुष्टस्य स्तम्भयत्येव सुखं वाचस्पतेरपि ॥"

इति वगलापरिच्छेदः ॥ * ॥

विश्वसारे ।

"काली तारा महाविद्या षोड़शी भुवनेश्वरी ।
भैरवी छिन्नमस्ता च विद्या धूमावती तथा ॥
वगला सिद्धविद्या च मातङ्गी कमलात्मिका ।
एता दश महाविद्याः सिद्धविद्याः प्रकीर्त्तिताः ॥"

अथ वगलामुखीस्तोत्रम् ।

"मध्ये सुधाब्धिमणिमण्डपरत्नवेदी-
सिंहासनोपरिगतां परिपीतवर्णाम् ।
पीताम्बराभरणमाल्यविभूषिताङ्गीं
देवीं भजामि धृतमुद्गरवैरिजिह्वाम् ॥
जिह्वाग्रमादाय करेण देवीं
वामेन शत्रुं परिपीड़यन्तीम् ।
गदाभिघातेन च दक्षिणेन
पीताम्बरां तां द्विभुजां भजामि ॥
चलत्कनककुण्डलोल्लसितचारुगण्डस्थलीं
लसत्कनकचम्पकद्युतिमदिन्दुविम्माननाम् ।
गदाहतविपक्षकां कलितलोलजिह्वाञ्चलां
स्मरामि वगलामुखीं विमुखसम्भनस्तम्भिनीम् ॥
पीयूषोदधिमध्यचारुविलसद्रत्नोत्पले मण्डपे
मत्तसिंहासनमौलिपातितरिपुप्रेतासनाध्यासिनीम् ।
स्वर्णाभां करपीड़ितारिरसनां भ्राम्यद्गदाविभ्रमा-
मित्थं ध्यायति यान्ति तस्य विलयं सद्योऽथ
सर्व्वापदः ॥
देवि त्वच्चरणाम्बुजार्च्चनरते यः पीतपुष्पाञ्जलीन्
भक्त्या वामकरे निधाय च मनुं मन्त्री मनोज्ञाक्षरम् ।
पीठध्यानपरोऽथ कुम्भकवशात् बीजं स्मरेत्
पार्थिवं
तस्यामित्रमुखस्य वाचि हृदये जाड्यं भवेत्
तत्क्षणात् ॥
वादी मूकति रङ्कति क्षितिपतिर्वैश्वानरः
शीतति
क्रोधी म्राम्यति दुर्जनः सुजनति क्षिप्रानुगः
खञ्जति ।
गर्व्वी खर्व्वति सर्व्वविच्च जड़ति त्वन्मन्त्रणा-
यन्त्रितः
श्रीनित्ये वगलामुखि प्रतिदिनं कल्याणि तुभ्यं
नमः ॥
मन्त्रस्तावदलं विपक्षदलने स्तोत्रं पवित्रञ्च ते
यन्त्रं वादिनियन्त्रणं त्रिजगतां जैत्रञ्च चित्रं
न ते ।
मातः श्रीवगलेति नाम ललितं यस्यास्ति
जन्तोर्म्मुखे

तन्नामग्रहणेन संसदि सुखस्तम्भो भवेद्-
वादिनाम् ॥
दुष्टस्तम्भनमुग्रविघ्नशमनं दारिद्र्यविद्रावणं
भूभृद्भूशमनं बलन्मदगडग्गां चेतःसमाकर्षणम् ।
सौभाग्यैकनिकेतनं मम दृशोः कारुण्यपूर्णार्द्रतां
मत्वोन्मीलनमाविरस्तु पुरतो मातस्त्वदीयं वपुः ॥
मातर्भञ्जय मे विपक्षवदनं जिह्वाञ्चलां कीलय
ब्राह्मीं मुद्रय नाशयाशु धिषणामुग्रां गतिं
स्तम्भय ।
शत्रूंश्चूर्णय देवि तीक्ष्णगदया गौराङ्गि
पीताम्बरे
विघ्नौघं वगले हर प्रणमतां कारुण्यपूर्णेक्षणे ॥
मातर्भैरवि भद्रकालि विजये वाराहि विश्वाश्रये
श्रीविद्ये समये महेशि वगले कामेशि रामे रमे ।
मातङ्गि त्रिपुरे परात्परतरे स्वर्गापवर्गप्रदे
दासोऽहं शरणागतः करुणया विश्वेश्वरि
त्राहि माम् ॥
संग्रामे चौरसङ्घे प्रहरणसमये बन्धने व्याधिमध्ये
विद्यावादे विवादे प्रकुपितनृपतौ दिव्यकाले
निशायाम् ।
वश्ये वा स्तम्भने वा रिपुवधसमये निर्জ্জने वा
वने वा
गच्छंस्तिष्ठंस्त्रिकालं यदि पठति शिवं प्राप्नुयादाशु धीरः ॥
नित्यं स्तोत्रमिदं पवित्रमिह यो देव्याः
पठत्यादरा-
द्धृत्वा यन्त्रमिदं तथैव समरे बाहौ करे वा
गले ।
राजानो हरयो मदान्धकरिणः सर्पा मृगेन्द्रा-
दिकास्ते वै यान्ति विमोहिता रिपुगणा लक्ष्मीः
स्थिरा सिद्धयः ॥
त्वं विद्या परमा त्रिलोकजननी विघ्नौघ-
संछेदिनी
योषाकर्षणकारिणी जनमनःसम्मोहसन्दायिनी ।
स्तम्भोत्सारणकारिणी पशुमनःसम्मोहसंदायिनी
जिह्वाकीलनभैरवी विजयते ब्रह्मादिमन्त्रो यथा॥
विद्या लक्ष्मीः सर्व्वसौभाग्यमायुः
पुत्रैः पौत्रैः सर्व्वसाम्राज्यसिद्धिः ।
मानं भोगो वश्यमारोग्यसौख्यं
प्राप्तं तत्तज्जन्तवेऽस्मिन् नरेण ॥
यत् कृतं जपसन्नाहं गदितं परमेश्वरि ।
दुष्टानां निग्रहार्थाय तद्गृहाण नमोऽस्तु ते ॥
ब्रह्मास्त्रमिति विख्यातं त्रिषु लोकेषु विश्रुतम् ।
गुरुभक्ताय दातव्यं न देयं यस्य कस्यचित् ॥
पीताम्बरां द्विभुजाञ्च त्रिनेत्रां गात्रकोज्ज्वलाम् ।
शिलामुद्गरहस्ताञ्च स्मरेत्तां वगलामुखीम् ॥
प्रातर्म्मध्याह्नकाले स्तवपठनमिदं कार्य्यसिद्धिप्रदं
स्यात् ॥"

इति रुद्रयामले वगलामुखीस्तोत्रं समाप्तम् ।
इति ज्ञानानन्दकृततन्त्रसारः ॥

वगाहः, पुं, (अव+गाह+भावे घञ् । अलोपः ।) अवगाहः । इति सुग्धबोधव्याकरणं भरतश्च ॥

वगुः, पुं, (वक्ति इति । वच्+"वचेर्गुश्च ।" उणा० ३ । ३३ । इति गुः गश्चान्तादेशः ।) वक्ता । इति सिद्धान्तकौमुद्यामुणादिवृत्तिः ॥ वावदूकः । इति संक्षिप्तसारोणादिवृत्तिः ॥ (शब्दः । यथा, ऋग्वेदे । ७ । १०३ । २ ।

"गवामाहनमायुर्वैतसिनीनां
मण्डूकानां वगुरत्रासमेति ॥"

"मण्डूकानां वगुः शब्दः समेति सङ्गच्छते ॥" इति तद्भाष्ये सायणः ॥)

वघ, इ ङ गतिनिन्दारम्भजयेषु । इति कविकल्पद्रुमः ॥ (भ्वा०-आत्म०-सक०-अवे अक० च-सेट् ।) इ, वंघ्यते । ङ, वंघते । अवे एव केचित् पठ्यते । इति दुर्गादासः ॥

वङ्कः, पुं, (वङ्कतीति । वङ्क+अच् ।) गवीवङ्क्रम् । इत्यमरटीकायां भरतः ॥

वङ्का, स्त्री, (वङ्क+टाप् ।) वलग्नभागः । तत्पर्य्यायः । पल्ययनम् २ । इति त्रिकाण्डशेषः ॥

वङ्किलः, पुं, (वङ्कति इति । वङ्क+इलच् ।) कण्टकः । इति त्रिकाण्डशेषः ॥

वङ्क्यः, त्रि, (वङ्क+ण्यत् । "वङ्केर्गतौ ।" ७ । ३ । ६३ । इति अगत्यर्थे कुत्वञ्च ।) वक्रम् । यथा, वङ्क्यं काष्ठम् । इति सुग्धबोधव्याकरणम् ॥

वङ्क्रि, क्ली, (वङ्कते इति । वकि कौटिल्ये+"वङ्क्रिक्राद्यश्च ।" उणा० ४ । ६६ । इति क्रिन्प्रत्ययेन निपातितम् ।) पार्श्वास्थि । तत्पर्य्यायः । पर्शुकम् २ । इति हेमचन्द्रः । ३ । २६२ ॥

वङ्क्रिः, पुं, क्ली, (वङ्कते इति । वकि कौटिल्ये+"वङ्क्रिक्राद्यश्च ।" उणा० ४ । ६६ । इति क्रिन्प्रत्ययेन निपात्यते ।) वाद्यभेदः । इत्युणादिकोषः । गृहदारु । पार्श्वास्थि । इति सिद्धान्तकौमुद्यामुणादिवृत्तिः ॥

वङ्गणः, पुं, (वङ्गति संहतो भवतीति । वङ्ग+ल्युः । पृषोदरादित्वात् नुम् ।) जङ्घासन्धिः । इत्यमरः । २ । ६ । ७३ ॥ कुँचकी इति भाषा ॥ (यथा, सुश्रुते शारीरस्थाने ५ अध्याये ।

"चतुर्दशास्थ्नां संघाताः । तेषां त्रयोगुल्फजानुवङ्क्षणेषु ॥")

वङ्क्षुः, स्त्री, (वङ्कतीति । वङ्क+बाहुलकात् क्षुन् । नुम् च ।) गङ्गास्रोतोविशेषः । यथा,—

"तस्याः स्रोतसि सीता च वङ्क्षुभद्रा च
कीर्त्तिता ॥"

सा च केतुमालवर्षस्था गङ्गा । यथा । सर्वं माल्यवच्छिखरान्निष्पतन्ती तत उपरतवेगा केतुमालमभिवङ्क्षुः प्रतीच्यां दिशि सरित्पतिं प्रविशति । इति श्रीभागवते ५ स्कन्धे १७ अध्यायः ॥(यथा च महाभारते । १३ । १६५ । २२ ।

"गोदावरी च वेला च कृष्णवेणा तथा द्विजा ।
वङ्क्षुर्नदी च कावेरी वङ्क्षुर्मन्दाकिनी तथा ॥")

वङ्गं

वङ्गं, क्ली, (वङ्गतीति। वगि गतौ + अच्।) धातु-विशेषः। रां इति भाषा॥ तत्पर्य्यायः। त्रपुः २ खर्णजम् ३ नागजीवनम् ४ भद्रङ्गम् ५ रङ्गम् ६ गुरुपत्रम् ७ पिच्चटम् ८ चक्रसंज्ञम् ९ तमरम् १० नागजम् ११ कस्तीरम् १२ आलीनकम् १३ सिंहलम् १४। इति हेमचन्द्रः। ४। १०८॥ खवेतम् १५ नागम् १६ त्रपु १७। इति शब्द-रत्नावली॥ अस्य गुणाः। तिक्तत्वम्। मधु-रत्वम्। भेदित्वम्। पाण्डुत्वम्। क्रमिवात-नाशित्वम्। लेखनत्वम्। किञ्चित्पित्तकारि-त्वञ्च। इति राजवल्लभः॥ (अथ वङ्गस्य नाम-लक्षणगुणाः।

"रक्तवङ्गं त्रपु प्रोक्तं तथा पिच्चटमित्यपि।
खुरकं मिश्रकञ्चापि विविधं वङ्गमुच्यते॥
उत्तमं खुरकं तच्च मिश्रकन्त्ववरं मतम्।
रङ्गं लघु सरं रूक्षसुष्णं मेहकफक्रिमीन्॥
निहन्ति पाण्डुं सश्वासं चक्षुष्यं पित्तलं मनाक्।
सिंहो यथा हस्तिगणं निहन्ति
तथैव वङ्गोऽखिलमेहवर्गम्।
देहस्य सौख्यं प्रबलेन्द्रियत्वं
नरस्य पुष्टिं विदधाति नूनम्॥"

इति भावप्रकाशस्य पूर्ब्बखण्डे प्रथमे भागे॥

अस्य शोधनमारणविधिर्यथा,—

"वङ्गं चूर्णोदके खिन्नं यामार्द्धेन विशुध्यति॥"

इति वङ्गशुद्धिः॥

"वङ्गं सतालमर्कस्य पिष्ट्वा दुग्धेन संपुटेत्।
शुष्कान्यत्यभवैर्व्वल्कैः सप्तधा भस्मतां नयेत्॥"

मतान्तरम्।

"वङ्गं खर्परके कृत्वा चुल्ल्यां संस्थापयेत् सुधीः।
द्रवीभूते पुनस्तस्मिन् चूर्ण्यान्येतानि दापयेत्॥
प्रथमं रजनीचूर्णं द्वितीये च यमानिका।
तृतीये जीरकञ्चैव ततश्चिञ्चात्वगुद्भवम्॥
अश्वत्थवल्कलोत्थञ्च चूर्णं तत्र विनिः-
क्षिपेत्।
एवं विधानतो वङ्गं म्रियते नात्र संशयः॥
वङ्गं तिक्ताम्लकं रूक्षं किञ्चिद्घातप्रकोपनम्।
मेदःश्लेष्मामयघ्नञ्च क्रिमिघ्नं मेहनाशनम्॥"

इति वङ्गमारणम्। इति वैद्यकरसेन्द्रसारसंग्रहे जारणमारणाधिकारे॥) अन्यद्रङ्गशब्दे द्रष्ट-व्यम्॥ *॥ सीसकम्। देशविशेषे पुं भूम्नि। इति मेदिनी। गे, २२॥ (एकवचनान्तोऽपि। यथा, महाभारते। १। १०४। ५०।

"अङ्गस्याङ्गो भवेद्देशो वङ्गो वङ्गस्य च
स्मृतः॥")

स तु प्राचीदेशान्तर्गतदेशविशेषः। यथा,—

"अङ्गवङ्गा मद्गुरका अन्तर्गिरिबहिर्गिराः॥"

इत्युपक्रम्य।

"म्लेच्छा मागधगोनर्दाः प्राच्यां जनपदाः
स्मृताः॥"

इत्यन्तं मत्स्यपुराणवचनम्॥

मतान्तरं यथा,—

"आग्नेय्यामङ्गवङ्गोपवङ्गत्रिपुरकोशलाः।
कलिङ्गौड्रान्धकिष्किन्धाविदर्भाग्नवरादयः॥"

इति ज्योतिस्तत्त्वधृतकूर्म्मचक्रवचनम्॥

तस्य सीमा यथा,—

"रत्नाकरं समारभ्य ब्रह्मपुत्रान्तगं शिवे!।
वङ्गदेशो मया प्रोक्तः सर्व्वसिद्धिप्रदर्शकः॥"

इति भक्तिसङ्गमतन्त्रे ७ पटलः॥

वङ्गः, पुं, चन्द्रवंशीयबलिराजपुत्रः। यथा,—

"बलिः सुतपसो जज्ञे अङ्गवङ्गकलिङ्गकाः।
सुह्मपौण्ड्राश्च बालेया अनपानन्तथाङ्गतः॥"

इति गारुडे १४४ अध्यायः॥ *॥

(स च वङ्गो दीर्घतमस औरसो बलेः क्षेत्र-जश्च। यथा, महाभारते। १।१०४।४७-५१।

"ततः प्रसादयामास पुनस्तमृषिसत्तमम्।
बलिं सुदेष्णां भार्य्यां स्वां तस्मै तां प्राहिणोत्-
पुनः॥
तां स दीर्घतमाङ्गेषु सृष्ट्वा देवीमथाब्रवीत्।
भविष्यन्ति कुमारास्ते तेजसादित्यवर्चसः॥
अङ्गो वङ्गः कलिङ्गश्च पुण्ड्रः सुह्मश्च ते सुताः।
तेषां देशाः समाख्याताः स्वनामप्रथिता भुवि॥
अङ्गस्याङ्गो भवेद्देशो वङ्गो वङ्गस्य च स्मृतः।
कलिङ्गविषयश्चैव कलिङ्गस्य च स स्मृतः॥
पुण्ड्रस्य पुण्ड्रा प्रख्याताः सुह्मा सुह्मस्य च
स्मृताः।
एवं बलेः पुरा वंशः प्रख्यातो वै महर्षिजः॥")

वार्त्ताकुः। कार्पासः। इति मेदिनी। गे, २५॥

वङ्गजं, क्ली, (वङ्गात् धातुविशेषात् जायते इति। जन + डः।) सिन्दूरम्। इति रत्नमाला॥ वङ्गदेशजाते, त्रि॥

वङ्गनः, पुं, (वङ्गतीति। वगि + ल्युः।) वार्त्ताकुः। इति शब्दरत्नावली॥ वेगुन इति भाषा॥ (गुणादयोऽस्य वार्त्ताकुशब्दे ज्ञातव्याः॥)

वङ्गला, स्त्री, रागिणीविशेषः। इति हलायुधः॥ वङ्गालीति च नामान्तरम्॥

वङ्गशुक्त्यज, क्ली, (वङ्गशुक्त्याभ्यां रङ्गताम्राभ्यां जायते इति। जन + डः।) कांस्यम्। इति हेमचन्द्रः। ४। ११५॥

वङ्गसेनः, पुं, वकवृक्षः। यथा,—

"वङ्गसेनस्त्वगस्तिद्रुः सुकनाग्नो सुनिद्रुमः।
अनलिः कुनली॥" इति त्रिकाण्डशेषः॥

वङ्गसेनकः, पुं, (वङ्गसेन + स्वार्थे कन्।) वकवृक्षः। यथा,—

"रक्तपुष्पो सुनितरुरगस्तिर्व्वङ्गसेनकः॥"

इति रत्नमाला॥

अस्य पुष्पगुणाः।

"वासकस्य च पुष्पाणि वङ्गसेनस्य चैव हि।
कटुपाकानि तिक्तानि कासक्षयकराणि च॥"

इति राजवल्लभः॥

वङ्गारिः, पुं, (वङ्गस्य रङ्गधातोररिः। अस्य वङ्ग-धातुजारकत्वात् तथात्वम्।) हरितालम्। इति हेमचन्द्रः॥

वङ्गालः, पुं, भैरवरागस्य पुत्रः। यथा,—

"वङ्गालः पञ्चमः षष्ठो मधुरो हर्षकस्तथा।
देशाख्यो माधवः सिन्धुर्भैरवपुत्राः प्रकी-
र्त्तिताः॥"

अस्य ध्यानम्।

"कक्षानिवेशितकरद्वयरक्तपद्मो
भास्वत्त्रिशूलपरिमण्डितवामहस्तः।
भस्मोज्ज्वलो निविड़बद्धजटाकलापो
वङ्गाल इत्यभिहितस्तरुणार्कवर्णः॥
षाड़वो देववङ्गालो गृहांशन्यासमध्यमः।
प्रहर्षे विनियोक्तव्यः प्रोक्तोऽयं मुनिना स्वयम्॥"

इति सङ्गीतरत्नाकरः॥

वङ्गाली, स्त्री, भैरवरागस्य रागिणी। यथा,—

"भैरवी कौशिकी चैव भाषा वेलावली तथा।
वङ्गाली चेति रागिण्यो भैरवस्यैव वल्लभाः॥"

इति सङ्गीतदामोदरः॥

अस्या मूर्त्तिः।

"मनोज्ञमुक्तागुणभूषिताङ्गी
शुकं दधाना धरणीधरस्था।
प्रांशुः कुमारी कमनीयमूर्त्ति-
र्व्वङ्गालिकेयं शुचिसाङ्गगीता॥"

इति सङ्गीतरत्नाकरः॥

"वङ्गाली औड़वा ज्ञेया गृहांशन्यासषड़्ज-
भाक्।
ऋषहीना च विज्ञेया मूर्च्छना प्रथमा मता।
पूर्णा वा मध्यगोपेता कल्लिनाथेन भाषिता॥"

इति सङ्गीतदर्पणम्॥

वच, औ वाचि। सन्देशे। इति कविकल्पद्रुमः॥ (भ्वा०-पर०-सक०-अनिट्।) ओ, वक्ता। अयं सेम् (सेट्) इत्येके। न वचत्यप्रियं वचः। इति हलायुधः। इति दुर्गादासः॥

वच, क सन्देशे। इति कविकल्पद्रुमः॥ (चुरा०-पर०-सक०-सेट्।) सन्देशो वचनविशेषः। क, वाचयत्यखिलां लिपिमिति हलायुधः। इति दुर्गादासः॥

वच, ल औ वाचि। इति कविकल्पद्रुमः॥ (अदा०-पर०-द्विक०-सेट्।) ल, वक्ति। औ, वक्ता। अस्मादन्तिविभक्तिर्न प्रयोज्या। इत्यालङ्का-रिकाः। इति दुर्गादासः॥ (यथा,—

"वचेरन्त्यमुशन्त्यङ्भिः प्रयोगो नाभिधीयते।
जयतेर्नास्ति पञ्चम्या उत्तमः पुरुषः क्वचित्॥"

इति बहुसम्मतम्॥)

वचः, पुं, (वक्तीति। वच् + अच्।) कीरपक्षी। इति मेदिनी। चे, ६॥

वचः, [स्] क्ली, (उच्यते इति। वच् + "सर्व्व-धातुभ्योऽसुन्।" उणा० ४।१८६। इत्यसुन्।) वाक्यम्। इत्यमरः।१।६।१॥ (यथा, रघौ।२।४१।

"इति प्रगल्भं पुरुषाधिराजो
मृगाधिराजस्य वचो निशम्य।
प्रत्याहृताक्षो गिरिशप्रभावा-
दात्मन्यवज्ञां शिथिलीचकार॥")

वचक्रुः, पुं, (वक्तीति। वच् + "हृषुवचिभ्यो-ऽनुजागजक्रुचः।" उणा० ३। ८१। इति अक्रुच्।) ब्राह्मणः। इति मेदिनी। ने, १२७॥

वचक्नुः त्रि, (वक्तीति। वच्+"ह्यधुवचिभ्यः इति।" उणा० ३।८१। इत्यक्नुच्।) वावदूकः। इति मेदिनी। ने, १२७।

वचखी, स्त्री, शारिका। वर्त्तिः। शस्त्रभेदः। इति शब्दरत्नावली॥ मेदिन्यां वचखा इति वरखा इति च पाठः॥

वचनं, क्ली, (उच्यतेऽनेनेति। श्विग्नाशकत्वादस्य तथात्वम्। वच्+ल्युट्।) शुण्ठी। इति शब्दचन्द्रिका॥ वाक्यम्। तत्पर्य्यायः।

"इरा सरस्वती भाषा वाणी च भारदा।
गिरा गीश्च गिरां देवी गीर्देवी भारती-
श्वरी॥
वाग्वाचा वचसामीशा वाग्देवी वर्णमातृका।
वचनं भाषितं चोक्तिर्व्याहारो लपितं वचः॥
वाग्देवीवचसोरेष पर्य्यायः परिकीर्त्तितः।
यथास्थानं यथायोग्यं भेदं ज्ञो मनीषिभिः॥"
इति शब्दरत्नावली॥ * ॥

(यथा, हितोपदेशे।

"असेवितेश्वरद्वारमदृष्टविरहव्यथम्।
अनुक्तजीववचनं धन्यं कस्यापि जीवनम्॥")

तच्च त्रिविधम्। यथा,—

वशिष्ठ उवाच।

"वचनं त्रिविधं प्रोक्तं लौकिकं वैदिकं तथा।
सर्व्वं जानाति शास्त्रज्ञो निर्म्मलज्ञानचक्षुषा॥
असत्यमहितं पश्चात् सांप्रतं श्रुतिसुन्दरम्।
सुबुद्धिशुचयो वदन्ति नहि तेषां कदाचन॥
आपदः प्रीतिजनकं परिणामसुखावहम्।
दयालुधर्म्मशीलश्च बोधयत्येव बान्धवम्॥
श्रुतिमात्रात् सुधातुल्यं सर्व्वकाले सुखावहम्।
सत्यं सारं हितकरं वचसां श्रेष्ठमीप्सितम्॥
एवं स त्रिविधं प्रोक्तं नीतिसारनिरूपितम्।
कथ्यतां त्रिभुमध्ये किं वदामि वाक्यमीप्सि-
तम्॥"

इति ब्रह्मवैवर्त्ते श्रीकृष्णजन्मखण्डे ४१ अध्यायः॥

विभक्तिः। सा तु स्यादिस्यादिश्च। यथा।

"स्त्रीरेकैकं वचनं क्रमात् कृद्बव्यसंज्ञं स्यात्।" इति मुग्धबोधव्याकरणम्॥ तद्वैदिकपर्य्यायः। श्लोकः १ धारा २ इळा ३ गौः ४ गौरी ५ गान्धर्व्वी ६ गभीरा ७ गम्भीरा ८ मन्त्रा ९ मन्त्रिणी १० वाग्मी ११ वाणी १२ वाणीची १३ वाग्वः १४ पविः १५ भारती १६ धमनिः १७ गाळीः १८ मेना १९ मेळिः २० सूर्य्या २१ सरस्वती २२ निवित् २३ स्वाहा २४ वसुः २५ उपब्दिः २६ मायुः २७ काकुत् २८ जिह्वा २९ घोषः ३० स्वरः ३१ शब्दः ३२ स्वनः ३३ शुष्क ३४ होत्रा ३५ गीः ३६ गाथा ३७ गथः ३८ धेना ३९ मा: ४० विषा ४१ नमा ४२ कशा ४३ धिषणा ४४ नौः ४५ अक्षरम् ४६ मही ४७ अदितिः ४८ शची ४९ वाक् ५० अनुष्टुप् ५१ धेनुः ५२ वलगुः ५३ गल्दा ५४ सरः ५५ सुपर्णी ५६ वेकुरा ५७। इति सप्तपञ्चाशत् वाङ्नामानि। इति वेदनिघण्टौ। १। ११॥

वचनग्राही [न्], त्रि, (वचनं गृह्णातीति। ग्रह+णिनिः।) वचने स्थितः। इत्यमरटीकायां रमानाथः॥

वचनीयः, त्रि, (वच्+अनीयर्।) कथनीयः। इति वचधातोः कर्म्मणि अनीयप्रत्ययेन निष्पन्नः॥ (निन्दायां, क्ली। यथा, कुमारे। ४। २१।

"मदनेन विना कृता रतिः
क्षणमात्रं किल जीवितेति मे।
वचनीयमिदं व्यवस्थितं
रमण! त्वामनुयामि यद्यपि॥"

"इति वचनीयं निन्दा मे मम व्यवस्थितम्॥"
इति तट्टीकायां मल्लिनाथः॥)

वचनीयता, स्त्री, (वचनीयस्य भावः। वचनीय+तल्।) लोकापवादः। यथा,—

"जनप्रवादः कौलीनं विगानं वचनीयता॥"
इति हेमचन्द्रः। २। १८४॥

(तथा, मृच्छकटिकनाटके तृतीयाङ्के।

"कामं नीचमिदं वदन्ति पुरुषः स्वप्ने च यद्वर्त्तते
विश्वस्तेषु च वञ्चनापरिभवश्चौर्य्यं न शौर्य्यं हि तत्।
स्वाधीनां वचनीयतापि हि वरं वह्नौ न सेवाञ्जलि-
र्मार्गो ह्येष नरेन्द्रसौधिकवधे पूर्ब्बं कृतो यौगिना॥")

वचनेस्थितः, त्रि, (वचने तिष्ठति स्मेति। स्था+"गत्यर्थेति।" ३।४।७२। इति क्तः। "तत्पुरुषे कृति बहुलम्।" ६।३।१४। इति सप्तम्या अलुक्।) वचने तिष्ठति यः। वचनस्थः। तत्पर्य्यायः। विधेयः २ विनयग्राही ३ आश्रवः। इत्यमरः। ३। १। २४॥ वश्यः ५ प्रणेयः ६। इति केचिदिति भरतः॥

वचनोपक्रमः, पुं, (वचनस्य उपक्रमः।) वाक्यारम्भः। इति भरतशब्दरत्नावल्यौ॥ तत्पर्य्यायः। उपन्यासः २ वाङ्मुखम् ३। इत्यमरः॥

वचरः, पुं, (अवान्तरे चरतीति। अव+चर+अच्। अलोपः।) कुक्कुटः। शठः। इति मेदिनी॥

वचलुः, पुं, शुचुः। यथा,—

"पुंसि मनुः चुपण्युश्च वचलुर्जगलुस्तथा।
भरण्युश्च शरण्युः स्यादमित्रे क्षत्रियेऽपि॥"
इति शब्दमाला॥

वचसांपतिः, पुं, (वचसां वाचां पतिः।) बृहस्पतिः। यथा,—

"जीवोऽङ्गिराः सुरगुरुर्व्वचसांपतीज्यौ॥"
इति दीपिका॥

वचस्करः, त्रि, (करोतीति। कृ+अच्। वचसः करः।) वचने स्थितः। इति केचित्॥

वचा, स्त्री, (वाचयतीति। वच्+णिच्+अच्। निपातनात् ह्रस्वः। यद्वा, अन्तर्भावितण्यर्थात् वचः अच्।) औषधविशेषः। वच् इति भाषा। तत्पर्य्यायः। उग्रगन्धा २ षड्ग्रन्था ३ गोलोमी ४ घृतपर्ब्बिका ५। इत्यमरः। २। ४। १०२॥ तीक्ष्णा ६ जटिला ७ मङ्गल्या ८ विजया ९ उग्रा १० रक्षोघ्नी ११। इति रत्नमाला॥ वच्या १२ लोमशा १३। इति जटाधरः॥ भद्रा १४। अस्या गुणाः। अतितीक्ष्णत्वम्। कटुत्वम्। उष्णत्वम्। कफामयग्रन्थिशोफवात-ज्वरातिसारसादभूतनाशित्वम्। वान्तिकारित्वञ्च। इति राजनिर्घण्टः॥ * ॥ अपि च।

"वचोग्रगन्धा षड्ग्रन्था गोलोमी घृतपर्ब्बिका।
क्षुद्रपत्री च मङ्गल्या जटिलोग्रा च लोमशा॥
वचोग्रगन्धा कटुका तिक्तोष्णा वान्तिवह्निकृत्।
विबन्धाध्मानशूलघ्नी शुक्रब्रूचविशोधिनी॥
अपस्मारकफोन्मादभूतजन्तुनिलान् हरेत्॥"

अथ खुरासानी वचा।

"पारसीकवचा शुक्ला प्रोक्ता हैमवतीति सा।
हैमवत्युदिता तद्वत् शूलं हन्ति विशेषतः॥"

अथ महाभरी वचा। अस्या लोके कुलीजन इति नामान्तरम्।

"सुगन्धाप्युग्रगन्धा च विशेषात् कफकासनुत्।
सुखरत्वकरी रुच्या कृत्कण्ठसुखशोधिनी॥"

अपरा सुगन्धा शूलग्रन्थिर्यस्या लोके महाभरा इति नाम।

"शूलग्रन्थिः सुगन्धाया ततो हीनगुणा स्मृता॥"

अथ चोपचीनीति लोके प्रसिद्धा। तस्या गुणाः।

"द्वीपान्तरवचा कट्वी तिक्तोष्णा वह्निदीपिकृत्।
विबन्धाध्मानशूलघ्नी शुक्रब्रूचविशोधिनी॥
वातव्याधीनपस्मारमुन्मादं तनुवेदनाम्।
अपोहति विशेषेण फिरङ्गामयनाशिनी॥"
इति भावप्रकाशः॥ * ॥

अपरञ्च।

"वचायुष्या वातकफशोथाग्नी स्मृतिवर्द्धिनी॥"
इति राजवल्लभः॥ * ॥

अन्यच्च।

"अङ्गिर्व्वा पयसाज्येन मासमेकन्तु सेविता।
वचा कुर्य्यान्नरं प्राज्ञं श्रुतिधारणसंयुतम्॥
चन्द्रसूर्य्यग्रहे पीतं पलमेकं पयोऽन्वितम्।
वचायास्तत्क्षणं कुर्य्यान्महाप्रज्ञान्वितं नरम्॥"
इति गारुडे १९८ अध्यायः॥

वचोग्रहः, पुं, (गृह्णातीति। ग्रह+अच्। वचसां ग्रहः।) कर्णः। इति राजनिर्घण्टः॥

वज, गतौ। इति कविकल्पद्रुमः॥ (भ्वा०-पर०-सक०-सेट्।) वजति। इति दुर्गादासः॥

वज, क संस्कृतौ। गतौ। इति कविकल्पद्रुमः॥ (चुरा०-पर०-सक०-सेट्।) अयं मार्गणसंस्कारे इति प्राचः। मार्गणस्य शरस्य पश्चादिना संस्कारो मार्गणसंस्कारः। क, वाजयति पक्षैर्बाणं काण्डकारः। इति रमानाथः॥ मार्गण-संस्कारयोरिति कश्चित्। इति दुर्गादासः॥

वज्रं, पुं, क्ली, (वजतीति। वज गतौ+"ऋज्रेन्द्राग्रवज्रविप्रेति।" उणा० २। २८। इति रन्-प्रत्ययेन निपातितः।) इन्द्रस्यास्त्रविशेषः। वाज् इति भाषा॥ तत्पर्य्यायः। स्वादिनी २ कुलिशम्३

भिदुरम् ४ पविः ५ शतकोटिः ६ खरः ७ शम्बः ८ दम्भोलिः ९ अशनिः १० । इत्यमरः । १।१।५०॥ कुलीशम् ११ भिदिरम् १२ भिदुः १३ खरसः १४ सम्बः १५ संवः १६ अशनी १७ वज्राशनिः १८ । इति तट्टीका ॥ जम्भारिः १९ त्रिदशायुधम् २० शतधारम् २१ शतारम् २२ आपोत्रम् २३ अत्रजम् २४ । इति पुरुषोत्तमः ॥ गिरिकण्टकः २५ गौः २६ अभोत्यम् २७ मेघभूतिः २८ गिरिश्वरः २९ । इति शब्दरत्नावली ॥ जाम्बविः ३० दम्भः ३१ । इति जटाधरः ॥ भिन्नः ३२ अम्बुजम् ३३ । इति त्रिकाण्डशेषः ॥ (यथा, ऋग्वेदे १।३२।२।

"अहन्नहिं पर्व्वते शिश्रियाणं
त्वष्टास्मै वज्रं स्वर्य्यं ततक्ष ॥")

अस्योत्पत्तिर्यथा,—

"तथेत्युक्तः स रविणा भ्रमौ कृत्वा दिवाकरम् ।
पृथक् चकार तत्तेजश्चक्रं विष्णोरकल्पयत् ॥
त्रिशूलञ्चापि रुद्रस्य वज्रमिन्द्रस्य चाधिकम् ।
दैत्यदानवसंहर्त्तुः सहस्रकिरणात्मकम् ॥
रूपञ्च प्रतिमञ्चक्रे त्वष्टा पादादते महत् ।
न शशाकाथ तद्द्रष्टुं प्रादरूपं रवेः पुनः ॥
अतोऽपि ततः पादौ न कश्चित् कारयेत् क्वचित् ।
यः करोति स पापिष्ठां गतिमाप्नोति निन्दिताम् ॥
कुष्ठरोगमवाप्नोति लोकेऽस्मिन् दुःखसंयुतम् ।
तस्मान्न धर्म्मकामार्थी चित्रेष्वायतनेषु च ।
न क्वचित् कारयेत् पादौ देवदेवस्य धीमतः ॥"

इति मात्स्ये १९ अध्यायः ॥ * ॥

अपि च ।

"प्रविश्य जठरं शुद्धो दैत्यमातुः पुरन्दरः ।
ददर्शोद्वेसुखं वासं कठिन्यस्करं महत् ॥
तस्यैवान्तेऽथ ददृशे पेशीं मांसस्य वासवः ।
शुद्धस्फटिकसंकाशां कराभ्यां जग्रहेऽथ ताम् ॥
ततः कोपसमाधातो मांसपेशीं शतक्रतुः ।
कराभ्यामर्दयामास ततः सा कठिनाभवत् ॥
जर्द्धनार्द्धेन वज्रेण त्वधोऽर्द्धं वज्रेण तथा ।
शतपर्व्वा च कुलिशः संजातो मांसपेशितः ॥"

इति वामने ६८ अध्यायः ॥ * ॥

वृत्रासुरवधार्थं दधीचिमुनेरस्थ्ना इन्द्राज्ञया विश्वकर्म्मणा निर्म्मितवज्रस्य प्रमाणं यथा,—

"एवं स्तुतयवसितो दध्यङ्ङाथर्व्वणस्तनुम् ।
परे भगवति ब्रह्मण्यात्मानं सन्नयन् जहौ ॥
यतोऽचलासु मनो बुद्धिस्तत्त्वद्रुक भक्तवत्सलः ।
आस्थितः परमं योगं न देहं बुबुधे गतम् ॥
अथेन्द्रो वज्रमुत्पाद्य निर्म्मितं विश्वकर्म्मणा ।
मुनेः सकृथिभिरुत्सिक्तो भगवत्तेजसान्वितः ॥
वृतो देवगणैः सर्व्वैर्गजेन्द्रो पर्य्यगोभत ।
स्तूयमानो मुनिगणैस्त्रैलोक्यं हर्षयन्निव ॥"

इति श्रीभागवते ६ स्कन्धे १० अध्यायः ॥*॥

तन्निर्म्मितवारकविधिर्यथा,—

"प्रचण्डपवनाघाते मेघेषु स्तनितेषु यः ।
चिः पतेच्चैमिनीयोऽस्मि प्राङ्मुखो वाप्युदङ्मुखः ॥
तस्य माभूद्भयं घोरं विद्युतीयोऽवसीदति ॥"

इत्याह्निकतत्त्वधृतब्रह्मपुराणम् ॥

"मुनेः कल्याणमित्रस्य जैमिनेश्चापि कीर्त्तनात् ।
विद्युदग्निभयं नास्ति पठिते च गृहोदरे ॥"

लिखिते च गृहोदरे । इति वा पाठः ।

"जैमिनिश्च सुमन्तुश्च वैशम्पायन एव च ।
पुलस्त्यः पुलहश्चैव पञ्चैते वज्रवारकाः ॥"

इति पुराणम् ॥*॥*॥

रत्नविशेषः । हीरा इति भाषा । तत्पर्य्यायः । इन्द्रायुधम् २ हीरम् ३ भिदुरम् ४ कुलिशम् ५ पविः ६ अमेद्यम् ७ अशिरम् ८ रत्नम् ९ दृढ़म् १० भार्गवकम् ११ षट्कोणम् १२ वज्रधारम् १३ शतकोटिः १४ । अस्य गुणाः । षड्रसोपेतत्वम् । सर्व्वरोगापहारकत्वम् । सर्व्वाघशमनत्वम् । सौख्यत्वम् । देहदार्ढ्यकरत्वम् । रसायनत्वञ्च । तद्विशेषो यथा,—

"स्वच्छं विद्युत्प्रभं स्निग्धं सौन्दर्य्यं लघु लेखनम् ।
षड्रारन्तीक्ष्णधारञ्च सुग्राह्यारं श्रियं दिशेत् ॥"

तस्य कुलक्षणं यथा,—

"भस्माभं काकपादञ्च रेखाक्रान्तन्तु वर्त्तुलम् ।
आधारमलिनं विन्दु संत्रासे स्फुटितन्तथा ।
नीलाभं चिपिटं रूक्षं तद्वज्रं दोषलं त्यजेत् ॥"

वज्रस्य चतुर्व्वर्णलक्षणं यथा,—

"श्वेतालोहितपीतमेचकतया छायाश्चतस्रः क्रमाद-
विप्रादित्वमिहास्य यत् सुमनसः प्रशंसन्ति सत्यं ततः ।
स्फीतां कीर्त्तिमनुत्तमां श्रियमिदं दत्ते यथा संधृतं
मर्त्यानामयथायथं तु कुलिशं पथ्यं हितं जायतः ॥"*॥

तस्य परीक्षा यथा,—

"यत् पाषाणतले निकाषनिकरे नोदृष्यते निष्ठुरे
यच्चान्योपलशोऽसृगरसुखेर्लेखान्न यात्याहनम् ।
यच्चान्यं निजलीलयैव दलयेद्वज्रेण वा भिद्यते
तज्ज्ञातं कुलिशं वदन्ति कुशलाः श्लाघ्यं महार्घ्यञ्च तत् ॥"*॥

तस्य वर्णगुणौ यथा,—

"विप्रः सोऽपि रसायनेषु बलवानष्टाङ्गसिद्धिप्रदो
राजन्यस्तु नृणां बलीपलितजिन्मृत्युं जयेदङ्गसा ।
द्रव्याकर्षणसिद्धिदस्तु सुतरां वैश्योऽथ शूद्रो भवेत्
सर्व्वव्याधिहरस्तदेष कथितो वज्रस्य वर्णो गुणः ॥"

इति राजनिर्घण्टः ॥*॥

अपि च ।

अथ वज्रस्य नामलक्षणगुणाः ।

"हीरकः पुंसि वज्रोऽस्त्री पन्नो मणिवरश्च सः ।
स तु श्वेतः स्मृतो विप्रो लोहितः क्षत्रियो मतः ।
पीतो वैश्योऽसितः शूद्रश्चतुर्व्वर्णात्मकश्च सः ॥
रसायने मतो विप्रः सर्व्वसिद्धिप्रदायकः ।
क्षत्रियो व्याधिविध्वंसी जराशत्रुहरः परः ॥
वैश्यो धनप्रदः प्रोक्तस्तथा देहस्य दार्ढ्यकृत् ।
शूद्रो नाशयति व्याधीन् वयस्तम्भं करोति च ।
पुंस्त्रीनपुंसकाश्चैते लक्षणीयानि लक्षणैः ॥
सुवृत्ताः फलसंपूर्णास्तेजोयुक्ता दृढत्तराः ।
पुरुषास्ते समाख्याता रेखाबिन्दुविवर्जिताः ॥
रेखाबिन्दुसमायुक्ताः षड्रास्ते स्त्रियः स्मृताः ॥"

षड्रसाः षट्कोणाः ।

"त्रिकोणाश्च सुदीर्घाश्च ते विज्ञेया नपुंसकाः ॥
तेऽपि स्युः पुरुषाः श्रेष्ठा रसबन्धनकारिणः ।
स्त्रियः कुर्व्वन्ति कायस्य कान्तिं स्त्रीणां सुखप्रदाः ॥
नपुंसकास्ववीर्य्याः स्युरकामाः सत्त्ववर्ज्जिताः ।
स्त्रियः स्त्रीभ्यः प्रदातव्याः क्लीवं क्लीवे प्रयोजयेत् ।
सर्व्वेभ्यः सर्व्वदा देयाः पुरुषा वीर्य्यवर्द्धनाः ॥
अशुद्धं कुरुते वज्रं कुष्ठं पार्श्वव्यथां तथा ।
पाण्डुतां पङ्गुरत्वञ्च तस्मात् संशोध्य मारयेत् ॥"

मारितस्य वज्रस्य गुणाः ।

"आयुः पुष्टिं बलं वीर्य्यं वर्णं सौख्यं करोति च ।
सेवितं सर्व्वरोगघ्नं मृतं वज्रं न संशयः ॥"

इति भावप्रकाशः ॥

(अथ वज्रमारणम् ।

"त्रिवर्षारूढ़कार्पासमूलमादाय पेषयेत् ।
त्रिवर्षनागवल्ल्यास्तु निजद्रावैः प्रपेषयेत् ॥
तन्नोलके क्षिपेद्वज्रं रुद्ध्वा गजपुटे पचेत् ।
एवं सप्तपुटेनैव म्रियते कुलिशं ध्रुवम् ॥"

मतान्तरम् ।

"कांस्यपात्रे तु भेकस्य मूत्रे वज्रन्तु निःक्षिपेत् ।
त्रिःसप्तकृत्वः सप्तप्तं वज्रमेवं मृतं भवेत् ॥"

अथान्यः ।

"त्रिःसप्तकृत्वः सप्तप्तं खरमूत्रेण सेचयेत् ।
सुक्षारैस्तालकं पिष्ट्वा तन्नोले कुलिशं क्षिपेत् ॥
प्रभातं वाजिमूत्रेण सिक्तं पूर्व्वक्रमेण तु ।
भस्मी भवति तद्वज्रं वज्रवत् कुरुते तनुम् ॥
आयुष्यं सौख्यजननं बलरूपप्रदन्तथा ।
रोगघ्नं मृत्युहरणं वज्रभस्म भवत्यलम् ॥"

इति वज्रमारणम् । इति वैद्यकरसेन्द्रसारसंग्रहे जारणमारणाधिकारे ॥ * ॥) अन्यच्च । अथ व्रजगणना । विष्णुधर्म्मोत्तरे ।

"वज्रं मरकतञ्चैव पद्मरागञ्च मौक्तिकम् ।
इन्द्रनीलं महानीलं वैदूर्य्यं गन्धसंज्ञकम् ॥
चन्द्रकान्तं सूर्य्यकान्तं स्फाटिकं वलकं तथा ।
कर्केतरं पुष्परागं तथा ज्योतीरसं द्विज ॥
स्फाटिकं राजवर्त्तञ्च तथा राजमतं शुभम् ।
सौगन्धिकं तथा गर्ज्जं प्रवालञ्चामयं तथा ॥
गोमेदं रुधिराक्षञ्च तथा भल्लातकं द्विज ।
धलीमरकतञ्चैव तुत्थकं सीसमेव च ॥

पीलुं प्रवालकञ्चैव गिरिवज्रञ्च भार्गव ।
भुजङ्गभामणिश्चैव तथा वज्रमणिः शुभः ॥
तित्तिरञ्च तथा पीतं भ्रामरञ्च तथोत्पलम् ।
वज्राण्येतानि सर्व्वाणि धार्य्याण्येव महीभृता ॥
सुवर्णप्रतिबद्धानि जयारोग्यसमृद्धये ॥"
इति युक्तिकल्पतरुः ॥
तस्योत्पत्तिपरीक्षामूल्यादि यथा,—
"वक्ष्मि परीक्षां रत्नानां बलो नामासुरोऽभवत् ।
इन्द्राद्या निर्ज्जितास्तेन निर्ज्जेतुं तेन मुक्ष्यते ॥"
इत्यपक्रम्य ।
"महाप्रभावं विबुधैर्यस्माद्वज्रमुदाहृतम् ।
वज्रपूर्ब्बा परीक्षेयं ततोऽस्माभिः प्रकीर्त्त्यते ॥
तस्यास्थिलेशो निपपात येषु
सुवः प्रदेशेषु कथञ्चिदेव ।
वज्राणि वज्रायुधनिर्ज्जिगीषो-
र्भवन्ति नानाकृतिमन्ति तेषु ॥
हैममातङ्गसौराष्ट्राः पौण्ड्रकालिङ्गकोशलाः ।
वेणातटाः ससौवीरा वज्रस्याष्टाविधाकराः ॥
आताम्रा हिमशैलजाश्च मुग्धिभा वेणातटीयाः स्मृताः
सौवीरे तुषिताम्बुमेघसदृशाश्चाम्राश्च सौराष्ट्रकाः ।
कालिङ्गाः कनकावदातरुचिराः पीतप्रभाः कोशले
श्यामाः पुष्पभवा मतङ्गविषये नात्यन्तपीतप्रभाः ॥
आढ्यं खलु वर्णतश्च गुणवत् पार्श्वेषु सम्यक् समं
रेखाबिन्दुकलङ्ककाकपदकच्चासादिभिर्व्वर्जितम् ।
लोकेऽस्मिन् परमाणुमात्रमपि यत् वज्रं क्वचिद् दृश्यते
तस्मिन् देवसमाश्रयो ध्रुवमयस्तीक्ष्णाग्रधारं यदि ॥
वज्रेषु वर्णयुक्ता देवानामपि परिग्रहः प्रोक्तः ।
वर्ज्जेष्वस्य विभागः कार्य्यो वर्णाश्रयादेव ॥
हरितसितपीतपिङ्गश्यामाताम्राः स्वभावतो रुचिराः ।
हरिवल्मयुक्तहुतवहपिष्टपतिमरुतां खका वर्णाः ॥
विप्रस्य शुद्धकुसुदस्फटिकावदातः
स्यात् क्षत्रियस्य शुचिवभ्रुविलोचनाभः ।
वैश्यस्य कान्तकदलीदलसन्निकाशः
शूद्रस्य धौतकरवालसमानदीप्तिः ॥
द्वौ वज्रवर्णौ पृथिवीपतीनां
सद्भिः प्रतिष्ठौ न तु सार्व्वजन्यौ ।
यः स्याच्चवाविद्रुमभङ्गगौरो
यो वा हरिद्रारससन्निकाशः ॥
ईशत्वात् सर्व्ववर्णानां गुणवत् सार्व्ववर्णिकम् ।
कामतो धारयेद्राजा न लक्ष्योऽन्यत् कथञ्चन ॥
अधरोत्तरवृत्ता हि यादृक् स्यादर्ब्बसङ्करः ।
ततः कृततरो वर्णो वर्णानां सङ्करो मतः ॥
न च मार्गविभागमात्रवृत्त्या
विदुषा वज्रपरिग्रहो विधेयः ।
गुणवद्गुणसम्पदां विभूति-
र्व्विपरीतो व्यसनोदयस्य हेतुः ॥
एकमपि यस्य पृष्ठं
विदलितमवलोक्यते विशीर्णं वा ।
गुणवदपि तन्न धार्य्यं
वज्रं श्रेयोऽर्थिभिर्भवने ॥
स्फुटिताग्निविशीर्णपृष्ठदेशं
मलवर्णैः पृषतैरुपेतमध्यम् ।
नहि वज्रभृतोऽति वज्रमाशु
श्रियमन्याश्रयलालसां न कुर्य्यात् ॥
यस्यैकदेशः क्षतजावभासो
यदा भवेल्लोहितवर्णचित्रम् ।
न तन्न कुर्य्याद्धियमाणमाशु
स्वच्छन्दमृत्योरपि जीवितान्तम् ॥
कोणाः पार्श्वानि धाराश्च षड्दौ द्वादशेति च ।
उत्तुङ्गसमतीक्ष्णाग्रा वज्रस्याकरजा गुणाः ॥
षट्कोटिशुद्धसमलं स्फुटतीक्ष्णधारं
वर्णान्वितं लघु सुपार्श्वमपेतदोषम् ।
इन्द्रायुधांशुविस्फुरितारुणाभ-
मेवंविधं भुवि भवेत् सुलभं न वज्रम् ॥
तीक्ष्णाग्रं विमलमपेतसर्व्वदोषं
धत्ते यः प्रयततनुः सदैव वज्रम् ।
वृद्धिस्तं प्रतिदिनमेति यावदायुः
श्रीसम्पत्सुतधनधान्यगोपशूनाम् ॥
व्यालवह्निविषव्याघ्रतस्करास्त्रभयानि च ।
दूरात्तस्य निवर्त्तन्ते कर्म्माण्याथर्व्वणानि च ॥
यदि वज्रमपेतसर्व्वदोषं
विभृयात्तरुणविशीर्णतिं गुरुत्वे ।
मणिशास्त्रविदो वदन्ति तस्य
द्विगुणं रूपकलक्षणमग्र्यं मूल्यम् ॥
त्रिभागहीनार्द्धतदर्द्धगौरवं
त्रयोदशं त्रिंशदतोऽर्द्धभागाः ।
अशीतिभागोऽथ शतांशभागः
सहस्रभागोऽल्पसमानयोगः ॥
यत्तण्डुलैर्द्वादशभिः कृतस्य
वज्रस्य मूल्यं प्रथमं प्रदिष्टम् ।
द्वाभ्यां क्रमाद्वानिमुपागतस्य
लेकावसानस्य विनिश्चयोऽयम् ॥
न चापि तण्डुलैरेव वज्राणां धारणक्रमः ।
अष्टाभिः सर्षपैर्गौरैस्तण्डुलं परिकल्पयेत् ॥
यत्तु सर्व्वगुणैर्युक्तं वज्रं तरति वारिणि ।
रत्नवर्गे समस्तोऽपि तस्य धारणमिष्यते ॥
अनेनापि हि दोषेण लक्ष्यालक्ष्येण दूषितम् ।
स्वमूल्यात् दशमं भागं वज्रं लभति मानवः ॥
प्रकटानेकदोषस्य स्वल्पस्य महतोऽपि वा ।
स्वमूल्याच्छतशो भागो वज्रस्य न विधीयते ॥
सृष्टदोषमलङ्कारे वज्रं यद्यपि दृश्यते ।
रत्नानां परिकर्म्मार्थं मूल्यं तस्य भवेन्नहु ॥
प्रथमं गुणसम्पदाश्रयेतं
प्रतिबद्धं ग्रसतेति यच्च दोषम् ।
अलमाभरणेन तस्य राज्ञो
गुणहीनोऽपि मणिर्न भूषणाय ॥
कार्य्या वज्रमधार्य्यं गुणवदपि सुतप्रसूति-
मिच्छन्त्या ।
अन्यच्च दीर्घचिपिटरूक्षादृगुणैर्विमुक्ताच्च ॥
व्यधसा पुष्परागेण तथा गोमेदकेन च ।
वैदूर्य्यस्फटिकाभ्याञ्च काचेनापि पृथग्विधैः ॥
प्रतिरूपाणि कुर्व्वन्ति वज्रस्य कुशला जनाः ।
परीक्षा तेषु कर्त्तव्या विदद्भिः स्वपरीक्षके ॥
क्षारोल्लिखनशालाभिस्तेषां कार्य्यं परीक्षणम् ।
पृथिव्यां यानि रत्नानि ये चान्ये लोहधातवः ॥
सर्व्वाणि विलिखेद्वज्रं तच्च तैर्न विलिख्यते ॥
गुरुता सर्व्वरत्नानां गौरवाधारकारणम् ।
वज्रे तान्येपरीक्षेण क्षयः परिचक्षते ॥
जातिरजातिं विलिखन्ति वज्रकुरुविन्दाः ।
वज्रेवज्रं विलिखति नान्येन लिख्यते वज्रम् ।
वज्राणि सुक्ष्मा मणयो ये च केचन जातयः ।
न तेषां प्रतिबद्धानां भा भवत्यूर्द्धगामिनी ॥
तिर्य्यक्त्वतत्वात् केषाञ्चित् कथञ्चिद्यदि
दृश्यते ।
तिर्य्यग्लिख्यमानानां सा पार्श्वेष्वपि दृश्यते ॥
यद्यपि विशीर्णकोटिः
सबिन्दुरेखान्वितो विवर्णो वा ।
तदपि धनधान्यपुत्रान्
करोति सेन्द्रायुधो वज्रः ।
सौदामिनीविस्फुरिताभिरामं
राजा यथोक्तं कुलिशं दधानः ।
पराक्रमाक्रान्तपरप्रतापः
समस्तसामन्तसुखं सुनक्ति ॥"
इति गारुडे ६८ अध्यायः ॥
वज्रार्थे वैद्यिकपर्य्यायो यथा । विद्युत् २ मेघिः २ हेतिः ३ नभः ४ पविः ५ शुक्रः ६ शुक्रः ७ वधः ८ वज्रः ९ अर्कः १० कुत्सः ११ कुलिशः १२ तुजः १३ तिग्मम् १४ मेनिः १५ स्वधितिः १६ सायकः १७ परशुः १८ । इत्यष्टादश वज्रनामानि । इति वैद्यनिघण्टौ । २ । २० ॥
वज्रं, क्ली, (वज गतौ + क्रन्नेक्रेति रन् ।) बालकः । धात्री । इति मेदिनी । रे, ६ ॥ आङ्गिकम् । इति धरणिः ॥ वज्रपुष्पम् । इति शब्दरत्नावली ॥ लौहविशेषः । स च बहुविधो यथा । नीलप्रियङ्गम् १ अरुणाभम् २ मोरङ्गम् ३ नागकेशरम् ४ तित्तिराङ्गम् ५ सर्व्ववज्रम् ६ ग्रीवावज्रम् ७ ग्रीववज्रम् ८ दोषिणी ९ काञ्चोलम् १० ग्रन्थिवज्रकम् ११ मद्गराख्यम् १२ इत्यादि । तेषां नामानुरूपं चिह्नम् । इति पुराणम् ॥ अथविशेषः । तस्योत्पत्त्यादि यथा,—
"पुरा प्रधाय वृत्रस्य वधिता वज्रमुद्यतम् ।
विस्फूर्जिज्वालतत्तस्य गगने परिचक्रमुः ॥
ते निपेतुर्वनध्वानाच्छिखरेषु महीभृताम् ।
तेभ्य एव समुत्पन्नं तत्तन्निरिषु चाश्मकम् ॥
तद्वज्रं वज्रजातत्वादश्मभ्यस्तेजसात् ।

गगनात् स्खलितं यस्मात् गगनञ्च ततो मतम् ॥
पिनाकं दर्दुरं नागं वज्रमेति चतुर्विधम् ।
वज्रन्तु वज्रवत् तिष्ठेत् तन्नाम्नौ विकृतिं व्रजेत् ॥
सर्व्वाभ्येषु वरं वज्रं व्याधिवार्द्धक्यमृत्युहृत् ॥"

इति भावप्रकाशः ॥

वज्रः, पुं, (वज्र+रन् ।) कोकिलाच्छदृक्षः । श्वेतकुशः । इति राजनिर्घण्टः ॥ सेहुण्डवृक्षः । इति भावप्रकाशः ॥ श्रीकृष्णप्रपौत्रः । यथा,—

"अनिरुद्धात् सुभद्रायां वज्रो नाम नृपोऽभवत् ।
प्रतिबाहुर्वज्रसुतश्चारुस्तस्य सुतोऽभवत् ॥"

इति गारुड़े १४४ अध्यायः ॥

अपि च ।

"प्रद्युम्न आसीत् प्रथमः पित्रवद्रुक्मिणीसुतः ।
स रुक्मिणो दुहितरमुपयेमे महारथः ॥
तस्यां ततोऽनिरुद्धोऽभून्नागायुतबलान्वितः ।
स चापि रुक्मिणः पौत्रीं दौहित्रो जगृहे ततः ॥
वज्रस्तस्यामभूद्यस्तु मौषलादवशेषितः ।
प्रतिबाहुरभूत्तस्मात् सुबाहुस्तस्य चात्मजः ॥"

इति श्रीभागवते १० स्कन्धे ६० अध्यायः ॥*॥

(विश्वामित्रपुत्रभेदः । यथा, महाभारते । १३ । ३ । ५१ ; ५६ ।

"वलगुजङ्घश्च भगवान् गालवश्च महातपाः ।
रुचिर्वज्रश्च विख्यातः सालङ्कायन एव च ॥"

"विश्वामित्रात्मजाः सर्व्वे मुनयो ब्रह्मवादिनः ॥") विष्कम्भादिसप्तविंशतियोगान्तर्गतपञ्चदशयोगः । तस्याद्यनवदण्डा वर्জ্জनीया यथा,—

"त्यजादौ पञ्च विष्कम्भे सप्त शूले च नाड़िकाः ।
गण्ड व्याघातयोः षट् च नव हर्षणवज्रयोः ॥
वैधृतिव्यतिपातौ च समस्तौ परिवर्জ্জयेत् ।
शेषा यथार्थनामानो योगाः कार्य्येषु शोभनाः ॥"

इति ज्योतिस्तत्त्वम् ॥

अत्र जातफलं यथा,—

"गुणी गुणज्ञो बलवान् महौजाः
सद्रत्नवस्त्रादिपरीक्षकः स्यात् ।
वज्राभिधाने यदि चेत् प्रसूतो
वज्रोपमः स्यात्रिपुकामिनीनाम् ॥"

इति कोष्ठीप्रदीपः ॥

वज्रकं, क्ली, (वज्र+संज्ञायां कन् ।) वज्रक्षारम् । इति राजनिर्घण्टः ॥ (यथा, सुश्रुते चिकित्सितस्थाने ६ अध्याये । तैलं वज्रकभृङ्गार्थे ॥) सर्व्वतोभद्रचक्रान्तर्गतसूर्य्यभोग्यनक्षत्रात् त्रयोविंशनक्षत्रात्मक उपग्रहः । यथा,—

"सूर्य्यभात् पञ्चमं धिष्ण्यं शेषं विद्युन्मुखाभिधम् ।
शून्यञ्चाष्टमगं प्रोक्तं सन्निपातं चतुर्दशम् ॥
केतुमष्टादशं प्रोक्तमुल्का स्यादेकविंशतिः ।
द्वाविंशतितमं कम्पं त्रयोविंशञ्च वज्रकम् ।
निर्घातञ्च चतुर्व्विंशमुक्ता अष्टावुपग्रहाः ॥"

इति ज्योतिस्तत्त्वम् ॥

वज्रकटः, पुं, (वज्रः कटको देहावरणमस्य ।) हनूमान् । इति हेमचन्द्रः । ३ । ३७० ॥

वज्रकण्टकः, पुं, (वज्रस्य कण्टकमिव तदाकारत्वात् ।) स्नुहीवृक्षः । इति जटाधरः ॥ कोकिलाक्षवृक्षः । इति राजनिर्घण्टः ॥

वज्रकन्दः, पुं, (वज्राकारः कन्दोऽस्य ।) वज्रकर्णः । इति रत्नमाला ॥ सकरकन्द आलु इति भाषा ॥

वज्रकपाली, [न्] पुं, (वज्रकपालोऽस्यास्तीति । इनिः ।) क्षुद्रविघ्नेशः । तत्पर्य्यायः । हेरम्बः २ हैरुकः ३ चक्रसम्बरः ४ देवः ५ निघुम्भीशः ६ अग्निशेखरः ७ वज्रटीकः ८ । इति हेमचन्द्रः ॥

वज्रकालिका, स्त्री, (वज्रोपलक्षिता कालिका ।) मायादेवी । इति हेमचन्द्रः ॥

वज्रकेतुः, पुं, (वज्रं केतुश्चिह्नमस्य ।) नरकराजः । यथा,—

"गते वशिष्ठे नरकः शीघ्रं विस्मयसंयुतः ॥"

इत्युपक्रम्य ॥

"इति यामीन्मतिस्तस्य वज्रकेतोस्तदा चला ।
दूतञ्च प्राहिणोत् यस्तं वाणस्य नगरं प्रति ॥"

इति कालिकापुराणे ३८ अध्यायः ॥

वज्रक्षारं, क्ली, (वज्रसंज्ञकं क्षारमिति ।) क्षारविशेषः । तत्पर्य्यायः । वज्रकम् २ क्षारश्रेष्ठम् ३ विदारकम् ४ सारः ५ चन्दनारः ६ धूमोत्थम् ७ धूमजाङ्गकम् ८ । अस्य गुणाः । अत्युष्णत्वम् । तीक्ष्णत्वम् । क्षारत्वम् । रेचनत्वम् । गुल्मोदरार्त्तिविष्मश्रमप्रशमनत्वम् । सरत्वञ्च । इति राजनिर्घण्टः ॥ (भक्षणीयौषधविशेषः । तद्यथा,—

"सामुद्रं सैन्धवं काचं यवक्षारं सुवर्चलम् ।
टङ्कणं सर्জ्जिका क्षारं तुल्यं सर्व्वं विचूर्णयेत् ॥
अर्कक्षीरैः स्नुहीक्षीरैरातपे भावयेत् क्षारम् ।
तेन लिप्त्वार्कपत्रञ्च रुद्ध्वा चान्तः पुटे पचेत् ॥
तत् क्षारं चूर्णयेत् पश्चात् चूर्णषष्ठिफलारजः ।
जीरकं रजनी वह्निं नवभागं समं समम् ॥
क्षारार्द्धमेवं सर्व्वञ्च एकीकृत्य प्रयोजयेत् ।
वज्रक्षारमिदं सिद्धं स्वयं प्रोक्तं पिनाकिना ॥
सर्व्वोदरेषु गुल्मेषु शूलदोषेषु योजयेत् ।
अग्निमान्द्येऽप्यजीर्णेऽपि भक्ष्यं निष्कट्टयं दयम् ॥
वाताधिके जलं कोष्णं घृतं वा पैत्तिके हितम् ।
कफे गोमूत्रसंयुक्तमारनालं चिदोषजे ॥"

इति वैद्यकरत्नेन्द्रसारसंग्रहे क्षौद्राधिकारे ॥*॥)

वज्रचर्म्मा, [न्] पुं, (वज्रवत् दुर्भेद्यं चर्म्म यस्य ।) खड्गी । गण्डकम् । इति राजनिर्घण्टः ॥

वज्रजित्, पुं, (वज्रं जयति तस्याघातसहनेनेति । जि+क्विप् । "इकस्य पिति क्ङिति तुक् ।" ६ । १ । ७१ । इति तुगागमश्च ।) गरुड़ः । इति हेमचन्द्रः । २ । १४५ ॥

वज्रज्वाला, स्त्री (वज्रस्य ज्वाला ।) वज्राग्निः । इति हलायुधः ॥ (यथा, मात्स्ये । १२१ । १४ । "वज्रज्वालान्तरमयः प्राग्मलश्चान्तरालकृत् ॥")

वज्रटीकः, पुं, (वज्रेण वज्रकपालेन टीकते प्रकाशते इति । टीक+कः ।) वज्रकपाली नामकक्षुद्रः । इति त्रिकाण्डशेषः ॥

वज्रतुण्डः, पुं, (वज्रं वज्रतुल्यं कठिनन्तुण्डं यस्य ।) गरुड़ः । गणेशः । इति त्रिकाण्डशेषः ॥ गृध्रः । मशकः । इति राजनिर्घण्टः ॥ (वज्रतुण्डधरे, त्रि । यथा, भागवते । ५ । २६ । ३५ ।

"यस्त्विह वा अतिथीनभ्यागतान् वा गृहपतिरसकृदुपगतमन्युर्दिधक्षुरिव पापेन चक्षुषा निरीक्षते तस्य चापि निरये पापदृष्टेरक्षिणी वज्रतुण्डा गृध्रकङ्ककाकवटादयः प्रसह्योरुबलादुत्पाटयन्ति ॥") वज्रदन्तः, पुं, (वज्रमिव कठिना दन्ता यस्य ।) शूकरः । मूषिकः । इति शब्दमाला ॥

वज्रदशनः, पुं, (वज्रमिव कठिनं दशनमस्य ।) मूषिकः । इति हेमचन्द्रः । ४ । ३६६ ॥

वज्रद्रुः, पुं, (वज्रवारको द्रुः ।) स्नुहीवृक्षः । इत्यमरः ॥

वज्रद्रुमः, पुं, (वज्रवारको द्रुमः ।) स्नुहीवृक्षः । इति शब्दरत्नावली ॥ (तथास्य पर्य्यायः ।

"सेहुण्डः सिंहतुण्डः स्यादथो वज्रद्रुमोऽपि च ।
सुधासमन्तदुग्धा च स्नुक्क्षीरी स्यात् स्नुहीगुड़ा ॥"

इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥)

वज्रधरः पुं, (धरतीति । धृ+अच् । वज्रस्य धरः ।) इन्द्रः । इति हलायुधः ॥ (यथा, महाभारते । ३ । ११३ । २३ ।

"अरुन्धती वा सुभगा वशिष्ठं
लोपामुद्रा वापि यथा ह्यगस्त्यम् ।
नलस्य वा दमयन्ती यथाभूद्
यथा शची वज्रधरस्य चैव ॥")

जिनविशेषः । इति त्रिकाण्डशेषः ॥ (वज्राधिपतिराजविशेषः । यथा, राजतरङ्गिण्याम् । ८ । ५४० ।

"उपरागे नवे सर्व्वे पार्व्वतीयास्त्रयो नृपाः ।
चाम्पेयो जाबटो वज्रधरो वज्राधिपः ॥") वज्रनिर्घोषः, पुं, (वज्रस्य निर्घोषः ।) वज्रजनितशब्दः । इति हलायुधः ॥

वज्रनिष्पेषः, पुं, (वज्राणां निष्पेषः संघर्षध्वनिः ।) वज्रनिर्घोषः । तत्पर्य्यायः । स्फुर्জथुः २ । इत्यमरः । १ । ३ । १० ॥ "द्वे वज्रजनितशब्दे । अन्योन्यसंघट्टनात् भग्नं साग्निमेघखण्डं वज्रमिव वज्रं तस्य साटोपध्वनौ द्वयमिति केचित् ॥ द्वौ स्फुर्জौ वज्रनिष्पेषे । निष्पेषः संघट्टध्वनिः । अशन्याघात इत्येके । निष्पेषश्चूर्णनं साटोपध्वनिश्च इह तु ध्वनिरभिप्रेतः । श्रुत्वा विस्फुर्জथुप्रख्यं निनादं परिदेविनीति भट्टिः । स्फुर्जेरथुरिति अथुः निपातनात् दीर्घः । स्फुर्जेरथुरिति दीर्घार्थं परसूत्रम् । केचित्तु दीर्घं नेच्छन्ति । केचिद्विभाषया दीर्घमिच्छन्ति । वज्रस्य निष्पेषो वज्रनिष्पेषः धौ पिष लृ चूर्णने घञ् । निष्पेषो द्विर्मूर्द्धन्यः ।" इति भरतः ॥

वज्रपाणिः, पुं, (वज्रं पाणौ यस्य ।) इन्द्रः । इति त्रिकाण्डशेषः ॥ (यथा, महाभारते । ६ । १६ । ७ । "एष यूहामि ते यूहं राजसत्तम दुर्জयम् ।

अचलं नाम वज्राख्यं विहितं वज्रपाणिना॥" ब्राह्मणः। यथा, महाभारते। १।१७१।५१।
"वज्रपाणिर्ब्राह्मणः स्यात् क्षत्रं वज्ररथं स्मृतम्।
वैश्या वै दानवज्राश्च कर्म्मवज्रा यवीयसः॥")
वज्रपुष्पं, क्ली, (वज्रमिव पुष्पम्।) तिलपुष्पम्। इत्यमरः। २।४।७६॥
वज्रपुष्पा, स्त्री, (वज्रमिव पुष्पं यस्याः।) शतपुष्पा। इति राजनिर्घण्टः॥
वज्रबीजकः, पुं, (वज्रमिव कठिनं बीजमस्य। कप्।) लताकरञ्जः। इति राजनिर्घण्टः॥
वज्रमूली, स्त्री, (वज्रमिव कठिनं मूलं यस्याः। ङीष्।) माषपर्णी। इति राजनिर्घण्टः॥
(विवरणमस्या माषपर्णीशब्दे ज्ञातव्यम्॥)
वज्ररथः, पुं, (वज्रमिव रथो यस्य।) क्षत्रियः। इति पुराणम्॥ (यथा, महाभारते।१।१७१।५१।
"वज्रपाणिर्ब्राह्मणः स्यात् क्षत्रं वज्ररथं स्मृतम्॥")
वज्ररदः, पुं, (वज्रमिव रदोऽस्य।) शूकरः। इति त्रिकाण्डशेषः॥ वज्रतुल्यदन्तश्च॥
वज्रवल्ली, स्त्री, (वज्रमिव कठिना वल्ली।) अस्थिसंहारलता। इति हारावली॥
वज्रवाराही, स्त्री, मायादेवी। तत्पर्य्यायः। मारीची २ त्रिमुखा ३ वज्रकालिका ४ विकटा ५ गौरी ६ प्रोच्चिरथा ७। इति त्रिकाण्डशेषः॥
वज्रवृक्षः, पुं, (वज्रनिवारको वृक्षः।) सेहुण्डवृक्षः। इति राजनिर्घण्टः॥ (तथास्यान्यः पर्य्यायो यथा, वैद्यकरत्नमालायाम्।
"स्नुही स्नुक् च महावृक्षो वज्रवृक्षः सुधागुड़ा॥")
वज्रशल्यः, पुं, (वज्रमिव कठिनं शल्यं गात्रलोमशूलाका यस्य।) शल्यकनामा जन्तुः। इति राजनिर्घण्टः॥
वज्रशृङ्खला, स्त्री, (वज्रवत् शृङ्खलं यस्याः।) विद्यादेवी। इति हेमचन्द्रः। २।१५३॥
वज्रसूर्य्यः, पुं, (अतिसारवत्त्वात् वज्रमिव तेजस्वित्वात् सूर्य्य इव च।) बुद्धविशेषः। इति त्रिकाण्डशेषः॥
वज्रा, स्त्री, (वजति गच्छतीति। वज गतौ+"ऋज्रेन्द्रेति।" उणा० २।२८। इति रक्। टाप्।) स्नुहीवृक्षः। गुड़ूची। इति मेदिनी। रे, ८१॥ दुर्गा। यथा,—
"वज्राङ्गशकरी देवी वज्रा तेनोपगीयते॥"
इति देवीपुराणे ४५ अध्यायः॥
वज्राङ्गः, पुं, (वज्रमिव अङ्गं यस्य।) सर्पः। इति राजनिर्घण्टः॥ वक्राङ्ग इति वा पाठः। वज्रतुल्याङ्गयुक्ते, त्रि॥
वज्राङ्गी, स्त्री, (वज्रमिव अङ्गं यस्याः। ङीष्।) गवेधुका। इति शब्दचन्द्रिका॥ अस्थिसंहारी। इति भावप्रकाशः॥
वज्राभः, पुं, (वज्रस्य हीरकस्य आभा इव आभा यस्य।) दुग्धपाषाणः। इति राजनिर्घण्टः॥ हीरकतुल्यदीप्तिमति, त्रि॥

वज्राशनिः, पुं, वज्रम्। इति त्रिकाण्डशेषः॥
वज्रास्थिशृङ्खला, स्त्री, कोकिलाक्षवृक्षः। इति राजनिर्घण्टः॥
वज्री, [न्] पुं, (वज्रोऽस्यास्तीति। वज्र+"अत इनिठनौ।" ५।२।११५। इति इनिः।) इन्द्रः। इत्यमरः। १।१।४५॥ (यथा, रघुः। ६।२४।
"यमकुबेरजनेश्वरवज्रिणां
समधुरं मधुरश्चितविक्रमम्॥")
बुद्धः। इति मेदिनी। नि, १२६॥ (वज्रविशिष्टे, त्रि। यथा, महाभारते। १३।१४।३८१।
"पिनाकिनं वज्रिणं तीक्ष्णदंष्ट्रं
शुभाङ्गदं बालयज्ञोपवीतम्॥")
वज्री, स्त्री, (वज्र+रक्। गौरादित्वात् ङीष्।) स्नुहीभेदः। इति मेदिनी। रे, ८१॥ (तथास्याः पर्य्यायः।
"सेहुण्डः सिंहतुण्डः स्याद्वज्री वज्रद्रुमोऽपि च।
सुधासमन्दुग्धा च स्नुक् स्त्रियां स्यात् स्नुहीगुड़ा॥"
इति भावप्रकाशस्य पूर्ब्बखण्डे प्रथमे भागे॥)
वञ्चकः, पुं, (वञ्चयते प्रतारयतीति। वञ्च+ण्वुच्+खल्।) शृगालः। इत्यमरः॥ गृहवभ्रुः। इति मेदिनी। के, १५४॥
वञ्चकः, त्रि, (वञ्चयते इति। वञ्च+णिच्+खुल्।) खलः। धूर्त्तः। इति मेदिनी। के, १५४॥ (यथा, कलाविलासे। १।३६।
"शृणु पुत्र वञ्चकानां सकलकलाहृदयसारमतिकुटिलम्।
ज्ञाते भवन्ति यस्मिन् क्षणरुचिचपलाः स्त्रियोऽप्यचलाः॥")
वञ्चयः, पुं, (वञ्चति प्रतारयतीति। वञ्च+"शीङ्शपीति।" उणा० ३।११३। इति अयः।) धूर्त्तः। इत्युणादिकोषः॥ वञ्चना। कोकिलः। इति संक्षिप्तसारोणादिवृत्तिः॥
वञ्चनं क्ली, (वञ्च+भावे ल्युट्।) प्रतारणम्। इति हेमचन्द्रः। ३।४३॥ तस्य गोपनीयत्वम्। यथा,—
"वञ्चनञ्चापमानञ्च मतिमान्न प्रकाशयेत्॥"
इति चाणक्यसंग्रहः॥
वञ्चना, स्त्री, (वञ्च+णिच्+युच्+टाप्।) प्रतारणा। यथा,—
"ते कान्तं सुनयो दिशः प्रेक्ष्य हैमवतं पुरम्।
स्वर्गाभिसन्धि सुकृतं वञ्चनामिव मेनिरे॥"
इति कुमारसम्भवे। ६।४७॥
वञ्चितः, त्रि, (वञ्च्यते स्मेति। वञ्च+णिच्+क्तः।) वञ्चनाविशिष्टः। प्रतारितः। तत्पर्य्यायः। विप्रलब्धः २। इति हेमचन्द्रः। ३।१०६॥ (यथा, कुमारे। ४।१०।
"विधिना जन एष वञ्चित-
स्त्वदधीनं खलु देहिनां सुखम्॥")

वञ्चुकः, त्रि, (वञ्चति प्रतारयतीति। वञ्च+उकञ्।) प्रतारणशीलः। तत्पर्य्यायः। धूर्त्तः २ वञ्चूकः ३। इति शब्दरत्नावली॥
वञ्च्य, त्रि, (वञ्च्+ण्यत्। "वञ्चेर्गतौ।" ७।३।६२। इति कुत्वं न।) गमनीयम्। इति गत्यर्थवञ्चधातोः कर्म्मणि ण्यगुप्रत्ययेन निष्पन्नम्। इति मुग्धबोधव्याकरणम्॥
वञ्जुलः, पुं, (वञ्जतीति। वञ्ज गतौ+बाहुलकात्। उलच् नुमागमश्च।) तिनिशवृक्षः। (तथास्य पर्य्यायः।
"तिनिशः स्यन्दनो नेमी रथद्रुर्व्वञ्जुलस्तथा॥"
इति भावप्रकाशस्य पूर्ब्बखण्डे प्रथमे भागे॥) अशोकवृक्षः। इत्यमरः। २।४।२७॥ स्थलपद्मवृक्षः। इति शब्दरत्नावली॥ पक्षिविशेषः। इति हलायुधः॥ वेतसवृक्षः। इति मेदिनी। ले, १२६॥ (अस्य पर्य्यायो यथा,—
"वेतसो नक्रकः प्रोक्तो वानीरो वञ्जुलस्तथा।
अभ्रपुष्पश्च विदुलो ह्यथ शीतश्च कीर्त्तितः॥"
इति भावप्रकाशः॥
यथा च रामायणे। ६।४।७६।
"चिरबिल्वा मधूकाश्च वञ्जुला वकुलास्तथा॥")
वञ्जुलद्रुमः, पुं, (वञ्जुलो द्रुमः।) अशोकवृक्षः। इति राजनिर्घण्टः॥ (वेतसवृक्षादिरपि तदर्थं वञ्जुलशब्ददर्शनात्॥)
वञ्जुलप्रियः, पुं, (वञ्जुलस्य प्रियः। वञ्जुलः प्रियश्चेति कर्म्मधारयो वा।) वेतसवृक्षः। यथा,
"विदुलो वेतसः शीतो वानीरो वञ्जुलप्रियः॥"
इति रत्नमाला॥
वञ्जुला, स्त्री, (वञ्जुल+टाप्।) बहुदुग्धा गौः। इति हेमचन्द्रः। ४।३३५॥ (नदीविशेषः। यथा, मात्स्ये। ११३।२६।
"गोदावरी भीमरथी कृष्णवेणी च वञ्जुला।
तुङ्गभद्रा सुप्रयोगा बाह्या कावेरी चैव तु।
दक्षिणापथनद्यस्ताः सह्यपादाद्विनिःसृताः॥")
वट, वेष्टे। इति कविकल्पद्रुमः॥ (भ्वा०-पर०-सक०-सेट्।) वटति वृत्तं सता। इति दुर्गादासः॥
वट, इ क्लेये। सौत्रधातुरयम्। इति कविकल्पद्रुमः॥ (भ्वा०-पर०-सक०-सेट्। इदित्।) इ, वण्टकः। इति दुर्गादासः॥
वट, इ कि वण्टने। इति कविकल्पद्रुमः॥ (चुरा०-पक्षे भ्वा०-पर०-सक०-सेट्।) वण्टनं विभागः। इ, वण्टयते। कि, वण्टयति वण्टति। वण्टन्ति घाटकं यस्मात् प्राप्य विप्राः परस्परम्। इति हलायुधः। अयं चुरादौ केचिन्न पठ्यते। इति दुर्गासिंहादयः। इति दुर्गादासः॥
वट, तृ क वेष्टे। भागे। इति कविकल्पद्रुमः॥ (अदन्तचुरा०-पर०-सक०-सेट्।) वटयति। इति दुर्गादासः॥
वट, म उक्तौ। इति कविकल्पद्रुमः॥ (भ्वा०-पर०-सक०-सेट्।) म, वटयति। इति दुर्गादासः॥

वटः

वटः, पुं, (वटति वेष्टयति मूलेन वृक्षान्तरमिति।) वट्+पचाद्यच्।) वृक्षविशेषः। बड़गाछ इति भाषा। तत्पर्य्यायः। न्यग्रोधः २ बहुपात् ३। इत्यमरः। २। ४। ३२॥ वृक्षनाथः४ यमप्रियः ५। इति शब्दरत्नावली॥ रक्तफलः ६ भृङ्गी ७ कर्म्मजः ८ ध्रुवः ९ क्षीरी १० वैश्रवणावासः ११ भाण्डीरः १२। इति जटाधरः॥ जटालः १३ रोहिणः १४ अवरोही१५ विटपी १६ स्कन्धरुहः १७ मण्डली १८ महाच्छायः १९ भृङ्गी २० यक्षावासः २१ यक्षतरुः २२ पादरोहणः २३ नीलः २४ शिफारुहः २५ बहुपादः २६ वनस्पतिः २७। अस्य गुणाः। कषायत्वम्। मधुरत्वम्। शिशिरत्वम्। कफपित्तच्छर्दिदाहव्रणमोहव्रणशोफनाशित्वञ्च। इति राजनिर्घण्टः॥ अपि च।

"वटः शीतो गुरुर्याही कफपित्तव्रणापहः।
वर्ण्यो विसर्पदाहघ्नः कषायो योनिदोषहृत्॥"

इति भावप्रकाशः॥ * ॥

स च वृक्षस्वरूपः। यथा,—

ऋषय ऊचुः।

"कथं त्वयाश्वत्थवटौ गोब्राह्मणसमौ कृतौ।
सर्व्वेभ्योऽपि तरुभ्यस्तौ कथं पूज्यतमौ कृतौ॥

सूत उवाच।

अश्वत्थरूपो भगवान् विष्णुरेव न संशयः।
वृक्षरूपो वटस्तद्वत् पलाशो ब्रह्मरूपधृक्॥
दर्शनस्पर्शनसेवासु ते वै पापहराः स्मृताः।
दुःखापद्व्याधिदुष्टानां विनाशकारिणौ ध्रुवम्॥"

इति पाद्मोत्तरखण्डे १६० अध्यायः॥

अन्यत् पलाशशब्दे द्रष्टव्यम्॥*॥ कपर्दः। इति मेदिनी। टे, २४॥ कड़ि इति भाषा॥ गोलः। भक्ष्यम्। बड़ा इति भाषा। साध्यम्। इति हेमचन्द्रः॥ * ॥ क्ली, व्रजमण्डलाभ्यन्तरीयवटसंज्ञकषोड़शवनानि यथा। अथैषां षट्साङ्गवनानामभ्यन्तरे सङ्केतवटाद्या यमुनायाश्चतुरशीतिक्रोशमर्य्यादान्तरे दधिबोत्तरतटयोः षोड़शवनानि। पाद्मे।

"सङ्केतवटमादौ तु भाण्डीराख्यं वटं ह्यथम्।
भाण्डीराख्यं तृतीयञ्च वटं शृङ्गारसंज्ञकम्॥
तूर्य्यं वंशीवटं श्रेष्ठं पञ्चमं श्रीवटञ्च षट्।
सप्तमञ्च जटाजूटं कामाख्यवटमष्टकम्॥
अतोऽर्थवटकं नाम नवमं परिकीर्त्तितम्।
आम्रावटं महाश्रेष्ठं दशमं शुभदायकम्॥
अशोकाख्यं वटं श्रेष्ठमेकादशसुदाहृतम्।
नाम केलिवटं श्रेष्ठं द्वादशं परिकीर्त्तितम्॥
नाम भद्रवटञ्चैव चयोदशमसंज्ञकम्।
नाम वृन्दवटं श्रेष्ठं चतुर्दशसुदाहृतम्॥
श्रीधराख्यं वटं ख्यातं पञ्चदशमभीरितम्।
सावित्र्याख्यं वटं श्रेष्ठं संख्याषोड़शनिर्म्मितम्॥"

इति व्रजमण्डलान्तरे षोड़शवटानि। इति नारायणभट्टकृतव्रजभक्तिविलासः॥ * ॥

वटः, त्रि, (वटतीति। वट्+अच्।) गुरुः। इति मेदिनी। टे, २४॥ वेटे इति भाषा॥

वटक:

वटकः, पुं, (वट एव। स्वार्थे कन्।) पिष्टकविशेषः। इत्यमरभरतौ॥ वड़ा इति भाषा। अस्य गुणौ। विदाहित्वम्। क्षुधाकारित्वञ्च। इति राजवल्लभः॥ अपि च।

"माषाणां पिष्टिकां युक्तां लवणार्द्रकहिङ्गुभिः।
कृत्वा विदध्याद्वटकांस्तांस्तैलेषु पचेच्छनैः॥
विशुष्का वटका वल्या दृंहणा वीर्य्यवर्द्धनाः।
वातामयहरा रुच्या विप्लेषादर्दितापहाः॥
विबन्धभेदिनः श्लेष्मकारिणोऽत्यग्निपूजिताः।
संचूर्ण्य निक्षिपेत्तक्रे भृष्टं जीरकहिङ्गु च॥
लवणं तच्च वटकान् सकलानपि मज्जयेत्।
शुक्रलस्तच्च वटको बलवृद्रोचनो गुरुः॥
विबन्धकृद्विदाही च श्लेष्मलः पवनापहः।
राज्यक्तयातिरोचिन्या पाचन्या तांस्तु भक्षयेत्॥

तत्प्रकारा यथा।

कदलसुमनमाषचोदसत्तौरिशस्यै-
र्मरिचसुघनदुग्धैः सचतुर्ज्जातचन्द्रैः।
कृत इह घृतपक्वो यः पतेत् खण्डपाके
वटकमण्डतकेलिं सा वधात्तं प्रियेष्टम्॥ १॥
सामिचैः प्रालिचूर्णैर्दधिमरिचसिताजारिकेलार्द्रशस्यै-
र्जात्येलासल्लवङ्गाष्टतकदलफलैः फेणिते पिष्टसुद्गैः।
हृष्टः पक्वो घृते यः प्रपतति समधौ दुग्धपूरे प्रगाढ़े
सेन्दौ कर्पूरकेलिं तमिह सुवटकं सा वधात् स्वप्रियेष्टम्॥ २॥
ग्रन्थिवद्वटिकालिस्तैर्द्रव्यैः स्पृष्टा तु या पतेत्।
पक्वाम्लते वधात्तां सा पीयूषग्रन्थिपालिकाम्॥३
सच्चीरसारघृतिशष्कुलनारिकेल-
जातीलवङ्गमरिचैः सशितैः सुपिष्टैः।
रम्भेलया च घृतभावनया भवेद्या
सा तामनङ्गगुटिकां विदधे प्रियेष्टाम्॥४॥
कदलमरिचदुग्धैः खण्डगोधूमपक्व-
प्रकटितवटकोऽयं भूरिजातीफलाढ्यः।
नवविधुमधुमध्ये यो विलासं विधत्ते
रचित इह तयासौ सौधुपूर्व्वो विलासः॥५॥
लवङ्गैलेन्दुमरिचैः संयुतैः शर्करान्वयैः।
चक्रे गङ्गाजलाख्यानि लड्डुकान्यपराणि च॥६
तिलैर्युतैः क्षीरसारैस्तथा लाङ्गलिशष्कुकैः।
अन्यान्यपाण्यसंभृष्टैः सा रसैः सरपूपिका॥"७

इति रघुनाथभट्टकृते गोविन्दलीलाम्ते १६ सर्गः॥ * ॥ अथाम्बिकावटकः।

"अम्बिकां खेदयित्वा तु जलेन सह मर्द्दयेत्।
तन्नीरे कृतसंस्कारे वटकान् मज्जयेत्ततः॥
अम्बिकावटकास्ते तु रुच्या वह्निप्रदीपनाः।
वटकस्य गुणैः पूर्व्वैरेतेऽपि च समन्विताः॥*॥

अथ तक्रवटकः।

मुद्गानां वटकास्तक्रे मज्जिता लघवो हिमाः।
संस्कारजप्रभावेण त्रिदोषघ्नमना हिताः॥*॥

अथ माषवटकः।

माषाणां पिष्टिका हिङ्गुलवणार्द्रकसंस्कृताः।

वटवा

तया विरचिता वह्नौ वटिकाः साधु शोषिताः॥
तालितास्तप्ततैले ता अथवा सुप्तलेहिताः।
वटकस्य गुणैर्युक्ता ज्ञातव्या रुचिदा भृशम्॥*

अथ कुष्माण्डवटिः।

कुष्माण्डकवटी ज्ञेया पूर्व्वोक्तवटिकागुणा।
विप्लेषात् पित्तरक्तघ्नी सघ्वी च कथिता बुधैः॥

अथ मुद्गवटिका।

मुद्गानां वटिका तद्वद्द्रविता साधिता तथा।
पथ्या रुच्या ततो सघ्वी मुद्गरूपगुणा स्मृता॥"

इति भावप्रकाशः॥*॥

(वटी। वड़ि इति भाषा॥ यथा,—

"वटका अथ कथ्यन्ते तन्नाम गुटिका वटी।
मोदको वटिका पिण्डी गुड़ोवर्त्तिस्तथोच्यते॥
लेहवत् साध्यते वह्नौ गुड़ो वा शर्करापि वा।
गुग्गुलुर्वा क्षिपेत्तत्र चूर्णं तन्मिश्रिता वटी॥"

इति भावप्रकाशस्य पूर्व्वखण्डे द्वितीये भागे॥

यथा च।

"मद्गूरं चूर्णयेच्छुद्धं गोमूत्रेऽष्टगुणे क्षिपेत्।
पक्त्वा च वटकं कृत्वा दद्यात्तक्रानुपानतः॥"

इति शार्ङ्गधरे मध्यखण्डे सप्तमेऽध्याये मद्गूरवटके॥ * ॥) अष्टमाषकपरिमाणम्। यथा,—

"दशगुञ्जास्तु माषः स्यात् शाणो माषचतुष्टयम्।
द्वौ शाणौ वटकः कोलस्तोलको द्रङ्क्षणश्च सः॥"

इति शब्दमाला॥

(तथा च।

"माषैश्चतुर्भिः शाणः स्याद्वटकः स निगद्यते।
टङ्कः स एव कथितस्तद्वयं कोल उच्यते।
क्षुद्रको वटकश्चैव द्रङ्क्षणः स निगद्यते॥"

इति शार्ङ्गधरे पूर्व्वखण्डे प्रथमेऽध्याये॥)

वटपत्रः, पुं, (वटस्येव पत्रं यस्य।) खिताजकः। इति राजनिर्घण्टः॥ (तथास्य पर्य्यायः।

"वर्व्वरी तुवरी तुङ्गी खरपुष्पाजगन्धिका।
पर्णाख्यस्तत्र कृष्णे तु कठिञ्जककुठेरकौ॥
तत्र शुक्लेऽर्ज्जकः प्रोक्तो वटपत्रस्ततोऽपरः॥"

इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे॥)

वटपत्रा, स्त्री, (वटस्येव पत्रमस्याः।) त्रिपुरमालीपुष्पवृक्षः। इति रत्नमाला॥

वटपत्री, स्त्री, (वटस्येव पत्रं यस्याः। गौरादित्वात् ङीष्।) माषाद्यभेदीविप्लेषः। तत्पर्य्यायः। इरावती २ ऐरावती ३ गोधावती ४ हरावती५ श्यामा ६ खट्वाङ्गनामिका ७। अस्याः गुणाः। हिमत्वम्। गोक्षत्वम्। मेहक्षयकुष्ठविनाशित्वम्। बलदात्रत्वम्। व्रणघ्नत्वम्। किञ्चिद्दीपनकारित्वञ्च। इति राजनिर्घण्टः॥ अपि च।

"वटपत्री तु कथिता मोहिन्यैरावती बुधैः।
वटपत्री कषायोष्णा योनिमूत्रगदापहा॥"

इति भावप्रकाशः॥

वटरः, पुं, कुक्कुटः। वेष्टः। भ्रष्टः। चौरः। चञ्चलः। इति शब्दरत्नावली॥

वटवासी [न्] पुं, स्त्री, (वटे वटवृक्षे वसतीति। वस्+णिनिः।) यक्षः। इति हेमचन्द्रः। २। १०८॥ वटवृक्षवासकर्त्तरि, त्रि॥

• वटाकरः, पुं, रज्जुः। इत्यमरटीकायां रामाश्रमः॥

वटारका, स्त्री, रज्जुः। दड़ि इति वेटे इति च भाषा। इति पुराणम्॥ (यथा, महाभारते। १२। ३२६। ३६।
"चतारिंशं सत्यमयीं धर्म्मस्थैर्य्यवटारकाम्॥"
पुंलिङ्गोऽप्ययं शब्दः। यथा, महाभारते। ३। १८७। ४०।
"वटारकमयं पाशमथ मत्स्यस्य मूर्द्धनि।
मनुर्मनुजशार्दूल! तस्मिन् मूर्द्धनि न्यवेशयत्॥")

वटावीकः, पुं, चौरविशेषः। यथा,—
"नामचौरो वटावीकः सन्धिचौरस्तु हारकः॥"
इति शब्दमाला॥

वटिः, स्त्री, (वटतीति। वट+"सर्व्वधातुभ्य इन्।" उणा० ४। ११८। इति इन्।) उपजिह्विका। यथा,—
"उपजिह्विकोत्पादिका च वटिरट्टेहिका देवी॥"
इति हारावली। ११०॥

वटिका, स्त्री, (वटिरेव। स्वार्थे कन्। टाप्।) वटी। वड़ी इति भाषा। तत्पर्य्यायः। निस्तली २। इति शब्दचन्द्रिका॥ अथ वटिकाविधिः।
"वटका अथ कथ्यन्ते तन्नामा वटिका वटी।
मोदको गुटिका पिण्डी गुड़ो वर्त्तिस्तथोच्यते॥
लेहवत् साध्यते वह्नौ गुड़ो वा शर्करायवा।
गुग्गुलुर्वा क्षिपेत्तत्र चूर्णं तन्निर्म्मिता वटी॥"
तत्र वह्निसिद्धे गुड़ादौ।
"कुर्य्यादवह्निसिद्धेन क्वचिद्गुग्गुलुना वटीम्।
द्रवेण मधुना वापि गुटिकां कारयेद्बुधः॥
सिता चतुर्गुणा देया वटीषु द्विगुणो गुड़ः।
चूर्णं चूर्णसमः कार्य्यो गुग्गुलुर्मधु तत्समम्॥"
तत्समं चूर्णसमम्।
"द्रवन्तु द्विगुणं देयं मोदकेषु भिषग्वरैः॥"
द्रवं चतुर्गुणमिति वा पाठः। द्रवं द्रवरूपं द्रव्यम्।
"कर्षप्रमाणा तन्मात्रा बलं दृष्ट्वा प्रयुज्यते।
बलमिति कालादेरप्युपलक्षणम्। इति भावप्रकाशः॥ * ॥ अञ्जनोपयोगिद्रव्यम्। अस्यापि वड़ी इति भाषा। यथा,—
"माषार्द्धां पिष्टिका हिङ्गुलवणार्द्धकसंस्कृता।
तया विरचिता वर्त्ते वटिकाः साधु शोधिताः॥
तालितास्तप्ततैले ता अथवा सुप्तलेहिताः।
वटकस्य गुणैर्युक्ता ज्ञातव्या रुचिदा भृशम्॥
कुम्माण्डकवटी ज्ञेया पूर्व्वोक्तवटिकागुणा।
विशेषात् पित्तरक्तघ्नी लघ्वी च कथिता बुधैः॥
सुन्नानां वटिका तद्वद्रचिता साधिता तथा।
प्रथा रूक्षा ततो लघ्वी सुन्नरूपगुणा स्मृता॥"
इति भावप्रकाशः॥

वटी, स्त्री, (वट्+अच्। गौरादित्वात् ङीष्।) वटिका। इति भावप्रकाशः॥ इक्षुविशेषः। तत्पर्य्यायः। नदीवटः २ यज्ञदृश्यः ३ सिद्धार्थः ४ वटकः ५ अमरा ६ भङ्गिनी ७ क्षीरकाष्ठाः। अस्या गुणाः। कषायत्वम्। मधुरत्वम्। अग्निवर्द्धत्वम्। पित्तनाशित्वम्। दाहतृष्णाश्रमश्वासविषच्छर्द्दिश्रमनत्वञ्च। इति राजनिर्घण्टः॥

वटी, स्त्री, रज्जुः। इत्यमरः। २। १०। २७॥

व(ब)टुः, पुं, (वटतीति। वट्+"कटिवटिभ्याञ्च।" उणा० १। ६। इति उः।) माणवकः। यथा,—
"वटुः पुनर्म्माणवको भिक्षास्य ग्राममात्रकम्॥"
इति हेमचन्द्रः॥
ब्रह्मचारी। यथा। वटुर्व्वर्णी ब्रह्मचारी। इति शब्दरत्नावली॥ (यथा, महाभारते। १। १८६। १५।
"तस्मादुच्यतु सर्व्वोऽयं वटुरेष यथाधर्म्महान्।
आरोपयतु शीघ्रं वै तथेत्यूचुर्द्विजर्षभाः॥")
कुटिलटङ्कः। यथा,—
"मक्कूकपर्णः प्रयोगाकः शुकनासः कुटिलटः।
ऋष्यो वटुदीर्घदलो दीर्घदलक इत्यपि॥"
इति च शब्दरत्नावली॥
बालकः। यथा,—
"बालको माणवो बालः किशोरो वटुरित्यपि॥"
इत्यपि शब्दरत्नावली॥

वटुकः, पुं, (वटु+स्वार्थे संज्ञायां वा कन्।) बालकः। इति शब्दरत्नावली॥ (यथा, पाद्मे क्रियायोगसारे।
"कुमारीवटुकान् पूज्य तथा श्वेतपोधनान्।
राजसूयफलं तेन प्राप्यते नात्र संशयः॥"
ब्रह्मचारी। यथा, भागवते। १०। ८८। २७।
"तं तथा व्यसनं दृष्ट्वा भगवान् वृजिनार्द्दनः।
दूरात् प्रत्युदियाद् भूत्वा वटुको योगमायया॥")
भैरवविशेषः। (यथा, महानिर्व्वाणतन्त्रे। २। २४।
"भैरवाश्चैव वेताला वटुका नायिकागणाः।
प्रोक्ताः श्वेता वैष्णवाश्च सौरा गाणपतादयः॥")
अस्य मन्त्रादिर्यथा,—
"उद्धरेद्वटुकं डेऽन्तमापदुद्धारणं तथा।
कुरुद्वयं पुनर्डेऽन्तं वटुकञ्च समुद्धरेत्।
एकविंशत्यक्षरात्मा प्रोक्तिरुद्रो महामनुः॥"
अस्य पूजा। प्रातःस्नात्वादिप्राणायामान्तं विधाय पीठन्यासं कुर्य्यात्। यथा। धर्म्मादिअनैश्वर्य्यान्तं देहे विन्यस्य ऋष्यादिन्यासं कुर्य्यात्। यथा शिरसि ॐ दक्षदारण्यकऋषये नमः। मुखे गायत्रीच्छन्दसे नमः। हृदि बटुकभैरवाय देवतायै नमः। ततो मूर्त्तिन्यासः। ह्रीं वौं ईशानाय नमोऽङ्गुष्ठयोः। ह्रैं वैं तत्पुरुषाय नमस्तर्ज्जन्योः। ह्रुं वुं अघोराय नमो मध्यमयोः। ह्रिं विं वामदेवाय नमोऽनामिकयोः। ह्रं वं सद्योजाताय नमः कनिष्ठयोः। पुनस्तत्तदङ्गुलीभिः शिरोवदनहृदयगुह्यपादेषु तत्तद्बीजादिकास्तत्तन्मूर्त्तीर्न्यसेत्। तथोर्द्धप्राग्दक्षिणोदीच्यपश्चिमेषु मुखेषु च तान् न्यसेत्। तथा च निबन्धे।
"अङ्गुलीदेहवक्त्रेषु मूर्त्तीर्न्यसेद्यथा पुरा।
सद्यादिपञ्चद्वयाढ्यप्रणवबीजपुरःसरम्।
वकारं पञ्चद्वयाढ्यमीशानादिषु योजयेत्॥"
ततः कराङ्गन्यासौ। तद्यथा ॐ ह्रां वां अङ्गुष्ठाभ्यां नम इत्यादि। ॐ ह्रां वां हृदयाय नम इत्यादि च। षड्दीर्घबीजहयेन कुर्य्यात्। तथा च निबन्धे।
"षड्दीर्घयुक्तया प्रणवा वकारेणापि तद्वता।
अङ्गानि जातियुक्तानि प्रणवाद्येन कल्पयेत्॥"
ततो ध्यानम्।
"तस्य ध्यानं त्रिधा प्रोक्तं सात्त्विकादिप्रभेदतः॥"
सात्त्विकम्। यथा,—
"वन्दे बालं स्फटिकसदृशं कुण्डलोद्भासिवक्त्रं
द्विभाकल्पैर्नवमणिमयैः किङ्किणीनूपुराद्यैः।
दीप्ताकारं विशदवदनं सुप्रसन्नं त्रिनेत्रं
हस्ताब्जाभ्यां वटुकमनिशं शूलदण्डौ दधानम्॥" १॥
राजसं यथा,—
"उद्यद्भास्करसन्निभं त्रिनयनं रक्ताङ्गरागस्रजं
स्मेरास्यं वरदं कपालमभयं शूलं दधानं करैः।
नीलग्रीवमुदारभूषणयुतं शीतांशुचूड़ोज्ज्वलं
बन्धूकारुणवाससं भयहरं देवं सदा भावये॥"२॥
तामसं यथा,—
"ध्यायेन्नीलादिकान्तं शशिशकलधरं मुण्डमालं महेशं
दिग्वस्त्रं पिङ्गकेशं डमरुमथ शशिं खड्गशूलाभयानि।
नागं घण्टां कपालं करसरसिरुहैर्बिभ्रतं भीमदंष्ट्रं
सर्पाकल्पं त्रिनेत्रं मणिमयविलसत्किङ्किणीनूपुराढ्यम्॥" ३॥
"सात्त्विकं ध्यानमाख्यातमपवर्गफलप्रदम्।
आयुरारोग्यजननमपवर्गफलप्रदम्॥ १॥
राजसं ध्यानमाख्यातं धर्म्मकामार्थसिद्धिदम्। २।
तामसं शत्रुशमनं ज्ञात्वाभूतगदापहम्॥" ३॥
एवं ध्यात्वा मानसैः संपूज्य शङ्खस्थापनं कुर्य्यात्॥ * ॥ अस्य पूजायन्त्रम्।
"धर्म्माधर्म्मादिभिः कल्पपीठे पङ्कजशोभिते।
वटुकोणान्तस्त्रिकोणस्थे योनिपङ्कजसंयुते॥"
ततो मूलेन मूर्त्तिं सङ्कल्प्य पूर्व्ववत् ध्यात्वावाहनादिकं कुर्य्यात्। तत्र क्रमः। मूलेन सद्योजातमन्त्रेणावाहनम्। मूलादिवामदेवेन स्थापनम्। मूलेन सन्निधम्। अघोरेण सन्निरोधनम्। तत्पुरुषेण योनिमुद्राप्रदर्शनम्। ईशानेन वन्दनमिति विशेषः। ततः कर्णिकार्य्यां दिक्षु कोणेषु ईशानादीन् यजेत्। ततो योमपङ्कजदलेषु असिताङ्गादिभैरवान् यजेत्।
"असिताङ्गो रुरुश्चण्डः क्रोधोन्मत्तौ च भैरवौ।
कपाली भीषणश्चैव संहारोऽष्टौ च भैरवाः॥"
एतैरष्टभैरवैर्द्वितीयावरणम्। ततः वटुकोणेषु ह्रां वां हृदयाय नम इत्यनेन पूजयेत्।

ततः पूर्व्वादिडाकिनीराकिणीलाकिनीकाकिनी-साकिनीहाकिनीमालिनीपुत्रान् देवीपुत्रान् उमापुत्रान् रुद्रपुत्रान् मालकापुत्रान् दक्षिणे यजेत्। ऊर्द्ध ऊर्द्धमुखीपुत्रान् अधोऽधोमुखी-पुत्रान्। तद्बहिरष्टपत्रेषु लोकेशान् वटुक-रूपान् पूजयेत्। तद्यथा: पूर्व्वे ॐ ब्रह्माणी-पुत्राय नमः। एवमीशाने माहेश्वरीपुत्राय। उत्तरे वैष्णवीपुत्राय। अग्निले कौमारीपुत्राय। पश्चिमे इन्द्राणीपुत्राय। नैर्ऋते महालक्ष्मी-पुत्राय। याम्ये वाराहीपुत्राय। अनले चामुण्डापुत्राय। तथा च निवन्धे।

"ब्रह्माणीपुत्रकं पूर्व्वे माहेशीपुत्रमैश्वरे।
वैष्णवीपुत्रकं सौम्ये कौमारीपुत्रमानिले॥
इन्द्राणीपुत्रकं भूयः पश्चिमे पूजयेत्ततः।
महालक्ष्मीसुतं पश्चाद्रक्षोदिग्नि समर्चयेत्।
वाराहीपुत्रकं याम्ये चामुण्डापुत्रमानले॥"

तद्बहिर्द्दलेषु च। हेतुकं त्रिपुरान्तकं वेतालं वह्निजिह्वं करालं कालान्तकं एकपादं भीम-रूपं अग्निलं चाटकैश्वरं पूजयेत्। ततो योगिनीसहितदिव्ययोगीशाय नमः। एवं योगिनीसहितान्तरीक्षयोगीशाय नमः। एवं योगिनीसहितभूमिष्ठयोगीशाय नमः। ईशा-नाग्निनिर्ऋतिषु पूजयेत्॥*॥ अस्य पुर-श्चरणमेकविंशतिलक्षजपः।

"वर्णलक्षं जपेन्मन्त्रं हविष्याशी जितेन्द्रियः।
तद्दशांशं प्रजुहुयात्तिलैर्मधुरसंयुतैः॥"*॥

अथ वलिदानम्।

"पूर्व्वं विघ्नं दुर्गां समाराध्य वलिं दद्यात्।
शाल्यन्नं पललं सर्पिर्लाजचूर्णानि शर्करा:॥
गुडमिक्षुरसापूपैर्मध्यक्तैः परिमिश्रितैः।
कृत्वा कवलमाराध्य देवं प्रागुक्तवर्त्मना।
रक्तचन्दनपुष्पाद्यैर्निर्ऋतौ तस्मै वलिं हरेत्॥"

यद्वा।

"अन्यूनाङ्गमजं कृत्वा राजसं प्रागुदीरितम्।
वलिप्रदानसमये रिपूणां सर्व्वसैन्यकम्।
निवेदयेद्वलित्वेन वटुकाय विशुद्धधीः॥
विदर्भयेच्छत्रुनाम्ना वलिमन्त्रं तथा सुधीः।
शत्रुपक्षस्य रुधिरं पिशितञ्च दिने दिने॥
भक्षयस्व गणैः सार्द्धं सारमेयसमन्वितः।
वलिमन्त्रोऽयमाख्यातः सर्व्वेषां विजयप्रदः॥
अनेन वलिना कृष्टो वटुकः परमेश्वरः।
सर्व्वं गणेभ्यो विभजेच्चामिषं क्षुद्रमानसः॥
एवं कृते परबलं क्षीयते नात्र संशयः॥"

इति तन्त्रसारः॥*॥

अथ वटुकभैरवस्तोत्रम्।

"कैलासशिखरासीनं देवदेवं जगद्गुरुम्।
शङ्करं परिपप्रच्छ पार्व्वती परमेश्वरम्॥

श्रीपार्व्वत्युवाच।

भगवन् सर्व्वधर्म्मज्ञ सर्व्वशास्त्रागमादिषु।
आपदुद्धारणं मन्त्रं सर्व्वसिद्धिप्रदं नृणाम्॥
सर्व्वाभीष्टमेव भूतानां हितार्थं वाञ्छितं मया।
विशेषतस्तु राज्ञां वै शान्तिपुष्टिप्रसाधनम्॥

अङ्गन्यासकरन्यासवीजन्याससमन्वितम्।
वक्तुमर्हसि देवेश मम हर्षविवर्द्धनम्॥

श्रीभगवानुवाच।

शृणु देवि महामन्त्रमापदुद्धारहेतुकम्।
सर्व्वदुःखप्रशमनं सर्व्वशत्रुनिवर्हणम्॥
अपस्मारादिरोगाणां ज्वरादीनां विशेषतः।
नाशनं स्मृतिमात्रेण मन्त्रराजमिमं प्रिये॥
ग्रहराजभयानाञ्च नाशनं सुखवर्द्धनम्।
स्नेहाद्वक्ष्यामि ते मन्त्रं सर्व्वसारमिमं प्रिये॥
सर्व्वकामार्थदं मन्त्रं राज्यभोगप्रदं नृणाम्।
प्रणवं पूर्व्वमुच्चार्य्य देवी प्रणवमुद्धरेत्॥
वटुकायेति वै पश्चादापदुद्धारणाय च।
कुरुद्वयं ततः पश्चाद्वटुकाय पुनः लिखेत्॥
देवी प्रणवमुद्धृत्य मन्त्रराजमिमं प्रिये।
मन्त्रोद्धारमिमं देवि त्रैलोक्यस्यापि दुर्लभम्।
अप्रकाश्यमिमं मन्त्रं सर्व्वशक्तिसमन्वितम्॥
स्मरणादेव मन्त्रस्य भूतप्रेतपिशाचकाः।
विद्रवन्ति भयार्त्ता वै कालरुद्रादिव प्रजाः॥
पठेद्वा पाठयेद्वापि पूजयेद्वापि पुस्तकम्।
नाग्निचौरभयं वापि ग्रहराजभयन्तथा।
न च मारीभयं तस्य सर्व्वत्र सुखवान् भवेत्॥
आयुरारोग्यमैश्वर्यं पुत्रपौत्रादिसम्पदः।
भवन्ति सततं तस्य पुस्तकस्यापि पूजनात्॥

श्रीपार्व्वत्युवाच।

य एष भैरवो नाम आपदुद्धारको मतः।
त्वया च कथितो देव भैरवः कस्य उत्तमः॥
तस्य नामसहस्राणि अयुताभ्यर्व्बुदानि च।
सारमुद्धृत्य तेषां वै नामाष्टशतकं वद॥*॥

श्रीभगवानुवाच।

यस्तु संकीर्त्तयेदेतत् सर्व्वदुष्टनिवर्हणम्।
सर्व्वान् कामानवाप्नोति साधकः सिद्धिमेव च॥
शृणु देवि प्रवक्ष्यामि भैरवस्य महात्मनः।
आपदुद्धारकस्येह नामाष्टशतमुत्तमम्॥
सर्व्वपापहरं पुण्यं सर्व्वापद्विनिवारकम्।
सर्व्वकामार्थदं देवि साधकानां सुखावहम्॥
देहाङ्गन्यसनञ्चैव पूर्व्वं कुर्य्यात् समाहितः।
भैरवं मूर्द्धि विन्यस्य ललाटे भीमदर्शनम्॥
आक्ष्णोर्भूतात्रयं न्यस्य वदने तीक्ष्णदर्शनम्।
क्षेत्रपं कर्णयोर्मध्ये क्षेत्रपालं हृदि न्यसेत्॥
क्षेत्रनाथं नाभिदेशे च कट्यां सर्व्वाघनाशनम्।
त्रिनेत्रमूर्व्वोर्विन्यस्य जङ्घयो रक्तपाणिकम्॥
पादयोर्दैवदेवेशं सर्व्वाङ्गे वटुकं न्यसेत्।
एवं न्यासविधिं कृत्वा तदनन्तरमुत्तमम्॥
नामाष्टशतकस्यापि छन्दोऽनुष्टुबुदाहृतम्।
दक्षदारुवनो नाम ऋषिश्च परिकीर्त्तितः॥
देवता कथिता चेह सद्भिर्वटुकभैरवः।
धर्म्मार्थकाममोक्षेषु विनियोगः प्रकीर्त्तितः॥*॥
ॐभैरवो भूतनाथश्च भूतात्मा भूतभावनः।
क्षेत्रदः क्षेत्रपालश्च क्षेत्रज्ञः क्षत्रियो विराट्।
श्मशानवासी मांसाशी खर्पराशी मखान्तकृत्।
रक्तपः प्राणपः सिद्धः सिद्धिदः सिद्धसेवितः॥
कराल: कालशमनः कलाकाष्ठातनुः कविः।

त्रिनेत्रो बहुनेत्रश्च तथा पिङ्गललोचनः॥
शूलपाणिः खड्गपाणिः कङ्कालो धूम्रलोचनः।
अभीरुर्भैरवो भीरुभूतपो योगिनीपतिः॥
धनदो धनहारी च धनवान् प्रतिभाववान्।
नागहारो नागकेशो व्योमकेशः कपालभृत्॥
कालः कपालमाली च कमनीयः कलानिधिः।
त्रिलोचनो ज्वलन्नेत्रस्त्रिशिखी च त्रिलोकपात्॥
त्रिपृत्तनयनो डिम्भः शान्तः शान्तजनप्रियः।
वटुको वटुकेशश्च खट्वाङ्गवरधारकः॥
भूताध्यक्षः पशुपतिर्भिक्षुकः परिचारकः।
धूर्त्तो दिगम्बरः शौरिर्हरिणः पाण्डुलोचनः॥
प्रशान्तः शान्तिदः शुद्धः शङ्करप्रियबान्धवः।
अष्टमूर्त्तिर्निधीशश्च ज्ञानचक्षुस्तपोमयः॥
अष्टाधारः कलाधारः सर्पयुक्तः शिखीसखः।
भूधरो भूधराधीशो भूपतिर्भूधरात्मकः॥
कङ्कालधारी मुण्डी च नागयज्ञोपवीतवान्।
जृम्भणो मोहनः स्तम्भी मारणः क्षोभणस्तथा॥
शुद्धनीलाञ्जनप्रख्यदेहो मुण्डविभूषितः।
बलिभुक् बलिभूतात्मा कामी कामपराक्रमः॥
सर्व्वापत्तारको दुर्गो दुष्टभूतनिषेवितः।
कामी कलानिधिः कान्तः कामिनीवशकृद्वशी।
सर्व्वसिद्धिप्रदो वैद्यः प्रभविष्णुः प्रभाववान्॥
अष्टोत्तरशतं नाम भैरवस्य महात्मनः।
मया ते कथितं देवि रहस्यं सर्व्वकामिकम्॥
य इदं पठति स्तोत्रं नामाष्टशतमुत्तमम्।
न तस्य दुरितं किञ्चिन्न रोगेभ्यो भयं तथा।
न शत्रुभ्यो भयं किञ्चित् प्राप्नोति मानवः क्वचित्॥
पातकानां भयं नैव पठेत् स्तोत्रमनन्यधीः।
मारीभये राजभये तथा चौराग्निजे भये॥
औत्पातिके महाघोरे यथा दुःखप्रदर्शने।
बन्धने च तथा घोरे पठेत् स्तोत्रं समाहितः॥
सर्व्वे प्रशमनं यान्ति भयाद्भैरवकीर्त्तनात्।
एकादशसहस्रन्तु पुरश्चरणमुच्यते॥
विसन्ध्यं यः पठेद्देवि संवत्सरमतन्द्रितः।
स सिद्धिं प्राप्नुयादिष्टां दुर्लभामपि मानुषः॥
षण्मासान् भूमिकामस्तु स जप्त्वा लभते महीम्।
राजा शत्रुविनाशाय जपेन्मासाष्टकं पुनः॥
रात्रौ वारत्रयञ्चैव नाशयत्येव शात्रवान्।
जपेन्मासत्रयं रात्रौ राजानं वशमानयेत्॥
धनार्थी च सुतार्थी च दारार्थी यस्तु मानवः।
पठेद्वारत्रयं यद्वा वारमेकं तथा निशि॥
धनं पुत्रांस्तथा दारान् प्राप्नुयान्नात्र संशयः।
रोगी रोगात् प्रमुच्येत बद्धो मुच्येत बन्धनात्॥
भीतो भयात् प्रमुच्येत देवि सत्यं न संशयः।
यान् यान् समीहते कामांस्तांस्तान्प्राप्नोति
निश्चितम्॥
अप्रकाश्यमिदं गुह्यं न देयं यस्य कस्यचित्॥
सत्कुलीनाय शान्ताय ऋजवे दम्भवर्জ্জिते।
दद्यात् स्तोत्रमिदं पुण्यं सर्व्वकामफलप्रदम्।
ध्यानं वक्ष्यामि देवस्य यथा ध्यात्वा पठेन्नरः॥*॥
ॐ शुद्धस्फटिकसङ्काशं सहस्रादित्यवर्चसम्।
अष्टबाहुं त्रिनयनं चतुर्बाहुं द्विबाहुकम्॥

भुजङ्गमेखलं देवमग्निवर्णशिरोरुहम् ।
दिगम्बरं कुमारीशं वटुकाख्यं महाबलम् ॥
खट्वाङ्गमसिपाशञ्च शूलञ्चैव तथा पुनः ।
डमरुञ्च कपालञ्च वरदं भुजगन्तथा ॥
नीलजीमूतसङ्काशं नीलाञ्जनचयप्रभम् ।
दंष्ट्राकरालवदनं नूपुराङ्गदभूषितम् ॥
आत्मवर्णसमोपेतसारमेयसमन्वितम् ।
ध्यात्वा जपेत् सुसंहृष्टः सर्व्वान् कामानवाप्नुयात् ॥
एतच्छ्रुत्वा ततो देवी नामाष्टशतमुत्तमम् ।
भैरवाय प्रहृष्टाभूत् स्वयञ्चैव महेश्वरी ॥"
इति विश्वसारोद्धारतन्त्रे आपदुद्धारकल्पे भैरव-स्तवराजः समाप्तः ॥*॥ अथ वटुकभैरवकवचम् ।

श्रीभैरव उवाच ।

"देवेशि देहरक्षार्थं कारणं कथ्यतां ध्रुवम् ।
म्रियन्ते साधका येन विना श्मशानभूमिषु ॥
रणेषु चातिघोरेषु महावायुजलेषु च ।
शस्त्रास्त्रमकरव्यूहेषु ज्वरादिव्याधिवह्निषु ॥

श्रीदेव्युवाच ।

कथयामि शृणु प्राज्ञ वटोस्तु कवचं शुभम् ।
गोपनीयं प्रयत्नेन माटजारोपमं यथा ॥
तस्य ध्यानं त्रिधा प्रोक्तं सात्त्विकादिप्रभेदतः ।
सात्त्विकं राजसञ्चैव तामसं देव तत् शृणु ॥
वन्दे बालं स्फटिकसदृशं कुण्डलोद्भासिवक्त्रं
दिव्याकल्पैर्नवमणिमयैः किङ्किणीनूपुराद्यैः ।
दीप्राकारं विशदवदनं सुप्रसन्नं त्रिनेत्रं
हस्ताब्जाभ्यां वटुकमनिशं शूलखड्गौ
दधानम् ॥१॥
उद्यद्भास्करसन्निभं त्रिनयनं रक्ताङ्गरागस्रजं
क्षेरास्यं वरदं कपालमभयं शूलं दधानं करैः ।
नीलग्रीवमुदारभूषणयुतं प्रीतांशुचूड़ोज्ज्वलं
वन्दूकारुणवाससं भयहरं देवं सदा भावये ॥२॥
ध्यायेन्नीलादिकान्तं प्रणिपतकलधरं मुण्डमालं
महेशं
दिग्वस्त्रं पिङ्गकेशं डमरुमथ खट्वाङ्ग-
शूलाभयानि ।
नागं घण्टां कपालं करसरसिरुहैर्बिभ्रतं
भीमदंष्ट्रं
सर्पाकल्पं त्रिनेत्रं मणिमयविलसत्किङ्किणी
नूपुराढ्यम् ॥ ३ ॥*॥
अस्य वटुकभैरवकवचस्य महाकाल ऋषिरनुष्टुप्छन्दः श्रीवटुकभैरवो देवता वं बीजं ह्रीं शक्तिरापदुद्धारणायेति कीलकं मम सर्व्वाभीष्टसिद्ध्यर्थे विनियोगः ।
"ॐ शिरो मे भैरवः पातु ललाटं भीषणस्तथा ।
नेत्रे च भूतदृग्यः सारमेयानुगो भ्रुवौ ॥
भूतनाथश्च मे कर्णौ कपोलौ प्रेतवाहनः ।
नासापुटौ तथोष्ठौ च भस्माङ्गः सर्व्वभूषणः ॥
भीषणास्यो ममास्यञ्च शक्तिहस्तो गलं मम ।
स्कन्धौ दैत्यरिपुः पातु बाहू अतुलविक्रमः ॥
पाणी कपाली मे पातु मुण्डमालाधरो हृदम् ।
वक्षःस्थलं तथा पात्वनन्तः कामचारी स्तनं मम ॥
उदरञ्च स मे तुष्टः चेत्रेशः पार्श्वतस्तथा ।
चेत्रपालः पृष्ठदेशं चेत्राख्यो नाभितस्तथा ॥
कटौं पापौघनाशश्च वटुको लिङ्गदेशकम् ।
गुह्यं रत्नाकरः पातु ऊरू रत्नाकरः सदा ॥
जानू च घुर्घुरारावो जङ्घे रत्नं रत्नप्रभः ॥
गुल्फौ च पादुकासिद्धः पादपृष्ठं सुरेश्वरः ॥
आपादमस्तकञ्चैव आपदुद्धारणस्तथा ।
सहस्रारे महापद्मे कर्पूरधवलो गुरुः ॥
पातु मां वटुको देवो भैरवः सर्व्वकर्म्मसु ।
पूर्व्वस्यामसिताङ्गो मे दिशि रक्षतु सर्व्वदा ॥
आग्नेय्याञ्च रुरुः पातु दक्षिणे चण्डभैरवः ।
नैर्ऋत्यां क्रोधनः पातु मासुम्मत्तस्तु पश्चिमे ॥
वायव्यां मे कपाली च नित्यं पायात् सुरेश्वरः ।
भीषणो भैरवः पात्वुत्तरस्यां दिशि सर्व्वदा ॥
संहारभैरवः पातु दिशमैशान्यां महेश्वरः ।
ऊर्द्धं पातु विधाता वै पाताले नन्दिको विभुः ॥
सद्योजातस्तु मां पायात् सर्व्वतो देवसेवितः ।
वामदेवोऽवतु प्रीतो रणे घोरे तथावतु ॥
जले तत्पुरुषः पातु स्थले पातु गुरुः सदा ।
डाकिनीपुत्रकः पातु दारासु लाकिनीसुतः ॥
पातु साकलको भ्रातॄन् श्रियं मे सततं गिरः ।
लाकिनीपुत्रकः पातु पशूनश्वानजांस्तथा ॥
महाकालोऽवतु क्षेत्रं सैन्यं वै कालभैरवः ।
राज्यं राज्यश्रियं पायात् भैरवो भीति-
हारकः ॥
रक्षाहीनन्तु यत् स्थानं वर्जितं कवचेन च ।
तत् सर्व्वं रक्ष मे देव त्वं यतः सर्व्वरक्षकः ॥
एतत् कवचमीशान तव स्नेहात् प्रकाशितम् ।
नाख्येयं नरलोकेषु सारभूतञ्च सुश्रियम् ॥
यस्मै कस्मै न दातव्यं कवचेशं सुदुर्लभम् ।
न देयं परशिष्येभ्यः क्षपणेभ्यश्च शङ्कर ॥
यो ददाति निशिष्टेभ्यः स वै भ्रष्टो भवेद्ध्रुवम् ॥
अनेन कवचेशेन रक्षां कृत्वा द्विजोत्तमः ।
विचरन् यत्र कुत्रापि विघ्नौघैः प्राप्यते न सः ॥
मन्त्रेण म्रियते योगी कवचं यन्न रक्षितः ।
तस्मात् सर्व्वप्रयत्नेन दुर्लभं पापचेतसाम् ॥
भूर्जे रक्तालचे वापि लिखित्वा विधिवत् प्रभो ।
धारयेत् पाठयेद्वापि सम्पठेद्वापि नित्यशः ।
सम्प्राप्नोति प्रभावं वै कवचस्यास्य वर्णितम् ॥
नमो भैरवदेवाय सारभूताय वै नमः ।
नमस्त्रैलोक्यनाथाय नाथनाथाय वै नमः ॥"
इति विश्वसारोद्धारतन्त्रे आपदुद्धारकल्पे भैरव-भैरवीसंवादे वटुकभैरवकवचं समाप्तम् ॥

वटुकरणं, क्ली, (वटोः करणम् ।) उपनयनम् । इति त्रिकाण्डशेषः ॥

वठ, स्थौल्ये । इति कविकल्पद्रुमः ॥ (भ्वा०-पर०-अक०-सेट् ।) स्थौल्यमिह सामर्थ्यम् । वठति दाता दातुं समर्थः स्यादित्यर्थः । इति दुर्गादासः ॥

वठ, इ क एकचरे । इति कविकल्पद्रुमः ॥ (भ्वा०-आत्म०-अक०-सेट् । इदित् ।) एककर्तृकचरणम् । इ, वठते । ड, वठते चौरश्चोरयितुं एकश्चरतीत्यर्थः । इति दुर्गादासः ॥

वठरः, पुं, (वल्गतीति । वल्ग् + "वल्गिमनिभ्यां किच्च ।" उणा० ५ । ३६ । इति अरप्रत्ययः । ठश्चान्तादेशः ।) मूर्खः । इत्युणादिकोषः ॥ अम्बष्ठः । इति हेमचन्द्रः ॥ शब्दकारः । वक्रः । इति संक्षिप्तसारोणादिवृत्तिः ॥

वठरः, त्रि, (वल्ग् + अरः । ठश्चान्तादेशः ।) शठः । मन्दः । इति त्रिकाण्डशेषः ॥

वड, आरोहणे । सौत्रधातुरयम् । इति कविकल्पद्रुमः ॥ (भ्वा०-पर०-सक०-सेट् ।) वड़भी । वड़िशम् । इति दुर्गादासः ॥

वड, इ क विभागे । इति कविकल्पद्रुमः ॥ (चुरा०-पर०-सक०-सेट् । इदित् ।) इ क, वण्डयति । व्यये केचिन्न पठ्यते । इति दुर्गादासः ॥

वड, इ ड वेष्टे । विभागे । इति कविकल्पद्रुमः ॥ (भ्वा०-आत्म०-सक०-सेट् । इदित् ।) इ, वण्डते । ड, वण्डते । इति दुर्गादासः ॥

वड़भी, स्त्री, (वध्यते आरुह्यतेऽत्रेति । वड् + बाहुलकात् अभिच् । ङीदिकारादिति ङीष् ।) गृहचूड़ा । इत्यमरः ॥ सुदनि । इति भाषा । तत्पर्य्यायः । गोपानसी २ । इति तट्टीकासार-सुन्दरी ॥ चन्द्रशालिका ३ कूटागारम् ४ । इति त्रिकाण्डशेषः ॥
"चन्द्रशाला च वड़भी स्यातां प्रासादमूर्द्धनि ॥"
इति श्रीधरः ॥
खेलायां वड़भौ चूड़ा । इति रुद्रः ॥
"वड़भी चन्द्रशालेति प्रासादादौ च मण्डपे ॥"
इति कोषान्तरम् ॥
"शुद्धान्ते वड़भी चन्द्रशाले सौधोर्द्ध्वेष्मनि ॥"
इति रभसः ॥
दृश्यन्तापि वड़भिः । तां कस्याश्चिद्वनवड़भौ सुप्तपारावतायामिति । मेघदूतम् । ४० ॥ वड़भिः वड़भी वलभिः वलभी चेति चातुरूप्यमिति दुर्गादासः । इति भरतः ॥ (यथा, हरिवंशे । ८४ । ११ ।
"सुवासिता वपुष्मन्त उपनीतोत्तरच्छदाः ।
क्रियन्तां मत्तवाटाश्च वड़भ्यो वीथयस्तथा ॥")

वड़ा, स्त्री, (वड् + अच् + टाप् ।) वटकः । यथा,—
"कदलेनाथवा तालैर्युक्तं यत्ताण्डुलं पिष्टम् ।
पिष्टं चूर्णं वटो वड़ा । इति शब्दचन्द्रिका ॥

वड्, त्रि (वड़ते इति । वड़ + बहुलमन्यत्रापीति रक् ।) शठः । इत्यमरः । ३ । १ । ६१ ॥ अस्य भाषा वड़ ॥

वण, ऋ शब्दे । इति कविकल्पद्रुमः ॥ (भ्वा०-पर०-सक०-सेट् ।) ऋ, अवीवणत् अववाणत् । इति दुर्गादासः ॥

वण्ट, तु क भागे । इति कविकल्पद्रुमः ॥ (चुरा०-पर०-सक०-सेट् ।) वण्टयति वण्टापयति । इति दुर्गादासः ॥

वण्टः, पुं, (वण्ट्यते इति । वण्ट् + घञ् ।) भागः । दायमुष्टिः । इति हेमचन्द्रः । ६ । ७० ॥ (वण्ट् + अच् ।) अलतीवाद्यः । इति शब्दमाला ॥

वटकः, पुं, (वट्ट एव । स्वार्थे कन् ।) भागः । इत्यमरः । २।६।८६ ॥ (वट्ट् + ण्वुल् । विभाग-कर्त्तरि, त्रि ॥)

वण्डः, पुं, (वण्डते इति । वडि ड एकचरे + अच् ।) अक्षतोदाहः । खर्व्वः । कुलायुधः । इति मेदिनी । डे, ८ ॥

वण्डरः, पुं, स्थगिकारज्जुः । कुक्कुरस्य लाङ्गूलम् । करीरकोषः । तालस्य पल्लवम् । पयोधरः । इति मेदिनी । रे, १८८ ॥ तत्र ओष्ठ्यवकारादौ गणितोऽयम् । किन्तु वडि ड एकचरे इत्यस्मात् अरच्-प्रत्ययेन निष्पन्नत्वात् दन्त्यवकारादौ लिखितः ॥

वण्डालः, पुं, शूरयुद्धम् । नौका । खनित्रम् । इति मेदिनी हेमचन्द्रश्च ॥

व(ब)ण्डः, पुं, (वनते इति वनु सम्भक्तौ । वन् + "अमन्ताड्डः ।" उणा० १ । ११३ । इति डः ।) अनातृतमेढ्रः । तत्पर्य्यायः । दुश्चर्म्मा २ छिन्नमकः ३ म्लिम्लिविष्टः ४ । इति हेमचन्द्रः ॥

वण्डः, त्रि, (वनते इति । वन सम्भक्तौ । वन् + "अमन्ताड्डः ।" उणा० १ । ११३ । इति डः ।) हस्तादिवर्ज्जितः । इति मेदिनी । डे, २४ ॥ वेँड़े इति भाषा ॥

वण्डा, स्त्री, (वण्ड + टाप् ।) पांशुला । इति मेदिनी । डे, २४ ॥

वत, य, (वातीति । वा + डति ।) साध्यम् । तत्पर्य्यायः । वा २ यथा ३ तथा ४ एव ५ एवम् ६ । इत्यमरः ॥

वत, य, खेदः । अनुकम्पा । (यथा, भक्ति-रत्नावायाम् । प्रथमाङ्के ।

"क्व वत हरिणकानां जीवितञ्चातिलोलं
क्व च निशितनिपाता वज्रसाराः प्रयुक्ताः ॥")

सन्तोषः । विस्मयः । आमन्त्रणम् । इत्यमरः । ३ । ३ । २४३ ॥

वतंसः, पुं, (अवतंसयति अवतंस्यतेऽनेन वेति । अव् + तंसि + अच् । घञ् वा । अवस्यात्लोपः ।) कर्णपूरः । कर्णभूषणम् । शेखरः । शिरो-भूषणम् । इति मेदिनी । से, ३७ ॥ (यथा, गीतगोविन्दे । २ । २ ।

"चलितदृगञ्चलचञ्चलमौलिकपोलविलोल-
वतंसम् ।
रासे हरिमिह विहितविलासं
स्मरति मनो मम कृतपरिहासम् ॥".)

वतङ्गः, पुं, (वनतीति । वन् + "अकृन् कृदृभ-वृनः ।" उणा० १ । १२८ । इत्यत्र वनतेस्तकारा-न्तादेशः । वतङ्ग इति काचिदृत्तिरित्यु-ज्ज्वलदत्तोक्त्या अकृन् प्रत्ययेन साधुः ।) सुनि-भेदः । इत्युणादिकोषः ॥

वतुः, पुं, वेदवादी । सत्यवाक् । पन्थाः । अग्नि-रोगः । इति संक्षिप्तसारोणादिवृत्तिः ॥

वतोका, स्त्री, (अवगतं तोकं अपत्यं यस्याः अव-स्यात्लोपः ।) अवतोका । इत्यमरटीकायां भरतः ॥

वत्सः, क्लीं, (वदतीति । वद व्यक्तायां वाचि + "वृतृवदिहनिकमिकषिभ्यः सः ।" उणा० ३ । ६२ । इति सः ।) वक्षः । इत्यमरः ॥

वत्सः, पुं, (वदतीति । वद् + "वृतृवदिहनिकमि-कषिभ्यः सः ।" उणा० ३ । ६२ । इति सः ।) वर्षः । गोशिशुः । वाछुर इति भाषा । तत्-पर्य्यायः । प्रक्रन्दकरिः २ तर्णकः ३ । इति वैद्य-वर्गे नानार्थे भामरः ॥ दोग्धा ४ दोषकः ५ दोषः ६ । इति शब्दरत्नावली ॥ रौहिणेयः ७ बाहुलेयः ८ तनुभः ९ । सद्योजातस्य तस्य पर्य्यायः । तर्णकः १ तर्णभः २ तनुभः ३ कचः ४ । इति जटाधरः ॥ पुत्रादिः । इति मेदिनी । से, ११ ॥ वाछा इति भाषा । (यथा, भागवते । ४ । ८ । ११ ।

"न वत्स ! नृपतेर्धिष्ण्यं भवानारोढुमर्हति ।
न गृहीतो मया यत् त्वं कुक्षावपि नृपात्मज ! ॥"

दिवोदासपुत्रः । द्युमानित्यादीन्यस्य नामा-न्तराणि । यथा, भागवते । ९ । १७ । ५—९ ।

"ततपुत्रः क्रतुमालस्य यज्ञे भीमरथस्ततः ।
दिवोदासो द्युमांस्तस्मात् प्रतर्द्दन इति स्मृतः ॥
स एव प्रत्रजित् वत्स ऋतध्वज इतीरितः ।
तथा कुवलयाश्वेति प्रोक्तोऽलर्कादयस्ततः ॥"

देशभेदः । यथा, कथासरित्सागरे । ६ । ४ ।

"अस्ति वत्स इति ख्यातो देशो दर्पोपशान्तये ।
स्वर्गस्य निर्म्मितो धात्रा प्रतिमल्ल इव क्षितौ ॥")

वत्सकं, क्लीं, (वत्स + संज्ञायां इवार्थे वा कन् ।) पुष्पकासीसम् । इति राजनिर्घण्टः ॥ (विव-रणमस्य पुष्पकासीसशब्दे ज्ञातव्यम् ॥)

वत्सकः, पुं, (वत्स + कन् ।) कुटजः । इत्यमरः ॥ (अस्य पर्य्यायो यथा,—

"वृक्षकः प्रक्रपर्य्यायो वत्सको गिरिमल्लिका ।
कुटजस्तत्फलेन्द्रयवश्चापि कलिङ्गकः ॥"

इति वैद्यकरत्नमालायाम् ॥

तथान्यः पर्य्यायः ।

"कुटजः कूटजः कौटो वत्सको गिरिमल्लिका ।
कालिङ्गः प्रक्रशाखी च मल्लिकापुष्प इत्यपि ॥"

इति भावप्रकाशस्य पूर्ब्बखण्डे प्रथमे भागे ॥) इन्द्रयवः । इति राजनिर्घण्टः ॥

वत्सकबीजं, क्लीं, (वत्सकस्य बीजम् ।) इन्द्र-यवः । इति राजनिर्घण्टः ॥ (यथा,—

"योषं वत्सकबीजञ्च निम्बभूनिम्बमार्कवम् ।
चित्रकं रोहिणीं पाठां दार्व्वीमतिविषां
समाम् ॥"

इति वैद्यकचक्रपाणिसंग्रहे ज्वरातिसारे योषाद्यचूर्णे ॥)

वत्सकामा, स्त्री, (वत्सं कामयते इति । कम् + अच् । टाप् ।) वत्साभिलाषिणी गौः । तत्-पर्य्यायः । वत्सला २ । इति राजनिर्घण्टः ॥ पुत्रादिकामा स्त्री च ॥

वत्सतरः, पुं, (प्रथमवया वत्सः । "वत्सोक्षाश्वर्षभेभ्य-स्तिः ।" ५ । ३ । ८१ । इति तरच् ।) प्राप्तदमनकाल-वत्सः । दोयाने वाछुर इति भाषा । तत्पर्य्यायः ।

इभ्यः २ । इत्यमरः । २ । ९ । ६२ ॥ दुर्दान्तः ३ गडिः ४ । इति राजनिर्घण्टः ॥

वत्सतरी, स्त्री, (वत्सतर + ङीप् ।) वृषोत्सर्गे वृषपत्नीत्वेन कल्पिता चिह्नायणी गौः । यथा, कात्यायनसूत्रम् । पयस्विन्याः पुत्रो यूथे च रूपवान् स्यात् तमलङ्कृत्य यूथमुख्याश्चतस्रो वत्सतर्य्यस्ताश्चालङ्कृत्य एनं युवानं पतिं वो ददानि तेन क्रीड़न्तीश्चरथ प्रियेण मनः साम्नजनुषा सुभगा रायस्पोषेण समिषा मदेम इत्येतयैव ऋचोत्सृजेरन्निति । ऋगर्थस्तु हे वत्सतर्य्यो वो युष्माकं एनं युवानं पतिं स्वामिनं ददानीत्युक्तं प्रार्थयामि तेन वृषेण सह क्रीड़न्त्यः खेलन्त्य-श्चरथ भ्रमथ हे वत्सतर्य्यो यूयमपि मानः नास्मत्सत्वविषया भविष्यथ किन्तु मया त्यक्तायाः । वयं वृषस्य वत्सतरीणाञ्च त्यागेन रायस्पोषेण धनसम्वृद्धा साम्नजनुषा सम्नज्म-यापकेन इषा अन्नेन च सम्मदेम हृष्टा भवामः सुभगा लोकस्य प्रिया इति सम्मदेम इति भविष्यत्यामीप्ये वर्त्तमान इति पाणिनिस्मर-साङ्गविष्यदर्थे वर्त्तमानः ॥ * ॥ वत्सतरीविषये-षयति स्मृतिः ।

"अग्रतो लोहिता पत्नी पार्श्वाभ्यां नीलपाण्डरे ।
पृष्ठतस्तु भवेत् कृष्णा वृषभस्य तु मोचणे ॥"

तासां वयःप्रमाणं यथा,—

"चिह्नायणीभिर्धेन्वाभिः सुरूपाभिः सुशो-
भितः ।
सर्व्वोपकरणोपेतः सर्व्वशस्यचरो महान् ।
उत्सृष्टव्यो विधानेन श्रुतिस्मृतिनिदर्शनात् ॥"

इति शुद्धितत्त्वे वृषोत्सर्गविचारः ॥

वत्सनाभः, पुं, (वत्सान् नभ्यति हिनस्तीति । नभ हिंसायाम् + "कर्म्मण्यण् ।" ३ । २ । १ । इत्यण् ।) विषवृक्षविशेषः । इत्यमरः १ । ८ । ११ ॥ स तु स्थावरविषभेदः । प्रायो वत्सान् नभ्यति हिनस्ति वत्सनाभः नभ्य न हिंसे ठात् षन्निति षन् । वत्सस्य नाभिरिव वत्सनाभः यद्वा अनित-खेति न वृद्धिः अयं सिन्धुवारपत्रसदृशपत्रः । इति भारतः ॥ * ॥ (यथा, हरिवंशे । २२३ । ६५ ।

"वरुणा वत्सनाभाश्च पनसाश्चन्दनैः सह ॥)

तत्पर्य्यायः । अन्नसम् २ विषम् ३ उग्रम् ४ महौषधम् ५ गरलम् ६ मारणम् ७ नागः ८ स्तोकम् ९ प्राणहारकम् १० स्थावरादि ११ । अस्य गुणाः । अतिमधुरत्वम् । उष्णत्वम् । वातकफकण्ठरुक्सन्निपातनाशित्वम् । पित्त-सन्तापकारकत्वञ्च । इति राजनिर्घण्टः ॥ * ॥ अस्य स्वरूपनिरूपणं यथा ।

"सिन्धुवारसदृक्पत्रो वत्सनाभ्याकृतिस्तथा ।
यत्पार्श्वेन तरोर्वृद्धिर्व्वत्सनाभः स भाषितः ॥"

तस्य सामान्यगुणा यथा ।

"विषं प्राणहरं प्रोक्तं वायौ च विकासि च ।
आग्नेयं वातकफहृद्योगवाहि महावह्नि ॥"

वायौ सकलकायवायुपूर्ब्बकपाकगमनशीलम् ।

विकासि ओजःप्रोषणपूर्ब्बकं सन्धिबन्धग्रन्थिशैथिल्यकरणशीलम् । आग्नेयं अधिकाग्न्यंशम् । योगवाहि संसर्गगुणग्राहकम् । मदावहं तमोगुणाधिक्येन बुद्धिविध्वंसकम् ।

"तदेव युक्तियुक्तं तु प्राणदायि रसायनम् ॥
योगवाहि चिदोषघ्नं दृंहणं वीर्य्यवर्द्धनम् ॥
ये दुर्गुणा विषेऽशुद्धे ते सुवर्णेना विशोधनात् ।
तस्मादिदं प्रयोगेषु शोधयित्वा प्रयोजयेत् ॥"

इति भावप्रकाशः ॥

(क्षीरेऽपि दृश्यते । यथा,—

"चत्वारि वत्सनाभानि सुस्त्रके हे प्रकीर्त्तिते ।"
"ग्रीवास्तम्भो वत्सनाभे पीतविण्मूत्रनेत्रता ॥"

इति सुश्रुते कल्पस्थाने द्वितीयेऽध्याये ॥)

वत्सपत्तनं, क्ली, (वत्सस्य वत्सराजस्य पत्तनम् ।) भारतवर्षस्योत्तरे देशविशेषः । तत्पर्य्यायः । कौशाम्बी २ । इति हेमचन्द्रः । ४ । ४१ ॥

वत्सपालः, पुं, (वत्सान् पालयतीति । वत्स + पालि + अण्) श्रीकृष्णः । बलदेवः । यथा,—

"वृन्दावनं गोवर्द्धनं यमुनापुलिनानि च ।
वीक्ष्यासीदुत्तमा प्रीतौ राममाधवयोर्नृप ॥
एवं व्रजौकसां प्रीतिं यच्छन्तौ बालचेष्टितैः ।
कलवाक्यैः स्वकालेन वत्सपालौ बभूवतुः ॥"

इति श्रीभागवते । १० । ११ । ३६ ॥

(वत्सपालके, त्रि । यथा, हरिवंशे । ६७।२४ ।

"स तत्र वयसा तुल्यैर्व्वत्सपालैः सहानघः ।
रेमे वै दिवसं क्षपाः पुरा स्वर्गगतो यथा ॥")

वत्सरः, पुं, (वसन्त्यस्मिन् अयनर्त्तुमासपक्षवारादय इति । वस निवासे + "वसेश्च ।" उणा० ३ । ७१ । इति सरन् । "सः स्यार्द्धधातुके ।" ७ । ४ । ४९ । इति सस्य तः ।) द्वादशमासात्मककालः । अयनद्वयात्मकश्च । तत्पर्य्यायः । संवत्सरः २ अब्दः ३ हायनः ४ शरत् ५ समा ६ । इत्यमरः । १ । ४ । २० ॥ शरदा ७ वर्षम् ८ वरिषम् ९ संवत् १० । इति शब्दरत्नावली ॥*॥

"व्रतबन्धविवाहे च वत्सरपरिकल्पनमाचुरार्य्याः ।
आधानपूर्ब्बमेके प्रकृतिपूर्ब्बं सदान्ये तु ॥"

सौरसावननाक्षत्रचान्द्रभेदेन चतुर्व्विधो वत्सरः । यथा चूड़ोपनयनादिषु वर्षगणना सावनेन शुभाशुभगणनन्तु सौरेणेति सिद्धम् । सावनसंवत्सरेण एकदिनाधिकवत्सरो नाक्षत्रो भवतीत्यनयोर्भेदः । सौरस्तु पञ्चषष्ट्यधिकत्रिशतदिनैर्भवति । यथा,—

"मेषादीनामहर्वृन्दं यस्यां सम्प्राप्यचन्द्रकम् ।१८७।
तुलादीनामभूयस्मिन्नक्रकन्तु लिखेत्ततः ।"१७८॥

चान्द्रवत्सरोऽपि द्वादशमासैर्भवति । मलमासपाते तु त्रयोदशमासैर्भवति । तथा च श्रुतिः । द्वादशमासाः संवत्सरः क्वचित्त्रयोदशमासाः संवत्सर इति । त्रयोदशेत्यधिमासे स्मृतिः । यस्मिन्वर्षे द्वादशैकश्च यथ इति । यथो मास इति । यथा मासाः सहैक इति संवत्सर इति श्रुतपथश्रुत्या यज्ञ सहैक-शब्दयोर्मासवर्षपर्य्यायतोक्ता । इति मलमासतत्त्वम् ॥*॥ अथ षष्टिसंवत्सरगणना ।

"शकेन्द्रकालः पृथगाकृति-२२ घ्नः
शशाङ्कनन्दाश्वियुगैः ४२९१ समेतः ।
शरादिवस्विन्दु-१८७५ हृतः सलब्धः
षष्ट्यावशिष्टाः प्रभवादयोऽब्दाः ॥
वर्षवर्जन्तु यच्छेषं खृत्यैः संपूर्य खोर्म्मिभिः ।६०।
हृतशुद्धक्रमतः खाग्निहृते शेषे मासकादयः ॥"

अस्यार्थः शकेन्द्रकालः शकराजाब्दकालः । पृथक् आकृतिघ्नः २२ द्वाविंशत्या पूरितः । शशाङ्कनन्दाश्वियुगैरेकनवत्यधिकशतद्वयाधिकचतुःसहस्रैः समेतोऽङ्कः । शरादिवस्विन्दुहृतः पञ्चसप्तत्यधिकाष्टादशशतैर्यावत्संख्यं हर्त्तुं शक्नोति तावता हृतः कर्त्तव्यः । सलब्धः पूर्ब्बशकाब्दः शरेत्यादिना लब्धसंख्यया युतः कार्य्यः । षष्ट्यादिशेषे पञ्चादेयोऽङ्कः पूर्ब्ववत् षष्ट्याद्धृतलब्धस्यावशिष्टे प्रभवादयः । एकावशेषे प्रभवः द्व्यादावशिष्टे विभवादिः । वर्षवर्जन्तु यच्छेषं वर्षातिरिक्तं शरादिवस्विन्दुहृतावशिष्टं तत् खृत्यैर्द्वादशभिः संपूर्य खोर्म्मिभिः षष्ट्या हृते शुद्धक्रमत इत्यनेन षष्टिहृतावशिष्टा अङ्का दद्यात् । षष्टिहृतलब्धांशके खाग्निहृते त्रिशता हृतेऽवशिष्टा अंशका लब्धा मासाः स्युरिति । प्रभवादिवर्षाण्युपक्रम्य ।

"आद्या तु विंशतिर्ज्ञेया द्वितीया वैष्णवी स्मृता ।
तृतीया रुद्रदेवत्या श्रेष्ठा मध्याधमा भवेत् ॥"

भविष्यपुराणे ।

भैरव उवाच ।

"षष्ट्यब्दं कथयाम्यत्र क्रूराः सौम्याश्च ये प्रिये ! ।
संवत्सरफलं सर्व्वं प्रभवादौ वरानने ! ॥
बहुतोयास्तथा मेघा बहुशस्या च मेदिनी ।
बहुक्षीरास्तथा गावो व्याधिरोगविवर्ज्जिताः ॥
प्रशान्ताः पार्थिवास्त्वेव प्रभवे परिकीर्त्तिताः ।१।
सुभिक्षं क्षेममारोग्यं सर्व्वे व्याधिविवर्ज्जिताः ॥
प्रशान्ता मानवास्तत्र बहुशस्या वसुन्धरा ।
हृष्टास्तुष्टा जनाः सर्व्वे विभवे च वरानने ! ॥२॥
रोगा बहुविधाश्चैव मनुष्या वाजिकुञ्जराः ।
सर्व्व एव प्रणश्यन्ति शुक्ले वर्षे वरानने ! ॥ ३ ॥
उन्मत्तश्च जगत् सर्व्वं धनधान्यसमाकुलम् ।
नित्योत्सवः प्रजावृद्धिः प्रमोदे जायते प्रिये ॥४॥
नीरोगाश्च निरावाधा मानवा विगतद्विषः ।
बहुक्षीरास्तथा गावः प्राजापत्ये वरानने ॥५॥
निरातङ्कं जगत् सर्व्वं धनयौवनगर्वितम् ।
अङ्गिरसि प्रजाः सर्व्वा नित्योत्साहा वरानने ॥६॥
सुभिक्षं क्षेममारोग्यं वर्षाकालं सुशोभनम् ।
श्रीमुखे सस्यवृद्धिं विजानीयात् श्रीमुखे सुरवन्दिते ॥७॥
बहुक्षीरास्तथा गावो धान्यञ्च बलवत्तरम् ।
जायन्ते सर्व्वशस्यानि भावे वर्षे वरानने ॥८॥
महार्घं जायते सर्व्वं घृततैलरसादिकम् ।
प्रजानाञ्च भवेद्वृद्धिर्युवनि संवत्सरे शुभे ॥९॥
निर्व्वृत्तिः सर्व्वशस्यानां मध्या धातरि कीर्त्तिता ।
इक्षुक्षीरगुड़ादीनां प्रबलत्वं वरानने ॥१०॥
सुभिक्षं क्षेममारोग्यं कार्पासस्य महार्घता ।
लवणं मधु गव्यञ्च ईश्वरे दुर्लभं प्रिये ॥ ११ ॥
सुभिक्षं क्षेममारोग्यं प्रशान्ताः पार्थिवाः प्रिये ।
तस्करोपहतं वित्तं बहुधान्ये वरानने ॥ १२ ॥
राष्ट्रभङ्गश्च दुर्भिक्षं तस्करैश्चोपपीड़नम् ।
जानीयाद्विग्रहं घोरं प्रमाथिनि वरानने ॥१३॥
जायन्ते सर्व्वशस्यानि मेदिनी निरुपद्रवा ।
लवणं मधु गव्यञ्च महार्घं विक्रमे प्रिये ॥१४॥
कोद्रवाः शालिमुद्गाश्च शुक्लमाषास्तथैव च ।
महार्घं जायते सर्व्वं वृषे च सुरवन्दिते ॥ १५ ॥
चणका मुद्गमाषाश्च अन्यच्च विदलं प्रिये ।
महार्घं जायते सर्व्वं चित्रभानौ वरानने ॥१६॥
सुभिक्षं क्षेममारोग्यं विश्वञ्च निरुपद्रवम् ।
व्यवहारो भवेत् हृष्टः स्वर्भानौ देवपूजिते ॥१७॥
अतिवृष्टिश्च जायेत धान्यस्याथ प्रपीड़नम् ।
शस्यं भवति मामान्यं तारणे सुरवन्दिते ॥१८॥
बहुशस्यानि जायन्ते सर्व्वदेशे सुलोचने ।
सौराष्ट्रे नाटदेशे च पार्थिवे नात्र संशयः ॥१९॥
दुर्भिक्षं जायते घोरं सर्व्वोपद्रवसंयुतम् ।
अनावृष्टिः समाख्याता व्यये संवत्सरे प्रिये ॥२०॥
उद्यतो वर्षणे मेघो जलं नैवोपजायते ।
महार्घं सर्व्वजिद्वर्षे सर्व्वमेव वरानने ॥ २१ ॥
कोद्रवाः शालिमुद्गाश्च कङ्गुमाषास्तथैव च ।
सुलभं जायते सस्यं जगदे सर्व्वधारिणि ॥२२॥
अनग्निप्रबला लोका धान्यौषधिप्रपीड़नम् ।
जायते मानुषे कष्टं विरोधिनि न संशयः ॥२३॥
सर्व्वाः प्रजाः प्रपीड्यन्ते व्याधिः शोकश्च जायते ।
शिरोवक्त्रोऽक्षिरोगाश्च पापाद्धि विलते जनाः ॥ २४ ॥
उपद्रुतं जगत् सर्व्वं तस्करैर्म्मूषिकैः खगैः ।
पीड़िताश्च प्रजाः सर्व्वा देशभङ्गाः खरे प्रिये ॥ २५ ॥
सुभिक्षं क्षेममारोग्यं सस्यं भवति शोभनम् ।
बहुक्षीरास्तथा गावो नन्दनं नन्दने प्रिये ॥२६॥
अल्पतोयास्तथा मेघा वर्षन्ति खण्डमण्डले ।
नश्यन्ति सर्व्वशस्यानि विजये नात्र संशयः ॥२७॥
क्षत्रियाश्च तथा वैश्याः शूद्राश्च नटनर्त्तकाः ।
पीड़ितास्ते वरारोहे जये सर्व्वे न संशयः ॥२८॥
रोगश्च तथा देवि दाहज्वरसमन्वितम् ।
अभिभूतं जगत् सर्व्वं मन्मथे सुरवन्दिते ॥२९॥
तुषधान्यत्रयो देवि सर्व्वशस्यमहार्घता ।
व्यवहाराश्च नश्यन्ति दुर्मुखे दुर्मुखाः प्रजाः ॥३०॥
पीड्यन्ते सर्व्वशस्यानि देशे देशे सुचिक्कणे ।
क्षेमलब्धे प्रजाः सर्व्वाः क्षीयन्ते नात्र संशयः ॥३१॥
तस्करैः पार्थिवैश्चैव अभिभूतमिदं जगत् ।
अर्घो भवति सामान्यो विलम्बे तु भयं महत् ॥३२॥
विघ्नमस्यं जगत् सर्व्वं विरोधे भयसंभवम् ।
विकारी सर्व्वतोऽप्रायो मम वाक्यन्तु नान्यथा ॥ ३३ ॥
क्वचिद्वर्षति पर्ज्जन्यो देशे संछिन्नमण्डलः ।
दुर्भिक्षं शूकरीवर्षे व्यवहारो विपर्य्ययः ॥३४॥

दुर्भिक्षं जायते सर्व्वा मेदिनी दुष्यति प्रिये।
म्रवे म्रवन्ति तोयानि पीड़िता मानवा भुवि ॥३५॥
सुवर्णरूप्यधान्यानि जगत् सर्व्वं सुशोभनम्।
ब्राह्मणा वणिजस्तुष्टाः सुभिक्षे शुभव्रत्
प्रिये ॥ ३६ ॥
सुभिक्षं क्षेममारोग्यं तृप्ता गोब्राह्मणाः प्रिये।
सुस्थिताः शोभने वर्षे प्रजाः सर्व्वाः सुलो-
चने ॥ ३७ ॥
विषमस्थं जगत् सर्व्वं व्याकुलं समुदाहृतम्।
जनानां जायते भद्रे क्रोधे क्रोधः परस्परम् ॥३८॥
सर्व्वत्र जायते क्षेमं सर्व्वशस्यमहार्घता।
विश्वावसौ वरारोहे कार्पासस्य महार्घता ॥३९॥
पार्थिवैर्नृपसैन्यैश्च समस्तैः खण्डमण्डले।
प्रपीड्यन्ते जनाः सर्व्वे भयभीताः पराभवे ॥४०॥
तृणधान्यानि पीड्यन्ते गौण्यै वर्षति वासवः।
म्रवङ्गे पीड़िताः सर्व्वाः प्रजाश्च सुरवन्दिते ॥४१॥
जायन्ते सर्व्वशस्यानि सुभिक्षं निरुपद्रवम्।
सौम्यदृष्टिर्भवेद्राजा कालिके च शुभं वदेत् ॥४२॥
सुभिक्षं क्षेममारोग्यं सुखञ्च निरुपद्रवम्।
सौम्यदृष्टिर्भवेद्राजा सौम्ये सौख्यं प्रकी-
र्त्तितम् ॥ ४३ ॥
तोयपूर्णो भवेन्मेघो वर्षते च दिने दिने।
निरुपद्रवाश्च राजानः सर्व्वसाधारणे प्रिये ॥४४॥
वासवो वर्षते देवि देशे चाखण्डमण्डले।
म्रहिच्छत्रे कान्यकुब्जे विरोधी क्षपिनाशु-
क्रत् ॥४५॥
म्रभिभूतं जगत् सर्व्वं क्लेशैर्व्व्याधिविधैः प्रिये।
भारतैः फलदाहैश्च परिवारिणि शोभने ॥४६॥
निष्पत्तिः सर्व्वशस्यानां सुभिक्षं भवति प्रिये।
प्रमाथिनि जलोद्गारी जलदो मोदते प्रजा ॥४७॥
निष्पत्तिः सर्व्वशस्यानां सर्व्वशस्यमहार्घता।
घृतं तैलसमं याति म्रानन्दे नन्दति प्रजा ॥४८॥
कोद्रवाः शालिसुद्गाश्च पीड्यन्ते वरवर्णिनि।
सर्व्वौषधानि धान्यानि राक्षसे निष्ठुराः
प्रजाः ॥ ४९ ॥
दुर्भिक्षं जायते घोरं धान्यौषधिप्रपीड़नम्।
म्रनले च समाख्यातं नात्र कार्य्या विचा-
रणा ॥ ५० ॥
देशभङ्गः सुदुर्भिक्षं समाख्यातं कथयाम्यहम्।
पिङ्गले चारुपद्माक्षि दुर्भिक्षं नर्म्मदातटे ॥५१॥
गोमहिष्यो विनश्यन्ति ये चान्ये नटनर्त्तकाः।
वासवो वर्षते देवि शस्यञ्च नहि जायते ॥
तिलसर्षपमाषादिकार्पासानां महार्घता।
गोमहिष्यः सुवर्णानि कांस्यताम्राद्यशेषतः ॥
तत् सर्व्वं देवि विक्रीय कर्त्तव्यो धान्यसञ्चयः।
तेन धान्येन लोकोऽयं निस्तरिष्यति दुर्दिनम्।
पार्थिवा मोषका दीनाः कालयुक्ते प्रपी-
ड़िताः ॥ ५२ ॥
तोयपूर्णाः स्रुता मेघा बहुशस्या च मेदिनी।
निष्ठुराः पार्थिवा देवि! सिद्धार्थे च वरा-
ननें! ॥ ५३ ॥
म्रल्पतोया घनाश्चैव कीटकाः प्रबलाः स्रुताः।
विरुद्धाः पार्थिवा देवि रौद्रे संवत्सरे प्रिये! ॥
५४ ॥
दुर्भिक्षं मध्यमं प्रोक्तं म्रवहारो न वर्त्तते।
भवेद्वै मध्यमा वृष्टिर्दुर्म्मतौ समुपस्थिते ॥ ५५ ॥
सुभिक्षं जायते लोकः सर्व्वोपद्रवर्व्वर्जितः।
प्राणिनां जायते हर्षो दुन्दुभौ वरवर्णिनि ॥५६॥
महिषीगोहिरण्यादितान्रकांस्याद्यशेषतः।
तत् सर्व्वं देवि! विक्रीय कर्त्तव्यो धान्यसञ्चयः ॥
रक्ते संवत्सरे देवि! क्रूरबुद्धिर्नराधिपः।
मानवाः क्रूरचेष्टाश्च संग्रामे न जयो भवेत् ॥५७
दुर्भिक्षं मरणं रोगो धान्यौषधिप्रपीड़नम्।
पापरोगो भवेद्देवि! रक्ताक्षेमरवन्दिते ॥५८॥
रोगो मरणदुर्भिक्षं विरोधो बहुसंकुलः।
क्रोधे तु विषमं सर्व्वं समाख्यातं हरप्रिये! ॥५९
मेदिनी चलते देवि! सर्व्वभूतं चराचरम्।
देशभङ्गश्च दुर्भिक्षं क्षये संक्षीयते प्रजा ॥
सौराष्ट्रे मालवे देशे दक्षिणे कोङ्कणे तथा।
दुर्भिक्षं जायते घोरं क्षये संवत्सरे प्रिये! ॥
कौसुदीचर्म्मनद्योश्च यमुनानर्म्मदातटे।
विन्ध्यायां सैन्धवे चापि विनश्यति न संशयः ॥
सिंहले मध्यदेशश्च कालञ्जरे तथैव च।
क्षये क्षयन्ति सर्व्वाणि नान्यथा वरवर्णिनि ॥"
६० ॥ * ॥
कार्त्तिकादिद्वादशवर्षाणि यथा। वराहसंहि-
तायाम्।
"नक्षत्रेण सहोदयमस्तं वा येन याति सुर-
राजमन्त्री ॥"
तत्संज्ञं वक्तव्यं वर्षं मासक्रमेणैव ॥
वर्षाणि कार्त्तिकादीनि आग्नेयाद्वयानु-
योगीनि।
क्रमशश्चित्रश्च पञ्चममन्त्यमुपान्त्यञ्च विज्ञेयम्॥"
नक्षत्रेण गुरुभुज्यमाननक्षत्रेण। आग्नेयं
कृत्तिका। पञ्चमं फाल्गुनं वर्षम्। अन्त्य-
माश्विनम्। उपान्त्यं भाद्रम्।
"अन्त्योपान्त्यौ त्रिभौ ज्ञेयौ फाल्गुनश्च त्रिभो
मतः।
शेषा मासा द्विभा ज्ञेया कृत्तिकादिक्षयवशया॥
द्वे द्वे चित्रादितारायां पूर्णपर्व्वेन्दुसङ्गते।
मासाश्चैत्रादयो ज्ञेयास्त्रिके षष्ठान्त्यसप्तमाः॥"
इति सङ्कर्षणकाण्डात्॥
पूर्णपर्व्वेन्दुसङ्गते पौर्णमासीयुते द्वे द्वे तारे
तदेकवाक्यतया पूर्व्ववचने पौर्णमासीलाभः।
यथा मासानां पौर्णमास्यां कृत्तिकादिसम्बन्धात्
कार्त्तिकादित्वं तथा वर्षाणामपि गुरोः कृत्ति-
कादावुदयसम्बन्धात् कार्त्तिकादित्वं तेन
कृत्तिकारोहिण्योरेकतरस्मिन् गुरोरुदये-
ऽन्यतरस्मिन् कार्त्तिकं वर्षम्। एवं मार्ग-
शीर्षादि। अत्र वर्षद्वयघटकयोर्नक्षत्रयोरेक-
तरस्मिन् अस्तं गतो गुरुरन्यतरस्मिन्नुदेति तत्र
का गतिरिति चेत् कार्त्तिकोत्तरं मार्गशीर्षं
ततः पौषमित्यादिक्रमाद्गतिरिति। फलानि च।
"शकटानलोपजीविकगोपीड़ाव्याधिशोकश्च।
वृद्धिस्तु रक्तपीतकुसुमानां कार्त्तिके वर्षे ॥ १ ॥
सौम्येऽब्देऽनावृष्टिर्मृगाखुशलभाण्डजेश्च शस्य-
नाशः।
व्याधिभयं मिश्रेरपि भूपानां जायते वैरम् ॥२॥
शुभक्षत्रजातः पौषो निवृत्तवैराः परस्परं
भूपाः।
द्विचिगुणो धान्यार्घः पौष्टिककर्म्मप्रसिद्धिश्च ॥३॥
पितृपूजा परिवृद्धिर्म्माघे हार्द्दञ्च सर्व्वभूता-
नाम्।
आरोग्यवृष्टिधान्यार्घसम्पदो वित्तलाभश्च ॥ ४ ॥
फाल्गुने वर्षे विद्यात् क्वचित् क्वचित् क्षेम-
वृष्ट्यादिशस्यानि।
दौर्भाग्यं प्रमदानां प्रबलाश्चौरा नृपाश्चोग्राः ॥५
चैत्रे मन्दा वृष्टिः प्रियमन्नं क्षेममवनिपा
स्तदवः।
वृद्धिश्च कोद्रवधान्यस्य भवति पीड़ा च रूप-
वताम् ॥ ६ ॥
वैशाखे धर्म्मपरा विगतभयाः प्रमुदिताः प्रजाः
सनृपाः।
यज्ञक्रियाप्रवृत्तिर्निष्पत्तिः सर्व्वशस्यानाम् ॥ ७ ॥
ज्येष्ठे ज्ञातिकुलधर्म्मश्रेणीश्रेष्ठा नृपाः सर्व्व-
धर्म्मज्ञाः।
पीड्यन्ते धान्यानि च हित्वा कङ्गुप्रभीजानि ॥८
आषाढ़े जायन्ते शस्यानि क्वचिद्वृष्टिरन्यत्र।
योगक्षेमं मध्यं शस्ययुग्या भवन्ति भूपाः ॥९॥
श्रावणे वर्षे क्षेमं कामं शस्यानि पाकमुप-
यान्ति।
क्षुद्रा ये पार्थिवास्ते पीड्यन्ते ये च तद्भक्ताः ॥
१० ॥
भाद्रपदे बलीजं निष्पत्तिं याति पूर्व्वशस्यञ्च।
न भवत्यपरं शस्यं क्वचित् सुभिक्षं क्वचिच्च
दुर्भिक्षम् ॥ ११ ॥
आश्वयुजेऽप्यजस्रं पतति जलं प्रमुदिताः प्रजाः
क्षेमम्।
प्राणभयः प्राणभृतां सर्व्वेषामर्थबाहुल्यम् ॥"
१२ ॥
इति ज्योतिस्तत्त्वम् ॥ * ॥
समाद्यादिपञ्चवत्सरा यथा,—
"म्रकाब्दात् पञ्चभिः शेषात् समाद्यादिषु वत्-
सराः।
सम्परीदानुपूर्व्वाश्च तथोद्वापूर्व्वका मताः ॥"
संवत्सरादिफलमुक्तं विष्णुधर्म्मोत्तरे ॥
"संवत्सरे तथा दानं तिलस्य तु महाफलम्।
परिपूर्व्वे तथा दानं यवानाञ्च द्विजोत्तमाः ॥
इदापूर्व्वेऽन्नवस्त्राणां धान्यानाञ्चानुपूर्व्वके।
उदासंवत्सरे दानं रजतस्य महाफलम् ॥
ज्योतिर्विदस्त्विज्यमथात् प्रभवादेश्च सम्भवम्।
ऊचुस्तद्वत् समाद्यादिवर्षाणामपि सम्भवम् ॥"
इज्यमथात्। गुरुमध्यभोगगमनात्। प्रभवादेः।
प्रभवादिवर्षषष्टेः। इति मलमासतत्त्वम् ॥ * ॥
(ध्रुवपुत्रः। यथा, भागवते। ४। १०। १।
"प्रजापतेर्दुहितरं शिशुमारस्य वै ध्रुवः।

उपयेमे भ्रमिं नाम तत्सुतौ कल्पवत्सरौ ॥")

वत्सरान्तकः, पुं, (वत्सरस्यान्ते कायति ग्लायति इति। कै+कः। यद्वा, वत्सरस्यान्तो नाशो यस्मात्।) फाल्गुनमासः। इति राजनिर्घण्टः॥

वत्सलः, त्रि, (वत्से पुत्रादिस्नेहपात्रे कामोऽस्यास्तीति। वत्स+"वत्सांसाभ्यां कामबले।" ५।२।९८। इति लच्।) स्नेहयुक्तः। तत्पर्य्यायः। स्निग्धः २। इत्यमरः। ३।१।१४॥ (यथा, भागवते। १।५।३०।
"ज्ञानं गुह्यतमं यत्तत् साक्षात् भागवतोदितम्।
अन्ववोचन् गमिष्यन्तः कृपया दीनवत्सलाः॥"
वत्सं लाति गृह्णातीति। ला+कः। वत्सकामुके च॥)

वत्सलः, पुं, (वत्स+लच्।) शृङ्गारादिदशरसान्तर्गतरसविशेषः। तत्पर्य्यायः। वात्सल्यम् २। इति जटाधरः॥ (अस्य लक्षणोदाहरणे तु रसशब्दे ज्ञातव्ये॥*॥ स्कन्दानुचरविशेषः। यथा, महाभारते। ९।४५।६९।
"वत्सलो मधुवर्णश्च कलसोदर एव च॥")

वत्सला, स्त्री, (वत्से कामोऽस्यस्या इति। लच्। यद्वा, वत्सं लातीति। ला+कः।) वत्सकामा गौः। इति हेमचन्द्रः। ४।३२७॥ (यथा, रामायणे। २।४३।१८।
"साहं गौरिव सिंहेन विवत्सा वत्सला कृता।
कैकेय्या पुरुषव्याघ्र बालवत्सेव गौर्बलात्॥")

वत्सात्री, स्त्री, (वत्सस्यात्रीव गात्रचिह्नं यस्याः। षच् समासे।) गोडुम्बा। इति जटाधरः॥

वत्सादनः, पुं, (अत्तीति। अद्+ल्युः। वत्सानां अदनो भक्षकः।) वृकः। इति राजनिर्घण्टः॥

वत्सादनी, स्त्री, (वत्सैरद्यते प्रियत्वादिति। अद् ल्युट्। ङीप्।) गुडूची। इत्यमरः।२।४।८९॥

व(ब)द, इ ङ स्तुत्यभिवादयोः। इति कविकल्पद्रुमः॥ (भ्वा०-आत्म०-सक०-सेट्।) अभिवादो नमस्कारः। इ, वन्दते। ङ, वन्दते गुरुं लोकः। नमस्करोति स्तौति वा इत्यर्थः। इति दुर्गादासः॥

व(ब)द, ऐ वाचि। इति कविकल्पद्रुमः॥ (भ्वा०-पर०-सक०-सेट्।) ऐ, उद्यात्। इति दुर्गादासः॥ ("क्विपि संवत् दन्त्योष्ठत्वात् पश्चे सानुनासिको वकारः संवत् यस्तु मन्यते नायं संप्रसारिणो वदेः प्रयोगः किन्तर्हि वद स्वैर्य्य इत्यस्य ओष्ठ्यवकारादेः तच्चते मकारवदपि सम्बदिति वर्णदेशना।" इति मनोरमा॥)

वद, क वाक्सन्देशयोः। इति कविकल्पद्रुमः॥ (चुरा०-पर०-सक०-आत्म०-इत्येके-सेट्।) क, वादयति। सन्देशो वचनविशेषः। अयमात्मनेपदीत्येके। इति दुर्गादासः॥

वद, भ ङ वाक्सन्देशयोः। इति कविकल्पद्रुमः॥ (भ्वा०-उभ०-आत्म०-इत्येके-सक०-सेट्।) भ, वदति वदते। ङ, वदते। अयमात्मनेपदीत्यन्ये। इति दुर्गादासः॥

वदः, त्रि, (वदति वक्तीति। वद+पचाद्यच्।) वक्ता। इत्यमरः। ३।१।३५॥

वदनं, क्ली, (वदत्यनेनेति। वद+करणे ल्युट्।) मुखम्। इत्यमरः॥ (यथा, आर्य्यासप्तशत्याम्। २७६।
"दर्शनविनीतमानां गृहिणीं हर्षोल्लसत्कपोलतलम्।
चुम्बननिषेधमिषतो वदनं पिदधाति पाणिभ्याम्॥"
लक्षणया अग्रभागः। यथा, सुश्रुते। १।७।
"त्रीण्यन्यानि (यन्त्राणि) जाम्बववदनानि त्रीण्यङ्कुशवदनानि षड्वाग्निकर्म्मेष्वभिप्रेतानि॥"
वद+भावे ल्युट्। कथनम्॥)

वदनासवः, पुं, (वदनस्य आसवः।) अधरमधु। इति भूरिप्रयोगः॥

वदन्तिः, वदन्ती, } स्त्री, (वद्+"वदेश्च।" इत्युञ्वुलौ दत्तोक्ता ङिच्प्रत्ययः।३।५०॥ ऋदिकारादिति वा ङीष्।) कथा। इति सिद्धान्तकौमुदी॥ विसर्गशून्यं वदन्तिपदं क्रियापदं भवति॥ (यथा, मनुः। १२।११५।
"यं वदन्ति तमोभूता मूर्खा धर्म्ममतद्विदः॥")

वदन्यः, त्रि, वदान्यः। इत्यमरटीकासारसुन्दरी॥

वदान्यः, त्रि, (वदति सर्व्वेभ्य एव दास्यामीति मनोहरवाक्यमिति। वद+"वदेरान्यः।" उणा० ३।१०४। इति आन्यः।) बहुप्रदः। (यथा, रघुः। ५।२४।
"गतो वदान्यान्तरमित्ययं मे
माभूत् परीवादनवावतारः॥")

वलगुवाक्। इत्यमरः। ३।१।६॥ (स्वनामख्यात ऋषिविशेषे, पुं। यथा, महाभारते। १३।१६।११।
"निवेष्टुकामस्तु पुरा अष्टावक्रो महातपाः।
ऋषेरथ वदान्यस्य वव्रे कन्यां महात्मनः॥")

वदामं, क्ली, फलविशेषः। बादाम इति भाषा॥ तत्पर्य्यायः। सुफलम् २ वातवैरिः ३ नेत्रोपमम् ४। अस्य गुणाः। उष्णत्वम्। सुस्निग्धत्वम्। वातघ्नत्वम्। गुरुत्वम्। शुक्रकारित्वञ्च। इति राजनिर्घण्टः॥ अपि च।
"वातादौ वातवैरी स्यान्नेत्रोपमफलस्तथा।
वातादुष्णः सुस्निग्धो वातघ्नः शुक्रकृत् गुरुः॥
वातादम्ला मधुरो वृष्यः पित्तानिलापहः।
स्निग्धोष्णकफकृत् श्रेष्ठो रक्तपित्तविकारिणाम्॥"
इति भावप्रकाशः॥

वदालः, पुं, (वद+घञर्थे कः। वदेन वदनेन अलति पर्य्याप्नोतीति। वद+अल्+अच्।) मत्स्यविशेषः। बोयालि इति भाषा। तत्पर्य्यायः। पाठीनः २। इति त्रिकाण्डशेषः॥ हयकथयोस्तस्योपयोगित्वं यथा, मनुः।
"पाठीनरोहितावाद्यौ नियुक्तौ हयकव्ययोः॥"

वदालकः, पुं, (वदाल एव। स्वार्थे कन्।) पाठीनमत्स्यः। इति भूरिप्रयोगः॥

वदावदः, त्रि, (अत्यन्तं वदतीति। वद्+अच्।
"चरिफलीति।"३।१।२३४। इत्यस्य वार्त्तिकोक्त्या निपातितम्।) वक्ता। इत्यमरः।३।१।३५॥

वधः, पुं, (हननमिति। हन्+अप्। वधादेशः।) प्राणवियोगफलकव्यापारः। तत्पर्य्यायः। प्रमापणम् २ निर्व्हणम् ३ निष्कारणम् ४ निश्चारणम् ५ प्रवासनम् ६ परासनम् ७ निस्सूदनम् ८ निर्हिंसनम् ९ निर्व्वासनम् १० संज्ञपनम् ११ निर्ग्रन्थनम् १२ अपासनम् १३ निस्तर्हणम् १४ निर्हननम् १५ क्षणनम् १६ परिवर्ज्जनम् १७ निर्व्वापणम् १८ विप्लुषनम् १९ मारणम् २० प्रतिघातनम् २१ उद्वासनम् २२ प्रमथनम् २३ क्रथनम् २४ उच्छासनम् २५ आलम्भः २६ पिञ्जः २७ विशूरः २८ घातः २९ उच्चन्थः ३०। इत्यमरः॥ हिंसा ३१ घातनम् ३२ विदारणम् ३३ पिञ्जकम् ३४ पातः ३५ परिघः ३६ परिघातनम् ३७ कदनम् ३८ निवारणम् ३९ समाघातः ४० निर्गन्थनम् ४१ मारिः ४२ मारी ४३ उत्पातः ४४ मारकः ४५ मरकः ४६ मारः ४७ संघातः ४८। इति शब्दरत्नावली॥*॥ पुण्यप्रदवधो यथा,—
"एकस्य यत्र निधने प्रवृत्ते दुष्टकारिणः।
बहूनां भवति क्षेमं तस्य पुण्यप्रदो वधः॥
ब्रह्मस्तेयी सुरापश्च ब्रह्महा गुरुतल्पगः।
आत्मानं घातयेद्यस्तु तस्य पुण्यप्रदो वधः॥"
इति कालिकापुराणे २० अध्यायः॥
अपि च।
"कथं नु स्त्रीवधं कुर्य्यां महापातकिनामपि।
स्त्रीवधे तु महापापं यथा ब्रह्मवधे स्मृते॥
इति रामवचः श्रुत्वा विश्वामित्रस्तमाह वै॥
यस्यास्तु बहवो मासान् म्रियन्तेऽपि द्विजन्मनः।
न पापं विद्यते तेन न दोषा नृपनन्दन॥
यस्यास्तु निधनाद्राम जनाः स्युः सुखिनो भृशम्।
भवन्ति सततं तस्मात्तस्याः पुण्यप्रदो वधः॥"
इत्यग्निपुराणम्॥*॥
अपि च।
"नैकस्यार्थे बहून् हन्यादिति प्राज्ञेषु निश्चयः।
एकं हन्यादबहूनां हि न पापी तेन जायते॥"
इति वामनपुराणे ५५ अध्यायः॥*॥
"नातताय्यिवधे दोषो हन्तुर्भवति कश्चन।"
इति गीतायाः १।२६ श्लोकटीकायां स्वामी॥
पापजनकवधः प्रायश्चित्तशब्दे द्रष्टव्यः॥*॥
वधबन्धौ पूर्व्वकर्म्मवश्यौ यथा,—
"न कश्चित्तात केनापि बध्यते हन्यतेऽपि वा।
वधबन्धौ पूर्व्वकर्म्मवश्यौ नृपतिनन्दन॥"
इति वामनपुराणे ६२ अध्यायः॥*॥
पारिभाषिकवधो यथा,—
"वपनं द्रविणादानं देशान्निर्य्यापनन्तथा।
एष हि ब्रह्मबन्धूनां वधो नान्योऽस्ति दैहिकः॥"
इति महाभारते सौप्तिकपर्व्व॥
(वधप्रकारो वधित्वभेदादिकञ्च वधित्रशब्दे द्रष्टव्यम्॥)

वधकः, पुं, (हन्तीति। हन्+ण्वुल्। "हनो वध च" उणा० २।३६ इति वधादेशः।) वधकर्त्ता

हिंस्रः। इति सिद्धान्तकौमुद्यामुणादिवृत्तिः॥ व्याधिः। मृत्युः। इतिसंक्षिप्तसारोणादिवृत्तिः॥

वधकर्म्म, क्ली, (वधः एव कर्म्म।) प्राणवियोगफलकव्यापारः। तद्वैदिकपर्य्यायः। दभ्नोति १ श्नथति २ ध्वरति ३ धूर्व्वति ४ तृणक्ति ५ तृक्षति ६ क्षुरति ७ क्षुन्नति ८ श्वसिति ९ नभते १० अर्द्दयति ११ क्षुणाति १२ खेहयति १३ यातयति १४ स्फुरति १५ स्फुलति १६ निपयसु १७ अवतिरति १८ वियातः १९ आतिरत् २० तळित् २१ आखण्डलः २२ भ्रूणाति २३ रन्नाति २४ भ्रूणाति २५ भ्रूम्नाति २६ त्रयोलृहि २७ तालृहि २८ नितोग्रते २९ निवर्हयति ३० मिनाति ३१ मिनोति ३२ धमति ३३। इति चयस्त्रिंशद्वधकर्म्माणः। इति वेदनिघण्टौ। २। १९॥

वधत्रं, क्ली, (वध्यतेऽनेन इति। वध+"अमिनक्षियजिवधिपतिभ्योऽत्रन्।" उणा० ३।१०५। इति अत्रन्।) अस्त्रम्। इत्युणादिकोषः॥

वधस्थली, स्त्री, (वधाय वधस्य वा स्थली स्थानम्।) प्राणिवधस्थलम्। मशान इति भाषा। तत्पर्य्यायः। आघातः २। इति त्रिकाण्डशेषः॥ प्रघातः ३ वधस्थानम् ४। इति शब्दरत्नावली॥ आघातनम् ५। इति हारावली॥

वधस्थानम्, क्ली, (वधाय वधस्य वा स्थानं भूमिः।) वधस्थली। इति हारावली। १९६॥

व(ब)धाङ्कं, क्ली, (वधः बन्धनं एवाङ्कं यस्य। ततः कन्।) कारावेश्म। इति त्रिकाण्डशेषः॥

वधार्हः, त्रि, (वधं अर्हतीति। अर्ह+अण्।) वध्यः। हननयोग्यः। यथा, वृहस्पतिः।

"वधार्हः सुवर्णशतं दमं दाप्यस्तु पूरुषः।
अङ्गच्छेदार्हकस्त्वर्द्धं सन्दंशार्हस्तदर्द्धकम्॥"

सन्दंशो वृद्धाङ्गुलितर्जन्योश्छेदः। इति प्रायश्चित्तविवेकः॥

वधी, [न्] त्रि, (प्राणवियोगफलकव्यापारो वधः स निष्पाद्यत्वनिरूपितनिष्पादकत्वेनास्त्यस्येति। वध+इनिः।) वधकर्त्ता। प्राणवियोगफलकव्यापारो वधः तन्निष्पादकत्वञ्च साक्षात् परम्परोदासीनं स्मृतिकारपरिगणितं वधित्वम्। तच्च पञ्चविधं स्मृतिस्वरसात् कर्त्ता प्रयोजकोऽनुमन्तानुग्राहको निमित्तौ चेति। नरान्तरव्यापारव्यवधानेन वधनिष्पादकः कर्त्ता। १। यः कर्त्तारं कारयति स प्रयोजकः। २। स च द्विविधः। एकः स्वतोऽप्रवृत्तमेव पदातिं वेतनादिना प्रेरयति। अपरः स्वतः प्रवृत्तमेव मन्त्रोपायोपदेशादिना प्रोत्साहयति। अनुमतिर्हातानुमन्ता। ३। अनुमतिश्च द्विविधा एका यद्विरोधाहननं न भवति तस्य विरोधिनो मया निरोधः कर्त्तव्य इति प्रयुक्तिरनुमतिः। अपरा एनं हन्मीति वचने प्रवृत्तस्याप्रतिषेध एव। अनुग्राहकोऽपि द्विविधः। एको वधप्रतिरोधकः। अपरः स्वयंप्रवर्त्तो। ४। उद्देश्यत्वे सति हन्तुर्मनूत्पादको निमित्तौ। ५। अत्र प्रयोजकस्य कर्त्तृप्रवृत्तिद्वारेण वधकारणत्वम्। अनुमन्तुश्च हन्तुर्निर्भयत्वेन दृढतरप्रहारोत्पत्तिद्वारेण। अनुग्राहकस्य पलायनाद्यसम्भवेन हननीयस्यैर्य्यं कुर्व्वतः प्रहारस्वरूपोत्पत्तिद्वारेण वा कारणत्वम्। निमित्तिनो हन्तुर्मनूत्पादनद्वारेणेति। प्रयोजकादीनां चतुर्णां व्यवहितहननकारणानामवान्तरभेदाद्वैदः। अतः पञ्चविधं वधित्वम्। इति प्रायश्चित्तविवेकः॥

वधोद्यतः, त्रि, (वधाय उद्यतः।) परवधायोद्युक्तः। तत्पर्य्यायः। सन्नद्धः २ आततायी ३। इत्यमरः॥ आततायिवधापवादमाह वृहस्पतिः।

"नाततायिवधे हन्ता प्राप्नुयात् किल्बिषं क्वचित्।
विनाग्न्यर्थिनमायान्तं घातयन्नापराध्नुयात्॥"

कात्यायनः।

"आततायिनमायान्तमपि वेदान्तपारगम्।
जिघांसन्तं जिघांसीयात् न तेन ब्रह्महा भवेत्॥"

जिघांसी सन् ईयात् गच्छेदित्यर्थः। देवलः।

"उद्यम्य शस्त्रमायान्तं भ्रूणमप्याततायिनम्।
निहत्य भ्रूणहा न स्यादहत्वा भ्रूणहा भवेत्॥"

भ्रूणो ब्राह्मणविशेषः। दोषदर्शनं नियमार्थम्। मनुर्विष्णुः।

"गुरुं वा बालवृद्धौ वा ब्राह्मणं वा बहुश्रुतम्।
आततायिनमायान्तं हन्यादेवाविचारयन्॥"

एवकारो नियमार्थः। तथा।

"नाततायिवधे दोषो हन्तुर्भवति कश्चन।
प्रकाशं वाप्रकाशं वा मन्युस्तन्मन्युमृच्छति॥"

यस्माद्धन्तुर्मन्युर्हन्यमानमन्युं नाशयति न पुनः पुरुषो हन्ति हन्यते वेति हननविधेरपवादः। आततायिनमाह वशिष्ठः।

"अग्निदो गरदश्चैव शस्त्रपाणिर्धनापहः।
क्षेत्रदारापहारी च षडेते आततायिनः॥"

विष्णुकात्यायनौ।

"उद्यतासिविषाग्निञ्च शापोद्यतकरं तथा।
आथर्व्वणीन हन्तारं पिशुनञ्चैव राजसु॥
भार्य्यातिक्रामिणञ्चैव विद्यात् सप्ततायिनः।
यशोवृत्तिहरान्यानाहुर्धर्म्मार्थहारकान्॥"

विशेषमाह कात्यायनः।

"अनाचारितपूर्व्वो यस्त्वपराधे प्रवर्त्तते।
प्राणद्रव्यापहारे च प्रवृत्तस्यातताियता॥"

अनाचारितोऽनपकृतः। तेन पूर्व्वकृतापराधस्य मारणोद्यतस्य नाततायिता। एतेन प्रत्यपकारिवधे दोष एव। ननु आततायिनोरपि गोब्राह्मणयोर्हनने दोषमाह सुमन्तुः।

"आततायिवधे न दोषोऽन्यत्र गोब्राह्मणात् यदा हन्यात् प्रायश्चित्तं कुर्य्यात्।" तथा भविष्ये।

"क्षुद्राणामपि गोविप्रं न हन्याद्वै कदाचन॥"

अतः पूर्व्ववचनविरोधः। अत्र व्यवस्थामाह कात्यायनः।

"आततायिनि चोत्कृष्टे तपःस्वाध्यायजन्मतः।
वधस्तत्र तु नैव स्यात् पापे हीने वधो भवेत्॥"

वध

जन्मपदेन जातिकुलयोरुच्यते। तेन हीनजात्यापि तपोविद्याजातिकुलैरुत्कृष्टो ज्ञाततायी वधः तदन्यो वध्य एव। भगवद्गीतायाम्। १। ३६। यथा,—

"पापमेवाश्रयेदस्मान् हत्वैतानाततायिनः॥"

इति।

एतान् भीष्मादीनत्यन्तोत्कृष्टगुणानित्यर्थः। एवम्भूताततायिनश्चाहनने फलमप्याह वृहस्पतिः।

"आततायिनमुत्कृष्टं वृत्तस्वाध्यायसंयुतम्।
यो न हन्याद्वधप्राप्तं सोऽश्वमेधफलं लभेत्॥"

यद्यपि गुरुं बहुश्रुतं हन्यादिति श्रूयते तथापि गुरोः सकाशात् कुलविद्यातपोभिः शिष्यस्योत्कर्षसम्भवादेवं बहुश्रुतादपि। एवमधमवर्णस्य उत्तमवर्णो न वध्यः पूर्व्वापराधकृतविषयं वा सुमन्तुवचनम्। गौराततायिन्यपि न वधः।

"नखिनां शृङ्गिणाञ्चैव दंष्ट्रिणाञ्चाततायिनाम्।
हस्त्यश्वानां तथान्येषां वधे हन्ता न दोषभाग्॥"

इति कात्यायनवचनं गोव्यतिरिक्तशृङ्गिविषयम्॥ विशेषमाह कात्यायनः।

"उद्यतानान्तु पापानां हन्तुर्दोषो न विद्यते।
निवृत्तास्तु यदारम्भाद्ग्रहणं न वधः स्मृतः॥"

इति प्रायश्चित्तविवेकः॥

वध्यः, त्रि, (वधमर्हतीति। वध+यत्।) वधार्हः। तत्पर्य्यायः। ग्रीवर्च्छेद्यः २। इत्यमरः। ३।१।१४५॥

"किन्त्वया न श्रुतं लोके अवध्याः ग्रामयोषितः।
हीनवर्णोपभुक्ता या त्याज्या वध्यापि वा भवेत्॥"

इति प्रायश्चित्ततत्त्वम्॥

अवध्या यथा,—

"गोब्राह्मणं वृद्धमथापि सुप्तं
बालं स्वबन्धुं ललनां सुदुष्टाम्।
कृतापराधानपि नैव वध्या-
दाचार्य्यमुख्या गुरवस्तथैव॥"

इति वामनपुराणे ५५ अध्यायः॥

वध्यपालः, पुं, (वध्यं बन्धनस्थानं कारागारं पालयतीति। वध+पाल+अण्।) कारागृहरक्षकः। यथा,—

"साध्वीविक्रयकृद्वध्यपालः केशरिविक्रयी।
तप्तलौहे तु पच्यन्तं यश्च भक्तं परित्यजेत्॥"

इति विष्णुपुराणे। २। ६। ११॥

वन, सम्भक्तिशब्दयोः। इति कविकल्पद्रुमः॥ (भ्वा०-पर०-सक०-सेट्।) वनति। संभक्तिः सेवनम्। इति दुर्गादासः॥

वन, उ म याष्टौ। इति कविकल्पद्रुमः। (भ्वा०-पर०-अक०-सेट्। उदित्त्वात् क्त्वेट्।) उ, वनित्वा वत्वा। म, प्रवनयति। मित्त्वेऽपि अस्य नौ व्यवहारेत्यादिना केवलस्य वृक्षविकल्पनात् सोपसर्गस्यैव नित्यं वृक्षः। वनयति वानयति। याष्टतिर्व्यापारः। अयन्तु कर्मवत् क्रियामात्र इत्यन्ये। इति दुर्गादासः॥

वन, कि उपसृतिश्रद्धाघातशब्दोपतापेषु। इति कविकल्पद्रुमः॥ (चुरा०-पक्षे भ्वा०-पर०-सक०-अक०-च-सेट्।) कि, वानयति वनति। अयं केचिन्न मन्यते। इति दुर्गादासः॥

वन, द ड उ याचे। इति कविकल्पद्रुमः॥ (तना०-आत्म०-द्विक०-सेट्। उदित्त्वात् क्त्वावेट्।) द ड, वनुते। उ, वनित्वा वत्वा। इति दुर्गादासः॥

वनं, क्ली क्वी, (वनतीति। वन्+पचाद्यच्। यद्वा, वन्यते सेव्यते इति। "पुंसि संज्ञायां घः प्रायेण।" ३।३।११८। इति घः।) बहुवृक्षयुक्तस्थानम्। (यथा, मनुः। ८। २५६।

"परस्त्रियं योऽभिवदेत्तीर्थेऽरण्ये वनेऽपि वा।
नदीनां वापि सम्भेदे ससंग्रहणमाप्नुयात्॥"

स्त्रियान्तु यथा, साहित्यदर्पणे आर्थिकयज्ञनायाम्।

"कालो मधुः कुपित एष च पुष्पधन्वा
धीरा वहन्ति रतिखेदहराः समीराः।
केलीवनीयमपि वञ्जुलकुञ्जमञ्जु
दूरेपतिः कथय किं करणीयमद्य॥")

तत्पर्य्यायः। अटवी २ अरण्यम् ३ विपिनम् ४ गहनम् ५ काननम् ६। इत्यमरभरतौ॥ दावः ७ दवः ८ अटविः ९ भीरुकम् १० झाटम् ११ गुहिनम् १२। इति शब्दरत्नावली॥ शुचम् १३ समजम् १४ प्रान्तरम् १५ विक्तम् १६॥ इति जटाधरः॥ कान्तारम् १७। इति राजनिर्घण्टः॥ * ॥ गृहसमीपकर्त्तव्यवनं यथा,—

"शिविराभ्यन्तरे भद्रा स्थापिता तुलसी मृणाम्।
धनपुत्रप्रदात्री च पुण्यदा हरिभक्तिदा।
प्रभाते तुलसीं दृष्ट्वा स्वर्णदानफलं लभेत्॥
मालती यूथिका कुन्दं माधवी केतकी तथा।
नागेश्वरं मल्लिका च काञ्चनं वकुलं शुभम्॥
अपराजिता च शुभदा तेषामुद्यानमीप्सितम्।
पूर्व्वे च दक्षिणे चैव शुभदं नात्र संशयः॥"

इति ब्रह्मवैवर्त्ते श्रीकृष्णजन्मखण्डे १०२ अध्यायः॥

मथुरायां द्वादश वनानि यथा,—

"रम्यं मधुवनं नाम विष्णुस्थानमनुत्तमम्।
तद्दृष्ट्वा मनुजो देवि सर्व्वान् कामानवाप्नुयात्॥
वनं तालवनञ्चैव द्वितीयं वनमुत्तमम्।
तत्र स्नात्वा नरो देवि कृतकृत्यो हि जायते॥
तृतीयं कुमुदं नाम वनं चैवोत्तमं तथा।
तत्र गत्वा नरो देवि कृतकृत्यो हि जायते॥
एकादशी कृष्णपक्षे मासि भाद्रपदे हि या।
तत्र स्नातो नरो देवि रुद्रलोके महीयते॥
चतुर्थं काम्यकवनं वनानां वनमुत्तमम्।
तत्र गत्वा नरो देवि मम लोके महीयते॥
विमलस्य च कुण्डे तु सर्व्वैः प्राप्यैः प्रमुच्यते।
यस्तु प्रमुच्यते प्राणान् मम लोकं स गच्छति॥
पञ्चमं बहुलावनं वनस्थानमनुत्तमम्।
तत्र गत्वा नरो देवि अग्निस्थानं स गच्छति॥
भद्रनाथाः परे पारे देवानामपि दुर्लभम्।
अस्ति भद्रवनं नाम षष्ठं वनमनुत्तमम्॥
तत्र गत्वा तु वसुधे मद्भक्तो मत्परायणः।
तदनस्य प्रभावेण नागलोकं स गच्छति॥
सप्तमन्तु वनं भूमे खादिरं लोकविश्रुतम्।
तत्र गत्वा नरो भद्रे मम लोकं स गच्छति॥
मद्भावनं चाष्टमन्तु सदैव तु मम प्रियम्।
तस्मिन् स्नात्वा तु मनुजो इन्द्रलोके महीयते॥
लोहजं धवलं नाम लोहजङ्घेन रक्षितम्।
नवमन्तु वनं देवि महापातकनाशनम्॥
वनं विल्ववनं नाम दशमं देवपूजितम्।
तत्र गत्वा तु मनुजो ब्रह्मलोके महीयते॥
एकादशन्तु भाण्डीरं योगिनां प्रियमुत्तमम्।
तस्य दर्शनमात्रेण नरो गर्भे न गच्छति।
भाण्डीरं समनुप्राप्य वनानां वनमुत्तमम्॥
वासुदेवं ततो दृष्ट्वा पुनर्जन्म न विद्यते॥
वृन्दावनं द्वादशमं वृन्दया परिरक्षितम्।
मम चैव प्रियं भूमे महापातकनाशनम्॥
वृन्दावनन्तु गोविन्दं ये पश्यन्ति वसुन्धरे।
न ते यमपुरं यान्ति वैकुण्ठं प्राप्नुवन्नराः॥"

इति वाराहे मथुरातीर्थवनद्वादशकवर्णनं नामाध्यायः॥ * ॥ वनविशेषे मरणफलं यथा,—

"यदेवं कथितं पुण्यं मया ब्रह्मसुखाच्युतम्।
तत् समग्रं भवेत्तस्य अरण्येषूषरेषु च॥
अरण्यानि प्रवक्ष्यामि तथा चैवोषराणि च।
सैन्धवं दण्डकारण्यं नैमिषं कुरुजाङ्गलम्॥
उपलाट्टमारण्यं जम्बूमार्गोऽथ पुष्करम्।
हिमवासस्ततोऽरण्य उत्तमः परिकीर्त्तितः॥
नवस्वेतेष्वरण्येषु यस्तु प्राणान् परित्यजेत्।
ब्रह्मलोकातिथिर्भूत्वा स याति परमं पदम्॥"

इति देवीपुराणे अरण्योषरप्रशंसा॥ * ॥

अरण्ये वर्णनीयानि यथा,—

"अरण्येऽहिवराहैभयूथसिंहादयो द्रुमाः।
शुककाककपोताद्या भिल्लभल्लदवादयः॥"

उद्याने वर्णनीयानि यथा,—

"उद्याने सरणिः सर्व्वफलपुष्पलतादुमाः।
पिकालिकेकिहंसाद्याः क्रीड़ावाप्यध्वग-
स्थितिः॥"

इति कविकल्पलतायाम् १ स्तवके ३ कुसुमम्॥ (शङ्कराचार्य्यशिष्यस्य हस्तामलकस्य शिष्याणामुपाधिविशेषे, पुं। यदुक्तं प्राणतोषिण्यामवधूतप्रकरणे।

"सुरम्ये गिर्भरे देशे वने वासं करोति यः।
आशापाशविनिर्मुक्तो वननामा स उच्यते॥")

वनं, क्ली, (वन्यते सेव्यते इति। वन्+"पुंसि संज्ञायां घः प्रायेण।" ३।३।११८। घः। इति निघण्टौ देवराजयज्वा। १।१२।६।) जलम्। (यथा, रघुः। ६। २२।

"नमयति स्म स केवलसूनृतं
वनसुचे नसुचेररये शिरः॥")

निवासः। आलयः। इति मेदिनी। ने, १६॥ (चमसः। यथा, ऋग्वेदे। २। १४। ६।

"अध्वर्यवः कर्त्तना शुचिमस्मै वने निपूतं वन
उन्नयध्वम्॥"

"वने संभजनीये वने उदके निपूतमाप्यायनेन प्रोक्षितं सोमसुन्नयध्वमूर्द्धं नयत। यद्वा वने तद्विकारे चमसे निपूतं दशापवित्रेण प्रोक्षितं सोमं वने चमसे उन्नयध्वम्।" इति तद्भाष्ये सायणः॥) प्रस्रवणम्। इति हेमचन्द्रः॥ (रश्मिः। इति निघण्टुः। १।५।८॥ "वन षण सम्भक्तौ भूवादिः परस्मैपदी। पुंसि संज्ञायां घः। वन्यते सेव्यते प्रीतादिनिवारणाय। अथवा वनतिर्हिंसार्थः। वन्यते हिंस्यतेऽनेन तमः। यद्वा, वनु याचने तनादि आत्मने भाषा। वन्यते याच्यते वृष्टिप्रदानाय। यद्वा, वनशब्दे भूवादिः परस्मैपदी वन्यते शब्द्यते स्तूयते स्तोतृभिः।" इति तत्र देवराजयज्वा॥ यथा, ऋग्वेदे। १। २४। ७।

"अबुध्ने राजा वरुणो वनस्य॥")

वनकदली, स्त्री, (वनोद्भवा कदली।) काष्ठकदली। इति राजनिर्घण्टः॥ (विवृतिरस्याः काष्ठकदलीशब्दे ज्ञातव्या॥)

वनकन्दः, पुं, (वनजातः कन्दः।) वनसूरणः। धरणीकन्दः। इति राजनिर्घण्टः॥

वनकार्पासी, स्त्री, (वनोद्भवा कार्पासी।) वनोद्भवकार्पासः। तत्पर्य्यायः। चिपर्णा २ भारद्वाजी ३ वनोद्भवा ४। इति रत्नमाला॥

वनकोलिः, स्त्री, (वनोद्भवा कोलिः।) वनजवदरी। तत्पर्य्यायः। कर्कन्धिका २ फलकर्कन्धा ३। इति कैयदन्तरम्॥

वनगोचरः, पुं, (वनं गोचरो देशो यस्य।) व्याधः। इति केचित्॥ (वनं जलं गोचरो निवासस्थानं यस्य। नारायणः। इति भागवतटीकायां श्रीधरस्वामी। ३। १८। ३॥ चि, जलचरः। यथा, भागवते। ३। १८। २।

"सुप्तान्तमज्ञा खरचोरुणश्रिया
जहास चाहो वनगोचरो मृगः॥"

काननविहारी। यथा, मनुः। ८। २५६।

"सामन्तानामभावे तु मौलानां सौन्धि साधिनाम्।
इमानन्यानुयुञ्जीत पुरुषान् वनगोचरान्॥")

वनगौः, स्त्री, (वनस्य गौः।) गवयः। इति राजनिर्घण्टः॥

वनचन्दनं, क्ली, (वनजातं चन्दनम्।) अगुरु। देवदारु। इति विश्वः॥

वनचन्द्रिका, स्त्री, (वने चन्द्रिका ज्योत्स्नेव।) मल्लिका। इति राजनिर्घण्टः॥

वनचम्पकः, पुं, (वनजातश्चम्पकः। प्राकृपार्थिववत् समासः।) वनजचम्पकपुष्पवृक्षः। तत्पर्य्यायः। वनदीपः २ हेमाङ्गः ३ सुकुमारः ४। अस्य गुणाः। कटुत्वम्। उष्णत्वम्। वातकफनाशित्वम्। वर्ण्यत्वम्। चक्षुष्यत्वम्। व्रणरोपणत्वम्। वयःस्तम्भकारित्वञ्च। इति राजनिर्घण्टः॥

वनच्छागः, पुं, (वनस्य छागः।) अरण्यच्छागलः। तत्पर्य्यायः। एडकः २ प्रिश्नुवाह्यकः ३। इति चिकाण्डशेषः॥ (वने छाग इव।) शूकरः। इति शब्दमाला॥

वनजं, क्ली, (वने जले जायते इति। जन्+डः।) अम्बुजम्। इति मेदिनी। जे, २८॥ (यथा, रघुः। ५। ७३।

"दीर्घेष्वमी नियमिताः पटमण्डपेषु
निद्रां विहाय वनजाक्ष! वनायुदेश्याः।
वक्त्रोष्णगा मलिनयन्ति पुरोगतानि
लेह्यानि सैन्धवशिलाशकलानि वाहाः॥"

जलजाते वनोद्भवे च त्रि। यथा, रामायणे। २। ५४। ७।

"दारूणि परिभिन्नानि वनजैरुपजीविभिः॥")

वनजः, पुं, (वने जले अरण्ये वा जायते इति। जन्+डः।) मुस्तकः। इति मेदिनी। जे, २८॥ गजः। इति विश्वः॥ वनशूरणः। इति राजनिर्घण्टः॥ (तुम्बुरुफलम्। तत्पर्य्यायो यथा,—

"तुम्बुरुः सौरवः सौरो वनजः सानुजोऽम्बजः॥"

इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे॥)

वनजा, स्त्री, (वने जायते इति। जन्+डः। टाप्।) मुद्गपर्णी। इति मेदिनी। जे, २८॥ अरण्यकार्पासी। वन्योपोदकी। अश्वगन्धा। गन्धपत्रा। भिण्टेया। ऐन्द्रम्। इति राजनिर्घण्टः॥

वनजीरः, पुं, (वनोद्भवो जीरः।) वनोद्भवजीरकः। तत्पर्य्यायः। वृहत्पाली २ क्षुद्रपत्रः ३ अरण्यजीरः ४ कणः ५। अस्य गुणाः। कटुत्वम्। शीतत्वम्। व्रणनाशित्वञ्च। इति राजनिर्घण्टः॥

वनतिक्तः, पुं, (वनेषु वनोद्भवेषु तिक्तः।) हरीतकी। इति शब्दमाला॥

वनतिक्ता, स्त्री, (वनेषु वनोद्भवेषु मध्ये तिक्ता।) वनतिक्तिका। इति रत्नमाला॥

वनतिक्तिका, स्त्री, (वनतिक्ता+कन्। टापि अत इत्वम्।) पाठा। इत्यमरः। २। ४। ८४॥ (गुणादिकमस्याः पाठाशब्दे ज्ञेयम्॥)

वनदः, पुं, (वनं जलं ददातीति। दा+कः।) मेघः। इति शब्दमाला॥ वनदातरि, त्रि॥

वनदमनः, पुं, (वनजातो दमनः।) अरण्यदमनः। इति राजनिर्घण्टः॥

वनदीपः, पुं, (वनस्य दीप इव।) वनचम्पकः। इति राजनिर्घण्टः॥

वनधेनुः, पुं, (वनस्य धेनुरिव।) गवयी। इति राजनिर्घण्टः॥

वनप्लवः, पुं, (वनमिव निबिडः प्लवो यस्य।) श्वेतभाञ्जनवृक्षः। इति जटाधरः॥ अरण्यजपत्रञ्च॥

वनपांशुलः, पुं, (वने पांशुलः पापिष्ठः।) आधुः। इति शब्दरत्नावली॥

वनपिप्पली, स्त्री, (वनोद्भवा पिप्पली।) वनोद्भवपिप्पली। तत्पर्य्यायः। क्षुद्रपिप्पली २ क्षुद्रपिप्पली ३ वनकणा ४। अस्या गुणाः। कटुत्वम्। उष्णत्वम्। तीक्ष्णत्वम्। रूक्षत्वम्। दीपनत्वम्। सा आमा गुणाढ्या। शुष्का खल्पगुणा। इति राजनिर्घण्टः॥

वनपुष्पा, स्त्री, (वनमिव निबिड़ं पुष्पं यस्याः। टाप्।) शतपुष्पा। इति राजनिर्घण्टः॥ (शतपुष्पाशब्देऽस्या विवरणं ज्ञातव्यम्॥)

वनपूरकः, पुं, (वनजातः पूरको बीजपूरकः।) वनबीजपूरकः। इति राजनिर्घण्टः॥

वनप्रियं, क्ली, (वनेषु वनजातेषु मध्ये प्रियम्।) त्वचम्। इति राजनिर्घण्टः॥

वनप्रियः, पुं, (वनं प्रियं यस्य।) कोकिलः। इत्यमरः। २। ५। १६॥ (यथा,—

"अयि वनप्रिय विश्रुत एव किं
बलिभुजो विधसो भवताधुना।
यदनयैव कुहूरिति विद्यया
न पततश्चरणौ धरणौ तव॥"

इत्युद्भटः॥)

अरण्यप्रियमात्रे, त्रि॥

वनबीजः, पुं, (वनस्य वनोद्भवो वा बीजो बीजपूरकः।) वनबीजपूरकः। इति राजनिर्घण्टः॥

वनबीजकः, पुं, (वनबीज+स्वार्थे कन्।) वनबीजपूरकः। इति राजनिर्घण्टः॥

वनबीजपूरकः, पुं, (वनोद्भवो बीजपूरकः।) अरण्यजातबीजपूरः। तत्पर्य्यायः। वनजः २ वनबीजकः ३ वनबीजः ४ अत्यम्लः ५ गन्धाम्लः ६ वनोद्भवः ७ देवदूती ८ पीता ९ देवदासी १० देवेष्टा ११ मातुलङ्गिका १२ पचनी १३ महाफला १४। अस्य गुणाः। अम्लत्वम्। कटुत्वम्। उष्णत्वम्। रूचिप्रदत्वम्। वातामदोषक्रिमिकफश्वासनाशित्वञ्च। इति राजनिर्घण्टः॥

वनभद्रिका, स्त्री, (वने भद्रं यस्याः। ततः टापि अत इत्वम्।) भद्रबला। इति केचित्॥

वनभुक्, [ज्] पुं, (वनं भुङ्क्ते इति। वन्+भुज्+क्विप्।) ऋषभौषधम्। इति शब्दचन्द्रिका॥

वनमक्षिका, स्त्री, (वनस्य मक्षिका।) दंशः। इत्यमरः। २। ५। २७॥

वनमल्ली, स्त्री, (वनोद्भवा मल्ली।) वनोद्भवमल्लिका। इति शब्दरत्नावली॥

वनमाला, स्त्री, (वनोद्भवपुष्पैरचिता माला। मध्यपदलोपिसमासः।) श्रीकृष्णस्य माला। तत्स्वरूपं यथा,—

"आजानुलम्बिनी माला सर्व्वर्त्तुकुसुमोज्ज्वला।
मध्ये स्थूलकदम्बाढ्या वनमालेति कीर्त्तिता॥"

इति शब्दमाला॥

(वनपुष्पसक्। यथा, रघुः। ६। ५१।

"ग्रथितमौलिरसौ वनमालया
तरुपलाशसवर्णतनुच्छदः॥")

वनमालिनी, स्त्री, (वनमाली अस्त्यस्यामिति। इनिः। ङीप्।) द्वारकापुरी। इति त्रिकाण्डशेषः॥ वाराही। इति राजनिर्घण्टः॥

वनमाली, [न्] पुं, (वनमाला अस्त्यस्येति। इनिः।) श्रीकृष्णः। इत्यमरः। १। ६। २१॥ (नारायणः। यथा, प्रद्युम्नविजये। ३ अङ्के।

"कमलयामलया वनमालिनं
गिरिजया गिरिशश्च निशा विधुम्।
सुविदुता परियोजयतो विधेः
चतुरता ह्यनुरूपसमागमे॥")

वनमुक्, [च्] पुं, (वनं जलं मुञ्चतीति। मुच्+क्विप्।) मेघः। इति शब्दरत्नावली॥ (जलवर्षिणि, त्रि। इति रघुः। ६। २२॥)

वनमुद्गः, पुं, (वनोद्भवो मुद्गः।) मुकुष्टकः। इत्यमरः। २। ६। १७॥ तत्पर्य्यायः। वरकः २ निगूढ़कः ३ कुलीनकः ४ खण्डी ५। इति हेमचन्द्रः। ४। २३६॥ अस्य अन्यपर्य्यायगुणौ मुकुष्टकशब्दयोर्द्रष्टव्यौ॥ (यथा, सुश्रुते। १। ४६।

"वनमुद्गकलायमकुष्ठमसूरमदृल्यचणकसतीनचिपुटकहरेणुकाढकीप्रभृतयो वैदलाः॥")

वनमुद्गा, स्त्री, (वनमुद्ग+टाप्।) मुद्गपर्णी। इति राजनिर्घण्टः॥

वनमूतः, पुं, मेघः। वनं जलं मूतं बद्धं अनेन वनं मुञ्चति इति वा मनीषादिः। इत्यमरटीकायां भरतकृतजीमूतशब्दव्युत्पत्तिदर्शनात्॥

वनमूर्द्धजा, स्त्री, (वनस्य मूर्द्धनि जायते इति। जन्+डः।) वनबीजपूरकः। इति राजनिर्घण्टः॥

वनमोचा, स्त्री, (वनोद्भवा मोचा।) काष्ठकदली। इति राजनिर्घण्टः॥

वनरः, पुं, (वानरः। पृषोदरादित्वात् ह्रस्वे साधुः।) वानरः। इति भरतहिरूपकोषः॥

वनराजः, पुं, (वनस्य वने वा राजा। "राजाहःसखिभ्यष्टच्।" ५। ४। ९१। इति टच्।) सिंहः। इति शब्दमाला॥ वनस्य राजा च॥

वनलक्ष्मीः, स्त्री, (वनस्य लक्ष्मीः शोभा।) कदली। इति राजनिर्घण्टः॥

वनवर्ब्बरः, पुं, (वनोद्भवो वर्ब्बरः।) क्षुद्राजकः। इति राजनिर्घण्टः॥

वनवर्ब्बरिका, स्त्री, (वनजाता वर्ब्बरिका।) अरण्यजवर्ब्बरी। वनवाउइ इति भाषा। तत्पर्य्यायः। सुगन्धिः २ सुप्रसन्नकः ३ दोषाक्षेणी ४ विषघ्नः ५ सुमुखः ६ क्षुद्रपत्रकः ७ निद्रालुः ८ शीतहारी ९ सुवक्त्रः १०। अस्य गुणाः। उष्णत्वम्। सुगन्धित्वम्। पित्तश्लेष्मवान्तिभूतघ्नत्वम्। घ्राणसन्तर्पणत्वञ्च। इति राजनिर्घण्टः॥

वनवल्लरी, स्त्री, (वनोद्भवा वल्लरी।) निःश्रेणिकालक्षणम्। इति राजनिर्घण्टः॥

वनवह्निः, पुं, (वनस्य वनोद्भवो वा वह्निः।) दावानलः। इति हेमचन्द्रः। ४। १६७॥ (यथा, कथासरित्सागरे। ५६। ३४३।

"फणारत्नप्रभाजालजटिलं वनवह्निना।
गृहीतमिव तेनोग्रहेतिहस्तेन मूर्द्धनि॥")

वनवासनः, पुं, (वनं वासयति गन्धेनेति। वासि+ल्युः।) खट्टाशः। इति त्रिकाण्डशेषः॥

वनवासी, [न्] पुं, (वनं वासयति सुरभीकरोतीति। वासि+णिनिः।) ऋषभनामौषधम्। मुष्ककवृक्षः। वाराहीकन्दः। शालमलीकन्दः। नीलमहिषकन्दः। इति राजनिर्घण्टः॥ (वने वसतीति। वस्+णिनिः।) वनवासकर्त्तरि, त्रि॥ (यथा, मनुः। ६। २७।

"तापसेष्वेव विप्रेषु यात्रिकं भैक्षमाहरेत्।
गृहमेधिषु चान्येषु द्विजेषु वनवासिषु॥")

वनवृन्ताकी, स्त्री, (वनस्य वृन्ताकी वार्त्ताकी।) वृहती। इति राजनिर्घण्टः॥

वनव्रीहिः, पुं, (वनस्य व्रीहिः।) नीवारः। इति हेमचन्द्रः। ४। २४२॥

वनशूकरी, स्त्री, (वनस्य शूकरीव रोमशत्वात् मांसलत्वाच्च।) कपिकच्छुः। इति राजनिर्घण्टः॥ (वनस्य शूकरी।) आरण्यवराही च॥

वनशूरणः, पुं, (वनजातः शूरणः।) वनोद्भवोल्लः। वन ओल इति भाषा। तत्पर्य्यायः। सितशूरणः२ वन्यः ३ वनकन्दः ४ अरण्यशूरणः ५ वनजः ६ श्वेतशूरणः ७ वनकण्डुलः ८। अस्य गुणाः। रूक्षत्वम्। कटुत्वम्। उष्णत्वम्। कृमिगुल्मशूलादिदोषसर्व्वारोचकनाशित्वञ्च। इति राजनिर्घण्टः॥

वनशृङ्गाटः, पुं, (वनस्य शृङ्गाट इव कण्टकावृतत्वात्।) गोक्षुरकः। इत्यमरः। २। ४। ६६॥ (अस्य पर्य्यायो यथा,—

"गोक्षुरः क्षुरकोऽपि स्यात् त्रिकण्टः स्वादुकण्टकः।
गोकण्टको गोक्षुरको वनशृङ्गाट इत्यपि॥
पलङ्कषा खदंष्ट्रा च तथा स्यादिक्षुगन्धिका।"

इति भावप्रकाशस्य पूर्ब्बखण्डे प्रथमे भागे॥)

वनशृङ्गाटकः, पुं, (वनशृङ्गाट+स्वार्थे कन्।) गोक्षुरकः। इति राजनिर्घण्टः॥

वनशोभनं, क्ली, (वनं जलं शोभयतीति। शुभ+णिच्+ल्युः।) पद्मम्। इति शब्दचन्द्रिका॥ वनस्य शोभाकर्त्तरि, त्रि॥

वनश्वा, [न्] पुं, (वनस्य वने वा श्वा कुक्कुरः।) गन्धमार्জ্জारः। वृषकः। व्याघ्रः। इति मेदिनी। ने, २०७॥

वनसङ्कटः, पुं, (वने सङ्कटो बाहुल्यं यस्य।) मरुरः। इति शब्दचन्द्रिका॥

वनसमूहः, पुं, (वनानां समूहः।) अरण्यसंहतिः। तत्पर्य्यायः। वन्या २। इत्यमरः। २। ४। ४॥ वान्या ३। इति शब्दरत्नावली॥ जलधरसमूहश्च॥

वनसरोजिनी, स्त्री, (वनस्य सरोजिनी पद्मिनीव शोभाकरत्वात्।) वनकार्पासी। इति शब्दरत्नावली॥

वनस्थः, पुं, (वने तिष्ठतीति। स्था+कः।) मृगः। इति शब्दचन्द्रिका॥ (वानप्रस्थः। यथा, मनुः। ५। १३७।

"एतच्छौचं गृहस्थानां द्विगुणं ब्रह्मचारिणाम्।
त्रिगुणं स्याद्वनस्थानां यतीनान्तु चतुर्गुणम्॥")

वनवासिनि, त्रि॥ (यथा, हरिवंशे। १५२। २१।

"प्रहृत्तचक्रो नृपतिर्वनस्थान्
गजान् गजेः खेरिव वीर्य्यदीप्तान्॥")

वनस्था, स्त्री, (वने तिष्ठति या। स्था+कः। टाप्।) अश्वत्थवृक्षः। इति राजनिर्घण्टः॥

वनस्पतिः, पुं, (वनस्य पतिः। पारस्करादित्वात् सुट्।) विना पुष्पं फलिद्रुमः। (यथा, मनुः। १। ४७।

"अपुष्पाः फलवन्तो ये ते वनस्पतयः स्मृताः॥")

वृक्षमात्रम्। इति मेदिनी। ते, २१६॥ (यथा, महाभारते। १। १४१। १६।

"कथं नु शाखास्तिष्ठेरंश्छिन्नमूले वनस्पतौ॥")

स्थालीवृक्षः। इति राजनिर्घण्टः॥ (अस्य पर्य्यायो यथा,—

"नन्दीवृक्षोऽश्वत्थभेदः प्ररोहो गजपादपः।
स्थालीवृक्षः क्षयतरुः क्षीरी च स्याद्वनस्पतिः॥"

इति भावप्रकाशे। १। १॥

घृतपृष्ठस्य पुत्रविशेषः। यथा, भागवते। ५। २०।२१॥ "आत्मा मधुरुहो मेघपृष्ठः सुधामा भ्राजिष्ठो लोहितवर्णो वनस्पतिरिति घृतपृष्ठसुताः॥" वटवृक्षः॥ तत्पर्य्यायो यथा,—

"वटो रक्तफलः शृङ्गी न्यग्रोधः स्कन्धजो ध्रुवः।
क्षीरी वैश्रवणावासो बहुपादो वनस्पतिः॥"

इति भावप्रकाशस्य पूर्ब्बखण्डे प्रथमे भागे॥)

वनहरिद्रा, स्त्री, (वनोद्भवा हरिद्रा।) अरण्यहरिद्रा। तत्पर्य्यायः। प्रोषी २ प्रोषिका ३ वनहरिद्रा ४। अस्या गुणाः। कटुत्वम्। गौल्यत्वम्। रूक्षत्वम्। तिक्तत्वम्। दीपनत्वञ्च। इति राजनिर्घण्टः॥ अपि च।

"अरण्यहरिद्रीकन्दः कुष्ठवातास्रनाशनः॥"

इति भावप्रकाशः॥

वनहासः, पुं, (वनस्य हास इव प्रकाशकत्वात्।) काशतृणम्। इति त्रिकाण्डशेषः॥ कुन्दवृक्षः। इति राजनिर्घण्टः॥

वनहासकः, पुं, (वनहास+स्वार्थे कन्।) काशतृणम्। इति शब्दरत्नावली॥

वनाखुः, पुं, (वनस्याखुः।) शल्यकः। इति त्रिकाण्डशेषः॥

वनाखुकः, पुं, मुञ्जः। इति त्रिकाण्डशेषः॥

वनाजः, पुं, (वनस्य अजः।) वनच्छागः। तत्पर्य्यायः। इडिक्कः २ शिशुवाहकः ३ पृष्ठशृङ्गः ४। इति हेमचन्द्रः। ४। ३४४॥

वनाटुः, पुं, वर्व्वणा। नीलमक्षिका। इति शब्दचन्द्रिका॥

वनामलः, पुं, (वनस्य आमल आमलक इव।) क्षुद्रपाकफलः। इति शब्दमाला॥

वनाम्रः, पुं, (वनस्य आम्र इव।) कोशाम्रः। इति राजनिर्घण्टः॥ (गुणादिविशेषोऽस्य कोशाम्रशब्दे ज्ञेयः॥)

वनायुः, पुं, देशविशेषः। यथा,—

"गया गयश्च वानायुर्वेनायुर्यदुसात्वतम्।"

इति शब्दरत्नावली॥

(यथा, महाभारते। ८। ७। ११।

"आजानेयैः सैन्धवैः पार्व्वतीयै-
र्नदीजकाम्बोजवनायुवाह्लिकैः॥")

दानवविशेषः। यथा, महाभारते। १। ६५। ३०।

"गरिष्ठश्च वनायुश्च दीर्घजिह्वश्च दानवः॥")

वनायुजः, पुं, (वनायौ देशे जायते इति। जन+डः।) वनायुदेशोद्भवघोटकः। अस्य रूपान्तरं वानायुजः। इति शब्दरत्नावली॥

वनारिष्टा, स्त्री, (वनजाता अरिष्टेव।) वनहरिद्रा। इति राजनिर्घण्टः॥

वनार्च्चकः, पुं, (वनस्य अर्च्चक इव। नियतपुष्पत्वात् तथात्वम्।) पुष्पजीवी। मालाकारः। इति जटाधरः॥

वनार्द्रका, स्त्री, (वनोद्भवा आर्द्रका।) वनभवार्द्रकम्। इति राजनिर्घण्टः॥ अस्याः पर्य्यायगुणौ ऐन्द्रशब्दे द्रष्टव्यौ॥

वनालिका, स्त्री, (वनं अलति भूषयतीति। अल+ण्वुल्। टाप्। अत इत्वम्।) हस्तिशुण्डी। यथा,—

"वज्रवल्लास्थिसंहारो हस्तिशुण्डी वनालिका।"

इति हारावली। ६५॥

वनाश्रयः, पुं, (वनमेव आश्रयो यस्याः।) द्रोणकाकः। इति जटाधरः॥ (अरण्याश्रयिणि, त्रि। यथा, मार्कण्डेये। १०६। ४३।

"सौदित्यत्यखिलो लोकस्त्वयि भूप! वनाश्रये॥")

वनाहिरः, पुं, (वनस्य आहिरः।) शूकरः। इति त्रिकाण्डशेषः॥

वनिः, पुं, अग्निः। खनि कषि अजि असि वसि सनि ध्वनि ग्रन्थि वलिभ्यश्च। इत्यनेन वनधातोः पूर्ब्बानुवृत्त-इप्रत्ययेन निष्पन्नः। इति सिद्धान्तकौमुद्यामुणादिवृत्तिः। ४। १३६॥

वनितः, त्रि, (वन+क्तः।) याचितः। सेवितः। इति मेदिनी। ते, १४६॥

वनिता, स्त्री, (वन+क्त। टाप्।) जातरागस्त्री। स्त्रीसामान्यम्। इति मेदिनी। ते, १४६॥ (यथा, रघुः। २। १६।

"वप्रक्रियानोरनुयायिनं तमावर्त्तमानं वनिता वनान्तात्।
पपौ निमेषालसपक्ष्मपङ्क्ति-
रूपोषिताभ्यामिव लोचनाभ्याम्॥")

वनी, स्त्री, वनम्। इत्यमरटीकायां भरतः॥ (यथा, साहित्यदर्पणे। २।

"केलीवनीयमपि वञ्जुलकुञ्जमञ्जुः॥")

वनी, [न्] पुं, (वनं आश्रयत्वेनास्त्यस्येति। वन+इनिः।) वानप्रस्थः। यथा,—

"गृहमेधी शरदसन्तयोः व्रीहियवाभ्यां यजेत
वनी वर्षासु श्यामाकैरापत्कल्पोऽन्यैः पुरातनैर्वा।" इति अग्निचित्तामणौ हारीतः॥

वनीकः, त्रि, याचकः। इत्यमरटीकासारसुन्दरी॥

वनीयकः, त्रि, (वनिं याचनमिच्छतीति। क्यच्। ततो ण्वुल्।) याचकः। इत्यमरः। ३। १। ४६॥

वनेचुम्बा, स्त्री, (वने चुम्बा। अलुक्समासः।) करञ्जः। इति रत्नमाला॥

वनेचरः, त्रि, (वने चरतीति। चर+"चरेष्टः।" इति टः। ततपुरुषे कृतीत्यलुक्।) अरण्यचारी। यथा,—

"वनेचराणां वनितासखानां
दरीगृहोत्सङ्गनिषक्तभासः।
भवन्ति यत्रौषधयो रजन्या-
मतैलपूराः सुरतप्रदीपाः॥"
इति कुमारसम्भवे १ सर्गः॥

वनेज्यः, पुं, (वने इज्यः पूज्यः।) वञ्जरसालः। इति राजनिर्घण्टः॥

वनेसर्ज्जः, पुं, (वने सर्ज्ज इव।) असनवृक्षः। इति रत्नमाला॥

वनोद्भवा, स्त्री, (वने उद्भवो यस्याः।) वनकार्पासी। इति रत्नमाला॥

वनौकाः, [स्] पुं, (वनमेव ओको गृहं यस्य।) वानरः। इत्यमरः। २। ५। ३॥ (वनवासिनि, त्रि। यथा, भागवते। ४।६।२१।

"धर्म्मोऽग्निः कश्यपः शुक्रो सुनयो ये वनौकसः।
चरन्ति दक्षिणीकृत्य भ्रमन्तो यत् सतारकाः॥")

वन्दका, स्त्री, वन्दा। यथा,—

"वन्दाका शेखरी सेया वन्दा च वन्दकेय्यते॥"
इति भरतधृतहडुः॥

वन्दथः, पुं, (वन्दते स्तौति वन्दयते स्तूयते इति वा। वन्द + "शीङ्शपिरुगमिवसिजीविप्राणिभ्योऽथः।" इत्यत्र वसीत्यस्य स्थाने वन्दीति पाठोऽपि बहुसम्मतः इत्यतोऽथः।) स्तोता। स्तुत्यः। वन्दिधातोरथप्रत्ययेन निष्पन्नः। इति सिद्धान्तकौमुदी॥

वन्दनं, क्ली, (वन्दतेऽनेनेति। वन्द+करणे ल्युट्।) वदनम्। इति शब्दचन्द्रिका॥ (वन्द+भावे ल्युट्।) प्रणामः। स तु षोड़शधाभक्त्यन्तर्गतभक्तिविशेषः। यथा। पाद्मोत्तरखण्डे शिवपार्व्वतीसंवादे।

"आद्यं तु वैष्णवं प्रोक्तं शङ्खचक्राङ्कनं हरेः।
धारणञ्चोर्द्धपुण्ड्राणां तन्नाम्नाञ्च परिग्रहः॥
अर्च्चनञ्च जपो ध्यानं तन्नामस्मरणं तथा।
कीर्त्तनं श्रवणञ्चैव वन्दनं पादसेवनम्॥
तत्पादोदकसेवा च तन्निवेदितभोजनम्।
तदीयानाञ्च संसेवा द्वादशीव्रतनिष्ठता॥
तुलसीरोपणं विष्णोर्दैवदेवस्य शार्ङ्गिणः।
भक्तिः षोड़शधा प्रोक्ता भववन्धविमुक्तये॥"
इति हरिभक्तिविलासे ११ विलासः॥

षोड़शोपचारपूजान्तर्गतशेषोपचारः। यथा,—

"आसनं स्वागतं पाद्यमर्घ्यमाचमनीयकम्।
मधुपर्कांचमनस्नानवसनाभरणानि च॥
गन्धपुष्पे धूपदीपौ नैवेद्यं वन्दनं तथा॥"
इत्याह्निकतत्त्वे आचारचिन्तामणिः॥ * ॥

अथ वन्दनम्।

"प्रणमेदग्र साष्टाङ्गं तन्नुत्वा च प्रदक्षिणेत्
पठेत् प्रतिप्रणामञ्च प्रसीद भगवन्निति॥"
तदुक्तमेकादशे श्रीभगवता।
"स्तवैरुच्चावचैः स्तोत्रैः पौराणैः प्राकृतैरपि।
स्तुत्वा प्रसीद भगवन्निति वन्देत दण्डवत्॥"
अथ प्रणामविधिः। कालिकापुराणे।
"यः स्वयं गद्यपद्याभ्यां घटिताभ्यां नमस्कृतिम्।
शिरो मत्पादयोः कृत्वा बाहुभ्याञ्च परस्परम्।
प्रपन्नं पाहि मामीश भीतं मृत्युमहार्णवात्॥"
किञ्चागमे।
"दोर्भ्यां पद्भ्याञ्च जानुभ्यामुरसा शिरसा दृशा।
मनसा वचसा चेति प्रणामोऽष्टाङ्ग ईरितः॥
जानुभ्याञ्चैव बाहुभ्यां शिरसा वचसा धिया।
पञ्चाङ्गकः प्रणामः स्यात् पूजासु प्रवराविमौ॥"
इति॥
"गरुड़ं दक्षिणे कृत्वा कुर्य्यात्तत्पृष्ठतो बुधः।
अवश्यञ्च प्रणामांस्त्रीन् मुक्तस्वेदधिकाधिकान्॥"
तथा च नारदपञ्चरात्रे।
"सन्धिं वीक्ष्य हरिं चाद्यं गुरून् स्वगुरुमेव च।
द्विचतुर्विंशदथवा चतुर्विंशत्तदर्द्धकम्।
नमेत्तदर्द्धमथवा तदर्द्धं सर्व्वथा नमेत्॥"
विष्णुधर्म्मोत्तरे।
"देवार्चादर्शनादेव प्रणमेन्मधुसूदनम्।
स्थानापेक्षा न कर्त्तव्या इष्टार्थो द्विजसत्तमाः।
देवार्चोद्दिष्टपूतं हि शुचि सर्व्वं प्रकीर्त्तितम्॥"
अथ नमस्कारमाहात्म्यम्। नारसिंहे।
"नमस्कारः स्तुतो यज्ञः सर्व्वयज्ञेषु चोत्तमः।
नमस्कारेण चैकेन नरः पूतो हरिं व्रजेत्॥"
स्कान्दे।
"दण्डप्रणामं कुरुते विष्णवे भक्तिभावितः।
रेणुसंख्यं वसेत् स्वर्गे प्रतमन्वन्तरं नरः॥"
तत्रैव श्रीकृष्णनारदसंवादे।
"प्रणम्य दण्डवद्भूमौ नमस्कारेण योऽर्चयेत्।
स यां गतिमवाप्नोति न तां क्रतुशतैरपि॥
नमस्कारेण चैकेन नरः पूतो हरिं व्रजेत्॥"
तत्रैव शिवोमासंवादे।
"भूमिमापीड्य जानुभ्यां शिर आरोप्य वै भुवि।
प्रणमेत् यो हि देवेशं सोऽश्वमेधफलं लभेत्॥"
तत्रैवान्यत्र।
"तीर्थकोटिसहस्राणि तीर्थकोटिशतानि च।
नारायणप्रणामस्य कलां नार्हन्ति षोड़शीम्॥
प्राणिनामपि नमस्कारं कुर्व्वतः प्राङ्मुखान्विते।
शतजन्मार्জ्जितं पापं तत्क्षणादेव नश्यति॥
रेणुगुण्ठितगात्रस्य कणा देहे भवन्ति ये।
तावद्वर्षसहस्राणि विष्णुलोके महीयते॥"
विष्णुधर्म्मोत्तरे।
"अभिवाद्य जगन्नाथं कृतार्थश्च तथा भवेत्।
नमस्कारक्रिया तस्य सर्व्वपापप्रणाशिनी॥
जानुभ्यां चैव पाणिभ्यां शिरसा च विचक्षणः।
कृत्वा प्रणामं देवस्य सर्व्वान् कामानवाप्नुयात्॥"
ब्रह्मपुराणे।
"अनादिनिधनं देवं दैत्यदानवदारणम्।
ये नमन्ति नरा नित्यं नहि पश्यन्ति ते यमम्॥
ये जना जगतां नाथं नित्यं नारायणं द्विजाः।
नमन्ति नहि ते विष्णोः स्थानादन्यत्र गामिनः॥"
नारदीये।
"एकोऽपि कृष्णस्य कृतप्रणामो
दशाश्वमेधावभृतेन तुल्यः।
दशाश्वमेधी पुनरेति जन्म
कृष्णप्रणामी न पुनर्भवाय॥"
भक्तिसुधोदये।
"विष्णोर्दण्डप्रणामार्थं भक्तेन प्रतता भुवि।
पातितं पातकं कृत्स्नं नोत्तिष्ठति पुनः सह॥
अपि पापं दुराचारं नरं त्वत्प्रणतं हरे।
नेक्षन्ते किङ्करा याम्या उलूकास्तपनं यथा॥"
श्रीविष्णुपुराणे। श्रीयमस्य निजभटानुधासने।
"हरिममरगणार्चिताङ्घ्रिपद्मं
प्रणमति यः परमार्थतो हि मर्त्यः।
तमपगतसमस्तपापबन्धं
व्रज परिहृत्य यथाग्निमाज्यसिक्तम्॥"
ब्रह्मवैवर्त्ते।
"प्रणागतरक्षणोद्यतं
हरिमीशं प्रणमन्ति ये नराः।
न पतन्ति भवाम्बुधौ स्फुटं
पतितानुद्धरति स्म तानसौ॥"
अष्टमस्कन्धे च बलिवाक्ये।
"अहो प्रणामाय कृतः समुद्यमः
प्रपन्नभक्तार्थविधौ समाहितः।
यल्लोकपालैस्त्वदनुग्रहोऽमरै-
रलब्धपूर्व्वापसदैऽसुरैऽर्पितः॥"
अतएव नारायणबृहत्सवे।
"अहो भाग्यमहो भाग्यमहो भाग्यं नृणामिदम्।
येषां हरिपदाजाग्रे शिरो न्यस्तं यथा तथा॥"
किञ्च नारसिंहे श्रीयमोक्तौ।
"तस्य वै नारसिंहस्य विष्णोरमिततेजसः।
प्रणामं ये प्रकुर्व्वन्ति तेषामपि नमो नमः॥"
भविष्योत्तरे च जलक्रीडाप्रसङ्गे।
"विष्णोर्दैवजगद्धातुर्जनार्द्दनजगत्पतेः।
प्रणामं ये प्रकुर्व्वन्ति तेषामपि नमो नमः॥"
इत्यादि॥*॥

अथ प्रणामनिन्दिता। दृष्टनारदीये तु दृक्पाखण्डागारम्भे।

"सकृद्वा न नमेद्यस्तु विष्णवे शूलभृत्कारिणे।
शूलोपमं विजानीयात् कदाचिदपि नालपेत्॥"
किञ्च पाद्मे। वैशाखमाहात्म्ये यमब्राह्मणसंवादे।

"प्रयन्तो भगवद्द्वारं नामशब्दपरिच्छदम्।
अकृत्वा तत्प्रणामादि यान्ति ते नरकौकसः॥"
अथ नमस्कारनिन्दितानि। विष्णुस्मृतौ।

"जन्मप्रभृति यत्किञ्चित् पुमान् वै धर्म्ममाचरेत्।
सर्व्वं तन्निष्फलं याति एकहस्ताभिवादनात्॥"
वाराहे।

"वस्त्रप्रावृतदेहस्तु यो नरः प्रणमेत माम्।
श्वित्री स जायते मूर्खः सप्तजन्मनि भामिनि!॥"

किञ्चान्यत्र।
"अग्रे पृष्ठे वामभागे समीपे गर्भमन्दिरे।
जपहोमनमस्कारान् न कुर्य्यात् केशवालये॥"
अपि च।
"सङ्कटभूमौ निपतितो न मुक्तः प्रणमेन्मुहुः।
उत्थायोत्थाय कर्त्तव्यं दण्डवत् प्रणिपातनम्॥
ततः प्रदक्षिणां कुर्य्यात् भक्त्या भगवतो हरेः।
नामानि कीर्त्तयन् मुक्तौ ताक्ष्य साष्टाङ्गवन्दनाम्॥"
इति हरिभक्तिविलासे ८ विलासः॥ * ॥
अन्यत् नमस्कारशब्दे प्रणामशब्दे च द्रष्टव्यम्॥
(विष्णविप्रेषः। यथा, ऋग्वेदे। ७। ५१। २।
"यद्विजामन् परुषि वन्दनं भुवत्॥"
असुरः। रक्षोविशेषः। इति ऋग्भाष्ये सायणः। ७। २१। ५॥)

वन्दनमाला, स्त्री, (वन्दनार्था माला यत्र सा।) तोरणम्। इति हलायुधः। २। १४६॥ (वन्दनार्था माला इति कर्म्मधारये।) रम्भास्तम्भचतुष्टयवेष्टिताम्रपल्लवरचितमाला। यथा,
"कुर्य्याद्वन्दनमालां यो रम्भास्तम्भैः सुशोभनैः।
धृतदृच्छोभवैः पत्रैर्जागरे चक्रपाणिनः॥
युगानि पञ्चसंख्यानां स्वर्गे तस्योत्सवो भवेत्।
पूज्यते वासवाद्यैश्च क्रीड़ते चाप्सरोवृतः॥"
इति हरिभक्तिविलासे १३ विलासः॥

वन्दनमालिका, स्त्री, (वन्दनमाला+स्वार्थे कन्।) बहिर्द्वारोपरि शुभदा माला। यथा,—
"तोरणोर्द्धे तु मङ्गल्यं दामवन्दनमालिका॥"
इति हेमचन्द्रः। ३।७४॥

वन्दना, स्त्री, (वन्द+"षट्टिवन्दिविदिभ्यश्चेति वाच्यम्।" ३। ३। १०७। इत्यस्य वार्त्तिकोक्त्या युच्। टाप्।) स्तुतिः। तत्पर्य्यायः। समीची २। इति त्रिकाण्डशेषः॥ होमभस्मना तिलकम्। यथा,—
"ऐशान्यामाहरेद्भस्म शुचौ वाथ शुचेरणे वा।
वन्दनां कारयेत्तेन शिरःकण्ठांसकेषु च।
कण्ठस्थस्येतिमन्त्रेण यथानुक्रमयोगतः॥"
इति तिथ्यादितत्त्वे वशिष्ठवचनम्॥

वन्दनी, स्त्री, (वन्द+ल्युट्। ङीप्।) नतिः। जीवातुः। वटी। याचनकर्म्म। इति मेदिनी। ने, ६७॥ क्वचित् पुस्तके वटीस्थाने कटी याचनकर्म्मस्थाने याचलकर्म्म इति च पाठः। तत्र तु पवर्गीयबकारादौ लिखितोऽयं शब्दः। किन्तु यदि ङ नुत्यभिवाद्योरित्यस्मात् अनट्प्रत्ययनिष्पन्नत्वात् अन्तःस्थवकारादौ लिखितः॥

वन्दनीयः, त्रि, (वदि+अनीयर्।) स्तवनीयः। वन्द्यः। वन्दितव्यः। वदधातोरनीयप्रत्ययेन निष्पन्नः॥ (यथा, महाभारते। ७।८०।३०।
"ततः शुद्धान्नमासाद्य जानुभ्यां भूतले स्थितः।
शिरसा वन्दनीयं तमभिवन्द्य जगत्पतिम्॥")

वन्दनीयः, पुं, (वन्दते सेवनार्थं स्तूयते इति। वदि+अनीयर्।) पीतभृङ्गराजः। इति राजनिर्घण्टः॥

वन्दनीया, स्त्री, (वदि+कर्म्मणि अनीयर्। टाप्।) गोरोचना। इति त्रिकाण्डशेषः॥ (विवृतिरस्या गोरोचनाशब्दे विज्ञेया॥)

वन्द्रा, स्त्री, (वन्दते अपरवृक्षमिति। वदि+अच्। टाप्।) वृक्षोपरिवृक्षः। वाँदु इति परगाछा। इति च भाषा। तत्पर्य्यायः। वृक्षादनी २ वृक्षरुहा ३ जीवन्तिका ४। इत्यमरः॥ वन्द्राका ५ शिखरी ६ सेव्या ७ वन्द्रका ८। इति भरतधृतहलायुधः॥ वन्द्रकः ९ नीलवल्ली १० इति रत्नमाला॥ वन्द्राकी ११ परवासिका १२ इति शब्दरत्नावली॥ वह्निनी १३ पुत्रिणी १४ वन्द्या १५ परपुष्टा १६ पराश्रया १७। इति शब्दचन्द्रिका॥ लताविशेषः। भिक्षुकी। इति मेदिनी। दे, १०॥ अस्याः पर्य्यायान्तरं गुणाश्च वन्द्राकशब्दे द्रष्टव्याः॥

वन्द्राकः, पुं, वृक्षोपरिवृक्षः। वाँदा इति हिन्दी भाषा। तत्पर्य्यायः। पादपरुहा २ शिखरी ३ तरुरोहिणी ४ वृक्षादनी ५ वृक्षरुहा ६ कामवृक्षः ७ शिखरी ८ केशरूपा ९ तरुरुहा १० तरुस्था ११ गन्धमादनी १२ कामिनी १३ तरुशुक् १४ श्यामा १५ उपदी १६। अस्य गुणाः। तिक्तत्वम्। शिशिरत्वम्। कफपित्तश्रमापहत्वम्। वह्न्यादिसिद्धिदत्वम्। वृष्यत्वम्। कषायत्वम्। रसायनत्वञ्च। इति राजनिर्घण्टः॥ अपि च।
"वन्द्राकः स्याद्विमस्निग्धः कषायमधुरो रसे।
मङ्गल्यः कफवातास्रश्वोव्रणविषापहः॥"
इति भावप्रकाशः॥

वन्द्राका, स्त्री, वन्द्रा। इति भरतधृतहलायुधः॥

वन्द्राकी, स्त्री, वन्द्रा। इति शब्दरत्नावली॥

वन्दारुः, त्रि, (वन्दते स्तौति अभिवादयतीति। वन्द+"गृवन्दोरारुः।" ३। २। १७३। इति आरुः।) वन्दनशीलः। तत्पर्य्यायः। अभिवादकः २। इत्यमरः। ३। १। २८॥ अभिवादयिता ३। इति शब्दरत्नावली॥ (यथा, ऋग्वेदे। १। १४७। २।
"पीपति त्वो अशुतो गृणति वन्दारुस्त
तन्वं वन्दे अग्ने॥"
स्तोत्रे, क्ली। इति ऋग्वेदभाष्ये सायणः। ४। ४३। १॥)

व(ब)न्दिः, स्त्री, (वन्दते स्तौति नृपादिकं स्वमुक्त्यर्थमिति। वदि+"सर्व्वधातुभ्य इन्।" उणा० ४। ११७। इति इन्।) आकृष्टमनुष्यगवादिः। कयेदी इति भाषा। तत्पर्य्यायः। प्रग्रहः २ उपग्रहः ३ वन्दी ४। इत्यमरभरतौ॥ वन्द्रिका ५। इति शब्दरत्नावली॥ सोपानकः। इत्युणादिकोषः॥ (स्तुतिः। यथा, भागवते। ६। १। २२।
"वन्द्यैः केतवैर्यैर्गर्हितां वृत्तिमाश्रितः॥"
पुं, स्तुतिपाठकः। यथा, हरिवंशे। ११२। ५०।
"सूतमागधवन्दीनामेकैकस्य सहस्रिकम्॥")

व(ब)न्दी [न्], पुं, (वन्दते स्तौति नृपादीन्निति। वदि स्तुतौ+णिनिः।) राजादेर्यात्राद्यौ वीर्य्यादिस्तुतिकारकः। तत्पर्य्यायः। स्तुतिपाठकः २। इत्यमरः॥ मागधः ३ मगधः ४। इत्यन्ये। इति तट्टीकायां भरतः॥ (यथा, रघुः। ४। ६।
"परिकल्पितसान्निध्या काले काले च वन्दिषु।
स्तुत्यं स्तुतिभिरर्थ्याभिरुपतस्थे सरस्वती॥")
अस्योत्पत्तिर्यथा,—
"क्षत्रियादिप्रकन्यायां सूतो भवति जातितः।
वैश्यान्मागधवैदेहौ राजविप्राङ्गसम्भवौ॥"
इति मानवे १० अध्यायः॥ *॥
आद्धोत्तरमस्मै शुक्तितो दानस्याकरणे निन्दा यथा,—
"वन्दिभ्यश्चैवमर्थिभ्योऽप्यार्थिभ्यश्चान्नमर्थितः।
यदि तत्र न दद्यात्तु विफलं प्राप्नुतो भवेत्॥"
वन्दिनो वीर्य्यस्तोतारः। अर्थितः सन् यदि एभ्योऽन्नं न दद्यात् आद्धं विफलं भवेदित्यर्थः।
"सूताः पौराणिकाः प्रोक्ता मागधा वंशशंसकाः।
वन्दिनश्चमलप्रज्ञाः प्रस्तावसदृशोक्तयः॥"
इत्युक्तेः। इत्यञ्च आद्धोत्तरदानविधेः आद्धे वन्दिप्रभृतिभ्यो दानाकरणे निन्दाश्रवणाच्च आद्धात् पूर्व्वं तदर्थं भोज्यादिकं उत्सृजेत्। इति आद्धतत्त्वम्॥ (भृत्यः। यथा, भागवते। ११। ४। १५।
"ओमित्यादेशमादाय नत्वा तं सुरवन्दिनः।

उर्वशीमप्सरःश्रेष्ठां पुरस्कृत्य दिवं ययुः ॥"
"सुरवन्दिनो देवभट्टाः।" इति तट्टीकायां श्रीधरस्वामी ॥)

ब(व)न्दीकारः, पुं, (वन्दीवत् गृहस्थं करोतीति। वन्दि+"कर्म्मण्यण्।" ३।२।१। इत्यण्।) वन्दिग्राहः। डाकाइत इति भाषा। तत्पर्य्यायः। माचलः २ प्रसह्यचौरः ३ चिल्लाभः ४। इति चिकाण्डशेषः ॥

वन्द्या, स्त्री, (वन्द्यते स्तूयते इति। वदि+ण्यत्।) वन्दा। इति शब्दचन्द्रिका ॥ गोरोचना। इति भावप्रकाशः ॥ (वन्दनीये, त्रि। यथा, साहित्यदर्पणे १ परिच्छेदे।
"आशीः परम्परां वन्द्यां कर्णे कृत्वा कृपां कुरु ॥"
यथा च भागवते। ४।१२।२६।
"आतिष्ठ जगतां वन्द्यं तद्विष्णोः परमं पदम् ॥")

वन्द्रं, क्ली, (वन्द्यते स्तूयते इति। वदि स्तुतौ+"स्फायितञ्चीति।" उणा० २।१३। इति रक्।) कल्याणम्। इति सिद्धान्तकौमुद्यामुणादिवृत्तिः ॥

वन्द्रः, त्रि, (वन्दते स्तौति देवादीन् पूजाकाले इति। वदि+रक्।) पूजकः। इत्युणादिकोषः ॥

वन्यं, क्ली, (वने भवम्। वन+यत्।) स्वच्छम्। इति राजनिर्घण्टः ॥ (कुटन्नटम्। तत्पर्य्यायो यथा,—
"कुटन्नटं परं वन्यं सुस्नाभञ्च परीलवम् ॥"
इति वैद्यकरत्नमालायाम् ॥)

वन्यः, त्रि, (वने भवः। वन्+यत्।) वनोद्भूतः। इति मेदिनी। ये, ५४ ॥ (यथा, रघुः। १।४५।
"हैयङ्गवीनमादाय घोषवृद्धानुपस्थितान्।
नामधेयानि पृच्छन्तौ वन्यानां मार्गशाखिनाम् ॥")

वन्यः, पुं, (वन+यत्।) वनसूरणः। वाराहीकन्दः। देवनलः। इति राजनिर्घण्टः ॥ (क्षीरविदारी। तत्पर्य्यायो यथा,—
"क्षीरी शुक्लपर्ण्याख्यः क्षुक्षुद्रः कुक्षवाग्रवः।
वन्यो मूलकमूलाभः खस्खदः स च कक्षुकी ॥"
इति वैद्यकरत्नमालायाम् ॥)

वन्या, स्त्री, (वनादागरण्यानां जलानां वा संहतिः। वन्+"प्राग्वादिभ्यो यः।" ४।२।३९। इति यः।) वनसमूहः। इत्यमरः। २।४।४॥ जलसंहतिः। इति मेदिनी। ये, ५४ ॥ सुद्गपर्णी। (तत्पर्य्यायो यथा, रत्नमालायाम्।
"मुद्गपर्णी क्षुद्रसहा कासुद्गा सिंहपर्णिका।
वन्या मार्जारगन्धेति रूपपर्ण्यावुभे च ते ॥")
गोपालकर्कटी। गुल्फा। मिश्रेया। भद्रसुस्ता। गन्धपत्रा। इति राजनिर्घण्टः ॥ (अश्वगन्धा। तत्पर्य्यायो यथा,—
"हयगन्धाश्वगन्धाख्या वाजिगन्धाश्वगन्धकः।
वन्या तुरगगन्धा च कम्बुकाश्वावरोहकः ॥"
वल्या क्वचित् दृश्यते। इति वैद्यकरत्नमालायाम् ॥)

वन्योपोदकी, स्त्री, (वन्या वनोद्भूता उपोदकी।) लताविशेषः। वनपुँइ इति भाषा। तत्पर्य्यायः। वनजा २ वनसाक्षया ३। अस्या गुणाः। तिक्तत्वम्। कटुत्वम्। उष्णत्वम्। रोचनत्वञ्च। इति राजनिर्घण्टः ॥

वनुः, पुं, (वनति भागमर्हतीति। वन सम्भक्तौ+"अर्त्तेरुनायवञ्चेति।" उणा० २। २८। इति रुनुप्रत्ययः।) अंशुः। भागः। इति सिद्धान्तकौमुद्यामुणादिवृत्तिः ॥

वप, ओ व डु ऐ सुखतन्तुबीजोप्तौः। इति कविकल्पद्रुमः ॥ (भ्वा०-उभ०-सक०-अनिट्।) ओ, वप्ता। व, वपति वपते। डु, उप्तिमन्। सुखो सुखितकरणम्। वपति मस्तकं नापितः। वपति तन्तुं तन्तुवायः। यदि वपति क्षेत्राणः क्षेत्रमासाद्य बीजम्। इति दुर्गादासः ॥

वपः, पुं, (वप्+घः।) केशसुखनम्। बीजवपनम्। इति वपधासोर्भावेऽल्प्रत्ययेन निष्पन्नः ॥

वपनं, क्ली, (वप्+भावे ल्युट्।) केशसुखनम्। (यथा, मनुः। ५।१४०।
"शूद्राणां मासिकं कार्य्यं वपनं न्यायवर्त्तिनाम् ॥")
बीजाधानम्। इति मेदिनी। ने, १२२ ॥

वपनी, स्त्री, (उप्यते मस्तकादिकमस्यामिति। वप्+अधिकरणे ल्युट्। ङीप्।) नापितशालाः। इति हेमचन्द्रः। ४।६६ ॥ (तन्तुवायशालाः। इति तत्धात्वर्थदर्शनात् ॥)

वपा, स्त्री, (उप्यतेऽत्रेति। वप्+भिदादिभ्यः अङ्। टाप्।) छिद्रम्। (यथा, शतपथब्राह्मणे। ६।३।३।५।
"अथ वल्मीकवपा सुषिरा यज्ञे निहिता भवति ॥") मेदः। इत्यमरः। २।६।६४ ॥ (यथा, रामायणे। १।१४।३६।
"पतत्रिणश्चस्य वपामुद्धृत्य नियतेन्द्रियः।
ऋत्विक् परमसम्पन्नः क्षपयामास शास्त्रतः ॥"
सा च हृदयस्थधातुः। यथा। "त्वक् च लोहितञ्च मांसञ्च मेदश्च नाभिश्च हृदयञ्च क्लोम च यकृच्च प्लीहा च वृक्कौ च वस्तिश्च पुरीषाधानञ्चामाशयश्च पक्वाशयश्चोत्तरगुदश्चाधरगुदश्च क्षुद्रान्त्रञ्च वपा च वपावहनञ्चेति मांसानि।" इति चरके शारीरस्थाने सप्तमेऽध्याये ॥)

वपिता, पुं, (वपति बीजमिति। वप्+इतृच्।) पिता। इत्युणादिकोषः ॥

वपुः, [स्] क्ली, (उप्यन्ते देहान्तरभोगसाधनबीजीभूतानि कर्म्माण्यत्रेति। वप्+"अर्त्तिसृवपियजीति।" उणा० २।११८। इति उसिः।) शरीरम्। इत्यमरः। २।६।७० ॥ (यथा, रघुः। २।४७।
"एकातपत्रं जगतः प्रभुत्वं
नवं वयः कान्तमिदं वपुश्च ॥")
प्रशस्ताकृतिः। इति मेदिनी। से, ३६ ॥ (अंशुः। यथा, मनुः। ५।६६।
"अष्टानां लोकपालानां वपुर्धारयते नृपः ॥"
"वपुस्तेजोऽंशुः।" इति मेधातिथिः ॥ स्त्री, खनामख्याता दक्षकन्या। सा तु धर्म्मराजस्य पत्नी। यथा, मार्कण्डेये। ५०।२१।
"बुद्धिर्लज्जा वपुः शान्तिः सिद्धिः कीर्त्तिस्त्रयोदशी।
पत्न्यर्थे प्रतिजग्राह धर्म्मो दाक्षायणीः प्रभुः ॥")

वपुःसवः, पुं, (वपुषः शरीरात् सवः स्रवणं यस्य।) शरीरस्रवधातुः। इति राजनिर्घण्टः ॥

वपुनः, पुं, (वप+उनच्। वयुन+पृषोदरादित्वात् यस्य मः इति केचित्।) देवता। इति शब्दरत्नावली ॥

वपुषा, स्त्री, हपुषा। इति भावप्रकाशः ॥ (रूपे, क्ली। यथा, ऋग्वेदे। ३।२।१५।
"इयं न चित्रं वपुषाय दर्शतं
मनुर्हितं सदमिन्नाय ईमहे ॥"
"वपुषाय रूपार्थं दर्शतं दर्शनीयम्।" इति तद्भाष्ये सायणः ॥)

वपुष्मा, स्त्री, पद्मचारिणी। इति जटाधरः ॥ (काशीराजस्य कन्या। जनमेजयस्य पत्नी। सा तु रम्भा नामाप्सरा। जनमेजयकृताश्वमेधकाले इन्द्रेणीयमश्वप्रविष्टेन धर्षितासीदतो जनमेजयेनेयं परित्यक्तापि पुनर्गन्धर्वराजविश्वावसुवाक्येन गृहीता। एतद्विवरणन्तु हरिवंशे १८८ अध्याये द्रष्टव्यम् ॥)

वप्ता, [तृ] पुं, (वपति बीजमिति। वप्+तृच्।) जनकः। इति मेदिनी ॥ कविः। इति जटाधरः ॥ (नापितः। यथा, ऋग्वेदे। १८।१४२।४।
"यदा ते वातो अनुवाति शोचिर्
वप्तेव श्मश्रु वपसि प्र भूम ॥"
"यथा वप्ता नापितो वपति सुखयति तथा भूम भूमिं प्रवपसि प्रकर्षेण सुखयसि ॥" इति तद्भाष्ये सायणः ॥)

वप्ता, [तृ] त्रि, (वपतीति ॥ वप् बीजोप्तौ+तृच्।) वापकः। इति मेदिनी ॥ (कर्षकः। यथा, मनुः। ३।१४२।
"यथैरिणे बीजमुप्त्वा न वप्ता लभते फलम्।
तथाऋचे हविर्हुत्वा न दाता लभते फलम् ॥")

वप्रं, क्ली, पुं, (उप्यतेऽत्रेति। वप+"वृषिवपिभ्यां रन्।" उणा० २।२७। इति रन्।) दुर्गनगरे परिखाया उद्धृतमृत्तिकास्तूपवद्धे यदुपरि प्राकारो निवेश्यते तत्। तथा चार्थशास्त्रम्। खातादुद्धृतमृदा वप्रं कारयेत् तस्योपरि प्राकारमिति। तत्पर्य्यायः। चयः २। इत्यमरभरतौ ॥ वल्मीकास्तूपः ३। इति शब्दरत्नावली ॥ (यथा, आर्य्यासप्तशत्याम् ।५०५।
"लग्नं वदने तस्याः सुविशाले कलितकरिकरक्रीड़े।
वप्रे सक्तं द्विपमिव मदकारस्तां विभूषयति ॥")

महावप्रो यथा,—
"महोद्यानां महावप्रां तड़ागशतशोभिताम्।
प्राकारगृहसम्बाधामिन्द्रस्येवामरावतीम्॥"
महान् वप्रो यस्याः।
"प्राकाराधारभूता क्षत्रिमोच्छ्रिता भूमि-
र्वप्रसंज्ञा॥"
इति विष्णुपुराणे ५ अंशे २३ अध्याये॥ * ॥
वपति बीजमत्र। क्षेत्र इति भाषा। तत्-
पर्य्यायः। केदारः २ क्षेत्रम् ३। इत्यमरभरतौ॥
निष्कुटः ४ वनजम् ५ वाटिका ६ पाटीरः ७।
इति जटाधरः॥ (यथा, वृहत्संहितायाम्।
१६।१६।
"शालीक्षुमत्यपि धरा धरणीधराभ-
धाराधरोज्झितपयः परिपूर्णवप्रा॥")
रेणुः। तटः। इति मेदिनीकरहेमचन्द्रौ॥
(यथा, किराते। ७।११।
"तत् पूर्व्वं प्रतिविदधे सुरापगाया
वप्रान्तस्खलितविवर्त्तनं पयोभिः॥"
मर्व्वतसानुः। यथा, किराते। ५। ३६।
"नानारत्नज्योतिषां सन्निपाते-
ष्वक्षेष्वन्तः सानुवप्रान्तरेषु॥")
वप्रं, क्ली, (वप्+"वृधिवपिभ्यां रन्।" उणा०
२।२७। इति रन्) सीसकम्। इति हेम-
चन्द्रः। ४।४६॥ (तथास्य पर्य्यायान्तरम्।
"सीसं वप्रञ्च वप्रञ्च योगेष्टं नागनामकम्॥"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे॥)
वप्रः, पुं, (वपति बीजमिति। वप्+रन्।)
तातः। इति मेदिनी। रे, ८२॥ प्राकारः।
इति विश्वः॥ प्रजापतिः। इति संक्षिप्तसारो-
णादिवृत्तिः॥
वप्रा, स्त्री, (वप्+रन्। टाप्।) मल्लिष्ठा।
इति राजनिर्घण्टः॥ (विवरणमस्या मल्लिष्ठा-
शब्दे ज्ञातव्यम्॥)
वप्रिः, पुं, (वपति बीजमत्र। वप्+"वङ्क्रादय-
श्च।" उणा० ४। ६६। इति क्रिन्प्रत्ययेन
साधुः।) क्षेत्रम्। इति सिद्धान्तकौमुद्या-
मुणादिवृत्तिः॥ दुर्गतिः। समुद्रः। इति संक्षिप्त-
सारोणादिवृत्तिः॥
वप्री, स्त्री, (वप्री+पृषोदरादित्वात् साधुः।)
वल्लीकः। इति हलायुधः॥
ववः, पुं, एकादशकरणान्तर्गतप्रथमकरणम्।
अस्याधिपतिरिन्द्रः। तत्र विहितानि यथा,—
"पौष्टिकक्षिरशुभानि ववाख्ये।"
इति ज्योतिस्तत्त्वम्॥
अत्र जातफलम्।
"ववाभिधाने जनकं हि यस्य
शूरोऽतिधीरो मनुजः कृती स्यात्।
यद्यालया तन्निलये विवादं
करोति नित्यं सुविचक्षणः स्यात्॥"
इति कोष्ठीप्रदीपः॥
दाक्षिणात्यमते अस्य शब्दस्य प्रथमवकारः
यवर्गीयः, द्वितीयवकारोऽन्तःस्थः॥

वस्व, गत्याम्। इति कविकल्पद्रुमः॥ (भ्वा०-पर०-
सक०-सेट्।) वकारादिः। ओष्ठ्यवर्णचतुर्थो-
पधः। वब्वति। इति दुर्गादासः॥
वम्, व, (उ+अ+म्।) शिवपूजान्ते कपोल-
वाद्यविशेषः। तत्तु उकाराकारमकारात्मकं
शिवप्रणवस्वरूपम्। यथा,—
"डिम् डिम् डिम् डिम् डिडिम् डिम् डिडिमरु
डमरुं वादयन् सूक्ष्मनादं
वम् वम् वम् वम् ववम् वम् भ्रमितदृगृगिरा-
ज्वालमालेन नृत्यन्।
कर्पूरासिक्तभस्मापटितपटुजटालम्बिरुद्राक्ष-
मालो
मायायोगी दृशास्यो रघुरमणपुरः प्राङ्गणे
प्रादुरासीत्॥"
इति रामलीलाद्भुतकाव्यम्॥ * ॥
वरुणबीजम्। यथा। नासापुटौ धृत्वा वमिति
वरुणबीजस्य शतुःपरिवारजपेन कुम्भकं कृत्वा
तस्मात् ललाटस्थचन्द्रान्गलितसुधया मातृका-
वर्णात्मिकया समस्तं देहं विरच्य लमिति
पृथ्वीबीजस्य द्वात्रिंशद्वारजपेन देहं सुदृढं
विचिन्त्य दक्षिणेन वायुं रेचयेत्। इति भूत-
शुद्धिप्रकरणे तन्त्रसारः॥
वम, ण शु टु उद्गिरि। इति कविकल्पद्रुमः॥
(भ्वा०-पर०-सक०-सेट्।) वकारादिः। ण,
वेमतुः ववमतुः। अन्ये तु तत्कार्य्यविधायक-
शास्त्रे फलादौ चेमं न पठन्ति वेमुश्च केचिदृधिर-
मित्यादिसाधनाय तत्शास्त्रे दन्त्यवकारादिवर्ज्जन-
स्यानित्यतां स्वीकुर्व्वन्ति। केचित् 'पुनर्व्वर्ग्य-
वकारादिधात्वन्तरमप्यन्ति इति प्रलपन्ति।
ज, वामः वमः। उ, वमित्वा वान्त्वा। टु,
वमथुः। उद्गिरि वान्तौ। वमति अन्नमजीर्ण-
वान्। अमन्तत्वेऽपि औ त्वत्फल इत्यादिना
केवलस्य वृक्षविकल्पनात् सोपसर्गस्य नित्यं
वृक्षः। वमयति वामयति प्रवमयति। इति
दुर्गादासः॥
वमः, पुं स्त्री, वमनम्। इति वमधातोरच्प्रत्ययेन
निष्पन्नम्। इति सिद्धान्तकौमुद्यामुणादिवृत्तिः॥
वमथुः, पुं, (वमनमिति। वम्+"दिसो ऽथुच्।"
३।३।८८। इति अथुच्।) वमिः। (यथा,
सुश्रुते उत्तरतन्त्रे ४५ अध्यायः।
"दौर्ब्बल्यश्वासकासज्वरवमथुमदाः पाण्डुता-
दाहमूर्च्छाः॥")
हस्तिशुण्डनिर्गतजलकणा। तत्पर्य्यायः। कर-
पूत्कारः २। इत्यमरः। २।६।५५॥ (यथा,
नैषधे। १६।६।
"रजनिवमथुप्रालेयाम्भः कणक्रमसंभृते:
कुशकिशलयस्याक्षैरक्षैर्यथैरुदबिन्दुभिः॥")
वमनं, क्ली, (वम्+भावे ल्युट्।) छर्दनम्।
(यथा, सुश्रुते। १।१२।
"मधुराम्बु रसौ वापि वमनाय प्रदापयेत्॥"
वमनद्रव्यमपि। यथा, कथासरित्सागरे।
६४।१७।

"स दत्त्वा वमनं क्षिप्रात् ऋतकल्पमजो-
वयत्॥")
अर्दनम्। इति मेदिनी। ने, १२३॥ आकृतिः।
इति विश्वः॥ (आहरणम्। यथा, रघुः।
१५।२६।
"या सौराज्यप्रकाशाभिर्वेभौ पौरविभूतिभिः।
स्वर्गाभिष्यन्दवमनं क्लमेवोपनिवेशिता॥"*॥
अथ वमनकल्पीयविधिः।
"वमने मदनं श्रेष्ठं त्रिवृन्मूलं विरेचने।
नित्यमन्यस्य तु यथा विशेषेण विशिष्यते॥
फलानि तानि पाक्यानि न चातिहरितान्यपि।
आदायाद्रे प्रशस्तर्त्ते मध्ये शीतवसन्तयोः॥
प्रस्थ्य कुशसुतोल्यां क्षिप्त्वा बद्ध्वा प्रलेपयेत्।
गोमयेनानुसुतोलीं धान्यमध्ये निधापयेत्॥
सप्तभूतानि मध्यिष्टगन्धानि कुशवेष्टनात्।
निष्कृष्य निर्गते ऽहाहे शोषयेत्तान्यथातपे॥
तेषां ततः सुपुष्काणामुद्धृत्य फलपिण्डकीः।
दधिमध्याज्यपललैर्दत्त्वा शोषयेत् पुनः॥
ततः सुगुप्तं संस्थाप्य कार्य्यकाले प्रयोजयेत्।
अथादाय ततो मात्रां जर्ज्जरीकृत्य वासयेत्॥
मृर्व्वरीं मधुयष्ट्या वा कोविदारस्य वा जले।
कर्व्वुदारस्य विम्ब्या वा नीपस्य विदुलस्य वा॥
शणपुष्प्याः सदा पुष्प्याः प्रत्यक्पुष्पुदकेऽथवा।
ततः पिबेत् कषायं तं प्रातर्मुदितगालितम्॥
सक्षौद्रेण विधिना साधु तेन तथा वमेत्।
श्लेष्मज्वरप्रतिश्यायगुल्मान्त्रविद्रधीषु च॥"
"पित्ते कफस्यागमते शीतसादिजलेन तत्।
क्षुद्राहेऽधोऽपि पित्ते च क्षीरं तत्पिप्पली
घृतम्॥
क्षेरेयीं वा कफच्छर्दिप्रसेकतमकेषु च।
दध्युत्तरं वा दधि वा तत्सुतक्षौरसम्भवम्॥
फलादिक्वाथकल्काभ्यां सिद्धं तत् सिद्धदुग्ध-
जम्।
सर्पिः कफाभिभूतेऽग्नौ शुष्यद्देहे च वा मतम्॥"
"वत्सकादिप्रतीवापः कषायः फलमञ्जनः।
निम्बार्कान्यतरक्वाथसमायुक्तो नियच्छति॥
वङ्गमूलानपि व्याधीन् सर्व्वान् सप्तमवोऽहवान्।
वाटपुष्पफलक्षत्रचूर्णैर्माल्यं सुरक्षितम्॥
वमेन्नरं वसादीनां क्षयो जिघ्रन् सुखं सुखी॥"
"इक्ष्वाकुर्व्वमने शस्तः प्रसान्यति च मानवे।
फलपुष्पावशेषस्य प्रवालैस्तस्य साधितम्।
पित्तश्लेष्मज्वरे क्षीरं पित्तोद्रिक्ते प्रयोजयेत्॥"
"सक्तुभिर्व्वा पिबेन्मन्थं तुम्बीस्वरसभावितैः।
कफोद्भवे ज्वरे कासे गलरोगेष्वरोचके॥
गुल्मे ज्वरे प्रसक्ते च कल्कं मांसरसैः पिबेत्।
नरः साधु वमत्येवं न च दौर्ब्बल्यमश्नुते॥"
"जीवकर्षभकौवीरा कपिकच्छूः शतावरी।
काकोलीक्षीरकाकौ मेदा महामेदा मधूलिका॥
तद्वदोभिः पृथक्पर्णी धामार्गवस्तथोऽन्विताः।
कासे हृदयदाहे च शस्ता मधुसिताप्लुताः॥"
"वर्षाभ्वां मधूकानां तोयेन जवसस्य वा।
पाचयेत् कौटजं बीजं शुष्कं क्षीरेयाथवा॥

सप्ताहं वार्कदुग्धाक्तं तच्चूर्णं पाययेत् पृथक् ।
फलजीमूतकैर्वाकु जीवन्तीजीवकोदनैः ॥
वमनौषधसूक्तानामिति कल्पदिगीरिता ।
बीजेभ्यानेन मतिमानन्यान्यपि च कल्पयेत् ॥"
इति वाभटे कल्पस्थाने प्रथमेऽध्याये ॥)

वमनः, पुं, (वमतीव शुक्लवर्णमिति । वम्+ल्युः ।) शुक्लः । इति राजनिर्घण्टः ॥

वमनी, स्त्री, (वमन+ङीप् ।) जलौका । इति राजनिर्घण्टः ॥ (विवृतिरस्या जलौकाशब्दे ज्ञातव्या ॥)

वमनीया, स्त्री, (वमयतीति । वम्+ण्यर्थे विवक्षायाम् । अभिधानात् कर्त्तरि अनीयर् ।) मक्षिका । इति राजनिर्घण्टः ॥ वमनयोग्ये, त्रि ॥

वमिः, स्त्री, (वमनमिति । वम्+सर्व्वधातुभ्य इन् । उणा० ४ । ११७ ।) प्रच्छर्द्दिका । इत्यमरः । २ । ६ । ५५ ॥ (अस्याः ससम्प्राप्तिलक्षणचिकित्सितं पथ्यापथ्यञ्च यथा,—

"आमजे शूलरोगार्त्तिः पर्व्वभेदो भ्रमः क्लमः ।
प्रोषः शिरोरुजा क्लेदो नेत्रे गम्भीरमिच्छति ॥
खल्ली वा चेतनं वापि अजीर्णाच्जायते वमिः ।
गम्भीरनेत्रो वमते विड्वन्धो वातिसार्य्यते ॥
गात्रे खल्ली करं शूलं तथा प्रोषोऽतिमूर्च्छना ।
विकलाङ्गो भ्रमार्त्तश्च भ्रमत्तदीक्षते जगत् ॥
शिरोर्त्तिर्वेपतेऽत्यर्थं करपादौ हिमोपमौ ।
एतैर्लिङ्गैस्तु संयुक्तां छर्द्दिं दूरे परित्यजेत् ॥"

चिकित्सा ।

"स पञ्चमूलीक्वथितः कषायः
ससैन्धवश्चामलकश्च कल्कः ।
क्वाथं पिबेच्छ्रिअतपिप्पलीकं
स वातछर्द्दिर्विनिवारणश्च ॥"
"आमलक्या रसेनाथ घृष्टं चन्दनकं मधु ।
गुडिकामलमानेन लेहो हन्ति वमिं ध्रुवम् ॥
चित्रककटुकरजनीदयश्च फलत्रिकं मधुना च
यावशूकश्च ।
समकृतमिति चूर्णमेतन्मधुना युतं वमिं निवारयति ॥"
"काकोली काकमाची च क्वाथं शर्करया युतम् ।
लाजाशर्करसंयुक्तं हन्ति पित्तवमिं नृणाम् ॥
मातुलुङ्गरसश्चैव पथ्याशर्करया युतः ।
हन्ति कासं पित्तभवं वमिं शीघ्रं नियच्छति ॥
दृष्ट्वा पित्तवमिं घोरां सदाहभ्रमदायिनीम् ।
तत्रारग्वधपत्राणि मधुशर्करयान्वितम् ॥
क्षीरपानं प्रशस्तं वा सुखाशर्करयान्वितम् ।"
"जम्बाम्रयोः प्रवालानि दाडिमामलकस्तथा ।
मस्तुनोपोषितं पानं हन्याच्छर्द्दिं वमिं नृणाम् ॥
सर्ज्जार्জ্জুनं धवकदम्बककोलचूर्णं
शुण्ठ्या च धान्यसहितं सगुडं प्रदद्यात् ।
श्लेष्मोद्भवं वमनमाशु निहन्ति पुंसां
शुण्ठीकणा मधुविड़ङ्गयुतोऽपि लेहः ॥"
"ऊर्द्धभागगते दोषे विरेको हि प्रशस्यते ।
तस्मिन् जातेऽप्यधोभागं वमनं प्राप्यति ध्रुवम् ॥
अथ द्विभागमानञ्चेत्तदा देयाभया मधु ।
क्रिमिजं वमनं ज्ञात्वा क्रिमीणां भ्रमनक्रिया ॥
न चोष्णं नातिचाम्लञ्च नतीक्ष्णं न तथा लघु ।
तण्डुलीयकशाकं वा न मद्यं काञ्जिकं न तु ॥
वमिदोषे च कथितं पथ्यञ्चाच शृणुष्व मे ।
आनूपं शालिभक्तञ्च घृतभृष्टा च वास्तुकम् ॥
आढकी मुद्गयूषश्च दधि सर्पिर्गुडान्वितम् ।
अङ्गारमण्डका चाथ वमौ पथ्यं प्रशस्यते ॥
यथाबलं यथाकालं यथारोगं यथानलम् ।
तथा दृष्ट्वा प्रकुर्व्वन्ति पथ्यानां सम्प्रक्रमम् ॥
दिवानिद्रां प्रयुञ्जीत वमौ श्वासेऽतिसारके ।
हिक्काप्रोषे तथा जीर्णे वमिक्लेदेऽथवा पुनः ॥
न चोष्णतोयपानञ्च नातिभोजनमेव च ।
नधावनञ्च कर्त्तव्यं वर्জ্জयेदमनार्हिते ॥"

इति वैद्यके ॥)

अथ छर्द्देरधिकारः । तत्र छर्द्दिविप्रकृष्टसन्निकृष्टनिदानं पूर्व्वरूपं संप्राप्तिञ्चाह ।

"अतिद्रवैरतिस्निग्धैरच्छर्द्दैर्लवणैरपि ।
अकाले चातिमात्रेश्च तथा सात्म्येश्च भोजनैः ॥
आमाशयात्तथोद्वेगादजीर्णात् क्रिमिदोषतः ।
नार्य्याश्चापन्नसत्त्वायास्त्वातिद्रुतमश्नतः ॥
दुष्टैर्दोषैः पृथक् सर्व्वैर्वीभत्सालोकनादिभिः ।
वीभत्सैर्हेतुभिश्चान्यैर्भुक्तमुत्क्लिश्यते बलात् ॥"

आमात् असम्यक्पक्वादसात् । अजीर्णात् यथास्थिताद्भुक्तात् । आपन्नसत्त्वायाः प्राप्तगर्भायाः । अन्यैर्वीभत्सैर्विकृतैर्हेतुभिः घृणाकारिभिः अनिष्टश्रवणस्पर्शनदर्शनभक्षणघ्राणैरुत्क्लिश्यते-छर्द्दिं नीत्वा मुखाद्बहिष्क्रियते ॥ * ॥ पूर्व्वरूपमाह ।

"हृल्लासोद्गाररोधौ च प्रसेको लवणास्यता ।
देहोऽन्नपाने च भृशं वमीनां पूर्व्वलक्षणम् ॥"

छर्द्देः सामान्यलक्षणमाह ।

"छादयन्नाननं वेगैरर्दयन्नङ्गभञ्जनैः ।
निरुच्यते छर्द्दिरिति दोषो वक्त्रं प्रधावितः ॥"

छादयन् पूरयन् अङ्गभञ्जनैः अङ्गभेदैः अर्दयन् अङ्गानि पीड़यन् । वक्त्रं प्रधावितः वक्त्रं प्रति धावितः दोषः छर्द्दिर्निरुच्यते ॥"* ॥ वातजाया लक्षणमाह ।

"हृत्पार्श्वपीड़ासुखशोषशीर्ष-
नाभ्यर्त्तिकासस्वरभेदतोदैः ।
उद्गारशब्दप्रबलं सफेनं
विच्छिन्नरूक्षं तनुकं कषायम् ॥
कृच्छ्रेण चाल्पं महता च वेगो-
नार्त्तोऽनिलाच्छर्द्दयतीव दुःखम् ॥"

कषायं कषायरसम् । दुःखं दुःखमिव छर्द्दयति ॥ * ॥ पित्तजामाह ।

"मूर्च्छापिपासासुखशोषमूर्द्ध-
तालुक्षिसन्तापतमोभ्रमार्त्तः ।
पीतं भृशोष्णं हरितञ्च तिक्तं
धूम्रञ्च पित्तेन वमेत् सदाहम् ॥"* ॥

कफजामाह ।

"तन्द्रास्यमाधुर्य्यकफप्रसेकं
सन्तोषनिद्रारुचिगौरवार्त्तः ।
स्निग्धं घनं स्वादु कफाङ्कि शुक्लं
सलोमहर्षोऽल्परुजं वमेत्तु ॥"

सन्तोषस्तृप्तिः ॥ * ॥ त्रिदोषजामाह ।

"शूलाविपाकारुचिदाहतृष्णा-
श्वासप्रमोहप्रबलाप्रसक्तम् ।
छर्द्दिस्त्रिदोषाल्लवणाम्लनील-
सान्द्रोष्णरक्तं वमतां नृणां स्यात् ॥"

आगन्तुजामाह ।

"असात्म्यजा च क्रिमिजामजा च
वीभत्सजा दौर्हृदजा च या हि ।
सा पञ्चमी ताश्च विभावयेच्च
दोषोत्क्लेशेनैव यथोक्तमादौ ॥"

एताः पञ्चागन्तुजत्वेन साम्यादेकैव अतएव सा आगन्तुजा पञ्चमी विभावयेत् अनुबन्धयेत् ॥*॥

उपद्रवानाह ।

"कासः श्वासो ज्वरस्तृष्णा हिक्का वैचित्यमेवच ।
हृद्रोगस्तमकश्चैव ज्ञेयाश्छर्द्देरुपद्रवाः ॥
वैचित्यं विकृतचित्तत्वम् । तमकोऽत्र तमः ।
श्वासपदेनैव तमकाख्यस्यापि श्वासस्योक्तत्वात् ॥

असाध्यां साध्यान्याह ।

"क्षीणस्य या क्षर्द्दिरतिप्रसक्ता
सोपद्रवा शोणितरूपयुक्ता ।
सचन्द्रिकां तां प्रवदेदसाध्यां
साध्यां चिकित्सेत् निरुपद्रवाञ्च ॥"

सचन्द्रिका मयूरपिच्छचन्द्रिकाप्रभायुक्ता ॥*॥

अथ छर्द्देश्चिकित्सा ।

"आमाशयोत्क्लेशभवा हि सर्व्वा-
श्छर्द्दयो मता लंघनमेव तस्मात् ।
विधीयते मारुतजां विना तु
संशोधनं वा कफपित्तहारि ॥"

अत्र द्वितीयपादे छर्द्दीशब्दः ॥

"हन्यात् क्षीरोदकं पीतं छर्द्दिं पवनसम्भवाम् ।
सुन्नामलकयूषो वा ससर्पिष्कः ससैन्धवः ॥"

क्षीरोदकं नाग्निसंस्कृतस्य क्षीरस्य उदकम् ॥ २ ॥

"गुड़ूचीचित्रफलानिम्बपटोलैः क्वथितं जलम् ।
पिबेन्मधुयुतं तेन छर्द्दिर्नश्यति पित्तजा ॥ ३ ॥
हरीतकीनां चूर्णन्तु लिह्यान्माक्षिकसंयुतम् ।
अधोमार्गीभवते दोषे छर्द्दिः शीघ्रं निवर्त्तते ॥४॥
विड़ङ्गचित्रफलाविश्वाचूर्णं मधुयुतं पिबेत् ।
विड़ङ्गभवशुण्ठीनां चूर्णं वा कफजां वमिम् ॥"

इदं कैवर्त्तीसूक्तम् । गुड़तजी इति लोके ॥ ५ ॥

"पिष्ट्वा धात्रीफलं लाजान् शर्करां च प्रलोभिताम् ।
दत्त्वा मधुपलञ्चापि कुड़वं सलिलस्य च ।
वाससा गालितं पीतं हन्ति छर्द्दिं त्रिदोषजाम् ॥६॥
गुड़्च्या रचितं हन्ति हिमं मधुसमन्वितम् ।
दुर्निवारामपि छर्द्दिं त्रिदोषजनितां बलात् ॥७
एलालवङ्गजकेशरकोलमज्ज-
लाजप्रियङ्गु घनचन्दनपिप्पलीनाम् ।
चूर्णानि माक्षिकसितासहितानि लीढ्वा

छर्द्दिं निहन्ति कफमारुतपित्तजाताम् ॥”
इति एलादिचूर्णम् ॥ ८ ॥
“अश्वत्थवल्कलं शुष्कं दग्धं निर्व्वासितं जले ।
तज्जलं पानमात्रेण छर्द्दिं जयति दुर्ज्जयाम् ॥९॥
पथ्याचिकटुधान्याकजीरकाणां रजो लिहन् ।
मधुना नाशयेच्छर्द्दिमरुचिञ्च त्रिदोषजाम् ॥१०॥
विल्वत्वचो गुडूच्या वा क्वाथः क्षौद्रेण संयुतः ।
छर्द्दिं त्रिदोषजां हन्ति पर्पटः पित्तजां
तथा ॥११॥
आम्राक्षिविल्वनिर्यूहः पीतः समधुशर्करः ।
निहन्यात् छर्द्दातीसारं वैश्वानर इवाहुतिम् ॥”
इति निर्यूहक्वाथः ॥१२॥
“जम्ब्वाम्रपल्लवग्रस्तं लाजरजःसंयुतं घृतम् ।
भ्रामयति मधुना युक्तं वमिमतिसारं तृषार्त्ति-
सुग्राम् ॥१३॥
वीभत्सजां छर्द्यतमेरिष्टैर्द्दीर्च्छर्द्दजां फलैः ।
लङ्घनैरामजां छर्द्दिं जयेत् सात्म्यैरसात्म्य-
जाम् ॥१४॥
क्रमिच्छर्द्दीगवद्धन्यात् वमिं क्रमिससङ्गवाम् ।
तत्र तत्र यथादोषं क्रियां कुर्य्यात् चिकित्-
सकः ॥”१५॥
इति छर्द्यधिकारः । इति भावप्रकाशः ॥

वमिः, पुं, (वमति उद्गिरति धूमादिकमिति । टु वम उद्गिरणे + “इक् कृष्यादिभ्यः ।” इतीक् ।) अग्निः । इति मेदिनी । मे, २६ ॥ धूमः । इति शब्दरत्नावली ॥

वमितः, त्रि, (वम् + क्तः ।) वान्तः । (यथा,—
“वमितं लङ्घयेत् प्राज्ञो लङ्घितं नतु वामयेत् ।
वमने क्लेशबाहुल्यात् हन्याल्लङ्घनकर्षितम् ॥”
इत्युद्भटः ॥”)
वमनकृतवस्तु । इति सुश्रुतसूत्रस्थाने ३५ अध्यायः ॥

वम्भः, पुं, वंशः । इति शब्दरत्नावली ॥

वल्मीकूटः, पुं, वल्मीकः । इति हेमचन्द्रः ॥

वय, ङ गत्याम् । इति कविकल्पद्रुमः ॥ (भ्वा०-आत्म०-सक०-सेट् ।) ङ, वयते । इति दुर्गादासः ॥

वयं, त्रि, अस्मदादिः । आमरा इति भाषा । अस्मच्छब्दस्य वयादेशे जसि रूपोऽयम् । इति व्याकरणम् ॥ (यथा,—
“एको भवामि स्म भवेऽहमादौ
दारैरथोभौ स्म भवाव आवाम् ।
वयं भवामो बहवः स्म पुत्रै-
स्त्वन्मायया तापि विभो प्रसीद ॥”
इति मुग्धबोधव्याकरणम् ॥)

वयः, [स्] क्ली, (वयते वेति अजतीति वा । वय ङ गतौ वीगतौ अजगतौ वा + असुन् । अजतेर्वीभावः ।) पक्षी । (यथा, विष्णुपुराणे । १ । ५ । ४६ ।
“ततः स्वच्छन्दतोऽन्यानि वयांसि वयसो-
ऽहरत् ॥”)
बालादिः । इत्यमरः । ३ । ३ । २२६ ॥ (यथा, महाभारते । ३ । ६८ । २३ ।
“तुल्यशीलवयोयुक्तां तुल्याभिजनसंयुताम् ।
नैषधोऽर्हति वैदर्भीं तच्चेयमसितेक्षणा ॥”
अन्नम् । इति निघण्टुः । २ । ७ ॥ यथा, ऋग्वेदे । २ । २० । १ ।
“वयं ते वय इन्द्र विद्धि सुगः प्रभरामहे वाजयु-
र्नरथम् ॥”)
यौवनम् । इति मेदिनी । से, ३५ ॥ * ॥ वयोविशेषे कर्त्तव्यानि यथा,—
“शैशवेऽभ्यस्तविद्यानां यौवने विषयैषिणाम् ।
वार्द्धके मुनिवृत्तीनां योगेनान्ते तनुत्यजाम् ॥”
इति रघुवंशे १ सर्गः ॥*॥
अपि च ।
“प्रथमेनार्জ্জिता विद्या द्वितीये नार्জ্জितं धनम् ।
तृतीये नार्জ্জितं पुण्यं चतुर्थे किं करिष्यति ॥”
इति चाणक्यशतकम् ॥
वयोविशेषाणां नियमा यथा,—
“कौमारं पञ्चमाब्दान्तं पौगण्डं दशमावधि ।
कैशोरमाषष्ठदशात् यौवनञ्च ततः परम् ॥”
इति प्रायश्चित्ततत्त्वधृतवचनम् ॥*॥
अपि च ।
“आषोडशाद्भवेद्बालस्तरुणश्चात उच्यते ।
वृद्धः स्यात् सप्ततेरूर्द्धं वर्षीयान् नवतेः परम् ॥”
इति भरतधृता स्मृतिः ॥*॥
अन्यच्च ।
“बालं वृद्धिर्वयो रूपं चक्षुश्चक्रक् श्रोत्रेतसी ।
दशकेन निवर्त्तन्ते मनः सर्व्वेन्द्रियाणि च ॥”
इति महाभारतम् ॥*॥
(“कालप्रमाणविशेषापेक्षिणी हि शरीरावस्था वयोऽभिधीयते । तद्वयो यथा स्थूलभेदेन त्रिविधम् । बालं मध्यं जीर्णमिति । तत्र बालमपरिपक्वधातुगुणमजातव्यञ्जनं कुमारादाषोडशवर्षसम्पूर्णबलं श्लेष्मधातुप्रायं आषोडशवर्षम् । विवर्द्धमानधातुगुणं पुनः प्रायेणानवस्थितसत्त्वमाविंशद्वर्षसुपदिष्टम् । मध्यं पुनः समर्थागतबलवीर्य्यपौरुषपराक्रमग्रहणस्मरणवचनविज्ञानसर्व्वधातुगुणं पित्तधातुप्रायमाषष्टिवर्षसुदिष्टम् । अतःपरं परिहीयमानधात्विन्द्रियबलपौरुषपराक्रमग्रहणधारणस्मरणवचनविज्ञानं भज्यमानधातुगुणं वातधातुप्रायं क्रमेण प्रजीर्णमुच्यते आवर्षशतम् ।” इति चरके विमानस्थानेऽष्टमेऽध्याये ॥
“वयस्तु त्रिविधं बालं मध्यं वृद्धमिति । तत्रोनषोडशवर्षा बालास्तेपि त्रिविधाः क्षीरपाः क्षीरान्नादा अन्नादा इति । तेषु संवत्सरपराः क्षीरपा द्विसंवत्सरपराः क्षीरान्नादाः परतोऽन्नादा इति ॥ षोडशसप्तत्योरन्तरे मध्यं वयस्तस्य विकल्पो वृद्धियौवनं सम्पूर्णता हानिरिति । तत्राविंशतेर्वृद्धिराविंशतो यौवनमाचत्वारिंशतः सर्व्वधात्विन्द्रियबलवीर्य्यसम्पूर्णता । अत ऊर्द्धमीषत्परिहाण्यारभ्यावत् सप्ततिरिति ॥ सप्ततेरूर्द्धं क्षीयमाणधात्विन्द्रियबलवीर्य्योत्साहमहन्यहनिवलीपलितखालित्यजुष्टं कासश्वासप्रभृतिभिरुपद्रवैरभिभूयमानं सर्व्वक्रियासुसमर्थं जीर्णागारमिवाभिवृष्टमवसीदन्तं वृद्धमाचक्षते ॥
तत्रोत्तरोत्तरासु वयोऽवस्थासूत्तरोत्तरा भेषजमात्राविशेषा भवन्त्यृते च परिहाणे स्वतन्त्रापेक्षया प्रतिकुर्व्वीत । भवन्ति चात्र ।
बाले विवर्द्धते श्लेष्मा मध्यमे पित्तमेव तु ।
भूयिष्ठं वर्द्धते वायुर्वृद्धे तद्वीक्ष्य योजयेत् ॥
अग्निचारविरेकैस्तु बालवृद्धौ विवर्জ্জयेत् ।
तत्साध्येषु विकारेषु स्वल्पां कुर्य्यात् क्रियां
घृने: ॥”
इति सुश्रुते सूत्रस्थाने ३५ अध्यायः ॥

वयःस्थः, त्रि, (वयसि यौवने तिष्ठतीति । वयस् + स्था + कः ।) युवा । इति हेमचन्द्रः । ३ । ३ ॥ (यथा, महाभारते । १ । ४२ । ४ ।
“पित्रा पुत्रो वयःस्थोऽपि सततं वाच्य एव तु ॥”)

वयस्थः, त्रि, युवा । इत्यमरः । २ । ६ । ४२ ॥ वयसि यौवने तिष्ठति इति वयस्थः डः निपातात्सिसर्गस्य वा लुक् वयःस्थश्च ॥ वयःपक्षिणि बाल्यादौ वयो यौवनमात्रके । इति विश्वः । इति भरतः ॥

वय(यः)स्था, स्त्री, (वयो यौवनं तिष्ठत्यनयेति । वयस् + स्था + घञर्थे कः । निपातनात् वा विसर्गस्य लोपः ।) आमलकी । हरीतकी । सोमवल्लरी । इत्यमरः । २ । ४ । १३७ ॥ गुडूची । स्रुग्घोला । काकोली । आली । इति मेदिनी । ये, ३२ ॥ शालालिः । इति हेमचन्द्रः ॥ क्षीरकाकोली । इति भावप्रकाशः ॥ अश्वत्थपर्णी । (यथा, सुश्रुते उत्तरतन्त्रे । ३२ ।
“वचा वयस्था गोलोमी हरितालं मनःशिला ।
कुष्ठं सर्জ্জरसश्चैव तैलार्थे वर्ग इष्यते ॥”)
मत्स्याक्षी । युवती । इति राजनिर्घण्टः ॥

वयस्यः, पुं, (वयसा तुल्यः । वयस् + “नौवयोधर्म्मेति ।” ४ । ४ । ९१ । इति यत् ।) समानवयस्कः । तत्पर्य्यायः । स्निग्धः २ सवयाः ३ । इत्यमरः । २ । ८ । १२ ॥ (यथा, आर्য্যासप्तशत्याम् । ४०३ ।
“बहुयोषिति लाक्षारुणशिरसि वयस्येन दयित
उपहसिते ।
तत्कालकलितलज्जा पिशुनयति सखीषु सौभाग्यम् ॥”)

वयस्या, स्त्री, (वयस्य + टाप्) सखी । इत्यमरः । २ । ६ । १२ । (यथा, कथासरित्सागरे । १०१ । १४५ ।
“अत्यर्थं सा च दृष्ट्वा त्वां जायते मदनातुरा ।
तां भजस्व वयस्यां मे ततः क्षेममवाप्स्यसि ॥”
इत्युक्ता । यथा, शतपथब्राह्मणे । १० । ४ । ३ । १५ ।
“एकया न विंशतिर्व्वयस्याख्या एकयैवाविंशति-
र्द्वितीया स्थितिः ।” तथाच, वाजसनेयसंहिताभाष्ये । १४ । ६ ।
“वयस्यासंज्ञका इका उपदधात्येकोविंशतिमन्वेरित्यर्थः ॥”)

वयुनं, क्ली, (वीयते गम्यते प्राप्यते विषया अनेनेति । अज गतौ + “अजियमिग्रीड्भ्यश्च ।”

उणा० ३ । ६१ । इति उनण् । स च कित् । अजेर्व्वीभावः ।) ज्ञानम् । यथा,—
"हस्ताग्राह्ये रचयति विधिं पीठकोदूखलाद्यै-
श्छिद्रं श्लक्ष्णैर्निहितवयुनः शिक्यभाण्डेषु तद्वित्।"
इति श्रीभागवते १० स्कन्धे ८ अध्यायः ॥ शिक्यभाण्डेषु अन्तर्निहितदध्यादौ वयुनं ज्ञानं यस्य सः । इति तट्टीकायां श्रीधरस्वामी ॥
वयुनः, पुं, (वीयते गम्यते ऽनेनेति । अज गतौ + उनण् ।) देवतागारम् । इत्युणादिकोषः । (ऋतदर्थे स्त्रीवलिङ्गः । इति उज्ज्वलदत्तः । ३ । ६१ ॥ विषणागर्भजातः क्षुप्राश्वस्य पुत्रः । यथा, भागवते । ६ । ६ । २० ।
"क्षुप्राश्वोऽर्चिषि भार्य्यायां धूमकेतुमजीजनत् ।
विषणायां वेदशिरं देवलं वयुनं मनुम् ॥")
वयोधाः, [स्] पुं. (वयो यौवनं दधातीति । वयस् + धा + "वयसि धाधाः ।" उणा० ४ । २२८ । इति असिः । स च डित् ।) युवा । इत्युणादिकोषः ॥ (अन्नम् । यथा, वाजसनेयसंहितायाम् । १५ । ७ ।
"वयोधसाधीतेनाधीतं जिन्व ।"
"वयोधसा वयो दधाति पुष्णाति वयोधा अन्नं तेनाधीतेनाध्ययनायोपहिताधीतं जिन्व ॥" इति तद्भाष्ये महीधरः ॥ आयुर्दातरि, त्रि । यथा, वाजसनेयसंहितायाम् । २८ । २४ ।
"अग्निमिन्द्रं वयोधसम् ॥"
"देवो होता अग्निं वयोधसमिन्द्रञ्च यजतु वय आयुर्दधाति वयोधास्तमायुषो दातारं धारयितारं वा।" इति तद्भाष्ये महीधरः ॥)
वयोवङ्गं, क्ली, (वयसा वङ्गमिव ।) सीसकम् । इति राजनिर्घण्टः ॥
वर, तृ क इच्छे । इति कविकल्पद्रुमः ॥ (अदन्तचुरा०-परo-सकo-सेट् ।) रेफोपधः । वरयति । इति दुर्गादासः ॥
वरं, क्ली, (व्रियते इति । वृ + कर्म्मणि अप् ।) कुङ्कुमम् । मनाक्प्रियम् । इत्यमरः । तथा च ।
"वरं प्राणास्त्वाज्या न च शिशुविनाशेष्वभिरतिर्-
वरं मौनं कार्य्यं न च वचनमुक्तं यदनृतम् ।
वरं क्लीवं भावं न च परकलत्राभिगमनं
वरं भिक्षाशित्वं न च परधनानां हि हरणम् ॥"
इति वामनपुराणे ५६ अध्यायः ॥
त्वक्त्वम् । बालकम् । आर्द्रकम् । इति राजनिर्घण्टः ॥
वरं [म्] अ, मनाक्प्रियम् । यथा,—
"मनागिष्टे वरं क्लीवं केचिदाहुस्तदव्ययम् ॥"
इति मेदिनी । वे, ६३ ॥
वरंवरा, स्त्री, (वरं वृणोतीति । वृ + अच् । सुम् च ।) चक्रपर्णी । इति शब्दचन्द्रिका ॥ चाकुलिया इति भाषा ॥
वरः, पुं, (वृ + अप् ।) वरणम् । तत्पर्य्यायः । वृतिः २ । इत्यमरः । ३ । २ । ८ ॥ वृ वेष्टने । प्रार्थनाविशेषे इत्यन्ये । इति भरतः ॥ देवादृतः । देवसकाशात् याचितः । उत्कृष्टः ।
"तपोभिरिष्यते यस्तु देवेभ्यः स वरो मतः ॥"
इति च भरतः ॥
जामाता । (यथा, रघुः । ६ । ८६ ।
"प्रसुदितवरपक्षमेकतस्तत्
क्षितिपतिमण्डलमन्यतो वितानम् ॥")
भिङ्गः । इति मेदिनी । रे, ६२ ॥ गुलगुलुः । इति शब्दरत्नावली ॥ पतिः । इति हेमचन्द्रः । ३ । २८० ॥ (नियन्ता । यथा, ऋग्वेदे । १ । १४३ । ५ ।
"न यो वराय मरुतामिव स्वनः सेनेव सृष्टा]
दिवा यथासनिः ॥"
"योऽग्निर्वराय वरणाय नियन्त्रे भृत्तो न भवति ॥" इति तद्भाष्ये सायणः ॥)
वरः, त्रि, (वृ + अप् ।) श्रेष्ठः । इत्यमरः । ३ । ३ । १७२ ॥ (यथा, विष्णुपुराणे । १ । ११ । १८ ।
"राजासनं राजच्छत्रं वराश्वा वरवारणाः ।
यस्य पुण्यानि तस्येते मत्वेतत् ग्राम्य पुत्रक ॥")
वरकं, क्ली, (व्रियते अनेन । वृ + अप् । ततः संज्ञायां कन् ।) पोताच्छादनम् । इति हारावली । ६६ ॥ धौताधौतसाधारणवस्त्रम् । इति शब्दरत्नावली ॥
वरकः, पुं. (व्रियते लोकैरिति । वृ + अप् । ततः कन् ।) वनमुद्गः । इति हेमचन्द्रः । ४ । २३६ ॥ पर्पटः । इति राजनिर्घण्टः ॥ क्षणधान्यभेदः । चीना इति भाषा । तत्पर्य्यायः । शूलकङ्गुः २ रूक्षः ३ शूलप्रियङ्गुः ४ । अस्य गुणाः । मधुरत्वम् । रूक्षत्वम् । कषायत्वम् । वातपित्तकारित्वञ्च । इति राजनिर्घण्टः ॥ (वर + स्वार्थे कन् । प्रार्थनाविशेषः । यथा, महाभारते । ३ । १०७ । ५३ ।
"स वव्रे तुरगं तत्र प्रथमं यज्ञकारणात् ।
द्वितीयं वरकं वव्रे पितॄणां पावनेच्छया ॥")
वरक्रतुः, पुं, (वराः श्रेष्ठाः क्रतवो यस्य यूताश्वमेधित्वात् तथात्वम् । यद्वा, वरः क्रतुर्यस्मात् । पूतक्रतुवत् तथात्वम् ।) इन्द्रः । इति हेमचन्द्रः । २ । ८७ ॥
वरचन्दनं, क्ली, (वरं श्रेष्ठं चन्दनम् ।) काश्मीरम् । देवदारु । इति मेदिनी । ने, २४२ ॥
वरटं, क्ली, (व्रियते इति । वृ + "ग्रकादिभ्योऽटन् ।" उणा० ४ । ८१ । इति अटन् ।) कुन्दपुष्पम् । इति शब्दरत्नावली ॥
वरटः, पुं, (वरति सेवते सरोवरमिति । वृ अ सेवायाम् + "ग्रकादिभ्योऽटन् ।" उणा० ४ । ८१ । इति अटन् ।) हंसः । इति मेदिनी । टे, ५१ ॥ कीटविशेषः । बोलता इति भाषा । तत्पर्य्यायः । गन्धोली २ वरटा ३ । इत्यमरः ॥ गन्धोलिः ४ वरला ५ । इति शब्दरत्नावली । वरली ६ । इति जटाधरः ॥ क्षुद्रा ७ क्रूरा ८ क्षुद्रवर्ब्बरा ९ । इति राजनिर्घण्टः ॥
वरटा, स्त्री, (वरट + टाप् ।) हंसी । (यथा, मेघदूते । १ । १३५ ।
"मदेकपुत्रा जननी जरातुरा
नवप्रसूतिर्वरटा तपस्विनी ॥")
वरला । इत्यमरः । २ । ५ । २५ ॥ कुसुम्भबीजम् । इति भावप्रकाशः ॥ (अस्या गुणा यथा,—
"वरटा मधुरा स्निग्धा रक्तपित्तकफापहा ।
कषाया शीतला गुर्व्वी स्यादतृष्यानिलापहा ॥"
इति भावप्रकाशस्य पूर्ब्बखण्डे प्रथमे भागे ॥)
वरटी, स्त्री, (वरट + जातौ ङीष् ।) हंसी । इति मेदिनी । टे, ५१ ॥ गन्धोली । इति त्रिकाण्डशेषः ॥ (यथा, सुश्रुते कल्पस्थाने ३ अध्याये ।
"स्फ्यातुण्डोच्चिटिङ्गवरटीशत पदीभृकवल-
भिकाभृङ्गीभ्रमराः शुकतुण्डविषाः ॥")
वरट्टिका, स्त्री, कुसुम्भबीजम् । तत्पर्य्यायः । वरटा २ । अस्या गुणाः । मधुरत्वम् । स्निग्धत्वम् । रक्तपित्तकफापहत्वम् । कषायत्वम् । शीतलत्वम् । गुरुत्वम् । अतृष्यत्वम् । अनिलापहत्वञ्च । इति भावप्रकाशः ॥
वरणं, क्ली, (वृ + भावे ल्युट् ।) कन्यादिवरणम् । (यथा, महाभारते । १ । १६० । ७ ।
"न च विप्रेष्वधीकारो विद्यते वरणं प्रति ।
स्वयंवरः क्षत्रियाणामितीयं प्रथिता श्रुतिः ॥")
वेष्टनम् । इति मेदिनी । णे, ६५ ॥ पूजनादि । इति शब्दरत्नावली ॥ * ॥ अथ वरणविधिः । तेषामाचार्य्यादीनां होमसाध्ये कर्म्मणि होमारम्भात् पूर्ब्बमानयनं यजमानेन स्वयं वरणं कार्य्यम् । दानवाचनानारम्भवरणव्रतप्रमाणेषु यजमानं प्रतीयात् । इति हरिस्वामिधृतकात्यायनसूत्रात् । तत्र ब्रह्मवरणं प्रथमतः । ज्योतिष्टोमे । ब्रह्मोक्षाग्नीध्वर्य्वादिक्रमदर्शनेनान्यत्राकाङ्क्षया दृष्टपरिकल्पनाया न्याय्यत्वात् । सुगतिसोपानप्रभृतयोऽप्येवम् । वरणन्तु । गन्धादिदानद्वारा प्रीतिसृत्पाद्य कर्म्मकरणाय प्रेरणम् । तच्च । सर्व्वत्र प्राङ्मुखो दाता ग्रहीता च उदङ्मुखः । इति वचनात् यजमानस्य प्राङ्मुखत्वं आचार्य्यादीनामुदङ्मुखत्वं प्रतीयते । वरणविधिमाह कात्यायनः । आसनमाहार्य्य आह साधु भवानास्तामर्च्चयिष्यामो भवन्तमिति । आसनमाहार्य्यानीय संस्थाप्याह साधु भवानास्तामिति । साध्वहमासे इति प्रतिवचनम् । अर्च्चयिष्यामो भवन्तमिति पुनरुक्ते अर्च्चय इति प्रतिवचनं सामर्थ्यात् । इति हरिस्वामी । इति संस्कारतत्त्वम् ॥ * ॥ मेदिनीमते पवर्गीयवकारादिशब्दोऽयम् । किन्तु अन्तःस्थवकरादिधातोरनट्प्रत्ययेन निष्पन्नत्वादत्र लिखितः ॥
वरणः, पुं, (व्रियते अनेन वृणोतीति वा । वृ + "सुयुवृञो युच् ।" उणा० २ । ७४ ॥ इति युच् ।) प्राकारः । वरणवृक्षः । इत्यमरः । २ । २ । ३ । (यथा, किराते । ५ । २५ ।
"इह सिन्धवश्च वरणावरणाः
करिणां सुहृदे सनलदानलदाः ॥")
उत्कृष्टः । इति हारावली । ८१ ॥ संक्रमः । इति हलायुधः ॥ साँको इति भाषा ॥

वरणसी, स्त्री, वाराणसी। इति शब्दरत्नावली ॥
वरणा, स्त्री, (वरण+टाप्।) नदीविशेषः। इति शब्दरत्नावली ॥ सा तु वाराणस्युत्तरसीमा। तस्या उत्पत्तिर्यथा,—

हरिरुवाच।

"महेश्वर शृणुष्वेमां मम वाचं कलस्वनाम्।
ब्रह्महत्याक्षयकरीं शुभदां पुण्यवर्द्धिनीम् ॥
योऽसौ प्राङ्मण्डले पुण्ये मदंशप्रभवोऽव्ययः।
प्रयागे वसते नित्यं योगशायी तु विश्रुतः ॥
चरणाद्दक्षिणात्तस्य विनिर्याता सरिद्वरा।
विश्रुता वरणेत्येवं सर्व्वपापहरा शुभा ॥
सप्तादत्या द्वितीया च असिरित्येव विश्रुता।
ते उभे च सरिच्छ्रेष्ठे लोकपूज्ये बभूवतुः ॥
ताभ्यां मध्ये तु यो देशस्तत् क्षेत्रं योगशायिनः।
त्रैलोक्यप्रभवं तीर्थं सर्व्वपापप्रमोचनम् ॥
न ताडशोऽस्ति गगने न भूम्यां न रसातले।
तत्रास्ति नगरी पुण्या ख्याता वाराणसी शुभा।
यस्यान्तु भोगिनो नाशं प्रयान्ति भवतो लयम् ॥"

इति वामने ३ अध्यायः ॥

वरण्डः, पुं, (वृणोतीति। वृ+"अण्डन्नुलस्भृवृञः।" उणा० १।१२८। इति अण्डन्।) अन्तरावेदिः। समूहः। सुखरोगः। स तु व्रण इति वयसु फोड़ा इति च भाषा। इति मेदिनी। डे, ३३ ॥ तच्चते पवर्गीयबकारादिरयं किन्तु अन्तःस्थवकारादिवृधातोरौणादिक अण्डन् प्रत्ययनिष्पन्नत्वादत्र लिखितः ॥

वरण्डकः, पुं, (वरण्ड+स्वार्थे संज्ञायां वा कन्।) मातङ्गवेदिः। हातीर छाओदा इति भाषा। यौवनकराटकः। वयसु फोड़ा इति भाषा, वस्तुलः। गोल इति ख्यातः। इति मेदिनी। के, २०३ ॥ भित्तिः। इति हेमचन्द्रः ॥ मेदिनीकारेण अयं पवर्गीयबकारादौ लिखितः। किन्तु हेमचन्द्रेन वृधातुनिष्पन्नत्वात् अन्तःस्थवकारादौ परिगणितः ॥

वरण्डकः, त्रि, (वरण्ड+कन्।) विशालः। भयसम्पन्नः। क्षपणः। इति शब्दरत्नाञ्जली ॥

वरण्डा, स्त्री, (वरण्ड+टाप्।) सारिका। वर्णिः। शस्त्रभेदः। इति मेदिनी। ते, ३६ ॥

वरण्डालुः, पुं, (वरण्ड इव आलुरत्र।) एरण्डवृक्षः। इति त्रिकाण्डशेषः ॥

वरतिक्तः पुं, (वरः श्रेष्ठस्तिक्तस्तिक्तरसो यस्य।) कुटजवृक्षः। इति राजनिर्घण्टः ॥ (पर्पटकः। तत्पर्य्यायो यथा,—

"पर्पटो वरतिक्तश्च स्मृतः पर्पटकश्च सः।
कथितः पांशुपर्य्यायस्तथाकवचनामकः ॥"

इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥)

वरतिक्तिका, स्त्री, (वरतिक्त+स्वार्थे कन्। टाप्। अत इत्वम्।) पाठा। इति राजनिर्घण्टः ॥ आकनादि इति भाषा ॥ (यथास्याः पर्य्यायः।

"पाठावष्टावष्टकीच प्राचीना पापचेलिका।
एकष्ठीला रसा प्रोक्ता पाठिका वरतिक्तिका ॥"

इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥)

वरत्करी, स्त्री, रेणुकानामगन्धद्रव्यम्। इति शब्दचन्द्रिका ॥

वरत्रा, स्त्री, (व्रियतेऽनयेति वृ+"वृञश्चित्।" उणा० ३।१०७। इति अत्रन्। टाप्।) चर्म्मरज्जुः। काछड़ड़ी इति ख्याता। तत्पर्य्यायः। चूषा २ कक्षा ३ कक्षा ४। चर्म्मरज्जुः। तत्पर्य्यायः। नड्डी २ वड्डी ३ वड्डी ४ वाड्डी ५। इत्यमरभरतौ ॥ (यथा, ऋग्वेदे। १०। ६०। ८।

"यथायुगं वरत्रया नह्यति धरुणायकम् ॥")

वरत्वचः, पुं, (वरा हितकरी त्वचा यस्य।) निम्बवृक्षः। इति रत्नमाला ॥

वरदः, त्रि, (वरं ददातीति। दा+"आतोऽनुपसर्गेति।" ३।२।३। इति कः।) अभीष्टदाता। तत्पर्य्यायः। समर्हकः २। इत्यमरः। ३।१।७॥ समर्हः ३ वाञ्छितार्थदः ४। इति शब्दरत्नावली ॥ (यथा, महाभारते। १। २।२१७।

"वरदं तं वरं वव्रे साहाय्यं क्रियतां मम।
शल्यस्त्वसौ प्रतिश्रुत्य जगामोद्दिश्य पाण्डवान्॥")

प्रसन्नः। इति मेदिनी। दे, ३७ ॥

वरदा, स्त्री, (वरद+टाप्।) कन्या। इति मेदिनी। दे, ३७ ॥ आदित्यभक्ता। इति राजनिर्घण्टः ॥ (पर्य्यायो यथा,—

"सुवर्चला सूर्य्यभक्ता वरदा वदरापि च।
सूर्य्यावर्त्ता रविप्रीता परा ब्रह्मसुवर्चला ॥"

इति च भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥) अश्वगन्धा। इति भावप्रकाशः ॥ वरदात्री च। (यथा, भागवते। ३।१६।७२।

"धर्म्मस्य ते भगवतस्त्रियुगत्रिभिः खैः
पद्भिश्चराचरमिदं द्विजदेवतार्थम्।
नूनं भृतं तदभिघाति रजस्तमश्च
सत्त्वेन नो वरदया तनुवानिरस्य ॥")

वरदाचतुर्थी, स्त्री, (वरदाख्या चतुर्थी।) माघशुक्लचतुर्थी। तस्यां गौरी पूज्या। यथा। भविष्योत्तरे माघशुक्लपक्षमधिकृत्य।

"चतुर्थी वरदा नाम तस्यां गौरी सुपूजिता।
सौभाग्यमतुलं कुर्य्यात् पश्यन्त्यां श्रीरपि श्रियम्॥"

इति तिथ्यादितत्त्वम् ॥

वरदातुः, पुं, (ददातीति ॥ दा+तुन्। वरस्य दातुः।) वृक्षविशेषः। भूइसह इति हिन्दी भाषा। तत्पर्य्यायः। भूमीसहः २ हारदातुः ३ खरच्छदः ४। अस्य गुणौ। शिशिरत्वम्। रक्तपित्तप्रसादनत्वञ्च। इति भावप्रकाशः ॥

वरपर्णाख्यः, पुं, (वराणि पर्णान्यस्य। वरपर्णेति आख्या यस्य।) क्षीरकाकुलीवृक्षः। इति रत्नमाला ॥

वरप्रदा, स्त्री, (वरं प्रददातीति। प्र+दा+कः।) लोपामुद्रा। इति हेमचन्द्रः। २। ३७ ॥ वरदातरि, त्रि ॥

वरफलः, पुं, (वरं फलमस्य।) नारिकेलवृक्षः। इति शब्दचन्द्रिका ॥ तत्फले श्रेष्ठफले च स्त्री ॥

वरसुखी, स्त्री, (वरं सुखमस्याः। ङीष्।) रेणुकानामगन्धद्रव्यम्। इति शब्दचन्द्रिका ॥

वरयिता, [तृ] पुं, (वृ+णिच्। तृच्।) भर्त्ता। इति हेमचन्द्रः ॥ वरणकारयिता च ॥

वररुचिः, पुं, (वरा रुचिरस्य।) कविविशेषः। तत्पर्य्यायः। पुनर्व्वसुः २। इति त्रिकाण्डशेषः ॥ स च विक्रमादित्यराजसभास्थनवरत्नान्तर्गतरत्नविशेषः यथा,—

"धन्वन्तरिः क्षपणकामरसिंहशङ्कु-
वेतालभट्टघटकर्परकालिदासाः।
ख्यातो वराहमिहिरो नृपतेः सभायां
रत्नानि वै ववरुचिर्नव विक्रमस्य ॥"

इति नवरत्नम् ॥

वरलः, पुं स्त्री, (वृणातीति। वृ+अलच्।) वरटः। बोल्ता इति भाषा। यथा,

"विघस्कृत्की भृङ्गरोलो वरलस्तृणघट्पदः ॥"

इति शब्दमाला ॥

वरलब्धः, पुं, (वरः उत्कर्षो लब्धः पुण्येषु येन।) चम्यकवृक्षः। इति त्रिकाण्डशेषः ॥ (वरेण लब्धः।) वरप्राप्ते, त्रि ॥

वरला, स्त्री, (वृ+अलच्+टाप्।) हंसी। इति मेदिनी। ले, ११६ ॥ तच्च पवर्गीयबकारादौ पठितोऽयम्। वरटा च ॥

वरली, स्त्री, (वरल+ङीष्।) वरटा। इति जटाधरः ॥

वरवत्सला, स्त्री, (वरे जामातरि वत्सला।) श्वशूरभार्य्या। इति शब्दमाला ॥

वरवर्णिनी, स्त्री, (वरः श्रेष्ठो वर्णः प्रशस्तः पीतादिर्वास्त्यस्या इति। वरवर्ण+इनिः। ङीप्।) अत्युत्तमा स्त्री। तत्पर्य्यायः। वरारोहा २ मत्तकाशिनी ३ उत्तमा ४। इत्यमरः। २। ६। ४ ॥ मत्तकाशिनी ५। इति भरतः ॥ (यथा, विष्णुपुराणे। १।१५।७।

"रत्नभूता च कन्येयं वार्द्धेयी वरवर्णिनी।
भविष्यत् जानता पूर्व्वं मया गोभिर्विवर्द्धिता ॥")

लाक्षा। हरिद्रा। रोचना। फलिनी। साध्वी स्त्री। इति मेदिनी। नि, २४३। गौरी ॥ (यथा, महाभारते। ६।२२।२१।

"भद्रकालि! नमस्तुभ्यं महाकालि नमोऽस्तु ते।
चण्डि! चण्डे! नमस्तुभ्यं तारिणि! वरवर्णिनि! ॥")

सरस्वती। लक्ष्मीः। इति शब्दरत्नावली ॥

वरवाञ्छीकं, क्ली, कुङ्कुमम्। इत्यमरटीका ॥

वरवृद्धः, पुं, (वरः श्रेष्ठो वृद्धः पुरातनः।) शिवः। इति त्रिकाण्डशेषः ॥

वरा, स्त्री, (वृ+अप्+टाप्।) फलत्रिकम्। इति मेदिनी। रे, ६३ ॥ रेणुकानामगन्धद्रव्यम्। इति शब्दचन्द्रिका ॥ गुडूची। मेदा। ब्राह्मी। विड्ङ्गम्। पाठा। हरिद्रा। इति राजनिर्घण्टः ॥ श्रेष्ठा च ॥

वराकः, पुं, (वृणीते तच्छील इति। वृ+"अल्पाभिषङ्कवृत्तुरुष्टवृङः षाकन्।" ३।२।१५५।

इति घाकन्।) शिवः। इति मेदिनी। के, १२६॥ युद्धम्। इति हेमचन्द्रः॥

वराकः, त्रि, (वृ+"जल्पभिक्षेति।" ३।२। १५५। इति घाकन्।) शोचनीयः। इति मेदिनी। के, १२६॥ अवरः। इति शब्दमाला॥ (यथा, मुकुन्दमालायाम्। १७।

"नाथे श्रीपुरुषोत्तमे त्रिजगतामेकाधिपे चेतसा
सेवे स्वस्य पदस्य दातरि परे नारायणे तिष्ठति।
यं कञ्चित् पुरुषाधमं कतिपयग्रामेशमल्पार्थदं
सेवायै मृगयामहे नरमहो मूढा वराका वयम्॥")

वराङ्गं, क्ली, (वरमङ्गानाम्।) मस्तकम्। गुह्यम्। इत्यमरः। ३। ३। २६॥ गुडत्वक्। योनिः। इति त्रिकाण्डशेषः॥ श्रेष्ठावयवे, त्रि॥ (वराय अङ्गाय अस्य।) तद्युक्ते, त्रि॥ (शोभनम्। यथा, "त्वक्पत्रञ्च वराङ्गं स्यादृष्टङ्गशोभनं तथोत्कटम्॥"

इति भावप्रकाशस्य पूर्वखण्डे प्रथमे भागे॥)

वराङ्गः, पुं, (वराणि स्थूलान्यङ्गानि यस्य।) हस्ती। इति त्रिकाण्डशेषः॥ विष्णुः। यथा,—

"सुवर्णवर्णो हेमाङ्गो वराङ्गश्चन्दनाङ्गदी॥"

इति तस्य सहस्रनामस्तोत्रम्॥

वराङ्गकं, क्ली, (वरमङ्गमस्य। कप्।) गुडत्वक्। इत्यमरः। २।४।१३४॥ श्रेष्ठावयवयुक्ते, त्रि॥

वराङ्गना, स्त्री, (वरा श्रेष्ठा अङ्गना।) अतिप्रशस्ताङ्गयुक्ता स्त्री। यथा,—

"शिरः सपुष्पं चरणौ सुपूजितौ
वराङ्गनासेवनमल्पभोजनम्।
अनग्नशायित्वमपर्व्वमैथुनं
चिरप्रनष्टां श्रियमानयन्ति षट्॥"

इति लक्ष्मीचरित्रम्॥

वराङ्गरूपोपेतः, त्रि, (अङ्गानां रूपाणि अङ्गरूपाणि। वराणि अङ्गरूपाणि तैरुपेतः।) श्रेष्ठरूपयुक्तः। सुन्दर इत्यर्थः। तत्पर्य्यायः। सिंहसंहननः १। इत्यमरः॥

वराङ्गी, स्त्री, (वरमङ्गमन्तरवयवो यस्याः।) हरिद्रा। इति राजनिर्घण्टः॥

वराङ्गी, [न्] पुं, (वराङ्गमस्त्यस्येति। इनिः।) अम्लवेतसः। वराङ्गाम्लवेतसं इति वा पाठः। इति रत्नमाला॥ श्रेष्ठाङ्गयुक्ते, त्रि॥

वराटः, पुं, (वरं मन्दमटतीति। अट्+कर्म्मणि अच्।) कपर्द्दकः। इति राजनिर्घण्टः॥ (अस्य शोधनादिविषयो यथा,—

"भूगर्त्ते च समे शुद्धे पत्रलीं स्थापयेत् सुधीः।
तुषेण पूरयेत्तस्याः किञ्चिन्न्यूनं भिषग्वरः॥
वराटैः पूरितां भूषां तन्मध्ये विनिवेशयेत्।
क्षारीमग्निं ततो दद्यात् पालिका यत्नसुत्तमम्।
अनेन म्रियते नूनं वराटः सर्व्वरोगजित्॥"॥

अन्यच्च।

"वराटं तत्र चाङ्गेरी जम्बीराणां रसेन वा।
अन्येषामपि चाम्लानां यावत् पीतं न गच्छति।
पश्चादुद्धृत्य प्रक्षाल्य गृह्णीयाच्च वराटकम्॥"

इति वराटशुद्धिः॥ *॥

इति वैद्यकरसेन्द्रसारसंग्रहे जारणमारणाधिकारे॥) रज्जुः। यथा। रज्जुः शुल्का वराटो ना। इति स्त्रीकाण्डे रत्नकोषः। इत्यमरटीकायां भरतः॥

वराटकः, पुं क्ली, (वराट+स्वार्थे कन्।) कपर्द्दकः। इत्यमरः॥ कड़ि इति भाषा। तस्य संख्याभेदेन संज्ञाभेदा यथा,—

"वराटकानां दशकद्वयं यत्
सा काकिनी ताश्च पणश्चतस्रः।
ते षोड़श द्रम्य इवावगम्यो
द्रम्यैस्तथा षोड़शभिश्च निष्कः॥"

इति लीलावती॥ *॥

अपि च। तान्त्रिकः कार्षिकः पणः। इति याज्ञवल्क्यवचनेन गुञ्जाः पञ्चाद्यमाषकस्ते षोड़शाक्षः कर्षोऽस्त्री। इत्यमरसिंहोक्तेन च अशीतिरक्तिकापरिमितताम्रे पणशब्दः सङ्केतितः स च तावत्संख्यकवराटकैर्लभ्यते इति वराटकेष्वपि तथा व्यवहारः। एतन्मूलकं भविष्यमत्स्यतन्त्रयोर्व्वचनं यथा,—

"अशीतिभिर्व्वराटकैः पण इत्यभिधीयते।
तैः षोड़शैः पुराणं स्याद्दनतं सप्तभिस्तु तैः॥"

इति प्रायश्चित्ततत्त्वम्॥ *॥

ते च दक्षिणार्थं विधीयन्ते। यथा,—

"हुतमश्रोत्रियं दानं हुतो यज्ञस्त्वदक्षिणः।
तस्मात् पञ्च काकिणीं वा फलं पुष्पमथापि वा।
प्रदद्यात् दक्षिणां यज्ञे तया स सफलो भवेत्॥"

इति शुद्धितत्त्वम्॥

वराटकः, पुं, (वराट एव। स्वार्थे कन्।) रज्जुः। पद्मबीजम्। इति मेदिनी। के, २०२॥

वराटकरजाः, [स्] पुं, (वराटक इव रजो यत्र।) नागकेशरवृक्षः। इति शब्दमाला॥

वराटिका, स्त्री, (वराट+स्वार्थे कन्। टाप्। अत इत्वञ्च।) कपर्द्दकः। इत्यमरटीकायां भरतः राजनिर्घण्टश्च॥ (यथा, नैषधे।२।८८।

"बहुकसुमणिर्व्वराटिका
गगनाटत्करकर्कटोत्करः॥")

क्षुच्छवाधिका च। यथा,—

"प्रयागे म्रियते येन तस्य गङ्गा वराटिका॥"

इत्युद्भटः॥

वराहः, पुं, (वृणोति इति। वृ+युच्। पृषोदरात् दीर्घः।) इन्द्रः। इति त्रिकाण्डशेषः॥ वरणवृक्षः। इति शब्दरत्नावली॥

वाराणसी, स्त्री, (वाराणसी पृषोदरादित्वात् साधुः।) काशी। यथा,—

"काशी वाराणसी वाराणसी शिवपुरी च सा॥"

इति हेमचन्द्रः॥

वरादनं, क्ली, (वरैः राजभिरद्यते इति। अद्+ल्युट्।) राजान्नम्। इति शब्दचन्द्रिका॥

वराभिधः, पुं, (अम्बष्ठस्य।) इति राजनिर्घण्टः॥ (वरा अभिधा यस्य।) श्रेष्ठनामा च॥

वराम्रः, पुं, (वरः श्रेष्ठः अम्बोऽत्र। रस्य लत्वम्।) करमर्दः। इति रत्नमाला॥ करान्न इति वा पाठः॥

वरारकं, क्ली, (वरं श्रेष्ठं धनिनं ऋच्छति गच्छति। ऋ+खल्।) हीरकम्। इति हेमचन्द्रः। ४। १३१॥ (गुणादयोऽस्य हीरकशब्दे ज्ञातव्याः॥)

वरारोहः, पुं, (हस्तिन उच्चत्वात् आयतपृष्ठत्वाच्च वरः आरोहो यत्र।) हस्त्यारोहः। अवरोहः। इति विश्वः॥

वरारोहा, स्त्री, (वरः आरोहो नितम्बो यस्याः।) उत्तमा स्त्री। इत्यमरः। २। ६। ४॥ (यथा, महानिर्व्वाणतन्त्रे। ४। ४७।

"यदा तु वैदिकी दीक्षा दीक्षा पौराणिकी तथा।
न स्थास्यति वरारोहे! तदैव प्रबलः कलिः॥")

कटिः। इति हेमचन्द्रः॥

वरालिका, स्त्री, (वरा आलिका सखी अयादिर्यस्याः।) दुर्गा। इति त्रिकाण्डशेषः॥

वराग्निः, पुं, स्थूलवस्त्रम्। मोटा कापड़ इति भाषा। तत्पर्य्यायः। स्थूलशाटकः २। इत्यमरः॥ वरासिः ३ स्थूलशाटकम् ४ स्थूलशाटिका ५। इति तट्टीकायां भरतः॥ स्थूलपट्टाकः ६। इति शब्दरत्नावली॥ वराग्नि ७। क्षौममिति जटाधरः॥

वरासनं, क्ली, (वराय दुर्गाय अस्यते क्षिप्यते दीयते इति यावत्। अस्+ल्युट्।) ओड्रपुष्पम्। इति शब्दमाला॥ (वरमासनमिति।) उत्तमासनञ्च॥

वरासनः, पुं, (वरां स्त्रीयां नारीं अस्यति क्षणतीति। अस्+क्युः।) षिङ्गः। (वरानपि जनान् अस्यति दूरीकरोतीति।) द्वारपालः। इति विश्वः॥

वरासिः, पुं, (वरैः श्रेष्ठैः अस्यते क्षिप्यते इति। अस्+इन्।) स्थूलशाटकः। (वरोऽसिर्यस्य।) खड्गधरः। इति धरणिः॥

वरासी, स्त्री, ज्ञानवासः। इति शब्दमाला॥

वराहः, पुं, (वरान् आहन्ति इति दुर्गः। छत्व° ४। ३। ४६। हन्+डः।) पशुविशेषः। वरा इति भाषा। तत्पर्य्यायः। शूकरः २ घृष्टिः ३ कोलः ४ पोत्री ५ किरिः ६ किट्टिः ७ डुंडुभः ८ घोणी ९ क्षत्वरोमा १० क्रोड़ः ११ भूदारः १२। इत्यमरः॥ किरः १३ सूकरादः १४ सूकरलाङ्गूलः १५। इति जटाधरः॥ स्थूलनासिकः १६ दंष्ट्रायुधः १७ वक्रवक्त्रः १८ दीर्घतरः १९ आखनिकः २० भूखित् २१ बहुरूपः २२। इति शब्दरत्नावली॥ अस्य मांसस्य गुणाः। दृष्यत्वम्। वातघ्नत्वम्। बलबृंहणत्वञ्च। इति राजवल्लभः॥ बहुमूत्रत्वम्। विरूक्षणत्वञ्च। इति सञ्जेय पाठान्तरम्। अन्यत् शूकरशब्दे द्रष्टव्यम्॥ *॥

तस्मांसं विष्णवे न देयम्। यथा। "नाभक्ष्यं नैवेद्यार्थं भक्षेच्छ्वजामहिषीक्षीरं वर्ज्जयेत्। पञ्चनखमत्स्यवराहमांसानि चेति।" इत्याह्निकतत्त्वधृतविष्णुसूत्रम् ॥ * ॥ वराहमांसं भुक्त्वा विष्णुपूजादिनिषेधो यथा,—

वराह उवाच।

"भुक्त्वा वाराहमांसन्तु यो वै मामुपसर्पति।
पतनं तस्य वक्ष्यामि यथा भवति सुन्दरि! ॥
वराहो दश वर्षाणि भूत्वा तु चरते वने।
व्याधो भूत्वा महाभागे समाः सप्त च सप्ततिः ॥
क्रमिर्भूत्वा समाः सप्त तिष्ठते तस्य पुष्कले।
अथोच्चैर्मूषिको भूत्वा वर्षाणाञ्च चतुर्दश ॥
एकोनविंशवर्षाणि यातुधानश्च जायते।
गृध्रकङ्काष्टवर्षाणि जायते भवने वहु ॥
आघ्रस्त्रिंशतिवर्षाणि जायते पिशिताशनः।
एव संसारितात्मत्वा वाराहामिषभक्षकः ॥
जायते विपुले सिद्धे कुले भागवतस्तथा।
हृषीकेशवचः श्रुत्वा सर्वसम्पूर्णलक्षणम् ॥
शिरसा चाञ्जलिं कृत्वा वाक्यमेतदुवाच ह।
एतन्मे परमं गुह्यं तव भक्तसुखावहम्।
वाराहमांसभक्षास्तु येन सुध्यन्ति किल्विषात् ॥

वाराह उवाच।

तरन्ति मानवा येन तिर्यक्संसारसागरात्।
गोमयेन दिनं पञ्च कणाहारेण सप्त वै ॥
पानीयन्तु ततो भुक्त्वा तिष्ठेत् सप्तदिनं ततः।
अष्टाक्षरजपं सप्त शुक्लभिक्ष तथा त्रयः ॥
तिलभक्षो दिनान् सप्त सप्त पाषाणभक्षकः।
पयो भुक्त्वा दिनं सप्त कारयेच्छुद्धिमात्मनः ॥
शान्तदान्तपराः श्रुत्वा अङ्गसंस्कारविवर्जिताः।
दिनान्येकोनपञ्चाशच्चरेत शुद्धनिश्चयः ॥
प्रमुक्तः सर्वपापेभ्यः सर्वज्ञो विगतज्वरः।
श्रुत्वा तु मम कर्म्माणि मम लोकाय गच्छति॥"
इति वाराहमांसभक्षणापराधप्रायश्चित्तम्।
इति वाराहपुराणम् ॥ * ॥

वन्यवराहमांसं श्राद्धादौ विहितम्। यथा अत्रन्तीत्यनुवृत्तौ हारीतः। महारण्यवासिनश्च वराहांश्चरेयेति। एवञ्च विवदन्ते अग्राम्यशूकरांश्चेति वशिष्ठोक्तं श्वेताश्वेतया व्यवस्थितम्। कल्पतरुस्तु। श्राद्धे नियुक्तानि युक्तयेति। विष्णूपासकस्य सर्व्वथा निषेधः। यथा वाराहे भगवद्वाक्यम्।

"भुक्त्वा वाराहमांसन्तु यस्तु मामुपसर्पति।
वराहो दशवर्षाणि भूत्वा वै चरते वने॥"
इत्येकादशीतत्त्वम् ॥ * ॥

याज्ञवल्क्यः।

"हविष्यान्नेन वै मासं पायसेन च वत्सरम्।
मात्स्यहारिणकौरभ्रशाकुनिच्छागमार्षतैः ॥
रौरवैश्चवाराहशाशैर्मांसैर्यथाक्रमम्।
मासवृद्ध्याभिदृप्यन्ति दत्तेनेह पितामहाः ॥"
इति श्राद्धतत्त्वम् ॥ * ॥

विष्णोरवतारविशेषः। यथा,—

सायम्भुव उवाच।

"कुत्र प्रजाः स्थास्यन्ति पृथिवी तावत् प्रलयार्णवे मग्ना तस्या उद्धरणे यत्नं कुरु। इति श्रुत्वा ब्रह्मा भगवन्तं ध्यातवान्। ध्यायतस्तस्य नासा विवरात् अङ्गुष्ठप्रमाणो वराहपोतो निरगात्। स च आकाशस्थः सन् क्षणमात्रेण पर्व्वतोपमो बभूव। तं विष्णुं मत्वा ब्रह्मा तुष्टाव। स च तेन स्तुतः प्रलयार्णवजलमध्ये प्रविश्य दन्ताग्रेण पृथ्वीमुद्धृत्य निजधारणशक्त्या संस्थाप्य अन्तर्हितो बभूव। ततः पृथिव्यां राजा सायम्भुवमनुरासीत्।" इति श्रीभागवतमतम् ॥ * ॥ तदवतारकर्त्तृकहिरण्याक्षवधो यथा,—

"वराहपर्व्वतो नाम यः पुरा हरिनिर्म्मितः।
स एव भूतो भगवानाजगामासुरान्तिकम् ॥
ततश्चन्द्रप्रतीकाशमगच्छच्छङ्खमुत्तमम्।
सहस्रारं ततश्चक्रं सूर्य्यवह्निसमप्रभम् ॥
यो वैकुण्ठः सुरेन्द्राणामनन्तो भोगिनामपि।
विष्णुर्यो योगविदुषां यो यज्ञो यज्ञकर्म्मणाम् ॥
विश्वे यस्य प्रसादेन सवनस्था दिवौकसः।
आज्यं महर्षिभिर्दत्तमश्नुवन्ति सुधाहुतम् ॥
ततो दैत्यद्रवकरं पुराणं गृह्यमुत्तमम्।
वक्त्रेण दध्मौ वेगेन विक्षिपन् दैत्यजीवितम् ॥
ततः संरक्तनयनो हिरण्याक्षो महासुरः।
क्रोशन्तिति वदन् रोषान्नारायणमुदैक्षत ॥
वाराहरूपिणं देवं स्थितं पुरुषविग्रहम्।
गृह्यचक्रोद्यतकरं देवानामार्त्तिनाशनम् ॥
रराज गृह्यचक्राभ्यां ताभ्यामसुरसूदनः।
सूर्य्याचन्द्रमसोर्मध्ये पौर्णमास्यामिवाम्बुदः ॥
ततो हिरण्याक्षसुखाश्च सर्व्वे
समाद्रवन् दैत्यगणाः सुरेशम्।
निहन्तुकामाः सहसा वराहं
गृहीतशस्त्रा बलपूर्णदर्पाः ॥
तैर्व्वध्यमानोऽतिशस्त्रेण शस्त्रैर्-
दैत्यासुरैर्दानवपुङ्गवैश्च।
नासौ चचालासुरवृन्दहा वै
मेघैः सुवृष्टा इव मन्दराद्रिः ॥
दैत्यस्ततोऽसौ वृवराहमाहवे
निपातयामास रुषा ज्वलन्तीम्।
गृह्णं यथा विद्युतमाशु कृष्णे
प्रवर्षमाणोऽपि गिरिं सुमेघः ॥
स हन्यमानो गदयाप्रमेयः
प्रोवाच दैत्यं वृवराहमूर्त्तिः।
प्रजापतेः सेतुमिमं निहत्य
व्रजेच्च क्व खलि यथा सुरेन्द्रः ॥
बलं समासाद्य परैरजेयं
विनाशयिष्याम्यहमेवमाजौ।
दैत्यांश्चया साकमतो हि देवान्
हृतस्वकीयान् सुतयोपपन्नान् ॥
संस्थापयिष्यामि न संशयोऽत्र
दैत्येन्द्रदर्पं क्व नु सम्प्रमीषे ॥
एवं ब्रुवति वाक्यन्तु विष्णोर्वक्त्रमपातयत्।
स बाहुगुप्तसुव्यग्र सर्व्वप्रहरणं रणे ॥

दानवाश्चापि समरे मयतारपुरोगमाः।
उद्यतायुधनिस्त्रिंशाः सर्व्वे तं समुपाद्रवन् ॥
स ताड्यमानोऽतिबलैर्दैत्यैः सन्नायुधोद्यतैः।
न चचाल वराहस्तु मैनाक इव पर्व्वतः ॥
क्रोधसंरक्तनयनः शङ्खचक्रधरो हरिः।
अवर्द्धत स वेगेन व्याप्नुवन् सर्व्वतो दिशम् ॥
तं जघायासुरेन्द्राणां वर्द्धमानं नभस्तले।
ऋषयः सह गन्धर्व्वैस्तुष्टुवुर्मधुसूदनम् ॥
दीप्ताग्निसदृशं घोरं दर्शनीयसुदर्शनम्।
सुवर्णरेणुपर्य्यन्तं वज्रनाभं भयावहम् ॥
मेदोऽस्थिमज्जारुधिरैः सिक्तं दानवसम्भवैः।
अद्वितीयं प्रहारेषु क्षुरपर्य्यन्तमण्डलम् ॥
स्रग्दाममालाविततं कामगं कामरूपिणम्।
चक्रमुद्यम्य समरे वाराहः स्वेन तेजसा ॥
चिच्छेद बाहूंश्चक्रेण हिरण्याक्षस्य वै तथा ॥
स छिन्नबाहुर्विशिरा न प्राकम्पत दानवः।
कबन्धवत्स्थितः संख्ये विशाख इव पादपः ॥
ततः स्थितस्येव शिरस्तस्य भूमावपातयत्।
हिरण्मयं रुक्मचित्रं मेरोः शृङ्गमिवोत्तमम् ॥
हिरण्याक्षे हते दैत्या ये शेषास्तेव दानवाः।
सर्व्वे तस्य भयात् त्रस्ता जग्मुरार्त्ता दिशो दश ॥"
इति वह्निपुराणम् ॥

अथ वराहावतारकारणम्। शूरभरूपिमहादेवकर्त्तृकतच्छरीरनाशश्च।

"त्रैलोक्यमखिलं दग्धं यदा कालाग्निना तदा।
अनन्तः पृथिवीं त्यक्त्वा विष्णोरन्तिकमागतः ॥
तेन त्यक्ता तु पृथिवी क्षणमात्रादधोगता।
ततो वराहरूपेण निमग्ना पृथिवी जले।
मग्नां वसुन्धरान्तु न्यधात् तत्सलिलोपरि ॥
वराहोऽपि स्वयं गत्वा लोकालोकाह्वयं गिरिम्।
वाराह्या सह रेमे स पृथिव्या चारुरूपया ॥
स तया रममाणस्तु सुचिरं पर्व्वतोत्तमे।
नावाप तोयं लोकेशः पोत्री परमकामुकः ॥
पृथिव्याः पोत्रिरूपाया रमयन्त्याश्चतः सुताः।
त्रयो जाता द्विजश्रेष्ठास्तेषां नामानि वै शृणु ॥
दुर्वृत्तः कनकोः घोरः सर्व्व एव महाबलाः।
स तैः पुत्रैः परिवृतो वाराहो भार्य्यया सह ॥
रममाणस्तदा कायत्यागं नैवागमद्द्विजाः।
इतस्ततश्च शिशुभिः क्रीड़द्भिः पोत्रिभिस्तदा ॥
जगत्सि तत्र भग्नानि नद्यः कल्पतरुंस्तथा।
ततो देवगणाः सर्व्वे सहिता देवयोनिभिः ॥
शक्रेण सहिता मन्त्रं चक्रुः सम्यक् जगद्धितम् ॥
ततो निश्चित्य ते सर्व्वे शक्राद्या मुनिभिः सह।
शूरण्यं शूरगं जग्मुर्नारायणमजं विभुम् ॥
तं समासाद्य गोविन्दं वासुदेवं जगत्पतिम्।
प्रणम्य सर्व्वे त्रिदशास्तुष्टुवुर्ऋग्भिरञ्जसम् ॥

देवा ऊचुः।

नमस्ते देवदेवेश! जगत्कारणकारण।
कालस्वरूपिन् भगवन् प्रधानपुरुषात्मक ॥
इति स्तुतो देवदेवो भूतभावनभावनः।
मेघनिस्वनः

श्रीभगवानुवाच ।
यदर्थमागता यूयं यज्ञो भयमुपस्थितम् ।
यच्च यज्ञा मया कार्य्यं तदेवास्तूर्णमुच्यताम् ॥
देवा ऊचुः ।
भूर्ग्रस्यते वसुधा नित्यं क्रीड़या यज्ञपोत्रिणः ।
लोकाश्च सर्व्वे संक्षुब्धा नाप्नुवन्त्युपशान्तिताम् ॥
इति तेषां निगदतां श्रुत्वा वाक्यं जनार्द्दनः ।
उवाच शूकरं देवं ब्रह्माणञ्च विशेषतः ॥
यत्कृते देवताः सर्व्वाः प्रजाश्च सकला इमाः ।
प्राप्नुवन्ति महद्दुःखं भूर्ग्रस्यते सकलं जगत् ॥
वाराहं तदहं कायं त्यक्तुमिच्छामि शूकर ।
निदेशग्रस्तं तत् त्यक्तुं स्वेच्छया नहि शक्यते ॥
त्वं त्यजस्व तनुं कायं यत्रात्मा शूकरोधुना ।
त्वमाप्यायस्व तेजोभिर्ब्रह्मन् सारहरं सुरुः ॥
आप्यायन्तु तदा देवाः शूकरो हन्तु पोत्रिणम् ।
रजस्वलायाः संसर्गात् विप्राणां मारणात् तथा ॥
कायः पापकरो भूतस्तं त्यक्तुं सुस्थतेऽधुना ।
प्रायश्चित्तैरुपेतैर्यैः प्रायश्चित्तमहं ततः ।
चरिष्यामि तदर्थं मे तनुर्यत्नेन पात्यताम् ॥
प्रजा पाल्या मम सदा या हि सीदति नित्यशः ।
मत्कृते प्रत्यहं तस्मात् त्यक्ष्ये कायं प्रजाकृते ॥
श्रीमार्कण्डेय उवाच ।
इत्युक्तौ वासुदेवेन तदा च ब्रह्मशूकरौ ।
त्वया यथोक्तं तत् कार्य्यमिति गोविन्दमूचतुः ॥
वासुदेवोऽपि तान् सर्व्वान् विसृज्य त्रिदशां-
स्तदा ।
वाराहं तेजसा हर्त्तुं स्वयं ध्यानपरोऽभवत् ॥
शूनेः शूनेर्यदा तेज आहरत्येष माधवः ।
तदा देहस्तु वाराहं सत्त्वहीनं व्यजायत ॥
ब्रह्माद्याश्चिदशाः सर्व्वे महादेवमुपागतम् ।
अनुजग्मुस्तथा तेज आधातुं शरणाग्नये ॥
ततः सर्व्वैर्दिवगणैः स्वं स्वं तेजो वृषध्वजे ।
आदधे तेन बलवान् सोऽतीव समजायत ॥
ततः शूरभरूपी स ततृचशाङ्गिरिशोऽभवत् ।
ऊर्द्धाधोभावतश्चाष्टपादयुक्तः सुभैरवः ॥
त्रिलक्षयोजनोच्छ्रायः सार्द्धलक्षैकविस्तृतः ॥
ऊर्द्धं वराहकायस्तु लक्षयोजनविस्तृतः ॥
लक्षार्द्धविस्तृतः पार्श्वे वर्द्धमानस्तदाभवत् ।
तमायान्तं ततो दृष्ट्वा क्रोधाद्दावन्तमञ्जसा ॥
सुवृत्तः कनको घोर आसेदुः क्रोधमूर्च्छिताः ।
उच्चिक्षिपुस्तं युगपत् पोत्रघातैर्महाबलाः ॥
ततस्तुण्डप्रहारेण शूरभः कक्षमध्यतः ।
भित्त्वा वपुर्वराहस्य पातयामास तच्छवे ॥
तं पातयित्वा प्रथमं सुवृत्तं कनकं तथा ।
घोरञ्च कक्षदेशेषु भित्त्वा भित्त्वा जघान ह ॥
त्यक्तप्राणास्तु ते सर्व्वे पेतुस्तोये महार्णवे ।
जलशून्यं वितन्वानाः कालानलसमत्विषः ॥
पतितेषु वराहेषु ब्रह्मा विष्णुर्हरस्तथा ।
हृष्टार्थं चिन्तयामासुः पुनरेव समागताः ॥"
इति कालिकापुराणीयाष्टाविंशत्यूनत्रिंशाध्याया-
न्तात् सङ्कलितः ॥ * ॥ विष्णुः । मानभेदः ।
पर्व्वतभेदः । सुस्था । इति मेदिनी । दे, २२ ॥

(पर्व्वतार्थे उदाहरणम् । यथा, महाभारते ।
२ । २१ । २ ।
"वेहारो विपुलः शैलो वराहो वृषभस्तथा ।
तथा ऋषिगिरिस्तात सुभाश्चैत्यकपञ्चमाः ॥")
शिशुमारः । वाराहीकन्दः । इति राज-
निर्घण्टः ॥ अष्टादशद्वीपान्तर्गतक्षुद्रद्वीपविशेषः ।
यथा,—
"गन्धर्व्वो वरुणः सौम्यो वराहः कङ्क एव च ।
कुमुदश्च कसेरुश्च नागो भद्रारकस्तथा ॥
चन्द्रेन्द्रमलयाः शङ्खवाङ्कगभस्तिमान् ।
ताम्राकुञ्च कुमारी च तत्र द्वीपाः दशाष्टभिः ॥"
इति शब्दमाला ॥
(क्षयापिण्डीरः । तत्पर्य्यायो यथा,—
"वराहः क्षयापिण्डीरः क्षयापिण्डीतकस्तु सः ॥"
इति वैद्यकरत्नमालायाम् ॥)
वराहकन्दः, पुं, (वराहप्रियः कन्दो यस्य ।)
वाराही । इति राजनिर्घण्टः ॥
वराहकान्ता, स्त्री, (वराहस्य कान्ता प्रियेति ।)
वाराहीवृक्षः । इति शब्दरत्नावली ॥
वराहकाली, [न्] पुं, (वराहवत् कलते इति ।
कल्+णिनिः ।) सूर्य्यमणिपुष्पवृक्षः । तत्प-
र्य्यायः । सूर्य्यावर्त्तः २ । इति हारावली ।
६४ ॥
वराहक्रान्ता, स्त्री, (वराहेण क्रान्ता अतिप्रिय-
त्वात् ।) क्षुपविशेषः । इति शब्दमाला ॥
तत्पर्य्यायः, । लज्जालुः २ समङ्गा ३ लज-
कारिका ४ वराहनामा ५ वदरा ६ शूकरी ७
तिक्तगन्धिका ८ नमस्कारी ९ गन्धकाली १०
खदिरी ११ । इति रत्नमाला ॥ लज्जालुका १२
अञ्जलिकारिका १३ लताञ्जलिः १४ गन्धकारी
१५ समीच्छदा १६ । इति ग्रन्थान्तरम् ॥
वाराही । चामाराजु इति ख्याते । इति
भूमिः । इत्यमरटीकायां भरतः ॥
वराहनामा, [न्] पुं, (वराहस्य नाम इव नाम
यस्य ।) वाराहीकन्दः । इति शब्दमाला ॥
वराहिका, स्त्री, कपिकच्छुः । इति राज-
निर्घण्टः ॥
वराही, स्त्री, (वराहो भक्षकत्वेनास्त्यस्येति ।
अच् । गौरादित्वात् ङीष् ।) भद्रमुस्ता ।
शूकरकन्दः । इति राजनिर्घण्टः ॥
वरिवसितः, त्रि, (वसु+"नमोवरिवश्चित्रङः
क्यच् ।" ३ । १ । १९ । इति क्यच् । ततः क्तः ।
"क्यस्य विभाषा ।" ६ । ४ । ५० । इति यस्य
यलोपः ।) उपासितः । इत्यमरः । ३ । १ ।
१०२ ॥
वरिवस्या, स्त्री, (वरिवसः पूजायाः करणम् ।
वरिवस्+"नमोवरिवश्चित्रङः क्यच् ।" ३ ।
१ । १९ । इति क्यच् । "अ प्रत्ययात् । ३ । ३ ।
१०२ । इत्यः । टाप् ।) शुश्रूषा । इत्यमरः ।
२ । ७ । ३५ ॥ (यथा, ऋग्वेदे । १ । १८१ । ९ ।
"हुवे यदां वरिवस्या गृणानो
विद्यामेषं वृजनं जीरदानुम् ।")

वरवर्णिनः, त्रि, (वरिवस्या संजाता अस्य
तारकादित्वादितच् । यद्वा, वरिवस्य+क्तः ।
"क्यस्य विभाषा ।" ६ । ४ । ५० । इति यस्य यलोपा-
भावः ।) उपासितः । इत्यमरः । ३ । १ । १०२ ॥
वरिष्णी, स्त्री, वरिष्णी । इति शब्दरत्नावली ॥
वरिषं, क्ली, (वृ+सः । बाहुलकात् इट् ।)
वत्सरः । इति शब्दरत्नावली ॥ ("वर्षः स्यात्
वरिषोऽपि च ।" इत्युज्ज्वलदत्तधृतचन्द्रवच-
नम् । ३ । ६२ ॥)
वरिषाः, स्त्री भूम्नि, (वृ+सः । बहुवचनात्
इट् ।) वर्षाः । इति भरतद्विरूपकोषः ॥
वरिषाप्रियः, पुं, (वरिषा वर्षा प्रिया यस्य ।)
चातकपक्षी । इति शब्दरत्नावली ॥
वरिष्ठं, क्ली, (अतिशयेन वरम् । वर+इष्ठन् ।)
ताम्रम् । इत्यमरः । ३ । २ । ११९ ॥ (यथा,—
"रक्तं वरिष्ठं म्लेच्छाख्यं ताम्रं शुल्बसुडम्बरम् ॥"
इति वैद्यकरत्नमालायाम् ॥)
मरिचम् । इति मेदिनी । ठे, १५ ॥
वरिष्ठः, त्रि, (अयमेषामतिशयेन वर उरुर्वा
अतिशायने इष्ठन् । प्रियस्थिरेति वरादेशः ।)
इति व्याकरणम् ॥ वरतमः । (यथा, भागवते ।
१ । १० । १ ।
"हत्वा स्वरिक्थस्पृध आततायिनो
युधिष्ठिरो धर्म्मभृतां वरिष्ठः ॥")
उरुतमः । इति मेदिनी । ठे, १५ ॥ (यथा,
ऋग्वेदे । ४ । ५६ । १ ।
"यत्नौ वरिष्ठे दृहतो विमिक्षतु
वह्नोरापप्रथानेभिरेवैः ॥")
वत्सः । इत्यजयः ॥
वरिष्ठः, पुं, (वर+इष्ठन् ।) तित्तिरिपक्षी । इति
मेदिनी । ठे, १५ ॥ नारङ्गवृक्षः । इति राज-
निर्घण्टः ॥ (चाक्षुषमनुपुत्रः । यथा, महा-
भारते । १३ । १८ । २० ।
"वरिष्ठो नाम भगवांश्चाक्षुषस्य मनोः सुतः ॥"
धर्म्मसावर्णिमन्वन्तरस्य ऋषिविशेषः । यथा,
मार्कण्डेये । ९४ । १६ ।
"हविष्मांश्च वरिष्ठश्च ऋष्टिरन्यस्तथाकृतिः ।
निश्चरश्चानघश्चैव रिष्टिश्चान्यो महामुनिः ।
सप्तर्षयोऽन्तरे तस्मिन्नभिदेवश्च सप्तमः ॥"
दैत्यविशेषः । तथा, हरिवंशे । २३२ । १३ ।
"वरिष्ठश्च गविष्ठश्च भूतलोच्चयनो विभुः ।
सुप्रसादः किरीटी च सुचीवक्त्रो महासुरः ॥")
वरिष्ठा, स्त्री, (वरिष्ठ+टाप् ।) आदित्यभक्ता ।
इति राजनिर्घण्टः ॥
वरी, स्त्री, (वृणोतीति । वृ+पचाद्यच् । गौरा-
दित्वात् ङीष् ।) घृतावरी । इत्यमरः । २ ।
४ । १०० ॥ सूर्य्यपत्नी । इति त्रिकाण्डशेषः ॥
वरीयान्, [स्] त्रि, (अयमनयोरतिशयेन उरु-
र्वरो वा । ईयसुन् । प्रियस्थिरेति वरादेशः ।)
श्रेष्ठः । (यथा, भागवते । २ । १ । १ ।
"वरीयानेष ते प्रश्नः कृतो लोकहितो नृप ! ॥")
वरिष्ठः । अतिशुद्धा । इति मेदिनी । ठे, १५ ॥

वरीयान्, पुं, विष्कम्भादिसप्तविंशतियोगान्तर्गता-ष्टादशयोगः। तत्र जातफलम्।
"दाता दयालुः सुतरां सुवेषः
सत्कर्म्मकर्त्ता मधुरस्वभावः।
नरो बलीयान् धनवान् जनाढ्यो
योगो वरीयान् यदि जन्मकाले॥"
इति कोष्ठीप्रदीपः॥
(पुलहस्य पुत्रः। इति भागवते।४।१।३४॥)
वरीवर्हः, पुं, बलीवर्दः। इत्यमरटीकायां रमानाथः॥
वरीषुः, पुं, कामः। इति त्रिकाण्डशेषः॥
वरुटः, पुं, म्लेच्छजातिविशेषः। यथा,—
"पुलिन्दा नाहला निष्पाः शबरा वरुटा भटाः।
माला भिल्लाः किरातास्च सर्व्वेऽपि म्लेच्छ-
जातयः॥"
इति हेमचन्द्रः॥
वरुड़ः, पुं, अन्त्यजजातिविशेषः। यथा,—
"रजकश्चर्म्मकारश्च नटो वरुड़ एव च।
कैवर्त्तमेदभिल्लाश्च सप्तैते चान्त्यजाः स्मृताः॥"
एषां स्त्रीगमनादौ दोषो यथा,—
"एतेषान्तु स्त्रियो गत्वा भुक्त्वा च प्रतिगृह्य च।
पतत्यज्ञानतो विप्रो ज्ञानात् साम्यन्तु गच्छति॥"
इति प्रायश्चित्ततत्त्वधृतयमवचनम्॥
अस्योत्पत्तिर्यथा,—
"कैवर्त्तस्य च कन्यायां शौल्किकादेव सौत्रिकः।
सौत्रिकात् शौल्किकाज्जातो नटो वरुड़
एव च॥"
इति पराशरपद्धतिः॥
वरुणः, पुं, (वृणोति सर्व्वं व्रियते अन्यैरिति वा। वृ+"छन्दसीरिच्च उनन्।" उणा० ३।५३। इति उनन्।) देवताविशेषः। स च कश्यपस्य अदितिनाम्न्यां पत्न्यां जातः। तस्य चर्षण्यां पत्न्यां भृगुवाल्मीकी पुत्रौ जातौ। इति श्रीभागवतमतम्॥ स च जलाधिपतिः पश्चिमदिक्पालश्च। तत्पर्य्यायः। प्रचेताः २ पाशी ३ यादसांपतिः ४ अप्पतिः ५। इत्यमरः॥ यादःपतिः ६ अपांपतिः ७। इति तट्टीकायां भरतः॥ जम्बुकः ८ मेघनादः ९ जलेश्वरः १० परञ्जयः ११ दैत्यदेवः १२ जीवनावासः १३ नन्दपालः १४। इति शब्दरत्नावली॥ वारिगोमः १५ कुक्कली १६ रामः १७ सुखाग्रः १८। इति जटाधरः॥ *॥ जलाग्न्युत्सर्गादौ अस्य पूजाविधिर्यथा। हयग्रीवपञ्चरात्रे।
"अथ वाप्यामतः कुर्य्यात् स्फाटिकादिनिर्म्मितम्।
द्विभुजं हंसपृष्ठस्थं दक्षिणेनाभयप्रदम्॥
वामेन नागपाशन्तु धारयन्तं सुभोगिनम्।
सलिलं वाममाभोगं कारयेद्यादसांपतिम्॥
वामे तु कारयेद्देवीं दक्षिणे पुष्करं शुभम्।
नागेनदीभिर्यादोभिः वसुदेः परिवारितम्॥
स्त्रवेवं वरुणं देवं प्रतिष्ठाविधिनार्चयेत्॥"
पुष्करं तत्पुत्रम्। ततो ध्यानम्।
"प्रसन्नवदनं सौम्यं हिमकुन्देन्दुसन्निभम्।
सर्व्वाभरणसंयुक्तं सर्व्वलक्षणलक्षितम्॥
किरणैः प्रीतलैः सौम्यैः प्रीणयन्तमवस्थितम्।
लावण्याप्लुतधाराभिस्तर्पयन्तमिव प्रजाः॥
राजहंससमारूढं पाशहस्तकरं शुभम्।
पुष्कराद्यैर्गणैः सर्व्वैः समन्तात् परिवारितम्॥
गौर्य्या कान्त्या चारुगतं नदीभिः परिवारितम्।
नागैर्यादोगणैर्युक्तं ब्रह्माणमिव चापरम्॥
सृष्टिसंहारकर्त्तारं नारायणमिवापरम्॥"
इति ध्यात्वा पूजयेत्। वरुणमन्त्रोद्धारस्तु तत्रैव।
"अष्टाविंशाक्षरबीजेन चतुर्हस्तरसेन च।
अर्द्धेन्दुबिन्दुयुक्तेन प्रणवेनोद्दीपितेन च॥"
तेन ॐ वौँ इति मन्त्रः।
"प्रतिमायां स्थितिं कृत्वा प्रणवेन निबोधयेत्।
पूजयेन्नन्दपुष्पाद्यैः सान्निध्यं पाशमुद्रया॥"
स्थितिं प्रतिष्ठाम्। निबोधयेत् अन्तर्गताङ्कुष्ठसुष्टिभ्यां निबोधमुद्रां दर्शयेत्। नमस्कारमन्त्रस्तु
"वरुणो धवलो विष्णुः पुरुषो निम्नगाधिपः।
पाशहस्तो महाबाहुस्तस्मै नित्यं नमो नमः॥"
इति जलाग्न्युत्सर्गतत्त्वम्॥*॥
तृप्त्यर्थं अस्य जपनीयमन्त्रा यथा,—
"पुष्करावर्त्तकैर्मेघैः प्लावयन्तं वसुन्धराम्।
विद्युद्भिश्चित्रसन्नद्धं तोयात्मानं नमाम्यहम्॥
यस्य केशेषु जीमूता नद्यः सर्व्वाङ्गसन्धिषु।
कुक्षौ समुद्राश्चत्वारस्तस्मै तोयात्मने नमः॥"
इति ध्यात्वा मानसैरुपचारैर्वरुणं आराध्य मूलमन्त्रं जपेत्। प्रजापतिर्ऋषिस्तृष्टुप् छन्दो वरुणो देवता एतावद्भ्यामभिधाय्य तृप्त्यर्थं जपे विनियोगः। मन्त्रस्तु गुरुमुखात् ज्ञेयः। स यथा। ॐ वृष्टिरिहागच्छत्वरयो मरुतामग्रतो गच्छ वशामग्निमिन्धत्वा दिवं गच्छत तेनो वृष्टिमावह। इति मन्त्रस्य सहस्रजपानन्तरं सुवृष्टिमती वसुमती भवति। अत्र सन्देहो न कार्य्यः॥*॥ मन्त्रान्तरम्। कूर्च्चं लक्ष्मीं तथा मायां तेन हुँ श्रीँ ह्रीँ इति त्र्यक्षरमन्त्रं नाभिमात्रजलमध्ये प्रविश्य यदि जपति तदा अनावृष्टिं हरति महावृष्टिर्भवति। अष्टसहस्रजपः संख्या चतुर्गुणा तेन द्वात्रिंशत्सहस्रजपः। दिनत्रयानन्तरं चतुर्थदिने जपसमाप्तिः।
"नाभिमात्रजले स्थित्वा जपेन्मन्त्रं प्रसन्नधीः।
वसुसहस्रं जपेन्मन्त्रं त्रिदिनं याप्य यत्नतः॥"
अथवा।
"षट्सहस्रं जपेन्नित्यं तदा वृष्टिर्भवेत् ध्रुवम्।"
इति षट्कर्म्मदीपिका॥*॥
पुस्तकान्तरे वं इति एकाक्षरमन्त्रोऽपि जप्यत्वेन लिखितः॥*॥ महापातकिनो दत्तधनं गृहीत्वा राजा वरुणाय प्रतिपादयेत्। यथा,—
"नाददीत नृपः साधुर्महापातकिनो धनम्।
आददानस्तु तल्लोभात्तेन दोषेण लिप्यते॥
अप्सु प्रवेश्य तं दण्डं वरुणायोपपादयेत्।
श्रुतवृत्तोपपन्ने वा ब्राह्मणे प्रतिपादयेत्॥
इत्थं दत्तस्य वरुणो राज्ञां दत्तधरो हि सः।
ईशः सर्व्वस्य जगतो ब्राह्मणो वेदपारगः॥"
इति मानवे ९ अध्यायः॥*॥
स्वनामख्यातवृक्षः। तत्पर्य्यायः। वरुणः २ सेतुः ३ तिक्तशाकः ४ कुमारकः ५। इत्यमरः। २।४।२५॥ शुक्लपुष्पः ६ सेतुकः ७ वराणः ८ ग्रन्थिलमर्दनः ९। इति शब्दरत्नावली॥ श्वेतवृक्षः १० श्वेतद्रुमः ११ साधुवृक्षः १२ तमालः १३ मारुतापहः १४। अस्य गुणाः। कटुत्वम्। उष्णत्वम्। रक्तदोषशीतवातहरत्वम्। स्निग्धत्वम्। दीपनत्वम्। विद्रधिरोगजित्त्वञ्च। इति राजनिर्घण्टः॥ अपि च।
"वरुणः पित्तलो भेदी श्लेष्मशुक्राश्मवातनुत्।
निहन्ति गुल्मवातास्रकृमीन्श्वोष्णोऽग्निदीपनः।
कषायो मधुरस्तिक्तः कटुको रूक्षको लघुः॥"
इति भावप्रकाशः॥
अन्यच्च।
"वरुणोऽनिलशूलघ्नो भेदी श्वोष्णोऽश्मरीहरः।
पुष्पं वरुणजं ग्राहि पित्तघ्नं आमवातजित्॥"
इति राजवल्लभः॥*॥
जलम्। इति मेदिनी। णे, ६५॥ सूर्य्यः। इति विश्वः॥ (यथा, महाभारते। १। ६५। १५।
"धाता मित्रोऽर्य्यमा शक्रो वरुणस्त्वंश एव च।
भगो विवस्वान् पूषा च सविता दशमस्तथा॥"
सुनिगर्भजातकश्यपपुत्रविशेषः। इति महाभारतम्। १। ६५। ४२॥)
वरुणात्मजा, स्त्री, (वरुणस्य जलस्य आत्मना तद्रूपत्वात्।) मद्यम्। इत्यमरः।२।२०।३६॥ (विवरणमस्या मद्यशब्दे ज्ञेया॥)
वरुणानी, स्त्री, (वरुणस्य पत्नी। वरुण+"इन्द्रवरुणभवेति।" ४।१।४९। इति ङीष् आनुगागमश्च।) वरुणपत्नी। इति जटाधरः॥ (यथा, ऋग्वेदे। १। २२। १२।
"इन्द्राणीमासुपत्नीषु वरुणानीं स्वस्तये।
अग्नायीं सोमपीतये॥")
वरुत्रं, क्ली, (वृणोति आवृणोत्यनेनेति। वृ+"आधृञ्चारिभ्य इत्रोत्रौ।" उणा० ४। १७२। इति उत्रः।) उत्तरीयवस्त्रम्। वृधातोरुत्रप्रत्ययेन निष्पन्नम्। इति सिद्धान्तकौमुद्यामुणादिवृत्तिः॥
वरुलः, पुं, (वृ+उलः।) संभक्तः। इति संक्षिप्तसारोणादिवृत्तिः॥
वरूथं, क्ली, (व्रियते शरीरमनेनेति। वृ वरणे+"वृञ्वृभ्यामूथन्।" उणा० २। ६। इति ऊथन्।) तनुत्राणम्। इति हेमचन्द्रः॥ चर्म्म। इति मेदिनी। थे, २१॥ तत्र प्रवर्गीयवकारादौ गणितोऽयं शब्दः॥ (गृहम्। इति निघण्टुः। ३। ४॥ यथा, ऋग्वेदे। १। ५८। ६।
"भवा वरूथं गृणते विभावो
भवा मघवन् मघवद्भ्यः शर्म्म॥"
सैन्यम्। यथा, भागवते। ६। १०। २०।
"तेऽनीकपा रघुपतेरभिपत्य सर्व्वं-
वृन्दं वरूथमिभपत्तिरथाश्वयोधैः।

जङ्घुर्मेर्गिरिगदेषुभिरङ्गदाद्याः
सीताभिमर्षहृतमङ्गलरावणेभ्यान् ॥")

वरूथः, पुं. (व्रियते रथोऽनेनेति। वृञ् वरणे + "जृवृभ्यामूथन्।" उणा० २। ६। इति ऊथन्।) परप्रहरणाभिघातरक्षार्थं रथस्य सन्नाहवदृदावरणकादि द्रव्यं तत्। तत्पर्य्यायः। रथगुप्तिः २। इत्यमरभरतौ। २। ८। ५७॥ रथसंवृतिः ३। इति जटाधरः॥ (यथा, रामायणे। ६। ५७। २६।

"उरगध्वजदुर्द्धर्षं सुवरूथं खपस्करम्॥"

ग्रामविशेषः। यथा, तत्रैव। २। ७१। ११।

"तोरणं दक्षिणार्द्धेन जम्बूप्रस्थं समागमत्।
वरूथञ्च ययौ सम्यक् ग्रामं दशरथात्मजः॥")

वरूथिनी, स्त्री, (वरूथं तनुत्राणादिकमस्त्यस्या इति। वरूथ + इनिः। ङीप्।) सेना। इत्यमरः। २। ८। ७८॥ (यथा, रघुः। ११। ५८।

"तस्य जातु मरुतः प्रतीपगाः
वर्त्मसु ध्वजतरुप्रमाथिनः।
चिक्षिपुर्भृशतया वरूथिनी-
मत्तटा इव नदीरयाः स्खलीम्॥")

वरेण्यं, क्ली, (व्रियते लोकैरिति। वृ + "वृञ एण्यः।" उणा० ३। ६८। इति एण्यः।) कुङ्कुमम्। इति राजनिर्घण्टः॥

वरेण्यः, त्रि, (वृ + एण्यः।) प्रधानः। इत्यमरः। ३। १। ५७॥ (यथा, भट्टिः। १। १४।

"पुण्यो महाब्रह्मसमूहजुष्टः
सन्तर्पणो नाकसदां वरेण्यः॥"

वरणीयः। इति मल्लिनाथः॥ यथा, कुमारे। ७। ६०।

"संस्कारपूतेन वरं वरेण्यं
वधूं सुखग्राह्यनिबन्धनेन॥"

पुं, पितृगणानामन्यतमः। यथा, मार्कण्डेये। ६६। ४५।

"वरो वरेण्यो वरदो पुष्टिदस्तुष्टिदस्तथा॥"

भृगुपुत्रविशेषः। यथा, महाभारते। १३। ८५। १२६।

"भृगोस्तु पुत्राः सप्तासन् सर्व्वे तुल्या भृगो-
र्गुणैः।
च्यवनो वज्रशीर्षश्च शुचिरौर्व्वस्तथैव च।
शुक्रो वरेण्यश्च विभुः सवनश्चेति सप्त ते॥"
महादेवः। यथा, तत्रैव शिवसहस्रनाम-कीर्त्तने। १३। १७। १३६।

"वरो वराहो वरदो वरेण्यः सुमहास्वनः॥")

वरेन्द्री, स्त्री, गौड़देशः। इति त्रिकाण्डशेषः॥

वरेश्वरः, पुं, (वरः श्रेष्ठ ईश्वरः।) शिवः। इति शब्दरत्नावली॥

वरोटं, क्ली, (वराणि श्रेष्ठानि उटानि दलानि अस्य।) मरुवकपुष्पम्। इति शब्दमाला॥

वरोलः, पुं स्त्री, (वृ + ओलच्।) वरटः। इति त्रिकाण्डशेषः॥

वर्करः, पुं, (वृक्यते गृह्यते इति। वृक आदाने + बहुलवचनात् अरः। इत्युज्ज्वलदत्तः। ३। १३१।) युवपशुः। इत्यमरः। २। १०। २३॥ मेषशावकः। इति तट्टीकायां भरतः॥ परिहासः। (यथा, अमरुशतके। ७।

"कान्तः केलिरुचिर्युवा सहृदयस्ताडक् पतिः कातरे
किन्नो वर्करकर्करैः प्रियसुतैराक्रम्य विक्री-यते॥")

छागः। इति मेदिनी। रे, २१०॥

वर्करीटः, पुं, (वर्करं परिहासं अटति गच्छतीति। अट् + अच्।) कटाहः। तरुणादित्यरोचिः। नारीपयोधरोत्सङ्गकान्तदत्तनखक्षतः। इति मेदिनी। टे, ६५॥

वर्गः, पुं, (वृज्यते इति। वृजी वर्জ্জने + घञ्।) स्वजातीयसमूहः। (यथा, रघुः। २। ४।

"व्रताय तेनानुचरेण धेनो-
र्न्यषेधि शैलोऽप्यनुयायिवर्गः॥")

समानधर्म्मभिः प्राणिभिरप्राणिभिरुपलक्षितं वृन्दम्। यथा कवर्गः। अत्र कत्वखत्वादिना विजातीयत्वेऽपि स्थानसाम्यमस्ति। इत्यमरभरतौ॥ ग्रन्थपरिच्छेदः। यथा,—

"सर्गो वर्गपरिच्छेदोद्घाताध्यायाङ्कसंग्रहाः।
उच्छ्वासः परिवर्त्तश्च पटलः काण्डमस्त्रियाम्।
स्थानं प्रकरणं पर्व्वाह्निकञ्च ग्रन्थसञ्चयः॥"

इति चिकाण्डशेषः॥

समानाङ्कद्वयस्य पूरणम्। तत्पर्य्यायः। कृतिः २। वर्गे करणसूत्रं वृत्तद्वयम्।

"समद्विघातः कृतिरुच्यतेऽथ
स्याप्योऽन्त्यवर्गो द्विगुणान्त्यनिघ्नः।
स्वस्योपरिष्टाच्च तथापरेऽङ्का-
स्त्यक्तान्त्यसूत्सार्य्य पुनश्च राशिम्॥
खण्डद्वयस्याभिहतिर्द्विनिघ्नी
तत्खण्डवर्गैक्ययुता कृतिर्वा।
इष्टोनयुग्राशिवधः कृतिः स्या-
दिष्टस्य वर्गेण समन्वितो वा॥" * ॥

अत्रोद्देशकः।

"सखे नवानाञ्च चतुर्द्दशानां
ब्रूहि त्रिहीनस्य शतत्रयस्य।
पञ्चोत्तरस्याप्ययुतस्य वर्गं
जानासि चेद्वर्गविधानमार्गम्॥"

न्यासः। ६। १४। २६७। १०००५। एषां यथोक्तकरणेन जाता वर्गाः। ८१। १६६। ८८२०६। १००१०००२५॥ अथवा नवानां खण्डे ४। ५। अनयोराहतिः २०। द्विनिघ्नी ४०। तत्खण्डवर्गैक्येन ४१। युता जाता सैव कृतिः ८१॥ अथवा चतुर्द्दशानां खण्डे ६। ८। अनयोराहतिः ४८। द्विनिघ्नी ६६। तत्खण्डवर्गौ ३६। ६४। अनयोरैक्येन १००। युता जाता सैव कृतिः १६६॥ अथवा खण्डे ४। १०। तथापि सैव कृतिः १६६॥ अथवा राशिः २६७॥ अयं त्रिभिरूनः पृथग्युतश्च २६४। ३००। अनयोर्घातः ८८२००। त्रिवर्गैर्युतो जातो वर्गः स एव ८८२०६॥ एवं सर्व्वत्रापि इति

लीलावत्यां वर्गः॥ (स्त्री, अप्सरोविशेषः। यथा, महाभारते। १। २१७। २५।

"अप्सरास्ति महाबाहो देवारण्यविहारिणी।
इष्टा धनपतेर्नित्यं वर्गा नाम महाबल॥"

सुनिशापात्ग्राहरूपिणीयं अर्জ্জुनात् शापमुक्तासीत्। एतद्वृत्तान्तन्तु तत्रैव द्रष्टव्यम्॥)

वर्गमूलं, क्ली, (वर्गस्य समानाङ्कद्वयस्य मूलम् आद्याङ्कः।) पूरितसमानाङ्कद्वयस्याद्याङ्कः। यथा। वर्गमूले करणसूत्रं वृत्तम्।

"त्यक्तान्त्यादिषमात् कृतिं द्विगुणयेन्मूलं समे तद्धृते
त्यक्तालब्धकृतिं तदादिविषमाल्लब्धं द्विनिघ्नं न्यसेत्।
षड्क्यां षड्क्तिहृते समेऽन्यविषमात् त्यक्तात्पदवर्गं फलं
षड्क्यां तद्द्विगुणं न्यसेदिति मुहुः षड्क्तैर्दलं स्यात् पदम्॥"*॥

अत्रोद्देशकः।

"मूलं चतुर्णाञ्च तथा नवानां
पूर्ब्बे कृतीनाञ्च सखे कृतीनाम्।
पृथक् पृथग्वर्गपदानि विद्वि
बुद्धेर्व्विबुद्धिर्यदि तेऽत्र जाता॥"

न्यासः ४। ६। ८१। १६६। ८८२०६। १००१०००२५। लब्धानि क्रमेण मूलानि २। ३। ६। १४। २६७। १०००५। इति लीलावत्यां वर्गमूलम्॥

सजातीयाङ्कचयस्य घातः घनः। तस्य तन्मूलस्य च समुदायसूचोदाहरणानि पूर्ब्बं न लिखितानि प्रसङ्गादत्र पुनर्लिख्यन्ते। घने करणसूत्रं वृत्तत्रयम्।

"समत्रिघातश्च घनः प्रदिष्टः
स्याप्यो घनोऽन्त्यस्य ततोऽन्त्यवर्गः।
आदित्रिनिघ्नस्तत आदिवर्ग-
स्त्यान्त्याहतोऽथादिघनश्च सर्व्वे॥
स्थानान्तरस्थेन युता घनः स्यात्
प्रकल्प्य तत् खण्डयुगं ततोऽन्त्यम्।
एवं मुहुर्व्वर्गघनप्रसिद्धा-
वाद्याङ्कतो वा विधिरेष कार्य्यः॥
खण्डाभ्यां वा हतो राशिस्त्रिघ्नः खण्डघनैक्ययुक्।
वर्गमूलघनस्थो वर्गराशेर्घनो भवेत्॥"*॥

अत्रोद्देशकः।

"नवघनं त्रिघनस्य घनं तथा
कथय पञ्चघनस्य घनञ्च मे।
घनपदञ्च ततोऽपि घनात् सखे
यदि घनेऽस्ति घना भवतो मतिः॥"

न्यासः ६। २७। २२५। जाताः क्रमेण घनाः ७२६। १६६८३। १६५३१२५॥ अथवा राशिः ६। अस्य खण्डे ४। ५। आभ्यां राशिर्हतः १८०। त्रिनिघ्नश्च ५४०। खण्डघनैक्येन १८६। युतो जातो घनः ७२६॥ अथवा राशिः २७। अस्य खण्डे २०। ७। आभ्यां हतस्त्रिघ्नश्च ११३४०। खण्डघनैक्येन ८३३३। युतो जातो घनः १६६८३॥ अथवा राशिः ६। अस्य

मूलम् २। घनः ८। अयं खण्डो जातश्चतुर्णां घनः ६४॥ अथवा राशिः ६। अस्य मूलम् ३। घनः २७। अस्य वर्गो नवानां घनः ७२६। य एव वर्गराशिघनः स एव वर्गमूलघनवर्गः॥ इतिघनः॥*॥ अथ घनमूले करणसूत्रं वृत्तद्वयम्।

"आद्यं घनस्थानमधोघने दे
पुनस्तथान्त्याद्घनतो विशोध्यम्।
घनं पृथक्स्थं पदमस्य कृत्वा
चिन्त्या तदाद्यं विभजेत् फलन्तु॥
षड्घ्नीं न्यसेत्तत्कृतिमन्त्यनिघ्नीं
छिन्नीं त्यजेत्तत्प्रथमात् फलस्य।
घनं तदाद्याद्घनमूलमेवं
षड्भक्तिभेवेदेवमतः पुनश्च॥"

अत्रोद्देशकः। पूर्ब्बघनानां मूलार्थं न्यासः ७२६। १६६८३। १६५३१२५। क्रमेण लब्धानि मूलानि ६। २७। १२५। इति लीलावत्यां घनमूलम्॥

वर्गोत्तमः, पुं, (वर्गेषु उत्तमः।) चराणां अर्थात् मेषकर्कटतुलामकरराशीनां प्रथमोंऽशः। स्थिराणां अर्थात् वृषसिंहवृश्चिककुम्भराशीनां पञ्चमोंऽशः। द्व्यात्मकानां अर्थात् मिथुनकन्याधनुर्मीनराशीनां नवमोंऽशश्च। यथा,—

"चराणां प्रथमे चांशे स्थिराणां पञ्चमे तथा।
नवमे द्व्यात्मकानाञ्च वर्गोत्तम इति स्मृतः॥"

अपि च। राशीनां स्वकीयनवांशः। यथा,—

"स्वनवांशस्तु राशीनां वर्गोत्तम इति स्मृतः॥"

इति ज्योतिस्तत्त्वम्॥

वर्च्च, ङ दीप्तौ। इति कविकल्पद्रुमः॥ (भ्वा०-आत्म०-अक०-सेट्।) ङ, वर्च्चते। इति दुर्गादासः॥

वर्च्चः, [स्] क्ली, (वर्च्चते इति। वर्च्च+"सर्व्वधातुभ्योऽसुन्।" उणा० ४। १८८। इति असुन्।) रूपम्। विष्ठा। (यथा, सुश्रुते उत्तरतन्त्रे ४० अध्याये।

"शूलाविष्टः सशब्दोऽन्त्रकूजी
रुद्धापानः सन्नकट्यूरुजङ्घः।
वर्च्चो मुञ्चत्यल्पमल्पं सफेनं
रुद्धं ग्लायं सानिलं मारुतेन॥")

तेजः। इति मेदिनी। से, ३५॥ (यथा, ऋग्वेदे। ६। ६६। २१।

"अग्ने पवस्व स्वपा अस्मे वर्च्चः सुवीर्य्यम्॥"

"वर्च्चः तेजः।" इति तद्भाष्ये सायणः॥ अन्नम्। यथा तत्रैव। ३। २४। १।

"अग्ने सहस्व पृतना अभिमातीरपास्य।
दुष्टरस्तरन्नरातीर्वर्च्चोधायन्न आवहे॥"

"वर्च्चोधाः अन्नं धेहि।" इति तद्भाष्ये सायणः॥)

वर्च्चस्कः, पुं क्ली, (वर्च्चस्+स्वार्थे कन्।) विष्ठा। इत्यमरः। २। ६। ६८॥ (दीप्तिः। यथा, महाभारते। १३। २५। १६॥

"देविकायासुपस्पृश्य तथा सुन्दरिकह्रदे।
अश्विन्यां रूपवर्च्चस्कं प्रेत्य वै लभते नरः॥")

वर्च्चस्वी, [न्] पुं, (वर्च्चोऽस्यास्तीति। वर्च्चस्+"अस्मायामेधेति।" ५। २। १२१। इति विनिः।) चन्द्रः। यथा,—

"रोहिण्यामभवद्बुधो वर्च्चस्वी येन चन्द्रमाः॥"

इति वह्निपुराणम्॥

वर्च्चाः, [स्] पुं, (वर्च्चते इति। वर्च्च+असुन्।) चन्द्रपुत्रः। इति मेदिनी। से, ३६॥ अन्यच्च।

"रोहिण्यामभवद्बुधो वर्च्चस्वी येन चन्द्रमाः॥"

इत्यादौ वह्निपुराणे सर्गानुकीर्त्तने सतीदेहत्यागनामाध्यायः॥

वर्ज्जनं, क्ली, (वृज्+ल्युट्।) त्यागः। हिंसा। इति मेदिनी। ने, १२२॥ मारणम्। इति हेमचन्द्रः॥

वर्ज्जितः, त्रि, त्यक्तः। वृजधातोः क्तप्रत्ययेन निष्पन्नः। यथा,—

"अवज्ञातञ्चावधूतं सरोषं विक्षयान्वितम्।
गुरोरपि न भोक्तव्यमन्नं सत्कारवर्ज्जितम्॥"

इति कौर्म्मे उपविभागे १६ अध्यायः॥

वर्ज्जनीयं, त्रि, (वृज्+अनीयर्।) वर्ज्जनयोग्यम्। त्यक्तव्यम्। वर्ज्जनीयान्नं यथा,—

"राजान्नं नर्त्तकान्नञ्च तक्ष्णोऽन्नञ्चक्रकारिणः।
गणान्नं गणिकान्नञ्च षण्ढान्नञ्चैव वर्ज्जयेत्॥
चक्रोपजीविरजकतस्करध्वजिनान्तथा।
गान्धर्व्वलोहकारान्नं सूतकान्नं विवर्ज्जयेत्॥
कुलालचित्रकर्म्मान्नं वाह्नुंधेः पतितस्य च।
पौनर्भवच्छात्रिकयोरभिघ्नस्तस्य चैव हि॥
सुवर्णकारशैलूषव्याधितस्यातुरस्य च।
चिकित्सकस्य चैवान्नं पुंश्चल्या दाम्भिकस्य च॥
स्तेननास्तिकयोरन्नं देवतानिन्दकस्य च।
सोमविक्रयिणश्चान्नं श्वपाकस्य विशेषतः॥
भार्य्याजितस्य चैवान्नं यस्य चोपपतिर्गृहे।
उत्सृष्टस्य कदर्य्यस्य तथैवोच्छिष्टभोजिनः॥
अपाङ्क्तानञ्च संघानं ग्रन्थाजीवस्य चैव हि।
क्लीवस्यान्त्यासिनश्चान्नं मत्तोन्मत्तस्य चैव हि॥
भीतस्य रुदितस्यान्नमवक्रुष्टं परिक्षितम्।
ब्रह्महिंसः पापरुचेः आक्षान्नं मृतकस्य च॥
वृथापाकस्य चैवान्नं ग्रावान्नं श्वशुरस्य च।
अप्रजानान्तु नारीणां कृतघ्नस्य तथैव हि॥
कन्दुकान्नं विशेषेण ग्रन्थविक्रयिणश्चथा।
घौण्डान्नं घटकान्नञ्च भिषजामन्नमेव च॥
विद्वत्प्रजननस्यान्नं परिवित्तान्नमेव च।
पुनर्भुवो विशेषेण तथैव दिधिषूपतेः॥
अवज्ञातञ्चावधूतं सरोषं विक्षयान्वितम्।
गुरोरपि न भोक्तव्यं अन्नं सत्कारवर्ज्जितम्॥
दुष्कृतं हि मनुष्यस्य सर्व्वमन्नेष्वनुष्ठितम्।
यो यस्यान्नं समश्नाति स तस्याश्नाति किल्बिषम्॥"

इति श्रीकूर्म्मपुराणे उपविभागे १६ अध्यायः॥

वर्ज्यः, त्रि, (वृज्+ण्यत्।) वर्ज्जनीयः। यथा,—

"अतः परं प्रवक्ष्यामि त्वं वर्ज्यावर्ज्यप्रतिक्रियाम्।
भोज्यमन्नं पर्य्युषितं स्नेहाक्तं चिरसंस्थितम्॥
अस्नेहाश्चापि गोधूमयवगोरसविक्रियाः।
मृगपक्षि कलविङ्कपो गोधा सेधा मत्स्योऽथ शल्लकः॥

भक्ष्या ह्येते सदा वर्ज्याः ग्रामशूकरकुक्कुटौ।
पिलदेवादिशेषञ्च श्राद्धे ब्राह्मणकाम्यया।
प्रोक्षितञ्चौषधार्थञ्च खादन् मांसं न दोषभाक्॥"

इति मार्कण्डेयपुराणे सदाचाराध्यायः॥

वर्ण, क वर्णे। इति कविकल्पद्रुमः॥ (चुरा०-पर०-सक०-सेट्।) क, वर्णयति। अयं कश्चिन्न मन्यते। वर्णः शुक्लादिक्रिया। इति दुर्गादासः॥

वर्ण, तृ क स्तुतिविस्तारशुक्लाद्युद्युक्तिदीपने। इति कविकल्पद्रुमः॥ (अदन्त चुरा०-पर०-सक०-दीपने अक०-सेट्।) वर्णयति वर्णापयति कविः स्तौतीत्यर्थः। वर्णयति तनुं विस्तारयतीत्यर्थः। वर्णयति प्रतिमां शुक्लादिवर्णां करोतीत्यर्थः। वर्णयति उद्युङ्क्ते दीप्यते वेत्यर्थः। शुक्लाद्युक्तिदीपने इत्यपि पाठः। इति दुर्गादासः॥

वर्ण, क्ली, (वर्णयतीति। वर्ण+अच्।) कुङ्कुमम्। इति हेमचन्द्रः॥

वर्णः, पुं, (व्रियते इति। वृ+"कृवृजूषिदृगुपन्यनिखपिभ्यो नित्।" उणा० ३। १०। इति नः। स च नित्।) जातिः। सा च ब्राह्मणः क्षत्रियो वैश्यः शूद्रश्च। एषामुत्पत्त्यादिर्यथा। यदा भगवान् पुरुषरूपेण सृष्टिं कृतवान् तदास्य शरीरात् चत्वारो वर्णा उत्पन्नाः। मुखतो ब्राह्मणाः बाहुतः क्षत्रियाः ऊरुतो वैश्याः पादतः शूद्रा जाताः। एतेषां वर्णानां धर्म्माः शास्त्रेषु निरूपिताः सन्ति। तत्र ब्राह्मणधर्म्मा उच्यन्ते। अध्ययनं यजनं दानञ्चेति। जीविकात्रयः अध्यापनं याजनं प्रतिग्रहश्चेति। १। क्षत्रियस्य त्रयो धर्म्माः। अध्ययनं यजनं दानञ्च। प्रजानां रक्षणं जीविका। २। वैश्यस्य त्रयो धर्म्माः। अध्ययनं यजनं दानञ्च। पशवो जीविकाः। कृषिः गोरक्षणं वाणिज्यं कुसीदञ्चेति। ३। शूद्रस्य तु ब्रह्मक्षत्रविशां शुश्रूषा धर्म्मो जीविका च। ४। ब्राह्मणा आश्रमचतुष्टयवन्तो भवन्ति। ब्रह्मचारी गृहस्थः वानप्रस्थः सन्न्यासी च। तत्र उपनयनानन्तरं नियमं कृत्वा यो गुरोः सन्निधौ स्थित्वा साङ्गवेदाध्ययनं करोति स ब्रह्मचारीत्युच्यते। १। साङ्गवेदाध्ययनं समाप्य यो दारपरिग्रहं कृत्वा स्वधर्म्माचरणं करोति स गृहस्थ उच्यते। २। पुत्रमुत्पाद्य यो वनवासं कृत्वा अकृष्टपच्यफलादि भक्षयित्वा ईश्वराराधनं करोति स वानप्रस्थ उच्यते। ३। यः सर्व्वं गृहादिकं त्यक्त्वा सुरक्षितसुखो गैरिककौपीनाच्छादनं दण्डं कमण्डलुञ्च बिभ्रत् भिक्षावृत्तिर्निर्जने तीर्थे वा स्थित्वा केवलमीश्वराराधनं करोति स सन्न्यासीत्युच्यते॥ ४॥ क्षत्रियवैश्ययोस्तु प्रथमाश्रमत्रयं विहितम्। शूद्रस्यैक एव गृहाश्रमः। ईश्वराराधनन्तु सर्व्वेषां वर्णानामाश्रमाणाञ्च साधारणो धर्म्मः। तत्रापि यस्तु विष्णूपासकः स वैष्णव उच्यते। शिवोपासकः शैवः। दुर्गादिशक्त्युपासकः शाक्तः। सूर्य्योपासकः सौरः। गणेशोपासको गाणपत्य उच्यते। इति पुराणार्थप्रकाशः॥*॥ अपि च।

ब्रह्मोवाच ।
"सर्गादिकृद्धरिश्चैव पूज्यः स्वायम्भुवादिभिः ।
विप्राद्यैः स्वेन धर्मेण तद्धर्मं यास वै शृणु ॥
यजनं याजनं दानं ब्राह्मणस्य प्रतिग्रहः ।
अध्यापनं चाध्ययनं षट् कर्माणि द्विजोत्तमे ॥
दानमध्ययनं यज्ञो धर्मः क्षत्रियवैश्ययोः ।
दण्डस्तथा क्षत्रियस्य क्षतिर्वैश्यस्य शस्यते ॥
शुश्रूषैव द्विजातीनां शूद्राणां धर्मसाधनम् ।
कारुकर्मस्तथाजीवः पाकयज्ञोऽपि धर्मतः ॥
भिक्षाचर्याथ शुश्रूषा गुरोः स्वाध्याय एव च ।
सन्ध्याकर्माग्निकार्यं च धर्मोऽयं ब्रह्मचारिणः ॥
सर्वेषामाश्रमाणान्तु द्वैविध्यन्तु चतुर्विधम् ।
ब्रह्मचार्युपकुर्वाणो नैष्ठिको ब्रह्मतत्परः ॥
योऽधीत्य विधिवद्वेदान् गृहस्थाश्रममाव्रजेत् ।
उपकुर्वाणको ज्ञेयो नैष्ठिको मरणान्तिकः ॥
अग्नयोऽतिथिशुश्रूषा यज्ञो दानं सुरार्चनम् ।
गृहस्थस्य समासेन धर्मोऽयं द्विजसत्तमाः ॥
उदासीनः साधकश्च गृहस्थो द्विविधो भवेत् ।
कुटुम्बभरणे युक्तः साधकोऽसौ गृही भवेत् ॥
ऋक्षाणि औष्ण्यपाक्त्य त्यक्त्वा भार्य्याधनादिकम् ।
एकाकी यस्तु विचरेत् उदासीनः स मौक्षिकः ॥
भूमौ मूलफलाग्नित्वं स्वाध्यायरूप एव च ।
संविभागो यथान्यायं धर्मोऽयं वनवासिनः ॥
तपस्तप्यति योऽरण्ये यजेद्देवान् जुहोति च ।
स्वाध्याये चैव निरतो वनस्थस्तापसो मतः ॥
तपसाकर्षितोऽत्यर्थं यस्तु ध्यानपरो भवेत् ।
सन्न्यासीह स विज्ञेयो वानप्रस्थाश्रमे स्थितः ॥
योगाभ्यासरतो नित्यमारुरुक्षुर्जितेन्द्रियः ।
ज्ञानाय कर्मते भिक्षुः प्रोच्यते पारमेष्ठिकः ॥
यस्मात्परतिरेव स्यान्नित्यतृप्तो महामुनिः ।
सम्यक् च दमसम्पन्नः स योगी भिक्षुरुच्यते ॥
मैत्रं शुचित्वं मौनित्वं तपोध्याने विशेषतः ।
सम्यक् च ज्ञानवैराग्यं धर्मोऽयं भिक्षुके मतः ॥
ज्ञानसन्न्यासिनः केचित् वेदसन्न्यासिनोऽपरे ।
धर्मसन्न्यासिनः केचित्त्रिविधः पारमेष्ठिकः ॥
योगी च त्रिविधो ज्ञेयो भौतिको मोक्ष एव च ।
तृतीयोऽन्त्याश्रमी प्रोक्तो योगमूर्तिसमाश्रितः ॥
प्रथमा भावना पूर्व्वे मोक्षे त्वक्षरभावना ।
तृतीये चान्तिमा प्रोक्ता भावना पारमेश्वरी ॥
धर्मात् संजायते मोक्षः अर्थात् कामोऽभिजायते ।
प्रवृत्तञ्च निवृत्तञ्च द्विविधं कर्म वैदिकम् ॥
ज्ञानपूर्व्वं निवृत्तं स्यात् प्रवृत्तञ्चाग्निदेवतम् ।
क्षमा दमो दया दानमलोभोऽभ्यास एव च ॥
आर्जवञ्चानसूया च तीर्थानुसरणं तथा ।
सत्यं सन्तोष आस्तिक्यं तथा चेन्द्रियनिग्रहः ॥
देवताभ्यर्चनं पूजा ब्राह्मणानां विशेषतः ।
अहिंसा प्रियवादित्वमपैशुन्यमरूक्षता ॥
एत आश्रमिका धर्माश्चातुर्वर्ण्य ब्रवीम्यतः ।
प्राजापत्यं ब्राह्मणानां क्षत्रं स्थानं क्रियावताम् ॥
स्थानमैन्द्रं क्षत्रियाणां संग्रामेष्वपलायिनाम् ।
वैश्यानां मारुतं स्थानं स्वधर्ममनुवर्त्तताम् ।
गान्धर्व्वं शूद्रजातीनां परिचारे च वर्त्तताम् ॥"
इति गारुड़े ४६ अध्यायः ॥ * ॥
अन्यच्च ।
"ब्राह्मणस्य तु वक्ष्यामि शृणु कर्म्म वसुन्धरे ! ।
यानि कर्म्माणि कुर्व्वीत मम भक्तिपरायणः ॥
षट्कर्म्मनिरतो भूत्वा अहङ्कारविवर्ज्जितः ।
लाभालाभं परित्यज्य भिक्षाहारो जितेन्द्रियः ॥
मम कर्म्मसमायुक्तः पैशुन्येन विवर्ज्जितः ।
ग्राम्यानुसारी मध्यस्थो न वृद्धः शिशुचेतनः ॥
एतद्वै ब्राह्मणः कर्म्म एकचित्तो जितेन्द्रियः ।
इष्टापूर्त्तञ्च कुरुते स मामेति वसुन्धरे ! ॥
क्षत्रियाणां प्रवक्ष्यामि मम कर्म्मसु निष्ठताम् ।
यानि कर्म्माणि कुर्व्वन्ति क्षत्रिया मध्यसंस्थिताः ॥
दानशूरश्च कर्म्मज्ञो यज्ञेषु कृतश्रमः शुचिः ।
मम कर्म्मसु मेधावी अहङ्कारविवर्ज्जितः ॥
अल्पभाषी गुणज्ञश्च नित्यं भागवतप्रियः ।
गुरुविद्यानतत्यात्मा शुल्ककर्म्मेष्वतन्द्रितः ॥
अभ्युत्थानादिकुशलः पैशुन्येन विवर्ज्जितः ।
एतैर्गुणैः समायुक्तो यो मां व्रजति क्षत्रियः ॥
भजते मम यो नित्यं मम लोकाय गच्छति ।
वैश्यानान्तु प्रवक्ष्यामि मम कर्म्मसु निष्ठताम् ॥
यानि कर्म्माणि कुरुते मम भक्तिपथे स्थितः ।
एतैर्गुणैः स्वधर्म्मेण लाभालाभविवर्ज्जितः ॥
ऋतुकालाभिगामी च ग्राम्यात्मा मोहवर्जितः ।
शुचिर्दक्षो निराहारो मम कर्म्मरतः सदा ॥
गुरुसंपूजको नित्यं युक्तो भक्तानुवत्सलः ।
वैश्यस्त्वेवन्तु संयुक्तो यो तु कर्म्माणि कारयेत् ।
तस्याहं न प्रणश्यामि स च मे न प्रणश्यति ॥
अथ शूद्रस्य वक्ष्यामि कर्म्माणि शृणु माधवि ! ।
यानि कर्म्माणि कृत्वा तु शूद्रो मह्यं व्यवस्थितः ॥
दम्पती मम भक्तौ यौ मम कर्म्मपरायणौ ।
उभौ भागवतौ भक्तौ मत्परौ कर्म्मनिष्ठितौ ॥
देशकालौ च जानाति रजसा तमसोज्झितः ।
निरहङ्कारयुक्तात्मा आतिथेयो विनीतवान् ॥
अदृधानोऽतिपूतात्मा लोभमोहविवर्ज्जितः ।
नमस्कारप्रियो नित्यं मम चिन्तापरायणः ॥
शूद्रकर्म्माणि मे देवि ! य एवं स समाचरेत् ।
त्यक्त्वा ऋषिसहस्राणि शूद्रमेव भजाम्यहम् ॥"
इति वाराहे विधिकर्म्मोत्पत्तिनामाध्यायः ॥
अपरञ्च ।
शुक्रेङ्गिरुवाच ।
"विप्राणां चातुराश्रम्यं विस्तरान्मे तपोधनाः ।
आचक्षध्वं न मे तृप्तिः श्रृण्वतः प्रतिविद्यते ॥
ऋषय ऊचुः ।
कृतोपनयनः सम्यक् ब्रह्मचारी गुरौ वसन् ।
तत्र धर्म्मोऽस्य यस्तञ्च कथ्यमानं निशामय ॥
स्वाध्यायोऽर्थोऽग्निशुश्रूषा स्नानं भिक्षाटनन्तथा ।
गुरौ निवेद्य तच्चान्नमनुज्ञातेन नित्यशः ॥
धर्म्मार्थकाममोक्षाणां सम्यक् प्रत्युपपादनम् ।
तेनाकृतः पठेच्चैव तत्परीभूय नित्यशः ॥
अवाप्य सकलान् वेदान् ग्राह्यं प्राप्य गुरोर्मुखात् ।
ततो वराम्बुदा दद्याद्गुरवे दक्षिणान्ततः ॥
गार्हस्थ्याश्रमकामस्तु गार्हस्थ्याश्रममाश्रयेत् ।
वानप्रस्थाश्रमञ्चापि चतुर्थं स्वेच्छया वसेत् ॥
तथैव च गुरोर्गेहे द्विजो निष्कामवाप्नुयात् ।
गुरोरभावे तत्पुत्रं तद्वदेव निषेवयेत् ॥
एवं जयति मृत्युं स द्विजः शालकटङ्कट ! ।
उपावृतस्ततस्तस्मात् गृहस्थाश्रमकाम्यया ।
असमानकुलां कन्यामुद्वहेत निशाचर ! ॥
स्वकर्म्मणा धनं लब्ध्वा पितृदेवातिथीनपि ।
सम्यक् संप्रीणयेद्भक्त्या सदाचाररतो द्विजः ॥
गार्हस्थ्यं ब्रह्मचर्य्यञ्च वानप्रस्थं त्रयाश्रमाः ।
क्षत्रियस्यापि गदिता य आचारा द्विजस्य हि ॥
वैखानसत्वं गार्हस्थ्यमाश्रमद्वितयं विभुः ।
गार्हस्थ्यमुत्तमं त्वेकं शूद्रस्य क्षमदाचर ! ॥
स्वानि वर्णाश्रमोक्तानि कर्म्माणीह न हापयेत् ।
यो हापयति तस्यासौ परिक्षुप्यति भास्करिः ॥"
इति वामनपुराणे १४ अध्यायः ॥ * ॥
पुनश्च ।
श्रीउर्व्व उवाच ।
"ब्राह्मणक्षत्रियविशां शूद्राणाञ्च यथाक्रमम् ।
त्वमेकाग्रमना भूत्वा शृणु धर्म्मान् मयोदितान् ॥
दानं दद्यादृयजेद्देवान् यज्ञैः स्वाध्यायतत्परः ।
नित्योदकी भवेद्विप्रः कुर्य्याच्चाग्निपरिग्रहम् ॥
क्षत्रार्थं याजयेच्चान्यानध्यापयेत्तथा ।
कुर्य्यात् प्रतिग्रहादानं शुक्लार्थान्न्यायतो द्विजः ॥"
शुक्लार्थात् शुक्लः शुद्धो न्यायोपार्ज्जितोऽर्थो यस्य तस्मात् । इति तट्टीका ।
"सर्व्वलोकहितं कुर्य्यान्नाहितं कस्यचिद्द्विजः ।
मैत्री समस्तसत्त्वेषु ब्राह्मणस्योत्तमं धनम् ॥
यावन्ति रन्ध्राणि च पारक्ये समबुद्धिर्भवेत् द्विजः ।
ऋतावभिगमः पत्न्यां श्रूयते चास्य पार्थिव ! ॥१
दानानि दद्यादिच्छातो द्विजेभ्यः क्षत्रियोऽपि हि ।
यजेच्च विविधैर्यज्ञैरधीयीत च पार्थिव ॥
ब्रह्मजीवो महीरक्षाप्रवरा तस्य जीविका ।
तस्यापि प्रथमे कल्पे पृथिवीपरिपालनम् ॥
धरित्रीपालनेनैव कृतकृत्यो नराधिपः ।
भवन्ति नृपतेरंशा यतो यज्ञादिकर्म्मणाम् ॥
दुष्टानां शासनाद्राजा क्षितेश्च परिपालनात् ।
प्राप्नोत्यभिमतांल्लोकान् वर्णसंस्कारको नृपः ॥२॥
पाशुपाल्यं वाणिज्यञ्च कृषिञ्च मनुजेश्वर ।
वैश्याय जीविकां ब्रह्मा ददौ लोकपितामहः ॥
तस्याप्यध्ययनं यज्ञो दानधर्म्मश्च शस्यते ।
नित्यनैमित्तिकादीनामनुष्ठानञ्च कर्म्मणाम् ॥३॥
द्विजातिसंश्रयं कर्म्म तादर्थ्यं तेन पोषणम् ।
क्रयविक्रयजैर्व्वापि धनैः कारुत्वेन वा ॥
दानञ्च दद्यात् शूद्रोऽपि पाकयज्ञैर्यजेदपि ।
पित्रादिकञ्च सर्व्वं वै शूद्रः कुर्व्वीत तेन च ॥४॥
भृत्यादिभरणार्थाय सर्व्वेषाञ्च परिग्रहः ।
ऋतुकालाभिगमनं स्वदारेषु महीपते ॥

दया सर्वभूतेषु तितिक्षा नाभिमानिता ।
सत्यं शौचमनायासो मङ्गलं प्रियवादिता ॥
मैत्रायणृहा तथा तद्वदकार्पण्यं नरेश्वर ।
अनसूया च सामान्या वर्णानां कथिता गुणाः ॥
आश्रमाणाञ्च सर्व्वेषामेते सामान्यलक्षणाः ।
गुणास्तथापद्धर्मांश्च विप्रादीनामिमान् शृणु ॥
क्षात्रं कर्म्म द्विजस्योक्तं वैश्यकर्म्म तथापदि ।
राजन्यस्य च वैश्योक्तं शौद्रं कर्म्म न चेतयोः ॥
सामर्थ्ये सति तत्त्याज्यमुभाभ्यामपि पार्थिव ।
तदेवापदि कर्त्तव्यं न कुर्य्यात् कर्म्म सङ्करम् ॥
इत्येते कथिता राजन् वर्णधर्म्मा मया तव ।
धर्म्ममाश्रमिणां सम्यगब्रुवतो मे निशामय ॥*॥

श्रीउर्व्व उवाच ।

बालः कृतोपनयनो वेदाहरणतत्परः ।
गुरुगेहे वसेद्भूप ब्रह्मचारी समाहितः ॥
शौचाचारवता तत्र कार्य्यं शुश्रूषणं गुरोः ।
व्रतानि चरता ग्राह्या वेदाश्च कृतबुद्धिना ॥
उभे सन्ध्ये रविं भूप तथैवाग्निं समाहितः ।
उपतिष्ठेत्तथा कुर्य्यादुगुरोरप्यभिवादनम् ॥
स्थिते तिष्ठेद्व्रजेद्याति नीचैरासीत चासति ।
शिष्यो गुरौ नृपश्रेष्ठ प्रतिकूलं न संभजेत् ॥
तेनैवोक्तः पठेच्चेदं नान्यचित्तः पुरःस्थितः ।
अनुज्ञातश्च भिक्षान्नमश्नीयाद्गुरुणा ततः ॥
अवगाहेदपः पूर्व्वमाचार्य्येणावगाहिताः ।
समिध्यजादिकं चास्य कल्यं कल्यमुपानयेत् ॥
गृहीतग्राह्यवेदश्च ततोऽनुज्ञामवाप्य वै ।
गार्हस्थ्यमावसेत् प्राज्ञो निष्पन्नगुरुनिष्कृतिः॥१॥
विधिना चाप्तदारस्तु धनं प्राप्य स्वकर्म्मणा ।
गृहस्थकार्य्यमखिलं कुर्य्यादभूपाल ! शक्तितः ॥
निर्व्वपेच्च पितॄनर्च्चेद्यज्ञैर्देवांस्तथातिथीन् ।
अन्नैर्मुनींश्च स्वाध्यायैरपत्येन प्रजापतिम् ॥
बलिकर्म्मणा च भूतानि वात्सल्येनाखिलं जगत् ।
प्राप्नोति लोकान् पुरुषो निजकर्म्मसमर्च्चितान् ॥
भिक्षाभुजश्च ये केचित् परिव्राट् ब्रह्मचारिणः ।
तेऽप्येवेव प्रतिष्ठन्ते गार्हस्थ्यं तेन वै परम् ॥
वेदाहरणकार्य्येण तीर्थस्नानाय च प्रभो ! ।
अटन्ति वसुधां विप्राः पृथिवीदर्शनाय च ॥
अनिकेता ह्यनाहारा यच्च सार्यं गृहासु ये ।
तेषां गृहस्थः सर्व्वेषां प्रतिष्ठा योनिरेव च ॥
तेषां स्वागतदानादि वक्तव्यं मधुरं वचः ।
गृहागतानां दद्याच्च शयनासनभोजनम् ॥
अतिथिर्यस्य भग्नाशो गृहात्प्रतिनिवर्त्तते ।
स दत्त्वा दुष्कृतं तस्मै पुण्यमादाय गच्छति ॥
अवज्ञानमहङ्कारो दम्भश्चैव गृहे सतः ।
परितापोपघातौ च पारुष्यञ्च न शस्यते ॥
यस्तु सम्यक् करोत्येवं गृहस्थः परमं विधिम् ।
सर्व्वबन्धविनिर्म्मुक्तो लोकानाप्नोत्यनुत्तमान् ॥
वयःपरिणतौ राजन् कृतकृत्यो गृहाश्रमी ।
पुत्रेषु भार्य्यां निक्षिप्य वनं गच्छेत् सहैव वा ॥२॥
वन्यमूलफलाहारः केशश्मश्रुजटाधरः ।
भूमीशायी भवेत्तत्र मुनिः सर्व्वातिथिर्नृप ॥
चर्म्मकाशकुशैः कुर्य्यात् परिधानोत्तरीयके ।
तद्वत्त्रिषवणं स्नानं शस्तमस्य नरेश्वर ॥
देवताभ्यर्च्चनं होमः सर्व्वाभ्यागतपूजनम् ।
भिक्षा बलिप्रदानञ्च शस्तमस्य नरेश्वर ॥
वन्यखेहेन गात्राणामभ्यङ्गश्चास्य शस्यते ।
तपस्यतश्च राजेन्द्र शीतोष्णादिसहिष्णुता ॥
यक्षेतां नियतश्चर्य्यां वानप्रस्थश्चरेन्मुनिः ।
स दहत्यग्निवद्दोषान् जयेल्लोकांश्च शाश्वतान्॥३॥
चतुर्थश्चाश्रमो भिक्षोः प्रोच्यते यो मनीषिभिः ।
तस्य स्वरूपं गदतो मम श्रोतुं कृपार्हसि ॥
पुत्रदारकलत्रेषु त्यक्तस्नेहो नराधिप ।
चतुर्थमाश्रमस्थानं गच्छेन्निर्धूतमत्सरः ।
त्रैवर्णिकांस्त्यजेत् सर्व्वानारम्भानवनीपते ।
मित्रादिषु समो मैत्रः समस्तेष्वेव जन्तुषु ॥
जरायुजाण्डजादीनां वाङ्मनःकर्म्मभिः क्वचित् ।
युक्तः कुर्व्वीत न द्रोहं सर्व्वसङ्गांश्च वर्ज्जयेत् ॥
एकरात्रस्थितिर्ग्रामे पञ्चरात्रस्थितिः पुरे ।
तथा तिष्ठेद्यथा प्रीतिर्द्वेषो वा नास्य जायते ॥
प्राणयात्रानिमित्तञ्च यङ्गारे भुक्तवज्जने ।
काले प्रशस्तवर्णानां भिक्षार्थं पर्य्यटेद्गृहान् ॥
कामः क्रोधस्तथा दर्पमोहलोभादयश्च ये ।
तांस्तु दोषान् परित्यज्य परिव्राट् निर्म्ममो भवेत् ॥
अभयं सर्व्वसत्त्वेभ्यो दत्त्वा यश्चरते मुनिः ।
न तस्य सर्व्वभूतेभ्यो भयमुत्पद्यते क्वचित् ॥
क्षत्वाग्निहोत्रं स्वशरीरसंस्थं
शारीरमग्निञ्च सुखे जुहोति ।
विप्रस्तु भैक्षोपगतैर्हविर्भि-
श्चिताग्निनां स व्रजतिश्च लोकान् ॥"

चिताग्नीनां अग्निचितामित्यर्थः । चिताग्निना इति वा पाठः । इति तट्टीका ॥

"मोक्षाश्रमं यश्चरते यथोक्तं
शुचिः सुसङ्कल्पितबुद्धियुक्तः ।
अनिन्धनं ज्योतिरिव प्रशान्तं
स ब्रह्मलोकं व्रजति द्विजातिः ॥" ४ ॥

इति विष्णुपुराणे ३ अंशे ८।९ अध्यायौ ॥*॥

प्रकारान्तरेण तेषामादिसृष्टिर्यथा,—

"ततस्तेजोमयं दिव्यं पद्मं सृष्टं स्वयम्भुवा ।
तस्मात् पद्मात् समभवद्ब्रह्मा वेदमयो विधिः ॥
प्रजासिसृक्षां विविधां मानसो मनसासृजत् ।
असृजद्ब्राह्मणानेव पूर्व्वं ब्रह्मा प्रजापतिः ॥
आत्मतेजोभिनिर्वृत्तान् भास्करानिसमप्रभान् ।
ततः सत्यञ्च धर्म्मञ्च तपो ब्रह्म च शाश्वतम् ॥
आचारञ्चैव शौचञ्च स्वर्गाय विदधे विभुः ।
देवदानवगन्धर्व्वा दैत्यासुरमहोरगाः ॥
यक्षराक्षसनागाश्च पिशाचा मनुजास्तथा ।
ब्राह्मणाः क्षत्रिया वैश्याः शूद्राश्च नृपसत्तम ! ॥
ये चान्यभूतसंघानां वर्णास्तांश्च विनिर्म्ममे ।
ब्राह्मणानां सितो वर्णः क्षत्रियाणाञ्च लोहितः ॥
वैश्यस्य पीतको वर्णः शूद्राणामसितस्तथा ॥

मान्धातोवाच ।

चातुर्व्वर्ण्यस्य वर्णेन यदि वर्णो विभज्यते ।
सर्व्वेषां खलु वर्णानां दृश्यते वर्णसङ्करः ॥
कामः क्रोधो भयं लोभः शोकश्चिन्ता क्षुधा श्रमः ।
सर्व्वेषां न प्रभवति कस्माद्वर्णो विभज्यते ॥
स्वेदमूत्रपुरीषाणि श्लेष्मापित्तं सशोणितम् ।
तनुः क्षरति सर्व्वेषां कस्मावर्णो विभज्यते ॥
जङ्गमानामसंख्येयाः स्थावराणाञ्च जातयः ।
तेषां विविधवर्णानां कुतो वर्णविनिश्चयः ॥

नारद उवाच ।

न विशेषोऽस्ति वर्णानां सर्व्वं ब्रह्ममयं जगत् ।
ब्रह्मणा पूर्व्वसृष्टं हि कर्म्मभिर्व्वर्णतां गतम् ॥
कामभोगप्रियास्तीक्ष्णाः क्रोधनाः प्रिय-
साहसाः ।
त्यक्तस्वधर्म्मा रक्ताङ्गास्ते द्विजाः क्षत्रतां
गताः ॥
गोभ्यो वृत्तिं समास्थाय पीताः कृष्युपजीविनः ।
स्वधर्म्मान्नानुतिष्ठन्ति ते द्विजा वैश्यतां गताः ॥
हिंसानृतप्रिया लुब्धाः सर्व्वकर्म्मोपजीविनः ।
कृष्णाः शौचपरिभ्रष्टास्ते द्विजाः शूद्रतां
गताः ॥
इत्येतैः कर्म्मभिर्व्यस्ता द्विजा वर्णान्तरं गताः ।
इत्येते चतुरो वर्णा येषां ब्राह्मी सरस्वती ॥
विहिता ब्रह्मणा पूर्व्वं लोभादज्ञानतां गताः ।
ब्राह्मणा धर्म्मतत्त्वज्ञास्ततस्तेषां न नश्यति ॥
ब्रह्म धारयतां नित्यं व्रतानि नियमांस्तथा ।
ब्रह्म चैव परं दृष्टं येन जानन्ति तद्विदः ॥
ऋषिभिः खेन तपसा सृष्यन्ते चापरे परैः ।
आदिदेवसमुद्भूता ब्रह्ममूलाच्चतार्थ्यः ।
सा दृष्टिर्म्मानसी नाम धर्म्मतत्त्वपरायणा ॥

मान्धातोवाच ।

ब्राह्मणः केन भवति क्षत्रियो वा द्विजोत्तम ! ।
वैश्यः शूद्रश्च देवर्षे तद्ब्रूहि वदतांवर ॥

नारद उवाच ।

जातकर्म्मादिभिर्यस्तु संस्कारैः संस्कृतः
शुचिः ।
वेदाध्ययनसम्पन्नः षट्सु कर्म्मस्ववस्थितः ॥
शौचाचारपरो नित्यं विघसाशी गुरुप्रियः ।
नित्यव्रती सत्यरतः स वै ब्राह्मण उच्यते ॥
सत्यं दानमथोऽद्रोह आनृशंस्यं क्षमा घृणा ।
तपश्च दृश्यते यत्र स ब्राह्मण इति स्मृतः ॥
क्षत्रजं सेवते कर्म्म वेदाध्ययनसंयुतः ।
दानादानरतिर्यस्तु स वै क्षत्रिय उच्यते ॥
विप्रत्वाशु पशुभ्यश्च कृष्यादानरतिः शुचिः ।
वेदाध्ययनसम्पन्नः स वैश्य इति संज्ञितः ॥
सर्व्वभक्ष्यरतिर्नित्यं सर्व्वकर्म्मकरोऽशुचिः ।
त्यक्तवेदस्त्वनाचारः स वै शूद्र इति स्मृतः ॥
शूद्रे चैव भवेल्लक्षं द्विजे चैव न विद्यते ।
न वै शूद्रो भवेच्छूद्रो ब्राह्मणो न च ब्राह्मणः ॥

मान्धातोवाच ।

के धर्म्माः सर्व्ववर्णानां चातुर्व्वर्ण्यस्य के पृथक् ।
चातुर्व्वर्ण्याश्रमाणाञ्च राजधर्म्माश्च के मताः ॥

नारद उवाच ।

अक्रोधः सत्यवचनं संविभागः क्षमा तथा ।

प्रजनः स्वेषु दारेषु शौचमद्रोह एव च ॥
आर्जवं भृत्यभरणं न वै ते सार्ववर्णिकाः ।
ब्राह्मणस्य तु यो धर्म्मस्तं ते वक्ष्यामि केवलम् ॥
दममेव महाराज धर्म्ममाहुः पुरातनम् ।
स्वाध्यायाभ्यसनञ्चैव तत्र कर्म्म समाप्यते ॥
तं चेद्वित्तमुपागच्छेदधर्म्मानं स्वकर्म्मणि ।
अकुर्व्वाणं विकर्म्माणि आर्त्तं प्रज्ञानतर्पितम् ॥
कुर्व्वीतोपेत्य सन्तानमथ दद्याद्यजेत च ।
संविभज्यापि भोक्तव्यं धनं सद्भिरितीष्यते ॥
परिनिष्ठितकार्य्यस्तु स्वाध्यायेनैव ब्राह्मणः ।
कुर्य्यादन्यन्न वा कुर्य्यान्नैचो ब्राह्मण उच्यते ॥*॥
क्षत्रियस्यापि यो धर्म्मस्तं ते वक्ष्यामि पार्थिव ।
दद्याद्राजा न याचेत यजेत न च याजयेत् ॥
नाध्यापयेदधीयीत प्रजाश्च परिपालयेत् ।
नित्योद्युक्तो दस्युवधे रणे कुर्य्यात् पराक्रमम् ॥
ये तु क्रतुभिरीजानाः श्रुतवन्तश्च पार्थिवाः ।
ये तु युद्धे विजेतारस्ते तु लोकजितो नृपाः ॥
अविक्षतशरीरो हि संगरादो निवर्त्तते ।
क्षत्रियस्य तु तत् कर्म्म नोभयत्र यशःप्रदम् ॥
क्षत्रियाणामयं धर्म्मो निर्णीतो मुनिभिः परैः ।
नास्य कृत्यतमं किञ्चिद्राज्ञो दस्युविनिग्रहात् ॥
दानमध्ययनं यज्ञो राज्ञां क्षेमोऽभिधीयते ।
तस्माद्राज्ञा महाराज योद्धव्यं धर्म्मशीलिना ॥
प्रजाः स्वेषु च धर्म्मेषु स्थापयेत महीपतिः ।
धर्म्माग्र्याण्येव हि कर्म्माणि कारयेत् सततं प्रजाः ॥
परमां सिद्धिमाप्नोति नृपतिः परिपालनात् ।
कुर्य्यादन्यन्न वा कुर्य्यान्नैचो राजन्य उच्यते ॥*॥
वैश्यस्य च प्रवक्ष्यामि यो धर्म्मो वेदसम्मतः ॥
दानमध्ययनं शौचं यज्ञश्च धनसञ्चयः ।
पालयेच्च पशून् वैश्यः पितृवद्धर्म्ममर्ज्जयन् ॥
विकर्म्म तद्विवेदन्यत् कर्म्म यत् स समाचरेत् ।
तथा स हि तेषां वै महत् सुखमवाप्नुयात् ॥
प्रजापतिर्हि वैश्याय सृष्ट्वा परिददे प्रजाः ।
ब्राह्मणेभ्यश्च राज्ञे च सर्व्वाः परिददे प्रजाः ॥
तस्य वृत्तिं प्रवक्ष्यामि यच्च तस्योपजीवनम् ।
यस्यामेकां पिबेद्धेनुं पृतञ्च मिथुनं भवेत् ॥
लब्धञ्च सप्तमं भागं तथा षड्भेकलक्षुरे ।
पशूनां सर्व्वबीजानि एषा सांवत्सरी श्रुतिः ॥
न च वैश्यस्य कामः स्यान्न रक्षेयं पशूनिति ।
वैश्ये रक्षति नान्येन रक्षितव्याः कथञ्चन ॥*॥
शूद्रस्यापि हि यो धर्म्मस्तं ते वक्ष्यामि भूपते ।
प्रजापतिर्हि वर्णानां दासं शूद्रमकल्पयत् ॥
तस्माच्छूद्रस्य वर्णानां परिचर्य्या विधीयते ।
तेषां शुश्रूषयैवेह महत् सुखमवाप्नुयात् ॥
शूद्र एतान् परिचरेत् त्रीन् वर्णाननुपूर्व्वशः ।
सञ्चयांश्च न कुर्व्वीत यातु शूद्रः कथञ्चन ॥
प्रापीयान् हि धनं लब्ध्वा वणिग् कुर्य्याद्गरीयसः ।
राज्ञा वा समनुज्ञातः कामं कुर्व्वीत धार्म्मिकः ॥
तस्य वृत्तिं प्रवक्ष्यामि यच्च तस्योपजीवनम् ।
अवश्यं भरणीयो हि वर्णानां शूद्र उच्यते ॥
कृष्णं वैतनमौशीरमुपानद्वाजिनानि च ।
यातयामानि देयानि शूद्राय परिचारिणे ॥
अधार्य्याणि विशीर्णानि वसनानि द्विजातिभिः ।
शूद्रायैव प्रदेयानि तस्य धर्म्मधनं हि तत् ॥
यश्च कश्चिद्द्विजातीनां शूद्रः शुश्रूषुराव्रजेत् ।
कल्पन्तेऽस्य तु तेनाहुर्वृत्तिं धर्म्मविदो जनाः ॥
देयः पिण्डोऽनपत्याय भर्त्तव्यो वृद्धदुर्ब्बलौ ।
शूद्रेण च न हातव्यो भर्त्ता कस्याञ्चिदापदि ॥
अतिरेकेण भर्त्तव्यो भर्त्ता द्रव्यपरिक्षये ।
न हि स्वमस्ति शूद्रस्य भर्त्तृहार्य्यधनो हि सः ॥
उक्तस्तयाणां वर्णानां यज्ञस्तस्य च पार्थिव ।
स्वाहाकारवषट्कारौ मन्त्रः शूद्रे न विद्यते ॥
तस्माच्छूद्रः पाकयज्ञैर्यजेत नच स्वयम् ।
पूर्णपात्रमयीमाहुः पाकयज्ञस्य दक्षिणाम् ॥*॥

श्रीनारद उवाच ।

इदानीमाश्रमाणाञ्च धर्म्मं वक्ष्यामि भूमिप ।
ब्रह्मचर्य्याश्रमं तावत् प्रथमं सर्व्वाधिवासन ॥
गत्वा गुरुगृहं शिष्यो नमस्कृत्य गुरुं शुचिः ।
ब्रूयादधीतुमायातः शिष्योऽहं तव भारिष ।
ततस्तस्याज्ञया नित्यमधीतव्यं नराधिप ॥
सदा विचारः शास्त्रस्य गुरुपादाभिवादनम् ।
तदाज्ञापालनञ्चापि ध्यानं दैवतभावना ॥
लाभेन येन केनापि तुष्टिः सद्भिः समागमः ।
समाप्तविद्यो गुरवे दक्षिणां प्रतिपाद्य च ॥*॥
गृहाश्रमं ततो गच्छेद्गुरोराज्ञामधिव्रजन् ।
उद्वहेत कुलजां कन्यां सुशीलां धर्म्मचारिणीम् ॥
अनृक्षवादिनीं सौम्यां सुचरित्रां प्रियंवदाम् ।
गृहिणां प्रथमो धर्म्मोऽतिथिपूजैव पार्थिव ॥
अप्राप्य पूजामतिथिर्यस्य गेहान्निवर्त्तते ।
स याति नरकं घोरं पुण्यं तस्मै प्रदाय च ॥
प्रथमं स्वागतं पृच्छेदासनञ्चापि संदिशेत् ।
पाद्यञ्च मधुपर्कञ्च दद्यात् प्रणतिपूर्व्वकम् ॥
संवादञ्च प्रियालापं कुर्य्यात्तेन सहात्मतः ।
भोजनञ्च यथाशक्ति कारयेदतिथिं नृप ॥
देवाश्च पितरश्चापि प्रीयन्तेऽतिथिपूजने ।
आतिथ्यसदृशं कर्म्म गृहस्थानां न विद्यते ॥
यस्य नित्यं स्थितिर्नास्ति सोऽतिथिःपरिकीर्त्तितः ।
सर्व्वाश्रमाणामधिको गृहाश्रम उदाहृतः ॥
यस्मात्तस्मिन् समायान्ति भिक्षार्थमाश्रमाश्रयाः ।
पितृदेवार्च्चनं कार्य्यं गृहिणा सुखमिच्छता ॥*॥
वानप्रस्थाश्रमं वक्ष्ये तृतीयं जगतीपते ।
वानप्रस्थाश्रमं गच्छेत् कृतकृत्यो गृहाश्रमात् ॥
तदारण्यकशास्त्राणि यमधीत्य स धर्म्मवित् ।
ऊर्द्धरेताः प्रव्रजित्वा गच्छत्यक्षरसात्मताम् ॥
सुते भार्य्यां परिन्यस्य वनं गच्छेत् सहैव वा ।
शान्तः शुद्धान्तरात्मा च सर्व्वभूतहिते रतः ॥
चरितब्रह्मचर्य्यस्य ब्राह्मणस्य विशाम्पते ।
कर्म्मण्याणीह राजेन्द्र कथ्यन्ते मुनिपुङ्गवैः ॥
भैक्ष्यचर्य्याखधीकारः प्रशस्त इह मोक्षिणः ।
यत्रास्तमितशायी स्यान्निरग्निरनिकेतनः ॥
यथोपलब्धजीवी स्यान्मुनिर्दान्तो जितेन्द्रियः ।
निराशीः स्यात् सर्व्वसमो नियोगो निर्व्विकारवान् ॥

विवेकी धनपुत्रादौ विरक्तः करुणः सदा ।
संसारं स्वप्नवद्वीक्ष्य शान्तः सन्तुष्टमानसः ॥
पत्रमूलफलाहारी जलाग्नी वायुभोजनः ।
निराहारोऽथवा शुद्धोऽहर्निशं तप आचरेत् ।
एवं कुर्व्वन् महाभाग ब्राह्मणः सिद्धिमाप्नुयात् ॥
चतुर्थमाश्रमं वक्ष्ये मुक्तिसोपानमेव हि ।
गुरोः पुरोधमासाद्य भिक्षुः सन्न्यासधर्म्मवित् ॥
विचरेत् सकलां पृथ्वीं लब्धाग्नी प्राप्त उत्सुकः ।
योगाभ्यासरतो नित्यं धर्म्मसञ्चयतत्परः ।
धर्म्माधर्म्मविहीनो वा भिक्षुकः सिद्धिमाप्नुयात् ॥”

इति पाद्मे स्वर्गखण्डे २५।२६।२७ अध्यायाः ॥*॥ अन्यत् नारसिंहपुराणे ५६ अध्याये मार्कण्डेयपुराणे मदालसोपाख्याने कूर्म्मपुराणे २।३ अध्याये च द्रष्टव्यम् ॥*॥*॥ गजश्चित्रकंबलः । हातीर झुल इति भाषा । तत्पर्य्यायः । प्रवेणी २ आस्तरणम् ३ परिस्तोमः ४ कुथः ५ कुथा ६ । इत्यमरः ॥ प्रवेणिः ७ परिस्तोमः ८ कुथम् ९ । इति भरतः ॥ शुक्लादिः । रङ्ग इति ख्यातः । स च बहुविधो यथा । श्वेतः १ पाण्डुः २ धूसरः ३ कृष्णः ४ पीतः ५ हरितः ६ रक्तः ७ गौरः ८ अरुणः ९ पाटलः १० श्यावः ११ धूम्रः १२ पिङ्गलः १३ कर्व्बुरः १४ । इति चामरः ॥ गर्भस्थबालकस्य षष्ठे मासि वर्णो भवति । इति सुखबोधः ॥ यशः । गुणः । स्तुतिः । इति मेदिनी । णौ, २६ ॥ स्वर्णम् । व्रतम् । रूपम् । अक्षरम् । भेदः । गीतक्रमः । चित्रम् । तालविशेषः । अङ्गरागः । इति हेमचन्द्रः ॥

वर्णः, पुं क्ली, (वर्ण्यते भिद्यते इति । वर्ण + घञ् ।) भेदः । (वर्ण्यते दीप्यतेऽनेनेति ।) वर्ण + घञ् ।) रूपम् । (वर्णयति । वर्ण + अच् ।) अक्षरम् । (वर्ण्यते रच्यते इति । वर्ण + घञ् ।) विलेपनम् । इति मेदिनी । णौ, २६ ॥*॥ वर्णश्च द्विविधः । ध्वन्यात्मकः अक्षरात्मकश्च । अस्योत्पत्तिप्रकारो यथा,—

“अवेषद्याभ्मुखश्रोत्रमार्गस्याविषदाक्षरम् ।
अप्यव्यक्तं प्रलपति यदा सा कुण्डली तदा ।
मूलाधारे विध्वनति सुषुम्नां वेष्टते मुहुः ॥”

इति प्रपञ्चसारः ॥

अस्यार्थः । मुखश्रोत्रमार्गस्यावेषद्यात् अनेभेल्याद्वेतोर्यदा सा कुण्डली अविषदाक्षरं अविषदमक्षरं यत्राव्यक्तं ध्वनौ तं प्रलपति अर्थात् कलभाषणादिकं करोति तदा मूलाधारे विध्वनति शब्दायते सुषुम्नाञ्च मुहुर्वेष्टते । इति तट्टीका ॥*॥ अस्य कुण्डलीस्वरूपत्वं यथा,—

“कुण्डलीभूतसर्पाणामङ्गश्रियसुपेयुषी ।
त्रिधामजननी देवी शब्दब्रह्मस्वरूपिणी ॥
द्विचत्वारिंशद्वर्णात्मा पञ्चाशद्वर्णरूपिणी ।
गुणिता सर्व्वगात्रेषु कुण्डली परदेवता ॥
विश्वात्मनापबुद्धा सा सूते मन्त्रमयं जगत् ।
एकधा गुणिता शक्तिः सर्व्वविश्वप्रवर्त्तिनी ॥

त्रिपुष्करं स्वरान् देवी ब्रह्मादीनां त्रयं त्रयम् ॥"
इति सारदातिलकः ॥

अस्यार्थः। त्रिधामेति चन्द्रसूर्य्याग्निरूपा। द्विचत्वारिंशदिति भूतलिपिमन्त्रमयी। पञ्चाशदिति मातृकामयीत्यर्थः। सर्व्वगात्रेण सर्व्ववर्णेन गुणिता परस्परमिलिता सती मन्त्रमयं जगत् क्षुते प्रकाशयति इत्यर्थः। मूलाधारे सर्पवत् कुण्डलीभूता नाड़ी वर्त्तते तच्चाध्यास्यित्वादियं कुण्डली। सर्व्वविश्वेत्युभयोपादानात् शब्दार्थरूपोभयप्रतिपादिकेति सूचितम्। त्रिपुष्करमिति ज्येष्ठमध्यमकनिष्ठत्वेन तीर्थत्रयम्। स्वरानिति उदात्तानुदात्तसमाहारान्। इति तट्टीका ॥ * ॥ अपि च।

"द्विचत्वारिंशता मूले गुणिता विश्वनायिका।
सा प्रसूते कुण्डलिनी शब्दब्रह्ममयी विभुः ॥
शक्तिं ततो ध्वनिस्तस्मान्नादस्तस्मान्निरोधिका।
ततोऽर्द्धेन्दुस्ततो बिन्दुस्तस्मादासीत् परा ततः ॥"
इति सारदायामाचार्य्याः ॥

मूले मूलाधारे द्विचत्वारिंशता गुणिता विश्वनायिका कुण्डलिनी अनेन क्रमेण अकारादिसकारान्तां द्विचत्वारिंशदात्मिकां भूतलिपिमन्त्रात्मिकां वर्णमालिकां क्षुते इत्यन्वयः। क्रममाह शक्तिमिति सा कुण्डलिनी शक्तिं क्षुते ततः शक्तेर्ध्वनिरासीदिति योजना। ततो ध्वनेरित्यादि ज्ञेयम्। अयञ्च क्रमः सर्व्वाक्षरोत्पत्तौ ज्ञेयः। तत्र सत्त्वप्रविष्टा चिच्छक्तिशब्दबाच्या। पुनराकाशस्था सैव सत्त्वप्रविष्टा रजोऽनुविद्धा सती ध्वनिशब्दवाच्या। अक्षरावस्था सैव तमोऽनुविद्धा नादशब्दवाच्या। अव्यक्तावस्था सैव तमःप्राचुर्य्यान्निरोधिकाशब्दवाच्या। सैव तदुभयप्राचुर्य्यादर्द्धेन्दुशब्दवाच्या। उक्तञ्च पदार्थादर्शे।

"इच्छाशक्तिबलोद्भूतो ज्ञानशक्तिप्रदीपकः।
पुंरूपिणी च सा शक्तिः क्रियाख्या क्षुभति
प्रभुः ॥"

असावेव बिन्दुः स्थानान्तरगतः पराद्याख्यो भवति।

पश्यन्ती मध्यमा वाचौ वैखरी शब्दजन्मभूः।
तत्र परा मूले पश्यन्ती स्वाधिष्ठाने मध्यमा हृदये वैखरी मुखे। तदुक्तं पदार्थादर्शे।

"क्षुब्धा कुण्डलिनी मध्ये ज्योतिर्माचारुरूपिणी।
अशोचविषया तस्माद्बिन्दुर्मूर्द्धगामिनी ॥
स्वयं प्रकाशा पश्यन्ती सुषुम्नामाश्रिता भवेत्।
सैव कण्ठमुरं प्राप्य मध्यमा नादरूपिणी ॥
ततः संजन्यशक्त्या स्यादविभक्तोर्द्धगामिनी।
सैवोरःकण्ठतालुस्था शिरोग्राहरदस्थिता ॥
जिह्वामूलोष्ठनिर्धूतसर्व्ववर्णपरिग्रहा।
शब्दप्रपञ्चजननी श्रोत्रग्राह्या तु वैखरी ॥
इच्छाज्ञानक्रियात्मासौ तेजोरूपा गुणात्मिका।
क्रमेणानेन क्षुभति कुण्डली वर्णमालिकाम् ॥
अकारादिसकारान्तां द्विचत्वारिंशदात्मिकाम्।
पञ्चाशद्विगुणितां पञ्चाशद्वर्णमालिकाम् ॥
क्षुते तद्वर्णतो भिन्नाः कला रुद्रादिकान् क्रमात् ॥"
इति तट्टीका ॥

"अष्टौ स्थानानि वर्णानामुरः कण्ठः शिरस्तथा।
जिह्वामूलञ्च दन्ताश्च नासिकोष्ठौ च तालुका ॥"
इति शिक्षाक्षत्रम् ॥*॥

किञ्च।

"यथा भवन्ति देहान्तरभी पञ्चाशद्वराः।
भेदा येन प्रकारेण तथा वक्ष्यामि तत्त्वतः ॥
समीरिताः समीरेण सुषुम्नारन्ध्रनिर्गताः।
यक्तिं प्रयान्ति वदने कण्ठादिस्थानघट्टिताः ॥
उच्चैरुच्चारणो वायुरुदात्तं कुरुते स्वरम्।
नीचैर्गतोऽनुदात्तञ्च स्वरितं तिर्य्यगागतः ॥
अर्द्धैकद्वित्रिसंख्याभिर्मात्राभिर्लिपयः क्रमात्।
सप्तञ्चनक्षस्वरदीर्घप्लुतसंज्ञा भवन्ति ताः ॥
अकारेकारयोर्योगादेकारो वर्ण इष्यते।
तस्यैवैकारयोगेन स्यादैकाराक्षरं तथा ॥
उकारयोगात्तस्यैव स्यादोकाराक्षयः स्वरः।
तस्यैवौकारयोगेन स्यादौकाराक्षयः स्वरः ॥
सन्त्यक्षराः स्युश्चत्वारो मन्त्राः सर्व्वार्थसाधकाः।
ऌवर्णॡवर्णयोर्यक्तिर्न वै सम्यक् प्रदर्श्यते ॥
बिन्दुसर्गात्मनोर्व्यक्तिमनसोरुभया वदेत्।
कण्ठात्तु निःसरन् सर्गः प्रायोऽचात्मकतः-
परः ॥
नश्वरः सर्ग एव स्यात् सोच्छ्वासः प्राणकस्तु हः।
स सर्गः क्षेपितः कण्ठे वायुना कादिमीरयेत् ॥
वर्गस्पर्शनमात्रेण कं खस्पर्शनात्तु खम्।
श्लोकगम्भीरसंस्पर्शात् गघौ ङश्च वहिर्गतम् ॥
विसर्गस्तालुगः सोष्मा शं षवर्गश्च यं तथा।
ऋटुरेफसकारश्च मूर्द्धगो दन्तगस्तथा ॥
ऌतवर्गलसानोष्ठानुपूपध्मानसंज्ञकान्।
दन्तौष्ठाभ्यां वदन् तत्तत्स्थानगोऽर्णान् समीरयेत् ॥"
इति प्रपञ्चसारे ३ पटलः ॥

सर्गो विसर्ग एव नश्वरो विज्ञेयः सोच्छ्वासः सकाररूपः उच्छ्वासोऽन्तःप्रवेशप्राणो वायुः स्यादित्यन्वयः। एवं प्राणको बहिर्निर्गमनप्राणो वायुर्हः स्यात् स एव उच्छ्वासः सोच्छ्वासः। प्राणश्चासौ को वायुश्चेति प्राणकः। इति तट्टीका ॥ * ॥ अवर्णकवर्गहविसर्ज्जनीयाः कण्ठ्याः। १। इवर्णचवर्गयशास्तालव्याः। २। ऋवर्णटवर्गरषा मूर्द्धन्याः। ३। ऌवर्णतवर्गलसा दन्त्याः। ४। उवर्णपवर्गोपध्मानीया ओष्ठ्याः। ५। ञ्नो दन्त्यौष्ठ्यः।६। ए ऐ कण्ठ्यतालव्यौ। ७। ओ औ कण्ठ्यौष्ठ्यौ। ८। इति शिक्षाक्षत्रम् ॥ * ॥ अपि च।

"यद्गुह्यं सर्व्वतन्त्रेषु वर्णोच्चारविधिं शिवे!।
तव स्नेहान्मयेशानि! तदद्य कथयामि ते ॥
पञ्चाशन्मातृकावर्णोच्चारणं गुरुतोऽभ्यसेत्।
अ कु चु टु तु पु यु शु अष्टौ वर्गाः प्रकीर्त्तिताः ॥
अ कु चा; कण्ठतो ज्ञेया; स्वानुतस्वयशाः
स्मृताः। २।

ऋ टु रषास्तु मूर्द्धन्याः ३ दन्त्या ऌ तु लसा
मताः ॥ ४ ॥
उपध्मीयोष्ठसंभूताः ५ स्थानानि कथितानि ते।
विशेषं कथयाम्यद्य प्रोच्चार्य्यः कण्ठतः स्वराः ॥
ऋह्रयं जिह्वया मूर्द्धा ऌह्रयं जिह्वदन्तजम्।
मुखस्थानाङ्गलो वाच्याः चकारः कण्ठतालजः ॥
यञ्जनह्रयसंयोगे भवेत् पूर्व्वस्वरो गुरुः।
पदान्तादिमवर्णस्य संयोगेषु श्रुतिर्द्वयोः ॥
अपदान्तादिसंयोगे योरन्यत्र तथेष्यते।
यो; श्रुतिस्तु तिरोभूय स्वरवत् श्रुतितां व्रजेत् ॥
श्रिया बीजे शकारस्य क्षुश्रुतिः परमेश्वरि!।
क्षुश्रुतिश्च रादिभ्यौ तथादिस्थे तु चश्रुतिः ॥
सहस्र इत्यादौ नमस्तस्थे आस्या इत्यादौ च।
रेफादिके तदन्ते वा हकारे समवाच्यता ॥
वर्हः ब्रह्म इत्यादौ।
किन्तु वैजात्यमाश्रित्य स्फुटं नाचास्य वाच्यता ॥
यु तूर्य्यध्वनिमाप्नोति यादिस्थे परमेश्वरि!।
वाल्य इत्यादौ।
पु चतुर्थध्वनिं याति वादिस्थे तु विशेषतः ॥
आक्रान्तमित्यादौ।
लादिस्थेऽप्यथ नादिस्थे वैजात्यं स्वल्पवाच्यता।
प्रह्लाद अह्लाय इत्यादौ।
मादिस्थे भे च मस्यापि नासिकामूलवाच्यता ॥
उ ड ण न मा बिन्दुर्नासिकामूलजाः स्मृताः।
यकारस्य तृतीयत्वं पदादौ सर्व्वदा व्रजेत् ॥
केयूरादावपि तथा अन्यत्र कण्ठमात्रगः।
नादिस्थश्लसयोश्चन्द्रं स्वरयोगात्तवर्गके ॥
प्रश्नः स्नान इत्यादौ।
वर्गोत्तरेषु डढयोर्व्वक्रजिह्वादिवाच्यता।
वैजात्यमपि तत्रास्ति गुरोरेव समभ्यसेत्।
आदिरेफस्तु संप्रोक्तो ढप्रेरन्यो व्रजेद्धताम्।
एवं ज्ञात्वा महेशानि! पठेत् श्लोकं जपेन्मनुम् ॥
कवचञ्च महेशानि नान्यथा फलमाप्नुयात् ॥"
इति प्रपञ्चसारे ३ पटलः ॥*॥

अपि च।

"ह्रस्वः स्वरेषु पूर्व्वोक्तः परो दीर्घः क्रमादिमे।
शिवशक्तिमयाः स्युर्बिन्दुसर्गावसानकाः ॥
बिन्दुः पुमान् रविः प्रोक्तः सर्गः शक्तिर्निशाकरः।
स्वराणां मध्यगं यत्तु तच्चतुष्कं नपुंसकम् ॥
विना स्वरेषु नान्येषां जायते व्यक्तिरञ्जसा।
शिवशक्तिमयान् प्राहुरक्षाद्यर्णान् मनीषिणः ॥
कारणात् पञ्चभूतानामुद्भूता मातृका यतः।
ततो भूतात्मका वर्णाः पञ्च पञ्च विभागतः ॥
वायुग्निभूजलाकाशाः पञ्चाशच्छिपयः क्रमात्।
पञ्च ह्रस्वाः पञ्च दीर्घाः विन्दवः सन्धिसम्भवाः।
पञ्चाशः कादयः ष च ल स ह्रस्वाः समीरिताः ॥"
इति सारदा ॥ * ॥

अक्षरस्थदिकारयं यथा,—

"यावन्नाधिकेऽपि समये भ्रान्तिः संजायते
यतः।

धाचाक्षराणि हृदयानि पत्राऽऽरूढान्यतः पुरा ॥"
इति ज्योतिस्तत्त्वे हृल्लेखतिः ॥
वर्णलेखनप्रकारस्तु तत्तद्वर्णे द्रष्टव्यः ॥ * ॥ वर्णनामानि यथा,—
"तन्त्रसङ्केतबोधार्थमाहृत्य तन्त्रशास्त्रतः ।
वर्णनामानि कतिचित् वक्ष्यामि विदुषां मुदे ॥
ॐकारो वक्तुलस्तारो वामश्च हंसकारणम् ।
मन्त्राद्यः प्रणवः सत्यं विन्दुशक्तिक्षिदेवतम् ॥
सर्व्वजीवोत्पादकश्च पञ्चदेवो ध्रुवस्त्रिकः ।
सावित्री त्रिशिखो ब्रह्म त्रिगुणो गुणजीवकः ॥
आदिबीजं वेदसारो वेदबीजमतः परम् ।
पञ्चरश्मिस्त्रिकूटे च त्रिभवे भवनाशनः ॥
गायत्रीबीजपञ्चाग्नी मन्त्रविद्याप्रभुः प्रभुः ।
अक्षरं मालकास्कन्धानादिरङ्गेतमोच्चदौ ॥ ॐ ॥
अः श्रीकण्ठः सुरेशश्च ललाटस्थैकमात्रिकः ।
पूर्णोदरी हृष्टिमेधौ सारस्वतः प्रियंवदः ॥
महाब्राह्मी वासुदेवो धनेशः केशवोऽन्तकम् ।
कीर्त्तिर्निवृत्तिर्वागीशो नरकारिर्हरो मरुत् ॥
ब्रह्मा वामाद्यजो हस्तः करस्तः प्रणवात्मकः ।
ब्रह्माणी कामरूपश्च कामेशी वाग्भिनी वियत् ॥
विश्वेशः श्रीविष्णुकण्ठौ प्रतिपत्तिथिरग्निनी ।
अर्कमण्डलवर्णाद्यौ ब्राह्मण: कामकर्षिणी ॥ अः ॥
आकारो विजयानन्तो दीर्घच्छायो विनायकः ।
क्षीरोदधिः पयोदश्च पाशो दीर्घास्यलक्तकौ ॥
प्रचण्ड एकजो रुद्रो नारायण इमेश्वरः ।
प्रतिष्ठा मानदा कान्तो विश्वान्तकगजान्तकः ॥
पितामहो द्विठान्तोऽभूः क्रिया कान्तिश्च
सम्भवः ।
द्वितीया मानदा काग्नी विप्रराजः कुजो वियत् ।
स्वरान्तकश्च हृदयमङ्गलो भगमालिनी ॥ आः ॥
इः स्कन्दा ग्राम्यली विद्या चन्द्रः पूषा सुगुह्यकः ।
सुभिक्षं सुन्दरो वीरः कोटरः काटरः पयः ॥
भ्रूमध्यो माधवस्तुष्टिर्दक्षनेत्रश्च नासिका ।
ग्राम्यः कान्तः कामिनी च कामो विघ्नविनायकः ।
नेपाली भरणी रुद्रो नित्या क्लिन्ना च पावकः ॥
॥ इः ॥
ईशिभूतिर्मदामाया लोलाक्षी वामलोचनम् ।
गोविन्दः शेखरः पुष्टिः सुभद्रा रत्नसंज्ञकः ॥
विष्णुर्लक्ष्मीः प्रहासश्च वाग्विशुद्धः परापरः ।
कलोत्तरीयो भैरुण्डा रतिश्च पौष्टवर्द्धनः ॥
ग्रियोत्तमः ग्रियः तुष्टिश्चतुर्थी विन्दुमालिनी ।
वैष्णवी वेन्द्रवी जिह्वा कामकला सनादका ॥
पावकः कोटरः कीर्त्तिर्मोहिनी कालकारिका ।
कुचदन्तं तर्ज्जनी च ग्राम्यलिपुरसुन्दरी ॥ ईः ॥
उः गुरुरो वर्त्तुलाद्यौ भूतः कल्याणवाचकः ।
अमरेशो दक्षकर्णः षड्वक्त्रो मोहनः ग्रियः ॥
उग्रः प्रसूर्धृतिर्विष्णुर्विश्वकर्म्मा महेश्वरः ।
गुह्यन्नखेटिका पुष्टिः पञ्चमी वह्निवासिनी ॥
खेटिकास्थाने खेचिका इति वा पाठः ।
कामघ्नः कामना खेशो मोहिनी विघ्नहृच्छदौ ।
ऊर्द्धः कुटिला श्रोत्रं पारङ्गीशो वृषो हरः ॥
ऊर्द्धः इति क्वचित् पाठः । ऊः ॥
ऊः कण्टको रतिः ग्राम्यः क्रोधनो मधुसूदनः ।
कामराजः कुजेशश्च महेशो वामकर्णकः ॥
कण्टकस्थाने कण्टक इति वा पाठः ।
अर्द्धीशो भैरवः सूक्ष्मो दीर्घघोणा सरस्वती ।
विलासिनी विघ्नकर्त्ता लक्ष्मणो रूपकर्षिणी ।
महाविद्येश्वरी षष्ठा षष्ठो भूः कान्यकुब्जकः ॥
॥ ऊः ॥
ऋः पूर्दीर्घसुखी रुद्रो देवमाता त्रिविक्रमः ।
भावभूतिः क्रिया क्रूरा रेचिका नासिका धृतः ॥
एकपादग्निरो माला मण्डला ग्राम्यिनी जलम् ।
कर्णः कमलभा मेधो निवृत्तिर्गणनायकः ।
रोहिणी ग्रिवदूती च पूर्णगिरिश्च सप्तमी ॥
मेधः स्थाने मेष इति च पाठः ॥ ऋः ॥
ॠः क्रोधोऽतिथिग्रो वाणी वामनोऽगोऽथ
श्रीर्धृतिः ।
ऌईसुखी निग्रानाथः पद्ममाला विनष्टधीः ॥
ग्रग्निनो मोचिका श्रेष्ठा दैत्यमाता प्रतिष्ठिता ।
एकदन्ताक्ष्यो माता हरिता मिथुनोदया ॥
माता स्थाने माया इति वा पाठः ।
कोमलः ग्रामला मेधो प्रतिष्ठा प्रतिरन्तमी ।
ब्रह्मण्यमिव कीलाले पावको गन्धकर्षिणी ॥
मिवस्थाने मवेति वा पाठः । ॠः ॥
ऌः स्थाणुः श्रीधरः शुद्धो मेधा धून्नो वको वियत् ।
देवयोनिर्दक्षगण्डो वह्नेशः कौन्तरुद्रकौ ॥
वह्नेशस्थाने वाहग इति वा पाठः ।
विश्वेश्वरो दीर्घजिह्वा महेन्द्रो लाङ्गलिः परा ।
चन्द्रिका पार्थिवो धून्ना हिदन्तः कामवर्द्धनः ॥
शुचिस्मिता च नवमी कान्तिराघातकेश्वरः ।
चित्ताकर्षिणी काग्नश्च तृतीयकुलसुन्दरी ॥
चित्ताकर्षिणीस्थाने चिन्ताकर्षिणी इति वा
पाठः । ॡः ॥
ॡकारः कमला हर्षा हृषीकेशो मधुव्रतः ।
सूक्ष्मा कान्तिर्वामगण्डो रुद्रः कामोदरी सुरा ॥
ग्राम्यिनात् खस्तिका शुक्रो मायावी लोलुपो
वियत् ।
कुग्रमी सुस्थिरो माता नीलपीतो गजाननः ॥
कामिनी विश्वधा कालो नित्या शुद्धः शुचिः
श्रुती ॥
विश्वधास्थाने विसया इति वा पाठः ।
सूर्य्यो धैर्य्याकर्षणी च एकाकी दनुजप्रभुः ॥ ॡः ॥
एकारो वास्तवः शुक्तिर्भिण्टीग्रोष्ठौ भगं मरुत् ।
सूक्ष्मा भूतोऽर्द्धकेशी च व्योत्सा श्रद्धा प्रमर्द्दनः ॥
भूतस्थाने ग्रहत इति वा पाठः ।
भयं ज्ञानं क्षमा धीरा जङ्घा सर्व्वमसुद्भवः ।
वह्निविष्णुर्भगवती कुण्डली मोहिनी वसुः ॥
योनिदाधारशुक्तिश्च चिकोणा ईशसंज्ञकः ।
सन्धिरेकादशी भद्रा पद्मनाभः कुलाचलः ॥ ऐः ॥
ऐलंज्या भौतिकः कान्ता वायवी मोहिनी
विभुः ।
दक्षा दामोदरः प्रज्ञोऽधरो विलसत्सुखपि ॥
चमालकी जगद्योनिः परः परनिबोधश्चत् ।
ज्ञानास्तता कपर्दी श्रीः पीठेशाग्निः समालकः ॥
त्रिपुरा लोहिता राज्ञी वाग्भवो भौतिकासनः ।
महेश्वरी द्वादशी च विमलश्च सरस्वती ।
कामकोटी वामजानुरंशुमान् विजया जटा ॥
॥ ऐः ॥
ओकारः सत्यपीयूषौ पश्चिमास्यः श्रुतिःस्थिरा ।
सद्योजातो वासुदेवो गायत्री दीर्घजङ्घकः ॥
आप्यायनी चोर्द्धदन्तो लक्ष्मीर्वाणी सुखी द्विजः ।
उद्देश्यदर्शकस्तोत्रः कैलासो वसुधाचरः ॥
प्रणवांशो ब्रह्मसूत्रमजेशः सर्व्वमङ्गला ।
त्रयोदशी दीर्घनासा रतिनाथो दिगम्बरा ॥
त्रैलोक्यविजया प्रज्ञा प्रीतिर्बीजादिकर्षिणी ॥
॥ ओः ॥
औकारः शक्तिको नाग्नस्त्रेजसो वामजङ्घकः ।
मनुबह्व्यशेषश्च शुक्रकर्णः सदाशिवः ॥
अधोदन्तश्च कण्ठोष्ठौ सङ्कर्षणः सरस्वती ।
आज्ञा चोर्द्धसुखी शान्तो व्यापिनी प्रकृतः
पयः ॥
अनन्ता ज्वालिनी व्योमा चतुर्दशी रतिप्रियः ।
नेत्रमात्माकर्षिणी च ज्वालामालिनिका भृगुः ॥
व्योमास्थाने रोमा इति वा पाठः । औः ॥
अङ्कारश्चक्षुषो दन्तो घटिका समगुह्यकः ।
प्रद्युम्नः श्रीसुखी प्रीतिर्बीजयोनिर्ध्वजः ॥
दन्तस्थाने दम्भ इति वा पाठः ।
परं शुक्री प्रमाणीशः सोमबिन्दुः कलानिधिः ।
अक्रूरश्चेतना नागपूर्णा दुःखहरः शिवः ॥
शिरः शम्भुर्नरेशश्च सुखदुःखप्रवर्त्तकः ।
पूर्णिमा रेवती शुद्धः कन्या चरवियद्रविः ॥
अष्टताकर्षिणी शून्यं विचित्रा व्योमरूपिणी ।
केदारो रात्रिनाशश्च कुब्जिका चैव बुद्बुदः ॥
॥ अं ॥
अः कण्ठको महासेनः कला पूर्णान्वता हरिः ।
इच्छा भद्रा गणेशश्च रतिर्विद्यासुखी सुखम् ॥
द्विविन्दुरसना सोमोऽनिरुद्धो दुःखशत्रुकः ।
द्विजिह्वः कुण्डलं वक्त्रः सर्गः शुक्तिर्निशाकरः ॥
सुन्दरी सुयशानन्ता गणनाथो महेश्वरः ॥ अः ॥
कः क्रोधीशो महाकाली कामदेवः प्रकाशकः ।
कपाली तेजसः शान्तिर्वासुदेवो जयानलः ॥
चक्री प्रजापतिः सृष्टिर्दक्षस्कन्धो विशाम्पतिः ।
अनन्तः पार्थिवो विन्दुस्त्रापिनी परमात्मकः ॥
दक्षस्कन्धस्थाने दक्षकर्णौ इति वा पाठः ।
वर्गाद्यश्च सुखी ब्रह्मा सप्ताधोऽभ्रः शिवो
जलम् ।
माहेश्वरी तुला पुष्या मङ्गलश्चरकं करः ॥
नित्या कामेश्वरी सुखः कामरूपो गजेन्द्रकः ।
श्रीपुरं रमणो रङ्गः कुसुमा परमात्मकः ॥ खः ॥
खः प्रचण्डः कामरूपी सृष्टिर्वृद्धिः सरस्वती ।
आकाशमिन्द्रियं दुर्गा चक्रीशस्त्रापिनी गुरुः ॥
शिखण्डी दक्षजातेशः कपोर्विर्गस्तो यदि ।
शून्यं कपाली कल्याणी रूपकर्णोऽजरामरः ॥
शुभाम्बेयं चक्रसिद्धो जगद्धात्रीरक्तकृष्णकौ ॥
॥ खः ॥

गो गौरी गौरवो गङ्गा गणेशो गोकुलेश्वरः ।
ग्राङ्गौं पश्चान्तको गाथा गन्धर्व्वः सर्व्वगः
स्मृतिः ॥
सर्व्वसिद्धिः प्रभा धूम्रा द्विजाख्यः शिवदर्शनः ।
विश्वात्मा गौः पृथग्रूपा बालबह्वक्षिलोचनः ॥
गीतं सरस्वती विद्या भोगिनी नन्दनो धरा ।
भोगवती च हृदयं ज्ञानं जालन्धरो लवः ॥
लवस्थाने नर इति वा पाठः । गः ॥
घः खड्गी घुर्घुरो घण्टी घण्टीशक्तिपुरा-
न्तकः ।
वायुः शिवोत्तमः सत्या किङ्किणी घोरनायकः ॥
मरीचिर्व्वरुणो मेघा कालरूपी च दाम्भिकः ।
लम्बोदरा ज्वालमूलं नन्देशो हननं ध्वनिः ।
त्रैलोक्यविद्या संहर्त्ता कामाख्यमनघामयः ॥घः॥
ङः शङ्खी भैरवश्चण्डो विन्दूत्तंसः शिवप्रियः ।
एकरुद्रो दक्षनखः खर्परो विषयसृहा ॥
कान्तिः श्वेताङ्गयो धीरो द्विजात्मा ज्वालिनी
वियत् ।
मन्त्रशक्तिश्च मदनो विघ्नेशी चात्मनायकः ॥
एकनेत्रो महानन्दो दुर्द्धरश्चन्द्रमा यतिः ।
शिवयोषा नीलकण्ठः कामेशी च मर्यादुकौ ॥
॥ङः॥
चः पुष्करो हली वाणी चात्मशक्तिः सुदर्शनः ।
चर्म्मसुखधरो भूत्वा महिषाचारसम्भिनी ॥
भूत्वास्थाने भौम इति च पाठः ।
एकरूपो रुचिः कूर्म्मश्चासृङ्मा दीर्घवालुकः ।
वामबाहुर्मलमाया चतुर्मूर्त्तिस्वरूपिणी ॥
दयितश्च त्रिनेत्रश्च लक्ष्मीस्त्रितयलोचनः ।
चन्दनं चन्द्रमा देवश्चतनो वृश्चिको बुधः ॥
देवी केटसुखेच्छात्मा कौमारपूर्व्वफल्गुनी ।
अनङ्गमेखला वायुर्मेदिनी च मूलावती ॥ चः ॥
छन्छन्दं सुमुखा च पशुः पशुपतिर्म्मतिः ।
छिन्नमस्तं तरलं वह्निभूतमात्मा विलासिनी ॥
एकनेत्रश्च दक्षली द्विशिरा वामकूर्परः ।
गोकर्णा लाङ्गली वामकाममत्ता सदाशिवः ॥
माता निशाचरः पायुर्व्विश्वतः क्षितिशब्दवः ॥
॥छः॥
जः ध्रुवो वानरः शूली भोगदा विजया स्थिरा ।
लक्षदेवो जयो जेता धातकी सुमुखी विभुः ॥
लम्बोदरी स्मृतिः शाखा सुप्रभा कर्तृका धरा ।
दीर्घबाहू रुचिर्हंसो नन्दी तेजाः सुराधिपः ॥
जवनो वेगितो वामो मानवात्मः सदात्मकः ।
कुब्जाक्षतेश्वरो वेगी वामोहा महाविकलः ॥जः॥
झो झङ्कारी गुहो झञ्झावायुः सत्यः षडुद्गतः ।
अजेशो द्राविणी नादः पाशी जिह्वा जलं
स्थितिः ॥
विराजेन्द्रो धनुर्हस्तः कर्कशो नादजः कुणः ।
दीर्घबाहुबलो रूपमाकन्दितः सुचञ्चलः ॥
दुर्मुखो नष्ट आत्मा वान् विकटा कुचमण्डलः ।
कलहंसप्रिया वामा अङ्गुलीमध्यपर्व्वकः ।
दक्षहासाट्टहासश्च पाथात्मा अञ्जनः खरः ॥
॥ञः॥

अकारो बोधनी विश्वा कण्डली मखदो वियत् ।
कौमारी नागविज्ञानी सत्याङ्गुलनखरो वकः ॥
कण्डलीस्थाने कुण्डली मखदस्थाने सुखद इति
वा पाठः ।
सर्व्वशक्तूर्जिता बुद्धिः स्वर्गात्मा घर्घरध्वनिः ।
धर्म्मैकपादो सुमुखो विरजा चन्द्रनेश्वरी ॥
बुद्धिस्थाने सिद्धिः स्वर्गस्थाने सर्ग इति वा
पाठः ।
गायनः पुण्यधन्वा च रागात्मा च वरा-
ङ्गिणी ॥ञः॥
टङ्कारः कपाली च सोमवाः खेचरी ध्वनिः ।
सुकुन्दो विनदा पृथ्वी वैष्णवी वारुणी नवः ॥
सोमवा स्थाने सोमेश इति क्वचित् पाठः ।
दक्षाङ्गकार्द्धचन्द्रश्च जरा भूतिः पुनर्भवः ।
बृहस्पतिर्धनुश्चित्रा प्रमोदा विमला कटिः ।
राजा गिरिर्म्महाधनुर्ग्गानात्मा सुमुखो
मरुत् ॥ टः ॥
ठः शून्यो मञ्जरी बीजः पाणिनी लाङ्गली
क्षया ।
वनजो नन्दनो जिह्वा सुनङ्गधूर्णकः सुधा ॥
वर्त्तुलः कुण्डलो वह्निरम्बतं चन्द्रमण्डलः ।
दक्षजानूरुभावश्च देवभक्षो बृहद्ध्वनिः ॥
एकपादो विभूतिश्च ललाटं सर्व्वमित्रकः ।
वृषघ्नो नलिनी विष्णुर्म्मेहेशो ग्रामणीः
ग्रामी ॥ ठः ॥
डः स्मृतिर्हारको नन्दिरूपिणी योगिनी
प्रियः ।
कौमारी शङ्करश्चाशक्तिवक्त्रो मदको ध्वनिः ॥
दुरूहो जटिली भीमा द्विजिह्वः पृथिवी सती ।
कोरगिरिः क्षमा कान्तिर्नाभिः स्वाती च
लोचनम् ॥
जटिलीस्थाने जटिल इति कान्तिस्थाने भ्रान्ति-
रिति वा पाठः ॥ डः ॥
ढो ढक्का निर्णयः पूर्व्वो यज्ञेशोदनदेश्वरः ।
अर्द्धनारीश्वरस्त्रोयमीश्वरी त्रिशिखी नवः ॥
यज्ञेशोदनदेश्वर इत्यत्र यज्ञेशो धनदेश्वर
इत्यपि पाठः ।
दक्षपादाङ्गुलेर्मूलं सिद्धिदक्षो विनायकः ।
प्रहासा त्रिवेरा ऋद्धिर्निर्गुणो निधनो ध्वनिः ॥
प्रहासा स्थाने प्रहास इति वा पाठः ।
विघ्नेशः पालिनी वज्रधारिणी क्रोडपुच्छकः ।
बलापुरं त्वगात्मा च विशाखा श्रीर्म्मनो रतिः ॥
तक्रस्थाने त्वक् च इति वा पाठः ॥ ढः ॥
णो निर्गुणं रतिर्ज्ञानं जघनः पक्षिवाहनः ।
जया प्रभो नरकजित् निष्कला योगिनीप्रियः ॥
द्विसृखं कोटवी श्रोत्रं सन्द्विर्बोधनो मता ।
त्रिनेत्रो मानुषी योगदक्षपादाङ्गुलेर्मुखम् ॥
माधवः शक्तिनी वीरो नारायणश्च निर्णयः ॥
सुखस्थाने नखं इति वा पाठः ॥ णः ॥
तः पूतना हरिः शुद्धिः शक्तौ शक्तिर्जटी ध्वजा ।
वामस्फिक्वामकक्षौ च कामिनी मथ-
नार्जनः ॥

हरिस्थाने हविः इति वा पाठः ।
आषाढ़ी तरुतुल्यश्च कामिका पृष्ठपुच्छकः ।
रत्नकश्च श्यामसुखी वाराही मकरोऽरुणा ॥
आषाढ़ीतरुतुल्यस्थाने आषान्तढ़ान्तचुद्रश्च
इति रत्नकश्चस्थाने रत्नकण्ठ इति वा पाठः ।
सुगतोऽर्द्धसुखा बुद्धजानुश्च क्रोड़पुच्छकः ।
गन्धो विश्वामरुच्छत्रश्चानुराधा च सौरकः ॥
बुद्धस्थाने वृद्ध इति सौरकस्थाने सेविक इति वा
पाठः ।
जयन्ति पुलको भ्रान्तिरनङ्गमदनातुरा ॥ तः ॥
थः स्थिरामी महायन्थिर्ग्रन्थिग्राहो भयानकः ।
शिवो शिवरसिजो दण्डी भद्रकाली शिवोदयः ॥
क्षणो बुद्धिर्विकर्म्मा च दक्षनाशाधिपोऽमरः ।
वरदा भोगदा केशो वामजानू रसोऽनलः ॥
क्षणो बुद्धिर्विकर्म्मा स्थाने क्षणो वह्निर्विकर्म्मा
इति वा पाठः ।
लोलोजज्वयिनी गुह्यः शरश्चन्द्रो विदारकः ॥
लोलौ इत्यादिस्थाने लोलोज्वयिनीपूर्णुच्छशर-
श्चन्द्रदिवाकरौ इति वा पाठः । धः ॥
दोऽदीशो धातकिर्धासा दासा दलं कलत्रकम् ।
दीनं ज्ञानश्च दानश्च भक्तिराहवनी धरा ॥
दासा दलं स्थाने दासादनु इति वा पाठः ।
सुमुखा योगिनी सद्यः कुण्डलो वामगुल्फकः ।
कात्यायनी शिवा दुर्गा लङ्घना नाचि
कण्डकी ॥
लङ्घनास्थाने सङ्घना कण्डकीस्थाने कण्टकी
इति वा पाठः ।
खड्गिकः कुटिला रूपः क्षणाक्षोभाजितेन्द्रियः ।
धर्म्मेशदामदेवश्च भमा बहुसुचञ्चला ॥
धर्म्मेशतुस्थाने धर्म्मेशतु बहुस्थाने बह्व इति वा
पाठः ।
हरिद्रा पुरमत्रौ च दक्षपार्श्विश्वरेखकः ॥दः॥
धो धनार्थो रुचिः स्थाणुः प्राश्वतो योगिनी-
प्रियः ।
मीनेशः शक्तिनी सोयं नागेशो विश्वपावनी ॥
धनार्थस्थाने धनाख्य इति वा पाठः ।
धिषणा धरणा चिन्ता नेत्रयुग्मं प्रियो मतिः ।
पीतवासा त्रिवर्णा च धाता धर्म्मध्वजक्रमः ॥
धरणाचिन्तास्थाने धरणी चिन्ता इति वा
पाठः ।
सन्दर्भो मोदनो लज्जा वज्रतुण्डा धरं धरा ।
वामपादाङ्गुलेर्मूलं ज्येष्ठा सुरपुरं भवः ।
आत्मात्मा दीर्घजङ्घा च धनेशो धनसञ्चयः ॥धः॥
नो गर्ज्जिनी क्षमा सौरिर्व्वारुणी विश्वपावनी ।
मेषश्च सविता नेत्रं दन्तुरो नारदोऽञ्जनः ॥
वारुणीस्थाने वरुणा इति वा पाठः ।
जङ्घामी हिरण्यश्च वामपादाङ्गुलेर्मुखम् ।
वैनतेयस्तुतिर्वर्त्म तरणिर्व्वालिरागमः ॥
वामनो ज्वालिनी दीर्घो गिरीशः सुगतिर्ज्जियतु ।
शब्दात्मा दीर्घघोणा च हस्तिनापुरमेचकौ ।
गिरिनायकनीलौ च शिवो नादिर्म्मनोन्मनी-
मतिः ॥ नः ॥

पः पूरप्रियता तीक्ष्णा लोहितः पञ्चमो रमा ।
गुह्यकर्त्ता निधिः श्रेष्ठः कालरात्रिः सुवाहिता ॥
तपनः पालनः पाता पद्मरेणुर्निरञ्जनः ॥
सावित्री पातिनी पानं वीरतत्त्वो धनुर्द्धरः ॥
पालनस्थाने पावन इति तत्त्वस्थाने तत्व इति वा पाठः ।
दक्षपार्श्वश्च सेनानी मरीचिः पवनः शनिः ।
उड्डीशं जयनी कुम्भोऽलसं रेखा च मोहकः ॥
कुम्भस्थाने कान्ता इति रेखास्थाने रेषा इति वा पाठः ।
मूला द्वितीयमिन्द्राणी लोकाक्षी मन आत्मनः ॥
आत्मनः स्थाने आत्मक इति वा पाठः । फः ॥
फः सखी दुर्गिणी धूम्रा वामपार्श्वो जनार्दनः ।
जया पादः शिखा रौद्री फेत्कारः शाखिनी प्रियः ॥
उमा विहङ्गमः कालकुञ्जिनीप्रियपावकौ ।
प्रलयाग्निर्नीलपादोऽक्षरः पशुपतिः शशी ॥
फुत्कारो यामिनी वक्ता पावनो मोहवर्द्धनः ।
निष्फलवागहङ्कारः प्रयागो ग्रामणीः फलम् ॥
वक्तास्थाने भक्षका इति प्रयागस्थाने प्रयाग इति वा पाठः । फः ॥
बो वनी भूधरो मार्गो घर्घरी लोचनप्रियः ।
प्रचेताः कलसः पक्षी स्थलगर्भः कपर्द्दिनी ॥
पृष्ठवंशो भया मातुः शिखिवाहो युगन्धरः ।
सुखबिन्दुर्ब्बली घण्टा योद्धा त्रिलोचनप्रियः ॥
सुखबिन्दुस्थाने सुखबिन्दुरिति वा पाठः ।
क्षौद्दिनी तापिता भूमिः सुपनिन्द्रबलिप्रियः ।
सुरभिर्मुखविष्णुश्च संहारो वसुधाधिपः ॥
सुपनिन्द्रस्थाने सुगन्धिश्चेति वा पाठः ।
षष्ठो पुरश्च पेटा च मोदको गगनं प्रति ।
पूर्व्वाषाढ़ामधस्तिङ्गौ शनिः कुम्भलतीयकौ ॥बः॥
भः क्षिप्रा भ्रमरो भीमो विश्वमूर्त्तिर्निशातवम् ।
दिरण्डो भूषणो मूलं यज्ञस्तत्त्वस्य वाचकः ॥
निशातवस्थाने निशाभयं इति वा पाठः ।
नक्षत्रं भ्रमणा दीप्तिर्वयो भूमिः पयो नभः ।
नाभिभद्रं भद्राबाहुर्विश्वमूर्त्तिर्वितारकः ॥
वयःस्थाने भय इति वितारकस्थाने विमर्षक इति वा पाठः ।
प्राणात्मा तापिनी वक्ता विश्वरूपी च चन्द्रिका ।
भीमसेनः सुधासेनः सुखो मायापुरं हरः ॥
वक्तस्थाने रुद्रा इति सुखस्थाने सुख इति वा पाठः । भः ॥
मः काली क्षेमिकः काको महाकालो महाकालकः ।
वैकुण्ठो वसुधा चन्द्री रविः पुरुषराजकः ॥
वसुधास्थाने वसुदा इति वा पाठः ।
कालभद्रो जया मेधा विश्वदा दीप्तसंज्ञकः ।
जठरश्च भ्रमानानं लक्ष्मीमातोग्रबन्धनौ ॥
दीप्तस्थाने दीप्र इति वा पाठः ।
विधिं शिखी महावीरः शशिप्रभा जनेश्वरः ।
प्रमत्तः प्रियश्च रुद्रः सर्व्वाङ्गो वह्निमण्डलम् ॥

मातङ्गमालिनी विन्दुः श्रवणाभरथो वियत् ॥
रथस्थाने मख इति वा पाठः । मः ॥
यो वायौ वसुधा वायुर्विकृतिः पुरुषोत्तमः ।
युगान्तः श्वसनः शीघ्रो धूमार्चिः प्राणिसेवकः ॥
युगान्तस्थाने युगाभ इति वा पाठः ।
प्रक्षा भ्रमो जटी लोला वायुवेगी यशस्करी ।
सङ्कर्षणः क्षपा वालो हृदयं कपिला प्रभा ॥
आग्नेयो व्यापकस्त्यागो होमो यानं प्रभा सुखम् ।
चण्डः सर्व्वेश्वरी धूमश्चासृङ्मा सुखेश्वरी ॥
प्रभास्थाने प्रभा इति वा पाठः ।
त्वगात्मा मलयो माता हंसिनी भृङ्गिनायकः ।
तेनमः शोषको मौनो धनिष्ठानङ्गवेदिनी ॥
त्वगात्मास्थाने विगात्मा इति तेनमस्थाने येमन इति वा पाठः ।
मेषः सोमः पक्षिनामा पापहा प्राणसंज्ञकः ॥
मेषस्थाने सेष इति वा पाठः । यः ।
रो रक्तः क्रोधिनी रेफः पावकस्त्वोजसो मतः ।
प्रकाशा दर्शनो दीपो रक्तक्षया परं बली ॥
स्त्वोजसस्थाने न्तेजन इति रक्तक्षयास्थाने रक्तक्षण इति वा पाठः ।
भुजङ्गेशो मतिः सूर्य्यो धातू रक्तः प्रकाशकः ।
व्यापको रेवती दासं कुक्षिशो वह्निमण्डलम् ॥
दासस्थाने दानमिति कुक्षिशस्थाने दक्षांश इति वा पाठः ।
उग्ररेखा स्थूलदण्डो वेदकण्ठपला पुरा ।
प्रकृतिः सुगलो ब्रह्मगन्धश्च गायको धनम् ॥
वेदकण्ठपलास्थाने वेदकश्चपला इति वा पाठः ।
श्रीकण्ठ उमा हृदयं सुखी त्रिपुरसुन्दरी ।
सविन्दुर्योनिजो ज्वाला श्रीशैलो विश्वतोमुखी ॥
श्रीशैलस्थाने श्रीशोण इति वा पाठः । रः ।
लक्ष्मीन्द्रः पूतना पृथ्वी माधवः शक्रवाचकः ।
बलानुजः पिशाकीशो व्यापको मांससंज्ञकः ॥
माधवस्थाने माधवी इति वा पाठः ।
खड्गी नादोऽतं देवी लवणं वारुणी पतिः ।
शिखा वाणी क्रिया माता भामिनी कामिनी प्रिया ॥
ऋतस्थाने रुड़मिति लवणस्थाने मरणमिति वा पाठः ।
ज्वालिनी वेगिनी नादः प्रद्युम्नः शोषणो हरिः ।
विद्यात्मामन्त्रो बली चेतो मेरुर्गिरिः कला रसः ॥
मन्त्रस्थाने मन्त्र इति कलास्थाने कला इति वा पाठः । लः ।
षो वालो वारुणी स्वप्ना वरुणो मेदसंज्ञकः ।
खड्गीशो ज्वालिनी वक्रः कलसध्वनिवाचकः ॥
वक्रस्थाने रक्त इति कलसध्वनिस्थाने कलसंरवि इति वा पाठः ।
उल्कारीशस्तु गा वीतो वक्ता स्फिक् सागरः शुचिः ।
त्रिधातुः शङ्करः श्रेष्ठो विशेषो वमसादनम् ॥वः॥
शः सर्व्वश्च कामरूपी कामरूपो महामतिः ।
सौख्यनामा कुमारोऽग्निः श्रीकण्ठो वृषकेतनः ॥

वृषघ्नः शयनं शान्ता सुभगा विस्फुलिङ्गिनी ।
मृत्युर्देवो महालक्ष्मीर्महेन्द्रः कुलकौलिनी ॥
बाहुर्हंसो वियद्वक्त्रं हृदनङ्गाङ्कुशः खलः ।
वामोरुः पुण्डरीकात्मा कान्तिः कल्याणवाचकः ॥
हंसस्थाने हिंसा इति वा पाठः । शः ॥
षः श्वेतो वासुदेवश्च पीता प्रज्ञा विनायकः ।
परमेष्ठी वामबाहुः श्रेष्ठो गर्भविमोचनः ॥
पीतास्थाने प्रीता इति प्रज्ञास्थाने श्रद्धा इति वा पाठः ।
लम्बोदरो यमौजेशः कामधुक् कामधूमकः ।
सुश्रीरुष्मा तृषो लज्जा मरुद्वध्वः प्रियः शिवः ।
कामधूमकस्थाने कालधूमक इति वा पाठः ।
सूर्य्यात्मा जठरः कोषो मत्ता वक्षोविदारिणी ।
कलकण्ठो मध्यभिन्ना बुद्धात्मा मलपूः शिवः॥षः॥
सो हंसः सुयशा विष्णुर्भवीशश्चन्द्रसंज्ञकः ।
जगद्बीजं शक्तिनामा मोहं वेशवती भृगुः ॥
सुयशास्थाने सुजन इति मोहस्थाने सोऽहं इति वा पाठः ।
प्रकृतिरीश्वरः शुद्धो प्रभा श्वेता कुलोज्ज्वलः ।
दक्षपादो स्तं ब्राह्मी परमात्मा परोऽक्षरः ॥
सुरूपा च गुणेशो गौः कलकण्ठो वृकोदरी ।
प्राणात्माश्च पुरादेवी लक्ष्मीः सोमो हिरण्यपुः ॥
दुर्गोत्तारिणि सन्मोहाज्जीवो मूर्त्तिर्मनोहरः ॥
दुर्गोत्तारिणिस्थाने दुर्गोत्तारिणी इति सन्मोहात्स्थाने सन्मोहा इति मनोहरस्थाने मनोयव इति वा पाठः । सः ।
हः शिवो गगनं हंसो नागलोकोऽम्बिकापतिः ।
नकुलीशो जगत्प्राणः प्राणेशः कपिला मलः ॥
मलस्थाने मत इति वा पाठः ।
परमात्मात्मजो जीवो यवाकः शान्तिदोऽङ्गनः ।
रुगो भयो रुणाख्याणुः कुटकूपविरावणः ॥
यवाकस्थाने वराक इति अङ्गनस्थाने अङ्गुल इति कुटकूपविरावणस्थाने कूटकोपरिवारण इति वा पाठः ।
लक्ष्मीर्मविहरः शम्भुः प्राणशक्तिर्ललाटजः ।
खकोपवारणः शूली चेतन्यं पादपूरणः ॥
मविहरस्थाने हरिहर इति खकोपस्थाने सकोप इति वा पाठः ।
महालक्ष्मीः परं नादो मेघनादो हरिर्मतः ।
विन्दुर्दुर्गा प्रिया देवी मेघश्यामेश्वरः पुमान् ॥
दक्षपादः सदाशम्भुः शाखोटः सोममण्डलम्॥हः
ळः पृथ्वी विमला मोघोऽनन्तो हयवहा सिता ।
व्यापिनी शिवदा केतुर्जगत्सारतरं हठः ॥
स्त्रौर्ह्रडानी च वेदार्थः सारो नारायणः स्वयम् ।
जठरो नकुलिः पीता शिवेशोऽनङ्गमालिनी ॥ळः॥
क्षः कोपस्तुम्बुकः कालो रूक्षः संवर्त्तकः परः ।
नृसिंहो विद्युता माया महातेजा युगान्तकः ॥
स्तुम्बुकस्थाने स्तुवुक इति रूक्षस्थाने यक्षमिति परस्थाने पय इति वा पाठः ।
परात्मा क्रोधसंहारो बलानो मेरुवाचकः ।
सर्व्वाङ्गः सागरः कामः संयोगान्तस्त्रिपूरकः ॥

वलान्तस्थाने नलान्त इति सर्व्वाङ्गस्थाने सर्व्वाग इति वा पाठः।
चैत्रपालो महाक्षोभो मालकान्तानलक्षयः।
सुखं कथवहानन्ता कालजिह्वा गणेश्वरः।
क्षायापुत्रश्च संघातो मलयः श्रीर्ललाटकः॥"च॥
इति नन्दनभट्टाचार्य्यविरचितं वर्णाभिधानं समाप्तम्॥

वर्णकं, क्ली, (वर्णयतीति। वर्ण + ण्वुल्।) हरितालम्। इति रत्नमाला॥ गात्रानुलेपनयोग्यं पिष्टं घृष्टं वा सुगन्द्रिद्रव्यम्। इत्यमरः॥ चन्दनम्। इति शब्दरत्नावली॥

वर्णकः, पुं, क्ली, (वर्ण + स्वार्थे संज्ञायां वा कन्।) विलेपनम्। चन्दनम्। इति मेदिनी। के, १५२॥ (यथा, महाभारते। १३।१११।१०७।
"वर्णकादीँस्तथा गत्वांस्तोरथित्वेह मानवः।
कुक्कुन्दरित्वमाप्नोति राजन्! लोभपरायणः॥")

वर्णकः, पुं, क्ली, (वर्ण्यते रच्यतेऽनेनेति। वर्ण + घञ्। स्वार्थे कन्।) हिङ्गुलहरितालकाञ्चनीलीक्रादिः। इत्यमरभरतौ॥ (यथा, आर्य्यासप्तशत्याम्। १८६।
"कस्तां निन्दति लुम्पति कः स्मरफलकस्य वर्णकं सुग्धः।
को भवति रत्नकाष्टकमन्तेकस्यारुचिरुदेति॥")

वर्णकः, पुं, (वर्ण्यति वृत्त्यादीन् विस्तारयतीति। वर्ण + ण्वुल्।) चारणः। इति मेदिनी। के, ५२। मङ्गलम्। इति शब्दरत्नावली॥

वर्णकविः, पुं, कुबेरपुत्रः। इति त्रिकाण्डशेषः॥

वर्णकूपिका, क्ली, (वर्णानां कूपिकेव।) मस्याधारः। यथा,—
"मसीधानी मसिमणिर्मेलान्तुर्वर्णकूपिका॥"
इति त्रिकाण्डशेषः॥

वर्णचारकः, त्रि, (वर्णान् नीलादीन् चारयति विस्तारयतीति। चर + णिच् + ण्वुल्।) चित्रकारः। इति शब्दमाला॥

वर्णज्येष्ठः, पुं. (वर्णेषु चतुर्षु मध्ये ज्येष्ठः प्रथमोत्पन्नात् गुणोत्कृष्टत्वाच्च।) ब्राह्मणः। इति त्रिकाण्डशेषः॥

वर्णज्येष्ठः, त्रि, (वर्णेन ज्योतिषोक्तपारिभाषिकवर्णेन ज्येष्ठः श्रेष्ठः।) स्ववर्णापेक्षोत्तमवर्णः। पारिभाषिकहीनवर्णकन्यैकपारिभाषिकवर्णज्येष्ठकन्याविवाहनिषेधो यथा,—
"मीनकर्कटवृश्चिकविप्राः
सिंहतुलाधनुः क्षत्रिय उक्तः।
कुम्भनरद्वयमेषविशः सु-
र्म्मैकरवृषकौ कथितावरजातिः॥
वर्णज्येष्ठा च या नारी वर्णहीनश्च यः पुमान्।
तयोर्विवाहे मृत्युः स्यात् यस्मात्तस्मान्न संशयः॥"
इति ज्योतिस्तत्त्वे वर्णजोटनम्॥

वर्णतूलिः, स्त्री, (वर्णानां तूलिरिव।) लेखनी। इति शब्दरत्नावली॥

वर्णतूलिका, स्त्री, (वर्णानां तूलिकेव।) लेखनी। इति हारावली। २१२॥

वर्णतूली, स्त्री, (वर्णानां तूलीव।) लेखनी। इति त्रिकाण्डशेषः॥

वर्णदं, क्ली, (वर्णं ददातीति। दा + "आतोऽनुसर्गे कः।" ३।२।३। इति कः।) कालीयकम्। इति जटाधरः॥ वर्णदातरि, त्रि॥

वर्णदात्री, स्त्री, (वर्णं ददातीति। दा + तृच् + ङीप्।) हरिद्रा। इति राजनिर्घण्टः॥ वर्णदातरि, त्रि॥

वर्णदूतः, पुं, (वर्णा एव दूता यत्र।) लिपिः। तत्पर्य्यायः। लेखः २ वाचिकहारकः ३ खस्तिसुखः ४। इति त्रिकाण्डशेषः॥

वर्णधर्म्मः, पुं,क्ली, (वर्णानां ब्राह्मणादीनां धर्म्मः।) ब्राह्मणक्षत्रियवैश्यशूद्राणां कर्त्तव्यं कर्म्म। तद्यथा,—
"यजनं याजनं दानं ब्राह्मणस्य प्रतिग्रहः।
अध्यापनं चाध्ययनं षट्कर्म्माणि द्विजोत्तमाः॥
दानमध्ययनं यज्ञो धर्म्मः क्षत्रियवैश्ययोः।
दक्षो युद्धं क्षत्रियस्य क्षत्रियैश्यस्य प्रस्मृते॥
शुश्रूषैव द्विजातीनां शूद्राणां वर्णसाधनम्।
कारुकर्म्म तथाजीवः पाकयज्ञोऽपि धर्म्मतः॥
क्षमा दमो दया दानमलोभस्त्याग एव च।
आर्ज्जवं चानसूया च तीर्थानुसरणं तथा॥
सत्यं सन्तोष आस्तिक्यं श्रद्धा चेन्द्रियनिग्रहः।
देवताभ्यर्चनं पूजा ब्राह्मणानां विशेषतः॥
अहिंसा प्रियवादित्वमपैशून्यमकल्कता।
समासिकमिमं धर्म्मं चातुर्व्वर्ण्योऽब्रवीन्मुनिः॥
प्राजापत्यं ब्राह्मणानां क्षुतं स्यानं क्रियावताम्।
स्थानमैन्द्रं क्षत्रियाणां संग्रामेष्वपलायिनाम्॥
वैश्यानां मारुतं स्थानं स्वधर्म्ममनुवर्त्तताम्।
गान्धर्व्वं शूद्रजातीनां परिचारे तु वर्त्तताम्॥"
इति कौर्म्मे २ अध्यायः॥*॥

अपि च।

मार्कण्डेय उवाच।
"हारीतस्त्वनुवाचाथ तैरेवं चोदितो मुनिः।
प्रह्वस्तु मुनयः सर्व्वे धर्म्मान् वक्ष्यामि शाश्वतान्॥
वर्णानामाश्रमाणाञ्च योगशास्त्रस्य सत्तमाः।
यज्ज्ञात्वा मुनयो नित्यं मुच्यते ऋणबन्धनात्॥
ब्राह्मण्यां ब्राह्मणेनैव उत्पन्नो ब्राह्मणः स्मृतः।
तस्य धर्म्मं प्रवक्ष्यामि तं योग्यं देशमेव च॥
ब्रह्मसारो मृगो यत्र स्वभावात्तु प्रवर्त्तते।
तस्मिन् देशे वसन् धर्म्मं कुरुते ब्राह्मणोत्तमः॥
अध्यापनं चाध्ययनं यजनं याजनं तथा।
दानं प्रतिग्रहश्चैव कर्म्मषट्कमिहोच्यते॥
अध्यापनञ्च त्रिविधं धर्म्मार्थं चात्मकारणम्।
शुश्रूषाकारणञ्चेति त्रिविधं परिकीर्त्तितम्॥
नैषामन्यतमो वापि दृश्यते यत्र मानवे।
तत्र विद्या न दातव्या पुरुषेण हितैषिणा॥
योग्यानध्यापयेच्छिष्यान् यज्ञानपि च योजयेत्।
विदितान् प्रतिग्रहानिच्छेद्गृहधर्म्मप्रसिद्धये॥
वेदमेवाभ्यसेन्नित्यं शुचौ देशे समाहितः।
यजेद्दयज्ञं यथाशक्त्या दद्याद्वित्तानुसारतः॥
नित्यं नैमित्तिकं धर्म्मं कर्म्म कुर्य्यात् प्रयत्नतः।
गुरुशुश्रूषणञ्चैव यथान्यायमतन्द्रितः॥
सायं प्रातरुपासीत विधिनाग्निं द्विजोत्तमः।
हुतहानः प्रकुर्व्वीत वैश्वदेवं दिने दिने॥
अतिथिञ्चागतं भक्त्या पूजयेच्छक्तितो गृही।
अन्यानप्यागतान् विप्रान् पूजयेदविरोधतः॥
स्वदारनिरतो नित्यं परदारविवर्ज्जितः।
सत्यवादी जितक्रोधः स्वधर्म्मनिरतो भवेत्॥
अकर्म्मणि च संप्राप्ते प्रमादे नैव रोचयेत्।
प्रियं हितं वदेद्वाक्यं परलोकाविरोधिनीम्॥
एष धर्म्मः समुद्दिष्टो ब्राह्मणस्य समासतः।
धर्म्ममेवन्तु यः कुर्य्यात् स याति ब्रह्मणः पदम्॥
हारीत उवाच।
क्षत्रादीनां प्रवक्ष्यामि यथावदनुपूर्ब्बशः।
येन येन प्रवर्त्तन्ते विधिना क्षत्रियादयः॥
राजा च क्षत्रियश्चैव प्रजा धर्म्मेण पालयेत्।
कुर्य्यादध्ययनं सम्यक् युगयुक्तो यथाविधि॥
दद्याद्दानं द्विजाग्रेभ्यो धर्म्मबुद्धिसमन्वितः।
देवब्राह्मणभक्तश्च पितृकार्य्यपरस्तथा॥
धर्म्मेण वै जयाकाङ्क्षी अधर्म्मस्य विवर्जयेत्।
उत्तमां गतिमाप्नोति क्षत्रियो ह्येवमाचरन्॥*॥
गोरक्षं कृषिवाणिज्यं कुर्य्याद्वैश्यो यथाविधि।
दानं धर्म्मं यथाशक्त्या द्विजशुश्रूषणं तथा॥
लोभदम्भविनिर्म्मुक्तः सत्यवाग्जनसूयकः।
स्वदारनिरतो दान्तः परदारविवर्ज्जितः॥
धनैर्व्विप्रान् समभ्यर्च्च्य यज्ञकाले त्वयाचितः।
अप्रमत्तः स्वधर्म्मेषु वर्त्तेत देहपातनात्॥
यज्ञाध्ययनदानानि कुर्य्यान्नित्यमतन्द्रितः।
पितृकार्य्यञ्च तत्काले नारसिंहार्च्चनं तथा॥
एतद्वैश्यस्य कर्म्मोक्तं स्वधर्म्ममनुतिष्ठतः।
एतदासेव्यमानस्तु मुक्तः स्यान्नात्र संशयः॥*॥
वर्णत्रयस्य शुश्रूषां कुर्य्यात् शूद्रः प्रयत्नतः।
दासवत् ब्राह्मणानान्तु विशेषेण समाचरेत्॥
अयाचितः प्रदाता स्यात् क्षुधं तृष्णार्थमाश्रयेत्।
पाकयज्ञविधानेन यजेद्देवानतन्द्रितः॥
शूद्राणां मासिकं कार्य्यं वपनं न्यायवर्त्तिनाम्।
धार्य्यं जीर्णवस्त्रस्य विप्रस्योच्छिष्टभोजनम्॥
स्वदारेषु रतिश्चैव परदारविवर्ज्जितः।
पुराणश्रवणं विप्रान्नारसिंहस्य पूजनम्॥
तथा विप्रनमस्कारस्तथा सत्यं दिने दिने।
सत्यं सम्भाषणं चैव रागद्वेषविवर्ज्जनम्॥
इत्थं कुर्व्वंस्तथा शूद्रो मनोवाक्कायकर्म्मभिः।
स्थानमैन्द्रमवाप्नोति मुक्तपापः प्रपुण्यकृत्॥"
इति नारसिंहे ५३।५४ अध्यायौ॥*॥

अन्यच्च।

मदालसोवाच।
"दानमध्ययनं यज्ञो ब्राह्मणस्य त्रिधोदितः।
धर्म्मो नान्यश्चतुर्थोऽस्ति धर्म्मस्तस्यापदं विना॥
याजनाध्ययने यज्ञस्तथा पुत्र प्रतिग्रहः।

एतत् सम्यक् समाख्यातं चित्तयं चास्य
जीविका ॥
दानमध्ययनं यज्ञः क्षत्रियस्याप्यं त्रिधा ।
धर्म्मः प्रोक्तः क्षिते रक्षा शस्त्रजीवश्च जीविका॥
दानमध्ययनं यज्ञो वैश्यस्यापि त्रिधैव सः ।
वाणिज्यं पाशुपाल्यञ्च कृषिश्चैवास्य जीविका ॥
दानं यज्ञोऽथ शुश्रूषा द्विजातीनां त्रिधा मया ।
आख्यातः शूद्रधर्म्मोऽपि जीविका कारुकर्म्मजा॥
सद्द्विजातिशुश्रूषा पोषणं क्रयविक्रयैः ।
वर्णधर्म्माख्यिमे प्रोक्ताः शूयतामाश्रमाश्रयः ॥"
इति मार्कण्डेयपुराणे मदालसानुशासनाध्यायः ॥
अपरञ्च ।
"ब्राह्मणा ब्रह्मयोनिस्था ये स्वकर्म्मण्यवस्थिताः।
ते सम्यगुपजीवेयुः षट्कर्म्माणि यथाक्रमम् ॥
अध्यापनमध्ययनं यजनं याजनं तथा ।
दानं प्रतिग्रहश्चैव षट् कर्म्माण्यग्रजन्मनः
षण्णान्तु कर्म्मणामस्य त्रीणि कर्म्माणि जीविका।
याजनाध्यापने चैव विशुद्धाच्च प्रतिग्रहः ॥
त्रयो धर्म्मा निवर्त्तन्ते ब्राह्मणात् क्षत्रियं प्रति ।
अध्यापनं याजनञ्च तृतीयश्च प्रतिग्रहः ॥
वैश्यं प्रति तथैवैते निवर्त्तेरन्निति स्थितिः ।
न तौ प्रति हि तान् धर्म्मान् मनुराह प्रजा-
पतिः ॥
शस्त्रास्त्रभृत्त्वं क्षत्रस्य वणिक्पशुकृषिर्विशः ।
आजीवनार्थं धर्म्मस्तु दानमध्ययनं यजिः ॥
वेदाभ्यासो ब्राह्मणस्य क्षत्रियस्य च रक्षणम् ।
वार्त्ताकर्म्मैव वैश्यस्य विशिष्टानि स्वकर्म्मसु ॥
अजीवंस्तु यथोक्तेन ब्राह्मणः स्वेन कर्म्मणा ।
जीवेत् क्षत्रियधर्म्मेण स ह्यस्य प्रत्यनन्तरः ॥
उभाभ्यामप्यजीवंस्तु कथं स्यादिति चेद्भवेत् ।
कृषिगोरक्षमास्थाय जीवेद्वैश्यस्य जीविकाम् ॥
वैश्यवृत्त्यापि जीवंस्तु ब्राह्मणः क्षत्रियोऽपि वा ।
हिंसाप्रायां पराधीनां कृषिं यत्नेन वर्जयेत् ॥
कृषिं साध्विति मन्यन्ते सा वृत्तिः सद्विगर्हिता ।
भूमिं भूमिशयांश्चैव हन्ति काष्ठमयोमुखम् ॥
इदन्तु वृत्तिवैकल्यात् त्यजतो धर्म्मनैपुणम् ।
विट्पण्यमुद्धृतोद्धारं विक्रेयं वित्तवर्द्धनम् ॥
सर्व्वान्नसानपोहेत कृतान्नञ्च तिलः सह ।
अश्मनो लवणञ्चैव पशवो ये च मानुषाः ॥
सर्व्वञ्च तान्तवं रक्तं शाणक्षौमाविकानि च ।
अपि चेत् स्युररक्तानि फलमूले तथौषधीः ॥
अपः शस्त्रं विषं मांसं सोमं गन्धांश्च सर्व्वशः ।
क्षीरं क्षौद्रं दधि घृतं तैलं मधु गुडं कृशान् ॥
आरण्यांश्च पशून् सर्व्वान् दंष्ट्रिणश्च वयांसि च।
मद्यं नीलीञ्च लाक्षाञ्च सर्व्वांश्चैकशफांस्तथा ॥
कामसृत्याद्य कृष्यान्तु स्वयमेव कृषीवलः ।
विक्रीणीत तिलान् शुद्धान् धर्म्मार्थमचिर-
स्थितान् ॥
भोजनाभ्यञ्जनाद्दानाद्यदन्यत् कुरुते तिलैः ।
कृमिभूतः श्वविष्ठायां पितृभिः सह मज्जति ॥
सद्यः पतति मांसेन लाक्षया लवणेन च ।
त्र्यहेण शूद्रीभवति ब्राह्मणः क्षीरविक्रयात् ॥

इतरेषान्तु पण्यानां विक्रयादिह कामतः ।
ब्राह्मणः सप्तरात्रेण वैश्यभावं नियच्छति ॥
रसा रसैर्निमातव्या न त्वेव लवणं रसैः ।
कृतान्नञ्चाकृतान्नेन तिला धान्येन तत्समाः ॥
जीवेदेतेन राजन्यः सर्व्वेणाप्यनयङ्गतः ।
न त्वेव न्याय्यां वृत्तिमभिमन्येत कर्हिचित् ॥
यो लोभाद्धर्म्मो ज्ञात्वा जीवेदुत्कृष्टकर्म्मभिः ।
तं राजा निर्द्धनं कृत्वा क्षिप्रमेव प्रवासयेत् ॥
वरं स्वधर्म्मो विगुणो न पारक्यः सुनुष्ठितः ।
परधर्म्मेण जीवन् हि सद्यः पतति जातितः ॥
वैश्योऽजीवन् स्वधर्म्मेण शूद्रवृत्त्यापि वर्त्तयेत् ।
अनाचरन्नकार्य्याणि निवर्त्तेत च शक्तिमान् ॥
अशक्तुवंश्च शुश्रूषां शूद्रः कर्त्तुं द्विजन्मनाम् ।
पुत्रदारात्ययं प्राप्तो जीवेत कारुकर्म्मभिः ॥
वैकर्म्मभिः प्रचरितैः शुश्रूष्यन्ते द्विजातयः ।
तानि कारुककर्म्माणि शिल्पानि विविधानिच ॥
वैश्यवृत्तिमनातिष्ठन् ब्राह्मणः स्वे पथि स्थितः ।
अवृत्तिकर्शितः सीदन्निमं धर्म्मं समाचरेत् ॥
सर्व्वतः प्रतिगृह्णीयाद्ब्राह्मणस्त्वनयङ्गतः ।
पवित्रं दुष्यतीत्येतत् धर्म्मतो नोपपद्यते ॥
नाध्यापनाद्याजनाद्वा गर्हिताद्वा प्रतिग्रहात् ।
दोषो भवति विप्राणां ज्वलनाम्बुसमा हि ते ॥
जीवितात्ययमापन्नो योऽन्नमत्ति यतस्ततः ।
आकाशमिव पङ्केन न स पापेन लिप्यते ॥
अजीगर्त्तः सुतं हन्तुमुपासर्पदबुभुक्षितः ।
न चालिप्यत पापेन क्षुत्प्रतीकारमाचरन् ॥
श्वमांसमिच्छन्नार्त्तोऽत्तुं धर्म्माधर्म्मविचक्षणः ।
प्राणानां परिरक्षार्थं वामदेवो न लिप्तवान् ॥
भरद्वाजः क्षुधार्त्तस्तु सपुत्रो विजने वने ।
बह्वीर्गाः प्रतिजग्राह वृधोक्षण्णो महातपाः ॥
क्षुधार्त्तश्चात्तुमभ्यागाद्विश्वामित्रः श्वजाघनीम् ।
चण्डालहस्तादादाय धर्म्माधर्म्मविचक्षणः ॥
प्रतिग्रहाद्याजनाद्वा तथैवाध्यापनादपि ।
प्रतिग्रहः प्रत्यवरः प्रेत्य विप्रस्य गर्हितः ॥
याजनाध्यापने नित्यं क्रियेते संस्कृतात्मनाम् ।
प्रतिग्रहस्तु क्रियते शूद्रादप्यन्त्यजन्मनः ॥
अपहोमैरपेतेनो याजनाध्यापनैः कृतम् ।
प्रतिग्रहनिमित्तन्तु त्यागेन तपसैव च ॥
शिलोञ्छमप्याददीत विप्रो जीवन् यतस्ततः ।
प्रतिग्रहाच्छिलः श्रेयांस्ततोऽप्युञ्छः प्रशस्यते ॥
सीदन्नपि कृषिमिच्छद्विर्धनं वा पृथिवीपतिः ।
याच्यः स्यात् स्नातकैर्विप्रैरदित्सन्त्यागमर्हति ॥
अकृतञ्च कृतात् चैत्राद्गौरजौविकमेव च ।
हिरण्यं धान्यमन्नञ्च पूर्व्वं पूर्व्वमदोषवत् ॥
सप्तवित्तागमा धर्म्म्या दायो लाभः क्रयो जयः ।
प्रयोगः कर्म्मयोगश्च सत्प्रतिग्रह एव च ॥
विद्या शिल्पं भृतिः सेवा गोरक्ष्यं विपणिः
कृषिः ।
धृतिर्भैक्षं कुसीदञ्च दश जीवनहेतवः ॥
ब्राह्मणः क्षत्रियो वापि वृद्धिं नैव प्रयोजयेत् ।
कामन्तु खलु धर्म्मार्थं दद्यात् पापीयसेऽल्पि-
काम् ॥

चतुर्थमाददानोऽपि क्षत्रियो भागमाप्नुयात् ।
प्रजा रक्षन् परं धर्म्मं किल्बिषात् प्रतिमुच्यते ॥
स्वधर्म्मो विजयस्तस्य नाहवे स्यात् पराङ्मुखः ।
शस्त्रेण वैश्यान्निर्जित्वा धर्म्ममाहारयेद्बलिम् ॥
धान्येऽष्टमं विंशं शुल्कं विंशं कार्षापणा-
वरम् ।
कर्म्मोपकरणाः शूद्राः कारवः शिल्पिनस्तथा ॥
शूद्रस्तु वृत्तिमाकाङ्क्षन् क्षत्रमाराधयेद्यदि ।
धनिनं वाप्युपाराध्य वैश्यं शूद्रो जिजीविषेत् ॥
स्वर्गार्थमुभयार्थं वा विप्रानाराधयेत्तु सः ।
जातब्राह्मणशब्दस्य सा ह्यस्य कृतकृत्यता ॥
विप्रसेवैव शूद्रस्य विशिष्टं कर्म्म कीर्त्यते ।
यदतोऽन्यद्धि कुरुते तद्भवत्यस्य निष्फलम् ॥
प्रकल्प्या तस्य तैर्वृत्तिः स्वकुटुम्बाद्यथार्हतः ।
शेषञ्चावेक्ष्य दाक्ष्यञ्च भृत्यानाञ्च परिग्रहम् ॥
उच्छिष्टमन्नं दातव्यं जीर्णानि वसनानि च ।
पुलाकाश्चैव धान्यानां जीर्णाश्चैव परिच्छदाः ॥
न शूद्रे पातकं किञ्चित् न च संस्कारमर्हति ।
नास्याधिकारो धर्म्मेऽस्ति न धर्म्मात् प्रतिषेध-
नम् ॥
धर्म्मैरेवन्तु धर्म्मज्ञाः सतां वृत्तिमनुष्ठिताः ।
मन्वादयो न दुष्यन्ति प्रशंसां प्राप्नुवन्ति च ॥
यथा तथाहि सद्वृत्तमातिष्ठत्यनसूयकः ।
तया तथेमञ्चामुञ्च लोकं प्राप्नोत्यनिन्दितः ॥
शूद्रेणापि हि शूद्रेण न कार्य्यो धनसञ्चयः ।
शूद्रो हि धनमासाद्य ब्राह्मणानेव बाधते ॥
एते चतुर्णां वर्णानामापद्धर्म्माः प्रकीर्त्तिताः ।
यान् सम्यगनुतिष्ठन्तो व्रजन्ति परमां गतिम् ॥
एष धर्म्मविधिः कृत्स्नश्चातुर्व्वर्ण्यस्य कीर्त्तितः ।
अतः परं प्रवक्ष्यामि प्रायश्चित्तविधिं शुभम् ॥"
इति मानवे धर्म्मशास्त्रे भृगुप्रोक्तायां संहि-
तायां दशमोऽध्यायः ॥ * ॥ अन्यत् वर्णशब्दे
द्रष्टव्यम् ॥

वर्णनं, क्ली, (वर्ण्य स्तुतौ विस्तारे रञ्जनादौ + ल्युट् ।) स्तवनम् । (यथा, भागवते । १० । ७४ । ३० ।
"इत्थं निगृह्य दमघोषसुतः स्वपीठा-
दुत्थाय कृष्णगुणवर्णनजातमन्युः ।
उत्क्षिप्य बाहुमिदमाह सदस्यनर्घ्यं
संश्रावयन् भगवते परुषाण्यभीतः ॥")
विस्तरणम् । शुक्लादिवर्णयोजनम् । दीपनम् ।
इति वर्णधातोर्भावेऽनट्प्रत्ययेन निष्पन्नम् ॥

वर्णना, स्त्री, (वर्ण + णिच् + युच् । टाप् ।) गुणकथनम् । तत्पर्य्यायः । इडा २ स्तवः ३ स्तोत्रम् ४ स्तुतिः ५ नुतिः ६ श्लाघा ७ प्रशंसा ८ अर्थवादः ९ । इति हेमचन्द्रः । २ । १६३ ॥ (यथा, कथासरित्सागरे । ३२ । १६६ ।
"विदग्धा अपि वर्ण्यन्ते विटवर्णनया स्त्रियः ॥")

वर्णनीयं, त्रि, (वर्ण + कर्म्मणि अनीयर् ।) वर्ण्यम् । वर्णितव्यम् । (यथा, साहित्यदर्पणे ६ परिच्छेदे ।

"वर्णनीया यथायोगं साङ्गोपाङ्गा अमी इह ॥")

वर्ण्याः पदार्था यथा,—

"अथ वर्ण्यानि कथ्यन्ते तानि यानि कवीश्वरैः ।
महाकाव्यप्रभृतिषु प्रबन्धेषु बबन्धिरे ॥
राजा राजवधूपुरोहितकुमारामात्यसेवाधिपाः
देशग्रामपुरीसरोऽब्धिसरिदुद्यानाद्रारण्याश्रमाः ।
मन्त्रो दूतरणप्रयाणमृगयाश्वेभर्त्विनेन्दूदया
वीहारो विरहः स्वयंवरसुरा पुष्पाम्बुखेला रतम् ॥"

इति कविकल्पलतायाम् १ स्तवके ३ कुसुमम् ॥ (स्तवार्हः । वर्णधात्वर्थदर्शनात् । यथा, भागवते । ३ । २२ । ३७ ।

"एतत्ते आदिराजस्य मनोश्चरितमद्भुतम् ।
वर्णितं वर्णनीयस्य तदपत्योदयं शृणु ॥")

वर्णपात्रं, क्ली, (वर्णस्य पात्रम् ।) चित्रकारस्य नील्यादिरागस्याधारः । यथा,—

"मल्लिका वर्णपात्रं स्यात् तूलिका लेख्यकूर्चिका ॥"

इति शब्दमाला ॥

वर्णपुष्पकः, पुं, (वर्णवन्ति नानावर्णानि पुष्पाणि यस्य । कप् ।) राजतरुणीपुष्पवृक्षः । इति राजनिर्घण्टः ॥

वर्णपुष्पी, स्त्री, (वर्णवन्ति पुष्पाणि यस्याः । ङीष् ।) उष्ट्रकाण्डीपुष्पवृक्षः । इति राजनिर्घण्टः ॥

वर्णप्रसादनं, क्ली, (वर्णस्य प्रसादनं यस्मात् ।) अगुरु । इति राजनिर्घण्टः ॥

वर्णमाता, स्त्री, (वर्णस्य मातेव ककाराद्यक्षरप्रसवात् ।) लेखनी । इति हारावली ॥

वर्णमालका, स्त्री, (वर्णानां वर्णमालानां मालकेव ।) सरस्वती । इति शब्दरत्नावली ॥

वर्णमाला, स्त्री, जातिमाला । (वर्णानां माला समूहः ।) अक्षरश्रेणी । तच्च संस्कृतवर्णाः५० जपमालायाम् ५१ । इङ्गरेजीयवर्णाः २६ । फरासीयाः २३ । हिब्रू अर्थात् इहुदीयाः २२ । आरबीयाः २८ । पारसीयाः ३१ । तुरस्कीयाः ३३ । रुशीयाः ४१ । ग्रिक् अर्थात् इयुनानीयाः २४ । लाटिन्देशीयाः २२ । डच् अर्थात् ओलन्दाजीयाः२६ । स्पानदेशीयाः२७। इटालिदेशीयाः २० । तातारीयाः २०२ । ब्रह्मदेशीयाः १६ । चीनदेशीयवर्णाः शब्दात्मकाः तत्सङ्ख्याः ८०००० ॥ * ॥ अकारादिक्षकारान्तवर्णैरेकैकप्रक्षाप्यजपमाला । यथा, सनत्कुमारसंहितायाम् ।

"क्रमोत्क्रमगतैर्माला मालकार्णैः क्षमेरुके ।
सबिन्दुकैः साष्टवर्गैरन्तर्यजनकर्मणि ॥"

आदि कु चु टु तु पु शु ग्रवोऽष्टौ वर्गाः प्रकीर्त्तिताः । अकारादिवर्णान् सबिन्दून् प्रत्येकं कृत्वा घृतं संजप्य अकारादीनां कवर्गादीनाञ्च वर्णानां अन्तिमवर्णं सानुस्वारं कृत्वा पूर्ब्बमुच्चार्य्य मन्त्रजपः कार्य्यः । अनेन प्रकारेणाष्टोत्तरशतसंख्यो जपो भवति । अन्तर्यजनमित्युपलक्षणम् ।

"सबिन्दुं वर्णमुच्चार्य्य पश्चान्मन्त्रं जपेत् सुधीः ।
अकारादिक्षकारान्तं बिन्दुयुक्तं विभाव्य च ॥
वर्णमाला समाख्याता अनुलोमविलोमिका ।
च्चकारं मेरुमेवात्र तत्र मन्त्रं जपेन्नहि ॥"

इति नारदीयवचनात् ॥

प्रकारान्तरं विष्णुरहस्ये ।

"अनुलोमविलोमेन वर्गाष्टकविभेदतः ।
मन्त्रेणान्तरितान् वर्णान् वर्णैर्नान्तरितान् मनून् ॥
कुर्य्याद्वर्णमयीं मालां सर्व्वतन्त्रप्रकाशिनीम् ।
चरमार्णं मेरुरूपं लङ्घनं नैव कारयेत् ॥"

इति तन्त्रसारः ॥

अपि च ।

"अनुलोमविलोमेन कृत्वप्रया वर्णमालया ।
आदिलान्तलादि आन्तक्रमेण परमेश्वरि ! ।
च्चकारं मेरुरूपञ्च लङ्घयेन्न कदाचन ॥"

इति मुण्डमालातन्त्रम् ॥

वर्णरेखा, } स्त्री, (वर्णा लिख्यन्तेऽनयेति । लिख +
वर्णलेखा, } करणे घञ् । रलयोरैक्यम् ।) कठिनी । इति त्रिकाण्डशेषः ॥

वर्णलेखिका, स्त्री, (वर्णलेखा + स्वार्थे कन् । टापि अत इत्वम् ।) कठिनी । इति रत्नमाला ॥

वर्णवती, स्त्री, (वर्णोऽस्त्यस्यामिति । वर्ण + "रसादिभ्यश्च ।" ५ । २ । ९५ । इति मतुप् । मस्य वः ।) हरिद्रा । इति जटाधरः ॥ वर्णविशिष्टे, त्रि ॥

वर्णविलोड़कः, पुं, (वर्णान् विलोड़यतीति । वि + लोड़ि + खुल् ।) श्लोकस्तेनः । सन्धिचौरः । इति मेदिनी । के, २३९ ॥

वर्णसङ्करः, पुं, (वर्णतो ब्राह्मणादिभ्यः वर्णानां वा सङ्करो मिश्रणं यत्र ।) मिश्रितजातिः । तद्विवरणं यथा,—

"बभूवुर्ब्रह्मणो वक्त्रादन्या ब्राह्मणजातयः ।
ब्रह्मणो बाहुदेशाच्च जाताः क्षत्रियजातयः ॥
ऊरुदेशाच्च वैश्याश्च पादतः शूद्रजातयः ।
तासां सङ्करजातेन बभूवुर्व्वर्णसङ्कराः ॥
गोपनापितलीलाश्च तथा मोदकमूलवौ ।
ताम्बूलिपर्णकारौ च तथा वणिक्जातयः ॥"

लीलास्थाने भाला इति मूलवस्थाने कूवर इति च पाठः ।

"इत्येवमाद्या विप्रेन्द्र ! सच्छूद्राः परिकीर्त्तिताः ।
शूद्राविशोस्तु करणोऽम्बष्ठो वैश्याद्विजन्मनोः ॥
विश्वकर्म्मा च शूद्रायां वीर्य्याधानं चकार सः ।
ततो बभूवुः पुत्राश्च नवैते शिल्पकारिणः ॥
मालाकारः कर्म्मकारः शङ्खकारः कुविन्दकः ।
कुम्भकारः कंसकारः षडेते शिल्पिनां वराः ॥
क्षत्रधारश्चित्रकरः स्वर्णकारस्तथैव च ।
पतितास्ते ब्रह्मशापादजात्या वर्णसङ्कराः ॥"

अजात्या इत्यत्र अयाज्या इत्यपि पाठः ।

"स्वर्णकारः स्वर्णचौर्य्यात् ब्राह्मणानां द्विजोत्तम ।
बभूव सद्यः पतितो ब्रह्मशापेन कर्म्मणा ॥
सूत्रधारो द्विजातीनां शापेन पतितो भुवि ।
शीघ्रञ्च यज्ञकाष्ठञ्च न ददौ तेन हेतुना ॥
अतिक्रमेण चित्राणां सद्यश्चित्रकरस्तथा ।
पतितो ब्रह्मशापेन ब्राह्मणानाञ्च कोपतः ॥
कश्चिद्वणिग्विप्रेषञ्च संसर्गात् स्वर्णकारिणः ।
स्वर्णचौर्य्यादिदोषेण पतितो ब्रह्मशापतः ॥
कुलटायाञ्च शूद्रायां चित्रकारस्य वीर्य्यतः ।
बभूवाट्टालिकाकारः पतितो जारदोषतः ॥
अट्टालिकाकारवीर्य्यात् कुम्भकारस्य योषिति ।
बभूव कोटिकः सद्यः पतितो ग्रहकारकः ॥
कुम्भकारस्य वीर्य्येण सद्यः कोटिकयोषिति ।
बभूव तैलकारश्च कुटिलः पतितो भुवि ।
सद्यः क्षत्रियवीर्य्येण राजपुत्रस्य योषिति ।
बभूव तीवरश्चैव पतितो जारदोषतः ॥
तीवरस्य तु वीर्य्येण तैलकारस्य योषिति ।
बभूव पतितो दस्युर्षेटश्च परिकीर्त्तितः ॥
वैटस्तीवरकन्यायां जनयामास षण्डरान् ।
मालं मल्लं मातरञ्च भड़ं कोलञ्च कन्दरम् ॥"

कन्दरस्थाने कलन्दर इति वा पाठः ।

"ब्राह्मण्यां शूद्रवीर्य्येण पतितो जारदोषतः ।
सद्यो बभूव चाण्डालः सर्व्वस्मादधमोऽशुचिः ॥
तीवरेणैव चाण्डाल्यां चर्म्मकारो बभूव ह ।
चर्म्मकार्य्याञ्च चाण्डालात् मांसच्छेदी बभूव ह ॥
मांसच्छेद्यां तीवरेण कोँचञ्च परिकीर्त्तितः ।
कोँचस्त्रियान्तु कैवर्त्तात् काण्डारः परिकीर्त्तितः ॥
सद्यश्चाण्डालकन्यायां वैटवीर्य्येण शौनक ! ।
बभूवतुस्तौ द्वौ पुत्रौ हड्डिकशौण्डिकौ तथा ॥"

हड्डिकशौण्डिकावित्यत्र द्वौ हड्डिडमौ इत्यपि पाठः ।

"क्रमेण हड्डिकन्यायां सद्यश्चाण्डालवीर्य्यतः ।
बभूवुः पञ्चपुत्राश्च भटा वनचराश्च ते ॥
वैटात्तीवरकन्यायां गङ्गासीरे च शौनक ।
बभूव सद्यो यो बालो गङ्गापुत्रः प्रकीर्त्तितः ॥
गङ्गापुत्रस्य कन्यायां वीर्य्येण वेशधारिणः ।
बभूव वेशधारी च पुत्रो युङ्गी प्रकीर्त्तितः ॥
वैश्यात्तीवरकन्यायां सद्यः शुण्डी बभूव ह ।
शुण्डीयोषिति वैश्यात्तु पौण्ड्रकश्च प्रकीर्त्तितः ॥
क्षत्रात् करणकन्यायां राजपुत्रो बभूव ह ।
राजपुत्रात्तु करणादागरीति प्रकीर्त्तितः ॥
क्षत्रवीर्य्येण वैश्यायां कैवर्त्तः परिकीर्त्तितः ।
कलौ तीवरसंसर्गाद्धीवरश्च प्रकीर्त्तितः ॥"

प्रकीर्त्तित इत्यत्र पतितो भुवि इति वा पाठः ।

"तीवर्य्यां धीवरात् पुत्रो बभूव रजकः स्मृतः ।
रजक्यां तीवराच्चापि कोदाली च बभूव ह ॥
नापितान्नापकन्यायां सर्व्वस्वी तस्य योषिति ।
क्षत्राद्बभूव व्याधश्च बलवान् मृगहिंसकः ॥
तीवरात् शुण्डिकन्यायां बभूवुः सप्त पुत्रकाः ।
ते कलौ हड्डिसंसर्गाद्बभूवुर्दस्यवः सदा ॥

ब्राह्मण्यान्त्वविधीर्य्येण ऋतोः प्रथमवासरे ।
कुत्सितश्चोदरे जातः कूदरत्वेन कीर्त्तितः ॥
तदन्नौचं विप्रतुल्यं पतित ऋतुदोषतः ।
सद्यः कोटिकसंसर्गादधमो जगतीतले ॥
क्षत्त्रवीर्य्येण वैश्यायान्ततोः प्रथमवासरे ।
जातः पुत्रो महादस्युर्बलवांश्च धनुर्द्धरः ॥
चकार वागतीतञ्च क्षत्रियो वारितस्त्वया ।
तेन जात्या स पुत्रश्च वागतीतः प्रकीर्त्तितः ॥
क्षत्त्रवीर्य्येण शूद्रायान्ततुदोषेण पापतः ।
बलवत्यो दुरन्ताश्च बभूवुर्म्लेच्छजातयः ॥
अविद्धकर्णाः क्रूराश्च निर्भया रणदुर्ज्जयाः ।
शौचाचारविहीनाश्च दुर्द्धर्षा धर्म्मवर्ज्जिताः ॥
म्लेच्छात् कुविन्दकन्यायां जोलाजातिर्ब्बभूव ह ।
जोलात् कुविन्दकन्यायां पुराकः परिकीर्त्तितः ॥
वर्णसङ्करदोषेण बङ्गाश्च पुटजातयः ।
तासां नामानि संख्याश्च को वा वक्तुं द्विजोत्तम ॥
वैद्योऽश्विनीकुमारेण जातश्च विप्रयोषिति ।
वैद्यवीर्य्येण शूद्रायां बभूवुर्म्लेच्छवो जनाः ॥
ते च म्लेच्छगुणाश्चाश्च मन्तौषधिपरायणाः ।
तेभ्यश्च जाताः शूद्रायां ते वालव्याहिणो भुवि ॥"

इति ब्रह्मवैवर्त्ते ब्रह्मखण्डे १० अध्यायः ॥*॥

अपि च ।

"अयं द्विजैर्हि विद्वद्भिः पशुधर्म्मो विगर्हितः ।
मनुष्याणामपि प्रोक्तो वेणे राज्यं प्रशासति ॥
स महीमखिलां भुञ्जन् राजर्षिप्रवरः पुरा ।
वर्णानां सङ्करं चक्रे कामोपहतचेतसः ॥
ततः प्रभृति यो मोहात् प्रमीतपतिकां स्त्रियम् ।
नियोजयत्यपत्यार्थं तं विगर्हन्ति साधवः ॥*॥
ब्राह्मणः क्षत्रियो वैश्यस्त्रयो वर्णा द्विजातयः ।
चतुर्थ एकजातिस्तु शूद्रो नास्ति तु पञ्चमः ॥
सर्व्ववर्णेषु तुल्यासु पत्नीष्वक्षतयोनिषु ।
आनुलोम्येन सम्भूता जात्या ज्ञेयास्त एव ते ॥
स्त्रीष्वनन्तरजातासु द्विजैरुत्पादितान् सुतान् ।
सदृशानेव तानाहुर्मातृदोषविगर्हितान् ॥
अनन्तरासु जातानां विधिरेष सनातनः ।
द्व्येकान्तरासु जातानां धर्म्यं विद्यादनुत्रिधिम् ॥
ब्राह्मणात् वैश्यकन्यायामम्बष्ठो नाम जायते ।
निषादः शूद्रकन्यायां यः पारशव उच्यते ॥
क्षत्रियाच्छूद्रकन्यायां क्रूराचारविहारवान् ।
क्षत्रशूद्रवपुर्जन्तुरुग्रो नाम प्रजायते ॥
विप्रस्य त्रिषु वर्णेषु नृपतेर्व्वर्णयोर्द्वयोः ।
वैश्यस्य वर्णे चैकस्मिन् षडेतेऽपसदाः स्मृताः ॥*
क्षत्रियाद्विप्रकन्यायां सूतो भवति जातितः ।
वैश्यात्त्वागधवैदेहौ राजविप्राङ्गनासुतौ ॥
शूद्रादयोगवः क्षत्ता चण्डालश्चाधमो नृणाम् ।
वैश्यराजन्यविप्रासु जायन्ते वर्णसङ्कराः ॥
एकान्तरे त्वानुलोम्यादम्बष्ठोग्रौ यथा स्मृतौ ।
क्षत्तृवैदेहकौ तद्वत् प्रातिलोम्येऽपि तज्जनि ॥*॥
पुत्रा येऽनन्तरस्त्रीणाः क्रमेणोक्ता द्विजन्मनाम् ।
तानन्तरास्तु मातृदोषात् प्रचक्षते ॥
ब्राह्मणादुग्रकन्यायामावृतो नाम जायते ।
आभीरोऽम्बष्ठकन्यायामायोगव्यान्तु धिग्वणः ॥
आयोगवश्च क्षत्ता च चण्डालश्चाधमो नृणाम् ।
प्रातिलोम्येन जायन्ते शूद्रादपसदास्त्रयः ॥
वैश्यान्मागधवैदेहौ क्षत्रियात् क्षत्त एव तु ।
प्रतीपमेते जायन्ते परेऽप्यपसदास्त्रयः ॥
जातो निषादाच्छूद्रायां जात्या भवति पुक्कसः ।
शूद्राच्जातो निषाद्यान्तु स वै कुक्कुटकः स्मृतः ॥
क्षत्तुर्जातस्त्वयोग्यायां श्वपाक इति कीर्त्यते ।
वैदेहकेन त्वम्बष्ठ्यामुत्पन्नो वेण उच्यते ॥
द्विजातयः सवर्णासु जनयन्त्यव्रतांस्तु यान् ।
तान् सावित्रीपरिभ्रष्टान् व्रात्या इति विनिर्द्दिशेत् ॥
व्रात्यात्तु जायते विप्रात् पापात्मा भूर्जकण्टकः ।
आवन्त्यवाटधानौ च पुष्पधः शैख एव च ॥
झल्लो मल्लश्च राजन्यात् व्रात्यान्निच्छिविरेव च ।
नटश्च करणश्चैव खशो द्रविड़ एव च ॥
वैश्यात्तु जायते व्रात्यात् सुधन्वाचार्य्य एव च ।
कारुषश्च विजन्मा च मैत्रः सात्वत एव च ॥
अभिचारेण वर्णानामवेद्यावेदनेन च ।
स्वकर्म्मणाञ्च त्यागेन जायन्ते वर्णसङ्कराः ॥*॥
सङ्कीर्णयोनयो ये तु प्रतिलोमानुलोमजाः ।
अन्योन्यव्यतिषक्ताश्च तान् प्रवक्ष्याम्यशेषतः ॥
सूतो वैदेहकश्चैव चण्डालश्च नराधमः ।
मागधः क्षत्तृजातिश्च तथायोगव एव च ॥
एते षट् सदृशान् वर्णान् जनयन्ति स्वयोनिषु ।
मातृजात्यां प्रसूयन्ते प्रवरासु च योनिषु ॥
यथा त्रयाणां वर्णानां द्वयोरात्मास्य जायते ।
आनन्तर्य्यात् स्वयोन्यान्तु तथा बाह्येष्वपि क्रमात् ॥
ते चापि बाह्यान् सुबहून् ततोऽप्यधिकदूषितान् ।
परस्परस्य दारेषु जनयन्ति विगर्हितान् ॥*॥
यथैव शूद्रो ब्राह्मण्यां बाह्यं जन्तुं प्रसूयते ॥
तथा बाह्यतरं बाह्यश्चातुवर्ण्ये प्रसूयते ।
प्रतिकूलं वर्त्तमाना बाह्याबाह्यतरान् पुनः ।
हीना हीनान् प्रसूयन्ते वर्णान् पञ्चदशैव तु ॥
प्रसाधनोपचारज्ञमदासं दासजीवनम् ।
सैरिन्ध्रं वागुराबृत्तिं सूते दस्युरयोगवे ॥
मैत्रेयकन्तु वैदेहो माधूकं संप्रसूयते ।
नृन् प्रशंसत्यजस्रं यो घण्टाताड़ोऽरुणोदये ॥
निषादो मार्गवं सूते दासं नौकर्म्मजीविनम् ।
कैवर्त्तमिति यं प्राहुरार्य्यावर्त्तनिवासिनः ॥
सूतवज्जघन्यासु नारीषु गर्हितानाशनासु च ।
भवन्त्ययोगवीष्वेते जातिहीनाः पृथक्त्रयः ॥
कारावरो निषादात्तु चर्म्मकारः प्रसूयते ।
वैदेहकादन्ध्रमेदौ बहिर्ग्रामप्रतिश्रयौ ॥
चण्डालात् पाण्डुसोपाकक्षत्तृसारथ्यवहारवान् ।
आहिण्डिको निषादेन वैदेह्यामेव जायते ॥
चण्डालेन तु सोपाको मूलव्यसनवृत्तिमान् ।
पुक्कस्यां जायते पापः सदा सज्जनगर्हितः ॥
निषादस्त्री तु चण्डालात् पुक्कसमन्त्यावसायिनम् ।
म्लेच्छानार्य्योचरं सूते बाह्यानामपि गर्हितम् ॥
सङ्करे जातयस्त्वेता: पित्तमातृप्रदर्शिताः ।
प्रच्छन्ना वा प्रकाशा वा वेदितव्याः स्वकर्म्मभिः ॥
स्वजातिजानन्तरजाः षट्सु ता द्विजधर्म्मिणः ।
शूद्रागास्तु सधर्म्माणः सर्व्वेऽपध्वंसजाः स्मृताः ॥
तपोबीजप्रभावैस्तु ते गच्छन्ति युगे युगे ।
उत्कर्षञ्चापकर्षञ्च मनुष्येष्विह जन्मतः ॥
शनकैस्तु क्रियालोपादिमाः क्षत्रियजातयः ।
वृषलत्वं गता लोके ब्राह्मणादर्शनेन च ॥
पौण्ड्रकाश्चोड्रद्रविड़ाः काम्बोजा यवनाः शकाः ।
पारदाः पह्लवाश्चीनाः किराताः दरदाः खशाः ॥
मुखबाहूरुपज्जानां या लोके जातयो बहिः ।
म्लेच्छवाचश्चार्य्यवाचः सर्व्वे ते दस्यवः स्मृताः ॥
ये द्विजानामपसदा ये चाप्यध्वंसजाः स्मृताः ।
ते निन्दितैर्वर्त्तयेयुर्द्विजानामेव कर्म्मभिः ॥*॥
सूतानामश्वसारथ्यमम्बष्ठानां चिकित्सितम् ।
वैदेहकानां स्त्रीकार्य्यं मागधानां वणिक्पथः ॥
मत्स्यघातो निषादानां तन्निर्ह्लायोगवस्य च ।
मेदान्ध्रयुक्षुमद्गूनामारण्यपशुहिंसनम् ॥
क्षत्तृगपुक्कसानान्तु विलौकोवधबन्धनम् ।
धिग्वणानां चर्म्मकार्य्यं वेणानां भाण्डवाद्यनम् ॥
चैत्यद्रुमश्मशानेषु शैलेषूपवनेषु च ।
वसेयुरेते विज्ञाता वर्त्तयन्तः स्वकर्म्मभिः ॥ * ॥
चण्डालश्वपचानान्तु बहिर्ग्रामात् प्रतिश्रयः ।
अपपात्राश्च कर्त्तव्या धनमेषां श्वगर्दभम् ॥
वासांसि मृतचेलानि भिन्नभाण्डेषु भोजनम् ।
कार्ष्णायसमलङ्कारः परिव्रज्या च नित्यशः ॥
न तैः समयमन्विच्छेत् पुरुषो धर्म्ममाचरन् ।
व्यवहारो मिथस्तेषां विवाहः सदृशैः सह ॥
अन्नमेषां पराधीनं देयं स्याद्भिन्नभाजने ।
रात्रौ न विचरेयुस्ते ग्रामेषु नगरेषु च ॥
दिवा चरेयुः कार्य्यार्थं चिह्निता राजशासनैः ।
अबान्धवं शवञ्चैव निर्हरेयुरिति स्थितिः ॥
वध्यांश्च हन्युः सततं यथाशास्त्रं नृपाज्ञया ।
वध्यवासांसि गृह्णीयुः शस्याच्चाभरणानि च ॥
वर्णापेतमविज्ञातं नरं कलुषयोनिजम् ।
आर्य्यरूपमिवानार्य्यं कर्म्मभिः स्वैर्विभावयेत् ॥
अनार्य्यतानिष्ठुरताक्रूरतानिष्क्रियात्मताः ।
पुरुषं व्यञ्जयन्तीह लोके कलुषयोनिजम् ॥
पित्र्यं वा भजते शीलं मातुर्वोभयमेव वा ।
न कथञ्चनदुर्य्योनिः प्रकृतिं स्वां नियच्छति ॥
कुले मुख्येऽपि जातस्य यस्य स्यादयोनिसङ्करः ।
संश्रयत्येव तच्छीलं नरोऽल्पमपि वा बहु ॥
यत्र त्वेतेऽपिध्वंसा जायन्ते वर्णदूषकाः ।
राष्ट्रिकैः सह तद्राष्ट्रं क्षिप्रमेव विनश्यति ॥
ब्राह्मणार्थे गवार्थे वा देहत्यागोऽनुपस्कृतः ।
स्त्रीबालाभ्युपपत्तौ च बाह्यानां सिद्धिकारणम् ॥
अहिंसा सत्यमस्तेयं शौचमिन्द्रियनिग्रहः ।
एतं सामासिकं धर्म्मं चातुर्व्वर्ण्येऽब्रवीन्मनुः ॥*॥
शूद्रायां ब्राह्मणाज्जातः श्रेयसा चेत् प्रजायते ।
अश्रेयान् श्रेयसीं जातिं गच्छत्यासप्तमादयुगात् ॥
शूद्रो ब्राह्मणतामेति ब्राह्मणश्चेति शूद्रताम् ।

वर्णाधि

क्षत्रियाज्जातमेवन्तु विद्याद्वैश्यात्तथैव च ॥
अनार्य्यायां समुत्पन्नो ब्राह्मणात्तु यदृच्छया ।
ब्राह्मण्यामप्यनार्य्यात्तु श्रेयस्त्वं क्रमेति चेद्भवेत् ॥
जातो नार्य्यामनार्य्यायामार्य्यादार्य्यां भवेद्-
गुणैः ।
जातोऽप्यनार्य्यादार्य्यायामनार्य्य इति निश्चयः ॥
तावुभावप्यसंस्कार्य्याविति धर्म्मो व्यवस्थितः ।
वैगुण्याज्जन्मनः पूर्व्व उत्तरः प्रतिलोमतः ॥
सुबीजक्षेत्र सुक्षेत्रे जातं सम्पद्यते यथा ।
तथार्य्याज्जात आर्य्यायां सर्व्वं संस्कारमर्हति ॥
बीजमेके प्रशंसन्ति क्षेत्रमन्ये मनीषिणः ।
बीजक्षेत्रे तथैवान्ये तत्रेयन्तु व्यवस्थितिः ॥
अक्षेत्रे बीजसुत्सृष्टमन्तरैव विनश्यति ।
अबीजकमपि क्षेत्रं केवलं स्थण्डिलं भवेत् ॥
यस्माद्बीजप्रभावेण तिर्य्यग्जा ऋषयोऽभवन् ।
पूजिताश्च प्रशस्ताश्च तस्माद्बीजं प्रशस्यते ॥
अनार्य्यमार्य्यकर्म्माणमार्य्यानार्य्यकर्म्मिणम् ।
सम्यग्धार्य्यात्रवीद्धाता न समौ नासमाविति ॥"
इति मानवे ९ । १० अध्यायौ ॥ * ॥

वर्णसङ्करस्य कारणं दोषाश्च यथा,—
"अधर्म्माभिभवात् कृष्ण प्रदुष्यन्ति कुलस्त्रियः ।
स्त्रीषु दुष्टासु वार्ष्णेय जायते वर्णसङ्करः ॥
सङ्करो नरकायैव कुलघ्नानां कुलस्य च ।
पतन्ति पितरो ह्येषां लुप्तपिण्डोदकक्रियाः ॥
दोषैरेतैः कुलघ्नानां वर्णसङ्करकारकैः ।
उत्साद्यन्ते जातिधर्म्माः कुलधर्म्माश्च शाश्वताः ॥
उत्सन्नकुलधर्म्माणां मनुष्याणां जनार्द्दन ! ।
नरके नियतं वासो भवतीत्यनुशुश्रुम ॥"
इति श्रीभगवद्गीतायाम् १ अध्यायः ॥

वर्णसिः, पुं, (वृणोति स्वलमिति । वृञ आवरणे + "सावसिवर्णसिपर्णसीति ।" उणा० ४ । १०७ । इति असिः धातोर्नुक् च ।) खड्गम् । इत्युणादि-कोषः ॥

वर्णा, स्त्री, (वृण्यते भक्ष्यते इति । वृञ भक्षणे + कर्म्मणि घञ् । ततष्टाप् ।) आढकी । इति हेमचन्द्रः ॥

वर्णाङ्का, स्त्री, (वर्णा अङ्क्यन्तेऽनयेति । अङ्क + करणे घञ् । ततष्टाप् ।) लेखनी । इति शब्दरत्नावली ॥

वर्णाटः, पुं, (वर्णान् अटतीति । अट् + अच् ।) मायनः । चित्रकरः । स्त्रीक्षतजीवनः । इति मेदिनी । टे, ५५ ॥

वर्णात्मा, [त्मन्] पुं, (वर्णः अक्षरं आत्मा स्वरूपं यस्य ।) शब्दः । इति जटाधरः ॥

वर्णाधिपः, पुं, (वर्णानां ब्राह्मणादीनामधिपः ।) ब्राह्मणक्षत्रियवैश्यशूद्राणामधिपतियहः । यथा,
"ब्राह्मणे शुक्रवागीशौ क्षत्रिये भौमभास्करौ ।
चन्द्रो वैश्ये बुधः शूद्रे पतिर्म्लेच्छेऽन्त्यजे शनैः ॥"
इति ॥
"खाध्याये वेद वर्णाधिप इह सुभदे चौरमे
नादितौ च ।"
इति च ज्योतिश्शास्त्रम् ॥

वर्णी

वर्णार्हः, पुं, (वर्णमर्हतीति । अर्ह + अण् ।) शुक्रः ।
इति राजनिर्घण्टः ॥

वर्णि, क्ली, (वर्ण्यते स्तूयते इति । वर्ण स्तुतौ + इन् ।) स्वर्णम् । इति सिद्धान्तकौमुदी ॥ ("वर्णेर्वलिश्चाहिरण्ये ।" उणा० ४।१२३। इत्युक्तेः अहिरण्ये तु वलिरित्येव ॥ क्वचित् पुंलिङ्गोऽपि ॥)

वर्णिकः, पुं, (वर्णा लेखत्वेन सन्ति अस्येति । वर्ण + ठन् ।) लेखकः । यथा,—
"लेखकेऽक्षरपूर्व्वाः स्युश्चणजवौकचक्षवः ।
वर्णिको लिपिकरश्चाक्षरन्यासे लिपिर्लिखिः ॥"
इति हेमचन्द्रः । ३ । १४८ ॥

वर्णिका, स्त्री, (वर्णा अक्षराणि लेखत्वेन सन्त्यस्या इति । वर्ण + ठन् + टाप् ।) कठिनी । यथा,—
"लेखन्यां वर्णिकापि स्यात् कठिन्यामपि
वर्णिका ॥"
इति शब्दरत्नावली । २६९ ॥
मसिः । इति त्रिकाण्डशेषः ॥ काञ्चनस्य उत्-कर्षः । यथा,—
"वर्णकाक्षारयोः स्त्री तु चन्दने च विलेपने ।
द्वयोर्गौल्यादिषु स्त्री स्यादुत्कर्षे काञ्चनस्य च ॥"
इति मेदिनी । णे, १५२ ॥

वर्णितः, त्रि, (वर्ण + क्त ।) स्तुतियुक्तः । तत्-पर्य्यायः । ईलितः २ शस्तः ३ प्रणायितः ४ प्रनायितः ५ प्रशुतः ६ पणितः ७ पनितः ८ गीर्णः ९ अभिष्टुतः १० ईड्तः ११ स्तुतः १२ । इत्यमरः । ३ । २ । ११० ॥ श्रुतः १३ । इति जटाधरः ॥ (विस्तारितः । यथा, महाभारते । १ । २ । २०९ ।
"चतुर्थमेतद्विपुलं वेदाटं पर्व्व वर्णितम् ॥"
कथितः । यथा, कथासरित्सागरे । १९ । ३९ ।
"क्षमस्तुल्यश्च न मया दरिद्रस्यापि वर्णितम् ॥")

वर्णिनी, स्त्री, (वर्णोऽस्त्यस्या इति । वर्ण + इनिः । ङीप् ।) हरिद्रा । इति राजनिर्घण्टः ॥ वनिता । इति हेमचन्द्रः । ३ । १५८ ॥

वर्णी, [न्] पुं, (वर्णा अक्षराणि लेखत्वेन सन्त्यस्येति । वर्ण + इनिः ।) लेखकः । (वर्णा नील पीतादयः लेखत्वेन सन्त्यस्येति । इनिः ।) चित्र-करः । (यथा, महाभारते । १२ । ६९ । ५७ ।
"अङ्गारकुथसुङ्गानां पलाशपुरवर्त्तिनाम् ।
यवसेन्धनदिग्धानां कारयेत च सञ्चयान् ॥"* ॥
वर्ण + "वर्णादनुदात्तोपधात्तो नः ।" ५ । २ । १३४ ॥
इति इनिः ।) ब्रह्मचारी । यथा,—
"वर्णी स्यात् लेखके चित्रकरेऽपि ब्रह्म-
चारिणि ।"
इति मेदिनी । णे, १२७ ॥
(यथा, कुमारे । ५ । ५२ ।
"सखी तदीया तमुवाच वर्णिनं
निबोध साधो ! तव चेत् कुतूहलम् ॥")

वर्णविशिष्टे, त्रि । (वर्णोत्तरपदात् तु "धर्म्मशील-वर्णान्नात्र ।" ५ । २ । १३२ । इति इनिः स्यात्। यथा, कामन्दकीये नीतिसारे । २ । १९ ।
"याजनाध्यापने शुद्धे विशुद्धात्र प्रतिग्रहः ।

वर्त्तनी

वृत्तित्रयमिदं प्राहुर्मुनयो ज्येष्ठवर्णिनः ॥"
ज्येष्ठवर्णिनो ब्राह्मणस्येत्यर्थः ॥)

वर्णुः, पुं, (वृङ संभक्तौ + "अजिवृरीभ्यो निच ।" उणा० ३ । ३८ । इति णुः । स च नित् ।) नदविशेषः । इत्युणादिकोषः ॥ आदित्यः । इति संक्षिप्तसारोणादिवृत्तिः ॥ (देशविशेषः । इत्युज्ज्वलदत्तः ॥)

वर्त्तकं, क्ली, (वर्त्तते इति । वृत् + ण्वुल् ।) वर्त्त-लोहम् । इति हेमचन्द्रः ॥ विदरि इति भाषा ॥ (पूजके, त्रि । यथा, गो० रामायणे । २ । १०७ । १२ ।
"निवेश्य सेनां भरतः पद्भ्यां पादवतां वरः ।
अभिगन्तुं स काकुत्स्थमियेष गुरुवर्त्तकः ॥")

वर्त्तकः, पुं, (वृत् + ण्वुल् ।) पक्षिविशेषः । भारट इति भाषा ॥ (यथा, महाभारते । १३ । १११ । १०३ ।
"कौशिकस्तु ततो भूत्वा नरो जायति वर्त्तकः ॥"
अस्य पर्य्यायो गुणाश्च यथा,—
"वर्त्तको वर्त्तकश्चित्रवर्त्ततोऽन्या वर्त्तकाः स्मृताः ।
वर्त्तकोऽग्निकरः पित्तो ज्वरदोषत्रयापहः ।
सुरूक्ष्यः शुक्रदो बल्यो वर्त्तकाख्यगुणास्ततः ॥"
इति भावप्रकाशस्य पूर्व्वखण्डे द्वितीये भागे ॥)
अन्नस्य क्षुरः । इत्यमरः । ३ । ६ । ११ ॥

वर्त्तका, स्त्री, (वर्त्तक + टाप् । "वर्त्तका शकुनौ प्राचाम् ।" इति वार्त्तिकोक्त्या न अत इत्वम् ।) वर्त्तकपक्षी । इत्यमरटीकायां रायमुकुटः ॥

वर्त्तजन्मा, [न्] पुं, (वर्त्तनि आकाशप्रथे जन्म यस्य ।) मेघः । इति शब्दमाला ॥

वर्त्तनं, क्ली, (वर्त्ततेऽनेनेति । वृत् + करणे ल्युट् ।) वृत्तिः । इत्यमरः । २ । ६ । १ ॥ (यथा, भाग-वते । ७ । ११ । २६ ।
"सम्मार्ज्जनोपलेपाभ्यां गृहमज्जनवर्त्तनैः ।
स्वयञ्च मज्जिता नित्यं परिङ्कृतपरिच्छदा ॥")
साधारण्यवर्त्तनम् । इति शब्दरत्नावली ॥

वर्त्तनं, क्ली खौ, (वर्त्ततेऽनेनेति । वृत् + ल्युट् ।) तूलनाडी । तकुपीठः । जीवनम् । इति मेदिनी । ने, १२६ ॥ (यथा, मार्कण्डेये ।५०।७१।
"देवतापितृमन्त्राणामतिथीनाञ्च वर्त्तनम् ।
यस्यावघ्रियते नास्ये पुंसस्तस्य गृहं व्रज ॥")

वर्त्तनः, पुं, (वर्त्तते इति । वृत् + "अशुदाक्षेतश्च हशादेः ।" ३ । २ । १४६ । इति युच् ।) वामनः । इति मेदिनी । ने, १२५ ॥ वर्त्तिनी, त्रि । इत्यमरः । ३ । १ । २६ ॥ (यथा, भाग-वते । ३ । १२ । २६ ।
"एष देवर्षिभिः सर्गो ब्राह्मणैर्लोकवर्त्तनः ।
तिर्य्यक्सृपिदेवानां सम्भवो यत्र कर्म्मभिः ॥")

वर्त्तनिः, पुं, पूर्व्वदेशः । इति त्रिकाण्डशेषः ॥ (स्त्री, वर्त्ततेऽनयेति । वृत् + "वृतेश्च ।" उणा० २ । १०७ । इति अनिः । पन्थाः । इत्युज्ज्व-लदत्तः ॥)

वर्त्तनी, स्त्री, (वर्त्तनि + ऋदिकारादिति पक्षे ङीष् ।) पन्थाः । मेषशृङ्गम् । इति शब्दरत्नावली ॥

वर्त्तमानः, पुं, (वर्त्तते इति। वृत्+शानच्। सुक्।) प्रयोगाधिकरणीभूतकालः। इति नैयायिकाः॥ तत्कालवृत्ते, त्रि। तयोः पर्य्यायौ। अद्यतनः २ अधुनातनः ३। इति राजनिर्घण्टः॥ वैयाकरणमते तु। आरब्धापरिसमाप्तिर्व्वर्त्तमानः कालः। यथा। महाभारतं पठति। स तु चतुर्विधः। यथा,—

"प्रवृत्तोपरतश्चैव वृत्तावित्त एव च।
नित्यप्रवृत्तः सामीप्यो वर्त्तमानश्चतुर्विधः॥"

क्रमेणोदाहरणानि। मांसं न खादति आदौ प्रवृत्तं मांसभोजनं निवर्त्तयति इत्यर्थः। इह कुमाराः क्रीड़न्ति तद्दानीन्तनक्रीड़नाभावेऽपि पूर्व्वक्रीड़ानां बुद्धौ वर्त्तमानत्वात्। पर्व्वतास्तिष्ठन्ति नित्यप्रवृत्तत्वात्। किञ्च पर्व्वतानां स्थितत्वे वर्त्तमानत्वेऽपि भूतभविष्यत्कालाभ्यां सम्बन्धविवक्षया पर्व्वतास्तस्थुः स्थास्यन्ति इत्यपि स्यात्। सामीप्यो द्विविधः। भूतसामीप्यो भविष्यत्सामीप्यश्च। भूतसामीप्ये यथा। कदा आगतोऽसि इति प्रश्ने अध्वखेदादेर्व्वर्त्तमानत्वात् एषोऽहमागच्छामि इति आगतोऽपि वदति। भविष्यत् सामीप्ये यथा। कदा गमिष्यसि इति प्रश्ने एषोऽहं गच्छामि इति गमनक्रियमाणोद्यमोऽपि वदति। इति सुग्धबोधटीकायां दुर्गादासः॥

वर्षरूकः, पुं, (वर्षां वर्षनं राति गृह्णातीति। रा+बाहुलकात् ऊकः।) नदीभेदः। काकनीड़ः। जलावटः। इति मेदिनी। के, २१२॥ द्वारपालः। यथा,—

"मल्ली गन्धिहरोऽमात्यो द्वाःस्थितो वेत्रधारकः।
दौःसाधिको वर्षरूको गर्व्वाटो दण्डवासिनि॥"

इति चिकाण्डशेषः॥

वर्षलोहं, क्ली, (वर्षते इति। वृष्+अच्। ततः कर्म्मधारयः।) लौहविशेषः। विदूरि इति भाषा। इति केचित्॥ तत्पर्य्यायः। वर्षतीक्ष्णम् २ वर्षकम् ३ लोहसङ्करम् ४ नीलकम् ५ नीललोहम् ६ नीलजम् ७ वर्षलोहकम् ८। अस्य गुणाः। कटुत्वम्। तिक्तत्वम्। अग्निग्निरत्वम्। कफदाहपित्तनाशित्वम्। मधुरत्वम्। पित्तदाहश्रमनत्वञ्च। इति राजनिर्घण्टः॥

वर्षिः, स्त्री, (वर्षतेऽनया इति। वृष्+"कृपिवितृहिवृतिविदिच्छिदिकौर्त्तिभ्यश्च।" उणा० ४। ११८। इति इन्।) भेषजनिर्म्माणम्। नयनाञ्जनम्। लेखः। गात्रानुलेपनी। दीपदशा। (यथा, भागवते। ५। ११। ८।

"यथा प्रदीपो घृतवर्त्तिमश्नन्
शिखाः सधूमा भजति ह्यन्यदा स्वम्॥")

दीपः। इति मेदिनी। र्त्ते, ५५॥ * ॥ वर्त्तिविशेषो यथा,—

"कतकस्य फलं ग्रन्थिः सैन्धवं चाग्निजं वचा।
मेषशृङ्गरसाञ्जनं चौद्रं विड़ङ्गानि मनःशिला।
एषां वर्त्तिर्हन्ति कासं तिमिरं पटलं तथा॥"

इति गारुड़े १९८ अध्यायः॥

(वर्त्ततेऽनयेति। वृत्+"वृतेश्चन्दसि।" उणा० ४। १४०। इति इः। बाहुलकात् लोकेऽपि। योगकर्म्मद्वयम्। इत्युज्ज्वलदत्तः॥)

वर्त्तिकः, पुं, पक्षिविशेषः। वटेर इति हिन्दी भाषा। तत्पर्य्यायः। वार्त्तिकः २ वर्त्ती ३ गाङ्गिकायः ४। अस्य मांसगुणाः।

"तद्वच्च वार्त्तकं मांसं निर्द्दोषं वीर्य्यपुष्टिदम्।"

तद्वत् तित्तिरवत्। इति राजनिर्घण्टः॥

वर्त्तिका, स्त्री, वर्त्तकपक्षी। इत्यमरः॥ वर्त्मनि वर्त्तत इत्यच् वर्त्मः। स्वार्थे कः वर्त्मकः। भारद इति ख्यातः। वृतिखतिभ्यां तिकः वर्त्तिका स्त्रीलिङ्गा। वाट्भार इति ख्याता। नामद्वयमित्यमरदीपिका। वर्त्तिकेति स्त्रियामीत्वप्रतिषेधार्थं द्वयोरुपादानमिति माधवी। रूपभेदप्रदर्शनार्थमिति रायमुकुटः। इति तट्टीका सारसुन्दरी॥ सा च वटेर पक्षी इति नाम्ना ख्याता। अस्या मांसगुणाः।

"वर्त्तिका मधुरा रूक्षा कफमारुतनाशिनी॥"

इति राजवल्लभः॥

अञ्जनद्रव्यं। इति राजनिर्घण्टः॥ (वर्त्ति+स्वार्थे कन्। टाप्।) वर्त्तिः। वाति इति गलिता इति पलिता इति च भाषा। इत्युणादिकोषः॥ * ॥ सा पञ्चविधा। यथा,—

"पद्मसूत्रभवा दर्भगर्भसूत्रभवाथवा।
शालजा वादरी वापि फलकोषोद्भवाथवा।
वर्त्तिका दीपकृत्येषु सदा पञ्चविधा स्मृता॥"

इति कालिकापुराणे ६८ अध्यायः॥

वर्त्तिष्णुः, त्रि, (वर्त्तते इति। वृत्+"अलञ्जिराक्षिप्रजनोत्पचोत्पतष्णुदरुष्णुपत्रपद्दतुदृधुसहचर इष्णुच्।" ३। २। १३६। इति इष्णुच्।) वर्त्तनशीलः। तत्पर्य्यायः। वर्त्तनः। इत्यमरः। ३। १। २६॥ वर्त्ती। इति हेमचन्द्रः। ३। ५३॥ (यथा, भट्टौ। ५। १।

"निराकरिष्णू वर्त्तिष्णू वर्द्धिष्णू परितो रयम्।
उत्पतिष्णू वहिष्णू च पेरतुः खरदूषणौ॥")

वर्त्तिष्यमाणः, त्रि, (वृत्+भविष्यति स्यमानप्रत्ययः।) भविष्यत्कालादिः। वर्त्तमानप्रागभावाश्रयः। इति राजनिर्घण्टः॥ (यथा, साहित्यदर्पणे। ६। ३०८।

"वृत्तवर्त्तिष्यमाणानां कथांशानां निदर्शकः॥
संक्षिप्तार्थस्तु विष्कम्भ आदावङ्कस्य दर्शितः॥")

वर्त्ती, स्त्री, (वर्त्ति+ऋदिकारादिति ङीष्।) वर्त्तिः। इत्यमरटीका॥ (यथा, महाभारते। ४। २१। २३।

"आसीदभ्यधिका चास्य श्रीः श्रियं प्रसुसूचतः।
निर्व्वाणकाले दीपस्य वर्त्तीमिव दिधक्षतः॥")

वर्त्तृ, [तृ] (वर्त्तते इति। वृत्+णिनिः।) वर्त्तिष्णुः। इति हेमचन्द्रः। ३। ५३॥

वर्त्तुलं, त्रि, (वर्त्तते इति। वृत्+बाहुलकात् उलच्।) गोलवस्तु। तत्पर्य्यायः। निस्तलम् २ वृत्तम् ३। इत्यमरः। ३। १। ९६॥ मण्डलायितम् ४। इति शब्दरत्नावली॥ * ॥ (यथा, भागवते। ५। १६। ५।

"यो वा अयं द्वीपः कुवलयकमलकोशाभ्यन्तरनियुतयोजनविशालः समवर्त्तुलो यथा पुष्करपत्रम्॥") सम्पूर्णगर्भवृत्तानि यथा,—

"सम्पूर्णगर्भवृत्तानि सुखपद्मेन्दुदर्पणाः।
चक्रावर्त्तवृत्तिलकन्दरङ्गपुटगायकाः॥
आवर्त्तः कमठो लूतायन्त्रं छत्त्रमपूपकम्।
आलबालमहीजालचर्म्मकं गोलकादयः॥"*॥

वृत्तानि यथा,—

"वृत्तानि बाहुनारङ्गस्कन्धघण्टिल्लमोदकाः।
रथाङ्गलावककङ्कुत्कुम्भिकुम्भाब्जकादयः॥
कर्णपाशभुजापाशाक्षवापघटाननम्।
मुद्रिकापरिखायोगपट्टहारसरगादयः॥"

इति कविकल्पलतायाम् २ श्लेषस्तवके ३ कुसुमम्॥

वर्त्तुलं, क्ली, शङ्खनम्। इति राजनिर्घण्टः॥

वर्त्तुलः, पुं, कलायविशेषः। वाटुला। इति भाषा। यथा,—

"कलायस्य त्रयो भेदा क्षिपुटो वर्त्तुलोऽङ्कुटी।"

इति शब्दमाला॥

वर्त्तुला, स्त्री, (वर्त्तुल+टाप्।) तर्कुपाठी। इति हारावली। २१३॥ टेकोर वाँटुल इति भाषा॥

वर्त्तुली, स्त्री, (वर्त्तुल+गौरादित्वात् ङीष्।) गजपिप्पली। इति राजनिर्घण्टः॥ (विवरणमस्या गजपिप्पलीशब्दे ज्ञातव्यम्॥)

वर्त्म, [न्] क्ली, (वर्त्ततेऽनेनाक्षिन् वेति। वृत्+मनिन्।) पन्थाः। इत्यमरः। २। १। १५॥ (यथा, ऋग्वेदे। १। ८५। ३।

"गोमातरो यच्छुभयन्ते अङ्गैरि-
ष्टानूषु सुभ्रा दधिरे विरुक्मतः।
बाधन्ते विश्वमभिमातिनमप-
वर्त्मान्येषामनुरीयते घृतम्॥"

"वर्त्मानि मार्गानुरुह्य।' इति तद्भाष्ये सायणः॥ यथा च रघौ। २। २०।

"पुरस्कृता वर्त्मनि पार्थिवेन
प्रत्युद्गता पार्थिवधर्म्मपत्न्या।
तदन्तरे सा विरराज धेनु-
र्दिनक्षपामध्यगतेव सन्ध्या॥")

नेत्रच्छदः। इति मेदिनी। र्त्मे, १२८॥ (यथा, अश्ववैद्यके। २। १०।

"सितासितञ्च तन्मध्ये नेत्रयोर्म्मण्डलं हि तत्।
प्रच्छादनं भवेद् वर्त्म चास्त्रिकूटमतः परम्॥")

वर्त्मनिः, क्ली, (वर्त्तते इति। वृत्+"वृतेश्च" उणा० २। १०७। इति मनिः। चकारात् सुड़ागमोऽप्यत्रेति केचित्। वर्त्म निरिति गोवर्द्धनः। इत्युज्ज्वलदत्तोक्ता साधुः।) पन्थाः। इत्युणादिकोषः॥

वर्द्ध, क पूर्त्तिच्छिदोः। इति कविकल्पद्रुमः॥ (चुरा०-परo-सकo-सेट्।) क, वर्द्धयति। दृष्ट क दीप्तावित्यत्रैव पूर्त्तिच्छिदोश्च पाठादिहसिद्धा-

वस्य पाठबुरादिभ्यो णेरनित्यतां बोधयति। तेन कदाचित् णेरप्राप्तौ यगादौ वृध क इत्यस्य वृध्यते इत्यादि अस्य तु वर्द्धते इत्यादिभेदः। इति दुर्गादासः॥

वर्द्धं, क्ली, (वर्द्धयति पूरयतीति। वर्द्ध+अच्।) सीसकम्। इति हेमचन्द्रः। ४। १०६॥

वर्द्धः, पुं, (वर्द्धते इति। वृध् छेदने+अच्।) ब्राह्मणयष्टिका। इति जटाधरः॥ पूर्त्तिः। छेदः। इति वर्द्धधात्वर्थदर्शनात्॥

वर्द्धकः, पुं, (वर्द्धते इति। वृध्+ण्वुल्।) ब्राह्मणयष्टिका। इत्यमरः। २। ४। ६०॥ (वर्द्धयतीति। वर्द्ध पूरणे छेदने च+ण्वुल्।) पूरके छेदके च, त्रि॥

वर्द्धकिः, पुं, (वर्द्धते छिनत्तीति। वर्द्ध+अच्। वर्द्धं कषतीति। कष हिंसायां+वाहुलकात् डिः।) त्वष्टा। इत्यमरः। २। १०। ६॥ (यथा, रामायणे। १। १३। ७।

"कर्म्मान्तिकान् शिल्पकरान् वर्द्धकीन् खनकानपि।
गणकान् शिल्पिनश्चैव तथैव नटनर्त्तकान्॥")

वर्द्धकी, [न्] पुं, (वर्द्धको वर्द्धोऽस्ति अस्येति। वर्द्धक+इनि।) वर्णसङ्करजातिविशेषः। बढ़ई इति हिन्दी भाषा। तत्पर्य्यायः। त्वष्टा २ वर्द्धकिः ३ तक्षा ४ सूत्रधारः ५ रथकारः ६ रथकरः ७ काष्ठतट ८ काष्ठतक्षकः ९। इति शब्दरत्नावली॥ (यथा, वृहत्संहितायाम्। ४३। २२।

"अरभङ्गे बलमेदो
मेन्द्रा नाशो बलस्य विज्ञेयः।
अर्थक्षयोऽग्निभङ्गे
तथाग्निभङ्गे च वर्द्धकिनः॥")

वर्द्धनं, क्ली, (वृध् छेदपूर्त्त्योः+ल्युट्।) छेदनम्। (यथा, मनुः। २। २६।

"प्राङ्नाभिवर्द्धनात् पुंसो जातकर्म्म विधीयते॥")

वृद्धिः। इति मेदिनी। ने, १२३॥

वर्द्धनः, त्रि, (वर्द्धयतीति। वृध्+नन्द्यादित्वात् ल्युः। यद्वा, वर्द्धते तच्छील इति। वृध् पूर्त्तौ+"अदृदर्शतत्रेति।" ३। २। १४६। इति युच्।) वर्द्धिष्णुः। इत्यमरः। ३। १। २८॥ (यथा, ऋग्वेदे। १। ३२। १२।

"यज्ञो हि त इन्द्र वर्द्धनो भूदुत प्रियः सुतसोमो मियेधः॥")

वर्द्धनी, स्त्री, घटी। इति मेदिनी। ने, १२३॥ संमार्জ্জनी। इति हेमचन्द्रः। ४। ८२॥ खनालपात्रविशेषः। बदना इति भाषा। यथा,

"आसुः स्त्री कर्करी पारी वर्द्धनी च खलन्तिका॥"

इति जटाधरः॥ *॥

प्रतिष्ठादिकर्म्मणि तत्प्रयोजनं यथा,—

"प्रतिष्ठा यस्य देवस्य तदाख्यं कलसं न्यसेत्।
ऐशान्यां पूजयेद्दाम्ये अस्त्रेणैव च वर्द्धनीम्॥
कलसं वर्द्धनीञ्चैव गन्धान् वास्तोष्पतिं तथा।
आसने तानि सर्व्वाणि प्रणवाद्यं जपेद्गुरुः॥
सूत्रग्रीवं रत्नगर्भं वस्त्रयुग्मेन वेष्टितम्।
सर्व्वौषधीगन्धसिद्धं पूजयेत् कलसं गुरुः॥
देवन्तु कलसे पूज्य वर्द्धन्या वस्त्रमुत्तमम्।
वर्द्धन्या तु समायुक्तं कलसं भ्रामयेद्गुरुः॥
वर्द्धनीं धारया सिञ्चन्नयतो धारयेत्ततः।
अभ्यर्च्य वर्द्धनीकुम्भं खस्तिके देवमर्च्चयेत्॥"

इति गारुड़े ४८ अध्यायः॥

वर्द्धमानः, पुं, (वर्धते इति। वृध वृद्धौ+शानच्।) शरावः। इत्यमरः। २। ४। ५१॥ (अस्य पर्य्यायो यथा,—

"शुक्ल शरावः आमत्रकुक्षिश्चो गन्धर्व्वहस्तकः।
पक्वाङ्गुलो वर्द्धमानो दीर्घदण्डोऽप्यरक्तकः।
वातारिस्तरुणश्चापि शरावश्च निगद्यते॥"

इति भावप्रकाशस्य पूर्ब्बखण्डे प्रथमे भागे॥) पशुभेदः। शरावः। (यथा, महाभारते। ७। ८०। १६।

"तथा गाः कपिला दोग्ध्रीः सवत्साः पाण्डुनन्दनः।
हेमशृङ्गी रूप्यखुरा दत्वा चक्रे प्रदक्षिणम्।
स्वस्तिकान् वर्द्धमानांश्च नन्द्यावर्त्तांश्च काञ्चनान्॥"

अस्मिन्नर्थे स्त्रीलिङ्गेऽपि दृश्यते। यथा, तत्रैव। १३। ६४। १२।

"मघासु तिलपूर्णानि वर्द्धमानानि मानवः।
प्रदाय पुत्रपशुमानिह प्रेत्य च मोदते॥"

तथा च सुश्रुते सूत्रस्थाने २६ अध्याये।

"स्त्री पुत्रिणी सवत्सा गौर्वर्द्धमानमखण्डिता।
कन्या मत्स्याः पयः पायसं खस्तिकं मोदका दधि॥")

विष्णुः। इति मेदिनी। ने, २०८॥ (यथा, महाभारते। १३। १४६। ४१।

"वर्द्धनो वर्द्धमानश्च विविक्तः श्रुतिसागरः॥")

जिनविशेषः। तत्पर्य्यायः। वीरः २ चरमतीर्थङ्करः ३ महावीरः ४ देवार्य्यः ५ ज्ञातनन्दनः ६। इति हेमचन्द्रः। १। ३०॥ धनिनां ग्रन्थविशेषः। यथा,—

"खस्तिको वर्द्धमानश्च नन्द्यावर्त्तादयोऽपि च॥"

इति त्रिकाण्डशेषः॥

(यथा, वृहत्संहितायाम्। ५३। ३३।

"द्वारालिन्दोऽग्नगतः प्रदक्षिणोऽन्यः शुभस्तत्र वास्यः।
तद्वच्च वर्द्धमाने द्वारन्तु न दक्षिणं कार्य्यम्॥")

स्वनामख्यातदेशः। यथा,—

"प्राच्यां मागधगौडौ च वारेन्द्रीगौड़राढ़काः।
वर्द्धमानतमोलिप्तप्राग्ज्योतिषोदयाद्रयः॥"

इति ज्योतिस्तत्त्वे कूर्म्मचक्रम्॥

(भद्राश्ववर्षस्थ कुलपर्व्वतविशेषः। यथा, मार्कण्डेये। ५६। १२।

"विशालः कनकः शाल्मो जलदो वरिपर्व्वतः।
विप्रोको वर्द्धमानश्च सप्तैते कुलपर्व्वताः॥"

वृद्धिविशिष्टे, त्रि॥)

वर्द्धमानकः, त्रि, (वर्द्धमान+स्वार्थे संज्ञायां वा कन्।) वृद्धिविशिष्टः। पुं, शरावः। इत्यमरः। २। ४। ५२॥ (यथा, महाभारते। १४। ६५। १४।

"भृङ्गाराणि कटाहानि कलसान् वर्द्धमानकान्॥")

स्वार्थे कप्रत्यये शरावश्च॥ (आरात्रिकम्। इति महाभारतटीकायां नीलकण्ठः॥ यथा, महाभारते। ७। ५५। ४।

"नटनर्त्तकगन्धर्व्वैः पूर्णकैर्व्वर्द्धमानकैः।
नित्योद्योगेश्च क्रीड़द्भिस्तत्र स्म परिहर्षिताः॥")

वर्द्धापनं, क्ली, नाड़ीच्छेदनम्। यथा,—

"अर्द्धरात्रे वसोर्धारां पातयेद्गुरुसन्निधौ।
ततो वर्द्धापनं षष्ठीं मामादेः करणं मम॥
कर्त्तव्यं तत्त्वयाप्राज्ञौ प्रभाते नवमीदिने।
यथा मम तथा कार्य्यो भगवत्या महोत्सवः॥"

वर्द्धापनं नाड़ीच्छेदनम्। इति तिथ्यादितत्त्वम्।

वर्द्धितं, त्रि, (वृध्+क्तः।) प्रवृत्तम्। छिन्नम्॥ पूरितम्। इति मेदिनी। ते, १४८॥ (परिपूर्णम्। यथा, मनुः। ३। २२४।

"पाणिभ्यान्नूपसंगृह्य स्वयमन्नस्य वर्द्धितम्।
विप्राणिके पितॄन् ध्यायन् प्रेतकेरूपनिक्षिपेत्॥"

"अन्नस्येति षष्ठीयार्थे षष्ठी। वर्द्धितं पूर्णं पिष्टादिपात्रम्।" इति तट्टीकायां कुल्लूकभट्टः॥ वृध+णिच्+क्तः। वृद्धिं प्रापितम्। यथा, भागवते। ४। २३। १।

"वृद्धात्मानं प्रवयसमेकदा वैद्यं आत्मवान्।
आत्मना वर्द्धितार्हेयखानुसर्गः प्रजापतिः॥")

वर्द्धिष्णुः, त्रि, (वर्द्धते इति। वृध+"अलर्त्तृजिति।" ३। २। १३६। इति इष्णुच्।) वर्द्धनशीलः। तत्पर्य्यायः। वर्द्धनः २। इत्यमरः। ३। १। २८॥ (यथा, भट्टिः। ५। १।

"निराकरिष्णू वर्षिष्णू वर्द्धिष्णू परितो रजम्।
उत्पतिष्णू वहिष्णू च पेरतुः खरदूषणौ॥")

वर्द्म, क्ली, (वर्द्धते दीर्घीभवतीति। वृध्+"वृधिधृषिभ्यां रन्।" उणा० २। २७। इति रन्।) चर्म्म। इत्युणादिकोषः॥ (यथा, ऋग्वेदे। १४। १। ६०।

"त्वदा पिपेग्र मध्यतोऽनुवर्द्मोक्षा नो अस्तु सुमङ्गली॥")

वर्द्मी, स्त्री, (वर्द्मन्+गौरादित्वात् ङीष्।) चर्म्मरज्जुः। वदी इति भाषा। तत्पर्य्यायः। नद्धी २ वरत्रा ३। इत्यमरः॥ वद्धी ४। इति भरतः॥

वर्षः, [स्] क्ली, (वृष्यते संपृक्तं भवतीति। वृ+"वृङ्गृहिभ्यां रूपाङ्गयोः पुट् च।" उणा० ४। २००। इति असुन् पुडागमश्च।) रूपम्। इत्युणादिकोषः॥ (यथा, ऋग्वेदे। १। १४०। ५।

"आदस्य ते ध्वसयन्तो वृथेरते
शुष्मामभ्रं मरुतो वर्षो दधिरे॥"

शौर्य्यम्। यथा, तत्रैव। १। ३६। १।

"कस्य क्रत्वा मरुतः कस्य वर्पसा कं याथ
कं ह धूतयः॥"

"कस्य यजमानस्य क्रत्वा क्रतुना सङ्कल्पेन इति

शेषः। तथा कस्य यजमानस्य वर्पसः स्तोत्रेण सङ्गच्छते॥" इति तद्भाष्ये सायणः॥)

वर्फ, भत्वाम्। वधे। इति कविकल्पद्रुमः॥ (भ्वा०-पर०-सक०-सेट्।) वर्फति। इति दुर्गादासः॥

वर्म्म, [न्] क्ली, (वृणोति आच्छादयति शरीरमिति। वृ+मनिन्।) तनुत्रम्। इत्यमरः। २। ८। ६४॥ (यथा, रघुः। ४। ५६।

"अभवभूयत वाहानां चरतां गाढरश्मिभिः।
वर्म्मभिः पवनोद्धूतराजतालीवनध्वनिः॥"

गृहम्। इति निघण्टुः। ३। ४॥ यथा, बृहत्संहितायाम्। ५१। ३।

"छिन्नभिन्नक्षमिखातकण्टकि-
प्लुष्टरूक्षकुटिलैर्न सत्कुजैः।
क्रूरपक्षियुतनिन्द्यनामभिः
शुष्कशूरिणैर्बहुपर्णवर्म्मभिः॥")

वर्म्मकण्टकः, पुं, पर्पटः। इति राजनिर्घण्टः॥ (विवृतिरस्य पर्पटशब्दे विज्ञेया॥)

वर्म्मकषा, स्त्री (वर्म्म कषतीति। कष+अच्। टाप्।) सन्नला। इति शब्दरत्नावली॥ चामार कषा इति भाषा॥

वर्म्मा, [न्] पुं, (वृ+मनिन्।) ऋषिस्य पहुतिः। यथा,—

"शुभ्रांस्तं ब्राह्मणस्य स्याद्धर्म्मांस्तं क्षत्रियस्य च।
गुप्तदासान्तकं नाम प्रशस्तं वैश्यशूद्रयोः॥"

इति आह्निकतत्त्वधृतशातातपवचनम्॥

वर्म्मिः, पुं, मत्स्यविशेषः। वानि इति भाषा। अस्य मांसगुणाः। गुरुत्वम्। वृष्यत्वम्। कषायत्वम्। रक्तपित्तनाशित्वञ्च। इति राजवल्लभः॥ (यथा, सुश्रुते। १। १३।

"वर्म्मिमत्स्यवदावता छिन्नोन्नतकुक्षिः कर्व्वुरा॥"

तथास्य गुणा यथा,—

"वर्म्मिमत्स्यो हरेद्वातं पित्तं रुचिकरो लघुः॥"

इति भावप्रकाशस्य पूर्व्वखण्डे द्वितीये भागे॥)

वर्म्मितः, त्रि, (वर्म्म करोतीति। वर्म्म+णिच्। ततः कर्म्मणि क्तः। वर्म्म सञ्जातमस्येति। इतच् वा।) वर्म्मयुक्तः। क्षतसन्नाहः। तत्पर्य्यायः। सन्नद्धः २ सज्जः ३ दंशितः ४ यूढकक्षटः ५। इत्यमरः। २। ८। ६५॥ ऊढकक्षटः ६। इति शब्दरत्नावली॥ (यथा, गो० रामायणे। २। ६१। १५।

"वाजिनां वर्म्मिताङ्गानां क्रुद्धस्य मम सायकाः।
अद्य भित्त्वा प्रवेक्ष्यन्ति शरीराणि मयेरिताः॥")

वर्म्मुषः, पुं, मत्स्यविशेषः। वामिरुष इति भाषा। अस्य मांसगुणाः। वातनाशित्वम्। स्निग्धत्वम्। ग्रहदोषनाशित्वञ्च। इति राजवल्लभः॥

वर्य्य, त्रि, (वर्य्यते प्रार्थ्यते इति। वर+यत्।) प्रधानम्। इत्यमरः। ३। १। ५०॥ (यथा, भागवते। १। ५। ६।

"यथा धर्म्मादयश्चार्था मुनिवर्य्यानुकीर्त्तिताः।
न तथा वासुदेवस्य महिमा ह्यनुवर्णितः॥")

श्रेष्ठम्। इति शब्दबोधव्याकरणम्॥ (यथा, किरातार्जुनीये। ७। २०।

"माहेन्द्रं नगमभितः करेणुवर्य्याः
पर्य्यन्तस्थितजलदा दिवः पतन्तः॥")

वर्य्यः, पुं, (वर्य्यते प्रार्थ्यते इति। वर+यत्।) कामदेवः। इति मेदिनी। ये, ४०॥

वर्य्या, स्त्री, (वियते इति। वृ+"अवद्यपण्यवर्य्येति।" ३। १। १०१। इति अप्रतिबन्धे यत्।) पतिंवरा। इत्यमरः। २। ६। ७॥ कन्या। इति सुग्धबोधव्याकरणम्॥

वर्व्वणा, स्त्री, (वरित्यव्यक्तशब्देन वर्णति शब्दायते इति। वर्ण शब्दे+अच्। टाप्।) नीलमक्षिका। इत्यमरः। २। ५। २७॥ नीलाकारवर्णा मक्षिका वर्व्वणा। भणभणिया इति ख्याता। मक्षिकाख्यायां स्त्रियाम्। वरिति वर्णति वर्व्वणा। वर्ण वर्ण शब्दे पचाद्यच्त्वादन् आप्। किंवा वृणोति पूतिद्रव्यं भजते इति वृङो विचि वर्। वर्णतेरपि वर्णा ततः कर्म्मधारये वर्व्वणा। इति तट्टीकायां भरतः॥

वर्व्वरं, क्ली, (वृणुते वरयति नानागुणान् इति। वृ+"कृगृशृवृवच्विभ्यः क्वरच्।" उणा०। २। १२३। इति क्वरच्।) हिङ्गुलम्। प्रीतचन्दनम्। वोलम्। इति राजनिर्घण्टः॥

वर्व्वरः, पुं, (वृणोति दोषानिति। वृ+क्वरच्।) पामरः। स च नीचजातिः। केशः। बावरी इति भाषा। चक्रलः। देशविशेषः। (तद्देशवासिनि, पुंभूम्नि। यथा, मार्कण्डेये। ५७। ३८।

"काम्बोजा दरजाश्चैव वर्व्वरा हर्षवह्वनाः॥")

फञ्जिका। इति मेदिनी। रे, २०६॥ वृक्षविशेषः। काल बावुइ इति भाषा। तत्पर्य्यायः। सुसुखः २ मरुजः ३ क्षत्रावर्व्वरकः ४ सुकन्दजः ५ गन्धपत्रः ६ पूतगन्धः ७ सुवाह्वकः ८। अस्य गुणाः। कटुत्वम्। उष्णत्वम्। सुगन्धित्वम्। वान्तिविषमर्पविषत्वमदोषनाशित्वञ्च। इति राजनिर्घण्टः॥

वर्व्वरकं, क्ली, (वर्व्वर+स्वार्थे कन्।) चन्दनभेदः। तत्पर्य्यायः। वर्व्वरोत्थम् २ श्वेतवर्व्वरकम् ३ प्रीतम् ४ सुगन्धिः ५ पित्तारिः ६ सुरभिः ७। अस्य गुणाः। प्रीतत्वम्। तिक्तत्वम्। कफमारुतपित्तकुष्ठकण्डूव्रणनाशित्वम्। विशेषात्रक्तदोषजित्वञ्च। इति राजनिर्घण्टः॥

वर्व्वरा, स्त्री, (वर्व्वरपुष्पस्येव आकृतिरस्त्यस्या इति। वर्व्वर+अच्। टाप्।) पुष्पभेदः। शाकभेदः। इति मेदिनी। रे, २०६॥ (वर्व्व इति शब्दं रातीति। रा+कः।) मक्षिकाभेदः। इति शब्दरत्नावली॥

वर्व्वरा, } स्त्री, (वर्व्वर+टाप्। पक्षे षित्वात्
वर्व्वरी, } ङीष्।) क्षुद्रवृक्षविशेषः। वायुइ इति भाषा। तत्पर्य्यायः। कवरी २ तुङ्गी ३ खरपुष्पा ४ अजगन्धिका ५ अजगन्धा ६ कवरा ७ खरपुष्पिका ८। इत्यमरशब्दरत्नावल्यौ॥ तस्याः प्रकारा गुणाश्च।

"वर्व्वरी कवरी तुङ्गी खरदुग्धाजगन्धिका।
पर्णासस्तत्र क्षुद्रा तु कदिक्षरकुवेरकौ॥

कालमारः करालश्च मलूकः क्षुद्रमक्षिका।
तत्र शुक्लोऽर्व्वकः प्रोक्तो वटपत्रस्तयोऽपरः॥
वर्व्वरीत्रितयं रूक्षं प्रीतं कटु विदाह्यि च।
तीक्ष्णं रुचिकरं क्षुद्यं दीपनं लघुपाकि च।
पित्तलं कफवातास्रदद्रुक्ष्मिविषापहम्॥"

इति भावप्रकाशः॥

वर्व्वरीकः, पुं, (वृणुते इति। वृञ् वरणे+"शृवृ-वृजां हे रुक् चाभ्यासस्य।" उणा० ४। १६। इति ईकन् द्विर्वचनं अभ्यासस्य रुगागमश्च।) ब्राह्मणयष्टिकावृक्षः। कुटिलकुन्तलः। इत्युणादिकोषः॥ अजगन्धिका। बावुइ तुलसी इति भाषा। इति शब्दचन्द्रिका॥ महाकालः। इति हेमचन्द्रः॥ तच्च पवर्गीयवकारादौ पठितोऽयं किन्तु मेदिन्यां चर्चरीकशब्दस्यायमर्थः॥

वर्व्वा, स्त्री, वर्व्वरी। इति शब्दचन्द्रिका॥

वर्व्वि, त्रि, (वृ+"वृदृभ्यां विन्।" उणा० ४। ५३। इति विन्।) वस्त्रकारः। इत्युणादिकोषः॥

वर्व्वुरः, पुं, (वृ+बाहुलकात् वुरच्।) वृक्षविशेषः। बावला इति भाषा। तत्पर्य्यायः। युगलाग्रः २ कण्टालुः ३ तीक्ष्णकण्टकः ४ गोशृङ्गः ५ पंक्तिबीजः ६ दीर्घकण्टः ७। कषायात्मकः ८ दृढ़बीजः ९ अजभक्षः १०। अस्य गुणाः। कषायत्वम्। उष्णत्वम्। कफकासामरक्तातिसारपित्तदाहार्शोनाशित्वञ्च। इति राजनिर्घण्टः॥

वर्ष, पुं, क्ली, (वृष्यते इति। वृषु सेचने+अस्त्रियौ भयादीनामुपसंख्यानमित्यच्। यद्वा, वियते प्रार्थ्यते इति। वृ+"वृतुवदिभ्रस्जिकमिकषिभ्यः सः।" उणा० ३। ६२। इति सः।) वृष्टिः। (यथा, मनुः। ४। १०३।

"विद्युत्स्तनितवर्षेषु महोल्कानाञ्च संभवे।
आकालिकमनध्यायमेतेषु मनुरब्रवीत्॥"

जम्बुद्वीपांशः। वत्सरः। इत्यमरः॥ (यथा, मनुः। ५। ५३।

"वर्षे वर्षेऽश्वमेधेन यो यजेत शतं समाः।
मांसानि च न खादेद् यस्तयोः पुण्यफलं समम्॥")

जम्बुद्वीपः। इति मेदिनी। षे, २४॥ (वर्षतीति। वृष्+घञ्।) मेघः। इति हेमचन्द्रः। २। ७६॥ *॥ अथ सप्तद्वीपानां वर्षवर्णनम्। तत्र जम्बुद्वीपस्य नववर्षविभागो यथा। यत एव क्षताः सप्त क्षुवो द्वीपा जम्बुप्लक्षशाल्मलिकुशक्रौञ्चशाकपुष्करसंज्ञाः। तेषां परिमाणं पूर्व्वस्मात् पूर्व्वस्माद्दुत्तरोत्तरो यथासंख्यं द्विगुणमानेन बहिः समन्तत उपकल्पनाः। क्षारोदेक्षुरसोदसुरोदघृतोददधिमण्डोदशुद्धोदाः सप्त जलधयः। सप्तद्वीपपरिखा इवाभ्यन्तरद्वीपसमाना एकैकशेन यथानुपूर्व्वं सप्तस्वपि बहिर्द्वीपेषु पृथक् परित उपकल्पिताः। तेषु पुनर्जम्बुप्लाक्षादिषु वर्षेष्वतीतानागतानामनेकेषामजिताजितयज्ञवाहुदिरण्यरेतोधृतपृष्ठमेधातिथिवीतिहोत्रसंज्ञान्

यथासंख्येन एकैकस्मिन्नेकमेवाधिपतिं विदधे। तस्य ह वा एते श्लोकाः।

"प्रियव्रतकृतं कर्म को ऽनुकुर्यादिनेश्वरम्।
यो नेमिनिम्नरकरोच्छायां घ्नन् सप्तवारिधीन्॥"

छायां घ्नन् तमो निरस्यन्।

"भूसंस्थानं कृतं येन सरिद्गिरिवनादिभिः।
सीमा च भूतनिर्वृत्यै द्वीपे द्वीपे विभागशः॥"

एवं पितरि संप्रवृत्ते तदनुशासने वर्त्तमान आग्नीध्रो जम्बुद्वीपौकसः प्रजा औरसवद्धर्म्मावेक्षमाणः पर्य्यगोपायत्। तदुपलभ्य भगवानादिपुरुषः सदसि गायन्तीं पूर्व्वचित्तिं नामाप्सरसमभियापयामास। तस्यामुह वात्मजान् स राजवर्य्य आग्नीध्रो नाभिकिंपुरुषहरिवर्षेलावृतरम्यक-हिरण्मय-कुरुभद्राश्वकेतुमालसंज्ञान् नव पुत्रानजनयत्। आग्नीध्रसुतास्ते मातुरनुग्रहादौत्पत्तिकेनैव संहननबलोपेताः पिचा विभक्ता आत्मतुल्यनामानि यथाविभागं जम्बुद्वीपवर्षाणि बुभुजुः। यस्मिन्नव वर्षाणि नवयोजनसहस्रायामानि अष्टभिर्मर्य्यादागिरिभिः सुविभक्तानि भवन्ति। एषां मध्ये इलावृतं नामाभ्यन्तरवर्षं यस्य नाभ्यामवस्थितः सर्व्वतः सौवर्णः कुलगिरिराजो मेरुर्द्वीपायामसमुन्नाहः कर्णिकाभूतः कुवलयकमलस्य मूर्द्धनि द्वात्रिंशत्सहस्रयोजनवितत ऋले षोड़शसाहस्रं तावतान्तर्भूम्यां प्रविष्टः। उत्तरोत्तरेणेलावृतं नीलः श्वेतः शृङ्गवान् इति त्रयो रम्यकहिरण्मयकुरूणां वर्षाणां मर्य्यादागिरयः प्रागायता उभयतः क्षारोदावधयो द्विसहस्रयोजनपृथव एकैकशः पूर्व्वस्मात् पूर्व्वस्मादुत्तरोत्तरो दशांशाधिकांशेन दैर्घ्ये एवाङ्गसन्ति। एवं दक्षिणेनेलावृतं निषधो हेमकूटो हिमालय इति प्रागायता यथा नीलादयः। अयुतयोजनोत्सेधा हरिवर्षकिंपुरुषभारतानां यथासंख्यम्। तथेवेलावृतमपरेण पूर्व्वेण च माल्यवन्गन्धमादनावानीलनिषधायतौ द्विसहस्रं पप्रथतुः केतुमालभद्राश्वयोः सीमानं विदधाते।

भारतेऽप्यस्मिन् वर्षे सरिच्छैलाः सन्ति बहवः। मलयो मङ्गलप्रस्थो मैनाकस्त्रिकूट ऋषभः कूटकः कोल्लः सह्यो देवगिरिर्ऋष्यमूकः श्रीशैलो वेङ्कटो महेन्द्रो वारिधारो विन्ध्यः शुक्तिमानृक्षगिरिः पारियात्रो द्रोणश्चित्रकूटो गोवर्द्धनो रैवतकः ककुभो नीलो गोकामुख इन्द्रकीलः कामगिरिरिति चान्ये शतसहस्रशः शैलास्तेषां नितम्बप्रभवा नद्यः शतसंख्याताः। एतासामपो भारतीः प्रजानामभिरेव पुनन्तीनामात्मना चोपस्पृशन्ति। चन्द्रवसा ताम्रपर्णी अवटोदा कृतमाला वैहायसी कावेरी वेणा पयस्विनी शर्करावर्त्ता तुङ्गभद्रा कृष्णवेणा भीमरथी गोदावरी निर्व्विन्ध्या पयोष्णी तापी रेवा सुरसा नर्म्मदा चर्म्मण्वती अन्धः शोणश्च नदौ महानदी वेदस्मृतिर्ऋषिकुल्या त्रिसामा कौशिकी मन्दाकिनी यमुना सरस्वती दृशद्वती गोमती सरयूरोधवती सप्तवती सुषोमा शतद्रुश्चन्द्रभागा मरुद्वृधा वितस्ता असिक्नी विश्वेति महानद्यः। अस्मिन्नेव वर्षे पुरुषैर्लब्धजन्मभिः शुक्लोहितकृष्णवर्णेन स्वारब्धेन कर्म्मणा दिवमानुषनारकगतयो वङ्क्या आत्मन आनुपूर्व्वेण सर्व्वा ह्येव सर्व्वेषां विधीयन्ते। यथावर्णविधानमपवर्गश्च भवति॥ १॥ * ॥

अतः परं शङ्खादीनां प्रमाणलक्षणसंस्थानतो वर्षविभाग उपवर्ण्यते। शङ्खो जम्बुप्रमाणो द्वीपाख्यातिकरो हिरण्मय उत्पितो यत्राभिरूपास्ते सप्तजिह्वः। तस्याधिपतिः प्रियव्रतात्मज इध्मजिह्वस्तं द्वीपं सप्तवर्षाणि विभज्य सप्तवर्षनामभ्य आत्मजेभ्य आकलय्य स्वयमात्मयोगेनोपरराम। अग्निवं वपसं सुभद्रं शान्तं क्षेममभयमिति वर्षाणि। तेषु गिरयो नद्यश्च सप्तैवाभिज्ञाताः। मणिकूटो वज्रकूट इन्द्रसेनो ज्योतिष्मान् सुवर्णो हिरण्यष्ठीवो मेघमाल इति सेतुशैलाः। अरुणा नृमणा आङ्गिरसी सावित्री सुभाता ऋतम्भरा सत्यम्भरेति महानद्यः॥ २॥ * ॥ शङ्खस्तु समानेनेक्षुरसोदेनावृतो यथा तथा द्वीपोऽपि प्लाक्षलो द्विगुणविशालः समानेन सुरोदेनावृतः परिवृङ्क्ते। यत्र ह वै प्लाक्षली शङ्खायामा। तद्द्वीपाधिपतिः प्रियव्रतात्मजो यज्ञबाहुः स्वसुतेभ्यः सप्तभ्यस्तन्नामानि सप्तवर्षाणि व्यभजत्। सुरोचनं सौमनस्यं रमणकं देववर्षं पारिभद्राप्यायनमभिज्ञातमिति। तेषु वर्षाद्रयो नद्यश्च सप्तैवाभिज्ञाताः। सुरसः शतशृङ्गो वामदेवः कुन्दः कुमुदः पुष्पवर्षः सहस्रश्रुतिरिति। अनुमती सिनीवाली सरस्वती कुहूरजनी नन्दा राकेति॥ ३॥ * ॥ एवं सुरोदादूबहिस्तद्द्विगुणः समानेनावृतो घृतोदेन यथा पूर्व्वः कुशद्वीपो यस्मिन् कुशस्तम्बो देवकृतस्तद्द्वीपाख्यापनो ज्वलन इवापरः सुशृङ्गरोचिषा दिशो विराजयति। तद्द्वीपपतिः प्रियव्रतो राजन् हिरण्यरेता नाम स्वं द्वीपं सप्तभ्यः स्वपुत्रेभ्यो यथाभागं विभज्य स्वयं तप आतिष्ठत्। वसुवसुदानदृढरुचिनाभिगुप्तस्तुत्यव्रतविप्रनामदेवनामभ्यस्तेषां वर्षेषु सीमागिरयो नद्याश्चाभिज्ञाताः सप्तैव। वभ्रुश्चतुःशृङ्गः कपिलश्चित्रकूटो देवानीक ऊर्द्ध्वरोमा द्रविण इति। रसकुल्या मधुकुल्या मित्रविन्दा श्रुतविन्दा देवगर्भा घृतच्युता मन्त्रमालेति॥ ४॥ * ॥ तथा बहिः क्रौञ्चद्वीपो द्विगुणः समानेन क्षीरोदेन परित उपकॢप्तः। घृतो यथा कुशद्वीपो घृतोदेन। यस्मिन् क्रौञ्चनामा पर्व्वतराजो द्वीपनामनिर्व्वर्त्तक आस्ते। तस्मिन्नपि प्रियव्रतो घृतपृष्ठो नामाधिपतिः स्वे द्वीपे वर्षाणि सप्त विभज्य तेषु पुत्रनामसु सप्त ऋक्थादान् वर्षपान् निवेश्य स्वयं भगवान् भगवतः परमकल्याणयशस आत्मभूतस्य हरेश्चरणारविन्दमुपजगाम। आत्मा मधुरुहो मेघपृष्ठः सुधामा भ्राजिष्ठो लोहितानो वनस्पतिरिति घृतपृष्ठसुताः। तेषां वर्षगिरयः सप्तैव नद्यश्चाभिख्याताः। शुक्लो वर्द्धमानो भोजन उपबर्हणो नन्दो नन्दनः सर्व्वतोभद्र इति। अभया अमृतौघा आर्य्यका तीर्थवती रूपवती पवित्रवती शुक्लेति॥ ५॥ * ॥ एवं परस्तात् क्षीरोदात् परित उपवेशितः प्लाक्षद्वीपो दाक्षिंप्रक्षत्रयोजनायामः समानेन दधिमण्डोदेन परीतः। यस्मिन् हि प्लाक्षो नाम महीरुहः स्वक्षेत्रव्यपदेशकः। यस्य हि महासुरभिगन्धस्तद्द्वीपमनुवासयति। तस्यापि प्रैयव्रत एवाधिपतिर्नाम्ना मेधातिथिः। सोऽपि विभज्य सप्तवर्षाणि पुत्रनामानि तेषु स्वात्मजान् पुरोजवमनोजववेपमानधूम्रानीकचित्ररेफबहुरूपविश्वाधारसंज्ञान् निधाप्याधिपतीन् स्वयं भगवत्यनन्त आवेशितमतिस्तपोवनं प्रविवेश। एतेषां वर्षमर्य्यादागिरयो नद्यश्च सप्त सप्तैव। ईशान उरुशृङ्गो बलभद्रः शतकेशरः सहस्रस्रोता देवपालो महानस इति। अनघा आयुर्दा उभयस्पृशिरपराजिता पञ्चपदी सहस्रश्रुतिर्निजधृतिरिति॥ ६॥ * ॥ एवमेव दधिमण्डोदात् परतः पुष्करद्वीपस्ततो द्विगुणायामः समन्तत उपकॢप्तः समानेन स्वादूदकेन समुद्रेण बहिरावृतः। तद्द्वीपमध्ये मानसोत्तरनामैक एवार्व्वाचीनपराचीनवर्षयोर्म्मर्य्यादाचलः अयुतयोजनोच्छ्रायायामः। यत्र तु चतसृषु दिक्षु चत्वारि पुराणि लोकपालानाम्। यदुपरिष्टात् सूर्य्यरथस्य मेरुं परिक्रामतः संवत्सरात्मकं चक्रं देवाहोरात्राभ्यां परिभ्रमति। तद्द्वीपस्याधिपतिः प्रैयव्रतो वीतिहोत्रो नाम तस्यात्मजौ रमणकधातकनामानौ वर्षपती नियुज्य स्वयं पूर्व्वजवद्भगवत्कर्म्मशील आस्ते। तद्वर्षपुरुषा भगवन्तं ब्रह्मरूपिणं सकर्म्मकेण कर्म्मणाराधयन्ति॥ ७॥ इति श्रीभागवते ५ स्कन्धे १। २। १६। १८। २० अध्यायाः॥ * ॥ अपि च।

"कन्ये द्वे दश पुत्राश्च सम्राट् कुक्षिश्च ते उभे।
ते सर्व्वे भ्रातरः शूराः प्रजापतिसमा दश॥
अग्नीध्रश्चाग्निबाहुश्च मेधा मेधातिथिर्व्वसुः।
ज्योतिष्मान् द्युतिमान् हव्यः सवनो मित्र एव वा।
मेधातिथिवसुमित्रास्तु त्रयो योगपरायणाः।
जातिस्मरा महाभागा न राज्याय मनो दधुः॥
प्रियव्रतोऽभ्यषिञ्चत्तान् सप्त सप्तसु पार्थिवान्।
द्वीपेषु तेषु धर्म्मेण द्वीपांस्तांश्च निबोध मे॥
जम्बुद्वीपे तथाग्नीध्रं राजानं कृतवान् पिता।
शङ्खद्वीपेश्वरञ्चापि तेन मेधातिथिः कृतः॥
प्लाक्षे तु वपुष्मन्तं ज्योतिष्मन्तं कुशाङ्गये।
क्रौञ्चद्वीपे द्युतिमन्तं हव्यं प्लाकाङ्गये सुतम्॥
पुष्कराधिपतिञ्चैव सवनं कृतवान् सुतम्।
महावीतो धातुकिञ्च पुष्कराधिपतेः सुतौ॥
द्विधा कृत्वा ततो वर्षं पुष्करे स न्यवेशयत्।
हव्यस्य पुत्राः सप्तासन्नामतस्तान्निबोध मे॥
जलदश्च कुमारश्च सुकुमारो मणीवकः।

कुशोत्तरोऽथ मोदाकी सप्तमस्तु महाद्रुमः ॥
तन्नामाङ्कानि वर्षाणि शाकद्वीपे चकार सः ।
तथा द्युतिमतः सप्त पुत्रांश्चापि निबोध मे ॥
कुशलो मनोऽनुगश्चोष्णः प्रधानश्चान्धकारकः ।
मुनिश्च दुन्दुभिश्चैव सप्तमस्तु तथावरः ॥
तेषां स्वनामधेयानि क्रौञ्चद्वीपे तथाभवन् ।*।
ज्योतिष्मतः कुशद्वीपे पुत्रनामाङ्कितानि वै ॥
तत्रापि सप्त वर्षाणि तेषां नामानि मे शृणु ।
उद्भिदं वेणुमच्चैव द्वैरथं लम्बमेव च ॥
धृतिमत् प्रभाकरश्चैव कपिलश्चापि सप्तमम् ।
वपुष्मतः सुताः सप्त शाल्मलेश्च बभूवन् ॥
श्वेतश्च हरितश्चैव जीमूतो रोहितस्तथा ।
वैद्युतो मानसश्चैव महीधः सुप्रभस्तथा ॥
तथैव शाल्मले तेषां स्वनामानि तु सप्त वै ।
सप्तमेधातिथेः पुत्राः शाकद्वीपेश्वरस्य ये ॥
तेषां नामाङ्कितैर्दीपैस्तद्वर्षं सप्तभिर्वृतम् ।
पूर्वं शान्तभयं वर्षं शिशिरन्तु सुखोदयम् ॥
आनन्दश्च शिवश्चैव क्षेमकश्च तथा ध्रुवम् ।
शाकद्वीपादियुक्तेषु शाकद्वीपात्किकेषु च ॥
ज्ञेयः पञ्चसु धर्म्मोऽत्र वर्णाश्रमविभागजः ।*।
यानि किंपुरुषाद्यानि वर्ज्यित्वा हिमाङ्कयम् ॥
सुखमायुश्च रूपञ्च बलं धर्म्मश्च नित्यशः ।
पञ्चस्वेतेषु वर्षेषु सर्व्वं साधारणं स्मृतम् ॥*॥
आग्नीध्राय पिता पूर्व्वं जम्बुद्वीपं ददौ द्विज ।
तस्य पुत्रा बभूवुर्हि प्रजापतिसमा नव ॥
ज्येष्ठो नाभिरिति ख्यातस्तस्य किंपुरुषोऽनुजः ।
हरिवर्षस्तृतीयस्तु चतुर्थोऽभूदिलावृतः ॥
रम्यश्च पञ्चमः पुत्रो हिरण्यः षष्ठ उच्यते ।
कुरुस्तु सप्तमस्तेषां भद्राश्वश्चाष्टमः स्मृतः ॥
नवमः केतुमालश्च तन्नाम्ना वर्षसंस्थितिः ।*।
यानि किंपुरुषाद्यानि वर्ज्यित्वा हिमाङ्कयम् ॥
तेषां स्वभावतः सिद्धिः सुखप्राया ह्युपद्रवः ।
विपर्य्ययो न तेष्वस्ति जराऽऽर्त्तभयं न च ॥
धर्म्माधर्म्मौ न तेष्वास्तां नोत्तमाधममध्यमाः ।
न वै चतुर्युगावस्था नाश्रमाः क्रतवो न च ॥*॥
आग्नीध्रसूनोर्नाभेश्च ऋषभोऽभूत् सुतो द्विज ।
ऋषभाद्भरतो जज्ञे वीरः पुत्रशताग्रजः ।
सोऽभिषिच्यर्षभः पुत्रं महाप्रव्रज्यमास्थितः ।
तपस्तेपे महाभागः पुलहाश्रमसंश्रयः ॥*॥
हिमाङ्कं दक्षिणं वर्षं भरताय ददौ पिता ।
तस्माच्च भारतं वर्षं तस्य नाम्ना महात्मनः ॥
भरतस्याप्यभूत् पुत्रः सुमतिर्नाम धार्म्मिकः ।
तस्मिन् राज्यं समावेश्य भरतोऽपि वनं ययौ ॥
इतेषां पुत्रपौत्रैश्च सप्तद्वीपा वसुन्धरा ।
प्रियव्रतस्य पुत्रेषु सुक्ता स्वायम्भुवेऽन्तरे ॥
एष स्वायम्भुवः सर्गः कथितस्ते द्विजोत्तम ।
पूर्व्वमन्वन्तरेशस्य किमन्यत् कथयामि ते ॥”
इति मार्कण्डेयपुराणे स्वायम्भुवे मन्वन्तरे भुवनकोषः ॥ * ॥ अन्यच्च ।

सूत उवाच ।

“केतुमाले नराः काला सर्व्वे पनसभोजनाः ।
स्त्रियश्चोत्पलपत्राक्ष्यो जीवन्ति च वर्षायुतम् ॥
भद्राश्वे पुरुषाः शुक्लाः स्त्रियश्चन्द्रांशुसन्निभाः ।
दशवर्षसहस्राणि जीवन्ति वायुभोजनाः ॥*॥
रम्यके पुरुषा नार्य्यो रमन्त्यारजसप्रभाः ।
दशवर्षसहस्राणि शतानि दशपञ्च च ॥
जीवन्ति तत्र सत्त्वस्था न्यग्रोधफलभोजनाः ।
हिरण्मये हिरण्याभाः सर्व्वे च लकुचाशनाः ॥
एकादशसहस्राणि शतानि दशपञ्च च ।
जीवन्ति कुरुवर्षे तु श्यामाङ्गाः क्षीरभोजनाः ॥
सर्व्वे मिथुनजाताश्च नित्यं सुखनिषेविणः ।
चन्द्रद्वीपे महादेवं यजन्ति सततं शिवम् ॥
तथा किंपुरुषे विप्रा मानवा हेमसन्निभाः ।
दशवर्षसहस्राणि जीवन्ति ह्रक्षभोजनाः ॥
यजन्ति सततं देवं चतुर्मूर्त्तिं चतुर्मुखम् ।
ध्याने मनः समाधाय सदा वा भक्तिसंयुताः ॥*
तथा च हरिवर्षेऽपि मनुष्या रजतसन्निभाः ।
दशवर्षसहस्राणि जीवन्त्युत्तरसाधिनः ॥
तत्र नारायणं देवं विश्वयोनिं सनातनम् ।
उपासते सदा विष्णुं मानवा विष्णुभाविताः ॥
तत्र चन्द्रप्रभं शुभ्रं शुद्धस्फटिकनिर्म्मलम् ।
विमानं वासुदेवस्य पारिजातवनाश्रितम् ॥
चतुर्द्वारमनौपम्यं चतुस्तोरणसंयुतम् ।
प्राकारैर्दशभिर्युक्तं सुगन्धञ्च समुद्गमम् ॥
स्फाटिकैर्मणिपर्य्युक्तं देवराजगृहोपमम् ।
स्वर्णस्तम्भसहस्रैश्च सर्व्वतः समलङ्कृतम् ॥
हेमसोपानसंयुक्तं नानारत्नोपशोभितम् ।
दिव्यसिंहासनोपेतं सर्व्वशोभासमन्वितम् ॥
सरोभिः स्वादुपानीयैर्नदीभिश्चोपशोभितम् ।
नारायणपरैः शुद्धैर्ब्रह्मोद्याध्ययनतत्परैः ॥
योगिभिश्च समाकीर्णं ध्यायद्भिः पुरुषं हरिम् ।
स्तुवद्भिः सततं मन्त्रैर्नमस्यद्भिश्च माधवम् ॥
तत्र देवादिदेवस्य विष्णोरमिततेजसः ।
राजानः सर्व्वकालन्तु महिमानं प्रकुर्व्वते ॥
गायन्ति चैव नृत्यन्ति विलासिन्यो मनोरमाः ।
स्त्रियो यौवनशालिन्यः सदा मण्डनतत्पराः ॥
इलावृते पद्मवर्णा जम्बूफलरसाशिनः ॥
त्रयोदशसहस्राणि वर्षाणां व स्थिरायुषः ॥
भारते तु स्त्रियः पुंसो नानावर्णाः प्रकीर्त्तिताः ।
नानादेवार्च्चने युक्ता नानाकर्म्माणि कुर्व्वते ॥
परमायुर्मतं तेषां शतं वर्षाणि सुव्रताः ।
नवयोजनसाहस्रं वर्षमेतत् प्रकीर्त्तितम् ॥
कर्म्मभूमिरियं विप्रा नराणामाधिकारिणाम् ।
महेन्द्रो मलयः सह्यः शुक्तिमानृक्षपर्व्वतः ॥
विन्ध्यश्च पारिपात्रश्च सप्तात्र कुलपर्व्वताः ।
इन्द्रद्वीपः कशेरुमांस्ताम्रवर्णो गभस्तिमान् ॥
नागद्वीपस्तथा सौम्यो गन्धर्व्वस्त्वथ वारुणः ।
अयन्तु नवमस्तेषां द्वीपश्च सागरावृतः ॥
योजनानां सहस्रन्तु द्वीपोऽयं दक्षिणोत्तरः ।
पूर्व्वे किरातास्तस्यान्ते पश्चिमे यवनास्तथा ॥
ब्राह्मणाः क्षत्रिया वैश्या मध्ये शूद्रास्तथैव च ।
इज्यायुधवणिज्याभिर्व्वर्त्तयन्त्यत्र मानवाः ॥
स्रवन्ति पावना नद्यः पर्व्वतेभ्यो विनिःसृताः ।
शतद्रुश्चन्द्रभागा च सरयूर्यमुना तथा ॥
इरावती वितस्ता च विपाशा देविका कुहूः ।
गोमती धूतपापा च बाहुदा च दृशद्वती ॥
कौशिकी लोहिता चैव हिमवत्पादनिःसृताः ।
वेदस्मृतिर्व्वेदमती व्रतघ्नी त्रिविदा तथा ॥
पर्णाशा वन्दना चैव सदानीरा मनोरमा ।
चर्म्मण्वती तथानूपा विदिशा वेदवत्यपि ॥
शिप्रा गण्डिन्यपि तथा पारिपात्राश्रयास्तथा ।
नर्म्मदा सुरसा शोणा दशार्णा च महानदी ॥
मन्दाकिनी चित्रकूटा तामसा च पिशाचिका ।
चित्रोत्पला विपाशा च माल्यना बाहुवाहिनी ॥
हिमवत्पादजा नद्यः सर्व्वपापहरा नृणाम् ।
तापी पयोष्णी निर्व्विन्ध्या शोणोदा च महानदी ॥
वेन्वा वैतरणी चैव बलाका च कुमुद्वती ।
तोया चैव महागौरी दुर्गा चान्तःशिला तथा ॥
विन्ध्यपादप्रसूतास्तु नद्यः पुण्यजलाः शुभाः ।
ऋषिकुल्या त्रिसामा च मन्दगा मन्दगामिनी ॥
रूपा शोणाग्निनी चैव ऋषिका वंशकारिणी ।
शुक्तिमत्पादसंजाताः सर्व्वपापहरा नृणाम् ॥
आसां नद्युपनद्यश्च शतशो द्विजपुङ्गवाः ।
सर्व्वाः पापहराः पुण्याः स्नानदानादिकर्म्मसु ॥
तास्विमे कुरुपञ्चाला मध्यदेशाद्यो जनाः ।
पूर्व्वे देशादिकाश्चैव कामरूपनिवासिनः ॥
औड्राः कलिङ्गमगधा दाक्षिणात्याश्च सर्व्वशः ।
तथा परान्ताः सौराष्ट्राः शूद्राभीरास्तथाऽर्व्बुदाः ॥
मानका मालवाश्चैव पारिपात्रनिवासिनः ।
सौवीराः सैन्धवा हूणाः शाल्वा कन्यनिवासिनः ॥
मद्रा वासास्तथाम्बष्ठाः पारसीकास्तथैव च ।
आसां पिबन्ति सलिलं वसन्ति सरितां सदा ॥
चत्वारि भारते वर्षे युगानि कवयोऽब्रुवन् ।
कृतं त्रेता द्वापरञ्च कलिश्चान्यच्च न क्वचित् ॥
यानि किंपुरुषाद्यानि वर्षाण्यष्टौ महर्षयः ।
न तेषु शोको नायासो नोद्वेगः क्षुद्भयन्न च ॥
सुस्थाः प्रजा निरातङ्का सर्व्वदुःखविवर्ज्जिताः ।
रमन्ते विविधैर्भावैः सर्व्वाश्च स्त्रियश्चोत्तमाः ॥”

इति कूर्म्मपुराणे ४४ अध्यायः ॥

अपरं वामनपुराणे १३ अध्याये द्रष्टव्यम् ॥*॥

प्रभवादिषष्टिवर्षाणि वत्सरशब्दे द्रष्टव्यानि । तत्र षष्टिधा पूज्या देवी यथा,—

“संवत्सरप्रमाणेन देव्याः कृत्वा पुरो हि ताः ।
यथा विधिना तात सर्व्वकामप्रसिद्धिदाः ॥
महाभयविनाशाय महारिपुवधाय च ।
महाभ्युदयकामाय महासिद्धिफलाय च ।
पूजयेत् तदृयजेद्देवीं षष्टिधा परमेश्वरीम् ॥
ऋतुनागकृता पीड़ा यच्चरत्योग्रहोद्भवा ।
संवत्सरमहादोषजन्मर्क्षत्रयपमर्द्दना ॥
केतूल्काशनिराहूतो भौमार्कसितभानुजाः ।
शमयेदृयजमानस्य देवीहोमरतस्य च ॥
मण्डलादिविधानेन महास्नानाभिषेचनैः ।
चन्द्रसंपूर्णपुष्पर्क्षफलरत्नाभिपूजनैः ॥
मङ्गला मङ्गलं धत्ते विधिना पूजिता सुने ! ॥

उत्पातक्षोभनिर्घातविह्वलानां शमाय च ।
कथयामि महाप्राज्ञ शृणुष्वैकमनाधुना ॥ * ॥
मङ्गला विजया भद्रा शिवा शान्तिर्धृतिः क्षमा ।
ऋद्धिर्वृद्धिस्मृतिः सिद्धिस्तुष्टिः पुष्टिः श्रिया उमा ॥
दीप्तिः कान्तिर्वपुः लक्ष्मीरीश्वरीति प्रकीर्त्तिता ।
विश्रुताश्चोत्तमा देव्यः सत्त्वभावव्यवस्थिताः ॥
प्रथमं संस्थिता वत्स ! सर्व्वसिद्धिप्रदायिका ।२०
ब्राह्मी जयावती शाक्री अजिता चापराजिता ॥
जरन्ती मानसी माया दितिः श्वेता विमोहनी ।
शरण्या कौशिकी गौरी विमला ललितालसा ॥
अरुन्धती क्रिया दुर्गा राजसा इति वायुना ।
मध्यभागे स्थिता देव्यो युगानामनुभावहा ॥२०॥
काली रौद्री कपाली च घण्टाकर्णा मयूरिकी ।
बहुरूपा सुरूपा च चिनेत्रा रिपुहाम्बिका ॥
माहेश्वरी कुमारी च वैष्णवी सुरपूजिताः ।
वैष्णवी तथा घोरा कराली विकटादिभिः ॥
चर्चिका चेति धातुस्था देवस्त्रैलोक्यविश्रुताः ।
पूजितास्था मुनिश्रेष्ठ ! सर्व्वकामप्रसाधिकाः ॥२०॥
सिद्धयक्षासुरगन्धर्व्वयक्षरक्षोगणैर्नुताः ।
भावकालाश्रयाः कार्य्यद्रव्यरूपफलप्रदाः ॥
प्रत्येकशः समस्ता वा कर्त्तव्या मुनिसत्तम ! ।
अथवा युगभेदेन पञ्च पञ्च प्रपूजिताः ॥"
इति देवीपुराणे संवत्सरदेवतार्विंशतिविधिनामाध्यायः ॥ (वर्षके, त्रि । यथा, भागवते ।
३ । २१ । २० ।
"नमाम्यभीक्ष्णं नमनीयपादं
सरोजमल्पीयसि कामवर्षम् ॥")

वर्षकरी, स्त्री, (वर्षं तत्सूचनं रवेण करोतीति । वर्ष + कृ + टः । ङीप् ।) झिल्लिका । इति हेमचन्द्रः । ४ । २८२ ॥

वर्षकेतुः, पुं, (वर्षस्य वृष्टेः केतुरिव । सति वर्षे भूरिशः उत्पन्नत्वादस्य तथात्वम् ।) रक्तपुनर्नवा । इति राजनिर्घण्टः ॥ (अलर्कवंशीयकेतुमतः पुत्रः । यथा, हरिवंशे । ३२ । ४० ।
"क्षेम्यस्य केतुमान् पुत्रो वर्षकेतुस्ततोऽभवत् ॥")

वर्षकोषः, पुं, (वर्षस्य वत्सरस्य कोष इव । सर्व्ववर्षज्ञानवत्त्वात् तथात्वमस्य ।) दैवज्ञः । इति शब्दरत्नावली ॥ (वर्षस्य अन्तःस्थितफलकोष इव कोषः ।) मासः । इति शब्दमाला ॥

वर्षजं, त्रि, (वर्षात् जातमिति । जन् + डः ।) वृष्टिजातम् । वत्सरजातम् । जम्बुद्वीपजातम् । द्वीपांशजातम् । मेघजातम् । इति वर्षशब्दपूर्व्वजनधातोर्डप्रत्ययेन निष्पन्नम् ॥

वर्षणं, क्ली, (वृष् + ल्युट् ।) वृष्टिः । इति शब्दरत्नावली ॥ (यथा, मार्कण्डेयपुराणे । १०४।२१।
"तमेव सुचतः सर्व्वं रसं वै वर्षणाय यत् ।
रूपमाप्यायकं भास्वत्तस्मै मेघाय ते नमः ॥")

वर्षणिः, स्त्री, (वृष् + अनिः ।) वर्त्तनम् । क्षतिः । इत्युणादिकोषः ॥ क्रतुः । वर्षणम् । इति संक्षिप्तसारोणादिवृत्तिः ॥

वर्षपर्व्वतः, पुं, (वर्षाणां भारतादीनां विभाजकः पर्व्वत इति मध्यलोपी समासः ।) वर्षविभाजकगिरिः । यथा,—
"हिमवान् हेमकूटश्च निषधो मेरुरेव च ।
नीलः शृङ्गी च सप्तैते वर्षपर्व्वताः ॥"
इति हारावली ॥

वर्षपाकी, [न्] पुं, (वर्षे वर्षाकाले पाकोऽस्यस्येति । वर्षपाक + इनिः ।) आम्रातकः । इति हेमचन्द्रः । ४ । २१८ ॥ (तथास्य पर्य्यायः । "आम्रातको वर्षपाकी ।" इति वैद्यकरत्नमालायाम् ॥)

वर्षपुष्पा, स्त्री, (वर्षे वर्षणकाले पुष्पं यस्याः ।) सहदेवीलता । इति राजनिर्घण्टः ॥ (सहदेवीलताशब्देऽस्या विवृतिर्ज्ञेया ॥)

वर्षप्रियः, पुं, (वर्षो वर्षणं प्रियं यस्य ।) चातकपक्षी । इति त्रिकाण्डशेषः ॥

वर्षवरः, पुं, (वरतीति । वर आवरणे + अच् । वर्षस्य रेतोवर्षणस्य वर आवरकः ।) षण्ढः । इत्यमरः । २ । ८ । ६ ॥ खोजा । इति भाषा ॥ (यथा, रत्नावल्याम् २ अङ्के ।
"नष्टं वर्षवरैर्मनुष्यगणनाभावादपास्य त्रपामन्तः कञ्चुकिकञ्चुकस्य विशति त्रासादयं वामनः ॥")

वर्षवृद्धिः, स्त्री, (वर्षस्य वृद्धिरधिक्यं यत्र ।) जन्मतिथिः । इति स्मार्त्तभट्टाचार्य्यधृतभविष्यपुराणात् ॥ अथ जन्मतिथिकृत्यम् । तन्मलमासे न कर्त्तव्यं चान्द्रमासीयत्वेन सावकाशत्वात् । न च तस्य सौरमासीयत्वं तथात्वे तन्मासे तत्तिथेः कदाचिदप्राप्तौ तद्वर्षे तत्कृत्यलोपापत्तेः । न चेष्टापत्तिः प्रतिसंवत्सरन्तद्विधानात् । यथा ब्रह्मपुराणं गर्गश्च ।
"सर्व्वैश्च जन्मदिवसे स्नातैर्मङ्गलपाणिभिः ।
गुरुदेवाग्निविप्राश्च पूजनीयाः प्रयत्नतः ॥
स्वनक्षत्रञ्च पितरौ तथा देवप्रजापतिः ।
प्रति संवत्सरञ्चैव कर्त्तव्यश्च महोत्सवः ॥"
स्नातैस्तिलस्नातैः । प्रजापतिर्ब्रह्मा । तथा च तत्तिथिमधिकृत्य ।
"तिलोदवर्त्ती तिलस्नायी तिलहोमी तिलप्रदः ।
तिलभुक् तिलवापी च षट्तिली नावसीदति ॥
मङ्गलपाणिभिः अभिप्रेतार्थसिद्धिर्मङ्गलं तद्धेतुतया गोरोचनादिकमपि मङ्गलं तेन धृतगुग्गुल्वादिपाणिभिरित्यर्थः । तथा च कृत्यचिन्तामणौ ।
"गुडदुग्धतिलान्नाद्यैर्जन्मभस्थेऽब्दबन्धनम् ।
गुग्गुलुं निम्बसिद्धार्थं दूर्व्वागोरोचनायुतम् ।
संपूज्य भानुविघ्नेशौ महर्षिं प्रार्थयेदिदम् ॥
चिरजीवी यथा त्वं भो भविष्यामि तथा मुने ! ।
रूपवान् वित्तवांश्चैव श्रिया युक्तश्च सर्व्वदा ॥
मार्कण्डेय महाभाग सप्तकल्पान्तजीवन ।
आयुरिष्टार्थसिद्ध्यर्थमस्माकं वरदो भव ॥"
स्वनक्षत्रञ्चेति स्वनक्षत्रं अश्विन्याद्यन्तर्गतजन्मकालीननक्षत्रम् । नामकरणे तथा दर्शनात् वक्ष्यमाणब्रह्मपुराणोक्तप्रणवादिनमोऽन्तं नाम्नैव पूजाविधानाच्च । तदज्ञाने स्वनक्षत्राय नम इत्युल्लेख्यम् ॥ * ॥ पूजायामर्घ्यानन्तरं पाद्यमाह मत्स्यपुराणम् । अर्घ्यं पाद्यादिकमत्र मधुपर्के प्रयोजयेत् । पाद्यानन्तरं अर्घ्यमाह नरसिंहपुराणम् । पाद्यञ्चैव तृतीयया चतुर्थ्यार्घ्यं प्रदापयेत् । तृतीयया पुरुषसूक्तीयतृतीयया ऋचा । उभयक्रमदर्शनादिच्छाविकल्पः । इति श्रीदत्तः ॥ * ॥ श्रीपतिव्यवहारनिर्णये ।
"नवाम्बरधरो भूत्वा पूजयेच्च चिरायुषम् ॥"
तथा ।
"द्विभुजं जटिलं सौम्यं सुहृद्वं चिरजीविनम् ।
मार्कण्डेयं नरो भक्त्या पूजयेत् प्रयतस्तथा ॥
ततो दीर्घायुषं व्यासं रामं द्रौणिं कृपं बलिम् ।
प्रह्लादञ्च हनूमन्तं विभीषणमथार्च्चयेत् ॥"
रामोऽत्र परशुरामः । चिरजीविसाहचर्य्यात् । द्रौणिरश्वत्थामा ॥ * ॥ तथा,—
"स्वनक्षत्रं जन्मतिथिं प्राप्य सम्पूजयेन्नरः ।
षष्ठीञ्च दधिभक्तेन वर्षे वर्षे पुनः पुनः ॥"
योगियाज्ञवल्क्यः ।
"ध्यायेन्नारायणं नित्यं स्नानादिषु च कर्म्मसु ।
तद्विष्णोरिति मन्त्रेण स्नायादपु पुनः पुनः ॥
गायत्री वैष्णवी ह्येषा विष्णोः संस्मरणाय वै ॥"
ध्यायेत् स्मरेत् । स च मन्त्रः ।
"तद्विष्णोः परमं पदं सदा पश्यन्ति सूरयः ।
दिवीव चक्षुराततम् ॥"
वामनपुराणम् ।
"सर्व्वमङ्गलमङ्गल्यं वरेण्यं वरदं शुभम् ।
नारायणं नमस्कृत्य सर्व्वकर्म्माणि कारयेत् ॥"*॥
सङ्कल्पाकरणे निन्दामाह भविष्यपुराणम् ।
"सङ्कल्पेन विना राजन् ! यत्किञ्चित् कुरुते नरः ।
फलञ्चाल्पाल्पकं तस्य धर्म्मस्यार्द्धक्षयो भवेत् ॥"
ब्रह्मपुराणम् ।
"प्रणवादिसमायुक्तं नमस्कारान्तकीर्त्तितम् ।
स्वनामसर्व्वसत्त्वानां मन्त्र इत्यभिधीयते ॥
अनेनैव विधानेन गन्धपुष्पे निवेदयेत् ।
एकैकस्य प्रकुर्व्वीत यथोद्दिष्टं क्रमेण तु ॥"
गन्धपुष्पमात्रं पञ्चोपचाराद्यसम्भवे ।
"मन्त्राच्छतगुणं प्रोक्तं भक्त्या लक्षगुणोत्तरम् ।
भक्तिमन्त्रसमेतन्तु कोटि कोटि गुणोत्तरम् ॥
सर्व्वत्र कर्म्मोपदेशकं दक्षिणादिभिरर्चयेत् ।
तथोपदेष्टारमपि पूजयेच्च ततो गुरुम् ।
न पूज्यते गुरुर्यत्र नरैस्तत्राफला क्रिया ॥"
इति मत्स्यपुराणवचनात् ॥ * ॥
ततः कर्म्मानन्तरं तिलहोमस्तु पूजितदेवतानामभिः कार्य्यः ।
"एकैकां देवतां राम समुद्दिश्य यथाविधि ।
चतुर्थ्यन्तेन धर्म्मज्ञ नाम्ना च प्रणवादिना ॥
होमत्रयमथैकैकं घृतसंप्लुतं होमयेत् ॥"
इति विष्णुधर्म्मोत्तरदर्शनात् ॥
एवं होमे स्वाहान्तता च मन्त्रस्य ।

"खाद्दावसाने जुहुयात् ध्यायन् वै मन्त्रदेव-
ताम् ॥"
इति स्मृतेः ॥
अग्नौ तु देवीपुराणम् ।
"होमो ग्रहादिपूजायां घृतमष्टोत्तरं भवेत् ।
अष्टाविंशतिरष्टौ वा यथाशक्ति विधीयते ॥"*॥
स्कान्दे ।
"खण्डनं नखकेशानां मैथुनाध्वानमेव च ।
आमिषं कलहं हिंसां वर्षट्कृद्वौ विवर्ज्जयेत् ॥"
अध्वानं अध्वगमनम् । कलहमित्यत्र सङ्गर-
मिति क्वचित् पाठः । सङ्गरं युद्धम् । वर्षट्कृद्वौ
जन्मदिने ॥ * ॥ वृद्धमनुः ।
"मृते जन्मनि संक्रान्तौ श्राद्धे जन्मदिने तथा ।
असृग्यस्मृग्मे चैव न स्नायादुष्णवारिणा ॥"
जन्मनि पुत्रजन्मनि । ज्योतिषे ।
"स्नाता जन्मदिने स्त्रियं परिहरन् प्राप्नोत्य-
भीष्टां श्रियं
मत्स्याक्षोचयतो द्विजाय ददतोऽप्यायुश्चिरं
वर्द्धते ।
भुक्त्वा खादति यच्च तस्य रिपवो नार्धं प्रयान्ति
ध्रुवं
भुङ्क्ते यस्तु निरामिषं स हि भवेज्जन्मान्तरे
पण्डितः ॥"*॥
दीपिकायाम् ।
"जन्मर्क्षयुक्ता यदि जन्ममासे
यस्य ध्रुवं जन्मतिथिर्भवेच्चेत् ।
भवन्ति तद्वत्सरमेव याव-
न्नैरुज्यसम्मानसुखानि तस्य ॥
कृतान्तकुजयोर्वारे यस्य जन्मतिथिर्भवेत् ।
अनृक्षयोगसंप्राप्तौ विपन्नस्तस्य पदे पदे ॥"
कृतान्तकुजयोः ग्रहनिमङ्गलयोः ।
"तस्य सर्व्वौषधिस्नानं ग्रहविप्रसुरार्चनम् ।
ग्रहानुद्दिश्य होमो वा ग्रहाणां प्रीतिमिच्छता॥
सौरारयोर्दिने मुक्ता देयावृत्ते तु काञ्चनम् ॥
सुरा मांसी वचा कुष्ठं शैलेयं रजनीद्वयम् ।
शटी चम्पकमुस्तश्च सर्व्वौषधिगणः स्मृतः ॥"
रजनीद्वयं हरिद्रा दारुहरिद्रेति । एतेषां
पत्राद्दीनां ग्रहणम् । कषायावयवग्रहणे मत्स्य-
पुराणविष्णुधर्म्मोत्तरयोस्तथा दर्शनात् । तद्-
यथा,—
"एषां पत्राणि सारांणि मूलानि कुसुमानि च ।
एवमादीनि चान्यानि कषायाख्यो गणः स्मृतः ॥"
आयुर्व्वेदोक्ता परिभाषा ।
"अङ्गेऽप्यनुक्ते विहितन्तु मूलं
भागेऽप्यनुक्ते समता विधेया ॥"
तत्र क्रमः । तिलोद्वर्त्तनम् । तिलयुक्तजलेन
स्नानम् । नववस्त्रपरीधानम् । गुग्गुलुनिम्ब-
सिद्धार्थदूर्व्वा-गोरोचनात्मकजन्मग्रन्थिं दक्षिणे
पाणौ बध्नीयात् । गुरुदेवाग्निविप्राश्च पूज-
नीयाः । खनक्षत्रं पूजनीयम् । अत्र च ।
स्वाती स्वाती अवणा अक्षौवे । मृगशिरो
नपुंसि स्यात् । पुंसि च पुनर्व्वसुपुष्यौ । मूलं
त्रक्षौ स्त्रियां श्रेषाः । इत्यनेन लिङ्गनिर्णयः ॥*॥
जन्मनक्षत्रादीनां शोधनमाह विष्णुधर्म्मोत्तरे ।
"शोधयेज्जन्मनक्षत्रं धनसारं गृहे मलम् ।
प्रभोरप्यपमानञ्च तस्य दुश्चरितञ्च यत् ॥"
धनसारं घनश्रेष्ठम् । मलं छिद्रम् ॥ पितरौ
प्रजापतिः सूर्य्यो गणपतिर्मार्कण्डेयश्च पूजनीयः ।
तत्र प्रार्थनमन्त्रौ ।
"चिरजीवी यथा त्वं भो भविष्यामि तथा मुने ।
रूपवान् वित्तवांश्चैव श्रिया युक्तश्च सर्व्वदा ॥
मार्कण्डेय महाभाग सप्तकल्पान्तजीवन ।
आयुरिष्टार्थसिद्ध्यर्थमस्माकं वरदो भव ॥"
ततो व्यासपरशुरामाश्वत्थामकृपवलिप्रह्लाद-
हनूमद्विभीषणाः पूजनीयाः । षष्ठ्यपि पूज-
नीया ।
"त्रैलोक्ये यानि भूतानि स्थावराणि चराणि
च ।
ब्रह्मविष्णुशिवैः सार्द्धं रक्षां कुर्व्वन्तु तानि मे ॥"
इति मत्स्यपुराणीयं रक्षार्थं पठेत् ॥ * ॥
पित्तमालपादग्रहणक्रमस्तु विष्णुपुराणादुन्नेयः ।
यथा,—
"कृष्णोऽपि वसुदेवस्य पादौ जग्राह सत्वरः ।
देवक्याश्च महाबाहुर्बलदेवसहायवान् ॥"
एवञ्च ।
"सहस्रन्तु पितुर्माता गौरवेणातिरिच्यते ॥"
इति मनुवचने पितुरपेक्षया यत् सहस्रं मातु-
र्गौरवमुक्तं यत् पोषणरक्षार्थम् । अतएव
मनुः ।
"मृते भर्त्तरि पुत्रस्तु वाच्यो मातुररक्षिता ॥"
वाच्यो गर्हणीयः ॥ * ॥ गुडदुग्धतिलपाने तु
मन्त्रः ।
"सतिलं गुडसंमिश्रमञ्जल्यर्द्धमितं पयः ।
मार्कण्डेयवरं लब्ध्वा पिबाम्यायुष्यहेतवे ॥"
अत्र वैदिकेतरमन्त्रपाठे शूद्रादेरप्यधिकारः ।
जन्मतिथेः प्रागुक्तब्रह्मपुराणीयत्वात् पौर्णमा-
स्यन्तमासादरः ॥ * ॥ जन्मतिथेरुभयदिनलाभे
तु देवीपुराणम् ।
"युगाद्या वर्षवृद्धिश्च सप्तमी पार्व्वतीप्रिया ।
रविरुदयमीक्षन्ते न तत्र तिथियुग्मता ॥
यस्मदये जन्मतिथिर्यदि स्यात्
पूज्या तदा जन्मभसंयुतैव ।
असङ्गता भेन दिनदयेऽपि
पूज्या परा या भवतीह यत्नात् ॥"
भं नक्षत्रम् । परवचनं बृहन्नाजमार्त्तण्डेऽपि ।
पूर्व्वाह्णे तिथिनक्षत्रलाभ एवेदं लक्ष्यते ।
"नक्षत्रे खण्डिते येन प्राप्तः कालस्तु कर्म्मणः ।
नक्षत्रकर्म्माण्यत्रैव तिथिकर्म्म तथैव च ॥"
इति बृहस्पतिवचनात् ॥
खण्डिते खण्डद्वययुक्ते येन नक्षत्रखण्डेन विहित-
कालः प्राप्तः । नक्षत्रद्वैधे तु बौधायनमार्कण्डेयौ ।
"तन्नक्षत्रमहोरात्रं यस्मिन्नस्तं गतो रविः ।
यस्मिन्नुदेति सविता तन्नक्षत्रं दिनं स्मृतम् ॥"
इति तिथ्यादितत्त्वम् ॥

वर्षाः, स्त्री मुनि, (वर्षो वर्षणमस्त्यासु इति ।
वर्ष + अर्शआदित्वात् अच् । टाप् । यद्वा, व्रियन्ते
इति । वृ + "वृतृवदीति ।" उणा० ३ । ६२ ।
इति सः । ततष्टाप् ।) खनामख्यात ऋतुः ।
तत्पर्य्यायः । प्रावृट् २ । इत्यमरः ।१।४।१६॥
घनकालः ३ जलार्णवः ४ प्रवृट् ५ मेघागमः ६
घनाकरः ७ । इति शब्दरत्नावली ॥ प्रावृषा८ ।
इति त्रिकाण्डशेषः ॥ स च ऋतुः सौरश्रावण-
भाद्रमासद्वयात्मकः । आषाढ़ादिमासचतुष्टया-
त्मकश्च । आद्यस्य प्रमाणम् । यथा । तपस्य-
पस्यौ शैशिरोऽृतुः । मधुश्च माधवश्च वासन्ति-
कोऽृतुः । शुक्रश्च शुचिश्च ग्रैष्मोऽृतुः । अयैत-
दुदगयनं देवानां दिनम् । नभाश्च नभस्यश्च
वार्षिकोऽृतुः । इषश्च ऊर्ज्जश्च शारदोऽृतुः ।
सहाश्च सहस्यश्च हैमन्तिकोऽृतुः । अथैतद्-
दक्षिणायनं देवानां रात्रिः । इति मलमास-
तत्त्वधृता श्रुतिः ॥ ग्रैष्मस्य प्रमाणं तत्र चातु-
र्मास्यव्रतनियमश्च यथा । वाराहे ।
"आषाढ़शुक्लद्वादश्यां पौर्णमास्यामथापि वा ।
चातुर्मास्यव्रतारम्भं कुर्य्यात् कर्कटसंक्रमे ॥
अभावे तु तुलार्केऽपि मन्त्रेण नियमं व्रती ।
कार्त्तिके शुक्लद्वादश्यां विधिवत्तत् समापयेत् ॥
चतुर्धापि हि तच्चीर्णं चातुर्मास्यं व्रतं नरः ।
कार्त्तिक्यां शुक्लपक्षे तु द्वादश्यां तत्समापयेत् ॥"
मात्स्ये ।
"चतुरो वार्षिकान् मासान् देवस्योत्थापना-
वधि ।
मधुस्त्यजी भवेन्नित्यं नरो गुडविवर्ज्जनात् ॥
तैलस्य वर्ज्जनादेव सुन्दराङ्गः प्रजायते ।
कटुतैलपरित्यागात् सुचुनासः प्रजायते ॥
लभते सन्ततिं दीर्घां स्थालीपाकमभक्षयन् ।
सदा मुनिः सदा योगी मधुमांसस्य वर्ज्जनात् ॥
निराधिर्नीरुगोजस्वी विष्णुभक्तश्च जायते ।
एकान्तरोपवासेन विष्णुलोकमवाप्नुयात् ॥
धारयन्नखलोमानि गङ्गास्नानं दिने दिने ।
ताम्बूलवर्ज्जनाद्भोगी रक्तकण्ठश्च जायते ॥
घृतत्यागात् सुलावण्यं सर्व्वं स्निग्धं वपुर्भवेत् ।
फलत्यागात्तु मतिमान् बहुपुत्रश्च जायते ॥
नमो नारायणायेति जप्तानघ्नजनं फलम् ।
पादाभिवन्दनाद्विष्णोर्लभेन्नोदानजं फलम् ॥
एवमादिव्रतैः पार्थ तुष्टिमायाति केशवः ॥"
सनत्कुमारः ।
"इदं व्रतं मया देव ! गृहीतं पुरतस्तव ।
निर्विघ्नां सिद्धिमाप्नोतु प्रसन्ने त्वयि केशव ! ॥
गृहीतेऽस्मिन् व्रते देव यद्यपूर्णे त्वहं त्रिये ।
तन्मे भवतु सम्पूर्णं त्वत्प्रसादाज्जनार्द्दन ! ॥"
समाप्तौ च ।
"इदं व्रतं मया देव कृतं प्रीत्यै तव प्रभो ।
नूनं सम्पूर्णतां यातु त्वत्प्रसादाज्जनार्द्दन ॥"*॥
अत्रैव यतिमधिकृत्य काठकगृह्यम् ।
"एकरात्रं वसेद्ग्रामे नगरे पञ्चरात्रकम् ।
वर्षाभ्योऽन्यत्र वर्षासु मासांश्च चतुरो वसेत् ॥"

एतदग्रन्थविषयम्। ऊर्द्धं वार्षिकाभ्यां मासाभ्यां नैकस्थानवासी इति ग्रन्थोक्तेः। इति तिथ्यादितत्त्वम्॥ वर्षर्त्तौ वर्ज्यनीयानि यथा,—

"वर्षासु घनग्रिखिस्वयहंसगमाः पङ्ककन्दलो-
ल्लेदौ।
जातीकदम्बकेतकभक्षानिलनिम्नगाहलि-
प्रीतिः॥"

इति कविकल्पलतायाम् १ स्तवके २ कुसुमम्॥

(एतत्कालस्नानादिकं यथा,—

"सघनवारिदवारिसमाकुला
निखिलभूः प्रबलोदकपूरिता।
समदवातकरा विदिशो दिशो
मुदितकोटकमिप्रभवा मही॥
नीलग्रस्यहरितोज्ज्वला मंही
कृत्यकासलिलसंप्लुता सरित्।
इन्द्रगोपकविराजिता धरा
पङ्कभूषणविभूषिता च सा॥

पत्री कूजति कानने च सरसी स्वागाम्बुपूर्णा तथा
हंसा मानसमाव्रजन्ति कमलान्यम्लानतां यान्ति
च॥

गर्ज्जन्मेघमहेन्द्रकन्दरदरीग्रस्यास्तृता श्यामला
भात्येवं पवनस्य कोपनकरो वर्षाऋतुः क्षोभितः॥"

"किञ्चिद्घर्म्मो भवेदत्र ग्रस्यानां दृढ़ता भवेत्।
बहुग्रस्या भवेद्वाची वारिपूर्णा सरिन्मुहुः॥
बहूदकधरा मेघा बहुतृष्णा घनस्वनाः।
एवं गुणसमायुक्ता वर्षा ज्ञेया ऋतूत्तमाः॥
तासु वातकफौ क्रुद्धौ जायेते हि नृणां भृशम्।
इति ज्ञात्वा भिषक् श्रेष्ठः कुर्य्यादस्य प्रतिक्रियाम्॥
खेदनं मर्द्दनं पथ्यं निर्व्वाते शयनन्तथा।
गौररामारसं ग्रस्यं व्यायामः क्रमविक्रमः॥
कट्वम्लक्षारसुरसाः सेवा वातकफापहाः।
निरूहा वस्तिकर्म्माद्याः कफवातरुजापहाः॥"

इति हारीते प्रथमे स्थाने चतुर्थेऽध्याये॥

"आदानस्थानवपुषामग्निः सक्षोऽपि सीदति।
वर्षासु दोषैर्दूष्यन्ति तेऽम्बुलम्बाम्बुदेऽम्बरे॥
सतुषारेण मरुता सहसा शीतलेन च।
भूवाष्पेणाम्लपाकेन मलिनेन च वारिणा॥
वह्निनैव च मन्देन तेष्वित्यल्पेषु दूषिषु।
भवेत् साधारणं सर्व्वमुग्रञ्चैवाग्नयश्च यत्॥
आस्थापनं शुद्धतनुर्जीर्णं धान्यं रसान् क्षतान्।
आशुगं पिशितं यूषान् मध्यरिष्टं चिरन्तनम्॥
मद्यं सौवर्चलाढ्यं वा पञ्चकोलावचूर्णितम्।
दिवा कौपं श्रृतशीतं क्षौद्रवन्नातिदुर्दिने॥
अक्लान्तवलवत्केशं संशुष्कं क्षौद्रवल्कलम्।
अपादचारी सुरभिः सततं धूपितास्बरः॥
ह्यर्व्वपृष्ठे वसेद्वाप्यग्नीतग्नीकरवर्ज्जिते।
नदीजलोदमन्थाद्यैः खन्नायासातपांस्त्यजेत्॥"

इति वाभटे सूत्रस्थाने सप्तदशेऽध्याये॥)

वर्षांशः, पुं, (वर्षस्य वत्सरस्य अंशः।) मासः। इति त्रिकाण्डशेषः॥

वर्षाघोषः, पुं, (वर्षासु घोषो महान् शब्दोऽस्य।) महामण्डूकः। इति राजनिर्घण्टः॥

वर्षाङ्गः, पुं, (वर्षस्य वत्सरस्य अङ्गमिव। अभिधानात् पुंस्त्वम्।) मासः। इति हारावली। २८॥

वर्षाङ्गी, स्त्री, (वर्षासु अङ्गं यस्याः। तत्र जाताङ्कुरवर्द्धनादस्यास्तथात्वम्।) पुनर्नवा। इति शब्दरत्नावली॥ (विषयोऽस्याः पुनर्नवाशब्दे ज्ञातव्यः॥)

वर्षाभवः, पुं, (वर्षासु भवतीति। भू+अच्। वर्षासु भव उत्पत्तिर्यस्य वा।) रक्तपुनर्नवा। इति राजनिर्घण्टः॥ वर्षाजाते, त्रि॥

वर्षाभूः, पुं, (वर्षासु भवतीति। भू+क्विप्।) भेकः। इत्यमरः। १। १०। २४॥ (अस्य पर्य्यायो यथा,—

"मण्डूकः प्लवगो भेको वर्षाभूर्दर्दुरो हरिः॥"

इति भावप्रकाशस्य पूर्व्वखण्डे द्वितीये भागे॥) इन्द्रगोपः। इति राजनिर्घण्टः॥ भूलता। इति मेदिनी। भे, १८॥

वर्षाभूः, स्त्री, (वर्षासु भवतीति। भू+क्विप्।) पुनर्नवा। इति मेदिनी। भे, १८॥ (यथा, सुश्रुते सूत्रस्थाने ४५ अध्याये।

"तिलपर्णिकावर्षाभूचित्रमूलकपोतिकालम्बुषाशाकुकलायप्रभृतीनि॥") भेकी। इति भरतधृतरूपरत्नाकरः॥ वर्षाभवे, त्रि॥

वर्षाभ्वी, स्त्री, (वर्षाभू+ङीप्।) भेकी। इत्यमरः। १।१०।२४॥ पुनर्नवा। इत्यमरमाला भागुरिश्च॥

वर्षामदः, पुं, (वर्षासु माद्यतीति। मद्+अच्।) मयूरः। इति केचित्॥

वर्षाम्भःपारव्रतः, पुं, (वर्षाम्भो वृष्टिजलं तस्य पारण्यं उपवासान्ते पानं व्रतमिव यस्य।) चातकपक्षी। इति केचित्॥

वर्षाराज्ञः, पुं, (वर्षाणां रात्रिः। ततः समासान्तोऽच्।) वर्षाकालीनरात्रिः। इति पुंलिङ्गसंग्रहटीकायां भरतः॥

वर्षार्च्चिः, [स्] पुं, (वर्षासु अर्च्चिर्दीप्तिरस्य।) मङ्गलग्रहः। इति शब्दरत्नावली॥

वर्षालङ्घिका, स्त्री, वृक्षा। इत्यमरटीकायां भरतः॥

वर्षावसानः, पुं, (वर्षाणामवसानमत्र।) शरत्कालः। इति राजनिर्घण्टः॥

वर्षिकं, त्रि, वर्षासम्बन्धि। वर्षसम्बन्धि। वर्षाशब्दात् वर्षशब्दाच्च परेण ठञिकप्रत्ययेन निष्पन्नम्॥

वर्षिष्ठः, त्रि, अतिशयवृद्धः। अयमनयोरतिशयेन वृद्धः इत्यर्थे वृद्धस्थाने वर्षादेशे इष्ठप्रत्ययेन निष्पन्नः॥

वर्षीयान्, [स्] त्रि, (अयमनयोरतिशयेन वृद्धः। वृद्ध+ईयसुन्। वर्षादेशः।) अतिवृद्धः। तत्पर्य्यायः। दशमी २ ज्यायान् ३। इत्यमरः। ३। २। २३॥ (यथा,—

"आयोऽशाद् भवेद्वालस्तत्रस्थस्तत उच्यते।
वृद्धः स्यात् सप्ततेरूर्द्धं वर्षीयान् नवतेः परम्॥"

इति स्मृतिः॥)

वर्षुकः, त्रि, (वर्षति तच्छील इति। वृष+"लषपतपदस्थाभूवृषहनकमगमशॄभ्य उकञ्।" ३। २। १५४। इति उकञ्।) वर्षणकर्त्ता। वृषधातोर्णुकप्रत्ययेन निष्पन्नः॥ (यथा, भट्टौ। २। ३७।

"जगुः प्रसादं द्विजमानसानि
द्यौर्वर्षुका पुष्पचयं बभूव।
निर्याजमिष्टा ववृते वचश्च
भूयो बभाषे मुनिना कुमारः॥")

वर्षुकाब्दः, पुं, (वर्षुकश्चासौ अब्दश्चेति कर्म्मधारयः।) वर्षणशीलमेघः। इति जटाधरः॥

वर्षेजः, त्रि, (वर्षे जायते इति। जन+डः। सप्तम्या अलुक्।) वर्षाकालजातः। वत्सरजातः। सप्तम्यन्तवर्षशब्दपूर्व्वकजनधातोर्डप्रत्ययेन निष्पन्नः॥

वर्षोपलः, पुं, (वर्षाणामुपलः।) मेघभवशिला। करका। इत्यमरः। १। ३। १२॥ (यथा, वृहत्संहितायाम्। ८१। २४।

"वर्षोपलवच्चातं वायुस्कन्धाच्च सप्तमाद्भ्रष्टम्।
ह्रियते किल खाद्यैस्तड़ित्प्रभं मेघसम्भूतम्॥")

वर्ष्म, [न्] क्ली, (वर्षति वृष्यते वेति। वृष्+मनिन्।) शरीरम्। (यथा, कथासरित्सागरे। २। ५।

"दर्प्पं च समीपेऽस्य पिशाचानां शृतद्रुतम्।
काणभूतिं पिशाचं तं वर्ष्मणा शालसन्निभम्॥")

प्रमाणम्। इत्यमरः। ३। ३। २२३॥ प्रमाणमन्योन्नतिरिति स्वामी॥ (यथा, महाभारते। १। ३१। ८।

"अथापश्यद्वधीन् हस्तान् अङ्गुष्ठोदरवर्ष्मणः।
पलालवल्लिकामेकां वहतः संहतान् पथि॥")

इयत्ता। इति भरतः॥ अतिसुन्दराकृतिः। इति मेदिनी। ने, १२८॥ (उन्नते स्थिरे च, त्रि। यथा, ऋग्वेदे। १०। २८। २।

"सरोरुवद्दृषभस्तिग्मशृङ्गो
वर्ष्मञ्छ्रयो वरिमन्ना पृथिव्याः।"

"वर्ष्मन्नुग्रन्द उन्नतवचनः स्थिरवचनो वा।" इति तद्भाष्ये सायणः॥ वर्षीयान्। यथा, भागवते। ५। १८। ३०।

"ॐ नमो भगवतेऽकूपाराय सर्व्वसत्त्वगुणविशेषाय नमोऽनुपलक्षितस्थानाय नमो वर्ष्मणे नमो भूम्ने नमोऽवस्थानाय नमस्ते॥" "वर्ष्मणे वर्षीयसे।" इति तट्टीकायां श्रीधरः॥)

वर्ष्मं, क्ली, शरीरम्। इति द्विरूपकोषः॥

वर्ह, क वधे। दीप्तौ। इति कविकल्पद्रुमः॥ (चुरा०-परo-वधे सकo-दीप्तौ अकo-सेट्।) रेफोपधः। क, वर्हयति। इति दुर्गादासः॥

वर्ह, ङ श्रेष्ठ्ये। इति कविकल्पद्रुमः॥ (भ्वा०-आत्मo-अकo-सेट्।) ङ, वर्हते धनी श्रेष्ठः स्यादित्यर्थः॥

व(ब)र्हं, क्ली, (वर्हयति दीप्यते इति। वर्ह+अच्।) मयूरपिच्छम्। इत्यमरः। २।५। ३९॥ (यथा, महाभारते। १२। १२०। ४।

"यथा वर्हाणि चित्राणि बिभर्त्ति भुजगाग्रगः।
तथा बहुविधं राजा रूपं कुर्व्वीत धर्म्मवित्॥")
ग्रन्थिपर्णम्। इति भरतः॥ (वर्हतीति। वृह वृद्धौ+अच्।) पत्रम्। इति शब्दरत्नावली॥ (यथा, रघुः। ६। १७।
"विलासिनी विभ्रमदन्तपत्र-
भाषाङ्कुरं केतकवर्हमन्यः।
प्रियानितम्बोचितसन्निवेशै-
र्विपाटयामास युवा नखाग्रैः॥")
परीवारः। इति हेमचन्द्रः॥

वर्हणं, क्ली, (वर्हतीति। वृह वृद्धौ+ल्युः। वर्हयति शोभते इति। वर्ह दीप्तौ+ल्युर्वा।) पत्रम्। इति शब्दरत्नावली॥

व(ब)र्हिः, [स्], पुं, (वृंहति वर्द्धते इति। वृह वृद्धौ+"वृंहेर्नलोपश्च।" उणा० २।११०। इति इसिः नलोपश्च।) अग्निः। इति मेदिनी। से, ३६॥ दीप्तिः। इत्युणादिकोषः॥ यज्ञः। इति हेमचन्द्रः॥ (यथा, ऋग्वेदे। ७। ७५। ८।
"नूनो गोमद्वीरवद्वेहि रत्न-
मुषो अश्वावत् पुरुभोजो अग्ने।
मानो बर्हिः पुरुषता निदेक-
र्यूयं पातस्वस्तिभिः सदा नः॥"
"नोऽस्माकं बर्हिर्यज्ञम्।"इति तद्भाष्ये सायणः॥) चित्रकम्। इत्यमरः॥ (वृहद्राजस्य पुत्रः। यथा, भागवते। ६। १२। १३।
"वृहद्राजस्तु तस्यापि बर्हिस्तस्मात् कृत-
ञ्जयः॥")

व(ब)र्हिः, [स्], पुं, क्ली, (वृंहति वर्द्धते इति। वृह वृद्धौ+"वृंहेर्नलोपश्च।" उणा० २। ११०। इति इसिः नलोपश्च।) कुशः। इति मेदिनी। से, ६३॥ (यथा, कुमारे। १। ६१।
"अवचितबलिपुष्पा वेदिसन्मार्गदत्ता
नियमविधिजलानां बर्हिषाञ्चोपनेत्री॥")

वर्हिः, [स्] क्ली, (वृंहतीति। वृह वृद्धौ+इसिः नलोपश्च।) ग्रन्थिपर्णम्। इति शब्दरत्नावली॥

वर्हिःपुष्पं, क्ली, (वर्हिर्दीप्तिस्तद्युक्तं पुष्पमस्य।) ग्रन्थिपर्णम्। इत्यमरटीकायां भरतः॥

वर्हिःशुष्मा [न्], पुं, (वर्हिषा कुशेन वर्हिषि यज्ञे वा शुष्म तेजो यस्य।) अग्निः। इत्यमरः।१।१।५७॥

वर्हिःष्ठं, क्ली, (वर्हिरिव तिष्ठतीति। स्था+कः।) वर्हिष्ठम्। ह्रीवेरम्। इत्यमरभरतौ॥

वर्हिःकुसुमं, क्ली, (वर्हिं वर्हयुक्तं कुसुमं यस्य।) ग्रन्थिपर्णम्। इति शब्दचन्द्रिका॥

व(ब)र्हिणः, पुं, (वर्हमस्त्यस्येति। वर्ह+"फल-वर्हाभ्यामिनच्।" इति इनच्। यदा "बहुल-मन्यत्रापि।" उणा० २।४६। इत्यत्र वर्ह बलंह प्राधान्ये। बर्हिणो मयूरः। इत्युज्ज्वलदत्तोक्त्या इनच्।) मयूरः। इत्यमरः। २। ५। ३०॥ (यथा, मनौ। १२। ६५।
"कुक्कुन्दरिः शुभान् गन्धान् पत्रशाकन्तु बर्हिणः।
आविस् कृतान्नं विविधमकृतान्नन्तु शल्यकः॥"
क्ली। तगरम्। तत्पर्य्यायो यथा,—
"कालानुसार्य्यं तगरं कुटिलं मधुरं मतम्।
अपरं पिण्डतगरं दण्डहस्ती च बर्हिणम्॥"
इति भावप्रकाशस्य पूर्ब्बखण्डे प्रथमे भागे॥)

बर्हिणवाहनः, पुं, (बर्हिणो मयूरो वाहनं यस्य।) कार्त्तिकेयः। इति हलायुधः॥

बर्हिध्वजा, स्त्री, (बर्हिर्ध्वजो वाहनं यस्याः।) चण्डी। इति चिकाण्डशेषः॥

बर्हिपुष्पं, क्ली, (बर्हिं बर्हयुक्तं पुष्पं यस्य।) ग्रन्थिपर्णम्। इत्यमरः। २। ४। १३२॥

बर्हिर्ज्योतिः, [स्] पुं, (बर्हिषि यज्ञे ज्योतिरस्य।) वह्निः। इति हेमचन्द्रः। ४। १६४।

बर्हिर्मुखः, पुं, (बर्हिरग्निर्मुखं यस्य।) देवता। इत्यमरः। १। १। ६॥

बर्हिषदः, [द्] पुं, (बर्हिषि अग्नौ कुशासने वा सीदन्ति ये ते। बर्हिस्+सद्+क्विप्। पृषोदरादित्वात् साधुः।) पितृगणविशेषः। यथा,
"अग्यत्त्वानश्च यत्त्वानः पितरो ब्रह्मणः सुताः।
अग्निस्वात्ता बर्हिषदो द्विधा तेषां व्यवस्थितिः॥"
इति कौर्म्मे १२ अध्यायः॥
अपि च।
"अपसव्यं ततः कृत्वा सव्यं जानु च भूतले।
अग्निस्वात्तांस्तथा सौम्यान् हविष्मन्तस्तथोष्मपान्॥
सुकालिनो बर्हिषद आज्यपांस्तर्पयेत्ततः।
तर्पयेच्च पितॄन् भक्त्या सतिलोदकचन्दनैः॥
दर्भपाणिस्तु विधिना हस्ताभ्यां तर्पयेत्ततः॥"
अत्र केचित् पितृधर्म्मातिदेशात् दिव्यपितॄणामपि अञ्जलित्रयदानम्। तदसत्।
"कव्यबालं नलं सौम्यं यममर्य्यमणं तथा।
अग्निस्वात्ताः सोमपाश्च बर्हिषदः सकृत् सकृत्॥"
इति छन्दोगपरिशिष्टेन विशिष्टैकाञ्जलिविधानात्। इत्याह्निकतत्त्वम्॥ (पृथुवंशजस्य हविर्द्धानेः पुत्रः। यथा, भागवते। ४।२४।८—६।
"हविर्द्धानाद्धाविर्द्धानिर्विदूरासत षट्सुतान्।
बर्हिषदं पयं शुक्लं कृष्णं सत्यं जितव्रतम्॥
बर्हिषत्सु महाभागो हविर्द्धानिः प्रजापतिः।
क्रियाकाण्डेषु निष्णातो योगेषु च कुरूद्वह॥"
बर्हिषि यज्ञे सीदतीति। यज्ञस्थे, त्रि। यथा, ऋग्वेदे। २। ३। ३।
"स आ वह मरुतां शर्धो अच्युत-
मिन्द्रं नरो बर्हिषदं यजध्वम्॥")

बर्हिष्केशः, पुं, (बर्हिर्दीप्तिरेव केशः इव यस्य।) अग्निः। इति शोचिष्केशशब्ददर्शनात्॥

बर्हिष्ठं, क्ली, (बर्हिषि तिष्ठतीति। स्था+कः। अम्बाम्बेति षत्वम्।) ह्रीवेरम्। इत्यमरः॥ (यथा, सुश्रुते उत्तरतन्त्रे ११ अध्यायः।
"खेदं विदध्यादधवानुलेपं
बर्हिष्ठशुण्ठीसुरकाष्ठकुष्ठैः॥"
त्रि, वृद्धतमः। इति सायणः। यथा, ऋग्वेदे। ३। १३। १।
"प्रवो देवायाग्नये बर्हिष्ठमर्चासने॥")

व(ब)र्हिणः, [न्] पुं, (वर्हमस्यास्तीति। वर्ह+इनिः।) मयूरः। इत्यमरः॥ (यथा, ऋतुसंहारे। २। ६।
"सदा मनोज्ञाम्बुदनादसोत्सुकं
विभाति विस्फीर्णकलापशोभितम्।
सविभ्रमालिङ्गनचुम्बनाकुलं
प्रवृत्तनृत्यं कुलमद्य बर्हिणाम्॥"
प्राधागर्भसम्भूतः कश्यपपुत्रविशेषः। यथा, महाभारते। १। ६५। ४७।
"सिद्धः पूर्णश्च बर्ही च पूर्णायुश्च महा-
यशाः॥")

वल, मि ङ संवरणे। इति कविकल्पद्रुमः॥ (भ्वा०-आत्म०-सक०-सेट्।) मि, वलयति वालयति। ङ, वलते धनं लोकः संवृणोतीत्यर्थः। इति दुर्गादासः॥

वलभिः, वलभी, } स्त्री, (वलभि+कृदिकारादिति वा ङीष्।) वड़भी। इति शब्दरत्नावली अमरटीका च॥ (यथा, कथासरित्सागरे। ८७। १२।
"हर्म्यप्रासादवलभीव्वन्विष्यन् सोऽभ्रमन्निशि॥"
पुरीविशेषः। यथा, भट्टिः। २३। ३५।
"काव्यमिदं विहितं मया वलभ्यां
श्रीधरसेननरेन्द्रपालितायाम्।
कीर्त्तिरतो भवतान्नृपस्य तस्य
क्षेमकरः क्षितिपो यतः प्रजानाम्॥")

वलयः, पुं क्ली, (वलते आवृणोति हस्तादिकमिति। वल+"वलिमलितनिभ्यः कयन्।" उणा० ४। ६६। इति कयन्।) स्वर्णादिरचितप्रकोष्ठाभरणम्। वाला इति भाषा। तत्पर्य्यायः। आवापकः २ परिहार्य्यः ३ कटकः ४। इत्यमरः॥ पारिहार्य्यः५ शृंखकः६। इति शब्दरत्नावली॥ कम्बुः७ कुण्डलम् ८। इति जटाधरः॥ (यथा, रामायणे। २। ३२। ५।
"सहेमसूत्रैर्मणिभिः केयूरैर्वलयैरपि॥"
मण्डलम्। यथा, मार्कण्डेये। २०। ४६।
"अश्रान्तः सकलं भूमेर्वलयं तुरगोत्तमः।
समर्थः क्रान्तुमर्केण तवायं प्रतिपादितः॥"
अस्थिविशेषः। यथा, सुश्रुते शारीरस्थाने ५ अध्याये॥
"कपालरुचकतरुणवलयनलकसंज्ञानि।"
"पाणिपादपार्श्वपृष्ठोदरेषु वलयानि॥"
वैद्यकोक्ताग्निकर्म्मविशेषः। यथा, सुश्रुते।१।१२।
"तच्च रोगाधिष्ठानभेदादग्निकर्म्म चतुर्धाभिद्यते। तद्यथा वलयबिन्दुलेखाप्रतिसारणानीति दहनविशेषाः॥" * ॥ वेष्टनम्। यथा, रघुः। १। ३०।
"सवेलावप्रवलयां परिखीकृतसागराम्।
अनन्यशासनामुर्व्वीं शशासैकपुरीमिव॥")

वलयः, पुं, (वलयवदाकृतिरस्यस्येति। अर्श आदित्वात् अच्।) अष्टादशगलरोगान्तर्गतगलरोगविशेषः। यथा,—

"वलास एवायतमुन्नतञ्च
श्लेष्मं करोत्यन्नगतिं निवार्य्य ।
तं सर्व्वथैवाप्रतिवार्य्य वीर्य्यं
विवर्ज्जनीयं वलयं वदन्ति ॥" * ॥

अथ गलरोगाणां चिकित्सा ।

"कण्ठरोगेष्वसृज्जोक्तैस्तीक्ष्णैर्नस्यादिकर्म्मभिः ।
चिकित्सकश्चिकित्स्यान्तु कुर्य्याल्लोऽत्र समाचरेत् ॥
क्वाथं दद्याच्च दार्व्वीत्वङ्निम्बतार्क्ष्यैकलिङ्गजम् ।
हरीतकीकषायो वा हितो माक्षिकसंयुतः ॥
कटुकातिविषादारुपाठामुस्ताकलिङ्गकाः ।
गोमूत्रक्वथिताः पीताः कण्ठरोगविनाशनाः ॥
स्नुहीका कटुका योषा दार्व्वी त्वक् त्रिफला
घनम् ।
पाठा रसाञ्जनं दूर्व्वा तेजोक्षेति सुचूर्णितम् ॥
क्षौद्रयुक्तं विधातव्यं गलरोगे महौषधम् ।
योगास्त्वेते त्रयः प्रोक्ता वातपित्तकफापहाः ॥
जवाग्रजं तेजवतीं सपाठां
रसाञ्जनं दारु निशां सकृष्णाम् ।
क्षौद्रेण कुर्य्यात् गुटिकां सुखेन
तां धारयेत् सर्व्वगलामयेषु ॥"
इति भावप्रकाशः ॥ * ॥

वेला । कङ्कणम् । इति जटाधरः ॥ (दण्डव्यूह-विशेषः । यथा, कामन्दकीये नीतिसारे । १६ । ४५ ।

"सुखास्यो वलयश्चैव दण्डभेदाः सुदुर्ज्जयः ॥")

वलयितं, त्रि, (वलयवत् श्रुतमिति । वलय + तत्करोतीति णिच् ततः क्तः । यद्वा, वलयं तदाकृतिर्जातमस्येति । वलय + इतच् ।) वेष्टितम् । इत्यमरः ॥ (यथा, गीतगोविन्दे । ११।२६।

"नीलनलिनमिव पीतपरागपटलभरवलयित-
मूलम् ॥"

यथा च, वैराग्यशतके ।

"इन्दीवरालावलयितबाहुः
परधनहरणे साचाद्राहुः ।
रण्डायौवनभञ्जनवीरः
कीर्त्तनपतने मल्लशरीरः ॥")

वलिरः, त्रि, (वलते संवृणोति पक्षुत्कारामिति । वल + बाहुलकात् किरच् ।) केकरः । इत्यमरः ॥

व(ब)लिशं, क्ली, (वलिना गल्यवद्दद्याद्युपहारेण श्यति क्षिणोति मत्स्यानिति । श्यो + कः ।) वड़िशम् । इति शब्दरत्नावली ॥

व(ब)लिशिः, स्त्री, (वलिना आहारोपहारेण मत्स्यादीन् श्यति विनाशयतीति । श्यो + बाहुलकात् किः ।) वड़िशम् । इति शब्दरत्नावली ॥

व(ब)लिशी, स्त्री, (वलिशि + ङ्यादिकारादिति ङीष् ।) वड़िशम् । इति शब्दरत्नावली ॥

व(ब)लूकं, क्ली, (वलते इति । वल संवरणे + "वलेरूकः ।" उणा० ४ । ४० । इति उकः ।) पद्ममूलम् । पक्षिविशेषे, पुं । इति सिद्धान्तकौमुद्यां सुबादिवृत्तिः उणादिकोषश्च ॥

व(ब)लूलः, त्रि, बलवान् । वलशब्दात् गोलगोत्यादिना ऊलप्रत्ययेन निष्पन्नः । इति मुग्धबोधव्याकरणम् ॥ अस्य पवर्गीयवकारादित्वेऽपि तत्रालिखितत्वादत्र लिखनम् ॥

वल्क, क भाषणे । इति कविकल्पद्रुमः ॥ (चुरा०-पर०-सक०-सेट् ।) क, वल्कयति । भाषणं कथनम् । इति दुर्गादासः ॥

व(ब)ल्कं, क्ली, (वलते इति । वल संवरणे + "शूक-वल्कोल्काः ।" उणा० ३ । ४२ । इति कप्रत्ययान्तो निपातितः ।) वल्कलः । (यथा, रघौ । ८ । ११ ।

"गुणवत् सुतरोपितश्रियः
परिणामे हि दिलीपवंशजाः ।
पदवीं तरुवल्कवाससां
प्रयताः संयमिनां प्रपेदिरे ॥")

शल्कः । इति मेदिनीशब्दरत्नावल्यौ ॥ खड्गम् । इति विश्वः ॥

व(ब)ल्कः, पुं, (वल संवरणे + कः निपातितश्च ।) पट्टिकालोध्रः । इति राजनिर्घण्टः ॥

वल्कतरुः, पुं, (वल्कप्रधानस्तरुरिति मध्यलोपी समासः ।) पूगवृक्षः । इति राजनिर्घण्टः ॥

वल्कद्रुमः, पुं, (वल्कप्रधानो द्रुमः ।) भूर्ज्जवृक्षः । इति राजनिर्घण्टः ॥ (विवरणमस्य भूर्ज्जशब्दे ज्ञातव्यम् ॥)

व(ब)ल्कलं, क्ली, (वलते संवृणोतीति । वल + बाहुलकात् कलन् ।) त्वचम् । इति राजनिर्घण्टः ॥ डालचिनि इति भाषा ॥

व(ब)ल्कलः, पुं क्ली, (वलते संवृणोतीति । वल + बाहुलकात् कलन् ।) वृक्षत्वक् । वाकल इति भाषा । तत्पर्य्यायः । त्वक् २ वल्कम् ३ । इत्यमरः ॥ त्वचा ४ त्वचम् ५ चोचम् ६ चोलकम् ७ शल्कम् ८ क्षल्लकम् ९ क्षल्लिः १० क्षल्ली ११ चोतकम् १२ । इति शब्दरत्नावली ॥ (यथा, महाभारते । १ । १५६ । २ ।

"तौ तु पूर्व्वेण कालेन तपोयुक्तौ बभूवतुः ।
क्षुत्पिपासापरिश्रान्तौ जटावल्कलधारिणौ ॥")

वल्कला, स्त्री, (वल्कल + टाप् ।) श्लक्ष्णवल्का । इति राजनिर्घण्टः ॥

वल्कलोध्रः, पुं, (वल्कप्रधानो लोध्रः ।) पट्टिकालोध्रः । इति राजनिर्घण्टः ॥

वल्कवान् [त्] पुं, (वल्कः शल्कोऽस्यास्तीति । वल्क + मतुप् । मस्य वः ।) मत्स्यः । इति चिकाण्डशेषः ॥ वल्कयुक्ते, त्रि ॥

वल्लिलः, पुं, (वल्कोऽस्यास्तीति । वल्क + इलच् ।) काष्टकः । इति शब्दरत्नावली ॥

वल्कुतं, क्ली, वल्कलः । इति शब्दचन्द्रिका ॥

वल्ग, गतौ । इति कविकल्पद्रुमः ॥ (भ्वा०-पर०-अक०-सेट् ।) वल्गति । अयं श्रुतगताविति भट्टमल्लः । इति दुर्गादासः ॥

वल्गनं, क्ली, (वल्ग + ल्युट् ।) श्रुतगमनम् । बहुभाषणम् । वल्गधातोर्भावेऽनटप्रत्ययेन निष्पन्नम् ॥

वल्गा, स्त्री, (वल्ग्यतेऽश्वोऽनयेति । वल्ग + करणे घञ् । टाप् ।) दन्तालिका । लागाम् इति भाषा । तत्पर्य्यायः । अवक्षेपणी २ रश्मिः ३ कुप्या ४ । इति हेमचन्द्रः ॥ (यथा, राजतरङ्गिण्याम् । ५ । ३६७ ।

"वल्गन्मध्येऽश्ववाराणां नृत्यते वाग्यवाजिना ।
वल्गाङ्कितोद्वहल्लम्बं शिरस्त्रं वामपाणिना ॥")

वल्गितं, क्ली, (वल्ग् + भावे क्तः ।) अश्वस्य विशेषगमनम् । तच्च वेगेन विशिष्योपरिचरणम् । इत्यमरभरतौ ॥ श्रुतगमनम् । (यथा, शिशुपालवधे । २ । २७ ।

"अनिलोद्धूतिकार्य्यस्य वाग्जालं वाग्मिनो वृथा ।
निमित्तादपराद्धेर्षोर्धानुष्कस्येव वल्गितम् ॥")

बहुभाषणञ्च ॥

व(ब)ल्गुः, पुं, (वलते इति । वल प्राणने + "वलेर्गुक्च ।" उणा० १ । २० । इति उप्रत्ययः । गुणागमश्च धातोः ।) छागः । सुन्दरे, त्रि । इति मेदिनी । गे, २५ ॥ (यथा, रघौ । ५ । ६८ ।

"तद्वल्गुना युगपदुन्मिषितेन तावत्
सद्यः परस्परतुलामधिरोहतां द्वे ।
पक्ष्मान्तरेषु विततेषु तदीक्षणानां
चक्षुःक्षमे प्रचलितभ्रमरञ्च पद्मम् ॥")

व(ब)ल्गुकं, क्ली, (वल्गु + संज्ञायां स्वार्थे वा कन् ।) चन्दनम् । विपिनम् । पद्मम् । रुचिरे, त्रि । इत्यजयः ॥ तत्र पवर्गीयवकारादौ लिखितोऽयं शब्दः । अस्माभिस्तु तत्रालिखितत्वादत्र लिखितः ॥

वल्गुपत्रः, पुं, (वल्गु मनोज्ञं पत्रं यस्य ।) वनमुद्गः । इति शब्दचन्द्रिका ॥

वल्गुला, स्त्री, (वल्गु लातीति । ला + कः । टाप् ।) वाकुची । पक्षिविशेषः । श्येनस्य पर्य्यायः । चक्रविष्ठा २ दिवान्धा ३ निशाचरी ४ खेरिणी ५ दिवान्धापा ६ मांसेष्टा ७ मालवाह्निणी ८ । इति राजनिर्घण्टः ॥

वल्गुलिका, स्त्री, (वल्गुल + संज्ञायां कन् । टापि अत इत्वञ्च ।) तैलपायिका । यथा,—

"वल्गुलिका सुखविष्ठा परोक्षी तैलपायिका ॥"
इति हेमचन्द्रः ॥

(यथा, कथासरित्सागरे । ५५ । ७६ ।

"ततो वल्गुलिकातस्तं दृष्ट्वा पटमदर्शयत् ।
स चित्रज्ञां चित्रशर्म्मा राज्ञे मदनसुन्दरीम् ॥")

वल्ल, ङ भक्षणे । इति कविकल्पद्रुमः ॥ (भ्वा०-आत्म०-सक०-सेट् ।) वल्लते अन्नं लोकः । इति दुर्गादासः ॥

वल्लणं, क्ली, (वल्ल भक्षणे + भावे ल्युट् ।) भक्षणम् । इति हेमचन्द्रः ॥

वल्मिकः, पुं क्ली, वल्मीकः । इति शब्दरत्नावली ॥

वल्मिकिः, पुं क्ली, वल्मीकः । इत्यमरटीकायां भरतः ॥

व(ब)ल्मीकः, पुं, क्ली, (वलते इति । वल संवरणे + "अलीकादयश्च ।" उणा० ४ । २५ । इत्यत्र वलतेर्मुंमागमश्चेति उज्ज्वलदत्तोक्त्या कौकनस्थो

निपातः।) उपीकाक्षतमृत्तिकारूपः। तत्-पर्य्यायः। वामलूरः २ नाकुः ३। इत्य-मरः॥ वल्मिकः ४ वाल्मीकः ५ वाल्मीकिः ६ वाल्मिकिः ७। इति शब्दरत्नावली॥ * ॥ (यथा, मेघदूते। १५।

"वल्मीकाग्रात् प्रभवति धनुःखण्डमाखण्ड-
लस्य॥")

तन्मृत्तिकया व्रौव्यनिषेधो यथा। विष्णुपुरा-णम्।

"वल्मीकमूषिकोत्खातां मृदमन्तर्जलां तथा।
व्रौव्यावघृष्टां गेहाच्च नादद्याल्लेपसम्भवाम्।
अन्तःप्राण्यवपन्नाच्च हलोत्खातां न कर्ह-
माम्॥"

इत्याह्निकाचारतत्त्वम्॥ * ॥

देवप्रतिष्ठायां स्नानात् पूर्व्वं स्निग्धिदोषशान्त्यर्थं तन्मृत्तिकया स्नानं यथा,—

"वल्मीकमृत्तिकाभिस्तु गोमयेन सुभस्मना।
स्नापयेत् स्निग्धिसंशुद्ध्यै दोषाणामुपशान्तये॥"

वल्मीकमृद्दादिस्नाने मन्त्रविशेषानुपादानात् मन्त्रानादेशे गायत्रीति मूलपाणिलिखितात् गायत्र्या तत्तन्मूलमन्त्रेण वा स्नानं कारयि-तव्यम्। तथा स्नानं यथा,—

"स्नापयेत् प्रथमं देवं सोयैः पञ्चविधैरपि।
पञ्चाम्बुतैः पञ्चगव्यैः पञ्चमृत्तिकयैरपि॥
मृत्तिका करिदन्तस्य पर्व्वताश्वखुरस्य च।
कुम्भवल्मीकसम्भूतं मृत्पञ्चकमुदीरितम्॥"

इति देवप्रतिष्ठातत्त्वम्॥

वल्मीकः, पुं, (वल्मीक उपीकाक्षतमृत्तिकारूपः उत्पत्तिकारणत्वेनास्त्यस्येति। अच्।) वाल्मीकि-मुनिः। रोगविशेषः। इति विश्वः॥ अथ वल्मीकरोगस्य लक्षणम्।

"ग्रीवां सकक्षाकरयादृदेशे
सन्धौ गले वा त्रिभिरेव दोषैः।
ग्रन्थिः स वल्मीकवदक्रियायां
जातः क्रमेणैव गतप्रवृद्धिः॥
सुखैरनेकैरुन्नतिलोहवर्ण-
विसर्पवत् सर्पति चोन्नतायैः।
वल्मीकमाहुर्भिषजो विकारं
नित्यञ्चनीकं चिरजं विशेषात्॥"

ग्रीवा शकाटिका। अंसः स्कन्धः। कक्षा बाहुमूलम्। गलः कण्ठः। वल्मीकवदित्यनेन प्रचुरशिखरत्वमुन्नतत्वमवगाढ़मूलत्वञ्च सूच्यते। नित्यञ्चनीकं उपचारायोग्यम्॥ * ॥ अथ तस्य चिकित्सा।

"मूक्ष्मैर्योतृक्षत्र वल्मीकं क्षारामिभ्यां प्रसा-
धयेत्।
विषाग्नेयाम्बुदोक्षेण शोधयित्वा च रोधयेत्॥
वल्मीकन्तु भवेद्यस्य नातिवृद्धमसंज्ञकम्।
तत्र संशोधनं कृत्वा शोधितं रोपयेद् भिषक्॥
कुलत्थिकायां मूलैश्च गुडूच्या वचया च च।
क्षारेषतश्च मूलैश्च दन्तीमूलेक्षवेण च॥

श्यामामूलैः सपलाशैः शुक्तभिश्रैः प्रलेपयेत्।
सुस्निग्धैश्च सुखोष्णैश्च भिषक् तमुपनाहयेत्॥
पक्वं तद्वा विजानीयाद्वेदनाः सर्व्वा यथाक्रमम्।
अभिज्ञाय गतीश्चित्वा प्रदिह्याच्चतिमान् भिषक्॥
संशोध्य दुष्टमांसानि क्षारेण प्रतिसारयेत्।
व्रणं विशुद्धं विज्ञाय रोपयेच्चतिमान् भिषक्॥
मनःशिलाजभल्लातसूक्ष्मैलागुरुचन्दनैः।
जातीपल्लवतक्रैश्च निम्बतैलं विपाचयेत्॥
वल्मीकं नाशयेच्छीघ्रं बहुच्छिद्रं बहुव्रणम्।
पाणिपादोपरिष्टात्तु छिद्रैर्बहुभिराततम्॥
वल्मीकं यत् सशोफं स्याद्वर्ष्म तद्धि विजा-
नता॥"

मनःशिलाद्यं तैलम्। इति भावप्रकाशः॥ (अस्य मृदो व्यवहारेण रोगनाशित्वं यथा,—

"क्षौद्रसर्षपवल्मीकमृत्तिकासंयुतं भिषक्।
गाढ़मुत्सादनं कुर्य्यादूरुस्तम्भे प्रलेपनम्॥"

इति वैद्यकचक्राणिसंग्रहे ऊरुस्तम्भाधिकारे॥)

वल्मीकिः, पुं, वल्मीकः। इति शब्दमाला॥

वल्मीकशीर्षं, क्ली, (वल्मीकस्य शीर्षमिव शीर्ष-मस्य।) स्रोतोऽञ्जनम्। इति राजनिर्घण्टः॥

वल्लीकूटं, क्ली, (वल्मीकस्य वल्मीकसम्बन्धि वा कूटम्।) वल्मीकः। इति हेमचन्द्रः॥

वल्गुल } तु क लूनिपूत्योः। इति कविकल्पद्रुमः॥
वल्गूल } (अदन्तपुरा०-पर०-सक०-सेट्।)

वल्गूलयति अववल्गूलत्। इति दुर्गादासः॥

वल्ग, ङ संवरणे। इति कविकल्पद्रुमः॥ (भ्वा०-आत्म०-सक०-सेट्।) ङ, वल्गते धर्मं लोकः संवृणोतीत्यर्थः। इति दुर्गादासः॥

वल्गः, पुं, (वल्गते संवृणोतीति। वल्ग+अच्।) गुञ्जात्रयपरिमाणम्। यथा,—

"वल्गस्त्रिगुञ्जो धरणश्च तेऽष्टौ।"

इति लीलावती॥

त्रिगुञ्जा। इति वैद्यकपरिभाषा। (यथा,—

"विषटङ्कणलिङ्गेक्षुदन्तीबीजं क्रमाद्द्वयम्।
दन्त्यर्द्धमर्द्धितं यामं रसस्त्रिपुरभैरवः॥
वल्गं खोपेत्य चार्द्रस्य रसे च सितया सह॥"

इति वैद्यकरसेन्द्रसारसंग्रहे ज्वराधिकारे॥)

सार्द्धगुञ्जा। यथा,—

"गोधूमस्त्रितयोक्तिता तु कथिता गुञ्जा तथा सार्द्धया
वल्गो वल्गचतुष्टयेन भिषजां मायां मतञ्चानुः।"

इत्यादि राजनिर्घण्टः॥

वल्गकी, स्त्री, (वल्गते इति। वल्ग+कुण्। गौरा-दित्वात् ङीष्।) वीणा। इत्यमरः॥ (यथा, हरिवंशे। ८४। १११।

"वल्गकीं वाद्यमानो हि सप्तस्वरविमूर्च्छिताम्॥")

वल्गकीहस्तः। इति राजनिर्घण्टः॥ (अस्याः पर्य्यायो यथा,—

"वल्गकी गजभक्षा च सुवक्त्रा सुरभीरसा।
मधुरस्वरा कुरुकरी वल्गकी च बहुस्वरा॥"

इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे॥)

वल्लभः, पुं, (वल्ल संवरणे+"रासिवल्लिभ्यश्च।" उणा० ३। १२५। इति अभच्।) दयितः। अध्यक्षः। सल्लक्षणतुरङ्गमः। इति मेदिनी। भे, १८॥ (जह्नुवंशीयबलाकाश्वस्य पुत्रः। स च कुशि-कस्य पिता। यथा, महाभारते। १३।४।५।

"वल्लभस्तस्य तनयः साक्षाद्धर्म्म इवापरः।
कुशिकस्तस्य तनयः सङ्क्षत्राच्चसमद्युतिः॥")

वल्लभः, त्रि, (वल्ल+अभच्।) प्रियः। (यथा, कामन्दकीयनीतिसारे। ५। १६।

"पुत्रेभ्यश्च नमस्कुर्य्यात् वल्लभेभ्यश्च भूपतेः॥")

अध्यक्षः। इत्यमरः॥ अध्यक्षोऽत्र गवाध्यक्षः। इति स्वामी॥

वल्लभपालकः, त्रि, (वल्लभानां अश्वविशेषाणां पालकः।) अश्वरक्षकः। इति भूरिप्रयोगः॥

वल्लभा, स्त्री, प्रिया। यथा,—

"प्रेयसी दयिता कान्ता प्राणेशा वल्लभा प्रिया।
हृदयेशा प्राणसमा प्रेष्ठा प्रणयिनी च सा॥"

इति हेमचन्द्रः॥

वल्लरं, क्ली, (वल्लते इति। वल्ल+अरन्।) क्षत्रा-गुरुः। इति राजनिर्घण्टः॥ मञ्जरिः। इति शब्द-रत्नावली॥ गह्वरम्। कुञ्जम्। इति धरणिः॥

वल्लरिः } स्त्री, (वल्ल+क्विप्। वल्लं संवरणं
वल्लरी } ऋच्छतीति। ऋ+अच इः। ङीष्-कारादिति वा ङीष्।) मञ्जरी। इत्यमर-भरतौ॥ (लता। यथा, कुमारे। ४। ३१।

"अनघायिनि संश्रयद्रुमे
गजभग्ने पतनाय वल्लरी॥")

चित्रमूलम्। मेथिका। इति राजनिर्घण्टः॥ (अस्याः पर्य्यायो यथा,—

"मेथिका मिथिनिर्मेथिर्दीपनी बहुपुत्रिका।
बोधिनी बहुबीजा च जातिगन्धफला तथा॥
वल्लरी चैव कामन्या मिश्रपुष्पा च वैरवी।
कुक्षिका बहुपर्णी च पित्तजिद्वायुवृद्धिदा॥"

इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे॥)

वल्लवः, पुं, (वल्ल प्रीतौ+क्विप्। वल्लं प्रीतिं वातीति। वा+कः।) गोपः। इत्यमरः॥ (यथा, माघे। ११। ८।

"इततरकरदण्डाः क्षिप्तवेणुग्रहास्ते
दधति दधनि धीराराववान् वारिजीव।
ग्रथितनिभिव सूरीघाः सारसङ्क्षुब्धमेते
कलयितसुदधिगुर्व्वीं वल्लवा लोड़यन्ति॥")

भीमसेनः। इति मेदिनी। वे, ४४॥ (विराटनगरे कृष्णवासकाले एवास्य एतन्नाम आसीत्। यथा महाभारते। ४। २। १।

"पौरोगवो ब्रुवाणोऽहं वल्लवो नाम नामतः।
उपस्थास्यामि राजानं विराटमिति मे मतिः॥")

वल्लवः, त्रि, (वल्लमाजन्दं वातीति। वा+कः।) सूपकारः। इत्यमरः॥

वल्लवी, स्त्री, (वल्लव+ङीष्।) वल्लवजातिस्त्री। वल्लवयष्टी। तत्पर्य्यायः। आभीरी २ गोपिका ३ गोपी ४ महाशूली ५ गोपालिका ६। इति शब्दरत्नावली॥ (यथा, किराते। ३। २७।

"स मन्थरावल्गित-पीवरत्वनी:
परिश्रमक्लान्तविलोचनोत्पला:।
निरीक्षितुं नोपरराम वल्लवी-
रभिप्रवृत्ता इव वारयोषित:॥")

वल्लि:, स्त्री, (वल्लते संवृणोति वृक्षादीनिति। वल्ल+"सर्व्वधातुभ्य इन्।" उणा० ४। ११७। इतीन्।) लता। इत्यमरटीकायां भरत:॥ (यथा, महाभारते। १२। १८४। १३।
"वल्लिर्वेष्टयते वृक्षं सर्व्वतश्चैव गच्छति॥")
पृथिवी। इति शब्दमाला॥

वल्लिकण्टकारिका, स्त्री, (वल्लिरूपा कण्टकारिका।) अग्निदमनीवृक्ष:। इति राजनिर्घण्ट:॥

वल्लिदूर्व्वा, स्त्री, (वल्लिरूपा दूर्व्वा।) माला-दूर्व्वा। इति राजनिर्घण्ट:॥

वल्लिप्राकटपोतिका, स्त्री, (वल्लिप्रधाना प्राकट-पोतिका।) मूलपोती। इति राजनिर्घण्ट:॥

वल्लिसूरण:, पुं, (वल्लिप्रधान: सूरण:।) अत्यम्ल-पर्णी। इति राजनिर्घण्ट:॥

वल्ली, स्त्री, (वल्लि+ङीष्।) लता। इत्यमर:॥ सा च भूमिप्रसारा वर्षमात्रस्थायिनी क्षुप्रा-वृक्षाद्या। (यथा च।
"विदारीसारिवाराजनीगुडूच्योऽजशृङ्गीचेतिवल्ली-संज्ञ:॥" इति सुश्रुते सूत्रस्थाने ३८ अध्याय:॥
यथा च, रामायणे। २। ८०। ६।
"लतावल्लीश्च गुल्मांश्च स्थानूनप्रथन एव च।
जनास्ते चक्रिरे मार्गं छिन्दन्तो विविधान् द्रुमान्॥")
अजमोदा। इति मेदिनी। ले, ३८॥ कैवर्त्तिका। चव्यम्। इति राजनिर्घण्ट:॥

वल्लीगड़:, पुं, (वल्लीरूपो गड़:।) मत्स्यविशेष:। भोला इति वाङ्गिकड़ा इति च भाषा। अस्य गुणा:। लघुत्वम्। रूक्षत्वम्। अनभिष्यन्दित्वम्। मरुत्करत्वम्। सर्य्यत्वम्। कफनाशन-त्वञ्च। इति राजवल्लभ:॥

वल्लीजं, क्ली, (वल्ल्यां लतायां जायते इति। जन+ड:।) मरीचम्। इति राजनिर्घण्ट-शब्दचन्द्रिके॥ (यथा, बृहत्संहितायाम्। ८।१३।
"भाद्रपदे वल्लीजं निष्पत्तिं याति पूर्व्वशस्यच्च॥")

वल्लीबदरी, स्त्री, (वल्लीरूपा बदरी।) भूबदरी। इति राजनिर्घण्ट:॥

वल्लीसुत:, पुं, (वल्लीषु जातो सुदग:।) मङ्कुष्ठक:। इति राजनिर्घण्ट:॥

वल्लीवृक्ष:, पुं, (वल्लीवत् दीर्घो वृक्ष:।) सालवृक्ष:। इति राजनिर्घण्ट:॥

वल्लुरं, क्ली, (वल्लन्ते आव्रियते लतादिनेति। वल्ल+बाहुलकात् उरच्।) कुञ्जम्। मञ्जरी। क्षेत्रम्। निर्जलस्थानम्। शाद्वल:। इति हेम-चन्द्र:॥ गहनम्। इति मेदिनी। रे, २१०॥ विश्वधररत्नावलीषु वल्लरमिति पाठ:॥

वल्लूरं, त्रि, (वल्लन्ते संव्रियते इति। वल्ल+"खर्ज्जि-पिञ्जादिभ्य ऊरोलचौ।" उणा० ४। ६०। इति ऊरच्।) आतपादिना शुष्कमांसम्। इत्यमर:। २। ६। ६३॥ (तस्याभक्ष्यत्वं यथा, मनु:। ५।१३।
"निमज्जतश्च मत्स्यादान् सौनं वल्लूरमेव च॥"
"वल्लूरं शुष्कमांसम्।" इति तट्टीकायां कुल्लूक-भट्ट:॥) शूकरमांसम्। इति मेदिनी। रे, २१०॥ वनचैत्यम्। वाहनम्। ऊषरभूमि:। इति हेमचन्द्र:॥

वल्ल्या, स्त्री, (वल्ल+भावे घञ्। वल्लाय संवरणाय साधु:। वल्ल+यत्।) धात्रीवृक्ष:। इति हारावली॥

व(ब)ल्वज:, पुं, (वल्वे पर्व्वते जायते इति। जन+ड:।) उलप:। इति हेमचन्द्र:॥ वाव इति ख्यातलवणम्। इत्यमर:॥ वलते भुवं वेष्टयति विप्रादित्वात् वप्रत्यये वल्व: पर्व्वत: तत्र जाता वल्वजा: इत्यन्ये। स्वभावात् बहुत्वे वल्वजा:। एको वल्वज इति भाष्यकारवचनादेकत्वमपि अतएव सुमनोऽभरोवल्वजादेर्व्वेति पाक्षिक-बहुत्वार्थं क्रमदीश्वरसूत्रम्। इति तट्टीकायां भरत:॥ (यथा, मनु:। २। ४२।
"मुञ्जालाभे तु कर्त्तव्या: कुशाश्मान्तकवल्वजै:।
त्रिवृता ग्रन्थिनैकेन त्रिभि: पञ्चभिरेव वा॥")

व(ब)ल्वजा, स्त्री, (वल्वे पर्व्वते जायते इति। जन+ड:। टाप्।) तृणविशेष:। सावे वागे इति हिन्दी भाषा। तत्पर्य्याय:। दृढ़पत्री २ तृणच्छद: ३ तृणवल्वजा ४ मौञ्जीपत्रा ५ दृढ़तृणा ६ पानीयाग्रा ७ दृढ़च्छदा ८। अस्या गुणा:। मधुरत्वम्। शीतत्वम्। पित्तदाहश्रमापहत्वम्। वातप्रकोपणत्वम्। रूक्षत्वम्। कण्ठशुद्धिकारि-त्वञ्च। इति राजनिर्घण्ट:॥

वल्ह, क त्विषि। इति कविकल्पद्रुम:॥ (चुरा०-पर०-अक०-सेट्।) क, वल्हयति। त्विषि दीप्तौ। इति दुर्गादास:॥

वल्ह, ड श्रेष्ठे। इति कविकल्पद्रुम:॥ (भ्वा०-आत्म०-अक०-सेट्।) ड, वल्हते धनी श्रेष्ठ: स्यादित्यर्थ:।

वप्र, लु स्तुतौ। इति कविकल्पद्रुम:॥ (अदा०-पर०-सक०-सेट्।) लु, वप्ति धनं लोक:। इति दुर्गादास:॥

वप्रं, क्ली, (वप्र+"वप्रिरण्योरुपसंख्यानम्।" ३। ३। ५८। इत्यस्य वार्त्तिकोक्त्या अप्।) इच्छा। प्रभुत्वम्। आयत्तता। इति शब्द-रत्नावली॥ (यथा, महाभारते। १२। १३४। ७।
"वप्रे बलवतां धर्म्म: सुखं भोगवतामिव॥")

वप्रंवद:, त्रि, (वप्रं तवाहं वप्र इति वाक्यं वद-तीति। वप्र+वद+"प्रियवशे वद: खच्।" ३। २। ३८। इति खच्। "अरुर्द्विषदजन्तस्य मुम्।" ६। ३। ६७। इति मुम्।) वप्रं वदति य:। आयत्तकरवाक्यवक्ता। इति सुग्धबोध-व्याकरणम्॥ (वप्रीभूत:। यथा, राजतरङ्गि-ण्याम्। ४। ३६५।
"स जहार दुराचारो भूभृत् लोभवप्रंवद:॥")

वप्र:, त्रि, (वष्टीति। वप्र+अच्।) आयत्त:। इति शब्दरत्नावली॥ (यथा, कथासरित्सागरे। ८।१७।
"गुणाढ्योऽपि तदाकर्ण्य सद्य: खेदवशो-ऽभवत्॥")

वप्र:, पुं, (वप्र+भावे अप्।) इच्छा। इति संकीर्णवर्गे अमर:॥ (उप्यते इष्यते इति। वप्र+कर्म्मणि अप्।) वेश्यागृहम्। आय-त्तता। प्रभुत्वम्। इति त्रिकाण्डशेष:॥ जन्म। इति हेमचन्द्र:।

वप्रका, स्त्री, (वप्रेण आयत्ततया कायति प्रीणति इति। के+क:।) वश्या नारी। इति शब्द-रत्नावली॥

वप्रक्रिया, स्त्री, (वप्रस्य क्रिया करणम्।) वशी-करणम्। तत्पर्य्याय:। संवदनम् २। इत्यमर:॥ मणिमन्त्रौषधैर्व्वशीकरणं संवदनं संपूर्व्वो वदि-र्व्वशीकरणे भावेऽनट्। संवदना च इति केचित्। करणेऽनटि वप्रक्रियासाधने मणि-मन्त्रादावपि। जयश्रिय: संवदनं यतस्तदिति रघु:। संचलनं इति पाठान्तरम्। इति तट्टीकायां भरत:॥

वप्रगा, स्त्री, (वप्रं गच्छतीति। गम+ड:।) वप्रीभूता। इति शब्दरत्नावली॥ (यथा, बृहत्संहितायाम्। ४३। ३२॥
"गाङ्गादिवाकरसुताजलचारुहारां
धात्रीं वसुद्वरसनां वप्रगां करोति॥"
अस्मिन्नर्थे वाच्यलिङ्ग एवायं शब्द:। यथा, महाभारते। ४। ६। १२।
"इदानि ते हन्त वरं यमिच्छसि
प्रशाधि मत्स्यान् वप्रगोऽस्म्यहं तव॥")

वप्रा, स्त्री, (वप्र स्तुहि+अच्। टाप्। "वप्रि-रण्योरुपसंख्यानम्।" इति अप् वा।) वन्ध्या। (अस्या धनं राजा रक्षितव्यम्। यथा, मनु:। ८। २८।
"वप्राऽपुत्रासु चैवं स्याद्रक्षणं निष्कुलासु च।
पतिव्रतासु च स्त्रीषु विधवास्वातुरासु च॥")
सुता। योषा। स्त्रीगवी। करिणी। इति मेदिनी। प्रे, १३॥ (यथा, कथासरित्सागरे। ६।१२०।
"असिञ्चत स ताभिश्च वप्राभिरिव वारण:।")
वन्ध्या गवी। इत्यमर:॥ (यथा, ऋग्वेदे। २।७।५।
"त्वं नो असि भारताग्ने वप्राभिरुक्षभि:॥"
"वप्राभिर्व्वन्ध्याभिर्गोभि:।" इति तद्भाष्ये सायण:॥
वप्रीभूता। यथा, गारुड़े। १८३ अध्याये।
"सप्तभिर्मन्त्रितं कृत्वा करवीरस्य पुष्पकम्।
स्त्रीणामग्रे भ्रामयेच्च तत्क्षणे सा वप्रा भवेत्।")

वप्राढ्यक:, पुं, (वप्रया आढ्यक:। प्रचुरवप्रा-वत्त्वात् तथात्वम्।) शिशुमार:। इति शब्द-रत्नावली॥

वप्रापायी [न्], पुं, (वप्रां पिबतीति। पा+णिनि:।) कुक्कुर:। इति शब्दमाला॥

वप्रि, क्ली, (वप्र+भावे इन्।) वप्रित्वम्। इति शब्दमाला॥

वप्रिक:, त्रि, मूल्यम्। इत्यमर:। ३। १। ५६॥

वशिका, स्त्री, (वशो वशीकरणं साधुत्वेनास्त्यस्या इति। वश्+ठन्।) अगुरुः। इति शब्दचन्द्रिका॥

वशिता, स्त्री, (वशिनो भावः। वशिन्+तल्।) वशित्वम्। इति हेमचन्द्रः॥ (यथा, भागवते। ११। १५। १६।
"नारायणे तुरीयाख्ये भगवच्छब्दशब्दिते।
मनो मय्यादधद्योगी महद्भीमा वशितामियात्॥")

वशित्वं, क्ली, (वशिनो भावः। वशिन्+त्व।) आयत्तत्वम्। (यथा, षड्विंशे। १।
"प्राज्ञं सुचिन्तितमपि प्रतिचिन्तनीय-
माराधितोऽपि नृपतिः परिशङ्कनीयः।
अङ्के स्थितापि युवतिः परिरक्षणीया
प्राज्ञे नृपे च युवतौ च कुतो वशित्वम्॥")
शिवस्याष्टैश्वर्य्यान्तर्गतैश्वर्य्यविशेषः। यथा,—
"अणिमा लघिमा प्राप्तिः प्राकाम्यं महिमा तथा।
ईशित्वञ्च वशित्वञ्च तथा कामावशायिता॥"
वशित्वं स्वातन्त्र्यं येन स्वतन्त्रश्चरति इत्यमरटीकायां भरतः॥

वशिनी, स्त्री, (वशो वशीकरणं साधुत्वेनास्त्यस्या इति। वश्+इनिः। ङीप्।) वन्ध्या। ग्रमीतृचः। इति शब्दरत्नावली॥

वशिरं, क्ली, (उशते इच्छते इति। वश्+बाहुलकात् किरच्। यद्वा, वशिं वशत्वं राती ति। रा+कः।) सामुद्रलवणम्। इत्यमरः॥

वशिरः, पुं, (वश्+किरच्।) गजपिप्पली। इत्यमरः॥ (अस्य पर्य्यायो यथा,—
"करिपिप्पली करेणा कपिवल्ली कपिञ्जिका।
श्रेयसी वशिरश्चापि गजाक्षा गजपिप्पली॥"
सुलिटा इति ख्यातः। अस्य पर्य्यायो यथा,—
"पार्व्वतेयश्च करभो वशिरः कपिपिप्पली।
जामातासौ क्वचित्प्रोक्तः सूर्य्यावर्त्तः सितोऽपरः॥"
इति वैद्यकरत्नमाला॥)
चव्यम्। इति राजनिर्घण्टः॥ अपामार्गः। इति मेदिनी। रे, २०८॥ वचा। इति शब्दचन्द्रिका॥

वशिष्ठः, पुं, (वशवतां वशिनां श्रेष्ठः। वशवत्+इष्ठन्। "विन्मतोर्लुक्।" ५।३।६५। इति लुक्।) यद्वा, वरिष्ठः। पृषोदरादित्वात् साधुः। अस्य निरुक्तिर्यथा, महाभारते। १३। ६३। ८६।
"वशिष्ठोऽसि वरिष्ठोऽसि वशे वासगृहेष्वपि।
वशिष्ठत्वाच्च वासाच्च वशिष्ठ इति विद्धि माम्॥")
स्वनामख्यातमुनिः। तत्पर्य्यायः। अरुन्धतीजानिः २। इति हेमचन्द्रः॥ अरुन्धतीनाथः ३ वाशिष्ठः ४। इति शब्दरत्नावली॥ स तु ब्रह्मणः प्राणेभ्यो जातः। तस्य भार्य्या कर्दमकन्या अरुन्धती। पुत्राः सप्तर्षयः। इति श्रीभागवतमतम्॥ अपि च।
"वशिष्ठश्च तथोर्ज्जायां सप्त पुत्रानजीजनत्।
कन्याञ्च पुण्डरीकाक्षां सर्व्वशोभासमन्विताम्॥
रजो गात्रोर्द्ध्ववाहुश्च सवनश्चानवस्तथा।
सुतपाः शुक्र इत्येते सप्त पुत्रा महौजसः॥
सर्व्वे तपस्विनः प्रोक्ताः सर्व्वे यज्ञेषु भागिनः।
अयज्वानश्च यज्वानः पितरो ब्रह्मणः सुताः॥"
इति कौर्म्मे १२ अध्यायः॥
मित्रावरुणयोः पुत्रः। यथा,—
"इति पृष्टा नरेन्द्रेण कथयामिति भूपते।
वशिष्ठं चोदयामासुः समस्तास्ते तपोधनाः॥
मुनिभिः प्रेरितः सोऽपि यथावद्यतमानसः।
योगमास्थाय सुचिरं मैत्रावरुणिरात्मवान्॥"
अन्यच्च।
"मित्रावरुणयोश्चैव कुक्षिजो ये परिश्रुताः।
एकार्षेयास्त्वथैवान्ये वशिष्ठा नाम विश्रुताः॥
एते पञ्चा वशिष्ठानां स्मृता ह्येकादशैव तु।
अष्टावेते समाख्याता ब्रह्मणो मानसाःसुताः॥"
इति वह्निपुराणे घृतधेनुविधिवाराहप्रादुर्भावाध्यायौ॥

वशीकरणं, क्ली, (वश्+च्+भावे ल्युट्। अभूततद्भावे चिः।) मणिमन्त्रौषधैरायत्तीकरणम्। इति भरतजटाधरौ॥ अस्य पर्य्यायः वशक्रियाशब्दे द्रष्टव्यः॥ * ॥ ततुसाधनौषधानि यथा,—
"ब्रह्मदण्डी वचा कुष्ठं प्रियङ्गुनागकेशरम्।
दद्यात्ताम्बूलसंयुक्तं स्त्रीणां मन्त्रेण तद्वशम्॥"
ॐ नारायणाय स्वाहेति।
"ताम्बूलं दीयते यस्य स वशी स्यान्न संशयः।"
ॐ हरि हरि स्वाहा॥ १॥
"गोदन्तं हरितालञ्च संयुक्तं काकजिङ्घया।
चूर्णं कृत्वा यस्य शिरे दीयते स वशी भवेत्॥२॥
खञ्जरीटस्य मांसन्तु मधुना सह पेषयेत्।
ऋतुकाले योनिलेपात् पुरुषो दासतामियात्॥३॥
अगुरुं गुग्गुलुञ्चैव नीलोत्पलसमन्वितम्।
गुडेन धूपयित्वा तु राजद्वारे प्रियो भवेत्॥४॥
श्वेतापराजितामूलं पिष्टं रोचनया युतम्।
यं पश्येत्तिलकेनैव वशीकुर्य्यान् नृपालये॥५॥
काकजिङ्घा वचा कुष्ठं निम्बपत्रं सकुङ्कुमम्।
आत्मरक्तं सभावेयं वशी भवति मानवः॥६॥
ॐ नमः सर्व्वसत्त्वेभ्यो नमः। सिद्धिं कुरु कुरु स्वाहा।
"सप्तभिर्मन्त्रितं कृत्वा करवीरस्य पुष्पकम्।
स्त्रीणामग्रे भ्रामयेच्च क्षणाद्वै सा वशा भवेत्॥७॥
ब्रह्मदण्डी वचा पत्रं मधुना सह पेषयेत्।
अङ्गलेपाच्च वनिता नान्यं भर्त्तारमिच्छति॥८॥
मूलं जयन्त्या वक्त्रस्थं व्यवहारे जयप्रदम्॥९॥
भृङ्गराजस्य मूलन्तु पिष्टं शुक्रेण संयुतम्।
अक्षिणी चाञ्जयित्वा तु वशीकुर्य्यान्नरं किल॥१०
अपराजितामूलिकां दद्यान्नीलोत्पलसमन्विताम्।
ताम्बूलेन प्रदानाच्च वशीकरणमुत्तमम्॥११॥
चतुःषष्टिकलाः प्रोक्ताः कामशास्त्रे वशीकराः।
आलिङ्गनाद्या वृक्षीणां कुमार्य्यादेर्व्वशीकराः॥
१२॥
रोचना नागपुष्पाणि विल्वपुष्पं प्रियङ्गवः।
कुङ्कुमं चन्दनञ्चैव तिलकेन जगद्वशे॥१३॥
इरालभा वचा कुष्ठं कुङ्कुमञ्च घृतावरी।
तिलतैलेन संयुक्तं योनिलेपात् वशो नरः॥१४॥
निम्बकाष्ठस्य धूपेन धूपयित्वा भगं स्त्रियः।
सुभगा स्यात् सा च रुद्र पतिर्दासो भविष्यति॥
१५॥
माहिषं नवनीतञ्च कुष्ठञ्च मधुयष्टिका।
सौभाग्यं भगलेपात् स्यात् पतिर्दासो भवेत्तदा॥
१६॥
पञ्च रक्तानि पुष्पाणि पृथग्जात्वा समाहरेत्।
कुङ्कुमेन समायुक्तमात्मरक्तसमन्वितम्॥
पुष्पेण तु स पिष्ट्वा च रोचनायां समेकतः।
स्त्रिया पुंसा कृतो रुद्र तिलकोऽयं वशीकरः॥
१७॥
ब्रह्मदण्डी तु पुष्पेण याने पाने वशीकरः॥१८॥
ॐ गं गणपतये स्वाहेति।
अयं गणपतेर्मन्त्रो धनविद्याप्रदायकः॥
दमनष्टसहस्रञ्च जप्त्वा वह्नौ शिखां ततः।
व्यवहारे जयः स्याच्च भूतजाप्यान्नृणां प्रियः॥
१९॥
तिलानाज्ये घृताक्तानां लक्षाणां रुद्र होमयेत्।
अष्टोत्तरसहस्रन्तु राजा वश्यस्त्रिभिर्दिनैः॥२०॥
ङीकारं सविसर्गञ्च प्रातःसूर्य्यसमद्युतिम्।
स्त्रीणां ललाटे विन्यस्य वश्यतां नयति ध्रुवम्॥
२१॥
यस्तु जुहुयादयुतं शुचिः प्रयतमानसः।
दृष्टिमात्रे सदा तस्य वश्यमायान्ति योषितः॥२२॥
मनःशिला पत्रकञ्च सगोरोचनकुङ्कुमम्।
एभिः कृते च तिलके सदा स्त्री वश्यतामियात्॥
२३॥
सहदेवो भृङ्गराजः सितापराजिता वचा।
तेनैव तिलकं कृत्वा त्रैलोक्यं वशतामियात्॥२४
गोरोचना मीनपित्तमाभ्याञ्च कृतवर्त्तिकाम्।
यः पुमांस्तिलकं कुर्य्याद्वामहस्तकनिष्ठया।
स करोति वशं सर्व्वं त्रैलोक्यं नात्र संशयः॥
२५॥
गोरोचना महादेव ऋतुशोणितभाविता।
ततः कृताच्च तिलकान्मानवं यं निरीक्षते।
तस्य सर्व्वं वशं कुर्य्यान्नात्र कार्य्या विचारणा॥
२६॥
नागेश्वरञ्च श्वेतेयं त्वक् पत्रञ्च हरीतकी।
चन्दनं काष्ठरूपेण रक्तशालिसमन्विता।
एतैर्धूपो वशकरः सुरवाण इवेश्वर॥ २७॥
रतिकाले महादेव पार्व्वतीप्रिय शङ्कर।
निजशुक्रं गृहीत्वा तु वामहस्तेन यः पुमान्।
कामिनीचरणं वामं लिम्पेत् स स्यात् स्त्रियः
प्रियः॥ २८॥
सैन्धवञ्च महादेव पारावतमलं मधु।
एभिर्लिप्तन्तु लिङ्गं वै कामिनीवशकृद्भवेत्॥२९॥
पुष्पाणि पञ्चरक्तानि गृहीत्वा यानि कानि च।
तण्डुलञ्च प्रियङ्गुञ्च पेषयेदेकयोगतः।
अनेन लिप्तलिङ्गस्य कामिनी वशतामियात्॥"
३०॥
इति गारुडे १८३। १८६। १८९ अध्यायाः॥
"अथान्यत् संप्रवक्ष्यामि वशीकरणमुत्तमम्।

येन विज्ञानमात्रेण मन्त्राः सिद्ध्यन्ति तत्त्वतः॥
प्रतिमां कारयेद्देवि ! पलेन रजतस्य च ।
पलार्द्धेन महेशानि ! साध्यस्य प्रतिमां शिवे ॥
हरितालं पलार्द्धञ्च हरिद्राचूर्णकं तथा ।
गर्त्तं कृत्वा सार्द्धहस्तं यत्र निःक्षिप्य सुन्दरि ! ॥
रक्तासनं तत्र दत्त्वा विशेत्तन्नतमानसः ।
चतुर्दिक्षु महेशानि ! पताका विनिवेशयेत् ॥
रक्तासने चोपविश्य पूर्ब्बास्यो जपमारभेत् ।
पूजाया नियमं देवि ! जानीहि भगनन्दिनि ॥
तिलपूर्णघटं तत्र स्थापयेत्तत्र देशिकः ।
प्राणप्रतिष्ठामन्त्रेण प्राणान् संस्थापयेद्बुधः ॥
अर्घः कृत्वा पूजयित्वा प्रवालमालया जपेत् ।
दशसाहस्रजापेन प्रयोगार्हो भवेत्ततः ॥
प्रणवं पूर्ब्बमुच्चार्य्य मायाबीजं द्वितीयकम् ।
का त्वं त्वक्षाकिनीयुक्तं वामकर्णेन्दुभूषितम् ॥
ततो रक्तपदं ब्रूयाच्चासृङ्मे तदनन्तरम् ।
साध्यनाम ततो ब्रूयात् वशमानय तत्परम् ॥
वह्निजायावधिर्मन्त्रो जपेद्दशसहस्रकम् ।
दशांशादिप्रमाणेन होमादींश्च समाचरेत् ॥
प्रातः स्नात्वा हविष्याशी शुचिर्भूत्वा जितेन्द्रियः ।
प्रातःकालं समारभ्य जपेन्मध्यन्दिनावधि ॥
जपे समाप्ते देवेशि ! हुनेद्दिने दिने शुभे ।
जातीपुष्पस्य होमेन वशयेन्नात्र संशयः ॥
कर्पूरमिश्रितैस्तोयैस्तर्पयेत् परदेवताम् ।
पूर्ब्बं प्रणवमुद्धृत्य चासृङ्मां प्रवदेत्ततः ॥
तर्पयाम्यग्निजायान्तं मन्त्रं जानीहि सुन्दरि ! ।
अनेनैव विधानेन संतर्प्य परदेवताम् ॥
सिद्धिः प्रयोगाद्देवेशि ! जायते नात्र संशयः ।
अभिषेकं ततः कुर्य्यात् प्रङ्करि प्राणवल्लभे ॥
प्रणवञ्च महेशानि ! चासृङ्मां तदनन्तरम् ।
अभिषिञ्चामि तत्पश्चात् हृदन्तेनाभिषिञ्चयेत् ॥
तद्दशांशेन देवेशि ! ब्राह्मणान् भोजयेत्तदा ।
एवं कृते महेशानि ! वशीकरणमुत्तमम् ॥
जायते नात्र सन्देहः सत्यं सत्यं न संशयः ।
कामतुल्यश्च नारीणां रिपूणां शमनोपमः ॥
यावज्जीवितपर्य्यन्तं सुरवाण इवेश्वरि ! ।
जायते नात्र सन्देहः सत्यं सुरगणार्चिते ॥*॥
श्वेतापराजितामूलं पेषयेद्रोचनाशुनम् ।
घृतेनाक्तन्तिलं कृत्वा तिलकं कारयेत्ततः ॥
वशयेन्नात्र सन्देहः सत्यं सत्यं महेश्वरि ! ।
चन्द्रसूर्य्यौ यदि दृश्यौ तदा निष्फलभाग्भवेत् ॥
रक्तवस्त्रेण चासृङ्मां तोषयेद्धुतवह्नितः ।
सुवर्णं दक्षिणा देया वित्तानुसारतः प्रिये ! ॥
आदौ अन्ते महतीं पूजां कुर्य्यात्तस्या वरानने ! ।
पञ्चदिनप्रयोगेण राजानं वशमानयेत् ॥
तव प्रीत्यै महादेवि ! कथितं भुवि दुर्लभम् ॥"
इति रुद्रयामलतन्त्रम् ॥

वशीभूतः, त्रि, वशतां प्राप्तः । अवशो वशो भूत इत्यर्थे च्विप्रत्ययेन निष्पन्नः ॥

वशीरः, पुं, (वश् + ईरन् ।) गजपिप्पली । इति जटाधरः ॥

वश्यं, क्ली, (वशाय वशीकरणाय साधु । "तत्र साधुः ।" ४ । ४ । ९८ । इति यत् ।) लवङ्गम् । इति शब्दचन्द्रिका ॥

वश्यः, त्रि, (वशमधीनत्वं गत इति । वश् + "वशं गतः ।" ४ । ४ । ८९ । इति यत् ।) आयत्तता गतः । तत्पर्य्यायः । प्रणेयः २ । इत्यमरः ॥ वशः ३ । इति शब्दरत्नावली ॥ (यथा, मार्कण्डेयपुराणे । ३६ । १७ ।
"मृदुत्वं सेव्यमानासु सिंहग्राद्दूर्ब्बलक्रुरा: ।
यथा यान्ति तथा प्राणो वश्यो भवति योगिनः ॥"
अग्निभस्य पञ्चमः पुत्रः । यथा, मार्कण्डेये । ५३ । ३४ ।
"हविर्वैश्वतृतीयस्तु चतुर्थोऽभूदिलावृतः ।
वशश्च पञ्चमः पुत्रो हिरण्यः षष्ठ उच्यते ॥")

वश्यका, स्त्री (वश्या + स्वार्थे कन् ।) वशगा स्त्री । इति शब्दरत्नावली ॥

वश्या, स्त्री, (वश्य + टाप् ।) वशीभूता नारी । तत्पर्य्यायः । वशगा २ वशास्या ३ वश्यका ४ । इति शब्दरत्नावली ॥ (यथा, उत्तररामचरिते १ अङ्के । १ ।
"यं ब्राह्मणमियं देवी वाग्वश्येवानुवर्त्तते ।
उत्तरं रामचरितं तत्प्रणीतं प्रयोक्ष्यते ॥")

वश, वधे । इति कविकल्पद्रुमः । (भ्वा०-पर०-सक०-सेट् ।) वशति । इति दुर्गादासः ॥

वशट्, य, देवोद्देशकहविस्त्यागमन्त्रः । इत्यमरः ॥ स्वाहा औषट् वौषट् वशट् स्वधा एते पञ्चशब्दा देवहविर्दाने वह्निमुखहुतौ वर्त्तन्ते । देवाय हविषो दानं देवहविर्दानं तत्र देवा इन्द्रादयः । अत्र पितरो देवता इति स्मृतेस्तेऽपि देवाः हविर्दानं इत्यनेन एते मन्त्रा इति स्मृतितम् । इति भरतः ॥ (यथा, ऋग्वेदे । १० । ११५ । ६ ।
"इति त्वाग्ने दृष्टिहोत्रस्य पुत्रा
उपस्तुतास ऋषयोऽवोचन् ।
तांश्च पाहि गृणतश्च सूरीन्
वषड् वषड्त्यूर्ध्वासो अनक्षन्
नमो नम इत्यूर्ध्वासो अनक्षन् ॥")

वशट्कारः, पुं, (वशट् इत्यस्य कारः करणं यत्र ।) देवोद्देशकयागः । तत्पर्य्यायः । देवयज्ञः २ आहुतिः ३ होमः ४ होत्रम् ५ । इति हेमचन्द्रः ॥ (यथा कातन्त्रे कृत्षष्ठे इत्युणादिकेषु कारग्रहणेन वा समासः । यथा वशट्कारः । स्वाहाकारः ॥)

वशट्कृतं, त्रि, (वशड्डिति मन्त्रेण कृतम् ।) हुतम् । इत्यमरः ॥
"अग्नौ हुतन्तु यद्द्रव्यं तत् स्यात्त्रिषु वशट्कृतम् ॥"
इति शब्दरत्नावली च ॥

वश्क, ड गतौ । इति कविकल्पद्रुमः ॥ (भ्वा०-आत्म०-सक०-सेट् ।) क्विपि वट् । ड, वश्कते । इति दुर्गादासः ॥

वश्कयः, पुं, (वश्कते इति । वश्क गतौ + बाहुलकात् अयन् ।) एकहायनो वत्सः । इत्यमरटीकायां रायमुकुटधृतशाकटायनः ॥

वश्कयणी, वश्कयिणी, } स्त्री, (वश्कय एकहायनो वत्सः । तेन नीयते इति । नी + क्विप् । गौरादित्वात् ङीष् । "पूर्ब्बपदात् संज्ञायामगः । ८ । ४ । ३ । इति णत्वम् । वश्कयिणीति पाठे । वश्कयोऽस्यस्या इति । "अत इनि ठनौ ।" इति इनिः । अट् कुप्वाङिति णत्वम् ।) चिरप्रसूता गौः । इत्यमरः ॥ "वश्कते परिक्रामति वश्कयश्चिरकालीनवत्सः वक्ना इति ख्यातः । वश्क ड गतौ नाञ्चौति अयः वश्कयस्यैकहायनो वत्स इति कोषः तद्योगात् वश्कयिणी नैकाजादिति ङीन् । वश्कयणीति पाठे गोलणीत्यादिनापामादित्वात् नः नदादित्वादीप् । दुग्धसुषवती गवेषितवश्कयिणीति मृच्छब्दमध्ये गदसिंहः ।" इति तट्टीकायां भरतः ॥

वस, ऐ औ निवासे । इति कविकल्पद्रुमः ॥ (भ्वा०-पर०-अक०-अनिट् ।) ऐ, उस्यात् । औ, अवात्सीत् । इति दुर्गादासः ॥

वस, क स्नेहच्छिदोश्च । इति कविकल्पद्रुमः ॥ (चुरा०-पर०-अक०-सक०-च सेट् ।) स्नेह इह प्रीतिः । क, वासयति बन्धुः । चकारात् वधे च । इति दुर्गादासः ॥

वस, तृ क वासे । इति कविकल्पद्रुमः ॥ (अदन्त-चुरा०-पर०-अक०-सेट् ।) वसयति । इति दुर्गादासः ॥

वस, य उ इर् स्तम्भे । इति कविकल्पद्रुमः ॥ (दिवा०-पर०-अक०-सेट् । उदित्वात् क्तावेट् ।) य, वस्यति । उ, वसित्वा वस्त्वा । इर्, अवसत् अवासीत् अवसीत् । अस्मात् पुषादित्वान्नित्यं ङ, इत्यन्ये । स्तम्भ इह नम्रतारहितौभावः । यो वस्यत्यरिष्यिति हलायुधः । इति दुर्गादासः ॥

वस, स ङ स्तुतौ । इति कविकल्पद्रुमः ॥ (अदा०-आत्म०-सक०-सेट् ।) स्तुतिरिह आच्छादनपूर्ब्बकधारणम् । स ङ, वस्ते लोकः वस्त्रम् । इति दुर्गादासः ॥

वसतिः, स्त्री, (वस निवासे + "वहिवस्यर्त्तिभ्यश्छित् ।" उणा० ४ । ६० । इति भावाधिकरणादौ क्तिः) । वासः । (यथा, अमरुशतके । ११ ।
"धीरं वारिधरस्य वारि किरतः श्रुत्वा निशीथे ध्वनिं
दीर्घोच्छ्वाससमश्रुणा विरहिणीं बालां चिरं ध्यायता ।
अध्वन्येन विमुक्तकण्ठकरुणं रात्रौ तथा क्रन्दितं
ग्रामीणैर्व्रजतो जनस्य वसतिर्ग्रामे निषिद्धा यथा ॥")
यामिनी । निकेतनम् । इति मेदिनी । ते, १५० ॥ (यथा, कुमारे । ४ । ११ ।

"रजनीतिमिरावगुण्ठिते
पुरमार्गे घनशब्दविक्लवाः ।
वसतिं प्रिय ! कामिनां प्रियाः
त्वदृते प्रापयितुं क ईश्वरः ॥")

वसती, स्त्री, (वसति + कृदिकारादिति ङीष् ।) वासः । यामिनी । निकेतनम् । इति मेदिनी । ते, १५० ॥

वसनं, क्ली, (वस्यते आच्छाद्यतेऽनेनेति । वस् + ल्युट् ।) वस्त्रम् । इत्यमरः ॥ (यथा, गीतगोविन्दे । १ । १२ ।

"वहसि वपुषि विशदे वसनं जलदाभं
हलहतिभीतिमिलितयमुनाभम् ।
केशवधृतहलधररूप !
जय जगदीश हरे ! ॥"

वसनमिति । वस् + भावे ल्युट् ।) छादनम् । इति मेदिनी । ने, १२३ ॥ (वस + आधारे ल्युट् ।) निवासः । (यथा, महाभारते । ५ । ४३ । ६० ।

"मौनान्न स मुनिर्भवति नारण्यवसनान्मुनिः ।
खलक्षणन्तु यो वेद स मुनिः श्रेष्ठ उच्यते ॥")

स्त्रीकटीभूषणम् । इति शब्दरत्नावली ॥

वसना, स्त्री, (वस + युच् ।) स्त्रीकटीभूषणम् । यथा,—

"सारसनं सारशनं वसना वशना तथा ।
वसनं वक्षनञ्चेति स्त्रीकटीभूषणी भवेत् ॥"

इति शब्दरत्नावली ॥

वसन्तः, पुं, (वसन्त्यत्र मदनोत्सवा इति । वस + "तॄभूवहिवसिभासिसाधिगडिमञ्जिजनिभ्यश्च ।" उणा० ३ । १२८ । इति झच् ।) ऋतुविशेषः । स च चैत्रवैशाखमासद्वयात्मकः । यथा । मधुश्च माधवश्च वासन्तिकावृतुः । इति मलमासतत्त्वधृता श्रुतिः ॥ (फाल्गुनचैत्रात्मकश्चेति केचित् । वसन्तः कुम्भमीनयोरितिप्रयोगदर्शनात् ॥*॥) तत्पर्य्यायः ॥ पुष्पसमयः २ सुरभिः ३ । इत्यमरः ॥ मधुः ४ । इति शब्दरत्नावली ॥ माधवः ५ फल्गुः ६ । इति जटाधरः ॥ ऋतुराजः ७ पुष्पमासः ८ पिकानन्दः ९ कान्तः १० कामसखः ११ ॥ तत्कालीनजलगुणाः । कषायत्वम् । मधुरत्वम् । रूक्षत्वञ्च । इति राजनिर्घण्टः ॥ (यथा, ऋतुसंहारे । ६ । २ ।

"द्रुमाः सपुष्पाः सलिलं सपद्मं
स्त्रियाः सकामाः पवनः सुगन्धिः ।
सुखाः प्रदोषा दिवसाश्च रम्या
सर्व्वं प्रिये ! चारुतरं वसन्ते ॥"

यथा च ।

"हेमन्ते चीयते श्लेष्मा वसन्ते च प्रकुप्यति ।
प्रायेण प्रशमं याति स्वयमेव समीरणः ।
ग्रीष्मकाले वसन्ते च पित्तं प्रावृडृतौ कफः ॥"

इति पूर्व्वखण्डे द्वितीयेऽध्याये गारुडधरन्वोक्तम् ॥

"मुदितकोकिलकूजितकाननं
मदनदत्तकदम्बकिंशुकशोभितम् ।
कुसुमसौरभरञ्जितभूधरं ।
कलितमत्तमधुव्रतसाधवम् ॥

मकरकेतनबाणसमाकुलं
मुदितमेव समस्तमिदं जगत् ।
मलयमारुतकल्पितगुणान्वितः
कफकरो हि वसन्तऋतुर्भवेत् ।
कफजकोपविनाशनमानलं
वमनमावनरूक्षनिषेवणम् ॥
विविधः सुरतानन्दः संश्रमः कफवारणः ।
कटुक्षाराम्लका सेव्याः शोधनं कफसम्भवे ॥
व्यायामश्रमसंरोधस्निग्धो विश्रान्तमानसः ।
एवं क्रियासमापन्नो नरः शीघ्रं सुखी भवेत् ॥"

इति वसन्तोपचारः ॥

इति हारीते प्रथमस्थाने चतुर्थेऽध्याये ॥*॥

"कफश्चितो हि शिशिरे वसन्तेऽर्कांशुतापितः ।
हत्वाग्निं कुरुते रोगानतस्तं त्वरया जयेत् ॥
तीक्ष्णैर्वमननस्याद्यैर्लघुरूक्षैश्च भोजनैः ।
व्यायामोद्वर्त्तनाघातैर्जित्वा श्लेष्माणमुल्बणम् ॥
स्नातोऽनुलिप्तः कर्पूरचन्दनागुरुकुङ्कुमैः ।
पुराणयवगोधूमचौरजाङ्गलशूल्यभुक् ॥
सहकाररसोन्मिश्रानासाद्य प्रियया पितान् ।
प्रियासक्तसुरभीन् प्रियानेचोत्पलाङ्कितान् ॥
सौमनस्यकृतो हृद्यान् वयस्यैः सहितो पिबेत् ।
निर्गंदानासवारिष्टसीधुमार्द्वीकमाधवान् ॥
मद्यवेराम्बु सारम्बु मध्वम्बु जलदाम्बु वा ।
दक्षिणानिलशीतेषु परितो जलवाहिषु ॥
अट्टनट्टस्थलीषु मणिकुट्टिमकान्तिषु ।
परपुष्टविघुष्टेषु कामकर्म्मान्तभूमिषु ॥
विचित्रपुष्पवृक्षेषु काननेषु सुगन्धिषु ।
गोष्ठीकथाभिश्चित्राभिर्मध्याह्नं गमयेत् सुखी ॥
गुरुशीतदिवास्वप्नस्निग्धाम्लमधुरांस्त्यजेत् ॥"

इति वाभटे सूत्रस्थाने तृतीयेऽध्याये ॥

"हेमन्ते निचितः श्लेष्मा दिनक्षयाभिरीरितः ।
कायाग्निं बाधते रोगांस्ततः प्रकुरुते बहून् ॥
तस्माद्वसन्ते कर्म्माणि वमनादीनि कारयेत् ।
गुर्व्वम्लस्निग्धमधुरं दिवास्वप्नञ्च वर्ज्जयेत् ॥
व्यायामोद्वर्त्तनं धूमं कवड़ग्रहमञ्जनम् ॥
सुखाम्बुना शीतविधिं शीलयेत् कुसुमागमे ।
चन्दनागुरुदिग्धाङ्गो यवगोधूमभोजनः ॥
शारभं शशमैणेयं मांसं लावकपिञ्जलम् ।
भक्षयेन्निगदं सीधुं पिबेन्माध्वीकमेव वा ॥
वसन्तेऽनुभवेत् स्त्रीणां काननानाञ्च यौवनम् ॥"

इति चरके सूत्रस्थाने षष्ठेऽध्याये ॥

"मधुमाधवौ वसन्तः । फाल्गुनचैत्रौ वसन्तः ।
तावेवौषधयः कालपरिणामात् परिणतवीर्य्या बलवत्यो हेमन्ते भवन्त्यापश्च प्रसन्नाः स्निग्धा अत्यर्थं गुर्व्वास्ता उपयुज्यमाना मन्दकिरणत्वाच्छानोः सतुषारपवनोपस्तम्भितदेहानां देहिनामविदग्धाः श्लेष्माणं चयमापादयन्ति स सद्यो वसन्तेऽर्करश्मिप्रविलापित ईषत्स्रस्तबन्धदेहानां देहिनां श्लेष्मिकान् व्याधीन् जनयति ।" "पूर्व्वाह्णे वसन्तस्य लिङ्गम् ।"

"दिशो वसन्ते विमलाः काननैरुपशोभिताः ।

किंशुकाम्भोजबकुलचूताशोकादिपुष्पितैः ॥
कोकिलाषट्पदगणैरुपगीता मनोहराः ।
दक्षिणानिलसंवीताः सुमुखाः पक्षलोच्ज्वलाः ॥"

इति सुश्रुते सूत्रस्थाने षष्ठेऽध्याये ॥*॥)

अस्याधिष्ठातृदेवतोत्पत्तिर्यथा,—

मन्मथ उवाच ।

"करिष्येऽहं तव विभो वचनाद्धरमोहनम् ।
किन्तु योषिन्महास्त्रं मे ततः कान्तां भवान् सृज ॥
मया संमोहिते शम्भौ यया तस्यानुमोहनम् ।
कार्य्यं मनोरमां कामां तां निदेशय लोकभृत् ॥
तामहं नहि पश्यामि यया तस्यानुमोहनम् ।
कर्म्मेयमधुना धातस्त्वोपायं ततः कुरु ॥

मार्कण्डेय उवाच ।

एवंवादिनि कन्दर्पे धाता लोकपितामहः ।
कया संमोहनीयोऽयमिति चिन्तां जगाम ह ॥
चिन्ताविष्टस्य तस्याथ निःश्वासो यो विनिःसृतः ।

तस्माद्वसन्तः संजातः पुष्पव्रातविभूषितः ॥
चूताङ्कुरांस्तत्कलिकां बिभ्रद्भ्रमरसंहतिम् ।
किंशुकान् सारसा रेजे प्रफुल्ल इव पादपः ॥
शोणराजीवसङ्काशः फुल्लतामरसेक्षणः ।
सन्ध्योदिताखण्डशशिप्रतिमास्यः सुनासिकः ॥
शुक्लवक्त्रवणावर्त्तः श्यामकुञ्चितमूर्द्धजः ।
सन्ध्यांशुमालिसदृशः कुण्डलद्वयमण्डितः ॥
प्रमत्तवारणगतिर्विस्तीर्णहृदयस्थलः ।
पीनशूलायतभुजः कठोरकरयुग्मकः ॥
सुवृत्तोरुकटीजङ्घः कम्बुग्रीवोन्नतांसकः ।
गूढजत्रुः पीनवक्षाः संपूर्णः सर्व्वलक्षणैः ॥
तादृशेऽथ वसन्तुपन्ने सम्पूर्णे कुसुमाकरे ।
ववौ वायुः सुरभिः पादपा अपि पुष्पिताः ॥
पिकाश्च नेदुः सततं पञ्चमं मधुरस्वराः ।
प्रफुल्लपद्मा अभवन् सरस्यः स्वच्छपुष्कराः ॥"

इति कालिकापुराणे ४ अध्यायः ॥*॥

हरमोहनकाले अस्य कर्म्माणि यथा,—

"मधुश्च कुरुते कर्म्म यदृत्तस्य विमोहने ।
तत् शृणुष्व महाभाग नित्यं तस्योचितं पुनः ॥
चम्पकान् केशरानाम्रान् करञ्जान् पाटलांस्तथा ।
नागकेशरपुन्नागान् किंशुकान् केतकान् बकान् ॥
माधवीमल्लिकापर्णसारान् कुरबकांस्तथा ।
उत्फुल्लयति तच्च स्म यत्र तिष्ठति वै हरः ॥
सरांस्युत्फुल्लपद्मानि वीजयन् मलयानिलैः ।
सुगन्धि कृतवान् यत्नात् अतीव शङ्कराश्रमम् ॥
लताः सर्व्वाः सुमनसो नूतनाङ्कुरसञ्चयाः ।
वृक्षान् रुचिरभावेन वेष्टयन्ति स्म तत्र च ॥
तान् वृक्षांश्चारुपुष्पौघांस्तैः सुगन्धिसमीरणैः ।
दृष्ट्वा कामवशं यातो न तत्र मुनिरप्युत ॥
तङ्गणा अपि लोकेऽग्र नानाभावैः सुशोभनैः ।
रमन्ते स्म सुराः सिद्धा ये ये चापि तपोधनाः ॥
न तस्य पुनरस्माभिर्दृष्टं मोहस्य कारणम् ।

भावं न कुरुते कामं कायोत्थमपि शूद्रकः ॥"
इति कालिकापुराणे ७ अध्यायः ॥*॥
वसन्ते वर्णनीयानि यथा,—
"सुरभौ दोला कोकिलमारुतसूर्य्यगतितरु-
दलोद्भिदाः ।
जातीतरपुष्पचयाम्रमञ्जरीभ्रमरझङ्काराः ॥"
इति कविकल्पलतायां प्रथमस्तवकः ॥*॥
अतिसारः । इति शब्दरत्नावली ॥ षड्रागान्त-
र्गतद्वितीयरागः । यथा,—
"रागाः षड़ेव तु प्रोक्ता रागिण्यस्त्रिंशदेव तु ।
भैरवोऽथ वसन्तश्च पटनारायणस्तथा ॥"
इत्यादि ॥ तस्य पञ्चरागिण्यो यथा,—
"आन्दोलिता च देशाख्या लीला प्रथममञ्जरी ।
मन्दारी चेति रागिण्यो वसन्तस्य सदानुगाः ॥"
अस्य ध्यानं यथा,—
"शिखण्डिवर्होच्चयबद्धचूड़ः
पुष्पान् पिकं चूतलताङ्कुरेण ।
भ्रमन् मुदा वाममनोज्ञमूर्त्ति-
र्मंतङ्गजस्थः स वसन्तरागः ॥"
अस्य गानसमयो यथा,—
"श्रीपञ्च्याः समारभ्य यावत् स्याच्छयनं हरेः ।
तावद्वसन्तरागस्य गानमुक्तं मनीषिभिः ॥"
इति सङ्गीतदामोदरः ॥
कल्लिनाथमते अस्य षड्रागिण्यो यथा ।
आन्धुली १ गमकी २ षटमञ्जरी ३ गौड़करी
४ धामकली ५ देवशाखा ६ ॥ हनूमन्मते
हिन्दोलरागपुत्रनामानोऽस्याष्टौ पुत्राः । किन्तु
तेषां मध्ये विभासस्थाने हिन्दोल इति लिखि-
तम् ॥ सोमेश्वरमते तस्य षड्रागिण्यो यथा ।
देशी १ देवगिरी २ वैराटी ३ टोड़िका ४
ललिता ५ हिन्दोली ६ ॥ तन्मते अस्य रागस्य
रागिणीसहितस्य वसन्तर्त्तुगानसमयः । इति
सङ्गीतशास्त्रम् ॥ * ॥ तालविशेषः । यथा,—
"जयमङ्गलगन्धर्व्वमकरन्दविभङ्गमाः ।
इतितालो वसन्तश्च जगज्झम्पोऽथ गारुडिः ॥"
इत्यादि ॥
"वसन्ततालके कर्त्तव्यौ भगणौ मगणस्तथा ।
जगज्झम्पे गुरुश्चैको विरामान्तश्च सप्तयम् ॥"
इति सङ्गीतदामोदरः ॥
वसन्तकः, पुं, (वसन्त + संज्ञायां कन् ।) म्लेच्छजा-
तिप्रभेदः । इति राजनिर्घण्टः ॥ (रुमण्वतो नर्म्म-
सुहृदः पुत्रः । यथा, कथासरित्सागरे ।६।४४।
"सुप्रतीकस्य पुत्रश्च रुमण्वानित्यजायत ।
योऽस्य नर्म्मसुहृत्तस्य पुत्रोऽजनि वसन्तकः ॥")
वसन्तकुसुमः, पुं, (वसन्ते कुसुमं यस्य ।) वृक्ष-
विशेषः । यथा,—
"वसन्तकुसुमः सेलुः ग्रथितो द्विजकुत्सितः ॥"
इति शब्दमाला ॥
वसन्तकुसुमाकरः, पुं, औषधविशेषः । यथा,—
"प्रवालरसमौक्तिकाभ्रमिदं चतुर्भागभाक्
पृथक् पृथगथ स्फुटे रजतहेमतो ह्यभ्रके ।
अयोमुनगरङ्गकं त्रिगुणकं विमर्द्याखिलं
शुभेऽहनि विभावयेत् भिषगिदं धिया सप्रयः ॥
द्रवैर्वृषनिशेक्षुजैः कमलमालतीपुष्पजैः
पयःकदलिकन्दजैर्मलयजैणनाभ्युद्भवैः ।
वसन्तकुसुमाकरो रसपतिर्द्विवल्लोऽग्नितः
समस्तगदहृद्भवेत् किल निजानुपानैरयम् ॥"
इति रुद्रयोगतरङ्गिणी ॥
(अथापरश्च ।
"द्विभागं हाटकं चन्द्रं त्रयो वङ्गाहिकान्तकाः ।
चतुर्भागं शुद्धमभ्रं प्रवालं मौक्तिकन्तथा ॥
भावयेदम्लदुग्धेन भावनेक्षुरसेन च ।
वासालाचारसोदीच्यरम्भाकन्दप्रसूनकैः ॥
घृतपञ्चरसेनैव मालत्याः कुङ्कुमोदकैः ।
पञ्चाङ्गमदैर्भाव्यं सुगन्धिरससम्भवम् ॥
कुसुमाकरविख्यातो वसन्तपदपूर्ब्बकः ।
शुङ्गाद्वयेन संसेव्यः सितामध्वाज्यसंयुतः ॥
मेहघ्नः कान्तिदश्चैव कामदः पुष्टिदस्तथा ।
वलीपलितनाशश्च श्रुतिभ्रंशं विनाशयेत् ।
पुष्टिदो बल्य आयुष्यः पुत्रप्रसवकारणः ॥
प्रमेहान् विंशतिश्चैव क्षयमेकादशन्तथा ।
तथा सोमरुजं हन्ति साध्यासाध्यमथापि
वा ॥"
इति वैद्यकरसेन्द्रसारसंग्रहे रसायनाद्यधि-
कारे ॥)
वसन्तघोषी [न्], पुं, (वसन्ते वसन्तकाले घोषति
विरौति वसन्तं घोषयति विज्ञापयतीति वा ।
घुष + णिनिः ।) कोकिलः । इति केचित् ॥
वसन्तजा, स्त्री, (वसन्ते जायते इति । जन + डः ।)
वासन्तीलता । इति राजनिर्घण्टः ॥ (वसन्त-
कालोद्भवे, त्रि ॥)
वसन्ततिलकं, क्ली, (वसन्तस्य तिलकमिव ।)
पुष्पविशेषः । चतुर्दशाक्षरपादच्छन्दोविशेषः ।
यथा,—
"स्यैयं वसन्ततिलकं त भ जा ज गौ गः ॥
फुल्लं वसन्ततिलकं तिलकं वनाल्या
लीलापरं पिककुलं कलमत्र रौति ।
वात्येष पुष्पसुरभिर्मलयाद्रिवातो
यातो हरिः स मथुरां विधिना हताः स्मः ॥"
इति छन्दोमञ्जरी ॥ * ॥
औषधविशेषः । यथा,—
"अत्यारलूदहनसैन्धवविश्वशुक्ल-
चूर्णं करञ्जसहितं मधितेन पीतम् ।
नैवं प्ररोहति पुनर्गुदजः स्वहेतो-
स्तस्मै वसन्ततिलकैरपि कल्पकल्पम् ॥"
इति वृत्तरत्नावल्यां गुदजरोगचिकित्सा ॥
(अन्यविधमौषधम् । यथा,—
"हेम्नो भस्मकमभ्रकं द्विगुणितं लौहाक्षयः
पारदा-
त्चत्वारो नियतन्तु वङ्गयुगलस्यैकीकृतं मर्द्दयेत् ।
मुक्ताविद्रुमयोः रसेन समता गोक्षुरवासेक्षुणा
सर्व्वं बन्धकरीषकेण सुदृढं गुप्तं पचेत् सम्यधा ॥
कस्तूरीघनसारमर्द्दितरयः पश्चात् सुसिद्धो
भवेत् ।
कासश्वाससपित्तवातकफजित्पाण्डुक्षयादीन्
हरेत्
शूलादिग्रहणीं विषादिहरणो मेहांस्तथा
विंशतिम् ॥
वृद्धोगादिहरो ज्वरादिशमनो वृष्यो वयोवर्द्धनः
श्रेष्ठः पुष्टिकरो वसन्ततिलको नाम्नायनोदितः ॥"
इति वैद्यकरसेन्द्रसारसंग्रहे रसायनाद्यधिकारे ॥)
वसन्तदूतः, पुं, (वसन्तस्य दूत इव ।) आम्रवृक्षः ।
कोकिलः । पञ्चमरागः । इति विश्वमेदिन्यौ ॥
वसन्तदूती, स्त्री, (वसन्तस्य दूतीव ।) पाटली-
वृक्षः । माधवीलता । इति मेदिनी । ते, २३३ ॥
गणिकारी । पिकी । इति राजनिर्घण्टः ॥
वसन्तद्रुः, पुं, (वसन्तस्य द्रुर्वृक्षः ।) आम्रवृक्षः ।
इति शब्दमाला ॥
वसन्तपञ्चमी, स्त्री, (वसन्तस्य पञ्चमी ।)
श्रीपञ्चमी । यथा,—
"मकरस्थे सहस्रांशौ शुक्लपक्षे यशस्विनि ! ।"
इत्यारभ्य ।
"पञ्चम्याञ्च जगद्धात्रीं प्रातरेव नदीजले: ।
स्नापयित्वा सलक्ष्मीकां कुम्भैर्मारकतैरपि ॥
वसन्तपञ्चमी नाम सर्व्वपापप्रमोचनी ।
वसन्तञ्च समभ्यर्च्च्य कन्दर्पं रतिं प्रिये ! ॥
वसन्तरागश्रवणात् श्रियमाप्नोत्यभीप्सिताम् ।
श्रीपञ्चमीन्तु केचित्तां सुनयः प्रवदन्ति वै ।
वर्त्तयेदेकभक्तेन श्रियो न विच्युतिर्भवेत् ॥"
इति मत्स्यसूक्ते ५५ पटलः ॥
अन्यच्च ।
"माघस्य शुक्लपञ्चम्यां महापूजां समाचरेत् ।
नवैः प्रवालैः कुसुमैरनुलेपैर्विशेषतः ॥
नीराजनोत्सवं कृत्वा भक्त्या संमान्य वेष्णवान् ।
वसन्तरागं जनयन् गीतवृत्यादि कारयेत् ॥"
तदुक्तम् ।
"श्रीपञ्चमीं समारभ्य यावत् स्याच्छयनं हरेः ।
वसन्तरागः कर्त्तव्यो नान्यदा तु कदाचनेति ॥
कृत्वा वसन्तपञ्चम्यां श्रीकृष्णस्यार्च्चनोत्सवम् ।
स्याद्वसन्त इव प्रेयान् वृन्दावनविहारिणः ॥"
इति हरिभक्तिविलासे १४ विलासः ॥
वसन्तसखः, पुं, (वसन्तस्य सखा । "राजाहः
सखिभ्यष्टच् ।" ५ । ४ । ९१ । इति टच् ।)
कामदेवः । इति हलायुधः ॥
वसन्तोत्सवः, पुं, (वसन्तस्य उत्सवः ।) फाल्-
गुनोत्सवः । यथा,—
"फाल्गुन्यां पौर्णमास्यान्तु विदध्याद्वैष्णवैः सह
श्रीकृष्णप्रियभक्तस्य वसन्तस्योत्सवं महम् ॥
भविष्योत्तरतो ज्ञेयस्तद्विधिश्चैदपेक्षते ।
यः श्रीयुधिष्ठिरस्योक्तो यत्तं भगवता स्वयम् ॥"
तस्माद्धात्राच्च तत्रैव ।
"एवं यः कुरुते पार्थ शास्त्रोक्तं फाल्गुनोत्-
सवम् ।
मत्प्रसादाच्च सिद्ध्यन्ति तस्य सर्व्वे मनोरथाः ॥
हर्षे तुषारसमये सितपञ्चदश्यां
प्रातर्व्वसन्तसमये समुपस्थिते च ।

संप्राश्य चूतकुसुमं सह चन्दनेन
सत्यं हि पार्थ पुरुषोऽब्दशतं सुखी स्यात् ॥"
इति श्रीहरिभक्तिविलासे १४ विलासः ॥
(वसन्तकालोज्झवोत्सवमात्रम्। यथा, कथासरित्सागरे। ४। ४६।
"अथ तस्मिन् महावेशो वसन्तोत्सववासरे।
आययौ प्रथमे यामे कुमारसचिवो निशि ॥")

वसा, स्त्री, (वसति वस्ते वा। वस निवासे वस आच्छादने वा+अच्। स्त्रियामाप्।) मांसप्रभवधातुविशेषः। इत्यमरः॥ (यथा, सुश्रुते शारीरस्थाने ४ अध्याये।
"शुद्धमांसस्य यः स्नेहः सा वसा परिकीर्त्तिता॥")
अस्या विवरणं मेदःशब्दे द्रष्टव्यम्॥ मांसरोहिणी। इति राजनिर्घण्टः॥

वसाढ्यः, पुं, (वसया आढ्यः। प्रचुरवसावत्त्वादस्य तथात्वम्।) शिशुमारः। इति चिकाण्डशेषः॥

वसिः, पुं, (वस्ते आच्छादयत्यनेन वस्यते आच्छादनपूर्ब्बकं ध्रियते इति वा। वस आच्छादने+"खनिकष्यञ्जीति।" उणा० ४। १३६। इति इः।) वसनम्। इत्युणादिकोषः॥

वसिरं, क्ली, (वस्+किरच्।) सासुद्रलवणम्। गजपिप्पली। इति धरण्यमरटीकै॥ (अस्य गुणा यथा,—
"वसिरं शीतपाकञ्च सारुष्करनिबन्धनम्।
विष्टम्भि दुर्ज्जरं रूक्षं शीतलं वातकोपनम्॥"
इति सुश्रुते सूत्रस्थाने ४६ अध्याये॥
पुं, रक्तापामार्गः। तत्पर्य्यायो यथा,—
"रक्तोऽन्यो वसिरो वृत्तफलो धामार्गवोऽपि च।
प्रत्यक्पर्णी केशपर्णी कथिता कपिपिप्पली॥"
इति भावप्रकाशस्य पूर्ब्बखण्डे प्रथमे भागे॥)

वसिष्ठः, पुं, (वशिष्ठः। पृषोदरादित्वात् शस्य सः।) वशिष्ठमुनिः। इति द्विरूपकोषः॥

वसु, क्ली, (वसत्यनेनेति। वस+"शुषिकमीति।" उणा० १। ११। इति उः।) रत्नम्। धनम्। इत्यमरः॥ (यथा, रघुः। ८। ३१।
"बलमार्त्तभयोपशान्तये
विदुषां सत्कृतये बहुश्रुतम्।
वसु तस्य विभोर्न केवलं
गुणवत्तापि परप्रयोजनम्॥")
वृद्धौषधम्। श्यामम्। इति मेदिनी। से, ६॥ हाटकम्। इति विश्वः॥ जलम्। इति सिद्धान्तकौमुद्यामुणादिवृत्तिः॥

वसुः, पुं, (वसतीति। वस+उः।) वकवृक्षः। अनलः। रश्मिः। गणदेवताविशेषः। इत्यमरः॥ स चाष्ट संख्यातः। यथा,—
"धरो ध्रुवश्च सोमश्च विष्णुश्चैवानिलोऽनलः।
प्रत्यूषश्च प्रभासश्च वसवोऽष्टौ क्रमात् स्मृताः॥"
इति भरतः॥
दक्षो द्वितीयजन्मनि षष्ठमन्वन्तरे असिक्न्यां पत्न्यां षष्टिकन्या जनयामास। ताः प्रजापतिभ्यो दत्तवान्। धर्म्माय दश। तासां नामानि। भानुर्लम्बा ककुद्यामिर्विश्वा साध्या मरुत्वती वसुर्मुहूर्त्ता सङ्कल्पा। आसां मध्ये वसोरष्टौ वसवः पुत्रा यथा। द्रोणः प्राणः ध्रुवः अर्कः अग्निः दोषः वास्तुः विभावसुरिति। द्रोणस्य अभिमत्यां पत्न्यां हर्षशोकभयादयः पुत्राः।१। प्राणस्य ऊर्ज्जस्वत्यां द्वौ पुत्रौ सहस्रायुः पुरोजवश्च।२। ध्रुवस्य धारण्यां पुरः पुत्रः।३। अर्कस्य वासनायां तर्षादयः पुत्राः।४। अग्नेर्वसोर्धारायां द्रविणकादयः पुत्राः।५। दोषस्य शर्व्वर्य्यां शिशुमारो हरेरंशः।६। वास्तोराङ्गिरस्यां विश्वकर्म्मा। विश्वकर्म्मणः पुत्रश्चाक्षुषो मनुरभूत्। विश्वे साध्या मनोः सुताः।७। विभावसोरुषायां व्यष्टः पुत्राः व्युष्टरोचिषातपनामानः।८। इति श्रीभागवतमतम्॥ * ॥ मतान्तरे अष्टौ वसवो यथा,—
धरः १ ध्रुवः २ सोमः ३ सावित्रः ४ अनिलः ५ अनलः ६ प्रत्यूषः ७ प्रभासः ८। इति महाभारते दानधर्म्मः॥ अपि च।
"आपो ध्रुवश्च सोमश्च धरश्चैवानिलोऽनलः।
प्रत्यूषस्य प्रभासश्च वसवोऽष्टौ प्रकीर्त्तिताः॥
आपस्य पुत्रो वैतण्ड्यः श्रमः श्रान्तो ध्वनिस्तथा।
ध्रुवस्य पुत्रो भगवान् कालो लोकप्रकालनः॥
सोमस्य भगवान् वर्च्चा वर्च्चस्वी येन जायते।
धरस्य पुत्रो द्रविणो हुतो हव्यवहस्तथा॥
मनोहरायाः शिरसः प्राणोऽथ रमणस्तथा।
अनिलस्य शिवा भार्य्या तस्याः पुत्रः पुरोजवः॥
अविज्ञातगतिश्चैव द्वौ पुत्रावनलस्य तु।
अग्निपुत्रः कुमारस्तु शरस्तम्बे व्यजायत॥
तस्याः शाखो विशाखश्चानैगमेयश्च पृष्टजाः।
प्रत्यूषस्य विदुः पुत्रं ऋषिं नाम्ना च देवलम्॥
द्वौ पुत्रौ देवलस्यापि क्षमावन्तौ मनीषिणौ।
वृहत्यतेश्च भगिनी वरस्त्री ब्रह्मचारिणी॥
प्रभासस्य तु सा भार्य्या वसूनामष्टमस्य च।
विश्वकर्म्मा महाभागस्तस्यां जज्ञे प्रजापतिः॥"
इति वह्निपुराणे कश्यपीयप्रजासर्गनामाध्यायः कौर्म्मे १४ अध्यायश्च॥ * ॥ (एते वशिष्ठस्य धेनुं नन्दिनीमपहृत्य तच्छापग्रस्ता पृथिव्यां प्रत्यनुपुत्रा आसन्। तेषु द्यौनामा वसुरेव कुरुवृद्धो भीष्मः। एतद्विवरणं यथा, देवीभागवते। २। ३। २४—४४।
"एतस्मिन् समये चाष्टौ वसवः स्त्रीसमन्विताः।
वशिष्ठस्याश्रमं प्राप्ता रममाणा यदृच्छया॥
पृथ्वादीनां वसूनाञ्च मध्ये कोऽपि वसूत्तमः।
द्यौर्नामा तस्य भार्य्याथ नन्दिनीं गां ददर्श ह॥
दृष्ट्वा पतिं सा पप्रच्छ कस्येयं धेनुरुत्तमा।
द्यौस्तामाह वशिष्ठस्य गौरियं शृणु सुन्दरि!॥
दुग्धमस्याः पिबेद्यस्तु नारी वा पुरुषोऽथवा।
अयुतायुर्भवेन्नूनं सदैवागतयौवनः।
तच्छ्रुत्वा सुन्दरी प्राह मर्त्यलोकेऽस्ति मे सखी।
उशीनरस्य राजर्षेः पुत्री परमशोभना॥
तस्या हेतोर्महाभाग! सवत्सां गां पयस्विनीम्।
आनयस्वाश्रमश्रेष्ठं नन्दिनीं कामदां शुभाम्॥
यावदस्याः पयः पीत्वा सखी मम सदैव हि।
मानुषेषु भवेदेका जरारोगविवर्ज्जिता॥
तच्छ्रुत्वा वचनं तस्या द्यौर्जहार च नन्दिनीम्।
अवमत्य मुनिं दान्तं पृथ्वाद्यैः सहितोऽनघः॥
हृतायामथ नन्दिन्यां वशिष्ठस्तु महातपाः।
आजगामाश्रमपदं फलान्यादाय सत्वरः॥
नापश्यत् स यदा धेनुं सवत्सां स्वाश्रमे मुनिः।
मृगयामास तेजस्वी गह्वरेषु वनेष्वपि॥
नासादिता यदा धेनुश्चुकोपातिशयं मुनिः।
वारुणिञ्चापि विज्ञाय ध्यानेन वसुभिर्हृताम्॥
वसुभिर्मे हृता धेनुर्यस्मान्मामवमन्य वै।
तस्मात् सर्व्वे जनिष्यन्ति मानुषेषु न संशयः॥
एवं शशाप धर्म्मात्मा वसूंस्तान् वारुणिः स्वयम्।
श्रुत्वा विमनसः सर्व्वे प्रययुर्दुःखिताश्च ते॥
शशाप इति जानन्त ऋषिं तमुपचक्रमुः।
प्रसादयन्तस्तन्मुनिं वसवः शरणं गताः॥
मुनिस्तानाह धर्म्मात्मा वसून्दीनान् पुरःस्थितान्।
अनुसंवत्सरं सर्व्वे शापमोक्षमवाप्स्यथ॥
येनेयं हृता धेनुर्नन्दिनी मम वत्सला।
तस्माद्द्यौर्मानुषे देहे दीर्घकालं वसिष्यति॥
ते शप्ताः पथि गच्छन्तीं गङ्गां दृष्ट्वा सरिद्वराम्।
ऊचुस्तां प्रणताः सर्व्वे शप्तां चिन्तातुरां नदीम्॥
भविष्यामो वयं देवि! कथं देवाः सुधाशनाः।
मानुषाणाञ्च जठरे चिन्तेयं महती हि नः॥
तस्मात्त्वं मानुषी भूत्वा जनयास्मान् सरिद्वरे!।
शन्तनुर्नाम राजर्षिस्तस्य भार्य्या भवानघे!॥
जातान् जातान् जले चास्मान् निक्षिपस्व सुरापगे!।
एवं शापविनिर्म्मोक्षो भविता नात्र संशयः॥
तथेत्युक्त्वा च ते सर्व्वे जग्मुर्लोकं स्वकं पुनः।
गङ्गापि निर्गता देवी चिन्त्यमाना पुनः पुनः॥")
योक्तम्। राजा। इति मेदिनी। से, ६॥ धनाधिपः। इति विश्वः॥ साधुः। इति शब्दरत्नावली॥ पीतसुङ्गः। वृक्षः। इति हेमचन्द्रः॥ पुष्करिणी। इति सिद्धान्तकौमुद्यामुणादिवृत्तिः॥ शिवः। सूर्य्यः। इत्यनेकार्थकोषः॥ (विष्णुः। यथा, महाभारते। १३। १४६। ८७।
"वसुप्रदो वासुदेवो वसुर्वसुमना हविः॥"
"वसन्ति भूतान्यत्र एतेषु स्वयमपीति वसुः।"
इति तत्र शाङ्करभाष्यम्॥) कुलीनकायस्थस्य पदवितिविशेषः। यथा शूद्राणां नामकरणे वसुघोषादिपदवितियुक्तनामत्वञ्च बोध्यम्। इत्युद्वाहतत्त्वम्॥ अष्टसंख्या। यथा,—
"युग्माग्निकृतभूतानि षण्मुन्योर्वसुरन्ध्रयोः॥"
इति तिथ्यादितत्त्वम्॥
(वकुलः। वृहद्वृक्षो सरीति च ख्यातः। अस्य पर्य्यायो यथा,—

"शिवमल्ली पाशुपत एकाष्ठीलो वुको वसुः ॥"
इति भावप्रकाशस्य पूर्ब्बखण्डे प्रथमे भागे ॥)

वसुः, स्त्री, (वस्+उः ।) दीप्तिः । वृद्धौषधम् । इति शब्दरत्नावली ॥ (दक्षस्य कन्याविशेषः । सा तु धर्म्मस्य पत्नीनामन्यतमा । इति विष्णुपुराणम् । १ । १५ । १०५ ॥)

वसुः, त्रि, (वस्+उः ।) मधुरम् । शुष्कम् । इति हेमचन्द्रः ॥

वसुकं, क्ली, (वसुवत् कायतीति । कै+कः ।) साम्भरिलवणम् । इत्यमरः ॥ पांशुवम् । वास्तूकम् । इति राजनिर्घण्टः ॥

वसुकः, पुं, (वसुः सूर्य्यस्तन्नाम्ना कायतीति । कै+आतोऽनुपेति कः ।) अर्कवृक्षः । इत्यमरः ॥ शिवमल्ली । इति मेदिनी । के, १५२ ॥ पुष्पविशेषः । स तु श्वेतरक्तभेदेन द्विविधः । तत्पर्य्यायः । वसुः २ शैवः ३ वकः ४ शिवमल्लिका ५ पाशुपतः ६ शिवमतः ७ सुरेष्टः ८ शिवशेखरः ९ । अस्य गुणाः । कटुत्वम् । तिक्तत्वम् । उष्णत्वम् । पाके शीतत्वम् । दीपनत्वम् । अर्शोगंवातगुल्मनाशित्वम् । श्वेतस्य रसायनत्वञ्च । इति राजनिर्घण्टः ॥ (अस्य पर्य्यायान्तरं यथा,—
"वकपुष्पः काकशीर्षः शूलपुष्पः शिवप्रियः ।
वसुकः काकनामा च वसुहृद्रः खपूरकः ॥"
इति वैद्यकरत्नमालायाम् ॥)

वसुकीटः, पुं, (वसुनि धने कीट इव प्रार्थकत्वात् ।) याचकः । इति हारावली । ३८ ॥

वसुच्छिद्रा, स्त्री, महामेदावृक्षः । इति रत्नमाला राजनिर्घण्टश्च ॥ (तथास्याः पर्य्यायो यथा,—
"महामेदा वसुच्छिद्रा चिरञ्जी देवतामणिः ॥"
इति भावप्रकाशस्य पूर्ब्बखण्डे प्रथमे भागे ॥)

वसुदः, पुं, (वसूनि ददातीति । दा+कः ।) कुबेरः । इति धनदशब्ददर्शनात् ॥ (यथा, हरिवंशे । ८१ । १५ ।
"सनन्दगोपस्य गृहं वासाय वसुदोपमः ।
अवतीर्य्य ततो यानात् प्रविवेश्य महाबलः ॥"*॥
वसु धनं ददातीति । विष्णुः । यथा, महाभारते । १३ । १४६ । ४२ ।
"सुभुजो दुर्द्धरो वाग्मी महेन्द्रो वसुदो वसुः ॥")
धनदातरि, त्रि ॥ (यथा, महाभारते । १२ । १२० । ३० ।
"अमोघक्रोधहर्षस्य स्वयंप्रत्याग्ववेक्षितुः ।
आत्मप्रत्ययकोशस्य वसुदेव वसुन्धरा ॥")

वसुदेवः, पुं, (वसुना धनेन दीव्यतीति । दिव्+अच् ।) श्रीकृष्णजनकः । तत्पर्य्यायः । आनकदुन्दुभिः २ । इत्यमरः ॥ शूरः ३ कृष्णपिता ४ । इति शब्दरत्नावली ॥ अस्य विवरणं यथा,—
नारायण उवाच ।
"कश्यपो वसुदेवश्च देवमाता च देवकी ।
पूर्ब्बपुण्यफलेनैव संप्राप श्रीहरिं सुतम् ॥
देवमीढ़ाच्छारिषायां वसुदेवो महानभूत् ।
आनकश्च महाकृष्णः श्रीहरेर्जनकश्च तम् ।
सन्तः पुरातनाख्यानं वदन्त्यानकदुन्दुभिम् ॥"

इति ब्रह्मवैवर्त्ते श्रीकृष्णजन्मखण्डे ७ अध्यायः वह्निपुराणञ्च ॥ (खनामख्यातः कलियुगराजविशेषस्य देवभूतेरमात्यः । स तु देवभूतिं निहत्य स्वयं राज्यञ्चकार । यथा, भागवते । १२ । १ । १८ ।
"शुङ्गं हत्वा देवभूतिं कण्वोऽमात्यस्तु कामिनम् ।
स्वयं करिष्यते राज्यं वसुदेवो महामतिः ॥"
वसवो देवता यस्य । धनिष्ठानक्षत्रे, क्ली । यथा, वराहसंहितायाम् । ७ । ११ ।
"घोरा अवणस्वाद्रं वसुदेवं वारुणञ्चैव ॥")

वसुदेवता, स्त्री, (वसवो देवता यस्याः ।) धनिष्ठानक्षत्रम् । इति हेमचन्द्रः । २ । २८ ॥ (यथा, हरिवंशे । १२२ । ३५ ।
"देवपत्न्यास्तथैवान्या देवाश्च वसुदेवता ॥")

वसुदेवभूः, पुं, (वसुदेवात् भवतीति । भू+क्विप् ।) श्रीकृष्णः । इति हेमचन्द्रः । ३ । ३६१ ॥

वसुधा, स्त्री, (वसूनि रत्नानि दधाति धारयतीति । धा+कः । सुवर्णादीनामाकरत्वात् तथात्वम् ।) पृथिवी । इत्यमरः ॥ (यथा, साहित्यदर्पणे १० परिच्छेदे ।
"राज्ये सारं वसुधा वसुधायां पुरं पुरे सौधम् ।
सौधे तल्पं तल्पे वराङ्गना सर्ब्बसम् ॥"*॥
वसुधनं दधाति दत्ते इति । धा+क्विप् । धनदातरि, त्रि । यथा, वाजसनेयसंहितायाम् । २७ । १५ ।
"वसुश्चेतिष्ठो वसुधातमश्च ॥"
"वसुधातमः वसूनां धनानां दातृतमः । क्विबन्तात् तमप् ।" इति तद्भाष्ये महीधरः ॥)

वसुधाखर्ज्जूरिका, स्त्री, (वसुधाजाता खर्ज्जूरिका ।) भूखर्ज्जूरिका । इति राजनिर्घण्टः ॥

वसुधारा, स्त्री, (वसुवत् रत्नस्येव धारा यस्याः ।) जिनशक्तिविशेषः । तत्पर्य्यायः । तारा २ महाश्रीः ३ ओङ्कारा ४ स्वाहा ५ श्रीः ६ मनोरमा ७ तारिणी ८ जया ९ अनन्ता १० शिवा ११ लोकेश्वरा १२ आत्मजा १३ खदूरवासिनी १४ भद्रा १५ वैश्या १६ नीलसरस्वती १७ ग्रहिणी १८ महातारा १९ धनंददा २० त्रिलोचना २१ असोचना २२ । इति हेमचन्द्रः ॥ (वसूनां रत्नानां धारा सन्ततिर्यत्र ।) कुबेरपुरी । इति शब्दमाला ॥ (तीर्थविशेषः । यथा, महाभारते । ३ । ८२ । ७२ ।
"ततो गच्छेत धर्म्मज्ञ ! वसुधारामभिष्टुताम् ।
गमनादेव तस्यां हि हयमेधमवाप्नुयात् ॥"*॥
वसोश्चेदिराजस्य प्रिया धारा । यद्वा,—
"वसु द्रव्यं घृतमाज्यमहृतं हविकामिकम् ।
तस्य धारा सदा देया वसोर्धारा हि सा मता ॥"
इति देवीपुराणोक्तवचनात् वसुनो घृतस्य धारा ।) वृद्धिश्राद्धपूर्ब्बकर्त्तव्यचेदिराजवस्वृद्देश्यककुचलमयघृतधारा । यथा । छन्दोगपरिशिष्टे कात्यायनः ।
"कुचलमां वसोर्धारां सप्तवारान् घृतेन तु ।

कारयेत् पञ्चवारान् वा नातिनीचां न चोच्छ्रिताम् ॥
आयुष्मानिति शान्त्यर्थं जप्त्वा तत्र समाहितः ।
षड्भ्यः पिण्डभ्यस्तदनु आज्यदानमुपक्रमेत् ॥"
वसोश्चेदिराजस्य वसोर्धारामिति वसोर्धाराधिपतेरित्यादिदर्शनात् अलुक्समासेनैव प्रयोगः कर्त्तव्यः । इति श्राद्धतत्त्वम् ॥ * ॥ साममन्त्राणां तत्पातनमन्त्रो यथा,—
"यद्वर्चो हिरण्यस्य यद्वा वर्चो गवामुत ।
सत्यस्य ब्रह्मणो वर्चस्तेन मांसं क्षुनामसि ॥"
यजुषां यथा । "वसोः पवित्रमसि शतधारं वसोः पवित्रमसि सहस्रधारं देवस्त्वा सविता पुनातु वसोः पवित्रेण शतधारेण सुप्वा कामधुक्षः ।" इति श्राद्धप्रयोगतत्त्वम् ॥ * ॥ ऋग्वेदिनां यथा ।
"अपस्वरं आगच्छन्ती भूरिधारे पयस्वती घृतप्रघाते सुव्रते शुचिव्रते । राजन्न यस्य यस्य भुवनस्य रोदसी आसा रेत सिञ्चितं यन्महद्धृतम् । १ ।
अन्या इव वयुनमे तवासुञ्जना अभिख्याकसीभिः । यत्र सोमः श्रूयते यत्र यज्ञो घृतस्य धारा मधुमद्दुहे वधन्ते ॥ २ ॥
घृतवती भुवनानामभिश्रियोर्व्वी पृथ्वी मधुदुघे सुपेशसा द्यावा पृथिवी वरुणस्य धर्म्मणा विष्कभिते अजरे भूरि रेतसा ॥ ३ ॥
घृतधारसुतसमीक्षमाणं विपश्चितं पितरं वक्ष्यानां अभिमदन्त पित्वोरुपस्थेतं रोदसी पिपृतं सत्यवाचम् ॥ ४ ॥
घृतधारं वायुमर्कार्चिषं घृतच्युतेस्तेऽभिचक्षते हविः । ये च प्रयन्ति प्रयजन्ति सज्ञमेति दुदुहे सप्तधारम् ॥ ५ ॥
वसोः पवित्रमसि शतधारं वसोः पवित्रमसि सहस्रधारं देवस्त्वा सविता पुनातु । वसोः पवित्रेण शतधारेण सुप्वा कामधुक्षः ॥ ६ ॥
सुहानन्दिवोरतिं पृथिव्या वैश्वानर रुत आजामशिं कविं सम्राजमतिथिं जनानामासन्नाः पात्रं जनयन्त देवाः स्वाहा ॥ ७ ॥
इत्येतैर्मन्त्रैः सप्तघृतधारा दद्यात् । इति कालेसिः ॥ * ॥ विशेषवसुधारा यथा,—
"न्यूना या वहते धारा मानात् सर्पिर्न सा शुभा ।
नाधिका शस्यते विप्र दुर्भिक्षकलिकारिका ॥
च्युयते वहमाना या भ्रमते च हुताशनम् ।
सवर्णा हेमवर्णा च धारा राज्यविवृद्धये ॥
सन्तता पतते या तु तनोतीव च पावकम् ।
तनोति नृपराष्ट्रञ्च वसोर्धारा न संशयः ॥
सुगन्धि स्वच्छविमलं कृमिकीटविवर्ज्जितम् ।
शस्यते च वसोर्धारा या सर्पिर्गन्धपूजिता ॥
अभावात् गवलाजं वा होतव्यन्तु सुशोभनम् ।
घृतशैत्यपयोधारा सर्व्वपीड़ानिवारिणी ॥
वसु द्रव्यं घृतमाज्यमहृतं हविकामिकम् ।
तस्य धारा सदा देया वसोर्धारा हि सा मता ॥

वसुना स्वर्गकामेन दत्तेन च महात्मना ।
मया च विष्णुना शक्र रुद्रेण च सहोमया ॥
आत्मानञ्च स्वरूपेण धारायान्तु प्रपादितम् ।
देवी सान्निध्यमायाता सर्व्वकामप्रदायिका ॥
तस्मात्त्वमपि राजेन्द्र ! वरोर्धारां प्रपातय ।
नातः परतरं पुण्यं विद्यते नृपसत्तम ! ॥
वसोर्धाराप्रदानस्य एकाहमपि यद्भवेत् ।
नृपेणायुषकामेन पुत्र राज्यजिगीषुणा ।
देया धारा सदा वत्स ! रिपुनाशाय बुद्धिमन् ॥
द्रव्याभावे घृताभावे नृप तस्करजे भये ।
यदि नो वहते धारा तदा क्षिप्रं न विद्यते ॥
महाआश्विनमासे तु अष्टमीनवमीषु च ।
कार्त्तिक्यां माघचैत्रे तु चित्रायां रोहिणीषु च ॥
वैशाख्यान्तु प्रदातव्या ज्येष्ठां ज्येष्ठस्य सत्तम ! ।
आषाढ़ादश्वीहोमं अष्टमी पूर्णिमा नभे ॥
नभस्ये रोहिणी वत्स ! चतुर्थ्यां द्वादशीदिने ।
संक्रान्तिषु च सर्व्वासु गुरुशौरिभवासु च ॥
चन्द्रसूर्य्योपरागेषु प्रतिष्ठायज्ञकर्म्मणि ।
शुक्लोच्छ्रये प्रदातव्या जन्मपुष्याभिषेचने ॥
मार्गे व्रतनिवन्धे तु शुभे वाक्ये तु दर्शने ।
ग्रहक्षत्योपसर्गेषु धारा देया शुभावहा ॥
एवं यो वाहयेद्धाराः शास्त्रदृष्टेन कर्म्मणा ।
तस्य भूः सिद्ध्यते सर्व्वा सनागा सहसागरा ॥"
इति देवीपुराणे वसोर्धारानाम ३५ अध्यायः ॥

वसुन्धरा, स्त्री. (वसूनि धारयतीति । धृ+"संज्ञायां भृतृवृजिधारिसहितपिदमः ।" ३ । २ । ४३ । इति खच् । "खचि ह्रस्वः । ६ । ४ । ९४ । इति ह्रस्वः । "अरुर्द्विषदजन्तस्य मुम् ।" ६ । ३ । ६७ । इति मुम् ।) पृथिवी । इत्यमरः ॥ (यथा, विष्णुपुराणे । १ । ४ । ११ ।
"निरीक्ष्य तं तदा देवी पातालतलमागतम् ।
तुष्टाव प्रणता भूत्वा भक्तिनम्रा वसुन्धरा ॥"
प्रफल्लस्य कन्या । यथा, हरिवंशे । ३८ । ५३ ।
"विश्रुता शाम्बमहिषी कन्या चास्य वसुन्धरा ।
रूपयौवनसम्पन्ना सर्व्वसत्त्वमनोहरा ॥"
पुं, शाल्मलद्वीपस्य वर्षपुरुषभेदः । यथा, भागवते । ५ । २० । ११ । "शाल्मलवर्षपुरुषाः श्रुतिधरवीर्य्यधरवसुन्धरेषुन्धरसंज्ञा भगवन्तं वेदमयं सोममात्मानं वेदेन यजन्ते ॥")

वसुप्राणः, पुं, (वसु दीप्तिः प्राणा इवास्य ।) अग्निः । इति शब्दरत्नावली ॥

वसुमती, स्त्री, (वसूनि धनरत्नानि सन्त्यस्या इति । वसु+मतुप् । ङीप् ।) पृथिवी । इत्यमरः ॥ (यथा, रघौ । ८ । ८३ ।
"तदलं तदपायचिन्तया
विपदुत्पत्तिमतामुपस्थिता ।
वसुधेयमवेक्ष्य तां त्वया
वसुमत्या हि नृपाः कलत्रिणः ॥")

वसुरोचिः, [स्] क्ली, (वसवः रोचन्ते अस्मिन्निति । रुच दीप्तौ+"वसौ रुचेः संज्ञायाम् ।" उणा० २ । ११२ । इति इसिन् ।) यज्ञः । इति सिद्धान्तकौमुद्यामुणादिवृत्तिः ॥

वसुल, पुं, (वसुं दीप्तिं लाति गृह्णातीति । ला+कः ।) देवता । इति त्रिकाण्डशेषः ॥

वसुश्रेष्ठं, क्ली, (वसुना दीप्त्या श्रेष्ठम् ।) रूप्यम् । इति राजनिर्घण्टः ॥

वसुसेनः, पुं, कर्णराजः । इति त्रिकाण्डशेषः । (यथा, महाभारते । १ । ६७ । १४० ।
"राधायाः कल्पयामास पुत्रं सोऽधिरथस्तदा ।
चक्रतुर्नामधेयञ्च तस्य बालस्य तावुभौ ।
दम्पती वसुसेनेति दित्तु सर्व्वासु विश्रुतम् ॥"
क्वचित् वसुषेणेति पाठः ॥)

वसुस्थली, स्त्री, (वसूनां धनानां स्थली ।) कुबेरपुरी । इति शब्दमाला ॥

वसुहृट्, पुं, (वसूनां दीप्तीनां हृट् इव ।) वकवृक्षः । इति रत्नमाला ॥

वसुहृट्कः, पुं, (वसुहृट्+स्वार्थे कन् ।) वकवृक्षः । इति शब्दमाला ॥

वस्कं, क्ली, साम्भरिलवणम् । इति हेमचन्द्रः ॥ वकपुष्पम् । इति द्विरूपकोषः ॥

वस्क, ड गतौ । इति कविकल्पद्रुमः ॥ (भ्वा०-आत्म०-सक०-सेट् ।) दन्त्यमध्य इत्येके । क्षिप वट् । ड, वस्कते । इति दुर्गादासः ॥

वस्कः, पुं, (वस्क+भावे घञ् ।) अध्यवसायः । इति भूरिप्रयोगः ॥

वस्कयः, पुं, (वस्कते इति । वस्क गतौ+बाहुलकात् अयन् ।) एकहायनो वत्सः । इत्यमरटीकायां रायमुकुटः ॥

वस्कयनी, स्त्री, (वस्कय एकहायनो वत्सः । तेन नीयते इति । नी+क्विप् । ङीष् ।) चिरप्रसूता गौः । इत्यमरटीकायां रायमुकुटः ॥ अस्या दुग्धगुणाः ।
"वस्कयिन्यास्त्रिदोषघ्नं तर्पणं बलवृत् पयः ।"
इति भावप्रकाशः ॥

वस्करराटिका, स्त्री, वृश्चिकः । इति हारावली ॥

वस्त, क ड बधे । इति कविकल्पद्रुमः ॥ (चुरा०-आत्म०-सक०-सेट् ।) क ड, वस्तयते । गतिहिंसायाचनेष्विति रमानाथः । इति दुर्गादासः ॥

व(ब)स्तः, पुं, (वस्त्यते यज्ञार्थं वध्यते इति । वस्त+कर्म्मणि घञ् ।) छागः । इत्यमरः । २ । ६ । ९६ ॥ (यथा, मार्कण्डेये । ४३ । १२ ।
"यस्य वस्तसमो गन्धो गात्रे ध्रुवसमोऽपि वा ।
तस्यार्द्धमासिकं श्रेयं योगिनो नृप ! जीवितम् ॥")

वस्तकं, क्ली, कृत्रिमलवणम् । इति हेमचन्द्रः ॥

वस्तकर्णः, पुं, (वस्तस्य छागस्य कर्णाकृतिः पत्रावच्छेदे अस्त्यस्येति । वस्तकर्ण+अर्शआदित्वादच् ।) शालवृक्षः । इति राजनिर्घण्टः ॥

वस्तगन्धा, स्त्री, (वस्तस्य गन्ध इव गन्धो यस्याः ।) इति राजनिर्घण्टः ॥

वस्तमोदा, स्त्री, (वस्तं छागं मोदयतीति । मुद्+णिच्+अच् ।) अजमोदा । इति राजनिर्घण्टः ॥

वस्तयः, पुं स्त्री भूम्नि, (वस्+"वसेस्तिः ।" उणा० ४ । १७६ । इति तिः बहुवचनान्तोऽयम् ।) वस्तस्य दृग्नाः । यथा, अमरः । २ । ६ । ११४ ।
"स्त्रियां बहुत्वे वस्तस्य दृग्नाः स्युर्वस्तयो द्वयोः ॥"

वस्तान्त्री, स्त्री, (वस्तस्येव अन्त्रमस्याः । गौरादित्वात् ङीष् ।) छगलान्त्रीक्षुपः । तत्पर्य्यायः । वृषगन्धाख्या २ मेषान्त्री ३ वृषपत्रिका ४ अजान्त्री ५ वोकड़ी ६ । अस्या गुणाः । कटुरसत्वम् । कासदोषविनाशित्वम् । बीजदाहत्वम् । गर्भजनकत्वञ्च । इति राजनिर्घण्टः ॥

वस्तिः, पुं, स्त्री, (वसति मूत्रादिकमत्र । वस्+"वसेस्तिः ।" उणा० ४ । १७६ । इति तिः ।) नाभेरधोभागः । इत्यमरः ॥ वस्ते आच्छादयति मूत्राशयपुटं वस्तिः । वस ल स्तौ नान्त्वीति तिक् । मूत्राशयपुटो वस्तिरिति रत्नमाला । इति तट्टीकायां भरतः ॥ * ॥ अथ वस्तिविधिः ।
"वस्तिर्द्विधानुवासाख्यो निरूहश्च ततः परः ।
यः स्नेहैर्दीयते स स्यादनुवासननामकः ॥
कषायक्षारतैलैर्यो निरूहः स निगद्यते ।
वस्तिभिर्दीयते यस्मात् तस्माद्वस्तिरिति स्मृतः ॥"
वस्तिभिः अंगादीनां मूत्राशयैः ।
"तत्रानुवासनाख्यो हि वस्तिर्यः सोऽत्र कथ्यते ।
अनुवासनभेदश्च मात्रावस्तिरुदीरितः ॥
पलद्वयं तस्य मात्रा तस्माद्द्वौ वा भवेत् ।
अनुवास्यस्तु रूक्षः स्यात्तीक्ष्णाग्निः केवलानिलो ॥
नानुवास्यस्तु कृष्णः स्यान्मेही स्थूलस्तथोदरी ।
नास्याप्या नानुवास्याः सुरजीर्णान्नादलङ्घिताः ॥
श्लेष्ममूर्च्छारुचिभयश्वासकासक्षयातुराः ।
नेत्रं कार्य्यं सुवर्णादिधातुभिर्वृत्तवेणुभिः ।
नलैर्दन्तैर्विषाणाग्रैर्मणिभिर्वा विधीयते ॥"
नेत्रं नाड़ी । तथा च विश्वप्रकाशे ।
नेत्रं पथि गुणे वस्त्रे तरुमूले विलोचने ।
नेत्रवस्त्रे च नाड्याञ्च नेत्रो नेतरि भेदवदिति ॥
"एकवर्षात्तु षड्वर्षं यावन्मानं षड़ङ्गुलम् ।
ततो द्वादशकं यावन्मानं स्यादष्टसंमितम् ॥
ततः परं द्वादशभिरङ्गुलैर्नेत्रदीर्घता ।
सुनिश्छिद्रं कलायाभं छिद्रं कोलास्थिरन्ध्रकम् ॥
यथासंख्यं भवेन्नेत्रं श्लक्ष्णं गोपुच्छसन्निभम् ॥"
मूले स्थूलम् । ततः क्रमात् कृशम् । सुनिश्छिद्रादिप्रमाणं नेत्रं क्रमेण षड्वर्षाय द्वादशवर्षाय तदूर्द्ध्ववर्षाय ज्ञेयम् ।
"आतुराङ्गुष्ठमानेन मूले स्थूलं विधीयते ।
कनिष्ठिकापरीणाहमग्रे च गुटिकासुखम् ॥"
परिणाहोऽत्र स्थौल्यम् ।
"तनुमूले कर्णिके द्वे च कार्य्ये भागाच्चतुर्थकात् ।
कर्णिका गवादिकर्णवत् । कर्णिका क्षुराकारा गुदाधिकान्तःप्रवेशरोधिनी कर्णिकेति । कर्णिकाकारत्वात् कर्णिकेति कथ्यते ।

"योजयेत्तत्र वस्तिञ्च बन्धदयविधानतः ।
मृगाजशूकरगवां महिषस्यापि वा भवेत् ॥"
वस्तिरिति शेषः ।
"मूत्रको यस्य वस्तिस्तु तदलाभे तु चर्मजः ।
कषायरक्तः सम्यद्वर्वस्तिःस्निग्धो दृढो हितः ॥
व्रणवस्तेस्तु नेत्रं स्यात् श्लक्ष्णमष्टाङ्गुलोच्छ्रितम् ।
सुच्छिद्रं गृध्रपक्षनालिकापरिणाहि च ॥
शरीरोपचयं वर्णं बलमारोग्यमायुषः ।
कुरुते परिवृंहिञ्च वस्तिः सम्यगुपासितः ॥
दिवा प्रीते वसन्ते च स्नेहवस्तिः प्रदीयते ।
ग्रीष्मवर्षाशरत्काले रात्रौ स्यादनुवासनम् ।
नवातिस्निग्धमश्नन्तं भोजयित्वानुवासयेत् ।
मदं मूर्च्छाञ्च जनयेद्विधा स्नेहप्रयोजितः ॥"
द्विधाभाजने वस्तौ च ।
"रूक्षं भुक्तवतोऽत्यन्तं बलं वर्णञ्च हापयेत् ।
युक्तस्नेहमतो जन्तुं भोजयित्वानुवासयेत् ॥"
युक्तस्नेहं यथोचितस्नेहं भोज्यं भोजयित्वा इत्यर्थः ।
"हीनमात्रावुभौ वस्ती नातिकार्य्यकरौ स्मृतौ ।
अतिमात्रौ तथानाहकृन्मातिसारकारकौ ॥"
उभौ वस्ती अनुवासननिरूहाख्यौ ।
"उत्तमा स्यात् पलैः षड्भिर्मध्यमा स्यात् पलैस्त्रिभिः ।
पलद्वयेन हीना स्यादुक्ता मात्रानुवासने ॥"*॥
अथ स्नेहवस्तिः ।
"घृताक्तासैन्धवाभ्यां च देयं स्नेहे च चूर्णकम् ।
तन्मात्रोत्तममध्यान्त्याः षट्चतुर्दयमाषकैः ॥
विरेचनात् सप्तरात्रे गते जातबलाय च ।
भुक्तान्नायानुवास्याय वस्तिर्देयोऽनुवासनः ॥
अथानुवास्यं खभ्यक्तमुष्णाम्बुस्नेदितं स्नेनैः ।
भोजयित्वा यथाग्नि कृतं चंक्रमणं ततः ॥
उत्तृष्टानिलविण्मूत्रं योजयेत् स्नेहवस्तिना ॥"
उष्णाम्बुस्नेदितं उष्णाम्बुना स्नापितम् ।
"सुप्तस्य वामपार्श्वेन वामजङ्घाप्रसारिणः ।
कुञ्चितापरजङ्घस्य नेत्रं स्निग्धे गुदे न्यसेत् ॥
ऊर्द्धं वस्तिमुखं मूत्रैर्वामहस्तेन धारयेत् ।
पीड़येद्दक्षिणेनैव मध्यवेगेन धीरधीः ॥
शुष्काकासक्षवादींश्च वस्तिकाले न कारयेत् ।
त्रिंशन्मात्रामितः कालः प्रोक्तो वस्तेस्तु पीड़ने ॥
ततः प्रक्षिप्ते स्नेहे उत्तानो वाक्यृतं भवेत् ।
खजानुः करावर्त्तं कुर्य्याच्छोटिकया युतम् ॥
एषा मात्रा भवेदेका सर्व्वत्रैवेष निश्चयः ।
निमेषोन्मेषयां पुंसामङ्गुल्या स्फोटिकाथ वा ॥
गुर्व्वक्षरोच्चारणं वा वाङ्मात्रेयं स्मृता बुधैः ।
प्रसारितैः सर्व्वगात्रैर्यथावीर्यं प्रसर्पति ॥"
यथावीर्यं स्नेहादि ।
"ताड़येत्तलयोरेनं त्रींस्त्रीन् वारान् अधोऽधः ।
स्फिचोस्नेव तथा श्रोणी ग्रीवां पृष्ठञ्चैवोत्क्षिपेत्ततः ॥
स्फिचोस्नेनं खपार्श्वाभ्यां पूर्ववत्ताड़येद्बुधः ।
ग्रीवाञ्च पादतलस्य त्रीन् वारानुत्क्षिपेत्ततः ।
जाते विघाने तु ततः कुर्य्यान्निद्रां यथासुखम् ॥
सानिलः सपुरीषश्च स्नेहः प्रस्नेति यस्य तु ।
उपद्रवं विना शीघ्रं स सम्यगनुवासितः ॥"
उपद्रवस्थाने उषचोषाविति सुश्रुते पाठः ।
"जीर्णान्नमथ सायाह्ने स्नेहे प्रत्यागते पुनः ।
लघ्वन्नं भोजयेत् कामं दीप्ताग्निस्तु नरो यदि ॥
अनुवासिताय देयमितरेऽह्नि सुखोदकम् ।
धान्याम्लशुक्तोदकाद्यं वा स्नेहव्यापत्तिनाशनम् ॥"
सुखोदकसुखोदकम् । व्यापत्तिर्व्याधिः ।
"अनेन विधिना षड्वा सप्त वाष्टौ नवापि वा ।
विधेया वस्तयस्नेषामन्ते चैव निरूहणम् ॥
दत्तस्तु प्रथमो वस्तिः स्नेहयेद्बस्तिवद्द्वयौ ।
सम्यग्दत्तो द्वितीयस्तु मूर्द्धस्थमनिलं जयेत् ॥
बलं वर्णञ्च जनयेत् तृतीयस्तु प्रयोजितः ।
चतुर्थपञ्चमौ दत्तौ स्नेहयेतां वसाऽसृजौ ॥
षष्ठो मांसं स्नेहयति सप्तमो मेद एव च ।
अष्टमो नवमश्चापि मज्जानञ्च यथाक्रमम् ॥"
यथाक्रममिति वचनादष्टमोऽस्थि स्नेहयेत् ।
"एवं शुक्रगतान् दोषान् द्विगुणः साधु साधयेत् ॥
द्विगुणः अष्टादशदिवसाधिको वस्तिः ।
"अष्टादशाष्टादशकान् वस्तीनां यो निषेवते ।
स कुञ्जरबलोऽश्वस्य रये तुल्योऽमरप्रभः ॥
रूक्षाय बहुवाताय स्नेहवस्तिं दिने दिने ।
दद्यादेवस्तथान्येषामग्र्यावाधभयात्त्रयात् ॥
स्नेहोऽल्पमात्रो रूक्षाणां दीर्घकालमनन्वयः ।"
अनन्वयोऽबाधकः ।
"तथा निरूहः स्निग्धानां मलमात्रः प्रशस्यते ॥
अथवा यस्य तत्कालं स्नेहो निर्याति केवलः ।
तस्यान्योऽल्पतरो देयो नहि स्निह्यति तिष्ठति ॥"
स्निह्यति स्निग्धे तिष्ठति दत्तस्नेह इति शेषः ।
"अशुद्धस्य मलोन्मिश्रः स्नेहो नेति यदा पुनः ।
तदाङ्गवेदनाध्माने शूलं श्वासश्च जायते ॥
पक्वाशये गुरुत्वञ्च तत्र दद्यान्निरूहणम् ।
तीक्ष्णं तीक्ष्णौषधैर्युक्तं फलवर्त्तिर्हितायवा ॥
यथाशुलोमगोवायुर्मलं स्नेहश्च जायते ।
तथा विरेचनं दद्यात् तीक्ष्णं नस्यं च शस्यते ॥
यस्य नोपद्रवं कुर्य्यात् स्नेहवस्तिर्विनिःसृतः ।
सर्व्वोऽन्यो वा कृतो रौक्ष्याद्रुपेक्ष्यः स विजानता ॥
अनायातं महोरात्रे स्नेहं संशोधनैर्हरेत् ।
स्नेहवस्तावनायाते नाल्पः स्नेहो विधीयते ॥
गुडूच्येरण्डपूतीकभार्गीदृष्याकरौहिषम् ।
घृतावरीसहचरं काकनासां पलोन्मिताम् ॥
यवमायातसीकोलकुलत्थात् प्रकृतोन्मितात् ।
चतुर्द्रोणेऽम्भसः पक्त्वा द्रोणशेषेण तेन च ॥
पचेत्तैलाढकं पेष्यैर्जीवनीयैः पलोन्मितैः ।
अनुवासनमेतद्धि सर्व्ववातविकारनुत् ॥"
पूतिकः करञ्जः । रौहिषं रोहिष इति सुगन्धलक्षणविशेषः । काकनासा कौयाठोठी । प्रकृतं पलद्वयम् ।
"षट्सप्ततिव्यापदस्तु जायन्ते वस्तिकर्म्मणः ।
दूषितात् समुदायेन तास्त्रिकित्यास्तु सुश्रुतात् ॥"
समुदायेन अनुचितनेत्रादिसामग्र्या ।
"प्राणाहारविहाराश्च वस्तिकर्म्मणि कृतत्रयः ।
स्नेहपानसमाः कार्य्या नात्र कार्य्या विचारणा ॥"*॥
अथ निरूहवस्तिविधिः ।
"निरूहवस्तिर्बहुधा भिद्यते कारणान्तरैः ।
तैरेव तस्य नामानि कृतानि मुनिपुङ्गवैः ॥"
कारणान्तरैः समवायिकारणभेदैः ।
"निरूहस्यापरं नाम प्रोक्तमास्थापनं बुधैः ।
स्वस्थानस्थापनाद्दोषधातूनां स्थापनं मतम् ॥
निरूहस्य प्रमाणञ्च प्रस्थः पादोत्तरं परम् ।
मध्यमं प्रस्थमुद्दिष्टं हीनश्च कुड़वास्रयः ॥"
परं श्रेष्ठम् ।
"अतिस्निग्धोऽक्लिष्टदोषः क्षतोरस्कः क्षुधान्वितः ।"
अक्लिष्टदोषः अनुत्क्लिष्टदोषः । अदत्तोत्क्लेशन इति यावत् । क्षतोरस्कः उरःक्षतवान् ।
"आध्मानच्छर्दिहिक्कार्शःप्लीहश्वासप्रपीड़ितः ।
गुदप्लोकातिसारार्त्तो विसूचीकुष्ठसंयुतः ॥
गर्भिणी मधुमेही च नास्थाप्याश्च जलोदरी ।
वातव्याधावुदावर्त्ते वातास्रविषमज्वरे ॥
मूर्च्छाहृल्लोदरानाहमूत्रकृच्छ्राश्मरीषु च ।
वृद्धबालदरमन्दाग्निप्रमेहेषु निरूहणम् ॥
शूलेऽम्लपित्ते हृद्रोगे योजयेद्विधिवद्बुधः ।
उत्तृष्टानिलविण्मूत्रस्निग्धं स्विन्नमभोजितम् ॥
मध्याह्ने गृहमध्ये च यथायोग्यं निरूहयेत् ।"
स्निग्धं सम्यक्तम् । स्विन्नं उष्णाम्बुस्नपितम् ।
"स्नेहवस्तिविधानेन बुधः कुर्य्यान्निरूहणम् ॥
जाते निरूहे च ततो भवेदुत्कटकासनः ।
तिष्ठेन्मुहूर्त्तमात्रन्तु निरूहागमनेच्छया ॥"
अत्र मुहूर्त्तमात्रशब्दे नेतरेऽपि बोधितम् ।
निरूहप्रत्यागमनकालो मुहूर्त्तमात्रः ।
"अनायातं मुहूर्त्तान्तु निरूहं प्रोधनैर्हरेत् ।
निरूहैरेव मतिमान् क्षारमूत्राम्लसैन्धवैः ॥
यस्य क्रमेण गच्छन्ति विट्पित्तकफवायवः ।
लाघवञ्चोपजायेत सुनिरूढं तमादिशेत् ॥
विविक्तता मनस्तुष्टिः स्निग्धता व्याधिनिग्रहः ।
आस्थापनस्नेहवस्त्योः सम्यग्दाने तु लक्षणम् ॥"
विविक्तता दत्तौषधनिःसरणम् ।
"अनेन विधिना युक्त्यानिरूहं वस्तिदानवित् ।
द्वितीयं वा तृतीयं वा चतुर्थं वा यथोचितम् ॥
सस्नेह एकः पवने पित्ते द्वौ पयसा सह ।
कषायकटुका मूत्रा कफे त्रयाश्चयो हिताः ॥
पित्तश्लेष्मानिलाविष्टं क्षीरयूषरसैः क्रमात् ।
निरूहं भोजयित्वा च ततस्तमनुवासयेत् ॥
सुकुमारस्य वृद्धस्य बालस्य च मृदुर्हितः ।
वस्तिस्तीक्ष्णा प्रयुक्ता हि तेषां हन्याद्बलायुषी ॥
दद्यादुत्क्लेशनं पूर्व्वं मध्ये दोषहरं ततः ।
पश्चात् संशमनीयञ्च दद्याद्वस्तिं विचक्षणः ॥
एरण्डबीजं मधुकं पिप्पली सैन्धवं वचा ।
मूलानि फलकल्कञ्च वस्तिरुत्क्लेशनः स्मृतः ॥"
इत्युत्क्लेशनवस्तिः ॥ * ॥

"घृताक्ता मधुकं विल्वं कौटजं फलमेव च।
सक्षाङ्किकः सगोमूत्रो वस्तिर्दोषहरः स्मृतः॥"
इति दोषहरवस्तिः॥ * ॥
"प्रियङ्गुमधुकं सुस्ता तथैव च रसाञ्जनम्।
सक्षीरः भ्रस्यते वस्तिर्दोषाणां शमनः स्मृतः॥"
इति शमनवस्तिः॥*॥
"त्रिफलाक्वाथगोमूत्रक्षौद्रक्षारसमायुताः।
जघकादिप्रतीवाया वस्तयो लेखनाः स्मृताः॥"
जघकादिप्रतीवायाः जघकादिगणविशेषचूर्ण-प्रक्षेपाः। इति लेखनवस्तयः॥ * ॥
"बृंहणद्रव्यनिःक्वाथैः कल्कैर्मधुरकैर्युताः।
सर्पिर्मांसरसोपेता वस्तयो बृंहणाः स्मृताः॥"
इति बृंहणवस्तयः॥ * ॥
"वदर्थैरावतीश्रेलुशाल्मलीपुष्पजाङ्कुराः।"
श्रेरावती नाराङ्गी। श्रेलुः बहुवारः।
क्षीरसिद्धाः क्षौद्रयुक्ता नाम्ना पिच्छिलसंज्ञिताः॥
अजोरभ्रैणरुधिरैर्युक्ता देया विचक्षणैः।"
अजश्छागः। उरभ्रो मेषः। एणः कृष्णमृगः।
"मात्रा पिच्छिलवस्तीनां पलैर्द्वादशभिर्मता॥"
इति पिच्छिलावस्तयः॥*॥
"दत्त्वादौ सैन्धवस्यार्धं मधुनः प्रस्तित्रयम्।
विनिर्मथ्य ततो दद्यात् स्नेहस्य प्रस्तित्रयम्॥
एकीभूते ततः स्नेहे कल्कस्य प्रस्तिं क्षिपेत्।
संमूर्च्छिते कषायस्तु चतुःप्रस्तिसम्मितम्॥
गृह्णीयाच्च तदावापमन्ते द्विप्रस्तोन्मितम्।
क्षिप्त्वा विमथ्य दद्याच्च निरूहं कुशलो भिषक्॥
एवं प्रकल्पितो वस्तिर्द्वादशप्रस्तो भवेत्।
वाते चतुःपलं क्षौद्रं दद्यात् स्नेहस्य षट्पलम्॥
पित्ते चतुःपलं क्षौद्रं स्नेहं दद्यात् पलत्रयम्।
कफे तु षट्पलं क्षौद्रं क्षिपेत् स्नेहं चतुः-
पलम्॥"
इति निरूहमात्रा॥
"एरण्डक्वाथतुल्यांशं मधु तैलं पलाष्टकम्।
घृतपुष्पापलार्द्धेन सैन्धवार्द्धेन संयुतम्॥
मधुतैलिकसंज्ञोऽयं वस्तिर्दारुविलोडितः।
मेदोगुल्मकृमिप्लीहमलोदावर्त्तनाशनः॥
बलवर्णकरश्चैव वृष्यो दीपनबृंहणः॥"
इति मधुतैलिकवस्तिः॥
"क्षौद्राज्यक्षीरतैलानां प्रस्तं प्रस्तं भवेत्।
हपुषा सैन्धवाच्चांशो वस्तिः स्याद्यापनः
परः॥"
यापनः सारकः। इति यापनवस्तिः॥*॥
"एरण्डमूलनिष्क्वाथो मधु तैलं ससैन्धवम्।
एष युक्तरथो वस्तिः सवचापिप्पलीफलः॥"
इति युक्तरथवस्तिः॥
"पञ्चमूलस्य निष्क्वाथस्तैलं मागधिका मधु।
सैन्धवः सयवक्षारः सिद्धवस्तिरिति स्मृतः॥"
इति सिद्धवस्तिः॥
"स्नानमुष्णोदकैः कुर्याद्दिवाखप्नमजीर्णताम्।
वर्जयेदपरं सर्वमाचरेत् स्नेहवस्तिवत्॥"
अथोत्तरवस्तिविधिः।
"अतः परं प्रवक्ष्यामि वस्तिमुत्तरसंज्ञितम्।
निरूहाद्युत्तरो यस्मात्तस्मादुत्तरसंज्ञकः॥
द्वादशाङ्गुलकं नेत्रं मध्ये च कृतकर्णिकम्।
मालतीपुष्पवृन्ताभं छिद्रं सर्षपनिर्गमम्॥
पञ्चविंशतिवर्षाणामधोमात्रा द्विकार्षिका।
तदूर्द्धं पलमात्रा च स्नेहस्योक्ता भिषग्वरैः॥
अथ स्थापनयुक्तस्य स्नातस्य स्नानभोजनैः।
स्थितस्य जानुमात्रेण पीठेऽन्विष्य शलाकया॥
स्निग्धया मेढ्रमार्गन्तु ततो नेत्रं नियोजयेत्।
शनैः शनैर्हृताभ्यक्तं मेढ्रमन्वङ्गुलानि षट्॥
ततोऽवपीड्येद्वस्तिं शनैर्नेत्रं विनिर्हरेत्।
ततः प्रत्यागते स्नेहे स्नेहवस्तिक्रमो हितः॥
स्त्रीणां कनिष्ठिकाशूलं नेत्रं कुर्याद्दशाङ्गुलम्।
सुखं प्रवेश्यं योन्यश्च योन्यन्तश्चतुरङ्गुलम्॥
द्व्याङ्गुलं मूत्रमार्गे च सूक्ष्मनेत्रं वियोजयेत्।
मूत्रक्षच्छ्रविकारेषु बालानां त्वेकमङ्गुलम्॥
शनैर्निष्क्रम्यमाधेयं सूक्ष्मं नेत्रं विचक्षणैः।"
मालतीपुष्पवृन्ताभं नेत्रमित्युक्तत्वात् पुनः सूक्ष्म-शब्दाभिधाने बालानां ततोऽपि नेत्रस्य सूक्ष्मता-बोधनार्थम्।
"योनिमार्गेषु नारीनां स्नेहमात्रा द्विपालिका॥
मूत्रमार्गे पलोन्मानाः बालानाञ्च द्विकार्षिकी।
उत्तानायै स्त्रियै दद्यात् ऊर्द्धजान्वै विचक्षणः॥
अप्रत्यागच्छति भिषक् वस्तावुत्तरसंज्ञिते।
भूयो वस्तिं विदध्याच्च संयुक्तं स्नेहनैर्गुणैः॥
फलवर्त्तिं विदध्याद्वा योनिमार्गे दृढं भिषक्।
स्नेहैर्विनिर्मितां स्निग्धां स्नेहनद्रव्यसंयुताम्॥
दह्यमाने तथा वस्तौ दद्याद्वर्त्तिं विशारदः।
क्षीरिवृक्षकषायेण पयसा घृततैलेन वा॥"
दह्यमाने वस्तौ यस्मिन् स्थाने वर्त्तिर्दत्तस्तस्मिन् दह्यमाने।
"वर्त्तिः शुक्रसृजः पुंसां स्त्रीणामार्त्तवजा सृजः।
हन्यादुत्तरवस्तिस्तु नोचिता मेहिनां क्वचित्॥
सम्यग्दत्तस्य लिङ्गानि व्यापदक्रम एव च।
वस्तेरुत्तरसंज्ञस्य समानः स्नेहवस्तिना॥"*॥
अथ फलवर्त्तिविधिः।
"घृताभ्यक्तं गुदे क्षिप्त्वा सूक्ष्मं स्वाङ्गुष्ठसन्निभा।
मलप्रवर्त्तिनी वर्त्तिः फलवर्त्तिश्च सा स्मृता॥"
इति भावप्रकाशः॥ * ॥
("चतुरङ्गुलां वेणुमयीं नाड़ीं प्रतिलक्ष्यं कृत्वा तया वस्तिप्रतिकर्म्म कुर्य्यात्।
नातिचोष्णे च काले च न भुक्ते न च भोजिते।
न निद्रालौ च मूत्रार्त्ते विड्आर्त्ते न च वेदभाक्॥
वस्तिकर्म्म निरूहञ्च कारयेत्तं निरस्य च।
आदौ मूत्रविड़ोत्सर्गं कृत्वा गुदं प्रक्षाल्य नाति शिथिलशय्यायां शाययित्वा वामाङ्गे वामपादं दक्षिणाङ्गे दक्षिणपादञ्च सङ्कोच्य जङ्घोपरि-संस्थाप्य गुदाभ्यन्तरे द्व्यङ्गुलमात्रां नाड़ीं सुधीः सञ्चारयेत्। ततः शनैः शनैर्वस्तिं निष्पीड्य द्विपलपरिमिततैलेन निरूहं कुर्य्यात्। निरूहा-नन्तरं शनैः शनैरुत्तानं शाययित्वा ऊर्द्धौ कृत्वा च पश्चात् सङ्कोच्य पाणिभिः पञ्च वारान् स्फिक्पिण्डान् चोटयेत्। ततः स्वस्थं कृत्वा क्षीणनाप्यामाशयं मलस्थानं बोधयति। वस्यु-दरवातान् दोषान् निवारयति। पण्डितास्तं वस्तिनिरूहं तद्वस्तिकर्म्म च विदुः।" इति हारीते सूत्रस्थाने तृतीयेऽध्याये॥

"कृतव्रणं शैलवरस्य रम्ये
स्थितं धनेशायतनस्य पार्श्वे।
महर्षिसंघैर्वृतमग्निवेशः
पुनर्व्वसुम्पाञ्जलिरन्वपृच्छत्॥
वस्तिर्नरेभ्यः किमपेक्ष्य दत्तः
स्यात् सिद्धिमान् किन्नयनस्य नेत्रम्।
कीदृक् प्रमाणाकृति किङ्गुणञ्च
केषाञ्च किं योनिगुणञ्च वस्तिः॥
निरूहकर्म्म प्रणिधानमात्राः
स्नेहस्य वा काः गमने विधिः कः।
के वस्तयः केषु मता इतीदं
शुश्रोत्तरं प्राह वचो महर्षिः॥
समीक्ष्य दोषौषधदेशकाल-
सात्म्याग्निसत्त्वौकवयोबलानि।
वस्तिः प्रयुक्तो नियतं गुणाय
स्युः सर्व्वकर्म्माणि च सिद्धिमन्ति॥
सुवर्णरूप्यत्रपुताम्रवीतिं
कांस्यास्थिशृङ्गद्रुमवेणुदन्तैः।
मलैर्विषाग्नैर्मणिभिश्च तैक्ष्ण्यैः
कार्य्याणि नेत्राणि सुकर्णिकानि॥
षड्द्वादशाष्टाङ्गुलसम्मितानि
षड्विंशतिर्द्वादशवर्षजानाम्।
सुमुद्गकर्कन्धुसतीनवाहि-
च्छिद्राणि वर्त्मना पिहितानि चापि॥
यथावयोऽङ्गुष्ठकनिष्ठिकाभ्यां
मूलाग्रयोः स्युः परिणाहवन्ति।
ऋजूनि गोपुच्छसमाकृतीनि
श्लक्ष्णानि च स्वर्गुलिकासुखानि॥
स्यात् कर्णिकैकाग्रचतुर्थभागे
मूलाश्रिते वस्तिनिबन्धने द्वे।
जरद्गवो माहिषहारिणो वा
स्यात् शौकरो वस्तिरजस्य वापि॥
दृढ़स्नुनेष्टशिरो विगन्धः
कषायरक्तः सुखदुः सुशुद्धः।
वृषां वयो वीक्ष्य यथानुरूपं
नेत्रेषु योज्येषु सुबद्धसूत्रः॥
वस्तेरभावे श्वयथुर्गलो वा
स्यादङ्गपादः सुषनः पटो वा।
आस्थापनार्हं पुरुषं विधिज्ञः
समीक्ष्य पुण्येऽहनि शुक्लपक्षे॥
प्रशस्तनक्षत्रमुहूर्त्तयोगे
जीर्णान्नमेकाग्रमुपक्रमेत।
बालां गुडूचीं त्रिफलां सराखां
द्वे पञ्च मूले च पलोन्मितानि॥
अष्टौ पलान्यर्द्धतुलाञ्च मांसा-
च्छागात् पचेदप्सु चतुर्थशेषम्।
पूतं यवानीफलचित्रकुष्ठ
वचाशृताङ्गा घनपिप्पलीनाम्॥

कल्केगुंड़क्षौद्रयुते: स तैले-
र्युतं सुखोष्णं तु पिचुप्रमाणे: ।
गुड़ोत्थलं द्विप्रसृतान्तु मात्रां
स्नेहस्य युक्त्वा मधुसैन्धवाद्यि ॥
प्रक्षिप्य वस्तौ मथितं खजेन
सुबद्धसुच्छाय्य च निर्व्रणीकम् ।
अङ्गुष्ठमध्येन सुखं प्रिधाय
नेत्राग्रसंस्थामपनीयवर्त्तिम् ॥
तैलाक्तगात्रं कृतमत्र विट्कं
नाति क्षुधार्त्तं शयने मनुष्यम् ।
समेऽथ वेधन्नतशैरसेवा
नात्युच्छ्रिते खास्तरणोपपन्ने ॥
सव्येन पार्श्वेन सुखं शयानं
क्षत्वर्ज्जुदेहं खभुजोपधानम् ।
निकुञ्च्य सव्येतरमस्य सक्थि
वामं प्रसार्य्य प्रणयेत्ततस्तम् ॥
स्निग्धे गुदे नेत्रचतुर्थभागं
स्निग्धं शनैर्दृजुपृष्ठवंशम् ।
अकम्पनावेपनलाघवादीन्
पाणेर्गुणांश्चापि विदर्शयन् हि ॥
प्रगृह्य चैकाग्रहणीन दत्तं
नेत्रं शनैरेव ततोऽवकर्षेत् ।
तिर्य्यक्प्रणीते तु न याति धारा
गुदव्रण: स्याच्चरिते च नेत्रे ॥
दत्त: शनैर्नाशयमेति वस्ति:
कफं प्रधावत्यतिपीड़ितश्च ।
प्रीतस्त्वतिस्तम्भकरो विदाहं
मूर्च्छाञ्च कुर्य्यादतिमात्रमुक्त: ।
स्निग्धोऽतिजाड्यं पवनन्तु रूक्ष-
स्तन्वल्पमात्रा लवणस्त्वयोगम् ।
करोति मात्राभ्यधिकोऽतियोगं
श्यामन्तु सान्द्र: सुचिरेण चेति ॥
दाहातिसारौ लवणोऽतिकुर्य्या-
त्तस्मात् प्रयुक्तं सममेव दद्यात् ।
पूर्व्वं हि योज्यं मधुसैन्धवन्तु
स्नेहं विनिर्मथ्य ततोऽनुकल्कम् ॥
विमथ्य संयुज्य पुनर्द्रवैस्तत्
वस्तौ निदध्यान्मथितं खजेन ।
आमाशयोऽग्निर्ग्रहणीगुदञ्च
तत्पार्श्वसंस्थस्य सुखोपलब्धि: ॥
लीयन्त एवं वलयश्च तस्मात्
स्वयं प्रयानोऽरतिवस्तिदानम् ।
विड्वातवेगो यदि चार्द्धदत्ते
निष्कृष्य दत्ते पयसेदशेषम् ॥
उत्तानदेहस्य कृतोपधान:
स्याद्वीर्य्यमाप्नोति तथास्य देहम्
एकोऽपकर्षत्यनिलं स्वमार्गात्
पित्तं द्वितीयस्तु कफं तृतीय: ॥
प्रत्यागते कोष्णजलावसिक्त:
भ्राज्यन्नमद्यात्तनुना रसेन ।
जीर्णे तु सायं लघु चाल्पमात्रं
भुक्तेऽनुवास्य: परिबृंहणार्थम् ॥"

"स्निग्धोष्ण एक: पवने निरूहो
द्वौ स्वादुशीतौ प्रयसा च पित्ते ।
त्रय: समूत्रा: कटुकोष्णतीक्ष्णा:
कफे निरूहा न परं विधेया: ॥
रसेन वाते प्रति भोजनं स्यात्
क्षीरेण पित्ते तु कफे च यूषै: ।
तथानुवास्येषु च विस्रतैलं
स्याज्जीवनीयं फलसाधितञ्च ॥"
इति चरके सिद्धिस्थाने तृतीयेऽध्याये ॥

"तत्र स्नेहादीनां कर्म्मणां वस्तिकर्म्मप्रधानतममाहुराचार्य्या: । कस्मादनेककर्म्मकरत्वाद्वस्तिरिह वस्तिर्नानाविधद्रव्यसंयोगाद्दोषाणां संशोधनसंशमनसंग्रहणानि करोति । क्षीणशुक्रं वाजीकरोति क्षयं वृंहयति शूलं कर्षयति चक्षु: प्रीणयति वलीपलितमुपहन्ति वय: स्थापयति । शरीरोपचयं वर्णं वलमारोग्यमायुष: परिवृंहणञ्च करोति वस्ति: सम्यगुपासित: ॥ तथा ज्वरातीसारतिमिरप्रतिश्यायशिरोरोगाधिमन्याहिताक्षेपकपक्षाघातेकाङ्गसर्व्वाङ्गरोगाध्मानोदरशर्करामूलवृद्ध्युपदंशानाहमूत्रकृच्छ्रगुल्मवातशोणितवातमूत्रपुरीषोदावर्त्तशुक्रार्त्तवस्तन्यनाशवृद्धवृषणयोनिशूलशुक्रदोषार्शोऽश्मरी मूढ़गर्भप्रभृतिषु चात्यर्थमुपयुज्यते ॥"

"तत्र द्विविधो वस्ति: नैरूहिक: स्नैहिकश्च । आस्थापनं निरूह इत्यनर्थान्तरम् । तस्य विकल्पो माधुतैलिक: । तस्य पर्य्यायशब्दौ यापनो युक्तरथ: सिद्धवस्तिरिति । सदोषनिर्हरणाच्छरीररोगहरणाद्वा निरूह: । वय: स्थापनादायु:स्थापनाद्वास्थापनम् । माधुतैलिकविधानञ्च निरूहक्रमचिकित्सिते वक्ष्याम: ॥

तत्र यथा प्रमाणगुणविहित: स्नैहवस्तिविकल्पोऽनुवासन: पादावशिष्ट: । अनुवसन्नपि न दुष्यत्यनुदिवसं दीयत इत्यनुवासन: ॥

तस्यापि विकल्पोऽर्द्धार्द्धमात्रावशिष्टोऽपरिहार्य्योमात्रावस्तिरिति ॥" इति सुश्रुते चिकित्सितस्थाने ३५ अध्याय: ॥

"अत ऊर्द्धं प्रवक्ष्यामि आपद: स्नेहवस्तिजा: । बलवन्तो यदा दोषा: कोष्ठे स्युरनिलादय: ॥
अल्पवीर्य्यं तदा स्नेहमभिभूय पृथग्विधान् ।
कुर्व्वन्त्युपद्रवान् स्नेह: स चापि न निवर्त्तते ॥
तत्र वाताभिभूते तु स्नेहे सुखकषायता ।
जृम्भावातरुजास्तास्ता वेपथुर्विषमज्वर: ॥
पित्ताभिभूते स्नेहे तु सुखस्य कटुता भवेत् ।
दाहस्तृष्णा ज्वर: स्वेदो नेत्रमूत्राङ्गपीतता ॥
श्लेष्माभिभूते स्नेहे तु प्रसेको मधुरास्यता ।
गौरवं छर्द्दिरुच्छ्वास: कृच्छ्र: प्रीतज्वरोरुचि: ॥
तत्र दोषाभिभूते तु स्नेहे वस्तिं निधापयेत् ।
यथास्वं दोषशमनान्युपयोज्यानि यानि च ॥
अत्याग्निरतिवृद्धाग्निर्भवात् स्नेहो नैति यदा तदा ।
गुरुरामाशय: शूलं वायुश्चाप्रतिसञ्चर: ॥
हृत्पीड़ासुखवैरस्यं श्वासो मूर्च्छा भ्रमोरुचि: ।

तत्रापतर्पणस्यान्ते दीपनो विधिरिष्यते ॥
अशुद्धस्य मलोन्मिश्र: स्नेहो नैति यदा पुन: ।
तदाङ्गसदनाध्माते श्वास: शूलञ्च जायते ॥
पक्वाशयगुरुत्वञ्च तत्र दद्यान्निरूहणम् ।
अतितीक्ष्णौषधैरेवं सिद्धञ्चाप्यनुवासनम् ॥
शुद्धस्य दूरानुहते स्नेहे स्नेहस्य दर्शनम् ।
गात्रेषु सर्व्वेन्द्रियाणामुपलेपोऽवसादनम् ॥
स्नेहगन्धिमुखन्तत्र कासश्वासावरोचक: ।
अतिपीड़ितवत्तत्र विविधा स्यापनन्तथा ॥
अस्निग्धस्याविशुद्धस्य स्नेहोऽल्प: सम्प्रयोजित: ।
शीतो रूक्षश्च नाभ्येति ततो मन्दं प्रवाहयेत् ॥
विबन्धगौरवाध्मानशूला: पक्वाशयं प्रति ।
तत्रास्थापनमेवाशु प्रयोज्यं सानुवासनम् ॥
अल्पं युक्तवतोऽल्पो हि स्नेहोमन्दगुणस्तथा ।
दत्तो नैति क्षयोत्क्लेशौ भृशं वा रतिमावहेत् ॥
तत्र वास्थापनं कार्य्यं शोधनीयेन वस्तिना ।
अन्वासनञ्च स्नेहेन शोधनीयेन शस्यते ॥
अहोरात्रादपि स्नेह: प्रत्यागच्छेन्न दूष्यति ।
कुर्य्याद्वस्तिगुणांश्चापि जीर्णस्त्वल्पगुणो भवेत् ॥
यस्य नोपद्रवं कुर्य्यात् स्नेहवस्तिरनि:सृत: ।
सर्व्वोऽल्पो वा वृतो रौक्ष्यादुपेक्ष्य: स विजानता ॥
अनायान्तस्त्वहोरात्रात् स्नेहं संशोधनैर्जयेत् ॥
स्नेहवस्तावनायाते नान्य: स्नेहो विधीयते ।
इत्युक्ता आपद: सर्व्वा: सलक्षणचिकित्सिता: ॥"
इति च सुश्रुते चिकित्सितस्थाने ३७ अध्याय: ॥)

वस्तिकर्म्माढ्य:, पुं, (वस्तिकर्म्मणा तच्छोधनव्यापारेण आढ्य:। वस्तिशोधने एवास्य प्रचुरकार्य्यकरत्वात् तथात्वम् ।) अरिष्टभेद: । भूरिष्टा इति ख्यात: । यथा,—
"अरिष्टो वस्तिकर्म्माढ्यो वेणीर: फेनिल: क्षुध: ॥"
इति शब्दचन्द्रिका ॥

वस्तिमलं, क्ली, (वस्तेर्नाभ्यधोभागस्य मलम् ।) मूत्रम् । इति हेमचन्द्र: । ३ । २६७ ॥

वस्तु, क्ली, (वसंतीति । वस + "वसेस्तुन् ।" उणा० १ । ७६ । इति तुन् ।) द्रव्यम् । यथा,—
"बुद्ध्यर्थं स्तौपिकं स्यात् सत्त्वं द्रव्यञ्च वस्तु च ॥"
इति ॥

(तथा, भागवते । ६ । ४ । २७ ।
"गृहेषु दारेषु सुतेषु बन्धुषु
द्विपोत्तमस्यन्दनवाजिवस्तुषु ।
अक्षय्यरत्नाभरणाम्बरादि-
ष्वनन्तकोशेष्वकरोदसन्मतिम् ॥"
प्राचुर्य्यम् । यथा, रघौ । ३ । २६ ।
"अथोपनीतं विधिवद् विपश्चितो
विनिन्युरेनं गुरवो गुरुप्रियम् ।
अबन्ध्यपुण्या ह्याभवन्प्रजुरत्र ते
क्रिया हि वस्तूपचिता प्रसीदति ॥")

पदार्थः । यथा,—
"भावः पदार्थो धर्म्मः स्यात् सत्त्वं तत्त्वञ्च वस्तु च ॥"
इति त्रिकाण्डशेषः ॥
(यथा, शकुन्तलायाम् १ अङ्के ।
"सतां हि सन्देहपदेषु वस्तुषु
प्रमाणमन्तःकरणप्रवृत्तयः ॥")
जगति वस्तुद्वयं भावोऽभावश्च । इति न्यायशास्त्रम् ॥ सच्चिदानन्दाद्वयं ब्रह्म । इति वेदान्तसारः ॥ (यथा, कथासरित्सागरे । २१ । ४६ ।
"अहो वस्तुनि मात्सर्य्यमहो भक्तिरवस्तुनि ॥"
कार्य्यम् । यथा, कामन्दकीयनीतिसारे।१५।२५।
"वस्तुष्वग्र्येषु समुद्यमश्चेत्
अग्र्येषु मोहादसमुद्यमश्च ।
अग्र्येषु कालेन समुद्यमश्च
त्रिधैव कार्य्यव्यसनं वदन्ति ॥"
अर्थः । इति मल्लिनाथः ॥ यथा, कुमारे । ६ । ६५ ।
"अथाङ्गिरसमग्र्यमुदाहरणवस्तुषु ।
ऋषयो नोदयामासुः प्रत्युवाच स भूधरम् ॥"
इतिवृत्तम् । यथा, विक्रमोर्व्वश्याम् ।
"अहमस्यां कालिदासग्रथितवस्तुना नवेन चोटकेनोपस्थास्ये ॥")
वस्तुकं, क्ली, (वस्तु + संज्ञायां कन् ।) वास्तूकम् । इति शब्दरत्नावली राजनिर्घण्टश्च ॥
वस्तुकी, स्त्री, (वस्तुक + गौरादित्वात् ङीष् ।) श्वेतचिल्लीशाकः । इति राजनिर्घण्टः ॥
वस्त्यं, क्ली, (वस् + क्तिन् । वस्तिर्वासश्चास्यां साधु । वस्ति + "तत्र साधुः ।" ४ । ४ । ९८ । इति यत् ।) गृहम् । इत्यमरः ॥
वस्त्रं क्ली, (वस्यते आच्छाद्यतेऽनेनेति । वस आच्छादने + "सर्व्वधातुभ्यः ष्ट्रन् ।" उणा० ४ । १५८ । इति ष्ट्रन् ।) परिधानाद्युपयुक्तकार्पासादिनिर्म्मितवस्तु । कापड़ इति भाषा । तत्पर्य्यायः । आच्छादनम् २ वासः ३ चेलम् ४ वसनम् ५ अंशुकम् ६ । इत्यमरः ॥ सिचयः ७ प्रोतः ८ लक्तकः ९ कर्पटः १० प्राटकः ११ कक्षिपुः १२ । इति जटाधरः ॥ वासनम् १३ द्विचयम् १४ ओतम् १५ क्षौमम् १६ वासम् १७ । इति शब्दरत्नावली ॥*॥ अस्य परिधानविधिर्यथा, भृगुः ।
"विकक्षोऽनुत्तरीयश्च नग्नश्चावस्त्र एव च ।
औतं स्मार्त्तं तथा कर्म्म न तस्मिन्नयेदपि ॥"
विकक्षः परीधानासंवृतकक्षः । तथा च ।
"परीधानादहिःकक्षा निबद्धा न्यासुरी भवेत् ॥"
स्मृतिः ।
"वामे पृष्ठे तथा नाभौ कक्षत्रयमुदाहृतम् ।
ऋभिः कक्षैः परीधत्ते यो विप्रः स शुचिः स्मृतः ॥"
बौधायनः ।
"नाभौ धृतञ्च यद्वस्त्रमाच्छादयति जानुनी ।
अन्तरीयं प्रशस्तं तदच्छिन्नमुभयोस्तयोः ॥"
प्रचेताः । दृश्या नाभौ प्रयोजयेत् । स्मृतिः ।
न स्यात् कर्म्मणि कञ्चुकीति । उत्तरीयधारणं चोपवीतवत् ।
"यथा यज्ञोपवीतञ्च धार्य्यते च द्विजोत्तमैः ।
तथा सन्धार्य्यते यत्नादुत्तरीयाच्छादनं शुभम् ॥"
इति स्मृतेः ॥
अत्र यथा द्विजोत्तमैः सयत्नादिना उपवीतं धार्य्यते तथा उत्तरीयाच्छादनमपि द्विजोत्तमैरिति प्रदर्शनमात्रम् । प्रागुक्तभृगुवचनेन सर्व्वेषां द्विवस्त्रतापतीतेः । पारस्करः । एकवस्त्रो वासो भवति तस्य उत्तरार्द्धेन प्रच्छादयतीति । इत्याह्निकतत्त्वम् ॥ * ॥ अस्य धारणगुणाः । यथा,—
"काम्यं यशस्यमायुष्यमलक्ष्मीघ्नं प्रहर्षणम् ।
श्रीमत्पारिषदं शस्तं निर्म्मलाम्बरधारणम् ॥"
इति राजवल्लभः ॥ * ॥
अपि च ।
"स्नातस्यानन्तरं सम्यग्वस्त्रेण तनुमार्जनम् ।
कान्तिप्रदं शरीरस्य कण्डूयादोषनाशनम् ॥
कौषेयं त्वचवस्त्रञ्च रक्तवस्त्रं तथैव च ।
वातश्लेष्महरं तत्तु शीतकाले विधारयेत् ॥"
कौषेयं पट्टाम्बरं तसरवस्त्रञ्च ।
"मेध्यं सुशीतं पित्तघ्नं कषायं वस्त्रमुच्यते ।
तद्धारयेदुष्णकाले तच्चापि लघु शस्यते ॥"
कषायं कोकची इति लोके । कषायरागरक्तं वा ।
"शुक्लन्तु शुभदं वस्त्रं शीतातपनिवारणम् ।
न चोष्णं न च वा शीतं तन्तु वर्षासु धारयेत् ॥
यशस्यं काम्यमायुष्यं श्रीमदानन्दवर्द्धनम् ।
त्वष्टं वशीकरं रुच्यं नवं निर्म्मलमम्बरम् ॥"
काम्यं कामोद्दीपकम् ।
"कदापि न जनैः सद्भिर्धार्य्यं मलिनमम्बरम् ।
तत्तु कच्छूलमिकरं म्लान्यलक्ष्मीकरं परम् ॥"
अलक्ष्मीरशोभा दारिद्र्यं वा । इति भावप्रकाशः ॥ * ॥ (अथ स्वप्ने वस्त्रादिदर्शनात् शुभफलं यथा,—
"कन्यां कुमारकान् गौरान् शुक्लवस्त्रान् सुतेजसः ।
यः पश्येल्लभते यो वा कृच्छ्रादर्थविषामिषम् ॥
शुक्लाः सुमनसो वस्त्रममेध्यालेपनं फलम् ॥
यस्य स्यादायुरारोग्यं वित्तं बहु च सोऽश्नुते ॥"
इति वाभटे शारीरस्थाने षष्ठेऽध्याये ॥)
अथ नववस्त्रपरीधानदिनम् ।
"ब्रह्मानुराधवसुतिष्यविशाखहस्त-
चित्रोत्तराभिपवनादितिरेवतीषु ।
जन्मर्क्षजीववुधशुक्रदिनोत्सवादौ
धार्य्यं नवं वसनमीश्वरदेवतुष्टौ ॥"
इति ज्योतिस्तत्त्वम् ॥ * ॥
अपि च ।
"स्वर्ये चाल्पधनं व्रणः शुभदिने क्लेशः सदा भूमिजे
वस्त्राणां बहुता बुधे सुरगुरौ विद्यागमः सम्पदः ।
नानाभोगयुतः प्रमोदशयनं दिव्याङ्गना भार्गवे
शौरे स्युः खलु रोगशोककलहा वस्त्रे धृते नूतने ॥"
इति कर्म्मलोचनम् ॥ * ॥
अस्य चारसंयोगनिषिद्धदिनानि यथा,—
"मन्दमङ्गलषष्ठीषु द्वादश्यां आह्ववासरे ।
वस्त्राणां चारसंयोगो दहत्याश्वमं कुलम् ॥"
इत्याह्निकाचारतत्त्वम् ॥
तद्दानफलं यथा,—
"वासोदश्चन्द्रसालोक्यमश्विसालोक्यमश्वदः ॥"
इति शुद्धितत्त्वम् ॥
अपि च ।
"द्विजानां ये तु सततं शुभवस्त्रप्रदा नराः ।
वस्त्रगन्धयुतः पन्थास्तेषां सुजलशीतलः ॥"
इत्यादौ वह्निपुराणे यमधर्म्मसंलापाख्याननामाध्यायः ॥ * ॥ तेन विष्णुपूजाविधिर्यथा,—
"दुकूलपट्टकौषेयवाल्कार्पासकादिभिः ।
वासोभिः पूजयेद्विष्णुं सुशुभैरात्मनः प्रियैः ॥"
इति तत्रैव क्रियायोगनामाध्यायश्च ॥
तद्ग्रहणविधिर्यथा । विष्णुधर्म्मोत्तरम् ।
"वस्त्रं दद्यात्तमादद्यात् परिधाय तथा पुनः ।
आरुह्योपानहौ यानमारुह्यैव च पादुके ॥"
तस्याधिपतिर्यथा । तत्रैव ।
"बार्हस्पत्यं स्मृतं वासः सौम्यानि रजतानि च ।
पक्षिणश्च तथा सर्व्वे वायव्याः परिकीर्त्तिताः ॥"
तत्प्रतिग्रहप्रायश्चित्तं यथा । हारीतः । मलिनवासोगवादीनां प्रतिग्रहे सावित्र्यष्टशतं जपेत् । अष्टसहस्रं अष्टोत्तरसहस्रम् । इति शुद्धितत्त्वम् ॥ * ॥ अपि च ।
श्रीभगवानुवाच ।
"कार्पासं काम्बलं वाल्कं कौषेयं वस्त्रमिष्यते ।
तत् पूर्व्वं पूजयित्वैव मन्त्रैर्देवाय चोत्सृजेत् ॥
निर्दग्धं मलिनं जीर्णं छिन्नं गात्रावलिङ्गितम् ।
परकीयं वाक्षुद्दृष्टं सूचीविद्धं तथोषितम् ।
उपप्लेग्यं विधौतञ्च श्लेष्मनस्रादिदूषितम् ॥
प्रदाने दैवताभ्यञ्च दैवे पैत्र्ये च कर्म्मणि ।
वर्ज्जयेत् शापयोगेन यज्ञादावुपयोजने ॥"
शापयोगेन इत्यत्र क्षोपयोगेन इति क्वचित् पुस्तके पाठः ।
"उत्तरीयोत्तरासङ्गौ निचोलो मोदचेलकः ।
परिधानञ्च पञ्चैतान्यस्तूतानि प्रयोजयेत् ॥
शाणवस्त्रं नीशारञ्च तथैवातपवारणम् ॥"
क्वचित् पुस्तके शाणवस्त्रमित्यत्र मशिवस्त्रमिति पाठः ।
"चञ्चातकं तथा दूष्यं पञ्च स्यूतान्यदूष्ये ।
पताकाध्वजदण्डादौ स्यूतं वस्त्रं प्रयोजयेत् ॥
अन्यत्रावरणादौ च तद्विना शस्ततोऽपि च ।
रक्तं कौषेयवस्त्रञ्च महादेवे प्रशस्यते ॥
पीतं तथैव कौषेयं वासुदेवाय चोत्सृजेत् ।
रक्तन्तु कम्बलं दद्यात् शिवाय परमात्मने ॥
विचित्रं सर्व्वदेवेभ्यो देवीभ्योऽणुं निवेदयेत् ।
कार्पासं सर्व्वतोभद्रं दद्यात् सर्व्वेभ्य एव तु ॥

नैकान्तरक्तं दद्यात्तु वासुदेवाय चैलकम्।
तथा नैकान्तरक्तन्तु शिवाय विनिवेदयेत्॥
नीलीरक्तन्तु यद्वस्त्रं तत् सर्व्वत्र विवर्ज्जितम्।
देवे पैत्रे स्त्रीपयोगे वर्ज्जयेत्तद्विचक्षणः॥
नीलीरक्तं प्रमादात्तु यो दद्यादिष्णवे बुधः।
निष्फला तस्य तत्पूजा तदा भवति भैरव॥
विचित्रे वाससि पुनर्लग्नं नीलीविरञ्जितम्।
वस्त्रं दद्यान्महादेवे नान्यस्मै तु कदाचन॥
द्विपदां ब्राह्मणो यद्वत् देवानां वासवो यथा।
तथा भूषणवर्गेषु वस्त्रमुत्तममुच्यते॥
वस्त्रेण चायते लज्जां वस्त्रेण चायते वपुः।
वस्त्रात् स्यात् सर्व्वतः सिद्धिश्चतुर्व्वर्गप्रदञ्च तत्॥"

इति कालिकापुराणे ६८ अध्यायः॥

राज्ञा सदा वस्त्राच्छादितशरीरं कर्त्तव्यम्। यथा,—

"सर्व्वदा मङ्गलं रत्नं धारयेत् सह दूर्व्वया।
अवस्त्राच्छादितं गात्रं न विप्रेभ्यः प्रदर्शयेत्॥"

इति तत्रैव ८६ अध्यायः॥

नीलवस्त्रं परिधाय विष्णुपूजननिषेधो यथा,—

वराह उवाच।

"भूषितो नीलवस्त्रेण यो हि मामुपसर्पति।
वर्षाणाञ्च शतं पच्च कृमिर्भूत्वा स तिष्ठति॥
तस्य वक्ष्यामि सुश्रोणि अपराधविशोधनम्।
प्रायश्चित्तं विशालाक्षि येन मुच्येत किल्बिषात्॥
व्रतं चान्द्रायणं कृत्वा विधिदृष्टेन कर्म्मणा।
मुच्यते किल्बिषात् भूमे एवमेतन्न संशयः॥"

इति वाराहे नीलवस्त्रपरीधानप्रायश्चित्तनामाध्यायः॥ * ॥ विष्णुपूजने रक्तवस्त्रपरीधाननिषेधो यथा,—

वराह उवाच।

"रक्तवस्त्रेण संयुक्तो यो हि मामुपसर्पति।
तस्यापि शृणु सुश्रोणि कर्म्म संसारमोचनम्॥
रजस्वलासु नारीषु रजो यत्तत् प्रवर्त्तते।
तेनासौ रजसा स्पृष्टो कर्म्मदोषेण जायते॥
वर्षाणि दशपञ्चैव वसते तत्र निश्चयः।
रजो भूत्वा महाभागे रक्तवस्त्रपरायणः॥
प्रायश्चित्तं प्रवक्ष्यामि तस्य कायविशोधनम्।
येन मुच्यन्ति वै भूमे पुरुषाः ब्राह्मवर्च्चिताः॥
एकाहारं ततः कृत्वा दिनानि दश सप्त च।
वायुभक्षो दिनत्रीणि दिनमेकं जलाशनः॥
एवं स मुच्यते भूमे मम विप्रियकारकः।
प्रायश्चित्तं ततः कृत्वा ममासौ रोचते सह॥
एतत्ते कथितं भूमे रक्तवस्त्रविभूषितम्।
प्रायश्चित्तं महाभागे सर्व्व संसारमोचनम्॥"

इति तत्रैव रक्तवस्त्रपरीधानप्रायश्चित्तम्॥

परिधृतकृष्णवस्त्रस्य विष्णूपासननिषेधो यथा,—

"यः पुनः कृष्णवस्त्रेण मम कर्म्मपरायणः।
देवि कर्म्माणि कुर्व्वीत तस्य वै पतनं शृणु॥
घुणा वै पञ्चवर्षाणि काष्ठभक्षश्च जायते।
मशकस्त्रीणि वर्षाणि कच्छपस्त्रीणि च पञ्च च॥
न स गच्छति संसारं मम कर्म्मपरायणः।
शारावतश्च जायेत नववर्षाणि पञ्च च॥
जातो ममापराधेन शितः शारावतो भुवि।
तिष्ठते मम पार्श्वेषु यत्रैवाहं प्रतिष्ठितः॥
प्रायश्चित्तं प्रवक्ष्यामि तस्य संसारमोचनम्।
येनासौ लभते सिद्धिं कृष्णवस्त्रापराधतः॥
सप्ताहं यावकं भुक्त्वा चिराच्चं घृतपिण्डिकाम्।
त्रीणि पिण्डान् चिराच्चन्तु एवं मुच्येत किल्बिषात्॥
य एतेन विधानेन देवि कर्म्माणि कारयेत्।
शुचिर्भागवतो भूत्वा मम मार्गानुसारकः।
न स गच्छति संसारं मम लोकाय गच्छति॥"

इति तत्रैव कृष्णवस्त्रपरीधानप्रायश्चित्तम्॥

परिधृताधौतवस्त्रस्य विष्णुकर्म्मकरणनिषेधो यथा,—

वराह उवाच।

"वाससा न च धौतेन यो मे कर्म्माणि कारयेत्।
शुचिर्भागवतो भूत्वा मम मार्गानुसारकः॥
तस्य दोषं प्रवक्ष्यामि अपराधं वसुन्धरे।
पतन्ति येन संसारं वाससोच्छिष्टकारिणः॥
देवि भूत्वा गजोन्मत्तस्त्रिसप्तैकं नरो भुवि।
उष्ट्रश्चैकं भवेज्जन्म जन्म चैकं खरस्तथा॥
गोमायुरेकजन्मा वै जन्म चैकं हयस्तथा।
सारङ्गश्चैकजन्मा वै मृगो भवति चैकतः॥
सप्तजन्मान्तरं पश्चात्ततो भवति मानुषः।
मद्भक्तश्च गुणज्ञश्च मम कर्म्मपरायणः।
निरापराधो दक्षश्च अहङ्कारविवर्ज्जितः॥

धरण्युवाच।

श्रुतमेतत् प्रयत्नेन यत्त्वया समुदाहृतम्।
संसारं वाससोच्छिष्टं येन गच्छन्ति मानवाः॥
प्रायश्चित्तञ्च मे ब्रूहि सर्व्वकर्म्मसुखावहम्।
किल्बिषात् येन मुच्यन्ति तव कर्म्मपरायणः॥

वाराह उवाच।

शृणु तत्त्वेन मे देवि कथ्यमानं मयानघे।
प्रायश्चित्तं प्रवक्ष्यामि मम भक्तिपरायणः॥
यावकेन दिनं त्रीणि पिण्याकेन पुनस्त्रयः।
कणभक्षो दिनत्रीणि पायसेन दिनत्रयम्॥
एवं कृत्वा महाभागे वाससोच्छिष्टकारिणः।
अपराधं न विन्दति संसारञ्च न गच्छति॥"

इति तत्रैव अधौतवासःपरिधानप्रायश्चित्तनामाध्यायः॥* अथ परिहितपरकीयवस्त्रस्य विष्णुपूजादिकरणे प्रायश्चित्तम्।

वाराह उवाच।

"यः पारक्येण वस्त्रेण नावधूतेन माधवि।
प्रायश्चित्ती पुमान्मूर्खो मम कर्म्मपरायणः॥
करोति मम कर्म्माणि स्पृष्ट्वा तं मां तमःस्थितः।
मृगो वै जायते देवि वर्षाणि त्रीणि सप्त च॥
हीनपादेन जायेत चैकजन्म वसुन्धरे।
मूर्खस्य क्रोधनश्चैव मद्भक्तश्चैव जायते॥
तस्य वक्ष्यामि सुश्रोणि प्रायश्चित्तं महौजसम्।
येन गच्छति संसारं मम भक्तो व्यवस्थितः॥
अष्टभक्तं ततः कृत्वा मम कर्म्मपरायणः।
माघस्यैव तु मासस्य शुक्लपक्षस्य द्वादशी॥
तिष्ठेज्जलाशये तत्र स्नात्वा दान्तो जितेन्द्रियः।
अनन्यमानसो भूत्वा मम चिन्तापरायणः॥
प्रभातायान्तु शर्व्वर्य्यां उदिते च दिवाकरे।
पञ्चगव्यं ततः पीत्वा शीघ्रं मुच्येत किल्बिषात्॥
य एतेन विधानेन प्रायश्चित्तं समाचरेत्।
सर्व्वपापविनिर्म्मुक्तो मम लोकाय गच्छति॥"

इति वाराहे परकीयवस्त्रपरीधानप्रायश्चित्तनामाध्यायः॥ * ॥ काञ्चननिर्म्मितवस्त्रप्रमाणं यथा,—

"यावत् काञ्चनवस्त्राणां वाहिका गोपकन्यकाः।
काञ्चित्तत्याययुः शीघ्रं यत्र चन्द्रावली मुदा॥"

इति ब्रह्मवैवर्त्ते श्रीकृष्णजन्मखण्डे २८ अध्यायः॥

"आसनं वसनं शय्या जायापत्यं कमण्डलुः।
आत्मनः शुचिरेतानि न परेषां कदाचन॥"

ईषद्धौतादिवस्त्रस्य पश्चिमाग्र्यादिप्रसारितवस्त्रस्य च अधौतत्वं यथा,—

"ईषद्धौतं स्त्रिया धौतं यद्धौतं रजकेन तु।
अधौतं तद्विजानीयाद्गृहा दक्षिणपश्चिमे॥"

इति कर्म्मलोचनम्॥*॥

सत्यतपाः।

"प्रागग्रमुदगग्रं वा धौतं वस्त्रं प्रसारयेत्।
पश्चिमाग्रं दक्षिणाग्रं पुनः प्रक्षालनात् शुचि॥"

अत्रायं दृश्यः दृश्यते॥ * ॥ प्रचेताः।

"स्वयं धौतेन कर्त्तव्या क्रिया धर्म्म्या विपश्चिता।
न च राजकधौतेन नाधौतेन भवेत् क्वचित्॥
पुत्रमित्रकलत्रेण स्वजातिबान्धवेन च।
दासवर्गेण यद्धौतं तत् पवित्रमिति स्थितिः॥"

स्नानोत्तरं उष्णीषवस्त्रस्य धार्य्यत्वं यथा॥

उष्णीषधारणं शिरोजलापनयनाय। तेन तदनन्तरं न धार्य्यम्। तथा महाभारतम्।

"आप्लुतः साधिवासेन जलेन च सुगन्धिना।
राजहंसनिभं प्राप्य उष्णीषं ग्रथिलार्पितम्।
जलक्षयनिमित्तं वै वेष्टयामास मूर्द्धनि॥"

ग्रथिलार्पितं अगाढ़बद्धम्॥ * ॥ निषिद्धवस्त्राणि यथा। भारते।

"न स्यूतेन न दग्धेन पारक्येण विशेषतः।
सूचिकोत्कीर्णजीर्णेन कर्म्म कुर्य्याद्विचक्षणः॥"

नारसिंहे।

"न रक्तमुल्बणं वासो न नीलञ्च प्रशस्यते।
मलाक्तञ्च दशाहीनं वर्ज्जयेदम्बरं बुधः॥"

उल्बणं उत्कटरक्तविशेषम्। आचाररत्ने उशनाः।

"दशाहीनेन वस्त्रेण कुर्य्यात् कर्म्माण्यभावतः।"

विष्णुधर्म्मोत्तरे।

"वस्त्रं नान्यधृतं धार्य्यं न रक्तं मलिनं तथा।
जीर्णं वापदशञ्चैव श्वेतं धार्य्यं प्रयत्नतः॥
उपानहं नान्यधृतं ब्रह्मसूत्रञ्च धारयेत्।
न जीर्णमलवद्वासो भवेच्च विभवे सति॥"

योगियाज्ञवल्क्यः।

"स्नात्वैवं वाससी धौते अक्लिन्ने परिधाय च।
प्रक्षाल्योरूभयदक्षिञ्च हस्तौ प्रक्षालयेत्ततः॥
अभावे धौतवस्त्राणां शुष्कार्द्रौ वाप्यकानि च।
कृतयोगपट्टं वा द्विर्व्वासा येन वा भवेत्॥

अधौतेन च वस्त्रेण नित्यनैमित्तिकीं क्रियाम्।
कुर्वन् फलं न चाप्नोति दत्तं भवति निष्फलम्॥"
कृतपो नेपालकम्बलः॥ * ॥ तर्पणात् पूर्व्वं स्नानवस्त्रनिष्पीड़ननिषेधो यथा,—
"निष्पीड़यति यः पूर्व्वं स्नानवस्त्रन्तु तर्पणात्।
निराशास्तस्य गच्छन्ति देवाः पितृगणैः सह॥"
याज्ञवल्किः।
"स्नानं कृत्वार्द्रवासास्तु विण्मूत्रं कुरुते यदि।
प्राणायामत्रयं कृत्वा पुनः स्नानेन शुद्ध्यति॥*॥
नार्द्रमेकञ्च वसनं परिदध्यात् कथञ्चन॥"
हारीतः। आर्द्रञ्च सप्तवातहतमपि शुद्धमिति॥ * ॥ मदनपारिजाते पाराशरः। एकवस्त्रो न भवति तस्योत्तरार्द्धेन प्रच्छादयतीति। इत्याह्निकतत्त्वम्॥ * ॥ संक्रान्त्यादौ वस्त्रनिष्पीड़ननिषेधो यथा। यट्त्रिंशन्मतनिगमौ।
"संक्रान्त्यां पञ्चदश्याञ्च द्वादश्यां श्राद्धवासरे।
वस्त्रं न पीड़येत्तत्र न च चारेण योजयेत्॥"
इति तिथ्यादितत्त्वम्॥

वस्त्रकुट्टिमं, क्ली, (वस्त्रनिर्म्मितं कुट्टिममिव।) कृत्रिमम्। इति त्रिकाण्डशेषः॥ (वस्त्रस्य कुट्टिमं क्षुद्रगृहम्।) वस्त्रगृहञ्च॥

वस्त्रगृहं, क्ली, (वस्त्रनिर्म्मितं गृहम्।) वस्त्रनिर्म्मितशाला। ताँबु इति भाषा। तत्पर्य्यायः। पटवासः २ पटमयम् ३ दूष्यम् ४ क्षौमम् ५। इति त्रिकाण्डशेषः॥

वस्त्रग्रन्थिः, पुं, (वस्त्रस्य ग्रन्थिः।) परिधानवस्त्रस्य ग्रन्थनम्। तत्पर्य्यायः। उच्चयः २ नीवी ३। इति त्रिकाण्डशेषः॥

वस्त्रपञ्जलः, पुं, कोलकन्दः। इति राजनिर्घण्टः॥

वस्त्रपुत्रिका, स्त्री, (वस्त्रनिर्म्मिता पुत्रिका पुत्तलिका।) वस्त्रनिर्म्मितपुत्तलिका। इति शब्दमाला॥

वस्त्रभूषणः, पुं, (भूषयतीति। भूष+ल्युः। वस्त्रस्य भूषणः रञ्जक इत्यर्थः।) साकरखण्डवृक्षः। इति राजनिर्घण्टः॥

वस्त्रभूषणा, स्त्री, (वस्त्रस्य भूषणं रागो यस्याः।) मञ्जिष्ठा। इति राजनिर्घण्टः॥ (गुणादयोऽस्या मञ्जिष्ठाशब्दे ज्ञातव्याः॥)

वस्त्रयोनिः, स्त्री, (वस्त्रस्य योनिरुत्पत्तिकारणम्।) वसनोत्पत्तिकारणम्। यथा,—
"त्वक्फलक्षमिरोमाणि वस्त्रयोनिर्हिरण्यञ्च त्रिषु॥"
इत्यमरः॥

वस्त्ररञ्जनः, पुं, (रञ्जयतीति। रञ्ज+णिच्+ल्युः।) वस्त्राणां रञ्जनः। कुसुम्भः। इति राजनिर्घण्टः॥ (तथास्य पर्य्यायः।
"स्यात् कुसुम्भं वह्निशिखं वस्त्ररञ्जनमित्यपि॥"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे॥)

वस्त्रं, क्ली, (वस निवासे आच्छादने वा+"धाञ्वस्त्रयतिभ्यो नः।" उणा० ३। ६। इति करणादौ यथायथं नः।) वेतनम्। मूल्यम्। (यथा, ऋग्वेदे। ४। २४। ६।
"भूयसा वस्त्रमघरत् कनीयोऽविक्रीतो अकानिषं पुनर्यन्॥")
वसनम्। द्रव्यम्। इति विश्वः॥ धनम्। भूतिः। इति हेमचन्द्रः॥ (वस्ते आच्छादयति शरीरमिति। कर्त्तरि नः।) त्वक्। इत्यमरटीकायां रामाश्रमः॥

वस्त्रः, पुं, (वस्+न।) मूलम्। इत्यमरः॥

वस्त्रनं, कटीभूषणम्। इति शब्दरत्नावली॥

वस्त्रसा, स्त्री, (वस्त्रं चर्म्म सीव्यति। वस्त्र+सिव+डः। स्त्रियां टाप्।) स्नायुः। इत्यमरः॥

व(खो)स्त्रौकसारा, स्त्री, (वस्त्रौकेषु रत्नाकरेषु सारा।) इन्द्रपुरी। (यथा, रघुः।१६।१०।
"वस्त्रौकसारामभिभूय साहं
सौराज्यबद्धोत्सवया विभूत्या।
समग्रशक्तौ त्वयि रक्ष्यवर्ग्गे
सति प्रपन्ना करुणामवस्याम्॥")
इन्द्रनदी। (यथा, महाभारते। ३। १८८। १०१।
"वस्त्रौकसारां नलिनीं नर्म्मदाञ्चैव भारत!॥")
कुबेरपुरी। (यथा, महाभारते। ७।६५।१५।
"नेतादृशं दृष्टपूर्व्वं कुबेरसदनेष्वपि।
धनञ्च पूर्य्यमाणं नः किं पुनर्मनुजेष्विति।
यत्तं वस्त्रौकसारेयमित्यूचुस्तत्र विस्मिताः॥")
कुबेरनदी। इति हेमचन्द्रः॥

वह, इ क त्रिषि। इति कविकल्पद्रुमः॥ (चुरा०-पर०-अक०-सेट्।) इ क, वंहयति। त्रिषि दीप्तौ। इति दुर्गादासः॥

वह, ऐ अ औ प्रापणे। इति कविकल्पद्रुमः॥ (भ्वा०-उभ०-द्विक०-अनिट्।) प्रापणमिह अन्तस्य रूपम्। ऐ, उह्यात्। अ, वहति वहते भारं ग्रामं जनः प्रापयतीत्यर्थः। औ, अवाचीत्। अर्थान्तरे अकर्म्मकोऽयम्। यथा। जम्बूः सरिद्वहति सीमनि कम्बुकण्ठीति नैषधे। मन्दं मरुद्वहति गर्ज्जति वारिवाहः। इति महानाटके। ववाह रक्षां पुरुषास्ततो जाताः सहस्रशः। इत्यादि सिद्ध्यर्थमोष्ठ्यादिषु वहधातुं मन्यते वर्णदेशग्ररणदेवौ। वस्तुतस्तु वक्राद्यसम्मतत्वादेवोष्ठ्यादिरनेनोपेक्षितः। ववाह इति चङीप्रयोगस्य तु वाह ड यत्ने इत्यस्मात् गणकृतानित्यत्वात् परस्मैपदसिद्धिः। अनेकार्थत्वात् सुस्राव इत्यर्थः। अथवा वव इत्याह इत्येव व्याख्यानम्। इति दुर्गादासः॥

वहः, पुं, (वहति युगमनेनेति। वह+"गोचरसञ्चरेति।" ३। ३। ११९। इति घप्रत्ययेन साधु।) वृषस्कन्धप्रदेशः। इत्यमरः॥ (यथा, महाभारते। ४। २। २१।
"यस्य बाहू समौ दीर्घौ व्यायतकठिनत्वचौ।
दक्षिणे चैव सव्ये च गवामिव वहः कृतः॥")
वहतीति। वह+अच्।) घोटकः। वायुः। इति मेदिनी। हे, ८॥ पन्थाः। इति त्रिकाण्डशेषः॥ नदः। इति हेमचन्द्रः॥ (वाहके, त्रि।
यथा, मनुः। १। ७६।
"आकाशात्तु विकुर्व्वाणात् सर्व्वगन्धवहः शुचिः।
बलवान् जायते वायुः स वै स्पर्शगुणो मतः॥")

वहतः, पुं, (वहतीति। वह+अतच्।) वृषः। पान्थः। इत्युणादिकोषः॥

वहतिः, पुं, (वहतीति। वह+"वहिवस्यर्त्तिभ्यश्चित्।" उणा० ४। ६०। इति अतिः।) वायुः। इत्युणादिकोषः। गौः। सचिवः। इति मेदिनी। ते, १४८॥

वहती, स्त्री, (वहतीति। वह+अति। वा ङीष्।) नदी। इति केचित्॥

वहतुः, पुं, (वह्+"इधिवह्योश्चतुः।" उणा० १। ७६। इति चतुः।) पथिकः। वृषभः। इति मेदिनी। ते, १४६॥ (विवाहकाले कन्यायै देयवस्तु। यथा, ऋग्वेदे। १०। ८५। १३।
"सूर्य्याया वहतुः प्रागात् सवितायमवाक्षत।"
"वहतुः कन्याप्रियार्थं दातव्यो गवादिपदार्थः।"
इति तद्भाष्ये सायणः॥ विवाहः। यथा, ऋग्वेदे। १०। ८५। १४।
"यदश्विना पृच्छमाना वयातं
त्रिचक्रेण वहतुं सूर्य्यायाः॥"
"सूर्य्याया वहतुं विवाहमित्यर्थः।" इति तद्भाष्ये सायणः॥ वहनकारणे, त्रि। यथा, ऋग्वेदे। ७। १। १७।
"उभा क्षयतो वहतू मियेधे।"
"उभौ वहतू वहनहेतू स्तोत्रं शृण्वन्तौ क्षयतः कुर्व्वन्तौ मियेधे।" इति तद्भाष्ये सायणः॥)

वहनं, क्ली, (उह्यतेऽनेनेति। वह+करणे ल्युट्।) होड़ः। हुड़ी इति भाषा। यथा,—
"तरण्डो भेलके वारिरथो नौस्तरिकः प्लवः।
होड़स्तरान्तुर्व्वहनं वहित्रं वार्व्वटः पुमान्॥"
इति त्रिकाण्डशेषः॥
(यथा, कथासरित्सागरे। २५। ४५।
"क्षणान्तरे च वणिजामाक्रन्दैस्तीव्रपूरितम्।
भरादिव तदुत्पत्य वहनं समभज्यत॥")
वह+भावे ल्युट्। प्रापणम्। धारणम्। यथा, महाभारते। २। ३१। ४१।
"पावनात् पावकत्वासि वहनात् हव्यवाहनः॥"
वहतीति। वह+ल्युः। वाहके, त्रि। यथा, कथासरित्सागरे। १२६। १६६।
"दैत्यानामधिपो विमानवहनः सान्तःपुरः
सानुगः॥")

वहन्तः, पुं, (वहति वातीति। वह+"तॄभूवहिवसीति।" उणा० ३। १२८। इति झच्।) वायुः। इति सिद्धान्तकौमुद्यामुणादिवृत्तिः॥ (उह्यते इति। कर्म्मणि झच्।) वाहे, त्रि। इत्युणादिकोषः॥

व(ब)हलः, पुं, (उह्यतेऽनेनेति। वह+बाहुलकात् अलच्।) पोतः। इति हारावली। १४२॥ दृढ़े, त्रि। इति हेमचन्द्रः॥ (बहुले च यथा, उत्तरचरिते। १।

"रसावस्याः स्पर्शो वपुषि वहलस्नेहनरसः ॥"
यथा वा प्रबोधचन्द्रोदये । १ ।
"येन त्रि.सप्तकृत्वो नृपवहलवसामांसमस्त्रिष्कपट्ट-
प्राग्भारेऽकारि भूरिश्युतरुधिरसरिद्वारिपूरे-
ऽभिषेकः ॥")
वहलगन्धं, क्ली, (वहलः प्रचुरो गन्धो यस्य ।) श्रीखण्डचन्दनम् । इति राजनिर्घण्टः ॥
वहलचक्षुः. [स्] पुं, (वहलानि प्रचुराणि चक्षुंषीव पुण्यान्यस्य ।) मेषशृङ्गी । इति रत्नमाला ॥ पुस्तकान्तरे ।
"नन्दीवृक्षो मेषशृङ्गी तथा मेषविषाणिका ।
चक्षुर्वहलं चक्षुश्च मेढ्रशृङ्गी गृहद्रुमाः ॥"
इत्यपि पाठः ॥
वहलत्वचः, पुं, (वहला दृढा त्वचा वल्कलं यस्य ।) श्वेतलोधः । इति राजनिर्घण्टः ॥
वहला, स्त्री, (वहलानि प्रचुराणि पुष्पाणि सन्त्यस्या इति । अर्शआदित्वादच् ।) घृतपुष्पा । इति राजनिर्घण्टः ॥ स्थूलेला । इति भावप्रकाशः ॥ (अस्याः पर्य्यायो यथा,—
"एला तु वहला स्थूला मालेयं ताड़काफलम् ॥"
इति वैद्यकरत्नमालायाम् ॥)
वहा, स्त्री, (वहतीति । वह + अच् । टाप् ।) नदी । इति हेमचन्द्रः । ४ । १३६ ॥
व(ब)हिः, [स्] य, बाह्यम् । इत्यमरः ॥ (यथा, मनुः । १० । ४५ ।
"सुखबाहूरुपज्जानां या लोके जातयो बहिः ।
म्लेच्छवाचश्चार्य्यवाचः सर्व्वे ते दस्यवः स्मृताः ॥"
यथा च, रामायणे । २ । ५३ । २ ।
"अद्येयं प्रथमा रात्रिर्यातो जनपदात् बहिः ।
या सुमन्त्रेण रहिता तां नोत्कण्ठितुमर्हसि ॥")
व(ब)हिःकुटीचरः, पुं, (बहिःकुट्यां चरतीति । चर + टः ।) कुलीरः । इति त्रिकाण्डशेषः ॥
वहितः, त्रि, (अवधीयते स्मेति । अव + धा + क्तः । अवस्यातो लोपः ।) अवहितः । इति द्विरूपकोषः ॥
वह्नित्रं, क्ली, (वहति द्रव्यमीति । वह + "अग्निचाग्निभ्य इत्रौ ।" उणा० ४ । १७२ । इति इत्रः ।) पोतः । तत्पर्य्यायः । वार्व्वटः २ । इति त्रिकाण्डशेषः ॥ (यथा, गीतगोविन्दे । १ । ५ ।
"प्रलयपयोधिजले धृतवानसि वेदं
विहितवहित्रचरित्रमखेदम् ॥")
वह्नित्रकं, क्ली, (वह्नित्र + स्वार्थे कन् ।) जलयानम् । यथा, हेमचन्द्रे ।
"सांयात्रिकः पोतवणिक् यानपात्रं वह्नित्रकम् ।
वोहित्थं वहनं पोतः पोतवाहो नियामकः ॥"
व(ब)हिर्द्वारं, क्ली, (बहिःस्थं द्वारम् ।) तोरणम् । इत्यमरः ॥ (यथा,—
"धिगस्त्वेतां विद्यां धिगपि कवितां धिक्सुजनतां
वयो रूपं धिक् धिगपि च यशो निर्हृतमतः ।
असौ जीयादेकः सकलगुणहीनोऽपि धनवान्
बहिर्द्वारे यस्यास्तबलभसमाः सन्ति गुणिनः ॥"
इत्युद्भटः ॥)

व(ब)हिर्द्वारप्रकोष्ठकः, पुं, (वह्निर्द्वारस्य प्रकोष्ठकः ।) गृहस्य द्वाराद्बहिः प्रकोष्ठम् । तत्पर्य्यायः । प्रघाणः २ प्रघणः ३ अलिन्दः ४ । इत्यमरः । २ । २ । १२ ॥
व(ब)हिर्भूतः, त्रि, (बहिस् + भू + क्तः ।) बहिर्गतः । बहिःशब्दपूर्व्वकप्राप्यर्थभूधातोः कर्त्तरि क्तप्रत्ययेन निष्पन्नः । यथा । "पञ्चविषयिताबहिर्भूतसाध्यविषयिताघटितधर्म्मावच्छिन्नप्रतिबध्यताप्रयोजितं शब्दं प्रयुञ्जता ॥" इति जगदीशः ॥
व(ब)हिर्मुखः, त्रि, (बहिर्बाह्यविषये सुखं प्रवणता यस्य ।) विमुखः । यथा, नरसिंहाचार्य्यधृतेज्ञानसंहितायाम् ।
"शैवो वा वैष्णवो वापि यो वा स्यादन्यपूजकः ।
सर्व्वं पूजाफलं हन्ति शिवरात्रिबहिर्मुखः ॥"
इति तिथ्यादितत्त्वम् ॥
व(ब)हिश्चरः, पुं, (बहिश्चरतीति । चर + टः ।) कर्कटः । इति हेमचन्द्रः ॥ (बहिश्चरणशीले, त्रि । यथा, मार्कण्डेये । २३ । ८३ ।
"युवयोर्यन्मदीयं तन्मामकं युवयोः स्वकम् ।
एतत्सत्यं विजानीतं युवां प्राणा बहिश्चराः ॥")
वह्नेडुकः, पुं, विभीतकवृक्षः । इति राजनिर्घण्टः ॥
वह्निः, पुं, (वहति धरति हव्यं देवार्थमिति । वह + "वह्निमिश्रुयुवि ।" उणा० ४ । ५१ । इति निः ।) चित्रकः । भल्लातकः । (यथा, सुश्रुते चिकित्सितस्थाने ६ अध्याये ।
"मञ्जिष्ठाच्यौ वासको देवदारु
पथ्यावह्नी ओषधाची विड़ङ्गम् ॥")
निम्बूकः । इति राजनिर्घण्टः ॥ रेफः । इति तन्त्रम् ॥ अग्निः । इत्यमरः ॥* ॥ तस्य नामानि यथा,—
"ते जातवेदसः सर्व्वे कल्याणाः कुसुमस्तथा ।
दहनः शोषणश्चैव तर्पणश्च महाबलः ।
पितरः पतगः स्वर्गस्वर्गाधो भाज एव च ॥"
अन्यत्र तु नामान्तराण्युक्तानि यथा,—
"जृम्भकोद्दीपकश्चैव विभ्रमभ्रमशोभनाः ।
अवसथ्याहवनीयौ दक्षिणाग्निस्तथैव च ।
अन्वाहार्य्यो गार्हपत्य इत्येते दश वह्नयः ॥"
अन्यैरन्यथोक्तानि यथा,—
"भ्राजको रञ्जकश्चैव क्लेदकः स्नेहकस्तथा ।
धारको वन्धकश्चैव द्रावकाख्यश्च सप्तधा ।
पाचकः पावकश्चैव श्लेष्मको दशमः स्मृतः ॥"
शरीरस्थवह्नेः स्थानानि यथा,—
"वह्नयो दोषदूष्येषु संलीना दश देहिनः ॥"
दोषदूष्यौ यथा,—
"वातपित्तकफा दोषा दूष्याः स्युः सप्त धातवः ॥"
इति सारदातिलकः ॥
तत्र निषिद्धकर्म्माणि यथा,—
"नाशुद्धोऽग्निं परिचरेत् न देवान् कीर्त्तयेद्वयीम् ।
न चाग्निं लङ्घयेद्धीमान् नोपदध्यादधः क्वचित् ॥
न चैनं पादतः कुर्य्यात् सुखेन न धमेद्बुधः ।
अयौ न निःक्षिपेदग्निं नाङ्गैः प्रशमयेत्तथा ॥
न वह्निं मुखनिश्वासैर्ज्वालयेन्नाशुचिर्बुधः ।

स्वमग्निं नैव हस्तेन स्पृशेन्नाप्सु चिरं वसेत् ॥
नाप्रक्षिप्तोपधमेन्न स्पर्शेच्च पाणिना ।
सुखेनाग्निं समिन्धीतं सुखादग्निरजायत ॥"
इति कौर्म्मे उपविभागे १५ अध्यायः ॥
अस्योत्पत्तिर्यथा,—
शौनक उवाच ।
"सर्व्वं श्रुतं महाभाग परिपूर्णं मनो मम ।
अधुना श्रोतुमिच्छामि वह्नेरुत्पत्तिमीप्सिताम् ॥
सूत उवाच ।
एकदा सृष्टिकाले च ब्रह्मानन्तमहेश्वराः ।
श्वेतद्वीपं ययुः सर्व्वे द्रष्टुं विष्णुं जगत्पतिम् ॥
परस्परञ्च संभाषां कृत्वा सिंहासनेषु च ।
जगुः सर्व्वे सभामध्ये सुरम्ये पुरतो हरेः ॥
विष्णुगात्रोद्भवास्तत्र कामिन्यः कमलाकलाः ।
तत्र नृत्यन्ति गायन्ति विष्णुगाथाश्च सुस्वरम् ॥
तासाञ्च कठिनां श्रोणिं कठिनं स्तनमण्डलम् ।
सस्मितं सुखपद्मञ्च दृष्ट्वा ब्रह्मा स कामुकः ॥
मनो निवारणं कर्त्तुं न शशाक पितामहः ।
वीर्य्यं पपात चक्षाद लज्जया वाससा विभुः ॥
तद्वीर्य्यं वस्त्रसहितं प्रतप्तं कामतापितः ।
क्षीरोदे प्रेरयामास सङ्गीते विरते द्विज ॥
जलादुत्थाय पुरुषः प्रज्वलन् ब्रह्मतेजसा ।
उवास ब्रह्मणः क्रोड़े लज्जितस्य च संसदि ॥
एतस्मिन्नन्तरे रुष्टो जलादुत्थाय सत्वरः ।
प्रणम्य वरुणो देवान् बालं नेतुं समुद्यतः ॥
बालो दधार ब्रह्माणं बाहुभ्याञ्च भयाद्दृढम् ।
किञ्चिन्नोवाच जगतां विधाता लज्जया द्विज ॥
बालकस्य करे धृत्वा चकाराकर्षणं रुषा ।
वरुणश्च सभामध्ये तं चिक्षेप प्रजापतिः ॥
पपात दूरतो देवो वरुणो दुर्ब्बलस्तथा ।
मूर्च्छां संप्राप मृतवत् कोपदृष्ट्या विधेरहो ॥
चेतनं कारयामासाष्टदृष्ट्या च शङ्करः ।
संप्राप्य चेतनां तत्र तमुवाच जलेश्वरः ॥
वरुण उवाच ।
बालो जले समुद्भूतो मम पुत्रोऽयमीप्सितः ।
अहं गृहीत्वा यास्यामि ब्रह्मा मां ताड़येत्
कथम् ॥
ब्रह्मोवाच ।
बालकः शरणापन्नो मयि विष्णो महेश्वर ।
कथं दास्यामि भीतञ्च रुदन्तं शरणागतम् ॥
शरणागतदीनार्त्तं यो न रक्षेदपक्षितः ।
पच्यते निरये तावद् यावच्चन्द्रदिवाकरौ ॥
उभयोर्व्वचनं श्रुत्वा प्रहस्य मधुसूदनः ।
उवाच सर्व्वतत्त्वज्ञः सर्व्वेशश्च यथोचितम् ॥
भगवानुवाच ।
दृष्ट्वा सुकामिनीश्रोणिं वीर्य्यं धातुः पपात तत् ।
लज्जया प्रेरयामास क्षीरोदे निर्म्मले जले ॥
ततो बभूव बालश्च धर्म्मतो विधिपुत्रकः ।
क्षेत्रजश्च सुतः प्राज्ञे वरुणस्यापि गौणतः ॥
महादेव उवाच ।
यो विद्यायोनिसम्बन्धो वेदेषु च निरूपितः ।
शिष्ये पुत्रे च समता चेति वेदविदो विदुः ॥

मन्त्रं ददातु वरुणो विद्याञ्च बालकाय च।
पुत्रो विधातुर्वह्निञ्च शिष्यञ्च वरुणस्य च॥
विष्णुर्ददातु बालाय दाहिकां शक्तिमुत्तमाम्।
सर्व्वदग्धो हुताशश्च निर्व्वाणो वरुणेन च॥
विष्णुश्च दाहिकां शक्तिं ददौ तस्मै शिवाज्ञया।
मन्त्रं विद्याञ्च वरुणो रत्नमालां मनोहराम्॥
क्रोडे़ कृत्वा च तं बालं चुचुम्ब मायया सुरः॥"
इति ब्रह्मवैवर्त्ते श्रीकृष्णजन्मखण्डे वह्न्युत्पत्तिर्नाम १३० अध्यायः॥ * ॥ तद्बाहनिवारणौषधानि यथा,—
"सामुद्रसैन्धवयवा विद्युद्दग्धा च मृत्तिका।
तयानुलिप्तं यद्देश्म नाग्निना दह्यते नृप!॥"
इति मात्स्ये राजधर्म्मे राजरक्षानाम १६३ अः॥
अग्निवैकृत्यं तच्छान्तिश्च यथा,—
"अनग्निर्दीप्यते यत्र राष्ट्रे यस्य निरिन्धनः।
न दीप्यते चेन्धनवान् स राष्ट्रः पीड्यते नृपैः॥
प्रज्वलेदप्सु मांसं वा तथाङ्गेष्वपि किञ्चन।
प्रासादतोरणद्वारं नृपवेश्म सुरालयम्॥
गृहाणि यत्र दह्यन्ते तत्र राजभयं भवेत्।
विद्युता वा प्रदह्यन्ते तत्रापि नृपतेर्भयम्॥
धूमश्चानग्निजो यत्र तत्र विद्यान्महद्भयम्।
विनाग्निं विस्फुलिङ्गाश्च दृश्यन्ते यत्र कुत्रचित्॥
चिरात्रोपोषितश्चाच्य पुरोधाः सुसमाहितः।
समिद्भिः क्षीरवृक्षाणां सर्पिषैस्तु घृतेन च॥
दद्यात् सुवर्णञ्च तथा द्विजेभ्यो
गाञ्चैव वस्त्राणि तथा सुवञ्च।
एवं कृते पापमुपैति नाशं
यदग्निवैकृत्यभवं द्विजेन्द्र!॥"
इति तत्रैवाद्भुतशान्तिरग्निवैकृत्यं नाम २०५ अध्यायः॥ * ॥ मुख्याग्नयो यथा,—
"गार्हपत्यो दक्षिणाग्निस्तथैवाहवनीयकः।
एतेऽग्नयस्त्रयो मुख्याः प्रेषाश्चोपसदस्त्रयः॥"
इति वह्निपुराणे गणभेदनामाध्यायः॥ * ॥
वह्निविप्रमध्यगमननिषेधो यथा,—
"द्वौ विप्रौ वह्निविप्रौ च इत्यत्रोर्गुरुशिष्ययोः।
हलाग्रे च न गन्तव्यं ब्रह्महत्या पदे पदे॥"
इति कर्म्मलोचनः॥ * ॥
अपि च।
"नाभिब्राह्मणयोरन्तरा व्रजेत् नाग्नेर्ब्राह्मणयोर्न गुरुशिष्ययोरनुज्ञया तु व्रजेत्।
इति तिथ्यादितत्त्वधृतवचनम्॥ * ॥ अथ वह्निस्तम्भनम्।
"मानुषस्य वसां गृह्य जलौकां तत्र पेषयेत्।
तस्तौ तु लेपयेत्तेन अग्निस्तम्भनमुत्तमम्॥
गृहीत्वा क्षीरसमादाय खरमूत्रे निधाय तम्।
अग्न्यागारे क्षिपेत्तेन अग्निस्तम्भनमुत्तमम्॥
वायसी उदरं गृह्य मण्डूकवसया सह।
गुडिकां कारयेत्तेन ततोऽग्निं प्रक्षिपेद्यदि॥
एवमेतत्प्रयोगेण अग्निस्तम्भनमुत्तमम्।
सुण्ठीतकवचायुक्तं मरीचं नागरं तथा॥
चर्व्वित्वा च इमं मन्त्रं जिह्वया ज्वलनं लिहेत्॥

गोरोचना भृङ्गराजं चूर्णं कृत्वा घृतं समम्।
दिवस्तम्भञ्च पीत्वा स्यान्मन्त्रेणानेन वै तथा॥"
ॐ अग्निस्तम्भनं कुरु। इति गारुड़े १८६ अध्यायः॥ (दैत्यविशेषः। यथा, महाभारते। १२। २२७। ५०।
"वाणः कार्त्तस्वरो वह्निर्विश्वदंष्ट्रोऽथ नैर्ऋतिः॥"
मित्रविन्दागर्भजातः कृष्णस्य पुत्रविशेषः। यथा, भागवते। १०। ६१। १६।
"महांशुः पावनो वह्निर्मित्रविन्दात्मजाः क्षुधिः॥"
तुर्व्वसुपुत्रः। यथा, हरिवंशे। ३२। ११७।
"तुर्व्वसोस्तु सुतो वह्निर्गोभानुस्तस्य चात्मजः॥"
क्रुक्कुरपुत्रः। यथा, भागवते। ६। २४। १६।
"क्रुक्कुरस्य सुतो वह्निर्विलोमा तनयस्ततः॥")
वह्निकरी, स्त्री, (वह्निं देहस्यवह्निं करोतीति। कृ+टः। ङीप्।) धात्रीश्वरी। इति शब्दचन्द्रिका॥ धाइ फुल इति भाषा॥
वह्निकाष्ठं, क्ली, (वह्निवत् दाहकं काष्ठम्।) दाहागुरुः। इति राजनिर्घण्टः॥
वह्निगन्धः, पुं, (वह्निना वह्निसंयोगेन दहनेन गन्धो यस्य।) यत्तधूपः। इति शब्दचन्द्रिका॥
वह्निगर्भः, पुं, (वह्निर्गर्भे यस्य।) वंशः। इति शब्दचन्द्रिका॥
वह्निगर्भा, स्त्री, (वह्निरग्निर्गर्भे यस्याः।) शमीवृक्षः। इति शब्दचन्द्रिका॥
वह्निचक्रा, स्त्री, (वह्निरिव चक्रं आवर्त्तवत् चिह्नं यत्र।) कलिकारीवृक्षः। इति भावप्रकाशः॥
वह्निज्वाला, स्त्री, (वह्नेर्ज्वालेव दाहकत्वात्।) धातकीवृक्षः। इति राजनिर्घण्टः॥ (तथास्य पर्य्यायो यथा,—
"धातकी धातुपुष्पी च ताम्रपुष्पी च कुञ्जरा।
सुभिक्षा बहुपुष्पी च वह्निज्वाला च सा स्मृता॥"
इति भावप्रकाशस्य पूर्ब्बखण्डे प्रथमे भागे॥)
वह्निदमनी, स्त्री, (दमयति भ्रमयतीति। दम+णिच्+ल्युः। ङीप्। वह्नेर्दमनी। अग्निदाहक्लेशभ्रमनकारित्वादस्यास्तथात्वम्।) अग्निदमनीक्षुपः। इति राजनिर्घण्टः॥
वह्निदीपकः, पुं, (वह्निं दीपयतीति। दीप+णिच्+ण्वुल्। वह्नेर्दीपक इति वा।) कुसुम्भम्। इति शब्दरत्नावली॥ (गुणादिविशेषोऽस्य कुसुम्भशब्दे ज्ञेयः॥)
वह्निदीपिका, स्त्री, (वह्नेर्जठरानलस्य दीपिका उत्तेजिका।) अजमोदा। इति राजनिर्घण्टः॥
वह्निनामा [न्], पुं, (वह्नेर्नाम नाम यस्य।) चित्रकः। भल्लातकः। इति रत्नमाला॥
वह्निनी, स्त्री, (वह्निं तद्वत्कान्तिं नयतीति। नी+डः। गौरादित्वात् ङीप्।) जटामांसी। इति रत्नमाला॥
वह्निपुष्पी, स्त्री, (वह्निरिव दाहकं रक्तवर्णं वा पुष्पमस्याः। ङीप्।) धातकी। इति राजनिर्घण्टः॥

वह्निबन्धूः, स्त्री, (वह्नेर्बन्धूः।) खाहा। इति शब्दरत्नावली॥
वह्निबीजं, क्ली, (वह्नेर्बीजम्।) रंबीजम्। इति तन्त्रम्॥ (वह्निदायकं बीजमस्य।) निम्बूकम्। इति राजनिर्घण्टः॥ (वह्नेर्बीजं वीर्य्यम्।) स्वर्णम्। इति हेमचन्द्रः॥ तस्योत्पत्तिर्यथा,—
"एकदा सर्व्वदेवाश्च समग्मुः स्वर्गसंसदि।
तत्र कृत्वा च नृत्यञ्च गायन्त्यश्चरसां गणाः॥
विलोक्य रम्भां सुश्रोणीं सकामो वह्निरेव च।
प्रपात वीर्य्यं चच्छाद लज्जया वाससा तथा॥
उत्तस्थौ स्वर्णपुञ्जश्च वह्निं क्षिप्त्वा ज्वलत्प्रभः।
क्षणेन वर्द्धयामास स सुमेरुर्बभूव ह॥
हिरण्यरेतसं वह्निं प्रवदन्ति मनीषिणः।
इति ते कथितं सर्व्वं किं भूयः श्रोतुमिच्छसि॥"
इति ब्रह्मवैवर्त्ते श्रीकृष्णजन्मखण्डे हिरण्योत्पत्तिर्नाम १३० अध्यायः॥
वह्निभोग्यं, क्ली, (वह्नेरग्नेर्भोग्यं भोगार्हं हव्यत्वात्।) घृतम्। इति शब्दचन्द्रिका॥
वह्निमन्थः, पुं, (वह्नये अग्न्युत्पादनार्थं मथ्यते इति। मन्थ+घञ्।) गणिकारिकावृक्षः। इति जटाधरः॥ (अस्य पर्य्यायो यथा,—
"तेजोमन्थो हविर्मन्थो ज्योतिष्को पावकोऽरणिः।
वह्निमन्थोऽग्निमन्थश्च मथनो गणिकारिका॥"
इति वैद्यकरत्नमालायाम्॥)
अग्निमन्थः। इति राजनिर्घण्टः॥
वह्निमारकं, क्ली, (वह्निं मारयति विनाशयतीति। मृ+णिच्+ण्वुल्।) जलम्। इति शब्दचन्द्रिका॥
वह्निमित्रः, पुं, (वह्निर्मित्रं यस्य।) वायुः। इति शब्दचन्द्रिका॥
वह्निरेताः [स्], पुं, (वह्नौ रेतो यस्य। अग्निनिषिक्तवीर्य्यत्वादेवास्य तथात्वम्।) शिवः। इति हलायुधः॥
वह्निलोहकं, क्ली, (वह्निदेवताकं लोहकम्।) कांस्यम्। इति राजनिर्घण्टः॥
वह्निवर्णं, क्ली, (वह्नेरिव रक्तो वर्णो यस्य।) रक्तोत्पलम्। इति शब्दचन्द्रिका॥
वह्निवल्लभः, पुं, (वह्नेर्वल्लभः प्रियः उद्दीपकत्वात्।) सर्ज्जरसः। इति त्रिकाण्डशेषः॥
वह्निशिखं, क्ली, (वह्निरिव शिखा यस्य।) कुसुम्भम्। इत्यमरः॥ (अस्य पर्य्यायो यथा,—
"स्यात् कुसुम्भं वह्निशिखं वस्त्ररञ्जकमित्यपि॥"
इति भावप्रकाशस्य पूर्ब्बखण्डे प्रथमे भागे॥)
वह्निशिखरः, पुं, (वह्निरिव शिखरं यस्य।) लोचमस्तकः। इति शब्दरत्नावली॥
वह्निशिखा, स्त्री, (वह्निरिव शिखा यस्याः।) फलिनी। इति धरणिः॥ कलिकारी। धातकी। इति राजनिर्घण्टः॥ (लाङ्गलिकी। लाङ्गलिया विष इति ख्याता। तत्पर्य्यायो यथा,—
"गौरी लाङ्गलिकी दीप्ता फलिनी गर्भघातिनी।
अग्निशिखेन्द्रपुष्पाग्निमुखी वह्निशिखा च सा॥"
इति भावप्रकाशस्य पूर्ब्बखण्डे प्रथमे भागे॥)

वांग्नी

वह्निसंज्ञकः, पुं, (वह्नेः संज्ञा संज्ञा यस्य । ततः कन् ।) चित्रकः । इत्यमरः ॥

वह्निसखः, पुं, (वह्नेर्जठराग्नेः सखा । टच् समासे ।) जीरकः । इति राजनिर्घण्टः ॥ (वह्नेः सखा ।) वायुः । इति वह्निमित्रशब्ददर्शनात् ॥

वह्न्यं, क्ली, (वहतीति । वह + "अन्नाद्यश्च ।" उणा० ४ । १११ । इति यक् प्रत्ययेन साधुः ।) वाहनम् । इति हेमचन्द्रः ॥ (वहन्त्यनेनेति । वह + "वह्न्यं करणम् ।" ३ । १ । १०२ । इति यत् ।) प्रकटम् । इत्युणादिकोषः ॥ (यथा, अथर्ववेदे । ४ । २० । ३ ।

"सा भूमिमा रुरोहिथ वह्न्यं आन्ता वधूरिव ॥")

वह्न्या, स्त्री, मुनिपत्नी । इत्युणादिकोषः ॥

वा, क सुखाप्तिगतिसेवासु । इति कविकल्पद्रुमः ॥ (चुरा०-पर०-सुखाप्तौ अक०-अन्यत्र सक०-सेट् ।) क, वापयति । इति दुर्गादासः ॥

वा, ल गमनहिंसयोः । इति कविकल्पद्रुमः ॥ (अदा०-पर०-सक०-सेट् ।) ओष्ठ्यादिरप्ययमित्येके । गमनमिह वायुकर्तृकमेव । ल, वाति वायुः । हिंसनं क्षयनमिति चतुर्भुजः । इति दुर्गादासः ॥

वा, य, (वा + क्विप् ।) विकल्पः । (यथा, मनुः । २ । ११२ ।

"धर्म्मार्थौ यत्र न स्यातां शुश्रूषा वापि तद्विधा ।
तत्र विद्या न वप्तव्या शुभं बीजमिवोषरे ॥")

उपमा । (इवार्थे । यथा, रघुः । १६ । ५१ ।

"व्योम पक्ष्मिमकलाक्षितेन्दु वा
पङ्कजेष्वमिव घर्म्मपक्षलम् ॥")

वितर्कः । (यथा, महाभारते । १ । १५४ । २३ ।

"किं ते हिडिम्ब एतैर्वा सुखसुप्तैः प्रबोधितैः ।
मामासाद्य दुर्बुद्धे तरसा त्वं नराशन ! ॥")

पादपूरणम् । (यथा, रामायणे । १ । २५ । ३ ।

"देवासुरगणान् वापि सगन्धर्व्वोरगान् भुवि ।
यैरभित्रान् प्रसह्याजौ वशीकृत्य जयिष्यसि ॥")

समुच्चयः । इति मेदिनी । वे, ७४ ॥ एवार्थः । इति विश्वः ॥ (यथा, किराते । ३ । १३ ।

"सुता न यूयं किमु तस्य राज्ञः
सुयोधनं वा न गुरुश्चरीतीः ॥")

वांग्रः, त्रि, वंग्रसम्बन्धी । वंग्रस्यायमित्यर्थे अण् (अञ्) प्रत्ययेन निष्पन्नः ॥

वांग्रिकः, पुं, (वंग्रीवादनं शिल्पमस्येति । वंग्र + ठक् ।) वंग्रीवादकः । इति जटाधरः ॥ (भारभूतान् वंग्रान् हरति वहति आवहति वा । "तद्धरति वहत्यावहति भाराद्वंग्रादिभ्यः ।" ५ । १ । ५० । इति ठक् । भारभूतवंग्रहारके तद्वाहके च त्रि ॥)

वांग्री, स्त्री, (वंग्रे भवा + वंग्र + अण् । ङीष् ।) वंग्रलोचना । इति राजनिर्घण्टः ॥ (तत्पर्य्यायो यथा,—

"तुगाक्षीरी शुभा वांग्री वंग्रजा वंग्रलोचना ॥"

इति वैद्यकरत्नमाला ॥

वाकुची

"स्यादंग्रलोचना वांग्री तुगाक्षीरी तुगा शुभा ।
त्वक्क्षीरी वंग्रजा शुभ्रा वंग्रक्षीरी च वेणुवी ॥"

इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥)

वाः [र्], क्ली, (वार्य्यते क्षयानेनेति । वृ + णिच् + क्विप् । यद्वा, "वृञ वरणे । स्वार्थिको ऽण् छान्दसः । तदन्तात् क्विप् । अणि लोपः । हल्ङ्यादिलोपः । रेफस्य विसर्जनीयः ।" इति निघण्टौ देवराजयज्वा । १ । १२ । ८ ।) जलम् । इत्यमरः ॥ (यथा, भागवते ।३।१३।१६।

"क्षुज्जतो मे क्षितिर्वाभिः क्षाद्यमाना रसाज्ञता ॥")

वाःकिटिः, पुं, वारो जलस्य किटिः शूकरः । शिशुमारः । इति केचित् ॥

वाःसदनं, क्ली, (वारो जलस्य सदनम् ।) जलाधारः । इति त्रिकाण्डशेषः ॥

वाक् [च्], स्त्री, (उच्यतेऽसौ अनया वेति । वच् + "क्विप् वचिप्रच्छीति ।" उणा० २ । ५७ । इति क्विप् दीर्घोऽसम्प्रसारणञ्च ।) वाक्यम् । (यथा, मनुः । २ । १५६ ।

"अहिंसयैव भूतानां कार्य्यं श्रेयोऽनुशासनम् ।
वाक् चैव मधुरा श्लक्ष्णा प्रयोज्या धर्म्ममिच्छता ॥")

सरस्वती । इत्यमरः ॥ (यथा, कथासरित्सागरे । १ । ३ ।

"प्रणम्य वाचं निःशेषपदार्थोद्द्योतदीपिकाम् ।
बृहत्कथायाः सारस्य संग्रहं रचयाम्यहम् ॥")

वाक्, त्रि, (वकस्येदमिति । वक + "तस्येदम् ।" ४ । ३ । १२० । इत्यण् ।) वकसम्बन्धि । वकस्येदं इत्यर्थे ष्णप्रत्ययेन निष्पन्नम् ॥ (क्ली, वकस्य समूहः । "तस्य समूहः ।" ४ । २ । ३७ । इत्यण् । वकसमूहः ॥ उच्यतेऽसौ अनेनेति वा । वच् + घञ् । वाक्यम् । यथा, उत्तररामचरिते । १ । १ ।

"इदं कविभ्यः पूर्व्वेभ्यो नमो वाकं प्रशास्महे ॥"

वेदभागविशेषः । यथा, महाभारते । १२ । ३७ । २५ ।

"यं वाकेष्वनुवाकेषु निषत्सूपनिषत्सु च ।
गृणन्ति सत्यकर्म्माणं सत्यं सत्येषु सामसु ॥"

पुं, वकस्यावयवो विकारो वा । प्राणित्वादण् । वकावयवविशेषः ॥)

वाकुची, स्त्री, (वातीति वा वायुस्तं कुचति सङ्कोचयति पूतिगन्धित्वात् । कुच् + कः । गौरादित्वात् ङीष् ।) वृक्षविशेषः । हाकुच इति भाषा ॥ तत्पर्य्यायः । सोमराजी २ सोमवल्ली ३ सुवल्लिका ४ सिता ५ सितावरी ६ चन्द्रलेखा ७ चन्द्री ८ सुप्रभा ९ कुष्ठहन्त्री १० काम्बोजी ११ पूतिगन्धा १२ वल्गुला १३ चन्द्रराजी १४ कालमेघी १५ त्वग्दोषापहा १६ कान्तिदा १७ अवल्गुजा १८ चन्द्रप्रभा १९ । अस्या गुणाः । कटुत्वम् । तिक्तत्वम् । उष्णत्वम् । कृमिकुष्ठकफत्वग्दोषविषकण्डूखर्ज्जूनाशित्वञ्च । इति राजनिर्घण्टः ॥ तत्पर्य्यायगुणाः ।

"अवल्गुजो वाकुची स्यात् सोमराजी सुपर्णिका ।
अग्निलेखा कृष्णफला सोमा पूतिफलीति च ॥
सोमवल्ली कालमेघी कुष्ठघ्नी च प्रकीर्त्तिता ।
वाकुची मधुरा तिक्ता कटुपाका रसायनी ॥
विष्टम्भहृद्विमा रुच्या सरा श्लेष्मासृपित्तनुत् ।
रूक्षा हृद्या श्वासकुष्ठमेहज्वरकृमिप्रणुत् ॥
तत्फलं पित्तलं कुष्ठकफानिलहरं कटु ।
केश्यं त्वच्यं कृमिश्वासकासशोथामपाण्डुहृत् ॥"

इति भावप्रकाशः ॥

वाकुलं, क्ली, (वकुलस्येदमिति । वकुल + "तस्येदम् ।" ४ । ३ । १२० । इत्यण् ।) वकुलफलम् । अस्य गुणाः ।

"वाकुलं मधुरं ग्राहि दन्तस्थैर्य्यकरं परम् ॥"

इति राजवल्लभः ॥

वाक्कीरः, पुं, (वाचि कौतुकवाक्ये कीरः शुक इव प्रियत्वात् ।) भ्रष्टालकः । इति शब्दरत्नावली ॥

वाक्कलहं, क्ली, (वाचा कलहम् ।) वाक्यव्याजः । यथा । वचनविघातोऽर्थविकल्पोपपत्त्या छलम् । तत्त्रिविधम् । वाक्छलम् । सामान्यच्छलम् । उपचारच्छलञ्च । अविशेषाभिहितेऽर्थे वक्तुरभिप्रायादर्थान्तरकल्पना वाक्छलम् ॥ १ ॥ सम्भवतोऽर्थस्यातिसामान्ययोगात् असम्भूतार्थकल्पना सामान्यच्छलम् ॥ २ ॥ धर्म्मविकल्पनिर्देशे अर्थसद्भावप्रतिषेध उपचारच्छलम् ॥ ३ ॥ इति गोतमसूत्रम् ॥ शब्दैकार्थग्राह्यबोधतात्पर्य्यकशब्दस्य शब्दा अर्थान्तरतात्पर्य्यकत्वकल्पनया दूषणाभिधानं वाक्छललक्षणम् । यथा । नेपालादागतोऽयं नवकम्बलवत्त्वात् । इत्युक्ते कुतोऽस्य नवसंख्यकाः कम्बलाः ॥१॥ सामान्यविशिष्टसम्भवदर्थाभिप्रायेण उक्तस्य सामान्ययोगादसम्भवदर्थकल्पनया दूषणाभिधानं सामान्यच्छलम् । यथा । ब्राह्मणोऽयं विद्याचरणसम्पन्न इत्युक्ते ब्राह्मण्येन विद्याचरणसम्पदं साधयति इति कल्पयित्वा परो वदति कुतो ब्राह्मण्येन विद्याचरणसम्पत् व्रात्ये व्यभिचारात् ॥ २ ॥ शक्तिलक्षणयोरेकतरवृत्त्या यः प्रतिषेधः स उपचारच्छलम् । यथा । मञ्चाः क्रोशन्ति इत्यत्र मञ्चस्था एव क्रोशन्ति न तु मञ्चाः । एवं अहं नित्य इति शक्त्या प्रयुक्ते असुकादुत्पन्नत्वं कथं नित्य इति प्रतिषेधोऽप्युपचारच्छलम् ॥ ३ ॥ इति तट्टीका ॥ अपि च ।

"सर्व्वेष्वर्थविवादेषु वाक्छले नावसीदति ।
प्रगुणीभूम्यृणादाने ग्राह्योऽप्यर्थान्न हीयते ॥"

इति व्यवहारतत्त्वम् ॥

वाक्पतिः, पुं, (वाचां पतिः ।) बृहस्पतिः ॥ इति शब्दरत्नावली ॥ (यथा, बृहत्संहितायाम् । ८ । १५ ।

"उदगारोग्यसुभिक्षक्षेमकरो वाक्पतिश्चरन्
भानाम् ॥")

वाक्पतिः, त्रि, (वाचां पतिरिव पटुत्वात् ।) उद्दामवचनः । इति रायमुकुटः ॥ अनवद्यो-

दमादिपटुवचनः। इति भरतः॥ खबुद्ध्या वाक्यरचकः। इति सारसुन्दरी॥ पटुवचनः। इति पदार्थकौमुदी॥ अल्पवाग्जनः। इति नीलकण्ठः॥ तत्पर्य्यायः। वागीशः २। इत्यमरः॥ अनवद्योद्यमवचाः ३। इति जटाधरः॥
"वाग्मी वाग्मिर्ववदूको वाचो युक्तिपटुस्तथा।
वागीशो वाक्पतिश्चेति षड्डेते सुखवक्तरि॥"
इति शब्दरत्नावली॥
(यथा, हरिवंशे। २१५। ३४।
"सम्भवं सर्व्वलोकस्य विदधाति स वाक्पतिः॥")

वाक्पारुष्यं, क्ली, (वाचा कृतं पारुष्यम्।) अप्रियवाक्योच्चारणम्। तच्च सप्तधायसनान्तर्गतव्यसनविशेषः। यथा,—
"स्तेयाच्चाः स्त्रियः पानं वाक्पारुष्यार्थदूषणे।
दण्डपारुष्यमित्येतज्ज्ञेयं व्यसनसप्तकम्॥"
इति हेमचन्द्रः॥*॥
तल्लक्षणं नारदेनोक्तम्।
"देशजातिकुलादीनामाक्रोशन्यङ्गसंयुतम्।
यद्वचः प्रतिकूलार्थं वाक्पारुष्यं तदुच्यते॥"
देशादीनां आक्रोशन्यङ्गसंयुतम्। उच्चैर्भाषणमाक्रोशः न्यङ्गमवद्यं तदुभययुक्तं यत्प्रतिकूलार्थं उद्वेगजननार्थं वाक्यं तद्वाक्पारुष्यं कथ्यते॥
तस्य च दण्डतारतम्यार्थं निष्ठुरादिभेदेन त्रैविध्यमभिधाय तल्लक्षणं तेनैवोक्तम्।
"निष्ठुराक्षीलतीव्रत्वात्तदपि त्रिविधं स्मृतम्।
गौरवाद्युक्तमात्रस्य दण्डोऽपि स्यात् क्रमाद्गुरुः॥
साक्षेपं निष्ठुरं ज्ञेयमश्लीलं व्यङ्गसंयुतम्।
यतनीयैरुपाक्रोशैस्तीव्रमाहुर्मनीषिणः॥"इति॥
तत्र निष्ठुराक्रोशे स्ववर्णविषये दण्डमाह।
"सत्यासत्यान्यथास्तोत्रैर्न्यूनाङ्गेन्द्रियरोगिणाम्।
क्षेपङ्करोति चेद्दण्डः पञ्चानर्हत्रयोदश॥
काणत्वाप्यथवा खञ्जमन्धं वापि तथाविधम्।
तथेनापि ब्रुवन् दाप्यो दण्डं कार्षापणावरम्॥"
इति यन्मनुवचनं तदतिदुर्वृत्तस्ववर्णविषयम्। यदा पुनः पुत्रादयो माचादीन् प्रपद्यन्ति तदा प्रातं दण्डनीया इति तेनैवोक्तम्।
"मातरं पितरं जायां भ्रातरं सुहृदं गुरुम्।
आक्षारयन् प्रातं दाप्यः पन्थानञ्चाददद्गुरोः॥"
इति च॥
एतच्च सापराधेषु माचादिषु गुरुषु निरपराधायाञ्च जायायां द्रष्टव्यम्॥*॥ अश्लीलाक्षेपे दण्डमाह।
"अभिगन्तासि भगिनीं मातरं वा तवेति च।
प्रयन् तन्द्रापयेद्राजा पञ्चविंशतिकं दमम्॥
दण्डप्रणयनं कार्य्यं वर्णजात्युत्तराधरैः।
प्रातिलोम्यापवादेषु द्विगुणश्चिगुणा दमाः॥
वर्णानामानुलोम्येन तस्मादर्द्धार्द्धहानितः॥"*॥
मनुः।
"प्रातं ब्राह्मणमाक्रुश्य क्षत्रियो दण्डमर्हति।
वैश्योऽध्यर्द्धप्रातं द्वे वा शूद्रस्तु वधमर्हति॥
पञ्चाशद्ब्राह्मणो दण्ड्यः क्षत्रियस्याभिशंसने।
वैश्ये स्यादर्द्धपञ्चाशच्छूद्रे द्वादशको दमः॥
बाहुग्रीवानेत्रसक्थिविनाशे वाग्विकृते दमः।
प्रत्यङ्गदर्द्धिकः पादो नासाकर्णकरादिषु॥
अप्रक्तस्तु वदन्नेव दण्डनीयः पणान् दश।
तथा प्रक्तः प्रतिभुवं दाप्यः क्षेमाय तस्य तु॥
पतनीयकृते क्षेपे दण्डो मध्यमसाहसः।
उपपातकयुक्ते तु दाप्यः प्रथमसाहसः।
क्षेविद्यनृपदेवानां क्षेपे उत्तमसाहसः।
मध्यमो जातिपूगानां प्रथमो ग्रामदेशयोः॥"
इति मिताक्षरा॥*॥
वाक्पारुष्ये अभियोगमनिच्छीर्य्यं प्रत्यभियोजने प्रतिप्रसवो यथा,—
"कुर्य्यात् प्रत्यभियोगञ्च कलहे साहसेषु च।"
वाक्पारुष्ये शस्त्रादिप्रहारेषु च यथा पूर्व्वमहमप्यनेनाक्रुष्टः शस्त्रेण हतः इत्यपराधाभावाय प्रत्यभियोगं कुर्य्यात्। इति व्यवहारतत्त्वम्॥

वाक्यं, क्ली, (उच्यते इति। वच्+ण्यत्। "चजोः कु घिण्यतोः।" ७। ३। ५२। इति कुत्वम्। शब्दसंज्ञात्वात् "वचोऽशब्दसंज्ञायाम्।" ७। ३। ६७। इति निषेधो न।) पदसमुदायः। इति व्याकरणम्॥ तिङन्तचयः। सुबन्तचयः। कारकान्विता क्रिया। इत्यमरः। इह श्रुतिलोकयोस्त्रिविधं निरुक्तं वाक्यमुक्तम्। तिङ्सुबन्तयोश्चयः समुदायः कारकान्विता क्रिया च वाक्यम्। तिङ्शब्देन तिबादीनि साप्तीतिश्रुतसंख्यकानि वचनानि उच्यन्ते। एवं सुप्शब्देन स्यादीन्येकविंशतिरुच्यन्ते द्वन्द्वात् परं यः श्रूयते लभते ऽसौ प्रत्येकं अभिसम्बन्धमित्यन्तशब्द उभयोरपि सम्बध्यते। अत्र तिङन्तसमूहो यथा। पचति भवति पाको भवति इत्यर्थः। एतच्छान्दसमेव। सुबन्तसमूहो यथा। प्रकृतिसिद्धमिदं हि महात्मनाम्। धात्वर्थः क्रिया कारकैः कर्त्रादिभिरन्विता सम्बन्धार्था कारकान्विता अन्वितत्वञ्च क्रियाकारकार्थां आकाङ्क्षायोग्यतासन्निधिवशात् ज्ञेयम्। तिङ्सुबन्तचयात्मकेऽपि सम्बद्धार्थता बोध्या असम्बद्धार्थस्याप्रयोगात् अतएव परस्पराभिसम्बन्धः पदसमूहो वाक्यमिति वृद्धाः। कारकान्विता क्रिया यथा। देवदत्तो ग्रामं गच्छति। इति तट्टीकायां भरतः॥*॥ वाक्यस्वरूपमाह।
"वाक्यं स्यात् योग्यताकाङ्क्षासत्तियुक्तः पदोच्चयः।
वाक्योच्चयो महावाक्यमित्यं वाक्यं द्विधा मतम्॥"
उक्तञ्च।
"स्वार्थबोधसमाप्तानामङ्गाङ्गित्वव्यपेक्षया।
वाक्यानामेकवाक्यत्वं पुनः संभूय जायते॥"
इति॥
अत्र वाक्यं यथा। शून्यं वासगृहमित्यादि। महावाक्यं यथा। रामायणमहाभारतरघुवंशादिः। इति साहित्यदर्पणे २ परिच्छेदः॥*॥
अप्रियवाक्यभाषणनिषेधो यथा,—
"न हिंस्यात् सर्व्वभूतानि नानृतञ्च वदेत् क्वचित्।
नाहितं नाप्रियं वाक्यं न स्तेनः स्यात् कदाचन॥*॥
पाषण्डादिभिर्भाषणनिषेधो यथा,—
"पाषण्डिनो विकर्म्मस्थान् वामाचारांस्तथैव च।
पञ्चरात्रान् पाशुपतान् वाङ्मात्रेणापि नार्च्चयेत्॥"
इति कौर्म्मे उपविभागे १६ अध्यायः॥*॥
शुभाशुभवाक्यानि यथा,—
"नैव राज्येन महता न वै वार्थस्य राशिभिः।
प्राप्यते ज्ञानकथनं परलोकसुभाषितम्॥
स्वर्गापवर्गसिद्ध्यर्थभाषितं यत् सुशोभनम्।
वाक्यं मुनिवरैः प्राप्तैस्तद्विज्ञेयं सुभाषितम्॥
रागद्वेषानृतक्रोधकामलोभानुसारि यत्।
वाक्यं निरयहेतुत्वात् तद्भाषितमुच्यते॥
संस्कृतेनापि किं तेन कटुना खलितेन वा।
अविद्या रागवाक्येन संसारक्लेशहेतुना॥
यत् श्रुत्वा जायते पुण्यं रागादीनाञ्च संक्षयः।
निरुद्धमपि तद्वाक्यं विज्ञेयमतिशोभनम्॥"
इति वह्निपुराणे वैष्णवधर्म्मे शुद्धिव्रतनामाध्यायः॥ (अत्र वाक्यदोषो यथा,—
"वाक्यदोषो नाम यथा खल्वभिप्रायं न्यूनमधिकमनर्थकमपार्थकं विरुद्धञ्चेति। तत्र हेतूदाहरणोपनयनिगमनानामन्यतमेनापि न्यूनं न्यूनं भवति यदा वक्तृप्रदिष्टहेतुकमेकेन साध्यते हेतुना तच्च न्यूनं एतानि ह्यन्तरेण प्रकृतोऽप्यर्थः॥ प्रणश्येत।" इति चरके विमानस्थानेऽष्टमेऽध्याये॥)

वाच्, इ काङ्क्षे। इति कविकल्पद्रुमः॥ (भ्वा०-पर०-सक०-सेट्।) इ, वाङ्क्षति। नमध्यपाठेनैवेष्टसिद्धौ इदुपधत्वो वेदेषूच्चारणभेदार्थः। इति तट्टीकायां दुर्गादासः॥

वागरः, पुं, (वाचा इयर्त्ति गच्छतीति। ऋ+अच्।) वारकः। प्राणः। निर्णयः। वाड़वः। दृकः। सुसुप्तुः। पण्डितः। परित्यक्तभयः। इति हेमचन्द्रः॥

वागारः, त्रि, (वाचि आशावाक्ये आरः कर्कट इव मर्म्मच्छेदकत्वात्।) आशाहन्ता। यथा,
"आशां बलवतीं दत्त्वा यो हन्ति प्रियुनो जनः।
स जीवासोऽपि वागारुड्नो दानुस्तु दातरि॥"
इति शब्दमाला॥

वागाग्निः, पुं, बुद्धः। इति शब्दरत्नावली॥

वागीशः, पुं,(वाचां ईशः।) बृहस्पतिः। इति शब्दरत्नावली॥ (यथा, बृहत्संहितायाम्।१७।२७।
"अयं विशेषोऽभिहितो हतानां
कुजज्ञवागीशसितासितानाम्॥"
ब्रह्मा। यथा, कुमारे। २। ३।
"वागीशं वाग्भिरर्थाभिः प्रणिपत्योपतस्थिरे॥")

वागीशः, त्रि, (वाचामीशः।) वाक्पतिः। सुष्ठुवक्ता इति यावत्। इत्यमरः॥ (यथा, महाभारते। १०। ७। ४१।
"नित्यानन्दप्रमुदिता वागीशा वीतमत्सराः॥")

वागीश्वरः, पुं, (वाचामीश्वर इव।) मञ्जुघोषः। इति त्रिकाण्डशेषः॥ (जैनविशेषः। इति च त्रिकाण्डशेषः। १। १। २३॥ बृहस्पतिः। ब्रह्मा। इति व्युत्पत्तिलभ्योऽर्थः॥) वाचामीश्वरे, त्रि। यथा, गारुडे १६६ अध्याये।
"रुद्रामलकचूर्णं वै मधुतैलसमन्वितम्।
जग्ध्वा मासं युवा स्याच्च नरो वागीश्वरो भवेत्॥"

वागीश्वरी, स्त्री, (वाचामीश्वरी।) सरस्वती। इति त्रिकाण्डशेषः॥ (यथा, तन्त्रसारे। "वागीश्वरीं ऋतुस्नातां।")

वागुजी, स्त्री, सोमराजी। इत्यमरः। २।४।६॥ (यथा, वैद्यकचक्रपाणिसंग्रहे कुष्ठाधिकारे।
"धर्म्मसेवी कदुष्णेन वारिणा वागुजीं पिबेत्।
क्षीरभोजी चिरम्नाहात् कुष्ठरोगादिमुच्यते॥")

वागुरः, पुं, कर्म्मरङ्गः। इति शब्दमाला॥

वागुरा, स्त्री, (वागतीति। वा गतिबन्धनयोः + "सृवृभूशुषिमुष्टिविदिभिदिच्छिदिजागृभ्यश्च।" उणा० १।४२। इति उरच्-प्रत्ययेन गुणागमेन च साधुः।) मृगबन्धनार्थ-जालविशेषः। इत्यमरः। २।१०।२६॥ (यथा, कथासरित्सागरे। २१। १६।
"श्वानः श्वभ्रे वने तस्मिंस्तस्य वर्त्मसु वागुराः॥")

वागुरिकः, पुं, (वागुरया चरतीति। वागुरा + "चरति।" ४। ४। ८। इति ठक्।) व्याधः। वागुरया मृगादीन् बध्नातीति यः। इत्यमरः। २। १५। ४॥ (यथा, रघुः। ६। ५३।
"मृगयाविवागुरिकेः प्रथमास्थितं
व्यपगतानलदस्यु विवेश सः॥")

वाग्गुदः, पुं, (वाचा गोदते क्रीड़तीवेति। गुद क्रीड़ायाम् + कः।) पक्षिविशेषः। इति त्रिकाण्डशेषः॥ एतद्योनिकारणं यथा,—
"क्रौञ्चिकं तित्तिरिं हत्वा चौमं हत्वा तु दर्दुरः।
कार्पासतान्तवं क्रौञ्चो गोधा गां वाग्गुदो गुडम्॥"
इति मानवे १२ अध्यायः॥

वाग्गुलिः, पुं, (वाचा गुड़ति रचयतीति। गुड़ + "इगुपधात् कित्।" उणा० ४। २१८। इति इन्। स च कित्।) ताम्बूली। राज्ञां ताम्बूल-दाता। इति शब्दमाला॥

वाग्गुलिकः, पुं, (वाग्गुलि + स्वार्थे कन्।) ताम्बूलदः। इति त्रिकाण्डशेषः॥

वाग्दरिद्रः, त्रि, (वाचि दरिद्र इव।) मित-भाषी। तत्पर्य्यायः। वाग्यः २। इति शब्द-माला॥

वाग्दलं, क्ली, (वाचां दलमिव।) ओष्ठाधरौ। इति त्रिकाण्डशेषः॥

वाग्दुष्टः, पुं, (वाचा वाक्यमात्रेण दुष्टः।) ब्राह्मः। इति जटाधरः॥

वाग्दुष्टः, त्रि, (वाचा शुद्धेऽपि वस्तुनि अशुद्ध-रूपवदुर्व्वाक्येन दुष्टः।) वाचा दोषयुक्तः। यथा,—
"वाग्भावदुष्टाश्च तथा दुष्टैश्चोपहतास्तथा।
वाससा चावधूतानि वर्ज्जयानि आह्निकर्म्मणि॥"
इति आह्निकतत्त्वम्॥ * ॥
तदन्नभक्षणप्रायश्चित्तम्। तत्र ग्रहः।
"वाग्दुष्टं भावदुष्टञ्च भाजने भावदूषिते।
भुक्तान्नं ब्राह्मणः पश्चात् चिराच्चन्तु व्रती भवेत्॥"
एतदभ्यासे व्रती यावकेन तत्र द्वादशपणा देयाः। इति प्रायश्चित्तविवेकः॥

वाग्देवता, स्त्री, (वाचां देवता।) सरस्वती। यथा,—
"पद्मासनोक्षिपिभिर्विभक्तसुखदोःपद्मध्वजाः-स्रजां
भास्वन्मौलिनिबद्धचन्द्रशकलामापीनतुङ्ग-स्तनीम्।
सुन्नामत्रिगुणं सुधाढ्यकलसं विद्याञ्च हस्ता-म्बुजै-
र्बिभ्राणां विशदप्रभां त्रिनयनां वाग्देवता-माश्रये॥"
इति तन्त्रसारः॥

वाग्देवी, स्त्री, (वाचां देवी।) सरस्वती। इति त्रिकाण्डशेषः॥ (यथा, राजतरङ्गिण्याम्। ५। १६३।
"द्विजस्त्रयोर्नायकाख्यो गौरीग्रसुरसद्मनोः।
चातुर्विद्यः श्रुतस्तेन वाग्देवी कुलमन्दि-रम्॥")

वाग्मी, [न्] त्रि, (प्रशस्ता वागस्त्यस्येति। "वाचो ग्मिनिः।" ५। २। १२४। इति ग्मिनिः।) वक्ता। इत्यमरः॥ (यथा, कामन्दकीयनीतिसारे। ४। १५।
"वाग्मी प्रगल्भः स्मृतिमानुदग्रो बलवान् वग्नी॥")
पटुः। इति मेदिनी। ने, १३०॥

वाग्मी, [न्] पुं, (प्रशस्ता वागस्त्यस्येति। वाच् + ग्मिनिः।) सुराचार्य्यः। इति मेदिनी। ने, १३०॥ (पुरुवंशीयमनस्योः पुत्रविशेषः। यथा, महाभारते। १। ६४। ७।
"प्रक्षः संहननो वाग्मी सौवीरीतनयाक्षयः।
मनस्योरभवन् पुत्राः शूराः सर्व्वे महारथाः॥")

वाग्यः, त्रि, (वाचं परिमितवाक्यं याति गच्छ-तीति। या + कः।) वाग्दरिद्रः। इति शब्द-माला॥ निर्व्वेदः। कल्यः। इत्यजयः॥

वाग्यतः, त्रि, (वाचि वाक्ये यतः संयतः।) वाक्यसंयतः। यथा,—
"प्रत्येकं नियतं कालमात्मनो व्रतमादिशेत्।
प्रायश्चित्तमुपाशीनो वाग्यतश्चिरसवनं स्पृशेत्॥"
इति प्रायश्चित्ततत्त्वधृतशङ्खलिखितवचनम्॥

वाग्यामः, त्रि, अशक्त्यादिना वाचं यच्छति यः। इति सिद्धान्तकौमुदी॥

वाङ्कः, पुं, वसुदः। इति त्रिकाण्डशेषः॥

वाङ्मयी, स्त्री, (स्तुतिरूपा वागस्त्यस्या इति। वाच् + मतुप्। ङीप्।) नदीविशेषः। यथा,—
"हिमाद्रिस्तुङ्गशिखरात् प्रोद्भूता वाङ्मयी नदी।
भागीरथ्याः शतगुणं पवित्रं तज्जलं स्मृतम्॥
तत्र स्नात्वा नरो लोकानुपसृत्य दिवस्पतेः।
त्यक्त्वा देहं नरो याति मम लोकं न संशयः॥"
इति वाराहे गोकर्णमाहात्म्ये जलेश्वरमाहात्म्य-वर्णननामाध्यायः॥

वाङ्मयं, त्रि, (वाक्समूहः। वाच् + मयट्।) वाक्यात्मकम्। यथा,—
"स्थूलस्थूलभ्रमोल्लासैरभिद्यमभिरक्षरैः।
समस्तं वाङ्मयं शास्त्रं जैलोक्यमिव विष्णुना॥"
अपि च।
"पद्यं गद्यमिति प्राहुर्वाङ्मयं द्विविधं बुधाः।
प्राग्युक्तलक्षणं पद्यं गद्यं संप्रति गद्यते॥"
पद्यं यथा,—
"पद्यं चतुष्पदी तच्च वृत्तं जातिरिति द्विधा।
वृत्तमक्षरसंख्यातं जातिर्मात्राकृता भवेत्॥
समममर्द्धसमं वृत्तं विषमञ्चेति तत्त्रिधा।
सर्व्वं समचतुष्पादं भवत्यर्द्धसमं पुनः॥
आदिसप्तलघुद्वयस्य पादस्यार्य्या द्वितीयवत्।
भिन्नमिश्रचतुष्पादं विषमं परिकीर्त्तितम्॥"
गद्यं यथा।
"अथादः पदमस्तानो गद्यं तच्च त्रिधा मतम्।
चूर्णकोत्कलिकाप्रायवृत्तगन्धिप्रभेदतः॥
अकठोरास्तरं स्वल्पसमासं चूर्णकं विदुः।
तत्रि पेदमरोनिस्थं गद्यं वृत्तपरं भवेत्॥
भवत्युत्कलिकाप्रायं समासाढ्यं दृढाक्षरम्।
वृत्तैकदेशसम्बन्धाद्वृत्तगन्धि पुनः स्मृतम्॥"
इति छन्दोमञ्जरी॥ * ॥

वाङ्मयपापानि यथा,—
"पारुष्यमनृतञ्चैव पैशुन्यञ्चापि सर्व्वशः।
असम्बन्धप्रलापश्च वाङ्मयं स्याच्चतुर्विधम्॥"
तथा यत्परुषवचनमसभ्यवादः पैशुन्यमनृतं वृथा-लापो निष्ठुरवचनं इति वाङ्मयानि षट्।
परेषां दैवज्ञानिकुलविद्याधिक्यरूपदुस्ताचार-परिच्छदधूरीरकर्म्मलौकिनां प्रज्ञाधरोपवचनं पञ्चमम्।
"यच्चान्यत् क्रोधसन्तापजातयं जगतं वचः।
परुषं तच्च विज्ञेयं यच्चान्यच्च तथाविधम्॥
चक्षुष्मानिति सुप्राज्ञं चाक्षान्नं ब्राह्मणेति च।
प्रज्ञामानिन्दनं ज्ञेयान् परुषान्न विनिक्षिपेत्॥"
तेषामेव परुषवचनानां परोक्षसदाक्षरत्वं अपवादः। गुरुसुपतिबन्धुब्राह्मणिभक्षक-प्रेक्षार्थोपघातार्थं दोषोपाख्यानं पैशुन्यम्। अनृतं द्विविधं असत्यमसंबादश्चेति।
"ईश्वरादृषभङ्गाच्च परार्थपरिकल्पनात्।
नर्म्मोद्भावप्रसङ्गाच्च भावयं अर्थभावयम्॥
गुह्याङ्गामेध्यसंज्ञानां भावयं निष्ठुरं विदुः।
यदन्यद्वा मनो नोद्यक्षोपुंसोर्मिथुनाश्रयम्॥
इत्येवं षड्विकल्पस्य दुष्टवाक्यस्य भावयात्।
इह चामुत्र च क्रमशर्थं प्रतिपद्यते॥"

प्रशंसया निन्दनं प्रशंसानिन्दनम्। अत्र चतुर्विधषड्विधयोरविरोधः। समत्वात्समत्वभेदानादरेण गौरव्यापवादयोरैक्यात् निष्ठुरस्य परुषान्तर्भावाच्च। असम्बद्धप्रलापपर्यवभाषणयोः पर्यायत्वान्नार्थान्तरम्। इति तिथ्यादितत्त्वम्॥

वाङ्मयी, स्त्री, (वाङ्मय + + ङीप्।) सरस्वती। इति केचित्॥

वाङ्सुखं, क्ली, (वाचां सुखमिव।) उपन्यासः। इत्यमरः। १। ६। ६॥

वाचंयमः, पुं, (वाचो वाक्यात् यच्छति विरमतीति। यम उपरमे + "वाचि यमो व्रते।" ३। २। ४०। इति खच्। "वाचंयमपुरन्दरौ च।" ६। ३। ६६। इति अमन्तत्वं निपात्यते।) मुनिः। इत्यमरः। २। ७। ४२॥ मौनव्रती। इति केचिदिति भरतः॥ (यथा, छान्दोग्योपनिषदि। ५। २। ८।

"वाचंयमोऽप्रसाद्यः स यदि स्त्रियं पश्येत् सन्दधं कर्मेति विद्यात्॥")

वाचः, पुं, (वाचयति गुणानिति। वच् + णिच् + अच्।) मत्स्यविशेषः। वाचा इति भाषा॥ (यथा,—

"ईलिषो जितपीयूषो वाचो वाचामगोचरः।
रोहितो नो हितः प्रोक्तो मङ्गरो मङ्गरोः प्रियः॥"
इत्युद्भटः॥)

अस्य गुणाः। स्वादुत्वम्। गुरुत्वम्। स्निग्धत्वम्। श्लेष्मलत्वम्। वातपित्तनाशित्वञ्च। इति राजवल्लभः॥

वाचकः, पुं, (वक्ति अभिधात्तत्त्वा बोधयत्यर्थान् इति। वच् + ण्वुल्।) शब्दः। यथा। शास्त्रे शब्दस्तु वाचकः। इत्यमरः॥ हे वाचके। प्रकृतिप्रत्ययद्वारेणार्थस्य वाचको गवादिरूपः शास्त्रे व्याकरणे तर्कादौ च शब्द उच्यते। लोके तु संस्कृतोऽसंस्कृतः शब्द उच्यते। वक्तीति वाचकः शकः। इति भरतः॥ तत्पर्य्यायः। यथा। शब्दाभिधायौ त्वभिधाभिधानं वाचको ध्वनिः। हासः कुहरितञ्चेति चिकाण्डशेषः॥ * ॥ (तच्चत्यं यदुक्तं मुग्धबोधटीकायां दुर्गादासः।

"शास्त्रात् सङ्केतितं योऽर्थमभिधत्ते स वाचकः॥*॥

वाचयतीति। वच् + णिच् + ण्वुल्।) कथकः। पुराणादिपाठकः। यथा,—

"ब्राह्मणं वाचकं विद्यान्मान्यवर्णजमादरात्।
सुतान्यवर्णजाद्राजन् वाचकान्नरकं व्रजेत्॥"

तथा।

"देवार्चामग्नतः कृत्वा ब्राह्मणानां विशेषतः।
यस्मिंश्च गृहिणं कुर्याद्वाचकः कुरुनन्दन!।
पुनर्ब्रूयात् तत् सूत्रं न मुह्यो धारयेत् क्वचित्॥
हिरण्यं रजतं गाश्च तथा कांस्योपदोहनाः।
दत्त्वा तु वाचकायेह श्रुतस्यान्नोति तत्फलम्॥"

कांस्योपदोहनाः कांस्यक्रोड़ाः।

"वाचकः पूजितो येन प्रसन्नास्तस्य देवताः॥"

तथा।

"ज्ञात्वा पर्व्वसमाप्तिञ्च पूजयेद्वाचकं बुधः।
आत्मानमपि विक्रीय य इच्छेत् सफलं क्रतुम्॥"

तथा।

"विशिष्टमद्भुतं ग्राह्यं सदाचरपदं तथा।
कलस्वरसमायुक्तं रसभावसमन्वितम्॥
बुध्यमानः सदात्यर्थं ग्रन्थार्थं क्षत्रसत्तमो नृपः।
ब्राह्मणादिषु सर्व्वेषु ग्रन्थार्थं चार्पयेन्नृप!।
य एवं वाचयेद्ब्रह्मन् स विप्रो याज्य उच्यते॥"

तथा।

"सप्तस्वरसमायुक्तं काले काले विराजते।
प्रदर्शयन् रसान् सर्व्वान् वाचयेद्वाचको नृप!॥"

इति तिथ्यादितत्त्वम्॥

वाचनं, क्ली, (वच् + णिच् + ल्युट्।) पठनम्। यथा,—

"शुद्धेनानन्यचित्तेन पठितव्यं प्रयत्नतः।
न कार्य्यासक्तमनसा कार्य्यं स्तोत्रस्य वाचनम्॥"

इति वाराहीतन्त्रम्॥

तथा।

"दानवाचनान्वारम्भवरणव्रतप्रमाणेषु यजमानं प्रतीयात्॥" इति कात्यायनसूत्रम्॥ (प्रतिपादनम्। यथा, साहित्यदर्पणे १० परिच्छेदे।

"शब्दैः स्वभावादेकार्थैः श्लेषोऽनेकार्थवाचनम्॥")

वाचनकं, क्ली, (वाचनेन कायतीति। कै + कः।) प्रहेलिका। इति हारावली।१ ५२॥

वाचस्पतिः, पुं, (वाचस्पतिः सर्व्वविद्यारूपवाक्यानां पतिः। अभिधानात् षष्ठ्या अलुक्।) बृहस्पतिः। इति शब्दरत्नावली॥

वाचस्पतिः, पुं, (वाचः पतिः। "षष्ठ्याः पतिपुत्रेति।" ८।३।५३। इति षष्ठीविसर्गस्य सः।) बृहस्पतिः। इत्यमरः। १। ३। २४॥ (यथा, कुमारे। २। ३०।

"वाचस्पतिरयाचैतं प्राञ्जलिर्जलजासनम्॥"

शब्दप्रतिपालके, त्रि। यथा, ऋग्वेदे। १०। १६६। ३।

"वाचस्पते निषेधे मा त्वं पथो मदधरं वदान्॥"
"हे वाचस्पते वाचः शब्दस्य पालयितर्देव॥"

इति तद्भाष्ये सायणः॥)

वाचा, स्त्री, (वाच् + भागुरिमते टाप्।) वाक्। इति चिकाण्डशेषः॥ (यथा, कातन्त्रे।

"वष्टि भागुरिरल्लोपञ्चावाप्योरुपसर्गयोः।
टापञ्चापि हलन्तानां क्षुधा वाचा निशा गिरा॥"

यथा च, पञ्चतन्त्रे। ४। ४८। "तत् श्रुत्वा ब्राह्मणेन शुचीभूय तिस्रभिर्वाग्भिः स्वजीवितार्द्धं दत्तं॥")

वाचाटः, त्रि, (कुत्सितं बहु भाषते इति। वाच् + "आलजाटचौ बहुभाषिणि।" ५। २। १२५। इति आटच्।) वाचालः। इत्यमरः। ३।१।३६॥ (यथा, मनुः। ३। ८।

"नोदाहरेत् कपिलां कन्यां नाधिकाङ्गीं न रोगिणीम्।
नालोमिकां नातिलोमां न वाचाटां न पिङ्गलाम्॥")

वाचालः, त्रि, (बहु कुत्सितं भाषते इति। वाच् + "आलजाटचौ बहुभाषिणि।" ५।२।१२५। इति आलच्।) बहुकुत्सितभाषी। तत्पर्य्यायः। जल्पाकः २ वाचाटः ३। इत्यमरः॥ सुबहुभाषिण्यपि जल्पाकादयस्त्रयो वर्त्तन्ते वाचाटो वाचालो जल्पाकः सुबहुभाषी स्यादिति श्लोकार्द्धपर्य्याये वोपालितः। नित्यप्रगल्भवाचालामुपतिष्ठे सरस्वतीम्। इति मुरारिरिति तट्टीकायां भरतः॥ (यथा, कथासरित्सागरे। ४०। ३४।

"वाचालैः कलहः क्लीवैस्त्रपाल्लज्जाहुधूर्त्तिनाम्॥")

वाचिकं, त्रि, (वाच् + ठक्।) वाचा कृतम्। यथा,—

"शरीरजैः कर्म्मदोषैर्याति स्थावरतां नरः।
वाचिकैः पक्षिमृगतां मानसैरन्त्यजातिताम्।"

इति प्रायश्चित्ततत्त्वम्॥

अपि च।

"कायिकं वाचिकञ्चैव मानसं यच्च दुष्कृतम्।
एकजप्येन तत् सर्व्वं प्रणश्यति ममाग्रतः॥"

इति शाम्बपुराणे सूर्य्यस्तोत्रम्॥

अन्यच्च। कायिकं मानसञ्च नमस्कारं हित्वा आचार्य्येण कथं वाचिको नमस्कारः कृतः। इति मुग्धबोधटीकायां दुर्गादासः॥ (वागेव। वाक् + "वाचो व्याहृतार्थायाम्।" ५। ४।३५। इति ठक्। सन्देशोक्तौ, क्ली। इति हारावली। १६६॥ यथा, राजतरङ्गिण्याम्। ६। ३५।

"भृत्यमेकं बणिग्वेषं प्राहिणोद्दत्तवाचिकम्॥")

वाचिकः, पुं, (वाचा निष्पन्नः। वाच् + ठक्।) वाक्यारम्भः। यथा,—

"आलापश्च विलापश्च संलापः प्रलापकः।
अनुलापोऽपलापश्च सन्देशश्चातिदेशिकः॥
अपदेशोपदेशौ च निर्देशो व्यपदेशकः।
कीर्त्तिता वचनारम्भादृहादग्रामी मनीषिभिः॥"

इत्युज्ज्वलनीलमणिः॥

वाचिकपत्रं, क्ली, (वाचिकस्य सन्देशस्य पत्रम्।) लिपिः। संवादपत्रम्। इति केचित्॥

वाचिकहारकः, पुं, (वाचिकस्य सन्देशस्य हारकः।) लेखनम्। इति चिकाण्डशेषः॥ (दूतः। इति व्युत्पत्तिलब्धोऽर्थः॥)

वाचोयुक्तिः, त्रि, (वाचि वाक्ये युक्तिर्यस्य।) वाग्मी। इत्यमरटीकायां रामाश्रमः॥ (स्त्री, वाचो वचसो युक्तिः। "वाग्दिक्पक्षद्रुहो युक्तिदक्षरेषु।" ६। ३। २१। इत्यस्य वार्त्तिकोक्त्या षष्ठ्या अलुक्। वाग्दर्भितन्यायः॥)

वाचोयुक्तिपटुः, त्रि, (वाचोयुक्तौ वाक्दर्भितन्याये पटुः।) वाग्मी। इत्यमरः। ३। १। ३॥

वाच्यं, त्रि, (उच्यते इति । वच् + ण्यत् । "वचोऽशब्दसंज्ञायाम् ।" इति न कुत्वम् ।) श्रुतस्तितम् । हीनम् । वचनार्हम् । इति मेदिनी । ये, ५५ ॥ (यदुक्तम् ।
"अन्योरपि गुणा वाच्या दोषा वाच्या गुरोरपि ॥")
अन्वम् । यथा,—
"न वाच्यलवदुष्टत्वाच्चां प्रयोगाणां विभिद्यते ।
वाच्यवाचकभावोऽयमन्धपादादिशब्दवत् ॥
विभीतकेऽप्यन्धशब्दो यद्यप्यक्षेः प्रयुज्यते ।
तथापि वाचकस्तस्य ज्ञायते शकटाङ्गवत् ॥"
इति मलमासतत्त्वधृतभट्टवार्त्तिकवचनम् ॥
अपि च ।
"अर्थो वाच्यश्च लक्ष्यश्च व्यङ्ग्येति त्रिधा मतः ।"
एषां स्वरूपमाह ।
"वाच्योऽर्थोऽभिधया बोध्यो लक्ष्यो लक्षणया मतः ।
व्यङ्ग्यो व्यञ्जनया तास्तिस्रः शब्दस्य शक्तयः ॥"
इति साहित्यदर्पणे २ परिच्छेदः ॥
वाच्यं, क्ली, (वच् + ण्यत् ।) प्रतिपादनम् । कूपजम् । इति धरणिः ॥ (यथा,—
"परवाच्येषु निपुणः सर्व्वो भवति सर्व्वदा ॥")
वाछ, इ कामे । इति कविकल्पद्रुमः ॥ (भ्वा०-पर०-सक०-सेट् ।) इ, वाञ्छति । इति दुर्गादासः ॥
वाजं, क्ली, घृतम् । (यथा, वाजसनेयसंहितायाम् । ६ । १ ।
"वाचस्पतिर्वाजं नः स्वदतु ॥")
अन्नम् । (यथा, ऋग्वेदे । ४ । २२ । ३ ।
"यो देवो देवतमो जायमानो
महो वाजेभिर्महद्भिश्च शुष्मैः ॥"
"वाजेभिरन्नैः ।" इति तद्भाष्ये सायणः ॥)
वारि । इति मेदिनी । जे, १४ ॥ (संग्रामः । यथा, ऋग्वेदे । ५ । ३५ । १ ।
"अस्माभ्यं वर्षीयसीषहं सखिं वाजेषु दुष्टरम् ॥"
बलम् । यथा, तत्रैव । ५ । ८५ । २ ।
"वनेषु व्यन्तरिक्षं ततान वाजमर्व्वत्सु पय उस्रियासु ॥")
वाजः, पुं, शरपक्षः । इत्यमरः । २ । ८ । ८७ ॥ (यथा, भागवते । १० । ५६ । १६ ।
"विचित्रवाजैर्नियुतैः शिखीमुखैः ॥")
निखनः । पक्षः । वेगः । इति मेदिनी । जे, १६ ॥ मुनिः । इति विश्वः ॥
वाजपेयं, क्ली पुं, (वाजमन्नं घृतं वा पेयमत्रेति ।) यागविशेषः । इत्यमरभरतौ ॥ स तु श्रौतसप्तसंस्थान्तर्गतपञ्चमयागः । यथा । अग्निष्टोमोऽत्यग्निष्टोमो उक्थ्यः षोड़शी वाजपेयश्च । इत्याश्वलायनसूत्रम् ॥ ऐनः पौण्डरीकसेति सप्तधागाः ॥
वाजभोजी [न्], पुं, (वाजं भुङ्क्ते इति । भुज + णिनिः ।) वाजपेययागः । इति शब्दरत्नावली ॥

वाजसनेयः, पुं, जनमेजयसत्रवेदार्थग्रन्थः । स तु वैशम्पायनप्रणीतः । इति भविष्यपुराणम् ॥ (वाजसनेः सूर्य्यस्य छात्रः । वाजसनि + ढक् । याज्ञवल्क्यः । यथा, बृहदारण्यके । "आदित्यानीमानि शुक्लानि यजूंषि वाजसनेयेन याज्ञवल्क्येनाख्यायन्ते ॥")
वाजसनेयी, [न्] पुं, (वाजसनेयेन प्रोक्तं वेदमधीयतेति । इनिः ।) यजुर्व्वेदी । यथा,—
"आर्षक्रमेण सर्व्वत्र शुद्धा वाजसनेयिनः ॥"
इति महाजनपरिगृहीतवचनात् यजुर्व्वेदविधिनैव कर्म्म कार्य्यं । इति मलमासतत्त्वम् ॥ (यथा, हरिवंशे । १४० । २ ।
"ब्राह्मणो याज्ञवल्क्यस्य शिष्यो धर्म्मगुणान्वितः ।
ऋचदर्शेति विख्यातो विप्रो वाजसनेयिनाम् ॥")
वाजिगन्धा, स्त्री, (वाजिनो घोटकस्य गन्धोऽस्यस्यामिति । अच् । टाप् ।) अश्वगन्धा । इति रत्नमाला ॥ (यथा, सुश्रुते चिकित्सितस्थाने ३७ अध्याये ।
"सरला गुरुविख्याश्च वाजिगन्धाधिवृद्धिभिः ॥")
वाजिदन्तः, पुं, (वाजिनां दन्त इव पुष्पं यस्य ।) वासकः । इति रत्नमाला ॥
वाजिदन्तकः, पुं, (वाजिदन्त एव । स्वार्थे कन् ।) वासकः । इत्यमरः । २ । ४ । १०३ ॥
वाजिनं, क्ली, आमिक्षामस्तु । इति हेमचन्द्रत्रिकाण्डशेषौ ॥ छानार जल इति भाषा ॥ (यथा, वाजसनेयसंहितायाम् । १९ । २१ ।
"सोमस्य रूपं हविष आमिक्षा वाजिनं मधु ॥"
अस्य गुणाः प्रसूतिनियमश्च यथा,—
"दध्ना तक्रेण वा नष्टं दुग्धं बह्वं सुवाससा ।
नष्टदुग्धभवन्नीरं मोरटश्लेष्मटोऽब्रवीत् ॥
सुखशीघ्रलघादाहरक्तपित्तज्वरप्रणुत् ।
लघुर्बलकरो रुच्यो मोरटः स्यात् सितायुतः ॥"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥
हविः । यथा, वाजसनेयसंहितायाम् । २६ । २ ।
"वाजी वहन् वाजिनम् ।"
"वाजिनं हविः ।" इति तद्भाष्ये महीधरः ॥*॥
पुं, अश्वः । यथा, ऋग्वेदे । १० । ७१ । ५ ।
"नेमं हिन्वन्त्यपि वाजिनेषु ॥"
"वाक् इना ईश्वरा येषाम् ।" इति सायणः ॥)
वाजिनी, स्त्री, अश्वगन्धा । घोटकी । श्लेष्मस्य पर्य्यायः । वड़वा २ वामी ३ प्रकृका ४ आर्णवी ५ । अस्याः क्षीरगुणाः ।
"अश्वाक्षीरन्तु रूक्षाम्लं लवणं दीपनं लघु ।
देहस्थैर्य्यकरं बल्यं गौरवं कान्तिकृत् परम् ॥"
तद्घृतगुणाः ।
"आश्वं दधि स्यान्मधुरं कषायं
कफास्रिमूर्च्छामयहारि रूक्षम् ।
वाताम्लदं दीपनकारि नेत्र-
दोषापहं तत् कथितं पृथिव्याम् ॥"*॥
तन्नवनीतगुणाः ।
"आश्वन्तु नवनीतं स्यात् कषायं कफकासजित् ।
चक्षुष्यं कटुकक्षोणमीषद्वातापचारकम् ॥"
सद्यःसद्यघृतगुणाः ।
"अन्धसर्पिस्तु कटुकं मधुरञ्च कषायकम् ।
श्लेष्मदीपनदं रूक्षं हारि वाताम्लदं गुरु ॥"
इति राजनिर्घण्टः ॥ * ॥
अपि च ।
"रूक्षोष्णं वड़वाक्षीरं बल्यं श्वासानिलापहम् ।
अन्नं कटु खलु स्वादु सर्व्वमेकगुणं तथा ॥"
इति भावप्रकाशः ॥
वाजिपृष्ठः, पुं, (वाजिनः पृष्ठमिव आकृतिरस्येति ।) अश्वाकृतिः । इति शब्दचन्द्रिका ॥
वाजिभक्षः, पुं, (वाजिभिर्भक्ष्यते इति । भक्ष + कर्म्मणि घञ् ।) चणकः । इति राजनिर्घण्टः ॥ (विवरणमस्य चणकशब्दे ज्ञातव्यम् ॥)
वाजिभोजनः, पुं, (वाजिभिर्भोज्यते इति । भुज् + कर्म्मणि ल्युट् ।) मुद्गः । इति राजनिर्घण्टः ॥
वाजिमान् [न्], पुं, पटोलः । इति रत्नमाला ॥
वाजिशाला, स्त्री, (वाजिनां शाला यत्र ।) घोटकगृहम् । आस्तबल् इति आरबी भाषा ॥ तत्पर्य्यायः । मन्थुरा २ । इत्यमरः ॥ (यथा, राजतरङ्गिण्याम् । ४ । १६६ ।
"काम्बोजानां वाजिशाला जायन्ते स्म हयोज्झिताः ॥")
वाजी [न्] पुं, (वाजो वेगोऽस्यास्तीति । वाज + इनिः ।) घोटकः । (यथा, रघुः । ३ । ४३ ।
"घृतेस्नमच्छामनिमेषवृत्तिभि-
र्हरिं विदित्वा हरिभिश्च वाजिभिः ॥"
वाजः पक्षोऽस्यास्तीति ।) वाजः । पक्षी । इत्यमरः ॥ वासकः । इति शब्दरत्नावली ॥ (वजति गच्छतीति । वज् + णिनिः । त्रि, चलनवान् यथा, वाजसनेयसंहितायाम् । २६ । १ ।
"वाजी वहन्वाजिनं जातवेदो देवानां वक्षि-
प्रियमाधश्चक्षम् ॥"
"वजति वाजी । वज्रगतौ चलनवान् ।" इति तद्भाष्ये महीधरः ॥ * ॥ वाजमन्नमस्यास्तीति अन्नवान् । यथा, ऋग्वेदे । १ । २१ । १४ ।
"तमीमहे नमसा वाजिनं बृहत् ॥"
"वाजिनं अन्नवन्तम् ।" इति तद्भाष्ये सायणः ॥ वाजः पक्षोऽस्यास्तीति । पक्षविशिष्टः । यथा, भागवते । ४ । ७ । १६ ।
"सुपर्णस्तोत्र उपागीतस्तार्क्ष्येण स्तोत्र-
वाजिना ॥")
वाजीकरणं, क्ली, (अवाजी वाजीव क्रियतेऽनेनेति । कृ + ल्युट् । अभूततद्भावे च्विः ।) वीर्य्यवर्द्धिकरम् । इति राजनिर्घण्टः ॥ वाजीकरणद्रव्यस्य लक्षणमाह ।
"यद्द्रव्यं पुरुषं कुर्य्यात् वाजिवत् सुरतक्षमम्
तद्वाजीकरणाख्यातं मुनिभिर्भिषजां वरैः ॥"
अत्र प्रसङ्गात् क्लैबस्य लक्षणं संख्या निदानञ्चाह ।
"क्लीवः स्यात् सुरताग्रक्तस्तद्भावः क्लैब्यमुच्यते ।
तच्च सप्तविधं प्रोक्तं निदानं तस्य कथ्यते

तैस्तैर्भावैरहृद्यैस्तु रिरंसोर्मनसि क्षते ।
ध्वजः पतत्यतो नृणां क्लैब्यं समुपजायते ॥
देयस्त्रीसंप्रयोगाच्च क्लैब्यं तन्नाशनं स्मृतम् ॥"
तैस्तैर्भावैर्भयशोककोधादिभिः । अहृद्यैः हृद-याहितैः दुःखदत्वात् । क्षते पीडिते अक्षस्रोतसि इति यावत् । ध्वजः शिश्नः । पतति न तून्नमति । संप्रयोगो मैथुनम् ॥ १ ॥
"कटुकाम्लोष्णलवणैरतिमात्रोपसेवितैः ।
पित्ताच्छुक्रक्षयो दृष्टः क्लैब्यं तस्मात् प्रजायते ॥"
कटुकादिनातिमात्रेण प्रवृद्धेन पित्तेन शुक्रस्य दग्धत्वात् क्लैब्यं भवति । पित्तजमेतद्दृष्टिती-यम् ॥ २ ॥
"अतिव्यवायशीलो यो न च वाजीक्रियारतः ।
ध्वजभङ्गमवाप्नोति स शुक्रक्षयहेतुकम् ॥"
शुक्रक्षयजं तृतीयम् ॥ ३ ॥
"मेहता मेढ्ररोगेण चतुर्थो क्लीवता भवेत् । ४ ।
वीर्यवाहिशिराच्छेदान्मेहनाशुन्नतिर्भवेत् ॥ ५ ॥
बलिनः क्षुब्धमनसो निरोधाद्ब्रह्मचर्यतः ।
यद्धं क्लैब्यं स्मृतं तत्तु शुक्रस्तम्भनिमित्तकम् ॥"
बलिनः पुरुषस्य पुरुषस्य क्षुब्धमनसः कामात् सञ्चलितस्य । मनसः ब्रह्मचर्यतो निरोधात् क्लैब्यं भवति ॥ ६ ॥
"जन्मप्रभृति यत् क्लैब्यं सहजं तद्धि सप्तमम् ॥"७
असाध्यं क्लैब्यमाह ।
"असाध्यं सहजं क्लैब्यं मर्म्मच्छेदाच्च यद्भवेत् ।"
मर्म्मच्छेदात् वीर्यवाहिशिराच्छेदात् ॥" * ॥
अथ क्लैब्यस्य चिकित्सायां वाजीकरणविधि-माह ।
"वरो वाजीकरान् योगान् सम्यक् शुद्धौ निरामयः ।
सप्तरात्रं प्रकुर्वीत वर्षादूर्द्धन्तु षोडशात् ॥
न च वै षोडशादर्वाक् सप्तरात्राः परतो न च ।
आयुष्कामो नरः स्त्रीभिः संयोगं कर्त्तुमर्हति ॥
क्षयहृद्रोगपदंशाद्या घोराश्चातीवदुर्जयाः ।
अकालमरणञ्च स्याद्भजतस्त्रियमन्यथा ॥
विलासिनामर्थवतां रूपयौवनशालिनाम् ।
नराणां बहुभार्य्याणां विधिर्वाजीकरो हितः ॥
स्थविराणां दरिद्राणां स्त्रीणां वाल्लभ्यमिच्छ-ताम् ।
योषित्प्रसङ्गात् स्त्रीणानां क्लीबानामल्परेतसाम् ॥
हिता वाजीकरा योगाः प्रौढप्रत्यबलप्रदाः ।
एतेऽपि पुरुषेहानां सेव्याः कालाद्यपेक्षया ॥"
वाजीकरणमाह ।
"भोजनानि विचित्राणि पानानि विविधानि च ।
वाचः श्रोत्राभिरामाश्च त्वचः स्पर्शसुखावहाः ।
यामिनी सेन्दुतिलका कामिनी नवयौवना ।
गीतं श्रोत्रमनोहारि ताम्बूलं मदिरा सजः ॥
गन्धा मनोज्ञा रूपाणि चित्राण्युपवनानि च ।
मनसश्चाप्रतीघातो वाजीकुर्व्वन्ति मानवम् ॥
माक्षीकधातुमधुपारदलोहचूर्णं
पञ्चाग्निशालजतुविड्वरतूतानि लिह्यात् ।
एकाग्र्यविंशतिदिनानि गवाहितोऽपि
सोऽग्रीतिकोऽपि रमयेत् प्रमदा युवेव ॥
गवां विरूढवत्सानां सिद्धं पयसि पायसम् ।
गोधूमचूर्णञ्च तथा सितामधुघृतान्वितम् ।
भुक्त्वा कृष्यति जीर्णोऽपि दशदारान् व्रजत्यपि ॥"
अथ रसाला ।
"दध्नार्द्धाढकमीषदम्लमधुरं खण्डस्य चन्द्रद्युतेः
प्रस्थं क्षौद्रपलञ्च पञ्च हविषः शुण्ठ्याश्चतुर्मांष-कान् ।
एलामासचतुष्टयं मरिचतः कर्षं लवङ्गं तथा
धृत्वा शुक्लपटे घृनेः करतलेनोन्मथ्य विस्रा-वयेत् ॥
श्लक्ष्णार्द्धं मृगनाभिचन्दनरसस्पृष्टेगुरूद्धूपिते
कर्पूरेण सुगन्धिकं तदखिलं संलोड्य संस्था-पयेत् ।
स्वस्यार्थे मधुरेश्वरेण रचिता ह्येषा रसाला स्वयं
भोक्तुर्मन्मथदीपनी सुखकरी कान्तेव नित्यं प्रिया ॥ * ॥
गोक्षुरेक्षुरबीजानि वालिगन्धा प्रतावरी ।
सुपली वानरीबीजं यष्टी नागबला बला ॥
एषां चूर्णं दुग्धसिद्धं गव्येनाज्येन भर्जितम् ।
सितया मोदकं कृत्वा भक्ष्यं वाजीकरं परम् ॥
चूर्णादष्टगुणं क्षीरं घृतं चूर्णसमं स्मृतम् ।
सर्व्वतो द्विगुणं खण्डं खादेदग्निबलं यथा ॥
वाजीकराणि भूरीणि संगृह्य रचितो यतः ।
तस्माद्बृहत्सु योगेषु योगोऽयं प्रवरो मतः ॥"
रतिवर्द्धनो मोदकः ॥ * ॥
"पिप्पलीलवणोपेते वस्त्राण्डे घृतसाधिते ।
कच्छपस्याथ वा खादेत्ते तु वाजीकरे भृशम् ॥
पूगं दक्षिणदेशजं दशपलोन्मानं भृशं कर्षयेत्
तच्छिन्नं बलयोगतो दृढतरं संकुट्य चूर्णी-कृतम् ।
तच्चूर्णं षटशोधितं वसुगुणे गोगुग्गुदुग्धे पचेत्
गव्याज्याञ्जलिसंयुतेऽतिनिबिडे दद्यात्तुलार्द्धां सिताम् ॥
पक्वं तज्ज्वलनात् क्षितिं प्रतिनयेत् तस्मिन् पुनः प्रक्षिपेत्
दद्यात्तत्तदुदाहरामि बकुला द्वन्द्वादरात् संहिताः ।
एला नागबला बला सचपला जातीफला-लिङ्गिका
जातीपत्रसुपत्रचित्रकयुतं तच्च त्वचा संयुतम् ॥
विश्वावीरणवारिवारिदवरा वांशी वरी वानरी-द्राक्षा सेक्षुरगोक्षुराश्च महती खर्ज्जूरिका क्षीरिका ।
धान्याकं सकसेरुकं समधुकं शृङ्गाटकं जीरकं
पृथ्वीकाश्मवारिका वरटिका मांसी मिसि-र्मेथिका ॥
कच्छेत्वत्र विदारिकाश्च सुपली गन्धर्व्वमन्था तथा
कर्व्वूरं करिकेशरं समरिचक्षारस्य बीजं नवम् ।
बीजं शाल्मलिसम्भवं करिकणा बीजञ्च राजी-बर्जं
श्वेतं चन्दनमत्र रक्तमपि च श्रीखण्डपुष्पैः समम् ॥
सर्व्वेषेति पृथक् पृथक् पलमितं संचूर्ण्य तत्र क्षिपेत्
क्षौद्रं वङ्गभुजङ्गलोहगगनं सम्भारितं खेच्छया ।
कस्तूरी घनसारचूर्णमपि च प्राप्तं यथा प्रक्षिपेत्
पश्चादस्य तु मोदकान् विरचयेद्विल्वप्रमाणा-नथ ॥
तान् भोक्तारि सदा यथानलबलं भुञ्जीत नाल्पं रसं
पूर्व्वस्मिन्नथिते गते परिणतिं प्राग्भोजनात् भक्षयेत् ।
नित्यं श्रीरतिवल्लभाख्यकमिमं यः पूगपाकं भजेत्
स स्याद्वीर्य्यविवृद्धिहृष्टवपुषो वाजीव शुक्लो रतौ ॥
दीप्ताग्निर्ब्बलवान् बली विरहितो व्याधेः स पुष्टः सदा
वृद्धो योऽपि युवेव सोऽपि रुचिरः पूर्णेन्दुवत् सुन्दरः ॥"
वसुगुणे अष्टगुणे । अञ्जलिरर्द्धशरावम् । तुलार्द्धं पञ्चाग्न्यलमिताम् । संहिताः सुश्रुताद्याः । नागबला गुरुसकरी गुरुखण्डी इति च लोके । बला वट्टंखियार तस्या मूलत्वक् । चपला पिप्पली । जातीपत्रकं जाइपत्री । विश्वा शुण्ठी । वीरणं एतस्य मूलं उशीरं ग्राह्यम् । वारि सुगन्धवाला । वारिदः मुस्तकः । वरा त्रिफला वांशी वंशरोचना । वरी शतावरी । वानरी कपिकच्छूस्तस्या बीजं ग्राह्यम् । इक्षुरः कोकिलाक्षः तस्य बीजम् । गोक्षुरस्यापि बीजम् । महती खर्ज्जूरिका छोहारा । क्षीरिका क्षीरी । पृथ्वीका कारवी मगरैला इति लोके । वराटिका वरटे इति लोके । शालूक-मेषां कन्दः स्याद्बीजकोषो वराटिका । मांसी जटामांसी । मिसिः सौफः । गन्धर्व्वगन्धा अश्व-गन्धा तस्या मूलम् । श्रीखण्डं चन्दनम् । घन-सारः कर्पूरः । विल्वप्रमाणान् पलप्रमाणान् । रतिवल्लभाख्यपूगपाकः ॥ * ॥
"एतस्मिन्रतिवल्लभे यदि पुनः सम्यक् खुरा-ग्रागिका
धुस्तूरस्य तु बीजमर्कसदृशं यासोऽब्धिशोष-स्तथा ।
सन्नाजफलकं तथा खसफलत्वक् वापि निःक्षि-प्यते
चूर्णार्द्धा विजया तदा स हि भवेत् कामेश्वरः संज्ञया ॥"
इति महाकामेश्वरः ॥*॥
"रक्तपित्ताधिकारोक्तः खण्डकुष्माण्डको महान् ।
रक्तपित्तादिरोगघ्नो महावाजीकरः स्मृतः ॥*॥
पक्वान्नस्य रसे द्रोणे सितामाढकसंमिताम् ।
घृतप्रस्थमिदं दद्यान्नागरस्य पलाष्टकम् ॥
मरिचं कुडवोन्मानं पिप्पलीदीपकोन्मितम् ।
सलिलस्याढकं दत्त्वा सर्व्वमेकत्र कारयेत् ॥
पचेत्तन्मृन्मयेपात्रे दारुदर्व्या प्रचालयेत् ।

चूर्णान्येषां क्षिपेत्तत्र घनीभूतेऽवतारिते ॥
धान्यकं जीरकं पत्रं चित्रकं मुस्तकं त्वचम् ।
वृहज्जीरकमप्यत्र ग्रन्थिकं नागकेशरम् ॥
एलाबीजं लवङ्गञ्च पृथक् जातीफलं पलम् ।
सिद्धं घृतं प्रदद्याच्च मधुनः कुड़वद्वयम् ॥
भक्षयेद्भोजनादर्ध्वाक् पलमात्रमिदं नरः ।
अथवा नियता नाच मात्रा खादेद्यथानलम् ॥
मानवः सेवनादस्य वाजीव सुरते भवेत् ।
समर्थो बलवान् पुष्टो हृष्टो नित्यं निरामयः ॥
अहर्णी नाप्नुयेदेष क्षयं श्वासमरोचकम् ।
अम्लपित्तञ्च पित्तञ्च रक्तपित्तञ्च पाण्डुताम् ॥"
वृहज्जीरकं नागकेशरेला । इति आम्रपाकः ॥
"शमयति गोक्षुरचूर्णं छागक्षीरेण साधितं
समधु ।
शुक्रं क्षपयति जाड्यं यच्चानितं कुप्रयोगेण ॥
द्रव्याणि चन्दनादिस्तु चन्दनं रक्तचन्दनम् ।
पत्तङ्गमथ कालीयागुरुकृष्णागुरूणि च ॥
देवदारुः सरलः पद्मकं तुगाक्षीरोऽपि च ।
कर्पूरो नखनामाश्च लताकस्तूरिकापि च ॥
सिक्थकः कुङ्कुमं नखं जातीफलकमत्र च ।
जातीपत्रं लवङ्गञ्च कङ्कोला महती च सा ॥
कक्कोलफलकं त्वक् च पत्रकं नागकेशरम् ।
बालकञ्च तथोशीरं मांसी दारु सितापि वा ॥
सुरा कर्पूरकञ्चापि ग्रैवेयं भद्रमुस्तकम् ।
रेणुका च प्रियङ्गुश्च श्रीवासो गुग्गुलुस्तथा ॥
लाक्षा नखञ्च रालञ्च धातकीकुसुमं तथा ।
ग्रन्थिपर्णञ्च मञ्जिष्ठा तगरं सिक्थकं तथा ॥
एतानि घ्राणमानानि कल्कीकृत्य घृतैः पचेत् ।
तैलं प्रस्थमितं सम्यक् एततपात्रे शुभे क्षिपेत् ॥
अनेनाभ्यक्तगात्रस्तु वृद्धोऽग्नीतिश्रमोऽपि यः ।
सुखी भवति शुक्राढ्यः स्त्रीणामत्यन्तवल्लभः ॥
वन्ध्यापि लभते गर्भं षण्ढोऽपि तरुणायते ।
अपुत्रः पुत्रमाप्नोति जीवेच्च शरदां शतम् ॥
चन्दनादिमहातैलं रक्तपित्तं क्षयं ज्वरम् ।
दाहप्रस्वेददौर्गन्ध्यं कुष्ठं कण्डूं विनाशयेत् ॥"
पत्तङ्गं वकम् इति लोके । कालीयं कालमक इति लोके । लताकस्तूरिका सुबुकदाना इति लोके । कक्कोलफलस्याभावे जातीपुष्पं ग्राह्यम् । तदभावेऽपि लवङ्गं ग्राह्यम् । दारुसिता दारुचिनी । ग्रैवेयं छरा इति लोके । श्रीवासः गुग्गुरो इति लोके । ग्रन्थिपर्णः गठिवन इति लोके । अग्नीतिसमः अग्नीतिवार्षिकः । इति चन्दनादितैलम् ॥ * ॥
"बीजानि कौशकक्षीराः कुड़वमितानि खेदये-
च्छनकैः ।
प्रस्थे गोभवदुग्धे दुग्धं यावद्भवेन्नाढ्यम् ॥
त्यक्तहितानि च ज्ञात्वा खल्वं संपेषयेत्तानि ।
पिष्टिकया लघुवटिकाः कृत्वा गव्ये पचेदाज्ये ॥
द्विगुणितशर्करया वा वटिकाः संपक्वया
क्षेप्याः ।
वटिका माक्षिकमध्ये मज्जनयोग्येऽखिलाः
क्षाप्याः ॥
पञ्चटङ्कमितास्तासु सायं प्रातश्च भक्षयेत् ।
अनेन ग्रीष्मजावी यो यश्च स्यात् पतितध्वजः ॥
सोऽपि प्राप्नोति सुरते सामर्थ्यमिति वाजिवत् ।
नानेन सदृशं किञ्चित् द्रव्यं वाजीकरं परम् ॥"
इति वानरीवटिका ॥ * ॥
"आकारकरभा शुण्ठी लवणं कुङ्कुमं कणा ।
जातीफलं जातिपुष्पं चन्दनं कार्षिकं पृथक् ॥
चूर्णयेदक्षिकैकन्तु तत्र दद्यात् पलोन्मितम् ।
सर्व्वमेकीकृतं माषमात्रं क्षौद्रेण भक्षयेत् ॥"
शुक्रस्तम्भकरं पुंसामिदमानन्दकारकम् ।
नारीनां प्रीतिजनकं सेवेत निशि कामुकः ॥"
इति भावप्रकाशः ॥
(यथा च ।
"विदारीकन्दा शुमलीवृहत्यौ ।
काकोलिकाभीरुपुनर्नवे द्वे ।
वृद्धाटकं मागधिका बला च
चूर्णं सिताढ्यं सितया प्रयोज्यम् ॥
जीर्णे पयः प्रायसमेव योज्यं
करोति पुंसां बलमेवमोजः ।
स्त्रीणां सहस्रं भजतेऽपि षण्ढो
मासद्वयेनापि च सेवमानः ॥"
इति हारीते चिकित्सास्थाने ४६ अध्यायः ॥
"वाजीकरणमन्विच्छेत् सततं विषयी पुमान् ।
तुष्टिः पुष्टिरपत्यञ्च गुणवत्तत्र संश्रितम् ॥
अपत्यसन्तानकरं यत् सद्यः संप्रहर्षणम् ।
वाजीवातिबलो येन यात्यप्रतिहतोऽङ्गना: ॥
भवत्यतिप्रियः स्त्रीणां येन चैनोपचीयते ।
तद्वाजीकरणं तद्धि देहस्योर्জस्करं परम् ॥
धर्म्यं यशस्यमायुष्यं लोकद्वयरसायनम् ।
अनुमोदामहे ब्रह्मचर्य्यमेकान्तनिर्म्मलम् ॥
अल्पसत्त्वस्य तु क्लेशैर्बाध्यमानस्य रागिणः ।
शरीरत्ययरक्षार्थं वाजीकरणमुच्यते ॥
कल्पस्योदयवयसो वाजीकरणसेविनः ।
सर्व्वेष्वतुष्वहरहर्व्यवायो न निवार्य्यते ॥
अथ स्निग्धविशुद्धानां निरूहान् सानुवासनान् ।
घृततैलरसक्षीरमूर्करांश्चौद्रसंयुतान् ॥
योगविद्योजयेत् पूर्व्वं क्षीरमांसरसाशिनम् ।
ततो वाजीकरान् योगान् शुक्रापत्यविवर्द्धनान् ॥
अच्छायः पूतिकुसुमः फलेन रहितो द्रुमः ।
यथैकश्चैकशाखश्च निरपत्यस्तथानरः ॥
स्खलन्नमनमत्यक्तवचनं धूलिधूसरम् ।
अपि लालाविलमुखं हृदयाङ्गादकारकम् ॥
अपत्यं तुल्यता केन दर्शनस्पर्शनादिषु ।
किंपुनर्यदयं शीघ्रमानश्रीकुलवर्द्धनम् ॥
शुद्धकाये यथाशक्ति दृष्ट्वा योगान् प्रयोजयेत् ।
शूरेक्षुकशूककाशानां विदार्य्या वीरणस्य च ॥
मूलानि कण्टकार्य्याश्च जीवकर्षभकौ बलाम् ।
मेदे द्वे द्वे च काकोल्यौ शूर्पपर्य्यौ शतावरीम् ॥
अश्वगन्धामतिबलामाल्मगुप्ता पुनर्नवाम् ।
वीरां पयस्यां जीवन्तीं ऋद्धिं वृद्धां त्रिकण्टकम् ॥
मधुकं घृतशिपर्य्यौ च भागांश्चिपलिकान् पृथक् ।
माषाणामाढकक्षेत्तद्विद्रोणी साधयेदपाम् ॥
रसेनाढकशेषेण पचेत्तेन घृताढकम् ।
दत्त्वा विदारीधात्रीक्षुरसानामाढकाढकम् ॥
घृताच्चतुर्गुणं क्षीरं पेष्यार्थीमानि चावपेत् ।
वीरां स्वगुप्तां काकोल्यौ यष्टीं फलगूनि पिप्पलीम् ॥
द्राक्षां विदारी खर्ज्जूरं मधुकानि घृतावरीम् ।
तत्सिद्धपूतं चूर्णस्य पृथक् प्रस्थेन योजयेत् ॥
शर्करायास्तुगायाश्च पिप्पल्याः कुड़वेन च ।
मरिचस्य प्रकुञ्चेन पृथगर्द्धपलोन्मितैः ॥
लवंगलाकेसरैः श्लक्ष्णैः क्षौद्राद्विकुड़वेन च ।
पलमात्रं ततः खादेत् प्रत्यहं रसदुग्धभुक् ॥
तेनारोहति वाजीव कुलिङ्ग इव हृष्यति ।
विदारीपिप्पलीशालिप्रियालेक्षुरकाद्रजः ॥
पृथक् स्वगुप्तामूलाच्च कुड़वांशं तथा मधु ।
तुलार्द्धं शर्करायाश्चूर्णात् प्रस्थार्द्धं नवसर्पिषः ॥
सोऽक्षमात्रमतः खादेद् यस्य रामाप्रतं गृहे ।
बालगुप्राफलात् क्षीरे गोधूमान् साधितान्
स्निग्धान् ॥
माषान् वा सघृतक्षौद्रान् खादन् गृष्टिपयोऽनुपः ।
जागर्त्ति रात्रिं सकलामखिन्नः खेदयेत् स्त्रियः ॥
वस्त्राक्तसिद्धे पयसि भावितानसकृत्तिलान् ।
यः खादेत् ससितान् गच्छेत् स स्त्रीशतमपूर्व्ववत् ॥
चूर्णं विदार्य्या बहुशः स्वरसेनैव भावितम् ।
क्षौद्रसर्पिर्युतं जीर्णे प्रमदाशतमश्नुते ॥"
"कृष्णाधात्रीफलरसः स्वरसेन सुभावितम् ।
शर्करामधुसर्पिर्भिर्लीढ्वा योऽनुपयः पिबेत् ॥
स नरोऽशीतिवर्षोऽपि युवेव परिहृष्यति ।
कर्षं मधुकचूर्णस्य घृतक्षौद्रसमन्वितम् ॥
पयोऽनुपानं यो लिह्यान्नित्यवेगः स नो भवेत् ॥"
"उच्चटाचूर्णमप्येवं ग्राह्यवर्य्याश्च योजयेत् ॥
चन्द्रशुभ्रं दधिसरं सस्तं मथितौदनम् ।
पटे सुमार्ज्जितं शुक्ला वृद्धोऽपि तरुणायते ॥"
"आचरेच्च सकलां रतिचर्य्यां
कामशास्त्रविहितामनवद्याम् ।
देशकालबलशक्त्यनुरोधाद्-
वेद्यतन्त्रसमयोक्तविरुद्धाम् ॥
अभ्यङ्गनोद्वर्त्तनसेकगन्ध-
स्रक्पत्रवस्त्राभरणप्रकाराः ।
गान्धर्व्वकाव्यादिकथा प्रवीणाः
समस्वभावा वयसावयस्याः ।
दीर्घिका स्वभवनान्तर्निविष्टा
पद्मरेणुमधुमत्तविहङ्गाः ।
नीलसानुशिरिकूटनिभस्थे
काननानि पुरकक्षगतानि ॥
दृष्टिसुखा विविधा तरुजातिः
श्रोत्रसुखः कलकोकिलनादः ।
अङ्गसुखस्तुवपुषेव विभूषा-
चित्तसुखः सकलः परिवारः ॥
ताम्बूलमच्छमदिरा कान्ता कान्ता निशा
शुभ्राङ्गाङ्गं ।

वाजीकर

यदृच्छया किञ्चिदिदं मनसो वाजीकरं तत्तत् ॥
मधुसुखमिव सोत्पलं प्रियायाः
कलरणनापरिवादिनी प्रियेव ।
कुसुमचयमनोरमा च पुष्पा
किसलयिनी लतिकेव पुष्पिताग्रा ॥
देहे शरीरे च न काचिदस्ति-
रर्थेषु नाप्योऽपि मनोविघातः ।
वाजीकराः सन्निहिताश्च योगाः
कामस्य कामं परिपूरयन्ति ॥"
इति वाभटे उत्तरस्थाने ४० अध्यायः ॥

तथाच ।

"वाजीकरणमन्विच्छेत् पुरुषो नित्यमात्मवान् ।
तदायत्तौ हि धर्म्मार्थौ प्रीतिश्च यश एव च ॥
पुत्रस्यायतनं ह्येतद्गुणाह्येते सुताश्रयाः ।
वाजीकरणमग्र्यञ्च वेद्यं स्त्री या प्रहर्षिणी ॥
दृष्टा ह्येकैकशोऽप्यर्थाः परं प्रीतिकराः स्मृताः ।
किं पुनः स्त्रीशरीरे ये संघातेन व्यवस्थिताः ॥
सङ्घातो ह्यौन्द्रियार्थानां स्त्रीषु नान्यत्र विद्यते ।
स्त्र्याश्रयो ह्यौन्द्रियार्थो यः सप्रीतिजननो-
ऽधिकः ॥"

"चित्रदीपः सरःशुष्कमधातुर्धातुसन्निभः ।
निष्प्रजस्तृणपूलीति ज्ञातव्यः पुरुषाकृतिः ॥
अप्रतिष्ठश्च नश्यश्च शून्यश्चेन्द्रियश्च सः ।
मन्त्रयो निष्क्रियश्चैव यस्यापत्यं न विद्यते ॥
बहुमूर्त्तिर्बहुसुखो बहुशूद्रो बहुक्रियः ।
बहुचक्षुर्बहुघ्राणो बह्वात्मा च बहुप्रजः ॥
मङ्गल्योऽयं प्रशस्तोऽयं धन्योऽयं वीर्य्यवानयम् ।
बहुघ्राणोऽयमिति च स्तूयते नाबहुप्रजः ॥
प्रीतिर्बलं सुखं वृत्तिर्विस्तारो विभवः कुलम् ।
यशोलोकाः सुखोदर्कास्तुष्टिश्चापत्यसंश्रिता ॥
तस्मादपत्यमन्विच्छेत् गुणांश्चापत्यसंश्रितान् ॥
वाजीकरणनित्यः स्यादिच्छेत् कामसुखानि च ।
माषाणामात्मगुप्ताया बीजानामाढकं नवम् ॥
जीवकर्षभकौवीरं मेदान्द्वे घृतावरीम् ।
मधुकस्याश्वगन्धाश्च साधयेत् कुड़वोन्मिताम् ॥
रसे तस्मिन् घृतप्रस्थं गव्यं दशगुणं पयः ।
विदारीणां रसप्रस्थं प्रस्थमिक्षुरसस्य च ॥
दत्त्वा मृदग्निनाधृष्यं सिद्धं सर्पिर्निधापयेत् ।
शर्करायास्तुगाक्षीर्य्याः क्षौद्रस्य च पृथक्
पृथक् ॥
भागांश्चतुष्पलांस्तत्र पिप्पल्याश्चावपेत् पलम् ।
पलं पूर्व्वमतो लीढ्वा ततोऽन्नमुपयोजयेत् ॥
य इच्छेदक्षयं शुक्रं श्रेष्ठसङ्ख्योत्तमं बलम् ।"
इति वाजीकरणं घृतम् ॥*॥

"शतकानां सहस्राणां दत्त्वाणां गृध्रिणा-
त्मजा ।
गृध्रगुमारस्य नक्रस्य भिषक् शुक्राणि संहरेत् ॥
गव्यं सर्पिर्वराहस्य कुलिङ्गस्य वसामपि ।
वल्मिकानाञ्च चूर्णानि चूर्णं गौधूममेव च ॥
एभिः पूपलिकाः कार्य्याः शुष्कुल्यो वर्त्तिका
स्तथा ॥
पूपाधानाश्च विविधा भक्ष्याश्चान्ये पृथग्विधाः ।

वाञ्छिनी

एषां प्रयोगाद्बल्यानां लब्धेनापूर्य्यरेतसा ॥
श्रेफसा वाजिवद्याति यावदिच्छन् स्त्रियो
नरः ॥"
इति वृष्यपूपालिकयोगः ॥*॥

"मण्डलेजातरूपस्य तस्या एव पयःप्लुतम् ।
अपत्यजननं सिद्धं सघृतक्षौद्रशर्करम् ॥"
"आर्द्राणि मत्स्यमांसानि भृष्टानि शफरीश्च वा ।
तप्ते सर्पिषि यः खादेत् स गच्छेत् स्त्रीषु न
क्षयम् ॥
घृतभृष्टान् रसे क्षीरे दोषितान् फलसाधिते ॥
अनुपीतरसान् सिद्धानपत्यार्थी प्रयोजयेत् ॥"
इति गर्भाधानकरो योगः ॥*॥

"नर्त्तें वै षोड़शाद्वर्षात् सप्तत्याः परतो नच ।
आयुष्कामो नरः स्त्रीभिः संयोगं कर्त्तुमर्हति ॥
अतिबालो ह्यसम्पूर्णसर्व्वधातुः स्त्रियो व्रजन् ।
उपतप्येत सहसा तड़ागमिव कोणसम् ॥
शुष्करुक्षं यथाकाष्ठं जन्तुदग्धं विजर्ज्जरम् ।
स्पृष्टमात्रं विशीर्य्येत तथा वृद्धस्त्रियो व्रजन् ॥
जरया चिन्तया शुक्रं व्याधिभिः कर्म्मकर्षणात् ।
क्षयं गच्छत्यनशनात् स्त्रीणाञ्चातिनिषेवणात् ॥
क्षयाद्व्यादितसम्भाच्छोकात् स्त्रीदोषदर्शनात् ।
नारीणामरसज्ञत्वादभिघाताद्सेवनात् ॥
वृद्धस्यापि स्त्रियो गन्तुं न शक्तिरुपजायते ।
देहसत्त्वबलापेक्षी हर्षः शक्तिश्च हर्षजा ॥"
इति चरके चिकित्सितस्थाने द्वितीयेऽध्याये ॥)

वाञ्छा, स्त्री (वाञ्छनमिति । वाञ्छि इच्छायाम् । गुरोश्चेत्यः । टाप् ।) आत्मवृत्तिगुणविशेषः । सा च द्विविधा यथा । उपायविषयिणी फलविषयिणी वा । फलं सुखं दुःखाभावश्च । तत्र फलेच्छां प्रति फलज्ञानं कारणम् । उपायेच्छां प्रति इष्टसाधनताज्ञानं कारणम् । इति सिद्धान्तमुक्तावली ॥ तत्पर्य्यायः । इच्छा २ काङ्क्षा ३ स्पृहा ४ ईहा ५ लट् ६ लिप्सा ७ मनोरथः ८ कामः ९ अभिलाषः १० तर्षः ११ । इत्यमरः ।१।७।२७॥ आकाङ्क्षा १२ कान्तिः १३ अपचयः १४ दोहदः १५ आभिलाषः १६ । इति शब्दरत्नावली ॥ रुक् १७ रुचिः १८ मतिः १९ दोहलम् २० छन्दः २१ । इति जटाधरः ॥ (यथा, कथासरित्सागरे ।१।२७।
"सन्दिदेश च यद्यस्ति वाञ्छा मच्छिष्यतां प्रति ।
त्वत्पुत्र्यास्तदिहैवैषा भवता प्रेष्यतामिति ॥")

वाञ्छितं, त्रि, (वाञ्छ + क्तः ।) अभिलषितम् । यथा,—
"अविच्छेदं पठेद्भीमान् ध्यात्वा देवीं सरस्वतीम् ।
शुक्लाम्बरधरां देवीं शुक्लाभरणभूषिताम् ॥
वाञ्छितं फलमाप्नोति स लोके नात्र संशयः ।
इति ब्रह्मा स्वयं प्राह सरस्वत्याः स्तवं शुभम् ॥"
इति तन्त्रसारः ॥

वाञ्छिनी, स्त्री, (वाञ्छतीति । वाञ्छ + णिनिः । ङीप् ।) वाञ्छनीया नारी । तत्पर्य्यायः । लङ्घिका २ कलतूलिका ३ । इति त्रिकाण्डशेषः ॥ वाञ्छनीयमात्रे, त्रि ॥

वाटी

वाटं, क्ली, वरण्डः । गात्रभेदः । इत्यमरटीका ॥ यथा,—
"वाटः पथि वृतौ वाटं वरण्डे गात्रभेदयोः ।"
इति हेमः ॥

वाटः, पुं, (वटयते वेष्टयते इति । वट + घञ् ।) मार्गः । वृतिस्थानम् । इति मेदिनी । टे, २८ ॥ अपि च ।
"सुखं निःसरणे वाटे प्राचीनावेष्टकौ वृतिः ॥"
इति हेमचन्द्रः ॥
(वास्तु । मण्डपः । यथा, भागवते । ८।१८।२३ ।
"कृतं सदस्यं सजलं क्रमण्डलुं
विवेश विप्रत्रयमेधवाटम् ॥"
वटस्येदमिति । वट + अञ् । वटसम्बन्धिनि, त्रि । यथा, मनुः । २ । १५ ।
"ब्राह्मणो वैल्वपालाशौ क्षत्रियो वाटखादिरौ ।
पैलवौदुम्बरौ वैश्यो दण्डानर्हन्ति धर्म्मतः ॥")

वाटप्रश्नला, स्त्री, (वाटरोधिका प्रश्नला । प्राकप्रार्थिवादिवत् मध्यपदलोपः ।) पथरोधकप्रश्नला । तत्पर्य्यायः । सभा २ । इति हारावली ॥

वाटिका, स्त्री, (वटयते वेष्टयते प्राचीरादिभिरिति । वट वेष्टने + संज्ञायामिति ण्वुल् । टाप् । अत इत्वम् ।) वास्तु । (यथा, कथासरित्सागरे । ७२ । २०६ ।
"सा स्नानाय गते तस्मिन् प्राकार्थं प्राकवाटिकाम् ।
प्रविष्टा धावकखरं खादन्तं प्राकमैक्षत ॥")
वाट्यालकः । इति शब्दरत्नावली ॥ क्षिप्रुपत्नी । इति शब्दचन्द्रिका ॥

वाटी, स्त्री, (वटयते वेष्टयते इति । वट वेष्टने + घञ् । गौरादित्वात् ङीष् ।) वाट्यालकः । इति शब्दरत्नावली ॥ कुटी । वास्तु । इति मेदिनी । टे, २८ ॥ श्रेफस्य पर्य्यायः ।
"वाट्यस्त्री वेश्म भूर्व्वाटी वाटिका गृहपोतकः ॥"
इति शब्दरत्नावली ॥

तस्या लक्षणादिर्यथा,—
विश्वकारुरुवाच ।
"के ते दृष्टाः प्रशस्ताश्च निषिद्धाश्चापि केचन ।
भद्रा भद्रप्रदाश्चापि तान् वदस्व जगद्गुरो ॥
केषामग्निनियुक्तश्च श्रीविरश्च शुभाशुभम् ।
दिशि कुत्र जलं भद्रमशुभञ्च वद प्रभो ॥
द्वाराणाञ्च गृहाणाञ्च प्राकाराणां प्रमाणकम् ।
भद्रप्रदश्च को वृक्षो दिशि कुत्र प्रवर्त्तते ॥
किं प्रमाणं गृहाणाञ्च प्राङ्गणानां जगद्गुरो ।
मङ्गलं कुसुमोद्यानं दिशि कुत्र तरोस्तथा ॥
प्राकारं किंप्रमाणञ्च परिखाणां सुरेश्वर ।
द्वाराणाञ्च गृहाणाञ्च प्राकाराणां प्रमाणकम् ॥
कस्य कस्य तरोः काष्ठं प्रशस्तं श्रीविरे प्रभो ।
अमङ्गलं वा केषां वा सर्व्वं मां वक्तुमर्हसि ॥*॥
श्रीभगवानुवाच ।
आश्रमे नारिकेलश्च गृहिणाञ्च धनप्रदः ।

वाटी

शिविरस्य यदीशाने पूर्ब्बे पुत्रप्रदस्तरुः ॥
सर्ब्बत्र मङ्गलार्हश्च तरुराजो मनोहरः ।
रसालवृक्षः पूर्ब्बस्मिन् नृणां सम्पत्प्रदस्तथा ॥
शुभप्रदश्च सर्ब्बत्र सुरकारो ! निशामय ।
विल्वश्च पनसश्चैव जम्बीरो बदरी तथा ॥
प्रजाप्रदश्च पूर्ब्बस्मिन् दक्षिणे धनदस्तथा ।
सम्पत्प्रदश्च सर्ब्बत्र यतो हि वर्द्धते गृही ॥
जम्बुवृक्षश्च दाड़िम्बः कदल्यान्नातकस्तथा ।
बन्धुप्रदश्च पूर्ब्बस्मिन् दक्षिणे मित्रदस्तथा ॥
सर्ब्बत्र शुभदश्चैव धनपुत्रशुभप्रदः ।
हर्षप्रदो गुवाकश्च दक्षिणे पश्चिमे तथा ॥
ईशाने सुखदश्चैव सर्ब्बत्रैवं निशामय ।
सर्ब्बत्र चम्पकः शुद्धो भुवि भद्रप्रदस्तथा ॥
अलाबुश्चापि कुष्माण्डं मायाम्बुश्च सुकासुकः ।
खर्ज्जूरी कर्कटी चापि शिविरे मङ्गलप्रदाः ॥
वास्तूकः कारवेल्लश्च वार्त्ताकुश्च शुभप्रदाः ।
लताफलश्च शुभदं सर्ब्बं सर्ब्बत्र निश्चितम् ॥
प्रशस्तं कथितं कारो निषिद्धञ्च निशामय ॥
वन्यवृक्षो निषिद्धश्च शिविरे नगरेऽपि च ।
वटो निषिद्धः शिविरे नित्यं चौरभयं ततः ।
नगरेषु प्रसिद्धश्च दर्शनात् पुण्यदस्तथा ॥
हे कारो तिन्तिड़ीवृक्षो यत्नात्तं परिवर्ज्जय ॥
शरेण धनहानिः स्यात् प्रजाहानिर्भवेत् ध्रुवम् ।
शिविरेऽतिनिषिद्धश्च नगरे किञ्चिदेव च ॥
न निषिद्धः प्रसिद्धश्च नगरेषु तथा पुरे ।
वाट्यामतिनिषिद्धश्च प्राज्ञैस्तं परिवर्ज्जयेत् ॥
खर्ज्जूरश्च डहुश्चैव निषिद्धः शिविरे तथा ।
न निषिद्धः प्रसिद्धश्च ग्रामेषु नगरेषु च ॥
वृक्षश्च चणकादीनां धान्यश्च मङ्गलप्रदम् ॥
ग्रामेषु नगरे चापि शिविरे च तथैव च ॥
इक्षुवृक्षश्च शुभदः सन्ततं शुभदस्तथा ।
अशोकश्च शिरीषश्च कदम्बश्च शुभप्रदः ॥
कच्ची हरिद्रा शुभदा शुभदश्चार्द्रकस्तथा ।
हरीतकी च शुभदा ग्रामेषु नगरेषु च ।
न वाट्यां भद्रदा नित्यं तथा चामलकी ध्रुवम् ॥
गजानामस्थि शुभदमश्वानाञ्च तथैव च ।
कल्याणसुखैरवर्षां वास्तौ स्थापनकारिणाम् ॥
न शुभप्रदमन्येषामुच्चत्वकारणं परम् ।
वावदूकानां नराणाञ्च गर्द्दभानां गवामपि ॥
कुक्कुराणां शृगालानां मार्জ্জाराणामभद्रकम् ।
मेढ़कानां शूकराणां सर्ब्बेषाञ्चाशुभप्रदम् ॥
ईशाने चापि पूर्ब्बस्मिन् पश्चिमे च तथोत्तरे ।
शिविरस्य जलं भद्रमन्यत्राशुभमेव च ॥
दीर्घे प्रस्थे समानञ्च न कुर्य्यान्मन्दिरं बुधः ।
चतुरस्रे गृहे कारो गृहिणां धननाशनम् ॥
दीर्घप्रस्थः परिमितो नेत्राङ्गेनापि संस्कृतम् ।
शून्येन रहितं भद्रं शून्यं शून्यप्रदं नृणाम् ॥
प्रस्थे हस्तद्वयात् पूर्ब्बं दीर्घे हस्तत्रयं तथा ।
गृहिणां शुभदं द्वारं प्राकारस्य गृहस्य च ॥
न मध्यदेशे कर्त्तव्यं किञ्चिन्यूनाधिके शुभम् ।
चतुरस्रं चन्द्रवेधं शिविरं मङ्गलप्रदम् ।
अभद्रदं सूर्य्यवेधं शिविरं मङ्गलाप्रदम् ।

वाड

अभद्रदं सूर्य्यवेधं प्राज्ञाङ्गनं तथैव च ॥ * ॥
शिविराभ्यन्तरे भद्रा स्थापिता तुलसी नृणाम् ।
धनपुत्रप्रदात्री च पुण्यदा हरिभक्तिदा ।
प्रभाते तुलसीं दृष्ट्वा स्वर्गदानफलं लभेत् ॥
मालती यूथिका कुन्दमाधवी केतकी तथा ।
नागेश्वरं मल्लिका च काञ्चनं वकुलं शुभम् ॥
अपराजिता च शुभदा तेषामुद्यानमीप्सितम् ।
पूर्ब्बे च दक्षिणे चैव शुभदं नाच संशयः ॥
ऊर्द्धं षोड़शहस्तेभ्यो नैवं कुर्य्यादृगृहं गृही ।
ऊर्द्धं विंशतिहस्तेभ्यः प्राकारं न शुभप्रदम् ॥*॥
सूत्रधारं तैलकारं स्वर्णकारञ्च क्षौरकम् ।
वाटीमूले ग्राममध्ये न कुर्य्यात् स्थापनं बुधः ॥
ब्राह्मणं क्षत्रियं वैश्यं सच्छूद्रं गणकं शुभम् ।
भट्टं वैद्यं पुष्पकारं स्थापयेत् शिविरान्तिके ॥*॥
प्रस्थे च परिखामानं गृतहस्तं प्रशस्तकम् ।
परितः शिविराणाञ्च गम्भीरं दशहस्तकम् ॥
सङ्केतपूर्ब्बकञ्चैव परिखाद्वारमीप्सितम् ।
सूचीरगम्यं मित्रस्य गम्यमेव सुखेन च ॥*॥
शाल्मलीनां तिन्तिड़ीनां हिन्तालानां
तथैव च ।
निम्बानां सिन्धुवाराणां उडुम्बराणामभद्रकम् ॥
धुस्तूराणां वटानाञ्चाप्येरण्डानामवाञ्छितम् ।
एतेषामतिरिक्तानां शिविरे काष्ठमीप्सितम् ॥
वृक्षञ्च वज्रहतकं दूरतो वर्ज्जयेद्बुधः ।
पुत्रदारधनं हन्यात् इत्याह कमलोद्भवः ॥
कथितं लोकशिक्षार्थं कुरु काष्ठं विना पुरीम् ।
शुभवर्त्मं चाप्यधुना गच्छ वत्स यथासुखम् ॥”
इति ब्रह्मवैवर्त्ते श्रीकृष्णजन्मखण्डे १०२ अः ॥
वाटीदीर्घः, पुं, (वाट्यां वास्तुभूमौ दीर्घः सर्ब्बो-
त्तत्वात् ।) इक्षुवृक्षः । इति रत्नमाला ॥
वाट्टकं, क्ली, भृष्टयवः । इति शब्दचन्द्रिका ॥
वाट्यपुष्पी, स्त्री, (वाट्यं वाट्यां साधु वेष्टनीयं वा
पुष्पं यस्याः । गौरादित्वात् ङीष् ।) वाट्या-
लकः । इति रत्नमाला ॥
वाट्या, स्त्री, (वट्यते वेष्ट्यते इति । वट वेष्टने +
ण्यत् । यद्वा, वाट्यां वास्तुप्रदेशे हिता । वाटी
+ यत् ।) वाट्यालकः । इति रत्नमाला ॥
वाट्यालः, पुं, (वाटीं अलति भूषयतीति । अल +
अण् ।) वाट्यालकः । इति शब्दरत्नावली ॥
(गुणादयोऽस्य वाट्यालकशब्दे ज्ञातव्याः ॥)
वाट्यालकः, पुं, (वाट्याल एव । स्वार्थे कन् । वाटीं
अलति भूषयतीति । अल + ण्वुल् वा ।) क्षुप-
विशेषः । वाड़ियाला इति भाषा । तत्प-
र्य्यायः । शीतपाकी २ वाट्या ३ भद्रौदनी ४
वला ५ वाटी ६ विनया ७ वाट्यालो ८ वाटिका
९ । इति शब्दरत्नावली ॥ अस्य पर्य्यायान्तरं
गुणाश्च वलाशब्दे द्रष्टव्याः ॥
वाट्यालो, स्त्री, (वाटीमलति भूषयतीति । अल
+ ण्वुल् । गौरादित्वात् ङीष् ।) वाट्यालकः ।
इति शब्दरत्नावली ॥
वाड, ऋ उ आप्लावे । इति कविकल्पद्रुमः ॥
(भ्वा०-आत्म०-अक०-सेट् ।) ऋ, अववाड़त ।

वात:

ड, वाड़ते लोकः । आप्लावः स्नानम् । उन्म-
ज्जनम् । इत्येके । इति दुर्गादासः ॥
वाड़ः, पुं, (धातूनामनेकार्थत्वात् वाड़ वेष्टने +
भावे घञ् ।) वेष्टनम् । इति शब्दमाला ॥
वा(वा)णिः, स्त्री, (वण + णिच् + “सर्ब्बधातुभ्य
इन् ।” उणा० ४ । ११७ । इति इन् ।) वप-
नम् । तत्पर्य्यायः । ऊतिः २ । इत्यमरः । २ ।
१४ । २८ ॥ ऊतिः ३ । इति तट्टीकायां भरतः ॥
(करणे इन् ।) वापदण्डः । इति हेमचन्द्रः । ३ ।
५७७ ॥
वा(वा)णिनी, स्त्री, (वण शब्दे + णिनिः । ङीप् ।)
नर्त्तकी । छेकः । मत्तस्त्री । इति हेमचन्द्रः ॥
(यथा, रघुः । ६ । ७५ ।
“यस्मिन् महीं शासति वाणिनीनां
निद्रां विहारार्द्धपथे गतानाम् ।
वातोऽपि नास्संसयदंशुकानि
को लम्बयेदाहरणाय हस्तम् ॥”*॥
षोड़शाक्षरच्छन्दोविशेषः । तल्लक्षणं यथा,—
“नजभजरैर्यदा भवति वाणिनी गयुक्तैः ॥”)
वा(वा)णी, स्त्री, (वाणि + वा ङीष् ।) सरस्वती ।
इत्यमरः । १ । ६ । १ ॥ वचनम् । (यथा, मार्क-
ण्डेये । ४१ । ४ ।
“चक्षुःपूतं न्यसेत् पादं वस्त्रपूतं पिबेज्जलम् ।
सत्यपूतां वदेद्वाणीं बुद्धिपूतञ्च चिन्तयेत् ॥”)
वपनम् । इति शब्दरत्नावली ॥
वात, तृ क गतिसेवयोः । सुखे । इति कविकल्प-
द्रुमः ॥ (अदन्त चुरा०-पर०-सक०-सेट् ।)
अववातत् । चयोऽर्थाः । रमानाथस्तु गति-
सुखसेवयोरिति मत्वा गतौ सुखं गतिसुखम् ।
वातयति पार्श्वं वातः गच्छन्तं सुखयतीत्यर्थः ।
इत्याह । सुखसेवनयोरिति जौमराः । इति
दुर्गादासः ॥
वातः, पुं, (वातीति । वा + क्तः ।) पञ्च-
भूतान्तर्गतचतुर्थभूतः । वातास इति भाषा ।
तत्पर्य्यायः । गन्धवहः २ वायुः ३ पवमानः ४
महाबलः ५ पवनः ६ सपर्गनः ७ गन्धवाहः ८
मरुत् ९ आशुगः १० श्वसनः ११ मातरिश्वा १२
नभस्वान् १३ मारुतः १४ अनिलः १५ समी-
रणः १६ जगत्प्राणः १७ समीरः १८ सदागतिः
१९ जीवनः २० पृषदश्वः २१ तरस्वी २२ प्रभ-
ञ्जनः २३ प्रधावनः २४ अनवस्थानः २५ धूननः
२६ मोटनः २७ खगः २८ । अस्य गुणाः ।
खैरत्वम् । लघुत्वम् । शीतत्वम् । रूक्षत्वम् ।
सूक्ष्मत्वम् । संज्ञानकत्वम् । स्तोककारित्वञ्च ।
तस्य कोपकारणं यथा । माधुर्य्यान्नभक्षणम् ।
साभ्रकालः । अपराह्णकालः । प्रत्यूषकालः ।
अन्नजीर्णसमयश्च । इति राजनिर्घण्टः ॥ * ॥
रोगविशेषः । यथा । अथ वातव्याध्यधिकारः ।
तत्र वातव्याधीनां सामान्यतो विप्रकृष्टनिदानान्याह ।
“कषायकटुतिक्तकप्रमितरूक्षलघ्वन्नतः
पुरःपवनजागरप्रतरणाभिघातश्रमैः ।

हिमादनग्ननाक्षुधा निधुवनाच्च धातुक्षयात्
मलादिरुपधारणात् मदनशोकचिन्ताभयैः ॥
अतिस्रुतजमोक्षणात् गदकृतातिमांसक्षया-
दतीव वमनान्नृणामतिविरेचनादामतः ।
प्रयोदसमये दिनक्षपदयोस्तृतीयांशयो-
र्जरामतिगतेऽग्निते ग्निग्निरसंज्ञकाशेऽपि च ॥
देहे स्रोतांसि रिक्तानि पूरयित्वानिलो बली ।
करोति विविधान् रोगान् सर्व्वाङ्गैकाङ्गसंश्र-
यान् ॥"

प्रमितत्वाच्च वैपरीत्ये प्रोषसर्गस्तेन अपरिमित-मित्यर्थः । प्रकर्षेण मितमल्पं वा लघ्वन्न-मतिपुराणं शाल्यादि । कतिचिदन्नानि नवान्यपि वातलानि । यत आह । गुणरत्नमाला-याम् ।

नीवारस्निपुटः सतीनचणकश्यामाकसुन्नाढकी-निष्पावाश्च मकुष्टकश्च वरटा मङ्गल्यकः
कोद्रवः ॥

एते वातकरा इति श्लेषः । नीवारः प्रसाधिका तीनी इति लोके । त्रिपुटः यसारी । सतीनः कलायः । निष्पावो राजमाषः । वोड़ा इति लोके । मकुष्टकः मोड़ः इति लोके । वरटा वरटिका वरटे इति लोके । मङ्गल्यकः मसूरी इति लोके । पुरःपवनः प्राग्वातः । आमतः आमेन मार्गावरणात् । यत उक्तम् ।

वायोर्द्धातुक्षयात् कोपो मार्गस्यावरणेन चेति । प्रयोदसमये वर्षासु । जरामतिगतेऽग्निते भुक्ते-ऽतीव जीर्य्यताङ्गते । देहे स्रोतांसीत्यादिना संप्राप्तिरुक्ता । कषायादिभिर्हेतुभिर्व्वर्षादौ समये हेतुभूते बली अनिलः प्रवृद्धो वायुः करोति विविधान् रोगान् । ते रोगाः कथ्यन्ते ।

"शिरोग्रहोऽल्पकेशत्वं जृम्भार्थं हनुग्रहः ।
निष्कास्तम्भो गद्गदत्वं मिन्मिनत्वच्च मूकता ॥
वाग्वालता प्रलापश्च रसानामनभिज्ञता ।
वाधिर्य्यं कर्णनादश्च सार्द्धजत्वं तथार्दितम् ॥
मन्यास्तम्भोऽत्र गणितो वाहुग्रीवोपवाहुकः ।
चर्व्विता चेव विश्वाची जर्द्धवात उदीरितः ॥
आक्षेपश्च प्रत्याक्षेपं वाताष्ठीला प्रत्यष्ठीला ।
तूनी च प्रतितूनी च वङ्क्षवेषण्यमेव च ॥
आटोपः पार्श्वशूलश्च त्रिकशूलं तथैव च ।
सुप्तुश्च मूत्रसं मूत्रनिग्रहो मलगाढ़ता ।
पुरीषस्याप्रवृत्तिश्च गुदभ्रंशस्तथैव च ॥
कलापखञ्जता चापि खञ्जता पङ्गुता तथा ।
क्रोष्टुशीर्षककल्यौ च वातकण्टक एव च ॥
पादहर्षः पाददाहः आक्षेपो दण्डकाभिधः ।
वातपित्तज्वरश्चैपश्चथा दण्डापतानकः ॥
अभिघातज्वरश्चैप आयामो द्विविधः स्मृतः ।
आन्तरश्च तथा वाह्यो धनुर्वातश्च कुब्जकः ॥
अपतन्त्रोपतानश्च पक्षाघातोऽखिलाङ्गकः ।
कम्पः स्तम्भो यथा तोदो भेदश्च स्फुरणं तथा ॥
रौक्ष्यं कार्श्यञ्च कार्ष्ण्यञ्च शैत्यं लोम्नाञ्च हर्ष-णम् ।
अङ्गमर्द्दोऽङ्गविभ्रंशः शिरासङ्कोच एव च ॥
अङ्गशोषश्च भीरुत्वं मोहश्चञ्चलचित्तता ॥
निद्रानाशः खेदनाशो वलहानिस्तथैव च ।
शुक्रक्षयो रजोनाशो गर्भनाशः परिश्रमः ॥
एत एवाशीतिसंख्या रोगा योगेन रूढ़िताः ।
वातव्याधीति नामानो मुनिभिः परि-कीर्त्तिताः ॥"

एत एव शिरोग्रहादय एव । योगेन वातेन । वाताद्या व्याधिर्व्वातव्याधिरिति निरुक्त्या तदा वातज्वरादिष्वपि प्रसङ्गः स्यादत आह रूढ़िताः प्रसिद्धिताः । शिरोग्रहादयोऽशीतिरेव वातव्याधिसंज्ञा प्रसिद्धा न तु वातज्वरादयः ॥*॥

अथ वातव्याधिनां सामान्यचिकित्सामाह ।

"मधुरलवणस्निग्धस्निग्धनस्योत्तरविधा
गुरुरविकरवस्तिस्वेदसन्तर्पणानि ।
दहनजलदसेकाभ्यङ्गसंमर्द्दनानि
प्रकुपितपवनानं शान्तमेतानि कुर्य्युः ॥"

इति भावप्रकाशः ॥ * ॥

अपि च ।

"वलपुष्टिकराण्येव वायुवीजं निगृह्णाति ।
भोजनानन्तरं सद्यो गमनं धावनं तथा ॥
छेदनं वह्नितापश्च ग्रन्थदृभ्रमणमैथुनम् ।
दृङ्लक्ष्मीगमनञ्चैव मनःसन्ताप एव च ॥
अतिरूक्षमनाहारं युद्धं कलह एव च ।
कटुवाक्यं भयं शोकः केवलं वायुकारणम् ॥
व्याघ्राख्यचक्रे तच्चक्रं निगृह्णाति तदौषधम् ॥
पक्वरम्भाफलञ्चैव सवीजं शर्करोदकम् ।
नारिकेलोदकञ्चैव सद्यस्तक्रं सुमिष्टकम् ॥
माहिषन्दधि मिष्टञ्च केवलं वा सशर्करम् ।
सद्यःपर्य्युषितान्नञ्च सौवीरं शीतलोदकम् ॥
पक्वतैलविशेषञ्च तिलतैलञ्च केवलम् ।
लाङ्गलीतालखर्ज्जूरमस्तुमामलकीद्रवम् ॥
शीतलोष्णोदकस्नानं सुस्निग्धचन्दनद्रवम् ।
स्निग्धपद्मपत्रतल्पं सुस्निग्धव्यजनानिलम् ॥
एतत्ते कथितं वत्से सद्यो वातप्रशान्तनम् ।
वायवस्त्रिविधाः पुंसां क्षोभसन्तापकामदाः ॥"

इति श्रीब्रह्मवैवर्त्ते ब्रह्मखण्डे १६ अध्यायः ॥*॥

अन्यच्च ।

"विल्वाग्निमन्थशोनाकपाटलापारिभद्रकम् ।
प्रसारणीगन्धा च दृहती कण्टकारिका ॥
वला चातिवला रास्ना अर्कपुष्पी च पुनर्नवा ।
एरण्डशारिवा पर्णीगुडूचीकपिकच्छवः ॥
एषां दशपलिकान् भागान् क्वाथयेत् सलिले-ऽमले ।
तेन पादावशेषेण तिलं पात्रे विपाचयेत् ॥
आजं वा यदि वा गव्यं क्षीरं दत्त्वा चतुर्गुणम् ।
घृतावशेषमेवं तैलतुल्यं प्रदापयेत् । *।
द्रव्याणि यानि पेष्याणि तानि वक्ष्यामि तच्छृणु ॥
घृतपुष्पा देवदारु शालपर्णी वचागुरुः ।
कुष्ठमांसी सैन्धवञ्च पलमेकं पुनर्नवा ॥
पाने नस्ये तथाभ्यङ्गे तैलमेतत् प्रदापयेत् ।
दुश्शूलं पार्श्वशूलञ्च गण्डमालाञ्च नाशयेत् ॥
अपस्मारं वातरक्तमायुर्व्वांश्च पुमान् भवेत् ।
गर्भमन्थतरौ विद्यात् किं पुनर्मानुषौ शिव ॥
अश्वानां वातभङ्गानां कुञ्जराणां नृणां तथा ।
तैलमेतत् प्रदातव्यं सर्व्ववातविकारिणाम् ॥"

पुनश्च ।

"पलद्वयं सैन्धवञ्च शुण्ठी चिचकपञ्चकम् ।
पञ्चप्रस्थं क्षारनालं तैलप्रस्थं पचेत्ततः ।
ग्रहगुल्मप्लवक्लीवसर्व्ववातविकारनुत् ॥"

इति गारुडे १६८ अध्यायः ॥

(तथास्य गुणादयः ।

"वातस्तु रूक्षलघुशीतबहुशीघ्रशीतपरुषविषदा-स्तस्य रौक्ष्याद्वातला रूक्षा पक्षिताल्पशरीराः प्रततरूक्षश्यामभिन्नसक्तजर्जरस्वराः जागरू-काश्च लघुत्वाच्च लघुचपलगतिचेष्टाहारव्यव-हाराः चपलादनवस्थितसन्धिस्थिभ्रूहनोष्ठजिह्वा शिरः स्कन्धपाणिपादाः बहुत्वाच्छुषिराधमकरा सिराप्रतानाः शीघ्रत्वात् शीघ्रसमारम्भक्षोभ-विकाराः शीघ्रोच्चासरागविरागाः श्रुत-ग्राहिणोऽल्पस्मृतयश्च शैत्यात् शीतासहिष्णवः प्रततशीतकोदैपकस्तम्भाः पारुष्यात् परुष-केशश्मश्रुरोमनखदशनवदनपाणिपादाङ्गा वैष-म्यात् स्फुटिताङ्गावयवाः सततसन्धिशब्दगामिनः त एवं गुणयोगात् वातलाः प्रायेणाल्पबला-श्चाल्पायुषश्चाल्पापत्याश्चाल्पसाधनाश्चाधन्याश्च।'

इति चरके विमानस्थाने ऽष्टमेऽध्याये ॥ अथास्य वृद्धिक्षयलक्षणं यथा ।

"तत्र वातवृद्धौ त्वक् पारुष्यं कार्श्यं कार्ष्ण्यं गात्रस्फुरणसुप्तिकामिता निद्रानाशोऽल्पबलत्वं गाढ़वर्चस्त्वञ्च ।"

"तत्र वातक्षये मन्दचेष्टताल्पवाक्त्वमल्पहर्षो मूढ़संज्ञा च ।" इति सुश्रुते सूत्रस्थाने पञ्च-दशेऽध्याये ॥ * ॥ स्थानविशेषेऽवस्थितस्यास्य चिकित्सा यथा,—

"विशेषतस्तु कोष्ठस्थे वाते क्षारं पिबेन्नरः ।
आमाशयस्थे शुद्धस्य यथा दोषहरी क्रिया ॥
आमाशयगते वाते कृच्छ्रिताय यथाक्रमम् ।
देयः षड्धरणो योगः सप्तरात्रं सुखाम्बुना ॥"

"पक्वाशयगते वाते हितं स्नेहविरेचनम् ।
वस्तयः स्नेहनीयाश्च प्राग्भाक्ताश्च लवणोत्तराः ॥"

स्नेहलवणम् ।

"खुड़ीलवणवार्त्ताकुस्नेहान् क्षीरे घटे दहेत् ।
गोमये स्नेहलवणं ततपरं वातनाशनम् ॥
कार्य्यो वस्तिगते चापि विधिर्वस्तिविशोधनः ।
लवणांसाम्लकृशरा प्राग्भक्ते कुर्य्याच्चाल्पम्
विमोक्षणम् ॥
स्नेहोपनाहाग्निकर्म्मवन्धनोत्कर्त्तनानि च ।
स्नायुसन्धिस्थि संप्राप्ते कुर्य्याद्वाते विचक्षणः ॥
स्नेहाभ्यङ्गावगाहांश्च कृत्यान्नक्तंगाश्रिते ।
घृतात् प्रदेहा रक्तस्थे विरेको रक्तमोक्षणम् ॥
विरेको मांसमेदःस्थे निरूहाः शमनानि च ।
वाह्याभ्यन्तरतः स्नेहैरस्थिमज्जगतं जयेत् ॥
घृतौदनपानं शुक्रस्थे वलशुक्रकरं हितम् ।

विवङ्गमार्गं शुक्रन्तु दृष्ट्वा दद्याद्विरेचनम् ॥
गर्भे शुष्के तु वातेन बालानाञ्चापि शुष्यताम् ।
सितामधुककाश्मर्य्यैर्हितसूत्यापने पयः ॥"
इति वैद्यकचक्रपाणिसंग्रहे वातव्याध्यधिकारः ॥)

वातकः, पुं, (वात इव चष्टते । इवार्थे कन् । यद्वा, वातं करोतीति । कृ + अण्येष्वोऽपीति कः ।) अग्निपर्णी । इत्यमरः । २ । ४ । १४६ ॥

वातकर्म्म [न्], (वातस्य कर्म्म ।) मरुत्क्रिया । ग्रहणम् । यथा,—

वराह उवाच ।
"सृज्यमानेन मे भूमे ! वातकर्म्म प्रसुप्यति ।
एवं हि पुरुषो युक्तो वातपीड़ितमानसः ॥
मक्षिका पञ्च वर्षाणि त्रीणि वर्षाणि मूषकः ।
श्वा चैव त्रीणि वर्षाणि कूर्म्मो वै जायते नव ॥
एषु वै तापनं देवि ! मेहनं मम गृह्यते ।
यो वै ग्राह्यं विजानाति मम कर्म्मपरायणः ॥
श्रुत्वा वाक्यं भगवतो प्रत्युवाच वसुन्धरा ॥
धरण्युवाच ।
अतुलं लभते पापं तव कर्म्मपरायणः ।
तस्य देव सुखार्थाय विशुद्धिं वक्तुमर्हसि ॥
वराह उवाच ।
शृणु कार्त्तस्वरेऽन मे देवि ! कथ्यमानं मयानघे ।
अपराधमिमं कृत्वा सन्तरेदृषिना कर्म्मणा ॥
यावकेन दिनत्रीणि नक्तेन च पुनस्त्रयः ।
कर्म्म चैवं ततः कृत्वा स च मे नापराध्यति ॥
सर्व्वगृह्यं परित्यज्य मम लोकाय गच्छति ।
एतत्ते कथितं भद्रे मरुत्कर्म्मापराधिनः ॥
दोषञ्चैव गुणञ्चैव यत्त्वया परिपृच्छितम् ॥"
इति वराहपुराणे मरुत्कर्म्मप्रायश्चित्तम् ॥

वातकी, [न्] त्रि, (वातोऽतिशयितोऽस्यस्येति । वात + "वातातीसाराभ्यां कुक् च ।" ५ । २ । १२६ । इति इनिः । कुक् च ।) वातरोगयुक्तः । तत्पर्य्यायः । वातरोगी २ । इत्यमरः । २ । ६ । ५६ ॥

वातकुम्भः, पुं, (वातस्य कुम्भ इव ।) गजकुम्भाधोभागः । इति हेमचन्द्रः । ४ । २६३ ॥

वातकेतुः, पुं, (वातस्य केतुरिव ।) धूलिः । इति त्रिकाण्डशेषः ॥

वातकेलिः, पुं, (वात तृ क सुखे + भावे घञ् । वातेन सुखेन केलिर्यत्र ।) कलालापः । विड्गदन्तश्चतः । इति मेदिनी । ले, १६३ ॥

वातगामी, [न्] पुं, (वातेन वायुना सह गच्छतीति । गम + णिनिः ।) पक्षी । इति केचित् ॥

वातगुल्मः, पुं, वातुलः । यथा,—
"वातुलो वातगुल्मः स्याद्वारवायुर्निदाघजः ।
भक्ष्यानिलः प्रावृषिजो वासन्तो मलयानिलः ॥"
इति त्रिकाण्डशेषः ॥
(वातेन जातो गुल्मः ।) रोगविशेषः । (यथा, मार्कण्डेये । ३६ । ५४ ।
"वातगुल्मप्रणाश्यर्थमुदावर्त्ते तथोदरे ।
यवागूं वापि पवनं वायुग्रन्थिं प्रतिक्षिपेत् ॥"
अस्य चिकित्सा यथा,—
"वचायवानीत्रिकटुदग्धमूलीजलं घृतम् ।
क्षाथक्षोणी स्थितः पाने धान्यनागरकोऽथवा ॥
वातगुल्मेषु सर्व्वेषु ज्वरेषु विषमेषु च ।
राज्ञादाप्यकं वापि वातगुल्मस्य पाचनम् ।
गुडौ सौवर्चलं शुण्ठी पाचनं वातगुल्मिने ॥"
"नागरं क्रिमिजित् पथ्या चित्रता त्रिगुणान्वितम् ।
चूर्णं गुड़ान्वितं देयं वातगुल्मविरेचनम् ॥
दन्त्याश्च भाग एकस्तु द्वौ भागौ च हरीतकी ।
चित्रतायास्त्रिभागः स्यात् शुण्ठ्याश्चत्वार एव च ।
प्रक्षिप्य सर्व्वमेकत्र सर्व्वतुल्यगुड़ेन तु ॥
वटकं भक्षयेत् प्रातस्तस्योपरि जलं पिबेत् ।
कथितञ्च विवेकञ्च वातगुल्मोपशान्तये ॥"
इति वातगुल्मचिकित्सा ॥ इति हारीते चिकित्सितस्थाने चतुर्थेऽध्याये ॥) तस्य निदानादिर्गुल्मशब्दे द्रष्टव्यः ॥

वातघ्नी, स्त्री, (वातं हन्तीति । हन + टक् । ङीप् ।) गृञ्जनपर्णी । अश्वगन्धा । गिलोड़ीवृक्षः । इति राजनिर्घण्टः ॥

वाततूलं, क्ली, (वातेन उड्डीयमानं तूलम् ।) आकाशोड्डीयमानसूक्ष्मम् । बुड़ि रूता इति भाषा । तत्पर्य्यायः । क्षुद्रसूक्ष्मकम् २ इन्द्रतूलम् ३ ग्रीष्महासम् ४ वैशूकफम् ५ मरुद्भूतम् ६ । इति हारावली । २३ ॥

वातध्वजः, पुं, (वातो वायुर्ध्वजो यस्य ।) मेघः । इति शब्दमाला ॥

वातपित्तजशूलं, क्ली, (वातपित्ताभ्यां जायते इति । जन् + डः । तच्च तत् शूलञ्चेति ।) शूलरोगविशेषः । तस्य औषधं यथा,—
"मातुलुङ्गस्य निर्य्यासं गुड़ाक्तेन समन्वितम् ।
वातपित्तजशूलानि हन्ति वै पानयोगतः ॥"
इति गारुड़े १८८ अध्यायः ॥
(तथास्यान्या चिकित्सा । यथा,—
"दुरालभा पर्पटकञ्च विश्वा
पटोलनिम्बाम्बुदतिन्तिड़ीकम् ।
सशर्करं कल्कमिदं प्रयोज्यं
सपित्तवातोद्भवशूलशान्त्यै ॥"
इति हारीते चिकित्सितस्थानेऽष्टमेऽध्याये ॥)

वातपुत्रः, पुं, (वातस्य पुत्रः ।) भीमसेनः । हनूमान् । महाधूर्त्तः । इति मेदिनी । रे, ६६ ॥

वातपोथः, पुं, (वातं वातरोगं पुथति हिनस्तीति । पुथ + अण् ।) पलाशवृक्षः । इत्यमरः । २ । ४ । २६ ॥ (अस्य पर्य्यायो यथा,—
"वातपोथः पलाशः स्याद्दानप्रस्थश्च किंशुकः ।
राजादनो ब्रह्मवृक्षो हस्तिकर्णो दलोऽपरः ॥"
इति वैद्यकरत्नमालायाम् ॥)

वातप्रमीः, पुं, स्त्री, (वातं प्रमिमीते वाताभिमुखं गच्छतीति । वात + प्र + मा माने + "वातप्रमीः ।" उणा० ४ । १ । इति ईप्रत्ययेन साधुः ।) वातरङ्गः । इत्यमरः । २ । ५ । ७ ॥ वाओट् हरिण इति भाषा ॥ नकुलः । अश्वः ।

इति संक्षिप्तसारोणादिवृत्तिः ॥ (वायुवद्वेगगामिनि, त्रि । यथा, ऋग्वेदे । ४ । ५८ । ७ ।
"सिन्धोरिव प्राध्वने शूघनासो वातप्रमियः पतयन्ति यह्वाः ॥")

वातफुल्लाण्डं, क्ली, (वातेन फुल्लं विकसितं यदण्डं तत् ।) पुप्फुसः । इति भूरिप्रयोगः ॥

वातभक्षः, पुं, (वातमभिमुखीकृत्य अक्षति गच्छतीति । वात + अक्ष + "वातसुनीतिलगृर्द्ध्वजधेट्तुदजहातीनां उपसंख्यानम् ।" ३ । २ । २८ । इत्यस्य वार्त्तिकोक्त्या खश् । "अरुर्द्विषदजन्तस्य मुम् ।" ६ । ३ । ६७ । इति मुम् ।) वातरङ्गः । इति जटाधरः ॥ (वातगामिनि, त्रि । यथा, भट्टिः । २ । १७ ।
"मेघाल्पयोपास्तवनोपगीतं
कदम्बकं वातभजं मृगाणाम् ॥")

वातमण्डली, स्त्री, (वातस्य मण्डली ।) वाट्या । इति त्रिकाण्डशेषः ॥

वातरङ्गः, पुं, (वाताभिमुखगामी रङ्गः ।) वातप्रमीः । इत्यमरः । २ । ५ । ७ ॥

वातरक्तं, क्ली, (वातदूषितं रक्तं यत्र ।) रोगविशेषः । तस्य विप्रकृष्टं निदानमाह ।
"लवणाम्लकटूष्णरूक्षगुर्व्वाजीर्णभोजनैः ।
क्लिन्नशुष्काम्बुजानूपमांसपिण्याकमूलकैः ॥
कुलत्थमाषनिष्पावशाकादिपललेक्षुभिः ।
दध्यारनालसौवीरशुक्ततक्रसुरासवैः ॥
विरुद्धाध्यशनक्रोधदिवास्वप्नातिजागरैः ।
प्रायशः सुकुमाराणां मिथ्याहारविहारिणाम् ।
स्थूलानां सुखिनां चापि प्रकुप्येद्वातशोणितम् ॥
हस्त्यश्वोष्ट्रैर्गच्छतश्चायतस्य
विदाह्यन्नं संविदाहाशनस्य ॥*॥
क्षारो यवक्षारादिः । अजीर्णभोजनैः अजीर्णाय भोजनैः । अतिमात्रभोजनैरित्यर्थः । क्लिन्नादीनि मांसस्य विशेषणानि । क्लिन्नं शिथिलितम् । शुष्कमातपे शोषितम् । अम्बुजं मत्स्यादिमांसम् । आनूपं गौड़ादिपूर्व्वदेशजं मांसम् । पिण्याकं तिलखलिः । मूलकं प्रसिद्धमेव । निष्पावः वोड़ाशाकम् । शाकं पत्रशाकम् । आदिशब्देन वृन्ताकादीनि फलशाकानि गृह्यन्ते । पललं शिथिलत्वादिदोषरहितमपि मांसं वातशोणितं प्रकोपयेत् । शिथिलादिं तु मांसं विशेषतो वातशोणितं प्रकोपयेत् । आरनालं सन्धानभेदः । शुक्तं सन्धानभेदः । सौवीरं सन्धानभेदः । तक्रं चतुर्थांशजलयुक्तं वस्त्रपूतं दधि । सुरा सन्धानभेदः । आसवः सन्धानभेदः । विरुद्धं क्षीरमत्स्यादि । अध्यशनम् । अजीर्णे भुज्यते यत्तु तदध्यशनमुच्यते ।
अतिजागरो निशि । प्रायशः बाहुल्येन । सुकुमाराणां अल्पतरकायव्यापाराणाम् । अथवा मिथ्याहारविहारिणाम् । अयथाहारविहाराभ्यां स्थूलानां सुखिनाञ्च रक्तदुष्टिः । हस्त्यश्वोष्ट्रैर्गच्छतः यतो वायुर्विवर्द्धते शरीरस्याधो गच्छति । हस्त्यादय उपलक्षणाणि । मन्दा-

मण्यति चलतः । अश्नतः विदाह्यन्नम् । विदाहि निष्पावकुलत्थसर्षपप्रायादि । संविदाहाप्रनस्य । संविदाहेऽन्नं यस्य भुक्ते विदग्धे तदुपरि भुञ्जानस्येत्यर्थः । अथान्नमुक्ताप्येतदचनं विदग्धाजीर्णभोजनस्य विशेषतो हेतुत्वार्थम् । पश्चात् वातश्लेष्मितं प्रकुप्येदित्यनेनान्वयः । एतेषां कारणानां मध्ये केनचिदायुः केनचिदुभयमपि प्रकुप्येत् ॥ * ॥ संप्राप्तिमाह ।

"क्षतरक्तं रक्तं विदहत्याशु तच्च
दुष्टं सस्रं पादयोश्चीयते तु ।
तत् संदुष्टं वायुना दूषितेन
तत्प्राबल्यादुच्यते वातरक्तम् ॥"

पूर्व्वोक्तैर्हेतुभिः क्षतरक्तं समस्तं रक्तं विदहति अत्र दहधातुरविवक्षितकर्म्मकः । तेन विदहति विदग्धं भवतीत्यर्थः । तच्च दुष्टं रक्तम् । सस्रं अधोगतम् । पादयोश्चीयते सञ्चितं भवति । तदुधिरं दूषितेन स्वहेतुवायुना संदुष्टं मिलितं वातरक्तं उच्यते । ननु चैतस्य संप्राप्तिरुक्ता सुश्रुतेन ।

"शीघ्रं रक्तं दुष्टिमायाति तच्च
वायोर्मार्गं संरुणद्ध्याशु वातः ।
क्रुद्धोऽत्यर्थं मार्गरोधात् स वायु-
रत्युद्रिक्तं दूषयेदुत्तमाशु ॥"

अत्र प्रथमं रक्तस्य दुष्टिरतो रक्तवातमिति व्यपदेष्टुमुचितं भवत्यत आह । तत्प्राबल्यादिति । तस्य वातस्य दोषत्वेन प्राधान्यादातरक्तमिति व्यपदिश्यते ॥ * ॥ पूर्व्वरूपमाह ।

"खेदोऽत्यर्थं न वा कार्श्यं सन्ध्यादौ सदनं क्लमः ।
जानुजङ्घोरुकट्यंसहस्तपादाङ्गसन्धिषु ।
निस्तोदः स्फुरणं भेदो गुरुत्वं सुप्तिरेव च ॥
कण्डूः सन्धिषु रुक् दाहो भूत्वा नश्यति चासकृत् ।
वैवर्ण्यं मण्डलोत्पत्तिर्वातासृक्पूर्व्वलक्षणम् ॥"

अथाधिक्रतवातस्य वातरक्तस्य लक्षणमाह ।

"वातेऽधिकेऽधिकं तत्र शूलस्फुरणतोदनम् ।
शोथस्य रौक्ष्यं श्यावत्वं म्लानत्वङ्निहानयः ॥
धमन्यङ्गुलिसन्धीनां सङ्कोचोऽङ्गग्रहोऽतिरुक् ।
शीतद्वेषानुपशयौ स्तब्धवेपथुसुप्तयः ॥"

तत्र पादयोः शूलादिकमधिकम् । यत आह सुश्रुतः ।

"स्पर्शोद्विग्नौ तोदभेदप्रशोषौ
स्वापोपेतौ वातरक्तेन पादौ ॥" इति ।

अत्र सुप्तिः स्पर्शाज्ञता ॥ * ॥ अधिकरक्तं वातरक्तमाह ।

"रक्ते शोथोऽतिरुक् तोदस्ताम्रच्छिमिच्छिमायते ।
स्निग्धरूक्षैः समं नैति कण्डूक्लेदसमन्वितः ॥"

अधिकपित्तं तदाह ।

"पित्ते विदाहः संमोहः स्वेदो मूर्च्छा मदः क्षुधा ।
सप्तांसहत्वं रुग्दाहः शोथपाकौ भृशौष्णता ॥"

विदाहश्च पादावेव बोद्धव्यः । यत आह सुश्रुतः ।

पित्तास्रगभ्यामुग्रदाहौ भवेता-
मत्यर्थौष्णौ रक्तशोथौ मृदू च ॥

पदाविति शेषः ॥ अधिककफं तदाह ।

कफेस्रेमित्यगुरुतासुप्तिस्निग्धत्वशीतताः ।

गुरुतादयः पादयोरेव । यत आह सुश्रुतः ।

कण्डूमन्तौ स्वेदशीतौ सशोथौ
पीनस्तब्धौ श्लेष्मदुष्टे तु रक्ते ॥ * ॥

अतिक्रियमाणवातरक्तस्य उपद्रवानाह ।

"अक्षिप्रारोचकश्वासमांसकोथग्निरोगदाः ।
मूर्च्छा च मन्दरुक् तृष्णा ज्वरमोहप्रकोपकाः ॥
हिक्कायाङ्गुल्यवीसर्पपाकतोदभ्रमक्लमाः ।
अङ्गुलीवक्रतास्फोटदाहमर्म्मग्रहाव्वंदाः ॥"

मांसकोथो मांसगलनम् ॥ * ॥ असाध्यत्वादिकमाह ।

"एतैरुपद्रवैर्व्वर्ज्यं मोहेनैकेन वापि यत् ।
अकृतक्षोपद्रवं याप्यं साध्यं स्यान्निरुपद्रवम् ॥
एकदोषानुगं साध्यं नवं याप्यं द्विदोषजम् ।
त्रिदोषजमसाध्यं स्यादृश्यस्य च सुरुपद्रवाः ॥"

अथ वातरक्तस्य चिकित्सामाह ।

"वातश्लेष्मितनो रक्तं स्निग्धस्य बहुशो हरेत् ।
अल्पाल्पं रक्षयेद्वायुं यथादोषं यथाबलम् ॥
उष्णाङ्गदाहतोदेषु जलौकोभिर्विनिर्हरेत् ।
शृङ्गतुम्बेक्षिमिचिमाकण्डूरुक्वेदनान्वितम् ॥
प्रच्छितेन शिराभिर्व्वा देशाद्देशान्तरं व्रजेत् ।
अङ्गे स्नाने न तत् साध्यं रूक्षे वातोत्तरस्य यत् ।
गम्भीरं श्वयथुं स्तब्धं कम्पं ग्लानिं शिरामयात् ।
रोगानन्यांश्च वातोत्थान् कुर्य्याद्वायुररक्षितः ॥
विविधान् वातरोगान् वा स्मृत्वा वात्यवशेषितम् ।
रक्तं कुर्य्यात्ततः स्निग्धात्तत्प्रमाणेन निर्हरेत् ॥
विरेचयेत्तु पित्ताढ्यौ स्नेहयुक्तैर्विरेचनैः ।
बाह्यमालेपनाभ्यङ्गपरिषेकोपनाहनैः ।
विरेकास्थापना स्नेहपानैर्गम्भीरमाचरेत् ॥
दिवास्वप्नञ्च कोपञ्च व्यायामं मैथुनं तथा ।
कटूष्णं गुर्व्वभिष्यन्दि लवणाम्लौ च वर्ज्जयेत् ॥
पुराणा यवगोधूमशालयः षष्टिकास्तथा ।
भोजनार्थे रसार्थे तु विष्किराः प्रतुदा हिताः ॥
आढकाश्चणका मुद्गा मसूराः सकुलत्थकाः ।
यूषार्थे बहुसर्पिष्काः प्रशस्ता वातशोणिते ॥
सुनिषण्णकवेचाग्रं काकमाची घृतावरी ।
वास्तूकशोणिकाशाकं शाकं सौवर्चलं तथा ॥
घृतमांसरसैर्भृष्टं शाकमतस्त्या च दापयेत् ।
क्षितौ गोधूमचूर्णैश्च छागक्षीरघृतप्लुतैः ॥
लेपस्तद्वत्तिला भृष्टाः पिष्टाः पयसि निर्व्वृताः ॥
क्षीरपिष्टातसीभिर्व्वा वर्द्धमानफलैरपि ।
दुग्धपिष्टैः प्रलेपैः स्याद्वितः पवनशोणिते ॥
गुडूचीकाथकल्काभ्यां सपयस्कं पलं घृतम् ।
वातरक्तं निहन्त्याशु कृच्छ्रं हरति दुस्तरम् ॥"
गुडूचीघृतम् ॥ * ॥
"तुलां पचेद्गुडूच्यास्तु जलद्रोणचतुष्टये ।
पादशेषैः कषायस्तु गोदुग्धं द्रोणकस्तथा ॥
तिलतैलाढकं ताभ्यां पचेन्मृद्वग्निना भिषक् ।
वक्ष्यमाणैस्ततो द्रव्यैः सम्यक्क्वथीकृतैः पचेत् ॥
मञ्जिष्ठा मधुकं कुष्ठं जीवनीयगणस्तथा ।
एलागुरु च मृद्वीका मांसी श्यामलतौ नखी ॥
हरेणुः श्रावणी बीजं स्थिरा त्वामलकी तथा ।
भृङ्गी श्यामा घृताक्षा च विष्णुक्रान्ता च
पत्रकम् ॥
नागकेशरवालत्वक्पद्मकोत्पलचन्दनम् ।
एतानि कल्कवस्तूनि कथितानीह कोविदैः ॥
पानेऽभ्यङ्गेऽनुवासे च तैलमेतन्निषेवितम् ।
वातरक्तं तदुद्भूतोपद्रवानाशु नाशयेत् ॥
धन्यं पुंसवनं स्त्रीणां गर्भदं वातपित्तनुत् ।
स्वेदकण्डूरुजायामशिरःकम्पार्दितामयान् ।
हन्याद्व्रणकृतान् दोषान् गुडूचीतैलमुत्तमम् ॥"

इति गुडूचीतैलम् । इति भावप्रकाशः ॥

(यथा च ।

"हुताग्निहोत्रमासीनमग्निमध्ये पुनर्व्वसुम् ।
पृष्टवान् गुरुमेकाग्रमग्निवैशोऽग्निवर्च्चसम् ॥
अग्निमारुततुल्यस्य संसर्गस्यानिलास्रजोः ।
हेतुलक्षणभैषज्यान्यथासौ गुरुरब्रवीत् ॥"
"अभिघातादशुद्धाश्च प्रदुष्टे शोणिते नृणाम् ।
कषायकटुतिक्ताम्लरूक्षाहारादभोजनात् ॥
क्षयोष्ट्ययानयानाम्बुक्रीड़ाव्यवनलङ्घनात् ।
उष्णे चात्यध्वगमनाद्व्यायामेनाग्निसंग्रहात् ॥
वायुर्विवृद्धो वृद्धेन रक्तेनावारितः पथि ।
क्रुद्धस्तद्दूषयेद्रक्तं तच्चेयं वातशोणितम् ॥
खुड़ं वातबलासाख्यमाढ्यं वातच्च नामभिः ।
तस्य स्थानं करौ पादावङ्गुल्यः पर्व्वसन्धयः ॥
कृत्वादौ हस्तपादे तु मूलं देहे विधावति ।
सौक्ष्म्यात् सर्व्वसवत्वाच्च देहं गच्छन् शिरायवैः ।
पर्व्वस्वभिहतं क्षुब्धं वक्रत्वादभितिष्ठते ।
स्थितं पित्तादिसंदुष्टं तास्वाः दूषयति वेदनाः ॥
करोति दुःखं तेष्वेव तस्मात् प्रायेण सन्धिषु ॥"
"उत्तानमथ गम्भीरं द्विविधस्तत् प्रचक्षते ।
त्वङ्मांसाश्रयसुत्तानं गम्भीरन्त्वन्तराश्रयम् ॥
कण्डूदाहरुगायासतोदस्फुरणकुञ्चनैः ।
अन्विता श्यावरक्ता त्वग्वाह्ये ताम्रा तथेष्यते ॥
गम्भीरे श्वयथुः स्तब्धः कठिनोऽत्यर्थशर्म्मभिः ।
श्यावस्ताम्रोऽथवा दाहतोदस्फुरणपाकवान् ॥
रुग्विदाहान्वितोऽभीक्ष्णं वायुः सन्ध्यस्थिमज्जसु ।
छिन्दन्निव चरत्यन्तर्व्वक्रीकुर्व्वंश्च वेगवान् ॥
करोति खञ्जं पङ्गुं वा शरीरे सर्व्वतश्चरन् ।
सर्व्वलिङ्गेन विज्ञेयं वाताढ्यगुभयाश्रयम् ॥"
"रक्तमार्गं निहन्त्याशु शाखासन्धिषु मारुतः ।
निवेश्यान्योन्यमावार्य्य वेदनाभिर्हरेदसून् ॥
तत्र मुक्षेदसृक्पृङ्गजलौकः सूच्यलाबुभिः ।
पुच्छनैर्व्वा शिराभिर्वा यथादोषं यथाबलम् ॥
रुग्दाहशूलतोदार्त्तादसृक्स्रावं जलौकसा ।
शृङ्गैस्तुम्बैर्हरेत् स्रुतिकण्डूक्षिमिक्षिमायनात् ॥
देशाद्देशं व्रजत् स्रावं शिराभिः पुच्छनेन वा ॥"
"सर्पिस्तैलवसामज्जापानाभ्यञ्जनबस्तिभिः ।

सुखोष्णैरुपनाहैश्च वातोत्तरमुपाचरेत् ॥
विरेचनघृतक्षीरपाने: सेकै: सवस्तिभि: ।
प्रीतैर्निर्वापनैश्चापि रक्तपित्तोत्तरं जयेत् ॥
वमनं मृदुनात्यर्थं स्नेहसेकादिलङ्घनम् ।
कोष्ठालेपाश्च शस्यन्ते वातरक्ते कफोत्तरे ॥
कफवातोत्तरे प्रोक्ते: प्रलिप्ते वातशोणिते ।
विदाह: शोथरुक्कण्डूविदृद्धि: स्रम्भनाद्भवेत् ॥
पित्तरक्तोत्तरे दाह: क्लेदोऽवदरणं भवेत् ।
उशीरसारिवायष्टीबलं वृद्धाचरेत् क्रियाम् ॥"
"दत्त्वापरूषकद्राक्षाकाश्मर्य्येक्षुरसान् समान् ।
घृतचिदार्य्याश्च रसं तथा क्षीरचतुर्गुणम् ॥
एतत् प्रायोगिकं सर्पि: पारूषकमिति स्मृतम् ।
वातरक्ते क्षते क्षीणे वीसर्पे पैत्तिके ज्वरे ॥"
इति पारूषकं घृतम् ॥*॥
"मधुपर्ण्या: पलं पिष्ट्वा तैलप्रस्थं चतुर्गुणे ।
क्षीरे साध्यं घृतकल्वस्तदेवं मधुकात् घृते ॥
सिद्धं देयं चिदोषे स्यात् वातासृग्व्याधिकासजुत् ।
क्षुत्पाण्डुरोगवीसर्पकामलादाहनाशनम् ॥
बलाकषायकल्काभ्यां तैलं क्षीरसमन्तथा ।
सहस्रघृतपाकं वा वातासृग्वातरोगनुत् ॥
रसायनं श्रेष्ठतमं इन्द्रियाणाम्प्रसादनम् ।
जीवनं वृंहणं स्वर्य्यं शुक्राल्पदोषनाशनम् ॥"
"चन्द्रपादाम्बुसंसिक्ते चौमपद्मदलच्छदे ।
शयने पुलिनस्पर्शे शीतमारुतवीजिते ॥
चन्दनार्द्रकराङ्गश्च: प्रिया नार्य्य: प्रियंवदा: ।
सम्प्राप्ते शीतसुखस्पर्शा यन्ति दाहं रुजं क्लमम्॥"
"गम्भीरे रक्तमाक्रान्तं स्याच्चेद्धातुं विवर्ज्जयेत् ।
रक्तपित्तातिवृद्धा तु पाकमासु नियच्छति ॥
भिन्नं स्रवति वा रक्तं विदग्धं पूयमेव वा ।
तयो: क्रिया विधातव्या: यथा: शोधनरोपणौ ॥
कुर्य्यादुपद्रवाणाञ्च क्रियां स्वां स्वांचिकित्-
सितात्॥"

इति चरके चिकित्सास्थाने २९ अध्याय: ॥
"गन्धकं पारदं लौहं घनं तालं मन:शिला ।
शिलाजतु पुरं शुद्धं समभागं विचूर्णयेत् ॥
विडङ्गं त्रिफला योषं वायुजी च पुनर्नवा ।
चित्रकं देवकाष्ठञ्च दार्व्वी श्वेतापराजिता ॥
चूर्णमेषां पृथक् तुल्यं सर्व्वमेकत्र कारयेत् ।
त्रिफलाभृङ्गराजस्य रसेनैव पृथक् त्रिधा ॥
विभाव्य भक्षयेत् प्रातर्माषमात्रं दिने दिने ।
क्रमानुपानं निम्बस्य पत्रं पुष्पं त्वचं समम् ॥
शुद्धमात्रं घृतैर्देयात् सर्व्ववातविकारजुत् ।
वातरक्तं महाघोरं गम्भीरं सर्व्वजञ्जयेत् ॥
सर्व्वोपद्रवसंयुक्तं साध्यासाध्यं निहन्त्यलम् ॥"
इति वातरक्ताग्नको रस: ॥*॥
"अथ शुद्धेन तावेन गन्धतुल्येन मेलयेत् ।
द्वयोस्तुल्यं जीर्णताम्रं वायुकाष्यकके पचेत् ॥
अयलाक्षेश्वरो नाम रस: परमदुर्लभ: ।
हन्यात् कुष्ठानि सर्व्वाणि वातरक्तमथापि वा ।
मूलमष्टविधं शित्रं रसलाक्षेश्वरो महान् ॥"
इति महालाक्षेश्वरो रस: ॥
इति वैद्यकरसेन्द्रसारसंग्रहे वातरक्ताधिकारे ॥

अथात्र पथ्यापथ्यविधि: ।
"द्वयोरस्रसृति: क्षौद्रशर्कराकाश्यक्षालाबुभि: ।
घृतधौतघृताभ्यङ्गो मेषीदुग्धावसेचनम् ॥
यवषष्टीकनीवारकलमारुणशालय: ।
गोधूमाश्चणका मुद्गास्तुवर्य्योऽपि सकुष्टका: ॥
अजानां महिषीणाञ्च गवामपि पयांसि च ।
लावतित्तिरिवर्षदिष्टताम्रचूड़ादिविष्किरा: ॥
प्रतुदा: शुकदात्यूहकपोतकटकादय: ।
उपोदिकाकाकमाची वेत्राग्रं सुनिषण्णकम् ॥
वास्तुकं कारवेल्लञ्च तण्डुलीय: प्रसारणी ।
पत्तूरो वृहत्कुष्माण्डं सर्पि: शुभ्राकपल्लवम् ॥
पटोलं रक्षुतेलञ्च गुडौकाश्वेतशर्करा ।
नवनीतं सोमवल्ली कस्तूरी सितचन्दनम् ॥
शिंशपागुरुदेवाक्षसरलं स्नेहमर्दनम् ।
तिक्तञ्च पञ्चमुद्दिष्टं वातरक्तगदे नृणाम् ॥
दिवास्वप्नाग्निसन्तापव्यायामातपमैथुनम् ।
माषा: कुलत्था निष्पावा: कलाया: क्षारसेवनम्॥
अम्लानूपमांसानि विरुद्धानि दधीनि च ।
इक्षवो मूलकं मद्यं पिण्याकोऽम्लानि काञ्जिकम्॥
कटुच्च गुर्व्वभिष्यन्दि लवणानि च शुक्तव: ।
इत्यपथ्यं निगदितं वातरक्तगदे नृणाम् ॥"
इति वैद्यकपथ्यापथ्यविधिग्रन्थे वातरक्ताधि-
कार: ॥)

वातरक्तघ्न:, पुं, (वातरक्तं रोगविशेषं हन्तीति। हन+टक् ।) कुकुरशुच: । इति शब्द-चन्द्रिका ॥ कुकुरसड़ा इति भाषा ॥

वातरक्तारि:, पुं, (वातरक्तस्य अरिर्नाशक: ।) पित्तघ्नी लता । इति शब्दचन्द्रिका ॥ गुलञ्च इति भाषा ॥

वातरङ्ग:, पुं, (वातेन वायुना रङ्गो यस्य । निर-न्तरचलदलत्वादस्य तथात्वम् ।) अश्वत्थ: । इति शब्दरत्नावली ॥

वातरथ:, पुं, (वातो वायू रथो यस्य ।) मेघ: । इति त्रिकाण्डशेष: ॥ (वातो रथ: प्रापको यस्येति वायुप्रापके, त्रि । यथा, भागवते । ३ । २६ । २० ।
"यथा वातरथो घ्राणमाहृत्य गन्ध आशयात् ।
एवं योगरतं चेत आत्मानमविकारि यत् ॥")

वातरायण:, पुं, (वातेन वायुजनितरोगेण रायति शब्दायते इति । रै शब्दे + ल्यु: ।) उन्मत्त: । नियोजनपूरुष: । काष्ठम् । करपात्रम् । कूट: । परशुक्रम: । इति मेदिनी । ने, ११६ ॥ सरलद्रुम: । इति शब्दरत्नावली ॥

वातरूष:, पुं, (वातेन रूष्यते भूष्यते इति । रूष + घञ् ।) वातूल: । उत्कोच: । शुक्रधनु: । इति मेदिनी । षे, ५७ ॥

वातरोग:, पुं, (वातजनितो रोग: ।) वायुव्याधि: । तत्पर्य्याय: । वातव्याधि: २ चलातङ्क: ३ अनिलामय: ४ । इति राजनिर्घण्ट: ॥ (यथा,
"वातरोगं निहन्त्याशु अर्हितं सापतन्त्रकम् ॥"
इति वैद्यकचक्रपाणिसंग्रहे वातव्याधौ खल्व-रसोपक्रमे ॥)

वातरोगी [न्] त्रि, (वातरोगोऽस्त्यस्येति । वात-रोग + इनि: ।) वातरोगयुक्त: । तत्पर्य्याय: । वातकी २ । इत्यमर: ॥ (यथा, सुश्रुतसंहिता-यां । ८७ । ११ ।
"परतोऽपि दर्शनं वातरोगिणां चन्दनागुरु-
प्राप्ति: ॥")

वातर्द्धि:, पुं, काष्ठलौहीभयनिर्म्मितपात्रम् । तत्-पर्य्याय: । काष्ठलौही २ । इति त्रिकाण्ड-शेष: ॥

वातल:, पुं, (वातं लातीति । ला + क: ।) चणक: । इति शब्दचन्द्रिका ॥ वायुकारके त्रि ॥ (यथा, सुश्रुते सूत्रस्थाने ४६ अ: ।
"वातला: शीतमधुरा: सकषाया विरूक्षणा: ।
कफशोणितपित्तघ्नाश्चणका: पुंस्त्वनाशना: ॥")

वातलमण्डली, स्त्री, वाट्या । इति भूरिप्रयोग: ॥

वातवान् [त्] त्रि, वायुयुक्त: । वातो विद्यते-ऽस्य इत्यर्थे वतुप्रत्ययेन निष्पन्न: ॥

वातवैरी [न्], पुं, (वातस्य वैरी ।) वाताद: । इति राजनिर्घण्ट: ॥ वायुघ्नौ, त्रि ॥

वातव्याधि:, पुं, (वातजनितो व्याधि: ।) वात-रोग: । इति राजनिर्घण्ट: ॥ (यथा,
"शूनं सुप्तत्वचं भग्नं कम्पाध्मानप्रपीड़ितम् ।
रूक्षार्त्तिमन्तञ्च नरं वातव्याधिर्विनाशयेत् ॥"
इति माधवकरस्ते रुग्विनिश्चये वातरोगाधि-कारे प्रथमांशे ॥)

वातशीर्षं, क्ली, (वातस्य शीर्षमिव ।) वस्ति: । इति राजनिर्घण्ट: ॥

वातशोणितं, क्ली, (वातजं शोणितं दुष्टरक्तं यत्र ।) वातरक्तरोग: । इति भावप्रकाश: ॥ (अस्य निदानसम्प्राप्तिकं पूर्व्वरूपं लक्षणञ्च यथा,—
"विदाह्यन्नं विरुद्धञ्च तत्तथारुक्प्रदूषणम् ।
भजतां विधिहीनञ्च स्वप्नजागरमैथुनम् ॥
प्रायेण सुकुमाराणामचंक्रमणशीलिनाम् ।
अभिघातादशुद्धेश्च वृणामहनि दूषिते ॥
वातजै: शीतलैर्वायुर्दुष्ट: क्रुद्धो विमार्गग: ।
ताड्येनाक्षजा रुज: प्राक् तदैव प्रदूषयेत् ॥
आढ्यरोगं खुड़ं वातबलासं वातशोणितम् ।
तदाकुर्नामभिस्तच्च पूर्व्वं पादौ प्रधावति ॥
विशेषाद्यानयानाद्यै: प्रजग्धौ तस्य तच्चलम् ।
भविष्यत: कुण्ठसमं तथा सादः प्रधाक्षता ॥
जानुजङ्घोरुकट्यंसग्रीवाशिरःपादाङ्गसन्धिषु ।
कण्डूस्फुरणनिस्तोदभेदगौरवसुप्तता: ॥
भूत्वा भूत्वा प्रजायन्ति सुप्तुराविर्भवन्ति च ।
पादयोर्मूलमास्थाय कदाचिद्धस्तयोरपि ॥
आखोरिव विषं क्रुद्धं क्षतजं देहं विधावति ।
त्वङ्मांसास्रायसस्थानं ततपूर्व्वं जायते ततः ॥
क्षणान्तरेण गम्भीरं सर्व्वान् धातूनभिद्रवत् ।
कण्डूादिसंयुतोत्थाने त्वक्ताम्रस्रावशोणिता ॥
सायामा भृशदाहोष्मा गम्भीरोऽधिकपूर्व्वरुक् ।
व्यथयुर्ग्रथित: पाकी वायु: सन्धिमभञ्जयेत् ॥
क्विन्नमिव चरत्यन्तर्वक्रीकुर्व्वंश्च वेगवान् ।

करोति खञ्जं पङ्गुं वा शरीरे सर्व्वतश्चरन् ॥
वातेऽधिकेऽधिकन्तच्च मूलस्फुरणतोदनम् ।
शोफस्य रौक्ष्यक्षयत्वश्यावतादृङ्निदानय: ॥
धमन्यङ्गुलिसन्धीनां सङ्कोचोऽङ्गग्रहोऽतिरुक् ।
शीतद्वेषानुपशयौ स्तम्भवेपथुसुप्तय: ॥
रक्ते शोफोऽतिरक्ततोदस्रावश्चिमिचिमायते ।
स्निग्धरुचै: भ्रमं नेति कण्डूक्लेदसमन्वित: ॥
पित्ते विदाह: सम्मोह: स्वेदो मूर्च्छामद: स-
ज्वर: ।
स्पर्शाज्ञमत्वं रुग्राग: शोफपाको भृशोष्मता ॥
कफेस्तैमित्यगुरुता सुप्तिस्निग्धत्वशीतता: ।
कण्डूर्मन्दा च रुग्दन्दसर्व्वलिङ्गञ्च सङ्करे ॥
एकदोषानुगं साध्यं नवं याप्यं द्विदोषजम् ।
त्रिदोषजं त्यजेत् स्रावि स्रव्यमर्व्बुदकारि च ॥
रक्तमार्गं निहन्त्यासृग्वाखासन्धिषु मारुत: ।
निविश्यान्योऽन्यमाचार्य्य वेदनाभिर्हरत्यसून् ॥"

इति वाभटे निदानस्थाने षोड़शेऽध्याये ॥
"वातश्लेष्मितनो रक्तं स्निग्धस्य बहुशो हरेत् ।
अल्पाल्पं पालयन् वायुं यथादोषं यथाबलम् ॥
चिकित्सितं हितं पथ्यं प्रायश्चित्तं भिषग्जितम् ।
भेषजं शमनं शस्तं पर्य्याये: स्मृतमौषधम् ॥"
इति च वाभटे चिकित्सितस्थाने द्वाविंशतितमे-
ऽध्याये ॥ अन्यद्वातरक्तशब्दे ज्ञातव्यम् ॥*॥)

वातसह:, त्रि, (वातं वातजनितरोगं सहते । सह+अच् ।) अत्यन्तवायुयुक्त: । यथा,—
"वातासहो वातसहो वातूलो वातुलोऽपि च ।"
इति शब्दरत्नावली ॥
(वायुवेगसहनशील: । यथा, महाभारते । १ । १४२ । ५ ।
"ततो वातसहां नावं यन्त्रयुक्तां पताकिनीम् ।
ऊर्म्मिक्षमां दृढ़ां कृत्वा कुन्तीभिदमुवाच च ॥")

वातसारथि:, पुं, (वात: सारथि: सहायो यस्य ।) अग्नि: । इति केचित् ॥

वातस्कन्ध:, पुं, (वातस्य स्कन्ध इव ।) आकाशस्य भागविशेष: । यत्र वायुर्व्वहति । इति केचित् ॥

वातघ्न, [न्] त्रि, (वातं हन्तीति । हन्+क्विप् ।) वातन्न: । वायुनाशकौषधम् । इति वैद्यकम् ॥

वाताट:, पुं, (वात इव अटति गच्छतीति । अट्+अच् ।) सूर्य्याश्व: । इति त्रिकाण्डशेष: ॥ वातरंहा: । इति शब्दरत्नावली ॥

वाताण्ड:, पुं, (वातदूषितौ अण्डौ यस्मात् ।) मुष्करोगविशेष: । तस्य लक्षणं यथा,—
"वृषणौ दूषयेद्वायु: श्लेष्मणा यस्य संवृत: ।
तस्य मुष्कस्फलत्येको रोगो वाताण्डसंज्ञक: ॥"
इति माधवकर: ॥

वाताद:, पुं, (वाताय वातनिवृत्तये अद्यते इति । अद्+घञ् ।) फलवृक्षविशेष: । बादाम इति ख्यात: । तत्पर्य्याय: । वातवैरी २ नेत्रोपम-फल: ३ वाताम्र: ४ । अस्य गुणा: । उष्णत्वम् । स्निग्धत्वम् । वातघ्नत्वम् । शुक्रकारित्वम् । गुरुत्वञ्च । अस्य मज्जगुणा: । मधुरत्वम् । वृष्यत्वम् । पित्तानिलापहत्वम् । स्निग्धत्वम् । उष्णत्वम् । कफकारित्वम् । रक्तपित्तविकारिणां श्रेष्ठत्वञ्च । इति भावप्रकाश: ॥

वातापि:, पुं, असुरविशेष: । स च ब्रह्मण: धमनौ प्रजां जात: । अगस्त्येन भक्षित: । इति श्रीभागवतमतम् ॥ कल्पान्तरे तु विप्रचित्ते: सिंहिकायां जात: । यथा,—
"सिंहिकायामथोत्पन्ना विप्रचित्तेश्चतुर्दश ।
शूर: शूरबलाश्चैव वातापी हरपो निक: ।
हरकल्प: कालनाभो भौमश्च नरकस्तथा ॥
राहुर्ज्येष्ठश्च तेषां वै चन्द्रसूर्य्यप्रमर्दन: ।
इत्येते सिंहिकापुत्रा देवैरपि दुरासदा: ॥"
इति वह्निपुराणे काश्यपीयवंश: ॥
अन्यच्च ।
"विप्रचित्ति: सैंहिकेयान् सिंहिकायामजीजनत् ।
हिरण्यकशिपोर्यो वै भागिनेयाञ्जयोदग्र ॥
वक्त्र: शूल्यश्च राजेन्द्रो तमो वातापिरेव च ।
इल्वलो नमुचिश्चैव खड्गमस्त्राञ्जनस्तथा ॥
नरक: कालनाभश्च सरमाणस्तथैव च ।
कल्पवीर्य्यश्च विख्यातो दनुवंशविवर्द्धन: ॥"
इति मात्स्ये ६ अध्याय: ॥
(मुनिवरोऽगस्त्यस्तु एनं ब्रह्महेश्वरं भक्षितवान् । एतदृत्तान्तस्तु महाभारते वनपर्व्वणि ९६ अध्यायमारभ्य द्रष्टव्य: ॥)

वातापिद्विट्, [ष्] पुं, (वातापिं द्वेष्टीति । द्विष्+क्विप् ।) अगस्त्यमुनि: । इति हेमचन्द्र: । २ । ३६ ॥

वातापिसूदन: पुं, (वातापिं सूदत इति । सूद्+ल्यु: ।) अगस्त्य: । इति त्रिकाण्डशेष: ॥

वातापिहा [न्] पुं, (वातापिं हन्तीति । हन्+क्विप् ।) अगस्त्य: । इति त्रिकाण्डशेष: ॥

वातामोदा, स्त्री, (वातेन प्रहृत आमोदो यस्या: ।) कस्तूरी । इति शब्दभाला ॥

वातायनं, क्ली, (वातस्य अयनं गमनागमनमार्ग: ।) गवाक्ष: । इत्यमर: ॥ (यथा, आर्य्यासप्तशत्याम् । ५१० ।
"लीलागारस्य बहि: सखीषु चरणातिथौ मयि प्रियया ।
प्रकटीकृत: प्रसादो दत्त्वा वातायने व्यजनम् ॥")
तेन परबाधानिषेधो यथा,—
"परबाधां न कुर्व्वीत जलवातायनादिभि: ।
कारयित्वा तु कर्म्माणि कारुं पश्चात् न वञ्चयेत् ॥"
इति कौर्म्मे उपविभागे १५ अध्याय: ॥

वातायन:, पुं, (वातस्येव अयनं गतिर्यस्य ।) घोटक: । इति त्रिकाण्डशेष: ।

वातायु:, पुं, (वातमयते इति । अय+बाहुलकात् उण् ।) हरिण: । इत्यमर: ॥

वातारि:, पुं, (वातस्य वातरोगस्य अरि: ।) एरण्डवृक्ष: । इति शब्दरत्नावली ॥ (अस्य पर्य्यायो यथा,—
"शुक्लएरण्ड आमण्डश्चिरोगन्तर्व्वहस्तक: ।
पञ्चाङ्गुलो वर्द्धमानो दीर्घदण्डोऽप्यदण्डक: ॥
वातारिस्तरुणश्चापि रुवूकश्च निगद्यते । १ ।
रक्तोऽपरो रुवूक: स्यादुरुवूको रुवूस्तथा ।
व्याघ्रपुच्छश्च वातारिश्चुरुत्तानपत्रक: ॥"२॥
इति भावप्रकाशस्य पूर्ब्बखण्डे प्रथमे भागे ॥)
घृतमूली । इति शब्दचन्द्रिका ॥ पुत्रदात्री । शोफालिका । यवानी । भार्गी । स्नुही । विड़ङ्ग: । शूरण: । भल्लातक: । जतुका । इति राजनिर्घण्ट: ॥

वातालु, स्त्री, (वातस्य आलु यच्च ।) वाल्या । इति त्रिकाण्डशेष: ॥

वाताश्व:, पुं, (वात इव शीघ्रगोऽश्व: ।) कुलीनाश्व: । तत्पर्य्याय: । हयोत्तम: २ जात्य: ३ अजानेय: ४ । इति त्रिकाण्डशेष: ॥ (यथा, कथासरित्सागरे । ६६ । १७४ ।
"तदिमं मां विजानीहि लक्ष्मीसेनं वरानने ।
आनीतमिह वाताश्वेनाक्षय्याखेटनिर्गतम् ॥")

वातासह:, त्रि, (वातं वातजनितरोगं आसहते इति । आ+सह+अच् ।) वातुल: । इति शब्दरत्नावली ॥

वाति:, पुं, (वाति गच्छतीति । वा+"वातेर्नित् ।) उणा० ५ । ६ । इति अति: ।) वायु: । यथा,
"वातिर्वायुर्मरुद्वात: श्वसन: पवनोऽनिल: ।"
इत्यमरटीकायां भरतधृतसाहसाङ्क: ॥
सूर्य्य: । चन्द्र: । यथा । वातिरादित्यसोमयो: ।
इति रभस: ॥

वातिक:, पुं, (वातादागत: । वात+ठञ् ।) वायुजव्याधि: । यथा,—
"वातिको वातजो व्याधि: पैत्तिक: पित्तसम्भव: ।
श्लैष्मिक: श्लेष्मसंभूत: सम्भूत: सान्निपातिक: ॥"
इति राजनिर्घण्ट: ॥
(क्ली, वातस्य शमनं कोपनं वा । "वातपित्तश्लेष्मभ्य: शमनकोपनयोरुपसंख्यानम् ।"५ । १ । ३८ । इत्यस्य वार्त्ति० ठञ् ॥ वातिकरोगाक्रान्ते वाच्यादौ, त्रि । यथा, महाभारते ।३।२५६।३।
"अपरे त्वरुवंस्तत्र वातिकास्तं महीपतिम् ।
युधिष्ठिरस्य यज्ञेन न समो ह्येष ते क्रतु: ॥")

वातिग:, पुं, (वातिं वायुं गच्छतीति । गम्+ड: ।) भण्टाकी । धातुवादिनि, त्रि । इति मेदिनी । गे, ४६ ॥

वातिगम:, पुं, (वातिं वायुं गमयतीति प्रापयति । गमि+अच् ।) वार्त्ताकु: । इति शब्दरत्नावली ॥

वातिङ्गन:, पुं, वार्त्ताकु: । इति त्रिकाण्डशेष: ॥

वातीयं, क्ली, (वाताय वातनिवृत्तये हित: । वात+छ: ।) काञ्जिकम् । इति शब्दचन्द्रिका ॥

वातुल:, पुं, वाल्या । इत्यमरटीकायां भरत: ॥

वातुल:, त्रि, वातविकारासह: । उन्मत्त: । इत्यमरटीकायां भरत: ॥

वातुलि:, स्त्री, तरुतूलिका । इति हारावली ॥ वाडुड़ इति भाषा ॥

वातूलः, पुं, (वातानां समूहः । "वाताद्दूलः ।" ४।२।४२ । इत्यस्य वार्त्तिकोक्त्या ञलः । यद्वा, वाताः खल्वस्मिन्निति । वात+"सिध्मादिभ्यश्च ।" ५ । २ । ९७ । इति लच् । "वातदन्तबलेति ।" ञड् । यद्वा, वातानां समूहः वातं न सहते इति वा । वात+"वातात् समूहे च । वातं न सहते इति च ।" ५।२।१२२ । इत्यस्य वार्त्ति० ञलच् ।) वात्या । वातासहे, त्रि । इत्यमरः ॥ "वात्या वातसमूहः । अत्र जनखलादिगौरथवातादिति ञलः । वातासहो वातल्यगेत्यासहः । वाइया इति ख्यातः । अत्र गोविकारादिना ञलः वातूलः । वातेर्नाऽतीति तुलि इखोकारवानपि वातुलः । वातूलो वातुलोऽपि स्यादिति द्विरूपकोषः ॥ उन्मत्तेऽपि वातूलः ।" इत्यमरटीकायां भरतः ॥

वातोना, स्त्री, (वातमूनयतीति । ऊन+अण् ।) गोजिङ्गाक्षुपः । इति राजनिर्घण्टः ॥ वायुहीने, त्रि ॥

वात्या, स्त्री, (वातानां समूहः । वात+"प्राग्वतिभ्यो यः ।" ४ । २ । ४९ । इति यः ।) वातसमूहः । यथा,—

"आसङ्गिनी च वातासौ स्यात् वात्या वातमण्डली ॥"

इति त्रिकाण्डशेषः ॥

(यथा, भागवते । ३ । १७ । ५ ।

"ववौ वायुः सुदुस्पर्शः फेत्कारानीरयन् मुहुः । उन्मूलयन्नगपतीन् वात्यानीको रजोध्वजः ॥")

वात्सकं, क्ली, (वत्सानां समूहः । वत्स+"गोत्रोक्षोष्ट्रेति ।" ४ । २ । ३९ । इति वुञ् ।) वत्ससमूहः । इत्यमरः ॥ (वत्सकस्येदमिति । वत्सक+अण् । कूटजसम्बन्धिनि इन्द्रयवसम्बन्धिनि च त्रि । यथा, सुश्रुते । ६ । ४० ।

"नागरातिविषासुस्तं पिप्पल्यो वात्सकं फलम् ॥")

वात्सल्यः, पुं, (वत्सल एव । स्वार्थे ष्यञ् ।) रसविशेषः । यथा,—

"वात्सल्यप्रधानौ तु रसौ भट्टारः कौशिकः स्मृतः ॥"

इति त्रिकाण्डशेषः ॥

एतद्रसाधिकारी यथा,—

"प्रायेण ब्राह्मण एव स्यात् प्रीते दासः प्रकीर्त्तितः ।
प्रेयसि स्युः सखायो हि यशोदा वत्सले स्मृता ॥
मधुरे राधिका ज्ञेया हास्ये स्याच्चमधुमङ्गलः ।
सखीयूथोऽद्भुते ज्ञेयो वीरे चारणगोष्ठयः ॥
करुणे वत्सलट्टाद्यैर्जटिलाद्यास्तु रौद्रके ।
गोवर्द्धनोऽभिमन्युश्च भयानक उदाहृतौ ॥
तपस्विन्यादयो ह्यत्र वीभत्से परिकीर्त्तिताः ।
व्रजस्था नियता ज्ञेया आलम्बनविभावकाः ॥"

इत्युज्ज्वलनीलमणिः ॥

(वत्सलस्य भावः । वत्सल+ष्यञ् ।) वत्सलस्य भावे, क्ली ॥ (स्नेहः । यथा, भागवते । ४।६।३४।

"चरन्तं विश्वसुहृदं वात्सल्याल्लोकमङ्गलम् ॥")

वात्सीपुत्रः, पुं, नापितः । इति त्रिकाण्डशेषः ॥

वात्स्यः, पुं, (वत्सस्य गोत्रापत्यम् । वत्स+"गर्गादिभ्यो यञ् ।" ४ । १ । १०५ । इति यञ् ।) मुनिविशेषः । यथा । वात्स्यसावर्णिगोत्रयोरौर्व्वच्यवनभार्गवजामदग्न्याप्नुवत्प्रवराः । इत्युद्वाहतत्त्वम् ॥

वात्स्यायनः, पुं, (वत्सस्य गोत्रापत्यं युवा । वत्स+यञ् । ततो यूनि फक् ।) मुनिविशेषः । तत्पर्य्यायः । मल्लनागः २ पक्षिलः ३ स्वामी ४ । इति त्रिकाण्डशेषः ॥ (अयं हि कामसूत्रकर्त्ता । यथा, कुट्टनीमते । ७७ ।

"वात्स्यायनमयमबुधं
बाह्यान्दूरेण दत्तकाचार्य्यान् ।
गणयति मल्लधतन्ते
पशुतुल्यं राजपुत्रञ्च ॥")

वादः, पुं, (वद्+घञ् ।) यथार्थबोधेच्छोर्वाक्यम् । यथा,—

"विजिगीषोः कथा जल्पो वादस्तत्त्वविवेदिषोः ।"

इति जटाधरः ॥

अस्य लक्षणं यथा । प्रमाणतर्कसाधनोपालम्भः सिद्धान्ताविरुद्धः पञ्चावयवोपपन्नः पक्षप्रतिपक्षपरिग्रहो वादः । इति गौतमसूत्रम् ॥ * ॥

अपि च ।

"सर्गाणामादिरन्तश्च मध्यञ्चैवाहमर्জ্জুন ! ।
अध्यात्मविद्या विद्यानां वादः प्रवदतामहम् ॥"

इति भगवद्गीतायाम् १० अध्यायः ॥

"प्रवदतां वादिनां सम्बन्धिनो वादजल्पवितण्डाख्यास्त्रिविधाः कथाः प्रसिद्धास्तासां मध्ये वादोऽहम् । यत्र द्वाभ्यामपि प्रमाणतर्कतश्च स्वपक्षः स्थाप्यते परपक्षश्छलजातिनिग्रहस्थानैर्दूष्यते स जल्पो नाम । यत्र स्वैकः स्वपक्षं स्थापयति अन्यस्तु छलजातिनिग्रहस्थानैस्तु पक्षं दूषयति न तु स्वपक्षं स्थापयति सा वितण्डा नाम कथा । तत्र जल्पवितण्डे विजिगीषमाणयोर्वादिनोः प्रक्तिपरीक्षामात्रफले । वादस्तु वीतरागयोः शिष्याचार्य्ययोरन्ययोर्वा तत्त्वनिरूपणफलः । अतोऽसौ श्रेष्ठत्वान्नविभूतिरित्यर्थः ।" इति तट्टीकायां श्रीधरस्वामी ॥ ("तत्र वादः । वादो नाम यः परस्परेण सह ग्राह्यपूर्व्वकं विपक्षं कथयति । स वादो द्विविधः संशयहेय जल्पो वितण्डा च । तत्र पक्षाश्रितयोर्वचनं जल्पः । जल्पविपर्य्ययो वितण्डा ।" इति चरके विमानस्थानेऽष्टमेऽध्याये ॥)

वादकः, त्रि, (वादयतीति वद्+णिच्+ण्वुल् ।) वाद्यकरः । (यथा, भागवते । १० । १८ । १३ ।

"क्वचित् नृत्यत्सु चान्येषु गायकौ वादकौ स्वयम् ।
प्रशंसतुर्महाराज साधु साध्विति वादिनौ ॥")

वक्ता । वदधातोः कर्त्तरि ण्वुल्(ण्वुल्)प्रत्ययेन निष्पन्नः ॥

वादनं, क्ली, (वद्+णिच्+ल्युट् ।) वाद्यम् । (यथा, संगीतदर्पणे । ३३ ।

"वीणावादनतत्त्वज्ञः श्रुतिजातिविशारदः ।
तालज्ञश्चाप्रयासेन मोक्षमार्गं नियच्छति ॥")

वा(बा)दरं, त्रि, (वदरात् वदराकारकार्पासफलाङ्गत्वम् । वदर+अण् ।) कार्पासनिर्म्मितवस्त्रादि । इत्यमरः । २।६।११९ ॥ वादरायाः कार्पास्या जातं इत्यर्थे ष्याप्रत्ययेन निष्पन्नम् ॥

वा(बा)दरः, पुं, (वदर+स्वार्थे अण् ।) कार्पासवृक्षः । इति हेमचन्द्रः ॥ (वदरीवृक्षः । कुलगाछ इति भाषा ॥)

वादरङ्गः, पुं, अश्वत्थवृक्षः । इति त्रिकाण्डशेषः ॥

वा(बा)दरा, स्त्री, (वदरवत् फलमस्त्यस्याः । वदर+अच् । ततः टाप् ।) कार्पासवृक्षः । तत्पर्य्यायः । कार्पासी २ कृष्णपुष्पा ३ वदरी ४ समुद्रान्ता ५ तुण्डिकेरी ६ कार्पासिका ७ । इति शब्दरत्नावली ॥ अस्याः पर्य्यायान्तरं गुणाश्च कार्पासीशब्दे द्रष्टव्याः ॥

वादरायणः, पुं, (वदरायणी वदरिकाश्रमे निवसतीति । वदरायण+अण् ।) व्यासदेवः । इति शब्दरत्नावली ॥

वादरायणिः, पुं, (वादरायण एव । स्वार्थे इञ् ।) व्यासदेवः । इति शब्दरत्नावली ॥ (वादरायणस्यापत्यमिति अपत्यार्थे इञ् । शुकदेवः ॥)

वादरिकः, त्रि, वदरचयनकर्त्ता । वदरं चिनोतीत्यर्थे ष्ठिकप्रत्ययेन निष्पन्नः ॥

वादलं, क्ली, मधुयष्टिका । इति शब्दचन्द्रिका ॥

वादवादी [न्], पुं, (वादं वदतीति । वद्+णिनिः ।) जिनभेदः । तत्पर्य्यायः । आर्हतः २ । इति हेमचन्द्रः ॥

वादामं, क्ली, खनामख्यातफलम् । तस्य गुणाः । उष्णत्वम् । सुस्निग्धत्वम् । वातघ्नत्वम् । बलशुक्रकारित्वञ्च । इति राजवल्लभः ॥

वादान्यः, त्रि, (वदान्य एव । स्वार्थे अण् ।) वदान्यः । बहुप्रदः । इति भरतहिरूपकोषः ॥

वादालः, पुं, मत्स्यभेदः । बोयालि इति भाषा । तत्पर्य्यायः । सहस्रदंष्ट्रः २ । इति हेमचन्द्रः ॥

वादिः, त्रि, (वादयति वक्तमुच्चारयतीति । वद्+णिच्+"वदिवपियजीति ।" उणा० ४ । १२४ । इति इन् ।) विद्वान् । इत्युणादिकोषः ॥

वादित्रं, क्ली, (वाद्यते । वद्+णिच्+"भूवादिगृभ्यो णित्रम् ।" उणा० ४ । १७० । इति णित्रम् ।) वाद्यम् । इत्यमरः ॥ (यथा, भागवते । ३ । २४ । ७ ।

"अवादयंस्तदा ओष्ठि वादित्राणि घनाघनाः ॥")

वादिनोऽर्थिनश्चायते इति । चे+कः । अर्थिरक्षके, त्रि । यथा, वक्रोक्तिपञ्चाशिकायाम् ।२६।

"कृत्वा त्वां प्रणयच्छितं यदि मया दूतेन नृ
प्रीयते
नैवाहं प्रणयः कृशोदरि चितः शक्यो विधातुं
त्वया ।
किं वादित्रविवक्षयाऽपि दयिते को वादिनश्चायते
स्वस्था निर्जितशैलराजसुत इत्यभ्यागर्जटिः ॥")

वादिरं, क्ली, वदरीवदग्रुरुक्ष्मफलवृक्षः। इति शब्दरत्नावली॥

वादिराट्, [ज्] पुं, (वादिषु वक्तृषु राजते इति। राज+क्विप्।) मञ्जुघोषः। इति त्रिकाण्डशेषः॥

वादिग्रः, त्रि, साधुवादी। इति शब्दमाला॥

वादी, [न्] त्रि, (वदतीति। वद+णिनिः।) वक्ता। (यथा, मनुः। ७। ६१।

"न तु हन्यात् स्थलारूढं न क्लीवं न कृताञ्जलिम्।
न मुक्तकेशं नासीनं न तवास्मीति वादिनम्॥")

अर्थी। विवादकर्त्ता। फरियादी इति पारस्यभाषा॥ यथा, सभापतेः कर्त्तव्यमाह कात्यायनः।

"अथ चेत् प्रतिभूर्नास्ति वादयोग्यस्तु वादिनः।
स रक्षितो दिनस्यान्ते दद्याद्भृत्याय वेतनम्॥"

वादिनो भाषावादिनः उत्तरवादिनश्च॥ * ॥

स्वयं विवादाग्रक्तौ प्रतिनिधिमाह नारदः।

"अर्थिना संनियुक्तो वा प्रत्यर्थिप्रहितोऽपि वा।
यो यस्यार्थे विवदते तयोर्जयपराजयौ॥"

तयोर्वादिप्रतिवादिनोः। कात्यायनः।

"मनुष्यमारणे स्तेये परदाराभिमर्षणे।
अभक्ष्यभक्षणे चैव कन्याहरणदूषणे॥
पारुष्ये कूटकरणे नृपद्रोहे तथैव च।
प्रतिवादी न दातव्यः कर्त्ता तु विवदेत् स्वयम्॥"

भ्रात्रादीतरस्य प्रतिष्ठितस्य दण्डनीयत्वमाह नारदः।

"यो न भ्राता पिता वापि न पुत्रो न नियोजितः।
परार्थवादी दण्ड्यः स्यात् व्यवहारेषु विद्ववान्॥"

नारदः।

"पूर्ब्बवादं परित्यज्य योऽन्यमालम्बते पुनः।
वादसंक्रमणाज्ज्ञेयो हीनवादी स वै नरः॥"

प्रत्यर्थी यदि कश्चित् कालं प्रार्थयते स लभते। अर्थी तु कालं प्रार्थयन् अर्थित्वमेव हन्यादिति तेन कालो न प्रार्थनीयः। तदाह।

"प्रत्यर्थी लभते कालं त्र्यहं सप्ताहमेव च।
अर्थी तु प्रार्थयन् कालं तत्क्षणादेव हीयते॥"

क्वचित् प्रत्यर्थी कालं न लभते। याज्ञवल्क्यः।

"साहसस्तेयपारुष्यगोऽभिशापात्यये स्त्रियाम्।
विवादेयेत् सद्य एव कालोऽन्यत्रेच्छया स्मृतः॥"

अथ भाषापादः। तत्र भाषास्वरूपमाह कात्यायनः।

"प्रतिज्ञादोषनिर्मुक्तं साध्यं सत्कारभान्वितम्।
निश्चितं लोकसिद्धञ्च पक्षं पक्षविदो विदुः॥
स्वल्पाक्षरः प्रभूतार्थो निःसन्दिग्धो निराकुलः।
विरोधिकारणैर्मुक्तो विरोधिप्रतिरोधकः॥
यदा त्वेवंविधः पक्षः कल्पितः पूर्ब्बवादिना।
दद्यात्तत्पक्षसम्बन्धं प्रतिवादी तदोत्तरम्॥"

नारदेनापि।

"सारस्तु व्यवहाराणां प्रतिज्ञा समुदाहृता।
तद्धानौ हीयते वादी तरंस्तामुत्तरो भवेत्॥"

तच्छोधनमाह स एवः।

"न्यूनाधिकं पूर्ब्बपक्षं तावदादौ विशोधयेत्।
न दद्यादुत्तरं यावत् प्रत्यर्थी सभ्यसन्निधौ॥"

इति व्यवहारतत्त्वम्॥

वाद्यं, क्ली, (वद्+णिच्+यत्।) वादयन्ति ध्वनयन्ति यत्। वाद्यना इति भाषा। तत्पर्य्यायः। वादित्रम् २ आतोद्यम् ३। तच्चतुर्विधं यथा,

"ततं वीणादिकं वाद्यमानद्धं मुरजादिकम्।
वंश्यादिकन्तु शुषिरं कांस्यतालादिकं घनम्॥"

इत्यमरः॥

"इदं तताद्यि चतुर्विधं चतुःप्रकारं वाद्यादिशब्दवाच्यम्।

'इदं चतुर्विधं वाद्यं वादित्रादिनामकम्।'

वाद्यमितिसमस्तं प्रथमान्तं विशेष्यपदं इति कलिङ्गादयः। फलतो न विशेष्यः।" इति तट्टीकायां भरतः॥ * ॥

अथ वाद्यानि।

"तालेन राजते गीतं तालो वादित्रसम्भवः।
गरीयस्तेन वादित्रं तच्चतुर्विधमुच्यते॥
ततं शुषिरमानद्धं घनमित्थं चतुर्व्विधम्।
ततं तन्त्रीगतं वाद्यं वंश्याद्यं शुषिरं तथा॥
चर्म्मावनद्धमानद्धं घनं तालादिकं मतम्॥"*॥

तत्र ततं यथा,—

"अलावणी ब्रह्मवीणा किन्नरी लघुकिन्नरी।
विपञ्ची वल्लकी ज्येष्ठा चित्रा ज्योषवती जया॥
हस्तिका कुब्जिका कूर्म्मी सारङ्गी परिवादिनी।
त्रिशवी घोषकवती च नकुलोष्ठी च टंकवी॥
औडुम्बरी पिनाकी च निबन्धः शुष्कलस्तथा।
गदावारणहस्तश्च रुद्रोऽथ भ्रमरस्तथा।
कपिलासो मधुस्यन्दी घोषेत्यादि ततं भवेत्॥"

अलावणी यथा,—

"कनिष्ठिका परिक्षिप्तमध्यच्छिद्रेण संयुतः।
दण्डयष्टिमितो दक्षः खादिरो वैणवोऽथवा॥
अधःकरभवानूर्द्धे कृत्वालाभिशोभितः।
नवाङ्गुलादधश्छिद्रोपरि चन्द्रार्द्धसन्निभाम्॥
निवेश्य तुम्बिकां भद्रालाबुखण्डं निवेशयेत्।
द्वादशाङ्गुलविस्तारं दृढपक्वं मनोहरम्॥
तुम्बिकावेधमध्येन दक्षच्छिद्रे तु निर्म्मिताम्।
अलाबुमध्यगां डोरीं कृत्वा खल्वान्तु कारिकाम्॥
तथा संवेश्य तन्मध्ये कारिकां भ्रामयेत्ततः।
यथा स्यान्निश्चलालाबुर्ब्बन्धश्च करभोपरि॥
पञ्चाङ्गुलिषु संत्यज्यालाबुं खल्वाच्च बन्धयेत्।
केशाश्वलिम्बिता षट्कमयी सूत्रकृताथवा॥
समाः सूक्ष्मा दृढा तत्र तन्त्री देया विचक्षणैः।
एतल्लक्षणसंयोग्यालावणी प्रकीर्त्तिता॥
बिन्दुना न समुपेतं तुम्बं निःक्षिप्य वक्षसि॥
मध्यमानामिकाभ्याञ्च वाद्या दक्षिणपाणिना॥
तारे मन्द्रे च घोषे च चिरस्थाने बिन्दुरिष्यते।
तुम्बीमूलं समुत्पीड्य वामाङ्गुष्ठेन धारयेत्॥
ततस्ताभिस्तु सर्व्वाभिः स्वरशक्तिर्विधीयते।
चिरस्थो दक्षिणः प्राणिर्वामस्तच्च चतुःस्वरः॥
अलाबुरयं स्मृता ज्ञेयाः षड्ज,ऋषभादयः स्वराः।
रागशक्तिर्यथा रागे भवेत् षड्जादिभेदतः॥

अंशन्यासविभेदाच्च तथाऽत्रापि विधीयते।
इयमलावणी प्रोक्ता मनःश्रवणरञ्जनी॥
प्रत्यक्षा सारदा देवी वीणारूपेण संस्थिता॥"

इत्यलावणी॥ अन्येषां लक्षणं विस्तरभयान्नोक्तम्॥ * ॥ शुषिरं यथा,—

"वंशोऽथ पारीमधुरीतित्तिरीशृङ्गकाहलाः।
तोड़हीसुरलीवुक्काशृङ्गिकाखरनाभयः॥
शृङ्गं कापालिकं वंशश्चर्म्मवंशस्तथापरः।
इति शुषिरभेदास्तु कथिताः पूर्ब्बसूरिभिः॥
वक्त्रंशः सरलश्चैकपर्व्वदोषविवर्ज्जितः।
वैणवः खादिरो वापि रक्तचन्दनजोऽथवा॥
श्रीखण्डजोऽथ सौवर्णो दन्तिदन्तमयोऽपि वा।
राजतस्ताम्रजो वापि लौहजस्फाटिकोऽथवा॥
कनिष्ठाङ्गुलितुल्येन गर्भरन्ध्रेण शोभितः।
शिल्पविद्याप्रवीणेन वंशः कार्य्यो मनोहरः॥
वंशेनैव मतोऽपीति मतङ्गमुनिनोदितम्।
ततोऽन्येऽपि तदाकारा वंशा एव प्रकीर्त्तिताः॥
तत्र त्यक्त्वा शिरोदेशादधो द्विमितमङ्गुलम्।
फुत्कारन्ध्रं कुर्व्वीत मितमङ्गुलिपर्व्वणा॥
पञ्चाङ्गुलानि संत्यज्य तावद्रन्ध्राणि कारयेत्।
कुर्य्यात्तथान्यरन्ध्राणि सप्तसंख्यानि कौशलात्॥
बदरीबीजतुल्यानि संत्यज्यार्द्धाङ्गुलम्।
प्रान्तयोर्ब्बन्धनं कार्य्यं खरादेर्नादहेतवे॥
सिक्थकेन कला देया तेन सुखरता भवेत्।
पञ्चाङ्गुलोऽयं वंशः स्यादेकैकाङ्गुलिवर्द्धितः॥
षड़ङ्गुलानि नाना स्याद्यावदष्टादशाङ्गुलम्।
फुत्कारतारन्ध्रस्य यावदङ्गुलिमन्तरम्॥
तदेव नाम वंशस्य वांशिकैः परिकीर्त्यते॥
एकाङ्गुलो द्व्यङ्गुलश्च त्र्यङ्गुलश्चतुरङ्गुलः।
अतितारतरत्वेन वांशिकैः समुपेक्षितः॥
त्रयोदशाङ्गुलो वीणापरः।
निन्दितो वंशतत्त्वज्ञैस्तथा सप्तदशाङ्गुलः॥
महानन्दस्तथा नन्दो विजयोऽथ जयस्तथा।
चत्वार उत्तमा वंशा मतङ्गमुनिसम्मताः॥
दशाङ्गुलो महानन्दो नन्द एकादशाङ्गुलः।
द्वादशाङ्गुलमानस्तु विजयः परिकीर्त्तितः॥
चतुर्दशाङ्गुलमितो जय इत्यभिधीयते।
ब्रह्मा रुद्रो रविर्विष्णुः क्रमादत्र व्यवस्थिताः॥
नैर्विद्यं प्रौढ़ता चापि सुखरत्वञ्च प्रौढ़ता।
माधुर्य्यमिति पञ्चामी फुत्कृतेषु गुणाः स्मृताः॥
प्रौत्कारबहुलः स्तब्धो विखरः स्फुटतो लघुः।
अमधुराश्च विज्ञेयाः षड्दोषाः फुत्कृते क्रमात्॥
तथा प्रयोगबाहुल्यमल्पता गीतवादने।
एभिर्दोषैर्युतोऽतीव निन्दितो वंशिको मतः॥
स्थानकादिलयाभिज्ञो गमकाढ्यः स्फुटाक्षरः।
प्रौढ़हस्तः कलाभिज्ञो वांशिको रक्त उच्यते॥
प्रसक्तिर्बहुसक्तिश्च युक्तिश्चेत्यङ्गुलेर्गुणाः।
सुस्थानत्वं सुखरत्वं अङ्गुलीसाधनक्रिया॥
समस्तगमकज्ञानं रागरागाङ्गवेदिता।
क्रियाभाषाविभाषासु दक्षता गीतवादने॥
खस्थाने चापि दुःस्थाने नादनिर्म्माणकौशलम्।
गातुर्यां स्थानदाढ्यं तद्दोषाच्छादनं तथा॥

वांशिकस्य गुणा एते मया संक्षिप्य दर्शिताः ॥"
इति वंशाः ॥

काहला स्त्री निषङ्गः । तोड़ही मुरली वुक्का इत्येते च स्त्रियां सप्तस्वराणां नाभिरिव स्वरनाभिः स्त्रियां वर्त्तते । इतरेषां विस्तरभयान्नोक्तम् ॥ * ॥ आनद्धं यथा,—

"आनद्धे मर्दलः श्रेयान् इत्युक्तं भरतादिभिः ॥"

अपि च ।

"मुरजपटहढक्का विम्बको दर्परवाद्यं
पणवघनसरुङ्गा लावजाङ्गत्रिवल्याः ।
करटकमठभेरी स्यात् कुडुक्का हुड़क्का
झनसमुरलि झल्ली ढुक्कली दौण्डिशाना ॥
डमरुटमुकिमड्डुः कुण्डलीस्तुम्बुनामा
रणमभिघटवाद्यं दुन्दुभी च रजश्च ।
क्वचिदपि ढुढुकी स्यात् दर्दुरं चाप्युपाङ्गं
प्रकटितमनवद्यं वाद्यमित्थं जगत्याम् ॥
त्रिपुरमथनकर्त्तुस्ताण्डवे तत्प्रयोगे
ततमखशुषिरघानद्धमित्थं घनञ्च । * ।

मर्दलः खादिरः श्रेष्ठो हीनः स्यादन्यदारुजः ।
रक्तचन्दनजो वाद्यो गभीरध्वनिरुच्चकैः ॥
सार्द्धहस्तप्रमाणन्तु दैर्घ्यमस्य विधीयते ।
त्रयोदशाङ्गुलं वाममथवा द्वादशाङ्गुलम् ॥
दक्षिणञ्च भवेद्धीनमेकेनार्द्धाङ्गुलेन वा ।
करणानद्धवदनो मध्ये चैव पृथुर्भवेत् ॥
षाण्मासीयो भवेत् वत्सस्तच्चर्म्म करणं मतम् ।
मृत्तिकानिर्म्मितश्चैव मृदङ्गः परिकीर्त्तितः ॥
पातयेत् खरलिं वाद्यं मादनार्थञ्च मर्दले ।
विभूतिगैरिकं भक्तं केन्दुकेन च सम्मतम् ॥
यद्वा त्रिपीटकं देयं जीवनीसत्त्वमिश्रितम् ।
सर्व्वमेकत्र पिण्डन्तल्लेपः खरलिरुच्यते ॥
वामास्ये पूरिकां कृत्वा लेपं दद्याच्च दक्षिणे ।
एवं मर्दलकः प्रोक्तः सर्व्ववाद्योत्तमो मतः ॥
अस्य संयोगमासाद्य सर्व्वे वाद्याश्च शोभते ।
एतद्वङ्गे बीजकाष्ठे दलमर्द्धाङ्गुलं विदुः ॥*॥
तधिधोतेमिति ज्ञेयाः पाढ़वर्णा मृदङ्गजाः ।
धों दं ढिं धिक्कटस्तद्वी ताकं दं दं धोगं धिधि ॥
खर्भं झिं नं गटं दं धा कूटपाढ़ा मता अमी ।
तधिं धों ढिं तक्क धी दों दं दं धिग् णां ततं
तधि ॥
तक्क तं धं धिदों तधि पाढ़खण्डे त्रयं क्रमः ।*।
तथा च यतिमाने पाढ़खण्डः । द्रगतधेजां द्रगतधेजां धो धो धिक ताधिका धोजां धोजां तक तता धिका धोता द्रगत ताधि धि धिधिकतता कड़ना धोधिक धोजां धोता द्रगतता द्रगतता द्रगतता धि । इति यतिमानपाढ़खण्डः ॥ * ॥

"यतिरोढ़ाप्यवच्छेदो गजरो रूपकं ध्रुवम् ।
गलपः सारिगोणी च नादश्च कथितं तथा ॥
प्रहरणं वृन्दनञ्च प्रबन्धा द्वादश स्मृताः ॥"

यथा दं धात इत्येकताल्यां यतिः ॥* ॥

ओड़वाद्यं यथा । दां तधो तधिक तधिक दं धा दं धा धोधि धोधि तत्त तत्त थवि थवि दिग्गां दिग्गां टटुनकि टटुनकि तदटकु तदटकु खवटकु खवटकु तगिनगि तगिनगि दां दां दं दं दीं दीं दं ता तथा । इत्योड़वाद्यम् ॥ * ॥ अवच्छेदवाद्यं यथा । दं धातः दं धातः धिकि धिकि दिगं दं धातः । इत्यवच्छेदवाद्यम् ॥*॥ गजरवाद्यं यथा । धोकटे त्व नेत्व टिं डिं गधो गधोङ्क टेङ्क धोगतकि धिक्तकि धिक टेङ्कन धि धि कटतक धोक तधि कटतक्क कतधो गतङ्गीम् । इत्येकताल्यां गजरः ॥ * ॥ रूपकवाद्यं यथा । तक धिक तक धिक्क थवितकि थवितकि धिक्क दं धातः । इति रूपकवाद्यम् ॥ ध्रुवकवाद्यं यथा । तक्क तक्काट धिक्क धिक्काट । इति निसारुताले ध्रुवकः ॥ * ॥ गलपो यथा । तधिद्धि धिकतक तधिगल गं धा धा दें तथा टेत्वन । इत्येकताल्यां गलपः ॥*॥ सारिगोणी यथा । धोङ्ग टेत्व तक्क धिक्क तकाधक तकधो हटङ्गन हटङ्गन धोगककधोः । इति प्रथमखण्डः ॥ * ॥ टेत्वखोः धिखोहः टेत्व टेत्व दक्क तगदक्क धिक्क तदिदक्क दं गदं गखो गखोक तक तक धिकत धिकत धोढ़ेत्व धोटेत्व धटेगल खोग गल खोग खोहट गें टगें खोहटत्व इत्यस्य छन्दनम् । इति सारिगोणी ॥ * ॥ नादो यथा,—

"दांकारचितयं पूर्व्वं दां धिगिति ततस्त्रयम् ।
दां दां धिकत्रयं यत्र इति नादः शुचीप्रियः ॥"
इति नादः ॥

"हृतं मानसमारब्धं शुद्धं कूटविनिर्म्मितम् ।
सप्तषण्डमयं वाद्यं करिभं तदिहोच्यते ॥"

हृतमानद्धात् प्रतितालेे यथा । तत्तत तत्तत तक्कि तक्कि दिदं धिगनखो धिगनखो धिक्क धिक धिक्क धिक्क धिक नगि नगमि धो धो धि धि धिः दां दां धिक्क धो धो धो हत्योह नखिथो नखिथो धोह धोह डेढि डेढि धोह धोह तटि तटि तटुक गीं गीं धगि धगि तत तधे तधे तत तगि डीखडी धोग धोग धों धोग गधो गधो तत्तता ।

"इति सप्तपदान्याहुः कथितं वाद्यपण्डिताः ।
प्रतितालेन तालेन पादवर्णसमासतः ॥
गन्धर्व्वपतिना पूर्व्वमुर्व्वशीलास्यनर्त्तने ।
सुधर्म्मारङ्गनार्थञ्च करीभं प्रकटीकृतम् ॥"

प्रहरणं यथा । धोगक्का तद्धिकाथा गकटग गीं दं धोग दिद्धिक धिक्क धिकटेत्व । इत्येकताल्यां प्रहरणम् ॥

"वाद्यं विमुच्यते येन छन्दनं तन्निगद्यते ।"

यथा । तद्धिधो दिग्न टेत्व तन्नः । इति छन्दनम् ॥

"कलाखो विकलासश्च टाकली चार्द्धटाकली ।
जोलाटा कलिका चैव गोमुखी सुरजस्तथा ॥"

अलावुजवाद्यं म्लेच्छवाद्यम् । मर्दलः त्रयोदशाङ्गुलवामसुखो द्वादशाङ्गुलदक्षिणसुखः । सुरजस्त्वष्टादशाङ्गुलवामसुखः सप्तदशाङ्गुलदक्षिणसुखः । मर्दलसुरजयोरयं भेदः ॥ * ॥ घनं यथा,—

"अनुरक्तं विरक्तञ्च द्विविधं घनवाद्यकम् ।
गीतानुगमनुरक्तं विरक्तं तालसंश्रयम् ॥
करतालः कांस्यबलो जयघण्टोऽथ शुक्तिका ।
कम्बिका पटवाद्यश्च पट्टातोघश्च घर्घरम् ॥
झञ्झातालश्च मञ्जीरकर्त्तर्य्युङ्कर इत्यपि ।
द्वादशेते मुनीन्द्रेण कथिता घनसंज्ञकाः ॥
त्रयोदशाङ्गुलव्यासौ शुद्धकांस्यविनिर्म्मितौ ।
मध्यमुखौ स्तनाकारौ तन्मध्ये रज्जुगुम्फितौ ॥
पद्मिनीपत्रसदृशौ कराभ्यां रज्जुयन्त्रितौ ।
करतालावुभौ वाद्यौ पाढ़े झनटकेरिति ॥
यद्वा त्रयोदशयवव्यासं वक्त्रयवोन्मितम् ।
यवपञ्चकगम्भीरं मध्ये च यवसप्तकम् ॥
विस्तृतं वर्त्तुलं निम्नं यवत्रयमितं ततः ।
पृष्ठतो मध्यदेशे च शिवलिङ्गसमाकृतिम् ॥
अत्यच्छपेशीनिर्दग्धशुद्धकांस्यविनिर्म्मितम् ।
संरक्ताङ्गुलिसुस्निग्धसुदीर्घमधुरध्वनिम् ॥
घना निसा विसंरक्तं दृढ़ं शुष्कं मनोहरम् ।
काश्मीरादिसमुद्भूतं तालमाहुर्मनीषिणः ॥
सुनादं दक्षिणं तालं ततो हीनञ्च वामकम् ।
कुर्व्वीत तद्वयं कार्य्यं तर्ज्जन्यङ्गुष्ठयोर्गतः ॥
वामहस्तस्थतालस्य मध्यमं सन्निनादितम् ।
तिर्य्यग्दक्षिणतालस्य परिवंशेन ताडयेत् ॥
तालादौ वादयेच्चैव प्लुतदीर्घलघुद्रुतैः ॥"

इति करतालविशेषः । कर्त्तरीघनविशेषः । उङ्कुरश्च घनविशेषोऽन्तरेफान्तपुंलिङ्गः । अन्येषां लक्षणं विस्तरभयान्नोक्तम् ॥ * ॥

"रुक्मिण्याः सत्यभामायाः कालिन्दीमित्र-
विन्दयोः ।
जाम्बवत्या नाग्नजित्या लक्ष्मणाभद्रयोरपि ॥
कृष्णस्याष्टमहिषीणां पुरोद्वाहमहोत्सवे ।
ततं शुषिरमानद्धं घनञ्च युगपज्जनाः ॥
अवादयन्नसंख्यातमिति पौराणिकी श्रुतिः ।
ततं वाद्यन्तु देवानां गन्धर्व्वाणाञ्च शौषिरम् ॥
आनद्धं राक्षसानान्तु किन्नराणां घनं विदुः ।
निजावतारे गोविन्दः सर्व्वमेवानयत् क्षितौ ॥
यावन्ति वाद्यभाण्डानि रामरावणयोर्युधि ।
तावन्तो नाभवन् सेनाः कुरुपाण्डवसङ्गरे ॥"

किञ्च ।

"लिलिम्प चूत्कम्पनतोमरेण
रणे सुरारेर्मथनात् सुरेण ।
अभूत्तदाद्यैरपि सिंहनादैः
सा पञ्चशब्दीति कणादवादः ॥

युद्धे सैन्यानां योऽहङ्काररवः स सिंहनादः । ततादिभिरेभिश्चतुर्भिर्वाद्यैश्चमूनां सिंहनादेश्च पञ्चशब्दीवाद्यमभूत् । सिंहनादेन सह वाद्यं पञ्चविधं भवतीत्यर्थः । इति सङ्गीतदामोदरः ॥

विष्णुगृहे वाद्यकरणफलं यथा,—

"अन्योन्यप्रहारैर्विविधैर्घृतक्षीराभिषेचनैः ।
गीतवाद्यनृत्याद्यैस्तोषयित्वाच्युतं नृप ॥
पुण्यरात्रिषु गोविन्दं गीतनृत्यरवोज्ज्वलैः ।
भूपजागरणैर्भक्त्या तोषयाच्युतमव्ययम् ॥
येषां न वित्तं तैर्भक्त्या मार्জ্জनाद्युपलेपनैः ।

तोषितो भगवान् विष्णुर्ददात्यभिमतं फलम् ॥
देवकर्म्मणि सक्तानां तेषां संस्तुतिसंस्तवैः ।
तोषितोऽभिमतान् कामान् प्रयच्छति जनार्द्दनः ॥"

इति वह्निपुराणे क्रियायोगनामाध्यायः ॥

देवप्रतिष्ठायां वाद्यविधिर्यथा,—

"ततः प्रासादे स्थाप्योऽहं गीतवादित्रमङ्गलैः ।
सर्व्वगन्धांस्ततो गृह्य इमं मन्त्रमुदाहरेत् ॥"

इति वाराहे शैलाचीस्थापनाध्यायः ॥

देवताविशेषगृहे वाद्यविशेषनिषेधो यथा । योगिनीतन्त्रे ।

"शिवागारे भल्लकञ्च सूर्य्यागारे च शङ्खकम् ।
दुर्गागारे वंशीवाद्यं माधुरीञ्च न वादयेत् ॥"

भल्लकं कांस्यनिर्म्मितकरतालम् । मत्स्यपुराणे ॥

"गीतवादित्रनिर्घोषं देवस्याग्रे च कारयेत् ।
विरिञ्चेश्च गृहे टक्कां घण्टां लक्ष्मीगृहे त्यजेत् ॥
घण्टा भवेदग्रतस्तस्य सर्व्ववाद्यमयी यतः ॥"

इति तिथ्यादितत्त्वम् ॥

वाद्यभाण्डं, क्ली, (वाद्यं वादनीयं भाण्डमिति ।) वादनीयपात्रम् । सुरजादि । यथा,—

"पुष्करं करिहस्ताग्रे वाद्यभाण्डमुखे जले ।"

इत्यमरश्लोकटीकायां भरतः ॥

अपि च ।

"वाद्यभाण्डमिदं देवि ! नानास्वरसमन्वितम् ।
भेरीपटहसंयुक्तं मया भक्त्या निवेदितम् ॥"

इति दुर्गोत्सवपद्धतिः ॥

वाध, ऋ ङ विहतौ । इति कविकल्पद्रुमः । ऋ, अवबाधते । ङ, बाधते । इति दुर्गादासः ॥

वाधुक्यं, क्ली, विवाहः । इति त्रिकाण्डशेषः ॥

वाधूः, पुं, वह्निचम् । इति शब्दरत्नावली ॥

वाध्रीणसः, पुं, वाड्र्ढीणस्यापत्यम् । खड्गी । इति हलायुधः ॥

वानं, त्रि, (वो वे प्रोषणे + क्तः । ओदितश्चेति नत्वम् ।) शुष्कफलम् । इत्यमरः ॥ शुष्कम् । इति मेदिनी । ने, २० ॥ (वनस्येदमिति । वन + अण् ।) वनसम्बन्धी ॥

वानं, क्ली, (वा + ल्युट् ।) सूतिकर्म्म । कटः । गतिः । इति मेदिनी । ने, २० ॥ जलसंप्लुतवातोर्म्मिः । सुरङ्गा । सौरभः । इति हेमचन्द्रः ॥ गोक्षीरजं तक्रक्षीरम् । इति राजनिर्घण्टः ॥

वानप्रस्थः, पुं, (वनप्रस्थे जातः । अण् ।) मधूकवृक्षः । (अस्य पर्य्यायो यथा,—

"मधूको गुड़पुष्पः स्यान्मधुपुष्पो मधुस्रवः ।
वानप्रस्थो मधुष्ठीलो जलजेचमधूलकः ॥"

इति भावप्रकाशस्य पूर्ब्बखण्डे प्रथमे भागे ॥)

पलाशवृक्षः । (अस्य पर्य्यायो यथा,—

"वातपोथः पलाशः स्याद्वानप्रस्थश्च किंशुकः ।
राजादनो ब्रह्मवृक्षो हस्तिकर्णो दलोऽपरः ॥"

इति वैद्यकरत्नमालायाम् ॥)

तृतीयाश्रमः । इति विश्वमेदिन्यौ ॥ * ॥ पुत्रमुत्पाद्य वनवासं कृत्वा अकृष्टपच्यफलादि भक्षयित्वा ईश्वराराधनं करोति यः स वानप्रस्थः ।

स च द्विविधः । अग्न्याकृष्टः दन्तोदूखलिकश्च । इति श्रीभागवतमतम् ॥ तस्य धर्म्मो यथा,—

"भूमौ मूलफलाग्नित्वं स्वाध्यायस्तप एव च ।
संविभागो यथान्यायं धर्म्मोऽयं वनवासिनः ॥
तपस्तप्यति योऽरण्ये यजेद्देवान् जुहोति च ।
स्वाध्याये चैव निरतो वनस्थस्तापसो मतः ॥
तपसा कर्षितोऽत्यर्थं वस्तु ध्यानपरो भवेत् ।
सन्यासीह स विज्ञेयो वानप्रस्थाश्रमे स्थितः ॥"

इति गारुड़े ४६ अध्यायः ॥

अपि च ।

याज्ञवल्क्य उवाच ।

"वानप्रस्थाश्रमं वक्ष्ये तत् शृणुध्वं महर्षयः ।
पुत्रेषु भार्य्यां निःक्षिप्य वनं गच्छेत् सहैव वा ॥
वानप्रस्थो ब्रह्मचारी साग्निः सोपासनः क्षमी ।
अफालकृष्टैर्नामीच्च पितृदेवातिथीँस्तथा ॥
भृत्यांस्तु तर्पयेत् प्रस्रुजटालोमभृदात्मवान् ।
दान्तक्षितवणस्नायी निष्टत्तश्च प्रतिग्रहात् ॥
स्वाध्यायवान् ध्यानशीलः सर्व्वभूतहिते रतः ।
अष्टौ मासस्य षण्मासं वा कुर्य्याद्वानप्रपरिग्रहम् ॥
कृत्वं त्यजेदाश्वयुजे नयेत् कालं व्रतादिना ।
पञ्चे मासे तु वाश्नीयादृन्तोलूखलिको भवेत् ॥
चान्द्रायणी क्षपेद्भूमौ कर्म्म कुर्य्यात् फलादिना ।
यौम्ये पञ्चाग्निमध्यस्थो वर्षासु स्थण्डिलेशयः ।
आर्द्रवासास्तु हेमन्ते योगाभ्यासाद्दिनं नयेत् ॥"

इति गारुड़े १०२ अध्यायः ॥

पुनरपि ।

"जटित्वमग्निहोत्रित्वं भूशय्याजिनधारणम् ।
वने वासः पयो मूलं नीवारफलवृत्तिता ॥
प्रतिग्रहान्निवृत्तिश्च चिह्नानं व्रतधारिता ।
देवतातिथिपूजा च धर्म्मोऽयं वनवासिनः ॥"

इति गारुड़े २१५ अध्यायः ॥

अन्यच्च ।

"वानप्रस्थाश्रमं धर्म्मं ते वक्ष्यामोऽवधार्य्यताम् ।
अपत्यसन्ततिं दृष्ट्वा प्राज्ञो देहस्य चायतिम् ॥
वानप्रस्थाश्रमं गच्छेदात्मनः शुद्धिकारणम् ।
तत्रारण्योपभोगेन तपोभिश्चात्मदर्शनम् ।
भूमौ शय्या ब्रह्मचर्य्यं पितृदेवातिथिक्रिया ॥
होमस्त्रिषवणस्नानं जटावल्कलधारणम् ।
वन्यस्नेहनिषेवित्वं वानप्रस्थविधिस्त्वयम् ॥"

इति वामने १४ अध्यायः ॥

अपरञ्च ।

व्यास उवाच ।

"एवं गृहाश्रमे स्थित्वा द्वितीयं भागमायुषः ।
वानप्रस्थाश्रमं गच्छेत् सदारः साग्निरेव च ॥
निःक्षिप्य भार्य्यां पुत्रेषु गच्छेद्वनमथापि वा ।
दृष्ट्वापत्यस्य चापत्यं जर्ज्जरीकृतविग्रहः ॥
शुक्लपक्षस्य पूर्ब्बाह्णे प्रशस्ते चोत्तरायणे ।
गत्वाप्यरण्यनियमांस्तप कुर्य्यात् समाहितः ॥
फलमूलानि पत्राणि नित्यमाहारमाहरेत् ।
यदाहारो भवेत्तेन पूजयेत् पितृदेवताः ॥
पूजयेदतिथिं नित्यं स्नात्वा चाभ्यर्चयेत् सुरान् ।
ग्रामादानीय वाश्नीयादद्यो ग्रासान् समाहितः ॥
जटाश्च विभृयान्नित्यं नखरोमाणि नो त्यजेत् ।
स्वाध्यायं सर्व्वदा कुर्य्यात् नियच्छेद्वाचमन्यतः ॥
अग्निहोत्रन्तु जुहुयात् पक्षयज्ञं समाचरेत् ।
मुन्यन्नैर्विविधैर्मेध्यैः श्राकमूलफलेन तु ॥
चीरवासा भवेन्नित्यं स्नायात् त्रिषवणं शुचिः ।
सर्व्वभूतानुकम्पी स्यात् प्रतिग्रहविवर्जितः ॥
दर्शेन पौर्णमासेन यजेत नियतं द्विजाः ।
पक्षेष्टया आग्रयणे चैव चातुर्मास्यानि चाहरेत् ॥
उत्तरायणञ्च क्रमशो दक्षस्यायनमेव च ।
वासन्तशारदैर्मेध्यैर्मुन्यन्नैः स्वयमाहरेत् ॥
पुरोडाशं गुरूंश्चैव विधिवन्निर्व्वपेत् पृथक् ।
देवताभ्यश्च तद्धुत्वा वन्यं मेध्यतरं हविः ॥
शेषं समुपभुञ्जीत लवणञ्च स्वयं कृतम् ।
वर्ज्जयेन्मधुमांसादि भौमानि करकाणि च ॥
भूस्तृणं शिग्रुकञ्चैव श्लेष्मातकफलानि च ।
न फालकृष्टमश्नीयात् उत्तृष्टमपि केनचित् ॥
न ग्रामजातान्यार्त्तो वा पुष्पाणि च फलानि च ।
आग्रयणे चैव विधिना वह्निं परिचरेत् सदा ॥
न हिंस्यात् सर्व्वभूतानि निर्हिंस्रो निर्भयो भवेत् ।
न नक्तं किञ्चिदश्नीयात् रात्रौ ध्यानपरो भवेत् ॥
जितेन्द्रियो जितक्रोधस्तत्त्वज्ञानविचिन्तकः ।
ब्रह्मचारी भवेन्नित्यं न पत्नीमपि संश्रयेत् ॥
यस्तु पत्न्या वनं गत्वा मैथुनं कामतश्चरेत् ।
तद्व्रतं तस्य लुप्येत प्रायश्चित्ती भवेत् द्विजः ॥
तत्र यो जायते गर्भो न संस्कृष्टो द्विजातिभिः ।
न हि वेदाधिकारोऽस्य तत्त्वमप्येवमेव हि ॥
अधः शयीत सततं सावित्रीजपतत्परः ।
शरण्यः सर्व्वभूतानां संविभागपरः सदा ॥
परिवादं मृषावादं निद्रालस्येऽपि वर्ज्जयेत् ।
एकाग्निरनिकेतः स्यात् प्रोक्षितां भूमिमाश्रयेत् ॥
मृगैः सह चरेद्वासं तैः सहैव च संवसेत् ।
शिलायां शर्करायां वा शयीत सुसमाहितः ॥
सदाः प्रचालको वा स्यात् मासषट्चयिकोऽपि वा ।
षण्मासनिचयो वा स्यात् समानिचय एव वा ॥
नक्तभोजनं समश्नीयात् दिवा वाक्षत्य शक्तितः ।
चतुःकालिकिको वा स्यात् स्याद्वा अष्टमकालिकः ॥
चान्द्रायणविधानैर्वा शुक्ले कृष्णे च वर्ज्जयेत् ।
पक्षे पक्षे समश्नीयात् यवागुं कथितां तथा ॥
पुष्पमूलफलैर्वापि केवलैर्व्वर्त्तयेत् सदा ।
स्वाभाविकैः स्वयं शीर्णैर्व्वैखानसमते स्थितः ॥
भूमौ वा परिवर्त्तेत तिष्ठेद्वा प्रपदैर्दिनम् ।
स्थानासनाभ्यां विहरेत् न क्वचिद्वैर्य्यमुत्सृजेत् ॥
ग्रीष्मे पञ्चतपाश्च स्यादर्षास्वभ्रावकाशिकः ।
आर्द्रवासास्तु हेमन्ते क्रमशो वर्त्तयंस्तपः ॥
उपस्पृश्य त्रिषवणं पितृदेवांश्च तर्पयेत् ।
एकपादेन तिष्ठेत मरीचीर्वा पिबेत् सदा ॥
पञ्चाग्निधूमपो वा स्याद्वायुभक्षः सोमपोऽथवा ।
पयः पिबेत् शुक्लपक्षे कृष्णपक्षे तु गोमयम् ॥
शीर्णपर्णाशनो वा स्यात् कृच्छ्रैर्वा वर्त्तयेत्सदा ।
योगाभ्यासरतो वा स्यादनाध्यायी भवेत् सदा ॥

वानरी

अथर्वशिरसोपेतो वेदान्ताभ्यासतत्परः ।
यमान् सेवेत सततं नियमांश्चाप्यतन्द्रितः ॥
कृष्णाजिनी सोत्तरीयः शुक्लयज्ञोपवीतवान् ।
अथवाग्नीन् समारोप्य स्वात्मनि ध्यानतत्परः ॥
अनग्निरनिकेतः स्यान्मुनिर्मोक्षपरो भवेत् ।
तापसेष्वव विप्रेषु याचिकं भैक्षमाहरेत् ॥
गृहमेधिषु चान्येषु द्विजेषु वनवासिषु ।
ग्रामादाहृत्य वाग्नीयादक्षौ ग्रासान् वने वसन् ॥
प्रतिगृह्य पुटेनैव पाणिना सकलेन वा ।
विविधाश्चोपनिषद आत्मसंसिद्धये जपेत् ॥
विद्याविशेषान् सावित्रीं रुद्राध्यायं तथैव च ।
महाप्रस्थानिकञ्चासौ कुर्य्यादनशनन्तथा ॥
अग्निप्रवेशमन्यद्वा ब्रह्मार्पणविधौ स्थितः ॥

ये तु सम्यगिममाश्रमं श्रिव-
माश्रयन्त्यग्निवपुञ्जनाशनम् ।
ते विशन्ति परमेश्वरं परं
यान्ति चैव जगतोऽस्य संस्थितिम् ॥"

इति कूर्म्मपुराणे उपविभागे २६ अध्यायः ॥
अन्यत् विष्णुपुराणे ३ अंशे ६ अध्याये द्रष्टव्यम् ॥

वानरः, पुं, स्त्री, (वा विकल्पितो नरः । यद्वा, वानं वने भवं फलादिकं राति ददातीति । रा + कः ।) स्वनामख्यातपशुः । वाँदर इति भाषा । तत्पर्य्यायः । कपिः २ प्लवङ्गः ३ प्लवगः ४ शाखामृगः ५ वलीमुखः ६ मर्कटः ७ कीशः ८ वनौकाः ९ । इत्यमरः ॥ मर्कः १० प्लवः ११ प्रवङ्गः १२ प्रवगः १३ प्लवङ्गमः १४ प्रवङ्गमः १५ गोलाङ्गूलः १६ कपित्थास्यः १७ दधिशोणः १८ हरिः १९ तरुमृगः २० नगाटनः २१ भर्म्मी २२ भम्भारुः २३ कलिप्रियः २४ । इति शब्दरत्नावली ॥ किखिः २५ शालावृकः २६ इति जटाधरः ॥ (एतद्धनने प्रायश्चित्तं यथा, मनुः । ११ । १३६ ।

"हत्वा हंसं बलाकाञ्च बकं बर्हिणमेव च ।
वानरं श्येनभासौ च स्पर्शयेत् ब्राह्मणाय गाम् ॥")

वानरप्रियः, पुं, (वानराणां प्रियः ।) क्षीरिवृक्षः । इति रत्नमाला ॥

वानराक्षः, पुं, (वानराणामक्षिणीव अक्षिणी यस्य ।) वनच्छागः । इति हारावली ॥

वानराघातः, पुं, (वानराणामाघातो यत्र ।) लोध्रवृक्षः । इति शब्दचन्द्रिका ॥

वानरी, स्त्री, (वानरस्य स्त्री । ङीष् ।) मर्कटी । (यथा, कथासरित्सागरे । १२३ । ६२ ।

"अथावतीर्य्य वृक्षात् तौ वानरो वानरी च सा ।
अवतीर्णस्य मे पादावगृह्णीतामुभावपि ॥")

शूकशिम्बी । इति शब्दरत्नावली ॥ (वानरस्येयमिति । वानर + अण् + ङीष् । वानरसम्बन्धिनी । यथा, महानाटके ।

"सुग्रीवे करुणा न सा हि करुणा लभ्या धरा वानरी ।
मय्येषा करुणा तवैव भविता नो वा भवेत् कुत्रचित् ॥")

वान्तिदा

वानरेन्द्रः, पुं, (वानराणामिन्द्रः ।) सुग्रीवः । इति शब्दरत्नावली ॥

वानलः, पुं, वातयः । इति शब्दचन्द्रिका ॥ क्षणावावुर इति ख्यातः ॥

वानस्पत्यः, पुं, (वनस्पतौ भवः । वनस्पति + "दित्यदित्यादित्येति ।" ४ । १ । ८५ । ण्यः ।) पुष्पजातफलवृक्षः । स तु आम्रजम्बादिः । इत्यमरः ॥ (वनस्पतीनां समूहः । "दित्यदित्येति ।" ण्यः । वनस्पतिसमूहे, क्लीवे । इति काशिका ॥ वनस्पतिजाते, त्रि । यथा, वाजसनेयसंहितायाम् । १ । १४ ।

"अद्रिरसि वानस्पत्यः ।"

"हे उदूखल त्वं यद्यपि वानस्पत्यः दारुमयस्तथापि दृढ़त्वात् अद्रिरसि ।" इति तद्भाष्ये महीधरः ॥ यथाच, महाभारते । ३ । १२१ । ४ ।

"तस्य सप्तसु यज्ञेषु सर्व्वमासौद्धिरण्मयम् ।
वानस्पत्यञ्च भौमञ्च यद्द्रव्यं नियतं मखे ।
चषालयूपचमसाः स्रुक्स्रुवाः पात्र्यः स्रुचः
सुवाः ॥")

वाना, स्त्री, वर्त्तिकापक्षी । इति जटाधरः ॥

वानायुः, पुं, देशविशेषः । स तु भारतवर्षस्य उत्तरपश्चिमे वर्त्तते । इति शब्दरत्नावली ॥

वानायुजः, पुं, (वनायौ देशविशेषे जायते इति । जन् + डः ।) वनायुदेशोत्पन्नघोटकः । इत्यमरः ॥

वानीरः, पुं, वेतसवृक्षः । इत्यमरः ॥ वाञ्जुल इति ख्यातवृक्षश्च । तत्पर्य्यायः । वृत्तपुष्पः २ शाखालः ३ जलवेतसः ४ व्याधिघातः ५ परिव्याधः ६ नादेयः ७ जलसम्भवः ८ । अस्य गुणाः । तिक्तत्वम् । शिशिरत्वम् । रक्तोष्णत्वम् । व्रणशोधनत्वम् । पित्तास्रकफदोषनाशित्वम् । संग्राहित्वम् । कषायत्वञ्च । इति राजनिर्घण्टः ॥

वानीरकः, पुं, (वानीर इव प्रतिकृतिः । इवार्थे कन् ।) मुञ्जतृणम् । इति राजनिर्घण्टः ॥

वानीरजं, क्लीं, कुष्ठम् । इति राजनिर्घण्टः ॥

वानेयं, क्लीं, (वने जले भवम् । वन + ढक् ।) केवर्त्तिमुस्तकम् । इत्यमरः ॥

वान्तः, त्रि, वमितवस्तु । वमधातोः कर्म्मणि क्तप्रत्ययेन निष्पन्नः ॥ (यथा, साहित्यदर्पणे ।

"क्तप्रवृत्तिरन्यार्थे कविर्वान्तं समश्नुते ॥")

वान्ताद्यः, पुं, (वान्तं अत्तीति । अद् + अण् ।) कुक्कुरः । इति त्रिकाण्डशेषः ॥

वान्तिः, स्त्री, (वम् + क्तिन् ।) वमनम् । वाँति इति भाषा । यथा,—

"वान्तिरुल्लेखनं छर्द्दिर्वमनं वमथुर्व्वमिः ॥"

इति रत्नमाला ॥

वान्तिकृत्, पुं, (वान्तिं करोतीति । कृ + क्विप् ।) लौहकण्टकवृक्षः । इति शब्दचन्द्रिका ॥ मयना इति भाषा ॥

वान्तिदा, स्त्री, (वान्तिं वमनं ददातीति । दा + कः । टाप् ।) कटुकीवृक्षः । इति शब्दचन्द्रिका ॥

वापी

वान्या, स्त्री, (वनानां समूह इति । वन + यत् । टाप् ।) वनसमूहः । इति शब्दरत्नावली ॥

वापः, पुं, वपनम् । वपधातोर्घञ्प्रत्ययेन निष्पन्नः ॥ (यथा, महाभारते । ३ । ३४ । १६ ।

"कालं प्रतीक्षस्व सुखोदयस्य
पङ्क्तिं फलानामिव बीजवापः ॥"

मुण्डनम् । यथा, मनौ । ११ । १०६ ।

"उपपातकसंयुक्तो गोघ्नो मांसं यवान् पिबेत् ।
क्षतवापो वसेन्नोष्ठे चर्म्मणा तेन संवृतः ॥"

उप्यते अस्मिन्निति । वप् + अधिकरणे घञ् । चेर्चं इति । ५ । १ । ४५ । पाणिनीयसूत्रे भट्टोजिदीक्षितः ॥ तन्त्वादेर्वयनं वापदण्डादिदर्शनात् ॥)

वापकः, त्रि, वपनकारयिता । आन्तवपधातोः कर्त्तरि णकप्रत्ययेन निष्पन्नः ॥

वापदण्डः, पुं, (वापाय वपनाय दण्डः ।) वपनार्थदण्डः । वेँड़ इति भाषा । तत्पर्य्यायः । वेमा २ । इत्यमरः ॥ वेम ३ वैमः ४ वायदण्डः ५ । इति भरतः ॥

वापिः, स्त्री, (उप्यते पद्मादिकमस्यामिति । वप् + "वसिवपियजिराजिव्रजीति ।" उणा० ४ । १२४ । इति इञ् ।) वापी । इति भरतद्विरूपकोषः ॥

वापितं, त्रि, (वप् + णिच् + क्तः ।) बीजाक्षतम् । मुण्डितम् । इति मेदिनी । ते, १५० ॥ धान्यविशेषे, क्ली । वाओया धान इति भाषा । तस्य गुणः ।

"वापितं गुरु तद्वान्यं किञ्चिद्धीनमवापितम् ॥"

इति राजवल्लभः ॥

वापी, स्त्री, (वापि + ऋदिकारादिति ङीष् ।) दीर्घिका । इत्यमरः । १ । १० । २८ ॥ उप्यते पद्मादिकं अस्याम् । वाप्यां वापिरपि स्मृता । इति द्विरूपकोषः ॥ इति तट्टीकायां भरतः ॥*॥ तस्या लक्षणं यथा । नद्यवर्द्धमानभृतो वर्गिष्ठः । प्रतेन धनुर्भिः पुष्करिणी । त्रिभिः प्रतेर्दीर्घिका । चतुर्भिर्द्रोणः । पञ्चभिस्तडागः । द्रोणाद्यग्रगुणा वापी । तेन चतुर्हस्तु पञ्चहस्तान्यूनतायां द्वादशग्रप्रतहस्तान्तरान्यूनत्वेन दीर्घिका । चतुर्हस्तु चत्वारिंशद्धस्तान्यूनतायां षोड़शग्रप्रतहस्तान्तरान्यूनत्वेन द्रोणः । चतुर्हस्तु त्रिंशद्धिकशतहस्तान्यूनतायां षोड़शसहस्रहस्तान्तरान्यूनत्वेन वापी । इति जलाशयोत्सर्गतत्त्वम् ॥ * ॥ तत्खननफलं यथा,—

"यो वापीमथवा कूपं देशे वारिविवर्जिते ।
खानयेत् स दिवं याति बिन्दौ बिन्दौ घृतं समाः ॥"

इति कल्पतरौ वायुपुराणम् ॥

तज्जलगुणाः ।

"वाप्यं गुरु कटु क्षारं पित्तलं कफवातजित् ।"

इति राजवल्लभः ॥

तत्खनने दिङ्निषेधो यथा,—

"वापीकूपतड़ागं वा प्रासादं वा निकेतनम् ।
न कुर्य्याद्दक्षिणामस्तु अनलानिलनैर्ऋते ॥

आग्नेय्यां मनसस्तापो नैर्ऋते क्रूरकर्म्मकृत्।
वायव्यां बलवित्तञ्च पीयमाने जले प्रिये॥
स्थानस्य पावके भागे वापीकूपतड़ागकम्।
अग्निदाहं सदा कुर्य्यात् समानुदचतुष्पदाम्॥
नैर्ऋते पीयमानन्तु आत्मना दुःखितो भवेत्।
कन्यापि तज्जलं पीत्वा पतिं गृह्णाति कामतः॥

इति देवीपुराणे नन्दाकुण्डप्रवेशाध्यायः॥

तत्कर्म्मफलं यथा,—

भूर्म्मिल उवाच।

"तड़ागोदकवापीनां कृतानामिह यत् फलम्।
विप्रेणेव पितश्रेष्ठ वक्तुमर्हस्यशेषतः॥

यम उवाच।

धर्म्मस्यार्थस्य कामस्य यशसञ्च द्विजोत्तम।
तड़ागं सुप्रभूतानु परमायतनं स्मृतम्॥
देवताः पितरो नागा गन्धर्व्वा यक्षराक्षसाः।
पशुपक्षिमनुष्याश्च संश्रयन्ति जलाशयम्॥
कृत्स्नं तारयते वंशं पश्य स्नाते जलाशये।
गावः पिबन्ति पानीयं मनुष्याः पशवस्तथा॥
प्रस्रष्टौ तड़ागेषु सलिलं यस्य तिष्ठति।
अग्निष्टोमफलं तस्य प्रवदन्ति मनीषिणः॥
येषां शिशिरकाले तु पानीयं प्रतितिष्ठति।
वाजपेयातिरात्राभ्यां फलं विन्दन्ति मानवाः॥
वसन्ते चैव ग्रीष्मे तु सलिलं यस्य तिष्ठति।
राजसूयाश्वमेधाभ्यां स फलं समुपाश्नुते॥
तड़ागं सर्व्वसत्त्वानां जीवनन्तु दिवानिशम्।
तस्मात् सर्व्वात्मना वत्स तड़ागमिह कारयेत्॥
कृत्स्नं हि तारयेद्वंशं पुरुषस्य न संशयः।
सावतारः कृतः कूपः सम्भूतजलस्तथा॥
यस्य स्वादुजलं कूपे पिबन्ति सततं जनाः।
स नरो विरजो लोके देववद्दिवि मोदते॥
पीत्वेक्षुरसं क्षीरं दधि मधु सुरासवम्।
तावत् पिपासा नापैति यावत्तोयं न पीयते॥
जीवन्ति चान्नरहिता दिवसानि बहून्यपि।
लवित्तस्तोयरहितो दिनमेकं न जीवति॥
तस्माद्ददाति यो नित्यं पानीयं प्राणिनामिह।
स ददाति नरः प्राणान् माभूत्ते ह्यत्र संशयः॥
प्राणदानात् परं नाम नान्यद्दानं हि विद्यते।
तस्माद्वापीञ्च कूपांश्च तड़ागानि च कारयेत्॥
सदृत्तानि हि विप्रर्षे यदीच्छेत् श्रियमात्मनः।
शुष्कं परनिपानन्तु यः कारयति शक्तितः।
सन्तारयति भूयोऽपि द्विगुणं तस्य वै फलम्॥"

इति वह्निपुराणे तड़ागवृत्तप्रशंसानामाध्यायः॥

वापीहः, पुं, (वापीं जहातीति। हा त्यागे + कः। पाने वापीजलवर्ज्जनादस्य तथात्वम्।) चातकपक्षी। इति त्रिकाण्डशेषः॥

वाप्यं, क्ली, (वाप्यां भवमिति। वापी + "दिगादिभ्यो यत्।"४। ३। ५४। इति यत्।) कुष्ठौषधम्। इत्यमरः। १। ४। १२६॥ वापीभवे, त्रि॥ (यथा, सुश्रुते सूत्रस्थाने ४५ अध्याये।
"तड़ागं वातलं स्वादु कषायं कटुपाकि च।
वातश्लेष्महरं वाप्यं सचारं कटुपित्तलम्॥"
वप् + ण्यत्।) वपनीये च, त्रि॥

वामं, क्ली, (वा + "अर्त्तिसुसुहृसृधृक्षीति।" उणा० १। १३६। इति मन्।) धनम्। इति मेदिनी। मे, २६॥ वास्तूकम्। इति जटाधरः॥

वामः, त्रि, (वमति वम्यते वेति। वम उद्गिरणे + "ज्वलितिकसन्तेभ्यो णः।" ३। १। १४०। इति णः। यद्वा, वातीति। वा गतिगन्धनयोः + "अर्त्तिसुसुहृसृधृक्षिक्षुभाया वापदीति। उणा० १। १३६। इति मन्।) वल्गुः। (यथा, रघौ। ७। ५७।
"स दक्षिणं तूणमुखेन वामं
व्यापारयन् हस्तमलक्ष्यताजौ।
आकर्णकृष्टा सकृदस्य योद्धुः
मौर्व्वीव बाणान् सुषुवे रिपुघ्नान्॥")
प्रतीपः। (यथा, वैराग्यशतके। ५३।
"दुःखेनोपार्ज्जयन्ते पाल्यन्ते प्रत्यहञ्च लाल्यन्ते।
वामाः स्त्रियो विमूढैरुपभुज्यमानाः सुखं विगुणम्॥"
यथाच, साहित्यदर्पणे। १०।
"वामा यूयमहो विड़म्बरसिकाः क्रीड़क् खरो वर्त्तते॥")
सव्यः। इत्यमरमेदिनीकारौ॥ (यथा, राजतरङ्गिण्याम्। १। २।
"भालं वह्निशिखाङ्कितं दधदधिश्रोत्रं वहन् सम्भृत-
क्रीड़त् कुण्डलिजृम्भितं जलधिजच्छायाच्छ-
कण्ठच्छविः।
वक्षो विभ्रदहीनकञ्चुकचितं बद्धाङ्गनार्द्धस्य वो
भागः पुङ्गवलक्षणोऽस्तु यशसे वामोऽथवा
दक्षिणः॥")
अधमः। इति सिद्धान्तकौमुद्यामुणादिवृत्तिः॥
वामहस्तेन जलपानभोजननिषेधो यथा। हारीतः।
"न पिबेन्न च भुञ्जीत द्विजः सव्येन पाणिना।
नैकहस्तेन च जलं शूद्रेणावर्ज्जितं पिबेत्॥"
इति आह्निकतत्त्वम्॥
अपि च।
"न वामहस्तेनोद्धृत्य पिबेद्वक्त्रेण वा जलम्।
नोत्तरेत्तुपस्पृशेच्च नाप्सु रेतः समुत्सृजेत्॥"
इति कौर्म्मे १५ अध्यायः॥
"वामः कायो ब्राह्मणोऽपि मांसमद्यादिभुक्तये।
कृतो मया मोहनाय चार्व्वाकादिप्रवर्त्तकः॥"
इति कालिकापुराणे ७७ अध्यायः॥
(वननीयः। यथा, ऋग्वेदे। ६। ५३। २।
"अभिनो नर्य्यं वसु वीरं प्रयतदक्षिणम्।
वामं गृहपतिं नय।"
"वामं वननीयम्।" इति तद्भाष्ये सायणः॥
वननीयं याचनीयं वसु याचने इत्यस्य प्रयोगो ज्ञातव्यः॥)

वामः, पुं, (वातीति। वा गतिगन्धनयोः + मन्।) हरः। (यथा, भागवते। ४। ३। ८।
"प्रजापतेस्ते श्वशुरस्य साम्प्रतं
निर्य्यापितो यज्ञमहोत्सवः किल।
वयञ्च तत्राभिसराम वाम! ते
यद्यर्थितामी विबुधा व्रजन्ति॥")
कामदेवः। पयोधरः। इति मेदिनी। मे, २६॥ (श्रीकृष्णस्य भद्रागर्भोत्पन्नः पुत्रविशेषः। यथा, भागवते। १०। ६१। १७।
"संग्रामजित् बृहत्सेनः शूरश्चारुरभीरुजित्।
जयः सुभद्रो भद्रायां वाम आयुश्च सत्यकः॥")
वामदृक् [ष्], क्ली, (वामा मनोहरा दृक् दृष्टिर्यस्याः।) नारी। इति राजनिर्घण्टः॥

वामदेवः, पुं, (वाम एव देवः।) शिवः। इत्यमरः। १। १। ३४॥ (यथा, महाभारते। १३। १७। ७०।
"वामदेवश्च वामश्च प्राग्दक्षिणश्च वामनः॥"
ऋषिभेदः। यथा, पद्मपुराणे। ६। ४५।
"आगामिप्रतिवन्यश्च वामदेवे समीरितः।
एकेन जन्मना स्त्रीणां भरतस्य त्रिजन्मभिः॥")

वामनः, पुं, (वामयति वमति वा मदमिति। वम + णिच् + ल्युः।) दक्षिणदिग्गजः। (यथा, भागवते। ५। २०। ३६।
"तदुपरिष्टाच्चतस्रष्वाम्नायात्मयोनिनाखिल-
जगद्गुरुणा विनिवेशिता ये द्विरदपतयः
ऋषभः पुष्करचूड़ो वामनोऽपराजित इति
सकललोकस्थितिहेतवः॥") ह्रस्वः। इत्यमरः। २। ६। ४६॥ (यथा, रघौ। १६।५१।
"व्योमपक्ष्मिकलाक्षितेन्द्रु वा
पङ्क्तिशेषमिव धर्म्मपक्ष्मलम्।
राज्ञि! तत्कुलमभूत् क्षयातुरे
वामनार्च्चिरिव दीपभाजनम्॥"
यथाच तत्रैव। १। ३।
"प्रांशुलभ्ये फले लोभादुद्बाहुरिव वामनः॥"
अङ्कोटवृक्षः। हरिः। इति मेदिनी। ने, १२६॥ (यथा, महाभारते। १३। १४६। ३०।
"उपेन्द्रो वामनः प्रांशुरमोघः शुचिरूर्জितः॥"
शिवः। यथा, महाभारते। १३। १७। ७०।
"वामदेवश्च वामश्च प्राग्दक्षिणश्च वामनः॥"
अश्वभेदः। यथा, अश्ववैद्यके। ३। १५३।
"एकेनाङ्गेन हीनेन भिन्नेन च विशेषतः।
यमजं वाजिनं विन्द्याद्वामनं वामनाकृतिम्॥"
दनोः पुत्रभेदः। यथा, हरिवंशे। ३। ८२।
"अयोमुखः शम्बरश्च कपिलो वामनस्तथा॥"
भुजङ्गभेदः। यथा, महाभारते। १। ३५। ६।
"कालियो मणिनागश्च नागश्चापूरणस्तथा।
नागस्तथा पिञ्जरक एलापत्रोऽथ वामनः॥"
गरुड़वंशीयः पक्षिविशेषः। यथा, महाभारते। ५। १०१। १०।
"पङ्क्तिदृक्पनिष्कुभो वैनतेयोऽथ वामनः।
वातवेगो दिशाचक्षुर्निमिषोऽनिमिषस्तथा॥"
हिरण्यगर्भस्य सुतभेदः। यथा, हरिवंशे। २५३। ६।
"गार्गः पृथुस्तथैवाग्र्यो जान्यो वामन एव च॥"

क्रौञ्चद्वीपस्थपर्व्वतविशेषः। यथा, महाभारते। ६। १२। १७—१८।
"क्रौञ्चद्वीपे महाराज! क्रौञ्चो नाम महा-
गिरिः।
क्रौञ्चात्परो वामनको वामनाद्वन्धकारकः॥
अन्धकारात्परो राजन्! मैनाकः पर्व्वतोत्तमः।
मैनाकात्परतो राजन्! गोविन्दो गिरि-
रुत्तमः॥"
तीर्थभेदः। यथा, महाभारते।३।८४।१२२।
"ततस्तु वामनं गत्वा सर्व्वपापप्रमोचनम्॥"
महापुराणान्यतमः। यथा, देवीभागवते। १।
३। ७।
"अयुतं वामनाख्यञ्च वायव्यं षट् शतानिच।
चतुर्व्विंशतिसंख्यातः सहस्राणि तु शौनक!॥")
विष्णोः पञ्चमावतारः। तस्य प्रादुर्भावो यथा।
श्रीसदाशिव उवाच।
"प्रह्लादस्य सुतो यज्ञे विरोचन इतीरितः।
तस्य पुत्रो महाबाहुर्बलिर्वैश्वानरप्रभः॥
स तु धर्म्मविदां श्रेष्ठः सत्यसंधो जितेन्द्रियः।
हरेः प्रियतमो भक्तो नित्यं धर्म्मरतः शुचिः॥
स जित्वा सकलान् देवान् सेन्द्रांश्च समरुद्ग-
णान्।
त्रिलोकान् स्ववशे स्थाप्य राज्यं चक्रे महाबलः॥
इन्द्रादिचिह्नशस्तस्य किङ्कराः समुपस्थिताः।
भरराज्यं सुरपतिं दृष्ट्वा तस्य पितार्दितः॥
कश्यपो भार्य्यया सार्द्धं तपस्तेपे हरिं प्रति।
अदित्या सह धर्म्मात्मा पयोव्रतसमन्वितः॥
अर्च्चयामास देवेशं पद्मनाभं जनार्द्दनम्।
ततो वर्षसहस्राणि तेन संपूजितो हरिः॥
तथैवाविरभूत्तस्य देव्या सह सनातनः।
तं दृष्ट्वा जगतामीशं हर्षनिर्भरचेतसा॥
पत्न्या सह नमस्कृत्य तुष्टाव च द्विजोत्तमः॥
कश्यप उवाच।
नमो नमस्ते लक्ष्मीश! सर्व्वज्ञ जगदीश्वर।
सर्व्वात्मन् सर्व्वदेवेश! सृष्टिसंहारकारक॥
इत्यादिस्तुतिभिः सम्यक् स्तूयमानो महर्षिणा।
प्राह गम्भीरया वाचा परितुष्टो जनार्द्दनः॥
सन्तुष्टोऽस्मि द्विजश्रेष्ठ! त्वया भक्त्या समर्चितः।
वरं वृणीष्व भद्रं ते करोमि तव वाञ्छितम्॥
ततः प्राह हृषीकेशं भार्य्यया सह कश्यपः।
पुत्रत्वं मम देवेश संप्राप्य त्रिदशां हितम्॥
कुरुष्व बलिना देव त्रैलोक्यं निर्ज्जितं बलात्।
इन्द्रस्यावरजो भूत्वा उपेन्द्र इति नामतः॥
येन केनात्ममार्गेण बलिं निर्ज्जित्य मायया।
त्रैलोक्यं मम पुत्राय देहि शक्राय शाश्वतम्॥
इत्युक्तस्तेन विप्रेण तथेत्याह जनार्द्दनः।
संस्तूयमानस्त्रिदशैस्तत्रैवान्तरधीयत॥
एतस्मिन्नन्तरे काले कश्यपस्य महात्मनः।
अदित्या गर्भमापेदे भगवान् भूतभावनः॥"
इति पाद्मोत्तरखण्डे ४८ अध्यायः॥
श्रीशिव उवाच।
"अथ वर्षसहस्रान्ते सर्व्वलोकमहेश्वरम्।

अदितिर्जनयामास वामनं विष्णुमच्युतम्॥
श्रीवत्सकौस्तुभोरस्कं पूर्णेन्दुसदृशद्युतिम्।
सुन्दरं पुण्डरीकाक्षं अतिखर्व्वतरं हरिम्॥
वटुवेषधरं देवं सर्व्ववेदान्तगोचरम्।
मेखलाजिनदण्डादिचिह्नैनाङ्कितमीश्वरम्॥
तं दृष्ट्वा देवताः सर्व्वे शतक्रतुपुरोगमाः।
स्तुत्वा महर्षिभिः सार्द्धं नमश्चक्रुर्म्महौजसः॥
ततः प्रसन्नो भगवान् प्रोवाच सुरसत्तमान्।
किं कर्त्तव्यं मया वाद्य तद्ब्रवीत सुरोत्तमाः॥
ततः प्रहृष्टास्त्रिदशास्तमूचुः परमेश्वरम्।
अस्मिन् काले बलेर्यज्ञं वर्त्तते मधुसूदन॥
प्रथमं दानकालोऽयं तस्य दैत्यपतेः प्रभो।
याचित्वा त्रिदिवं लोकं ततस्तं दातुमर्हसि॥
इत्युक्तस्त्रिदशैः सर्व्वैराजगाम बलिं हरिः।
यागदेशे समासीनमृषिभिः सार्द्धमच्युतैः॥
अभ्यागतं वटुं दृष्ट्वा सहसोत्थाय दैत्यराट्।
अभ्यागतं स्वयं विष्णुं महाहर्षसमन्वितः॥
पूजयामास विधिना निवेश्य कुसुमासने।
प्रणिपत्य नमस्कृत्य प्राह गद्गदया गिरा॥
धन्योऽस्मि कृतकृत्योऽस्मि सफलं जीवितं मम।
त्वामर्च्चयित्वा विप्रेन्द्र! किं करोमि तव प्रियम्॥
आगतोऽसि यदर्थं त्वं मामुद्दिश्य द्विजोत्तम।
तत् प्रयच्छामि ते शीघ्रं ब्रूहि वेदविदां वर॥
ततः प्रहृष्टमनसा तमुवाच महीपतिम्।
शृणु राजेन्द्र! वक्ष्यामि ममागमनकारणम्॥
अग्निकुण्डस्य पृथिवीं देहि दैत्यपते मम।
मम त्रिविक्रमं पादं महीं संदातुमर्हसि॥
सर्व्वेषामेव दानानां भूमिदानमनुत्तमम्।
यो ददाति महीं राजन् विप्रायाकिञ्चनाय वै॥
अङ्गुष्ठमात्रमथवा स भवेत् पृथिवीपतिः।
न भूमिदानसदृशं पवित्रमिह विद्यते॥
तस्माद्भूमिं महीपाल प्रयच्छ त्वेप्सितं मम।
एतदल्पमहीं दातुं मा विमुञ्च महीपते॥
जगत्त्रयप्रदानन्तु मम भूप भविष्यति।
ततः प्रहृष्टवदनस्तथेत्याह महीपतिः॥
तस्मै महीप्रदानन्तु कर्त्तुं मेने विधानतः।
तं दृष्ट्वा दैत्यराजानं तदा तस्य पुरोहितः॥
उशना अब्रवीद्वाक्यं मा राजन् दीयतां मही।
एष विष्णुः परेशो यो देवैः संप्रार्थितो नृप!॥
वञ्चयित्वा महीं सर्व्वां ततः प्राप्तुमिहागतः।
तस्माद्भूमी न दातव्या तस्मै राजन् महात्मने॥
अन्यमर्थं प्रयच्छस्व वचनान्मम भूपते!।
ततः प्रहस्य राजासौ तं गुरुं प्राह धैर्य्यतः॥
प्रीतये वासुदेवस्य पुण्यं सर्व्वं कृतं मया।
अद्य धन्योऽस्म्यहं विष्णुः स्वयमेवागतो यदि॥
तस्यार्पयामि राज्यं हि जीवितञ्च महत्तमम।
तस्मादस्मै प्रयच्छामि त्रीन् लोकानपि भार्गवम्॥
इत्युक्त्वा भूपतिस्तस्य पादौ प्रक्षाल्य भक्तितः।
वाञ्छितां प्रददौ भूमिं वारिपूर्व्वं विधानतः॥
प्रदक्षिणीय नमस्कृत्य दत्त्वा वै दक्षिणां वसु।
उवाच तं वटुं विप्रं प्रहर्षेणान्तरात्मना॥
धन्योऽस्म्यनुगृहीतोऽस्मि तव दत्त्वा महीं द्विज।

यथेष्टं तव विप्रेन्द्र तद्गृहाण महीमिमाम्॥
पञ्चाशत्कोटिविस्तीर्णां सकाननमहीधराम्।
सवागराञ्च सद्वीपां सदेवासुरमानुषाम्॥
पादेनैकेन पुरुषो विक्रम्य मधुसूदनः।
उवाच तं दैत्यराजं किं करोमीति शाश्वतम्॥
तत्र चैविक्रमं रूपमीश्वरस्य महौजसः।
सम्मातुमपि देवानामृषीणाञ्च महात्मनाम्॥
न वक्तुमपि शक्यं स्यात् ब्रह्मणः शूकरस्य च।
तत्पदं पृथिवीं सर्व्वामाक्रम्य गिरिजे शुभे॥
अतिरिक्तं समभवत् शतयोजनमायतम्।
दिव्यं चक्षुर्ददौ तस्मै दैत्यराजे सनातनः॥
तस्मै सन्दर्शयामास स्वकं रूपं जनार्द्दनः।
तद्विश्वरूपं देवस्य दृष्ट्वा दैत्येश्वरो बलिः॥
प्रहर्षमतुलं लेभे सानन्दाश्रुपरिप्लुतः।
दृष्ट्वा देवं नमस्कृत्य स्तुत्वा स्तुतिभिरेव च॥
प्राह गद्गदया वाचा प्रहर्षेणान्तरात्मना।
धन्योऽस्मि कृतकृत्योऽस्मि त्वां दृष्ट्वा परमेश्वरम्॥
लोकत्रयं ममैवेतत् गृहाण मधुसूदन।
अथ सर्व्वेश्वरो विष्णुर्द्वितीयं पदमव्ययम्॥
ऊर्द्धं प्रसारयामास ब्रह्मलोकान्तमच्युतः।
सनक्षत्रग्रहोपेतं सर्व्वदेवसमावृतम्॥
पादेनापरिपूर्णोऽभूदच्युतः स शुभानने।
ततः पितामहो दृष्ट्वा चक्रपद्मादिचिह्नितम्॥
श्रीपादं देवदेवस्य हर्षसंभ्रमचेतसा।
धन्योऽसीति वदन् ब्रह्मा गृहीत्वा स्वं कम-
ण्डलुम्॥
भक्त्या प्रक्षालयामास तत्र संस्थितवारिणा।
अक्षय्यमभवत्तोयं तस्य विष्णोः प्रभावतः॥
तत्तीर्थं मेरुशिखरे प्रापतद्विमलं जलम्।
जगतः पावनार्थाय चतुर्द्धा तु प्रवाहितम्॥
सीता चालकनन्दा च वङ्क्षुर्भद्रा यथाक्रमात्॥
प्रसङ्गादिदमाख्यातं गङ्गाजन्म त्वनुत्तमम्॥
ततो नारायणः श्रीमान् बलेर्दैत्यपतेः प्रभुः।
रसातलं शुभं लोकं प्रददौ भक्तवत्सलः॥
सर्व्वेषां दानवानाञ्च नागानां यादसाम्पतेः।
राजानञ्च बलिञ्चक्रे यावदाभूतसंप्लवम्॥
प्रतिगृह्य बलेर्लोकान् वटुवेषेण दैत्यहा।
महेन्द्राय ददौ प्रीत्या काश्यप्यै विष्णुरव्ययः॥
ततो देवाः सगन्धर्व्वा ऋषयश्च महौजसः।
तुष्टुवुः स्तुतिभिर्दिव्यैः पूजयामासुरच्युतम्॥
संस्थाप्य तत्पदं तेषां सन्दर्शनाय वै।
संपूज्यमानस्त्रिदशैरन्तर्धानं ययौ हरिः॥"
इति पाद्मोत्तरखण्डे ४९ अध्यायः॥*॥
तदवतारप्रकारान्तरं यथा,—
नारद उवाच।
"सांप्रतं भगवान् विष्णुस्त्रैलोक्याक्रमणं वपुः।
करिष्यति जगत्स्वामी बलेर्बन्धनमीश्वरः॥
सत् कथं पूर्व्वकालेऽपि विसस्रासीत् त्रिविक्रमः।
कस्य वा बन्धनं विष्णुः कृतवांश्च मे वद॥
पुलस्त्य उवाच।
शृणुष्व कथयिष्यामि योऽयं प्रोक्तस्त्रिविक्रमः।
यस्मिन् काले सम्बभूव यच्च वञ्चितवानसौ॥

आसीत् धुन्धुरिति ख्यातः कश्यपस्यौरसः सुतः ।
दनुगर्भसमुद्भूतो महाबलपराक्रमः ॥
स समाराध्य वरदं ब्रह्माणं तपसासुरः ।
अवध्यत्वं सुरैः सर्व्वैः प्रार्थयत् स तु नारद ॥
तद्वरं तस्य च प्रादात् तपसा पङ्कजोद्भवः ।
परितुष्टः स च बली निर्ज्जगाम त्रिपिष्टपम् ॥
चतुर्थस्य कलेरादौ जित्वा देवान् सवासवान् ।
धुन्धुः शक्रत्वमकरोत् हिरण्यकशिपौ सति ॥
तस्मिन् काले स बलवान् हिरण्यकशिपुसुतः ।
चचार मन्दरगिरौ दैत्यं धुन्धुं समाश्रितः ॥
ततोऽसुरा यथाकामं विहरन्ति त्रिपिष्टपे ।
ब्रह्मलोके च त्रिदशाः संस्थिता दुःखसंयुताः ॥
ततोऽमरान् ब्रह्मसदोनिवासिनः
श्रुत्वा च धुन्धुर्दितिजानुवाच ह ।
गच्छाम दैत्या वयमग्रजस्य
सदो विजेतुं त्रिदशान् सशक्रान् ॥
ते धुन्धुवाक्यन्तु निशम्य दैत्याः
प्रोचुर्न नो विद्यति लोकपाल ।
गतिर्यया याम पितामहाजिरं
सुदुर्गमोऽयं परतो हि मार्गः ॥
इतः सहस्रैर्ब्बहुयोजनाख्यै-
र्लोकोको महनाम महर्षिजुष्टः ।
येषां हि नासापवनोदितेन
दह्यन्ति दैत्याः सहसेच्छितेन ॥
तेषां वचनमाकर्ण्य धुन्धुः प्रोवाच दानवान् ।
गन्तुकामः स सदनं ब्रह्मणो जेतुमीश्वरान् ॥
कथन्तु कर्म्मणा केन गम्यते दानवर्षभाः ।
कथं तत्र सहस्राक्षः संप्राप्तः सह दैवतैः ॥
ते धुन्धुना दानवेन्द्राः पृष्टाः प्रोचुर्वचोऽधिपम् ।
कर्म्म तन्न वयं विद्मः शुक्रस्तद्वेत्तासंशयम् ॥
दैत्यानां वचनं श्रुत्वा धुन्धुर्दैत्यपुरोहितम् ।
पप्रच्छ शुक्रं किं कर्म्म कृत्वा ब्रह्मसदोगतिः ॥
ततोऽस्मै कथयामास दैत्याचार्य्यः कलिप्रियः ।
शक्रस्य चरितं श्रीमान् पुरा वृत्रवधोः किल ॥
शक्रः शतन्तु पुण्यानां क्रतूनामजयत् पुरा ।
दैत्येन्द्र ! वाजिमेधानां तेन ब्रह्मसदो गतः ॥
तदाकर्ण्य दानवपतिः श्रुत्वा शुक्रस्य वीर्य्यवान् ।
यष्टुं तुरगमेधानां चकार मतिमुत्तमाम् ॥
आमन्त्र्याहासुरगुरुं दानवांश्चाप्यनुत्तमान् ।
प्रोवाच यक्ष्येऽहं यज्ञैरश्वमेधैः सदक्षिणैः ॥
आहूयन्ताञ्च निधयश्चाप्यन्ताञ्च गुह्यकाः ।
प्रयामो देविका यत्र गङ्गा प्राचीनवाहिनी ॥
सा हि पुण्या सरिच्छ्रेष्ठा सर्व्वसिद्धिकरी शिवा ।
जलं प्राचीनमासाद्य वाजिमेधान् यजामहै ॥
इत्थं सुरारिवचनं निशम्यासुरयाजकः ।
वाढमित्यब्रवीद्दृष्टो निधयः सन्दिदेश सः ॥
ततो धुन्धुर्देविकायाः प्राचीने पापनाशने ।
भार्गवेन्द्रेण शुक्रेण वाजिमेधाय दीक्षितः ॥
ततोऽग्निधूमेन मही सशैला
व्याप्ता दिशः खं विदिशश्च पूर्णाः ।
तेनोग्रगन्धेन दिवंसृणेन
मरुद्वतौ ब्रह्मलोके महर्षे ॥

तं गन्धमाघ्राय सुरा विषण्णा
जानन्त धुन्धुं हयमेधदीक्षितम् ।
ततः शरण्यं शरणं जनार्द्दनं
जग्मुः सशक्रा जगतः परायणम् ॥
प्रणम्य वरदं देवं पद्मनाभं जनार्द्दनम् ।
प्रोचुः सर्व्वे सुरगणा भयगद्गदया गिरा ॥
भगवन् देवदेवेश ! चराचरपरायण ! ।
विघ्नाग्निः श्रूयतां विष्णो सुराणामार्त्तिनाशन ! ॥
धुन्धुर्नाम्ना सुरपतिर्बलवान् बलदर्पितः ।
शुक्रस्य मतमास्थाय सोऽश्वमेधाय दीक्षितः ॥
शतं क्रतूनामिष्ट्वासौ ब्रह्मलोकं महासुरः ।
आरोढुमिच्छति बली विजेतुं त्रिदशानपि ॥
तस्मादकालहीनन्तु चिन्तयस्व जगद्गुरो ।
उपायं मखविध्वंसे भवामो येन निर्वृताः ॥
श्रुत्वा सुराणां वचनं भगवान्मधुसूदनः ।
दत्त्वाभयं महाबाहुः प्रेषयामास सोऽथ तान् ॥
विसृज्य देवताः सर्व्वा ज्ञात्वा जेतुं महासुरम् ।
वधनाय मतिञ्चक्रे स धुन्धोरध्वरस्य वै ॥
ततः स कृत्वा भगवान् वामनं रूपमीश्वरः ।
देहं कृत्वा निरालम्बं कालवद्दैविकाजले ॥
क्षणान्मज्जंस्तथोन्मज्जन्मुक्तकेशो यदृच्छया ।
दृष्टोऽथ दैत्यपतिना दैत्यैश्चान्यैः सुरर्षिभिः ॥
ततः कर्म्म परित्यज्य यज्ञियं ब्राह्मणोत्तमाः ।
समुत्तारयितुं विप्रमद्रवन्त समाकुलाः ॥
सदस्या यजमानाश्च ऋत्विजश्च महौजसः ।
निमज्जमानमुद्वृत्तं सर्व्वे तं वामनं द्विजम् ॥
समुत्तार्य्य हसन्तस्ते पप्रच्छुः सर्व्व एव हि ।
किमर्थं पतितोऽसीह केन विघ्नोऽसि वा वद ॥
तेषामाकर्ण्य वचनं कम्पमानो मुहुर्मुहुः ।
प्राह धुन्धुपुरोगांस्तान् श्रूयतामत्र कारणम् ॥
ब्राह्मणो गुणवानासीत् प्रभास इति विश्रुतः ।
तस्य पुत्रद्वयं जातं मन्दप्रज्ञं सुदुःखितम् ॥
तस्य ज्येष्ठो मम भ्राता कनीयानवरस्त्वहम् ।
नेत्रभाल इति ख्यातो ज्येष्ठो भ्राता ततोऽसुराः ॥
मम नाम पिता चक्रे इति भासोऽतिकौतुकात् ।
ततः कालेन महता आवयोः स पिता मृतः ॥
तस्यौर्द्धदेहिकं कृत्वा गृहमावां समागतौ ।
ततो मयोक्तः स भ्राता विभजामो गृहं वयम् ।
तेनोक्तो नैव भवतो विद्यते भाग इत्यहम् ॥
कुब्जवामनखञ्जानां क्लीवानां श्वित्रिणामपि ।
उन्मत्तानां तथान्धानां धनभागो न विद्यते ॥
एवमुक्तो मया सोऽथ किमर्थं पैतृकाद्गृहम् ।
धनार्द्धभागमर्हामि नाहं न्यायेन केन वै ॥
इत्युक्तवति वाक्येऽसौ भ्राता मे कोपसंयुतः ।
समुत्पित्याच्छिनद्यामस्यां मामिति कारणात् ॥
ममास्यां निम्नगायान्तु मध्ये च पुरतो गतः ।
कालः संवत्सराख्यस्तु युष्माभिरिह चोद्धृतः ।
के भवन्तश्च संप्राप्ताः सस्नेहा बान्धवा इव ॥
ते वामनवचः श्रुत्वा भार्गवा द्विजसत्तमाः ।
प्रोचुर्दैत्यपतिं सर्व्वे वामनार्थकरं वचः ॥
इति द्विजानां वचनं श्रुत्वा दैत्यपतिर्व्वचः ।

प्राह द्विज ददामीति यावद्दिच्छसि वै धनम् ॥
तदाक्यं दानवपतेः श्रुत्वा देवोऽथ वामनः ।
प्राहासुरपतिं धुन्धुं स्वार्थसिद्धिकरं वचः ॥
सोदरेणापि हि भ्रात्रा द्विष्यते यस्य सम्पदः ।
तस्यात्मनस्य यद्दत्तं किमन्यो न हरिष्यति ॥
मम प्रमाणमालोक्य मामकञ्च क्रमत्रयम् ।
संप्रयच्छस्व दैत्येन्द्र नाधिकं रक्षितुं क्षमः ॥
इत्येवमुक्ते वचने महात्मा
विहस्य दैत्याधिपतिः सऋत्विक् ।
प्रादाद्विजेन्द्राय पदत्रयं तदा
यदा स नान्यत् जगृहे च किञ्चन ॥
क्रमत्रये तोयमवेक्ष्य दत्तं
महासुरेन्द्रेण विभुर्यशस्वी ।
चक्रे ततो लङ्घयितुं त्रिलोकीं
त्रिविक्रमं रूपमनन्तशक्तिः ॥
क्षत्वा तु रूपं दितिजांश्च हत्वा
प्रणम्य चर्षीन् प्रथमक्रमेण ।
महीं महीघ्रैः सहितां सहार्णवां
जहार रत्नाकरपत्तनैर्युताम् ॥
भुवं सनाकं त्रिदशाधिवासं
सोमार्कऋक्षैरभिमण्डितं नभः ।
देवो द्वितीयेन जगाम वेगात्
क्रमेण देवप्रियलोकमीश्वरः ॥
क्रमं तृतीयं न यदास्य पूरितं
तदातिकोपादनुपुङ्गवस्य ।
पपात पृष्ठे भगवांस्त्रिविक्रमो
मेरुप्रमाणेन तु विग्रहेण ॥
पतता वासुदेवेन दानवोपरि नारद ! ।
त्रिंशद्योजनसाहस्री भूमिर्भूता घटीकृता ॥
ततो दैत्यं समुत्थाप्य तस्यां प्रक्षिप्य वेगतः ।
वर्षसिक्ताभिरद्भिश्च तां गर्भभूमिमपूरयत् ॥
ततः स्वर्गं सहस्राक्षो वासुदेवप्रसादतः ।
सुराश्च सर्व्वे त्रैलोक्यमवापुर्निरुपद्रवाः ॥
भगवानपि दैत्येन्द्रं प्रक्षिप्य सिकतार्णवे ।
कालिन्यां रूपमाधाय तत्रैवान्तरधीयत ॥”

इति वामने ७५ अध्यायः ॥

वामनः, त्रि, (वामयतीति । वम + णिच् + ल्युः ।) अतिक्षुद्रः । तत्पर्य्यायः । न्यङ् २ नीचः ३ खर्व्वः ४ कृशः ५ । इत्यमरः ॥ अणुः ६ अनायतः ७ । इति जटाधरः ॥ (यथा, नैषधे । २२ । ५७ ।

“विधिस्तुषारर्त्तुदिनानि कर्त्तुं
कर्त्तुं विनिर्म्माति तदन्तभिन्नैः ।
ज्योत्स्नीर्न चेत् तत्प्रतिमा इमा वा
कथं कथं तानि च वामनानि ॥”)

वामनव्रतं, क्ली, (वामनदेवताकं व्रतम् ।) अवणद्वादश्यीकर्त्तव्यो वामनदेवस्य व्रतविशेषः ।

अथ श्रीवामनव्रतविधिः ।

“नत्वा गुरुमनुज्ञाप्य पश्चान्नियममाचरेत् ।
न हि सिद्धिर्गुरोर्भक्तिं नियमञ्च विना फलम् ॥”
नियममन्त्रः ।
“एकादश्यां निराहारः स्थित्वा चैवापरेऽहनि ।

भोक्ष्ये श्रीवामनानन्त प्ररणागतवत्सल ॥" इति ॥
"एकादश्यां रजन्यांवा द्वादश्यां वार्चयेत् प्रभुम् ।
स्वर्णरूप्यमये पात्रे ताम्रवंशमयेऽपि वा ॥
कुङ्किकां स्थापयेत् प्राज्ञो छत्रिकापादुकास्तथा ।
शुभाश्च वैणवीं यष्टिमत्तस्रूत्रं पवित्रकम् ॥
पुष्पैर्गन्धैः फलैर्धूपैः प्रदीपैश्चार्चयेद्धरिम् ।
नानाविधैश्च नैवेद्यैर्भक्ष्यभोज्यैर्गुडोदनैः ॥
जागरं निशि कुर्व्वीत गीतवादित्रनर्त्तनैः ।
एवमाराध्य देवेशं प्रभाते विमले सति ॥
आदावर्घ्यं प्रदातव्यं पश्चाद्देवं प्रपूजयेत् ।
नारिकेलेन शुभ्रेण दद्यादर्घ्यञ्च पूर्ब्ववत् ॥"
तत्र मन्त्रः ।
"वामनाय नमस्तुभ्यं क्रान्तत्रिभुवनाय च ।
गृहाणार्घ्यं मया दत्तं वामनाय नमोऽस्तु ते ॥"
वामनाय अर्घ्यं नमः ।
"मत्स्यं कूर्म्मं वराहञ्च नरसिंहञ्च वामनम् ।
रामं रामञ्च कृष्णञ्च क्रमात् बौ बुद्धकल्किनौ ॥
पादयोर्ज्जानुनोर्गुह्ये नाभ्यासरसि कक्षयोः ।
भुजयोर्भ्रूर्द्वि सर्व्वाङ्गेष्वर्चयेदायुधानि च ॥
महापूजां ततः कृत्वा गोमहीं काञ्चनादिकम् ।
गृह्याचार्य्याय दातव्यं ब्राह्मणेभ्यश्च मन्त्रतः ॥
ब्राह्मणश्चापि मन्त्रेण प्रतिगृह्णाति मन्त्रवित् ।
ददाति मन्त्रतो ह्येव दाता भक्तिसमन्वितः ॥"
तत्र दानमन्त्रः ।
"वामनो बुद्धिदो दाता ह्यस्मो वामनः स्वयम् ।
वामनश्च प्रतिग्राही तेन मे वामने रतिः ॥
वामनः प्रतिगृह्णाति वामनोऽपि ददाति च ।
वामनस्तारको द्वाभ्यां तेनेदं वामने नमः ॥"
इति ॥
"एवं कृत्वा विधानेन भोजनं पृथदाज्यकम् ।
पूर्ब्बं दद्याद्ब्राह्मणेभ्यः पश्चाद्भुञ्जीत बन्धुभिः ॥
यदामनपुराणे च यद्भविष्योत्तरे व्रतम् ।
वामनस्योदितं तस्यानुसारालिखितं त्विदम् ॥"
ब्रह्मवैवर्त्ते ।
"गृहीत्वा नियमं प्रातर्गत्वा नद्याञ्च सङ्गमे ।
सौवर्णं वामनं कृत्वा सौवर्णमाषकेण वा ॥
यथाशक्त्याथ वित्तस्य कुम्भोपरि जगत्पतिम् ।
स्वर्णपात्रे स्थापयित्वा मन्त्रैरेतैश्च पूजयेत् ॥
ॐ वामनाय नमः पादौ कटिं दामोदराय च ।
उरू श्रीपतये गुह्यं कामदेवाय पूजयेत् ॥
पूजयेज्जगतां पत्युरुदरं विश्वधारिणी ।
हृदयं योगनाथाय कण्ठं श्रीपतये नमः ॥
मुखञ्च पङ्कजाक्षाय शिरः सर्व्वात्मने नमः ।
इत्थं संपूज्य वासोभिराच्छाद्य च जगद्गुरुम् ।
दद्यात् सुश्रद्धया चार्घ्यं नारिकेलादिभिः फलैः ॥
ॐ नमो नमस्ते गोविन्द बुध श्रवणसंज्ञक ।
अघौघसङ्घयं कृत्वा प्रेतमोचप्रदो भव ॥"
इत्यर्घ्यमन्त्रः ॥
"कृत्वोपानद्गोदानं दद्याद्दत्त कमण्डलुम् ।
विप्रेषेण द्विजाग्र्याय वामनः प्रीयतामिति ॥
दध्योदनसमायुक्तां वारिधानीं प्रदापयेत् ।
पूजयित्वा जगन्नाथं वामनः प्रीयतामिति ॥
यथाशक्त्या च दानानि द्विजाग्र्येभ्यः प्रदापयेत् ।
कुर्य्याज्जागरणं रात्रौ गीतशास्त्रसमन्वितम् ॥
श्रद्धया परया युक्तो निशामनिमिषेक्षणः ।
प्रभाते भोजयेद्विप्रान् द्वादश्यां पारणं ततः ।
कुर्य्यात् स्वयं श्रद्धया तत् सर्व्वं सफलतां व्रजेत् ॥"
तन्माहात्म्यञ्च तत्रैव ।
"एवं कृते तु कालेय व्रतेऽस्मिन् विजयादिने ।
न दुर्लभतरं किञ्चिदिह लोकेऽथवा परे ॥
फलमस्य व्रतस्योक्तं दत्त्वा पित्रोर्नरोत्तमः ।
वंशोद्धारकरो मुक्तिं याति पैत्र्याद्दशादपि ॥
न पावनतरं किञ्चिदतः परमिहोच्यते ।
विजयाव्रततुल्यञ्च न परं परिपठ्यते ॥"
भविष्योत्तरे च ।
"समाप्ते तु व्रते तस्मिन् यत् पुण्यं तन्निबोध मे ।
चतुर्युगानि राजेन्द्र ! सप्तसप्ततिसञ्ज्ञया ॥
प्राप्य विष्णुपुरं राजन् क्रीड़ते कालमक्षयम् ।
इहागत्य भवेद्राजा प्रतिपक्षभयङ्करः ॥
हस्त्यश्वरथयानानां दाता भोक्ता विमत्सरः ।
रूपसौभाग्यसम्पन्नो दीर्घायुर्निरुजो भवेत् ।
पुत्रपौत्रैः परिवृतो जीवेच्च शरदां शतम् ॥"
इति श्रीहरिभक्तिविलासे १५ विलासः ॥
वामनेत्रं, क्ली, (वर्णन्यासे वामं नेत्रं स्पृश्यं येन ।) दीर्घैकारः । यथा,—
"ईस्थिम्नृत्तिम्मेहामाया लोलाक्षी वामलोचनम् ।"
इत्यादि वर्णाभिधानम् ॥
अपि च ।
"ईशो वैश्वानरस्यः शशधरविलसद्वामनेत्रेण युक्तो
बीजन्ते इन्दमन्यद्गिरिशतचिकुरे कालिके ये जपन्ति ।"
इति तन्त्रसारे महाकालविरचितं श्यामास्तोत्रम् ॥ (वामचक्षुश्च ॥)
वामलूरः, पुं, (वामं यथा तथा लुनातीति । लू + बाहुलकात् रक् ।) वल्मीकः । इत्यमरः । २ । १ । १४ ॥ (यथा, काशीखण्डे । २२ । १६ ।
"जटाटवीकोटरान्तःक्षतनीड़ाण्डजाश्च ये ।
प्ररूढ़वामलूराङ्गाः स्वायुनद्धास्थिसञ्चयाः ॥")
वामलोचना, स्त्री, वामे चारुणी लोचने यस्याः । स्त्रीभेदः । इत्यमरः । २ । ६ । ३ ॥ (यथा, हितोपदेशे । २ । १५६ ।
"नाग्निस्तृप्यति काष्ठानां नापगानां महोदधिः ।
नान्तकः सर्व्वभूतानां न पुंसां वामलोचना ॥")
वामवेधशुद्धिः, स्त्री, (वामे प्रतिकूले यो वेधस्तद्विषये शुद्धिर्विशोधनम् । यद्वा, वामेन विपरीतेन वेधेन शुद्धिः ।) स्वराभ्यपेक्षया द्वादशचतुर्थनवमगृहस्थो विरुद्धोऽपि चन्द्रः यदि शुक्रशनिकुजजीवार्कयुक्तगृहात् सप्तमगृहे तिष्ठति तदा नराणां अभिलषितफलदाता भवति । यदि तु सितशनिकुजजीवार्कयुक्तगृहात् दशमपञ्चमाष्टमगृहे तिष्ठति तदा नराणां स्वराभ्यपेक्षया यथासंख्यं अष्टमपञ्चमद्वितीयगृहगोऽपि चन्द्रः प्रचुरफलदाता भवति । यथा,—
"सितशनिकुजजीवार्कास्त इन्दुर्नराणां
व्ययसुखनवमस्थोऽपीष्टदाता तथैषाम् ।
स्वसुतनिधनगश्चेन्नृष्टपुत्रार्थगोऽपि
प्रचुरशुभफलं स्याद्वामवेधेन शुद्धिः ॥"
वामवेधत्वञ्च द्यूनजन्मेति एवमेति वक्ष्यमाणवचनाभ्यामेकार्थत्वाद्बोध्यम् ॥ * ॥
अथ दक्षिणवेधवामवेधकथनम् ।
"लाभविक्रमसखगृचुस्थितः
शोभनो निगदितो दिवाकरः ।
खेचरैः सुततपोजलान्त्यगै-
र्वार्किभिर्यदि न विध्यते तदा ॥
द्यूनजन्मरिपुलाभखेचर-
श्चन्द्रमाः शुभफलप्रदस्तदा ।
स्वात्मजान्त्यसुतिवन्धुधर्म्मगै-
र्विध्यते न विबुधैर्यदि ग्रहः ॥
विक्रमाय रिपुगः शुभः कुजः
स्वात्तदान्त्यसुतधर्म्मगैः खगैः ।
चैन्न विद्ध इनसूनुरप्यसौ
किन्तु धर्म्मसृणिना न विध्यते ॥
स्वाम्बुगृचुतिखायगः शुभो
ह्यस्तदा न खलु विध्यते यदा ।
आत्मजत्रिनवकाद्यनेधन-
प्रान्त्यगैर्विविधुभिर्नभश्चरैः ॥
स्वायधर्म्मतनयद्यूनस्थितो
नाकनायकपुरोहितः शुभः ।
रिप्फरन्ध्रखजलत्रिगैर्यदा
विध्यते गगनचारिभिर्नहि ॥
आसुताष्टमतपोव्ययायगो
विद्ध आस्तु जिदशोभनः स्फुटः ।
नैधनास्ततनुकर्म्मधर्म्मधी-
लाभवैरिसहजस्थखेचरैः ॥"
इति ज्योतिस्तत्त्वम् ॥
वामा, स्त्री, (वमति सौन्दर्य्यं इति । वम + ज्वलादित्वात् ण्यण् । टाप् । यद्वा, वमति-प्रतिकूलमेवार्थं कथयति । यद्वा, वामः कामोऽस्यस्या इति अर्शआदिभ्योऽच् इत्यच् ।) सामान्या स्त्री । इत्यमरः । २ । ६ । २ ॥ (यथा, गीतगोविन्दे । १ । ४६ ।
"श्लिष्यति कामपि चुम्बति कामपि कामपि रमयति वामाम् ।
पश्यति सस्मितचारुपरामपरामनुगच्छति रामाम् ॥")
दुर्गा । यथा,—
"वामं विरुद्धरूपन्तु विपरीतन्तु गीतये ।
वामेन सुखदा देवी वामा तेन मता बुधैः ॥"
इति देवीपुराणे ४५ अध्यायः ॥
अपि च ।
"बालान्तु बाल्यदाक्षिण्यभावाभ्यामपि पूजयेत् ।
श्मशानभैरवीं देवीमुग्रतारां तथैव च ॥
उच्छिष्टभैरवीं चण्डीं तारां त्रिपुरभैरवीम् ।

एतास्तु वामभावेन यजेत्त्रिपुरभैरवीम् ॥
सर्व्वत्र पिष्टदेवादौ यस्माद्भवति दक्षिणः ।
देवी च दक्षिणा यस्मात्तस्मात् दाक्षिण्यमुच्यते ॥
या पुनः पूज्यमाना तु देवादीनान्तु पूर्व्वतः ।
यज्ञभागं स्वयं धत्ते सा वामा तु प्रकीर्त्तिता ॥"

इति कालिकापुराणे ७७ अध्यायः ॥

वामाक्षि, क्ली, (वाममक्षि ।) वामचक्षुः । (वर्णन्यासे न्यस्तं वाममक्षि येन ।) दीर्घ ईकारः । यथा,—

"कर्पूरं मध्यमान्त्यस्वरपरिरहितं सेन्दु वामाक्षियुक्तं
बीजन्ते मातरेतत्त्रिपुरहरवधु चिःकृतं ये जपन्ति ॥"

इत्यादिकर्पूराख्यस्तोत्रम् ॥

वामाक्षी, स्त्री, (वामे मनोहरे अक्षिणी अस्याः । ङीष् ।) वामलोचना । इति हेमचन्द्रः ॥

वामाचारः, पुं, (वामो विपरीतो वेदविरुद्धो वा आचारः ।) आचारविशेषः । यथा,—

"पञ्चतत्त्वं स्वपुष्पञ्च पूजयेत् कुलयोषितम् ।
वामाचारो भवेत्तत्र वामा भूत्वा यजेत् पराम् ॥"

इत्याचारभेदतन्त्रम् ॥

तदाचारवतां नरकगमनं यथा,—

"स्वधर्म्मरहिता विप्रा वेदान्यसेविनः सदा ।
भ्रष्टाचाराश्च वामाश्च ते यान्ति नरकं ध्रुवम् ॥"

इति ब्रह्मवैवर्त्ते प्रकृतिखण्डे २४ अध्यायः ॥

तत्प्रशंसा यथा,—

"चत्वारो देवि वेदाश्चाः पशुभावे प्रतिष्ठिताः ।
वामाद्याश्चय आचारा दिव्ये वीरे प्रतिष्ठिताः ॥"

इति नित्यातन्त्रम् ॥

"सर्व्वेभ्यश्चोत्तमा वेदा वेदेभ्यो वैष्णवं महत् ।
वैष्णवादुत्तमं शैवं शैवाद्दक्षिणमुत्तमम् ॥
दक्षिणादुत्तमं वामं वामात् सिद्धान्तमुत्तमम् ।
सिद्धान्तादुत्तमं कौलं कौलात् परतरं नहि ॥"

इति कुलार्णवतन्त्रे २ खण्डम् ॥ * ॥

सदाचारयुक्तस्य निषिद्धकर्म्माणि यथा,—

"न दद्यात् ब्राह्मणो मद्यं महादेवे कथञ्चन ।
वामकामो ब्राह्मणो हि मद्यं मांसं न भक्षयेत् ॥"

तदनुकल्पो यथा । कुलचूड़ामणौ ।

"यत्राशक्तमवश्यन्तु ब्राह्मणन्तु विशेषतः ।
तत्र गुड़ार्द्रकं दद्यात् ताम्रे वा विल्वजेऽम्बु ॥
देयास्तु दक्षिणे भागे चक्रपार्श्वे निवेदयेत् ।
एतद्द्वयन्तु शूद्रस्य नान्येषान्तु कदाचन ॥
वैश्यस्य माक्षिकं शुद्धं क्षत्रियस्य तु खाण्डवम् ।
ब्राह्मणस्य गवां क्षीरं ताम्रे वा विल्वजेऽम्बु ।
नारिकेलोदकं कांस्ये सर्व्वेषां द्रव्यशोधनम् ॥"

क्षत्रियवैश्ययोस्तु गौड़ी माध्वी च दातव्या तत्र तयोरधिकारात् तदभावे अनुकल्पविधानम् । तथा च ।

"गोक्षीरं ब्राह्मणो दद्यात् द्रव्यमाद्यञ्च बाहुजः ।
वैश्यश्च माक्षिकं द्रव्यं शूद्रः पैष्टादिकं पुनः ॥"

तेन शूद्रस्य नानुकल्पः ॥ * ॥ कुलार्णवे ।

"जलं क्षीरं घृतं भद्रे मधु मैरेयमेव च ।
पौष्पं तरुभवं धान्यसम्भवं तक्रनिर्म्मितम् ॥
सहकारभवं देवि त्रिविधं बहुभेदकम् ।
माद्यं धर्म्मसंभेदात् वर्ज्ज्यमाहुः सुलोचने ॥
ज्ञानेन संस्कृतन्तत्तु महापातकनाशनम् ।
तद्दाने पातकाभावो दिव्यभावविधयं वा ॥ * ॥
माकन्दफलजं रम्यं द्रव्यं सेव्यं द्विजातिभिः ।
आमादकत्वाद्देवेशि रैवतं सेव्यते बुधैः ॥"

एतेन क्षत्रियादिभिरमादकं द्रव्यं सेव्यं मादकस्य पापहेतुकत्वमुक्तम् । भैरवतन्त्रे ।

"मद्यं मांसं विना वत्स यत्किञ्चित् कुलसाधनम् ।
शुक्ले दत्त्वा ततः शेषं गुरवे तन्निवेदयेत् ।
तदनुज्ञां मूर्द्धि कृत्वा शेषमात्मनि योजयेत् ॥"

तेन क्षत्रियादीनां सुखदाने अधिकारः । न पाने । यतु ।

"पीत्वा पीत्वा पुनः पीत्वा पतित्वा च महीतले ।
उत्थाय च पुनः पीत्वा पुनर्जन्म न विद्यते ॥"

तत्तु चषुर्थाभिपरम् ॥ * ॥ तद्व्यतरणौ जातिचिन्तां न कुर्य्यात् ।

"मदिरायां मैथुने च जातिचिन्तां न कारयेत् ॥"

एतेषां शोधनस्यावश्यकत्वम् । तथा च ।

"संशोधनमनाचार्य्य स्त्रीषु मद्येषु साधकः ।
आचार्य्य सिद्धिहानिः स्यात् कृत्वा भवति सुन्दरी ॥"

मद्येषु सुखानुकल्पेषु ॥ * ॥ तथा कुलपूजायामस्यावश्यकत्वम् । तथा च ।

"मधु मांसं विना देवि कुलपूजां समाचरेत् ।
जन्मान्तरसहस्रस्य सुकृतं तस्य नश्यति ॥"*॥

अथ मांसादिशोधनम् ।

"मांसन्तु त्रिविधं ज्ञेयं जलखेचरभूचरम् ।
मांसन्तु त्रिविधं प्रोक्तं देवताप्रीतिकारकम् ॥
मत्स्यश्च त्रिविधं देवि उत्तमाधममध्यमम् ।
उत्तमं त्रिविधं मत्स्यं शालपाठीनरोहितम् ॥
प्रवीणं कण्टकैर्हीनं तैलाक्तं वल्कलैर्युतम् ।
दैवाः प्रीतिकरश्चैव मध्यमं तच्चतुर्व्विधम् ।
क्षुद्राणि तानि सर्व्वाणि अधमानि विदुर्बुधाः ॥"

भूचरमांसञ्च ।

"गोमेषाश्वखराश्योत्थगोधाजोष्ट्रगोद्भवम् ।
महामांसाष्टकं प्रोक्तं देवताप्रीतिकारकम् ॥"

मांसाभावे अनुकल्पः । समयाचारे ।

"शशार्द्धकपिण्याकतिलगोधूममाषकम् ।
लशुनञ्च महादेवि मांसप्रतिनिधिः स्मृतः ॥"*॥

मुद्रा तु द्विविधा । कुलार्णवे ।

"क्षरं मद्यलाकारं चक्रपद्मनिभं शुभम् ।
चारु पङ्कजमनोहारि शर्करादैश्च पूरितम् ।
पूजाकाले देवताया मुद्रेयं परिकीर्त्तिता ॥"

यामले ।

"शष्टधान्यादिकं यावत् चर्व्वणीयं प्रकल्पयेत् ।
तेषां संज्ञा कृता मुद्रा महामोदप्रदायिनी ॥"

तेषां शोधनन्तु स्वतन्त्रतन्त्रे । ॐ प्रतद्विष्णुरित्यादि मांसम् । त्र्यम्बकमित्यादि मीनम् । तद्विष्णोरित्यादि मुद्राम् ॥ * ॥ अथ शक्तिशोधनम् । तत्र भावचूड़ामणौ ।

"अदीक्षितकुलासङ्गात् सिद्धिहानिः प्रजायते ।
तत्कथाश्रवणं चेत् स्यात् तत्स्थगमनं यदि ।
स कुलीनः कथं देवि पूजयेत् परमेश्वरीम् ॥"

श्रीक्रमे । संशोधनमनाचार्य्येति । कौलिकतन्त्रे ।

"अभिषेकाद्भवेच्छुद्धिर्म्मन्त्रस्योच्चारबिन्दुभिः ।
बलाद्वा यत्नतो वापि अभिषेकं समाचरेत् ॥"

अभिषेकमन्त्रस्तु ।

"आदौ वाणीं समुच्चार्य्य त्रिपुरायै समुद्धरेत् ।
नमःशब्दं समुच्चार्य्य इमां शक्तिं ततो वदेत् ॥
पवित्रीकुरु शब्दान्ते मम सिद्धिं कुरु प्रिये ।
वह्निजायां समुच्चार्य्य शुद्धिमन्त्रः सुरेश्वरि ।
तस्याः कर्णेऽभिदातव्या भायाबीजं समुद्धरेत् ॥"

इति शक्तिशोधनम् ॥ * ॥

ततः शोधितद्रव्यमर्घ्ये क्षिपेत् । श्रीक्रमे अर्घ्यविधौ ।

"पूर्व्वशोधितद्रव्यन्तु गुप्तेनैव च संक्षिपेत् ॥"

स्वतन्त्रतन्त्रे ।

"आद्यद्रव्यमर्घ्यपात्रे निःक्षिप्य प्रयतः सुधीः ।
कुङ्कुमोलोड्यवं द्रव्यं स्वयम्भुकुसुमं तथा ।
अर्घ्यं दत्त्वा महेशानि सर्व्वसिद्धीश्वरो भवेत् ॥
सुरया चार्घ्यदानेन योगिनीनां भवेत् प्रियः ।
महायोगी भवेद्देवि पीठप्रक्षालितेज्यलैः ॥"

भैरवतन्त्रे ।

"पञ्चमात् तु परं नास्ति भुक्तानां सुखमोक्षयोः ।
केवलैः पञ्चमैर्व्वापि सिद्धो भवति साधकः ॥"

तेन पञ्चमकारेण पूजा कर्त्तव्या । इति तन्त्रसारः ॥

वामापीड़नः, पुं, पीलुवृक्षः । इति शब्दचन्द्रिका ॥

वामिका, स्त्री, (वामा + स्वार्थे कन् । टापि अत इत्वम् ।) चक्षिका । यथा,—

"वक्षास्तु चक्षिका देया वामिका मूर्त्तयः स्मृताः ।
तस्मात्तु वामिका मूर्त्तिरुक्ता दक्षभैरवी ॥
नाम्निदाहं पुरग्रामसन्दिरेषु करोत्यलम् ।
अपूजिता महालक्ष्मीर्दहत्यां तासु पूजयेत् ॥
वाग्भैरवी सरस्वत्या वामिका मूर्त्तिरीरिता ।
तस्मा मन्त्रं पुरा प्रोक्तं शुक्लवर्णा तु सा स्मृता ॥"

इति कालिकापुराणे ७७ अध्यायः ॥

वामिलः, त्रि, (वाम + इलच् ।) दाम्भिकः । वामः । इति मेदिनी । ले, १३१ ॥

वामी, स्त्री, शृगाली । बड़वा । (यथा, रघौ । ५ । ३२ ।

"अथोष्ट्रवामीश्रुतवाहितार्थं
प्रजेश्वरं प्रीतमना महर्षिः ॥")

राक्षसी । करभी । इति मेदिनी । मे, ३० ॥

वामोरूः, स्त्री, वामौ सुन्दरौ ऊरू यस्याः । ("संहितशफलक्षणवामादेश्च ।" ४ । १ । ७० ।

इति ऊङ्।) नारीविशेषः। इति मुग्धबोधव्याकरणम्॥ (यथा, माघे। ८। २४।
"चञ्चन्ती चलशफरीविघट्टितोरु-
र्वांभोरुरतिश्रमयंमाप विभ्रमस्य।
क्षुभ्यन्ति प्रसभमहो विनापि हेतो-
र्लीलाभिः किमु सति कारणे तरुण्यः॥")

वायकः, पुं, (वयतीति। वे+ण्वुल्।) समूहः। इति शब्दचन्द्रिका॥ (तन्तुवायः। यथा, भागवते। ५। २६। ३६।
"यच्च ह वित्तयशसं पापपुरुषं धर्म्मराजपुरुषा वायका इव सर्व्वतोऽङ्गेषु सूत्रैः परिवयन्ति॥")

वायदण्डः, पुं, (वायस्य दण्डः। यद्वा, वायतेऽनेनेति वायः। वाय एव दण्ड इति कर्म्मधारयः।) वापदण्डः। इति भरतद्विरूपकोषः॥

वायनं, क्ली, पिष्टकविशेषः। तत्पर्य्यायः। व्रतोपायनम् २। प्रदेयकम् ३। इति त्रिकाण्डशेषः॥

वायवी, स्त्री, (वायोरियमिति। वायु+अण्। ङीप्।) उत्तरपश्चिमदिक्। इति जटाधरः॥ (कार्त्तिकेयस्यानुचरमातृगणभेदः। यथा, महाभारते। ९। ४६। ३७।
"वायव्यश्चाथ कौमार्य्यो ब्राह्मश्च भरतर्षभ!।
वैष्णवश्च तथा सौर्य्यो वाराह्यश्च महाबलाः॥")

वायव्य, त्रि, (वायुर्देवतास्येति। वायु+"वायृतुपित्रुषसो यत्।" ४। २। ३१। इति यत्।) वायुसम्बन्धिदिगादि। यथा। विश्वयुग्ममुपक्रम्य गवाह्नतन्ने।
"वायव्यस्यं नैर्ऋतस्थं न गृह्णीयात् कदाचन॥"
इति तिथ्यादितत्त्वम्॥
(वायुदेवताकपशुहविरादि। यथा, ऋग्वेदे। १०। ६०। ८।
"तस्माद्यज्ञात् सर्व्वहुतः सम्भृतं पृषदाज्यम्।
पशूंस्ताँश्चक्रे वायव्यानारण्यान् ग्रामाश्च ये॥"
"वायव्यान् वायुदेवताकान्।" इति तद्भाष्ये सायणः॥ * ॥ क्ली, षट्शताधिकचतुर्विंशतिसहस्रश्लोकात्मकवायुनामकमहापुराणम्। यथा, देवीभागवते। १। ३। ७।
"अयुतं वामनाख्यञ्च वायव्यं षट्शतानि च।
चतुर्विंशतिः संख्यातः सहस्राणि तु शौनक!॥"
अस्त्रविशेषः। यथा, महाभारते। १।१२६।१६।
"आग्नेयेनाहनद्वह्निं वारुणेनाहनज्जलम्।
वायव्येनाहनद्वायुं पार्জन्येनाहनद्घनान्॥")

वायसः, पुं, (वयते इति। वय गतौ। "वयश्च।" उणा० ३। १२०। इति असच्। सच्च णित्।) अगुरुवृक्षः। श्रीवासः। काकः। इति मेदिनी। से, ३८॥ (यथा, महाभारते। ३। २७०। ३१।
"श्वगृध्रकङ्ककाकोलभासगोमायुवायसाः।
अत्यन्तलुब्धा वीराणां हतानां मांसशोणितैः॥")
अस्योत्पत्तिर्यथा,—
"अरुणस्य भार्य्या श्येनी वीर्य्यवन्तौ महाबलौ।
सम्पातिञ्च जटायुञ्च प्रभूतौ पक्षिसत्तमौ।

सम्पातिर्जनयन् गृध्रान् काकाः पुत्रा जटायुषः॥"
इति वह्निपुराणे वाराहप्रादुर्भावः॥*॥
अस्य एकाक्षिनाशकारणं यथा,—
मार्कण्डेय उवाच।
"गते तु भरते तस्मिन् रामः कमललोचनः।
लक्ष्मणेन सह भ्रात्रा भार्य्यया सीतया सह।
शाकमूलफलाहारो विचचार महावने॥
एकदा लक्ष्मणस्ते रामदेवः प्रतापवान्।
चित्रकूटे वने देशे वैदेह्या सङ्गमाश्रितः॥
सुप्वाप सुसुकूर्त्तञ्च ततः काको दुरात्मवान्।
सीताभिसुखमभ्येत्य विददार स्तनान्तरम्।
विदार्य्य वृक्षमारुह्य स्थितोऽसौ वायसाधमः॥
ततः प्रबुद्धो रामोऽसौ दृष्ट्वा रक्तं स्तनान्तरम्।
शोकाविष्टान्तु सीतां तामुवाच कमलेक्षणः॥
किमिदं स्तनान्तरे भद्रे तव रक्तस्य कारणम्।
इत्युक्ता सा च तं प्राह भर्त्तारं विनयान्विता॥
पश्य राजेन्द्र वृक्षाग्रे वायसं दुष्टचेष्टितम्।
येनेतच्च कृतं कर्म्म सुप्ते त्वयि महामते॥
रामोऽपि दृष्ट्वा तं काकं तस्मिन् क्रोधमथाकरोत्।
ऐषिकास्त्रं समादाय ब्रह्मास्त्रेणाभिमन्त्रितम्॥
काकमुद्दिश्य चिक्षेप सोऽवधावज्जयान्वितः॥
स त्विन्द्रस्य सुतो राजन् इन्द्रलोकं विवेश ह।
रामास्त्रं प्रज्वलं दीप्तं तस्यानुप्रविवेश वै॥
विदितार्थश्च देवेन्द्रो देवैः सर्व्वैः समन्वितः।
निष्क्रामयच्चै तं दुष्टं राघवस्यापकारिणम्॥
ततोऽसौ सर्व्वदेवैस्तु देवलोकाद्बहिष्कृतः।
पुनः सोऽभ्येत्य रामस्य राजानं शरणं गतः॥
त्राहि राम महाबाहो अज्ञानादपकारिणम्।
इति ब्रुवन्तं स प्राह रामः कमललोचनः॥
अमोघाय ममास्त्राय अक्षि एकं प्रयच्छ मे।
ततो जीवसि दुष्टात्मन् मेऽपराधो महान् कृतः॥
इत्युक्तोऽसौ स्वकं नेत्रमेकमस्त्राय दत्तवान्।
अस्त्रञ्च नेत्रमेकन्तु भस्मीकृत्य शमं ययौ॥
ततः प्रभृति सर्व्वेषां काकानामेकनेत्रता।
चक्षुषैकेन पश्यन्ति हेतुनानेन पार्थिव!॥"
इति नरसिंहपुराणे ४३ अध्यायः॥
(वायससम्बन्धिनि, त्रि। यथा, महाभारते। १२। ८२। ७—८।
"स काकं पञ्जरे बद्ध्वा विषयं क्षेमदर्शिनः।
सर्व्वं एवाचरद्युक्तः प्रवृत्तार्थो पुनः पुनः॥
अधोध्वं वायसीं विद्यां शंसन्ति मम वायसाः।
अनागतमतीतञ्च यच्च संप्रति वर्त्तते॥")

वायसादनी, स्त्री, (वायसेन अद्यते इति। अद+कर्म्मणि ल्युट्+ङीप्।) महाज्योतिष्मती। काकतुण्डी। इति राजनिर्घण्टः॥

वायसारातिः, पुं, (वायसस्य अरातिः।) पेचकः। इत्यमरः। २। ५। १५॥

वायसाक्षा, स्त्री, (वायसस्य आक्षा नाम यस्याः।) काकनामा। काकमाची। इति राजनिर्घण्टः॥

वायसी, स्त्री, (वायसानामियमिति ततः प्रियत्वात्। वायस+अण्। ङीष्।) काकोडुम्बरिका। काकमाची। इति मेदिनी। से, ३८॥ महाज्योतिष्मती॥ काकनामा। काकतुण्डी। इति राजनिर्घण्टः॥

वायसेक्षुः, पुं, (वायसानामिक्षुरिव प्रियत्वात्।।) काशः। इति राजनिर्घण्टः॥

वायसोलिका, स्त्री, (वायसोली+स्वार्थे कन्।) काकोली। इति शब्दरत्नावली॥

वायसोली, स्त्री, (वायसान् ओलञ्जयतीति। ओलडि उत्क्षेपे+"अनेष्वपि दृश्यते।" इति डः। पृषोदरादित्वात् अस्य लोपः।) काकोली। इत्यमरः। २। ४। १४४॥

वायुः, पुं, (वातीति। वा गतिगन्धनयोः+"शवायाजिमिस्विदिसाध्यशूभ्य उण्।" उणा० १। १। इति उण्। "आतो युक्चिण्कृतोः।" ७। ३। ३३। इति युक्।) उत्तरपश्चिमकोणाधिपतिः। वाति यः। वातास इति भाषा। स च पञ्चभूतान्तर्गतभूतविशेषः। तद्विशेषविवरणं यथा। वायवः प्राणापानव्यानोदानसमानाः। प्राणो नाम प्राग्गमनवान् नासाग्रस्थानवर्त्ती। अपानो नाम अवाग्गमनवान् पायुादिस्थानवर्त्ती। व्यानो नाम विश्वग्गमनवानखिलशरीरवर्त्ती। उदानः कण्ठस्थानीय ऊर्द्ध्वगमनवायुत्क्रमणवायुः। समानः शरीरमध्यगताशितपीताद्यादिसमीकरणकरः। समीकरणन्तु परिपाककरणं रसरुधिरशुक्रपुरीषादिकरणम्। केचित्तु नागकूर्म्मकृकरदेवदत्तधनञ्जयाख्याः पञ्चान्ये वायवः सन्तीत्याहुः। तत्र नागः उद्गिरणकरः। कूर्म्मः निमीलनादिकरः। कृकरः क्षुधाकरः। देवदत्तः जृम्भणकरः। धनञ्जयः पोषणकरः। एतेषां प्राणादिष्वन्तर्भावात् प्राणादयः पञ्चेवेति केचित्॥ इदं प्राणादिपञ्चकं आकाशादितरजोंऽशेभ्यो मिलितेभ्य उत्पद्यते। इदं प्राणादिपञ्चकं कर्म्मेन्द्रियसहितं सत् प्राणमयकोशो भवति। अस्य क्रियात्मकत्वेन रजोंऽशकार्य्यत्वम्। एतेषु कोशेषु मध्ये विज्ञानमयो ज्ञानशक्तिमान् कर्त्तृरूपः। मनोमय इच्छाशक्तिमान् करणरूपः। प्राणमयः क्रियाशक्तिमान् कार्य्यरूपः। इति वेदान्तसारः॥ तत्पर्य्यायः। श्वसनः २ सपूर्णः ३ मातरिश्वा ४ सदागतिः ५ पृषदश्वः ६ गन्धवहः ७ गन्धवाहः ८ अनिलः ९ आशुगः १० समीरः ११ मारुतः १२ मरुत् १३ जगत्प्राणः १४ समीरणः १५ नभस्वान् १६ वातः १७ पवनः १८ पवमानः १९ प्रभञ्जनः २०। इत्यमरः॥ जगत्प्राणः २१ खश्वासः २२ वाहः २३ धूलिध्वजः २४ फणिप्रियः २५ वातिः २६ नभःप्राणः २७ भोगिकान्तः २८ खकम्पनः २९ अक्षतिः ३० कम्पलक्ष्मा ३१ पृश्नीनिः ३२ आवकः ३३ हरिः ३४। इति शब्दरत्नावली॥ वासः ३५ मुखाग्रः ३६ नगवाहनः ३७ सारः

३८ चञ्चलः ३९ विहगः ४० प्रकम्पनः ४१ नभःसरः ४२ निश्वासकः ४३ क्षनूनः ४४ पृषतांपतिः। इति जटाधरः॥ * ॥ स च सृष्टिकाले आकाशाज्जातः। यथा। तस्माद्वा एतस्मादात्मन आकाशः संभूत आकाशाद्वायुः। इत्यादि तैत्तिरीयश्रुतिः॥ * ॥ ऊनपञ्चाशद्वायवो हि पुत्राः। ते सर्व्वे अपजाः। इन्द्रेण देवत्वं प्रापिताः। शरीरान्तर्व्वाह्यभेदेन द्विधा। यथा। प्राणः १। तस्य कर्म्म बहिर्गमनम्। अपानः २। तस्य कर्म्म अधोगमनम्। व्यानः ३। तस्य कर्म्म आकुञ्चनप्रसारणादि। समानः ४। तस्य कर्म्म अशितपीतादीनां समं नयनम्। उदानः ५। तस्य कर्म्म ऊर्द्धनयनम्।

"उद्गारे नाग ६ आख्यातः कूर्म्म ७ उन्मीलने स्मृतः।
कृकरः ८ क्षुत्करो ज्ञेयो देवदत्तो९ विजृम्भणे।
न जहाति मृतञ्चापि सर्व्वव्यापी धनञ्जयः१०॥"

इति भागवतटीकायां श्रीधरस्वामी॥ * ॥

अन्यच्च।

"द्वितीयं मारुतो भूतं त्वगथात्मञ्च विश्रुता।
सर्व्वेन्द्रियमधिभूतञ्च विद्युत्तत्राधिदैवतम्॥"

इति महाभारते आश्वमेधिकपर्व्व॥

तस्य गुणाः। यथा,—

"वायोरनियतस्पर्शो वार्दस्थानं खतन्त्रता।
बलं प्रेरयच्च मोक्षञ्च कर्म्म चेष्टात्मता भवः॥"

इति महाभारते मोक्षधर्म्मः॥ * ॥

अनियतस्पर्शः। अनुष्णाशीतस्पर्शः १। द्वादशस्थानम्। वागिन्द्रियगोलकानि २। खतन्त्रता। गमनादौ ३। बलम् ४। प्रेरणम् ५। मोक्षः क्षुदादेः ६। कर्म्म। उत्क्षेपणादि ७। चेष्टा श्वासप्रश्वासादि ८। आत्मता प्राणरूपेण चिद्वाधित्वम् ९। भवः। जन्ममरणे १०। इति तट्टीका॥*॥ न्यायमते अस्य गुणादिर्यथा,—

"अपाकजोऽनुष्णाशीतस्पर्शस्तु पवने मतः।
तिर्य्यग्गमनवानेष ज्ञेयः स्पर्शादिलिङ्गकः॥
पूर्ब्बवन्नित्यतायुक्तं देहव्यापि त्वगिन्द्रियम्।
प्राणादिस्तु महावायुपर्य्यन्तविषयो मतः॥"

इति भाषापरिच्छेदः॥

"वायुं निरूपयति अपाकज इति। अनुष्णाशीतस्पर्शस्य पृथिव्यामपि सत्त्वात् अपाकज इति। अपाकजस्पर्शस्य जलादावपि सत्त्वात् उक्तमनुष्णाशीत इति। एतेन वायोर्विजातीयस्पर्शो दर्शितः। तज्जनकतावच्छेदकं वायुत्वमिति भावः। एष वायुः स्पर्शादिलिङ्गकः। वायुर्हि स्पर्शशब्दधृतिकम्पैरनुमीयते। विजातीयस्पर्शेन विलक्षणशब्देन क्षणादीनां ध्वजाग्राखादीनां कम्पनेन च वायोरनुमानात्। तथा च वायुर्न प्रत्यक्षस्तथापि वक्ष्यते। वायुर्नित्योऽनित्यो वा परमाणुरूपो नित्यस्तदन्योऽनित्यः समवेतश्च। सोऽपि त्रिविधः शरीरेन्द्रियविषयभेदात्। अत्र शरीरमयोनिजं पित्राद्यादीनाम्। देहव्यापीति। शरीरव्यापकं स्पर्शग्राहकमिन्द्रियं त्वक्। तच्च वायवीयं रूपादिषु मध्ये स्पर्शस्यैव व्यञ्जकत्वात्। अङ्गसंसर्गिसलिलप्रेर्य्यव्यञ्जकव्यञ्जनवातवत्। विषयं दर्शयति प्राणादिरिति। यद्यप्यनित्यो वायुश्चतुर्व्विधः तस्य चातुर्व्विध्यं प्राणादिना इत्युक्तमाकरे। तथापि संक्षेपात् अत्र त्रैविध्यमुक्तं प्राणस्यैक एव हृदादिनानास्थानवशात् नानासंज्ञां लभते इत्यर्थः।" इति सिद्धान्तमुक्तावली॥*॥ अस्योत्पत्तिर्यथा,—

पुलस्त्य उवाच।

"प्रविश्य जठरं शुभ्रो दैत्यमातुः पुरन्दरः।
ददर्शोर्द्ध्वमुखं बालं कठिन्यस्तकरं महत्॥
तेनैव गर्भं दितिजं वज्रेण शतपर्व्वणा।
चिच्छेद सप्तधा ब्रह्मन् स रुरोद सुविस्वरम्॥
शक्रोऽपि प्राह मा रुद्र रुदस्वेति सचर्षभम्।
इत्येवमुक्ता चैकैकं भूयश्चिच्छेद सप्तधा॥
ते जाता मरुतो नाम देवा दित्याः शतक्रतोः।
मातुरेवापचारेण बलवीर्य्यपुरस्कृताः॥"

इति वामने ६८ अध्यायः॥

"यदमी भवता प्रोक्ता मरुतो दितिसम्भवाः।
तत् केन पूर्ब्बमासन् वै मरुन्नामेण कथ्यताम्॥

पुलस्त्य उवाच।

शृणुतां पूर्ब्बमरुतामुत्पत्तिं कथयामि ते।
स्वायम्भुवं समारभ्य यावन्मन्वन्तरं त्विदम्॥
स्वायम्भुवस्य पुत्रोऽभून्नाभो नामेति प्रियव्रतः।
तस्यासीत् सवनो नाम पुत्रस्त्रैलोक्यपूजितः॥
खसृत्यपाताथ स कामचारी
समं महिष्या वसुमानपुत्र्या।
ररास तन्व्या सह कामचारी
ततोऽम्बरात् प्राच्यवतास्य शुक्रम्॥
पतिभिः समनुज्ञाताः पपुः पुष्करसंस्थितम्।
तं शुक्रं पार्थिवेन्द्रस्य मन्यमानास्तदाहृतम्॥
पौतमात्रेण शुक्रेण पार्थिवेन्द्रोद्भवेन च।
ब्रह्मतेजोविहीनास्ता जाताः पत्त्रस्तपक्षिनाम्॥
सुषुवुः सप्त तनयांस्ते रुदन्तोऽथ भैरवम्।
तेषां रुदितशब्देन सर्व्वमापूरितं जगत्॥
अथाजगाम भगवान् ब्रह्मलोकात् पितामहः।
समभ्येत्याब्रवीद्बालान् मा रुदध्वं महाबलाः॥
मरुतो नाम यूयं वै भविष्यध्वं वियच्चराः।
इत्येवमुक्ता देवेशो ब्रह्मा लोकपितामहः॥
तानादाय वियच्चारी मारुतानादिदेश ह।
ते चासन् मरुतस्तात्रा मनोः स्वायम्भुवान्तरे॥*॥

स्वारोचिषे तु मरुतो वक्ष्यामि शृणु नारद।
स्वारोचिषस्य पुत्रश्च श्रीमानासीत् क्रतुध्वजः॥
तस्य पुत्रा भवन् सप्त सप्तार्च्चिःप्रतिमा सुने!।
तपोऽर्थं ते गताः शैलं महामेरुं नभश्चराः॥
आराधयन्तो ब्रह्माणं पद्मजेन्द्रमधेश्वरः।
ततो विपश्चिन्नामाथ सहस्राक्षो भयातुरः।
एतन्नामधरीसुस्थां प्राह नारद वाक्यवित्॥
यथा हि तपसो विघ्नं तेषां भवति सुन्दरि!।
तथा कुरुष्व मा तेषां सिद्धिर्भवतु वै यथा॥
इत्येवमुक्ता शक्रेण घृतना रूपशालिनी।
तच्चाजगाम त्वरिता यत्र तप्यन्ति ते तपः॥
आश्रमस्याविदूरे तु नदी मन्दोदवाहिनी।
तस्यां स्नातुं समायाताः सर्व्व एव सहोदराः॥
सा तु स्नातुं सुचार्व्वङ्गी त्वरतीर्णा महानदीम्।
दृदृशुस्ते नृपाः स्नातुं ततस्तुष्टुभिरे सुने॥
तेषाञ्च प्राश्यवत् शुक्रं तत् पपौ जलचारिणी।
शुक्रिणी शाहसुस्यस्य महाशुक्रस्य वल्लभा।
ते वै विगतपसो जग्मू राज्यमेव पैतृकम्॥
अहो बहुतिथे काले सा शाही शुक्ररूपिणी।
समुद्भृता महाजालैर्मत्स्यबन्धेन मानिनी॥
स तां दृष्ट्वा महाशुक्रीं स्थलस्थां मत्स्यजीवनः।
निवेदयामास तदा क्रतुध्वजसुतेषु वै॥
तथाभ्येत्य महात्मानो योगिनो योगधारिणः।
नीत्वा स्वमन्दिरं सर्व्वे पुरवास्यां समुत्सृजन्॥
ततः क्रमाच्छुक्रिणी सा सुषुवे सप्त वै सुतान्।
जातमात्रेषु पुत्रेषु मोक्षभावमगाच्च सा॥
अमात्रपिप्पला बाला जलमध्यविचारिणः।
स्नात्वार्थिनो वै रुरुदुरथाभ्यागात् पितामहः॥
मा रुदध्वमिति प्राह मारुतो नाम पुत्रकाः।
यूयं देवा भविष्यध्वं वायवोऽम्बरचारिणः॥
इत्येवमुक्त्वादाय सर्व्वांस्तान् दैवतान् प्रति।
नियोज्य च मरुन्मार्गे वैराजभवनं गतः॥
एवमासंश्च मरुतो मनोः स्वारोचिषान्तरे॥*॥

औत्तमे मरुतो ये च तान् शृणुष्व तपोधन।
औत्तमस्यान्ववाये च राजासीन्नृषधाधिपः।
वपुष्मानिति विख्यातो वपुषा भास्करोपमः॥
तस्य पुत्रो गणश्रेष्ठो ज्योतिष्मान् धार्म्मिकोऽभवत्।
स च पुत्रार्थी तपस्तेपे नदीं मन्दाकिनीमनु॥
तस्य भार्य्या च सुश्रोणी देवाचार्य्यसुता शुभा।
तपश्चरणयुक्तस्य बभूव परिचारिका॥
तेजोयुक्ता सुचार्व्वङ्गी दृष्ट्वा सप्तर्षिभिर्व्वने।
तां तथा चारुसर्व्वाङ्गीं दृष्ट्वाथ तपसा क्रशाम्॥
प्रप्रच्छुस्तपसो हेतुन्तस्यास्तेऽङ्गुरेव च।
साब्रवीत्तनयार्थाय आवाभ्यां वै तपःक्रिया॥
ते चासे वरदा ब्रह्मन् जाताः सप्त महर्षयः॥
व्रजध्वं तनयाः सप्त भविष्यन्ति न संशयः।
युवयोर्गुणसंयुक्ता महर्षीणां प्रसादतः।
इत्येवमुक्ता जग्मुस्ते सर्व्व एव महर्षयः।
सोऽपि राजर्षिरगमत् सभार्य्यो नगरं निजम्॥
ततो बहुतिथे काले सा राज्ञो महिषी प्रिया।
अवाप गर्भं तन्वङ्गी तस्मान्नृपतिसत्तमात्॥
गुर्व्विण्यामथ भार्य्यायां ममारासौ नराधिपः।
सा चाप्यारोढुमिच्छन्ती भर्त्तारं वै पतिव्रता॥
निवारिता तदामात्यैर्न तथापि व्यतिष्ठत।
तस्यामाज्ञिप्य भर्त्तारं चितायामारुरोह सा॥
ततोऽग्निमध्यात् बलिजे मांसपेश्यपतन्मुने।
साम्भसा सुखशीतेन संसिक्ता सप्तधाभवत्।
तेऽजायन्ताथ मरुत औत्तमस्यान्तरे मनोः॥*॥

तामसस्यान्तरे ये च मरुतोऽप्यभवन् पुरा ।
तानहं कीर्त्तयिष्यामि गीतनृत्यकलिप्रिय ! ॥
तामसस्य मनोः पुत्र ऋतध्वज इति श्रुतः ।
स पुत्रार्थी जुहावाग्नौ स्वमांसं रुधिरं तथा ॥
अस्थीनि रोम केशांश्च स्नायु मज्जा यकृद्वपम् ।
शुक्रं च विन्यसो राजा सुतार्थी वैति नः
श्रुतम् ॥
सप्तार्चिर्मंथ्याच्च ततः शुक्रपातादनन्तरम् ।
भा मे क्षिपस्वेत्यसरत् शब्दः सोऽपि नृपो ह्यतः ॥
ततस्तस्माद्धुतवहात् सप्त तत्तेजसोपमाः ।
शिशवः समजायन्त ते रुदन्तश्च तन्मुने ॥
तेषान्तु ध्वनिमाकर्ण्य भगवान् पद्मसम्भवः ।
समागम्य निवार्य्याथ स चक्रे मरुतः सुतान् ॥
ते त्वासन्मरुतो ब्रह्मंस्तामसे देवतागणाः ।
ये ऽभवन्नेवते तांश्च शृणुष्व त्वं तपोधन ॥
रैवतस्यान्वये तु राजासीद्रिपुजिद्बली ।
रिपुजिन्नाम स ख्यातो न तस्यासीत् सुतः
किल ॥
स समाराध्य तपसा भास्करं तेजसां निधिम् ।
अवाप कन्यां सुरतिं तां प्रगृह्य गृहं ययौ ॥
तस्यां पितृगृहे ब्रह्मन् वसत्यान्च पिता मृतः ।
सापि दुःखपरीताङ्गी स्वां तनुं त्यक्तुमुद्यता ॥
ततस्तां वारयामासुर्ऋषयः सप्त मानसाः ।
तस्यामासक्तचित्तासु सर्व्व एव तपोधनाः ॥
अपारयन्ती तद्दुःखं प्रत्याख्यातुं विवेश ह ।
तं चापश्यन्त ऋषयस्तच्चित्ताभावितास्तथा ॥
तं मृतां ऋषयो दृष्ट्वा कष्टं कष्टेति वादिनः ।
प्रजगुर्ज्वलनाच्चापि समाजायन्त दारकाः ॥
ते च माता विना भूता रुरुदुस्तान् पितामहः ।
निवारयित्वा कृतवान् लोकनाथो मरुद्गणान् ॥
रैवतस्यान्तरे जाता मरुतोऽमी तपोधन ।
शृणुष्व कीर्त्तयिष्यामि चाक्षुषस्यान्तरे मनोः ॥
आसीन्नाड्वीति विख्यातो तपस्वी सत्यवाक्
शुचिः ।
सप्त सारस्वते तीर्थे सोऽतप्यत महत्तपः ॥
विघ्नार्थं तस्य तपसो देवाः संप्रेरयन् वधूम् ।
सा चाभ्येत्य नदीतीरं क्षोभयामास भाविनी ॥
ततोऽस्य प्राप्यवच्छुक्रं सप्त सारस्वते जले ।
तां चैवाप्यप्सरां मूढां मुनिर्नाड्वनिको वधूम् ॥
गच्छालब्धेति मूढे त्वं पापस्यास्य फलं महत् ।
विध्वंसयिष्यति ह्यद्य भवतीं यज्ञसंसदि ॥
एवं शप्त्वा ऋषिः श्रीमान् जगामाथ स्वमाश्रमम् ।
सरस्वतीप्रभृतयः सप्त वै मरुतोऽभवन् ॥
एते तवोक्ता मरुतः पुरा यथा
जाता वियद्वह्निकरा महर्षे ।
येषां श्रुते जन्मनि पापहानि-
र्भवेच्च धर्म्माभ्युदयो महान् वै ॥"
इति वामने मरुतोत्पत्तिर्नाम ६६ अध्यायः ॥*॥
अन्यच्च ।
"अतः परं प्रवक्ष्यामि मरुतोऽमीन् पितॄन्
शृणु ।
प्रावाहो निवहश्चैव उद्वहः संवहस्तथा ॥
विवहः प्रवहश्चैव परिवाहस्तथैव च ।
अन्तरीक्षे च बाह्ये ते पृथङ्मार्गविचारिणः ॥
महेन्द्रप्रविभक्ताङ्गा मरुतः सप्त कीर्त्तिताः ।*।
सूर्य्याग्निश्च शुचिर्भामा वैद्युतः पावकः स्मृतः ॥
निर्म्मथ्य पच्यमानोऽग्निस्त्रयः प्रोक्ता इमेऽग्नयः ।
अग्नीनां पुत्रपौत्राश्च चत्वारिंशन्नवैव तु ।
मरुतामपि सर्व्वेषां विज्ञेयाः सप्त सप्तकाः ॥"
इति देवीपुराणे कालव्यवस्थानामाध्यायः ॥*॥
जनपद्याग्रहायुनामानि यथा,—
"एकज्योतिश्च द्विज्योतिस्त्रिज्योतिर्ज्योतिरेव च ।
एकशुक्रो द्विशुक्रश्च त्रिशुक्रश्च महाबलः ॥
इन्द्रश्च गत्यष्टयश्च ततः पतिसुतत्वरः ।
मितश्च संमितश्चैव मुनिश्च महाबलः ॥
ऋतजित् सत्यजिच्चैव सुषेणः सेनजित्तथा ।
अन्तिमित्रोऽनमित्रश्च पुरुमित्रोऽपराजितः ॥
ऋतश्च ऋतवाहश्च धर्त्ता च धरणो ध्रुवः ।
विधारणो नाम तथा देवदेवो महाबलः ॥
ईडश्चाप्यष्टयश्च एते दश मिताग्नयः ।
व्रतिनः प्रसवश्च समरश्च महायशाः ॥
धाता दुर्गो धितिर्भौमश्चभियुक्तश्चपात् सहः ।
द्युतिर्धुरनाथोऽथ वासः कामो जयो विराट् ।
इत्येकोनाश्च पञ्चाशन्मरुतः पूर्वसंभवाः ॥"
इति वह्निपुराणे गणभेदनामाध्यायः ॥*॥
वायोर्विकारहेतुर्यथा,—
"व्यायामादपतर्पणात् प्रपतनाद्भङ्गात् क्षया-
ध्वागमात्
वेगानाञ्च विधारणादतिगुरुः शैत्यादति-
त्रासतः ।
रूक्षक्षारकषायतिक्तकटुकैरेभिः प्रकोपं व्रजेत्
वायुर्वारिधरात्यये परिणते चान्नेऽपराह्णेऽपि
च ॥"*॥
तस्य लक्षणम् ।
"आध्मानस्तम्भरौक्ष्यस्फुटनविमथनश्चोभकम्प-
प्रतोदाः
कण्ठध्वंसावसादो भ्रमकविलपनं संसदूल-
प्रभेदाः ।
पारुष्यं कर्णनादो विषयपरिगतिर्भंग्रहृद्धि-
प्रमोहा
विस्रन्दोहृष्टनादिस्खपनमनशनं तोदनं पीड़-
नञ्च ॥
नामोन्नामौ विषादौ भ्रमपरिवदनं जृम्भणं
रोमहर्षौ
विच्छेपाक्षेपशोषग्रहणशुषिरता छेदनं वेष्टनञ्च ।
वर्णः श्यावोऽरुणो वा स्फुटति च महती खाप-
विश्लेषसङ्गा
विद्यात् कर्म्माण्यस्मिन् प्रकुपितपवनः स्यात्
कषायो रसश्च ॥"*॥
अन्यच्च ।
"वदनविरसता स्यादर्चसः कर्कशत्वं
भवति वपुषि कार्श्यं रात्रिनेद्रानिवृत्तिः ।
त्वचि च परुषता स्यात् स्याच्च वैषम्यमक्षे-
रिति पवनविकारे लक्षणं प्रोक्तमेतत् ॥"*॥
तस्य प्रशमताकारणम् । यथा,—
"रूक्षग्रीष्मो लघुः सूक्ष्मश्चलोऽथ विशदः खरः ।
विपरीतगुणैर्द्रव्यैर्मारुतः संप्रशाम्यति ॥
स्निग्धोष्णस्थिरगुर्व्यवल्लवणस्नाह्यम्लतैलातप-
स्नानाभ्यञ्जनवस्तिमांसमदिरासंवाहनोत्कर्त्तनैः ।
स्निग्धस्वेदनिरूहणोपशमनः स्नेहोपनाहादिकं
पानाहारविहारभेषजमिदं वातं प्रशान्तं
नयेत् ॥"*॥
ऋतुभेदेन विहारादिना च तस्य चयप्रकोप-
प्रशमनानि यथा,—
"ग्रीष्मे सञ्चीयते वायुः प्रावृट्काले प्रकुप्यति ।
प्रायेणोपशमं याति स्वयमेव समीरणः ॥
शरत्काले वसन्ते च पित्तं प्रावृतृतौ कफः ।
चयकोपशमान्दोषा विहाराहारसेवनैः ।
समानैर्व्यत्यकालेऽपि विपरीतैर्विपर्य्ययः ॥"*॥
स च प्राणादिभेदेन पञ्चविधः । यथा,—
"पित्तं पङ्गु कफः पङ्गुः पङ्गवो मलधातवः ।
वायुना यत्र नीयन्ते तत्र वर्षन्ति मेघवत् ॥
वायुरायुर्बलं वायुर्वायुर्धाता शरीरिणाम् ।
वायुर्विश्वमिदं सर्व्वं प्रभुर्वायुः प्रकीर्त्तितः ॥
चाक्रमण्डलचक्रेषु यथा राजा प्रशास्यते ।
तथा शरीरमध्येऽपि वायुरेकः परो विभुः ॥
वायुः प्राणादिभेदेन सच्च पञ्चविधः स्मृतः ।
हृदि प्राणो गुदेऽपानः समानो नाभिमध्यगः ॥
उदानः कण्ठदेशे तु व्यानः सर्व्वशरीरगः ।
योऽनिलो रक्तसञ्चारी स प्राणो नाम देहधृक् ॥
सोऽन्नं प्रवेशयत्यन्तः प्राणांश्चैवावलम्बते ।
कुपितः कुरुते रोगान् हिक्काश्वासादिकानपि ॥
उदानो नाम यस्तूर्द्ध्वमुपैति पवनोत्तमः ।
तेन भाषितगीतादिविशेषोऽपि प्रवर्त्तते ॥
ऊर्द्ध्वजत्रुगतान् रोगान् करोति कुपितश्च सः ।
आमपक्वाशयचरः समानोऽग्निसहायवान् ॥
अन्नं पचति तज्जांश्च विकारान् विविनक्ति सः ।
गुल्माग्निसादातीसारान् कुपितश्च करोति सः ॥
पक्वाशयस्थोऽपानस्तु काले कर्षति चाप्यधः ।
वातमूत्रपुरीषाणि शुक्रगर्भाशयानि च ॥
क्रुद्धश्च कुरुते रोगान् घोरान् बस्तिगुदाश्रयान् ।
सर्व्वदेहचरो व्यानो रससंवाहनोद्यतः ॥
स्वेदास्रक्स्रावणश्चापि षड्धा वेष्टयत्यपि ।
क्रुद्धश्च कुरुते रोगान् प्रायशः सर्व्वदेहगान् ॥
शुक्रदोषाः प्रमेहाश्च व्यानापानप्रकोपजाः ।
युगपत् कुपिताश्चामी देहं हन्युरसंशयः ॥"*॥
तत्प्रकृतिकस्य लक्षणं यथा,—
"अल्पक्लेशः क्रुधो रूक्षो वाचालश्चलमानसः ।
आकाशचारी स्वप्नेषु वातप्रकृतिको नरः ॥"*॥
प्राणादिपञ्चवायूनां यथाक्रमं संज्ञान्तरमाह ।
"प्राणोऽपानः समानश्चोदानव्यानौ च वायवः ।
नागः कूर्म्मश्च कुकरो देवदत्तो धनञ्जयः ॥*॥
प्राणस्तु प्रथमो वायुर्नराणामधिपः प्रभुः ।
नित्यमावापयेत् सर्व्वान् प्राणिनामुरसि स्थितः ॥
निःश्वासोच्छ्वासकश्चैव प्राणो जीवं समाश्रितः ।
प्रसाराकुञ्चनो वायुः प्रकाशो धारणस्तथा ॥

प्राणस्त्वेवंविधं कुर्य्यात् प्राणिनां प्राणधारकः ।
प्राणनं कुरुते यस्मात् तस्मात् प्राणः प्रकीर्त्तितः ॥
प्राणो हि भगवान् ईशः प्राणो विष्णुः पितामहः ।
प्राणेन धार्य्यते लोकः सर्व्वं प्राणमयं जगत् ॥
इन्द्रियाणि प्रवर्त्तन्ते यावत् प्राणास्तिष्ठे हृदि ।
नष्टे न दृश्यते सर्व्वं तस्मात् प्राणन्तु रक्षयेत् ॥
रज्जुबद्धो यथा श्येनो गतोऽप्याकृष्यते पुनः ।
गुणबद्धस्तथा जीवः प्राणापानेन कृष्यते ॥
अपानयंस्तथाहारं मनुजानां यतोऽधमः ।
शुक्रसृक्चरजे वायुरपानस्तेन कीर्त्तितः ॥ * ॥
पीतं भक्षितमाघ्रातं रक्तं पित्तकफानिलान् ।
समं नयति गात्रेषु समानो नाम मारुतः ॥
समानोऽग्निसमीपस्थः कोष्ठे च वाति सर्व्वतः ।
अन्नं गृह्णाति पचति विरेचयति मुञ्चति ॥*॥
स्यन्दयत्यधरं वक्त्रं नेत्रगात्रप्रकोपणः ।
उद्वेजयति मर्म्माणि उदानो नाम मारुतः ॥*॥
व्यानो विनामयत्यङ्गं व्यानो व्याधिप्रकोपणः ।
प्रीतेर्व्विनाशुक्रकृच्चायं वाङ्मनोत्पादकस्तथा ॥"*॥
वायूनां स्थानानि ।
"शिरसो नासिकाप्रान्तमुदानस्थानमुच्यते ।
नाभेः पादतलं यावदपानस्य प्रकीर्त्तितम् ॥
शरीरव्यापको व्यानः प्राणः सकलनायकः ।
उद्गारे नाग इत्युक्तः कूर्म्मश्चोन्मीलने स्थितः ॥
कृकरः क्षुधिते चैव देवदत्तो विजृम्भिते ।
धनञ्जयः स्थितो मेढ्रे मृतस्यापि न मुञ्चति ।
भूतावाप्निस्ततस्तस्माज्जायतेन्द्रियगोचरात् ॥*॥
उत्साहोच्छ्वासनिःश्वासचेष्टाधातुगतिः समाः ।
समो मोक्षे गतिमतां वायोः कर्म्मविकारजम् ॥"
इति सुखबोधः ॥ * ॥
अथ दिग्भेदवायुगुणाः ।
"प्राग्वातो मधुरः क्षारो वह्निमान्मलकरो गुरुः ।
वैरस्यगौरवौष्णानि करोत्यप्स्वोषधीषु च ॥
भ्रमोत्क्लिष्टत्वतापेषु रागश्वयथुदाहकृत् ।
सन्निपातज्वरश्वासत्वग्दोषार्शोविषक्रिमीन् ।
कोपयेदामवातञ्च घनसंघातकारणम् ॥
दाक्षिणो मारुतो बल्यश्चक्षुष्यः शुक्रघातकः ।
मधुरस्वाम्लदाही च कषायानुरसो लघुः ॥
रक्तपित्तप्रशमनो न च मारुतकोपनः ।
गण्डूपदादिकीटानां जनकः प्राणकारकः ॥
पाश्चिमोऽग्निवपुर्वर्णबलारोग्यविवर्द्धनः ।
कषायः शोषणः स्वर्य्यो रोचनो विशदो लघुः ॥
अपां लघुत्ववैशद्यशैत्यवैमल्यकारकः ।
सर्व्वद्रव्येष्वभिव्यक्तप्रभावरसवीर्य्यकृत् ।
व्रणसंरोपणस्त्वग्यो दाहश्लेष्मश्रमापहः ॥
औत्तरो मारुतः स्निग्धो मृदुर्म्मधुर एव च ।
कषायानुरसः शीतः सर्व्वदोषप्रकोपणः ॥
क्षीणक्षतविषार्त्तानां हितो दाहश्रमापहः ।
शीताधिकः सनीहारः सविद्युत्स्तनयित्नुमान् ॥
विश्ववायुरनायुष्यः प्राणिनां नैकदोषकृत् ।
सर्व्वर्त्तुनिन्दको हन्ता क्षत्योत्पातपुरःसरः ॥"*॥
व्यजनवायुगुणाः ।
"मूर्च्छादाहश्रमश्वासक्लेदश्रमनुदो व्यजनानिलः ।
तालवृन्तमयो वातश्लिष्मदोषघ्नो लघुः ॥
वंशव्यजनजो वातो रूक्षोष्णो वातपित्तहृत् ।
बालव्यजनभोज्यं मक्षिकादीन् व्यपोहति ।
मायूरा वल्गजा वैत्रा वाता दोषत्रयापहाः ॥"
इति राजवल्लभः ॥ * ॥
अपि च । तत्र वायोः स्वरूपमाह ।
"दोषधातुमलादीनां नेता शीघ्रः समीरणः ।
रजोगुणमयः सूक्ष्मो रूक्षः शीतो लघुश्चलः ॥"
नेता स्थानान्तरे प्रापयिता । शीघ्रः आशुकारी । अन्यच्च ।
"उत्साहोच्छ्वासनिःश्वासचेष्टावेगप्रवर्त्तनैः ।
सम्यग्गत्या च धातूनामिन्द्रियाणाञ्च पाटवैः ॥
अनुगृह्णात्यविकृतो हृदयेन्द्रियचित्तधृक् ।
रजोगुणमयः सूक्ष्मो रूक्षः शीतो लघुश्चलः ॥
खरो मृदुर्योगवाही संयोगादुभयार्थकृत् ।
दाहक्लेदौजसा युक्तः शीतकृत् सोमसंश्रयात् ॥
विभागकरणाद्वायुः प्रधानं दोषसंग्रहे ।
पक्वाशयकटीसक्थिश्रोत्रास्थिस्पर्शनेन्द्रियम् ।
स्थानं वातस्य तत्रापि पक्वाधानं विशेषतः ॥"
एको वायुः पित्तवशान्नामस्थानकर्म्मभेदैः पञ्चविधः ॥ * ॥ तेषां वायूनां नामान्याह ।
"उदानस्तदनु प्राणः समानोऽपान एव च ।
व्यानश्चेतानि नामानि वायोः स्थानप्रभेदतः ॥"
अथोदानादीनां स्थानान्याह ।
"कण्ठे हृदि तथाधस्तात् कोष्ठवह्निमलाशये ।
सकलेऽपि शरीरेऽसौ क्रमेण पवनो वसेत् ॥"
अथ तेषां कर्म्माण्याह ।
"उदानो नाम यस्तूर्द्ध्वमेति पवनोत्तमः ।
तेन भाषितगीतादिप्रवृत्तिः कुपितस्तु सः ।
ऊर्द्ध्वजत्रुगतान् रोगान् विदधाति विशेषतः ॥
यो वायुः प्राणनामासौ सुखं गच्छति देहधृक् ।
सोऽन्नं प्रवेशयत्यन्तः प्राणांश्चाप्यवलम्बते ॥
प्रायशः कुरुते दुष्टो हिक्काश्वासादिकान् गदान् ।
आमपक्वाशयचरः समानो वह्निसङ्गतः ॥
सोऽन्नं पचति तज्जांश्च विशेषान् विविनक्ति हि ॥"
तज्जानित्याह अन्नजान् । रसमलमूत्रादीन् पृथक्करोतीत्यर्थः ।
"स दुष्टो वह्निमान्द्यातिसारगुल्मान् करोति हि ।
पक्वाशयालयोऽपानः काले कर्षति चाप्ययम् ॥
समीरणः शुक्रनृमूत्रशुक्रगर्भार्त्तवान्ध्यहृत् ।
कुद्धस्तु कुरुते रोगान् घोरान् वस्तिगुदाश्रयान् ॥
शुक्रदोषप्रमेहांश्च व्यानापानप्रकोपजान् ॥"
स च ।
"कृत्स्नदेहचरो व्यानो रससंदहनो यतः ।
स्वेदास्रक्स्रावणश्चापि प्रच्यवा चेष्टयत्यपि ॥
गत्यपक्षेपणोत्क्षेपनिमेषोन्मेषणादिकाः ।
प्रायः सर्व्वाः क्रियास्तस्मिन् प्रतिबन्धाः शरीरिणाम् ॥
प्रस्यन्दनं चोद्वहनं पूरणञ्च विरेचनम् ।
धारणञ्चेति पञ्चेताश्चेष्टाः प्रोक्ता नभस्वतः ॥
क्रुद्धः स कुरुते रोगान् प्रायशः सर्व्वदेहगान् ।
युगपत् कुपिता यस्ते देहं भिन्द्युरसंशयम् ॥"
देहं भिन्नं कुर्य्युर्मारयेयुरित्यर्थः । इति भावप्रकाशः ॥ * ॥ (असुरविशेषः । यथा, हरिवंशे । २ । ८५ ।
"दीर्घजिह्वोऽर्कनयनो मृदुत्वापो मृदुप्रियः ।
वायुर्गरिष्ठो नमुचिः शम्बरो विजयो महान् ॥")
वायुकेतुः, स्त्री, (वायुः केतुर्ध्वजो वाहनं वा यस्याः ।) धूलिः । इति हारावली । १५८ ॥
वायुगण्डः, पुं, अजीर्णम् । इति त्रिकाण्डशेषः ॥
वायुगुल्मः, पुं, (वायुना कृतो गुल्म इव ।) अभसां भ्रमः । इति त्रिकाण्डशेषः ॥
वायुदारुः, पुं, (वायुना दीर्य्यते इति । दृ + उण् ।) मेघः । इति त्रिकाण्डशेषः ॥
वायुपुत्रः, पुं, (वायोः पुत्रः ।) भीमः । इति धनञ्जयः ॥ हनूमान् । यथा,—
"हनूमानञ्जनास्तनुर्वायुपुत्रो महाबलः ।"
इति तस्य द्वादशनामस्तोत्रम् ॥
वायुफलं, क्ली, (वायुना फलति प्रतिफलतीति । फल् + अच् ।) शृङ्गधनुः । (वायोः फलमिव ।) कर्कटी । इति मेदिनी । ले, १६४ ॥
वायुभक्ष्यः, पुं, (वायुर्भक्ष्योऽस्येति ।) सर्पः । इति राजनिर्घण्टः ॥ वातभक्षके, त्रि ॥ (यथा, गो० रामायणे । ३ । १५ । १२ ।
"स हि तेपे तपस्तीव्रं मन्दकर्णिर्महामुनिः ।
दशवर्षसहस्राणि वायुभक्ष्यः शिलाशयः ॥")
वायुवर्त्म, [न्] क्ली, (वायोर्वर्त्म ।) आकाशः । इति शब्दचन्द्रिका ॥
वायुवाहः, पुं, (वायुना उह्यते इति । वह् + घञ् ।) धूमः । इति हेमचन्द्रः । ४ । १६६ ॥
वायुवाहिनी, स्त्री, (वायुं वहतीति । वह् + णिनिः । ङीप् ।) वायुसञ्चारिणी शिरा । इति वैद्यकम् ॥
वायुषः, पुं, मत्स्यविशेषः । कालवायुषयोना इति भाषा । तस्य गुणाः ।
"वायुषो दृंहणो वृष्यो मधुरो धातुवर्द्धनः ॥"
इति राजवल्लभः ॥
वायुसखः, पुं, (वायोः सखा । "राजाहःसखिभ्यष्टच् ।" ५ । ४ । ९१ । इति टच् ।) अग्निः । इति भरतः ॥
वायुसखा, [खि] पुं, (वायुः सखा यस्येति विग्रहे टजभावात् । "अनङ् सौ ।" ७ । १ । ९३ । इति अनङादेशः ।) अग्निः । इत्यमरः । १ । १ । ५८ ॥
वायूत्सर्गः, क्ली, (वायूनामुत्सर्गः सञ्चरणस्थानम् ।) आकाशः । इति धनञ्जयः ॥
वार्, क्ली, (वारयतीति । वृञ् + णिच् + क्विप् ।) जलम् । इत्यमरः । १ । १० । ३ ॥ (यथा, भागवते । १० । ३३ । २२ ।
"गन्धर्व्वपालिभिरनुद्रुत आविशद्वा
आन्तो गजीभिरिभराडिव भिन्नसेतुः ॥")

वारं, क्ली, (वार्य्यतेऽनेनेति। वृ+णिच्+घञ्।) मदिरापात्रम्। इति हेमचन्द्रः॥
वारंवारं, अ, पुनःपुनः। यथा। वारंवारं सुङ्क्ते प्रभ्रश्यदिति शब्दरत्नावली॥
वारः, पुं, (वारयति म्रियते वेति। वृ+णिच्+अच्। वृ+घञ् वा।) समूहः। अवसरः। इत्यमरः॥ (यथा, महाभारते। १।१६१।७।
"एकैकस्यापि पुरुषस्तत्प्रयच्छति भोजनम्।
स वारो बहुभिर्वर्षैर्भवत्यसुतरो नरैः॥")
सूर्य्यादिवासरः। द्वारः। हरः। कुजवृक्षः। क्षणः। इति मेदिनी। रे, ६५॥ *॥ अथ वाराणां संज्ञा।
"चरः सौम्यो गुरुः स्निग्धो मृदुः शुक्रो रविर्ध्रुवः।
शनिश्च दारुणो ज्ञेयो भौम उग्रः शशी समः॥
चरस्त्रिप्रे प्रयातव्यं प्रवेष्टव्यं मृदुध्रुवैः।
दारुणोग्रैश्च योद्धव्यं क्षत्रियैर्जयकाङ्क्षिभिः॥
नृपाभिषेकोऽग्निकार्य्यं सूर्य्यवारे प्रशस्यते।
सोमे तु लेपधानञ्च कुर्य्याच्चैव गृहादिकम्॥
सेनापत्यं प्रौढ्ययुद्धं शस्त्राभ्यासः कुजे तथा।
सिद्धिकार्य्यञ्च मन्त्रश्च याचा चैव बुधे स्मृता॥
पठनं देवपूजा च वस्त्राद्याभरणं गुरौ।
कन्यादानं गजारोहः शुक्रे स्यात् समयः स्त्रियाः।
स्थाप्यं गृहप्रवेशश्च गजबन्धः शनौ शुभः॥"
इति गारुडे ६२ अध्यायः॥
सावनदिनवद्वारप्रवृत्तिः सूर्य्योदयावधिरेव। सूर्य्यसिद्धान्ते।
"सूतकादिपरिच्छेदो दिनमासाब्दपास्तथा।
मध्यमग्रहभुक्तिश्च सावनेन प्रकीर्त्तिताः॥"
अत्र दिनाधिपस्य रव्यादेर्भोग्यं दिनं वाररूपं सावनगणनोक्तं व्यवहारोऽपि तादृगेव। तिथिविवेकेऽपि। भवतु वारयोगे यस्तिथेर्ग्रहणं तस्य दिनक्षयेऽसम्भवादित्युक्तम्। सावनदिनमाह सूर्य्यसिद्धान्तः।
"उदयादुदयं भानोर्भौमसावनवासराः॥"
भौमेति प्रियादिदिनव्यावृत्त्यर्थम्। यत्तु रेखापूर्व्वपरयोरित्यादिना ज्योतिषे वारप्रवृत्तिरुक्ता तल्लोकसिद्धौदयिकसूर्य्योक्तकालहोरादिज्ञापनार्थमिति ज्योतिस्तत्त्वे बहुधा विवृतम्।
"नैवास्तमनमर्कस्य नोदयः सर्व्वदा सतः।
उदयास्तमनाख्यं हि दर्शनादर्शनं रवेः॥
येयंच दृश्यते भास्वान् स तेषामुदयः स्मृतः॥"
इति विष्णुपुराणात् सूर्य्यदर्शनयोग्यकालादेव वारघटककर्म्मसु स एव कालः। इति ज्योतिस्तत्त्वम्॥ *॥ अथ शोभनवाराः।
"रविः सोमो मङ्गलश्च बुधो जीवः सितः शनिः।
एतेषां नामतो वारा विख्याताः सर्व्वकर्म्मसु॥
सितेन्दुबुधजीवानां वाराः सर्व्वत्र शोभनाः।
भानुभूसुतमन्दानां शुभकर्म्मसु केष्वपि॥"
इति ज्योतिःसागरः॥
अथ वारवेला।
"ऋतमुनियमशरमङ्गल-
द्रामर्तुश्च भास्करादेयामार्द्धे।
प्रभवति हि वारवेला
न शुभाशुभकार्य्यकरणाय॥"
अथ कालवेला।
"कालस्य वेला रवितः शराग्नि-
कालानलाग्न्यम्बुधयो गजेन्द्राः।
दिने निशायाश्चतुर्वेदनेत्र-
नगेषु रामा विधुदन्तिनौ च॥"
इति ज्योतिस्तत्त्वम्॥ *॥
तयोर्व्वर्ज्यत्वं यथा,—
"रवौ वर्ज्यं चतुःपञ्च सोमे सप्तद्वयं तथा।
कुजे षष्ठद्वयञ्चैव बुधे बाणत्रितीयकम्॥
गुरौ सप्ताष्टकं चैव त्रिचत्वारि च भार्गवे।
शनावाद्यञ्च षष्ठञ्च शेषञ्च परिवर्ज्जयेत्॥ *॥
रवौ षष्ठं विधौ वेदं कुजवारे द्वितीयकम्।
बुधे सप्त गुरौ पञ्च भृगुवारे त्रितीयकम्।
शनावाद्यं तथा चान्त्यं रात्रौ कालं विवर्जयेत्॥"
इति सारसंग्रहः॥ *॥
अथ स्त्रीणां प्रथमरजस्वलायां वारफलम्।
"आदित्ये विधवा नारी सोमे चैव पतिव्रता।
वेश्या मङ्गलवारे च बुधे सौभाग्यमेव च॥
वृहस्पतौ पतिः श्रीमान् शुक्रे पुत्रवती भवेत्।
शनौ वन्ध्या तु विज्ञेया प्रथमस्त्री रजस्वला॥"
इति मधुरेशगृहीतसारसंग्रहः॥
(बालः। यथा, ऋग्वेदे। २।४।४।
"वियोभरिभ्रदोधथीषु जिह्मा
मत्यो न रथ्यो दोधवीति वारान्॥"
"रथ्यो रथार्होऽश्वोन वाजी यथा वारान् दंशवारणसाधनान् बालान् दोधवीति कम्पयति।"
इति तद्भाष्ये सायणः॥ वरणीये, त्रि,। यथा, ऋग्वेदे। १।१२८।६। [वृणक्ति॥"
"विश्वस्मा इत्सुकृते वारन्धनत्यग्निर्द्वारान्
"वारं सर्व्वैर्वरणीयम्॥"इति तद्भाष्ये सायणः॥)
वारकं, क्ली, (वारयतीति। वृ+णिच्+ण्वुल्।) कटस्थानम्। इति हारावली। १२८॥ क्रौवेरम्। इति हेमचन्द्रः। ४।२२४॥
वारकः, पुं, (वृ+णिच्+ण्वुल्।) अश्वविशेषः। इति विश्वः॥ अश्वगतिः। निषेधके, त्रि। इति मेदिनी। के, १३१॥ (यथा, महाभारते।१२।३२१।३६।
"पुरा सम्मूलबान्धवं प्रसुहृद्रत्यदुःखवित्।
तवेह जीवितं यमो न चास्ति तस्य वारकः॥")
वारकी, [न्] पुं, (वारकोऽस्त्यस्येति। इनिः।) चित्राश्वः। शत्रुः। पर्णाजीवी। पयोधिः। इति मेदिनी। नि, १६५॥
वारकीरः, पुं, (वारो वरणीयः कीरः पक्षीव। यद्वा, वारे अवसरे किरति कौतुकवाक्यमिति। कृ+कः। निरुक्तलक्षणो दीर्घः। यद्वा, वारे अवसरे कीलति बध्नाति कौतुकार्थं रज्ज्वा प्रेमृणाति वा। कील+कः। लस्य रत्वम्।) शशलकः। इति त्रिकाण्डशेषः॥ वारयाही। वाड़वः। यूका। वेणिवेधिनी। नीराजितकृमयः। इति मेदिनी। रे, २८८॥

वारङ्गः, पुं, पक्षी। इति त्रिकाण्डशेषः॥
वारङ्गः, पुं, (वारयतीति म्रियते इति वा। वृ+"वृञोर्ऽद्विच्च।" उणा० १।१२१। इति अङ्गच्। धातोर्द्वित्वञ्च।) खड्गादिमुष्टिः। इति सिद्धान्तकौमुद्यामुणादिवृत्तिः॥ मुट् इति वाँट इति च भाषा॥ (यथा, सुश्रुते।१।७।
"तत्र खस्तिकयन्त्राणि ***शूले कुण्ठवदावृत्तवारङ्गाणि अस्थिविनष्टग्रन्थ्योद्धरणार्थमुपदिश्यन्ते॥")
वारटं, क्ली, (वार् जलमटति प्राप्नोतीति। अट्+अच्।) क्षेत्रम्। इति त्रिकाण्डशेषः। क्षेत्रसमूहः। इति शब्दरत्नावली॥
वारटा, स्त्री, (वारि जले अटतीति। अट्+अच्+टाप्।) हंसी। इति हेमचन्द्रः।४।३६३॥
वारणं, क्ली, (वृ+णिच्+ल्युट्।) प्रतिषेधः। इति मेदिनी। णे, ६६॥ (यथा, हरिवंशे।१८०।४५॥
"अस्त्राणां वारणार्थाय वासुदेवोऽप्यसूचत॥")
हस्तिवारणम्। इति जटाधरः॥*॥ दानकाले वारणनिषेधो यथा,—
"न देवगुरुविप्राणां दीयमानन्तु वारयेत्।
न चात्मानं प्रशंसेद्वा परनिन्दाञ्च वर्ज्जयेत्॥"
इति कौर्म्मे उपविभागे १६ अध्यायः॥
वारणः, पुं, (वारयति परबलमिति। वृ+ल्युः।) हस्ती। इत्यमरः। २।८।३४॥ (यथा, कुमारे। ५।७०।
"इयञ्च ते कन्या पुरतो विडम्बना
यदूढया वारणराजहार्य्यया।
विलोक्य वृद्धोक्षमधिष्ठितं त्वया
महाजनः स्मेरमुखो भविष्यति॥")
वारणवारः। इति शब्दरत्नावली॥ (यथा, महाभारते। ४।४०।२।
"वारणा यस्य सौवर्णाः पृष्ठे भासन्ति दंशिताः।
सुपार्श्वं सुग्रहञ्चैव कस्तेनद्युरुत्तमम्॥"
वारि जले रणति चरतीति। वार्+रण+अच्। जलजाते, त्रि। यथा, हरिवंशे।३१।४८।
"ततो वैभ्राजकिरातस्य वारणं शुक्लवाहनम्।
अवतारयामास महीं मत्तैर्वाहनसत्तमम्॥"
"वारि जले रणति चरतीति वारणः सप्तद्वीपेश्वर इत्यर्थः।" इति तट्टीकायां नीलकण्ठः॥)
वारणवृषा, स्त्री, (वृष्यते इति। वृष उत्सर्गे+कः। वारणानां वृषा। यद्वा, वारणान् पुष्णातीति। पुष+कः। पृषोदरादित्वात् षस्य वः।) कदली। इत्यमरः। २।४।११३॥
वारणवल्लभा, स्त्री; (वारणानां वल्लभा प्रिया।) कदलीवृक्षः। इति त्रिकाण्डशेषः॥
वारणसी, स्त्री, (वरणा च असी च नदीद्वयं तस्य अदूरे भवा। "अदूरभवश्च।" ४।२।७०। इत्यण्। ङीप्। पृषोदरादित्वात् साधुः।) वाराणसी। काशी। इति हेमचन्द्रः॥
वारणीयं, त्रि, (वृ+णिच्+अनीयर्।) वारणयोग्यम्। वृञ्धातोः आत्मादनीयप्रत्ययेन निष्पन्नम्॥ (यथा, कथासरित्सागरे।५७।१।

"अवारणीयं रिपुभिर्वारणीयं करं नृपः।
हैरम्बस्य ससिन्दूरमसिं दूरमघच्छिदम्॥")

वारत्रं, क्ली, चर्म्मबन्धनी। इति क्षीरस्वामी॥

वारवधूः, स्त्री, (वाराणां जनसमूहानां वधूः।) वारमुख्या। इति हेमचन्द्रः। ३। १६७॥ (यथा, आर्य्यासप्तशत्याम्। ३०८॥

"निजगात्रनिर्विशेषस्थापितमपि सारमखिल-
मादाय।
निर्मोकस्थ भुजङ्गी मुञ्चति पुरुषस्य वारवधूः॥")

वारवाणः, पुं, क्ली, (वारं वारणीयं वाणं यस्मात्।) कञ्चुकः। इत्यमरः। २। ८। ६३॥ (यथा, माघे। १५। ८७।

"पीनकुचतटनिपीड़दल-
दरवारवाणसुरसा लिलिङ्गिरे॥")

वारवुषा, स्त्री, (वारान् बालकान् पुष्णातीति। पुष्+कः। पृषोदरादित्वात् पस्य बः।) कदली। इति शब्दरत्नावली॥

वारमुख्या, स्त्री, (वारेषु वेश्यासमूहेषु मुख्या श्रेष्ठा।) जनैः सत्कृता वेश्या। इत्यमरः। २। ६। १६॥ (यथा, भागवते। १। ११। २०।

"वारमुख्यास्त्र गृतघ्नो यानैस्तद्दर्शनोत्सुकाः॥")

वारयिता, पुं, (वारयति दुर्नीतेरिति। वृ+णिच्+तृच्।) पतिः। इति हलायुधः॥

वारला, स्त्री, (वारं लातीति। ला+कः।) वरटा। हंसी। इति हेमचन्द्रः। ४। ३६३॥

वारलीकः, पुं, वल्लजा। इति शब्दरत्नावली॥ वायुर इति ख्यातः॥

वारवाणिः, पुं, (वारं शब्दसमूहं वणते इति। वण+इण्।) वंशीवादकः। इति त्रिकाण्ड-शेषः॥ उत्तमगायकः। इति शब्दरत्नावली॥ धर्म्माध्यक्षः। संवत्सरः। इत्यजयपालः॥ एतन्नते पवर्गीयादिः॥

वारवाणिः, स्त्री, (वारे अर्घदानावसरे वाणिः प्रियालापो यस्याः।) वेश्या। इति त्रिकाण्ड-शेषः॥

वारवाणी, स्त्री, (वारवाणि+प्रत्ये ङीष्।) वार-मुख्या। इति शब्दरत्नावली॥

वारविलासिनी, स्त्री, (वाराणां जनसमूहानां विलासिनी स्त्री। यद्वा, वारान् विलासयतीति। वि+लस+णिच्+णिनिः। ङीप्।) वेश्या। इति शब्दरत्नावली॥ (यथा, कथासरित्-सागरे। १२। ७८।

"अस्तीह मथुरा नाम पुरीकंसारिजन्मभूः।
तस्यां रूपनिकेत्यासीत् ख्याता वारविला-
सिनी॥")

वारवृषा, स्त्री, (वारान् हस्तिसमूहान् वर्षतीति। वृष+कः। टाप्। हस्तिभक्ष्यत्वेनास्यास्तथा-त्वम्।) कदली। इति शब्दरत्नावली॥

वारसुन्दरी, स्त्री, (वाराणां नरसमूहानां सुन्दरी।) वेश्या। इति हारावली। १४४॥

वारसेवा, स्त्री, (वारे अवसरे सेवा।) वेश्यानां क्रमः। तासां गणः। इति जटाधरः॥

वारस्त्री, स्त्री, (वाराणां जनसमूहानां स्त्री।) वेश्या। इत्यमरः। २। ६। १६॥

वारांनिधिः, पुं, (वारां जलानां निधिः। अलुक्-समासः।) समुद्रः। इति शब्दरत्नावली॥

वाराणसी, स्त्री, (वरणा च असी च। तयोर्नद्यो-रदूरे भवा। "अदूरभवश्च।" ४। २। ७०। इत्यण्। ङीप्। पृषोदरादित्वात् साधुः। अस्या निरुक्तिर्यथा,—

"वरणासी च नद्यौ द्वे पुण्ये पापहरे उभे।
तयोरन्तर्गता या तु सेयं वाराणसी स्मृता॥")

मोक्षदपुरीविशेषः। बनारस इति हिन्दी भाषा। तत्पर्य्यायः। वाराणसी २ काशी ३ शिवपुरी ४। इति हेमचन्द्रः॥ जित्वरी ५ तपःस्थली ६ वरणसी ७ तीर्थराजी ८ काशिका ९। इति शब्दरत्नावली॥ तस्या माहात्म्यं यथा,—

ईश्वर उवाच।

"परं गुह्यतमं चैवं मम वाराणसी पुरी।
सर्व्वेषामेव भूतानां संसारार्णवतारिणी॥
तच्च भक्ता महादेवि! मदीयं व्रतमाश्रिताः।
निवसन्ति महात्मानः परं नियममास्थिताः॥
उत्तमं सर्व्वतीर्थानां स्थानानामुत्तमञ्च यत्।
ज्ञानानामुत्तमं ज्ञानं अविमुक्तपुरं मम॥
स्थानान्तरं पवित्राणि तीर्थान्यायतनानि च।
श्मशानसंस्थितान्येव दिव्यभूमिगतानि च॥
भूर्लोके नैव संलग्नमन्तरीक्षे ममालयम्।
अमुक्तास्तन्न पश्यन्ति मुक्ताः पश्यन्ति चेतसा॥
श्मशानमेतद्विख्यातमविमुक्तमिति श्रुतम्।
कालो भूत्वा जगदिदं संहराम्यत्र सुन्दरि!॥
देवीदं सर्व्वगुह्यानां स्थानं प्रियतरं मम।
यङ्गत्वास्तत्र गच्छन्ति मामेव प्रविशन्ति ते॥
दत्तं जप्तं हुतं चेष्टं तपस्तप्तं कृतञ्च यत्।
ध्यानमध्ययनं ज्ञानं सर्व्वं तत्राक्षयं भवेत्॥
जन्मान्तरसहस्रेषु यत् पापं पूर्व्वसञ्चितम्।
अविमुक्तं प्रविष्टस्य तत्सर्व्वं व्रजति क्षयम्॥
ब्राह्मणाः क्षत्रिया वैश्या शूद्रा ये वर्णसङ्कराः।
स्त्रियो म्लेच्छाश्च ये चान्ये संकीर्णाः पाप-
योनयः॥
कीटाः पिपीलिकाश्चैव ये चान्ये दृग्पक्षिणः।
कालेन निधनं प्राप्ताः स्वविमुक्ते वरानने!॥
चन्द्रार्द्धमौलयश्चान्ये महादृषभवाहनाः।
शिवे मम पुरे देवि! जायन्ते तत्र मानवाः॥
नाविमुक्ते मृतः कश्चिन्नरकं याति किल्बिषी।
ईश्वरानुगृहीता हि सर्व्वे यान्ति परां गतिम्॥
मोक्षं सुदुर्ल्लभं मत्वा संसारश्चातिभीषणम्।
अप्रमत्ता चरणौ हत्वा वाराणस्यां वसेन्नरः॥
दुर्ल्लभा तपसा चापि पूतस्य परमेश्वरि!।
यत्र तत्र विपन्नस्य गतिः संसारमोचनी॥
प्रसादाज्जायते श्वेतन्मम शैलेन्द्रनन्दिनि!।
अप्रबुद्धा न पश्यन्ति मम मायाविमोहिताः॥
अविमुक्तं न पश्यन्ति मूढ़ा ये तमसावृताः।
विण्मूत्ररेतसां मध्ये तेषां वासः पुनः पुनः॥
हन्यमानोऽपि यो विद्वान् वसेद्विघ्नशतैरपि।
स याति परमं स्थानं यत्र गत्वा न शोचति॥
जन्ममृत्युजरायुक्तं परं यान्ति शिवालयम्।
अपुनर्मरणानां हि सा गतिर्मोक्षकाङ्क्षिणाम्॥
यां प्राप्य कृतकृत्याः स्यादिति मन्यन्ति पण्डिताः।
न दानैर्न तपोभिश्च न यज्ञैरपि विद्यया॥
प्राप्यते मतिरुत्कृष्टा या विमुक्तौ तु लभ्यते।
नानावर्णा विवर्णाश्च चाण्डालाद्या जुगुप्सिताः॥
किल्बिषैः पूर्णदेहा ये विशिष्टैः पातकैरपि।
भेषजं परमं तेषामविमुक्तं विदुर्बुधाः॥
अविमुक्तं परं ज्ञानमविमुक्तं परं पदम्।
अविमुक्तं परं तत्त्वमविमुक्तं परं शिवम्॥
श्रुत्वा वै नैष्ठिकीं दीक्षामविमुक्ते वसन्ति ये।
तेषां तत् परमं ज्ञानं ददाम्यन्ते परं पदम्॥
प्रयागं नैमिषं पुण्यं श्रीशैलोऽथ हिमालयः।
केदारं भद्रकर्णञ्च गया पुष्करमेव च॥
कुरुक्षेत्रं रुद्रकोटिर्नर्म्मदा स्वातकेश्वरम्।
शालग्रामञ्च कुब्जाम्रं कोकामुखमनुत्तमम्॥
प्रभासं विषयेशानं गोकर्णं भद्रकर्णकम्।
एतानि पुण्यस्थानानि त्रैलोक्ये विश्रुतानि तु॥
न यास्यन्ति परं मोक्षं वाराणस्यां तथा मृताः।
वाराणस्यां विशेषेण गङ्गा त्रिपथगामिनी॥
प्रविश्य नाशयेत् पापं जन्मान्तरशतैः कृतम्।
अन्यत्र शुभगा गङ्गा आद्यं दानं तपो जपः॥
व्रतानि सर्व्वमेवैतत् वाराणस्यां सुदुर्लभम्।
यजेत जुहुयान्नित्यं ददात्यर्चयते ऽमरान्॥
वायुभक्ष्यश्च सततं वाराणस्यां स्थितो नरः।
यदि पापो यदि मूढो यदि वा धार्म्मिको नरः॥
वाराणसीं समासाद्य पुनाति सकलं नरः॥
वाराणस्यां महादेवं येऽर्चयन्ति स्तुवन्ति वै।
सर्व्वपापविनिर्म्मुक्तास्ते विज्ञेया गणेश्वराः॥
अन्यत्र योगज्ञानाभ्यां सन्न्यासादथ नान्यतः।
प्राप्यते तत् परं स्थानं सहस्रेणैव जन्मनः॥
ये भक्त्या देवदेवेशं वाराणस्यां वसन्ति वै।
ते विन्दन्ति परं मोक्षमेकेनैव तु जन्मना॥
यत्र योगस्तथा ज्ञानं मुक्तिरेकेन जन्मना।
अविमुक्तं तदासाद्य नान्यत्र क्षेत्रपोवनम्॥
ज्ञानाज्ञानाभिनिष्ठानां परमानन्दमिच्छताम्।
या गतिर्विहिता प्रभु साविमुक्ते हतस्य तु॥
यानि चैवाविमुक्तस्य देहे मुक्तानि कृतघ्नैः।
पुरी वाराणसी तेभ्यः स्थानेभ्योऽधिका शुभा॥
यत्र साक्षान्महादेवो देहान्ते स्वयमीश्वरः।
याचते तारकं ब्रह्म तत्रैव ह्यविमुक्तके॥
तत्तत् परतरं तत्त्वमविमुक्तमिति श्रुतम्।
एकेन जन्मना देवि वाराणस्यां तदाप्नुयात्॥
भ्रूमध्ये नाभिमध्ये च हृदये चैव मूर्द्धनि।
यथाविमुक्तमादित्ये वाराणस्यां व्यवस्थितम्।
वाराणायास्तथा चास्या मध्यं वाराणसी पुरी॥
तत्रैव संस्थितं भद्रं नित्यमेवाविमुक्तकम्।
वाराणस्याः परं स्थानं न भूतं न भविष्यति॥
यत्र नारायणो देवो महादेवाधिरीश्वरः।
तत्र देवाः सगन्धर्व्वाः सयक्षोरगराक्षसाः।

उपासते मां सततं देवदेवः पितामहः ॥
महापातकिनो ये च ये च वै पापकृत्तमाः ।
वाराणसीं समासाद्य ते यान्ति परमां गतिम् ।
तस्मान्मुच्चुर्विवर्णो वसेद्वै मरणान्तिकम् ॥
वाराणस्यां महादेवाज्ज्ञानं लब्ध्वा विमुच्यते ।
किन्तु विघ्ना भविष्यन्ति पापौघहतचेतसः ॥
यथा नारायणः श्रेष्ठो देवानां पुरुषोत्तमः ।
यथेश्वराणां गिरिशः स्थानानां वै तदुत्तमम् ॥
यैः समाराधितो रुद्रः पूर्व्वस्मिन्नेव जन्मनि ।
ते विन्दन्ति परं क्षेत्रमविमुक्तं शिवालयम् ॥
ये स्मरन्ति सदा कालं वदन्ति च पुरीमिमाम् ।
तेषां विनश्यति क्षिप्रमिहामुत्र च पातकम् ॥
आचक्ष्वमिदं स्थानं सेवितं मोक्षकाङ्क्षिणाम् ।
मृतानाञ्च पुनर्जन्म न भूयो भवसागरे ॥
तस्मात् सर्व्वप्रयत्नेन वाराणस्यां वसेन्नरः ।
योगी वाप्यथवायोगी पापी वा पुण्यकृत्तमः ॥"

इति कौर्म्मे २८ अध्यायः ॥ * ॥

अन्यच्च ।

"वाराणसी नाम पुरी गङ्गातीरे मनोहरे ।
वरणायास्तया वासेर्मध्ये चापाकृतिः सदा ॥
स्वयं वृषध्वजस्तत्र नित्यं वसति योगिनाम् ।
सदा प्रीतिकरो योगी स्वयं चाप्यात्मचिन्तकः ॥
वियत्स्था सा पुरी नित्यं भर्गयोगबलादृता ।
दिशं ज्ञानं ददात्येव तत्र यो म्रियते जनः ॥
तस्मै स्वयं महादेवः संसारमुक्तिमुक्तये ।
स भूत्वा परमो योगी मृतस्तत्र भवान्तरे ॥
सुखमेनैव निर्व्वाणमाप्नोति स्मरहासमः ।
योगयुक्तो महादेवः पार्व्वत्या सहितः सदा ॥
देवगन्धर्व्वयक्षाणां मानुषाणाञ्च नित्यशः ।
श्रेयो हरः प्रकाशञ्च क्षेत्रं तत्र प्रकाशितम् ॥
न तत्र कामदो देवो न चिराच्च प्रसीदति ।
आराधितश्चिरं भक्त्या निर्व्वाणाय प्रसीदति ॥
गौर्य्यादिवर्ज्जिता सा तु पुरी तत्र न गच्छति ।
योगस्थानं महाक्षेत्रं कदाचिदपि शाङ्करी ॥
आसन्नं युवयोः क्षेत्रमिदं वाराणसी तु यत् ।
कथितं नातिदूरे च वर्त्तते ऽमरसत्तमौ ॥"

इति कालिकापुराणे ५० अध्यायः ॥ * ॥

अथ काशीयात्राविधिः ।

सूत उवाच ।

"यात्राप्रक्रमं ब्रूहि जनानां हितकाम्यया ।
यथावत् सिद्धिकामानां सत्यवत्या सुतो मम ॥

व्यास उवाच ।

निशामय महाप्राज्ञ लोमहर्षण वच्मि ते ।
यथा प्रथमतो यात्रा कर्त्तव्या याचिकैर्मुदे ॥
सचेलमादौ संस्नाय चक्रपुष्करिणीजले ।
सन्तर्प्य देवान् सपितॄन् ब्राह्मणांश्च तपस्विनः ॥
आदित्यं द्रौपदीं विष्णुं दण्डपाणिं महेश्वरम् ।
नमस्कृत्य ततो गच्छेत् द्रष्टुं ढुण्ढिविनायकम् ॥
ज्ञानवापीमुपस्पृश्य नन्दिकेशं ततोऽर्च्चयेत् ।
तारकेशं समभ्यर्च्च्य महाकालेश्वरं ततः ॥
ततः पुनर्दण्डपाणिमित्येषा पञ्चतीर्थिका ।
दैवनद्दिनी विधातया महाफलमभीप्सुभिः ॥*॥

ततो वैश्वेश्वरी यात्रा कार्य्या सर्व्वार्थसिद्धये ।
द्विसप्तायतनानाञ्च कार्य्या यात्रा प्रयत्नतः ॥
कृष्णां प्रतिपदं प्राप्य भूतावधि यथाविधि ।
अथवा प्रतिभूतञ्च क्षेत्रसिद्धिमभीप्सुभिः ॥
तत्ततीर्थकृतस्नानस्तत्तल्लिङ्गहृतार्च्चनः ।
मौनेन यात्रां कुर्व्वाणः फलं प्राप्नोति याचिकः ॥
ॐकारं प्रथमं पश्येत् भक्त्योर्दर्य्यां हृतोदकः ।
त्रिपिष्टपमहादेवं ततो वै कृत्तिवाससम् ॥
रत्नेशञ्चाथ चन्द्रेशं केदारञ्च ततो व्रजेत् ।
धर्म्मेश्वरञ्च वीरेशं गच्छेत् कामेश्वरं ततः ॥
विश्वकर्म्मेश्वरञ्चाथ मणिकर्णीश्वरं ततः ।
अविमुक्तेश्वरं दृष्ट्वा ततो विश्वेशमर्च्चयेत् ॥
एषा यात्रा प्रयत्नेन कर्त्तव्या क्षेत्रवासिभिः ॥
यस्तु क्षेत्रमुषित्वापि नेतां यात्रां समाचरेत् ।
विघ्नास्तस्योपजायन्ते क्षेत्रोच्चाटनसूचकाः ॥*॥
अष्टायतनयात्रान्या कर्त्तव्या विघ्नशान्तये ॥
दण्डेशः पार्व्वतीशञ्च तथा पशुपतीश्वरः ।
गङ्गेशो नर्म्मदेशञ्च शमस्तीशः सतीश्वरः ॥
अष्टमस्तारकेशश्च प्रत्यष्टमि विशेषतः ।
दृष्ट्वान्येतानि लिङ्गानि महापापापशान्तये ॥*॥
अपरापि शुभा यात्रा योगक्षेमकरी सदा ।
सर्व्वविघ्नोपहन्त्री च कर्त्तव्या क्षेत्रवासिभिः ॥
शैलेशं प्रथमं वीक्ष्य वरणास्नानपूर्व्वकम् ।
स्नानन्तु सङ्गमे कृत्वा द्रष्टव्यः सङ्गमेश्वरः ॥
स्वर्नीलतीर्थे सुस्नातः पश्येत् स्वर्नीलमीश्वरम् ।
स्नात्वा मन्दाकिनीतीर्थे द्रष्टव्यो मध्यमेश्वरः ॥
पश्येद्धिरण्यगर्भाख्यं तत्र तीर्थं हृतोदकः ।
पञ्चचूड़ह्रदे स्नात्वा ज्येष्ठस्थानं ततोऽर्च्चयेत् ॥
चतुःसमुद्रकूपे तु स्नात्वा देवं ततोऽर्च्चयेत् ।
देवस्याग्रे तु या वापी तत्रोपस्पर्शने कृते ।
शुक्रेश्वरं ततः पश्येत्तत्कूपविहितोदकः ।
दण्डखाते नरः स्नात्वा शान्तेशं पूजयेत्ततः ॥
शौनकेश्वरकुण्डे तु स्नानं कृत्वा ततोऽर्च्चयेत् ।
जम्बुकेशं महालिङ्गं कृत्वा यात्रामिमां नरः ॥
क्वचिन्न जायते भूयः संसारे दुःखसागरे ।
समारभ्य प्रतिपदं यावत् कृष्णां चतुर्दशीम् ॥
एतत्क्रमेण कर्त्तव्यान्येतदायतनानि वै ।
इमां यात्रां नरः कृत्वा न भूयोऽभिजायते ॥
अन्या यात्रा प्रकर्त्तव्येकादशायतनोद्भवा ।
अग्नीश्वरकुण्डस्नातः पश्येदग्नीशमीश्वरम् ॥
उर्व्वशीशं ततो गच्छेत्ततस्तु नकुलीश्वरम् ।
आषाढ़ीशं ततो दृष्ट्वा भावभूतेश्वरं ततः ॥
लाङ्गलीशमथालोक्य ततस्तु त्रिपुरान्तकम् ।
ततो मनःप्रकामेशं प्रीतिकेशमथो व्रजेत् ॥
मदालसेश्वरं तस्मात् तिलपर्णेश्वरं ततः ।
यात्रैकादशलिङ्गानामेषा कार्य्या प्रयत्नतः ॥
इमां यात्रां प्रकुर्व्वाणो रुद्रत्वं प्राप्नुयान्नरः ।*।
अतः परं प्रवक्ष्यामि गौरीयात्रामनुत्तमाम् ॥
शुक्लपक्षतृतीयायां या यात्रा विश्वदृद्धिका ।
गोप्रेक्षतीर्थे सुस्नाय सुखनिर्म्मालिकां व्रजेत् ॥
ज्येष्ठवाप्यां नरः स्नात्वा ज्येष्ठां गौरिं समर्च्चयेत् ।
सौभाग्यगौरी संपूज्या ज्ञानवाप्यां हृतोदकैः ॥

ततः शृङ्गारगौरीञ्च तत्रैव च हृतोदकः ।
स्नात्वा विशालगङ्गायां विशालाक्षीं ततो व्रजेत् ॥
सुस्नातो ललितातीर्थे ललितामर्च्चयेत्ततः ।
स्नात्वा भवानीतीर्थे तु भवानीं परिपूजयेत् ॥
भङ्गला च ततोऽभ्यर्च्चा विन्दुतीर्थहृतोदकैः ।
ततो गच्छेन्महालक्ष्मीं स्थिरलक्ष्मीसमन्विताम् ॥
इमां यात्रां नरः कृत्वा क्वचेऽस्मिन्मुक्तिजन्मनि ।
न दुःखैरभिभूयेत इहामुत्रापि कुत्रचित् ॥*॥
कुर्य्यात् प्रतिचतुर्थीह पूजां विघ्नेशितुः सदा ।
ब्राह्मणेभ्यस्तदुद्देशाद्देवा वै मोदका मुदे ॥
भौमे भैरवयात्रा च कार्य्या पातकहारिणी ।
रविवारे रवेर्यात्रां षष्ठ्यां वा रविसंयुजि ॥
तथैव रविसप्तम्यां सर्व्वविघ्नोपशान्तये ।
नवम्यामथवा षष्ठ्यां चण्डीयात्रा शुभावहा ॥*॥
अन्तर्गृहस्य यात्रा वै कर्त्तव्या प्रतिवत्सरम् ।
प्रातःस्नानं विधायादौ नत्वा पञ्च विनायकान् ।
नमस्कृत्वा च विघ्नेशं स्थित्वा निर्व्वाणमण्डपे ।
अन्तर्गृहस्य यात्रां हि करिष्येऽघौघशान्तये ॥
गृहीत्वा नियमञ्चेति कृत्वाथ मणिकर्णिकाम् ।
स्नात्वा मौनेन चागत्य मणिकर्णीशमर्च्चयेत् ॥
कम्बलाश्वतरौ नागौ वासुकीशं प्रणम्य च ।
पर्व्वतेशं ततो दृष्ट्वा गङ्गाकेशमथाग्रतः ॥
ततस्तु ललितां दृष्ट्वा चरासन्धेश्वरं ततः ।
ततो वै सोमनाथञ्च वराहञ्च ततो व्रजेत् ॥
ब्रह्मेश्वरं ततो नत्वा नत्वागस्तीश्वरं ततः ।
कपर्द्दीशं नमस्कृत्य हरिकेशवनन्त्वथ ॥
वैद्यनाथं ततो गत्वा ध्रुवेशमथ वीक्ष्य च ।
गोकर्णेशं ततोऽभ्यर्च्च्य हाटकेशमथो व्रजेत् ॥
अस्थिक्षेपतड़ागेऽथ दृष्ट्वा वै कीकटेश्वरम् ।
भावभूतं ततो नत्वा चित्रगुप्तेश्वरं ततः ॥
चित्रघण्टां प्रणम्याथ ततः पशुपतीश्वरम् ।
पितामहेश्वरं गत्वा ततस्तु कलसेश्वरम् ॥
चन्द्रेशन्त्वथ वीरेशो विघ्नेशोऽग्नीश एव च ॥
नागेश्वरो हरिश्चन्द्रचिन्तामणिविनायकः ।
सेनाविनायकश्चाथ द्रष्टव्यः सर्व्वविघ्नहृत् ॥
वशिष्ठवामदेवौ च ऋषिरूपधरावुभौ ।
द्रष्टव्यौ यत्नतः काश्यां महाविघ्नविनाशनौ ।
सीमाविनायकं नाथं करुणेशं ततो व्रजेत् ॥
चिन्तेशेशो विशालाक्षी धर्म्मेशो विश्वबाहुकः ।
आशाविनायकश्चाथ दृष्ट्वादित्यस्ततः पुनः ॥
चतुर्वक्त्रेश्वरं लिङ्गं ब्रह्मेशस्तु ततः परम् ।
ततो मनःप्रकाशेश ईशानेशस्ततः परम् ॥
चण्डीचण्डीश्वरौ दृष्ट्वौ भवानीशङ्करौ ततः ।
ढुण्ढिं प्रणम्य च ततो राजराजं समर्च्चयेत् ॥
लाङ्गलीशस्ततोऽभ्यर्च्चास्ततस्तु नकुलीश्वरः ।
परार्थेशमथो नत्वा परब्रह्मेश्वरं ततः ॥
प्रतिष्ठेश्वरश्चापि निष्कलङ्केशमेव च ।
मार्कण्डेयेशमभ्यर्च्च्य ततः अक्षरेश्वरम् ॥
गङ्गेशोऽर्च्चास्ततो ज्ञानवाप्यां स्नानं समाचरेत् ।
नन्दिकेशं तारकेशं महाकालेश्वरं ततः ॥
दण्डपाणिं महेशञ्च मोक्षेशं प्रणमेत्ततः ।
वीरभद्रेश्वरं नत्वा अविमुक्तेश्वरं ततः ॥

विनायकांस्ततः पश्च विश्वनाथं ततो व्रजेत् ।
ततो मौनं विसृज्याथ मन्त्रमेनमुदीरयेत् ॥
अन्तर्गृहस्य यात्रेयं यथावद्दत्तमया कृता ।
न्यूनातिरिक्तया प्रभुः प्रीयतामनया विभुः ॥
इति मन्त्रं समुच्चार्य्य चरणं वै सुक्तिमण्डपे ।
विश्राम्य यायाद्भवनं निष्पापः पुण्यवान्नरः ॥*॥
संप्राप्य वासरं विष्णोर्विष्णुतीर्थेषु सर्व्वतः ।
कार्य्या यात्रा प्रयत्नेन महापुण्यसमृद्धये ॥
नवम्यां पञ्चदश्यां च कुलस्त्रीभं समर्चयेत् ।
दुःखदारिद्र्यनाशत्वे न भवेदस्य पूजनात् ॥
श्रुत्वा पूर्व्वमिमां यात्राः कर्त्तव्यास्तीर्थवासिभिः ।
पर्व्वस्वपि विशेषेण कार्य्या यात्राश्च सर्व्वतः ॥
न वर्ज्यं दिवसं कुर्य्यात् विना यात्रां क्वचित् क्वतौ ।
यात्राद्वयं प्रयत्नेन कर्त्तव्यं प्रतिवासरम् ।
आदौ स्वर्गतरङ्गिण्यास्ततो विश्वेशितुर्भुवम् ॥
यस्य वन्द्यं दिनं जातं काश्यां निवसतः सतः ।
निराशाः पितरस्तस्य तस्मिन्नेव दिनेऽभवन् ॥
स दष्टः कालसर्पेण स दग्धो ह्यनुना स्फुटम् ।
स सुप्तश्च दिवसे विश्वेशो यत्र नेक्षितः ॥
सर्व्वतीर्थेषु सस्नौ स सर्व्वयात्रां यधात् स च ।
मणिकर्ण्यान्तु यः स्नातो यो विश्वेशं निरैक्षत ॥
सत्यं सत्यं पुनः सत्यं सत्यं सत्यं पुनः पुनः ।
दृश्यो विश्वेश्वरो नित्यं स्नातया मणिकर्णिका ॥

व्यास उवाच ।

स्कन्द स्कान्दमिमं श्रुत्वा काश्यीमाहात्म्यमुत्तमम् ।
नरो न निरयं याति कृत्वाप्यघसहस्रकम् ॥"

इति काश्यीखण्डे १०० अध्यायः ॥

वाराणसेयः, त्रि, (वाराणसी + "तत्रादिभ्यो ठक् ।" ४।२।६७। इति ठक् ।) वाराणसीजातः । वाराणसी शब्दात् घोषप्रत्ययेन निष्पन्नः ॥

वारासनं, क्ली (वारां आसनम् ।) जलाधारः । तत्पर्य्यायः । वासःसदनम् २ । इति त्रिकाण्डशेषः ॥

वाराहः, पुं, महापिण्डीतकवृक्षः । इति राजनिर्घण्टः ॥ वराह एव (वराह + स्वार्थे अण् ।) वाराहः । (कल्पभेदः । यथा, भागवते । ३ । ११ । ३७ ।

"अयन्तु कथितः कल्पो द्वितीयस्यापि भारत ! ।
वाराह इति विख्यातो यत्राशेत् शूकरी हरिः ॥"

वराहस्येदमिति । वराह + तस्येदमित्यण् ।) तत्सम्बन्धिनि, त्रि ॥ (यथा, महाभारते । २।४।२।

"साज्येन पायसेनेव मधुना मिश्रितेन च ।
भक्ष्यैर्मूलैः फलैश्चैव मांसैर्वाराहहारिणैः ॥"

क्ली, तीर्थभेदः । यथा, महाभारते । ३।८३।१८।

"ततो गच्छेत धर्म्मज्ञ ! वाराहं तीर्थमुत्तमम् ।
विष्णुर्वराहरूपेण पूर्व्वं यत्र स्थितोऽभवत् ॥"

पुराणविशेषः । यथा, देवीभागवते । १।३।८ ।

"चतुर्विंशतिसाहस्रं वाराहं परमाद्भुतम् ॥")

वाराहकर्णी, स्त्री, (वाराहकर्ण इव पत्रमस्यस्याः । वाराहकर्ण + अच् । गौरादित्वात् ङीष् ।) अश्वगन्धा । इति राजनिर्घण्टः ॥

वाराहपत्री, स्त्री, (वाराहस्तत्कर्ण इव पत्रमस्यस्याः । अच् । गौरादित्वात् ङीष् ।) अश्वगन्धा । इति राजनिर्घण्टः ॥

वाराहाङ्गी, स्त्री, (वाराहमिवाङ्गमस्याः । ङीष् ।) दन्तीवृक्षः । इति भावप्रकाशः ॥

वाराही, स्त्री, (वाराह + ङीष् ।) ब्रह्माण्याद्यष्टमातृकान्तर्गतमातृकाविशेषः । यथा,—

"वराहरूपधारी च वराहोपम उच्यते ।
वाराहजननी चाथ वाराही वरवाहना ॥"

इति देवीपुराणे देवीनिरुक्ताध्यायः ४५ ॥

योगिनीविशेषः । यथा,—

"दुर्गा चण्डेश्वरी चण्डी वाराही कार्त्तिकी तथा ।
हरसिद्धा तथा काली इन्द्राणी वैष्णवी तथा ॥
भद्रकाली विशालाक्षी भैरवी कामरूपिणी ।
एताः सर्व्वाश्च योगिन्यो भृङ्गारैः स्नापयन्तु ते ॥"

तीर्थविशेषः । यथा,—

"वाराही यमुना गङ्गा करतोया सरस्वती ।
कावेरी चन्द्रभागा च सिन्धुरेवसागराः ।
पशुस्नानविधानाय सान्निध्यमिह कल्पय ॥"

इति वृहन्नन्दिकेश्वरपुराणोक्तदुर्गापूजापद्धतिः ॥

वराहदेवस्य शक्तिः । यथा,—

"यज्ञवाराहमतुलं रूपं या बिभ्रतो हरेः ।
शक्तिः साप्यायथौ तत्र वाराहीं विभ्रती तनुम् ॥"

इति चण्डी ॥

अपि च ।

"वाराहरूपिणीं देवीं दंष्ट्रोद्धृतवसुन्धराम् ।
शुभदां सुप्रभां शुभ्रां वाराहीं तां नमाम्यहम् ॥"

इति वृहन्नन्दिकेश्वरपुराणोक्तदुर्गापूजापद्धतिः ॥

वराहक्रान्ता । चामालु इति ख्यातः । तत्पर्य्यायः । विष्वक्सेनप्रिया २ वृष्टिः ३ वदरा ४ । इत्यमरः ॥ गृष्टिः ५ । इति भरतः ॥ शूकरी ६ क्रोडकन्या ७ विष्वक्सेनकान्ता ८ वराही ९ कौमारी १० चिनेचा ११ ब्रह्मपुत्री १२ क्रोड़ी १३ कन्या १४ गृष्टिका १५ माधवेक्षा १६ शूकरकन्दः १७ क्रोड़ः १८ वनवासी १९ कुष्ठनाशनः २० वल्यः २१ अम्बतः २२ महावीर्य्यः २३ महौषधम् २४ शूकरकन्दः २५ वराहकन्दः २६ वीरः २७ ब्राह्मीकन्दः २८ शुककन्दः २९ वृद्धिदः ३० व्याधिहन्ता ३१ । अस्य गुणाः । तिक्तत्वम् । कटुत्वम् । विषपित्तकफकुष्ठप्रमेहक्रिमिनाशित्वम् । वृष्यत्वम् । बल्यत्वम् । रसायनत्वञ्च । इति राजनिर्घण्टः ॥ अन्यच्च ।

"वाराहीकन्द एवान्यैश्चर्म्मकारालुको मतः ।
अनूपे स भवेद्देशे वाराह इव लोमवान् ॥"

इति भावप्रकाशः ॥

श्यामापत्री । इति राजनिर्घण्टः ॥ मेदिनीमते पवर्गीयबकारादिरयं शब्दः ॥

वारि, क्ली, (वारयति क्षुधामिति । वृ + णिच् + "वसिवपियजिराजिव्रजिमदिहनिवाशिवादिवारिभ्य इन् ।" उणा० ४ । १२४ । इति इन् ।) जलम् । इत्यमरः । १ । १० । ३ ॥ (यथा, मनौ । ४ । ६३ ।

"न कुर्व्वीत वृथा चेष्टां न वार्य्यञ्जलिना पिबेत् ।
नोत्सङ्गे भक्षयेत् भक्ष्यान्न जातु स्यात् कुतूहली ॥")

दिग्विशेषे तस्य निषेधविधी यथा,—

"ईशाने चापि पूर्व्वस्मिन् पश्चिमे च तथोत्तरे ।
शिविरस्य जलं भद्रमन्यत्राशुभमेव च ॥"

इति ब्रह्मवैवर्त्ते श्रीकृष्णजन्मखण्डे १०२ अध्यायः ॥

जलक्रीड़ायां वर्ज्जनीयानि यथा,—

"जलक्रीडौ सरःक्षोभक्रकहंसापसर्पणम् ।
पद्मखानिपयोविन्दुदुग्गा भूषणच्युतिः ॥"

इति कविकल्पलतायाम् १ स्तवके ३ कुसुमम् ॥

क्षीरम् । इति हेमचन्द्रः ॥

वारिः, स्त्री, (वारयतीति । वारि + इञ् ।) वाक् । सरस्वती । गजबन्धनी । हस्तिबन्धनभूमिः । (यथा, रघौ । ५ । ४५ ।

"संहारविक्षेपलघुक्रियेण
हस्तेन तीराभिमुखः सशब्दम् ।
बभौ स भिन्दन् दृषदस्तरङ्गान्
वार्य्यर्गलाभङ्ग इव प्रवृत्तः ॥")

वन्हिः । करएटीति भाषा । इति मेदिनीकारहेमचन्द्रौ ॥ (वरणीये, त्रि । यथा, वाजसनेयसंहितायाम् । २१ । ६१ ।

"बहुभ्य आ सङ्गतेभ्य एष मे देवेषु वसु वार्य्यायत्यते ।"

"एषोऽग्निर्मेमह्यं देवेषु वारि वरीतुं योग्यं वारि वरणीयं वसु धनमायत्यते ।" इति तद्भाष्ये महीधरः ॥)

वारिकण्टकः, पुं, (वारिणः कण्टक इव ।) पद्मकाष्ठकः । इति जटाधरः चिकाण्डशेषश्च ॥

वारिकर्णिका, स्त्री, (वारिषु कर्णा इव पत्राण्यस्याः । गौरादित्वात् ङीष् । स्वार्थे कन् । टाप् पूर्व्वह्रस्वश्च ।) खमूली । इति शब्दरत्नावली ॥ पाना इति भाषा ॥

वारिकर्पूरः, पुं, (वारिषु कर्पूर इव ।) इक्षिप्रमत्स्यः । इति त्रिकाण्डशेषः ॥

वारिकुञ्जः, पुं, (वारिषु कुञ्ज इव वक्रत्वात् ।) पद्मकाष्ठकः । इति शब्दरत्नावली ॥

वारिकुञ्जकः, पुं, (वारिकुञ्ज + स्वार्थे कन् ।) पद्मकाष्ठकः । इति त्रिकाण्डशेषः ॥

वारिक्रिमिः, पुं, (वारिणः क्रिमिः ।) जलौकाः । इति त्रिकाण्डशेषः ॥

वारिचत्वरः, पुं, (वारिणि चत्वर इव ।) कुम्भिका । इति त्रिकाण्डशेषः ॥

वारिचरः, पुं, (वारिषु चरतीति । चर + टः ।) मत्स्यः । इति धनञ्जयः ॥ (यथा, भागवते । ६ । ६ । २३ ।

"यस्योरुशृङ्गे जगतीं सनावं
मनुर्यथावध्य ततार दुर्गम् ।
स एव नस्त्वाद्भयादुद्वरन्नात्
नानाश्रितान् वारिचरोऽपि नूनम् ॥")

जलचरजन्तुमात्रे, त्रि ॥ (यथा, महाभारते। १२। २४७। १८।
"यथा वारिचरः पक्षी न लिप्यति जले चरन्।
विमुक्तात्मा तथा योगी गुणदोषैर्न लिप्यते ॥")

वारिचामरं, क्ली, (वारिणश्चामरमिव तदाकारपुञ्जवत्त्वात्।) शैवालः। इति त्रिकाण्डशेषः ॥

वारिजं, क्ली, (वारिणि जायते इति। जन+डः।) द्रोणीलवणम्। गौरसुवर्णम्। पद्मम्। (यथा, अध्यात्मरामायणे। २। ६। २।
"स तत्र वज्राङ्कुशवारिजान्वित-
ध्वजादिचिह्नानि पदानि सर्व्वतः ॥")
लवङ्गम्। इति राजनिर्घण्टः ॥ (वारिजातमात्रे, त्रि। यथा, महाभारते।१।८२।१४।
"केनास्यर्थेन नृपते! इमं देशमुपागतः।
जिघृक्षुर्वारिजं किञ्चिदथवा मृगलिप्सया ॥"
"वारिजं मीनपद्मादि वेत्ति।" तट्टीकायां नीलकण्ठः ॥)

वारिजः, पुं, (वारिणि जायते इति। जन+डः।) शङ्खः। इति हेमचन्द्रः ॥ शम्बूकः। इति शब्दमाला ॥

वारितस्करः, पुं, (वारिणस्तस्करः। अलक्षितभावेन तदपहारकत्वात्तथात्वम्।) मेघः। इति शब्दमाला ॥ वारिशोषणकर्त्तरि, त्रि। यथा,
"स्वरूपधारिणीं चेमामानिनाय निजाश्रमम्।
संज्ञां भार्य्यां प्रीतिमतीं भास्करो वारितस्करः ॥"
इति मार्कण्डेयपुराणम् ॥

वारित्वा, स्त्री, (वारिणस्त्वायते इति। त्वै+डः। टाप्।) छत्रम्। इति त्रिकाण्डशेषः ॥

वारिदं, क्ली, वालम्। इति शब्दरत्नावली ॥

वारिदः, पुं, (वारि ददातीति। दा+"आतोऽनुपसर्गे कः।" ३। २। ३। इति कः।) मेघः। (यथा, मृच्छकटिकनाटके। ५ अङ्के।
"विद्युद्वारिदगर्ज्जितैः सचकिता तद्गर्भनाकाङ्क्षिणी।
पादौ नूपुरलग्नकर्दमधरौ प्रक्षालयन्ती स्थिता ॥")
मुस्तकः। इत्यमरः ॥ (यथा, सुश्रुते चिकित्सितस्थाने। ३८ अध्याये।
"राजादनधवर्षाभूकटुकोशीरवारिदैः।
त्रायमाणाष्टतारक्तापञ्चमूलविभीतकैः ॥"
वारिदातरि, त्रि। यथा, मनौ। ४। २२६।
"वारिदस्तृप्तिमाप्नोति दीर्घमायुर्हिरण्यदः।
गृहदोऽन्नानि वेश्मानि रूप्यदो रूपमुत्तमम् ॥")

वारिधिः, पुं, (वारीणि धीयन्ते अस्मिन्निति। धा+"कर्म्मण्यधिकरणे च।" ३। ३। ९३। इति किः।) समुद्रः। इति शब्दरत्नावली ॥ (यथा, कथासरित्सागरे। १८। ३०१।
"तद्वृद्धोऽवततारैव वारिधौ स विदूषकः।
न जात्ववसरे प्राप्ते सत्त्ववानवसीदति ॥")

वारिनाथः, पुं, (वारीणां नाथः।) वरुणः। समुद्रः। मेघः। इति केचित् ॥

वारिनिधिः, पुं, (वारीणि निधीयन्ते अत्रेति। नि+धा+किः।) समुद्रः। इति शब्दरत्नावली ॥ (यथा, राजतरङ्गिण्याम्। ३। ७८।
"पाराद्वारिनिधेः प्राप्ताः क्षाम्नीरेष्वधुनापि ये।
राज्ञां यात्रासु निर्यान्ति ख्याता वारिध्वजाः पुरः ॥")

वारिपथिकः, त्रि, (वारिपथेन गच्छतीति। वारिपथ+"उत्तरपथेनाहृतञ्च।" ५। १। ७७। इत्यत्र "आहृतप्रकरणे वारिजङ्गलकान्तारपूर्ब्बाद्वुपसंख्यानम्।" इति वार्त्तिकस्थात्ठक्।) जलपथगामी। वारिपथं गच्छतीत्यर्थे णिकप्रत्ययेन निष्पन्नः ॥ (वारिपथेन आहृतम्। इति काशिका ॥)

वारिपर्णी, स्त्री, (वारिणि पर्णमस्या इति ॥ वारिपर्ण+"पाककर्णपर्णपुष्पेति।" ४। १। ६४। इति ङीष्।) कुम्भिका। इत्यमरः। १। १०। ३८ ॥ अस्या गुणाः।
"वारिपर्णी हिमा तिक्ता मदी स्वाद्वी सरा पटुः।
दोषत्रयकरी रूक्षा ग्लौणितज्वरशोषकृत् ॥"
इति राजवल्लभः ॥

वारिपालिका, स्त्री, (वारीणि पालयति सूर्य्यरश्म्यादिभ्यो रक्षतीति। पालि+ण्वुल्। टाप्। अत इत्वम्।) खमूलिका। इति शब्दमाला ॥

वारिप्रवाहः, पुं, (वारिणः प्रवाहः।) निर्झरः। इति शब्दमाला ॥

वारिप्रश्नी, स्त्री, (वारिजाता प्रश्नी।) वारिपर्णी। इति शब्दमाला ॥

वारिबदरा, स्त्री, (वारिपरिपूर्णा बदरेव।) प्राचीनामलकम्। इति त्रिकाण्डशेषः ॥

वारिबालकं, क्ली, (वारिणो बालकम्।) क्षीरेरम्। इति हारावली। १७८ ॥

वारिभवं, क्ली, (वारिणे नेत्रजलाय भवति प्रभवतीति। भू+अच्।) श्रोतोऽञ्जनम्। इति राजनिर्घण्टः ॥ (जलभवमात्रे, त्रि ॥)

वारिमषिः, पुं, (वारि मसिरिव श्यामलाजनकं यस्य। सजलमेघस्येव कृष्णवर्णत्वात् तथात्वम्।) मेघः। इति त्रिकाण्डशेषः ॥

वारिमुक्, [च्] पुं, (वारि मुञ्चतीति। मुच्+क्विप्।) मेघः। इति शब्दरत्नावली ॥ (यथा, रघौ। ४। ८६।
"स विश्रमितमाजह्रे यज्ञं सर्व्वसदक्षिणम्।
आदानं हि विसर्गाय सतां वारिमुचामिव ॥")

वारिमूली, स्त्री, (वारिणि मूलं यस्याः। "पाकवर्णपर्णेति।" ४। १। ६४। इति ङीष्।) वारिपर्णी। इति शब्दरत्नावली ॥

वारिरथः, पुं, (वारिषु रथ इव गमनसाधनत्वात्।) मेलकः। इति त्रिकाण्डशेषः ॥

वारिराशिः, पुं, (वारीणां राशयो यत्र।) समुद्रः। इति त्रिकाण्डशेषः ॥ (यथा, कथासरित्सागरे। ६३। ६८।
"तस्य भक्षयतो हस्ताच्चुतमेकमुदुम्बरम्।
जघास गिरिशुमारोऽत्र वारिराशिजलाश्रयः ॥"
वारीणां राशिः। जलसमूहश्च। यथा, रघौ। ४। ४६।
"शैलोपमः शैवलमञ्जरीणां
जालानि कर्षन्नुरसा स पश्चात्।
पूर्व्वं तटोत्पीडितवारिराशिः
सरित्प्रवाहस्त्वटसुत्ससर्प ॥")

वारिरुहं, क्ली, (वारिणि रोहति जायते इति। रुह+"इगुपधज्ञाप्रीकिरः कः।" ३। १। १३५। इति कः।) कमलम्। इति राजनिर्घण्टः ॥ (यथा, किरातार्জ্জुनीये। ५। १३।
"विकचवारिरुहन्द्वधतं सरः
सकलहंसगणं शुचिमानसम्।
गिरिमगात्मजया च कृतेक्षया
सकलहंसगणं शुचिमानसम् ॥")
जलजाते, त्रि ॥

वारिलोमा, [न्] पुं, (वारिणि लोमानि यस्य। यद्वा, वारि लोम्नि यस्य।) वरुणः। इति जटाधरः ॥

वारिवदनं, क्ली, (वारियुक्तं वदनं यस्मात्। तत्सेवनेन मुखे जलनिस्रावात्तथात्वम्।) प्राचीनामलकम्। इति भूरिप्रयोगः ॥

वारिवरं, क्ली, करमर्द्दकम्। इति जटाधरः ॥

वारिवल्लभा, स्त्री, (वारि वल्लभमस्याः। खञ्जनकत्वात्।) विदारी। इति राजनिर्घण्टः ॥

वारिवासः, पुं, (वारिसमीपे वासोऽस्य। यद्वा, वारि पर्य्युषितान्नादिजलं वासयति सुगन्धीकरोतीति। वास+अण्।) शौण्डिकः। इति हेमचन्द्रः। ३। ५६५ ॥

वारिवाहः, पुं, (वारि वहतीति। वह+"कर्म्मण्यण्।" ३। २। १। इति अण्।) मेघः। मुस्ता। इत्यमरः ॥

वारिवाहनः, पुं, (वाह्यतीति। वाहि+ल्युः। वारीणां वाहनः।) मेघः। इति शब्दरत्नावली ॥

वारिशः, पुं, (वारिणि शेते इति। शी+डः।) विष्णुः। इति त्रिकाण्डशेषः ॥

वारिसम्भवं, क्ली, (वारिप्रधानदेशेषु सम्भव उत्पत्तिर्यस्य।) लवङ्गम्। सौवीराञ्जनम्। उशीरम्। इति राजनिर्घण्टः ॥

वारिसम्भवः, पुं, (वारिप्रधानस्थानेषु सम्भव उत्पत्तिर्यस्य।) यावनालशरः। इति राजनिर्घण्टः ॥ (वारिषु सम्भवोऽस्य। वारिजातमात्रे, त्रि। यथा, रामायणे। ५। ६६। ६।
"इतस्तु किं दुःखतरं यमिमं वारिसम्भवम्।
मणिं पश्यामि सौमित्रे! वैदेहीमागतं विना ॥")

वारी, स्त्री, (वार्य्यतेऽनयेति। वृ+णिच्+"वसिवपियजिराजिव्रजिसदिहनिराधिभ्यादिञ्।" उणा० ४। १२४। इति इञ्। वा ङीष्।) गजबन्धिनी। (यथा, रघुवंशे। ५। ४५।

वारुणिः

"बभौ स भिन्दन् वृहतस्तरङ्गान्
वार्य्यर्गलाभङ्ग इव प्रवृत्तः ॥")
कलसी। इति धरणिः ॥
वारीटः, पुं, (वार्य्यां गजबन्धनभूस्यामेटतीति। इट्+कः।) हस्ती। इति शब्दमाला ॥
वारीशः, पुं, (वारीणामीशः।) समुद्रः। इति हेमचन्द्रः। ४। १३६ ॥
वारुः, पुं, (वारयति रिपूनिति। वृ+णिच्+बाहुलकात् उण्।) विजयकुञ्जरः। इति हारावली। १६० ॥
वारुटः, पुं, खट्टिः। अन्तपुरया। इति त्रिकाण्डशेषः ॥
वारुणं, क्ली, (वरुणो देवतास्येति। वरुण+अण्।) जलम्। इति राजनिर्घण्टः ॥ (शतभिषानक्षत्रम्। यथा, तिथितत्त्वे।
"वारुणेन समायुक्ता मधौ कृष्णा त्रयोदशी।
गङ्गायां यदि लभ्येत सूर्य्यग्रहशतैः समा ॥"
उपपुराणविशेषः। यथा, देवीभागवते। १। ३। १५।
"वारुणं कालिकाख्यञ्च ग्रामं नन्दिकुलं शुभम्।
सौरं पाराशरप्रोक्तमादित्यं चातिविस्तरम् ॥"
पुं, भारतस्य खण्डविशेषः। यथा, विष्णुपुराणे। २। ३। ६।
"इन्द्रद्वीपस्तथा सौम्यो गन्धर्वस्तथ वारुणः ॥")
वरुणसम्बन्धिनि, त्रि। यथा,—
"पश्चिमे पुष्पदन्तश्च वारुणश्च प्रशस्यते।
उत्तरेण तु भल्लाटं सौम्यश्च शुभदं भवेत् ॥
उदुम्बरस्तथा याम्ये वारुणे पिप्पलः शुभः।
ऋक्षोत्तरतो धन्यो विपरीतास्त्वसिद्धये ॥"
इति मात्स्ये २२६ अध्यायः ॥
(यथा च महाभारते। ३। १०२। १।
"समुद्रं ते समाश्रित्य वारुणं विविधम्भसाम्।
कालेयाः संप्रवर्त्तन्ते त्रैलोक्यस्य विनाशने ॥")
वारुणकर्म्म, क्ली, (वारुणं जलसम्बन्धि कर्म्म।) जलाशयखननादि। तस्य शुभाशुभकालादि यथा,—
यम उवाच।
"सुदिने शुभनक्षत्रे चन्द्रतारावलैर्युते।
सदृतुस्तु भवेद्यत्र काले तस्मिन् विधिः स्मृतः ॥
सदृतौ तु कृते कर्त्तुः संपूर्णस्तन्मनोरथः।
कर्कटे पुत्रलाभस्तु सौख्यं तु मकरे भवेत् ॥
मीने यशोऽर्थलाभस्तु कुम्भे च सुवृष्टिकम्।
वृषे च मिथुने वृद्धिर्वृश्चिके निर्ज्जलं भवेत् ॥
पिप्पलन्निस्तु कन्यायां तुलायां सत्यसङ्गतिः।
सिंहे मेषे धनं नाशं जलस्य कुरुते द्विज।
तथा चैतेषु लग्नेषु वारुणं कर्म्म नो दिशेत् ॥"
इति वह्निपुराणे वारुणारामप्रतिष्ठानामाध्यायः ॥
वारुणिः, पुं, (वरुणस्यापत्यं पुमान्। वरुण+इञ्।) अगस्त्यमुनिः। इति त्रिकाण्डशेषः ॥ (यथा, महाभारते। ३। १०५। १।

वारुणी

"समुद्रं स समासाद्य वारुणिर्भगवानृषिः।
उवाच सहितान् देवानृषींश्चैव समागतान् ॥
अहं लोकहितार्थं वै पिबामि वरुणालयम् ॥"
वशिष्ठः। यथा, महाभारते। १। ६६। ७।
"स वारुणिस्तपस्तेपे तस्मिन् भरतसत्तम!।
वने पुण्यवृतां श्रेष्ठः खादुमूलफलोदके ॥"
विश्वतापुत्रभेदः। यथा, महाभारते। १। ६५। ४०।
"तार्क्ष्यश्चारिष्टनेमिश्च तथैव गरुड़ारुणौ।
आरुणिर्वारुणिश्चैव वैनतेयाः प्रकीर्त्तिताः ॥"
भृगुः। यथा, शतपथब्राह्मणे। ११। ६। १।
"भृगुर्ह वै वारुणिः। वरुणं पितरं विद्ययातिमेने। तह वरुणो विदाञ्चकार ॥")
वारुणी, स्त्री, (वरुणस्येयम्। "तस्येदम्।" ४। ३। १२०। इत्यण्। ङीप्।) सुरा। (यथा, मनौ। ११। १६०।
"अज्ञानाद्वारुणीं पीत्वा संस्कारेणैव शुध्यति।
मतिपूर्ब्बमनिर्द्देश्यं प्राणान्तिकमिति स्थितिः ॥"
मदिराधिष्ठात्री देवी। यथा, विष्णुपुराणे। १। ६। ६३।
"किमेतदिति सिद्धानां दिवि चिन्तयतां ततः।
बभूव वारुणी देवी मदाघूर्णितलोचना ॥"
"वारुणी मदिराधिष्ठात्री देवी।" इति तट्टीकायां श्रीधरस्वामी ॥ वरुणपत्नी। वारुणीवल्लभशब्ददर्शनात् ॥ यथा, महाभारते। २। ६। ६।
"यस्यामास्ते स वरुणो वारुण्या च समन्वितः।
दिव्यरत्नाम्बरधरो दिव्याभरणभूषितः ॥"
नदीविशेषः। यथा, गो० रामायणे। २। ७०। १२।
"पूर्ब्बेण वारुणीं तीर्त्वा कुरुक्षेत्रे सरस्वतीम्।
सरांसि च प्रफुल्लानि नदीश्च विमलोदकाः ॥")
पश्चिमदिक्। इत्यमरः। १। ३। ५१ ॥ (यथा, वैद्यकचरिते। ४। ६०।
"यद विद्युन्नुदमालि मदीरितै-
स्त्यजसि किं द्विजराजधिया विधुम्।
किमु दिवं पुनरेति यदीदृशः
पतित एष निधेय हि वारुणीम् ॥"
विद्याविशेषः। यथा, तैत्तिरीयोपनिषदि। ३ क्षतीयवल्ल्याम् ६ षष्ठानुवाके। "आनन्देन जातानि जीवन्ति। आनन्दं प्रयन्त्यभिसंविशन्तीति। सैषा भार्गवी वारुणी विद्या ॥"
अश्वानां छायाविशेषः। यथा, अश्ववैद्यके। ३। १७३।
"शुद्धस्फटिकसङ्काशा सुस्निग्धा चैव वारुणी ॥")
शतभिषानक्षत्रम्। इति हेमचन्द्रः ॥ मञ्जिष्ठा। इति मेदिनी। णी, ६८ ॥ इन्द्रवारुणी। दूर्व्वा। इति राजनिर्घण्टः ॥ शतभिषानक्षत्रयुक्तचैत्रकृष्णत्रयोदशी। यथा, स्कन्दपुराणे।
"वारुणेन समायुक्ता मधौ कृष्णा त्रयोदशी।
गङ्गायां यदि लभ्येत सूर्य्यग्रहशतैः समा ॥"
वारुणं शतभिषा।
"शनिवारसमायुक्ता सा महावारुणी स्मृता।
गङ्गायां यदि लभ्येत कोटिसूर्य्यग्रहैः समा ॥

वारुणः

शुभयोगसमायुक्ता शनौ शतभिषा यदि।
महामहेति विख्याता त्रिकोटिकुलसुद्धरेत् ॥
अत्र संज्ञाविधेः सार्थकत्वाय निमित्तत्वेन मासपत्तितिथ्युल्लेखानन्तरं महावारुणीमहामहावारुणयोरुल्लेखनीये। तेन चैत्रे मासि कृष्णपक्षे त्रयोदश्यां तिथौ महावारुण्यां महामहावारुण्यां यथायथं प्रयोज्यम्। न चात्र।
"स्नानं कुर्व्वन्ति या नार्य्यश्चन्द्रे शतभिषां गते।
सप्तजन्म भवेद्युक्ता दुर्भगा विधवा ध्रुवम् ॥"
इति ॥
"त्रयोदश्यां तृतीयायां दशम्यान्च विशेषतः।
शूद्रविट्क्षत्रियाः स्नानं नाचरेयुः कथञ्चन ॥"
इति प्रचेतोजाबालिवचनाभ्यां स्त्रीणां शूद्रादीनाञ्च स्नानविधेः इति वाच्यम्।
"भोगाय क्रियते यत्तु स्नानं याट्च्छिकं नरैः।
तन्निषिद्धं दशम्यादौ नित्यनैमित्तिके न तु ॥"
इति हेमाद्रिधृतवचनेन रागप्राप्तस्नान एव निषेधात् नक्षत्रेऽपि तथा कल्पनात्। अत्र त्रयोदश्यां पूर्णायां पूर्ब्बाह्णेतरकाले नक्षत्रादिसत्त्वे परेद्युः पूर्ब्बाह्णे तिथिनक्षत्रलाभेऽपि पूर्ब्बेद्युरेव स्नानम्। राज्ञावपि वारुण्यादिषु गङ्गायां स्नानम्।
"दिवा रात्रौ च सन्ध्यायां गङ्गायाञ्च प्रसङ्गतः।
स्नात्वाश्वमेधजं पुण्यं गृहेऽप्युद्धृततज्जलैः ॥"
इति ब्रह्माण्डपुराणे सामान्यतः प्रतिप्रसवात्। इति तिथ्यादितत्त्वम् ॥ * ॥ वरुणप्रेरितवृन्दावनस्थकदम्बतरुकोटरनिःसृतबलदेवपीतवारुणी। यथा,—
पराशर उवाच।
"वने विचरतस्तस्य सह गोपैर्महात्मनः।
मानुषत्वमुपेतस्य शेषस्य धरणीधृतः ॥
निष्पादितोरुकार्य्यस्य कार्य्येणोर्व्वीविचारिणः।
उपभोगार्थमत्यर्थं वरुणः प्राह वारुणीम् ॥
अभीष्टा सर्व्वदा यस्य मदिरे त्वं महौजसः।
अनन्तस्योपभोगाय तस्य गच्छ ह्रदे शुभे ॥
इत्युक्ता वारुणी तेन सन्निधानमथाकरोत्।
वृन्दावनवनोत्पन्नकदम्बतरुकोटरे ॥
विचरन् बलदेवोऽपि मदिरागन्धमुत्तमम्।
आघ्राय मदिरातर्षमवापाथ पुरातनम् ॥
ततः कदम्बात् सहसा मद्यधारां स लाङ्गली।
पतन्तीं वीक्ष्य मेनेव प्रययौ परमां मुदम् ॥
पपौ च गोपगोपीभिः समवेतो मुदान्वितः।
उपगीयमानो ललितं गीतवाद्यविशारदैः ॥"
इति विष्णुपुराणे ५ अंशे ३५ अध्यायः ॥
वारुणीवल्लभः, पुं, (वारुण्या वल्लभः। वारुणीवल्लभा यस्येति वा।) वरुणः। इति शब्दमाला ॥
वारुडः, पुं, फणिनां राजा। इति मेदिनी। डे, ३३॥ तन्नामते पवर्गीयादिः। किन्तु वृधातोः उण्डप्रत्ययनिष्पन्नत्वात् अन्तःस्थादौ लिखितः ॥
वारुडः, पुं क्ली, (वृ+उण्डः।) नौसेकपात्रम्। नेत्रमलम्। कर्णमलम्। इति मेदिनी। ते, ३३ ॥

वारुण्डी, स्त्री, (वारुण्ड+गौरादित्वात् ङीष्।) द्वारपिण्डी। इति मेदिनी। ते, ३३॥
वारेन्द्री, स्त्री, देशविशेषः। इति शब्दरत्नावली॥ यथा,—
"प्राच्यां मागधशोणौ च वारेन्द्रीगौड़राढ़काः।
वर्द्धमानतमोलिप्तप्राग्ज्योतिषोदयाद्रयः॥"
इति ज्योतिस्तत्त्वम्॥
अधुना राजशाहीनामकदेशैकदेशः॥
वार्क्षं, क्ली, (वृक्षाणां समूह इति। वृक्ष+"तस्य समूहः।" ४। २। ३७। इति अण्।) वनम्। इति हेमचन्द्रः॥ (वृक्षस्येदमित्यण्।) वृक्षसम्बन्धिनि, त्रि। यथा,—
"वार्क्षं वित्तप्रदं लिङ्गं स्फाटिकं सर्व्वकामदम्॥"
इति तिथ्यादितत्त्वम्॥
वार्क्षी, स्त्री, (वृक्षस्यापत्यं स्त्री। वृक्ष+अण्। ङीष्।) स्त्रीविशेषः। (यथा, महाभारते। १। १६७। १५।
"तथैव मुनिजा वार्क्षी तपोभिर्भावितात्मनः।
सङ्गताभूद्गुरु भ्रातृनेकनाम्नः प्रचेतसः॥"
इयं हि मारिषापरनाम्नी कण्डुमुनेरौरसात् प्रम्लोचागर्भगता सती पश्चात् वृक्षेभ्य उत्पन्ना। तत्कथा यथा, विष्णुपुराणे।१।१५।१—५३।
पराशर उवाच।
"तपश्चरत्सु पृथिवीं प्रचेतःसु महीरुहाः।
अरक्ष्यमाणामावव्रुर्व्वभूवाथ प्रजाक्षयः॥
नाशकन्मारुतो वातुं वृतं खमभवद् द्रुमैः।
दशवर्षसहस्राणि न शेकुश्चेष्टितुं प्रजाः॥
तद् दृष्ट्वा जलनिष्क्रान्ताः सर्व्वे क्रुद्धाः प्रचेतसः।
मुखेभ्यो वायुमग्निञ्च तेऽहजन् जातमन्यवः॥
उन्मूलानथ तान् वृक्षान् कृत्वा वायुरशोषयत्॥
तानग्निरदहद् घोरस्तत्राभूद् द्रुमसंक्षयः॥
द्रुमक्षयमथो दृष्ट्वा किञ्चिच्छिष्टेषु शाखिषु।
उपगम्याब्रवीदेतान् राजा सोमः प्रजापतीन्॥
कोपं यच्छत राजानः शृणुध्वञ्च वचो मम।
सत्वानं वः करिष्यामि सह स्थितिरहैरहम्॥
रत्नभूता च कन्येयं वार्क्षी यै वरवर्णिनी।
भविष्यं जानता पूर्व्वं मया गोभिर्व्विवर्द्धिता॥
मारिषा नाम नाम्नेषा वृक्षाणामिति निर्म्मिता।
भार्य्या वोऽस्तु महाभागा ध्रुवं वंशविवर्द्धिनी॥
युष्माकं तेजसोऽर्द्धेन मम चार्द्धेन तेजसः।
अस्यामुत्पत्स्यते विद्वान् दक्षो नाम प्रजापतिः॥
मम चांशेन संयुक्तो युष्मत्तेजोमयेन वै।
अग्निवायुसमो भूयः प्रजाः संवर्द्धयिष्यति॥
कण्डुर्नाम मुनिः पूर्व्वमासीद् वेदविदां वरः।
सुरम्ये गोमतीतीरे स तेपे परमं तपः॥
तत्क्षोभाय सुरेन्द्रेण प्रम्लोचाख्या वराप्सराः।
प्रयुक्ता क्षोभयामास तन्तपिं सा शुचिस्मिता॥
क्षोभितः स तया सार्द्धं वर्षाणामधिकं शतम्।
अतिष्ठन्मन्दरद्रोण्यां विषयासक्तमानसः॥
सा तं प्राह महाभागं गन्तुमिच्छाम्यहं दिवम्।
प्रसादसुमुखो ब्रह्मन् अनुज्ञां दातुमर्हसि॥
तयेवमुक्तः स मुनिस्तस्यामासक्तमानसः।
दिनानि कतिचिद् भद्रे स्थीयतामित्यभाषत॥
एवमुक्ता ततस्तेन सार्द्धं वर्षशतं पुनः।
बुभुजे विषयांस्तन्वी तेन सार्द्धं महात्मना॥
अनुज्ञां देहि भगवन् व्रजामि त्रिदिवालयम्।
उक्तस्तयेति स मुनिः स्थीयतामित्यभाषत॥
पुनर्गते वर्षशते साधिके सा शुभानना।
यामीत्याह दिवं ब्रह्मन् प्रणयस्खलितक्षोभनम्॥
उक्तस्तयैवं स मुनिरुपगुह्यायतेक्षणाम्।
प्राहास्यतां क्षणं सुभ्रु चिरं कालं गमिष्यसि॥
तच्छापभीता सुश्रोणी सह तेनर्षिणा पुनः।
शतद्वयं किञ्चिदूनं वर्षाणामन्वतिष्ठत॥
गमनाय महाभागो देवराजनिवेशनम्।
प्रोक्तः प्रोक्तस्तया तन्व्या स्थीयतामित्यभाषत॥
तं सा प्राप्तभयाद् भीता दाक्षिण्येन च दक्षिणा।
प्रोक्ता प्रणयभङ्गार्त्तिवेदनी न जहौ मुनिम्॥
तया च रमतस्तस्य महर्षेस्तदहर्निशम्।
नवं नवमभूत् प्रेम मन्मथाविष्टचेतसः॥
एकदा तु त्वरायुक्तो निश्चक्रामोटजान्मुनिः।
निष्क्रामन्तञ्च कुत्रेति गम्यते प्राह सा शुभा॥
इत्युक्तः स तया प्राह परिवृत्तमहः शुभे।
सन्ध्योपास्तिं करिष्यामि क्रियालोपोऽन्यथा भवेत्॥
ततः प्रहस्य सुदिता तं सा प्राह महामुनिम्।
किमद्य सर्व्वधर्म्मज्ञ परिवृत्तमहस्तव॥
बहूनां विप्र वर्षाणां परिणाममहस्तव।
गतमेतन्न कुरुते विस्मयं कस्य कथ्यताम्॥
मुनिरुवाच।
प्रातस्त्वमागता भद्रे नदीतीरमिदं शुभम्।
मया दृष्टासि तन्वङ्गि प्रविष्टा च ममाश्रमम्॥
इयञ्च वर्त्तते सन्ध्या परिणाममहर्गतम्।
उपहासः किमर्थोऽयं सद्भावः कथ्यतां मम॥
प्रम्लोचोवाच।
प्रत्यूषस्यागता ब्रह्मन् सत्यमेतन्न ते मृषा।
किन्त्वद्य तस्य कालस्य गतान्यब्दशतानि ते॥
सोम उवाच।
ततः ससाध्वसो विप्रस्तां प्रच्छायतेक्षणाम्।
कथ्यतां भीरु कः कालस्त्वया मे रमतः सह॥
प्रम्लोचोवाच।
सप्तोत्तराण्यतीतानि नववर्षशतानि ते।
मासाश्च षट् तथैवान्यत् समतीतं दिनत्रयम्॥
ऋषिरुवाच।
सत्यं भीरु वदस्येतत् परिहासोऽथ वा शुभे।
दिनमेकमहं मन्ये त्वया सार्द्धमिहासितम्॥
प्रम्लोचोवाच।
वदिष्याम्यनृतं ब्रह्मन् कथमत्र तवान्तिके।
विशेषेणाद्य भवता दृष्टा मार्गानुवर्त्तिना॥
सोम उवाच।
निशम्य तद् वचः सत्यं स मुनिर्मुनिनन्दनाः।
धिङ्मां धिङ्मामतीवेत्थं निनिन्दात्मानमात्मना॥

सुनिरुवाच।
तपांसि मम नष्टानि हृतं ब्रह्मविदां धनम्।
हृतो विवेकः केनापि योषिन्मोहाय निर्म्मिता॥
ऊर्म्मिषट्कातिगं ब्रह्म ज्ञेयमात्मजयेन मे।
मतिरेषा हृता येन धिक् तं काममहाग्रहम्॥
व्रतानि वेदविद्याग्निकारणान्यखिलानि च।
नरकग्राममार्गेण सङ्गेनापहृतानि मे॥
विनिन्द्येत्थं स धर्म्मज्ञः स्वयमात्मानमात्मना।
तामप्सरसमासीनामिदं वचनमब्रवीत्॥
गच्छ पापे यथाकामं यत् कार्य्यं तत्कृतं त्वया।
देवराजस्य मत्क्षोभं कुर्व्वन्त्या भावचेष्टितैः॥
न त्वां करोम्यहं भस्म क्रोधतीव्रेण वह्निना।
सतां साप्तपदं मैत्रसुषितोऽहं त्वया सह॥
अथवा तव को दोषः किं वा कुप्याम्यहं तव।
ममैव दोषो नितरां येनाहमजितेन्द्रियः॥
यया शक्रप्रियार्थिन्या हृतो मे तपसो व्ययः।
त्वया धिक् तां महामोहमञ्जूषां सुकुमारिताम्॥
सोम उवाच।
यावदित्थं स विप्रर्षिस्तां ब्रवीति सुमध्यमाम्।
तावद् गलत्स्वेदजला सा बभूवातिवेपथुः॥
प्रवेपमानां सततं खिन्नगात्रलतां सतीम्।
गच्छ गच्छेति सक्रोधं उवाच मुनिसत्तमः॥
सा तु निर्भर्त्सिता तेन विनिष्क्रम्य तदाश्रमात्।
आकाशगामिनी खेदं ममार्ज्ज तरुपल्लवैः॥
वृक्षाद् वृक्षं ययौ बाला तदारुणपल्लवैः।
निर्म्मार्ज्यमाना गात्राणि गलत्स्वेदजलानि वै॥
ऋषिणा यत्तदा गर्भस्तस्या देहे समाहितः।
निर्ज्जगाम स रोमाञ्च स्वेदरूपी तदङ्गतः॥
तं दृष्ट्वा जगृहुर्गर्भं एकं चक्रे तु मारुतः।
मया चाप्यायितो गोभिः स तदा ववृधे भृशैः॥
वृक्षाग्रगर्भसंभूता मारिषाख्या वरानना।
तां प्रदास्यन्ति वो दृष्ट्वा कोप एष प्रशाम्यताम्॥
कण्डोरपत्यमेवं सा वृक्षेभ्यश्च समुद्गता।
ममापत्यं तथा वायोः प्रम्लोचा तनया च सा॥
स चापि भगवान् कण्डुः क्षीणे तपसि सत्तमः।
पुरुषोत्तमाख्यं मैत्रेय विष्णोरायतनं ययौ॥
तत्रैकाग्रमतिर्भूत्वा चकाराराधनं हरेः।
ब्रह्मपारमयं कुर्व्वन् जपमेकाग्रमानसः।
ऊर्द्ध्वबाहुर्महायोगी स्थित्वासौ भूपनन्दनाः॥")

वार्चैः, पुं, हंसः। वारि चरतीत्यर्थे डप्रत्ययेन निष्पन्नः। इति सुग्धबोधव्याकरणम्॥
वार्णिकः, त्रि, (वर्णलेखनं शिल्पमस्य। वर्ण+ठक्।) लेखकः। इति शब्दमाला॥
वार्ष्णं, क्ली, असारम्। आरोग्यम्। इत्यमरः। ३। ३। ७५॥
वार्षः, त्रि, (वृत्तिरस्येति। "प्रज्ञाश्रद्धार्चावृत्तिभ्यो यः।" ५। २। १०१। इति यः।) निरामयः। इत्यमरः। २। ६। ५७॥ वृत्तिशाली। इत्यजयपालः॥
वार्षकः, पुं, पक्षिविशेषः। बटेर इति भाषा। यथा,—

वार्त्ताकुः

"वार्त्ताकी वार्त्तकश्चित्रतण्डोऽन्या वर्त्तका स्मृता।
वर्त्तकोऽग्निकरः प्रोक्तो ज्वरदोषत्रयापहः।
सुरुच्यः शुक्रदो बल्यो वर्त्तकाख्यगुणा ततः॥"
इति भावप्रकाशः॥

वार्त्ता, स्त्री, (वृत्तिरस्यां अस्तीति। "प्रज्ञाश्रद्धार्चावृत्तिभ्यो णः।"५।२।१०१। इति णः। ततष्टाप्।) दुर्गा। यथा,—
"पश्वादिपालनाद्देवी कृषिकर्म्मान्तकारणात्।
वर्त्तनाद्धारणाद्वापि वार्त्ता सा एव गीयते॥"
इति देवीपुराणे ४५ अध्यायः॥

वृत्तिः। जनश्रुतिः। इत्यमरः। १। ६। ६॥
उद्भटः। (यथा, मोहमुद्गरे। ८।
"यावद्वित्तोपार्जनशक्तः
तावन्निजपरिवारो रक्तः।
तदनु च जरया जर्जरदेहे
वार्त्तां को ऽपि न पृच्छति गेहे॥")
वातिङ्गणः। कृष्यादि। इति मेदिनी। ते, ५६॥
(यथा, मनौ। ६। ३२६।
"वैश्यस्तु कृतसंस्कारः कृत्वा दारपरिग्रहम्।
वार्त्तायां नित्ययुक्तः स्यात् पशूनाञ्चैव रक्षणे॥"
वार्त्तेयं चतुर्विधा। यथा, भागवते। १०।२४।२१।
कृषिवाणिज्यगोरक्ष्याकुसीदं तुर्यमुच्यते।
वार्त्ता चतुर्विधा तत्र वयं गोवृत्तयोऽनिशम्॥")

वार्त्ताकः, पुं, (वर्त्तते ऽनेनेति। वृत्+"वृतेर्ट्टिच्च।" उणा० ३। ७६। इति काकुः। "बाहुलकात् उकारस्याकारे वार्त्ताकवार्त्ताक्यौ।" इत्युज्ज्वलदत्तोक्या सिद्धम्।) वार्त्ताकुः। इति त्रिकाण्डशेषः॥ वार्त्तकपक्षी। इति भावप्रकाशः॥

वार्त्ताकी, [न्] पुं, वार्त्ताकुः। इत्यमरटीकायां भरतः॥

वार्त्ताकी, स्त्री, वृहती। इति भावप्रकाशः॥
वार्त्ताकुः। इत्यमरः। २। ४। ११४॥

वार्त्ताकुः, स्त्री, (वर्त्तते इति। वृत्+"वृतेर्ट्टिच्च।" उणा० ३। ७६। इति काकुः।) स्वनामख्यातफलवृक्षः। वेगुन इति भाषा॥ तत्पर्य्यायः। हिङ्गुली २ सिंही ३ भण्टाकी ४ दुष्प्रधर्षिणी ५ वार्त्ताकी ६ वार्त्ता ७ वातिङ्गणः ८ वार्त्ताकः ९ भ्राकविल्वः १० राजकुष्माण्डः ११। इति जटाधरः॥ वार्त्तिकः १२ वातिगमः १३ वृन्ताकः १४ वङ्गणः १५ अङ्गणः १६। इति शब्दरत्नावली॥ कण्टवृन्ताकी १७ कण्टालुः १८ कण्टपत्रिका १९ निद्रालुः २० मांसकफला २१ वृन्ताकी २२ मध्योटिका २३ चित्रफला २४ कण्टकिनी २५ मध्वती २६ कटुफला २७ मिश्रवर्णफला २८ नीलफला २९ रक्तफला ३० भ्राकश्रेष्ठा ३१ वृत्तफला ३२ नृपप्रियफला ३३। अस्या गुणाः कटुत्वम्। रुच्यत्वम्। मधुरत्वम्। पित्तनाशित्वम्। बलपुष्टिकारित्वम्। हृद्यत्वम्। गुरुत्वम्। वातेषु निन्दितत्वञ्च। इति राजनिर्घण्टः॥ अपि च।

वार्त्तिनः

"अग्निप्रदा मारुतनाशिनी च
शुक्रप्रदा श्लेष्मितवर्द्धिनी च।
हृल्लासकासारुचिनाशिनी च
वार्त्ताकुरेषा गुणसप्तयुक्ता॥
सा बाला कफवातघ्नी पक्का सक्षारपित्तला।
सदाफला त्रिदोषघ्नी रक्तपित्तप्रसादनी॥
अङ्गारपक्का वार्त्ताकुः किञ्चित्पित्तकरी मता।
कफमेदोऽनिलहरा सरा लघुतरा परा॥"
इति राजवल्लभः॥

अन्यच्च।
"वृन्ताकं स्वादु तीक्ष्णोष्णं कटुपाकमपित्तलम्।
ज्वरवातबलासघ्नं दीपनं शुक्रलं लघु॥
तद्बालं कफपित्तघ्नं वृद्धं पित्तकरं गुरु।
वृन्ताकं पित्तलं किञ्चिदङ्गारोपरिपाचितम्॥
कफमेदोऽनिलामघ्नमत्यन्तं लघु दीपनम्।
तदेव हि गुरु स्निग्धं सतैलं लवणान्वितम्॥
अपरं श्वेतवृन्ताकं कुक्कुटाण्डसमं भवेत्।
तदग्नेः सु विशेषेण हितं हीनञ्च पूर्व्वतः॥"
इति भावप्रकाशः॥

वार्त्ताकुः, पुं, (वृत्+काकुः।) वार्त्ताकी। इति त्रिकाण्डशेषः॥

वार्त्तायनः, पुं, (वार्त्तानामयनमनेनेति।) प्रवृत्तिज्ञः। तत्पर्य्यायः। हैरिकः २ गूढपूरुषः ३ प्रणिधिः ४ यथार्हवर्णः ५ अवसर्पः ६ मन्त्रवित् ७ चरः ८ स्पशः ९ चारः १०। इति हेमचन्द्रः। ३। ३६८॥

वार्त्तावहः, पुं, धान्यतण्डुलादेर्वार्त्तां वहति यः। पसारी इति भाषा। तत्पर्य्यायः। वैवधिकः २। इत्यमरभरतौ॥ वार्त्तोवहः ३। इति शब्दरत्नावली॥ संवादवाहके, त्रि॥

वार्त्तिकः, पुं, (वृत्तिं वेदेति। वृत्ति+उक्थादित्वात् ठक्।) प्रवृत्तिज्ञः। चरः। इति त्रिकाण्डशेषः॥ (यथा, कथासरित्सागरे। ३४। ७६।
"दुर्गतो वार्त्तिकजनो लोभात् किं नाम ना चरेत्॥"
(वार्त्ता कृष्यादिस्तत्र साधुः। ठक्।) वैश्यः। (वार्त्ते आरोग्ये साधुरिति। ठक्।) वर्त्तिकपक्षी। इति राजनिर्घण्टः॥ वार्त्ताकी। इति शब्दरत्नावली॥ (वृत्तौ साधुरिति। वृत्ति+"कथादिभ्यष्ठक्।" ४। ४। १०२। इति ठक्। सूत्रवृत्तिनिपुणे, त्रि॥)

वार्त्तिकं, क्ली, (वृत्तिर्ग्रन्थसूत्रविवृतिः। तत्र साधुः। वृत्ति+"कथादिभ्यष्ठक्।" ४।४।१०२। इति ठक्।) उक्तानुक्तदुरुक्तार्थचिन्ताकारिग्रन्थः। यथा,—
"उक्तानुक्तदुरुक्तार्थचिन्ताकारि तु वार्त्तिकम्॥"
इति हेमचन्द्रः॥

वार्त्तिका, स्त्री, (वार्त्तिक+टाप्।) पक्षिविशेषः। वटेर इति भाषा। तत्पर्य्यायः। विष्णुलिङ्गी २। इति शब्दरत्नावली॥

वार्त्रघ्नः, पुं, (वृत्रघ्न इन्द्रस्यापत्यं पुमान्। वृत्रहन्+अण्।) अर्জ্জুनः। इति त्रिकाण्डशेषः॥

वार्द्धुषिः

जयन्तः। वृत्रघ्नसम्बन्धिनि, त्रि॥ (यथा, भागवते। ६। १२। ३४।
"तदा च खे दुन्दुभयो विनेदु-
र्गन्धर्वसिद्धाः समहर्षिसङ्घाः।
वार्त्रघ्नलिङ्गैस्तमभिष्टुवाना
मन्त्रैर्मुदा कुसुमैरभ्यवर्षन्॥")

वार्द्दरं, क्ली, कृष्णलावीजम्। दक्षिणावर्त्तशुङ्गः। काकचिञ्चा। भारती। इति मेदिनी। रे, २११॥ क्षमिजम्। जलम्। आम्रबीजम्। इति विश्वः॥

वार्द्दलं, क्ली, (वार्भिः सलिलैर्दलतीति। दल+अच्। सदा मेघाच्छन्नवृष्टिपातात्तथात्वम्।) दुर्दिनम्। इति मेदिनी। ले, ११६॥ तन्नते पवर्गौयादिः॥ (वादल इति भाषा॥)

वार्द्दलः, पुं, (वार्दल्यतेऽनेति। दल+"पुंसि संज्ञायां घः प्रायेण।" ३। ३। ११८। इति घः।) मेलानन्दा। सा तु मस्याधारः। इति मेदिनी। ले, ११६॥

वार्द्धकं, क्ली, (वृद्धानां समूहः। "गोचोक्षोष्ट्रोरभ्रेति।" ४। २। ३६। इत्यत्र "वृद्धाच्चेति।" काशिकोक्तेः वुञ्।) वृद्धसंघातः। (वृद्धस्य भावः कर्म्म वेति। मनोज्ञादित्वात् वुञ्।) वृद्धस्य भावः। वृद्धस्य कर्म्म। इति मेदिनी। के, ५६॥ (यथा, मार्कण्डेयपुराणे। १०६। २४।
"बाल्ये बालक्रिया पूर्व्वं तदत् कौमारके च या।
यौवने चापि या योग्या वार्द्धके वनसंश्रया॥"
त्रि, वृद्धः। यथा, नैषधे। १। ७७।
"फलानि पुष्पाणि च पल्लवे करे
वयोऽतिपातोद्गतवातवेपिते।
स्थितेः समादाय महर्षिवार्द्धकाद्
वने तदातिथ्यमशिक्षि शाखिभिः॥"
"महर्षीणां मुनिश्रेष्ठानां मध्ये यो वार्द्धको वृद्धस्तस्मात्। त्रिषु स्याद्वार्द्धको वृद्धे क्लीवं तद्भावसंघयोरिति वलः।" इति तट्टीका॥)

वार्द्धक्यं, क्ली, (वार्द्धकमेव। वार्द्धक+चतुर्वर्णादित्वात् स्वार्थे ष्यञ्।) वृद्धावस्था। तत्पर्य्यायः। वार्द्धकम् २ वृद्धत्वम् ३ स्थाविरम् ४। इति जटाधरः॥ (यथा, महाभारते। ६।५२।८।
"आत्मानं मन्थमानापि कृतकृत्यं अमान्विता।
वार्द्धक्येन च राजेन्द्र! तपसा चैव कर्षिता॥")

वार्द्धिः, पुं, (वारि जलानि धीयन्तेऽत्रेति। धा+किः।) समुद्रः। इति त्रिकाण्डशेषः॥ (यथा, देवीभागवते। ८। २०। ३१।
"सोऽनन्तो भगवान् देवोऽनन्तसत्त्वो महाद्युतिः।
अनन्तगुणवार्द्धिश्च आदिदेवो महाद्युतिः॥")

वार्द्धिभवं, क्ली, (वार्द्धौ समुद्रे भवतीति। भू+अच्।) द्रोणीलवणम्। इति राजनिर्घण्टः॥

वार्द्धुषिः, पुं, (वार्द्धुषिकः। पृषोदरादित्वात् कलोपः।) वृद्धराजीवः। इत्यमरः। २। ६। ५॥ (यथा, मनौ। ३। १५३।
"प्रेष्यो ग्रामस्य राज्ञश्च कुनखी श्यावदन्तकः।
प्रतिरोद्धा गुरोश्चैव त्यक्ताग्निर्वार्द्धुषिस्तथा॥")

वार्द्धुषिकः, पुं, (वृद्ध्यर्थं द्रव्यं वृद्धिः तां प्रयच्छतीति। "प्रयच्छति गर्ह्यम्।" ४। ४। ३०। इति ठक्। "वृद्धेर्वृधुषिभावो वक्तव्यः।" इति वार्त्तिकोक्तेः वृधुषिभावः।) वृद्धिजीवी। लभ्यभुक्। वाड़ि-खोर इति सुदखोर इति च भाषा। तत्पर्य्यायः। कुसीदकः २ वृद्ध्याजीवः ३ वार्द्धुषिः ४। इत्यमरः॥ कुसीदः ५ कुसीदिकः ६। इति शब्दरत्नावली॥ तस्य लक्षणं यथा,—

"समर्घं धान्यमादाय महार्घे यः प्रयच्छति।
स वै वार्द्धुषिको नाम दयाकरुणवर्जितः॥"
इति स्मृतिः॥

तस्य वृद्धिग्रहणनियमो यथा, मनुः।

"अप्रीतिभागं गृह्णीयात् मासाद्वार्द्धुषिकः शतात्।
द्विकं शतं वा गृह्णीयात् सतां धर्म्ममनुस्मरन्॥
द्विकं शतस्य गृह्णानो न भवत्यर्थकिल्बिषी।
शतकार्षापणेऽप्रीतिभागं विंशतिकाः पणाः॥"

द्विकं पुराणद्वयम्। एवंविधं नियममतिक्रम्य आपदि स्वयमन्यद्वारा वा स्वाच्छन्द्येन यो व्यवहरति तस्यैव प्रायश्चित्तम्। आपदि तु स्वयं करणे नियमातिक्रमे च न दोषः। इति प्रायश्चित्तविवेकः। इत्याह्निकतत्त्वम्॥

वार्द्धुष्यं, क्ली, (वार्द्धुषेर्भावः। वार्द्धुषि+ष्यञ्।) धान्यवर्द्धनम्। इति त्रिकाण्डशेषः॥ (यथा, मनौ। ११। ६२।

"कन्याया दूषणञ्चैव वार्द्धुष्यं व्रतलोपनम्।
तड़ागारामदाराणामपत्यस्य च विक्रयः॥")

वार्द्धेयं क्ली, (वार्द्धेः समुद्रस्येदमिति। वार्द्धि+ष्यञ्।) मौक्तिकम्। इति राजनिर्घण्टः॥

वार्द्धी, क्ली, स्त्री, (वर्द्धेरिदमिति। वर्द्धी+"चर्म्मणोऽञ्।"५। १। १५। इति अञ्।) चर्म्मरज्जुः। इत्यमरटीकायां रायमुकुटः॥

वार्द्धीणसः, पुं, (वार्द्धीव नासिकास्येति। "अञ् नासिकायाः संज्ञायां नसं चाशूलात्।" ५। ४। ११८। इति अच् नसादेशश्च। "पूर्व्वपदात् संज्ञायामगः।" ८। ४। ३। इति णत्वम्।) पशुविशेषः। यथा,—

"त्रिवर्षं त्विन्द्रियाणीयं श्वेतं वृद्धमजापतिम्।
वार्द्धीणसः प्रोच्यतेऽसौ हव्ये कव्ये च संस्कृतः॥"

पक्षिविशेषः। यथा,—

"नीलग्रीवो रक्तशीर्षः शुक्लपादः सितच्छदः।
वार्द्धीणसः स्यात् पक्षीशो मम विष्णोरतिप्रियः॥"

तेषां बलिदानफलम्। यथा,—

"रोहितस्य तु मत्स्यस्य मांसैर्व्वार्द्धीणसस्य च।
वह्निमाप्नोति वर्षाणां शतानि त्रीणि मत्स्यिका॥
महिषाणाञ्च खड्गानां रुधिरैः शतवार्षिकौम्।
वह्निमाप्नोति परमां शार्दूलरुधिरैस्तथा॥"
इति कालिकापुराणे ६६ अध्यायः॥*॥

तन्मांसेन पितृतृप्तिर्यथा,—

"वार्द्धीणसामिषं नौहं कालशाकं तथा मधु।
दौहित्रामिषमन्यच्च यद्दत्तं तत् कुलोद्भवैः॥
अनन्तां तां प्रयच्छन्ति तृप्तिं गौरीसुतस्तथा।
पितॄणां नात्र सन्देहो यथाश्राद्धं च पुत्रक॥"
इति मार्कण्डेयपुराणे श्राद्धकल्पाध्यायः॥

"त्रिविधं त्विन्द्रियचीयं श्वेतं वृद्धमजापतिम्।
वार्द्धीणसन्तु तं प्राहुर्याज्ञिकाः श्राद्धकर्म्मणि॥
रक्तपादो रक्तशिरा रक्तचञ्चुर्विहङ्गमः।
कृष्णवर्णेन च तथा पक्षी वार्द्धीणसो मतः॥"
लौहं रक्तच्छागः।
"दौहित्रं खड्गमित्याहुरपत्यं दुहितुस्तिलाः।
कपिलाया घृतञ्चैव दौहित्रमिति चोच्यते॥"
गौरीसुतः दग्धवर्षोढ़ाजः। इति तट्टीका॥

वार्द्धी(णी)नसः, पुं, वार्द्धीव नासिका यस्य। नासाया नसादेशः।) गण्डकः। गण्डार इति भाषा। यथा,—

"वार्द्धीनसस्त्वेकचरो गणोल्लाहश्च गण्डकः॥"
इति त्रिकाण्डशेषः॥

वार्भटः, पुं, (वारि जले भट इव।) कुम्भीरः। इति त्रिकाण्डशेषः॥

वार्म्मण्यं, क्ली, (वर्म्मणां समूहः। वर्म्मन्+"भिक्षादिभ्योऽण्।"४।२।३८। इति अण्।) वर्म्मसमूहः। इत्यमरटीकायां सारसुन्दरी॥

वार्म्मिणं, क्ली, (वर्म्मिणां समूहः। वर्म्मिन्+अण्।) वर्म्मिसमूहः। इत्यमरटीकायां स्वामी॥

वार्म्मुक्, [च्] पुं, (वाः वारि मुञ्चतीति। मुच्+क्विप्।) मेघः। इति शब्दरत्नावली॥ (यथा, भागवते। १०। २४। ६।

"तं तात! वयमन्ये च वार्म्मुचां पतिमीश्वरम्।
द्रव्येस्त्रैतसा सिद्धैर्यजन्ते क्रतुभिर्नराः॥")

वार्य्युद्भवं, क्ली, (वारिणि उद्भव उत्पत्तिर्यस्य।) पद्मम्। इति धनञ्जयः॥ जलजे, त्रि॥

वार्य्यं, त्रि, (वारि+ष्यञ्।) वारिसम्बन्धि। वारिशब्दात् ष्यञ्प्रत्ययेन निष्पन्नम्॥ (ऋक् सम्भक्तौ +"ऋहलोर्ण्यत्।" ३।१।१२४। इति ण्यत्। वरणीये, त्रि। यथा, ऋग्वेदे। ३। २१। २।

"स्वधर्म्मन् देववीतये श्रेष्ठं नो धेहि वार्य्यम्॥"
निवारणीयः। यथा, महाभारते। ५।१८६।६।

"स्त्रीभारे परिनिर्व्विण्णा पुंस्त्वार्थे कृतनिश्चया।
भीष्मे प्रतिचिकीर्षामि नास्ति वार्य्येति वै पुनः॥")

वाराग्निः, पुं, (वारां राशिर्यत्र।) समुद्रः। इति पुराणम्॥ (वारासनशब्दात् प्राग्यं स्यात्॥)

वार्व्वटः, पुं, (वार्भिर्वर्त्तते वेष्टते इति। वट+घञर्थे कः।) वह्निचम्। इति त्रिकाण्डशेषः॥

वार्व्वणा, स्त्री, नौलीमक्षिका। इति शब्दरत्नावली॥

वार्षकं, क्ली, (वर्षस्येदम्। वर्ष+अण्। स्वार्थे कन्।) सुद्युम्नक्षत्रपृथिवीदशभागान्तर्गतभागविशेषः। यथा,—

"दशधा विभजन् क्षेत्रमकरोत् पृथिवीमिमाम्।
इक्ष्वाकुर्ज्येष्ठदायादो मध्यदेशमवाप्तवान्।
कोष्टवे वार्षकं क्षेत्रं रणदृष्टिर्बभूव ह॥"
इति वह्निपुराणे सागरोपाख्यानाध्यायः॥

वार्षभाणवी, स्त्री, (वृषभाणोरपत्यं स्त्री। वृषभाणु+अण्।) वृषभाणुकन्या। श्रीराधा। यथा,—

"यथा परात्परः कृष्णस्तथेयं वार्षभाणवी॥"
इति पाद्मोत्तरखण्डे ६७ अध्यायः॥

वार्षिकं, क्ली, (वर्षासु जातमिति। वर्षा+"वर्षाभ्यष्ठक्।" ४। ३। १८। इति ठक्।) धान्यमाषा। इति मेदिनी। के, १५६॥

वार्षिकः, त्रि, (वर्षे भवः। वर्ष+"कालात् ठञ्।" ४। ३। ११। इति ठञ्।) वर्षभवः। वात्सरिकः। इति मेदिनी। के, १५६॥ (यथा, भागवते। ११। ११। ३०।

"यात्रावलिविधानञ्च सर्व्ववार्षिकपर्व्वसु॥")

यथाच।

"शरत्काले महापूजा क्रियते या च वार्षिकी।
तस्यां ममैतन्माहात्म्यं पठितव्यं समाहितैः॥"
इति मार्कण्डेयपुराणम्॥

वर्षाकालोद्भवञ्च॥ (यथा, अध्यात्मरामायणे। ४। ४। २।

"तत्र वार्षिकदिनानि राघवो
लीलया मनिगुहासु सञ्चरन्।
पक्वमूलफलभोगसोधितो
लक्ष्मणेन सहितोऽवसत् सुखम्॥")

वार्षिकी, स्त्री, (वर्षासु भवा। वर्ष+"वर्षाभ्यष्ठक्।" ४। ३। १८। इति ठक्। ङीष्।) धान्यमाषा। इति राजनिर्घण्टः॥

वार्षिला, स्त्री, (वार्जाता शिला। "शाकपार्थिवादिनासुपसंख्यानं उत्तरपदलोपश्च।"२। १। ६०। इत्यस्य वार्त्तिकोक्त्या शाकपार्थिवादिवत् समासः। पृषोदरादित्वात् शस्य षः।) करका। इति शब्दचन्द्रिका॥

वार्षुकः, त्रि, वर्षणशीलः। वृषधातोर्ण्वुकप्रत्ययेन निष्पन्नो वर्षुकः। ततः स्वार्थे ष्यञ्प्रत्ययः॥

वा(बा)र्हतं, क्ली, (वृहत्या पत्रमिति। "शाखादिभ्योऽण्।"४। ३। १६४। इति अण्। विधानसामर्थ्यात्तस्य फले न लुक्।) वृहतीफलम्। इत्यमरः॥

वा(बा)र्हद्रथः, पुं, (वृहद्रथस्यापत्यं पुमान्। वृहद्रथ+अण्।) जरासन्धः। इति शब्दरत्नावली॥ (यथा, देवीभागवते। ४। १६। १६।

"कंसः कुजोऽथ यवनेन्द्रसुतश्च केशी-
वार्हद्रथो वकबकीखरशाखसुखाः॥"
वृहद्रथस्येदमिति अण्॥) वृहद्रथराजसम्बन्धिनि, त्रि॥

वा(बा)र्हद्रथिः, पुं, (वृहद्रथस्यापत्यं पुमान्। वृहद्रथ+इञ्।) जरासन्धः। इति त्रिकाण्डशेषः॥

वा(बा)लकः, पुं, क्ली, पारिभाष्यः। अङ्गुरीयके, त्रि। इति मेदिनी। के, १५३॥ अस्यार्थान्तराणि पवर्गीयबकारादौ द्रष्टव्यानि॥ (गन्धयुक्तद्रव्यविशेषे, पुं। यथा, वृहत्संहितायाम्। ७७।५।

"त्वक्कुष्ठरेणुनलिका शुक्लारसतगरवालकेशुक्लैः।
केशरपत्रविमिश्रैर्नरपतियोग्यं शिरःस्नानम्॥")

वालव:, पुं, ववाद्येकादशकरणान्तर्गतद्वितीय-करण:। तच्च जातफलम्।
"कार्यस्य कर्त्ता स्वजनस्य भर्त्ता
सेनाप्रणेता कुलशीलयुक्त:।
उदारबुद्धिर्बलवान् मनुष्य-
श्चेद्वालवाख्ये जननं हि यस्य॥"
इति कोष्ठीप्रदीप:॥

वाल्कं, त्रि, (वल्कस्य वल्कलस्य विकार:। वल्क+"तस्य विकार:।" ४।३।१३४। इति अण्।) वल्कसम्बन्धिवस्त्रम्। क्षौमादि। इत्यमर:॥ (यथा, मार्कण्डेयपुराणे। १५। २८।
"तथैवाजाविकं छित्वा वस्त्रं क्षौमञ्च जायते।
कार्पासिके छिते क्षौद्रो वाल्कछेत्ता बकस्तथा॥")

वाल्कलं, त्रि, वल्कलनिर्म्मितम्। वल्कलस्येदं इत्यर्थे ण्याप्रत्ययेन निष्पन्नम्॥

वाल्कली, स्त्री, मदिरा। इति त्रिकाण्डशेष:॥

वाल्मिकि:, पुं, (वल्मिके भव:। वल्मिक+इञ्।) वाल्मीकमुनि:। इति द्विरूपकोष:॥

वाल्मीक:, पुं, (वल्मीके भव:। वल्मीक+अण्।) रामायणकर्त्ता मुनि:। तत्पर्य्याय:। प्राचेतस:२ वाल्मीकि:३ कविज्येष्ठ:४ कुशीलव:५ वल्मीक:६। इति त्रिकाण्डशेष:॥ कवि:७ आद्यकवि:८। इति जटाधर:॥

वाल्मीकि:, पुं, (वल्मीके भव:। वल्मीक+इञ्।) भृगुवंशीयमुनिविशेष:। इति त्रिकाण्डशेष:॥ यथा—
"रावणान्तकरो राजा रघूणां वंशवर्द्धन:।
वाल्मीकिर्यस्य चरितं चक्रे भार्गवसत्तम:॥"
इति मात्स्ये १२ अध्याय:॥
(यथा वा काव्यादर्शभूमिकायाम्।
"जाते जगति वाल्मीकौ कविरित्यभिधाभवत्।
कवी इति ततो व्यासे कवयस्त्वयि दण्डिनि॥")

वावदूक:, त्रि, (पुन: पुनरतिशयेन वा वदतीति। वद+यङ् लुक्+"उलूकादयश्च।" उणा० ४। ४१। इति ऊक:। "सर्व्वस्वे तु 'यजजपदशां यङि।' ३। २। १६६। इति बहुलवचनादन्यतोऽपि भवत्यूकप्रत्यय: इति ज्ञात्वा वावदूक इति साधितम्।" इत्युणादिवृत्तौ उज्ज्वलदत्त:।) अतिशयवचनशील:। तत्पर्य्याय:। वाचोयुक्तिपटु:२ वाग्मी३ वक्ता४। इत्यमर:॥ वचक्र:५ सुवचा:६ प्रवाक्७। इति जटाधर:॥ (यथा, महाभारते। १२। १६। २४।
"अन्धतस्यावमन्तारो वक्तारो जनसंसदि।
चरन्ति वसुधां कृत्स्नां वावदूका बहुश्रुता:॥")

वावय:, पुं, तुलसीविशेष:। इति शब्दचन्द्रिका॥ क्षुद्रवाबुइ इति भाषा॥

वावुट:, पुं, वह्निम्। इति शब्दरत्नावली॥

वाशृत, य ङ उ संभक्तौ। वरणे। इति कविकल्पद्रुम:॥ (दिवा०-आत्म०-सक०-सेट्। क्वावेट्।) य ङ, वाशृत्यते। उ, वावर्शित्वा वाशृत्वा। संभक्ति:सेवनम्। इति दुर्गादास:॥ ("ततो वाशृत्यमानासाविति भट्टि:॥)

वाशृत्त:, त्रि, कृतवरण:। इत्यमर:। ३।१।९२॥

वाश्, य ङ ऋ शब्दे। इति कविकल्पद्रुम:॥ (दिवा०-आत्म०-अक०-आक्रोशने सक०-सेट्।) शब्द इह तिरश्चामेव। तिरश्चां वाश्यितं रुतमित्यमरात्। य ङ, वाश्यते पक्षी। ऋ, अववाशत्। उद्वाश्यमान: पितरं स रामभिति भट्टौ। अनेकार्थत्वादाक्रोशनार्थ:। वासितं सुरभीकृते। ज्ञानमात्रे खगारावे वासितं वस्त्रवेष्टिते। इति विश्वप्रकाशाद्दन्त्यान्तोऽयमपीति। इति दुर्गादास:॥

वाश्रा, स्त्री, (वाश्यते इति। वाश् शब्दे+"गुरोश्च हल:।" ३। ३। १०३। इति अ:। स्त्रियां टाप्।) वासक:। इति शब्दरत्नावली॥

वाश्रि:, पुं, (वाश्यते इति। वाश्+क्विच्+"वसिवपियजिराजिव्रजिसदिहनिवाश्रिवादीति।" उणा० ४। १२४। इति इञ्।) अग्नि:। इत्युणादिकोष:॥

वाश्रिका, स्त्री, (वाश्रा+स्वार्थे कन्। टाप्। अत इत्वम्।) वासक:। इति शब्दरत्नावली॥

वाश्रितं, क्ली, (वाश्र शब्दे+भावे क्त:।) पशुपक्ष्यादीनां शब्द:। इत्यमर:॥ (यथा, महाभारते। ६। ३१। ५३।
"आर्त्तप्रलापान् मा तात! सलिलस्य: प्रभाषिथा:।
नैतन् मनसि मे राजन्! वाश्रितं शकुनेरिव॥")

वाश्रित:, त्रि, (धातूनामनेकार्थत्वात् वाश्र सुरभीकरणे+क्त:।) सुरभीकृत:। इत्यमरटीकायां स्वामी॥

वाश्रिता, स्त्री, (वाश्र+क्त। टाप्।) स्त्रीमात्रम्। करिणी। इत्यमर:॥

वाश्रिष्ठ:, त्रि, वश्रिष्ठसम्बन्धी। वश्रिष्ठस्येदं इत्यर्थे ण्याप्रत्ययेन निष्पन्न:॥ (यथा, महाभारते। ३। ११५। २।
"सोमशुष्मस्य तान् सर्व्वानाचख्यौ तत्र तापसान्।
भृगूनङ्गिरसश्चैव वाश्रिष्ठानथ काश्यपान्॥")
क्ली, उपपुराणविशेष:। यथा, देवीभागवते। १। ३। १६।
"माहेश्वरं भागवतं वाश्रिष्ठञ्च सविस्तरम्।
एतान्युपपुराणानि कथितानि महात्मभि:॥"
तीर्थभेद:। यथा, महाभारते। ३। ८४। ४५।
"ऋषिकुल्यां समासाद्य वाश्रिष्ठञ्चैव भारत!।
वाश्रिष्ठं समतिक्रम्य सर्व्वे वर्णा द्विजातय:॥")

वाश्रिष्ठी, स्त्री, (वश्रिष्ठस्येयमिति। वश्रिष्ठ+अण्। ङीप्।) गोमतीनदी। इति हेमचन्द्र:॥

वाश्रुरा, स्त्री, (वाश्र्यते अस्यामिति। वाश्र शब्दे+"मन्दिवाश्रिमथिपतिपंक्यक्ष्मिभ्य उरच्।" उणा० १। ३६। इति उरच्। टाप्।) रात्रि:। इत्युणादिकोष:॥

वार्श्यं, क्ली, (वाश्यतेऽस्मिन्निति। वाश्र+"स्फायितञ्चिवञ्चिप्रुङ्खीति।" उणा० २। १३। इति रक्।) मन्दिरम्। चतुष्पथ:। इति मेदिनी। रे, ८३॥

वार्श्र:, पुं, (वाश्यतेऽस्मिन्निति। वाश्र+"स्फायितञ्चीति।" उणा० २। १३। इति रक्।) दिवस:। इति मेदिनी। रे, ८३॥

वाष्प:, पुं, (वाधते इति। वाध लोडने+"स्वप्यग्रिस्यघ्यवाष्यरूषपर्पतल्पा:।" उणा०। ३। २८। इति पप्रत्यये धस्य षत्वं निपातनात्।) उष्मा। (यथा, रघौ। ७। ६८।
"तस्या: प्रतिद्वन्द्वमवाद्विषादात्
सद्यो विमुक्तं सुखमावभासे।
निश्वासबाष्पागमसम्प्रपन्न:
प्रसाद मालीयमिवात्मदर्श:॥")
लोह:। इति मेदिनी। षे, ११॥ अश्रु:। इत्यमर:॥ (यथा, आर्य्यासप्तशत्याम्। ३६४।
"प्राङ्गण एव कदा मां श्लिष्यन्ती मन्युकम्पि-
कुचकलसा।
अंशुनिषण्णसुखी सा क्षपयति वाष्पेण मम
पृष्ठम्॥")

वाष्पक:, पुं, (वाष्प+संज्ञायां कन्।) मारिष:। नटिया शाक इति भाषा। यथा,—
"मारिषो वाष्पको मार्ष: श्वेतो रक्तश्च स स्मृत:।
मारिषो मधुर: शीतो विष्टम्भी पित्तनुद्गुरु:॥
वातश्लेष्मकरो रक्तपित्तनुद्विषमाग्निजित्।
रक्तमार्षो गुरुर्नाति सक्षारो मधुर: सर:।
श्लेष्मल: कटुक: पाके स्वल्पदोष उदीरित:॥"
इति भावप्रकाश:॥

वाष्पका, स्त्री, (वाष्प+संज्ञायां कन्। टाप्। अभिधानादिदभाव:।) हिङ्गुपत्री। इति शब्दरत्नावली॥

वाष्पिका, स्त्री, (वाष्प+संज्ञायां कन् टाप् अत इत्वम्।) हिङ्गुपत्री। तत्पर्य्याय:। कारवी२ पृथ्वी३ कवरी४ पृथु:५। इत्यमर:॥ लक्पत्री६ वाष्पीका७ कर्व्वरी। इति तट्टीका॥

वाष्पी, स्त्री, (वाष्प+गौरादित्वात् ङीष्।) वाष्पिका। इति शब्दरत्नावली॥

वाष्पीका, स्त्री, हिङ्गुपत्री। इति राजनिर्घण्ट:॥ राँधुनी इति ख्यातस्य। अस्य गुणा:। कटुत्वम्। तीक्ष्णत्वम्। उष्णत्वम्। कृमिश्लेष्मनाशित्वञ्च। इति राजवल्लभ:॥

वास, तृ क उपसेवायाम्। इति कविकल्पद्रुम:। (अदन्त चुरा०-पर०-सक०-सेट्।) उपसेवा तु गुणान्तराधानाम्। अववासद्वस्त्रं चन्दन:। इति दुर्गादास:॥

वास:, पुं, (वसन्त्यत्रेति। वस निवासे+"हलश्च।" ३। ३। १२१। इति घञ्।) गृहम्। इत्यमर:॥ (यथा, हरिवंशे। १७४। ३४।
"उत्तिष्ठोत्तिष्ठ भद्रन्ते विषादं मा कृथा: शुभे।
नैवं विधेषु वासेषु भयमस्ति वरानने!॥"
वास्यते इति। वास+घञ्।) वस्त्रम्। इति तट्टीका॥ (वस+भावे घञ्।) अवस्थानम्।

इति हेमचन्द्रः ॥ (यथा, महाभारते । १ । १२८ । ५० ।
"विहारावसथेष्वेव वीरा वासमरोचयन् ॥")
वासकः । इति शब्दरत्नावली ॥ सुगन्धिः । इति वासधात्वर्थदर्शनात् ॥ * ॥ स्थानविशेषे वासस्य कर्त्तव्याकर्त्तव्यत्वं यथा,—
देवयान्युवाच ।
"वेदाहं तात बालापि कार्य्याणान्तु गतागतिम् ।
क्रोधे चैवाभिवादे वा वेद चापि बलाबलम् ॥
शिष्यस्याशिष्यवृत्तेर्हि न क्षन्तव्यं बुभूषता ।
तस्मात् सङ्कीर्णवृत्तेषु वासो मम न रोचते ॥
पुंसो येनाभिनन्दन्ति वृत्तेनाभिजनेन च ।
न तेषु च वसेत् प्राज्ञः श्रेयोऽर्थी पापबुद्धिषु ॥
ये त्वेवमभिजानन्ति वृत्तेनापि जनेन च ।
तेषु साधुषु वस्तव्यं स वासः श्रेय उच्यते ॥"
इति माद्ये २८ अध्यायः ॥ * ॥
अपि च ।
"धार्म्मिकैरावृते ग्रामे न व्याधिबहुले भृशम् ।
न शूद्रराज्ये निवसेत् न पाषण्डजनैर्वृते ॥
हिमवद्विन्ध्ययोर्म्मध्यं पूर्ब्बपश्चिमयोः शुभम् ।
सङ्गा समुद्रयोर्देशं नान्यत्र निवसेत् द्विजः ॥
अर्द्धक्रोशान्नदीकूलं वर्जयित्वा द्विजोत्तमः ॥
नान्यत्र निवसेत् पुण्यं नान्त्यजग्रामसन्निधौ ॥
न संवसेच्च पतितैर्न चण्डालैर्न पुक्कशैः ।
न मूर्खैर्नावलिप्तैश्च नान्त्यैर्नान्त्यावसायिभिः ॥"
इति कौर्म्मे उपविभागे २५ अध्यायः ॥
वासः, [स्] क्ली, (वस्यतेऽनेति । वस आच्छादने + "वसेर्णित् ।" उणा० ४ । २१७ । इत्यसुन् । स च णित् ।) वस्त्रम् । इत्यमरः ॥ (यथा, मनौ । ४ । ६६ ।
"उपानहौ च वासश्च धृतमन्येन धारयेत् ॥")
पत्रकम् । इति राजनिर्घण्टः ॥
वासकः, पुं, (वासयतीति । वासि + ण्वुल् ।) वृक्षविशेषः । वाकस इति भाषा । तत्पर्य्यायः । वैद्यमाता २ सिंही ३ वासिका ४ वृषः ५ अटरूषः ६ सिंहास्यः ७ वाजिदन्तकः ८ । इत्यमरः ॥ वाशा ९ वाशिका १० वृशः ११ अटरूषः १२ वाशकः १३ । इति तट्टीका ॥ वासा १४ वासः १५ वाजी १६ वैद्यसिंही १७ माढसिंही १८ । इति शब्दरत्नावली ॥ वासका १९ सिंहपर्णी २० । इति जटाधरः ॥ सिंहिका २१ भिषङ्माता २२ वसादनी २३ सिंहमुखी २४ कण्ठीरवी २५ शितकर्णी २६ वाजिदन्ती २७ नासा २८ पञ्चमुखी २९ सिंहपत्री ३० मृगेन्द्राणी ३१ । अस्य गुणाः । तिक्तत्वम् । कटुत्वम् । शीतत्वम् । कासरक्तपित्तकामलाकफवैकल्यज्वरश्वासक्षयनाशित्वञ्च । तत्पुष्पगुणाः । कटुपाकित्वम् । तिक्तत्वम् । कासक्षयहरत्वञ्च । इति राजनिर्घण्टः ॥ अपि च ।
"वासको वासिका वासा भिषङ्माता च सिंहिका ।
सिंहास्यो वाजिदन्तः स्यादाटरूषोऽटरूषकः ॥
आटरूषो वृषो नाम्ना सिंहपर्णश्च स स्मृतः ।
वासको वासकृत् सर्य्यः कफपित्तासनाशनः ॥
तिक्तस्तुवरको हृद्यो लघुः शीतस्तृड्वृत्तिहृत् ।
श्वासकासज्वरच्छर्द्दिमोहकुष्ठक्षयापहः ॥"
इति भावप्रकाशः ॥ * ॥
गानाङ्गविशेषः । यथा,—
"मनोहरोऽथ कन्दर्पश्चारुनन्दन एव च ।
चत्वारो वासकाः प्रोक्ताः शङ्करेण स्वयं पुरा ॥"
केषाञ्चिन्मते नामान्यपि पृथक् ।
"विनोदो वरदश्चैव नन्दः कुसुद एव च ।
चत्वारो वासकाः प्रोक्ता गीतवाद्यविशारदैः ॥"
इति सङ्गीतदामोदरः ॥
(वासरः । इति वासकसज्जाशब्दार्थे आलङ्कारिकाः ॥)
वासकर्णी, स्त्री, यज्ञशाला । इति शब्दरत्नावली ॥
वासकसज्जा, स्त्री, (वासके प्रियसमागमवासरे सज्जतीति । सज्ज् + अच् । टाप् । यद्वा, वासकं वासवेश्म सज्जयतीति । सज्जि + अण् । टाप् ।) स्त्रीयादिनायिकाभेदः । (यथा, गीतगोविन्दे । ६ । ८ ।
"भवति विलम्बिनि विगलितलज्जा
विलपति रोदिति वासकसज्जा ॥")
तस्या लक्षणं यथा । अद्य मे प्रियवासर इत्यं निश्चित्य या सुरतसामग्रीं सज्जीकरोति सा वासकसज्जा । वासको वासरः । अस्याश्चेष्टा मनोरथसखीपरिहासदूतीप्रश्नसामग्रीविधानमार्गविलोकनादयः । सुग्धावासकसज्जा यथा,
"हारं गुम्फति तारकातिरुचिरं ग्रथ्नाति काञ्चीलतां
दीपं न्यस्यति किन्तु तत्र बहुलं स्नेहं न दत्ते पुनः ।
आलीनामिति वासकस्य रजनौ कामानुरूपाः क्रियाः
साचिस्मेरमुखी नवोढ़सुमुखी दूरात् समुद्वीक्षते ॥"
मध्या वासकसज्जा यथा,—
"ग्रन्थिं दर्शयितुं करोति कुतुकात् कङ्कारहारस्रजं
चित्रप्रेक्षणकैतवेन किमपि द्वारं मसृणीक्षते ।
गृह्णात्याभरणं नवं सहचरी भूषाजिगीषामिषादित्थं पद्मदृशः प्रतीत्य चरितं स्मेराननोऽभूत् स्मरः ॥"
प्रौढ़ा वासकसज्जा यथा,—
"कृतं वपुषि भूषणं चिकुरधोरणी धूपिता
कृता ग्रथनसन्निधौ क्रमुकवीटिकासम्भृतिः ।
अकारि हरिणीदृशा भवनमेत्य देहत्विषा
स्फुरत्कनककेतकीकुसुमकान्तिभिर्दुर्दिनम् ॥"
मनोरथश्च यथा,—
"आवयोरङ्गयोर्दैधे भूयो विरहपल्लवः ।
अद्वैते च सितस्फीतं न स्यादन्योन्यवीक्षणम् ॥"
परकीया वासकसज्जा यथा,—
"श्मश्रुं स्नापयितुं क्लेन च तिरोधत्ते प्रदीपाङ्कुरान्
धत्ते सौधकपोतपोतनिनदैः साङ्केतिकं चेष्टितम् ।
शुश्रूषापरिवर्त्तिताङ्गलतिकं लोलत्कपोलद्युति
क्वापि क्वापि करास्बुजं प्रियधिया तस्यान्तिकं न्यस्यति ॥"
इति रसमञ्जरी ॥
(तथाच साहित्यदर्पणे । ३ । ८६ ।
"कुरुते मण्डनं यस्याः सज्जिते वासवेश्मनि ।
सा तु वासकसज्जा स्याद्विदितप्रियङ्गमा ॥")
वासका, स्त्री, (वासक + टाप् ।) वासकवृक्षः । इति जटाधरः ॥
वासगृहं, क्ली, (वासाय गृहम् ।) गर्भागारम् । इत्यमरः ॥ "ह्रे गृहमध्यभागे शयनगृहे च गृहान्तर्गृहे इलोके निर्व्वातत्वात् गर्भ इवागारं गर्भागारम् । वासाय गृहं वासगृहम् । वासवेश्मादि चात्र ।" इति भरतः ॥ (यथा, बृहत्संहितायाम् । ५३ । ७० ।
"वासगृहाणि च विन्द्याद्
विप्रादीनामुदग्दिगाद्यानि ।
विप्रतान्य यथा भवनम्
भवन्ति तान्येव वृत्तिगतः ॥")
वासतः, पुं, (वास्यते इति । वास् शब्दे + बाहुलकात् अतच् ।) गर्दभः । इति शब्दरत्नावली ॥
वासतेयी, स्त्री, (वसतौ साधुरिति । वसति + "पथ्यतिथिवसतिस्वपतेर्ढञ् ।" ४ । ४ । १०४ । इति ढञ् ।) रात्रिः । इति त्रिकाण्डशेषः ॥ (वसतिसाधुमात्रे, त्रि । यथा, भट्टौ । ४ । ८ ।
"वनेषु वासतेयेषु निवसन् पर्णसंस्तरः ।
शुश्रोत्यायं मृगान् विध्यन्नातिथेयो विचक्रमे ॥")
वासनं, क्ली, (वास्यते इति । वासि + ल्युट् ।) धूपनम् । वारिधानी । वस्त्रम् । इति मेदिनी । ने, १२६ ॥ वासः । इति शब्दरत्नावली ॥ ज्ञानम् । इति धरणिः ॥ निक्षेपाधारः । यथा, याज्ञवल्क्यः ।
"आधिसीमोपनिक्षेपजड़वाणिधनैर्विना ।
तथोपनिधिराजस्त्रीश्रोत्रियाणां धनैरिह ॥"
उपनिक्षेपस्तु ।
"वासनस्यमनाख्याय सैमुद्रं यद्विधीयते ॥"
इति नारदोक्तेः ॥
वासनं निक्षेपाधारभूतं सम्पुटादिकं समुद्रं यन्त्रादियुतम् । इति व्यवहारतत्त्वम् ॥ वसनसम्बन्धिनि, त्रि ॥ (वसनेन क्रीतमिति । वसन + "शतमानविंशतिकसहस्रवसनादण् ।" ५ । १ । २७ । इति अण् । वसनेन क्रीते च, त्रि ॥)
वासना, स्त्री, (वासयति कर्म्मणा योजयति जीवं मनांसीति । वस + णिच् + युच् । टाप् ।) प्राक्तनाग्रा । (यथा, भागवते । २ । २ । २ ।
"शब्दस्य हि ब्रह्मण एष पन्था
यन्नामभिर्ध्यायति धीरपार्थैः ।

वासन्ती

परिभ्रमंस्तत्र न विन्दतेऽर्थान्
मायामये वासनया प्रयानः ॥")
ज्ञानम् । इति मेदिनी । ने, १३० ॥ स्मृतिहेतुः । तत्पर्य्यायः । संस्कारः२ भावना ३ । इति जटाधरः ॥ देहात्मबुद्धिजन्यमिथ्यासंस्कारः । इति न्यायशास्त्रम् ॥ दुर्गा । यथा,—
"वसत्यदृष्टा सर्व्वेषु भूतेष्वन्तर्हिताय च ।
धातुर्व्वस निवासेति वासना तेन सा स्मृता ॥"
इति देवीपुराणे ४५ अध्यायः ॥
(अर्कस्य भार्य्या । यथा, भागवते । ६ । ६ । १३ ।
"अर्कस्य वासना भार्य्या पुत्रास्तर्षादयः
स्मृताः ॥")

वासन्तः, पुं, (वसन्ते भवः । वसन्त + "सन्धिवेलाद्यतुनक्षत्रेभ्योऽण् ।" ४ । ३ । १६ । इति अण् । उष्ट्रः । इति मेदिनी । ते, १५२ ॥ कोकिलः । इति राजनिर्घण्टः ॥ मलयवायुः । सुन्नः । इति त्रिकाण्डशेषः ॥ कृष्णसुन्नः । इति हेमचन्द्रः ॥ मदनवृक्षः । इति शब्दमाला ॥ अवहित्थे, त्रि । इति मेदिनी । ते, १५२ ॥ (वसन्तोत्पन्ने च त्रि । इति सिद्धान्तकौमुदी । ४ । ३ । ४६ ॥)

वासन्तकं, त्रि, वसन्तसम्बन्धि । वसन्तस्येदमित्यर्थे कण्प्रत्ययेन निष्पन्नम् ॥ (वसन्ते उत्पन्नम् । वसन्त + "ग्रीष्मवसन्तादन्यतरस्याम् ।" ४ । ३ । ४६ । इति वुञ् । (वसन्तोत्पन्ने, त्रि ॥ इति सिद्धान्तकौमुदी ॥)

वासन्तिकः, त्रि, (वसन्तमधीते वेद वेति । वसन्त + "वसन्तादिभ्यष्ठक् ।" ४ । २ । ६३ । इति ठक् ।) विदूषकः यथा । वासन्तिकः केलिकिलो वेहासिको विदूषकः । इति हेमचन्द्रः ॥ (वसन्तस्येदमिदि । "वसन्तात् च ।" ४ । ३ । २० । इति ठञ् । वसन्तसम्बन्धिनि, त्रि । यथा, भागवते । ५ । ६ । ५ ।
"सप्रणवव्याहृतिपदां सावित्रीं त्रैष्णवासन्तिकान् मासानधीयानमप्यसमवेतरूपं ग्राहयामास ॥")

वासन्ती, स्त्री, (वसन्तस्येयमिति । वसन्त + अण् । ङीष् ।) माधवी । यूथी । इति मेदिनी । ते, १५२ ॥ (यथा, रामायणे । ४ । १ । ७७ ।
"मालतीमल्लिकापद्मकरवीराश्च पुष्पिताः ।
केतक्यः सिन्धुवाराश्च वासन्त्यश्च सुपुष्पिताः ॥")
पाटला । इति विश्वः ॥ कामोत्सवः । तत्पर्य्यायः । चैत्रावली २ मधूत्सवः ३ सुखसन्तः ४ कामसखः ५ कर्दनी ६ । इति त्रिकाण्डशेषः ॥ मल्लिकारी । पुष्पलताविशेषः । तत्पर्य्यायः । प्रहसन्ती २ वसन्तजा ३ माधवी ४ महाजातिः ५ प्रीतसहा ६ मधुवल्लिका ७ वसन्तदूती ८ । अस्या गुणाः । स्निग्धिरत्वम् । स्निग्धत्वम् । सुरभित्वम् । अमहारित्वम् । धम्मिल्लामोदित्वम् । मन्दमदोन्मादनदायित्वञ्च । इति राजनिर्घण्टः ॥ नवमल्लिका । नेवारि इति हिन्दी भाषा ॥ यथा,—
"नेपाली कथिता तज्ज्ञैः सप्रसा नवमालिका ।
वासन्ती प्रीतलता लक्ष्मी तिक्ता दीर्घत्वयाम्रजित् ॥"
इति भावप्रकाशः ॥ * ॥
अथ वासन्तीदुर्गापूजाप्रमाणम् । तत्र भविष्यपुराणम् ।
"मीनराशिस्थिते सूर्य्ये शुक्लपक्षे नराधिप ।
सप्तमीं दशमीं यावत् पूजयेदम्बिकां सदा ॥"
भविष्योत्तरे ।
"चैत्रे मासि सिते पक्षे सप्तम्यादिदिनत्रये ।
पूजयेद्विधिवद्दुर्गां दशम्याञ्च विसर्জ্জयेत् ॥"
कालकौमुद्यां जाबालिः ।
"चैत्रे मासि सिते पक्षे सप्तम्यादिदिनत्रये ।
पूजयेद्विधिवद्दुर्गां सर्व्वसौख्यप्रदायिनीम् ॥
नानाविधैश्च बलिभिर्मेषाभैर्दोषवर्জ্জितैः ।
विचित्राभरणैः पार्थ पट्टवस्त्रादिभिस्तथा ॥
एवं यः कुरुते पूजां वर्षे वर्षे विधानतः ।
ईप्सितान् लभते कामान् पुत्रपौत्रादिकानृप ॥"
अत्र भविष्योत्तरे निरूपपदमासशब्दसङ्केतात् भविष्यपुराणवचने मीनराशिस्थित इति मीनस्थरव्यारब्धचान्द्रमासीयतिथिपरम् । सौरस्यारब्धे कदाचित् सप्तम्यादितिथित्रयालाभात् तद्वर्षे ततुत्तत्यलोपः स्यात् । न चैवापत्तिः भविष्यपुराणे सदापदोपादानात् जाबालिवचने वर्षे वर्षे इत्युपादानाच्च नित्यत्वम् । एतद्विवृतं कालविवेके । एवं जाबाली श्लोकवचनपरार्द्धे पुत्रादिरूपफलश्रवणात् काम्यत्वञ्च । ततश्च काम्यतया पूजने कृते प्रसङ्गात् नित्यत्वसिद्धिः ।
"सिताष्टम्यान्तु चैत्रस्य पुष्येणैतत्कालसम्भवे ॥
अशोकैरपि यः कुर्य्यात् मन्त्रेणानेन पूजनम् ।
न तस्य जायते शोको रोगो वाप्यथ दुर्गतिः ॥"
इति कालिकापुराणवचनात् केवलाष्टमीकल्प उक्तः । चैत्रमासमधिकृत्य ।
"नमस्यां पूजयेद्देवीं महिषासुरमर्দ্দिनीम् ।
कुङ्कुमागुरुकस्तूरीधूपान्नध्वजतर्पणैः ।
दमनैर्मुरपत्रैश्च विजयाख्यपदं लभेत् ॥"
इत्यनेन केवलनवमीकल्प उक्तः । अवस्था तु प्रारम्भीयपूजाप्रकरणोक्ता ग्राह्या । विशेषस्तत्र बोधनप्रक्रिया नास्ति बोधिताया बोधनासम्भवात् । इति प्राक् विवृतम् । होमादिकञ्च पूर्ব্ববज्ज्ञेयमिति दिक् । इति दुर्गोत्सवविवेकः ॥ * ॥
अपि च ।
श्रीनारायण उवाच ।
"पुरा स्तुता सा गोलोके कृष्णेन परमात्मना ।
संपूज्य मधुमासे च प्रीतेन रासमण्डले ॥
मधुकैटभयोर्युद्धे द्वितीये विष्णुना पुरा ।
तत्रैव काले सा दुर्गा ब्रह्मणा प्राणसङ्कटे ॥"
इति ब्रह्मवैवर्त्ते प्रकृतिखण्डे ६३ अध्यायः ॥
(चतुर्दशाक्षरवृत्तविशेषः । इति छन्दोमञ्जरी । अस्या लक्षणादिकं छन्दःशब्दे द्रष्टव्यम् ॥)

वासन्तीपूजा, स्त्री, (वासन्ती तदाख्या पूजा ।) चैत्रमासीयदुर्गापूजा । यथा,—
"चैत्रे मासि सिते पक्षे नवम्यादिदिनत्रये ।
प्रातः प्रातर्महादेवीं दुर्गां भक्त्या प्रपूजयेत् ॥"
इति ॥
तत्राष्टम्यां अन्नपूर्णापूजा यथा,—
"तत्राष्टम्यामन्नपूर्णां पूर्ব্वाह्णे साधकोत्तमः ।
रक्तवासैरक्तपुष्पैर्बलिभिः पूजयेच्छिवाम् ॥"
इति च मायातन्त्रे ७ पटलः ॥
अपि च ।
"विशेषाच्चैत्रमासस्य या तिथिः स्यात् सिताष्टमी ।
तस्यां यः पूजयेद्भक्त्या प्रसादयति मां ध्रुवम् ॥"
इति शाम्भवीतन्त्रे १४ पटलः ॥

वासयोगः, पुं, (वासाय सुगन्धार्थं युज्यते इति । युज + घञ् ।) चूर्णम् । इत्यमरः ॥ "हे आविर इति ख्याते । पटरसा चोदे इत्यन्ये । चूर्ण्यन्ते प्रेर्य्यन्ते चूर्णानि चूर्ण प्रेरणे अल् । वासे सुरभीकरणे युज्यन्ते उपयुज्यन्ते इति घञि वासयोगः ।" इति तट्टीकायां भरतः ॥ तत्पर्य्यायः । गन्धचूर्णम् २ पटवासम् ३ चूर्णकम् ४ । इति शब्दरत्नावली ॥

वासरः, पुं क्ली, (वासयतीति । वस् + णिच् + "अर्त्तिकमिभ्रमिचमिदेविवासिभ्यश्चित् ।" उणा० ३ । १३२ । इति अरः ।) दिवसः । इत्यमरः ॥ (यथा, कथासरित्सागरे । ४ । २३ ।
"प्रवृत्ते चावयोर्वांछे प्रयाताः सप्त वासराः ॥")
नागप्रभेदे, पुं । इति मेदिनी । रे, २१३ ॥

वासवः, पुं, (वसुरेव । प्रज्ञाद्यण् ।) इन्द्रः । इत्यमरः ॥ (यथा, महाभारते । ३ । ४३ । २२ ।
"सहस्राक्षनियोगात् स पार्थः शक्रासनं गतः ।
अध्यक्रामदमेयात्मा द्वितीय इव वासवः ॥")

वासवी, स्त्री, (वसोरपत्यं स्त्री । वसु + अण् । ङीप् ।) व्यासमाता । यथा,—
"व्यासस्याम्बा सत्यवती वासवी गन्धकालिका ।
योजनगन्धा दासेयी प्रौढं कायनजीवनः ॥"
इति हेमचन्द्रः ॥
(यथा, महाभारते । १ । ६३ । ७० ।
"दिवं तां वासवीं कन्यां रम्योरूं मुनिपुङ्गवः ।
सङ्गमं मम कल्याणि ! कुरुष्वेत्यभ्यभाषत ॥")

वाससज्जा, स्त्री, (वासं गृहं सज्जयतीति । सज्ज + णिच् + अण् । टाप् ।) नायिकाभेदः । यथा,
"खण्डितोत्कण्ठिता लज्जा तथा प्रोषितभर्तृका ।
कलहान्तरिता वाससज्जा स्वाधीनभर्तृका ।
अभिसारिकाप्यहो ता वन्द्याः पांशुलासती ॥"
इति जटाधरः ॥
अस्या विवरणं वासकसज्जाशब्दे द्रष्टव्यम् ॥

वासा, स्त्री, (वासयतीति । वस् + णिच् + अच् । टाप् ।) वासकः । इति शब्दरत्नावली ॥ (यथा, वैद्यके ।
"वासायां विद्यमानायामाघ्रायां जीवितस्य च ।
रक्तपित्ती क्षयी कासी किमर्थमवसीदति ॥")

वासागारं, क्ली, (वासाय वासस्य वा आगारम् ।) वासगृहम् । तत्पर्य्यायः । भोगगृहम् २ कक्षाटः ३

३ पद्माटः ४ निष्कुटः ५। इति त्रिकाण्डशेषः॥

वासिः, पुं, (वसनिवासे + "वसिवपियजिराजीति।" उणा० ४।१२४। इति इण्। कुठारभेदः। वाइस इति भाषा। इत्युणादिकोषः॥

वासिका, स्त्री, (वासेव। स्वार्थे कन्। टाप्। अत इत्वञ्च।) वासकः। इति शब्दरत्नावली॥

वासितं, क्ली, (वास्यते स्मेति। वास + क्तः।) रक्तम्। इति मेदिनी। ते, १५२॥ ज्ञानमात्रम्। इति हेमचन्द्रः॥ खगवरः। इति विश्वः॥

वासितः, त्रि, (वास्यते स्मेति। वासि सुरभीकरणे + क्तः।) सुरभीकृतः। तत्पर्य्यायः। भावितः २। इत्यमरः॥ हे सुगन्धिपुष्पादिवासितद्रव्ये। भाव्यते प्राप्यते भावितं भू कर्त्तरि क्तः। वासं सौरभं करोति इति आत्वात्। कर्म्मणि क्ते वासितम्। इति तट्टीकायां भरतः॥ जलादौ वासितः। इति शब्दरत्नावली॥ ख्यातः। वस्त्रवेष्टितः। इति धरणिः॥

वासिता, स्त्री, (वासयतीति वस निवासे + णिच् + क्तः। टाप्।) स्त्रीमात्रम्। करिणी। इत्यमरः॥

वासिनी, स्त्री, (वासोऽस्या अस्तीति। वास + इनिः।) शुक्लभिण्टी। इति शब्दचन्द्रिका॥

वासिष्ठं, क्ली, रुधिरम्। इति हेमचन्द्रः॥

वासिष्ठं, त्रि, वसिष्ठकृतयोगशास्त्रादि। वसिष्ठेन कृतमित्यर्थे (अण्) प्रत्ययेन निष्पन्नम्॥ वसिष्ठसम्बन्धि च॥

वासी, स्त्री, (वासयतीति वासि अच्। गौरादित्वात् ङीष्।) तक्षणी। वाइस इति ख्यातास्त्रम्। इति त्रिकाण्डशेषः॥

वासुः, पुं, (सर्व्वोऽत्र वसति, सर्व्वत्रासौ वसतीति वा। वस + बाहुलकात् उण्। इति २।१ संख्यक उणादिसूत्रवृत्तौ उज्ज्वलदत्तः।) नारायणः। इति त्रिकाण्डशेषः॥ श्रीनिवासोऽप्यजो वासुः। इति जटाधरस्य॥ विश्वरूपः। पुनर्व्वसुः। इत्युणादिकोषः॥

वासुकिः, पुं, (वसुकस्यापत्यमिति। वसुक + इञ्।) अहिपतिः। तत्पर्य्यायः। सर्पराजः २। इत्यमरः॥ वासुकेयः ३। इति शब्दरत्नावली। तस्योत्पत्तिर्यथा,—

"सुरसा जज्ञिरे सर्पांस्तेषां राजा तु तक्षकः।
वासुकिश्चैव नागानां गणाः क्रोधतमोऽधिकः॥"

इति वह्निपुराणे काश्यपीयवंशः॥

(जरत्कारुमुनिपत्नी मनसादेवी तु अस्यैव भगिनी।

"आस्तीकस्य मुनेर्माता भगिनी वासुकेस्तथा।
जरत्कारुमुनेः पत्नी नागमातर्नमोऽस्तु ते॥"

इति मनसाप्रणाममन्त्रः॥)

वासुकेयः, पुं, (वसुकस्यापत्यमिति। वसुक + ढक्।) वासुकिः। इति शब्दरत्नावली॥

वासुकेयखसा, [ऋ] स्त्री, (वासुकेयस्य वासुकेः खसा भगिनी।) मनसादेवी। इत्यमरः॥

वासुदेवः, पुं, (वसुदेवस्यापत्यमिति। वसुदेव + "ऋष्यन्धकवृष्णिकुरुभ्यश्च।" ४। १। ११४। इति अण्। यद्वा, सर्व्वत्रासौ वसत्यात्मरूपेण विश्वम्भरत्वादिति। वस् + बाहुलकात् उण्। वासुः। वासुश्चासौ देवश्चेति कर्म्मधारयः। अस्य नामनिरुक्तिस्तु परतो ज्ञेया।) श्रीकृष्णः। इत्यमरः॥ तत्पर्य्यायः। वसुदेवभूः २। इति हेमचन्द्रः॥ सत्यः २ सुभद्रः ४ वासुभद्रः ५ षड्ङ्गजित् ६ षड्बिन्दुः ७ प्रश्निभद्रः ८ प्रश्निभद्रः ९ गदाग्रजः १० मार्जः ११ वभ्रुः १२ लोहिताक्षः १३ परमाणुरङ्गकः १४। इति शब्दमाला॥ अन्यत् कृष्णशब्दे द्रष्टव्यम्॥ श्रीकृष्णशरीरस्य नित्यत्वं यथा,—

श्रीसनत्कुमार उवाच।

"भद्रं वो मुनयः प्रश्नस्तपसां फलमीप्सितम्।
कृष्णस्य कृत्स्नप्रश्नं शिवबीजस्य निष्फलम्॥
साम्प्रतं कृत्स्नं वक्ष्ये दर्शनं परमात्मनः।
भक्तानुरोधादेहस्य परस्य प्रकृतेरपि॥
निर्गुणस्य निरीहस्य सर्व्वबीजस्य तेजसः।
भारावतारणायैव चाविर्भूतस्य साम्प्रतम्॥

श्रीकृष्ण उवाच।

शरीरधारिणश्चापि कृत्स्नप्रश्नमीप्सितम्।
तत्कथं कृत्स्नप्रश्नं मयि विप्र न विद्यते॥

सनत्कुमार उवाच।

शरीरे प्राकृते नाथ सम्भवत्यत्र शुभाशुभम्।
नित्यदेहे शिवबीजे शिवप्रश्नमनर्थकम्॥

श्रीभगवानुवाच।

यो यो विग्रहधारी च स च प्राकृतिकः स्मृतः।
देहो न विद्यते विप्र तां नित्यां प्रकृतिं विना॥

सनत्कुमार उवाच।

रक्तविन्दूद्भवा देहास्ते च प्राकृतिकाः स्मृताः।
कथं प्रकृतिनाथस्य बीजस्य प्राकृतं वपुः॥
सर्व्वबीजस्य सर्व्वादिर्भवांश्च भगवान् स्वयम्।
सर्व्वेषामवताराणां प्रधानं बीजमव्ययम्॥
ज्ञात्वा वदन्ति वेदास्त्वां नित्यं नित्यं सनातनम्।
ज्योतिःस्वरूपं परमं परमात्मानमीश्वरम्॥
मायया सगुणश्चैव मायेशं निर्गुणं परम्।
प्रवदन्ति च वेदाङ्गास्तथा वेदविदः प्रभो॥

श्रीकृष्ण उवाच।

साम्प्रतं वासुदेवोऽहं भक्तवीर्य्यान्वितं वपुः।
कथं न प्राकृतो विप्र शिवप्रश्नमभीप्सितम्॥

सनत्कुमार उवाच।

वासः सर्व्वनिवासश्च विश्वानि यस्य लोमसु।
तस्य देवः परं ब्रह्म वासुदेव इतीरितः॥
वासुदेवेति तन्नाम वेदेषु च चतुर्षु च।
पुराणेष्वितिहासेषु यात्रादिषु च दृश्यते॥
रक्तबीर्य्यान्वितो देहः कृते वेदे निरूपितः।
सात्त्विको सुनयश्चात्र धर्म्मः सर्व्वत्र एव हि॥
सात्त्विको मम वेदाश्च रविचन्द्रौ च साम्प्रतम्।"

इति ब्रह्मवैवर्त्ते श्रीकृष्णजन्मखण्डे ८७ अध्यायः॥

तस्य नामव्युत्पत्तिः।

"सर्व्वत्रासौ समस्तञ्च वसत्यत्रेति वै यतः।
ततः स वासुदेवेति विद्वद्भिः परिगीयते॥"

इति विष्णुपुराणे १ अंशे २ अध्यायः॥

अपि च।

"सर्व्वाणि तत्र भूतानि वसन्ति परमात्मनि।
भूतेष्वपि च सर्व्वात्मा वासुदेवस्ततः स्मृतः॥
खाण्डिक्यजनकायाह दृष्टः कैशिध्वजः पुरा।
नामव्याख्यामनन्तस्य वासुदेवस्य तत्त्वतः॥
भूतेषु वसते सोऽन्तर्व्वसन्त्यत्र च तानि यत्।
धाता विधाता जगतां वासुदेवस्ततः प्रभुः॥"

इति तत्रैव। ६। ५। ८०—८२॥*॥

(तथा च महाभारते। ५। ७०। ३।

"वसनात् सर्व्वभूतानां वसुत्वात् देवयोनितः।
वासुदेवस्ततो वेद्यो दृढत्वात् विष्णुरुच्यते॥")

अस्य अङ्गप्रत्यङ्गमन्त्रा यथा,—

"बीजन्तु वासुदेवस्य पुरैव प्रतिपादितम्।
तदङ्गमन्त्रं राजेन्द्र द्वादशाक्षरमुच्यते॥
ॐ नमो भगवते वासुदेवाय वै पदम्।
अङ्गमन्त्रं तथैतस्य वासुदेवस्य कीर्त्तितम्॥
अस्य प्रत्यङ्गरूपन्तु दधिवामनसंज्ञकम्।
तस्य मन्त्रं नरश्रेष्ठ शृणुष्व भावितं मया॥
ॐ नमो विष्णवे पूर्व्वं पदं तस्य प्रकीर्त्तितम्।
पदन्तु सुरपतये चतुर्थ्यन्तं महाबलम्॥
स्वाहान्तं हृदयासन्नं प्रत्यङ्गं वैष्णवं मतम्।
मन्त्रद्वयन्तु यो वेद बीजं प्रत्यङ्गमन्त्रकम्॥
स पूता देवकायस्तु न स भूयोऽभिजायते।
सर्व्वसूक्तरत्नोक्तः क्रमो ग्राह्यः प्रपूजने॥
चित्रं मन्त्रेषु च बुधो विशेषं ग्रहणं भूपते।
रूपन्तु बीजमन्त्रस्य प्रथमं ग्रहणं भूपते॥
पूर्णचन्द्रोपमः शुभ्रः पक्षिराजोपरिस्थितः।
चतुर्भुजः पीतवस्त्रैस्त्रिभिः संवीतदेहभृत्॥
दक्षिणोर्द्धे गदां धत्ते तदधो विकचाम्बुजम्।
वामोर्द्धे चक्रमत्युग्रं धत्तेऽधः शङ्खमेव च॥
श्रीवत्सवक्षाः सततं कौस्तुभं हृदि चाद्भुतम्।
धत्ते कण्ठे ऊर्ध्वो वामे तूणीरं बाणपूरितम्॥
दक्षिणे कोशगं खड्गं नन्दकं सप्तराष्ट्रगम्।
पूर्व्वे किरीटं सद्योतं कर्णयोः कुण्डलद्वयम्॥
आजानुलम्बिनीं चित्रां स्वर्णमालां गलस्थिताम्।
दधानं दक्षिणे देवीं श्रियं पार्श्वे तु बिभ्रतम्॥
सरस्वतीं वामपार्श्वे चिन्तयेद्वरदं हरिम्।
मन्त्रस्य बीजरूपन्तु कथितं तव पार्थिव॥
द्वादशाक्षरमन्त्रस्य रूपमन्यत् शृणुष्व मे।
नीलोत्पलदलश्यामं तथैव च चतुर्भुजम्॥
दक्षिणोर्द्धे स्थितं पद्मं गदाधाधः प्रचोदयेत्॥
वामेऽधश्चक्रमतुलमूर्द्धे शङ्खञ्च बिभ्रतम्।
चिन्तयेद्वरदं देवं सर्व्वमन्त्रेषु पूर्व्ववत्॥
अष्टाक्षराक्षरस्यास्य प्रत्यङ्गस्य च विस्तरम्।
शृणु राजन्नवहितो दारिद्र्यभयभञ्जनम्॥
पूर्णेन्दुसदृशं कामं शुक्लवस्त्रं विचिन्तयेत्।
करे विचिन्तयेदामे पीयूषापूरितं घटम्॥
दधन्नखड्गसंयुक्तं दक्षिणे स्वर्णभाजनम्।
पद्मासनगतं देवं चक्रमण्डलमध्यगम्॥

शुक्लवस्त्रधरं देवं प्रमाणाद्दामनं सदा।
ईषद्धासयुतं त्रिलोकैश्वं त्रिविक्रमम्।
चिन्तयेद्धरदं देवं सर्व्वकामफलप्रदम्॥"

इति कालिकापुराणे ८२ अध्यायः॥*॥

तस्योत्पत्तिर्यथा,—

"ततस्तु दशमे मासि विधौ ब्रह्मर्क्षसङ्गते।
अर्द्धरात्रौ च तस्यां जातो जनार्द्दनः॥
इन्दीवरदलश्यामः पद्मपत्रायतेक्षणः।
चतुर्भुजः सुन्दराङ्गो दिव्याभरणभूषितः॥
श्रीवत्सकौस्तुभोरस्को वनमालाविभूषितः।
वसुदेवस्य जातोऽसौ वासुदेवः सनातनः॥

इति पाद्मोत्तरखण्डे ६० अध्यायः॥*॥

तस्य चतुर्धा मूर्त्तिर्यथा,—

"एकांशेन जगत् कृत्स्नं व्याप्य नारायणः स्थितः।
चतुर्द्धावस्थितो व्यापी सगुणो निर्गुणोऽपि वा॥
एका भगवतो मूर्त्तिर्ज्ञानरूपा शिवामला।
वासुदेवाभिधाना सा गुणातीता सुनिष्कला॥
द्वितीया कालसंज्ञान्या तामसी ग्रोषसंज्ञिता।
निहन्ति सकलांश्चान्ते वैष्णवी परमा तनुः॥
सत्त्वोद्रिक्ता तृतीयान्या प्रद्युम्नेति च संज्ञिता।
जगत् स्थापयते सर्व्वं सा विष्णुप्रकृतिर्ध्रुवा॥
चतुर्थी वासुदेवस्य मूर्त्तिर्ब्राह्मी सुसंज्ञिता।
राजसी चानिरुद्धाख्या प्रादुर्ज्ञी सृष्टि-
कारिका॥
यः खण्डयित्वाखिलं हत्वा प्रद्युम्नेन सह प्रभुः।
नारायणाख्यो ब्रह्मासौ प्रजासर्गकरो हि सः॥
या सा नारायणतनुः प्रद्युम्नाख्या मुनीश्वराः।
तया संमोहयेद्विश्वं सदेवासुरमानुषम्॥
सैव सर्व्वजगत्सृष्टिः प्रकृतिः परिकीर्त्तिता।
वासुदेवो ह्यनन्तात्मा केवलो निर्गुणो हरिः॥
प्रधानं पुरुषः कालस्त्रयमेतत्तमम्।
वासुदेवात्मकं नित्यमेतत् विज्ञानमुच्यते॥
एकवेदं चतुर्व्याहं चतुर्द्धा पुनरुच्यतः।
विभेद वासुदेवोऽसौ प्रद्युम्नो हरिरव्ययः॥"

इति कूर्म्मपुराणे ४८ अध्यायः॥

वासुदेवप्रियङ्करी, स्त्री, (वासुदेवस्य प्रियङ्करी।) शतावरी। इति राजनिर्घण्टः॥ श्रीकृष्णप्रिय-कारिणी च॥

वासुपूज्यः, पुं, (वासुनारायण इव पूज्यः।) जिनविशेषः। इति हेमचन्द्रः। १। २७॥

वासुभद्रः, पुं, श्रीकृष्णः। इति शब्दमाला॥ (यथा, विष्णुपादादि-केशान्तवर्णनस्तोत्रे। ३१।

"या वायावानुकूल्यात् सरति मणिरुचा भास-
मानासमाना
साकं साकम्यमंसे वसति विदधती वासुभद्रं
सुभद्रम्॥")

वासुरा, स्त्री, स्त्रीमात्रम्। करिणी। रात्रिः। भूमिः। इति हेमचन्द्रः॥

वासूः, स्त्री, (वासयते स्वगृहे इति। वास+बाहु-लकात् ऊः।) नाय्योत्तौ बाला। इत्यमरः॥

वासौकः, [स्] क्ली, (वासाय ओकः स्थानम्।) वासगृहम्। यथा,—

"गर्भागारेऽपरको वासौकः शयनास्पदम्।"
इति हेमचन्द्रः॥

वास्तवं, क्ली, (वस्तुनि। वस्तु+अण्।) यथार्थ-भूतम्। यथा,—

"धर्म्मः प्रोज्झितकैतवोऽत्र परमो निर्म्मत्सराणां सतां
वेद्यं वास्तवमत्र वस्तु शिवदं तापत्रयोन्मूलनम्।"
इत्यादि श्रीभागवते प्रथमस्कन्धे १ अध्यायः॥

"वास्तवं परमार्थभूतं वस्तु। यद्वा, वास्तव-शब्देन वस्तुनोऽंशो जीवः वस्तुनः कार्य्यं जगच्च तत् सर्व्वं वस्तुनैव न ततः पृथक्।" इति तट्टी-कायां श्रीधरस्वामी॥

वास्तविकं, त्रि, (वस्तुनि वस्तु+ठक्।) परमार्थ-भूतं वस्तु। वास्तवमेव इत्यर्थे वास्तवशब्दात् स्वार्थिकप्रत्ययेनापि निष्पन्नम्॥

वास्तवोषा, स्त्री, रात्रिः। इति त्रिकाण्डशेषः॥ किन्तु वास्तवा ऊषा इति नामद्वयमिति साधु-पाठः॥

वास्तव्यः, त्रि, वसतीति वस+"वसेस्तव्यत् कर्त्तरि णिच्च।" ३। १। ९९। इत्यस्य वार्त्तिकोक्त्या वासकर्त्ता। कर्त्तरितव्यत्। इति सिद्धान्त-कौमुदी॥ (यथा, कथासरित्सागरे। ३८। १०७।

"इहैवास्मि महाराज वास्तव्यो नगरे द्विजः॥")

वास्तव्यः। वसतौ, पुं॥

वास्तु, क्ली, वास्तूकशाकम्। इति राजनिर्घण्टः॥

वास्तु, क्ली पुं, (वसन्ति प्राणिनो यत्र। वस निवासे +"वसेरगारे णिच्च।" उणा० १। ७०। इति तुण्। स च णित्।) गृहकरणयोग्यभूमिः। तत्-पर्य्यायः। वेश्मभूः २। इत्यमरः॥ पोतः ३ वाटी ४। इति जटाधरः॥ वाटिका ५ गृहपोतकः ६। इति शब्दरत्नावली॥ वास्तुकरणप्रमा-णादिर्यथा,—

श्रीहरिरुवाच।

"वास्तु संक्षेपतो वक्ष्ये गृहादौ विघ्ननाशनम्।
ईशानकोणादारभ्य ह्येकाशीतिपदे यजेत्॥
ईशाने च शिरःपादौ नैर्ऋतेऽग्निनिले करौ।
आवासवासवेशादौ पुरे ग्रामे वणिक्पथे॥
प्रासादारामदुर्गेषु देवालयमठेषु च।
द्वात्रिंशत्तु सुरान् वास्तु तदन्तश्च त्रयोदश॥
ईशश्चैवाथ पर्ज्जन्यो जयन्तः कुलिशायुधः।
सूर्य्यः सत्यो भृशश्चैव आकाशो वायुरेव च॥
पूषा च वितथश्चैव गृहक्षतयमावुभौ।
गन्धर्व्वो भृङ्गराजश्च मृगः पितृगणस्तथा॥
दौवारिकोऽथ सुग्रीवः पुष्पदन्तो गणाधिपः।
असुरः शेषपापौ च रोगोऽहिर्मुख एव च॥
भल्लाटः सोमसर्पौ च अदितिश्च दितिस्तथा।
बहिर्द्वात्रिंशदेते तु तदन्तश्चतुरः शृणु॥
ईशानादिचतुष्कोणसंस्थितान् पूजयेद्बुधः।
आपश्चैवाथ सावित्रो जयो रुद्रश्चथैव च॥
मध्ये नवपदो ब्रह्मा तस्याधो च समीपगान्।
देवानेकोत्तरानेतान् पूर्ब्वादौ नामतः शृणु॥
अर्य्यमा सविता चैव विवस्वान् विबुधाधिपः।
मित्रोऽथ राजयक्ष्मा च तथा पृथ्वीधरः क्रमात्॥
आपमश्चापवत्सश्च परितो ब्रह्मणः स्थिताः।
ईशानकोणादारभ्य दुर्ज्ञेयो वंशः उच्यते॥
आग्नेयकोणादारभ्य वंशो भवति दुर्द्धरः।
अदितिं हिमवन्तञ्च जयन्तञ्च इदं त्रयम्॥
नादिका कारिका नाम प्रक्राङ्गन्तर्व्वगा पुनः।
वास्तुदेवान् पूजयित्वा गृहप्रासादलक्षयेत्॥
सुरेभ्यः पुरतः कार्य्यं दिश्याग्नेय्यां महानसम्।
रूपनिर्गमनं येन पूर्ब्बतः सत्रमण्डपम्॥
गन्धपुष्पगृहं कार्य्यमैशान्यां पङ्क्तिसंयुतम्।
भाण्डागारञ्च कौबेर्य्यां गोष्ठागारञ्च वायवे॥
उदगायनञ्च वारुण्यां वातायनसमन्वितम्।
समित्कुशेध्मसन्धानमायुधागारञ्च नैर्ऋते॥
अभ्यागतालयं रम्यं शय्यासनसपाटकम्।
सोयाग्निदीपसद्भृत्यैर्युक्तं दक्षिणतो भवेत्॥
गृहान्तराणि सर्व्वाणि सजलैः कदलीगृहैः।
पश्चवर्णैश्च कुसुमैः शोभितानि प्रकल्पयेत्॥
प्राकारं तद्बहिर्दद्यात् पञ्चहस्तं प्रमाणतः।
एवं विष्णोरमं कुर्य्यादनेश्वोपवनैर्युतम्॥
चतुःषष्टिपदो वास्तुः प्रासादादौ सुपूजितः।
मध्ये चतुष्पदो ब्रह्मा द्विपदास्तस्यमादयः॥
कर्णे चैवाथ पञ्चाद्यास्तथा देवाः प्रकीर्त्तिताः।
तेभ्योऽप्युभयतः सार्द्धा अन्येऽपि द्विपदाः सुराः॥
चतुःषष्टिपदे देवा इत्येवं परिकीर्त्तिताः।
चरकी च विदारी च पूतना पापराक्षसी॥
ईशानाद्यास्तथा बाह्ये देवाद्या हेतुकादयः।
हेतुकश्चिपुरान्तश्च अग्निर्वेतालको यमः॥
अग्निजिह्वः कालकस्तु करालो ह्येकपादकः।
ईशान्यां भीमरूपस्तु पाताले प्रेतनायकः॥
आकाशे गन्धमाली स्यात् क्षेत्रपालांस्तथा
यजेत्।
विस्तारार्द्धमितं दीर्घं राज्ञिद्वारन्तु कारयेत्॥
वसुभिर्भागशुद्धिश्च शेषाद्भादायमादिशेत्।
पुनर्गणितमष्टाभिर्ऋक्षभागन्तु भाजयेत्॥
यच्छेषं तच्चवेदञ्च भागैर्ज्ञात्वा व्ययं भवेत्।
ऋक्षं चतुर्गुणं कृत्वा नवभिर्भागहारितम्॥
शेषमंशं विजानीयात् देवलस्य मतं यथा।
अष्टाभिर्गुणितं पिण्डं षष्टिभिर्भागहारितम्॥
यच्छेषन्तु भवेच्छ्रीवं मरणं भूतहारितम्।
वास्तुक्रोड़े गृहं कुर्य्यात् न पृष्ठे मानवः सदा॥
वामपार्श्वेन खपिति नात्र कार्य्या विचारणा।
सिंहकन्यातुलायाञ्च द्वारं शुद्धेदशोत्तरम्॥
एवञ्च वृश्चिकादौ स्यात् पूर्ब्वदक्षिणपश्चिमम्।
द्वारं दीर्घार्द्धविस्तारं द्वाराणश्टौ क्षतानि च॥
सुताल्पप्रेष्यनीचत्वं सुयानं क्षत्रभूषणम्।
पुत्रहीनन्तु रौद्रेण वीर्य्यघ्नं दक्षिणे तथा॥
बह्वोऽवन्ध्याश्चायुर्वृद्धिः पुत्रलाभसुलक्षिदे।
धनदं नृपपीड़ादमर्थघ्नं रोगदं जले॥
नृपभीतिर्ऋतापत्या अनपत्यञ्च वैरिदम्।
अर्थदं वार्धहान्येव दोषदं पुत्रबन्धुदम्॥
द्वाराण्युत्तरसंज्ञानि पूर्ब्वद्वाराणि वक्ष्यहम्।

अग्निभीतिर्बहुकन्या धनसम्मानकोपदम् ॥
राजघ्नं कोपदं पूर्व्वे फलतो द्वारमीरितम् ।
ईशानादौ भवेत् पूर्व्वे आग्नेयादौ तु दक्षिणे ॥
नैर्ऋत्यादौ पश्चिमे स्यात् वायव्यादौ तु चोत्तरे ।
अष्टभागे कृते भागे द्वाराणाञ्च फलाफलम् ॥
अश्वत्थप्लक्षन्यग्रोधाः पूर्व्वादौ स्यादुडुम्बरः ।
गृहस्य शोभनः प्रोक्त ईशाने चैव शाल्मलिः ॥
पूजितो विघ्नहारी स्यात् प्रासादस्य गृहस्य च ॥"

इत्यादि गारुडे वास्तुमानलक्षणं ४६ अध्यायः ॥
प्रासादलक्षणन्तु प्रासादशब्दे द्रष्टव्यम् ॥ * ॥
अपि च ।

ऋषय ऊचुः ।

"प्रासादभवनादीनां निवेशं विस्तरान्नृप ।
कुर्य्यात् केन विधानेन कश्च वास्तुरदाहृतः ॥

सूत उवाच ।

भृगुरत्रिर्व्वशिष्ठश्च विश्वकर्म्मा मयस्तथा ।
नारदो नग्नजिच्चैव विशालाक्षः पुरन्दरः ॥
ब्रह्मा कुमारो नन्दीशः शौनको गर्ग एव च ।
वासुदेवोऽनिरुद्धश्च तथा शुक्रबृहस्पती ॥
अष्टादशैते विख्याता वास्तुशास्त्रोपदेशकाः ।
संक्षेपेणोपदिष्टं यन्मनवे मत्स्यरूपिणा ॥
तदिदानीं प्रवक्ष्यामि वास्तुशास्त्रमनुत्तमम् ।
पुरान्धकवधे घोरे घोररूपस्य शूलिनः ॥
ललाटस्वेदसलिलमपतद्भुवि भीषणम् ।
करालवदनं तस्मात् समुद्भूतं समुल्बणम् ॥
ज्वलमानमिवाकाशं सप्तद्वीपां वसुन्धराम् ।
ततोऽन्धकानां रुधिरमपिबत् पतितं क्षितौ ॥
तेन तत्समरे सर्व्वं पतितं यन्महीतले ।
तथापि तृप्तिमगमत्तद्भूतं न तदा यदा ॥
तदा शिवस्य पुरतस्तपश्चक्रे सुदारुणम् ।
क्षुधाविष्टन्तु तद्भूतमाहर्त्तुं जगतां त्रयम् ॥
ततः कालेन सन्तुष्टो भैरवस्तस्य चादरात् ।
वरं वृणीष्व भद्रं ते यदभीष्टं तवानघ ॥
तमुवाच ततो भूतं त्रैलोक्यग्रसनक्षमम् ।
भवामि देवदेवेश तथेत्युक्तश्च शूलिना ॥
ततस्तत् क्षिप्तिवं सर्व्वं भूमण्डलमशेषतः ।
स्वदेहेनान्तरीयश्च बभ्राम प्रापतद्भुवि ॥
भीतभीतैस्ततो देवैर्ब्रह्मणा वाथ शूलिना ।
दानवासुररक्षोभिरवध्यं समन्ततः ॥
येन यत्रैव चाक्रान्तं स तत्रैवाभवत् पुनः ।
निवासात् सर्व्वदेवानां वास्तुरित्यभिधीयते ॥
अवध्यत्वेन तेनापि विघ्नाः सर्व्वदेवताः ।
प्रसीदध्वं सुराः सर्व्वे युष्माभिर्निर्मलीकृतः ॥
स्थास्यामि किं यदाहारमवश्यमधोमुखम् ।
ततो ब्रह्मादिभिः प्रोक्तं वास्तुमध्ये तु यो बलिः ॥
आहारो वैश्वदेवान्ते न्यूनमस्मिन् भविष्यति ।
वास्तूपशमनो यज्ञस्तवाहारो भविष्यति ॥
एवमुक्तस्ततो हृष्टः स वास्तुरभवत्तदा ।
वास्तुयज्ञः स्मृतस्तस्मात् ततः प्रभृति शान्तये ॥"

इति मात्स्ये वास्तुभूतोद्भवो नाम २२६ अध्यायः ॥ * ॥

सूत उवाच ।

"अथातः संप्रवक्ष्यामि गृहकालविनिर्णयम् ।
यथाकालं शुभं ज्ञात्वा सदा भवनमारभेत् ॥
चैत्रे व्याधिमवाप्नोति यो गृहं कारयेन्नरः ।
वैशाखे धनरत्नानि ज्येष्ठे मृत्युं तथैव च ॥
आषाढ़े भृत्यरत्नानि पशुवर्ग्गमवाप्नुयात् ।
श्रावणे भृत्यलाभश्च हानिं भाद्रपदे तथा ॥
पत्नीनाशोऽश्वयुजे विन्द्यात् कार्त्तिके धन-
धान्यकम् ।
मार्गशीर्षे तथा भक्तं पौषे तस्करतो भयम् ॥
लाभश्च बहुशो विन्द्यादग्निं माघे विनिर्दिशेत् ।
फाल्गुने काञ्चनं पुत्रानिति कालबलं स्मृतम् ॥
अश्विनी रोहिणी मूलमुत्तराचयमेन्दवम् ।
स्वाती हस्तानुराधा च गृहारम्भे प्रशस्यते ॥
आदित्यभौमवर्ज्यन्तु सर्व्वे वाराः शुभावहाः ।
वज्रव्याघातशूलेषु व्यतीपातातिगण्डयोः ॥
विष्कम्भगण्डपरिघवर्ज्यं योगेषु कारयेत् ।
श्वेते मैत्रेय माहेन्द्रे गान्धर्व्वेऽभिजिदोहिणे ।
तथा वैराजसावित्रे मुहूर्त्ते गृहमारभेत् ॥
चन्द्रादित्यबलं लब्ध्वा लग्नं शुभनिरीक्षितम् ।
स्तम्भोच्छ्रायादि कर्त्तव्यमन्यच्च परिवर्ज्जयेत् ॥
प्रासादेष्वेवमेव स्यात् कूपवापीषु चैव हि ।
पूर्व्वं भूमिं परीक्षेत पश्चाद्वास्तुं प्रकल्पयेत् ॥
श्वेता रक्ता तथा पीता कृष्णा चैवानुपूर्व्वशः ।
विप्रादेः शस्यते भूमिरतः कार्य्यं परीक्षणम् ॥
विप्राणां मधुरास्वादा कषाया क्षत्रियस्य च ।
कषायकटुका तद्वद्वैश्यशूद्रेषु शस्यते ॥
रत्निमात्रे तु वै गर्त्ते श्वभ्रेणापूर्य्य तत्समम् ।
घृतमामशरावस्थं कृत्वा वर्त्तिचतुष्टयम् ।
ज्वालयेत् भूपरीक्षार्थं पूर्व्वं तत् सर्व्वदिङ्मुखम् ॥
दीप्तां पूर्व्वादि गृह्णीयादर्णानामनुपूर्व्वशः ।
वास्तुः सामूहिको नाम दीप्यते सर्व्वतस्तु यः ॥
शुभदः सर्व्ववर्णानां प्रासादेषु गृहेषु च ।
रत्निमात्रमधो गर्त्तं परीक्ष्यं खातपूरणे ॥
अधिके श्रेयमाप्नोति न्यूने हानिः समे समम् ।
हलकृष्टेऽथवा देशे पूर्व्वबीजानि वापयेत् ॥
त्रिपञ्चसप्तमात्रेण यत्र रोहन्ति तान्यपि ।
ज्येष्ठोत्तमा कनिष्ठा भूर्वर्ज्जनीयतरा मता ॥
पञ्चगव्योषधिजलैः परीक्षित्वा च सेचयेत् ॥
एकाशीतिपदं कृत्वा रेखाभिः कनकेन तु ।
पश्चात् पिष्टेन चालिप्येत् सूत्रेणालोड्य सर्व्वतः ॥
दश पूर्व्वायता रेखा दश चैवोत्तरायताः ।
सर्व्वा वास्तुविभागेषु विज्ञेया नवका नव ॥
एकाशीतिपदं कृत्वा वास्तुवित् सर्व्ववास्तुषु ।
पदस्थान् पूजयेद्देवांस्त्रिंशत् पञ्चदशैव तु ॥
द्वात्रिंशद्बाह्यतः पूज्याः पूज्याश्चान्तस्त्रयोदश ।
नामतस्तान् प्रवक्ष्यामि स्थानानि च निबोधत ॥
ईशानकोणादिषु तान् पूजयेद्बुधिमान् नरः ।
शिखी चैवाथ पर्जन्यो जयन्तः कुलिशायुधः ॥
सूर्य्यसत्यौ भृशश्चैव आकाशो वायुरेव च ।
पूषा च वितथश्चैव गृहक्षतयमावुभौ ॥
गन्धर्व्वो भृङ्गराजश्च मृगः पितृगणस्तथा ।
दौवारिकोऽथ सुग्रीवः पुष्पदन्तो जलाधिपः ॥
असुरः शेषपापौ च रोगोऽहिर्मुख्य एव च ।
भल्लाटः सोमसर्पौ च अदितिश्च दितिस्तथा ।
बहिर्द्वात्रिंशदेते तु तदन्तश्चतुरः शृणु ॥
ईशानादिचतुष्कोणे संस्थितान् पूजयेदृथा ।
आपश्चैवाथ सावित्रो जयो भद्रश्चथैव च ॥
मध्ये नवपदो ब्रह्मा तस्याष्टौ च समीपगान् ।
साध्या नैकान्तरान् विद्यात् पूर्व्वाद्यान् नामतः
शृणु ॥
अर्य्यमा सविता चैव विवस्वान् विबुधाधिपः ।
मित्रोऽथ राजयक्ष्मा च तथा पृथ्वीधरः स्मृतः ॥
अष्टमस्त्वापवत्सस्तु परितो ब्रह्मणः स्मृताः ।
आपश्चैवापवत्सश्च पर्जन्योऽग्निरितिस्तथा ॥
पदिकानाञ्च वर्गोऽयमेवं कोणेष्वशेषतः ।
तन्मध्ये तु बहिर्विंशत् द्विपदास्तु सर्व्वतः ॥
अर्य्यमा च विवस्वांश्च मित्रः पृथ्वीधरस्तथा ।
ब्रह्मणः परितौ दिक्षु त्रिपदास्ते तु सर्व्वतः ॥*॥
वंशानिदानीं वक्ष्यामि ऋजूनपि पृथक् पृथक् ।
वायुं यावत्तथा रोगात् पितृभ्यः शिखिनं पुनः ॥
सुख्याद्भृशमथो शेषात् मितवं यावदेव तु ।
सुग्रीवाददितिं यावत् भृगोः पर्जन्यमेव च ॥
एते वंशाः समाख्याताः क्वचिदुर्ज्जय एव च ।
एतेषां यस्तु सम्पातः पदं मर्म्म समन्ततः ॥
मर्म्म चैतत् समाख्यातं त्रिशूलं कोणगञ्च यत् ।
स्तम्भन्यासे तु वर्ज्यानि तुलाविधिषु सर्व्वदा ॥
कीलोच्छिष्टोपघातानि वर्ज्जयेदृयत्नतो नरः ।
सर्व्वत्र वास्तुर्निर्दिष्टः पितृवैश्वानरायतः ॥
सुर्हन्यग्निः समाविष्टो मुखे चापः समाहितः ।
पृथ्वीधरोऽर्य्यमा चैव तयोस्त्रावदधिष्ठितौ ॥
वक्षःस्थले चापवत्सः पूजनीयः सदा बुधैः ।
नेत्रयोर्दितिपर्ज्जन्यौ श्रोत्रेऽदितिजयन्तकौ ॥
सर्पेन्द्रा वंशसंस्थौ च पूजनीयौ प्रयत्नतः ।
सत्यरोगादयस्तद्वद्बाहवः पञ्च च पञ्च च ॥
रुद्रश्च राजयक्ष्मा च वामहस्ते समाश्रितौ ।
सावित्रः सविता तद्वद्दक्षिणमाश्रितौ ॥
विवस्वानथ मित्रश्च जठरे संव्यवस्थितौ ।
पूषा च पापयक्ष्मा च हृत्स्थयोर्मरुदन्तने ॥
तथैवासुरसोमौ च वामपार्श्वे समाश्रितौ ।
पार्श्वे तु दक्षिणे तद्वदितथः सगृहक्षतः ॥
उर्व्वोर्य्यमाम्बुपौ ज्ञेयौ जान्वोर्गन्धर्व्वपुष्पकौ ।
जङ्घयोर्भृगुसुग्रीवौ शिक्स्थौ दौवारिको मृगः ॥
जयशक्रौ तथा मेढ्रे पार्श्वयोः पितरस्तथा ।
मध्ये नवपदो ब्रह्मा हृदये स तु पूज्यते ॥
चतुःषष्टिपदो वास्तुः प्रासादे ब्रह्मणा स्मृतः ।
ब्रह्मा चतुष्पदस्तत्र कोणेष्वष्टपदास्ततः ॥
बहिष्कोणे तु चाष्टौ तु सार्द्धाश्चोभयसंस्थिताः ।
विंशतिर्द्विपदाश्चैषां चतुःषष्टिपदे स्मृताः ॥ * ॥
गृहारम्भे तु कर्त्तृणां स्वाम्यङ्गे यत्र जायते ।
शल्यस्तत्परिवर्ज्जयेत्तत्र प्रासादे भवनेऽपि वा ॥
सशल्यं भयदं तस्मादशल्यं शुभदायकम् ।
हीनाधिकाङ्गभावांस्तु सर्व्वथा तु विवर्ज्जयेत् ॥
नगरग्रामदेशेषु सर्व्वत्रैवं प्रकल्पयेत् ।

चतुःशालं त्रिशालन्तु द्विशालञ्चैकशालकम् ॥
नामतस्तानि वक्ष्यामि स्वरूपेण द्विजोत्तमाः ॥"
इति मात्स्ये एकाशीतिपदवास्तुनिर्णयो नाम
२२७ अध्यायः ॥ * ॥

सूत उवाच ।

"चतुःशालं प्रवक्ष्यामि स्वरूपान्नामतस्तथा ।
चतुःशालं द्वयद्वारैरलिन्दैः सर्व्वतोमुखम् ॥
गत्वा तत् सर्व्वतोभद्रं शुभं देवनृपालये ।
पश्चिमद्वारहीनन्तु नन्द्यावर्त्तं प्रचक्षते ॥
दक्षिणद्वारहीनं तद्वर्द्धमानमुदाहृतम् ।
पूर्व्वद्वारविहीनन्तत् स्वस्तिकं नाम विश्रुतम् ॥
रुचकं चोत्तरद्वारविहीनं तत्प्रचक्षते ।
सौम्यशालाविहीनन्तु त्रिशालं धन्यकञ्च तत् ॥
क्षेमवृद्धिकरं नृणां बहुपुत्रफलप्रदम् ।
शालया पूर्व्वया हीनं सुक्षेत्रमिति विश्रुतम् ॥
धन्यं यशस्यमायुष्यं श्रीकमोहविवाशनम् ।
युक्तौ तु याम्यया हीनं विशालं शालया तु यत् ॥
कुलक्षयकरं नृणां सर्व्वव्याधिभयावहम् ।
हीनं पश्चिमया यत्तु पक्षघ्नं नाम तत् पुनः ॥
मित्रबन्धुसुतान् हन्ति तथा सर्पभयावहम् ।
याम्यापराभ्यां शालाभ्यां धनधान्यफलप्रदम् ॥
क्षेमवृद्धिकरं नृणां तथा पुत्रफलप्रदम् ।
यमं सूर्य्यञ्च विज्ञेयं पश्चिमोत्तरशालकम् ॥
राजाग्निभयदं नृणां कुलक्षयकरञ्च तत् ।
उदक्पूर्व्वे तु शाले द्वे दण्डाख्ये यत्र तद्भवेत् ॥
अकालमृत्युभयदं परचक्रभयावहम् ।
धनाख्यं यामपूर्व्वाभ्यां शालाभ्यां यद्विशालकम् ॥
तच्छस्त्रभयदं नृणां पराभवभयावहम् ।
युक्तौ पूर्व्वापराभ्यान्तु सा भवेत् मृत्युसूचनी ॥
वधबन्धाय शस्त्राणामनेकभयकारकम् ।
काचसुत्तरयामाभ्यां शालाभ्यां भयदं नृणाम् ॥
सिद्धार्थवर्ज्यं वर्ज्यानि द्विशालानि सदा बुधैः ॥*॥
अथातः संप्रवक्ष्यामि भवनं पृथिवीपतेः ।
पञ्चप्रकारं तत् प्रोक्तमुत्तमादिविभेदतः ॥
अष्टोत्तरं हस्तशतं विस्तारश्चोत्तमो मतः ।
चतुर्व्वन्येषु विस्तारो हीयते चाष्टभिः करैः ॥
चतुर्थांशाधिकं दैर्घ्यं पञ्चस्वपि निगद्यते ।
युवराजस्य वक्ष्यामि तथा भवनपञ्चकम् ॥
षड्भिः षड्भिस्तथांशैर्हीयते तच्च विस्तरात् ।
त्रिंशांशेन चाधिकं दैर्घ्यं पञ्चस्वपि निगद्यते ॥*॥
सेनापतेः प्रवक्ष्यामि सदा भवनपञ्चकम् ।
चतुःषष्टिन्तु विस्तारात् षड्भिः षड्भिस्तु
हीयते ॥
पञ्चस्वेतेषु दैर्घ्यञ्च षड्भागेनाधिकं भवेत् ॥*॥
मन्त्रिणामथ वक्ष्यामि तथा भवनपञ्चकम् ॥
चतुश्चतुर्भिर्हीना स्यात् करषष्टिः प्रविस्तरे ।
अष्टांशेनाधिकं दैर्घ्यं पञ्चस्वपि निगद्यते ॥ * ॥
सामन्तामात्यलोकानां वक्ष्ये भवनपञ्चकम् ।
चत्वारिंशत्तथाष्टौ च चतुर्भिर्हीयते क्रमात् ॥
चतुर्थांशाधिकं दैर्घ्यं पञ्चस्वेतेषु शस्यते । * ।
पुरोधिनां कञ्चुकीनाञ्च वैद्यानां गृहपञ्चकम् ॥

अष्टाविंशत् कराणान्तु द्विहीनं विस्तरेण तत् ।
द्विगुणं दैर्घ्यमेवोक्तं मध्यमेष्वेवमेव तु ॥ * ॥
दूतकर्म्मान्तिकादीनां वक्ष्ये भवनपञ्चकम् ।
चतुर्थांशाधिकं दैर्घ्यं विस्तारो द्वादशैव तु ॥
अध्यर्द्धकरहानिः स्यात् विस्तारात् पञ्चसु
क्रमात् । * ।
दैवज्ञगुरुवैद्यानां सभास्तारपुरोधसाम् ॥
तेषामपि प्रवक्ष्यामि सदा भवनपञ्चकम् ।
चत्वारिंशच्च विस्ताराच्चतुर्भिर्हीयते क्रमात् ॥
पञ्चस्वेतेषु दैर्घ्यञ्च षड्भागेनाधिकं भवेत् ।*।
चतुर्व्वर्णस्य वक्ष्यामि सामान्यं गृहपञ्चकम् ॥
द्वात्रिंशत्करं कराणान्तु चतुर्भिर्हीयते क्रमात् ।
आषोड़शादिति परं नूनमन्त्यावसायिनाम् ॥
दशांशेनाष्टभागेन त्रिभागेणाथ पादिकम् ।
अधिकं दैर्घ्यमित्याहुर्मानज्ञाद्यैः प्रशस्यते ॥
सेनापतेर्नृपस्यापि गृहस्येवोत्तरेण तु ।
नृपवासगृहं कार्य्यं भाण्डागारन्तथैव च ॥
सेनापतेर्गृहस्यापि चातुर्व्वर्ण्यस्य चान्तरम् ।
वासकोषगृहं कार्य्यं राजपूज्येषु सर्व्वदा ॥
अन्तरप्रभवाणाञ्च स्वपितुर्दूरमिष्यते ।
तथा हस्तशतादर्व्वाक् गदितं वनवासिनाम् ॥
सेनापतेर्नृपस्यापि सम्मत्या सहितेऽन्विते ।
चतुर्द्वशुद्धते आसे शालाभ्यासः प्रकीर्त्तितः ॥
पञ्चत्रिंशद्गृहते तस्मिन् अलिन्दः समुदाहृतः ।
तथा षट्त्रिंशद्गृहस्तात्तु सप्ताङ्गुलसमन्वितः ॥
विप्रस्य महतो शाला न दैर्घ्यं परतो भवेत् ।
दशाङ्गुलाधिका तद्वत् क्षत्रियस्य विधीयते ॥
पञ्चत्रिंशत् करा वैश्ये अङ्गुलानि चथोदश ।
तावत्करेषु शूद्रस्य युता पञ्चदशाङ्गुलैः ॥
शालायास्तु त्रिभागेण यस्याग्रे वीथिका भवेत् ।
सोष्णीषं नाम तदास्तु पश्चाच्छायोच्छ्रयम्भवेत् ॥
पार्श्वयोर्वीथिका यत्र सावष्टम्भन्तदुच्यते ॥
समन्ताद्वीथिका यत्र सुस्थितं तदिहोच्यते ॥
शुभदं सर्व्वमेतत् स्यात् चातुर्वर्ण्यस्तुर्विधम् ।
विस्तरात् षोड़शो भागस्तथा हस्तचतुष्टयम् ॥
प्रथमो भूमिकोच्छ्राय उपरिष्टात् प्रहीयते ।
द्वादशांशेन सर्व्वासु भूमिकासु तथोच्छ्रयः ॥
एकैकके भवेद्धित्तिः षोड़शांशेन विस्तरात् ।
दानवेन विकल्प्यः स्यात् तथा शुषिरभित्तिके ॥
गर्भमानेन मानन्तु सर्व्ववास्तुषु शस्यते ।
गृहवासस्य पश्चाग्रदशद्वादशभिरङ्गुलैः ॥
संयुतो द्वारनिष्क्रमो द्विगुणश्चोच्छ्रयो भवेत् ।
द्वारशाखासु बाहुल्यमुच्छ्रायं करसम्मितैः ॥
अङ्गुलैः सर्व्ववास्तूनां पृथुत्वं शस्यते बुधैः ।
उदुम्बरोत्तराङ्गे च तदर्द्धार्द्धं प्रविस्तरैः ॥"
इति मात्स्ये वास्तुविद्यासु गृहमाननिर्णयो
नाम २२८ अध्यायः ॥ * ॥

सूत उवाच ।

"अथातः संप्रवक्ष्यामि स्तम्भमानविनिर्णयम् ।
श्रुत्वा स्वभवनोच्छ्रायं सदा सप्तगुणं बुधः ॥
अशीत्यङ्गं पृथुत्वं स्यादग्रे नवगुणैः सह ।
रुचकश्चतुरस्रः स्यादर्द्धांशो वज्र उच्यते ॥

द्विवज्रः षोड़शास्रस्तु द्वादशास्रः प्रशोभनकः ।
मध्यप्रदेशे यः स्तम्भो वृत्तो वृत्त इति स्मृतः ॥
एते पञ्च महास्तम्भाः प्रशस्ताः सर्व्ववास्तुषु ।
पद्मवल्लीलता कार्य्या पत्रदर्शनरूपिता ॥
स्तम्भस्य नवमांशेन पद्मकुम्भोत्तराणि च ।
स्तम्भतुल्या तुला प्रोक्ता हीनाश्चोपतुला ततः ॥
त्रिभागेणेह सर्व्वत्र चतुर्भागेण वा पुनः ।
हीनं हीनञ्चतुर्थांशात्तथा सर्व्वासु भूमिषु ॥
वासगेहानि सर्व्वेषां प्रवेशे दक्षिणेन तु । * ।
द्वाराणि तु प्रवक्ष्यामि प्रशस्तानीह तानि तु ॥
पूर्व्वेणेन्द्रं जयन्तञ्च द्वारं सर्व्वत्र शस्यते ।
याम्यञ्च वितथञ्चैव दक्षिणेन विदुर्बुधाः ॥
पश्चिमे पुष्पदन्तञ्च वारुणञ्च प्रशस्यते ।
उत्तरेण तु भल्लाटं सौम्यञ्च शुभदं भवेत् ॥
तथा वास्तुषु सर्व्वत्र वेधं द्वारस्य वर्ज्जयेत् ।
द्वारे तु रथ्यया विद्धे भवेत् सर्व्वकुलक्षयः ॥
तरुणा दोषबाहुल्यं शोकः पङ्केन जायते ।
अपस्कारो भवेन्नूनं कूपवेधेन सर्व्वदा ॥
यथा प्रस्रवणेन स्यात् कीलेनाग्निभयम्भवेत् ।
विनाशो देवताविद्धे स्तम्भेन स्त्रीक्षतो भवेत् ॥
गृहभङ्गं विनाशः स्यात् गृहेण च गृहे क्षते ।
अमेध्यावस्करैर्विद्धे गृहिणीबन्धनम्भवेत् ॥
तथा शस्त्रभयं विद्यादन्त्यजस्य गृहेण तु ।
उच्छ्रायद्विगुणां भूमिं त्यक्त्वा वेधो न विद्यते ॥
स्वयमुद्घाटिते द्वारे उन्मादो गृहमेधिनाम् ।
स्वयञ्च पिहिते विन्द्यात् कुलनाशं विचक्षणः ॥
मानाधिके राजभयं नीचे तस्करतो भयम् ।
द्वारोपरि च यद्द्वारं तदन्तकसुखं स्मृतम् ॥
आध्मानं मध्यदेशे तु अधिको यस्य विस्तरः ।
वज्रन्तु प्रकटं मध्ये सद्यो भर्त्तृविनाशनम् ॥
तथान्यपीड़ितद्वारं बहुदोषकरम्भवेत् ।
शूलद्वारं तथान्यन्तु नाधिकं शोभनम्भवेत् ॥
कुम्भश्रीपर्णिवल्लीभिर्मूलद्वारन्तु शोभयेत् ।
पूजयेचापि तन्नित्यं बलिना चाक्षतोदकैः ॥*॥
भवनस्य वटः पूर्व्वे दिग्भागे सर्व्वकालिकः ।
उड़ुम्बरस्तथा याम्ये वारुणे पिप्पलः शुभः ॥
प्लक्षश्चोत्तरतो धन्यो विपरीतस्त्वसिद्धये ।
कण्टकी क्षीरवृक्षश्च आसन्नः सफलो द्रुमः ॥
भयं हानिं प्रजाहानिं कुर्व्वन्ति क्रमशः सदा ।
न च्छिन्द्याद्यदि तान्यानन्तरे स्थापयेत्
शुभान् ॥
पुन्नागाशोकवकुलशमीतिलकचम्पकान् ।
दाड़िमी पिप्पली द्राक्षा तथा कुसुमसञ्चयम् ॥
जम्बीरपूगपनसद्रुमकेतकीभि-
र्जातीसरोजशतपत्रिकमल्लिकाभिः ।
यन्नारिकेलकदलीदलपाटलाभि-
र्युक्तं तदत्र भवनं श्रियमातनोति ॥"
इति मात्स्ये वास्तुविद्यासु वेधपरिवर्ज्जनो नाम
२२९ अध्यायः ॥ * ॥

सूत उवाच ।

"उदगादिप्लवं वास्तु समानशिरसन्तथा ।
प्रदीप्तं पूर्व्ववत् कुर्य्यात् स्तम्भोच्छ्रायं विचक्षणः ॥

न देवधूर्नसचिवचत्वराणां समीपतः ।
कारयेद्भवनं प्राज्ञो दुःखशोकभयं यतः ॥
तस्य प्रवेशाश्चत्वारस्तथोत्सङ्गोऽथतः शुभः ।
पृष्ठतः पृष्ठभङ्गस्तु सद्यावर्त्तः प्रशस्यते ॥
अपसव्यो विनाशाय दक्षिणे प्रीतिकस्तथा ।
सर्व्वकामफलो नृणां संपूर्णो नाम वामतः ॥
एवं प्रवेशमालोक्य यत्नेन गृहमारभेत् । * ।
अथ संवत्सरे पूर्णे सुहूर्त्ते शुभलक्षणे ॥
रत्नोपरि शिलां कृत्वा सर्व्वबीजसमन्विताम् ।
चतुर्भिर्ब्राह्मणैस्तम्भं वस्त्रालङ्कारपूजितम् ॥
शुक्लाम्बरधरः शिल्पी सहितो वेदपारगैः ।
स्थापितं विन्यसेत् तद्वत् सर्व्वौषधिसमन्वितम् ॥
नानाफलतरोपेतं वस्त्रताम्बूलसंयुतम् ।
ब्रह्मघोषेण वाद्येन गीतमङ्गलनिस्वनैः ॥
पायसं भोजयेद्विप्रान् होमस्तु मधुसर्पिषा ।
वास्तोष्पते प्रतिजानीहि मन्त्रेणानेन सर्व्वदा ॥
सूत्रपाते तथा कार्य्यमेवं स्तम्भोदये पुनः ।
द्वारबन्धोच्छ्राये तद्वत् प्रवेशसमये तथा ॥
वास्तूपशमने तद्वत् वास्तुयज्ञस्तु पञ्चधा ।
ईशाने सूत्रपातः स्यादाग्नेये स्तम्भरोपणम् ॥
प्रदक्षिणञ्च कुर्व्वीत वास्तोः पदविलेखनम् ।
तर्ज्जनी मध्यमा चैव तथाङ्गुष्ठस्तु दक्षिणे ॥
प्रबालरत्नकनकं फलपिष्टकृतोदकम् ।
सर्व्ववास्तुविभागेषु प्रशस्तम्पदविलेखने ॥
न भस्माङ्गारकाष्ठेन न शुष्कनखचर्म्मभिः ।
न च सास्थिकपालेन क्वचिद्वास्तु प्रलेखयेत् ॥
एभिर्विलेखितं कुर्य्यात् दुःखशोकामयादिकम् ।
यदा गृहप्रवेशः स्याच्छिल्पी तत्रोपलेखयेत् ॥
स्तम्भसूत्रादिके तद्वत् शुभाशुभफलोदयम् । * ।
आदित्याभिमुखं रौति शकुनः परुषं यदि ॥
तुल्याकालं स्पृशेदङ्गं गृहभर्त्तुः समात्मनः ।
वाक्यङ्गे तद्विजानीयान्नरशल्यं भयप्रदम् ॥
शकुनानन्तरं तत्र हस्त्यश्वापदमेव च ।
तदङ्गसम्भवं विद्यात्तत्र शल्यं विचक्षणः ॥
प्रसार्य्यमाणे सूत्रे तु श्वगोमायुविलङ्घिते ।
तत्र शल्यं विजानीयात् खरशब्दे च भैरवे ॥
यदीशान्तेऽथ दिग्भागे मधुरं रौति वायसः ।
धनन्तत्र विजानीयादङ्गे वा स्वास्थ्यधिष्ठिते ॥
सूत्रच्छेदे भवेन्मृत्युर्व्याधिः कीले त्वधोमुखे ।
अङ्गारेषु तथोन्मादः कपालेषु च सम्भ्रमः ।
कम्बुशल्ये च जानीयात् पुंश्चल्यं स्त्रीषु वास्तुवित् ।
गृहभर्त्तुर्गृहस्यापि विनाशः शिल्पिसम्भवे ॥
स्तम्भस्थाने च्युते कुम्भे शिरोरोगं विनिर्द्दिशेत् ।
कुम्भापहारे सर्व्वस्य कुलस्यापि क्षयो भवेत् ॥
मृत्युं स्थानच्युते कुम्भे भग्ने बन्धं विदुर्बुधाः ।
करसंख्याविनाशे तु नाशं गृहपतेर्विदुः ॥
बीजौषधिविहीने तु भूतेभ्यो भयमादिशेत् ।
प्राग्दक्षिणेन विन्यस्य स्तम्भे सूत्रं विवेशयेत् ॥
ततः प्रदक्षिणेनान्यन्यसेत् स्तम्भं विचक्षणः ।
यस्माद्भयकरं नृणां योजितान्यप्रदक्षिणम् ॥
रक्षां कुर्व्वीत यत्नेन स्तम्भोपद्रवनाशिनीम् ।
तथा फलवतीं शाखां स्तम्भोपरि निवेशयेत् ॥

प्रागुदक्प्लवनं कार्य्यं द्विमुखन्तु न कारयेत् ।
स्तम्भंवा भवनं वापि द्वारंवा स्वगृहन्तथा ॥
दिङ्मूढे कुलनाशः स्यात् न च सम्वर्द्धयेद्गृहम् ।
यदि सम्वर्द्धयेन्नेहं सर्व्वदिक्षु विवर्द्धयेत् ॥
पूर्व्वेण वर्द्धितं वास्तु कुर्य्याद्वैराणि वै सदा ।
दक्षिणे वर्द्धितं वास्तु मृत्यवे स्यान्न संशयः ॥
पश्चाद्वृद्धन्तु यद्वास्तु तदर्थक्षयकारकम् ।
वर्द्धायितं तथा सौम्ये बहुसन्तापकारकम् ॥
आग्नेये यत्र वृद्धिः स्यात् तदग्निभयदम्भवेत् ।
वर्द्धितं राक्षसे कोणे शिशुक्षयकरं भवेत् ॥
वर्द्धायितन्तु वायव्ये वातव्याधिप्रकोपकृत् ।
ईशाने तु प्रजाहानिर्वास्तौ सम्वर्द्धिते सदा ॥*॥
ईशाने देवतागारं तथा शान्तिगृहं भवेत् ।
महानसं तथाग्नेये तत्पार्श्वे चोत्तरं जलम् ॥
गृहस्योपस्करं सर्व्वं नैर्ऋते स्थापयेद्बुधः ।
वस्त्रस्थानं वह्निःकुर्य्यात् स्नानमण्डपमेव च ॥
धनधान्यञ्च वायव्ये कर्म्मशाला ततो बहिः ।
एवं वास्तुनिवेशः स्यात् गृहभर्त्तुः शुभावहः ॥"
इति मात्स्ये वास्तुविद्यागृहनिर्णयो नाम २३० अध्यायः ॥ * ॥

सूत उवाच ।

"अथातः संप्रवक्ष्यामि दार्व्वाहरणमुत्तमम् ।
धनिष्ठापञ्चकं त्यक्त्वा विष्ट्यादिकमतः परम् ॥
ततः साम्वत्सरोद्दिष्टे दिने यायाद्वनं बुधः ।
प्रथमं बलिपूजान्तु कुर्य्यात् वृक्षाय सर्व्वदा ॥
पूर्व्वोत्तरेण पतितं गृहे दारु प्रशस्यते ।
अन्यथा न शुभं विद्याद्याम्यापरनिपातने ॥
क्षीरवृक्षोद्भवं दारु न गृहे विनिवेशयेत् ।
क्षताधिवासं विहगैरनिलानलपीड़ितम् ॥
गजावभग्नञ्च तथा विद्युन्निर्घातपीड़ितम् ।
अर्द्धशुष्कं तथा दारु भग्नशुष्कं तथैव च ॥
चैत्यदेवालयोत्पन्नं नदीसङ्गमजन्तथा ।
श्मशानकूपनिलयं तड़ागादिसमुद्भवम् ॥
वर्ज्जयेत् सर्व्वथा दारु यदीच्छेद्विपुलां श्रियम् ।
तथा कण्टकिनो वृक्षान्नीपनिम्बविभीतकान् ॥
श्लेष्मातकान् एलतरून् वर्ज्जयेत् गृहकर्म्मणि ।
अग्निनं शाकमधुकसर्ज्जशालाः शुभावहाः ॥
चन्दनं पनसं धन्यं सुरदारु हरिद्रका ।
द्वाभ्यामेकेन वा कुर्य्यात् त्रिभिर्व्वा भवनं शुभम् ॥
बहुभिः कारितं यस्मादनेकभयदं भवेत् ।
एकैकं शिंशपा धन्या श्रीपर्णी तिन्दुकी तथा ॥
एता नान्यसमायुक्ता कदाचिच्छुभकारिकाः ।
स्यन्दनः पनसस्तद्वत् सरलार्जुनपद्मकाः ॥
एते नान्यसमायुक्ता वास्तुकार्य्ये शुभप्रदाः ।
तरुच्छेदे महापीडे गोधां विद्याद्विचक्षणः ॥
माञ्जिष्ठवर्णे भेकः स्यात् नीले सर्पं विनिर्द्दिशेत् ।
अरुणे सरटं विद्यात् सुक्तामे शुकमादिशेत् ॥
कपिले मूषिकां विद्यात् खड्गाभे जलमादिशेत् ।
एवंविधं सगर्भन्तु वर्ज्जयेद्वास्तुकर्म्मणि ॥
पूर्व्वं छिन्नन्तु गृह्णीयात् निमित्तं शकुनैः शुभैः ।*।
वासेन शुचिते देवे अष्टभिर्वै हते तथा ॥
यत्क्षेपमायतं विद्यादष्टभेदं वदामि वः ।

ध्वजो धूमश्च सिंहश्च श्वा वृषः खर एव च ॥
हस्ती ध्वाङ्क्षश्च पूर्व्वाद्याः करिशैषा भवन्त्यमी ।
ध्वजः सर्व्वसुखो धन्यः प्रत्यग्द्वारो विशेषतः ॥
उदङ्मुखो भवेत् सिंहः प्राङ्मुखो वृषभो भवेत् ।
दक्षिणाभिमुखो हस्ती सप्तभिः स उदाहृतः ॥
एकेन ध्वज उद्दिष्टस्त्रिभिः सिंह उदाहृतः ।
पञ्चभिर्वृषभः प्रोक्तो विकोणस्थांस्तु वर्ज्जयेत् ॥
तमेवाष्टगुणं कृत्वा विद्यादग्निं विचक्षणः ।
सप्तविंशद्धृते भागे ऋक्षं विद्याद्विचक्षणः ॥
अष्टभिर्भाजिते ऋक्षे यच्छेषं स व्ययो मतः ।
व्ययाधिकं न कुर्व्वीत यतो दोषकरम्भवेत् ।
आयाधिके भवेच्छान्तिरित्याह भगवान् हरिः ॥
कृत्वाग्रतो द्विजवरानथ पूर्णकुम्भं
दध्यक्षताम्बरफलपुष्पफलोपशोभम् ।
दत्त्वा हिरण्यवसनानि तथा द्विजेभ्यो
माङ्गल्यशान्तिनिलयाय गृहं विशेच्च ॥
गृह्योक्तहोमविधिना बलिकर्म्म कुर्य्यात्
प्रासादवास्तुशमने च विधिर्य उक्तः ।
सन्तर्पयेत् द्विजवरानथ भक्ष्यभोज्यैः
शुक्लाम्बरञ्च भवनं प्रविशेत् सधूमम् ॥"
इति मात्स्ये वास्तुविद्यानुकीर्त्तनं समाप्तम् २३१ अध्यायः ॥ * ॥ अन्यच्च । अथ वास्तुयुक्तिः ।
तत्र स्थाननिर्णयः ।
"नदीश्मशानशैलानां वनस्य निकटे तथा ।
न वास्तुकर्म्म कुर्व्वीत न द्वन्द्व-नगरान्तयोः ॥"*॥
तत्र दिङ्निर्णयः ।
"राक्षसानिलवह्नीनां यमस्य दिशि वेश्मनः ।
नारम्भं कारयेद्राजा भीरुग्दाहक्षयप्रदम् ॥"
तथा हि ।
"भोगः कीर्त्तिर्धनं रोगः स्थिरता च भयः क्षयः ।
दाह इत्येव कथितो दिशि वास्तुफलोद्भवः ॥"
भोजे च ।
"यल्लग्ने जायते राजा तस्य लग्नस्य यः पतिः ।
या दिक् तस्य नृपस्तस्यां वास्तारम्भं समाचरेत् ॥"
एवञ्च ।
"कुजाधिपतिके मेषलग्ने जातस्य भूपतेः ॥"
कुजाधिपतिकायां दक्षिणस्यामपि वास्तुर्न दुष्यतीति । पराशरस्तु ।
"यद्ग्राजनितो राजा वास्तुस्तस्मिन्तु तद्दिशि ॥"
एतेन सूर्य्यादिजनितस्य नृपतेः पूर्व्वादिदिक्षु वास्तुकरणम् । तेन शुक्रदग्रायां जातस्याग्नेय्यामपि न दुष्यति ॥ * ॥ अथ लक्षणम् ।
"वास्तु कुर्य्यान्महीपालः समं सुस्निग्धमृत्तिकम् ।
प्रागुदक्प्लवनं रम्यं रम्यवृक्षोपशोभितम् ॥
लक्ष्मीर्हानिः क्षयो भीतिर्धननाशोऽभ्यसूयता ।
सम्यग्दृष्टद्विरिति प्रोक्तं पूर्व्वादिककुभां फलम् ॥"
तथा हि भवनमन्यत् ।
"लक्षलग्नेन दिक् पश्चात् राज्ञां वास्तुरवोमतः ॥"
एतेन सूर्य्याधिपतितुलालग्ने जातस्य नृपतेः सूर्य्याधिपतेः पूर्व्वस्याः पश्चात् पश्चिमप्लवोऽपि न दुष्यति । अन्ये तु ।

"यद्ग्राजनितो राजा तद्ग्रोग्यद्भवो मतः ॥"
एतेन गुरुदग्राजातस्य नृपतेर्द्दक्षिणद्भवोऽपि न दुष्यति । अन्यत्र तु ।
"ब्रह्मक्षत्रियविट्शूद्राः पूर्व्वादिदिग्युगे क्रमात् ।
वास्तुद्भवनमिच्छन्ति निजसम्पत्तिहेतवे ॥"
नीतिग्राखे च ।
"वास्तुकर्म्म नृपः कुर्य्याद्भलवद्देरिगो दिग्नि ।
दीर्घा वा चतुरस्रा वा वास्तुभूमिर्म्महीप्सिताम् ।
एतयोर्लक्षणं तद्वत् फलञ्च नगरे यथा ॥"*॥
अथ मानम् ।
"राजकाष्ठेन नृपतिर्व्वाखारम्भं समाचरेत् ।
जयो भङ्गः सुखं दुःखं प्रीतिर्भीतिश्च यः स्थिरः ।
इत्यष्टौ वास्तुनामानि राजकाष्ठैरनुक्रमात् ॥"
अन्यत्र तु ।
"जन्मलग्ने महीभर्त्तुर्द्दण्डयोरन्त एव हि ।
राजकाष्ठैस्तु तावद्भिर्वास्तु कुर्य्यान्महीपतिः ॥
सुदर्ग्याच्छन्दसंख्येन राजपट्टेन भूपतेः ।
वास्तुकर्म्मसमारम्भो धनधान्यजयप्रदः ॥"
एतयोरपि पूर्व्ववद्व्याख्यानम् ।
"राजच्छन्देण कुत्रापि वास्तुपत्तनमिष्यते ।
तस्यापि पूर्व्ववन्मानमिति भागुरिभाषितम् ॥"
अथ दोषगुणौ ।
"परनिर्म्मितवास्तुस्थो न तिष्ठति चिरं नृपः ।
न सुखाय न धर्म्माय तत्तस्य भुवि जायते ॥"
अन्यत्रापि ।
"राजान्यवीर्य्यप्रत्याग्री परवास्तुकृतस्थितिः ।
न सुखाय भवेन्नृणां यथा परगृहे गृहः ॥
यः स्वनिर्म्मितवास्तुस्थो निजलग्नादिसंयुतः ।
विचारितपुरो राजा स चिरं सुखमश्नुते ॥"
अन्यत्रापि ।
"राजा स्वबाहुवीर्य्याढ्यो निजनिर्म्मितवास्तु-
भाक् ।
स चिरं तनुते सौख्यं स्वगृहस्थो गृहो यथा ॥"
अथ कालः ।
"वर्षान्तेऽभ्युदिते शुक्रे केन्द्रे सुरगुरौ शुभे ।
वास्तुकर्म्मसमारम्भं शुक्रचन्द्रार्कभूमिजे ॥
गृहयुक्तो यः समयः कर्त्तव्यस्तत्र वै शुभे ।
वास्वारम्भः कार्य्यः शुभसम्पत्तिकामिना
राज्ञा ॥"
इति वास्तुयुक्तौ वास्तूद्देशः ॥*॥
अन्येषां यथा । यदाह वास्तुकुण्डल्याम् ।
"स्वामिहस्तैश्चतुर्भिः स्याद्दण्डस्तेनैव मापयेत् ।
क्षेमो भयङ्करो भद्रः श्रीकरद्विजयः शुचिः ॥
वंशकृत् पापकारी च विकारी शोभनः शिवः ।
क्षुण्णः कामदो धून्नो धौम्यो धनहरस्तथा ॥
धनदः सुखकृच्चेति वाच्योऽष्टादश कीर्त्तिताः ॥"
तद्यथा ।
"आयामपरिणाहाभ्यां योऽङ्गपिण्डोऽभिजायते ।
जनविंशतिहस्ते मागे शेषैर्नेता यथाक्रमम् ॥
क्षेमे सर्व्वार्थसंसिद्धिर्भयकारी भयङ्करः ।
भद्रो भोगं प्रकुरुते श्रीकरद्विजनाशनः ॥
विजयः कुरुते वृद्धिं शुचिः सर्व्वसुखं वहेत् ।
वंशकृत् कुरुते वंशं पापकारी कुलापहः ॥
विकारी कुरुते दुःखं शोभनः शुभमावहेत् ।
शिवः सर्व्वार्थसिद्धौ स्यात् क्षुण्णः सर्व्वनाशनः ॥
कामदोऽभीष्टलाभः स्यात् धून्नो दहति सर्व्वशः ।
धौम्ये धर्म्ममतिः सौख्यं दुःखं धनहरे भवेत् ॥
धनदे धनलाभः स्यात् सुखकृत् सुखकारकः ।
इति प्रोक्तोऽतिसंक्षेपाद्वास्तुलक्षणसंग्रहः ॥"
भोजस्तु । दण्डमानं तथैव किन्तु युक्तिरन्या ।
खदग्राब्दतो द्विगुणैस्तैः शुभावह-
श्चतुरस्र एव नववास्तु शिष्यते ।
किमु लग्नदण्डमितदण्डसम्मितः
प्रकरोति वास्तुरतिसौख्यसम्पदम् ॥
ऊषरा वालुका क्षिप्ता चयमेतद्विनिन्दितम् ।
त्रिकोणो वर्त्तुलो दीर्घो यवमध्योऽष्टहस्तमुखः ॥
तथा डमरुरूपश्च सर्पाकारस्तथैव च ।
छिन्नो भिन्नो मध्यनिम्नो वज्रनामश्चतुष्पथः ॥
त्रिपथो जनदोषी च वृक्षदोषी तथा परः ।
गजशुण्डाकृतिश्चैवोपद्रवाः परिकीर्त्तिताः ॥
वास्तुखण्डे महादोषा हेयास्तस्माद्विचक्षणैः ।
चतुरस्रः शुभो दीर्घस्तुल्यः प्रान्तः समाश्रितः ।
दोषैर्विहीनो विज्ञेयो वास्तुखण्डः सुखावहः ॥"
इति युक्तिकल्पतरौ वास्तुयुक्तिः ॥*॥
तत्र कालनिर्णयः ।
"वैशाखश्रावणाषाढ़मार्गफाल्गुनकार्त्तिकाः ।
सुप्रशस्ता गृहारम्भे पत्नीपुत्रसम्वर्द्धिदाः ॥
शुक्लपक्षे भवेत् सौख्यं कृष्णे च भवते भयम् ।
आदित्यभौमवर्ज्यन्तु सर्व्वे वाराः शुभावहाः ॥"
तथान्यत्र ।
"पूर्णिमाद्यष्टमीं यावत् पूर्व्वास्यं वर्ज्जयेद्गृहम् ।
उत्तरास्यं न कुर्व्वीत नवम्यादिचतुर्दशीम् ॥
अमावास्याष्टमीं यावत् पश्चिमास्यं विवर्ज्जयेत् ॥
नवम्यादि तथा याम्यं यावत् शुक्लचतुर्दशीम् ।
वज्रव्याघातशूले च व्यतीपातातिगण्डयोः ॥
विष्कम्भगण्डयोश्चैव गृहारम्भं न कारयेत् ॥
आदित्यत्रयरोहिणी मृगशिरो ज्येष्ठा धनिष्ठो-
त्तरा
रेवत्याथ मघानुराधहरिभिः शुद्धैः खभा-
वादिभिः ।
सौम्यानां दिवसेऽथ पापरहिते योगे विरिक्ते
तिथौ
विश्वित्यक्तदिने वदन्ति मुनयो वेश्मादिकार्य्यं
शुभम् ॥"
मत्स्यपुराणेऽपि ।
"चन्द्रादित्यबलं लब्ध्वा लग्नं शुभनिरीक्षितम् ।
स्तम्भोच्छ्रायादि कर्त्तव्यमन्यत्र तु विवर्ज्जयेत् ॥
अश्विनी रोहिणी मूलमुत्तराचयमैन्दवम् ।
स्वातिर्हस्तानुराधा च वास्तुकर्म्मणि शस्यते ॥"
तथा च ।
"त्रिभिस्त्रिभिर्वेश्मनि शक्तिकाद्यै-
रग्नेयपुत्राग्निधनानि शोकाः ।
शून्योर्भयं राजभयञ्च मृत्युः
सुखं प्रवासश्च नव प्रभेदाः ॥
नार्शं दिशन्ति मकरालिकुलीरलग्ने
मेषे घटे धनुषि कर्म्मसु दीर्घसत्रम् ।
कन्याझषे मिथुनके शुभमर्थलाभो
ज्योतिर्व्विदः कलससिंहवृषेषु वृद्धिम् ॥
लग्नेऽर्के वज्रसम्पातः कोषहानिश्च प्रीतगौ ।
मृत्युर्वसुन्धरापुत्रे चन्द्रजे सुखसम्पदः ॥
जीवे धर्म्मार्थकामाश्च सुतोत्पत्तिश्च भार्गवे ।
शनैश्चरे तु दारिद्र्यं राहावस्वं प्रवर्त्तते ॥"*॥
अथ प्रवेशकालः ।
"शुद्धैर्द्वादशकेन्द्रगैर्त्रिधनगैः पापैस्त्रिषष्ठायगै-
र्लग्ने केन्द्रगतेऽथवा सुरगुरौ दैतेयपूज्येऽपि वा ।
सर्व्वारम्भफलप्रसिद्धिरुदये राशौ च भर्त्तुः शुभे
स्वाम्यस्थिरतोदये च भवनं कार्य्यं प्रवेशोऽपि
वा ॥
पौष्णे धनिष्ठा अथ वारुणेषु
स्वायम्भुवर्क्षे त्रिषु चोत्तरेषु ।
अक्षीणचन्द्रे शुभवासरे च
तथा विरिक्ते च गृहप्रवेशः ॥
तिथिर्व्वारस्य लग्नादि समारम्भे यथोदितम् ।
प्रवेशेऽपि गृहस्याहुस्तथा ज्योतिर्व्विदो जनाः ॥"
अथ द्वारम् ।
"नैकद्वारं वास्तुखण्डं न चतुर्द्वारमारभेत् ।
एकद्वारं दुःशरणं चतुर्द्वारं दुरावरम् ॥
त्रिद्वारमेव नृपतेर्व्वास्तुकर्म्म प्रशस्यते ।
द्वे सुखे तत्र चान्यत् स्यादसुखमिति निर्णयः ॥
राजद्वारस्तु तत्रैको यमद्वारस्तथा परः ।
अपद्वारं तथान्यत् स्यादिति द्वारस्य निर्णयः ॥
ब्रह्मक्षत्रियवैश्यानां प्रागुदक्पश्चिमैः क्रमात् ।
सुखद्वारं दक्षिणस्य परं तस्यापि दक्षिणे ॥
बलवद्वै वैरिसुखं द्वारमित्यन्यसम्मतम् ।
राजद्वारेऽन्यभूपानां शिष्टानांवा प्रवेशयेत् ॥
याचाप्रसादपर्व्वाणि राजद्वारेषु कारयेत् ।
यमद्वारे छिद्रकर्म्म द्विषतान्च प्रवेशनम् ॥
निःसारणं मृतानान्च दुष्टानान्च निबन्धनम् ।
अपद्वारेऽपरोधस्य गमनागमनक्रिया ॥
राज्ञे विलासयात्रा च मर्म्मज्ञस्य प्रवेशनम् ॥"
अथ प्राचीरनिर्णयः ।
"गजैरभेद्या मनुजैरलङ्घ्याः
प्राचीरखण्डा नृपतेर्भवन्ति ॥
राजदण्डोन्नताः सर्व्वे प्राचीराः पृथिवीभुजः ।
विंशतिस्ते तु पञ्चाग्ये पार्श्वयोः पञ्च पञ्च च ॥
पश्चात् पञ्च च विज्ञेयाः प्राचीरा पृथिवीभुजः ।
सर्व्वप्रान्ते त्वावरणो नाम प्राचीर उच्यते ॥
प्रतिप्राकारसंस्थानं द्वारं नाभिसुखस्थितम् ।
तच्च जयाख्यस्य दीर्घस्य वास्तुखण्डस्य निर्णयः ॥
तद्यथा ।
"राजच्छान्तरे पञ्च राजद्वारे महीपतेः ।
राजदण्डत्रये सार्द्धजयद्वारे प्रतिष्ठिताः ॥
अद्वारे राजदण्डार्धे प्राचीराः पृथिवीपतेः ।
एवं व्यवस्थिते स्थाने मध्यमेतद्धि तिष्ठति ॥
राजच्छन्दत्रयं सार्द्धमायामे जयवास्तुनि ।
परिणाहे पञ्च राजदण्डास्तिष्ठन्ति मध्यतः ॥

राजपट्टाभिधानेन स्थानमेतन्निगद्यते ।
अस्मिन् गृहं नृपः कृत्वा सुचिरं सुखमश्नुते ॥
अज्ञानाद् दम्भतो राजा योऽन्यच्च गृहमारभेत् ।
सोऽचिरात् मृत्युमाप्नोति रोगं शोकं भयं तथा ॥
यमदण्डोदयदण्डौ केनाहतिरुपप्लवः ।
ये चान्ये वास्तुदोषाः स्युः स्थाने दोषाश्च ये पुनः ।
न स्पृश्यते राजपट्टस्थैः सर्पैर्गरुडो यथा ॥
द्विगुणादितोऽपि स्यात् क्रमाद्भङ्गादिवासुषु ।
राजकुञ्जमितेऽप्येवं प्राचीरे गुणदोषकौ ॥"*॥
अथ जयाख्यस्य चतुरस्रस्य वास्तुखण्डनिर्णयः ।
"राजद्वारे हि प्राकारा राजकुञ्जान्तरे मताः ।
यमद्वारे सार्द्धं राजकुञ्जान्तरे च ये नृपाः ॥
अपद्वारे राजदण्डं जिता आरभिताः पुनः ।
अद्वारे भूपतेस्तस्य राजदण्डत्रयान्तरे ॥
एवं व्यवस्थिते स्थाने मध्यमे तत् प्रदृश्यते ।
आयामे राजकुञ्जानि चत्वारि परिणाहतः ॥
राजकुञ्जैकमानेन राजदण्ड उदाहृतः ।
अयश्च सप्तमो भागो वास्तोर्भवति शोभनः ॥
अस्मिन् गृहं नृपः कृत्वा सुचिरं पाति मेदिनीम् ।
अस्मिन् विजयवृद्धिश्च सौख्यञ्च समवाप्नुयात् ॥
यो राजा दम्भतोऽन्यच्च वेश्मारम्भं समाचरेत् ।
य उक्तो राजदण्डोऽयं तस्येदं स्थानपञ्चकम् ॥
गजो व्याघ्रश्च सिंहश्च मृगो भृङ्गो यथाक्रमम् ।
सिंहे सिंहासनं स्थानं व्याघ्रे स्यात् द्वारमन्दिरम् ॥
गजे याचास्थयं कुर्यात् मृगे केलिनिकेतनम् ।
भ्रमरेऽन्तःपुरं कुर्यात् क्रमेण पृथिवीपतेः ॥
तेन मध्यमेव सिंहासनं दीर्घस्य चतुरस्रकैः ॥"
तत्र भविष्योत्तरे ।
"मेषादिचन्द्रे जातस्य नृपतेः स्युरनुक्रमात् ।
द्वादशैव गृहान् वक्ष्ये तेषां लक्षणमग्रतः ॥
सुनन्दः सर्वतोभद्रो भद्रो नान्दीसुखस्तथा ।
विनोदश्च विलासश्च विजयो विमलस्तथा ।
रङ्गः केलिर्जयो वीरो द्वादशैते प्रकीर्त्तिताः ॥"
अथैषां लक्षणानि ।
"यदृच्चयैवोच्यते मानं तस्य तेनैव कल्पना ।
राज्ञः स्वहस्तमेकन्तु दीर्घे सर्व्वत्र निक्षिपेत् ॥
आयामेन सुन्दरः स्यात् राजहस्तैश्च पञ्चभिः ।
परिणाहे चतुर्भिश्च राजहस्तैः प्रतिष्ठितः ॥
अस्याधिदेवता भौमो रक्षतीदं वसुन्धरा ।
द्वाराणि विंशतिश्चास्य रक्तचित्राकृतानि च ॥
रक्तपट्टावृतो गेहः सकलार्थप्रसाधकः ।
अत्र स्थित्वा महीपालः सुचिरं पाति मेदिनीम् ॥"
दीर्घम् ५१ । प्रस्थम् ३० । इति सुन्दरः ॥*॥
"द्वौ राजहस्तावायामे परिणाहे तथैव च ।
इत्ययं सर्वतोभद्रः शुक्रश्चास्याधिदेवता ॥
दानवा रक्तकाश्चैव पूज्यास्ते चात्र यत्नतः ।
चतुर्द्वारास्य द्वाराणि क्रमाच्चित्राकृतानि च ॥
पीतपट्टावृतो ह्येष सर्व्वानिष्टविनाशनः ।
अत्र स्थित्वा महीपालः सर्व्वान् प्रचून् निक्षन्ति ॥"
दीर्घम् २१ । प्रस्थम् २० । इति सर्व्वतोभद्रः ॥*॥
"अष्टकोणो भवेद्भद्रः कोणो हस्तचतुष्टयः ।
राजहस्तोन्नतः कार्य्यो बुधश्चास्याधिदेवता ॥
रक्तका वसवश्चास्य पूज्यास्तेऽत्र प्रयत्नतः ।
अष्टौ द्वाराणि चास्य स्युः पीतचित्रावृतानि च ॥
पीतपट्टावृतो ह्येष सर्व्वानिष्टविनाशनः ।
अत्र स्थाता क्षितिपतिर्न रिष्टैरवबध्यते ॥
राजदण्डो भवेद्दीर्घः प्रसरे राजहस्तकः ।
राजहस्ते राजहस्ते प्रकोष्ठाः स्युश्च कारयेत् ॥
अयं नान्दीसुखो नाम चन्द्रश्चास्याधिदेवता ।
मत्तचलोकः पूज्योऽत्र स यक्षादस्य रक्षकः ॥
द्वाविंशतिस्तु द्वाराणि दीर्घे दश तथान्तरे ।
अन्यत्र दीर्घे एकं स्यात् प्रसरे एकमेव च ॥"
दीर्घद्वितये दश द्वाराणि प्रसरद्वितये एकं कृत्वा द्वितयं एवं २२ द्वाराणि ।
"शुक्लचित्रेण सहितः शुक्लपट्टेन शोभितः ।
सर्व्वार्थसाधको राज्ञां लक्ष्मीविजयवर्द्धनः ॥"
दीर्घम् ११ । प्रस्थम् १० । इति नान्दीमुखः ॥*॥
"दीर्घे त्रयो राजहस्ताः प्रसरे द्वौ प्रतिष्ठितौ ।
विनोद एष द्वाराणि त्रिंशत्कोष्ठद्वयं भवेत् ॥
रक्तचित्रेण चित्राङ्गो रक्तवस्त्रोपगूहितः ।
अत्र स्थाता नरपतिर्भवेत् कीर्त्तिप्रतापवान् ॥
सूर्य्याधिदेवता चास्य रक्तका सकलग्रहाः ॥"
दीर्घम् ३१ । प्रस्थम् २० । इति विनोदः ॥ * ॥
"दीर्घेण राजदण्डार्द्धं प्रसरे राजहस्तकौ ।
विलास एष द्वाराणि चत्वारिंशद्बुधा विदुः ॥
गन्धर्व्वा रक्तकाश्चास्य प्रकोष्ठत्रितयं भवेत् ।
चित्रपट्टेन शुद्धेन चित्रवस्त्रेण शोभितः ॥
दुर्भिक्षभ्रमणो ह्येष ग्रस्तसम्पत्तिकारकः ।
तत्र स्थित्वा नरपतिः प्रचुरं सुखमश्नुते ॥"
दीर्घम् ५१ । प्रस्थम् २० । इति विलासगृहम् ॥ * ॥
"द्वादशहस्ताः प्रसरे दीर्घे द्वौ राजहस्तकौ कथितौ ।
विजये द्वादश भवनद्वाराणि सुजयप्रदान्यत्र ॥
सूर्य्योऽधिदेवता चास्य रक्ततीमं विहङ्गराट् ।
अरुणाम्भोजचित्राङ्गो अरुणाम्बरभूषितः ।
तत्र स्थित्वा नरपतिः क्षत्रक्षां प्राप्ति वसुन्धराम् ॥"
दीर्घम् २१ । प्रस्थम् १२ ॥ * ॥
"आयामे राजदण्डौ द्वौ प्रसरे राजदण्डकः ।
प्रतदारोपसहितः प्रकोष्ठैर्द्वादशभिर्युतः ॥
दिक्पाला रक्तकाश्चास्य कुजश्चास्याधिदेवता ।
नानावर्णेन चित्रेण वसनेन विभूषितः ॥
अत्र स्थित्वा नरपतिः सुचिरं सुखमश्नुते ।
यस्मिन्नान्ये प्रतिष्ठेत विमलो गृहसत्तमः ॥
दुर्भिक्षं नाच जायेत नेतयोर्न च विप्लवः ।
न रोगो नापि शोकश्च नैवोत्पातभवन्तथा ।
इत्यादि गुणबाहुल्यमन्यच्च कथितं बुधैः ॥"
दीर्घम् २०० । प्रस्थम् १०० ॥ * ॥
"आयामपरिणाहाभ्यां राज्ञः षोड़शहस्तकः ।
द्वाराणि षोड़शैवास्य गुरुरस्याधिदेवता ॥
रक्षिका देवता चास्य शुक्लवस्त्रैर्विभूषणम् ।
अत्र स्थित्वा नरपतिः सर्व्वार्थान् भुवि साधयेत् ॥"
दीर्घम् १७ । प्रस्थम् १६ । इति रङ्गः ॥ * ॥
"आयामे राजदण्डः स्यात् प्रसरे च तदर्द्धकम् ।
दश प्रकोष्ठा द्वाराणि शनिरस्याधिदेवता ॥
पिशाचा रक्षकाश्चास्य नीलवस्त्रादिभूषणम् ।
गान्धारं केलिराख्यातो भयरोगविनाशनः ।
अत्र स्थित्वा नरपतिः सुखं विजयते रिपून् ॥"
दीर्घम् १०० । प्रस्थम् ५० ॥ * ॥
"राजहस्तेन कोणः स्यादेवं केलिश्चतुर्दश ।
चतुर्दशैव द्वाराणि राहुरस्याधिदेवता ॥
नक्तञ्चरा रक्षकास्तु नानावर्णाम्बरादिकम् ।
अयं जयः प्रकटितः सर्व्वत्रैव जयप्रदः ॥
आयामे राजहस्तः स्यात् परिणाहेऽष्टहस्तकः ।
नानारूपः कुटीरूपो वीरो नाम यजप्रदः ॥
बृहस्पतिर्देवतास्य रक्षकाश्चास्य खेचराः ।
विचित्रवसनोपेतः सर्व्वकामार्थदायकः ॥"
दीर्घम् ११ । प्रस्थम् ८ । इति वीरः ॥ * ॥
"यो यस्य गदितो वर्णस्तथा स्याच्चामरोऽपि च ।
राजहस्तान्तरे पञ्च चामराः स्युर्महीभुजाम् ॥
चन्द्रोऽपि दर्पणे हस्त उपरि क्रमतो न्यसेत् ।
पताकाध्वजयुक्ताश्च गृहरक्षक-रक्षसाम् ।
छत्रयुक्तं गृहं राज्ञां विज्ञेयं चक्रवर्त्तिनाम् ॥"
एषां नियमः परवत् ।
"इति द्वादशचिह्नानि गृहाणां कथितानि वै ।
विन्यसेतानि नृपतिर्गृहारम्भं समाचरेत् ॥
इति सिंहासनस्थानमिति राज्ञश्च मस्तकम् ।
इतोऽन्ये चित्तहर्षार्थाः प्रासादाः पृथिवीभुजः ॥
जलयन्त्रादयो येऽन्ये तेषां नास्ति विनिश्चयः ।
स्वजन्मगेहसंस्थो यो नृपतिः शुभचेतनः ॥
स चिरं पृथिवीं प्राप्ति सर्व्वार्थान् साधयत्यपि ।
यो वा तत्परगेहस्थो दुर्म्मोहात् धरणीपतिः ॥
न चिरं पाति वसुधां घोरं रोगञ्च विन्दति ।
स्वलग्नपतिमित्रस्य गृहवारो न दुष्यति ॥"*॥
परञ्च ।
"हीरकस्य विशुद्धस्य ब्रह्मजातेर्महाद्युतेः ।
सूर्य्याङ्गारार्द्धमात्रेण वमतो दीप्तिमच्छिखाः ।
गृहाग्रे धारयेद्राजा तद्वज्रं वज्रवारणम् ॥"
वात्स्यस्तु ।
"गृहेषु मणिविन्यासो विज्ञेयो न च दण्डवत् ।
विष्णुहीरकन्यासो विधेयः सदनोपरि ।
तेन सर्व्वाणि नश्यन्ति अरिष्टानि महीभुजाम् ॥"
भोजोऽपि ।
"वास्तुखण्डोऽजरूपः स्यात् यथार्थैर्नामभिः स्वकैः ।
यमद्वारात् समारभ्य यावद्द्वारमिष्यते ॥"
तद्यथा,—
"मृत्युभयः स्थिरश्चण्डो धनं विभव एव च ।
वीरश्चापच्च इत्यष्टौ वास्तुभागा यथाक्रमम् ॥

यमनैर्ऋततोयेशवायुधनेशशङ्कराः ।
इन्द्रो वह्निरिति प्रोक्ता विभागानामधीश्वराः ॥
स्त्रीणां कारालयं कुर्य्यात् भयस्थाने च पत्तयः ।
स्थिरे सहचरान् रचेत् चरे वाजिगजादयः ॥
धने धान्यादिकं रचेत् विभवे कोषरत्नगम् ।
राजपट्टे भवेद्वीरो तापे कश्चिन्नरालयम् ।
प्राचीरप्रतिभागान्ते इति भोजस्य सम्मतम् ॥"
इति युक्तिकल्पतरौ राजगृहयुक्तिः ॥ * ॥
"वास्तुमानेन नियमो गृहमाणेन निर्णयः ॥"
तत्र वास्तुप्रवलक्षणम् ।
"पूर्व्वप्लवो वृद्धिकरो धनदश्चोत्तरप्लवः ।
दक्षिणो व्ययदो वास्तुर्दुनहा पश्चिमप्लवः ॥
कोणे रेखाद्वयं कृत्वा मध्ये रेखाद्वयं तथा ।
ऐशानकोणतो रेखा दक्षिणाद्यैर्ध्वजास्तथा ॥
नाचामरो नामशिश्च नापताकापि नाध्वजः ।
नाकुम्भादिर्नावितानो नाचित्रो नातिचित्रवृक् ॥
नात्युच्चो नातिनीचो वा नाप्रकीर्णप्रकीर्णकः ।
नो धातुर्नागवाच्यश्च न चैकानेकहारभाक् ॥
नियमोऽस्तु महीन्द्राणां सर्व्वसम्पत्तिहेतवे ॥"
इति राजगृहयुक्तिः ॥ * ॥
अन्येषान्तु यथा वास्तुमानेन नियमः ।
"ध्वजो धूमस्तथा सिंहः श्वा वृषो गर्द्दभो गजः ।
काक इत्येष गदितो वास्तुस्थानस्य निर्णयः ।
अयुग्मे सुखसम्पत्तिर्युग्मञ्च विपदास्पदम् ॥"
एवमन्यत्रापि ।
"ध्वजे विभूतिर्विपदश्च धूमे
सिंहे विभोगः शुनि सर्व्वनाशः ।
वृषे सुखं गर्द्दभतो विनाशो
गजे धनं काकपदे च मृत्युः ॥
कोणरेखा कोणमुखिः सुखसम्पत्तिनाशिनी ।
पूर्व्वपश्चिमतो दण्ड उदग्याम्यः सुखावहः ॥
दक्षिणोत्तरतो दण्डो वंशहृद्यमदण्डकः ।
गृहाणि पातयेद्वीमानेषां दण्डयधान्तरे ॥ * ॥
एका चेद्दक्षिणे शाला द्वे च दक्षिणपश्चिमे ।
तिस्रश्चेत् पूर्व्वतो हीनाश्चतुःशालं सुखावहम् ॥
पश्चिमास्यं ध्वजे वेश्म सिंहे तूदङ्मुखं शुभम् ।
पूर्व्वालयं वृषस्थाने दक्षिणाभिमुखं गजे ॥
महाघातः परिघातः पथाघातस्तथैव च ।
जलदोषो वृक्षदोषो दोषा इत्येवमादयः ॥
गच्छतां पदतालस्य श्रवणं यदि वेश्मनि ।
महाघातो नाम दोषः पुत्रपौत्रधनापहः ॥
परिघादण्डयोर्घातो वास्तुनोः प्रतिवेशिनोः ।
परिघाघातो नाम दोषः कुलवीर्य्यधनापहः ॥
पथाघातो नाम दोष आघातो वास्तुनः पथः ।
स हन्ति भोगं वंशञ्च तस्य भेदमतः शृणु ॥
एकमार्गे सुखं कुर्य्यात् द्विपथं कुलवर्द्धनम् ।
त्रिपथं कुलनाशाय सर्व्वनाशश्चतुष्पथे ॥
स्ववास्यां परवास्याञ्च यस्तिष्ठति जलाशयः ।
तद्दोषो जलदोषः स्यात् स हन्ति कुलसम्पदः ॥
ऋद्धिमानसुखैश्वर्य्यमृत्युक्लेशभयामयाः ।
एते जलाशये दोषाः पूर्व्वादिदिक्षु च क्रमात् ॥
स्ववास्तुवृक्षतो दोषः कुलसम्पत्तिनाशनः ।
वर्ज्जयेत् पूर्व्वतोऽश्वत्थं प्लक्षं दक्षिणतस्तथा ॥
ऐशान्यां रक्तपुष्पञ्च आग्नेय्यां क्षीरिणस्तथा ।
यत्र तत्र स्थिता वृक्षा विल्वदाड़िमकेशराः ।
पनसा नारिकेलाश्च शुभं कुर्व्वन्ति निश्चयम् ।
निम्बा नीली पलाशश्च चिञ्चा श्वेतापराजिता ।
कोविदारश्च सर्व्वत्र सर्व्वं निघ्नन्ति मङ्गलम् ॥*॥
गृहपातनमिच्छन्ति नागस्य स्वपने क्रमात् ।
पूर्व्वादिषु शिरः कृत्वा नागः शेते त्रिभि-
स्त्रिभिः ।
भाद्राद्यैर्व्वामपार्श्वेन तस्य क्रोड़े गृहं शुभम् ॥"
तत्र प्रमाणम् ।
"स्वामिहस्तप्रमाणेन ज्येष्ठपत्नीकरेण वा ।
गृहाभ्यन्तरसंस्थानं मापयेदभितो नरः ॥"*॥
तत्र सामान्यलक्षणम् ।
"गृहभूमिसमाहतपिण्डपदं
वसुलोचनरन्ध्रगजैर्गणितम् ।
रविभूधरत्रिंशद्योगहृतं
भवनाय वयस्थितिऋक्षपदम् ॥
एकाशीतिगुणे हस्ते दिवाशैकहते च ते ।
षड्रिन्द्रयुग्मसम्भक्ते पिण्डः स्यात् सर्व्ववेश्मनः ॥"
तद्यथा ।
"ध्वजादिगेहसंस्थाने गृहमानं शुभावहम् ।
दीर्घे भानुः परीणाहे सप्त चैवाङ्गुलिद्वयम् ॥
इदं पुत्रफलं गेहं वृषस्थाने ऽप्युदीरितम् ।
दीर्घे षट्प्रसरे पक्ष चतस्रोऽङ्गुलयोऽपि च ॥
इदं पुत्रफलं गेहं गजस्थाने प्रकीर्त्तितम् ।
दीर्घे त्रयोदश भुजाङ्गुलयश्चैकविंशतिः ॥
प्रसरेऽष्टौ सुखफलं गजस्थाने गृहं विदुः ।
इति द्वादशकं प्रोक्तं गृहाणां सर्व्वसंमतम् ।
एवं गृहं समाचार्य्य गृहस्थः शुभमिच्छति ॥"*॥
भोजस्तु ।
"आयामपरिणाहाभ्यां योऽङ्कपिण्डो विजायते ।
येन केनापि चाङ्केन शोधनीयः स इष्यते ॥
एकद्विपञ्चसप्तानि शुभान्यन्यानि चान्यथा ।
आयामपरिणाहाभ्यां सार्द्धदादशहस्तकम् ॥
एतत्तु मङ्गलं नाम गृहं सुखविवर्द्धनम् ।
आयामपरिणाहाभ्यां सार्द्धहस्तचतुर्दश ॥
इदं कमलकं नाम गृहं सम्पत्तिकारकम् ।
आयामपरिणाहाभ्यां सार्द्धहस्तास्तु षोड़श ॥
इदं हि सर्व्वतोभद्रं स्वामिनः सुखकारकम् ॥
आयामपरिणाहाभ्यां सार्द्धाष्टादशहस्तकम् ।
कल्याणनाम वेश्मेदं धनधान्यसुखप्रदम् ॥
आयामपरिणाहाभ्यां सार्द्धविंशतिहस्तकम् ।
इदं हि सुखदं नाम भर्त्तुः सुखविवर्द्धनम् ॥
मया यदिदमुद्दिष्टं गृहपद्मकमद्भुतम् ।
न तेषु स्थाननियमः सर्व्वेष्वेतानि कारयेत् ॥
स्थानं मानञ्च दोषाश्च ये प्रोक्तास्तु मया क्रमात् ।
तद्विचार्य्य गृहं कृत्वा गृहस्थः सुखमश्नुते ॥
अज्ञानादथ मोहाद्वा योऽन्यथा गृहमाचरेत् ।
स विपद्येति नश्येत तस्य कीर्त्तिः कुलं बलम् ॥
प्राचीरार्णां न नियमो गृहस्थानाच्च विद्यते ।
यथावास्तु यथाप्राप्ति प्राचीरानचयेद्गृही ॥
गृहरोधो यथा न स्यात् तथा प्राचीरकल्पना ॥"
इति युक्तिकल्पतरौ गृहयुक्तिः ॥ * ॥
अथ वास्तुयागप्रमाणम् । लेखे ।
चतुःषष्टिपदं वास्तु सर्व्वदेवगृहं प्रति ।
एकाशीतिपदं वास्तु मानुषं प्रति विद्विदम् ॥
अग्रतः प्रोक्षयेदास्तुभूमिं यस्य पुरोदिताम् ।
चतुर्हस्तं द्विहस्तं वा जलान्तं वापि प्रोक्ष्य च ॥
सुसमञ्च तदा कृत्वा सदार्चनं ततो भवेत् ॥"
पुरोदितां ब्राह्मणादिभेदेन प्रशस्तत्वेनोपपादि-
ताम् ॥ * ॥ तथा च मत्स्यपुराणम् ।
"अरत्निमात्रे गर्त्ते वै अनुलिप्ते च सर्व्वशः ।
घृतमामशरावस्थं कृत्वा वर्त्तिचतुष्टयम् ॥
ज्वालयेत्तु परीचार्थं पूर्व्वं तत् सर्व्वदिङ्मुखम् ।
दीप्ता पूर्व्वादि गृह्णीयात् वास्तूनामनुपूर्व्वशः ॥
वास्तुः सद्वृद्धिको नाम दीप्यते सर्व्वतो हि यः ।
शुभदः सर्व्ववर्णानां प्रासादेषु गृहेषु च ॥"
वास्तुकर्त्तुररत्निमात्रे गर्त्ते तत्रैव स्थापिते आम-
शरावे पूर्व्वादिक्रमेण वर्त्तिचतुष्टयं कृत्वा गव्य-
घृतेनापूर्य्य वर्त्तिचतुष्टयं प्रज्वालयेत् । तत्र
प्राच्यां दीप्तशिखाया उज्ज्वलत्वे तद्वास्तु ब्राह्म-
णस्य प्रशस्तम् । एवं दक्षिणादिदिक्षु शिखाया-
स्तथात्वे क्षत्रियादेः । सर्व्वशिखासमत्वे सर्व्व-
वर्णानां स वास्तुदेशः प्रशस्तः । जलान्तमिति
तु मत्स्यपुराणपरिभाषितं प्रासादपरम् ॥ * ॥
तथा च मात्स्ये ।
"पुरुषाधःस्थितं शल्यं न गृहे दोषदं भवेत् ।'
प्रासादे दोषदं शल्यं भवेद्यावज्जलान्तिकम् ॥
प्रासादभवनादीनां निवेशं विस्तराद्वद ।
कुर्य्यात् केन विधानेन कस्य वास्तुरुदाहृतः ॥"
इत्युपक्रम्य वाप्यादीनामभिधानादादिपदात्
कूपादयो गृह्यन्ते । प्रासादेऽप्येवमेव स्यात् कूप-
वापीषु चैव हि । इत्यभिधानाच्च कूपादावपि ॥
वास्तुपुरुषश्च ।
"कश्यपस्य गृहिण्यौ तु सिंहिका
राहुवास्तुतनयावजीजनत् ।
पूर्व्वजो हरिनिकृत्तकन्धरो
देवतैरवरजो निपातितः ॥"
तथा ।
"चैत्रे व्याधिमवाप्नोति यो गृहं कारयेन्नरः ।
वैशाखे धनरत्नानि ज्येष्ठे मृत्युमवाप्नुयात् ॥
आषाढ़े भृत्यरत्नानि पशुवर्ज्जमवाप्नुयात् ।
श्रावणे मित्रलाभस्तु हानिर्भाद्रपदे तथा ॥
आश्विने पत्नीनाशः स्यात् कार्त्तिके धनधान्य-
कम् ।
मार्गशीर्षे तथा भक्तं पौषे तस्करतो भयम् ॥
माघे चाग्निभयं विद्यात् काञ्चनं फाल्गुने
सुतान् ।
शुक्लपक्षे भवेत् सौख्यं कृष्णे तस्करतो भयम् ॥
अश्विनी रोहिणी मूलमुत्तरात्रयमेन्दवम् ।
स्वाती हस्तानुराधा च गृहारम्भे प्रशस्यते ॥
आदित्यभौमवर्ज्यन्तु सर्व्वे वाराः शुभावहाः ।
वज्रव्याघातशूले च व्यतीपातातिगण्डयोः ॥

विष्कम्भगरुडपरिघवर्ज्जं योगेषु कारयेत् ।
श्वेतमैत्रेयगान्धर्व्वैभिजिद्रौहिणेऽपि च ॥
तथा विजयसावित्रे मुहूर्त्ते गृहमारभेत् ।
चन्द्रादित्यबलं लग्नं तथा शुभनिरीक्षितम् ।
प्रासादेऽप्येवमेव स्यात् कूपवापीषु चैव हि ॥"
ऐन्द्रवं ब्रह्मगिरः ॥ * ॥ मुहूर्त्ते संवर्त्तः ।
"रौद्रः श्वेतश्च मैत्रेयस्तथा प्राजकटः स्मृतः ।
सावित्रश्च जयन्तश्च गान्धर्व्वः कुतपस्तथा ॥
रौहिणश्च विरिञ्चिश्च विजयो नैर्ऋतस्तथा ।
माहेन्द्रो वारुणश्चैव वटः पञ्चदश स्मृताः ॥"
तेन द्वितीयतृतीयसप्तमाष्टमनवमैकादशपञ्चमान्यतममुहूर्त्ते श्वेतादौ वास्तुकर्म्म कुर्य्यात् ।
चैत्रादिफलन्तु नरगृहे देवगृहे तु प्रतिष्ठाकालवशात् तत्कालपरिग्रहः ॥ * ॥ तथा च कल्पतरौ देवीपुराणम् ।
"यस्य देवस्य यः कालः प्रतिष्ठाध्वजरोपणे ।
गर्त्तापूरग्रिलान्यासे शुभदस्तस्य पूजितः ॥"
यस्य देवस्य प्रतिष्ठाध्वजरोपणे यः कालः शुभदस्तस्य गर्त्तापूरग्रिलान्यासे गृहारम्भे स कालः पूजित इति ॥ * ॥ प्रतिष्ठाकालश्च मात्स्ये ।
"चैत्रे वा फाल्गुने वापि ज्यैष्ठे वा माधवे तथा ।
माघे वा सर्व्वदेवानां प्रतिष्ठा शुभदा भवेत् ॥
प्राप्य पञ्चं शुभं शुक्लमतीते चोत्तरायणे ।
पञ्चमी च द्वितीया च तृतीया सप्तमी तथा ॥
दशमी पौर्णमासी च तथा श्रेष्ठा त्रयोदशी ।
आसु प्रतिष्ठा विधिवत् कृता बहुफला भवेत् ॥"
प्रतिष्ठासमुच्चये ।
"माघे वा फाल्गुने वापि चैत्रवैशाखयोरपि ।
ज्यैष्ठाषाढ़कयोर्व्वापि प्रतिष्ठा शुभदा भवेत् ॥"
कल्पतरौ देवीपुराणम् ।
"महिषासुरहन्त्राश्च प्रतिष्ठा दक्षिणायने ॥"
ज्योतिषे ।
"गुरोर्भेगोरस्तबाल्यं वार्द्धके सिंहगे गुरौ ।
गुर्व्वादित्ये दशाहे तु वक्रिजीवाष्टविंशके ॥
पूर्व्वराग्रावनायातातिचारिगुरुवत्सरे ।
प्राग्राग्निगन्तृजीवस्य चातिचारे चिपञ्चके ॥
कन्याद्यङ्गतसप्ताहे नीचस्थेज्ये मलिम्लुचे ।
पौषादिकचतुर्म्मासे चरणाङ्कितवर्षगे ॥
एकेनाह्ना चैकदिने द्वितीयेन दिनत्रये ।
तृतीयेन तु सप्ताहे माङ्गल्यानि विवर्जयेत् ॥
व्रतारम्भप्रतिष्ठे च गृहारम्भप्रवेशने ।
प्रतिष्ठारम्भणे देवकूपादेः परिवर्जयेत् ॥"*॥
स्मृतिसागरे ।
"उल्कापाते च भूकम्पे अकालवर्षगर्जिते ।
वज्रकेतूल्कमोत्पाते ग्रहणे चन्द्रसूर्य्ययोः ॥
प्रयाणन्तु त्यजेत् शूद्रः सप्तरात्रमतः परम् ।
ब्राह्मणः क्षत्रियो वैश्यस्त्यजेत् कर्म्म चिरात्रकम् ॥
शूद्रस्त्यक्त्वा चैकरात्रं ततः कर्म्म समाचरेत् ॥"
पराशरः ।
"प्रयाणे सप्तरात्रन्तु चिरात्रं व्रतबन्धने ।
एकरात्रं परित्यज्य कुर्य्यात् पाणिग्रहं गृहे ॥"

मत्स्यपुराणे ।
"नवगृहमखं कृत्वा ततः कर्म्म समाचरेत् ।
अन्यथा फलदं पुंसां न कार्य्यं जायते क्वचित् ॥"
नवग्रहमानधृतवचनम् ।
"पित्रभ्यो दद्यये दद्यिश्राद्धं दत्त्वा सदक्षिणम् ।
क्रूरभूतबलिञ्चैव संपूज्य वास्तुदेवताः ॥"
एकदिने वास्तुयागगृहोत्सर्गयोः करणे सकृदेव वृद्धिश्राद्धं करणीयम् ।
"गणेशः क्रियमाणे तु मातृभ्यः पूजनं सकृत् ।
सकृदेव भवेत् श्राद्धमादौ न पृथगादिषु ॥"
इति कृन्दोगपरिशिष्टात् ॥
मात्स्ये ।
"ऊहापोहार्थतत्त्वज्ञो वास्तुशास्त्रस्य पारगः ।
आचार्य्यश्च भवेन्नित्यं सर्व्वदा दोषवर्जितः ॥"
देवीपुराणम् ।
"प्रासादे च चतुःषष्टिरेकाशीतिपदं गृहे ।
चतुरश्रीकृते क्षेत्रे चाष्टधा नवधा कृते ॥
कोणे रेखास्ततो दत्त्वा नव भागान् प्रकल्पयेत् ।
ईशः कोणार्द्धतो ज्ञेयः पर्জन्यः पदसंस्थितः ॥
द्विपदस्थो जयन्तश्च शक्रः स्यादेककोष्ठगः ।
भास्करश्च पदो ज्ञेयो द्विपदः सत्य उच्यते ॥
भृशः पदस्थो ज्ञातव्यो व्योम चैव पदार्द्धकम् ।
हुताशनः पदार्द्धं तु पूषा च पदसंस्थितः ॥
वितथो द्विपदो ज्ञेयः पदैकस्थो गृहक्षतः ।
यमश्चैकपदो ज्ञेयः पदस्थो गन्धर्व्वो द्विपदस्थितः ॥
भृङ्गश्चैकपदो ज्ञेयो मृगश्चार्द्धपदस्थितः ।
पितरोऽर्द्धपदे ज्ञेयाः पदे दौवारिकस्तथा ॥
सुग्रीवो हि पदे ज्ञेयः पदस्थः पुष्पदन्तकः ।
पयसां पतिरेकस्थोऽसुरो द्विपदसंस्थितः ॥
शोषश्चैकपदो ज्ञेयः पापोऽर्द्धपद उच्यते ।
रोगश्चार्द्धपदो ज्ञेयो नागश्चापि पदे स्थितः ॥
द्विपदे विश्वकर्म्मा तु भल्लाटः पदसंस्थितः ।
यक्षेश्वरः पदो ज्ञेयो नागराड्द्विपदस्थितः ॥
पादस्था श्रीर्महादेवी दितिश्चार्द्धपदस्थिता ।
आपान्तपादसंस्थः स्यादापवत्सः पदस्थितः ॥
चतुष्पदस्थो विज्ञेयश्चार्य्यमा मध्यपूर्व्वगः ।
सावित्रस्तु पदो ज्ञेयः सावित्री पदसंस्थिता ॥
ततो विवस्वान् विज्ञेयश्चतुष्कैर्मध्यसंस्थितः ॥
इन्द्रश्चेन्द्रात्मजश्चोभावेकैकपदसंस्थितौ ॥
मित्रश्चतुष्पदश्चैव पश्चिमे च व्यवस्थितः ।
रुद्रश्चैकपदो ज्ञेयो राजयक्ष्मा पदस्थितः ॥
धराधरश्च विज्ञेय उत्तरे च चतुष्पदे ।
चतुष्पदश्चतुर्हस्तो मध्ये ज्ञेयः प्रजापतिः ॥
देवतानुचरा बाह्ये सर्व्वे चान्तस्तथासुराः ।
एवं प्रगृह्य कोष्ठानि रजसापूर्य्य देशिकः ।
एतेषामेव देवानां बलिं दद्यात्तु कामिकम् ॥"
रजसेति पञ्चवर्णरजोभिः । तथा च शारदायाम् ।
"उक्तानामपि देवानां पदान्यापूर्य्य पञ्चभिः ।
रजोभिश्चैर्यथोक्तेभ्यः पायसान्नैर्बलिं हरेत् ॥"
तथा ।
"पीतं हरिद्राचूर्णं स्यात् सितं तण्डुलसम्भवम् ।

कुसुम्भचूर्णमरुणं कृष्णं दग्धपुलाकजम् ।
विल्वादिपञ्चजं श्याममित्युक्तं वर्णपञ्चकम् ॥"
स्यात् पुलाकस्तुच्छधान्ये इत्यमरोक्तेः तुच्छं अपक्वम् ।
"पूज्या मण्डलबाह्ये तु पूर्व्वाग्न्यादिक्रमात् ।
स्कन्दश्चैव विदारी च अर्य्यमा पूतना तथा ।
जम्भका पापराक्षस्यौ पिलिपिञ्जश्चरक्यपि ॥"
मण्डलकरणासामर्थ्ये ग्रालग्रामसमीपे सर्व्वे पूज्याः ।
"ग्रालग्रामग्रिलारूपी यत्र तिष्ठति केशवः ।
तत्र देवासुरा यक्षा भुवनानि चतुर्दश ॥"
इति पद्मपुराणवचनात् ॥
तत्रावाहनविसर्জ्जने न स्तः ।
"ग्रालग्रामे स्थावरे च नावाहनविसर्জ्जने ॥"
इति वचनात् ॥
तदसम्भवे घटादिजले । प्रतिमास्थानेष्वप्सु आवाहनविसर्জ्जनवर्জ्जम् । इति बौधायनवचनात् ॥*॥ एषां विशेषबलिर्मत्स्यपुराणदेवीपुराणाभ्यामुक्तोऽपीदानीन्तनैर्न अवधार्यते । इति न लिखितः । किन्तु मत्स्यपुराणोक्तपायसबलिर्दीयते । तथा च ।
"पायसं वापि दातव्यं स्वनाम्ना सर्व्वतः क्रमात् ।
नमस्कारेण मन्त्रेण प्रणवाद्येन सर्व्वतः ॥"
अतएव प्रागुक्तशारदावाक्ये पायसमाचसृक्तं तेन एष पायसबलिः ॐ ईशानाय नमः । इत्यादिना प्रयोगः । न च वाचस्पतिमिश्रोक्तमसुकदेवतायै एष पायसबलिर्नम इत्यादि प्रणवादिनमस्कारान्तस्वनामरूपमन्त्रमध्ये देयप्रवेशस्यायुक्तत्वात् । तथा च ब्रह्मपुराणम् ।
"ॐकारादिसमायुक्तं नमस्कारान्तकीर्त्तितम् ।
स्वनाम सर्व्वसत्त्वानां मन्त्र इत्यभिधीयते ॥"
इति देवीपुराणम् ॥
"एवं भूतगणानान्तु बलिर्देयस्तु कामिकः ।
एतान् प्रपूजयेद्देवान् कृष्णपुष्पाक्षतैर्बुधः ॥
एवं प्रपूजिता देवाः शान्तिपुष्टिप्रदा नृणाम् ।
अपूजिता विनिघ्नन्ति कारकं स्थापकं तथा ।
एतान् प्रपूजयेद्देवान् कृष्णपुष्पाक्षतैस्तथा ॥"
अत्र पूजाया नित्यत्वात् वक्ष्यमाणमत्स्यपुराणवचने होमानन्तरं बलिदानाच्च बलेः काम्यत्वात् पूजा होमानन्तरं बलिदानाचारः । तथा च ।
"ब्रह्मस्थाने तथा कुर्य्याद्वासुदेवस्य पूजनम् ।
श्रियाश्च पूजनं कुर्य्याद्वासुदेवगणस्य च ॥
गन्धार्घ्यपुष्पनैवेद्यधूपाद्यैः सुरसत्तम ।
ततः संपूजयेत् तस्मिन् सर्व्वलोकधरां महीम् ॥
सुरूपां प्रमदारूपां दिव्याभरणभूषिताम् ।
ध्यात्वा तामर्च्चयेद्देवीं परितुष्टां क्षितानन्नाम् ॥
ततः स्वनाममन्त्रेण सर्व्वदेवमयं हरिम् ।
ध्यात्वा समर्च्चयेत्तत्र यजेद्वासुनरं परम् ॥
ब्रह्मस्थाने ततो विद्वान् कुर्य्यादाधारमच्युतेः ।
तस्मिन् संस्थापयेत् कुम्भं वर्द्धन्या सह पूरितम् ॥
हैमं वा राजतं पात्रं ताम्रमयं वा दृढ़ं शुभम् ।
सर्व्वबीजौषधीयुक्तं सुवर्णरजतान्वितम् ॥

ब्रह्मस्थाने ततो मन्त्री कलसं स्थाप्य पूजयेत् ।
तस्मिंश्चतुर्म्मुखं देवं प्राजेशं मन्त्रविग्रहम् ॥
गन्धैः पुष्पैश्च धूपैश्च नैवेद्यैः सुमनोहरैः ।
ततो मण्डलबाह्ये तु प्रतीच्यां प्राङ्मुखः स्थितः ॥
आचार्य्यो गृह्य सम्भारं ब्रह्मादीन्तर्पयेत् सुरान् ।
प्राजेशं तर्पयेद्विद्वान् आहुतीनां घृतेन च ॥
इतरान् दशभिर्देवानाहुतिभिः प्रतर्पयेत् ।
ततः प्रणम्य विज्ञाप्य कृत्वा वै स्वस्तिवाचनम् ॥
प्रगृह्य कर्करीं सम्यङ्मण्डलान्तःप्रदक्षिणम् ।
सूत्रमार्गेण देवेन तोयधारेण कारयेत् ॥
पूर्ब्ववत् तेन मार्गेण सप्तबीजानि वापयेत् ।
आरम्भं तेन मार्गेण तस्य खातस्य कारयेत् ॥
ततो गर्त्तं खनेन्मध्ये हस्तमानप्रमाणतः ।
चतुरङ्गुलमानं तदधः खन्यात् सुसम्मितम् ॥
गोमयेन प्रलिप्याथ चन्दनेन विलेपितम् ।
मध्ये दत्त्वा तु पुष्पाणि शुक्लान्यक्षतमेव च ॥
आचार्य्यः प्राङ्मुखो भूत्वा ध्यायेद्देवं चतुर्म्मुखम् ।
तूर्य्यमङ्गलघोषेण ब्रह्मघोषरवेण च ॥
अर्घं दद्यात् सुरश्रेष्ठ कुम्भतोयेन मन्त्रवित् ।
प्रगृह्य कर्करीं तान्तु तत् खातं पूजयेज्जलैः ॥
सर्व्वरत्नसमायुक्तैर्विमलैश्च सुगन्धिभिः ।
तस्मिन् पुष्पाणि शुक्लानि प्रक्षिपेदोमिति स्मरन् ॥
तदावर्त्तं परीक्षेत दधिभक्तान्वितं क्षिपेत् ।
शुभं स्याद्दक्षिणावर्त्ते ऽशुभं वामे भवेत्ततः ॥
बीजैः शालियवादीनां गर्त्तं तं पूरयेत्ततः ।
क्षीरजाभिः पवित्राभिर्मृद्भिर्गर्त्तं प्रपूरयेत् ॥
एवं निष्पाद्य विधिना वास्तुयागं सुरोत्तम ।
सुवर्णं गाञ्च वस्त्रञ्च आचार्य्याय निवेदयेत् ॥"
इतरानीग्राहयेत् होमस्तु प्रणवादिस्वाहान्ततत्तन्नामभिः । तथा च विष्णुधर्म्मोत्तरे ।
"एकैकां देवतां राम समुद्दिश्य यथाविधि ।
चतुर्थ्यन्तेन धर्म्मज्ञो नाम्ना च प्रणवादिना ।
होमद्रव्यमथैकैकं घृतसङ्क्तान्तु होमयेत् ॥"
घृतसङ्क्तमिति पूर्ब्बोक्तवचनानुसारेण वास्तुयागेतरपरम् । स्मृतिः ।
"स्वाहावसाने जुहुयात् ध्यायन् वै मन्त्रदेवताम् ॥"
होमदक्षिणासम्प्रदानमाह छन्दोगपरिशिष्टम् ।
"ब्रह्मणे दक्षिणा देया यत्र या परिकीर्त्तिता ।
कर्म्मान्तेऽनुच्यमानायां पूर्णपात्रादिका भवेत् ॥
विदध्याद्धोत्रमन्यस्मैदक्षिणार्द्धहरो भवेत् ।
स्वयञ्चेदुभयं कुर्य्यादन्यस्मै प्रतिपादयेत् ॥"
अन्यो यजमानभिन्नः । उभयं ब्रह्मकर्म्म होत्रकर्म्म च । उपसंहारे वास्तुयागमिति स्मृतेः सङ्कल्पवाक्ये तेनैवोल्लेखमाचरन्ति । अत्र मिलितामिलितदक्षिणादानात् फलतारतम्यम् ॥ * ॥ मात्स्ये ।
"ततः सर्व्वौषधिस्नानं यजमानस्य कारयेत् ॥"
देवीपुराणम् ।
"कालज्ञश्चपतौ पूज्यो वेणावान् प्रक्षितोऽर्च्चयेत् ।
ब्राह्मणान् भोजयित्वा तु नृत्यगीतादि कारयेत् ॥
प्रासादं कारयेद्विद्वान् गृहं वापि मनोहरम् ।
कार्य्यस्तु पञ्चभिर्व्विल्वैर्व्विल्वबीजैरथापि वा ।
होमान्ते भक्ष्यभोज्यैश्च वास्तुयागे बलिं हरेत् ॥"
इति मत्स्यपुराणे होमान्ते बलिविधानात् अत्रापि होमं कृत्वा बल्यादिप्रागुदितसर्व्वकर्म्मकरणाचारः ॥ * ॥ अत्र प्रजापतिनामानि ।
"प्रतिष्ठायां लोहितश्च वास्तुयागे प्रजापतिः ।
जलाशयप्रतिष्ठायां वरुणः समुदाहृतः ॥"
इति मत्स्यसूक्तवचनात् । एकाग्नीतिपदवास्तुयागे मत्स्यपुराणम् । भूम्यधिकारे ।
"पञ्चगव्यौषधिजलैः परीक्षित्वा तु सेचयेत् ।
एकाग्नीतिपदं कृत्वा रेखाभिः कनकेन तु ॥
पञ्चाक्षिप्येण चालिख्य सूत्रेणालोड्य सर्व्वतः ।
दश पूर्व्वायता रेखा दश चैवोत्तरायताः ।
सर्व्ववास्तुविभागे तु विज्ञेया नवधा नव ॥"
पञ्चगव्यमन्त्रमाह शङ्खः ।
"गायत्र्यादाय गोमूत्रं गन्धद्वारेति गोमयम् ।
आप्यायस्वेति च क्षीरं दधिक्रावृ्ण्वति वै दधि ।
तेजोऽसीति घृतञ्चैव देवस्यत्वा कुशोदकम् ॥"
ओषधीराह कात्यायनः ।
"व्रीहयः शालयो मुद्गा गोधूमाः सर्षपास्तिलाः ।
यवाश्चौषधयः सप्त विपदो घ्नन्ति धारिताः ॥"
व्रीहिः प्रस्तपक्वधान्यं षष्टिकाख्यम् । शालयो हैमन्तिकाः । दशेति वास्तुमण्डलवायव्ये उपविश्य पूर्व्वाभिमुखो गुरुः उत्तरत आरभ्य दशरेखाः प्राङ्मुखीर्यथादक्षिणं कुर्य्यात् । एवं नैर्ऋत्यामुपविश्य पश्चिमतः पूर्व्वापरगा दशोत्तरायता रेखाः कुर्य्यात् कनकशलाकादिना । रुद्रयामले तासां नामानि ।
"शान्ता यशोवती कान्ता विशाला प्राग्वाहिनी ।
शुची सुमनसा नन्दा सुभद्रा सुरथा तथा ॥"
इत्याद्या दश रेखाः ॥
"हिरण्या सुव्रता लक्ष्मीर्विभूतिर्विमला प्रिया ।
जया कला विशोका च इडा संज्ञा दशोत्तराः ॥"
इत्यन्तदश रेखाः ॥
"एकाग्नीतिपदं कृत्वा वास्तुकृत् सर्व्ववास्तुषु ।
पदस्थान् पूजयेद्देवान् चिंशत् पञ्चदशैव तु ॥
द्वात्रिंशद्बाह्यतः पूज्याः पूज्याश्चान्तस्त्रयोदश ।
नामतस्तानि वक्ष्यामि स्थानानि च निबोध मे ॥
ईशानकोणादिषु तान् पूजयेच्च विधानतः ।
शिखी चैवाथ पर्জन्यो जयन्तः कुलिशायुधः ॥
सूर्य्यः सत्यो भृशश्चैव आकाशो वायुरेव च ।
पूषा च वितथश्चैव गृहक्षतयमावुभौ ॥
गन्धर्व्वो भृङ्गराजश्च मृगः पितृगणस्तथा ।
दौवारिकोऽथ सुग्रीवः पुष्पदन्तो जलाधिपः ॥
असुरः शोषपापौ च रोगोऽहिर्मुख्य एव च ।
भल्लाटः सोमसर्पौ च अदितिश्च दितिस्तथा ॥
बहिर्द्वात्रिंशदेते च तदन्तश्चतुरः शृणु ।
ईशानादिचतुष्कोणसंस्थितान् पूजयेद्बुधः ॥
आपश्चैवाथ सावित्रो जयो रुद्रश्चथैव च ।
मध्ये नवपदे ब्रह्मा तस्याधौ च समीपगाः ॥
सर्व्वानेकान्तरान् विद्यात् पूर्ब्वाद्यान्नामतः शृणु ।
अर्य्यमा सविता चैव विवस्वान् विबुधाधिपः ॥
मित्रोऽथ राजयक्ष्मा च तथा पृथ्वीधरः क्रमात् ।
अष्टमश्चापवत्सश्च परितो ब्रह्मणः स्नुषाः ॥
आपश्चैवापवत्सश्च पर्জन्योऽग्निर्दितिस्तथा ।
पादिकानाञ्च वर्गोऽयमेवं कोणेषु शेषतः ॥
तन्मध्ये तु बहिर्विंशद्बिपदास्ते तु सर्व्वतः ।
अर्य्यमा च विवस्वांश्च मित्रः पृथ्वीधरस्तथा ।
ब्रह्मणः परितो दिक्षु त्रिपदास्ते तु सर्व्वतः ॥"
एवमिति यथा ईशानकोणे कोष्ठचतुष्टये अन्तस्थितैककोष्ठसहिते देवतापञ्चकमेवमाग्नेयादिकोणेष्वपीत्यर्थः । दिक्षु पूर्ब्वादिदिक्षु ॥ * ॥
"वंशानिदानीं वक्ष्यामि बहूनपि पृथक् पृथक् ।
वायुं यावत् तथा रोगात् पितृभ्यः शिखिनं पुनः ॥
सुग्रीवादृक्षगमधो शोषादितथं यावदेव तु ।
सुग्रीवाददितिं यावदृक्षङ्गाच्चयन्तमेव च ॥
एते वंशाः समाख्याताः क्वचिच्चटर एव च ।
एतेषां चैव सम्पातः पदमध्ये समस्तथा ॥
मर्म्म चैतत् समाख्यातं चिभूलं कोणगं च यत् ।
स्तम्भन्यासेषु वर्ज्यानि तुलाविधिषु सर्व्वदा ॥
कीलोच्छिष्टोपघातानि वर्জ्जयेत् यत्नतो नरः ।
सर्व्वत्र वास्तुनिर्द्दिष्टः पितृवैश्वानरायतः ॥
मूर्द्धन्यग्निः समाविष्टो मुखे चापः समाश्रितः ।
पृथ्वीधरोऽर्य्यमा चैव स्तनयोस्तावधिष्ठितौ ॥
वक्षःस्थले चापवत्सः पूजनीयस्तथा बुधैः ।
नेत्रयोर्दितिपर्জन्यौ श्रोत्रे दितिजयन्तकौ ॥
सर्पेन्द्रा वंशसंस्थौ च पूजनीयौ प्रयत्नतः ।
सोमसूर्य्यादयस्तद्वद्बाह्यो पञ्च च पञ्च च ॥
रुद्रश्च राजयक्ष्मा च वामहस्तसमाश्रितौ ।
सावित्रः सविता तद्वद्दक्षिणमाश्रितौ ॥
विवस्वानथ मित्रश्च जठरे संव्यवस्थितौ ।
पूषा च पापयक्ष्मा च हस्तयोर्म्मणिबन्धके ॥
तथैवासुरशेषौ च वामपार्श्वे समाश्रितौ ।
पार्श्वे तु दक्षिणे तद्वदितथः सग्रहक्षतः ॥
उर्व्वोर्यमाम्बुपौ ज्ञेयौ जान्वोर्गन्धर्व्वपुष्पकौ ।
जङ्घयोर्भृङ्गसुग्रीवौ कर्य्यां दौवारिको मृगः ॥
जयः शुक्रस्तथा मेढ्रे पादयोः पितरस्तथा ।
मध्ये नवपदो ब्रह्मा हृदये स तु पूज्यते ॥
चरकीञ्च विदारीञ्च पूतनां पापराक्षसीम् ।
ईशाग्नेयादिकोणेषु मण्डलाद्बाह्यतो यजेत् ॥"
पितृभ्य इति पितृगणादारभ्य वह्निं यावत् यो वंशः प्रसारितस्तद्दायतो वास्तुपूरुषः । अम्बुपो वरुणः । पुष्पकः पुष्पदन्तः । तथा ।
"प्रदक्षिणन्तु कुर्व्वीत वास्तोः पदविलेखनम् ।"
कोष्ठानां लिखनं प्रदक्षिणं कार्य्यम् । तथा ।
"तर्জनी मध्यमा चैव तथाङ्गुष्ठश्च दक्षिणः ।
प्रकालरत्नकनकं फलपुष्पाक्षतोदकम् ।
सर्व्वत्र वामभागेषु ग्राह्यं पदविलेखने ॥" * ॥
तथा ।
"वास्तौ परीक्षिते सम्यग्वास्तुदेहे विचक्षणः ।
वास्तूपशमनं कुर्य्यात् समिद्भिर्वैल्वकर्म्मणा ॥

जीर्णोद्धारे तथोद्याने तथा गृहनिवेशने।
द्वाराभिवर्द्धने तद्वत् प्रासादेषु गृहेषु च॥
वास्तूपशमनं कुर्य्यात् पूर्व्वमेव विचक्षणः।
एकाशीतिपदं लेख्यं लेखकैर्वास्तुपिष्टकैः।
होमस्थिमेखले कार्य्यः कुण्डे हस्तप्रमाणके॥"
विश्वकर्म्मा।
"खाताधिके भवेद्रोगी हीने धेनुधनक्षयः।
वक्रकुण्डे तु सन्तापो मरणं छिन्नमेखले॥
मेखलारहिते शोको ह्यधिके वित्तसंक्षयः।
भार्य्याविनाशकं कुण्डं प्रोक्तं योन्या विना कृतम्।
अपत्यध्वंसनं प्रोक्तं कुण्डं यत् कण्ठवर्ज्जितम्॥"
वशिष्ठसंहितायाम्।
"तस्मात् सम्यक् परीक्ष्यैवं कर्त्तव्यं शुभवेदिकम्।"
एवंविधकुण्डासम्भवे क्रियासारः।
"कुण्डमेवंविधं न स्यात् स्यण्डिलं वा समा-
श्रयेत्॥"
मत्स्यपुराणम्।
"यवैः कृष्णातिलैस्तद्वत् समिद्भिः क्षीरसम्भवैः।
पालाशैः खादिरैरापामार्गोडुम्बरसम्भवैः॥
कुशदूर्व्वामयैर्व्वापि मधुसर्पिःसमन्वितैः।
कार्य्यस्तु पञ्चभिर्विल्वैर्विल्वबीजैरथापि वा।
होमान्ते भक्ष्यभोज्यैश्च वास्तुदेवे बलिं हरेत्॥"
अत्र होमे मन्त्रानाह विष्णुधर्म्मोत्तरम्।
"वास्तोष्पतेन मन्त्रेण यजेच्च गृहदेवताम्।"
वास्तोष्पतेन वास्तोष्पतिदेवतेन पञ्चमन्त्रेण।
बलिद्रव्यञ्च पायसं प्रागेव लिखितम्॥ * ॥
ब्रह्मस्थाने ततः कुर्य्याद्वासुदेवस्य पूजन-
मित्यादि। सुवर्णं गां वस्त्रयुगमाचार्य्याय निवे-
दयेत्। इत्यन्तमत्रापि बोध्यम् कल्पतरौ मत्स्य-
पुराणम्।
"ततः सर्व्वौषधिस्नानं यजमानस्य कारयेत्।
द्विजांश्च पूजयेद्भक्त्या ये चान्ये गृहमागताः॥
एतद्वास्तूपशमनं कृत्वा कर्म्म समाचरेत्।
प्रासादभवनोद्यानप्रारम्भे परिवर्त्तने॥
पुरवेशप्रवेशेषु सर्व्वदोषापनुत्तये।
इति वास्तूपशमनं कृत्वा सूत्रेण वेष्टयेत्॥"
इति मत्स्यपुराणे उपक्रमोपसंहारयोर्वास्तूप-
शमनत्वेनाभिधानात् वास्तूपशमनं कर्म्मणो
नामधेयं इति तेनैवोल्लेखः सर्व्वदोषापनुत्तये
इति श्रुतेश्च वास्तुसर्व्वदोषापनोदनं फलं संकल्पे
तु तदुल्लेखः कार्य्यः। एतत्तु प्रारम्भप्रवेशान्य-
तरस्मिन्नवश्यं कर्त्तव्यम्। आवश्यकत्वे प्रमाणं
प्रागेवोक्तम्। इति श्रीरघुनन्दनभट्टाचार्य्यविर-
चितं वास्तुयागतत्त्वं समाप्तम्॥

वास्तुकं, क्ली, (वास्तु एव। वास्तु+स्वार्थे कन्।) वास्तूकशाकम्। इत्यमरटीकायां भरतः॥ (यथा, सुश्रुते। १। १६।
"तण्डुलीयकजीवन्तीसुनिषण्णकवास्तुकैः॥")

वास्तुकी, स्त्री, चिल्लीशाकम्। इति राजनिर्घण्टः॥

वास्तूकं, क्ली, (वसन्ति गुणा अत्रेति। वस+ऊलूकादयश्चेति साधुः।) शाकविशेषः। वेतुया इति भाषा। तत्पर्य्यायः। वास्तू २ वास्तुकम् ३ वसुकम् ४ वस्तूकम् ५ छिलमोचिका ६ शाकराजः ७ राजशाकः ८ चक्रवर्त्ती ९। अस्य गुणाः। मधुरत्वम्। सुशीतलत्वम्। क्षारत्वम्। मादनत्वम्। त्रिदोषजित्त्वम्। रोचनत्वम्। ज्वरहरत्वम्। महाग्नेर्सां नाशनत्वम्। मलमूत्रशुद्धिकारित्वञ्च। इति राजनिर्घण्टः॥ अपिच।
"वास्तूकं वासुकञ्च स्यात् क्षारपत्रञ्च शाकराट्।
तद्वेव तु दृढत्वत्वं रक्तं स्याद्गौड़वास्तुकम्॥
प्रायशो यवमध्ये स्यात् यावत् शाकमतः स्मृतम्।
वास्तूकद्वितयं खादु क्षारं पाके कटूदितम्॥
दीपनं पाचनं रुच्यं लघु शुक्रबलप्रदम्।
सरं श्लीहास्रपित्तास्रकृमिदोषत्रयापहम्॥"
इति भावप्रकाशः॥

वास्तेयं, त्रि, वस्तिसम्बन्धि। वस्तसम्बन्धि। वस्तुसम्बन्धि। वास्तुसम्बन्धि। वस्तिवस्तवस्तुवास्तुशब्देभ्यः ढिण्यञ्प्रत्ययेन निष्पन्नम्॥ (वस्तौ भवम्। वस्ति+"इतिकुत्सिकलग्निवस्त्यस्त्यहेर्ठेञ्।" ४। ३। ५६। इति ठञ्। वस्तिभवम्॥ यथा, छान्दोग्योपनिषदि। ३। १६। २।
"तत् यत् रजतं सेयं पृथिवी यत् सुवर्णं सा द्यौर्य्यत्तारायु ते पर्व्वता यदुलूखं स मेघो नीहारो याधमनयस्ता नद्यो यद्वास्तेयमुदकं स समुद्रः॥"
वस्तिरिव। वस्ति+"वस्तेर्ठेञ्।" ५। ३। १०१। इति ठञ्। वस्तिसदृशम्। इति सिद्धान्तकौमुदी॥)

वास्तोष्पतिः, पुं, (वास्तोर्गृहक्षेत्रस्य पतिरधिष्ठाता। "वास्तोष्पतिगृहमेधाच्छ च।" इति निपातनात् असुक् षत्वञ्च। यद्वा, "वास्त्वन्तरिक्षं तस्य पतिः पाता विभुत्वेन।" इति निघण्टुटीकायां देवराजयज्वा। ५। ४। ६।) इन्द्रः। इत्यमरः॥ (देवतामात्रम्। यथा, भागवते। १०। ५०। ५३।
"वास्तोष्पतीनाञ्च गृहैर्वलभीभिश्च निर्म्मितम्।
चातुर्व्वर्ण्यजनाकीर्णं यदुदेवगृहोत्तमम्॥"
"किञ्च नगरगृहादौ वास्तोष्पतीनां देवानाञ्च गृहैर्वलभीभिश्चन्द्रमालिकाभिश्च निर्म्मितम्॥"
इति तट्टीकायां स्वामी॥ गृहपालयितरि, त्रि। यथा, ऋग्वेदे। ७। ५४। १।
"वास्तोष्पते प्रतिजानीह्यस्मान्
स्वावेशो अनमीवो भवानः॥"
"हे वास्तोष्पते गृहस्य पालयितर्देव त्वं अस्मान् त्वदीयान् स्तोतॄनिति प्रतिजानीहि।" इति तद्भाष्ये सायणः॥)

वास्त्यः, पुं, (वस्त्येन परिवृतो रथः। वस्त्य+"परिवृतो रथः।" ४। २। १०। इति अण्।) वस्त्यावृततरथः। इत्यमरः। २। ८। ५४॥ त्रि, वस्त्यसम्बन्धी॥

वास्यः, त्रि, वारि तिष्ठति यः। वार्शब्दपूर्व्वस्थाधातोर्डप्रत्ययेन निष्पन्नः॥

वास्यः, पुं, उष्मा। लोहम्। इति केचित्॥ मूर्द्धन्यमध्य इति साधुपाठः॥

वास्येयः, पुं, नागकेशरः। इति रत्नमाला॥

वाह, ऋ ङ यत्ने। इति कविकल्पद्रुमः॥ (भ्वा०-आत्म०-अक०-सेट्।) ऋ, अववाहत्। ङ, वाहते। ववाह रक्तं पुरुषास्रतो जाताः सहस्रशः इत्यादि सिद्धार्थभोष्ठ्यादिश्च वहधातुं मन्यते वर्णदेशशरणदेवौ। वस्तुतस्तु बहुवाद्यसम्मतत्वादेवोष्ठ्यादिरनेनोपेक्षितः ववाहेति चण्डीप्रयोगस्य तु वाह ऋ ङ यत्ने इत्यस्मात् गणकृतानित्यत्वात् परस्मैपदसिद्धिः अनेकार्थत्वात् सुस्रावेत्यर्थः। अथवा वव इत्याह इत्येव व्याख्यानम्। इति दुर्गादासः॥

वाहः, पुं, (उह्यतेऽनेनेति। वह+करणे घञ्।) घोटकः। (यथा, अध्यात्मरामायणे। २। ५। ५६।
"इत्याज्ञप्तः सुमन्त्रोऽपि रथं वाहैरयोजयत्॥")
परिमाणविशेषः। इत्यमरः॥ यथाहुः।
"पलं प्रकुञ्चकं मुष्टिः कुड़वस्तच्चतुष्टयम्।
चत्वारः कुड़वाः प्रस्थस्तत्प्रस्थमधाढ़कम्॥
अष्टाढ़को भवेत् द्रोणो द्विद्रोणः शूर्प उच्यते।
सार्द्धशूर्पो भवेत् खारी द्वे खार्य्यौ गोण्युदाहृता।
तामेव भारं जानीयात् वाहो भारचतुष्टयम्॥"
इति भरतः॥
चतुर्द्रोणभेदात् संख्यान्यथात्वम्। तथा च।
"चतुराढ़को द्रोणः षोड़शद्रोणा खारी।
विंशतिद्रोणः कुम्भः दशकुम्भो वाहः। इति स्वामी॥ * ॥ भुजः। वृषः। वायुः। इति शब्दरत्नावली॥ (प्रवाहः। यथा, कथासरित्सागरे। ६३। ८१।
"यत्रार्चिरान्ध्यधूमादिमार्गाविव समागतौ।
गङ्गायमुनयोर्वाहौ भातः सुगतये नृणाम्॥"
वाहनम्। यथा, तत्रैव। ६२। १५७।
"तच्छ्रुत्वा तत्र मेकानां राजा वाहसमुत्सुकः।
जलादुत्तीर्य्य तत्पृष्ठमारोहत् गतभीर्मुदा॥")

वाहकः, त्रि, (वहतीति। वह+ण्वुल्।) वहनकर्त्ता। वहति यः। इत्यर्थे णकप्रत्ययेन निष्पन्नः॥ (यथा, भागवते। १०। १८। २१।
"आचेरुर्विविधाः क्रीड़ा वाह्यवाहकलक्षणाः।
यत्रारोहन्ति जेतारो वहन्ति च पराजिताः॥")

वाहदिषन्, [त्] पुं, (वाहानां घोटकानां द्विषन् शत्रुः।) महिषः। इत्यमरः॥

वाहनं, क्ली, (वहत्यनेनेति। वह+करणे ल्युट्।
"वाहनमाहितात्।" ८। ४। ८। इत्यत्र
"वहेर्ल्युटि वृद्धिरिहैव सूत्रे निपातनात्।"
इति भट्टोजिदीक्षितोक्त्या निपातनात् वृद्धिः।) हस्त्यश्वरथदोलादिः। तत्पर्य्यायः। यानम् २ युग्यम् ३ पत्रम् ४ धोरणम् ५। इत्यमरः। २। ८। ५८॥*॥ (यथा, रघुः। ११। १०।
"पूर्व्ववृत्तकथितैः पुराविदः
साधुभिः पितृसखस्य राघवः।
उह्यमान इव वाहनोचितः
पादचारमपि न व्यभावयत्॥")

वाहनं

देवा वाहनानि यथा,—
"विष्णुब्रह्माग्निवेदैर्वेर्ध्रियते सा जगन्मयी ॥
सितप्रेतो महादेवो ब्रह्मा लोहितपङ्कजः ।
हरिर्हरिस्तु विज्ञेयो वाहनानि महौजसः ॥
स्वमूर्त्या वाहनत्वन्तु तेषां यस्मान्न युज्यते ।
तस्मान्मूर्त्यन्तरं कृत्वा वाहनत्वं गताक्षयः ॥
यस्मिन् यस्मिन्महामाया प्रीणाति सततं शिवा ।
तेन तेनैव रूपेण आसनान्यभवन् त्रयः ॥"
इति कालिकापुराणे ५७ अध्यायः ॥*॥
दैवदानवानां वाहनानि यथा,—
पुलस्त्य उवाच ।
"शृणुष्व कथयिष्यामि सर्व्वेषामपि नारद ।
वाहनानि समासेन एकैकस्यानुपूर्व्वशः ॥
रत्नहस्ततलोत्पन्नं महाकायं महागजम् ।
श्वेतवर्णं महावीर्य्यं देवराजस्य वाहनम् ॥
रौद्रौजःसम्भवं भीमं कृष्णवर्णं मनोजवम् ।
पौण्ड्रकं नाम महिषं धर्म्मराजस्य नारद ॥
रत्नमानस-सम्भूतं श्यामं जलधिसंज्ञकम् ।
शिशुमारं दिव्यगतिं वाहनं वरुणस्य च ॥
रौद्रं शकटचक्राक्षं शैलाकारनरोत्तमम् ।
अम्बिकापादसम्भूतं वाहनं धनदस्य तु ॥
एकादशानां रुद्राणां वाहनानि महामुने ।
गन्धर्व्वाश्च महावीर्य्या भुजगेन्द्राः सुदारुणाः ॥
श्वेतानि सौरभेयाणि वृषाण्युग्रजवानि च ।
रथं चन्द्रमसश्चार्द्धं सहस्रहंसवाहनम् ॥
हयोढ़रथवाहाश्च आदित्या मुनिसत्तम ।
कुञ्जरस्थाश्च वसवो यक्षाश्च नरवाहनाः ॥
किन्नरा भुजगारूढ़ा हयारूढ़ौ तथाश्विनौ ।
शारङ्गाधिष्ठिता ब्रह्मन् मरुतो घोरदर्शनाः ॥
शुकारूढ़ाश्च कवयो गन्धर्व्वाश्च पदातिनः ।
आरुह्य वाहनान्येवं खानि खान्यमरोत्तमाः ॥
सन्नह्य निर्य्युर्द्दृष्टा युद्धाय सुमहौजसः ॥*॥
नारद उवाच ।
गदितानि सुरादीनां वाहनानि महामुने ।
दैत्यानां वाहनान्येवं यथावद्वक्तुमर्हसि ॥
पुलस्त्य उवाच ।
शृणुष्व दानवादीनां वाहनानि द्विजोत्तम ।
कथयिष्यामि तत्त्वेन यथावत् श्रोतुमर्हसि ॥
अन्धकस्य रथो युक्तः श्रेष्ठः परमवाजिभिः ।
कृष्णवर्णैः सहस्रारश्चिनस्वपरिमाणवान् ॥
प्रह्लादस्य रथो दिव्यः श्वेतवर्णैर्हयोत्तमैः ।
उह्यमानस्तथाष्टाभिः श्वेतरुक्मयः शुभः ॥
विरोचनस्य तु गजः कुम्भस्य तु तुरङ्गमः ।
जम्भस्य तु रथो दिव्यो हयैः काञ्चनसन्निभैः ॥
शङ्कुकर्णस्य तुरगो हयग्रीवस्य कुञ्जरः ।
रथो मयस्य विख्यातो दुन्दुभेश्च महोरगः ।
शम्बरस्य विमानोऽभूदायः शङ्कोर्द्दगाधिपः ॥"
इति श्रीवामनपुराणे ६ अध्यायः ॥
(वाहयतीति । वह + स्वार्थे णिच् + ल्युः । वाहके, त्रि । यथा, कथासरित्सागरे । १२४ । २२०—२२२ ।

वाहिनी

"स वाहनानां नागानां शौकराम्बुमहाभरैः ।
शूकरप्रेयसीपृष्ठे स्वयं चक्रे क्रियं नृपः ॥"
"नागानां वाहना मेघाः शूकरप्रेयसी क्षितिः ।
विष्णोः शूकररूपस्य सा हि प्रियतमोच्यते ॥
तस्यां मेघाम्बुभिर्धान्यमुत्पन्नं चेत् किमद्भुतम् ॥")
वाहश्रेष्ठः, पुं, (वाहेषु वाहनेषु श्रेष्ठः ।) अश्वः । इति राजनिर्घण्टः ॥
वाहसः, पुं, (उह्यते इति । वह + "वहियुभ्यां णित् ।" उणा० ३ । ११६ । इति असच् । सच णित् ।) अजगरः । इत्यमरः ॥ (यथा, तैत्तिरीयसंहितायाम् । ५ । ५ । १४ । १ ।
"त्वाष्ट्राः प्रतिश्रुत्कायै वाहसः ॥")
वारिनिर्य्याणम् । सुनिषण्णकम् । इति मेदिनी । से, ३७ ॥
वाहा, स्त्री, (वाह + अजादित्वात् टाप् ।) बाहुः । इत्यजयपालहिरूपकोषौ ॥
वा(बा)हावा(बा)हवि,व, (बाहुभिर्बाहुभिः प्रहृत्य इदं युद्धं प्रवृत्तं तत् ।) बाहुयुद्धम् । हाताहाति इति भाषा । इति सुग्धबोधव्याकरणम् ॥
वाहिकः, पुं, (वाहेन परिमाणविशेषेण क्रीतः । वाह + "असमासे निष्कादिभ्यः ।" ५ । १ । २० । इति ठक् ।) ठक्का । गोवाहः । शकटादि । इति धरणिः ॥ त्रि, भारवाहकश्च ॥
वाहित्थं, क्ली, गजकुम्भस्याधोभागः । इत्यमरः ॥
वाहिनी, स्त्री, (वाहा वाहनानि घोटकादीनि सन्त्यस्यामिति । वाह + इनिः । ङीप् ।) सेना । (यथा, रघुः । ११ । ६ ।
"लक्ष्मणानुचरमेव राघवं
नेतुमैच्छदृषिरित्यसौ नृपः ।
आग्निषं प्रयुयुजे न वाहिनीं
सा हि रक्षणविधौ तयोः क्षमा ॥" *॥
वाहः प्रवाहोऽस्यस्या इति ।) नदी । (यथा, रामायणे । २ । ८६ । ६ ।
"उत्तिष्ठत प्रबुध्यध्वं भद्रमस्तु हि वः सदा ।
नावः समुपकर्षध्वं तारयिष्याम वाहिनीम् ॥")
सेनाभेदः । तद्यथा । गजाः एकाशीतिः । रथाः एकाशीतिः । अश्वास्त्रिचत्वारिंशदधिकशतद्वयम् । पदातिकाः पञ्चाधिकचतुःशतम् । समुदायेन दशाधिकाष्टशतं वाहाः सन्त्यस्याम् । इत्यमरभरतौ ॥ (यथा, महाभारते । १ । २ । १६—२१ ।
"एको रथो गजश्चैको नराः पञ्च पदातयः ।
त्रयस्त्र तुरगास्तज्ज्ञैः पत्तिरित्यभिधीयते ॥
पत्तिस्तु त्रिगुणामेतामाहुः सेनामुखं बुधाः ।
त्रीणि सेनामुखान्येको गुल्म इत्यभिधीयते ॥
त्रयो गुल्मा गणो नाम वाहिनी तु गणास्त्रयः ।
स्मृतास्तिस्रस्तु वाहिन्यः पृतनेति चतुष्टये ॥")
प्रवाहशीला । यथा, मार्कण्डेये । ७८ । २६ ।
"यमुना च नदी जज्ञे कलिन्दान्तरवाहिनी ॥")
वाहिनीपतिः, पुं, (वाहिन्याः सेनायाः पतिः ।) सेनापतिः । इत्यमरः ॥ (यथा, महाभारते । ४ । २१ । ६ ।

वाहुः

"प्रवादेनेह मत्स्यानां राजा नाम्नायमुच्यते ।
अहमेव हि मत्स्यानां राजा वै वाहिनीपतिः ॥",
वाहिन्या नद्याः पतिः ।) समुद्रः । इति शब्दरत्नावली ॥
वाह्लीकः, पुं, देशभेदः । तत्पर्य्यायः । अश्वकः २ । इति हेमचन्द्रः ॥ जर्त्तिकजातिः । जाट् इति भाषा ॥ यथा,—
"तत्र वृद्धः पुरावृत्ताः कथाः कश्चिद्द्विजोत्तमः ।
वाह्लीकदेशं मद्रांश्च कुत्सयन् वाक्यमब्रवीत् ॥
पञ्चानां सिन्धुषष्ठानां नदीनां येऽन्तराश्रिताः ।
तान् धर्म्मबाह्यानशुचीन् वाह्लीकान् परिवर्ज्जयेत् ॥
शाकलं नाम नगरमापगानामनिम्नगा ।
जर्त्तिका नाम वाह्लीकास्तेषां वृत्तं सुनिन्दितम् ॥"
इति महाभारते कर्णपर्व्वणि २०० अध्यायः ॥
वा(बा)हुः, पुं, (बाधते शत्रूनिति । बाध लोड़ने + "अर्त्तिहृधिकमीति ।" उणा० । १ । २८ । इति कुः हकारादेश्च ।) कक्षावधङ्गुल्यग्रपर्य्यन्तावयवः । यथा । भुजबाहुः प्रवेष्टो दोरित्यमरः ॥ वहत्यनेन बाहुः नाम्नीति उण् । घञि बाहोऽदन्तः । बाहोऽश्वभुजयोः पुमान् । इति दामोदरः । स्त्रियां बाहा च । बाहो बाहा भुजा बाहुर्दोषो दोषा च दोः पुमान् । इति कोषान्तरम् ॥ इति तट्टीकायां भरतः ॥ कूर्परस्योर्द्धभागो बाहुस्तस्याधोभागः प्रबाहुः । यथा,—
"मुखं बाहू प्रबाहू च मनः सर्व्वेन्द्रियाणि च ।
रक्षत्वयाहतैश्वर्य्यस्तव नारायणोऽव्ययः ॥"
इति विष्णुपुराणे ५ अंशे ५ अध्यायः ॥
बाहुप्रबाहू च कूर्परस्योर्द्धाधोभागौ । इति तट्टीका ॥ अन्यत् प्रवर्गीयवकारादिबाहुशब्दे द्रष्टव्यम् ॥ * ॥ अस्य शुभाशुभलक्षणं यथा,—
"निर्मांसौ चैव भग्नास्यौ श्लिष्टौ च विपुलौ भुजौ ।
आजानुलम्बिनौ बाहू वृत्तौ पीनौ नृपेश्वरे ॥
निःस्नानां रोमशौ ह्रस्वौ श्रेष्ठौ करिकरप्रभौ ।
हस्ताङ्गुलय एव स्युरायुर्दा ललिताः शुभाः ॥
मेघाविनाश्च सूक्ष्माः स्युर्भृत्यानां चिपिटाः स्मृताः ।
शूलाङ्कुशीभिर्निःस्नाः स्युर्नताः स्युर्वक्रिरन्ददाः ॥
कपितुल्याकरा निःस्ना व्याघ्रतुल्यकरैर्धनम् ।
मणिबन्धैर्निगूढ़ैश्च सुश्लिष्टशुभसन्धिभिः ॥
नृपा हीनैः करच्छेदः सप्तभिर्धनवर्জ্জिताः ।
पितृवित्तविहीनाश्च निम्नात् करतलान्नराः ॥
संवृत्तैश्चैव निम्नैश्च धनिनः परिकीर्त्तिताः ।
प्रोक्ता नरकदातारो विषमैर्विषमा नराः ॥
करैः करतलैश्चैव लाञ्छनैरीश्वरास्तलैः ।
परदाररताः पीतैः रूक्षैर्निःस्ना नरा मताः ॥
तुषतुल्यनखाः क्लीवाः कुटिलैः स्फुटितैर्नराः ।
निःस्नाश्चक्रनखैस्तद्वद्वर्णैः परतस्करकाः ॥
ताम्रैर्भूपा धनाढ्याश्च अङ्गुष्ठैः सयवैस्तथा ।
अङ्गुष्ठशूलजैः प्रेष्यः स्याद्दीर्घाङ्गुलिपर्व्वकः ॥

दीर्घायुः सुभगश्चैव निर्धनो विरलाङ्गुलिः ।
धनाङ्गुलिश्च सधनस्त्रिलो रेखाश्च यस्य वै ॥
नृपतेः करतलगा मणिबन्धे समुत्थिताः ।
युगमौनाङ्कितकरो भवेत् सत्रप्रदो नरः ॥
वज्राकाराश्च धनिनः मत्स्यपुच्छनिभा बुधे ।
शङ्खातपत्रशिविकागजपद्मोपमा नृपे ॥
कुम्भाङ्कुशपताकाभा रत्नालाभा निरीश्वरे ।
दामाभाश्च गवाढ्यानां खस्तिकाभा नृपेश्वरे ॥
चक्रासितोमरधनुःकुन्ताभा नृपतेः करे ।
उदूखलाभा यज्ञाढ्ये वेदीभाश्चाग्निहोत्रिणि ॥
वाप्रीदेशकुलाभाश्च त्रिकोणाभाश्च धार्मिके ।
अङ्गुष्ठमूलगा रेखाः पुत्राः स्युश्चाश्च दारिकाः ॥
प्रदेशिनीगता रेखा कनिष्ठामूलगामिनी ।
भ्रातायुषश्च कुरुते छिन्नया तरुतो भयम् ।
निखाश्च बहुरेखाः स्युर्निर्द्रव्याश्चिपुके: कृशैः ॥"

इति गारुडे ६६ अध्यायः ॥

बा(बा)हुमूलं, क्ली, (बाहोर्मूलम् ।) भुजद्वयस्य आद्यभागः । काँक् इति वगल् इति च भाषा । तत्पर्य्यायः । कक्षः२ । इत्यमरः ॥ भुजकोटरः ३ दोर्मूलम् ४ खण्डिका ५ कक्षा ६ । इति हेमचन्द्रः ॥ (यथा, साहित्यदर्पणे । ३ । १२४

"कापि कुन्तलसंयानसंयमव्यपदेशतः ।
बाहुमूलं स्तनौ नाभिपङ्कजं दर्शयेत् स्फुटम् ॥")

बा(बा)हुलः, पुं, कार्त्तिकमासः । इत्यमरः ॥ अथ कार्त्तिकमाहात्म्यम् ।

नारद उवाच ।

"कार्त्तिकस्य तु माहात्म्यं मासस्य वक्तुमर्हसि ।
पूर्व्वं कार्त्तिकमाहात्म्यं यथावत् वक्तुमर्हसि ॥

ब्रह्मोवाच ।

साधु पृष्टं त्वया पुत्र लोकोद्धारणहेतवे ।
कथयामि न सन्देहस्त्वत्समो नास्ति वैष्णवः ॥
एकतः सर्व्वतीर्थानि सर्व्वे यज्ञाः सदक्षिणाः ।
कार्त्तिकस्य च मासस्य कोट्यंशं नापि बिभ्रति ॥
एकतः पुष्करे वासः कुरुक्षेत्रे हिमाचले ।
एकतः कार्त्तिको वत्स ! सर्व्वपुण्याधिको मतः ॥
स्वर्णानि मेरुतुल्यानि सर्व्वदानानि चैकतः ।
एकतः कार्त्तिको वत्स ! सर्व्वदा केशवप्रियः ॥
हत्वा कोटिसहस्राणि पापानि सुबहून्यपि ।
निमेषार्द्धेन सर्व्वाणि विलयं यान्ति कार्त्तिके ॥
यत्किञ्चित् कुरुते पुण्यं विष्णुमुद्दिश्य कार्त्तिके ।
तदक्षयं भवेत् सर्व्वं सत्योक्तं तव नारद ! ॥
तस्य क्षयं न पश्यामि सत्यमुक्तं तवानघ ।
सोपानभूतं स्वर्गस्य मानुष्यं प्राप्य दुर्लभम् ॥
तथात्मानं समादध्यात् यथा न स्यादितः पुनः ।
दुष्प्राप्यं प्राप्य मानुष्यं कार्त्तिकोक्तं चरेन्न यः ॥
स वै धर्म्मभृतां श्रेष्ठ स आत्मप्रियघातकः ।
कार्त्तिकं खलु वै मासं सर्व्वमासेषु चोत्तमम् ॥
पुण्यानां परमं पुण्यं पावनानाञ्च पावनम् ।
अस्मिन् मासे क्षयस्त्रिंशद्देवाः सन्निहिता ऋषे ॥
अत्र स्नानानि दानानि भोजनानि व्रतानि च ।
तिलधेनुहिरण्यानां रजतं भूमिवाससाम् ॥
गोप्रदानानि कुर्व्वन्ति सर्व्वभावेन नारद ! ।

ब्राह्मणानाञ्च ये कन्यां दास्यन्ति विधिवन्नराः ॥
दानानां फलमेतेषां प्राप्नुयुस्ते विधानतः ।
तानि दानानि गृह्णन्ति दत्तानि विधिवत् सुराः ॥
यत्किञ्चित् कार्त्तिके दत्तं तपश्चैव तथा कृतम् ।
तदक्षयफलं प्रोक्तं विष्णुना लोककर्त्तृणा ॥
वृषाणां मोचणं चैव कार्त्तिके मासि यैः कृतम् ।
अश्वमेधादिकं पुण्यं तेषां प्राप्तं न संशयः ॥
तस्मादयत्नेन विप्रेन्द्र कार्त्तिके मासि दीयते ।
यत्किञ्चित् कार्त्तिके दत्तं विष्णुमुद्दिश्य मानवैः ॥
हुतं दत्तञ्च विप्रेन्द्र तपश्चैव तथा कृतम् ।
तदक्षयं लभन्ते ते प्रसादान विप्रेषतः ॥
यथा नदीनां विप्रेन्द्र शैलानाञ्चैव नारद ।
उदधीनाञ्च विप्रर्षे क्षयो नैवोपपद्यते ॥
तद्वत् कार्त्तिकमासे तु यत्किञ्चिद्दीयते मुने ।
न तस्यास्ति क्षयो विप्र पापं याति सहस्रधा ॥
तस्मात् सर्व्वप्रयत्नेन कर्म्मणा मनसा गिरा ।
पापं समाचरेन्नैव कार्त्तिके विष्णुतत्परः ॥
ज्ञानाद्वा यदि वाज्ञानाद्दुष्कृतं येन यत्कृतम् ।
तत्तस्य नश्यति क्षिप्रं वायुना पांशवो यथा ॥
संप्राप्तं कार्त्तिकं दृष्ट्वा परान्नं यस्तु वर्জ्जयेत् ।
दिने दिने च कृच्छ्रस्य फलं प्राप्नोत्यसंशयम् ॥
प्रदत्तानान्तु भक्ष्याणां कार्त्तिके नियमे कृते ।
अवश्यं विष्णुरूपत्वं प्राप्यते मुक्तिदं शुभम् ॥
न कार्त्तिकसमो मासो न कृतेन समं युगम् ।
न वेदसदृशं शास्त्रं न तीर्थं गङ्गया समम् ॥
न चान्नेन समं दानं न सुखं भार्य्यया समम् ।
न क्षमेतु समं वित्तं न लाभः सुरभीसमः ॥
न तपोऽनशनैस्तुल्यं न दमात् परमो जयः ।
न च धर्म्मो दयातुल्यो न ज्योतिश्चक्षुषा समम् ॥
न तृप्तौ रसनातुल्या न प्रीतिस्तु सुतं विना ।
न कार्त्तिकसमो मासो वैष्णवानां प्रियः सदा ॥
अव्रतेन क्षपेदेयस्तु मासं दामोदरप्रियम् ।
तिर्य्यग्योनिमवाप्नोति सर्व्वधर्म्मबहिष्कृतः ॥
दुर्लभं वैष्णवं ज्ञानं दुर्लभा वैष्णवी कथा ।
दुर्लभा वैष्णवी दीक्षा दुर्लभो जागरस्तथा ॥
दुर्लभं कपिलादानं दुर्लभं जाह्नवीजलम् ।
दुर्लभो वैष्णवो विप्रो दुर्लभं नीलमोक्षणम् ॥
दुर्लभं पुष्करे दानं दुर्लभाः कार्त्तिके तिलाः ।
दुर्लभो जागरो विष्णोः पक्षयोरुभयोरपि ॥
दुर्लभा कार्त्तिके विप्र द्वादशी हरिबोधिनी ।
दुर्लभा मालतीपूजा दुर्लभा तुलसी मुने ॥
दुर्लभं कार्त्तिके स्नानं दुर्लभं साधुवन्दनम् ।
शालग्रामशिलापूजा दुर्लभा मुनिपुङ्गव ॥
वसुदग्धा नदी यत्र दुर्लभा स्नानशालिनाम् ।
कुलशीलवती कन्या दुर्लभा दम्पती नृणाम् ॥
दुर्लभा जननी लोके पिता चैव विशेषतः ।
दुर्लभं साधुसम्मानं दुर्लभो धार्मिकः सुतः ॥
दुर्लभैकादशी लोके दशमीसङ्गवर्জ्जिता ।
पञ्चाहयं व्रतं वत्स अयने दक्षिणोत्तरे ॥
दुर्लभं वैष्णवे दानं माघस्नानं नदीजले ।
ज्येष्ठाषाढि तु प्रानीयमिन्धनं पौषमाघयोः ॥
ब्राह्मणं दुर्लभं विप्र दुर्लभं तीर्थसेवनम् ॥

न्यायेनोपार्জ्जितं वित्तं दुर्लभं कुलवर्द्धनम् ।
दुर्लभं वत्स द्रव्याणां पात्रे यत् प्रतिपादितम् ॥
पात्राणामपि तत्पात्रं सदाचारक्रियान्वितम् ।
संप्राप्य कार्त्तिकं मासं विमुखा ये जनार्द्दने ।
तेषां यमपुरे वासः पितृभिः सह नारद ! ॥"

इति पाद्मे उत्तरखण्डे कार्त्तिकमाहात्म्ये११४ अ:॥

ब्रह्मोवाच ।

"कार्त्तिकस्य तु माहात्म्यं पुनरेव शृणुष्व मे ।
यत् श्रुत्वा मुनिशार्द्दूल ! सर्व्वान् कामानवाप्स्यसि ॥
व्रतानामिह सर्व्वेषामेकजन्मानुगं फलम् ।
कर्त्तुर्विष्णुव्रतस्योक्तं शतजन्मानुगं फलम् ॥
आश्विनस्य सिते पक्षे एकादश्यां द्विजोत्तम ! ।
वैष्णवैर्वैष्णवं धर्म्मं प्रारभ्योऽस्य विधीयते ॥
यावत् कार्त्तिकशुक्लस्य पौर्णमासी तिथिर्भवेत् ।
तावदस्य व्रतस्योक्तं सम्यगाचरणं बुधैः ॥
अन्यथा तु कृतं विप्र व्रतमेतत् सुदुर्लभम् ।
कार्य्यं सद्भिः प्रयत्नेन कार्त्तिके तु विशेषतः ॥
त्रिंशद्दिनानि पुण्यानि विप्रप्रीतिकराणि वै ।
कार्त्तिकस्य व्रतं विप्र ! श्रीविष्णुप्रीतिकारणम् ॥
तदर्द्धं भीष्मस्य व्रतं सुने तुष्टिकरं परम् ।
पुण्यं पञ्चदिनं प्रोक्तं दत्तं तस्मै च विष्णुना ॥
नरो वा यदि वा नारी कुरुते वैष्णवं व्रतम् ।
दिने दिनेऽश्वफलं भवेत्तस्यैव कार्त्तिके ॥
अतस्त्वं विधिवत् पुत्र ! वैष्णवं व्रतमुत्तमम् ।
श्रीदामोदरतुष्ट्यर्थं प्रकुरुष्व समाहितः ॥
ऊर्জ्जे मासि मुनिश्रेष्ठ प्रातःकाले तथामले ।
गोष्पदेऽपि जले स्नानं स्वर्गदं पापिनामपि ॥"

इति पाद्मे उत्तरखण्डे ११५ अध्यायः ॥*॥

ब्रह्मोवाच ।

"पुराणश्रवणं यत्र कुर्व्वन्ति द्विजसत्तम ।
तेषां करस्थिता मुक्तिर्विद्यते नात्र संशयः ॥
कार्त्तिके मासि यो भक्त्या कुर्य्याद्ब्राह्मणभोजनम् ।
प्रत्यहं विष्णुलग्नार्थं स याति भवनं हरेः ॥
कार्त्तिके मासि यः कुर्य्यात् तिलतैलेन दीपकम् ।
अहोरात्रान् मुनिश्रेष्ठ स याति परमं पदम् ॥
कार्त्तिके मासि यो दद्यात् पादत्राणं द्विजन्मने ।
दद्याद्धस्त्यान्वितं वत्स यमं नैव स पश्यति ॥
यज्ञोपवीतं यो दद्यात् भूमिं वै ब्राह्मणाय तु ।
स याति ब्रह्मसदनं पुनरावृत्तिवर्জ्जितम् ॥
ताम्बूलञ्चैव यो दद्यात् सपूगं विधिवद्द्विज ।
मन्वन्तरलोकमाप्नोति भुक्त्वा भोगान् मनोरमान् ॥
श्रीचन्दनञ्च यो दद्यात् देवपूजार्थमादरात् ।
विप्राय वेदविदुषे पुरन्दरपुरं व्रजेत् ॥
नारिकेलफलं वत्स सवस्त्रञ्च सदक्षिणम् ।
यो दद्याद्वेदविदुषे स पुत्रवान् भवेत् ॥"

इति पाद्मे उत्तरखण्डे ११६ अध्यायः ॥

बा(बा)हुल्यं, क्ली, बहुलम् । बहुलस्य भाव इत्यर्थे ष्यञ्प्रत्ययेन निष्पन्नम् ॥

बाहुवारः, पुं, (बाह्वान्तकक्षः । इति रभसनिघण्टः ॥

अन्यत् पवर्गीयवकारादिशब्दे द्रष्टव्यम् ॥

वाह्यं, क्ली, (वाह्यते चाल्यते इति वाहि + ण्यत् ।) यानम् । यथा, हेमचन्द्रे ।
"यानं युग्यं पत्रं वाह्यं वह्यं वाहनधोरणे ॥"
वाह्यः, त्रि, (वह + ण्यत् ।) वहनीयः । (यथा, रघुः । ६ । १० ।
"मनुष्यवाह्यं चतुरस्रयान-
मध्यास्य कन्या परिवारशोभि ।
विवेश मञ्चान्तरराजमार्गं
पतिंवरा कल्पितविवाहवेश्मा ॥"
वहिस् + ष्यञ् ।) वहिः । वाहिर इति भाषा । यथा, स्मृतिः ।
"अपवित्रः पवित्रो वा सर्व्वावस्थां गतोऽपि वा ।
यः स्मरेत् पुण्डरीकाक्षं स वाह्याभ्यन्तरः शुचिः ॥"
वा(बा)ह्येन्द्रियं, क्ली, (वाह्यमिन्द्रियम् ।) वहिरिन्द्रियम् । तदृयथा । चक्षुः । जिह्वा । नासिका । त्वक् । श्रोत्रम् । एतदेकैकगुणाः । यथा,—
"एते तु द्वीन्द्रियग्राह्या अथ स्पर्शान्तशब्दकाः ।
वाह्येकैकेन्द्रियग्राह्या गुरुत्वाद्दृष्टभावना ॥"
इति भाषापरिच्छेदः ॥
वाक्किकः, पुं, वाक्कीकदेशः । इत्यमरटीकायां भरतः ॥ (तद्देशजाते, त्रि । यथा, महाभारते । १ । २२२ । ४६ ।
"पृष्ठ्यानामपि चाश्वानां वाक्किकानां जनाईनः ।
ददौ शतसहस्राणि कन्याधनमनुत्तमम् ॥")
वाक्किकं, } क्ली, कुङ्कुमम् । हिङ्गु । इत्यमर-
वाङ्कीकं, } मेदिनीकरौ ॥
वाङ्कीकः, पुं, देशभेदः । वलख इति आरवी भाषा । तद्देशजातघोटकः । इत्यमरमेदिनीकरौ ॥ गन्धर्व्वविशेषः । इति शब्दरत्नावली ॥ (प्रतीपपुत्रविशेषः । यथा, महाभारते । १ । ९५ । ४४ ।
"प्रतीपः खलु शैव्यासुपयेमे सुतन्दां नाम तस्यां पुत्रानुत्पादयामास देवापिं शान्तनुं वाङ्कीकञ्चेति ॥")
वि, अ, निग्रहः । नियोगः । पदपूरणम् । निश्चयः । असहनम् । हेतुः । अग्निः । विनियोगः । ईषदर्थः । परिभवः । शुद्धम् । अवलम्बनम् । विज्ञानम् । इति मेदिनी । वे, ७६ ॥ विशेषः । गतिः । आलम्भः । पालनम् । इति शब्दरत्नावली ॥ उपसर्गविशेषः । अस्यार्थाः । वि विशेषवैरूप्यनानार्थगतिदानेषु । इति सुग्धबोधटीकायां दुर्गादासः ॥
विः, पुं, स्त्री, (वाति गच्छतीति । वा + "वातेर्डिच्च ।" उणा० ४ । १३३ । इति इण् । स च डित् ।) पक्षी । इत्यमरः ॥ (यथा, साहित्यदर्पणे १० परिच्छेदे ।
"के यूयं स्थल एव सम्प्रति वयं प्रश्नो विशेषाश्रयः ।
किं ब्रूते विहगः स वा फणिपतिर्यत्रास्ति सुप्तो हरिः ॥")
विंशः, त्रि, (विंशति + पूरणे डट् । तेलोपः ।) विंशतेः पूरणः । इति सिद्धान्तकौमुदी ॥ (यथा, मनुः । ८ । ३६८ ।
"कार्षापणं भवेद्दण्ड्यो यत्रान्यः प्राकृतो जनः ।
तत्र राजा भवेद्दण्ड्यः सहस्रमिति धारणा ॥")
विंशकः, त्रि, (विंशत्या क्रीतः । विंशति + "विंशतित्रिंशद्भ्यां ड्वुनसंज्ञायाम् ।" ५ । १ । २४ । इति ड्वुन् । "ति विंशतेर्डिति ।" ६ । ४ । १४२ । इति तिलोपः ।) विंशतिक्रीतः । इति सिद्धान्तकौमुदी ॥
विंशतिः, स्त्री, (द्वौ दश परिमाणस्य । पक्तिविंशतौति निपातनात् सिद्धम् ।) संख्याविशेषः । विष इति कुड़ि इति च भाषा । यथा,—
"विंशत्याद्याः सदैकत्वे सर्व्वा संख्येयसंख्ययोः ।
संख्यार्थे द्विबहुत्वे स्तस्तासु चानवतेः स्त्रियः ॥"
इत्यमरः ॥
तद्दाश्चकानि । रावणबाहुः १ । अङ्गुलिः २ । इति कविकल्पलता ॥ नखम् ३ । इति सतुक्तयसुक्तावली ॥
विंशतिकः, त्रि, विंशतियोग्यः । यथा । संख्यायाः कक् स्यादर्हीयेऽर्थे । विंशतित्रिंशद्भ्यां कन् संज्ञायाम् । अभ्यां कन् स्यात् असंज्ञायान्तु ड्वुन् स्यात् । विंशकः । संज्ञायान्तु विंशतिकः । इति सिद्धान्तकौमुदी ॥
विंशतितमः, त्रि, (विंशतेः पूरणः । विंशति + डट् । "विंशत्यादिभ्यस्तमड्न्यतरस्याम् ।" ५ । २ । ५६ । इति तमड़ागमः ।) विंशः । इति सिद्धान्तकौमुदी ॥
विंशी, पुं, विंशतिः । इति सिद्धान्तकौमुदी ॥
विकं, क्ली, सद्यःप्रसूतायाः गोः क्षीरम् । यथा,—
"क्षीरं सद्यःप्रसूतायाः पेयूषं पालनं विकम् ।"
इति शब्दचन्द्रिका ॥
विककटः, पुं, गोक्षुरः । इति शब्दमाला ॥
विकङ्कतः, पुं, वदरीसदृशस्वल्पफलवृक्षः । वँइच इति भाषा । तत्पर्य्यायः । खादुकण्टकः २ सुवादुफलः ३ ग्रन्थिलः ४ व्याघ्रपात् ५ । इत्यमरः ॥ शुवारुः ६ मधुपर्णी ७ । इति रत्नमाला ॥ कण्टपादः ८ बहुफलः ९ गोपघण्टा १० सुवादुमः ११ मृदुफलः १२ दन्तकाष्ठः १३ यज्ञीयवृक्षपादपः १४ पिण्डारः १५ हिमकः १६ पूतः १७ किङ्किणी १८ वैकङ्कतः १९ वृतिकरः २० कण्टकारी २१ । इति शब्दरत्नावली ॥ किङ्किरी २२ सुगन्दारु २३ । इति जटाधरः ॥ अस्य गुणाः । अम्लमधुरत्वम् । पाकेऽतिमधुरत्वम् । लघुत्वम् । दीपनत्वम् । कामलाप्लीहनाशित्वम् । पाचनत्वञ्च । इति राजनिर्घण्टः ॥ अपि च ।
"स एव यज्ञवृक्षश्च कण्टकी व्याघ्रपादपि ।
विकङ्कतफलं पक्वं मधुरं सर्व्वदोषजित् ॥"
इति भावप्रकाशः ॥
विकङ्कता, स्त्री, अतिबला । इति राजनिर्घण्टः ॥
विकचः, पुं, (विगतः कचो यस्य केशशून्यत्वात् । यद्वा, विशिष्टः कचो यस्य प्रभूतकेशत्वात् ।) चपणः । केतुः । इति मेदिनी । चे, ॥ (यथा, वृहत्संहितायाम् । ११ । १६ ।
"विकचा नाम गुरुसुताः
सितेकतारा; शिखिपरिवृत्ताः ।
षष्टिः पञ्चभिरधिका
स्निग्धा याम्याश्रिताः पापाः ॥")
विकचः, त्रि, (विकचति विकशतीति । वि + कच् + अच् ।) विकसितः । इत्यमरः ॥ (यथा, माघे । ११ । १६ ।
"विकचकमलगन्धैरन्वयुः भृङ्गमालाः
सुरभितमकरन्दं मन्दमावाति वातः ।
प्रमदमदनमाद्यद्यौवनोद्दामरामा-
रमणरभसखेदस्वेदविच्छेददक्षः ॥"*॥
विगतः कचो यस्य ।) केशशून्यः । इति मेदिनी । चे, ॥ (यथा, महाभारते । ३ । २५६ । १२ ।
"विभज्यानियतं वेश्मसुक्तं इव पार्थिव ।
विकचः परुषा वाचो व्याहरन् विविधा मुनिः ॥")
विकचा, स्त्री, महाश्रावणिका । इति राजनिर्घण्टः ॥
विकच्छः, त्रि, (विगतः कच्छो यस्य ।) कच्छरहितः । मुक्तकच्छः । इति स्मृतिः ॥
विकटः, पुं, (विकटति पूयरक्तादिकं वर्षतीति । वि + कट + पचाद्यच् ।) विस्फोटकः । इति शब्दरत्नावली ॥ साकुरण्डवृक्षः । इति राजनिर्घण्टः ॥ (धृतराष्ट्रस्य पुत्रविशेषः । यथा, महाभारते । १ । ६७ । ८६ ।
"दुर्मदो दुष्प्रधर्षश्च विवित्सुर्विकटः समः ॥")
विकटः, त्रि, (वि + "संप्रोदश्च कटच् ।"५।२।२६। इति कटच् ।) विशालः । (यथा, माघे ।१०।४२।
"उत्तरीयविनयात्प्रभाणा
रुन्धती किल तदीक्षणमार्गम् ।
आवरिष्ट विकटेन विवोढु-
र्वक्षसैव कुचमण्डलमन्या ॥")
विकरालः । इति मेदिनी । टे, ॥ सुन्दरः । इति विश्वः ॥ दन्तुरः । इति धरणिः ॥ (यथा, मार्कण्डेये । ४३ । २० ।
"करालैर्विकटैः कृष्णैः पुरुषैरुद्यतायुधैः ।
पाषाणैस्ताड़ितः खड्गैः सद्यो मृत्युं लभेन्नरः ॥")
विकृतः । इति चिकाण्डशेषः ॥
विकटा, स्त्री, (विकट + टाप् ।) मायादेवी । सा च बौद्धदेवीभेदः । तत्पर्य्यायः । मारीची २ त्रिमुखा ३ वज्रकालिका ४ वज्रवाराही ५ गौरी ६ पोत्रिरथा ७ । इति चिकाण्डशेषः ॥
विकटकः, पुं, (विगिष्टः कण्टको यस्य ।) धवासः । इति जटाधरः ॥ वृक्षविशेषः । तत्पर्य्यायः । मृदुफलः २ ग्रन्थिलः ३ खादुकण्टकः ४ गोकण्टकः ५ काकनासः ६ व्याघ्रपादः ७ घनद्रुमः ८ गर्जाफलः ९ घनफलः १० मेघध्वनितोद्भवः ११ सुदिरफलः १२ प्रावृष्यः १३ क्षारफलः १४ क्षनितफलः १५ । अस्य गुणाः । कषायत्वम् । कटुत्वम् । उष्णत्वम् । रुचिप्रदत्वम् । दीपनत्वम् । कफहारित्वम् । वस्त्ररञ्जनविधायकत्वञ्च । इति राजनिर्घण्टः ॥
विकत्थनं, क्ली, (विकत्थ्यते इति । वि + कत्थ श्लाघायाम् + भावे ल्युट् ।) मिथ्याश्लाघा । यथा,—

"श्लाघा प्रशंसार्थवादः सा तु मिथ्याविकत्थनम् ॥"
इति हेमचन्द्रः ॥
(यथा, भागवते । १ । १५ । १६ ।
"ग्रथ्यासनाटनविकत्थनभोजनादि-
ष्वेकाङ्गयस्य ऋतवानिति विप्रलब्धः ॥"
विकत्थते आत्मानमिति । वि + कत्थ + ल्युः । आत्मश्लाघाकारिणि, त्रि । यथा, महाभारते । २ । ७३ । ३२ ।
"असूयितारं द्वेष्टारं प्रवक्तारं विकत्थनम् ।
भीमसेननियोगात्ते हन्ताहं कर्णमाहवे ॥"* ॥
स्त्री, वि + कत्थ + णिच् + युच् । टाप् । आत्मश्लाघा । यथा, विक्रमोर्वश्यां नाटके । २ ।
"सम्भावोक्तापि ग्रक्तानां न प्रगल्भा विकत्थना ।
ग्ररदीयघनध्वानैर्व्वाचोभिः किं भवाद्दृशाम् ॥")
विकम्पितः, त्रि, विशेषेण कम्पविशिष्टः । विपूर्ब्बकम्पधातोः क्तप्रत्ययेन निष्पन्नः ॥
विकरः, पुं, (विकीर्य्यते हस्तपदादिकमनेनेति । वि + कृ + "ऋदोरप् ।" इत्यप् ।) रोगः । इति ग्रब्दचन्द्रिका ॥
विकरालः, त्रि, (विशेषेण करालः ।) भयानकः । इति विकटग्रब्दार्थे मेदिनी ॥ (यथा, मार्कण्डेये । ११८ । ४८ ।
"विकरालं महावक्त्रमतिभीषणदर्शनम् ।
समुद्यतमहाशूलं प्रभूतमतिदारुणम् ॥")
विकर्णः, पुं, दुर्य्योधनपक्षीयशूरः । यथा,—
"ग्रश्वत्थामा विकर्णश्च सोमदत्तिर्जयद्रथः ।
ग्रन्ये च बहवः शूरा मदर्थे त्यक्तजीविताः ॥"
इति भगवद्गीतायाम् १ ग्रध्यायः ॥
(विगतौ कर्णौ यस्येति विग्रहे कर्णरहिते, त्रि ॥)
विकर्णिकः, पुं, सारस्वतदेशः । इति हेमचन्द्रः ॥
विकर्त्तनः, पुं, (विशेषेण कर्त्तनं यस्य । विश्वकर्म्मग्रन्थखोदितत्वादस्य तथात्वम् ।) सूर्य्यः । अर्कवृक्षः । इत्यमरः ॥
विकर्म्मकृत्, त्रि, (विकर्म्म विरुद्धं कर्म्म करोतीति । कृ + क्विप् ।) निषिद्धकर्म्मकारी । यथा,
"न साक्षी नृपतिः कार्य्यो न कारुककुशीलवौ ।
न श्रोत्रियो न लिङ्गस्थो न सङ्घेभ्यो विनिर्गतः ॥
नाध्यधीनो न वक्तव्यो न दस्युर्न विकर्म्मकृत् ।
न वृद्धो न शिशुर्नैको नान्त्यो न विकलेन्द्रियः ॥"
इति मानवे । ८ । ६६ ॥
"विकर्म्मकृत् निषिद्धकर्म्मकारी ।" इति कुल्लूकभट्टः ॥
विकर्म्मस्थः, त्रि, (विकर्म्मणि विरुद्धाचारे तिष्ठतीति । स्था + कः ।) निषिद्धकृत् । यथा,—
"पाषण्डिनो विकर्म्मस्थान् वैडालव्रतिकान् शठान् ।
हैतुकान् बकवृत्तींश्च वाङ्मात्रेणापि नार्च्चयेत् ॥"
इति विष्णुपुराणे ३ ग्रंशे १८ ग्रध्यायः ॥
(तथा मनौ । ४ । ३० ॥)
विकर्षः पुं, (विकृष्यतेऽसौ इति । ग्रथवा, विकृष्यन्ते परप्राणा ग्रनेनेति । वि + कृष् + घञ् ।) वाणः । इति त्रिकाण्डशेषः ॥ (वि + कृष + भावे घञ् । विकर्षणम् ॥)
विकर्षणं, क्ली, (वि + कृष + ल्युट् ।) ग्राकर्षणम् । विपूर्ब्बकृषधातोरनट्प्रत्ययेन निष्पन्नम् ॥ (यथा, किरातेः । ३ । ५७ ।
"ग्रविलङ्घ्याविकर्षणं परैः
प्रथितव्यारवकर्म्मकार्म्मुकम् ॥"
विभागः । यथा, भागवते । ३ । ७ । ३० ।
"वर्णाश्रमविभागांश्च रूपशीलस्वभावतः ।
ऋषीणां जन्मकर्म्माणि वेदस्य च विकर्षणम् ॥")
विकलः, त्रि, (विगतः कलो व्यक्तध्वनिर्यस्य ।) विक्लवः । इति जटाधरः ॥ स्वभावहीनः । इति भरतः ॥ (यथा, महाभारते । १ । ७६ । ११ ।
"विधवानाथविकलान् क्षपणांश्च बभार सः ।
सदृशैः सर्व्वभूतानामासीत् सोम इवापरः ॥")
विकलपाणिकः, पुं, (विकलः पाणिर्यस्य । कन् ।) स्वभावहीनपाणियुक्तः । यथा । कुणिर्विकलपाणिकः । इति हलायुधः ॥
विकला, स्त्री, (विगतः कलो मधुरालापो यस्याः । ऋतौ तु स्त्रिया मौनित्वविहितत्वात् ।) ऋतुहीना । इति ग्रब्दरत्नावली ॥
विकलाङ्गः, त्रि, (विकलानि ग्रङ्गानि यस्य ।) स्वभावतो न्यूनाङ्गः । तत्पर्य्यायः । ग्रपोगण्डः २ । इत्यमरः ॥ पोगण्डः ३ ग्रङ्गहीनकः ४ । इति ग्रब्दरत्नावली ॥ (यथा, महाभारते । १ । ३१ । ३४ ।
"जनयामास पुत्रौ द्वावरुणं गरुडं तथा ।
विकलाङ्गीऽरुणस्तत्र भास्करस्य पुरःसरः ॥")
विकली, स्त्री, (विगता कला यस्याः । गौरादित्वात् ङीष् ।) ऋतुहीना । इति ग्रब्दरत्नावली ॥
विकल्पः, पुं, (विरुद्धं कल्पनमिति । वि + कृप + घञ् ।) भ्रान्तिः । (यथा, देवीभागवते । १ । १६ । ३२ ।
"विकल्पोपहतत्वं वै दूरदेशमुपागतः ।
न मे विकल्पसन्देहो निर्व्विकल्पोऽस्मि सर्व्वथा ॥")
कल्पनम् । इति मेदिनी । पे, ॥ (यथा, भागवते । ५ । १६ । २ ।
"तत्रापि प्रितव्रतरथचरणपरिखातैः सप्तभिः सप्त सिन्धवः उपकल्पिताः । यत एतस्याः सप्तद्वीपविशेषविकल्पत्वया भगवान् खलु लक्षितः ॥"
संशयः । यथा, रघुः । १७ । ४६ ।
"राजन्विधविभागेषु यथादिष्टं महीक्षिताम् ।
तत्सिषेवे नियोगेन स विकल्पपराङ्मुखः ॥"
नानाविधः । यथा, मनुः । ६ । २२८ ।
"प्रच्छन्नं वा प्रकाशं वा तन्निषेवेत यो नरः ।
तस्य दण्डविकल्पः स्यादृतघ्नेष्टं नृपतेस्तथा ॥")
विविधकल्पः । स च द्विविधः । ग्रवस्थितः । ऐच्छिकश्च । सोऽप्याकाङ्क्षाविरहे युक्तः । तथा च भविष्ये ।
"स्मृतिग्राह्ये विकल्पस्तु ग्राकाङ्क्षापूरणे सति ॥"
इच्छाविकल्पेऽदोषाः । यथा,—
"प्रमाणत्वाप्रमाणत्वपरित्यागप्रकल्पना ।
प्रत्युच्चीवनहानिभ्यां प्रत्येकमदुष्टता ॥"
व्रीहिभिर्यजेत यवैर्यजेत इति ग्रूयते । तत्र व्रीहिप्रयोगे प्रतीतयवप्रामाण्यपरित्यागः । ग्रप्रतीतयवाप्रामाण्यपरिकल्पनम् । इदन्तु पूर्ब्बस्मात् पृथक् वाक्यं ग्रन्यथा समुच्चयेऽपि यागसिद्धिः स्यात् । ग्रतएव विकल्पे न उभयः प्राप्तार्थ इत्युक्तम् । प्रयोगान्तरे यवे उपादीयमाने परित्यक्तयवप्रामाण्योच्चीवनं स्वीकृतयवाप्रामाण्यहानिरिति चत्वारो दोषाः । एवं व्रीहावपि चत्वारः । इत्यष्टौ दोषा इच्छाविकल्पे । तथा चोक्तम् ।
"एवमेवाष्टदोषोऽपि यद्व्रीहियववाक्ययोः ।
विकल्प ग्राश्रितस्तत्र गतिरन्या न विद्यते ॥"
इति ॥
एकार्थतया विविधं कल्प्यते इति विकल्पः । तस्मादष्टदोषभिया उपोष्य दे तिथी इत्यत्र न इच्छाविकल्पः किन्तु ग्रवस्थितविकल्पः । इत्येकादशीतत्त्वम् ॥ (ग्रवान्तरः कल्पः । यथा, भागवते । २ । ८ । ११ ।
"यावान् कल्पो विकल्पो वा यथा कालोऽनुमीयते ॥"
देवता । यथा, भागवते । १० । ८५ । ११ ।
"वैकारिको विकल्पानां प्रधानमनुग्रायिनाम् ॥"
"विविधं ग्राधिदैवाध्यात्माधिभूतभेदेन कल्प्यन्ते इति विकल्पा देवास्तेषां कारणं वैकारिकः सात्त्विकोऽहङ्कारश्च त्वम् ॥" इति तट्टीकायां स्वामी ॥)
विकल्वरः, त्रि, (वि + कल्प + वरच् ।) विकासी । इत्यमरटीकायां भरतः ॥ (यथा, नैषधे । २ । ५ ।
"ग्रयमेत्य तडागनीडजै-
र्लघुपर्य्यस्त्रियताथ ग्रङ्क्यते ।
उदडीयत वैक्लवात् कर-
ग्रहजादस्य विकल्वरस्वरैः ॥")
विकषा, स्त्री, (विकषतीति । वि + कष गतौ + ग्रच् । टाप् ।) मञ्जिष्ठा । इत्यमरटीकायां रायमुकुटः ॥ मांसरोहिणी । इति राजनिर्घण्टः ॥
वकस्वरः, त्रि, (वि + कस + वरच् ।) विकस्वरः । इत्यमरटीकायां भरतः ॥
विकसः, पुं, (विकसतीति । वि + कस + ग्रच् ।) चन्द्रः । इति त्रिकाण्डशेषः ॥
विकसा, स्त्री, (विकसतीति । वि + कस + ग्रच् । टाप् ।) मञ्जिष्ठा । इत्यमरः ॥
विकसितं, त्रि, (वि + कस + क्तः ।) दलानामन्योन्यविश्लेषः । तत्पर्य्यायः । उज्जृम्भितम् २ उज्जृम्भम् ३ स्फुटितम् ४ उन्मिषितम् ५ विनिद्रम् ६ उन्निद्रम् ७ उन्मीलितम् ८ विजृम्भितम् ९ उद्बुद्धम् १० उद्भिदुरम् ११ भिन्नम् १२ उद्भिन्नम् १३ हसितम् १४ विकस्वरम् १५ विकचम् १६ ग्राकोषम् १७ फुल्लम् १८ संफुल्लम् १९

स्फुटम् २० उदितम् २१ इलितम् २२ दीर्णम् २३ स्फुटितम् २४ उत्फुल्लम् २५ प्रफुल्लम् २६। इति राजनिर्घण्टः॥ (यथा, आर्य्यासप्तशत्याम्। ४७६।

"यदवधिविकृष्टमात्रा विकसितकुसुमोत्करा प्रभाश्रेणी।
पीतांशुकप्रियेयं तदवधि पल्लीपतेः पुत्री॥")

विकसरः, त्रि, (विकसतीति। वि+कस गतौ+"स्रेग्भासपिसकसो वरच्।" ३। २। १७५। इति वरच्।) विकासशीलः। तत्पर्य्यायः। विकासी २। इत्यमरः॥ "विकसति कस ज गतौ दन्त्यान्तः यायाय भासकसेति वरे विकसरः। विकासः स्फुटने यक्षाविति दन्त्यान्ते धरणिः।

'कुशेशयेरेच जलाशयोषिता
मुदा रमन्ते कलभा विकसरैः।
प्रगीयते सिद्धगणैश्च योषिता
मुदा रमन्ते कलभा विकसरैः॥'

इति माघयमकेऽपि दन्त्यवत्त्वम्। (४।३३) कथ वधे मूर्द्धन्यान्त इत्यस्य रूपमिति केचित्। कथ शब्दे इत्यस्य तालव्यान्तस्य रूपमिति केचित्।" इति तट्टीकायां भरतः॥ (यथा, कथासरित्सागरे। ४। १५।

"एकस्याः सोत्सुका दृष्टिर्नृपालोकविकसरा।
श्रुतेः पार्श्वमपश्यन्त्याश्चक्षुराख्यातुमिवाययौ॥")

विकसरा, स्त्री, (विकसर+टाप्।) रक्तपुनर्नवा। इति राजनिर्घण्टः॥ (विवरणमस्या रक्तपुनर्नवाशब्दे ज्ञातव्यम्॥)

विकारः, पुं, (वि+कृ+घञ्।) प्रकृतेरन्यथाभावः। तत्पर्य्यायः। परिणामः २ विकृतिः ३ विक्रिया ४। इत्यमरः॥ विकृत्या ५। इति भरतः॥ केचित्तु पूर्व्वद्वयं प्रकृतिध्वंसजन्यविकारे यथा काष्ठस्य विकारो भस्म। मृत्पिण्डस्य घट इति। परद्वयं विकारमात्रे यथा मुखस्य विकृतिः क्रोधरक्तता। काष्ठस्य भस्म च। इति भरतः॥ (यथा, कुमारे। ७। ६५।

"अपि प्रयत्नसखिभ्यो दत्तवाचं कथञ्चित्
प्रमथ्यसुखविकारैर्हासयामास गूढम्॥"

प्रकृतिविकृतिः। यथा, हरिवंशे। २४६। ३५।

"शब्दः स्पर्शश्च रूपञ्च रसो गन्धस्तथैव च।
प्रकृतिश्च विकारश्च यच्चान्यत् कारणं महत्॥"

अस्य विशेषविवरणं विकृतिशब्दे द्रष्टव्यम्॥) रोगः। इति मेदिनी। रे, २१८॥ (यथा,—

"विकारो धातुवैषम्यं साम्यं प्रकृतिरुच्यते।
सुखसंज्ञकमारोग्यं विकारो दुःखमेव च॥"
इति चरके सूत्रस्थाने नवमेऽध्याये॥

मत्स्यः। तत्पर्य्यायो यथा,—

"मत्स्यो मीनो विकारश्च झषो वैग्घारिणो-
ऽण्डजः।
शकुलो पृथुरोमा च स सुदर्शन इत्यपि॥
रोहितायास्तु ये जीवास्ते मत्स्याः परिकीर्त्तिताः॥"

इति भावप्रकाशस्य पूर्व्वखण्डे द्वितीये भागे॥)

विकालः, पुं, (विरुद्धः कार्य्यानर्हः कालः।) दैवपैत्र्यादिकर्म्मणि विरुद्धकालः। बैकाल इति भाषा। तत्पर्य्यायः। सायः २ दिनान्तः ३ सायाह्नः ४ सायम् ५। इति शब्दरत्नावली॥ उत्सवः ६ विकालकः ७। इति त्रिकाण्डशेषः॥ (यथा, मार्कण्डेये। ३५। ३०।

"न लङ्घयेत् तथैवाक्ष्णः क्षीवनोदर्त्तनानि च।
नोद्यानादौ विकालेषु प्राज्ञस्त्रिस्तेत्कदाचन॥")

विकालकः, पुं, (विकाल एव। स्वार्थे कन्।) विकालः। इति त्रिकाण्डशेषः॥

विकालिका, स्त्री, (विज्ञातः कालो यया। कन्। टापि अत इत्वम्।) मानरम्भा। ताम्बी। इति त्रिकाण्डशेषः॥ ताँबी इति भाषा॥

विकाशः, पुं, (वि+काश दीप्तौ+घञ्।) रहः। प्रकाशः। इत्यमरटीकायां भरतः॥ विकाशो विजने स्फुटे। इत्यजयः॥ (यथा, राजतरङ्गिण्याम्। ४। १५५८।

"विकाशः केषाञ्चित् नयनविषमैर्व्विद्रुदये:
परेषामुज्जृम्भः अवणकटुभिर्द्दीर्घरसितैः।
नचेष्टा काव्यन्योपक्रतिपरिहीना जलमुचो
जड़ो वर्षादन्यं गणयति गुणं नास्य तु जनः॥")

विकाशनं, क्ली, (वि+काश+ल्युट्।) विकाशः। विपूर्ब्व-काश ङ दीप्तौ इत्यस्मात् अनट्प्रत्ययेन निष्पन्नम्॥

विकाशी, [न्] त्रि, (विकाशोऽस्यास्तीति। विकाश+इनिः।) विकाशशीलः। इत्यमरटीकायां रायमुकुटः॥ (यथा, मार्कण्डेये।

"कात्यायनीं तुष्टुवुरिष्टलाभात्
विकाशिवक्त्राब्जविकाशिताशाः॥")

विकाशी, [न्] त्रि, (विकाश+इनिः।) विकाशशीलः। इत्यमरटीकायां भरतः॥

विकासी, [न्] त्रि, (विकास+इनिः। विकासते इति। वि+कास+णिनिर्वा।) विकसरः। इत्यमरः॥

विकिरः, पुं, (विकिरति भक्षणार्थं भूमिमिति। वि+कृ विक्षेपे+इगुपधेति कः।) पक्षी। इत्यमरः॥ (अस्य पर्य्यायो यथा,—

"पक्षी खगो विहङ्गश्च विहगश्च विहङ्गमः।
शकुनिर्विः पतत्री च विष्किरो विकिरोऽण्डजः॥"

इति भावप्रकाशस्य पूर्व्वखण्डे द्वितीये भागे॥) कूपः। इति त्रिकाण्डशेषः॥ (विकीर्य्यते इति। वि+कृ+घञर्थे कः।) पूजाकालीनविप्रोत्सारणार्थक्षेपणीयतण्डुलादिः। यथा। ऋद्धिमिति सप्त जप्त्वा विकिरानादाय।

"अपसर्पन्तु ते भूता ये भूता भुवि संस्थिताः।
ये भूता विघ्नकर्त्तारस्ते नश्यन्तु शिवाज्ञया॥"
इति विकिरेत्॥

यथा,—

"लाजचन्दनसिद्धार्थभस्मदूर्व्वाकुशाक्षताः।
विकिरा इति सन्दिष्टाः सर्व्वविघ्नौघनाशकाः॥"
इति तन्त्रसारः॥

अग्निदग्धादीनां पिण्डम्। यथा, मनुः। ३।२४५।

"असंस्कृतप्रमीतानां योगिनां कुलयोषिताम्।
उच्छिष्टं भागधेयं स्याद्यच्च विकिरञ्च यः॥"

अपि च।

"पिण्डनिर्व्वापरहितं यत्तु श्राद्धं विधीयते।
स्वधावाचनलोपोऽत्र विकिरस्तु न लुप्यते॥"
इति श्राद्धतत्त्वम्॥

(यथा च मार्कण्डेये। ३१। १२।

"ये वा दग्धाः कुले बालाः क्रियायोग्या
ह्यसंस्कृताः।
विपन्नास्तेऽन्नविकिरसम्मार्জ্জनजलाग्निजः॥"*॥

जलविशेषे, क्ली। तथा च चिन्तामणिधृतवचनम्।

"नद्यादिनिकटे भूमिर्यत्र भवेद्वालुकामयी।
उद्भवते ततो यत्तु तज्जलं विकिरं विदुः॥
विकिरं शीतलं स्वच्छं निर्दोषं लघु च स्मृतम्।
तुवरं स्वादु पित्तघ्नं मनाक् कफकरं स्मृतम्॥")

विकिरणं, क्ली, (वि+कृ+ल्युट्। इत्वं रपरत्वम्।) विक्षेपणम्। विक्षिपनम्। विज्ञानम्। इति कृधात्वर्थदर्शनात्॥ (अर्कवृक्षे, पुं। इत्यमरः। २। ४। ८०॥)

विकीरणः, पुं, अर्कवृक्षः। इत्यमरः। २।४।८०॥ (तथास्य पर्य्यायः।

"अलर्को गुणरूपः स्याच्चन्दारो वसुकोऽपि च।
श्वेतपुष्पः सदापुष्पः सवालार्कः प्रतीयसः॥
रक्तोपरोऽर्कनामा स्यादर्कपर्णो विकीरणः।
रक्तपुष्पः शुक्लफलस्तथास्फोटः प्रकीर्त्तितः॥"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमभागे॥)

विकीर्णः, त्रि, (विकीर्य्यते स्मेति। वि+कृ+क्तः।) विक्षिप्तः। छड़ान इति भाषा॥ यथा,—

"अथ सा पुनरेव विक्लवा
वसुधालिङ्गनधूसरस्तनी।
विललाप विकीर्णमूर्द्धजा
समदुःखामिव कुर्व्वती स्थलीम्॥"
इति कुमारसम्भवे ४ सर्गः॥

विकीर्णरोम, [न्] क्ली, (विकीर्णानि रोमाण्यस्मिन्निति।) खौरेयम्। इति राजनिर्घण्टः॥

विकीर्णसंज्ञं, क्ली, (विकीर्णमिति संज्ञा यस्य।) खौरेयम्। इति राजनिर्घण्टः॥

विकुक्षिः, पुं, इक्ष्वाकुराजपुत्रः। यथा,—

"वैवस्वतमनोरासीदिक्ष्वाकुः पृथिवीपतिः।
तस्य पुत्रशतस्यासीद्विकुक्षिर्ज्येष्ठ उच्यते।
सोऽयोध्याधिपतिर्वीरस्तस्य षष्टश्च स्मृताः॥"
इति वह्निपुराणे सागरोपाख्याननामाध्यायः॥

विकुर्व्वाणः, त्रि, (विकुरुते इति। वि+कृ+शानच्।) हर्षमाणः। इत्यमरः॥ (त्रिकृति प्राप्ते च॥ यथा, सांख्यदर्शने। १। ६२।

"आकाशस्तु विकुर्व्वाणः स्पर्शमात्रं यदर्च्छया।
बलवानभवद्यस्मात्तस्य स्पर्शो गुणो मतः॥")

विकुस्रः, पुं, (विकसतीति। वि+कस+"वौ कसेः।" उणा० २। १५। इति रक्। उत्वञ्चो पधायाः।) चन्द्रः। इत्युणादिकोषः॥

विकूणिका, स्त्री, नासिका। इति हैमचन्द्रः॥
विकृतं, त्रि, (वि+कृ+क्तः।) वीभत्सम्। रोगितम्। असंस्कृतम्। इति मेदिनी। ते, १५८॥ (अङ्गविहीनम्। यथा, मनुः। ६। २४७।
"बालाञ्च न प्रमीयन्ते विकृतं न च जायते॥"
अप्रकृतिस्थः। यथा, महाभारते।३।१११।१८।
"अथर्ष्यशृङ्गं विकृतं समीक्ष्य
पुनः पुनः पीच्य च कायमस्य।
अवेक्ष्यमाणा ग्लनकेर्जगाम
क्लत्वाग्निहोत्रस्य तदापदेशम्॥"*॥
मायावी। यथा, रघुः। १२। ३६।
"लक्ष्मणः प्रथमं श्रुत्वा कोकिलामञ्जुवादिनीम्।
शिवाघोरखनां पश्चात् बुबुधे विकृतेति ताम्॥")
विकृतं, क्ली, विकारः। तस्य लक्षणम्। यथा,—
"श्रीमानेषादिभिर्यत्र नोच्यते स्वं विवक्षितम्।
वक्ष्यते चेष्टयैवेदं विकृतं तद्विदुर्बुधाः॥"
इत्युज्ज्वलनीलमणिः॥
प्रभवादिषष्टिसंवत्सरान्तर्गतचतुर्विंशोत्तरवर्षम्। यथा, भविष्यपुराणे।
भैरव उवाच।
"सर्व्वाः प्रजाः प्रपीड्यन्ते व्याधिः शोकश्च जायते।
शिरोवक्षोऽक्षिरोगाश्च पापाह्नि विकृते जनाः॥"
इति ज्योतिस्तत्त्वम्॥
(नायिकालङ्कारविशेषः। यथा, साहित्यदर्पणे। ३। १४६।
"वक्तव्यकालेऽप्यवचो व्रीड़या विकृतं मतम्॥")
विकृतिः, स्त्री, (वि+कृ+क्तिन्।) विकारः। इत्यमरः॥ (यथा, कुमारे। ७। ३४।
"यथाप्रदेशं भुजगेश्वराणां
करिष्यतामाभरणान्तरत्वम्।
शरीरमात्रं विकृतिं प्रपेदे
तथैव तस्थुः फणरत्नशोभाः॥")
रोगः। डिम्बः। मद्यादिः। इति हेमचन्द्रः॥ (सांख्योक्तविकृतिः। यथा, सांख्यकारिकायाम्। ३।
"मूलप्रकृतिरविकृति-
र्महदाद्याः प्रकृतिविकृतयः सप्त।
षोड़शकस्तु विकारो
न प्रकृतिर्न विकृतिः पुरुषः॥"
संक्षेपतः ग्राह्यस्य चतस्रो विधाः। कश्चिदर्थः प्रकृतिरेव कश्चिदर्थो विकृतिरेव कश्चित् प्रकृतिविकृतिरेव कश्चिदनुभयरूपः। तत्र का प्रकृतिरेवेत्यत उक्तं मूलप्रकृतिरविकृतिरिति। प्रकरोतीति प्रकृतिः प्रधानं सत्त्वरजस्तमसां साम्यावस्था सा प्रकृतिः प्रकृतिरेव इत्यर्थः। कस्मादित्यत उक्तम् मूलेति मूलञ्चासौ प्रकृतिश्चेति मूलप्रकृतिः विश्वस्य कार्य्यसंघातस्य सा मूलं च तस्या मूलान्तरमस्तीतिभावः। कतमाः पुनः प्रकृतिविकृतयः कियत्यश्च इत्यत उक्तं महदाद्याः प्रकृतिविकृतयः सप्तेति। प्रकृतयश्च ता विकृतयश्च ता इति। तथाहि महत्तत्त्वमहङ्कारस्य प्रकृतिर्विकृतिश्च मूलप्रकृतेः। एवमहङ्कारतत्त्वं तन्मात्राणामिन्द्रियाणाञ्च प्रकृतिर्विकृतिश्च महतः। एवं पञ्चतन्मात्राणि भूतानामाकाशादीनां प्रकृतयो विकृतयश्चाहङ्कारस्य। अथ का विकृतिरेव कियती च इत्यत उक्तं षोड़शकस्तु विकार इति षोड़शसंख्यापरिमितो गणः षोड़शकः। तु शब्दोऽवधारणे भिन्नक्रमश्च। पञ्चमहाभूतान्येकादशेन्द्रियाणि चेति षोड़शको गणो विकार एव न प्रकृतिरिति। यद्यपि पृथिव्यादीनामपि गोघटवृक्षादयो विकाराः एवं तद्विकारभेदानां दध्यङ्कुरादयस्तथापि गवादयो बीजादयो वा न पृथिव्यादिभ्य स्तत्त्वान्तरम्। तत्तान्तरोपादानत्वञ्च प्रकृतित्वमिहाभिप्रेतमिति न दोषः सर्व्वेषां गोघटादीनां स्थूलता इन्द्रियग्राह्यता च समेति न तत्त्वान्तरम्। अनुभयरूपमुक्तं तदाह न प्रकृतिर्न विकृतिः पुरुष इति तत्त्वकौमुदी॥ ३॥)
विकृष्टः, त्रि, विशेषेण कृष्टः। आकृष्टः। विपूर्ब्वकृषधातोः क्तप्रत्ययेन निष्पन्नः॥
विकृष्टकालः, पुं, (विकृष्टः कालः।) चिरकालः। यथा,—
"विकृष्टकालैर्यो वेगैर्मन्दैः समभिवर्त्तते।
क्षुद्रिका नाम सा छिक्का जन्तुमूलात् प्रधावति॥"
विकृष्टकालैः चिरेण। जन्तु कण्ठोरसोः सन्धिः। इति भावप्रकाशः॥
विकेशी, स्त्री, (विगतः केशो यस्याः। ङीष्।) केशवर्জ्जिता। पटवर्त्तिः। इति धरणिः॥ महीरूपशिवस्य पत्नी। यथा,—
"सूर्य्यो जलं मही वह्निर्वायुराकाशमेव च।
दीक्षितो ब्राह्मणः सोम इत्येतास्तनवः क्रमात्॥
सुवर्चला तथैवोषा विकेशी चापरा शिवा।
स्वाहा दिशस्तथा दीक्षा रोहिणी च यथाक्रमम्।
सूर्य्यादीनामिमाः पत्न्यो रुद्राद्यैर्नामभिः सह॥"
इति मार्कण्डेयपुराणे रुद्रसर्गः॥
विकोकः, पुं, वृकासुरपुत्रः। स च कल्किदेवेन हतः। यथा,—
"कल्किः कोकविकोकाभ्यां गदापाणिर्युधां पतिः।
युयुधे विप्लवे विष्णुर्लोकानां जनयन् भयम्॥
वृकासुरस्य पुत्रौ तौ नप्तारौ शकुनेर्हरिः।
तयोः कल्किः संयुयुधे मधुकैटभयोर्यथा॥
तयोर्गदाप्रहारेण चूर्णिताङ्गस्य भूपतेः।
करात्युतोऽपतद्भूमौ दृष्ट्वोचुरित्यहो जनाः॥
ततः पुनः क्रुधा विष्णुर्जगर्ज्जाशुर्महाभुजः।
नन्दकेन शिरस्तस्य विकोकस्याच्छिनत् प्रभुः॥"
इति कल्किपुराणे २१ अध्यायः॥
विकोषः, त्रि, (विगतः कोषो यस्य।) कोषरहितः। निष्कोषः। इति पुराणम्॥ (यथा, महाभारते। ३। ६२। १८।
"परिधावन्नथ नल इतश्चेतश्च भारत।
आससाद सभोद्देशे विकोषं खड्गमुत्तमम्॥"
आच्छादनरहितः। यथा, मनोः। ११। ६६। श्लोकटीकायां कुल्लूकः।
"गुरुभार्य्यागामी विकोषमेढ्रनत्वमिति॥")
विक्रः, पुं, (विक् इति कायति शब्दायते इति। कै+कः।) करिशावकः। इति त्रिकाण्डशेषः॥
विक्रमः, पुं, (विशेषेण क्रामतीति। वि+क्रम+अच्।) विष्णुः। यथा, विष्णुसहस्रनामस्तोत्रे।
"ईश्वरो विक्रमी धन्वी मेधावी विक्रमः क्रमः॥"
(वि+क्रम+घञ्।) शौर्य्यातिशयः। तत्पर्य्यायः। अतिशक्तिता २। इत्यमरभरतौ॥ (यथा, रघुः। १२। ८७।
"अन्योन्यदर्शनप्राप्तविक्रमावसरं चिरात्।
रामरावणयोर्युद्धं चरितार्थमिवाभवत्॥")
क्रान्तिमात्रम्। इति मेदिनी। मे, ५४॥ (पादविक्षेपः। यथा, रामायणे। १। १। १०।
"आजानुबाहुः सुशिराः सुललाटः सुविक्रमः॥")
विक्रमादित्यराजा। यथा,—
"धन्वन्तरिक्षपणकामरसिंहशङ्कु-
वेतालभट्टघटकर्परकालिदासाः।
ख्यातो वराहमिहिरो नृपतेः सभायां
रत्नानि वै वररुचिर्नव विक्रमस्य॥"
इति नवरत्नश्लोकः॥
चरणः। शक्तिः। इति राजनिर्घण्टः॥ (स्थितिः। यथा, भागवते। २। ८। २०।
"संभवः सर्व्वभूतानां विक्रमः प्रतिसंक्रमः।
इष्टापूर्त्तस्य काम्यानां त्रिवर्गस्य च यो विधिः॥"
"विक्रमः स्थितिः प्रतिसंक्रमो महाप्रलयः।"
इति तट्टीकायां श्रीधरस्वामी॥ *॥) प्रभवादिषष्टिसंवत्सरान्तर्गतचतुर्विंशोत्तरवर्षम्। यथा
"जायन्ते सर्व्वशस्यानि मेदिनी निरुपद्रवा।
लवणं मधु गव्यञ्च महार्घ्यं विक्रमे प्रिये॥"
इति ज्योतिस्तत्त्वम्॥
(स्वनामख्यातकविविशेषः। स च नेमिदूताख्यखण्डकाव्यं विरचितवान्। तथा च नेमिदूते उक्तम्।
"तद्ःखाय प्रचरकवितुः कालिदासस्य काव्या-
दन्त्यं पादं सुपदरचितान् मेघदूतादृहीत्वा।
श्रीमन्नेमेश्चरितविशदं साङ्गणस्याङ्गजन्मा
चक्रे काव्यं बुधजनमनःप्रीतये विक्रमाख्यः॥"
वत्सप्रीपुत्रः। यथा, मार्कण्डेये। ११७। १।
"तस्य तस्यां सुनन्दायां पुत्रा द्वादश जज्ञिरे।
प्रांशुः प्रवीरः शूरश्च सुचक्रो विक्रमः क्रमः॥")
विक्रमादित्यः, पुं, (विक्रमेणादित्य इव।) स्वनामख्यातो राजा। स च उज्जयनीदेशाधिपतिः संवत्कर्त्ता च। तत्पर्य्यायः। साहसाङ्कः २ शकारिः ३। इति जटाधरः॥ अस्य विवरणं द्वात्रिंशत्पुत्तलिकाकथायां तथा विक्रमार्कशब्दे च द्रष्टव्यम्॥ (मोदकविशेषः। यदुक्तं चिन्तामणौ। यथा,—
"घृते गुन्द्रपलं विंशत् पचेत् सम्यग्भिषग्वरः।
उत्तार्य्य च क्षिपेदेषां खण्डञ्च पलविंशतिः॥

तालमूली तुरङ्गी च शुण्ठी चेति पलार्द्धकम् ।
जातीफलञ्च कक्कोलं लवङ्गञ्चेति कार्षिकम् ॥
मालतीञ्च कुलिञ्जञ्च कवावं करभं त्वचम् ।
एतेषां कोलमात्राञ्च आयसस्य पलद्वयम् ॥
पलैकं मोदकं कृत्वा एकैकं भक्षयेद् दिने ।
धातुक्षीणोऽग्निक्षीणश्च बलानलकरं परम् ॥
नेत्ररोगेषु सर्व्वेषु कासश्वासे च कामले ।
प्रमेहान् विंशतिं हन्याद्विक्रमादित्यमोदकः ॥”

विक्रमार्कः, पुं, (विक्रमेण अर्क इव ।) विक्रमादित्यः । इति केचित् ॥ (अथ विक्रमार्कवर्णनं सन्दधाति ज्योतिर्व्विदाभरणसमाप्तौ श्रीकालिदासः ।

“वर्षे श्रुतिस्मृतिविचारविवेकरम्ये
श्रीभारते खधृतिसम्मित-१८० देशपीठे ।
मत्तोऽधुनाकृतिरियं सति मालवेन्द्रे
श्रीविक्रमार्कनृपराजवरे समासीत् ॥”

प्रथमं नृपसभायां पण्डितवर्गं वर्णयति ।

“शङ्कुः सुवाग् वररुचिर्म्मणिरंशुदत्तो
जिष्णुस्त्रिलोचनहरी घटकर्पराख्यः ।
अन्येऽपि सन्ति कवयोऽमरसिंहपूर्व्वा
यस्यैव विक्रमनृपस्य सभासदोऽमी ॥
सत्यो वराहमिहिरः श्रुतसेननामा
श्रीवादरायणमणित्थकुमारसिंहाः ।
श्रीविक्रमार्कनृपसंसदि सन्ति चैते
श्रीकालतन्त्रकवयस्त्वपरे मदाद्याः ॥
धन्वन्तरिक्षपणकामरसिंहशङ्कु-
वेतालभट्टघटखर्परकालिदासाः ।
ख्यातो वराहमिहिरो नृपतेः सभायां
रत्नानि वै वररुचिर्नव विक्रमस्य ॥”

अथ परिजनान् वर्णयति ।

“अश्वौ यस्य घृतानि मण्डलधराधीशाः सभायां सदा
स्युः संसत्परिणाहकोटिसुभटाः सत्पण्डिताः षोड़श ।
देवज्ञा दश षण्मिताश्च भिषजो भट्टास्तथा पड्डिनो
वेदज्ञा रसचन्द्रमा १६ विजयते श्रीविक्रमः सोऽधिभूः ॥”

अथास्य सैन्यं वर्णयति ।

“यस्याष्टादशयोजनानि कटके पादातिकोटित्रयम् ३०००००० वाहानामयुतायुतञ्च १०००००००० नवतेस्त्रिघ्ना कृति-२४३०० र्हस्तिनाम् ।
नौकालक्षचतुष्टयं ४००००० विजयिनो यस्य प्रयाणे भवेत्
सोऽयं विक्रमभूपतिर्व्विजयते नान्यो धरित्रीतले ॥”

अथास्य प्राकप्रवृत्तिं दर्शयति ।

“येनास्मिन् वसुधातले शकगणान् सर्व्वा दिशः सङ्गरे
हत्वा पञ्चनवप्रमान् ५५५५५५५५ कलियुगे शाकप्रवृत्तिः कृता ।
श्रीमद्विक्रमभूभुजा प्रतिदिनं मुक्तामणिस्वर्णगो
सम्पीभाद्यपवर्ज्जनेन विहितो धर्म्मः सुवर्णाननः ॥”

अथास्य दिग्विजयमाह ।

“उद्दामद्रविड़द्रुमैकपरशुर्लाटाटवीपावको
वल्गद्वङ्गभुजङ्गराजगरुड़ो गौड़ाब्धिकुम्भोद्भवः ।
गर्ज्जद्गुर्ज्जरराजसिन्धुरहरिर्धारान्धकारार्यमा
काम्भोजाम्बुजचन्द्रमा विजयते श्रीविक्रमार्कोनृपः ॥”

अथास्य प्रभुत्वादिगुणान् वर्णयति ।

“येनाणुग्रमहीधराग्रविषये दुर्गाण्यसह्यान्यहो
नीत्वा यानि नतीकृतान्यदधिया दत्तानि तेषां पुनः ।
इन्द्राम्भोधमरद्रुमस्मरसुरच्छाभृङ्गीनाङ्गसा
श्रीमद्विक्रमभूभृताखिलजनाभ्योजेन्दुना मण्डले ॥”

अस्य पुरीं वर्णयति ।

“यद्राजधान्युज्जयिनी महापुरी
सदा महाकालमहेशयोगिनी ।
समाश्रितप्राग्यपवर्गदायिनी
श्रीविक्रमार्कोऽवनिपो जयत्यपि ॥
यो रूमदेशाधिपतिं शकेश्वरं
जित्वा गृहीत्वोज्जयिनीं महाहवे ।
आनीय सम्भाव्य सुमोच तन्त्वहो
श्रीविक्रमार्कः समसह्यविक्रमः ॥
तस्मिन् सदा विक्रममेदिनीशे
विराजमाने समवन्तिकायाम् ।
सर्व्वप्रजामण्डलसौख्यसम्पदभूव सर्व्वत्र च वेदकर्म्म ॥
शङ्कादिपण्डितवराः कवयस्त्वनेके
ज्योतिर्व्विदः समभवंस्तु वराहपूर्व्वाः ।
श्रीविक्रमार्कनृपसंसदि मान्यबुद्धिस्तैरप्यहं नृपसखा किल कालिदासः ॥”

इति ज्योतिर्व्विदाभरणम् ॥)

विक्रमी, [न्] पुं, (विक्रमोऽस्यास्तीति । विक्रम + इनिः ।) सिंहः । इति राजनिर्घण्टः ॥ विष्णुः । यथा,—

“ईश्वरो विक्रमी धन्वी मेधावी विक्रमः क्रमः ।”

इति महाभारते अनुशासनपर्व्वणि तस्य सहस्रनामस्तोत्रे १४६ अध्याये २२ श्लोकः ॥ अतिशक्तिविशिष्टे, त्रि ॥ (यथा, महाभारते । १ । १२८ । २८ ।

“प्राणवान् विक्रमी चैव शौर्य्येण महतान्वितः ।
सार्द्धते चापि सहितानस्थानेको दृकोदरः ॥”)

विक्रयः, पुं, (विक्रयणमिति । वि + क्री + “एरच् ।” ३ । ३ । ५६ । इति अच् ।) विक्रयणक्रिया । बेचा इति भाषा ॥ तत्पर्य्यायः । विपणः २ । इत्यमरः ॥ विपणनम् ३ पणनम् ४ । इति शब्दरत्नावली ॥ व्यवहारः ५ पणायाः ६ । इति जटाधरः ॥ अस्य विहिताविहितनक्षत्राणि यथा,—

“यमाग्निशक्राग्निजलाग्नपूर्व्वा
नेष्टाः क्रये विक्रयणे प्रशस्ताः ।
पौष्णाग्निचित्राग्नतविन्दुवाताः
क्रये हिता विक्रयणे निषिद्धाः ॥”

इति ज्योतिःसारसंग्रहः ॥ * ॥

क्रयविक्रयनिर्णयो यथा । मूल्यं दास्यामीति कृत्वा ग्रहणादपि क्रयसिद्धिः । तथा च विवादचिन्तामणौ कात्यायनः ।

“पण्यं गृहीत्वा यो मूल्यमदत्त्वैव दिशं व्रजेत् ।
ऋतुत्रयस्योपरिष्टात् तद्धनं वृद्धिमाप्नुयात् ॥”

अतएव वृहस्पतिः ।

“गृहचैत्यादिकं क्रीत्वा तुल्यमूल्याक्षरान्वितम् ।
पत्रं कारयते यत्तु क्रयलेख्यं तदुच्यते ॥”

क्रयविक्रये समयविशेषाभ्यन्तरे पश्चात्तापादसिद्धिः । यथा मनुः ।

“क्रीत्वा विक्रीय वा किञ्चित् यस्येहानुशयो भवेत् ।
सोऽन्तर्दशाहे तद्द्रव्यं दद्याच्चैवाददीत वा ॥”

एतद्व्याज्ञवल्क्योक्तेतरपरम् । यथा याज्ञवल्क्यः ।

“दशैकपञ्चसप्ताहमासञ्चार्द्धमासिकम् ।
बीजायोबाह्यरत्नस्त्रीदोह्यपुंसां परीक्षणम् ॥”

अत्र वृहस्पतिः ।

“अतोऽर्व्वाक् पण्यदोषस्तु यदि संजायते क्वचित् ।
विक्रेतुः प्रतिदेयन्तत् क्रेता मूल्यमवाप्नुयात् ॥”

अतस्तद्द्रव्यपरीक्षणकालात् । कात्यायनः ।

“अविज्ञातन्तु यत् क्रीतं दुष्टं पश्चाद्विभावितम् ।
क्रीतं तत् स्वामिने देयं पण्यं कालेऽन्यथा न तु ॥”

काले प्रागुक्तपरीक्षाकालाभ्यन्तरे । परीक्षिते तु वृहस्पतिः ।

“परीक्षेत स्वयं पण्यं अन्येनाथ प्रदर्शयेत् ।
परीक्षितं बहुमतं गृहीत्वा न पुनस्त्यजेत् ॥”

अत्र विशेषयति नारदः ।

“क्रीत्वा मूल्येन यो द्रव्यं दुष्क्रीतं मन्यते क्रयी ।
विक्रेतुः प्रतिदेयं तत् तस्मिन्नेवाहृविच्चितम् ॥
द्वितीयेऽह्नि ददत् क्रेता मूल्यात्त्रिंशांशमाहरेत् ।
द्विगुणन्तु तृतीयेऽह्नि परतः क्रेतुरेव तत् ॥”

आहरेत् दद्यात् विक्रेत्रे इति शेषः । द्विगुणं त्रिंशांशस्य । याज्ञवल्क्यः ।

“राजदैवोपघातेन पण्ये दोष उपागते ।
हानिर्विक्रेतुरेवासौ याचितस्याप्रयच्छतः ॥”

नारदः ।

“उपहन्येत वा पण्यं दह्येतापहियेत वा ।
विक्रेतुरेव सोऽनर्थो क्रीयासंप्रयच्छतः ॥
दीयमानं न गृह्णाति क्रीतं पण्यन्तु यः क्रयी ।
स एवास्य भवेद्दोषो विक्रेतुर्योऽप्रयच्छतः ॥”

इति प्रायश्चित्ततत्त्वम् ॥ * ॥

अपि च ।

“न्यासं कृत्वा परत्राधिं कृत्वा वाधिं करोति च ।
विक्रयं वा क्रियां तत्र पश्चिमा बलवत्तरा ॥”

न्यासं कृत्वा आधिं करोति आधिं कृत्वा वा विक्रयं करोति। विक्रयपदं स्वत्वध्वंसकत्वात् दानं लक्षयति परा क्रिया सिद्धेत्यर्थः। एवञ्च विक्रेतृदात्रोर्मरणादिना आधुद्धारे विक्रयदाने तत्कर्तृतुल्यस्वत्वजननात् तत्र ततृक्रेतृप्रतिग्रहीतृभ्यामाधुद्धारः कार्य्यः। इति। तत्र च।

"न च स्थावरस्य समस्तस्य गोचसाधारणस्य च।
नैकः कुर्य्यात् क्रयं दानं परस्परमतं विना॥
विभक्ता अविभक्ता वा सपिण्डाः स्थावरे समाः।
एको ह्यनीशः सर्व्वत्र दानाधमनविक्रये॥"

इति व्यासवचनाभ्यामेकस्य दानबन्धकविक्रयाधिकारः इति वाच्यं यथेष्टविनियोगार्हत्वरूपस्य स्वत्वस्य द्रव्यान्तर इवाचाप्यविशेषात् वचनञ्च स्वामित्वेन दुर्व्वृत्तपुरुषगोचरविक्रयादिना कुटुम्बविरोधादधर्म्मज्ञापनार्थनिषेधरूपं न तु विक्रयाद्यनिष्पत्त्यर्थमिति दायभागः॥ * ॥ एवञ्च।

"स्थावरे विक्रयो नास्ति कुर्य्यादाधिमनुज्ञया॥"

इति स्थावरस्य केवलविक्रयप्रतिषेधात् एवं भूमिं यः प्रतिगृह्णातीत्यादिवचने दानप्रशंसादर्शनाच्च विक्रयेऽपि कर्त्तव्ये सहिरण्यमुदकं दत्त्वा दानरूपेण स्थावरविक्रय इति विज्ञानेश्वरः॥ वस्तुतस्तु स्थावरविक्रयनिषेधो अविभक्तस्थावरविषयः। तत्रापि यदि विक्रयं विना अवस्थितिर्न भवति तदा विक्रयः कर्त्तव्यः। पूर्व्वपुरुषार्জ्जितनष्टोद्धारे विशेषयति मिताक्षरायाम्।

"स्थावरं द्विपदञ्चैव यद्यपि स्वयमर्জ्जितम्।
असम्भूय सुतान् सर्व्वान् न दानं न च विक्रयः॥"

इत्यादि॥

अस्यापवादमाह।

"एकोऽपि स्थावरे कुर्य्यादानाधमनविक्रयम्।
आपत्काले कुटुम्बार्थे धर्म्मार्थे च विशेषतः॥"

इति दायतत्त्वम्॥

द्रव्यविशेषविक्रयनिषेधो यथा। स्मृतिः।

"विक्रीणन् मद्यमांसानि ह्यभक्ष्यस्य च भक्षणम्।
कुर्व्वन्नगम्यागमनं शूद्रः पतति तत्क्षणात्॥
कपिलाक्षीरपानेन ब्राह्मणीगमनेन च।
वेदाक्षरविचारेण शूद्रश्चाण्डालतां व्रजेत्॥"

कालिकापुराणम्।

"विक्रयं सर्व्ववस्तूनां कुर्व्वन् शूद्रो न दोषभाक्।
मधु चर्म्म सुरां लाक्षां लवणं मांसञ्च पञ्चमम्॥"

मनुः।

"सद्यः पतति लौहेन लाक्षया लवणेन च।
त्र्यहेण शूद्रीभवति ब्राह्मणः क्षीरविक्रयात्॥
अभक्ष्यो भेषजस्यार्थे यज्ञहेतोस्तथैव च।
यद्यवश्यन्तु विक्रेयास्तिला धान्येन तत्समाः॥"

इत्याह्निकतत्त्वम्॥

"गवां विक्रयकारी च गवि लोमानि यानि च।
तावद्वर्षसहस्राणि गवां गोष्ठे क्रिमिर्भवेत्॥"

इति यमवचनम्॥

"गोवधोऽयाज्यसंयाज्यपारदार्य्यात्मविक्रयाः।
तड़ागारामदाराणामपत्यस्य च विक्रयः।
भृताचाध्ययनादानमपण्यानाञ्च विक्रयः॥"

इत्यादि मानवे ११ अध्याये उपपातकमध्ये गणितम्॥

विक्रयणं, क्ली, (वि+क्री+ल्युट्।) विक्रयः। यथा,

"यमाहिषुष्ट्राश्वमिथुताग्नपूर्व्वा
नेष्टाः क्रये विक्रयणे प्रशस्ताः।
पौष्णाग्निचित्राश्वतविन्दुवाताः
क्रये हिता विक्रयणे निषिद्धाः॥"

इति ज्योतिःसारसंग्रहः॥

विक्रयिकः, पुं, (विक्रयेण जीवतीति। विक्रय+"वस्नक्रयविक्रयात् ठन्।" ४।४।१३। इति ठन्। यद्वा, विक्रीणातीति। वि+क्री+"क्रिय इकन्।" उणा० २।४४। इति इकन्।) विक्रेता। इत्यमरः॥ (यथा, महाभारते। १२।३६।३०।

"दीक्षितस्य कदर्य्यस्य क्रतुविक्रयिकस्य च।
तक्ष्णश्चर्म्मावकर्त्तुञ्च पुंश्चल्या रजकस्य च।
चिकित्सकस्य यच्चान्नमभोज्यं रक्षिणस्तथा॥")

विक्रयी, [न्] त्रि. (विक्रीणातीति। वि+क्री+णिनिः।) विक्रयकर्त्ता। इति शब्दरत्नावली॥ (यथा, याज्ञवल्क्ये। २।१७३।

"क्रेता मूल्यमवाप्नोति तस्मात् यस्तस्य विक्रयी॥")

विक्रान्तं, क्ली, (वि+क्रम+क्तः।) वैक्रान्तमणिः। इति राजनिर्घण्टः॥ (त्रिविक्रमावतारस्य विष्णोर्द्वितीयपादक्षेपेण अन्तरिक्षं विक्रान्तमिति ख्यातम्। तथा च वाजसनेयसंहितायाम्। १०।१६।

"विष्णोर्विक्रमणमसि। विष्णोर्विक्रान्तमसि। विष्णोः क्रान्तमसि।"

"हे द्वितीयप्रक्रम त्वं विष्णोर्विक्रान्तं द्वितीयपादप्रक्षेपेण जितमन्तरिक्षमसि।" "इमे वै लोका विष्णोर्विक्रमणं विष्णोर्विक्रान्तं विष्णोः क्रान्तमिति श्रुतेः।" इति तद्भाष्ये महीधरः॥)

विक्रान्तः, पुं, (वि+क्रम+क्तः।) शूरः। इत्यमरः॥ (वाच्यलिङ्गेऽपि दृश्यते। यथा, सुद्राराक्षसे। १।

"विक्रान्तैर्नयशालिभिः सुसचिवैः श्रीर्व्वक्रनासादिभिः॥")

सिंहः। इति राजनिर्घण्टः॥ (महालसागर्भजात-ऋतध्वजपुत्रः। यथा, मार्कण्डेये। २५।८।

"महालसायाः सञ्जज्ञे पुत्रः प्रथमजस्ततः।
तस्य चक्रे पिता नाम विक्रान्त इति धीमतः॥"

हिरण्याक्षपुत्रविशेषः। यथा, हरिवंशे। ३। ७८—७९।

"हिरण्याक्षसुताः पञ्च विद्वांसः सुमहाबलाः।
शकुनिश्चैव भूतसन्तापनस्तथा।
महानाभश्च विक्रान्तः कालनाभस्तथैव च॥")

विक्रान्तिः, स्त्री, (वि+क्रम्+क्तिन्।) अश्वगतिः। तत्पर्य्यायः। प्लावितम् २। इति चिकाङ्क्षेषः॥ विक्रमश्च॥ (यथा, राजतरङ्गिण्याम्। ४।१२६।

"पार्थिवः पृथुविक्रान्तिर्युधि क्रोधं समोचयः॥"

पादन्यासः। यथा, शुक्लयजुर्व्वेदीये। १।२।२।१६।

"विष्णुर्व्यक्रमतामिति यज्ञो वै विष्णुः स देवेभ्य इमां विक्रान्तिं विचक्रमे येषामिमं विक्रान्तिरिदमेव प्रथमेन पदेन पस्पाराथेदमन्तरिक्षं द्वितीयेन दिवमुत्तमेनैनां वेवैव एतस्मै विष्णुर्यज्ञो विक्रान्तिं विक्रमते॥")

विक्रायकः, पुं, (विक्रीणातीति। वि+क्री+ण्वुल्।) विक्रेता। इति हेमचन्द्रः। ३।५३२॥ (यथा, महाभारते। ५।३८।४।

"चिकित्सकः शल्यकर्त्तावकीर्णी-
स्तेनः क्रूरो मद्यपो भ्रूणहा च।
सेनाजीवी श्रुतिविक्रायकश्च
भृत्यं प्रियोऽप्यतिथिर्नोदकार्हः॥")

विक्रियाः, स्त्री, (विकरणमिति। वि+कृ+"कृञः श्च।" ३।३।१००। इति श्चः। टाप्।) विकारः। इत्यमरः॥ (यथा, रघुः।१३।७१।

"प्रस्रस्तुप्रकृतिजनितानविक्रियांश्च
प्लक्षान् प्ररोहजटिलानिव मल्लिकृक्षान्॥"

प्रकृतेरन्यथाभावः। यथा, मार्कण्डेये। ३५।२।

"अस्नेहाश्चापि गोधूमयवगोरसविक्रियाः॥"

विरुद्धा क्रिया। विरुद्धकार्य्यम्। यथा, रघुः। १५।४८।

"इत्याप्तवचनादाभो विनेष्यन् वर्णविक्रियाम्।
दिशः प्रपात प्रत्येकं वेगनिष्कम्पकेतुना॥")

विक्रीतः, त्रि, (वि+क्री+क्तः।) कृतविक्रयः। यथा, बृहस्पतिः।

"नास्तिकश्चैव कुरुते तद्धनं ज्ञातिभिः सकम्।
अदत्तत्यक्तविक्रीतं कृत्वा स्वं लभते धनी॥"

इति प्रायश्चित्ततत्त्वम्॥

विक्रुष्टं, त्रि, (वि+क्रुष+क्तः।) निष्ठुरम्। इति हेमचन्द्रः॥

विक्रेता, [तृ] त्रि, (विक्रीणातीति। वि+क्री+तृच्।) विक्रयकर्त्ता। तत्पर्य्यायः। विक्रयिकः २। इत्यमरः॥ विक्रयी ३। इति शब्दरत्नावली॥ विक्रायकः ४। इति हेमचन्द्रः॥ (यथा, याज्ञवल्क्यः। २।१७३।

"विक्रेतुर्दोषजातं शुद्धिः स्वामी द्रव्यं नृपो दमम्।
क्रेता मूल्यमवाप्नोति तस्माद्यस्तस्य विक्रयी॥")

विक्रेयं, त्रि, (विक्रीयते इति। वि+क्री+"अचो यत्।"३।१।९७। इति यत्।) विक्रययोग्यद्रव्यम्। तत्पर्य्यायः। पणितव्यम् २ पण्यम् ३। इत्यमरः॥ विक्रययोग्यायोग्यानि यथा,—

"इदन्तु वृत्तिवैकल्यात्त्यजतो धर्म्मनैपुणम्।
विट्पण्यसुकृतोद्धारं विक्रेयं वित्तवर्द्धनम्॥
सर्व्वानुसानपोहेत क्षतान्नञ्च तिलैः सह।
अश्मनो लवणञ्चैव पशवो ये च मानुषाः॥
सर्व्वञ्च तान्तवं रक्तं शाणक्षौमाविकानि च।
अपि चेत् स्युररक्तानि फलमूले तथौषधीः॥
अपः शुष्कं विषं मांसं सोमं गन्धांश्च सर्व्वशः।

क्षीरं क्षौद्रं दधि घृतं तैलं मधु गुडं क्रमात् ॥
अरण्यांश्च पशून् सर्व्वान् दंष्ट्रिणश्च वयांसि च।
मद्यं नीलीञ्च लाक्षांञ्च सर्व्वांश्चैकशफांस्तथा ॥
कामसुत्पाद्य कृष्यादि स्वयमेव कृषीवलः।
विक्रीणीत तिलान् शुद्धान् धर्म्मार्थमचिर-
स्थितान् ॥"
इति मानवे १० अध्यायः ॥

विक्लवः, त्रि, (विक्लवते इति। वि+क्लु+पचाद्यच्।) विह्वलः। इत्यमरः ॥ (यथा, माघे। १२। ६३।
"नूनं सहायेन वियोगविक्लवा
पुरः पुरस्त्रीरपि निर्ययौ तदा ॥" * ॥
क्लीबे, दुःखम्। यथा, रामायणे। २।४४।२५।
"किमिदानीमिदं देवि! करोति हृदि विक्लवम्॥")

विक्लिन्नः, त्रि, (वि+क्लिद्+क्तः।) जरसा जीर्णः। शीर्णः। आर्द्रः। इति मेदिनी। ने, १३३ ॥

विक्षतः, त्रि, (वि+क्षण+क्तः।) विशेषेण क्षतः। (यथा, महाभारते। २। ४६। ३३।
"अङ्गारेण विनिर्गच्छन् द्वारसंस्थानरूपिणा।
अभिहत्य शिलां भूयो ललाटेनास्मि विक्षतः॥")

विक्षावः, पुं, (विक्षवणमिति। वि+क्षु+"वौ क्षुश्रुवः।" ३। ३। २५। इति घञ्।) शब्दः। इत्यमरः ॥ (यथा, भट्टिः। ७। ३६।
"यात यूयं यमस्यायं दिशं नायेन दक्षिणाम्।
विक्षावैस्तोयविस्रावं तर्ज्जयन्तो महोदधेः॥")
कासः। इति स्वामिकलिङ्गौ। इति भरतः ॥

विक्षिप्तः, त्रि, (वि+क्षिप्+क्तः।) त्यक्तः। (यथा, महाभारते। १। २७। ७।
"वायुविक्षिप्तकुसुमैस्तथान्यैरपि पादपैः॥")
कम्पितः। यथा, भागवते। ८। ८। ४६।
"स व्रीड़स्मितविक्षिप्तभ्रूविलासावलोकनैः।
दैत्यदृष्यपचेतःसु कामसुद्दीपयन् मुहुः॥"
क्लीबे चित्तवृत्तिविशेषः। यथा, पातञ्जलभाष्ये। १।
"क्षिप्तं मूढं विक्षिप्तमेकाग्रनिरुद्धमितिचित्तभूमयः॥" "क्षिप्तादिष्वियं विक्षिप्तमितिमणिप्रभा॥")

विक्षीरः, पुं, (विशिष्टं क्षीरं यत्र।) अर्कवृक्षः। इति राजनिर्घण्टः ॥

विक्षेपः, पुं, (वि+क्षिप्+घञ्।) प्रेरणम्। त्यागः। विक्षेपणम्। यथा,—
"नैर्ऋत्यामिषुविक्षेपमतीत्य ह्यधिकं भुवम्॥"
इत्याद्याह्निकाचारतत्त्वम् ॥
(कम्पनम्। यथा, कुमारे। १। १३।
"लाङ्गूलविक्षेपविसर्पिशोभै-
रितस्ततश्चन्द्रमरीचिगौरैः।
यस्यार्थयुक्तं गिरिराजशब्दं
जुर्व्वन्ति वालव्यजनैश्चमर्यः॥")
अद्वितीयवस्त्ववलम्बनेन चित्तस्य अन्यावलम्बनम्। इति वेदान्तसारः।

विक्षेपशक्तिः, स्त्री, (विक्षेपाय शक्तिः।) मायाशक्तिः। यथा। रज्ज्वज्ञानं स्वावृतरज्जौ स्वशक्त्या सर्पादिकमुद्भावयति। एवं अज्ञानमपि स्वावृतात्मनि तथा विक्षेपशक्त्या आकाशादिप्रपञ्चमुद्भावयति तादृशं सामर्थ्यम्। इति वेदान्तसारसुबोधिनीटीका ॥

विखः, त्रि, (विख्यः। निपातनात् यलोपः।) गतनासिकः। इति भरतद्विरूपकोषः ॥

विखनाः, [स्] पुं, ब्रह्मा। यथा,—
"न खलु गोपिकानन्दनो भवा-
नखिलदेहिनामन्तरात्मदृक्।
विखनसार्थितो विश्वगुप्तये
सख उदेयिवान् सात्वतां कुले ॥"
इति श्रीभागवते। १०। ३१। ४ ॥

विखुः, त्रि, (विगता नासिका यस्य। बहुलवचनात् नासिकायाः खुः।) गतनासिकः। इति भरतद्विरूपकोषः ॥

विखुरः, पुं, राक्षसः। इति त्रिकाण्डशेषः ॥
चौरः। इति संक्षिप्तसारोणादिवृत्तिः ॥

विख्यः, त्रि, (विगता नासिकास्येति। "ख्यश्च।" ८। ४। २८। इत्यस्य वार्त्तिकोक्त्या नासिकायाः ख्यः।) गतनासिकः। इति केचित् ॥

विख्यातः, त्रि, ख्यात्यापन्नः। विपूर्ब्बख्याधातोः क्तप्रत्ययेन निष्पन्नः ॥ (यथा, महाभारते। १। ६७। ३२।
"चन्द्रवर्म्मेति विख्यातः काम्बोजानां नराधिपः॥")

विख्यातिः, स्त्री, प्रसिद्धिः। सुख्यातिः। विपूर्ब्बख्याधातोः क्तिप्रत्ययेन निष्पन्नः ॥

विख्यापनं, क्ली, (वि+ख्या+णिच्+ल्युट्।) आख्यानम्। विपूर्ब्बख्याख्याधातोरनट्प्रत्ययेन निष्पन्नम् ॥

विखुः, } त्रि, (विगता नासिका यस्य। "खुविखुः, } खौ च वक्तव्यौ।" इति नासिकाया खुः खुश्च।) अनासिकः। इति हेमचन्द्रः ॥ छिन्ननासिकः। इति शब्दरत्नावली ॥

विगणनं, क्ली, (वि+गण+ल्युट्।) ऋणमुक्तिः। इति त्रिकाण्डशेषः ॥ (यथा, याज्ञवल्क्यः। १। ३। ३६।
"संमाननोत्सञ्जनाचार्य्यकरणज्ञानभृतिविगणनव्ययेषु नियः॥" "विगणनं ऋणादेर्निर्यातनम्।" इति काशिका ॥)

विगतः, त्रि, (वि+गम+क्तः।) प्रभारहितः। ततपर्य्यातः। निष्प्रभः २ अरोकः ३। इत्यमरः ॥ वीतः ४। इति रुद्रः ॥ विशेषेण गतः। इति हेमचन्द्रः ॥ (यथा, माघे। ११। २६।
"विगततिमिरपङ्कं पश्यति व्योम यावत्
ध्रुवति विरहखिन्नः पक्षती यावदेव।
रथचरणसमाक्रान्तावदौत्सुक्यवन्ध्या
सरिदपरतटान्तादागता चक्रवाकी ॥")

विगतश्रीकः, त्रि, श्रीरहितः। विगता श्रीर्यस्य इति बहुव्रीहौ कप्रत्ययेन निष्पन्नः ॥

विगतार्त्तवा, स्त्री, (विगतं आर्त्तवं रजो यस्याः।) पञ्चपञ्चाशद्वर्षेभ्य ऊर्द्धं निवृत्तरजस्का। तत्पर्य्यायः। निष्कली २ निष्कला ३ निष्फली ४ निष्फला ५ विकली ६ विकला ७। इति शब्दरत्नावली ॥

विगमः, पुं, (वि+गम+"अवहृदृनिश्विगमश्च।" ३। ३। ५८। इति अप्।) नाशः। यथा। एकदण्डिनो वेदान्तिनस्तु यदुपाध्यनवच्छिन्नस्य ब्रह्मणो विशुद्धरूपता तादृशोपाधिविगम एव कैवल्यम्। चिदण्डिनस्तु आनन्दमयपरमात्मनि जीवात्मनो लयो मोक्षः। जीवात्मपरमात्मनोरभेदेऽपि उपाधिविशेषविशिष्टस्यात्मनो जीवरूपतया तस्यौपाधिकः परमात्मभेदः। इति भेदकोपाधिविगम एव जीवस्य परमात्मनि लयः। यथा घटाकाशस्य घटविगम एव शुद्ध आकाशे तस्य लयः। लिङ्गशरीरावच्छिन्नस्येवात्मनो जीवभाव इति लिङ्गशरीरनाश एव पर्य्यवसितो मोक्षः। इति मुक्तिवादः ॥ (विच्छदः। यथा, भागवते। १। १३। ४३।
"यथा क्रीड़ोपस्कराणां संयोगविगमादिह।
इच्छया क्रीड़ितुः स्यातां तथैवेशेच्छया
नृणाम् ॥")

विगन्धकः, पुं, (विरुद्धो गन्धो यस्मिन्। बहुव्रीहिलक्षणः कः।) इङ्गुदीवृक्षः। इति राजनिर्घण्टः ॥

विगन्धिका, स्त्री, हपुषा। इति राजनिर्घण्टः ॥

विगर्हणं, क्ली, (वि+गर्ह+ल्युट्।) निन्दनम्। भर्त्सनम्। (यथा, हरिवंशे। ७६। २३।
"क्षणे च भवतो द्वेष्ये वसुदेवविगर्हणात् ॥")

विगर्हणा, स्त्री, (वि+गर्ह+णिच्+युच्। टाप्।) निन्दनम्। भर्त्सनम्। (यथा, महाभारते। १२। ११४। २१।
"विगर्हणां परमदुरात्मना कृतां
सहेत यः संसदि दुर्ज्जनानरः ॥")

विगर्हितः, त्रि, (विशेषेण गर्हितः।) निन्दितः। (यथा, नैषधे। १। १३१।
"न केवलं प्राणिवधो वधो मम
त्वदीक्षणादिश्वसितान्तरात्मनः।
विगर्हितं धर्म्मधनैर्निषेवणं
विशिष्य विश्वासजुषां द्विषामपि ॥")
निषिद्धः। इति विपूर्ब्बगर्हधातोः क्तप्रत्ययेन निष्पन्नः ॥

विगलितः, त्रि, (विशेषेण गलितः।) स्खलितः। यथा, गीतगोविन्दे ५ सर्गे।
"विगलितवसनं परिहृतरसनं
घटय जघनमपिधानम्।
किसलयशयने पङ्कजनयने
निधिमिव हर्षनिधानम् ॥"

विगाढः, त्रि, (विगाह्यते स्मेति। वि+गाह+क्तः।) स्नातः। अवगाहितः। विपूर्ब्बगाहधातोः क्तप्रत्ययेन निष्पन्नः ॥ (प्रगाढः। यथा, महाभारते। ३। ४६। ५।
"निर्गम्य चन्द्रोदयने विगाढे रजनीमुखे।
प्रस्थिता सा पृथुश्रोणी पार्थस्य भवनं प्रति ॥")

विगानं, क्ली, (विरुद्धं गानं परस्य।) निन्दा। इति हेमचन्द्रः ॥

विगाहमानः, त्रि, (वि + गाह + शानच् ।) विलोड़नकर्त्ता । अवगाहनकर्त्ता । विपूर्ब्बगाहधातोः शानप्रत्ययेन निष्पन्नः ॥ (यथा, रघुः । १३ । १ ।
"अथात्मनः शब्दगुणं गुणज्ञः
पदं विमानेन विगाहमानः ।
रत्नाकरं वीक्ष्य मिथः स जायां
रामाभिधानो हरिरित्युवाच ॥")

विगुणः, त्रि, (विपरीतो गुणो यस्य ।) गुणवैपरीत्यविशिष्टः । यथा,—
"यथा मनो ममाचष्ट नेयं माता तथा मम ।
विगुणेष्वपि पुत्रेषु न माता विगुणा भवेत् ॥"
इति मार्कण्डेयपुराणे वैवस्वतमन्वन्तराध्यायः ॥
(स्वल्पः । यथा, भागवते । ७ । ६ । ४८ ।
"सर्व्वं त्वमेव सगुणो विगुणश्च भूमन्
नान्यत् त्वदस्त्यपि मनो वचसा निरुक्तम् ॥"
गुणहीनः । यथा, शिशुपालवधे । ६ । १२ ।
"अवसन्नतापमतमिस्रमभा-
दपदोषतेव विगुणस्य गुणः ॥")

विगूढः, त्रि, (विशेषेण गूढः ।) गर्हितः । गुप्तः । इति मेदिनी । ढे, ६—१० ॥

विग्रः, त्रि, (विगता नासिकास्य । "वेर्ग्रीवक्त्रयः ।" ८ । ४ । २८ । इत्यस्य वार्त्तिकोक्त्या नासिकायाः ग्रः ।) गतनासिकः । इत्यमरः ॥*॥ (त्रि,"विविधं गृह्णात्यर्थानिति विपूर्ब्बात् ग्रहातेः 'अन्येभ्यपि दृश्यते ।' इति डः ।" इति देवराजयज्वा । मेधावी । इति निघण्टुः । ३ ।१५॥ यथा, ऋग्वेदे । १ । ४ । ४ ।
"परेहि विग्रमस्तृतमिन्द्रं पृच्छाविपश्चितम् ॥")

विग्रहः, पुं, (विविधं सुखदुःखादिकं गृह्णातीति । वि + ग्रह + अच् । यद्वा, विविधैर्दुःखादिभिर्गृह्यते इति । वि + ग्रह + "ग्रहवृदृनिश्चिगमश्च ।" ३ । ३ । ५८ । इति अप् ।) शरीरम् । (यथा, रघुः । ११ । १३ ।
"विग्रहेण मरुतस्य चारुणा
सोऽभवत् प्रतिनिधिर्न कर्म्मणा ॥")

युद्धम् । इत्यमरः ॥ (यथा, मनुः । ७ । १६० ।
"सन्धिञ्च विग्रहञ्चैव यानमासनमेव च ।
द्वैधीभावं संश्रयञ्च षड्गुणांश्चिन्तयेत् सदा ॥"
विरोधमात्रम् । यथा, रघुः । ६ । ४७ ।
"त्यजत मानमलं वत विग्रहै-
र्न पुनरेति गतं चतुरं वयः ।
परभृताभिरितीव निवेदिते
किमरमते रमते स्म वधूजनः ॥")

विभागः । इति मेदिनी । हे, २३ ॥ (यथा, भागवते । १ । ३१ । ३ ।
"भासेन तु शिरो दाभ्यां बाहूरुग्राद्यङ्ग-
विग्रहः ।
नखलोमास्थिमर्म्माणि शिल्पिच्छिन्नोद्भव-
स्त्विभिः ॥")

वाक्यभेदः । स तु समासवाक्यम् । तत्पर्य्यायः । विस्तरः २ । इत्यमरः ॥ (वीनां पक्षिणां ग्रहो ग्रहणमिति वाक्ये विहङ्गग्रहणम् । यथा, वक्रोक्तिपञ्चाशिकायाम् । ४ ।
"नो सन्धा हितमत्सरा तव तनौ वत्स्याम्यहं सन्धिना
न प्रीतासि वरोरु चेत्कथय तत् प्रस्तौमि किं विग्रहम् ।
कार्य्यं तेन न किञ्चिदस्ति गृह मे वीनां ग्रहे-णीति वो
दिग्धाङ्गः प्रतिवद्धकेलिशिखयोः श्रेयांसि वक्रोक्तयः ॥")

देवविग्रहकरणादिप्रमाणं श्रीमूर्त्तिशब्दे द्रष्टव्यम् ॥

विग्रहः, पुं क्ली, (विगृह्यन्ते ग्रन्थवो यस्मिन् । वि + ग्रह + अप् ।) युद्धम् । इत्यमरः ॥ (यथा, मनुः । ७ । १७० ।
"यदा ग्रहृष्टा मन्येत सर्व्वास्ता: प्रकृतीर्भृशम् ।
अत्युच्छ्रितं तथात्मानं तदा कुर्व्वीत विग्रहम् ॥")

विग्रहावरं, क्ली, (विग्रहमावृणोतीति । आ + वृ + अच् ।) पृष्ठम् । इति शब्दचन्द्रिका ॥

विघटिका, स्त्री, (विभक्ता घटिका यया ।) पलम् । इति राजनिर्घण्टः ॥

विघट्टितं, त्रि, विशेषेण चालितम् । विपूर्ब्बघट्टधातोः क्तप्रत्ययेन निष्पन्नम् ॥ (यथा, हरिवंशे । ८५ । १ ।
"सूर्य्यस्य विविधवर्णाः पवनेन विघट्टिताः करा: साभ्रे ।
वियति धनुःसंस्थाना ये दृश्यन्ते तदिन्द्रधनुः ॥")

विद्रुम् । यथा, माघे । ८ । २४ ।
"चस्खन्नौ चलशफरीविघट्टितोरु-
र्वामोरूरतिश्रमभाप विभ्रमस्य ॥")

विघसं, क्ली, (विशेषेण अद्यते इति । वि + अद् + "उपसर्गेऽदः ।" ३ । ३ । ५६ । इति अप् । "घञपोश्च ।" २ । ४ । ३८ । इति घसृलआदेशः ।) सिक्थकम् । इति राजनिर्घण्टः ॥

विघसः, पुं, (वि + अद् + अप् ।) भोजनशेषः । इत्यमरः ॥ देवपित्रतिथिगुर्व्वादिभुक्तस्य शेषः । इति भरतः ॥ (यथा, मनुः । ३ । २८५ ।
"विघसाशी भवेन्नित्यं नित्यं वाम्नतभोजनः ।
विघसो भुक्तशेषन्तु यज्ञशेषं तथामृतम् ॥")

आहारः । इति शब्दरत्नावली ॥ (यथा,—
"अयि वनप्रिय ! विश्रुत एव किं
बलिभुजो विघसो भवताधुना ।
यदनयैव कुचूरिति विद्यया
न पलतश्चरणौ धरणौ तव ॥"
इत्युद्भटः ॥)

विघातः, पुं, (विशेषेण हननमिति । वि + हन + घञ् ।) आघातः । यथा, अमरे ।
"दृष्टिर्वर्षं तद्विघातेऽवग्राहावग्रहौ समौ ॥"
आघातः । (यथा, महाभारते ।
"चक्रे शरविघातञ्च क्रीड़न्निव पितामहः ॥"
विनाशः । यथा महाभारते । १ । २६ । १३ ।
"क्षुत्पिपासाविघातार्थं भक्ष्यमाख्यातु मे भवान् ॥")

विघाती, [न्] त्रि, निवारकः । घातकः । विघातशब्दादिनिप्रत्ययेन विपूर्ब्बहनधातोर्ग्रहादित्वात् णिनिप्रत्ययेन वा निष्पन्नः ॥ (यथा, हरिवंशे । ८७ । ४५ ।
"एवमूर्ज्जितवीर्य्यस्य ममामरविघातिनः ॥")

विघ्नः, पुं, (विहन्यते अनेनेति । वि + हन + "घञर्थे कविधानम् ।" ३ । ३ । ५८ । इत्यस्य वार्त्तिकोक्त्या कः ।) आघातः । तत्पर्य्यायः । अन्तरायः २ प्रत्यूहः ३ । इत्यमरः ॥ (यथा सुन्दरात्तसे । २ ।
"प्रारभ्यते न खलु विघ्नभयेन नीचै:
प्रारभ्य विघ्ननिहता विरमन्ति मध्याः ।
विघ्नैः पुनः पुनरपि प्रतिहन्यमाना
प्रारब्धमुत्तमगुणास्त्यमिवोद्वहन्ति ॥"
क्षणपाकफला । इति शब्दचन्द्रिका ॥ शेषार्थे अमरे अविघ्न इति पाठः ॥

विघ्नकारी, [न्] त्रि, (विघ्नं कर्त्तुं शीलमस्येति । कृ + णिनिः ।) घोरदर्शनः । विघाती । इति मेदिनी । नि, २५५ ॥

विघ्ननायकः, पुं, (विघ्नानां नायकः विघ्नाधीश्वरत्वात् ।) गणेशः । इति शब्दरत्नावली ॥

विघ्ननाशकः, पुं, (विघ्नानां नाशकः ।) गणेशः । इति शब्दरत्नावली ॥

विघ्ननाशनः, पुं, (नाशयतीति नाशनः विघ्नानां नाशनः ।) गणेशः । इति शब्दरत्नावली ॥

विघ्नराजः, पुं, (विघ्नानां राजा । "राजाहः सखिभ्यष्टच् ।" ५ । ४ । ९१ । इति टच् ।) गणेशः । इत्यमरः ॥ (यथा, कथासरित्सागरे । २० । १०१ ।
"आर्य्यपुत्र पुरा गत्वा विघ्नराजमपूजयत् ॥")

विघ्नविनायकः, पुं, (विघ्नानां विनायकः ।) गणेशः । इति काशीखण्डः ॥

विघ्नहारी, [न्] पुं, (विघ्नं हर्त्तुं शीलमस्य इति । हृ + णिनिः ।) गणेशः । इति त्रिकाण्डशेषः ॥ विघ्ननाशके, त्रि ॥

विघ्नितः, त्रि, जातविघ्नः । विघ्नोऽस्य जात इत्यर्थे विघ्नशब्दादितच् प्रत्ययेन निष्पन्नः ॥

विघ्नेशः, पुं, (विघ्नानां ईशः ।) गणेशः । इति शब्दरत्नावली ॥ (यथा कथासरित्सागरे । २० । ८३ ।
"विघ्नोऽत्र तव जातोऽयं विना विघ्नेशपूजनम् ॥")

विघ्नेशवाहनः, पुं, (विघ्नेशस्य वाहनः ।) मूषकः । इति राजनिर्घण्टः ॥

विघ्नेशानकान्ता, स्त्री, (विघ्नेशानस्य गणेशस्य कान्ता प्रिया । तत् पूजायां एतस्याः प्राशस्त्यात् । श्वेतदूर्व्वा । इति राजनिर्घण्टः ॥

विङ्कः पुं, अश्वखुरः । इति त्रिकाण्डशेषः ॥

विच, इर् लि ध ओ अ पृथक्त्वे । इति कविकल्पद्रुमः ॥ (अदा०-क्रा०-रुधा०-च-उभ०-अक०-सकच-अनिट् ।) इर्, अविचत् । अवैचीत् । लि, अ, वेवेक्ति वेविक्ते मूर्खात् पण्डितः पृथक् स्यादित्यर्थः । विच इति जान्तो यः स एव चान्तोऽपि प्रयुज्यते कस्यचिदनुरोधात्

तेन निर्ज्जा खेरेणुरित्यस्य वृत्तौ विजग्रहणेनैवास्य ग्रहणात् खेर्गुणः। ध ञ, विनक्ति विङ्क्ते। विविनक्ष्मि दिवः सुरान् इति पृथक् करोमीत्यर्थः। औ, वेत्ता। इति दुर्गादासः॥

विचकिलः, पुं, मल्लीप्रभेदः। मदनकवृक्षः। इति मेदिनी। ले,१६४॥ (यथा, राजेन्द्रकर्णपूरे।७०।
"कुन्दः कन्दलितश्चर्यं विचकिलः कम्याकुलं केतकः
सातङ्कं मदनः सदैन्यमलसं सुक्तोऽतिमुक्तद्रुमः॥")

विचक्षणः, पुं, (विशेषेण चष्टे धर्म्मादिमुपदिशतीति। वि+चक्ष+"अनुदात्तेतश्च हलादेः।" ३।२।१४६। इति कर्त्तरि युच्।) पण्डितः। इत्यमरः॥ (यथा रघुवंशे। ५। १६।
"ततो यथावद् विहिताध्वराय
तस्मै स्वयावेशुविवर्ज्जिताय।
वर्णाश्रमाणां गुरवे सवर्णी
विचक्षणः प्रस्तुतमाचचक्षे॥")
निपुणे, त्रि। इति राजनिर्घण्टः॥ (यथा भागवते। १। ५। १६।
"विचक्षणोऽस्यर्हति वेदितुं विभो
अनन्तपारस्य निवृत्तितः सुखम्॥"
नानार्थदर्शी। यथा ऋग्वेदे। ४। ५३। २
"विचक्षणः प्रथयन्नापृणन्नुर्व्वंजीजनत् सविता सुम्नमुक्थ्यम्।"
"विचक्षणः विविधं द्रष्टा।" इति तद्भाष्ये सायणः॥)

विचक्षणा, स्त्री, नागदन्ती। इति राजनिर्घण्टः॥

विचक्षुः, [स्] त्रि, (विगतं प्रत्यक्षितेऽपि वस्तुनि अपगतं चक्षुर्यस्य।) विमनाः। इति त्रिकाण्डशेषः॥ (विगते नष्टे चक्षुषी यस्य।) विगतचक्षुषि, त्रि॥ (यथा, महाभारते। १२। ६५। ३४।
"अन्तरा विलयं यान्ति यथा पथि विचक्षुषः॥*"॥
विगृष्टे चक्षुषी यस्य सः। वृष्णिवंशीयः कश्चिद् योद्धा। यथा, हरिवंशे। १४१। ६।
"कृतवर्म्मा सुदंष्ट्रश्च विचक्षुररिमर्दनः॥")

विचयनं, क्ली, (विशेषेण चयनम्।) मार्गणम्। इत्यमरः॥

विचर्च्चिका, स्त्री, (विशेषेण चर्च्चाते पाणिपादस्य त्वक् विदार्य्यते अनया इति। चर्च्च तर्जने+"रोगाख्यायां खुल् बहुलम्।"३।३।१०८। इति खुल्। टापि अत इत्वम्।) रोगविशेषः। विकच इति भाषा। तत्पर्य्यायः। कच्छूः २ पाम ३ पामा ४। इत्यमरः॥ अपि च।
"कच्छुः कच्छूः पाम पामा पादरोगे विचर्च्चिका।"
इति शब्दरत्नावली॥*॥
तद्रोगधर्म्म यथा,—
"करवीरं भृङ्गराजं लवणं कुष्ठकर्कटम्।
चतुर्गुणेन सूत्रेण पचेत्तैलं हरेत्ततः।
पामां विचर्च्चिकां कुष्ठमभ्यङ्गाद्धि व्रणानि वै॥"
इति गारुडे २८७ अध्यायः॥*॥

अन्यच्च।
"मरीचं त्रिवृतं कुष्ठं हरितालं मनःशिला।
देवदारु हरिद्रे द्वे कुष्ठं मांसी च चन्दनम्॥
विश्वाला करवीरश्च अर्कक्षीरं सकृत् फलम्।
एषाञ्च कार्षिको भागो विषस्यार्द्धपलं भवेत्॥
प्रस्थं कटुकतैलस्य गोमूत्रेऽष्टगुणे पचेत्।
मृत्पात्रे लौहपात्रे वा मृन्मर्द्दनेन पचेत्॥
पामा विचर्च्चिका चैव दद्रुविष्फोटकानि च।
अभ्यङ्गेन प्रणश्यन्ति कोमलत्वञ्च जायते॥
प्रसृतान्यपि श्वित्राणि तैलेनानेन म्रक्षयेत्।
चिरोत्थितमपि श्वित्रं विवर्णं तत्क्षणाच्छमेत्॥"
इति गारुडे १६८ अध्यायः॥*॥

खल्वकुष्ठविशेषः। यथा।
"एकं कुष्ठं स्फुटं पूर्व्वं गजचर्म्म ततः स्फुटम्।
ततश्चर्म्मदलं प्रोक्तं ततश्चापि विचर्च्चिका॥
विपादिकाभिधा सैव पामा कच्छूस्ततः परा।
ततो दद्रुश्च विष्फोटः किटिमञ्च ततः परम्॥
ततश्चालमकं प्रोक्तं व्यङ्गारुश्च ततः परम्।
क्षुद्रकुष्ठानि चैतानि कथितानि भिषग्वरैः॥
सकण्डुः पिड़का श्यावा बहुस्रावा विचर्च्चिका॥"
पिड़का क्षुद्रपिड़का।
"दार्य्यते त्वक् खरा रूक्षा जान्वोर्ज्जङ्घा विचर्च्चिका।
पादे विपादिका ज्ञेया स्थानभेदाद्विचर्च्चिका॥"
दार्य्यते विदार्य्यते। केचिद्विचर्च्चिकातो विपादिकां विभिन्नमाहुः। इति भावप्रकाशः॥ (सा च महापातकश्लेषभोगचिह्नं वैदिककर्म्मप्रतिबन्धिका च। यथा, शुद्धितत्त्वधृतभविष्यपुराणीयमध्यतन्त्रे षष्ठाध्याये।
"शृणु कुष्ठगणं विप्र उत्तरोत्तरतो गुरुम्।
विचर्च्चिका तु दुश्चर्म्मा चर्च्चरीयस्तृतीयकः॥
विकर्च्चेर्व्रणताम्रौ च क्षयाश्चेते तथाष्टकम्।
एषां मध्ये तु यः कुष्ठी गर्हितः सर्व्वकर्म्मसु॥
व्रणवत् सर्व्वगात्रेषु गण्डे भाले तथानसि।
मृते च प्रोपयेत् तीर्थे अथवा तरुमूलके॥"
कदाचित् अग्निजन्यभूमिकम्पेऽपि विचर्च्चिका उत्पद्यते। यथा बृहत्संहितायाम्। ३२।१४।
"आग्नेयेऽम्बुदनाशः
सलिलाशयसङ्क्षयो नृपतिवैरम्।
दद्रुविचर्च्चिकाज्वर-
विसर्पिकाः पाण्डुरोगश्च॥")

विचलः, त्रि, अस्थिरः। विपूर्ब्बचलधातोरल्-प्रत्ययेन निष्पन्नः॥

विचलितः, त्रि, पतितः। स्खलितः। विपूर्ब्बचलधातोः क्तप्रत्ययेन निष्पन्नः॥ (यथा, मनुः। ७। २८।
"दण्डो हि सुमहत् तेजो दुर्द्धरश्चाकृतात्मभिः।
धर्म्माद्विचलितं हन्ति नृपमेव सबान्धवम्॥")

विचारः, पुं, (विशेषेण चरणं प्रदार्थादिनिर्णये ज्ञानमिति। वि+चर+घञ्।) तत्त्वनिर्णयः। इति व्यवहारतत्त्वम्॥ सन्दिग्धे वस्तुनि प्रमाणैरर्थपरीक्षणं विमर्शमात्रमिति केचित्। इति भरतः॥ तत्पर्य्यायः। तर्कः २ निर्णयः ३ गुह्या ४ चर्च्चा ५। इति त्रिकाण्डशेषः॥ संख्या ६ विचारणा ७। इत्यमरः॥ चर्च्चनम् ८ संख्यानम् ९। इति तट्टीका॥ विचारणम् १० वितर्कः ११ ऊहः १२ वूहः १३ ऊहः १४ वितर्कणम् १५। इति शब्दरत्नावली॥ प्रत्यिधानम् १६ समाधानम् १७। इति जटाधरः॥ (यथा, कथासरित्सागरे। ३६। ८८।
"न चैवं क्षमते नारी विचारं मारमोहिता।
यदियं क्रमते राज्ञी तव काम्यं विपन्नतम्॥"
नाट्योक्तलक्षणविशेषः। तल्लक्षणं यथा, साहित्यदर्पणे। ६। ४४७।
"विचारो युक्तवाक्येर्यदप्रत्यक्षार्थसाधनम्॥")

विचारणं, क्ली, (वि+चर+णिच्+ल्युट्।) विचारः। इति शब्दरत्नावली॥ (यथा, भागवते। १२। १३। १८।
"तच्च ज्ञानविरागभक्तिसहितं नैष्कर्म्ममाविष्कृतम्।
तच्छृण्वन् सुपठन् विचारणपरो भक्त्या विमुच्येन्नरः॥"
"एकस्मिन् धर्म्मिणि विरुद्धनानार्थविमर्शो विचारणम्। स च संशयस्त्रिधा स्यात् एको विशेषादर्शने समानधर्म्मदर्शनात्। अस्त्विन्द्रद्युम्नः। द्वितीयो विशेषादर्शनमात्रे। अत्र शब्दो नित्योऽनित्यो वा। तृतीयोऽसाधारणधर्म्मजः यथा भूर्नित्या अनित्या वा। अत्र गन्धोऽसाधारणधर्म्मः विशेषमपश्यन् संशेते गन्धाधिकरणं नित्यं अनित्यं वेति दिक्।" इति। "विचारणे पूर्व्वस्य।" इति श्रीपतिदत्तकृतकालतत्त्वपरिशिष्टे गोपीनाथतर्कार्च्चार्य्यः॥)

विचारणा, स्त्री, (वि+चर+णिच्+युच्। टाप्।) विचारः। इत्यमरः॥ (यथा, देवीभागवते। १। १८। ४२।
"जीवो ब्रह्म सदैवाहं नात्र कार्य्या विचारणा।
भेदबुद्धिस्तु संसारे वर्त्तमाना प्रवर्त्तते॥")
मीमांसाशास्त्रम्। इति हेमचन्द्रः॥

विचारणीयं, त्रि, विचार्य्यम्। विपूर्ब्बण्यन्त(णिजन्त) चरधातोरनीयप्रत्ययेन निष्पन्नम्। क्ली, शास्त्रम्। इति हेमचन्द्रः॥

विचारितः, त्रि, (विचारः संजातोऽस्य इति विचार+"तदस्य संजातं तारकादिभ्य इतच्।" ५। २। ३६। इति इतच्।) कृतविचारः। तत्पर्य्यायः। विन्नः २ वित्तः ३। इत्यमरः॥ (यथा, मनौ। ११। २८।
"आपत्कल्पेन यो धर्म्मं कुरुतेऽनापदि द्विजः।
स नाप्नोति फलं तस्य परत्रेति विचारितम्॥")

विचार्य्यं, त्रि, विचारितव्यम्। विचारणीयम्। विपूर्ब्बचरधातोर्ण्यान्तात् यप्रत्ययेन निष्पन्नम्॥ (यथा, मार्कण्डेये। ६६। १८।

"द्वाःस्थैनां दुष्टहृदयामादाय विजने वने।
परित्यजाशु नैतत्ते विचार्य्यं वचनं मम॥")

विचालं, त्रि, अभ्यन्तरम्। अन्तरालम्। इति हेमचन्द्रः॥ (पुं, संख्यान्तरापादनम्। यथा, पाणिनौ। ५। ३। ४३। "अधिकरणे विचाले च॥")

विचिः, पुं स्त्री, (विवेक्ति जलानि पृथगिव करोति। विच्+"इगुपधात् कित्।" उणा० ४। ११६। इन्। स च कित्।) वीची। तरङ्गः। इत्यमरटीकायां भरतः॥

विचिकित्सा, स्त्री, (विचिकित्सनमिति। वि+कित+सन्+अः। टाप्।) सन्देहः। इत्यमरः॥ (यथा, भागवते। ३। ६। ३६।
"तुभ्यं मद्विचिकित्सायामात्मा मे दर्शितोऽबहिः।
नालेन सलिले मूलं पुष्करस्य विचिन्वतः॥")

विचित्रं, क्ली, (विशेषेण चित्रम्।) कर्ब्बुरवर्णः। इति शब्दरत्नावली॥ तद्वति, त्रि। (यथा, महाभारते। ३। ५४। १०।
"विचित्रमाल्याभरणैर्ब्बलेर्दृप्तैः खलङ्कृतैः॥")
आश्चर्य्यम्। यथा,—
"विचित्रमिदमाख्यातं भगवन् भवता मम।
देव्याश्चरितमाहात्म्यं रक्तबीजवधाश्रितम्॥"
इति देवीमाहात्म्यम्॥
(यथा च, उपदेशशतके। ३३।
"दुहिता विदेहभर्त्तुर्द्दाशरथेर्भामिनी सीता।
वधमाप राक्षसीनां विधेर्विचित्रा गतिर्ब्बोध्या॥")

पुं, रौच्यमनुपुत्रः। यथा, मार्कण्डेये। ९४। ३१।
"चित्रसेनो विचित्रश्च नयतिर्नर्भयो दृढः।
सुनेत्रः चित्रबुद्धिश्च सुव्रतश्चैव तत्सुताः॥"
अर्थालङ्कारविशेषः। यथा, साहित्यदर्पणे। १०। ७२२।
"विचित्रं तद्विरुद्धस्य कृतिरिष्टफलाय चेत्।
यथा,—
प्रणमत्युन्नतिहेतोर्जीवनहेतोर्विमुञ्चति प्राणान्।
दुःखीयति सुखहेतोः को मूढः सेवकादन्यः॥")

विचित्रकः, पुं, (विविधानि चित्राणि यस्मिन्। बहुव्रीहौ कन्।) भूर्ज्जवृक्षः। इति राजनिर्घण्टः॥

विचित्रदेहः, पुं, (विचित्रा देहा यस्य सः।) मेघः। इति शब्दचन्द्रिका॥ आश्चर्य्यशरीरे नानावर्णदेहे च, त्रि॥

विचित्रवीर्य्यः, पुं, (विचित्राणि वीर्य्याणि यस्य सः।) चन्द्रवंशीयराजविशेषः। स च शान्तनोर्दाशकन्यायां जातः। तस्य क्षेत्रे सत्यवत्याज्ञया व्यासो धृतराष्ट्रं पाण्डुञ्च जनयामास। इति श्रीभागवतमतम्॥

विचित्रवीर्य्यसूः, स्त्री, (विचित्रवीर्य्यस्य सूः प्रसूर्जननी।) सत्यवती। इति शब्दरत्नावली॥

विचित्रा, स्त्री, (विचित्रं नानाविधवर्णमस्त्यस्या इति। अर्शं आदित्वादच्। स्त्रियां टाप्।) रुगेर्व्वारुः। इति राजनिर्घण्टः॥

विचित्राङ्गः, त्रि, (विचित्राणि अङ्गानि यस्य।) मयूरः। इति शब्दरत्नावली॥ आम्रः। इति शब्दचन्द्रिका॥ आश्चर्य्यशरीरे, त्रि॥

विचित्रितः, त्रि, (विचित्रमस्य जातमिति। विचित्र+इतच्।) नानावर्णयुक्तः। यथा,—
"आसनं सर्व्वशोभाढ्यं सद्रत्नमणिनिर्म्मितम्।
विचित्रितञ्च चित्रेण गृह्यतां शोभनं हरे॥"
इति ब्रह्मवैवर्त्ते श्रीकृष्णजन्मखण्डे ८ अध्यायः॥

विची, स्त्री, (विचि+कृदिकारादिति ङीष्।) तरङ्गः। इति विरूपकोषः॥

विचेताः, [स्] त्रि, (विगतं विरुद्धं वा चेतो यस्य।) विगतचित्तः। (यथा, भागवते। ६। ११। ६।
"एवं सुरगणान् क्रुद्धो भीषयन् वपुषा रिपून्।
अनदत् सुमहाप्राणो येन लोका विचेतसः॥")
विरुद्धचित्तः। दुष्टचित्तः॥ तत्पर्य्यायः। दुर्म्मनाः २ अन्यमनाः ३ विमनाः ४। इति हेमचन्द्रः॥ (यथा, महाभारते। ३। ४६। १७।
"ये चास्य सचिवा मन्दाः कर्णशौबलकादयः।
ते तस्य भूयसो दोषान् वर्द्धयन्ति विचेतसः॥"॥
विप्लुष्टं चेतो यस्मादिति। विप्लुष्टज्ञानहेतुभूतः। यथा, ऋग्वेदे। १। ८३। १।
"तमित् पृणन्ति वसुना भवीयसा
सिन्धुमापो यथाभितो विचेतसः॥"
"विचेतसः विप्लुष्टज्ञानहेतुभूता आपो यथा अभितः सर्व्वासु दिक्षु सिन्धुं समुद्रं पूरयन्ति तद्वत्।" इति तद्भाष्ये सायणः॥ ॥ विप्लुष्टं चेतो यस्येति। विप्लुष्टज्ञानः। यथा, ऋग्वेदे। १। ४५। २।
"मुष्टीवानो हि दाशुषे देवा अग्ने विचेतसः॥"
"हे अग्ने विचेतसो विप्लुष्टप्रज्ञाना देवाः।" इति तद्भाष्ये सायणः॥)

विचेष्टितः, त्रि, (विशेषेण चेष्टितं गतिर्यस्य।) विगतः। (विशेषेण चेष्टितः।) ईहितः। इति मेदिन्यां चेष्टितशब्दार्थदर्शनात्॥ (विगतं चेष्टितमस्येति वाक्ये चेष्टाशून्यश्च॥॥ क्ली, वि+चेष्ट+भावे क्तः। विशेषेण चेष्टा। यथा, भागवते। १। ५। १३।
"उरुक्रमस्याखिलबन्धमुक्तये
समाधिनानुस्मर तद्विचेष्टितम्॥")

विच्छ, क त्विषि। इति कविकल्पद्रुमः (चुरा०-पर०-अक०-सेट्।) क, विच्छयति। त्विषि दीप्तौ। इति दुर्गादासः॥

विच्छ, ग्र गतौ। इति कविकल्पद्रुमः॥ (तुदा०-पर०-सक०-सेट्।) विच्छायति विच्छायते आयन्तत्वादुभयमिति वोपदेवः। पक्षे विच्छति। ग्र, विच्छती विच्छन्ती। इति दुर्गादासः॥

विच्छन्दकः, पुं, ईश्वरसङ्घभेदः। इत्यमरः॥ विप्लुष्टच्छन्दोऽभिप्रायोऽत्र विच्छन्दकः। किंवा विप्लुष्टेच्छानिर्म्मितो विच्छन्दकः। ढके कादिति कः। एवं लक्षणमुपन्यस्तं साङ्ख्येन। यथा,—
"उपर्य्युपरि यद्गेहं तद्विच्छन्दकसंज्ञकम्॥"
इति भरतः॥

विच्छर्दकः, पुं, विच्छन्दकः। इत्यमरटीकायां रायमुकुटः॥

विच्छाया, स्त्री, पक्षिणां छाया। इत्यमरः॥ समासे षष्ठ्यन्तात् परा च्छाया स्त्रीत्वे स्यात्। सा चेत् बहूनां सम्बन्धिनी स्यात्। स्वयमुदाहरति। वीनां पक्षिणां छाया विच्छायम्। इत्यमरटीकायां भरतः॥ (यत्तु भागवते। १०। १२। ८।
"विच्छायाभिः प्रधावन्तो गच्छन्तः साधु हंसकैः॥"
इति दृश्यते तत्तु वेः पक्षिणश्छाया विच्छाया तत एकशेषद्वन्द्वे कृते विच्छायास्ताभिर्विच्छायाभिरिति सिद्धं स्यादिति सुधीभिर्विभाव्यम्॥॥ विगता च्छाया यस्य।) छायारहिते, त्रि॥ (विगता च्छाया कान्तिर्यस्य। कान्तिरहिते च त्रि। यथा, भागवते। १। १४। २४।
"विलोक्योद्विग्नहृदयो विच्छायमनुजं नृपः।
पृच्छति स्म सुहृन्मध्ये संस्मरन्नारदेरितम्॥")

विच्छायः, पुं, (विश्लिष्टा छाया कान्तिर्यस्य।) मणिः। इति यान्तवर्गे छायाशब्दटीकायां भरतः॥

विच्छित्तिः, स्त्री, (वि+छिद्+क्तिन्।) अङ्गरागः। विच्छेदः॥ (यथा, कामन्दकीयनीतिसारे। १४। ४४।
"लोभो धर्म्मक्रियालोपः कर्म्मणामप्रवर्त्तनम्।
सत्समागमविच्छित्तिरसद्भिः सह वर्त्तनम्॥")
हारभेदः। इति मेदिनी। ते, १८५॥ छेदः। विनाशः। इति त्रिकाण्डशेषः॥ (यथा, हरिवंशसंहितायाम्। १२। ६।
"दिनकरस्थमार्गविच्छित्तयेऽभ्युद्यतं यच्चलमङ्गम्॥")
अङ्गहारः। गेहावधिः। इति हेमचन्द्रः॥ (वैचित्र्यम्। यथा, साहित्यदर्पणे। १०। ७११।
"अनुमानन्तु विच्छित्त्या ज्ञानं साध्यस्य साधनात्॥"
स्त्रीणां स्वाभाविकालङ्कारविशेषः।) यथा,—
"आकल्पकल्पनाल्पापि विच्छित्तिः कान्तिपोषकृत्॥"
इत्युज्ज्वलनीलमणिः॥
(यथा च साहित्यदर्पणे। ३। १३८।
"श्लोकाप्याकल्परचना विच्छित्तिः कान्तिपोषकृत्॥")

विच्छिन्नः, त्रि, (वि+छिद्+क्तः।) समालब्धः। विभक्तः। इति मेदिनी। ने, १३४॥ (यथा, शाकुन्तले १ अङ्के।
"यदालोके लक्ष्यं व्रजति सहसा तद्विपुलतां
यदन्तर्व्विच्छिन्नं भवति कृतसन्धानमिव तत्।
प्रकृत्या यद्वक्रं तदपि समरेखं नयनयो-
र्न मे पार्श्वे किञ्चित् क्षणमपि न दूरे रथजवात्॥")
कुटिलः। इति हेमचन्द्रः॥

विच्छेदः, पुं, (वि + छिद् + घञ् ।) वियोगः । विरहः । भेदः । यथा, ब्रह्मवैवर्त्ते गणपतिखण्डे ।
"कान्तायाः कान्तविच्छेदो मरणादतिरिच्यते ॥"
(लोपः । यथा, रघुवंशे । १ । ६६ ।
"नूनं मत्तः परं वंश्याः पिण्डविच्छेददर्शिनः ।
न प्रकामभुजः श्राद्धे स्वधासंग्रहतत्पराः ॥")

विच्युतः, त्रि, विगतः । विपूर्ब्बच्युधातोः क्तप्रत्ययेन निष्पन्नः । विचरितः । विपूर्ब्बच्युतधातोः कप्रत्ययेन निष्पन्नः ॥ (यथा, भागवते । ८ । १२ । २१ ।

विच्युतिः, स्त्री, (वि + च्यु + क्तिन् ।) वियोगः । यथा,—
"सोऽपि वैश्यस्ततो ज्ञानं वव्रे निर्व्विन्नमानसः ।
ममेत्यहमिति प्राज्ञः सङ्गविच्युतिकारकम् ॥"
इति मार्कण्डेयपुराणे देवीमाहात्म्यम् ॥

विज, इर् लि च औ वेके । इति कविकल्पद्रुमः ॥ (अदा०-ङा०-उभ०-अक०-अनिट् ।) वेक इति विचिर्लि धौ च पृथक्के इत्यस्य धत्वि रूपम् । इर्, अविजत् अवैक्षीत् । लि च, वेवेक्ति वेविक्ते मूर्खात् पण्डितः क्षधक् स्यादित्यर्थः । औ, वेक्ता । इति दुर्गादासः ॥

विज, ईं ओ ध भीकम्ये । इति कविकल्पद्रुमः ॥ (रुधा०-पर०-अक०-सेट् । अनिड्निष्ठः ।)
ईं ओ, विग्नः । ध, विनक्ति । इति दुर्गादासः ॥

विज, ड भ्र ईं ओ भीकम्ये । इति कविकल्पद्रुमः ॥ (तुदा०-आत्म०-अक०-सेट् । निष्ठायामनिट् ।)
ड भ्र, विजते । ईं ओ, विग्नः । द्वावर्थौ । इति दुर्गादासः ॥

विजनः, त्रि, (विगतो जनो यस्मात् ।) निर्ज्जनः । तत्पर्य्यायः । विविक्तः २ क्लृप्तः ३ निःशलाकः ४ रहः ५ उपांशु ६ । इत्यमरः ॥ (यथा, महाभारते । १ । १५२ । १५ ।
"ततो भीमो वनं घोरं प्रविश्य विजनं महत् ।
न्यग्रोधं विपुलच्छायं रमणीयं ददर्श ह ॥")

विजनम्, क्ली, (वि + जन + ल्युट् ।) प्रसवः । इति हेमचन्द्रः ॥

विजपिलं, क्ली, पङ्कः । यथा,—
"पिच्छिलं स्यात् विजपिलं पङ्कः शादो निषद्वरः ॥"
इति हलायुधः ॥

विजन्मा, [न्] त्रि, (विरुद्धं जन्म यस्य ।) जारजः । विरुद्धजन्मविशिष्टः । इति लोकप्रसिद्धः ॥ (पुं, वर्णसङ्करजातिविशेषः । यथा, मनुः । १० । २३ ।
"वैश्यात् तु जायते व्रात्यात् सुधन्वाचार्य्य एव च ।
कारूषश्च विजन्मा च मैत्रः सात्वत एव च ॥")

विजयः, पुं, (वि + जि + भावे अच् ।) जयः । इत्यमरः ॥ (यथा, मनौ । १० । ११६ ।
"स्वधर्म्मो विजयस्तस्य नाहवे स्यात् पराङ्मुखः ।
शस्त्रेण वैश्यान् रक्षित्वा धर्म्मसंहारयेदलिम् ॥")
अर्জ্জुनः । इति मेदिनी । ये, १०४ ॥ (यथा, महाभारते । ४ । ४२ । २४ ।

"अभिप्रयामि संग्रामे यदहं युद्धदुर्म्मदान् ।
नाजित्वा विनिवर्त्तामि तेन मां विजयं विदुः ॥"
यथा च विख्यातविजयनाटके । २ ।
"इतो भीमः क्रूरो नृपतिसहजन्मानमवधीत्
इतः क्रुद्धो वत्सं वधयति शरीधेय विजयः ।
न मे चेतःस्थैर्य्यं व्रजति सखे कुत्र गमनं
विधेयं तद्ब्रूहि त्वमसि सदसद्वाक्यविषयः ॥")
वृत्तार्हन्नृपिता । जिनबलदेवः । विमानः । इति हेमचन्द्रः ॥ यमः । इति शब्दचन्द्रिका ॥
कल्किपुत्रः । यथा,—
"ततः कल्किस्तु पद्मायां जयो विजय एव च ।
द्वौ पुत्रौ जनयामास लोकख्यातौ महाबलौ ॥"
इति श्रीकल्किपुराणे १३ अध्यायः ॥
भैरववंशीयकल्पराजपुत्रः । स काश्मीराजः खाण्डववनकर्त्ता च । यथा,—
"सुमतेरभवत् कल्पः सुतः सत्यस्य डिण्डिमः ।
विरूपस्याभवद्गाधिर्गाधेर्भीमोऽभवत् सुतः ॥
तेषां कल्पोऽभवद्राजा कल्पात्तु विजयोऽभवत् ॥
यो विजित्य क्षितिं सर्व्वां पार्थिवान् भूरितेजसा ।
शक्रस्यानुमते चक्रे खाण्डवं शतयोजनम् ॥
यत् सत्यसाची ह्यदहत् पाण्डुपुत्रः प्रतापवान् ।
आवहन् परमां प्रीतिं ज्वलनस्य महात्मनः ॥"
इति कालिकापुराणे भैरववंशानुकीर्त्तनम् ६० अध्यायः ॥ विष्णुचरविशेषः । यथा । विष्णुचराश्चण्डप्रचण्डजयविजयादयः । इति पुलिङ्गसंग्रहे भरतः ॥

विजयकुञ्जरः, पुं, (विजयाय यः कुञ्जरः ।) राजवाह्यहस्ती । इति त्रिकाण्डशेषः ॥

विजयच्छन्दः, पुं, (विजयस्य छन्दो यस्मात् ।) पञ्चशतमौक्तिकहारः । इति हेमचन्द्रः ॥ (यथा, बृहत्संहितायाम् । ८१ । ३१ ।
"सुरभूषणं लतानां सहस्रमष्टोत्तरं चतुर्हस्तम्
इन्द्रच्छन्दो नाम्ना विजयच्छन्दस्तदर्द्धेन ॥")

विजयनन्दनः, पुं, इक्ष्वाकुवंशजराजविशेषः । तत्पर्य्यायः । जयः २ । इति हेमचन्द्रः ॥

विजयमर्द्दलः, पुं, (विजयाय मर्द्दलः ।) ढक्का । इति त्रिकाण्डशेषः ॥ जयढाक इति भाषा ॥

विजया, स्त्री, तिथिविशेषः । सा विजयादयमीति ख्याता । तत्कृत्यं दुर्गाशब्दे द्रष्टव्यम् । उमासखी । इति मेदिनी । ये, ४० ॥ सा तु गौतमकन्या । यथा,—
"तमागतां सती दृष्ट्वा जयामेकामुवाच ह ।
किमर्थं विजया नागाज्जयन्ती चापराजिता ॥
सा देवी वचनं श्रुत्वा उवाच परमेश्वरीम् ॥
गता निमन्त्रिता सर्व्वा मखे मातामहस्य ताः ।
सर्व्वं पित्रा गौतमेन माता चाप्यनुराधया ॥"
इति वामनपुराणे ४ अध्यायः ॥
कालिकापुराणे १७ अध्यायेऽप्येवम् ॥* ॥ विश्वामित्रोपासितविद्याविशेषः । यथा,—
"विद्यामथैनं विजयां जयाञ्च
रथोगयं विष्णुमविक्षतात्मा ।

अध्यापिपत् गाधिसुतो यथावन्निघातविष्यन् युधि यातुधानान् ॥"
इति भट्टिः । २ । २१ ॥*॥
दुर्गा । इति हेमचन्द्रः ॥ तथा च ।
"विजित्य पद्मनाभानं देवराजं महाबलम् ।
विजया तेन सा देवी लोके चैवापराजिता ॥"
इति देवीपुराणे ४५ अध्यायः ॥*॥
यमभार्य्या । हरीतकी । इति जटाधरः ॥ वचा । इति रत्नमाला ॥ जयन्ती । शेफालिका । मञ्जिष्ठा । शमीभेदः । अग्निमन्थः । इति राजनिर्घण्टः ॥ मादकद्रव्यविशेषः । भाङ् इति सिद्धि इति च भाषा । तत्पर्य्यायः । त्रैलोक्यविजया २ भङ्गा ३ इन्द्रासनम् ४ जया ५ । इति शब्दचन्द्रिका ॥ वीरपत्रा ६ गञ्जा ७ चपला ८ अजया ९ आनन्दा १० हर्षिणी ११ । अस्या गुणाः । कटुत्वम् । कषायत्वम् । उष्णत्वम् । तिक्तत्वम् । वातकफापहत्वम् । संग्राहित्वम् । वाक्प्रदत्वम् । बल्यत्वम् । मेधाकारित्वम् । श्रेष्ठदीपनत्वञ्च । इति राजनिर्घण्टः ॥ अपि च ।
"भङ्गा गञ्जा मातुलानी मादिनी विजया जया ।
भङ्गा कफहरी तिक्ता ग्राहिणी पाचनी लघुः ।
तीक्ष्णोष्णा पित्तला मोहमदवाग्वह्निवर्द्धिनी ॥"
इति भावप्रकाशः ॥
अन्यच्च ।
"शुक्राशुनं तु तीक्ष्णोष्णं मोहकृत् कुष्ठनाशनम् ।
बलमेधाग्निकृत् श्लेष्मदोषहारि रसायनम् ॥
जाता मन्दरमन्थनाब्धिनिधौ पीयूषरूपा पुरा
त्रैलोक्ये विजयप्रदेति विजया श्रीदेवराजप्रिया ।
लोकानां हितकाम्यया क्षितितले प्राप्ता नरैः कामदा
सर्व्वातङ्कविनाशहर्षजननी यैः सेविता सर्व्वदा ॥"
इति राजवल्लभः ॥*॥
अष्टमहाद्वादश्यन्तर्गतद्वादशीविशेषः । यथा,
अथ विजयाव्रतम् । ब्रह्मपुराणे ।
"यदा तु शुक्लद्वादश्यां नक्षत्रं श्रवणं भवेत् ।
तदा सा तु महापुण्या द्वादशी विजया स्मृता ॥
तस्यां स्नातः सर्व्वतीर्थे स्नातो भवति मानवः ।
संपूज्य वर्षपूजायाः सकलं फलमश्नुते ॥
एकजप्यात् सहस्रस्य जप्तस्यान्नोति सत् फलम् ।
दानं सहस्रगुणितं तथा वै विप्रभोजनम् ॥
होमस्तत्रोपवासश्च सहस्रगुणितो भवेत् ॥"*॥
अथ व्रतविधिः ।
"आदौ गुरुं नमस्कृत्य ततः सङ्कल्पमाचरेत् ।
शरशार्ङ्गधरं देवं सौवर्णं रचयेत्तराम् ॥"
सङ्कल्पमन्त्रः ।
"द्वादश्यां निराहारः स्थित्वाहमपरेऽहनि ।
भोक्ष्ये त्रिविक्रमानन्त शरणं मे भवाच्युत ॥
घोषवीतन्तु कलसं पूर्ब्बवत् स्थापयेद्व्रती ।

पाद्यं तदुपरि न्यस्येत्ताम्रं वैष्णवमेव वा ॥
तत्रोपवेश्य स स्नाप्य देवं विष्वक्सेनैः ।
आलिप्य शुभ्रं वसनं दत्वाच्छिद्रञ्च पादुके ॥
वासुदेवायेति शिरः श्रीधरायेति वै मुखम् ।
हृषीकेशेति च कण्ठं वै वक्षः श्रीपतये इति ॥
शस्त्रास्त्रधारिणे बाहू कट्यै च वामनाय वै ।
कवीन्द्रायोदरं मेढ्रं त्रैलोक्यजनाय च ॥
जघनं चार्चयेद्विद्वान् सर्व्वाधिपतये इति ।
सर्व्वात्मने इति पदावेवमङ्गानि पूजयेत् ॥
शङ्खचक्रगदापद्मशार्ङ्गधरविभूषितम् ।
गृहाणार्घ्यं मया दत्तं शार्ङ्गपाणे ! नमोऽस्तु ते ॥
इत्यर्घ्यं पूर्ब्ववत् कृत्वा धूपदीपौ समर्प्य च ।
घृतपक्वप्रधानानि नैवेद्यानि निवेदयेत् ॥
ताम्बूलादीनि दत्त्वाथ कृत्वा जागरणं निशि ।
प्रातःस्नात्वार्चयित्वेशं पुष्पाञ्जलिमथार्चयेत् ॥
नमस्ते अस्तु गोविन्द बुध श्रवणसंज्ञक ।
अघोरं चास्त्रयं कृत्वा सर्व्वसौख्यप्रदो भव ॥
इति प्रार्थ्य ततः सर्व्वं दत्त्वा चार्घ्यं प्रतोष्य हि ।
भक्त्या विप्रान् भोजयित्वा सुखं पारणमाचरेत् ॥
भाद्रे मासि बुधस्यार्क्षे यदि स्याद्विजयाव्रतम् ।
तदा सर्व्वव्रतेभ्योऽस्य माहात्म्यमतिरिच्यते ॥"

इति श्रीहरिभक्तिविलासे १३ विलासः ॥

(सहदेवपत्नी । यथा, महाभारते । १ । ९५ । ८० ।
"सहदेवोऽपि माद्रीमेव स्वयंवरे विजयां नामोपयेमे मद्रराजस्य द्युतिमतो दुहितरं तस्यां पुत्रमजनयत् सुहोत्रं नाम ॥"*॥
पुरुवंशीयभूमन्योः पत्नी । यथा, तत्रैव । १ । ९५ । ३३ ।
"भूमन्युः खलु दाक्षार्हीमुपयेमे विजयां नाम तस्यामस्य जज्ञे सुहोत्रः ॥")

विजयासप्तमी, (विजयाख्या सप्तमी ।) रविवारे शुक्लपक्षीया सप्तमी । यथा,—
"शुक्लपक्षस्य सप्तम्यां सूर्य्यवारो यदा भवेत् ।
सप्तमी विजया नाम तत्र दत्तं महाफलम् ॥"

इति तिथ्यादितत्त्वम् ॥ * ॥

अथ विजयोत्सवविधिः ।
"रथमारोप्य देवेशं सर्व्वालङ्कारशोभितम् ।
सासितूणधनुर्ब्बाणपाणिं नक्षत्रमध्यगम् ॥
स्वलीलया जगत्त्रातुमाविर्भूतं रघूद्वहम् ।
राजोपचारैः श्रीरामं भ्रमीवृत्ततलं नयेत् ॥
सीताकान्तं भ्रमीयुक्तं भक्तानामभयङ्करम् ।
अर्चयित्वा भ्रमीवृत्तमर्चयेद्विजयाग्रये ॥"
तत्र मन्त्रः ।
"भ्रमी भ्रमयते पापं भ्रमी लोहितकण्टका ।
धरित्रार्জ্জুनबाणानां रामस्य प्रियवादिनी ॥
करिष्यमाणा या यात्रा यथाकालं सुखं मया ।
तत्र निर्व्विघ्नकर्त्री त्वं भव श्रीरामपूजिता ॥
गृहीत्वा साक्षतामार्द्रां भ्रमीमूलगतां मृदम् ।
गीतवादित्रनिर्घोषैस्ततो देवं गृहं नयेत् ॥
केचिदत्रैस्तत्र भावं केचिद्भाद्यञ्च वानरैः ।
केचिदुक्तसुखैर्भावं कोशलेन्द्रस्य तुष्टये ॥
निर्जिता राक्षसा दैत्या वैरिणो जगतीतले ।
रामराज्यं रामराज्यं रामराज्यमिति ब्रुवन् ॥
आनीय स्थापयेद्देवं निजसिंहासने सुखम् ।
ततो नीराज्य देवेशं प्रणमेद्दण्डवद्भुवि ॥
महाप्रसादवस्त्रादि धारयेद्वैष्णवैः सह ।
इति श्रीविष्णुधर्म्मोक्तानुसारेण व्यलेख्यथम् ॥
विधिः श्रीरामविजयोत्सवस्योत्सवकृत् सताम् ।
सीता दृष्टेति हनुमद्वाक्यं श्रुत्वाकरोत्प्रभुः ।
विजयं वानरैः सार्द्धं वासरेऽस्मिन् भ्रमीतलात् ॥"

इति श्रीहरिभक्तिविलासे १५ विलासः ॥

विजयिन्, त्रि, विजिलम् । इत्यमरटीकायां रायमुकुटः ॥
विजयी, [न्] त्रि, (विशेषेण जेतुं शीलमस्य । वि + जि + "जिदृक्षिविश्रीति ।" ३ । २ । १५७ । इति इनिः ।) जयशीलः । यथा,—
"वज्रपञ्जरनामेदं यो रामकवचं पठेत् ।
स चिरायुः सुखी पुत्री विनयी विजयी भवेत् ॥"

इति तन्त्रसारः ॥

(पुं, अर्জ্জुनः । यथा,—
"अर्জ্জुनः फाल्गुनो जिष्णुः किरीटी श्वेतवाहनः ।
बीभत्सुर्व्विजयी कृष्णः सव्यसाची धनञ्जयः ॥
एतान्यर्জ্জुननामानि प्रातरुत्थाय यः पठेत् ।
उद्यतेष्वपि शस्त्रेषु हन्ता तस्य न विद्यते ॥"

इति सर्व्वजनप्रसिद्धम् ॥)

विजयोत्सवः, पुं, (विजयायासुत्सवः ।) आश्विनशुक्लदशमीविहितभगवदुत्सवविशेषः । यथा,
"आश्विनस्य सिते पक्षे दशम्यां विजयोत्सवः ।
कर्त्तव्यो वैष्णवैः सार्द्धं सर्व्वत्र विजयार्थिना ॥"
अथ विजयोत्सवविधिः ।
"रथमारोप्य देवेशं सर्व्वालङ्कारशोभितम् ।
सासितूणधनुर्ब्बाणपाणिं नक्षत्रमध्यगम् ॥
स्वलीलया जगत्त्रातुमाविर्भूतं रघूद्वहम् ।
राजोपचारैः श्रीरामं भ्रमीवृत्ततलं नयेत् ॥
सीताकान्तं भ्रमीयुक्तं भक्तानामभयङ्करम् ।
अर्चयित्वा भ्रमीवृत्तमर्चयेद्विजयाग्रये ॥"
तत्र मन्त्रः ।
"भ्रमी भ्रमयते पापं भ्रमी लोहितकण्टका ।
धरित्रार्জ্জুनबाणानां रामस्य प्रियवादिनी ॥
करिष्यमाणा या यात्रा यथाकालं सुखं मया ।
तत्र निर्व्विघ्नकर्त्री त्वं भव श्रीरामपूजिता ॥
गृहीत्वा साक्षतामार्द्रां भ्रमीमूलगतां मृदम् ।
गीतवादित्रनिर्घोषैस्ततो देवं गृहं नयेत् ॥
केचिदत्रैस्तत्र भावं केचिद्भाद्यञ्च वानरैः ।
केचिदुक्तसुखैर्भावं कोशलेन्द्रस्य तुष्टये ॥
निर्जिता राक्षसा दैत्या वैरिणो जगतीतले ।
रामराज्यं रामराज्यं रामराज्यमिति ब्रुवन् ॥
आनीय स्थापयेद्देवं निजसिंहासने सुखम् ।
ततो नीराज्य देवेशं प्रणमेद्दण्डवत् भुवि ।
महाप्रसादवस्त्रादि धारयेत् वैष्णवैः सह ॥*॥
इति श्रीविष्णुधर्म्मोक्तानुसारेण व्यलेख्यथम् ॥
विधिः श्रीरामविजयोत्सवस्योत्सवकृत् सताम् ॥
सीता दृष्टेति हनुमद्वाक्यं श्रुत्वाकरोत् प्रभुः ।
विजयं वानरैः सार्द्धं वासरेऽस्मिन् भ्रमीतलात् ॥"

इति श्रीहरिभक्तिविलासे १५ विलासः ॥

विजरः, त्रि, जरारहितः । विगता जरा यस्येति बहुव्रीहिसमासनिष्पन्नः ॥ (यथा, कथासरित्सागरे । ४१ । ११ ।
"यः सर्व्वौषधियुक्तिज्ञश्चक्रे सिद्धरसायनः ।
आत्मानं तच्च राजानं विजरं चिरजीवितम् ॥")

विजलं, त्रि, विजिलम् । इति हेमचन्द्रः ॥ (विगतं जलं यस्मात् ।) निर्জলश्च ॥ (यथा, बृहत्संहितायाम् । १६ । २० ।
"नष्टर्क्षचन्द्रकिरणातिरजोऽवनद्धा
तोयाशयाश्च विजलाः सरितोऽपि तन्व्यः ॥")

विजल्पः, पुं, (विशेषेण जल्पनमिति । वि + जल्प + घञ् ।) वाक्यविशेषः । यथा,—
"उक्तयास्तयया गूढमानसुद्रान्तरालया ।
अघट्टिघि कटाक्षोक्तिर्विजल्पो विदुषां मतः ॥"

इत्युज्ज्वलनीलमणिः ॥

विजातः, त्रि, (विरुद्धं जातं जन्म यस्य ।) विजन्मा । इति लोकप्रसिद्धः ॥
विजाता, स्त्री, (विशेषेण जातः पुत्रो यस्याः ।) जातापत्या । यथा,—
"विजाता च प्रजाता च जातापत्या प्रसूतिका ॥"

इति हेमचन्द्रः ॥

विजातीयः, त्रि, (विभिन्नां जातिमर्हतीति । विजाति + छः ।) विभिन्नधर्म्माक्रान्तः । यथा,
"प्रायश्चित्ताद्विजातीयात् ताडक्प्रायविनाशनम् ॥"

इति प्रायश्चित्ततत्त्वम् ॥

(यथा च साहित्यदर्पणे ७ परिच्छेदे ।
"एवं पददोषसजातीया वाक्ये दोषा उक्ताः सम्प्रति तद्विजातीया उच्यन्ते ॥") विशेषजातिविशिष्टः । यथा,—
"प्रवाहो नादिमानेव न विजात्येकशक्तिमान् ।
तत्त्वे यत्नवता भाव्यमन्वयव्यतिरेकयोः ॥"

एष कार्य्यकारणप्रवाहो नादिमान् अनादिः । विजातीयेषु तृणादिषु एकशक्तिमान् न प्रवाहः । अन्वयव्यतिरेकयोस्तत्त्वे नियतत्वे नियतात्वनिर्व्वाहे यत्नवता भाव्यं यत्नः करणीयः वैजात्यमिति भावः । वह्निसामान्यं प्रति विजातीयोपाधिपूर्ब्वत्वेन एव कारणम् । इति हरिदासीयकुसुमाञ्जलिटीका ॥

विजिगीषः, त्रि, (विजिगीषा अस्त्यस्येति । अर्शआदित्वादच् ।) जयेच्छुः । इति सिद्धान्तकौमुदी ॥
विजिगीषा, स्त्री, (विजेतुमिच्छा । वि + जि + सन् + अः । स्त्रियां टाप् ।) स्वोदरपूरणाशक्तिनिमित्तकनिन्दात्यागेच्छा । इत्यमरटीकायां

रमानाथः ॥ अवहारः । कश्चित् प्रकर्षः । इति तत्रैव भरतः ॥ विजयेच्छा च ॥ (यथा, कथासरित्सागरे । ३६ । ७१ ।
"द्वारे विधिमिवान्यं तत्तद्रत्ना विजिगीषया ।
आगतं पुरुषं कञ्चिद्दर्शाश्चर्यदायकम् ॥")

विजिगीषाविवर्ज्जितः, त्रि, (विजिगीषया विवर्ज्जितः ।) केवलमुदराधीनः । तत्पर्य्यायः । आत्मनः २ औदरिकः ३ । इत्यमरः ॥ विजिगीषा अवहारः कश्चित् प्रकर्षो वा तेन विवर्ज्जितो विहीनो यः केवलमुदराधीनः तत्र द्वाविमौ तर्त्तेते इत्यर्थः । जिगीषा जेतुमिच्छायां अवहारप्रकर्षयोः । इति मेदिनी ॥ तत्र खोदरपूरणाप्रवृत्तिनिमित्तकनिन्दात्यागेच्छा विजिगीषा तया रहिते इयमिति रमानाथः । इति तट्टीकायां भरतः ॥

विजिगीषुः, त्रि, (विजेतुमिच्छुः । वि + जि + सन् + "सनाशंसभिक्ष उः ।" ३ । २ । १६८ । इति उः ।) जयेच्छाशीलः । यथा,—
"जेतुमेषणशीलश्च विजिगीषुरिति स्मृतः ॥"
इति शब्दमाला ॥
(यथा, कामन्दकीयनीतिसारे । ८ । ३ ।
"रोचते सर्व्वभूतेभ्यः शरीराखण्डमण्डलः ।
सम्पूर्णमण्डलस्तस्माद्विजिगीषुः सदा भवेत् ॥")

विजितः, त्रि, (विशेषेण जितः ।) पराजितः । यथा,—
"पथ्याशिनां शीलवतां नराणां
सद्वृत्तिभाजां विजितेन्द्रियाणाम् ।
एवं विधानामिदमायुरत्र
चिन्त्यं सदा वृद्धसुनिप्रवादः ॥"
इति मलमासतत्त्वम् ॥

विजिता, [क्त] त्रि, (विज + क्त ।) पृथक् । भीतः । कम्पितः । इति विजधात्वर्थदर्शनात् ॥

विजितिः, स्त्री, (वि + जि + क्तिन् ।) विजयः । यथा,—
"क्षितिविजितिस्थितिविहितिव्रततत्त्वः परगतयः ।
उररुरुधुर्गुरुदुधुवुर्धिकुरवः स्वमरिकुलम् ॥"
इति दण्डी ॥

विजिनं, त्रि, विजिलम् । इत्यमरटीकायां रायमुकुटः ॥

विजिलं, त्रि, ईषत् सरसत्वञ्जनादि । तत्पर्य्यायः । पिच्छिलम् २ । इत्यमरः ॥ विजयिनम् ३ विजिनम् ४ विच्चलम् ५ उच्चलम् ६ लालसीकम् ७ । इति वाचस्पतिः ॥ विजिविलम् ८ विजलम् ९ । इति हेमचन्द्रः ॥
"पाकरूपरसासक्ते व्यञ्जने तु भवेत् त्रयम् ।
तैलपाकसुसंस्कारे प्रायस्तत्सुपसंस्कृतम् ।
पिच्छिलं लालसीकञ्च विजिनं विच्चिलञ्च तत् ॥"
इति शब्दरत्नावली ॥

विजिविलं, त्रि, विजिलम् । इति हेमचन्द्रः ॥

विजिह्मः, त्रि, (विशेषेण जिह्मः ।) वक्रः । कुटिलः । इति केचित् ॥ (यथा, रघुः । १६ । ३५ ।
"शिल्पकार्य्यं उभयेन वेजिता-
स्तं विजिह्मनयना अलोभयन् ॥")

विजुलः, पुं, प्राग्भलीकन्दः । इति राजनिर्घण्टः ॥

विजृम्भणं, क्ली, (वि + जृम्भ + ल्युट् ।) जृम्भणम् । (यथा, सुश्रुते । ५ । २ ।
"निद्रागुरुत्वञ्च विजृम्भणञ्च
विश्लेषहर्षावयवाङ्गमर्द्दः ॥")
विकसनम् । इति केचित् ॥ (यथा, रघुः । १६ । ४७ ।
"वनेषु सायन्तनमल्लिकानां
विजृम्भणोद्गन्धिषु कुट्मलेषु ॥"
कम्पनम् । सङ्कोचः । यथा, भागवते । ७ । ५ । ४६ ।
"जितं त्वयैकेन जगत्त्रयं भ्रुवो-
र्विजृम्भणत्रस्तसमस्तधिष्ण्यपम् ॥")

विजृम्भितं, क्ली, (वि + जृम्भ + क्तः ।) चेष्टा । इति मेदिनी । ते, २१७ ॥ (यथा, कथासरित्सागरे । ४ । १३ ।
"अथागत्य समाख्यातं तत्सखा मल्लिबन्धनम् ।
उद्गाढ़सुप्तकेयूराया नवानङ्गविजृम्भितम् ॥")

विजृम्भितः, त्रि, (वि + जृम्भ + क्तः ।) विकसरः । इति मेदिनी । ते, २१७ ॥ यथा, भागवते । ४ । २१ । ८ ।
"तदादिराजस्य यशो विजृम्भितं
गुणैरशेषैर्गुणवत्सभाजितम् ॥"
व्याप्तः । यथा, रघुः । ७ । ४२ ।
"आतृष्णतो लोचनमार्गमाजौ
रजोऽन्धकारस्य विजृम्भितस्य ॥" ॥
विजृम्भा सञ्जाता अस्येति । तारकादित्वादितच् ।) जृम्भायुक्तश्च ॥ (यथा, हरिवंशे । १८१ । ६ ।
"सप्तारं सधनुष्कञ्च दृष्ट्वात्मानं विजृम्भितम् ।
ततो ननाद भूतात्मा स्निग्धगम्भीरनिःस्वनः ॥")

विज्वनं, त्रि, विजिलम् । इत्यमरटीकायां रायमुकुटः ॥

विज्वलं, क्ली, वाणम् । यथा,—
"पत्रवाहो विकर्णोऽथ तीरं विज्वलशायके ।
लोहनालस्तु नाराचः प्रसरः काण्डगोचरः ॥"
इति चिकाण्डशेषः ॥
त्रि, विजिलम् । इति हेमचन्द्रः ॥ (यथा, बृहत्संहितायाम् । ५५ । २६ ।
"श्लेष्मातकस्य बीजानि
निष्कुलीकृत्य भावयेत् प्राज्ञः ।
अङ्कोल्लविज्वलाङ्घ्रि-
च्छायायां सप्तकृत्वेवम् ॥")

विच्चिलं, त्रि, विजिलम् । इति शब्दरत्नावली ॥

विच्चुलं, क्ली, त्वचम् । इति राजनिर्घण्टः ॥

विच्चुलिका, स्त्री, जतुका । इति राजनिर्घण्टः ॥

विज्ञः, त्रि, (विशेषेण जानातीति । वि + ज्ञा + "आतश्चोपसर्गे ।" इति कः ।) प्रवीणः । इत्यमरः ॥ (यथा, भागवते । ६ । १६ । ६१ ।
"एवं विपर्य्ययं बुद्ध्वा नृणां विज्ञाभिमानिनाम् ।
आत्मनश्च गतिं सूक्ष्मां स्थानत्रयविलक्षणाम् ॥")

अस्य पर्य्यायो निपुणशब्दे द्रष्टव्यः ॥ पण्डितः । इति राजनिर्घण्टः ॥ (यथा, नैषधे । ३ । ६६ ।
"विज्ञेन विज्ञाप्यमिदं नरेन्द्रे
तस्मात्त्वयास्मिन् समयं प्रतीच्छ ।
आत्यन्तिकासङ्गिविलम्बसिद्धेः
कार्य्यस्य कार्य्यस्य शुभा विभाति ॥")

विज्ञबुद्धिः, स्त्री, जटामांसी । इति शब्दचन्द्रिका ॥

विज्ञातः, त्रि, (वि + ज्ञा + क्तः ।) ख्यातः । इत्यमरः ॥ (विदितः । यथा, हरिवंशे । १६५ । १७ ।
"विज्ञातोऽसि मया चित्रैर्विना चक्रं जनार्द्दन ॥")

विज्ञानं, क्ली, (वि + ज्ञा + ल्युट् ।) ज्ञानम् । कर्म्म । इति मेदिनी । ने, ११३ ॥ कार्म्मण्यम् । इति हेमचन्द्रः ॥
"मोक्षे धीर्ज्ञानमन्यत्र विज्ञानं शिल्पशास्त्रयोः ॥"
इत्यमरः ॥
"विशेषेण सामान्येन चावबोधो मोक्षो मुक्तिः शिल्पं चित्रादिशास्त्रं व्याकरणादि । मोक्षे शिल्पे शास्त्रे च या धीः सा ज्ञानं विज्ञानञ्चोच्यते एषा विशेषप्रवृत्तिः । अन्यत्र घटपटादौ या धीः सापि ज्ञानं विज्ञानञ्चोच्यते । एषा सामान्यप्रवृत्तिः । मोक्षे धीर्ज्ञानं विज्ञानञ्च यथा । ज्ञानान्मुक्तिरिति । सा याचिता च विज्ञानं तुष्टा ऋद्धिं प्रयच्छति इति । अन्यत्र यथा । ज्ञानमस्ति समस्तस्य जन्तोर्विषयगोचरे इति । घटत्वप्रकारकज्ञानमिति । ये केचित् प्राणिनो लोके सर्व्वे विज्ञानिनो मता इति । ब्रह्मणो नित्यविज्ञानानन्दरूपत्वात् इति । एवं चित्रज्ञानं व्याकरणज्ञानं घटपटविज्ञानमित्यादिकं प्रयुज्यत एव । तद्विगमे गरुत्मदादिशब्दवत् गरुत्मच्छब्दो हि गरुड़े पक्षिमात्रे च वर्त्तते । मोक्ष इति निमित्तसप्तमी मोक्षनिमित्तं शिल्पशास्त्रयोर्धीर्ज्ञानमुच्यते । तन्निमित्ततोऽन्यनिमित्तं या तयोर्धीः सा विज्ञानमिति केचित् । मोक्षविषया मोक्षफला धीर्ज्ञानं अन्यधीर्विज्ञानम् । कान्यच इत्याह शिल्पशास्त्रयोरिति केचित् । अवबोध इत्यध्याहृत्य मोक्षविषयेऽवबोधो धीर्ज्ञानं अन्यच घटपटादिविज्ञानं शिल्पशास्त्रविषये विज्ञानमिति केचित् । जानातेरनट् ज्ञानं विविधं विरूपं वा ज्ञानं विज्ञानम् ।" इत्यमरटीकायां भरतः ॥ ॥
तत्तु ब्राह्मणस्य लक्षणविशेषः । यथा,—
"क्षमा दया च विज्ञानं सत्यञ्चैव दमः शमः ।
अध्यात्मनित्यता ज्ञानमेतद्ब्राह्मणलक्षणम् ॥"
ज्ञानविज्ञानयोर्लक्षणं यथा,—
"चतुर्द्दशानां विद्यानां धारणं हि यथार्थतः ।
विज्ञानमितरं विद्याद्येन धर्म्मो विवर्द्धते ॥
अधीत्य विधिवद्विद्यामर्थञ्चैवोपलभ्य तु ।
धर्म्मैकार्य्यान्निवृत्तञ्चेन्न तद्विज्ञानमिष्यते ॥
यया स देवो भगवान् विद्यते यत्र विद्यते ॥

साक्षादेव महादेवस्तज्ज्ञानमिति कीर्त्तितम्॥"
इति कौर्म्मे उपविभागे १४ अध्यायः॥
विज्ञानपादः, पुं, (विज्ञानमेव पादं लक्ष्यं यस्य।) वेदव्यासः। इति केचित्॥
विज्ञानमयकोषः, पुं, (विज्ञानमयस्तदात्मकः कोष इवाच्छादकत्वात्।) ज्ञानेन्द्रियैः सहिता बुद्धिः। इति वेदान्तसारः॥
विज्ञानमातृकः, पुं, (विज्ञानं मातेव यस्य। बहुव्रीहौ कन्।) बुद्धः। इति हेमचन्द्रः॥
विज्ञानिकः, त्रि, (विज्ञानमस्त्यस्येति। विज्ञान+ठन्।) ज्ञानविशिष्टः। विज्ञः। इति वैज्ञानिकग्रन्थटीकायां भरतः॥
विज्ञापनं, क्ली, (वि+ज्ञा+णिच्+ल्युट्।) बोधनम्। जानान इति भाषा। विपूर्ब्बज्ञान्तज्ञाधातोरनट्प्रत्ययेन निष्पन्नम्॥ (यथा, कथासरित्सागरे। ३१। ५८।
"तया विज्ञापनायाहं प्रेषितः स्वीकुरुष्व ताम्।
युवयोरस्तु योगोऽयं कौमुदीचन्द्रयोरिव॥"*॥
स्त्री, वि+ज्ञा+णिच्+युच्। टाप्। विज्ञापना। यथा, रघुः। १७। ४०।
"ततः परमभिव्यक्तसौमनस्यनिवेदितैः।
युयोज़ पाकाभिमुखैर्भृत्यान् विज्ञापनाफलैः॥")
विज्ञाप्तिः, स्त्री, (वि+ज्ञा+णिच्+क्तिन्।) विज्ञापनम्। विपूर्ब्बज्ञान्तज्ञाधातोः क्तिप्रत्ययेन निष्पन्ना॥ (विकल्पेन द्वयेविज्ञप्तिरपि॥)
विज्ञेयं, त्रि, (विज्ञातुं योग्यम्। वि+ज्ञा+"अचो यत्।" ३। १। ९७। इति यत्। "ईद्यति।" ६। ४। ६५। इति आत ईत्।) विज्ञातव्यम्। विज्ञानीयम्। विपूर्ब्बज्ञाधातोर्य्यप्रत्ययेन निष्पन्नम्॥ (यथा, मनुः। २। १०।
"श्रुतिस्तु वेदो विज्ञेयो धर्म्मशास्त्रन्तु वै स्मृतिः॥")
विज्ञामरं, क्ली, चक्षुःशुक्लरोगम्। इति केचित्॥
विज्ञोषी, स्त्री, पङ्क्तिः। इति त्रिकाण्डशेषः॥
विट, आक्रोशे। खने। इति कविकल्पद्रुमः॥ (भ्वा०-पर०-सक०-खने अक०-सेट्।) वेटति। तोग्रः। केचिन्न पठति। खनः शब्दः। इति दुर्गादासः॥
विटः, पुं, (वेटतीति। विट+कः।) पिङ्गः। इत्यमरः॥ (यथा, भागवते। १०। १३। २।
"सतामयं सारभृतां निसर्गो
यदर्थवाणीश्रुतिवित्तसामपि।
प्रतिक्षणं नव्यवदच्युतस्य यत्
स्त्रिया विटानामिव साधु वार्त्ता॥")
कामुकानुचरः। धूर्त्तः। इति भरतः॥ कामतन्त्रकलाकोविदः। इति रसमञ्जरी॥ पर्व्वतविशेषः। लवणभेदः। खदिरविशेषः। मूषिकः। इति मेदिनी। टे, २८॥ नारङ्गवृक्षः। इति शब्दमाला॥
विटङ्कः, पुं क्ली, (विशेषेण टङ्कयते सौधादिषु इति। वि+टङ्क बन्धने+घञ्।) कपोतपालिका। पायरा खोप इति भाषा। इत्यमरः॥ हे सौधादिषु प्राग्ते काष्ठादिरचिते गृहपक्षिस्थाने। कपोतान् पालयतीति कपोतपाली ढात् षण् इति षण् स्वार्थे कः कपोत इत्युपलक्षणं पक्षिमात्रपालिकेति बोध्यम्। वीन् पक्षिणष्टङ्कयति बध्नाति विटङ्कं टकि क बन्धे षण् विशेषेण टङ्कयत्यत्रेति वा अल् घञ् वा। इति भरतः॥ (यथा, माघे। ३। ५५।
"रतान्तरे यच्च गृहान्तरेषु
वितर्द्दिनिर्य्यूहविटङ्कनीड़ः।
रुतानि पृश्नेर्वयसां गणोऽन्ते-
वासित्वमाप स्फुटमङ्गनानाम्॥"*॥
सुन्दरे, त्रि। यथा, भागवते। ३। १५। २७।
"देवावचक्षत गृहीतगदौ परार्द्ध्य-
केयूरकुण्डलकिरीटविटङ्कवेषौ॥")
विटङ्कः, पुं क्ली, (विटङ्क एव। स्वार्थे कन्।) विटङ्कः। इति शब्दरत्नावली॥
विटपः, पुं क्ली, (वेटति शब्दायते इति। विट+"विटपपिष्टपविशिपोलपाः।" उणा० ३।१४५। इति कप्रत्ययेन निपातनात् साधुः।) शाखापल्लवसमुदायः। तत्पर्य्यायः। विस्तारः २। इत्यमरः॥ स्तम्बः ३। इति मेदिनी। पे, २२॥ शाखा। (यथा, रघुः। १०। ११।
"बाहुभिर्विटपाकारैर्दिव्याभरणभूषितैः।
आविर्भूतमणां मध्ये पारिजातमिवापरम्॥")
पल्लवः। इति शब्दरत्नावली॥ (यथा, ऋतुसंहारे। १। २४।
"तरुविटपलतालिङ्गनव्याकुलेन
दिग्नि दिग्नि परिदग्धा भूमयः पावकेन॥")
क्ली, मुष्कवङ्क्षणान्तरम्। यथा,—
"विटपन्तु महाबीज्यमन्तरामुष्कवङ्क्षणम्॥"
इति हेमचन्द्रः॥
(यथा, सुश्रुते। ३। ६।
"वङ्क्षणवृषणयोरन्तरे विटपं नाम तत्र घाण्टाभस्थ्यशुक्रता वा भवति॥")
विटपः, पुं, (विटान् पातीति। पा+कः।) विटाधिपः। पारदारिकश्रेष्ठः। इति मेदिनी। पे, २२॥ आदित्यपत्रः। इति राजनिर्घण्टः॥
विटपी, [न्] पुं, (विटपः शाखादिरस्त्यस्येति। विटप+इनिः।) वृक्षः। इत्यमरः॥ (यथा, आर्य्यासप्तशत्याम्। ४८६।
"यूथपते तव कश्चिन्नहि मानस्यानुरूप इह विटपी।
प्रेरय दिनं निदाघद्राघीयः क्व खलु ते च्छाया॥")
वटः। इति राजनिर्घण्टः॥ (विटपयुक्ते, त्रि। यथा, महाभारते। १। ४३। १०।
"अङ्कुरं कृतवांस्तत्र ततः पर्णद्वयान्वितम्।
पलाशिनं शाखिनञ्च तथा विटपिनं पुनः॥")
विटप्रियः, पुं, (विटानां प्रियः।) सुन्दरवृक्षः। इति राजनिर्घण्टः॥
विटमाक्षिकः, पुं, (विटप्रियो माक्षिकः।) धातुविशेषः। तत्पर्य्यायः। ताप्यः २ नदीजः ३ कामारिः ४ तारारिः ५। इति हेमचन्द्रः॥
विटलवणं, क्ली, (विटसंज्ञकं लवणम्।) विड्लवणम्। इति केचित्॥
विट्, स्त्री, (विटतीति। विट्+इन्। स च कित्।) पीतचन्दनम्। इति शब्दमाला॥
विट्, [श्] पुं, (विश्+क्विप्।) वैश्यः। (यथा, मनुः। २। ३६।
"गर्भाष्टमेऽब्दे कुर्व्वीत ब्राह्मणस्योपनायनम्।
गर्भादेकादशे राज्ञो गर्भाच्च द्वादशे विशः॥")
मशुजः। इत्यमरः॥ (यथा, रघुः। १। ६३।
"अथ प्रदोषे दोषज्ञः संवेशाय विशांपतिम्।
सुनुः सूनृतवाक् सूनुः विससर्जोदितश्रियम्॥")
प्रवेशः। इति विश्वः॥
विट्, [ष्] स्त्री, (विष आप्तौ+क्विप्।) विष्ठा। इत्यमरः॥ कन्या। इति विट्पतिशब्ददर्शनात्॥ (अग्नौ, त्रि। यथा, ऋग्वेदे। ८। १६। ११।
"हव्या वा वेविषद्विषः।"
"विषः व्याप्तान् देवान् वेविषत् प्राप्नुयेत्।" इति तद्भाष्ये सायणः॥)
विट्कारिका, स्त्री, पक्षिविशेषः। तत्पर्य्यायः। कुणपी २ गोराटी ३ गोकिराटिका ४। इति भूरिप्रयोगः॥ विट्मारिका ५। इति हारावली॥
विट्खदिरः, पुं, (विड्वत् दुर्गन्धः खदिरः।) विष्ठावद्गन्धखदिरः। गुयेवाबला इति भाषा॥ तत्पर्य्यायः। अरिमेदः २। इत्यमरः॥ हरिमेदः ३ अक्षिमेदः ४। इति शब्दरत्नावली॥ हरिमेदः ५ कालस्कन्धः ६ अरिमेदकः ७। अस्य गुणाः। कषायत्वम्। उष्णत्वम्। मुखदन्तगदास्यकण्डूविषश्लेष्मकृमिकुष्ठव्रणश्वहनाग्नित्वञ्च। इति भावप्रकाशः॥ राजनिर्घण्टोक्तगुणपर्य्यायौ अरिमेदशब्दे द्रष्टव्यौ॥
विट्चरः, पुं, (विषि विष्ठायां चरतीति। चर+टः।) ग्राम्यशूकरः। इत्यमरः॥
विट्पतिः, पुं, (विषः कन्यायाः पतिः।) जामाता। इति जटाधरः॥ (यथा, मनुः। ३। १४८।
"मातामहं मातुलञ्च स्वसारीयं श्वशुरं गुरुम्।
दौहित्रं विट्पतिं बन्धुऋत्विग्याज्यौ च भोजयेत्॥"*॥
वैश्यानां पतिः। यथा, भागवते। ४।२३। ३२।
"वैश्यः पठन् विट्पतिः स्यात् शूद्रः सत्तमतामियात्॥"
"विशां पश्वादीनां वैश्यादीनां वा पतिः स्यात्।" इति तट्टीका॥)
विट्सारिका, स्त्री, (विट्प्रिया सारिका।) पक्षिविशेषः। इति जटाधरः॥ गुये सालिक् इति भाषा॥
विठरः, पुं, वाग्मी। इति संक्षिप्तसारोणादिवृत्तिः॥
विड, आक्रोशे। इति कविकल्पद्रुमः॥ (भ्वा०-पर०-सक०-सेट्।) वेड़ति शत्रुं बली। इति दुर्गादासः॥

विड्लवणं

विड्, क्ली, (विड् आक्रोशे + इगुपधेति कः ।) लवणविशेषः । विट्लुण इति भाषा ॥ यथा,—
"पाक्यं विड्च क्षतके द्वयम् ।" इत्यमरः ॥
द्वे समुद्रतीरासन्नभवां लवणमृत्तिकां पाचयित्वा निष्पादिते लवणे । विट्लवणे । इति केचित् । क्षतके कृत्रिमे । पाक्यविड्लवणयोर्भेदेऽपि कृतकत्वात् ऐक्यमिति स्वामी ॥ पच्यते इति पाक्यम् । डु पच अघौ पाके ण्यासश्रिति ण्यत् चजोर्घितीति कः पाकेन निष्पादितमिति ष्ठ्यञ् वा । वेड्ति भिनत्ति विड् विड्राक्रुग्भि इजुडलात् कः । इति भरतः ॥ तत्पर्य्यायः । विड्गन्धम् २ काललवणम् ३ विड्लवणम् ४ । इति रत्नमाला ॥ द्राविड्कम् ५ खण्डम् ६ क्षतकम् ७ क्षारम् ८ आसुरम् ९ सुपाक्यम् १० खण्डलवणम् ११ धूर्त्तम् १२ क्षत्रिमकम् १३ । अस्य गुणाः । उष्णत्वम् । दीपनत्वम् । रूक्षत्वम् । वाताजीर्णशूलगुल्ममेहनाग्नित्वञ्च । इति राजनिर्घण्टः ॥ अपि च ।
"विड् सक्षारमुद्भेदि कफं वातानुलोमनम् ॥
क्षारं कफमधो वातं सक्षारमेवेत्यर्थः ।
दीपनं लघु तीक्ष्णोष्णं रूक्षं रुच्यं व्यवायि च ।
विबन्धानाहविष्टम्भक्षुद्गौरवशूलजुत् ॥"
इति भावप्रकाशः ॥
अन्यच्च ।
"विड् लवणमुत्क्लेदि वह्नेर्बलविवर्द्धनम् ।
मलवातामविष्टम्भशूलाटोपविबन्धजुत् ॥"
इति राजवल्लभः ॥

विड्लवणं, क्ली पुं, (विड् आक्रोशे + "विड्विदिभ्यः कित् ।" उणा० १ । १२० । इति अङ्गच् । सच कित् ।) खनामख्यातौषधम् । (यथा, वृहत्संहितायाम् । ५५ । ७ ।
"घृतोशीरतिलक्षौद्रविड्लवणक्षीरगोमयैः ।
आमूलस्कन्धलिप्तानां सङ्क्रामणविरोपणम् ॥")
तत्पर्य्यायः । वेल्लम् २ अमोघा ३ चित्रतण्डुलाः ४ तण्डुलः ५ क्रिमिघ्नः ६ । इत्यमरः ॥ रसायनः ७ पावकः ८ भक्षकम् ९ । इति जटाधरः । वेलुः १० मोघा ११ तण्डुलः १२ । इति शब्दरत्नावली ॥ जन्तुघ्नम् १३ चित्रतण्डुलम् १४ क्रिमिघ्नम् १५ क्रिमिघ्नः १६ गर्हभम् १७ केवलम् १८ । इति रत्नमाला ॥ विड्लवा १९ क्रमिहा २० चित्रा २१ तण्डुला २२ तण्डुलीयका २३ वातारितण्डुला २४ जन्तुघ्नी २५ मृगगामिनी २६ केरालो २७ मक्करा २८ कापाली २९ वराङ्गः ३० चित्रबीजा ३१ जन्तुहन्त्री ३२ । अस्य गुणाः । कटुत्वम् । उष्णत्वम् । लघुत्वम् । वातकफार्शोग्निमान्द्यारुचिभ्रान्तिक्लमिदोषविनाशित्वञ्च । ईषत्तिक्तत्वम् । क्रिमिविषनाशित्वञ्च । इति राजवल्लभः ॥
"विड्लवणं कटु तीक्ष्णोष्णं रूक्षं वह्निकरं लघु ।
शूलाध्मानोदरश्लेष्मक्रिमिवातविबन्धजुत् ॥"
इति भावप्रकाशः ॥

विड्लवः, पुं, (विड्+अङ्गच् ।) अभिन्नः । इति मेदिनी । गे, ४६ ॥

विड्म्बनं, क्ली, (वि+ड्म्ब+ल्युट् ।) अनुकरणम् । यथा,—
"न वेद कश्चिद्भगवंश्चिकीर्षितं
तवेहमानस्य नृणां विड्म्बनम् ।
न यस्य कश्चिद्दयितोऽस्ति कर्हिचि-
द्द्वेष्यश्च यस्मिन् विषमा मतिर्नृणाम् ॥"
इति श्रीभागवते । १ । ८ । २६ ॥
प्रतारणम् । यथा, तत्रैव ।
"जन्म कर्म्म च विश्वात्मन्नजस्याकर्त्तुरात्मनः ।
तिर्य्यङ्नृषिषु यादःसु तदत्यन्तविड्म्बनम् ॥"३०॥

विड्म्बना, स्त्री, (वि+ड्म्ब+णिच्+युच् । टाप् ।) अनुकरणम् । (यथा, कुमारे । ४ । १२ ।
"असति त्वयि वारुणीमदः
प्रमदानामधुना विड्म्बना ॥")
प्रतारणम् । (यथा, पञ्चतन्त्रे । ४ । ४६ ।
"नो चेदेतेषां सकाशात् विड्म्बनां प्राप्य मरिष्यसि ॥"* ॥ परिहासः । यथा, कुमारे । ५ । ७० ।
"इयञ्च तेऽन्या पुरतो विड्म्बना
यदूढ्या वारणराजहार्य्यया ।
विलोक्य दृङ्नोत्तमधिष्ठितं त्वया
महाजनः स्मेरमुखो भविष्यति ॥")

विड्म्बितः, त्रि, (वि+ड्म्ब+क्तः ।) कृतविड्म्बनः । तत्पर्य्यायः । व्यस्तः २ आकुलः ३ दुर्गतः ४ । इति शब्दमाला ॥ (अनुकृतः । यथा, रघुः । ३ । ५२ ।
"अतिष्ठदालीढविशेषशोभिना
वपुःप्रकर्षेण विड्म्बितेश्वरः ॥")

विड्वारकः, पुं, (विड्वाल एव । स्वार्थे कन् । ह्रस्वः ।) विड्वालः । इति शब्दरत्नावली ॥

वि(बि)ड्वालः, पुं, (विड् आक्रोशे + "तमिविशिविड्डीति ।" उणा० १ । ११७ । इति कालन् ।) नेत्ररिपुः । इति मेदिनी । ले, १३३ ॥ नेत्रौषधविशेषः । इति भावप्रकाशः ॥ खनामख्यातप्राणुः । बिल्ली इति हिन्दीभाषा । तत्पर्य्यायः । ओतुः २ मार्ज्जारः ३ वृषदंशकः ४ आखुभुक् ५ । इत्यमरः ॥ विरालः ६ विलालः ७ । इति तट्टीका ॥ दीप्राक्षः ८ नक्तञ्चरी ९ जाहकः १० विड्वारकः ११ । इति शब्दरत्नावली ॥ चित्रशुङ्गः १२ जिह्मकायः १३ मेनादः १४ सूचकः १५ । इति जटाधरः ॥ भूषिकारातिः १६ ग्रासाहृतकः १७ मायावी १८ दीप्तलोचनः १९ । इति राजनिर्घण्टः ॥ (यथा, मनुः । ११ । १६० ।
"विड्वालकाकाखूच्छिष्टं जग्ध्वा श्वनकुलस्य च ।
केशकीटावपन्नञ्च पिबेदब्रह्मसुवर्चलाम् ॥")

वि(बि)ड्वालकं, क्ली, हरितालम् । इति हेमचन्द्रः ॥

वि(बि)ड्वालकः, पुं, (विड्वाल एव । स्वार्थे कन् ।) विड्वालः । नेत्ररोगस्य औषधविशेषः । यथा ।
अथ विड्वालकविधिः ।
"विड्वालको बहिर्लोपो नेत्रे पक्ष्मविवर्जिते ।
तस्य मात्रा परिज्ञेयो सुखालेपविधानवत् ॥"

विड्व

सुखालेपो यथा,—
"अङ्गुलस्य चतुर्थांशो सुखालेपः कनिष्ठिकः ।
मध्यमस्तु त्रिभागः स्यादुत्तमोऽर्द्धाङ्गुलो भवेत् ॥
स्थितिकालोऽपि तस्योक्तो यावत् कल्को न शुष्यति ।
तेनापि गुणहीनः स्यात्तथा दूषयति त्वचम् ॥"
स यथा ।
"यष्टिगैरिकसिन्धूत्थदार्व्वीतार्क्ष्यैः समांशकैः ।"
जलपिष्टैर्बहिर्लेपः सर्व्वनेत्रामयापहः ॥"
तार्क्ष्यं रसाञ्जनम् ।
"रसाञ्जनेन वालेयः पथ्याविल्वदलैरपि ।
वचाहरिद्राविश्वैर्व्वा तथा नागरगैरिकैः ॥"
इति भावप्रकाशः ॥

वि(बि)ड्वालपदः, पुं, तोलकद्वयपरिमाणम् । यथा,
"तोलौ द्वौ पिचुरुच्च सुवर्णकडवग्रहः ।
विड्वालपदकर्षौ च पाणीतलसुडुम्बरम् ॥"
इति शब्दमाला ॥

मार्ज्जारचरणे, क्ली ॥

वि(बि)ड्वालपदकं, क्ली, कर्षपरिमाणम् । इति वैद्यकपरिभाषा ॥

वि(बि)ड्वाली, स्त्री, विदारी । इति राजनिर्घण्टः ॥ (मार्ज्जारी ॥)

विडीनं, क्ली, (वि+डी+क्तः ।) खगगतिविशेषः । यथा,—
"डीनं प्रडीनमुड्डीनं संडीनं परिडीनकम् ।
विडीनमवडीनञ्च निडीनं डीनडीनकम् ॥
गतागतप्रगतितसम्पतादयश्च पक्षिणाम् ।
गतिभेदाः पक्षिगृहं कुलायो नीड़मस्त्रियाम् ॥"
इति जटाधरः ॥

विड्डुलः, पुं, वेतसवृक्षः । इति हेमचन्द्रः ॥

विड्ओजाः, [स्] पुं, (विष् व्याप्तौ + क्विप् । विट् व्यापकं ओजो यस्य ।) इन्द्रः । इत्यमरः ॥

विड्ओजाः, [स्] पुं. (विड् आक्रोशे शत्रुद्वेषमसहिष्णु ओजो यस्य ।) इन्द्रः । इति भरतीयद्विरूपकोषः ॥ (यथा, रघौ । ३ । ५६ ।
"रघुः प्रणाङ्कार्द्धसुखेन पक्षिणा
शरासनज्यामनुनाद्विड्ओजसः ॥")

विड्, [ष्] पुं, (विशतीति । विश् + क्विप् ।) वैश्यः । यथा विट् विड् विशौ विशः । इति सुग्धबोधव्याकरणम् ॥ (मनुजः । विशांपतिशब्ददर्शनात् ॥)

विड्, [ष्] स्त्री, विष्ठा । इति विड्गन्धादिशब्ददर्शनात् ॥

विड्गन्धं, क्ली, (विड्वत् गन्धो यस्य ।) विड्लवणम् । इति रत्नमाला ॥

विड्जः, त्रि, विष्ठाजातः । विष्शब्दपूर्ब्बकजनधातोर्डप्रत्ययेन निष्पन्नः ॥

विड्लवणं, क्ली, (विड्वत् दुर्गन्धं लवणम् ।) विड्म् । इति रत्नमाला ॥ विट्लुण इति भाषा ॥

विड्वराहः, पुं, (विट्प्रियो वराहः ।) ग्राम्यशूकरः । इति जटाधरः ॥ (यथा, मनुः । ५ । १६ ।

"छत्राकं विड्वराहस्य लशुनं ग्रामकुक्कुटम्।
पलाण्डुं गृञ्जनञ्चैव मत्वा जग्ध्वा पतेद्द्विजः॥")

वितंसः, पुं, (वि+तंस+घञ्।) वीतंसः। पक्षपक्षिणां बन्धनोपकरणम्। इत्यमरटीकायां भरतः॥

वितण्डा, स्त्री, (वितण्डायते विहन्यते परपक्षोऽनयेति। वि+तण्ड+गुरोश्चेत्यः। टाप्।) स्वपक्षास्थापना परपक्षयुदासः। इत्यमरभरतौ॥ (यथा, महाभारते। २। ३६। ३।
"एवमेतन्न चाप्येवमेवं चेतन्न चान्यथा।
प्रलपुर्बहवस्तत्र वितण्डां वै परस्परम्॥")

कपीष्णाकः। ग्रिलाक्षयः। करवीरी। इति मेदिनी। डे, ३६॥ दर्व्वी। इति हारावली॥

वितत, त्रि, (वि+तन्+क्तः।) विस्तृतम्। (यथा, प्रबोधचन्द्रोदये। ३। ५।
"उद्गायन्ति यशांसि यस्य वितते र्नादैः प्रचण्डा-
निल-
प्रत्युष्यत्करिकुम्भकूटकुहरयक्ते रणच्चौ
शयः॥")

वीणादिवाद्यम्। इत्यमरे ततशब्दार्थदर्शनात्॥

विततिः, स्त्री, विस्तारः। विपूर्ब्बतनधातोः क्तिप्रत्ययेन निष्पन्ना॥ (यथा, भागवते। ६।१०।१५।
"बध्नीहि सेतुमिह ते यशसो वितत्यै
गायन्ति दिग्विजयिनो यमुपेत्य भूपाः॥")

वितथं, त्रि, मिथ्या। इत्यमरः॥ (यथा, मनुः। ८। ६४।
"अवाक्शिरास्तमस्यन्धे किल्बिषी नरकं व्रजेत्।
यः प्रश्नं वितथं ब्रूयात् पृष्टः सन् धर्म्मनिश्चये॥"
निष्फलः। वृथा। यथा, भागवते। ६।२०।३५।
"तस्येवं वितथे वंशे तदर्थं यजतः सुतम्।
मरुत्तोमेन मरुतो भरद्वाजमुपाददुः॥"
पुं, भरद्वाजपुत्रः। स च दौष्मन्तेर्भरतस्य पौत्रः। यथा, हरिवंशे। ३२। १८—१६।
"ततोऽथ वितथो नाम भरद्वाजात् सुतोऽभवत्।
पौत्रेऽथ वितथे जाते भरतस्तु दिवं ययौ॥
वितथञ्चाभिषिच्याथ भरद्वाजो वनं ययौ॥")

वितथ्यं, त्रि, असत्यम्। वितथशब्दात् स्वार्थे ष्यञ्प्रत्ययेन निष्पन्नम्॥

वितनुः, स्त्री, (वितनोतीति। वि+तन+"जत्वादयश्च।" उणा० ४। १०२। इति रुप्रत्ययेन सम्भवः।) नदीविशेषः। सा च पञ्चावाख्यदेशे वर्त्तते इत्युणादिकोषः॥

वितरणं, क्ली, (वि+तॄ+भावे ल्युट्।) दानम्। इत्यमरः॥ (यथाह कश्चित्।
"वित्तेन किं वितरणं यदि नास्ति तस्य॥")

वितर्कः, पुं, (वि+तर्क+घञ्।) ऊहः। (यथा, भागवते। १०। ८६। १।
"सरस्वत्यास्तटे राजन् ऋषयः सत्रमासत।
वितर्कः समभूत्तेषां त्रिष्वधीशेषु को महान्॥")

संशयः। इति मेदिनी। के, १५७॥ (यथा, महाभारते। १। १६०। २३।
"यौ तौ कुमाराविव कार्त्तिकेयौ
द्वावश्विनेयाविति मे वितर्कः॥")

ज्ञानस्तवकः। इति शब्दरत्नावली॥ * ॥
आहो उताहो किमुत किं किमु उत एते षट् विकल्पवितर्कार्थे। यथा स्थाणुराहो पुरुषः। इति अहो दृश्यादि च। विकल्पे विस्मयेऽप्यहो इति रुद्रः। किमु दृश्यान्तं उत दृश्यादि। चकारात् उताहोस्वित् आहोस्विदिति च यथा भारते। "उताहोस्विन्महेन्द्राजानलः परपुरञ्जयः।" इति आहोस्विन्मुखमिति भारतौ। इति भरतः॥

वितर्कणं, क्ली, (वि+तर्क+ल्युट्।) वितर्कः। इति शब्दरत्नावली॥

वित(र्हि)र्हिः, स्त्री, (वि+तर्ह हिंसायाम्+"सर्व्वधातुभ्य इन्।" उणा० ४। ११७। इति इन्।) वेदिका। इत्यमरः॥ (यथा, माघे। ३। ५५।
"रताम्बरे यत्र गृहाम्बरेषु
वितर्हिनिर्य्यूहविटङ्कनीडः॥")

वित(र्हि)र्हिका, स्त्री, (वितर्हिरेव। स्वार्थे कन्।) वेदिका। इति शब्दरत्नावली॥ (यथा, राजतरङ्गिण्याम्। ८। २६८।
"क्षेमराजाभिधानेन डामरेणेन सोऽन्वितः।
ग्रिलां वितर्हिकातुल्यामध्यास्त स्वप्रभध्वगाम्॥")

वितर्ही, स्त्री, (वितर्हि+ऋदिकारादिति ङीष्।) वेदिका। इति शब्दरत्नावली॥

वितर्ह्वी, स्त्री, वेदिका। इत्यमरटीकायां भरतः।

वितलं, क्ली, (विशेषेण तलम्।) पातालभेदः॥ यथा,—
"अतलं नितलञ्चैव वितलञ्च गभस्तिमत्।
तलं सुतलपाताले पाताला हि तु सप्त वै॥"
इति शब्दरत्नावली॥
(अस्य विवरणं यथा, देवीभागवते। ८। १६। ८—१२।
"द्वितीयविवरस्यात्र वितलस्य निबोधत।
भूतलाधस्तले चैव वितले भगवान् भवः॥
हाटकेश्वरनामायं स्वपार्षदगणैर्वृतः।
प्रजापतिश्च तस्यापि सर्गस्य वृंहणाय च॥
भवान्या मिथुनीभूय आस्ते देवाधिपूजितः।
भवयोर्वीर्य्यसंभूता हाटकी सरिदुत्तमा॥
समिद्धो मरुता वह्निरोजसा पिबतीव हि।
तन्निष्ठ्यूतं हाटकाख्यं सुवर्णं देवभूषणम्॥
दैत्याङ्गनाभूषणार्हं सदा सन्धारयन्ति हि॥")

वितस्तिः, पुं स्त्री, (वि+तसु उपक्षेपे+"वौ तसेः।" उणा० ४। १८१। इति तिः।) विस्तृतसकनिष्ठाङ्गुष्ठः। विगत इति भाषा॥ तत्पर्य्यायः। द्वादशाङ्गुलः २। इत्यमरः॥ (यथा, मार्कण्डेये। ४६। ३६।
"हे वितस्ती तथा हस्तौ ब्राह्मतीर्थादिवेष्टनम्॥")

वितानं, क्ली, (वितन्यते यत्। वि+तन+घञ्।) वृत्तिविशेषः। इति मेदिनी। ने, १३१॥ अवसरः। इति विश्वः॥

वितानः, पुं क्ली, (वि+तन्+घञ्।) क्रतुः। (यथा, माघे। १४। १०॥
"सोमपाथिनि भविष्यते मया
वाञ्छितोत्तमवितानयाजिना॥")

विस्तारः। (यथा, भागवते। ६। ७। ३१।
"यज्ञस्य च वितानानि योगस्य च पथं प्रभो।
नैष्कर्म्मस्य च साङ्ख्यस्य तन्त्रं वा भगवत्-
स्मृतम्॥")

उल्लोचः। इत्यमरः॥ चाँदोया इति भाषा। अस्य पर्य्यायश्चन्द्रातपशब्दे द्रष्टव्यः॥ (यथा, रघुः। १७। २८।
"वितानसहितं तत्र भेजे पैतृकमासनम्।
चूडामणिभिरुद्दृष्टपादपीठं महीक्षिताम्॥")

समूहः। यथा, माघे। ११। ४३।
"नवकनकपिशङ्गं वासरागां विधातुः
ककुभि कुलिशपाणेर्भाति भासां वितानम्॥")

व्रणबन्धनविशेषः। यथा, सुश्रुते। १। १८।
"तत्र कोशदामखस्तिकानुवेल्लितप्रतोलीमञ्छल-
स्यङ्गिकायमकखट्वाचीनविवल्लवितानगोफणाः
पक्षाङ्गी चेति चतुर्दशव्रन्धविशेषाः॥")

वितानः, त्रि, (वि+तन+घञ्।) तुच्छः। (यथा, रघुः। ६। ५०।
"गगनमध्वखुरोद्धतरेणुभि-
र्दृशविता च वितानमिवाकरोत्॥")

मन्दः। इत्यमरः॥ शून्यः। इति धरणिः॥ (यथा, माघे। ३। ५०।
"दृढस्तुलैरप्यतुलैर्वितान-
मालापिनद्धैरपि चावितानैः॥")

वितानकः, पुं क्ली, (वितान एव। स्वार्थे कन्।) चन्द्रातपः। इति शब्दमाला॥ (यथा, कथासरित्सागरे। ४८। ६६।
"तदा तैर्मुक्तमन्योन्यं बाणजालं बभौ दिवि।
रणलक्ष्म्या सपत्न्यर्के वितानकमिवाततम्॥")

समूहः। यथा, माघे। ६। २७।
"अनुययौ विविधोपलकुण्डल-
द्युतिवितानकसंवलितांशुकम्॥")

वितानकः, पुं, (वितान इव प्रतिभाति। वितान+कन्।) माङ्गल्यः। इति राजनिर्घण्टः॥

वितानमूलकं, क्ली, (वितानतुल्यं मूलं यस्य। बहुव्रीहौ कन्।) उष्णीरम्। इति राजनिर्घण्टः॥

वितुन्नं, क्ली, (वि+तुद्+क्तः।) सुनिषण्णकम्। इत्यमरः॥ ग्रैवालकम्। इति मेदिनी। ने, १३१॥

वितुन्नकं, क्ली, (वितुन्नमिव। स्वार्थे कन्।) धान्यकम्। तुत्थम्। इत्यमरः॥

वितुन्नकः, पुं, आमलकी। इत्यमरः॥

वितुन्ना, स्त्री, भूम्यामलकी। इति राजनिर्घण्टः॥

वितुन्निका, स्त्री, (वितुन्ना+स्वार्थे कन्। टापि अत इत्वम्।) भूम्यामलकी। इति राजनिर्घण्टः॥

वित्त, तृ क त्यागे। इति कविकल्पद्रुमः॥ (अदन्तचुरा०-परo-सकo-सेटo।) वित्तयति। वित्तायति। इति दुर्गादासः॥

वित्तं, क्ली, (विद्+क्तः। "वित्तो भोगप्रत्ययथोः।" ८।२।५८। इति साधुः।) धनम्। इत्यमरः॥ (यथा, मनुः। ८। ३६।
"अनृतन्तु वदन् दण्ड्यः स्ववित्तस्यांशमष्टमम्।
तस्यैव वा निधानस्य संख्यायाल्पीयसीं
कलाम्॥")

वित्तः, त्रि, (विद्+क्तः। "तुदविदेति।" ८। २। ५६। इति पक्षे नत्वाभावः।) विचारितः। विज्ञातः। इत्यमरः॥ लब्धः। इति तट्टीकायां रामाश्रमः॥ (विख्यातः। अत्र वित्तो भोगप्रत्ययथोः इति साधुः। यथा च पाणिनिः। "तेन वित्तश्चुञ्चुप्चणपौ।" ५। २। २६॥)

वित्तदः, त्रि, धनदाता। वित्तं ददाति य इत्यर्थे डप्रत्ययेन निष्पन्नः॥

वित्तिः, स्त्री, (विद्+क्तिन्।) विचारः। लाभः। (यथा, वाजसनेयसंहितायाम्। १८। १४।
"मे वित्तञ्च मे वित्तिश्च मे भूतञ्च मे भूतिश्च मे यज्ञेन कल्पन्ताम्॥") सम्भावना। इति मेदिनी। ते, ५६॥ ज्ञानम्। इति हेमचन्द्रः॥

वित्तेशः, पुं, (वित्तानामीशः।) कुबेरः। यथा,—
"त्वं ब्रह्मा हरिहरसंज्ञितस्त्वमिन्द्रो
वित्तेशः पितृपतिरम्बुपः समीरः।
सोमोऽग्निर्गगनमहीधरोऽब्धिरूपः
किंस्तुत्यं सकलतरस्वरूपधाम्नः॥"
इति मार्कण्डेयपुराणे। १०४। ३७॥

वित्रस्तः, त्रि, त्रासयुक्तः। विपूर्ब्बत्रसधातोः क्तप्रत्ययेन निष्पन्नः॥

वित्रासः, पुं, भयम्। विपूर्ब्बत्रसधातोर्भावे घञ्प्रत्ययेन निष्पन्नः॥ (यथा, भागवते। १०। ५०। १६।
"ततोऽभूत् परसैन्यानां हृदि वित्रासवेपथुः॥")

वित्सनः, पुं, वृषभः। इति शब्दचन्द्रिका॥

विध, ऋ ड याचे। इति कविकल्पद्रुमः॥ (भ्वा०-आत्म०-द्विक०-सेट्।) वेधते। इति दुर्गादासः॥

विधुरः, पुं, (व्यथते इति। व्यथ भयचलनयोः। "व्यथेः संप्रसारणं किच्च।" उणा० १। ४०। इति उरच्। सच कित् सम्प्रसारणञ्च धातोः।) चौरः। राक्षसः। इत्युणादिकोषः॥ (स्त्री, भर्त्रादिवियुक्ता नारी। यथा, ऋग्वेदे। १।८७।३।
"प्रेषामजमेषु विधुरेव रेजते भूमिः॥
"विधुरेव यथा भर्त्रा वियुक्ता जाया राजोपद्रवादिषु सत्सु निरालम्बा सती कम्पते तद्वत्।" इति तद्भाष्ये सायणः॥)

विध्या, स्त्री, गोजिह्वा। इति शब्दचन्द्रिका॥

विद, ल्ल प्र ज्ञ लाभे। इति कविकल्पद्रुमः॥ (तुदा०-उभ०-सक०-अनिट्।) ल्ल, अविदत्। प्र ज्ञ, विन्दति विन्दते। ज्ञा, वेत्ता। इति दुर्गादासः॥

विद, क ड ज्ञ चेतनाख्यानवासवादे। इति कविकल्पद्रुमः॥ (चुरा०-आत्म०-उभ०-च-सक०-दासे स्थैर्ये च अक०-सेट्।) चेतना ज्ञानम्। वादः स्थैर्यम्। क ड, वेद्यते ग्राह्यं धीरः जानातीत्यर्थः। वेदयते ख्यातं लोकः आख्यातीत्यर्थः। वेदयते तीर्थं साधुर्वसतीत्यर्थः। वेदयते वृक्षः स्थिरः स्यादित्यर्थः। ज्ञ, वेदयति वेदयते। केचित्तु वादं न पठन्ति। चेतनाख्याने वेदनेति पठित्वा वेदयते वृक्षः व्यथते इत्यर्थः। इत्युदाहरन्ति। अस्माच्च परस्मैपदमन्यमाना जितां सपत्नेन निवेदयिष्यत इति निवेदनं करोतीत्यर्थे णौ समादधते। इति दुर्गादासः॥

विद, ड धौ मीमांसे। इति कविकल्पद्रुमः॥ (रुधा०-आत्म०-सक०-अनिट्।) मीमांसो विचारणम्। ड ध, विन्ते ग्राह्यं धीरः। धौ वेत्ता। इति दुर्गादासः॥

विद, य ड औ भावे। इति कविकल्पद्रुमः॥ (दिवा०-आत्म०-अक०-अनिट्।) भावः सत्ता स चेह विद्यमानतैव। य ड, विद्यते विष्णुः। औ, वेत्ता। इति दुर्गादासः॥

विद, ल मतौ। इति कविकल्पद्रुमः॥ (अदा०-पर०-सक०-सेट्।) ल, वेत्ति। इति दुर्गादासः॥

विदंशः, पुं, (वि+दंश+घञ्।) अवदंशः। इति राजनिर्घण्टः॥

विदः, पुं, पण्डितः। विदधातोः कर्त्तरि कप्रत्ययेन निष्पन्नः॥

विदग्धः, त्रि, (वि+दह+क्तः।) नागरः। इति त्रिकाण्डशेषः॥ (यथा, देवीभागवते। ६।
"विदग्धाया विदग्धेन सङ्गमो गुणवान् भवेत्॥")
निपुणः। इति त्रिकाण्डशेषः॥ (यथा आर्य्यासप्तशत्याम्। ५०६।
"क्लिन्नं न मुखं नाङ्गं न पच्यती चरणा परागेण।
अस्पृश्यतेव गलिता विदग्धमधुपेन मधु पीतम्॥")
पण्डितः। इति शब्दरत्नावली॥ (विशेषेण दग्धः। यथा, सुश्रुते। ४। १।
"शोफयोरुपनाहन्तु कुर्य्यादामविदग्धयोः।
अविदग्धः शमं याति विदग्धः पाकमेति च॥")

विदग्धता, स्त्री, विदग्धत्वम्। विदग्धस्य भाव इत्यर्थे ताप्रत्ययेन निष्पन्ना॥

विदग्धा, स्त्री, (विदग्ध+टाप्।) परकीयान्तर्गतनायिकाभेदः। यथा। गुप्ताविदग्धालक्षिताकुलटानुशयानासुदिताप्रभृतीनां परकीयायामेवान्तर्भावः। अस्या लक्षणम्। वाक्कौशलयुक्तत्वम्। सा च द्विविधा। वाग्विदग्धा क्रियाविदग्धा च। प्रथमा यथा,—
"निबिड़तमतमालमल्लिवल्ली-
विचकिलराजिविराजितोपकण्ठे।
पथिकसमुचितस्त्ववाद तीव्रे
सवितरि तच्च सरित्तटे निवासः॥"
द्वितीया यथा,—
"दासाय भवनार्थे वदरीमपनेतुमादिशति।
हेमन्ते हरिणाक्षी पयसि कुठारं विनिक्षिपति॥"
इति रसमञ्जरी॥

विदग्धः, पुं, (वेत्तीति। विद+"कविदिभ्यां डित्।" उणा० ३। ११६। इति अथः। सच डित्।) योगी। क्षती। इति मेदिनी। धे, २४॥ (यज्ञः। इति निघण्टुः। ३। १७। "विद ज्ञाने विद विचारणे विदृ लाभे विद सत्तायाम्। 'कृदिदिभ्यां डित्।' इति अथप्रत्ययः। ज्ञायते हि यज्ञः। लभते हि दक्षिणादिरत्र। विचार्य्यते हि विद्वद्भिः। भावयत्यनेन फलम्॥" इति तत्र देवराजयज्वा॥ *॥ वेदितव्ये, त्रि। यथा, ऋग्वेदे। ३। २७। ७।
"होता देवो अमर्त्यः पुरस्तादेति मायया।
विदथानि प्रचोदयन्॥")

विदन्, [त्] त्रि, पण्डितः। विदधातोः शतृप्रत्ययेन निष्पन्नः॥

विदरं, क्ली, (विदीर्य्यतीति। वि+दृ+अच्।) विश्वसारकम्। इति शब्दचन्द्रिका॥ फणीमनसा इति भाषा॥ (विदीर्णे, त्रि। यथा, कामन्दकीये नीतिसारे। १६। १०।
'अल्पवृक्षोपला च्छिद्रा लतिका विदरा स्थिरा।
निःशर्करा च निःपङ्का सापसारा च वारिभूः॥')

विदरः, पुं, (वि+दृ+"ऋदोरप्।" ३। ३। ५७। इति अप्।) विदरणम्। फाटन इति चैरण इति च भाषा। तत्पर्य्यायः। स्फुटनम् २ भिदा ३। इत्यमरः॥ दारणम् ४ विदारणम् ५। इति शब्दरत्नावली॥

विदर्भः, पुं, क्ली, (विप्रिष्टा दर्भाः कुशा यत्र।) कुण्डिननगरम्। इति हेमचन्द्रः॥ स तु वङ्गदेशस्य दक्षिणपश्चिमे वर्त्तते अधुना वड़नागपुर इति ख्यातः॥ *॥ यथा, पूर्ब्बमेघे २ सर्गः।
"स जयत्यरिसार्थसार्थकीकृतनामा किल भीमभूपतिः।
यमवाप्य विदर्भभूः प्रभुं हसति द्यामपि प्रकर्षकाम्॥"
(यथा च रघुः। ५। ६०।
"एको ययौ चैत्ररथप्रदेशान्
सौराज्यरम्यानपरो विदर्भान्॥"*॥
पुं, नृपविशेषः। स च ज्यामघात् शैव्यायां जातः। अस्य कुशक्रथलोमपादाः पुत्राः। यथा, भागवते। ६। २४। १।
"तस्यां विदर्भोऽजनयत् पुत्रौ नाम्ना कुशक्रथौ।
तृतीयं रोमपादञ्च विदर्भकुलनन्दनम्॥"
अस्य नाम्नैव विदर्भनगरी समुत्पन्ना॥ मुनिविशेषः। यथा, हरिवंशे। १६६। ८४।
"द्वैपायनो विदर्भश्च जैमिनिर्माठरः कठः॥")

विदर्भजा, स्त्री, (विदर्भे जायते इति। जन+डः।) अगस्त्यपत्नी। तत्पर्य्यायः। कौशीतकी २ लोपामुद्रा ३। इति त्रिकाण्डशेषः॥ दमयन्ती। यथा, पूर्ब्बमेघे २ सर्गः।
"धृतलाञ्छनगोमयाक्षतं
विधुमालेपनपाकरं विधिः।

भमयत्युचितं विदर्भजा-
ननीराजनवर्त्मानकम् ॥”
रुक्मिणी च ॥

विदर्भराजः, पुं, (विदर्भाणां राजा । “राजाहः-सखिभ्यष्टच् ।” इति टच् ।) विदर्भदेशाधिपतिः । तस्य नामान्तरं भीमराजः । यथा,—
“खरोपतप्तोऽपि भृशं न स प्रभु-
र्विदर्भराजं तनयामयाचत ।
त्यजन्त्यसून् शूरमृषे च मानिनो वरं
त्यजन्ति न त्वेकमयाचितव्रतम् ॥
इति पूर्ब्बनैषधे । १ । ५० ॥

विदर्भसुभ्रूः, स्त्री, (विदर्भस्य सुभ्रूः रमणी ।) दमयन्ती । यथा,—
“विदर्भसुभ्रूस्तनतुङ्गताप्तये
घटानिवापश्यदलं तपस्यतः ।
फलानि धूमस्य धयानधोमुखान्
स दाड़िमे दोहदधूपिनि द्रुमे ॥”
इति पूर्ब्बनैषधे १ सर्गः ॥

विदर्भाधिपतिः, पुं, (विदर्भाणामधिपतिः ।) कृष्णजनपतिः । स च भीष्मकराजः रुक्मिणीपिता च । यथा,—
“तं ये विदर्भाधिपतेः समभ्येत्याभिवाद्य च ।
निवेशयामास मुदा कलितान्यनिवेशने ॥”
इति श्रीभागवतीयदशमस्कन्धे ५३ अध्यायः ॥

विदलं, क्ली, (विघट्टितं दलं यस्य ।) द्विधाकृतकलायादि । दालि इति भाषा । खर्णादेरवयवः । दाड़िमकल्कः । वंशादिकृतपात्रविशेषः । इति क्लीवलिङ्गसंग्रहे अमरभरतौ ॥

विदलः, पुं, (विघट्टितानि दलानि यस्य ।) रक्तकाञ्चनः । इति शब्दरत्नावली ॥ पिष्टकः । इति शब्दचन्द्रिका ॥

विदला, स्त्री, (विघट्टितानि दलानि यस्याः ।) चित्रवृत् । इति राजनिर्घण्टः ॥ पत्रशून्या । यथा,
“विशीर्णा विदला ह्रस्वा वक्रा स्थूला द्विधाकृता ।
क्षमिदग्धा च दीर्घा च समिधो नैव कारयेत् ॥”
इति तन्त्रम् ॥

विद्या, स्त्री, (विद् ज्ञाने + “सिद्धिदादिभ्योऽङ् ।” ३ । ३ । १०४ । इत्यङ् । टाप् ।) ज्ञानम् । बुद्धिः । इति मेदिनी । दे, १४ ॥

विदायः, पुं, (विगतो दायः साक्षात्करणादिरूपऋणं येन ।) गमनानुमतिः । यथा,—
“ऋणं वा चम्यकवनं गच्छ वा तिष्ठ सुन्दरि ! ।
ऋणं गृहच्च यास्यामि विश्लिष्टं कार्य्यमस्ति मे ।
विदायं देहि संप्रीत्या ऋणं मे प्राणवल्लभे ॥”
इति ब्रह्मवैवर्त्ते जन्मखण्डे श्रीराधां प्रति श्रीकृष्णवाक्यम् ॥

विदारः, पुं, (वि + दृ + घञ् ।) जलोच्छ्वासः । विदारणम् । इति मेदिनी । रे, ११६ ॥ युद्धम् । इति हेमचन्द्रः ॥

विदारकं, क्ली, (विदृणातीति । वि + दृ + ण्वुल् ।) वज्रक्षारम् । इति राजनिर्घण्टः ॥

विदारकः, पुं, (विदृणाति जलयानादीनिति । वि + दृ + ण्वुल् ।) जलमध्यस्थिततरुगुल्मादिः । तत्पर्य्यायः । कूपकः २ । इत्यमरः ॥ जलबन्धकः । इति शब्दरत्नावली ॥ शुष्कनद्यादौ जलावस्थानार्थं गर्त्तः । इति सर्ब्बधरः ॥ अतएव कूपा इव कूपकाः । कृतसिताश्च कूपा इति वा । विदारयन्तीति विदारकाः । जलान्तर्गतास्तरुगुल्मादयोऽज्ञानाल्लोकादिविदारकाः कूपकाः । इति साक्षः । बहुत्वमतन्त्रम् । इति भरतः ॥

विदारणं, क्ली, (वि + दृ + णिच् + भावे ल्युट् ।) विक्षतम् । भेदः । इति मेदिनी । णे, १०७ ॥ (यथा, हरिवंशे । ६५ । ७६ ।
“आयुधावाप्तिरत्वेव वपुषो वैष्णवस्य च ।
लक्षणाच्च तेजसश्चैव गूढानाच्च विदारणम् ॥”)
मारणम् । इति शब्दरत्नावली ॥

विदारणः, पुं क्ली, (विदार्य्यन्ते शुचवोऽस्मिन्निति । वि + दृ + णिच् + ल्युट् ।) युद्धम् । इति मेदिनी । णे, १०७ ॥ (विदारयतीति । वि + दृ + णिच् + ल्युः । विदारके, त्रि । यथा, मार्कण्डेये । २० । २ ।
“तस्यात्मजो महावीर्य्यो बभूवारिविदारणः ॥”)

विदारणः, पुं, (विदार्य्यतेऽसौ इति । वि + दृ + णिच् + कर्म्मणि ल्युट् ।) कर्णिकारवृक्षः । इति शब्दचन्द्रिका ॥

विदारिका, स्त्री, (वि + दृ + णिच् + ण्वुल् । टापि अत इत्वम् ।) शालपर्णी । इति शब्दरत्नावली ॥ (यथा, वृहत्संहितायाम् । ७६ । ५ ।
“विदारिकाया खरसेन चूर्णं
सुहुर्मुहुर्भावितशोषितञ्च ।
घृतेन दुग्धेन सशर्करेण
पिबेत् स यस्य प्रमदाः प्रभूताः ॥”)

विदारिणी, स्त्री, (विदृणातीति । वि + दृ + णिनिः । ङीप् ।) काष्ठारी । इति राजनिर्घण्टः ॥ (विदारणकर्त्री । यथा, कथासरित्सागरे । ५३ । १७१ ।
“एकानंशे शिवे दुर्गे नारायणि सरस्वति ।
भद्रकाली महालक्ष्मि सिद्धे रुरुविदारिणि ॥”)

विदारी, स्त्री, (विदारयतीति । वि + दृ + णिच् + अच् । गौरादित्वात् ङीष् ।) शालपर्णी । इति मेदिनी ॥ भूमिकुष्माण्डः । तत्पर्य्यायः । क्षीरशुक्ला २ इक्षुगन्धा ३ क्रोष्ट्री ४ । इत्यमरः ॥ विदारिका ५ स्वादुकन्दा ६ सिता ७ शुक्ला ८ मृगालिका ९ वृष्यकन्दा १० विड़ाली ११ वृष्यवल्लिका १२ भूकुष्माण्डी १३ स्वादुलता १४ गजेष्टा १५ वारिवल्लभा १६ गन्धफला १७ । अस्या गुणाः । मधुरत्वम् । शीतत्वम् । गुरुत्वम् । स्निग्धत्वम् । असृपित्तनाशित्वम् । कफकारित्वम् । पुष्टिबलवीर्य्यविवर्द्धनत्वञ्च । इति राजनिर्घण्टः ॥ विदारी वातपित्तघ्नी तृप्या बल्या रसायनी इति राजवल्लभः ॥ * ॥ अष्टादश-प्रकारकशठरोगान्तर्गत-रोगविशेषः । यथा, अथ विदारीमाह ।

“सदाहलोदं श्वयथुं सुतान्त्र-
मन्तर्गले पूतिविशीर्णमांसम् ।
पित्तेन विद्याद्रुदने विदारीं
पार्श्वे विशेषात् स तु येन शेते ॥”
स पुरुषो येन पार्श्वेन विशेषाद्बाहुल्येन शेते तस्मिन् पार्श्वे सा विदारी भवति इत्यर्थः । इति भावप्रकाशः ॥ अस्माच्चिकित्सादि रोहिणीशब्दे द्रष्टव्यम् ॥

विदारी, [न्] त्रि, विदारणकर्त्ता । विपूर्ब्बदृधातोः कर्त्तरि णिनिप्रत्ययेन निष्पन्नः ॥

विदारीगन्धा, स्त्री, (विदार्य्या भूमिकुष्माण्डस्येव गन्धो यस्याः ।) शालपर्णी । इत्यमरः ॥

विदारुः, पुं, कृकवाकुपादः । कृकलासः । इति हारावली । २१८ ॥

विदाहि, [न्] क्ली, (विदहतीति । वि + दह + णिनिः ।) दाहजनकद्रव्यम् । अस्य गुणौ । पित्तरक्तप्रकारित्वे । इति राजवल्लभः ॥ (दाहजनकभावे, त्रि । यथा, गीतायाम् । १७ । ९ ।
“कट्वम्ललवणात्युष्णातीक्ष्णरूक्षविदाहिनः ।
आहारा राजसस्येष्टा दुःखशोकामयप्रदाः ॥”)

विदिक्, [श्] स्त्री, (दिग्भ्यां विगता ।) दिशोर्मध्यम् । अग्निनिर्ऋतिवायुशानकोणचतुष्टयम् । तत्पर्य्यायः । अपदिशम् २ । इत्यमरः ॥ प्रदिक् ३ । इति जटाधरः ॥ विदिशम् ४ । इति शब्दरत्नावली ॥ कोणः ५ । इति राजनिर्घण्टः ॥ (यथा, भागवते । ४ । १७ । १६ ।
“सा दिशो विदिशो देवी रोदसी चान्तरं तयोः ।
धावन्ती तच्च तच्चेनं ददर्शानुन्नतायुधम् ॥”)

विदिक्चङ्गः, पुं, हरिद्राङ्गपक्षी । इति शब्दचन्द्रिका ॥

विदितं, त्रि, (विद् + क्तः ।) अवगतम् । इत्यमरः ॥ (यथा, महाभारते । ७ । २८ । २२ ।
“सबाणः सधनुश्चाहं ससुरासुरमानुषान् ।
यत्तो लोकानिमान् जेतुं तत्रापि विदितं तव ॥”)
अर्थितम् । इति मेदिनी । ते, १०६ ॥ उपगमः । इति शब्दरत्नावली ॥

विदितः, पुं, (विदितं ज्ञानमस्यास्तीति । अर्शआदित्वात् अच् ।) कविः । इति जटाधरः ॥ (ज्ञानाश्रये, त्रि । यथा, किराते । १ । १ ।
“श्रियः कुरूणामधिपस्य पालनीं
प्रजासु वृत्तिं यमयुङ्क्त वेदितुम् ।
सवर्णिलिङ्गौ विदितः समाययौ
युधिष्ठिरं द्वैतवने वनेचरः ॥”

विदिधः, पुं, पण्डितः । योगी । इति शब्दरत्नावली हलायुधमेदिनी च ॥ सुन्नाक्षिप्तमेदिन्यां हेमचन्द्रे च विदध इति पाठः ॥

विदीर्णः, त्रि, (वि + दृ + क्तः ।) कृतविदारणः । चेरा इति भाषा । यथा,—
पितर ऊचुः ।
“आज्ञानि नोऽधिवुभुजे प्रबभं तनूजै-
र्दत्तानि तीर्थसमयेऽप्यपिबत्तिलाम्बु ।

विदूरः

तस्योदरान्नखविदीर्णवपादृत आर्च्छ-
त्तस्मै नमो वृहरयेऽखिलधर्म्मगोप्त्रे ॥"
इति श्रीमद्भागवते ७ स्कन्धे ८ अध्यायः ॥
अपि च।
"अङ्गीपे क्षिपती समस्तजगती सश्लोकशोका-
मुधौ
राधा सम्भृतकाकुराकुलमसौ चक्रे तथा
क्रन्दनम्।
येन स्यन्दननेमिनिर्म्मितमहासौमन्तदम्भादिदं
हा सर्व्वं सहयापि निर्भरमभूद्दूरादिदीर्णं
सुवा ॥"
इत्युज्ज्वलनीलमणिः ॥

विदुः, पुं, (वेत्ति संग्रामनेनेति। विद्+बाहुलकात् कुः।) गजकुम्भदयमध्यभागः। इत्यमरः ॥ (अश्वकर्णाधोभागः। यथा, अश्ववैद्यके। २। १४।
"विदुर्मर्म्मविदश्चैव कर्णस्याधः षडङ्गुले ॥")
जानन्ति। इति क्रियापदम् ॥ (यथा, महाभारते। १। १२०। २८।
"अपत्यं नाम लोकेषु प्रतिष्ठा धर्म्मसंहिता।
इति कृत्वि! विदुर्धीराः शाश्वतं धर्म्म-
वादिनः ॥")

विदुरः, पुं, (वेत्ति तच्छीलः। विद्+"विदिभिदिच्छिदेः कुरच्।"३। २। १६२। इति कुरच्।) नागरः। धीरः। कौरवाणां मन्त्री। इति मेदिनी। रे, ११५ ॥ विदुरोत्पत्तिर्यथा,—
"क्षेत्रेऽप्रजस्य वै भ्रातुर्म्मात्रोक्तो बादरायणः।
धृतराष्ट्रञ्च पाण्डुञ्च विदुरञ्चाप्यजीजनत् ॥"
इति श्रीभागवते। ९। २२ ॥
ज्ञातरि, त्रि। इत्यमरः ॥ *॥

विदुलः, पुं, (विशेषेण दोलयतीति। धि+दुल+कः।) वेतसः। अम्बुवेतसः। इत्यमरः ॥ गन्धरसः। इति रत्नमाला ॥

विदुषी, स्त्री, (वेत्तीति। विदेः शतर्वसुः। उगितश्चेति ङीप्।) पण्डिता स्त्री। इति मुग्धबोधव्याकरणम् ॥ (यथा, नैषधे। २।
"चिकुरप्रकरा जयन्ति ते
विदुषी मूर्द्धनि सा विभर्त्ति यान् ॥")

विदुषतृ, त्रि, (विद्वानस्ति अस्यामिति। विद्वस्+मतुप्। स्त्रियां ङीप्।) पण्डितवती। यथा,—
"द्यौर्व्वाचक्षतिनेव पन्नगपुरी श्रेषाहिनेवा-
भवद्-
येनैकेन विदुषतृ वसुमती सर्व्वेण संख्याव-
ताम् ॥"
इति बोपदेवप्रशंसा ॥

विदूः, पुं, विदुः। गजकुम्भयोर्म्मध्यम्। इत्यमरटीका ॥

विदूरः, त्रि, (विगतं दूरं यस्य।) अतिदूरस्थदेशादि। यथा,—
"मासानष्टौ तव जलधरोत्कण्ठया शुष्ककण्ठः
सारङ्गोऽसौ युगशतमिव व्यतिनायातिलङ्क-
क्षात्।
आस्तां तावन्नवजलकणाभाजनत्वं विदूरे
वर्षारम्भप्रथमसमये दारुणो वज्रपातः ॥"
इति चातकाष्टकम् ॥
(पर्व्वतविशेषे, पुं। यथा, कुमारे। १। २४।
"तया दुहित्रा सुतरां सवित्री-
स्फुरत्प्रभामण्डलया चकाशे।
विदूरभूमिर्नवमेघशृङ्खा-
दुद्भिन्नया रत्नशलाकयेव ॥")

विदूरगः, त्रि, अतिदूरगन्ता। विदूरे गच्छतीत्यर्थे डप्रत्ययेन निष्पन्नः ॥

विदूरजं, क्ली, (विदूरे पर्व्वते जायते इति। जन+डः।) विदूरपर्व्वतजरत्नम्। वैदूर्य्यमणिः। अतिदूरजाते, त्रि। इति केचित् ॥

विदूरथः, पुं, राजविशेषः। यथा,—
"मनोस्तु दत्तपुत्रस्य दाक्षस्यात्मजान् शृणु।
देववानुपदेवञ्च देवश्रेष्ठो विदूरथः ॥
मित्रवान् मित्रदेवश्च मित्रविन्दश्च वीर्य्यवान्।
मित्रवाहः सवर्चाश्च दत्तपुत्रमनोः सुताः ॥"
इति गारुडे ८७ अध्यायः ॥
(कुरुपुत्रः। यथा, महाभारते। १। ९५। ३९—४०।
"कुरुः खलु दाक्षाहींमुपयेमे सुभाङ्गीं नाम तस्यामस्य जज्ञे विदूरथः। विदूरथस्तु माधवीमुपयेमे संप्रियां नाम तस्यामस्य जज्ञे अनश्वा नाम ॥"*॥ दक्षिणवंशीयाजामन्यतमः। यथा, भागवते। ९। २४। १८।
"पृथुर्विदूरथाद्याश्च बहवो दक्षिनन्दनाः ॥"
अस्य पुत्रः शूरः। यथा, तत्रैव। ९।२४।२६।
"शूरो विदूरथादासीत् भजमानस्तु तत्सुतः।
शिनिस्तस्मात् स्वयं भोजो हृदिकस्तत्सुतो
मतः ॥")

विदूरभूमिः, स्त्री, (विदूरस्य भूमिः।) विदूरदेशः। यत्र वैदूर्य्यमणिरुत्पद्यते। यथा,—
"तया दुहित्रा सुतरां सवित्री
स्फुरत्प्रभामण्डलया चकाशे।
विदूरभूमिर्नवमेघशृङ्खा-
दुद्भिन्नया रत्नशलाकयेव ॥"
इति कुमारसम्भवम् ॥

विदूराद्रिः, पुं, (विदूरनामकोऽद्रिः।) विदूरपर्व्वतः। इति जटाधरः ॥

विदूषकः, त्रि, (विदूषयति आत्मानमिति। वि+दूष+णिच्+ण्वुल्।) कामुकः। तत्पर्य्यायः। विड्गः २ वलीकः ३ षट्प्रश्नः ४ कामकेलिः ५ पीठकेलिः ६ पीठमर्दः ७ भविलः ८ क्षिदुरः ९ विटः १०। इति चिकाण्डशेषः ॥ चाटुवटुः ११ वासन्तिकः १२ केलिकिलः १३ वैहासिकः १४ प्रहासी १५ प्रीतिदः १६। इति हेमचन्द्रः ॥ परनिन्दाकरः। इति मेदिनी। के, २१४॥ तत्पर्य्यायः। खलः २ रङ्कः ३ अभीकः ४ क्रूरः ५ सूचकः ६ कण्टकः ७ नागः ८ मलिनास्यः ९ परदेशी १०। इति शब्दमाला ॥ चतुर्धानायकान्तर्गतनायकविशेषः। तस्य लक्षणं यथा। अङ्गादिवैकृत्यैर्हास्यकारी विदूषकः। अस्योदाहरणं यथा,—
"आनीय नीरजमुखीं श्रयनोपकण्ठ-
सुप्तस्कण्ठतोऽस्मि कुचकच्चुकमोचनाय।
अत्रान्तरे सुहृदकारि विदूषकेण
प्रातस्तनस्तरुणकुक्कुटकण्ठनादः ॥"
इति रसमञ्जरी ॥
(अयन्तु शृङ्गारसहायः। यथा, साहित्यदर्पणे। ३। ७७।
"शृङ्गारस्य सहाया विटचेटविदूषकाद्याः स्युः।
भक्ता नर्म्मसु निपुणाः कृपितबधूमानभञ्जना:
शुद्धाः ॥"
दूषणकारके, त्रि। यथा, भागवते। ५।६।१०।
"येनेह वाव कलौ मनुजापसदा देवमाया-
विमोहिताः * * * * ब्रह्मब्राह्मणयज्ञपुरुष-
लोकविदूषकाः प्रायेण भविष्यन्ति ॥")

विदूषणं, क्ली, विशेषेण दूषणम्। विपूर्ब्बाच्छन्तदुषधातोरनट्(ल्युट्)प्रत्ययेन निष्पन्नम् ॥

विदेशः, पुं, (विप्रकृष्टो देशः।) परदेशः। देशान्तरम्। यथा। अशौचकालाभ्यरे विदेशश्राशौचश्रवणे श्रेषाहेः शुद्धिः। इति शुद्धितत्त्वम् ॥ अन्यच्च।
"को ऽतिभारः समर्थानां किं दूरं व्यवसायिनाम्।
को विदेशः सविद्यानां कः परः प्रियवादिनाम्॥"
इति चाणक्ये ॥
अन्यत् देशान्तरशब्दे द्रष्टव्यम् ॥

विदेहः, पुं, जनकान्वयभूमिपः। (यथा, देवीभागवते। १। १६। ५२।
"द्रष्टुमिच्छाम्यहं भूपं विदेहं नृपसत्तमम्।
कथं तिष्ठति संसारे पद्मपत्रमिवाम्भसि ॥"
विगतो देहो यस्य।) कायशून्ये, त्रि। इति मेदिनी। ले, २४ ॥ (यथा, महाभारते। ३। १०७। २६ ॥
"छिन्नपक्षीर्षा विदेहाश्च भिन्नत्वगस्थिसञ्चयः।
प्राणिनः समदृश्यन्त श्रुतश्रोऽथ सहस्रशः ॥")
निमिराजस्य विदेहत्वकारणम्। यथा,—
"असमाप्ते ततो यज्ञे वशिष्ठश्चागमद्दिवः।
तं दृष्ट्वा कुपितः प्राह प्रत्याख्यातोऽस्मि
पार्थिव।
यस्मात्तस्मात् शपेयं त्वां विदेहत्वं भविष्यसि ॥"
इति वह्निपुराणे सूर्य्यवंशसमाप्त्याध्यायः ॥

विदेहा, स्त्री, मिथिला। इति हेमचन्द्रः ॥ (यथा, रघुः। १२। २६।
"बभौ तमनुगच्छन्ती विदेहाधिपतेः सुता।
प्रतिषिद्धापि कैकेया लक्ष्मीरिव गुणोन्नतौ ॥")

विद्धः, त्रि, (विध्यते स्मेति। व्यध+क्तः।) छिद्रितः। इत्यमरः ॥ क्षिप्तः। षड्गः। बाधितः। इति मेदिनी। धे, १६ ॥ (यथा, मार्कण्डेये। ५०। ७०।
"तरुगुल्मादिभिर्द्वारं न विद्धं यस्य वेश्मनः।
मर्म्मभेदोऽथवा पुंसस्तत् श्रेयो भवनं न ते ॥")

ताड़ितः । इत्यजयपालः ॥ (यथा, विष्णुसंहितायाम् । २० । ४४ ।
"नाकाले म्रियते कश्चित् विद्धः शरशतैरपि ।
कुशाग्रेणापि संस्पृष्टः प्राप्तकालो न जीवति ॥")

विद्धकर्णः, पुं, (विद्धः कर्ण इव पञ्चमस्य ।) विद्धकर्णी । इति भरतहिरूपकोषः ॥ (विद्धौ कर्णौ यस्येति । क्षतकर्णवेधे, त्रि ॥)

विद्धकर्णा, स्त्री, विद्धकर्णी । इति भरतहिरूपकोषः ॥

विद्धकर्णिका, स्त्री, (विद्धकर्णा । स्वार्थे कन् ।) विद्धकर्णी । इति शब्दरत्नावली ॥

विद्धकर्णी, स्त्री, (विद्धः कर्ण इव पञ्चमस्याः ।) वृक्षविशेषः । अकनादि इति भाषा ॥ तत्पर्य्यायः । पाठा २ अम्बष्ठा ३ स्थापनी ४ श्रेयसी ५ रसा ६ एकाष्ठीला ७ पाषचैली ८ प्राचीना ९ वनतिक्तिका १० । इत्यमरः ॥ अविद्धकर्णी ११ अविद्धकर्णा १२ । इति सट्टीका ॥ आविद्धकर्णिका १३ विद्धकर्णिका १४ । इति शब्दरत्नावली ॥ अन्यत् पाठाशब्दे द्रष्टव्यम् ॥

विद्यमानः, त्रि, (विद्+शानच् ।) वर्त्तमानः । इति सच्छब्दटीकायां भरतः ॥ (यथा, वैद्यके ।
"वासायां विद्यमानायामाम्रायां जीवितस्य च ॥")

विद्या, स्त्री, (विद्यतेऽसौ इति । विद्+"संज्ञायां समजनिषदनिपतेति ।" ३ । ३ । ९९ । इति क्यप् ।) दुर्गा । इति शब्दरत्नावली ॥ गणिकारिका । इति शब्दचन्द्रिका ॥ ज्ञानम् । तत्तु मोक्षे धीः । इति जटाधरः ॥ परमोत्तमपुरुषार्थसाधनीभूता विद्या ब्रह्मज्ञानरूपा । इति नागोजीभट्टः ॥ मन्त्रः । यथा । शारदायाम् ।
"भान्तं वियत्सनयनं श्वेतो महिनि ठद्वयम् ।
अष्टाक्षरी समाख्याता विद्या महिषमर्द्दिनी ॥"
विश्वसारे ।
"प्रणवाद्यां जपेद्विद्यां मायाद्यां वा जपेत् सुधीः ।"
महिषमर्द्दिनीमन्त्रः ॥
"दृग्वाक्षरी समाख्याता विद्या त्रिभुवनेश्वरी ।
प्रणवश्च तथा माया भवेद्विद्या पुनर्दृग् ।
कामं प्रणवमित्युक्तं भवेद्विद्या पुनर्दृग् ॥"
दुर्गामन्त्रः ।
"वाग्बीजाद्या यदा विद्या वागीशत्वप्रदायिनी ।
कामाद्या च यदा विद्या सर्व्वकामप्रदायिनी ॥
तारमायादिका विद्या भोगमोक्षैकदायिनी ।
यद्बीजाद्या भवेद्विद्या तद्बीजेनाङ्गकल्पना ॥"
अन्नपूर्णामन्त्रः । इति तन्त्रसारः ॥ * ॥ महाविद्या । कलौ तस्या नानाभूतोक्तासनी पूजा सर्व्वत्र भविता । अधुना सा बारोएयारीपूजा इति ख्याता । यथा,—
"अस्मिन् काले सुरेशानि प्रकाशो जायते भुवि ।
तमोधर्म्मेण सर्व्वत्र देवताप्रतिमां सदा ॥
अष्टम्याञ्च चतुर्दश्यां नवम्यां शनिभौमयोः ।
संक्रान्त्यां पञ्चदश्याञ्च पञ्चयोरुभयोरपि ॥
कृत्वा तु पूजयिष्यन्ति महाविद्यां सभैरवाम् ।
विद्याञ्च विविधां देवि तथान्यप्रतिमां शुभाम् ॥
एवं हि तामसीं पूजामनित्याञ्च भवेत् कलौ ।"
इति मायातन्त्रे १७ पटलः ॥

शास्त्रम् । तच्तु अष्टादशविधम् । यथा । शिक्षा १ कल्पः २ व्याकरणम् ३ निरुक्तम् ४ ज्योतिषम् ५ छन्दः ६ ऋग्वेदः ७ यजुर्व्वेदः ८ सामवेदः ९ अथर्व्ववेदः १० मीमांसा ११ न्यायः १२ धर्म्मशास्त्रम् १३ पुराणम् १४ आयुर्व्वेदः १५ धनुर्व्वेदः १६ गान्धर्व्ववेदः १७ अर्थशास्त्रम् १८ ॥ यथा, विष्णुपुराणम् ।
"अङ्गानि वेदाश्चत्वारो मीमांसा न्यायविस्तरः
धर्म्मशास्त्रं पुराणञ्च विद्या ह्येताश्चतुर्दश ॥
आयुर्व्वेदो धनुर्व्वेदो गान्धर्व्वश्चेति ते त्रयः ।
अर्थशास्त्रं चतुर्थञ्च विद्या ह्यष्टादशैव ताः ॥"
इति प्रायश्चित्ततत्त्वम् ॥*॥

नीचादप्युत्तमा विद्या ग्राह्या यथा,—
"श्रद्दधानः शुभां विद्यामाददीतावरादपि ।
अन्त्यादपि परं धर्म्मं स्त्रीरत्नं दुष्कुलादपि ॥"
इति मानवे २ अध्यायः ॥*॥

विद्याप्रशंसा यथा,—
"ये बालभावान्न पठन्ति विद्यां
ये यौवनस्था अधना अदाराः ।
ते शोचनीया इह जीवलोके
मनुष्यरूपेण मृगाश्चरन्ति ॥
भोजने भोजनं चित्तं न कुर्य्याच्छास्त्रसेवकः ।
सुदूरमपि विद्यार्थं व्रजेत् गरुड़वेगवान् ॥
ये बालभावान्न पठन्ति विद्यां
कामातुरा यौवनगर्व्वचित्ताः ।
ते वृद्धकाले परिभूयमानाः
सन्दह्यमानाः शिशिरे यथाजम् ॥
माता शत्रुः पिता वैरी बालो येन न पाठितः ।
न शोभते सभामध्ये हंसमध्ये बको यथा ॥
विद्या नाम कुरूपरूपमधिकं प्रच्छन्नमन्तर्द्धनं
विद्या साधुजनप्रिया शुचिकरी विद्या गुरूणां गुरुः ।
विद्या बन्धुजनार्त्तिनाशनकरी विद्या परं देवता
विद्या भोगयशःसुखोन्नतिकरी विद्याविहीनः पशुः ॥
गृहे चाभ्यन्तरे द्रव्यं लभ्यं चैव तु दृश्यते ।
अग्नेर्भं हरणीयञ्च विद्या न ह्रियते परैः ॥"
इति गारुड़े ११०।११५ अध्यायौ ॥

अथ विद्यादानफलम् ।
"यस्तु देया गृहे नित्यं विद्यादानं प्रवर्त्तयेत् ।
स भवेत् सर्व्वलोकानां पूज्यः पूजापदं व्रजेत् ॥
विद्यादानं प्रवक्ष्यामि येन तुष्यन्ति मातरः ।
लिप्यते दीयते येन विधिना तं शृणुष्व नः ॥
सिद्धान्तमोक्षशास्त्राणि वेदान् स्वर्गादिसाधकान् ।
तदङ्गानीतिहासानि देया धर्म्मविवृद्धये ॥
गारुड़ं बालतन्त्रञ्च भूततन्त्राणि भैरवम् ।
शास्त्राणि पठनाद्दानात् मातरः फलदा नृणाम् ॥
ज्योतिषं वैद्यशास्त्राणि कलाकाव्यं सभाग्यतः ।
दानादारोग्यमाप्नोति गन्धर्व्वं लभते पदम् ॥
विद्याभ्यो वर्त्तते लोको धर्म्माधर्म्मौ च दृष्टये ।
तस्माद्विद्या सदा देया दृष्टादृष्टफलार्थिभिः ॥
मेदीदानञ्च गोदानं हेमवस्त्रतिला जलम् ।
धान्यदीपान्नदानञ्च महादानानि दानसु ॥
इहाच्च चीयते दानं दीपदानं नराधिप ।
विद्या वृद्धिमवाप्नोति दीयमानापि नित्यशः ॥
एकोच्चारेण भूदानं दत्तं भवति भूमिप ।
नहि तद्विद्यते भूप देहपातादनन्तरम् ॥
विद्यादानं न तद्वत्स एकधा दशधा भवेत् ।
शतधा कोटिधा गच्छेदिहामुत्र च पारगः ॥
राज्ञा तस्करदायाद्यैर्जलवह्निसरीसृपैः ।
सर्व्वदानानि क्षीयन्ते विद्या केनापि क्षीयते ॥
विद्यादानात् परं दानं न भूतं न भविष्यति ।
विद्यादानेन दानानि नहि तुल्यानि बुद्धिमन् ॥
विद्या एव परं मन्ये यत्तत् पदमनामयम् ।
प्रत्यक्षमुत्पद्यते भक्तिर्भक्त्या गुरुसुपासते ॥
स च विद्यागमान् वक्ति विद्या मुक्ताश्रिता नृप ।
विद्याविवेकबोधेन शुभाशुभविचारिणाम् ॥
विद्यते सर्व्वकामाप्तिस्तस्माद्विद्या परा मता ॥
विद्यादानात् परं दानं न भूतं न भविष्यति ।
येन दत्तेन चाप्नोति शिवं परमकारणम् ॥
विद्याविचारतत्त्वज्ञा राज्ञः सन्मार्गगामिनः ।
भुञ्जतेऽपि हि भोगादि गच्छन्ति परमां गतिम् ॥
अन्यथा अपि यां प्राप्य क्रीड़न्ति शरराक्षसैः ।
सा विद्या केन मीयेत यस्याः कोऽन्यः समोऽपि च ॥
ज्वरेण कुञ्जरं हन्ति सर्षपेण तुरङ्गमम् ।
मक्षिकापदमात्रस्य विषस्य विषमा गतिः ॥
एवंविधं विधिं वत्स विद्यामन्त्रप्रभावतः ।
चीर्य्यते भक्षितं पुंभिस्तस्माद्विद्या परात्परा ॥
नहि विद्या कुलं जातिरूपं पौरुषपात्रताम् ।
वृणुते सर्व्वलोकानां पतिता उपकारिका ॥
भूतैर्गृहीता विध्वस्ता दष्टा वा महपन्नगैः ।
विद्या उत्थापयेत् वत्स अन्त्यजस्यापि क्षुत्क्षिता ।
सर्व्वेषामेव वृद्धानां विद्यावृद्धे हि मान्यता ॥
वयोवृद्धो हि शूद्राणां विप्राणां धनवान् यतः ।
क्षत्रियाणान्तु वीर्य्येण विप्राणां शास्त्रपारगः ॥
वित्तं बन्धुर्वयश्चैव तपो विद्या यथोत्तरम् ।
पूजनीयानि सर्व्वेषां विद्या तेषां गरीयसी ॥
गुरुशुश्रूषया विद्या पुष्कलेन धनेन वा ।
विद्यया लभ्यते विद्या चतुर्थी नोपलभ्यते ॥
यः क्षत्रियान्तु मर्द्दी दद्यात् मेरुतुल्यञ्च काञ्चनम् ।
स यदभ्यायतः पृष्टेन तस्योपदिशेत् क्वचित् ॥
एवंविधं महाभाग विद्यारूपं हि वर्णितम् ।

संक्षेपान्न च विस्तारात्तस्या दानफलं शृणु ॥
श्रीताड़ीपत्रजे सम्यक् समे पत्रसुसंस्थिते ।
विचित्रकं विपार्श्वे च चर्म्मणा संवटीकृते ॥
रक्तेन अथ क्षौद्रेण मूर्ज्जानावर्त्तितेन च ।
दृढ़बन्धसुबन्धेन एवंविधकृतेन च ॥
यस्तु द्वादशवाहस्रीं संहितामुपलेखयेत् ।
ददाति चाभियुक्ताय स याति परमां गतिम् ॥
पूर्व्वोत्तरन्यस्ते देशे सर्व्वबाधाविवर्जिते ।
गोमयेन शुभेनैव कुर्य्यान्मण्डलकं बुधः ॥
चतुर्हस्तप्रमाणेन शुभश्च चतुरस्रकम् ।
तस्य मध्ये लिखेत् पद्मं सितरक्तरजादिभिः ॥
सर्व्वर्त्तुकमयैः पुष्पैर्भूषयेत् सर्व्वतो दिशम् ।
वितानं दापयेच्चूर्ण्णं शुभचित्रविचित्रितम् ।
पार्श्वतः सितवस्त्रेषु सम्यक् शोभां प्रकल्पयेत् ।
कन्दुकैरर्द्धचन्द्रैश्च दर्पणैश्चामरैस्तथा ॥
घण्टाकिङ्किणिशब्दैश्च सर्व्वत्र उपकल्पयेत् ।
तस्य मध्ये न्यसेद्दण्डं नागदन्तमयं शुभम् ॥
अधः कृत्वा निवद्धन्तु पार्श्वतो हरिदन्तिभिः ।
शोभितं दृढ़बन्धेन बद्धं सूत्रेण बुद्धिमान् ॥
तस्योर्द्ध्वे विन्यसेद्दण्डं पुस्तकं लिखितं शुभम् ।
आलेख्यमपि तत्रैव पूजयेद्विधिना ततः ॥
निरुदकैस्तथा पुष्पैः कृमिकीटविवर्जितैः ।
चन्दनेन सदा तत्र भस्मना चारु धूपयेत् ॥
धूपञ्च गुग्गुलुं देयं तुरुष्कागुरुमिश्रितम् ।
दीपमालां तथा चाग्रे नैवेद्यं विविधं पुनः ॥
खाद्यं पेयान्वितं लेह्यं चोष्यञ्चापि निवेदयेत् ।
पूजयेद्दिग्पालांस्तु लोकपालान् यथाक्रमम् ॥
कन्याः स्त्रियस्तु संपूज्या मातरः कल्पयेच्च ताः ।
पुस्तकं देवदेवीश्च विप्राणां दक्षिणां तथा ॥
स्वशक्त्या चैव दातव्या नृपं पौरांश्च पूजयेत् ।
तथा संपूजयेद्दत्तस्य लेखकं धर्म्मभागकम् ॥
छन्दोलक्षणतत्त्वज्ञं सत्कविं मधुरस्वरम् ।
प्रगल्भं स्मरते ग्रन्थं श्रेष्ठं पुस्तकलेखकम् ॥
नातिसन्ततविच्छिन्नैर्न स्थूलैर्न च कर्कशैः ।
नन्दिनागरकैर्व्वर्णैर्लेखयेच्छिवपुस्तकम् ॥
प्रारम्भे पञ्चश्लोकानि पुनः प्रान्तिन्तु कारयेत् ।
रात्रौ जागरणं कुर्य्यात् सर्व्वोपेतं प्रकल्पयेत् ॥
नटचारणगन्धर्व्वैश्च देवाः कथनसम्भवैः ।
प्रत्यूषे पूजयेल्लोकांस्ततः सर्व्वं विसर्ज्जयेत् ॥
एकान्ते सुमनस्केन विश्रब्धेन दिने दिने ।
निष्पाद्यं विधिनानेन खर्च्चे च शुभवासरे ॥
ततः पूर्व्वोक्तविधिना पुनः पूजां प्रकल्पयेत् ।
तथा विद्याविमानन्तु सप्तपञ्चभूमिकम् ॥
विचित्रवस्त्रशोभाढ्यं शुभलक्षणलक्षितम् ।
कारयेत् सर्व्वतोभद्रं किङ्किणीवरकान्वितम् ॥
दर्पणैरर्द्धचन्द्रैश्च घण्टाचामरमण्डितम् ।
तस्मिन्नृपं समुत्थाप्य सुगन्धं चन्दनागुरुम् ॥
तुरुष्कं गुग्गुलुं दत्त्वा शर्करामधुमिश्रितम् ।
पूर्व्ववत् पूजयेत् सर्व्वान् कन्यास्त्रीद्विजपौरवान् ॥
तथा तं पुस्तकं वस्त्रे विन्यसेद्विधिपूजितम् ।
एवं कृत्वा तथा चिन्त्या मातरः प्रीयतां मम ॥
यस्यैव शुल्कं तच्छास्त्रं पुस्ते पुरि विकल्पयेत् ।
तथा तपस्विनः पूज्याः सर्व्वशास्त्रार्थपारगाः ॥
शिवव्रतधरा मुख्या विष्णुधर्म्मपरायणाः ।
महता जनसंघेन रथस्थं वाद्यवाहनैः ॥
प्रधानैर्व्वापि तन्नेयं यस्य देवस्य अंशुजम् ।
सामान्यं शिवतीर्थेषु मातरो भवनेषु च ॥
तस्मिन् पूजां तथा कृत्वा देवदेवेन शूलिना ।
समर्पयेत् प्रणम्येशं मातरः प्रीयतां मम ॥
सदाध्ययनयुक्ताय विद्यादानरताय च ।
विद्यासंग्रहयुक्ताय सर्व्वशास्त्रकृताश्रमे ॥
तेनैव वर्त्तते यस्तु तस्य तं विनिवेदयेत् ।
जगद्धिताय वै शास्त्रं सन्ध्यायां वाचयेत्तथा ॥
तेन तोयेन हासारं मूर्द्ध्नि समभिसिञ्चयेत् ।
वरन्तेन ततः शब्दसुचार्य्य जगतस्तथा ॥
एवं कृते महाकान्तिर्देशस्य नगरस्य च ॥
अनेन विधिना यस्तु सर्व्वबाधाः शमन्ति च ॥
अनेन विधिना यस्तु विद्यादानं प्रयच्छति ।
स भवेत् सर्व्वलोकानां दर्शनादघनाशनः ।
मृतोऽपि गच्छते स्थानं ब्रह्मविष्णुनमस्कृतम् ॥
सप्त पूर्व्वापरान् वंशानात्मनः सर्व्व एव च ।
उद्धृत्य पापकलिलाद्विष्णुलोके महीयते ॥
यावत् तत्पत्रसंख्यानमक्षराणि विधीयते ।
तावत् स विष्णुलोकेषु क्रीड़ते विविधैः सुखैः ॥
तदा क्षितिं समायातो देवा भक्तिरतो भवेत् ।
समस्तभोगसम्पन्ने विद्वान् संजायते कुले ॥
विद्यादानप्रभावेन योगशास्त्रं ददेद्यदि ।
आत्मविज्ञानरूपेण यः प्रयच्छति मानवः ।
शास्त्रात्तु फलमाप्नोति सत्यं सत्यं न संशयः ॥
स्त्रिया वानेन विधिना विद्यादानफलं लभेत्
भर्त्तुर्व्वानुज्ञया दत्तं विधवा वा तदुद्दिशेत् ॥*॥
विद्यार्थिने सदा देयं वस्त्रमभ्यङ्गभोजनम् ।
कृत्तिका उदकं दीपं यस्मात्तेन विना नहि ॥
लेखनीघटनं तीक्ष्णमसिपत्रन्तु लेखनीम् ।
दत्त्वा तु लभते वत्स विद्यादानमनुत्तमम् ॥
पुस्तकाक्षरसं दत्त्वा तत्प्रमाणं सुशोभनम् ।
विद्यादानमवाप्नोति स्वर्गवन्तन्तु बुद्धिमान् ॥
पत्रकामासनञ्चैव दण्डासनमथापि वा ।
विद्याधारणशीलाय दत्तं भवति राज्यदम् ॥
अञ्जनं नेत्रपादानां दत्तं विद्याप्रदायिनी ।
भूमिं गृहन्तु लेखन्तु स्वर्गराज्यफलप्रदाम् ॥
यस्य भूम्यां स्थितो नित्यं विद्यादानं प्रवर्त्तते ।
तस्यापि भवते स्वर्गं तत्प्रभावान्नराधिप ॥
तस्मात् सर्व्वप्रयत्नेन विद्या देया सदा नरैः ।
इह कीर्त्तिमवाप्नोति मृतो याति परां गतिम् ॥"
इति देवीपुराणे विद्यादानमहाभाग्यफलाध्यायः ॥ * ॥ अपि च ।
"दशवापीसमा कन्या भूमिदानञ्च तत्समम् ।
भूमिदानाद्दशगुणं विद्यादानं विशिष्यते ॥
यथा सुराणां सर्व्वेषां रामश्च परमेश्वरः ।
तथैव सर्व्वदानानां विद्यादानन्तु देहिनाम् ॥
राजसूयसहस्रस्य सम्यगिष्टस्य यत् फलम् ।
तत् फलं लभते विप्रो विद्यादानेन पुण्यवान् ॥
सर्व्वशस्यसमापूर्णां सर्व्वरत्नोपशोभिताम् ।
विप्राय वेदविदुषे महीं दत्त्वा शशिग्रहे ।
यत्फलं लभते विप्रो विद्यादानेन तत् फलम् ॥
कपिलानां सहस्रेण सम्यग्दत्तेन यत् फलम् ।
तत् फलं समवाप्नोति पुस्तकस्य प्रदानतः ॥
यावच्च पातकं तेन कृतं जन्मशतैरपि ।
तत् सर्व्वं नाशयत्याशु विद्यादानेन भो द्विज ॥
धर्म्मोपदेशं यः कुर्य्यात् शास्त्रं ज्ञात्वा तु वैष्णवे ।
कृत्स्नां धरित्रीं यो दद्यात् उभयोरुत्तमं फलम् ॥
विद्यादानात् परं दानं न भूतं न भविष्यति ।
येन दत्तेन चाप्नोति शिवं परमकारणम् ॥
विद्या च श्रूयते लोके सर्व्वधर्म्मप्रदायिका ।
तस्माद्विद्या सदा देया पण्डितैर्धार्म्मिकैर्द्विजैः ॥
आत्मविद्याप्रदातारो ये भवन्ति सदा सुने ।
न पुनस्तेऽपि निरयं प्रविशन्ति सुनिश्चयम् ॥
विप्राय पुस्तकं दत्त्वा धर्म्मशास्त्रस्य च द्विज ।
पुराणस्य च यो दद्यात् स देवत्वमवाप्नुयात् ॥
शास्त्रदृष्ट्या जगत् सर्व्वं सुस्थतश्च शुभाशुभम् ।
तस्मात् शास्त्रं प्रयत्नेन दद्याद्विप्राय कार्त्तिके ॥
वेदविद्याश्च यो दद्यात् स्वर्गे कल्पत्रयं वसेत् ।
आत्मविद्याश्च यो दद्यात् तस्य संख्या न विद्यते ॥
त्रीणि तुल्यप्रदानानि त्रीणि तुल्यफलानि च ।
शास्त्रं कामदुघा धेनुः पृथिवी चैव शाश्वती ॥
यत्किञ्चित् कार्त्तिके दत्तं विष्णुर्ब्रह्मश्च मानवैः ।
तदक्षयञ्च लभते त्वन्नदानादिशेषतः ॥
इह लोके बहून् भोगान् भुक्त्वा याति शिवालयम् ।"

इति पाद्मोत्तरखण्डे ११७ अध्यायः ॥

अथ विद्यारम्भदिनानि ।

विष्णुधर्म्मोत्तरे ।
"संप्राप्ते पञ्चमे वर्षे अप्रसुप्ते जनार्द्दने ।
षष्ठीं प्रतिपदञ्चैव वर्ज्जयित्वा तथाष्टमीम् ॥
रिक्तां पञ्चदशीञ्चैव सौरिभौमदिनं तथा ।
एवं सुनिश्चिते काले विद्यारम्भन्तु कारयेत् ॥
पूजयित्वा हरिं लक्ष्मीं देवीञ्चापि सरस्वतीम् ।
स्वविद्याश्चकारांश्च स्वाञ्च विद्यां विशेषतः ॥
नमस्ते बहुरूपाय विष्णवे परमात्मने ।
स्वाहेत्यनेन हरिं चिः पूजयेत् ।
भद्रकाल्यै नमो नित्यं सरस्वत्यै नमो नमः ।
वेदवेदान्तवेदाङ्गविद्यास्थानेभ्य एव च ॥
स्वाहेति ब्रह्मपुराणीयेन च चिः पूजयेत् ॥"*॥
लिखनविधिमाह नन्दिपुराणम् ।
"शुभे नक्षत्रदिवसे शुभे वारे दिनग्रहे ।
लेखयेत् पुण्य देवेशान् रुद्रब्रह्मजनार्द्दनान् ॥
पूर्व्वदिग्वदनो भूत्वा लिपिज्ञो लेखकोत्तमः ।
निरोधो हस्तवाङ्कोच्च मसीपत्रावधारणी ॥"
मत्स्यपुराणञ्च ।
"ग्रीष्मेपितान् सुसंपूर्णान् समश्रेणीगतान् समान् ।
अक्षरान् विलिखेद्यस्तु लेखकः स परः स्मृतः ॥"

नाधीयीतेत्यनुवृत्तौ मनुः ।
"रुधिरे चलते गात्रात् शस्त्रेण च परीक्षते ।"
रुधिरस्रवं विना शस्त्रेण क्षतमात्रेऽपि । दीपिकायाम् ।
"लघुचरशिवभूलाधोमुखत्वपौष्ण-
शुक्रेषु च हरिबोधे शुक्रजीवार्कवारे ।
उदितवति च जीवे केन्द्रकोणेषु सौम्ये-
रपठनदिनवर्ज्यं पाठयेत् पञ्चमेऽब्दे ।"
मदनपारिजाते ।
"विद्यारम्भे गुरुः श्रेष्ठो मध्यमौ भृगुभास्करौ ।
मरणं शनिभौमाभ्यामविद्या बुधसोमयोः ॥
विद्यारम्भः सुरगुरुसितज्ञेष्वभीष्टार्थदायी
कर्त्तुश्चायुश्चिरमपि करोत्यंशुमान् मध्यमोऽत्र ।
नीहारांशौ भवति जड़ता पञ्चता भूमिपुत्रे
छायासूनावपि च सुतयः कीर्त्तयन्त्येवमाद्याः ॥
रवेर्गुरोर्भृगोर्लग्ने तत्स्थेऽर्केऽपीन्दुदर्शिते ।
गुर्व्वर्केन्दूद्भुसुद्दौ च विद्यारम्भः प्रशस्यते ॥"*॥
बृहस्पतिः ।
"प्राङ्मुखो गुरुरासीनो वरणाभिमुखं शिष्यम् ।
अध्यापयेच्च प्रथमं द्विजाग्रीभिः प्रपूजितम् ॥"
कूर्म्मपुराणम् ।
"स्वाध्यायस्य त्रयो भेदा वाचिकोपांशु-
मानसाः ॥"
शिवधर्म्मे ।
"संस्कृतेः प्राकृतैर्वाक्यैः शिष्यमनुरूपतः ।
देशभाषादुपायैश्च बोधयेत् स गुरुः स्मृतः ॥"
आदिः ग्रन्थकरणादिः । * । नन्दिपुराणम् ।
"प्रशस्तशब्दसंयोगे कुर्य्यात् यतिविरामणम् ।"
विरामणं तद्दिनपाठसमाप्तिम् ॥ * ॥
"समाप्ते वाचकाभीष्टं कुर्य्यादेव विचक्षणः ।
सुव्रतं सुव्रतं भूयादस्तु श्राद्धा तु नित्यदा ॥
लोकः प्रवर्त्ततां धर्म्मे राजा चास्तु सदा जयी ।
धर्म्मवान् धनसम्पन्नो गुरुश्चास्तु निरामयः ॥*॥
इति प्रोच्य यथान्यायं गन्तव्यञ्च विभावितैः ।
शिष्यैः परस्परं श्राद्धं चिन्तनीयं विचक्षणैः ॥
कथावस्तुप्रसङ्गेन नानाश्राद्धानसम्भवैः ।
युक्तिभिश्च स्मरेद्दाद्धां चिह्नैश्चापि स्वयंकृतैः ।
एवं दिने दिने श्राद्धां शृणुयान्नियतो नरः ॥"
विष्णुपुराणम् ।
"पुत्रैरध्यापिता ये च ते पतन्ति श्वभोजने ॥"
सूत उवाच ।
"प्रागल्भ्यहीनस्य नरस्य विद्या
शस्त्रं यथा कापुरुषस्य हस्ते ।
न क्षत्रियुत्पादयते शरीरे
अन्धस्य दारा इव दर्शनीयाः ॥"*॥
लिङ्गपुराणम् ।
"यो गुरुं पूजयेन्नित्यं तस्य विद्या प्रसीदति ।
तत्प्रसादेन यस्मात् स प्राप्नुते सर्व्वसम्पदः ॥"
दुर्व्वासाः ।
"सन्ध्यायां गर्ज्जिते मेघे श्राद्धचिन्तां करोति यः ।
चत्वारि तस्य नश्यन्ति चायुर्विद्या यशो बलम् ॥"
अधीतस्यार्थिने दानमावश्यकं तथा च श्रुतिः ।
योऽधीत्यार्थिभ्यो विद्यां न प्रयच्छेत् स कार्य्यहा स्यात् श्रेयसो द्वारमावृणुयात् इति । * ।
तद्दानञ्च अध्यापनेन व्याख्यया 'विलिख्यार्पणेन च सम्भवतीत्यतो धीमद्भिर्निबन्धः क्रियते ॥ * ॥
तथा च विष्णुपुराणम् ।
"प्राणिनामुपकाराय यदेवेह परत्र च ।
कर्म्मणा मनसा वाचा तदेव मतिमान् भजेत् ॥"
बृहस्पतिरपि ।
"अज्ञानतिमिरोपेतान् सन्देहपटलान्वितान् ।
निरामयान् यः कुरुते श्राद्धाञ्जनशलाकया ॥
इह कीर्त्तिं राजपूजां लभते सद्गतिञ्च सः ।
धाराधिके तु समये भ्रान्तिः सञ्जायते यतः ॥
धात्राक्षराणि दृष्टानि पत्रारूढान्यतः पुरा ।
उपदेशानुमन्ता च लोके तुल्यफलौ स्मृतौ ॥"
एवञ्च । एकलव्येनानुपदेशेऽपि द्रोणाचार्य्यो गुरुः कृतः अतो ग्रन्थकर्त्तुः सुतरां गुरुत्वम् । यथा, महाभारते ।
"अरण्यमनुसंप्राप्य कृत्वा द्रोणं महीमयम् ।
तस्मिन्नाचार्य्यवृत्तिञ्च परमामास्थितस्तदा ।
इष्वस्त्रे योगमातस्थे परं निश्चयमागतः ॥"*॥
शूलपाणिः ।
"न वेदमनधीतानां विद्यामधीयीतान्यत्र वेदाङ्गस्मृतिभ्यः ॥" * ॥ अङ्गानि च ।
"शिक्षा कल्पो व्याकरणं छन्दो ज्योतिषमेव च ।
निरुक्तञ्चेति चाङ्गानि वेदानां गदितानि षट् ॥"
स्मृतिस्तु धर्म्मसंहितेत्यमरः ॥ * ॥ शिष्यस्य गुरुत्व ऋणित्वमाह लघुहारीतः ।
"एकमप्यक्षरं यस्तु गुरुः शिष्ये निवेदयेत् ।
पृथिव्यां नास्ति तद्द्रव्यं यद्दत्त्वा सोऽनृणी भवेत् ॥"
नन्दिपुराणम् ।
"यश्च श्रुत्वान्यतः श्राद्धं संस्कारं प्राप्य वै दृढम् ।
अन्यस्य जनयेत् कीर्त्तिं गुरोः स ब्रह्महा भवेत् ॥
विस्मरेच्च तथा मौढ्यादृषोऽपि श्राद्धमनुत्तमम् ।
स याति नरकं घोरमक्षयं भीमदर्शनम् ॥"*॥
अतएव गृहस्थादीनामपि पुनरध्ययनमाह आपस्तम्बः । यया विद्यया न विरोधेत पुनराचार्य्यमुपेत्य साधयेदिति ॥ * ॥ विष्णुः । यश्च विद्यामासाद्य तया जीवेत् न च सा तस्य परलोकफलप्रदा भवति यश्च विद्यया परेषां यशो हन्तीति । * । देवलः ।
"दृष्टं दत्तमधीतं यद्दिनश्यत्यनुकीर्त्तनात् ।
श्राघानुशोचनाभ्याञ्च भग्नतेजो विभिद्यते ॥
तस्मादात्मकृतं पुण्यं तथा न परिकीर्त्तयेत् ॥"
अनुकीर्त्तनं कथनम् । श्राघा प्रशंसा । अनुशोचनं धनव्ययेन पश्चात्तापः । भग्नतेजः फलजनकशक्तिहीनम् । तथा रक्षादिप्रयोजनं विना ॥ * ॥ वैष्णवाग्नेते भविष्यपुराणम् ।
"उपाध्यायस्य यो वृत्तिं दत्त्वाध्यापयति द्विजान् ।
किन्न दत्तं भवेत्तेन धर्म्मकामार्थमिच्छता ॥"
इति ज्योतिस्तत्त्वम् ॥

विद्याचक्षुः, विद्याचक्षुः, } (विद्यया चित्तः । विद्या + "तेन-चित्तचक्षुषूपचयौ ।" ५ । २ । २६ । इति चक्षप् चक्षुप् च ।) विद्यया ख्यातः । इति व्याकरणम् ॥
विद्यादलः, पुं, भूर्ज्जवृक्षः । इति शब्दमाला ॥
विद्यादाता, [तृ] त्रि, (विद्यां ददातीति । दा + तृच् ।) विद्यादानकर्त्ता । यथा,—
"अन्नदाता भयत्राता पितातत्तुल्यएव च ।
विद्यादाता जन्मदाता पञ्चैते पितरो नृणाम् ॥"
इति ब्रह्मवैवर्त्ते ब्रह्मखण्डे १० अध्यायः ॥
अपि च ।
"न च विद्यासमो बन्धुर्न्नास्ति कश्चित् गुरोः परः ।
विद्यादातुः पुत्रदारौ तत्समौ नात्र संशयः ॥"
इति ब्रह्मवैवर्त्ते गणपतिखण्डे ४४ अध्यायः ॥
विद्यादानं, क्ली, (विद्यायाः दानम् ।) अध्यापनम् । पुस्तकदानम् । यथा,—
वशिष्ठ उवाच ।
"विद्यादानं प्रवक्ष्यामि याथातथ्यात्तवाधुना ।
तथा देयं फलं यच्च तच्छृणुष्व नृपोत्तम ! ॥
पुण्येऽह्नि शुभनक्षत्रे मण्डपं शुभवेदिकम् ।
चतुरस्रं वितानं वा कृत्वा तत्रोपलेपयेत् ॥
गोमयेनोपलिप्ते तु पुण्याक्षरशोभिते ।
तत्र न्यस्यासनं दिव्यं दिग्गजादिवासितम् ॥
संस्थाप्य पुस्तकं तत्र धर्म्मशास्त्रस्य धीमतः ।
ब्राह्मणान् वेदसंपूर्णान् छन्दोलक्षणपारगान् ॥
लेखयित्वा तु यत्नेन तत्समञ्च शुभाक्षरैः ।
चन्द्रसूर्य्योपरागे वा संक्रान्त्ययनवासरे ॥
पुण्येऽह्नि तत् सुसंपूज्य वस्त्रालङ्कारभूषणैः ।
धृतधेन्वा युतं रत्नैर्दद्यात् गुणवते ततः ॥
ब्राह्मसद्भावविदुषे वाचकेऽतिप्रियंवदे ।
तच्छास्त्रं शृण्वतां नित्यं जनानां नाशयत्यघ ।
दातुस्तस्माच्चवत्येवं फलं तच्छृणु भूपते ॥
यत् पुण्यं सर्व्वतीर्थानां विधिवदृयजतां तथा ।
तत् पुण्यं समवाप्नोति विधिवच्छास्त्रदः पुमान् ॥
कपिलानां सहस्रेण सम्यग्दत्तेन यत् फलम् ।
तद्राजन् सकलं लेभे धर्म्मशास्त्रप्रदायकः ॥
पुराणं भारतं वापि रामायणमथापि वा ।
दत्त्वा यत् फलमाप्नोति न तत् सर्व्वैर्मखैरपि ॥
देवानामालये नित्यं धर्म्मशास्त्राणि यः पुमान् ।
अध्यापयति धर्म्मात्मा तस्य दानफलं शृणु ॥
धनभूमिहिरण्यानां दानेन यदवाप्यते ।
फलं तत् सकलं राजन् नित्यं कारापकस्य च ॥
योऽधीते धर्म्मशास्त्राणि देवानां पुरतोऽनिशम् ।
द्विजो वीप्सुरथार्थानामेवमेवार्हति ध्रुवम् ॥
प्रातरुत्थाय यो वेदं वेदाङ्गं शास्त्रमेव वा ।
पृथिवीदानतुल्यं स्यात् फलं तस्य नृपोत्तम ॥
दानेर्योऽपि विभर्त्तीतानतीप्सुर्धर्म्मतत्परः ।
द्विगुणं पृथिवीदानात् फलं तस्य भवेन्नृप ! ॥
यो भृतं पठमानानां करोत्यनुदिनं नृप ! ।
स यज्ञफलमाप्नोति दानाच्छादनभोजनैः ॥
विवेकी जीवितं दीर्घं धर्म्मकामार्थसम्पदः ।

सर्व्वं तेन भवेद्दत्तं ग्राह्याणां पोषणे कृते ॥
वाजपेयसहस्रस्य सम्यगिष्टस्य यत् फलम् ।
तत् फलं समवाप्नोति विद्यादानान्न संशयः ॥
तस्माद्देवालये नित्यं धर्म्मशास्त्रस्य वा श्रुतेः ।
पठनं कारयेद्राजन् यदीच्छेद्धर्म्ममात्मनः ॥
गोभूहिरण्यवासांसि शयनान्यासनानि च ।
प्रत्यहं तेन दत्तानि भवन्ति नृपसत्तम ! ॥
धर्म्माधर्म्मं न जानाति लोकोऽयं विद्यया विना ।
तस्मात् सदैव धर्म्मात्मन् विद्यादानरतो भव ॥"
इति वह्निपुराणे विद्यादाननामाध्यायः ॥

विद्यादेवी, स्त्री, (विद्याया देवी ।) जिनघोड़शदेवान्तर्गतदेवीविशेषः । इति हेमचन्द्रः ॥ सरस्वती च ॥

विद्याधनं, क्ली, विद्यया अर्ज्जितधनम् । यथा ।
विद्याधनमाह कात्यायनः ।
"उपन्यस्तं तु यल्लब्धं विद्यया प्रथमपूर्ब्बकम् ।
विद्याधनन्तु तद्विद्यात् विभागे न नियोजयेत् ॥
शिष्यादार्व्वित्यतः प्रश्नात् सन्दिग्धप्रश्ननिर्णयात् ।
स्वज्ञानप्रसंगादाल्लब्धं प्राध्ययनात्तु यत् ॥
विद्याधनन्तु तत् प्राज्ञैर्विभागे न प्रयोजयेत् ।
शिष्येष्वपि हि धर्म्मोऽयं मूलादप्यधिकं भवेत् ॥
परं निरस्य यल्लब्धं विद्यया द्यूतपूर्ब्बकम् ।
विद्याधनन्तु तद्विद्यात् न विभाज्यं दृष्टस्मृतिः ॥"
यदि भवान् भद्रमुपन्यस्यति तदा भवत एव मयेतद्देयमिति पणितं यत्रोपन्यासं निर्ज्जीर्य लभते तत्र विभाज्यम् । शिष्यादध्यापितात् आर्व्वित्यतः यजमानाद्वित्तिप्रया लब्धं धनं न प्रतिग्रहलब्धं वेतनरूपत्वात्तस्य । तथा यत्किञ्चिद्विद्याप्रश्ने निर्ज्जीर्णोपणितं यदि कश्चित् परितोषाद्ददाति । तथा यो ह्यस्मिन् ग्राह्यार्थे अस्माकं संशयमपनयति तस्मै धनमिदं ददामीत्युपस्थितस्य संशयमपनीय यल्लब्धम् । तथा वादिनोर्व्वादसन्देहे व्याधकरणार्थमागतयोः सभ्यैर्निरूपणे यल्लब्धं षष्ठांशादिकम् । तथा ग्राह्यादिप्रश्नदृष्टान्तं सभाय्य यत् प्रतिग्रहादिना लब्धम् । तथा ग्राह्यज्ञानविवादे अन्यत्रापि यत्र क्वचिदन्योन्यज्ञानविवादे निर्ज्जित्य यल्लब्धम् । तथैकस्मिन् देये बहूनामुपन्यासे येन प्रदृष्टात् यल्लब्धम् । तथा शिल्पादिविद्यया चित्रकरत्वसुवर्णकारादिभिर्यल्लब्धम् । तथा द्यूतेनापि परं निर्ज्जित्य यल्लब्धं तत् सर्व्वमविभाज्यमितरैः । तस्माद्यया कयाचित् विद्यया लब्धमर्ज्जकस्यैव तन्न इतरेषामिति । प्रदर्शनार्थन्तु कात्यायनेन विस्तारितमिति दायभागः ॥
नारदः ।
"कुटुम्बं बिभृयाद्भ्रातुर्यो विद्यामधिगच्छतः ।
भागं विद्याधनात्तस्मात् स लभेताश्रुतोऽपि सन् ॥"
बिभृयादित्येकवचननिर्द्देशान्न बहवः । यदि विद्यामभ्यस्यतो भ्रातुः कुटुम्बमपरो भ्राता स्वधनव्ययप्रदौरात्म्याभ्यां संवर्द्धयति तदा तद्विद्यार्ज्जितधने तस्याधिकारः । अश्रुतो मूर्खः । कल्पतरुमिताक्षरादीपकलिकासु कात्यायनः ।
"परभक्तोपयोगेन विद्या प्राप्तान्यतस्तु या ।
तया लब्धं धनं यत्तु विद्यालब्धं तदुच्यते ॥"
अन्यतः पित्रमातृकुलव्यतिरिक्तात् । अत्र विशेषयति स एव ।
"नाविद्यानान्तु वैद्येन देयं विद्याधनं क्वचित् ।
समविद्याधिकानान्तु देयं वैद्येन तद्धनम् ॥"
तत्रोचरितविद्यापदमुभाभ्यां सम्बध्यते । तेन समविद्याधिकविद्यानां भागो न तु न्यूनविद्याविद्ययोः । वैद्येन विदुषा । पुनर्विशेषयति ।
"कुले विनीतविद्यानां भ्रातॄणां पितृतोऽपि वा ।
प्रौढ्यप्राप्तन्तु यद्वित्तं विभाज्यं तद्दृष्टस्मृतिः ॥"
कुले स्वकुले पितामहपितृव्यादिभ्यः पितृत एव वा प्रश्चितविद्यानां भ्रातॄणां यद्विद्याप्रौढ्यप्राप्तं धनं तद्विभजनीयमिति कल्पतरुरत्नाकरौ ।
इति दायतत्त्वम् ॥

विद्याधरः, पुं, देवयोनिविशेषः । इत्यमरः ॥ विद्यां मन्त्रादिकं धरति पचाद्यच् । पृषोदरादित्वात् । पृषोदरादिः । कामरूपी खेचरः । इति भरतः ॥ (यथा, रघुः । २ । ६० ।
"तस्मिन् क्षणे पालयितुः प्रजानां-
मुत्पश्यतः सिंहनिपातमुग्रम् ।
अवाङ्मुखस्योपरि पुष्पवृष्टिः
पपात विद्याधरहस्तमुक्ता ॥")
तस्योत्पत्त्यादिर्यथा,—
"नैकैर्यज्ञशतैर्धाम चैलोक्यमघरोधनैः ।
तेषामुत्पादिताश्चोग्रं महागन्धर्व्वनायकाः ॥
उत्पादिताः पुनस्तैर्ये विक्रान्ता युद्धदुर्म्मदाः ।
विद्याधरेश्वरास्ते तु खेचराः कामचारिणः ॥
हिरण्यरोमा कपिलः सुलोमा माधवस्तथा ।
इन्द्रकेतुश्च पिङ्गाक्षो नादश्चैव महाबलः ॥
गण इत्येवमादिस्तु ये चान्ये वै सुलोचने ।
शिवा च सुमनाश्चैव ताभ्यामपि च विश्रवाः ॥
पुनश्चोत्पादयामास विद्या सौमनसं गणम् ।
एतैर्व्याप्तो ह्ययं लोको विद्याधरगणैस्त्रिभिः ॥
एभ्योऽनेकानि जातानि ह्यवरान्तरचारिणाम् ।
लोकेऽस्मिन् गणग्रस्तानि मन्त्रविद्याविचारिणाम् ।
विद्याधरास्तथाप्येते विद्याबलसमन्विताः ॥"
इति वह्निपुराणे काश्यपीयवंशः ॥ * ॥
षोड़शरतिबन्धान्तर्गतचरमबन्धः । तस्य लक्षणं यथा, रतिमञ्जर्य्याम् ।
"नार्य्या ऊरुयुगं धृत्वा कराभ्यां ताड़येत् पुनः ।
कामयेन्निर्भरं कामी बन्धो विद्याधरो मतः ॥"

विद्यावान्, [त्] त्रि, (विद्या अस्त्यस्येति । विद्या + मतुप् । मस्य वः ।) विद्याविशिष्टः । विद्याशब्दात् वतुप्प्रत्ययेन विष्पन्नः ॥ (यथा, प्रबोधचन्द्रोदये । २ । ३१ ।
"विद्यावन्त्यपि कीर्त्तिमन्त्यपि सदाचारादवद्यात्यपि ।

प्रोच्चैः पौरुषभूषणान्यपि कुलान्युद्धर्त्तुमीशः क्षणात् ॥")

विद्युज्जिह्वः, पुं, (विद्युदिव चञ्चला जिह्वा यस्य ।) राक्षसविशेषः । यथा,—
"अग्निकेतुश्च दुर्द्धर्षो रश्मिकेतुश्च वीर्य्यवान् ।
विद्युज्जिह्वो द्विजिह्वश्च सूर्य्यशत्रुश्च राक्षसः ॥"
इति रामायणे उत्तरकाण्डे ६० सर्गः ॥
(स्त्री, कुमारानुचरमातृगणविशेषः । यथा, महाभारते । ६ । ४६ । ८ ।
"मेघस्वना भोगवती सुभ्रूश्च कनकावती ।
अलातान्ती वीर्य्यवती विद्युज्जिह्वा च भारत ! ॥")

विद्युज्ज्वाला,, स्त्री, (विद्युत इव ज्वाला यस्याः ।) कलिकारीवृक्षः । इति राजनिर्घण्टः ॥ (विद्युतो ज्वाला ।) तड़ित्प्रभा च ॥

विद्युत्, स्त्री, (विशेषेण द्योतते इति तच्छीला वा । वि + द्युत + "आजभासेति ।" ३ । २ । १७७ । इति क्विप् ।) सन्ध्या । इति मेदिनी । ते, १५५ ॥ विद्योतते या । तत्पर्य्यायः । शम्या २ प्रतर्द्दनी ३ ह्रादिनी ४ ऐरावती ५ क्षणप्रभा ६ तड़ित् ७ सौदामिनी ८ चञ्चला ९ चपला १० । इत्यमरः ॥ वीणा ११ सौदामनी १२ चिलमौलिका १३ सञ्जूः १४ अशिरप्रभा १५ सौदामनी १६ अस्थिरा १७ मेघप्रभा १८ अग्निः १९ । इति शब्दरत्नावली ॥ चटुला २० अशिररोचिः २१ राधा २२ नीलाञ्जना २३ । इति जटाधरः ॥ सा चतुर्व्विधा । यथा,—
"अरिष्टनेमिपत्नीनामपत्यानीह षोड़श ।
बहुपुत्रस्य विदुषश्चतस्रो विद्युतः स्मृताः ॥"
इति विष्णुपुराणे १ अंशे १५ अध्यायः ॥
चतस्रो विद्युतस्तु ।
"वाताय कपिला विद्युद्दातूषाय हि लोहिता ।
पीता वर्षाय विज्ञेया दुर्भिक्षायासिता भवेत् ॥"
इति ज्योतिःशास्त्रे प्रसिद्धाः । इति तट्टीका ॥

विद्युत्, त्रि, (विगता द्युत् कान्तिर्यस्य ।) निष्प्रभः । इति मेदिनी । ते, १५५ ॥ (विशिष्टा द्युत् दीप्तिर्यस्येति विग्रहे । विशेषेण दीप्तिशाली । यथा, ऋग्वेदे । १ । २३ । १२ ।
"हस्कारादिद्युतत्सर्य्यतो जाता अवस्यवः ॥"
"हस्कारात् दीप्तिकारात् विद्युतो विशेषेण दीप्यमानात् ।" इति तद्भाष्ये सायणः ॥)

विद्युत्केशः, पुं, (विद्युत इव दीप्तिशालिनः केशा यस्य ।) राक्षसविशेषः । यथा,—
"स कालभगिनीं कान्तां भर्य्यां नाम महाभयाम् ।
उदावहदमेयात्मा स्वयमेव महामतिः ॥
स तस्यां जनयामास हेती राक्षसपुङ्गवः ।
पुत्रं पुत्रवतां श्रेष्ठो विद्युत्केशमिति श्रुतम् ॥"
इति रामायणे उत्तरकाण्डे ४ सर्गः ॥

विद्युत्प्रियं, क्ली, (विद्युतः प्रियम् । तदाकर्षकत्वात् ।) काँस्यम् । इति हेमचन्द्रः ॥

विद्युत्वान्, [त्] त्रि, (विद्युतः सन्त्यस्मिन्निति । विद्युत् + मतुप् ।) विद्युद्विशिष्टः । विद्यु-

च्छन्दात् वतुप्रत्ययेन निष्पन्नः ॥ (यथा, मेघदूते । ६६ ।
"विद्युत्वन्तं ललितवनिताः सेन्द्रचापं सचित्राः
सङ्गीताय प्रहतमुरजाः स्निग्धगम्भीरघोषम् ॥"
पुं, पर्व्वतविशेषः । यथा, हरिवंशे ।२२८।६१।
"विद्युत्वान् पर्व्वतः श्रीमानायतः शतयोजनम् ।
विद्युतां यत्र सम्पाता निपतन्ति नगोत्तमे ॥")
विद्युन्माला, स्त्री, अष्टाक्षरपादच्छन्दोविशेषः । यथा । "मो मो गो गो विद्युन्माला ।"
"वाशो वक्त्री विद्युन्माला वर्ष्मग्रन्थी प्राक्त्वापः ।
यस्मिन्नास्तां सापोच्छित्तेः सोमध्यस्थः क्षण्णाभोदः ॥"
इति छन्दोमञ्जरी ॥
अपि च ।
"सर्व्वे वर्णा दीर्घा यस्या विश्रामः स्याद्वेदैर्वेदैः ।
विद्वद्वृन्दैर्वीणावाणि ! गीयाता सा विद्युन्माला ॥"
इति श्रुतबोधः ॥
विद्युन्माली, [न्] पुं, राक्षसविशेषः । यथा ।
विद्युन्माली नाम कश्चिद्राक्षसो माहेश्वरः तस्मै रुद्रेण सौवर्णं विमानं दत्तं ततोऽर्कस्य पृष्ठतो भ्रमन् विमानदीप्त्या रात्रिं विलोपितवान् ततोऽर्केण निजतेजसा द्रावयित्वा तद्विमानं पातितं तच्छ्रुत्वा क्रुपिते रुद्रे भयादर्कः पराद्रवत् ततो रुद्रस्य क्रूरया दृष्ट्या दह्यमानः प्रतप्तं वाराणस्यां पतितो लोलार्कनाम्ना विख्यातः । इति श्रीभागवते १ स्कन्धे ७ अध्यायटीकायां श्रीधरस्वामी ॥ अपि च ।
"धर्म्मस्य पुत्रो बलवान् सुवेग इति विश्रुतः ।
स विद्युन्मालिना सार्द्धं व्ययुध्यत महाकपिः ॥"
इति रामायणे युद्धकाण्डे ७३ सर्गः ॥
विद्रं, क्ली, छिद्रम् । इति शब्दचन्द्रिका ॥
विद्रधिः, पुं, रोगविशेषः । तत्पर्य्यायः । विदरणम् २ क्षुद्ग्रन्थिः ३ क्षुद्व्रणः ४ । इति राजनिर्घण्टः ॥
तत्र विद्रधेः संप्राप्तिपूर्ब्बकं सामान्यं लक्षणमाह ।
"लक्षणभाषमेदांसि प्रदुष्टास्त्रिसमाश्रिताः ।
दोषाः ग्रोथं ग्रनैर्घोरं जनयन्त्यश्रिता भृशम् ॥
महान्मूलं रुजावन्तं वृत्तं वाप्यथवायतम् ।
स विद्रधिरिति ख्यातो विज्ञेयः षड्विधश्च सः ॥"
अस्त्रिसमाश्रिता दोषा इति वक्ष्यमाणाद्व्रणग्रोथाद्विद्रधेर्भेदार्थम् । यतो व्रणग्रोथे दोषाणामस्त्रिसमाश्रयनियमो नास्ति । घोरं व्रणग्रोथाद्दारुणम् । आयतं दीर्घम् ॥ * ॥ षड्विधत्वं विवृणोति ।
"पृथग्दोषैः समस्तैश्च सृतेनाग्निहता तथा ।
भग्नाश्रमपि हि तेषान्तु लक्षणं संप्रचक्षते ॥"*॥
तत्र वातिकस्य लक्षणमाह ।
"अल्पोऽरुणो वा विषमो भृशमत्यर्थवेदनः ।
पिप्पोत्थानप्रपाकश्च वेद्रधिर्व्वातसम्भवः ॥"
विषमो भृशं चलमल्पः स्वयं महान् । पिप्पो त्थानप्रपाकः । पिप्पौ नानाविधौ उन्नमप्रपाकौ यस्य सः ॥*॥ पैत्तिकमाह ।
"पक्वोडुम्बरसङ्काशः श्यावो वा ज्वरदाहवान् ।
पिप्पोत्थानप्रपाकश्च विद्रधिः पित्तसम्भवः ॥"
श्लैष्मिकमाह ।
"गुरावसदृशः प्राक्तुः शीतस्निग्धोऽल्पवेदनः ।
चिरोत्थानप्रपाकश्च विद्रधिः श्लेष्मसम्भवः ।
तनुपीतसितास्तेषामास्रावाः क्रमशो मताः ॥"
सान्निपातिकमाह ।
"नानावर्णरुजः स्रावी घाटालो विषमो महान् ।
विषमं पच्यते वापि विद्रधिः सान्निपातिकः ॥"
नानाअनेकविधाः । वर्णाः कृष्णारक्तपाण्डुरूपाः । रुजः तोददाहकण्डादिरूपाः । स्रावाः तनुपीतसिता यस्य । घाटालः घाटा क्षकाटिकास्यास्ति इति घाटालः । अत्युच्छ्रिताग्र इत्यर्थः । विषमः निम्नोन्नतः । विषमं पच्यते वापि चिराच्चिरमभीरोस्तानोर्द्धभेदेन विषमं यथा स्यात्तथा पच्यते ॥ * ॥ अभिघातजस्यागन्तोः संप्राप्तिपूर्ब्बकं लक्षणमाह ।
"तैस्तैर्भावैरभिहते क्षते वापथ्यकारिणः ।
क्षतोष्मा वायुविक्षतः सरक्तं पित्तमीरयेत् ॥
ज्वरस्तृष्णा च दाहश्च जायते तस्य देहिनः ।
आगन्तुविद्रधिर्ज्ञेयः पित्तविद्रधिलक्षणः ॥"
तैस्तैर्भावैः काष्ठलोष्टपाषाणादिभिर्हते यथा रक्तस्रावो न भवति तथाभिहते क्षते क्षते वा । अथवा खड्गशूलादिभिः क्षते यथा रक्तस्रावो भवति तथा क्षते क्षते क्षतोष्मा अत्र क्षतशब्देन क्षतमात्रमुच्यते । तेनाभिहतक्षतयोरप्युष्मवायुविक्षतः । अभिहतः अभिघातात् क्षते रक्तक्षयात् कुपितेन वायुना प्रहतः ईरयेत् कोपयेत् ॥*॥ रक्तजमाह ।
"क्षणात्स्फोटावृतः स्रावस्त्रीव्रदाहरुजाज्वरः ।
पित्तविद्रधिलिङ्गस्तु रक्तविद्रधिरुच्यते ॥"*॥
अधिष्ठानविशेषेण लिङ्गविशेषं बोधयितुमाभ्यन्तरान् विद्रधीनाह ।
"आभ्यन्तरानतस्त्वङ्गे विद्रधीन् परिचक्षते ।
गुर्व्वन्नाम्बुविरुद्धान्नशुष्कशाकान्नभोजनात् ॥
अतिसञ्चीयमानामवेगाघातविदाहिभिः ।
पृथक् समस्य वा दोषाः कुपिता गुल्मकुक्षिगम् ॥
वल्मीकवत् समुन्नद्धमन्तः कुर्व्वन्ति विद्रधिम् ।
गुदे वस्तिमुखे नाभ्यां कुक्षौ वंक्षणयोस्तथा ॥
वृक्कयोः प्लीह्नि यकृति हृदि वा क्लोम्नि वाग्रथ ।
येषां चिह्नानि जानीयात् बाह्यविद्रधिलक्षणैः ।
सम्भूय वा मिलित्वा वा समुन्नद्धं तदुन्नतम् ॥"*॥
स्थानविशेषेण रूपविशेषमाह ।
"गुदे वातनिरोधस्तु वस्तौ छर्द्यास्यमूत्रता ।
नाभ्यां हिक्का तथाटोपः कुक्षौ भारतकोपनम् ॥
कटीपृष्ठग्रहस्त्रीत्वे वंक्षणोत्थे च विद्रधौ ।
वृक्कयोः पार्श्वसंकोचः प्लीह्नः श्वासनिरोधनम् ॥
सर्व्वाङ्गग्रहणस्तीव्रो हृदि श्वासश्च जायते ।
श्वासो वक्त्रं विशत्यन्तः स्वयं महान् । पिप्पो

स्रावमार्गमाह ।
"नाभेरुपरिजाः पक्वा यान्त्यूर्द्धमितरे त्वधः ।
अधः सृतेषु जीवेच्च सृतेषूर्द्धं न जीवति ॥"
नाभेरुपरिजा वृक्कादिजाताः । यान्ति स्रवन्ति ऊर्द्धमुखात् । इतरे वस्त्यादिजाः । अधः गुदात् । नाभिजस्तूभाभ्यां मार्गाभ्याम् । तथा च हारीतः ।
"ऊर्द्धप्रभिन्नेषु मुखाच्छरीरा-
प्रवर्त्तते ऽरुक्षसहितो हि पूयः ।
अधःप्रभिन्नेषु तु पायुमार्गाद्-
द्वाभ्यां प्रवृत्तिस्त्विह नाभिजेषु ॥"*॥
साध्यत्वादिकमाह ।
"अधःसृतेषु जीवेषु सृतेषूर्द्धं न जीवति ।
क्षुद्राभिवस्तिपर्य्याये तेषु भिन्नेषु वातजैः ।
जीवेत् कदाचित् पुरुषो नेतरेषु कदाचन ॥"
क्षुद्राभिवस्तिपर्य्याये क्षुद्रक्षोमादिजातेषु । वातजैः शस्त्रवैद्यव्यापारेण भिन्नेषु पुरुषः कदाचित् जीवेत् । इतरेषु क्षुद्राभिवस्तिजेषु तथा भिन्नेषु न जीवेत् । क्षुदादीनां मर्म्मत्वात् । अतएव भोजः ।
"असाध्यो मर्म्मजो ज्ञेयः पक्वोऽपक्वश्च विद्रधिः ।
सन्निपातोत्थितोऽप्येवं पक्व एव हि वत्सिजः ॥
क्षुद्रा नाभेरधोजश्च साध्या मर्म्मसमीपतः ।
अपक्वश्चैव पक्वश्च साध्यो नोपरि नाभितः ॥
आध्मानं बहुनिष्यन्दं क्षुद्दिङ्मोहधान्वितम् ।
रक्तश्वासयुतं विद्रधिर्नाम्ना येन्नरम् ॥"*॥
बाह्यविद्रधीनां साध्यासाध्यत्वमाह ।
"साध्या विद्रधयः पञ्च विवर्ज्ज्याः सान्निपातिकः ।
आमं पक्वं विदग्धञ्च तेषां ग्रोथवदादिशेत् ॥"
ग्रोथवत् वक्ष्यमाणव्रणग्रोथवत् ॥ * ॥
अथ विद्रधेश्चिकित्सा ।
"जलौकापातनं ग्रस्तं सर्व्वस्मिन्नपि विद्रधौ ।
रक्तदुष्टिरेको लङ्घनं स्वेदः पित्तोत्तरं विना ॥
अपक्वविद्रधौ युक्त्याद्व्रणग्रोथवदौषधम् ।
वातघ्नमूलकाक्कोल्यौ वसातैलप्लुतान्विते ॥
सुखोष्णो बहलो लेपः प्रयोज्यो वातविद्रधौ ।
यवगोधूमसक्तूंश्च पिष्टैराज्येन लेपयेत् ॥
विलीयते शनैरेव ह्यविपक्वस्तु विद्रधिः ।
पैत्तिकं विद्रधिं वैद्यः प्रदिह्यात् सर्पिषा सृतैः ।
पयस्योशीरमधुकचन्दनैर्दुग्धपेषितैः ॥
पयस्यानेकार्थत्वात् अत्र क्षीरकाकोली गृह्यते । तस्या अलाभे अश्वगन्धा ग्राह्या ।
"पक्वस्त्वस्त्रकफक्लेन घृतमिश्रेण लेपयेत् ।
पिबेद्वा त्रिफलाक्वाथं त्रिवृत्कल्काक्षसंयुतम् ॥
इष्टिकाचिकलालोष्टकीटैर्गोधूलता यच ।
मृदेः सुखोष्णैर्लेपेन खेदयेत् श्लेष्मविद्रधिम् ॥
दग्धभूलीकषायेण सक्षौद्रेण घृतेन च ।
ग्रोथं व्रणं वा कोष्णेन सभूलं परिषेचयेत् ॥
पित्तविद्रधिवत् सर्व्वाः क्रिया निरवशेषतः ।
विद्रधौ कुशलः कुर्य्यात् रक्ताङ्कुशं भिषक्तमः ॥
रक्तचन्दनमञ्जिष्ठाविशालमधुकैरिकैः ।
क्षीरेण विद्रधौ लेपो रक्ताङ्कुशं विभिद्यते ॥

क्षाणाजाजी विशाला च धामार्गवफलं तथा।
पीतं ह्येते निहन्त्याशु विद्रधीन् कोष्ठसम्भवान्॥"
धामार्गवफलं कोषातकीफलम्।
"श्वेतवर्षाभुवो मूलं मूलं वरुणकस्य च।
जलेन क्वथितं पीतमन्तर्विद्रधिच्छत् परम्॥
गायत्रीबिल्वफलानिम्बकटुका मधुकं समम्।
त्रिवृत्यटोलमूलाभ्यां चत्वारोऽंशाः पृथक् पृथक्॥
मस्तुरान्निस्तुषान् दद्यात् एष क्वाथो घृताप्लुतः।
विद्रधिगुल्मवीसर्पदाहमोहज्वरापहः।
लाम्लूर्ध्वाच्छर्दिहृद्रोगपित्तास्रक्कुष्ठकामलाः॥"
वाग्भटात्।
"ग्रियुमूलं जले धौतं पिष्टं वस्त्रेण गालयेत्।
तद्रसं मधुना पीत्वा हन्त्यन्तर्विद्रधिं नरः॥
गोभाङ्गनकनिर्यूहो हिङ्गुसैन्धवसंयुतः।
हन्त्यन्तर्विद्रधिं जन्तोः प्रातः प्रातर्निषेवितः॥"
निर्यूहः क्वाथः। इति विद्रध्यधिकारः। इति भावप्रकाशः॥

विद्रधिनाशनः, पुं, (विद्रधिं रोगविशेषं नाशयतीति। नश्+णिच्+ल्युः।) गोभाङ्गनवृक्षः। इति चिकाण्डशेषः॥

विद्रवः, पुं, (विद्रवणमिति। वि+द्रु+"ऋदोरप्।" ३।३।५७। इत्यप्।) पलायनम्। इत्यमरः॥ (यथा, महाभारते। ७।१०६। ३८।
"तैः शरैस्तव सैन्यस्य विद्रवः सुमहानभूत्॥")
बुद्धिः। इति मेदिनी। वे, ५१॥ निन्दा। इति शब्दरत्नावली॥ चरणम्। इति केचित्॥
(विनाशः। यथा, कृष्णसंहितायाम्। ३४।१३।
"भौमे कुमारबलपति-
सैन्यानां विद्रवोऽभिशस्तभयम्॥")

विद्रावः, पुं, विद्रवः। विपूर्ब्वद्रुधातोर्घञ्प्रत्ययेन निष्पन्नः॥

विद्रावितं, त्रि, (वि+द्रु+णिच्+क्तः।) पलायितम्। यथा,—
"विद्रावितो भूतगणो ज्वरस्तु त्रिशिराभ्ययात्॥"
इति श्रीभागवते बाणयुद्धम्॥

विद्रुतः, त्रि, (वि+द्रु+क्तः।) प्राप्तद्रवीभावघृतादिः। तत्पर्य्यायः। विलीनः २ द्रुतः ३। इत्यमरः॥ पलायितश्च॥ (यथा, रघुः।११।४४।
"विद्रुतक्रतुमृगानुसारिणं
येन बाणमसृजत् वृषध्वजः॥"
पीड़ितः। यथा, मनुः। ७। ३।
"अराजके हि लोकेऽस्मिन् सर्व्वतो विद्रुते भयात्।
रक्षार्थमस्य सर्व्वस्य राजानमसृजत् प्रभुः॥")

विद्रुमः, पुं, (विशिष्टो द्रुमः। यद्वा, विशिष्टो द्रुर्वृक्षोऽस्येति। "द्रुद्रुभ्यां मः।" ५।२।१०८। इति मः।) प्रवालः। (यथा, ऋतुसंहारे। ६। १७।
"आमूलतो विद्रुमरागताम्राः
सपल्लवं पुष्पचयं दधानाः।
कुर्व्वन्त्यशोका हृदयं सशोकं
निरीक्ष्यमाणा नवयौवनानाम्॥")
रत्नवृक्षः। इति मेदिनी। मे, ५३॥ (यथा, रघुः। १३। १३।
"तवाधरस्पर्द्धिषु विद्रुमेषु
पर्य्यस्तमेतत् सहसोर्म्मिवेगात्।
जर्द्धाङ्कुरप्रोतसुखं कथञ्चित्
क्षौमादपक्रामति शुभ्रयूथम्॥")

विद्रुमलता, स्त्री, (विद्रुम इव लता।) नलीनामगन्धद्रव्यम्। इत्यमरः॥

विद्रुमलतिका, स्त्री, (विद्रुमलता। स्वार्थे कन्। टापि अत इत्वम्।) नलिका। इति राजनिर्घण्टः॥

विद्वत्कल्पः, त्रि, (विद्वस्+कल्पः।) ईषदूनो विद्वान्। इति मुग्धबोधव्याकरणम्॥

विद्वत्तमः, त्रि, (विद्वस्+तमः।) अयमेषामतिशयेन विद्वान्। इति व्याकरणम्॥

विद्वत्तरः, त्रि, (विद्वस्+तरः।) अयमनयोरतिशयेन विद्वान्। इति व्याकरणम्॥

विद्वद्देशीयः, त्रि, (ईषदूनो विद्वान्। विद्वस्+देशीयर्।) विद्वत्कल्पः। इति व्याकरणम्॥

विद्वद्देश्यः, त्रि, (ईषदूनो विद्वान्। विद्वस्+देश्यः।) विद्वत्कल्पः। इति मुग्धबोधव्याकरणम्॥

विद्वान्, [स्] त्रि, (वेत्तीति। विद्+क्वसु। "विदेः शतुर्वसुः।" ७।१। ३६। इति शतुर्वसुरादेशः।) आत्मवित्। प्राज्ञः। पण्डितः। इति मेदिनी॥ (यथा, मनुः। १। ६७।
"ब्राह्मणेषु तु विद्वांसो विद्वत्सु कृतबुद्धयः।
कृतबुद्धिषु कर्त्तारः कर्त्तृषु ब्रह्मवेदिनः॥")

विद्विषः, पुं, (विशेषेण द्वेष्टीति। वि+द्विष्+इगुपधेति कः।) शत्रुः। विद्वेषके, त्रि। विपूर्ब्वकाद्विषधातोः कप्रत्ययेन निष्पन्नः॥

विद्वेषः, पुं, (वि+द्विष्+घञ्।) शत्रुता। तत्पर्य्यायः। वैरम् २ विरोधः ३। इत्यमरः॥ अनुशयः ४ द्वेषः ५ समुच्छ्रयः ६ वैरत्वम् ७। इति जटाधरः॥ द्वेषणम् ८। इति शब्दरत्नावली॥ (यथा, आर्य्यासप्तशत्याम्। ६०२।
"सुभग स्वभवनभित्तौ भवता संमर्द्य पीड़िता सुतनुः।
सा पीड़येव जीवति दधती वैद्येषु विद्वेषम्॥")

विद्वेषकः, त्रि, विद्वेष्टा। द्वेषकर्त्ता। विरोधकः। वैरी। विद्वेष्टीति विपूर्ब्वद्विषधातोर्ण्वुल्(ष्वुल्) प्रत्ययेन निष्पन्नः॥ (यथा, महाभारते। १३। ७३। १४।
"न मित्रध्रुङ्नैकृतिकः कृतघ्नः
शठोऽनृजुर्धर्म्मविद्वेषकश्च॥")

विद्वेषणं, क्ली, विद्वेषः। विपूर्ब्वद्विषधातोरनट्(ल्युट्)प्रत्ययेन निष्पन्नम्॥ (यथा, महाभारते। ३। १६५। ३।
"विद्वेषणं परमं जीवलोके
कुर्य्यान्नरः पार्थिव याच्यमानः।
तत्त्वां पृच्छामि कथयस्व राजन्
दद्याद्भवान् दयितञ्च मेऽद्य॥")

अभिचारकर्म्मविशेषः। तस्य विहितदिनादि यथा,—
"सूर्य्योदयं समारभ्य घटिकादशकं क्रमात्।
ऋतवः स्युर्व्वसन्ताद्या अहोरात्रं दिने दिने॥
वसन्तग्रीष्मवर्षाश्च शरद्धेमन्तशैशिराः।
हेमन्तः शान्तिके प्रोक्तो वसन्तो वश्यकर्म्मणि॥
शिशिरः स्तम्भने ज्ञेयो विद्वेषे ग्रीष्म ईरितः।
पौर्णमासी मन्दभानुयुक्ता विद्वेषकर्म्मणि॥
वश्यं पूर्ब्वेऽह्नि मध्याह्ने विद्वेषोच्चाटनं तथा।
शान्तिपुष्टी दिनस्यान्ते सन्ध्याकाले च मारणम्॥
कुर्य्याच्च स्तम्भनं कार्य्यं सूर्य्यस्तृप्तिकोदये।
द्वेषोच्चाटादिकं कर्म्म कुलीरे वा तुलोदये॥"
भूतोदयनियममाह।
"जलं शान्तिविधौ शस्तं वश्ये वह्निरुदीरितः।
स्तम्भने पृथिवी शस्ता विद्वेषे व्योम कीर्त्तितम्॥"
दिङ्नियममाह।
"याम्ये रक्षसि विद्वेषं शान्तिं वारुणवायवे॥"
नक्षत्रनियममाह।
"विद्वेषोच्चाटनं वह्निवायुयोगे च कारयेत्॥*॥
अथ विद्वेषणं वक्ष्ये मिथो विद्वेषणं रिपोः।
करणीयं महेशानि! यदुक्तं मालिनीमते॥
अन्योन्ययुद्धसंरम्भरुषितौ समरे युतौ।
तदीयनखरोद्भीनधूलिमादाय साधकः॥
धूलिना तेन विद्वेषस्ताड़नादभिजायते॥*॥
परस्परं रिपोर्व्वैरं मित्रेण सह निश्चितम्।
महिषाश्वपुरीषाभ्यां गोमूत्रेण समालिखेत्॥
यस्य नाम तयोः शीघ्रं विद्वेषश्च परस्परम्।
रक्तेन महिषाश्वेन श्मशानवल्मके लिखेत्॥
यस्य नाम भवेत्तस्य काकपक्षेण लेखितम्।
वेष्टयेत् द्विजचाण्डालकेशैरेकतरेण तत्॥
गर्त्ते आमशवस्यान्तु पिटकाननमध्यतः।
षट्कोणचक्रमध्ये तु रिपोर्नामसमन्वितम्॥
मन्त्रराजं प्रवक्ष्यामि महाभैरवसंज्ञकम्।
ॐ नमो महाभैरवाय रुद्ररूपाय श्मशानवासिने अमुकामुकयोर्व्विद्वेषं कुरु कुरु सुरु सुरु हुँ हुँ फट्।
एतन्मन्त्रं लिखेत्तत्र विद्वेषो जायते ध्रुवम्॥"
इति षट्कर्म्मदीपिका॥
(विशेषेण द्वेष्टीति। वि+द्विष+ल्युः। विद्वेषके, त्रि। यथा, हरिवंशे। २८। ३०।
"नास्ति-वादार्थशास्त्रं हि धर्म्मेविद्वेषणं परम्॥"
तथा च महाभारते। १३। १२६। २।
"ब्राह्मणानां परीवादो मम विद्वेषणं महत्।
ब्राह्मणैः पूजितैर्नित्यं पूजितोऽहं न संशयः॥")

विद्वेष(षि)णी, स्त्री, स्त्रीविशेषः। यथा,—
"विद्वेषणी तु या कन्या भृकुटीकुटिलानना।
तस्या हौ तनयावास्तामयकारप्रकाशकौ॥"
इति मार्कण्डेयपुराणे दुःसहवंशोत्पत्तिः॥

विद्वेषी, [न्] त्रि, (विशेषेण द्वेष्टीति। वि+द्विष्+णिनिः।) यद्वा, विद्वेषशब्दादस्त्यर्थे इनिप्रत्ययेन निष्पन्नः। विद्वेषविशिष्टः। वैरी। (यथा,

महाभारते । १३ । १४५ । ५८ ।
"अपरे खल्पविज्ञाना धर्म्मविद्वेषिणो नराः ।
ब्राह्मणान् वेदविदुषो नेच्छन्ति परिसर्पितुम् ॥")

विध, ग्र विधौ । इति कविकल्पद्रुमः ॥ (तुदा०-पर०-सक०-सेट् ।) विधिर्विधानम् । ग्र, विधति वेधा जगत् । अनेकार्थत्वात् छिद्रकरणेऽप्ययम् । विधितच्छिद्रितौ विद्धे । इत्यमरः ॥ कर्णवेधः । इति दुर्गादासः ॥

विधः, पुं, (विधत्ते क्रियते इति । विध + घञर्थे क: ।) विमानम् । हस्त्यन्नम् । प्रकारः । वेधनम् । ऋद्धिः । इति भरतधृतधरणिकोषौ ॥

विधवनं, क्ली, कर्म्मधनम् । विपूर्ब्बधूधातोर्भावे अनट् (ल्युट्)प्रत्ययेन निष्पन्नम् ॥

विधवा, स्त्री, (विगतो धवो भर्त्ता यस्याः ।) मृतभर्त्तृका । तत्पर्य्यायः । विश्वस्ता २ । इत्यमरः ॥ जालिकी ३ रण्डा ४ यतिनी ५ यतिः ६ । इति शब्दरत्नावली ॥ (यथा, ऋग्वेदे १०।४०।२।

"को वां शयुत्रा विधवेव देवरं
मर्यं न योषा कृणुते सधस्थ आ ॥")

तस्याः कर्त्तव्याकर्त्तव्यानि यथा । विष्णुः ।
"मृतेभर्त्तरि ब्रह्मचर्य्यं तदन्वारोहणं वा इति ।"
ब्रह्मचर्य्यं मैथुनवर्জ्जनं ताम्बूलादिवर्জ्जनञ्च । यथा, प्रचेताः ।
"ताम्बूलाभ्यञ्जनं चैव कांस्यपात्रे च भोजनम् ।
यतिश्च ब्रह्मचारी च विधवा च विवर्জ्जयेत् ॥"
अभ्यञ्जनं आयुर्वेदोक्तं पारिभाषिकम् । स्मृतिः ।
"एकाहारः सदा कार्य्यो न द्वितीयः कदाचन ।
पर्य्यङ्कशायिनी नारी विधवा पातयेत् पतिम् ॥
गन्धद्रव्यस्य सम्भोगो नैव कार्य्यस्तया पुनः ।
तर्पणं प्रत्यहं कार्य्यं भर्त्तुः कुशतिलोदकैः ॥"
एतत्तु तर्पणं पुत्रपौत्राद्यभाव इति मदनपारिजातः ॥
"वैशाखे कार्त्तिके माघे विशेषनियमश्चरेत् ।
स्नानं दानं तीर्थयात्रां विष्णोर्नामग्रहं मुहुः ॥"
इति शुद्धितत्त्वम् ॥*॥

अपि च ।
"ब्राह्मणी पतिहीना या भवेन्निष्कामिनी सदा ।
एकभक्ता दिनान्ते सा हविष्यान्नरता सदा ॥
न धत्ते द्वितयवस्त्रञ्च गन्धद्रव्यं सुतैलकम् ।
सजञ्च चन्दनञ्चैव शुक्लसिन्दूरभूषणम् ॥
त्यक्त्वा मलिनवस्त्रञ्च स्नानित्यं नारायणं स्मरेत् ।
नारायणस्य सेवाञ्च कुरुते नित्यमेव च ॥
तन्नामोच्चारणं शश्वत् कुरुतेऽनन्यभक्तितः ।
पुत्रतुल्यञ्च पुरुषं सदा पश्यति धर्म्मतः ॥
मिष्टान्नं न च भुङ्क्ते सा न कुर्य्याद्विभवं व्रणम् ।
एकादश्यां न भोक्तव्यं कृष्णजन्माष्टमीदिने ॥
श्रीरामस्य नवम्याञ्च शिवरात्रौ पवित्रया ।
अघोरायाञ्च प्रेतायां चन्द्रसूर्य्योपरागयोः ॥
भक्ष्यद्वयं परित्याज्यं भुज्यते परमेव च ।
ताम्बूलं विधवास्त्रीणां यतीनां ब्रह्मचारिणाम् ।
सन्ध्यासिनाञ्च गोमांसं सुरातुल्यं श्रुतौ श्रुतम् ॥
रक्तशाकं मसूरञ्च जम्बीरं पर्णमेव च ।
अलाबुवर्त्तुलाकारा वर्জ्जनीया च तैरपि ॥
पर्य्यङ्कशायिनी नारी विधवा पातयेत् पतिम् ।
यान आरोहणं कृत्वा विधवा नरकं व्रजेत् ॥
न कुर्य्यात् केशसंस्कारं गात्रसंस्कारमेव च ।
केशवेणीजटारूपं तत्क्षौरं तीर्थकं विना ॥
तैलाभ्यङ्गं न कुर्व्वीत न हि पश्यति दर्पणम् ।
सुखञ्च परपुंसाञ्च यात्रा नृत्यं महोत्सवम् ॥
नर्त्तकं गायनञ्चैव सुवेषं पुरुषं शुभम् ॥"
इति ब्रह्मवैवर्त्ते श्रीकृष्णजन्मखण्डे ८२ अध्यायः ॥
(विधवायास्तु पत्यन्तर-ग्रहणं निषिद्धं न तद्विवाहशब्दवाच्यञ्च । तत्तु विशेषतो विचारेण ग्रन्थविस्तृतिभयेदत्तस्त्रीतः केवलं कतिपयानि वचनान्युद्धृत्य दर्शयामि तानि सुधीभिर्विचारणीयानीति ॥ तत्र याज्ञवल्क्यः ।
"अविप्लुतब्रह्मचर्य्यो लक्षण्यां स्त्रियमुद्वहेत् ।
अनन्यपूर्व्विकां कान्तामसपिण्डां यवीयसीम् ॥"
अनन्यपूर्व्विकां दानेनोपभोगेनवा पुरुषान्तरापरिगृहीताम् ॥ व्यासः । २ । ३ ।
"सवर्णामसमानार्षामसाट्पिण्डगोत्रजाम् ।
अनन्यपूर्व्विकां लक्ष्मीं शुभलक्षणसंयुताम् ॥"
गौतमः । ४ । १ ।
"गृहस्थः सदृशीं भार्य्यां विन्देतानन्यपूर्व्विकाम् ॥"
वशिष्ठः । ८ । १ ।
"गृहस्थो विनीतक्रोधहर्षो गुरुणानुज्ञातः स्नात्वा असमानार्षां अप्रयुक्तमैथुनां भार्य्यां विन्देत ॥" हारीतः । ४ । १ ।
"असमानार्षगोत्रां हि कन्यां सभ्रातृकां शुभाम् ।
सर्व्वावयवसम्पन्नां सुदृष्टामुद्वहेन्नरः ॥"
पारस्करगृह्यसूत्रम् ।
"अग्निमुपधाय कुमार्याः पाणिं गृह्णीयात् त्रिषु त्रिषूत्तरादिषु ॥"
कन्याशब्दार्थः कथ्यते । "कन्या कुमारी" इत्यमरः । "कन्यापदस्यादत्तस्त्रीमात्रवचनेन ।" इत्यादि दायभागटीकायां आचार्य्यचूड़ामणिः । "कन्यापदस्यापरिणीतामात्रवचनात् ।" इति रघुनन्दनः ॥ "अनूढात्वेन कन्यापदस्य सपत्नीकस्या बोधकतया असुखत्वप्रसक्तेः तद्रूपेणैव कन्यापदस्य शक्तेः ।" इति श्रीकृष्णतर्कालङ्कारः ॥ पूर्व्वोक्तैर्व्वचनैः कुमारीणामेव परिणये विवाहशब्दवाच्यत्वं गतानूढानाम् ॥
मनुः । ५ । १५१—१५२ ।
"यस्मै दद्यात् पिता त्वेनां भ्राता वानुमते पितुः ।
तं शुश्रूषेत जीवन्तं संस्थितञ्च न लङ्घयेत् ॥
मङ्गलार्थं स्वस्त्ययनं यज्ञश्चास्यां प्रजापतेः ।
प्रयुज्यते विवाहेषु प्रदानं स्वाम्यकारणम् ॥"
तत्रैव । १६०—१६३ ।
"मृते भर्त्तरि साध्वी स्त्री ब्रह्मचर्य्ये व्यवस्थिता ।
स्वर्गं गच्छत्यपुत्रापि यथा ते ब्रह्मचारिणः ।
अपत्यलोभात् या तु स्त्री भर्त्तारमतिवर्त्तते ।
सेहनिन्दामवाप्नोति पतिलोकाच्च हीयते ॥
नान्योत्पन्ना प्रजास्तीह न चाप्यस्य परिग्रहे ।
न द्वितीयश्च साध्वीनां क्वचिद्भर्त्तोपदिश्यते ॥
पतिं हित्वापकृष्टं स्वमुत्कृष्टं या निषेवते ।
निन्द्यैव सा भवेल्लोके परपूर्व्वेति चोच्यते ॥"
लघुहारीतः ।
"स्वगोत्राद् भ्रश्यते नारी विवाहात् सप्तमे पदे ।
पतिगोत्रेण कर्त्तव्या तस्याः पिण्डोदकक्रिया ॥"
मनुः । ९ । ४७ ।
"सकृदंशो निपतति सकृत्कन्या प्रदीयते ।
सकृदाह ददानीति त्रीण्येतानि सतां सकृत् ॥"
तत्रैव । ५९—६५ ।
"देवराद्वा सपिण्डाद्वा स्त्रिया सम्यङ्नियुक्तया ।
प्रजेप्सिताधिगन्तव्या सन्तानस्य परिक्षये ॥
विधवायां नियुक्तस्तु घृताक्तो वाग्यतो निशि ।
एकमुत्पादयेत् पुत्रं न द्वितीयं कथञ्चन ।
द्वितीयमेके प्रजनं मन्यन्ते स्त्रीषु तद्विदः ॥
अनिर्वृतं नियोगार्थं पश्यतो धर्म्मतस्त्रयः ॥
विधवायां नियोगार्थे निर्वृते तु यथाविधि ।
गुरुवच्च स्नुषावच्च वर्त्तेयातां परस्परम् ॥
नियुक्तौ यौ विधिं हित्वा वर्त्तेयातान्तु कामतः ।
तावुभौ पतितौ स्यातां स्नुषागुरुतल्पगौ ॥
नान्यस्मिन् विधवा नारी नियोक्तव्या द्विजातिभिः ।
अन्यस्मिन् हि नियुञ्जाना धर्म्मं हन्युः सनातनम् ॥
गोदाद्यिकेषु मन्त्रेषु नियोगः कीर्त्यते क्वचित् ।
न विवाहविधावुक्तं विधवावेदनं क्वचित् ॥"
"न च विवाहविधायकशास्त्रे अन्येन पुरुषेण सह पुनर्व्विवाह उक्तः ॥" इति कुल्लूकः ॥
तत्रैव । ६८—७० ।
"सतः प्रभृति यो मोहात् प्रमीतपतिकां स्त्रियम् ।
नियोजयत्यपत्यार्थं तं विगर्हन्ति साधवः ॥
यस्या म्रियेत कन्याया वाचा सत्ये कृते पतिः ।
तामनेन विधानेन निजो विन्देत देवरः ॥
यथाविध्यभिगम्यैनां शुक्लवस्त्रां शुचिव्रताम् ।
मिथोभजेदप्रसवात् सकृत् सकृदृतावृतौ ॥"
"आगर्भग्रहणात् सकृद्गमनोपदेशाच्च यस्मै वाग्दत्ता तस्यैवापत्यं भवति ।" इति कुल्लूकभट्टः ॥ तत्रैव । ७१ ।
"न दत्त्वा कस्यचित् कन्यां पुनर्दद्याद्विचक्षणः ।
दत्त्वा पुनः प्रयच्छन् हि प्राप्नोति पुरुषानृतम् ॥"
तत्रैव । ७६ ।
"उन्मत्तं पतितं क्लीवमवीजं पापरोगिणम् ।
न त्यागोऽस्ति द्विषन्त्याश्च न च दायापवर्त्तनम् ॥"
तत्रैव । ६७ ।
"कन्यायां दत्तशुल्कायां म्रियते यदि शुल्कदः ।
देवराय प्रदातव्या यदि कन्यानुमन्यते ॥"
आश्वलायनगृह्यसूत्रम् । ४ । २ । २१ ।
तासुत्यापयेत् देवरः पतिस्थानीयः अन्तेवासी जरद्दासः । उदीर्ष्वनार्य्यभि जीवलोकम् ॥ अथ पत्नीसुत्यापयेत् कः देवरः पतिस्थानीयः स पतिस्थानीय इत्युच्यते । अनेन ज्ञायते पतिकर्त्तृकं कर्म्म पुंसवनादि पत्यसम्भवे देवरः

कुर्य्यात्। अन्तेवासी शिष्यः स वा यो बहुकालं दास्यं कृत्वा वृद्धोऽभूत् स वा ॥ * ॥ पराशरः। ४। २५—२६।

"ज्येष्ठभ्राता यदा तिष्ठेत् आधानं नैव कारयेत्। अनुज्ञातस्तु कुर्व्वीत ग्रन्थस्य वचनं यथा ॥ मृते मृते प्रव्रजिते क्लीबे च पतिते पतौ। पञ्चस्वापत्सु नारीणां पतिरन्यो विधीयते ॥" पराशरः। १०। २५—३७।

"वन्ध्याष्टमेऽधिवेद्या या मृता हृत्वा वृषोत्सर्गात्। कृत्वा सान्तपनं कृच्छ्रं पुनर्दारान् पराशरोऽब्रवीत् ॥

सकृदुक्ता तु या नारी नेच्छन्ती पापकर्म्मभिः। भ्राजापत्येन शुद्ध्येत ऋतुप्रस्रवणेन तु ॥ पतत्यर्द्धशरीरस्य यस्य भार्य्या सुरां पिबेत्। पतितार्द्धशरीरस्य निष्कृतिर्न विधीयते ॥ गायत्रीं जपमानस्तु कृच्छ्रं सान्तपनञ्चरेत्। गोमूत्रं गोमयं क्षीरं दधि सर्पिः कुशोदकम् ॥ एकरात्रोपवासश्च कृच्छ्रं सान्तपनं स्मृतम्। जारेण जनयेद्गर्भं गते त्यक्ते मृते पतौ ॥ तां त्यजेदपरे राष्ट्रे पतितां पापकारिणीम्। ब्राह्मणी तु यदागच्छेत् परपुंसा समन्विता ॥ सा तु नष्टा विनिर्द्दिष्टा न तस्या गमनं पुनः। कामाज्जीघ्रात् यदा गच्छेत् त्यक्ता बन्धुं सुतान् पतिम् ॥ सा तु नष्टा परे लोके मानुषेषु विशेषतः। दशमे तु दिने प्राप्ते प्रायश्चित्तं न विद्यते ॥ दशाहं न त्यजेन्नारी त्यजेन्नष्टश्रुता तथा। भर्त्ता चैव चरेत्कृच्छ्रं कृच्छ्रार्द्धं चैव बान्धवाः ॥ तेषां भुक्ता च पीत्वा च अहोरात्रेण शुध्यति। ब्राह्मणी तु यदागच्छेत् परपुंसा विवर्जिता ॥ गत्वा पुंसां व्रतं याति त्यजेयुस्तान्तु गोत्रिणः। पुंसो यदि गृहं गच्छेत् तदमुद्दं गृहं भवेत् ॥ पितृमातृगृहं यस्य जारस्यैव तु तद्गृहम्। उच्छिष्टं तद्गृहं पश्चात् पञ्चगव्येन शुद्ध्यति ॥" वृद्धहारीतीयम्। उद्वाहतत्त्वे।

"समुद्रयात्रास्वीकारः कमण्डलुविधारणम्। द्विजानामसवर्णासु कन्योद्वहनमित्यपि ॥ देवरेण सुतोत्पत्तिर्मधुपर्के पशोर्व्वधः। मांसदानं तथा श्राद्धे वानप्रस्थाश्रमस्तथा ॥ दत्तायाश्चैव कन्यायाः पुनर्द्दानं वरस्य च। दीर्घकालं ब्रह्मचर्य्यं गरमेधाश्वमेधकौ ॥ महाप्रस्थानगमनं गोमेधश्च तथा मखम्। इमान् धर्म्मान् कलियुगे वर्ज्यानाहुर्म्मनीषिणः ॥" हेमाद्रिपराशरभाष्ययोरादित्यपुराणम्।

"दीर्घकालं ब्रह्मचर्य्यं धारणञ्च कमण्डलोः। देवरेण सुतोत्पत्तिरीप्सिता कन्यया प्रदीयते ॥ कन्यानामसवर्णानां विवाहश्च द्विजातिभिः। आततायिद्विजाग्र्याणां धर्म्मयुद्धे निषेवणम् ॥ वानप्रस्थाश्रमस्थापि प्रवेशो विधिदेशितः। दत्तस्याध्यायसाद्येपसमयसङ्कोचनन्तथा ॥ प्रायश्चित्तविधानञ्च विप्राणां मरणान्तिकम्।

संसर्गदोषः पापेषु मधुपर्के पशोर्व्वधः ॥ दत्तौरसेतरेषान्तु पुत्रत्वेन परिग्रहः। शूद्रेषु दासगोपालकुलमित्रार्द्धसीरिणाम् ॥ भोज्यान्नता गृहस्थस्य तीर्थसेवातिदूरतः। ब्राह्मणादिषु शूद्रस्य पक्षतादिक्रियापि च ॥ भृग्वग्निमरणञ्चैव वृद्धादिमरणं तथा। एतानि लोकगुप्त्यर्थं कलेरादौ महात्मभिः ॥ निवर्त्तितानि कर्म्माणि यत्नतः पूर्व्वकं बुधैः। समयश्चापि साधूनां प्रमाणं वेदवद्भवेत् ॥" याज्ञवल्क्यः। १। ६५।

"सकृत् प्रदीयते कन्या हरंस्तां चौरदण्डभाक्। दत्तामपि हरेत् कन्यां श्रेयांश्चेद्वर आव्रजेत् ॥" गौतमः।

"प्रतिश्रुत्याप्यधर्म्मसंयुक्ताय न दद्यात् ॥" वशिष्ठः।

"कुलशीलविहीनस्य वराद्यैरपतितस्य च। अपस्मारिविधर्म्मस्य रोगिणां वेद्यधारिणाम्। दत्तामपि हरेत्कन्यां सगोत्रोढां तथैवच ॥" वशिष्ठः उदाहृतत्त्वे।

"अद्भिर्व्वाचा प्रदत्तायां म्रियेतोद्वे वरो यदि। नच मन्त्रोपनीता स्यात् कुमारी पितुरेव सा ॥" उद्वाहतत्त्वे। यमः।

"मोदकेन न वा वाचा कन्यायाः पतिरिष्यते। पाणिग्रहणसंस्कारात् पतित्वं सप्तमे पदे ॥" उद्वाहतत्त्वे कात्यायनः।

"अनेकेभ्योऽपि दत्तायामनूढायान्तु तत्त्वतः। वरागमन सर्व्वेषां दत्तं पूर्व्ववरो हरेत् ॥" नान्योत्पन्ना प्रजास्तीह नचाप्यन्यपरिग्रहे। न द्वितीयश्च साध्वीनां क्वचिदुक्तोपदिश्यते ॥ यभिचाराच्च भर्त्तुः स्त्री लोके प्राप्नोति निन्दितम्। शृगालयोनिं प्राप्नोति पापरोगैश्च पीड्यते ॥" नारदसंहिता।

"अक्षतदोषेणोढ़ाया निर्द्दोषा नाश्यमाश्रिता। बन्धुभिः सा नियोक्तव्या निर्व्वन्धुः स्वयमाश्रयेत् ॥ नष्टे मृते प्रव्रजिते क्लीबे च पतिते पतौ। पञ्चस्वापत्सु नारीणां पतिरन्यो विधीयते ॥ अष्टौ वर्षाण्यपेक्षेत ब्राह्मणी प्रोषितं पतिम्। अप्रसूता च या नारी परतोऽन्यं समाश्रयेत् ॥ ऋतुर्य्या यद् समाख्यातं तु अप्रसूता समा स्मृता। वैश्या प्रसूता चत्वारि द्वे वर्षे इतरा वसेत् ॥ न शूद्राया: स्मृतः कालः एष प्रोषितयोषिताम्। जीवति श्रूयमाणे तु स्यादेव द्विगुणो विधिः ॥ अतोऽन्यगमने स्त्रीणां नास्ति दोषो न विद्यते ॥" ऋग्वेदे। १०। ४०। २।

"को वां शयुत्रा विधवेव देवरम् ॥" "तत्र दृष्टान्तं दर्शयति शयुत्रा शयने विधवेव यथा मृतभर्तृका नारी देवरं भर्तृभ्रातरं अभिमुखीकरोति।" "तथाच यास्कः क्वचिन्नौ भवथः क्व दिवा क्वाभिप्राप्तिं कुरुथः क्व वसथः को वां शयुत्रा विधवेव देवरं देवरः कस्मादितरो यौ

वर उच्यते। विधवा विधाल्लका भवति विधवनाद्वा विधावनादेति चर्म्मशिरा अपिधा ध्व इति मनुष्यनाम तद्वियोगाद्विधवा देवरो दीयतिकर्म्मा मर्त्यो मनुष्यो मरणधर्म्मा योषा यौतेरिकुरुते सहस्थाने इति ॥" इति तद्भाष्ये सायणः ॥

एतेन पूर्व्वोल्लिखितप्रमाणपञ्चालोचनेन एतत् प्रतीयते यत् विधवाया विवाहो नास्ति किन्तु देवरादिना नियोगोऽस्ति। सोऽपि कलौ चैत्रजादिपुत्रवत् नास्त्येव। नष्टेमृते इत्यादि वचने अन्यवचनैरेकवाक्यतया पतिशब्दस्य पालकार्थत्वं वाग्दानपत्यर्थत्वं वा दत्तामपि हरेत्कन्यामित्यादिवचने दत्ताशब्दस्य वाग्दत्तापरार्थत्वञ्च एतच्च सर्व्वं सुधीभिर्भाव्यमिति ॥)

विधा, स्त्री, (विधानमिति। वि + धा + क्विप्।) विधिः। प्रकारः। इत्यमरः ॥ यथा, तैत्तिरीयोपनिषदि। ३। १०। १।

"तस्मात् यया कया च विधया बह्वन्नं प्राप्नुयात् ॥")

ऋद्धिः। गजान्नम्। वेतनम्। इति मेदिनीशब्दरत्नावल्यौ ॥ कर्म्म। इति हेमचन्द्रः ॥ वेतनम्। इति त्रिकाण्डशेषः ॥ (आपः। यथा, वाजसनेयसंहितायाम्। १४। ७।

"सजूर्ऋतुभिः सजूर्विधाभिः सजूर्वसुभिः।"

"विधाभिर्या त्वं सजूरसि विदधति हव्यानि जगदिति विधा आपस्ताभिः। आपो वै विधा अद्भिर्वीदं सर्व्वं विहितमितिश्रुतेः। आप एव ससर्जादौ इति स्मृतेश्च।" इति तद्भाष्ये महीधरः ॥)

विधाः, [स्] पुं, ब्रह्मा। इत्युणादिकोषः ॥

विधाता, [तृ] पुं, (विदधातीति। वि + धा + तृच्।) ब्रह्मा। इत्यमरः ॥ (विष्णुः। यथा, महाभारते। १३। १४६। ६४।

"अविज्ञाता सहस्रांशुर्विधाता कृतलक्षणः ॥"

"विशेषेण धोषद्दिग्गजभू भूधरात् समस्तभूतानि च दधातीति विधाता।" इति तत्र शाङ्करभाष्यम् ॥ * ॥ महेश्वरः। यथा, महाभारते। १३। १७। १०४।

"उषङ्गश्च विधाता च मान्धाता भूतभावनः।") कामदेवः। इति मेदिनी। ते, १६ ॥ मदिरा। इति राजनिर्घण्टः ॥ भृगुमुनिपुत्रः। तस्य भार्य्या मेरुकन्या नियतिः। तस्य पुत्रः प्राणः। तस्य सुतः वेदशिराः कविश्च। इति श्रीभागवतमतम् ॥ * ॥ विधातुर्विचित्रा मतिर्यथा,—

कंस उवाच।

"तृणेन पर्व्वतं हन्तुं गतो धाता च दनुजः। कीटेन सिंहशार्दूलं भग्नकेन गजं तथा ॥ शिशुना च महावीरं महान्तं क्षुद्रजन्तुभिः। भूमिकेश च मार्জ্জारं मक्षकेण सुरद्रुमम् ॥ एवं जन्येन जनकं भक्ष्येणैव च भक्षकम्। वह्निना च जलं नष्टं वह्निं मुष्टकशेन च ॥ पीतः घट सहस्राब्धि द्विजेनैकेन अङ्गजा।

धातुर्गतिर्विचित्रा च दुर्ज्ञेया भुवनत्रये ॥"
इति ब्रह्मवैवर्त्ते श्रीकृष्णजन्मखण्डे ७ अध्यायः ॥
अपि च।
भगवन्नुवाच।
"सम्बन्धो हि विधिवशो न मे साध्यो व्रजाधिप।
प्रजापतिर्योगकर्त्ता जन्मदाताहमेव च ॥
का कस्य पत्नी कन्या वा वरः को वा ससाधनः ॥
कर्म्मानुरूपफलदः सर्व्वेषां कारणं विधिः।
भवितव्यं कृतं कर्म्म तदभोघं श्रुतौ श्रुतम् ॥
अन्यथा निष्फलं सर्व्वमनीश्वरोदामो यथा।
तृषभानुप्रिया धात्रा लिखिता चेत् सुता मम ॥
पुरा भूतैव को वाहं केनान्येन निवार्य्यते ॥"
इति ब्रह्मवैवर्त्ते श्रीकृष्णजन्मखण्डे १७ अः ॥*॥
अन्यच्च।
"त्यागे दोषः कामुकीनां ग्रापभाक् पापभाक् ग्रही।
ब्रह्मा जगद्विधातापि न विरक्तः कलत्रवान्।
त्यागे दोषस्तु कदाचिन्नास्माकं व्यक्तयोषिताम् ॥"*॥
अपरञ्च।
"स्वान्तर्दुःखेन दुःखार्त्तो योयं ग्रपति निश्चितम्।
तं ग्रापं खण्डितुं शक्तो न विधाता जगत्प्रभुः ॥"
इति ब्रह्मवैवर्त्ते श्रीकृष्णजन्मखण्डे २० अः ॥*॥
असौ जगतां पतिर्यथा,—
"द्वौ धाता च विधाता च पौराणौ जगतां पतौ।
द्वौ शास्तारौ त्रिलोकेऽस्मिन् धर्म्माधर्म्मौ प्रकीर्त्तितौ ॥"
इति वह्निपुराणे गणभेदनामाध्यायः ॥
(त्रि, मेधावी। इति निघण्टुः। ३। १५ ॥
विहितकर्म्मानुष्ठाता। यथा, मनुः। ११। ३५।
"विधाता ग्रासितर वक्ता मेत्री ब्राह्मण उच्यते।
तस्मै नाकुशलं ब्रूयात् न शुष्कां गिरमीरयेत्॥"
स्रष्टा। सर्व्वसमर्थः। यथा, रघुः। १। ७०।
"तया हीनं विधातर्मा कथं पश्यन्न दूयसे।
सिक्तं स्वयमिव स्नेहादन्यमाश्रमपादपम् ॥"
अनयिता। दाता। यथा, कुमारे। १। ५७।
"स्वयं विधाता तपसः फलानां
केनापि कामेन तपश्चचार ॥")
विधातृभूः, पुं, (विधातुर्ब्रह्मणो भूरुत्पत्तिर्यस्य।) नारदमुनिः। इति त्रिकाण्डशेषः ॥
विधायुः, [मु] पुं, (विधातुरायुर्ज्ञौवितकालपरिमाणं यस्मात्। सूर्य्यक्रियां विना वत्सरादिज्ञानासम्भवादेवास्य तथात्वम्।) सूर्य्यः। यथा,—
"वेगप्रदानो विधाचायुर्द्दिश्यवल्लो दिवाकरः ॥"
इति शब्दचन्द्रिका ॥
क्ली, ब्रह्मणो वयः। तद्यथा। चतुर्द्दशमन्वन्तरे ब्रह्मणः एकं दिनं भवति। तच्चतुष्यमानेनैकः कल्पस्त्रिंशत्कल्पे ब्रह्मण एको मासो भवति। एतादृशैर्द्वादशमासैर्ब्रह्मणः संवत्सरो भवति। एवं वर्षशतं ब्रह्मण आयुः। तच्च पञ्चाशत् वर्षा व्यतीताः। एकपञ्चाशदारम्भेऽधुना श्वेतवाराहकल्पः। अत्र मन्वन्तराणि व्यतीतानि षट् अधुना वैवस्वतमन्वन्तरं वर्त्तते। इति श्रीभागवतमतम् ॥
विधात्री, स्त्री, (वि + धा + तृच्। ङीप्।) पिप्पली। इति शब्दचन्द्रिका ॥ विधानकर्त्री। यथा,—
"गतास्तनां बाहुप्रकरकृतकाञ्चीपरिलम्भितम्बां दिग्वस्त्रां त्रिभुवनविधात्रीं त्रिनयनाम्।
पुरः प्रेतत्रस्ते तरुणे शवहृदि महाकालसुरतप्रयुक्तां त्वां ध्यायन् जनति जड़चेता अपि कविः ॥"
इति तन्त्रसारे कर्पूराख्यस्तोत्रम् ॥
विधानं, क्ली, (वि + धा + ल्युट्।) विधिः। इति जटाधरः ॥ (यथा, मनुः। ७। १८१।
"यदातु यानमातिष्ठेत् परराष्ट्रं प्रति प्रभुः।
तदानेन विधानेन यायादरिपुरं शनैः ॥")
करणम्। इति नानार्थविधिशब्दटीकायां भरतः ॥ (यथा, रघुः। ७। १४।
"परस्परेण स्पृहणीयशोभं
न चेदिदं द्वन्द्वमयोजयिष्यत्।
अस्मिन् द्वये रूपविधानयत्नः
पत्युः प्रजानां वितथोऽभविष्यत् ॥")
करिकलभः। इति हारावली ॥१६१ ॥ (वेदादिशास्त्रम्। यथा, मनुः। १। ३।
"त्वमेको ह्यस्य सर्व्वस्य विधानस्य स्वयम्भुवः।
अचिन्त्यस्याप्रमेयस्य कार्य्यतत्त्वार्थवित् प्रभो!॥"
नाटकाङ्गविशेषः। यथा, साहित्यदर्पणे। ६। ३४६।
"सुखदुःखकृतो योऽर्थस्तद्विधानमिति स्मृतम् ॥"
यथा, बालचरिते।
"उत्साहातिशयं वत्स तव बाल्यञ्च पश्यतः।
मम हर्षविषादाभ्यामाक्रान्तं युगपन्मनः ॥")
विधानकं, क्ली, यथा। इति शब्दरत्नावली ॥ (विधिः। यथा, कथासरित्सागरे। ४६। १८०।
"ततश्चुक्रो भद्रनोऽसौ तस्मायादित्यगर्भमौ।
ददौ सुखोचमामन्त्रमर्थितं सविधानकम् ॥")
विधानवेत्तरि, त्रि ॥
विधानगः, पुं, (विधानं गायतीति। गै + टक्।) पण्डितः। इति शब्दरत्नावली ॥
विधायकः, त्रि, विपूर्ब्बधाधातोर्ण्वुल्(ख्वुल्)प्रत्ययेन निष्पन्नः ॥ विधानकर्त्ता। (यथा, राजतरङ्गिण्याम्। १। १६६।
"स विहारस्य निर्म्माता शुष्को शुष्कपुरस्य यः।
अयस्वामिपुरस्यापि शुद्धधीः स विधायकः ॥")
विधिज्ञापकः ॥
विधायी, [न्] त्रि, विधानकर्त्ता। विपूर्ब्बकधाधातोर्णिनिप्रत्ययेन निष्पन्नः ॥ (यथा, कथासरित्सागरे। ४९। ११३।
"भार्य्याञ्च कायालङ्कारां तादृक्कार्य्यविधायिनीम्।
भूयश्चे स निधिक्षेप पार्श्वां सां पुत्रघातिनीम् ॥")
विधार्य्य, क्ली, कर्म्मनम्। विपूर्ब्बधूधातोर्ण्यत्प्रत्ययेन निष्पन्नम् ॥
विधिः, पुं, (विधति विदधाति विश्वमिति। विध विधाने + "इगुपधात् कित्।" उणा० ४। १२६। इति इन्। स च कित्।) ब्रह्मा। (यथा, नैषधे। २२। ४७।
"विधिर्विधत्ते विधुना वधूनां
किमाननं काञ्चनसञ्चकेन ॥"*॥
विधीयेते सुखदुःखे अनेनेति। वि + धा + "उपसर्गे धोः किः।" ३। ३। ९२। इति किः।) भाग्यम्। (यथा, मार्कण्डेये। ८। १८२।
"राज्यनाशं सुहृत्यागो भार्य्यातनयविक्रयः।
हरिश्चन्द्रस्य राजर्षेः किं विधे! न कृतं त्वया ॥")
क्रमः। विधानम्। इत्यमरः ॥ कालः। इति मेदिनी। धे, १७ ॥ विधिवाक्यम्। (यथा, गीतायाम्। १६। २३।
"यः शास्त्रविधिमुत्सृज्य वर्त्तते कामचारतः।
न स सिद्धिमवाप्नोति न सुखं न परां गतिम् ॥")
प्रकारः। नियोगः। इति हेमचन्द्रः ॥ विष्णुः। इति हलायुधः। कर्म्म। इति त्रिकाण्डशेषः ॥ (यथा, देवीपुराणे।
"तस्मात् स्वर्गः प्रयत्नेन यज्ञकृद्भिर्विधेर्विभुः ॥")
गजानम्। इति जटाधरः ॥ वैद्यः। इति राजनिर्घण्टः ॥ यागोपदेशकवाक्यम्। इति भरतधृतकोषः ॥ षड्विधलक्षणलक्षणान्तर्गतलक्षणविशेषः। यथा,—
"संज्ञा च परिभाषा च विधिर्नियम एव च।
अतिदेशोऽधिकारश्च षड्विधं सूत्रलक्षणम् ॥"
अप्राप्तप्रापको विधिः। स तु द्विविधः। वर्णोत्पादनरूपोऽभावरूपश्च। वर्णोत्पादनरूपो यथा सवर्णे घं इत्यादि। अभावरूपो द्विविधः। नाग्नो निषेधरूपश्च। नाग्विधिर्यथा। लोपोऽस्योमाङोरित्यादि। निषेधविधिर्यथा। नाञोऽन्त इत्यादि। सामान्यप्राप्तस्य विशेषावधारणं नियमविधिः। यथा। रङो वः सुपि इत्यादि। अन्यधर्म्मस्यान्यत्रारोपणमतिदेशविधिः यथा। इग्यदिक् इत्यादि। पूर्ब्बसूत्रस्थितपदस्य परसूत्रेषूपस्थितिरधिकारविधिः। स तु त्रिविधः।
"सिंहावलोकितार्थश्च मण्डूकप्लुतिरेव च।
गङ्गास्रोत इति ख्यातस्त्रयोऽधिकारास्त्रयो मताः॥"
सिंहावलोकितो यथा। वावशोर्द्दान्ते इत्यस्मात् दान्ते इति पदस्य ऋक्यग्नित्यन्तेषूपस्थितिः। मण्डूकप्लुतिर्यथा। टाङिसङेऽङसोत्यस्मात् अत इति पदस्य आक्तिमभवि इत्यत्रोपस्थितिः। गङ्गास्रोतो यथा। ङेः सि औ जस् इत्यस्मात् ङेरिति पदस्य तद्धितपर्य्यन्तेषूपस्थितिरिति। एवञ्च।
"कार्य्यं कार्य्यं निमित्तञ्च त्रिभिः सूत्रमुदाहृतम्।
कदाचित् कार्य्यिकार्य्याभ्यां कचित् कार्य्यनिमित्ततः ॥
यस्य निर्द्दिश्यते कार्य्यं स कार्य्यी गदितो बुधैः।

क्रियते यत्तु तत्कार्य्यमादेयप्रत्ययागमम् ॥
यस्मात् परं परे यस्मिन् तन्निमित्तं द्विधा मतम् ।
आकाङ्क्षायान्तु सर्व्वेषामनुवृत्तिः परे भवेत् ॥"
इति ॥

अपच्च ।

"बहिरङ्गविधिभ्यः स्यादन्तरङ्गविधिर्बली ।
प्रत्ययाश्रितकार्य्यन्तु बहिरङ्गमुदाहृतम् ॥
प्रकृत्याश्रितकार्य्यं स्यादन्तरङ्गमिति ध्रुवम् ।
प्रकृतेः पूर्ब्बपूर्ब्बं स्यादन्तरङ्गतरं तथा ॥
सावकाशविधिभ्यः स्याद्बली निरवकाशकः ।
कस्यचिद्विहितकार्य्यस्य प्रथमे प्रवृत्तस्तथा ।
सम्भवेद्विषयो यस्य स भवेत् सावकाशकः ॥
आदौ हि विषयो यस्य परतो न हि संभवेत् ।
स पण्डितगणैरुक्तो विधिर्निरवकाशकः ॥
तथा सामान्यकार्य्येभ्यो विशेषकविधिर्ब्बली ।
बहवो विषया यस्य स सामान्यविधिर्भवेत् ॥
स्वल्पः स्याद्विषयो यस्य स विशेषविधिर्म्मतः ।
आगमादेशयोर्मध्ये बलीयानागमो विधिः ॥
प्रकृतिं प्रत्ययञ्चापि यो न हन्ति स आगमः ।
आदेशः उपघाती यः प्रकृते प्रत्ययस्य वा ॥
सकलेभ्यो विधिभ्यः स्याद्बली लोपविधिस्तथा ।
लोपस्वरादेशयोस्तु स्वरादेशो विधिर्बली ॥"
इति मुग्धबोधव्याकरणटीकायां दुर्गादासः ॥*॥

अथ विधिभेदाः । तत्र कश्चित् प्रधानविधिः । स तु स्वतः फलहेतुक्रियाबोधकः । यथा । यजेत स्वर्गकाम इत्यादि । कश्चिदङ्गविधिः । स तु स्वतः फलहेतुक्रियायां कथमित्याकाङ्क्षायां विधायकः । यथा । इष्टो यजति इत्यादि । कश्चित् प्रयोगविधिः । स तु यावदङ्गयुक्तक्रियाबोधकः । यथा । यावदङ्गयुक्तं यजेत विलक्षणस्वर्गकाम इत्यादि । कश्चिदङ्गगुणफलविधिः । स तु आकाङ्क्षानिवृत्तौ अधिकफलाय प्राप्तकर्म्मणि गुणविधिः । यथा । गोदोहेनापः प्रक्षयेत् पशुकाम इत्यादि । प्रधानविधिश्च द्विविधः । उत्पत्तिर्नियोगश्चेति । तत्रोत्पत्तिस्तु कर्म्मस्वरूपबोधकः । यथा आग्नेयोष्टाकपालः अमावास्यायां पौर्णमास्यामाधाच्युतो भवति इत्यादि । नियोगश्च स्वर्गकामाद्यधिकारिबोधकः । यथा । स्वर्गकामो यजेत इत्यादि । अङ्गविधिस्तु कालदेशकर्त्रादिबोधकतया अनियत एव । प्रधानाङ्गविध्योर्विधेयाप्राप्तिप्राप्तिभ्यां चैविध्यम् । तत्र अप्राप्तितो द्वैविध्यम् । तत्राप्यत्यन्ताप्राप्तौ अपूर्ब्बविधिः । पक्षतोऽप्राप्तौ नियमविधिः । विधेयतत्प्रतिपक्षयोः प्राप्तौ परिसङ्ख्याविधिः । अतएवोक्तम् ।

"विधिरत्यन्तमप्राप्तौ नियमः पाक्षिके सति ।
तत्र चान्यत्र च प्राप्तौ परिसङ्ख्या विधीयते ॥"

तत्र प्रधानस्य विधिभेदो यथा । अहरहः सन्ध्यामुपासीत इत्यादिरपूर्ब्बविधिः । अत्र विधेयस्य सन्ध्यादेः श्राद्धतो रागतो न्यायतो वा क्वचिदप्यप्राप्तेः । तथा ऋतौ भार्य्यामुपेयात् इत्यादिर्नियमविधिः । विधेयस्य भार्य्याभिगमनस्य रागतः प्राप्तावपि रागाभावात् पक्षतोऽप्राप्तेः । तथा । प्रोक्षितं मांसं भक्षीत इत्यादिः परिसङ्ख्याविधिः । विधेयस्य प्रोक्षितमांसभक्षणस्य च रागतः प्राप्तेः । अङ्गस्य विधिभेदो यथा । श्राद्धीयपूजायामष्टम्यामुपवसेत् इत्यादिरपूर्ब्बविधिः । अत्र विधेयस्योपवासस्य एतदन्यश्राद्धतो रागतो न्यायतो वा क्वचिदप्राप्तेः । तथा श्राद्धे भुञ्जीत पित्रर्थेवितमित्यादिर्नियमविधिः । विधेयस्य श्राद्धीयभोजनस्य रागतः प्राप्तावपि रागाभावात् पक्षतोऽप्राप्तेः । तथा । दृद्धिश्राद्धे प्रातरामन्त्रितान् विप्रान् इत्यादिः परिसङ्ख्याविधिः । तत्र विधेयस्य प्रातर्निमन्त्रणस्य तत्प्रतिपक्षस्य पूर्ब्बदिनसायं निमन्त्रणस्य च पार्ब्बणवद्न्यायतः प्राप्तेरिति स्मृतेरुदाहरणम् । इति धर्म्मदीपिका ॥*॥ न्यायमते विधिर्यथा,—

"प्रवृत्तिः क्रतिरेवात्र सा चेच्छातो यतश्च सा ।
तज्ज्ञानं विषयस्तस्य विधिस्तज्ज्ञापको वा ॥"

विधिजन्यज्ञानात् प्रवृत्तिर्दृश्यते सा इच्छातः चिकीर्षातः चिकीर्षा च क्रतिसाध्यत्वेष्टसाधनत्वज्ञानात् तज्ज्ञानस्य विषयः कार्य्यत्वं इष्टसाधनत्वञ्च विधिरिति प्राचीनमतम् ॥ स्वमतमाह तज्ज्ञापको वेति इष्टसाधनत्वानुमापक आप्ताभिप्रायो विधिप्रत्ययार्थः । इति हरिदासीयकुसुमाञ्जलिः ॥*॥ अपि च आश्रयत्वसम्बन्धेन प्रत्ययोपस्थापितेष्टसाधनत्वान्वितस्वार्थपरपदघटितवाक्यत्वं विधित्वम् । मीमांसकमते इष्टसाधनत्वं क्रतिसाध्यत्वञ्च पृथग्विध्यर्थः । इति गदाधरभट्टाचार्य्यकृतविधिस्वरूपः ॥

विधिदर्शी, [न्] पुं, (विधिं द्रष्टुं शीलमस्य । दृश्+णिनिः ।) सदस्यः । इत्यमरः ॥

विधिदेशकः, पुं, (विधिं दिशतीति । दिश्+ण्वुल् ।) सदस्यः । इति शब्दरत्नावली ॥

विधिवत्, य, यथाविधि । विधानुसारेण । यथा,—

"तोषयेत् सततं भार्य्यां विधिवत् पाणिपीड़िताम् ॥"

इति कालिकापुराणे १६ अध्यायः ॥*॥

अपि च ।

"सन्ध्यामुपास्य विधिवत् विल्वपत्राद्युपार्च्चयेत् ॥"

इति शिवरात्रिव्रतकथा ॥*॥

अन्यच्च ।

"पूजयेद्ब्रह्मविष्णुरुद्रवस्वात्मकं शिवम् ।
व्रतोपवासैर्विधिवत् श्रद्धया च विमत्सरः ॥"

इति मत्स्यपुराणे योगमाहात्म्यम् ३६ अध्यायः ॥

अपरञ्च ।

"इति नक्षत्रपुरुषमुपोष्य विधिवत् स्वयम् ।
सर्व्वान् कामानवाप्नोति विष्णुलोके महीयते ॥"

इति तत्रैव ५१ अध्यायः ॥

विधुः, पुं, (विधयति विरहिणं विध्यते राहुणेति वा । अध लाड़े + "पृभिदिव्यधीति ।" उणा० १ । २४ । इति कुः ।) चन्द्रः । (यथा,—

"पिक ! विधुस्तव हन्ति समं तमः-
खमपि चन्द्रविरोधिकुकूरवः ।
तदुभयोरनिशं हि विरोधिता
कथमहो समता मम तापने ॥"*॥

विध्यति असुरानिति ।) विष्णुः । कर्पूरः । इति मेदिनी । धे, १६ ॥ ब्रह्मा । इति शब्दरत्नावली ॥ राक्षसः । इति विश्वः ॥ आयुधः । वायुः । इति संक्षिप्तसारोणादिवृत्तिः ॥*॥ चन्द्रस्य द्वादशावस्थाश्चतुःफलादिश्च यथा,—

"चन्द्रस्य द्वादशावस्था भवन्ति शृणु ता अपि ।
त्रिषु त्रिषु च ऋक्षेषु अश्विन्यादि वदाम्यहम् ॥
प्रवासस्थं पुनर्नष्टं मृतावस्थं जयावहम् ।
हास्यावस्थं क्रीड़ावस्थं प्रमोदावस्थमेव च ।
विषादावस्थभोगस्थे ज्वरावस्थं व्यवस्थितम् ॥
कन्यावस्थं सुखावस्थं द्वादशावस्थगं भवेत् ॥
प्रवासो हानिर्मृत्युश्च जयो हासो रतिः सुखम् ।
शोको भोगो ज्वरः कन्यः सुखावस्थाक्रमात्-
फलम् ॥
जन्मस्थः कुरुते लक्ष्मीं द्वितीये नास्ति निर्वृतिः ।
तृतीये राजसम्मानं चतुर्थे कलहागमः ॥
पञ्चमेन मृगाङ्केन स्त्रीलाभो वै तथा भवेत् ॥
धनधान्यागमः षष्ठे रतिः पूजा च सप्तमे ।
अष्टमे प्राणसन्देहो नवमे कोषसञ्चयः ॥
दशमे कार्य्यनिष्पत्तिर्ध्रुवमेकादशे जयः ।
द्वादशेन शशाङ्केन मृत्युरेव न संशयः ॥"

इति गारुड़े । ६१ । ३—६ ॥*॥

चन्द्रस्य क्षयवृद्धिकारणम् यथा,—

ब्रह्मोवाच ।

"राका चानुमती चैव द्विविधा पूर्णिमा मता ।
सिनीवाली कुहुश्चैव अमावास्या द्विधैव तु ॥
अमा नाम रवेः रश्मिश्चन्द्रलोके प्रतिष्ठिता ।
यस्मात् सोमो वसत्यस्यामतोऽमावासी ततः स्मृता ॥
पूर्ब्बोदितकलाभिन्नपौर्णमास्या निशाकरे ।
पूर्णिमानुमती ज्ञेया पश्चात्तमितभास्करे ॥
यस्मात्तामनुमन्यन्ते देवताः पितृभिः सह ।
तस्मादनुमती नाम पूर्णिमा प्रथमा स्मृता ॥
यदा चास्तमिते सूर्य्ये पूर्णचन्द्रस्य चोद्गमः ।
युगपत् सोत्तरा रागस्तदानुमतिपूर्णिमा ॥
राकान्तामनुमन्यन्ते देवताः पितृभिः सह ।
रञ्जनाच्चैव चन्द्रस्य राकेति कवयोऽब्रुवन् ॥
सिनीवालीप्रमाणन्तु चीर्णप्रेषो निशाकरः ।
अमावास्यां विशत्यर्कं सिनीवाली ततः स्मृता ॥
कुहूरिति कोकिलेनोक्तो यः कालस्तु समाप्यते ।
तत्कालसंज्ञा त्वेषा वै अमावास्या कुहूः स्मृता ।
अनुमत्याश्चवाः कार्य्या सिनीवाल्याः कुहूं
विना ।
एतासां विरलः कालः कुमार्य्यन्ति कुहूः स्मृता ॥
कलाः षोड़श सोमस्य शुक्ले वर्द्धयते रविः ।
अहतेनाहतं क्षीणे पीयते देवतैः क्रमात् ॥
प्रथमां पिबते वह्निर्द्वितीयां पवनः कलाम् ।
विश्वेदेवास्तृतीयान्तु चतुर्थीन्तु प्रजापतिः ॥
पञ्चमीं वरुणश्चापि षष्ठीं पिबति वासवः ।

विधुः

सप्तमीञ्चयो दिवा वसवोऽष्टौ तथाष्टमीम् ॥
नवमीं क्षणपक्षस्य पिबतीन्द्रः कलामपि ।
दशमीं मरुतश्चापि रुद्रा एकादशीं कलाम् ।
द्वादशीन्तु कलां विष्णुर्धनदश्च त्रयोदशीम् ।
चतुर्दशीं पशुपतिः कलां पिबति नित्यशः ।
ततः पञ्चदशीष्वेव पिबन्ति पितरः कलाम् ॥
कलावशिष्टो निष्पीतः प्रविष्टः सूर्यमण्डलम् ।
अमायां विशते रात्रौ अमावासी ततः स्मृता ॥
पूर्वाह्णे विशते चार्कं मध्याह्ने तु वनस्पतिम् ।
अपराह्णे विशत्यप्सु स्वयोनिवारिसम्भवः ॥
आपः प्रविष्टः सोमस्य शेषया कलयैकया ।
तृणगुल्मलतावृक्षान्निष्पादयति चौषधीः ॥
तमोषधिं स्थितं गावश्चरन्त्यापः पिबन्ति च ।
तदङ्गानुगतं गोभ्यः क्षीरत्वमुपगच्छति ॥
तत्क्षीरमन्नतं भूत्वा मन्त्रभूतं द्विजातयः ।
स्वाहाकारवषट्कारैर्जुह्वन्त्याहुतयः क्रमात् ॥
हुतमग्निषु देवाय पुनः सोमं विवर्द्धयेत् ।
एवं संक्षीयते सोमः क्षीणक्षाप्यायते पुनः ।
तस्मात् सूर्यः शशाङ्कस्य क्षयवृद्धिविधेर्विभुः ॥"
इति देवीपुराणे चन्द्रक्षयवृद्धिः ॥ * ॥
ब्रह्मोवाच ।
"यदयं वदते लोको वालिशत्वान्महामते ।
तदहं संप्रवक्ष्यामि चन्द्रसूर्योपरागिकम् ॥
यदि सत्यमयं ग्रस्तस्तेजोराशिर्दिवाकरः ।
तत्कथं नोदरस्थेन राहुर्न भस्मसात् कृतः ॥
अथवा राहुणाक्रम्य मुखवक्त्रं प्रवेशितः ।
तत् कथं दृश्यतेऽक्षीणैः मृतधा न विखण्डितः ॥
विमुक्तश्च पुनर्दृष्टस्तथैवाखण्डमण्डलः ।
न चास्यापहृतं तेजो न स्थानादपसारितः ॥
यदि वा ग्रसते निष्पीतः कथं दीप्ततरोऽभवत् ।
तस्मान्न तेजसा राज्ञो राहोर्वक्त्रं गमिष्यति ॥
भक्ष्यार्थं सर्वदेवानां सोमः सृष्टः स्वयम्भुवा ।
तच्चमन्नतश्चापि सम्भूतं सूर्यतेजसा ॥
पिबन्त्यम्बुमयं देवाः पितरश्च स्वधान्नतम् ।
त्रयश्च त्रिंशतश्चैव त्रयस्त्रिंशतथैव च ॥
त्रयश्च त्रिसहस्राश्च देवाः सोमं पिबन्ति ये ।
राहोरप्यन्नतं भाग्यं पुरा सृष्टं स्वयम्भुवा ॥
तस्मात्तद्राहुरागत्य पातुमिच्छति पर्व्वसु ।
उद्भृत्य पार्थिवीं छायां मद्राकारान्नमोमयः ॥
पातुमिच्छन् ततश्चेन्द्रमाच्छादयति छायया ।
मुक्ते च चन्द्रमभ्येति ग्रस्ते पर्व्वणि भास्करम् ॥
सूर्यमण्डलसंस्थन्तु चन्द्रमेव जिघांसति ।
तस्मात् पिबति तं राहुस्तनुमस्याविनाशयन् ॥
अविहिंसन् यथा पद्मं पिबति भ्रमरो मधु ।
चन्द्रस्यमन्नतं तद्वदमेद्याद्राहुरुच्यते ॥
चन्द्रकान्तो मणिर्यद्वत्तुहिनं चरते क्षणात् ।
चरन्नपि न क्षीयेत तेजसा नैव मुच्यते ॥
यथा सूर्यमणिः सूर्यादुत्पाद्य पावकं शुभम् ।
न भवत्यङ्गहीनोऽपि तेजसा नैव मुच्यते ॥
एवं चन्द्रश्च सूर्यश्च क्षादितावपि राहुणा ।
स्वतेजसा न मुच्येत नाङ्गहीनौ बभूवतुः ॥
पर्व्वस्वर्थं च चन्द्रस्य माणिक्यकलसाकृतिः ।

विधुतिः

सोमो देवतसंयोगात् क्षायायोगाच्च पार्थिवात् ।
राहोश्च वरलब्धाद्वै प्रचरेदन्नतं मुधा ॥
स्वदोहकाले संप्राप्ते वत्सं दृष्ट्वा च गौर्यथा ।
स्वाङ्गादेव चरेत् क्षीरं तथेन्दुः चरतेऽन्नतम् ।
पितेव सूर्य्यो देवानां सोमो मातेव लक्ष्यते ॥
यथा मातुः स्तनं पीत्वा जीवन्ते सर्व्वजन्तवः ।
पीत्वाऽन्नतं तथा सोमात् तृप्यन्ते सर्व्वदेवताः ॥
सम्भृतं सर्व्वयोगेषु तथायं चरते मुधा ।
तं चरन्तं यथाभागमुपजीवन्ति देवताः ॥
तस्मिन् काले समभ्येति राहुरप्यवकर्षति ।
सर्व्वमर्हन्ति भागञ्च पादं पादार्द्धमेव च ॥
आक्रम्य पार्थिवीं क्षायां यावती चन्द्रमण्डलम् ।
स्मृतः स भागो राहोस्तु देवभागास्तु शेषकाः ॥
तृप्तिं विधाय देवानां राहोः पर्व्वगतस्य च ।
चन्द्रो न क्षयमायाति तेजसा नैव मुच्यते ॥
तिथिभागाश्च यावन्तः पुनन्त्यर्कं प्रमाणतः ।
सर्व्वच्छायास्थितः कालस्तावानेव प्रकीर्त्तितः ॥
अतो राहुभुजः सोमः सोमाद्वृद्धिं दिवाकरः ।
पर्व्वकाले स्थितिरेवं विपरीता पुनः पुनः ॥
अतश्चादयते राहुरभ्रवच्छशिभास्करौ ।
राहुरभ्रकसंस्थानः सोममाच्छाद्य तिष्ठति ॥
उद्भृत्य पार्थिवीं छायां धूमभेद इवोत्थितः ।
चन्द्रस्य यद्वस्त्रं राहुणा भास्करस्य च ॥
नान्यावखण्डितं तस्य केवलं श्यामलीकृतम् ।
कर्दमेन यथा वस्त्रं शुक्लमप्युपहन्यते ॥
एकोद्देशेऽथ सर्व्वत्रा राहुणा चन्द्रमास्तथा ।
प्रक्षालितं तदेवेह पुनः शुक्लतरं भवेत् ॥
राहुयुक्तं भवेत्तद्वन्मैलं चन्द्रमण्डलम् ।
राहुणाच्छादितौ वापि दृष्ट्वा चन्द्रदिवाकरौ ॥
विप्राः भ्रान्तिपरा भूत्वा पुनराप्याययन्ति तम् ।
एवं न गृह्यते सूर्यश्चन्द्रमास्तच्च गृह्यते ॥
अबुधास्तं न पश्यन्ति मानुषा मांसचक्षुषः ।
जगत्सम्मोहनं चैतत् ग्रहणं चन्द्रसूर्ययोः ॥"
इत्याद्ये देवीपुराणे ग्रहणविकल्पः ॥ * ॥
विधोर्दैवपित्र्याद्यन्नकारणत्वं राजयज्ञादिकारणत्वञ्च कालिकापुराणे २०।२१ अध्याययोर्द्रष्टव्यम् ॥ * ॥ (कर्त्तरि, त्रि । यथा, ऋग्वेदे । १० । ५५ । ५ ।
"विधुं दद्राणं समने बहूनां
युवानं सन्तं पलितो जगार ॥"
"विधुं विधातारं सर्व्वस्य जुह्वादेः कर्त्तारं विपूर्ब्बो दधातिः करोत्यर्थे ।" इति तद्भाष्ये सायणः ॥")

विधुतः, त्रि, (वि + धु + क्तः ।) त्यक्तः । इत्यमरः ॥ (यथा, भागवते । ६ । १६ । २५ ।
"स तत्र निर्मुक्तसमस्तसङ्ग
आत्मानुभूत्या विधुतत्रिलिङ्गः ।
परेऽमले ब्रह्मणि वासुदेवे
लेभे गतिं भागवतीं प्रतीतः ॥")
कम्पितञ्च ॥

विधुतिः, स्त्री, कम्पनम् । विपूर्ब्बधुधातोः क्तिप्रत्ययेन निष्पन्ना ॥ (यथा, भागवते । १० । ३३ । ८ ।

विधूतं

"प्रादन्यासैर्भुजविधुतिभिः सस्मितैर्भ्रूविलासै-
र्भिन्द्यन्मध्येऽलकुचपटैः कुण्डलेगण्डलोलैः ॥"
निराकृतिः । यथा, तत्रैव । ४ । २२ । ३८ ।
"यस्मिन्निदं सदसदात्मतया विभाति-
मायाविवेकविधुतिस्रजि वाङ्मयत्वात् ॥")

विधुननं, क्ली, (वि + धू + णिच् । ल्युट् । नुक् च । पृषोदरादित्वात् ह्रस्वः ।) कम्पनम् । इति जटाधरः ॥

विधुन्तुदः, पुं, (विधुं तुदति पीड़यतीति । विधु + तुद + "विध्वरुषोस्तुदः ।" ३ । २ । ३५ । इति खश् । मुम् ।) राहुः । इत्यमरः ॥ (यथा, माघे । २ । ६१ ।
"नीतिरापदि यत्नस्थः परस्वस्थानिनो द्विषे ।
विधुर्विधुन्तुदस्येव पूर्णस्यस्योत्सवाय सः ॥")

विधुपञ्जरः, पुं, (विधोः पञ्जरः वक्राश्रित इव तत्सादृश्यात् ।) खड्गः । इति शब्दमाला ॥

विधुप्रिया, स्त्री, (विधोश्चन्द्रस्य प्रिया ।) चन्द्रपत्नी । यथा । दाक्षायण्यो विधुप्रिया । इति कोषान्तरम् ॥

विधुरं, क्ली, (विगता धूर्भारो यस्मात् । समासे अः ।) प्रविश्लेषः । इत्यमरः ॥ कैवल्यम् । इति त्रिकाण्डशेषः ॥ (प्रत्यवायः । कष्टम् । यथा, किरातटीकायां मल्लिनाथधृतवेजयन्ती ।
"विधुरं प्रत्यवाये स्यात् कष्टविश्लेषयोरपि ॥"
तथा च किराते । २ । ७ ।
"विधुरं किमतः परं परे-
रवगीतां गमिते दशामिमाम् ।
अवसीदति यत् सुरेरपि
त्वयि सम्भावितदृप्ति पौरुषम् ॥")

विधुरः, त्रि, (विगता धूः कार्य्यभारो यस्मात् । ऋक्पूरित्यः ।) विकलः । इति मेदिनी । रे, २१६ ॥ (यथा, कुमारे । ४ । ३२ ।
"तदिदं क्रियतामनन्तरं
भवता बन्धुजनप्रयोजनम् ।
विधुरां ज्वलनातिसर्ज्जनात्
मनु मां प्रापय पत्युरन्तिकम् ॥")

विधुरा, स्त्री, रसाला । इति मेदिनी । रे, २१६ ॥ (जङ्घोर्द्धस्थायुमर्म्म । यथा, सुश्रुते । ३ । ६ ।
"जङ्घोर्द्ध मर्म्माणि चतस्रो धमन्योऽष्टौ माटका द्वे कटिके द्वे विधुरे ॥")

विधुवनं, क्ली, (वि + धु + ल्युट् । कुटादित्वात् साधुः ।) कम्पनम् । इत्यमरः । ३ । २ । ४ ॥

विधूतं, त्रि, (वि + धू + क्तः ।) कम्पितम् । (यथा, कलाविलासे । २ । २८ ।
"तं वदति सोऽन्यदृष्टिः सभ्रूभङ्गं विधूतहस्ताग्रः ।
वक्रकवचनः पापो दृष्टिस्त्रीणः कृतोऽयमा-
यातः ॥")
त्यक्तम् । इति हेमचन्द्रः ॥ (यथा, महाभारते । पतिस्तोत्रे । १ ।
"योगं योगविदां विधूतविविधव्यासङ्गयुद्ग्राशय-
प्रादुर्भूतसुधारसप्रहसमरध्यानास्पदाध्यासि-
नाम् ॥")

विधूतिः, स्त्री, कम्पनम्। विपूर्ब्बधूधातोः क्तिप्रत्ययेन निष्पन्नमिति॥

विधूननं, क्ली, (वि+धू+णिच्+ल्युट्। युक् च।) कम्पनम्। तत्पर्य्यायः। विधुवनम् २। इत्यमरः। ३। २। ४॥ विधुननम् ३। इति शब्दरत्नावली॥ (यथा, साहित्यदर्पणे। ३। १४२।
"केशग्रहनाधरादीनां यद्यपि हर्षेऽपि सम्भ्रमात्।
प्राहुः कुट्टमितं नामगिरः करविधूननम्॥")

विधूनितं, त्रि, कम्पितम्। विपूर्ब्बण्यन्तधूधातोः क्तप्रत्ययेन निष्पन्नम्॥

विधृतं, क्ली, विग्रहेण धृतम्। यथा,—
"अथावक्रष्य विण्मूत्रं लोष्टकाष्ठतृणादिना।
उदक्स्ववासा उत्तिष्ठेद्दृढं विधृतमेहनः॥"
इत्याह्निकतत्त्वम्॥

विधेयः, त्रि, विधातुं शक्यः। (वि+धा+"अचो यत्।"३।१।९७। इति यत्। "ईद्यति।"६।४। ६५। इति आत ईत्।) वाक्यस्थः। तत्पर्य्यायः। विनयग्राही २ वचनेस्थितः ३ आश्रवः ४। इत्यमरः॥ (यथा, महाभारते। ५। २३। १३।
"कर्म्मोऽमात्यः कुशली तात कश्चित्
सुयोधनो यस्य मन्दो विधेयः॥")
विधिजन्यबोधविषयः। यथा,—
"अनुवाद्यमनुक्त्वा तु न विधेयमुदीरयेत्।
न ह्यलब्धास्पदं किञ्चित् कुत्रचित् प्रतितिष्ठति॥"
इत्येकादशीतत्त्वम्॥
अपि च। प्रमाणान्तरासन्निहितं कर्म्म प्रथमं बुद्धौ न विषयीभवति शब्दादेव तस्य कर्म्मणः उपस्थितिरित्युपादेये विधेये कर्म्मणि पूजादौ शुचितत्कालजीवित्वकर्म्माधिकारात् प्रमाणान्तरलभ्यत्वेनाविधेयत्वात्तिथ्यादिर्गुणः। इति तिथ्यादितत्त्वम्॥ (कर्म्मणि यम्। यथा, हुहुतसंहितायाम्। ६५। ४६।
"द्वाविंशत्प्रविभक्ते दिक्चक्रे यद्यथा समुद्दिष्टम्॥
तत्तथा विधेयं गुणदोषफलं धियाऽनुनाम्॥"*॥
अधीनः। यथा, रघुः। १६। ४।
"सन्निवेश्य सचिवेष्वतः परं
स्त्रीविधेयनवयौवनोऽभवत्॥"
तथा च तत्रैव। ७। ६२।
"तस्थौ ध्वजस्तम्भनिषक्तदेहं
निद्राविधेयं नरदेवसैन्यम्॥")

विधेयता, स्त्री, (विधेयस्य भावः। विधेय+तल्।) विधेयत्वम्। विधिजन्यबोधविषयत्वम्। यथा। यथा ब्रह्मवधादिषु पापस्य निषिद्धतयोपयुक्तब्राह्मणादिज्ञाने हेतुत्वं तथा गङ्गास्नानादिषु पुण्यस्य विधेयतावच्छेदकगङ्गादिज्ञाने हेतुत्वम्। इति प्रायश्चित्ततत्त्वम्॥ (अधीनता। यथा, किरातेः। ११। ३३।
"परवानर्थसंसिद्धौ नीचवृत्तिरपत्रपः।
अविधेयेन्द्रियः पुंसां गौरिवैति विधेयताम्॥")

विध्वंसः, पुं, (वि+ध्वंस+घञ्।) विनाशः। यथा, तिथ्यादितत्त्वे।
"हरिते रोगोऽनुतापः शस्यानामीतिभिश्च विध्वंसः।
कपिले शीघ्रगसत्त्वस्त्वेच्छध्वंसोऽथ दुर्भिक्षम्॥"
(अपकारः। यथा, किराते। ३। १६।
"विधाय विघ्नं समनात्मनीनं
श्रमैकवृत्तेर्भवतश्छलेन।
प्रकाशितत्वन्मतिगूढसाराः
कृतोपकारा इव विद्विषन्ते॥")

विनतः, त्रि, (वि+नम+क्तः।) प्रणतः। (यथा, आर्य्यासप्तशत्याम्। ६१६।
"सखि दुरवगाहगहनो विदधानो विप्रियं प्रियजनेऽपि।
खल इव दुर्लक्ष्यस्तव विनतमुखस्योपरि स्थितः कोपः॥")
सुगमः। (यथा, बृहत्संहितायाम्। ६१। ३।
"दृश्यसमुच्चतुर्दन्तः प्रलम्बसुखाननो विनतपृष्ठः।
दृढशूलग्रीवो यवमध्यो दारितखुराश्च॥")
ग्रथितः। इति मेदिनी। ते, १५६॥ (सङ्कुचितः। यथा, रामायणे। १। ४३। २४।
"विनतं क्वचिदुद्भूतं क्वचिदुन्नतसन्निभम्।
सलिलेनेव सलिलं क्वचिदभ्याहतं पुनः॥")
पुं, खनामख्यातवानरविशेषः। यथा, भट्टिः। ७। ५२।
"प्राचीं तावद्विरथ्यः कपिभिर्विनतो ययौ।
अप्रगाद्वैरिवादित्यो वाजिभिर्दूरपातिभिः॥")

विनता, स्त्री, गरुड़माता। (सा तु दक्षप्रजापतेः कन्या। यथा, महाभारते। १। ६५। १२।
"क्रोधा प्राधा च विश्वा च विनता कपिला मुनिः।
कद्रुश्च मनुजव्याघ्र दक्षकन्येव भारत॥")
पिड़कामेदः। इति मेदिनी। ते, १५६॥ (यथा, सुश्रुते। २। ६।
"महती पिड़का नीला पिड़का विनता स्मृता॥")

विनताखनुः, पुं, (विनतायाः खनुः पुत्रः।) अरुणः। इति हेमचन्द्रः॥ गरुड़श्च॥

विनदः, पुं, (विग्रहेण नदति शब्दायते पत्रफलादिनेति। नद्+अच्।) विन्याकवृक्षः। इति शब्दचन्द्रिका॥ क्षातियान् इति ख्यातः॥

विनम्रकं, क्ली, तगरपुष्पम्। इति राजनिर्घण्टः॥

विनयः, त्रि, वणिक्। क्षिप्तः। निभृतः। विजितेन्द्रियः। इत्यजयपालः॥ (विग्रहेण नयतीति। नी+अच्। विग्रहेण प्रापकः। पृथक्कर्त्ता। यथा, ऋग्वेदे। २। २४। ६।
"स संनयः स विनयः पुरोहितः
सम्राट्टत्तः सयुधि ब्रह्मणस्पतिः॥"
"विनयः संगतानां विविधं नेता पृथक्कर्त्ता स एव।" इति तद्भाष्ये सायणः॥)

विनयः, पुं, (वि+नी+अच्।) शिक्षा। (यथा, रघुः। १। २४।
"प्रजानां विनयाधानाद्रक्षणाद्भरणादपि।
स पिता पितरस्तासां केवलं जन्महेतवः॥")

"जितेन्द्रियत्वं विनयस्य कारणं
गुणप्रकर्षो विनयादवाप्यते।
गुणप्रकर्षेण जनोऽनुरज्यते
जनानुरागप्रभवा हि सम्पदः॥"
इत्युद्भटः॥)

अथ विनयप्रशंसा।
"वृद्धांश्च नित्यं सेवेत विप्रान् वेदविदः शुचीन्।
तेभ्यो हि शिक्षेत् विनयं विनीतात्मा हि नित्यशः॥
समग्रां वशगां कुर्य्यात् पृथिवीञ्चाप्रसंशयः।
बहवोऽविनयाद्भ्रष्टा राजानः सपरिच्छदाः।
वनस्थाश्चैव राज्यानि विनयात् प्रतिपेदिरे॥"
इति मत्स्यपुराणे २१९ अध्यायः॥*॥
(विग्रहो नयः। दण्डः। यथा। "यस्तु।
'पूर्व्वमाचारयेद्दण्यं नियतं स्यात् स दोषभाक्।
पश्चाद्दण्यः सोऽप्यसत्कारी पूर्व्वं तु विनयो गुरुः॥'
इति नारदवचनम्॥
ततपूर्व्वापेक्षया परस्याधिकवाक्पारुष्योत्पादकस्यापि स्वल्पदण्डविधायकम्। युगपत्संप्रवर्त्तने अधिकदण्डाभावमाह स एव।
'पारुष्ये साहसे चैव युगपत्संवर्त्तयोः।
विग्रहश्चेन्न लभ्येत विनयः स्यात् समस्तयोः॥'
विनयो दण्डः।" इति व्यवहारतत्त्वम्॥

विनयग्राही, [न्] त्रि, (विनयं गृह्णातीति। ग्रह+णिनिः।) वचनेस्थितः। इत्यमरः॥

विनयस्थः, त्रि, (विनये तिष्ठतीति। स्था+कः।) आज्ञाकारी। तत्पर्य्यायः। विधेयः २ आश्रवः ३ वचनस्थितः ४ वश्यः ५ प्रणेयः ६। इति हेमचन्द्रः। ३। ६६॥

विनया, स्त्री, वाक्यालङ्कारः। इति मेदिनी॥

विनयनं, क्ली, (विनयति अन्तर्दधाति सरस्वत्यनेति। वि+नय+अधिकरणे ल्युट्।) कुरुक्षेत्रम्। तच्च हस्तिनाया उत्तरपश्चिमे वर्त्तते। इति त्रिकाण्डशेषः॥ (यथा, महाभारते। ३। ८२। १०५।
"ततो विनयनं गच्छेन्नियतो नियताशनः।
गच्छत्यन्तर्हिता यत्र मेरुपृष्ठे सरस्वती॥"
वि+नय+भावे ल्युट्।) विनाशश्च॥

विनष्टः, त्रि, (वि+नश+क्तः।) नाशाश्रयः। ध्वंसविशिष्टः। यथा। शिखी विनष्टः पुरुषो न नष्टः। इति विग्रहव्याख्याटीकायां मथुरानाथः॥ पतितः। यथा नारदः।
"विनष्टे वाप्यशरणे पितर्य्युपरतस्पृहे॥"
विनष्टे पतिते। इति दायभागः॥

विनष्टिः, स्त्री, विनाशः। इति विपूर्ब्बनशधातोर्भावे क्तिप्रत्ययेन निष्पन्नमिति। इति सिद्धान्तकौमुदी॥ (यथा, भागवते। ३। १। २०।
"तत्राथ शुश्राव सुहृद्विनष्टिं
वनं यथा वेणुजवह्निसंश्रयम्।

संसङ्ग्या जग्मथाशुशोचन्
वरस्तां प्रत्यग्रिधाय तूष्णीम् ॥")

विनसः, त्रि, (विगता नासिका यस्य । नञादेशः।) गतनासिकः। तत्पर्य्यायः। विग्रः २ विखुः ३ विनासकः ४। इति जटाधरः ॥

विना, अ, (वि+"विनड्भ्यां नानाञौ न सह।" ५।२। २७। इति ना।) वर्জ্জনम्। तत्पर्य्यायः। पृथक् २ अन्तरेण ३ ऋते ४ हिरुक् ५ नाना ६। इत्यमरः ॥ (अस्मिन्ननेन योगे "पृथग्-विनेति।" २। ३ ।३२। इत्यनेन तृतीया पञ्चमी च स्यात्। एवं "पृथग्विना नानाभिरिति योगविभागो द्वितीयार्थः ॥" इति काशिकोक्त्या द्वितीयापि। यथा, तत्रैव।

"विना वातं विना वर्षं विद्युत्प्रपतनं विना।
विना हस्तिक्षतान्दोषान् कैनेमौ पातितौ द्रुमौ ॥"

तृतीयाप्रयोगो यथा, रघुवंशे ३। १४।

"ययाम तृष्णापि विना दवाग्निः ॥"

पञ्चमीप्रयोगो यथा, सांख्यकारिकायाम् ।४१।

"चित्रं यथाश्रयमृते
स्थाण्वादिभ्यो विना यथा च्छाया।
तद्वद्विना विशेषै-
र्न तिष्ठति निराश्रयं लिङ्गम् ॥")

विनाकृतं, त्रि, (विना अन्तरेण कृतम्।) त्यक्तम्। इति त्रिकाण्डशेषः ॥

विनायकः, पुं, (विशिष्टो नायकः।) बुद्धः। गणेशः। इत्यमरः ॥ (यथा, कथासरित्सागरे ।३०। ५५।

"अस्तीह प्रमदोद्याने तरुमण्डलमध्यगः।
दृढप्रभावो वरदो देवदेवो विनायकः ॥")

गरुड़ः। विघ्नः। (यथा, हरिवंशे ।१८१।६५।

"राक्षसाश्च पिशाचाश्च भूतानि च विना-
यकाः ॥")

गुरुः। इति मेदिनी। के, ११२ ॥ * ॥ विनायकगणो यथा,—

"गाङ्गेयो विघ्नवर्त्तैव ह्यौ विघ्नेयौ विनायकौ ॥"

इति वह्निपुराणे गणभेदनामाध्यायः ॥*॥

विनायकस्योत्पत्तिर्यथा,—

प्रजापाल उवाच।

"कथं गणपतेर्जन्म मूर्त्तिमत्त्वञ्च सत्तम!।
एतन्मे संशयं छिन्धि धृतिकर्त्तृ यवस्थितम् ॥

महातपा उवाच।

पूर्व्वं देवगणाः सर्व्वे ऋषयश्च तपोधनाः।
कार्य्यारम्भे यथा प्राग्ना विघ्नं ते च न संशयः ॥
सन्मार्गावस्थिता यथा विघ्नन्ते विघ्नतः क्रियाः।
अतस्तत्कारिणः सर्व्वे तद्वदेवमविघ्नतः ॥
ततो देवाः सपितरश्चिन्तयामासुरोजसा।
अमत्कार्य्येषु विघ्नार्थं सर्व्व एवाध्यमक्षयन् ॥
ततस्तेषां तदा मत्तं कुर्व्वतां त्रिदिवौकसाम्।
बभूव बुद्धिर्जनने रुद्रं प्रति महामते ॥
ते तत्र रुद्रमामन्त्र्य कैलासनिलयं गुरुम्।
ऊचुः सविनयं सर्व्वे प्रणिपातपुरःसरम् ॥

देवा ऊचुः।

देवदेव महादेव मूलपाणे त्रिलोचन।
विघ्नार्थमविघ्नितानां उत्पादयितुमर्हसि ॥
एवमुक्तस्तदा देवैर्भवः परमया मुदा।
उमां निरीक्षयामास चक्षुषानिमिषेण ह ॥
देवानां सन्निधौ तस्य प्रश्नतो मां महात्मनः।
चिन्ताभूद्योनि मूर्त्तेभ्यो ह्यश्यते केन हेतुना ॥
पृथिव्या विद्यते मूर्त्तिरपां मूर्त्तिस्तथैव च।
तेजसः श्वसनस्यापि मूर्त्तिरेषा तु दृश्यते ॥
आकाशस्य कथं नेति मत्वा देवो जहास च।
ज्ञानशक्तिः परान् दृष्ट्वा यदृष्टं योनि मूर्त्तुना ॥
यच्चोक्तं ब्रह्मणा पूर्व्वं शरीरेषु शरीरिणाम्।
यच्चापि हसितं तेन देवेन परमेष्ठिना ॥
एतत्कार्य्यं चतुर्व्वक्त्रेण पृथिव्यादिचतुर्व्वपि।
मूर्त्तिमानतितेजस्वी हसतः परमेष्ठिनः ॥
प्रदीप्तास्यो महादीप्तः कुमारोभासयन् दिशम्।
परमेष्ठिगुणैर्युक्तः साक्षाद्ब्रह्म इवापरः ॥
उत्पन्नमात्रो देवानां द्योतितः संप्रमोहयन्।
कान्त्या दीप्त्या तथा मूर्त्या रूपेण च
महात्मवान् ॥
तं दृष्ट्वा परमं रूपं कुमारस्य महात्मनः।
उमा निमिषनेत्राभ्यां तमपश्यत भामिनी ॥
तं दृष्ट्वा कुपितो देवस्तीव्रकोपसमन्वितः।
मत्वा कुमाररूपन्तु शोभनं मोहनं दृश्याम्।
ततः शशाप तं देवो गणेशं परमेश्वरः ॥
कुमार गजवक्त्रं प्रलम्बजठरस्तथा।
भविष्यति तथा सर्पैरुपवीतगतिर्ध्रुवम् ॥
एवं शशाप तं देवस्तीव्रकोपसमन्वितः।
शृण्वन् शरीरसत्याय ततो देवो रघान्वितः ॥
यथा यथासौ च शरीरमाद्यं
धुनोति देवस्त्रिशिखास्त्रपाणिः।
तथा तथा चाङ्गरुहाश्चकाश
जलं चितौ संभवतंसघाते ॥
विनायकानेकसुखा गजास्या-
स्तमालनीलाञ्जनसन्निकाशाः।
उत्सृष्टरूपैर्विविधास्त्रहस्ता-
स्ततस्तु देवा मनसाकुलेन ॥
किमेतदित्यद्भुतकर्म्मकारी
स्रष्टेकः करोत्यप्रतिमं महच्च।
कार्य्यं सुराणां ज्ञतमेतदिष्टं
भवेत्सदैतं प्रहितं शुभत्वत् ॥
दिवौकसां चिन्तयतां तथा तु
विनायकैः व्याप्त शुभिता बभूव।
चतुर्म्मुखश्चाप्रतिमो विमान-
मास्थाय खे वाक्यमिदं जगाद ॥
ब्रह्मासुर देवा सुरनायकेन
त्रिलोचनेनाद्भुतरूपिणा च।
अनुग्रहीताः परमेश्वरेण
सुरद्विषां विघ्नकृतौ च।
इत्येवमुक्ता प्रणिपामहस्ता-
शुवाच देवस्त्रिशिखास्त्रपाणिम् ॥
यस्ते विभो वक्त्रसमुद्भवः प्रभु-
र्विनायका नाम बभूविमेऽनुगाः।
भवन्त्वधास्यात्मवरेण चाग्रे
त्वया च तुल्यन्तु शरीरचारी ॥
आकाशमेतद्बहुधा व्यवस्थितं
त्वया चैको वदतां ते प्रयाताः।
प्रभुर्भवत्वप्रतिमाक्षपाणिना
इमान् हि चाक्षैः सुवरांश्च देहि ॥
इत्येवमुक्ताभिगते पितामहे
त्रिलोचनस्यात्मभवं जगाद।
विनायको विघ्नकरो गजास्यो
गणेशनामा तु भवस्य पुत्रः ॥
एते च सर्व्वे तपसाप्तु भूता
विनायकाः क्रूरदृशः प्रचण्डाः।
उच्छ्वासदानादिविदृष्टदेहाः
कार्य्येषु सिद्धिं प्रतिपादयन्तः ॥
भवांश्च वेदेषु तथा मखेषु
कार्य्येषु चान्येषु महानुभावात्।
अग्रेषु पूजां लभतेऽन्यथा च
विनाग्रयिष्यस्यथ कार्यसिद्धिम् ॥
इत्येवमुक्तः परमेश्वरेण
सुरैः समं काञ्चनकुम्भसंस्थैः।
जलैस्तथासावभिषिक्तगात्रो
रराज राजेन्द्रः विनायकानाम् ॥
दृष्ट्वाभिषिच्यमानं तु देवाग्रं गणनायकम्।
तुष्टुवुः प्रयताः सर्व्वे त्रिशूलाक्षस्य सन्निधौ ॥

देवा ऊचुः।

नमस्ते गजवक्त्राय नमस्ते गणनायक!
विनायक नमस्तेऽस्तु नमस्ते चण्डविक्रम ॥
नमोऽस्तु ते विघ्नकर्त्रे नमस्ते सर्पमेखल।
नमस्ते रुद्रवक्त्रोत्थ प्रलम्बजठराश्रित।
सर्व्वदेवनमस्कारादविघ्नं कुरु सर्व्वदा ॥
एवं स्तुतस्तदा देवैर्महात्मा गणनायकः।
अभिषिक्तस्तु रुद्रेण सोमस्यापत्यतां गतः ॥
एतच्चतुर्थ्यां सम्यक्तं गणाध्यक्षस्य पार्थिव।
यतस्ततोऽयं महती तिथीनां परमा तिथिः ॥
एतस्यां यस्तिलान् भक्त्या सुक्त्वा गणपतिं नृप।
आराधयति तस्याशु तुष्यते नात्र संशयः ॥
यश्चैतत् पठते स्तोत्रं यश्चैतत् शृणुयान्नरः।
तस्य विघ्ना न जायन्ते न पापं सर्व्वथा नृप ॥"

इत्यादि वाराहे विनायकोत्पत्तिनामाध्यायः ॥*॥

विनायकस्य नामाष्टकस्तोत्रं यथा,—

श्रीविष्णुरुवाच।

"गजेशमेकदन्तञ्च हेरम्बं विघ्नायकम्।
लम्बोदरं शूर्पकर्णं गजवक्त्रं गुहाग्रजम्।
नामाष्टकार्थं पुत्रस्य शृणु मत्तो धरप्रिये।
स्तोत्राणां सारभूतञ्च सर्व्वविघ्नहरं परम् ॥
ज्ञानार्थवाचको गश्च णश्च निर्व्वाणवाचकः।
तयोरीशं परं ब्रह्म गणेशं प्रणमाम्यहम् ॥१॥
एकशब्दः प्रधानार्थो दन्तश्च बलवाचकः।
बलं प्रधानं सर्व्वस्मादेकदन्तं नमाम्यहम् ॥२॥
हेशब्दो विघ्नवाचकश्च रम्बः पालनवाचकः।
परिपालकं तं हेरम्बं प्रणमाम्यहम् ॥३॥
विघ्नशब्दस्य वाचको विघ्नो नायकः खण्डनार्थकः।
विघ्नहन्तारमीशानं नमामि विघ्ननायकम् ॥४॥

विघ्नदत्तैश्च नैवेद्यैर्यस्य लम्बोदरं पुरा।
पिचा दत्तैश्च विविधैर्वन्दे लम्बोदरञ्च तम् ॥५॥
शूर्पाकारौ च तत्कर्णौ विघ्नवारणकारणौ।
सम्पदास्फालरूपौ च शूर्पकर्णं नमाम्यहम् ॥६॥
विघ्नप्रसादपुण्यञ्च यन्मूर्द्ध्नि मुनिदत्तकम्।
तद्गजेन्द्रवक्त्रयुक्तं गजवक्त्रं नमाम्यहम् ॥ ७ ॥
गुहस्याग्रे च जातोऽयमाविर्भूतो हरगृहे।
वन्दे गुहाग्रजं देवं सर्व्वदेवाग्रपूजितम् ॥ ८ ॥
एतन्नामाष्टकं दुर्गे नामार्थसंयुतं परम्।
पुत्रस्य पश्य वेदे च तदा कोपं वृथा कुरु ॥
एतन्नामाष्टकं स्तोत्रं नामार्थसंयुतं शुभम्।
त्रिसन्ध्यं यः पठेन्नित्यं स सुखी सर्व्वतो जयी ॥
ततो विघ्नाः पलायन्ते वैनतेयादयोरगाः।
गणेश्वरप्रसादेन महाज्ञानी भवेद्ध्रुवम् ॥
पुत्रार्थी लभते पुत्रं भार्य्यार्थी विपुलां स्त्रियम्।
महाजड़ः कवीन्द्रश्च विद्यावांश्च भवेद्ध्रुवम् ॥"
इति ब्रह्मवैवर्त्ते गणपतिखण्डे ४४ अध्यायः ॥

अस्य कवचं यथा,—

नारद उवाच।

"संसारमोहनस्यास्य कवचस्य प्रजापतिः।
ऋषिश्छन्दश्च बृहती देवो लम्बोदरः स्वयम् ॥
धर्म्मार्थकाममोक्षेषु विनियोगः प्रकीर्त्तितः।
सर्व्वेषां कवचानाञ्च सारभूतमिदं मुने ॥
ॐ गौँ गेँ श्रीँ गणेशाय स्वाहा मे पातु मस्तकम्।
द्व्याक्षरोदरो मन्त्रो ललाटं मे सदावतु ॥
ॐ ह्रीँ क्लीँ श्री गमिति च सततं पातु लोचनम्।
तारकां पातु विघ्नेशः सततं धरणीतले ॥
ॐ ह्रीँ श्रीँ क्लीमिति सततं पातु नासिकाम्।
ॐ गौं गं शूर्पकर्णाय स्वाहा पात्वधरं मम ॥
दन्तांश्च तालुकां जिह्वां पातु मे षोड़शाक्षरः।
ॐ श्रीं लम्बोदरायेति स्वाहा गण्डं सदावतु ॥
ॐ गां गं गजाननायेति स्वाहा स्कन्धं सदावतु ॥
श्रीं क्लीं क्लीमिति कङ्कालं पातु वक्षःस्थलञ्च गं।
पादौ पादौ सदा पातु सर्व्वाङ्गं विघ्ननिघ्नकृत् ॥
प्राच्यां लम्बोदरः पातु आग्नेय्यां विघ्ननायकः।
दक्षिणे पातु विघ्नेशो नैर्ऋत्यान्तु गजाननः ॥
पश्चिमे पार्व्वतीपुत्रो वायव्यां शङ्करात्मजः।
कृष्णस्यांशश्चोत्तरे तु परिपूर्णतमस्य च ॥
ऐशान्यामेकदन्तश्च हेरम्बः पातु चोर्द्धतः।
गणाधिपोऽप्यधः पातु सर्व्वपूज्यश्च सर्व्वतः।
स्वप्ने जागरणे चैव पातु मे योगिनां गुरुः ॥
इति ते कथितं वत्स! सर्व्वमन्त्रौघविग्रहम्।
संसारमोहनं नाम कवचं परमाद्भुतम् ॥
श्रीकृष्णेन पुरा दत्तं गोलोके रासमण्डले।
वृन्दावने विनीताय मह्यं दिनकरात्मज ॥
मया दत्तञ्च तुभ्यञ्च यस्मै कस्मै न दास्यसि।
परं वरं सर्व्वपूज्यं सर्व्वसङ्कटतारणम् ॥
गुरुमभ्यर्च्च्य विधिवत् कवचं धारयेत्तु यः।
कण्ठे वा दक्षिणे बाहौ सोऽपि विष्णुर्न संशयः ॥

अश्वमेधसहस्राणि राजसूयशतानि च।
ग्रहेन्द्रकवचस्यास्य कलां नार्हन्ति षोड़शीम् ॥
इदं कवचमज्ञात्वा यो भजेच्छङ्करात्मजम्।
शतलक्षप्रजप्तोऽपि न मन्त्रः सिद्धिदायकः ॥"
इति ब्रह्मवैवर्त्ते गणपतिखण्डे गणेशकवचं नाम १३ अध्यायः ॥ * ॥ अथ विनायकशान्तिः।

याज्ञवल्क्य उवाच।

"विनायकोपसृष्टस्य लक्षणानि निबोधत।
स्वप्नेऽवगाहतेऽत्यर्थं जलं सुखांश्च पश्यति।
विमना विफलारम्भः स दीर्घत्वनिमित्ततः ॥
राजा राज्यं कुमारी च पतिं पुत्रञ्च गुर्व्विणी।
नाप्नुयात् स्वपनन्तस्य पुण्येऽह्नि विधिपूर्ब्बकम् ॥
गौरसर्षपकल्केन सल्लेनोत्सारितस्य च।
सर्व्वौषधैः सर्व्वगन्धैर्विलिप्तशिरसस्तथा ॥
भद्रासनोपविष्टस्य स्वस्तिवाच्य द्विजान् शुभान्।
मृत्तिकां रोचनां गन्धान् गुग्गुलुं चाप्सु निक्षिपेत् ॥
या आहृता ह्येकवर्णैश्चतुर्भिः कलसैर्ह्रदात्।
चर्म्मण्यानुड़हे रक्ते स्थाप्यं भद्रासनं तथा ॥
सहस्राक्षं शतधारं ऋषिभिः पारगं कृतम्।
तेन त्वामभिषिञ्चामि पावमान्यः पुनन्तु ते ॥
भगस्तु वरुणो राजा भगं सूर्य्यो बृहस्पतिः।
भगमिन्द्रश्च वायुश्च भगं सप्तर्षयो ददुः ॥
यत्ते कोषसुसौभाग्यं सीमन्ते यच्च मूर्द्धनि।
ललाटे कर्णयोरक्ष्णोरापस्तत् शन्तु ते सदा ॥
स्नातस्य सार्षपं तैलं श्रुवेणोड़म्बरेण तु।
जुहुयान्मूर्द्धनि क्रुद्धान् सर्पेन परिगृह्य च ॥
मितश्च संमितश्चैव तथा शालकटंकटाः।
कुष्माण्डा राजपुत्राश्चेत्यन्ते स्वाहासमन्विते ॥
इत्याचतुर्थ्यये सर्पे क्रुद्धानास्तीर्य्य सर्व्वशः।
कृताकृतांस्तण्डुलांश्च पललौदनमेव च ॥
पुष्पं चित्रं सुगन्धिञ्च सुराञ्च विविधामपि।
मूलकं पूरिका पूपास्तथैवेक्षुकाः सक्तवः ॥
दधि पायसमन्नञ्च गुड़पिष्टं समोदकम्।
एतान् सर्व्वानुपाहृत्य भूमौ कृत्वा ततः शिरः ॥
अम्बिकासुपतिष्ठेच्च दद्यादर्घ्यं कृताञ्जलिः।
दूर्व्वासर्षपपुष्पैश्च पुत्रजन्मभिरन्ततः ॥
कृतस्वस्त्ययनं चैव प्रार्थयेदम्बिकां सतीम्।
रूपं देहि यशो देहि भगं भगवति देहि मे ॥
पुत्रान् देहि श्रियं देहि सर्व्वकामांश्च देहि मे।
ब्राह्मणान् भोजयेत् पश्चात् शुक्लवस्त्रानुलेपनैः ॥
वस्त्रयुग्मं गुरोर्दद्यादासंपूज्य यहांस्तथा।
श्रेयःकर्म्मफलं विद्यात् सूर्य्यार्चनरतस्तथा ॥"
इति गारुड़े १०० अध्यायः ॥*॥

अथ गणेशमन्त्राः।

"पञ्चान्तकं शशिधरं बीजं गणपतेर्विदुः।"
पञ्चान्तको गकारः। ध्यानन्तु गणेशशब्दे द्रष्टव्यम्। अस्य पुरश्चरणं चतुर्लक्षजपः ॥ * ॥
अथ महागणपतिमन्त्रः। निवन्धे।
"श्रीशक्तिस्मरभूविघ्नबीजानि प्रथमं वदेत्।
ङेऽन्तं गणपतिं पश्चात् वराग्नी वरदं पदम् ॥
उक्त्वा सर्व्वजनं मेऽन्ते वशमानय टद्वयम्।
अष्टाविंशत्यक्षरोऽयं ताराद्यो मनुरीरितः ॥"
भूबीजमाह।
"स्मृतिस्थं मांसमौविन्दुयुक्तं भूबीजमीरितम्।"
स्मृतिर्गकारः। मांसं णकारः ॥ * ॥ अस्य ध्यानम्।
"नवरत्नमयं द्वीपं स्मरेदिक्षुरसाम्बुधौ।
तदौचिधौतपर्य्यन्तं मन्दमारुतसेवितम् ॥
मन्दारपारिजातादिकल्पवृक्षलताकुलम्।
उद्भूतरत्नच्छायाभिररुणीकृतभूतलम्।
उद्यद्दिनकरेन्द्वभ्यामुद्भासितदिगन्तरम् ॥
तस्य मध्ये पारिजातं नवं रत्नमयं स्मरेत्
ऋतुभिः सेवितं षड्भिरनिशं प्रीतिवर्द्धनम् ॥
तस्याधस्तात् महापीठं रचिते मालकाम्बुजे।
षट्कोणान्तश्चिकोणस्थं महागणपतिं स्मरेत् ॥
हस्तीन्द्राननमिन्दुचूड़मरुणच्छायं त्रिनेत्रं रसा-
दाश्लिष्टं प्रियया सपद्मकरया स्वाङ्कस्थया
सस्मितम्।
बीजापूरगदाधनुश्चिशिखयुक्चक्राब्जपाशोत्-
पलं
श्रीखण्डस्रविषाणगण्डकलसान् हस्तैर्वहन्तं
भजे ॥
गण्डपाणिगलद्दानपूरलालसमाननान्।
द्विरेफान् कर्णतालाभ्यां वारयन्तं मुहुर्मुहुः ॥
कराग्रधृतमाणिक्यकुम्भवक्त्रविगलृते।
रत्नवर्षैः प्रीणयन्तं साधकं मदविह्वलम् ॥
माणिक्यमुकुटोपेतं रत्नाभरणभूषितम् ॥"
अस्य पुरश्चरणं चतुर्लक्षजपः ॥*॥ अपि च।
"भक्तिरुद्वनिजं बीजं महागणपतिं वदेत्।
ङेऽन्तमस्त्रवधूप्रोक्तो मन्त्रोऽयं दाशाक्षरः ॥"
अस्य ध्यानम्।
"मुक्तागौरं मदगजमुखं चन्द्रचूड़ं त्रिनेत्रं
हस्तैः खीयैर्दधतमरविन्दद्वयौ रत्नकुम्भम्।
अङ्कस्थाया सरसिजरुचेस्तुङ्गनालम्बिपार्श्वे-
र्दैया योनौ विनिहितकरं रत्नमौलिं
भजामि ॥"
अस्य पुरश्चरणं लक्षजपः ॥*॥ मन्त्रान्तरम्।
"भक्तिरुद्वं निजं बीजं वशमानय टद्वयम्।
तारादो मनुराख्यातो वसुसंख्याक्षरान्वितः ॥"
अस्य ध्यानम्।
"हस्तैर्विभ्रतमिक्षुदण्डवरदौ पाशाङ्कुशौ पुष्कर-
सृष्टस्रग्मदवाराङ्गमनयाश्लिष्टं श्रिया शक्तया।
श्यामाङ्गया विधृताब्जया त्रिनयनं चन्द्रार्द्धचूड़ं
भवा-
रक्तं हस्तिमुखं स्मरामि सततं भोगालिलोलं
विभुम्।"
अस्य पुरश्चरणं लक्षत्रयजपः ॥*॥ अथ हेरम्ब-
मन्त्रः। स च ऊकारयुक्तो गकारः सचिन्दुः
प्रणवादिनमोऽन्तश्चतुरक्षरः। निवन्धे।
"पञ्चान्तको बिन्दुयुक्तो वामकर्णविभूषितः।
तारादिर्हृदयान्तोऽयं हेरम्बमनुरीरितः।
चतुर्वर्गात्मको नृणां चतुर्व्वर्गफलप्रदः ॥"

अस्य ध्यानम् ।
"सुक्ताकाञ्चननीलकुन्दधुरुणच्छायैस्त्रिनेचान्वितै-
र्नागास्यैर्हरिवाहनं ग्रग्निधरं हेरम्बमर्कप्रभम् ।
दन्तं दानमभीतिमोदकरदान् टङ्कं शिरोऽक्षा-
लिकां
मालां सुन्दरमङ्कुशं त्रिशिखकं दोर्भिर्दधानं
भजे ॥"
अस्य पुरश्चरणं त्रिलक्षसंख्यकजपः ॥*॥ मन्त्रान्तरम् । गं क्षिप्रप्रसादनाय हृत् । तथा च निबन्धे ।
"संवर्त्तको नेत्रयुतः पार्श्वो वह्नासने स्थितः ।
प्रसादनाय हृन्मन्त्रः खबीजाद्यो दशाक्षरः ॥"
अस्य ध्यानम् ।
"पाशाङ्कुशौ कल्पलतां विषाणं
दधत् स्वशुण्डाहितबीजपूरः ।
रक्तस्त्रिनेत्रस्तरुणेन्दुमौलि-
र्हीरोज्ज्वलो हस्तिसुखोऽवतान्नः ॥"
अस्य पुरश्चरणं लक्षजपः ॥*॥ अथ हरिद्रागणेशमन्त्रः ।
"पञ्चान्तको धरासंस्थो बिन्दुभूषितमस्तकः ।
एकाक्षरो महामन्त्रः सर्व्वकामफलप्रदः ॥"
ध्यानन्तु ।
"हरिद्राभं चतुर्ब्बाहुं हारिद्रवसनं विभुम् ।
पाशाङ्कुशधरं देवं मोदकं दन्तमेव च ॥"
अस्य पुरश्चरणं चतुर्लक्षजपः । इति तन्त्रसारः ॥*॥ (पीठस्थानविशेषः । यथा, देवीभागवते । ७ । ३० । ७१ ।
"करवीरे महालक्ष्मीरुमादेवी विनायके ।
आरोग्या वेदवाणे तु महाकाले महेश्वरी ॥"
विगतो नायको यस्येति विग्रहे अनाथे, त्रि ॥)
विनायिका, स्त्री, (विनायकस्य स्त्री । भार्य्यार्थे ङीप् ।) गरुड़पत्नी । इति शब्दमाला ॥
विनारुहा, स्त्री, (विना आश्रयं रोहतीति । रुह + कः । स्त्रियां टाप् ।) त्रिपर्णिका । इति राजनिर्घण्टः ॥
विनाशः, पुं, (विनश्यनमिति । वि + नश् + घञ् ।) विनश्यनम् । (यथा, गीतायाम् । २ । १७ ।
"अविनाशि तु तद्विद्धि येन सर्व्वमिदं ततम् ।
विनाशमव्ययस्यास्य न कश्चित् कर्त्तुमर्हति ॥")
तत्पर्य्यायः । अदर्शनम् २ । इत्यमरः ॥ क्षुक्षुट् ३ । यथा, श्रीभागवते ।
"एषा घोरतमा सन्ध्या लोकक्षुक्षुट्करी
विभो ॥"
क्षुक्षुडित्यव्ययं विनाशे वर्त्तते । इति श्रीधरस्वामी ॥
विनाशकः, त्रि, विनाशकर्त्ता । विपूर्ब्बकनश्धातोर्ण्वुल्(ण्वुल्)प्रत्ययेन निष्पन्नः ॥ (यथा, महाभारते । १२ । ६१ । ६ ।
"राजैव कर्त्ता भूतानां राजैव च विनाशकः ।
धर्म्मात्मा यः स कर्त्ता स्यादधर्म्मात्मा विनाशकः ॥")
विनाशी, [न्] त्रि, विनाशकरणशीलः । विपूर्ब्बनशधातोर्णिनिप्रत्ययेन निष्पन्नः ॥ (यथा, महाभारते । १२ । १०७ । ११ ।
"लोभमेको हि दृणुते ततोऽमर्षमनन्तरम् ।
तौ क्षयव्ययसंयुक्तावन्योन्यञ्च विनाशिनौ ॥"
यथा च मनौ । १ । २७ ।
"अक्षरो मात्राविनाशिन्यो दशार्द्धवानु याः
स्मृताः ।
ताभिः सार्द्धमिदं सर्व्वं सम्भवत्यनुपूर्ब्बशः ॥")
विनाशोन्मुखं, त्रि, (विनाशाय पतनाय उन्मुखम् ।) पक्वम् । इत्यमरः ॥ नाशोन्मुखञ्च ॥
विनासकः, त्रि, (विगता नासा यस्य । बहुव्रीहौ कन् ह्रस्वश्च ।) गतनासिकः । इति जटाधरः ॥
विनाहः, पुं, (विशेषेण नह्यते अनेन । वि + नह + "हलश्च ।" ३ । ३ । १२१ । इति घञ् ॥) कूपाननपिधानकः । इति शब्दरत्नावली ॥
विनिक्षिप्तः, त्रि, विनिक्षेपाश्रयः । परित्यक्तः । विनिपूर्ब्बकक्षिपधातोः क्तप्रत्ययेन निष्पन्नः ॥ (यथा, देवीभागवते । २ । ८ । २७ ।
"पितुः कण्ठेऽद्य मे येन विनिक्षिप्तो मृतोरगः ॥")
विनिगमना, स्त्री, एकतरपक्षपातिनी युक्तिः । एकतरावधारणा । यथा । उच्यते । एकदेशोपात्तस्यैव भूहिरण्यादावुत्पन्नस्य स्वत्वस्य विनिगमनाप्रमाणाभावेन वैशेषिकव्यवहारानर्हतया अव्यवस्थितस्य गुटिकापातादिना अञ्जनं विभागः । इति दायभागः ॥ उच्यत इति भूहिरण्यादावुत्पन्नस्य एकदेशोपात्तस्य तत्तदंशावच्छिन्नस्य विनिगमना इदमसुकस्य नान्यस्येत्यवधारणरूपा तत्प्रमाणाभावेन वैशेषिकव्यवहारः परस्परनैरपेक्ष्येण दानविक्रयादिलक्षणस्तदनर्हतया अव्यवस्थितस्य सतोऽप्यसत्कल्पस्य गुटिकापातादिना अञ्जनं इदं असुकस्येत्यवधारणं विभाग इत्यर्थः । इति तट्टीकायां श्रीकृष्णतर्कालङ्कारः ॥
विनिद्रः, त्रि, (विगता निद्रा सुप्तता यस्य ।) उन्मीलितः । इति शब्दमाला ॥ (यथा, नैषधे । १ । ३४ ।
"विनिद्ररोमाञ्चनि पद्मखण्डती नलम् ॥"
तथा च साहित्यदर्पणे । १० परिच्छेदे ।
"उत्पत्तिरिन्दोरपि निष्कलैव
दृष्टा विनिद्रा नलिनी न येन ॥")
निद्रारहितः । (यथा, महाभारते । ३ । २८५ । २१ ।
"स्वप्नमासीनमव्यग्रं विनिद्रं राक्षसाधिपः ।
ततोऽब्रवीद्दशग्रीवः कुम्भकर्णं महाबलम् ॥")
विनिद्रत्वं, क्ली, (विनिद्रस्य भावः ।) प्रबोधः । इति हेमचन्द्रः ॥ निद्रारहितत्वञ्च ॥
विनिपातः, पुं, (विशेषेण निपतनम् । वि + नि + पत + घञ् ।) निपातः । दैवादिव्यसनम् । इति मेदिनी । ते, २१७ ॥ अवमानः । इति हेमचन्द्रः ॥ (यथा, मनौ । ४ । १४६ ।
"मङ्गलाचारयुक्तानां नित्यञ्च प्रयतात्मनाम् ।
जपतां जुह्वताञ्चैव विनिपातो न विद्यते ॥")
विनिमयः, पुं, (वि + नि + मी + अप् ।) परिदानम् । प्रतिदानम् । इति शब्दरत्नावली ॥ (यथा, रघुः । १ । २६ ।
"दुदोह गां स यज्ञाय सस्याय मघवा दिवम् ।
सम्पद्विनिमयेनोभौ दधतुर्भुवनद्वयम् ॥")
वल्कः । इति शब्दमाला ॥ यथा,—
"विक्रयेणाथ विनिमयेनैवात्ता गोमांसखादके ।
व्रतं चान्द्रायणं कुर्य्याद्धुत्वे साक्षादधो भवेत् ॥"
इति प्रायश्चित्ततत्त्वधृतगोभिलवचनम् ॥
विनियोगः, पुं, (वि + नि + युज् + घञ् ।) कर्म्मणे अर्पणम् । इति हेमचन्द्रः ॥ विनियोजनम् । यथा,—
"अनेनेदन्तु कर्त्तव्यं विनियोगः प्रकीर्त्तितः ॥"
इत्याह्निकतत्त्वम् ॥
(यथा, सन्ध्याविधौ ।
"ॐकारस्य ब्रह्मऋषिर्गायत्रीच्छन्दः सविता देवता प्राणायामे विनियोगः ॥")
विनियोजितः, त्रि, विनियुक्तः । विनिपूर्ब्बयुज्धातोः क्तप्रत्ययेन निष्पन्नः ॥
विनिधूतः, त्रि, (वि + निर् + धू + क्तः ।) दूरवस्त्रया चलितः । यथा,—
"ततो देवा विनिर्धूता भ्रष्टराज्याः पराजिताः ।
हृताधिकारास्त्रिदशास्ताभ्यां सर्व्वे निराकृताः ॥"
इति मार्कण्डेये देवीमाहात्म्यम् ॥
विनिर्भयः, पुं, (विशेषेण निर्गतं भयं यस्य ।) साधुगणविशेषः । यथा,—
"मनो मन्ता तथा प्राणो नरो यानश्च वीर्य्यवान् ।
विनिर्भयो नयश्चैव हंसो नारायणो वृषः ।
प्रभुश्चेति समाख्याताः साध्याः द्वादश
पौर्व्विकाः ॥"
इति वह्निपुराणे काश्यपीयवंशः ॥
भयरहितश्च ॥
विनिर्म्मोकः, पुं, अतिरेकः । यथा । दिवाकरवारविनिर्म्मोके तु गर्गः । इति चूड़ाप्रकरणे ज्योतिस्तत्त्वम् ॥ (विगतो निर्म्मोको यस्य इति विग्रहे सुक्तकक्षुके, त्रि ॥)
विनिर्वृत्तः, त्रि, समाप्तः । निष्पन्नः । विनिर्पूर्ब्बकवृतुधातोः क्तप्रत्ययेन निष्पन्नः ॥
विनिवृत्तः, त्रि, निवृत्तिविशिष्टः । शान्तः । निरस्तः । विनिपूर्ब्बकवृतुधातोः क्तप्रत्ययेन निष्पन्नः ॥ (यथा, गीतायाम् । १५ । ५ ।
"निर्म्मानमोहा जितसङ्गदोषा
अध्यात्मनित्या विनिवृत्तकामाः ॥")
विनिहतः, त्रि, विनष्टः । विनिपूर्ब्बकहनधातोः क्तप्रत्ययेन निष्पन्नः ॥
विनीतः, त्रि, (वि + नी + क्तः ।) विनयान्वितः । विनयः शास्त्रतः संस्कारः इन्द्रियजयो वा ।

तत्पर्य्यायः। निश्चतः २ प्रश्रितः ३। इत्यमर-भरतौ॥ (यथा, रघुवंशे। १४। ७५।
"तपस्विसंसर्गविनीतसत्त्वे
तपोवने वीतभया वसाखिनि॥")
जितेन्द्रियः। (यथा, तन्त्रसारे।
"शान्तो दान्तः कुलीनश्च विनीतः शुद्धवेषवान्॥")
अपनीतः। (यथा, महाभारते।७।११०।५५।
"विनीतशल्यांस्तुरगांश्चतुरो हेममालिनः॥")
क्षुतः। इति मेदिनीकारहेमचन्द्रौ॥ क्षिप्तः। इत्यजयपालः॥ कृतदण्डः। इति स्मृतिः॥ (अनुद्धतः। यथा, मनौ। ६। ४१।
"तत्राऽऽत्मना विनीतेन ज्ञानविज्ञानवेदिना॥")

विनीतः, पुं, (वि+नी+क्तः।) सुवाहाश्वः। तत्पर्य्यायः। साधुवाही २। इत्यमरः। सुखवाहनशीलकः ३। इति शब्दरत्नावली॥ (यथा, महाभारते। ७। ११०। ५६।
"तांस्तदा रूप्यवर्णाभान् विनीतान् शीघ्रगामिनः॥")
वैणिक्। इति मेदिनी। ते, १५४॥ दमनकवृक्षः। (अस्य पर्य्यायो यथा,—
"उक्तो दमनको दान्तो सुनिपुत्रस्तपोधनः।
गन्धोत्कटो ब्रह्मजटो विनीतः फलपत्रकः॥"
इति भावप्रकाशस्य पूर्ब्बखण्डे प्रथमे भागे॥)
शिक्षितवृषभादिः। इति राजनिर्घण्टः॥

विनीतकं, क्ली पुं, वैनीतकम्। परस्परावाहनम्। इत्यमरटीकायां रायमुकुटः॥

विनीयः, पुं, (वि+नी+"विपूयविनीयजित्यैति।" ३। १। ११७। क्यप्प्रत्ययेन निपातितः।) कल्कः। इति मुग्धबोधव्याकरणम्॥ (यथा,—
"शृङ्गातुरुष्कलघुलाभतया विनीयः।"
इति वैद्यकचक्रपाणिसंग्रहे वातव्याधौ एलातैले॥) पापम्। इति सिद्धान्तकौमुदी॥

विनेता, [ऋ] पुं, (वि+नी+तृच्।) राजा। आदेशके, त्रि। इति मेदिनी। ते, १५६॥ (यथा, रघुवंशे। १४। २३।
"तेनास लोकः पितृमान् विनेत्रा॥")
गुरुः। शिक्षकः। यथा, महाभारते।११।२६।
"अर्ज्जुनस्य विनेतारमाचार्य्यं बालकेष्वथा।
तं पश्य पतितं द्रोणं कुरूणां द्विषतां शमम्॥"
यथाच रघुवंशे। ८। ६१।
"स तथेति विनेतुरुदारमतेः
प्रतिपद्य वचो विससर्ज्ज मुनिम्॥")

विनेयः, त्रि, (वि+नी+यत्।) नेतव्यः। विपूर्ब्बेणीघासोर्य्यप्रत्ययेन निष्पन्नः॥ दण्डनीयः। यथा,
"ज्योतिर्ज्ञानं तथोत्पातमविदित्वा तु ये नृणाम्।
आवयन्त्यर्थलोभेन विनेयास्तेऽपि यत्नतः॥"
विनेयाः दण्डनीयाः। इति ज्योतिस्तत्त्वम्॥

विनोदः, पुं, (वि+णुद+घञ्।) कौतूहलम्। इति हलायुधः॥ (यथा, कथासरित्सागरे। १५। १२५।
"वाधते तच्च नैकत्वात् सर्व्वं च मगधेश्वरः।
तत्तच्च रक्षाहेतोश्च विनोदायतनस्य ताम्॥")
क्रीड़ा। इति भूरिप्रयोगः॥ (यथा, भागवते। ३। १६। २४।
"नैतावता ह्यधिपतेर्वत विश्वभर्त्तु-
स्तेजःक्षयं तव च तस्य स ते विनोदः॥"
अपनयनम्। यथा, शिशुपालवधे। १। ४८॥
"विनोदमिच्छन्नथ दर्पजन्मनो
रणेन कण्डूक्षिदृशैः समं पुनः॥"
प्रमोदः। यथा, हितोपदेशे।
"कालशास्त्रविनोदेन कालो गच्छति धीमताम्।
व्यसनेन च मूर्खाणां निद्रया कलहेन वा॥")
आलिङ्गनविशेषः। तल्लक्षणं यथा। नायको नायिकाया दक्षिणपादं वामपादं वा स्वमध्यदेशे स्वदक्षिणपादं वामपादं वा नायिकामध्यदेशे निधाय वक्षसि वक्षः ओष्ठे ओष्ठं दत्त्वा यदाश्लिष्यति तत्। इति कामशास्त्रम्॥ राजग्रहविशेषः। यथा,—
"दीर्घे त्रयो राजहंसाः प्रसरे द्वौ प्रतिष्ठितौ।
विनोद एव द्वारणि चिंशुतः कोष्ठइयं भवेत्॥"
इति युक्तिकल्पतरुः॥
"द्वादशैते गृहान् वक्ष्ये तेषां लक्षणमग्रतः।
सुनन्दः सर्व्वतोभद्रो भद्रो नान्दीसुखस्तथा॥
विनोदश्च विलासश्च विजयो विमलस्तथा।
रङ्गः केलिर्जयो वीरो द्वादशैते प्रकीर्त्तिताः॥"
इति भविष्योत्तरपुराणम्॥

वि(बि)न्दुः, पुं, (बिदि अवयवे+बाहुलकादुः।) जलकणा। तत्पर्य्यायः। पृषत् २ पृषतः ३ विप्रुट् ४। इत्यमरः॥ पृषन्ति ५ विप्रुट्६। इति तट्टीका॥ (यथा, पद्मतन्त्रे।
"जलबिन्दुप्रपातेन क्रमशः पूर्य्यते घटः।
स हेतुः सर्व्वशास्त्रस्य धर्म्मस्य च धनस्य च॥")
दन्तक्षतविशेषः। भ्रुवोर्मध्यम्। रूपकार्थप्रकृतिः। इति मेदिनी। दे, १०-११॥ अनुस्वारः। यथा।"बिन्दुद्विबिन्दुमात्रौ वर्णौ क्रमान्नृवी संज्ञौ स्तः।" इति मुग्धबोधव्याकरणम्॥ अपि च।
"अग्निर्वह्निसमायुक्तो वामाक्षिबिन्दुभूषितः।
एकाक्षरो महामन्त्रः श्रीसूर्य्यस्य प्रकीर्त्तितः॥"
इति सूर्य्यकवचम्॥

विन्दूत्पत्तिर्यथा,—
"सच्चिदानन्दविभवात् सकलात् परमेश्वरात्।
आसीच्छक्तिस्ततो नादो नादाद्बिन्दुसमुद्भवः॥"
इति शारदातिलके १ पटलः॥
अपि च।
"आसीद्बिन्दुस्ततो नादो नादाच्छक्तिः समुद्भवा।
नादरूपा महेशानी चिद्रूपा परमा कला॥
नादाख्यैव समुत्पन्नः अर्द्धबिन्दुर्महेश्वरि।
सार्द्धचित्रयबिन्दुभ्यो भुजङ्गी कुलकुण्डली॥"
इति कुब्जिकातन्त्रे १ पटलः॥
"बिन्दुर्नादो बीजमिति तस्य भेदाः समीरिताः।
बिन्दुः शिवात्मको बीजं शक्तिर्नादस्त्रयोर्मिथः॥
समवायः समाख्यातः सर्व्वागमविशारदैः॥"
इति शारदातिलकः॥

अन्यच्च।
"बिन्दुः शिवात्मकस्तत्र बीजं शक्त्यात्मकं स्मृतम्।
तयोर्योगे भवेन्नादस्ताभ्यो जाताश्चिशक्तयः॥"
इति क्रियासारः॥

वि(बि)न्दुः, त्रि, (वेत्ति तच्छीलः। विदज्ञाने+"विन्दुरिच्छुः।" ३। २। १६६। इति उप्रत्ययो नुमागमश्च निपात्यते।) ज्ञाता। इत्यमरः॥ दाता। इत्यजयपालः॥ वेदितव्यः। इति शब्दरत्नावली॥

वि(बि)न्दुचिञ्चकः, पुं, (बिन्दुभिश्चिञ्चविशेषैश्चिञ्चकः इव।) मृगभेदः। इति शब्दरत्नावली॥

वि(बि)न्दुजालं, क्ली, (बिन्दूनां जालम्।) हस्तिमुखोपरिविचित्रबिन्दुसमूहः। इति हेमचन्द्रः॥

वि(बि)न्दुजालकं, क्ली, (बिन्दूनां जालकम्।) गजस्य मुखादिस्थो बिन्दुसमूहः। तत्पर्य्यायः। पद्मकम् २। इत्यमरः। पद्मम् ३। अतएव पद्मी हस्तीति भरतः॥

वि(बि)न्दुतल्लः, पुं, (बिन्दुश्चिह्नं तल्लं यस्य।) अश्वः। इति हारावली॥ तुरङ्गकः। यथा,—
"बिन्दुतल्लः पुमान् शारिफलके च तुरङ्गके॥"
इति पवर्गीयवादौ मेदिनी॥

वि(बि)न्दुपत्रः, पुं, (बिन्दुः पत्रे यस्य।) भूर्य्यत्रः। इति रत्नमाला॥

वि(बि)न्दुरेखकः, पुं, (बिन्दुविशिष्टा रेखा यत्र। कन्।) पक्षिभेदः। इति शब्दचन्द्रिका॥

वि(बि)न्दुवासरः, पुं, (बिन्दुपातस्य वासरः।) गर्भे सन्तानोत्पत्तिकारकशुक्रपातदिनम्। इति ज्योतिषम्॥

वि(बि)न्दुसरः, [स्] क्ली, (बिन्दुनामकं सरः।) सरोवरविशेषः। यथा,—
"अभ्युत्तरेण कैलासं शृङ्गं सर्व्वौषधिं गिरिम्।
गौरन्तु पर्व्वतश्रेष्ठं हरितालमयं प्रति॥
हिरण्यशृङ्गः सुमहान् दिव्यौषधिमयो गिरिः।
तस्य पादे महद्दिव्यं सरः काञ्चनसन्निभम्॥
रम्यं बिन्दुसरो नाम यत्र राजा भगीरथः।
गङ्गार्थे स तु राजर्षिरुवास बहुलाः समाः॥
दिव्यं यास्यन्ति ये पूर्ब्बे गङ्गातोयपरिप्लुताः।
तत्र त्रिपथगा देवी प्रथमञ्तु प्रतिष्ठिता॥
सोमपादात् प्रसृता सा सप्तधा प्रतिभव्यते।
यूपा मणिमयास्तत्र चितयश्च हिरण्मयाः॥
तत्रेष्ट्वा क्रतुभिः सिद्धः शुक्रः सुरगणैः सह।
दिव्यच्छायापथश्चात्र नक्षत्राणाञ्च मण्डलम्॥
दृश्यते भास्वरा रात्रौ देवी त्रिपथगा तु सा।
अन्तरीक्षं दिवश्चैव भावयित्वा भुवं गता॥
भवस्य खाङ्के पतिता संरुद्धा योगमायया।
तस्या ये बिन्दवः केचित् च्युताया पतिता भुवि।
श्रुतस्तु तैर्बिन्दुसरस्ततो बिन्दुसरः स्मृतम्॥"
इति मात्स्ये। १२०। २७—३१॥

विन्धपत्री, स्त्री, व्यराया। इति शब्दचन्द्रिका॥ बेलशुँटा इति भाषा॥

विन्ध्यः, पुं, चन्द्रः । इति त्रिकाण्डशेषः ॥
विन्ध्यः, पुं, पर्व्वतविशेषः । इत्यमरः ॥ (यथा, मनौ । २ । २१ ।
"हिमवद्विन्ध्ययोर्मध्यं यः प्राग्विनशनादपि ।
प्रत्यगेव प्रयागाच्च मध्यदेशः प्रकीर्त्तितः ॥")
व्याधः । इति मेदिनी ॥ विन्ध्यपर्व्वतस्य निम्नशृङ्गत्वकारणम् । यथा,—
नारद उवाच ।
"किमर्थमद्रिं भगवानगस्त्य-
स्तं निम्नशृङ्गं कृतवान् महर्षिः ।
कस्मै कृते केन च कारणेन
तन्नस्तदस्याखिलसत्त्ववृत्तं ॥
पुलस्त्य उवाच ।
पुरा हि विन्ध्येन दिवाकरस्य
गतिर्निरुद्धा गगनेचरस्य ।
रविस्ततः कुम्भभवं समेत्य
होमावसाने वचनं बभाषे ॥
समागतोऽहं द्विजवर्य्य लां
कुरुष्व मय्युद्धरणं मुनीन्द्र ।
ददस्व दानं मम यन्मनीषितं
वरामि येन त्रिदिवे सुनिर्वृतः ॥
इत्थं दिवाकरवचो गुणसङ्गयोगि
श्रुत्वा तदा कलसजो वचनं बभाषे ।
दानं ददामि तव यन्मनसा त्वभीष्टं
यावौ प्रयाति विमुखो मम कश्चिदेव ॥
श्रुत्वा वचोऽमृतमयं कलशोद्भवस्य
प्राह प्रभुः करपुटं प्रणिधाय मूर्द्ध्नि ।
एषोऽद्य मे गिरिवरः प्रणिहि मार्गं
विन्ध्यस्य निम्नकरणे भगवान् यतस्व ॥
इति रविवचनाद्वाच कुम्भजन्मा
कृतमिति तद्धि मया हि नीचशृङ्गम् ।
तव किरणजितो भविष्यतीति महीध्रो
मम हि प्रणामसमागतस्य का व्यथा ते ॥
इत्येवमुक्ता कलशोद्भवस्तु
सूर्य्यञ्च संस्तूय विनम्य भक्त्या ।
जगाम संत्यज्य हि दक्षकं हि
विन्ध्याचलं तद्वपुर्महर्षिः ॥
गत्वा वचः प्राह मुनिर्महीध्रं
याम्ये महातीर्थवरं सपुण्यम् ।
तद्रोढ्यशक्तश्च तवाधिरोढुं
तस्माद्भवान् नीचतरोऽस्तु सद्यः ॥
इत्येवमुक्तो मुनिसत्तमेन
स नीचशृङ्गस्तदभवन् महीध्रः ।
समाक्रमच्चापि महर्षिमुख्यः
प्रोक्तश्च विन्ध्यं द्विज आह शैलम् ॥
यावन्न भूयो निजमाव्रजामि
महाश्रमं धौतवपुः सुतीर्थात् ।
तावन्न तावच्चिह वर्द्धितव्यं
न चेत् प्रणिष्येऽहमवज्ञया ते ॥
इत्येवमुक्ता भगवान् जगाम
दिग्यं स याम्यां सहसाव्रतीत्य ।
आक्रम्य तस्थौ स हि तां तदाशां
काले व्रजाम्यत्र यदा मुनीन्द्र ॥
तत्राश्रमं रम्यतरं हि कृत्वा
संशुद्धजाम्बूनदतोरणान्तम् ।
तत्राथ निःक्षिप्य विदर्भपुत्रीं
स्वमाश्रमं सौम्यमुपाजगाम ॥
ऋतावृतौ कार्य्यपरो ह्यगस्त्यो
नित्यं तदा स्वाश्रममावसत् सः ।
शेषञ्च कालं स हि दक्षकस्य-
क्षपञ्चकारामितकान्तिमान्मुनिः ॥
विन्ध्योऽपि दृष्ट्वा गगने महाश्रमं
दृष्टिं न यात्येव भयान्महर्षेः ।
नासौ निवृत्तेऽभिमतिं निधाय
स संस्थितो नीचतराग्रशृङ्गः ॥
एवं त्वगस्त्येन महाचलेन्द्रः
स नीचशृङ्गो हि कृतो महर्षे ।
तस्योर्द्ध्वशृङ्गे मुनिसंस्तुता सा
दुर्गा स्थिता दानवशासनार्थे ॥
देवाश्च सिद्धाश्च महोरगाश्च
विद्याधराभूतगणाश्च सर्व्वे ।
सर्व्वायुधैः सहिता दिवानिशं
कात्यायनीं तस्थुरुपेतशोकाः ॥"
इति वामनपुराणे देवीमाहात्म्ये १८अध्यायः ॥
"आर्य्यावर्त्तः पुण्यभूमिर्मध्यं विन्ध्यहिमाचयोः ।"
इत्यमरः ॥
"विन्ध्यस्य पश्चिमे भागे मत्स्यशूक् पतितो भवेत् ॥"
इति प्राचीनाः ॥
विन्ध्यकूटः, पुं, (विन्ध्ये कूटं माया कैतवं वा यस्य । अगस्त्येन तस्यावनतीकरणादस्य तथात्वम् ।) अगस्त्यमुनिः । इति त्रिकाण्डशेषः ॥
विन्ध्यवासी, [न्] पुं, (विन्ध्ये वसतीति । वस + णिनिः ।) व्याडमुनिः । इति हेमचन्द्रः ॥
विन्ध्यवासिनी, स्त्री, (विन्ध्ये वसतीति । वस् + णिनिः । ततस्त्रियां ङीप् ।) दुर्गा । यथा,—
"सहस्राक्षोऽपि तां दृष्ट्वा विन्ध्यं वेगाज्जगाम ह ।
तत्र गत्वा तपोवाच तिष्ठस्वात्र महावने ॥
पूज्यमाना सुरैर्नित्यं ख्याता त्वं विन्ध्यवासिनी ॥
तत्र स्थाप्य हरिर्देवीं दत्त्वा सिंहञ्च वाहनम् ।
भवामरारिहन्त्रीति श्रुत्वा स्वर्गमवाप्नुयात् ॥"
इति वामने ५१ अध्यायः ॥ * ॥
अन्यच्च देवीपुराणे ३५ अध्याये ।
"विन्ध्येऽवतीर्य्य देवार्थं हतो घोरो महाभटः ।
अद्यापि तत्र सावासा तेन सा विन्ध्यवासिनी ॥"
विन्ध्यस्थः, पुं, (विन्ध्ये विन्ध्यपर्व्वते तिष्ठतीति । स्था + कः ।) व्याडमुनिः । इति जटाधरः ॥
विन्ध्या, स्त्री, लवलीवृक्षः । इति मेदिनी ॥ चुटिः । इति हेमचन्द्रः ॥ एलाचि इति भाषा ॥
विन्ध्यावली, स्त्री, बलिपत्नी । बाणराजमाता । इति पुराणम् ॥ (यथा, भागवते । ८ । २० । १७ ।
"विन्ध्यावली तदागत्य पत्नीभाजकमालिनी ॥")
विन्ध्यावलीपुत्रः, पुं, (विन्ध्यावल्याः पुत्रः ।) बाणराजः । इति त्रिकाण्डशेषः ॥
विन्ध्यावलीसुतः, पुं, (विन्ध्यावल्याः सुतः ।) बाणराजः । इति जटाधरः ॥
विन्नः, त्रि, (विद् + क्तः । "गुदविदेति ।" ८।२।५६। नत्वम् ।) विचारितः । प्राप्तः । इत्यमरः ॥ ज्ञातः । स्थितः । इति विश्वः ॥
विन्यस्तः, त्रि, (वि + नि + अस + क्तः ।) कृतविन्यासः । यथा,—
"सद्वृत्या गुणगुम्फिता सुकृतिनां सत्कर्म्मणां ज्ञापिका
सत्सामान्यविशेषनित्यमिलिता भावप्रकर्षोज्ज्वला ।
विष्णोर्वक्षसि विश्वनाथकृतिना सिद्धान्तमुक्तावली
विन्यस्ता मनसो मुदं वितनुतां सद्युक्तिरेषा चिरम् ॥"
इति सिद्धान्तमुक्तावली ॥
विन्यासः, पुं, (वि + नि + अस + घञ् ।) विन्यासः । इति शब्दचन्द्रिका ॥ छातियान् इति भाषा ॥
विन्यासः, पुं, (वि + नि + अस + घञ् ।) स्थापनम् । रचनम् । यथा, ज्ञानार्णवे । वैद्यके तु ।
"एकैकवर्णसुचार्य्य मूलाधाराच्छिरोऽन्तकम् ।
नमोऽन्तमिति विन्यास आन्तरः परिकीर्त्तितः ॥"
अपि च ।
"ओमाद्यन्तो नमोऽन्तो वा सबिन्दुर्बिन्दुवर्ज्जितः ।
पञ्चाङ्गन्यासविन्यासः क्रमादुक्तो मनीषिभिः ॥"
इति भट्टः । इति तन्त्रसारः ॥
अन्यच्च ।
"गृहेषु मणिविन्यासो विज्ञेयो न च दण्डवत् ।
विद्युद्धीरकन्यासो विधेयः सदनोपरि ।
तेन सर्व्वाणि नश्यन्ति अरिष्टानि मही-
भुजाम् ॥"
इति युक्तिकल्पतरुः ॥
किञ्च ।
"तया कवितया किंवा तया वनितया च किम् ।
पदविन्यासमात्रेण यया नापहृतं मनः ॥"
इत्युद्भटः ॥
विप, क चेपे । इति कविकल्पद्रुमः ॥ (चुरा०-परः -सक०-सेट् ।) क, वेपयति । इति दुर्गादासः ॥
विपक्षः, पुं, (विरुद्धः पक्षो यस्य ।) शत्रुः । इत्यमरः ॥ (यथा, हरिवंशे । ५३ । ५४ ।
"तत्र वंशा विभज्यन्तां विपक्षाः पक्ष एव च ।
पुत्राणां हि त्रयो राज्ञो भविता विग्रहो महान् ॥"
यथा च रघुवंशे । १७ । ७५ ।
"इन्दोरंशतयः पक्षे सूर्य्यस्य कुसुदेऽंशवः ।
गुणास्तस्य विपक्षेऽपि गुणिनो वेभिरेऽन्तरम् ॥"
न्यायमते साध्याभाववत्त्वम् । यथा, भाषापरिच्छेदे । ७३ ।

"यः सपक्षे विपक्षे च भवेत् साधारणस्तु सः।"
"सपक्षविपक्षवृत्तिः साधारणः। सपक्षः साध्यवान्। विपक्षः साध्याभाववान्।" इति मुक्तावली॥ विकल्पः पक्षः। उत्क्षाकरणम्। यथा, आर्य्यासप्तशत्याम्। ३५४।
"प्रतिभूः सुकृते विपक्षे दण्डः प्रहारसंकथा गुरुषु॥"
विगतः पक्षो यस्य। पक्षहीने, त्रि॥)

विपञ्चिका, स्त्री, (वि+पञ्चि विस्तारे+ण्वुल्। स्त्रियां टाप् अत इत्वञ्च।) वीणा। इति शब्दरत्नावली॥

विपञ्ची, स्त्री, (वि+पञ्च+अच्। स्त्रियां गौरादित्वात् ङीष्।) वीणा। इत्यमरः॥ (यथा, कथासरित्सागरे। ४६। २०।
"अहं ह्येतद्विजानामि तन्त्रीझङ्कारलक्षणे:। इत्युक्त्वा गुणशर्म्माङ्कात्तां विपञ्चीं सुमोच सः॥")
केलिः। इति मेदिनी। ञे, १७॥

विपणः, पुं, (वि+पण व्यवहारे+घञ्। संज्ञापूर्ब्बकत्वात् न वृद्धिः।) विक्रयः। इत्यमरः॥ (यथा, मनौ। ३। १५२।
"विपणेन च जीवन्तो वर्ज्जयेयुः सुदूषकयवौ॥"
विपणेषु पण्यतेऽस्मिन्निति। विपणिः। यथा, महाभारते। १२। ६६। ५३।
"विशालान् राजमार्गांश्च कारयेत नराधिपः। प्रपाश्च विपणांश्चैव यथोद्दिष्टं समादिशेत्॥")

विपणिः, पुं स्त्री, (विपण्यतेऽस्मिन्निति। वि+पण+"सर्व्वधातुभ्य इन्।" उणा० ४। ११७। इति इन्।) पण्यविक्रयशाला। इति हलायुधः॥ वृद्धः। इत्यन्ये। विक्रयार्थप्रसारितनानाद्रव्यायां वणिग्वीथ्यां वाणियावीथी इति बाजार इति च ख्यातायामिति केचित्। वृद्धमद्यपः। इति केचित्। इति भरतः॥ तत्पर्य्यायः। पण्यवीथिका २। इत्यमरः॥ आपणः ३ पण्यवीथी ४ पण्यम् ५। इति रभसः॥ निषद्या ६ वणिक्पथम् ७। इत्यमरदत्तः॥ विपणम् ८ वीथी ९। इति कोषः॥
"निषद्या विपणिः पण्यवीथिका त्वापणिस्तथा। पण्यविक्रयशालायां भवेदेतच्चतुष्टयम्॥"
इति शब्दरत्नावली॥
"विपणिः पण्यवीथ्याञ्च भवेदापणपण्ययोः।"
इति मेदिनी। णे, ७८॥
(यथा, महाभारते। ६। ३५। ३०।
"विपण्यापणपण्यानां नानाजनपरैर्वृतः॥"
वाणिज्यम्। यथा, मनौ। १०। ११६।
"विद्या शिल्पं भृतिः सेवा गोरक्ष्यं विपणिः कृषिः।
धृतिर्भैक्ष्यं कुसीदञ्च दश जीवनहेतवः॥")

विपणी, [न्] पुं, (विपणः विक्रयोऽस्यास्तीति। विपण+इनिः।) वणिक्। इति जटाधरः॥ (यथा, शिशुपालवधे। ५। २४।
"पूर्णापणा विपणिनो विपणीर्विभेजुः॥")

विपणी, स्त्री, (विपणि+वा ङीष्।) हट्टः। इति हिरूपकोषः॥ (यथा, कथासरित्सागरे। २०। ६५।
"यथौ भोजनमूल्यार्थी विपणीमात्तमूलकः॥")

विपत्तिः, स्त्री, (वि+पद्+क्तिन्।) आपत्। विपत्। इत्यमरः॥ यातना। इति मेदिनी। ते, १५६। यथा,—
भृगुरुवाच।
"श्रुतं सर्व्वं सुरश्रेष्ठ मारोदीर्व्वचनं प्रभो।
न मातरो हि नीतिज्ञो विपत्तौ च कदाचन॥
सम्पत्तिर्व्वा विपत्तिर्व्वा नश्वरा स्वप्नरूपिणी।
पूर्व्वसत्कर्म्मायत्ता च स्वयं कर्त्ता तयोरपि॥"
इति ब्रह्मवैवर्त्ते प्रकृतिखण्डे ३४ अध्यायः॥
विनाशः। यथा,—
"यस्मिन् राशिगते भानौ विपत्तिं यान्ति मानवाः।
तेषां तत्रैव कर्त्तव्या पिण्डदानोदकक्रिया॥"
इति मलमासतत्त्वम्॥

विपथः, पुं, (विरुद्धः पन्थाः। "ऋक्पूरब्धूःपथामानक्षे।" ५। ४। ७४। इत्यकारप्रत्ययः।) निन्दितपथः। तत्पर्य्यायः। वध्वः २ दुरध्वः ३ कदध्वा ४ कापथः ५। इत्यमरः॥ कुपथः ६ असत्पथः ७ कुत्सितवर्त्म ८। इति शब्दरत्नावली॥ (यथा, महाभारते। १२। ३५६। ११।
"सत्पथं कथयस्वेह यास्यामि विपथं वद॥")

विपत् } स्त्री, (वि+पद्+सम्पदादित्वात् क्विप्।)
विपद् } विपत्तिः। इत्यमरः॥ (यथा,—
"कैवर्त्तकर्कशकरात् सफरश्च्युतोऽपि जाले पुनर्निपतितः सफरो विपाकः।
दैवात्ततो विगलितो गिलितो बकेन वामे विधौ वद कथं विपदां निवृत्तिः॥"
इत्युद्भटः॥
यथा च भागवते। १। ६। १५।
"यत्र धर्म्मसुतो राजा गदापाणिर्व्वृकोदरः।
कृष्णोऽस्त्री गाण्डिवं चापं सुहृत् कृष्णस्ततो विपत्॥")

विपदा, स्त्री, (विपद्+भागुरिमते डलन्तानां टाप्।) विपत्। इत्यमरटीकायां रायमुकुटः॥

विपन्नः, त्रि, (वि+पद्+क्तः।) विपदाक्रान्तः। इति मेदिनी। ने, १३४॥ नष्टः। इति शब्दरत्नावली॥

विपन्नः, पुं, सर्पः। इति मेदिनी। ने, १३४॥

विपरीतः, त्रि, (वि+परि+इ+क्तः।) विपर्य्ययः। उल्टा इति भाषा॥ तत्पर्य्यायः। प्रतिसव्यः २ प्रतिकूलः ३ अपसव्यः ४ अपष्टुः ५ विलोमकः ६। इति जटाधरः॥ प्रसव्यम् ७ पराचीनम् ८ प्रतीपम् ९। इति शब्दरत्नावली॥ (यथाच भट्टिरुद्दिविजये।
"मत्तो जातः कलङ्काग्नौ विपरीतानि भाषसे।
सत्यं ब्रवीषि पिल्लवत् त्वत्तो जातः कलङ्कभुक्॥"
मुम्भुपुः। यथा, रामायणे। ६। १७। १५।
"स च न प्रतिजग्राह रावणः कालचोदितः।
उच्यमानं हितं वाक्यं विपरीत इवौषधम्॥")

षोड़शरतिबन्धान्तर्गतदशमबन्धः। यथा,—
"पादमेकमधरौ कृत्वा द्वितीयं कटिसंस्थितम्।
नारीषु रमते कामी विपरीतस्तु बन्धकः॥"
इति रतिमञ्जरी॥
अपि च।
"पादमेकमधरौ कृत्वा द्वितीयं स्कन्धसंस्थितम्।
कामिन्याः कामयेत् कामी बन्धः स्याद्विपरीतकः॥"
इति स्मरदीपिका॥

विपरीता, स्त्री, कासुकी। इति धनञ्जयः॥

विपर्य्यटकः, पुं, (विशिष्टानि पर्य्यटनानि यस्य।) पलाण्डुः। इति शब्दचन्द्रिका॥ (पर्य्यटरहिते, त्रि॥)

विपर्य्ययः, पुं, (वि+परि+इ+"ऋदृत्।" इत्यच्।) व्यतिक्रमः। तत्पर्य्यायः। व्यत्ययः २ विपर्य्यासः ३ अत्ययः ४। इत्यमरः॥ विपर्य्यायः ५। इति भरतः॥ (यथा, भागवते। १०। १। ५०।
"विपर्य्ययो वा किं न स्यादगतिर्धातुरत्यया। उपस्थितो निवर्त्तेत निवृत्तः पुनरापतेत्॥"
सांख्यनये विपर्य्ययाः पञ्च। ते च सांख्यकारिकायां दृष्टव्याः॥)

विपर्य्यायः, पुं, (विगतः पर्य्यायो यस्य। यद्वा, वि+परि+इ+घञ्।) विपरीतमयनम्। अन्यस्यान्यरूपग्रहणम्। इति भरतः॥
"विपर्य्याये कुलं नास्ति न कुलं रूपवर्जितयोः।"
इति कुलाचार्य्यकारिका॥

विपर्य्यासः, पुं, (वि+परि+अस+घञ्।) विपर्य्ययः। इत्यमरः॥ (यथा, उत्तरचरिते। २।
"पुरा यत्र स्रोतः पुलिनमधुना तत्र सरितां विपर्य्यासं यातो घनविरलभावः क्षितिरुहाम्।
बहोर्दूरं कालादपरमिव मन्ये वनमिदं निवेशः शैलानां तदिदमिति बुद्धिं दृढयति॥"
अप्रमात्मकबुद्धिभेदः। यथा, भाषापरिच्छेदे।
"तत्रून्ये तन्मतिर्य्यास्यादप्रमा सा निरूपिता। तत्पक्षो विपर्य्यासः संशयोऽपि प्रकीर्त्तितः। आद्यो देहे ह्यात्मबुद्धिः शुक्त्यादौ रौप्यतामतिः॥"
"आद्यो विपर्य्यासः।" इति मुक्तावली॥)

विपर्य्यं, त्रि, (वि+पू+"अचो यत्।" इति यत्।) शोधनीयम्। विपूर्ब्बपूधातोर्यप्रत्ययेन निष्पन्नम्॥

विपश्चित्, [न्] पुं, बुद्धभेदः। इति हेमचन्द्रः॥

विपश्चित्, त्रि, (विशेषं पश्यति विप्रकृष्टं चेतति चिनोति चिन्तयति वा। पृषोदरादित्वात् साधुः।) पण्डितः। इत्यमरः॥ (यथा, मनौ। ७। ५८।
"सर्व्वेषान्तु विशिष्टेन ब्राह्मणेन विपश्चिता॥")

विपाकः, पुं, (वि+पच+भावे कर्म्मणि वा घञ्।) पचनम्। (यथा, भागवते। ५। १६। २०।
"तावदुभयोरपि रोधसोर्या रुक्तिका तदसेनाहविद्यमाना वाय्वर्कसंयोगविपाकेन सदामरलोकाभरणं जाम्बूनदं नाम सुवर्णं भवति॥")

खेदः । कर्म्मणो विसदृक्फलम् । इति मेदिनी ॥ (फलमात्रम् । यथा, भागवते ।१०।७१।१०।
"नरासन्नवधः क्षत्रा भूर्य्यर्थायोपकल्पते ।
प्रायःपाकविपाकेन तव चाभिमतः क्रतुः ॥"
परमोत्कर्षः । यथा, तत्रैव । ४ । ६ । २ ।
"सर्वे धिया योगविपाकतीव्रया
हृत्पद्मकोषे स्फुरितं तडित्प्रभम् ॥")
परिणामः । दुर्गतिः । स्वादुः । इति हेमचन्द्रः ॥ जातिः । आयुः । भोगः । इति कुसुमाञ्जलिः ॥ * ॥ (कर्म्मफलरूपस्यैव विपाकस्य त्रैविध्यम् । यथाच पातञ्जले । २ । १३ ।
"सति मूले तद्विपाको जात्यायुर्भोगाः ॥"
"सत्सु क्लेशेषु कर्म्माशयो विपाकारम्भी भवति नोच्छिन्नक्लेशमूलोऽपि । यथैव तुषावनद्धाः शालितण्डुला दग्धबीजभावाः प्ररोहसमर्था भवन्ति नापनीततुषा दग्धबीजभावा वा । तथा क्लेशावनद्धः कर्म्माशयो विपाकप्ररोही भवति नापनीतक्लेशोपप्लवंस्यानदग्धबीजभावो वेति । स च विपाकस्त्रिविधो जातिरायुर्भोगश्चेति ॥" इति तद्भाष्यम् ॥)
"जाठरेणाग्निना योगात् यदुदेति रसान्तरम् ।
रसानां परिणामान्ते स विपाक इति स्मृतः ॥"
इति सुश्रुतः ॥
अपि च ।
"मिष्टः कटुश्च मधुरमम्लोऽम्लं पच्यते रसः ।
कटुस्तिक्तकषायाणां पाकः स्यात् प्रायशः कटुः ॥"
तथा च वाग्भटः ।
"त्रिधा रसानां पाकः स्यात् स्वाद्वम्लकटुकात्मकः ॥"
प्रायः पदेन व्रीहिः स्वादुरम्लविपाकः । शिग्रुकषाया मधुपाका । शुण्ठी कटुकमधुरपाकेत्यादि: ॥ * ॥ अथ विपाकानां गुणाः ।
"श्लेष्मलमधुरः पाको वातपित्तहरो मतः ।
अम्लस्तु कुरुते पित्तं वातश्लेष्मगदापहः ॥
कटुः करोति पवनं कफं पित्तञ्च नाशयेत् ।
विशेष एष रसतो विपाकानां निदर्शितः ॥"
इति भावप्रकाशः ॥
(तथास्य विवरणम् ।
"नेत्याहुरन्ये । विपाकः प्रधानमिति कस्मात् सम्यङ्मिथ्याविपाकत्वादिह सर्व्वद्रव्याण्यभ्यवहृतानि सम्यङ्मिथ्याविपकानि गुणं दोषं वा जनयन्ति । तत्राहुरन्ये प्रतिरसं पाक इति । केचित्त्रिविधमिच्छन्ति मधुरमम्लं कटुकञ्चेति तत्तु न सम्यक् भूतगुणादागमाच्चाम्लो विपाको नास्ति पित्तं हि विदग्धमम्लतामुपैत्यग्नेर्मन्दत्वात् । यद्येवं लवणोऽप्यम्लः पाको भविष्यति श्लेष्मादिविदग्धो लवणतामुपैति मधुरो मधुरस्याम्लोऽम्लस्यैवं सर्व्वेषामिति । केचिदाहुर्द्वौ द्वौ पाकौ चोपदिशन्ति यथा तावत् क्षीरं स्थालीगतमभिमानं मधुरमेवस्थात्तथा ग्लायिवसुन्नादयः

प्रकीर्णाः स्वभावसुत्तरकालेऽपि न परित्यजन्ति तदृदिति ।"
"किञ्चिद्रसविपाकाभ्यां दोषं हन्ति करोति वा ॥"
इति सुश्रुते सूत्रस्थाने ४० अः ॥)
विपाट्, [ष्] स्त्री, विपाशानदी । इत्यमरः ॥ (यथा, ऋग्वेदे । ३ । ३३ । १ ।
"गावेव शुभ्रे मातरा रिहाणे
विपाट्छुतुद्री पयसा जवेते ॥"
"विपाट् कूलविपाटनात् विपाशनात् शुतपुत्रमरणोद्भूततमोद्वतेर्म्मुनेर्मूर्द्धोर्वग्निष्ठस्य पाशा अस्यां व्यपास्यन्त विमोचनाद्वा विपाट् । शुतुद्री शुचिप्रं तुन्ना तुन्नेव द्रवति गच्छतीति शुतुद्री एतन्नामके नद्यौ ॥ प्रजवेते समुद्रं प्रति शीघ्रं गच्छतः । *** विपाट् पटगतौ । पशुबाधनस्पर्शनयोरितिवा ण्यन्तावेतौ विपूर्व्वौ ण्यकारस्य ब्रह्मादिना षत्वम् ॥" इति तट्टीकायां सायणः ॥)
विपा(ट)ठः, पुं, वाणः । इति त्रिकाण्डशेषः ॥ (यथा, महाभारते । ३ । २७० । १७ ।
"एकैकेन विपाठेन जघ्ने माद्रवतीसुतः ॥"
स्त्री, दुर्गमराजभार्य्या । यथा, मार्कण्डेये । ७५ । ४६ ।
"विपाठां नन्दिनीञ्चैव वेद्मि भार्य्यां गृहे द्विज ॥")
विपादिका, स्त्री, पादस्फोटः । इत्यमरः ॥ (यथा, राजतरङ्गिण्याम् । ८ । १६७ ।
"छिन्नोपानत कण्टावन्धे घृतं चर्म्मकृतेऽर्पितम् ।
विपादिकाक्षते दास्या नीतं पश्चाद्गतो घृतम् ॥")
"वेपादिकं पाणिपादे स्फुटनं तीव्रवेदनम् ।
कण्डूमद्भिः सरागैश्च गण्डैरलसकं चितम् ॥"
विपादिका वातश्लेष्मोद्भवा । इति माधवकरः ॥ अयं कुष्ठरोगः ॥ (अस्या लक्षणम् । यथा,—
"कण्डूमती दाहरुजोपपन्ना
विपादिका पादगतेयमेव ॥"
इति सुश्रुते निदानस्थाने पञ्चमेऽध्याये ॥)
प्रहेलिका । इति शब्दमाला ॥ * ॥
विपाश्या, स्त्री, (पाशं विमोचयतीति । पाश+ "सत्यापपाशेति ।" ३।१।२५ । विमोचने क्विप् । ततः पचाद्यच् ।) नदीविशेषः । इत्यमरः ॥ पुत्रशोकादेव गले पाशं बद्ध्वा प्रविष्टं वशिष्ठं पाशच्छेदात् विपाशितवती विसृक्तपाशं कृतवतीति विपाशा ऋिः कल्पादेरिति पाशं विमोचयति इत्यर्थे ऋिः पचाद्यजादन् आप् । एवं क्विपि विपाट् । इति तट्टीकायां भरतः ॥ * ॥ (यथा, हरिवंशे । २६६ । २० ।
"इरावती विपाशाच्च सरयूर्यमुना तथा ॥")
तस्या जलगुणाः ।
"शुतद्रोर्विपाशायाश्च सिन्धुनद्याः
सुशीतं लघु स्वादु सर्व्वामयघ्नम् ।
जलं निर्म्मलं दीपनं पाचनञ्च
प्रदत्ते बलं बुद्धिमेधायुषञ्च ॥"
इति राजनिर्घण्टः ॥

(अस्या नामनिरुक्त्यादि विशेषविवरणं महाभारते । १ । १७८ । अध्याये द्रष्टव्यम् ॥ अस्याः क्षीरे पीठस्थाने अमोघाक्षीदेवी वर्ण्यते । यथा, देवीभागवते । ७ । ३० । ६५ ।
"विपाशायाममोघाक्षी पाटला पुरुषर्द्धने ॥"
तथा अत्र यज्ञस्करनामकविष्णुमूर्त्तिरपि वर्ण्यते । यथा, नरसिंहपुराणे ६२ अध्याये ।
"यज्ञस्करं विपाशायां माहिष्मत्यां हुताशनम् ॥"
विगतः पाशो यस्य ।) पाशवर्ज्जिते, त्रि । इति धरणिः ॥ (यथा, महाभारते ।३।१३०।६।
"अत्र वै पुत्रशोकेन वशिष्ठो भगवानृषिः ।
बद्ध्वात्मानं निपतितो विपाशः पुनरुत्थितः ॥"
पाशाक्षहीने च त्रि ॥ यथा, हरिवंशे । ४७ । ४८ ।
"निर्व्यापारः कृतस्तेन विपाशो वरुणो ह्रदे ॥")
विपिनं, क्ली, (वेपन्ते जना यत्रेति । "वेपितृक्षीर्ङ्खच ।" उणा० २ । ५२ । इनन् । ङ्खच् ।) वनम् । इत्यमरः ॥ (यथा, महानाटके ।
"यच्चिन्तितं तदिह दूरतरं प्रयाति
यच्चेतसा न गणितं तदिहाभ्युपैति ।
प्रातर्भवामि वसुधाधिपचक्रवर्त्ती
सोऽहं व्रजामि विपिने जटिलस्तपस्वी ॥"
भीतिप्रदे, त्रि । यथा, भागवते ।६।१५।२३।
"स एकदा तुङ्गभद्रायां विचरन् विपिने वने ।
यदृच्छयाश्रमपदं जगदृषेरुपाविशत् ॥"
विजने वने इत्यपि क्वचित् पाठः ॥)
विपुलः, त्रि, (विशेषेण पीलतीति । वि+पुल महत्त्वे+कः ।) बृहत् । इत्यमरः ॥ (यथा, साहित्यदर्पणे । १० ।
"विपुलेन सागरश्चयस्य कुक्षिणा ॥")
अगाधम् । इति मेदिनी । ले, १३२ ॥
विपुलः, पुं, (वि+पुल+कः ।) मेरुपश्चिमभूधरः । इति मेदिनी । ले, १३२ ॥ (अयं हि सुमेरोर्व्विष्कम्भपर्व्वतानामन्यतमः । यथा, विष्णुपुराणे । २ । ३ । १७ ।
"विपुलः पश्चिमे पार्श्वे सुपार्श्वश्चोत्तरे स्मृतः ॥"
अस्मिंस्तु पीठस्थाने विपुलेति पीठदेवी वर्ण्यते । यथा, देवीभागवते । ७ । ३० । ६६ ।
"विपुले विपुला देवी कल्याणी मलयाचले ॥")
सुमेरुः । हिमाचलः । इति धरणिः ॥ (वसुदेवपुत्रः । यथा, भागवते । ६ । २४ । ४६ ।
"बलं गदं सारणञ्च दुर्म्मदं विपुलं ध्रुवम् ।
वसुदेवस्तु रोहिण्यां कृतादीनुदपादयत् ॥")
विपुलरसः, पुं, (विपुलो रसो यत्र ।) इक्षुः । इति केचित् ॥
विपुला, स्त्री, (वि+पुल महत्त्वे+कः । ततस्त्रियां टाप् ।) पृथिवी । आर्य्याच्छन्दोभेदः । इति हेमचन्द्रः ॥ अस्या लक्षणादिर्यथा,—
"पथ्या विपुला चपला मुखचपला जघन-
चपला च ।
गीत्युपगीत्युद्गीतय आर्य्यागीतिश्च नवधार्य्या ॥

संलङ्घ्य गणत्रयमादिमं सकलयोर्द्वयोर्भवति पादः।
यस्यास्यां पिङ्गलनागो विपुलामिति समाख्याति॥
पुंसां कलिकालव्यालदष्टानां नास्त्युपद्रुतिरल्पापि।
वीर्य्यविपुला मुखे चेत् स्यात् गोविन्दाख्यमन्त्रकला॥"
इति छन्दोमञ्जरी॥
(विपुलपर्व्वतस्थादेवी। इति देवीभागवतम्। ७।३०।६६॥)

विपुलास्रवा, स्त्री, (विपुलं रसं आस्रवतीति। आ+स्रु+अच्। टाप्।) गृहकन्या। इति राजनिर्घण्टः॥

विपूयः, पुं, (वि+पू+"विपूयविनीयेति।"३।१।११७। इति कर्म्मणि क्यबन्तनिपातः।) सुङ्गः। इति मुग्धबोधव्याकरणम्॥ यथा,—
"वासानां वल्कले मुद्गे विपूयैः क्लृप्तमेखलाम्।
श्यामामञ्जनपिञ्जाभां दक्षिणीमजिनास्तराम्॥"
इति भट्टिः।६।६०॥

विप्रः, पुं, (वप+"ऋचेन्द्राग्रवज्रेति।" उणा० २।२८। निपातनात् रप्रत्ययेन साधुः।) ब्राह्मणः। इत्यमरः। विप्रैर्वेण प्राति पूरयति षट् कर्म्माणि विप्रः। प्रा+ल पूर्त्तौ इत्यस्मात् डप्रत्ययः। किंवा। उप्यते धर्म्मबीजमत्र इति वपेर्नान्नीति रे निपातनादत इत्वम्। इति भरतः॥ तस्य लक्षणं यथा,—
"जन्मना ब्राह्मणो ज्ञेयः संस्कारैर्द्विज उच्यते।
विद्यया याति विप्रत्वं त्रिभिः श्रोत्रियलक्षणम्॥"
इति प्रायश्चित्तविवेकः॥
(यथाच मनौ। १।६४।
"उत्पत्तिरेव विप्रस्य मूर्त्तिर्धर्म्मस्य शाश्वती।
स हि धर्म्मार्थमुत्पन्नो ब्रह्मभूयाय कल्पते॥"
अस्य पादोदकमाहात्म्यं यथा, ब्रह्मवैवर्त्ते। १। ११। २६—३३।
"पृथिव्यां यानि तीर्थानि तानि तीर्थानि सागरे।
सागरे यानि तीर्थानि विप्रपादेषु तानि च॥
विप्रपादोदकक्लिन्ना यावत्तिष्ठति मेदिनी।
तावत् पुष्करपात्रेषु पिबन्ति पितरो जलम्।
विप्रपादोदकं पुण्यं भक्तियुक्तश्च यः पिबेत्॥
स स्नातः सर्व्वतीर्थेषु सर्व्वयज्ञेषु दीक्षितः।
महारोगी यदि पिबेत् विप्रपादोदकं द्विज।
मुच्यते सर्व्वरोगेभ्यो मासमेकन्तु भक्तितः॥
अविद्वो वा सविद्वो वा सन्ध्यापूतो हि यो द्विजः।
स एव विष्णुषड्भो मा हरौ विमुखो यदि॥
भ्रूणं विप्रं गुरुन्तल्पं वा न हन्यान्नच तं त्यजेत्।
गोभ्यः शतगुणं पूज्यो हरिभक्तश्च ब्राह्मणः॥
पादोदकञ्च नैवेद्यं भुङ्क्ते विप्रस्य यो द्विज।
नित्यं नैवेद्यभोजी यो राजसूयफलं लभेत्॥
एकादश्यां न भुङ्क्ते यो नित्यं विष्णुं समर्च्चयेत्।
तस्य पादोदकं प्राप्य स्नानं तीर्थं भवेद्ध्रुवम्॥")

अश्वत्थः। इति राजनिर्घण्टः॥ (त्रि, मेधावी। यथा, ऋग्वेदे। १०।११२।६।
"निषसाद गणपते गणेषु त्वा माहुर्विप्रतमं कवीनाम्॥")
"विप्रतमं अतिशयेन मेधाविनम्।"इति तद्भाष्ये सायणः॥ स्तवकर्त्ता। यथा, ऋग्वेदे। १०। ४०।१४।
"विप्रस्य वा यजमानस्य वा गृहम्॥"
"विप्रस्य मेधाविनः स्तोतुर्वा।" इति तद्भाष्ये सायणः॥)

विप्रकारः, पुं, (वि+प्र+कृ+भावे घञ्।) अपकारः। तत्पर्य्यायः। निकारः २। इत्यमरः॥ (यथा, महाभारते। १।६२।१४।
"तेषान्तु विप्रकारेषु तेषु तेषु महामतिः।
मोक्षणे प्रतिकारे च विदुरोऽवहितोऽभवत्॥")
खलीकारः। इति स्वामी। तिरस्कारः। इति हेमचन्द्रः॥ (विविधप्रकारः। यथा, महाभारते। ३।२७५।३।
"स बाधते प्रजाः सर्व्वा विप्रकारैर्म्महाबलः।
ततो नस्त्रातु भगवान्नान्यस्त्राता हि विद्यते॥")

विप्रकाष्ठं, क्ली, तूलवृक्षः। इति राजनिर्घण्टः॥

विप्रकृतः, त्रि, (वि+प्र+कृ+क्तः।) तिरस्कृतः। तत्पर्य्यायः। निकृतः २। इति हेमचन्द्रः॥ (यथा, कुमारसम्भवे। २।१।
"तस्मिन् विप्रकृता काले तारकेण दिवौकसः।
तुराषाहं पुरोधाय धाम स्वायम्भुवं ययुः॥")

विप्रकृतिः, स्त्री, विप्रकारः। विप्रपूर्ब्बकडुधातोः क्तिप्रत्ययेन निष्पन्नमिदम्॥

विप्रकृष्टः, त्रि, (वि+प्र+कृष+क्तः।) दूरः। इति हलायुधः॥ (यथा,—
"सन्निकृष्टविप्रकृष्टयभिचारिप्राधानिकभेदाच्चतुर्धा इति। नच ते चयादिकमपेक्षन्ते। विप्रकृष्टो यथा। हेमन्ते निचितः श्लेष्मा वसन्ते कफरोगकृत्। किंवा सन्निकृष्टो ज्वरस्य रुच्यादिसेवा विप्रकृष्टो रुद्रकोपः।" इति माधवकृत रुग्विनिश्चयव्याख्याने विजयः॥)

विप्रकृष्टकं, त्रि, (विप्रकृष्ट एव। स्वार्थे कन्।) दूरम्। इत्यमरः॥

विप्रचित्तिः, पुं, दनुपुत्रः। यथा,—
सूत उवाच।
"अभवन्दनुपुत्राश्च वंशे ख्याता महासुराः।
विप्रचित्तिप्रधानास्ते श्रूयतां तीव्रपराक्रमाः॥"
इति वह्निपुराणे काश्यपीयवंशः॥
(तथाच महाभारते। १।६५।२१।
"चत्वारिंशद्दनोः पुत्राः ख्याताः सर्व्वत्र भारत।
तेषां प्रथमजो राजा विप्रचित्तिर्म्महाबलः॥")

विप्रतिपत्तिः, स्त्री, (वि+प्रति+पद+क्तिन्।) विरोधः। यथा,—
"परस्परं मनुष्याणां स्वार्थविप्रतिपत्तिषु।
वाक्यान्यायाद्यवस्थानं व्यवहार उदाहृतः॥
भाषोत्तरक्रियासाध्यसिद्धिभिः क्रमवृद्धिभिः।
आक्षिप्तचतुरंशस्तु चतुष्पादभिधीयते॥"
इति मिताक्षरायां व्यवहारमालिका॥*॥

विप्रतिः। यथा प्रथमाध्याये कात्यायनसूत्रम्। शब्दे विप्रतिपत्तिरिति। प्रतिनिर्दिष्टद्रव्ये श्रुतशब्दः प्रयोज्यः। श्रुतद्रव्यबुद्ध्या प्रतिनिर्द्दिष्टोपादानात् शब्दान्तरप्रयोगे द्रव्यान्तरबुद्धिप्रसङ्गात्। इत्येकादशीतत्त्वम्॥ (अन्यथाभावः। अरिष्टविशेषः। यथा, सुश्रुते।१।३०। "अथातः पञ्चेन्द्रियार्थविप्रतिपत्तिमध्यायं व्याख्यास्यामः।" एवं छायाविप्रतिपत्तिः। स्वभावविप्रतिपत्तिः॥)

विप्रतिसारः, पुं, (वि+प्रति+सृ+घञ्।) विप्रतीसारः। इत्यमरटीकायां रायमुकुटः॥ (यथा, शिशुपालवधे। १०।२०।
"प्राप्ति चेतसि स विप्रतिसारे
सुभ्रुवामवसरः सरकेण॥"
"विप्रतिसारे पश्चात्तापयुक्ते। पश्चात्तापोऽनुतापश्च विप्रतीसार इत्यपि। इत्यमरः।" इति तट्टीकायां मल्लिनाथः॥)

विप्रतिषिद्धं, त्रि, (वि+प्रति+षिध+क्तः।) निषिद्धम्। इति स्मृतिः॥

विप्रतीसारः, पुं, अनुतापः। इत्यमरः॥ कौक्षेयम्। अनुशयः। रोषः। इति मेदिनी। रे, ६०७॥

विप्रदृष्टः, पुं, (विशेषेण प्रकृष्टश्च दृश्यते इति। दृश+घः।) फलभूलादिशुष्कद्रव्यम्। इति शब्दचन्द्रिका॥

विप्रप्रियः, पुं, (विप्राणां प्रियः। यत्नीयद्रुमत्वात्।) पलाशवृक्षः। इति केचित्॥ ब्राह्मणवल्लभे, त्रि। यथा,—
"रामं लक्ष्मणपूर्व्वजं रघुवरं सीतापतिं सुन्दरं
काकुत्स्थं करुणामयं गुणनिधिं विप्रप्रियं धार्म्मिकम्।"
इति रामायणम्॥

विप्रयागं, क्ली, (विशेषेण प्रयागम्।) पलाशवनम्। इति केचित्॥

विप्रयुक्तः, त्रि, (प्र+युज्+भावे क्तः। विगतं प्रयुक्तं प्रयोगो यस्मात्।) विश्लिष्टः। विभिन्नः। इति केचित्॥

विप्रयोगः, पुं, (विगतः प्रकृष्टो योगो यत्र।) विप्रलम्भः। इत्यमरः॥ विरहो विसंवादो वा। इति स्वामी॥ रागिणोर्विच्छेदः। इति सुभूतिः॥ (यथा, मनौ। ९।१।
"पुरुषस्य स्त्रियाश्चैव धर्म्मो यः सहनिर्मितः।
तस्य नित्यं विवृद्धस्य संयोगे विप्रयोगे च धर्म्मान् वक्ष्यामि शाश्वतान्।"
संयोगाभावः। यथा, साहित्यदर्पणे। २।
"संयोगो विप्रयोगश्च साहचर्य्यं विरोधिता॥")

विप्रलब्धः, त्रि, (वि+प्र+लभ+क्तः।) वञ्चितः। इति हेमचन्द्रः॥ (यथा, महाभारते। ५।१६१।२१।
"दशार्णराजो राजंस्त्वामिदंवचनमब्रवीत्।
अभिषङ्गात् प्रकुपितो विप्रलब्धस्त्वयानघ॥")

विप्रल

विप्रलब्धा, स्त्री, (विशेषेण प्रलब्धा प्रतारिता ।) स्त्रीयादिनायिकाभेदः । तस्या लक्षणं यथा,—

सङ्केतनिकेतने प्रियमनवलोक्य समाकुलहृदया विप्रलब्धा । अस्याश्चेष्टा निर्वेदनिश्वाससखीजनोपालम्भभयमूर्च्छाचिन्तास्रुपातादयः ॥ * ॥

मुग्धा विप्रलब्धा यथा,—

"आलीभिः प्रपधेरनेककपटैः कुञ्जोदरं नीतया
शून्यं तच्च निरीक्ष्य विप्लुभितया न प्रस्थितं न स्थितम् ।
अस्याः किन्तु नवोढ़नीरजदृशा कुञ्जोपकण्ठे रुषा
भ्राम्यद्भृङ्गकदम्बडम्बरचमत्कारस्रुगो दृष्टयः ॥" * ॥

मध्या विप्रलब्धा यथा,—

"सङ्केतकेलिगृहमेत्य निरीक्ष्य शून्य-
मेणीदृशो निभृतनिश्वसिताधरायाः ।
अर्द्धाक्षरं वचनमर्द्धविकाशि नेत्रं
ताम्बूलमर्द्धकवलीकृतमेव तस्थौ ॥"*॥

प्रगल्भा विप्रलब्धा यथा,—

"शून्यं कुञ्जगृहं निरीक्ष्य कुटिलं विज्ञात-
चेतोभवं दूती नापि निवेदिता सहचरी दृष्टापि नो वा तया ।
शम्भो शङ्कर चन्द्रशेखर हरश्रीकण्ठ शूलिन् शिव
त्रायस्वेति परन्तु पङ्कजदृशा भर्गस्य चक्रे स्तुतिः ॥"* ॥

परकीया विप्रलब्धा यथा,—

"दत्त्वा धैर्य्यभुजङ्गमूर्द्ध्नि चरणावुल्लङ्घ्य लज्जा-नदी-
मङ्गीकृत्य घनान्धकारपटलं तत्प्रा न दृष्टः प्रियः ।
सन्तापाकुलया तया च परितः पाथोधरे गर्ज्जति
क्रोधाक्रान्तकृतान्तमत्तमहिषभ्रान्त्या दृशौ योजिते ॥"

सामान्या विप्रलब्धा यथा,—

"कपटवचनभाजा केनचिद्वारयोषा
सकलरसिकगोष्ठीवञ्चिका वञ्चितासौ ।
इति तरलितरिङ्गद्भृङ्गविक्षिप्तचञ्चु-
र्हसति विकचकुन्दच्छद्मना केलिकुञ्जः ।"
इति रसमञ्जरी ॥

विप्रलम्भः, पुं, (वि + प्र + लभ + घञ् । नुम् ।) विसंवादः । (यथा, महाभारते । ३।३१।२७। "विप्रलम्भोऽयमत्यन्तं यदि स्युरफलाः क्रियाः ॥") वञ्चनम् । (यथा, महाभारते ।५।१६१।१६। "ततो दशार्णाधिपतेः प्रेष्याः सर्व्वा न्यवेदयन् । विप्रलम्भं यथा वृत्तं स च चुक्रोध पार्थिवः ॥") विप्रयोगः । विश्लेषः । इत्यमरः ॥ शृङ्गाररसभेदः । यथा, ग्रन्थरत्नावल्याम् ।

"नामान्येतानि शृङ्गारे कैश्चिदुक्तानि सूरिभिः ।
सम्भोगो विप्रलम्भश्च तस्य भेदद्वयं भवेत् ॥"

विप्रुट्

शृङ्गाराङ्गविशेषः । यथा,—

"यूनोरयुक्तयोर्भावो युक्तयोर्वाथ यो मिथः ।
अभीष्टालिङ्गनादीनामनवाप्तेः प्रहृष्यते ।
स विप्रलम्भो विज्ञेयः सम्भोगोन्नतिकारकः ॥"
इत्युज्ज्वलनीलमणिः ॥

विप्रलापः, पुं, (वि + प्र + लप + घञ् ।) विरोधोक्तिः । इत्यमरः ॥ परवचनविरोधिवचनं विप्रलापः । अन्योन्यविवदनमिति यावत् । यथा एको ब्रूते आगता कल्याणीति अन्यो ब्रूते नहीति । तथाभ्युदाजहार सर्व्वानन्दः ।

"एकः स्रवन्मधुसरोजमवैति वक्त्र-
मन्यः सुधाकिरणबिम्बमदो दृगाद्याः ।
यूनोर्मुहुर्विवदतोर्व्वदने बभूवुः
सिद्धान्तवन्मधुपराजिगतागतानि ॥"

विरुद्धः प्रलापो विप्रलापः घञ् । विरोधे उक्तिर्वचनं विरोधोक्तिः । इति भरतः ॥ (यथा, महाभारते । ६ । ८२ । २५ ।

"स धर्म्मराजस्य वचो निशम्य
रूक्षाक्षरं विप्रलापापविद्धम् ॥")

अनर्थकवाक्यम् । इति हेमचन्द्रः ॥ (यथा, महाभारते । ३ । ५ । २१ ।

"सत्यं श्रेयः पाण्डव विप्रलापं
तुल्यान्नं सह भोज्यं सहायैः ॥")

विप्रलोभी, [न्] पुं, किंकिरातवृक्षः । इति राजनिर्घण्टः ॥

विप्रश्निका, स्त्री, (विविधः प्रश्नोऽस्यस्या इति । विप्रश्न + "अत इनिठनौ ।" ५।२।११५ । इति ठन् ।) दैवज्ञा । इत्यमरः ॥

विप्रियः, पुं, (विरुद्धं प्रीणातीति । प्री + कः ।) अपराधः । तत्पर्य्यायः । मन्युः २ व्यलीकम् ३ आगः ४ । इति हेमचन्द्रः ॥ (यथा, भागवते । ६ । ५ । ४२ ।

"यन्नस्यं कर्म्मसन्यानां साधूनां गृहमेधिनाम् ।
कृतवानसि दुर्म्मर्षं विप्रियं तव मर्षितम् ॥")

अप्रिये, त्रि । (यथा, महाभारते ।१।१६०।८। "पिण्डं पितॄणां युच्छिद्यात्तेषां विप्रियं भवेत् ॥")

विप्रुट्, [ष्] स्त्री, (विशेषेण प्रोषति दहति पापानि । वि + प्रुष् + क्विप् ।) बिन्दुः । इत्यमरः ॥ (यथा, महाभारते । १३ । १०७ । १३५ ।

"विप्रुषश्चैव यावन्तो निपतन्ति नभस्तलात् ॥")

वेदपाठे विप्रुषो मुखनिर्गतजलबिन्दवो ब्रह्मबिन्दव उच्यन्ते । ते शुद्धाः । यथा,—

"मक्षिका विप्रुषस्त्याज्या गौरश्च सूर्य्यरश्मयः ।
रजो भूर्व्वायुरग्निश्च सर्व्वं मेध्यानि निर्द्दिशेत् ॥"
इति शुद्धितत्त्वे मनुवचनम् ॥

(यथा च मनौ । ५ । १४१ ।

"नोच्छिष्टं कुर्व्वते सूक्ष्मा विप्रुषोऽङ्गे पतन्ति याः ।
न मुखभ्रूक्षि गतान्यास्यं न दन्तान्तरधिष्ठितम् ॥")

आचमनकाले मुखनिर्गता विप्रुषो न उच्छिष्टकारिकाः । यथा,—

विप्रुट्

"नोच्छिष्टं कुर्व्वते सूक्ष्मा विप्रुषोऽङ्गं नयन्ति याः ।
दन्तवद्दन्तलग्नेषु जिह्वासर्गेऽप्युचिर्भवेत् ॥"
इति कौर्म्मे उपविभागे १३ अध्यायः ॥

विप्रोषितः, त्रि, प्रवासितः । विप्रपूर्ब्बकवसधातोः क्तप्रत्ययेन निष्पन्नः ॥

विप्लवः, पुं, (वि + प्लु + अप् ।) परचक्रादिभयम् । इति भरतः ॥ राष्ट्रादुपद्रवः । इति सारसुन्दरी ॥ तत्पर्य्यायः । डिम्बः २ डमरः ३ । इत्यमरः ॥ (यथा, राजतरङ्गिण्याम् ।८।१०४१। "सर्व्वा मण्डवराज्योर्व्वीं वीरः प्रमितविप्लवाम् ॥")

अस्खलनम् । इति स्वामी ॥ (क्षोभः । उपद्रवः । यथा, भागवते । ४ । २६ । ६ ।

"विप्लवोऽभूद्दुःखितानां दुःसहः करुणात्मनाम् ॥"

विनाशः । यथा, कथासरित्सागरे । १३ । ८२ ।

"संमन्त्र्य कौतुकात् पापास्तद्भार्य्याश्चाग्नीलविप्लवम् ।
चिकीर्षवो ययुः शीघ्रं ताम्रलिप्तीमलक्षिताः ॥"

विप्लवते इति अच् । जलोपप्लुतस्थितः । यथा, महाभारते । ६ । ३ । ५ ।

"वणिजो नावि भग्नायामगाधे विप्लवा इव ॥")

विप्लावः, पुं, अश्वस्य प्लुतगतिः । इति विपूर्ब्वप्लुधातोर्घञ् प्रत्ययेन निष्पन्नम् ॥

विप्लुट्, [ष्] स्त्री, (विशेषेण प्लोषतीति । वि + प्लुष् + क्विप् ।) विप्रुट् । बिन्दुः । इत्यमरटीकायां रामाश्रमः ॥

विप्लुतः, त्रि, (वि + प्लु + क्तः ।) व्यसनार्त्तः । तत्पर्य्यायः । पक्षभद्रः २ व्यसनी ३ । इति हेमचन्द्रः ॥

विफलं, त्रि, (विगतं फलं यस्य ।) निरर्थकम् । तत्पर्य्यायः । मोघम् २ वृथम् ३ । इति जटाधरः ॥ (यथा, कुमारसम्भवे । ७ । ६६ ।

"परस्परेण स्पृहणीयशोभं
न चेदिदं द्वन्द्वमयोजयिष्यत् ।
अस्मिन् द्वये रूपविधानयत्नः
पत्युः प्रजानां विफलोऽभविष्यत् ॥")

विफला, स्त्री, (विगतं फलं यस्याः ।) केतकी । इति राजनिर्घण्टः ॥

विबन्धः, पुं, आनाहरोगः । इत्यमरः ॥ तस्य चिकित्सा ।

"तुल्यकारणकार्य्यत्वात् उदावर्त्तहरीं क्रियाम् ।
आनाहेऽपि च कुर्व्वीत विशेषश्चाभिधीयते ॥
चित्रकस्य त्रिफलायाः द्विपलं पञ्चभागिकाः ।
गुडेन तुल्या वटिका हरन्त्यानाहमुल्बणम् ॥
वर्षाभिकटुसैन्धवसर्षपयवहपूमकुष्ठमदनफलैः ।
मधुनि गुडे वा पक्वैर्निहिता खाङ्कुष्ठपरिमाणा ॥
वर्षाभिरियं दृष्टफला शूले: प्रयोक्तव्या गुदे घृताभ्यक्ते ।
आनाहोदावर्त्तौ शमयति जठरं तथा गुल्मम् ॥"

त्रिकटुकाद्या वर्त्तिः । इति भावप्रकाशः ॥ (विशेषेण बन्धः । विशेषबन्धनम् । यथा, महाभारते । ८ । १४० । ४४ ।

"पादोदरविबन्धेन भूमावुद्भ्रमतेक्षया ॥")

विबाधा, स्त्री, विशेषेणबाधनम्। इति त्रिकाण्डशेषः॥
विबुधः, पुं, (विशेषेण बुध्यते इति। बुध + कः।) देवः। इत्यमरः॥ (यथा, मनौ। १२। ४७।
"गन्धर्व्वा गुह्यका यक्षा विबुधानुचराश्च ये॥")
पण्डितः। इति मेदिनी। धे, ३६॥ (यथा, कथासरित्सागरे। ६३। १०५।
"ब्रवीमि विबुधः खेदं अनार्य्या निह्नुते कथम्॥
अस्मिन्नर्थे वाक्यलिङ्गेऽपि दृश्यते॥*॥) चन्द्रः। इति हलायुधः॥
विबुधानः, पुं, (वि + बुध + शानच्।) आचार्य्यः। पण्डितः। देवः। इति संक्षिप्तसारोणादिवृत्तिः॥
विबोधः, पुं, (विगतो बोधः।) अनवधानता। इति केचित्॥ (विशिष्टो बोधः।) प्रबोधश्च॥ (यथा, भागवते। ३। ४। २०।
"स एवमाराधितपादतीर्था-
दधीत तत्त्वात्मविबोधमार्गः॥"
द्रोणपत्निपुत्रः। यथा, मार्कण्डेये। १। २१।
"पिङ्गाक्षश्च विबोधश्च सुपुत्रः सुमुखस्तथा।
द्रोणपुत्राः खगश्रेष्ठास्तत्त्वज्ञाः प्राक्तचिन्तकाः॥")
विबोधनं, क्ली, (वि + बुध + ल्युट्।) प्रबोधनम्। यथा,—
"तुष्टाव योगनिद्रान्तामेकाग्रहृदयस्थितः।
विबोधनार्थाय हरेर्हरिनेत्रकृतालयाम्॥"
इति देवीमाहात्म्यम्॥
(जागरणम्। यथा, महाभारते। १।१००।८।
"वीतशोकभयाबाधाः सुखसुप्तविबोधनाः॥")
प्राप्तिबोधके, त्रि। यथा, ऋग्वेदे। ३८। १२।
"अदाद्रायो विबोधनम्।"
"रायो धनस्य विबोधनं विशेषेण बोधकं बहुधनप्राप्तिहेतुमित्यर्थः।"इति तद्भाष्ये सायणः॥)
विभक्तः, त्रि, (वि + भज् + क्तः।) प्राप्तविभागः। विभिन्नः। पृथक्। यथा। दक्षस्मृतिः।
"पित्रा सह विभक्ता ये सापत्न्या वा सहोदराः॥
जघन्यजाश्च ये तेषां पित्र्यभागहरास्तु ते।
अनीशः पूर्व्वजः पित्र्ये भ्रातृभागे विभक्तजः॥"
विभक्तजो विभागानन्तरं गर्भाधानेन जातः॥
अपि च। व्यासः।
"भ्रातॄणां जीवतोः पित्रोः सहवासो विधीयते।
तदभावे विभक्तानां धर्म्मस्तेषां विवर्द्धते॥"
विभक्तानां स्वमात्रधने वैदिककर्म्मकरणात्तच्चाधर्म्मत्वेन तद्वृद्धिरित्यर्थः।
"विभक्ता अविभक्ता वा सपिण्डाः स्यावरे समाः।
एको ह्यनीशः सर्व्वत्र दानाधमनविक्रये॥"
अपि च।
"दानग्रहणपश्चात्तु ग्रहश्चेत्परियच्छति।
विभक्तानां पृथक् क्रिया पाकधर्म्मागमव्ययाः॥
साक्षित्वं प्रातिभाव्यञ्च दानं ग्रहणमेव च।
विभक्ता भ्रातरः कुर्य्युर्नाविभक्ताः परस्परम्॥
येषामेताः क्रिया लोके प्रवर्त्तन्ते स्वकृत्यतः।
विभक्तानवगच्छेयुर्लेखमप्यन्तरेण तान्॥"
इति नारदवचनानि॥
तथा।
"भ्रातॄणामथ सम्यग्वो पितुः पुत्रस्य चैव हि।
प्रातिभाव्यन्तु साक्ष्यमविभक्ते न तत् स्मृतम्॥"
इति याज्ञवल्क्यवचनम्॥*॥
तथा।
"विभक्तो यः पुनः पित्रा भ्रात्रा चैकत्र संस्थितः।
पित्र्येणाथवा प्रीत्या स तु संसृष्ट उच्यते॥"
इति दक्षस्मृतिवचने येषामेव हि पित्र्यभ्रातृपित्र्यादीनां पित्रपितामहोपार्ज्जितद्रव्येणाविभक्तत्वमुत्पत्तितः सम्भवति त एव विभक्ताः सन्तः परस्परप्रीत्या पूर्व्वकृतविभागध्वंसेन यत्तव धनं तन्मम धनं यन्मम धनं तत्तवापि इत्येकस्मिन् कार्य्ये एकग्रहिरूपतया स्थिताः संसृष्टाः। न त्वेवं रूपाणां धनसंसर्गमात्रेण। नापि विभक्तानां प्रीतिपूर्व्वकाभिसन्धानं विना॥*॥ तथा।
"बन्धूनामविभक्तानां भोगं नैव प्रदापयेत्॥"
इति कात्यायनवचनम्॥
तथा।
"भ्रातॄणामविभक्तानामेको धर्म्मः प्रवर्त्तते।
विभागे सति धर्म्मोऽपि भवेत्तेषां पृथक्पृथक्॥"
तथा।
"भ्रातॄणामविभक्तानां यद्युत्थानं भवेत् सह।
न तत्र भागं विषमं पिता दद्यात् कथञ्चन॥"
इति मनुवचनम्॥
तथा। कात्यायनः।
"अविभक्ते मृते पुत्रे तत्सुतं ऋक्थभागिनम्।
कुर्व्वीत जीवनं येन लब्धं नैव पितामहात्।
लभेतांशं स पित्र्यं च पितृव्यात् तस्य वा सुतात्॥"
तथा। विष्णुः। पितृविभक्ता विभागानन्तरोत्पन्नस्य विभागं दद्युः॥*॥ अपि च।
"अविभक्तविभक्तानां कुल्यानां वसतां सह।
भूयो दायविभागः स्यादाचतुर्थादिति स्थितिः॥"
इति कात्यायनवचनम्॥
अविभक्तानां सह वसतां संसृष्टानां वा पुनर्विभागो भ्रातृतत्सुततत्सुतपर्य्यन्तमेव तत्सुताच्चतुर्थान्निवर्त्तते। इति॥ तथा।
"अविभक्तं स्थावरं यत् सर्व्वेषामेव तद्भवेत्।
विभक्तं स्थावरं प्राप्तं नान्योदर्य्यैः कदाचन॥"
इति यमवचनम्। एतानि वचनादीनि दायतत्त्वधृतानि॥*॥ अपि च।
"अविभक्ता विभक्ता वा कुर्य्युः श्राद्धमदैविकम्।
मघासु च तथान्यत्र नाधिकारः पृथक् विना॥"
इति श्राद्धतत्त्वम्॥
अन्यच्च।
"बहवः स्युर्यदा पुत्राः पितुरेकत्र वासिनः।
सर्व्वेषान्तु मतं कृत्वा ज्येष्ठेनैव तु यत् कृतम्।
द्रव्येण चाविभक्तेन सर्व्वैरेव कृतं भवेत्॥"
इति शुद्धितत्त्वम्॥

(पुं, कार्त्तिकेयः। यथा, महाभारते। ३।२३१।६।
"षष्ठीप्रियश्च धर्म्मात्मा पवित्रो मातृवत्सलः।
कन्याभर्त्ता विभक्तश्च स्वाहेयो रेवतीसुतः॥")
विभक्तजः, पुं, (विभक्ते सति जायते इति। जन + डः।) विभागानन्तरं गर्भाधानेन जातः। यथा। दक्षस्मृतिः।
"पित्रा सह विभक्ता ये सापत्न्या वा सहोदराः।
जघन्यजाश्च ये तेषां पित्र्यभागहरास्तु ते॥
अनीशः पूर्व्वजः पित्र्ये भ्रातृभागे विभक्तजः।
यथा धने तथर्णेऽपि सुता ग्राह्योदकक्रियाः॥"
इति दायतत्त्वम्॥
विभक्तिः, स्त्री, (विभजनमिति। संख्याकर्म्मादयोऽर्था विभज्यन्ते आभिरिति वा। वि + भज + क्तिन्।) विभागः। स्यादिः। त्यादिश्च। यथा।
"संख्यात्वयाप्यसामान्ये; शक्तिमान् प्रत्ययस्तु यः।
सा विभक्तिर्द्विधा प्रोक्ता सुप्तिङ् चेति प्रभेदतः॥"
संख्यात्वावान्तरजात्यवच्छिन्नशक्तिमान् यः प्रत्ययः सा विभक्तिः। सुप् तिङ् इति भेदाद्द्विविधा। इति शब्दशक्तिप्रकाशिका॥ (उभयार्थोदाहरणम्। यथा, नैषधे। ३। २३।
"क्रियेत चेत् साधु विभक्तिचिन्ता
शक्तिस्तदा सा प्रथमाभिधेया।
या स्वौजसां साधयितुं विलासै-
स्तावत् क्षमा नाम पदं बहु स्यात्॥")
विभजनीयं, त्रि, विभाज्यम्। विभागयोग्यम्। यथा। यद्यस्य प्रयोजनार्हं पुस्तकादि तन्मूर्खादिभिः सह पण्डितादिभिर्न विभजनीयम्। इति दायतत्त्वम्॥ भजनार्हम्। विपूर्ब्वभजधातोरनीयप्रत्ययेन निष्पन्नम्॥
विभवः, पुं, धनम्। (यथा, मनौ। ४। ३४।
"न जीर्णमलवद्वासा भवेच्च विभवे सति॥")
मोक्षः। ऐश्वर्य्यम्। इति मेदिनी। वे, ५१॥ (यथा, भागवते। ७। ८। ५५।
"भवता हरे स दृजिनोऽवसादितो
नरसिंह नाथ विभवाय नो भव॥")
प्रभवादिषष्टिसंवत्सरान्तर्गततृतीयवर्षम्। यथा, भविष्यपुराणे।
भैरव उवाच।
"सुभिक्षं क्षेममारोग्यं सर्व्वे व्याधिविवर्ज्जिताः।
प्रशान्ता मानवास्तत्र बहुपुत्रा वसुन्धरा।
हृष्टास्तुष्टा जनाः सर्व्वे विभवे च वरानने!॥"
इति ज्योतिस्तत्त्वम्॥
विभा, स्त्री, (वि + भा + क्विप्।) किरणः। इति क्षेमचन्द्रः॥ प्रकाशः। शोभा। इति राजनिर्घण्टः॥ (यथा, साहित्यदर्पणे। १०।६६७।
"कमलेव मतिर्मतिरिव कमला
तनुरिव विभा विभेव तनुः।
धरणीव धृतिर्धृतिरिव धरणी
सततं विभाति वत यस्य तव॥"
प्रकाशके, त्रि। यथा, ऋग्वेदे। १०।५५।७।

"यदुप औच्छः प्रथमा विभानाम् ॥"
"विभानां विभासकानां ग्रहनक्षत्रादीनाम् ।"
इति तद्भाष्ये सायणः ॥)

विभाकरः, पुं, (वि + भा + क्त + "दिवाविभा-निशेति ।" ३ । २ । २१ । इति टः ।) सूर्य्यः । (यथा, साहित्यदर्पणे । १० । अर्थस्वरूपे ।
"सहसा भूयसाविष्टो विभाति च विभाकरः ॥")
अर्कैतुल्यः । चित्रकवृक्षः । इत्यमरः । अग्निः । इति मेदिनी । रे, २६७॥ (त्रि, प्रकाशशीलः ॥)

विभागः, पुं, (वि + भज + घञ् ।) भागः । अस्य पर्य्यायः अंशशब्दे द्रष्टव्यः ॥ अस्य लक्षणं यथा ।
"एकदेशोपात्तस्यैव भूहिरण्यादावुत्पन्नस्य स्वत्वस्य विनिगमनाप्रमाणाभावेन वैशेषिक-व्यवहारानर्हतया अव्यवस्थितस्य गुटिकापातादिना व्यञ्जनं विभागः । विशेषेण भजनं स्वत्वज्ञापनं वा विभागः ।" इति दायभागः ॥
अपि च ।
"विभागोऽर्थस्य पित्र्यस्य पुत्रैर्यत्र प्रकल्प्यते ।
दायभाग इति प्रोक्तं तद्विवादपदं बुधैः ॥"
इति नारदवचनम् ॥
पूर्व्वस्वामिस्वत्वोपरमे सम्बन्धाविशेषात् सम्बन्धिनां सर्व्वधनप्रसृतस्य स्वत्वस्य गुटिकापातादिना प्रादेशिकस्वत्वव्यवस्थापनं विभागः ॥ * ॥
अपि च । कात्यायनः ।
"जीवद्विभागे तु पिता नैकं पुत्रं विशेषयेत् ।
निर्भाजयेत् न चैवैकमकस्मात् कारणं विना ॥"
उक्तकारणमूले तु नारदः ।
"आधितः कुपितश्चैव विषयासक्तचेतनः ।
अयथाप्राप्तकारी च न विभागे पिता प्रभुः ॥"
विशेषतस्तु स्त्रीधनमेव मातरि पितामहधन-विभागमाह बृहस्पतिः ।
"पित्रोरभावे भ्रातॄणां विभागः संप्रदर्शितः ।
मातुर्निवृत्ते रजसि जीवतोरपि दृश्यते ॥"
अन्यच्च । याज्ञवल्क्यः ।
"विभागं चेत् पिता कुर्य्यादिच्छया विभजेत् सुतान् ।
ज्येष्ठं वा श्रेष्ठभागेन सर्व्वे वा स्युः समांशिनः ॥"
अपि च देवलः ।
"अविभक्तविभक्तानां कुल्यानां वसतां सह ।
भूयो दायविभागः स्यादाचतुर्थादिति स्थितिः ॥"
विष्णुः । पित्रविभक्ता विभागानन्तरोत्पन्नस्य विभागं दद्युरिति ।
"गोत्रभागविभागार्थं सन्देहे समुपस्थिते ।
गोत्रजैश्चापरिज्ञाते कुलं साक्षित्वमर्हति ॥"
इति ब्रह्मवचनम् ॥ इति दायतत्त्वम् ॥
सामान्यधर्म्मावच्छिन्नानामेव वस्तूनां परस्पर-विरुद्धतद्व्याप्यधर्म्मप्रकारेण प्रतिपादनं हि विभागः । इति श्राद्धविवेकटीकायां श्रीरघुनाथतर्कालङ्कारः ॥*॥ न्यायमते चतुर्विंशतिगुणान्तर्गतगुणविशेषः । स त्रिविधः । यथा,—
"ग्रन्थादेकतरस्वत्वः स्यात् विभागोऽपि त्रिधा भवेत् ।
एककर्म्मोद्भवस्त्वाद्यो द्वयकर्म्मोद्भवः परः ॥
विभागजस्तृतीयः स्यात्तृतीयोऽपि द्विधा भवेत् ।
हेतुमात्रविभागोत्थहेत्वहेतुविभागजः ॥"
इति भाषापरिच्छेदः ॥*॥
विभक्तप्रत्ययकारणं विभागं निरूपयति विभाग इति एककर्म्मेति । उदाहरन्तु । ग्रन्थेनग्रन्थ-विभागादिकं पूर्व्ववत् बोध्यं तृतीयो विभागजः कारणमात्रविभागजन्यः कारणाकारणविभाग-जन्यश्चेति आद्यस्त्रावत् यत्र कपालकर्म्म ततः कपालद्वयविभागस्ततो घटारम्भकसंयोगनाश-स्ततो घटनाशः ततस्तेन एककपालविभागेन सकर्म्मणः कपालस्य देशान्तरविभागो जन्यते तत उत्तरदेशसंयोगः ततः कर्म्मनाश इति । न च तेन कर्म्मणैव कथं देशान्तरविभागो न जन्यते इति वाच्यं एकस्य कर्म्मणः आरम्भक-संयोगप्रतिबन्धिविभागजनकत्वस्यानारम्भकसं-योगप्रतिबन्धिविभागजनकत्वविरोधात् अन्यथा विकसत्कमलकुट्मलभङ्गप्रसङ्गात् तस्मादयमेवं आरम्भकसंयोगप्रतिबन्धिविभागं जनयेत्तदा आरम्भकसंयोगप्रतिबन्धिविभागं न जनयेत् । न च कारणविभागेनैव द्रव्यनाशात् पूर्व्वं कुतो देशान्तरविभागो न जन्यते इति वाच्यं आरम्भकसंयोगप्रतिबन्धिविभागवतः अवयवस्य सति द्रव्ये देशान्तरविभागासम्भवात् यत्र हस्त-क्रियया हस्ततरविभागः ततः शरीरेऽपि विभक्तप्रत्ययो भवति तत्र च शरीरतरुविभागे हस्तक्रिया न कारणं अधिकरणत्वात् शरीरे तु क्रिया नास्ति अवयविकर्म्मणो यावदवयवकर्म्म-नियतत्वात् । अतस्तत्र कारणाकारणविभागेन कार्य्याकार्य्यविभागो जन्यते इति अतएव विभागो गुणान्तरं अन्यथा शरीरे विभक्ताविभक्त-प्रत्ययो न स्यात् अतः संयोगनाशेन विभागो नान्यथासिद्धो भवति । इति सिद्धान्तमुक्ता-वली ॥ ("सामान्यधर्म्मावच्छिन्नानामेव वस्तूनां परस्परविरुद्धतद्व्याप्यधर्म्मप्रकारेण प्रतिपाद-नम् ॥" यथा द्रव्यत्वधर्म्मावच्छिन्नानां चित्या-दीनां परस्परविरुद्धेन क्षितित्वजलत्वादिना अथ द्रव्यत्वव्याप्येन विशेषेण तथा प्रतिपादनं नवधा द्रव्यविभागः ॥ यागः । यथा, ऋग्वेदे । ५ । ७७ । ४ ।
"यो भूयिष्ठं नासत्याभ्यां विवेष च निष्ठं पित्र-रत्ते विभागे ।"
"यो यजमानो विभागे हविर्व्विभागवति यागे ।"
इति तद्भाष्ये सायणः ॥")

विभाज्यं, त्रि, विभजनीयम् । विभागार्हम् । यथा,
"कुले विनीतविद्यानां भ्रातॄणां पितृतोऽपि वा ।
शौर्य्यप्राप्तन्तु यद्वित्तं विभाज्यं तद्बृहस्पतिः ॥
म्लेच्छेष्वपि हि धर्म्मोऽयं श्रुत्यादृष्यधिकं भवेत् ।
परं निरस्य यल्लभ्यं विद्यया द्यूतपूर्व्वकम् ।
विद्याधनन्तु तद्विद्यान्न विभाज्यं बृहस्पतिः ॥"

तथा ।
"शौर्य्यभार्य्याधने चोभे यच्च विद्याधनं भवेत् ।
त्रीण्येतान्यविभाज्यानि प्रसादो यच्च पैतृकः ॥"
इति दायतत्त्वम् ॥

विभाण्डकः, पुं, मुनिविशेषः । स तु ऋष्यशृङ्ग-पिता । इति रामायणम् ॥ (यथा, भट्टा-भारते । ३ । ११९ । २१ ।
"सोऽपश्यदासीनमुपेत्य पुत्रं
ध्यायन्तमेकं विपरीतचित्तम् ।
विनिश्वसन्तं सुहुरूर्द्धदृष्टिं
विभाण्डकः पुत्रमुवाच दीनम् ॥")

विभाण्डी, स्त्री, आवर्त्तकीलता । इति राज-निर्घण्टः ॥

विभातं, क्ली, (वि + भा + क्तः ।) प्रत्यूषः । इति शब्दरत्नावली ॥

विभावः, पुं, (विशेषेण भावयति रसं सामाजि-कानिति । वि + भावि + अच् ।) परिचयः । रसस्योद्दीपनादिः । इति मेदिनी ॥ तल्लक्ष-णादिर्यथा,—
"विभावेनानुभावेन व्यक्तः सञ्चारिणा तथा ।
रसतामेति रत्यादिः स्थायी भावः सचेतसाम् ॥"
विभावादयो वक्ष्यन्ते । विभावादीनां यथा-संख्यं कारणकार्य्यसहकारित्वे कथं चयानामपि रसोद्बोधे कारणत्वमित्युच्यते ।
"कारणकार्य्यसञ्चारिरूपा अपि हि लोकतः ।
रसोद्बोधे विभावाद्याः कारणान्येव ते मताः ॥
सद्भावाच्च विभावादेर्द्वयोरेकस्य वा भवेत् ।
झटित्यन्यसमाक्षेपे तदा दोषो न विद्यते ॥
विभावादिपरामर्शविषयत्वात् सचेतसाम् ।
परानन्दमयत्वेन संवेद्यत्वादपि स्फुटम् ॥"*॥
"अथ के ते विभावानुभावव्यभिचारिण इत्य-पेक्षायां विभावमाह ।
रत्यादुद्बोधका लोके विभावाः काव्य-नाट्ययोः ।
ये हि लोके रामादिगतरतिहासादीनां उद्-बोधकारणानि सीतादयस्त एव काव्ये नाट्ये च निबेशिताः सन्तो विभावयन्ते आस्वादाङ्कुरप्रादु-र्भावयोग्याः क्रियन्ते सामाजिकरत्यादिभावा एभिरिति विभावा उच्यन्ते ।
आलम्बनोद्दीपनाख्यौ तस्य भेदावुभौ स्मृतौ ॥"
इति साहित्यदर्पणे ३ परिच्छेदे ।
(विविधप्रकारेण प्रकाशयति, त्रि । यथा, ऋग्वेदे । १ । १४८ । १ ।
"न चित्रं वपुषे विभावम् ।"
"विभावं विविधप्रकाशयन्तम् ।" इति तद्भाष्ये सायणः ॥)

विभावनं, क्ली, } (विभावयति कारणं विना
विभावना, स्त्री, } कार्य्योत्पत्तिं चिन्तयति पण्डित-मिति । वि + भावि + ल्युः । युच् वा ।) अल-ङ्कारविशेषः । स च विनाकारणं उपनिबद्ध-मानोऽपि कार्य्योदयरूपः । यथा,—
"विभावना विना हेतुं कार्य्योत्पत्तिर्यदुच्यते ।

उक्तानुक्तनिमित्तत्वात् द्विधा सा परिकीर्त्तिता ॥"

उक्तहेतौ यथा,—

"अनायासकृशं मध्यमग्रुक्तरले दृशौ।
अभूषणमनोहारि वपुर्वयसि सुभ्रुवः ॥"

अनुक्तहेतौ यथा,—

"स एव त्रीणि जयति जगन्ति कुसुमायुधः।
हरतापि तनुं तस्य ग्रभ्रुणा न हृतं बलम् ॥"

इति साहित्यदर्पणे १० परिच्छेदे ॥

(पालनम्। यथा, भागवते। ४। ८। २०।

"यस्याङ्घ्रिपद्मं परिचर्य्य विश्व-
विभावनायात्तगुणाभिपत्तेः ॥")

विभावरी, स्त्री, रात्रिः। इत्यमरः ॥ (यथा, राजतरङ्गिण्याम्। ३। २०७।

"प्रभातायां विभावर्य्यां यथास्थानस्थितो नृपः।
आकार्य्यतां मातृगुप्त इति चत्तारमादिशत्॥"

मन्दारविद्याधरकन्या। यथा, मार्कण्डेये।६३। १४।

"मन्दारविद्याधरजा सखी मम विभावरी ॥"

सुमेरूत्तरस्था पुरी। यथा, भागवते।७५।२१।७।

"उत्तरतः सौम्यां विभावरीं नाम ॥")

हरिद्रा। कुट्टनी। वक्रयोषित्। विवादवस्तुखड़ी। इति मेदिनी। रे, २६६ ॥ मौख्यर्य्यनिरतस्त्री। इति शब्दरत्नावली ॥ मेदाद्यः। इति रत्नमाला ॥

विभावसुः, पुं, (विभा प्रभा एव वसु सम्पद्यस्य।) सूर्य्यः। (यथा, महाभारते। १। ८६। ७।

"वह्निनः कुरुवंशस्य विभावसुसमद्युतिः ॥")

अर्कवृक्षः। अग्निः। (यथा, महाभारते। ३। ६८। ७।

"निवर्त्तां धूमजालेन प्रभामिव विभावसोः ॥")

चित्रकवृक्षः। इत्यमरः ॥ चन्द्रः ॥ हारभेदः। इति हेमचन्द्रः ॥ (वसुपुत्रविशेषः। यथा, भागवते। ६। ६। १०,१६।

"वसवोऽष्टौ वसोः पुत्रास्तेषां नामानि मे शृणु।
द्रोणः प्राणो ध्रुवोऽर्कोऽग्निर्दोषो वास्तुर्विभावसुः।
विभावसोरसूतोषा व्युष्टं रोचिषमातपम् ॥"

सुरासुरपुत्रः। यथा, तत्रैव। १०। ५६। १२।

"ताम्रोऽन्तरिक्षः श्रवणो विभावसुः
वसुर्नभस्वानरुणश्च सप्तमः ॥"

दनुपुत्रोऽसुरविशेषः। यथा, तत्रैव।६।६।३०।

"त्रिमूर्द्धा शम्बरोऽरिष्टो हयग्रीवो विभावसुः॥")

विभावित, त्रि, विचिन्तितः। विशेषेण उत्पादितः। विशेषेण प्रापितः। विभिश्रयितः। इति भाव्+भूधातोः क्तप्रत्ययेन निष्पन्नः ॥ (यथा, शिशुपालवधे। १। २।

"चयस्त्रिषामित्यवधारितं पुरा
ततः शरीरीति विभावितात्मभिः ॥")

विभाषा, स्त्री, (विकल्पत्वेन भाष्यते इति। भाष्+"गुरोश्च हलः।" ३।३।१०३। इत्यः। ततष्टाप्।) विकल्पः। यथा। द्वयोर्विभाषयोर्मध्ये विधिर्नित्यः। इति मुग्धबोधव्याकरणम् ॥ ("नवेति विभाषा ॥" इति पाणिनिः।१।१।४४॥)

विभिन्नः, त्रि, (वि+भिद्+क्तः।) विभक्तः। विदीर्णः। यथा,—

"गदापरशुखड्गैश्च चक्रतोमरशार्ङ्गकैः।
विभिन्ने वेदना या हि क्षुधया सापि निर्ज्जिता॥"

इति इतिहाससमुच्चयः ॥

(विघट्टितः। यथा, शिशुपालवधे। १। ५५।

"विभिन्नग्रुक्षः कलुषीभवन्मुहु-
र्मदेन दन्तीव मनुष्यधर्म्मणः ॥")

विभीतकः, त्रि, वृक्षविशेषः। बहेड़ा इति भाषा। तत्पर्य्यायः। अक्षः २ तुषः ३ कर्षफलः ४ भूतवासः ५ कलिद्रुमः ६। इत्यमरः ॥ कलिवृक्षः ७ संवर्त्तः ८। इति रत्नमाला ॥ तैलफलः ९ भूतावासः १० संवर्त्तकः ११ वासन्तः १२ कलिवृक्षः १३ बहेड़ुकः १४ क्षार्य्यः १५ विषघ्नः १६ अनिलघ्नः १७ कासघ्नः १८। (यथा, महाभारते। ३। ६४। ५।

"पियालतालखर्ज्जूरहरीतकविभीतकैः ॥")

अस्य गुणाः। कटुत्वम्। तिक्तत्वम्। कषायत्वम्। उष्णत्वम्। कफापहत्वम्। चक्षुष्यत्वम्। पलितघ्नत्वम्। विपाके मधुरत्वञ्च ॥ तन्मज्जगुणाः। क्षुण्णाच्छर्दीकफवातहरत्वम्। लघुत्वम्। मधुरत्वम्। मदकारित्वञ्च ॥ तत्तैलगुणाः। स्वादुत्वम्। स्निग्धत्वम्। केश्यत्वम्। गुरुत्वम्। पित्तानिलार्त्तिनाशित्वञ्च। इति राजनिर्घण्टः ॥ * ॥ अपि च। अथ विभीतकनामानि गुणाश्च।

"विभीतकस्त्रिलिङ्गः स्यादक्षः कर्षफलस्तु यः।
कलिद्रुमो भूतवासस्तथा कलियुगालयः ॥
विभीतकं स्वादुपाकं कषायं कफपित्तजुत्।
उष्णवीर्य्यं स्निग्धमग्र्यं भेदनं काश्यनाशनम्।
रूक्षं नेत्रहितं केश्यं क्रमिवैस्वर्य्यनाशनम् ॥
विभीतमज्जा लघ्वक्षर्दिकफवातहरो लघुः।
कषायो मदकृच्चाथ धात्रीमज्जापि तद्गुणः॥"

इति भावप्रकाशः ॥ * ॥

अन्यच्च।

"विभीतं भेदि तीक्ष्णोष्णं वैस्वर्य्यं क्रिमिनाशनम्।
चक्षुष्यं स्वादुपाकञ्च कषायं कफपित्तजुत् ॥"

इति राजवल्लभः ॥ * ॥

अस्य कलिद्रुमत्वकारणं यथा,—

पुलस्त्य उवाच।

"ततो गतेषु देवेषु ब्रह्मलोकं प्रति द्विज।
त्रैलोक्यं पालयामास बलिर्धर्म्मान्वितः सदा ॥
कलिस्तदा धर्म्मयुतं जगद्दृष्ट्वा क्षते यथा।
ब्रह्माणं शरणं भेजे स्वभावस्य निषेधनात् ॥
प्रणिपत्य तमाहाथ तिष्ठ ब्रह्मन्मदीश्वरम्।
मम स्वभावो बलिना नाशितो देवसत्तम ॥
तं प्राह भगवान् योगी स्वभावो जगतोऽपि हि।
न केवलं हि भवतो हृतस्तेन बलीयसा ॥
पश्चाद्य तिष्ठ देवेन्द्रं वरुणञ्च समागतम्।
भास्करोऽपि हि दीनत्वं प्रयातो हि बलादसौ॥
इत्येवमुक्तो देवेन ब्रह्मणा कलिरव्ययः।
दीनान् दृष्ट्वा च शक्रादीन् विभीतकवनं गतः ॥"

इति वामने १७ अध्यायः ॥

(अन्यच्च। यथा, महाभारते ३।७२ अध्याये।

"एवमुक्ता ददौ विद्यान्तुषर्णां नलाय वै।
तस्माच्चकर्द्दयाद्यस्य शरीरान्निःसृतः कलिः ॥"

"तं शप्तुमैच्छत् कुपितो निषधाधिपतिर्नलः।
तमुवाच कलिर्भीतो वेपमानः कृताञ्जलिः ॥
कोपं संयच्छ नृपते कीर्त्तिं दास्यामि ते पराम्॥"

"एवमुक्तो नलो राजा नियच्छत् कोपमात्मनः।
ततो भीतः कलिः क्षिप्रं प्रविवेश विभीतकम् ॥"

"विभीतकस्याश्रयस्थः संवृत्तः कलिसंश्रयात्॥")

विभीषणः, पुं, (विभीषयतीति। वि+भीषि+ल्युः।) रावणभ्राता। इति रामायणम् ॥ (यथा, भागवते। ४। १। ३४।

"रावणः कुम्भकर्णश्च तथाप्यस्यां विभीषणः।
पुलहस्य गतिर्भार्य्या त्रीनसूत सतो सुतान् ॥")

नलक्षणम्। इति राजनिर्घण्टः ॥ भयानके त्रि ॥ (यथा, ऋग्वेदे। ५। ३४। ६।

"इन्द्रो विश्वस्य दमिता विभीषणः ॥"

"विभीषणः भयजनकः।" इति तद्भाष्ये सायणः ॥)

विभीषिका, स्त्री, (विभीषा+स्वार्थे कन्। स्त्रियां टाप् अत इत्वञ्च।) भयप्रदर्शनम्। यथा,—

"कृत्वा ग्रस्तविभीषिकां कतिपयग्रामेषु दीनाः प्रजाः
मथ्नन्तो विटजल्पितैरुपहताः क्षौणीभुजश्चक्रिरे
ऽखिलाः।
विद्वांसोऽपि वयं परं त्रिजगतां सर्गस्थिति-
व्यापदा-
मीशस्तत्परिचर्य्यया न गणितो येनेष नारा-
यणः ॥"

इति शान्तिशतकम् ॥

विभुः, पुं, (वि+भू+"विप्रसंभ्यो डुसंज्ञायाम्।" ३।२।१८०। इति डुः।) प्रभुः। (यथा, शिशुपालवधे।

"विभुर्विभक्तावयवं पुमानिति
क्रमादमुं नारद इत्यबोधि सः ॥")

सर्व्वगतः। ईश्वरः। (यथा, महाभारते।१३। १७। १६।

"त्रिजटस्त्रिरवासाश्च रुद्रः सेनापतिर्विभुः ॥")

ब्रह्मा। इति मेदिनी। भे, ७ ॥ भव्यः। इति त्रिकाण्डशेषः ॥ विष्णुः। इति शब्दमाला ॥ (यथा, महाभारते। १३। १४६। १०७।

"विहायसगतिर्ज्योतिः सुरुचिर्हुतभुग्विभुः ॥"

जीवात्मा। यथा,—

"न ग्रह्यश्चक्षुषा द्रष्टुं देहे स्थोऽतमो विभुः।
दृश्यते ज्ञानचक्षुर्भिस्तत्त्वज्ञैरेव चेतसा ॥"

इति सुश्रुते शारीरस्थाने पञ्चमेऽध्याये ॥)

नित्यः। अर्हन्। इति हेमचन्द्रः ॥

विभूतिः

विभुः, त्रि, सर्व्वमूर्त्तसंयोगी। परममहत्त्ववान्। स तु आत्मादिः। यथा,—

"आत्मेन्द्रियाद्यधिष्ठाता करणं हि सकर्त्तृकम्।
विभुर्व्वैद्व्यादिगुणवान् बुद्धिस्तु द्विविधा मता॥"

इति भाषापरिच्छेदः॥

विभुरिति विभुत्वं परममहत्त्ववत्त्वम्। इति सिद्धान्तमुक्तावली॥

"कालस्वात्मदिशां सर्व्वगतत्वं परमं महत्।"

इति भाषापरिच्छेदः॥

दृढ़ः। इत्यजयपालः॥ व्यापकः। इति हेमचन्द्रः॥ (यथा, ऋग्वेदे। १०। ४०। १।

"प्रातर्यावाणं विभ्वं विष्णे विष्णे॥"

"विभ्वं विभुं व्यापिनम्।" इति तद्भाष्ये सायणः॥ व्याप्नः। यथा, ऋग्वेदे। १। ३४। १।

"चिच्चिन्नो अद्याभवतं न वेद सा
विभुर्व्वायाम उत रातिरश्विना॥"

"विभुः व्याप्नः।" इति तद्भाष्ये सायणः॥ सर्व्वत्र गमनशीलः। यथा, ऋग्वेदे।१।१६५।१०।

"एकस्य चिन्मे विभ्वस्वोजो
या नु दधृष्वानृक्षवे मनीषा॥"

"विभु सर्व्वत्र गमनशीलम्।" इति तद्भाष्ये सायणः॥ ईश्वरः। यथा, ऋग्वेदे। ४। ७। १।

"यमग्नवानो भृगवो विरुरुचुर्व्वनेषु चित्रं विभ्वं विशे विशे॥"

"विभ्वं विभुं ईश्वरम्।" इति तद्भाष्ये सायणः॥ महान्। यथा, ऋग्वेदे। ५। ३८। १।

"उरोष इन्द्र राधसो विभ्वी रातिः शतक्रतो॥"

"विभ्वी महती।" इति तद्भाष्ये सायणः॥)

विभूतिः, स्त्री, (वि+भू+क्तिन्।) अणिमादिकमष्टधा। तत्पर्य्यायः। भूतिः २ ऐश्वर्य्यम् ३। इत्यमरः॥ (यथा, ऋग्वेदे। १। ८। ६।

"एवाहिते विभूतय ऊतयः॥"

"विभूतयः ऐश्वर्य्यविशेषाः।" इति तद्भाष्ये सायणः॥) शिवधृतभस्म। अस्य शिवस्य अणिमाद्यष्टप्रकारं वैभवं विभूत्यादिपदत्रयं वाच्यं केचित्तु विभूतिर्भूतिरिति द्वयं शम्भुधृतभस्मनि अणिमाद्यष्टके तु ऐश्वर्य्यमित्याहुः। विभवत्यनया विभूतिः क्तिः भवतेः क्तिः भूतिः विग्रहणमन्योपसर्गनिरासार्थं ईश्वरगुणैश्वर्य्यं भावे ष्यञ्। अणिमादि लघिमादि। तथा च।

"अणिमा लघिमा प्राप्तिः प्राकाम्यं महिमा तथा।
ईशित्वञ्च वशित्वञ्च तथा कामावसायिता॥"

इति॥

अणुत्वमणिमा येन सूक्ष्मो भूत्वा विचरति। लघुत्वं लघिमा येन वायुरिव लघुतरो भवति। प्राप्तिरभीप्सितप्राप्यं प्राकाम्यमिच्छानभिघातः। महिमा महत्त्वं येन चतुर्दशभुवनान्यस्योदरे वर्त्तन्ते। ईशित्वं प्रभुता येन स्थावरजङ्गमादिभूतान्यादेशकारीणि भवन्ति। वशित्वं स्वातन्त्र्यं येन स्वतन्त्रश्चरति। कामेन इच्छया अवसायितुं स्नातुं शीलमस्य कामावसायी शीलो

विभूति

ग्रहादित्वाच्छिन् तस्य भावः कामावसायिता। सर्व्वानन्दस्तु अनेकार्थत्वाद्धातूनां स्तुतिरिह तिष्ठत्यर्थः। अवसायी दन्तमध्य इत्याह। इति भरतः॥ * ॥ अपि च।

श्रीभगवानुवाच।

"परात्परतरं तत्त्वं परं ब्रह्मैकमव्ययम्।
नित्यानन्दं स्वयं ज्योतिरद्वयं तमसः परम्।
ऐश्वर्य्यं तस्य यन्नित्यं विभूतिरिति गीयते॥"

इति कौर्म्मे १ अध्यायः॥

(लक्ष्मीः। यथा, ऋग्वेदे। १। ३०। ५।

"विभूतिरस्तु सूनृता।"

"विभूतिर्लक्ष्मीः।" इति तद्भाष्ये सायणः॥ विभवहेतुः। यथा, तत्रैव। ६। २१। १।

"रयिर्व्विभूतिरीयते वयस्या॥"

"विभूतिर्ज्जगतो विभवहेतुः॥" इति तद्भाष्ये सायणः॥ विविधसृष्टिः। यथा, भागवते।'४। २४। ४३।

"भक्तिवयसमेताय मौढ्येऽहंकृतात्मने।
चेत आकूतिरूपाय नमो वाचोविभूतये॥"

सम्पत्। यथा, रघुवंशे। ८। ३६।

"अभिभूय विभूतिमार्त्तवीं
मधुगन्धातिशयेन वीरुधाम्॥")

विभूतिद्वादशी, स्त्री, (विभूतिवर्द्धिका द्वादशी।) व्रतविशेषः। यथा,—

नन्दिकेश्वर उवाच।

"शृणु नारद! वक्ष्यामि विष्णोर्व्रतमनुत्तमम्।
विभूतिद्वादशीनाम सर्व्वपापनिसूदनम्॥
कार्त्तिके चैव वैशाखे मार्गशीर्षेऽथ फाल्गुने।
आषाढ़े वा दशम्यान्तु शुक्लायां लघुभुङ्नरः।
कृत्वा सायन्तनीं सन्ध्यां गृह्णीयान्नियमं बुधः॥
एकादश्यां निराहारः समभ्यर्च्य जनार्द्दनम्।
द्वादश्यां विधिसंयुक्तः करिष्ये भोजनं विभो।
तदविघ्नेन मे यातु साफल्यं मधुसूदन॥
ततः प्रभाते चोत्थाय कृतस्नानजपः शुचिः।
पूजयेत् पुण्डरीकाक्षं शुक्लमाल्यानुलेपनैः॥
विभूतिदाय नमः पादावशोकाय च जानुनी।
नमः शिवायेत्यूरू च विश्वमूर्त्तये नमः कटिम्॥
कन्दर्पाय नमो मेढ्रमादित्याय नमः करौ॥
दामोदरायेत्युदरं वासुदेवाय च स्तनौ।
माधवायेति हृदयं कण्ठमुत्कण्ठिते नमः॥
श्रीधराय मुखं केशान् केशवायेति नारद।
पृष्ठं शार्ङ्गधरायेति श्रवणौ च स्वयम्भुवे॥
स्नात्वा शङ्खचक्रासिगदाधरशुपाणयः।
सर्व्वात्मने शिरो ब्रह्मन् नम इत्यभिपूजयेत्॥
मध्यमुत्पलसंयुक्तं हैमं कृत्वा तु शक्तितः।
उदकुम्भसमायुक्तमग्रतः स्थापयेद्विभोः॥
गुड़पात्रं तिलैर्युक्तं सितवस्त्राभिवेष्टितम्।
रात्रौ जागरणं कुर्य्यादितिहासकथादिना॥
प्रभातायाञ्च शर्व्वर्य्यां ब्राह्मणाय कुटुम्बिने।
सकाञ्चनोत्पलं देवं सोदकुम्भं निवेदयेत्॥
यथा न मुच्यसे विष्णोः सदा सर्व्वविभूतिभिः।
तथा मामुद्धराशेषदुःखसंसारसागरात्॥

विभ्रत्

दशावताररूपाणि प्रतिमासं क्रमाद्यजेत्।
दत्तात्रेयं ततो वासमुत्सवेन समन्वितम्।
दद्यादेवं समा यावत् पाषण्डानभिवर्ज्जयेत्॥
समाप्येवं यथाशक्त्या द्वादशद्वादशीं नरः।
संवत्सरान्ते लवणपर्व्वतेन समन्विताम्॥
शय्यां दद्यात्सुनिश्रेष्ठ गुरवेऽमरसंयुताम्॥
यामञ्च शक्तिमान् दद्यात् चैलमाभरणान्वितम्।
गुरुं संपूज्य विधिवत् वस्त्रालङ्कारभूषणैः॥
अन्यानपि यथाशक्त्या भोजयित्वा द्विजोत्तमान्।
तर्पयेद्धेनुगोदानैरन्यच्च धनसञ्चयात्॥
अल्पवित्तो यथाशक्त्या श्लोकं श्लोकं समाचरेत्।
यस्मात्तिनिश्चयः पुरुषो भक्तिमान् माधवं प्रति।
पुष्पार्च्चनविधानेन स कुर्य्याद्व्रतमरदयम्॥
अनेन विधिना यस्तु विभूतिद्वादशीव्रतम्।
कुर्य्यात् स पापनिर्म्मुक्तः पितॄणान्तारयेच्छतम्॥
जन्मनां शतसाहस्रं न शोकफलभाग्भवेत्।
न च व्याधिर्भवेत्तस्य न दारिद्र्यं न बन्धनम्॥
वैष्णवो वाथ शैवो वा भवेज्जन्मनि जन्मनि।
यावद्युगसहस्राणां शतमष्टोत्तरं भवेत्।
तावत् स्वर्गे वसेद्ब्रह्मन् भूपतिश्च पुनर्भवेत्॥"

इति मात्स्ये ८२ अध्यायः॥

विभूषणं, क्ली, (विशेषेण भूषयत्यनेनेति। वि+भूष+णिच्+ल्युट्।) आभरणम्। इत्यमरः॥ (यथा, कथासरित्सागरे। १७। ६४।

"अस्ति पाटलिपुत्राख्यं पुरं पृथ्वीविभूषणम्॥")

विभूषा, स्त्री,(वि+भूष् भूषणे+"गुरोश्च हलः।" ३। ३। १०३। इत्यः। स्त्रियां टाप्।) शोभा। इति हेमचन्द्रः॥ (यथा, कामन्दकीये। १५।१६।

"ततः प्रबुद्धः शुचिरिष्टदेवः
श्रीमद्विभूषोल्लसितः प्रहृष्टः॥")

आभरणञ्च॥ (यथा, आर्य्यासप्तशत्याम्। ४५६।

"मानग्रहगुरुकोपादनुदयितालीव रोचते मह्यम्।
काञ्चनमयी विभूषा दाहाक्षिप्तशुद्धभावेव॥")

विभूषितः, त्रि, (वि+भूष+क्तः। यद्वा, विभूषा संजातास्य इति। विभूषा+इतच्।) अलङ्कृतः। यथा,—

"विशुद्धरत्नांशुविभूषिताङ्गी
शिलातले हेममये सुरम्ये।
सुखोपविष्टं मदनाङ्गनाशनं
जगाद वाक्यं गिरिराजपुत्री॥"

इति स्कान्दे नीलकण्ठस्तोत्रम्॥

विभृतः, त्रि, भृतः। पुष्टः। विपूर्व्वभृधातोः क्तप्रत्ययेन निष्पन्नः॥

वि(बि)भृत्, त्रि, (भृ+क्विप्।) बिभर्त्ति यः। धारणपोषणकर्त्ता। यथा,—

"चतुर्द्दशं नारसिंहं बिभ्रद्दैत्येन्द्रवृच्छ्रितम्।
ददार करजैरूरावेरकां कटकृद्यथा॥"

इति श्रीभागवते १ स्कन्धे ३ अध्यायः॥

अपि च।

"तरुणशकलमिन्दोर्बिभ्रती शुभ्रकान्तिः।"

इत्यादि तन्त्रसारे सरस्वतीध्यानम्॥

(पवर्गीयबकारादिः साधुरेव॥)

विभ्रमः, पुं, (वि + भ्रम + घञ् ।) हावभेदः । स तु स्त्रीणां शृङ्गारभावजक्रियाविशेषः । इत्यमरः ॥ (यथा, मेघदूते । २६ ।

"स्त्रीणामाद्यं प्रणयवचनं विभ्रमो हि प्रियेषु ॥") मदरागहर्षजनितविपर्य्यासो विभ्रमः । यथा अन्यनिमित्तमानसादुत्थायान्यच्च गमनं प्रियाख्यकथामाक्षिप्य सखा सहालपनमुच्चैर्हसितक्रीडौ पुष्पादीनां यादृच्छा सहसैव तत्परित्यागः । वस्त्राभरणमाल्यानामकारणतः खण्डनं मानने च । यदुक्तम् ।

"क्रोधः क्षिपेच्च कुसुमाभरणादियाच्ञा
तद्भर्त्सनञ्च सहसैव विमर्दनञ्च ।
आक्षिप्य कान्तवचनं जपनं सखीभि-
र्निष्कारणोत्थितगतं वद विभ्रमं तत् ॥" इति ।

"चित्तवृत्तेरनवस्थानं शृङ्गाराद्विभ्रमो भवेत् ॥" इत्यन्यच्च च ॥ तथान्यच्च ।

"विभ्रमस्त्वरया काले भूषास्थानविपर्य्ययः ।" यथा,—

"श्रुत्वायातं बहिः कान्तमसमाप्तिभूषया ।
भाले ऽञ्जनं दृशोर्लाक्षा कपोले तिलकः कृतः ॥"
इति ।

योषितां यौवनजो विकारो विभ्रमः । इत्येके । विभ्रान्तिर्विभ्रमः घञ् । इति भरतः ॥ अपि च ।

"वल्लभप्राप्तिवेलायां मदनावेशसंभ्रमात् ।
विभ्रमो हारमाल्यादिभूषास्थानविपर्य्ययः ॥"
इत्युज्ज्वलनीलमणिः ॥*॥

भ्रान्तिः । इति मेदिनी । मे, ५२ ॥ (यथा, भागवते । ४ । २१ । १२ ।

"तमत्रिभगवानेत्य त्वरमाणं विहायसा ।
आसक्तमिव पापेषु योऽधर्मे धर्मविभ्रमः ॥") प्रोभा । (यथा, राजतरङ्गिण्याम् । ३ । ३६७ ।

"ललाटे भूलसद्भङ्गे जराशुक्लाः शिरोरुहाः ।
तस्य शम्भुभ्रमासङ्गिगङ्गाम्भोविभ्रमं दधुः ॥"
यथा च अमरुशतके । १ ।

"व्याकृष्टिवक्रखटकासुखपाणिपृष्ठे
प्रेङ्खन्नखांशुचयसंवलितोऽम्बिकायाः ।
त्वां पातुमञ्जरितपल्लवकर्णपूर-
लोभभ्रमद्भ्रमरविभ्रमभृत्कटाक्षः ॥") संभ्रमः । इति हेमचन्द्रः ॥ (यथा, कथासरित्सागरे । १६ । ६५ ।

"पूरयन् बहुनादाभिर्व्याहिनीभिर्भुवस्तलम् ।
कुर्व्वन्नकाण्डनिर्म्मेघवर्षासमयविभ्रमम् ॥") भ्रमणम् । इति शब्दरत्नावली ॥ (विकारविशेषः । यथा,—

"तीव्रार्त्तिरपि नाजीर्णे पिबेच्छूलघ्नमौषधम् ।
आमसन्नोऽनलो नालं पक्तुं दोषौषधाशनम् ॥
निहन्यादपि चैतेषां विभ्रमः सहसातुरम् ।
जीर्णाग्नेस्तु भवेच्छ्रेयो युञ्जीत लघ्वगुरूदरे ॥"
इति वाभटे सूत्रस्थानेऽष्टमेऽध्याये ॥)

विभ्रमा, स्त्री, वार्द्धक्यम् । इति शब्दरत्नावली ॥

विभ्राट्, [ज्] / विभ्राड्, [ज्] } त्रि, (विशेषेण भ्राजते इति । वि + भ्राज् + "अन्येभ्योऽपि दृश्यते ।" ३ । २ । १७७ । इति क्विप् ।) अलङ्कारादिना दीप्तिशीलः । तत्पर्य्यायः । भ्राजिष्णुः २ रोचिष्णुः ३ । इत्यमरः ॥ (यथा, ऋग्वेदे । १० । १७० । १ ।

"विभ्राड् बृहत्पिबतु सोम्यं
मध्वायुर्दधद्यज्ञपतावविहुतम् ॥"
"विभ्राड् विभ्राजमानः विशेषेण दीप्यमानः ।" इति तद्भाष्ये सायणः ॥)

विभ्रान्तः, त्रि, विभ्रमयुक्तः । विपूर्ब्बभ्रमधातोः क्तप्रत्ययेन निष्पन्नः ॥ (यथा, गीतायाम् । १६ । १६ ।

"अनेकचित्तविभ्रान्ता मोहजालसमावृताः ॥")

विभ्रान्तिः, स्त्री, (वि + भ्रम + क्तिन् ।) विभ्रमः । इति विभ्रमशब्दटीकायां भरतः ॥ (यथा, प्रबोधचन्द्रोदये । "स्फुरदहेतुविभ्रान्तिसन्तानसन्तप्तबन्धारसंसारनिद्रापहारैकदक्षेति ॥")

विभ्रान्तः, त्रि, विरुद्धमतिविशिष्टः । विपूर्ब्बभ्रमधातोः क्तप्रत्ययेन निष्पन्नः ॥

विभ्रान्तकः, त्रि, विभ्रान्तः । विशिष्टहीतं मनोऽस्येति बहुव्रीह्यर्थे कप्रत्ययेन निष्पन्नः ॥ (यथा, भागवते । ७ । १० । ६१ ।

"विलोक्य भयसङ्कुलं विभ्रान्तकं वृषध्वजम् ॥")

विभ्रान्तः, [स्] त्रि, (विरुद्धं भ्रान्तं मनो यस्य ।) चिन्तादिव्याकुलचित्तः । तत्पर्य्यायः । दुर्म्मनाः २ अन्तर्म्मनाः ३ । इत्यमरः ॥ दुःखितमानसः ४ ॥ इति शब्दरत्नावली ॥ (यथा, देवीभागवते । १ । १६ । १० ।

"मिष्टमन्नं सदा राजन् सुदितो विभ्रान्तस्तथा ।
मालायाञ्च तथा वर्षे समदक् कृपणोत्तम ! ॥")

विभ्रयः, पुं, (वि + भ्री + "हरत्र् ।" इत्यच् ।) विनिमयः । इति हेमचन्द्रः ॥

विभ्रेट्, पुं, (विभ्रेटतेऽसौ इति । वि + भ्रेट् + घञ् ।) कालकृतवृक्षः । इति रत्नमाला ॥ कालकासुन्दिया इति भाषा ॥ विभ्रेटनम् । इति शब्दरत्नावली ॥ (यथा, रघुः । ५ । ६५ ।

"तं कर्णभूषणनिपीड़ितपीवरांस-
ग्रथ्योत्तरच्छदविभ्रेटकृशाङ्गरागम् ॥"
सम्भ्रेटः । यथा, रघुः । १३ । २० ।

"असौ महेन्द्रद्विपदानगन्धि-
स्त्रिमार्गगावीचिविभ्रेटशीतः ॥"
"त्रिमार्गगा गङ्गा तस्या वीचीनां विभ्रेटेन सम्भ्रेटेण शीतः ।" इति तट्टीकायां मल्लिनाथः ॥*॥ युद्धम् । यथा, रामायणे । ३ । ३२ । ७ ।

"देवासुरविभ्रेटेषु वज्राग्निक्षतवक्षसम् ॥"
कलहः । यथा, तत्रैव । ७ । ६३ । २४ ।

"कार्य्यार्थिनां विभ्रेटो हि राज्ञां दोषाय
कल्पते ॥")

विभ्रेटकः, पुं, (विभ्रेट एव । स्वार्थे कन् ।) चक्रमर्दः । इति राजनिर्घण्टः ॥ (चक्रमर्दशब्देऽस्य गुणादयो विज्ञेयाः ॥)

विभ्रेटनं, क्ली, (वि + भ्रेट् + ल्युट् ।) कुङ्कुमादिमर्दनम् । तत्पर्य्यायः । परिमलः २ । इत्यमरः ॥ विभ्रेटः ३ । इति शब्दरत्नावली ॥ विशेषेण मर्दनञ्च ॥ (यथा, महाभारते । ३ । ३६ । ३ ।

"धर्म्मस्य जानमानोऽहं गतिमग्र्यां सुदुर्विदाम् ।
कथं बलात्करिष्यामि मेरोरिव विभ्रेटनम् ॥"
त्रि, विशेषेण भ्रेटनातीति । वि + भ्रेट + ल्युः । मर्दनकारी । पीड़ादायकः । यथा, कथासरित्सागरे । ११३ । १६ ।

"अभूच्च वारणस्तस्य परसैन्याविभ्रेटनः ।
महान् कुवलयापीड़ इति ख्यातो महीतले ॥"
यथा च साहित्यदर्पणे । ४ । २६६ ।

"अयं स रसनोत्कर्षी पीनस्तनविभ्रेटनः ।
नाभ्यूरुजघनस्पर्शी नीवीविस्रंसनः करः ॥")

विभ्रेत्थः, पुं, (विभ्रेट्डुत्तिष्ठतीति । उत् + स्था + कः ।) मर्दनाज्जातसुगन्धादिः । यथा,—

"अथ गन्धे परिमलो विभ्रेत्थे मनोहरे ।
दूरगामी मनोहारी गन्ध आमोद ईरितः ॥"
इति शब्दरत्नावली ॥

विमर्शनं, क्ली, (वि + मृश + ल्युट् ।) परामर्शः । वितर्कः । यथा,—

"वितर्कः स्यादुन्नयनं परामर्शो विमर्शनम् ।
अध्याहारस्तर्क ऊहोऽन्वयान्यगुणदूषणम् ॥"
इति हेमचन्द्रः ॥

(विमृश्यतेऽनेनेति । करणे ल्युट् । ज्ञानम् । यथा, भागवते । ६ । १ । २१ ।

"कर्म्मणा कर्म्मनिर्हारो न ह्यात्यन्तिक इष्यते ।
अविद्वदधिकारित्वात् प्रायश्चित्तं विमर्शनम् ॥")

विम(र्ष)र्षः, पुं, (वि + मृ(र्ष)ष + घञ् ।) विचारणा । इति जटाधरः ॥ (यथा, कथासरित्सागरे । २० । १२४ ।

"प्रत्ययः स्त्रीषु सुप्तासि विम(र्श)र्षं विदुषामपि ॥")

विमलं, क्ली, (विगतो मलो यस्मात् ।) तारहेमद्विधातुजातम् । तत्पर्य्यायः । निर्म्मलम् २ स्वच्छम् ३ अमलम् ४ स्वच्छधातुकम् ५ । अस्य गुणाः । कटुत्वम् । तिक्तत्वम् । त्वग्दोषव्रणनाशित्वम् । रसवीर्य्यादौ तुल्यत्वम् । वृषे भिन्नवीर्य्यकत्वञ्च । इति राजनिर्घण्टः ॥ (तथास्य शोधनमारणविधिः ।

"सूत्रारनालतैलेषु गोदुग्धे कदली रसे ।
कौलत्थे कोद्रवक्वाथे माक्षिकं विमलन्तथा ॥
सुहुः शूरणकन्दस्थं खेदयेद्वरवर्णिनि ! ।
क्षारान्वलवणैश्चैव तैलसर्पिःसमन्वितम् ॥
पुटत्रयं प्रदातव्यं ततस्तु शोधितं भवेत् ।
जम्बीरस्य रसे स्निग्धे मेषशृङ्गीरसैस्तथा ।
रम्भातोयेन वा पाठ्यं घसं विमलशुद्धये ॥"
इति विमलशुद्धिः ॥ इति वैद्यकरसेन्द्रसारसंग्रहे जारणमारणाधिकारे ॥)

विमलं, त्रि, (विगतो मलो यस्मात् ।) निर्म्मलम् । तत्पर्य्यायः । वीथम् २ । इत्यमरः ॥ प्रयतम् ३ । इति शब्दरत्नावली ॥ (यथा, रामायणे । २ । ४८ । १४ ।

"प्रसन्नविपलानि तोयानि विमलानि महीधराः।
विदर्शयन्तो विविधान् भूयश्चित्रांश्च निर्झरान्॥")
चारुः। इति शब्दरत्नावली॥ (यथा, माघे। ६। १३।
"रुचिधात्रि भर्त्तरि भृशं विमलाः
परलोकमभ्युपगते विविधुः॥")
विमलः, पुं, (विगतो मलः पापं यस्मात्।) अर्हन्। इति हेमचन्द्रः॥ (बुद्धस्यपुत्रः। यथा, भागवते। ६। १। ४१।
"तस्योत्कलो गयो राजन् विमलश्च त्रयःसुताः॥")
विमलदानं, क्ली, (विमलं विशुद्धं दानम्।) नित्यनैमित्तिककाम्यदानम्। ईश्वरप्रीणनार्थदानञ्च। यथा,—
"नित्यं नैमित्तिकं काम्यं विमलं दानमीरितम्।
अहन्यहनि यत्किञ्चिद्दीयतेऽनुपकारिणे।
अनुद्दिश्य फलं तत् स्यात् ब्राह्मणाय तु नित्यकम्॥
यत्तु पापापशान्त्यै च दीयते विदुषां करे।
नैमित्तिकं तदुद्दिष्टं दानं सद्भिरनुष्ठितम्॥
अपत्यविजयैश्वर्य्यस्वर्गार्थं यत् प्रदीयते।
दानं तत् काम्यमाख्यातमृषिभिर्ब्रह्मचिन्तकैः॥
चेतसा सत्त्वयुक्तेन दानं तद्विमलं स्मृतम्।"
इति गारुडे ५१ अध्यायः॥
विमलमणिः, पुं, (विमलः स्वच्छो मणिः।) स्फटिकः। इति राजनिर्घण्टः॥
विमला, स्त्री, (विमल+टाप्।) सप्तला। इत्यमरः॥ चामरकथा इति भाषा॥ (अस्याः पर्य्यायो यथा,—
"श्रीतला सप्तला सारा विमला विदुला च सा।
तथा निगदिता भूरिफेना चर्म्मकषेत्यपि॥"
इति भावप्रकाशस्य पूर्ब्बखण्डे प्रथमे भागे॥)
भूमिभेदः। इति मेदिनी। ले, १३१॥ देवीभेदः। यथा,—
"यथाख्यविमला कार्य्या शुद्धस्फटिकसन्निभा।
सुक्ताक्षस्रक्त्रधारी च कमण्डलुकरा वरा॥
नानासनसमारूढा श्वेतमाल्याम्बरप्रिया।
दधिक्षीरोदनाहारा कर्पूरमदचर्चिता।
सितपङ्कजहोमेन राष्ट्रायुर्नृपवर्द्धिनी॥"
इति देवीपुराणे संवत्सरदेवताद्वितीयविग्रहपतिकाविधिः॥ * ॥ अन्यच्च।
"पूजयेत् कर्णिकामध्ये वासुदेवन्तु नायकम्।
विमला नायिका तस्य वासुदेवस्य कीर्त्तिता॥"
इति कालिकापुराणे ८२ अध्यायः॥ * ॥
अपरञ्च।
"उत्कले नाभिदेशश्च विरजाक्षेत्र उच्यते।
विमला सा महादेवी जगन्नाथस्तु भैरवः॥"
इति तन्त्रचूड़ामणौ ५१ पीठनिर्णयः॥
(यथा च देवीभागवते। ७। ३०। ६४।
"गयायां मङ्गला प्रोक्ता विमला पुरुषोत्तमे॥")
विमलात्मकः, त्रि, (विमलो निर्म्मल आत्मा यस्य।) निर्म्मलः। इत्यमरटीकायां रायमुकुटः॥
विमलाद्रिः, पुं, (विमलः अद्रिः।) शत्रुञ्जयपर्व्वतः। इति हेमचन्द्रः॥
विमलार्थकः, त्रि, निर्म्मलः। इत्यमरटीकायां रायमुकुटः॥
विमांसं, क्ली, (विरुद्धं मांसम्।) अशुद्धमांसम्। तत्तु कुक्कुरादिमांसम्। इति केचित्॥
विमाता, [तृ] स्त्री, (विरुद्धा माता।) माल्लसपत्नी। सत्मा इति भाषा। सा कनीयस्यपि नमस्या। यथा, स्मृतिः।
"मातुः पितुः कनीयांसं न नमेद् वयसाधिकः।
नमस्कुर्य्यात् गुरोः पत्नीं भ्रातृजायां विमातरम्॥"
स्मृत्यर्थसारे।
"स्त्रियो नमस्या वृद्धाश्च वयसा पत्युरेव ताः॥"
यतः पत्युर्व्वयसा ताः स्त्रियो वृद्धा अतः कनिष्ठा अपि नमस्याः। इति मलमासतत्त्वम्॥ * ॥
विमातरजोनिवृत्तावपि पितामहधनविभागकर्त्तव्यत्वम्। यथा बृहस्पतिः।
"पित्रोरभावे भ्रातॄणां विभागः संप्रदर्शितः।
मातुर्निवृत्ते रजसि जीवतोरपि दृश्यते॥"
अत्र मातृपदं विमातृपरमपि पुत्रान्तरोत्पत्तिसम्भावनातौल्यात्। इति दायतत्त्वम्॥ * ॥
अस्या अनंशित्वं यथा। सोदरभ्रातृभिर्विभागे क्रियमाणे मात्रे पुत्रसमांशो दातव्यः। समांशहारिणी माता इति वचनात्मातृपदस्य जननीपरत्वात् न सपत्नीमातृपरत्वमपि। सङ्गच्छतस्य सुखगौणत्वानुपपत्तेः। इति दायभागः॥
विमातृजः, पुं, (विमातुर्जायते इति। विमातृ+जन+डः।) मातृसपत्नीपुत्रः। तत्पर्य्यायः। वैमात्रेयः २। इत्यमरः॥ वैमात्रः ३। इति जटाधरः॥
विमानः, पुं क्ली, (विगतं मानमुपमा यस्य।) देवरथः। तत्पर्य्यायः। व्योमयानम् २। इत्यमरः॥ (यथा, कुमारसम्भवे। २। ४५।
"भुवनालोकनप्रीतिः खर्गिभिर्नानुभूयते।
खिलीभूते विमानानां तदापातभयात् पथि॥")
सार्व्वभौमगृहम्। (तत्तु सप्तभूमिगृहम्। यथा, रामायणे। १। ५। १६।
"सर्व्वरत्नसमाकीर्णां विमानगृहशोभिताम्॥"
"विमानोऽस्त्री देवयाने सप्तभूमौ च सद्मनि॥"
इति तट्टीकाधृतनिघण्टुः॥)
घोटकः। यानमात्रम्। इति मेदिनी। ने, १३२॥ (त्रि, परिच्छेदकम्। यथा, ऋग्वेदे। २। ४०। ३।
"सोमापूषण्णा रजसो विमानं
सप्तचक्रं रथमविश्वमिन्वम्॥"
"विमानं परिच्छेदकं सर्व्वमानमित्यर्थः।" इति तट्टीकायां सायणः॥ साधनम्। यथा, तत्रैव। ३। ३। ४।
"पिता यज्ञानामसुरो विपश्चितां
विमानमग्निर्दिवयुनञ्च वाघताम्॥")
"विमानं विमीयतेऽनेन फलमिति विमानं यज्ञादिकर्म्मसाधनम्।" इति तट्टीकायां सायणः॥
विगतो मानो यस्येति विग्रहे। अवज्ञातः। यथा, भागवते। ५। १३। १०।
"कर्हिस्विच्चुद्ररसान् विचिन्वंस्तत्तत्क्षिकाभिर्व्यथितो विमानः।
तत्रातिकृच्छ्रं प्रतिलभ्यमानो
बलादिलुम्पन्त्यथ तांस्ततोऽन्ये॥")
विमार्गः, पुं, विपूर्ब्बमृजधातोर्घञ्प्रत्ययेन निष्पन्नः॥ सम्मार्জ্জনी। (विरुद्धो मार्गः।) कुपथः। (यथा, शाकुन्तले ५ अङ्के।
"नियमयसि विमार्गप्रस्थितानात्तदण्डः
प्रशमयसि विवादं कल्पसे रक्षणाय॥")
विमुक्तः, त्रि, (वि+मुच्+क्तः।) विशेषेण मुक्तः। यथा,—
"येऽन्येऽरविन्दाक्ष विमुक्तमानिनस्त्वय्यस्तभावादविशुद्धबुद्धयः।
आरुह्य कृच्छ्रेण परं पदं ततः
पतन्त्यधो नादृतयुष्मदङ्घ्रयः॥"
इति श्रीभागवते १० स्कन्धे १४ अध्यायः॥
त्यक्तः। (यथा, महाभारते। ७। २८। ३५।
"विमुक्तं परमास्त्रेण जहि पार्थ महासुरम्।
वैरिणं युधि दुर्द्धर्षं भगदत्तं सुरद्विषम्॥"
पुं, माधवी। तत्पर्य्ययो यथा,—
"माधवी स्यात्तु वासन्ती पुण्ड्रको मण्डकोऽपि च।
अतिमुक्तो विमुक्तश्च कासुको भ्रमरोत्सवः॥"
इति भावप्रकाशस्य पूर्ब्बखण्डे प्रथमभागे॥)
विमुक्तिः, स्त्री, (वि+मुच्+क्तिन्।) विमोचनम्। मोक्षः। यथा, प्रायश्चित्ततत्त्वे।
"पितॄन्नमस्ये दिवि ये च सूर्य्याः
स्वधाभुजः काम्यफलाभिसन्धौ।
प्रदानशक्ताः सकलेप्सितानां
विमुक्तिदा येऽनभिसंहितेषु॥"
विमुखः, त्रि, (विरुद्धं अननुकूलं मुखं यस्य।) बहिर्मुखः। विरतः। यथा,—
"खागमैः कल्पितैस्त्वं हि जनान् मदिमुखान् कुरु।
माञ्च गोपय येन स्यात् सृष्टिरेषोत्तरोत्तरा॥"
इति पाद्मोत्तरखण्डे शिवं प्रति विष्णुवाक्यम्॥
विमुग्धः, त्रि, (विगता मुग्धा मुग्धभावो यस्य।) प्रफुल्लः। इति हेमचन्द्रः॥ मुग्धारहितश्च॥
विमोचनं, क्ली, (वि+मोच+ल्युट्।) विमोचनम्। परित्यजनम्। यथा,—
"ये धर्म्मकामार्थविमुक्तिकामा
भजन्त इष्टां गतिमाप्नुवन्ति।
किन्वाशिषो राल्पि देहमव्ययं
करोतु मेऽदभ्रदयो विमोचनम्॥"
इति श्रीभागवते १०।८३ अध्यायः॥
विमोचनं, क्ली, (वि+मुच्+ल्युट्।) दूरीकरणम्। विमुक्तिः। विपूर्ब्बमुचधातोरनट्प्रत्ययेन निष्पन्नम्॥ (यथा, महाभारते। १। १६०। १३।
"अथवाहं करिष्यामि कुलस्यास्य विमोचनम्।
फलसंज्ञा भविष्यामि त्यक्त्वा कर्म्म सुदुष्करम्॥"